Bible. O.T. Sanskrit 1848

THE

HOLY BIBLE

IN THE

SANSCRIT LANGUAGE.

VOL. I.

CONTAINING THE FIVE BOOKS OF MOSES AND THE BOOK OF JOSHUA.

TRANSLATED OUT OF THE ORIGINAL TONGUES

BY THE

CALCUTTA BAPTIST MISSIONARIES,

WITH NATIVE ASSISTANTS.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS, CIRCULAR ROAD.

1848.

आदिपुस्तकं।

मूसालिखितं प्रथमपुस्तकं।

१ प्रथमोऽध्यायः।

१ पृथिव्या आकाशस्य च सृष्टिः ३ दीप्तेः सृष्टिः ६ शून्यतायाः सृष्टिः ९ शुष्कभूमेः सृष्टिः ११ वृक्षादीनां सृष्टिः १४ चन्द्रसूर्य्यादीनां सृष्टिः २० मीनपक्षिणां सृष्टिः २४ ग्राम्यवन्यपश्वादीनां सृष्टिः २६ ईश्वरस्य सादृश्येन मनुष्यस्य सृष्टिः २९ मानुषादीनां भक्ष्यञ्च।

१ आदित ईश्वर आकाशं पृथिवीञ्च ससर्ज। पृथिवी निर्जना शून्या
२ चासीत्, अन्धकारश्च गम्भीरजलस्योपरि तस्थौ, तदानीम् ईश्वरस्यात्मा
तोयानि व्याप्यासीत्।
३ अनन्तरं, दीप्ति र्भवतु, इतीश्वरेणाज्ञापिते दीप्ति र्बभूव। तदानीम्
४ ईश्वरो दीप्तिमुत्तमां विलोक्य तमिस्रात् तां पृथक् कृत्वा दीप्ते र्नाम
५ दिवसइति, तमिस्रस्य नाम रात्रिरिति कृतवान्। ततः सन्ध्यायां प्रातः-
काले च जाते प्रथमो दिवसो बभूव।
६ ततः परं तोयानां मध्ये शून्यत्वमुद्भूय तोयानि भागद्वयेन पृथक् करोतु।
७ ईश्वर इत्यादिश्य शून्यत्वं ससर्ज शून्योर्द्धस्थिततोयेभ्यः शून्याधःस्थितता-
८ यानि पृथक् चकार च, ततस्तादृशं बभूव। तदेश्वरस्तस्य शून्यस्य नाम
गगणं चकार। सन्ध्यायां प्रातःकाले च जाते द्वितीयो दिवसो बभूव।
९ पश्चात् ईश्वर इत्याज्ञापयामास, गगणाधःस्थितानि सर्व्वाम्भांसि एक-
१० स्मिन् मिलन्तु स्थलञ्च प्रकाशतां; ततस्तथैव बभूव। तदेश्वरः स्थलनाम
पृथ्वीति तोयराशे र्नाम समुद्रइति कृतवान्, तच्चोत्तमं ददर्श।
११ अपरम् ईश्वर आदिदेश, मेदिन्यां तृणानि सवीजौषधयो नानाजा-
तीयाः सवीजफलदायिनो महीरुहाश्च समुत्पद्येरन्; ततस्तथैवाभवत्;
१२ अर्थात् पृथिव्यां तृणानि सवीजनानाजातीयौषधयः सवीजफलदायिनो

नानाविधा वृक्षाश्च जातानि तदानीमीश्वरस्तानि सर्व्वाण्युत्तमानि दृष्ट-
वान्। तथा सन्ध्यायां प्रातःकाले च जाते तृतीयो दिवसो बभूव। १३
अपरम् ईश्वर आज्ञापयत्, निशातो दिवसं पृथक् कर्त्तुं दिवस- १४
वत्सरर्त्तुचिह्ननिमित्तं नभोमण्डले ज्योतिर्गण उत्पद्यतां, तथा वसुन्ध- १५
रायामालोकं कर्त्तुं दीपइव गगणमण्डले तिष्ठतु; ततस्तादृगभवत्। इत्थम् १६
ईश्वरो दिवसं शासितुम् महाज्योतिरेकं, क्षणदाञ्च शासितुं ततः क्षुद्र-
ज्योतिरेकं, इमे वृहती ज्योतिषी उडुनिवहञ्च ससर्ज। ततो धरित्रीं १७
दीपयितुं, दिवारात्री शासितुं, तमिस्राद् विद्युतिं पृथक् कर्त्तुञ्चेश्वरस्तानि
ज्योतींषि गगणमण्डले स्थापयामास; तानि सर्व्वाणि चेश्वर उत्तमानि १८
वीक्षाञ्चक्रे। तथा सन्ध्याप्रातःकालयोः जातयोः सतोश्चतुर्थो दिवसो १९
बभूव।

ततः परं सलिलानां मध्ये विहारार्थं नानाविधा जलचराः प्राणिनो, २०
मेदिन्या ऊर्द्ध्वं नभोमण्डले उड्डयितुं शक्ता विहगाश्च बाहुल्यम् उत्पद्य-
न्ताम्, इतीश्वर आदिश्य वृहन्मीनादीन् नानाप्रकारान् कीलालचरान् २१
प्राणिनो नानाविधखगांश्च सृष्टवान्। अनन्तरम् ईश्वर एतान् सर्व्वान् २२
उत्तमान् वीक्ष्य एतामाशिषं जगाद, यूयं प्रजावन्तो बहुवंशाश्च भूत्वा
सरित्पतीनां सलिलानि परिपूरयत, वसुधाया उपरि विहङ्गमाश्च बहु-
लीभवन्तु। तथा सन्ध्यायां प्रभाते च जाते पञ्चमो दिवसोऽभवत्। २३
ततः परम् ईश्वर आदिदेश, धरायां ग्राम्या वन्याश्च पशव उरोगा- २४
मिनो जन्तुप्रभृतयो नानाविधा जन्तवो जायन्ताम्; ततस्तथैव बभूव।
इत्थम् ईश्वरो नानाविधान् ग्राम्यवन्यपशून् भूमे नानाजातीयान् उरङ्गम- २५
जन्तूंश्च सृष्ट्वा सर्व्वानेवोत्तमान् व्यालुलोके।

अनन्तरम् ईश्वरो व्याचचक्षे, वयं स्वप्रतिमूर्त्त्या सादृश्येन च आदमं २६
(अर्थात् मनुष्याः) सृजामः, ते जलचरमीनान् खेचरविहङ्गान् ग्राम्यवन्य-
पशून् सर्व्वपृथिवीं भूमिस्थितोरङ्गमान् प्राणिनश्च शासतु। ईश्वरेण २७
स्वप्रतिमूर्त्त्या मनुष्यः सृजे; ईश्वरस्य प्रतिमूर्त्त्यैव स तेन सृष्टः; पुरुष-
त्वस्त्रीत्वाभ्यां तौ सृष्टौ। तदनन्तरम् ईश्वरस्ताभ्याम् इत्याशिषं ददौ, युवां २८
प्रजावन्तौ बहुवंशौ च भवतं, पृथिवीं परिपूर्य्य वशीभूतां कुरुतं,
किञ्च सलिलचरमीनान् खेचरखगान् भूमिस्थोरङ्गमजन्तूंश्च शिष्टं।

ईश्वरोपरमपि कथयामास, पश्यतं, निखिलपृथिवीस्थाः सर्व्वसवीजौ- २९
षधीः सर्व्वान् सवीजफलदायिनो महीरुहांश्च युवाभ्यां भोक्तुम् अद-

३० दाम्। तथा वन्यपशुखेचरखगेभ्यो भूमिस्थितसजीवोरङ्गमजन्तुभ्यश्च
३१ भोक्तुं सर्व्वहरितौषधीरहमदाम्; ततस्तथैव बभूव। अनन्तरम् ईश्वरः
स्वसृष्टसकलवस्तूनि निरीक्ष्य सर्व्वाण्यत्युत्तमानि ददर्श। तथा सन्ध्यायां
प्रातःकाले च जाते षष्ठं दिनं बभूव।

---

२ द्वितीयोऽध्यायः।

१ विश्रामवारस्य निरूपणं ४ सृष्टेर्वृत्तान्तः ७ एदनुद्याननिर्म्माणं १५ तस्य मध्ये मनुष्यस्थापनं १८ स्त्रियाः सृष्टिवृत्तान्तश्च।

१ इत्थम् आकाशस्य पृथिव्यास्तदुभयस्थानां सर्व्ववस्तूनाञ्च सृष्टिः सम्पूर्णा
२ बभूव। पश्चात् सप्तमे दिने ईश्वरः स्वकृतकर्म्माणि समाप्य तस्मिन् सप्तमे
३ दिने स्वकृतकार्य्येभ्यो विशश्राम। तदा ईश्वरेन सप्तमं दिनं आशिष्य
पवित्रीकृतं, यस्मात् तस्मिन् दिने ईश्वरेन स्वकृतनिखिलसृष्टिकार्य्यात्
विश्रामोऽकारि।
४ सृष्टिकाले गगणधरित्र्योरियं विवृतिः। यस्मिन् काले प्रभुः परमेश्वरः
पृथिव्याकाशौ ससर्ज, तदानीं पृथिव्यां किमपि क्षेत्रियं तृणं नासीत्
५ क्षेत्रिया काप्योषधिश्च नासीत्; यतः प्रभुः परमेश्वरः पृथिव्यां न वर्षया-
६ मास भूमौ कृषिकर्म्म कर्त्तुं मनुष्यो नासीत्। किन्तु पृथिव्याः शिशिरः
समुत्थाय सर्व्वां भूमिम् असिञ्चत्।
७ अपरञ्च प्रभुणा परमेश्वरेण मृदा मनुष्यं निर्माय तस्य नासारन्ध्रं
८ प्राणवायौ प्रवेशिते स सात्मप्राणी बभूव। अनन्तरं प्रभुः परमेश्वरः
पूर्व्वदिक्स्थिते एदन्नामकदेशे उद्यानमेकं कृत्वा तत्र स्वसृष्टं तं मानवं
९ स्थापयामास। तत्र प्रभुः परमेश्वरः भूमौ सर्व्वजातीयान् सुदृश्यान्
सुखाद्यफलान् पादपान् तस्योद्यानस्य मध्यस्थाने अमृतं पादपं सदस-
१० ज्ज्ञानदातारं पादपञ्च जनयाञ्चकार। उद्यानं सलिलेन सेक्तुम् एका
११ स्रवन्ती एदनुद्यानात् निर्याय विभिद्य चतुर्मुखी भूत्वा प्रोवाह। तस्याः
पीशोनाख्या प्रथमा तटिनी सुवर्णोत्पादिनी हवीला देशनिवहान्
१२ वेष्टित्वा प्रोवाह। तस्य देशस्य जातरूपम् अतीवोत्तमं, तस्मिन् स्थाने
१३ रत्नानि वैदूर्य्यमणयश्च जायन्ते। तथा तस्या गीहोन्नामिका द्वितीया
१४ धुनी समस्तकूशदेशं वेष्टमाना प्रोवाह। तथा तस्या हिद्देकल्नामा
तृतीया धुनी अशूरियादेशस्य पूर्व्वदिशा प्रोवाह। तथा तस्याः चतुर्थ-
धुन्या नाम फरात्।

ततः परं प्रभुः परमेश्वर आदमं नीत्वा एदनस्थितस्योद्यानस्य कर्म्म १५
कर्त्तुं तदवितुञ्च नियोजयामास। किञ्च प्रभुः परमेश्वरस्तमित्यादिदेश, १६
एतस्योद्यानस्य सकलपादपानां फलानि त्वया स्वच्छन्दं भोक्तव्यानि;
किन्तु सदसज्ज्ञानदातुः पादपस्य फलं मा भुज्यतां, यतो यस्मिन् दिने १७
तत् खादिष्यसि तस्मिन्नेव दिने निश्चितं मरिष्यसि।

अनन्तरं प्रभुः परमेश्वरो जगाद, मनुष्यो यद् एकाकी तिष्ठेत् तन् न १८
भद्रं, तस्य साक्षादिव एकः सहकारी मया निर्म्मास्यते। प्रभुणा परमे- १९
श्वरेण मृदा निर्म्मितानां वन्यपशुखेचरखगानां कानि नामान्यादम् करि-
ष्यतीति वेदितुं यदेश्वरः सर्व्वप्राणिनस्तस्य समीपमानयामास, तदानीं
आदम् यस्य यन्नाम चकार, तस्य तदेव नामाभवत्। तदा आदम् सर्व्वेषां २०
पशूनां खेचरखगानां वन्यपशूनाञ्च नामानि कृतवान्, किन्तु तेषां मध्यत
आदमा साक्षादिव एकः सहकारी न प्राप्तः। अनन्तरं प्रभुः परमेश्वर २१
आदमम् अतिनिद्राप्य तस्यां निद्रायां तस्यैकं पञ्जरं गृहीत्वा क्रव्येण तत्
क्षतस्थानं पूरयामास। किञ्च प्रभुणा परमेश्वरेण यः पञ्जर आदमो नीत- २२
स्तेन स एकां स्त्रियं निर्म्माय ताम् आदमः सन्निधिम् आनिनाय। तदा- २३
नीम् आदम् आचचक्षे, एषैव मदीयास्थ्नाम् अस्थि मदीयमांसस्य मांसं;
तथेयं नरादजनिष्ट, तस्माद् अस्या नाम नारीति करिष्यते। एतदर्थं २४
मानवः स्वमातापितरौ परित्यज्य स्वभार्य्यायाम् आसंक्ष्यति, तौ द्वौ
जनावेकाङ्गौ भविष्यतः। तदानीम् आदमस्तद्भार्य्यायाश्च नग्नत्वे स्थिते २५
तयोरपि लज्जाबोधो नासीत्।

३ तृतीयोऽध्यायः।

१ सर्पस्य खलत्वं ८ तेन मानुषाणां पतनं १४ सर्पस्य शप्तत्वं १६ नारीपुरुषयोः शप्तत्वं २२ ताभ्यां वस्त्रं दत्त्वा उद्यानतो दूरीकरणञ्च।

प्रभुणा परमेश्वरेण सृष्टानां भूचरजन्तूनां मध्ये सर्पोऽतीव खल १
आसीत्। स तां नारीमवदत् अये अस्योद्यानस्य कस्यचिदपि पादपस्य २
फलानि भोक्तुं परमेश्वरो युवां न्यसेधत्, किमिदं सत्यं? ततो नारी सर्पं
प्रोवाच, आवाम् एतस्योद्यानस्य सर्व्वेषां विटपिनां फलानि भोक्तुं शक्नुवः ३
केवलम् उद्यानमध्यस्थितस्य पादपस्य फलं प्रतीश्वरेण कथितं, युवाम्
एतत् फलं मा भुञ्जायाम् मा स्पृशतञ्च, तत् कृत्वा मरिष्यथः। तदा भुजगो ४
नारीं बभाषे, युवां निश्चितं न मरिष्यथः, किन्तु यदा तत् खादिष्यथः, ५

तदा युवयोर्लोचनप्रकाशो भविष्यति; तत ईश्वर इव भद्राभद्रज्ञानं
६ लप्स्येथे, इतीश्वरो जानाति। तदा नारी तं महीरुहं सुखाद्यफलं लोचन-
रञ्जकं ज्ञानलाभाय वाञ्छनीयञ्च विज्ञाय तस्य फलानि शातयित्वा
७ बुभुजे, स्वस्वामिने च ददौ सोपि भुक्तवान्। तेन तयोरुभयो र्नयन-
प्रकाशो बभूव, ततस्तौ स्वकीयनग्नतां विज्ञाय वटपत्राणि स्यूत्वा कटौ
बबन्धतुः।

८ ततो दिवावसाने मध्ययुद्यानं गमनागमनकारिणः प्रभोः परमेश्वरस्य
रवं श्रुत्वा आदम् तस्य जाया च प्रभोः परमेश्वरस्य सम्मुखात् उद्यान-
९ स्थानां शाखिनां मध्येऽन्तर्दधाते। तदा प्रभुः परमेश्वर आदमम् आहूय
१० बभाषे, त्वं कुत्र? ततः स उवाच, उद्याने भवतः शब्दं श्रुत्वा नग्नता-
११ कारणात् भीत्वा स्वमगोपयम्। स जगाद, त्वं नग्नोसीति कस्त्वामबोधयत्?
यस्य वृक्षस्य फलं भोक्तुं त्वामहं न्यसेधं तस्य वृक्षस्य फलं किं त्वया भुक्तं?
१२ तत् आदमा गदितं, त्वं यां योषितं मम सङ्गिनीमकरोः, सा मह्यं तस्य
१३ पादपस्य फलम् अददात् तन्मया भुक्तं। प्रभुः परमेश्वरो नारीं जगाद,
त्वया किमिदम् अकारि? नारी बभाषे, सर्पस्य प्रवञ्चनयाहं अखादम्।

१४ पश्चात् प्रभुः परमेश्वर उरगं जगाद, त्वमिदं कर्माकरोः, तस्मात्
ग्राम्यवन्यपशुगणात् अधिकशापग्रस्तो भूत्वा वक्षसा गमिष्यसि, यावज्जीवं
१५ धूलीः खादिष्यसि च। किञ्च त्वया योषिता च त्वदीयवंशेन तस्या वंशेन
च परस्परं वैरितां जनयिष्यामि, तेन स त्वदीयशिर आहनिष्यति,
त्वञ्च तस्य पादमूले आहनिष्यसि।

१६ अनन्तरं स नार्य्यै कथयामास, त्वदीयप्रसववेदनाम् अहम् अतीव
वर्द्धयिष्यामि, ततस्त्वम् अतिशयकष्टेन सन्तानान् प्रसविष्यसि, तथा
स्वामिनो निघ्नीभूय स्थास्यसि स च त्वां शास्यति।

१७ ततः परं स आदमे कथयाञ्चकार, यस्य पादपस्य फलं भोक्तुं त्वामहं
न्यसेधं, त्वं योषितः कथां निशम्य तस्य पादपस्य फलं अभुंक्थाः, तत्-
कारणात् भूमिरभिशप्ता जाता; त्वया यावज्जीवं क्लेशं प्राप्य तस्याः
१८ शस्यादि भक्षिष्यते। तस्यां शृगालकण्टकानि नानाकण्टकिद्रुमा उत्प-
१९ त्स्यन्ते, त्वञ्च क्षेत्रस्यौषधीः खादिष्यसि। अपरञ्च यस्या मृत्तिकाया अजा-
यथा यावत् तस्यां लीनो न भविष्यसि तावत् घर्म्माक्तमुखेन भक्ष्यं भोक्ष्यसे;
२० यतस्त्वं मृत्तिका, पुनरपि मृत्तिकायां लीनो भविष्यसि। अनन्तरं आदम्
तस्या योषितो नामधेयं हवा (अर्थात् जीवनीति) चक्रे, यतः सा सर्व्वेषां

सजीवलोकानां माता। ततः प्रभुः परमेश्वरः चर्म्मणो वसनं निर्म्माय २१
आदमं तस्य भार्य्याञ्च परिधापयामास।

ततः परं प्रभुः परमेश्वर उवाच, पश्य, मानवो भद्रमभद्रञ्च विज्ञाय २२
अस्माकमेकइवाभवत्; इदानीं स हस्तं प्रसार्य्य अमृतवृक्षस्य फलं
पातयित्वा तद् भुक्त्वा अमरो न भवेत्। तदर्थं प्रभुः परमेश्वरस्तम् एदन् २३
उद्यानात् अपसार्य्य तदुत्पादिन्यां मृत्तिकायां कृषिं कर्त्तुं तं न्ययोजयत्।
इत्थं स तं मानुषं दूरीकृत्य अमृततरोः पन्थानं रक्षितुं एदन्उद्यानस्य २४
पूर्व्वस्यां दिशि घूर्णायमानतेजोमयखड्गधरान् किरूवः स्थापयामास।

---

४ चतुर्थोऽध्यायः।

१ काबिलहाबिलोर्वृत्तान्तः ९ हाबिलो बधात् काबिलः शप्तत्वं १६ काबिलो वंशावलिः २५ शेतो जननञ्च।

अपरं आदमि स्वजायां हवाम् उपगते सा गर्भिणी भूत्वा काबिलं १
(अर्थात् लाभनामानं) पुत्त्रमेकं प्रसुषुवे कथयामास च, परमेश्वरात् मम
पुत्त्रैकलाभो जातः। पश्चात् सा हाबिलं (अर्थात् अलीकनामानं) तस्य २
सहोदरं प्रसुषुवे; स हाबिल् मेषपालकः, काबिल् च कृषीवल आसीत्।
कालपरिणामे काबिल् स्वीयकृषिकर्म्मणः कियत् फलम् परमेश्वरमुद्दिश्य ३
उत्ससर्ज। तथा हाबिल् स्वपशुव्रजस्य कतिपयान् प्रथमजातान् पुष्टपशून् ४
उत्ससर्ज। परमेश्वरः हाबिलं तेनोत्सृष्टं वस्तु चान्वग्रह्लात् किन्तु ५
काबिलं तेनोत्सृष्टं वस्तु च नान्वग्रह्लात्, तत्कारणात् काबिल् क्रुद्धो विष-
ण्णवदनो बभूव। ततः परमेश्वरस्तम् उवाच, त्वं कुतः क्रुध्यसि? कुतश्च ६
विषण्णवदनो भवसि? यदि शुभं करोषि, तदा किं नानुग्रह्यसे? यदि ७
शुभं न करोषि, तर्हि पापं द्वारि तिष्ठति। तव भ्राता तव वशीभूय
स्थास्यति, त्वञ्च तं शास्यसि। अपरञ्च काबिल् स्वीयभ्रात्रा हाबिला सह ८
संललाप; तत्पश्चात् तयोः क्षेत्रं गतयोः सतोः काबिल् आक्रम्य स्वीयभ्रा
तरं हाबिलं निजघान।

तदनन्तरं परमेश्वरः काबिलं पप्रच्छ, तव भ्राता हाबिल् कुत्र? ९
ततः स प्रत्युवाच, नाहं जानामि, किमहं निजभ्रातूरक्षकः? ततः स १०
कथयामास, त्वया किमकारि? तव भ्रातुः शोणितं भूम्या माम् आक्र-
यति। अतो या भूमिस्तव हस्ताभ्यां हतस्य भ्रातुः शोणितं पीतवती ११
तस्यां भूमौ तमभिशप्तो भवसि। ततः कृषिकर्म्मणि त्वया कृतेपि बहु- १२

१३ शस्यं नोत्पत्स्यते, तथा त्वं धरिच्यां पर्य्यटन् भ्रमन् च भविष्यसि । ततः
१४ काबिल् परमेश्वरं बभाषे, एतादृशो दण्डो मया न सह्यः। अद्य यदि त्वं
मान् अस्मात् स्थानाद् अपसारयसि, तर्हि तव समचाद् बहि गत्वा
पर्य्यटन् भ्रमन् च भविष्यामि तथा कोपि मानुषो मां प्राप्य हनिष्यति।
१५ तदा परमेश्वरो जगाद, यः कश्चित् काबिलं हनिष्यति, तस्य सप्तगुण-
दण्डो भविष्यति, तस्मात् कोपि तं वीच्य यथा न हनिष्यति, तदर्थं पर-
मेश्वरः काबिलि चिह्नमेकं निदधो।
१६ काबिल् परमेश्वरस्य समचात् प्रस्थाय एदनः पूर्व्वस्यां दिशि नोद्
१७ नामनि देशे न्युवास। अनन्तरं काबिलि स्वभार्य्यामुपगते सा गर्भवती
भूत्वा हनोक्नामानं पुत्त्रं प्रसुषुवे, किञ्च स नगरमेकं निर्म्माय स्वपुत्त्र-
१८ नामानुसारेण तस्य नगरस्य नाम हनोक् चक्रे। तस्य हनोकः पुत्त्र ईरद्,
ईरदः पुत्त्रो मिहूयायेल्, मिहूयायेलः पुत्त्रो मिथुशायेल्, मिथुशायेलः
१९ पुत्त्रो लेमक्। तस्य लेमको द्वे जाये, एकस्या नामधेयम् आदा तदन्याया
२० नाम सिल्लासीत्। तस्या आदाया गर्भे जातो यो याबल्, स दूष्यगृहवा-
२१ सिनां पशुपालकानाम् आदिपुरुष आसीत्। अपरं यूबल्नामा तस्यैको
२२ भ्राता वीणावादकानां वंशीवादकानाञ्चादिपुरुष आसीत्। किञ्च
सिल्लाया गर्भजन्मा तूबल्काबिल्नामा पुत्त्रः पित्तलस्य लोहस्य च नाना-
विधं कर्म्म कर्त्तुं निपुण आसीत्; तस्य तूबल्काबिलो नयमा नामिका
२३ भगिन्यासीत्। पश्चात् लेमक् स्वभार्य्ये अवदत्।

हे आदे शृणु मद्वाक्यं हे सिल्ले त्वञ्च तत् शृणु।
हे मन्नार्य्यौ युवाभ्यां मे वाक्ये चेतो निधीयतां।
आक्रान्तः सन्नहं पूर्व्वं हतवान् लोकमेककं।
आघातः सन्नहं तेन युवानं हतवान् नरं।
२४ फलं बधस्य काबिलो यदि सप्तगुणं भवेत्।
गुणितं सप्तसप्तत्या मद्बधस्य फलं भवेत्।

२५ अनन्तरम् आदमि पुनश्च स्वभार्य्याम् उपगते सा गर्भवती भूत्वा
पुत्त्रमपरं प्रसुषुवे, तथा काबिलाहतस्य हाबिलः प्रतिनिधिरूपं
पुत्त्रमपरं ईश्वरो मह्यं दत्तवान् इति कथयित्वा सा तस्य नाम शेत्
२६ (अर्थात् प्रतिनिधिं) चक्रे। अनन्तरं तस्य शेतः पुत्त्रे जाते स तस्य
नाम इनोश् चक्रे; तदानीं लोकाः परमेश्वरस्य नाम्नि प्रार्थनां कर्त्तुं
प्रारभन्त।

५ पञ्चमोऽध्यायः।

१ आदमो विवृतिः ६ शेतो विवृतिः ९ इनोशो विवृतिः १२ कैननो विवृतिः १५ महललेलो विवृतिः १८ येरदो विवृतिः २१ हनोको विवृतिः २५ मिथूशेलहो विवृतिः २८ लेमको विवृतिश्च।

आदमो वंशावलिविवरणमिदं। यदेश्वरो मनुष्यं ससर्ज, तदा ईश्वर- १
सादृश्येन तं सृष्टवान्। स्त्रीत्वपुंस्त्वाभ्यां ताव् असृजत्; किञ्च तयोः सृष्टि- २
दिने ताभ्याम् आशिषं दत्त्वा आदम् (अर्थात् मनुष्य) इति नाम चकार।
तत आदम त्रिंशदधिकशतवत्सरे वयसि तस्य सदृशे तुल्ये च पुत्रे जाते ३
तस्य नाम शेतं चक्रे। अस्य शेतो जन्मनः परम् आदम् अष्टशतानि ४
वर्षाणि जीवन् पुत्रान् कन्याश्च जनयामास। साकल्येन त्रिंशदधिकन- ५
वशतवर्षवयसि सति तस्य मृत्यु र्बभूव।

ततः परं शेतः पञ्चाधिकशतवत्सरवयसि सति इनोश्नामा तस्य ६
पुत्रो जज्ञे। तस्य जन्मनः परं शेत् सप्ताधिकाष्टशतानि वर्षाणि जीवन् ७
पुत्रान् कन्याश्च जनयाञ्चक्रे। साकल्येन द्वादशाधिकनवशतवत्सरवयसि ८
सति तस्य मृत्यु र्बभूव।

इनोशो नवतिवत्सरवयसि सति कैनन् नामा तस्य पुत्रो जज्ञे। ९
तस्य जन्मनः परम् इनोश् पञ्चदशाधिकाष्टशतवर्षाणि जीवन् पुत्रान् १०
कन्याश्च जनयाञ्चक्रे। साकल्यतः पञ्चाधिकनवशतवत्सरवयसि तस्य ११
मरणं बभूव।

तस्य कैननः सप्ततिवत्सरवयसि सति महललेल्नामा तस्य पुत्रो १२
जज्ञे। तस्य जन्मनः परं कैनन् चत्वारिंशदधिकाष्टशतवत्सरान् जीवन् १३
पुत्रान् कन्याश्च जनयाञ्चक्रे। साकल्यतो दशाधिकनवशतवत्सरवयसि १४
सति तस्य मृति र्बभूव।

तस्य महललेलः पञ्चषष्टिवत्सरवयसि सति तस्य येरद्नामा पुत्रो १५
जज्ञे। तस्य जन्मनः परं महललेल् त्रिंशदधिकाष्टशतानि वर्षाणि १६
जीवन् पुत्रान् कन्याश्च जनयाञ्चक्रे। साकल्येन पञ्चनवत्यधिकाष्टशत- १७
वत्सरवयसि सति तस्य मृति र्बभूव।

येरदो द्विषष्ट्यधिकशतवत्सरवयसि सति हनोक्नामा तस्य पुत्रो १८
जज्ञे। तस्य जन्मनः परं येरद् अष्टशतानि वर्षाणि जीवन् पुत्रान् १९
कन्याश्च जनयाञ्चक्रे। साकल्येन द्विषष्ट्यधिकनवशतवत्सरवयसि सति २०
तस्य मरणं बभूव।

२१ हनोको वयसि पञ्चषष्टिवत्सरे सति मिथूशेलहनामा तस्य पुत्रो
२२ जज्ञे। तस्य मिथूशेलहो जन्मनः परं हनोक् त्रीणि शतानि वर्षाणि
२३ यावत् ईश्वरेण सार्द्धं गमनागमने चकार, तथा पुत्रान् कन्याश्च जनितवान्। साकल्येन तस्य पञ्चषष्ट्यधिकशतत्रयवत्सरवयसि सति हनोक्
२४ ईश्वरस्य सहगामी सन् अन्तर्दधे; फलत ईश्वरस्तं निनाय।
२५ अनन्तरं मिथूशेलहः सप्ताशीत्यधिकशतवत्सरवयसि सति लेमक्
२६ नामा तस्य पुत्रो जज्ञे। तस्य जन्मनः परं स द्व्यशीत्यधिकसप्तशतानि
२७ वर्षाणि जीवन् पुत्रान् कन्याश्च जनयाञ्चक्रे। साकल्येन मिथूशेलहः ऊनसप्तत्यधिकनवशतवत्सरवयसि तस्य मरणं बभूव।
२८ ततः परं लेमको द्व्यशीत्यधिकशतवत्सरवयसि तस्यैकस्मिन् पुत्रे जाते भूम्याम् अस्माकं परिश्रमक्लेशयो र्जनयिता यः परमेश्वरस्याभि-
२९ शाप आस्ते, तत्रास्माकम् एष पुत्रः सान्त्वनां जनयिष्यतीति निश्चित्य
३० लेमक् तस्य पुत्रस्य नाम नोहं (अर्थात् सान्त्वयितेति) चकार। तस्य नोहस्य जन्मनः परं लेमक् पञ्चनवत्यधिकानि पञ्चशतानि वर्षाणि
३१ जीवन् पुत्रान् कन्याश्च जनितवान्। साकल्यतः सप्तसप्तत्यधिकसप्तशत-
३२ वत्सरवयसि तस्य मृति र्बभूव। पश्चात् नोहस्य पञ्चशतवत्सरवयसि सति शाम् हाम् येफत् नामकास्तस्य त्रयः पुत्रा जज्ञिरे।

---

६ षष्ठोऽध्यायः।

१ अनुचितविवाहस्य कथनं ५ मानुषस्य दुष्टत्वात् प्लावनकथनं ९ नोहवंशावलिः १४ अर्णवपोतनिर्म्माणकथनञ्च।

१ इत्थं मेदिन्यां मानवानां वृद्धौ सत्यां तेषां बहुलासु कन्यासु च जातासु,
२ ईश्वरीयलोका ऐहिकलोकानां कन्याः परमसुन्दरीः समीक्ष्य स्वस्वमनो-
३ रम्याणां नारीणां पाणिग्राहं कर्त्तुमारेभिरे। अतः परमेश्वरः कथयामास, ममात्मा मनुष्येषु सर्व्वदा नाधिष्ठास्यति, यतस्ते पापिनो मांसपिण्डमात्राश्च, तेषां जीवनकालाः केवलं विंशत्यधिकशतवत्सरा भविष्यन्ति।
४ तदानीं पृथिव्यां महावीरा आसन्, तथेश्वरीयलोकानां वीर्य्याद् ऐहिकलोकानां कन्यानिवहस्य गर्भजाता अनेके सन्ताना आसन्; एतएव पूर्व्वकालीयाः प्रसिद्धा महावीराः।
५ अपरम् पृथिव्यां मानुषाणां नानात्याचाराः सर्व्वदा मनःकल्पनो-
६ त्पत्तिश्च दुष्टा इति परमेश्वरो ददर्श; किञ्च परमेश्वरः पृथिव्यां मानुषस्य

सृष्टत्वात् शोचन् मानसेऽनुतपन् कथितवान् अहं स्वसृष्टान् मानुषान्
लुप्ता पृथिवीं परिष्करिष्यामि। तैः सार्द्धं उरङ्गमान् पदगांश्च जन्तून् ७
खेचरपक्षिप्रभृतींश्च लोप्स्यामि; यत एषां सर्जनकारणात् ममानुतापो ८
भवति। किन्तु नोहः परमेश्वरस्यानुग्रहपात्रम् अभवत्।
नोहस्य वंशावलिविवरणं। स नोहः स्ववंशे साधु र्धार्मिकश्च सन् ९
ईश्वरस्य सहगाम्यासीत्। तथा शाम् हाम् येफत् नामानस्तस्य त्रयः १०
पुत्रा जज्ञिरे। अपरञ्च ईश्वरस्य साक्षाद् पृथिवी दुष्टा दौरात्म्येन ११
पूर्णा च जाता। पृथिवी दुष्टा पृथिवीस्थानां सर्व्वेषां प्राणिनां पन्थानश्च १२
सदोषाः, ईश्वरः पृथिवीं निरीक्ष्य तद् दृष्टवान्। तत ईश्वरो नोहम- १३
वदत्, मम गोचरे सर्व्वेषां प्राणिनाम् अन्तकाल उपस्थितवान्, यत-
स्तेषां दौरात्म्येन पृथिव्याः परिपूर्णत्वात् अहं पृथिव्या सार्द्धं तान्
सर्व्वान् विनाशयिष्यामि। त्वं गोफरकाष्ठेन पोतमेकं निर्म्माहि, तथा १४
तस्य मध्ये कोष्ठानि कृत्वा तस्यान्तर्बहिश्च सर्जरसेन लिम्प। तस्य दैर्घ्यं १५
हस्तानां शतत्रयं, विस्तारः पञ्चाशद्धस्तप्रमाणः, उच्चता च त्रिंशद्धस्त-
प्रमाणा इत्थं तं निर्म्माहि। तस्योपरि हस्तैकाधो वातायनं निर्म्माहि, १६
तस्य पार्श्वे द्वारं कुरु, तथा तस्य प्रथमद्वितीयतृतीयकोष्ठानि निर्म्माहि।
यतोहम् आकाशस्याधःस्थितान् सर्व्वप्राणिनो नाशयितुं पृथिवीम् अद्भि- १७
राप्लावयिष्यामि, तेन पृथिव्याः सर्व्वप्राणिनः प्राणान् परित्यक्ष्यन्ति।
किन्तु त्वया सार्द्धम् अहं नियमं निर्णयामि; तेन त्वं स्वपुत्रान् स्वभार्य्यां १८
पुत्रवधूश्च सङ्गिनः कृत्वा पोतम् आरोक्ष्यसि। प्रतिजात्यनुसारतः सकल- १९
प्राणिनां स्त्रीपुरुषाणां युग्मानि समादाय प्राणरक्षार्थं तानि स्वेन सह
पोतमानय। फलतः पक्षिणां पशूनां भूमिस्थोरोगामिनाञ्च द्वौ द्वौ २०
स्वस्वजात्यनुसारतः स्वस्वप्राणरक्षार्थं तव समीपे गमिष्यतः। अपरं २१
युष्माकम् एतेषाञ्च भोजनार्थम् उपयुक्तद्रव्याणि समानीय स्वसमीपे
सञ्चिनु। ततो नोहस्तादृशं चकार, ईश्वरस्याज्ञानुसारतएव सर्व्वाणि २२
कर्म्माणि कृतवान्।

---

७ सप्तमोऽध्यायः।

१ पोतमारोढुं नोहं प्रतीश्वरस्याज्ञा ७ नोहस्य तस्य परिजनानां पशुप्रभृतीनाञ्च पोतारोहणं १७ प्लावनविवरणं।

परमेश्वरो नोहं बभाषे, त्वं सपरिवारः पोतम् आरोह, यत इदानीं १
त्वामेव साधुं पश्यामि। अतः पृथिव्यां यद्येतेषां वंशास्तिष्ठेयुः, तदर्थं २

३ शुचिपशूनां स्त्रीपुरुषान् गृहीत्वा प्रतिजातिसप्तयुग्मानि, अशुचिपशू-
नाञ्च स्त्रीपुरुषौ गृहीत्वा एकैकजातेरेकैकं युग्मं, तथा खेचरपक्षिणां
४ स्त्रीपुरुषौ गृहीत्वा प्रतिजातिसप्तयुग्मानि स्वेन सार्द्धं नय। यतः सप्ता-
हात् परम् अहं चत्वारिंशत् दिवारात्रीः पृथिव्यां वर्षयिष्यामि. ततः
५ पृथिव्यां मया सृष्टान् सर्व्वान् प्राणिनो लोप्स्यामि। तदा नोहः परमे-
६ श्वरस्याज्ञानुसारतः सर्व्वाणि कर्म्माणि कृतवान्। तस्य नोहस्य षट्-
शतवत्सरवयसि पृथिव्यां जलाप्लावनं अभवत्।
७ ततो जलाप्लावनभयात् नोहस्तस्य भार्य्या तस्य पुत्राः पुत्रबध्वश्च सर्व्वे
८ पोतम् आरुरुहुः। तथा नोहं प्रतीश्वरस्याज्ञानुसारात् शुद्धाशुद्ध-
९ पशुपक्षिभूचरोरोगामिजन्तवश्च स्त्रीपुरुषाः युग्मं युग्मं नोहसन्निधाने
१० पोतमारुरुहुः। पश्चात् सप्ताहे गते पृथिव्यां जलाप्लावनम् आरेभे। ततो
११ नोहस्य वयसः षट्शततमवत्सरस्य द्वितीयमासस्य सप्तदशदिने महा-
समुद्रस्य सर्व्वाणि प्रस्रवणानि बभञ्जिरे, गगणस्थानि मेघद्वाराणि च
१२ सर्व्वाणि मुक्तानि। ततः पृथिव्यां चत्वारिंशत् दिवारात्री महती वृष्टि
१३ र्बभूव। तस्मिन् दिने नोहस्तस्य जाया शाम् हाम् येफत् नामकास्त्रयः
१४ पुत्रास्तेषः पुत्रबध्वश्च पोतम् आरुरुहुः। प्रतिजातिग्राम्यवन्यपशवः
१५ प्रतिजातीया उरोगामिभूचराः प्रतिजातीयाः खेचरपक्षिणश्च सर्व्वजी-
वज्जन्तूनां स्त्रीपुरुषा युग्मं युग्मं भूत्वा नोहस्य समीपे पोतम् आरोहन्।
१६ किञ्च ईश्वरस्याज्ञानुसारात् सर्व्वप्राणिनां स्त्रीपुरुषाणां युग्मेषु समारूढेषु
परमेश्वरो द्वारं रुरोध।
१७ इत्थं पृथिव्यां चत्वारिंशद् दिनानि यावत् जलाप्लावनं बभूव, तदा-
१८ नीम् अप्सु वृद्धासु पोतो भूदं विहाय बभासे। ततः क्रमशः पृथिव्याम्
१९ अतीव जलवृद्धौ सत्यां पोतो जलेषु भासमानो जगाम। इत्थं पृथिव्यां
२० जलं भृशं ववृधे; तत आकाशस्य नीचस्थाः सर्व्वे प्रोन्नतभूधरा ममज्जुः।
२१ तदुपरि पञ्चदशहस्तान् यावत् जल उत्थिते सर्व्वे पर्व्वता अमज्जन्।
२२ तेन भूचराः सकलप्राणिनः फलतः पक्षिणो ग्राम्या वन्याश्च पशवः
पृथिव्या उरोगामिजन्तवः सर्व्वे मनुष्याश्च मम्रुः। शुष्कभूमिस्थिताः सकल-
२३ प्राणिनो मम्रुः। इत्थं पृथिवीवासिनः सर्व्वप्राणिनः अर्थतो मनुजा पशव
उरङ्गमजन्तव आकाशीयाः सकलपक्षिणश्च विनेशुः; पृथिव्याः सर्व्वएव
२४ विलुप्ताः केवलं नोहस्तस्य सङ्गिनश्च पोतस्थाः प्राणिनो जिजीवुः। इत्थं
पृथिव्यां सार्द्धशतदिनानि यावत् आपस्तस्थुः।

८ अष्टमोऽध्यायः।

१ प्लावनस्य ह्रासः ६ द्रोणकाकस्योड्डायनं १० कपोतस्योड्डायनं १५ पोतादवरोहणमीश्व-
राज्ञा २० ईश्वरमुद्दिश्य नोहस्य हवनं तं प्रतीश्वरस्य प्रतिज्ञानञ्च।

ततःपरम् ईश्वरो नोहं तस्य सङ्गिनः पोतस्थितान् पश्वादिसकलप्रा- १
णिनः स्मृत्वा पृथिव्यां प्रबलवायुं वाहयामास ततो जलं निववृते। अपरं २
महासमुद्रस्य प्रस्रवणेषु वियतो मेघद्वारेषु च रुद्धेषु नभसो वर्षे च नि-
वृत्ते सति क्रमशस्तोयं वहत् सार्द्धशतदिनान्ते भूमे र्जह्रास; तदा सप्तम- ३
मासस्य सप्तदशदिने आरारट् नाम्नि भूधरे पोतो लगन् तस्थौ। अनन्तरं ४
क्रमशो दशममासं यावत् तोयं वहत् स्तोकतरं बभूव; तस्य दशम- ५
मासस्य प्रथमेऽहनि महीध्राणां शृङ्गानि ददृशिरे।

ततः पुनश्चत्वारिंशद्दिनेषु गतेषु नोहः पोतस्य स्वनिर्म्मितं वातायनं ६
मोचयित्वा द्रोणकाकमेकम् उड्डायामास। ततः स प्रस्थाय मेदिन्या ७
अपशोषणं यावत् यातायातं चकार। पश्चाद् नोहो भूम्या वारिह्रासं ८
वेदितुं पुनः कपोतं उड्डायाञ्चकार। तदा मह्यास्तोयाच्छादितत्वात् स ९
पदार्पणाय स्थानमलभमानः पुनरपि पोते तदभ्यासं प्रत्याजगाम; तदा
नोहो हस्तं विस्तार्य्य कपोतं धृत्वा पोताभ्यन्तः स्वसमीपम् आनयत्।

ततोऽपरसप्ताहं विलम्ब्य नोहः पोतात् तं कपोतम् उड्डायाञ्चकार। १०
ततः स चञ्च्वा जितवृक्षस्य अभिनवपत्रमेकम् आदाय सन्ध्यायां तस्य ११
सन्निधिं प्रत्याययौ; ततः पृथिव्या अपां ह्रासो जातइति नोहो बुबुधे। १२
अनन्तरम् अपरैकसप्ताहे व्यतीते तेन सएव कपोत उड्डायाञ्चक्रे, किन्तु
स तन्निकटं पुन र्न प्रत्याजगाम। नोहस्य वयसः षट्शतवत्सराणां पर- १३
वत्सरस्य प्रथममासीयप्रथमदिने मेदिन्या अपशोषणं जातं; ततो
नोहः पोतस्योपरिभागं विमोच्य निरीक्ष्य भूमिं शुष्कां ददर्श। इत्थं १४
द्वितीयमासस्य सप्तविंशे दिने पृथिवी शुष्का बभूव।

ततःपरम् ईश्वरो नोहम् अवदत्, त्वमिदानीं स्वजायां पुत्रान् पुत्रव- १५
धूश्च सङ्गिनः कृत्वा पोताद् अवरोह। अपरं त्वया सार्द्धं पशुपक्ष्युरङ्गम- १६
प्रभृतयो ये ये जीवज्जन्तवः सन्ति, तान् सकलान् त्वया सह बहिरानय; १७
तेन ते धरण्यां बहवो भूयासुः धरण्यां प्रजावन्तो बहुवंशा भूयासुः।
तदानीं नोहः स्वजायां पुत्रान् पुत्रबधूश्च गृहीत्वा पोताद् अवरुरोह। १८
अपरं स्वस्वजात्यनुसारतः सर्व्वे पशवः पक्षिण उरोगामिनः सकलभूचर- १९
जन्तवश्च निर्ययुः।

१० तदनन्तरं नोहः परमेश्वरम् उद्दिश्य यज्ञवेदिं निर्म्माय कतिचित्
शुचिपशून् कतिचित् शुचिपक्षिणश्च गृहीत्वा वेद्या उपरि जुहाव।
११ ततः परमेश्वरस्तस्य सुरभिम् आघ्राय मनसि कथयामास, मनुष्याणां
दोषात् पुनः पृथिवीं नाभिशप्स्ये; यद्यपि आबाल्यकालं मनुष्याणां
मनःकल्पना दुष्टा तथापि यथा समहार्षं तथा पुनः कदापि सकलान्
१२ प्राणिनो न संहरिष्यामि। यावत् धरित्री तिष्ठति तावत् वपनस्य
कर्त्तनस्य च समयः तथा शीतं ग्रीष्मः शीतकालो ग्रीष्मकालश्च दिवा
रात्रिश्च एतेषां सर्व्वेषां निवृत्ति र्न भविष्यति।

---

९ नवमोऽध्यायः।

१ नोहं प्रतीश्वरस्याशीर्व्वचनं ८ नोहेन सार्द्धं ईश्वरस्य नियमस्थिरीकरणं १८ नोहस्य मत्ततावृत्तान्तः कनिष्ठपुत्त्रस्य हामोभिशपनं २८ नोहस्य मरणञ्च।

१ अनन्तरम् ईश्वरो नोहं तस्य पुत्त्रान् इत्याशिषं जगाद, यूयं प्रजा-
२ वन्तो बहुवंशाश्च भूत्वा मेदिनीं परिपूरयत। धरण्याः सर्व्वे पशवः
खचरविहगा भूचरा उरङ्गमा जन्तवः सागरीयमीनाः सर्व्वे युष्मत्तो
भीतिमन्तः शङ्कावन्तश्च भविष्यन्ति, एते युष्माकं हस्तेषु समर्पिता
३ आसते। सर्व्वे गतिमन्तः प्राणिनो युष्माकं भक्ष्या भविष्यन्ति, हरितौ-
४ षधी इव युष्मभ्यम् एतान् अदाम्। किन्तु सजीवनम् अर्थात् सशोणितं
५ पललं मा भुङ्ग्ध्वं। अहं युष्माकं जीवनरूपस्य शोणितपातस्य
परिशोधं कारयिष्यामि; अहमेकैकपशुं एकैकमनुष्यञ्च नरहत्यायाः
६ परिशोधं कारयिष्यामि। यः कश्चित् मानुषस्य शोणितं पातयिष्यति,
मानुषेण तस्य शोणितं पातयिष्यते; यत ईश्वरः स्वसादृश्येन मनुष्यं
७ सृष्टवान्। यूयं प्रजावन्तो बहुवंशाश्च भवत, किञ्च धरायां बहुतरा
भूत्वा बर्द्धिष्णवो भवत।
८ अपरम् ईश्वरो नोहं तस्य सङ्गिनः पुत्त्रांश्च बभाषे, पश्यत युष्माभि-
९ र्युष्माकं भाविवंशैश्च युष्माकं सङ्गिभिः पोतान्निर्गतवद्भि र्ग्राम्यवन्यपशुभिः
१० पक्षिप्रभृतिभिश्च पृथिवीस्थितैः सकलप्राणिभिश्च सह नियममहं स्थिरी-
११ करिष्यामि। अहं युष्माभिः सार्द्धम् एनं नियमं स्थिरीकरोमि, जला-
प्लावनात् सकलप्राणिनः पुन र्न विनंक्ष्यन्ति; पृथिव्या विनाशार्थं जलाप्ला-
१२ वनं पुनः कदापि न भविष्यति। ईश्वरोऽपरम् अकथयत्, अहं युष्माभिः
सह युष्माकं सङ्गिसकलप्राणिभिः सह यं नित्यनियमं स्थिरीकरोमि,

तस्येदमेकं चिह्नं स्थास्यति। अहं जीमूते स्वीयं कोदण्डं स्थापयामि, तत् १३
धरण्या साकं मदीयनियमस्य लक्ष्म भविष्यति। यस्मिन् समयेहं धरण्या १४
ऊर्द्ध्वं पयोदान् सञ्चारयिष्यामि, किञ्च तत् पयोदकार्म्मुकं दर्शिष्यते, १५
तस्मिन् काले युष्माभिः सार्द्धं सर्व्वप्रकारप्राणिभिश्च सार्द्धं ममायं नियम
आस्ते, इति मया संस्मृते सति सकलप्राणिविनाशाय पुन र्न जलाप्लावनं
भविष्यति। यतः पृथिवीस्थितैः सकलप्राणिभिः समं मदीयचिरस्थायी १६
नियमोस्तीति मम स्मरणार्थं पयोदकार्म्मुकं प्रति मया दृष्टिरर्पिष्यते।
ईश्वरो नोहं जगाद, क्षितिस्थितैः सकलप्राणिभिः साकं मत्स्थापितस्य १७
नियमस्य लक्षणमिदं भविष्यति।

शाम् हाम् येफत् नामानो नोहस्य ये त्रयः पुत्राः पोताद बहिरागं- १८
च्छन्, तेषां मध्ये हाम् किनान् वंशस्य पूर्व्वपुरुष आसीत्। नोहस्यैतै- १९
स्त्रिभिः पुत्रैः सर्व्वा धरित्री व्यानशे। अनन्तरं नोहः कृषिकर्म्मणि प्रवृत्तः २०
सन् द्राक्षावृक्षान् रोपितवान्। ततः स द्राक्षारसं पीत्वा मत्तः सन् २१
दूष्यमध्ये विवस्त्रो भूत्वा निपपात। तदा किनानः पिता हाम् स्वतातं २२
नग्नं विलोक्य बहिः स्थितौ द्वौ भ्रातरौ वार्त्तां बभाषे। तदानीं शाम्ये- २३
फतौ वसनं गृहीत्वा स्कन्धे निधाय पश्चात् व्रजित्वा नग्नं तातं समा-
च्छादयामासतुः, तौ पराङ्मुखौ भूत्वा व्रजित्वा जनकस्य नग्नतां न
वीक्षाञ्चक्राते। ततः परं नोहो द्राक्षारसस्य निद्रातः प्रबुध्य स्वीय- २४
कनिष्ठसुतस्य तदाचरणं विज्ञायाह,

अभिशप्तः किनान् स्याच्च भ्रातृचेटकचेटकः। २५

पुनश्च तेनोक्तं। शामः प्रभुः परेशो यः स हि धन्यत्वमाप्नुयात्। २६

भविष्यति किनान्नामा शामाख्यपरिचारकः॥
येफतश्चोन्नतिः सम्यग् ईश्वरेण विधास्यते। २७
दूष्ये वत्स्यति शामः स तद्दासो भविता किनान्॥

जलाप्लावनात् परं नोहः पुनः सार्द्धशतत्रयवत्सरान् अजीवत्। २८
किञ्च नोहः साकल्यतः सार्द्धनवशतवत्सरवयसि प्राणान् तत्याज। २९

---

१० दशमोऽध्यायः।

१ येफतो वंशावलिः ६ हामो वंशावलिः २१ शामो वंशावलिः।

तस्य नोहस्य शाम् हाम् येफत् नामकानां त्रयाणां पुत्राणां वंशा- १

२ वलिः; जलाप्लावनात् परं तेषां एते सकलपुत्ता जज्ञिरे। गोमर् माजूज्
३ मादय् यूनान् तूबल् मेश्क् तीरस् एते येफतः पुत्ताः। अस्किनस्
४ रीफत् तोगर्म, इमे गोमरः पुत्ताः। इलीशा तर्शीश् कित्तीम् दोदानीम्,
५ इमे यूनानः पुत्ताः। एतेभ्यो नानोपद्वीपीया देवपूजकाः स्थाने स्थाने
विभक्ताः सर्व्वेषाञ्च पृथक् पृथक् भाषावंशजातयो बभूवुः।
६ तथा कूश् मिसर् पुट् किनान्, इमे हामः पुत्ताः। सिवा हवीला
७ सब्ता रयमा सब्तिका, इमे कूशः पुत्ताः। रयमाः पुत्तौ शिवादिदनौ।
८ अपरं कूशः पुत्तो निम्रोद् स पृथिवीमध्ये पराक्रमी भवितुम् आरभत।
९ परमेश्वरस्य साक्षात् पराक्रान्तो व्याधो बभूव; तस्मात् लोका अद्यापि
दृष्टान्तमिमं कथयन्ति, परमेश्वरस्य समक्षं निम्रोद इव पराक्रमी
१० व्याधः। किञ्च शिनियरि देशे बाबिल्-एरक्-अक्काद्-कल्नी, एतेषु
११ सर्व्वेषु नगरेषु तस्य प्रथमं राज्यं बभूव। तद्देशात् आश्शूरो निर्गत्य
१२ निनिवी रिहोबोत् केलह; निनिवी केलहो मध्यस्थितं महानगरं
१३ रेषन्, एतानि नगराणि निर्ममे। अपरं लूदीय अनामीय लिहावीय
१४ नप्तुहीय पथ्रुषीय, पिलेष्टीयानाम् आदिपुरुषः कस्लूहीय, कप्तोरीय,
१५ एते सर्व्वे मिसरः पुत्ताः। तस्य किनानो ज्येष्ठः पुत्तः सीदोन्, ततः
१६ परं हेत्, यिबूषीय इमोरीय गिर्गाशीय, हिव्वीय अर्कीय सीनीय
१७ अर्वदीय सिमारीय हमातीया एतैः पुत्तैः किनान् देशो व्याप्त आसीत्।
१८ ततः सीदोनो गिरर् दिशि असामारभ्य सिदोम् अमोरा अद्मा
१९ सिबोयीम् लेशां यावत् किनानीयानां निवाससीमासीत्। एते सर्व्वे
२० हामो वंशाः, किन्तु एतेषां मध्ये जातिकुलभाषादेशानां भेद आसीत्।
२१ येफतो ज्येष्ठो भ्राता शाम् इब्रीयलोकानां आदिपुरुष आसीत्,
२२ तस्यापि पुत्ताः पुत्र्यश्चासन्। एते तस्य वंशा, एलम् आश्शुर् अर्फक्षद
२३ लूद् अराम्। अरामो वंशा ऊष् हूल् गेथर् मश्। अर्फक्षदो वंशः
२४ शेलहः शेलहस्य पुत्त एबर्। एबरो द्वौ पुत्तौ एकस्य नाम पेलग्
२५ (अर्थात् भागः) यतस्तदानीं पृथिवी विभक्ताभवत्; तस्य भ्रातु र्नाम
२६ यक्तन्। यक्तनः पुत्ता अल्मोदद् शेलफ् हत्सर्मावत् येरह हदोराम्
२७ ऊषल् दिक्ल ओबल् अबीमायेल् शिवा ओफीर् हवीला योबब्. एते
२८ यक्तनो वंशाः। आ मेषातः पूर्व्वदिशीयं सिफरभूधरं यावत् तेषां वस-
२९ तिरासीत्। एते सर्व्वे शामो वंशाः; एषां मध्ये जातिकुलभाषादेशानां
३० भेद आसीत्। एषां कुलजात्यो र्भेदे सत्यपि ते नोहस्य पुत्ताणां वंशा

आसन्; किञ्च जलाप्लावनात् परम् एतेभ्यो नानाजातयः क्षितौ विभक्ता ११
अभवन्।

---

११ एकादशोऽध्यायः।

१ बाबिलो निर्म्माणेन लोकानां भाषाया भेदनं १० शामो वंशावलिः १७ तेरहस्य वंशावलिः ३० तेरहस्य इब्रामो लोटश्च हारणं प्रति गमनं तत्र तेरहस्य मरणञ्च।

पूर्व्वं वसुधास्थितानां सर्व्वेषां लोकानाम् एकैव भाषा एकमेवोच्चा- १
रणम् आसीत्। पश्चात् लोकाः पूर्व्वदिशि भ्रमन्तः शिनियरो देशस्य २
प्रान्तरमेकं प्राप्य तत्र न्यूषुः। तदा परस्परं मन्त्रयाञ्चक्रुः, आगच्छत, वयं ३
इष्टकानि निर्म्माय वह्निना दाहयामः एतेन तेषां पाषाणानां विनि-
मयात् इष्टकानि बभूवुः चूर्णस्य विनिमयाच्च शिलाजतु बभूव। ततः
परं कथयामासुः, आगच्छत, वयं स्वार्थं नगरमेकं गगणस्पर्शि प्रोच्च- ४
गृहमेकञ्च निर्म्मिमीमहे; ततोऽस्माकं कीर्त्ति र्भविष्यति किञ्च वयं सर्व्वस्यां
पृथिव्यां न विकारिष्यामहे। अनन्तरं ते मानुषा यन्नगरं गृहञ्च ५
निर्म्ममते, तद् वीक्षितुं परमेश्वरोऽवरुरोह। परमेश्वरः कथयामास, ६
पश्यत, सर्व्वेषाम् एतेषाम् एका जातिः भाषा चैषाम् एका, ते कर्म्मण्य-
स्मिन् प्रवर्त्तन्ते; इदानीं यद्यत् कर्त्तुमिच्छन्ति, तस्मात् न निवर्त्तिष्यन्ते।
अतस्ते केपि केषामपि भाषां बोद्धुं न शक्नुयुः तदर्थम् आगच्छत वयं ७
अधस्तत्र गत्वा तेषां भाषाया भेदं जनयाम। इत्थं परमेश्वरेण ते
मेदिन्याः सर्व्वदिक्षु व्यकीर्य्यन्त ते च नगरनिर्म्माणात् न्यवर्त्तन्त। इति ८
कारणात् तस्या नगर्य्या नाम बाबिल् (अर्थतो भेद) इत्यभवत्; यतः ९
परमेश्वरेण सर्वस्या मेदिन्या भाषाभेदं जनयित्वा तस्मात् स्थानात्
सर्वस्यां मह्यां व्यकीर्य्यन्त।

शामो वंशावलिः। जलाप्लावनात् परं वत्सरद्वये गते सति शामो १०
वत्सरशते वयसि अर्फक्षद्नामा तस्य पुत्रोऽजायत। तस्य जन्मनः परं ११
शाम् पञ्चशतानि वर्षाणि जीवन् पुनः पुत्रान् पुत्रीश्च जनयामास।
किञ्च अर्फक्षदः पञ्चत्रिंशद्वत्सरवयसि सति शेलहनामा तस्य पुत्रो १२
जज्ञे। तस्य जन्मनः परं अर्फक्षद् त्र्यधिकचतुःशतानि वर्षाणि जीवन् १३
पुनः पुत्रान् पुत्रीश्च जनयाञ्चक्रे। ततः शेलहस्त्रिंशद्वर्षवयसि सति एवर् १४
नामा तस्यैकपुत्रो बभूव। तस्य जन्मनः परं शेलह् त्र्यधिकचतुःशतानि १५
वर्षाणि जीवन् पुनः पुत्रान् पुत्रीश्च जनयाञ्चक्रे। तत एवरः चतुस्त्रिंशद- १६

१७ षंवयसि सति पेलग्नामा तस्य पुत्रो जज्ञे। तस्य जन्मनः परम् एवर्
त्रिंशदधिकचतुःशतानि वर्षाणि जीवन् पुनः पुत्रान् पुत्रींश्चाजनयत्।
१८ ततः पेलगस्त्रिंशद्वर्षवयसि सति रियूनामा तस्यैकः पुत्रोऽजायत। तस्य
१९ जन्मनः परं पेलग् नवाधिकवर्षशतद्वयं जीवन् अपरपुत्रान् पुत्रींश्च
२० जनयाञ्चक्रे। ततो रियूर्द्वात्रिंशद्वर्षवयसि सति सिरूग्नामा तस्यैकः
२१ पुत्रोऽजायत। तस्य जन्मनः परं रियूः सप्ताधिकशतद्वयवत्सरान्
२२ जीवन् अपरान् पुत्रान् पुत्रींश्चाजनयत्। ततः सिरूगस्त्रिंशद्वर्षवयसि
२३ सति नाहोरनामा तस्यैकः पुत्रोऽजायत। तस्य जन्मनः परं सिरूग् द्वेशते
२४ वत्सरान् जीवन् अपरान् पुत्रान् पुत्रींश्च जनयाञ्चक्रे। अपरं नाहोर
२५ ऊनत्रिंशद्वत्सरवयसि सति तेरहनामा तस्यैकः पुत्रो जज्ञे। तस्य
जन्मनः परं नाहोर् ऊनविंशाधिकशतं वत्सरान् जीवन् अपरान्
२६ पुत्रान् पुत्रींश्चाजनयत्। अपरं तेरहस्य सप्ततिवत्सरवयसि सति इब्राम्
नाहोर् हारण् नामानः तस्य त्रयः पुत्रा जज्ञिरे।
२७ तेरहस्य वंशावलिः। तस्य तेरहस्य पुत्रा इब्राम् नाहोर् हारण्।
२८ हारणः पुत्रो लोट् किन्तु हारण् आत्मनः पितुः तेरहस्याग्रे स्वजन्मस्थाने
२९ कस्दीयानाम् ऊर्नामक नगरे प्राणान् तत्याज। अनन्तरं इब्राम्-
नाहोरौ व्यूहतुः इब्रामो जायाया नाम सारी, नाहोरो जायाया नाम
मिल्का। सा नाहोरो जाया मिल्का हारणः कन्यासीत् स हारण्
मिल्कायिस्कयो र्जनक आसीत्।
३० सा सारी वन्ध्याभवत्, तस्या अपत्यं न जातम्। अनन्तरं तेरह इब्राम्
३१ पुत्रं हारणः पुत्रं लोट्नामकं पौत्रम् इब्रामो जायां सारीनामिकां पुत्र-
बधूञ्च गृहीत्वा कस्दीयानाम् ऊर्नामकनगरात् किनानदेशम् उद्दिश्य
३२ गच्छन् हारण्नगरीं प्राप्य तत्रैव न्यवसत्। ततः परं तेरहस्तस्मिन्
हारणि नगरे तिष्ठन् पञ्चाधिकशतद्वयवत्सरवयसि प्राणान् अत्यजत्।

१२ द्वादशोऽध्यायः।

१ इब्रामं प्रतीश्वरस्याशीर्व्वदनं ४ इब्रामो हारणगमनं ६ किनान्देशे तस्य भ्रमणं १० दुर्भिक्षकारणात् तस्य मिसरगमनं १४ इब्रामो जायाया राज्ञा ग्रहणं पुनस्तस्मै दानञ्च।

१ ततः परम् परमेश्वर इब्रामम् आचचक्षे, त्वं स्वदेशं ज्ञातिं कुटुम्बं
२ पैतृकगृहञ्च परित्यज्य यं देशमहं त्वां दर्शयामि, तं देशं व्रज। अहं

त्वत्तो महाजातिमेकाम् उत्पाद्य तुभ्यं आशिषं प्रदास्यामि, तेन त्वं
विख्यातो मङ्गलदाता च भविष्यसि। अपरं ये तुभ्यम् आशिषं ददति, २
अहं तेभ्य आशिषं दास्यामि; ये तुभ्यम् अभिशापं ददति, तेभ्योऽहम्
अभिशापं दास्यामि, त्वत्तो मेदिन्याः सर्व्वे वंशाश्च आशिषं प्राप्स्यन्ति।

अनन्तरम् इब्राम् परमेश्वरस्याज्ञानुसारात् जगाम; तदा लोट् च ४
तेन सहितो जगाम; इब्रामो हारण्नगरात् गमनकाले पञ्चसप्तति
वत्सरवय आसीत्। इत्थं इब्राम् सारीं जायां भ्रातृपुत्त्रलोटं हारणि ५
प्राप्तं स्वीयसञ्चितधनञ्च दासदासीनिवहञ्च समादाय किनान्देशं प्रति
यात्रां कृत्वा तं देशं प्राप्तवान्।

अनन्तरं तस्मिन् देशे भ्रमन् शिखिम्स्थानस्य समीपस्थितं मोरि- ६
प्रान्तरं प्राप्तवान्; तदानीं किनानीयलोकास्तस्मिन् देशे न्यवसन्।

ततः परमेश्वर इब्रामं दर्शनं दत्त्वा जगाद, तव वंशाय देशमिमं ७
दास्याम्यहं; अत इब्राम् तस्मिन् स्थाने दर्शनदातारं परमेश्वरम् उद्दिश्य
यज्ञवेदिं निर्म्मितवान्। पश्चात् स तत्स्थानं परित्यज्य बैथेलः पूर्व्वदिशः ८
पर्व्वतं गत्वा दूष्यं स्थापयामास; तस्य पश्चिमे बैथेल्, पूर्व्वदिशि अयनगर-
मासीत्; तत्रापि परमेश्वरम् उद्दिश्य यज्ञवेदिं कृत्वा तस्य नाम्नि प्रार्थ-
याञ्चक्रे। ततः परम् इब्राम् भ्रमन् ततो दक्षिणदेशं गतवान्। ९

तदानीं तस्मिन् देशे दुर्भिक्षस्य जातत्वात् इब्राम् मिसरदेशे प्रवस्तुं १०
यात्रां चकार; यतः किनान्देशे दुर्भिक्षम् अतीव ववृधे। अनन्तरं ११
मिसरदेशं प्रवेष्टुम् उद्यतः सन् इब्राम् निजजायां सारीं बभाषे, पश्य,
त्वं द्रष्टुं सुन्दरीत्यहं जानामि। एतत्कारणात् मिसरीयलोकास्त्वां दृष्ट्वा १२
मदीयजायेति विज्ञाय मां हत्वा त्वां जीवन्तीं स्थापयिष्यन्ति। अतए- १३
वाहं विनये, त्वं मम भगिनीति वद, तेन त्वया मम मङ्गलं भविष्यति,
त्वया मम प्राणाश्च रक्षिष्यन्ते।

अनन्तरम् इब्रामि मिसरं प्रविष्टे मिसरीयलोकास्तां नारीं परम- १४
सुन्दरीं ददृशुः। अपरं राज्ञोऽध्यक्षास्तां निरीक्ष्य राज्ञः साक्षात् तां १५
प्रशशंसुः; ततः सा नारी राज्ञो गृहम् आनिन्ये। तदा तन्निमित्तं नृप १६
इब्रामं समादृत्य तस्मै गोमेषगर्दभगर्दभीमहाङ्गादीन् दासीदासांश्च
ददौ। किन्तु सारी इब्रामो भार्य्या, तस्मात् परमेश्वरो राज्ञः सप- १७
रिवारस्य महाक्लेशं घटयामास। अतो राजा तम् इब्रामम् आहूय १८
बभाषे, मया सह त्वया किं व्यवहृतं? एषा मम जायेति कुतो मह्यं

१९ नावादीस्त्वं? इयं मम भगिनीति कुतोऽवादीः? येनाहं तां विवोढुं
२० गृहीतवान्; इदानीं त्वं तां तव जायां गृहीत्वा याहि। तदा राजा-
ज्ञया भृत्या सर्व्वस्वैः सार्द्धं तं तदीयजायाञ्च व्यसृजन्।

---

१३ त्रयोदशोऽध्यायः।

१ इब्रामो लोटस्य मिसर्देशाद् गमनं, तेषां पशुपालकानां विरोधः १० लोटः सिदोम्-
गमनं १४ इब्रामं प्रतीश्वरस्य प्रतीज्ञा च।

१ तदनन्तरं इब्राम् निजजायां लोटञ्च सकलसम्पत्तिञ्च गृहीत्वा मिसरः
२ प्रस्थाय दक्षिणदेशं प्राप्तवान्। स इब्राम् पशुभिः स्वर्णरूप्यैश्च अतीव
३ धनवान् आसीत्। पश्चात् स पूर्व्वयात्रानुसारेण दक्षिणस्माद् बैथेलो
दिशं गच्छन् बैथेल्अयो र्मध्यवर्त्तिनि यस्मिन् स्थाने तस्य दूष्यं स्थापित-
४ मासीत्, तत् स्थानम् उपस्थाय पूर्व्वं स्वनिर्म्मितायाः यज्ञवेद्याः सन्निधौ
५ परमेश्वरस्य नाम गृहीत्वा प्रार्थयाञ्चक्रे। अपरम् इब्रामः सङ्गी यो
लोट् तस्यापि अजमेषगोदूष्याणां विद्यमानत्वात् तस्मिन् देशे तयोः
६ सहवासो न समपद्यत। तयोः प्राज्यसम्पत्तेः सम्भवात् सहवस्तुं तौ न
७ शेकतुः। यत इब्रामः पशुपालकानां लोटः पशुपालकैः सार्कं परस्पर-
विरोधो बभूव; तदानीं तस्मिन् देशे किनानीयाः पिरिषीयाश्च मानुषा
८ न्यवसन्। अत इब्राम् लोटम् अवदत्, अहं त्वां विनये, त्वं मम ज्ञातिः
त्वया मया तव पशुपालकै र्मम पशुपालकैश्च सार्द्धं विरोधो न भवतु।
९ तव सम्मुखे किं समस्तदेशो नास्ति? अतस्त्वां विनये, त्वं मत्तः पृथक्
भव त्वं वामं याहि, अहं दक्षिणं यामि; यदा त्वं दक्षिणं याहि, अहं
वामं यामि।

१० तदा लोट् नेत्रे उन्मील्य ददर्श, सोयर्यावत् यर्द्दन नद्याः सकल-
प्रान्तरं परमेश्वरस्य उद्यानसमानं मिसरदेशइव तस्य सर्व्वत्र जलं
११ भवति; यतस्तदानीं सिदोमअमोरौ परमेश्वरेण न नाशितौ। अतो
लोट् यर्द्दनः सकलप्रान्तरं मनोनीतं कृत्वा पूर्व्वदिशं प्रति प्रतस्थे; इत्थं
१२ तौ परस्परं पृथक् बभूवतुः। अपरं इब्राम् किनानदेशे न्युवास; किञ्च
लोट् तत्प्रान्तरस्थितानां सर्व्वेषां नगराणां मध्ये सिदोम नगरस्य समीपे
१३ दूष्यं स्थापयामास। तस्य सिदोमो लोका अतीव दुष्टाः परमेश्वरस्य
गोचरे महापापिष्ठाश्चाभवन्।

१४ इत्थं इब्रामो लोटि पृथक् भूते सति, परमेश्वर इब्रामं बभाषे त्वं नेत्रे

उन्मील्य स्थानादस्मात् उत्तरदक्षिणपूर्व्वपश्चिमान् वीक्षस्व। त्वं यावद् १५
दूरं द्रष्टुं शक्नोषि, तावतीं भूमिं चिरकालार्थं तुभ्यं तव वंशाय च
दास्यामि। अपरं पृथिव्या धूलिवत् तव वंशं बर्द्धयिष्यामि; यदि कश्चित् १६
पृथिव्या धूली गणयितुं शक्नोति, तर्हि तेन तव वंशो गणयिष्यते। उत्तिष्ठ, १७
देशस्यास्य दैर्घ्यं विस्तारञ्च भ्रम, तावतीं भूमिं तुभ्यं दास्यामि। तदानीम् १८
इब्राम् दूष्यमुत्थाप्य हिब्रोणः समीपस्थितं मम्रीनामकं प्रान्तरं गत्वा
न्युवास, किञ्च तत्र परमेश्वरम् उद्दिश्य यज्ञवेदिं निर्म्ममे।

---

१४ चतुर्द्दशोऽध्यायः।

१ चतुर्भि र्नरपतिभिः सार्द्धं पञ्चानां भूपतीनां युद्धं १२ लोटो लोठनं परहस्तगतत्वं इब्रामा पुनर्मोचनं १७ प्रत्यागमनकाले सिदोमो राज्ञो मल्कीषेदक्राजस्य साक्षात्करणं तस्य कथाकथनञ्च।

अनन्तरं शिनियरोऽम्राफल्नामको राजा, इल्लासरोऽरियोकनामको १
राजा, एलमः किदर्लायोमर्नामको राजा, अन्यजातीयतिदियल्नामको २
राजा, चैते सिदोमो बिरानाम्ना राज्ञा सार्द्धं अमोराया बिर्शानाम्ना
राज्ञा सार्द्धं, अद्माया शिनाब्नाम्ना राज्ञा सार्द्धं, सिबोयिमः शिमेब-
र्नाम्ना राज्ञा सार्द्धं, सोयरोऽर्थतो बिलानाम्ना राज्ञा च सार्द्धं युयुधुः।
तत्र सर्व्वे सिद्दीमः प्रान्तरेऽर्थतो लवणसागरेऽमिलन्। यस्मात् ते द्वाद- ३
शवत्सरान् यावत् तस्य किदर्लायोमरभूपतेर्वशीभूताः सन्तस्त्रयोदशे ४
वत्सरे तस्यावशा अभवन्। एतत्कारणात् चतुर्दशे वत्सरे किदर्लायो- ५
मरराजा निजसहायै राजभिः सहित आगत्य, अस्तिरोत्कर्णयिम-
देशीयान् रिफायीयलोकान् हामदेशीयान् सुषीयलोकान् शाविकिरि- ६
याथयिमदेशीयान् एमीयलोकान् एल्पारण्प्रान्तरं यावत् सेयीरपर्व्वत-
निवासिनो होरीयलोकांश्च जिगाय। अपरञ्च ते तस्मात् परावृत्य ७
एणमिस्पटोऽर्थतो कादेशो मध्येन गत्वा, अमालेकीयलोकानां कृत्स्नं देशं
हत्ससोन्तामर् निवासिन इमोरीयलोकान् पराजिग्युः अतएव सिदो-
मराजा, अमोराराजा, अद्माराजा, सिबोयिमराजा, बिला अर्थत ८
सोयरराजा, चेमे पञ्च राजानो मिलित्वा एलम् देशस्य किदर्लायोमर- ९
राजेन सार्द्धं, अन्यजातीयानां तिदियल्राजेन सार्द्धं, शिनियरोऽम्राफ-
ल्राजेन सार्द्धं, इल्लासरो अरियोक्राजेन सार्द्धं, सिद्दीम्प्रान्तरे युद्धं
कर्त्तुमारेभिरे। तदा तस्मिन् सिद्दीम्प्रान्तरे शिलाजतोः खातानि आसन्, १०

ततः सिदोमघमोराराजानौ पलायमानौ तेषां मध्ये पेततुः शेषाश्च
११ पर्व्वतं प्रत्यपलायन्त। तस्मात् ते सिदोमघमोरयोः सर्व्वसम्पत्तिं भक्ष्यद्र-
१२ व्याणि च लोठयित्वा प्रतस्थिरे। अपरम् इब्रामो भ्रातृपुत्त्रं सिदोम-
निवासिनं लोटं तदीयां सर्व्वसम्पत्तिञ्च निन्युः।
१३ तदानीम् एकः पलाय्य इब्रीयम् इब्रामं वार्त्ताम् अवदत्, तदा इब्राम्
इष्कोल आनेरश्च भ्राता इमोरीयस्य मम्रीप्रान्तरे न्यवसत्; इब्रामस्ते
१४ च सहाया आसन्। शत्रुभिः स्वीयभ्रातृपुत्त्रो धृत इतिवार्त्तां श्रुत्वैव
इब्राम् स्वगृहजातान् अष्टादशाधिकशतत्रयशिक्षितभृत्यान् सुसज्जान्
१५ कृत्वा शत्रूणां पश्चात् धावित्वा दान्नगरं यावत् गतवान्। अनन्तरं
स्वभृत्यान् द्विधा विभज्य रजन्यां वैरिणः प्रति आचक्रमे; ततो दम्मे-
१६ षकोः वामस्थितं होबानगरं यावत् तेषां पश्चात् अधावत्। ततः सर्व्व-
सम्पत्तिं स्वभ्रातृपुत्त्रं लोटं तस्य सम्पत्तिञ्च योषितः सर्व्वान् लोकांश्च परा-
वर्त्यानिनाय।
१७ इत्थं इब्राम् किदर्लायोमरं तस्य सहायभूपतींश्च जित्वा प्रत्यागत-
वान्; तदा सिदोमो राजा तं साक्षात् कर्त्तुं शावीप्रान्तरम् अर्थतो
१८ राज्ञः प्रान्तरं उपतस्थौ। अपरञ्च सर्व्वोपरिस्थेश्वरस्य यष्टा मल्कीषे-
दक नामा शालमो राजा पूपान् द्राक्षारसञ्च नीत्वा इब्रामं इत्याशिषं
१९ जगाद, गगणपृथिव्योः स्वामी सर्व्वोपरिस्थ ईश्वर इब्रामो मङ्गलं
२० क्रियात्। सर्व्वोपरिस्थ ईश्वरो धन्यो भवतु, स तव वैरिणस्तवैव हस्ते
समर्पितवान्; तदानीम् इब्राम् सर्व्वद्रव्याणां दशमांशं तस्मै ददौ।
२१ अनन्तरं सिदोमो राजा इब्रामम् आचष्टे, त्वं सर्व्वां सम्पत्तिं गृहाण;
२२ किन्तु लोकान् मह्यं देहि। तत इब्राम् सिदोमो राजानं प्रत्युवाच, गगण-
मेदिन्योः स्वामिनः सर्व्वोपरिस्थितस्य प्रभोः परमेश्वरस्य नाम्ना शपमानोऽहं
२३ कथयामि, मम युवलोकै र्यद् अभोजि; अपरं मम सहकारिण आनेर
इष्कोल् मम्रिश्च, एतेषां यो भागः प्राप्तव्यस्तं परित्यज्य यद्यदस्ति तत्
२४ तवैव तिष्ठतु। अहम् इब्रामं धनिनं अकार्षम्, एतां कथां यथा न वक्ष्यसि
तदर्थं त्वदीयमेकं सूत्रं उपानद्बन्धनरज्जुं वा नाहं ग्रहीष्यामि

१५ पञ्चदशोऽध्यायः।

१ इब्रामोऽपत्यं दातुं तदपत्याय किनान्देशं दातुम् ईश्वरस्य प्रतिज्ञानं ईश्वरम् उद्दिश्य इब्रामो बलिदानञ्च।

१ एतद्घटनासु सतीषु परमेश्वर इब्रामं स्वप्नइव दर्शनं दत्त्वा वाच-

मेतां बभाषे, हे इब्राम् मा भैषीः अहं तव फलकरूपो महापारि-
तोषिकरूपश्च। तत इब्राम् प्रत्यूचे, हे प्रभो परमेश्वर त्वं मह्यं किं २
दास्यसि? अहं स्वयम् अनपत्यः किञ्च एतद्दम्मेषकीयइलीयेषरनामको ३
मम गृहस्य धनाधिकारी विद्यते। इब्राम् पुनरवदत् पश्य मह्यम् ४
अपत्यं नादाः सुतरां मम गृहजातः कोपि जनो ममोत्तराधिकारी
भविष्यति। तदानीं परमेश्वर इब्रामं प्रति इति कथां कथयामास स ५
जनस्त्वदीयोत्तराधिकारी न भविष्यति; किन्तु यस्तवौरसपुत्रो जनि-
ष्यते सएव त्वदीयोत्तराधिकारी भविष्यति। अनन्तरं स तं वहिरा- ६
नीय जगाद त्वम् अन्तरीक्षं निरीक्ष्य यदि नक्षत्राणि गणयितुं शक्नोषि
तर्हि गणयन् ब्रूहि। सोऽपरमपि कथयामास, एतादृशस्तव वंशो भवि-
ष्यति; तदानीं तस्मिन् परमेश्वरे विश्वसति सति स तस्य विश्वसनं
पुण्याय गणयाञ्चकार। ततः परमेश्वरस्तस्मै कथयामास; यस्त्वाम् एनं ७
देशम् अधिकारयितुं कस्दीयानाम ऊरनगराद् आनिनाय सएव पर- ८
मेश्वरोहम्। तदा स बभाषे, हे प्रभो परमेश्वर अहमेनं देशमधिकरि- ९
ष्यामीति कथं ज्ञास्यामि? परमेश्वर आचचक्षे त्वं त्रिहायणां गोवत्समेकं
त्रिहायणीं छागीमेकां त्रिहायणं मेषमेकञ्च पुनः कपोतमेकं पारावतमे-
कञ्च मां निकषानय। ततः स तान् पशून् तस्य समीपम् आनीय द्विख- १०
ण्डीकृत्य खण्डैकस्याग्रेऽन्यखण्डं निदधे; किन्तु विहङ्गान् न द्विखण्डीचकार।
अनन्तरं हिंस्रविहगेषु तेषां मृतपशूनाम् उपरि पतत्सु इब्राम् तान् ११
अपसारयाञ्चक्रे। ततो दिनकरस्यास्तकाले इब्राम् अतीव निद्रितः सन् १२
अन्धतमसभयेनाक्रान्तोऽभूत्। तदानीं परमेश्वर इब्रामम् उवाच तव १३
सन्तानाश्चतुःशतानि वर्षाणि परदेशे प्रवत्स्यन्ति दास्यं कर्म्म कुर्व्वाना
क्लेशं भोक्ष्यन्ते च निश्चितमिदं विद्धि; किन्तु यज्जातीय लोकाः तान् १४
दास्यं कर्म्म कारयिष्यन्ति तानहं दण्डयिष्यामि; ततः परं ते प्राज्यं द्रविणं
गृहीत्वा तस्माद् देशात् निर्गमिष्यन्ति। अपरं त्वया क्षेमेण पूर्व्वपुरुषाणां १५
सन्निधिं गमिष्यते अतीव जरता श्मशानं लप्स्यते। अपरञ्च तव वंशीयश्च- १६
तुर्थः पुरुष एनं देशं प्रत्यागमिष्यति; यत इमोरीयलोकानां वृजिनमद्यापि
सम्पूर्णत्वं न व्रजति। अस्तं गते सवितरि तमिस्रे च सति तयोः खण्ड- १७
श्रेण्यो मध्येन चुल्लीधूमो वह्निप्रदीपश्च चेलतुः। अपरं तस्मिन्नेवाहनि १८
परमेश्वर इब्रामा साकं नियमं निर्णीय कथयाञ्चकार एतां मिसरीय-
सरितम् आरभ्य फरात्नामिकां वृहतीं धुनीं यावत् केनीयानां किनसी- १९

२० यानां कद्मोनीयानां हित्तीयानां पिरिषीयाणां रिफायीयानां इमो-
२१ रीयाणां किनानीयानां गिर्गासीयानां यिबूषीयानाञ्च निखिलान् देशान्
तव वंशायाहं दास्यामि।

---

१६ षोडशोऽध्यायः।

१ सार्य्या इब्राम्हाजिरयोरुद्वाहः ४ स्वामिन्या दुःखमनुभूय हाजिरायाः पलायनं ईश्वराज्ञया तस्याः प्रत्यागमनञ्च।

१ तस्येब्रामो जाया सारी बन्ध्यासीत् किञ्च मिसरीया हाजिराना-
२ मिका तस्या दास्येकासीत्। ततः सारी इब्रामम् अवदत् परमेश्वरेणाहं
बन्ध्या कृतास्मि ततोहं त्वां विनये त्वं मदीयामेनां दासीमुपगच्छ, तेनाहं
३ तस्याः पुत्रं प्राप्स्यामि; तदा इब्राम् सारीवाक्यात् तदङ्गीकृतवान्। तदा
किनान्देशे इब्रामः प्रवासस्य दशवर्षेषु गतेषु तस्य जाया सारी तां
मिसरीयां हाजिरां दासीं नीत्वा स्वस्वामिनम् इब्रामम् उद्वाहयाञ्चक्रे।
४ अनन्तरम् इब्रामि हाजिराम् उपगते सा गर्भिणी बभूव; किञ्च
स्वकीयो गर्भोऽभवत् इति विज्ञाय सा स्वस्वामिनीम् अवमन्तुम् आर-
५ भत। ततः सारी इब्रामं बभाषे मां प्रतीत्यन्यायस्य फलं तुभ्यं भवेत्;
मया या स्वीया दासी तव क्रोड़े दत्ता साधुना निजगर्भं विदित्वा माम-
६ वमन्यते; परमेश्वरएव त्वां माञ्च विचारयतु। तत इब्राम् सारीं जगाद
पश्य सा दासी त्वदीया तवैव हस्तगतास्ते; त्वदिच्छानुसारेण तां प्रति
व्यवहर; तदा सारी हाजिरां प्रति काठिन्यं व्यवजहार ततः सा तस्याः
७ समीपात् पलायाञ्चक्रे। ततः परमेश्वरस्य दूतः शूरः पथि मध्येप्रान्तरं
कस्यचित् प्रस्रवणस्य समीपे तां निरीक्ष्य प्रोवाच, हे सार्य्या दासि
८ हाजिरे, त्वं कुत आगतासि? कुत्र च गमिष्यसि? ततः सा प्रत्युवाच
९ स्वस्वामिन्याः सार्य्याः समीपात् पलायेहम्। तदा परमेश्वरस्य दूतस्तां
१० जगाद त्वं स्वस्वामिन्याः समीपं परावृत्य तस्या वशीभव। परमेश्वरीय-
दूतः पुनः प्रोवाच तव वंशो बाहुल्यात् अगण्यो यथा भवेत् तथाहं तं
११ वर्द्धयिष्यामि। परमेश्वरस्य दूतः पुनस्तां बभाषे पश्य तवोदराद् यः
पुत्रो जनिष्यते तस्य नाम इस्मायेल् (अर्थत ईश्वरः शृणोतीति) करि-
१२ ष्यसि यतः परमेश्वरस्तव दुःखस्य कथां श्रुतवान्। सोऽबाध्यः पुमान्
भविष्यति तस्य हस्तः सर्व्वेषां विरुद्धं स्थास्यति सर्व्वेषां हस्ताश्च तस्य
१३ विरुद्धं स्थास्यन्ति; स च निजभ्रातृणां पूर्व्वदिशि निवत्स्यति। अपरञ्च

हाजिरा तया साकं यः परमेश्वरः संललाप तस्य नाम मद्दर्शकेश्वर इति १४
चक्रे। यतः सा कथयामास किमहं मद्दर्शकं नादर्शम्? किञ्च तस्य प्रहे
र्नाम बेर्लहयरोयी (अर्थतः स्वयंजीवी मद्दर्शकस्य प्रहिरिति) चक्रे। स
प्रहिः कादेश्बेरदो र्मध्ये विद्यते। अनन्तरं हाजिरया पुत्रे प्रसूते इब्राम् १५
हाजिरातो जातस्य तस्य पुत्रस्य नामधेयम् इस्मायेल् इति चक्रे। इब्रामः १६
षडशीतिवत्सरवयसि हाजिरा तस्य पुत्रं इस्मायेलं प्रसुषुवे।

---

१७ सप्तदशोऽध्यायः।

१ इब्राहिमा सहेश्वरस्य नियमस्थिरीकरणं तन्नियमस्य लक्ष्म त्वक्छेदः १५ सार्य्या नामविनिमयः पुत्रप्रसवकथनं २३ इब्राहीमा इस्मायेल प्रभृतीनां त्वक्छेदनञ्च।

इब्राम ऊनशतवत्सरवयसि परमेश्वरस्तं दर्शनं दत्वा जगाद, १
सर्व्वशक्तिमान् ईश्वरोऽहं मम समक्षं धर्म्म माचरन् सिद्धो भव। अहं २
त्वया सह स्वनियमं निर्णीय त्वां भृशं वर्द्धयिष्यामि। तदानीम् इब्रामि ३
दण्डवत् प्रणमति ईश्वरस्तेन सार्द्धम् आलप्य कथितवान् पश्याहमेव ४
त्वया सहितः स्वीयनियमं संप्रधारयामि त्वं बहुजातीनाम् आदिपुरुषो
भविष्यसि। किञ्च तव नामधेयम् इब्राम् (अर्थात् महापितेति) पुन ५
र्न स्थास्यति किन्तु इब्राहीम् (अर्थात् बहुलोकानां पितेति) नाम
भविष्यति। यतोऽहं त्वां बहुजातीनामादिपुरुषं कृत्वा तव वंशं भृशं ६
वर्द्धयिष्यामि किञ्च त्वत्तो बहुजाती र्जनयिष्यामि राजानस्त्वत्त उत्प-
त्स्यन्ते। अहं त्वदर्थं तव भाविवंशार्थञ्च यं नियमं निर्णीतवान् स चिर- ७
स्थायी भविष्यति; ततोऽहं तव त्वदीयभाविवंशस्य ईश्वरो भविष्यामि।
अपरं त्वमिदानीं यस्मिन् किनान्देशे प्रवससि निखिलमिमं देशं तुभ्यं ८
तव भाविवंशाय च चिरकालमधिकर्त्तुं दास्यामि; तेषामहम् ईश्वरो
भविष्यामि। पुनरीश्वर इब्राहीमं जगाद त्वया त्वदीयभाविवंशेन च ९
पुरुषपरम्परां यावत् मम नियमः पालयिष्यते। त्वया सार्द्धं त्वदीयभा- १०
विवंशेन च सार्द्धं मम यो नियमः पालयितव्यः सएषः; युष्माकं सकल-
पुत्त्रापत्यानां त्वक्छेदनं भविष्यति युष्माभिः स्वस्वलिङ्गाग्रचर्म्मणि छिन्ने ११
तद् युष्माभिः साकं मदीयनियमस्य चिह्नं भविष्यति। युष्माकं पुरुषपर- १२
म्पराणां स्वस्वपुत्त्रापत्यस्याष्टदिनवयसि त्वक्छेदनं भविष्यति किञ्च तवा-
नौरसो विदेशीयो यः पुत्त्रस्तद्गृहजातो मूल्येन क्रीतो वा भवति
तस्यापि त्वक्छेदनं भविष्यति। तव गृहजातस्य मूल्येन क्रीतस्य वा १३

बालकस्य त्वक्छेदनम् अवश्यं कर्त्तव्यं तेन चिरकालार्थं युष्माकं मांसे
१४ मदीयनियमचिह्नं स्थास्यति। किन्तु यस्य पुमपत्यस्य लिङ्गाग्रचर्म्मच्छेदनं
न भविष्यति स मम नियमभञ्जनात् स्वलोकानां मध्यत उच्छेत्स्यते।
१५ तदनन्तरम् ईश्वर इब्राहीमं बभाषे त्वं तव सारीं (अर्थात् कुलीनां)
जायाम् इतःपरं सारीत्युक्त्वा माह्वय तस्या नाम सारा (राज्ञीति) जातं।
१६ अहं तस्यै आशिषं वदामि तस्या गर्भजं पुत्रमेकं तुभ्यं ददामि तस्यै वर-
मिमञ्च ददाम्यहं सा नानाजातीनाम् आदिमाता भविष्यति किञ्च तस्या
१७ वंशे नानाजातीया नृपतय उत्पत्स्यन्ते। तदानीम् इब्राहीम् दण्डवत्
प्रणतिं कृत्वा हसन् मनसि कथितवान् पुरुषस्य शतवत्सरवयसि किं पुत्रो
१८ जनिष्यते? नवतिवत्सरवयसि सारा किं पुत्रं प्रसविष्यति? तत इब्रा-
१९ हीम् ईश्वरं जगाद इस्मायेल तव गोचरे जीवन् तिष्ठतु। तदानीम् ईश्वरः
कथयामास तव जाया सारा त्वदर्थं निश्चितं पुत्रं प्रसविष्यति त्वञ्च
तस्य नाम इस्हाक् (हास्य) इति करिष्यसे अहन्तु तेन सार्द्धं तदीयभा-
२० विवंशेन च सार्द्धं चिरस्थायिनं नियमं निर्णेष्यामि। तथा इस्मायेलीयां
तव प्रार्थनामपि श्रुतवानहं; पश्याहम् आशिषा तं बहुप्रजं कृत्वा
तदीयवंशम् भृशं वर्द्धयिष्यामि; तस्माद् द्वादश राजान उत्पत्स्यन्ते तमहं
२१ महाजातिं करिष्यामि। किन्तु भविष्यद्वत्सरस्यास्मिन् काले साराया
२२ गर्भे तव य इस्हाक् पुत्रो जनिष्यते तेन सार्द्धं स्वीयनिममं निर्णेष्याम्य-
हम्। इत्थं संलप्येश्वर इब्राहीमः समीपाद् ऊर्द्धं जगाम।
२३ अनन्तरम् इब्राहीम् इस्मायेलं पुत्रं स्वीयगृहजातान् मूल्येन क्रीतान्
स्वगृहस्थितान् सकलान् पुरुषांश्च गृहीत्वा ईश्वरस्याज्ञानुसारेण तस्मि-
२४ न्नेव दिने सर्व्वेषां लिङ्गाग्रचर्म्म चिच्छेद। इब्राहीम ऊनशतवत्सरवयसि
२५ सति तदीयलिङ्गाग्रस्य त्वक्छेदनं बभूव। किञ्च तस्य पुत्रस्येस्मायेलस्त्र-
२६ योदशवत्सरवयसि सति लिङ्गाग्रस्य त्वक्छेदनं बभूव। इत्थम् इब्राहीम-
२७ स्तस्य पुत्रस्येस्मायेल एकस्मिन्नेव दिने त्वक्छेदनं बभूव। अपरं तेन
सार्द्धं तस्य गृहजातानां मूल्येन क्रीतानाम् अन्यजातीयानां तस्य गृह-
स्थितानां सर्व्वेषां पुरुषाणामेव लिङ्गाग्रस्य त्वक्छेदनं बभूव।

---

१८ अष्टादशोऽध्यायः।

१ इब्राहीमः स्वर्गीयाणां त्रयाणां दूतानामातिथ्यविधानं तैः सार्द्धं संलपनं १६ तान

मार्गं दर्शयितुं सिदोम्दिशं प्रतीब्राहीमो गमनं २२ सिदोमोरक्षार्थं इब्राहीमो निवेदनञ्च।

अनन्तरं मध्याह्नसमये मम्रीनामकोद्याने इब्राहीम् स्वीयदूष्यगृहद्वारि १
समुपाविशत् एतस्मिन्नन्तरे परमेश्वरस्तस्मै दर्शनं ददौ। तदा स स्वलो- २
चने उन्मील्य सम्मुखे समुपस्थितान् त्रीन् पुरुषान् ददर्श; किञ्च दृष्ट्वैव
साक्षात् कर्त्तुं दूष्यद्वारात् वेगेन गत्वा भूमिष्ठः सन् प्रणम्य कथयाञ्चकार
हे प्रभो निवेदयामि यदि मां प्रत्यनुग्रहोऽस्ति तर्हि भृत्यस्यास्य स्थानात् ३
न यास्यसि। विनयेहं अल्पतोयम् आनयतु तेन यूयं पादान् प्रक्षाल्य ४
पादपस्यास्य मूले विश्राम्यत। अपरं किञ्चित् खाद्ये मयानीते तेन स्वस्वान्तः- ५
करणम् आप्यायध्वम् पश्चाद् त्रयिष्यध्वे; तद्धेतो यूयं स्वदासस्य समीपम्
आगताः। तदानीं ते प्रत्यूचुः त्वया यदुक्तं तदेव क्रियताम्। तत इब्रा- ६
हीम् क्षिप्रं दूष्यगृहे सारायाः समीपं गत्वा बभाषे गोधूमचूर्णानां श्रेट-
कत्रयं तोयेनाभिषिच्य चुल्यां प्रतप्य तूर्णं पूपान् कुरु। तत इब्राहीम् तूर्णं ७
गोष्ठं गत्वा उत्तमं कोमलं वत्समेकं गृहीत्वा भृत्याय ददौ; स तं झटिति
पपाच। तदानीं दधि दुग्धं सिद्धवत्सपललञ्च समानीय तेषां साक्षात् ८
स्थापयामास; किञ्च स पादपमूले तेषां भुञ्जतां सन्निधौ तस्थौ। अनन्तरं ९
ते तं पप्रच्छुः तव जाया सारा कुत्र? स कथयामास पश्यत सा दूष्ये
विद्यते। तदा तेषामेकः पुरुष उवाच अहम् आगामि वत्सरस्यास्मिन् १०
समयेऽवश्यं पुनरागमिष्यामि पश्य तत्पूर्व्वं तव जायायाः सारायाः पुत्त्र-
एको जनिष्यते। एतां वाचं सारा दूष्यद्वारे तस्य पश्चात् तिष्ठन्ती शुश्राव।
तदानीम् इब्राहीम् सारा चातीव वृद्धावास्तां सारायाः रजोपि न्यव- ११
र्त्तत। ततः सारा हसन्ती मनसि बभाषे, मम मत्पत्युश्च वृद्धावस्थायां १२
किमेतादृश आनन्दो भविष्यति? तदा परमेश्वर इब्राहीमम् आचख्यौ १३
स्वीयवार्द्धक्यकाले किं निश्चितं पुत्त्रो जनिष्यते इति चिन्तयित्वा सारया
कुतो हसितं? परमेश्वरस्य किं कर्म्मासाध्यम्? आगामिनो वत्सरस्या- १४
स्मिन् समयेहं परावृत्यागमिष्यामि तदा सारायाः पुत्त्रो भविष्यति।
ततः सारा वितथं बभाषे नाहमहासिषम् यतः सा बिभयाञ्चकार। १५
ततस्तेनोचे सत्यं त्वमहासीः।

ततःपरं ते पुमांस उत्थाय तस्मात् स्थानात् सिदोमो दिशं प्रतस्थिरे। १६
तदानीम् इब्राहीमि पन्थानं दर्शयितुं तैः सार्द्धं व्रजति परमेश्वर १७
उवाच, यत् कर्त्तुमहम् उद्यतोस्मि तत् किम् इब्राहीमो गोपायिष्यामि?

१८ इब्राहीमो महती बलवती च जातिरेका जनिष्यते धरित्र्याः सर्व्वा जाति-
१९ स्तस्मात् मङ्गलं प्राप्स्यति। अहं तं जानामि स निजानि भावीन्यपत्यानि
परिवारांश्च परमेश्वरीयवर्त्मनि चलितुं न्यायं धर्म्मञ्च कर्त्तुम् आदेक्ष्यति;
२० तेन इब्राहीमं प्रति परमेश्वरोक्ता प्रतिज्ञा सेत्स्यति। परमेश्वरोऽपरम-
प्यवदत् सिदोमीय अमोरीयस्च महाशब्द उत्तिष्ठति तेषां पापम्
२१ अतीव गुरुतरं तत्कारणादहं अधोदृष्टुं गत्वा मत्सन्निधिमागतशब्दा-
नुसारेण ते लोकाः सर्व्वथा कृतवन्तो नवेति वेदिष्यामि।
२२ पश्चात् तौ पुमांसौ तस्मात् स्थानात् परावृत्य सिदोमो दिशं जग्मतुः;
किन्तु इब्राहीम् परमेश्वरस्य समक्षं तदानीं अप्युत्थित एव तस्थौ।
२३ तत इब्राहीम् समीपं गत्वा जगाद त्वं पापिभिः सार्द्धं धार्म्मिकानपि
२४ नाशयिष्यसि किं? नगरस्य मध्ये पञ्चाशत् जना धार्म्मिका भवितुं शक्ष्यन्ति
तन्मध्यस्थितानां पञ्चाशत्धार्म्मिकानां कृते तत् स्थानं न रक्षन् किं विना-
२५ शयिष्यसि? पातकिभिः समं धार्म्मिकानां विनाशनं कर्म्म त्वत्तो दूरे
तिष्ठतु; धार्म्मिकानां पापिभिः समानकरणञ्च त्वत्तो दूरे तिष्ठतु। सर्व्व-
२६ मेदिन्या विचारयिता किं न्यायं न करिष्यति? ततः परमेश्वरः कथया-
मास यद्यहं सिदोमनगरे पञ्चाशत् जनान् धार्म्मिकान् पश्यामि तर्हि
२७ तेषां निमित्तात् तत् सर्व्वं स्थानं रक्षिष्यामि। तत इब्राहीम् कथयामास
२८ पश्य मयि स्ट्दि भस्ममात्रेपि सति प्रभुं प्रति कथां कथयितुं उद्यतोस्मि।
यदि पञ्चाशत् धार्म्मिकाः पञ्चोना भवन्ति तर्हि पञ्चन्यूनत्वात् किं सर्व्वं
नगरं विनाशयिष्यसि? तेन कथितं, पञ्चचत्वारिंशत्सु प्राप्तेष्वपि तदहं
२९ न विनाशयिष्यामि। स तं पुनरवदत्, तत्र यदि चत्वारिंशत् जना
३० लभ्यन्ते? तेनोक्तं, चत्वारिंशत्सु प्राप्तेष्वपि तन्न करिष्यामि। पुनरपि स
कथयामास, चेत् प्रभु र्न विरजिष्यति, तदा पुनः कथयामि; यदि तत्र
त्रिंशत् जना प्राप्यन्ते? स उक्तवान,त्रिंशज्जनेषु प्राप्तेष्वपि तन्न करिष्यामि।
स उवाच, पश्य, प्रभुं प्रति मया क्षोभरहितेन पुनरपि कथ्यते यदि
३१ तत्र विंशति र्जना लभ्यन्ते? स उवाच, विंशतौ जनेषु प्राप्तेष्वपि तन्न
३२ नाशयिष्यामि। स पुनरुवाच एतेन प्रभु र्न क्रोत्स्यति, केवलमहं वारमेकं
कथयामि यदि तत्र दशजनाः प्राप्यन्ते? स उवाच, दशसु जनेषु प्राप्तेष्वपि
३३ तन्न नाशयिष्यामि। तदानीं परमेश्वर इब्राहीमा सार्द्धं इत्थं संलापं
समाप्य प्रतस्थे, इब्राहीम् च स्वस्थानं प्रतस्थे।

---

१९ ऊनविंशोऽध्यायः।

१ दूतद्वयस्य लोठः समीपागमनं, तौ प्रति सिदोमीयानां दुराचरणं लोट्तत्कन्यानां रक्षणं, सिदोमीयलोकानां लोट्स्त्रियाश्च विनाशनं २७ सिदोमो विनाशाद् इब्राहीमादे रक्षणं ३० लोटस्तत्कन्ययोश्च दुराचारात् मोयाबीयाम्मोनीयलोकानाञ्चोत्पत्तिश्च।

अनन्तरं सन्ध्याकाले स्वर्गीयदूतौ सिदोम्नगरमुपागतौ, तदा नगर- १
द्वार्य्युपविष्टो लोट् तौ विलोक्य समुत्थाय तौ साक्षात् चकार भूमिलग्न-
शिराः प्रणम्य कथयाञ्चकार च, हे मदीयप्रभू विनयेहं, अद्य यामिन्याम् २
एतस्य दासस्य गेहमागत्य वसतां पादान् प्रक्षालयताञ्च; ततः प्रत्यूष
उत्थाय गन्तव्यं स्थानं गमिष्यतः। तदा तौ कथयामासतुः नहि, आवां
कृत्स्नां यामिनीं वर्त्मन्येव स्थास्यावः। ततो लोटातीव यतिते तौ परा- ३
वर्त्त्य तेन समं तदीयनिवेशनं प्रविविशतुः; तदानीं स तयोः कृते
किण्वहीनपूपादीनि खाद्यानि समासादयाञ्चक्रे, तौ च बुभुजाते। किन्तु ४
तयोः शयनात् पूर्व्वं सिदोमनगरीया बालादिवृद्धपर्य्यन्ताः सकललोकाः
चतुर्दिशः समागत्य तस्य गेहमावृतवन्तः। किञ्च लोटमाहूय जगदुः, ५
अद्य यामिन्यां ये मनुजास्तव गेहम् आगमन्, ते कुत्र? तान् वहिरस्माकं
समीपम् आनय, वयं तानुपगमिष्यामः। तदा लोट् वहिरागत्य द्वारं ६
रुद्ध्वा कथयामास, हे भ्रातरो विनयेहम् एतादृशं मा कुरुत। ७
पश्यत मम द्वे अनूढकन्ये आसाते, ते युष्माकं समीपम् आनयामि यूयं ८
ताभ्यां समं यथेष्टाचारम् आचरत, किन्त्वेतौ मनुजौ प्रति किमपि मा
कार्ष्ट, यत एतौ मम गेहम् अशिश्रियतां। तदानीं ते कथयामासुः ९
अपसर; पुनरूचुः एष एको विदेशी मध्येऽस्माकं प्रवस्तुम् आगत्य
अस्माकं विचारयिता भवितुमिच्छति; इदानीं तेभ्योप्यतीव दुराचारं त्वां
प्रति करिष्यामः; ततस्ते लोटं प्रति समाक्राम्यन्तः कवाटं भंक्तुं जग्मुः। तदा १०
तौ द्वौ लोकौ हस्तैः स्वसमीपं गृहान्तरं लोटमाकृष्यानीय द्वारं रुरुधतुः
किन्तु द्वारसमीपस्थान् क्षुद्रान् महतो वा लोकान् अन्धान् चक्रतुः; ततस्ते ११
द्वारम् अन्विच्छन्तः परिशश्रमुः। अनन्तरं तौ मनुजौ लोटे कथयामासतुः १२
अस्मिन् नगरे त्वदीया अपरे के के सन्ति? पुत्राः पुत्र्या जामात्रादयश्च
तदीया ये ये लोका एतस्मिन् नगरे सन्ति तान् सकलान् एतत्स्थानात् १३
नय। यत आवाम् इदं स्थानमुत्छेत्स्यावः परमेश्वरस्य साक्षात् एतस्य
नगरस्य महाध्वनिरुदतिष्ठत्। अतः परमेश्वर एतन् नगरम् उच्छेत्तुं १४

आवां प्रहितवान् तदा लोट् वहि र्गत्वा तस्य कन्याग्रहणोद्यतान् जामा-
तृन् उवाच, उत्तिष्ठत, अस्मात् स्थानात् वहिर्भवत, परमेश्वर एतन्नगरं
१५ उच्छेत्स्यति; किन्तु तस्य जामातरस्तम् उपहासकमिव बुबुधिरे। अपरं
प्रभाते सति दूतौ शीघ्रयन्तौ लोटं जगदतुः, उत्तिष्ठ. या स्वीया जाया,
ये द्वे कन्ये चात्रासते, तास्त्वं नय; नो चेद् नगरीयदण्डेन विनंक्ष्यसि।
१६ तथापि तस्मिन् विलम्बमालम्बमाने सति परमेश्वरस्यानुग्रहात् तौ तस्य
तद् जायाया द्वयोः कन्ययोश्च हस्तान् धृत्वा नगरस्य वहि र्नीत्वा तान्
१७ स्थापयामासतुः। इत्थं तान् वहिः कृत्वा तयोरेको लोटं जगाद, प्राण-
रक्षार्थं पलायस्व, पश्चात् न वीक्षस्व, किञ्च एषां प्रान्तराणाम् मध्येपि मा
१८ तिष्ठ; पर्व्वतं पलायस्व, नो चेद् विनंक्ष्यसि। तदा लोट् प्रत्युवाच, हे मम
१९ प्रभो, इत्थं नहि; इदानीम् त्वं मत्प्राणान् रक्षितुम् एतस्मिन् भृत्येऽनुग्रहं
महतीं दयाञ्च कृतवान्; अहं पर्व्वतं प्रति पलायितुं न शक्नोमि; पथि
२० विपदि सत्यां म्रियेहं। पश्य, इदानीं पलायितुम् अदो-यन्नगरं निकटे
वर्त्तते, तत् क्षुद्रमास्ते, तत्र पलायितुम् आज्ञापयतु, तत् किं क्षुद्रस्थानं
२१ नहि? तेन मम प्राणा जीविष्यन्ति। ततः सोवदत्, भद्रं, त्वामनुगृह्य तदपि
२२ स्वीकरोमि, त्वया यन्नगरनिमित्तं प्रार्थ्यते तन्न नाशयिष्यामि। किन्तु क्षिप्रं
तत् स्थानं प्रति पलायस्व, यतस्त्वयि तत्र नोपस्थिते नाहं किमपि कर्त्तुं
२३ शक्ष्यामि। तस्मात् तस्य स्थानस्य नाम सोयर् (क्षुद्रं) इत्यभवत्। ततो
२४ लोटि सोयर्नगरं प्रविशति सति पृथिव्यां भास्कर उदियाय। तदानीं
परमेश्वरस्य समीपात् अर्थत आकाशात् सिदोममोरयोरुपरि परमे-
२५ श्वरेण सगन्धकाग्नौ वृष्टे ते नगरे सर्व्वप्रान्तरं तन्नगरनिवासिनो नरा
२६ उद्भिदश्च सर्व्वे विनाशिताः। तदानीं लोटो जाया पश्चाद्दिशि दर्शनात्
लवणस्तम्भो बभूव।

२७ अपरम् इब्राहीम् प्रातरेव समुत्थाय प्राक् यत्र परमेश्वरस्य साक्षात्
२८ तस्थौ, तत्रोपस्थाय सिदोममोरौ तत्सर्व्वप्रान्तरभूमिञ्च प्रति वीक्षाञ्चक्रे,
२९ तदा तस्माद्देशात् वह्निकुण्डस्य धूममिव धूमं उत्थातुं ददर्श। किन्त्वीश्वरः
तत्प्रान्तरस्थितानां सर्व्वनगराणां विनाशकाले इब्राहीमं सस्मार, तद्धेतो
र्लोटो वासस्थाननगराणां विनाशकवह्ने र्मध्यात् लोटं निर्गमयामास।

३० ततः परं लोट् सोयरि वस्तुं शङ्कमानस्तस्मान्निर्गत्य स्वीयदुहितृभ्यां
३१ सार्द्धं गिरौ न्युवास; ततः स तस्य द्वे कन्ये च गुहायां ऊषुः। अनन्तरं
तस्य ज्येष्ठा कन्या कनिष्ठां जगाद, आवयोः पिता वृद्धः, किञ्च संसा-

रिकव्यवहारानुसारेण आवामुपगन्तुम् अस्मिन् देशे कोपि पुरुषो
नास्ति। आगच्छावां पितरं गोस्तनीरसं पाययावः पितुर्वंशरक्षार्थं तेन सार्द्धं ३२
शयावहै च। अपरं तस्यां रजन्यां ते स्वपितरं द्राक्षारसं पाययामासतुः ३३
तस्य ज्येष्ठा कन्या गत्वा पित्रा साकं सुष्वाप च, किन्तु सा यत् सुष्वाप
उत्थाय जगाम च, तत् लोट् न बुबुधे। परेऽहनि सा ज्येष्ठा कनिष्ठा- ३४
माह, पश्याहं गतरजन्यां पित्रा सार्द्धम् अस्वपं; आगच्छाद्य यामि-
न्यामपि पितरं द्राक्षारसं पाययावः; ततस्त्वं पितुर्वंशरक्षार्थं गत्वा तेन
सार्द्धं शेष्व। तदा तस्यां रजन्यामपि पितरं गोस्तनीरसं पाययामासतुः, ३५
तस्य कनिष्ठा कन्या तेन सार्द्धं सुष्वाप च; किन्तु तया यत् शयितं उत्थाय
गतञ्च तत् लोट् न विदामास। इत्थं लोटो द्वेएव कन्ये स्वपितृतो ३६
गर्भिण्यौ बभूवतुः। अनन्तरं ज्येष्ठा कन्या पुत्त्रं प्रसूय तस्य नाम मोयाब् ३७
चक्रे; स इदानीन्तनानां मोयावीयनराणाम् आदिपिता। कनिष्ठापि ३८
कन्या पुत्त्रं प्रसूय तस्य नाम विनम्मि चक्रे, स इदानीन्तनानाम् अम्मो-
नीयनराणाम् आदिपिता।

---

२० विंशतितमोऽध्यायः।

१ इब्राहीमः स्वभार्य्याया भगिनीकथनात् तद्भार्य्याया अवीमेलकाग्टहीतात्वं, स्वप्ने ईश्व-
रभर्त्सनात् इब्राहीमो जायाया दानञ्च।

अनन्तरम् इब्राहीम् तस्माद् दक्षिणदेशं प्रति गत्वा कादेशशूरो १
र्मध्यस्थितगिररप्रदेशं प्रविश्य न्यवसत्। किन्तु इब्राहीम् स्वजायां सारां २
प्रति कथयामास, सा मम भगिनी, इति कारणात् गिररो राजा अवी-
मेलक् नरान् प्रहित्य सारां जग्राह। ततो यामिन्याम् ईश्वरः स्वप्ने निक- ३
षावीमेलकं आगत्य जगाद, पश्येयं त्वया ग्टहीता योषित् तव म्टत्युहेतुः,
यतः सा स्वामिनोढा। किन्त्ववीमेलक् तामनुपगत्य बभाषे, हे प्रभो निर्दो- ४
षामपि जातिमेकां किं विनाशयिष्यसि? एषा मम भगिनीति कथां किं स
पुमान् मह्यं नाकथयत्? किञ्च ममैष भ्रातेति कथां किमेषा नाकथयत्? ५
अतो मनसः सारल्येन हस्तयो र्निर्दोषत्वेन च कार्य्यमिदम् अकरवं।
तदानीम् ईश्वरः स्वप्ने तमाचख्यौ, त्वया मनसः सरलत्वेन कार्य्यमेतद् ६
अकारीति विज्ञाय तां स्प्रष्टुं त्वां निवार्य्य मद्विरुद्धं कलुषकरणात् त्वां
न्यवर्त्तयम्। अत इदानीं तस्य मनुजस्य जायां परावृत्य देहि, यतः स ७
भविष्यद्वक्ता; त्वन्निमित्तं प्रार्थयिष्यते, तेन त्वं जीविष्यसि; यदि न

८ ददासि तां, तर्हि त्वं सपरिवारोऽवश्यं मरिष्यसीति जानीहि। अन-
न्तरम् अबीमेलक् प्रत्यूष उत्थाय भृत्यानाहूय तान् सकलवृत्तान्तान् तेषां
९ कर्णगोचरे बभाषे; तदा तेऽतीव बिभयाञ्चक्रुः। ततः परम् अबीमेलक्
इब्राहीमम् आहूय जगाद, त्वयास्मान् प्रति किमिदं व्यवहृतं? मया को
दोषः कृतः, येन त्वं मां प्रति मम प्रजाः प्रति च महापराधं घटयितुम्
१० ऐच्छः? त्वं मां प्रत्यकर्त्तव्यं कर्म्माकरोः। अबीमेलक् इब्राहीमम् अपर-
११ मप्यवदत्, त्वं किं विलोक्य कर्म्मैतत् कृतवान्; तदानीम् इब्राहीम् कथ-
यामास, देशेऽस्मिन् ईश्वरात् किमपि भयं न विद्यते, इमे मम पत्नीलो-
१२ भात् मां विनाशयिष्यन्तीति मया शङ्कितं; किञ्च सा मम भगिन्यपि
भवति, यतः सा मम पितुः कन्या, नतु मातुः कन्या, किञ्च मम भार्य्याभवत्।
१३ यदेश्वरो मां पैतृकात् गेहाद् अभ्रमयत, तदानीम् अहं तां भाषित-
वान् त्वं मां प्रतीममनुग्रहं कुरु, आवां यद्यत् स्थानं यास्यावः तत्र तत्र
१४ ममायं भ्रातेति मां परिचाययिष्यसि। तदानीम् अबीमेलक् मेषगो-
दासदासीरानाय्य इब्राहीमे ददौ, तदीयजायां साराञ्च तस्मिन् समर्प-
१५ यामास। अनन्तरम् अबीमेलक् जगाद, पश्यैते मम देशास्तव गोचरा
१६ विद्यन्ते; तव यत्रेच्छा तत्र निवस। साराञ्च बभाषे, पश्य, त्वयान्यैः
सर्व्वैश्च यद् घटितं, तत् कारणात् तव भ्रात्रे सहस्रं रूप्यमुद्राः प्राय-
१७ श्चित्तदानं मयादीयन्त; इत्थम् अभर्त्स्यत सा। ततः परम् इब्राहीमा
ईश्वरे प्रार्थिते ईश्वरेणाबीमेलक् तस्य जाया तस्य दास्यश्च स्वस्था अक्रि-
१८ यन्त, ततस्ताः प्रासूयन्त। यतः परमेश्वर इब्राहीमो जायायाः सारायाः
हेतोः अबीमेलको गेहस्थितानां गर्भान् रोधयामास।

२१ एकविंशतितमोऽध्यायः।

१ इस्हाको जननं स्तन्यत्यजनं ९ हाजिरायां दूरीकृतायां सत्यां दूतेन तस्याः शमनं
२२ इब्राहीमा सार्द्धम् अबीमेलको नियमनिर्णयनं ३३ बेर्शेबायां इब्राहीमा प्रार्थनञ्च।

१ अपरं परमेश्वरः स्ववाक्यानुसारतः सारां प्रति मनो निधाय स्वीयां
२ प्रतिज्ञां फलयामास। ततः सारा इब्राहीमो वार्द्धक्यएव गर्भिणी भूत्वा
३ ईश्वरेण निरूपितकाले पुत्त्रं प्रसुषुवे। तदानीम् इब्राहीम् सारायाः गर्भ-
४ जातस्य तस्य पुत्त्रस्य नामधेयम् इस्हाक् (हास्य) इति चक्रे। तत ईश्वरा-
५ देशानुसारात् तत्पुत्त्रस्येस्हाकोऽष्टदिनवयसि त्वचं चिच्छेद। इब्राहीमः-
६ शतवत्सरवयसि तस्य पुत्त्र इस्हाक् जज्ञे। अपरञ्च सारा कथयामास, माम्

ईश्वरोऽहासयत्, इति श्रुत्वा सर्व्वे माम् उद्दिश्य हसिष्यन्ति। सा पुनः ७
कथयामास, सारा पुत्त्रान् स्तन्यं पाययिष्यतीति वाचम् इब्राहीमं को
वक्तुम् अशक्नत्? यतोऽहं इदानीं तस्य वार्द्धक्ये पुत्त्रं प्रासूये। अनन्तरं बाल ८
एधित्वा स्तन्यं तत्याज; यद्दिने चेस्हाक् स्तन्यपानं तत्याज, तद्दिने
इब्राहीम् महाभोज्यम् आसादयामास।

अनन्तरं मिसरीय हाजिराया गर्भजात इब्राहीमः पुत्त्रः परिहस- ९
ति, तद् दृष्ट्वा सारा इब्राहीमं बभाषे, त्वम् इमां दासीं अस्याः पुत्त्रञ्च १०
अपसारय; एष दासीपुत्त्रो मत्पुत्त्रेणेसहाका समं नोत्तराधिकारी भवि-
ष्यति। किन्तु वाचमिमां निशम्य इब्राहीम् स्वपुत्त्रनिमित्तम् अतीवदुःखी ११
बभूव। तदानीम् ईश्वर इब्राहीमम् उवाच, स्वदास्याश्च निमित्तं त्वं मा
दुःखी भव; सारा तुभ्यं यत् कथयति, तस्यास्तद्वाक्ये मनो निधेहि; यत १२
इसहाकि तव वंशो विख्यास्यति। एष दासीपुत्त्रस्तव वंश, एतत्कारणात् १३
तस्मादपि जातिमेकाम् उत्पादयिष्यामि। अत इब्राहीम् प्रत्यूष उत्थाय १४
पूपान् तोयपूर्णां कुतूञ्च गृहीत्वा हाजिरायाः स्कन्धे निदधे, बालकञ्च
दत्त्वा तां विससर्ज। ततः सा प्रस्थाय बेर्शेवानामके प्रान्तरे बभ्राम।
ततः परं कुत्वास्तोये निःशेषे सति हाजिरा स्तम्बतले बालं निधाय १५
तस्य सम्मुखात् शरैकक्षेपाद् दूरं गत्वा समुपविवेश, किन्तु यथाहं १६
बालकस्य मृतिं न पश्येयमिति कथयित्वा बालकस्य सम्मुखात् दूरं
उपविश्य प्रोच्चैः चक्रन्द। तदानीम् ईश्वरो बालकस्य रवं शुश्राव, तदा १७
ईश्वरीयदूतो नभस आहूय हाजिरां जगाद, हे हाजिरे, तव किमभूत्?
मा भैषीः, तत्र स्थाने स्थितस्य बालकस्य क्रन्दनम् ईश्वर आकर्णयत्, १८
त्वमुत्थाय बालकम् उत्थाप्य कराभ्यां धारय; तस्मादहं महाजातिमेकाम्
उत्पादयिष्यामि। तदानीम् ईश्वरेण तस्या लोचनयोः प्रसन्नीकृतयोः १९
सा सतोयप्रहिं ददर्श; तदन्तिकं गत्वा च तोयेन कुतूं पूरयित्वानीय
बालकं पाययामास। तत ईश्वरो बालकस्य सहायो बभूव, ततः स २०
क्रमश एधमानः प्रान्तरे वासात् धनुर्द्धरो बभूव। किञ्च पारन्नाम्नि २१
प्रान्तरे वसतिं चक्रे। अनन्तरं तस्य माता मिसरदेशीयां कन्यां तमु- २२
द्वाहयामास।

तस्मिन् काले अबीमेलक् फीखोल् नामा तस्य सेनापतिश्च इब्राहीमं २३
व्याजहार, ईश्वरः सकलकार्य्ये तव सहाय आस्ते। अतस्त्वं मां प्रति २४
मम पुत्त्रपौत्त्रांश्च प्रति विश्वासघातित्वं न करिष्यसि; किञ्च त्वां प्रति

यथानुग्रहो मया कृतस्तदनुसारेण मां प्रति तव प्रवासस्थानमेतं देशञ्च
प्रति तथैवानुग्रहं करिष्यसीति वचनं मम साक्षात् ईश्वरस्य शपथं
२५ कृत्वा ब्रूहि। तत इब्राहीम् आचचक्षे, तमेव शपथं करिष्यामि। किन्त्व-
वीमेलको भृत्या इब्राहीमः सतोयं प्रहिं बलात् अध्यकुर्व्वन्, तस्मात्
२६ इब्राहीम् अवीमेलकं भर्त्सयाञ्चक्रे। ततोऽवीमेलक् उवाच, कस्तत्
केन कृतं तदहं न वेद्मि, त्वयाप्यहं न विज्ञापितः, किञ्च केवलमद्याहं
२७ श्रुतवानेतत्। अनन्तरं इब्राहीम् मेषान् गाश्च गृहीत्वा अवीमेलके
२८ प्रददौ किञ्च तौ द्वौ नियममेकं स्थिरीकृतवन्तौ। अपरम् इब्राहीम् सप्त-
२९ मेषशावकान् पृथक् कृत्वा निदधे। तदानीम् अवीमेलक् तं पप्रच्छ त्वया
३० केनाशयेन सप्तैते मेषशावकाः पृथङ्निहिताः? इब्राहीम् प्रतिजगाद,
एष प्रहि मया खातस्तत्प्रमाणार्थं मत्त एतान् सप्त मेषशावकान् प्रति-
३१ गृहाण। अतएव तस्य स्थानस्य नाम वेर्श्शेवा (शपथीयकूपइति) जातं,
३२ यतस्तस्मिन् स्थाने उभाभ्यां शपथोऽकारि। इत्थं वेर्श्शेवायां नियमे
निर्णीते, अवीमेलक् तस्य फीखोल्नामा सेनापतिश्च उत्थाय पिलेष्टीयानां
देशं प्रत्याजग्मतुः।
३३ अनन्तरम् इब्राहीम् तद्वेर्श्शेवायाः सन्निधावुपवनं कृत्वा तत्र नित्य-
३४ स्थायिनः प्रभोः परमेश्वरस्य नामनि प्रार्थयाञ्चक्रे, तत इब्राहीम् पिलेष्टी-
यानां देशे बहुकालं प्रोवास।

---

२२ द्वाविंशतितमोऽध्यायः।

१ इब्राहीमः स्वपुत्त्रमिस्हाकं बलिं दातुम् आज्ञापनं तत्र प्रवृत्ते ईश्वरीयदूतेन निषेधनं १५ तस्मात् कर्म्मण ईश्वरस्याशीर्व्वदनं २० इब्राहीमो भ्रातुर्नाहोरो वंशराजिश्च।

१ एतासां घटनानां पश्चात् ईश्वर इब्राहीमम् परीक्षितुम् उवाच,
२ हे इब्राहीम्। ततः सः प्रतिजगाद, पश्याहमुपतिष्ठामि। तदानीं स
कथितवान्, त्वं निजपुत्त्रम् अर्थात् यस्मिन् अद्वितीयपुत्त्रे इस्हाकि
प्रीणासि तं गृहीत्वा मोरियादेशं याहि, किञ्च तत्रत्यं यं धराधरं वदि-
३ ष्याम्यहं, तस्मिन् धराधरे तं बलिं दत्त्वा जुहुधि। तत इब्राहीम् प्रत्यूष
उत्थाय गर्दभं सज्जयित्वा द्वौ भृत्यौ पुत्त्रमिस्हाकञ्च सङ्गिनः कृतवान्;
किञ्च होमार्थं काष्ठे कृत्ते सति स उत्थाय ईश्वरेण निर्दिष्टं स्थानं
४ जगाम। अनन्तरं तृतीये दिवसे इब्राहीम् लोचने उन्मील्य दूरात्
५ तत् स्थानं ददर्श। तदानीम् इब्राहीम् भृत्यौ अवदत्, यूवामत्र गर्दभेन

सार्द्धं तिष्ठतं; अहं बालकश्च द्वौ तत् स्थानं इत्याराधयावः; ततः
परं युवयोः समीपम् आगमिष्यावः। तदानीम् इब्राहीम् यज्ञकाष्ठम् ६
आदाय स्वपुत्रस्य इस्हाकः स्कन्धे निधाय करेण वह्निं असिञ्च गृहीत-
वान्; पश्चाद् उभौ मिलित्वा चेलतुः। अपरम् इस्हाक् स्वतातम् ७
इब्राहीमम् आहूय जगाद, हे मत्तात! ततः स प्रत्युवाच, हे मदा-
त्मज, अहमुपतिष्ठामि। तदा स पप्रच्छ, वह्निमिन्धनञ्च पश्य, किन्तु
होतुं मेषशावकः कुत्र? तत इब्राहीम् कथयाञ्चकार, हे मदात्मज ८
होतुं मेषशावकम् ईश्वरः स्वयं योजयिष्यति; पश्चाद् उभौ मिलित्वा
चेलतुः। अपरम् ईश्वरेण निर्दिष्टस्थानम् उपस्थाय इब्राहीम् तत्र यज्ञ- ९
वेदिं कृत्वा तदुपरि काष्ठं सज्जयित्वा स्वपुत्रमिस्हाकं बद्धा वेद्याः
काष्ठोपरि निदधे। तत इब्राहीम् करं प्रसार्य्य स्वपुत्रं हन्तुम् असिं १०
जग्राह। एतस्मिन्नन्तरे गगणात् परमेश्वरीयदूतः हे इब्राहीम् हे ११
इब्राहीम् इत्याहूतवान्; ततः स उवाचाहम् उपतिष्ठामि। ततः स १२
कथयामास, त्वमेतस्य यूनः प्रतिकूलं करमुत्तुल्य तस्मिन् किमपि मा-
कार्षीः; यत ईश्वरं प्रति तव भीतिरस्तीति मया बुद्धमिदानीं; यस्मात्
त्वया मह्यं स्वीयमेकमात्रं तनयं दातुम् अनङ्गीकृतं नहि। तदनन्तरं १३
इब्राहीम् लोचने उन्मील्य दृष्टवान् तदा स्वपश्चात् स्तम्बस्थायां वल्ल्यां
बद्धशृङ्गं मेषमेकं वीक्षाञ्चक्रे; तत इब्राहीम् गत्वा तं मेषं गृहीत्वा
निजपुत्रस्य विनिमयात् होतुम् उत्ससर्ज। किञ्च इब्राहीम् तस्य स्थानस्य
नामधेयम् यिहोवा यिरि (अर्थात् परमेश्वरो द्रक्ष्यतीति) चकार। तस्माद् १४
अद्यापि नरैरुच्यते गिरौ परमेश्वरो योजयिष्यतीति।

अपरञ्च परमेश्वरस्य दूत आकाशात् इब्राहीमं द्वितीयवारं आहूय १५
जगाद, परमेश्वरः कथयति, त्वया मह्यं स्वीयमेकमात्रं पुत्रं दातुम् १६
अनङ्गीकृतं नहि, त्वदी तत्कार्य्यहेतोः स्वनाम्ना शपमानः कथयाम्यहं, १७
त्वामाशिषं गदित्वा गगणस्य भानीव सरित्पतेस्तटे सिकताइव च तवा-
न्वयं वर्द्धयिष्यामि; ते सपत्नानां नगराण्यधिकरिष्यन्ति। किञ्च मेदिनी- १८
स्थिताः सर्व्वजातयस्त्वदन्वयाद् आशिषं लप्स्यन्ते; यतस्त्वया मदीयनि-
देशोऽपाल्यत। तत इब्राहीम् स्वचेटकयोः सन्निधिं परावृत्य गतवान्, १९
तदा ते समुत्थाय मिलित्वा बेर्शेवां वव्रजुः; किञ्च बेर्शेवायाम् इब्राहीम्
न्युवास।

तस्या घटनायाः परं नर एक इब्राहीमं वार्त्तामिमां बभाषे, पश्य, तव २०

२१ नाहोरनाम्नो भ्रातुर्वीर्य्यात् मिल्काया उदरात् पुत्त्रा अजायन्त; तेषां
ज्येष्ठपुत्त्रस्य नामधेयम् ऊष् तस्य भ्राता बूष् अरामः पिता किमुयेल्।
२२ किञ्च केषद् हसोः पिल्दस् यिद्लफ् बिथुयेल्। तस्य बिथुयेलो दुहिता
२३ रिब्का। एतेऽष्टौ जना इब्राहीमो नाहोर्नामकात् भ्रातृतो मिल्काया
२४ उदराद् अजायन्त। अपरं नाहोरो रूमा नामिकाया उपपत्न्या उद-
रात् टेवह् गहम् तहश् माखा अजायन्त।

२३ त्रयोविंशोऽध्यायः।

१ साराया मरणं मक्पेलानाम्नि श्मशाने तस्याः स्थापनं।

१ साराया आयुषो वत्सराः सप्तविंशत्यधिकशतम् आसन्, तस्या आयुष
२ एतेषु वत्सरेषु सत्सु सा किनान् देशस्य किरियथर्व्वोऽर्थतः हिब्रोणे
३ ममार। तत इब्राहीम् सारायै शोचितुं विलपितुञ्च अभ्यन्तरं जगाम।
४ अनन्तरं मृतजायायाः समीपात् उत्थाय गत्वा इब्राहीम् हेतः सन्तानेभ्यः
कथयामास, युष्माकं मध्येऽहं यात्री प्रवासी च नरोऽस्मि, तस्मात् स्वीय-
दृष्टिगोचरात् मृतां जायां श्मशाने स्थापयितुं युष्माकं मध्ये श्मशान-
५ स्थानाधिकृतिं मह्यं दत्त। ततो हेतः सन्ताना इब्राहीमं प्रत्याचख्युः,
६ हे प्रभो, अस्माकं वचनं निशामयतु, भवान् अस्मन्मध्ये प्रबलो राजा;
तस्मादस्माकं श्मशानस्थानमध्ये श्रेष्ठवेश्मनि स्वीयां मृतपत्नीं स्थापयतु
अस्माकं कोपि निजश्मशानवेश्मनि भवतो गतासुजायां स्थापयितुं न
७ निषेत्स्यति। तदानीम् इब्राहीम् उत्थाय तस्मिन् देशे वासिनो हेतीय-
८ सन्तानान् नत्वा संभाष्य कथयाञ्चकार, मद्दर्शनात् गतासुं जायां
श्मशाने स्थापयितुं यदि यूयं सम्मन्यध्वे, तर्हि मम गिरं निशामयत।
९ युष्माभि र्मत्कृते सोहरः पुत्त्र इफ्रोणे निवेद्यतां, मक्पेलायां तस्य
क्षेत्रान्ते या गुहा स तां मह्यं ददातु; तस्या यावन्मूल्यं भवति तावत्
१० आदाय युष्मन्मध्ये श्मशानस्थानमधिकर्त्तुं तां ददातु। तदानीं हेतीय
इफ्रोण् हेतीयसन्तानानां मध्ये उपविशन् तत्र निजनगरद्वारि प्रवि-
११ शतां सर्व्वेषां हेतीयसन्तानानां साक्षाद् इब्राहीमं प्रतिजगाद, भो
मत्प्रभो, मदीयगिरं भवान् निशामयतु, मया तत् क्षेत्रं गुहया सहितं
तुभ्यम् अदायि; अहं स्वजातीयनराणां समक्षमेव तत् तुभ्यमदां,
१२ त्वया स्वीयमृतपत्नी श्मशाने निधीयताम्। तत इब्राहीम् तद्देशीय-
१३ जनान् प्रणम्य तद्देशीयजनानां कर्णगोचरे इफ्रोणं उवाच, यदि त्वं मां

प्रत्यनुगृह्णासि, तर्हि निवेदयामि मदुक्तिम् आकर्णय। अहं तस्य
वप्रस्य मूल्यं वितरामि, त्वया तद् गृह्यतां, पश्चाद् अहं तत्र स्थाने
गतासुं जायां स्थापयिष्यामि। तत इफ्रोन् इब्राहीमं प्रति व्याज- १४
हार, भो मम प्रभो, मद्वचनम् आकर्णय, तस्या भूमे मूल्यं चतुः- १५
शतानि रूप्यमुद्रा एव; ताभिस्तव मम च किं भवितुं शक्नोति? तस्मात्
त्वया स्वीयमृतभार्य्या श्मशाने निधीयताम्। इफ्रोण एनां कथां निशम्य १६
इब्राहीम् हेतः सन्तानानां कर्णगोचरे गदितसंख्यानुसारेण तदानीं
वणिग्भिः परिचालिताः चतुःशतरूप्यमुद्राः तुलया तुलित्वा इफ्रोणे
प्रददौ। अतो मम्र्याः पूर्व्वस्यां मक्पेलायाम् इफ्रोणो यः केदार आसीत्, १७
तस्य मध्ये या गुहा तस्याश्चतुर्दिक्षु सीमायां ये पादपाश्च तेषु सर्व्वेषु
हेतः सन्तानानां समक्षं तन्नगरनिवासिनां समक्षञ्च इब्राहीमः स्वत्वं
निरनायि। अनन्तरं मम्र्याः पूर्व्वस्यां मक्पेलाक्षेत्रस्थितायां गुहायाम् १८
इब्राहीम् स्वभार्य्यायाः सारायाः श्मशानं विदधे। तत् मम्रीस्थानं १९
किनानदेशस्य हिब्रोनि आस्ते। इत्थं हेतः सन्तानैः सा भूमिस्तन्मध्य- २०
स्थिता गुहा चेब्राहीमः श्मशानवेश्मार्थं निरनायि।

---

२४ चतुर्व्विंशतितमोऽध्यायः।

१ इब्राहीमा स्वदासस्य शापनं १० तस्य दासस्य गमनं प्रार्थनञ्च १५ रिब्का साक्षात् करणं ईश्वरस्य धन्यवदनं २८ लावना तस्यातिथ्यकरणं ३१ तेन दासेन रिब्कायाः याचनं तां दातुं लावन्बिथुयेलोः स्वीकारः ५५ दासेन सार्द्धं रिब्कायाः गमनं ६२ इस्हाकः साक्षात् करणञ्च।

बहुलवर्षवयस्त्वाद् इब्राहीम् वृद्धतमो बभूव, किञ्च परमेश्वर इब्रा- १
हीमे सर्व्वकर्म्मण्याशिषं ददौ; स स्वगेहस्य सर्व्वकार्य्याध्यक्षं वृद्धदासं २
बभाषे, विनयेहं त्वं मम जङ्घायां हस्तं निधाय स्वर्गमर्त्त्ययोः प्रभोः पर-
मेश्वरस्य नाम्ना मां प्रति शप, मम पुत्त्रेण विवोढुं ममैतद्वासस्थानस्य ३
किनानीयनराणां कन्यामगृहीत्वा मम देशस्य ज्ञातीनां समीपं गत्वा ४
मम पुत्त्रस्येस्हाकः कृते कन्यामानेष्यसीति। तदानीं स दासस्तं जगाद ५
यदि कापि कन्या मया सार्द्धम् एतं देशम् आयातुं न सम्मन्यते तर्हि त्वं
यस्माद्देशाद्बहिरागतोसि तं देशं किं तव पुत्त्रं नेष्यामि? तत इब्राहीम् ६
कथयामास, सावहितो भव, मम पुत्त्रं तत्र कदापि न नेष्यसि। यतः ७
स्वर्गस्य प्रभुः परमेश्वरो मां पैतृकात् सदनात् जन्मदेशाच्च समानीय,

त्वदीयान्वयाय देशमिमं दास्याम्यहम्, इति शप्तवान्, अतस्तेन तवाग्रे
निजदूते प्रेषिते सति त्वं मम पुत्त्रेण विवोढुं कन्यामेकां तस्मात् स्थानात्
८ आनेष्यसि। किन्तु यदि कापि कन्या त्वया सार्द्धं आयातुं नेच्छति,
तर्हि त्वं तस्मात् शपथात् मोच्यसे; किन्तु मम पुत्त्रं तं देशं न नेष्यसि।
९ तदानीं स दासः स्वीयप्रभोरिब्राहीमो जङ्घायां करं निधाय तदर्थं
तथैव शशाप।
१० तदनन्तरं स दासः स्वप्रभो र्महाङ्गानां मध्यात् दश महाङ्गान् प्रभो
र्नानाविधसम्पत्तिञ्च गृहीत्वा प्रस्थाय अराम्-नहरयिम् देशस्य नाहोर्
११ नगरम् जगाम। ततः सन्ध्यायां यदा कन्या अप उत्तोलयितुम् आग-
च्छन्ति, तदानीं स तस्य नगरस्य वहिः स्थितोदपानं निकषा महाङ्गान्
१२ उपवेश्य स्थापितवान् इदं प्रार्थयत च। हे मम स्वामिन इब्राहीमः प्रभो
परमेश्वर प्रार्थयेहं, मम प्रभुमिब्राहीमं प्रत्यनुगृह्य मामद्य कृतार्थं
१३ कुरु। पश्चाहमेतस्य प्रहेः समीप उत्तिष्ठन्नेव, नगरनिवसतां कन्या
१४ अप उत्तोलयितुम् आयान्ति। अतएव त्वं स्वीयकलशमवरोह्य मामपः
पाययेति मयोच्यमाना काचित् कन्या यदि वदिष्यति पिव तावकीनम-
हाङ्गानपि पाययिष्ये, तर्हि स्वीयदासस्येस्हाकः कृते भवन्निरूपिता कन्या
सैव भवतु, त्वं मम प्रभुं प्रत्यनुगृहीतवानिति तेनैवाहं ज्ञास्यामि।
१५ इमां कथां तस्मिन् कथयति सतीब्राहीमो नाहोराख्यस्य भ्रातुः पत्न्या
मिल्काया गर्भजातो यो विथूयेल् तस्य दुहिता रिब्का स्कन्धे कलशं
१६ वहन्ती वहिराजगाम। सा कन्यातीव सुन्दरी चानूढासीत्, केनापि
१७ पुंसा नोपभुक्ता च। सा प्रहिमवरुह्य कलशं पूरयित्वा उपर्य्यायाति,
तस्मिन्नेवावसरे स दासो धावन् तां साक्षात्कृत्य कथितवान्, अहं विनये
१८ तव कलशात् किञ्चित् तोयं पातुं मह्यं देहि। ततः सा व्याजहार, भो
महेच्छ, पिव, इत्युक्त्वा सा शीघ्रं कलशं करोपर्य्यवरोह्य पातुं तस्मै ददौ।
१९ किञ्च तं पाययित्वा कथितवती, यावत् सर्व्वे महाङ्गा न पिवन्ति, तावत्
२० अहं तेषां कृतेपि तोयमुत्तोलयिष्यामि। ततः सा शीघ्रं निपाने कलशस्य
तोयमवतार्य्य पुनस्तोयमुत्तोलयितुं प्रहेः समीपं धावन्ती गत्वा सर्व्वेषां
२१ महाङ्गानां कृते तोयमुत्तोलयामास। ततः स पुरुषो निरीक्ष्य परमे-
श्वरात् स्वयात्रा सफला भविष्यति नवेति निःशब्दः सन् तत् चिन्तयाञ्च-
२२ कार। महाङ्गानां जलपाने सम्पूर्णे सति स पुरुषस्तस्याः कृतेऽर्द्धमुद्रा-
परिमितसुवर्णस्य नासाभरणं, दशमुद्रापरिमितसुवर्णस्य करवलयद्वयञ्च

गृहीत्वा कथयामास, निवेदयामि, त्वं कस्य कन्यासीति मह्यं कथय।
अस्माकं यामिनीयापनार्थं तव पितुर्निवेशने किं स्थानमास्ते? ततः २२
सा प्रत्युवाच नाहोर औरसस्तुतो मिल्काया गर्भजातो यो बिथूयेल् २४
तस्य कन्याहं। सापरं जगाद, अस्माकं नालानि माषाश्च प्रभूताः २५
सन्ति, यामिनीयापनार्थञ्च स्थानमास्ते। तदानीं स पुमान् उत्तमाङ्गं २६
नमयन् परमेश्वरं प्रणनाम कथयामास च, मम स्वामिन इब्राहीमः प्रभुः २७
परमेश्वरो धन्यो भवतु, यतः स मम स्वामिनं प्रत्यनुग्रहीतुं सत्यमा-
चरितुञ्च न न्यवर्त्तत; परमेश्वरो माञ्च यात्रया मम प्रभो र्ज्ञातिनिवे-
शनम् आनैषीत्।

अपरं सा कन्या धावन्ती स्वमातु र्निवेशनं गत्वा तां कथां ज्ञाप- २८
यामास। लावन्नामा रिब्कायाः सहोदर एक आसीत्; स वहिः २९
प्रह्वेः समीपे तस्य मनुजस्य समीपं धावन् वव्राज। फलतः पुरुषोऽसौ ३०
मह्यम् अमुकीं कथामचकथत्, स्वभगिन्या रिब्काया वदनाद् इति श्रुत्वा,
भगिन्या नासाभरणं करयो र्वलयद्वयञ्च विलोक्य लावन् तस्य पुरुषस्य
सन्निधिं गत्वा प्रह्वेः समीपे महाङ्गैः सार्द्धं तिष्ठन्तं निरीक्ष्य कथयाञ्चकार, ३१
भोः परमेश्वरानुगृहीतमानव, त्वं कुतो वहिस्तिष्ठसि? गेहमायाहि, वेश्म
परिष्कृतमास्ते, महाङ्गानां क्षतेपि स्थानमास्ते। ततः स मनुजो गेहं ३२
गतवान् तदा स तस्य महाङ्गानां सज्जां मोचयित्वा तेभ्यो नालानि माषांश्च
दत्त्वा तस्य तत्सङ्गिमनुजानाञ्च पादप्रक्षालनाय पानीयं ददौ। अपरं ३३
तस्य सम्मुखे भोजनीयान्ने स्थापिते सति स कथयामास, वक्तव्यं वचनं
नोक्त्वा न भक्षिष्यामि; ततो लावन् अकथयत् कथय। तदानीं स वदि- ३४
तुमारेभे, इब्राहीमो दासोहं, परमेश्वरस्य प्रसादात् मम प्रभु र्महान् ३५
मनुजोऽभवत्, परमेश्वरो तस्मै मेषगवादीनां भूरिव्रजान् महाङ्गान्
गर्द्दभान् रूप्याणि सुवर्णानि दासान् दासीश्च व्यतरत्। मम प्रभोः पत्नी ३६
सारा वार्द्धक्ये तस्य पुत्त्रैकं प्रासोष्ट, स च तस्मिन् निजं सर्व्वस्वं समार्प-
यत्। अपरं प्रभु र्मां शापयित्वा कथितवान्, मम पुत्त्रेण विवोढुं मदीय- ३७
दासस्थानकिनानदेशीयानां कामपि कन्यां न गृहीत्वा मम पैटकनिवेशने
ज्ञातीनां समीपं गत्वा मम पुत्त्रार्थं कन्यामानेष्यसि। ततोहं प्रभवे- ३८
ऽकथयं, यदि कापि कन्या मया सार्द्धं नागमिष्यति? ततः सोऽचकथत्, ३९
अहं यस्य परमेश्वरस्य साक्षाद् आचरामि, स त्वया सार्द्धं निजदूतं ४०
प्रहित्य तव यात्रां सफलयिष्यति। ततस्त्वं मम पैटकनिवेशनस्य ४१

ज्ञातीनां मध्यात् मम पुत्त्रार्थं कन्यामानेष्यसि। किन्तु ते चेत् कन्यां न
दास्यन्ति, तदा त्वं शपथात् मोक्ष्यसे; मम ज्ञातीनां सन्निधिं गत्वैव त्वं
४२ शपथात् मोक्ष्यसे। अतोऽद्याहं प्रस्रेः सन्निधिम् आगत्य प्रार्थितवान् इदं हे
४३ मम स्वामिन इब्राहीमः प्रभो परमेश्वर, यदि मया कृतां याच्ञां सफलां
कुर्य्याः तर्हि पश्याहं इदानीमेतस्य साम्बुप्रस्रेः सन्निधौ तिष्ठामि, अतएव
४४ या कन्या तोयमुत्तोलयितुम् आयाति, तव कलशात् किञ्चित् तोयं पातुं
मह्यं देहीति मया प्रोच्यमाना सा यदि वदति, पिव तव महाङ्गानां
कृतेऽपि तोयमुत्तोलयिष्यामि, तर्हि यां कन्यां परमेश्वरो मम प्रभोः
४५ पुत्त्रकृते निरूपितवान्, सैव सा भवतु। एतां कथां मनसि चिन्तित-
४६ वानहं, तस्मिन्नेव काले रिब्का स्कन्धे कलशं गृहीत्वा वहिरागमत्,
किञ्च तयावरुह्य प्रस्रेरप्सूत्तोलितासु मया गदितं, विनयेऽहं मां तोयं
पायय। ततः सा क्षिप्रं स्कन्धात् कलशमवतार्य्य गदितवती, पिव तव
महाङ्गानपि पाययिष्यामि; तदानीं मया तोये पीते सति सा महा-
४७ ङ्गान् अपाययत्। ततो मया साप्रच्छि, त्वं कस्य कन्यासि? ततः सा
प्रत्यवादीत् नाहोर् औरससुतो मिल्कागर्भजातो यो विथुयेल् तस्याहं
दुहिता। तदाहं तस्या नासिकायां स्वर्णाभरणं करयो र्वलयद्वयञ्च पर्य्य-
धापयं। अपरं यो मत्प्रभोः पुत्त्रकृते तस्य भ्रातुः कन्यां ग्रहीतुं मां न्याय्य-
४८ वर्त्मना नीतवान् तमिब्राहीमो मम स्वामिनः प्रभुं परमेश्वरम् अहं प्रह्वः
४९ सन् प्रणम्य धन्यमवादिषम्। अतो यदि यूयं साम्प्रतं यथार्थं मम प्रभुमनु-
गृह्णीथ, तर्हि तद् ब्रूत; यदि नहि तदपि ब्रूत; ततोऽहं दक्षिणं वामं
५० वा यास्यामि। तदा लावनूविथूयेलौ प्रत्यूचतुः, परमेश्वराद् इयं घटना
५१ जाता, तत्र वयं भद्रमभद्रं वा वक्तुं न शक्नुमः। पश्य रिब्केयं तव
सम्मुखे तिष्ठति, एनां गृहीत्वा गम्यतां; तेन परमेश्वरस्य वाक्यानुसा-
५२ रतः सा तव प्रभोः पुत्त्रस्य भार्य्या भवतु। तदानीम् इब्राहीमो भृत्यस्त-
५३ योरिमां कथां श्रुत्वा भूमिस्पृक्शिराः सन् परमेश्वरं प्रणनाम। तदा
स दास रूप्यसुवर्णपात्राणि वासांसि च वहिः कृत्वा रिब्कायै ददौ,
५४ तस्या भ्रात्रे मात्रे च महार्घाणि द्रव्याणि दत्तवान्। पश्चात् स तस्य
सङ्गिनो जनाश्च भुक्त्वा पीत्वा तत्र निशायां न्यवसन्।

५५ अनन्तरं तेषु प्रातः समुत्थाय स्थितेषु स दासः कथितवान, मम प्रभोः
समीपं गन्तुं मां विसृजत। ततो रिब्काया भ्राता माता च जगाद,
कन्येयम् अस्माकं समीपे कतिपयदिनानि तिष्ठतु, यदा दश दिनानि

तिष्ठतु, पश्चात् सा गमिष्यति। किन्तु स तान् अवदत्, मां मा विल- ५६
म्बयत यतः परमेश्वरो मम यात्रां सफलीं कृतवान्, इदानीं प्रभोः
समीपं व्रजितुं मां विसृजत। ततस्ते प्रतिबभाषिरे, वयं कन्यामाहूय ५७
तां पृच्छामः। ततस्ते रिब्काम् आह्वयन् अवदन् च, त्वं किमेतेन ५८
मानुषेण सार्द्धं व्रजिष्यसि? ततः सावादीत्, यास्यामि। तदानीं ते ५९
रिब्कां भगिनीं तस्या धात्रीं इब्राहीमो दासं तदीयमनुजांश्च विसृज्य
रिब्काम् इत्याशिषं जगदुः, त्वमस्माकं भगिनी, बहुसहस्रनराणां ६०
जननी भव, तव वंशः स्वशत्रूणां नगराण्यधिकरोतु; अनन्तरं रिब्का
तस्या दास्यश्च समुत्थाय महाङ्गान् आरुह्य तस्य मनुष्यस्य पश्चात् जग्मुः।
इत्थं स दास रिब्कां गृहीत्वा प्रतस्थे। ६१

अपरं इस्हाक् दक्षिणदेशे वसनात् बेर्लहयरोयी नाम्नि स्थाने ६२
समुपस्थितवान्। स सन्ध्यायां ध्यातुं केदारं जगाम। इति समये ६३
लोचने उन्मील्य वीक्ष्य महाङ्गान् आगच्छतो ददर्श। किञ्च रिब्का ६४
लोचने उन्मील्य इस्हाकं निरीक्ष्य महाङ्गात् अवरुह्य, ततस्तं दासेयं ६५
पप्रच्छ अस्मान् साक्षात् कर्त्तुं क्षेत्रमध्य आयाति कोऽयं पुरुषः? ततो
दासेयः कथयामास, मम प्रभुरयं। अतो रिब्का प्रच्छादनं गृहीत्वा
स्वाम् आच्छादयामास। अनन्तरं स दासेयः स्वकर्म्मणां सर्व्ववृत्तान्तं ६६
इस्हाकं जगाद। तदानीं इस्हाक् रिब्कां गृहीत्वा सारायां मातु- ६७
र्दूष्यम् आनीय ताम् उदुवाह, तस्यां प्रीतवांश्च मातृमरणजस्य शोकस्य
सान्त्वनां लेभे।

२५ पञ्चविंशतितमोऽध्यायः।

१ किटूरया इब्राहीमो वंशराजिः तस्य मरणं श्मशाने स्थापनञ्च ११ इस्हाक् प्रतीश्वरस्याशीर्व्वचनं १२ इस्मायेलो वंशराजिमरणञ्च १९ इस्हाको यमजपुत्रयो र्जननं २७ एषावो व्यवसायकर्म्म ज्येष्ठाधिकारविक्रयश्च।

अनन्तरं इब्राहीम् किटूरानामिकाम् अपरां जायाम् व्युवाह; तस्या १
गर्भे सिम्रन् यक्षन् मिदान मिदियन् यिश्बक् शूह एते पुत्रा जज्ञिरे। २
किञ्च तस्य यक्षन औरसौ शिवादिदनौ जज्ञाते। तस्य दिदनः पुत्रो ३
आशूरीयानां लिटूशियानां लियुम्मीयानाञ्चादिपुरुष आसीत्। अपरं ४
मिदियनः पुत्त्रा ऐफा एफर् हनोक् अबीद् इल्दाया एते सर्व्वे किटू-
रान्वयाः। अनन्तरम् इब्राहीम् इस्हाके निजं सर्व्वस्वं प्रददौ, किन्तू- ५

६ सपत्नीनां पुत्त्रेभ्यः किञ्चिद् दत्त्वा स्वीयजीवनदशायामेव इस्हाकः समी-
७ पात् तान् पूर्व्वदिकस्थे पूर्व्वदेशे स्थातुं विससर्ज। इब्राहीम् पञ्चसप्तत्य-
८ धिकशतवत्सरान् स्वीयजीवनकालान् यापयामास। ततः परं वृद्धः
पूर्णायुश्च सन् उत्तमवार्द्धक्ये प्राणान् परित्यज्य निजलोकानां सन्निधौ
९ समगच्छत। अपरं इस्हाक्-इस्मायेलौ तस्य पुत्त्रौ मम्रेः पूर्व्वं हेतीयसो-
हरः पुत्त्रस्येफ्रोणो भूमिस्थितमक्पेलागुहायां श्मशानवेश्मनि तं स्थाप-
१० यामासतुः। यत इब्राहीम् हेतीयसन्तानेभ्यस्तां भूमिं क्रीतवान्; इब्रा-
हीमस्तस्य जायायाश्च सारायास्तत्र स्थाने श्मशानं बभूव।
११ इब्राहीमो मृतौ सत्याम् ईश्वरस्तस्य पुत्त्रम् इस्हाकम् आशिषं ददौ;
तत इस्हाक् बेर्लहयरोयी नाम्नि स्थाने उवास।
१२ साराया दास्या मिसरीयाया हाजिराया गर्भजात इस्मायेल् नामा
१३ य इब्राहीमः पुत्त्र आसीत् तस्य वंशराजिरयं। नामजन्मनोरनुसारात्
१४ इस्मायेलः सन्तानानां नामान्येतानि। इस्मायेलो ज्येष्ठपुत्त्रो निबायोत्
१५ पश्चात् केदर् अद्बेल् मिब्सम् मिश्म दूमा मसा हदर् तेमा यिटूर्
१६ नाफीश् केदिमा, एते सर्व्वे इस्मायेलः पुत्त्राः; तेषां नामानुसारात्
१७ नगराणि दुर्गाणि चासन्, ते च स्वस्वजात्यनुसारात् द्वादशाधिपतय
आसन्। अनन्तरम् इस्मायेलः सप्तत्रिंशदधिकशतवत्सरवयसि प्राणान्
१८ परित्यज्य स्वीयलोकानां सन्निधौ समगच्छत। ततः परं तस्य सकल-
भ्रातृणां पूर्व्वदिशि वासानुसारात् तदीयसन्ताना हवीलामिसरोः
पूर्व्वस्यां स्थितं शूरमवधिं कृत्वाऽशूरीयानां दिशि न्यवसन्।
१९ इब्राहीमः पुत्त्रस्येस्हाको वंशराजिरयं। इब्राहीमः पुत्त्र इस्हाक्, स
२० इस्हाक् चत्वारिंशद्वत्सरवयसि अरामीयस्य लावनो भगिनी पद्दन्
२१ अरामस्थस्य बिथूयेलः कन्या या रिब्का तां व्युवाह। किन्तु तस्या रिब्-
काया बन्ध्यात्वात् तस्याः पुत्त्रजननार्थम् इस्हाक् परमेश्वरं प्रार्थयाञ्चक्रे।
ततः परमेश्वरेण तदीयप्रार्थनायां श्रुतायां सत्यां तस्य जाया रिब्का
२२ गर्भिणी बभूव। अनन्तरं तस्य गर्भमध्ये पुत्त्राभ्यां समालिङ्गिते
ममैतादृशं कुतोऽभवत्? इति चिन्तयित्वा सा परमेश्वरं प्रष्टुं जगाम।
२३ तदा परमेश्वरस्तां बभाषे, तव गर्भे द्वे जाती आसाते, त्वदीयोदरात्
द्विविधौ वंशौ निःसरिष्यतः; तयोरेक इतरस्मात् बलवान् भविष्यति,
२४ ज्येष्ठश्च कनिष्ठं सेविष्यते। अनन्तरं प्रसूतिकाले सम्पूर्णे सति तस्या
२५ जठरात् यमजपुत्त्रौ बभूवतुः। तयोर्ज्येष्ठो रक्तवर्णोऽभवत् तस्य सर्व्वाङ्गानि

लोमशवसनवत् आसन्। तस्मात् तस्य नामधेयम् एषौ (लोमव्याप्त)
इति चक्रे। तत्क्षणात् परं तस्य पादमूलं धृत्वा तस्यानुजो भूमिष्ठो बभूव। २६
तस्मात् तस्य नाम याकूब् (पदापहारक) इति चक्रे। इस्हाकः षष्टि-
वत्सरवयसि सति पुत्त्रावेतौ यमजौ बभूवतुः।

अनन्तरं बालकयोरेधमानयोः सतोः एषौ मृगयानिपुणो काननवासी २७
चाभवत्; किन्तु याकूब् मृदुर्दूष्यनिवासी चाभवत्। मृगमांसस्याति- २८
स्वादुत्वबोधात् इस्हाक् एषौपुत्त्रे अप्रीयत किन्तु रिब्का याकूबि
समप्रीयत। ततः परम् एकदा एषौः क्षेत्रादागत्य समक्लाम्यत्, तदानीं २९
याकूब् व्यञ्जनम् अपचत्। ततः स याकूबं जगाद निवेदयामि क्लान्तो- ३०
स्म्यहं, रक्तेनानेन व्यञ्जनेन मामाप्यायय। अतः कारणात् तस्य नाम-
धेयम् इदोम् (रक्तवर्ण) इति विख्यातं। तदा याकूब् अवदत् अद्य त्वं ३१
मयि स्वीयज्येष्ठाधिकारं विक्रीणीहि। एषौः प्रतिजगाद पश्येदानीमहं ३२
मृतकल्पो ज्येष्ठाधिकारे मम किं प्रयोजनं? याकूब् उवाच त्वमद्य मम ३३
सन्निधौ शपथं कुरु; ततस्तस्य समीपे शपथं कृत्वा निजज्येष्ठाधिकारं
याकूबि व्यक्रीणात्। तदा याकूब् एषावे पूपं पक्वं रक्तद्विदलञ्च ददौ; स ३४
भुक्त्वा पीत्वाच उत्थाय जगाम। इत्थम् एषौः स्वीयज्येष्ठाधिकारं
तुच्छीचकार।

---

२६ षड्विंशतितमोऽध्यायः।

१ दुर्भिक्षात् इस्हाको गिररनगरगमनं, तत्र स्वीयभार्य्याया भगिनीवदनञ्च १२ इस्हाको धनवृद्धिः १७ प्रहिनिमित्तं दासानां विवादः बेर्शेबायां वसनञ्च २६ इस्हाका सार्द्धं अबीमेलको नियमनिर्णयः ३२ शपथप्रहेः खननं ३४ एषवा बिवाहेन पित्रो र्दुःखीकरणञ्च।

पूर्व्वम् इब्राहीमि विद्यमाने यादृशोऽभवत् तस्मिन् देशे ततोपि १
दुर्भिक्षे उपस्थिते इस्हाक् गिरर देशे पिलेष्टीयानां राजानं अबी-
मेलकम् उपजगाम। परमेश्वरः प्रत्यक्षीभूय तमवदत्, त्वं मिसरदेशं २
मा गाः, यं देशमहं तुभ्यं कथयिष्यामि, तत्र निवस तत्र प्रवस च; ३
ततोहं तव सहायो भवन् त्वामाशिषं वदिष्यामि; अपरं तुभ्यं तव
वंशाय चैतान् सर्व्वान् देशान् दत्त्वा तव पितुरिब्राहीमः सन्निधौ
स्वकृतशपथं सफलं करिष्यामि। अहं गगणस्य तारागणवत् तव वंशम् ४
एधयित्वा तेभ्य एतान् देशान् दास्यामि, तव वंशेन च मेदिनीस्थिताः

५ सर्व्वजातय आशिषं लप्स्यन्ते। यत इब्राहीम् मम वाक्यं संमान्य मम
६ विधानम् आज्ञां विधिं व्यवस्थाञ्च अपालयत्। अनन्तरं इस्हाक् गिररि
न्यवसत्। ततस्तत्स्थानस्थलोकैस्तस्य जायायाः परिचये पृष्टे सोऽवदत्
७ एषा मम भगिनी। यतो रिब्काया अतीव सौन्दर्य्यात् अत्रत्यनराः
तस्याः कृते मां हनिष्यन्तीति कारणात् स तां भार्य्येति वक्तुं बिभया-
८ ञ्चकार। किन्तु तत्र बहुकालमुषिते सति एकदा पिलेष्टीयभूपतिर-
वीमेलक् वातायनद्वारा निरीक्ष्य इस्हाकं स्वजायया रिब्कया सार्द्धं
९ क्रीड़न्तं ददर्श। अतोऽवीमेलक् राजा इस्हाकम् आहूय जगाद, सा
नारी निश्चितं तव जाया; तर्हि भगिनीति परिचयं कुतस्त्वं अवादीः?
तदानीमिस्हाक् प्रतिजगाद, तस्याः कृते यथा मम मृत्यु र्न जायते
१० तदर्थमवादिषम्। तदानीम् अविमेलक् कथयामास, त्वयास्माभिः साकं
किमिदं व्यवहृतम्? यदि कश्चित् नरस्तव जायया सार्द्धं निःशङ्कम्
११ अशयिष्यत तर्हि त्वमस्मान् दोषिणोऽकरिष्यः। अनन्तरम् अवीमेलक्
सर्व्वान् मनुजान् प्रतीत्यादिदेश, यः कश्चित् एनं मनुजं वा तस्य जायां
स्प्रक्ष्यति स बध्यो भविष्यति।
१२ अनन्तरम् इस्हाक् तस्मिन् देशे कृषिं कृत्वा परमेश्वरस्याशीर्व्वादात्
१३ तस्मिन्नेव वत्सरे शतगुणं लेभे। इत्थं स धनी बभूव, क्रमश उन्नतिमेत्य
१४ महान् बभूव च। ततस्तस्य गोमेषाणां बहुव्रजा बहुदासा दास्यश्च बभूवुः
१५ तेन पिलेष्टीया नरास्तं प्रतीर्षितुमारेभिरे। अपरं तस्य तात इब्राहीमि
विद्यमाने तस्य दासेया यान् यान् प्रहीन् अखनन् पिलेष्टीयनरा
१६ मृद्भिस्तान् सर्व्वान् अपूरयन्। अनन्तरम् अवीमेलक् इस्हाकम् अवदत्
त्वमस्मत् समीपात् याहि, यतस्त्वम् अस्मत्तोऽतीव बलवान् भवसि।
१७ ततः परम् इस्हाक् तस्मात् यात्रां विधाय गिरर् उपत्यकायां दूष्यं
१८ स्थापयित्वा तत्र न्यवसत्। अपरं निजतात इब्राहीमि विद्यमाने ये ये
प्रहयः खाता इब्राहीमो मरणात् परं पिलेष्टीयैः पूरितास्तान् सर्व्वान्
१९ इस्हाक् पुनः खनित्वा निजतातेन कृतनामानि पुनः कृतवान्। अप-
रम् इस्हाको दासेयास्तामुपत्यकां खनित्वा स्रोतोवाहिनं प्रहिमेकं
२० प्रापुः। ततो गिरर्नगरीयाः पशुपालका इस्हाकः पशुपालकैः सार्द्धं
विवदमाना अकथयन्, इदं तोयमस्माकं; तस्मात् इस्हाक् तस्य प्रहे-
२१ र्नाम एषक् (विवाद) इति कृतवान्, यतस्ते तेन सार्द्धं व्यवदन्त। अन-
न्तरं तस्य दासेयैरपरस्मिन् प्रहौ खाते ते ऽतन्निमित्तमपि व्यवदन्त;

तत इस्हाक् तस्य नाम सिट्ना (द्वेषेति) कृतवान्। तस्मात् ते प्रस्थायान्यं २२
प्रहिं चख्नुः तदर्थं तै र्न व्युदिते सति तस्य नाम रिहोबोत् (स्थानं)
इत्यकरोत्; सोऽकथयत् इदानीं परमेश्वरोऽस्मभ्यं स्थानं दत्तवान् वयं
देशे वर्द्धिष्णवो भविष्यामः। अनन्तरं स तस्मात् बेर्शेबां जगाम, २३
तत्र तस्यां रजन्यां परमेश्वरस्तं दर्शनं दत्त्वा जगाद, तव पितुरिब्राहीम २४
ईश्वरोऽहं, मा भैषीः, स्वदासेयस्येब्राहीमः कृते तव सहायोऽहमस्मि,
त्वामाशिषमुक्त्वा तव वंशम् एधयिष्यामि। तत इस्हाक् तत्र यज्ञवेदिं २५
कृत्वा परमेश्वरस्य नाम्नि प्रार्थयाञ्चक्रे। पश्चात् तेन तत्र दूष्ये स्थापिते तस्य
दासेयाः प्रहिमेकं चख्नुः।

अनन्तरम् अवीमेलक् अहूषत्नामकं मित्रं फीखोल् नामकं सेना- २६
पतिञ्च नीत्वा गिरर्नगराद् इस्हाकः समीपमागतवान्। तत इस्- २७
हाक् तान् अवदत्, यूयं मां द्विषन्तो निजमध्यात् दूरीकृतवन्तः,
इदानीं मम सन्निधिं कुत आगमत? तदा ते प्रत्यवदन्, परमेश्वरस्तव २८
सहायोऽस्तीति ज्ञातमस्माभिः, तस्मात् कथयामो वयम् अस्माभिः सार्द्धं
तव शपथ एको भवेत्, अस्माभिः सार्द्धं तवायं नियमश्च भवेत्।
त्वमस्मान् प्रति काञ्चन हिंसां न करिष्यसि, यतो वयं त्वां नास्पृशाम, २९
तव विना मङ्गलं किमपि नाकुर्म्म, त्वां शान्त्या व्यसृजाम च, त्वमिदानी-
मपि परमेश्वरस्यानुग्रहपात्रमसि। तदानीमिस्हाक तेषां कृते भोज्य- ३०
मासादयत ते च बुभुजिरे पपुश्च। ततस्ते प्रत्यूष उत्थाय परस्परं शपथं ३१
चक्रुः तत इस्हाका विसृष्टास्ते क्षेमेण तस्मात् प्रतस्थिरे।

अपरं तस्मिन्नेव दिन इस्हाको दासेया आगत्य खातप्रहे वार्त्तां ३२
निवेदयन्तस्तं जगदुः, तोयमस्माभिरलभि। अतः स तस्य प्रहे नाम ३३
बेर्शेबा (शपथस्य प्रहिरिति) कृतवान, अद्य यावत् तत्स्थानस्थनगरं
बेर्शेबानाम्ना विदितमास्ते।

अनन्तरम् एषौः चत्वारिंशद्वत्सरवयसि हित्तीयबेरे यिहूदीत्ना- ३४
मिकां कन्यां हित्तीयैलोनोवासिमत्नामिकां कन्याञ्च उदुवाह; किन्तु ३५
ते इस्हाको रिब्कायाश्च मनोदुःखदायके बभूवतुः।

---

२७ सप्तविंशोऽध्यायः।

१ मृगमांसार्थम् इस्हाका एषौप्रेषणं ५ याकूबं प्रति रिब्काया मन्त्रणा १४ रिब्काया मन्त्रणया याकूबः स्वापतरर् इस्हाकं भ्रान्तं कृत्वाशीः प्राप्तिः ३० मृगमांसमानी-

याशिषं प्राप्तुम् एषावा चेष्टने कृते पितुरनङ्गीकरणं ४१ एषावः क्रोधेन याकूबं हन्तुमिच्छा च।

१ अनन्तरम् इस्हाकि स्थविरे सति लोचनयो र्निस्तेजस्कत्वात् स्पष्टं
द्रष्टुं न शशाक; स स्वपुत्त्रं ज्येष्ठमेषावमाहूय बभाषे, हे मम तनय;
२ ततः स प्रतिजगाद, पश्याहम् उपस्थितोस्मि। तदानीम् इस्हाक् कथ-
यामास, पश्याहम् इदानीं वर्षिष्ठोस्मि, कर्हि मम मरणं भविष्यति,
३ तदहं न जाने। अतस्त्वम् एतर्हि तुनीरकोदण्डास्त्राणि गृहीत्वा प्रान्तरं
४ गत्वा मत्कृते मृगमांसम् आनय। यादृशेऽहं प्रीये तादृशं सुस्वादु खाद्य-
मासाद्य मत्सन्निधिमानय; ततोहं भुक्त्वा मरणात् पूर्व्वमेव तुभ्यम्
आशिषं प्रदास्यामि।

५ इस्हाका यदेतत् एषौतनयाय कथितं तत् रिब्का शुश्राव। अत
६ एषावि मृगयित्वा मृगमांसम् आनेतुं प्रान्तरं गते सति रिब्का निजपुत्त्रं
याकूबं जगाद, पश्य तव पिता तव भ्रातरम् एषावम् एतां कथाम्
७ अवादीत्, त्वं मृगमांसम् आनीय मदर्थं सुस्वादु खाद्यमासादय, ततोहं
भुक्त्वा मरणात् पूर्व्वं परमेश्वरस्य साक्षात् आशिषं तुभ्यं दास्यामि, तस्येदं
८ वचोऽश्रौषमहं। अतो हे ममात्मज साम्प्रतम् अहं त्वां यद् आज्ञापयामि
९ तन्मदीयं वचो निशामय। त्वमिदानीं व्रजं व्रजित्वा तस्मात् उत्तमं
छागवत्सद्वयम् आनय, ततस्तव तातेन यादृशे प्रीयते तादृशं सुस्वादु
१० खाद्यमहं तदर्थं पक्ष्यामि। त्वं तदादाय निजतातस्य सन्निधिं व्रजिष्यसि,
११ ततस्तेन तत् खादित्वा मरणात् पूर्व्वमेव तुभ्यमाशी वितरिष्यते। तदानीं
याकूब् स्वप्रसूं रिब्काम् आचचक्षे, पश्य मम सगभ एषौ लोमशः किन्तु
१२ निर्लोमाहं, तेन यदि तातो मां स्पृशन् प्रवञ्चकं वेदिष्यति, तर्हि
१३ आशिषं न प्राप्य प्रत्युताभिशापेन ग्रसिष्येहम्। किन्तु तस्य प्रसूरुवाच,
हे तनय सोभिशापो मयि वर्त्ततां, केवलं मम वाचं मन्यमानो व्रजं
व्रजित्वा छागवत्सद्वयम् आनय।

१४ ततो याकूब् अयित्वा तद् गृह्णन् प्रसूसमीपम् आनिनाय; तत्प्रसूश्च
१५ तस्य तातो यादृशे प्रीयते तथा सुस्वादु खाद्यं पपाच। ततो रिब्का
ज्येष्ठपुत्त्रस्यैषावो गेहस्थितं उत्तमवसनमानीय कनिष्ठतनयं याकूबं परि-
१६ धापयामास। अपरं छागवत्सयोः कृत्ती गृहीत्वा तदीयकरौ लोमशून्यं
१७ गलदेशञ्चाववेष्टत्। तत् सुपक्वं सुस्वादु खाद्यं पूपञ्च याकूबो हस्ते ददौ।
१८ तदानीं याकूब् स्वतातं उपागत्य बभाषे, हे, तात; ततः स प्रत्याचख्यौ,

अहमुपस्थितोस्मि, हे वत्स, कस्त्व? याकूब् स्वतातम् उक्तवान्, अहं तव १९
ज्येष्ठतनय एषौः; त्वं मां यदाज्ञापयो मया तदकारि; एतर्हि निवे-
दयामि, त्वमुत्थायोपविशन् मदानीतं मृगमांसं खादित्वा मह्यम् आशिषं
देहि। तत इस्हाक् पुत्त्रं जगाद, हे पुत्त्र, त्वमतीव क्षिप्रं तत् प्राप्तवान्। २०
स उवाच, तव प्रभुः परमेश्वरएव मम समक्षं तदानीतवान्। इस्हाक् २१
याकूबम् अपरमपि जगाद, हे सूनो, मम सन्निधिम् एहि, त्वं मदीय
एषौः सुतो न वेति त्वां स्पृष्ट्वा ज्ञास्यामि। तदानीं याकूब् इस्हाक्- २२
पितुः सन्निधिं इयाय, स च तं स्पृशन् बभाषे, स्वरोयं याकूबो
भवति किन्तु करोयम् एषावः। इत्थं स तं परिचेतुं न शशाक, यतः २३
स एषावः सहजस्य कराविव स्वकरौ सलोमानौ चक्रवान्; अतः स
तस्मायाशिषं दत्तवान्। अनन्तरं तेनोक्तं, त्वं किं ध्रुवं मदीय एषौसुतः? २४
ततः स गदितवान् सएवाहं। तदानीम् इस्हाक् अकथयत, हे २५
आत्मज, खाद्यं समीपमानय, पुत्त्रेणानीतम् ऐणमांसं भुक्त्वा त्वामा-
शिषं प्रभाषे। ततः सन्निधिमानीय दत्ते तत् इस्हाक् बुभुजे द्राक्षा-
रसञ्च आनीय दत्तवान् स तमपि पपौ। अनन्तरं तस्य तात इस्- २६
हाक् आचचक्षे, हे सूनो साम्प्रतं समीपमेत्य मां चुम्ब। तदा तेन २७
समीपं व्रजित्वा तस्मिन् चुम्बिते सति तस्य वसनस्य गन्धम् आघ्राय
तमाशिषं ब्रुवन् अवोचत्, परमेश्वरस्याशीर्युक्तक्षेत्रस्येव मम तनयस्य
सौगन्ध्यम्। अत ईश्वर आकाशीयशिशिरात् उर्व्वरायां भूमावुत्पन्नं २८
शस्यं द्राक्षारसञ्च प्रभूतं तुभ्यं देयात्। नानानरास्त्वदधीना भूयासुः २९
नानाजातीयास्त्वां नम्यासुः स्वीयगोत्रमध्ये त्वं मुख्यो भूयाः, तव मातृतन-
यास्च त्वां नम्यासुः, यस्त्वाम् अभिशपेत सोभिशप्तो भूयात्, यश्च त्वामा-
शिषं भाषेत स आशिषं प्राप्यात्।

इत्थं इस्हाका याकूबे आशिषि दत्तायां सत्यां स्वपितुरिस्हाकः ३०
समक्षात् याकूबि बहिर्गतएव तस्य सहज एषौ मृगयात आगत्य
सुस्वादु खाद्यमासाद्य पितुः समीपमानीय कथयामास, हे पितस्त्वम् ३१
उत्तिष्ठ पुत्त्रानीतमृगमांसं भुक्त्वा मामाशिषं भाषस्व। तदा तस्य तात ३२
इस्हाक् अब्रवीत्, कस्त्वं? सोऽवदत्, अहं तव ज्येष्ठपुत्त्र एषौः।
तदानीम् इस्हाक् अतीवकम्पमान उदितवान्, तर्हि यो मृगयमाणो ३३
मम सन्निधिं मृगपललम् अनैषीत् स कः? अहं तवागमनात् पूर्व्वमेव
तदखादिषं तमाशिषम् अवादिषञ्च, सएव साशीष्कः स्यास्यति।

३४ तदानीम् एषौः पितुरीदृशीं वाचं निशम्य भृशं विलप्य व्याकुलचेता
रोदितुम् आरभ्य तताय कथयामास, हे पितः, आशिषं मह्यमपि
३५ देहि। तत इस्हाक् बभाषे, तव सहज आगत्य वञ्चयन् तव प्राप्त-
३६ व्यामाशिषम् अग्रहीत्। तत एषौरुवाच, तदीयं नाम किं यथार्थं
याकूब् नहि? यतः स वारद्वयं मामवञ्चयत्; पश्च स पूर्व्वं मम ज्येष्ठा-
धिकारं गृहीतवान्, इदानीमपि मम प्राप्तव्यामाशिषम् अग्रहीत्;
३७ स पुनरवोचत् किं मत्कृते त्वयैकाशी न रक्षिता? तदानीम् इस्हाक्
एषावं प्रतिबभाषे, पश्चाहं तं तब प्रभुमकार्षं, तदीयं सकलकुटुम्बञ्च
तदधीनीकृतवान्। अपरं तस्य प्रतिपालनार्थं शस्यानि द्राक्षारसांश्च
३८ दत्तवान्; अतएव हे तनय, त्वदर्थम् इदानीं किं कर्त्तुं शक्नोमि? तत
एषौः पुनरपि स्वतातं जगाद, हे तात तव किं केवलम् एकाशीरासीत्?
३९ हे तात मह्यमप्याशिषं प्रयच्छ। इति ब्रुवन् एषौरुच्चैः चक्रन्द। अन-
न्तरं तस्य तात इस्हाक् इमां वाचं गदितवान्, यस्मिन् देशे भूमि-
रुर्व्वरा न भवति, अगणाच्च शिशिरं न पतति तस्मिन् देशे तव वसति
४० र्भविष्यति। त्वं चन्द्रहासव्यवसायेन कालं यापयिष्यसि, स्वसहजस्य
निघ्नीभविष्यसि च; यदा तु तव प्रभुत्वं भविष्यति, तदा स्वीयग्रीवातः
तस्य युगं भंक्ष्यसि।

४१ इत्थं याकूब् स्वपितृत आशिषम् अलभत, तस्मात् एषौरीर्ष्यन् मनसा
चिन्तयाञ्चकार, पितुरन्तकालः प्रायेणोपतिष्ठति, ततः परं याकूबं
४२ भ्रातरं हनिष्यामि। किन्तु ज्येष्ठपुत्त्रस्यैषाव एतस्मिन् वाक्ये रिवकायाः
कर्णगोचरीभूते, सा कनिष्ठसुतं याकूबं प्रति कथयामास, पश्च तव सगर्भ
एषौ त्वां हन्तुं मनसि निश्चित्य सुस्थिर आस्ते। अतो हे ममात्मज, मद्-
४३ वचनम् आकर्णय। त्वं सम्पलाय्य हारन्नगरस्थितस्य मम सहजलाबनस्य
४४ समीपं याहि। यावत् तव सगर्भस्य क्रोधो न निवर्त्तते तावत्कालं तत्र
४५ तिष्ठ। पश्चात् त्वां प्रति भ्रातुः क्रोधे निवृत्ते त्वं तं प्रति यत् कृतवान्
तस्मिन् तेन विस्मृते च सति नरं प्रहित्य तत्स्थानात् त्वाम् आनेष्यामि;
४६ एकदा द्वौ युवां कुतो हारयिष्ये? ततो रिबका इस्हाकं जगाद,
एताभ्यां हित्तीयकन्याभ्यां मम प्राणा व्याकुलीभवन्ति, यदि याकूब् हित्तीय-
कन्यानाम् अर्थात् एतद्देशीयकन्यानां मध्यात् अनयोस्तुल्यां काञ्चन कन्यां
विवहति, तर्हि मम प्राणधारणे किं सुखं?

२८ अष्टाविंशोऽध्यायः।

१ याकूबः पद्दनराम्देशं प्रेरणं ६ एषाव इस्मायेल् कन्यां विवहनं १० याकूबो यात्राकथनं स्वप्नदर्शनञ्च १८ स्वप्नदर्शनस्थानस्य बैथेल्नामकरणं तत्र स्थाने मानसप्रतिज्ञा च।

अनन्तरम् इस्हाक् याकूबम् आहूय आशिषं बभाषे, इत्यादिश्य च १
तं जगाद, किनान्देशीया कन्या त्वया नोद्वाह्या। उत्तिष्ठ पद्दनरामि २
स्वीयमातामह्या बिथुयेलो गृहं गत्वा तत्र स्वमातुलस्य लावनः काञ्चन
कन्यां विवह। सर्व्वशक्तिमान् ईश्वर आशिषं दत्त्वा त्वां बहुकुलं कर्त्तुं ३
फलवन्तं बहुप्रजञ्च क्रियात्। अपरम् इब्राहीमं प्रति दत्तामाशिषं ४
त्वयि तव वंशे च सफलां क्रियात्; तत ईश्वर इब्राहीमे यं देशं दत्त-
वान् यत्र स्थाने त्वमिदानीं विदेशी, तत्रैव देशे तवाधिकारो भवि-
ष्यति। तत इस्हाक् याकूबं विसृष्टवान् स च पद्दनरामीयबिथुयेलः ५
आत्मजस्य लाबनो, अर्थात् याकूब् एषावो मातू रिब्काया भ्रातुः
समीपं प्रतस्थे।

अपरम् इस्हाक् याकूबम् आशिषम् उक्त्वा विवोढुं पद्दनरामं प्रति ६
विससर्ज; आशीर्व्वदनकाले च किनानीयां कन्यां विवोढुं न्यसेधत्;
ततो याकूब् मातापित्रोराज्ञानुसारात् पद्दनरामं प्रति प्रतस्थिवान्, ७
एषौरिति विलोक्य किनानीयाः कन्याः प्रति स्वपितुरिस्हाकोऽसन्तुष्टिञ्च ८
विज्ञाय तस्य जायाद्वये सत्यपि इस्मायेलः सन्निधिं व्रजित्वा इब्राहीमः ९
पुत्त्रस्येस्मायेलः पुत्त्रीं निवायोतो भगिनीं महलत् नामिकां कन्यां
व्यवहत्।

अनन्तरं याकूब् बेर्शेवातो हारणं प्रति यात्रां कृतवान्। सूर्य्येऽस्तं १०
गते सति स कस्मिन् स्थान उत्तीर्य्य यामिनीं यापयामास; तदानीं स ११
तत्रत्यं पाषाणमेकम् उपधानीकृत्य तत्र निद्रातुम् अशेत। ततः स स्वप्ने १२
सोपानमेकं ददर्श, तस्य मूलं मेदिन्यां स्थितं शिरश्च गगणस्पर्शि, तेने-
श्वरीयदूता अवरोहन्ति आरोहन्ति च, परमेश्वरस्तदुपर्य्युत्थितः कथ- १३
याञ्चकार, परमेश्वरोहं, तव पूर्व्वपुरुषस्येब्राहीम इस्हाकस्येश्वरः, त्वं
यत्र देशे शेषे देशमिमं तुभ्यं तव वंशाय चाहं प्रदास्यामि। तव वंशो १४
धरण्या धूलिवत् असंख्यो भविष्यति, त्वञ्च पूर्व्वपश्चिमोत्तरदक्षिणासु
दिक्षु समेधिष्यसे त्वत्तस्तव वंशाच्च मेदिनीस्थिताः सर्व्वजातय आशिषं १५
लप्स्यन्ते। अपरं त्वं यत्रैव गमिष्यसि, तत्रैव तव सहायो भविष्यामि,

त्वाञ्चावित्वा देशमेतम् आनेष्यामि; किन्तु तव सन्निधौ यदवोचं तत्सर्व्वं
१६ यावन्न सफलं करिष्यामि तावत् त्वां न परित्यक्ष्यामि। अनन्तरं भग्न-
निद्रो याकूब् जागरित्वा जगाद, स्थानेऽस्मिन् अवश्यमीश्वरोऽस्ति,
१७ किन्त्वहं तन्नाज्ञासिषं। भयादपरमपि व्याजहार, स्थानमिदं कीदृक्
भयङ्करम्; इदं स्थानमवश्यम् ईश्वरस्य भवनं स्वर्गद्वारस्वरूपञ्च।
१८ अनन्तरं याकूब् प्रत्यूष उत्थाय उपधानार्थं यं पाषाणं निदधे तं स्तम्भ-
१९ रूपं संस्थाप्य तदुपरि तैलमसिञ्चत्। तस्य स्थानस्य नाम बैथेलम्
(ईश्वरभवनं) चकार; किन्तु पूर्व्वं तस्य स्थानस्य नाम लूस् आसीत्।
२० अपरं स मनसैतत् प्रतिज्ञातवान्, यदीश्वरो मम सहायः सन् मम
गन्तव्याध्वनि मां रक्षेत्, भोजनार्थम् अन्नं परिधानार्थं वसनं दद्याच्च,
२१ पुनः क्षेमेण परावर्त्त्य पितृसदनम् आनयेत्, तर्हि परमेश्वरो मम प्रभु
२२ र्भविष्यति, मया च स्थापितस्यास्य स्तम्भरूपस्य पाषाणस्योपरि ईश्वरी-
यभवनं निर्म्मायिष्यते; अपरं तेन मह्यं यत्किञ्चित् दायिष्यते तस्य
दशमांशम् अहं तस्मै दास्याम्यवश्यम्।

---

२९ ऊनत्रिंशोऽध्यायः।

१ हारन्क्षेत्रे याकूब् उपस्थानं ९ राहेलः समीपे परिचयदानं लावनः सकाशात्
आतिथेयग्रहणं १५ राहेलं प्राप्तुं सप्त वत्सरान् दास्यकर्म्मकरणं २१ भ्रान्त्या राहेल्
विनिमयात् लेयां प्राप्य राहेलः कृते पुनश्च सप्तवत्सरान् दास्यकर्म्मकरणं ३१
लेयाया अपत्योत्पत्तिश्च।

१ ततः परं याकूब् गच्छन् पूर्व्वदेशम् उपस्थाय वीक्षाञ्चक्रे, मध्येप्रान्तरं
२ प्रहेः समीपे मेषाणां त्रयोव्रजाः शयानाः सन्ति; यतो लोकास्तस्य
प्रहेरपो मेषान् पाययन्ति; किन्तु तस्य प्रहेः समीपे सर्व्वेषां पशुव्रजानां
मेलनं यावत् तावत् तस्य प्रहेर्मुखे वृहत्पाषाण एक आच्छादक-
३ स्तिष्ठति। अनन्तरं नरास्तस्मात् पाषाणम् अपसार्य्य मेषव्रजान् अपः
४ पाययन्ति, पुनरपि प्रहेरास्ये पाषाणं निदधति। याकूब् तान् अपृच्छत
५ हे भ्रातरो युष्माकं निवासः कुत्र? ततस्ते प्रत्यूचुः, हारन् नगर्य्यां। तदा
याकूब् पृष्टवान्, यूयं नाहोरः पौत्रं लावनं परिचिनुथ न वा? ते
६ कथयामासुः, परिचिनुमः। याकूबा पृष्टं, स क्षेमेण वर्त्तते? ते प्रत्य-
वोचन्, स क्षेमेण वर्त्तते; पश्यासौ तदीया कन्या राहेल् मेषव्रजम्
७ आदायायाति। तदा याकूब् अवादीत्, इदानीमपि बहुवेला विद्यते,

मेषव्रजानाम् एकत्र मेलनसमयो नाभूत्; यूयं मेषव्रजान् अपः
पाययित्वा पुनरपि चारयितुं नयत। किन्तु ते कथयाञ्चक्रुः, सर्व्वान् मेष- ८
व्रजान् एकत्र मेलयित्वा यावत् प्रहेरास्यात् पाषाणो नापसार्य्यते
तावत् वयं तत् कर्त्तुं न शक्नुमः, तथा भूतएव वयं मेषान् अम्भः
पाययिष्यामः।

याकूब् तैः सार्द्धम् इत्थं कथां कथयति तस्मिन् समये राहेल् आत्मनः ९
पितुः पशुव्रजम् आदाय समुपातिष्ठत्, यतः सा मेषपालिकासीत्।
तदानीं याकूब् आत्ममातुलस्य लावनः कन्यां राहेलं तस्य मातुलस्य १०
पशुव्रजञ्च दृष्ट्वा समीपं व्रजन् प्रहेराननात् पाषाणम् अपसार्य्य मातुलस्य
लावनः पशुव्रजं तोयमपाययत्।

अनन्तरं याकूब् राहेलं चुम्बन् उच्चै रुरोद, तव पितु र्भागिनेयो ११
रिब्कायाः पुत्त्रोऽहमिति परिचाययामास च। तदा राहेल् द्रुतं व्रजित्वा १२
स्वतातं वार्त्ताम् अवदत्। ततो लावन् स्वभागिनेयस्य याकूबो वार्त्तां १३
श्रुत्वा तूर्णं तं साक्षात् कर्त्तुम् वव्राज; तमालिङ्ग्य चुम्बित्वा स्वभवनं
निनाय च; पश्चात् स निजागमनस्य सर्व्ववृत्तान्तं लावनं ज्ञापयामास।
ततो लावन् कथयामास, त्वं ममास्थिमांसस्वरूपोसि; ततो याकूब् तस्य १४
निवेशने मासमेकं अभिन्यवसत्।

अनन्तरं लावन् याकूबं जगाद, त्वं कुटुम्बः सन् किं विना वेतनं १५
मम दास्यकर्म्म करिष्यसि? तस्मात् किं वेतनं ग्रहीष्यसि, तद् ब्रूहि।
तस्य लावनो द्वे दुहितरावास्तां; तयो र्ज्येष्ठाया नाम लेया कनिष्ठाया १६
नाम राहेल्। लेया क्लिन्ननयनासीत् किन्तु राहेल् रूपवती सुन्दरी १७
चासीत्। याकूब् तस्यां राहेल्यप्रीयत, तेन स प्रत्यवादीत् तव कनिष्ठ- १८
कन्याया राहेलः कृते सप्तवत्सरान् दास्यं कर्म्म करिष्यामि। ततो लावन् १९
उवाच, अन्यपात्राय दानात् तुभ्यं दानमुत्तमं भवति, तस्मात् मम सन्निधौ
तिष्ठ। इत्थं स याकूब् राहेलः कृते सप्त वत्सरान् दास्यं कर्म्म कृतवान्; २०
राहेलं प्रति तस्यानुरागात् सप्त वत्सरा अपि तेनाल्पदिनवत् बुबुधिरे।

अनन्तरं याकूब् लावनं जगाद, नियमितः कालः सम्पूर्णोऽभूत्, इदानीं २१
मम भार्य्यां मह्यं देहि, तामहम् उपैष्यामि। ततो लावन् तत्रत्यान् २२
सर्व्वजनान् आमन्त्र्य भोजयित्वा यामिन्यां लेयानामिकां निजदुहितरम् २३
आनीय तस्मै दत्तवान्, तदा याकूब् तामुपजगाम। लावन् निजकन्याया २४
लेयाया दास्यकर्म्म कर्त्तुं सिल्पानामिकां स्वीयदासीं दत्तवान्। किन्तु २५

प्रभाते सति सा लेयेति दृष्ट्वा याकूब् लावनम् उक्तवान्, मया साकं त्वया
किमिदं व्यवहृतं? मया राहेलः कृते किं तव दास्यं कर्म्म नाकारि?
२६ तयात्वे किमर्थं त्वयाहं वञ्चितः? तदा लाबन् अचकथत्, अस्माकमत्र
२७ स्थाने ज्येष्ठायामदत्तायां सत्यां कनिष्ठा न दातव्या। अत इदानीं तस्याः
सप्त दिनानि यापय यदि पश्चात् अपरान् सप्तवत्सरान् मम दास्यं
२८ कर्म्म करिष्यसि, तर्ह्यन्यां कन्यामपि तुभ्यं प्रदास्यामि। ततो याकूब् तथैव
२९ कृतवान्, अर्थात् तस्याः सप्तदिनानि यापितवान्। अनन्तरं लाबन्
दुहितरं राहेलं तं विवाहयामास; राहेलो दास्यकर्म्मकरणार्थं विल्-
३० हानामिकां निजदासीं दत्तवान्। तदानीं स राहेलम् अभिजगाम;
लेयातो राहेलि बहु प्रीतवान् राहेलः कृते पुनः सप्त वत्सरान् दास्यं
कर्म्म कृतवान्।

३१ ततः परमेश्वरो लेयामवज्ञातां ज्ञात्वा तस्यै गर्भधारणशक्तिं दत्तवान्;
३२ किन्तु राहेल् बन्ध्या बभूव। ततो लेया गर्भवती भूत्वा पुत्त्रं प्रसुषुवे,
तस्य च नाम रूबेन् (पुत्त्रं पश्यतेति) कृतवान्, यतः सा कथयामास,
परमेश्वरो निश्चितं मम दुःखमपश्यत्; अतः पतिः साम्प्रतं मयि प्रेष्यते।
३३ अपरं सा पुनर्गर्भवती सती पुत्त्रं प्रसूय गदितवती, अहमवमान्या
विद्ये, परमेश्वर इति ज्ञात्वा मह्यम् इमं तनयञ्च दत्तवान्, पश्चात् तस्य
३४ नाम शिमियोनं (श्रवणं) चक्रे। पुनश्च सा गर्भवती सती पुत्त्रं प्रसूय
कथितवती, एतावतो दिनात् परं स्वामिना मयि समासंक्ष्यते; यतो
मया तस्य त्रयः सुताः प्रासूयन्त, तस्मात् तदीयं नाम लेविं (आसक्तं)
३५ चक्रे। अनन्तरं पुनरपि तस्या गर्भे सति सा सुतं प्रसूय प्रोवाच, इदा-
नीम् अहं परमेश्वरं प्रशंसामि; तस्मात् तदीयं नाम यिहूदां (प्रशंसां)
अकरोत्; ततः परं तस्या गर्भो निवृत्ते।

---

३० त्रिंशत्तमोऽध्यायः।

१ लेयां प्रति राहेल ईर्षणं १४ राहेलो दूदाफलप्रापनं १९ लेयायाः पुनरपत्यजनन
२२ राहेलः सुतस्य यूषफो जननं २५ याकूबि पितृसदनं यातुमिच्छति तेन सार्द्धं
लाबनो नियमनिर्णयनं ३७ सम्पत्तिमाप्तुं याकूब उपायचिन्तनञ्च।

१ अपरं स्वतो याकूबः सुतो न जातवान् इति विलोक्य राहेल्
भगिनीम् ईर्ष्यती याकूबं जगाद, मह्यमपत्यानि देहि, नो चेदहं मरि-
२ ष्यामि। तदा याकूब् राहेले प्रकुप्य प्रोवाच, त्वदीयगर्भफलं न्यवारि

येनेश्वरेण तस्य किमहं प्रतिनिधिः? तदानीं राहेल् बभाषे, तर्हि २
मदीयदासीं बिल्हाम् उपेहि, तया पुत्त्रं प्रसूय मम क्रोड़े दत्ते तेनाहं
पुत्त्रिणी भविष्यामि। एतत् कथयित्वा सा स्वीयदासीं बिल्हां स्वस्वा- ४
मिनं व्यवाहयत्। तदा याकूबि तामुपगते बिल्हा गर्भिणी सती याकूबः ५
सुतमेकं प्रसूतवती। तदानीं राहेल् अवादीत्, ईश्वरो मम विचार- ६
मकार्षीत्, यतः स मम काकूक्तिं निशम्य मह्यं सुतमदात्; अतः सा तस्य
नाम दानं (विचारम्) अकुरुत। अनन्तरं राहेलो बिल्हा दासी पुनर्गर्भं ७
धारयन्ती याकूबो द्वितीयं सुतं प्रसूतवती। तदानीं राहेल् कथयामास, ८
महायत्नेनाहं भगिन्या समं मल्लयुद्धं कृत्वा जितवती; अतः सा तस्य
नाम नप्तालिं (मल्लयुद्धं) कृतवती। अनन्तरं लेया स्वीयगर्भनिवृत्तिम् ९
अवगम्य स्वीयदासीं सिल्पानामिकां आनीय स्वस्वामिनं याकूबं विवाह-
यामास। ततो लेयाया दास्याः सिल्पाया गर्भात् याकूबः सुतएको जज्ञे। १०
तदानीं लेया कथितवती निवहएक आयाति, तस्मात् तस्य नाम गादं ११
(निवहं) कृतवती। अपरं लेयाया दासी सिल्पा याकूबो द्वितीयं सुतं १२
प्रसुषुवे। ततो लेया जगाद, धन्याहं सर्व्वा योषितो मां धन्यां वदि- १३
ष्यन्ति, तस्मात् सा तस्य नाम आशेरं (धन्यं) चकार।

अपरं गोधूमकर्त्तनकाले रूवेन् वहि र्गत्वा क्षेत्रे दूदाफलं प्राप्यानीय १४
स्वजनन्यै लेयायै दत्तवान्; तदा राहेल् लेयाम् अवदत्, तव सुतेना-
नीतानां दूदाफलानां कानिचित् मह्यं देहि। ततः सा बभाषे, त्वया १५
मम स्वामी गृहीत, इति किं क्षुद्रकार्य्यं? त्वं मम सुतस्य दूदाफलमपि
जिघृक्षसि? तदा राहेल् जगाद, तव सुतस्य दूदाफलविनिमयात् सोद्य
यामिन्यां त्वया सह शयिष्यते। तत्पश्चात् सन्ध्याकाले क्षेत्रात् याकूब १६
आगमनकाले लेया तं साक्षात् कर्त्तुं वहि र्गत्वा बभाषे, अद्य यामिन्यां
मया सह त्वया शयितव्यं यतोहं स्वसुतस्य दूदाफलं दत्त्वा त्वां भाटकित-
वती तस्मात् स तस्यां रजन्यां तया सार्द्धं अशेत। तत ईश्वरेण लेयायाः १७
प्रार्थनायां श्रुतायां सत्यां सा पुन र्गर्भिणी भूत्वा याकूबः पञ्चमं पुत्त्रं
प्रसुषुवे। तदा लेया कथयामास, मह्यम् ईश्वरो वेतनम् अददात्, यतो १८
मया स्वामिने दासी दत्ता, तस्मात् सा तस्य नामधेयम् इषाखरं (वेतनं)
कृतवती।

अनन्तरं लेया पुनरपि गर्भं धारयन्ती याकूबः षष्ठं पुत्त्रं प्रसूतवती। १९
तदा लेया कथयाञ्चकार, मह्यम् ईश्वर उत्तमं यौतुकं दत्तवान् इदानीं २०

मम स्वामी मया सार्द्धं वत्स्यति, यतो मत्तस्तस्य षट् सुता अजायन्त;
२१ तस्मात् सा तस्य नाम सिवूलून् (वासं) चकार। तत्पश्चात् तस्याः सुतैकायां
जातायां तस्या नाम सा दीणां कृतवती।
२२ अनन्तरम् ईश्वरो राहेलं स्मरन् तस्याः प्रार्थनां निशम्य गर्भधारण-
२३ शक्तिम् अददात्। तदानीं तस्या गर्भे सति सा सुतं प्रसूय कथितवती,
२४ ममापमानम् इदानीम् ईश्वरो दूरीकृतवान्। ततः सा तस्य नाम यूषफं
(वृद्धिं) कृत्वा कथितवती, परमेश्वरो मह्यम् अपरमेकं सुतं ददातु।
२५ अनन्तरं राहेलो यूषफि जातवति याकूब् लाबने कथयाञ्चकार,
२६ स्वदेशे स्वस्थानं गन्तुं मां विसृज; ययोः कृते तव दास्यं कर्म्माहं अक-
रवं, मम ते योषिते सुतांश्च मयि समर्प्य यातुमादिश; ततो यथा
२७ तव दास्यकर्म्म कृतवान्, तत् त्वं जानासि। तदानीं लाबन् तस्मै
कथयामास, विनयेहं, त्वमिदानीं मय्यनुग्रहं कुरु, यतोहम् अनुभवेन
ज्ञातवान् केवलं तव कृतएव परमेश्वरो मह्यम् आशिषं दत्तवान्।
२८ अतः स उक्तवान् स्वयमेव त्वं यत् वेतनं निरूपयिष्यसि, तदेवाहं तुभ्यं
२९ वितरिष्यामि। तदा याकूब् तस्मै कथितवान्, मया यादृशं तव दास्यं
कर्म्म कृतं, मम सन्निधौ तव पशवश्च यादृग् विद्यन्ते, तदपि त्वया
३० ज्ञायते। यतो मदागमनात् पूर्व्वं तव कनीयसी सम्पत्तिरासीत्; किन्तु
साम्प्रतं प्रभूताभूत्; मदागमनम् आरभ्य परमेश्वरेण तव मङ्गलं
३१ व्यधायि; किन्तु मया निजपरिजनाय कदा सञ्चेष्यते? ततो लाबन्
कथितवान, तुभ्यमहं किं दास्यामि? याकूब् अवदत् त्वं मह्यम् अन्यं
किमपि न दत्त्वा यदि मां प्रति कर्म्मैतत् करोषि, तर्हि तव पशून्
३२ पुनरहं चारयित्वा पालयिष्यामि। अद्य मया तव सर्व्वेषां पशुव्रजानां
मध्यं गत्वा कर्व्वुरवर्णा विचित्रा मेषाः कपिशवर्णा मेषशावका विचित्राः
कर्व्वुरवर्णाश्छागाश्च पृथक् कारिष्यन्ते; ते सर्व्वे मम वेतनरूपा भवि-
३३ ष्यन्ति। इतः परं यदा तव समक्षं मम वेतनमुपस्थास्यति, तदानीं
मम न्यायस्य प्रमाणमेकं भविष्यति; तत्र यदि छागानां मध्ये कर्व्वुर-
वर्णात् विचित्राच्च भिन्ना मेषाणां मध्ये धूमलवर्णात् अन्ये तिष्ठन्ति, तर्हि
३४ ते मम तास्कर्य्यरूपेण गण्या भविष्यन्ति। तदानीं लाबन् उवाच,
३५ भद्रं तव वचनानुसारादेव भविष्यतीति। अपरं स तद्दिनएव विन्दु
विचित्रान् कर्व्वुरवर्णांश्च छागान्, सर्व्वाः विचित्राः कर्व्वुरवर्णाश्छागीश्च
यासु च किञ्चित् शुक्लवर्णम् आसीत्, ताः कपिशवर्णान् सर्व्वमेषांश्च पृथक्

कृत्वा स्वपुत्राणां हस्तेषु समर्प्य दूरं दिनत्रयमार्गं प्रेषयामास; पश्चात् ३६
याकूब् लाबनोऽवशिष्टपशुव्रजान् चारयितुम् आरब्धवान्।
अपरं याकूब् लिब्नी लूसः अर्मोनां वृक्षाणां सरसाः शाखाश्छित्त्वा ३७
तत्त्वचं विमोच्य काष्ठस्य शुक्लरेखा वहिष्कृतवान्। अनन्तरं यदा ३८
पशवो जलं पातुम् आयान्ति, तदानीं ते यथा गर्भं धारयन्ति, तदर्थं
तोयपानकाले पशूनां सङ्गमे तेषां सम्मुखे पानपात्रस्य मध्ये ताः शाखा
उच्चीकृत्य स्थापयितुम् आरभत। अतएव तेषां तासां शाखानां सन्निधौ ३९
गर्भधारणात् विन्दुचित्रिताः कर्व्वुरवर्णा विचित्रा वत्सा अजायन्त।
ततो याकूब् तान् वत्सान् पृथक् कृतवान् लाबनो विन्दुचित्रितानां कपि- ४०
शवर्णानां वत्सानां सम्मुखे निजव्रजं स्थापितवान्; इत्थं स लाबनो
व्रजेन सार्द्धं न निधाय निजव्रजं पृथक् चक्रे। अपरं बलिनः पशवो ४१
यथा शाखासमीपे गर्भान् धारयन्ति, तदर्थं पानभाजनमध्ये पशूनां
समक्षं ताः शाखाः स्थापयामास, किन्तु दुर्ब्बलानां पशूनां समक्षं ४२
नास्थापयत्, तेन यावन्तो बलवन्तः पशवस्तावन्तएव याकूबो बभूवुः।
अतो याकूब् अतिवर्द्धिष्णु र्बभूव अर्थात् तस्य पशुदासदासीमहाङ्गर्द- ४३
भाश्च वहवो बभूवुः।

---

३१ एकत्रिंशत्तमोऽध्यायः।

१ लाबनः समीपात् याकूबः पलायनं १७ लाबनो पुत्तलिकानां राहेलापहरणं २२ याकूब पलायनवार्त्ताश्रवणं २५ तस्य पश्चाद्धावनं ३० दुष्ये देवान्वेषणं ३६ लाबनं प्रति याकूबस्तिरस्कारः ४३ याकूबा सह लाबनो नियमस्य।

अपरं याकूब् अस्माकं तातस्य सर्व्वस्वमग्रहीत्, अस्मत्पितु र्धनात् १
तस्यैतान्यैश्वर्य्याणि जातानीति लाबनः पुत्राणां वचनं याकूब् श्रुतवान्।
लावन् तं प्रति पूर्व्ववत् नहीति च तस्य वदनं विलोक्य याकूब् बुबुधे। २
ततः परमेश्वरो याकूबं बभाषे, त्वम् आत्मनः पैत्रकदेशं ज्ञातीनां सन्निधिं ३
परावृत्य याहि, अहं तव सहायोस्मि। अतो याकूब् प्रान्तरे पशूनां ४
सन्निधौ राहेलं लेयाञ्च समाहूय बभाषे, युवयोः पितुर्वदनं मां प्रति ५
पूर्व्ववत् नहि इत्यहमपश्यं, किन्तु मम पितुरीश्वरो मम सहाय आस्ते।
अहं यथाशक्ति युष्माकं पितु र्दास्यं कर्म्म कृतवान् तत् युवां जानीथो ६
युवयोः पिता मां वञ्चितवान् दशकृत्वो मम वेतनस्यान्यथा कृतवांश्च ७
किन्त्वीश्वरो मम हानिं कर्त्तुं तं न्यवारयत्; यतो विचित्राः सर्व्वे पशव- ८

स्तव वेतनस्वरूपा भविष्यन्तीति वाचं यदि स स्वयम् अवदत्, तर्हि
सर्व्वेभ्यः पशुभ्यएव विचित्राः पशवो जाताः, अपरं रेखाविशिष्टाः पशवः
सर्व्वे तव भविष्यन्ति यद्येतत् अवादीत्, तर्हि सर्व्वएव पशवो रेखायुक्ता
९ बभूवुः। इत्थम् ईश्वरो युवयोः पितुः पशुधनम् आदाय मह्यं दत्तवान्।
१० यतः पशूनां गर्भाधानकाले ऽहं स्वप्ने स्वचक्षुषा दृष्टवान्, व्रजस्य मध्य
योषित्पशूनाम् उपरि यावन्तः पुंपशव आरोहन्ति, तावन्तएव विन्दु-
११ चित्रिता विचित्रा रेखायुक्ताश्च भवन्ति। तदानीम् ईश्वरीयदूतः स्वप्ने मां
याकूब् इत्याहूतवान्, तदा मया प्रतिभाषितम् अहमुपस्थितोस्मीति।
१२ ततः स उक्तवान्, पश्यैतत् योषित्पशूनाम् उपरि यावन्तः पुंपशव
आरोहन्ति, तावन्तएव विन्दुचित्रिता विचित्रा रेखावन्तश्च; यतस्त्वां
१३ प्रति लाबन् यादृग् व्यवहरति, तदहं दृष्टवान्। यत्र स्थाने त्वं स्तम्भेऽ-
भिषेचनं मम सन्निधौ प्रतिश्रवणञ्च कृतवान् तस्य वैथेल् ईश्वरोहम्;
इदानीम् उत्थाय देशमिमं परित्यज्य स्वीयज्ञातीनां देशं परावृत्य
१४ याहि। ततो राहेल्लेये प्रतिजगदतुः, पैतृकनिवेशन आवयोः किं
१५ कोप्यंशोस्ति वाधिकार आस्ते? आवामिदानीं तस्य समीपे विदे-
शिवेन किं गण्यिते नहि? यतः स आवां विक्रीय मूल्यं भुक्तवान्।
१६ तस्मात् ईश्वर आवयोः पितुः सकाशात् यावन्ति धनानि गृहीतवान्,
तावन्ति सर्व्वाण्यावयोः स्वीयापत्यानाञ्च ईश्वरस्तुभ्यं यत् कथितवान् त्वं
तदेव कुरु।
१७ तदानीं याकूब् उत्थाय स्वीयापत्यानि योषितश्च महाङ्गान् आरो-
१८ हयामास, पद्दनरामि तेन ये पशवो याश्च सम्पत्तिरुपार्जिताः किनान्
१९ देशे स्वतातस्येस्हाकः समीपं गन्तुं तान् नीतवान्। तदानीं लाबन्
मेषलोमानि छेत्तुं गतवान्, इत्यवकाशे राहेल् निजतातस्य पुत्तलिका
२० अपजहार। अनन्तरं याकूब् काञ्चन वार्त्ताम् अनुक्त्वा लाबनम् अरामीयं
२१ वञ्चयित्वा तेनाज्ञातं पलायाञ्चक्रे। इत्थं स निजसर्व्वस्वं गृह्णन् अपलायत;
फरात् नद्याः पारं गत्वा गिलियदं गिरिं सम्मुखीकृत्य चलितवान्।
२२ अनन्तरं तृतीयदिवसे लाबन् इत्थं याकूबः पलायनवार्त्तां प्राप्य
२३ निजकुटुम्बान् नीत्वा तस्य पश्चात् सप्तदिनगम्यमार्गं धावन् गिलियद्-
२४ गिरौ तं धृतवान्। किन्त्वीश्वरो रात्रौ स्वप्ने दर्शनं दत्वा अरामीयलाबनं
बभाषे, सावधानो भव, भद्रं विना याकूबम् अभद्रं मा वद।
२५ अनन्तरं लाबन् याकूबं दधार, तदानीं याकूबो दूष्यं पर्व्वतोपरि

स्थापितमासीत् ततो लाबनपि कुटुम्बैः सह गिलियद्पर्व्वतोपरि दूष्यं
स्थापयामास। ततः परं लाबन् याकूबे कथयामास, त्वं कुत ईदृक् कर्म्म २६
कृतवान्? मां वञ्चयित्वा अस्त्रधृतलोकाइव मम कन्ये गृहन् कुत
आगमः? त्वं मां वञ्चयन् कथं गुप्तः पलायितः? मां वार्त्तां नावादीः, २७
तस्यामुक्तायां सत्याम् अहं त्वां आह्लादेन डिण्डिमवीणावाद्यगानपूर्व्वकं
व्यसर्ज्ञ्यम्। त्वं पुत्रान् कन्याश्च चुम्बितुं मह्यं नादाः कर्म्मेदम् अतीव २८
मूढस्य कृतवान्। त्वां हिंसितुं मम करः समर्थो भवति, किन्तु गतायां २९
यामिन्यां तव पितुरीश्वरो मामवदत्, सावधानः सन् विना भद्रम्
किमप्यभद्रं याकूबं मा वादीः।

अपरं निजतातनिवेशनं यातुं तवातीव वाञ्छायां जातायां त्वं यातु- ३०
मुद्यतोसि, तद् अस्तु, किन्तु मम देवाः कुतश्चोरिताः? ततो याकूब् ३१
लाबनं प्रतिजगाद, त्वञ्चेद् बलात् निजकन्ये मत्तो ऽपहरेः, इति
चिन्तयित्वा भीतवानहं। किन्तु मृगयित्वा यस्य निकटे तव देवान् ३२
प्राप्स्यसि, स न जीविष्यति। ममात्र त्वदीयं यदस्ति, तद् अस्माकं
कुटुम्बानां समक्षम् अन्विष्य गृहाण; यतो याकूब् राहेलस्तत् चौर्य्यं
नाजानात्। तदानीं लाबन् याकूबो लेयाया द्वयोर्दास्योश्च दूष्यगृहाणि ३३
गत्वा गवेषयामास, किन्तु न लेभे। अनन्तरं स लेयाया दूष्यतो
राहेलो दूष्यगृहं प्रविवेश। किन्तु राहेल् ताः पुत्तलिका आदाय ३४
महाङ्कस्य सज्जाया अन्तः स्थापयित्वा तदुपरि समुपविवेश; ततो
लाबन् तस्याः सर्व्वं दूष्यगृहं मृगयित्वापि ता न प्राप्तवान्। तदानीं ३५
राहेल् तातम् कथयामास; भवतः समक्षम् उत्थातुं न शक्ताहं हे
प्रभो तेनासन्तुष्टो माभूत् यतोहं स्त्रीधर्म्मिणी विद्ये; तस्मात् तेनान्वि-
ष्यापि पुत्तलिका न प्राप्ताः।

तदानीं याकूब् क्रुध्यन् लाबनं भर्त्सयित्वा जगाद, मम कोऽपराधः किं ३६
पापं वा विद्यते, यत् त्वं प्रज्वलन् मम पश्चात् धावन् आगतवान्? त्वं मम ३७
सर्व्वाणि वस्तूनि मृगयित्वा निजगृहस्य किमपि वस्तु यदि प्राप्तवान्,
तर्हि तद् मम तव च कुटुम्बानां साक्षात् निधेहि, इमे पक्षयोरुभयो
र्विचारं करिष्यन्ति। एतान् विंशतिवत्सरान् यावत् तव गृहे स्थितवा- ३८
नहं; तावत् तव मेषीणां छागीनाञ्च गर्भस्रावोपि नाभवत्; तव व्रजस्य
मेषानप्यहं न भुक्तवान्। वरं हिंस्रजन्तुना यो विदारितः सोपि तव ३९
समीपं मया नानीतः, तां हानिं स्वयमहं सोढवान्; दिवा रात्रौ च

४० यस्योरितस्त्द्दिनिमयो मत्तो गृहीतस्त्वया। अहं दिवसस्योत्तापात्
४१ रात्रेः शीताच्च मृतकल्पोऽभवं; मम लोचनतो निद्रा दूरं गता। इत्थ-
महं विंशतिवत्सरान् यावत् तव गृहे दास्यं कर्म्म कृतवान्, तत्र तव
द्वयोः कन्ययोः कृते चतुर्दश वत्सरान् तव पशूनां कृते षट् वत्सरान्
दास्यवृत्तिं कृतवान्; तन्मध्ये त्वं मम वेतनान्यथा दशकृत्वः कृतवान्।
४२ यो मम पैटक ईश्वरोऽर्थात् इब्राहीम ईश्वर इस्हाकस्य भयस्थानं स
यदि मम सहायो नाभविष्यत् तर्हीदानीं त्वमवश्यं मां रिक्तहस्तं
व्यस्रक्ष्यः। ईश्वरो मम दुःखं करपरिश्रमञ्च दृष्टवान् तस्मात् गतायां
यामिन्यां त्वाम् अतर्जयत्।
४३ तदानीं लाबन् याकूबं प्रत्यवदत्, एताः कन्या ममैव कन्याः, एते
बालका ममैव बालका, एष पशुव्रजो ममैव पशुव्रजः, यद्यत् पश्यसि
४४ तत् सर्व्वं ममैवास्ति। अत एतयो र्निजकन्ययो स्तयोः प्रसूतापत्यानाञ्च
कृते किमिदानीं कर्त्तुं शक्नोमि? किन्त्वागच्छ त्वया मया नियमो निर्णीयते
४५ स तव मम च साक्षी स्थास्यति। तदानीं याकूब् पाषाणमेकं गृहीत्वा
४६ स्तम्भम् अस्थापयत्। याकूब् निजकुटुम्बान् अवदत्, यूयमपि पाषा-
णान् आनीय राशिं कुरुत, ततस्ते पाषाणान् आनीय राशिमेकं
४७ चक्रुः, तत्र स्थाने तस्मिन् राशौ च ते स्वयं बुभुजिरे। अनन्तरं लाबन्
तस्य नाम यिगर्साहदुथां (साक्षिराशिं) चकार, किन्तु याकूब् तस्य
४८ नाम गलियेदं (साक्षिराशिं) चकार। तदानीं लाबन् उवाच, राशि-
रयम् अद्य तव मम च साक्षी विद्यते, तस्मात् तस्य नाम गलियेदं
४९ मिस्पां च (रक्षिणं) कृतवान्। यतः सोऽकथयत्, अस्मासु परस्परम्
५० अदृश्येषु सत्सु परमेश्वरो मम तव च रक्षकः स्थास्यति। यदि त्वं मम
कन्याभ्यां दुःखं ददासि वा मम कन्याभ्याम् इतरां कन्यां विवहसि, तर्हि
तदानीं कस्मिन्नपि समीपे न स्थितेपि मम तव चेश्वरः साक्षी भवि-
५१ ष्यति। लाबन् याकूबम् अपरमप्यवदत्, एतं राशिं वीक्षस्व मया स्थापितं
५२ मम तव च मध्यवर्त्तिनं एतं स्तम्भं पश्य च। अहम् अपकर्त्तुं राशेरस्य
पारमुत्तीर्य्य तव समीपं न गमिष्यामि, तथा त्वमपि अपकर्त्तुं राशेरस्य
स्तम्भस्य च पारमुत्तीर्य्य मम सन्निधिं न यास्यसि, तस्य साक्षी राशिरयं,
५३ तस्य साक्षी स्तम्भोयञ्च। एतस्मिन् इब्राहीम ईश्वरो नाहोर ईश्वर-
स्तयोः पूर्व्वपुरुषाणाञ्चेश्वरो मध्य आवयोर्विचारं करिष्यति; तदानीं
५४ याकूब् स्वपितुरिस्हाको भयस्थानस्य नाम्नि शपथं चकार। ततो याकूब्

तस्मिन् धराधरे बलिं दत्त्वा भोक्तुं निजकुटुम्बान् न्यमन्त्रयत्, तत्र ते
भक्षित्वा धराधरे कृत्स्नां रात्रिं यापयामासुः। अनन्तरं लाबन् प्रत्यूषएव ५५
प्रोत्थाय निजदुहितरौ बालकांश्च चुम्बित्वाशिषं प्रोवाच यात्रां कुर्व्वंश्च
निजदेशं प्रतस्थे।

---

३२ द्वात्रिंशत्तमोऽध्यायः।

१ याकूबो दर्शनं एषावं प्रति वार्त्ताप्रेरणं ६ दूतस्य प्रत्यागमनं याकूबः प्रार्थना १२ उपढौकनासादनं १६ उपढौकनप्रेषणं २४ याकूबो मल्लयुद्धं ३१ खञ्जस्य तस्य नदीपारगमनञ्च।

तदनन्तरं याकूबा यात्रायां कृतायां सत्यां ईश्वरीया दूतास्तस्य १
प्रत्यक्षा बभूवुः। तदानीं याकूब् तान् विलोक्य कथितवान्, ईश्वरीय २
सैन्यानीमानि, तस्मात् तस्य स्थानस्य नाम मह्नयिमं (सैन्यद्वयं) चकार।
ततः परं याकूब् अग्रस्थितसेयीरदेशीयम् इदोमप्रदेशं प्रति भ्रातुरेषावः ३
समीपं दूतान् प्रेरयित्वा तान् इत्याज्ञापयामास, यूयं मम प्रभुमेषावम् ४
इमां वार्त्तां वदत, तव दासो याकूब् त्वां ज्ञापितवान्, अहम् अद्य
यावत् लाबनः समीपे प्रवासं कृत्वागतोस्मि। मम गोमेषगर्द्दभादीनां- ५
व्रजा दासा दास्यश्च विद्यन्ते, ततोहं स्वप्रभोरनुग्रहदृष्टिं प्राप्तुं त्वां प्रति
वार्त्तां प्रहितवान्।
अनन्तरं दूताः प्रत्यागत्य याकूबं जगदु र्वयं तव भ्रातुरेषावः समीपं ६
आगमाम; स चतुःशतानि लोकान् गृहीत्वा त्वां साक्षात् कर्त्तुम् एति।
ततो याकूब् अतीवभीतो दुःखितश्च बभूव सङ्गिनो लोकान् गोमेषादिसर्व्व- ७
व्रजान् महाङ्गांश्च विभज्य द्वौ निवहौ कृत्वा बभाषे एषौरागत्य यदि
निवहमेकं प्रहरिष्यति, तथापीतरो निवहो जीविष्यन् पलायिष्यते। ८
तदानीं याकूब् उक्तवान्, हे मम पितुर् इब्राहीम ईश्वर मम पितुरि- ९
स्हाक ईश्वर, त्वमेव परमेश्वरस्त्वं स्वयं मह्यं कथितवान्, त्वं स्वदेशे
ज्ञातीनां समीपं प्रत्यागच्छ, ततोहं त्वया सार्द्धं साधु व्यवहरिष्यामि।
त्वम् एतं दासेयं प्रति दयां विश्वास्यत्वञ्च यादृक् प्रादुष्कृतवान् तस्य लव- १०
स्यापि नाहं योग्योस्मि; अहं यष्टिमात्रं गृहीत्वा यर्द्दन्धुनीमिमां तीर्ण-
वान्, किन्त्विदानीमहं निवहद्वयस्य पतिरभवम्। इदानीम् भ्रातुरेषावः ११
करात् मामव, यतः स आगत्य चेत् मां मम बालकान् तेषां मातॄश्च

१२ हनिष्यतीति बिभेमि। त्वया कथितं, मया तव क्षेमं कृत्वाऽसङ्ख्यक-
समुद्रसिकतेव तव वंशोऽवश्यम् एधयिष्यते।
१३ अपरं याकूब् तस्यां यामिन्यां तत्र स्थाने तिष्ठन् उपस्थितेभ्यः पशुभ्यः
कतिचित् आदाय भ्रातुरेषावः कृते उपढौकनम् आसादितवान्; अर्थात्
१४ द्वे शते छाग्यो विंशतिश्छागा द्वे शते मेष्यो विंशति मेषा स्त्रिंशत् सवत्सा
१५ दुग्धवत्यो महाङ्ग्यश्चत्वारिंशत् स्त्रीगव्यो दश वृषा विंशति गर्द्दभ्यो दश
गर्द्दभाश्च तेन समासादिताः।
१६ अनन्तरं एकैकस्मिन् दासे एकैकं व्रजं समर्प्य तान् दासान् आज्ञा-
पयामास, यूयं ममाग्रे गच्छत; मध्ये मध्ये स्थानं स्थापयित्वा च व्रजमेकैकं
१७ पृथक् कुरुत। ततः सोऽग्रगामिनं दासेयमित्याज्ञापयामास, मम
भ्रातरेषावि त्वया साक्षात् कृते स यदा प्रक्ष्यति, त्वं कस्य दासेयः?
१८ कुत्र वा यासि? तवाग्रस्थितास्ते सर्व्वे च कस्य? तदानीं प्रतिवक्ष्यसि,
एते सर्व्वे तव दासेयस्य याकूबः स निजप्रभवे एषावे सर्व्वान् एतान्
१९ उपढौकनीकृत्य प्राहात्, पश्य, स पश्चादस्माकं समेति। इत्थं द्वितीय-
तृतीयप्रभृतीनां व्रजानां पश्चाद्गामिनः सर्व्वदासान् आदिशन् जगाद,
२० एषावि साक्षात् भूते यूयमित्थं कथां कथयिष्यथ। अपरं कथयिष्यथ,
पश्य, तव दासेयो याकूब् अस्माकं पश्चात् समायाति। यतः स मनसि
कथयामास, पूर्व्वम् उपढौकनं प्रहित्य तं शान्तयिष्यामि, पश्चात् तं
२१ साक्षात् करिष्यामि, तेन स मां प्रत्यनुग्रहं करिष्यति। तस्मात् तदाग्र
२२ उपढौकनद्रव्यं गतं, किन्तु स्वयं तस्यां यामिन्यां निजनिवहस्य मध्ये
तस्थिवान्। ततो यामिन्यां स उत्थाय स्वस्य द्वे जाये द्वे दास्यौ स्वीयैका-
२३ दशपुत्रांश्च यव्वोक्घाटे पारं तारयितुं निनाय। तान् तटिनीपारं
तारयित्वा निजं सकलद्रव्यं पारं प्रहितवान्।
२४ तदानीं याकूबि तत्रैकाकिनि तिष्ठति सति पुरुष एक आप्रभातं
२५ तेन सार्द्धं मल्लयुद्धेन युयोध, किन्तु तं जेतुं न शशाक। इति वीक्ष्य
स याकूब ऊरुसन्धिम् आजघान। तेन सार्द्धम् इत्थं मल्लयोधनात् याकूब
२६ ऊरुसन्धिः स्थानान्तरीबभूव। ततः-परं स पुरुष उदितवान्, मां त्यज
यतः प्रभातमभूत्; तदानीं याकूब् उक्तवान् मह्यम् अदत्ताशिषं त्वां
२७ न त्यक्ष्याम्यहम्। पुनश्च तेन पुरुषेणावादि, तव किं नाम? स प्रत्युवाच,
२८ याकूब्। स उवाच, त्वं याकूब्नाम्ना पुन र्न विख्यास्यसि, किन्तु इस्रा-
येला (ईश्वरजेत्रा) नाम्ना विख्यास्यसि, यतस्त्वम् ईश्वरेण मानुषेण च

राजवत् युद्धा जितवान्। तदानीं याकूब् जगाद, प्रार्थयेहं भवतः किं २९
नाम? वदतु। स कथितवान्, त्वं किं कृते मम नाम पृच्छसि? ततः
परं तत्र याकूबम् आशिषं प्रोक्तवान्। तदा याकूब् तस्य स्थानस्य नाम ३०
पिनूयेलं (ईश्वरवदनं) कृतवान्; यतः स गदितवान्, मयेश्वरीयवदने
प्रत्यक्षतो दृष्टेपि मम प्राणा अजीवन्।

ततः परं तस्मिन् पिनूयेलः पारं गते भास्कर उदियाय; किन्तु तदी- ३१
योरुसन्धे र्मुक्तत्वात् स ऊरुणा खञ्जो बभूव। अत इस्रायेलन्वयैरद्यापि ३२
नोर्व्वोः सङ्कोचितमुख्यधमनि र्भुज्यते; यतो दूतेन याकूब ऊरो र्वङ्क्षणे
स्पृष्टे तस्य धमनिः सङ्कोचिता बभूव।

३३ त्रयस्त्रिंशत्तमोऽध्यायः।

१ याकूब एषौसाक्षात्करणं १६ याकूबः सुक्कोत्गमनं १८ याकूबः शिखिम्नगर उप-
स्थानं भूमिक्रयणं वेदिनिर्म्माणञ्च।

अनन्तरं याकूब् लोचने उन्मील्य वीक्षमाणश्चतुःशतै र्नरैः सार्द्धम् १
आगच्छन्तम् एषावं ददर्श; ततो निजापत्यैः सार्द्धं लेयां राहेलं द्वे दास्यौ
च पृथक् कृतवान्। फलतोऽग्रे स्वीयापत्यैः सार्द्धं दास्यौ तत्पश्चात् निजा- २
पत्यैः सार्द्धं लेयां सर्व्वशेषे यूषफा सार्द्धं राहेलं नियुज्य स्वयं सर्व्वेषाम् ३
अग्रे गत्वा भूमिष्ठः सन् सप्तकृत्वः प्रणमन् स्वभ्रातुः समीप उपस्थितवान्।
तदानीम् एषौस्तेन सार्द्धं मेलितुं द्रुतमागत्य याकूबः कण्ठं धृत्वालिङ्गन- ४
चुम्बने चकार, तत उभावेव रुरुदतुः। स लोचन उन्मील्य योषितो ५
बालकांश्च विलोक्य पप्रच्छ, इमे तव के? ततः स प्रत्युवाच, ईश्वर-
स्तव दासं प्रति दयां कृत्वा सर्व्वाणीमान्यपत्यानि दत्तवान्। तदानीं ६
दास्यौ तयोरपत्यानि च समीपमागत्य प्राणमन्। अनन्तरं लेया तद- ७
पत्यानि चागत्य प्राणमन्; सर्व्वशेषे यूषफ्राहेलौ समीपमागत्य प्राण-
मताम्। एषौ पृष्टवान् अहमग्रे यान् पशुनिवहान् अदर्शं, ते किन्नि- ८
मित्ताः? याकूब् उदितवान्, प्रभोरनुग्रहप्राप्तिनिमित्ताः। तदानीम् एषौः ९
कथितवान, हे भ्रात मम प्रभूताः सन्ति तव यदास्ते तत् तवैव तिष्ठतु।
याकूबोदितं नेत्थं भवतु, निवेदयामि, यद्यहं भवतो दृष्यानुग्रहं प्राप्तस्तर्हि १०
मम करात् उपढौकनीयं द्रव्यं त्वया गृह्यतां; यतोहम् ईश्वरीयवदन-
दर्शनवत् त्वदीयवदनम् अदर्शं, तेन त्वमपि मयि तुष्टवान्। अत इदानीं ११
भवतः कृते यदुपढौकनीयद्रव्यं आनीयते तद् गृह्यतां मदीयेयं प्रार्थना;

यत ईश्वरो माम् अन्वग्रहीत् मम प्राज्यमास्ते च ; इत्थम् अत्याग्रहं
१२ प्रार्थित एषौ स्तत् जग्राह। अनन्तरम् एषौः कथयामास, आगच्छावां
१३ यावः, युष्माकमग्रेऽहं गच्छामि। ततो याकूब् बभाषे, एते बालकाः कोमला
दुग्धवत्यो मेष्यो गवादिव्रजाश्च मम सङ्गिनः सन्ति, तत् प्रभुः पश्यति ;
१४ दिनैकमात्रमधिकं चालिताः सर्व्वे व्रजा मरिष्यन्ति। अतो निवेदयामि,
हे मम प्रभो, भवान् निजदासेयस्याग्रे यातु ; सेयीर्प्रदेशे मम प्रभोः
समीपोपस्थितिं यावत् पशूनां बालकानाञ्च गमनशक्तेरनुसारतः शनैरहं
१५ तान् नयामि। एषौः कथयामास, तर्हि मम सङ्गिनः कियन्तो मनुजा-
स्तव समीपे निधाय यानि ; याकूब् कथितवान् तेन प्रयोजनं किं?
साम्प्रति केवलं प्रभोरनुग्रहो भवतु।
१६ तत एषौस्तस्मिन्नेवाहनि सेयीरः पथा प्रत्याजगाम। किन्तु याकूब्
१७ सुक्कोतं गत्वा तत्र निजार्थं गेहं पश्वर्थं कुटीश्च निर्म्ममे; तस्मात् तत्
स्थानं सुक्कोत् (कूटीति) व्याख्यत्।
१८ इत्थं याकूब् पद्दनरामः प्रत्यागम्य निर्व्विघ्नं किनान् देशान्तर्गतशि-
१९ खिम एकस्मिन् नगरे उपस्थाय नगरस्य वहि दूष्यं स्थापयामास। अन-
न्तरं यस्मिन् स्थाने दूष्यं स्थापितवान् तद् भूमिखण्डं शिखिमः पितृह-
२० मोरो वंशीयजनेभ्यः शतरूप्यमुद्राभ्य क्रीत्वा तत्र वेदीमेकां निर्म्मितवान्,
तन्नामधेयम् एलिलोहीइस्रायेल् (इस्रायेलः सर्व्वशक्तिमान् ईश्वरः) इति
कृतवांश्च।

---

३४ चतुस्त्रिंशत्तमोऽध्यायः।

१ शिखिमा दीणाया भ्रष्टात्वं लकच्छेदनेन विवाहसम्बन्धनिर्णयः २० हमोरः शिखिमस्य वाक्येन नराणां लकच्छेदाङ्गीकारः २५ लकच्छेदेन पीडितजनान् प्रति याकूबीयसुत-द्वयोराक्रमणं हननं लोठनञ्च।

१ अनन्तरं याकूबो लेयाया जायाया जाता दीणानामिका कन्या तद्देशी-
२ यकन्याः साक्षात् कर्त्तुं वहि र्गता। तदा हिव्वीय हमोरो नामाधिपतेः
३ सुतः शिखिम् तां विलोक्य बलादपहृत्य संगम्य भ्रंशयामास। याकूब-
स्तस्यां कन्यायां दीणायां तस्य मनसो मग्नत्वात् स मनोहरं वच उक्त्वा
४ तस्यां प्रीतवान्। ततः परं शिखिम् निजपितरं हमोरं जगाद, कन्या-
५ मेतां त्वं मां विवाहय। अनन्तरं शिखिम् मम दुहितरं भ्रंशितवान्,
इति कथां याकूब् शुश्राव। तदानीं तस्य पुत्राः प्रान्तरे पशुव्रजान्

अचारयन्; अतो याकूब् तेषामागमनपर्य्यन्तं स्तब्धोऽतिष्ठत्। तदानीं ६
शिखिमः पिता हमोर् याकूबा सार्द्धं संलपितुं जगाम। अपरं याकूबः ७
सुतास्तां वार्त्तां श्रुत्वा प्रान्तराद् आजग्मुः; याकूबः कन्याया बलात्कार-
सङ्गमात् इस्रायेलो विरुद्धं शिखिम इदम् अधमं अकर्त्तव्यञ्च यत्
कर्म्म तस्मात् मनस्तापिताः शोकान्विताश्च बभूवुः। तदानीं हमोर् तैः ८
सार्द्धं संलप्य कथयामास, युष्माकम् अस्यां कन्यायां मम सुतस्य शिखिमो
मन आसजत्; अतो निवेदयामि, मम सुतेन सार्द्धं तां विवाहयत; ९
सार्द्धमस्माभि वैवाहिकसम्बन्धञ्च कुरुत, युष्माकं कन्या अस्मभ्यं दत्त,
अस्माकं कन्या गृह्लीत च। यूयमस्माभिः सार्द्धं वसत, युष्माकं सम्मुखे १०
देशोयमास्ते, तत्र वसत, वाणिज्यं कुरुत, अधिकुरुत च। शिखिम् ११
दीणायाः पितरं भ्रातॄंश्च जगाद, यूयं मां प्रति कृपादृष्टिं कुरुत; ततो
यद् वदिष्यथ, तदेव दास्यामि। यौतुकं दानञ्च यावद् अधिकं प्रार्थयि- १२
ष्यथ युष्माकं वाक्यानुसारात् तावदेव दास्यामि, किन्तु मया सार्द्धम्
एनां कन्यां विवाहयत। तदानीं शिखिमा तेषां दीणाया भगिन्या भ्रंश- १३
नात् याकूबः सुताः शिखिमं तस्य तातं हमोरञ्च छलोक्त्या जगदुः; अत्व- १४
क्छेदिभ्यो वयं निजभगिनीं दातुं न शक्नुम; दाने कृतेऽस्माकम् अप-
यशो भविष्यति। किन्तु वयमिव यूयं सर्व्वे पुरुषा यदि त्वक्छेदिनो १५
भवेत तर्हि पणेनानेन वयमङ्गीकरिष्यामः। युष्मभ्यं निजकन्याः प्रदा- १६
स्यामः, युष्माकं कन्याश्च वयं ग्रहीष्यामः, युष्माभिः सार्द्धं निवसन्त एक-
जातयो भविष्यामः। किन्तु यूयं चेत् त्वक्छेदनेऽस्माकं वचो न शृणुथ १७
तर्हि वयं तां कन्यां गृहीत्वा यास्यामः। तदानीं तेषां कथयानया हमोर् १८
तत्सुतः शिखिमपि तुतुषतुः। अनन्तरं स युवा तत् कर्म्म क्षिप्रं कर्त्तु- १९
मुद्यक्तवान्; यतः स याकूबः कन्यायाम् अतीवान्वरज्यत; स च शिखिम्
निजपितृपरिवारेभ्यः सर्व्वेभ्यो गुरुतर आसीत्।

ततः परं हमोर् तस्य शिखिम् सुतश्च निजनगरस्य द्वारम् आगत्य २०
नगरवासिभिः सार्द्धं संलप्य कथयामासतुः, इमे जना अस्माभिः समं २१
निर्व्विरोधिनः, तस्मात्त इमं देशमधिवसन्तु वाणिज्यमत्र कुर्व्वन्तु च;
यतः पश्यत देशोयं तेषां कृते प्रभूतोस्ति; तेषाञ्च कन्या वयं ग्रहीष्यामः
अस्माकं कन्याश्च तेभ्यो दास्यामः। किन्तु तेषामयं पण आस्ते, अस्माकं २२
मध्ये सर्व्वे पुरुषा यदि तइव छिन्नत्वचो भवन्ति, तर्हि तेऽस्माभिः
सार्द्धम् उषित्वा एकजातयो भवितुं संमन्यन्ते। अपरं तेषां धनानि २३

सम्पत्तयः पशवश्च किमस्माकं न भविष्यन्ति ? अस्माभिस्तेषां वचने-
२४ ऽङ्गीकृते तेऽस्माभिः सार्कं निवत्स्यन्ति। तदानीं तन्नगरद्वारगामिनः
सर्व्वे नरा हमोरस्तत्सुतस्य शिखिमस्य कथामेताम् अमन्यन्त ; तन्नगर-
द्वारगामिनः सर्व्वएव मनुजा छिन्नत्वचो बभूवुः।
२५ अपरं तृतीयदिवसे तेषु पीडितेषु सत्सु दीणायाः सहोदरौ शिमियोन्
लेविश्च याकूब एनौ द्वौ सुतौ खड्गान् गृहीत्वा हठात् नगरं प्रविश्य
२६ सकलान् पुरुषान् निजघ्नतुः। हमोरं तस्य सुतं शिखिमञ्च खड्गाघातेन
२७ हत्वा शिखिमो गृहात् दीणां निन्यतुः। अपरं स्वीयसोदराया भ्रंशनात्
२८ याकूबः सुता हतनराणां समीपम् आगत्य नगरं लोठयामासुः। अपरं
२९ तेषां गोमेषगर्द्दभादीनि नगरक्षेत्रस्थानि सर्व्वद्रव्याणि जगृहुः। अपरं
तेषां शिशून् योषितश्च वन्दीकृत्य तेषां सर्व्वाणि धनानि गेहस्थसर्व्वस्वानि
३० लोठयामासतुः। तदानीं याकूब् शिमियोनं लेविञ्च जगाद, युवामे-
तद्देशीयानां अर्थात् किनानीयपिरिषीयमनुजानां सन्निधौ मां दुर्गन्ध-
स्वरूपं कृत्वा व्याकुलीकृतवन्तौ ; मदीयलोका अल्पा एतस्मात् ते मद्विरुद्धं
३१ मिलित्वा मां हनिष्यन्ति, ततोऽहं सपरिवारो विनंक्ष्यामि। तावूचतु
र्यथा वेश्यया सार्द्धं तथैव स किमस्माकं भगिन्या सार्द्धं व्यवहरेत् ?

---

३५ पञ्चत्रिंशोऽध्यायः।

१ ईश्वरेण याकूबो बैथेलं प्रति प्रेरणं ६ तत्र वेदिनिर्म्माणं दिवोराया मरणं ९ बैथेलि याकूबे ईश्वरस्याशीर्दानं प्रसववेदनाकष्टात् राहेलो मरणं २१ याकूबो वंशराजिः २७ इस्हाको मरणं श्मशाने निधानञ्च।

१ अनन्तरम् ईश्वरो याकूबं व्याजहार, त्वमुत्थाय बैथेलं गत्वा तत्र वासं
कुरु; भ्रातुरेषावः समीपात् तव पलायनकाले य ईश्वरस्तुभ्यम् दर्शनमा-
२ शिषञ्च दत्तवान् तमुद्दिश्य तत्र यज्ञवेदिं निर्म्माहि। ततो याकूब् निज-
परिजनान् सङ्गिलोकांश्च अवदत् युष्माकं सन्निधौ यद्देवमूर्त्तय आसते,
३ यूयं ता अपसार्य्य वस्त्राण्यन्यानि परिधाय शुद्ध्यत। अपरं वयमुत्थाय बैथेलं
यामः; य ईश्वरो मदीयदुःखसमये मम प्रार्थनां श्रुत्वा मम गमनमार्गे
४ सहायोऽभवत्, तमुद्दिश्य तत्र यज्ञवेदीमेकां निर्म्मामि। ततस्ते स्वसमी-
पस्थितदेवमूर्त्तिकर्णकुण्डलानि गृहीत्वा याकूबे व्यतरन्, स तान्यादाय
५ शिखिम् देशस्थितैलावृक्षमूले पोथयित्वा ततो यात्रां चकार। किन्तु

चतुर्द्दिक्स्थनगरेषु ऐश्वरिकभयोपस्थितेस्तत्रत्यलोकाः कोपि याकूबः
पुत्त्राणां पश्चात् ताडयितुं न जग्मुः।

अनन्तरं याकूब् तस्य सङ्गिनश्च किनान्देशस्य लूस् नगरम् अर्थात् ६
बैथेलम् आगत्य स यज्ञवेदिं निर्म्माय तस्य स्थानस्य नाम एल् बैथेलं ७
(बैथेल ईश्वरं) कृतवान्; यतो याकूबो भ्रातृभयात् पलायनकाले
ईश्वरस्तस्मिन् स्थाने तस्मै दर्शनं दत्तवान्। अपरं तत्र रिब्काया दास्या ८
दिबोराया मरणे सति बैथेलः समीपस्थालोन् पादपस्य मूले तस्याः
श्मशानवेश्म बभूव; तस्य स्थानस्य नामधेयम् आलोन् बाखूत् (शोकवृक्षः)
इति बभूव।

अनन्तरं याकूबि पद्दनरामः प्रत्यागते सतीश्वरस्तं पुनः संदर्शयामास ९
पुनराशिषञ्च व्याजहार। अपरम् ईश्वरस्तं जगाद, इदानीं तव याकूब् १०
नामास्ते किन्त्वतःपरं याकूब् नाम न स्यास्यति, इस्रायेलिति तव नाम
भविष्यति; ततःपरं तस्य नामधेयम् इस्रायेलं कृतवान्। ईश्वरेण तस्मै ११
पुनरकथ्यत, सर्व्वशक्तिमान् अहमेवेश्वरस्त्वं फलवान् भूत्वा प्रवर्द्धस्व;
त्वत्त एका जातिरिति नहि बहुजातिरुत्पत्स्यते तवौरसा राजानो
जनिष्यन्ते। अपरम् अहम् इब्राहीमे इस्हाके च यं देशं दातुं प्रतिज्ञा- १२
तवान् तं देशं तुभ्यं तव भाविवंशाय च दास्यामि। इत्थं संलप्य तस्मात् १३
ईश्वर ऊर्द्धं जगाम। ततो याकूब् ईश्वरस्य तत्संलपनस्थाने स्तम्भम् १४
एकम् अर्थात् प्रस्तरस्य स्तम्भमेकं संस्थाप्य तदुपरि पेयनैवेद्यं तैलञ्च
सिषेच। अपरं याकूब् ईश्वरेण सार्द्धं संलपनस्थानस्य नाम पुनरपि १५
बैथेल् (ईश्वरगेहं) इति कृतवान्।

अनन्तरं ते बैथेलः प्रतस्थिरे; किन्तु इफ्राथायाम् उपस्थितेरल्पे पथि १६
स्थिते राहेलः प्रसववेदना बभूव, तस्याः प्रसूतौ बहु कष्टञ्च जातम्। ततः १७
प्रसववेदनाया अतिशयत्वे सति धात्री तां बभाषे, मा भैषीस्त्वमिदानी-
मपि सुतं प्रसोष्यसे। ततो मरणकाले प्राणवियोगसमये सा तस्य नाम १८
बिनोनी (कष्टजातपुत्त्रः) इति चकार; किन्तु तस्य तातस्तस्य नाम बि-
न्यामीन् (दक्षिणहस्तपुत्त्रः) इति कृतवान्। इत्थं राहेलो मरणे सति १९
इफ्राथाया अर्थात् बैत्लेहमो गमनमार्गस्य समीपे तस्याः श्मशानस्थानं
बभूव। ततो याकूब् तस्य श्मशानस्योपरि स्तम्भमेकं स्थापयामास, तस्य २०
नामाद्यापि राहेलः श्मशानस्तम्भ इति वदन्ति।

अनन्तरम् इस्रायेल् तत्स्थानात् प्रस्थाय मिग्दलेदरस्य (पशुयूथदुर्गस्य) २१

२२ पारं गत्वा तस्य समीपे दूष्यं स्थापयामास। तस्मिन् देशे निवासकाले
रूवेन् निजतातस्य विल्हानामिकाम् उपपत्नीम् उपगतवान् एतत्
२३ इस्रायेल् श्रुतवान्। याकूबो द्वादशसुतास्तेषां मध्ये लेयागर्भजाता इमे,
रूवेन् ज्येष्ठः, अपरं शिमियोन् लेवि यिहूदा इषाखरः सिबूलून्।
२४ राहेलः सुतौ यूषफ्विन्यामीनौ। अपरं राहेलो विल्हाया दास्याः
२६ सुतौ दान् नप्तालिश्च। लेयायाः सिल्पाया दास्याः सुतौ गाद् आशेरौ,
याकूब एते सुताः पद्दनरामि जज्ञिरे।
२७ अपरम् इब्राहीम् इस्हाक् च यत्र मम्रीस्थाने अर्थात् अर्व्वनगरे
न्यवसतां, अद्य यावत् यच्च हिब्रोणं वदन्ति, तत्र याकूब् निजतातस्येस्-
२८ हाकः समीप उपस्थितवान्। अनन्तरम् इस्हाकि साशीतिशतवत्सर-
२९ वयसि सति स वृद्धः पूर्णायुश्च भवन् प्राणान् त्यक्त्वा निजलोकैः सार्द्धं
संगृहीतोऽभवत्; तस्य सुतावेषौयाकूबौ तं श्मशाने स्थापयामासतुः।

---

३६ षट्त्रिंशत्तमोऽध्यायः।

१ किनान्देशीयस्यैषावो वंशराजिः ६ तस्य सेयीर्पर्व्वतगमनं ९ सेयीर्पर्व्वते तस्य वंशराजिः १५ तस्य पुत्त्रजातानां राज्ञां नामानि २० सेयीरो वंशराजिः २१ इदोमो राज्ञां नामानि ४० एषौजातानां राज्ञां नामानि च।

१ एषावोऽर्थाद् इदोमो वंशराजिरयं। एषौः किनानीयानां द्वे कन्ये
२ अर्थात् हित्तीयैलोनः कन्याम् आदाम् हिव्वीयस्य सिवियोनः पौत्रीम्
३ अनाः कन्याम् अहलीवामां; तदन्याम् वासिमन्नामिकाम् इस्मायेलः
४ कन्यां निवायोतो भगिनीं व्यवहत्। अनन्तरम् आदागर्भाद् इलीफास्
५ वासिमतो गर्भात् रूयेल् च एषाव औरसपुत्त्रौ यज्ञाते। अपरम्
अहलीवामाया गर्भात् यियूश् यालम् कोरहो जज्ञिरे, एषाव एते
सर्व्वसन्तानाः किनानदेशे जज्ञिरे।
६ ततः परम् एषौः स्वीयभार्य्याः सुतान् कन्या गेहस्थितान्यान् सकल-
लोकांश्च स्वकीयपश्वादीन् किनानदेश उपार्जितां सर्व्वसम्पत्तिञ्च गृहीत्वा
७ भ्रातु र्याकूबः सन्निधे र्देशमन्यं प्रतस्थिवान्। यस्मात् तयोः प्रभूतैश्वर्य्य-
सम्भवात् वास एकत्र न संबभूव, तयोः प्रवासदेशश्च पशुधननिदानात्
८ तयो र्भारं वोढुं नाशक्नोत्। इत्थम् एषौः सेयीर्धराधरे न्युवास
तस्यैषावो नामधेयम् इदोमप्यासीत्।
९ अपरं सेयीर् धराधरस्थायीदोमीयानां पूर्व्वपुरुषस्यैषावो वंशराजि-

रयं। एषावः सन्तानानां नामानीमानि। एषाव आदानामिकाया १०
जायाया गर्भजातः सुत इलीफस् वासिमत्नामिकायाः स्त्रिया गर्भजातः
सुतो रूयेल्। अपरम् इलीफसः सुतस्तैमन् ओमार् सिफो गयितम् ११
किनस्। अपरम् एषावः सुतस्येलीफसः तिम्ना नामिकाया उपपत्न्या १२
गर्भजात अमालेक् एते सर्व्वे एषाव आदायाः पत्न्याः पौत्राः। रूयेलः १३
सुतो नहत् सेरह शम्म मिसा इमे एषावो जायाया वासिमतः पौत्राः।
अपरम् एषावोऽहलीवामा या जाया सिवियोनः पौत्री अनाः कन्या १४
तस्या अपत्यानि यियूश् यालम् कोरहः।

एषावः सुतानां राज्ञां वंशराजिः। एषावो ज्येष्ठपुत्रो य इलीफस् १५
तस्य पुत्रो राजा तैमन् भूप ओमार् भूपः सिफो भूपः किनस्;
भूपः कोरहो राजा गयितम् भूपत् अमालेक् एत इलीफसः पुत्रा १६
आदायाः पौत्रा इदोम्देशस्य राजान आसन्। एषावः पुत्रस्य रूयेलः १७
सन्ताना राजा नहत् राजा सेरहो राजा शम्मो राजा मिसा एते
रूयेल औरससुता एषावो वासिमत् जायायाः पौत्रा इदोम्देशस्य
राजान आसन्। अपरम् एषावो अहलीवामाया भार्य्यायाः पुत्रा १८
राजा यियूश् राजा यालम् राजा कोरह एते अनाः कन्या या एषावो
जाया अहलीवामा तस्या गर्भजाता राजानः। एते एषाव अर्थात् १९
इदोम औरसपुत्रा राजानः।

पूर्व्वकाले तद्देशनिवासिनो होरीयसेयीरः सन्तानाः लोटन् शोवल् २०
सिवियोन् अना दिशोन् एत्सर् दीशन्। इमे इदोम्देशीयाः सेयीरः २१
पुत्रा होरीयलोकानां राजान आसन्। लोटनः पुत्रौ होरिहेममौ २२
लोटनस्य तिम्ना नामिका भगिन्यासीत्। अपरं शोवलः पुत्रा अल्वन् २३
मानहत् एवल् शिफो ओनम्। सिवियोनः पुत्रौ अया अनास्च, अयम् २४
अना निर्जपितुः सिवियोनो गर्द्दभचारणसमये वने उष्णतोयस्य प्रस्रवणं
प्राप्तवान्। तस्यानाः पुत्रो दिशोन् कन्या अहलीवामा। दिशोनस्य पुत्रा २५
हिम्दन् इश्वन् यित्रन् किरान्। अपरम् एत्सरस्य पुत्राः विल्हन् २७
सावन् याकन्। दिशनः पुत्रौ ऊस् अरान्। अपरं होरीया राजान २८
इमे राजा लोटन् राजा शोवल् राजा सिवियोन् राजा अना राजा २९
दिशोन् राजा एत्सर् राजा दिशन्। एते सेयीर्देशस्य होरीयवंशीया ३०
राजान आसन्।

अपरम् इस्रायेलः सन्तानानां राजत्वात् पूर्व्वम् इमे इदोमो देशस्य ३१

३२ भूपतय आसन्। वियोरो वेलानामा सुत इदोम्देशं शशास दिन्-
३३ हावानगरञ्च तस्य राजधान्यासीत्। अपरं वेले मृते सति तस्य पदे
३४ वस्रानिवासिनः सेरहः सुतो योवब् तच्छशास। ततो योववि मृते सति
३५ तैमन्देशीयो हूशम् तस्य पदे देशं शशास। ततो हूशमि मृते सति
विददः सुतो यो हदद् मोयावः प्रान्तरे मिदियनं जितवान् स तस्य
पदे देशं शशास; तस्य राजधान्याश्च नामधेयम् अवीत् आसीत्।
३६ ततो हददि मृते सति मस्रेकानिवासी सम्लस्तस्य पदे देशं शशास।
३७ ततः सम्ले मृते सति फरात्तटिन्याः समीपस्थरिहोवोत्निवासी
३८ शौल् तस्य पदे देशं शशास। ततः शौलि मृते सति अक्वोरः सुतो
३९ बाल्हानन् तस्य पदे देशं शशास। अपरम् अक्वोरः सुते बाल्हाननि
मृते सति हदर् तस्य पदे देशं शशास; पायूनगरं तस्य राजधान्या-
सीत्; मिहेटवेल्नामिका तस्य जायासीत्, सा मट्रेदः कन्या मेषाहबो
दौहित्र्यासीत्।
४० एषाव उत्पन्ना नामस्थानकुलभेदात् ये ये राजान आसन् तेषां
४१ नामानि। राजा तिम्नो राजा अल्वा राजा यिथेत् राजा अहलीवामा
४२ राजा एला राजा पीनोन् राजा किनस् राजा तैमन् राजा मिव्सर्
४३ राजा मग्दीयेल् राजा ईरम्। इमे स्वस्वराज्यभेदेन राजधानीभेदेन
च इदोमो देशस्य राजान आसन्। इदोमीयानाम् आदिपुरुषस्य एषावो
वंशराजिरिति।

---

३७ सप्तत्रिंशोऽध्यायः।

१ यूषफं प्रति भ्रातॄणां द्वेषः ५ यूषफः स्वप्नद्वयदर्शनं ९ याकूबा तस्य भ्रातॄन् प्रति प्रेरणं १२ शिखिमि तेषां मेषपालनं १५ तेषां साक्षात्कारः १८ यूषफं हन्तुं तेषां परामर्शः २३ इस्मायेलीयेषु यूषफो विक्रयः २९ तस्य वस्त्रं शोणितखचितं दृष्ट्वा याकूबः शोचनञ्च।

१ याकूबा निजतातस्य प्रवासीयस्थाने किनान्देशे प्रोषिते सति तस्मै यद्
२ घटितं तस्य विवृतिरियं। यूषफ् सप्तदशवत्सरवयसि निजभ्रातृभिः
सार्द्धं पशुव्रजान् अचारयत् स बालकः सन् निजतातस्य भार्य्ययो र्विल्-
हासिल्पयोः सुतानां सहचर आसीत्, तेषाञ्च सहजानां कुव्यवहारं
३ स्वीयतातस्य समीपे गदितवान्। स यूषफ् इस्रायेलो वार्द्धक्यवयसः
सुतस्तस्मात् इस्रायेल् सकलसुतेभ्योऽधिकं तस्मिन् अप्रीयत, नानावर्णम्

उत्तरीयं निर्म्माय च तस्मै दत्तवान्। किन्त्वस्माकं पिता सकलसुतेभ्योऽधिकं ४
यूषफि प्रीयते, इति विलोक्य तस्य भ्रातृभिस्तदारभ्य तस्यर्तीयितत्वात्
तं प्रति स्नेहवचनं वक्तुमपि नाशक्यत।

अनन्तरं यूषफ् स्वप्नं दृष्ट्वा निजभ्रातृभ्यस्तं कथयामास; तेन तैः ५
सोऽधिकम् ऋतीयितः। फलतः स कथितवान्, अहं स्वप्नमेकं दृष्टवान्, तं ६
निवेदयामि शृणुत। पश्यत वयं क्षेत्रे शस्यमुष्टीन् अवध्नीम, तत्र मम ७
शस्यमुष्टिरुत्तिष्ठन् अस्थात्, किन्तु युष्माकं शस्यमुष्टयश्चतुर्दिक्षु तिष्ठन्तो
मम शस्यमुष्टिं प्राणमन्। तेन तस्य भ्रातरस्तं जगदुः किं त्वमस्माकं ८
उपरि निश्चितं राजत्वं करिष्यसि? किमस्माकम् उपरि प्रभविष्यसि?
ततस्ते तस्य तस्मात् स्वप्नात् कथायाश्च तमतीव समृतीयितवन्तः।

अनन्तरं यूषफ् अपरैकं स्वप्नं दृष्ट्वा भ्रातॄणां समक्षं कथितवान्, पश्य- ९
ताहम् अपरमेकं स्वप्नं दृष्टवान्, पश्यत सूर्य्यचन्द्रैकादशनक्षत्राणि च
मां प्राणमन्। किन्तु यूषफ् स्वीयपितु र्भ्रातॄणाञ्च साक्षात् तं गदित- १०
वान् तदा तस्य पिता तं तर्जयन् उक्तवान् त्वया कीदृशोयं स्वप्नो दृष्टः?
अहं तव माता भ्रातरश्च वयं भूमौ तिष्ठन्तः किं त्वां प्रणंस्यामः? तत- ११
स्तस्य भ्रातरस्तं प्रत्यैर्ष्यन्, किन्तु तत्पिता तां कथां मनसि निदधे।

अपरं यूषफो भ्रातरः पितुः पशुव्रजान् चारयितुं शिखिमं जग्मुः, तत १२
इस्रायेल् यूषफं जगाद तव भ्रातरः किं शिखिमि पशुव्रजान् न चार- १३
यन्ति? आगच्छ त्वामहं तेषां सन्निधिं प्रेषयामि; ततो यूषफ् उक्तवान्
अहमुपस्थितोस्मि। तदानीम् इस्रायेल् तं जगाद, त्वं गत्वा तव भ्रातरः १४
पशुव्रजाश्च सकुशलाः सन्ति न वेति विलोक्य मां वार्त्तां वद। इत्थं स
हिब्रोण उपत्यकातो यूषफं विसृष्टवान् स च शिखिमं गतवान्।

तदानीम् एको मनुजो यूषफं प्रान्तरे भ्रमन्तं वीक्ष्य पप्रच्छ, त्वं किं १५
मृगयसे? स उक्तवान् निजसहजान् गवेषये; ते कुत्र पशुव्रजान् चार- १६
यन्ति? विनयेहं तन्मां वद। स मनुज उदितवान्, त इतो गतवन्तः, १७
यतो वयं दोथनं यास्याम इति वाचं तेषाम् अश्रौषम्; अतो यूषफ्
पश्चात् पश्चात् व्रजित्वा दोथनि निजभ्रातॄन् साक्षात् चकार।

अपरं तस्य तेषां समीपगमनकाले ते दूरात् तं दृष्ट्वा हन्तुं मन्त्रयित्वा १८
परस्परं जगदुः पश्यतासौ स्वप्नदर्शक आगच्छति। आगच्छत वयमिमं १९
हत्वा कस्मिंश्चित् अवटे निक्षिपाम; पश्चात् कश्चन हिंस्रो जन्तुस्तम- २०
खादत् इति वाचं वदिष्यामः, तेन तस्य स्वप्नानां किं भविष्यतीति

२१ पश्यामः। किन्तु रूबेन् तत् श्रुत्वा तेषां करेभ्यस्तम् अवितुं कथयामास,
२२ नहि, वयं तं न हनिष्यामः। रूबेन् तेषां करेभ्यस्तं रक्षित्वा पितुः
समीपं प्रहेतुम् इच्छन् पुनस्तान् अवदत्, एतस्य शोणितपातम् अकृत्वा
तं प्रान्तरीयावटमध्ये पातयत, किन्तु तं प्रति करान् मोत्तोलयत।
२३ अनन्तरं यूषफि भ्रातृणां समीपमागते ते तस्य गात्रात् वसनम्
२४ अर्थात् नानावर्णवस्त्रं बलात् गृहीत्वा तं धृत्वा अवटमध्ये पातयामासुः;
२५ किन्तु सोवटो रिक्तस्तत्र न तोयमासीत्। अनन्तरं ते भोक्तुम् उपविश्य
वीक्ष्य ददृशुः, गिलियद् एको निवह इस्रायेलीयलोका महाङ्गवाहनेन
२६ सुगन्धिद्रव्याणि गुग्गुलुगन्धरसान् आदाय मिसरदेशं गच्छन्ति। तदानीं
यिहूदा भ्रातॄन् उवाच, भ्रातु र्हननात् शोणितगोपनाच्च अस्माकं को
२७ लाभः? आगच्छत वयं तं न हिंसित्वा एतेषाम् इस्रायेलीयानां करेषु
विक्रीणाम, यतः सोऽस्माकं भ्रातास्माकं मांसस्वरूपश्च; ततस्तस्य भ्रात-
२८ रोऽङ्गीचक्रुः। तदानीं तेषु मिदियन्वासिवणिक्षु समीपमागतेषु ते यूषफं
गर्त्तात् आकृष्य प्रोत्तोलयामासुः; तत इस्रायेलीयानां विंशतिरूप्यमुद्रा
गृहीत्वा तेषां करेषु तं व्यक्रीणन्; ततस्ते यूषफं मिसरदेशं निन्युः।
२९ अनन्तरं रूबेन् परावृत्य गर्त्तसमीपं जगाम, यूषफ् गर्त्ते नास्तीति
३० विलोक्य स निजवसनं चिच्छेद। भ्रातृणां समीपं गत्वा च जगाद,
३१ बालको नास्ति, अहमिदानीं कुत्र गमिष्यामि? ततः परं ते यूषफो
वसनं आदाय छागवत्समेकं मारयित्वा तस्य शोणितेषु तद् मज्जितवन्तः।
३२ अनन्तरं तस्य पितुः समीपं तत् नानावर्णं वसनं प्रेषयामासुः कथयामा-
सुश्च, वयम् एतावन्मात्रं प्राप्ताः, इदं तवात्मजस्य वसनं भवति न वा?
३३ ततः स तत् परिचीय कथितवान्, इदं मम पुत्त्रस्य गात्रीयवसनं
भवति; कश्चित् हिंस्रो जन्तुस्तं भक्षितवान्, यूषफ् निश्चितं विदीर्णो
३४ भूतः। तदानीं याकूब् निजवस्त्रं छित्त्वा कटौ शणजं परिधाय पुत्त्राय
३५ बहुदिनानि शुशोच। अनन्तरं तस्य कन्याः पुत्त्राः सर्व्वे उत्थाय तं सान्त्व-
यितुं यतितवन्तः, किन्तु स प्रबोधं न मत्वा कथितवान्, अहं शोकेन
३६ पुत्त्रसमीपं परलोकं गमिष्यामि, इत्थं तस्य पिता तदर्थं रुरोद। अनन्तरं
ते मिदियनीया यूषफं मिसरं नीत्वा पोटीफर्नामकस्य फिरौणो रक्षक-
सेनापतेः समीपे तं विक्रीतवन्तः।

३८ अष्टत्रिंशोऽध्यायः ।

१ यिहूदासुतत्रयाणां एर्-ओनन्-शेलानां विवृतिः १२ जायामरणात् परं यिहूदाः तिम्नागमनं १५ तदीयपुत्रबधूपगमनं २४ तस्य दोषाविष्करणं २७ तस्य पुत्रबध्वाः पेरस् सेरह इति सुतद्वयजननञ्च ।

तदानीं यिहूदा निजसहजानां समीपात् अदुल्लमीयहीरानाम्न १
एकमनुजस्य समीपं गत्वा तत्र शूयनामकस्य किनानीयपुरुषस्य कन्यामेकां २
विलोक्य तामादायाभिजगाम । ततः सा गर्भिणी बभूव, अपरं तस्यां ३
पुत्रमेकं प्रसूतायां स तस्य नामधेयम् एर् इति चकार । पुनः सा ४
गर्भवती भूत्वा पुत्रं प्रसूय तस्य नामधेयम् ओनन् इति चकार। पुन- ५
रपि तस्या गर्भे सति सा सुतं प्रसूय तस्य नाम शेलेति चकार; एतस्य
जन्मकाले यिहूदाः किषीवि स्थितवान् । ततो यिहूदाः तामर्नामिकां ६
कन्याम् आनीय ज्येष्ठपुत्रम् एरं विवाहयामास, किन्तु यिहूदा
ज्येष्ठपुत्र एर् परमेश्वरस्य साक्षात् दुष्टोऽभवत् तदा परमेश्वरस्तं ७
व्यनाशयत्। ततो यिहूदा ओननं जगाद, त्वं निजभ्रातु र्भार्य्यां विवह, ८
तामभिगम्य भ्रातुर्वंशम् उत्पादय। किन्तु स वंशः स्वीयो न भविष्यतीति ९
विज्ञाय ओनन् भ्रातृभार्य्याम् अभिगम्यापि भ्रातुर्वंशोत्पादनानिच्छया
भूमौ शुक्रं पातयामास । तस्मात् तस्यैतादृशेन कर्म्मणा परमेश्वरोऽ- १०
सन्तुष्टः सन् तमपि नाशितवान् । तदानीं यिहूदास्तां तामर्नामिकां ११
पुत्रबधूं वभाषे, यावत् मम शेला पुत्रो युवा न भवति, तावत् त्वं
विधवा सती निजपितृगेहे तिष्ठ; यतः सोऽचिन्तयत् चेत् भ्रातराविव
शेलापि म्रियते; तस्मात् तामर् गत्वा पितृसदने न्यवसत ।

अपरं शूयस्य कन्याया यिहूदा भार्य्याया मरणात् परं वहुदिनेषु १२
गतेषु यिहूदाः सान्त्वनायुक्तः सन् अदुल्लमीयहीरानाम्ना बन्धुना सह
तिम्नां प्रति निजमेषाणां लोमच्छेदकानां समीपं जगाम। तदानीं श्वशुरः १३
स्वीयमेषाणां रोमाणि छेत्तुं तिम्नां यातीति वार्त्तां कश्चित् तामरं कथया-
मास। ततस्तामर् विधवावसनं विहाय आवरकवस्त्रं परिधाय स्वाम् १४
आच्छाद्य ऐनमो निकटे तिम्नामार्गपार्श्वे समुपविश्य तस्थौ; यतः सा
ददर्श शेला युवत्वे सत्यपि तेन सार्द्धं विवाहो नाभवत्।

तदानीं यिहूदास्तां विलोक्य वेश्यां विवेद, यतः सा मुखमाच्छाद्य १५
स्थिता। ततः स पुत्रबधूं परिचेतुम् असक्तः सन् मार्गपार्श्वे तामरः १६
समीपं गत्वाब्रवीत्, आगच्छ त्वामहम् अभिगमिष्यामि, तेन तामर्

१७ उवाच त्वमुपगमनहेतो मह्यं किं दास्यसि? स कथितवान् व्रजात् एकं
छागवत्सं प्रेषयिष्यामि; तामर् अवदत् यावत् तं न दास्यसि तावत्
१८ मह्यं किं बन्धकं दास्यसि? यिहूदाः पृष्टवान् किं बन्धकं दास्यामि?
तामरवादीत् तव मुद्रां सूत्रं हस्तयष्टिञ्च देहि। तदानीं स तामरे
१९ तानि सर्व्वाणि दत्त्वा तामभिगतवान् ततः सा गर्भवती बभूव। पश्चात्
तामर् उत्थाय प्रतस्थे, आवरकं वसनं विहाय विधवावसनं परिदधे।
२० अनन्तरं यिहूदास्तस्या योषितो बन्धकं ग्रहीतुं निजादुल्लमीयबन्धुना
२१ छागवत्सं प्रहितवान्, किन्तु स तां न दृष्टवान्। अतः स तत्रत्यान्
जनान् पृष्टवान्, एतस्य ऐनम्ग्रामस्य समीपे मार्गपार्श्वे या वेश्या
२२ प्रोपाविशत् सा कुत्र? ते कथितवन्तः कापि वेश्यात्र न तिष्ठति। अनन्तरं
स यिहूदाः समीपं गत्वा कथयामास, नाहं तां दृष्टवान् तत्रत्या जनाश्च
२३ कथितवन्तः, स्थानेऽस्मिन् कापि वेश्या न तिष्ठति। तदा यिहूदा जगाद,
तस्याः स्थाने यदस्ति तत् सा गृह्णातु, कुतो वयं लज्जास्पदं भविष्यामः?
पश्चाहं छागवत्सं प्रहितवान् किन्तु त्वं तां न दृष्टवान्।
२४ अपरं प्रायेण मासत्रये गते कश्चित् यिहूदां जगाद, तव पुत्त्रबधू-
स्तामर् व्यभिचारिणी जाता, तेन तस्या गर्भोऽभवत्; तदानीं यिहूदाः
२५ कथितवान् तां वहिरानीय वह्निना दाहय। अनन्तरं तस्यां वहिरा-
नीतायां सा लोकं प्रहित्य श्वशुराय जगाद, यस्यैतानि वस्तूनि तस्मात्
पुरुषात् मम गर्भोऽभवत्; पुनरवदत्, एतानि मुद्रायष्टिसूत्राणि कस्य?
२६ वीक्ष्य परिचिनु। तदानीं यिहूदाः स्वीयानि तानि वस्तूनि स्वीकृत्य
कथितवान् सा मत्तोपि महाधर्म्मिष्ठा, यतोहं तस्यै निजं शेलासुतं न
दत्तवान्, किन्तु यिहूदास्तां पुन र्नाभिजगाम।
२७ अपरं तामरः प्रसवकाल उपस्थिते सति तस्या उदरात् यमजौ सुतौ
२८ जज्ञाते। तस्याः प्रसववेदनायां समुपस्थितायां सुतस्यैकस्य करो वहिर्ब-
भूव; ततो धात्री तस्य तस्मिन् करे रक्तसूत्रं बद्धा बभाषे, बालकोयं
२९ ज्येष्ठो भविष्यति। किन्तु स निजकरम् आकृष्य नीतवान् ततस्तस्य
भ्राता भूमिष्ठो बभूव; तदा धात्री कथितवती त्वं कथं विभिद्यागतोसि?
३० तस्मात् तस्य नाम पेरस् (भेदको) बभूव। पश्चात् रक्तसूत्रबद्धस्तस्य
भ्राता भूमिष्ठो बभूव, तस्य नाम च सेरह चकार।

३९ ऊनचत्वारिंशोऽध्यायः।

१ पोटीफरो गेहे यूषफ उन्नतिः ७ पोटीफरो जायाया यूषफि प्रेमासक्तिः अभिलषिताप्राप्तिहेतोः तस्य मिथ्यापवादनं काराबन्धनञ्च।

यूषफि मिसरदेशमानीते सति मिस्रीयपोटीफर्नामा फिरौन्राजस्य १
रक्षकसैन्याधिपतिः तस्यानयनकारिभ्य इस्मायेलीयनरेभ्यो यूषफं
क्रीतवान्। किन्तु परमेश्वरस्य साहाय्यात् यूषफ् श्रीमान् बभूव, २
निजमिस्रीयप्रभो र्गृहे न्यवसत्। यतः परमेश्वरस्य साहाय्येन तेन ३
कृतानि सकलकर्म्माणि फलवन्ति भवन्तीति स प्रभुः स्वयं दृष्टवान्।
अतएव स यूषफमनुगृह्य स्वीयसेवायां नियुक्तवान्, स्वीयनिवेशनस्या- ४
धिपतिं कृत्वा तस्य करे सर्व्वसम्पत्तिं समर्पयामास। इत्थं स यूषफ ५
स्वीयनिवेशनस्य सकलसम्पत्तेश्चाधिपतिं चकार, तदारभ्य यूषफः
कारणात् तस्य मिस्रीयपुरुषस्य निवेशनं प्रति परमेश्वरस्यानुग्रहात्
निवेशनस्य क्षेत्रस्य च सर्व्वसम्पत्तिं प्रति तस्याशी र्बभूव। ततस्तेन यूषफः ६
करे निजसर्व्वस्वस्य तादृशो भारोऽर्पितो येन स्वयं भोजनपाने विना
कस्यापि कर्म्मणः प्रवृत्तिं न ज्ञातवान्।

यूषफ् रूपेण सौन्दर्य्येण च मनोहारी आसीत्, तत्कारणात् कालक्रमशः ७
तस्य प्रभो र्जाया यूषफं निरीक्ष्य तं बभाषे, त्वं मया सार्द्धं शेष्व। किन्तु ८
यूषफ् तदनङ्गीकृत्य प्रभो र्भार्य्यां जगाद, पश्य निवेशनेऽस्मिन् यदहं
करोमि, तस्य किमपि प्रभु र्नानुसन्धत्ते; स मम करे सर्व्वस्वम् अर्पित-
वान्। अस्मिन् निवेशने मत्समो महान् कोपि नास्ति; त्वन्तु तस्य जाया ९
कारणादतः केवलं त्वां विना मां प्रति किमपि वारितं नास्ति; तस्मात्
कथम् एतादृशीं दुष्टतां कुर्व्वन् ईश्वरस्य गोचरे पातकं कर्त्तुं शक्नोमि?
तथापि सा योषित् स्वया सार्द्धं शयितुं वा स्वसमीपे स्थातुं यूषफं १०
प्रत्यहं आह्वयति; किन्तु यूषफ् तत् नाङ्गीकरोति। अनन्तरम् एकदा ११
कार्य्यवशात् यूषफ् गृहमध्यं जगाम, तदा तत्रान्यभृत्याभावात् मया
सह शेष्वेति वदन्ती सा यूषफो वसनं धृत्वा चकर्ष, किन्तु यूषफ् तस्याः १२
करे निजवसनं विहाय वहिः पलायाञ्चक्रे। तदानीं यूषफ् तस्या हस्ते १३
निजवस्त्रं परित्यज्य वहिः पलायित इति विलोक्य सा गेहस्य लोकान्
आहूय बभाषे, स्वामी सार्द्धमस्माभि र्हास्यं कर्त्तुम् एनम् इब्रीयम् १४
आनीतवान्; स मया शयितुं मम सन्निधिम् आगमत्। ततोऽहम् १५
उच्चैराहूतवती ममोच्चैःशब्दं श्रुत्वा स मत्समीपे वसनं विहाय वहिः

१६ पलायितः। अपरं सा स्वामिनो गृहागमनम् अपेक्ष्य तद् वसनं
१७ स्वसमीपे निदधे। अनन्तरं स्वस्वामिनं पूर्व्वोक्तानुसारत ऊचे, त्वया य
इब्रीयदासोऽस्मत्कृते समानायि, स मया सार्द्धं हास्यं कर्त्तुं समीपम्
१८ आगमत्। किन्तु मया प्रोच्चैराहूते स तद् वसनं मम हस्ते परित्यज्य
१९ बहिः पलायितः। तदानीं तव दासो मां प्रतीत्थं कृतवान् स्वजायाया
वदनात् एतां कथां श्रुत्वा यूषफः प्रभुः क्रोधेन प्रज्वलितः सन् यूषफं
२० नीत्वा राजवन्दिनां वासस्थाने बन्धनालये स्थापितवान्, ततो यूषफ्
२१ तस्यां कारायां तस्थौ। किन्तु परमेश्वरस्य साहाय्यात् कृपातश्च
२२ यूषफ् कारारक्षिणोऽनुग्रहृत। अपरं स कारारक्षी काराबद्धानां
सर्व्वेषां भारं यूषफः करे समार्पयत्, तस्मात् तत्रस्थानि सर्व्वकर्म्माणि
२३ यूषफ आज्ञानुसारतः प्रवर्त्तिरे। स कारारक्षी यूषफो हस्ते यद्यत्
समर्पितवान् तदनुसन्धानमपि न कृतवान्, यतो यूषफ् यद्यत् कृतवान्
परमेश्वरस्तस्य सहायः सन् तत् तत् सफलीकृतवान्।

---

४० चत्वारिंशोऽध्यायः।

१ फिरौणः पानपात्रवाहकस्य मोदककृतश्च यूषफा सह कारायां निधानं ५ तयो
र्द्वयोः स्वप्नफलस्य यूषफा प्रकाशनं २० यूषफः कथानुसारात् स्वप्नस्य सफलत्वं पान-
पात्रवाहकस्याकृतज्ञत्वञ्च।

१ अपरं मिसरो भूपस्य पानपात्रवाहकेन मोदककृता च स्वीयप्रभो
२ र्मिस्त्रीयभूपतेः समीपेऽपराधे कृते फिरौन् स्वीयप्रधानपात्रवाहकः
३ प्रधानमोदककृच्च एताभ्यां भृत्याभ्यां प्रकुप्य रक्षकसैन्याधिपते र्यस्यां
४ कारायां यूषफ् आसीत् तत्र तौ वन्दीकृत्य स्थापितवान्। ततो रक्षक-
सैन्याधिपतिना यूषफो हस्ते तयोः समर्पितयोः सतो र्यूषफ् तौ
सेवितुम् आरेभे। इत्थं तौ बहुदिनानि कारायां स्थितौ।
५ काराबद्धौ मिस्त्रीयराजस्य पानपात्रवाहकमोदककृतौ द्वावेकस्यां
६ यामिन्यां द्विधार्थविशिष्टौ द्वौ स्वप्नौ ददृशतुः। ततो यूषफ् प्रभाते
७ समीपं गत्वा तौ विषण्णवदनौ ददर्श। तदानीं फिरौणो यौ भृत्यौ
स्वेन सार्द्धं प्रभोः कारायां बद्धावास्तां, तौ पप्रच्छ कुतो युवयो र्वदनेद्य
८ विषण्णे? तौ प्रत्यूचतुरावामुभौ स्वप्नौ दृष्टवन्तौ, किन्तु तयोः स्वप्नयोः
फलवक्ता कोपि न विद्यते; तदा युषफ तौ जगाद, फलकथनशक्तिः किम्
९ ईश्वरान्न जायते? विनयेहं युवयोः स्वप्नौ मां वदतं। तदानीं प्रधान-

पात्रवाहको निजस्वप्नकथां यूषफे प्रकाश्य कथयामास, अहं स्वप्ने
द्राक्षालतामेकां दृष्टवान्। तस्याः शाखात्रये पल्लविते तत्र पुष्पाणि १०
जातानि स्तवके स्तवके तस्याः फलानि पक्वानि जातानि। तदा मम ११
हस्ते फिरौणः पानपात्रस्य सत्त्वात् द्राक्षाफलानि निधाय तत्र पात्रे
निष्पीड्याहं फिरौणो हस्ते तत्पात्रं दत्तवान्। ततो यूषफ् तस्मै कथ- १२
यामास, अस्य फलमेतत् ताभिस्तिसृभिः शाखाभि र्दिनत्रयं बोध्यते।
त्रयाणां दिनानां मध्ये फिरौन् त्वां विचार्य्य तव पदे पुन र्नियोजयि- १३
ष्यति; तेन त्वं पूर्व्ववत् पानपात्रवाहको भूत्वा फिरौणो हस्ते पान-
पात्रं दास्यसि। किन्तु यदा तव मङ्गलं भविष्यति, तदा मां स्मरिष्यसि, १४
मय्यनुग्रहं विधाय फिरौणो गोचरे मद्विषयिकां कथां कथयित्वा
मामस्याः कारायाः उद्धरिष्यसि। यत इब्रीयानां देशात् लोका मां १५
चोरयित्वानयन्, किन्त्वहं यत् कूपरूपे बन्धनालये बद्धो भवेयं तादृशं
किमपि कर्म्म नात्र स्थानेपि कृतवान्। अपरं प्रधानमोदककृत् तस्य १६
कथाया उत्तमं फलं निशम्य यूषफे कथयामास, अहमपि स्वप्नमेकं दृष्ट-
वान्, मम मस्तकोपरि शुक्लपिष्टकानां त्रीणि भाजनान्यासन्। तदुपरिस्थ- १७
भाजने फिरौणो भोजनार्थानि बहुविधानि पक्वान्नान्यासन्; ततः पक्षिण
आगत्य मम मस्तकोपरिस्थिताद् भाजनाद् आदाय तान्यभक्षन्। तदा १८
यूषफ् प्रत्युवाच एतस्य फलमेतत्, तैस्त्रिभि र्भाजनै र्दिनत्रयं बोध्यते।
दिनत्रयमध्ये फिरौन् त्वां विचार्य्य वृक्षोपर्य्युद्बन्त्स्यति पक्षिणश्चागत्य तव १९
शरीरात् मांसं खादिष्यन्ति।

ततः परं तृतीयदिवसे फिरौणो जन्मदिन उपस्थिते स सर्व्वेभ्यो २०
निजदासेभ्यो भोज्यम् आसादयामास। तत्र सर्व्वेषां निजदासानां साक्षात्
प्रधानपात्रवाहकं प्रधानमोदककृतञ्च विचारयाञ्चकार। फिरौन् स्वीय- २१
हस्ते पानपात्रं दातुं प्रधानपानपात्रवाहकं तस्य निजपदे पुनरपि
नियोजयामास; किन्तु यूषफा कथितार्थानुसारात् प्रधानमोदककृतं २२
उद्बबन्ध। तथापि प्रधानपानपात्रवाहको यूषफं न सस्मार किन्तु २३
विसस्मार।

---

४१ एकचत्वारिंशोऽध्यायः।

१ फिरौणः स्वप्नद्वयदर्शनं ९ पानपात्रवाहकस्य यूषफवार्त्ता कथनं १४ फिरौणो

यूषफे निजस्वप्नकथनं २५ राज्ञः स्वप्नफलज्ञापनं उपदेशनं ३७ यूषफ उन्नतिः
४६ मिसरि शस्यसञ्चयनं ५० यूषफः सुतद्वयजननं ५३ दुर्भिक्षारम्भश्च।

१ अनन्तरं द्वितीयवत्सरस्य शेषे फिरौन् इति स्वप्नं ददर्श। स नदीतीरे
२ तिष्ठति, तदा नद्याः सप्त सुन्दराः पुष्टा गाव उत्थाय शस्यमध्ये चरितुं
३ आरेभिरे। पश्चात् सप्तान्याः कृशाः कुत्सिता गावः सरित उत्थाय
४ तटिन्यास्तटे तासां गवां समीपे स्थिताः। अनन्तरं ताः कृशाः कुत्सिता
गावस्ताः सप्त हृष्टाः सुन्दरा गा अग्रसन्। तदानीं फिरौणो निद्रा
५ भग्ना। तदनन्तरं फिरौन् निद्रितः सन् द्वितीयवारं इति स्वप्नं दृष्टवान्;
६ एकस्मिन् वृन्ते सप्त स्थूला उत्तमाः शस्यमञ्जर्य्य उदतिष्ठन्। ततः परं
७ पूर्व्वीयवायुना शुष्का अन्याः सप्त क्षीणाः शस्यमञ्जर्य्य उदतिष्ठन्। ताः
सप्त क्षीणाः शस्यमञ्जर्य्यः स्थूलाः सप्त मञ्जरी र्जग्रसुः। अनन्तरं फिरौणो
निद्राभङ्गे सति स्वप्नमात्रो बभूव।
८ ततः परं प्रातःकाले तस्य मनस्युद्विग्ने सति स लोकान् प्रहित्य मिसर-
देशीयान् सर्व्वान् मायाविनो ज्ञानिनश्चाकारयितवान्; किन्तु फिरौणा
तेषां समीपे स्वप्नदृष्टकथायां कथितायां तेषां मध्ये कोपि फिरौणे तत्-
९ फलं कथयितुं नाशक्नोत्। तदानीं प्रधानपात्रवाहकः फिरौणे निवेद-
१० यामास, अद्य स्वीयापराधं स्मरामि। फिरौन् द्वाभ्यां स्वीयभृत्याभ्यां
अर्थात् मह्यं प्रधानमोकदक्षते च प्रकुप्य आवां रक्षकसैन्याधिपतेः
११ कारायां बद्धवान्। तत्र सोहञ्च द्वावेकस्यां यामिन्यां स्वप्नौ दृष्टवन्तौ;
१२ द्वयोः स्वप्नयो र्द्विविधफले जाते। तत्र सार्द्धमस्माभी रक्षकसैन्या-
धिपते र्युवदास एक इब्रीय आसीत्; आवाभ्यां तस्मै कथिते स आवयोः
१३ स्वप्नार्थं कथितवान्; उभयोः स्वप्नयोः फले उक्तवान्। तत्र स आवाभ्यां
यादृशं फलं गदितवान् तादृशमेव घटितं अर्थात् महाराजो मां निज-
पदे नियुक्तवान् तन्तूदबध्नात्।
१४ फिरौणि यूषफम् आनेतुं जनान् प्रहितवति लोकास्तं कारातः क्षिप्रम्
आनिन्युः। ततः स क्षौरं कारयित्वा वसनान्तरं परिधाय फिरौणः
१५ समीप उपस्थितवान्। तदा फिरौन् यूषफम् अवदत्, अहं स्वप्नं
दृष्टवान्, तस्य फलं कोपि कथयितुं नाशक्नोत्; किन्तु त्वं स्वप्नं श्रुत्वा
१६ तस्य फलं कथयितुं शक्नोसीति मया श्रुतम्। ततो यूषफ् फिरौणं प्रति
जगाद, तदहं न शक्नोमि, किन्त्वीश्वरः फिरौणं मङ्गलयुक्तम् उत्तरं
१७ वदिष्यति। फिरौन् यूषफं जगाद, स्वप्नेहं तटिनीतटे स्थितवान्। तदा

सरितः सप्तपुष्टाः सुन्दराश्च गाव उत्थाय शस्यमध्ये चरितुम् आरभन्त। १८
अनन्तरं मिसरि देशेऽहं यादृशीः कदापि न दृष्टवान् तादृश्यः सप्त १९
दुर्ब्बलाः कुत्सिताः क्षशाश्चापरा गाव उदतिष्ठन्। अपरं ताः क्षशाः २०
कुत्सिताश्च गावस्ताः पूर्व्वीयाः पुष्टाः सप्त गा अग्रसन्। किन्तु ताभिस्तासु २१
ग्रस्तासु ग्रस्ताइति बोधो नाभवत्; यतस्ताः पूर्व्ववत् कुत्सिताएव स्थिताः;
तदा मम निद्राभङ्गोऽभवत्। अनन्तरम् अहं पुनः स्वप्नमपश्यम् एक- २२
स्मिन् वृन्ते स्थूलान्युत्तमानि सप्त कणिशान्युदतिष्ठन्। ततः परं पूर्व्वीय- २३
वायुना शुष्कानि क्षीणानि म्लानानि च सप्त कणिशान्युदतिष्ठन्। अपरं २४
तैः क्षीणै र्म्लानैश्च सप्तकणिशैस्तानि स्थूलान्युत्तमानि च सप्त कणिशानि
ग्रस्तानि। इति स्वप्ने दृष्टम् अहं मायाविभ्यः कथितवान्, किन्तु कोप्यस्य
फलं वक्तुं नाशक्नोत्।

तदानीं यूषफ् फिरौणं प्रत्युवाच, फिरौणो द्वयोः स्वप्नयोः फलमेक- २५
मेव; ईश्वरो यत् कर्त्तुम् उद्यतोस्ति तदेव फिरौणं ज्ञापितवान्। ता २६
उत्तमाः सप्त गावः सप्तवत्सरस्वरूपास्तैः सप्तभिरुत्तमैः कणिशैश्च सप्त
वत्सरा बोध्यन्ते; द्वयोः स्वप्नयोः समानत्वं। अपरं तत्पश्चात् उत्थिता याः २७
क्षशाः कुत्सिताश्च सप्त गावस्ता अपि सप्त वत्सरस्वरूपाः; पूर्व्वीयपवनेन
शुष्कानि यानि सप्त क्षशानि कणिशानि, तानि दुर्भिक्षस्य सप्त वत्सरा
भविष्यन्ति। फिरौणे मया यथा कथितं तथेश्वरो यत् कर्त्तुम् उद्य- २८
तोस्ति तत् फिरौणं दर्शितवान्। पश्यतु सकलमिसर्देशे सप्त वत्सरा २९
अतीव सुभिक्षा भविष्यन्ति। पश्चात् सप्त वत्सरास्तथा दुर्भिक्षा भवि- ३०
ष्यन्ति यथा मिसर्देशस्य सर्व्वं सुभिक्षत्वं विस्मारिष्यते, तेन दुर्भिक्षेण
देशो नंक्ष्यति। तेन दुर्भिक्षेण पूर्व्वीयं सुभिक्षत्वं नानुभाविष्यते च; तद- ३१
तीवासह्यं भविष्यति। फिरौणो वारद्वयदृष्टस्वप्नस्य फलमेतत् ईश्वर ३२
एतत् निश्चितं कृत्वा तूर्णं घटयिष्यति। अतएव फिरौन् एकं विवेचकं ३३
ज्ञानिपुरुषं चेष्टित्वानीय तं मिसर्देशोपरि नियुनक्तु। अपरं फिरौन् ३४
एतत् कर्म्म करोतु; ये सप्त वत्सराः सुभिक्षा भविष्यन्ति तत्र काले
देशेऽध्यक्षान् नियुज्य मिसर्देशात् पञ्चमांशं गृह्णातु। पश्चात् ते तदुत्तम- ३५
वत्सराणां शस्यानि संगृह्णन्तु भोजनार्थं फिरौणः स्थाने प्रतिनगरे तत्
सञ्चित्य स्थापयन्तु च। इत्थं मिसर्देशे भाविदुर्भिक्षस्य सप्तसु वत्सरेषु ३६
देशस्थितानां कृते सञ्चितभक्ष्येषु स्थितेषु दुर्भिक्षात् देशो न नंक्ष्यति।

तदानीं फिरौणस्तदीयसकलदासेयानाञ्च दृष्टौ कथैषा उत्तमा बभूव। ३७

३८ ततः फिरौन् भृत्यान् उवाच, यत्रैतस्मिन् पुरुष ईश्वरस्यात्मास्ति, एता-
३९ दृशः किमन्यः कश्चिल्लप्स्यते ? तदा फिरौन् यूषफं जगाद ईश्वरस्त्वाम्
एतानि ज्ञापितवान्; अतएव त्वत्तुल्यो विवेचको ज्ञानी च कोऽपर
४० आस्ते ? त्वामहं निजगृहस्याधिपतिकर्म्मणि नियुक्तवान्, मदीयाः सर्व्वे
लोकास्त्वदीयवाक्यस्य वशीभविष्यन्ति; केवलं सिंहासनेहं त्वत्तो महान्
४१ स्यास्यामि। फिरौन् यूषफं पुनरुक्तवान्, पश्य सकलमिसर्देशोपरि
४२ त्वामहं नियुक्तवान्। अनन्तरं फिरौन् निजकरात् अङ्गुरीयकं विमोच्य
यूषफः करे दत्त्वा तं सूक्ष्मवसनं परिधाप्य तस्य कण्ठे सुवर्णं हारञ्च
४३ ददौ। तं स्वस्य द्वितीयरथम् आरोहयामास, अपरं जनास्तस्याग्रेऽग्रे
अब्रेक् अब्रेक् (जानूनि पातयत जानूनि पातयतेति) घोषयामासुः;
४४ इत्थं स सकलमिसर्देशस्याधिपत्ये न्ययोजि। पश्चात् फिरौन् यूषफं
जगाद, यद्यहं फिरौन् भवेयं तर्हि त्वदीयाज्ञां विना सर्व्वदेशे कोपि
४५ लोको करौ पादौ च लाडयितुं न शक्ष्यति। अपरं फिरौन् यूषफो
नाम साफिनत्पानेहं (निगूढवाक्यप्रकाशकं) चकार। तत ओन्नगरी-
यस्य पोटीफेरनामकयाजकस्य कन्याम् आसिनतं तं विवाहयामास।
अनन्तरं यूषफ् सकलमिसर्देशे यातायातं कर्त्तुमारेभे।

४६ त्रिंशद्वत्सरवयसि यूषफ् मिस्रीयभूपतेः फिरौणः समक्षम् उपस्थित-
वान्; तदानीं फिरौणः समीपात् प्रस्थाय मिसर्देशस्य सर्व्वत्र बभ्राम।
४७ अनन्तरं सुभिक्षस्य ते सप्त वत्सराः भूम्यां बहुशस्यानि जनयामासुः।
४८ तेषु सप्तसु वत्सरेषु मिसर्देशे जातानि सर्व्वशस्यानि संगृह्य प्रतिनगरं
सञ्चिचाय। अपरं यद्यन्नगरस्य चतुर्दिक्षु भूमौ यावन्ति शस्यानि जातानि,
४९ तावन्ति तत्र तत्र नगरे सञ्चिचाय। इत्थं यूषफ् समुद्रीयसिकतावत्
प्रभूतानि शस्यानि संजग्राह यत् तेषां गणनं तत्याज यतस्तान्यपरि-
मितान्यासन्।

५० अपरं दुर्भिक्षवत्सरेभ्यः पूर्व्वं ओन्नगरनिवासिनः पोटीफेरयाजकस्य
५१ कन्यायाम् आसिनत्नामिकायां यूषफो द्वौ सुतौ जज्ञाते। ततो यूषफ्
तयो र्ज्येष्ठस्य नाम मिनशिं (विस्मृतिं) चकार; यतः स कथितवान्
५२ ईश्वरो मम सर्व्वक्लेशं पितृगेहञ्च मां विस्मारितवान्। अपरं द्वितीय-
सुतस्य नाम इफ्रयिमं (फलवन्तं) चकार; यतः स उक्तवान् यत्राहं दुःख-
ग्रस्तस्तत्र देशे माम् ईश्वरः फलवन्तं कृतवान्।

५३ अनन्तरं मिसर्देशे सुभिक्षस्य सप्तवत्सरेषु सम्पूर्णतां गतेषु यूषफो

वाक्यानुसारात् दुर्भिक्षस्य सप्तवत्सराणाम् आरम्भो बभूव, ततोऽन्य- ५४
सर्व्वदेशेषु दुर्भिक्षो बभूव, किन्तु समस्तमिसर्देशे शस्यान्यासन्। सर्व्वेषु ५५
मिसर्देशेषु दुर्भिक्षे जाते प्रजानिवहः फिरौणः समीपे भक्ष्यार्थं
प्रार्थयाञ्चक्रे; ततः फिरौन् सकलमिस्त्रीयान् बभाषे, यूयं यूषफः
समीपं यात, स युष्मभ्यं यत् वदति तदेव कुरुत। तदानीं सर्व्वपृथिव्यां ५६
दुर्भिक्षो बभूव, मिसर्देशस्य सर्व्वस्थानेऽतीवप्रबले दुर्भिक्षे सति यूषफ्
सर्व्वस्थानीयं भाण्डागारं मोचयित्वा मिस्त्रीयेषु शस्यानि विक्रेतुम् आर-
भत। अपरं नानादेशीया नरा मिसर्देशे शस्यानि क्रेतुं यूषफः समीपं ५७
आजग्मुः, यतः सर्व्वेषु देशेषु प्रबलो दुर्भिक्षो बभूव।

---

४२ द्विचत्वारिंशत्तमोऽध्यायः।

१ याकूबः पुत्त्राणां शस्यं क्रेतुं मिसर्गमनं ५ यूषफः समीपे उपस्थानं ६ तैः सार्द्धं यूषफो व्यवहरणं शिमियोनं बद्ध्वा विन्यामीनम् आनेतुम् आज्ञापनं २१ तेषां भ्रातरं प्रति कृतापराधस्मरणं २५ तेषां शाणपुटेषु मुद्रा निधाय यूषफस्तेषां विसर्जनं २९ गृहं गत्वा पितुः समीपे सर्व्ववृत्तान्तकथनं ३५ याकूबो भयं विन्यामीनं प्रहेतुम् अनङ्गीकरणञ्च।

अपरं मिसर्देशे शस्यानि सन्तीति वार्त्तां श्रुत्वा याकूब् स्वीयपुत्त्रान् १
उवाच, यूयं परस्परं विलोक्य कुत आध्वे? स पुनरुदितवान्, पश्यत २
मया श्रुतं मिसरि शस्यानि सन्ति, तस्माद् यूयं तत्र गत्वास्मत्कृते शस्यं
क्रीत्वानयत; तेन वयं न मृत्वा जीविष्यामः। अनन्तरं यूषफो दशभ्रा- ३
तरः शस्यं क्रेतुं मिसरं जग्मुः। किन्तु याकूब् यूषफः सहोदरं विन्या- ४
मीनं भ्रातृभिः सार्द्धं न प्रहितवान् यतः स कथितवान् यद्येतस्यापि
विपद् घटेत।

तदानीं यात्राकारिणां लोकानां सङ्गे इस्रायेलः सुताः शस्यानि क्रेतुं ५
गतवन्तः, यतः किनानदेशेपि दुर्भिक्ष आसीत्। यूषफस्तस्य देशस्याधि- ६
पतित्वात् तद्देशीयमनुष्येषु शस्यानि व्यक्रीणात् ततो यूषफो भ्रातर
आगत्य भूमिष्ठाः सन्तस्तं प्रणेमुः। यूषफ् निजसहजान् निरीक्ष्य परि- ७
चिचाय, किन्तु तेषां समीपे अपरिचित इव व्यवहृत्य निष्ठुरवाक्यं
जगाद, यूयं कुत आगताः? ते कथयामासुः वयं शस्यं क्रेतुं किनान्देशात्
आगताः। यूषफो निजसहजेषु परिचितेष्वपि ते तं परिचेतुं न शेकुः। ८
यूषफ् तानधि पूर्व्वं दृष्टानि स्वप्नानि संस्मृत्य तानवोचत्, यूयं सर्व्वे ९
चारजना, एतद्देशस्य अनावृतसकलस्थानानि निरीक्षितुं समागताः।

१० ते कथयामासुः हे प्रभो तन्न; भवत इमे दासाः शस्यं क्रेतुम् आगमन्।
११ वयं सकला एकस्य सुता विश्वास्या मनुजा भवत एते दासेयाश्चारा
१२ नहि। सोवदत् नहि किन्तु यूयं देशस्यानावृतस्थानानि वीक्षितुम्
१३ आगताः। ते प्रत्यवदन् भवत इमे दासेया द्वादश भ्रातरः किनान् देश-
निवासिन एकस्यैव सुताः; पश्यतु अस्माकं कनिष्ठः सहजोऽद्यापि पितुः
१४ समीपेऽस्ति अपरैकजनस्तु न विद्यते। यूषफ् तान् पुनरवोचत्,अहं युष्मभ्यं
१५ यत् चारा इति गिरं कथितवान्, यूयं तएव भवत। अहं युष्मान् परीक्षितुं
फिरौण आयुषः शपथं कुर्व्वन् कथयामि, युष्माकं कनिष्ठो भ्राता चेदत्र
१६ नायास्यति तर्हि यूयमितः स्थानात् गन्तुं न शक्ष्यथ। युष्माकमेकं प्रहित्य
निजभ्रातरम् आनयत, तत्कालपर्य्यन्तं युष्माभि र्बद्धैः स्थातव्यं; ततो युष्माकं
वचः सत्यं न वेति परीक्ष्यैव ज्ञायिष्यते; नो चेत् फिरौण आयुषः शपथं
१७ कुर्व्वन् कथयामि यूयमवश्यमेव चारा भवथ। अनन्तरं यूषफ् तान्
१८ दिनत्रयं यावत् कारायां बद्धा स्थापितवान्। अपरं तृतीयेह्नि तान्
उक्तवान् ईश्वरात् भीति र्ममास्ति; यूयमित्थं कुरुत, तेन जीविष्यथ।
१९ यदि यूयं विश्वास्यमानवा भवेत तर्हि स्वेषामेकः सहजोस्यां कारायां
२० बद्धस्तिष्ठतु, यूयञ्च दुर्भिक्षहेतो र्गेहाय शस्यानि नीत्वा निजकनिष्ठसह-
जम् मत्समीपम् आनीय युष्मदुक्तागिरं प्रमाणीकुरुत तेन न मरिष्यथ।
२१ ततस्ते तथैव कृतवन्तः, पश्चात् परस्परं जगदुः, स्वीयसहजमधि
वयं निश्चितापराधिन आस्महे, यतोऽस्माकं समीपे तेन काकूक्तिः कृता,
वयं तस्य मनसो व्याकुलत्वं विलोक्यापि तां न श्रुतवन्त एतत्कारणात्
२२ अस्माकम् एषा विपद् अजनि। तदानीं रूबेन् तान् अवादीत्, यूय-
मेतस्मिन् यूनि पापं मा कार्ष्ट कथामिमाम् अहं किं युष्मान् न गदित-
वान्? तथापि यूयं नामन्यध्वं पश्यतेदानीं तस्य शोणितं परिशोध्यते।
२३ किन्तु यूषफ् यत् तेषां संलापं बुद्धवान् तत् ते बोद्धुं नाशक्नुवन्. यतो
२४ द्विभाषावादिना कथोपकथनम् अभवत्। अनन्तरं यूषफ् तेषां समी-
पात् गत्वा चक्रन्द; पुनरागत्य तैः सार्द्धं संलप्य तेषां मध्यात् शिमियोनं
नीत्वा तेषां साक्षादेव बबन्ध।
२५ अनन्तरं यूषफ् तेषां शाणपुटेषु शस्यानि पूरयित्वा एकैकजनस्य
शाणपुटे मुद्राः परावर्त्त्य दातुं तेभ्यः पाथेयभक्ष्यं दातुञ्चाज्ञापितवान्; ततो
२६ भृत्यास्तथैव कृतवन्तः। अनन्तरं स्वस्वगर्द्दभस्योपरि शस्यानि निधाय
२७ तत्स्थानात् प्रतस्थिरे। किन्तूत्तरणस्थानं प्राप्य एकः स्वीयगर्द्दभाय भक्ष्यं

दातुं श्यापुटं मोचयित्वा निजमुद्रा ददर्श, यतः श्यापुटस्य मुखएव
मुद्रा आसन्। तदानीं स सहजान् जगाद, मम मुद्राः प्रत्याहृताः पश्य- २८
तैता मम श्यापुटे सन्ति। तदा तेषां मनांसि प्रोद्विज्यन्त ते बिभ्यतश्च
परस्परं प्रोक्तवन्त ईश्वरोऽस्मान् प्रति किमिदं कृतवान्?

अनन्तरं ते किनान्देशे निजपितु र्याकूबः समीपं प्राप्य स्वेषु यद्यद् २९
अघटत, तत्सर्व्वं तं विज्ञाप्य जगदुः, स देशाधिपतिरस्मान् देशचारान् ३०
ज्ञात्वा निष्ठुरवचनं भाषितवान्। ततोऽस्माभिः स उदितः, वयं चारा ३१
न भवामो विश्वास्यमानवाः। वयं द्वादश भ्रातरः सर्व्वे एकपितुः सुताः; ३२
अस्माकं मध्यादेको नास्ति कनिष्ठः सहजश्च पितुः समीपे किनान्देशे
विद्यते। तदानीं स देशाधिपतिरस्मभ्यम् अकथयत्, अनेनाहं युष्मान् ३३
विश्वस्यान् बोद्धुं शक्नोमि; यदि यूयं स्वेषाम् एकं सहजं मम सन्निधौ
निधाय स्वेषां गेहस्य दुर्भिक्षकारणात् शस्यानि गृहीत्वा यास्यथ,
निजकनिष्ठं सहजञ्च मत्समीपं आनेष्यथ, तदा यूयं याथार्थिका लोका ३४
भवत, चारा नहीति ज्ञास्यामि। पश्चात् युष्माकं सहजं युष्मभ्यं दास्यामि
ततो यूयम् अस्मिन् देशे वाणिज्यं कर्त्तुं शक्ष्यथ।

अनन्तरं तैः श्यापुटेभ्यः शस्येषु उत्तारितेषु सर्व्वे स्वस्वश्यापुटेषु ३५
मुद्राग्रन्थिं प्रापुः। तदानीं सकलमुद्राग्रन्थी र्विलोक्य तेषां पिता ते च
बिभ्युः। तदा तेषां पिता याकूब् उक्तवान्, यूयं मां पुत्त्रहीनं कुरुथ; ३६
पश्यत यूषफ् नास्ति, शिमियोन् नास्ति, पुनश्च बिन्यामीनं नेतुम्
इच्छथ; एतत् सर्व्वं मम विरुद्धं भवति। ततो रूबेन् निजतातं जगाद, ३७
यद्यहं तं तव समीपं नानयानि, तर्हि मम द्वौ सुतौ हनिष्यसि; त्वं
मम करे बिन्यामीनं समर्पय, तमहं पुनश्च तव समीपम् आनेष्यामि।
तदानीं तेन कथितं, मम पुत्त्रो युष्माभिः सार्द्धं न यास्यति, यतस्तस्य ३८
सहोदरस्य मरणात् स एकएव जीवन् आस्ते; यूयं येन मार्गेण याथ,
तत्र यद्यस्यापि कापि विपद् घटेत, तर्हि शोकात् एतैः पक्वकेशैः सार्द्धं
मां परलोकं प्रेषयिष्यथ।

---

४३ त्रिचत्वारिंशत्तमोऽध्यायः।

१ शेषे याकूबा बिन्यामीनः प्रेरणं १५ भ्रातृणां यूषफो गेहगमनं अधिपतेः समीपे तेषां भयप्रकटनं २५ यूषफे पारितोषं दत्त्वा तेन सार्द्धं भ्रातृणां भोजनञ्च।

अनन्तरं देशे महादुर्भिक्षे तिष्ठति ते मिसर्देशात् यानि शस्यान्या- १

२ नयन् तानि सर्व्वाणि भक्षितानि। तदा तेषां तातस्तान् बभाषे, यूयं पुन-
३ र्गत्वा किञ्चित् शस्यम् अस्मत्कृते क्रीणीत। ततो यिहूदास्तं गदितवान्,
सोऽधिपति दृढं प्रतिज्ञाय कथितवान्, युष्माकं भ्राता युष्माभिः सार्द्धं
४ न स्थितश्चेत् तर्हि युष्माभि र्मम वदनं वीक्षितुं न शक्ष्यते। तस्मात् यदि
त्वम् अस्माभिः सार्द्धं सहजं प्रेरयसि, तर्हि वयं त्वत्कृते शस्यं क्रेतुं
५ यास्यामः। यदि न प्रेरयसि, तर्हि वयं न यास्यामः; यतः सोऽधिपतिः
कथितवान्, युष्माकं सहजे युष्माकं सङ्गे न तिष्ठति सति यूयं मम वदनं
६ वीक्षितुं न प्राप्स्यथ। तत इस्रायेल् कथयामास युष्माकम् अपर एकः
सहज आस्ते इति मनुजस्य तस्य समीपे कथयन्तो मां प्रति कुव्यवहा-
७ रमिमं कुतः कृतवन्तः? ते कथितवन्तः, युष्माकं तातः किमद्यापि जीवन्
आस्ते? युष्माकं किम् अपरः सहजोऽस्तीति तेनास्मान् अस्माकं ज्ञातींश्च
प्रति यथा परिपृष्टं तथा वयं एतेषां वाक्यानाम् उत्तरं अवोचाम; किन्तु
युष्माकं भ्रातरम् अत्रानयतेति वाचं स वदिष्यतीति केन प्रकारेण
८ बोधेमहि? अनन्तरं यिहूदा निजपितरम् इस्रायेलं बभाषे, त्वं मया सार्द्धं
तं युवानं प्रेषय; वयम् उत्थाय यात्रां कुर्म्मः, तेन वयं त्वं बालकाश्च सर्व्व-
९ एव रक्षिता भविष्यामो न मरिष्यामः। अहमेतस्य लग्नकोऽभूवम् एनं मम
करात् ग्रहीष्यसि; यद्यहम् एनम् आनीय तव सम्मुखे न स्थापयामि,
१० तर्हि स दोषः सर्व्वदा मयि वर्त्तिष्यते। यद्यस्माकम् एतावान् विलम्बो
११ नाभविष्यत् तर्हि वयं द्वितीयवारं परावृत्यागन्तुम् अशक्ष्याम। तदानीं
तेषां जनक इस्रायेल् तान् अवदत्, यदीत्थं भवति, तर्हि कर्म्मैकं
कुरुत; तस्मायधिपतये पारितोषिकं दातुं गन्धरसमधुसिह्लगुग्गुलु-
पेस्तावादामा इत्यादीनि देशस्यास्य फलान्युत्तमानि स्वेषां पात्रेषु गृह्णीत।
१२ अपरं स्वेषां करेषु द्विगुणा मुद्रा गृह्णीत, युष्माकं शाणपुटानां मुखेषु
या मुद्राः परावृत्यागतास्ताश्च करेषु गृहीत्वा यात; को जानाति तत्र
१३ वा भ्रान्तिः संजाता। अपरं निजभ्रातरं गृहीत्वा उत्थाय पुनरपि
१४ तस्याध्यक्षस्य सन्निधिं गच्छत। सर्व्वशक्तिमान् ईश्वरो युष्मान् तेना-
धिपतिना तथानुगृहीतान् करोतु यथा सोऽधिपतिः स्वयं युष्माकम्
अन्यभ्रातरं विन्यामीनञ्च परित्यक्ष्यति; किन्तु यदि मया पुत्त्रहीनेन
भवितव्यं तर्हि पुत्त्रहीनोऽभूवम्।

१५ तदा ते तान्युपढौकनीयानि द्रव्यानि द्विगुणमुद्रा विन्यामीनञ्च नीत्वा
१६ उत्थाय मिसरं गत्वा यूषफः समक्षम् अतिष्ठन्। यूषफ् तैः सार्द्धं विन्यामीनं

विलोक्य निजगृहाधिपतिं गदितवान् एतान् मनुजान् मम निवेशनं
नय पशूंश्च मारयित्वा भक्ष्यद्रव्याण्यासादय; इमे मध्याह्ने मया सार्द्धं
भोक्ष्यन्ते। ततः स यूषफ आदेशानुसारात् तान् यूषफो निवेशनं नीत- १७
वान्। किन्तु तेषां यूषफो निवेशननयनात् ते भीताः परस्परं गदि- १८
तवन्तः, पूर्व्वम् अस्माकं शाणपुटेषु या मुद्राः प्रत्याहृत्य गतास्तत्कारणात्
अस्मान् अत्रानीतवान्; इदानीम् अस्मद्विरुद्धं तं दोषम् आरोप्य समा-
क्रम्यास्माकं गर्द्दभानपि गृहीत्वास्मान् क्रीतदासानिव स्थापयिष्यति।
तदानीं ते यूषफो गृहाधिपतेः समीपं गत्वा गृहद्वारे तिष्ठन्तस्तेन १९
सार्द्धं संलप्य कथयामासुः, हे महेच्छ वयं पूर्व्वं शस्यानि क्रेतुम् आग- २०
माम, किन्तूत्तरणस्थानं गत्वा निजशाणपुटेषु मोचितेषु शाणपुटमुखे २१
प्रतिमनुजपरिमितमुद्राः प्राप्ताः; वयं ताः करेषु समानयाम, शस्यानि २२
क्रेतुञ्चापरा मुद्रा आनयाम; किन्तु ता मुद्रा अस्माकं शाणपुटेषु केन
निहिता वयं तन्न जानीमः। ततः स गृहाधिपतिः कथितवान् युष्माकं २३
शान्ति भूयात् मा भैष्ट, युष्माकम् ईश्वरोऽर्थात् युष्माकं पैतृक ईश्वरो
युष्माकं शाणपुटेषु युष्मभ्यं गुप्तधनं दत्तवान्, युष्माकं मुद्रा मम करे
स्थिताः। अनन्तरं स शिमियोनं तेषां समीपम् आनीय तान् यूषफो २४
गेहाभ्यन्तरं नीत्वा पादान् प्रक्षालयितुं तोयं ददौ, ततस्तेषां गर्द्दभेभ्यः
खाद्यद्रव्यम् अददात्।

अनन्तरं मध्याह्नात् पूर्व्वं यूषफ आगमनसमये ते पारितोषिकान्य- २५
सज्जयन् यतोत्रास्माभि र्भोक्तव्यम् इतिवाचं ते श्रुतवन्तः। ततो यूषफि २६
गृहम् आगते ते करस्थितानि पारितोषिकानि तस्मिन् गृहे निधाय
भूमिष्ठाः सन्तः प्रणेमुः। तदानीं यूषफ् तेषां क्षेमं पृष्ट्वा कथयामास, २७
युष्माकं यस्य वृद्धतातस्य कथाम् अकथयत, स किं क्षेमेणास्ते? स किम्
अद्यापि जीवन् आस्ते? ते प्रत्यूचुः, भवतो दासोऽस्माकं जनकोऽद्यापि २८
जीवन् क्षेमेणास्ते, ततस्ते भूमिष्ठाः सन्तः प्राणमन्। तदानीं यूषफ् २९
पश्यन् निजसहोदरं बिन्यामीनं विलोक्य कथयामास, युष्माकं यस्य कनि-
ष्ठसहजस्य कथामकथयत स किमयम्? अपरं स कथितवान्, हे वत्स
त्वामीश्वरोऽनुगृह्णातु। तदानीं यूषफोऽन्तःकरणे स्नेहस्योपस्थितत्वात् स ३०
व्याकुलीभूय रोदितुं स्थानमन्विष्य क्षिप्रं निजकोष्ठं प्रविवेश तत्र रुरोद
च। तदनन्तरं स वदनं प्रक्षाल्य वहिरागत्य धैर्य्यमवलम्ब्य भक्ष्याणि ३१
परिवेष्टुम् आदिदेश। ततो दासा यूषफे तस्य भ्रातृभ्यश्च तद्देहे ३२

भोक्तृभ्यो मिस्त्रिभ्यश्च पृथक् पृथक् परिवेषयामासुः, यत इब्रिभिः सार्द्धं
मिस्त्रियाणां भोजनव्यवहारो नास्ति तत्कर्म्म मिस्त्रीयाणाम् ऋतीय-
३३ नीयं। अनन्तरं निजसम्मुखे तेषां ज्येष्ठं ज्येष्ठाधिकारानुसारात्
कनिष्ठञ्च कनिष्ठाधिकारानुसारेण समुपवेशयामास, तेन ते परस्परम्
३४ आश्चर्य्यं मेनिरे। अपरं स स्वीयसम्मुखस्थिताद् भक्ष्यात् उत्थाप्य तेभ्यो
दत्तवान्, किन्तु तेषां भागेभ्यो विन्यामीनो भागं पञ्चगुणाधिकं
कृतवान्। ततस्ते पीत्वा तेन सार्द्धम् आनन्दितवन्तः।

४४ चतुश्चत्वारिंशोऽध्यायः।

१ सहजान् प्रति यूषफश्चातुरी ६ तस्य पानपात्रं विन्यामीनः शाणपुटे स्थापनं १४ पुनरपि तेषां तत्समीपागमनं १८ यूषफं प्रति यिहूदाः कातरोक्तिः।

१ अनन्तरं यूषफ् निजगृहाधिपतिम् आदिष्टवान् एषां मानुषाणां
शाणपुटानि यावत् शस्यं धरन्ति तावत् शस्यं परिपूर्य्य देहि, अपरं
२ एकैकशो मुद्रास्तेषां शाणपुटानां मुखेषु स्थापय च। विशेषतः कनि-
ष्ठस्य शाणपुटे तस्य शस्यक्रयणीयमुद्राभिः सह मम पानपात्रम् अर्थात्
रूप्यमयपात्रं निधेहि; ततः स यूषफ आदेशानुसारेण कृतवान्।
३ अपरं प्रभाते सत्येव ते गर्द्दभैः सार्द्धं विसर्जनं प्राप्तवन्तः। किन्तु नग-
४ रात् तेषु बहुदूरं न गतेषु यूषफ् निजगृहाधिपं जगाद, त्वम् उत्थाय
तेषां मानुषाणां पश्चाद् धावन् तान् धृत्वा वद, यूयम् उपकारपरि-
५ वर्त्तेन कुतोऽपकारम् अकार्ष्ट? मम प्रभु र्येन पिबति येन च गणयति
तत् पानपात्रं किमेतत् नहि? एतत् कर्म्म करणात् यूयं दोषिणो
जाताः।
६ ततः परं स तान् धृत्वा तथोक्तवान्, तदा ते प्रतिजगदुः, अस्माकं
७ प्रभुः कुत एतादृशीं वाणीं वक्ति? तव दासानां एतादृक् कर्म्मकरणं दूरे
८ तिष्ठतु। पश्य निजनिजशाणपुटे पूर्व्वं या या मुद्राः प्राप्ताः, किनानदेशात्
ताः पुनरपि तव समीपम् आनीतवन्तः, तर्हि कथं निजप्रभो र्गेहात्
९ सुवर्णं दुर्वर्णं वा चोरयिष्यामः? तव दासानां मध्ये यस्य समीपे तत्
१० प्राप्यते, स मरिष्यति; अपरं वयमपि प्रभोः क्रीतदासा भविष्यामः।
ततः स उक्तवान्, भद्रं युष्माकं कथानुसारादेव भवेत्; यस्य समीपे
तत् प्राप्यते, स मम दासो भविष्यति, किन्त्वन्ये निर्दोषा भविष्यन्ति।
११ तदानीं ते भूमौ स्वं स्वं शाणपुटम् अवारोहयन् स्वं स्वं शाणपुटं

मोचयामासुः । ततः स गृहाधिपो ज्येष्ठमारभ्य कनिष्ठपर्य्यन्तं १२
समाप्य पात्रम् अन्विष्टवान्, तदा विन्यामीनः शणपुटे तत् प्राप्तं।
अतएव ते स्वस्ववस्त्रं छित्त्वा स्वस्वगर्द्दभोपरि शणपुटानि निधाय १३
पुनर्नगरम् जग्मुः।

अपरं यिहूदास्तस्य भ्रातरश्च यूषफो गृहं पुनराययुः। यूषफि तत्र १४
स्थिते सति ते तस्याग्रे भूमौ दण्डवत् बभूवुः । तदा यूषफ् तान् अवदत् १५
यूयं किमिदं कर्म्म कृतवन्तः? एतादृशोऽहं पुमान् अवश्यं गणयितुं शक्नो-
मीति यूयं किं न जानीथ? ततो यिहूदा जगाद, वयं प्रभोः समक्षं १६
किमुत्तरं दास्यामः? किं वा वदिष्यामः? कथं वा स्वान् निर्दोषान्
करिष्यामः? ईश्वरेण तव दासेयानां दुष्टता प्रकाशिता; पश्यतु यस्य
स्थाने पानपात्रं प्राप्तं स वयञ्च सर्व्वएव भवतो दासेया भविष्यामः।
ततो यूषफ् उक्तवान्, एतादृशं कर्म्म मत्तो मा भूत्; यस्य स्थाने पात्रं १७
प्राप्तं सएव मम दासो भविष्यति, किन्तु यूयं क्षेमेण पितुः समीपं यात।

ततो यिहूदाः समीपं गत्वा जगाद, हे प्रभो भवान् फिरौणा समः, १८
एतान् दासान् प्रति भवतः क्रोधो यदि न प्रज्वलति, तर्हि प्रभोः कर्ण-
गोचरे भवतो दासोऽहं किञ्चिन्निवेदयामि। यूष्माकं पिता भ्राता वास्तीति १९
प्रभुरेतान् दासान् अपृच्छत्। ततो वयं प्रभुं प्रत्यवदाम, अस्माकं २०
जनक आस्ते, स स्थविरः; अपरं तस्य वृद्धावस्थाया एकः कनिष्ठः
पुत्रोऽस्ति, तस्य सहोदरो मृतवान्, सएव तन्मातुरेकः पुत्रोऽस्ति, तस्मात्
पिता तस्मिन् स्निह्यति। अनन्तरम् एतान् दासान् भवान् अवादीत्; २१
यूयं तं मम समीपम् आनयत तं द्रक्ष्यामि। वयम् तदा प्रभुम् अवदाम, २२
स युवा जनकं त्यक्तुं न शक्ष्यति, यदि त्यजेत्, तदा तातो मरिष्यति।
ततस्त्वं दासान् एतान् अवादीः, युष्माकं सङ्गे कनिष्ठे सहजे नागते २३
यूयं मम वदनं पुन र्न द्रक्ष्यथ। पश्चात् वयं तव दासस्यास्मत्पितुः २४
समीप उपस्थाय तं प्रभोरेताः कथा अवदाम। अपरं जनको गदितवान् २५
यूयं पुनर्गत्वास्मत्कृते किञ्चित् शस्यं क्रीणीत । ततो वयं अवदाम, २६
यातुं न शक्ष्यामः, कनिष्ठो भ्राता यद्यस्माभिः सार्द्धं तिष्ठति, तर्हि
यास्यामः; यतः कनिष्ठे सहजे सङ्गे न तिष्ठति वयं तस्याधिपस्य
वदनदर्शनमपि प्राप्तुं न शक्ष्यामः। ततस्तव दासेयोऽस्माकं जनकः २७
कथितवान् मम तस्या भार्य्याया द्वावेव पुत्रौ जातौ, तत् यूष्माभि
र्ज्ञायते। तयोरेकस्मिन् गते कथितवानहं स खण्डखण्डीभूय छिन्नोऽ- २८

२९ भवत्; तदारभ्य तमहं कदापि द्रष्टुं न प्राप्तवान्। इदानीं मम सन्नि-
धेरेतस्मिन् नीते, यद्येतमपि काचित् विपत् प्राप्नोति, तर्हि यूयं शोकात्
३० अनेन पक्वकेशेन मां परलोकं प्रहेष्यथ। अतो भवद्दासो यो मम
पिता तत्समीपे मयोपस्थाने कृते यद्येष युवास्माकं सङ्गे न तिष्ठति,
३१ तर्हि स युवानमेनम् अदृष्ट्वा तत्क्षणात् मरिष्यति। यतस्तस्य प्राणा
वत्सस्य प्राणे बद्धाः सन्ति; तेन तव दासेया वयं शोकेन पक्वकेशेन
३२ सार्द्धं तव दासं तमस्माकं जनकं परलोकं प्रेषयिष्यामः। यस्मात् तव
दासोहं निजपितुः समीपे एतस्य यूनः प्रतिभू र्भवन् कथितवान्,
यद्यहं तं तव सन्निधिं नानयेयं, तर्हि पितुः समीपे सर्व्वदा दोषी
३३ स्थास्यामि। अतोहं निवेदयामि, एतस्य यूनः परिवर्त्तेन प्रभोः समीपेहं
३४ दासो तिष्ठामि, किन्तु युवानमेनं सहजैः सार्द्धं विसृजतु। यत एष
युवा मया सार्द्धं चेन्न याति, तर्ह्यहं केन प्रकारेण पितुः समीपं गन्तुं
शक्नोमि? अपरं पितरि या विपत् घटिष्यते तां केन प्रकारेण द्रष्टुं
शक्नोमि?

---

४५ पञ्चचत्वारिंशोऽध्यायः।

१ भ्रातॄणां समीपे यूषफः परिचयनं, ईश्वरानुग्रहस्य प्रशंसनं पित्रे वार्त्ताप्रेषणं ६ यूषफो भ्रातॄणामागमनात् फिरौणस्तुष्टिः पाथेयं दातुमाज्ञा २५ यूषफो जीवनवार्त्तां निशम्य याकूबः प्रफुल्लश्च।

१ अनन्तरं यूषफ् समीपस्थजनानां साक्षात् अधैर्य्यः सन् जगाद, मम
सम्मुखात् सर्व्वान् मनुजान् बहिः कुरुत। तत्र कस्मिंश्चित् न तिष्ठति
२ यूषफ् निजसहजान् निजं परिचाययितुम् आरब्धवान्। तत उच्चै
रुरोद तत् मिस्रीयाः फिरौणो गृहस्थिताश्च सर्व्वे जनाः श्रुतवन्तः।
३ यूषफ् निजसहजान् जगाद, यूषफहं, मम जनकः किमद्यापि जीव-
न्नास्ते? किन्तु तदीया भ्रातरस्तस्य समक्षम् उद्विग्ना अभवन्, तस्मात्
४ उत्तरं दातुं न शेकुः। अनन्तरं यूषफ् निजसहजान् अवदत्, विन-
येहं मत्समीपम् आगच्छत, ततस्ते सन्निधिम् ईयुः; तदा यूषफ् बभाषे,
५ यूयं यं मिसरगामिषु व्यक्रीणीत युष्माकं स यूषफ् सहजोहं। किन्तु
युष्माभिरत्राहं विक्रीत इत्यस्मात् माखिद्यध्वं स्वेषु मा विरज्यध्वं; यतः
६ प्राणरक्षार्थम् ईश्वरो युष्माकमग्रे मां प्रेषितवान्। पश्यत देशे द्वावेव

वत्सरौ दुर्भिक्षोऽभवतां; अपरे पञ्च वत्सरा एतादृशा भविष्यन्ति,
तेषु कर्षणं शस्यकर्त्तनञ्च न भविष्यतः। ईश्वरः पृथिव्यां युष्माकं वंशान् ७
रक्षितुं महोपकारेण युष्मान् प्राणै र्जीवयितुं युष्माकमग्रे मां प्रेषितवान्।
युष्माभिरहमत्र प्रहित इति नहि, ईश्वरेण प्रेरितोऽहम्, स मां फिरौणः ८
पितरं तदीयगेहस्य प्रभुं सर्व्वमिसर्देशस्याधिपञ्च कृतवान्। अतो यूयं ९
पितुः समीपं शीघ्रं गत्वा तं वदत, तव पुत्रो यूषफ् इत्थम् उक्तवान् ईश्वरो
मां निःशेषमिसर्देशस्य प्रभुं कृतवान्; त्वं मम सन्निधिम् आगच्छ, विलम्बं
मा कृथाः। त्वं पुत्रपौत्रादिभिः सार्द्धं गोमेषादिसर्व्वस्वैः सार्द्धञ्च समागत्य १०
मम समीपस्थो भवितुं गोशन्प्रदेशे वत्स्यसि। अहं तत्र स्थाने त्वां पाल- ११
यिष्यामि, नो चेत् ये पञ्च वत्सरा दुर्भिक्षाः स्थास्यन्ति, तत्र सपरिवा-
रस्य त्वदीयस्य सर्व्वस्य च दारिद्र्यं भविष्यति। पश्यताहं स्ववक्त्रेण युष्माभिः १२
संलापयामि, तत् यूयं बिन्यामीन् सहोदरश्च निजनयनै र्दृष्टवन्तः। अत १३
एतस्मिन् मिसर्देशे मम यद्यदैश्वर्य्यादिकं युष्माभि र्दृष्टं, तत् सर्व्वं मम
पितुः समीपे कथयित्वा तं क्षिप्रमत्रानेष्यथ। अनन्तरं यूषफ् निज- १४
सहजस्य बिन्यामीनः कण्ठं धृत्वा रुरोद, बिन्यामीनपि, तस्य कण्ठं धृत्वा
चक्रन्द। अपरं यूषफ् अन्यसहजानपि चुम्बित्वा तेषां कण्ठेषु रुदितवान्; १५
तदानीं तस्य सहजास्तेन सार्द्धम् आलपितुम् आरेभिरे।

अपरं यूषफः सहजा आगमन्, इति जनरवे फिरौणो गृहं गते, १६
फिरौन् तस्य दासेयाश्च सर्व्वे तुतुषुः। अपरं फिरौन् यूषफं जगाद, त्वं १७
निजसहजेभ्यः कथय यूयमेतत् कर्म्म कुरुत, निजपशूनां शाणपुटानि
समवतार्य्य किनान्देशं गत्वा स्वीयपित्रा सार्द्धं सकलपरिवारान् मम १८
सन्निधिम् आनयत; अहं युष्मभ्यं मिसर्देशस्य उत्तमं स्थानं दत्त्वा देशी-
योत्तमानि द्रव्याणि भोजयिष्यामि। इदानीं ममाज्ञयैतत् कर्म्म कुरुत, १९
यूयं मिसरः शकटानि गृहीत्वा निजबालकान् निजयोषितो निज-
जनकञ्च समानयत। तत्र निजद्रव्यादीनि प्रति मा चिन्तयत, कृत्स्न- २०
मिसर्देशीयोत्तमानि द्रव्याणि युष्माकं सन्ति। तत इस्रायेलः सुतास्त- २१
दनुसारेण चक्रुः यूषफ् फिरौण आज्ञानुसारात् तेभ्यः शकटानि पाथे-
यानि च दत्तवान्। प्रतिजनं परिधानाय वस्त्रयुग्मं दत्तवान्; किन्तु २२
बिन्यामीने शतत्रयरूप्यमुद्राः पञ्च युग्मवासांसि च ददौ। अपरं पितुः २३
कृते मिसरीयोत्तमवस्तूनां भाराक्रान्तान् दश गर्दभान् पितुः पाथे-
यानां शस्यानां पूपानां तदन्यभक्ष्यवस्तूनाञ्च भाराक्रान्ता दश गर्द-

२४ भीश्च प्रेषयामास। इत्थं यूषफा निजसहजेषु विसृष्टेषु ते प्रतस्थिरे;
ततः स तान् उवाच, सावधाना यूयं पथि मा विवदध्वम्।
२५ इत्थं ते मिसर्देशात् प्रस्थाय किनान्देशे स्वपितु र्याकूबः समीप
२६ उपतस्थुः। अपरं ते तं बभाषिरे, हे तात यूषफ् अद्ययावत् जीवन्
विद्यते स निःशेषमिसर्देशस्याधिपतिरभूत्; अनया वाचा याकूबो
२७ हृदयं जडीबभूव, यस्मात् स तेषां वचसि न विशश्वास। तदानीं
यद्वाक्यं यूषफ् तेभ्यः कथयामास, तत् सर्व्वं ते तं बभाषिरे, ततः स यदा
यूषफा प्रेषितानि वहनार्थानि शकटानि ददर्श, तदा तेषां जनकस्य
२८ याकूबो मनः प्रफुल्लं बभूव। तत इस्रायेल् कथयामास, मम पुत्त्रो यूषफ्
अद्ययावत् जीवन् आस्ते, एतदेव यथेष्टं; अहं गत्वा मरणात् पूर्व्वं
तं वीक्षिष्ये।

---

४६ षट्चत्वारिंशोऽध्यायः।

१ याकूबो बेर्शेबागमनं ईश्वरेण दर्शनं ५ मिसरि यात्रा ८ तस्य वंशश्रेणिः २८ यूषफः सत्कारः सहजानां समीपे यूषफः कथा च।

१ अनन्तरं इस्रायेल् निजसर्व्वस्वं गृहीत्वा यात्रां विधाय बेर्शेबायामु-
२ त्तीर्य्य तत्र निजपितुरिस्हाक ईश्वरम् उद्दिश्य बलीन् प्रददौ। तत
ईश्वरो रजन्याम् इस्रायेले दर्शनं दत्त्वा कथितवान्, हे याकूब् हे
३ याकूब्, ततः स उक्तवान्, अहमत्रास्मि। तदा स कथितवान्, अह-
मीश्वरस्तव पितुरीश्वरः, त्वं मिसरं गन्तुं मा भैषीः, तत्राहं त्वां एकां
४ बृहज्जातिं करिष्यामि। अहमपि त्वया सार्द्धं मिसरं गमिष्यामि;
ततः परं त्वां पुनरवश्यं परावर्त्तयिष्यामि, यूषफ् निजकराभ्यां तव
नेत्रे निमीलयिष्यति।
५ अनन्तरं याकूबा बेर्शेबातो यात्रायां कृतायां इस्रायेलः पुत्त्रा तं वोढुं
फिरौणा प्रहितेषु शकटेषु निजपितरं याकूबं बालकान् योषितश्च
६ निन्युः। ततः परं ते स्वीयपशून् किनान्देशोपार्जिताः सकलसम्पत्तीश्च
७ गृह्णन्तो याकूबा सार्द्धं सवंशा मिसर्देशम् उत्तीर्णवन्तः। इत्थं याकूब्
सुतान् सुताः पौत्त्रान् पौत्त्रीः सकलपरिवारान् मिसर्देशं निनाय।
८ मिसरमागतानाम् इस्रायेलः अर्थात् याकूबः सन्तानानां नामान्येतानि।
याकूबो ज्येष्ठपुत्त्रो रूबेन्।
९ तस्य रूबेणः सुता हनोक् पल्लुः हिष्रोन् कर्म्मी च।

शिमियोनः सुता यिमूयेल् यामीन् ओहद् याखीन् सोहर् तस्य १०
किनानीयजायाया जातः सुतश्च शौल्।
लेवेः सुता गेर्शोन् किहात् मिरारिश्च। ११
यिहूदाः सुता एर् ओनन् शेलाः पेरस् सेरहश्च। किन्तु एरओननौ १२
किनान्देशे ममतुः। पेरसः सुतौ हिष्रोन् हामूल् च।
इषाखरः सुताः तोलय् पूय योव् शिम्रोन् च। १३
सिवूलूनः सुता सेरद् एलोन् यहलेल् च। १४
एते सर्व्वे दीणा कन्या च पद्दनरामि याकूबो जाता लेयाया वंशाः। १५
इमे सुतैः सुताभिश्च त्रयस्त्रिंशत् जना आसन्।
गादः सुताः सिफोन् हगि शूनी इष्वोन् एरिः अरोदी अरेली च। १६
आशेरः सुता यिम्ना यिश्वा यिश्वि विरिय तेषां भगिनी सेरहश्च; १७
विरियः सुतौ हेवर् मल्कीयेल् च।
लावन् निजकन्यालेयायै यां सिल्पानामिकां दासीं दत्तवान्, तस्या १८
उदरात् याकूबा जाता इमे षोडश प्राणिनः।
याकूबो जायाराहेलः सुतौ यूषफ् विन्यामीन् च।, १९
मिसर्देशे ओन्नगरस्य पोटीफेरा याजकस्य आसिनत्नामिकायाः २०
कन्याया गर्भे यूषफो जातौ मिनशिरिफ्रयिम् च।
विन्यामीनः सुता बेला बेखर् अस्बेल् गेरा नामन् एही रोश् २१
सुप्पीम् ऊप्पीम् अर्द च। एते चतुर्दश जना याकूब औरसा राहेलो २२
वंशाः।
दानः सुतो हूशीम्। २३
नप्तालेः पुत्रा यहसियेल् गूनि यत्सेर् शिल्लेम् च। २४
लावन् निजकन्यायै राहेले यां विल्हानामिकां दासीं दत्तवान्, २५
तस्या गर्भे याकूबो जाता एते सप्त जनाः॥
पुत्रबधू विहाय याकूब औरसाः सन्तानाः षटषष्टि र्जनास्तेन सार्द्धं २६
मिसर्देशं जग्मुः। तदन्याभ्यां यूषफो मिसरि जाताभ्यां द्वाभ्यां पुत्राभ्यां २७
सह मिसरं गता याकूबः परिजनाः साकल्यतः सप्तति र्जना आसन्।
अनन्तरं याकूब् गोशनप्रदेशे यूषफं साक्षात् कर्त्तुं तस्य समीपं स्वस्याग्रे २८
यिहूदां प्राहिणोत्। तदानीं तेषु गोशन्प्रदेशं उत्तीर्णवत्सु, यूषफ् निज- २९
रथं सज्जयित्वा गोशन्प्रदेशे निजपितरम् इस्रायेलं साक्षात् कर्त्तुं
जगाम; ततस्तस्य सन्निधिम् उपस्थितस्य तस्य पिता तस्य कण्ठं धृत्वा

३० बहुक्षणं रुरोद। तदा इस्रायेल् यूषफं कथयामास, त्वम् अद्य यावत्
जीवन् असि, त्वदीयं मुखमहं दृष्टवान्, इदानीं स्वच्छन्दं मरिष्यामि।
३१ अनन्तरं यूषफ् निजसहजान् पितुः परिवारांश्च बभाषे अहं गत्वा
फिरौणे सम्वादं दत्त्वा कथयिष्यामि, किनान्देशात् मम सहजाः पितुः
३२ सर्व्वे परिजनाश्च मम समीपम् आगच्छन्। ते पशुपालकाः पशुवाणिज्य-
३३ काराश्च तस्मात् ते निजगोमेषव्रजादि सर्व्वस्वम् आनयन्। ततः फिरौन्
३४ युष्मान् आहूय युष्माकं का वृत्तिरिति यदि पृच्छति, तर्हि तवैते दासेया
आ यौवनात् अद्य यावत् पुरुषपरम्परातः पशुपालनवृत्तिका इति
वाचं कथयिष्यथ; तेन यूयं गोशन्प्रदेशे वस्तुं प्राप्स्यथ, यतः सर्व्वे पशु-
पालका मिस्रीयाणां घृणास्पदं भवन्ति।

---

४७ सप्तचत्वारिंशोऽध्यायः।

१ यूषफः पितृपञ्चभ्रातृणां फिरौणः साक्षात्करणं १३ शस्यकृते लोकानां रौप्यपशुप्रभृते मूल्यदानं २१ फलानां पञ्चमभागाय बीजदानं २८ याकूबे यूषफश्लोकरणञ्च।

१ अनन्तरं यूषफ् गत्वा फिरौणे वार्त्तां कथयामास, मम जनकः
सहजाश्च किनान्देशात् निजगोमेषादीनां व्रजान् तदन्यसर्व्वस्वञ्चादाय
२ समागता इदानीं गोशनप्रदेशे सन्ति। ततो यूषफ् निजान् पञ्च
३ सहजान् नीत्वा फिरौणं साक्षात् कारयामास; तदा फिरौन् तस्य
भ्रातॄन् पप्रच्छ युष्माकं का वृत्तिः? ते फिरौणं प्रत्यवदन्, भवत एते दासेयाः
४ पूर्व्वपुरुषपरम्परया पशुपालकाः। ते फिरौणं पुनरूचुः, वयमस्मिन्
देशे प्रवस्तुम् आगमाम, यतः किनान्देशे महादुर्भिक्षोऽभवत् तस्मात्
तवैतद्दासेयानां पशुव्रजचारणस्थानं न भवति; ततो निवेदयामो
५ भवान् गोशन्प्रदेशे दासेयान् वासयतु। ततः फिरौन् यूषफम् आज्ञा-
६ पयामास, तव जनकः सहजाश्च तव समीपम् आगमन्। मिसर्देशश्च
तव सम्मुखे विद्यते, देशस्योत्तमस्थाने निजजनकसहजान् वासय; तेभ्यो
गोशन्प्रदेशे स्थानं देहि, तेषां मध्ये यं यं कर्म्मयोग्यं बुध्यसे, तान् मदी-
७ यपशुव्रजानाम् आधिपत्यपदे नियोजय। अनन्तरं यूषफ् निजजनकं
याकूबम् आनीय फिरौणं साक्षात् कारयामास। याकूब् फिरौणं आशिषं
८ जगाद। तदानीं फिरौन् याकूबं पप्रच्छ, तव वयः कति वत्सरा अभवन्?
९ याकूब् फिरौणं जगाद, मम प्रवासकालाः त्रिंशदधिकशतं वत्सरा अभ-
वन्; मदीयायुरल्पं क्लेशजनकञ्च मदीयपूर्व्वपुरुषाणां प्रवासकालस्यायुषां

सम नहि। अनन्तरं याकूब् फिरौणमाशिषं गदित्वा तस्य साक्षाद् १०
विसृष्टो ऽभवत्। तदानीं यूषफ् फिरौण आज्ञानुसारेण मिसर्देशस्य ११
मध्ये रामिषेष्नामके उत्तमस्थाने ऽधिकारं दत्त्वा निजपितरं सहजांश्च
स्थापयामास। अपरं यूषफ् निजजनकं सहजान् पितुः परिजनांश्च १२
परिवारानुसारतो भक्ष्यवस्तूनि दत्त्वा प्रतिपालयामास।

अनन्तरं सर्व्वस्मिन् देशेऽतिशयकठिनदुर्भिक्षस्य जातत्वात् खाद्य- १३
वस्तूनां योऽभावो जातस्तेन मिसर्देशीयाः किनान्देशीयाश्च जना
मूर्च्छागतदेहा अभवन्। अपरं लोका यूषफः समीपे यानि शस्यानि क्रीत- १४
वन्तस्तेषां मूल्यार्थं यूषफ् मिसर्देशस्य किनान्देशस्य च निःशेषरौप्याणि
संगृह्य फिरौणः कोषम् आनीतवान्। इत्थं मिसर्देशे किनान्देशे च १५
रूप्याभावे सति मिस्रीयलोका यूषफो निकटम् आगत्य जगदुः, अस्मभ्यं
खाद्यं देहि, अस्माकं रूप्याणां शेषत्वात् वयं किं तव सम्मुखे मरिष्यामः?
ततो यूषफ् कथितवान्, यदि युष्माकं रूप्याणां शेषोऽभवत् तर्हि पशून् १६
दत्त, पशुमूल्यं युष्मभ्यं शस्यं दास्यामि। तदानीं ते यूषफः समीपं निज- १७
निजपशुष्वानीतेषु यूषफ् वाजिमेषगोगर्दभादिसम्पत्तीनां विनिमयत-
स्तेभ्यः शस्यानि दातुम् आरभत; इत्थं यूषफ् तेषां पशून् गृहीत्वा
तस्मिन् वत्सरे तेभ्यः खाद्यानि दत्तवान्। अपरं वत्सरे सम्पूर्णे परवत्सरे १८
ते यूषफः समीपम् आगत्य बभाषिरे, अस्माभिः सर्व्वाणि रूप्याणि
व्ययितानि, अस्माकञ्च पशुव्रजाश्च प्रभोरेवाभवन्, तत् प्रभुतो न
गोपायिष्यते; अस्माकं कायान् भूमीश्च विना प्रभोः साक्षात् किमपि
न विद्यते। अतो वयम् अस्माकं भूम्यश्च एते उभे तव गोचरे कुतो १९
विनंक्ष्यतः? भवान् खाद्यशस्यानि दत्त्वा अस्मान् अस्माकं सर्व्वा भूमीश्च
क्रीत्वा गृह्णातु; वयं स्वस्वभूम्या सार्द्धं फिरौणोऽधीना भविष्यामः, तथा
वीजानि ददातु, तेन वयं न मृत्वा जीवन्तः स्थास्यामः, अस्माकं भूम्यश्च
निःशेषं न विनंक्ष्यन्ति। अनन्तरं दुर्भिक्षे तेषाम् अतीवासह्ये सति २०
मिस्रियाः स्वस्वा भूमी व्यक्रीणन्; ततो यूषफ् फिरौणः कृते मिसरीयाणां
सर्व्वा भूमीः क्रीतवान्; इत्थं सर्व्वासु भूमिषु फिरौणो ऽधिकारो जातः।
ततः स मिसर एकसीमातोऽन्यसीमां यावत् नगरे नगरे लोकान् २१
स्थानान्तरीचकार। केवलं याजकानां भूमी नाक्रीणत्, यतः फिरौन् २२
तेभ्यस्ता वृत्तित्वेन दत्तवान, तस्मात् तेषां भूमौ न विक्रीतायां फिरौणा
दत्ता या वृत्तिः सा तेषां भोगार्थमेव स्थितवती।

२३ अनन्तरं यूषफ् प्रजाभ्यः कथयामास, पश्यताहं फिरौणः कृते युष्मान्
युष्माकं सर्व्वा भूमीश्च क्रीतवान्; इदानीं एतानि वीजानि गृहीत्वा भूमौ
२४ वपत; तत्र यद्यत् उत्पत्स्यते तस्य पञ्चमांशं फिरौणे दास्यथ, तदन्य-
चतुरोंऽशान् भूमेर्वीजकृते निजपरिजनानां बालकानाञ्च खाद्यकृते
२५ स्थापयिष्यथ। ततस्ते प्रत्यूचुः, भवान् अस्माकं प्राणान् रक्षितवान्; भवतः
२६ कृपादृष्टौ सत्यां वयं फिरौणो दासेया भविष्यामः। अपरं याजकानां
यस्यां भूमौ फिरौणो नाधिकारो जातस्तदितरासां मिसर्देशस्य सर्व्वासां
भूमीनां पञ्चमांशं फिरौन् प्राप्स्यति, यूषफा स्थापितेयं व्यवस्था सर्व्व-
मिसर्देशेऽद्य यावत् वर्त्तते।
२७ अपरम् इस्रायेल् मिसरो गोशनप्रदेशे न्युवास, तत्र चाधिकारं प्राप्य
२८ क्रमशो वर्द्धिष्णुरतिवृद्धवंशो बभूव। स याकूब् मिसर्देशे सप्तदश वत्स-
रान् यापयामास तदा तस्य वयः सप्तचत्वारिंशदधिकशतं वत्सरा बभूव।
२९ अत इस्रायेल् निजं मरणदिनं सविधं विज्ञाय निजसुतं यूषफं समाहूय
गदितवान्, अहं यदि तव साक्षात् अनुगृहीतोऽभवं, तर्हि विनये
मिसर्देशे श्मशाने मां न निधाय मम पूर्व्वपुरुषाणां समीपे मां श्मशाने
३० निधातुम् एतस्मात् मिसर्देशात् नीत्वा तेषां श्मशानवेश्मनि मां
शाययिष्यसि, मां प्रतीमम् अनुग्रहं सत्यतया व्यवहरिष्यसीति मम
जंघाधो हस्तं दत्त्वांगीकुरु; ततो यूषफ् कथयामास, त्वदीयाज्ञा-
३१ नुसारेणैव करिष्यामि। तथापि शपथं कर्त्तुं यूषफि याकूबा भाषिते
यूषफ् तस्य समीपे शपथं चकार, तदानीम् इस्रायेल् शय्यायाः
शिरःस्थानदिशि प्रणनाम।

---

४८ अष्टचत्वारिंशोऽध्यायः।

१ यूषफस्तस्य सुतयोश्च पीडितस्य याकूबः साक्षात्करणं तान् प्रति याकूबः कथनं ८ यूषफः सुतद्वयायाशिषं दत्त्वा कनिष्ठस्य प्रधानत्वकरणं १९ यूषफा सार्द्धं तस्य संलपनञ्च।

१ एतासु घटनासु गतासु, पश्य तव पिता पीडितोऽभवत्, इति वार्त्ता
यूषफे कथिता; ततः स निजौ द्वौ सुतौ मिनशीफ्रयिमौ नीत्वा जगाम।
२ तदानीं केनचिद् याकूबे कथितं, पश्य तव सुतो यूषफ् आगमत्, तत
३ इस्रायेल् आत्मानं सबलं कृत्वा शय्यायां उत्तिष्ठन् उपविवेश; अपरं
यूषफे कथयामास, किनान्देशस्य लूस्नगरे सर्व्वशक्तिमान् ईश्वरो मां

दर्शनं दत्त्वा इत्याशिषं गदित्वा कथयामास ; पश्य, त्वामहं फलवन्तं ४
बहुवंशं करिष्यामि, त्वत्तो जननिवह उत्पत्स्यते, तव भाविवंशाय
चिरमधिकर्त्तुम् इमं देशं दास्यामि च । अत इफ्रयिम् मिनशिनामानौ ५
तव यौ द्वौ पुत्रौ मम मिसरागमनात् पूर्व्वं मिसर्देशे जातौ तौ मम सुतौ
भविष्यतः, तौ रूवेन् शिमियोनाविव मम भविष्यतः। किन्त्वितः परं ६
तव ये ये सन्ताना भविष्यन्ति, ते तव भविष्यन्ति, अपरं ज्येष्ठभ्रातृणां
नाम्ना स्वस्वाधिकारे विख्यास्यन्ति। तथा पद्दनरामागमनकाले किनान्- ७
देशस्य इफ्राथातः किञ्चिद् दूरे तिष्ठति मयि राहेल् मार्ग एव मम
समीपे मृता ; ततोहम् इफ्राथा अर्थात् बैत्लेहमः पदवीपार्श्वे तस्याः
श्मशानस्थानं कृतवान्।

अनन्तरम् इस्रायेल् यूषफः पुत्रौ विलोक्य पप्रच्छ, एतौ कौ? ततो ८
यूषफ् पितरं जगाद, ईश्वर एतस्मिन् देशे मह्यं पुत्रावेतौ दत्तवान्। ९
तदानीम् इस्रायेल् कथितवान्, अहं विनये, एतौ मम समीपम् आनय,
तावहम् आशिषं वदामि। किन्तु वार्द्धक्यकारणात् क्षीणदृष्टिरिस्रायेल् १०
सुस्पष्टं द्रष्टुं न शशाक ; ततो यूषफ् तस्य समीपं तावानीतवान्, स तौ
चुम्बितवान् आलिङ्गितवांश्च । अपरं इस्रायेल् यूषफं बभाषे, अहं ११
तव वदनं पुनर्द्रष्टुं न प्राप्स्यामीति, चिन्तितवान्, किन्तु पश्य, तव वंश-
मपीश्वरो माम् अदर्शयत्। तदा यूषफ् जानुद्वयमध्यात् तौ नीत्वा भूमिष्ठः १२
सन् प्रणनाम। पश्चात् यूषफ् तौ द्वौ पितुः समीपं नीत्वा निजदक्षिण- १३
करेण इस्रायेलो वामे इफ्रयिमं, वामकरेण इस्रायेलो दक्षिणे मिनशिं
धृत्वा स्थापितवान्। तत इस्रायेल् विविच्य दक्षिणकरं प्रसार्य्य कनिष्ठस्य १४
इफ्रयिमो मस्तकोपरि दत्तवान्, ज्येष्ठस्य मिनशे मस्तकोपरि च वामं
करं दत्तवान्।

अनन्तरं स यूषफम् आशिषं निगद्य भाषितवान्, मम पूर्व्वपुरुषौ इब्रा- १५
हीम्इस्हाकौ यस्य पश्चानम् अवलम्बितवन्तौ यश्चेश्वरोऽद्य यावत् मां
यावज्जीवनं प्रतिपालितवान्; यश्च दूतः सर्व्वापद्भ्यो मां रक्षितवान्, १६
स एतौ बालकौ स्वाशिषं ब्रूयात्; आभ्यां मम नाम मदीयपूर्व्वपुरुषयोः
इब्राहीम् इस्हाकोश्च नाम तिष्ठतु, एतौ पृथिव्यां बहुवंशौ भवताम्।
तदानीं इफ्रयिमः शिरसि पितु र्दक्षिणं हस्तं दृष्ट्वा यूषफ् असन्तुष्टोऽ- १७
भवत्, तत इफ्रयिमो मस्तकात् मिनशेः शिरसि तं स्थापयितुं जनकस्य
करं उत्थाप्य जगाद, हे तात इत्थं नहि, एष ज्येष्ठ एतस्य शिरसि दक्षिणं १८

१९ करं देहि। किन्तु तस्य पिता अनङ्गीकृत्य कथितवान्, हे पुत्त्र, तदहं
जानामि, जानाम्यहं; सोऽपि महती जाति र्भविष्यति, इति सत्यं, किन्तु
तस्य कनिष्ठो भ्राता तस्मादपि महती जाति र्भविष्यति, एतस्य वंशो
२० बहुजनो भविष्यति। तद्दिनं स तावाशिषं प्रभाष्य कथयामास, इस्रा-
येल्वंशीया आशीर्व्वचनार्थं युवयो र्नामनी प्रभाष्य वदिष्यन्ति, ईश्वर-
स्त्वाम् इफ्रयिमो मिनशिस्य तुल्यं करोतु, इत्थं स मिनशेरिफ्रयिमम् अग्र-
२१ गण्यं कृतवान्। अपरम् इस्रायेल् यूषफं कथयामास, पश्य मम मृत्युकाल
उपस्थितवान्; किन्तु ईश्वरो युष्माकं सहायो भूत्वा युष्मान् पुनः पैतृकं
२२ देशं नेष्यति। अहं यमंशं निजासिधनुषो र्बलात् इमोरीयाणां करात्
प्राप्तवान् तव भ्रातृगणात् तमधिकमंशं तुभ्यम् अदाम्।

---

४९ ऊनपञ्चाशत्तमोऽध्यायः।

१ याकूबः सर्व्वेषां पुत्त्राणामाह्वानं कृत्वा मेलनं २ एकैकमधि तस्य कथनं भविष्यद्वाक्यञ्च
२९ निजश्मशानस्थानमाज्ञापनञ्च।

१ अनन्तरं याकूब् निजपुत्त्रान् आहूय कथयामास,
यूयं मिलत हे पुत्त्रा यद् युष्मान् प्रति शेषतः।
घटिष्यते तदेवाहं युष्मभ्यं कथयामि हि।
२ हे याकूबः सुता यूयं निशामयत मद्वचः।
पित्रिस्रायेल्कथायां वः स्वमनांसि निधत्त च॥
३ रूबेन् ज्येष्ठसुतस्त्वं मे सामर्थ्यं प्रथमं बलं।
पराक्रमेण मुख्योऽसि महिम्ना त्वं निजेन च।
४ त्वं स्रोतइव वेगी हि न स्याता मुख्यता तव।
यतस्त्वं निजतातस्य शयनीयं गतः पुरा।
गत्वा च शयनीयं मे तदशुद्धं कृतं त्वया॥
५ शिमियोन् लेविनामानौ विद्येते सोदरावुभौ।
भवतो निर्दये अस्त्रे तयो र्द्वौ चन्द्रहासकौ।
६ तयो र्गूढपरामर्शे मन्मनो न प्रवर्त्ततां।
समज्यायां तयो र्नो मे सम्मानमुपतिष्ठतु।
अहन्यन्त पुरा ताभ्यां मनुजा निजकोपतः।
एकश्च भूपतिस्ताभ्याम् अनाश्यत निजेच्छया।
७ तयोः क्रोधोऽभिशप्येत यतः स ज्वलितोऽभवत्।

तयोः कोपोऽभिशप्येत यतः स निष्ठुरोऽभवत्।
याकूबीयजनेष्वेतौ करिष्यामि पृथक् पृथक्।
इस्रायेलीयमध्ये तौ विकिरिष्यामि निश्चितं॥
यिहूदाः सहजास्ते त्वां प्रशंसिष्यन्ति सर्व्वशः। ८
भविष्यन्ति त्वदीयाश्च रिपवस्तव हस्तगाः।
त्वदीयपितृसन्तानास्त्वां प्रणंस्यन्ति दण्डवत्।
सिंहानां शावकैस्तुल्यो यिहूदा भवति स्वयं। ९
हे वत्स मृगयाद्रव्यं भुक्त्वा त्वम् आगमिष्यसि।
सिंहीवत् सिंहवद्वा त्वां सुप्तं को बोधयिष्यति।
यत्समीपे च लोकानां भविष्यति हि संग्रहः। १०
स शीलोः सान्वको यावद् आगमं न करिष्यति।
नहि तावद् यिहूदातो राजदण्डो गमिष्यति।
चिराधिपतिता तस्य वंशान्नापगमिष्यति।
द्राक्षालतासमीपे स गर्द्दभं भन्त्स्यति स्वयं। ११
सुगोस्तनीसमीपे च बद्ध्वा गर्द्दभशावकान्।
रञ्जयिष्यति गोस्तन्या रसेन चोत्तरीयकं।
द्राक्षारक्तरसै रक्तं परिधेयं करिष्यति।
द्राक्षारसेन तस्यापि नेत्रे रक्ते भविष्यतः। १२
शुक्लास्तस्य भविष्यन्ति दुग्धेन सकला रदाः॥
सरित्पतेः प्रतीरे हि सिबूलून् संनिवत्स्यति। १३
पोतीयाब्धितटे तस्य निवासश्च भविष्यति।
तस्याधिकारसीमा च सीदोनन्ता भविष्यति॥
आवासमध्यतः शायी बलवानपि यो भवेत्। १४
गर्द्दभस्तेन सङ्काश इषाखर् संभविष्यति।
विश्राममुत्तमं बुद्ध्वा रम्यं बुद्ध्वा च नीवृतं। १५
भारं वोढुं नमन् स्कन्धं करं राज्ञः स दास्यति॥
इस्रायेलोऽन्यवंशानां सदृशत्वं गतोहि दान्। १६
स्वकीयानां मनुष्याणां सुविचारं करिष्यति।
पथि संस्थाय यः सर्पो दष्ट्वा च वाजिनः पदं। १७
तदारूढं पातयेच्च तत्तुल्यो दान् भविष्यति॥
परेश त्वत्परित्राणं समवेक्ष्य स्थितोस्म्यहं॥ १८

१९ कश्चित् सैन्यसमूहश्चेत् गादं जयति कर्हिचित्।
तर्हि गादपि तत्सैन्यं पराजेष्यति निश्चितं॥
२० आशेर उत्तमं खाद्यं तस्मात् राजापि भोक्ष्यते॥
२१ मनोहृत्शृङ्गशाखाभिः कुरङ्गो योस्ति सुन्दरः।
मृगेन तेन सङ्काशो नप्तालिः संभविष्यति॥
२२ यूषफ् प्रस्रवेः समीपस्था प्राचीरपारगामिनी।
फलयुक्ता च या शाखा तद्युक्तशाखिनः समः।
२३ चापभृद्भिर्मृगयित आविद्धश्च शिलीमुखैः।
अतिक्लिष्टस्य येनास्य गाढीकृतं शरासनं।
२४ तदीयदोः कराणाञ्च येनाभूद्बलवत्तता।
इस्रायेलः सहि त्राता मूलपाषाणरूपकः।
ईश्वरः स च याकूबो विद्यते सर्व्वशक्तिमान्।
२५ त्वत्तातेश्वरसाहाय्यात् कृत्स्नशक्त्याशिषस्तथा।
ऊर्द्धस्थाद्वियतो यद्यत् कुशलं परिजायते।
अधोगम्भीरनीराब्धेः कुशलं यच्च जायते।
मङ्गलं जायते यच्च गर्भतश्च पयोधरात्।
त्वदीयानि भविष्यन्ति तानि सर्व्वाणि निश्चितं।
२६ त्वत्पितुः फलदाशीः स्यान्मदादिपुरुषाशिषः।
सा चिरन्तनशैलीयां सीमां यावत् समेधिता।
भ्रात्रापसारितस्यैव यूषफो मस्तकोपरि।
सातिबाहुल्यमासाद्य सुतरां संभविष्यति॥
२७ प्रगे संहृतभक्ष्याशी सन्ध्याखेटान्नवण्टकः।
योवृकस्तेन सङ्काशो विन्यामीन् संभविष्यति॥
२८ एत इस्रायेलो द्वादश वंशाः, तेषां जनकस्तान् प्रत्येतानि आशि-
र्व्वचनानि कथयित्वा तेषाम् एकैकं विशेषं आशिषं जगाद।
२९ अनन्तरं याकूब् तान् अवदत्, अहं निजजनैः सार्द्धं संगृहीतो
३० भविष्यामि। अतः किनान्देशे मम्रयाः पूर्व्वस्थितं मक्पेलाया यत्
३१ क्षेत्रम् इब्राहीम् श्मशानाधिकर्त्तुं हेतीयइफ्रोणः क्रीतवान्, यत्र स्थान
इब्राहीमस्तस्य जायायाः सारायाश्च इस्हाकस्तस्य भार्य्याया रिव्कायाश्च
श्मशानम् अभवत् यत्र चाहं लेयायाः श्मशानम् अकरवं, तत्रैव हेतीय-
३२ इफ्रोणः क्षेत्रस्थितायां गुहायां पितृलोकानां समीपे मम श्मशानं करि-

अथ, यतस्तत् क्षेत्रं तन्मध्यस्था गुहाच हेतीयसन्तानेभ्यः क्रीता। इत्थं ३३
याकूब् निजसुतान् प्रत्याज्ञापनं समाप्य शयनीये पादौ मेलयित्वा
प्राणान् त्यक्त्वा निजजनानां समीपे समगच्छत।

---

५० पञ्चाशत्तमोऽध्यायः।

१ याकूबः कृते शोचनं ७ याकूबः श्मशानगमनं १५ यूषफो भ्रातॄणां सान्त्वनं २२ यूषफो वंशस्य कथनं शेषाज्ञा मरणञ्च।

तदानीं यूषफ् निजपितु र्वदनं प्रति शिरः संनम्य रोदित्वा चुचुम्ब। १
अपरं यूषफ् स्वपितृदेहं सुगन्धिद्रव्ययुक्तं कर्त्तुं निजभृत्यचिकित्सकान् २
आज्ञापयामास; ततश्चिकित्सका इस्रायेलो वपुः सुगन्धिद्रव्यै र्योजया-
मासुः। ते च तत्र तत्कर्म्मकरणाय प्रयोजनीयानि चत्वारिंशत् दिनानि ३
यापयामासुः, मिस्रीयलोकाश्च तत्कृते सप्ततिदिनानि यावत् शुशुचुः।
शोकीयदिनेषु गतेषु यूषफ् फिरौणः परिजनान् अवदत्, यदि मां प्रति ४
युष्माकम् अनुग्रह आस्ते, तर्हि फिरौणः कर्णगोचरे कथामेतां कथ-
यत। मम पिता मां शपथं कारयित्वा गदितवान्, पश्य किनान्देशे स्वस्य ५
कृते मया यत् श्मशानं खातं मयि मृते त्वं मां तत्र निधास्यसि; तस्मात्
इदानीं मां यातुम् आज्ञापयतु; पितरं श्मशाने निधायाहं पुनराग-
मिष्यामि। ततः फिरौन् उक्तवान्, याहि, तव पिता त्वां यथा शपथं ६
कारितवान् तथैव त्वं तं श्मशाने स्थापय।

तदा यूषफ् स्वपितरं श्मशाने निधातुं यात्रां चकार; ततः फिरौणो ७
गृहस्याधिपतयो भृत्या मिसर्देशीयाधिपतयो यूषफः सर्व्वे परिवारा- ८
स्तस्य भ्रातरस्तस्य पितुः परिवाराश्च तेन सार्द्धं जग्मुः; गोशन् प्रदेशे
केवलं बालका गोमेषव्रजाश्च तै र्निहिताः। तेन सार्द्धं रथारूढा ९
अश्वारूढाश्च जग्मुः; तेनातीव जनसमागमो बभूव। पश्चात् ते यर्द्दन्- १०
तटिन्याः पारे स्थितम् आटदः शस्यमर्द्दनस्थानम् उपस्थाय तत्र महारवेण
रुरुदुः; यस्मात् तत्र स्थाने यूषफा पितुः कृते सप्त दिनानि यावत् शुशुचे।
अतः किनान्देशीया आटदः शस्यमर्द्दनस्थाने तेषाम् ईदृक् शोकं ११
विलोक्य कथयामासुः; मिस्रीयाणाम् अयं महान् शोकः। तस्मात् यर्द्दन्-
पारस्थं तत्स्थानम् आवेल्मिसर् (मिस्रीयशोकः) इति नाम्ना विख्यातं
बभूव। अनन्तरं याकूब् निजपुत्रान् यथाज्ञापयत्, तस्य पुत्रास्तदनुसा- १२
रेण कर्म्म चक्रुः। फलतस्तस्य पुत्रास्तं किनान्देशं नीत्वा हेतीयेफ्रोणः १३

समीपात् श्मशानस्थानार्थम् इब्राहीमा क्रीता मम्रेः पूर्व्वस्थमक्पेला-
१४ क्षेत्रस्य या गुहा तन्मध्ये तस्य श्मशानं कृतवन्तः। स्वस्य तातस्य श्मशाने
जाते यूषफ् तस्य पितुः श्मशानं कर्त्तुं गतवन्तस्तस्य भ्रात्रादयः सह-
गामिनश्च मिसर्देशं प्रत्यागतवन्तः।

१५ अपरं स्वेषां पिता मृत इति दृष्ट्वा यूषफो भ्रातरः कथयामासुः, यदि
यूषफ् अस्मान् ऋतीयते तर्हि वयं तस्य यद्यत् अहितम् अकुर्म्म तत्प्रति-
१६ फलम् अस्मभ्यं दास्यति। तस्मात् ते यूषफं प्रति कथामेतां लोकद्वारा कथ-
यामासुः, तव भ्रातृभिस्त्वां प्रति दोषे कृतेपि त्वम् अनुगृह्य तेषां दोषम्
१७ अपराधञ्च मार्ज्जिसि, कथामेतां यूषफे कथयिष्यथेति तव पिता मरणात्
पूर्व्वं अस्मान् गदितवान्, अतो वयम् इदानीं प्रार्थयामहे, तव
पितुरीश्वरस्य दासेयानां दोषं मृष्धि, किन्तु यूषफ् तेषां कथामेतां श्रुत्वा
१८ रोदितुम् आरभत। अनन्तरं तस्य भ्रातरस्तदग्रं गत्वा प्रणिपत्य कथया-
१९ मासुः, पश्य, वयं तव दासाः। ततो यूषफ् तेभ्यः कथितवान्, मा
२० भैष्ट, किमहम् ईश्वरस्य प्रतिनिधिस्वरूपः? यूयं मद्विरुद्धां कुमन्त्रणां
कृतवन्त इति सत्यं, किन्त्वीश्वरस्तामेव सुमन्त्रणां कृतवान्, फलत इदानीं
२१ यादृशं पश्यथ, तथैव स बहूनां मनुष्याणां प्राणान् अरक्षत्। अतो
यूयम् इदानीं मा भैष्ट, युष्मान् युष्माकं बालकांश्च प्रतिपालयिष्येहम्।
इत्थं मधुरवाक्यं कथयित्वा स तान् सान्त्वयामास।

२२ अनन्तरं यूषफ् तस्य पितुः परिवाराश्च मिसर्देशे वसन्तस्तस्थुः।
२३ अपरं यूषफ् दशाधिकं शतं वत्सरान् जीवन् इफ्रयिमः पौत्त्रं यावत्
२४ ददर्श, स मिनशे माखीर्न्नाम्नः पुत्त्रस्य सन्तानानपि क्रोडे चकार। ततो
यूषफ् सहजान् अवदत्, अहं मुमूर्षुः, किन्त्वीश्वरो युष्मान् प्रति नितान्तं
दृष्टिं कृत्वा इब्राहीम इस्हाको याकूबश्च समीपे यं देशं दातुं शपथं
२५ कृतवान् अस्माद् देशात् तं देशं नेष्यति। ततो यूषफ् इमं शपथं कार-
यित्वा इस्रायेलः सन्तानान् बभाषे, ईश्वरो युष्मान् प्रत्यवश्यं दृष्टिं
करिष्यति, तदानीञ्च यूयं एतस्मात् स्थानात् मदीयास्थीनि नेष्यथ।
२६ इत्थं यूषफ् दशाधिकशतवत्सरवयसि ममार, ततः सुगन्धिद्रव्ययुक्त-
स्तस्य देहो मिसर्देशे काष्ठाधारे स्थापितः।

इत्यादिपुस्तकं समाप्तं।

यात्रापुस्तकम्

अर्थात्

मूसालिखितं द्वितीयपुस्तकं।

१ प्रथमोऽध्यायः।

१ यूषफस्तस्य भ्रातृणाञ्च मरणात् परं तेषां वंशवृद्धिः ८ फिरौणा तेषामुपद्रवः १५ तेषु धात्रीणां दया २२ तेषां पुत्त्राणां बधश्च।

रूवेन् शिमियोन् लेवि यिहूदा इषाखर् सिबूलून् विन्यामीन् १
दान् नप्तालि गाद् आशेर् एतन्नामका इस्रायेलः सुताः सर्व्वे स्वस्वपरि-
जनानादाय याकूबा सार्द्धं मिसर्देशम् आजग्मुः। तदा याकूबो वंशीयाः ५
साकल्येन सप्ततिजना आसन्, किन्तु यूषफ् पुरैव मिसरि स्थितवान्।
अनन्तरं यूषफ् तस्य भ्रातरस्तत्कालीयलोकाश्च मम्रुः। तथापि इस्रायेलो ६
वंशा बहुप्रजा वर्द्धिष्णवो बहुसन्तानाः सन्तोऽतीवप्रबला ऽभवन्; ७
देशस्तैः परिपूर्णो बभूव।

ततः परं यूषफं यो न जानाति, तादृश एको मिसरि नवीनो राजा ८
भूत्वा निजलोकेभ्यः कथयामास, पश्यत, इस्रायेलीयलोका बलेन संख्यया ९
च अस्मत्तोऽधिका अभवन्। यथा ते वर्द्धिष्णवो भूत्वा युद्ध उपस्थिते १०
अस्माकं शत्रुपक्षाः सन्तोऽस्माभिः सार्द्धं न युद्ध्येयुः, अस्माद् देशाद् वा
न वहि र्गच्छेयुः, तन्निमित्तं वयं तैः सार्द्धं सावधाना व्यवहराम। अन- ११
न्तरं ते भारवाहनेन तान् क्लेष्टुं तेषामुपरि कार्य्यशासकान् नियोजया-
मासुः; अपरं तैः फिरौणः कृते भाण्डागारनगराण्यर्थात् पिथोमं
रामिषेषञ्च निचाययाञ्चक्रुः। किन्तु ते तै र्यावतः क्लेशान् लेभिरे, तावतीं १२
वृद्धिम् उन्नतिञ्च गन्तुम् आरेभिरे; तस्मात् ते इस्रायेलो वंशकारणात्
अतीवोद्विविजुः। पश्चात् मिस्रीयलोका निर्द्दयत्वेन तान् दास्यकर्म्माणि १२
कारयामासुः। फलतः कठोरदास्येन पङ्केष्टकक्षेत्रकर्म्मभिश्च तेषां १४
प्राणान् विरञ्जयाञ्चक्रुः; ते तान् यावन्ति दास्यकर्म्माणि कारितवन्तस्ता-
वन्ति महोपद्रवेणाकारयन्।

१५ अनन्तरं मिस्रीयो भूपतिरिब्रीयलोकानां शिफ्रानामिकां पूयाना-
१६ मिकाञ्च धात्र्यावाहूय वचनमिदं बभाषे, यदा युवाम् इब्रीययोषितां
धात्रीकार्य्यं करिष्यथस्तदा तासाम् अपत्यानां कोषान् परीक्ष्य पुमपत्यानि
१७ हनिष्यथे, स्त्र्यपत्यानि जीवन्ति स्थापयिष्येथे। किन्तु धात्र्यौ ईश्वरात्
भीत्वा मिस्रीयराजस्य निदेशानुसारात् अकृत्वा पुमपत्यानि जीवन्ति
१८ रक्षितुम् आरेभाते। अतो मिसरो राजा धात्र्यावाहूय बभाषे युवाम्
१९ एतादृशं कर्म्म कुतः कुरुथः? पुमपत्यानि कुतो जीवन्ति स्थापयथः? ततो
धात्र्यौ फिरौणं प्रतिजगदतुः, इब्रीयाणां योषितो मिस्रीयाणां योषित-
इव न भवन्ति; ता बलवत्यस्तासां समीपे धात्रीणाम् आगमनात् पुरैव
२० ताः प्रसूयन्ते। अत ईश्वरस्तयो र्धात्र्योः कुशलं चकार, ततस्ते वंशा अति-
२१ शयमेधमाना महाबलवन्तो बभूवुः। धात्र्यावीश्वरात् बिभयाञ्चक्रतुः,
तस्मात् स तयोरपि वंशान् एधयाञ्चकार।
२२ अनन्तरं फिरौन् निजान् सर्व्वलोकान् इत्याज्ञापयामास, यूयं सर्व्वाणि
सद्योजातानि पुमपत्यानि स्रोतस्विन्यां निक्षेप्स्यथ, किन्तु सर्व्वाः कन्या
जीवन्तीः रक्षिष्यथ।

---

२ द्वितीयोऽध्यायः।

१ मूसाजननं तस्य नदीतटे पेटके स्थापनं ५ फिरौणः कन्यया गृहीतत्वं ११ तेन मिस्रीयलोकस्य बधः १५ फिरौणः क्रोधात् मिदियन्देशं प्रति तस्य पलायनं २३ इस्रायेल् लोकान् प्रतीश्वरस्य दया च।

१ अनन्तरं लेविवंशजातस्य कस्यचिन्मनुष्यस्य लेविवंशस्य कन्यया
२ विवाहे जाते सा नारी गर्भं धृत्वा पुत्त्रमेकं प्रसुषुवे; ततः सा तं बाल-
३ कम् अतीव सुन्दरं दृष्ट्वा तं मासत्रयपर्य्यन्तं गोपयामास। ततो गोप-
यितुम् असमर्था सती नलनिर्म्मितं पेटकम् आनीय पङ्कसर्जरसाभ्यां
संलिप्य तन्मध्ये बालकं निधाय तटिनीतीरस्थनलवने स्थापयामास।
४ ततस्तस्य का दशा घटेतेति दर्शनाय तस्य भगिनी दूरे स्थितवती।
५ अनन्तरं फिरौणः कन्या नद्यां स्नातुम् आगच्छत् तस्या दास्यो नदीतटे
भ्रमन्ति, तदा सा नलवनमध्ये पेटकं विलोक्य तमानेतुं निजदासीं प्रेषया-
६ मास। पश्चात् सा पेटकं मोचयित्वा तं बालकं ददर्श, तस्मिन् बालके
७ क्रन्दति सा सदया सती जगाद, एष इब्रीयाणां बालकः। तदानीं तस्य

भगिनी फिरौणः कन्यां बभाषे, त्वत्कृते बालकमेनं दुग्धं पाययितुम् अहं
गत्वा इब्रीयां धात्रीमेकां आहूय किमानेष्यामि? ततः फिरौणः कन्या ८
कथयामास, याहि। तदानीं सा कन्या गत्वा तद्बालकस्य मातरम्
आहूयानयत्। ततः फिरौणः कन्या तामवदत् त्वमेनं बालकं गृहीत्वा ९
मदर्थं पयः पायय, तव वेतनमहं दास्यामि; तदा सा योषित् बालकमा-
दाय पयः पाययामास। ततो बालक एधिते सा तमादाय फिरौणः कन्यायै १०
ददौ, ततो बालकस्तस्या एव पुत्त्रोऽभवत् तदानीं सा तस्य नाम मूसाम्
(आकर्षितं) चकार, यतः सा कथयामास तोयादहमिमम् आकार्षम्।

इत्थं मूसा एधितः सन् एकदा निजभ्रातॄणां समीपं गत्वातीव भारं ११
वहतस्तान् ददर्श; तस्य भ्रातॄणाम् एक इब्रीयः केनचिन् मिस्रियेण प्रहार्य्यते
इत्यपि ददर्श। अतः स चतुर्दिशो वीक्षमाणः कमपि न पश्यन् तं मिस्रीयं १२
हत्वा सिकतामध्ये पोथयामास। अपरं द्वितीयदिने स वहिर्गत्वा द्वा- १३
विब्रीयौ विवदमानौ वीक्ष्य दोषिणं कथयामास, त्वं निजभ्रातरं कथं
प्रहरसि? ततः स उक्तवान् अस्माकमुपरि कस्त्वां राजानं विचारयि- १४
तारं वा नियुक्तवान्? त्वं यथा मिस्रीयलोकं हतवान्, तथा किं मामपि
हन्तुमिच्छसि? ततो मूसा भीतः सन् उक्तवान् तत् कर्म्मावश्यं
प्रकाशितं।

ततः फिरौन् कथामेतां श्रुत्वा मूसां हन्तुं मृगयाञ्चक्रे। तस्मात् मूसा १५
फिरौणः सम्मुखात् पलायमानो मिदियन्देशे वस्तुं गत्वा कस्यचित् प्रहेः
समीपे समुपविवेश। एतस्मिन्नन्तरे मिदियनीययाजकस्य सप्त कन्यास्त- १६
त्रागत्य पितुर्मेषव्रजं तोयं पाययितुं तोयमुत्तोल्य तोयपात्रं पूरयामासुः।
किन्तु मेषपालका आगत्य तास्ताडयामासुः; ततो मूसा उत्थाय ता १७
उपचकार, तासां मेषव्रजञ्च पयांसि पाययाञ्चकार। अनन्तरं तासु १८
निजपितू रूयेलः समीपं गतासु स ताः पप्रच्छ, यूयमद्य कथं शीघ्रमा-
गताः? ततस्ताः कथयाञ्चक्रुः, एको मिस्री मेषपालकानां करेभ्योऽस्मान् १९
उद्धृत्य अस्मत्कृते यथेष्टाय उदतोलयत्, अस्माकं मेषव्रजञ्च तोयं पायि-
तवान्। तदानीं स निजकन्या अवदत्, स कुत्र? यूयं तं कुतस्त्यक्त्वा- २०
गमत? यूयं तं भोक्तुम् आह्वयत। अनन्तरं मूसास्तेन मनुष्येण सार्द्धं २१
वस्तुं सममन्यत, तदा स मूसां निजां सिप्पोरां कन्यां विवाहयामास।
ततस्तया योषिता पुत्त्रे प्रसूते स तस्य नाम गेर्शोम् (अत्र विदेशीति) २२
कृतवान्, यतः स उक्तवान्, अहं विदेशे विदेशी तिष्ठामि।

२३ बहुकालात् परं मिस्रीयराजस्य मृत्यु र्बभूव; अपरं इस्रायेलः सन्ताना
दासत्वकारणात् कातरोक्तिं क्रन्दनञ्च चक्रुः, तदा तेषां दासत्वकारणात्
२४ तत्कातरत्वशब्द ईश्वरस्य समीपम् उपतस्थौ। तत ईश्वरस्तेषामार्त्तस्वरं
२५ निशम्य इब्राहीम्-इस्हाक्-याकूब्भिः सार्द्धं स्वकृतपूर्व्वनियमं स्मृत्वा
इस्रायेल्वंशान् प्रति निरीक्ष्य तान् अनुजग्राह।

---

३ तृतीयोऽध्यायः।

१ प्रज्वलिते स्तम्बे मूसासमीप ईश्वरप्रकाशनं ७ मूसां प्रतीश्वरकथनं ११ ईश्वरेण सार्द्धं मूसालपनञ्च।

१ अपरं मूसा मिदियन्निवासियाजकस्य निजश्वशुरस्य यिथ्रस्य मेषव्रजं
चारयितुम् आरभत; एकदा स मेषव्रजं गृहीत्वा कान्तारस्य पश्चात्
२ होरेब्नामानम् ईश्वरस्य पर्व्वतम् आजगाम, तदा स्तम्बमध्यस्थिताग्नि-
शिखायाम् ईश्वरस्य दूतस्तस्य सन्निधौ प्रत्यक्षोऽभवत्; तदानीं स दृष्ट्वा
३ ददर्श, स्तम्बो वह्निना प्रज्वलति, तथापि स्तम्बो न नश्यति। अतो मूसाः
कथितवान् स्तम्बः कुतो न दह्यते? अहमेकपार्श्वेन गत्वा तन्महाश्चर्य्यं
४ वीक्षिष्ये। पश्चात् स द्रष्टुम् एकपार्श्वेन याति, इति विलोक्य परमेश्वरः
स्तम्बमध्यात् तमाहूय जगाद, हे मूसा हे मूसाः, ततः सोवदत् एषोहम्
५ उपतिष्ठामि। तदानीं स कथितवान्, एतस्य स्थानस्य समीपं मागच्छ,
तव पदाभ्याम् उपानहौ मोचय, त्वं यत्र स्थाने तिष्ठसि, सा मेध्या भूः।
६ सोपरमपि कथयामास, तव पूर्व्वपुरुषाणाम् ईश्वरः, फलत इब्राहीम
ईश्वरः, इस्हाक ईश्वरो, याकूब ईश्वरश्चाहं, ततो मूसा ईश्वरं प्रति
वीक्षितुं बिभ्यत् निजास्यम् आचच्छाद।
७ अनन्तरं परमेश्वरः कथयाञ्चकार, अहं मिसरस्थितानां निजलोका-
नाम् अतिशयक्लेशं दृष्टवान्, कार्य्यशासकैः कारितं तेषां रोदनञ्च श्रुतवान्,
८ तेषां यातनाञ्च ज्ञातवान्। अतो मिस्रीणां करेभ्यस्तान् उद्धर्त्तुम् अस्मात्
देशात् उत्तमं विस्तृतं देशम् अर्थात् किनानीय-हित्तीय-इमोरीय-
पिरिषीय-हिव्वीय-यिवूषीयाणां दुग्धमधुप्रवाहिदेशं तान् नेतुम् अव-
९ रूढवान्। पश्य, इस्रायेलो वंशानाम् आर्त्तस्वरो मम कर्णगोचरी-
१० भूतः, यमुपद्रवं मिस्रीयास्तान् प्रति कुर्व्वन्ति, तमप्यहं दृष्टवान्। अत
इदानीम् आगच्छ, त्वामहं फिरौणः समीपं प्रेषयामि, त्वं मिसरदेशात्
मम इस्रायेल्लोकान् वहिः करिष्यसि।

ततो मूसा ईश्वराय कथितवान्, कोऽहम् यत् फिरौणः समीपं गत्वा ११
मिसर्देशात् इस्रायेल्वंशं वहिः कर्त्तुं शक्नोमि? तदा स कथितवान्, १२
अहं तव सहायो भविष्यामि, ततो मिसरो लोकनिवहं वहिरानीय
यूयम् अस्मिन् गिरावीश्वरभजनं करिष्यथ; इति मम त्वत्प्रेषणस्य लक्ष्म
भविष्यति। पश्चात् मूसा ईश्वराय कथयामास, पश्चाहं इस्रायेल्वंशानां १३
समीपं गत्वा तान् इति वाचं वदामि, युष्माकं पूर्व्वपुरुषाणाम् ईश्वरो
युष्माकं समीपं मां प्रेषितवान्; किन्तु तस्य किन्नामेति चेत् ते पृच्छन्ति,
तर्हि किमहं प्रतिवदिष्यामि? तत ईश्वरो मूसामवदत् अहं योऽस्मि सो- १४
स्मि; पुनः कथितवान्, इस्रायेल्वंशम् इति वद, स्वयम्भु र्युष्माकं समीपं
मां प्रेरितवान्। तत ईश्वरः पुन र्मूसां बभाषे, त्वम् इस्रायेल्वंशम् इति १५
वक्ष्यसि, युष्माकं पूर्व्वपुरुषाणां प्रभु र्यिहोवाः (परमेश्वरः) अर्थात् इब्रा-
हीम ईश्वर, इस्हाक ईश्वरो, याकूब ईश्वरो युष्माकं समीपं मां प्रेरि-
तवान्; मम नामैतत्; एतच्च चिरकालं पुरुषानुसारेण स्मरणाय भवि-
ष्यति। त्वं गत्वा इस्रायेल्वंशस्य प्राचीनानां सभां कारयित्वा कथामिमां १६
कथय, युष्माकं पूर्व्वपुरुषाणां प्रभुः परमेश्वरो ऽर्थात् इब्राहीम इस्हाको
याकूबश्चेश्वरो मां दर्शनं दत्त्वा गदितवान्, अहं युष्मान्, मिसर्देशे
युष्मान् प्रति कृतान् सकलान् व्यवहारांश्च दृष्टवान्। अतोऽहं पूर्व्वोक्त- १७
वाक्यानुसारात् मिसरः क्लेशात् युष्मान् वहिरानीय किनानीयानां
हित्तीयानां इमोरीयानां पिरिषीयानां हिव्वीयानां यिवूषीयानां
दुग्धमधुप्रवाहिदेशं नेष्यामि; तेन ते तव कथां श्रोष्यन्ति। तदा त्वम् १८
इस्रायेल्वंशस्य प्राचीनाश्च मिसरो राज्ञः समीपं गत्वा कथामेतां
कथयिष्यथ, इब्रीणां प्रभुः परमेश्वरोऽस्माकं साक्षात् अभवत्; अतो
विनयेऽहं, अस्माकं प्रभुं परमेश्वरम् उद्दिश्य बलिं दातुम इदानीं दिन-
त्रयमार्गं प्रान्तरं यातुम् अस्मान् आदिशतु। किन्त्वहं निश्चयं जानामि, १९
मिस्रीयराजं प्रति पराक्रान्तहस्ते न प्रकाशिते स युष्मान् यातुं वारयि-
ष्यति। ततो निजहस्तं विस्तार्य्य मया कृताश्चर्य्यकर्म्मभि र्मिसर्देशे २०
आहते स युष्मान् यातुम् आदेक्ष्यति। अपरं मिस्रीणां साक्षाद् २१
एतान् जनान् प्रासदयान् करिष्यामि, तेन गमनकाले यूयं रिक्तकरा
न यास्यथ। किन्तु सर्व्वा योषितः स्वस्वसमीपवासिनीनां योषितां २२
समीपे स्वस्वगृहस्थानां प्रवासिनीनाञ्च समीपे सुवर्णदुर्वर्णभूषणानि
वसनानि च याचित्वा ग्रहीष्यन्ति; तान्यपि यूयं स्वस्वपुत्राणां

स्वस्वकन्यानाञ्च गात्रेषु परिधापयिष्यथ। इत्थं मिस्रीयाणां द्रव्याणि हरिष्यथ।

---

४ चतुर्थोऽध्यायः।

१ मूसायष्टेः सर्पत्वं ६ तत्करस्य कुष्ठित्वं १० मूसा गन्तुमनङ्गीकारात् तेन सार्द्धं यातुं हारोणो नियुक्तत्वं १८ मिदियनो मूसागमनं २१ फिरौणः सन्निधौ वक्तव्यवचः २४ मूसासुतस्य त्वक्छेदः २७ हारोणो मूसासाक्षात् करणं २९ इस्रायेल्वंशसन्निधिं गत्वेश्वरकथाप्रकाशनञ्च।

१ अनन्तरं मूसाः प्रत्युवाच ते मां न प्रत्येष्यन्ति, मम कथायां न मनांसि च निधास्यन्ति; किन्तु ते वदिष्यन्ति, परमेश्वरस्त्वां दर्शनं न दत्तवान्।
२ तदानीं परमेश्वरस्तं पप्रच्छ, तव करे किमिदं? स उक्तवान् यष्टिः। ततः
३ स उवाच, तां भूमौ निक्षिप। तेन तस्यां यष्ट्यां भूमौ निक्षिप्तायां साहि
४ र्बभूव, ततो मूसास्तस्य सम्मुखात् पलायितः। तदा परमेश्वरो मूसां जगाद, करं प्रसार्य्य तस्य पुच्छं धारय; ततः स करं प्रसार्य्य पुच्छं
५ धृतवान् तदा स तस्य करे यष्टि र्बभूव। अत्राहं तेषां पूर्व्वपुरुषाणां प्रभुः परमेश्वर इब्राहीम इस्हाको याकूबश्चेश्वरस्तव समीपे प्रकाशितोऽभवम्, इति ते सर्व्वे प्रत्येष्यन्ति।
६ अपरं परमेश्वरः पुनस्तं जगाद, तव करं वक्षसि देहि; ततः स वक्षसि करं दत्त्वा वहिः कृतवान् तस्य करः कुष्ठयुक्तो हिमवर्णो बभूव।
७ पश्चात् स उदितवान् त्वं पुन र्वक्षसि निजकरं निधेहि, ततस्तेन पुन र्वक्षसि करं दत्त्वा वहिः कृतः; तेन तस्य करः प्रकृतमांसो बभूव।
८ ते यदि त्वां न प्रत्येष्यन्ति, तव प्रथमलक्ष्मणि च न मनांसि निधास्यन्ति,
९ तर्हि द्वितीयचिह्नात् प्रत्येष्यन्ति। द्वाभ्यां चिह्नाभ्यामपि यदि न प्रत्येष्यन्ति, तव कथायाञ्च न मनो निधास्यन्ति, तर्हि तटिन्याः किञ्चित् तोयमादाय शुष्कभूमौ पातय; तत्र तटिन्योद्धृतं तोयं शुष्कभूमौ शोणितं भविष्यति।
१० अनन्तरं मूसाः परमेश्वरं बभाषे, हे मम प्रभो, एतत्कालात् प्राक् वा निजदासस्य निकटे भवतः कथाकथनात् परमपि नाहं वाक्पटुः, किन्तु
११ धीरवक्ताहं जडजिह्वश्चास्मि। पश्चात् परमेश्वरस्तं प्रत्युक्तवान्, मानुषाणां वक्त्रनिर्म्माता कः? तथा मूकं वधिरं द्रष्टारं अन्धञ्च को निर्म्मिमीते?
१२ अहं परमेश्वरः किं तन् न करोमि? अत इदानीं याहि, तव वदने

तिष्ठन्नहं वक्तव्यां वाचं त्वां शिक्षयिष्यामि। ततः स कथितवान्, हे मम १३
प्रभो, विनयेहं, यः प्रेषयितव्यः स प्रेष्यतां। ततो मूसां प्रति परमेश्वरस्य १४
कोपे ज्वलिते स कथितवान्, लेवीयो हारोन् किं तव भ्राता न भवति?
स सुवक्ता तमहं जानामि, स त्वां साक्षात् कर्त्तुम् आगच्छति, त्वां पश्यन्
हृष्टचित्तो भविष्यति। त्वं तेन सार्द्धं संलपिष्यसि, तस्य वदने वाक्यं १५
दास्यसि; अहं तव वदने तस्य च वदने तिष्ठन् करणीयं कर्म्म युवां
शिक्षयिष्यामि। स लोकानां समीपे तव वाचं वदिष्यति, स तव वदन- १६
स्वरूपो भविष्यति। त्वञ्च तस्येश्वरस्वरूपो भविष्यसि। अपरं त्वं स्वक- १७
रेण यष्टिं गृह्णन् तयैतानि चिह्नानि दर्शयिष्यसि।

अनन्तरं मूसा निजश्वशुरस्य यिथ्रस्य समीपं गत्वा बभाषे, विनयेहं, १८
मिसरि स्थिता मम भ्रातरोऽद्य यावत् जीवन्तः सन्ति नवेति ज्ञातुम्
इदानीं तेषां समीपं पुन र्यातुं माम् अनुजानीहि; ततो यिथ्रो
मूसामवदत्, कुशलं गच्छ। अपरं परमेश्वरो मिदियनि मूसे १९
कथितवान्, ये जनास्त्वां हन्तुम् ऐच्छन्, ते सर्व्वेऽम्रियन्त, तस्मात् त्वं
मिसरं व्याघुट्य गच्छ। तदानीं मूसा निजजायां सुतौ च गर्द्दभम् २०
आरोह्य मिसर्द्देशं व्यावृत्य गतवान्, अपरं स स्वकरेण ताम् ईश्वरीयां
यष्टिं जग्राह।

अपरं परमेश्वरो मूसां जगाद, त्वयि मिसरं पुन र्गन्तुम् उद्यते तव २१
करेणाहं यान्यद्भुतानि कर्म्माणि कर्त्तुं दत्तवान्, तानि विविच्य फिरौणः
समक्षं कुरु; किन्त्वहं तदन्तःकरणं कठिनीकरिष्यामि, तेन स लोकान्
न त्यक्ष्यति। अपरं त्वं फिरौणे कथयिष्यसि, परमेश्वरः कथयति, इस्रा- २२
येल्वंशो मम सुतः, अर्थात् मम ज्येष्ठपुत्त्ररूपः। अतोहं तुभ्यं कथयामि, २३
मां सेवितुं मम पुत्त्रं परित्यज; तेन यदि तं त्यक्तुं नेच्छसि, तर्हि तव
पुत्त्रम् अर्थात् तव ज्येष्ठपुत्त्रमहं हनिष्यामि।

अनन्तरं मार्गे उत्तरणीयगेहे परमेश्वरस्तं दर्शनं दत्त्वा हन्तुम् उद्य- २४
तवान्। तदानीं सिप्पोरा तीक्ष्णास्त्रं गृहीत्वा निजपुत्त्रस्य त्वचं छित्त्वा तां २५
तस्य चरणसन्निधौ निधाय कथितवान्, त्वं निश्चितं मम शोणितपाती
वरः। अनन्तरम् ईश्वरेण तस्मिन् त्यक्ते सा योषित् त्वक्छेदकारणात् २६
तस्मै कथितवती, त्वं मम शोणितपाती वरोसि।

अनन्तरं परमेश्वरो हारोणं बभाषे, त्वं मूसां साक्षात् कर्त्तुं प्रान्तरं २७
व्रज। ततः स गत्वा ईश्वरस्य पर्व्वते तेन सार्द्धं मिलित्वा तं चुम्बितवान्।

१८ तदानीं मूसाः परमेश्वरेणादिष्टं सर्व्ववाक्यं निरूपितं सकलचिह्नञ्च
हारोणं ज्ञापयामास।
२९ अनन्तरं मूसोहारोणौ गत्वा इस्रायेल्वंशानां प्राचीनानां सभां
३० कारयामासतुः; ततो मूससं प्रति परमेश्वरेण कथिता याः कथास्ता
हारोणस्तेभ्यः कथयामास; अपरं लोकानां दृष्टिगोचरे तानि सर्व्व-
३१ लक्ष्माणि प्रकाशयामास। तेन लोकाः प्रतीतवन्तः, ततः परमेश्वर
इस्रायेल्वंशान् निरीक्ष्य तेषां दुःखानि दृष्टवान्, इति विज्ञाय ते तं
प्रणम्य समाराधयामासुः।

५ पञ्चमोऽध्यायः।

१ मूसोहारोणयोः फिरौणः समीपगमनं, तौ प्रति फिरौणः कथनं ६ लोकेषु बहुकर्म्मणां भारार्पणं १० तेभ्यः पलालादानं १५ राज्ञः समीपे कार्य्यशासकानां काकूक्तिः २० मूसोहारोणौ प्रति भर्त्सनकथनं ईश्वरं प्रति मूससो निवेदनञ्च।

१ ततो मूसोहारोणौ प्रविश्य फिरौणं कथयामासतुः, इस्रायेलः प्रभुः
परमेश्वरः कथयति, प्रान्तरे मामुद्दिश्य महचरणार्थं मम लोकान्
२ गन्तुम् अनुजानीहि। तदा फिरौन् कथयामास, परमेश्वरः को यत्
तस्य कथां मानित्वा इस्रायेलो वंशान् यातुम् आदेक्ष्यामि? नाहं पर-
३ मेश्वरं परिचिनोमि नेस्रायेलो वंशञ्च यातुम् आदेक्ष्यामि। तौ जगदतुः
इब्रीयाणाम् ईश्वर आवां दर्शनं दत्तवान्; अत आवां विनयावहे,
अस्माकं प्रभुं परमेश्वरम् उद्दिश्य बलिं होतुं दिनत्रयपथं प्रान्तरं यातुम्
आदिश; नो चेत्सोऽस्मान् महामार्य्या चन्द्रहासेन वा निपातयिष्यति।
४ ततो मिस्रीयो राजा तौ जगाद, हे मूसो हे हारोण, युवां कार्य्यात्
५ लोकान् कुतो निवारयथः? युवां निजं निजं भारं वोढुं यातं। फिरौन्
पुनर्बभाषे, पश्यतं, एतस्मिन् देशे मनुष्या एते इदानीं बहवः, युवाञ्च
तान् भारवहनकर्म्मणो निवर्त्तयितुम् इच्छथः।
६ अपरं फिरौन् तस्मिन् दिने लोकानां कर्म्मशासकान् अध्यक्षांश्चा-
७ ज्ञापयामास, यूयम् इष्टकादि निर्म्माणार्थं पूर्व्ववत् एतेभ्यः पलालान्
८ मा दत्त; त एव गत्वा स्वार्थं पलालान् संगृह्णन्तु। अपरं पुरा
यतीष्टकनिर्म्माणभार आसीत्, इदानीं तमेव भारमर्पयत; तस्मात्
न्यूनं मा कार्ष्ट; यतस्तेऽलसाः, अत उच्चैरवन्तः कथयन्ति, ईश्वरमुद्दिश्य
९ होतुं अस्मान् यातुम् आज्ञापय। तस्मात् तेषामुपरि पुनरधिक-

कर्म्मणां भारमर्पयत; तेन ते परिश्रमं कुर्व्वन्तोऽनर्थकवाक्ये मनांसि न
निधास्यन्ति।

अनन्तरं कार्य्यशासका अध्यक्षाश्च बहि र्गत्वा तेभ्योऽकथयन् फिरौण् १०
इमां कथां कथयति, इतः परमहं युष्मभ्यं पलालान् न प्रदास्यामि।
यूयं यत्र प्राप्नुथ, तत्रैव पलालान् संगृह्णीत; किन्तु युष्माकं कार्य्यं किञ्चि- ११
दपि न्यूनं न भविष्यति। ततो लोकाः पलालानां विनिमयेन नालान् १२
संग्रहीतुं कृत्स्नं मिसर्देशं बभ्रमुः। ततः कार्य्यशासकाः क्षिप्रं कर्त्तुं कथ- १३
यामासुः, पलालप्राप्तिकाले यूयं यानि दैवसिकानि कर्म्माणि कृतवन्तः,
इदानीमपि तान्येव सम्पूर्णानि कुरुत। फिरौणः कार्य्यशासकै र्ये ये १४
अध्यक्षा इस्रायेल्वंशीयोपरि नियुक्तास्तेपि प्रहृताः सन्त इमां कथाम्
अपृच्छ्यन्त, यूयं पूर्व्ववत् इष्टकनिर्म्माणस्य निरूपितानि कार्य्याणि कुतो-
ऽहरहः सम्पूर्णानि न कारयथ?

तत इस्रायेलो वंशीयाध्यक्षा आगत्य फिरौणः समीपे प्रोच्चैरुदन्तो १५
निवेदयामासुः, कुतस्त्वं निजदासेयैः सार्द्धं एतादृग् व्यवहरसि? तव १६
दासेभ्यः कोपि पलालान् न ददाति, तथापि ते कथयन्ति इष्टकानि
निर्म्मातेति; अपरं तव दासेयाः प्रहृता भवन्ति, किन्तु तव लोकानां
दोषाः। ततः स कथयामास, यूयमलसा यूयमलसा इति हेतो र्वदथ, १७
परमेश्वरम् उद्दिश्य होतुम् अस्मान् यातुम् आज्ञापय। इदानीं गच्छत, १८
कर्म्माणि कुरुत, युष्मभ्यं पलाला न दास्यन्ते; तथापि युष्माभिरिष्टकानां
सम्पूर्णसंख्या दातव्या। तस्माद् युष्माकं दैवसिकनिरूपितेष्टकानां किञ्चि- १९
दपि न्यूनत्वं न भविष्यतीति तेन कथिते इस्रायेलो वंशानाम् अध्यक्षा
ददृशु र्वयमतीव दुर्दशायाम् अपताम।

अनन्तरं ते फिरौणः समीपात् निर्गत्य पथि स्वसम्मुखे मूससं हारो- २०
णञ्च साक्षात् चक्रुः। तदानीं ते ताभ्यां कथयामासुः, परमेश्वरो युवां २१
प्रति निरीक्ष्य विचारयतु, यतो युवां फिरौणस्तस्य दासानाञ्च समक्षम्
अस्मान् दुर्गन्धरूपान् कृत्वा हन्तुं तेषां करेषु चन्द्रहासान् दत्तवन्तौ।
ततो मूसाः परमेश्वरस्य समीपं परावृत्य गत्वा तस्मै कथयाञ्चकार, हे २२
प्रभो, त्वमेतेषां लोकानां कुतोऽमङ्गलम् अकार्षीः? माञ्च कुतः प्रहित-
वान्? यदारभ्य तव नाम्ना फिरौणः समीपे कथयितुम् आगच्छं, २३
तदारभ्य स एतेषां लोकानाम् अमङ्गलं करोति, त्वन्तु निजलोकानां
कमप्युद्धारं न कृतवान्।

६ षष्ठोऽध्यायः।

१ मूसःसमीप ईश्वरस्य पुनः प्रतिज्ञानं १० फिरौणः समीपे मूसःप्रेरणं १४ रूबेन्-शिमियोनो वंशश्रेणी १६ लेवे वंशश्रेणी २८ मूससं प्रति परमेश्वरस्याज्ञा।

१ अनन्तरं परमेश्वरो मूससमवदत्, अहं फिरौणं प्रति यत् करिष्यामि
तत् त्वम् इदानीमेव द्रक्ष्यसि; दोर्बले प्रकाशिते स लोकान् यातुम् अनु-
२ ज्ञास्यति; दोर्बले प्रकाशिते स निजदेशात् तान् दूरीकरिष्यति। ईश्वरो
३ मूससा सार्द्धम् आलप्य पुनः कथयामास, अहं यिहोवाः, अहम् इब्राहीम
इस्हाकौ याकूबश्च समीपे यिहोवानाम्ना न विख्याय सर्व्वशक्तिमान्
४ ईश्वरनाम्ना विख्यातोऽभवम्। अपरं किनान्देशम् अर्थात् तेषां प्रवासी-
यदेशम् अहं तेभ्यो दास्यामि, तैः सार्द्धम् एतं नियमं निर्णीतवान्।
५ इदानीं मिस्रीयाणां समीपे दास्ये नियुक्तानाम् इस्रायेलो वंशानां
६ कातर्य्योक्तिं श्रुत्वा निजं तं नियमं स्मृतवान्। अत इस्रायेलो वंशान् वद,
परमेश्वरोऽहं मिस्रीयाणां भारवहनात् युष्मान् उद्धरिष्यामि, दास्याच्च
युष्मान् मोचयिष्यामि; अपरं विस्तीर्णदोर्भ्यां महादण्डनैश्च युष्मान्
७ उद्धरिष्यामि। अहं युष्मान् निजजनीकृत्य युष्माकमीश्वरो भविष्यामि;
तेनाहं मिस्रीयाणां भारवहनात् युष्माकं वहिष्कर्त्ता प्रभुः परमेश्वर इति
८ ज्ञास्यथ। इब्राहीमे इस्हाके याकूबे च यं देशं दातुमहम् अङ्गीकृतवान्,
तं देशं युष्मान् नीत्वा युष्मभ्यम् अधिकारं दास्यामि; यतोऽहमेव परमे-
९ श्वरः। अनन्तरं मूसा इस्रायेलो वंशान् तदनुसारेण भाषितवान्; किन्तु ते
मनोदुःखकठिनदास्ययोः कारणात् मूससः कथायां मनांसि न निदधिरे।

१० अनन्तरं परमेश्वरो मूससे कथितवान्, त्वं गत्वा मिसरो राजानं
११ फिरौणं वद, त्वम् इस्रायेलो वंशान् निजदेशात् विसृज। ततो मूसाः
परमेश्वराय कथयामास, पश्य, इस्रायेल्वंशा अपि मम कथायां न
मनांसि न्यदधत, तथात्वे अव्यक्तवाचो मम वाक्यं फिरौन् कथं श्रोष्यति?
१३ तदा परमेश्वरो मूससा हारोणेन च सार्द्धं संलप्य इस्रायेलो वंशं मिस-
देशात् वहिष्कर्त्तुं मिसरो भूपस्य फिरौणः समीप इस्रायेलः समीपे च
कथयितुम् तावाज्ञापयामास।

१४ एते लोकाः स्वस्वपितृवंशानां मुख्याः। इस्रायेलो ज्येष्ठसुतो रूबेन्
तस्य सुतो हनोक् पल्लू हिष्रोन् कर्म्मिश्च, एते रूबेनो वंशाः।

१५ शिमियोनः सुता यिमूयेल् यामीन् ओहद् याखीन् सोहर् किनानी-
यजायायाः सुतः शौल् च, इमे शिमियोनो वंशाः।

वंशानुसारतो लेविवंशस्य नामानि। गेर्शोन् किहात् मिरारिः। १६
लेवेरायुः सप्तत्रिंशाधिकशतं वत्सरा आसन्। वंशानुसारतो गेर्शोनः १७
सुतौ लिव्निः शिमियिश्च। किहातः सुताः अम्रम् यिष्हर् हिब्रोन् १८
उषीयेल् च, तस्य किहातस्त्रयस्त्रिंशदधिकशतं वत्सरा आयुरासीत्।
मिरारेः सुतौ मह्लि मूशिश्च, इमे पुरुषानुसारात् लेवे वंशाः। अपरम् १९
अम्रमा स्वपितृस्वसरि योकेवदि समूढायां सा नारी तस्मात् हारोणं २०
मूससञ्च प्रसुषुवे; तस्याम्रम आयुः सप्तत्रिंशदधिकाः शतवत्सरा आसन्।
यिष्हरः सुताः कोरहो नेफग् सिक्रिश्च, उषीयेलः सुतौ मीशायेल् इली- २१
षाफन् सिफ्रिश्च। हारोणो ऽम्मीनादवः सुतां नहशोनो भगिनीं इली- २२
शेवाम् उदुवाह; ततः सा स्त्री तदर्थं नादवम् अवीहूम् इलियासरम्
ईथामरञ्च प्रसुषुवे। कोरहस्य सुता असीर् इल्काना अवीयासफ् च, एते २४
कोरहस्य वंशाः। अपरं हारोणस्य सुत इलियासरः पुटीयेलः कन्याम् २५
उदुवाह, सा तदर्थं पीनिहसं प्रसुषुवे; एते लेवीयपूर्व्वपुरुषाणां मध्ये
वंशानुसारतो मुख्या आसन्। मिसर्देशात् सैन्यैः सार्द्धम् इस्रायेलो वंशम् २६
नयतम्, इत्याज्ञां परमेश्वरो यौ प्रति कृतवान्, तावेतौ हारोण-
मूससौ। अपरं यौ मिसर्देशात् इस्रायेल्वंशं प्रेरयितुं फिरौणं समा- २७
दिष्टवन्तौ, एतौ तौ मूसोहारोणौ।

अपरं यदा परमेश्वरो मिसर्देशे मूससमवदत्, तदेमां कथां जगाद, २८
परमेश्वरोऽहं तुभ्यं यत् कथयामि तत् त्वं मिस्रीयराजं फिरौणं वद, ततो २९
मूसाः परमेश्वरस्य समक्षं कथितवान्, अव्यक्तवागहं मम कथां फिरौन् ३०
कथं श्रोष्यति?

---

७ सप्तमोऽध्यायः।

१ फिरौणः समीपं यातुं परमेश्वरस्य मूससाज्ञापनं ८ यष्टेः सर्पत्वकथनं १४ फिरौणं प्रति पुनर्मूसःप्रेरणं १९ जलस्य शोणितत्वकथनञ्च।

अपरं परमेश्वरो मूससं जगाद, पश्य त्वामहं फिरौणः समीपम् ईश्व- १
रस्वरूपं नियुक्तवान्, तव भ्राता हारोणस्त्वत्प्रचारको भविष्यति। अहं २
त्वां याः कथा आज्ञापयामि, ताः सर्व्वास्त्वं कथयिष्यसि; इस्रायेलो वंशं
देशात् प्रेषयितुं तव भ्राता हारोणः फिरौणे ताः कथयिष्यति। किन्त्वहं २
फिरौणो हृदयं कठिनीकरिष्यामि, मिसर्देशे बाहुल्येन मम चिह्नानि
आश्चर्य्यकर्म्माणि च करिष्यामि; तथापि फिरौन् युवयो र्वाचि न मनो ४

निधास्यति, अतोऽहं मिसर्देशं प्रति हस्तं प्रसार्य्य महादण्डैर्मिसरः
५ स्वसैन्यम् अर्थात् निजलोकान् इस्रायेल्वंशान् वहिः करिष्यामि। मिस्री-
यान् प्रति स्वकरं प्रसार्य्य तेषां मध्याद् इस्रायेल्वंशे मया वहिरानीते
६ परमेश्वरोऽहमेवेति ते ज्ञास्यन्ति। ततो मूसाहारोणौ परमेश्वरीयाज्ञा-
७ नुसारात् कर्म्माणि कृतवन्तौ। फिरौणा सार्द्धं कथाकथनकाले मूससो
ऽशीतिवत्सरा हारोणस्य त्र्यशीतिवत्सरा वय आसीत्।
८ अपरं परमेश्वरो मूसाहारोणौ जगाद, युवां किञ्चन लक्ष्म दर्शयतम्,
९ इति वाचं यदि फिरौन् युवां गदति, तर्हि त्वं हारोणं वदिष्यसि, त्वं
यष्टिमादाय फिरौणः सम्मुखे निक्षिप, तदा सा यष्टिः सर्पो भविष्यति।
१० तदा मूसाहारोणौ फिरौणः समीपं गत्वा परमेश्वरस्याज्ञानुसारात् कर्म्म
कृतवन्तौ; अपरं फिरौणस्तस्य दासानाञ्च सम्मुखे हारोणेन यष्ट्यां
११ निक्षिप्तायां सा सर्पो बभूव। तदा फिरौन् निजान् विदुषो गुणिनश्चा-
हूतवान्; ततो मिस्रीया मायाविलोका निजमायया तथैव चक्रुः।
१२ फलतस्ते स्वां स्वां यष्टिं निचिक्षिपुः,ताश्च सर्व्वा भुजगा बभूवुः; किन्तु
१३ हारोणस्य यष्टिस्तेषां यष्टीर्जग्रास। ततः परमेश्वरो यथा कथितवान्
तदनुसारेण फिरौणो हृदये कठिनीभूते स तयोः कथायां न मनो
निदधे।
१४ अनन्तरं परमेश्वरो मूससं जगाद, फिरौणो हृदयं कठिनम् अभवत्,
१५ तेन स लोकान् यातुं नादिशति। अतस्त्वं प्रातः फिरौणः समीपं याहि,
पश्य, तस्मिन् तोयसमीपं गते तस्यागमनपर्य्यन्तं त्वं तटिनीतीरे तिष्ठ;
१६ या च यष्टिः सर्पोऽभवत्, तामपि करेण गृहाण। फिरौणे कथय,
प्रान्तरे माम् आराधयितुं मम लोकान् त्वं यातुम् अनुजानीहि; इब्री-
याणां प्रभुः परमेश्वर एतां कथां कथयितुं तव समीपं मां प्रहितवान्,
१७ किन्तु पश्य, त्वम् अस्यां कथायां नाद्यापि मनो निधत्तवान्। परमेश्वर
इत्थं कथयति, पश्याहं स्वकरस्थया यष्ट्या तटिनीतोयं प्रहरिष्यामि,
१८ तदा तटिनीतोयं शोणितं भविष्यति। तटिन्याञ्च ये मत्स्याः सन्ति तेपि
मरिष्यन्ति, तटिनी च दुर्गन्धा भविष्यति; ततो मिस्रीया लोकास्तटि-
नीतोयं पातुं विरजिष्यन्ति, तेनाहमेव परमेश्वर इति त्वं ज्ञास्यसि।
१९ अनन्तरं परमेश्वरो मूससं बभाषे, हारोणाय कथामेतां कथय, त्वं
निजयष्टिं गृहीत्वा मिसर्देशस्य तोयानामुपरि अर्थात् तस्य स्रोतस्तटि-
नीसरोवरान्यजलाशयानाम् उपरि निजकरं प्रसारय, तेन तानि शोणि-

तानि भविष्यन्ति, मिसर्देशस्य सर्व्वत्र काष्ठमयप्रस्तरमयपात्रेषु च शोणितं
भविष्यति। तदानीं मूसोहारोणौ परमेश्वराज्ञया तादृशं कृतवन्तौ; २०
फलतो यष्टिमादाय फिरौणस्तस्य दासानाञ्च सम्मुखे तटिन्यास्तोयो-
परि प्रहृतवन्तौ, तेन तटिन्याः सर्व्वतोयं शोणितं बभूव। तटिन्याः २१
सर्व्वमीनेषु मृतेषु तटिनी दुर्गन्धा बभूव च; तेन मिस्रीयास्तटिनीतोयं
पातुं न शेकुः, सर्व्वस्मिन् मिसर्देशे शोणितम् अभवत्। तदानीं मिस्रीया २२
मायाविलोका अपि निजमायया तादृशं चक्रुः, तत ईश्वरीयवचनानुसा-
रात् फिरौणो हृदये कठिनीभूते स तयोः कथायां न मनो निदधे।
पश्चात् फिरौन् परावृत्य निजगेहं जगाम, तत्रापि न मनो निदधे। २३
किन्तु सर्व्वे मिस्रीयलोकास्तटिनीतोयं पातुं न पारयन्तः पेयतोयार्थं २४
तटिनीचतुर्दिक्षु भुवं चख्नुः।

---

८ अष्टमोऽध्यायः।

१ मण्डूककथनं ८ मूससः समीपे फिरौणो निवेदनं १६ धूलितो यूकाभवनं तेन मायाविनां पराजितत्वं २० मशककथनं २५ फिरौणो मनसः काठिन्यञ्च।

परमेश्वरेण तटिन्याघातात् परं सप्तसु दिनेषु समाप्तेषु परमेश्वरो १
मूससं गदितवान्, त्वं फिरौणः समीपं गत्वा तस्मै कथामिमां कथय,
परमेश्वरः कथामिमां कथयति, मां सेवितुं मदीयलोकान् यातुम् अनु-
जानीहि। यदि यातुं नादेक्ष्यसि, तर्हि मण्डूकैस्तव सर्व्वप्रदेशान् नाश- २
यिष्यामि। तटिन्यां बहुमण्डूकान् उत्पादयिष्यामि; ततः सर्व्वे ते मण्डूका ३
उत्थाय तव गृहं शयनगेहं शयनीयञ्च तव दासानां गेहानि तव
लोकानां गेहानि तव चूल्ली गोधूमचूर्णनपात्राणि च प्रवेक्ष्यन्ति। तवो- ४
परि तव लोकानां दासानाञ्चोपरि आरोक्ष्यन्ति। ततः परमेश्वरो मूससं ५
जगाद, हारोणाय कथय, त्वं स्रोतसां तटिनीनां जलाधाराणाञ्चोपरि
यष्टिविशिष्टहस्तं प्रसारय, मिसर्देशोपरि मण्डूकान् आगमय। ततो ६
हारोणेन मिसर्देशीयानां सर्व्वतोयानाम् उपरि करे प्रसारिते मण्डूका
उत्थाय मिसर्देशं व्यानशिरे। तदानीं मायाविनोऽपि तथा कृत्वा मिस- ७
र्देशोपरि मण्डूकान् आनयन्।

अनन्तरं फिरौन् मूससं हारोणञ्चाहूय बभाषे, मत्तो मम लोकेभ्यश्च ८
मण्डूकान् इमान् दूरयितुं परमेश्वरं प्रार्थयेथां; ततोऽहं परमेश्वरम्
उद्दिश्य होतुं लोकान् यातुम् आदेक्ष्यामि। तदा मूसाः फिरौणे कथ- ९

यामास, मण्डूका यथा त्वत्तस्तव गृहाच्च दूरीभूय केवलं तटिन्यां
तिष्ठन्तीति तव त्वदीयदासेयानां लोकानाञ्च कृते परमेश्वरस्य समीपे
१० कदा प्रार्थयिष्ये, तत् समयं निश्चित्य मां वद। स कथितवान्, श्वः करि-
ष्यसि; तदा मूसा भाषितवान् अस्माकं प्रभोः परमेश्वरस्य समः कोपि
११ नास्तीति त्वं यथा ज्ञास्यसि तदर्थं तव वाक्यानुसारादेव भवतु। मण्डू-
कास्त्वत्तस्तव गृहाद् दासेभ्यो लोकेभ्यश्च दूरीभूय केवलतटिन्यां स्थास्यन्ति।
१२ ततो मूसोहारोणौ फिरौणः समीपाद् वहिर्गतवन्तौ, पश्चात् मूसाः
फिरौणो विरुद्धम् उत्पादितानां मण्डूकानां निवारणार्थम् ईश्वरं प्रार्थ-
१३ यामास। ततः परमेश्वरेण मूससः प्रार्थनायां साधितायां गृहेषु ग्रामेषु
१४ क्षेत्रेषु च सर्व्वे मण्डूका अम्रियन्त। ततो लोकैः संगृह्य तेषु राशी-
१५ कृतेषु देशे दुर्गन्धो बभूव। किन्तु फिरौन् विपदो निवृत्तिं निरीक्ष्य
परमेश्वरीयवाक्यानसारात् पुनरपि स्वान्तःकरणं कठिनीकृत्य तयोः
कथायां न मनो निदधे।
१६ तस्मात् परमेश्वरो मूससं जगाद, हारोणाय कथय, सर्व्वस्मिन् मिस-
र्देशे यथा यूका भवन्ति, तदर्थं त्वं निजयष्टिं उत्थाप्य भूमे धूलिं प्रहर।
१७ ततस्तौ तादृशं चक्रतुः फलतो हारोणो निजयष्टिविशिष्टं करम् उत्थाप्य
भूमे धूलिं प्रहृतवान्; तदा मानुषेषु पशुषु च यूका अभवन् मिसर्दे-
१८ शस्य सर्व्वा धूल्यश्च यूका अभवन्। तदानीं मायाविनो निजमायया
तथा कृत्वा यूका उत्पादयितुं यतितवन्तः; किन्तु किमपि न शेकुः।
१९ मानुषेषु पशुषु च यूकासु जातासु मायाविनः फिरौणे कथयामासुः,
कर्म्मेदम् ईश्वरस्याङ्गुलिकृतं; तथापि फिरौन् परमेश्वरस्य वाक्या-
नुसाराद् अन्तःकरणं कठिनीकृत्य तयोः कथायां न मनो निदधे।
२० अनन्तरं परमेश्वरो मूससं जगाद, त्वं प्रत्यूषएव उत्थाय फिरौणः
सम्मुखे तिष्ठ; पश्य, तस्मिन् तोयसमीपम् आगते तस्मै कथामिमां
कथय, परमेश्वरः कथयति, मां सेवितुं मम लोकान् यातुम् आदिश।
२१ किन्तु यदि मम लोकान् यातुं नाज्ञापयिष्यसि, तर्हि त्वां तव दासेयान्
लोकान् गृहाणि च प्रति मशकानहं प्रेषयिष्यामि, ते मिस्रीयाणां गृहाणि
२२ ग्रामांश्च परिपूरयिष्यन्ते। किन्तु जगतो मध्ये केवलोहं परमेश्वर इति
त्वां ज्ञापयितुं तस्मिन् दिने मम लोकानां निवासस्थानं गोशन्प्रदेशं पृथक्
२३ करिष्यामि, तत्स्थानं मशकसंघो न यास्यति। अहं श्वः स्वीयलोकानां
२४ युष्माकञ्च भेदं करिष्यामि, श्व इदं चिह्नञ्च भविष्यति। पश्चात् परमेश्वरः

तथैव कृतवान्, तेन फिरौणस्तस्य दासानाञ्च गृहेषु कृत्स्नमिसर्देशे च
वृहन्तो मशकनिवहा आगच्छन्, तेषु देशो विनष्टुम् आरभ्यत।
तदानीं फिरौन् मूससं हारोणञ्चाहूय कथयामास, युवां गत्वा देशस्य २५
मध्ये युवयोरीश्वरम् उद्दिश्य जुहुतं। ततो मूसा जगाद, तद् अस्माकं न २६
युक्तं, यतोऽस्माकं प्रभुं परमेश्वरम् उद्दिश्य मिस्रीयाणां घृण्यवस्तुना होत-
व्यम्, इदानीं मिस्रीयाणां घृण्यवस्तुना तेषां समक्षं हुते लोकाः किमस्मान्
पाषाणान् निक्षिप्य न मारयिष्यन्ति? तस्माद् वयं दिनत्रयपथं प्रान्तरं २७
गत्वा निजप्रभोः परमेश्वरस्य निदेशानुसारेण तमुद्दिश्य होष्यामः।
पश्चात् फिरौन् कथयामास, युष्मानहं यातुम् आज्ञापयामि, यूयं प्रान्तरं २८
गत्वा निजप्रभुं परमेश्वरम् उद्दिश्य जुहुत; किन्तु बहुदूरं मा गच्छत
मदर्थञ्च प्रार्थयध्वं। तदानीं मूसा बभाषे, पश्य, त्वत्तस्तव दासानां २९
लोकानाञ्च समीपात् श्वः सर्व्वान् मशकान् दवयितुमहं तव समीपात्
प्रयाय प्रार्थनामेतां ईश्वरसन्निधौ करिष्यामि, किन्तु परमेश्वरम्
उद्दिश्य होतुं लोकान् प्रस्थापयितुं फिरौन् पुनरपि न वञ्चयतु। ततो ३०
मूसाः फिरौणः समीपाद् वहिर्गत्य परमेश्वरं प्रार्थितवान्। तदा ३१
परमेश्वरो मूससः प्रार्थनानुसारेण फिरौणस्तस्य दासेभ्यो लोकेभ्यस्च
सर्व्वमशकनिवहान् दवयामास, तेषामेकोपि शेषो नातिष्ठत्। तदानीं ३२
फिरौन् स्वान्तःकरणं कठिनीकृत्य लोकान् गन्तुं न्यवारयत्।

---

९ नवमोऽध्यायः।

१ मारीकथनं ८ मानुषाणां पशूनाञ्च विस्फोटककथनं १३ शिलावर्षणकथनं २२ शिलावृष्टिभवनं २७ मूससः समीपे फिरौणो निवेदनं तस्य मनसः काठिन्यञ्च।

अनन्तरं परमेश्वरो मूससं भाषितवान्, त्वं फिरौणः सन्निधिं गत्वा १
तं ब्रूहि, इब्रीयाणां प्रभुः परमेश्वर इति कथयति, मां सेवितुं त्वं मम
लोकान् यातुम् आदिश। किन्तु यदि यातुं आदेष्टुम् असंमन्य, इदानी- २
मपि बाधको भवसि, तर्हि तव क्षेत्रस्थानां हयगर्दभमहाङ्गगोमेषादि- ३
पशूनाम् उपरि परमेश्वरो हस्तं प्रसारयिष्यति, तेन तेषां मध्येऽतीव
महामारी भविष्यति। किन्तु परमेश्वर इस्रायेल्वंशानां पशुभ्यो ४
मिस्रीयाणां पशूनां भेदं करिष्यति; तत इस्रायेल्वंशानां कोपि पशु र्न
मरिष्यति। परमेश्वरः समयं निरूप्य कथितवान्, अहं श्वो देशे ५
कर्म्मैतत् करिष्यामि। परेऽहनि परमेश्वरेण तथैव कृते मिस्रीयाणां सर्व्वे ६

७ पशवो मृताः, किन्त्विस्रायेल्वंशस्य पशूनाम् एकोपि न मृतः। तदानीं
फिरौन् लोकं प्रहित्य इस्रायेल्वंशस्य पशुरेकोपि न मृत इति दृष्टवान्,
तथापि फिरौणोऽन्तःकरणे कठिने सति स लोकान् यातुं न्यवारयत्।
८ अपरं परमेश्वरो मूसोहारोणौ जगाद, युवां मुष्टिं पूरयित्वा
चुल्ल्या भस्म गृह्णीतं; ततो मूसाः फिरौणः समक्षं तद् आकाशं प्रति
९ विकिरतु। तेन सर्व्वमिसर्देशोपरि धूलि र्भविष्यति, मिसरः सर्व्वमनु-
१० ष्याणां पशूनाञ्च गात्रेषु क्षतयुक्तविस्फोटका भविष्यन्ति। तदानीं तौ
चुल्ल्या भस्म गृहीत्वा फिरौणः संमुखे स्थितवन्तौ; ततो मूसा गगणं प्रति
तद् विकीर्णवान्, तदा मनुष्याणां पशूनाञ्च गात्रेषु क्षतयुक्तविस्फो-
११ टका बभूवुः। तदानीं सर्व्वेषां मिस्रीयाणां मायाविलोकानाञ्च गात्रेषु
विस्फोटकेषु जातेषु तत्कृते मायाविनो मूससः समक्षमपि स्थातुं न
१२ शेकुः। ततः परमेश्वरः फिरौणो मनः कठिनीकृतवान्, ततः स मूससा
भाषितस्य परमेश्वरीयवाक्यस्यानुसारात् तयोः कथायां न मनो निदधे।
१३ अनन्तरं परमेश्वरो मूससं गदितवान्, त्वं प्रत्यूष उत्थाय फिरौणः सम्मुखे
तिष्ठन् तस्मै कथामेतां कथय, इब्रीयाणां प्रभुः परमेश्वरः कथयति, मां
१४ सेवितुं त्वं मम लोकान् यातुं आज्ञापय। नो चेत् इदानीमहं तवात्मन
उपरि तव दासानां लोकानाञ्चोपरि सर्व्वथा महामारीं प्रेषयिष्यामि,
१५ तेन सर्व्वजगति मम समः कोपि नास्तीति त्वं ज्ञास्यसि। इदानीमहं
निजकरं प्रसार्य्य महामार्य्या त्वां तव प्रजाश्च प्रहरिष्यामि, तेन त्वं
१६ पृथिव्या उच्छिन्नो भविष्यसि। अहं त्वद्द्वारा पराक्रमं दर्शयितुं सर्व्व-
१७ पृथिव्यां निजनाम प्रकाशयितुञ्च त्वां स्थापितवान्। किन्तु त्वम् इदानी-
१८ मपि मम लोकान् यातुं निषिध्य निजदर्पं प्रकाशयसि। पश्य, मिसरो
निर्म्माणकालाद् अद्यपर्य्यन्तं यादृशी कदापि नाभवत् तादृशीं महा-
१९ शिलावृष्टिम् अहं श्वो मिसर्देशे कारयिष्यामि। इदानीं लोकान् प्रहित्य
क्षेत्रे तव पश्वादयो ये ये सन्ति तान् संगृहाण; यतो यो मनुजो यश्च
पशु र्गेहं नानीतः क्षेत्रे स्थास्यति, तेषामुपरि शिलावृष्टौ सत्यां ते
२० प्राणान् त्यक्ष्यन्ति। तदा फिरौणो दासानां मध्ये ये केचित् परमेश्वरीय-
२१ कथातो बिभ्युस्ते तूर्णं निजान् दासान् पशूंश्च गृहम् आनिन्युः। ये च
केचित् परमेश्वरस्य वाक्ये मनांसि न निदधिरे, ते निजान् दासान्
पशूंश्च क्षेत्रे तत्यजुः।
२२ अनन्तरं परमेश्वरो मूससमवदत्, त्वं गगणं प्रति स्वकरं प्रसारय, तेन

मिसर्देशस्य सर्व्वत्र मनुजपशुक्षेत्रस्थतृणानां सर्व्वेषाम् उपरि शिला-
वृष्टि र्भविष्यति। ततो मूससा निजयष्ट्यां गगणं प्रति प्रसारितायां पर- २३
मेश्वरो मेघगर्जनं शिलावृष्टिञ्च चकार, विद्युच्च भूम्युपरि वेगेन जगाम,
इत्थं परमेश्वरो मिसर्देशे शिलावृष्टिं चकार। ततोऽतीवासह्यनीया २४
शिलामिश्रिताग्निवृष्टि र्बभूव, ईदृशी शिलावृष्टि र्मिसर्देशे तस्य
स्थापनम् आरभ्य कदापि नाभवत्। तेन सर्व्वमिसर्देशस्य क्षेत्रस्था २५
मनुजाः पशवश्च सर्व्वे शिलाभि र्हताः, क्षेत्रस्य च सर्व्वतृणानि शिला-
वृष्टे र्नष्टानि क्षेत्रस्य सर्व्वे पादपा भग्नाः। किन्त्विस्रायेल्वंशस्य वास- २६
स्थाने गोशन्प्रदेशे शिलावृष्टि र्नाभवत्।

ततः फिरौन् लोकं प्रहित्य मूससं हारोणञ्चाहूय बभाषे, अहमेक- २७
कृत्व इदं पापं कृतवान् परमेश्वरस्तु न्यायवानेव; किन्त्वहं मदीयलोकाश्च
दुष्कर्म्मिणः। घोरमेघगर्जनं शिलावृष्टिश्च यथा पुनरधिकं न जायते, २८
तदर्थं युवां परमेश्वरं प्रति प्रार्थयेथाम्, यतो यदभूत् तदेव प्रचुरं;
ततोऽहं युष्मान् यातुम् आदेक्ष्यामि, युष्माकं पुनर्व्विलम्बो न भविष्यति।
मूसास्तमवदत्, अहं इदानीमेव नगराद् वहिर्गत्य परमेश्वरं प्रति करौ २९
प्रसारयिष्यामि, तेन मेघगर्जनं निवर्त्तिष्यते शिलावृष्टिश्च पुन र्न भवि-
ष्यति, पृथिवीयं परमेश्वरस्येति च त्वं ज्ञास्यसि। किन्तु त्वं तव दासाश्च ३०
यूयं इदानीमपि परमेश्वरात् प्रभो र्न बिभीथ, इत्यहं जानामि। अतस्तो ३१
यवाश्च सर्व्वे विनष्टाः, यतो यवाः कनिशयुक्ता अतस्यः पुष्पयुक्ता आसन्।
किन्तु गोधूमा जनराश्च बाल्यत्वात् न नष्टाः। पश्चात् मूसाः फिरौणः समी- ३२
पात् नगराद् वहि र्गत्वा परमेश्वरं प्रति करौ प्रसारितवान्; ततो मेघ- ३३
गर्जनं शिलावृष्टिश्च निवृत्तौ भूमौ पुन र्न वृष्टि र्बभूव। तदानीं फिरौन् ३४
वृष्टिशिलावृष्टिमेघगर्जनानां निवृत्तिं विलोक्य पुनः पापं कृतवान्, स
तस्य दासाश्च स्वमनांसि कठिनानि चक्रुः। इत्थं मूससोक्तस्य परमेश्वरीय- ३५
वाक्यस्यानुसारात् फिरौणान्तःकरणे कठिने सति स इस्रायेलो वंशान्
यातुं न्यवारयत्।

---

१० दशमोऽध्यायः।

१ स्थककीटकथनं ७ फिरौणं प्रति दासानां कथनं १२ स्थककीटागमनं १६ मूससं प्रति फिरौणो निवेदनं २१ घोरान्धकारकथनं २४ मूससं प्रति फिरौणः शेषकथनञ्च।

अनन्तरं परमेश्वरो मूससं जगाद, त्वं फिरौणो निकटं याहि, यतोऽहं १

तस्य समक्षं निजचिह्नानि प्रकाशयितुं फिरौणस्तस्य दासानाञ्च मनांसि
२ कठिनानि कृतवान्। तस्मादहं मिसरि यद् यत् कर्म्म तेषां समक्षं यद्
यत् चिह्नञ्च कृतवान्, तत् सर्व्वं यूयं निजपुत्त्रपौत्त्राणां कर्णेषु कथ-
३ यिष्यथ, अहमेव परमेश्वर इति च ज्ञास्यथ। तदा मूसाहारोणौ
फिरौणः समीपं गत्वा जगदतुः, इब्रीयाणां प्रभुः परमेश्वरः कथयति,
त्वं मम समक्षं नम्रो भवितुं कति कालान् न संमंस्यसे? मां सेवितुं
४ मम लोकान् यातुम् अनुजानीहि। किन्तु यातुं यदि नानुजानासि,
५ तर्हि पश्य, श्वः सूककीटान् तव देशम् आनेष्यामि। तैश्च तव सर्व्वासु
भूमिष्वाच्छन्नासु भूमिरदृश्या भविष्यति, यच्च शिलावृष्टे रक्षितम-
वशिष्टम् अस्ति तत् सर्व्वं ते खादिष्यन्ति, क्षेत्रोत्पन्नान् युष्माकं सर्व्वान्
६ वृक्षांश्च ते खादिष्यन्ति। अपरं तैस्तव गेहानि तव दासानां गेहानि मि-
सीयलोकानाञ्च गेहानि पूरयिष्यन्ते, तादृशाः कीटा एतस्मिन् जनपदे
तव पित्रादीनां तत्पित्रादीनाञ्च आजन्मतोऽद्य यावत् केनापि न दृष्टाः;
तदा मूसा मुखं परावर्त्त्य फिरौणः समीपात् वहिर्जगाम।
७ अनन्तरं फिरौणो दासास्तस्मै कथयामास, मानुषोयं कति कालम्
अस्माकं उन्माथरूपः स्थास्यति? स्वीयं प्रभुं परमेश्वरं सेवितुम् एतान्
यातुम् अनुमन्यस्व, मिसर्देशोऽनश्यत् तत् त्वं किमिदानीमपि न बुध्यसे?
८ तदानीं मूसाहारोणौ फिरौणः समीपम् पुनरानीतौ; ततः स ताभ्यां
कथितवान्, यूयं निजप्रभुं परमेश्वरं सेवितुं गच्छत; किन्तु के के
९ गमिष्यन्ति? ततो मूसाः कथयामास, वयं सबालवृद्धा गमिष्यामः;
अस्माकं पुत्रान् कन्याश्च गवादीन् मेषव्रजांश्च गृहीत्वा गमिष्यामः, यतः
१० परमेश्वरम् उद्दिश्य महः कर्त्तव्यः। तदानीं फिरौन् ताभ्याम् उक्तवान्
परमेश्वरो यदि युष्माकं सहायोऽस्ति, तथाप्यहं युष्मान् सबालकान्
११ यातुं नानुज्ञास्यामि; पश्यत, युष्माकं मनोगतं कर्म्म सदोषं। इत्थं नहि,
युष्माकं पुरुषा गत्वा परमेश्वरम् आराधयन्तु, युष्माभिरपि पूर्व्वमेवं
प्रार्थितं; ततस्तौ फिरौणः सम्मुखात् दूरीकृतावभवतां।
१२ अनन्तरं परमेश्वरो मूससं गदितवान् त्वं मिसर्देशे सूककीटार्थं स्वकरं
प्रसारय, तेन ते मिसर्देशम् आगत्य शिलावृष्टे रक्षितानि भूमेस्तृणादीनि
१३ सर्व्वाणि भक्षिष्यन्ति। तदा मूसा मिसर्देशोपरि निजयष्टिं प्रसारित-
वान्, ततः परमेश्वरः कृत्स्नम् अहर्निशं देशे पूर्व्वीयवायुं वाहयामास,
१४ पश्चात् प्रातःकाले पूर्व्वीयवायुना सूककीटा उपानीताः। ततः सकल-

मिसर्देशं सूककीटा व्याप्तवन्तः, मिसरः सकलप्रदेशे सूकखीटाः पेतुः,
तादृशा भयानकाः सूककीटाः पुरा कदापि नासन्, पश्चादपि कदापि
न भविष्यन्ति। तैः सकला भूमिराच्छन्ना देशश्चान्धकारावृतो बभूव, १५
पृथिव्यां शिलावृष्टेरच्छितानि यानि यानि भूमेस्तृणानि पादपानां फलानि
चासन्, तानि सर्व्वाणि ते बभक्षुः, तेन मिसरः सर्व्वप्रदेशे कस्मिन्नपि
पादपे क्षेत्रस्य तृणेषु किञ्चिन्मात्रोपि हरिद्वर्णो नातिष्ठत्।

तदानीं फिरौन् मूससं हारोणञ्च त्वरितमाहूय बभाषे, युष्माकं प्रभोः १६
परमेश्वरस्य विरुद्धम् अहं पापं कृतवान्। विनयेहं केवलमेतद्वारं मम १७
पापं विमोच्य मत्त इमं मृत्युस्वरूपं दूरयितुं निजप्रभोः परमेश्वरस्य समक्षं
प्रार्थयेथां। ततः स फिरौणः समीपाद् वहि र्गत्वा परमेश्वरस्य साक्षात् १८
प्रार्थयाञ्चक्रे। परमेश्वरः प्रबलं पाश्चात्यवायुम् आनाय्य देशात् सूककी- १९
टान् उत्थाप्य सूफ्सागरे निचिक्षेप; ततो मिसरः कस्मिंश्चिदपि प्रदेशे
सूककीटानाम् एकोपि न तस्थौ। किन्तु परमेश्वरेण फिरौणो हृदये २०
कठिनीकृते स इस्रायेलो वंशान् यातुं न्यवारयत्।

अपरं परमेश्वरो मूससं जगाद, त्वं गगणं प्रति हस्तं प्रसारय, तेन २१
मिसर्देशे ध्वान्तं भविष्यति, ध्वान्तकारणात् लोका हस्तामर्षं करिष्यन्ति।
पश्चात् मूससा गगणं प्रति करः प्रसारितः; ततो दिनत्रयं यावत् मिस- २२
र्देशस्य सर्व्वत्र तथान्धतमसं जातं, येन कश्चिदन्यजनं नापश्यत् दिन- २३
त्रयं यावत् कोपि निजस्थानात् उत्थातुं न शशाक, किन्त्विस्रायेलो
वंशानां वासस्थानेषु आलोकएवासीत्।

तदानीं फिरौन् मूससमाहूय बभाषे, यूयं परमेश्वरं सेवितुं यात, २४
युष्माभिः सार्द्धं बालकाश्च यान्तु केवलमत्र युष्माकं मेषगवादीनां व्रजा
स्तिष्ठन्तु। ततो मूसाः कथितवान्, वयम् अस्माकं प्रभुं परमेश्वरम् उद्दिश्य २५
यानि बलिहोमीयद्रव्याणि दास्यामः, तान्यस्माकं हस्तेषु भवता दात-
व्यानि। अस्माभिः सार्द्धम् अस्माकं पशवो यास्यन्ति, तेषाम् एकः खुरोपि २६
नावशेक्ष्यते, यतोस्माकं प्रभुं परमेश्वरं सेवितुं तेषां मध्यात् पशवो
ग्रहीतव्याः किन्तु केन बलिना परमेश्वरः सेवितव्य इति तत्र स्थान
उपस्थितेः प्रागस्माभि र्न ज्ञायते।

अनन्तरं परमेश्वरेण फिरौणो मनसि कठिने कृते स तेषां गमनं २७
नानुजानात्। पश्चात् फिरौन् तस्मै कथितवान्, मम समीपात् दूरीभव, २८
किन्तु सावधानो भव मन्मुखं पुनः कदापि न वीक्षस्व; यद्दिने मन्मुखं

२९ द्रक्ष्यसि, तद्दिनएव मरिष्यसि। ततो मूसाः कथितवान्, त्वया भद्रमुक्तं
तव वदनं पुनः कदापि नैव वीक्षिष्येऽहम्।

---

११ एकादशोऽध्यायः।

१ मिस्रीयेभ्यो द्रव्यं याचित्वा ग्रहीतुम् इस्रायेलो वंशं प्रतीश्वरस्याज्ञा ४ प्रथमजातापत्यानां हननप्रतिज्ञा ९ फिरौणो मनसः कठिनताकथनञ्च।

१ परमेश्वरो मूससम् अवदत्, अहं फिरौणो मिसरस्योपरि अपरम्
एकमुत्पातम् आनेष्यामि; ततः स युष्मान् इतो यातुम् आदेक्ष्यति, यातुम्
२ आदेशकाले युष्मान् ससर्व्वान् वहिः करिष्यति च। तस्मात् इदानीं
लोकानां कर्णगोचरे कथय, एकैकः पुमान् निजप्रतिवासित एकैका
योषिच्च निजप्रतिवासिनीतः स्वर्णरूप्याभरणानि याचित्वा गृह्णातु।
३ अनन्तरं परमेश्वरो मिस्रीयाणां दृष्टौ लोकान् दयाभाजनानि चकार,
तथा मिसर्देशे फिरौणो दासानां लोकानाञ्च दृष्टौ मूसा अतीव मान्यः
पुरुष आसीत्।
४ अनन्तरं मूसा अवदत् परमेश्वरो वदति, अहं मध्यरात्रौ मिसरो
५ मध्येन यास्यामि, तेन सिंहासनस्थफिरौणः प्रथमजातम् आरभ्य पिषन्त्या
दास्याः प्रथमजातं यावत् मिसर्देशस्थिताः सर्व्वे प्रथमजाता मरिष्यन्ति,
६ पशूनामपि सर्व्वे प्रथमजा मरिष्यन्ति। तेन यादृशं कदापि नाभवत्
७ न भविष्यति च, तादृशं महारोदनं सर्व्वमिसर्देशे भविष्यति। किन्तु
परमेश्वरो मिस्रीयलोकेभ्य इस्रायेलीयलोकान् भिन्नान् करोतीति यथा
यूयं जानीथ, तदर्थं इस्रायेल्वंशस्य मानुषान् पशूंश्च प्रति कोपि
८ कुक्कुरो जिह्वां न दोलायिष्यते। तेन तवैते दासा अवरुह्य मत्समीपम्
आगमिष्यन्ति, मां प्रणम्य च कथयिष्यन्ति, त्वं त्वत्पार्श्विग्राहलोकाश्च
वहिर्भवत; तत् पश्चाद् अहं वहिर्भविष्यामि। ततः परं स महाक्रुद्धस्य
फिरौणः समीपात् वहि र्जगाम।
९ परमेश्वरो मूससम् अवादीत् फिरौन् युष्माकं वाक्ये न मनो
१० निधास्यति, तेनाहं मिसर्देशे स्वाश्चर्य्यकर्म्मणां वृद्धिं करिष्यामि। अपरं
मूसोहारोणौ फिरौणः समक्षं एतानि चित्रकार्य्याणि कृतवन्तौ; किन्तु
परमेश्वरः फिरौणो हृदयं कठिनं कृतवान्, तस्मात् स स्वदेशात्
इस्रायेलो वंशान् यातुं नानुज्ञातवान्।

---

१२ द्वादशोऽध्यायः।

१ वत्सरस्य प्रथममासनिर्णयः ३ निस्तारपर्व्वणो निरूपणं ११ निस्तारपर्व्वणो विवरणं १८ निस्तारपर्व्वणि किण्वशून्यपूपभक्षणं २१ प्राचीनान् प्रति मूसस आज्ञापनं २९ मिस्रीयाणां प्रथमजातापत्यानां बधः ३१ इस्रायेलीयानां वहिर्गमनं ३७ तेषां संख्या ४० मिसरि वासस्य कालनिर्णयः ४३ निस्तारपर्व्वणि भोजनविधे र्निर्णयश्च।

अपरं मिसर्देशे परमेश्वरो मूससं हारोणञ्च जगाद, मासोयं युष्माकं १
प्रधानमासो वत्सरस्य प्रथममासो भविष्यति। २
इस्रायेलो वंशीयसर्व्वसमाजायेमां कथां कथय, मासस्यास्य दशमे ३
दिने युष्माकम् एकैको गृहस्थः स्वीयपरिवारार्थम् एकैकं मेषशावकं
गृह्णातु। मेषं भोक्तुं यस्य परिजना अल्पा भवन्ति, स तस्य निकटस्थः ४
प्रतिवासी च मेषशावकमेकं गृह्णीतां, यूयं लोकानां संख्यां भोजनशक्त्य-
नुसारतो मेषशावकमधि गणयिष्यथ। यूयं मेषव्रजात् छागव्रजाद् वा ५
निर्दोषम् एकवत्सरवयस्कं पुंशावकं गृहीत्वा तस्य मासस्य चतुर्दशदिनं
यावत् स्थापयिष्यथ। पश्चाद् यूयं इस्रायेलो वंशीयसमाजभुक्ताः सर्व्वे ६
सन्ध्यायां तं शावकं बलिं दास्यथ। अपरं तस्य किञ्चित् शोणितं गृहीत्वा ७
तन्मेषस्य भोजनगेहद्वाराणां पार्श्वद्वयकाष्ठेषु नासासु च तत् शोणितं
म्रक्षयिष्यथ। तस्यां रात्रौ तस्य वह्निदग्धं पललं तिक्तशाकमिश्रितान् ८
किण्वशून्यान् पूपांश्च भोक्ष्यध्वे। तत्पललम् अपक्वं तोयसिद्धं वा न ९
भोक्ष्यध्वे, किन्तु तस्य मुण्डजंघावपूंषि वह्निना दग्ध्वा भोक्ष्यध्वे। अपरं १०
प्रातःकालं यावत् तस्य किमपि नावशेक्ष्यध्वे; यदि प्रातःकालं यावत्
किञ्चिदवशिष्यते तर्हि तदग्निना भस्मसात् करिष्यथ।

यूयं कटिबन्धनं विधाय पादयोः पादुके दत्त्वा हस्तेन यष्टिं गृहीत्वा ११
तद् भोक्ष्यध्वे; एतत् परमेश्वरस्य निस्तारपर्व्व भविष्यति, तस्माद् यूयं
त्वरितं तद् भोक्ष्यध्वे। यतोहमद्य रात्रौ मिसर्देशस्य मध्येन गत्वा मिस- १२
र्देशस्य मनुजानां पश्वादीनाञ्च सर्व्वान् प्रथमजातान् प्रहरिष्यामि,
मिस्रीयान् देवांश्च दण्डयिष्यामि, परमेश्वरोऽहमेव। किन्तु यूयं यस्मिन् १३
यस्मिन् गेहे तिष्ठथ, तच्छोणितं तस्य तस्य गेहस्य चिह्नं भविष्यति,
यदाहं मिसर्देशं दण्डयिष्यामि, तदानीं तच्छोणितं विलोक्य युष्मान् विहाय
गमिष्यामि, स च दण्डो युष्मान् नाशयितुं युष्मान् प्रति नोपस्थास्यति। स १४
दिवसो युष्माकं स्मरणविषयो भविष्यति, तदर्थं यूयं पुरुषपरम्परया
तद्दिनं परमेश्वरस्य पर्व्वत्वेन पालयिष्यध्वे, इदं पर्व्व नित्यविधिना पाल-

१५ यिष्यध्वे। अपरं यूयं सप्तदिनानि यावत् किण्वशून्यान् पूपान् खादिष्यथ,
किन्तु प्रथमे दिने निजगेहेभ्यः किण्वम् अपसारयत; यतो यो जनः
आ प्रथमदिनात् सप्तमदिनं यावत् किण्वमिश्रितपूपं भोक्ष्यते स
१६ इस्रायेलो वंशाद् उच्छेत्स्यते। अपरं प्रथमे दिने युष्माकं पवित्रसमा-
रोहो भविष्यति, सप्तमे दिनेऽपि युष्माकं पवित्रसमारोहो भविष्यति,
तस्मिन् दिनद्वये प्रतिप्राणिभक्ष्यायोजनं विनान्यत् कर्म्म न करिष्यथ,
१७ केवलं तदेव युष्माभिः साध्यताम्। इत्थं युष्माभिः किण्वशून्यपूपीयं पर्व्व
पालनीयं, यतस्तस्मिन्नेव दिनेऽहं मिसर्देशाद् युष्मन्निवहान् उद्धरिष्यामि,
तस्माद् यूयं पुरुषपरम्परां यावत् विधिवत् तत् पर्व्व पालयिष्यथ।
१८ यूयं प्रथममासस्य चतुर्दशदिनस्य सायंकालमारभ्य एकविंशतितम-
१९ दिनस्य सायंकालं यावत् किण्वशून्यपूपान् भोक्ष्यध्वे। सप्ताहं युष्माकं
गृहेषु किण्वाभावो भूयात्, यतो विदेशी स्वदेशी वा यो जनोऽत्र
किण्वमिश्रितं पूपं भुंक्ते, स इस्रायेलो वंशस्य समाजाद् उच्छेत्स्यते।
२० यूयं किण्वयुक्तं किमपि द्रव्यं मा भक्षत, किन्तु स्वस्वसर्व्वगृहेषु किण्व-
शून्यपूपान् भक्षत।
२१ तदानीं मूसा इस्रायेलो वंशस्य सर्व्वान् प्राचीनलोकान् आहूय बभाषे
यूयं निजार्थं स्वस्वपरिजनानुसाराद् एकैकं मेषशावकं गृहीत्वा निस्ता-
२२ रपर्व्वणि बलिं छेदयत। अपरम् एकमुष्टिम् एसोबतृणानि गृहीत्वा
पात्रस्थिते शोणितेऽवगाहयित्वा द्वारस्य नासायां पार्श्वकाष्ठयोश्च पात्र-
स्थितशोणितविन्दून् प्रक्षिप्य प्रभातं यावत् युष्माकं कोपि गृहद्वाराद्
२३ वहि र्मा गच्छतु। यतः परमेश्वरो मिस्रीयान् हन्तुं तेषां मध्येन
गमिष्यति, तेन युष्माकं द्वारनासासु पार्श्वकाष्ठेषु च शोणितचिह्नं दृष्ट्वा
परमेश्वरः स्थानान्तरं गत्वा युष्माकं गेहं हन्तारं प्रवेष्टुं वारयिष्यति।
२४ अपरं यूयं युष्माकं सन्तानाश्च विधिवत् एतत् पर्व्व पालयिष्यथ।
२५ परमेश्वरो निजप्रतिज्ञानुसारेण युष्मभ्यं यं देशं दास्यति तत्र प्रविष्टै-
२६ रपि युष्माभिः पर्व्वैतत् पालयितव्यं। अपरं युष्माकं सन्तानैरेतत्पर्व्व-
२७ णोभिप्रायः कः? इति पृष्टे यूयं कथयिष्यथ, मिस्रीयाणाम् आघात-
काले अस्माकं गृहरक्षणकाले च परमेश्वरो मिसरि प्रवासिन इस्रायेलो
२८ वंशस्य गृहाणि परित्यज्य गतवान्, तस्येदं निस्तारपर्व्व। तदानीं लोका
दण्डवत् प्रणेमुः, अनन्तरम् इस्रायेलः सन्ताना गच्छन्तो मूसाहारोणौ
प्रति कथितस्येश्वरवाक्यस्यानुसारात् कर्म्म कृतवन्तः।

ततः परं परमेश्वरो मध्यरात्रौ सिंहासनस्थितस्य फिरौणः प्रथमजातं २९
सन्तानम् आरभ्य कारास्थितलोकानां प्रथमजातसन्तानान् यावत् मिस-
र्देशस्थितान् सर्व्वान् प्रथमजातसन्तानान् पशूनां प्रथमजातशावकांश्च
आजघान। ततः फिरौन् रजन्याम् उत्तस्थौ तस्य दासा मिस्रीयलोकाश्च ३०
मिसरि भृशं रुरुदुः, यतो यस्मिन् गृहे नैको मृतस्तादृशं गृहं नासीत्।

तदानीं रजन्यामेव फिरौन् मूससं हारोणञ्चाहूय जगाद, यूयम् ३१
इस्रायेलः सर्व्वे वंशा उत्थाय मम लोकानां मध्याद् वहिर्भवत, वहि र्भूत्वा
च युष्माकं वाक्यानुसारतः परमेश्वरं सेवध्वम्। अपरं युष्माकं वाक्यानु- ३२
सारात् मेषव्रजान् सर्व्वान् गवादिव्रजांश्च आदाय गच्छत, माञ्चाशिषं
गदत। तदानीं इस्रायेल्वंशो यथा तूर्णं देशाद् याति, मिस्रीयैरित्यु- ३३
द्योगश्चक्रे, यतस्तैरुक्तम् वयमपि सर्व्वे मृतकल्पाः। ततो लोकाः किण्व- ३४
मिश्रणात् पूर्व्वं, निजं निजं तोयमिश्रितं गोधूमचूर्णं वसनै र्बद्धा स्कन्धे
जगृहुः। अपरं इस्रायेलो वंशो मूससो वाक्यानुसारात् मिस्रीयेभ्यः ३५
स्वर्णरूप्याभरणानि वसनानि च याचित्वा जगृहुः। परमेश्वरो मिस्री- ३६
याणां दृष्टौ तान् अनुग्रहभाजनानि कृतवान्, तस्मात् ते तेषां प्रार्थनानु-
सारात् तेभ्यस्तानि ददुः। इत्थं ते मिस्रीयाणां धनादि जह्रुः।

तदानीम् इस्रायेलो वंशा बालकान् विहाय षट्लक्षाणि पुमांसः ३७
पदव्रजेन रामिषेषः सुक्कोतं प्रति यात्रां चक्रुः। तेन विदेशीया बहवो ३८
लोका मेषगवादयो बहुपशवश्च तैः सार्द्धं प्रतस्थिरे। अनन्तरं ते मिसर्दे- ३९
शाद् आनीतै र्मिश्रितगोधूमचूर्णैः किण्वशून्यपिष्टकान् चक्रुः, तन्मध्ये
किण्वाभाव आसीत्, यतस्ते मिसरो दूरीभवनकाले विलम्बकरणाशक्तेः
स्वेषां कृते किञ्चिदपि खाद्यम् आसादयितुं न शेकुः।

इस्रायेलो वंशस्त्रिंशदधिकचतुःशतवत्सरान् यावत् मिसर्देशे न्यव- ४०
सत्। अनन्तरं त्रिंशदधिकचतुःशतवत्सरेषु व्यतीतेषु तस्मिन् दिने ४१
परमेश्वरस्य सैन्यानि मिसरो वहि र्बभूवुः। परमेश्वरेण मिसरस्तेषां ४२
वहिष्करणकृते सा यामिनी तान् प्रति महामान्या बभूव, परमेश्वरस्य
सा यामिनी च इस्रायल्वंशस्य पुरुषपरम्परां यावत् अतीव मान्या
भवति।

अपरं परमेश्वरो मूससं हारोणञ्च बभाषे, निस्तारबलिन एष विधिः, ४३
कोपि विदेशी जनस्तं न भक्षिष्यति। किन्तु रूप्येण क्रीतः सर्व्वो दासो ४४
यदि त्वक्छेदी भवति, तर्हि भोक्तुं शक्ष्यति। नो चेत् विदेशी वेतन- ४५

४६ जीवी दासो वा तद् भोक्तुं न शक्ष्यति। एकस्मिन् गृहे तद् भोक्ष्यध्वे,
तस्य मांसस्य किञ्चिदपि गृहस्य वहि र्न नेष्यथ, तदीयैकं कीकसमपि
४७ मा भज्यतां। इस्रायेलः समाजीयाः सर्व्वे इदं पर्व्व करिष्यन्ति।
४८ अपरं त्वया सार्द्धं प्रवासी कोपि विदेशी जनो यदि परमेश्वरस्य
निस्तारपर्व्व पालयितुम् इच्छति, तर्हि स पुंपरिवारेण सार्द्धं
त्वक्छेदी सन् पर्व्व कर्त्तुम् आगच्छतु, तेन स देशीयलोकस्य सदृशो
४९ भविष्यति; किन्तु कोप्यच्छिन्नत्वक् तन्न भुंक्तां। अपरं देशजातं लोकं
युष्माकं मध्ये प्रवसद्विदेशीयलोकांश्च प्रति विधिरेक एव भविष्यति।
५० तत इस्रायेल्वंशीयाः सर्व्वे तथैव कृतवन्तः, अर्थात् मूसाहारोणौ
५१ प्रति परमेश्वरस्य याज्ञासीत्, तदनुसारतएव चक्रुः। इत्थं परमेश्वर-
स्तस्मिन् दिने सेनाश्रेणीनिवद्धान् इस्रायेलीयवंशान् मिसरो देशाद्
वहिः कृत्वानयत्।

---

१३ त्रयोदशोध्यायः।

१ ईश्वरम् उद्दिश्य प्रथमजातस्य पवित्रीकरणं ३ मिसरो मोचनस्मरणार्थचिह्नं ११ ईश्वरम् उद्दिश्य प्रथमजातस्य पवित्रीकरणविवरणं १७ मिसरो यात्राकरणकाले यूषफः कीकसस्य सहनयनं २० दिवा मेघस्तम्भेन रात्रौ वह्निस्तम्भेन परमेश्वरस्य तेषां मार्गदर्शनञ्च।

१ अनन्तरं परमेश्वरो मूसां गदितवान्, इस्रायेलो वंशमध्ये प्रथम-
२ जातान् सर्व्वजातीयान् सन्तानान् मामुद्दिश्य पवित्रान् कुरु, यतो मनुज-
पशुजात्योः प्रथमगर्भस्य सन्ताना मदीया भविष्यन्ति।
३ अनन्तरं मूसा लोकेभ्यः कथितवान्, यस्मिन् दिने यूयं मिसरो
दासत्वरूपगृहात् मुक्ता अभवत, अर्थात् यस्मिन् दिने परमेश्वर-
स्तस्मात् स्थानात् निजबाहुबलेन युष्मान् वहिः कृतवान्, तद्दिनं स्मर-
४ णीयं, तत्र किण्वयुक्ताः पूपा न भोक्तव्याः। यूयम् आवीव्मासस्य दिने-
५ ऽस्मिन् वहिरभवत। किनानीय-हित्तीय-इमोरीय-हिव्वीय-यिबूषी-
यानां यं देशं तुभ्यं दातुं तव पूर्व्वपुरुषाणां समीपे परमेश्वरेण
शपथोऽकारि, तं दुग्धमधुप्रवाहिनं देशं यदा स त्वाम् आनेष्यति,
६ तदापि त्वं मासेऽस्मिन् इदं पर्व्व पालयिष्यसि। सप्ताहं यावत् किण्वशून्य-
पूपान् खादिष्यसि, सप्तमे दिने परमेश्वरम् उद्दिश्य महं करिष्यसि।
७ सप्ताहं किण्वशून्यपूपा भोक्तव्याः, तव समीपे किण्वयुक्तपूपश्च दृष्टो

मा भवेत्, तव सर्व्वप्रदेशमध्ये किण्वदर्शनं न भवेत्। तस्मिन् दिने ८
त्वं निजपुत्त्रम् इति ज्ञापय, मिसरो मम वहिर्भवनकाले परमेश्वरो
मां प्रति यद् यत् कर्म्म कृतवान्, तस्य स्मरणार्थम् अयं व्यवहारो
भवति। अपरम् अयं विधिस्तव करस्य चिह्नस्वरूपः स्मरणार्थं नयन- ९
द्वयमध्यस्थानस्य भूषणस्वरूपो भविष्यति; परमेश्वरस्य च व्यवस्था तव
वदने स्थास्यति, यतः परमेश्वरः पराक्रमिकरेण मिसरस्त्वां वहिः-
कृतवान्। अतस्त्वं प्रतिवत्सरम् स्वसमय एतं विधिं पालयिष्यसि। १०
परमेश्वरस्तव त्वत्पूर्व्वपुरुषाणाञ्च समीपे यादृशं शपथं कृतवान् ११
तदनुसारेण यदा किनानीयदेशे त्वां प्रवेश्य तुभ्यं तं दास्यति, तदानीं १२
त्वं प्रथमजातसन्तानान् परमेश्वरार्थं पृथक् करिष्यसि, तव पशू-
नामपि प्रथमजाताः पुंसन्तानाः परमेश्वरस्य भविष्यन्ति। अपरं १३
गर्द्दभानां सर्व्वेषां प्रथमजातानां विनिमयेन मेषशावका दातव्याः, यस्य
विनिमयं न करोषि, तस्य ग्रीवां भंच्यसि; किन्तु तव सन्तानानां मध्ये
मनुजानां सर्व्वेषां प्रथमजातानां विनिमयः कर्त्तव्यः।

पश्चात् किमिदम्? इति भविष्यति काले तव पुत्त्रेण पृष्टे त्वं १४
वदिष्यसि, यदा परमेश्वरो निजपराक्रमिकरेणास्मान् मिसरोऽर्थात्
दासत्वरूपगृहाद् वहिः कृतवान् फिरौणश्च अस्मान् यातुं न सम-
मन्यत; तदानीं परमेश्वरो मिसर्देशे मनुजानां पश्वादीनाञ्च सर्व्वान् १५
प्रथमजातसन्तानान् अवधीत्, एतत्कारणाद् अहं पुंल्लिङ्गसकलप्रथम-
जातान् परमेश्वराय बलीन् ददामि; किन्तु मम वंशस्य प्रथम-
जातान् सर्व्वसन्तानान् मोचयामि। अयं विधिस्तव हस्तस्य चिह्नस्वरूपो १६
नेत्रद्वयमध्यस्थानस्य भूषणस्वरूपश्च भविष्यति, यतः परमेश्वरो बाहु-
बलेनास्मान् मिसर्देशात् वहिरानयत्।

अपरं फिरौणा लोकेषु परित्यक्तेषु पिलेष्टीयदेशेन यातुं स्तोकमार्गे १७
स्थितेऽपि ईश्वरस्तेन मार्गेण तान् न गमयामास, यत ईश्वरो गदितवान्,
तथा सति लोका रणं विलोक्यानुतप्य मिसरं परावृत्य यास्यन्ति। अत १८
ईश्वरः सूफ्सागरस्य प्रान्तरे तान् वक्रवर्त्मना गमयामास; तत
इस्रायेलो वंशाः शृङ्खलवत् मिसरो वहिरभवन्। अपरं मूसा यूषफः १९
कीकसानि सह निनाय, यतः स इस्रायेलो वंशं भृशं शपथं कार-
यित्वा जगाद, ईश्वरोऽवश्यं युष्मान् साक्षात् करिष्यति; यूयञ्च स्वैः
सार्द्धं मम कीकसानि स्थानादस्मात् नेष्यथ।

२० अनन्तरं ते सुक्कोतो यात्रां विधाय, एथमि अर्थात् काननपार्श्वे
२१ शिविरं स्थापयामासुः। परमेश्वरो दिवा पथा नेतुं मेघस्तम्भे रजन्यां
दीपनार्थं वह्निस्तम्भे स्थित्वा तेषाम् अग्रेऽग्रे गतवान्, इत्थं दिवानिशं
२२ तान् गमितवान्। स लोकानां सम्मुखात् दिवा मेघस्तम्भं रजन्यां
वह्निस्तम्भञ्च न दूरयामास।

---

१४ चतुर्दशोध्यायः।

१ इस्रायेलीयलोकान् प्रति परमेश्वरेण पथदर्शनं ५ फिरौणस्तेषां पश्चाद गमनं १० इस्रायेलीयलोकानां विलपनं १३ मूससः सान्त्वनावाक्यं १५ परमेश्वरेण मूसःशिक्षणं १९ दूतमेघस्तम्भयोः पश्चाद्वर्त्तित्वं २१ मूससः समुद्रद्विधाकरणं २३ इस्रायेल् लोकानां पश्चात् मिस्रीयाणां गमनं २६ सागरे मिस्रीयाणां विनाशश्च।

१ अनन्तरं परमेश्वरो मूससं बभाषे, त्वं इस्रायेलीयवंशाय कथय, यूयं
२ परावृत्य पीहहीरोतः सम्मुखे मिग्दोलः सागरस्य च मध्ये बाल्सि-
फोनः सम्मुखे शिविरं स्थापयत; यूयं तस्याग्रभूमौ सागरस्य समीपएव
३ शिविरं स्थापयत। यतः फिरौन् इस्रायेलो वंशान् उद्दिश्य कथयिष्यति,
४ ते देशस्य मध्ये बद्धाः सन्ति काननेन च रुद्धाः सन्ति। अपरं मया
फिरौणो हृदये कठिने कृते स युष्माकं पश्चात् धाविष्यति, ततः फिरौणा
तदीयसैन्यैश्च सम्मानम् प्राप्स्यामि, तेन परमेश्वरोहमेवेति मिस्रीया
ज्ञास्यन्ति, तदा ते तथैव कृतवन्तः।
५ ततो लोकाः पलायिता इति वार्त्तायां मिस्रीयराजे विज्ञापितायां
फिरौणस्तस्य दासानाञ्च मनांसि लोकेष्वनुतापितानि बभूवुः, ते च
कथयामासुः, कुतो वयम् एतादृशं कृतवन्तः? दासत्वात् मुक्तं इस्रायेल्-
६ वंशं कुतस्त्यक्तवन्तः? तदानीं राजा निजरथं सज्जयामास, निजलोकान्
७ सङ्गिनः कृतवान्। अपरं मनोनीताः षट्शतानि रथा मिस्रीयाणां
८ सर्व्वे रथाः प्रतिरथं योद्धॄन् जग्राह। तदा परमेश्वरेण मिस्रीयराजस्य
फिरौणो हृदये कठिने कृते स इस्रायेल्वंशस्य पश्चाद् अधावत्,
९ अपरम् इस्रायेलः सन्ताना महाबलेन गतवन्तः। किन्तु मिस्रीया अर्थात्
फिरौणः सर्व्वहया रथा अश्वारूढाः सैन्यानि च तेषां पश्चाद् जग्मुः,
तदा ते सागरस्य तीरे बाल्सिफोनः सम्मुखे पीहहीरोतः समीपे
शिविरं स्थापयन्ति, तदानीं ते तेषां समीप उपतस्थुः।
१० तत इस्रायेलो वंशास्चक्षुरुन्मील्य फिरौन् निकटमेति मिस्रीयाः

लोकाश्च पश्चाद् आगच्छन्तीति विलोक्यातीव बिभ्युः, इस्रायेलो वंशैः
परमेश्वरम् प्रति प्रार्थितं। अपरं ते मूससं भाषितवन्तश्च मिसरि किं ११
श्मशानाभावस्तत्कारणात् किमस्मान् प्रान्तरे मारयितुम् आनीतवान्?
अस्माभिः सार्द्धम् ईदृग् व्यवहृत्य अस्मान् मिसरः कुतो वहिः कृतवान्?
अस्मान् स्थातुम् आदिश, वयं मिस्रीयान् सेवामहे, यतः प्रान्तरे १२
मरणात् मिस्रीयाणां सेवनम् अस्माकं मङ्गलम्, एतां कथां वयं किं
मिसरि तुभ्यं न कथितवन्तः?

अनन्तरं मूसा लोकान् अवादीत्, यूयं मा बिभीत, स्थिरीभवत, १३
परमेश्वरो युष्मान् अद्य कथम् उद्धारयति, तत् पश्यत। यूयमद्य
एतान् यान् मिस्रीयान् पश्यथ, तान् पुनः कदापि न द्रक्ष्यथ। परमेश्वरो १४
युष्मत्कृते योत्स्यति, यूयं स्थिरास्तिष्ठत।

अनन्तरं परमेश्वरो मूससं जगाद, त्वं मां कुत आह्वयसि? इस्रायेलो १५
वंशम् अग्रं गन्तुं वद। अपरं त्वं निजयष्टिं गृहीत्वा निजकरं सागरो- १६
परि प्रसार्य्य तं द्विभागं कुरु, तत इस्रायेलो वंशाः शुष्कमार्गेण सागर-
मध्यं प्रवेक्ष्यन्ति। अपरं पश्याहं मिस्रीयाणाम् अन्तःकरणानि कठि- १७
नानि करिष्यामि, ते च तेषां पश्चात् प्रवेक्ष्यन्ति, ततोऽहं फिरौणस्तस्य
सर्व्वसैन्यानां रथानां हयारूढानां समक्षं सम्मानं प्राप्स्यामि।
फिरौणस्तस्य रथानां हयारूढानाञ्च समक्षं मया सम्माने प्राप्ते परमे- १८
श्वरोऽहमेवेति मिस्रीयाः सर्व्वे लोका ज्ञास्यन्ति।

तदानीम् इस्रायेलीयसैन्याग्रगामी य ईश्वरस्य दूतः स तेषां पश्चात् १९
जगाम, मेघस्तम्भस्तेषां सम्मुखात् गत्वा तेषां पश्चात् स्थितवान्। स २०
मेघस्तम्भो मिस्रीयलोकानाम् इस्रायेलो वंशस्य चोभयशिविरमध्ये तस्थौ,
तेन स एकस्मिन् पार्श्वे मेघोऽन्धकारस्वरूपो बभूव; किन्त्वन्यस्मिन् पार्श्वे
रजन्यां दीप्तिं दत्तवान्, इति कारणात् कृत्स्नायां रजन्याम् एको
निवहोऽन्यनिवहस्य समीपं गन्तुं न शशाक।

अनन्तरं मूसाः सागरोपरि स्वकरं प्रसारयामास, ततः परमेश्वरः २१
तस्यां कृत्स्नायां यामिन्यां प्रबलेन पूर्व्वीयवायुना सागरतोयानि चालया-
मास, तेन सागरः शुष्कीभूय तोयानि द्विभागी बभूवुः। तत इस्रायेलो २२
वंशाः शुष्केण पथा सागरमध्यं प्रविष्टाः, अपरं तेषां दक्षिणे वामे च
तोयं प्राचीररूपं बभूव।

अनन्तरं मिस्रीया अर्थात् फिरौणः सर्व्वे हया रथा हयारोहाश्च २३

२४ धावन्तस्तेषां पश्चात् सागरस्य मध्यं प्रविविशुः। अपरं रजन्याः शेष-
प्रहरे परमेश्वरो वह्निमेघयोस्तम्भाभ्याम् मिस्रीयसैन्यम् अवलोक्य मिस्री-
२५ यान् व्याकुलान् चकार। तेषां रथचक्रेषु मोचितेषु तेऽतिकष्टेन रथान्
चालयामासुः; ततो मिस्रीयलोका उक्तवन्तो वयम् इस्रायेलो वंशात्
पलायामहै, यतः परमेश्वरो मिस्रीयाणां प्रतिकूलं तेषां पक्षे युध्यति।
२६ अनन्तरं परमेश्वरो मूससं जगाद, त्वं सागरोपरि निजकरं प्रसा-
रय, तेनाहं मिस्रीयाणां तेषां हयानां हयारोहाणाञ्चोपरि पुनरपि
२७ तोयम् आगमिष्यति। तदा मूसाः सागरोपरि स्वकरं प्रसारितवान्;
ततः प्रातःकाले जाते सागरः समानो भवितुम् आरभत, तेन मिस्री-
यास्तस्य सम्मुखाद् अपलायन्त; तथापि परमेश्वरः सागरस्य मध्ये
२८ तान् निरक्षिपत्। फलत आपः परावृत्य तेषां रथान् हयारोहांश्च
छादयामास, तेन फिरौणो यानि सैन्यानि तेषां पश्चात् सागरं
२९ प्रविष्टानि, तेषाम् एकोपि नावशिष्टः। किन्त्विस्रायेलो वंशः शुष्कपथेन
सागरस्य मध्येन गतवान्, जलन्तु तेषां वामे दक्षिणे च प्राचीर-
३० रूपं बभूव। इत्थं तद्दिने परमेश्वरो मिस्रीयाणां करेभ्य इस्रायेलो
वंशं रक्षितवान्, इस्रायेलो वंशो मिस्रीयान् सागरस्य तटे मृतान्
३१ ददृशुः। परमेश्वरो मिस्रीयाणां मध्ये यदाश्चर्य्यपराक्रमं प्रकाशयामास,
तद् इस्रायेलो वंशो ददर्श, तेन लोकाः परमेश्वरात् परिभीय परमेश्वरे
तस्य दासे मूससि च व्यश्वसन्।

---

१५ पञ्चदशोध्यायः।

१ मूससो गीतं २० तस्य गानं २२ तोयाभावः २३ माराख्याने तिक्ततोयप्राप्तिः काष्ठेन तस्य मिष्टत्वं २७ एलीम्स्थाने शिविरस्थापनञ्च।

१ अनन्तरं मूसा इस्रायेलो वंशाश्च परमेश्वरमुद्दिश्य गीतमिदं गीत्वा जगदुः।

अहं गीतं प्रगायामि समुद्दिश्य परेश्वरं।
स्वकीयो महिमा तेन स्वयमेव प्रकाशितः।
हयारोहा हयाश्चैव निक्षिप्ताः सागराम्भसि।
२ परेशो मे बलं गीतं परित्राता च मेऽभवत्।
मदीश्वरः स तस्मात्तं प्रशंसिष्याम्यहं ध्रुवम्।
स ईशो मम तातस्य तद् वदिष्यामि तद्गुणान्।

यिहोवाः परमेशो यः सएव कुरुते रणम्। ३
फिरौणो रथसैन्यानि सागरे क्षिप्तवान् स हि। ४
तन्मनोनीतसेनान्यो निमग्नाः सूफि सागरे।
आच्छादितेषु लोकेषु गम्भीरतोयराशिना। ५
पाषाणाइव ते सर्व्वे तोयानामगमन् तलम्।
बलात्ते दक्षिणो हस्तः परेश गौरवं गतः। ६
परेश दक्षिणो हस्तोऽचूर्णयत्ते रिपून् भृशं।
त्वद्विरुद्धगतान् लोकान् सुमहिम्ना व्यनाशयः। ७
त्वत्सम्प्रेषितकोपाग्ने र्नालवत् भक्षिताश्च ते।
त्वन्नासारन्ध्रवातेन तोयं गाढ़मजायत। ८
अतिष्ठत् सेतुवत् स्रोतो घनीभूतमधोऽम्बु च।
तैरुक्तं रिपुभि र्वेगात् धरिष्यामो हि तान् वयं। ९
कामान्नः पूरयिष्यामो विभज्यादाय लोठितम्।
खड्गान् निष्कोष्य नो हस्ता नाशयिष्यन्ति तान् जनान्।
सिन्ध्वम्बुच्छादितास्तेतु त्वया निश्वासहुंकृते। १०
सीसकानीव ते सर्व्वे गम्भीराम्बुतलं गताः।
मध्ये देवगणं कोस्ति त्वत्समः परमेश्वर। ११
आदर्त्तव्यः पवित्रत्वात् स्तव्यश्च भीतिदानतः।
आश्चर्य्यकर्म्मकारी च त्वत्समः कोत्र विद्यते।
स्वकीयदक्षिणे हस्ते त्वया शीघ्रं प्रसारिते। १२
सर्व्वं रिपुगणं तूर्णं जग्रास मेदिनी स्वयम्।
त्वं लोकान् परिमोच्य स्वान् कृपया गमयस्यपि। १३
त्वत्पवित्रनिवासाय स्वबलात् तान् नयस्यपि।
इति श्रुत्वेतरे लोकाः परियास्यन्ति साध्वसं। १४
उद्विग्नत्वे पिलेष्टीया जना मंक्ष्यन्ति निश्चितं।
चमत्कृता भविष्यन्ति नृपाः सर्व्वं इदोमियाः। १५
कम्पग्रस्ता भविष्यन्ति मोयावो बलवन्नराः।
द्रवत्वं परियास्यन्ति किनान्देशनिवासिनः।
त्रासकम्पौ ततस्तेषु सर्व्वेषु निपतिष्यतः। १६
तव दोर्बलतस्ते हि स्थास्यन्ति ग्राववत् स्थिराः।
तान् विहाय प्रयास्यन्ति परमेश्वर ते जनाः।

तान् सन्त्यज्य गमिष्यन्ति त्वत्क्रीतसर्व्वमानुषाः ।
१७ परेश ते स्वयं वस्तुं यत् स्थानं निर्म्मितं पुरा ।
यच्च स्थानं पवित्रं ते कराभ्यां स्थापितं भुवि ।
तत्राधिष्ठातृशैले त्वं तान् जनान् वासयिष्यसि ।
१८ सर्व्वकाले परेशेन राजत्वं प्रकरिष्यते ।
१९ फिरौणोऽश्वा रथाः सिन्धुं प्राविशन् सादिनस्तथा ।
तेषामुपरि सामुद्रं परेशस्तोयमानयत् ।
इस्रायेलीयसन्ताना ये ते शुष्केण वर्त्मना ।
पारावारस्य मध्येन गमनं चक्रिरे पदैः ।

२० अनन्तरं हारोणस्य भगिनी मरियम्भविष्यद्वक्त्री कराभ्यां मृदङ्गं
गृहीतवती, ततोऽन्या योषितश्च सर्व्वा मृदङ्गान् गृहीत्वा नृत्यं कुर्व्वं-
२१ त्यस्तस्याः पश्चाद् वहि र्बभूवुः । तदानीं मरियम् ताभ्य इदं गीतं गातुं
कथयामास,

परेश्वरं समुद्दिश्य यूयं गीतं प्रगायत ।
स्वकीयो महिमा तेन स्वयमेव प्रकाशितः ।
हयारोहा हयाश्चैव निक्षिप्ताः सागराम्भसि ।

२२ अनन्तरं मूसा इस्रायेलो वंशान् सूफसागराद् आनीतवान्, ततस्ते
शूर्प्रान्तरस्य दिशं गतवन्तः; प्रायेण दिनत्रयं प्रान्तरं गत्वा पानीयं
न प्रापुः ।

२३ पश्चात् तेषु माराम् उपस्थितेषु तिक्तताकारणात् मारायाः पानीयं
२४ पातुं न शेकुः, तत्कारणात् तस्य नाम मारा (तिक्तेति) चक्रुः । अतो
२५ लोकै र्मूससो विरुद्धं वाग्युद्धं कृत्वा कथितं, वयं किं पास्यामः? तेन स
परमेश्वरम् उद्दिश्य प्रार्थितवान्, तदा परमेश्वर एकजातीयं काष्ठं
तं दर्शयामास, तदादाय मूसा जले निक्षिप्तवान्, ततस्तोयं मधुरं
बभूव । तत्र स्थाने परमेश्वरस्तेषां कृते विधिं व्यवस्थाञ्च निरूपयामास,
२६ पुनस्तान् परीक्ष्य गदितवान्, यदि यूयं निजप्रभोः परमेश्वरस्य
कथायां मनांसि निधद्ध्वे, तस्य दृष्टौ यदुचितं तदेव कुरुथ, तस्याज्ञायां
मनांसि निधद्ध्वे, तदीयां सकलव्यवस्थाञ्च पालयथ, तर्हि मिस्रीयलोकान्
अहं यान् यान् रोगान् भोजितवान्, तान् युष्मान् न भोजयिष्यामि,
परमेश्वरोऽहमेव युष्माकम् आरोग्यकारः ।

२७ अनन्तरम् एलीमं तेषूपस्थितेषु तत्र द्वादश प्रस्रवणानि सप्ततिः

खर्ज्जूरपादपास्त्रासन्, तस्मात् ते तोयप्रस्रवणसमीपे शिविराणि स्थाप-
यामासुः।

---

१६ षोडशोऽध्यायः।

१ खाद्याभावाद् इस्रायेलो वंशस्य कलहः ४ खाद्यं वर्ष्टुम् ईश्वरस्य प्रतिज्ञानं ९ लोकान् प्रति मूसस आज्ञापनम् ईश्वरस्य तेजःप्रकाशनं ११ वर्त्तकपक्षिणां प्रेषणं मान्नावर्षणं १६ खाद्यस्य परिमाणनिरूपणं २२ षष्ठदिनाय विशेष निरूपणं २७ सप्तमदिने खाद्यवर्षणाभावः ३२ पात्रेषु मान्नारक्षणञ्च।

अपरं मिसर्देशत्यागानन्तरं द्वितीयमासस्य पञ्चदशदिने इस्रायेल् १
वंशीयसमाजस्य सर्व्वलोका एलीमो यात्रां विधाय एलीम्सीनयो-
रुभयो र्मध्यवर्त्तिनं सीनप्रान्तरम् उपस्थितवन्तः। तदानीम् इस्रायेल् २
वंशीयसमाजस्य सर्व्वे लोका मूसोहारोणयोः प्रतिकूलं प्रान्तरे व्यवदन्त।
अपरम् इस्रायेलो वंशास्ताभ्यां कथयामासुः, वयं यदा मांसानां पाक- ३
पात्रनिकटे समुपविशन्तस्तृप्तिं यावत् अन्नम अभुञ्ज्महि, हाहा तदा
यदि वयं मिसर्देशे परमेश्वरस्य हस्तेन अम्रियामहि; युवाम् एतत्-
समाजस्य सर्व्वलोकान् अस्मान् क्षुधया मारयितुम् वहिः प्रान्तरम्
आनयतम्।
तदा परमेश्वरो मूससमवदत्, पश्याहं युष्मत्कृते आकाशाद् भक्ष्य- ४
द्रव्याणि वर्ष्यामि, ततो लोका वहिर्गत्य दैवसिकनिरूपितपरिमाणानु-
सारेण भक्ष्याणि संग्रहीष्यन्ति, तेन ते मम व्यवस्थयाचरिष्यन्ति न वेति
तान् परीक्षिष्ये। षष्ठदिने ते यद् आनेष्यन्ति, तस्मिन् पक्के दिनं दिनं ५
यत् संग्रहीष्यन्ति, तस्य द्विगुणं भविष्यति। ततो मूसोहारोणौ इस्रा- ६
येलः सर्व्ववंशं जगदतुः, परमेश्वरो यत् युष्मान् मिसरो वहिरानयत्,
तत् युष्माभिः सायंकाले ज्ञायिष्यते। अपरं प्रातःकाले यूयं परमेश्वरस्य ७
महिमानं द्रक्ष्यथ, परमेश्वरं प्रति युष्माकं यद् वाग्युद्धं स तदश्रौषीत्,
आवां कौ यत् यूयम् आवयोर्विरुद्धं वाग्युद्धं कुरुथ? पश्चात् मूसाः ८
कथितवान् परमेश्वरः सायंकाले भोजनार्थं युष्मभ्यं मांसानि दास्यति,
प्रातःकाले तृप्तिपर्य्यन्तं भक्ष्याणि च दास्यति, परमेश्वरं प्रति युष्माकं यो
वाक्कलहः स तं श्रुतवान्, आवां कौ? आवयो र्विपरीतं नहि, किन्तु
परमेश्वरस्य विपरीतं युष्माकं वाक्कलहो भवति।
अपरं मूसा हारोणं बभाषे, त्वम् इस्रायेल्वंशीयसमाजस्य निखिल- ९

लोकान् वद, यूयं परमेश्वरस्य सम्मुखम् आगच्छत, स युष्माकं वाक्कलहं
१० श्रुतवान्। इस्रायेल्वंशस्य समाजम् हारोणो यदा तद्वाक्यं वदति,
तदा तैः प्रान्तरं प्रति दृष्टिरकारि, मेघस्तम्भस्य मध्ये परमेश्वरस्य
तेजोऽदर्शि च।

११ परमेश्वरो मूससं गदितवान्, अहम् इस्रायेलो वंशानां वाक्कलहम्
१२ अश्रौषम्। त्वं तेभ्यः कथय, यूयं सायंकाले मांसानि भक्षिष्यथ, प्रातः-
काले भक्ष्यद्रव्यैस्तृप्तिं यास्यथ, तेनाहं युष्माकं प्रभुः परमेश्वर इति
१३ ज्ञास्यथ। अनन्तरं सन्ध्यायां वर्त्तकपक्षिण उपस्थाय शिविरस्थानं
१४ व्याप्तवन्तः, प्रातःकाले च सैन्यस्थानस्य चतुर्दिक्षु तुषाराः पेतुः। अन-
न्तरं पतिततुषारेषूर्द्ध्वं गतेषु प्रान्तरभूमौ क्षुद्रा वर्त्तुला नीहाराइव
१५ क्षुद्रद्रव्याणि पतितान्यतिष्ठन्। ततः परम् इस्रायेलः सन्तानास्तानि
विलोक्य परस्परं जगदुः, मान् हू? (किमेतत्?) यतः किं तदिति ते न
विविदुः। ततो मूसाः कथितवान् परमेश्वरो युष्मभ्यं द्रव्यमेतत् भोक्तुं
दत्तवान्।

१६ अत्र परमेश्वरस्येयमाज्ञा, युष्माकम् एकैको जनो निजभोजन-
शक्तिं विज्ञाय तत् संगृह्णातु, अर्थत एकजनकृते एकम् ओमरं
युष्माकं प्राणिनां संख्यानुसारेण निजनिजदूष्ये स्थितानां लोकानां कृते
१७ तत् संगृह्णीत। तत इस्रायेलो वंशास्तथैव कृतवन्तः, कश्चिद् अधिकं,
१८ कश्चिद् अल्पं समचिनोत्। पश्चात् तै जनैरोमरेण तस्मिन् परिमिते,
येनाधिकं संगृहीतं तस्याधिकं नाभवत्, येन चाल्पं संगृहीतं तस्याल्पं
१९ नाभवत्, इत्थं ते स्वस्वभोजनशक्त्यनुसारेण संजगृहुः। अनन्तरं मूसाः
कथितवान्, युष्माकं कोपि प्रातःकालं यावत् तस्य किञ्चिदपि न स्थापयतु।
२० किन्तु मूससोवाक्यं न गृहीत्वा केचित् प्रातःकालं यावत् किञ्चित् किञ्चित्
स्थापयामासुः; तदा तत्र कीटा जज्ञिरे, दुर्गन्धश्च बभूव; ततो मूसा-
२१ स्तेभ्यः क्रुद्धवान्। इत्थं प्रत्यहं प्रातःकाले ते स्वस्वभोजनशक्त्यनुसारेण
तत् संगृहीतवन्तः, किन्तु प्रखरे रौद्रे सति तद् द्रवीबभूव।

२२ अनन्तरं षष्ठदिने तै द्विगुणम् अर्थत एकैकजनकृते ओमरद्वय-
परिमितानि द्रव्याणि संगृहीतानि; तदा समाजस्य अधिपतय आगत्य
२३ मूससं ज्ञापयामासुः। ततो मूसास्तेभ्यः कथितवान्, परमेश्वर इत्याज्ञाप-
यत्, श्वः परमेश्वरस्य पवित्रो विश्रामवारो भविष्यति, तस्मात् युष्माकं
यद् भर्ज्जनीयं तद् भृज्जत, यच्च पचनीयं तत् पचत, अवशिष्टद्रव्यञ्च

प्रातःकालार्थं स्थापयत। तेन ते मूसस आज्ञानुसारेण प्रातःकालपर्य्यन्तं २४
तत् स्थापयामासुः; किन्तु तत्र दुर्गन्धो न बभूव, कीटाश्च न जज्ञिरे।
पश्चात् मूसाः कथयामास, यूयमद्य तत् भुङ्ग्ध्वं, यतोद्य परमेश्वरस्य २५
विश्रामवारः, अद्य प्रान्तरे किञ्चित् न लप्स्यध्वे। यूयं षट् दिनानि तत् २६
संग्रहीष्यथ; किन्तु सप्तमे दिने, अर्थतो विश्रामवारे तन्न जनिष्यते।
तथापि कश्चित् कश्चित् सप्तमदिनेपि तत् संग्रहीतुं जगाम; किन्तु २७
किञ्चिदपि न प्राप्तवान्। ततः परमेश्वरो मूससं जगाद, यूयं मदीयाज्ञां २८
विधिञ्च पालयितुं कतिकालान् न मतिं करिष्यथ? पश्यत यः परमेश्वरो २९
युष्मभ्यं विश्रामदिनं दत्तवान्, स षष्ठदिने दिनद्वयोपयुक्तं खाद्यं ददाति;
तस्माद् यूयं स्वस्वस्थाने तिष्ठत, युष्माकं कोपि जनः सप्तमदिने स्वस्वस्था-
नात् न वहिर्भवतु। तदानीं लोकाः सप्तमदिने विश्रान्तवन्तः। अपरम् ३०
इस्रायेलः सन्तानास्तस्य भक्ष्यस्य नाम मान्नां कृतवन्तः, सा मान्ना धन्या- ३१
काकृतिः शुक्लवर्णा तस्या रसो मधुमिश्रितपिष्टकवत् आसीत्।

ततः परं मूसा गदितवान्, परमेश्वर एतद् आज्ञापितवान्, मिसरो ३२
युष्मदानयनकाले प्रान्तरस्य मध्ये यदन्नमहं युष्मान् भोजितवान्, तद्
यथा युष्माकं पुरुषपरम्परया दर्शिष्यते, तदर्थं त्वं तेषां कृते ओमरैक-
परिमाणां मान्नां स्थापय। तदानीं मूसा हारोणम् अवादीत्, त्वम् ३३
पात्रमेकं गृहीत्वा एकोमरपरिमाणां मान्नां पूरयित्वा परमेश्वरस्य
सम्मुखे निधेहि, सा युष्माकं भाविपुरुषाणां निमित्तं स्थापयिष्यते।
तदानीं हारोणो मूससं प्रति कथितायाः परमेश्वरस्याज्ञाया अनुसारेण ३४
साक्षिपेटकस्य समीपे स्थातुं तां स्थापितवान्। इस्रायेलो वंशा निवास- ३५
देशोपस्थितिं यावत् चत्वारिंशत् वत्सरान् तां मान्नां भुक्तवन्तः,
किनान्देशस्य सीमोपस्थितिं यावत् तां खादितवन्तः। एक ओमर ३६
एफादशमांशः।

---

१७ सप्तदशोध्यायः।

१ रिफीदीमि तोयाभावात् लोकानां कलहः ८ अमालेक् लोकानां पराजयः १४ परमेश्वरमुद्दिश्य मूसावेदिनिर्म्माणं।

अनन्तरम् इस्रायेल्वंशीयसमाजस्य सर्व्वे लोका परमेश्वरस्याज्ञानु- १
सारेण निरूपितपथेन सीन्प्रान्तरात् यात्रां कृत्वा रिफीदीमं गत्वा
शिविरं स्थापयामासुः; किन्तु तत्र स्थाने लोकानां पानार्थं तोयाभाव

२ आसीत्। अतो लोका मूससा सार्द्धं वाक्कलहं कृत्वा कथयामासुः,
अस्मभ्यं पानीयं देहि तद् वयं पास्यामः; ततो मूसाः कथितवान् यूयं
२ कुतो मया सार्द्धं वाग्मि युध्यथ? कुतः परमेश्वरं परीक्षध्वे? तदानीं
लोकास्तत्र स्थाने पानीयाभावात् तृषार्त्ताः सन्तो वाग्युद्धं कृत्वा मूससं
कथितवन्तः, त्वम् अस्मान् अस्माकं सन्तानान् पशूंश्च पिपासया मार-
४ यितुं मिसर्देशात् कुत आनीतवान्? ततो मूसाः परमेश्वरं प्रार्थयमानः
कथितवान्, एतेषां लोकानां कृते किमहं करिष्यामि? ते मां प्रायेण
५ पाषाणै र्मारयितुम् उद्यताः। तदानीं परमेश्वरो मूससं बभाषे, त्वं
यया यष्ट्या तटिनीम् आहनः, तां करेण गृहीत्वा इस्रायेल्वंशानां
६ प्राचीनान् सङ्गिनः कुर्व्वन् लोकानाम् अग्रे याहि। पश्चादहं होरेब्-
पर्व्वतस्योपरि तव सम्मुखे स्थास्यामि, त्वं तं शैलम् आहनिष्यसि, तेन
तस्मात् तोयं निर्गते लोकास्तत् पास्यन्ति। तदानीं मूसा इस्रायेलो
७ वंशस्य प्राचीनानां दृष्टौ तथैव कृतवान्। अपरं परमेश्वरोऽस्माकं
मध्ये विद्यते नवेति कथनेन इस्रायेलो वंशानां विवादकारणात् पर-
मेश्वरपरीक्षणकारणाच्च तस्य स्थानस्य नाम मसामिरीवे (परीक्षण-
विवादाविति) कृतवान्।

८ तदानीम् अमालेक्लोका आगत्य रिफीदीम्स्थान इस्रायेलो वंशै
९ सार्द्धम् अयुध्यन्, तदा मूसा यिहोशूयं गदितवान्, त्वम् अस्माकं
मध्यात् मनोनीतान् मानुषान् गृहीत्वा अमालेको लोकैः सार्द्धं योद्धुं
याहि; अहम् ईश्वरीयां यष्टिं करेण गृहीत्वा पर्व्वतस्य शिखरे
१० स्थास्यामि। तदा यिहोशूयो मूसस आज्ञानुसारात् अमालेको लोकैः
सार्द्धम् अयुध्यत्, मूसा हारोणो हूरश्च पर्व्वतस्य शृङ्गोपरि समारुहन्।
११ किन्तु यदा यदा मूसा निजकरौ ऊर्द्धीकरोति, तदा तदेस्रायेलो वंशो
जयति, किन्तु निजकरयोरवरोहितयोरमालेको लोका जयन्ति।
१२ अपरं मूससः करयो र्गुर्व्वी भूतयोः, तैरेकं पाषाणम् आनीय तस्याधः-
स्थापितः; तदा मूसास्तस्योपरि समुपविष्टवान्, ततो हारोणहूरयो-
रेको जन एकदिशि तदन्यजनोऽन्यदिशि तस्य करावुत्थाप्य धृतवन्तौ
१३ तेन रवेरस्तगतिपर्य्यन्तं तस्य करौ स्थिरीभूय स्थितवन्तौ। अतएव
यिहोशूयोऽमालेकं तस्य लोकांश्च खड्गेन पराजितवान्।

१४ अनन्तरं परमेश्वरो मूससं गदितवान्, एतां कथां स्मरणार्थं पुस्तके
लिख, यिहोशूयस्य कर्णगोचरे तत् पठ च; अहम् आकाशस्याधो-

भागात् अमालेकः स्मरणं लोप्स्यामि। अनन्तरं मूसा एकां वेदिं १५
निर्म्माय तस्या नाम यिहोवा-निषि (परमेश्वरो मम ध्वजस्वरूपः) इति
कृतवान्। अपरं पुरुषपरम्परां यावत् अमालेका सार्द्धं परमेश्वरस्य १६
संग्रामो भविष्यतीमां कथां ध्वजे लेखितुं आज्ञापयामास।

---

१८ अष्टादशोऽध्यायः।

१ मूसःसमीपं तस्य भार्य्यापुत्त्रश्वशुराणामागमनं ७ तेषां साक्षात्कारः तेषां ग्रहणञ्च १३ मूससं प्रति यिथ्रस्य सुमन्त्रणा तस्य स्वदेशगमनञ्च।

ईश्वरो मूससं प्रति निजलोकम् इस्रायेलो वंशं प्रति च कर्म्माण्येतानि १
कृतवान्, अपरं मिसरो देशाच्च इस्रायेलो वंशं वहिः कुर्व्वन् आनीत-
वान्, एताः सकलाः कथाः श्रुत्वा मूससः श्वशुरो मिदीयनो याजको २
यिथ्रो निजगेहं प्रहितां मूससो जायां सिप्पोरां तस्या द्वौ पुत्त्रौ च सङ्गे
गृहीतवान्। एतयो द्वयोः पुत्त्रयोरेकस्य नाम गेर्शोम् (अत्रस्थाने विदेशी) ३
यतः स कथितवान्, अहमितरस्मिन् देशे विदेशी भूतवान्। अन्यस्य ४
नामधेयम् इलीयेषर् (ईश्वरो ममोपकर्त्ता) यतः स कथितवान्, मम
पितुरीश्वरो ममोपकर्त्ता भवन् फिरौणः खड्गात् माम् उद्धृतवान्।
पश्चात् मूससः श्वशुरो यिथ्रो मूससः सुतौ तौ द्वौ जायाञ्च सङ्गे गृह्णन् ५
प्रान्तरे यस्मिन् स्थाने मूसाः शिविरं स्थापितवान्, तत्र स्थाने ऽर्थात्
ईश्वरस्य पर्व्वते तस्य समीपम् आजगाम। अपरञ्च मूससे कथितवान्, ६
अहं तव श्वशुरो यिथ्रस्तव जाया च तया सार्द्धं तव द्वौ सुतौ च तव
समीपम् आगतवन्तः।

तदानीं मूसा निजश्वशुरं साक्षात् कर्त्तुं वहि र्गत्वा तं प्रणम्य चुचुम्बे; ७
ततः परस्परं मङ्गलं पृष्ट्वा ते दूष्यं प्रविविशुः। अनन्तरं परमेश्वर ८
इस्रायेलो वंशकारणात् फिरौणं प्रति मिस्रीयान् प्रति च किं किं कृत-
वान्, वर्त्मनि तान् प्रति कीदृक् परिश्रमोऽभूत्, परमेश्वरश्च केन
प्रकारेण तान् उद्धृतवान्, एताः सकलाः कथा मूसा निजश्वशुरं
ज्ञापयामास। तत्र परमेश्वरो मिस्रीयाणां करेभ्य इस्रायेलो वंशम् ९
उद्धृत्य तेषां मङ्गलं कृतवान्, एतेषां कृते यिथ्रो ऽतीवाह्लादितो बभूव।
अपरं स कथितवान् यः परमेश्वरो मिस्रीयाणां फिरौणस्य करेभ्यो युष्मान् १०
उद्धृतवान् स धन्यः। मिस्रीयाणां करेभ्यः स्वकीयलोकानाम् उद्धारयिता
परमेश्वरः सर्व्वदेवताभ्यो महान् इत्यहम् इदानीं ज्ञातवान्; यतस्ते ११

यस्मिन् अभिमानं कृतवन्तस्तस्मिन् स तेषाम् उपरि जयी बभूव।
१२ अनन्तरं मूससः श्वशुरो यिथ्र् ईश्वरम् उद्दिश्य होमं नैवेद्यञ्च कृतवान्;
अपरं हारोण इस्रायेलो वंशस्य प्राचीनलोकाश्च आगत्य ईश्वरस्य
सम्मुखे मूससः श्वशुरेण सार्द्धं भोजनं चक्रुः।
१३ परेऽहनि मूसा लोकानां विचारं कर्त्तुम् उपविवेश, तदा लोकाः
१४ प्रातःकालम् आरभ्य सन्ध्यां यावत् तस्य सम्मुखे स्थितवन्तः। ततो
मूससः श्वशुरो लोकान् प्रति तस्य सर्व्वं व्यवहारं विलोक्य कथयामास,
त्वं लोकैः सार्द्धं कीदृक् व्यवहरसि? त्वं कुत एकाकी उपविशसि? सर्व्वे
१५ लोका आ प्रातःकालात् सन्ध्यां यावत् तव समीपे कुतस्तिष्ठन्ति? ततो
मूसा निजं श्वशुरं कथितवान्, लोका ईश्वरस्य विचारं प्रष्टुं मम
१६ सन्निधिम् आगच्छन्ति, तेषां कस्मिंश्चित् विवादे जाते मम समीपम्
आगच्छन्ति; ततो वादिप्रतिवादिनौ विचारयाम्यहम्, अपरम् ईश्व-
१७ रस्य सर्व्वा विधिव्यवस्थास्तानहं ज्ञापयामि। अनन्तरं मूससः श्वशुरः
१८ कथयामास, त्वं यत् करोषि, तद् भद्रं नहि। त्वं तव सङ्गिनो लोका-
श्चोभये क्षीणा भविष्यथ, यत इदं कार्य्यं त्वदीयशक्तितो गुरुतरं;
१९ एतत् त्वम् एकाकी कर्त्तुम् अशक्नोसि। अतएव मम कथायां मनो
निधेहि, त्वामहं बुद्धिं दर्शयामि, तत ईश्वरस्तव सहायो भविष्यति,
अपरम् ईश्वरस्य सम्मुखे त्वं लोकानां प्रतिनिधिः सन् तेषां कथा ईश्वरं
२० ज्ञापय। त्वन्तु तान् विधिं व्यवस्थाञ्च समुपदिश, तेषां गन्तव्यमार्गं
२१ कर्त्तव्यं कर्म्म च तान् दर्शय। अपरं त्वं सर्व्वेषां मध्यात् कर्म्मकुशलमान-
वान् अर्थात् ईश्वराद् भीरून् सत्यवादिनो लोभर्त्तीयिनो लोकान्
मनोनीतान् कृत्वा तेषामुपरि सहस्रपतीन् शतपतीन् पञ्चाशत्पतीन्
२२ दशपतीन् कुर्व्वन् नियोजय। अपरं ते सर्व्वदा लोकान् विचारयिष्यन्ति;
किन्तु कस्मिंश्चित् महाविचार उपस्थिते तं तव समीपम् आनेष्यन्ति,
क्षुद्रान् सर्व्वविचारान् ते करिष्यन्ति, तेन ते त्वया सह भारं वक्ष्यन्ति,
२३ तेन तव कर्म्म लघु भविष्यति। यदि त्वम् ईदृशं करोषि, ईश्वरश्च
तादृशं कर्त्तुं त्वामादिशति, तर्हि त्वं सोढुं शक्ष्यसि; अपरम् एते सर्व्वे
२४ मानुषाश्च क्षेमेण निजस्थानं गमिष्यन्ति। ततो मूसाः श्वशुरस्य वचने
२५ मनो निधाय तस्य वाक्यानुसारेण कर्म्म कृतवान्। ततः परं मूसाः
सर्व्वेभ्य इस्रायेलो वंशेभ्यः कर्म्मकुशलान् मानवान् मनोनीतान् कृत्वा
मनुजानां मध्ये मुख्यान् अर्थतः सहस्रपतीन् शतपतीन् पञ्चाशत्-

पतीन् दशपतीन् कृत्वा नियोजयामास। तेन ते सर्व्वदा लोकानां २६
विचारान् कुर्व्वन्ति; दुर्ब्बोध्यविचारान् मूससः समीपम् आनयन्ति;
किन्तु स्वयं क्षुद्रक्षुद्रकथानां विचारान् कुर्व्वन्ति। अनन्तरं मूससा २७
निजश्वशुरे विसृष्टे स निजस्थानं प्रति प्रतस्थे।

---

१९ ऊनविंशोऽध्यायः।

१ मनुजेषु सीनयपर्व्वतम् उपगतेषु तान् प्रतीश्वरस्य संवादः ७ जनानां कृते मूसस ईश्वरं प्रति उत्तरं १० मानुषान् पवित्रान् कर्त्तुं पर्व्वतं न स्प्रष्टुञ्च आज्ञापनं १४ मानवानां समक्षं पर्व्वतोपरीश्वरागमनञ्च।

मिसरो देशाद् प्रस्थानकरणात् परं तृतीयस्य मासस्य प्रथम- १
दिने इस्रायेलो वंशाः सीनयप्रान्तरम् उपस्थितवन्तः। ते रिफीदीमो २
यात्रां कृत्वा सीनयप्रान्तरम् प्राप्य तत्र प्रान्तरे शिविरं स्थापयामासुः;
इस्रायेलो वंशास्तस्य पर्व्वतस्य सम्मुख एव शिविरं स्थापयामासुः।
ततः परं मूससीश्वरस्य समीपम् आरूढे, परमेश्वरः पर्व्वतात् तमा- ३
हूय जगाद, त्वं याकूबः सन्तानान् इदं वाक्यं वद, इस्रायेलो वंशान्
इति ज्ञापय। अहं मिस्रीयान् प्रति यत् यत् कृतवान्, यथा ४
चोत्क्रोशः पक्षी पक्षाभ्यां, तथा युष्मान् वहन् निजसमीपम् आनी-
तवान् तद् यूयं दृष्टवन्तः। इदानीं यदि यूयं मम कथां शृणुथ, मम ५
नियमञ्च पालयथ, तदा सर्व्वस्यां पृथिव्यां मम सत्यामपि यूयं सर्व्वेभ्यो
लोकेभ्यो मम विशेषाधिकृता भविष्यथ, मम निमित्तं याजकानाम् एको ६
राजवंशः पवित्रजातिश्च भविष्यथ, एताः सर्व्वाः कथा इस्रायेलो
वंशाय त्वं कथय।

तदानीं मूसा आगत्य लोकानां प्राचीनान् आहूय परमेश्वराज्ञानुसा- ७
रेण ताः सर्व्वाः कथास्तेषां समक्षं प्रस्तुतवान्। ततः सर्व्वे लोका युगपद् ८
अङ्गीकृत्य कथयामासुः, परमेश्वरो यानि वाक्यानि कथितवान्, तानि
वयम् आचरिष्यामः। मूसाः परमेश्वरस्य समीपे तेषां वचनानि निवे- ९
दयामास, तदा परमेश्वरो मूससे कथितवान्, अहं निविडपयोदेन तव
समीपम् आगत्य त्वया सार्द्धं वाक्यं वदिष्यामि, ततो ते मानवास्त्वया सार्द्धं
मम संलापस्य श्रोतारो भूत्वा सर्व्वदा त्वयि प्रत्येष्यन्ति; पश्चात् मूसा
मानवानां वाक्यानि परमेश्वरं ज्ञापयाञ्चकार।

तदानीं परमेश्वरो मूससं व्याहृतवान्, त्वं मनुजानां समीपं गत्वाद्य १०

परदिनञ्च यावत् तान सर्व्वान् पवित्रीकुरु ते च वसनानि धौतानि
११ कृत्वा तृतीयदिननिमित्तं सर्व्वे सुसज्जा भवन्तु; यस्मात् तृतीये दिने
परमेश्वरः सकलमानवानां समक्षं सीनयधराधरस्योपरि समवरोक्ष्यति।
१२ तस्मात् त्वं मानवानां चतुर्दिक्षु सीमानं निरूप्य वचनमिदं व्याहर, यूयं
धराधरम् आरोढुं तस्य सीमां स्प्रष्टुञ्च सावहिता भवत, यतो यः
१३ कश्चित् धराधरं स्प्रक्ष्यति सोऽवश्यं हतो भविष्यति। तस्मात् कोपि तं
करेण न स्पृशतु यदि स्पृशति तर्हि स पाषाणाघातेनावश्यं मरि-
ष्यति, यद्वा बाणेन विद्धो भविष्यति, पशु र्भवेत् मानुषो वा भवेत्, स
कदाचन न जीविष्यति; तूर्य्यां वादितायां ते धराधरस्य समीपम्
आगमिष्यन्ति।
१४ अनन्तरं मूसा धराधराद् अवरुह्य मानवानां समीपम् आगत्य तान्
१५ पवित्रीकृतवान्; ते च निजवसनानि धौतानि कृतवन्तः। पश्चात् स
मनुजान् व्याहृतवान् यूयं तृतीयदिनकृते सुसज्जा भवत, निजनिज-
१६ भार्य्यायाः समीपं मा व्रजत। ततः परं तृतीयदिनस्य प्रातःकाले जाते
तडित्वत्स्तनितं तडित् धराधरोपरि निविडजीमूता अतीवोच्चैःस्वरेण
तूरीनिर्घोषश्च भवितुम् आरेभिरे, तेन शिविरस्थिताः सर्व्वे मनुजा
१७ वेपमाना अभवन्। तदानीं मूसा ईश्वरं साक्षात् कारयितुं मानवान्
१८ शिविरात् वहिः कृतवान् ते च भूधरस्याधः स्थितवन्तः। तदा सीनय-
धराधरो धूममयो बभूव; यतः परमेश्वरस्तत्शिखरे वह्निनावरूढवान्;
अपरं चुल्लीधूमइव तस्मात् धूम उदगच्छत् तेन कृत्स्नो भूधरोऽतीव कम्पि-
१९ तुम् आरभत। पश्चात् क्रमात् तूरीनिर्घोषोऽतीव वृद्धिमेतुम् आरेभे;
तदानीं मूससा कथायां कथितायाम् ईश्वर आकाशवाचा तदुत्तरं व्याज-
२० हार। अनन्तरं परमेश्वरे सीनयधराधरम् अर्यतो भूधरस्य शिखरम्
अवरूढे, तत्र स्थाने स मूससम् आहूतवान्; ततो मूसा आरुरोह।
२१ तदानीं परमेश्वरो मूससं गदितवान्, मनुजानां बहवो यथा न विन-
श्यन्ति, एतदर्थं त्वम् अवरुह्य परमेश्वरदर्शनाय सीमानं लङ्घितुं तान्
२२ निवारय। ये याजकाः परमेश्वरसमक्षम् आगमिष्यन्ति, तेषाम्
उपरि यथा स नाक्रामति, तन्निमित्तं तेऽपि स्वान् पवित्रान् कुर्व्वन्तु।
२३ ततो मूसाः परमेश्वरं व्याजहार मानवाः सीनयधराधरम् आरोढुं
न शक्नुवन्ति; यतो भूधरस्य सीमां निरूपयत तां पवित्रां कुरुतेति
२४ त्वमस्मान् आज्ञापयः। तदा परमेश्वरस्तस्मै कथितवान्, याहि त्वमव-

रोह, पश्चात् त्वम् हारोणेन सार्द्धम् आरोह ; किन्तु याजकानां मनु-
जानाञ्चोपरि परमेश्वरो यथा नाक्रामति, तदर्थं ते तस्य समीपम् आगन्तुं
सीमानं नातिक्रामन्तु। तदा मूसा मानुषाणां समीपम् अवरुह्य तान् २५
तादृग् आज्ञापयामास।

---

२० विंशोऽध्यायः।

१ दशानाम् आज्ञानां प्रथमो भागः १२ तासां द्वितीयो भागः १८ मानुषाणां भयं तान् प्रति मूससः सान्त्वनावाक्यं २२ देवपूजानिषेधः २४ वेदिनिर्म्माणे विधिश्च।

अनन्तरम् ईश्वर एताः कथाः कथयामास, दास्यगेहाद् अर्थतो १
मिसर्देशाद् त्वदीयोद्धारयिताहमेव तव प्रभुः परमेश्वरः। २
मम साक्षात् तव काचिदन्या देवता न तिष्ठतु। निजार्थं काञ्चित् ३
तक्षितप्रतिमाम् अर्थात् उपरिस्थे स्वर्गे वा नीचस्थायां पृथिव्यां वा धरण्या ४
अधःस्थे तोये स्थितस्य कस्यचित् वस्तुनो मूर्त्तिं मा निर्म्माहि। ता न नम, ५
ता न सेवस्व, यतोऽहं तव प्रभुः परमेश्वरः स्वगौरवरक्षी, ये पितृलोका
माम् ऋतीयन्ते, तृतीयचतुर्थपुरुषान् यावत् तेषां सन्तानेभ्योऽधर्म्म-
फलदाता ; किन्तु ये मयि प्रीयन्ते ममाज्ञाश्च पालयन्ति तेषां सहस्र- ६
पुरुषान् यावत् दयाकृदहं। त्वं निजप्रभोः परमेश्वरस्य नाम निर- ७
र्थकं मा गृहाण, यतो यः कश्चित् तस्य नाम निष्प्रयोजनं गृह्णाति,
परमेश्वरस्तं निरपराधीति न गणयति। विश्रामदिनं स्मरन् पवित्रीकुरु। ८
षड्दिनानि श्रमित्वा तव वाणिज्यादि सर्व्वं कर्म्म कुरु ; किन्तु सप्तमदिनं ९
तव प्रभोः परमेश्वरस्य विश्रामदिनमेव, तस्मिन् त्वया वा तव पुत्त्रेण वा १०
तव दुहित्रा वा तव दासेन वा दास्या वा पशुना वा द्वारवर्त्तिना
विदेशिना केनापि किमपि कार्य्यं मा क्रियतां। यतः परमेश्वर आकाशं ११
पृथिवीं सागरं तन्मध्यस्थानि सकलवस्तूनि च षड्भि र्दिनै र्निर्म्माय
सप्तमे दिने विश्रान्तवान् एतत्कारणात् परमेश्वरो विश्रामदिनं वरं
दत्त्वा पवित्रीकृतवान्।

त्वं निजपितरं मातरञ्च सम्मन्यस्व, तेन तव प्रभुः परमेश्वरो यं देशं १२
तुभ्यं दास्यति, तस्मिन् देशे तव दीर्घकालम् आयु र्भविष्यति। नरहत्यां १३
मा कार्षीः। परदारान् मा गच्छ। चौर्य्यं मा कार्षीः। स्वस्य समीप- १४
वासिनो विरुद्धं मिथ्यासाक्ष्यं मा देहि। स्वस्य समीपवासिनो गेहे १५

१७ लोभं मा कार्षीः ; स्वस्य समीपवासिनो जायायां वा दासे वा दास्यां
वा गवि वा गर्द्दभे वा कस्मिंश्चित् वस्तुनि लोभं मा कार्षीः।
१८ तदानीं सर्व्वे मानवा जीमूतस्तनितं तडितं तूरीनिस्वनं धूमयुक्तं
१९ धराधरञ्च दृष्टवन्तः, दृष्ट्वा च पृथग् भूत्वा दूरे स्थितवन्तः ; ततो मूससे
कथितवन्तः, त्वम् अस्माभिः सार्द्धं कथां कथय, तां वयं श्रोष्यामः,
किन्त्वीश्वरोऽस्माभिः सार्द्धं कथां न कथयतु, नो चेत् वयं मरिष्यामः।
२० ततो मूसा मानुषान् अवदत्, मा भैष्ट, युष्मान् परीक्षितुं, युष्माभि र्यत्
पापं न क्रियते तदर्थं स्वीयं भयानकत्वं युष्माकं चक्षुर्गोचरीकर्त्तुञ्चेश्वरः
२१ स्वयमागतवान्। तदानीं लोका दूरे तिष्ठन्त आसन्, किन्तु यत्र स्थान
ईश्वर आसीत्, तस्य घोरान्धकारस्य समीपं मूसा जगाम।
२२ अनन्तरं परमेश्वरो मूससं जगाद, त्वम् इस्रायेलो वंशान् वाचमिमां
ब्रूहि, अहं गगणे तिष्ठन् युष्माभिः सार्द्धम् आलपम् इति यूयं स्वयं
२३ दृष्टवन्तः। अतो युष्माभि र्मत्समक्षं दुर्व्वर्णमूर्त्तयो मा क्रियन्तां, स्वाथ
सुवर्णमूर्त्तयो वा मा क्रियन्तां।
२४ त्वं मदर्थं मृण्मयीम् एकां वेदिं निर्म्माहि तदुपरि हव्यस्य मङ्ग-
लस्य च नैवेद्यं निधेहि मेषगवादीन् उत्सृज च। अहं यत्र यत्र स्थाने
स्वनाम स्मारयिष्यामि तत्र तत्र स्थाने त्वत्समीपमागत्य त्वामाशिषं
२५ वदिष्यामि। अपरं यदि त्वं मन्निमित्तं पाषाणमयीं वेदिं निर्म्माया-
स्तर्हि तक्षितपाषाणैस्तां मा निर्म्माहि यस्मात् तेष्वस्त्राघाते कृते वेदि-
२६ रपवित्रा भविष्यति। मम वेद्युपरि यत् तव नग्नत्वं न दृश्यते तदर्थं
त्वया तदुपरि सोपानेन नारुह्यतां।

---

२१ एकविंशोऽध्यायः।

१ दासानधि व्यवस्था ७ दासीरधि व्यवस्था १२ नरहत्याकथनं १६ नरचौर्य्यकथनं १७ पितृमातृशपनकथनं १८ आघातमधि व्यवस्था २० दण्डेन दासदासोः प्रत्याघातस्य व्यवस्था २२ गर्भिणीं प्रत्याघातस्य व्यवस्था २६ दासदासोः प्रति प्रहारस्य व्यवस्था २८ गोराघातस्य व्यवस्था ३३ खातमधि व्यवस्था ३५ गां प्रत्याघातस्य व्यवस्था च।

१ अपरं त्वं तान् एता व्यवस्था आदिश। केनचित् क्रीत इब्रीयदासः षट्
२ वत्सरान् यावत् सेवित्वा सप्तमवत्सरे विना मूल्यं मुक्तीभूय गन्तुं
३ प्राप्स्यति। यदि स एकाक्यागतोऽस्ति तर्ह्येकाकी गमिष्यति ; यदि च व्यूढ़-
४ भार्य्य आगतोऽस्ति तर्हि तस्य जायापि तेन साकं वहिर्गमिष्यति। किन्तु

यदि स स्वप्रभुना विवाहितोऽस्ति तस्या जायायाः पुत्रकन्याश्च जाताः सन्ति,
तर्हि तस्यां योषिति तस्या बालकेषु च तस्य प्रभोरधिकारो भविष्यति,
दास एकाकी वहिर्गमिष्यति। यद्वा निजप्रभौ स्वजायायां बालकेषु ५
चाहमतीव प्रीये मुक्तीभूय न यास्यामि वाचमेतादृशीं स दासो यदि स्पष्टं
वदेत्, तर्हि स प्रभुस्तं विचारयितुः समक्षं नयेत्, तत्र तस्मिन् द्वारस्य ६
पार्श्वस्थकाष्ठस्य वा समीपे स्थापिते तस्य प्रभुः सूचिद्वारा तस्य कर्णौ छिद्रं
करिष्यति ततः स तेन चिरकालं सेवितव्यः।

अपरञ्च यदि केनचित् दासी भवितुं निजकन्या विक्रीयेत तर्हि सा ७
दासाइव न विसर्ज्जनीया। तस्याः प्रभौ तां विवोढुं प्रतिज्ञातेपि तां ८
प्रति यदि स न सन्तुष्येत् तर्हि सा मुक्तीभवतु, तां प्रति प्रवञ्चना-
करणात् स अन्यजातिषु तद्विक्रयाधिकारी न भविष्यति। यद्वा स ९
प्रभु यदि निजात्मजं तां विवाहयितुं प्रतिजानीयात्, तर्हि स तां
कन्यावत् व्यवहरिष्यति। यद्वा स यद्यन्यां स्त्रियमपि तं विवाहयेत् १०
तथापि तस्या अन्नवसनयोषित्पुरुषव्यवहाराणामन्यथा कर्त्तुं न शक्ष्यति।
यदि तेषां त्रयाणां कर्म्मणामन्यथा कुर्य्यात् तर्हि सा दासी विना मूल्यं ११
मुक्तीभूय गमिष्यति।

यदि कश्चिन् प्रहारेण कञ्चन मनुजं हन्ति तर्हि स बध्यो भविष्यति। १२
यदि तं मारयितुं न यतेत किन्तु तस्य करेण दैवात् स म्रियेत तर्हि १३
यत् स्थानं पलायितुं त्वं शक्ष्यसि तादृशं स्थानं त्वत्कृते निरूपयिष्यामि।
किन्तु कश्चित् कपटं विधाय निजसमीपवासिनं प्रहर्त्तुं दुःसाहसं चेत् १४
कुर्य्यात् तर्हि तं हन्तुं स मम वेद्याः समीपादपि त्वया नेतव्यः। यदि १५
कश्चिन् निजं पितरं मातरं वा प्रहरेत् तर्हि स बध्यो भविष्यति।

यः कश्चित् मानुषं चोरयित्वा विक्रीणाति, यस्य चाधिकारे स मानुषः १६
प्राप्यते, द्वावेतौ जनौ बध्यौ भविष्यतः।

यो निजपितरं मातरं वा शपेत स बध्यो भविष्यति। १७

अपरञ्च कश्चित् विवादसमये यं कञ्चन पाषाणेन मुष्टिना वा समा- १८
हन्ति स यदि न मृत्वा शय्यागतः सन् पश्चाद् उत्तिष्ठन् यष्टिमवलम्ब्य १९
वहिश्चलेत् तर्हि स प्रहर्त्ता निर्दोषो भविष्यति किन्तु तस्य कर्म्महाने-
श्चिकित्सायाश्च व्ययस्तेन दातव्यः।

यः स्वदासं दासीं वा यष्ट्या प्रहरति तत्प्रहारसमये स दासो यदि २०
म्रियेत तर्हि सोऽवश्यं दण्डनीयो भविष्यति। किन्तु दिनमेकं द्वयं वा स २१

दासो यदि जीवेत् तर्ह्हि स दण्डनीयो न भविष्यति यतः स मूल्ये-
नाक्रीयत ।
२२ विवदमानेन केनचित् गर्भिण्यां प्रहृतायां यदि तस्या गर्भः पतेत्
किन्तु तदन्या काचित् आपन्न जायेत तर्ह्हि स तस्याः स्त्रियाः पत्यु-
र्वाक्यानुसारेण दण्डितः सन् विचारकानां समक्षं दण्डस्य धनं दास्यति।
२३ यद्वा काचित् आपत्ति र्घटेत तर्ह्हि प्राणानां विनिमयेन प्राणा लोचनस्य
२४ विनिमयेन लोचनं दन्तस्य विनिमयेन दन्तः प्णयस्य विनिमयेन प्णयः
२५ पादस्य विनिमयेन पादस्तेन त्यक्तव्याः, तथा दाहनस्य विनिमयेन
दाहनं क्षतस्य विनिमयेन क्षतं ताड़नस्य विनिमयेन ताड़नं तेन
भोक्तव्यानि।
२६ केनचित् निजदासस्य दास्या वा लोचन आहते यदि तत् नश्येत
२७ तर्ह्हि तस्य लोचननाशात् स मोचयितव्यः। आघातेन स्वदासस्य दास्या
वा दन्ते भग्ने तद्दन्तभंगकारणात् स मोचयितव्यः।
२८ गवा नरे नार्य्यां वा शृङ्गेणाहते स यदि म्रियेत तर्ह्हि सा गौः पाषाणा-
घातेन बध्या भविष्यति तस्याः पललनभक्ष्यं भविष्यति, किन्तु गोस्वामी
२९ दण्ड्यो न भविष्यति। सा गौः प्राक् शृङ्गेणाहन्तीति यदि तस्याः स्वामिने
प्रमाणमस्य दीयेत तेनाबद्धया तया कश्चित् नरो नारी वाहन्येत तर्ह्हि
सा गौः पाषाणै र्बध्या भविष्यति तस्याः स्वामी च बध्यो भविष्यति।
३० यदि तस्य प्राणहृते प्रायश्चित्तं निरूप्येत तर्ह्हि स प्राणमुक्तये निरू-
३१ पितं सर्व्वं मूल्यं दास्यति। तथा गवा यदि कस्यचित् सुतो दुहिता वा
३२ शृङ्गेणाहन्येत तर्ह्हि तद्विधेरनुसारात् तस्या दण्डो भविष्यति। यदि तया
गवा कस्यचित् दासो दासी वा शृङ्गेणाहन्येत तर्ह्हि गोस्वामी तदीय-
प्रभवे त्रिंशत् शेकलरूप्यं दास्यति किन्तु गौः पाषाणै र्बध्या भविष्यति।
३३ यदि कश्चित् स्वगर्त्तम् अनाच्छादितं कुर्य्यात् खनित्वा वा तं नाच्छादयेत्
३४ तदा तत्र गवि गर्द्दभे वा पतिते तद्गर्त्तस्य स्वामी पशुस्वामिने रूप्यमूल्यं
दास्यति किन्तु स मृतपशुस्तस्य भविष्यति।
३५ एकस्य नरस्य गवान्यस्य गौः शृङ्गेणाहता यदि म्रियेत तर्ह्हि तौ
जीवन्तीं गां विक्रीय तन्मूल्यं अंशद्वयं करिष्यतः तां मृतगाञ्च द्व्यंशेन
३६ विभज्य ग्रहीष्यतः। किन्तु गौः प्राक् शृङ्गेणाहन्तीति यदि प्रमाणं भवेत्
तथा तत्स्वामी तां न बध्नीयात् तर्ह्हि स तस्या विनिमयेनान्यां गां दास्यति
किन्तु सा मृता गौस्तस्य भविष्यति।

२२ द्वाविंशोऽध्यायः।

१ चौर्य्यमधि व्यवस्था ५ हानिमधि व्यवस्था ७ समर्पितवस्त्वधि व्यवस्था १० समर्पित-पश्वमधि व्यवस्था १४ ऋणमधि व्यवस्था १६ व्यभिचारिणमधि व्यवस्था १८ डाकिनी-मधि व्यवस्था १९ पशुशृङ्गारमधि व्यवस्था २० देवार्चामधि व्यवस्था २१ विदेशि-विधवापितृहीनानधि व्यवस्था २५ ऋणबन्धकावधि व्यवस्था २८ विचारकानधि व्यवस्था २९ प्रथमजातफलमधि व्यवस्था ३१ छिन्नक्रव्यभोजनस्य निषेधस्य।

केनचित् चौर्य्यं कृत्वा गवि मेषे वा हते विक्रीते वा गोरेकाया १
विनिमयेन पञ्च गावः मेषस्यैकस्य विनिमयेन चत्वारो मेषास्तेन दातव्याः।
सन्धिं कुर्व्वन् धृतः स्तेनः केनचित् यदि हन्येत तर्हि स नरबधपापी २
न भविष्यति। किन्तु यदि रवावुदिते तं हन्यात् तर्हि स नरबधजपापी ३
भविष्यति; तस्करेण चौर्य्यद्रव्यं परिशोधनीयं, किन्तु यदि तस्य करे किमपि
न तिष्ठेत् तर्हि चौर्य्यहेतोः स विक्रायिष्यते। गोगर्द्दभमेषादिचौर्य्यवस्तु ४
यदि चौरस्य स्थाने जीवल्लभ्येत तर्हि तेन तद्द्विगुणं दातव्यं।

क्षेत्रं द्राक्षाक्षेत्रं वा भोजयितुं केनचित् व्यक्तः पशु र्यद्यन्यस्य क्षेत्रे ५
चरेत् तर्हि तद्विनिमयेन स्वक्षेत्रस्योत्तमं शस्यं वा निजद्राक्षाक्षेत्रस्योत्तमं
फलं तेन दातव्यं।

केनचित् कण्टकवने वह्नौ दत्ते यदि कस्यचित् धान्यराशि र्वा ६
वर्द्धमानं शस्यं क्षेत्रं वा तेन वह्निना दह्येत, तर्हि सोऽग्निदाताऽवश्यं
तन्मूल्यं दास्यति।

निजसमीपवासिनः स्थाने निक्षिप्तानि परभूषणानि मुद्रा वा यदि ७
तस्य गृहात् केनचित् चोर्य्येरन् स च चौरो धार्य्येत तदा स तद्द्विगुणं
दास्यति। यदि चौरो न धार्य्येत तर्हि गृहस्वामिना समीपवासिनो ८
वस्तूनि प्रति करः प्रसारितो नवेति ज्ञातुं स विचारयितुः समक्षम्
आनायिष्यते। तथा विश्वासघातमधि फलतो गोगर्द्दभमेषवस्त्रादि यत् ९
किञ्चन हारितं वस्त्वधि यदि कश्चित् कथयेत् ममेदमिति तर्हि द्वयो
र्वाक्ये विचारयितुः समीपमुपस्थिते विचारयिता यमेव दोषिणं कुर्य्यात्
स स्वसमीपवासिने तद्द्विगुणं प्रदास्यति।

केनचित् स्वगर्द्दभे गवि मेषेऽन्यस्मिन् पशौ वा समीपवासिनः स्थाने १०
पालनार्थम् अर्पिते यदि सर्व्वेषाम् असमक्षं स पशु र्म्रियेत हिंस्येत ताड्येत
वा, तर्हि समीपवासिनो वस्तुनि मया हस्तो नार्पित इत्युक्त्वा एकोऽन्यस्य ११
समक्षं परमेश्वरनाम्ना शपथं करिष्यति, तदा पशुस्वामी तं शपथं ग्रही-

१२ ष्यति परिशोधं न लप्स्यते। किन्तु यदि तस्य समीपात् कश्चित् चोर-
१३ येत् तदा स तस्य स्वामिने तन्मूल्यं दास्यति। यदि पशु र्विदीर्य्येत तर्हि
स तत् प्रमाणी कृत्य तस्य विदीर्णस्य पशो र्मूल्यं न दास्यति।
१४ यदा कश्चित् स्वसमीपवासिनः पशुं याचित्वा गृह्लाति, तदा तस्य
स्वामिनि तेन सार्कं न तिष्ठति यदि तस्य हानि र्मृत्यु र्वा जायेत तर्हि स
१५ तस्य मूल्यमवश्यं दास्यति। किन्तु यदि तस्य स्वामी तस्य समीपे तिष्ठेत्
तदा तस्य मूल्यं स न दास्यति, यदि स पशु र्भाटकार्थम् आनीत-
स्तर्हि भाटको दातव्यः।
१६ यदि कश्चित् अवाग्दत्तां कन्यां प्रतार्य्य तया सह शयेत तर्हि स तस्याः
१७ कन्यायाः शुल्कं दत्त्वा तां विवक्ष्यति। यदि तां तं विवाहयितुं तस्याः पिता
नानुमतिं कुर्य्यात् तर्हि कन्याशुल्कस्य व्यवस्थानुसारात् स रूप्यं दास्यति।
१८ डाकिनीं जीवन्तीं न स्थापय।
१९ पशुना सह शृङ्गारकृदवश्यं बध्यो भविष्यति।
२० यः कश्चित् केवलं परमेश्वरं विना कस्मैचित् देवाय बलिं ददाति स
उग्रदण्डं प्राप्स्यति।
२१ त्वं विदेशिनं मा क्लिश्नीयास्तं नोपद्रुह्याः यस्मात् यूयमपि मिसर्देशे
२२ विदेशिन आस्त। त्वं काञ्चन विधवां पितृहीनबालकं वा मा क्लिश्नीयाः।
२३ केनापि प्रकारेण तस्मिन् क्लिष्टे स यदि मत्सन्निधौ प्रार्थयेत तदाहं तस्य
२४ प्रार्थनामवश्यं श्रोष्यामि। मम क्रोधे प्रज्वलिते युष्मानहं खड्गेन मारयि-
ष्यामि च तेन युष्माकं जाया विधवा भविष्यन्ति सन्तानाश्च पितृहीना
भविष्यन्ति।
२५ मदीयलोकानां मध्ये तव समीपवासिने कस्मैचित् दरिद्राय यदि
त्वम् ऋणं दद्यास्तर्हि तम्प्रति कुसीदग्राहीव मा भवेः, तस्मात् कुसीदं
२६ मा गृहाण। यदि त्वं स्वसमीपवासिनो वसनं बन्धकत्वेन गृह्णीया-
२७ स्तर्हि सूर्य्यास्तगमनात् प्राक् तस्मै तद्वसनं पुन र्देहि। यस्मात् तत् तस्या-
द्वितीयम् आच्छादनं नग्नतारोधकञ्च, स कस्मिन् शेष्यते? स यदि मत्-
सन्निधौ प्रार्थयेत तर्हि मम दयालुत्वात् तत् श्रोष्याम्यहं।
२८ विचारयितारं मा निन्द, स्वीयलोकानां मुख्यं मा शपस्व।
२९ तव प्रथमं पक्वफलं द्राक्षारसञ्च निवेदयितुं मा विलम्बस्व, तव
३० प्रथमजातपुत्रान् मह्यं देहि च। स्वगोमेषवत्सान् प्रति तथा कुरु ते सप्त-
दिनानि मात्रा सह स्थास्यन्ति अष्टमदिने त्वं तान् मह्यं देहि।

यूयं मम पवित्रलोका भविष्यथ क्षेत्रे विदीर्णं पिशितं मा भुङ्क्ध्वं तत् २१
सारमेयाणां समीपे निक्षिपत।

---

२३ त्रयोविंशोऽध्यायः।

१ अपवादकथनं २ अन्यायकथनं ४ उपकारकथनं ६ न्यायकरणकथनं ८ उत्कोचकथनं ९ विदेशिनः कथनं १० भूमिमधि कथनं १२ विश्रामवारकथनं १३ देवार्च्चाकथनं १४ वार्षिकोत्सवत्रयकथनं १८ बलिदानकथनं २० अग्रगदूतकथनं २६ आशीःकथनञ्च।

त्वं कस्यापि मृषापवादं न गृह्लाण मृषा साक्षी भवन् दुष्टस्य १
साहाय्यं मा कुरु च।

त्वमसत् कर्म्म कर्त्तुं बहुलोकानां पश्चात् मा गच्छ विचारे ऽन्यायं २
कर्त्तुञ्च बहुलोकानां पक्षो भवन् मा प्रतिवद। दरिद्रस्य कृतेपि विचारे ३
पक्षपातं मा कार्षीः।

त्वं रिपो र्गां गर्द्दभं वान्यत्र भ्रमन्तं विलोक्य तत्समीपम् अवश्यं ४
नेष्यसि। त्वं स्वर्त्तीयिनो गर्द्दभं भाराधः पतन्तं निरीक्ष्य तं विहाय मा ५
गाः, अवश्यं तेन साकं तमुपकरिष्यसि।

विचारे दरिद्राय मान्यायं कार्षीः। मृषा विवादाद् दूरे तिष्ठ, निर्दोषं ६
धार्म्मिकञ्च मा नाशय, यतोहं दुष्टं निर्दोषं न करिष्यामि। ७

त्वमुत्कोचं मा ग्रहीः यत उत्कोचेन ज्ञानिनोऽप्यन्धी भवन्ति धार्म्मि- ८
काणामपि वागन्यथा भवति।

विदेशिनं नोपद्रव यतो यूयं मिसर्द्देशे विदेशिन आस्त तेन विदेशि- ९
नामन्तःकरणभावं जानीथ।

त्वं स्वीयभूमौ षट् वत्सरान् यावत् वीजं वप तस्मात् शस्यादि संगृ- १०
ह्लाण। किन्तु सप्तमवत्सरे तां विश्रामय निष्कर्षणां निधेहि तदुत्पन्न- ११
द्रव्याणि तव दरिद्राणां भक्ष्याणि भविष्यन्ति तेषां भोजनावशिष्टं वन्य-
पशवः खादिष्यन्ति, तव गोस्तनीक्षेत्रं जितद्रुमं प्रति च तथैव कुरु।

त्वं षट् दिनानि कर्म्म कृत्वा सप्तमे दिने विश्राम्य, नेन तव गोगर्द्दभाः १२
सर्व्वे विश्रमिष्यन्ति तव दासीपुत्रा विदेशिनश्च विश्रमिष्यन्ति।

अहं युष्मभ्यं यद्यद् अकथयं तदधि सावधाना भवत ; अन्यदेवानां १३
नाम मा स्मारयत, युष्माकं वदनैरपि तदुच्चारणं मा भवेत्।

त्वं वत्सरमध्ये वारत्रयं मामुद्दिश्य महं कुरु। किण्वशून्यपूपोत्सवं १४

१५ पालयित्वा ममाज्ञानुसाराद् आबीब्मासस्य निरूपितसमये सप्तदिनानि
किण्वशून्यपूपान् अशान, यस्मात् तत्काले त्वं मिसर्देशाद् अमोच्यथाः,
१६ कोऽपि रिक्तहस्तो मत्समीपं नोपतिष्ठतु। क्षेत्रे यद्यद् अवपस्तस्य
प्रथमसंगृहीतफलोत्सवं कुरु; तथा वत्सरस्य शेषभागे क्षेत्रात् फलानि
१७ संगृह्य फलसञ्चयोत्सवञ्च कुरु। तव सर्व्वे पुरुषा वत्सरमध्ये त्रिः प्रभोः
साक्षात् समायान्तु।

१८ त्वं मां प्रति किण्वयुक्तपूपेन साकं बलेः शोणितं मा निवेदय, बलेर्मे-
१९ दश्च प्रातःकालं यावत् न तिष्ठतु। तव क्षेत्रे प्रथमजातोत्तमफलं त्वत्प्रभु-
परमेश्वरस्य भवनमानय; छागवत्सस्य पिशितं तन्मातृदुग्धे न पचेः।

२० पश्य त्वां वर्त्मन्यवितुं स्वासादितस्थानमानेतुञ्च त्वदग्रेऽग्रे दूतमेक-
२१ महं प्रेषयिष्यामि। किन्तु तत्रावधत्त तद्वचो निशामय तं मा क्रोधय
२२ च यस्मात् तस्मिन् मन्नामस्थितेः स युष्माकमपराधं न क्षमिष्यते। यदि
त्वं तस्य वाक्यं नितान्तं शृणुया यद्यत् कथयामि तच्च कुर्य्यास्तर्ह्यहं
२३ तव रिपूणां रिपुर्वैरिणां वैरी च भविष्यामि। ततो मम दूतस्त्वदग्रेऽग्रे
व्रजन् इमोरीय-हित्तीय-पिरिषीय-किनानीय-हिव्वीय-यिबूषीयानां
२४ देशं त्वामानेष्यति तांश्चाहम् उच्छेत्स्यामि। त्वं तेषां देवान् मा प्रणम
तान् मा सेवस्व तान् उद्दिश्य कृत्यं मा कुरु किन्तु तान् निर्मूलमुत्पाटय
२५ तेषां प्रतिमा भंग्धि। यूयं स्वप्रभुपरमेश्वरं सेवध्वं ततः स युष्माकमन्न-
तोये प्रत्याशिषं वक्ष्यति किञ्च युष्मत्तोऽहं व्याधीनपसारयिष्यामि।

२६ तव जनपदे कस्याश्चिदपि गर्भो न पतिष्यति कापि बन्ध्या च न
२७ भविष्यति तवायुःपरिमाणमहं पूरयिष्यामि। त्वदग्रे मत्तो भयं प्रेषयि-
ष्यामि; त्वं येषां जनानां विपरीतं यास्यसि तानहं व्याकुली करिष्यामि
२८ तव रिपून् पराङ्मुखी करिष्यामि। मया त्वदग्रेऽग्रे नीलाङ्गेषु प्रेषितेषु ते
२९ हिव्वीय-किनानीय-हित्तीयान् तव सम्मुखात् अपसारयिष्यन्ति। किन्तु
जनपदो यत् शून्यो न भवेत् तव प्रतिकूलाः प्रभूतवन्यपशवश्च न भवेयुः
३० तत्कृतेऽहम् एकवत्सरेण तव सम्मुखात् तान् नापसारयिष्यामि। त्वं
यावत् प्रफुल्लः सन् जनपदं नाधिकुर्व्वीथास्तावत् तव सम्मुखात् तान्
३१ क्रमशोऽपसारयिष्यामि। आ सूफ्सागरात् पिलेष्टीयसमुद्रपर्य्यन्तां आ प्रा-
न्तरात् फरात्नदीपर्य्यन्ताञ्च तव सीमां निरूपयिष्यामि तद्देशनिवासिषु
३२ मया तव करे समर्पितेषु त्वं स्वसम्मुखात् तान् दूरयिष्यसि। किन्तु तैः
३३ साकं तेषां देवैश्च साकं कमपि नियमं न निर्द्धारयिष्यसि। ते तव नीवृति

न वत्स्यन्ति नोचेत् ते मद्विरुद्धं त्वां कलुषं कारयिष्यन्ति यतस्त्वया यदि तेषां देवाः सेव्यन्ते तर्हि तेऽवश्यं तवोन्मायरूपा भविष्यन्ति।

---

२४ चतुर्व्विंशोऽध्यायः।

१ गिरिमारोढुं मूससाह्वानं ३ आज्ञां ग्रहीतुं प्रजानामङ्गीकारः मूससो वेदिद्वादशस्तम्भानां निर्म्माणं ९ ईश्वरस्य तेजःप्रकाशनं १२ मूसोहारोणहूराणां नियोजनं गिरिमारुह्य चत्वारिंशदहोरात्रस्थितिः।

अनन्तरं परमेश्वरो मूससमवदत् त्वं हारोणो नादब अवीहूरिस्रा- १
येलीयवंशस्य प्राचां सप्ततिर्जनाश्च यूयमुत्थाय परमेश्वरस्य समीपमागत्य
दूरे तिष्ठन्तस्तं भजध्वं। केवलो मूसाः परमेश्वरस्य सन्निधिमागमिष्यति २
किन्तु ते सन्निधिं नागमिष्यन्ति लोकास्तेन साकं गिरिं नारोक्ष्यन्ति च।
तदानीं मूसा आगत्य परमेश्वरस्य ताः सर्व्वा गिरो विधींश्च लोकान् ३
आदिदेश ततः सर्व्वे जना एकवाक्यीभूय प्रत्यवोचन् परमेश्वरेण याः
गिरो गदिता वयं ताः पालयिष्यामः। ततो मूसाः परमेश्वरस्य सर्व्वाः ४
वाचो लिलेख प्रत्यूषएवोत्थाय गिरेरध एकां यज्ञवेदिं इस्रायेलो द्वादश
वंशानुसारेण द्वादश स्तम्भांश्च निर्ममे। स इस्रायेल्वंशस्य यूनः प्रेषित- ५
वान् ते च परमेश्वरमुद्दिश्य जुहवाम्बभूवुः मङ्गलार्थं गोबलींश्च ददुः।
तदा मूसाः शोणितमादाय तदर्द्धं पात्रेषु निदधेऽर्द्धं वेद्युपरि सिषेच। ६
नियमपुस्तकं गृहीत्वा लोकानां श्रुतिगोचरे पपाठ ते तु जगदुः परमेश्व- ७
रेण यद्यदादिष्टं तत्तद्वयं पालयिष्यामो मंस्यामश्च। ततो मूसास्तत् शोणितं ८
गृहीत्वा प्रजानामुपर्य्यभिषिच्य जगाद पश्यत एतानि वाक्यान्यधि
परमेश्वरो युष्माभिः साकं यं नियमं कृतवान् तन्नियमस्येदं शोणितम्।
तदानीं मूसा हारोणो नादब अवीहूरिस्रायेलो वंशीयाः सप्ततिप्रा- ९
चीनमानवास्चोर्द्धं गत्वा इस्रायेल ईश्वरं ददृशुः। तस्य चरणाधःस्थानं १०
नीलकान्तमणिखचितमिव निर्म्मलतया गगणसमानञ्चासीत्। तथापि ११
स इस्रायेल्वंशीयाधिपतीनां विरुद्धं करौ न विस्तारयामास, किन्तु त
ईश्वरं दृष्ट्वा बुभुजिरे पपुश्च।
ततः परमेश्वरो मूससमवदत् त्वं गिरिमारुह्य मम समीपे तत्र स्थाने १२
तिष्ठ लोकानां शिक्षार्थं मया यस्मिन् व्यवस्थाज्ञे लिखिते, तत्पाषाण-
फलकद्वयमहं तुभ्यं दास्यामि। ततो मूसस्तत्सेवकयिहोशूययोरुत्थि- १३

१४ तयो मूसा ईश्वरस्य गिरिं समारुरोह। प्राचीनानवदच्च यावदावां
युष्माकं समीपं परावृत्य नागच्छावस्तावद् यूयं तत्रैव तिष्ठत, पश्यत
हारोणहूरौ युष्माकं सविधे स्तः कस्यापि कस्याश्चित् विवादकथायामुप-
१५ स्थितायां स तयोः समीपमागच्छतु। ततो मूससि गिरिमारूढे मेघेन
१६ गिरिराच्छादितः। तेन सीनयगिरेरुपरि परमेश्वरीयं तेजस्तस्थौ तत्र
षड्दिनानि गिरौ मेघाच्छन्ने स्थिते सप्तमे दिने स मेघमध्यात् मूससं
१७ आहूतवान्। तत इस्रायेल्वंशस्य दृष्ट्यां गिरिशृङ्गे परमेश्वरीयतेजो
१८ ज्वलदग्नीव प्रचकाशे। मूसा मेघमध्यं प्रविश्य गिरिमारुह्य तत्र गिरौ
चत्वारिंशद्दिवारात्रीरुवास।

---

२५ पञ्चविंशोऽध्यायः।

१ आवासं निर्म्मातुं परमेश्वराज्ञा १० मञ्जूषाकथनं १७ पापाच्छादनकथनं २३ भोजना-
सनदर्शनीयपूपयोः कथनं ३१ दीपपादपकथनञ्च।

१ अनन्तरं परमेश्वरो मूससं बभाषे त्वमिस्रायेलीयवंशान् तेषां मध्याद्
२ मत्कृते नैवेद्यं संग्रहीतुं वद, ततो यो जनः स्वेच्छया मनसा समं
३ यत् प्रयच्छति तस्मात् ते तन् मदीयं नैवेद्यं गृह्णन्तु। सुवर्णं दुर्व्वर्णं पित्तलं
५ नीलधूम्रसिन्दूरवर्णं सूक्ष्मवसनं छागरोमाणि रक्तीकृतमेषचर्म्माणि तक्ष-
६ शीयचर्म्माणि शिटीमकाष्ठानि दीपार्थतैलं अभिषेकार्थतैलाय सुगन्धि-
७ धूपाय च गन्धद्रव्याणि एफोदे वक्षःपट्टे च सूर्य्यकान्तमण्यादिखचनीय-
८ ग्रावा एतानि नैवेद्यानि ते गृह्णन्तां। ते मदर्थं पवित्रस्थानमेकं निर्म्मान्तु
९ ततोहं तेषां मध्ये निवत्स्यामि। आवासस्याकारं तदीयसकलपात्राणा-
ञ्चाकारादि यत् यदहं त्वां दर्शयामि तदनुसारेण यूयं तत्सर्व्वाणि
निर्मास्यथ।

१० अपरं ते सार्द्धद्विहस्तदीर्घां सार्द्धहस्तविस्तृतां सार्द्धहस्तोच्चां शिटीम्-
११ काष्ठीयां मञ्जूषामेकां निर्मास्यन्ति। पश्चात् त्वं निर्मलसुवर्णेन तां
मण्डयिष्यसि तस्या बहिरभ्यन्तरञ्च मण्डयिष्यसि तदुपरि चतुर्दिक्षु
१२ सुवर्णस्य कर्णिकां करिष्यसि। तदर्थं सुवर्णस्य चतुरो बलयाग्रान् कीलकान्
सिक्त्वा चतुर्षु कोणेषु दास्यसि तस्यैकपार्श्वे द्वौ बलयावन्यपार्श्वे च
१३ द्वौ बलयौ स्थास्यतः। शिटीम्काष्ठस्य वहनदण्डौ कृत्वा तौ सुवर्णेन
१४ मण्डयिष्यसि। मञ्जूषां वोढुं मञ्जूषायाः पार्श्वद्वयस्थवलयेषु वहनदण्डौ
१५ प्रवेशयिष्यसि। तौ दण्डौ मञ्जूषाया बलयेषु स्थास्यतः, ततो न मोच-

यिष्यतः। अहं यत् साक्ष्यपत्रं तुभ्यं दास्यामि तत् तन्मञ्जूषाया मध्ये १६
निधास्यसि।

पश्चात् निर्मलसुवर्णेन सार्द्धद्विहस्तदीर्घं सार्द्धहस्तविस्तृतम् पापाच्छा- १७
दनं निर्म्मास्यसि। तस्याच्छादनस्य द्वयोरन्तयोः स्वर्णेन द्वौ किरूवौ १८
निर्मास्यसि। एकं किरूवम् एकस्मिन् अन्ते तदन्यकिरूवम् अन्यस्मिन् १९
अन्ते निधास्यसि, तदन्तस्थितौ किरूवौ तदाच्छादनसंयुक्तौ भवेतां।
किरूवयोः पक्षा ऊर्द्धे विस्तारिता भविष्यन्ति, तैश्चाच्छादनम् आच्छा- २०
दयिष्यते तयो र्वदने परस्परं सम्मुखे स्थास्यतः किन्तु तयो र्वदनयो र्दृष्टि-
राच्छादनं प्रति भविष्यति। त्वं तदाच्छादनं मञ्जूषाया उपरि निधास्यसि २१
यत् साक्ष्यपत्रम् अहं तुभ्यं दास्यामि तत् तस्या मञ्जूषाया मध्ये निधा-
स्यसि। अहं तत्र स्थाने त्वां साक्षात् करिष्यामि तस्य पापाच्छादनस्यो- २२
परिभागात् साक्ष्यमञ्जूषाया उपरिस्थितयो र्द्वयोः किरूवयो र्मध्यात्
त्वया साकमालपन् इस्रायेलो वंशं प्रति त्वाम् आज्ञापयिष्यामि।

तदनन्तरं त्वं शिटीम्काष्ठेन द्विहस्तदीर्घम् एकहस्तविस्तृतं सार्द्ध- २३
हस्तोच्चम् एकं भोजनासनं निर्माय निर्मलस्वर्णेन मण्डयिष्यसि तस्य २४
चतुर्दिक्षु स्वर्णस्य कर्णिकां करिष्यसि। तच्चतुर्दिक्षु चतुरङ्गुलविस्तृतम् २५
एकं पार्श्वकाष्ठं करिष्यसि तस्य चतुर्दिक्षु स्वर्णकर्णिकां करिष्यसि। स्वर्ण- २६
निर्मितान् चतुर्बलयाग्रकीलकान् कृत्वा तस्य चतुर्णां पदानां चतुर्षु कोणेषु
निधास्यसि। तदासनस्य वहनदण्डौ स्थापयितुं ते बलयाः पार्श्वकाष्ठान्तिके २७
स्थास्यन्ति। तदासनस्य वहनदण्डौ शिटीम्काष्ठेन निर्म्माय तौ स्वर्णेन २८
मण्डयिष्यसि। भोजनपात्रचमसाच्छादनपात्राणि सेक्तुं पात्राणि च २९
निर्मास्यसि एतानि सर्व्वाणि निर्मलस्वर्णेन निर्मास्यसि। त्वम् आसनो- ३०
परि मम सम्मुखे नित्यं दर्शनीयपूपान् निधास्यसि।

पश्चात् त्वम् आहतस्वर्णेन दीपवृक्षं कुरु तत्र प्रकाण्डशाखावर्त्तुला- ३१
कारकलिकापुष्पाणि स्थास्यन्ति फलतः तत्पार्श्वैकतस्त्रिस्रः शाखाः ३२
अन्यतश्च तिस्र इमाः षट्शाखास्तस्मात् निर्गमिष्यन्ति। तदेकशा- ३३
खायां वादामपुष्पाकृतयस्त्रयो वर्त्तुलाकारा एका कलिका पुष्पैकञ्च
स्थास्यन्ति तदन्यशाखायाञ्च वादामपुष्पाकृतयस्त्रयो वर्तुलाकारा एका
कलिका पुष्पैकञ्च स्थास्यन्ति इत्थं तस्मात् दीपवृक्षात् षट् शाखा निर्गमि-
ष्यन्ति। तत्र दीपवृक्षो वादामपुष्पाकृतिचतुर्वर्त्तुलाकारकलिकापुष्पाणि ३४
स्थास्यन्ति। तस्य दीपवृक्षस्य याः षट् शाखा निर्गच्छन्ति तासां द्वयोः ३५

शाखयोरध एका कलिका तदन्यशाखयोरधस्यैका कलिका तदन्यशाख-
३६ योरधस्यैका कलिका स्थास्यति । कलिकाशाखे तदंशौ भविष्यतः सर्व्वा-
३७ ण्याहतनिर्मलस्वर्णै र्निर्मायिष्यन्ते । तस्य सप्त प्रदीपांश्च निर्मास्यसि ततो
३८ लोकैस्तेषु प्रदीपेषु ज्वालितेषु तत्सम्मुखे आलोको भविष्यति । निर्मल-
३९ सुवर्णेन वर्त्तिकाच्छेदनकर्त्तनीं तस्याः पात्रञ्च निर्मास्यसि । किन्तु स
४० दीपवृक्षः साकल्यत एकतालान्तपरिमितस्वर्णै र्निर्मायिष्यते । अवधेहि
गिरौ त्वां यद्यन्निदर्शनं दर्शितं तद्वत् सर्व्वाणि त्वया क्रियन्ताम् ।

२६ षड्विंशोऽध्यायः।

१ आवासस्य यवनिकाकथनं ७ आवासाच्छादनाय छागरोमजवस्त्रकथनं १५ आवासस्य फलककथनं २६ अर्गलकथनं ३१ आवासभेदकविच्छेदवसनस्य कथनञ्च ।

१ पश्चात् त्वं वर्त्तितनीलधूम्ररक्तवर्णसूत्रीयाभि र्दशभि र्यवनिकाभिरेक-
२ मावासं निर्माहि तत्र विचित्रकिरूवाकाराः स्थास्यन्ति । तासां यवनि-
कानाम् एकैका अष्टाविंशद्धस्तदीर्घा चतुर्हस्तविस्तृता भविष्यति सर्व्वासां
३ परिमाणं समानं भविष्यति । एकत्र पञ्च यवनिका युक्ताः स्थास्यन्ति
४ अन्यपञ्च यवनिकाश्च परस्परं युक्ताः स्थास्यन्ति । संयोक्तव्ययोः शेषयव-
निकयोरेकस्या अन्ते नीलसूत्रपुटिका निर्मास्यसि, तद्वत् द्वितीयस्याः
५ प्रान्तेऽपि करिष्यसि । एकस्या अन्ते पञ्चाशत् पुटिकाः करिष्यसि
तद्वदन्यस्या अन्ते पञ्चाशत् पुटिकाः करिष्यसि, उभयपङ्क्तिपुटिकाः
६ समवर्त्तिन्यो भविष्यन्ति । पञ्चाशत् स्वर्णग्रन्थीन् कृत्वा तद्ग्रन्थिभि र्द्वे यव-
निके भंत्स्यसि तेनैक आवासो भविष्यति ।
७ तदावासोपर्य्याच्छादनार्थं छागरोमजैकादश यवनिकाः करिष्यसि ।
८ तासामेकैका त्रिंशद्धस्तदीर्घा चतुर्हस्तविस्तृता, एकादशयवनिकानां
९ परिमाणं समानं भविष्यति । पञ्च यवनिकाः परस्परं संयोज्य एकत्र
निधास्यसि षडन्यास्तद्वत् संयोज्य निधास्यसि, तासां षष्ठीं द्विगुणीकृत्य
१० दूष्यद्वारसम्मुखे निधास्यसि । संयोक्तव्ययोः शेषयवनिकयोरेकस्या अन्ते
पञ्चाशत् पुटिकाः करिष्यसि, तद्वत् द्वितीयस्या अन्ते पञ्चाशत् पुटिकाः
११ करिष्यसि । पित्तलस्य पञ्चाशत् ग्रन्थीन् कृत्वा पुटिकाः प्रवेश्य संयोज-
१२ यिष्यसि तेनैकदूष्यं भविष्यति । तद्दूष्ययवनिकानां योंशो ऽर्थात् यार्द्ध-
१३ यवनिकातिरिक्ता स्थास्यति सा पश्चादवलम्बिष्यते । दूष्यवनिका-
दैर्घ्यस्य योंश एकपार्श्वे एकहस्तोन्यपार्श्वे एकहस्तोऽतिरिच्यते स आवास-

पार्श्वद्वयाच्छादनाय लम्बिष्यते। त्वं रक्तीकृतमेषचर्म्मभि र्दूष्याच्छादन- १४
मेकं करिष्यसि, तदुपरि तहशचर्म्मभिराच्छादनमेकं करिष्यसि।

त्वम् आवासार्थं शिटीम्काष्ठीयोच्चफलकानि करिष्यसि। तानि १५
फलकानि दशहस्तदीर्घाणि सार्द्धहस्तविस्तृतानि भविष्यन्ति। एकैकस्य १६
फलकस्य समानाकारौ द्वौ पादौ करिष्यसि इत्थम् आवासफलकानि १७
करिष्यसि। आवासाय यानि फलकानि करिष्यसि तेषां विंशतिफल- १८
कानि दक्षिणे दक्षिणपार्श्वाय भविष्यन्ति। तेषां फलकानामधश्चत्वा- १९
रिंशत् रूप्यपदाधारान् करिष्यसि फलकैकाधस्तत्पादद्वयाय द्वौ
पदाधारौ अन्यफलकानामधश्च तेषां द्वयोर्द्वयोः पदयोः कृते द्वौ द्वौ
पदाधारौ करिष्यसि। उत्तरे आवासान्यपार्श्वाय विंशतिफलकानि २०
भविष्यन्ति। फलकैकाधो द्वौ पदाधारावन्यफलकानामधश्च द्वौ द्वौ २१
पदाधारौ तेन चत्वारिंशत् रूप्यपदाधारा भविष्यन्ति। आवासपश्चिम- २२
पार्श्वाय षट् फलकानि दास्यसि। आवासस्य पश्चाद्भागस्य कोणद्वये २३
द्वे द्वे फलके दास्यसि। ते अधो योजयिष्यसि तद्वत् तच्छिरसी प्रथम- २४
वलयेन योजयिष्येते इत्थं उभयार्थं करिष्यते, ते कोणद्वये स्थास्यतः। तेन २५
तत्फलकान्यष्टौ भविष्यन्ति रूप्यपदाधाराः षोडश भविष्यन्ति एकैक-
फलकस्य द्वौ द्वौ पदाधारौ भविष्यतः।

त्वं शिटीम्काष्ठस्य दीर्घार्गलानि कृत्वा आवासैकपार्श्वफलकेषु पञ्च २६
दीर्घार्गलानि अन्यपार्श्वफलकेषु पञ्च दीर्घार्गलानि आवासपश्चाद्भा- २७
गस्यार्थतः पश्चिमपार्श्वस्य फलकेषु पञ्च दीर्घार्गलानि निधास्यसि।
फलकानां मध्यदेशस्थितं यन् मध्यार्गलं, तद् अग्रमारभ्यान्तं यावत् २८
यास्यति। तत्फलकानि स्वर्णेन मण्डयिष्यसि अर्गलानि निधातुं २९
स्वर्णवलयान् करिष्यसि अर्गलानि स्वर्णेन मण्डयिष्यसि। इत्थं ३०
गिरौ त्वां आवासाकारो यो दर्शितस्तदनुसारात् तम् आवासं
स्थापयिष्यसि।

त्वं नीलधूम्ररक्तवर्णवर्त्तितसूत्रै र्विच्छेदकवस्त्रं करिष्यसि तत्र विचित्र ३१
किरूवाणामाकृतयः स्थास्यन्ति। तत् शिटीम्काष्ठस्य चतुर्णां स्वर्णमण्डि- ३२
तस्तम्भानामुपरि लम्बयिष्यसि तेषामधो रूप्यचतुःपदाधारा उपरि च
स्वर्णकीलकाः स्थास्यन्ति। ग्रन्थिषु विच्छेदकवस्त्रमवलम्ब्य तद्वस्त्राभ्यान्तरं ३३
साक्ष्यमञ्जूषामानेष्यसि तेन तद्विच्छेदकवस्त्रं पवित्रस्थानातिपवित्रस्थान-
योर्मध्ये भेदकं भविष्यति। महापवित्रस्थाने साक्ष्यमञ्जूषोपरि पापाच्छादन ३४

१५ स्थापयिष्यसि। विच्छेदवस्त्रस्य वहि भोजनासनं निधास्यसि आवास-
दक्षिणे भोजनासनसम्मुखे दीपवृक्षं निधास्यसि उत्तरे भोजनासनं
१६ निधास्यसि। आवासद्वारार्थं नीलधूम्ररक्तवर्णवर्त्तितसूत्रै र्निर्म्मितं चित्र-
१७ विचित्रमेकमाच्छादकवस्त्रं करिष्यसि। तदाच्छादकवस्त्राय शिटीम्-
काष्ठस्य पञ्च स्तम्भान् निर्मास्यसि तान् स्वर्णेन मण्डयित्वा स्वर्णेन तेषां
कीलकान् करिष्यसि तदर्थं पित्तलस्य पञ्च पदाधारान् करिष्यसि।

---

२७ सप्तविंशोऽध्यायः।

१ वेदिनिर्म्माणविधिः ९ आवासचत्वरकथनं १८ चत्वरपरिमाणं २० तैलस्य विधिश्च।

१ त्वं शिटीम्काष्ठेन पञ्चहस्तदैर्घ्यां पञ्चहस्तविस्तारां त्रिहस्तोच्चां चतुष्कोणां
२ वेदिमेकां निर्मास्यसि। तस्याश्चतुष्कोणानामुपरि शृङ्गाणि करिष्यसि
तानि शृङ्गाणि वेद्या अंशा भविष्यन्ति तानि च पित्तलेन मण्डयिष्यसि।
३ भस्मनिधानाय भस्माधारान् करिष्यसि तथा दर्व्वीकुण्डत्रिशूलाग्नि-
४ पात्राणि च करिष्यसि एतत्सर्व्वाणि पित्तलेन करिष्यसि। जालवत्
पित्तलीयामेकां झर्जरीं करिष्यसि तदुपरि चतुष्कोणेषु चतुरो वलयान्
५ करिष्यसि। तां झर्जरीं वेद्या वारणाधो निधास्यसि सा नीचतो
६ अर्द्धवेदिं यावत् स्थास्यति। वेदिं वोढुं शिटीम्काष्ठस्य वहनदण्डौ
७ करिष्यसि पित्तलेन च मण्डयिष्यसि। वेदिं वोढुं तत्पार्श्वयो र्वलयमध्ये
८ वहनदण्डौ दास्यसि। वेदिं फलकनिर्म्मितामन्तःशून्याञ्च करिष्यसि
गिरावत्र त्वां यद्वदर्शि तद्वत् करिष्यसि।
९ आवासचत्वरं कृत्वा तद्दक्षिणे वर्त्तितसूत्रनिर्म्मितयवनिका दास्यसि
१० तत्पार्श्वस्य दैर्घ्यं शतहस्तं भविष्यति। तस्य विंशतिः स्तम्भाः पित्तलस्य
विंशतिः पदाधारा भविष्यन्ति स्तम्भानां कीलकाः शलाकाश्च रूप्यस्य
११ भविष्यन्ति। तथोत्तरपार्श्वस्य यवनिकाः शतहस्तदीर्घा भविष्यन्ति तासां
विंशतिः स्तम्भाः पित्तलस्य विंशतिः पदाधारा भविष्यन्ति स्तम्भकीलक-
१२ शलाका रूप्यस्य भविष्यन्ति। चत्वरविस्तारमापकस्य पश्चिमपार्श्वस्य
१३ पञ्चाशद्धस्तयवनिका दश स्तम्भा दश पदाधारा भविष्यन्ति। पूर्व्वपार्श्वे
१४ चत्वरविस्तारः पञ्चाशद्धस्तः। एकतः पञ्चदशहस्तपर्य्यन्ता यवनिकास्त्रय-
१५ स्तम्भास्त्रयः पदाधाराश्च भविष्यन्ति। अन्यतोपि पञ्चदशहस्ता यवनिका-
१६ स्त्रयः स्तम्भास्त्रयः पदाधाराश्च भविष्यन्ति। मध्ये चत्वरद्वारार्थं नीलधूम्र-

रक्तवर्णवर्त्तितसूत्रैः शिल्पकार्य्यान्वितं विंशहस्तमाच्छादनवस्त्रं चतुःस्तम्भाः
चतुःपदाधारा भविष्यन्ति। चत्वरचतुर्दिक्स्थस्तम्भा रूप्यशलाकाभि १७
र्बद्धा तेषां कीलका रूप्यमयाः पदाधाराः पित्तलमया भविष्यन्ति।
चत्वरं शतहस्तदैर्घ्यं सर्व्वत्र पञ्चाशद्धस्तविस्तारं पञ्चहस्तोच्चं वर्त्ति- १८
तसूत्रकृतं तस्य पदाधाराः पित्तलस्य भविष्यन्ति। आवासस्य सेवार्थपा- १९
त्राणि कीलाः प्राङ्गणस्य सर्व्वकीलाश्च पित्तलमया भविष्यन्ति।
प्रत्यहमालोकं कर्त्तुं त्वदन्तिकं दीपस्यार्थं निर्मलालोड़ितजिततै- २०
लमानेतुं इस्रायेल् सन्तानान् आदेक्ष्यसि। समाजावासमध्ये साक्ष्य- २१
मञ्जूषायाः सम्मुखस्थविच्छेदकवस्त्राद् बहि हारोणतत्पुत्रा आ सन्ध्यातः
प्रातर्यावत् परमेश्वरसम्मुखे तन्निरूपयिष्यन्ति इस्रायेल्वंशस्य पुरुष-
परम्परां यावद् एष विधिः स्थास्यति।

---

२८ अष्टाविंशोऽध्यायः।

१ हारोणतत्पुत्रानधि याजकत्वपदनिरूपणं २ तेषां कृते पवित्रवासोनिरूपणं ५ एफोद्वस्त्रकथनं १५ विचारवक्षःपटीकथनं ३० ऊरीम्तुम्मीभिः कथनं ३१ एफोदो नीलवस्त्रकथनं ३६ उष्णीषकथनं ३९ उत्तरासङ्गोष्णीषकटिबन्धनकथनं ४५ हारोणतत्सन्तानानां वासःकथनं।

त्वमिस्रायेल्वंशमध्यात् त्वदीयभ्रातरं हारोणं तत्सुतान् अर्थात् १
नादवं अवीहूं इलीयासरं इथामरञ्च मम सम्मुखे याजयितुं स्वान्तिकम्
आनेष्यसि।
स्वभ्रातुर्हारोणस्य ऐश्वर्य्यशोभार्थं मेध्यवासांसि करिष्यसि। यानहं २
बोधशक्त्या पूरितवान् तान् बुद्धिमल्लोकान् आदिश, मम याजकत्व- ३
कर्म्मार्थं हारोणं पवित्रं कर्त्तुं ते तद्वासांसि समासादयन्तु। वक्षः- ४
पटी एफोद् परिधेयविचित्रोत्तरासङ्गोष्णीषकटिबन्धा एतानि वासांसि
कुर्व्वन्तु ते मत्साक्षात् याजनाय त्वद्भ्रातृहारोणस्य तत्सुतानाञ्च मेध्य-
वासांसि करिष्यन्ति; तदर्थं ते स्वर्णनीलधूम्ररक्तवर्त्तितसूत्राणि च ५
ग्रहीष्यन्ति।
ते स्वर्णेन नीलधूम्ररक्तवर्त्तितसूत्रैश्च शिल्पकर्म्मणा एफोदवासः करि- ६
ष्यन्ति। स्कन्धाच्छादकौ तस्याग्रीयांशौ संयुज्येतां। एफोदो बन्धनाय यद् ७
विचित्रं कर्म स्थास्यति तदपि तद्वस्त्रानुसाराद् भविष्यति, फलतः ८
स्वर्णेन नीलधूम्ररक्तवर्त्तितसूत्रै र्भविष्यति। त्वं द्वौ हरिन्मणी समादाय ९

१० तत्रेस्रायेल्वंशानां नामानि खनिष्यसि। तेषां जात्यनुसारात् एकमणौ
११ षन्नामानि तदन्यमणौ शेषषन्नामानि खनिष्यसि। तन्मण्योः शिल्पकर्म्मणा
मुद्रावत् इस्रायेलो नामानि खनिष्यसि त्वं स्वर्णस्थालीभ्यां तौ भंत्स्यसि।
१२ इस्रायेल्वंशानां स्मरणाय तौ द्वौ मणी एफोद उपरि निधास्यसि तेन
हारोणः स्मर्त्तुं तेषां नामानि परमेश्वरसमक्षं स्वस्कन्धाभ्यां वक्ष्यति।
१३ त्वं ये स्वर्णस्थाल्यौ करिष्यसि तदग्रे निर्मलस्वर्णेन वर्त्तिते द्वे शृङ्खले कृत्वा
१४ ते स्थालीभ्यां भंत्स्यसि।
१५ 　शिल्पकर्मणा विचारवक्षःपटीं करिष्यसि अर्थात् एफोदः कर्मानुसा-
१६ रात् स्वर्णनीलधूम्ररक्तवर्त्तितसूत्रैस्तां करिष्यसि। सा चतुरस्रा द्विगुणा
१७ भविष्यति तस्या दैर्घ्यं विस्तारश्च वितस्तिमात्रौ भविष्यतः। मणिचतुः-
१८ पंक्तिषु तां खचिष्यसि प्रथमपंक्तौ चुणीपद्मरागताम्रमणयः। द्वितीयायां
१९ मरकतनीलकान्तहीरकानि। तृतीयायां लस्रूनीययिम्माकटाहेलाः।
२० चतुर्थ्यां गोदन्तवैदूर्य्यसूर्य्यकान्ता एते स्वर्णेन स्वस्वपंक्तौ भन्त्स्यन्ते। एते
२१ प्रस्तरा इस्रायेल्वंशनामार्थं तेषां नामानुसारात् द्वादश भविष्यन्ति
२२ मुद्रायामिव प्रतिप्रस्तरं द्वादशवंशानामेकैकं नाम स्थास्यति। निर्मल-
२३ स्वर्णेन वक्षःपटीकृते वर्त्तितशृङ्खले निर्मास्यसि। वक्षःपट्युपरि द्वौ स्वर्ण-
२४ बलयौ करिष्यसि वक्षःपटीकोणयोस्तौ बलयौ भन्त्स्यसि। तयोर्बलयोर्मध्ये
२५ वर्त्तितस्वर्णस्य द्वे शृङ्खले निधास्यसि। शृङ्खलयोर्द्वे मुखे स्थाल्यौ बद्धा
२६ एफोदः सम्मुखस्थयोः स्कन्धाच्छादकांशयोरुपरि निधास्यसि। स्वर्णस्य द्वौ
बलयौ निर्माय वक्षःपटीकोणयोरेफोदः सम्मुखस्थाभ्यन्तरे निधास्यसि।
२७ अपरं स्वर्णस्य द्वौ बलयौ कृत्वा एफोदः पार्श्वयोरधः सम्मुखे योजनस्थाने
२८ एफोदो विचित्रबन्धनोपरि च निधास्यसि। एफोदो विचित्र कटिबन्धनो-
परि तिष्ठन्ती वक्षःपटी यदेफोदः स्खलिता न पतेत् तदर्थं वक्षःपटी
२९ स्वबलयद्वये एफोदो बलयद्वये च नीलसूत्रेण बन्धनीया। यदा हारोणः
पवित्रस्थानं प्रवेक्ष्यति तदा परमेश्वरस्य समक्षं नित्यं स्मारयितुं स स्वहृ-
दये विचारवक्षःपट्यां नित्यमिस्रायेल्वंशानां नामानि वक्ष्यति।
३० 　त्वं विचारवक्षःपट्याम् ऊरीम्तुम्मीमौ (दीप्तिसिद्धी) स्थापयिष्यसि,
यदा हारोणः परमेश्वरसम्मुखं प्रवेक्ष्यति तदा हारोणस्य हृदये तत्
स्थास्यति हारोणो नित्यं परमेश्वरसम्मुखे इस्रायेल्वंशस्य विचारं
स्वहृदये वक्ष्यति।
३१ 　त्वम् एफोदः कृत्स्नपरिधेयवासो नीलं करिष्यसि। तन्मध्यस्थले

शिरःप्रवेशार्थमेकं छिद्रं करिष्यसि वर्मच्छिद्रवत् तच्छिद्राग्रं चतुर्दिक्षु ३२
तन्तुवायेन वीतं भविष्यति, तन्न छेत्स्यते। तद्दशोपरि चतुर्दिक्षु नील- ३३
धूम्ररक्तदाडिमानि करिष्यसि स्वर्णकिङ्किणीश्च तन्मध्ये स्थापयिष्यसि।
तद्वस्त्रदशोपरि चतुर्दिक्षु एकैका स्वर्णकिङ्किणी एकैकं दाड़िमफलञ्च ३४
स्थास्यति। ईश्वरसेवनकाले हारोणस्तत् परिधास्यति यदा स परमे- ३५
श्वरसम्मुखं पवित्रस्थानं प्रवेक्ष्यति यदा च तस्मात् वहि र्भविष्यति तदा
तच्छब्दः श्रोष्यते तेन स न मरिष्यति।

त्वं निर्मलस्वर्णेन पत्रमेकं करिष्यसि तदुपरि परमेश्वरमुद्दिश्य पवि- ३६
त्रेति पदं खनिष्यसि। मुकुटोपरि स्थातुं तन्नीलसूत्रेण बद्धा मुकुटस्या- ३७
ग्रभागे निधास्यसि। तत् हारोणस्य भाले स्थास्यति इस्रायेलः सन्तानाः ३८
स्वमेध्यकर्मसु दानेषु च यदपराध्यन्ति तद् हारोणो वक्ष्यति, यत् ते पर-
मेश्वरेण नित्यम् अनुगृह्यन्ते तदर्थं तस्य भाले स्थास्यति।

त्वं कार्पाससूत्रैरुत्तरासङ्गोष्णीषौ करिष्यसि किन्तु कटिबन्धनं ३९
सूचिना चित्री करिष्यसि।

हारोणस्य सुतानां कृते कटिबन्धनोत्तरासङ्गौ करिष्यसि तेषां सौन्दर्य- ४०
शोभार्थं उष्णीषान् करिष्यसि। हारोणस्य तत्सुतानाञ्च गात्रेषु तानि ४१
वासांसि परिधापयिष्यसि तानभिषिच्य पदे नियुक्तान् मेध्यांश्च करि-
ष्यसि तेन ते याजकत्वपदे न मां सेविष्यन्ते। तेषां नग्नत्वाच्छादनाय ४२
कटितो जङ्घां यावत् कटिबन्धनानि परिधापयिष्यसि। यदा हारोण- ४३
स्तत्सुताश्च समाजावासं प्रविश्य पवित्रस्थाने सेवितुं वेद्या अन्तिकं
यास्यन्ति तदा यत् तेऽपराध्य न म्रियन्ते तदर्थं तद्वासांसि परिधा-
स्यन्ति हारोणतद्वंशार्थं एष नित्यविधि र्भविष्यति।

२९ ऊनत्रिंशोऽध्यायः।

१ याजकपावनबलिदानविधिः २८ नित्यं मेषशावकद्वयबलिदानं ४२ इस्रायेलीयैः समं वस्तुं तान् पावयितुं ईश्वरप्रतिज्ञानञ्च।

याजनपदे मां सेवितुं स्वेषां पूतत्वाय तान् प्रति त्वमेतानि कर्माणि १
करिष्यसि एकं निर्दोषवत्सं मेषौ च ग्रहीष्यसि। किण्वशून्यपूपान् तैल- २
मिश्रितान् किण्वशून्यान् पिष्टकांश्च तैलाक्तान् किण्वशून्यान् सूक्ष्म-
पिष्टकान् गोधूमचूर्णैः करिष्यसि। परन्तु तान् एकस्मिन् डल्लके स्थाप- ३
यित्वा डल्लकेन सार्द्धं वत्सं मेषौ चानेष्यसि। समाजावासद्वारान्तिके ४

५ हारोणं तत्सुतांश्चानीय जलैः स्नपयिष्यसि। अपरं त्वं तानि वासांसि
गृहीत्वा तमुत्तरासङ्गम् एफोदो वस्त्रं एफोदं वक्षःपटीञ्च हारोणं परि-
६ धापयिष्यसि एफोदो विचित्रकटिबन्धनेन तं भन्त्स्यसि। तच्छिरस्युष्णीषं
७ दत्त्वा तदुपरि पूतमुकुटं दास्यसि। अभिषेकार्थं तैलं गृहीत्वा तच्छिरो-
८ ऽभिषेक्ष्यसि। अपरं हारोणस्य सुतानानीय तान् उत्तरासङ्गान् परि-
९ धापयिष्यसि। हारोणं तत्पुत्रांश्च कटिबन्धनानि परिधापयिष्यसि, तेषां
शिरःसूष्णीषान् दास्यसि तेन ते नित्यं याजनं करिष्यन्ति, इत्थं हारोणं
१० ससुतं त्वं पूतं करिष्यसि। ततस्त्वं समाजावाससम्मुखे वत्समानेष्यसि
११ हारोणस्तत्सुताश्च तद्वत्सशिरसि हस्तान् दास्यन्ति। त्वं समाजावा-
१२ सद्वारान्तिके परमेश्वरसम्मुखे तं वत्सं छेत्स्यसि। तस्य किञ्चित् शोणितं
गृहीत्वा स्वाङ्गुल्या वेद्याः शृङ्गेषु दास्यसि वेदिमूले सर्व्वशोणितं निषेक्ष्यसि।
१३ तदन्त्रोपरिस्थितमेदो यकृदुपरिस्थान्त्राच्छादकं द्वौ मेरुग्रन्थी तन्मेदश्चा-
१४ दाय वेद्यां होष्यसि। वत्सपललं चर्म्म गोमयञ्च शिविरस्य बहिर्वह्नौ
दाहयिष्यसि, एष प्रायश्चित्तार्थको बलिः।

१५ अनन्तरं त्वं मेषयोरेकमानेष्यसि हारोणतत्सुतैस्तन्मेषशिरसि करे-
१६ ष्वर्पितेषु त्वं तं मेषं छित्त्वा तच्छोणितं गृहीत्वा वेद्युपरि चतुर्दिक्षु
१७ विकरिष्यसि। मेषं खण्डं खण्डं कृत्वा तदन्त्रं पदानि च प्रक्षाल्य खण्डशिर-
१८ सोरुपरि निधास्यसि। इत्थं त्वया वेद्यां कृत्स्नमेषे हुते तत् परमेश्वरस्य
होमसुगन्धिद्रव्यम् अर्थात् परमेश्वरोद्देश्यं वह्निकृतनैवेद्यं भविष्यति।
१९ अपरं त्वं द्वितीयं मेषमादास्यसि हारोणतत्सुतैस्तन्मेषशिरसि करेष्वर्पि-
२० तेषु त्वं तं मेषं छित्त्वा तस्य किञ्चित् शोणितं गृहीत्वा हारोणस्य दक्षिण-
कर्णप्रान्ते तत्सुतानां दक्षिणकर्णप्रान्तेषु दक्षिणहस्ताङ्गुष्ठोपरि दक्षि-
णपदाङ्गुष्ठोपरि च दास्यसि वेद्युपरि चतुर्दिक्षु शोणितं विकरिष्यसि।
२१ वेद्युपरिस्थशोणितस्याभिषेकार्थतैलस्य च किञ्चित् गृहीत्वा हारोणस्य
तद्वाससाञ्चोपरि तेन साकं तस्य पुत्राणां तेषां वाससामुपरि च तद्
विकरिष्यसि तेन स तद्वासांसि तत्सुतास्तेषां वासांसि च पवित्री
२२ भविष्यन्ति। पश्चात् त्वं तन्मेषस्य मेदो लाङ्गूलमन्त्रोपरिस्थमेदो यकृदु-
परिस्थान्त्राच्छादकं द्वौ मेरुग्रन्थी तदुपरिस्थमेदो दक्षिणस्कन्धञ्च ग्रहीष्यसि
२३ यतः स पदनियोगार्थावि भवति। ततः परमेश्वरसम्मुखस्थकिण्वशून्यपूप-
२४ डल्लकात् पूपमेकं तैलाक्तपिष्टकं सूक्ष्मपिष्टकञ्च गृहीत्वा हारोणतत्-
२५ सुतानां हस्तेषु दत्त्वा निवेदयितुं परमेश्वरसम्मुखे तानि दोलयिष्यसि। त्वं

तेषां करेभ्यस्तान्यादाय परमेश्वरसम्मुखे सुगन्धिद्रव्यार्थं होमवेद्युपरि
तदन्तिके होष्यसि तत् परमेश्वरोद्देश्यमग्निकृतनैवेद्यं भविष्यति ।
पश्चात् त्वं हारोणस्य पदनियोगार्थमेषवक्ष आदाय परमेश्वरसम्मुखे २६
दोलयिष्यसि तत् खण्डं तवांशो भविष्यति । ततो हारोणस्य तत्सुतानाञ्च २७
पदनियोगकाले दोलितं मेषवक्ष उत्तोलितः स्कन्धश्च त्वया पावयितव्यौ ।
ततो नित्यविधिना इस्रायेल्वंशात् तद् हारोणतत्सन्ताना अधिकरि- २८
ष्यन्ति यतस्तद् इस्रायेलीयै र्दातव्यम् उत्तोलनीयनैवेद्यम् अर्थात् तेषां
मङ्गलार्थकबलीनां मध्यात् परमेश्वराय दातव्यं उत्तोलनीयनैवेद्यं ।
हारोणे मृते तन्मेध्यवासांसि तत्सुतानां भविष्यन्ति तानि परिधाय २९
तेऽभिषिक्ताः पदनियुक्ताश्च भविष्यन्ति । तत्सुतानां मध्ये यो जनस्तत्पदेन ३०
याजकः सन् समाजावासमध्ये पवित्रस्थाने सेवितुं प्रविशेत् स तद्वासांसि
सप्तदिनानि परिधास्यति ।
त्वया तत् पदनियोगार्थमेषं गृहीत्वा तन्मांसे पवित्रस्थाने पक्के हारोण- ३१
तत्सुताः समाजावासद्वारे तन्मेषमांसं डल्लकस्थान् तत्पूपांश्च भोक्ष्यन्ते । ३२
तेषां पदनियोगार्थं शौचार्थञ्च यैः प्रायश्चित्तं कृतं तानि ते भोक्ष्यन्ते किन्तु ३३
कोप्यन्यजाति र्जनस्तानि न भोक्ष्यते यस्मात् तत् सर्व्वं पवित्रं वस्तु । तत्- ३४
पदनियोगार्थमांसपूपयो र्यदि प्रातःपर्य्यन्तं किञ्चिदवशिष्टं तिष्ठति तर्हि
तद् वह्निना दाहयिष्यसि तत् केनापि न भोक्ष्यते यस्मात् तत् पवित्रं
वस्तु । अहं यद्वत् त्वामाज्ञापयामि तद्वत् कृत्वा त्वं हारोणं तत्सुतांश्च ३५
सप्तदिनानि पदे नियोक्ष्यसि । तेन त्वं प्रायश्चित्तार्थं प्रतिदिनं पापार्थं ३६
वृषमेकं होष्यसि वेद्यर्थं प्रायश्चित्ते कृते तां परिष्करिष्यसि पावयितुं
अभिषेक्ष्यसि च । वेदिकृते सप्तदिनानि प्रायश्चित्तं कृत्वा तां पावयिष्यसि ३७
तेन वेदिरतिपवित्रा भविष्यति वेद्या च यस्य स्पर्शो भवति सोपि
पवित्रो भविष्यति ।
त्वं नित्यमेकवर्षीयमेषशावकद्वयं वेद्यां होष्यसि प्रतिदिनं तदेकं प्रात- ३८
रुत्स्रक्ष्यसि सन्ध्यायामन्यमुत्स्रक्ष्यसि । एकमेषशावकेन सार्कं हिन्पात्र- ४०
चतुर्थांशेनालोडिततैलेन मिश्रितं एफापात्रदशमांशगोधूमचूर्णं पानी-
यवस्त्वर्थं हिनचतुर्थांशं द्राक्षारसञ्च दास्यसि । द्वितीयं मेषवत्सं सन्ध्यायां ४१
उत्सृज्य प्रातःकर्त्तव्यानुसारात् नैवेद्येन पानीयवस्तुना च सहितं तमुत्स्र-
क्ष्यसि, तेन तत् परमेश्वरान्तिके वह्निकृतसुगन्धिनैवेद्यं भविष्यति । अहं ४२
यत्र त्वया सार्कं संलपितुं युष्मान् साक्षात् करिष्यामि तत्र समाजावास-

द्वारान्तिके युष्माकं पुरुषपरम्परा परमेश्वरम् उद्दिश्य नित्यमित्थं होम-
बलिं दास्यति।
४३ तत्राहमिस्रायेल्वंशं साक्षात् करिष्यामि मन्महिम्नावासः पवित्रो
४४ भविष्यति। अहं समाजावासं वेदिञ्च पावयिष्यामि मां सेवितुं हारोणं
४५ तत्सुतांश्च पावयिष्यामि। इस्रायेल्वंशमध्ये वसन् तेषामीश्वरो भवि-
४६ ष्यामि। तेनाहमेव तेषां प्रभुः परमेश्वरस्तेषां मध्ये वस्तुं मिसर्देशात्
तान् वहिरानयमिति ते ज्ञास्यन्ति तेषां प्रभुरहमेव परमेश्वरः।

३० त्रिंशोध्यायः।

१ धूपवेदिकथनं ११ जनगणनकाले प्रायश्चित्तकथनं १७ पित्तलीयप्रक्षालनपात्र-कथनं २२ पवित्रतैलकथनं ३४ सुगन्धिद्रव्यकथनं।

१ त्वं धूपं ज्वालयितुं शिटीम्काष्ठस्य वेदिं निर्म्मास्यसि। सा हस्तैकदीर्घा
२ हस्तैकविस्तृता चतुष्कोणा हस्तद्वयोच्चा च भविष्यति तदुपरि शृङ्गाणि च
३ भविष्यन्ति। तस्याः पृष्ठं चतुःपार्श्वं शृङ्गाणि च निर्म्मलस्वर्णेन मण्डयिष्यसि
४ तच्चतुर्दिक्षु स्वर्णकर्णिकां करिष्यसि। तद्वहनदण्डयोराधारार्थं त्वं तस्य
कर्णिकाधः पार्श्वयोरुभयोः कोणयोरन्तिके स्वर्णस्य द्वौ वलयाग्रकीलकौ
५ करिष्यसि, तौ दण्डौ शिटीम्काष्ठेन निर्म्माय स्वर्णेन मण्डयिष्यसि। यत्राहं
६ त्वां साक्षात् करिष्यामि तत्साक्ष्योपरिस्थपापाच्छादनसम्मुखे साक्ष्यमञ्जू-
७ षायाः समीपस्थविच्छेदवस्त्राग्रभागे तां निधास्यसि। हारोणस्तदुपरि
सुगन्धिधूपं ज्वालयिष्यति प्रतिप्रभातं प्रदीपपरिष्करणकाले तं धूपं
८ ज्वालयिष्यति। सन्ध्यायां प्रदीपज्वालनकाले च हारोणो धूपं ज्वाल-
यिष्यति तेन युष्माकं पुरुषपरम्परां यावत् परमेश्वरसम्मुखे नित्यं धूपो
९ ज्वालयिष्यते। यूयं तदुपरीतरधूपं वा हवनीयवस्तु वान्यनैवेद्यं
१० नोत्स्रक्ष्यथ तदुपरि पानीयनैवेद्यं न सेक्ष्यथ। वर्षमध्ये हारोण एकवारं
तच्छृङ्गोपरि पापार्थप्रायश्चित्तस्य रक्तं दत्त्वा प्रायश्चित्तं करिष्यति, युष्माकं
पुरुषपरम्परां यावत् वर्षमध्ये तन्निमित्तं वारैकं प्रायश्चित्तं कारिष्यते,
वेदिरियं परमेश्वरदृष्टावतिपूता।
११ परमेश्वरो मूससमिदं वाचं बभाषे, इस्रायेल्वंशस्य संख्यां ज्ञातुं तेषां
१२ गणनकाले यथा कापि बाधा न जायते तदर्थं गणनकाल एकैको जनः
१३ परमेश्वरान्तिके स्वस्वप्राणार्थं प्रायश्चित्तं करिष्यति। तत्र यः कश्चिद्
गणितानां मध्ये पतिष्यति स पवित्रस्थानीयशेकलानुसाराद् अर्द्धशेकलं

दास्यति विंशतिगेराभिरेकशेकलं भवति तदर्द्धशेकलं परमेश्वरीयनैवेद्यं
भविष्यति । विंशतिवत्सरवयस्कः तदधिकवयस्को वा यः कश्चिद् १४
गणितानां मध्यमागच्छति स परमेश्वरमुद्दिश्य तन्नैवेद्यं दास्यति । युष्माकं १५
प्राणार्थं प्रायश्चित्तं कर्त्तुं धनवान् परमेश्वरमुद्दिश्य अर्द्धशेकलाधिकं
नैवेद्यं न दास्यति दरिद्रस्तन्न्यूनं न दास्यति । त्वमिस्रायेल्वंशात् १६
प्रायश्चित्तीयरूप्याणि गृहीत्वा समाजावासकर्म्मार्थं निरूपयिष्यसि,
तन्नैवेद्यं परमेश्वरसम्मुखे युष्माकं प्राणानां प्रायश्चित्तार्थं इस्रायेल्वंशस्य
स्मरणार्थञ्च भविष्यति ।

परमेश्वरो मूससमवदत् त्वं प्रक्षालयितुं पित्तलेन पदयुक्तं प्रक्षालन- १७
पात्रमेकं करिष्यसि तच्च समाजावासवेद्योर्मध्ये निधाय तत्र पयो १८
दास्यसि । हारोणस्तत्सुताश्च तत्र हस्तपादान् प्रक्षालयिष्यन्ति । यदा ते २०
समाजावासं प्रवेक्ष्यन्ति वा वह्निकृतै र्नैवेद्यादिभिः परमेश्वरं सेवितुं
वेदिसमीपमागमिष्यन्ति तदा ते यन्न म्रियन्ते तदर्थं तोयैः स्वान्
धौतान् करिष्यन्ति । इत्थं यत्ते न म्रियन्ते तदर्थं निजहस्तपादान् २१
क्षालयिष्यन्ति विधिरयं तस्य तत्सुतानाञ्च पुरुषपरम्परां यावत्
स्थास्यति ।

परमेश्वरो मूससमवदत् त्वं उत्तमानि सुगन्धिवस्तूनि, अर्थात् पवित्र- २२
शेकलानुसारेण पञ्चशतानि शेकलानि निर्म्मलगन्धरसान् तदर्द्धं अर्थात् २३
सार्द्धशतद्वयशेकलानि गुडत्वचः सार्द्धशतद्वयशेकलानि सुगन्धिवचाः पञ्च २४
शतशेकलानि सूक्ष्मगुडत्वचा हिनैकं जिततैलं स्वसमीपम् आनेष्यसि । एतैस्त्वं २५
मर्द्दनार्थं पवित्रतैलम् अर्थात् गन्धवणिजां क्रियया कृतं तैलं करिष्यसि
तदभिषेकार्थं पवित्रं भविष्यति । तेन त्वं समाजावासं साक्ष्यमञ्जूषाञ्चा- २६
भिषेक्ष्यसि भोजनासनं तदीयं सर्व्वपात्राणि दीपवृक्षं तदीयसर्व्वपात्राणि २७
च धूपवेदिं होमवेदिं तदीयसर्व्वपात्राणि च प्रक्षालनपात्रं तत्पदञ्चा- २८
भिषेक्ष्यसि । सर्व्वाण्येतानि वस्तून्यपि त्वया पवित्री करिष्यन्ते, तेन तान्य- २९
तिपवित्राणि भविष्यन्ति तेषु च यद्वस्तुनः स्पर्शो जायते तदेव पूतं
भविष्यति । त्वं हारोणं तत्सुतांश्चाभिषिच्य याजनपदेन मां सेवितुं ३०
पावयिष्यसि । त्वं इस्रायेल्वंशं वदिष्यसि युष्माकं पुरुषपरम्परां यावत् ३१
मदर्थं तद् अभिषेकाय पवित्रं तैलं भविष्यति । मानुषशरीरं तेन ३२
नाभिषेक्ष्यते तन्निर्म्माणानुरूपं किमपि तैलं न करिष्यते तदेव पूतं युष्मा-
कमन्तिके तत् पूतं भविष्यति । किन्तु यः कश्चित् तत्सदृशं तैलं कुर्य्यात् ३३

यस्य तस्मात् किञ्चित् नीत्वान्यजातिजनगात्रे दद्यात् स खलोकेभ्य उच्छिद्येत।
२४ परमेश्वरो मूससं जगाद त्वं सुगन्धिवस्तूनि गृहाण अर्थात् गुग्गुलु
नखी कुन्दुरु निर्म्मलसिक्ह एतानि सुगन्धिवस्तूनि समांशानि कृत्वा
२५ गृहाण। तेन गन्धवणिजां क्रियया कृतं लवणाक्तं निर्म्मलं पूतं सुगन्धिधूपं
२६ करिष्यसि। तस्य किञ्चित् चूर्णं कृत्वा यत्राहं त्वां साक्षात् करिष्यामि
तत्र अर्थात् समाजावासे साक्षिमञ्जूषासम्मुखे निधास्यसि सएव युष्माक-
२७ मतिपवित्रो भविष्यति। त्वं यं सुगन्धिधूपं करिष्यसि तन्निर्म्माणव्यवस्था-
नुरूपो धूपः स्वार्थं युष्माभि र्न करिष्यते स युष्माभिः परमेश्वराय पूतो
२८ गणिष्यते। यः स्वयं घ्रातुं तत्समं धूपं कुर्य्यात् स खलोकेभ्य उच्छिद्येत।

---

३१ एकत्रिंशोऽध्यायः।

१ आवासकर्म्म कर्त्तुं वित्सलेलाहलीयावयो र्नियोजनं १२ विश्रामवारं पवित्रत्वेन मन्तुमाज्ञा १८ मूससे व्यवस्थायाः प्रस्तरद्वयदानं।

१ परमेश्वरो मूससमिदं जगाद पश्याहं यिहूदावंशीयं हूरस्य पौत्त्रं
२ ऊरेः पुत्त्रं वित्सलेलं नाम्नाहूतवान्। शिल्पकर्म्मणो नैपुण्यं अर्थात्
४ सुवर्णरूप्यपित्तलतक्षणखचनार्थमणिकर्त्तनकाष्ठतक्षणादिसर्व्वप्रकारशिल्प-
५ कर्म्म कर्त्तुं तं बुद्धिविद्याज्ञानकर्म्मकुशलत्वदायकेनेश्वरस्यात्मना पूर्णम-
६ कार्षम्। पश्य दान्वंशजाताहीषामकस्य सुतमहलीयावं तत्सहकारि-
णमकार्षं तदन्येषां ज्ञानिनां हृदये ज्ञानमदां ततोहं त्वां यान्याज्ञापयं
७ तानि ते निर्म्मास्यन्ति। फलतः समाजावासं साक्ष्यमञ्जूषां तदुपरिस्थ-
८ पापाच्छादनं आवासस्य सर्व्वपात्राणि भोजनासनं तत्पात्राणि निर्म्मल-
९ दीपवृक्षं तत्पात्राणि धूपवेदिं होमवेदिं तत्पात्राणि प्रक्षालनपात्रं
१० तत्पादं याजनपदेन सेवनाय हारोणयाजकस्य तत्सुतानाञ्च सेवार्थकानि
११ पवित्रवासांस्यभिषेकार्थतैलं पूतस्थानाय सुगन्धिधूपञ्च यथा त्वामाज्ञापयं
तदनुरूपं तौ निर्म्मास्यतः।
१२ ततः परमेश्वरो मूससमवदत् त्वमिस्रायेल्वंशाय कथामिमां कथय
१३ यूयं मम विश्रामदिनमवश्यं पालयिष्यथ यतः परमेश्वरोहं युष्माकं पाव-
कोस्मीति ज्ञापनार्थं तदेव मम युष्मत्पुरुषपरम्परायाश्च मध्ये चिह्नं
१४ भविष्यति। अतो यूयं विश्रामदिनं पालयिष्यथ तत् युष्मभ्यं पूतं भवि-
ष्यति किन्तु यस्तद् अपूतं करिष्यति स नितान्तं घानिष्यते यः प्राणी

तद्दिने कर्म्म कुर्य्यात् स स्वलोकेभ्य उच्छिद्येत । षड्दिनानि कर्म्म करि- १५
ष्यते, किन्तु सप्तमदिनं परमेश्वरस्य पूतं विश्रामदिनं, तद्विश्रामदिने
यः कर्म्म कुर्य्यात् सोऽवश्यं हन्येत । इस्रायेल्वंशा नित्यनियमार्थं १६
पुरुषपरम्परायां मन्तुं विश्रामदिनं पालयिष्यन्ति। तन्मदिस्रायेल्वंश- १७
मध्ये नित्यचिह्नरूपं भविष्यति यतः परमेश्वरः षड्दिनै नभःपृथिव्यौ
सृष्ट्वा सप्तमेह्नि विश्रम्याप्यायितवान्।
पश्चात् स तेन सार्कं कथनं समाप्य सीनयाद्रौ साक्ष्यप्रस्तरद्वयम् १८
अर्थात् ईश्वराङ्गुल्या लिखितफलकौ मूससेऽदात्।

---

३२ द्वात्रिंशोऽध्यायः।

१ मूससो ऽसमक्षं लोकानां हारोणेन स्वर्णप्रतिमानिर्म्माणं ७ ईश्वरस्य क्रोधे मूसानिवेदनञ्च १५ प्रस्तरद्वयकरस्य मूससो ऽद्रेरवरोहणं १९ प्रस्तरद्वयभञ्जनं वत्सनाशनं २१ हारोणस्य निवेदनं २५ देवार्च्चकहननं ३० परमेश्वराय मूससो निवेदनं परमेश्वरोत्तरञ्च।

अद्रेरवरोहणे मूससो विलम्बं विलोक्य लोका हारोणस्य समीपे १
मिलित्वा तमवदन् उत्तिष्ठास्माकं कृते अस्मदग्रगामिनो देवान् निर्म्माहि
यतो मिसर्देशाद् अस्मान् वहिरानयत् यो मूसास्तस्य किं जातमिति
वयं नो विद्मः । हारोणस्तानुवाच तर्हि यूयं स्वस्वजायासुतकन्यानां २
कर्णेभ्यः स्वर्णकुण्डलानि प्रमोच्य मदन्तिकमानयत । ततो लोकास्तेषां ३
कर्णेभ्यः सुवर्णकुण्डलान्यवमोच्य हारोणान्तिकम् आनिन्युः स तेषां करेभ्य- ४
स्तान्यादाय मूषया निषिच्य शिल्पास्त्रेण तक्षित्वा वत्समेकं निर्म्ममे, तदा
लोकैरवादि हे इस्रायेल् वंश तव यो देवो मिसरदेशात् त्वां वहिरान-
यत् सोयं। इति विलोक्य हारोणस्तत्सम्मुखे वेदिमेकां निर्म्ममे श्वः ५
परमेश्वरोद्देशको महामहो भविष्यतीति घोषयामास च। परेहनि ६
लोकाः प्रत्यूष उत्थाय होमबलीन् मङ्गलार्थबलींश्च ददुः ततो लोका
भोक्तुं पातुञ्चोपविविशुः ततः क्रीडितुम् उत्थिताः।
तदा परमेश्वरो मूससमुवाच त्वमवरुह्य याहि यस्मात् मिसर्- ७
देशात् त्वयानीता लोका भ्रष्टाः। अहं तान् यन्मार्गमधि समादिशं ८
तस्मात् ते तूर्णं वहिर्भूताः यतस्ते स्वार्थमेकं निषिक्तवत्सं निर्म्माय तम-
पूपुजन् तस्मै बलीन् दत्त्वा कथितवन्तश्च हे इस्रायेल्वंश तव यो देवस्त्वां
मिसरो वहिरानयत् सोयम्। परमेश्वरो मूससमपरमवदत् अहं जना- ९

१० नेतान् अपश्यं पश्यैमेऽतीवाबाध्याः। तस्मात् त्वया क्षम्यतां अहं तेषां
प्रतिकूलं क्रोधं प्रज्वाल्य तान् विनाशयिष्यामि, किन्तु त्वां महाजातिं मूलं
११ करिष्यामि। ततो मूसा निजप्रभोः परमेश्वरस्य सन्निधौ विनीय कथित-
वान् हे परमेश्वर त्वं यान् स्वलोकान् महापराक्रमेण बाहुबलेन च
मिसरो देशात् बहिरानयस्तेषां प्रतिकूलं त्वया क्रोधः कुतः प्रज्वालयिष्यते?
१२ सोऽसुभाय गिरिषु तान् नाशयितुं मर्त्यलोकाद् दवयितुञ्च बहिरानयत्
इति मिस्रीयाः कुतो वदेयुः? भवान् प्रचण्डकोपात् परावर्त्ततां स्वलोका-
१३ नाममङ्गलकरणात् विरमतु। त्वं येषां समक्षं स्वनाम्ना शपथं कुर्व्वन्
व्योमतारकाइव युष्माकं वंशं वर्द्धयिष्यामि यं देशमधि च कथितवान् तं
युष्मद्वंशेभ्यो दास्यामि ते तं सदाधिकरिष्यन्तीति कथयामासिथ तव
१४ तान् दासान् इब्राहीम्-इस्हाक्-इस्रायेलः स्मर। अतः परमेश्वरः
स्वलोकान् प्रति यां दुर्गतिं घटयितुं मतिं कृतवान् तस्मात् व्यरमत्।
१५ तदा मूसाः साक्ष्यप्रस्तरद्वयं गृहीत्वा परावृत्य गिरेरवारोहत् तयोः
१६ प्रस्तरयोरुभययोः पृष्ठयो र्लिपिरासीत्। तौ प्रस्तरफलकावीश्वरनि-
१७ र्म्मितौ तत्र खनिता लिपिरपि तस्य। ततो जनैरुच्चैः शब्दे कृते यिहो-
शूयस्तेषां कलरवान् श्रुत्वा मूससमवोचत् शिविरे रणनादो भवति।
१८ स उदितवान् एष जयध्वनेः शब्दो नहि पराजयध्वनेश्च शब्दो नहि
किन्तु मया गीतशब्दः श्रूयते।
१९ ततः स शिविरान्तिकं प्राप्य तं वत्सं लोकानां नृत्यञ्च ददर्श ततो
मूसाः क्रोधेन प्रज्वलितः स्वकरात् तौ प्रस्तरौ क्षिपन् गिरे र्मूले तौ
२० बभञ्ज। ते र्निर्म्मितं वत्सञ्चादाय वह्निना दाहयामास धूलिवत् पिष्ट्वा
जले विकीर्य्य इस्रायेल्वंशं पाययामास च।
२१ मूसा हारोणं जगाद त्वमेतान् यदेतत्पापं कारितवान् एते जनास्त्वां
२२ प्रति तादृशं किमकार्षुः? हारोणोऽवादीत् हे प्रभो क्रोधं मा प्रज्वालय
२३ जना इमे दुष्टत्वतत्परा इति भवता ज्ञायते। इमे मामवदन् अस्मत्कृते
अस्मदग्रगामिनो देवान् निर्म्माहि यस्मात् मिसरोऽस्मान् बहिरानयत्
२४ यो मूसास्तस्य किं जातमिति वयं न विद्मः। तदाहमुदितवान् युष्माकं
मध्ये यस्य यत्स्वर्णमस्ति स तद् विमोच्य ददातु, तदा ते मह्यं तददुः
तस्मिन् मया वह्नौ निक्षिप्ते तस्मात् वत्सोऽयं निरगात्।
२५ मूसा जनानां नग्नत्वं दृष्टवान् यतो हारोणस्तेषां रिपुमध्ये तान् अप-
२६ मानयितुं नग्नीचकार। तदा मूसाः शिविरद्वारे तिष्ठन् बभाषे परमेश्वर-

यच्छीयो यः स मामुपेयात् तदा लेविसन्तानास्तदन्तिके मिलिताः। स २७
तानवदत् इस्रायेलः प्रभुः परमेश्वर इति गदति युष्माकमेकैको नरः
स्वोरौ खड्गं बद्धा मध्येशिविरम् एकस्माद् द्वारादन्यद्वारं यावत्
यातायातं करोतु एकैको जनः स्वभ्रातृमित्रसमीपवासिनो हन्तु।
ततो लेवेः सन्ताना मूससो वाक्यात् तथा चक्रुः, तद्दिने लोकानां त्रिसह- २८
स्राणि विनेशुः। यतो मूसा अवदत् युष्माकमेकैको जनः स्वपुत्त्रभ्रात्रादे २९
र्विपक्षः सन् अद्य परमेश्वरमुद्दिश्य स्वात्मानं पवित्रं करोतु तेन सोऽस्मिन्
दिने युष्मान् आशीर्व्वदिष्यति।

परेहनि मूसा लोकानाचचक्षे यूयं महापापं कृतवन्त इदानीमहं ३०
परमेश्वरान्तिकम् आरोहामि यदि भवेत् तर्हि युष्मत्पापस्य प्रायश्चित्तं
करिष्यामि। मूसाः परमेश्वरान्तिकं प्रतिगत्यावादीत् हन्त जना एते ३१
महापापं कुर्व्वन्तः स्वार्थं स्वर्णदेवतां निर्ममिरे। यदि भवेत् तर्हि तेषां ३२
पापं क्षमस्व नो चेत् त्वल्लिखितपुस्तकात् मन्नाम कृन्तेति विनयेहं।
परमेशो मूससं जगाद यो मत्प्रतिकूलं पापमकार्षीत् अहं स्वपुस्तकात् ३३
तन्नाम कर्त्तिष्यामि। अतो गच्छ यं देशमधि त्वां गदितवान् तं देशं ३४
लोकान् नय पश्य मद्दूतस्त्वदग्रे यास्यति किन्त्वहं दण्डदिवसे तान् दण्ड-
यिष्यामि। लोका हारोणं वत्सं निरमापयन् तस्मात् परमेश्वरो ३५
लोकान् व्याजघान।

---

३३ त्रयस्त्रिंशोऽध्यायः।

१ जनैः सार्कं यातुं ईश्वरानिच्छा ४ जनानां दुःखं ७ शिविरवहिरावासनयनं ९ तत्रेश्वरोत्तरं १२ परमेश्वराय मूसोनिवेदनं १८ परमेश्वरपश्चाद्भागदर्शनञ्च।

ततः परमेश्वरो मूससमवादीत् गच्छाहं त्वद्वंशाय देशमिमं दास्या- १
मीति वाक्येनाहमिब्राहीम इस्हाको याकूवः समीपे यं देशमधि शपथं
कृतवान् तं दुग्धमधुप्रवाहिदेशं गन्तुं मिसर्द्देशात् त्वयानीतजनान् इतो
नय। त्वदग्रेहं दूतं प्रहित्य किनानीयइमोरीयहित्तीयपिरोषीयहिव्वी- २
यियिवूषीयान् दूरयिष्यामि। अहं युष्मन्मध्ये न यास्यामि यतो यूयम- ३
बाध्याः, चेदहं मार्गमध्ये युष्मान् संहरेयं।

इति दुर्व्वाक्यं श्रुत्वा लोका विलेपुः कोपि स्वशरीरेऽलङ्कारं न ४
परिदधौ। यतः परमेश्वरो मूससमुवाच त्वम् इस्रायेल्वंशान् इति ५
वद यूयमबाध्यास्चेदहमेकनिमेषेण युष्मन्मध्यं गत्वा युष्मान् संहरेयं

अतो यूयं स्वस्वदेहादाभरणानि मोचयत, पश्चात् युष्मान् प्रति यत्
६ कर्त्तव्यं तदहं विवेक्ष्यामि। इस्रायेल्वंशा आ होरेबद्रिसमीपात् स्वाभर-
णानि दवयामासुः।
७ ततो मूसा आवासमादाय शिविराद्वहिः शिविराद् दूरे च निदधे
तन्नाम समाजावास इति चक्रे; तत्कालमारभ्य परमेश्वरान्वेषिणो
८ जनाः शिविराद्वहिः समाजावाससमीपं गच्छन्ति। ततो यदा यदा मूसा
आवासान्तिकं गच्छति तदा सर्व्वे लोका उत्थाय स्वस्वदूष्यद्वारे तिष्ठन्ति
यावच्च मूसा आवासं न प्रविशति तावत् ते तं समालोकन्ते।
९ मूसा यदा यदावासं प्रविशति तदा तदा मेघस्तम्भो ऽवरुह्या-
१० वासद्वारे ऽवतिष्ठते परमेश्वरो मूससा साकम् आलपति च। तत
आवासद्वारे स्थितं मेघस्तम्भं दृष्ट्वा सर्व्वे लोका उत्थाय प्रत्येकशः स्वीय
११ दूष्यद्वारे तिष्ठन्तः प्रणमन्ति। मनुष्यो यथा मित्रेण समं संलपति तथा
परमेश्वरः सम्मुखे तिष्ठन् मूससा साकं संलपति, ततो मूसाः शिविरं
प्रत्यागच्छति, किन्तु तस्य सेवको नूनस्य पुत्रो युवा यिहोशूय आवास-
मध्यान्न वहिर्गच्छति।
१२ मूसाः परमेश्वरं जगाद पश्य त्वं लोकानेतान् नेतुम् मामाज्ञापयसि,
किन्तु मम यं सहायं प्रेरयिष्यसि त्वया तत्परिचयो मह्यं न दत्तस्तथापि
१३ नाम्नाहं त्वां जानामि मम दृष्ट्या त्वमनुग्रहपात्रमिति कथयसि। भद्रं
यदि तव दृष्ट्यानुग्रहपात्रं भवेयं तर्हि विनये यदहं त्वां ज्ञातुं शक्नोमि
तव दृष्ट्यानुग्रहं प्राप्नोमि तदर्थं मां स्वमार्गं ज्ञापय, एवैव जातिस्तव
१४ लोका इति स्मर च। तदा स उक्तवान् यो ममैव वदनस्वरूपः स त्वया
१५ साकं गमिष्यति, त्वामहं विश्रामयिष्यामि। ततः स कथितवान् यदि
तव वदनस्वरूपो मया साकं न गच्छति तर्हि त्वम् अस्मान् इतो मा नय।
१६ यतोहं तव लोकाश्च तव दृष्ट्यानुग्रहपात्राणीति केन ज्ञायते? किम्
अस्माभिः सह तव गमनेन नहि? तथात्वे ऽहं तव लोकाश्च पृथिव्याः
१७ सर्व्वलोकेभ्यो विशेषलोका भवेम। परमेश्वरो मूससमवदत्, यामिमां
वाचं त्वमकथयः, तामप्यवश्यं साधयिष्यामि यतस्त्वं मम दृष्ट्यानुग्रह-
पात्रम् अहं नाम्ना त्वां जानामि।
१८ ततः सोवदद् अहं विनये त्वं मां स्वमहिमानं दर्शय। परमेश्वरोवदद्
१९ अहं स्वसर्व्वोत्तमत्वं तव सम्मुखेन गमयिष्यामि त्वत्सम्मुखे परमेश्वरस्य
नाम प्रचारयिष्यामि च; अहं यस्मिन् अनुग्रहं चिकीर्षामि तमेवानुग्र-

च्छामि यं दयितुम् इच्छामि तमेव दये। अपरमुक्तवान् मन्मुखं द्रष्टुं त्वया २०
न शक्यते मां दृष्ट्वा कोपि न जीवति। परमेश्वर उवाच पश्य ममान्तिके २१
स्थानमेकमस्ति त्वम् एतत्पर्व्वतोपरि तिष्ठ। तत्र त्वदन्तिकेन मन्महिम्नो २२
गमनकालेऽहं त्वां गिरिगह्वरे निधास्यामि मम गमनस्य शेषं यावत्
करेण त्वामाच्छादयिष्यामि। मया करे उत्तोलिते त्वं मत्पश्चाद्भागं २३
द्रक्ष्यसि किन्तु मन्मुखं कोपि द्रष्टुं न शक्नोति।

---

३४ चतुस्त्रिंशोध्यायः।

१ प्रस्तरद्वयमादाय मूससः पर्व्वतगमनं ४ परमेश्वरेण स्वनामप्रकाशनं ८ मूसोनिवेदनं १० परमेश्वरोत्तरं १८ नानाप्रकाराज्ञा २९ गिरेरवरोहणकाले मूससास्यतेजःप्रकाशनञ्च।

ततः परमेश्वरो मूससमवदत् त्वं पूर्व्ववद् द्वौ प्रस्तरफलकौ खन, त्वया १
भग्नयोः प्रस्तरयो र्या या वाचो लिखिता आसन् ताः सर्व्वाः प्रस्तरयोर-
नयोरहं लेखिष्यामि। त्वं प्रातः सज्जमानः प्रभाते सीनयपर्व्वतमारुह्य २
तत्शृङ्गे मदन्तिकमुपस्थास्यसि। किन्तु त्वया साकं अपरः कोप्युपरि नाग- ३
च्छतु एतत्कृत्स्नाद्रौ कोपि न दृश्येत गोमेषादयोऽप्येतदद्रिसम्मुखे न
चरेयुः।

मूसाः पूर्व्ववत् प्रस्तरद्वयं खनित्वा प्रातरुत्थाय कराभ्यां प्रस्तरद्वयं ४
गृहीत्वा परमेश्वराज्ञानुसारात् सीनयाद्रेरुपरि गतवान्। परमेश्वरो ५
मेघेनावरुह्य तत्र तेन साकं स्थित्वा परमेश्वरस्य नाम प्रचारयामास।
परमेश्वरस्तस्य समक्षं गत्वा इदं प्राचारयत् परमेश्वरः प्रभुः परमेश्वरः ६
कृपालुरनुग्राहकश्चिरसहिष्णुश्च दयासत्याभ्यां परिपूर्णः। सहस्राणि ७
पुरुषान् प्रति दयाकारी अधर्म्माज्ञालङ्घनपापानां क्षमाकृत् किन्तु तद्-
गृह्णत् तृतीयचतुर्थपुरुषान् यावत् पुत्त्रपौत्त्रान् प्रति पितृपुरुषाणां
पापफलदाता च।

ततो मूसाः शीघ्रं भूमौ पतन् तं प्रणमन् भजंश्च कथयामास हे प्रभो ८
यद्यहं तव दृष्ट्यानुग्रहं लभेयं तर्हि विनये हे मम प्रभो भवान् अस्मन्म- ९
ध्यमागच्छतु एतल्लोकेष्ववाध्येष्वप्यस्माकमधर्म्मपापे प्रमोच्य अस्मान् स्वाधि-
कृतानिवानुगृह्णातु।

तदा स उक्तवान् पश्याहं नियममेकं करोमि सर्व्वपृथिव्यां सर्व्वजग- १०
न्मध्ये यादृशानि कदापि नाक्रियन्त तादृगाश्चर्य्याणि कर्म्माणि तव सर्व्व-

लोकानां समक्षं करिष्यामि तेन येषां लोकानां मध्ये त्वमसि ते परमे-
श्वरीयां क्रियां द्रक्ष्यन्ति यस्मात् तवान्तिके यत् करिष्यामि तद् भयङ्करं।
११ अद्याहं त्वां यदाज्ञापयामि तत्र मनो निधेहि; पश्चाहं इमोरीय-
किनानीय-हित्तीय-पिरिषीय-हिव्वीय-यिबूषीयान् जनान् तव सम्मुखाद्
१२ अपसारयिष्यामि। किन्त्ववधेहि यं देशं त्वं यासि तद्देशवासिभिः साकं
१३ नियमं मा कार्षीः नो चेत् युष्मन्मध्ये स उन्माथरूपो भविष्यति। किन्तु
त्वं तेषां वेदी भंक्ष्यसि तेषां प्रतिमा भंक्ष्यसि चैत्यवृक्षांश्च छेत्स्यसि।
१४ स्वगौरवरक्षीति नाम्ना विख्यातो यः परमेश्वरः सएव स्वगौरवं रक्षति
१५ तस्मात् त्वमन्यदेवं न प्रणंस्यसि। नो चेत् तद्देशवासिभिः सह त्वया नियमे
कृते यदा ते स्वदेवैः साकं व्यभिचरन्ति देवेभ्यो वलिं ददति तदा केन-
१६ चिन्निमन्त्रितस्त्वं वलिं भक्षिष्यसि स्वपुत्राणां कृते तेषां कन्या ग्रहीष्यसि
स्वदेवैः साकं व्यभिचरन्त्यस्तेषां कन्यास्तव सुतान् स्वदेवैः साकं व्यभि-
१७ चारयिष्यन्ति। त्वं स्वार्थं निषिक्तां कामपि प्रतिमां मा कार्षीः।
१८ त्वं किण्वशून्यपूपानां महं पालयिष्यसि आवीव्मासस्य यदा यत्
कर्त्तुं आज्ञापयं तद्वत् सप्त दिनानि किण्वशून्यपूपान् खादिष्यसि, यत-
१९ स्तदावीव्मासे त्वं मिसर्देशाद् वहिरागमः। सर्व्वे प्रथमजाताः पुत्रा
२० गोमेषपुंवत्साश्च मम। किन्तु गर्दभवत्सं मेषवत्समूल्येन मोचयिष्यसि
यदि न मोचयसि तर्हि तस्य गलं भंक्ष्यसि त्वदीयवंशप्रथमजान्
सर्व्वान् सुतान् मोचयिष्यसि। कोपि रिक्तहस्तो मत्सम्मुखं नोपतिष्ठेत्।
२१ त्वं षड्दिनानि कर्म्म करिष्यसि किन्तु सप्तमे दिने विश्रमिष्यसि
कर्षणशस्यकर्त्तनकालयोरपि विश्रमिष्यसि।
२२ त्वं सप्ताहमहम् अर्थात् गोधूमसंग्रहणस्य प्रथमफलमहं, तथा
वर्षान्त्यभागे फलसंग्रहणस्य महं करिष्यसि।
२३ युष्माकं तावन्तः पुमांसो प्रति वर्षम् इस्रायेलीश्वरप्रभुपरमेश्वरस्य
२४ साक्षात् त्रिरुपस्थास्यन्ति। अहं त्वत्सम्मुखादन्यजातीं द्रवयिष्यामि
त्वत्सीमां विस्तारयिष्यामि वर्षमध्ये त्रिः स्वप्रभोः परमेश्वरस्य सम्मुखं
उपस्थातुं त्वयि गते त्वद्देशं प्रति कोपि न लोभं करिष्यति।
२५ त्वं किण्वेन समं वले रक्तं नोत्स्रक्ष्यसि निस्तारमहीयं वस्तु
२६ प्रातर्यावत् केनापि न रक्षिष्यते। भूम्याः प्रथमजातफलानि स्वप्रभुपरमे-
श्वरस्य गृहमानेष्यसि छागवत्समांसं तस्य मातृदुग्धेन समं न पक्ष्यसि।
२७ परमेश्वरो मूससमवदत् त्वमेतानि वचनानि लिख यत एतद्वचना-

नुसारात् त्वया इस्रायेल्लोकैश्च साकं मया नियमो निरनायि । मूसाः २८
परमेश्वरेण साकं तत्र चत्वारिंशत् दिवारात्रीरन्नं न भुक्ता तोयं न
पीत्वा तस्थौ स प्रस्तरयो र्नियमवाक्यानि दशाज्ञा लिलेख ।

पश्चात् सीनयगिरे र्मूससोऽवरोहणकाले स साक्षिप्रस्तरकरः सन् २९
गिरेरवरुरोह किन्तु परमेश्वरेण समं कथाकथनकाले स्वास्यं दीप्तिमद-
भूदिति मूसा न विवेद । यदा हारोण इस्रायेलः सन्तानाश्च मूससं ३०
ददृशुः, तदा तदास्यचर्म्म दीप्तिमदासीत् तेन ते तदन्तिकं यातुं विभ्युः ।
किन्तु मूससा तेष्वाहूतेषु हारोणः समाजाध्यक्षाश्च तदन्तिकं प्रत्यागताः ३१
ततो मूसास्तैः समं समलपत् । अपरम् इस्रायेलः सर्व्वेषु वंशेषु तद- ३२
न्तिकं गतेषु स सीनयाद्रौ परमेश्वरोक्ताज्ञास्तेभ्यो ददौ । तैः साकं ३३
मूससः संलपनस्य समाप्तौ सत्यां स स्वमुखमाच्छादयत् । तत्काल- ३४
मारभ्य स परमेश्वरेण साकं कथां कथयितुं प्रविश्य वहिरागमनपर्य्यन्तं
तद्वस्त्रं मोचयति वहिरागत्य परमेश्वरस्य सर्व्वा आज्ञा इस्रायेल्वंशं
वदति च । तेन मूसस आस्यचर्म्म दीप्तिमदभूदितीस्रायेल्वंशास्तस्यास्यं ३५
प्रति दृक्पातं कृत्वा पश्यन्ति ततो मूसाः परमेश्वरेण साकं संलपितुं
यावदन्त र्न गच्छति तावत् स्वास्यं वाससा पुनराच्छादयति ।

---

३५ पञ्चत्रिंशोऽध्यायः ।

१ विश्रामवारकथनं ४ दूष्याय देयं वस्तु २० देयवस्तु दातुं जनानां प्रवृत्तिः ३० तत्कर्म्म कर्त्तुं वित्सलेलाहलीयावयो र्नियोजनं ।

ततो मूसा इस्रायेलीयवंशानां कृत्स्नसमाजं मेलयित्वा जगाद, १
परमेश्वर एतानि वाक्यानि पालयितुं युष्मानादिशत् । यूयं षड्दिनानि २
कर्म्म करिष्यथ किन्तु सप्तमं दिनं युष्माकं पूतं परमेश्वरोद्देश्यं विश्राम-
दिनञ्च भविष्यति तद्दिने यः कश्चित् कर्म्म करिष्यति स घानिष्यते ।
ततो यूयं विश्रामदिने स्वस्ववासस्थाने वह्निं न ज्वालयिष्यथ । ३

मूसा इस्रायेल्वंशानां सर्व्वसमाजं पुनरवादीत् परमेश्वर इत्था- ४
दिशत् । यूयं परमेश्वराय स्वतो नैवेद्यं संगृह्णीत तद् दातुं य एषिष्यति ५
स परमेश्वराय स्वर्णं रूप्यं पित्तलं नीलधूम्ररक्तवर्णसूक्ष्मवस्त्राणि छागलो- ६
मानि रक्तीकृतमेषचर्म्माणि तहश्चर्म्माणि शिटीम्काष्ठानि दीपार्थतैलं ७
अभिषेकार्थतैलार्थं सुगन्धिधूपार्थञ्च गन्धद्रव्याणि एफोद्वक्षःपट्टार्थं हरि- ९
न्मण्यादयः खचनीयमणय एतानि निवेदनीयानि वस्तून्यानेष्यति । युष्माकं १०

सर्व्वे विज्ञजना आगत्य परमेश्वरेणाज्ञापितानि सर्व्ववस्तूनि निर्म्मान्तु,
११ अर्थत आवासतद्दूष्याच्छादनग्रन्थिफलकवहनदण्डस्तम्भपदाधारा मञ्जू-
१२ षातद्वहनदण्डपापाच्छादनविच्छेदवसनानि भोजनासनतद्वहनदण्डना-
१४ नापात्रदर्शनपूपा दीप्त्यर्थदीपवृक्षतत्पात्रदीपदीपार्थतैलानि धूपवे-
१५ दितद्वहनदण्डावभिषेकार्थतैलसुगन्धिधूपावासप्रवेशद्वाराच्छादनवस्त्राणि
१६ होमवेदितत्पित्तलजालवहनदण्डनानापात्राणि प्रक्षालनपात्रतत्पादौ
१७ प्राङ्गणयवनिकातत्स्तम्भपदाधाराः प्राङ्गणद्वाराच्छादनवसनमावासप्राङ्ग-
१८ णयो रज्जुकीलाः पवित्रस्थानीयसेवार्थवस्त्राणि चार्थतो हारोणया-
१९ जकार्थपूतवस्त्राणि याजनपदसेवार्थतत्सुतवासांसि च सर्व्वाण्येतानि तैः
क्रियन्तां।

२० अनन्तरं इस्रायेल्वंशानां समाजस्थाः सर्व्वे लोका मूससः सम्मुखात्
२१ प्रतस्थिरे। ततो येषां मनःसु प्रवृत्तिवाञ्छे अभूतां ते समाजावासस्य
निर्म्माणार्थं तत्सम्बन्धीयेश्वरसेवार्थं पवित्रवस्त्रार्थञ्च परमेश्वराय नैवे-
२२ द्यम् आनिन्युः। पुरुषस्त्रीणां यति प्रवृत्तमनस आसन् ते सर्व्वे समागत्य
वलयकुण्डलाङ्गुरीयकहारान् स्वर्णालङ्कारान् आनिन्युः ये परमेश्वराय
२३ नैवेद्यमानिन्युस्ते सर्व्वे स्वर्णमयं नैवेद्यं निवेदयामासुः। येषां नीलधूम्र-
रक्तवर्णसूक्ष्मवस्त्राणि छागलोमानि रक्तीकृतमेषचर्म्माणि तहश्चर्म्माणि
२४ चासन् ते सर्व्वे तान्यानिन्युः। येन रूप्यपित्तलोपहार आनीतः स पर-
मेश्वराय तं निवेदयामास, यस्य चान्तिके शिटीम्काष्ठमासीत् स
२५ सेवनकर्म्मार्थं तदानीतवान्। बुद्धिमत्यो नार्य्यः स्वकरैः सूत्राणि निर्म्माय
२६ नीलधूम्ररक्तवर्णसूत्राणि सूक्ष्मवासांसि चानिन्युः। प्रवृत्तमनसो बुद्धिमत्यः
२७ स्त्रियश्छागलोम्ना सूत्राणि चक्रुः। एफोदो वक्षःपट्टास्त्र कृते ऽध्यक्षा
२८ हरिन्मण्यादीन् खचनार्थमणीन् दीपार्थमभिषेकतैलार्थं सुगन्धिधूपार्थञ्च
२९ गन्धद्रव्यतैले समानिन्युः। इस्रायेलो वंशा इच्छातः परमेश्वरमुद्दिश्य
नैवेद्यम् आनिन्युः फलतः परमेश्वरो मूसोद्वारा यद्यत् कर्त्तुमादिदेश
तत्सर्व्वेभ्यः कर्म्मभ्यो यस्य यस्य पुरुषस्य स्त्रिया वा मनोवाञ्छाभूत् ते
नैवेद्यम् आनिन्युः।

३० मूसा इस्रायेल्वंशं पुनरवादीत् पश्यत यिहूदावंशीयहूरस्य पौत्रम्
३१ ऊरेः पुत्रं वित्सलेलं परमेश्वरो नाम्नाकृत। विद्यया बुद्ध्या ज्ञानेन
३२ नानाशिल्पकर्म चित्रकर्म स्वर्णरूप्यपित्तलानां खननं खचनार्थमणिखननं
३३ नानाशिल्पार्थं काष्ठखननञ्चैतानि कर्माणि कर्त्तुम् ईश्वरीयात्मना तं पूर-

यामास। एतानि शिक्षयितुं तस्य दानवंशीयाहीषामकस्य सुताहली- ३४
यावस्यान्तःकरणं प्रावर्त्तयत्। खनितुं शिल्पकर्म च कर्त्तुं नीलधूम्ररक्त- ३५
वर्णसूक्ष्मसूत्रैः सूचिकर्म कर्त्तुं तन्तुवायस्य कर्म कर्त्तुं तदन्यशिल्पकर्म
चित्रकर्म च कर्त्तुं तेषामन्तःकरणानि विद्यया पर्य्यपूरयत्।

---

३६ षट्त्रिंशोऽध्यायः।

१ कर्म्मकर्त्तां कृतद्रव्यसमर्पणं ४ अन्यकर्म्म कर्त्तुं निवारणं ८ किरूवो यवनिकाकथनं १४ छागलोमीययवनिकाकथनं २० फलककथनं ३१ अर्गलकथनं ३५ विच्छेदवासःकथनं ३७ दूष्यद्वाराच्छादनवसनकथनञ्च।

अनन्तरं परमेश्वरस्य सर्व्वाज्ञानुसारेण पवित्रस्थानस्य सेवनकर्म कर्त्तुं १
येभ्यः परमेश्वरो विद्याबुद्धी अदात् ते वित्सलेलाहलीयावादयः सर्व्वे
सद्विवेचका जना परमेश्वरस्य सर्व्वं कर्म कर्त्तुम् आरेभिरे। मूसा वित्- २
सलेलाहलीयावौ परमेश्वराद् अन्तःकरणप्राप्तविद्यान् जनान् येषाञ्च कर्म
करणायागन्तुं प्रवृत्ति र्जाता तांश्च सर्व्वान् आह्वत। पूतस्थानस्य सेवार्थं ३
तन्निर्म्माणार्थञ्च इस्रायेल्वंशा यानि वस्तून्यानयन् तानि ते मूससोऽगृह्णन्,
तदा लोकैः प्रतिप्रभातं तदन्तिकं स्वेच्छया तदधिकानि द्रव्याण्यानीतानि।

अपरं पूतस्थानस्य सर्व्वकर्मकारिणो विज्ञलोकाः स्वस्वकर्म्मत आगत्य ४
मूससमवदन्, परमेश्वरो यद्यत् निर्मातुम् आदिशत् ततोऽधिकानि ५
सेवार्थद्रव्याणि लोकैरानीयन्ते। ततो मूसा आदिश्य शिविरस्य सर्व्वत्र ६
घोषयामास पुमान् स्त्री च पूतस्थानार्थं निवेदनीयं वस्तु पुन र्नासादयेत्
ततो लोका आनेतुं न्यवर्त्तन्त। यतः सर्व्वकर्मकरणाय प्रचुराणि ततोऽधि- ७
कानि च वस्तूनि तैरानीतानि।

कर्मकारिविज्ञा जना वर्त्तितसूक्ष्मसूत्रै र्नीलधूम्ररक्तवर्णसूत्रैश्च ८
आवासस्य दश यवनिकाश्चक्रुस्तत्र किरूवाकृतिशिल्पकर्म चक्रुः। प्रति- ९
यवनिकावस्त्रं अष्टाविंशहस्तदैर्घ्यं चतुर्हस्तविस्तारं सर्व्वाण्येकपरिमा-
णान्यासन्। तासां पञ्च यवनिका योजयामास तदन्याः पञ्च यवनिकाश्च १०
योजयामास। संयोक्तव्ययोः शेषयवनिकयोरेकस्या अन्ते नीलसूत्रपुटि- ११
काश्चकार, तद्वत् संयोक्तव्ययोः शेषयवनिकयो र्द्वितीयाया अन्तेऽपि
चकार। प्रथमयवनिकायां पञ्चाशत् पुटिकाश्चकार, संयोक्तव्यद्वितीय- १२
यवनिकाया अन्तेपि पञ्चाशत् पुटिकाश्चकार ताः पुटिकाः समवर्त्तिन्यः।

१३ ततः स स्वर्णस्य पञ्चाशत् ग्रन्थीन् निर्म्माय ते यवनिके समयोजयत् तेनैक
आवासोभूत्।
१४ आवासोर्द्धमाच्छादयितुं छागरोम्नामेकादश यवनिकाश्चकार तासां
१५ एकैकयवनिका त्रिंशद्धस्तदैर्घ्या चतुर्हस्तविस्तृता ता एकादश यवनिकाः
१६ समपरिमाणा आसन्। स पञ्चयवनिकाः पृथकत्वेन षड्यवनिकाश्च
१७ पृथक्त्वेन समयोजयत्। संयोक्तव्ययोः शेषयवनिकयोरेकस्या अन्ते
पञ्चाशत् सूत्रपुटिकाश्चकार तद्वत् संयोक्तव्यद्वितीययवनिकाया अन्तेऽपि
१८ पञ्चाशत् पुटिकाश्चकार। संयोज्य दूष्यमेकं कर्त्तुं पञ्चाशत् पित्तलग्रन्थीन्
१९ चकार। अपरं स रक्तीकृतमेषचर्म्मभि र्दूष्याच्छादनमेकं तदुपरि तहश्-
चर्म्मभिरन्यदाच्छादनञ्च कृतवान्।
२० ततः स शिटीम्काष्ठेन आवासस्य दण्डायमानफलकानि निर्म्ममे।
२१ एकैकं फलकं दशहस्तदीर्घं सार्द्धहस्तविस्तृतं। प्रतिफलकं परस्परं सम-
२२ दूरे द्वौ द्वौ पादावास्ताम् इत्थं स आवासाय सर्व्वफलकानि निर्म्ममे। स
२४ दक्षिणदिक्स्थदक्षिणपार्श्वाय विंशतिफलकानि निर्म्ममे। तेषां विंशति-
फलकानामधश्चत्वारिंशत् रूप्यपदाधारान् कृतवान् सर्व्वफलकाधो
द्वयोर्द्वयोः पदयोः कृते द्वौ द्वौ पदाधारौ तदन्यफलकाधो द्वयो र्द्वयोः
२५ पदयोः कृते द्वौ द्वौ पदाधारौ चकार। आवासान्यपार्श्वार्थम् अर्थात्
२६ उत्तरपार्श्वार्थं विंशतिफलकानि निर्म्ममे। तेषां चत्वारिंशत् रूप्यपदा-
धारा अर्थात् प्रतिफलकाधो द्वौ द्वौ पदाधारौ तदन्यफलकाधो द्वौ द्वौ
२७ पदाधारौ चकार। आवासपश्चिमपार्श्वार्थं षट् फलकानि चकार।
२८ आवासपश्चात् पार्श्वकोणद्वयार्थं द्वे द्वे फलके चकार। तयोरधोभागौ
२९ संयुक्तौ, तद्वत् ते शिरःस्थितं प्रथमवलयं यावत् संयुक्ते, द्वयोः कोणयो-
३० रिदं तेन कृतं। ततोऽष्टौ फलकानि, एकैकफलकाधो द्वौ द्वौ पदाधारौ,
इत्थं रौप्याः षोडश पदाधारा आसन्।
३१ ततः स शिटीम्काष्ठेनार्गलान् निर्म्ममे आवासैकैकपार्श्वफलकेषु
३२ पञ्चार्गलान् अन्यपार्श्वफलकेषु च पञ्चार्गलान् पश्चिमदिक्स्थपश्चात्पार्श्वस्य
३३ फलकेषु पञ्चार्गलान् ददौ। फलकानामेकस्मादन्ततोन्यदिगन्तं यावत्
३४ मध्यवर्त्त्यर्गलं प्रवेशयामास। स सर्व्वफलकानि स्वर्णेनामण्डयत् अर्गल-
स्थानाय स्वर्णवलयान् निर्म्मायार्गलानपि स्वर्णेनामण्डयत्।
३५ ततः परं स नीलधूम्ररक्तवर्त्तितसूत्रै र्निर्म्मितं किरूवाकृतिविचित्रितम्
३६ एकं विच्छेदवस्त्रं चकार। तदर्थं शिटीम्काष्ठस्य चतुरः स्तम्भान् कृत्वा

तान् स्वर्णैरमण्डयत् तदर्थं स्वर्णमयान् कीलकान् चकार रूप्येण तेषां
चतुरः पदाधारान् कृतवान्।
स आवासद्वारार्थं नीलधूम्ररक्तवर्त्तितसूत्रैः सूचिकर्म्मवत् एकमाच्छा- ३७
दनवस्त्रं निर्म्ममे। तस्य पञ्च स्तम्भान् कीलकांश्च चकार तेषां मूर्द्धः ३८
शलाकाश्च स्वर्णै मण्डयामास किन्तु तेषां पञ्च पदाधारान् पित्तलेन
चकार।

---

३७ सप्तत्रिंशोध्यायः।

१ मञ्जूषाकथनं ६ पापाच्छादनकिरूवकथनं १० भोजनासनपात्रयोः कथनं १७ दीपवृक्षप्रदीपानां कथनं २५ धूपवेदिकथनं २९ पवित्रतैलकथनञ्च।

वितसलेल् शिटीम्काष्ठेन सार्द्धद्विहस्तदैर्घ्यां सार्द्धहस्तविस्तारां १
सार्द्धहस्तोच्चां मञ्जूषां निर्म्माय तदन्तर्वहिश्च निर्म्मलस्वर्णै मण्डयामास २
तच्चतुर्दिक्षु स्वर्णकर्णिकां निर्म्ममे। चतुरः स्वर्णवलयान् निषिच्य तच्च- ३
तुर्षु कोणेषु निदधे तदेकपार्श्वे द्वौ वलयौ तदन्यपार्श्वे च द्वौ वलयौ
निदधे। शिटीमकाष्ठीयौ वहनदण्डौ कृत्वा तौ स्वर्णेन मण्डयामास। ४
मञ्जूषां वोढुं मञ्जूषापार्श्वस्थवलयेषु तौ वहनदण्डौ प्रवेशयामास। ५
स निर्म्मलस्वर्णेन सार्द्धद्विहस्तदैर्घ्यं सार्द्धहस्तविस्तारम् पापाच्छादनं ६
निर्म्ममे। एकखण्डस्वर्णम् आहृत्य तदाच्छादनान्तयो र्द्वौ किरूवौ निर्म्ममे। ७
एकस्मिन् प्रान्ते किरूवैकं, अन्यस्मिन् प्रान्ते किरूवैकं निहितवान्, ८
आच्छादनस्य प्रान्तद्वये तत्संयुक्तौ द्वौ किरूवौ निर्म्ममे। तौ किरूवौ ९
पक्षान् ऊर्द्धं विस्तार्य्य तत्पक्षैराच्छादनमाच्छादयामासतुः परस्परं
सम्मुखं कारयित्वा पापाच्छादनं प्रति मुखे निदधे।
स शिटीमकाष्ठेन द्विहस्तदीर्घं हस्तैकविस्तृतं सार्द्धहस्तोच्चमेकं भोज- १०
नासनं निर्म्ममे। तन्निर्म्मलस्वर्णेन मण्डितवान् तच्चतुर्द्दिक्षु स्वर्णकर्णिकां ११
चकार। तदर्थं चतुर्दिक्षु चतुरङ्गुलपरिमितं पार्श्वकाष्ठं चकार तत्पार्श्व- १२
काष्ठस्य चतुर्दिक्षु स्वर्णकर्णिकां कृतवान्। तदर्थं स्वर्णस्य चतुरो वलयान् १३
चकार तस्य चतुर्णां पादानां चतुष्कोणेषु वलयान् बबन्ध, आसनवहन- १४
दण्डाधारार्थं तान् पार्श्वकाष्ठस्य समीपे बबन्ध। भोजनासनं वोढुं १५
शिटीमकाष्ठेन वहनदण्डौ कृत्वा तौ स्वर्णेन मण्डितवान्। आसनोपरि- १६
पात्राण्यर्थंतस्तस्य पात्राणि चमसान् गोलाधारान् निषेक्तुं पात्राणि
निर्म्मलस्वर्णेन निर्म्ममे।

१७ स निर्म्मलं स्वर्णमाहृत्य दीपवृक्षं निर्म्ममे तस्य प्रकाण्डः शाखा वर्त्तु-
१८ लाधाराः कलिकाः पुष्पाणि तदंशा अभवन्। दीपवृक्षस्यैकतः शाखात्रयं
१९ तदन्यतश्च शाखात्रयम् एताः षट् शाखास्तत्पार्श्वयो र्निरगमन्। एकशा-
खायां वादामपुष्पाकृतयस्त्रयो गोलाधारा एका कलिका पुष्पञ्चैकं तदन्य-
शाखायां वादामपुष्पाकृतयस्त्रयो गोलाधारा एका कलिका पुष्पञ्चैकं,
२० दीपवृक्षात् निर्गतासु षट्शाखास्वेतानि बभूवुः। दीपवृक्षस्य वादाम-
२१ पुष्पाकृतयश्चतस्रो गोलाधारास्तत्कलिकाः पुष्पाणि चासन्। तस्मात् याः
षट्शाखा निरगमन् तासां द्वयोः शाखयोरध एका कलिका अन्य-
शाखयोरध एका कलिका तदन्यशाखयोरध एका कलिका चासीत्।
२२ एताः कलिकाः शाखाश्च तदंशा आसन् कृत्स्नो दीपवृक्षो निर्म्मलस्वर्ण-
२३ निर्म्मितः। तस्य सप्त प्रदीपाः कर्त्तर्य्यस्तत्पात्राणि च निर्म्मलस्वर्णनिर्म्मि-
२४ तानि। स एकतालान्तमितस्वर्णेन तं तदीयपात्राणि च निर्म्ममे।

२५ स शिटीमकाष्ठेन हस्तैकदैर्घ्यां हस्तैकविस्तारां हस्तैकोच्चां चतुष्कोणां
२६ धूपवेदिं निर्म्ममे तत्र शृङ्गाणि चक्रे। तामर्थतस्तदूर्द्ध्वभूमिं तच्चतु-
ष्पार्श्वान् तच्छृङ्गाणि निर्म्मलस्वर्णेन मण्डितवान् तच्चतुर्दिक्षु स्वर्णकर्णिकां
२७ निर्म्ममे। तद्वहनदण्डस्थापनाय कर्णिकाधो द्वयोः पार्श्वयोः कोणयोः
२८ स्वर्णवलयद्वयं निदधे। शिटीमकाष्ठेन वहनदण्डौ चक्रे स्वर्णेन च
मण्डितवान्।

२९ अपरं स अभिषेकार्थं पूततैलं गन्धवणिजां क्रियानुसारात् शुचिं
सुगन्धिधूपञ्च चक्रे।

---

३८ अष्टत्रिंशोध्यायः।

१ होमवेदिकथनं ८ पित्तलस्य प्रक्षालनपात्रकथनं ९ प्राङ्गणकथनं २१ निवेदित-
मुख्यद्रव्यकथनञ्च।

१ स शिटीम्काष्ठेन पञ्चहस्तदैर्घ्यां पञ्चहस्तविस्तारां हस्तत्रयोच्चां चतु-
२ ष्कोणां होमवेदिं निर्म्ममे। तस्याश्चतुर्षु कोणेषु शृङ्गाणि निर्म्ममे शृङ्गाणि
३ तदंशा आसन् तां पित्तलेन मण्डितवान्। अपरं वेद्याः सर्व्वपात्रं अर्थात्
४ कटाहदर्वीचुल्लीत्रिशूलकुण्डानि च पित्तलेन निर्म्ममे। वेद्या वारण्यधो
५ मध्यं यावत् जालवत् कर्म्मणा पित्तलस्य जालं निर्म्ममे। वहनदण्डौ
६ निधातुं पित्तलीयजालस्य चतुर्षु कोणेषु चतुरो वलयान् निदधे।
७ शिटीम्काष्ठेन वहनदण्डौ निर्म्माय पित्तलेन मण्डयामास। वेदिं वोढुं

तत्पार्श्वयोस्तौ वहनदण्डौ वलयेषु निदधे, फलकै र्वेदिम् अन्तःशून्यां
निर्म्ममे।
या योषितो समाजावासद्वारान्तिके सिषेविरे तासां पित्तलनिर्म्मितै ८
र्दर्पणैः स प्रक्षालनपात्रं तत्पादञ्च निर्म्ममे।
स प्राङ्गणं चक्रे दक्षिणदिशि प्राङ्गणस्य दक्षिणपार्श्वीययवनिका वर्त्तित- ९
सूत्रेण शतहस्तास्तासां विंशतिस्तम्भान् पित्तलस्य विंशतिपदाधारान् १०
रूप्यस्य स्तम्भकीलकशलाकाश्च चक्रे। उत्तरदिशि यवनिकाः शतहस्ता- ११
स्तासां विंशतिस्तम्भान् पित्तलस्य विंशतिपदाधारान् रूप्यस्य शलाकाश्च
चक्रे। पश्चिमाया यवनिकाः पञ्चाशत्हस्ता दश स्तम्भान् दश पदाधारान् १२
रूप्यस्य शलाकाश्च चक्रे। पूर्व्वस्यां पूर्व्वपार्श्वस्य पञ्चाशद्धस्तदैर्घ्यं; प्राङ्गण- १३
द्वारस्यैकदिशोऽर्थं पञ्चदशहस्ता यवनिका स्तम्भत्रयं त्रीन् पदाधारान् १४
द्वारस्यान्यदिशोऽर्थञ्च पञ्चदशहस्ता यवनिका त्रीन् स्तम्भान् त्रीन् पदा- १५
धारान् निर्म्ममे। प्राङ्गणचतुर्दिशां यवनिका वर्त्तितसूत्रनिर्म्मिताः। १६
स्तम्भानां पदाधाराः पित्तलमयाः स्तम्भानां कीलकशलाका रूप्यमयाः १७
स्तम्भमस्तका रूप्यमण्डिताः प्राङ्गणस्य सर्व्वे स्तम्भा रूप्यशलाकाभिः
संयुक्ताः। प्राङ्गणद्वारस्याच्छादनवस्त्रं नीलधूम्ररक्तवर्त्तितसूत्रैः सूचि- १८
कर्म्मणा चकार तस्य दीर्घता विंशतिहस्ता, विस्तारो ऽर्थत उच्चत्वं
प्राङ्गणयवनिकावत् पञ्च हस्ताः। तस्य चतुरः स्तम्भान् पित्तलस्य चतुरः १९
पदाधारान् रूप्यकीलकान् रूप्यमण्डितमूर्द्ध्नो रूप्यशलाकाश्च चक्रे।
आवासस्य प्राङ्गणचतुर्दिक्षु सर्व्वकीलान् पित्तलस्य चक्रे। २०
आवासस्यार्थात् साक्षिरूपावासस्य वस्तून्येतानि लेवीयलोकानां २१
सेवार्थं मूसस आज्ञानुसारात् हारोणयाजकस्य सुतेथामरेण गणितानि।
परमेश्वरो मूससं यदादिशत् तदनुसारेण यिहूदावंशजातो हूरस्य २२
पौत्र ऊरेः पुत्रो बित्सलेल् तानि निर्म्ममे। नीलधूम्ररक्तवर्त्तितसूत्रैः २३
शिल्पकारी खनको विचित्रतन्तुवायो यो दान्वंशजातोऽहीषामकस्य सुत
अहलीयावः स तत्सहकृद् आसीत्। पवित्रावासस्य सर्व्वत्र सर्व्व- २४
कर्म्मणि स्वर्णान्येतानि व्ययितानि अर्थात् पूतावासस्य शेकलानुसारात्
ऊनत्रिंशत् तालान्ताः सप्तशतानि त्रिंशत् शेकलानि परिमितानि
नैवेद्यस्य सर्व्वस्वर्णानि। तथा पवित्रावासस्य शेकलानुसारात् शतं २५
तालान्ताः सहस्रं सप्तशतानि पञ्चसप्तति शेकलानि च परिमितानि
समाजस्य गणितलोकानां रूप्याणि। विंशतिवर्षवयस्कास्तदधिकवयस्का २६

वा ये सार्द्धपञ्चशताधिकसहस्रत्रयाधिकषट्लक्ष सङ्ख्यका जनास्तेषामे-
कैकेन जनेनैकैका वेका अर्थात् पवित्रावासस्य शेकलानुसारात् अर्द्धं
२७ अर्द्धं शेकलं दातव्यं। तैः शततालान्तरूप्यैः पूतावासस्य विच्छेदकवस्त्रस्य
च पदाधारा निषिक्ताः शतपदाधारकृते शततालान्ता अर्थात् एकैकपदा-
२८ धारकृत एकैकतालान्तो व्ययितः। अवशिष्टैः पञ्चसप्ततिसप्तशताधिक-
सहस्रशेकलरूप्यैः स स्तम्भकीलकान् निर्म्ममे स्तम्भमूर्द्ध्नो मण्डितवान् तान्
२९ शलाकाभिः समयोजयच्च। नैवेद्यस्य पित्तलाः सप्ततितालान्ताश्चतुः-
३० शताधिकसहस्रद्वयशेकलान्यासन्। तैः समाजावासस्य द्वारपदाधारास्तस्य
पित्तलमयी वेदिस्तस्याः पित्तलमयं जालं वेद्याः सर्व्वपात्राणि च निर्म्मि-
३१ तानि। प्राङ्गणस्य चतुर्दिशः पदाधारान् प्राङ्गणद्वारपदाधारान् आवा-
सस्य सर्व्वकीलान् प्राङ्गणचतुर्दिशः सर्व्वकीलांश्च निर्म्ममे।

---

३९ ऊनचत्वारिंशोऽध्यायः।

१ पवित्रवस्त्राणामेफोदश्च कथनं ८ वक्षःपटीकथनं २२ एफोदो वस्त्रकथनं २७ उष्णीषा-
दिकथनं ३० पवित्रमुकुटपत्रकथनं ३२ आवासस्य सर्व्वकर्म्मसमापनञ्च।

१ अपरं पूतस्थानसेवार्थं लोकै र्नीलधूम्ररक्तसूत्रै र्वासांसि कृतानि
विशेषतो मूससं प्रति परमेश्वरस्य निदेशानुसाराद् हारोणार्थं पूतवा-
२ सांसि निर्म्मितानि। स्वर्णेन नीलधूम्ररक्तवर्त्तितसूत्रैश्च तैरेफोद् निर्म्ममे।
३ स्वर्णमाहत्य पत्रं कृत्वा विचित्रकर्म्मणा नीलधूम्ररक्तसूक्ष्मवस्त्रस्य मध्ये
४ वातुं सूत्राणि कृतानि। एफोदो योजनाय तैः स्कन्धपट्यौ कृते, तयोः
५ प्रान्तद्वयेन तत् समयोजि। मूससं प्रति परमेश्वराज्ञानुसारात् एफोद
उपरिस्थं विचित्रकटिबन्धनं तत्कर्म्मानुसारात् स्वर्णेन नीलधूम्ररक्तवर्त्ति-
६ तसूत्रैश्च निर्म्मितं। ते खनितमुद्रावत् इस्रायेल्वंशानां नामभिः खनित-
७ हरिन्मणी स्वर्णस्थाल्यो र्बबन्धुः। एफोदः स्कन्धपट्योरुपरि तौ निवेशया-
मासुः मूससं प्रति परमेश्वराज्ञानुसाराद् इस्रायेल्वंशस्य स्मरणार्थं
प्रस्तरावेतावभूतां।

८ एफोद्वत् स स्वर्णेन नीलधूम्ररक्तवर्त्तितसूत्रैश्च विचित्रकर्म्मणा वक्षः-
९ पटीं निर्म्ममे। सा चतुरस्रासीत् ताञ्च ते द्विगुणीकृत्य दैर्घ्ये विस्तारे च
१० प्रादेशप्रमाणां चक्रुः। चतुःपंक्तिमणिभिस्तां खचितवन्तः प्रथमपंक्तौ चुनि-
११ पद्मरागताम्रमणय आसन्। द्वितीयायां पंक्तौ मरकतनीलकान्तहीर-
१२ काणि ददौ। तृतीयायां पंक्तौ लशुनीययिस्मकटाहेला ददौ। चतुर्थपंक्तौ

गोदन्तवैदूर्य्यसूर्य्यकान्तान् ददौ स्वर्णस्थाल्यो मणिभिरेतैः खचिताः। इमे १३
प्रस्तरा इस्रायेल्वंशार्थं तेषां नामानुसारात् द्वादशाभवन् मुद्रावत् १४
एकैकप्रस्तरे द्वादशवंशानामेकैकं नामाभूत्। वक्षःपट्याः कोणयो र्निर्म्मल- १५
स्वर्णेन वर्त्तितौ शृङ्खलौ निर्म्ममे। द्वे स्वर्णस्थाल्यौ द्वौ स्वर्णवलयौ च १६
निर्म्माय वक्षःपट्या द्वयोः कोणयोस्तौ वलयौ बबन्ध। वक्षःपट्याः १७
कोणस्थयो र्वलययो र्मध्ये द्वे वर्त्तिते शृङ्खले निदधे। वर्त्तितशृङ्खलयो १८
र्द्वावग्रभागौ द्वाभ्यां स्थालीभ्यां बद्धा तावेफोदो ऽग्रभागे स्कन्धपट्योरुपरि
निदधे। स्वर्णवलयौ निर्म्माय वक्षःपट्या अभ्यन्तरे द्वयोः कोणयोरेफोदः १९
सम्मुखे तौ निदधे। स्वर्णस्यापरौ वलयौ निर्म्माय एफोदः स्कन्धपट्या २०
अधो यत्र संयोग आस्ते तस्याः श्रेण्याः सम्मुखे एफोदो विचित्रकटि-
बन्धनोपरि निदधे। मूससं प्रति परमेश्वरस्य निदेशानुसाराद् वक्षः- २१
पटी यदेफोदो न पतन्ती एफोदो विचित्रकटिबन्धनोपरि तिष्ठेत,
तदर्थं ते नीलसूत्रेण एफोदो वलयाभ्यां साकं वक्षःपट्या वलयौ बद्धा
निदधिरे।

मूससं प्रतीश्वराज्ञानुसारात् स एफोदो नीलवसनं ववौ। तन्मध्ये २२
वर्म्मनश्छिद्रवत् छिद्रं चक्रे तच्छिद्रमच्छिन्नं तस्य प्रान्तश्चतुर्दिक्षु तेनावायि। २३
मूससं प्रति परमेश्वराज्ञानुसारात् ते तद्वसनस्य पार्श्वोपरि नीलधूम्र- २४
रक्तै र्वर्त्तितसूत्रै र्दाडिमफलानि निर्म्ममिरे। ते निर्म्मलस्वर्णेन किङ्किणीः २५
कृत्वा वस्त्राञ्चलस्य चतुर्दिक्षु दाडिमानां मध्येषु तत्किङ्किणीः स्थापया-
मासुः। अर्थात् एका किङ्किणी तत एको दाडिमस्तत एका किङ्किणी २६
तत एको दाडिम इत्थं सेवनार्थवस्त्रस्याञ्चलचतुर्दिक्षु चक्रुः।

मूससं प्रति परमेश्वराज्ञानुसारात् ते हारोणस्य तत्पुत्राणाञ्च कृते २७
सूत्रनिर्म्मितानुत्तरासङ्गान् सूक्ष्मवस्त्रकिरीटं सूक्ष्मसूत्रनिर्म्मितान् उष्णी- २८
षान् वर्त्तितसूत्रमयकटिवस्त्राणि च चक्रिरे। नीलधूम्ररक्तै र्वर्त्तितसूत्रैः २९
सूचिकर्म्मणा कटिबन्धनमेकं चक्रिरे।

मूससं प्रति परमेश्वरस्य निदेशानुरूपं ते निर्म्मलस्वर्णेन पूतकिरीटस्य ३०
पत्रं निर्म्माय खनितमुद्रावत् तदुपरि परमेश्वरम् उद्दिश्य पवित्रतेति
लिलिखुः। ऊर्द्ध्वे बद्धुं किरीटोपरि तन्नीलसूत्रै र्बबन्धुः। ३१

इत्थं समाजावासस्य दूष्यीयं सर्व्वं कर्म्म समाप्तिमगात् मूससं प्रति ३२
परमेश्वरस्य निदेशानुसारात् इस्रायेल्वंशाः सर्व्वकर्म्माणि चक्रिरे। ततस्ते ३३
मूसान्तिकं तमावासं आनिन्युः तस्य दूष्यं सकलभाजनानि ग्रन्थयः

३४ फलकानि अर्गलाः स्तम्भाः पदाधारा रक्तीकृतमेषतहश्चर्म्माच्छादकौ
३५ विच्छेदकवासः साक्ष्यमञ्जूषा तद्वहनदण्डौ पापाच्छादनं भोजनासनं
३७ तदीयानि सर्व्वभाजनानि दर्शनीयपूपाः निर्मलो दीपवृक्षस्तदीयदीपा
३८ अर्थात् तस्य दीपावलिस्तदीयपात्राणि दीपार्थतैलं, स्वर्णमयी वेदिर-
३९ भिषेकार्थतैलं धूपार्थं सुगन्धिद्रव्याण्यावासद्वारस्याच्छादकवसनं पित्तल-
वेदिस्तत्पित्तलजालस्तद्वहनदण्डौ सर्व्वभाजनानि प्रक्षालनपात्रं तत्-
४० पादः प्राङ्गणस्य यवनिकास्तस्य स्तम्भाः पदाधाराः प्राङ्गणद्वाराच्छादन-
वस्त्रं तस्य रज्जवः कीलाश्च समाजदूष्यावासस्य सेवनार्थं सर्व्वभाज-
४१ नानि, पवित्रस्थान ईश्वरं सेवितुं वासांसि हारोणयाजकस्य पवित्र-
४२ वासांसि तत्सुतानां याजनपदेन सेवार्थवासांसि च इत्यादि यद्यत्
कर्म्म मूससं प्रति परमेश्वर आज्ञापयत् इस्रायेलवंशास्तानि सर्व्वाणि
४३ निर्म्ममे। मूसास्तानि कर्म्माणि पश्यन् तैः परमेश्वरीयादेशानुसारादेव
सर्व्वाणि कृतानीति ज्ञातवान् तदा मूसास्तान् आशिषं बभाषे।

४० चत्वारिंशोध्यायः।

१ आवासस्योत्थापनं अभिषेचनञ्च १२ हारोणतत्सुतानां पावनं १७ परमेश्वराज्ञया मूससः सर्व्वकर्म्मकरणं ३४ मेघवह्निरूपस्तम्भकथनञ्च।

१ ततः परमेश्वरो मूससं जगाद त्वं प्रथममासस्य प्रथमदिने समाजा-
२ वासस्य दूष्यं स्थापयिष्यसि। तन्मध्ये साक्ष्यमञ्जूषां निधाय विच्छेदक-
४ वाससा तां संगोपयिष्यसि। भोजनासनम् अभ्यन्तरमानीय तदुपर्य्यनुक्र-
मात् निरूपितानि वस्तूनि निधास्यसि, दीपवृक्षम् अभ्यन्तरम् आनीय
५ तस्य दीपान् ज्वालयिष्यसि। स्वर्णमयीं धूपवेदिं साक्ष्यमञ्जूषायाः
६ सम्मुखे निधास्यसि आवासद्वारस्य आच्छादकवस्त्रं निधास्यसि। समा-
७ जावासस्य द्वारस्य सम्मुखे होमवेदिं निधास्यसि। समाजदूष्यवेद्यो र्मध्ये
८ प्रक्षालनपात्रं निधाय तत्र जलं दास्यसि। चतुर्दिक्षु चत्वरं करिष्यसि
९ तद्द्वार आच्छादनवस्त्रम् उल्लम्बयिष्यसि। अभिषेकार्थं तैलं गृहीत्वा
आवासं तदीयं सकलवस्तु चाभिषिच्य तत् तदीयसर्व्वं पावयिष्यसि
१० तस्मात् तत् सर्व्वं पवित्री भविष्यति। त्वं होमवेदिं तदीयं सकलपा-
त्रञ्चाभिषिच्य पवित्री करिष्यसि तेन सातीव पवित्रा वेदि र्भविष्यति।
११ प्रक्षालनपात्रं तदीयपादञ्चाभिषिच्य पवित्री करिष्यसि।
१२ पश्चात् त्वं हारोणं तत्सुतांश्च समाजावासस्य द्वारान्तिकम् आनीय

जलैः स्नपयिष्यसि। मामुद्दिश्य याजनकर्म कर्त्तुं हारोणं पूतवासांसि १३
परिधाप्याभिषिच्य पवित्री करिष्यसि। तदीयसुतान् आनीय उत्तरीय- १४
वसनानि परिधापयिष्यसि। तेषां पितरं यथाभिषिक्तवान् तथा १५
मामुद्दिश्य याजयितुं तानपि समभिषेक्ष्यसि यतः सोऽभिषेकस्तेषां
पुरुषपरम्परायां नित्ययाजकत्वस्य मूलं भविष्यति। मूसास्तादृशं चक्रे, १६
स परमेश्वराज्ञानुरूपं सर्व्वकर्म्माणि कृतवान्।

ततो मूससं प्रति परमेश्वराज्ञानुसारतः स द्वितीयवत्सरस्य प्रथम- १७
मासस्य प्रथमदिन आवासं स्थापयामास। मूसा आवासं स्थापयित्वा १८
तस्य पदाधारान् बद्धा तत्फलकानि स्थापितवान् अर्गलान् प्रवेश्य
तत्स्तम्भान् उदतोलयत्। स आवासोपरि दूष्यं स्थापितवान् दूष्योपर्य्या- १९
च्छादकं विस्तारितवान्।

मूससं प्रति परमेश्वराज्ञानुसारतः स साक्ष्यपुस्तकं गृहीत्वा २०
मञ्जूषामध्ये निदधे मञ्जूषावहनदण्डौ निधाय मञ्जूषोपर्य्यूर्द्ध्वे पापाच्छादनं
निहितवान्। स आवासमध्यं मञ्जूषामानिनाय आच्छादनार्थं विच्छेद- २१
कवसनम् उल्लम्ब्य साक्ष्यमञ्जूषां संगोपयामास।

मूससं प्रति परमेश्वराज्ञानुसारतः स आवासस्योत्तरे पार्श्वे विच्छेद- २२
कवस्त्रस्य वहिः समाजदूष्ये भोजनासनं निदधे, परमेश्वरस्य सम्मुखे २३
तदुपरि विधिवत् पूपान् निदधे च।

मूससं प्रति परमेश्वराज्ञानुसारतः स भोजनासनस्य सम्मुख आवा- २४
सस्य दक्षिणपार्श्वे समाजदूष्ये दीपवृक्षं निदधे, परमेश्वरस्य सम्मुखे २५
दीपान् प्रज्वालयामास च।

मूससं प्रति परमेश्वरस्य निदेशानुसारतः स समाजदूष्ये विच्छेदक- २६
वस्त्रस्य सम्मुखे स्वर्णवेदिं निदधे, तदुपरि सुगन्धिधूपान् ज्वालया- २७
मास च।

मूससं प्रति परमेश्वरस्य निदेशानुसारतः स आवासद्वारे तदा- २८
च्छादकवसनं उल्लम्बयामास। समाजदूष्यस्यावासद्वारस्य समीपे २९
होमवेदिं संस्थाप्य तदुपरि होमबलिनैवेद्यान्युत्ससर्ज।

मूससं प्रति परमेश्वरस्य निदेशानुसारात् स समाजदूष्यवेद्योर्मध्ये ३०
प्रक्षालनपात्रं निधाय तत्र प्रक्षालनार्थं तोयं निदधे। तत्र मूसा ३१
हारोणस्तत्सुताश्च स्वस्वहस्तपादान् क्षालितवन्तः। यदा यदा ते ३२
समाजदूष्यं प्रविशन्ति वा वेद्याः समीपमागच्छन्ति तदा तान् क्षाल-

२३ यन्ति। स आवासस्य वेद्याश्च चतुर्दिक्षु चत्वरं चक्रे, चत्वरद्वारस्यावरण-
वासः स्थापितवान्। इत्थं मूसास्तत् कार्य्यं समापयामास।
२४ ततो जीमूतेन तत्समाजदूष्ये समाच्छादिते परमेश्वरीयं तेज आवासं
२५ पर्य्यपूरयत्। मूसा समाजदूष्यं प्रवेष्टुं नाशक्नोत् यतो जीमूतस्तदुपर्य्य-
२६ वातिष्ठत पारमेश्वरं तेज आवासम् अपूपुरत्। आवासोपरितो जीमूते
२७ नीते इस्रायेल्वंशः स्वप्रतियात्रम् अग्रेऽसरत्। किन्तु यदि जीमूत ऊर्द्ध्वं
२८ नानेष्यत तर्हि यावदूर्द्ध्वं नानेष्यत तावत् ते यात्रा ना करिष्यत। इस्रा-
येल्सर्व्ववंशगोचरे दिवा तेषां यात्रायां परमेश्वरीयजीमूतो रजन्यां
वह्निरावासोपर्य्यवतस्थे।

लेवीयपुस्तकम्

अर्थात्

मूससा लिखितं तृतीयपुस्तकं।

१ प्रथमोऽध्यायः।

१ होमविधिः २ अर्थात् गोः १० मेषस्य १४ पक्षिणश्च होमस्य विधिः।

१ परमेश्वरो समाजावासात् मूससमाहूय कथामिमां बभाषे। त्वमि-
२ स्रायेल्वंशान् वद युष्माकं कश्चिद् यदि परमेश्वरस्य समीपं पशुवलिमा-
निनीषति तर्हि स गोव्रजाद् मेषादिव्रजाद्वा तम् आनयतु, कथामिमां
तेभ्यः कथय।
३ अपरं यदि होमार्थं व्रजात् गां जिघृक्षति, तर्हि निर्दोषं पुंपशुं ग्रही-
ष्यति, स परमेश्वरस्य सम्मुखे ग्राह्यार्थं समाजावासद्वारस्य समीपे
४ तमानीय होमवलेः शिरसि करमर्पयिष्यति, तेन स वलिस्तस्य प्राय-
५ श्चित्तरूपेण ग्राहिष्यते। ततः परमेश्वरस्य सम्मुखे तेन तस्मिन् वत्से
हते हारोणस्य सुता याजकास्तस्य शोणितं गृहीत्वा समाजावासद्वारस्य
६ समीपस्थवेद्युपरि चतुर्दिक्षु विकरिष्यन्ति। स तस्य कृत्तिं निर्मोच्य तं

खण्डखण्डी करिष्यति। हारोणयाजकस्य सुता वेद्युपरि वह्निं निधास्यन्ति ७
वह्नेरुपरि दारूणि सज्जयिष्यन्ति। हारोणस्य सुता याजकास्तस्या वेद्या ८
उपरिस्थवह्नेरिन्धनोपरि तस्य खण्डानि शिरोमेदश्च निधास्यन्ति। किन्तु ९
याजकस्तस्य नाडीपदान् तोयेन प्रक्षाल्य वेद्या उपरि सर्व्वं दाहयिष्यति
तेन स परमेश्वरमुद्दिश्य वह्निकृतः सुगन्धिहोमबलि र्भविष्यति।

यदि होतुं व्रजात् मेषं छागं वा जिहीर्षति तर्हि निर्दोषं पुंपशुं १०
गृहीत्वा वेद्याः पार्श्वे उत्तरस्यां दिशि परमेश्वरस्य सम्मुखे तं हनिष्यति ११
हारोणस्य पुत्रा याजका वेद्युपरि चतुर्दिक्षु तस्य शोणितं विकरिष्यन्ति।
तेन तस्मिन् खण्डखण्डीकृते याजको वेद्या उपरिस्थयो र्वह्निकाष्ठयोरुपरि १२
शिरसा मेदसा च सहितं तं सज्जयिष्यति। किन्तु याजकस्तस्य नाडी- १३
पादान् तोयेन प्रक्षाल्य सर्व्वं गृहीत्वा वेद्या उपरि दाहयिष्यति, तेन स
परमेश्वरमुद्दिश्य वह्निकृतः सुगन्धिहोमबलि र्भविष्यति।

यदि परमेश्वरमुद्दिश्य होतुं पक्षिणं जिहीर्षति तर्हि कपोतानां वा १४
युवपारावतानां मध्यात् तं ग्रहीष्यति। याजकस्तं वेद्याः समीपम् १५
आनीय तस्य शिरोऽवमर्द्य तं वेद्यां दाहयिष्यति तस्य शोणितं वेद्याः
पार्श्वे निष्पीडयिष्यति। ततः स तस्य मलेन साकम् आमाशयं गृहीत्वा १६
वेद्याः पूर्व्वपार्श्वे भस्मनः स्थाने तं निक्षेप्स्यति। ततः पक्षमूलं छेत्स्य- १७
ति किन्तु तं द्विभागं न करिष्यति, याजको वेद्या उपरिस्थितयो र्वह्नि-
काष्ठयोरुपरि तं दाहयिष्यति तेन स परमेश्वरमुद्दिश्य वह्निकृतः
सुगन्धिहोमबलि र्भविष्यति।

---

२ द्वितीयोऽध्यायः।

१ नैवेद्यस्य विधिः ४ अर्थात् चुल्लीजातनैवेद्यकथनं ५ पात्रे भृष्टनैवेद्यकथनं ७ कटाहे भृष्टनैवेद्यकथनं १२ प्रथमफलकथनं १३ नैवेद्यासादनकथनञ्च।

केनचित् परमेश्वरमुद्दिश्य नैवेद्ये कृते स सूक्ष्मगोधूमचूर्णेन नैवेद्यं १
करिष्यति तदुपरि तैलमभिषिच्य कुन्दुरुं दत्त्वा हारोणस्य सुतानां याज- २
कानां सन्निधिम् आनेष्यति ततो याजकस्तस्मात् मुष्टिमेकं सूक्ष्मगोधूमचूर्णं
किञ्चित् तैलं सर्व्वकुन्दुरुञ्च गृहीत्वा परमेश्वरमुद्दिश्य स्मरणार्थं वेद्या
उपरि दाहयिष्यति, तेन तत्परमेश्वरम् उद्दिश्य वह्निकृतं सुगन्धिनैवेद्यं
भविष्यति। एतन्नैवेद्यावशिष्टांशो हारोणस्य तस्य सुतानाञ्च भविष्यति ३
परमेश्वरम् उद्दिश्य हवनीयद्रव्यमिदमतीव पवित्रं भवति।

४ चुल्लीपक्वद्रव्यनिवेदनकाले तैलमिश्रिताः किण्वशून्याः सूक्ष्मगोधूम-
चूर्णपिष्टका वा तैलाक्ताः किण्वशून्याः सूक्ष्मपिष्टका वा तव नैवेद्यं
भविष्यन्ति।
५ भाजनभृष्टद्रव्यनिवेदनकाले किण्वशून्यतैलमिश्रितानि सूक्ष्मगोधूम-
६ चूर्णानि पक्त्वा तत् खण्डखण्डीकृत्य तदुपरि तैलम् निषेक्ष्यसि तदेव
तव नैवेद्यं भविष्यति।
७ कटाहभृष्टद्रव्यनिवेदनकाले तैलयुतानि सूक्ष्मगोधूमचूर्णानि तव नैवेद्यं
८ भविष्यन्ति। त्वं तद्द्रव्यस्य नैवेद्यं परमेश्वरस्य समीपमानीय याज-
९ काय दास्यसि, स तद् वेद्याः समीपम् आनेष्यति। स्मरणार्थं तन्नै-
वेद्यस्य किञ्चिद् आदाय वेद्यां दाहयिष्यति। तेन तत् परमेश्वरोद्देशकम्
१० अग्निकृतं नैवेद्यं भविष्यति। तन्नैवेद्यावशिष्टांशं हारोणतत्सुतानां
११ भविष्यति परमेश्वरमुद्दिश्य होतव्यद्रव्यमिदमतीव पूतं भवति। यूयं
परमेश्वरम् उद्दिश्य किण्वयुक्तं नैवेद्यं नानेष्यथ तथा परमेश्वरम्
उद्दिश्य होतव्यनैवेद्येन साकं किण्वं मधु च किञ्चिदपि न दाहयिष्यथ।
१२ प्रथमफलीयनैवेद्यस्यायं विधिः, यूयं परमेश्वरम् उद्दिश्य तन्निवे-
दयिष्यथ किन्तु सुगन्ध्यर्थं वेद्या उपरि तन्न ज्वालयिष्यथ।
१३ किञ्च नैवेद्यस्य सर्व्वद्रव्याणि लवणाक्तानि करिष्यथ, ईश्वरनियमितस्य
१४ लवणस्य न्यूनमकृत्वा सर्व्वनैवेद्यैः साकं लवणं निवेदयिष्यथ। तव
प्रथमफलस्य नैवेद्यं परमेश्वरमुद्दिश्य निवेदनकाले त्वं वह्निशुष्कस्य
सम्पूर्णकणिशस्य मर्द्दितान् कोमलान् कणान् तव प्रथमफलस्य नैवेद्यार्थं
१५ निवेदयिष्यसि। तदुपरि तैलं दास्यसि कुन्दुरुञ्च निधास्यसि तदेव
१६ नैवेद्यमेकं भविष्यति। याजकः स्मरणार्थं तस्य किञ्चित् मर्द्दितं शस्यं
किञ्चित् तैलं सर्व्वकुन्दुरुञ्च दाहयिष्यति तेन तत् परमेश्वरम् उद्दिश्य
वह्निकृतं नैवेद्यं भविष्यति।

---

३ तृतीयोध्यायः।

१ मङ्गलार्थबले विधिः ६ मङ्गलार्थबलये मेषशावकस्य १२ छागलस्य कथनं।

१ मङ्गलार्थबलिदानकाले गोरुत्सृष्टा निर्दोषं पुरुषं स्त्रियं वा पशुम्
२ परमेश्वरस्य सम्मुखम् आनेष्यति। स्वबलेः शिरसि करमर्पयित्वा समा-
जावासस्य द्वारे तं बलिं छेत्स्यति पश्चात् हारोणस्य सुता याजकास्तस्य

शोणितं वेद्युपरि चतुर्दिक्षु विकरिष्यन्ति। ततः परमेश्वरम् उद्दिश्य ३
मङ्गलार्थकस्य बले र्हवनीयम् उत्स्रक्ष्यति, अर्थतस्तस्य नाडीच्छादकं ४
मेदो ऽन्त्रोपरिस्थितं पार्श्वस्थमेदो द्वौ मेदोग्रन्थी तदुपरिस्थितं पार्श्व-
स्थमेदो यकृत उपरिस्थम् अन्त्राशावकं मेदोग्रन्थिभ्यां साकं विमोच-
यिष्यति। ततो हारोणस्य पुत्रा वेद्या उपरिस्थवह्निकाष्ठद्रव्यो- ५
परि तत् सर्व्वं दाहयिष्यन्ति तेन तत् परमेश्वरम् उद्दिश्य वह्निकृतं
सुगन्धिहव्यं भविष्यति।

परमेश्वरम् उद्दिश्य मङ्गलार्थबलिदानकाले मेषादेरुत्सृष्टा निर्दोषं ६
पूरुषं वा स्त्रियं बलिम् उत्स्रक्ष्यति। मेषशावकस्योत्स्रष्टा स्वीयबलिं ७
परमेश्वरस्य समीपमानीय स्वीयबलेः शिरसि करमर्पयित्वा समाजा-
वासस्य सम्मुखे तं बलिं छेत्स्यति हारोणस्य सुता वेद्या उपरि चतु- ८
र्दिक्षु तच्छोणितं विकरिष्यन्ति। परमेश्वरम् उद्दिश्य मङ्गलार्थकस्य ९
बले र्हवनीयम् उत्स्रक्ष्यति, अर्थतस्तस्य लाङ्गूलस्य मेरुदण्डस्य समी-
पाद् विमोचयिष्यति नाडीछादकं मेदो नाड्या उपरिस्थं मेदो द्वौ १०
मेदोग्रन्थी तदुपरिस्थपार्श्वमेदो यकृत उपरिस्थान्त्राशावकं मेदोग्रन्थिभ्यां
समं विमोचयिष्यति। ततो याजकस्तत् वेद्या उपरि दाहयिष्यति ११
तेन तत् परमेश्वरमुद्दिश्य वह्निकृतं भक्ष्यं भविष्यति।

अजस्योत्सृष्टा स्वीयबलिं परमेश्वरस्य सम्मुखम् आनीय तच्छि- १२
रसि करमर्पयित्वा समाजावासस्य सम्मुखे तं छेत्स्यति हारोणस्य १२
सुता वेद्या उपरि चतुर्दिक्षु तस्य शोणितं विकरिष्यन्ति। पश्चात् १४
स तस्य हवनीयद्रव्यं परमेश्वरम् उद्दिश्य उपहारं करिष्यति अर्थात्
नाडीछादकमेदो नाड्युपरिस्थं सर्व्वमेदो द्वौ मेदोग्रन्थी तदुपरिस्थपा- १५
र्श्वस्थमेदो यकृत उपरिस्थान्त्राशावकं मेदोग्रन्थिभ्यां साकं मोचयिष्यति।
ततो याजको वेद्या उपरि तत् सर्व्वं दाहयिष्यति तेन तद् वह्निकृतं १६
सुगन्धिभक्ष्यं भविष्यति कृत्स्नमेदः परमेश्वरस्य भविष्यति। युष्माकं १७
पुरुषपरम्परायां सर्व्वनिवासेषु नित्यविधिरयमेको भविष्यति यूयं
मेदः शोणितञ्च किञ्चिदपि न भोक्ष्यध्वे।

---

४ चतुर्थोऽध्यायः।

१ याजकाज्ञातपापार्थं बलिदानकथनं १३ समाजाज्ञातपापार्थं बलिदानकथनं २२

अध्यक्षाज्ञातपापार्थं बलिदानकथनं २२ साधारणलोकानामज्ञातपापार्थं बलि-
दानकथनञ्च।

१ अनन्तरं परमेश्वरो मूससमवदत् त्वमिस्रायेलो वंशं वद यदि कश्चिन्
२ न बुद्धा पापं करोत्यर्थतः परमेश्वरस्याज्ञाभि र्निषिद्धानां सर्व्वकर्म्मणां
३ किञ्चन कर्म्म करोति विशेषतोऽभिषिक्तो याजको यदि पापं कृत्वा
लोकान् अपराधिनः करोति, तर्हि स स्वकृतपापात् परमेश्वरमुद्दिश्य
४ प्रायश्चित्तार्थं निर्दोषमेकं गोवत्सम् उत्स्रक्ष्यति। ततः समाजावासस्य
द्वारसमीपे परमेश्वरस्य सम्मुखे तं गोवत्समानीय तस्य शिरसि करमर्प-
५ यित्वा परमेश्वरस्य सम्मुखे तं छेत्स्यति। अभिषिक्तो याजकस्तस्य
गोवत्सस्य किञ्चित् शोणितं गृहीत्वा समाजावासमध्यम् आनेष्यति।
६ तच्छोणिते याजकः स्वाङ्गुलिं मज्जयित्वा परमेश्वरस्य सम्मुखे पवित्र-
स्थानस्य विच्छेदवसनस्याग्रभागे तच्छोणितस्य किञ्चित् सप्तकृत्वो विक-
७ रिष्यति। पश्चात् याजकस्तस्य शोणितस्य किञ्चिद् आदाय समाजा-
वासस्य मध्यस्थितसुगन्धिधूपस्य वेद्याः शृङ्गेषु परमेश्वरस्य सम्मुखे दास्यति
वत्सस्य कृत्स्नं शोणितं गृहीत्वा समाजावासस्य द्वारस्थिताया होम-
१० वेद्या मूले निषेक्ष्यति। मङ्गलार्थबलौ यथा कर्त्तव्यं, तथा प्रायश्चित्तीय
वत्सस्यापि नाडीछादकमेदो ऽन्त्रोपरिस्थं मेदो द्वौ मेदग्रन्थी तदुप-
रिस्थपार्श्वस्थमेदो यकृत उपरिस्थान्त्राशावकं मेदग्रन्थिभ्यां साकं मोच-
११ यिष्यति, याजको होमवेद्या उपरि तानि दाहयिष्यति। तस्य वत्सस्य
१२ चर्म्मशिरःपदान्त्रगोमयैः सहितं सर्व्वमांसं गृहीत्वा शिविरस्य वहिः
शुचिस्थानम् अर्थात् भस्मक्षेपणस्थानम् आनीय काष्ठोपरि वह्नौ
दाहयिष्यति, यत्र स्थाने भस्म क्षिप्यते तत्र तं दाहयिष्यति।

१३ इस्रायेल्वंशस्य सर्व्वसमाजो यदि न बुद्धा समाजस्याज्ञातं पापं
करोति परमेश्वरस्य कस्याश्चिदाज्ञाया विरुद्धम् अकर्त्तव्यं कर्म्म यदि तैः
१४ क्रियते, तर्हि त अपराधिनो भविष्यन्ति। तै र्यत् पापं कृतं तस्मिन् पापे
प्रकाशिते सति समाजस्तत्पापात् गोवत्समेकं समाजावाससमीप-
१५ मानीय उत्स्रक्ष्यति। समाजस्य प्राचीनजनाः परमेश्वरस्य सम्मुखे
तस्य शिरसि करान् अर्पयिष्यन्ति ततः स परमेश्वरस्य सम्मुखे
१६ छेत्स्यते। पश्चाद् अभिषिक्तो याजकस्तस्य शोणितस्य किञ्चित्
१७ समाजावासमध्यमानेष्यति। याजकस्तत्र शोणिते निजाङ्गुलिं मज्जयित्वा
परमेश्वरस्य सम्मुखे विच्छेदवस्त्रस्याग्रभागे सप्तकृत्वस्तस्य किञ्चित् विक-

रिष्यति। तच्छोणितस्य किञ्चिद् आदाय परमेश्वरस्य सम्मुखे समाजा- १८
वासस्य मध्यस्थितवेद्याः शृङ्गेषु दास्यति ततः समाजावासस्य द्वार-
समीपस्थाया होमवेद्या मूले सर्व्वं शोणितं निषेच्यति। तस्मात् तस्य १९
सकलमेद आदाय वेद्या उपरि दाहयिष्यति। स प्रायश्चित्तस्य वत्सं २०
यादृशं करोति एनमपि तादृशं करिष्यति, इत्थं याजकेन तेषां
प्रायश्चित्ते कृते तेषां पापक्षमा भविष्यति। ततः स याजकस्तं वत्सं २१
शिविरस्य बहि र्नीत्वा प्रथमवत्सवत् तमपि दाहयिष्यति। समाजस्य
प्रायश्चित्तमिति।

यदि कश्चिद् अध्यक्षो न ज्ञात्वा पापं करोति परमेश्वरस्याज्ञाया २२
विरुद्धं अकर्त्तव्यं कर्म्म च करोति तर्हि सोऽपराधी भविष्यति। यत् पापं २३
तेन कृतं तत्पापे तस्मै ज्ञापिते सति स बलिं दातुम् एकं निर्दोषं
पुञ्छागवत्सम् आनेष्यति। पश्चात् स तस्य छागवत्सस्य शिरसि करम् २४
अर्पयित्वा होमबलिच्छेदनस्य स्थाने परमेश्वरस्य सम्मुखे तं छेत्स्यति,
सएव प्रायश्चित्तबलि र्भविष्यति। ततो याजकः प्रायश्चित्तबलेः किञ्चिद् २५
शोणितं गृहीत्वा निजाङ्गुल्या होमवेद्याः शृङ्गेषु दास्यति तस्य सर्व्वरक्तं
होमवेदिमूले निषेच्यति। मङ्गलार्थबले र्मेदोवत् तस्य सर्व्वमेदो गृहीत्वा २६
वेद्यां दाहयिष्यति इत्थं याजकेन तस्य पापस्य प्रायश्चित्ते कृते तस्य
पापक्षमा भविष्यति।

साधारणनृणां मध्ये यदि कश्चिद् अज्ञात्वा परमेश्वरस्याज्ञाया २७
विरुद्धं अकर्त्तव्यं कर्म्म कुर्व्वन् पापं करोति, तर्हि सोऽपराधी भविष्यति।
यत् पापं तेन कृतं तत्पापे तस्मै ज्ञापिते सति स तत्पापात् बलिं २८
दातुं व्रजात् निर्दोषां छागवत्सामेकाम् आनेष्यति। तत्प्रायश्चित्तबलेः २९
शिरसि करमर्पयित्वा होमबलिदानस्य स्थाने तत्प्रायश्चित्तस्य बलिं
छेत्स्यति। याजकोऽङ्गुल्या तस्य किञ्चित् रक्तं गृहीत्वा होमवेद्याः ३०
शृङ्गेषु दास्यति, तस्य सर्व्वरक्तं वेद्या मूले निषेच्यति। मङ्गलार्थबले र्नीत- ३१
मेदोवत् तस्य सकलमेदो मोचयिष्यति पश्चात् याजकः परमेश्वरम् उद्दिश्य
सुगन्ध्युपहारार्थं वेद्या उपरि तं दाहयिष्यति इत्थं याजकेन तदर्थं
प्रायश्चित्ते कृते तस्य पापक्षमा भविष्यति। यदि कश्चित् प्रायश्चित्तार्थं ३२
मेषशावकम् आनिनीषति तर्हि निर्दोषां मेषीम् आनेष्यति। तत्प्राय- ३३
श्चित्तबलेः शिरसि हस्तं दत्वा यत्र होमबलिश्छिद्यते तत्र प्रायश्चित्तबलिं
छेत्स्यति। ततो याजकोऽङ्गुल्या तस्य किञ्चिद् रक्तं गृहीत्वा होमवेद्याः ३४

२५ शृङ्गेषु दास्यति निःशेषं रक्तं वेदिमूले निक्षेप्स्यति। मङ्गलार्थबलेर्मेषशा-
वकस्य मेदोवत् तस्य सर्व्वमेदो मोचयित्वा परमेश्वरम् उद्दिश्य सुगन्धि-
नैवेद्यस्य विधिवत् वेद्यां दाहयिष्यति इत्थं याजकेन तस्य पापस्य प्राय-
श्चित्ते कृते तस्य पापं क्षमिष्यते।

---

५ पञ्चमोऽध्यायः।

१ साक्ष्यदानादिदोषे मेषस्य छागवत्साया वा बलिदानं ७ तदभावे कपोतबलिदानं ११ कपोताभावे गोधूमचूर्णनैवेद्यदानं १४ अज्ञानकृतदोषे मेषबलिकथनं १७ अज्ञानकृतसाधारणदोषे मेषबलिश्च।

१ यदि कश्चित् साक्षी भूत्वा शपथं श्रुत्वापि स्वेन यद् दृष्टं विदितं वा
२ तन्न प्रकाश्य पापं करोति तर्हि स स्वपापस्य शास्तिं भोक्ष्यति। यदि
कश्चित् न ज्ञात्वा अशुचिद्रव्यम् अर्थात् अशुचिपशोः शवं वाऽशुचि-
गोमेषादीनां शवम् अशुचिकीटस्य शवं स्पृशति तर्हि सोऽशुचि र्दोषी
३ च भविष्यति। वा मानुषस्य किमप्यशौचकृत् द्रव्यम् अर्थात् येन मनु-
ष्योऽशुचि र्भवति तादृशं किञ्चित् यद्यज्ञानात् स्पृशति तर्हि तेन तस्मिन्
४ ज्ञाते सोऽपराधी भविष्यति। अपरं वाचालतया मनुष्यै र्यद्वत् शप्यते,
तदनुसारात् सदसद्वा भवतु अहमिदं करिष्यामीति गदन् यदि
कश्चित् न ज्ञात्वा वाचालतया शपति, तर्हि स तज्ज्ञात्वा तेन दोषी
५ भविष्यति। एतादृशे कस्मिंश्चित् दोषे भूते तद्दोषिणा स्वपापं स्वीकार्य्यं।
६ ततः स स्वकृतपापार्थं प्रायश्चित्तनिमित्तं व्रजात् मेषवत्सां छागवत्सां
वा परमेश्वरस्य समीपं स्वदोषार्थं बलिम् आनेष्यति तेन याजक-
स्तस्य पापस्य प्रायश्चित्तं करिष्यति।

७ स यदि मेषवत्साम् आनेतुं न शक्नोति तर्हि स्वकृतदोषार्थं द्वौ कपोतौ
द्वौ पारावतवत्सौ वा परमेश्वरस्य समीपम् आनेष्यति। तयोरेकं
८ प्रायश्चित्तार्थं एकं होमार्थं भविष्यति। स तौ याजकस्य समीपमानीय
प्रायश्चित्तार्थं बलिमादावुत्सृज्य तस्य गलम् अवमर्द्दयिष्यति किन्तु न
९ छेत्स्यति। स प्रायश्चित्तबलेः किञ्चित् शोणितं गृहीत्वा वेद्याः पार्श्वे
विकरिष्यति शेषं सर्व्वरक्तं वेद्या मूले निषेक्ष्यति तेन तदेव प्रायश्चित्तं
१० भविष्यति। ततः स विधिना द्वितीयं होमार्थम् उत्स्रक्ष्यति, इत्थं
याजकेन तस्य पापार्थं प्रायश्चित्ते कृते तस्य पापक्षमा भविष्यति।
११ कपोतवत्सद्वयस्य पारावतवत्सद्वयस्य वा दानमपि यदि तस्याशक्यं

भवति, तर्हि स स्वपापस्य प्रायश्चित्तार्थं ऐफादशमांशं गोधूमचूर्णोपहा-
रम् आनेष्यति तदुपरि तैलं न दास्यति कुन्दुरुं न निधास्यति यस्मात्
तत् प्रायश्चित्तं भवति। तेन तस्मिन् याजकान्तिकम् आनीते याजकः १२
स्मरणार्थं तस्मात् मुष्टिमेकं गृहीत्वा परमेश्वरम् उद्दिश्य वह्निकृतोप-
हारवत् तं दाहयिष्यति तदेव प्रायश्चित्तं भविष्यति। याजकस्तत्कृत- १३
पापार्थं एतेषाम् एकेन प्रकारेण प्रायश्चित्तं करिष्यति तेन तस्य पापक्षमा
भविष्यति नैवेद्यस्य विध्यनुसारात् अवशिष्टद्रव्यं याजकस्य भविष्यति।

ततःपरं परमेश्वरो मूससमवदत् कश्चिद् यदि न बुद्ध्वा परमेश्वर- १४
स्याज्ञां लङ्घित्वा तस्य पवित्रवस्तुनो न्यूनत्वं करोति तर्हि स परमेश्वरम् १५
उद्दिश्य दोषबलिदानाय पवित्रस्थानस्य शेकलानुसारात् भवन्निरूपित-
मूल्यलभ्यं निर्दोषमेकं मेषबलिं व्रजात् आनेष्यति। पवित्रवस्तुनि तेन १६
या क्षतिः कृता तामपि परिशोत्स्यति पञ्चमांशादधिकम् अपरमेकमंशं
याजकाय दास्यति याजकेन दोषार्थकमेषबलिना तत्प्रायश्चित्ते कृते
तस्य पापक्षमा भविष्यति।

यदि कश्चित् परमेश्वराज्ञया निषिद्धं किञ्चन कर्म्म कुर्व्वन् पापं १७
करोति तर्हि स तद् अज्ञात्वापि अपराधी भवन् निजपापं भोक्ष्यति।
स दोषार्थं त्वन्निरूपितमूल्यलभ्यं निर्दोषं मेषबलिं व्रजात् याजकसमीपं १८
आनेष्यति याजकेन तदज्ञानकृतदोषार्थं प्रायश्चित्ते कृते तस्य पापक्षमा
भविष्यति। यः परमेश्वरस्य विरुद्धं दोषं करोति तस्यैव दोषार्थम् १९
एष बलि र्भविष्यति।

---

६ षष्ठोऽध्यायः।

१ प्रतिवासिविरुद्धदोषे बलिदानं ८ याजकानां शिक्षार्थं प्रकाशितो बलिदानस्य विधिः १४ नैवेद्यस्य विधिः १९ याजकाभिषेकनैवेद्यविधिः २४ प्रायश्चित्तविधिः।

अनन्तरं परमेश्वरो मूससं जगाद यदि कश्चन दोषं करोति परमे- १
श्वरस्य विरुद्धमन्यायं करोति यद्वा निक्षिप्तं स्वीयहस्ते समर्पितं वा २
अपहृतं वा वस्त्वधि समीपवासिने मृषा कथयति यद्वा स्वप्रतिवासिनं ३
वञ्चयति यद्वान्येन हारितं वस्तु प्राप्य तदधि मृषावाचं वक्ति मृषा-
शपथञ्च करोति एतेषां किञ्चनाधि कश्चन यदि पापी भवति तर्हि स ४
तत्पापहेतोरपराधी भविष्यति, यत्तेन बलेनापहृतं कापट्येन वा लब्धं,
स्वस्य समीपे निक्षिप्तं अन्येन हारितं वा यद्वस्तु तेन लब्धं, यस्मिन्

५ कस्मिंश्चित् वस्तुनि वा तेन मृषा शपथः कृतस्तानि वस्तूनि स पुनर्दास्यति,
तस्य दोषनिश्चयकाले द्रव्यस्वामिने मूलादधिकं पञ्चमांशं दास्यति च।
६ एतस्माद् दोषात् परमेश्वरम् उद्दिश्य व्रजात् त्वन्निरूपितमूल्यलभ्यं
७ निर्दोषं मेषबलिं याजकसमीपम् आनेष्यति। याजकः परमेश्वरस्य
सम्मुखे तदर्थं प्रायश्चित्तं करिष्यति ततो यत्र कुत्रापि तेन दोषः कृतः
स तस्मात् क्षमां प्राप्स्यति।
८ ततःपरं परमेश्वरो मूससं गदितवान् त्वं हारोणं तत्सुतांश्च इदमा-
९ ज्ञापय। होमस्यायं विधिः प्रभातं यावत् समस्तरात्रिं हवनीयं वस्तु वेद्या
१० वह्निकुण्डे स्थास्यति वेद्या वह्निश्च प्रज्वलन् स्थास्यति। याजको गात्रेऽतस्याः
परिधेयकटिवस्त्रे परिधाय वेदिस्थितं वह्निकृतहोमस्य यद्भस्म तद्-
११ त्याप्य वेद्याः पार्श्वे निधास्यति। ततः स तद् वस्त्रं विमोच्यान्यद् वस्त्रं
१२ परिधाय शिविरस्य बहिः शुचिस्थानं भस्म नेष्यति। किन्तु वेद्यां
स्थितोऽग्निः सदा प्रज्वलितः स्थास्यति न निर्व्वास्यति याजकः प्रतिप्रात-
स्तत्र काष्ठं दास्यति तदुपरि होमबलिं निधास्यति मङ्गलार्थबलीनां मेद-
१३ स्तत्र दाहयिष्यति। सोऽग्नि र्वेद्यां सदा ज्वलिष्यति कदापि नहि
निर्व्वास्यति।
१४ नैवेद्यस्यायं विधिः हारोणस्य सुताः परमेश्वरस्य सम्मुखे वेद्यग्रे तदुत्-
१५ सक्ष्यन्ति। अपरं याजकस्तस्मात् नैवेद्यस्य मुष्टिमेकं गोधूमचूर्णं किञ्चित्
तैलं तदुपरिस्थं सर्व्वकुन्दुरुञ्च गृहीत्वा परमेश्वरम् उद्दिश्य स्मरणार्थं सौ-
१६ रभार्थञ्च वेद्यां दाहयिष्यति। हारोणस्तस्य सुताश्च तदवशिष्टांशं भोक्ष्यन्ते
किन्तु किण्वशून्यपूपैः साकं पूतस्थाने तद् भोक्ष्यन्ते अर्थात् समाजा-
१७ वासस्य प्राङ्गणमध्ये तद् भोक्ष्यन्ते। किण्वेन समं तन्न भक्ष्यते यतोहं
तेषामंशार्थं मम वह्निकृतोपहारेभ्यस्तद् अदाम् तत्प्रायश्चित्तबलिवत्
१८ दोषार्थबलिवच्चातिपूतं भविष्यति। हारोणवंशीयाः सर्व्वे पुरुषास्तद्
भोक्ष्यन्ते युष्माकं पुरुषपरम्परायां वह्निकृतोपहाराणां नित्यो विधिरयं
यः कश्चित् तान् स्प्रक्ष्यति स पवित्रो भविष्यति।
१९ ततःपरं परमेश्वरो मूससं जगाद हारोणस्य तत्सुतानाञ्चाभिषेकदिने
२० परमेश्वरम् उद्दिश्य य उपहारस्तै र्दातव्यस्तस्यायं विधिः। ते नित्यनैवे-
२१ द्यार्थं ऐफादशमांशं सूक्ष्मगोधूमचूर्णं गृहीत्वार्द्धं प्रातःकालेऽर्द्धं सन्ध्यायां
कटाहे तैलं दत्त्वा भ्रक्ष्यन्ति भृष्टे सति त्वं तद् अभ्यन्तरम् आनीय
तन्नैवेद्यस्य पक्वान्नानि खण्डीकृतानि सुगन्धिद्रव्यार्थं परमेश्वरम् उद्दिश्य

उत्स्रक्ष्यसि। हारोणस्य पुत्राणां मध्ये यो जनस्तत्पदेनाभिषिक्तो २२
याजको भवति स तद् उत्स्रक्ष्यति परमेश्वरम् उद्दिश्य नित्यविधिरेषः
तदखिलं दाहयिष्यते। यतो याजकस्य सर्व्वनैवेद्यं दाहयितव्यं तस्य २३
किमपि न भोक्तव्यं।

ततः परमेश्वरो मूससं जगाद त्वं हारोणं तत्सुतांश्च वद प्रायश्चित्त- २४
बलेरयं विधिः। यत्र होमबलिश्छिद्यते तत्र परमेश्वरस्य सम्मुखे प्राय- २५
श्चित्तबलिरपि छेदनीयः, सोऽति पवित्रो भविष्यति। यो याजकः पापार्थं २६
तद् उत्स्रक्ष्यति सएव तद् भोक्ष्यते पवित्रस्थाने समाजावासस्य प्राङ्गणे
तद् भोक्ष्यते। यः कश्चन तस्य मांसं स्पृशति स पवित्रो भविष्यति तस्य २७
रक्तं यदि कुत्रचित् वसने लगति तर्हि तद् रक्तम्रक्षितं वसनं पवित्र-
स्थाने क्षालयिष्यसि। यस्मिन् मृत्पात्रे तत् पच्यते तद् भंक्ष्यते यदि २८
पित्तलपात्रे तत् पच्यते तर्हि तन् मार्क्ष्यसि जलेन परिष्कारिष्यसि च।
याजकानां सर्व्वे पुरुषास्तद् भोक्ष्यन्ते तद् अतीव पवित्रं। किन्तु पूत- २९
स्थाने प्रायश्चित्तं कर्त्तुं यस्य कस्यचित् प्रायश्चित्तबले रक्तं समाजावास- ३०
स्याभ्यन्तरम् आनेष्यते तन्न भोक्ष्यते वह्निना दाहयिष्यते।

---

७ सप्तमोऽध्यायः।

१ दोषार्थबलेर्विधिः ११ मङ्गलार्थबलेर्विधिः २२ मेदरक्तयोर्निषेधः याजकानामंश-निरूपणं ३५ विधिनिरूपणकालकथनञ्च।

दोषार्थबलेरयं विधिः सोऽतिपूतो भवति। यत्र होमबलिश्छिद्यते १
तत्रैव दोषार्थबलिश्छेदनीयो वेद्या उपरि चतुर्दिक्षु तस्य रक्तं निक्षेप्स्यति। २
तस्य सर्व्वमेदो लाङ्गूलं नाडीच्छादकमेदो द्वौ मेरुग्रन्थी तदुपरिपार्श्वस्थ- ३
मेदो द्वाभ्यां मेरुग्रन्थिभ्यां साकं यकृत उपरिस्थम् अन्त्रावरकं विमोच्य ४
उत्स्रक्ष्यति। याजकः परमेश्वरम् उद्दिश्य वह्निकृतोपहारं कर्त्तुं वेद्या ५
उपरि एतत्सर्व्वाणि दाहयिष्यति, दोषार्थबलिदानमिदं। याजकानां ६
सर्व्वे पुरुषास्तं भोक्ष्यन्ते पूतस्थाने तं भोक्ष्यन्ते सोऽतिपूतो भवति।
प्रायश्चित्तबलिदोषार्थकबल्योरेकएव विधिः यो याजकस्तेन प्रायश्चित्तं ७
करोति स तस्य भविष्यति। याजकेन कस्यचिद् होमबलावुत्सृष्टे ८
तदुत्सृष्टहोमबलेरजिनं स याजको ग्रहीष्यति। चुल्ल्यां कटाहे पात्रे ९
वा पक्वं सर्व्वप्रकारं नैवेद्यम् उत्सृष्टा याजको लप्स्यते। किन्तु हारोणस्य १०

सर्व्वे पुत्रास्तैलमिश्रितानां शुष्काणां वा सर्व्वनैवेद्यानां समांशिनो
भविष्यन्ति।
११ परमेश्वरोद्देशकस्य मङ्गलार्थकस्य बलेरयं विधिः। यदि कश्चित्
१२ प्रशंसाबलिम् आनयति तर्हि प्रशंसाबलिना साकं स तैलमिश्रितान्
किण्वशून्यपूपान् तैलाक्तान् किण्वशून्यपिष्टकान् तैलमिश्रितान् भृष्टान्
१३ सूक्ष्मगोधूमचूर्णस्य पिष्टकांश्च निवेदयिष्यति। मङ्गलार्थकप्रशंसाबलिना
साकं स तत्पिष्टकेभ्यो ऽन्यान् किण्वयुक्तान् पूपानपि निवेदयिष्यति।
१४ पश्चात् स उत्तोलनीयनैवेद्यार्थं परमेश्वरमुद्दिश्य तस्मादुपहारात् सर्व्व-
प्रकारपूपानाम् एकैकं पूपम् निवेदयिष्यति। मङ्गलार्थकस्य बले रक्तं
१५ येन याजकेन प्रक्षिप्यते तन्नैवेद्यं तस्यैव भविष्यति। मङ्गलार्थप्रशंसाबले
मांसं निवेदनदिने भोक्तव्यं प्रातःकालं यावत् तस्य किमपि न निधा-
१६ तव्यं। कस्यचिद् उत्सर्जनीयो बलि र्यदि मानसबलिः स्वेच्छादत्तबलि र्वा
भवति तर्हि तद्बलेरुत्सर्गदिने तस्य मांसं भोक्तव्यं परदिनेऽपि तदव-
१७ शिष्टं भोजनोपयुक्तं। किन्तु तृतीयदिने बलेरवशिष्टं मांसं वह्निना
१८ दाहिष्यते। यद्यपि तृतीयदिने तस्य मङ्गलार्थबले मांसस्य किञ्चित्
केनचित् भुज्यते तर्हि तदग्राह्यं भविष्यति तदुत्स्रष्टुः फलं न भवि-
ष्यति तद् घृण्यं भविष्यति, तद् यो जनो भोक्ष्यते स स्वीयपापं स्वयं
१९ भोक्ष्यते। किञ्चनाशुचिवस्तुनि यदि मांसस्य स्पर्शो भवति तदा तद्
अभक्ष्यं भविष्यति वह्निना दाहिष्यते किन्त्वन्यमांसानि सर्व्वशुचिलोकै
२० र्भक्ष्याणि। यः कश्चिद् अशुचि र्भूत्वा परमेश्वरायोत्सृष्टस्य मङ्गलार्थक-
२१ बले र्मांसं भुङ्क्ते स स्वलोकानां मध्याद् उच्छेत्स्यते। यः कश्चिद् अशुचि-
द्रव्यम् अर्थात् मानुषस्याशुचिवस्तु वा अशुचिपशुं वा किमप्यशुचि-
घृण्यास्पदं स्पृष्ट्वा परमेश्वरायोत्सृष्टस्य मङ्गलार्थकस्य बले र्मांसं भुङ्क्ते स
निजलोकानां मध्याद् उच्छेत्स्यते।
२२ परमेश्वरो मूससं जगाद, त्वम् इस्रायेलो वंशान् वद यूयं गोमेषच्छा-
२४ गानां मेदो मा भुंग्ध्वं। स्वयं मृतस्य पशुना हतस्य वा पशो र्मेदो ऽन्य-
२५ कर्म्मणि व्ययिष्यध्वे किन्तु यूयं कदापि तन्न भुंग्ध्वं। यतो यः कश्चित्
वह्नौ परमेश्वरायोत्सर्जनीयस्य कस्यचित् पशो र्मेदो भोक्ष्यते स भोक्ता
२६ स्वलोकेभ्य उच्छेत्स्यते। युष्माकम् आवासेषु यूयं कस्यापि पशुपक्षिणो
२७ रक्तं मा भुञ्जीध्वं। यो जनः केनापि प्रकारेण रक्तं भुङ्क्ते स स्वलो-
केभ्य उच्छेत्स्यते।

ततःपरं परमेश्वरो मूससं बभाषे त्वम् इस्रायेलो वंशान् वद यः कश्चित् २८
परमेश्वरम् उद्दिश्य मङ्गलार्थकं बलिम् उत्सृजति स स्वमङ्गलार्थकबलिना २९
समं परमेश्वरोद्देशकं नैवेद्यम् उत्स्रक्ष्यति। स्वहस्तेन परमेश्वरम् उद्दिश्य ३०
वह्निकृतमुपहारम् अर्थात् वक्षसा समं मेद आनेष्यते, ततो वक्षः
परमेश्वरस्य समक्षम् आन्दोलयिष्यते। याजको वेद्या उपरि तन्मेदो ३१
दाहयिष्यति किन्तु तद् वक्षो हारोणतत्सुतानां भविष्यति। यूयं मङ्ग- ३२
लार्थबलेरुत्तोलनीयं दक्षिणस्कन्धं याजकाय दास्यथ। हारोणस्य सुतानां ३२
यो यस्य मङ्गलार्थबले रक्तमेदसी उत्सृजति स तस्य दक्षिणस्कन्धं
स्वांशं प्राप्स्यति। यत इस्रायेल्वंशस्य मङ्गलार्थबलेरान्दोलनीयं वक्ष २४
उत्तोलनीयं स्कन्धम् अहं इस्रायेलो वंशाद् आदाय नित्यविधिना
हारोणाय तत्पुत्त्रेभ्यश्चादां।

यद्दिने ते परमेश्वरान्तिके याजनकर्म्म कर्त्तुं नियुक्तास्तद्दिनमारभ्य २५
हारोणतत्सुता अभिषिक्तत्वात् परमेश्वरस्य वह्निकृतोपहाराद् एनमंशं
प्राप्नुवन्ति। यतोऽयमंश इस्रायेल्वंशस्य पुरुषपरम्परया तेभ्यो दातव्य २६
इति नित्यो विधिस्तेषाम् अभिषेकदिने परमेश्वरेणाज्ञापितः। होमबले २७
नैवेद्यस्य प्रायश्चित्तबले दोषार्थकबलेः पदनियोगस्य मङ्गलार्थकबलेश्चायं
यो विधिः, स सीनयगिरौ परमेश्वरेण मूससं प्रत्याज्ञापितः, फलतः २८
परमेश्वराय स्वीयनैवेद्यान्युत्स्रष्टुं लोका यद्दिने तेनादिष्टास्तद्दिने सीनय-
प्रान्तरे विधिरयमदायि।

---

८ अष्टमोध्यायः।

१ हारोणतत्सुतानां पावनं १४ तत्कृते प्रायश्चित्तं १८ हवनं २२ पावनार्थं मेषबलि-
दानं ३१ पावनकालः स्थाननिरूपणञ्च।

परमेश्वरो मूससं जगाद त्वं हारोणं तत्सुतान् तैः समं वसनानि १
अभिषेकार्थं तैलं प्रायश्चित्तार्थकगोवत्सं मेषौ किण्वशून्यपूपडल्लकञ्च २
गृहाण, समाजावासस्य द्वारान्तिके समाजस्य सर्व्वजनान् मेलय च। तदा २
मूसाः परमेश्वराज्ञानुसारात् तथाकरोत् ततः समाजावासस्य द्वारा- ४
न्तिके निखिलसमाजा मिलिताः। तदा मूसाः समाजम् अवदत् परमेश्वर ५
इदं कर्म्म कर्त्तुम् आदिशत्। ततो मूसाः परमेश्वराज्ञानुसाराद् हारोणं ६
तस्य पुत्त्रांश्चानीय जलैः स्नपयामास हारोणम् उत्तरीयवसनं पर्य्यधापयत् ७
कटौ कटिबन्धनं बद्धा वपुष्युत्तरासङ्गं ददौ तदुपर्य्येफोदं ददौ एफोदो

८ विचित्ररज्ज्वा गात्रं संवेष्ट्य तदुपरि बबन्ध। तदुपरि वक्षःपटीं वक्षः-
९ पट्या उपरि ऊरीमतुम्मीमौ बबन्ध। तस्य शिरस्युष्णीषं ददौ तदुपरि
१० तस्य भाले स्वर्णपत्रस्य किरीटं ददौ। मूसा अभिषेकार्थं तैलम् आदाय
११ आवासं तन्मध्यस्थितं सर्व्वपात्रञ्चाभिषिच्य पावितवान्। तस्य किञ्चिद्
आदाय वेद्या उपरि सप्त कृत्वः प्राक्षिपत् वेदिं तस्याः सर्व्वपात्राणि
१२ प्रक्षालनपात्रं तस्य पादं पावयितुं अभिषिक्तवान्। अभिषेकार्थं किञ्चि-
१३ त्तैलं हारोणस्य मूर्द्ध्नि निक्षिप्य तं पावयितुम् अभिषिक्तवान्। ततो
मूसाः परमेश्वरानुज्ञया हारोणस्य सुतान् आनीय तान् उत्तरीयवस-
नानि पर्य्यधापयत् कटिबन्धनैः कटी बबन्ध उष्णीषै र्भूषितवांश्च।
१४ ततःपरं परमेश्वरस्याज्ञानुसारात् मूससा प्रायश्चित्तार्थकगोवत्स
आनीते हारोणस्तस्य सुताश्च तस्य प्रायश्चित्तबले गोवत्सस्य शिरसि
१५ हस्तान् आर्पयन्। तदा मूसास्तं छित्त्वा तस्य रुधिरं गृह्णन् अङ्गुल्या
वेद्याश्चतुर्दिशां शृङ्गेषु दत्त्वा वेदिं पावयामास, रुधिरं वेद्या मूले
१६ निषिक्तवान् तदुपरि प्रायश्चित्तं कर्त्तुं तां पावितवान्। मूसास्तस्यान्त्रो-
परिस्थं सर्व्वं मेदो यकृदुपरिस्थम् अन्त्राच्छादकं द्वौ मेरुग्रन्थी तयो र्मेदश्च
१७ गृहीत्वा वेद्या उपरि दाहयामास। तस्य वत्सस्य चर्म्ममांसगोमयानि
गृहीत्वा शिविरस्य वहि र्वह्निना दाहयामास।
१८ ततः परं परमेश्वरस्य निदेशानुसारात् मूससा होमार्थकमेष आनीते
१९ हारोणस्तत्सुताश्च मेषस्य शिरसि हस्तान् आर्पयन् मूसाश्च तं छित्त्वा
२० वेद्या उपरि चतुर्दिक्षु तस्य रुधिरं प्रचिक्षेप। मेषं खण्डं खण्डं कृत्वा
२१ तस्य शिरोमांसखण्डमेदांसि दाहयामास। तस्यान्त्रपदान् जलेन प्रक्षाल्य
निखिलमेषं वेद्यां दाहयामास एष परमेश्वरम् उद्दिश्य सुगन्धिहोमबलि
र्वह्निकृत उपहारश्च बभूव।
२२ ततः परं मूसाः परमेश्वरस्याज्ञानुसारतो द्वितीयं मेषं अर्थात् पद-
नियोगार्थकं मेषमानयत् तदा हारोणतत्सुतास्तस्य मेषस्य शिरसि
२३ हस्तान् आर्पयन् मूसास्तं छित्त्वा तस्य किञ्चिद् रक्तं गृहीत्वा हारोणस्य
२४ दक्षिणकर्णप्रान्ते दक्षिणहस्ताङ्गुष्ठे दक्षिणपादाङ्गुष्ठे च ददौ। स
हारोणस्य सुतान् आनीय तस्यास्रजः किञ्चिद् आदाय तेषां दक्षिणकर्ण-
प्रान्ते दक्षिणहस्ताङ्गुष्ठे दक्षिणपादाङ्गुष्ठे च ददौ सर्व्वरक्तं वेद्या उपरि
२५ चतुर्दिक्षु प्रचिक्षेप। स तस्य मेदो लाङ्गूलं अन्त्रोपरिस्थं सर्व्वमेदो यकृत
२६ उपरिस्थान्त्राच्छादकं द्वौ मेरुग्रन्थी तन्मेदो दक्षिणस्कन्धञ्च जग्राह। स

परमेश्वरस्य सम्मुखस्थितकिण्वशून्यपूपडल्लकात् किण्वशून्यं पिष्टक-
मेकं तैलपक्वपिष्टकं सूक्ष्मपिष्टकञ्च गृहीत्वा मेदोदक्षिणस्कन्धयोरुपरि
निदधे। हारोणतत्पुत्राणां हस्तेषु तानि निधाय परमेश्वरस्य समक्षम् २७
आन्दोलनीयोपहारार्थम् आन्दोलयामास। मूसास्तेषां हस्तेभ्यस्तानि २८
गृहीत्वा वेद्यां होमबलेरुपरि दाहयामास। तानि पदनियोगार्थक-
नैवेद्यं परमेश्वरोद्देश्यो वह्निकृतः सुगन्ध्युपहारश्च। मूसा वक्षो गृहीत्वा २९
परमेश्वरस्य समक्षम् आन्दोलनीयोपहारार्थं दोलयामास, यतः पद-
नियोगार्थकमेषस्य वक्षो मूससोंऽशो बभुव। मूसा अभिषेकार्थतैलात् ३०
वेद्या उपरिस्थरुधिराच्च किञ्चित् किञ्चिदादाय हारोणतद्वस्त्राणामुपरि
तत्सुतवस्त्राणाञ्चोपरि प्रक्षिप्य हारोणं तस्य वसनानि तत्सुतान् तेषां
वसनानि च पावयामास।

ततः परं मूसा हारोणतत्सुतान् उवाच यूयं समाजावासद्वारे मांसं ३१
पचत, हारोणतत्सुतास्तद् भुञ्जतां ममैतदाज्ञानुसारात् पदनियोगार्थ-
कडल्लकस्थपूपैः समं तत्र तन्मांसं भुञ्जीध्वं। शेषपिष्टितपूपान् आदाय ३२
वह्निना दाहयिष्यथ। यूयं सप्त दिनानि यावद् अर्थाद् युष्माकं पदनि- ३३
योगस्य शेषदिनं यावत् समाजावासद्वाराद् बहि र्न यास्यथ यस्मात् तेषु
सप्त दिनेषु युष्माकं पदनियोगकर्म्म सम्पत्स्यते। युष्मदर्थं प्रायश्चित्तकर- ३४
णायाद्यवत् क्रियां कर्त्तुं परमेश्वरेणादिष्टं। तस्मात् यूयं सप्त दिनानि ३५
यावत् समाजावासद्वारे दिवानिशं स्थास्यथ, यथा न म्रियेध्वं तदर्थं
परमेश्वरस्य निदेशं पालयध्वं इत्याज्ञा मया लब्धा। तस्मात् परमेश्वरो ३६
मूससा यथाज्ञापयत् हारोणतत्सुतास्तत्सर्व्वं पालयाञ्चक्रिरे।

---

९ नवमोऽध्यायः।

१ हारोणस्य कृते बलिदानं १५ लोकानां कृते बलिदानं २२ मूसाहारोणयोराशी-
र्व्वादात् लोकान् प्रतीश्वरस्य तेजःप्रकाशश्च।

अष्टमदिने मूसा हारोणं तत्सुतान् इस्रायेलवंशस्य प्राचीनांश्चाहूत- १
वान्। स हारोणं बभाषे त्वं प्रायश्चित्तबल्यर्थं निर्दोषगोवत्सं होम- २
बल्यर्थं निर्दोषमेषं गृहीत्वा परमेश्वरस्य समक्षम् आनय। इस्रायेलो ३
वंशं वद यूयं परमेश्वरस्य सम्मुखे बलिदानाय प्रायश्चित्तबल्यर्थं छागं
होमबल्यर्थं एकहायनौ निर्दोषौ गोमेषवत्सौ मङ्गलार्थबल्यर्थं वृषमेषौ ४
तैलमिश्रितं नैवेद्यञ्च गृह्णीध्यय यस्मादद्य परमेश्वरो युष्मभ्यं दर्शनं

५ दास्यति। तदा ते मूसस आज्ञानुसारात् तानि सर्व्वाण्यादाय समाजा-
वासस्य सम्मुखम् उपातिष्ठन् कृत्स्नः समाजः समीपवर्त्ती सन् परमे-
६ श्वरस्यान्तिकेऽतिष्ठत्। तदा मूसाः कथितवान् परमेश्वरो युष्मान् एतानि
कर्म्माणि कर्त्तुम् आदिशत् एतेषु कृतेषु युष्मान् प्रति परमेश्वरस्य महिमा
७ प्रकाशिष्यते। मूसा हारोणं बभाषे त्वं वेद्याः समीपं गत्वा परमे-
श्वराज्ञानुसारात् स्वस्य प्रायश्चित्तहोमबली उत्सृज्य स्वस्य लोकानाञ्च
पापानां प्रायश्चित्तं कुरु, ततः परं लोकानाम् उपहारं निवेद्य तेषां
८ कृतेऽपि प्रायश्चित्तं कुरु। मूससं प्रति परमेश्वराज्ञानुसारात् हारोणो
९ वेद्या अन्तिकं गत्वा स्वप्रायश्चित्तबलिं गोवत्सं अच्छिनत्। हारोणस्य
सुतास्तदन्तिकं रुधिरम् आनिन्युः स स्वाङ्गुलिम् अस्रे मज्जयित्वा वेद्याः
१० शृङ्गेषु ददौ रुधिरं वेद्या मूले निषिक्तवान्। प्रायश्चित्तबले र्मेदो
११ मेत्रग्रन्थी यकृत उपरिस्थम् अन्त्राच्छादकं वेद्या उपरि जुहाव। किन्तु
१२ तस्य पिशितं कृत्तिं शिविराद् वहि र्नीत्वा वह्निना दाहयामास। ततः
परं होमबलौ तेन छिन्ने हारोणस्य सुतास्तदन्तिकम् अस्रजं आनिन्युः।
१३ स वेद्या उपरि चतुर्दिक्षु तत् प्रचिक्षेप। ते होमबलेः शिरःसहितेषु
पिशितखण्डेषु तदन्तिकम् आनीतेषु स तानि वेद्या उपरि दाहया-
१४ मास। तस्यान्त्रं पादांश्च प्रक्षाल्य होमद्रव्यैः साकं वेद्या उपरि दाह-
यामास।

१५ अपरं स लोकानाम् उपहारम् आनिनाय लोकानां प्रायश्चित्तबलिं
१६ छागं छित्त्वा प्रथमवत् पापहेतोरुत्ससर्ज। ततः परं स होमबली
१७ आनीय विधिवत् उत्ससर्ज। नैवेद्यम् आनीय तस्यैकमुष्टिम् आदाय
१८ प्रातःकालीनहोमबलिना साकं वेद्या उपरि दाहयामास। ततः परं स
लोकानां मङ्गलार्थकबली वृषमेषौ छित्त्वा हारोणस्य सुतैस्तदन्तिकं तद्रक्ते
१९ आनीते स वेद्या उपरि चतुर्दिक्षु तत् प्रचिक्षेप। ततः परं स वृषस्य
मेदो मेषस्य लाङ्गूलम् अन्त्रस्य मेत्रग्रन्थ्योरुपरि स्थितं मेदो यकृदुपरि
२० स्थितम् अन्त्राच्छादकम् एतानि मेदांसि गृहीत्वा वक्षस उपरि निधाय
२१ वेद्या उपरि तन्मेदो दाहयामास। मूसस आज्ञानुसारात् हारोणः
२२ परमेश्वरस्य सम्मुखे द्वे वक्षसी द्वौ दक्षिणस्कन्धौ च दोलयामास। अपरं
हारोणो लोकान् प्रति हस्तौ विस्तार्य्य तान् आशिषं गदितवान् इत्थं
प्रायश्चित्तबलिं होमबली मङ्गलार्थकबली च दत्त्वा वेद्या अवरुरोह।

२३ ततो मूसोहारोणौ समाजावासं प्राविशतां तस्माद् वहिरागत्य

लोकान् आशिषं जगदतुस्ततः सर्व्वान् जनान् प्रति परमेश्वरस्य तेजः
प्रचकाशे। परमेश्वरस्य सम्मुखाद् वह्नि र्निर्गत्य वेद्या उपरि स्थितं २४
होमबलिं मेदश्च भस्मी चकार तद् दृष्ट्वा सर्व्वे लोका उच्चैःशब्दं कृत्वा
न्युब्जीभूय प्रणेमुः।

१० दशमोऽध्यायः।

१ निषिद्धवह्निना धूपज्वालनाद् अवीहूनादवयोर्दाहनं ८ तद्विधिः १२ पूतभक्ष्यविधिः १६ तद्विधिलङ्घने हारोणस्य कथा च।

हारोणस्य सुतौ नादव अवीहूश्च स्ववह्निपात्रे गृहीत्वा तत्राग्निं १
निधाय सर्जरसं दत्त्वानादिष्टं सामान्यवह्निं परमेश्वरस्य समक्षम्
उत्सृजतुः। ततः परमेश्वरस्य सम्मुखात् वह्नि र्निर्गत्य तौ ददाह तौ च २
परमेश्वरस्य सम्मुखे प्राणान् तत्यजतुः। मूसा हारोणाय कथयामास ३
परमेश्वर इति वाचं गदितवान् अहं स्वान्तिकस्थानां लोकानां मध्ये
पवित्रत्वेन मंस्ये सर्व्वलोकानां समीपे गौरवं लप्स्ये च तस्माद् हारोणो
मौनी बभूव। अपरं मूसा हारोणपितृव्यस्य उषीयेलस्य सुतौ मीशा- ४
येलं इल्षाफनञ्चाहूय बभाषे समीपमागच्छतं युवां पूतस्थानसम्मुखात्
निजभ्रातरौ शिविराद् बहि र्नयतं। तेन मूसस आज्ञानुसारात् तौ ५
समीपं गत्वा सोत्तरीयवस्त्रौ तौ बहि र्निन्यतुः। मूसा हारोणं तत्सुता- ६
विलियासरम् ईथामरञ्च जगाद यथा यूयं न म्रियेध्वं समाजं प्रति च
कोपो न ज्वलेत् तत्कृते स्वशिरांस्यनाच्छतानि मा कुरुत स्ववस्त्राणि मा
छिन्त, किन्तु युष्माकं भ्रातर इस्रायेलो वंशाः परमेश्वरकृतदाहात्
विलपन्तु। यथा युष्माकं मृति र्न भवेत् तदर्थं यूयं समाजावासस्य ७
द्वाराद् बहि र्मा यात, यतो युष्माकं गात्रेषु परमेश्वरीयमभिषेकतैलम्
आस्ते, ततस्ते मूससो वाक्यात् तथैव चक्रुः।

परमेश्वरो हारोणं बभाषे यथा यूयं न म्रियेध्वं तदर्थं त्वं वा तव ८
सुताः समाजावासप्रवेशकाले द्राक्षारसं मद्यं वा न पिवत, एष युष्माकं ९
पुरुषानुक्रमं नित्यविधि र्भविष्यति। तथा सति पूतत्वापूतत्वयोः शुचित्वा- १०
शुचित्वयोश्च भेदं कर्त्तुं मूसोद्वारा परमेश्वरेण ज्ञापितान् सर्व्वविधीन् ११
इस्रायेल्वंशान् शिक्षयितुं युष्माभिः शक्ष्यते। मूसा हारोणं तदवशिष्ट- १२
पुत्रद्वयम् इलियासरं ईथामरञ्च जगाद परमेश्वरमुद्दिश्य वह्निकृतोप-
हारादवशिष्टं यन्नैवेद्यमास्ते तद् यूयं वेद्यन्तिकं नीत्वा विना किण्वं

१३ भुंग्ध्वं तदतिपूतं। परमेश्वरम् उद्दिश्य वह्निकृतोपहारात् तदेव तव
त्वत्सुतानाञ्च प्राप्यांशः, तस्मात् तत् पूतस्थाने युष्माभि र्भोजनीयम्
१४ एषाज्ञा मया प्राप्ता। त्वं त्वत्पुत्रकन्याश्च तद् दोलनीयं वक्ष उत्तोलनीयं
स्कन्धञ्च शुचिस्थाने भोक्ष्यध्वे यत इस्रायेलवंशीयानां मङ्गलार्थकबलेः स
१५ तव त्वत्सन्तानानाञ्च प्राप्यांशः। ते हवनीयमेदसा साकं यम् उत्तोल-
नीयं स्कन्धं यञ्चान्दोलनीयं वक्ष आन्दोलयितुं परमेश्वरसम्मुखम् आने-
ष्यन्ति तत् परमेश्वराज्ञानुसारात् नित्यविधिना तव त्वत्सन्तानानाञ्च
भविष्यति।

१६ मूसाः प्रायश्चित्तार्थकछागम् अन्विष्टवान् किन्तु सोऽदह्यत तस्मात् स
१७ हारोणस्यावशिष्टसुताविलियासरैथामरौ क्रुद्धावदत्, यूयं कुतः पूत-
स्थाने प्रायश्चित्तबलिं न भुक्तवन्तः? सोऽतीव पूतः समाजप्रायश्चित्तार्थं
१८ परमेश्वरसम्मुखे प्रायश्चित्तं कर्त्तुं स युष्मभ्यं दत्तः। पश्यत पूतस्थानमध्ये
तद्रक्तं नानीतं तस्मात् मदाज्ञया पूतस्थाने स युष्माकं भोक्तव्य
१९ आसीत्। ततो हारोणो मूससमवादीत् पश्य तेऽद्य परमेश्वरमुद्दिश्य
स्वीयप्रायश्चित्तबलिहोमबलीन् उदसृजन् तथापि माम्प्रतीदृशं घटितं,
यद्यहमद्य प्रायश्चित्तबलिम् अभोक्ष्ये तर्हि तत् किं परमेश्वरस्य दृष्ट्या-
२० ग्रहीष्यत? तन्निशम्य मूसाः सन्तुष्टोऽभूत्।

---

११ एकादशोऽध्यायः।

१ भक्ष्याभक्ष्यपशो र्विधिः ९ भक्ष्याभक्ष्यजलजन्तो र्विधिः १३ भक्ष्याभक्ष्यपक्षिणां विधिः
२१ भक्ष्याभक्ष्योरोगामिनां विधिश्च।

१ परमेश्वरो मूसोहारोणौ जगाद युवाम् इस्रायेलवंशं वदतं मेदि-
२ नीस्थपशूनां मध्य एते पशवो युष्माभि र्भोजनीयाः। पशूनां मध्ये ये
३ द्विखण्डखुरिणो भूत्वा रोमन्थायन्ते तानेव भक्षत। किन्तु ये केवलं
रोमन्थायन्ते वा केवलं द्विखण्डखुरिणस्तान् पशून् न भक्षत, मह्राङ्गो
५ युष्माकम् अशुचि र्यतः स रोमन्थायते किन्तु द्विखण्डखुरी नहि। शाफन्
पशु र्युष्माकम् अशुचि र्यतः स रोमन्थायते किन्तु द्विखण्डखुरी नहि।
६ शशकश्च युष्मभ्यमशुचि र्यतः स रोमन्थायते किन्तु द्विखण्डखुरी नहि।
७ वराहो युष्मभ्यमशुचि र्यतः स द्विखण्डखुरी भूत्वापि न रोमन्थायते।
८ तस्माद् यूयं तेषां पिशितं न भक्षत तेषां कुणपमपि न स्पृशत ते युष्मभ्यम्
अशुचयः।

जलजन्तूनां मध्य एते युष्माभि र्भोजनीयाः सागरस्थानां नदीस्थानां ९
अन्याम्बुस्थानां वा मध्ये पक्षवन्तः शल्कलिनो युष्माकं भक्ष्याः। किन्तु १०
नदीजलाशयस्थानां जलचरप्राणिनां मध्ये ये पक्षवन्तो नहि शल्कलिनश्च
नहि ते युष्माकं घृण्या भविष्यन्ति। तएव युष्माकं घृण्या भविष्यन्ति यूयं ११
तेषां मांसं न भक्षिष्यथ तेषां कुणपमपि न स्पृशत। जलजन्तूनां मध्ये १२
येषां पक्षवल्कलौ न स्तः, ते सर्व्वे युष्माकं घृण्या भविष्यन्ति।

पक्षिणां मध्य एते युष्माकं घृण्या भविष्यन्ति, ते ऽभक्ष्या घृणास्पदाः १३
उत्क्रोशः क्रौञ्चः कुररो गृध्रश्च स्वस्वजात्यनुसारात् चिल्लः स्वस्वजात्य- १४
नुसारात् काकाः स्वस्वजात्यनुसारात् उष्ट्रपक्षी रात्रिश्येनः गांचिल्लः १६
स्वस्वजात्यनुसारात् श्येनः पेचकः मत्स्यरङ्को महापेचको दीर्घगलहंसः १८
शौणहंसः शकुनी सारसः स्वस्वजात्यनुसाराद् वको टिट्टिभो जतुका च। १९
तथा चतुष्पदै र्गामिनः पक्षवन्तो जन्तवो युष्माकं घृण्या भविष्यन्ति। २०
तथापि चतुष्पदै र्गामिनां पतङ्गानां मध्ये ये भूमावुल्लम्फनाय दीर्घजङ्घा २१
भवन्ति ते युष्माकं भक्ष्या भविष्यन्ति। स्वस्वजात्यनुसारात् शलभः स्वस्व- २२
जात्यनुसारात् शूककीटः स्वस्वजात्यनुसारात् भिल्लिका स्वस्वजात्यनुसा-
रात् खद्योत एते युष्माकं भक्ष्या भविष्यन्ति। किन्तु तदन्ये चतुष्पदै र्गा- २३
मिन उड्डीयमानाः पतङ्गा युष्माकम् अभक्ष्या घृण्या भविष्यन्ति। तै र्यूय- २४
मशुचयो भविष्यथ यस्तेषां कुणपं स्पृशति स सन्ध्यां यावत् अशुचिः
स्थास्यति। यश्च तेषां कुणपस्य कमप्यंशं वक्ष्यति स स्ववस्त्रं क्षालयिष्यति २५
तथापि सन्ध्यां यावद् अशुचिः स्थास्यति। ये जन्तवो द्विखुरा न भूत्वा २६
किञ्चित् पृथक्खुरा भवन्ति न रोमन्थायन्ते वा ते युष्मभ्यमशुचयः, तान्
स्पृष्ट्वा लोका अशुचयो भवन्ति। चतुष्पदवन्यजन्तूनां मध्ये हस्ततलगा- २७
मिनो जन्तवो युष्माकम् अशुचयो यस्तेषां शवान् स्प्रक्ष्यति, स सन्ध्यां
यावत् अशुचिः स्थास्यति। यस्तेषां कुणपान् वक्ष्यति स स्ववस्त्रं क्षाल- २८
यिष्यति तथापि सन्ध्यां यावद् अशुचिः स्थास्यति यस्मात् ते युष्मभ्यम्
अशुचयः।

पृथिव्या उरोगामिनां मध्ये युष्मान् प्रत्येते ऽशुचयो भविष्यन्ति स्वस्व- २९
जात्यनुसारात् नकुलः क्षेत्रस्थमूषिको मुषली गौधेरो नीलमूषली कृमि ३०
र्गृहगोधिका कृकलासः। उरोगामिनां मध्यत एते युष्मभ्यमशुचयो ३१
भविष्यन्ति, तेषु मृतेषु यस्तान् स्पृशति स सन्ध्यां यावद् अशुचिः
स्थास्यति। यस्मिन् वस्तुनि तेषां कुणपाः पतिष्यन्ति तदप्यशुचि भविष्यति ३२

तत् दारुभाजनं वसनं वा कृत्ति र्वा शाणपूटकं यस्य कस्यचित् कर्म्मणो
योग्यं भाजनं भवेत् तत् तोये निधास्यति सन्ध्यां यावत् तदशुचि
३३ स्थास्यति पश्चात् शुचि भविष्यति। कस्यचित् मृद्भाजनस्य मध्ये तेषां
कुणपेषु पतितेषु तन्मध्यस्थितं सर्व्वं वस्त्वशुचि भविष्यति युष्माभिस्तद्
३४ भञ्ज्यतां। कस्यचिद् भक्ष्यस्योपरि यदि तत्क्षालितं तोयं पतेत् तदा
तद् अशुचि भविष्यति सर्व्वजातीयभाजनेषु सर्व्वजातीयं पेयवस्त्वशुचि
३५ भविष्यति। यस्य कस्यचिद् वस्तुन उपरि तेषां कुणपानां किञ्चित्
यदि पतेत्, तर्हि तदशुचि भविष्यति यदि चुल्ल्यादिपाकस्थाने पतेत्
३६ तर्हि तत् भंक्ष्यते यतस्तदशुचि युष्मान् प्रत्यशुचि स्थास्यति। केवलं
प्रस्रवणं यत्र पुष्करिण्यां बहुतोयानि तिष्ठन्ति सा च शुचि र्भविष्यति
किन्तु यत्र तेषां कुणपानां स्पर्शो भविष्यति तदेवाशुचि भविष्यति।
३७ तेषां कुणपानां किञ्चिद् यदि कुत्रापि वपनीयवीजे पतेत् तर्हि
३८ तत् शुचि स्थास्यति। किन्तु वीजोपरि तोये तिष्ठति यदि तेषां
कुणपानां किञ्चित् तदुपरि पतेत् तर्हि तद् युष्मभ्यम् अशुचि
३९ भविष्यति। युष्माकं भक्ष्यपशौ मृते यः कश्चित् तस्य कुणपं स्पृशति स
४० सन्ध्यां यावद् अशुचि र्भविष्यति। यश्च तस्य कुणपं भक्षिष्यति स स्ववसनं
प्रक्षाल्य सन्ध्यां यावद् अशुचिः स्थास्यति, यश्च तं वक्ष्यति सोऽपि
४१ स्ववसनं प्रक्षाल्य सन्ध्यां यावद् अशुचिः स्थास्यति। भूचराः सर्व्वकीटा
४२ युष्माकं घृण्या अभक्ष्याश्च भविष्यन्ति। उरोगामी वा चतुष्पदै र्गामी वा
ततोऽधिकपदै र्गामी भूचरः सर्व्वकीटो युष्माभि र्न भुज्यतां स युष्माकं
४३ घृण्यः। एतैः सर्व्वजातीयै र्जन्तुभि र्यूयं स्वान् घृण्यान् मा कुरुत, तैः
४४ स्वान् अशुचीन् मा कुरुत, यूयम् अमेध्या मा भवत। अहं युष्माकं
प्रभुः परमेश्वरः, तस्माद् यूयं स्वान् पावयित्वा पवित्रास्तिष्ठत यस्मादहं
पवित्रः, भूमौ गन्त्वा केनापि जन्तुना स्वान् अपवित्रान् मा करिष्यथ।
४५ यस्मादहं परमेश्वरो युष्माकं प्रभु र्भवितुं मिसर्देशाद् युष्मान् आनैषं
४६ तस्माद् यूयं पवित्रा भवत यतोऽहं पवित्रः। शुच्यशुचिभक्ष्याभक्ष्याणां
४७ प्राणिनां प्रभेदकः पशुपक्षिजलचरस्थलचरानधि विधिरिति।

---

१२ द्वादशोऽध्यायः।

प्रसवात् परं शुचीकरणोत्सर्जनयो र्विधिः।

१ परमेश्वरो मूससमवादीत् त्वम् इस्रायेल्वंशं वद या नारी गर्भं धृत्वा

पुत्रं प्रसविष्यते सा रजस्वलाशौचवत् सप्त दिनान्यशुचि स्थास्यति। अष्टमे २
दिने बालकस्य मेहनस्य त्वक् छेत्स्यते। सा योषित् त्रयस्त्रिंशद्दिनानि ३
यावत् स्वशौचार्थं रक्तस्रावावस्थया स्थास्यति यावत् शौचार्थं दिनानि
न पूर्य्यन्ते तावत् किञ्चन पूतं वस्तु न स्प्रक्ष्यति पवित्रस्थानञ्च न ४
प्रवेक्ष्यति। किन्तु यदि कन्यां प्रसुवीत तर्हि सा यथाशौचात् तथा सप्ताह- ५
द्वयम् अशुचिः स्थास्यति पश्चात् सा षट्षष्टिदिवसान् स्वशुच्यर्थं रक्त-
स्रावावस्थया स्थास्यति। ततः सुतस्य सुताया वा प्रसवाशौचस्य दिनेषु ६
पूर्णेषु सा होमबल्यर्थम् एकहायनं मेषवत्सं प्रायश्चित्तबल्यर्थं पारा-
वतशावकं वा कपोतशावकमेकं समाजावासस्य द्वारि याजकान्ति-
कम् आनेष्यति। स परमेश्वरम् उद्दिश्य तम् उत्सृज्य तस्याः कृते प्राय- ७
श्चित्तं करिष्यति तेन सा स्वरक्तस्रावात् शुचि र्भविष्यति। प्रसूतपुत्र-
कन्याया इयं व्यवस्था। यदि काचन मेषवत्सम् आनेतुम् असमर्था तर्हि ८
सा द्वौ कपोतवत्सौ द्वौ पारावतवत्सौ वा तयोरेकं होमार्थम् अन्यम्
प्रायश्चित्तार्थम् आनेष्यति ततो याजकस्तदर्थं प्रायश्चित्तं करिष्यति तेन
सा शुचि र्भविष्यति।

---

१३ त्रयोदशोऽध्यायः।

१ कुष्ठरोगनिर्णयार्थं नाना परीक्षा लक्षणं विधिश्च।

परमेश्वरो मूसाहारोणौ जगाद यदि कस्यचिन् मनुजस्य देह- १
चर्म्मणि शोथः पामा श्वेतचिह्नं वा जायते देहचर्म्मणि कुष्ठवत् भवति २
च तर्हि स हारोणयाजकस्य समीपं तस्य याजकसुतानां मध्ये कस्य-
चिद् वा समीपं आनायिष्यते। याजकस्तस्य देहचर्म्मस्थं व्याधिं ३
द्रक्ष्यति यदि तत्र चर्म्मस्थलोमानि पाण्डराणि भवन्ति तद्व्याधि र्यदि
दृष्ट्या देहचर्म्मणोऽधो भवति तर्हि तस्य कुष्ठरोगो भवति तं दृष्ट्वा
याजकस्तम् अशुचिं वक्ष्यति। लक्ष्म यदि तद्देहस्य चर्म्मणि श्वेतवर्णं ४
भवति दृष्ट्या चर्म्मणोऽधः स्थितं न भवति तस्य रोमाणि शुक्लानि न
भवन्ति तर्हि याजकस्तं रोगिणं सप्त दिनानि संरुध्य निधास्यति।
सप्तमे दिवसे याजकेन तस्मिन् दृष्टे यदि स व्याधिस्तथैव तिष्ठति चर्म्म न ५
व्याप्नोति तर्हि याजकः पुनः सप्तदिनानि तं संरुध्य निधास्यति। सप्त- ६
माह्ने पुनस्तं द्रक्ष्यति तत्र यदि स व्याधि र्मलीमसो भवति चर्म्म न
व्याप्नोति तर्हि याजकस्तं शुचिं वदिष्यति सा पामा पश्चात् स स्ववस्त्रं

७ प्रक्षाल्य शुचि र्भविष्यति। किन्तु तस्य शौचार्थं याजकेन दृष्टे तस्य
८ पामा यदि चर्म्म व्याप्नोति तर्हि स नरो याजकेन पुन र्दर्शिष्यते। तत्र
तस्य पामा चर्म्म व्याप्नोत् इति यदि याजकः पश्यति तर्हि स तम्
अशुचिं वदिष्यति स कुष्ठरोगः।

९ मानुषस्य कुष्ठव्याधौ तिष्ठति स याजकान्तिकम् आनायिष्यते।
१० पश्चाद् याजकस्तं द्रक्ष्यति यदि तस्याजिने श्वेतः शोथो भवति तत्रस्थ-
रोमाणि च श्वेतानि भवन्ति स्फीते आममांसं भवति च तर्हि तस्य
११ देहचर्म्मणि पुरातनं कुष्ठं ज्ञात्वा याजकस्तं न रोत्स्यति किन्त्वशुचिं
१२ वदिष्यति यतः सोऽशुचिः। कुष्ठेन सर्व्वचर्म्मणि व्याप्ते तस्य शिरसः
पादं यावत् कुष्ठं व्याप्नोत् इत्थं यदि याजकः पश्यति तर्हि स विवेक्ष्यति
१३ यदि कुष्ठेन सर्व्वाङ्गं व्याप्तं, तर्हि तं शुचिं वदिष्यति यतो यस्य सर्व्वाङ्गं
१४ शुक्लमभूत् सएव शुचिः। यदा तस्य काये आममांसं प्रकाशते तदा
१५ सोऽशुचि र्भविष्यति। याजकस्तस्याममांसं दृष्ट्वा तमशुचिं वदिष्यति यत-
१६ स्तद् आममांसमशुचि तदेव कुष्ठं भवति। तद् आममांसं यदि पुनः
१७ शुक्लीभवति तर्हि स याजकान्तिकं यास्यति। तदा याजकेन तस्मिन् दृष्टे
यदि तस्य व्याधिः सर्व्वाङ्गे श्वेतो भवति तर्हि तं रोगिणं शुचिं वदिष्यति
तेन स शुचि र्भविष्यति।

१८ कायचर्म्मणि स्फोटको जातो निरामयश्चाभूत् पश्चात् तत्स्थाने
१९ यदि श्वेतचिह्नं वा श्वेतरक्तवर्णं स्नेहवचिह्नं जायते तर्हि तत् याजकं
२० दर्शयिष्यति। याजकेन तस्मिन् दृष्टे यदि तत् चर्म्मणो ऽधो भवति तस्य
रोमाणि च श्वेतानि जातानि तर्हि याजकस्तमशुचिं वदिष्यति स
२१ स्फोटान्निर्गतः कुष्ठव्याधिः। किन्तु याजको यदि तत्र श्वेतरोमाणि न
पश्यति स व्याधिश्चर्म्माधश्च न भवतीषन्मलिनो भवति तर्हि याजकस्तं सप्त
२२ दिनानि रुद्ध्वा निधास्यति। पश्चात् स यदि चर्म्म व्याप्नोति तर्हि याजक-
२३ स्तम् अशुचिं वदिष्यति तदेव कुष्ठं। किन्तु यदि स्निग्धचिह्नं स्वस्थाने
तिष्ठति न वर्द्धते तर्हि तत् क्षतस्य चिह्नं याजकस्तं शुचिं वदिष्यति।

२४ यदि मांसे वा चर्म्मणि वह्निदाहो भवति तद्दाहस्य रक्तश्वेतवर्णं
२५ शुक्लवर्णं वा स्निग्धचिह्नं भवति तर्हि याजकेन तस्मिन् दृष्टे यदि स्निग्ध-
चिह्ने स्थितरोमाणि श्वेतानि भवन्ति चिह्नञ्च दृष्ट्या चर्म्माधःस्थं भवति
तर्हि तद् दग्धाङ्गात् निर्गतं कुष्ठं तस्माद् याजकस्तम् अशुचिं वदिष्यति
२६ तदेव कुष्ठं। किन्तु स्निग्धचिह्ने स्थितरोमाणि श्वेतानि न भवन्ति चिह्नञ्च

चर्म्माधो नहि किन्तु मलिनमस्तीत्थं दृष्ट्वा याजकस्तं सप्तदिनानि रुद्ध्वा
निधास्यति। सप्तमेऽह्नि याजकस्तं वीक्षिष्यते यदि तत् चर्म्म व्याप्नोति २७
तर्हि याजकस्तम् अशुचिं वदिष्यति तदेव कुष्ठं। यदि स्निग्धचिह्नं २८
स्वस्थाने तिष्ठति चर्म्मणि च न वर्द्धते किन्त्वीषन्मलिनं भवति तर्हि स
दग्धस्थानस्य शोथो याजकस्तं शुचिं वदिष्यति यतस्तद् वह्निक्षतक्षतस्य
चिह्नं।

पुरुषस्य योषितो वा शिरसि श्मश्रुणि वा व्याधौ जाते याजकस्तं २९
द्रक्ष्यति यदि दृष्ट्या चर्म्माधो बुध्यते तत्र हारिद्राणि सूक्ष्मलोमानि ३०
तिष्ठन्ति तर्हि याजकस्तम् अशुचिं वक्ष्यति सा कच्छुरर्थात् शिरःस्थितं
श्मश्रुमध्यस्थितं कुष्ठं। याजकेन कच्छुव्याधौ दृष्टे यदि तस्य दृष्ट्या स ३१
व्याधिश्चर्म्माधो न भवति तत्र कृष्णं रोम न तिष्ठति तर्हि याजकस्तं कच्छु-
रोगिणं सप्त दिनानि रोत्स्यति। पश्चात् सप्तमेऽह्नि याजकेन तस्मिन् ३२
दृष्टे तस्य दृष्ट्या यदि स रोगो न वर्द्धते तत्र हारिद्रं लोम न तिष्ठति
दृष्ट्या चर्म्माधो न बुध्यते तर्हि स मुण्डयिष्यते किन्तु रोगस्थानं न मुण्डयि- ३३
ष्यते, ततो याजकस्तं रोगिणं पुनः सप्त दिनानि रोत्स्यति। सप्तमेऽह्नि ३४
याजकस्तं रोगं द्रक्ष्यति यदि स रोगश्चर्म्मणि न वर्द्धते दृष्ट्या चर्म्मणो
ऽधो न भवति तर्हि याजकस्तं शुचिं वदिष्यति स स्ववस्त्रं प्रक्षाल्य शुचि
र्भविष्यति।

तस्य शुचित्वात् परं यदि चर्म्मणि स रोगोतीव वर्द्धते तर्हि याजकस्तं ३५
पुन र्द्रक्ष्यति यदि तस्य चर्म्मणि कच्छु र्वर्द्धते तर्हि हारिद्रं लोम न मृगयि- ३६
ष्यते सोऽशुचिः। किन्तु तस्य दृष्ट्या स रोगो न वर्द्धते कृष्णरोमाण्युत्ति- ३७
ष्ठन्ति तर्हि तस्य रोग उपाशाम्यत् स शुचिरभूत् याजकस्तं शुचिं
वदिष्यति।

यदि कस्यचित् पुरुषस्य स्त्रिया वा कायचर्म्मणि चिक्कणानि चिह्ना- ३८
न्यर्थात् श्वेतानि स्निग्धचिह्नानि भवन्ति तर्हि याजकस्तानि द्रक्ष्यति ३९
तस्य चर्म्मस्थितानि स्निग्धचिह्नानीषन्मलिनानि श्वेतानि च भवन्ति
तर्हि तत्र चर्म्मणि निर्दोषास्तिलकाः स शुचिः स्थास्यति। यस्य केशाः ४०
शिरसश्च्युताः स खलतिः शुचिः स्थास्यति। यस्य कचाः शिरोग्रपार्श्वात् ४१
च्युताः स भाले खलतिः शुचि र्भविष्यति। किन्तु यदि खलते र्नरस्य ४२
शिरसि भाले वा ईषल्लोहितं शुक्लक्षतं भवति तर्हि तस्य केशहीने
शिरसि भाले वा जातं कुष्ठं। याजकेन तस्मिन् दृष्टे यदि देहचर्म्मस्थं कुष्ठ- ४३

४४ मिव केशहीने शिरसि भाले वा शुक्ललोहितक्षतस्य शोथो भवति,
तर्हि स कुष्ठ्यशुचिः याजकस्तमवश्यम् अशुचिं वदिष्यति तच्छिरसि कुष्ठ-
४५ मस्ति। यस्य कुष्ठरोगो जायते तस्य वस्त्रं छेत्स्यते तच्छिरो न छादिष्यते
स निजं चिबुकं वस्त्रेण छादयित्वा अशुचिरशुचिरिति शब्दं करि-
४६ ष्यति। यति दिनानि तस्य कुष्ठव्याधिः स्थास्यति स तति दिनानि
अशुचिः स्थास्यति अशौचाद् एकाकी वत्स्यति शिविराद् वहिस्तस्य
वासस्थानं भविष्यति।

४७ रोमजे वा आतसवस्त्रे रोमजस्य आतसस्य वा अयायां नयायां वा
४८ चर्म्मणि चर्म्मनिर्म्मितद्रव्ये वा यदि कुष्ठं जायते तथा वस्त्रे चर्म्मणि वा
४९ अयायां नयायां वा चर्म्मनिर्म्मिते कुत्रचिद् द्रव्ये यद्यल्पं श्यामता वाल्प-
लोहितता भवति तर्हि तत् कुष्ठं भवति तद् याजकं दर्शयिष्यते।
५० ततो याजकस्तं रोगं दृष्ट्वा रोगयुक्तं वस्तु सप्त दिनानि रोधयिष्यति।
५१ सप्तमेऽह्नि तद्रोगस्य स्थानं द्रक्ष्यति यदि वस्त्रे वा अयायां नयायां वा
चर्म्मणि वा चर्म्मनिर्म्मितद्रव्ये वा स व्याधि वर्द्धते तर्हि तत् संहारकं
५२ कुष्ठं तदशुचि। तस्मात् वस्त्रे वा रोमजस्य आतसजस्य वा अयायां
नयायां वा चर्म्मनिर्म्मिते वा यत्र कुत्रचित् द्रव्ये स व्याधि जायते तदेव
५३ द्रव्यं दाहयिष्यते, तत् संहारकं कुष्ठं तद् वह्निना दाहयिष्यते। याज-
केन दृष्टे स व्याधि यदि वस्त्रे अयायां नयायां वा चर्म्मकृतद्रव्ये वा
५४ न वर्द्धते तर्हि याजकस्तद्व्याधियुक्तं द्रव्यं प्रक्षालयितुम् आदेक्ष्यति
५५ पुनः सप्त दिनानि रोधयिष्यति। धौते याजकस्तद् द्रक्ष्यति तत्र स व्याधि
यद्यन्यवर्णो न भवति न च वर्द्धते तर्हि तदेवाशुचि त्वं तद् वह्निना दाह-
५६ यिष्यसि। अन्तर्वहिर्वा तिष्ठति तत् कुष्ठं भवति किन्तु क्षालनात् परं
याजकस्य दृष्ट्या तद् यदि मलिनं भवति तर्हि स वस्त्रात् चर्म्मणः
५७ अयायां नयायां वा तत् छेत्स्यति। तथापि तद्वस्त्रे वा तदयायां नयायां
वा तच्चर्म्मनिर्म्मितद्रव्ये वा यदि तत् पुन दृश्यते तर्हि तदेव वर्द्धमानं
५८ कुष्ठं यत्र स व्याधि स्तिष्ठति तत् त्वं वह्निना दाहयिष्यसि। यद् वस्त्रं वा
तदायां नयां चर्म्मणो द्रव्यं वा क्षालयिष्यसि तस्माद् यदि स व्याधिः
शाम्यति तर्हि द्वितीयवारं तद् धाविष्यसि तेन तत् शुचि भविष्यति।
५९ रोमजस्य आतसस्य वा वस्त्रस्य अयाया नयाया वा चर्म्मणः पात्रस्य वा
शौचाशौचकथनाय कुष्ठव्याधेरियं व्यवस्था।

१४ चतुर्दशोऽध्यायः।

१ कुष्ठिनः शुचित्वविधिः प्रायश्चित्तं ३३ गृहीयकुष्ठचिह्ननिर्णयः ४८ गृहीयकुष्ठस्य शुचित्वविधिप्रायश्चित्ते।

परमेश्वरो मूससमवदत् कुष्ठिनः शुचित्वदिने तस्येयं व्यवस्था स याज- १
कान्तिकम् आनेष्यते याजकः शिविराद् बहि र्गत्वा तं द्रक्ष्यति कुष्ठिनः २
कुष्ठे शान्तिं गते सति याजकेन तस्य शोध्यनरस्यार्थं द्वौ जीवन्तौ ४
शुचिपक्षिणौ एरसकाष्ठं रक्तं रोम एसोवतृणम् एतानि ग्राहयिष्यन्ते, ५
मृत्पात्रस्थप्रस्रवणतोयोपरि पक्षिणोरेकश्छेदयिष्यते। स तं जीवत्पक्षिणं ६
एरसकाष्ठं रक्तलोम एसोवतृणञ्च गृहीत्वा तत्प्रस्रवणोद्धृततोयमिश्रिते
हतपक्षिरक्ते तानि जीवत्पक्ष्यादीनि सर्व्वाणि मञ्जयिष्यति। कुष्ठात् शोध्य- ७
जनस्योपरि सप्तकृत्वस्तत् प्रक्षिप्य तं शुचीकृत्य तं जीवत्पक्षिणं प्रान्तरे
त्यक्ष्यति। तदा स शुचि र्जनः स्ववस्त्रं धौत्वा केशान् मुण्डयित्वा तोयेन ८
स्नास्यति तेन स शुचि र्भविष्यति ततः स शिविरं प्रवेष्टुं शक्ष्यति किन्तु
सप्तदिनानि स्वदूष्यस्य बहिः स्थास्यति। सप्तमेऽह्नि स्वशिरसः कचात् ९
श्मश्रूणि भ्रुवोः सर्व्वाङ्गलोमानि च मुण्डयिष्यति। स्ववसनं धौत्वा स्वयं
तोयेन स्नात्वा शुचि र्भविष्यति। अष्टमेऽह्नि स निर्दोषौ मेषशावकौ निर्दो- १०
षाम् एकहायनीं मेषवत्सां नैवेद्यार्थं दशमांशत्र्यंशपरिमितानि तैल-
मिश्रितानि गोधूमचूर्णानि लोगेकं तैलञ्च ग्रहीष्यति। शुचिकर्त्ता ११
याजकस्तं शोध्यमनुजं तानि वस्तूनि च गृहीत्वा समाजावासस्य द्वारा-
न्तिके परमेश्वरस्य सम्मुखे स्थापयिष्यति। याजक एकतरं मेषशावकं १२
लोगेकं तैलं गृहीत्वा दोषबलिरूपेणोत्स्रक्ष्यति आन्दोलनीयनैवेद्यार्थं
परमेश्वरसम्मुखे दोलयिष्यति च। प्रायश्चित्तहोमबलीनाम् उत्सर्गस्थले १३
पवित्रस्थाने तं मेषशावकं बलिं दास्यति यतः प्रायश्चित्तबलिरिव
दोषबलि र्याजकस्यांशो भविष्यति अयमप्यति पूतो भविष्यति। याजक- १४
स्तस्य दोषबलेः किञ्चिद् रुधिरं गृहीत्वा तस्य शोध्यजनस्य दक्षिणश्रोत्र-
प्रान्ते दक्षिणकराङ्गुष्ठे दक्षिणपादाङ्गुष्ठे च दास्यति। याजकस्तस्माद् १५
लोगेकतैलात् किञ्चित् तैलं गृहीत्वा स्ववामहस्ततले निषेक्ष्यति।
याजकस्तत्र वामकरतलस्थतैले स्वदक्षिणकराङ्गुलिं मञ्जयित्वा अङ्गुल्या १६
तत्तैलस्य किञ्चित् किञ्चित् सप्तकृत्वः परमेश्वरस्य सम्मुखे प्रक्षेप्स्यति।
स्वकरतलस्थम् अवशिष्टं तैलं गृहीत्वा तस्य शोध्यनरस्य दक्षिणकर्णस्य १७
प्रान्ते दक्षिणकराङ्गुष्ठे दक्षिणपादाङ्गुष्ठे दोषबले रक्तोपरि दास्यति।

१८ ततः परं याजकः स्वकरतलस्थतैलमादाय शोध्यनरस्य शिरस्यभिषेक्ष्यति
१९ याजकः परमेश्वरसम्मुखे तदर्थं प्रायश्चित्तं करिष्यति। याजकः प्रायश्चित्त-
बलिं दास्यति शौचात् शोध्यमानस्य नरस्यार्थं प्रायश्चित्तं करिष्यति
२० ततो होमबलिं दास्यति। इत्थं याजकेन वेदिमानीते होमबलौ नैवेद्ये
२१ चोत्सृष्टे तदर्थं प्रायश्चित्ते कृते च स शुचि र्भविष्यति। स कुष्ठी यदि
दरिद्रः स्यात् एतावद् आनेतुं न शक्नुयात् तर्हि स प्रायश्चित्तं कर्त्तुम्
आन्दोलनार्थं दोषबलेः कृते मेषवत्समेकं तैलमिश्रितगोधूमचूर्णस्य
२२ दशांशस्यैकांशं नैवेद्यम् लोगेकतैलं तस्य सामर्थ्यानुसारात् द्वौ कपोतौ
वा कपोतवत्सावानेष्यति तयोरेकः प्रायश्चित्तबलिरन्यो होमबलि
२३ र्भविष्यति। अष्टमदिने स स्वशौचार्थं समाजावासस्य द्वारसमीपे पर-
२४ मेश्वरस्य सम्मुखे याजकस्य निकटे तान् आनेष्यति। याजको दोष-
बल्यर्थकं मेषशावकं लोगेकतैलञ्च गृहीत्वा परमेश्वरस्य सम्मुखे
२५ आन्दोलनार्थं दोलयिष्यति। स दोषबल्यर्थकं मेषशावकं छेत्स्यति
याजको दोषार्थकबलेः किञ्चिद् रक्तं गृहीत्वा शोध्यजनस्य दक्षिणकर्ण-
२६ प्रान्ते दक्षिणकराङ्गुष्ठे दक्षिणपादाङ्गुष्ठे च दास्यति। याजकस्तस्मात्
२७ तैलात् किञ्चिद् आदाय स्ववामकरतले निषेक्ष्यति। याजको दक्षिण-
कराङ्गुल्या वामकरतलस्थतैलात् किञ्चित् किञ्चित् सप्तकृत्वः परमेश्वरस्य
२८ सम्मुखे प्रक्षेप्स्यति। याजकः स्वकरतलस्थतैलात् किञ्चिदादाय शोध्य-
जनस्य दक्षिणकर्णप्रान्ते दक्षिणकराङ्गुष्ठे दक्षिणपादाङ्गुष्ठे च दोषबले
२९ रक्तस्यानोपरि दास्यति। याजकः शोध्यजनस्य कृते परमेश्वरस्य
३० सम्मुखे प्रायश्चित्तं कर्त्तुं स्वकरस्यावशिष्टं तैलं तच्छिरसि दास्यति। ततः
परं स तत्सामर्थ्यानुसारात् प्राप्तयोः कपोतयो र्युवपारावतयो र्वैकं
३१ दास्यति तेन स्वसामर्थ्यानुसाराद् यौ पक्षिणौ प्राप्तौ, तयोरेकं नैवेद्येन
सहितं प्रायश्चित्तार्थम् अन्यञ्च होमार्थं दास्यति। याजकः शोध्यजनकृते
३२ परमेश्वरस्य सम्मुखे प्रायश्चित्तं करिष्यति। अर्थहीनस्य कुष्ठिनः शोधन-
विधिरिति।

३३ परमेश्वरो मूसाहारोणौ जगादाहं यं देशं अधिकर्त्तुं युष्मभ्यं
३४ दास्यामि तत्किनान्देशप्रवेशकाले युष्माकम् अधिकारदेशस्य कुत्रापि
३५ गृहे मया कुष्ठ उत्पादिते तद्गृहस्वामी समेत्य, मम दृष्ट्या गृहे व्याधिः
३६ प्रकाशित इति कथयित्वा याजकं ज्ञापयिष्यति। गृहस्य सर्व्वं वस्तु यथा
नाशुचि भवति तदर्थं व्याधिं द्रष्टुं याजकस्य प्रवेशात् पूर्व्वं गृहं याजकेन

शून्यं कारयिष्यते, ततो याजको गृहं द्रष्टुं प्रवेक्ष्यति। अनन्तरं याजको ३७
व्याधिं द्रक्ष्यति यदि व्याधि गृहभित्तिषु निम्नी भूत ईषद्धरिद्वर्णो रक्त-
वर्णो वा जायते तद्दृष्ट्या भित्तौ निम्नी भूतो भवति तर्हि याजको वेश्मनो ३८
वहिर्भूय द्वारान्तिकं गत्वा सप्तदिनानि तद्वेश्म रोधयिष्यति। याजकः ३९
सप्तमेऽह्नि पुनरेत्य निरीक्ष्य द्रक्ष्यति यदि वेश्मकुड्ये स व्याधि र्वर्द्धते
तर्हि तस्य व्याधियुक्तान् पाषाणान् वहिष्कृत्य नगरस्य वहिरमेध्यस्थाने ४०
निक्षेप्तुं याजकस्तान् आदेक्ष्यति। ततस्तद्वेश्मनोऽभ्यन्तरस्य चतुर्दिग्भ्यस्तैः ४१
परिष्कारयिष्यन्ते सञ्चिता धूल्यश्च नगरस्य वहिरशुचिस्थाने निक्षेप्-
स्यन्ते। ते ऽन्यग्रावण आनीय तत्पाषाणस्थाने निचेष्यन्ति तदन्यलेपेन ४२
गृहं लेपयिष्यन्ति। पाषाणेषु परिवर्त्तितेषु वेश्मनि परिष्कृते लेपिते च ४३
चेद् व्याधिः पुन र्वृद्धा वेश्म विस्तृणोति तदा याजक एत्य द्रक्ष्यति; यदि ४४
तस्मिन् वेश्मनि व्याधि र्वर्द्धते तर्हि तत्र वेश्मनि मारकं कुष्ठमास्ते
तद् वेश्माशुचि भवति। ततः स तद् वेश्म भञ्जयिष्यति अर्थात् तस्य ४५
ग्रावकाष्ठधूलीः सर्व्वा नगरस्य वहि र्नीत्वाशुचिस्थलं नाययिष्यति।
तद्गृहं यावत्कालं रुद्धं तिष्ठेत्, तत्काले यः कश्चित् तदभ्यन्तरं याति ४६
स सन्ध्यां यावद् अशुचिः स्थास्यति। यश्च तस्मिन् वेश्मनि शेते स निजां- ४७
शुकं धाविष्यति यस्तु तत्र भुंक्ते सोपि स्ववस्त्रं धाविष्यति।
तद्वेश्मनो लेपनात् परं व्याधिर्नावर्द्धतेति चेद् याजको वेश्म प्रविश्य ४८
पश्यति तर्हि याजकस्तद् वेश्म शुचि वदिष्यति यतः स व्याधिरशाम्यत्।
तद् वेश्म शुचीकर्त्तुं द्वौ पक्षिणौ एरस्काष्ठं रक्तं रोम एसोवत्यां ४९
गृहीत्वा मृत्पात्रे प्रस्रवणतोयोपरि पक्षिणमेकं छेत्स्यति। स एरसकाष्ठं ५०
एसोवत्यां रक्तरोम जीवत्पक्षिणञ्च गृहीत्वा प्रस्रवणजलमिश्रिते हत- ५१
पक्षिरक्ते मज्जयित्वा वेश्मनि सप्तकृत्वः प्रक्षेप्स्यति। इत्थं पक्षिरक्तं प्रस्र- ५२
वणतोयं जीवत्पक्ष्येरसकाष्ठैसोवत्यां रक्तरोम चैतैः स वेश्म शोधयि-
ष्यति। तं जीवत्पक्षिणां नगरस्य वहिः प्रान्तरे त्यक्ष्यतीति प्रकारेण ५३
वेश्मार्थं प्रायश्चित्ते कृते तत् शुचि भविष्यति। कुष्ठस्येयं व्यवस्थार्थात् ५४
सर्व्वप्रकारकुष्ठं श्वित्रं वस्त्रस्थं वेश्मस्थञ्च कुष्ठं स्फीतिः पामा स्निग्धं ५५
एतानि कदा शुचीनि कदा चाशुचीनि तज्ज्ञातुमिति व्यवस्था। ५७

---

१५ पञ्चदशोऽध्यायः ।

१ प्रमेहिनः शोधनविधिः १९ रजस्वलायाः शोधनविधिश्च ।

१ परमेश्वरो मूसाहारोणौ जगाद, युवाम् इस्रायेल्वंशं वदतं तान्
२ इमां वाचं गदतं, कस्यचिन्नरस्याङ्गे प्रमेहरोगे जाते तस्मात् सोऽशुचि
३ र्भविष्यति। प्रमेहेन तस्याशौचं भविष्यति विशेषतो यदि तदङ्गात् प्रमेहः
क्षरति वा प्रमेहाद् अङ्गं रुध्यते, इत्यनयोरेकेन तस्याशौचं भविष्यति।
४ प्रमेही नरो यत्र शय्यायां शेते सा शय्या अशुचिः, यत्रासने स उपवि-
५ शति तदासनञ्चाशुचि भविष्यति। यश्च तस्य शय्यां स्पृशति स स्ववस्त्रं
धाविष्यति तोये स्नास्यति तथापि सन्ध्यां यावद् अशुचिः स्थास्यति।
६ प्रमेही यत्र वस्तुन्युपविशति तत्र यः कश्चिद् उपविशति स स्ववसनं
धाविष्यति तोये स्नास्यति तथापि सन्ध्यां यावद् अशुचिः स्थास्यति।
७ यस्तस्याङ्गं स्पृशति स स्ववसनं धाविष्यति तोये स्नास्यति तथापि
८ सन्ध्यां यावद् अशुचिः स्थास्यति। प्रमेही यस्य शुचिनरस्य गात्रे
निष्ठीवति स स्ववसनं धाविष्यति तोये स्नास्यति तथापि सन्ध्यां
९ यावद् अशुचिः स्थास्यति। प्रमेही यद् वाहनम् आरोहति तद् अशुचि
१० भविष्यति। तस्याधःस्थं वस्तु यः स्पृशति स सन्ध्यां यावद् अशुचिः
स्थास्यति यदि तद् वहति तर्हि तोयेन वस्त्रं धाविष्यति तोये स्नास्यति
११ च तथापि सन्ध्यां यावद् अशुचिः स्थास्यति। प्रमेही स्वकरं तोयेन न
धौत्वा यं स्पृशति स स्ववस्त्रं धाविष्यति तोये स्नास्यति तथापि सन्ध्यां
१२ यावद् अशुचिः स्थास्यति। प्रमेही यन्मृत्पात्रं स्पृशति तद् भज्यते सर्व्वं
१३ काष्ठपात्रं तोयेन धाविष्यति। प्रमेही यदा स्वप्रमेहात् शुद्ध्यति तदा स
स्वशुचित्वात् परम् अपराणि सप्त दिनानि योजयित्वा स्ववस्त्रं धाविष्यति
१४ प्रस्रवणतोये स्नास्यति ततः शुचि र्भविष्यति। अष्टमेऽह्नि स स्वार्थं द्वौ
कपोतौ कपोतवत्सौ वा गृहीत्वा परमेश्वरस्य सम्मुखे समाजावास-
१५ द्वारान्तिकम् एष्यति तौ याजकाय दास्यति। याजकस्तयोरेकं प्राय-
श्चित्तार्थम् एकञ्च होमार्थम् उत्स्रक्ष्यति याजकस्तस्य प्रमेहकारणात्
१६ परमेश्वरमुद्दिश्य प्रायश्चित्तं करिष्यति। यदि कस्यचिन् मनुजस्य शुक्रं
पतति तर्हि स निजं कृत्स्नदेहं जलेन धाविष्यति तथापि सन्ध्यां यावद्
१७ अशुचिः स्थास्यति। यत्र यत्र वस्त्रे वा कृत्तौ शुक्रं पतति तत्सर्व्वं तोयेन
१८ धाविष्यते तथापि सन्ध्यां यावद् अशुचि स्थास्यति। यया योषिता सार्क्कं

यः पुमान् शुक्रेण समं शेते तौ जले स्नास्यतः, तथापि सन्ध्यां यावद्
अशुचिः स्यास्यतः।
या योषिद् रजस्वला भवति तस्या अङ्गाद् रुधिरं क्षरति सप्तदिनानि १९
तस्या अशौचं भविष्यति यश्च तां स्पृशति स सन्ध्यां यावद् अशुचिः
स्थास्यति। तदशौचकाले सा यत्र यत्र शयनीये शेते तद् अशुचि भवि- २०
ष्यति यत्रोपवेक्ष्यति तद् अशुचि भविष्यति। यश्च तस्याः शयनीयं २१
स्प्रक्ष्यति स स्ववस्त्रं धाविष्यति तोये स्नास्यति तथापि सन्ध्यां यावद्
अशुचिः स्थास्यति। यस्तु तस्या उपवेशनाधारं स्प्रक्ष्यति, स स्ववस्त्रं धा- २२
विष्यति तोये स्नास्यति, तथापि सन्ध्यां यावद् अशुचिः स्थास्यति।
यस्तु तस्याः शय्यास्थम् आसनस्थं वा वस्तु स्पृशति सोपि सन्ध्यां यावद् २३
अशुचिः स्थास्यति। यः पुमान् ऋतुमत्या साकं संसर्गं करोति तद्रज- २४
स्तद्गात्रे लगति स सप्तदिनान्यशुचिः स्थास्यति यत्र शय्यायां शेष्यते
साप्यशुचि भविष्यति। अशौचकालाद् अन्यानि बहुदिनानि यावद् २५
यदि कस्याश्चिद् योषितो रक्तं स्रवति अशौचकालात् परं वा यदि बहु-
दिनानि तस्या रक्तं क्षरति तर्हि सा तद्रक्तस्रावात् तानि सर्व्वदिनानि
यावद् अशौचकालवद् अशुचिः स्थास्यति। रक्तस्रावस्य सर्व्वदिनानि २६
सा यत्र शय्यायां शेष्यते साऽशौचकालवद् अशुचि भविष्यति यत्र चासन
उपवेक्ष्यति तद् अशौचकालवद् अशुचि भविष्यति। यश्च तानि २७
स्प्रक्ष्यति सोऽशुचि भविष्यति वस्त्रं धौत्वा तोये स्नास्यति तथापि सन्ध्यां
यावद् अशुचिः स्थास्यति। किन्तु यदि तस्याः स्त्रिया रक्तस्रावो निवर्त्तते २८
तर्हि सा स्वार्थं सप्त दिनानि गणयित्वा तेभ्यो गणितसप्तदिनेभ्यः परं
शुचि भविष्यति। अष्टमेऽह्नि सा स्वार्थं द्वौ कपोतौ कपोतवत्सौ वा २९
गृहीत्वा समाजावासद्वारे याजकान्तिकम् आनेष्यति। याजकस्तयो- ३०
रेकं प्रायश्चित्तबलिम् अन्यं होमबलिम् उत्स्रक्ष्यति तस्या रक्तस्रावाशौच-
कारणात् परमेश्वरस्य समीपे तस्याः कृते प्रायश्चित्तं करिष्यति। लोकानां ३१
मध्यवर्त्तिनि ममावासे ऽशौचकाले तैरशुचीकृते ते यन्न म्रियन्ते तदर्थं
इस्रायेल्वंशाः स्वाशौचात् युवाभ्याम् इत्थं पृथक् करिष्यन्ते। इति प्रमे- ३२
हिनः शुक्रक्षरणादशुचे र्नरस्य रजस्वलायाः स्त्रियाः प्रमेहवत्स्त्रीपुंस- ३३
योरशुचिस्त्रिया साकं संसर्गिणश्च व्यवस्था।

१६ षोड़शोऽध्यायः।

१ याजकस्यातिपूतस्थानप्रवेशविधिः ११ याजकस्य प्रायश्चित्तबलिदानं १५ लोकानां प्रायश्चित्तबलिदानं २० त्याज्याजविधिः २९ वार्षिकबलिदानविधिः।

१ परमेश्वरान्तिके गमनसमये हारोणस्य द्वयोः सुतयो र्मृत्यौ घटिते
२ परमेश्वरो मूससं बभाषे। परमेश्वरो मूससे कथामिमां कथितवान्
तव भ्राता हारोणो यन्न म्रियेत, तदर्थं विच्छेदकवसनस्य मध्यवर्त्ति-
मञ्जूषाया उपरिस्थपापाच्छादनस्य सम्मुखम् अतिपूतं स्थानं सर्व्वसमये
३ प्रवेष्टुं तं निषेध, पापाच्छादनोपर्य्यहं मेघे दर्शनं दास्यामि। हारोणः
प्रायश्चित्तार्थं गोवत्समेकं होमार्थं मेषमेकं गृहीत्वा इत्थम् अति पवित्र-
४ स्थानं प्रवेक्ष्यति। स आतसमुत्तरासङ्गं परिधास्यति आतसं कटिवस-
नञ्च परिधास्यति आतसं कटिबन्धनञ्च परिधास्यति आतसस्योष्णी-
षेण भूषितो भविष्यति; एतानि वसनानि पवित्राणि, तस्मात् तोयेन
५ स्वकायं धौत्वा तानि परिधास्यति। ततः स इस्रायेल्वंशस्य समाजात्
६ प्रायश्चित्तार्थकं छागद्वयं होमार्थकं मेषमेकञ्च ग्रहीष्यति। हारोणः स्वस्य
प्रायश्चित्तार्थकं गोवत्सम् आनीय स्वस्य परिवारस्य च कृते प्राय-
७ श्चित्तं करिष्यति। ततस्तौ छागौ गृहीत्वा समाजावासस्य द्वारान्तिके
८ परमेश्वरस्य सम्मुखम् आनेष्यति। अधिछागौ तौ द्वौ हारोणो गुटिका-
९ पातं करिष्यति तयोरेकः परमेश्वराय तदन्यस्त्यागाय भविष्यति। अयं
परमेश्वरायेति यं छागं प्रति गुटिकापातेन निश्चीयते हारोणस्तं
१० गृहीत्वा प्रायश्चित्तार्थं बलिं दास्यति। किन्तु योऽजो गुटिकापातेन
त्यागाय भविष्यति प्रान्तरे त्यागाय तद्विसर्जनात् पूर्व्वं तस्य कृते प्रायश्चित्तं
कर्त्तुं जीवता तेन परमेश्वरस्यान्तिके समुपस्थातव्यं।
११ हारोणः स्वीयप्रायश्चित्तबलिं गोवत्सम् आनीय स्वस्य परिजनस्य
च कृते प्रायश्चित्तं करिष्यति, स्वीयप्रायश्चित्तबलिं तं गोवत्सं छेत्स्यति।
१२ परमेश्वरस्य सम्मुखस्थवेद्याः प्रज्वलिताङ्गारैः पूर्णं धूपपात्रं चूर्णीकृत-
१३ सुगन्धिसर्जरसमुष्टिमेकञ्च गृहीत्वा विच्छेदकवस्त्रमध्यं नेष्यति। तं सुग-
न्धिसर्जरसं परमेश्वरस्य सम्मुखे वह्नौ दास्यति तेन साक्ष्यमञ्जूषोपरि
१४ स्थिते पापाच्छादने सर्जरसस्य धूमेनावृते सति स न मरिष्यति। ततः स
तस्य गोवत्सस्य किञ्चिद् रक्तं गृहीत्वा पापाच्छादनस्य पूर्व्वदिशि स्वाङ्गुल्या
प्रक्षेप्स्यति स्वाङ्गुल्या तद्रक्तम् पापाच्छादनस्य सम्मुखे सप्त वारान्
प्रक्षेप्स्यति।

ततः स लोकानां प्रायश्चित्तार्थकबलिं छागं छित्वा तद्रक्तं विच्छेद- १५
वस्त्रमध्यम् आनीय गोवत्सरक्तं यथा प्रक्षिप्तवान्, तथा तद्रक्तमपि
करिष्यति अर्थात् पापाच्छादनस्य सम्मुखे पापाच्छादने च तत् प्रक्षे-
प्स्यति। इस्रायेल् वंशानाम् अशुचितासर्व्वपापापराधेभ्यः स पवित्रस्था- १६
नार्थं प्रायश्चित्तं करिष्यति अशुचितायुक्तानां तेषां मध्यवर्त्तिनः समाजा-
वासस्य हेतोः स तथा करिष्यति। प्रायश्चित्तं कर्त्तुं तस्य महापूत- १७
स्थानप्रवेशमारभ्य वहिरागमनं यावत् समाजावासे कोपि जनो न
स्थास्यति। अपरं तेन स्वस्य परिवारस्य इस्रायेल्वंशस्य सर्व्वसमाजस्य १८
च प्रायश्चित्ते समापिते स परमेश्वरसम्मुखस्थाया वेद्याः समीपम् आगत्य
तदर्थं प्रायश्चित्तं करिष्यति, गोवत्साजयोः किञ्चिद् रक्तमादाय वेदि-
शृङ्गेषु चतुर्दिक्षु दास्यति। तद्रक्तस्य किञ्चिद् आदाय स्वाङ्गुल्या १९
तदुपरि सप्तकृत्वः प्रक्षिप्य तां शुचिं करिष्यति इस्रायेल्वंशस्याशौचात्
तां पावयिष्यति।

इत्थं पूतस्थानस्य समाजावासस्य वेद्याश्च प्रायश्चित्ते सम्पन्ने जीवदजः २०
समानेष्यते। हारोणस्तस्य जीवदजस्य शिरसि स्वकरावर्पयित्वा इस्रा-
येल्वंशस्य सर्व्वदोषपापापराधान् तदुपरि स्वीकृत्य तत्सर्व्वान् तद- २१
जशिरस्यर्पयिष्यति तत उपयुक्तनरेण तं प्रान्तरे विस्रक्ष्यति तेन सोजस्तेषां
सर्व्वपापानि नरशून्यस्थाने शिरसा वक्ष्यति सोऽजस्तेन प्रान्तरे त्यक्ष्यते।
हारोणो महापूतस्थानप्रवेशकाले यान्यातसवसनानि पर्य्यधात् तानि २२
समाजावासमध्यं गत्वा त्यक्त्वा तत्र स्थापयिष्यति। स पूतस्थाने स्वदेहं २३
जलेन धौत्वा स्ववस्त्राणि परिधाय निर्गमिष्यति स्वस्य लोकानाञ्च होमबलिं
दत्त्वा स्वस्य लोकानाञ्च कृते प्रायश्चित्तं करिष्यति। तत्प्रायश्चित्तबले र्मेदो २४
वेद्यां दाहयिष्यति। यः पुमान् त्याज्यमजं त्यक्ष्यति स स्ववस्त्राणि
प्रक्षाल्य स्वदेहं जलेन धौत्वा शिविरम् आगमिष्यति। यस्य प्रायश्चित्त- २५
बले र्गोवत्सस्य यस्य च प्रायश्चित्तबलेरजवत्सस्य रक्तं प्रायश्चित्तार्थं २६
पूतस्थानम् आनीतं लोकास्तौ शिविरवहि र्नीत्वा तयोः कृत्तिक्रव्यविष्ठा २७
वह्निना दाहयिष्यन्ति। यस्तानि दाहयिष्यति स स्ववस्त्राणि धाविष्यति २८
तोये देहं स्नापयिष्यति ततः शिविरमध्यम् आगमिष्यति।

युष्माकं कृते नित्यविधिरयं भविष्यति सप्तममासस्य दशमे दिवसे २९
स्वदेशीया वा युष्मन्मध्यवासिनो विदेशीया यूयं स्वप्राणेषु दुःखं दास्यथ
किमपि कर्म्म न करिष्यथ यस्मात् तदह्नि याजको युष्मान् शुचीकर्त्तुं

युष्मत्कृते प्रायश्चित्तं करिष्यति तेन यूयं परमेश्वरस्य सम्मुखे स्वपापेभ्यः
३० परिष्कारिष्यध्वे। तद् युष्माकं विश्रामाय विश्रामदिनं, यूयं नित्य-
३१ विधिना स्वस्वप्राणान् तापयिष्यथ। यो जनो स्वपितृपदेन यागं कर्त्तुं
लोकैरभिषिच्य याजनपदे नियोच्यते, सएव प्रायश्चित्तं करिष्यति
३२ आतसानि पूतवस्त्राणि परिधास्यति च। सोऽतिपूतस्थानाय प्रायश्चित्तं
करिष्यति समाजावासस्य वेद्याश्च कृते प्रायश्चित्तं करिष्यति, याज-
३३ कानां समाजस्थानां सर्व्वेषाञ्च कृते प्रायश्चित्तं करिष्यति। इस्रायेल्वंशस्य
सर्व्वपापात् वर्षमध्य एककृत्वः प्रायश्चित्तं कर्त्तुं युष्मभ्यमयं नित्यविधि
र्भविष्यति। ततो मूससं प्रति परमेश्वरस्य यथा निदेशं तथा कर्म्मा-
क्रियत।

---

१७ सप्तदशोऽध्यायः।

१ आवासद्वारें परमेश्वरमुद्दिश्य सर्व्वमुत्सृष्टमाज्ञा देवानुद्दिश्य उत्सृष्टं निषेधः ८ तत्करणफलं १० रक्तपाननिषेधः २५ स्वयं मृतस्य पशुना हतस्य वा पशो र्भक्षण-निषेधश्च।

१ परमेश्वरो मूससमवदत् त्वं हारोणं तत्सुतान् इस्रायेल्वंशांश्च वद
३ तेभ्य एतद्वाचं कथय परमेश्वर इत्यादिशति। इस्रायेल्वंशजो यः
४ कश्चिद् गां वा मेषं छागं वा शिविरमध्ये शिविरवहि र्वा छिनत्ति किन्तु
परमेश्वरावाससम्मुखे परमेश्वरमुद्दिश्य उपहारमुत्स्रष्टुं समाजावास-
द्वारान्तिकं नानयति तं प्रति रक्तपातपापं भविष्यति स रक्तपातनात्
५ स्वलोकानां मध्याद् उच्छेत्स्यते। अस्यायमाशय इस्रायेल्वंशाः स्वं स्वं
बलिं प्रान्तरं न नीत्वा समाजावासद्वारान्तिके परमेश्वरमुद्दिश्य याज-
६ कान्तिकमानीय मङ्गलार्थं परमेश्वरमुद्दिश्य उत्स्रक्ष्यन्ति। याजकः समा-
जावासस्य द्वारान्तिके परमेश्वरस्य वेद्या उपरि तेषां बलीनां रक्तं
७ प्रक्षेप्स्यति परमेश्वरमुद्दिश्य सुगन्धार्थं मेदो दाहयिष्यति। तेन ते
ये दैवैः सह व्यभिचरन् तानुद्दिश्य पुन र्बलिं न दास्यन्ति तेषां
पुरुषपरम्परासु नित्यविधिरयमेको भविष्यति।
८ पुनस्त्वं तान् वद इस्रायेल्वंशीयो वा युष्माकं मध्ये प्रवासिविदेशी
९ यः कश्चित् प्रायश्चित्तबलिं होमबलिञ्च ददाति किन्तु परमेश्वरम्
उद्दिश्योत्स्रष्टुं तं समाजावासान्तिकं नानयति स स्वलोकानां मध्याद्
उच्छेत्स्यते।

इस्रायेल्वंशीयो युष्माकं मध्ये प्रवासिविदेशी वा यः कश्चित् किञ्चन १०
रक्तं भुंक्ते तं रक्तभोक्तारं प्रति विमुखोऽहं भविष्यामि लोकानां
मध्यात् तमुच्छेत्स्यामि। यतो रक्तमध्ये देहस्य जीवनं तिष्ठति युष्माकं ११
प्राणकारणात् प्रायश्चित्तं कर्त्तुम् अहं वेद्या उपरि युष्मभ्यं तददां,
प्राणस्य प्रायश्चित्तं रक्तमेव भवति। अत इस्रायेल्वंशमहम् अवदं १२
युष्माकं मध्ये कोपि रक्तं न भोक्ष्यते युष्माकं मध्यवासी कश्चिद् विदेश्यपि
रक्तं न भोक्ष्यते। इस्रायेल्वंशीयो युष्मन्मध्यवासिविदेशी वा यः १३
कश्चित् मृगयया कमपि भक्ष्यं पशुं पक्षिणं वा हन्ति स तस्यास्रं
निक्षिप्य धूलीभिराच्छादयिष्यति। यतो ऽस्रमेव सर्व्वप्राणिनां जीवनं १४
अर्थात् जीवनोपायो ऽतोऽहम् इस्रायेल्वंशाय कथितवान् यूयं कस्यापि
प्राणिनोऽस्रं न भक्ष्यध्वं, यतो ऽस्रमेव सर्व्वप्राणिनो जीवनं यः कश्चित्
तद् भोक्ष्यते स उच्छेत्स्यते।

स्वदेशिविदेशिनां मध्ये यः स्वयं मृतं पशुना हतं वा पशुं भुंक्ते स १५
स्ववस्त्रं धाविष्यति तोये स्नास्यति च तथापि सन्ध्यां यावद् अशुचिः
स्थास्यति ततः शुद्धो भविष्यति। किन्तु यदि न धावति न स्नाति वा १६
तर्हि स स्वपापं भोक्ष्यते।

---

१८ अष्टादशोध्यायः।

१ ईश्वराज्ञां पालयितुं विनयः ६ अविहितविवाहकथनं १९ अविहितानां नाना कर्म्मणां कथनञ्च।

परमेश्वरो मूससं जगाद त्वम् इस्रायेल्वंशान् वद तेभ्य इमां वाचं १
कथय, अहं युष्माकं प्रभुः परमेश्वरः। यूयं यत्र मिसर्देशे न्यवसत २
तन्मतानुसारतो नाचरत यं किनान् देशं युष्मान् नेष्यामि तन्मतानु-
सारादपि नाचरत तत्रस्थानां व्यवस्थाभि र्न वर्त्तध्वं। किन्तु मम राज्य- ४
नीती मन्यध्वं मम विधीन् पालयध्वं तदनुसारेणाचरत यस्मादहमेव
युष्माकं प्रभुः परमेश्वरः। मम विधयो राज्यनीतयश्च युष्माभिः पालनीया ५
यो जनस्तान् पालयिष्यति सएव तद्द्वारा जीविष्यति, परमेश्वरो ऽहं।

यूयं स्वगोत्रस्य निषिद्धस्त्रिया आवरणं मोचयितुं तदन्तिकं मा ६
यात यस्मादहं परमेश्वरः। त्वं स्वपितु र्मातु र्वा नावरणं मोचय ७
यतः सा तव माता, त्वं तस्या आवरणं मा मोचय। तव पितृजायाया ८
आवरणीयं मा मोचय यस्मात् तत् पितुरावरणं भवति। तव ९

भगिनी अर्थात् तव पितुः कन्या वा मातुः कन्या सा गेहजाता वान्यत्र
१० जाता भवेत् तस्या आवरणं मा मोचय। पौत्र्या दौहित्र्या वावरणं
११ मा मोचय तत् तवावरणं भवति। तव विमातृसुताया आवरणं मा
१२ मोचय यतः सा तव पितृतो जाता तव स्वसा भवति। तव पितृस्वसु-
१४ रावरणं मा मोचय सा तव पितृगोत्रजा। मातुः स्वसुरावरणं मा
मोचय सा तव मातृगोत्रजा। तव पितृव्यावरणं मा मोचय तत्पत्नीं
१५ मा गच्छ च यतः सा तव मान्या भवति। तव पुत्रवध्वा आवरणं मा
१६ मोचय यतः सा स्नुषा भवति तस्या आवरणं मा मोचय। तव सहज-
१७ जायाया आवरणं मा मोचय यस्मात् तत् तव सहजावरणं। यस्या
योषाया आवरणं मोचयसि, तस्याः सुताया आवरणं मा मोचय,
आवरणं मोचयितुं तस्याः पौत्रीं दौहित्रीं वा मा गृहाण यतः सा
तद्गोत्रजा कर्म्मेदं गुरुपापं।
१८ स्वजायायाः क्लेशभयात् तज्जीवत्काले तत्स्वसुरावरणं यन्न मोचयेस्तदर्थं
१९ कामपि स्त्रियं तत्स्वसुः सपत्नीरूपेण मा गृहाण। ऋतुमत्या अशौ-
२० चकाले तस्या आवरणं मोचयितुं तस्याः समीपं मा याहि। त्वं स्वात्मानम्
२१ अशुचिं कर्त्तुं स्वसमीपवासिनो जायां मा गच्छ। त्वदंशजातं कमपि
मोलक् देवमुद्दिश्य वह्निमध्येन मा गमय त्वदीश्वरस्य नामाशुचि मा
२२ कुरु अहमेव परमेश्वरः। स्त्रियेव पुंसा समं संसर्गं मा कार्षीस्तदकर्त्तव्यं
२३ कर्म्म। त्वं स्वम् अशुचिं कर्त्तुं कमपि पशुं मा गच्छ कापि योषा केन-
चित् पशुना साकं शृङ्गारं कारयितुं तत्सम्मुखे न तिष्ठतु यस्मात् तत्
२४ विपरीतं कर्म्म। यूयम् एतैः कर्म्मभिः स्वान् अशुचीन् मा कार्ष्ट किन्तु
२५ यान् जातीयान् युष्मत्सम्मुखात् द्रवयिष्यामि ते कर्म्मभिरेतैरशुचयो-
ऽभूवन् देशोप्यशुचिरभूत् अतोहं तत्कलुषाणि तान् भोजयिष्यामि
२६ देशः स्वनिवासिन उद्गरिष्यति। अतः स्वदेशीया युष्माकं मध्ये प्रवा-
सिनो विदेशीयाश्च सर्व्वे यूयं एतादृशम् घृणनीयं कर्म्म न कुर्व्वाणा मम
२७ विधीन् व्यवस्थाश्च पालयत। युष्माकं पूर्व्ववर्त्तिनाम् एतद्देशीयजनानां
२८ तादृशार्त्तनीयकर्म्मकरणाद् देशोऽशुचिरभूत् तस्माद् यूयं सावधाना
भवत, नो चेद् युष्माकं पूर्व्ववर्त्तिनो जातीया यद्वद् अनेन देशेनोद्गीर्णा-
२९ स्तद्वद् यूयमपि स्वीयाशुचित्वात् तेनोद्गरिष्यध्वे। यतो येन केनचित्
एषां मध्ये कापि घृणार्हा क्रिया क्रियते स निजलोकेभ्य उच्छेत्स्यते।
३० अतो युष्मत्पूर्व्वकालीयै र्यानि घृण्यकर्म्माण्यक्रियन्त यूयं तानि मा कुरुत

तैः स्वान् अशुचीन् अकृत्वा मदाज्ञां पालयत अहमेव युष्माकं प्रभुः परमेश्वरः।

१९ ऊनविंशोऽध्यायः।

१ नानाविधविधिव्यवस्थानां वर्णनं।

परमेश्वरो मूससमवदत् त्वम् इस्रायेलवंशानां सर्व्वसमाजाय कथय १
तान् इमां वाणीं वद यूयं पविचा भवत यतो युष्माकं प्रभुः परमेश्वरो- २
ऽहमेव पविचः।

यूयं स्वस्वमातरं पितरञ्चाद्रियध्वं मम विश्रामदिनानि पालयत ३
यतोऽहं युष्माकं प्रभुः परमेश्वरः। यूयं देवगणस्य पश्चाद्गामिनो मा भूत ४
स्वार्थं धातुमयीं मूर्त्तीं मा कार्ष्ट यतोऽहं युष्माकं प्रभुः परमेश्वरोऽस्मि।

परमेश्वरमुद्दिश्य मङ्गलार्थकबलिदानसमये यूयम् अनुग्रहलाभार्थं ५
दानं करिष्यथ। बलिदानस्याह्नि तत्परेऽह्नि च तन्मांसं भक्षिष्यथ यदि ६
तृतीयदिनं यावत् तदवशिष्टं तिष्ठति तर्हि तद् वह्निना दाहयिष्यथ।
किन्तु तृतीयदिने यदि कश्चित् तस्य किञ्चित् भुंक्ते तर्हि स घृणार्हो ७
ऽग्राह्यश्च भविष्यति। भोक्ता तत्पापं भोक्तव्यं यतः स परमेश्वरस्य ८
पविचं वस्तु सामान्यं कृतवान् अतः स स्वलोकेभ्य उच्छेत्स्यते।

यूयं स्वस्वक्षेत्रस्य शस्यकर्त्तनकाले क्षेत्रस्य कोणे निःशेषं न छन्तत न च ९
स्वस्वक्षेत्रपतितं शस्यमुञ्छत। गोस्तनीक्षेत्रस्य सर्व्वं फलं न संगृह्णीत १०
गोस्तनीक्षेत्रे पतितं फलं न संगृह्णीत दरिद्रेभ्यो विदेशिभ्यः किञ्चित्
त्यजत युष्माकं प्रभुः परमेश्वरोऽहं।

यूयं मा चोरयत मा वञ्चयत परस्परं मृषा मा वदत च। ११

यूयं मम नाम्ना मृषा शपथं मा कुरुत स्वीयेश्वरस्य नाम साधारणं मा १२
कार्ष्ट च यस्मादहं परमेश्वरः।

त्वं स्वसमीपवासिनं प्रति नान्यायं कुरु मापहर वेतनभुजो वेतनं १३
आ रात्रेः प्रातर्यावत् मा निधेहि।

त्वं वधिरं मा शपस्व, अन्धसम्मुखे बाधकं वस्तु मा निधेहि किन्तु त्वदी- १४
श्वरात् विभीहि परमेश्वरोऽहमेव।

त्वं विचारे नान्यायं कुरु दुर्गतस्य पक्षपातं मा कुरु धनिनं मा सम्म- १५
न्यस्व न्यायेन स्वसमीपवासिनो विचारं निष्पादय।

१६ त्वं कर्णेजपन् स्वलोकानां मध्ये मा भ्राम्य स्वसमीपवासिनि हते निश्चेष्टो
मा तिष्ठ, परमेश्वरोऽहमेव।
१७ त्वं मनसा स्वभ्रातरं मा ऋतीयस्व किन्तु स्वसमीपवासिनं स्वयं
तिरस्करिष्यसि तेन तत्पापं न भोक्ष्यसे।
१८ त्वं मा प्रतिहिंस्याः स्वलोकानां वंशं मा द्विष्याः समीपवासिनि स्ववत्
प्रेम कुर्य्याः परमेश्वरोऽहमेव।
१९ त्वं मद्यवस्थाः पालय अन्यजातीयैः पशुभिः समं स्वपशून् मा क्रीडय
त्वदेकक्षेत्रे नानाजातीयवीजानि मा वप अतसीलोम्नो वस्त्रं मा परि-
धेहि।
२० मूल्येन न मुक्ता तदन्यथा वा न विसृष्टा या वाग्दत्ता दासी तया सह
२१ यदि कश्चित् संसर्गं करोति तर्हि तौ दण्ड्यौ भविष्यतस्तौ न घानिष्येते
यतः सा न मुक्ता। स पुमान् समाजावासस्य द्वारान्तिकं परमेश्वरमुद्दिश्य
२२ दोषार्थबलिम् अर्थात् दोषार्थमेषबलिम् आनेष्यति। याजकः परमेश्वरम्
उद्दिश्य दोषार्थमेषबलिं दत्त्वा तत्कृतपापस्य प्रायश्चित्तं करिष्यति तेन
तस्य पापं क्षंस्यते।
२३ यूयं देशं प्रविश्य भक्षणार्थं यान् यान् पादपान् रोपयिष्यथ तत्-
फलान्यच्छिन्नत्वक्केन गणयिष्यथ, यथा युष्मभ्यं बहुफलान्युत्पद्यन्ते
तदर्थं वर्षत्रयं यावत् ते युष्माकं पक्षे अच्छिन्नत्वचः स्थास्यन्ति तत्
२४ फलानि न भक्षिष्यत। चतुर्थवर्षे सर्व्वफलानि परमेश्वरप्रशंसायै पूतानि
२५ भविष्यन्ति। पञ्चमवर्षे तत्फलानि भोक्ष्यध्वे युष्माकं प्रभुः परमेश्वरोऽहं।
२६ युष्माभिरस्रेण साकं किमपि वस्तु न भोक्तव्यं, मायाविद्या न व्यव-
हार्य्या शुभाशुभकालौ न विचार्य्यौ।
२७ यूयं स्वस्वशिरसः कचान् वर्त्तुलान् मा कार्ष्ट स्वस्वश्मश्रूणां कोणं
२८ मा मुण्डयत। यूयं प्रमीतानां कृते स्वस्वाङ्गं अस्त्रै मा हत वपुःस्वक्षत-
चिह्नं मा चित्रयत, परमेश्वरोऽहं।
२९ यूयं स्वस्वसुतां वेश्यालये मा प्रवर्त्तयत नोचेत् कृत्स्नो देशो व्यभिचरि-
ष्यति कुकर्म्मणा देशः पूरिष्यते।
३० यूयं मद्विश्रामदिनानि पालयत मत्पूतस्थानम् आद्रियध्वं परमेश्वरो-
ऽहमेव।
३१ यूयं भूतविदो न मन्यध्वं स्वान् अशुचीन् कर्त्तुं गुणिनां समीपे किमपि
मा चेष्टध्वं यस्मादहमेव युष्माकं प्रभुः परमेश्वरः।

यूयं पक्वकचानां प्राचीनानां सम्मुख उत्थाय तिष्ठत वृद्धान् समाद्रियध्वं ३२
स्वेश्वरात् बिभीत परमेश्वरोऽहमेव।
कश्चन विदेशी यदि युष्मद्देशे युष्माभिः साकं निवसति तर्हि यूयं तं ३३
नोपद्रवत युष्मद्वंशीयो युष्मत्सहवासिविदेशी च युष्माकं दृष्ट्या समौ ३४
भविष्यतः, विदेशिनम् आत्मवत्प्रीयध्वं यतो यूयं मिसर्देशे विदेशिन
आस्त युष्माकं प्रभुः परमेश्वरोऽहं।
यूयं विचारे वा परिमाणे वा तौले वा द्रोणे नान्यायं कुरुत। न्याय्यो ३५
दण्डो न्याय्यो मानपाषाणो न्याय्य एफा न्याय्यो हिन् च युष्माकं भवन्तु ३६
यो मिसर्देशात् युष्मान् वहिरानयत् युष्माकं स प्रभुः परमेश्वरोऽहं। अतो ३७
यूयं मम सर्व्वा विधिव्यवस्था मन्यमानाः पालयत परमेश्वरोऽहं।

---

२० विंशोऽध्यायः।

१ मोलक्देवमुद्दिश्य पुत्त्रोत्सर्गाद्दण्डः ६ भूतविद्भिः, सह मन्त्रणातो दण्डः ७ पूतत्वकथनं ९ मातरपित्रोः शपनाद्दण्डः १० अशुचिकर्म्मणा दण्डः २२ आज्ञापालनकथनं २७ भूतविदां दण्डश्च।

परमेश्वरो मूससमवदत् त्वम् इस्रायेल्वंशाय पुनः कथय इस्रायेल्वंश- १
मध्ये तेषां देशे प्रवासिविदेशिनां मध्ये वा यः कश्चित् स्ववंशीयं कमपि २
मोलक्देवम् उद्दिश्य ददाति स नितान्तं घानिष्यते देशीयलोकास्तं पाषाणै
र्हनिष्यन्ति। अहमपि तं मानुषं प्रति विमुखीभूय स्वलोकेभ्यस्तम् उच्छे- ३
त्स्यामि यतः स मोलक्देवमुद्दिश्य स्ववंशजं दत्त्वा मत्पूतस्थानम् अपवित्री
करोति मम पवित्रं नाम च साधारणं करोति। यदा पुमान् स्वसन्तानं ४
मोलक्देवायोत्सृजति, तदा यदि देशीयलोकास्तं दृष्ट्वापि न पश्यन्ति तं
न घ्नन्ति तदाहं तं तस्य वंशञ्च प्रति विमुखीभूय तं मोलक्देवेन समं ५
व्यभिचर्त्तुं तत्पश्चाद्गामिनः सर्व्वांश्च स्वलोकेभ्य उच्छिन्नान् करिष्यामि।
यश्च भूतविद्भि र्गुणिभिर्वा साकं व्यभिचर्तुं तेषां पश्चाद् गच्छति अहं ६
तं प्रति विमुखीभूय स्वलोकेभ्यस्तम् उच्छेत्स्यामि।
यूयं स्वान् पावयित्वा पूता भवत यस्मादहं युष्माकं प्रभुः परमेश्वरः। ७
यूयं मम विधीन् सम्मन्य पालयत युष्माकं पावकः परमेश्वरोऽहं। ८
यः स्वपितरं मातरं वा शपते स नितान्तं घानिष्यते पित्रोः शपनात् ९
तदुपरि बधापराधो भविष्यति।
यदि कश्चित् परस्य जायया समं व्यभिचरति तर्हि यः समीपवासिनो १०

११ यया भार्य्यया समं व्यभिचरति स व्यभिचारी सा व्यभिचारिणी चोभौ
नितान्तं घानिष्येते। यदि कश्चित् पितु र्जायाया आवरणीयं नग्नी करोति
तामुपगच्छति तर्हि तौ नितान्तं घानिष्येते तयोरुपरि बधापराधो भवि-
१२ ष्यति। यदि कश्चित् पुत्रबधूं गच्छति तर्हि तावपि नितान्तं घानिष्येते
१३ अतिकुकर्म्मकरणात् तौ प्रति बधापराधो भविष्यति। पुमान् यदि
स्त्रीवत् पुमांसमुपगच्छति तर्हि घृणार्हकर्म्मकरणात् तौ नितान्तं घानि-
१४ ष्येते तयोरुपरि बधापराधो भविष्यति। यदि कश्चित् कन्यां तन्मातरञ्च
गच्छति तर्हि तद् घृणार्हं कर्म्म युष्मन्मध्ये यथा तादृशी दुष्टता न जायते
१५ तदर्थं ते त्रयोपि वह्निना दाहयिष्यन्ते। यदि कश्चित् कमपि पशुं
१६ गच्छति तर्हि स नितान्तं घानिष्यते यूयं तं पशुमपि हनिष्यथ। काचि-
न्नारी यदि पशुना साकं संसर्गं कर्त्तुं तदन्तिकं गत्वा शेते तर्हि त्वं तां
नारीं तं पशुञ्च घातयिष्यसि तौ नितान्तं घानिष्येते तौ प्रति बधापराधो
१७ भविष्यति। यदि कश्चित् स्वभगिनीम् अर्थात् पितुः कन्यां मातृकन्यां वा
गृह्णाति तयोरुभयोरावरणीयं यद्युभाभ्यां दृश्यते तर्हि तद्गुरुपापं
तौ स्वलोकानां दृष्टित उच्छेत्स्येते यतः स स्वभगिन्या आवरणीयस्य
१८ नग्नत्वकरणात् स्वपापफलं स्वयं भोक्ष्यते। कश्चिद् यदि रजस्वलां योषितं
गच्छति तदावरणीयं नग्नी करोति तर्हि तेन पुंसा रुधिरखनिप्रकटी-
करणात् तया योषिता स्वास्वखनिप्रकटीकरणाच्च तावुभौ स्वलोकानां
१९ मध्याद् उच्छेत्स्येते। त्वं स्वमातृस्वसुः पितृस्वसु र्वा आवरणीयं नग्नी मा
कुर्य्याः, यः कश्चिद् इत्थं स्वगोत्रजाताया आवरणीयं नग्नी करोति तावुभौ
२० स्वपापं भोक्ष्येते। यः स्वमातुलीं गच्छति स्वमातुलावरणीयनग्नीकरणात्
२१ तौ स्वं स्वं पापफलं भोक्ष्येते निरपत्यौ च मरिष्यतः। यः स्वभ्रातृजायां
गच्छति सोऽशुचिकर्म्म कुरुते स्वभ्रातृजायाया आवरणीयस्य नग्नत्वकर-
णात् तौ निरपत्यौ भविष्यतः।

२२ यूयं मम सर्व्वं विधिं व्यवस्थाञ्च पालयथ तेनाहं वस्तुं युष्मान् यं देशं
२३ नयामि स देशो युष्मान् नोद्गरिष्यति। अहं युष्माकं सम्मुखाद्
या जाती र्दवयिष्यामि तेषाम् आचारानिव नाचरिष्यथ यस्मात् ते तानि
२४ कुकर्म्माणि कृतवन्तस्ततोहं तान् ऋतीयितवान्। किन्त्वहं युष्मभ्यमकथयं
यूयं तेषां देशमधिकरिष्यथ, अहं युष्मभ्यं तं दुग्धमधुप्रवाहिनं देशम्
अधिकर्त्तुं दास्यामि यत इतरलोकेभ्यो युष्मान् पृथक्कृद् युष्माकं प्रभुः
२५ परमेश्वरोहं। अतो यूयं शुच्यशुचिपशून् शुच्यशुचिपक्षिणश्च भेत्स्यथ,

अहं यान् पशून् पक्षिणः कीटादीन् जन्तून् अशुचीन् उक्का युष्मान्
पृथक् कृतवान् तै र्यूयं स्वान् स्वान् प्राणान् घृणार्हान् मा कुरुत। यूयं २६
मामुद्दिश्य पवित्रीभवत यतोऽहं परमेश्वरएव पवित्रः किञ्चाहं युष्मान्
स्वलोकान् कर्त्तुं अन्यलोकेभ्यः पृथक् कृतवान्।
पुमान् स्त्री वा यो भूतविद् गुणी वा भवति स नितान्तं घानिष्यते २७
लोकैः स पाषाणै र्हनिष्यते। तं प्रति बधापराधो भविष्यति।

२१ एकविंशोध्यायः।

१ याजकान् प्रति शोकविवाहादे र्व्यवस्था १६ देहे दोषिणां याजकस्य कर्म्मकरण-निषेधः।

परमेश्वरो मूससमवदत् त्वं हारोणवंशीययाजकान् वद तेभ्यइमां १
कथां कथय स्वलोकानां मध्ये कस्मिंश्चिन् मृतएव याजकोऽशुचि र्न भवि-
ष्यति। केवलस्वगोत्रे अर्थात् मातृपितृपुत्त्रकन्याभ्रातृषु मृतेष्वशुचि २
र्भविष्यति। यस्याः समीपस्थभगिन्याः पति र्नास्ति तस्यामनूढायां भगिन्यां ३
मृतायाम् अशुचि र्भविष्यति। किन्तु ते मुख्यीभूय स्वलोकानां मध्ये स्वान् ४
साधारणान् कर्त्तुम् अशुचीन् न करिष्यन्ति। ते स्वं स्वं शिरो न मुण्ड- ५
यिष्यन्ति श्मश्रूणां कोणमपि न मुण्डयिष्यन्ति देहेष्वस्त्राघातं न करि-
ष्यन्ति। ते स्वेश्वरमुद्दिश्य पवित्री भविष्यन्ति स्वेश्वरस्य नाम साधारणं न ६
करिष्यन्ति यस्मात् ते परमेश्वरमुद्दिश्य वह्निकृतमुपहारं अर्थाद् ईश्वरस्य
भक्ष्यमुत्सृजन्ति तस्मात्ते पवित्रा भविष्यन्ति। ते वेश्यां कलङ्किनीं वा न ७
विवक्ष्यन्ति पतित्यक्तामपि न विवक्ष्यन्ति यतस्ते स्वेश्वरम् उद्दिश्य पूता
भवन्ति। अतस्त्वं याजकं पावयिष्यसि यतः स त्वदीश्वरस्य भक्ष्यमुत्सृ- ८
जति स त्वदर्थं पवित्रो यतो युष्मत्पावकः परमेश्वरोऽहं पवित्रः।
कस्यचिद् याजकस्य कन्या यदि व्यभिचारक्रियया स्वाम् अशुचिं करोति ९
तर्हि सा स्वतातम् अशुचिं करोति सा वह्निना दह्यते। स्वीयभ्रातृणां १०
मध्ये श्रेष्ठस्य यस्य याजकस्य शिरस्यभिषेकार्थं तैलं निषिक्तं यस्य पदनियो-
गात् पूतवस्त्रपरिधानाधिकारी जातः स स्वशिरो नग्नी न करिष्यति
निजवस्त्रं न छेत्स्यति। स कस्यापि कुणपस्यान्तिकं गृहं न प्रवेक्ष्यति ११
स्वपित्रो र्मरणादप्यशुचि र्न भविष्यति। पवित्रस्थानादपि न निर्गमिष्यति १२
स्वेश्वरस्य पूतं स्थानं साधारणं न करिष्यति यतस्तदीयेश्वरस्याभिषेकार्थ-
तैलाक्तकिरीटं तदुपर्य्यास्ते परमेश्वरोऽहमेव। स केवलं कुमारीं विव- १३

१४ च्यति। किन्तु विधवां त्यक्तां कलङ्किनीं वेश्यां वा न विवक्ष्यति स निज-
१५ लोकमध्यात् कुमारीं विवक्ष्यति। स निजलोकानां मध्ये स्ववंशं नापवित्रं
करिष्यति यतोऽहमेव तत्पावकः परमेश्वरः।
१६ परमेश्वरो मूससं जगाद त्वं हारोणाय कथय तव वंशस्य पुरुषपरम्प-
१७ रायां यस्य गात्रे दोष स्तिष्ठति स स्वेश्वरमुद्दिश्य भक्ष्यं निवेदितुं समीपं
१८ न यास्यति। यस्य लोकस्य दोषोऽस्ति स निकटवर्त्ती न भविष्यति
१९ विशेषाद् अन्धः खञ्जो व्यङ्गो ऽधिकाङ्गो भग्नपदो भग्नहस्तः कुब्जो वामनो
२० नेत्ररोगी श्वित्ररोगी कण्डुमान् भग्नमुष्क एतद्दोषवान् हारोणयाजक-
२१ वंशस्य कोऽपि पुरुषः परमेश्वरमुद्दिश्य वह्निकृतोपहारम् उत्स्रष्टुं
समीपं न यास्यति तस्य दोषोऽस्ति तस्मात् स स्वेश्वरमुद्दिश्य भक्ष्यमुत्-
२२ स्रष्टुं समीपवर्त्ती न भविष्यति। स ईश्वरस्य नैवेद्यं अर्थाद् अतिपूतं
२३ पूतभक्ष्यञ्च भोक्ष्यते। किन्तु विच्छेदकवस्त्रस्य समीपं न प्रवेक्ष्यति वेद्याः
समीपञ्च न यास्यति यस्मात् तस्य दोषोऽस्ति स मम पूतस्थानम् अपूतं
२४ न करिष्यति तस्य पावकः परमेश्वरोऽहमेव। इत्थं मूसा हारोणं तस्य
सुतान् सर्व्वम् इस्रायेल्वंशञ्च वाचमिमां बभाषे।

---

२२ द्वाविंशोऽध्यायः।

१ अपवित्रीभूतस्य याजकस्य पवित्रवस्तुनः पृथग्भवनविधिः १० याजकस्य गृहवासिनां मध्ये पवित्रवस्तुभक्षणे विधिनिषेधौ १४ अज्ञानात् पवित्रवस्तुभक्षणात् प्रायश्चित्तं १७ निर्दोषबलेरावश्यकत्वं २६ बलेर्वयो निरूपणं २९ प्रशंसार्थबलिकथनञ्च।

१ परमेश्वरो मूससमवदत् त्वं हारोणं तत्सुतांश्च वद यूयं इस्रायेल्-
२ वंशस्य पवित्रवस्तुषु सावधाना भवत, मम यन्नाम उद्दिश्य तैस्तानि
३ पवित्रीक्रियन्ते, मम तत् पवित्रं नाम अमेध्यं मा कुरुत यतोऽहमेव
परमेश्वरः। तान् वद युष्माकं पुरुषपरम्परायां वंशमध्ये यः कश्चिद्
अशुचि भूत्वा इस्रायेल्वंशेन परमेश्वरम् उद्दिश्य पावितवस्तुनः समीपं
४ यास्यति स मम सम्मुखाद् उच्छेत्स्यते परमेश्वरोऽहमेव। हारोणवंशस्य
यः कुष्ठी प्रमेही वा भवति स यावत् शुचि र्न भविष्यति तावत् पवित्रं
५ वस्तु न भोक्ष्यते। यो ऽपूतवस्तु स्पृशति अर्थात् मृतं रेतःपातिनं वा
६ अशौचजनकान् कीटादीन् केनचित् प्रकारेणाशौचजनकं मानुषं वा यः
स्पृशति स सन्ध्यां यावद् अशुचिः स्थास्यति जले स्वगात्रमधौत्वा पूतं

वस्तु न भोक्ष्यते। ततः सूर्य्येऽस्तं गते स पवित्रीभूय पूतं वस्तु भक्षिष्यति ७
यस्मात् तत् तस्यैव भक्ष्यं भवति। स्वम् अपूतं कर्त्तुं स्वयं मृतस्य छिन्नस्य ८
वा पशो र्मांसं कोपि न भोक्ष्यते परमेश्वरोऽहमेव। ते मम विधानं ९
पालयन्तु नोचेत् तत्र सामान्यज्ञाने कृते ते स्वपापं भोक्ष्यन्ते मरिष्यन्ति
च तेषां पावकः परमेश्वरोऽहमेव।

अन्यजातीयो लोकः पवित्रं वस्तु न भोक्ष्यते वस्तुतो याजकस्य गृह- १०
प्रवासी वेतनभुग्वा पवित्रं वस्तु न भोक्ष्यते। किन्तु याजको यदि रूप्येण ११
कमपि प्राणिनं क्रीणाति तर्हि स भोक्ष्यते तस्य गृहजाता लोकाश्च
तस्यान्नं भक्षिष्यन्ति। याजकस्य कन्या यद्यन्यजातीयेन व्युह्यते तदा सा १२
पवित्रवस्तुरूपम् उपहारं न भोक्ष्यते। यदि याजकस्य दुहिता विधवा १३
त्यक्ता निरपत्या वा भूत्वा पुनरनूढावत् तातगेहे तिष्ठति तर्हि सा
स्वतातस्यान्नं भोक्ष्यते किन्त्वन्यजातीयो लोकस्तन्न भोक्ष्यते।

यदि कश्चिद् अज्ञानात् पवित्रं वस्तु भोक्ष्यते तर्हि स तद्वत् पूतं १४
वस्तु तस्य पञ्चमांशम् अधिकं याजकाय दास्यति। इत्थं इस्रायेल्वंशाः १५
परमेश्वरम् उद्दिश्य यानि पूतवस्तूनि निवेदयन्ति याजकास्तानि सामा- १६
न्यानि न करिष्यन्ति। पूतवस्तुभोजनकाले स्वान् दोषदण्डं न भोजयि-
ष्यन्ति यस्मादहमेव तेषां पावकः परमेश्वरः।

परमेश्वरो मूससमवदत् त्वं हारोणाय तत्सुतेभ्य इस्रायेल्वंशाय च १७
कथय तान् इति वाचं वद, इस्रायेल्वंशस्तन्मध्ये प्रवासिनश्च ये परमे- १८
श्वरम् उद्दिश्य प्रतिश्रुतान् वा दत्तान् स्वेच्छोपहारान् आनयन्ति तेषां
मध्ये यः परमेश्वरम् उद्दिश्य होमबलिम् उत्सृजति सोऽनुग्रहलाभाय १९
गोभ्यो मेषेभ्यश्छागेभ्यो वा निर्दोषं पुंपशुम् उत्स्रक्ष्यति। यूयं सदोषं २०
किमपि न निवेदयिष्यथ यतो युष्मत्कृते तन्न ग्राहिष्यते। कोपि लोको २१
यदि मानससिद्ध्यर्थं वा स्वेच्छोपहारार्थं गोभ्यो मेषादिभ्यो वा मङ्गलार्थकं
बलिम् उत्सृजति तर्हि स निर्दोषो भविष्यति तत्र कोपि दोषो न
स्थास्यति। यूयं परमेश्वरम् उद्दिश्य अन्धं भग्नं छिन्नं सव्रणं सश्वित्रं पाम- २२
युक्तं वा पशुं न निवेदयिष्यथ तं परमेश्वरम् उद्दिश्य वेद्यां वह्निकृतम्
उपहारं मा कुरुत। अधिकाङ्गं हीनाङ्गं वृषं मेषवत्सं वा स्वेच्छात २३
उत्स्रष्टुं शक्नुथ किन्तु संकल्पार्थं स न ग्राहिष्यते। मर्द्दितं पिष्टं भग्नं २४
सच्छतञ्च पशुं परमेश्वराय न निवेदयिष्यथ। तादृशः पशु युष्मद्देशे न २५
तिष्ठतु, यूयं विदेशिनो हस्तादपि तादृशं पशुं ईश्वरीयभक्ष्यं न निवे-

यिष्यथ यतस्तेषां मध्ये ऽपवित्रम् आस्ते तेषां मध्ये दोषोस्ति ते युष्म-
द्धस्तान्न ग्राहिष्यन्ते।
२६ परमेश्वरो मूससमवदत् गोमेषछागशावकेषु जातेषु सप्त दिनानि
२७ यावत् मात्रा साकं ते स्थास्यन्ति ततो ऽष्टमदिनमारभ्य परमेश्वरम्
२८ उद्दिश्य ते वह्निकृतोपहाराय ग्राहिष्यन्ते। गौ र्मेषी वा भवेत् तां
तद्वत्सञ्च नैकदिने हनिष्यथ।
२९ यूयं यदा परमेश्वरम् उद्दिश्य प्रशंसाया बलिम् उत्स्रक्ष्यत तदानु-
३० ग्रहलाभाय तम् उत्स्रक्ष्यथ तस्मिन्नेव दिने तं भोक्ष्यध्वे च प्रात र्यावत्
३१ तस्य किञ्चिदप्यवशिष्टं मा स्थापयिष्यथ परमेश्वरोहमेव। यूयं मदाज्ञाः
३२ सम्मन्य पालयिष्यथ परमेश्वरोहमेव। यूयं मम पूतं नामापूतं न करि-
३३ ष्यथ किन्त्वहम् इस्रायेलो वंशमध्ये पवित्रत्वेन मंस्ये युष्माकं पावकः
परमेश्वरोहं। युष्माकम् ईश्वरो भवितुं मिसर्द्देशात् युष्मान् वहिरानयं
अहमेव परमेश्वरः।

---

२३ त्रयोविंशोध्यायः।

१ परमेश्वरोत्सवाः ३ अर्थात् विश्रामवारः ४ निस्तारोत्सवः ९ प्रथमशस्यसुष्युत्सर्गः १५ पञ्चाशद्दिनोत्सवः २२ पतितशस्यसंग्रहनिषेधः २३ तूरीवाद्योत्सवः २६ प्राय-श्चित्तादि दिननिरूपणं ३० कुटीरवासोत्सवश्च।

१ परमेश्वरो मूससमवदत् त्वम् इस्रायेल्वंशेभ्यः कथय तान् इति वाचं
२ वद। यूयं पवित्रसभार्थं परमेश्वरस्य यान् उत्सवान् प्रचारयिष्यथ
तइमे मदुत्सवाः।
३ यूयं षड् दिनानि कर्म्म करिष्यथ, किन्तु सप्तमदिनं पवित्रसभार्थं
विश्रामदिनं तद्दिने किमपि कर्म्म न करिष्यथ, तद् युष्माकं सर्व्वनिवासे
परमेश्वरम् उद्दिश्य विश्रामदिनं भविष्यति।
४ यूयं स्वनिरूपितकाले पवित्रसभाकरणार्थं परमेश्वरस्यैतान् उत्सवान्
५ प्रचारयिष्यथ। प्रथममासस्य चतुर्द्दश दिनस्य सन्ध्यायां परमेश्वरम्
६ उद्दिश्य निस्तारो महो भविष्यति। तन्मासस्य पञ्चदश दिने परमेश्वरम्
उद्दिश्य किण्वशून्यपूपानां महं कृत्वा सप्त दिनानि किण्वहीनान् पूपान्
७ भोक्ष्यध्वे। प्रथमेह्नि युष्माकं पवित्रा समिति र्भविष्यति तत्र यूयं किमपि
८ वृत्तिकर्म्म न करिष्यथ। किन्तु सप्ताहं परमेश्वरम् उद्दिश्य वह्निकृतो-

उपहारं निवेदयिष्यथ सप्तमे दिने पवित्रा समज्या भविष्यति तत्र यूयं
किमपि वृत्तिकर्म्म न करिष्यथ।

परमेश्वरो मूससमवदत् त्वम् इस्रायेल्वंशं वद तान् इति वाचं गद ९
अहं युष्मभ्यं यं देशं दास्यामि तं प्रविश्य यदा यूयं शस्यं कर्त्तिष्यथ तदा १०
युष्माकं प्रथमकृत्तशस्यस्य मुष्टिमेकं याजकान्तिकम् आनेष्यथ। युष्माकं ११
अनुग्रहलाभाय याजकस्तं मुष्टिं परमेश्वरस्य सम्मुखे दोलयिष्यति
अर्थात् विश्रामवारस्य परदिने याजकस्तं दोलयिष्यति। किन्तु यद्दिने १२
यूयं तं मुष्टिं दोलयिष्यथ तद्दिने परमेश्वरम् उद्दिश्य होतुं प्रथमवर्षीयं
निर्दोषम् एकं मेषशावकं उत्स्रक्ष्यथ। तस्य तन्नैवेद्यं दशमांशद्वयं तैल- १३
मिश्रितं सूक्ष्मगोधूमचूर्णं, तत् परमेश्वरम् उद्दिश्य वह्निकृतं सुगन्धि-
नैवेद्यं भविष्यति, तस्य पानीयं नैवेद्यं हिनेकपरिमितस्य द्राक्षारसस्य
चतुर्थांशो भविष्यति। यूयं यावद् ईश्वरम् उद्दिश्य तदुपहारं नानयत १४
तद्दिनं यावत् पूपं भृष्टशस्यं छिन्नकणिशं वा न भोक्ष्यथ युष्माकं पुरुष-
परम्परायां सर्व्वनिवासेषु नित्यविधिरयं भविष्यति।

ततो विश्रामवारस्य परदिनमारभ्य अर्थात् आन्दोलनीयं मुष्ट्यानय- १५
नमारभ्य यूयं पूर्णान् सप्त सप्ताहान् गणयिष्यथ। इत्थं सप्तमस्य विश्राम- १६
वारस्य परदिनं यावद् यूयं पञ्चाशत् दिनानि गणयित्वा परमेश्वरम्
उद्दिश्य नवजातं नैवेद्यं निवेदयिष्यथ। दयो दशमांशयो द्वौ दोलनीय- १७
पूपौ स्वस्वनिवासात् आनयिष्यथ तौ सूक्ष्मगोधूमचूर्णेन करिष्यथ
किण्वेन पक्ष्यथ तत् परमेश्वरम् उद्दिश्य प्रथमं फलं भविष्यति। यूयं १८
ताभ्यां पूपाभ्यां साकं प्रथमवर्षीयान् निर्दोषान् सप्त मेषशावकान् एकं
युवदृषं द्वौ मेषौ बलिं दास्यथ स ईश्वरम् उद्दिश्य होमबलि र्भवि-
ष्यति नैवेद्येन पानीयद्रव्येण च समं परमेश्वरम् उद्दिश्य वह्निकृतः
सुगन्धि र्होमबलि र्भविष्यति। ततो यूयं प्रायश्चित्तबलये छागवत्समेकं १९
मङ्गलार्थबलये एकहायनौ द्वौ मेषशावकौ बली दास्यथ। याजकः २०
प्रथमफलस्य पूपै द्वाभ्यां मेषशावकाभ्याञ्च समं तान् परमेश्वरम् उद्दिश्य
दोलयिष्यति तेन तत्सर्व्वं याजकार्थं परमेश्वरम् उद्दिश्य पूतं भविष्यति।
यूयं तद्दिने पवित्रां समितिं प्रचारयिष्यथ यूयं किमपि वृत्तिकर्म्म २१
न करिष्यथ युष्माकं पुरुषपरम्परायां सर्व्वनिवासेषु नित्यविधिरयं
भविष्यति।

युष्माकं भूमेः शस्यकर्त्तनकाले यूयं स्वस्वक्षेत्रस्य कोणं निःशेषं न छेत्- २२

त्स्यथ स्वक्षेत्रस्य पतितं शस्यं न संग्रहीष्यथ तत् दीनविदेशिनां कृते
त्यक्ष्यथ युष्माकं प्रभुः परमेश्वरोऽहं।
२३ ततः परमेश्वरो मूससमवदत् त्वम् इस्रायेल्वंशं वद, सप्तममासस्य
२४ प्रथमदिनं युष्माकं विश्राममदिनं भविष्यति, अर्थात् तूरीवाद्येन स्मरणा-
२५ र्थिका पवित्रा समिति भविष्यति। तत्र यूयं किमपि वृत्तिकर्म्म न
करिष्यथ, किन्तु परमेश्वरम् उद्दिश्य वह्निकृतोपहारम् उत्स्रक्ष्यथ।
२६ ततः परमेश्वरो मूससमवदत् सप्तममासस्य दशमदिनं प्रायश्चित्तदिनं
२७ भविष्यति तत्र युष्माकं पवित्रा समिति भविष्यति, तद्दिने यूयं स्वप्राणान
दुःखा करिष्यथ परमेश्वरम् उद्दिश्य वह्निकृतम् उपहारम् उत्स्रक्ष्यथ।
२८ तद्दिने यूयं किमपि वृत्तिकर्म्म न करिष्यथ यतो युष्माकं कृते युष्मत्प्रभोः
परमेश्वरस्य समक्षं प्रायश्चित्तं कर्त्तुं तदेव प्रायश्चित्तदिनं भविष्यति।
२९ तद्दिने यः स्वप्राणान् दुःखा न करोति स स्वलोकमध्याद् उच्छेत्स्यते।
३० तद्दिने यः कर्म्म करोति तमहं स्वलोकमध्याद् उच्छेत्स्यामि। यूयं किमपि
३१ वृत्तिकर्म्म न करिष्यथ युष्माकं सर्व्वनिवासेषु नित्यविधिरयं भविष्यति।
३२ तद् विश्राममदिनं युष्माकं विश्रामार्थं भविष्यति तत्र दिने यूयं स्वस्व-
प्राणान् दुःखा करिष्यथ मासस्य नवमेऽह्नि सन्ध्यामारभ्य परसन्ध्यां
यावत् यूयं विश्राममदिनं पालयिष्यथ।
३३ ततः परमेश्वरो मूससं जगाद त्वम् इस्रायेल्वंशं वद, सप्तममासस्य
३४ पञ्चदशदिवसमारभ्य सप्तदिनानि यावत् परमेश्वरोद्देश्य उटजमहो
३५ भविष्यति। प्रथमेऽह्नि पवित्रा समिति भविष्यति तत्र यूयं किमपि
३६ वृत्तिकर्म्म न करिष्यथ। सप्त दिनानि यावत् परमेश्वरम् उद्दिश्य
वह्निकृतम् उपहारम् उत्स्रक्ष्यथ, अष्टमेऽह्नि युष्माकं शुध्धा समिति
भविष्यति, तत्र यूयं वह्निकृतम् उपहारं उत्स्रक्ष्यथ, सा निवृत्तिसमिति
३७ भविष्यति तत्र यूयं किमपि वृत्तिकर्म्म न करिष्यथ। एते परमेश्वरस्य
महाः। परमेश्वरस्य विश्राममदिनानि विना परमेश्वरम् उद्दिश्य युष्माकं
३८ देयदानानि विना युष्माकं सर्व्वसङ्कल्पितं विना युष्माकम् ऐच्छिकनैवे-
द्यानि च विना यूयं मेध्यसभाकरणायैतान् महान् प्रचार्य्य प्रतिदिन-
कर्त्तव्यानुसारतः परमेश्वरम् उद्दिश्य वह्निकृतम् उपहारं होमबलिं
३९ नैवेद्यं बलिं पेयनैवेद्यम् उत्स्रक्ष्यथ। पुनः सप्तममासस्य पञ्चदशदिवसे
भूमेरुत्पन्नफलसंग्रहणकाले यूयं परमेश्वरम् उद्दिश्य सप्त दिनानि महं
४० पालयिष्यथ तन्मध्ये प्रथमाष्टमाहनी विश्राममदिने भविष्यतः। प्रथमेऽह्नि

यूयम् उत्तमपादपफलानि तालपत्राणि घनवृक्षशाखास्तटिनीतटस्थ-
वृक्षांश्च गृहीत्वा युष्माकं प्रभोः परमेश्वरस्य समक्षम् आनन्दिष्यथ।
यूयं परमेश्वरम् उद्दिश्य वर्षमध्ये सप्त दिनानि तं महं पालयिष्यथ ४१
युष्माकं पुरुषपरम्परासु स नित्यविधि र्भविष्यति सप्तमे मासि यूयं तं
महं पालयिष्यथ। यूयं सप्त दिवसान् उटजेषु निवत्स्यथ, इस्रायेल्वंशजाः ४२
सर्व्वे उटजेषु वत्स्यन्ति, तेन यदाहम् इस्रायेल्वंशान् मिसर्देशाद् वहि- ४३
रानयं तदा तान् उटजेष्ववासयम् इति युष्माकं भाविपुरुषा ज्ञास्यन्ति,
युष्माकं प्रभुः परमेश्वरोऽहमेव। इस्रायेल्वंशस्य समीपे मूससा परमे- ४४
श्वरस्य सर्व्वमहानां प्रकाशनमिति।

२४ चतुर्व्विंशोऽध्यायः।

१ प्रदीपतैलकथनं ५ दर्शनीयपूपकथनं १० शिलोमीतः पुत्रस्य निन्दाकथनं १७ नरहत्याकथनं १८ परिशोधकथनं २३ निन्दकस्य दण्डश्च।

परमेश्वरो मूसां जगाद त्वम् इस्रायेल्वंशम् इत्यादिश। नित्यं १
प्रदीपान् ज्वालयितुं ते त्वदन्तिकं मर्दितं निर्म्मलं जिततैलम् आने- २
ष्यन्ति। हारोणः समाजावासमध्ये साक्ष्यविच्छेदकवस्त्रस्य वहिरा- ३
सन्ध्यातः प्रभातं यावत् परमेश्वरस्य सम्मुखे प्रत्यहं तान् ज्वालयिष्यति,
स युष्माकं पुरुषपरम्परायां नित्यविधि र्भविष्यति। परमेश्वरस्य सम्मुखे ४
निर्म्मलदीपवृक्षस्योपरि नित्यं तान् दीपान् स्थापयिष्यति।

त्वं सूक्ष्मगोधूमचूर्णेन द्वादश पिष्टकान् भक्ष्यसि तेषाम् एकैकः ५
पिष्टक ऐफादशमांशद्वयेन भविष्यति। एकैकपंक्तौ षट् षट् तादृशौ द्वे ६
पंक्ती कृत्वा परमेश्वरस्य सम्मुखे निर्म्मलभोजनासनोपरि स्थापयिष्यसि।
प्रतिपंक्ति सूक्ष्मकुन्दरून् दास्यसि ते पूपोपरि स्मरणार्थम् अर्थात् पर- ७
मेश्वरम् उद्दिश्य वह्निकृतोपहारार्थं स्थास्यन्ति। याजकः प्रतिविश्रामवारं ८
परमेश्वरस्य सम्मुखे तान् पूपान् नित्यं स्थापयिष्यति, इस्रायेल्वंशात् ते
नित्यनियमेन ग्राहिष्यन्ते। ते हारोणस्य तस्य सुतानाञ्च भविष्यन्ति ९
ततस्ते पूतस्थाने तान् भक्षिष्यन्ति यतो नित्यविधिना परमेश्वरम् उद्दिश्य
वह्निकृतोपहारमध्ये तत् तस्मै महामेध्यं भविष्यति।

इस्रायेलीयामातृको मिस्रीयपितृक एको जन इस्रायेल्वंशसहितो १०
वहिरागच्छत् स शिविरे इस्रायेलीयमानुषेण समं विरुरोध। तस्य ११
माता दान्वंशजा दिब्रेः कन्या शीलोमीत्नामिस्रायेल्वंशीया योषित्,

१२ स परमेश्वरस्य नाम निनिन्द अभिशापञ्च ददौ, तस्मात् जनास्तं
१३ मूससोऽन्तिकं निन्युः परमेश्वरादेशं ज्ञातुं तं कारायां बबन्धुश्च। ततः
१४ परमेश्वरो मूससं जगाद त्वं तमभिशपन्तं शिविरस्य बहिरानय। श्रोता-
१५ रस्तच्छिरसि हस्तान् अर्पयन्तु समाजीयाः सर्व्वे पाषाणैस्तं घ्नन्तु। त्वम्
१६ इस्रायेल्वंशं वद यः स्वेश्वरं निन्दिष्यति स स्वपापं भोक्ष्यते। परमे-
श्वरस्य नामनिन्दकोऽवश्यं घानिष्यते सर्व्वे समाजीयास्तं पाषाणैः हनि-
ष्यन्ति, परमेश्वरस्य नामनिन्दको विदेशी स्वदेशी वा हनिष्यते।
१७ यो मानुषं हन्ति सोऽवश्यं हनिष्यते।
१८ यः पशुं हन्ति स पशो विंनिमयात् पशुं दास्यति। यः स्वसमीप-
१९ वासिनो गात्रे क्षतचिह्नं करोति तत्कृतकर्म्मवत् तं प्रति कारिष्यते।
२० तस्य क्षतस्य शोधनं क्षतं नेत्रस्य शोधनं नेत्रं दन्तस्य शोधनो दन्तो भवि-
२१ ष्यति तेनान्यस्मिन् नरे यथा क्षतं कृतं तं प्रत्यपि तथैव कारिष्यते। अतो
यः पशुं हन्ति स तद्विनियमात् पशुं दास्यति किन्तु यो मानुषं हन्ति स
२२ हनिष्यते। स्वदेशीयविदेशीयान् अभि युष्माकं एकैव व्यवस्था भविष्यति
यतोऽहमेव युष्माकं प्रभुः परमेश्वरः।
२३ तत इस्रायेल्वंशा मूसस आदेशात्तं निन्दकं शिविरस्य बहि र्नीत्वा
पाषाणै र्जघ्नुः। मूससं प्रति परमेश्वराज्ञानुसाराद् इस्रायेल्सन्तानाः
सर्व्वं कर्म्म कृतवन्तः।

---

२५ पञ्चविंशोऽध्यायः।

१ सप्तमवर्षमध्ये विश्रामवत्सरनिरूपणं ८ प्रतिपञ्चाशद्वर्षेमहनिरूपणं १४ उपद्रव-
निषेधः १८ आज्ञावहनफलं २३ भूमे र्नित्यविक्रयनिषेधः २९ गृहमुक्तिकथनं ३५
भ्रातरि दयाकथनं ३९ दासान् प्रति व्यवहरणं ४७ दासानां मुक्तिश्च।

१ परमेश्वरः सीनयाद्रौ मूससं बभाषे त्वम् इस्रायेल्वंशान् वद तेभ्य इति
२ कथां कथय युष्मभ्यमहं यं देशं दास्यामि युष्माभिस्तस्मिन् देशे प्रविष्टे
३ परमेश्वरम् उद्दिश्य भूमे र्विश्रामो भविष्यति फलतः षड् वर्षाणि यावत्
४ स्वक्षेत्रे वीजं वप्स्यथ द्राक्षावल्लीश्छेत्स्यथ तत्फलं संग्रहीष्यथ। किन्तु
सप्तमो वत्सरः परमेश्वरम् उद्दिश्य भूमे र्विश्रामवर्षं भविष्यति, तस्मिन्
५ त्वं स्वक्षेत्रं न वप्स्यसि द्राक्षावल्लीं न छेत्स्यसि स्वयंरूढं शस्यं न कर्त्तिष्यसि
अपरिष्कृताया द्राक्षावल्ल्याः फलं न संग्रहीष्यसि तेनैव भूमे र्विश्राम-
६ वत्सरो भविष्यति। देशस्य विश्रामेण युष्माकं भक्ष्यं भविष्यति, अर्थात्

क्षेत्रोत्पन्नं सर्व्वद्रव्यं युष्माकं युष्मद्दासदासीवेतनजीविभृत्यानाञ्च युष्मत्स- ७
हवासिविदेशिनाञ्च युष्माकं पशूनां देशीयवनपशूनाञ्च भक्ष्यं भविष्यति।
त्वं सप्त विश्रामवत्सरान् अर्थात् सप्तगुणसप्तवत्सरान् गणयिष्यसि ८
ततः सप्तगुणसप्तवर्षैरूनपञ्चाशद् वत्सरा भविष्यन्ति। तदा सप्तम- ९
मासस्य दशमेऽह्नि यूयं महाशब्दकरीं तूरीं वादयिष्यथ अर्थात् प्राय-
श्चित्तदिने युष्माकं सर्व्वदेशे तूरीं वादयिष्यथ। यूयं पञ्चाशत्तमं वर्षं १०
पावयिष्यथ ततस्ते देशे सर्व्वनिवासिनः प्रति मुक्तिं घोषयिष्यथ तद्
युष्मभ्यं योबेल्नामा महो भविष्यति तत्र युष्माकं एकैको जनः स्वस्वाधि-
कारं परावृत्य यास्यति एकैको जनः स्वस्वकुलसमीपं परावृत्य यास्यति।
युष्मत्कृते पञ्चाशत्तमं वर्षं व्याप्य महामहो भविष्यति तत्र यूयं वीजं ११
न वप्स्यथ स्वयंरूढं शस्यं न कर्त्तिष्यथ अपरिष्कृताया द्राक्षावल्ल्याः
फलं न संग्रहीष्यथ। यतः सएव महामहो युष्मान् प्रति पूतो भविष्यति १२
तथापि यूयं क्षेत्रं गत्वा शस्यादि भक्षितुं शक्ष्यथ। तस्मिन् महामहवर्षे १३
यूयं स्वस्वाधिकारं परावृत्य यास्यथ।
यदि यूयं स्वसमीपवासिनं प्रति किमपि भूम्यादि विक्रीणीध्वं यद्वा १४
स्वसमीपवासिनः क्रीणीयात तर्हि यूयं परस्परम् अन्यायं मा कार्ष्ट।
किन्तु त्वं महामहस्य परवर्षाणां संख्यानुसारात् स्वसमीपवासितः १५
क्रेष्यसि फलोत्पत्तिवर्षाणां संख्यानुसारात् त्वां प्रति स विक्रेष्यते।
वर्षाणां बाहुल्यानुसारात् तन्मूल्यं वर्द्धयिष्यसि वत्सराणां न्यूनतानुसा- १६
रात् मूल्यं न्यूनयिष्यसि यतस्त्वां प्रति स अमुकसंख्यकवर्षाणाम् उत्पन्न-
द्रव्याणि विक्रीणीते। अतो यूयं परस्परं नान्यायं करिष्यथ किन्तु १७
स्वेश्वराद् विभेष्यथ यतोऽहं युष्माकं प्रभुः परमेश्वरः।
यूयं मम व्यवस्थयाचरिष्यथ मम राज्यनीतीर्मंस्यध्वं पालयिष्यध्वञ्च तेन १८
देशे निष्कण्टकं वत्स्यथ। देशः फलान्युत्पत्स्यन्ते तानि यूयं तृप्तिं यावद् १९
भोक्ष्यध्वे तत्र निष्कण्टकं वत्स्यथ। पश्यत यदि वयं क्षेत्रे न वपेम स्वय- २०
मुत्पन्नं शस्यञ्च न संगृह्णीयाम तर्हि सप्तमे वर्षे किं भक्षिष्यामः? इति
चेद् वदिष्यथ, तर्हि षष्ठे वर्षेऽहं युष्मान् आशिषं वदिष्यामि तेन वर्षत्रयो- २१
पयुक्तं शस्यमुत्पत्स्यते। यूयम् अष्टमे वर्षे वप्स्यथ नवमं वर्षं यावत् २२
पुरातनं शस्यं भोक्ष्यथ, तद्वर्षं यावत् शस्योत्पत्ति र्न भवेत्, तावत् पुरातनं
शस्यं भोक्ष्यथ।
देशीया भूमि र्युष्माभिः सर्व्वकालार्थं न विक्रेतव्या, यतो देशो ममैव, २३

२४ यूयं मया साकं विदेशिनः प्रवासिनश्चाध्वे। यूयं स्वाधिकृतदेशस्य सर्व्वत्र
२५ भूमिं मोचयिष्यथ। तत्र तव भ्राता यदि दरिद्रः सन् स्वाधिकारस्य
किञ्चिद् विक्रीणीते, तर्हि तस्य निकटस्थो ज्ञातिरागत्य स्वभ्रातु
२६ र्विक्रीतां भूमिं मुक्तीकृत्य ग्रहीष्यति। यदि तां मोचयितुं तस्य कोपि न
२७ तिष्ठति किन्तु स्वयं मोचयितुं शक्नोति, तर्हि तस्या विक्रयवर्षाणि गण-
यित्वा तदनुसारतः क्रेत्रेऽवशिष्टं मूल्यं दास्यति, ततः सा पुनस्तदधिकृता
२८ भविष्यति। किन्तु यदि स तन्मूल्यं प्रतिदातुं न शक्नोति तर्हि स
विक्रीताधिकारो महामहवर्षं यावत् क्रेतरि स्थास्यति महामहवर्षे सा
मुक्ता सती पुनस्तदधिकृता भविष्यति।

२९ यदि कश्चित् प्राचीरवेष्टितनगरस्य मध्यस्थितं वासगृहं विक्रीणीते
तर्हि स तद् विक्रीय प्रथमवर्षमध्ये तन् मोचयितुं शक्नोति अर्थाद्
३० वर्षैकमध्ये तन्मोचयितुं शक्नोति। यदि पूर्णैकवर्षमध्ये तन्न मोच्यते
तर्हि प्राचीरवेष्टितनगरस्थितं तद्गृहं पुरुषपरम्परायां क्रेतुर्नित्याधि-
३१ कारो भविष्यति तन् महामहस्य वत्सरे न मोच्यते। अप्राचीरवेष्टित-
ग्रामे स्थितं गृहं भूमिमध्ये गणिष्यते तन् मोचयितुं शक्यते किञ्च
३२ महामहवर्षे तन् मोच्यते। किन्तु लेविनां नगराणि तेषाम् अधि-
कृतनगरेषु स्थितानि गृहाणि च लेविनः सर्व्वदा मोचयितुं शक्नुवन्ति।
३३ कश्चिल्लेविनो यत् क्रीणाति तद् विक्रीतं वेश्म तस्याधिकृतं नगरं वा
महामहे मोच्यते यत इस्रायेल्वंशस्य मध्ये लेविनां नगरेषु स्थितानि
३४ वेश्मान्येव तेषामधिकारः। तेषां नगराणां प्रान्तरीया भूमि र्न विक्रा-
यिष्यते यस्मात् तत्रैव तेषां नित्याधिकारो भविष्यति।

३५ तव भ्राता यदि दुर्गतो भवति वा त्वद्गोचरे क्षीणधनो भवति तर्हि
स विदेशी प्रवासी वा भवेत् त्वं तमुपकरिष्यसि तेन स त्वया साकं
३६ जीवितं धरिष्यति। त्वञ्च तस्मात् कुषीदं वृद्धिं वा न ग्रहीष्यसि किन्तु
३७ निजेश्वराद् बिभेष्यसि तव भ्रातरं त्वया साकं जीवनं धारय। त्वं कुषीदं
३८ विना निजमुद्रां तस्मै दास्यसि वृद्धिं विना निजान्नं तं धारयिष्यसि। यो
युष्मभ्यं किनान्देशं दातुं युष्माकम् ईश्वरो भवितुं युष्मान् मिसर्देशात्
बहिरानयत् युष्माकं स प्रभुः परमेश्वरोऽहम्।

३९ तव भ्राता यदि दुर्गतो भवन् त्वां प्रति विक्रीयेत तर्हि त्वं तं
४० दासवन्न श्रमय। स वेतनजीविभृत्यवत् वा प्रवासीव त्वया साकं
४१ निवसन् महामहस्य वत्सरं यावत् त्वां सेविष्यते। ततः स निजसन्तानैः

समं तव समीपान्निजकुलान्तिकं परावृत्य स्वीयपैतृकाधिकारं पुनः
प्राप्स्यति। यस्मात्ते मिसर्देशात् मया वहिष्कृता मम दासा अतस्ते ४२
दासवन्न विक्रेतव्याः। त्वं तदुपरि कठिनं शासनं न करिष्यसि ४३
किन्तु निजेश्वराद् भेष्यसि। चतुर्दिक्षु स्थितान्यजातीनां मध्याद् दासान् ४४
दासीश्च क्रेष्यसि। युष्माकं मध्ये वासिनां भिन्नजातीयसन्तानानां मध्याद् ४५
युष्मद्देशे तेभ्य उत्पन्नानां युष्मत्सहवर्त्तिनां परिजनानां मध्याच्च क्रेष्यसि
तेषु युष्माकम् अधिकारो भविष्यति। यूयं स्वस्वापत्यानां अधिकारार्थं ४६
तान् दातुं शक्नुथ नित्यं स्वदासत्वकर्म्म तान् कारयितुं शक्नुथ किन्तु
भ्रातृस्रायेल्वंशोपरि परस्परं कठिनं मा शासिष्यथ।

युष्माकं मध्ये कश्चित् प्रवासी विदेशी वा यदि धनवान् जायते किञ्च ४७
तत्समीपवर्त्ती तव भ्राता दरिद्रः सन् तं प्रवासिनं विदेशिनं प्रति
वा तद्वंशं प्रति विक्रीयते, तर्हि विक्रयात् परं तस्य मुक्तिं भवितुं ४८
शक्नोति तस्य ज्ञातिमध्ये कोपि तं मोचयितुं शक्ष्यति। अर्थात् तस्य ४९
पितृव्यः पितृव्यपुत्त्रो वा तं मोचयिष्यति यद्वा तस्य वंशपरिवाराणां
कश्चित् तं मोचयिष्यति; यद्यपि स स्वयं समर्थो भवति तर्हि स्वं मोचयि-
ष्यति। तत्र तस्य विक्रयवर्षमारभ्य महामहवर्षं यावत् क्रेत्रा साकं ५०
गणिते सति वर्षाणां संख्यानुसारात् तन्मूल्यं भविष्यति, तं प्रति वेतन-
भुग्भृत्यस्य दिनानुसारात् मूल्यं भविष्यति। यद्यनेकवर्षाण्यवशिष्टानि ५१
तिष्ठन्ति तर्हि तदनुसारात् तत्क्रयमूल्यं भविष्यति। यदि महामह- ५२
वर्षं यावद् अल्पवर्षाण्यवशिष्टानि तिष्ठन्ति तर्हि स तेन साकं गणयित्वा
तत्तद्वर्षानुसारात् स्वोद्धारमूल्यं तस्मै दास्यति। स वर्षवैतनिकभृत्यवत् ५३
तेन साकं स्थास्यति, युष्मत्समक्षं कोपि तदुपरि कठिनं न शासिष्यति।
यदि स तेषु वर्षेषु न मोच्यते तर्हि स महामहवर्षे स्वापत्यैः साकं ५४
मोच्यमानो यास्यति। यत इस्रायेल्वंशाः केवलं मम दासास्ते मया ५५
मिसरो वहिष्कृता मद्दासा अहं तेषां प्रभुः परमेश्वरः।

---

२६ षड्विंशोऽध्यायः।

१ मूर्त्त्यर्च्चानिषेधः ७ आज्ञाग्रहाशीः १४ आज्ञालङ्घन शापः ४० पापात् खिन्नजनानां क्षेमप्रतिज्ञा च।

यूयं स्वार्थं देवं तच्चित्रमूर्त्तिञ्च मा निर्म्मात दण्डायमानं विग्रहं मा १

निर्म्मात तत्सम्मुखे दण्डवद् भवितुं युष्मद्देशे तच्छिलग्रावमूर्त्तिं मा स्थाप-
२ यत यतोऽहमेव युष्मत्प्रभुः परमेश्वरः। यूयं मद्विश्रामवारान् पालयत
मत्पूतस्थानं सम्मन्यध्वं परमेश्वरोऽहमेव।
३ यदि मद्व्यवस्थयाचरत मदाज्ञा मन्यध्वे पालयत च तर्हि समयेऽहं
४ युष्मभ्यं वृष्टिं दास्यामि तेन भूर्नानाशस्यं जनयिष्यति क्षेत्रस्थपादपाः
५ फलवन्तो भविष्यन्ति। युष्मच्छस्यमर्द्दनं द्राक्षाचयनकालं प्राप्स्यति द्राक्षा-
चयनं वीजवपनकालं प्राप्स्यति यूयं तृप्तिं यावद् अन्नं भोक्ष्यध्वे देशे
६ निष्कण्टकं निवत्स्यथ। देशेऽहं शान्तिं स्थापयिष्यामि यूयं शयिष्यध्वे कोपि
युष्मान्न भाययिष्यति युष्मद्देशात् हिंस्रजन्तून् दूरयिष्यामि युष्मद्देशेऽसि
७ र्न भ्रमिष्यति। यूयं स्वशत्रून् ताड़यित्वा द्रवयिष्यथ ते युष्मत्समक्षम्
८ असिना पातयिष्यन्ते। युष्मत्पञ्चजना अन्यशतमपसारयिष्यन्ति युष्मत्-
शतजना अन्यदशसहस्राण्यपसारयिष्यन्ति युष्मद्रिपवो युष्मत्समक्ष-
९ मसिना पातयिष्यन्ते। युष्मानहम् अनुग्रहीष्यामि वर्द्धयित्वा वह्वपत्यान्
१० करिष्यामि युष्माभिः स्वनियमं निर्णेष्यामि। यूयं सञ्चितपुरातनशस्यं
११ भोक्ष्यध्वे नूतनस्य स्थापनार्थं पुरातनं वहिरानेष्यध्वे। अहं न युष्मान्
१२ ऋतीयित्वा युष्मन्मध्ये स्वावासं निधास्यामि। युष्मन्मध्ये यातायातं कुर्व्वन्
१३ युष्मदीश्वरो भविष्यामि यूयं मल्लोका भविष्यथ। यूयं यथा दास्यं न
कुर्य्यात तदर्थं युष्मत्प्रभुः परमेश्वरोऽहं मिसर्देशाद् युष्मान् वहिरानयं
युष्माकं युगबन्धनं मोचयित्वा युष्मान् उन्नतशिरसो गमितवान्।
१४ किन्तु यदि यूयं मद्वाक्ये मनो न निधाय मदाज्ञा न गृह्णीय
१५ मद्विधीन् अवजानीथ मद्राजनीतीस्तुच्छीकृत्य मदाज्ञा न गृहीत्वा
१६ मन्नियमं लङ्घध्वे तर्हि युष्मान् प्रत्यहम् इत्थं व्यवहरिष्यामि युष्मान् प्रति
नेत्रक्षीणताहृत्पीडाजनिकाम् आशङ्कां यक्ष्मां कम्पज्वरञ्च निरूप
यिष्यामि युष्माकं वीजवपनं वृथा भविष्यति यतो युष्मद्रिपवस्तद्
१७ भोक्ष्यन्ते। अहं युष्मान् प्रति विमुखो भविष्यामि तेन यूयं रिपूणां
समक्षं घानिष्यध्वे युष्मद्रिपवो युष्मान् शासिष्यन्ति केनापि नापसा-
१८ रिता अपि यूयं पलायिष्यध्वे। इत्थं घटितेपि यदि यूयं मद्वाक्ये मनो न
१९ निधत्थ तर्हि युष्माकं पापेभ्य एतत्सप्तगुणं युष्मान् दण्डयिष्यामि। युष्माकं
पराक्रमस्य गर्व्वं खर्व्वयिष्यामि युष्माकं व्योम लोहवत् भूमिञ्च पित्तलवत्
२० करिष्यामि। युष्माकं श्रमो निष्फलो भविष्यति यतो युष्माकं भूः शस्यादि
२१ नोत्पादयिष्यति। क्षेत्रशाखी फली न भविष्यति। तथापि यदि यूयं मद्वि

परीताचरन्तो मदाज्ञा मत्त न स्वीकुरुथ तर्हि युष्मत्पापानुसारात्
पुनः सप्तगुणं युष्मानहं क्लेशयिष्यामि। युष्मत्प्रतिकूलं वनजन्तून् २२
प्रेषयिष्यामि ते च युष्मत्पशून् नाशयिष्यन्ति युष्मान् अपत्यहीनान् कृत्वा-
ल्पसंख्यान् करिष्यन्ति युष्माकं राजमार्गान् वनीकरिष्यन्ति। एतैरपि यदि २३
यूयं मया शासिता न भवथ मद्विपरीतञ्चाचरथ तदाहमपि युष्मान् प्रति २४
विपरीतमाचरिष्यामि युष्मत्पापेभ्यः पुनः सप्तगुणं युष्मान् शासिष्यामि।
मन्नियमलङ्घनस्य फलं दातुं युष्मान् प्रत्यसिम् आनेष्यामि नगरमध्ये २५
युष्मासु मिलितेषु युष्मन्मध्यं महामारीं प्रेषयिष्यामि युष्मान् रिपुकरे
समर्पयिष्यामि। मया युष्माकम् अन्नयष्ट्यां भग्नायां दश योषित एक- २६
चुल्ल्यां युष्माकं पूपान् पक्ष्यन्ति तूलयित्वा युष्मभ्यं दास्यन्ति किन्तु यूयं तद्-
भुक्त्वा न तर्प्स्यथ। एतैरपि यदि यूयं मयि मनो न निधाय मद्विपरीतम् २७
आचरथ तदाहं क्रुद्धो युष्मान् प्रति विपरीतम् आचरिष्यामि, अहमेव २८
युष्मत्पापेभ्यो युष्मान् सप्तगुणं शासिष्यामि। यूयं स्वस्वपुत्त्रकन्यानां पिशितं २९
भोक्ष्यध्वे। युष्मद्देवपीठान्यहं भंक्ष्यामि युष्मत्सूर्य्यमूर्त्तीः नाशयिष्यामि ३०
युष्मन्मूर्त्तिकुणपोपरि युष्मत्कुणपानि क्षेप्स्यामि युष्मान् ऋतीयिष्यामि,
युष्मत्पुराणि शून्ययिष्यामि युष्माकं पूतस्थानानि वनीकरिष्यामि सुगन्धु- ३१
पहाराणां गन्धं न ग्रहीष्यामि, देशं वनीकरिष्यामि रिपवस्तद्देशवासिनः ३२
सन्तस्तत्राश्चर्य्यं मंस्यन्ते अन्यजातीनां मध्येऽहं युष्मान् विकरिष्यामि ३३
युष्माकं पश्चादसिं निष्कोषयिष्यामि देशं वनवत् पुराणि च शून्यानि
करिष्यामि। यावद् देशो वनं स्थास्यति यूयञ्च रिपुमध्ये वत्स्यथ तावत् ३४
देशः स्वविश्रामं भोक्ष्यते अर्थात् तदैव स देशो विश्रम्य स्वविश्रामं
भोक्ष्यते। यावत् कालं देशो वनं स्थास्यति तावत्कालं विश्रमिष्यति यतो ३५
यूयं यावत् तद्देशेऽवसत तावत् स युष्मद्विश्रामवारेषु विश्रामं नाभुंक्त।
रिपूणां देशमध्येऽहं युष्मदवशिष्टानां मनांसि विषसतया पूरयिष्यामि ३६
पत्त्रपतनशब्दस्तान् कम्पयित्वापसारयिष्यति यथासिवक्त्रात् पलायते
तथा ते पलायिष्यन्ते केनापि नापसारिता अपि पतिष्यन्ति। यथा ३७
जना असिवक्त्रेण पतन्ति तथा ते केनापि नापसारिता अपि स्वस्वसङ्गिना-
मुपरि पतिष्यन्ति स्वस्वरिपूणां समक्षं स्थातुं न शक्ष्यन्ति। यूयमन्यजाति- ३८
मध्ये विनंक्ष्यथ युष्मद्रिपुदेशो युष्मान् ग्रसिष्यति। अवशिष्टाः जना ३९
रिपुदेशेषु स्वस्वपापेभ्यः क्षायिष्यन्ते तत्सहितेभ्यः पूर्व्वपुरुषाणां पापे-
भ्योऽपि क्षायिष्यन्ते।

४० स्वस्वापराधेन ते मम यदपराद्धं मद्विपरीतमाचरितञ्च तस्मादहमपि
४१ तेषां प्रतिकूलमाचरन् तान् रिपुदेशमानीतवान् इति स्मृत्वा ते
यदि स्वपापानि स्वपूर्व्वपुरुषपापानि च स्वीकुर्व्वन्ति तेषामच्छिन्नत्वङ्मनो
४२ नम्रो भवति ते स्वपापस्य दण्डं स्वीकुर्व्वन्ति च तर्हि याकूबा साकं
मम यो नियमस्तं स्मरिष्यामि इस्हाक्इब्राहीमभ्याञ्च मम यो
४३ नियमस्तं स्मृत्वा देशं स्मरिष्यामि। देशस्तैस्त्यक्तो वनीभूय स्वविश्रामं
भोक्ष्यते तैश्च मद्विचारतुच्छीकरणात् मद्व्यवस्थाघृणितत्वात् स्वपापदण्डो
४४ भोक्तव्यो भविष्यति। तथापि शत्रूणां देशे तेषां प्रवासकाले ते मया न
त्यक्ष्यन्ते, न च तैः साकं मम नियमभञ्जनार्थम् अहं तेषां निःशेषं नाशाय
४५ तानवज्ञास्यामि यतोऽहमेव तेषां प्रभुः परमेश्वरः। किन्तु तेषामीश्वरो
भवितुमहं यदान्यजातीयानां दृष्टौ तेषां पूर्व्वपुरुषान् मिसर्देशाद्बहि-
रानयं, तदा तैः साकं यं नियममकार्षं तेषां मङ्गलार्थं तं स्मरिष्यामि
परमेश्वरोऽहमेव।

४६ परमेश्वरः सीनयरण्ये तिष्ठन् मूससा समं स्वस्येस्रायेल्वंशस्य च मध्ये
व्यवस्था इमा राज्यनीती र्विधींश्च स्थिरीकृतवान्।

---

२७ सप्तविंशोऽध्यायः।

१ प्रतिश्रुतप्राणिनो मूल्यनिरूपणं १४ प्रतिश्रुतस्थावरस्य मूल्यनिरूपणं २६ प्रथमजात-
पशौ परमेश्वराधिकारः २८ निवेदितपशो मुक्तिनिषेधः।

१ अनन्तरं परमेश्वरो मूससमवदत् त्वम् इस्रायेल्वंशान् वद तेभ्य इमां
२ कथा कथय, यदि कश्चिद् ईश्वराय विशेषं प्रतिशृणोति तर्हि प्राणिमूल्यं
३ त्वया निरूपिष्यते। आ विंशवत्सरात् षष्टितमवर्षवयो यावत् पूत-
शेकलनुसारात् पञ्चाशत् शेकल्रूप्याणि पुंसः कृते मूल्यं भविष्यति।
४ किन्तु स्त्रियाः कृते त्रिंशत्शेकल्रूप्यं मूल्यं निरूपिष्यते। आ पञ्चम-
५ वर्षाद् विंशवर्षवयो यावद् यदि भवति तर्हि पुंसः कृते त्रिंशत्
६ शेकल् स्त्रियाः कृते दश शेकल्रूप्यं निरूपिष्यते। यद्येकमासात् पञ्च-
७ वर्षवयो यावद् भवति तर्हि पुंसः कृते पञ्च शेकल्रूप्यं स्त्रियाः कृते त्रयः
शेकल्रूप्यं निरूपिष्यते। यदि षष्टिवर्षं तदधिकवर्षं वा वयो भवति
तर्हि पुंसः कृते पञ्चदशशेकल् स्त्रियाः कृते दश शेकल्रूप्यं निरूपिष्यते।
८ किन्तु यदि दौर्गत्यात् स त्वन्निरूपितं मूल्यं दातुं न क्षमते तदा स

याजकान्तिकं यास्यति याजकस्तन्मूल्यं निरूपयिष्यति प्रतिश्रोतु वि-
भवानुसाराद् याजकेन तन्मूल्यं निरूपिष्यते। यादृशः पशुः परमेश्व- ९
रायोपहारार्थमुत्सर्जनीयस्तादृशः पशु र्यदि दीयते तर्हि परमेश्वराय
दत्तो यः पशुः सएव पूतो भविष्यति। तदन्यथा विनिमयो वा न कर्त्तव्यः, १०
अर्थादभद्रविनिमयाद् भद्रं भद्रविनिमयादभद्रं वा न दातव्यं, यदि
कश्चित् पशुना पशुं विनिमयते तर्हि तौ द्वावेव पशू पूतौ भविष्यतः।
यादृशः पशुः परमेश्वरायोपहारार्थं नोत्सर्जनीयस्तादृगशुचिपशु र्यदि ११
दीयते तर्हि तदुत्सृष्टा तं पशुं याजकान्तिकमुपस्थापयिष्यति स भद्रो- १२
ऽभद्रो वा भवेत् याजकेन तन्मूल्यं निरूपिष्यते याजकनिरूपणानुसारात्
तन्मूल्यं भविष्यति। किन्तु यदि स कथञ्चित् मुमुक्षति तर्हि स निरूपि १३
तमूल्यस्य पञ्चमांशम् अधिकं दास्यति।

यदि कश्चित् परमेश्वराय स्ववेश्म पावयति तर्हि तद् भद्रमभद्रं वा १४
भवेत् याजकेन तन्मल्यं निरूपिष्यते, याजकेन यन्मूल्यं निरूपिष्यते तदेव
निश्चितं भविष्यति। वेश्मपावको यदि स्ववेश्म मुमुक्षति तर्हि स १५
तन्निरूपितमूल्याधिकं पञ्चमांशं दास्यति तस्मात् तत् तस्य भविष्यति।
यदि कश्चित् स्वाधिकृतभुवः कञ्चनांशं परमेश्वराय पावयति तर्हि तत्र १६
वपनीयबीजानुसारात् मूल्यं निरूपिष्यते विशेषतो यस्याम् एकहो-
मर्परिमितं यवबीजं वपनीयं, तस्या भूमे मूल्यं पञ्चाशत्शेकलरूप्यं
भविष्यति। यदि स महवर्षमारभ्य स्वभुवं पावयति तर्हि तन्निरू- १७
पितं यन्मूल्यं तदेव निश्चितं भविष्यति। किन्तु महात् परं यदि भुवं १८
पावयति तर्हि याजकेन महवर्षं यावदवशिष्टवर्षाणां संख्यानुसारात्
तेन साकं रूप्ये गणिते सति तन्निरूपितमूल्यं न्यूनयिष्यते। तद्भूपावको १९
जनो यदि कथञ्चित् तां मुमुक्षति तदा स तन्निरूपितरूप्याद् अधिकं
पञ्चमांशं दास्यति तेन सा तस्य निश्चेष्यते। किन्तु यदि स स्वभुवं २०
न मोचयति वान्यं प्रति विक्रीणीते तर्हि सा कदापि न मोच्यते।
किन्तु सा भू महवर्षे क्रेतुः कराद् गता निवेदितभूरिव परमेश्वराय २१
पूता भविष्यति तत्र याजकाधिकारो भविष्यति। यदि कश्चित् पैटक- २२
भुवं विना क्रीतभुवं परमेश्वराय पावयति तर्हि याजकस्तन्निरूपि- २३
तमूल्यानुसारात् महवर्षं यावत् तेन दातव्यं मूल्यं गणयिष्यति, तदा
स तद्दिन एव तन्निरूपितरूप्यं दत्त्वा परमेश्वराय निवेदयिष्यति।
महवर्षे सा पुन र्विक्रेतुरर्थाद् भूम्यधिकारिणः करे समर्पयिष्यते। २४

२५ तव सर्व्वमूल्यनिरूपणं पूतशेकलनुसाराद् भविष्यति, विंशतिगेरयैक-
शेकल् अस्ति।
२६ परमेश्वराय देयं प्रथमजं पशुवत्सं कोपि पावयितुं न शक्ष्यति गोवत्सो
२७ मेषवत्सो वा भवेत् स परमेश्वरस्य भविष्यति। स यद्यशुचिजन्तु
र्भवति तर्हि तदधिकारी त्वन्निरूपितमूल्येन तं मोचयिष्यति तत्राधिकं
पञ्चमांशं दास्यति, यदि न मुक्तस्तर्हि त्वन्निरूपितमूल्येन विक्रेष्यते।
२८ कश्चित् स्वसर्व्वस्वात् यत्किञ्चित् परमेश्वराय निवेदयति तन्नरः
पशुर्वाधिकृतभूमिखण्डं वा भवेत्, तन्न विक्रेष्यते न वा मोचयिष्यते यतः
२९ सर्व्वं निवेदितं वस्तु परमेश्वराय पूतं भवति। निवेदितो नरो न
३० मोचयिष्यते, स विनाशिष्यते। भूशस्यानां शाखिफलानां वा भूमेरुत्पन्न-
३१ द्रव्याणां दशमांशः परमेश्वरस्य भविष्यति सएव परमेश्वराय पूतः। यो
दशमांशात् किञ्चित् मुमुक्षति सोऽधिकं पञ्चमांशं दास्यति।
३२ गोमेषादे र्व्रजानां दशमांशो ऽर्थात् रक्षकदण्डाधोगामिनाम् एकैकदश-
३३ मपशुः परमेश्वराय मेध्यो भविष्यति। स भद्रोऽभद्रो वेति कोपि नानु-
सन्धास्यति स न परिवर्त्तिष्यते किन्तु यदि कश्चित् कथञ्चित् तं परिवर्त्त-
३४ यिष्यति तर्हि स तत्परिवर्त्तश्च मेध्यौ भविष्यतः स पशु र्न मोचयिष्यते।
परमेश्वरः सीनयद्रौ इस्रायेल्वंशं प्रति मूससमेतान्यादिदेश।

गणनापुस्तकम्

अर्थात्

मूसोलिखितं चतुर्थपुस्तकं।

---

१ प्रथमोऽध्यायः।

१ लोकान् गणयितुं मूससं प्रति परमेश्वराज्ञा ५ प्रतिवंशमुख्यनरनाम १७ लोकानां गणनं २० प्रतिवंशसंख्या ४७ लेवीयवंशगणनञ्च।

१ मिसर्देशाद् इस्रायेल्वंशस्य वहिरागमनस्य द्वितीयवत्सरस्य द्वितीय-
२ मासस्य प्रथमदिने परमेश्वरः सीनयप्रान्तरे समाजावासमध्ये मूससमव-
दत्, यूयम् इस्रायेलः समाजीयान् सर्व्वान् स्वस्वकुलानुसारात् पितृ-

वंशानुसाराच्च गणयत, नामानुक्रमणिकायाम् एकैकं पुमांसं विशेषयत २
च। विंशतिवर्षवयस्कास्ततोधिकवर्षवयस्काश्च ये सर्व्वे पुरुषा इस्रायेल्-
वंशमध्ये रणगमनयोग्याः सन्ति तेषां सर्व्वेषां संख्यां स्वस्वसैन्यानुसारतः
कुरुत। त्वं हारोणश्च तत् करिष्यथः एकैकवंशीय एकैको जनो युवयोः ४
सहकारी भविष्यति ते स्वस्वपितृवंशस्य मुख्या भविष्यन्ति।

ये युवयोः सहायाः भविष्यन्ति तेषामेतानि नामानि। रूबेनवंशजः ५
शिदेयूरस्य सुत इलीषूरः। शिमियोनवंशजः सूरीशद्दयस्य सुतः ६
शिलुमीयेलः, यिहूदावंशजोऽम्मीनादवस्य सुतो नहशोनः। इषाखर्- ७
वंशजः सूयारस्य सुतो निथनेलः। सिबूलूनवंशजो हेलोनस्य सुत ८
इलीयावः। यूषफसन्तानानां मध्ये इफ्रयिमवंशजोऽम्मीहूदस्य सुत १०
इलीशामः, मिनशि वंशजः पिदाहसूरस्य सुतो गमिलीयेलः। विन्यामीन- ११
वंशजो गिदियोनेः सुतोऽवीदानः। दानवंशजोऽम्मीशद्दयस्य सुतो १२
ऽहीयेषरः। आशेरवंशजोऽक्रणस्य सुतः पगीयेलः। गादवंशजो दूये- १३
लस्य सुत इलीयासफः। नप्तालि वंशज ऐननस्य सुतोऽहीरः। इमे स्व- १५
पितृवंशमुख्या इस्रायेल्वंशस्य सहस्राणामधिपाः समाजस्य मनोनीत- १६
लोकाश्च।

तदा मूसाहारोणावुक्तनामविशिष्टान् लोकान् आददातां। तस्माद् १७
द्वितीयमासस्य प्रथमे सर्व्वसमाजं मेलयित्वा स्वस्वकुलानुसारात् स्व- १८
पितृवंशानुसारात् स्वस्वनामसंख्यानुसाराच्च विंशतिवर्षवयस्कमारभ्य
शिरोगणनया लोकानां सङ्ख्या तैः कृता। इत्थं मूसाः परमेश्वराज्ञया १९
सीनयप्रान्तरे तान् गणयामास।

इस्रायेलो ज्येष्ठसुतस्य रूबेनस्य वंशीयानां कुलानुसारात् पितृवंशा- २०
नुसाराच्च संख्यानिर्णयः। विंशतिवर्षवयस्कमारभ्य रणगमनयोग्यानां २१
सर्व्वपुरुषाणां नामगणनया शिरोगणनया च रूबेनवंशस्य गणित-
लोकानां संख्या पञ्चशताधिकषट्चत्वारिंशत्सहस्राणि।

शिमियोनवंशस्य कुलानुसारात् पितृवंशानुसाराच्च संख्यानिर्णयः। २२
विंशतिवर्षवयस्कमारभ्य रणगमनयोग्यानां सर्व्वपुरुषाणां नामगणनया २३
मस्तकगणनया च शिमियोनवंशस्य गणितलोकानां संख्या शतत्रयाधि-
कोनषष्टिसहस्राणि।

गादवंशस्य कुलानुसारात् पितृवंशानुसाराच्च संख्यानिर्णयः। विंश- २४
तिवर्षवयस्कमारभ्य रणगमनयोग्यानां सर्व्वपुरुषाणां नामगणनया २५

गादवंशस्य गणितलोकानां संख्या सार्द्धषट्शताधिकपञ्चचत्वारिंशत्स-
हस्राणि।

२६ यिहूदावंशस्य कुलानुसारात् पितृवंशानुसाराच्च संख्यानिर्णयः।
विंशतिवर्षवयस्कमारभ्य रणगमनयोग्यानां पुरुषाणां नामगणनया
२७ यिहूदावंशस्य गणितलोकानां संख्या षट्शताधिकचतुःसप्ततिसहस्राणि।

२८ इषाखरवंशस्य कुलानुसारात् पितृवंशानसाराच्च संख्यानिर्णयः।
२९ विंशतिवर्षवयस्कमारभ्य रणगमनयोग्यानां सर्व्वपुरुषाणां नामगणनया
इषाखर्वंशस्य गणितलोकानां संख्या चतुःशताधिकचतुःपञ्चाशत्स-
हस्राणि।

३० सिबूलूनवंशस्य कुलानुसारात् पितृवंशानुसाराच्च संख्यानिर्णयः।
३१ विंशतिवर्षवयस्कमारभ्य रणगमनयोग्यानां सर्व्वपुरुषाणां नामगणनया
सिबूलूनवंशस्य गणितलोकानां संख्या चतुःशताधिकसप्तपञ्चाशत्सह-
स्राणि।

३२ यूषफो ऽर्थात् इफ्रयिमवंशस्य कुलानुसारात् पितृवंशानुसाराच्च
संख्यानिर्णयः। विंशतिवर्षवयस्कमारभ्य रणगमनयोग्यानां सर्व्वपुरुषाणां
३३ नामगणनया इफ्रयिम्वंशस्य गणितलोकानां संख्या पञ्चशताधिकच-
त्वारिंशत् सहस्राणि।

३४ मिनशिवंशस्य कुलानुसारात् पितृवंशानुसाराच्च संख्यानिर्णयः।
विंशतिवर्षवयस्कमारभ्य रणगमनयोग्यानां सर्व्वपुरुषाणां नामगणनया
३५ मिनशिवंशस्य गणितलोकानां संख्या शतद्वयाधिकद्वात्रिंशत्सहस्राणि।

३६ विन्यामीनवंशस्य कुलानुसारात् पितृवंशानुसाराच्च संख्यानिर्णयः।
विंशतिवर्षवयस्कमारभ्य रणगमनयोग्यानां सर्व्वपुरुषाणां नामगणनया
३७ विन्यामीनवंशस्य गणितलोकानां संख्या चतुःशताधिकपञ्चत्रिंशत्सह-
स्राणि।

३८ दानवंशस्य कुलानुसारात् पितृवंशानुसाराच्च संख्यानिर्णयः। विंशति-
३९ वर्षवयस्कमारभ्य रणगमनयोग्यानां सर्व्वपुरुषाणां नामगणनया दान-
वंशस्य गणितलोकानां संख्या सप्तशताधिकद्वाषष्टिसहस्राणि।

४० आशेरवंशस्य कुलानुसारात् पितृवंशानुसाराच्च संख्यानिर्णयः।
४१ विंशतिवर्षवयस्कमारभ्य रणगमनयोग्यानां सर्व्वपुरुषाणां नामगणनया
आशेरवंशस्य गणितलोकानां संख्या पञ्चशताधिकचत्वारिंशत्सह-
स्राणि।

नप्तालिवंशस्य कुलानुसारात् पितृवंशानुसाराच्च संख्यानिर्णयः। विंशति- ४२
वर्षवयस्कमारभ्य रणगमनयोग्यानां सर्व्वपुरुषाणां नामगणनया नप्तालि- ४३
वंशस्य गणितलोकानां संख्या चतुःशताधिकत्रिपञ्चाशत्सहस्राणि।

मूसा हारोण इस्रायेल्वंशानां द्वादशाध्यक्षाश्च अर्थात् स्वस्वपितृ- ४४
वंशैकैकाध्यक्षा येषां गणनां चक्रुस्त इमे गणिता लोकाः। तस्मात् इस्रायेल ४५
वंशानां पितृवंशानुसारात् विंशतिवर्षवयस्कमारभ्य येऽगण्यन्त ते गणिता
लोका अर्थाद् इस्रायेलवंशमध्ये रणगमनयोग्याः सर्व्वे लोकाः सार्द्धपञ्च- ४६
शताधिकत्रिसहस्राधिकषट्लक्षाणि जनाः।

लेवीयाः स्वस्वपितृवंशानुसारात् तेषां मध्ये नागण्यन्त। यतः परमे- ४७
श्वरो मूससमवदत् त्वं केवलं लेविवंशं न गणय इस्रायेल्वंशमध्ये तेषां ४८
संख्यां मा कुरु। किन्तु साक्ष्यावासे तत्पात्रद्रव्येषु च तान् नियुंक्ष्व, त ५०
आवासं तत्पात्राणि च वक्ष्यन्ति तं सेविष्यन्ते च, तथावासस्य चतुर्दिक्षु
शिविरं स्थापयिष्यन्ति। प्रस्थानकाले लेवीया आवासमादायावरोह- ५१
यिष्यन्ति, आवासस्थापनकाले च लेवीयास्तं स्थापयिष्यन्ति, तदन्तिक-
गामिनो ऽन्यवंशीया घानिष्यन्ते। इस्रायेल्वंशाः स्वस्वसैन्यस्य शिविरान्तिके ५२
तत्केतुसमीपे वत्स्यन्ति। इस्रायेल्वंशस्य मण्डलीं प्रति यथा क्रोधो न ५३
घटते तदर्थं लेवीयैः साक्ष्यावासस्य चतुर्दिक्षु शिविरं स्थापयित्वा साक्ष्या-
वासो रक्षणीयः। तत इस्रायेलवंशास्तथैव चक्रुः, मूससं प्रति परमेश्वरा- ५४
ज्ञानुसारात् ते सर्व्वं कर्म्म चक्रुः।

२ द्वितीयोऽध्यायः।

१ इस्रायल्वंशस्य शिविरस्थापनक्रमः १० स्थानं १७ सेनापतिनाम २५ सैन्यप्रभृते नाम च।

अनन्तरं परमेश्वरो मूससं हारोणञ्च जगाद इस्रायेल्वंशस्य सर्व्वे १
जनाः स्वस्वपितृवंशानुसारात् केतुसमीपे शिविरं स्थापयिष्यन्ति, ते २
समाजावाससमीपे चतुर्दिशि शिविरं स्थापयिष्यन्ति।

पूर्व्वस्यां दिश्यर्थात् सूर्य्योदयदिशि यिहूदावंशस्य ध्वजस्यानुगामिनो ३
लोकाः स्वस्वसैन्यानुसारात् शिविरं स्थापयिष्यन्ति, अम्मीनादवस्य सुतो
नहशोनो यिहूदावंशीयानां सेनापति र्भविष्यति। तेषां सैन्यान्यर्थाद् ४
ये गणितास्ते षट्शताधिकचतुःसप्ततिसहस्राणि लोकाः। इषाखर- ५

स्तत्पार्श्वे शिविरं स्थापयिष्यति सूयारस्य सुतो निथनेल इषाखर-
६ वंशीयानां सेनापति र्भविष्यति। तेषां सैन्यान्यर्थाद् ये गणितास्ते चतुः-
७ शताधिकचतुःपञ्चाशत्सहस्राणि लोकाः। तत्पार्श्वे सिबूलूनवंशः स्थास्यति,
८ हेलोनस्य सुत इलीयाव इषाखरवंशीयानां सेनापति र्भविष्यति। तेषां
सैन्यान्यर्थाद् ये गणितास्ते चतुःशताधिकसप्तपञ्चाशत्सहस्राणि लोकाः।
९ यिहूदावंशादीनां सर्व्वशिविरस्य गणिता लोकाः स्वस्वसैन्यानुसारात्
चतुःशताधिकषडशीतिसहस्राधिकलक्षं, यात्राकाले ते प्रथमा भवि-
ष्यन्ति।

१० दक्षिणस्यां दिशि रूबेनवंशस्य ध्वजस्यानुगामिनो लोकाः स्वस्वसैन्या-
नुसारात् शिविरं स्थापयिष्यन्ति, शिदेयूरस्य सुत इलीसूरो रूबेनवं-
११ शीयानां सेनापति र्भविष्यति। तेषां सैन्यान्यर्थाद् ये गणितास्ते पञ्चश-
१२ ताधिकषट्चत्वारिंशत्सहस्राणि लोकाः। शिमियोनवंशस्तत्पार्श्वे शिविरं
स्थापयिष्यति, सूरिशद्दयस्य सुतः शिलुमीयेलः शिमियोनवंशीयानां
१३ सेनापति र्भविष्यति। तेषां सैन्यान्यर्थाद् ये गणितास्ते शतत्रया-
१४ धिकोनषष्टिसहस्राणि। तेषां पार्श्वे गादवंशः स्थास्यति, दूयेलस्य सुत
१५ इलीयासफो गादवंशीयानां सेनापति र्भविष्यति। तेषां सैन्यान्यर्थाद्
१६ ये गणितास्ते सार्द्धषट्शताधिकपञ्चचत्वारिंशत्सहस्राणि। रूबेनवंशा-
दीनां सर्व्वशिविरस्य गणिता लोकाः स्वस्वसैन्यानुसारात् सार्द्धचतुः-
शताधिकैकपञ्चाशत्सहस्राधिकलक्षं, यात्राकाले ते द्वितीया भविष्यन्ति।

१७ समाजावासो लेवीयानां शिविरेण समं यात्राकाले सर्व्वशिविराणां
मध्यीयो र्भविष्यति; एकैको वंशो यथा स्वस्वकेतुसमीपे शिविरं स्थापयि-
ष्यति तथैव गमिष्यति।

१८ पश्चिमायां दिशि इफ्रयिमवंशस्य ध्वजस्यानुगामिनो लोकाः स्वस्व-
सैन्यानुसारात् शिविरं स्थापयिष्यन्ति, अम्मीहूदस्य सुत इलीशामः
१९ इफ्रयिमवंशीयानां सेनापति र्भविष्यति। तेषां सैन्यान्यर्थाद् ये गणि-
२० तास्ते पञ्चशताधिकचत्वारिंशत्सहस्राणि लोकाः। तत्पार्श्वे मिनशि वंशः
स्थास्यति पिदाहसूरस्य सुतो गमिलीयेलो मिनशिवंशीयानां सेना-
२१ पति र्भविष्यति। तेषां सैन्यान्यर्थाद् ये गणितास्ते शतद्वया-
२२ धिकद्वात्रिंशत्सहस्राणि लोकाः। तत्पार्श्वे विन्यामीनवंशः स्थास्यति
गिदियोनेः सुतो ऽवीदानो विन्यामीनवंशीयानां सेनापति र्भवि-
२३ ष्यति। तेषां सैन्यान्यर्थाद् ये गणितास्ते चतुःशताधिकपञ्चत्रिंशत्सह-

स्राणि लोकाः। इफ्रयिमवंशादीनां सर्व्वशिविरस्य गणिता लोकाः २४
स्वस्वसैन्यानुसारात् शताधिकाष्टसहस्राधिकलक्षं, यात्राकाले ते तृतीया
भविष्यन्ति।

उत्तरस्यां दिशि दानवंशस्य ध्वजस्यानुगामिनो लोकाः स्वस्वसैन्यानु- २५
सारात् शिविरं स्थापयिष्यन्ति, अम्मीशद्दयस्य सुतोऽहीयेषरो दानवंशी-
यानां सेनापति र्भविष्यति। तेषां सैन्यान्यर्थाद् ये गणितास्ते सप्तश- २६
ताधिकद्वाषष्टिसहस्राणि लोकाः। तेषां पार्श्वे आशेरवंशः शिविरं स्थाप- २७
यिष्यति, अक्रणस्य पुत्रो पगीयेल आशेरवंशीयानां सेनापति र्भविष्यति।
तेषां सैन्यान्यर्थाद् ये गणितास्ते पञ्चशताधिकैकचत्वारिंशत्सह- २८
स्राणि लोकाः। तेषां पार्श्वे नप्ताले वंशः स्थास्यति, एननस्य सुतोऽहीरो २९
नप्तालिवंशीयानां सेनापति र्भविष्यति। तेषां सैन्यान्यर्थाद् ये गणितास्ते ३०
चतुःशताधिकत्रिपञ्चाशत्सहस्राणि लोकाः। दानवंशादीनां सर्व्वशिवि- ३१
रस्य गणिता लोकाः षट्शताधिकसप्तपञ्चाशत्सहस्राधिकलक्षं, यात्रा-
काले ते स्वं स्वं केतुमादाय शेषगामिनो भविष्यन्ति। ३२

इस्रायेल्वंशस्य पितृवंशानुसारेण गणिताः सर्व्वे लोका अर्थात् ३३
सैन्यानुसारात् शिविरस्था गणिता लोकाः सार्द्धपञ्चशताधिकत्रिंशत्-
सहस्राधिकषट्लक्षाणि। किन्तु मूससं प्रति परमेश्वरीयाज्ञानुसाराल् ३४
लेवीया इस्रायेल्वंशमध्ये नागण्यन्त। इस्रायेल्वंशो मूससं प्रति परमे-
श्वरीयाज्ञानुसारात् सर्व्वं कर्म्म चक्रुस्तद्वत् ते स्वस्वकुलानुसारात् पितृ-
वंशानुसाराच्च केतुसमीपे शिविरं स्थापयामासुः प्रतस्थिरे च।

---

३ तृतीयोऽध्यायः।

१ हारोणस्य सुतानां कथनं ५ लेवीयलोकानां कथनं २१ अर्थाद् गेर्शोनीयजनानां कथनं २७ किहातीयजनानां कथनं ३३ मिरारीयजनानां कथनं ३९ लेवीयानां प्रथमजातजनानां गणनञ्च।

सीनयाद्रौ यदा परमेश्वरो मूससमवदत् तदा हारोणस्य मूससश्च वंश- १
श्रेणीयं। हारोणस्य सुतानां नामान्येतानि प्रथमजातो नादवोऽवीहूः २
इलियासर ईथामरः। हारोणस्य सुतानामभिषिक्तयाजकानां नामा- ३
न्येतानि, अर्थात् ये सेवितुं याजकत्वपदे नियुक्तास्तेषां नामानि। किन्तु ४
नादवोऽवीहूश्च सीनयप्रान्तरे परमेश्वरम् उद्दिश्य साधारणवह्निं

निवेद्य परमेश्वरस्य सम्मुखे प्राणान् तत्यजतुस्तयोरपत्यानि नासन्,
तत इलियासरैथामरौ स्वपितु र्हारोणस्य समक्षं याजकत्वपदेन सेवां
५ चक्रतुः। परमेश्वरो मूससं बभाषे त्वं लेविवंशानानीय हारोणयाजक-
७ मुपकर्त्तुं तत्सम्मुखे स्थापय। तेन त आवासं सेवितुं समाजावासस्य
८ सम्मुखे तस्य सर्व्वसमाजस्य च पालनीयं पालयिष्यन्ति। आवासं सेवितुं
समाजावासस्य सर्व्वपात्राणि इस्रायेल्वंशस्य रक्षणीयञ्च रक्षिष्यन्ति।
९ त्वं पुत्रगणसहिताय हारोणाय लेविनो दास्यसि, यतस्ते इस्रायेल्-
१० वंशमध्यात् तस्मै सर्व्वथा दत्ताः। त्वं हारोणं तत्सुतांश्च पदे नियोक्ष्यसे
ते स्वयाजनपदं रक्षिष्यन्ति, किन्तु योऽन्यवंशीयो निकटं यास्यति स
घानिष्यते।

११ परमेश्वरो मूससं जगाद पश्याहं इस्रायेल्वंशानां मध्यात् तेषां सर्व्व-
१२ प्रथमजातानां विनिमयाल् लेविनोऽग्रहीषं अतो लेविनएव ममाभवन्
१३ यतो यदाहं मिसर्देशे सर्व्वप्रथमजातान् प्राहरं तदा आ मानुषात् पशुं
यावद् इस्रायेल्वंशस्य सर्व्वप्रथमजातान् मदर्थम् अपावयम् अतः सर्व्वे
प्रथमजा मम सन्ति, परमेश्वरोऽहमेव।

१४ सीनय् प्रान्तरे परमेश्वरो मूससमुवाच त्वं स्वस्वपितृवंशानुसारात्
१५ कुलानुसाराच्च लेविवंशं गणय मासैकाधिकवयस्कान् सर्व्वपुंसो गणय।
१६ ततो मूसाः परमेश्वरोक्ताज्ञानुसारात् तान् गणयामास। तेषां प्रत्येकशो
१८ नाम, लेवेः सन्ताना गेर्श्गोनः किहातो मिरारिश्च। स्वस्वकुलानुसारात्
१९ गेर्श्गोनस्य सन्तानानां नाम लिव्निः शिमियिश्च। स्वस्वकुलानुसारात्
किहातस्य सन्तानानां नामाम्रामो यिष्हरो हिब्रोण उषीयेलश्च।
२० स्वस्वकुलानुसारात् मिरारेः सन्तानानां नाम मह्लि मूशिश्च, एतानि
पितृवंशानुसाराल् लेविनां कुलानि।

२१ तद्गेर्श्गोनाल् लिव्निवंशः शिमियिवंशश्चोत्पन्नौ, तौ गेर्श्गोनीय-
२२ वंशौ। मासैकाधिकवयस्कपुरुषेषु गणितेषु संख्यया ते पञ्चशताधिकसप्त-
२३ सहस्राण्यासन्। गेर्श्गोनीयवंशाः पश्चिमदिशायाम् आवासपश्चात्पार्श्वे
२४ शिविरमस्थापयन्। लायेलस्य सुत इलीयासफो गेर्श्गोनीयानां पितृ-
२५ वंशस्य मुख्य आसीत्। आवासदूष्याच्छादनवस्त्राणि समाजावासद्वार-
२६ स्याच्छादनवस्त्रं प्राङ्गणस्य यवनिका आवासवेद्योश्चतुर्दिक्षु स्थितस्य
प्राङ्गणस्य द्वाराच्छादनवस्त्रं सेवार्थकाः सर्व्वरज्जवश्चैतानि समाजावा-
सीयद्रव्याणि गेर्श्गोनीयवंशेन रक्षितव्यानि।

किहातात् अम्रामीयवंशो यिष्हरीयवंशो हिब्रोणीयवंश उषीयेली- २७
यवंशश्चोदपद्यन्त, एते सर्व्वे किहातीयवंशाः। एतेषां मध्ये मासैकाधिक- २८
वयस्काः पुरुषाः षट्शताधिकाष्टसहस्राणि, ते पवित्रस्थानस्य रक्षिण
आसन्। एते किहातीयवंशा आवासस्य पार्श्वे दक्षिणस्यां दिशि शिवि- २९
रमस्थापयन्। उषीयेलस्य पुत्र इलीषाफनः किहातीयानां पितृवंशस्य ३०
मुख्यो बभुव। मञ्जूषा भोजनासनं दीपवृक्षो वेदिद्वयं पूतस्थानस्य सेवा- ३१
र्थकपात्राणि विच्छेदवस्त्रम् एतानि तै रक्षितव्यानि। हारोणयाजकस्य ३२
सुत इलियासरो लेविवंशस्य मुख्यो भूत्वा पूतस्थानरक्षिणाम् आधिपत्यं
चकार।

मिरारे मह्लीयमूशीयवंशौ जातौ, तौ मिरारीयवंशौ। तद्वंशस्य ३३
मासैकाधिकवयस्कपुंसु गणितेषु शतद्वयाधिकषट्सहस्राणि पुरुषा अभ- ३४
वन्। अवीहयिलस्य सुतः सूरीयेलो मिरारिवंशस्य पितृगेहस्य मुख्यो ३५
बभुव, त आवासोत्तरपार्श्वे शिविरम् अस्थापयन्। आवासस्य फल- ३६
कान्यर्गलाः स्तम्भाः पदाधारास्तदीयानि सर्व्वभाजनानि सेवार्थकसर्व्व-
वस्तूनि चतुर्दिक्स्थप्राङ्गणस्य स्तम्भास्तेषां पदाधाराः कीला रज्जव एतानि ३७
रक्षणाय मिरारिसन्तानानां करगाणि बभूवुः। मूसा हारोणस्तत्सुताश्च ३८
समाजावासस्य सम्मुखे पूर्व्वपार्श्वे शिविरं स्थापयन्त इस्रायेल्वंशस्य
पूतस्थानस्य रक्षणीयम् अरक्षन्, किन्तु योऽन्यजातिस्तत्समीपमितः
सोऽम्रियत।

मूसाहारोणाभ्यां परमेश्वराज्ञया लेविवंशस्य मासैकाधिकवयस्क- ३९
पुंसु गणितेषु संख्यया द्वाविंशतिसहस्राणि लोका आसन्। ततः परमे- ४०
श्वरो मूससमवदत् त्वम् इस्रायेल्वंशस्य मासैकाधिकवयस्कान् प्रथम-
जातपुंसो गणय तेषां नामसंख्यां कुरु च। परमेश्वरो योऽहं मदर्थम् ४१
इस्रायेल्वंशस्य प्रथमजलोकानां विनिमयाल् लेविन इस्रायेल्वंशस्य
प्रथमजातपशूनाञ्च विनिमयाल् लेविनां पशून् गृहाण। ततः परमेश्व- ४२
राज्ञात इस्रायेल्वंशस्य प्रथमजातलोकेषु मूससा गणितेषु तेषां मासैका- ४३
धिकवयस्कानां प्रथमजातपुंसां नामसंख्या त्रिसप्तत्यधिकशतद्वयाधिक-
द्वाविंशतिसहस्राणि बभूव। परमेश्वरो मूससमवदत् त्वम् इस्रायेल्- ४४
वंशस्य प्रथमजातलोकानां विनिमयाल् लेविनस्तेषां पशूनाञ्च विनि- ४५
मयाल् लेविनां पशून् गृहाण, परमेश्वरो योऽहं लेवीया ममैव भवि-
ष्यन्ति। तत इस्रायेल्वंशीयप्रथमजातानां मध्ये लेवीयै र्मुक्तेभ्योऽधिका ४६

४७ ये त्रिसप्तत्यधिकशतद्वयं पुरुषा मोचनीयास्तेषामेकैकजनात् पूतशेकलनु-
सारात् पञ्च पञ्च शेकलो ग्रहीष्यसि, विंशतिगेराभिः शेकलेको भवति।
४८ तेषां मोक्षयावशिष्टलोकानां रूप्यमूल्यं हारोणतत्सुतेभ्यो दास्यसि।
४९ लेविभिरमुक्ता ये ऽवशिष्टलोका आसन् तेषां मुक्तिमूल्यं रूप्यं मूसा
५० जग्राह। अर्थाद् इस्रायेल्वंशस्य तेभ्यः प्रथमजातलोकेभ्यः पूतशेकल्-
परिमाणात् पञ्चषष्ठ्यधिकशतत्रयाधिकसहस्रशेकलरूप्याणि जग्राह।
५१ मूसाः परमेश्वराज्ञया तेषां मुक्तलोकानां रूप्यमादाय हारोणाय तत्सु-
तेभ्यश्च ददौ।

---

४ चतुर्थोऽध्यायः।

१ किहातीयलोकानां सेवायोग्यवयोनिर्णयः ४ याजकानां कर्म्मनिर्णयः १७ पूतवस्त्व्-न्यनाच्छादिते किहातीयानामावासयानानिषेधः २१ गेर्शोनीयलोकानां सेवा-योग्यवयोनिर्णयः २९ मिरारीयान् प्रति कथनं ३४ किहातीयानां संख्या ३८ गेर्शोनीयलोकानां संख्या ४२ मिरारीयाणां संख्या च।

१ परमेश्वरो मूससं हारोणञ्च बभाषे त्वं लेविवंशानां मध्ये किहातीयानां
२ कुलानुसारात् पितृवंशानुसाराच्च आ त्रिंशद्वर्षवयस्कात् पञ्चाशद्वर्ष-
३ वयस्कं यावद् ये पुरुषाः समाजावासे कर्म्मकारिणां श्रेण्यन्तर्गता
भवन्ति तान् गणय।
४ समाजावासे या सेवा किहातवंशेन करणीया सातिपवित्रस्थान-
५ सम्बन्धीया। यदा शिविरमग्रं यास्यति तदा हारोणतत्पुत्रा आगत्य
६ विच्छेदकवस्त्रमवरोह्य तेन साक्ष्यमञ्जूषामाच्छादयिष्यन्ति तदुपरि
तहश्चर्म्मत्तेराच्छादनं दास्यन्ति तदुपरि सम्पूर्णनीलवस्त्रं दास्यन्ति
७ तत्पार्श्वयो र्वहनदण्डौ निधास्यन्ति च। दर्शनीयपूपासनोपरि नीलवस्त्रं
पातयिष्यन्ति तदुपरि भोजनभाजनचमसपानपात्रनिषेकार्थकपात्राणि
८ सज्जयित्वा तदुपरि नित्यपूपान् परिवेषयिष्यन्ति तदुपरि रक्तवसनं
विस्तार्य्य तहश्चर्म्मत्तेराच्छादनेन तदाच्छाद्य भोजनासने वहनदण्डौ
९ दास्यन्ति। ते नीलवस्त्रमादाय तेन दीपवृक्षं तद्दीपान् वर्त्तिकाछेदनीः
१० कर्त्तरिका तत्सेवार्थकसर्व्वतैलपात्राणि चाच्छादयिष्यन्ति। ते दीपवृक्षं
तत्सर्व्वपात्राणि च तहश्चर्म्मत्तेराच्छादने निधाय वहनदण्डोपरि स्थाप-
११ यिष्यन्ति। ते स्वर्णवेद्या उपरि नीलवस्त्रं विस्तार्य्य तहश्चर्म्मत्तेराच्छा-
१२ दनेन तामाच्छाद्य तत्र वहनदण्डौ निधास्यन्ति। ते पवित्रस्थानसेवार्थ-
कानि सर्व्वपात्राण्यादाय नीलवस्त्रमध्ये निधास्यन्ति तहश्चर्म्मत्या तदा-

च्छादयिष्यन्ति वहनदण्डोपरि स्थापयिष्यन्ति। वेद्या भस्म निःक्षिप्य १३
तदुपरि वार्त्ताकीवर्णवस्त्रं पातयिष्यन्ति। तदुपरि तत्सेवार्थकभाजना- १४
न्यर्थात् कर्त्तरीत्रिशूलदर्व्वीकुण्डानि वेद्याः सर्व्वपात्राणि निधास्यन्ति
तदुपरि तहश्चर्म्मणाच्छादनं विस्तार्य्य तत्र वहनदण्डौ निधास्यन्ति।
इत्थं शिविरस्याग्रगमनकाले पवित्रस्थाने पवित्रस्थानस्य सर्व्वभाजने १५
च हारोणतत्सुतैराच्छादिते किहातवंशाः स्वस्वभारं वोढुमायास्यन्ति
किन्तु मृत्युभयात् पूतं वस्तु ते न स्पर्शनीयं। समाजावासे किहात-
वंशस्य भारोयं भविष्यति, दीपार्थकतैलं सुगन्धिधूपो दैवसिकनैवेद्यम् १६
अभिषेकार्थकतैलम् आवासस्तस्य सर्व्ववस्तु पूतस्थानं तत्पात्राणि चैतानि
हारोणसुतस्य इलियासरयाजकस्य हस्ते समर्पितानि।

अनन्तरं परमेश्वरो मूससं हारोणञ्च जगाद यूयं लेविनां मध्यात् १७
किहातीयवंशं नोच्छिन्त। तेषां मृति र्यथा न भवेत् ते जीवेयुस्तदर्थं ते १८
यदातिपवित्रस्थानस्य सविधा भवन्ति तदा तान् प्रतीत्थं कुरुत हारोण- १९
तत्पुत्रा अभ्यन्तरं गत्वा तेषां प्रतिजनं सेवायां भारे च नियोक्ष्यन्ते।
किन्तु यथा ते न म्रियेरंस्तदर्थं निमिषैकमपि पवित्रवस्तु द्रष्टुं तैरन्त- २०
र्न गन्तव्यं।

ततः परं परमेश्वरो मूससमवदत् त्वं गेर्शोनीयानां पितृवंशानुसारात् २१
कुलानुसाराच्च तेषामपि संख्यां गृहाण। आ त्रिंशद्वर्षवयस्कात् पञ्चा- २२
शद्वर्षवयस्कं यावद् ये पुरुषाः समाजावासे कर्म्मकारिणां श्रेण्यन्तर्ग- २३
तास्तान् गणय। गेर्शोनवंशेन यत् करणीयं, तत् कार्य्यं वहनञ्चेदं, २४
आवासस्य यवनिका समाजदूष्यं तदाच्छादनं तदुपरिस्थतहश्चर्म्म- २५
राच्छादनं समाजावासस्य द्वाराच्छादनवस्त्रं प्राङ्गणस्य यवनिका आ- २६
वासवेद्योश्चतुर्दिक्स्थितस्य प्राङ्गणस्य द्वाराच्छादनवस्त्रं तस्य रज्जवस्त-
त्सेवार्थकं सर्व्वपात्रं एतानि तै र्वहनीयानि, एतानि च यत्कर्म्मार्थम-
भुवन् तदपि तैः करणीयं। गेर्शोनीयवंशाः स्वीयसर्व्वभारवहने सेवने च २७
हारोणतत्सुतानामाज्ञानुसारात् सर्व्वकर्म्म करिष्यन्ति, यूयं तेषु भारेषु
तान् नियोक्ष्यध्वे। समाजावासे गेर्शोनीयवंशस्य सेवनमिदं, तान् २८
शासितुं हारोणयाजकस्य सुतेथामरस्याधिकारो भविष्यति।

मिरारिवंशीयानां कुलानुसारात् पितृवंशानुसाराच्च तान् गणय। २९
आ त्रिंशद्वर्षवयस्कात् पञ्चाशद्वर्षवयस्कं यावद् ये पुरुषाः समाजावासे ३०
कर्म्मकारिणां श्रेण्यन्तर्गतास्तेषां प्रतिजनं गणय। समाजावासे तेषां ३१

कर्म्मानुसारात् तैः पालनीयो भारवहनविधिरयं, आवासफलकानि
३२ स्तम्भास्तदर्गलाः पदाधाराः प्राङ्गणचतुर्दिक्स्थस्तम्भास्तेषां पदाधाराः
कीलाः रज्जवः सर्व्वपात्राणि सेवार्थसकलवस्तूनि च तै रक्षितव्यान्ये-
३३ तानि वहनीयद्रव्याण्येकैकनामक्रमेण तै र्गणितव्यानि। समाजावासे
मिरारीयवंशेन करणीया सेवेयं हारोणयाजकस्य सुतेथामरस्य वशे
भविष्यति।

३४ मूसा हारोणः समाजाध्यक्षाश्च किहातवंशस्य कुलानुसारात् पितृ-
३५ वंशानुसाराच्च त्रिंशद्वर्षवयस्कमारभ्य पञ्चाशद्वर्षवयस्कं यावत् समा-
३६ जावासे कर्म्मकारिणां श्रेण्यन्तर्गतान् पुरुषान् गणयाञ्चक्रुः। तेषां
३७ कुलानुसाराद् गणितानां सार्द्धसप्ताधिके द्वे सहस्रे आसन्। मूससं
प्रति परमेश्वराज्ञानुसारात् मूसोहारोणौ किहातीयवंशमध्ये समा-
जावाससेवाकारिण एतान् जनान् गणयामासतुः।

३८ गेर्शोनीयवंशमध्य आ त्रिंशद्वर्षवयस्कात् पञ्चाशद्वर्षवयस्कं यावद् ये
३९ समाजावासे कर्म्मकारिणां श्रेण्यन्तर्गताऽभवन्, ते स्वस्वकुलानुसारात्
४० पितृवंशानुसाराच्चागण्यन्त। तेषां स्वस्वकुलानुसारात् पितृवंशानुसाराच्च
४१ गणितानां त्रिंशदधिकषट्शताधिके द्वे सहस्रे जना आसन्। मूसो-
हारोणौ परमेश्वराज्ञानुसाराद् गेर्शोनीयवंशमध्ये समाजावाससेविन-
स्तान् जनान् गणयामासतुः।

४२ मिरारीयवंशस्य मध्ये आ त्रिंशद्वर्षवयस्कात् पञ्चाशद्वर्षवयस्कं यावद् ये
४३ समाजावासे कर्म्मकारिणां श्रेण्यन्तर्गताऽभवन्, ते स्वस्वकुलानुसरात् पितृ-
४४ वंशानुसाराच्चागण्यन्त। स्वस्वकुलानुसारात् गणितानां तेषां संख्या शतद्व-
४५ याधिकसहस्रत्रयम् आसीत्। मूससं प्रति परमेश्वराज्ञया मूसोहा-
४६ रोणौ मिरारिवंशस्य लोकानेतानगणयतां। मूसा हारोण इस्रायेल्-
४७ वंशाध्यक्षाश्च लेवीयवंशस्य त्रिंशद्वर्षवयस्कमारभ्य पञ्चाशद्वर्षवयस्कं यावत्
समाजावाससम्बन्धीयं भारवहनादिसेवाकर्म्म कर्त्तुं योग्यान् पुरुषान्
४८ स्वस्वकुलानुसारात् पितृवंशानुसाराच्च गणयाञ्चक्रुः। गणितास्ते अशीत्य-
४९ धिकपञ्चशताधिकाष्टसहस्राण्यासन्। परमेश्वराज्ञया तेषां प्रत्येको जनो
मूससा स्वस्वसेवायै भाराय च नियुक्तः। मूससं प्रति परमेश्वराज्ञया
तद्गणितलोकानां कथेति।

५ पञ्चमोऽध्यायः।

१ शिविरादशुचिलोकानां दूरीकरणं ५ अपराधात् परिशोधनं ११ जायां प्रति पत्यौ क्रुद्धे जायापरीक्षाव्यवस्था।

परमेश्वरो मूससं जगाद त्वं सर्व्वान् कुष्ठिनः प्रमेहिनः स्पृष्टशवा- १
शुचींश्च प्राणिनः शिविराद् वहिष्कर्त्तुं इस्रायेल्वंशमित्यादिश। यूयं २
पुमांसं स्त्रियश्च वहिष्कुरुत यत्र युष्मत्शिविरमध्येऽहं वसामि तत् ते ३
यथाशुचि न कुर्य्युस्तदर्थं तान् शिविराद् वहिष्कुरुत। तत इस्रायेल- ४
वंशस्तथैव तान् शिविराद् वहिष्कृतवान् इस्रायेल्सन्ताना मूससम्प्रति
परमेश्वराज्ञानुसारात् कर्म्मेदं चक्रुः।

अनन्तरं परमेश्वरो मूससमवदत् त्वम् इस्रायेल्वंशं वद, पुमान् वा ५
स्त्री स्यात्, यः कश्चिद् मानवैराचरितं पापं कृत्वा परमेश्वरस्य दृष्टाव- ६
पराध्यति, स एव दण्डनीयो भविष्यति। तस्मात् स आत्मकृतं पापं स्वीकृत्य ७
स्वापराधात् यस्य प्रतिकूलात् पापं कृतवान् तस्मै पञ्चमांशाधिकं मूलद्रव्यं
दास्यति। किन्तु तद्दोषपरिशोधकं दानं तेन यस्य करे समर्पितुं शक्यते, ८
तद्वत् तस्य कश्चिद् ज्ञाति र्यदि न तिष्ठति तर्हि तेन तत् परिशोधकं
दानं परमेश्वरम् उद्दिश्य याजकाय दातव्यं, येन च स्वार्थं प्रायश्चित्तं ९
कर्त्तव्यं, स प्रायश्चित्तार्थको मेषबलिरपि दातव्यः। इस्रायेल्वंशे यानि १०
पवित्रवस्तूनि याजकान्तिकम् आनीयन्ते, तेषाम् उत्तोलनीयोपहारा
याजकस्य भविष्यन्ति। येन याजकेन यन्निवेद्यते तत् तस्यैव भविष्यति,
मानुषो यत् किञ्चन वस्तु याजकाय ददाति तत् तस्य भविष्यति।

परमेश्वरो मूससं बभाषे त्वम् इस्रायेल्वंशं वद तेभ्य इमां कथां ११
कथय कस्यापि जनस्य जाया यदि विपरीतमाचरति तस्य प्रातिकूल्येना- १२
पराध्यति, अर्थात् सा यदि स्वामिनोऽगोचरं गुप्तभावेन पुंसा संसर्गं १३
कृत्वाशुचि र्भवति तस्या विपक्षः कोपि साक्षी न तिष्ठति सा न धार्य्यते च,
यदि क्रोधित्वं स्वामिनमेति जायाया अशौचसत्त्वात् तां द्वेष्टि यद्वा स्वामी १४
क्रोधापन्नः सन् जायाया अशौचासत्त्वेपि तां द्वेष्टि, तर्हि स पतिः स्वजायां
याजकान्तिकमानेष्यति तत्कृते नैवेद्यार्थकम् एफादशमांशं यवचूर्णम् १५
आनेष्यति किन्तु तदुपरि तैलकुन्दुरू न दास्यति यस्मात् तत् तदामर्ष-
नैवेद्यम् अर्थात् अतिक्रमस्मारकं स्मरणनैवेद्यं। अनन्तरं याजकस्तां नीत्वा
परमेश्वरस्य सम्मुखम् उपस्थापयिष्यति। याजको मृत्पात्रे पूततोयमा- १६
दायावासमध्यस्थलस्य धूलिं गृहीत्वा तत्र तोये दास्यति। याजक- १७

स्तां जायां परमेश्वरस्य सम्मुखम् उपस्थाप्य तस्याः शिरोऽनावृतं कृत्वा
१८ स्मरणनैवेद्यम् अर्थात् कोपनैवेद्यं तत्कराभ्यां दास्यति। याजकः
१९ शापदं तिक्ततोयं स्वकरे निधास्यति। याजकः शपथं कारयित्वा तां
स्त्रियं वदिष्यति कोपि पुमान् यदि त्वां नागच्छत् त्वञ्च स्वपतिं विनान्य-
पुंसा साकमशुचि कर्म्म नाकरोस्तर्ह्येतत् शापदं तोयं त्वयि निष्फलं
२० भवेत्। किन्तु यदि त्वं स्वपतिं विनान्यपुंसा साकम् अशुचि कर्म्माकरो-
स्त्वत्पतिं विनान्यः पुमान् यदि त्वामुपागच्छत् तर्हि परमेश्वरस्तवोरू
२१ पाचयित्वा तवोदरं स्फीतं कृत्वा तव लोकानां मध्ये त्वां शापशपथयो-
रास्पदं करोतु तत इदं शापदं तोयं तवोदरं स्फीतं कर्त्तुं उरू पाचयितुं
तवान्तरं प्रविशत्विति याजकः शापददिव्येन तां स्त्रियं दिव्यं कारयित्वा
२२ वदिष्यति ततः सा स्त्री तथास्तु तथास्त्विति वदिष्यति। याजकस्तं
२३ शापं पुस्तके लेखिष्यति तत्तिक्ततोयेन मार्जिष्यति च। ततस्तेन
२४ तत् शापदं तिक्तजलं तस्यां स्त्रियां पायितायां तत् तोयं तिक्तत्वेन तस्या
२५ उदरं प्रवेक्ष्यति। अनन्तरं याजकस्तस्याः स्त्रियाः करात् कोपजन्यनैवेद्य-
मादाय परमेश्वरस्य सम्मुख आन्दोल्य वेद्या उपरि निवेदयिष्यति।
२६ याजकस्तस्य नैवेद्यस्य मुष्टिमेकाम् अर्थात् तत्स्मरणनैवेद्यस्यांशं गृहीत्वा
२७ वेद्या उपरि दाहयित्वा तां स्त्रियं तत्तोयं पाययिष्यति। स्त्रियां तोयं
पायितायां सा यदि स्वस्वामिनः प्रातिकूल्यात् कर्म्म कृत्वाशुचि जाता तर्हि
तत्शापदं तोयं तस्या मध्यं तिक्तत्वेन प्रवेक्ष्यति, तस्या जठरः स्फीतो
भविष्यति उरू च पक्ष्येते इत्थं सा स्वलोकानां मध्ये शापफलं भक्षि-
२८ ष्यति। सा स्त्री यद्यशुचि न जाता तर्हि सा मुक्ता भविष्यति गर्भञ्च
२९ धारयिष्यति। स्त्री पत्यु र्विरुद्धम् अन्येन साकं व्यवहृत्याशुचि र्यदि
३० जायते तर्हि तस्य क्रोधहेतोरियं व्यवस्था। यद्वा पति र्यदि क्रोधापन्नः
३१ सन् स्वभार्य्यायै कुप्यति तर्हि स तां परमेश्वरस्य सुम्मुख उपस्थाप-
यिष्यति याजकस्तत्र व्यवस्थामिमां पालयिष्यति। तेन पतिः पापात्
मोक्ष्यते किन्तु सा स्त्री स्वपापं भोक्ष्यते।

---

६ षष्ठोऽध्यायः।

१ नासरीयव्रतकरणव्यवस्था १३ नासरीयव्रतसमापनव्यवस्था २२ लोकान् प्रत्याशीर्व्वद-नकथनञ्च।

१ परमेश्वरो मूससमुवाच त्वमिस्रायेल्वंशं वद तेभ्य इमां कथां कथय,

केनचित् पुंसा स्त्रिया वा परमेश्वरम् उद्दिश्य पृथग् भवितुं नासरीय- २
व्रते कृते स गोस्तनीरसात् सुरायाश्च पृथक् स्थास्यति, फलतो गोस्तनीरसं ३
सुराम्लरसञ्च न पास्यति गोस्तनीरसोत्पन्नं किमपि पेयं न पास्यत्यामं
शुष्कं वा मृद्विकाफलं न भक्षिष्यति। पृथक्स्थितेः सर्व्वकाले स मृद्वि- ४
काफलजातं किमपि न भोक्ष्यति, आ वीजात् त्वचं यावत् किमपि न
खादिष्यति। व्रतहेतोः पृथक्स्थितेः सर्व्वकाले क्षुरं तच्छिरो न स्प्रक्ष्यति ५
परमेश्वरम् उद्दिश्य पृथक्स्थितेर्दिनात् व्रतपूर्णं यावत् स पवित्रः
स्थास्यति, स्वकचगुच्छं वर्द्धयिष्यति। परमेश्वरमुद्दिश्य पृथक्स्थितेः ६
सर्व्वकाले स कस्यापि कुणपस्यान्तिकं न यास्यति। स्वस्य पिता भ्राता ७
माता भगिनी वा यदि म्रियते तथापि स्वं नाशुचिं करिष्यति यस्मात्
तस्य शिरसि तदीश्वरीयशौचचिह्नम् आस्ते। पृथक्स्थितेः सर्व्वसमयं ८
स परमेश्वरमुद्दिश्य पवित्रः स्थास्यति। यद्यपि तत्समीपे हठात् कस्य- ९
चिन्मरणात् स शौचचिह्नितशिरोऽशुचि करोति तर्हि स शुचित्वदिवसे
स्वशिरो मुण्डयिष्यत्यर्थात् सप्तमदिने तन् मुण्डयिष्यति। अष्टमदिने स १०
द्वौ कपोतौ वा पारावतवत्सौ समाजावासद्वारस्यान्तिके याजकसमीप-
मानेष्यति। याजकस्तयोरेकं प्रायश्चित्तार्थम् अन्यं होमार्थं निवेद्य कुणप- ११
जन्यपापात् प्रायश्चित्तं करिष्यति तेन स तद्दिनात् स्वशिरः पावयित्वा
स्वव्रतदिनानि परमेश्वरमुद्दिश्य पृथक् स्थास्यति, तेन दोषार्थम् एक- १२
वर्षीयैकमेषवत्सो बलिरूपेण दातव्यः, किन्तु पृथक्स्थितिकाले तदशौ-
चहेतोः पूर्व्वदिवसा वृथा जाताः।

पृथक्स्थितिदिवसेषु पूर्णेषु नासरीयव्रतस्य व्यवस्थेयं, आदौ व्रतकृत् १३
समाजावासद्वारस्य समीपमानेष्यते। होतुम् एकहायनं निर्दोषमेकं १४
मेषवत्सं प्रायश्चित्तार्थम् एकहायनीं मेषवत्सामेकां मङ्गलार्थं निर्दोषमेषं
किण्वहीनपूपपूर्णं डल्लकं तैलाक्तान् सूक्ष्मगोधूमचूर्णपिष्टकान् किण्वही- १५
नान् तैलाक्तान् सूक्ष्मपिष्टकान् तदुपकरणं पेयनैवेद्यम् एतानि परमेश्वर-
मुद्दिश्य निवेदयिष्यति। याजकः परमेश्वरस्य सम्मुखम् एतान्यानीय १६
प्रायश्चित्तबलिं होमबलिञ्चोत्स्रक्ष्यति। किण्वहीनपूपडल्लकेन सार्कं मङ्ग- १७
लार्थकमेषबलिं परमेश्वरम् उद्दिश्योत्स्रक्ष्यति पश्चात् तदुपकरणं पानीय-
नैवेद्यञ्च निवेदयिष्यति। अनन्तरं नासरीयनरः समाजावासद्वारान्तिके १८
पृथक्स्थितिसूचकं शिरो मुण्डयित्वा पृथक्स्थितिसूचकान् शिरःकचान्
आदाय मङ्गलार्थकबलेरधःस्थिताग्नौ निःक्षेप्स्यति। नासरीयव्रतकृन् १९

रस्य केशमुण्डनात् परं याजको जलसिद्धमेषस्य स्कन्धं डल्लकात् किण्व-
हीनपूपमेकं किण्वहीनं सूक्ष्मपिष्टकमेकञ्च गृहीत्वा तत्करयोः स्थापयि-
२० ष्यति। याजक आन्दोलनीयनैवेद्यार्थं तानि परमेश्वरमुद्दिश्य दोलयि-
ष्यति, तत आन्दोलनीयवक्षसोत्तोलनीयस्कन्धेन च साकं तानि याज-
कोद्देश्यानि पूतानि भविष्यन्ति, पश्चान् नासरीयनरो द्राक्षारसं पातुं
२१ शक्ष्यति। नासरीयव्रतकृन्नरस्य तत्पृथक्स्थितिहेतोः परमेश्वराय
स्वीकर्त्तव्यस्य नैवेद्यस्य च व्यवस्थेयं, तस्य पृथक्स्थितिव्यवस्थाधिकं तेन
स्वक्षमतानुसारात् यत्किमपि प्रतिश्रूयते तदेव स्वीयप्रतिश्रुत्यनुसारात्
तेन कर्त्तव्यं।

२२ ततः परं परमेश्वरो मूससं जगाद त्वं हारोणं तत्सुतांश्च वद यूयम्
२४ एतैराशीर्वचोभिरिस्रायेल्वंशायाशिषं दास्यथ। परमेश्वरस्त्वाम् आशीषं
२५ वदन् रक्षतु। परमेश्वरस्त्वां प्रति स्वास्यं प्रसन्नी कुर्व्वन् त्वामनुगृह्णातु।
२६ परमेश्वरस्त्वां प्रति कृपादृष्टिं कुर्व्वन् तुभ्यं शान्तिं ददातु। तेषाम् इस्रायेल्-
२७ वंशमधि मन्नामोच्चारणाद् अहं तेभ्य आशिषं दास्यामि॥

---

७ सप्तमोऽध्यायः।

१ आवासाय १ वेद्यै च सर्व्वाधिपानां नैवेद्यं ११ साक्ष्यमञ्जूषाया मूससा साकं परमेश्वरस्य कथनञ्च।

१ आवासस्थापनसमाप्तिदिने मूसास्तं तत्पात्राणि वेदिं तत्पात्राणि
२ चाभिषिक्तवान् पावितवांश्च। तेषु सर्व्वेष्वभिषिक्तेषु पावितेषु चेस्रायेे-
लीयपितृवंशानां मुख्याध्यक्षा अर्थात् गणितेषु नियुक्ता वंशाध्यक्षा
३ नैवेद्यानि ददुः। ते परमेश्वरमुद्दिश्य षट् शकटानि द्वादश बलीवर्दान्
आनिन्युः, अर्थात् द्वौ द्वावध्यक्षावेकमेकं शकटम् एकैको ऽध्यक्ष एकैकं
बलीवर्दमानीयावाससम्मुख उपस्थापितवान्।

४ तदा परमेश्वरो मूससं बभाषे त्वं तेभ्यस्तानि ग्रहीष्यसि तानि
५ समाजावासस्य कर्म्मकृते भविष्यन्ति त्वं तानि लेविभ्यो दास्यसि, अर्थाद्
६ एकैकवंशाय स्वस्वकर्म्मानुरूपं दास्यसि। ततो मूसास्तान् शकटबली-
७ वर्दानादाय लेविभ्यो ददौ। फलतो गेर्शोनीयवंशाय तेषां सेवानुसारात्
८ द्वे शकटे चतुरो बलीवर्द्दान्, मिरारिवंशाय च चतुःशकटान्यष्टौ बली-
९ वर्द्दान् दत्त्वा हारोणयाजकस्य सुतेथामरस्य करे समर्पितवान्। किन्तु

किहातीयवंशाय किमपि न ददौ यतः स्कन्धैः पवित्रस्थानीयसर्व्ववस्तुवहनं
तेषां सेवासीत्

वेद्या अभिषेकदिने ऽधिपास्तां पावयितुं वेद्याः सम्मुखे स्वं स्वं नैवेद्यं १०
निवेदयामासुः। परमेश्वरो मूससं जगाद एकैकोऽधिप एकैकदिने वेदिं ११
पावयितुं स्वं स्वं नैवेद्यं निवेदयतु।

तत्र प्रथमेऽहनि यिहूदावंशजातो ऽम्मीनादवस्य सुतो नहशोनः स्वं १२
नैवेद्यं निवेदितवान्। पवित्रस्थानस्य शेकलनुसारात् त्रिंशदधिकशत- १३
शेकल्मानं रूप्यभाजनं सप्ततिशेकल्मानं रूप्यपात्रं, एतत्पात्रद्वयं
नैवेद्यार्थं तैलपक्वसूक्ष्मगोधूमचूर्णपूर्णं, धूपेन पूर्णं दशशेकल्मानं स्वर्णमय- १४
धूपपात्रं, होमार्थं गोवत्सैको मेषैक एकवर्षीयमेषवत्सैकश्च, पापप्रायश्चि- १५
त्तार्थं छागैको मङ्गलार्थकबलये द्वे गावौ पञ्च मेषाः पञ्च छागा एकहा- १७
यनाः पञ्चमेषवत्सा एतान्यम्मीनादवसुतेन नहशोनेन निवेदितानि।

द्वितीयदिने इषाखरवंशस्याधिपः सूयारस्य सुतो निथनेल एतानि १८
न्यवेदयत्। पवित्रस्थानस्य शेकलनुसारात् त्रिंशदधिकशतशेकल्मानं १९
रूप्यभाजनं सप्ततिशेकल्परिमाणं रूप्यपात्रं, इदं पात्रद्वयं नैवेद्यार्थं
तैलपक्वसूक्ष्मगोधूमचूर्णैः पूर्णं, धूपपूर्णं दशशेकल्मानं स्वर्णमयं धूपपात्रं, २०
होमार्थं गोवत्सो मेष एकहायनो मेषवत्सश्च, पापप्रायश्चित्तार्थं छागैको २१
मङ्गलार्थकबलये द्वे गावौ पञ्च मेषाः पञ्च छागा एकहायनाः पञ्च मेष- २३
वत्सा एतानि सूयारसुतेन निथनेलेन निवेदितानि।

तृतीयदिने सिवूलूनवंशस्याधिपो हेलोनस्य सुत इलीयाव एतानि २४
न्यवेदयत्। पवित्रस्थानस्य शेकलनुसारात् त्रिंशदधिकशतशेकल्मानं २५
रूप्यभाजनं सप्ततिशेकल्मानरूप्यपात्रं, इदं पात्रद्वयं नैवेद्यार्थं तैलपक्व-
सूक्ष्मगोधूमचूर्णपूर्णं, धूपपूर्णं दशशेकल्मानं स्वर्णमयं धूपपात्रं, होतुं गोव- २६
त्सो मेष एकहायनो मेषवत्सश्च,पापप्रायश्चित्तार्थं छागो मङ्गलार्थकबलये २९
द्वे गावौ पञ्च मेषाः पञ्च छागा एकहायनाः पञ्च मेषवत्सा एतानि हेलोन-
सुतेनेलीयावेन निवेदितानि।

चतुर्थदिवसे रूबेनवंशस्याधिपः शिदेयुरस्य पुत्त्र इलीषूर एतानि ३०
निवेदितवान्। पूतस्थानशेकलनुसारात् त्रिंशदधिकशतशेकल्मानं ३१
रूप्यभाजनं सप्ततिशेकल्मानं रूप्यपात्रं, इदं पात्रद्वयं नैवेद्यार्थं तैल-
पक्वसूक्ष्मगोधूमचूर्णपूर्णं धूपपूर्णं, दशशेकलमानं स्वर्णमयं धूपपात्रं, होतुं ३२
गोवत्सो मेष एकहायनो मेषवत्सश्च, पापप्रायश्चित्तार्थं छागो मङ्गला- ३५

र्थकबलये द्वे गावौ पञ्च मेषाः पञ्च छागा एकहायनाः पञ्च मेषवत्सा
एतानि शिदेयूरसुतेनेलीषूरेण निवेदितानि।

३६ पञ्चदिवसे शिमियोनवंशस्याधिपः सूरीशद्दयस्य सुतः शिलुमीयेल
३७ इमानि निवेदितवान्। पूतस्थानशेकलनुसारात् त्रिंशदधिकशतशेकल्-
मानं रूप्यभाजनं सप्ततिशेकल्मानं रूप्यपात्रं, इदं पात्रद्वयं नैवेद्यार्थं
३८ तैलपक्वसूक्ष्मगोधूमचूर्णपूर्णं, धूपपूर्णं दशशेकल्मानं स्वर्णमयं धूपपात्रं,
४० होतुं गोवत्सो मेष एकहायनो मेषवत्सश्च, पापप्रायश्चित्तार्थं छागो
४१ मङ्गलार्थकबलये द्वे गावौ पञ्च मेषाः पञ्च छागा एकहायनाः पञ्च मेष-
वत्सा एतानि सूरीशद्दयसुतेन शिलुमीयेलेन निवेदितानि।

४२ षष्ठदिने गादवंशाधिपो द्युयेलस्य सुत इलीयासफ एतानि निवेदित-
४३ वान्। पूतस्थानशेकलनुसारात् त्रिंशदधिकशतशेकल्मानं रूप्यभाजनं
सप्ततिशेकल्मानं रूप्यपात्रं, इदं पात्रद्वयं नैवेद्यार्थं तैलपक्वसूक्ष्मगोधूम-
४४ चूर्णैः पूर्णं, धूपपूर्णं दशशेकल्मानं स्वर्णमयं धूपपात्रं,-होतुं गोवत्सो
४७ मेष एकहायनो मेषवत्सश्च पापप्रायश्चित्तार्थं छागो मङ्गलार्थकबलये द्वे
गावौ पञ्च मेषाः पञ्च छागा एकहायनाः पञ्च मेषवत्सा एतानि
द्युयेलसुतेनेलीयासफेन निवेदितानि।

४८ सप्तमदिने इफ्रयिम्वंशाधिपोऽम्मीहूदस्य पुत्र इलीशाम एतानि निवे-
४९ दितवान्। पूतस्थानस्य शेकलनुसारात् त्रिंशदधिकशतशेकल्मानं रूप्य-
भाजनं सप्ततिशेकल्मानं रूप्यपात्रं, इदं पात्रद्वयं नैवेद्यार्थं तैलपक्वसूक्ष्म-
५० गोधूमचूर्णपूर्णं, धूपपूर्णं दशशेकल्मानं स्वर्णमयं धूपपात्रं, होतुं गो-
५२ वत्सो मेष एकहायनमेषवत्सश्च, पापप्रायश्चित्तार्थं छागो मङ्गलार्थक
बलये द्वे गावौ पञ्च मेषाः पञ्च छागा एकहायनाः पञ्च मेषवत्सा
एतानि अम्मीहूदसुतेनेलीशामेन निवेदितानि।

५४ अष्टमदिने मिनशिवंशाधिपः पिदाहसूरस्य सुतो गमिलीयेल
५५ एतानि निवेदितवान्। पूतस्थानस्य शेकलनुसारात् त्रिंशदधिकशतशे
कल्मानं रूप्यभाजनं सप्ततिशेकल्मानं रूप्यपात्रं, इदं पात्रद्वयं नैवेद्यार्थं
५६ तैलपक्वसूक्ष्मगोधूमचूर्णपूर्णं, धूपेन पूर्णं दशशेकल्मानं स्वर्णमयं धूपपात्रं,
५८ होतुं गोवत्सो मेष एकहायनो मेषवत्सश्च, पापप्रायश्चित्तार्थं छागो
५९ मङ्गलार्थकबलये द्वे गावौ पञ्च मेषाः पञ्च छागा एकहायनाः पञ्च मेष-
वत्सा एतानि पिदाहसूरसुतेन गमिलीयेलेन निवेदितानि।

६० नवमदिने विन्यामीनवंशाधिपो गिदियोनेः सुतोऽबीदान एतानि

निवेदितवान्। पूतस्थानस्य शेकलनुसारात् त्रिंशदधिकशतशेकल्मानं ६१
रूप्यभाजनं सप्ततिशेकल्मानं रूप्यपात्रम् इदं पात्रद्वयं नैवेद्यार्थं तैलपक्व-
सूक्ष्मगोधूमचूर्णपूर्णं, धूपेन पूर्णं दशशेकल्मानं स्वर्णमयं धूपपात्रं, होतुं ६२
गोवत्सो मेष एकहायनो मेषवत्सश्च, पापप्रायश्चित्तार्थं छागो मङ्गला- ६५
र्थकबलये द्वे गावौ पञ्च मेषाः पञ्च छागा एकहायनाः पञ्च मेषवत्सा
एतानि गिदियोनेः सुतेनावीदानेन निवेदितानि।

दशमदिने दानवंशाधिपो ऽम्मीशद्दयस्य सुतोऽहीयेषर एतानि निवे- ६६
दितवान्। पूतस्थानशेकलनुसारात् त्रिंशदधिकशतशेकल्मानं रूप्य- ६७
भाजनं सप्ततिशेकल्मानं रूप्यपात्रं इमे भाजने नैवेद्यार्थतैलपक्वसूक्ष्म-
गोधूमचूर्णपूर्णे, धूपेन पूर्णं दशशेकल्मानं स्वर्णमयं धूपपात्रं, होतुं ६८
गोवत्सो मेष एकहायनो मेषवत्सश्च, पापप्रायश्चित्तार्थं छागो ७०
मङ्गलार्थकबलये द्वे गावौ पञ्च मेषाः पञ्च छागा एकहायनाः पञ्च ७१
मेषवत्सा एतान्यम्मीशद्दयस्य सुतेनाहीयेषरेण निवेदितानि।

एकादशेऽह्नि आशेरवंशस्याधिपोऽक्रणस्य सुतो पगीयेल एतानि न्यवे- ७२
दयत्। पूतस्थानशेकलनुसारात् त्रिंशदधिकशतशेकल्मानं रूप्यभाजनं ७३
सप्ततिशेकलमानं रूप्यपात्रं इमे पात्रे नैवेद्यार्थतैलपक्वसूक्ष्मगोधूमचूर्ण-
पूर्णे, धूपेन पूर्णं दशशेकल्मानं स्वर्णमयं धूपपात्रं, होतुं गोवत्सो मेष ७५
एकहायनो मेषवत्सश्च, पापप्रायश्चित्तार्थं छागो मङ्गलार्थकबलये द्वे ७७
गावौ पञ्च मेषाः पञ्च छागा एकवर्षीयाः पञ्च मेषवत्सा एतान्यक्रण-
सुतेन पगीयेलेन निवेदितानि।

द्वादशे दिने नप्तालिवंशस्याधिप एननस्य सुतोऽहीर एतानि निवे- ७८
दितवान्। पूतस्थानस्य शेकलनुसारात् त्रिंशदधिकशतशेकल्मानं रूप्य- ७९
भाजनं सप्ततिशेकल्मानं रूप्यपात्रं पात्रद्वयमिदं नैवेद्यार्थतैलपक्वसूक्ष्म-
गोधूमचूर्णपूर्णं, धूपपूर्णं दशशेकल्मानं स्वर्णमयं धूपपात्रं, होतुं गो- ८०
वत्सो मेष एकहायनमेषवत्सश्च पापप्रायश्चित्तार्थं छागो मङ्गलार्थक- ८२
बलये द्वे गावौ पञ्च मेषाः पञ्च छागा एकहायनाः पञ्च मेषवत्सा एता-
न्येननसुतेनाहीरेण निवेदितानि।

वेद्या अभिषेकदिने तस्याः पावनाय यद्यद् इस्रायेलवंशीयाधिपैरुत्सृष्टं, ८४
तत् सर्व्वमिदं रूप्यस्य द्वादशभाजनानि रूप्यस्य द्वादशपात्राणि स्वर्णस्य
द्वादश धूपपात्राणि। एकैकभाजनं त्रिंशदधिकशतशेकल्मानमासीत् ८५
एकैकं पात्रं सप्ततिशेकल्मानमासीत् तेन तत्सर्व्वेषां पात्राणां रूप्यं पवित्र-

८६ स्थानशेकलनुसारात् चतुःशताधिकसहस्रद्वयशेकल्मानं। धूपपूर्णानि
स्वर्णस्य द्वादश धूपपात्राण्येकैकं पूतस्थानशेकलनुसारात् दशशेकल्-
मानमासीत् सर्व्वेषां धूपपात्राणां स्वर्णं विंशत्यधिकशतशेकल्मानं।
८७ होमार्थं द्वादश गावो द्वादश मेषा एकहायना द्वादश मेषवत्साः
८८ पापप्रायश्चित्तार्थं द्वादश छागाः। मङ्गलार्थकबलये साकल्यतश्चतुर्विं-
शतिगावः षष्टिर्मेषाः षष्टिश्छागा एकहायनाः षष्टिर्मेषवत्सा एतानि
वेद्यभिषेकात् परं तस्याः पावनाय न्यवेद्यन्त।
८९ मूसा ईश्वरेण साकं कथां कथयितुं समाजावासं प्रविश्य साक्ष्यमञ्जू-
षाया उपरिस्थितपापाच्छादनाद् अर्थात् तत्रस्थकिरूवयो र्मध्यात् तेन
साकं वाक्यवादिनं शब्दं शुश्राव ततः स तेन साकं कथां कथितवान्।

---

८ अष्टमोऽध्यायः।

१ प्रदीपज्वालनकथनं ५ लेविनां पावनकथनं २३ तेषां सेवायोग्यवयोनिर्णयश्च।

१ परमेश्वरो मूससं गदितवान् त्वं हारोणाय कथय तमिति वाचं भण
२ स प्रदीपज्वालनकाले दीपवृक्षस्य सम्मुखे सप्त दीपान् ज्वालयिष्यति।
३ ततो हारोणस्तादृशं चकृवान् अर्थात् मूससं प्रति परमेश्वरस्याज्ञा-
४ नुसाराद् दीपवृक्षसमक्षं सप्त दीपान् ज्वालितवान्। स दीपवृक्ष आहृ-
तस्वर्णेन निर्म्मितः,परमेश्वरो मूससं यादृशीम् आकृतिं दर्शितवान् तादृश-
मेव स तं दीपवृक्षं प्रकाण्डमारभ्य प्रसूनं यावद् आहतस्वर्णेन निर्म्ममे।
५ परमेश्वरो मूससं गदितवान् त्वमिस्रायेल्वंशस्य मध्याल् लेविन
७ आदाय इत्थं पावय। तान् पावयितुं तेषामुपरि पावकं तोयं निक्षिप ते
८ स्वं स्वं कायं मुण्डयित्वा वसनं धौत्वा स्वान् पावयन्तु। तै र्गोवत्से तैलपक्व-
सूक्ष्मगोधूमचूर्णे नैवेद्ये च समानीते त्वं पापप्रायश्चित्तार्थम् अपरं
९ गोवत्सं गृहाण। लेविनः समाजावासस्य समक्षमानीयेस्रायेलवंशी-
१० यानां समाजं मेलय। अनन्तरं लेवीयेषु त्वया परमेश्वरस्यान्तिकम् आ-
११ नीतेषु इस्रायेल्वंशस्तेषां गात्रेषु करानर्पयतु। ततो हारोणः परमेश्वरस्य
समक्षम् इस्रायेल्वंशस्योत्तोलनीयोपहाररूपेण लेविन उत्स्रक्ष्यति तेन
१२ ते परमेश्वरस्य सेवायै नियुक्ता भविष्यन्ति। लेवीयै र्गोवत्सयोः शिर उपरि
स्वे स्वे करेऽर्पिते त्वं लेवीयानां प्रायश्चित्तार्थं तयोरेकं प्रायश्चित्तबलि-
१२ मन्यञ्च होमार्थकबलिं परमेश्वरमुद्दिश्योत्स्रक्ष्यसि। हारोणतत्सुतानां

समक्षं लेविन उपस्थाप्य परमेश्वरम् उद्दिश्य तान् उत्तोलनीयनैवेद्यरूपे-
णोत्तोलयिष्यसि। इत्थं त्वमिस्रायेल्वंशाल् लेवीयान् पृथक् करिष्यसि १४
तेन ते मम भविष्यन्ति। ततः परं लेवीयाः सेवितुं समाजावासं प्रवे- १५
क्ष्यन्ति। त्वं तान् पावयित्वा उत्तोलनीयोपहाररूपेणोत्स्रक्ष्यसि यस्मात् त १६
इस्रायेल्वंशमध्यात् सर्व्वथा मामुद्दिश्य दत्ता अहमिस्रायेल्वंशस्य सर्व्वे-
षामादिजानां विनिमयात् तानग्रहीं। यतो मानुषः पशु र्वा भवेत् १७
इस्रायेल्वंशस्य सर्व्वादिजा मम भवन्ति यदाहं मिसर्द्देशस्य सर्व्वादिजान्
व्यनाशयं तदा स्वार्थं तानपावयं। इस्रायेल्वंशस्य सर्व्वादिजानां विनि- १८
मयाल् लेविनोऽग्रहीषं। समाजावास इस्रायेल्वंशानां कर्त्तव्यकर्म्म १९
साधयितुं तेषां कृते प्रायश्चित्तं कर्त्तुञ्चाहम् इस्रायेलवंशमध्याल् लेवी-
यान् नीत्वा हारोणतत्सुतेभ्यो दानरूपमदां, तेन पूतस्थानसन्निधानगम-
नाद् इस्रायेल्वंशमध्ये मारी न भविष्यति। मूसा हारोण इस्रायेल्- २०
वंशस्य सर्व्वसमाजश्च लेविनः प्रति तदेव चक्रुः, लेविनोऽधि परमेश्वरो
मूससं प्रति यथाज्ञापितवान् इस्रायेल्वंशास्तान् प्रति तथैव चक्रुः।
फलतो लेवीयाः स्वान् अपावयन् स्वं स्वं वसनं अधावन् हारोणस्तान् २१
उत्तोलनीयोपहाररूपान् परमेश्वरायोत्ससर्ज तान् पावयितुं प्रायश्चित्तं
चकार च। ततः परं लेवीया हारोणतत्सुतानां समक्षं स्वस्वसेवाकार्य्याय २२
समाजावासं प्राविशन् लेविनः प्रति परमेश्वरो मूससं यद्यदादिशत् तान्
प्रति तदनुसाराद् अक्रियत।

परमेश्वरो मूससं गदितवान् लेविनः प्रति व्यवस्थेयं, आ पञ्चविंशति- २३
वयसो लेवीयाः समाजदूष्यस्य कर्म्मकारिणां श्रेण्यन्तर्गता भविष्यन्ति। २४
पञ्चाशत्तमवर्षे जाते तच्छ्रेणीनिर्गता भविष्यन्ति, पुन र्न सेविष्यन्ते। रक्ष- २५
णीयं रक्षितुं ते समाजदूष्ये स्वं स्वं भ्रातरमुपकरिष्यन्ति किन्तु नान्यत् २६
किञ्चित् सेविष्यन्ते लेविनां रक्षणीयमधि तान् प्रति त्वम् इत्थं करिष्यसि।

---

९ नवमोऽध्यायः।

१ निस्तारोत्सवकरणाज्ञा ६ केषाञ्चिदशुचीनां कथनं ९ तदशुचीनां निस्तारमहकरणाज्ञा १५ आवासोपरिमेघस्थितिः, तस्य यात्रया तेषां स्थिति र्यात्रा च।

इस्रायेल्वंशे मिसर्द्देशाद् वहिरागते द्वितीयवर्षस्य प्रथमे मासि १
सीनयप्रान्तरे परमेश्वरो मूससं जगाद, इस्रायेल्वंशा निरूपितकाले २
निस्तारमहं कुर्व्वन्तु। अस्य मासस्य चतुर्दशदिनस्य सन्ध्यायां तस्य निरूपितः ३

कालो भवति तदा यूयं तं महं करिष्यध्वे, सर्व्वविधिव्यवस्थानुसारात्
४ तं करिष्यध्वे। तदा मूसा निस्तारमहं कर्त्तुमिस्रायेल्वंशानादिशत्। तदा
५ ते प्रथममासस्य चतुर्दशदिनस्य सन्ध्यायां सीनयप्रान्तरे निस्तारमहं
चक्रुः इस्रायेल्वंशा मूसां प्रति परमेश्वराज्ञानुरूपं तत् कर्म्म चक्रुः।
६ किन्तु मानुषशवस्पर्शजन्याशुचित्वात् तदा निस्तारमहं कर्त्तुम् अशक्ताः
७ केचिद् जनास्तद्दिने मूसाहारोणयोः समीपं गताः पप्रच्छुः, वयं मानुष-
कुणपं स्पृष्ट्वाशुचयो जातास्तस्माद् इस्रायेल्वंशमध्ये निरूपितकाले परमे-
८ श्वरम् उद्दिश्योपहारं निवेदयितुं किं वयं निवारिष्यामहे? ततो मूसा-
स्तानवोचद् यूयं तिष्ठत युष्मानधि परमेश्वरः किमादिशति तदहं
शृणवानि।
९ ततः परं परमेश्वरो मूसामवादीत् त्वम् इस्रायेल्वंशाय कथय युष्माकं
१० वा युष्मद्भाविसन्तानानां मध्ये यदि कश्चित् कुणपं स्पृष्ट्वाशुचि दूरदेशीयः
पान्थो वा भवति तथापि स परमेश्वरस्य निस्तारमहं करिष्यति।
११ द्वितीयमासस्य चतुर्दशदिने सन्ध्यायां तं करिष्यति किण्वशून्यपूपैस्तिक्त-
१२ शाकैश्च समं मेषशावकं भक्षिष्यति। किन्तु प्रातःकालं यावत् तस्य
किञ्चिदप्यवशिष्टं न स्थापयिष्यति तस्य किञ्चन कीकशं न भंक्ष्यति ते
१३ सर्व्वविधिना निस्तारमहं करिष्यन्ति। किन्तु यः कश्चित् शुचिस्तिष्ठति
पान्थोऽपि न भवति स यदि निस्तारमहं कर्त्तुं निवर्त्तते तर्हि स प्राणी
स्वलोकमध्याद् उच्छेत्स्यते, निरूपितकाले परमेश्वरायोपहारानयना-
१४ भावात् तेन स्वपापं स्वयं भोक्ष्यते। यदि युष्मन्मध्ये प्रवासकारी कश्चित्
विदेशीयलोकः परमेश्वरम् उद्दिश्य निस्तारमहं चिकीर्षति तर्हि सोऽपि
विधिवद् रीत्यनुसारात् तं करिष्यति स्वदेशजो विदेशजो वा द्वयोः कृते
विधिरेको भविष्यति।
१५ यस्मिन् दिने आवासः स्थापितस्तद्दिने मेघस्तमावासम् अर्थात्
साक्ष्यदूष्यम् आच्छादितवान् सन्ध्यामारभ्य प्रातःकालं यावत् तदावासो-
१६ परि वह्नेरिवाकारः प्राकाशत। इत्थं नित्यमभवत्, दिवा मेघो रजन्यां
१७ वह्निवदाकार आवासम् आच्छादयत्। तस्मिन् मेघ आवासोपरित
ऊर्द्ध्वं नीते इस्रायेल्वंशाः प्रयान्ति स मेघो गत्वा यत्रावतिष्ठति तत्र
१८ इस्रायेल्वंशाः शिविरं स्थापयन्ति। इस्रायेल्वंशाः परमेश्वराज्ञानुसारात्
प्रयान्ति परमेश्वराज्ञानुसारात् शिविरं स्थापयन्ति च, स मेघो याव-
१९ दावासोपरि तिष्ठति तावत् ते शिविरे तिष्ठन्ति। यदा स मेघो

बहुदिनानि विलम्ब्यावासोपरि तिष्ठति, तदेस्रायेल्वंशा यात्रामकृत्वा
परमेश्वरस्य रक्षणीयं रक्षन्ति। तस्मिन् मेघे स्वल्पदिनान्यावासोपरि २०
स्थिते ते तदेव कुर्व्वन्ति परमेश्वराज्ञानुसारात् शिविरे तिष्ठन्ति तथा
परमेश्वराज्ञानुसारात् प्रयान्ति। आसन्ध्यातः प्रातर्यावत् स्थितेः परं मेघे २१
प्रातरूर्द्ध्वं नीते ते यात्रां चक्रुः, दिवा रात्रौ वा मेघ उत्थापिते ते यात्रां
चक्रुः। द्वे दिने मासं वर्षं वा विलम्ब्यावासोपरि मेघेऽवस्थिते इस्रायेल्- २२
वंशा अपि तति दिनानि यात्रामकृत्वा शिविरे न्यूषुः किन्तु तस्मिन्
उत्थापिते ते यात्रां चक्रुः। इत्थं ते परमेश्वराज्ञया शिविरे न्यूषुः परमे- २३
श्वराज्ञया यात्रां चक्रुश्च ते मूसाद्वारा परमेश्वराज्ञया परमेश्वरस्य रक्ष-
णीयं ररक्षुः।

---

१० दशमोऽध्यायः।

१ रूप्यतूरीकथनं ११ आ सीनयप्रान्तरात् पारन्प्रान्तरं यावद् यात्रा १४ यात्रानुक्रमः २९ होबवं प्रति मूससा निवेदनं ३३ साक्ष्यमञ्जूषानयनस्थापनकालयो र्मूससाशीर्व्वदनं।

अनन्तरं परमेश्वरो मूससं जगाद त्वं समाजं समाह्वातुं शिविर- १
प्रस्थानमादेष्टुञ्च ताडितरूप्यस्य द्वे तूर्य्यौ निर्म्माहि। तयो र्द्वयो र्ध्वनौ २
कृते सर्व्वे समाजीयास्त्वदन्तिकं समाजावासद्वारि समुपस्थास्यन्ति। तयो- ३
रेकस्यां वादितायामधिपा अर्थाद् इस्रायेल्वंशस्य सहस्राधिपास्त्वद- ४
न्तिकमुपस्थास्यन्ति। तयोरुच्चैर्ध्वनौ कृते पूर्व्वदिक्स्थशिविरीया जनाः ५
प्रस्थास्यन्ते। पुनरुच्चैर्ध्वनौ कृते दक्षिणदिक्स्थशिविरीया जनाः प्रस्था- ६
स्यन्ते, इत्थं तेषां प्रस्थानक्रमानुसारेणोच्चैस्तूरीध्वनिः कर्त्तव्यः। किन्तु ७
यदा समाजस्य सर्व्वे संग्रहीतव्यास्तदा तूरीं यद्वादयिष्यथ तदुच्चै र्न
वादयिष्यथ। हारोणयाजकस्य सुतास्तूर्य्यौ वादयिष्यन्ति एष विधि ८
र्युष्माकं पुरुषपरम्परायां स्थास्यति। यदा यूयं स्वदेशे क्लेशदरिपूणां ९
विरुद्धं योद्धुं यास्यथ, तदेमे तूर्य्यावुच्चै र्वादयिष्यथ तेन युष्मत्प्रभुपरमे-
श्वरेण स्मृता यूयं रिपुगणाद् रक्षिष्यध्वे। युष्माकमानन्ददिनेषु मह- १०
दिनेषु मासारम्भेषु च यूयं होमबलिमङ्गलार्थकबलिदानायेमे तूर्य्यौ
वादयिष्यथ तत्तूरीध्वनिना युष्मदीश्वरो युष्मान् स्मरिष्यति युष्माकं प्रभुः
परमेश्वरोऽहमेव।

द्वितीयवत्सरस्य द्वितीयमासस्य विंशदिने स मेघः साक्ष्यावासस्योप- ११

१२ रितो नीतस्तस्माद् इस्रायेल्वंशाः प्रस्थाननियमानुसारेण सीनयप्रान्त-
१३ रात् प्रतस्थिरे स मेघः पारणप्रान्तरेऽवतस्थे। मूसाद्वारा परमेश्वराज्ञया
तेषामेषा प्रथमा यात्रा।
१४ प्रथमतः स्वस्वसैन्यैः साकं यिहूदादिवंशानां शिविरस्य केतुश्चलितः,
१५ अम्मीनादवस्य पुत्रो नहशोनस्तेषां सेनापतिरासीत्। इषाखर-
१६ वंशस्य सेनापतिः सूयारस्य सुतो निथनेलः। सिबूलूनवंशस्य सेनापति
१७ र्हेलोनस्य सुत इलीयावः। आवासेऽवतारिते गेर्शोनमिरारिवंशीया-
स्तमावासं वहन्तो जग्मुः।
१८ तत्पश्चात् स्वस्वसैन्यैः समं रूबेनादिवंशानां शिविरस्य केतुश्चलितः
१९ शिदेयूरस्य सुत इलीषूरस्तेषां सेनापतिरासीत्। शिमियोनवंशस्य
२० सेनापतिः सूरीशद्दयस्य सुतः शिलुमीयेलः। गादवंशस्य सेनापति र्दूये-
लस्य सुत इलीयासफ आसीत्।
२१ पश्चात् किहातीयवंशीयाः पूतद्रव्यं वहन्तो जग्मु र्गन्तव्यस्थाने तेषा-
मुपस्थितेः पूर्व्वम् आवासः स्थापितः।
२२ ततः स्वस्वसैन्यैः साकम् इफ्रायिमादिवंशानां शिविरस्य केतुश्चलितः,
२३ अम्मीहूदस्य सुत इलीशामस्तेषां सेनापतिरासीत्। मिनशिवंशस्य
२४ सेनापतिः पिदाहसूरस्य सुतो गमिलीयेलः। बिन्यामीनवंशस्य सेना-
पति र्गिदियोनेः सुतोऽबीदान आसीत्।
२५ सर्व्वेषां शिविरस्थानां पश्चात् स्वस्वसैन्यैः साकं दानादिवंशानां शिवि-
रस्य केतुश्चलितः, अम्मीशद्दयस्य सुतोऽहीयेषरस्तेषां सेनापतिरासीत्।
२६ आशेरवंशस्य सेनापतिरक्रणस्य सुतः पगीयेलः। नप्तालिवंशस्य सेना-
२८ पतिरैननस्य सुतोऽहीर आसीत्। इस्रायेल्वंशा अग्रगमनकाल एतेन
विधिना स्वस्वसैन्यैः साकं यात्रां कृतवन्तः।
२९ मूसाः स्वश्वशुररूयेलस्य सुतं मिदियनदेशीयं होबवं बभाषे, परमेश्व-
रोऽस्मभ्यं यं देशं दातुं प्रतिज्ञातवान् वयं तत्स्थानं यामः, त्वमपि साक-
मस्माभिरागच्छ वयं तव मङ्गलं करिष्यामो यतः परमेश्वर इस्रायेल्वंश-
३० मधि शुभं प्रतिज्ञातवान्। ततः स प्रतिजगाद न यास्यामि स्वदेशं स्वज्ञा-
३१ तिसमीपं यास्याम्यहं। मूसा उक्तवान् त्वमस्मान् मा त्याक्षीरिति विनयेऽहं
यतः प्रान्तरस्य मध्ये कथमस्माभिः शिविरं स्थापयितव्यं तद् भवान् वेत्ति
३२ तेन त्वमस्माकं नेत्ररूपोऽसि। यदि त्वमस्माभिः समं यायास्तर्हि परमे-
श्वरोऽस्मान् यन्मङ्गलं भोजयिष्यति, वयं त्वामपि तन्मङ्गलं भोजयिष्यामः।

ततः परं तेषु परमेश्वरस्य पर्व्वताद् दिनत्रयवर्त्म गच्छत्सु परमेश्वरस्य ३३
साक्ष्यमञ्जूषा तद्दिनत्रयं तेषां विश्रामस्थानं मृगयितुं तेषाम् अग्रे ययौ।
शिबिरात् प्रतिष्ठमानानां तेषामुपरि दिवा परमेश्वरस्य मेघोऽवतस्थे। ३४
मञ्जूषाया अग्रगमनकाले मूसा जगाद हे परमेश्वर, उत्तिष्ठ तव शत्रवो ३५
विकीर्य्यन्तां त्वाम् ऋतीयितारस्त्वत्सम्मुखात् पलायन्तां। विश्रामकाले ३६
स उक्तवान् हे परमेश्वर त्वमिस्रायेल्वंशस्यायुतानि सहस्राणि च प्रति
प्रत्यायाहि।

---

११ एकादशोऽध्यायः।

१ तवियेरास्थाने मूससः प्रार्थनया वह्निनिर्व्वाणं ४ मान्नाम् ऋतीयमानानां मांसप्रार्थना १० मूससः स्वपदभारासह्यत्वं १६ सप्ततिप्राचीनेभ्यो भारांशं दातुमाज्ञा २१ मूससः प्रतीतिपरीक्षणं २४ सप्ततिप्राचीनेभ्यो मूसस आत्मांशदानं ३१ लोकेभ्यो वर्त्तकपक्षि-दानं ईश्वरस्य क्रोधप्रकाशश्च।

अनन्तरं लोकैः परमेश्वरस्य कर्णगोचरे कुवाग्भिः कलहे कृते परमे- १
श्वरस्तं श्रुत्वा चुक्रोध, तेन तेषां मध्ये परमेश्वरीयाग्निः प्रज्वलन् शिबिरस्य
शेषभागं ददाह। अतो लोका मूससः समीपे काकूक्तिं चक्रुस्तेन मूससा २
परमेश्वरस्य समीपे प्रार्थिते स वह्निं र्निर्व्वाणः। ततो मूसास्तस्य ३
स्थानस्य नाम तवियेरा (दहनं) चकार यस्मात् तेषां मध्ये परमे-
श्वरीयवह्निर्ददाह।

तेषां मध्यीयविदेशीयलोकाः क्रमशो लोभिनो बभूवुरिस्रायेल्वंशा ४
अपि पुनः क्रन्दन्त उक्तवन्तः कोऽस्मभ्यं पिशितं भोक्तुं दास्यति? मिसर्देशे ५
ऽस्माभि र्भुक्ता विनामूल्येन लब्धा मत्स्यास्त्रपुषाणि कुष्माण्डानि लतार्का
पलाण्डवो लशुनानि चैतान्यस्माभिः स्मर्य्यन्ते। इदानीम् अस्माकं प्राणाः ६
शुष्का अस्माकं समक्षम् इमां मान्नां विना किमपि नास्ति। सा मान्ना ७
आकृत्या धन्याकवद् वर्णेन च गुग्गुलुवद् आसीत्। लोका भ्रमित्वा तामा- ८
हृत्य पेषण्या पिष्टां कण्डन्या चूर्णीकृतां वा कटाहे पक्ता पूपान् अकुर्व्वन्
तैलपक्वपिष्टकवत् तदास्वाद आसीत्। रजन्यां शिबिरोपरि तुषारे ९
पतिते सा मान्ना तदुपरि पतितवती।

मूसा लोकानां रोदनम् अर्थात् वंशानुसारात् स्वस्वदूष्यद्वारस्य समीपे १०
प्रतिजनरोदनं शुश्राव, तस्मात् परमेश्वरस्य क्रोधोऽतिशयेन प्रज्वलितो
मूससोऽप्यसन्तुष्टि र्जाता। ततो मूसाः परमेश्वरं जगाद त्वं किमर्थम् ११

निजदासं क्लिश्नासि? किमर्थं वाहं तव दृष्टावनुग्रहाप्राप्तोऽस्मि, यत्
१२ त्वमेतस्य लोकसमूहस्य भारं मय्यर्पयसि? किमहमेतल्लोकनिवहस्य
गर्भधारिणी जन्मदाता वा, ततो हेतोस्त्वं दुग्धपोष्यशिशुवोढृपालक-
वत् माम् एतान् सर्व्वान् तेषां पूर्व्वपुरुषेभ्यस्त्वया प्रतिश्रुतं देशं यावद्
१३ वक्षस्थलेन वोढुं किमाज्ञापयसि? एतेभ्यो लोकेभ्यो दातुं कुत्र मया मांसं
लप्स्यते? यत एते सर्व्वे ममान्तिके क्रन्दन्तः कथामिमां कथयन्ति भोक्तु-
१४ मस्मभ्यं पललं देहि। एतावतां लोकानां भारं सोढुमेकेन मया न शक्यते
१५ स मम शक्तितोऽधिकः। यदि त्वं मां प्रतीदृशं व्यवहरेस्तर्हि त्वयानुग्रहं
कृत्वा मम प्राणा विनश्यन्तां मम दुर्गति मया न दृश्यतां।
१६ परमेश्वरो मूससमूचे त्वं लोकमुख्याध्यक्षरूपेण तव परिचितान्
इस्रायेल्वंशस्य सप्ततिप्राचीनलोकान् संगृह्य समाजावासद्वारान्तिकं
१७ समानय ते त्वया सार्कं तत्र तिष्ठन्तु। अहं तत्रोत्तीर्य्य त्वया साक-
मालपिष्यामि य आत्मा त्वामधितिष्ठति तस्य किञ्चिदादाय तेष्ववस्था-
पयिष्येऽहं यथैकाकिना त्वया लोकानां भारो नोह्यते तदर्थं त्वया
१८ सहितैस्तैरपि लोकानां भारो वक्ष्यते। त्वं लोकान् वद यूयं श्वोऽर्थं
स्वान् पावयत तेन भोक्तुं पललं लप्स्यध्वे यस्मात् कोऽस्मान् मांसं भोज-
यिष्यति? मिसर्द्देशेऽस्माकं क्षेममासीद् इत्युक्ता यूयं यद् रोदनम्
अकुरुत तत् परमेश्वरस्य कर्णगोचरीभूतं तस्मात् परमेश्वरो युष्मभ्यं पललं
१९ दास्यति तद् यूयं भक्षिष्यथ। तद् एकदिनं द्वे दिने पञ्च दिनानि दश
२० दिनानि विंशतिदिनानि वा खादिष्यथ तन्न किन्तु युष्माकं वदनेभ्यस्तस्य
निर्गमनं युष्माकं तस्मिन् घृणाकरणञ्च यावद् अर्थात् पूर्णैकमासं यावत्
तत् खादिष्यथ यस्माद् यूयं स्वमध्यवर्त्तिपरमेश्वरं तुच्छीकृत्य तत्सम्मुखे
रुदन्तः कथामिमां कथितवन्तः कुतो वयं मिसर्द्देशाद् बहिरागताः?
२१ ततो मूसा अवदत्, येषां मध्येऽहमासे ते षट्लक्षपदातिलोकास्तथापि
२२ त्वमवोचः संपूर्णैकमासभोजनायाहं तेभ्यः पललं दास्यामि। तेषां कृते
सर्व्वेषु गोमेषव्रजेषु हतेषु किं तेषां प्रचुरो भविष्यति? सागरस्य
२३ सर्व्वेषु मीनेषु वा संगृहीतेषु किं तेषां कृते प्रचुरो भविष्यति? तदा
परमेश्वरो मूसं बभाषे परमेश्वरस्य करः सङ्कुचितः किं? त्वदन्तिके
मद्वचनं सत्यं भवति न वेति त्वम् इदानीं द्रक्ष्यसि।
२४ तदा मूसा बहिर्गत्वा परमेश्वरीया वाणी लोकेभ्यः कथयामास
लोकानां तान् सप्ततिजनान् संगृह्यावासस्य चतुष्पार्श्वे उपस्थाप-

यामास च। परमेश्वरो मेघेनावरुह्य तेन साकमालप्य तदीया- २५
न्तरस्थात्मनः किञ्चिद् आदाय तेभ्यः सप्ततिप्राचीनेभ्यो ददौ तेन
तेषामन्तर आत्मन्यवस्थिते त ईश्वरीयकथां प्रचारयितुम् आरेभिरे न
निववृतिरे। इल्दद मेददनाम्नोः शिविरमध्येऽवशिष्टयो र्द्वयो र्जनयो- २६
रप्यात्मावस्थितवान्, तौ लिखितलोकश्रेण्यन्तर्गतौ, किन्त्वावासान्तिकं वहि
र्न गतौ, तौ शिविर ईश्वरीयकथां प्रचारयितुम् आरेभाते। ततः कश्चिद् २७
युवा धावन् मूससं जगाद, इल्ददमेददौ शिविरमध्ये कथां प्रचारयतः।
तेन नूनसुतो यिहोशूयनामा आ यौवनात् मूससः सेवको मूसस- २८
मुक्तवान् हे मत्प्रभो तौ प्रतिषेध। मूसा उक्तवान् मदनुरोधात् त्वं २९
किं तावीर्ष्यसि? परमेश्वरस्य सर्व्वे लोकास्तस्यादेशप्रचारका भवन्तु,
परमेश्वरस्तेषामन्तरे स्वात्मानं ददातु। मूसा इस्रायेलः प्राचीनाश्च ३०
शिविरं प्रविविशुः।

ततः परं परमेश्वरेण चालितः पवनः सागराद् एतावतो वर्त्तकपक्षिण ३१
आनीय शिविरस्य समीपे विचकार येन ते चतुर्दिक्षु शिविरस्यैकैकपार्श्वे
दिनैकमार्गं यावद् भूमे र्हस्तद्वयमूर्द्धीभूय स्थिताः। ततो लोका उत्तिष्ठ- ३२
न्तस्तदहोरात्रं कृत्स्नं परदिनञ्च तान् पक्षिणः संजगृहुस्तेषां मध्ये
कोपि दशहोमरात् न्यूनं नहि संजग्राह ततः स्वार्थं शिविरस्य चतुर्दिक्षु
व्यकिरन्। किन्तु तेषां दन्तेषु मांसस्य धारणकाले चर्व्वणात् प्रागेव ३३
लोकान् प्रति परमेश्वरस्य क्रोधः प्रजज्वाल तेन परमेश्वरो लोकान्
अतिमहामार्य्या जघान। मूसास्तस्य स्थानस्य नाम किब्रोद्धत्तावा (लोभि- ३४
श्मशानमिति) कृतवान् यस्मात् ते लोभिनस्तत्र श्मशाने ऽवतस्थिरे।
ततो लोका किब्रोद्धत्तावातो हत्सेरोतं प्रति यात्रां कृत्वा तत्रावतस्थिरे। ३५

१२ द्वादशोऽध्यायः।

१ मूसोविरुद्धं हारोणमरियमो विपरीतकथनं १० मरियमः कुष्ठित्वं तत्कृते मूससः प्रार्थनं १४ मरियमः शिविराद् वहिष्करणं सप्तदिनात् परं पुनर्ग्रहणञ्च।

मूससा या कूशदेशीया योषित् पाणौ गृहीता, तस्याः कूशदेशीयाया १
भार्य्याया हेतो र्मरियमहारोणौ मूससो विपरीतं वचनम् उदितवन्तौ।
तावुक्तवन्तौ परमेश्वरः किं केवलमूससा कथां कथयति? किमावाभ्या- २
मपि न कथयति? किन्तु परमेश्वरेण तत् श्रुतं। मूसाः क्षितिस्थसर्व्व- ३
लोकेभ्यो नम्रतम आसीत्।

४ अनन्तरं परमेश्वरोऽकस्मान् मूसोहारोणमरियमम् उक्तवान् यूयं त्रयः
५ समाजावासद्वारान्तिकं वहिरागच्छत तेन ते त्रयो वहिर्गताः। ततः
परमेश्वरो मेघस्तम्भ उत्तीर्य्यावासद्वारे तिष्ठन् हारोणमरियमावाहूत-
६ वान् तेन तयो र्वहिर्भूतयोः स उक्तवान् युवां मद्वाचं निशामयतं,
युष्मन्मध्ये यदि कश्चिद् भविष्यद्वक्तास्ति तर्हि परमेश्वरोऽहं तत्समक्षं
७ दर्शनेन स्वं प्रकाशयिष्ये वा स्वप्ने तेन सह कथां कथयिष्यामि। मम
सेवको मूसास्तादृङ् नहि, स मम सर्व्वपरिवारमध्ये विश्वासभाजनं।
८ अहं तेन साकं गुप्तं नहि किन्तु व्यक्तं सम्मुखामुखी कथां कथयामि स
परमेश्वरस्य मूर्त्तिं पश्यति च, मद्दासमूससः प्रतिकूलं युवां कथां कथयितुं
९ कुतो नाविभीतं? तौ प्रति परमेशस्य कोपो जज्वाल ततः स प्रतस्थे।
१० अनन्तरं आवासोपरितो मेघे प्रस्थिते मरियमो हिमवत् कुष्ठं बभूव
११ ततो हारोणो मरियमं प्रति निरीक्ष्य तां कुष्ठिनीं ददर्श। हारोणो मूससं
बभाषे हा हा हे मत्प्रभो विनयेऽहम् आवाभ्याम् उन्मादाद् यत् कृतम्
१२ अपराद्धञ्च तत्पापस्य फलम् आवाभ्यां मा देहि। मातृगर्भात् निर्गमन-
काले यस्य मांसस्यार्द्धं नष्टं तादृशं कञ्चन कुणपमिव तां मा कार्षीः।
१३ तदा मूसाः परमेश्वरं प्रार्थ्य जगाद हे ईश्वर तां स्वस्थां कुर्व्विति
विनयेऽहम्।
१४ परमेश्वरो मूससम् उक्तवान् यदि तस्याः पिता तस्या मुखे निष्ठीवम्
अदास्यत् तर्हि सा किं सप्त दिनानि नालज्जिष्यत? तद्वत् सा सप्त दिनानि
१५ शिविरस्य वहिः संरुध्यतां पश्चात् पुनर्ग्राहिष्यते। तेन मरियम् सप्त
दिनानि शिविरस्य वहिः समरुध्यत यावन् मरियम् अभ्यन्तरं नानीयत
१६ तावल् लोका यात्रां न चक्रुः। ततो लोका हत्सेरोतः प्रस्थाय पारण-
प्रान्तरे शिविरं स्थापयामासुः।

---

१३ त्रयोदशोऽध्यायः।

१ देशं निरीक्षितुं प्रेषितलोकानां नामानि १७ तान् प्रति मूससाज्ञा २१ तेषां यात्रायाः कथनं २६ तेषां पुनरागमनं वार्त्ताकथनञ्च।

१ परमेश्वरो मूससम् उक्तवान् अहम् इस्रायेल्वंशाय यं किनान्देशं
२ दास्यामि तं निरीक्षितुं त्वं लोकान् प्रेषय तेषां पितृवंशानां मध्ये ये ये
३ लोका मुख्यास्तान् प्रहिणु। ततो मूसाः परेशाज्ञया यान् इस्रायेल्-
४ वंशाध्यक्षान् पारणप्रान्तरात् प्राहिणोत् तेषां नामानि, रूबेणवंशजः

सक्कूरसुतः शम्मूयः। शिमियोनवंशजो होरेः सुतः शाफटः। यिहूदा- ६
वंशजो यिफुन्निसुतः कालेवः। इषाखरवंशजो यूषफसुतो यिगालः। ७
इफ्रयिमवंशजो नूनसुतो होशेयः। विन्यामीनवंशजो राफूसुतः पल्टिः। ८
सिवूलूनवंशजः सोदेः सुतो गद्दीयेलः। यूषफवंशजो ऽर्थात् मिनशि १०
वंशजः सूषेः सुतो गद्दिः। दानवंशजो गिमल्लेः सुतोऽम्मीयेलः। आशेर- १२
वंशजो मीखायेलसुतो सियूरः। नप्तालिवंशजो वप्सेः सुतो नह्बिः। १४
गादवंशजो माखेः सुतो गूयेलः। एतन्नामका लोका देशं निरीक्षितुं १६
मूससा प्रेरिताः, नूनसुतस्य होशेयस्य नाम मूससा यिहोशूय इति कृतं।

मूसाः किनानदेशं निरीक्षितुं तेषां प्रेषणकाले जगाद यूयमेतं दक्षि- १७
णप्रदेशं गत्वा गिरिमारोहयत। स देशः कीदृक् तत्र वसल्लोका बलवन्तो १८
दुर्ब्बला वा, अल्पे बहवो वा, ते यत्र देशे वसन्ति स कीदृक् भद्रोऽभद्रो १९
वा ते यस्मिन् यस्मिन् नगरे न्युष्यते तानि किम्भूतानि शिविररूपाणि
दुर्गरूपाणि वा, तेषां वसतिभूमिः कीदृशी उर्व्वरा नीरसा वा तन्मध्ये २०
पादपाः सन्ति न वा तत् पश्यत। यूयं साहसिनो भूत्वा तद्देशीयानि
कतिपयफलान्यानयत, स कालो द्राक्षाफलारम्भसमय आसीत्।

अनन्तरं ते प्रस्थाय आ सीन्प्रान्तरात् हमातप्रवेशस्थाने स्थितं रिहोवं २१
यावद् देशं निरीक्षिरे। अतो दक्षिणप्रदेशेन गत्वा हिब्रोणम् उपतस्थुः २२
तत्र अनाकवंशीया अहीमानः शेशयस्तल्मयश्चासन् मिसरस्य सोयन-
नगरस्य स्थापनस्य सप्तवत्सरात् पूर्व्वं हिब्रोणनगरं स्थापितं। इष्को- २३
लोपत्यकाम् उपस्थितैस्तै द्राक्षालतायाः फलगुच्छयुक्तैका शाखा छिन्ना
सती वहनदण्डेन जनाभ्याम् ऊढा च कतिपयानि दाडिमोडुम्बरफ-
लान्यपि समानीतानि। इस्रायेल्वंशीयास्तत्र यद् द्राक्षागुच्छम् अकृन्तन् २४
तस्मात् सोपत्यका इष्कोल् (गुच्छेति) नाम्ना प्रसिद्धाभूत्। इत्थं ते देशे २५
निरीक्षिते चत्वारिंशद्दिनेभ्यः परं प्रत्यागतं।

ते प्रत्यागत्य पारणप्रान्तरस्थकादेशस्थाने मूसोहारोणाविस्रायेलः २६
सर्व्वसमाजीयञ्चाभिगत्य तौ सर्व्वसमाजीयांश्च वार्त्तां जगदुस्तद्देशीय-
फलानि दर्शयामासुश्च। ते स्वयात्रां वर्णयित्वा गदितवन्तः, त्वमस्मान् २७
यं देशं प्रेषितवान् तं देशं वयं गतवन्तः स दुग्धमधुप्रवाहीति सत्यम्
एतानि च तदीयफलानि। किन्तु तद्देशवासिनो बलवन्तस्तत्रस्थनगरा- २८
णि प्राचीरवेष्टितान्यतिवृहन्ति च तत्रास्माभिरनाकवंशीया अपि दृष्टाः।
अमालेकीयलोका दक्षिणप्रदेशे वसन्ति हित्तीया यिवूषीया इमोरीयाश्च २९

गिरिषु वसन्ति किनानीयाः सागरसमीपे यर्द्दननद्यास्तटे च वसन्ति।
१० ततः कालेवो मूससे लोकान् क्षमयितुं बभाषे वयम् युगपद् उत्थाय
११ तमधिकरवाम, तस्य पराजयो ऽस्माकं सुसाध्यः। किन्तु ये लोकास्तेन
साकम् अगमन् तेऽकथयन् तेषां लोकानां विरुद्धं गन्तुं वयं न शक्ष्यामः
१२ तेऽस्मत्तो बलवन्तः। इत्थं ते यं देशं निरीक्षितस्तस्यापयशसे तैरि-
स्रायेल्वंशस्य साक्षाद् जगदे, वयं यं देशं निरीक्षितुं भ्रमणं कृतवन्तः स
देशः स्वनिवासिनो ग्रसति तन्मध्येऽस्माभि र्ये जना दृष्टास्ते सर्व्वेऽतीव-
१३ बृहत्कायाः। तत्रस्थान् वीरजान् अनाकवंशीयवीरान् पश्यन्तो वयं
स्वदृष्टौ शलभाइवाभवाम तेषां दृष्टावपि तादृशा आस्म।

---

१४ चतुर्द्दशोऽध्यायः।

१ लोकानां कलहः ६ तान् शान्तयितुं यिहोशूयकालवयो र्यत्नः ११ ईश्वरस्य भर्त्सनं
१३ क्षन्तुम् ईश्वरं प्रति मूससो निवेदनं २६ कलहकारिणां देशानधिकारित्वं ३६
कुवार्त्तादायिनां महामार्य्या मारणं ४० इस्रायेल्लोकानां शत्रुभिर्हतत्वञ्च।

१ ततः समाजीयाः सर्व्वे उच्चैःस्वरं कृत्वा कोलाहलं चक्रुः, लोकास्तस्यां
२ रजन्यां रुरुदुः। इस्रायेलः सर्व्वे वंशा मूसोहारोणयो र्विपरीतं कलहं
चक्रुः सर्व्वसमाजीयास्तयोः साक्षाद् गदितवन्तः, हा हा यदि वयं मिस-
३ र्द्देशेऽमरिष्याम वात्र प्रान्तरेऽस्माकं मृत्युरभविष्यत्। परमेश्वरः खड्ग-
धारेणास्मान् निपातयितुम् अस्माकं स्त्रियः सन्तानांश्च लोठयितुञ्चैतद्दे-
४ शान्तिकम् अस्मान् कुत आनीतवान्? मिसरदेशं प्रत्यागमनमस्माकं किं
नाधिकं क्षेमं? ततस्ते परस्परं मन्त्रयाञ्चक्रुरागच्छत वयं एकं सेनापतिं
५ कृत्वा मिसर्द्देशं परावृत्य यामः। ततो मूसोहारोणाविस्रायेल्वंशस्य
सर्व्वसमाजीयानां सम्मुखे न्यूब्जीभूय पतितौ।
६ देशनिरीक्षकानां मध्ये नूनसुतो यिहोशूयो यिफुन्निसुतः कालेबश्च
७ स्वं स्वं वसनं छित्त्वा इस्रायेल्वंशस्य सर्व्वसमाजीयान् अवदतां वयं
८ यं देशं निरीक्षितुं गताः स देशोऽतीवोत्तमः। यदि परमेश्वरोऽस्मान्
प्रति सन्तुष्टस्तिष्ठति तर्ह्यस्मान् तत्र नीत्वा तं देशमस्मभ्यं दास्यति स
९ दुग्धमधुप्रवाहीति सत्यं। यूयं केवलं परमेश्वरस्य विरुद्धं नाचरत
तद्देशीयलोकेभ्यो न बिभीत यस्मात् ते ऽस्माकम् आहारस्वरूपास्तेषामा-
१० श्रयो व्यपगतः परमेश्वरो ऽस्माकं सहाय आस्ते तेभ्यो मा बिभीत। किन्तु

सर्व्वे समाजीयास्तौ पाषाणै र्मारयितुं कथितवन्तः, तदा समाजावास
इस्रायेल् वंशस्य सम्मुखे परमेश्वरस्य महिमा प्राकाशत।
परमेश्वरो मूससमवादीद् एते लोकाः कतिकालान् माम् अवज्ञा- ११
स्यन्ति? तेषां मध्य एतावदाश्चर्य्यक्रियासु मया दर्शितास्वपि ते कतिकालान्
मय्यप्रत्ययिनो भविष्यन्ति? महामार्य्याहं तान् हनिष्यामि तान् अनधि- १२
कारिणः कृत्वा त्वां तेभ्योपि वृहज्जातिं बलवज्जातिञ्च करिष्यामि।
ततो मूसाः परमेश्वराय कथयामास तस्मिन् कृते त्वं स्वशक्तिं प्रकाश्य १३
येषां मिस्रीयलोकानां मध्याल् लोकानेतान् आनयस्ते कथामिमां
श्रोष्यन्ति, तथा लोका एतद्देशनिवासिनोऽपि तां ज्ञापयिष्यन्ति, यतस्त्वं १४
परमेश्वर एतेषां लोकानां मध्यवर्त्ती तेभ्यः प्रत्यक्षदर्शनं ददासि तव
मेघ स्तेषाम् उपरि तिष्ठति त्वं दिवा मेघस्तम्भे रजन्यां वह्निस्तम्भे तिष्ठन्
तेषामग्रेग्रे गच्छसीति तैः श्रुतमस्ति। इदानीं यदि त्वमेकजनवद् एतं १५
लोकसमूहं नाशयसि तर्हि तव कीर्त्तिं यैरन्यजातीयैः श्रुता त इमां
कथां कथयिष्यन्ति, परमेश्वर एतल्लोकेभ्यो यं देशं दातुं प्रतिज्ञातवान् १६
तं देशं तान् नेतुं न शक्तस्तस्मात् प्रान्तरे तान् व्यनाशयत्। इदानीम् १७
अहमिति विनये परमेश्वरश्चिरसहिष्णुः कृपया पूर्णो ऽधर्म्माज्ञालङ्घ-
नयोः क्षमाकृत्, किन्तु तद्दण्डकृत् तृतीयचतुर्थपुरुषान् यावत् सन्ता-
नान् प्रति पितृपुरुषाणां पापफलदाता चेति त्वया यत् कथितं, तदनुसा- १८
रान् मत्प्रभो र्महिमा महान् भवतु। आ मिसर्देशाद् एतत्पर्य्यन्तमेतान् १९
जनान् प्रति त्वया यथा निजप्राज्यकृपानुसारात् क्षमा कृता तथै-
षामिदं पापमपि क्षम्यताम् इत्यहं विनये। ततः परमेश्वरो जगाद २०
तव वाक्यात् तदहं क्षान्तवान्। किन्त्वहं यदि नित्यो भवामि तर्हि २१
सर्व्वा पृथ्वी परमेश्वरमहिम्ना पूर्णा भविष्यति। एते लोका मे महिमानं २२
मिसरि प्रान्तरे च मम कृतान्याश्चर्य्यकर्म्माणि च दृष्ट्वापि दशकृत्वो मां
परीक्षितवन्तो मद्वाक्यमवज्ञातवन्तश्च। तस्माद् अहं तेषां पूर्व्वपुरुषान् २३
प्रति यं देशमधि शपथं कृतवान् स देश एतैः कदापि न द्रक्ष्यते, ये माम-
वजानन् तेषां मध्ये केनापि स न द्रक्ष्यते। किन्तु मम दासः कालेबो २४
ऽन्यात्मविशिष्टः सम्पूर्णं ममानुगतश्च ततो हेतोः स यं देशं गतस्तं
देशमहं तं प्रवेशयिष्यामि तस्य वंशस्तमधिकरिष्यति। अमालेकीयाः २५
किनानीयाश्च लोका उपत्यकायां वसन्ति स्म यूयं परावृत्य सुफार्णवगामि
प्रान्तरं गच्छत।

२६ परमेश्वरो मूससं हारोणञ्च बभाषे, अहं स्वप्रतिकूलत एतस्य कल-
२७ हकृतो दुष्टसमाजस्य भारं कतिकालान् सहिष्ये? इस्रायेल्वंशा मत्-
२८ प्रतिकूलतो यद्यद् वाग्युद्धं कृतवन्तस्तदहं श्रुतवान्। त्वं तेभ्यः कथय
परमेश्वर इति वाचं वदति, यद्यहं नित्यो भवेयं तर्हि मत्कर्ण-
२९ गोचरे युष्माभि र्यत् कथितं, युष्मान् प्रति तदेव मया करिष्यते। हे
मया सह वाग्युद्धकारिणः सर्व्वे, युष्माकं गणितलोकानां सम्पूर्णसंख्या-
नुसाराद् विंशतिवर्षाधिकवयस्कानां युष्माकं सर्व्वेषां शवा एतत्प्रान्तरे
३० पतिष्यन्ति। युष्मान् यस्मिन् देशे वासयितुम् अहं शपथं कृतवान् तं
देशं यिफुन्निसुतं कालेवं नूनसुतं यिहोशूयञ्च विना युष्माकं कोपि न
३१ प्रवेक्ष्यति। किन्त्वेते लोठिष्यन्त इति वाचं यूयं यान् स्वबालकानधि
कथितवन्तस्तानहं तत्स्थानं प्रवेशयिष्यामि, यूयं यं देशं तुच्छं कृतवन्तः
स तैः परिचेष्यते। किन्तु युष्माकमेव शवा एतस्मिन् प्रान्तरे पतिष्यन्ति।
३२ युष्माकं वंशाश्चत्वारिंशद्वर्षाणि प्रान्तरेऽस्मिन् भ्रमन्तोऽत्रैव यावद् युष्माकं
३३ शवानां संख्या पूर्णा न भवेत्, तावद् युष्मद्व्यभिचारस्य फलं भोक्ष्यन्ते।
३४ युष्माभि र्यानि चत्वारिंशद्दिनानि देशो निरीक्षितस्तद्दिनसंख्यानुसाराद्
एकैकदिनार्थं एकैकं वर्षमित्थं चत्वारिंशद्वर्षाणि यावद् युष्माभि र्निज-
३५ पापं भोक्ष्यते, तेन यूयं मम विपक्षत्वं ज्ञास्यथ। अहं परमेश्वरः कथ-
यामि मद्विपरीतं मिलितम् एतं दुष्टसमाजं प्रति तदहमवश्यं करि-
ष्यामि, तेऽस्मिन्नेव प्रान्तरे विनाशिष्यन्ते तत्र मरिष्यन्ति च।

३६ देशं निरीक्षितुं मूससा प्रेषिता ये लोकाः परावृत्यागत्य तस्य देश-
स्यायशः आनीय तस्य प्रातिकूल्यात् सर्व्वसमाजीयान् वाग्युद्धं कारित-
३७ वन्तो देशस्यायशोवादिनस्ते लोकाः परमेश्वरस्य सम्मुखे महामारीतो
३८ मृताः। देशनिरीक्षणाय गतानां लोकानां मध्ये केवलो नूनसुतो यिहो-
३९ शूयो यिफून्नेः सुतः कालेबश्च जीवन्तौ तस्थतुः। तदा मूसा इस्रायेल्वंशाय
एता वाणीः कथितवान् लोकास्तातीव विललपुः।

४० प्रातस्त उत्थाय गिरेरुपरि जिगमिषन्तोऽकथयन् पश्य परमेश्वरो
यत्र गन्तुम् आदिष्टवान् वयं तत्र गच्छाम, वयं पापं कृतवन्तः।
४१ ततो मूसाः कथितवान् अधुना यूयं कुतः परमेश्वरीयाज्ञां लङ्घध्वे?
४२ एतेन युष्माकं मङ्गलं न भविष्यति। इदानीं परमेश्वरो युष्मन्मध्ये
४३ नास्ति तदर्थम् उत्थाय मा यात। गमने कृते यूयं रिपूणां समक्षम्
हनिष्यध्वे यस्माद् अमालेकीयाः किनानीयाश्च जनास्तत्र युष्माकं सम्मुखे

सन्ति यूयम् असिना पतिष्यथ यतः परमेश्वरात् पराङ्मुखानां युष्माकं
परमेश्वरः सहायो न भविष्यति। तथापि ते दुःसाहसेन पर्व्वतशृङ्गम् ४४
आरुरुहुः किन्तु परमेश्वरस्य साक्ष्यमञ्जूषा मूसाश्च शिबिरान्न निर्जग्मतुः।
तदा तद्गिरिवासिनोऽमालेकीयाः किनानीयाश्च लोका अवरुह्य तान् ४५
समाजघ्नु र्हर्म्मां यावद् विचक्रुश्च।

---

१५ पञ्चदशोऽध्यायः।

१ भक्ष्यपानीयनैवेद्ययोरुत्सर्गव्यवस्था १४ विदेशिनमधि कथनं १७ उत्तोलनीयप्रथमजशस्यस्य शक्तौ व्यवस्था २२ अज्ञानकृतपापस्य कथनं ३० अवज्ञाकृतां दण्डः ३२ विश्रामवाराकृतां पाषाणाघातदण्डः ३७ वस्त्रस्य ग्रन्थिकथनं।

परमेश्वरो मूससं बभाषे, त्वमिस्रायेल्वंशेभ्यः कथय तान् इदं वचनं १
वद यूयं यदा मद्दत्ताधिकारदेशं प्रविश्य मानसपालनार्थं वा स्वेच्छा- २
दत्तनैवेद्यार्थं वा युष्माकं मह्े गोमेषव्रजात् परमेश्वरम् उद्दिश्य सौगन्ध्यं ३
कर्त्तुं वह्निकृतोपहाररूपेण होमार्थकादिबलिं परमेश्वरम् उद्दिश्योत्स्र-
क्ष्यथ, तदानीम् उपहारोत्स्रष्टा होमार्थकादिबलिनैकेन मेषशावकेन ४
समम् एकहिनस्य चतुर्थांशेन तैलेन पक्वं दशमांशं गोधूमचूर्णं भक्ष्य-
नैवेद्यम् एकहिनस्य चतुर्थांशं द्राक्षारसं पानीयनैवेद्यञ्च परमेश्वरम् ५
उद्दिश्य दास्यति। यद्वा मेषेण सह हिनैकतृतीयांशेन तैलेन पक्वगोधूम- ६
चूर्णस्य द्वौ दशमांशौ भक्ष्यनैवेद्यं हिनैकतृतीयांशं द्राक्षारसम् पेयनैवे- ७
द्यञ्च दत्त्वा परमेश्वरम् उद्दिश्य सुगन्ध्युपहारार्थम् उत्स्रक्ष्यति। परमे- ८
श्वरम् उद्दिश्य व्रतपूरणाय मङ्गलार्थकबलिदानाय वा येन होमादि-
बलिरूपो गोवत्स उत्सृज्यते स तद्गोवत्सेन सममर्द्धहिनतैलेन ९
पक्वं दशमांशत्रयगोधूमचूर्णं भक्ष्यनैवेद्यमर्द्धहिनं द्राक्षारसं पेयनैवेद्यञ्च १०
परमेश्वरम् उद्दिश्य वह्निकृतसुगन्ध्युपहारार्थम् आनेष्यति। यूयं ११
गवैकेन मेषेणैकेन मेषवत्सेन छागवत्सेन च समम् इत्थं नैवेद्यं
करिष्यथ। यूयं यति पशून् आसादयिष्यथ तेषां संख्यानुसाराद् एकैकं १२
प्रतीत्थं करिष्यथ। देशीयाः सर्व्वे लोकाः परमेश्वरम् उद्दिश्य वह्नि- १३
कृतसुगन्ध्युपहारं निवेदयितुम् अनया व्यवस्थयैतानि करिष्यन्ति।

युष्माकं मध्ये प्रवासी वा युष्माकं मध्ये पुरुषपरम्परयावासी कश्चित् १४
यदि परमेश्वरम् उद्दिश्य वह्निकृतं सुगन्ध्युपहारं निवेदयितुम् इच्छेत्

१५ तर्हि युष्माभि र्यथा कर्त्तव्यं तेनापि तथा कर्त्तव्यं। समाजीयानां
युष्माकं युष्मन्मध्यप्रवासिनाञ्च व्यवस्थैकैव भविष्यति, युष्माकं पुरुषपर-
म्परायां विधिरेष नित्यो भविष्यति, परमेश्वरस्य सम्मुखे यूयं यादृशा
१६ विदेशिनोऽपि तादृशा भविष्यन्ति। युष्माकं युष्मन्मध्ये प्रवासिविदेशी-
यानाञ्च विधिरेक एव व्यवस्था चैकैव भविष्यति।

१७ परमेश्वरो मूससम् उक्तवान् त्वम् इस्रायेल्वंशाय कथय तान् इमां
१८ वाचं वद, युष्मानहं यं देशं नेष्यामि तं देशम् उपस्थाय इत्थं करिष्यथ।
१९ यूयं तद्देशीयान्नभोजनकाले परमेश्वरम् उद्दिश्योत्तोलनीयमुपहारं
२० निवेदयिष्यथ। उत्तोलनीयनैवेद्यार्थं प्रथमशक्तूनां पिष्टकमेकं निवेदयिष्यथ,
२१ यथा शस्यमर्द्दनस्थानस्योत्तोलनीयनैवेद्यं तदपि तथैव करिष्यथ। यूयं
पुरुषपरम्परायां स्वप्रथमशक्तुभ्यः परमेश्वरम् उद्दिश्योत्तोलनीयम्
उपहारं निवेदयिष्यथ।

२२ परमेश्वरेण मूससे कथिता विधयो युष्माभि र्भ्रान्तै र्यदि लङ्घ्येरन्, फलत
२३ इति पूर्व्वे परे वा प्रकाश्यमाना युष्मत्पालनीया ये विधयो मूसोद्वारा
परमेश्वरेण युष्मान् प्रत्यादिश्यन्ते, तेषां कश्चन विधि र्यदि युष्माभि
२४ र्लङ्घ्येत, तत् कर्म्म यदि समाजागोचरतोऽज्ञानतः क्रियेत, तर्हि कृत्स्न-
समाजः परमेश्वरम् उद्दिश्य सुगन्ध्युपहाराय होमार्थं गोवत्सं व्यवस्था-
नुसारात् तेन समं भोज्यपेयनैवेद्ये पापप्रायश्चित्तार्थकच्छागञ्च निवेदयि-
२५ ष्यति। इत्थम् इस्रायेलवंशस्य सर्व्वसमाजार्थं याजकेन प्रायश्चित्ते कृते
तान् क्षमिष्यते यस्मात् तत् पापम् अज्ञानकृतं तैश्च तदज्ञानकृतपापार्थं
परमेश्वरम् उद्दिश्य वह्निकृतोपहारः प्रायश्चित्तबलिश्च परमेश्वरस्य
२६ समक्षम् आनीतौ। तत इस्रायेल्वंशस्य सर्व्वसमाजीयान् प्रति युष्मन्मध्ये
प्रवासिविदेशीयान् प्रति च तत् क्षमिष्यते यस्मात् सर्व्वे लोका अज्ञानात्
पापं कृतवन्तः।

२७ यदि कश्चिदेको जनोऽज्ञानतः पापं कुर्य्यात् तर्हि स प्रायश्चित्तार्थं
२८ एकहायनीं छागवत्साम् आनेष्यति। याजकः परमेश्वरस्य साक्षात्
तस्याज्ञानपापकारिणो हेतोरज्ञानकृतपापस्य प्रायश्चित्तं करिष्यति,
२९ प्रायश्चित्ते कृते तस्य पापं क्षमिष्यते। इस्रायेल्वंशजलोकानां तन्मध्ये
प्रवासिनाञ्चाज्ञानकृतपापस्येयमेका व्यवस्था भविष्यति।

३० स्वदेशीयो विदेशीयो वा यः कश्चिद् दुःसाहसेन पापं करोति स
३१ परमेश्वरं निन्दति तस्मात् स निजलोकेभ्य उच्छेत्स्यते। यतः स परमे-

श्वरस्य वाक्यमवज्ञातवान् तस्याज्ञाञ्च लङ्घितवान् तस्मात् स नितान्तम्
उच्छेत्स्यते तस्य दोषस्तदुपरि भविष्यति।

प्रान्तरे तिष्ठद्भिरिस्रायेल्वंशै र्विश्रामदिन इन्धनानि संगृह्णन् एको ३२
जनो विविदे। तमिन्धनसंग्राहिणं ये विविदुस्ते मूसोहारोणयोः सर्व्व- ३३
समाजीयानाञ्च समक्षं तमानिन्युः। तं प्रति किं कर्त्तव्यम् इत्यस्याप्रकाश- ३४
त्वात् ते तमवरुध्य रक्षितवन्तः। परमेश्वर उक्तवान् स मानुषो हन्तव्य ३५
एव सर्व्वसमाजीयाः शिविरस्य वहिस्तं पाषाणाघातै र्हनिष्यन्ति। ततः ३६
समाजस्य लोका मूससं प्रति परमेश्वराज्ञानुसारात् तं शिविराद् वहि-
रानीय पाषाणैराघ्नन् तेन स प्राणान् तत्याज।

परमेश्वरो मूससं जगाद, त्वमिस्रायेल्वंशेभ्यः कथय तान् इति वाक्यं ३७
वद ते पुरुषपरम्परासु स्ववसनकोणेषु ग्रन्थीन् कुर्व्वन्तु तत्र नीलसूत्राणि ३८
बध्नन्तु च। यूयं यथा तान् ग्रन्थीन् विलोक्य परमेश्वरस्याज्ञाः स्मृत्वा ३९
पालयथ युष्माकं यै र्मनोनेत्रै र्यूयं चञ्चूर्य्यध्वे तेषामिच्छातो यथा न भ्रमथ
मम सर्व्वाज्ञाः स्मृत्वा पालयित्वा ईश्वरमुद्दिश्य यथा पवित्रा भवथ तदर्थं ४०
ते ग्रन्थयो भविष्यन्ति। युष्माकं प्रभुः परमेश्वरोऽहं युष्माकम् ईश्वरो ४१
भवितुं मिसर्देशाद् युष्मान् वहिरानयं, अहमेव युष्माकं प्रभुः परमेश्वरः।

---

१६ षोडशोऽध्यायः।

१ मूससं प्रति कोरहदाथनावीरामप्रभृतीनां विपक्षत्वं ४ तान् प्रति मूससः कथा १२ तेषां प्रत्युत्तरं १६ तान् प्रति मूससः पुनः कथा २० मूसोहारोणौ प्रति परमेश्वरस्य कथा २३ विपक्षाणां दूष्याद् यातुं लोकानामाज्ञापनं ३१ विपक्षाणां पृथिव्या ग्रसनं ३६ धूपपात्राणां वेदिमाच्छादयितुं नियुक्तत्वं ४१ लोकानां कलहः ४४ मूससं प्रति परमेश्वरस्य कथनं ४६ तेषां दण्डः मूसोहारोणाभ्यां दण्डनिवारणञ्च।

लेवेः प्रपौत्रः किहातस्य पौत्रो यिष्हरस्य पुत्रः कोरहो रूवेनवंशीया १
इलीयावस्य पुत्रौ दाथनोऽवीरामश्च पेलतस्य पुत्र ओनश्चेस्रायेल्वंशस्य २
सभाध्यक्षाः समाजे विख्याता लब्धनामानः पञ्चाशदधिकशतद्वयलोका
मूससो विरुद्धम् उदतिष्ठन्। ते मूसोहारोणयो र्विरुद्धं मिलित्वा ३
ताभ्याम् अकथन् युवाम् आत्माभिमानिनौ, समाजीयाः सर्व्वे जनाः
पवित्राः परमेश्वरस्तन्मध्यवर्त्ती, युवां कुतः परमेश्वरस्य समाजोपर्य्यात्मा-
नावुन्नतौ कुरुथः?

मूसास्तत् श्रुत्वा न्युब्जः पपात कोरहं तस्य सर्व्वं गणञ्च जगाद ४

५ कस्तदीयः कश्च पवित्र इति परमेश्वरः श्वो ज्ञापयिष्यति तं स्वान्ति-
कम् आनेष्यति च, यं मनोनीतं करोति तमेव स्वसमीपम् आने-
६ ष्यति । हे कोरह तव गणाश्च कर्म्मेदं कुरुत श्वो धूपपात्राणि
७ गृहीत्वा परमेश्वरस्य सम्मुखे तन्मध्ये वह्निं दत्त तदुपरि सर्ज्जरसं दत्त
तेन परमेश्वरो यं मनोनीतं करिष्यति स एव पवित्रो भविष्यति, हे
८ लेविसन्ताना यूयम् आत्माभिमानिनः। पश्चात् मूसाः कोरहादीन् बभाषे
९ हे लेविसन्ताना विनये मद्वाक्यं शृणुत। इस्रायेल ईश्वर इस्रायेल्-
समाजाद् युष्मान् पृथक् कृत्वा परमेश्वरस्यावासं सेवितुं समाजसम्मुखे
तदीयामपि परिचर्य्यां कर्त्तुञ्च युष्मान् स्वसमीपम् आनीतवान् एतत् किं
१० युष्माभिः क्षुद्रं बुध्यते ? त्वं त्वया समं तव लेवीयभ्रातरश्च तेन स्वसमीपम्
११ आनीतास्तथापि यूयं किं याजकत्वपदमपि मृगयध्वे ? पश्य त्वं तव
सहायाश्च परमेश्वरस्यैव प्रतिकूलं सम्मिलिता यतो हारोणः को यद् यूयं
तत्प्रतिकूलं वाग्युद्धं कुरुथ ?

१२ इलीयावस्य पुत्रौ दाथनावीरामावाह्वातुं मूससा लोके प्रेषिते तावू-
१३ चतुरावां न यास्यावः। त्वमस्मान् प्रान्तरे मारयितुं दुग्धमधुप्रवाहिदे-
शाद् वहिरानीतवान् इदं किं क्षुद्रं कर्म्म? त्वं किम् अस्मदुपरि सर्व्वथा
१४ प्रभुत्वं चिकीर्षसि? त्वम् अस्मान् अदुग्धमधुप्रवाहिदेशम् आनीत-
वान् अस्मभ्यमशस्यद्राक्षाक्षेत्राणि दत्तवांश्च, किं त्वम् एतेषां लोकानां
१५ नेत्राण्युत्पाटयिष्यसि? न यास्याव आवां। ततो मूसाः प्रकुप्य परमेश्वरं
गदितवान् त्वया तेषां नैवेद्यं न गृह्यतां मया तेभ्य एको गर्द्दभोऽपि न
गृहीतस्तेषामेकोऽपि न हिंसितः।

१६ ततो मूसाः कोरहं जगाद त्वं तव गणाश्च यूयं श्वो हारोणेन सह
१७ परमेश्वरस्य समक्षम् उपतिष्ठध्वं, युष्माकम् एकैकजनेन धूपपात्रम्
आदाय तस्मिन् सर्ज्जरसं दत्त्वा परमेश्वरस्य सम्मुखे स्वं स्वं धूपपात्रं
साकल्येन सार्द्धशतद्वयधूपपात्राण्युपस्थाप्यन्तां, त्वया हारोणेन चापि
१८ धूपपात्रे उपस्थाप्येतां। ततस्तेषाम् एकैको जनो धूपपात्रं जग्राह तत्र
वह्निं दत्त्वा सर्ज्जरसं ददौ मूसोहारोणाभ्यां समं समाजावासद्वारे
१९ तस्थौ, कोरहश्च समाजावासद्वारान्तिके तयोः प्रतिकूलं सर्व्वसमाजीयान्
मेलयामास तदा सर्व्वसमाजस्य साक्षात् पारमेश्वरं तेजः प्रचकाशे।

२० अनन्तरं परमेश्वरो मूसोहारोणौ बभाषे युवाम् एतत्समाजमध्यात्
२१ पृथग् भवतं तेनाहं निमिषैकस्माद् एतान् विनाशयिष्यामि। तदा तौ

न्युब्जीभूय पतन्तौ कथितवन्तौ हे ईश्वर हे सर्व्वशरीरस्थात्मनाम् ईश्वर
एकेन पापे कृते त्वत्कोपः किं सर्व्वसमाजं प्रति प्रज्वलिष्यति ?

तदा परमेश्वरो मूससम् उक्तवान् त्वं समाजीयेभ्यः कथय यूयं कोर- २३
हदाथनावीरामाणां दूष्यसमीपाद् यात। तस्मान् मूससा तत्पश्चाद्गा- २४
मिभिरिस्रायेल्वंशस्य प्राचीनैश्चोत्थाय दाथनावीरामयोः समीपे गते २५
स समाजीयेभ्यः कथितवान् विनयेऽहं यूयम् एतेषां दुष्टानां पापनिवहै २६
र्यथा न विनाश्यध्वे तदर्थं तेषां दूष्यसमीपाद् यात तेषां किमपि न
स्पृशत च। तेन तैः कोरहदाथनावीरामाणां दूष्यचतुर्दिग्भ्यो गतं, किन्तु २७
दाथनो ऽवीरामस्तयोर्जायापुत्रशिशवश्च स्वस्वदूष्यद्वारे तस्थुः।

अनन्तरं मूसा उक्तवान् एतानि सर्व्वकार्य्याणि कर्त्तुं परमेश्वरेण २८
प्रेषितोऽहं स्वेच्छया नेदमकार्षं तदित्यनेन ज्ञातुं शक्ष्यथ। यद्येते मनु- २९
जाः सामान्यलोकवन् म्रियेरन् यद्वा सर्व्वेषां घटनावद् एतान् जनान्
प्रति घटेत तर्ह्यहं न परमेश्वरेण प्रेषितः। किन्तु परमेश्वरस्याद्भुत- ३०
कर्म्मकरणाद् धरित्री यदि स्वास्यं व्यादाय तान् तेषां सर्व्वस्वञ्च ग्रसेत्
ते च यदि जीवन्तः परलोकं गच्छेयुस्तर्हि मानुषैरेतैः परमेश्वर एवा-
वज्ञात इति यूयं वेत्स्यथ।

मूसस एतासु वाणीषु समाप्तासु तेषामधःस्थभूमि र्विदद्रे। धरित्री ३१
स्वास्यं व्यादाय तान् तेषां परिजनान् कोरहस्य सर्व्वलोकान् तेषां ३२
सकलैश्वर्य्यञ्च जग्रसे। तेन ते तेषां सर्व्वपरिजनाश्च जीवन्तः परलोकं गताः। ३३
पृथ्वी च तान् पुनराच्छादयत्, इत्थं ते समाजमध्याद् विलुप्ताः। तेषां ३४
निनादात् तेषां चतुर्दिक्स्था इस्रायेल्वंशाः पलायन्त यस्मात् तेऽकथयन्
पृथिव्यस्मानपि ग्रसिष्यतीति बिभीमः। पश्चात् परमेश्वराद् वह्नि ३५
र्निर्गत्य धूपदायकान् पञ्चाशदधिकशतद्वयलोकान् ददाह।

परमेश्वरो मूससमुक्तवान् त्वं वह्नितस्तानि धूपपात्राणि ग्रहीतुं ३६
तेषां वह्निं तत्रैव विकरीतुञ्च हारोणस्य सुतम् इलियासरं याजक- ३७
मादिश, यस्मात् तानि पवित्री भूतानि। ये पापिनः स्वस्वप्राणप्रतिकूलं ३८
पापं कृतवन्तस्तेषां धूपपात्रै र्वेद्याच्छादनाय विस्तृतानि पित्तलपत्राणि
निर्म्मीयन्तां, तानि परमेश्वरम् उद्दिश्य तै र्निवेदितानि तस्मात् पवित्री
भूतानि, तानीस्रायेल्वंशाय चिह्नस्वरूपाणि भविष्यन्ति। ततः परं ३९
येषु पित्तलमयेषु धूपपात्रेषु तै र्दग्धै र्जनै र्धूप उदह्यत तानि मूससं
प्रति परमेश्वरीयाज्ञानुसाराद् इलियासरेण याजकेन गृहीतानीस्रा-

४० येल्वंशस्य स्मरणार्थम् अर्थाद् हारोणवंशादन्यवंशीयः कोपि यथा
परमेश्वरस्यान्तिकं धूपम् उत्स्रष्टुं समीपगामी कोरहतद्गणेन समानश्च
न भवेत् तदर्थं वेद्या आच्छादनाय पत्ररूपीकृतानि।
४१ तथापि परेऽहनि इस्रायेल्वंशस्य सर्व्वे समाजीया मूसाहारोणयोः
प्रतिकूलं वाग्युद्धं कृत्वा बभाषिरे युवामेव परमेश्वरस्य लोकान् विना-
४२ शितवन्तौ। मूसाहारोणयोः प्रतिकूलं मिलितेन समाजेन समाजावासे
विलोकिते स मेघेनाच्छादितः पारमेश्वरं तेजश्च प्रचकाशे। तदा
४३ मूसाहारोणौ समाजावासस्य द्वारसम्मुखं जग्मतुः।
४४ परमेश्वरो मूसमुक्तवान् युवामेतत्समाजस्य मध्याद् यातं ततोऽहं
४५ निमिषैकस्मात् तान् विनाशयिष्यामि। तदा तौ न्युब्जीभूय पेततुः।
४६ मूसा हारोणं जगाद त्वं धूपपात्रं गृहाण वेद्या वह्निमानीय तत्र
देहि तत्र सर्जरसं दत्त्वा तूर्णं समाजस्य समीपं गत्वा तेषां प्रायश्चित्तं
४७ कुरु यतः परमेश्वरात् क्रोधस्य निर्गतत्वात् महामारी प्रवृत्ता। हारोणो
मूससाज्ञानुसारात् धूपपात्रं गृहीत्वा समाजमध्यं धावितवान् तदा
लोकानां मध्ये महामारी प्रवृत्ता तस्मात् स सर्जरसं दत्त्वा लोकानां कृते
४८ प्रायश्चित्तं चकार, मृतजीवितलोकानां मध्ये तस्थौ च, तेन तत्क्षणात्
४९ महामारी निववृते। कोरहेण सार्कं येऽम्रियन्त तदन्ये सप्तशताधिकानि
५० चतुर्दशसहस्राणि लोका तया महामार्य्या मम्रुः। महामार्य्यां निवृ-
त्तायां हारोणः समाजावासद्वारस्य समीपं मूससोऽन्तिके प्रत्याजगाम।

---

१७ सप्तदशोऽध्यायः।

१ अध्यक्षाणां यष्टिकथनं ६ हारोणस्य यष्टेः पुष्पितत्वं १० पापिनां विरुद्धं चिह्नार्थं
तस्या यष्टे रक्षणं।

१ अनन्तरं परमेश्वरो मूसं जगाद त्वम् इस्रायेल्वंशान् उक्ता तेषां
२ पितृवंशाध्यक्षेभ्य एकैकवंशस्य कृत एकैकयष्टिमित्थं द्वादश यष्टी-
३ र्गृहाण यस्य या यष्टिस्तस्यां तस्य नाम लिख। किन्तु लेवेर्यष्ट्यां हारोणस्य
४ नाम लिख एकैकपितृवंशाध्यक्षस्य कृते एकैका यष्टि र्भविष्यति। यत्राहं
त्वां साक्षात् करोमि तत्र साक्ष्यमञ्जूषायाः सम्मुखे समाजावासमध्ये
५ सर्व्वा निधास्यसि। यो जनो मम मनोनीतस्तस्य यष्टिः पुष्पिता भवि-
ष्यति इस्रायेल्वंशो युष्मत्प्रतिकूलं यद् वाग्युद्धं करोति तदहं स्वसमी-
पान्निवर्त्तयिष्यामि।

इस्रायेल्वंशाय तत्सर्व्वस्मिन् मूससा कथिते तेषाम् अध्यक्षास्तस्मै ६
द्वादशयष्टीर्ददुः फलत एकैकः पितृवंशाध्यक्ष एकैकां यष्टिं ददौ,
हारोणस्य यष्टिस्तेषां यष्टीनां मध्यीयासीत्। मूसाः परमेश्वरस्य सम्मुखे ७
साक्ष्यावासे ता यष्टी र्निदधौ। परेऽहनि मूसाः साक्ष्यावासं गत्वा ददर्श ८
लेविवंशसम्बन्धीया हारोणस्य यष्टिरङ्कुरिता सती मुकुलिता पुष्पिता च
भूत्वा वादामफलम् अफलत्। तदा मूसा इस्रायेल्वंशानां समक्षं परमे- ९
श्वरसम्मुखात् ता यष्टी र्बहिरानयत् ता दृष्ट्वा ते स्वां स्वां यष्टिं जगृहुः।

परमेश्वरो मूससं जगाद, एतेषामाज्ञालङ्घिनां वाग्युद्धं यथा मत्तो १०
दूरी भवति तेषाञ्च मृत्यु र्न जायते तदर्थं तेषां प्रतिकूलं चिह्नं स्थातुं
त्वं साक्ष्यमञ्जूषायाः सम्मुखं पुन र्हारोणस्य यष्टिं प्रत्यानय। ततो मूसा- ११
स्तत् चकार स परमेश्वराज्ञयैव चकार। इस्रायेल्वंशा मूससं बभाषिरे १२
पश्य वयं म्रियामहे वयं विनश्यामः सर्व्वे विनश्यामः। यतो यः कश्चित् १३
परमेश्वरस्यावासान्तिकं याति स म्रियते तर्हि किं वयं निःशेषपर्य्यन्तं
विनश्यामः?

---

१८ अष्टादशोऽध्यायः।

१ याजकानां लेवीयानाञ्च कर्म्म ८ याजकानामंशकथनं २० लेवीयानामंशकथनं २५ लेवीयानामुत्तोलनीयनैवेद्यं याजकानामंशकथनञ्च।

परमेश्वरो हारोणम् उक्तवान् त्वं त्वया साकं त्वत्सुतास्तव पितृवंशश्च १
यूयं पवित्रस्थानस्यापराधं भोक्ष्यध्वे त्वं त्वया समं त्वत्सुताश्च याजक-
त्वपदस्यापराधमपि भोक्ष्यध्वे। त्वं लेविवंशीयान् तव भ्रातॄन् अर्थात् २
तव पितृवंशीयान् त्वया साकम् आनेष्यसि, ते त्वया संयुक्ताः सन्तस्त्वां
परिचरिष्यन्ति किन्तु त्वं त्वया साकं तव पुत्राश्च साक्ष्यावाससम्मुखे
स्थास्यथ। ते तव रक्षणीयम् आवासस्य सर्व्वरक्षणीयञ्च रक्षिष्यन्ति किन्तु ३
तेषां युष्माकञ्च यथा मृति र्न भवेत् तदर्थं ते पवित्रस्थानीयपात्राणां वेद्याश्च
समीपं न यास्यन्ति। ते त्वया संयुक्ताः सन्तः समाजावासस्य रक्षणीयं ४
आवासस्य सर्व्वसेवानुसाराद् रक्षिष्यन्ति कोप्यन्यवंशीयो युष्माकं समीपं
न यास्यति। इस्रायेल्वंशाय यथा पुनः क्रोधो न जायते तदर्थं पवित्र- ५
स्थानस्य रक्षणीयं वेद्याश्च रक्षणीयं युष्माभी रक्षिष्यते। पश्य, इस्रा- ६
येल्वंशमध्याद् युष्माकं भ्रातरो लेविवंशीया मया गृहीताः परमेश्वराय
दत्तास्ते समाजावासीयां परिचर्य्यां कर्त्तुं युष्मभ्यं समर्पिताः। तस्मात् त्वं ७

त्वया सार्कं तव पुत्त्राश्च यूयं वेद्याः समीपे विच्छेदवस्त्रस्याभ्यन्तरे च
याजकत्वं करिष्यथ सेविष्यध्वे च, युष्मभ्यमहं दानरूपं याजकत्वपदं
दत्तवान् किन्तु योऽन्यवंशीयो लोकः समीपं यास्यति स घानिष्यते।
८ परमेश्वरो हारोणं गदितवान् पश्य, इस्रायेल्वंशस्य सर्व्वपावित-
द्रव्याल् लभ्यानां ममोत्तोलनीयनैवेद्यानां रक्षणमहं तुभ्यं दत्तवान्, तवा-
भिषेककारणात् तुभ्यं तव सन्तानेभ्यश्च नित्यविधिना तानि दत्तवान्।
९ वह्निकृतस्यातिपवित्रवस्तुनो मध्य एतानि तव भविष्यन्ति, नैवेद्यरूपेण
वा प्रायश्चित्तरूपेण वा दोषार्थकबलिरूपेण यावन्त उपहारास्तैर्माम्
१० उद्दिश्य निवेद्यन्ते, ते सर्व्वे तुभ्यं तव पुत्त्रेभ्यश्च पवित्रा भविष्यन्ति। त्वं
तान् पूतस्थाने भक्षिष्यसि सर्व्वे पुरुषास्तान् भक्षिष्यन्ति ते तुभ्यं पूताः।
११ इस्रायेल्वंशस्यान्दोलनीयनैवेद्यरूपात् सर्व्वदानाद् उत्तोलनीयनैवेद्यानि
तुभ्यं त्वया सार्कं तव सुतेभ्यः सुताभ्यश्च नित्यविधिना दत्तवान् अहं,
तानि तव भविष्यन्ति तव गेहस्य सर्व्वे शुचयो लोकास्तानि भक्षिष्यन्ति।
१२ ते परमेश्वराय यद्यद् उत्तमं तैलम् उत्तमद्राक्षारसं गोधूमं प्रथमजं
१३ फलम् उत्सक्ष्यन्ति तान्यहं तुभ्यं दत्तवान्। तैर्यानि स्वदेशीयानि प्रथ-
मपक्कफलानि परमेश्वराय निवेद्यन्ते तानि तव भविष्यन्ति, तव गेहस्य
१४ सर्व्वे शुचयो लोकास्तानि भक्षिष्यन्ति। इस्रायेल्वंशेन निवेदितं सर्व्वं
१५ वस्तु तव भविष्यति। मानुषाणां पशूनां वा मध्यात् परमेश्वरार्थं तैरा-
नीताः प्रथमजाताः सर्व्वप्राणिनस्तवैव भविष्यन्ति, किन्तु मानुषस्य प्रथमजं
त्वमवश्यं मोचयिष्यसि तथाशुचेः पशोः प्रथमजमपि मोचयिष्यसि।
१६ एकमासवयस्कमारभ्य मोचनीयाः सर्व्वे त्वन्निरूपितमूल्येन विंशतिगेरा-
१७ परिमितपूतस्थानशेकलनुसारात् पञ्चशेकलरूप्येण मोचयिष्यन्ते। किन्तु
गोमेषच्छागानां प्रथमजास्त्वया न मोचयिष्यन्ते त एव पवित्रास्त्वं तेषां
रुधिरं वेद्युपरि प्रोक्षिष्यसि परमेश्वरम् उद्दिश्य वह्निकृतसुगन्ध्युपहा-
१८ राय तेषां मेदो दाहयिष्यसि। आन्दोलनीयं वक्षो दक्षिणस्कन्धश्च यथा
१९ तव तथा तेषां पललमपि तवैव भविष्यति। इस्रायेल्वंशः पूतवस्तूनां
मध्याद् यान्युत्तोलनीयानि नैवेद्यानि परमेश्वराय निवेदयति तान्यहं
तुभ्यं तव पुत्त्रेभ्यः कन्याभ्यश्च नित्यविधिना दत्तवान् परमेश्वरस्य साक्षात्
त्वया त्वद्वंशेन च सार्कं स्थिरीकृत एष नियमश्चिरस्थायी भविष्यति।
२० परमेश्वरो हारोणं जगाद तेषां भूमौ तव कोप्यधिकारो न स्थास्यति
तेषां मध्ये तव कोप्यंशो न स्थास्यति, इस्रायेल्वंशमध्येऽहमेव तवांशोऽधि-

कारस्व। पश्चाहं लेविवंशीयेभ्यः स्वीयाधिकाररूपेणेस्रायेलवंशस्य सर्व्वं २१
दशमांशं दत्तवान् ते यत् सेवाकर्म्म क्रियते, तस्य समाजावासीयस्य
सेवाकर्म्मणो वेतनं तदेव भविष्यति। इस्रायेल्वंशा यथा पापं भुक्ता २२
न म्रियेरन् तदर्थम् अद्यारभ्य ते समाजावासस्य सविधा न भवेयुः।
लेवीयलोकाः समाजावासं परिचरिष्यन्ति, ते निजापराधं भोक्ष्यन्ते, २३
इस्रायेल्वंशमध्ये ते कमप्यधिकारं न प्राप्स्यन्ति एष युष्माकं पुरुष-
परम्परासु नित्यविधि र्भविष्यति। किन्तु इस्रायेल्वंशाः परमेश्वरम् २४
उद्दिश्य यं दशमांशं उत्तोलनीयनैवेद्यरूपेणोत्स्रक्ष्यन्ति, तमहं लेवीये-
भ्योऽधिकर्त्तुं दत्तवान्, अतोहं तेभ्यः कथितवान्, इस्रायेल्वंशमध्ये ते
कमप्यधिकारं न प्राप्स्यन्ति।

परमेश्वरो मूससं जगाद, त्वं लेवीयेभ्यः कथय तान् इति वाक्यं वद, २५
अहं युष्मदधिकारार्थं यं दशमांशं युष्मभ्यमदां तं यदा यूयम् इस्रायेल्- २६
वंशेभ्यो ग्रहीष्यथ, तदा तस्य दशमांशस्य दशमांशम् उत्तोलनीय-
नैवेद्यरूपेण परमेश्वराय निवेदयिष्यथ। युष्माकं तदुत्तोलनीयं नैवेद्यं २७
युष्मान् प्रति मर्द्दनस्थानीयशस्यवद् द्राक्षायन्त्रीयधनवच्च गणिष्यते। इत्थं २८
यूयं इस्रायेल्वंशाद् यं दशमांशं ग्रहीष्यथ तस्मात् यूयमपि परमेश्वरा-
योत्तोलनीयं नैवेद्यं निवेदयिष्यथ तस्माच्च परमेश्वरीयम् उत्तोलनीय-
नैवेद्यं हारोणाय याजकाय दास्यथ। युष्मभ्यं यद्यद् दीयते, तस्माद् यूयं २९
परमेश्वरीयम् उत्तोलनीयनैवेद्यम् अर्थत उत्तमात् सर्व्ववस्तुनस्तत्पवित्रांशं
निवेदयिष्यथ। तस्मात् त्वं तेभ्यः कथयिष्यसि यूयं यदोत्तमवस्तुभ्य उत्तो- ३०
लनीयं नैवेद्यं निवेदयिष्यथ तदा तत् लेवीयानां मर्द्दनस्थानीयधन-
वद् द्राक्षायन्त्रीयधनवच्च गणिष्यते। यूयं युष्माकं परिजनाश्च तत् सर्व्वत्र ३१
भक्षिष्यथ, यस्मात् तद् युष्माकं समाजावासीयायाः परिचर्य्याया वेतनं
भवति। तस्माद् उत्तमवस्तुनो नैवेद्य उत्सृष्टे तत्कारणाद् यूयं किमपि ३२
पापफलं न भोक्ष्यध्वे, इस्रायेल्वंशस्य पवित्रीकृतवस्तूनि युष्माभि र्नापवित्री
करिष्यन्ते युष्माकं मृतिश्च न भविष्यति।

---

१९ ऊनविंशोऽध्यायः।

१ रोहितगोभस्मना पवित्रजलकरणं ११ तद्व्यवहारमधि व्यवस्था च।

परमेश्वरो मूससं हारोणञ्च बभाषे परमेश्वर इति व्यवस्थाया विधिम् १
आदिशत् त्वम् इस्रायेल्वंशान् ब्रूहि ते निर्दोषां निष्कलङ्कां अनूढयुगां २

३ रोहितवर्णाञ्च गां तवान्तिकम् आनयन्तु । यूयं तां गाम् इलियासर-
याजकाय दास्यथ स तां शिविराद् वहिरानीय स्वसम्मुखे छेदयि-
४ ष्यति । इलियासरयाजकः स्वाङ्गुल्या तस्याः किञ्चिद् रुधिरं गृहीत्वा
५ समाजावासस्य सम्मुखे तत् सप्तकृत्वः प्रक्षेप्स्यति । तस्य दृष्टौ सा गौ
र्दाहिष्यते ऽर्थात् तस्या गोमयेन साकं चर्म्ममांसरुधिराणि दाहिष्यन्ते ।
६ याजक एरसकाष्ठं एसोवतृणं सिन्दूरवर्णं रोम चादाय गोदाहाग्निमध्ये
७ निक्षेप्स्यति । ततो याजकः स्ववसनं धौत्वा कायं जलेन स्नापयिष्यति ततः
८ शिविरं प्रवेक्ष्यति तथापि याजकः सन्ध्यां यावद् अशुचि र्भविष्यति । यो
नरस्तां दाहयिष्यति सोपि स्ववसनं तोयेन क्षालयिष्यति कायं जलेन
९ स्नापयिष्यति च तथापि सन्ध्यां यावद् अशुचि र्भविष्यति । कश्चन शुचि-
स्तद् गोभस्म संगृह्य शिविरवहिस्थशुचिस्थाने निधास्यति, शुचित्वतो-
यार्थं तद् इस्रायेल्वंशीयसमाजाय स्थापिष्यते तत् पापपरिष्कृद्
१० भवति । तद्गोभस्मसंग्राहको नरः स्ववसनं क्षालयिष्यति तथापि
सन्ध्यां यावद् अशुचि र्भविष्यति । इस्रायेल्वंशं प्रति तन्मध्ये प्रवासि-
विदेशिनः प्रति चैष नित्यविधि र्भविष्यति ।
११ यः कश्चिन् मनुष्यस्य कुणपं स्पृशति स सप्त दिनान्यशुचि र्भविष्यति ।
१२ स तृतीयदिने तज्जलेन स्वं परिष्करिष्यति सप्तमेऽह्नि स शुचि र्भविष्यति
किन्तु यदि तृतीयेऽह्नि स्वं न परिष्करिष्यति तर्हि स सप्तमेऽह्नि शुचि र्न
१३ भविष्यति । यः कश्चन मानुषस्य कुणपं स्पृष्ट्वा स्वं न परिष्करोति स पर-
मेशस्यावासम् अशुचिं करोति स इस्रायेल्वंशाद् उच्छेत्स्यते, यस्मात्
तदुपरि परिष्कारि तोयं न क्षिप्तं तस्मात् सोऽशुचि र्भविष्यति तद-
१४ शुचित्वं तस्मिन् चिरं स्थास्यति । दूष्यमध्ये मानुषे मृते तदीयेयं
व्यवस्था, तद्दूष्यं प्रविशन्तो दूष्यमध्यवर्त्तिनश्च सर्व्वे लोकाः सप्त
१५ दिनान्यशुचयो भविष्यन्ति । आच्छादनबन्धनयो राहित्यान्मुक्तं सर्व्व-
१६ द्रव्यमप्यशुचि भविष्यति । यः कश्चन क्षेत्रे खड्गेन हतस्य वा मृतस्य नरस्य
कुणपं वा नरास्थि वा कुणपाधारं स्पृशति स सप्त दिनान्यशुचि
१७ र्भविष्यति । अशुचेर्जनस्य कृते तस्य दग्धवलेः किञ्चिद् भस्म गृहीत्वा
१८ पात्रे निधाय तदुपरि प्रस्रवणतोयं दातव्यं । ततः शुचिरेको नर एसो-
वतृणं गृहीत्वा तोये मज्जयित्वा तद्दूष्योपरि तत्रस्थसर्व्वपात्रोपरि सर्व्व-
लोकोपरि चास्थि वा हतं वा मृतं वा श्मशानं स्पृशतो जनस्योपरि च तत्
१९ प्रक्षेप्स्यति । इत्थं तृतीयदिने सप्तमदिने चाशुचेरुपरि शुचि लोकेन तस्मिन्

प्रक्षिप्ते सति स सप्तमेऽह्नि स्वं परिष्करिष्यति स्ववसनं क्षालयिष्यति तोये
स्नास्यति च तेन सन्ध्यायां शुचि र्भविष्यति। किन्तु यो नरोऽशुचि र्भूत्वा २०
स्वं न परिष्करोति स समाजमध्याद् उच्छेत्स्यते यतः स परमेश्वरस्य पूतं
स्थानम् अशुचि कृतवान् यदुपरि शुचिकृत् तोयं न क्षिप्तं स एवाशुचिः।
तान् प्रति नित्यविधिरयं भविष्यति यः शुचिकृत् तोयं प्रक्षिपति स २१
स्ववसनं क्षालयिष्यति, यश्च शुचिकृत् तोयं स्पृशति सोपि सन्ध्यां यावद्
अशुचि र्भविष्यति। अशुचिजनेन यत् स्पृश्यते तदशुचि भविष्यति, यः २२
प्राणी तत् स्पृशति सोपि सन्ध्यां यावद् अशुचि र्भविष्यति।

---

२० विंशोऽध्यायः।

१ मरियमो मृत्युः २ इस्रायेल्वंशस्य वाग्युद्धं ७ मूसोद्दण्डेनाहननात् शैलात् तोयोद्गमः मूसोहारोणौ प्रति परमेश्वरस्यासन्तुष्टिः १४ इदोम्देशेन यातुं मूससः प्रार्थना २२ होरपर्व्वते हारोणस्य पुत्राय स्वपददानं मृतिश्च।

अनन्तरं प्रथमे मासीस्रायेल्वंशीये सर्व्वसमाजे सीन्प्रान्तरं गत- १
वति लोकाः कादेशे न्यवसन् तत्रैव मरियमि मृतायां तत्श्मशानं बभूव।
तत्र समाजार्थं तोयं नासीत् तस्माल् लोका मूसोहारोणयोः प्रतिकूलं २
मिलिताः। मूससा सार्द्धं वाग्युद्धं कुर्व्वन्तस्ते कथयामासुः, हा, परमेश्वरस्य ३
सम्मुख अस्मद्भ्रातृणां मरणसमये यद्यस्माकं मृतिरभविष्यत्। यूयं अस्मा- ४
कम् अस्मत्पशूनाञ्च मरणार्थं कुतः परमेश्वरस्य समाजम् एतत्प्रान्तरम्
आनीतवन्तौ? एतत् कुस्थानम् आनेतुम् अस्मान् मिसरः कुतो वहिरान- ५
यतं? इदं वीजवपनस्योडुम्बरद्राक्षादाडिमानाञ्च न स्थानम् अत्र पानार्हं
तोयमपि नास्ति। ततो मूसोहारोणौ समाजस्य सम्मुखात् समाजावास- ६
द्वारं गत्वा न्युब्जौ पतितौ तेन तयोः समीपे परमेश्वरस्य तेजः प्राकाशत।
अनन्तरं परमेश्वरो मूससं कथितवान्, त्वं तव भ्राता हारोणश्च यष्टिं ७
गृहीत्वा समाजञ्च मेलयित्वा तद्दृष्टिगोचर एतं शैलं भाषेथां, तस्मात् ८
स स्वीयतोयानि प्रस्रावयिष्यति। इत्थं त्वया शैलाज्जले निःसारिते समा-
जीयास्तत्पशवश्च तत् पाययिष्यन्ते। ततो लब्धाज्ञानुसारतो मूससा परमे- ९
श्वरस्य सम्मुखाद् यष्ट्यां गृहीतायां मूसोहारोणौ शैलान्तिके समाजं मेल- १०
यामासतुः। अनन्तरं मूसास्तान् जगाद, हे कलहकारिणो निशामयत
यूयं, एतच्छैलमध्याद् युष्मदर्थं सलिलमावाभ्यं किं निःसारयितव्यं?

११ अनन्तरम् उत्तोलितकरेण मूससा शैले द्विकृत्वो यष्ट्याहते बहुतोयानि
प्रास्रवन्, ततः समाजस्तत्पशवश्च पपुः।
१२ परमेश्वरो मूससं हारोणञ्च बभाषे युवां इस्रायेल्वंशस्य समक्षं मां
सम्मानितुं मम वाचं न प्रत्यैतं, तस्माद् अहं एतस्मै समाजाय यं देशं
१३ दास्यामि तं देशं स न युवाभ्यां प्रवेशयिष्यते। तानि मिरीवाया (विवाद-
स्थानस्य) तोयानि यत इस्रायेल्वंशाः परमेश्वरेण समं व्यवदन्त स च तेषां
मध्ये सम्मानं लब्धवान्।
१४ अनन्तरं मूसाः कादेशाद् इदोमीयराजस्य समीपं दूतैः कथामिमां
प्रेषयामास तव भ्रातृलोका इस्रायेल्वंशा इमां वाचं कथयन्ति ये क्लेशा
१५ अस्मान् प्रत्यघटन्त तान् त्वं वेत्सि। अस्माकं पितृषु मिसर्देशं गतेषु वयं
बहुदिनानि मिसर्देशे न्यवसाम, ततो मिस्रीयलोका अस्मान् अस्मत्-
१६ पितृंश्च प्रति कुत्सितं व्यवाहरन्। तस्मात् परमेश्वरसन्निधौ प्रार्थित-
वताम् अस्माकं शब्दं स श्रुत्वा स्वदूतं प्रेष्यास्मान् मिसरो वहिरानयत्,
१७ इदानीं पश्य वयं तव देशीयसीमास्थकादेशनगरे तिष्ठामः। अधुना
त्वं स्वदेशमध्येनास्मान् यातुम् अनुजानीहीति वयं विनयामहे, वयं
तव शस्यक्षेत्रेण द्राक्षाक्षेत्रेण वा न यास्यामः प्रहितोयञ्च न पास्यामः
केवलं राजमार्गेण यास्यामः, यावत् तव सीमां नोत्तरामस्तावद्
१८ दक्षिणं वामं वा न परावर्त्तिष्यामहे। तत इदोमीयो राजा तानवदत्,
युष्माभि र्मम देशेन न गन्तव्यं, गमने कृते युष्माकं विरुद्धम् अह-
१९ मसिमादाय यास्यामि। तत इस्रायेल्वंशाः प्रत्यवदन् वयं केवलं
राजमार्गेण यास्यामः, अस्माभिरस्मत्पशुभिर्वा यदि युष्माकं पानीयं पीयते
तर्हि तन्मूल्यं वयं दास्यामः केवलं पादवद् वयं यास्यामः किमप्यन्यत्
२० न करिष्यामः। तदा स प्रत्यूचे युष्माभि र्न गन्तव्यं, तत इदोमीयो राजा
२१ बहुलोकानादाय महाबलेन तेषां प्रतिकूलं वहिरागतवान्। इत्थम्
इदोमीयराजेन स्वसीम्ना यातुं वारिता इस्रायेल्वंशास्तस्य समीपात्
परावर्त्तिरे।
२२ अनन्तरम् इस्रायेल्वंशीयो निखिलसमाजः कादेशात् प्रस्थाय होरा-
२३ द्रिम् उपतस्थे। तदानीम् इदोमदेशस्य सीमान्तिकस्थे होरपर्व्वते
२४ परमेश्वरो मूससं हारोणञ्च जगाद, हारोणः स्वपितृलोकैः समं संग्रा-
हिष्यते यं देशम् अहम् इस्रायेल्वंशाय दास्यामि तं देशं स न प्रवेक्ष्यति,
२५ यस्मात् युवां मिरीवाम्बुनो निकटे मदाज्ञां लङ्घितवन्तौ। त्वं हारोणं

तदपत्यम् इलियासरञ्च गृहीत्वा होराद्रिशृङ्गम् आरोहय। हारोणं २६
स्वीयवसनानि सन्त्याज्य तत्सुतम् इलियासरं तानि परिधापय, पश्चाद्
हारोणस्तत्र स्थाने मृत्वा स्वपितृलोकैः समं संग्राहिष्यते। ततो मूसाः २७
परमेश्वराज्ञनुसारात् सर्व्वं कर्म्म कृतवान् ते सर्व्वसमाजीयानां समक्षं
होराद्रिम् आरुरुहुः। मूसा हारोणं स्वीयवसनानि सन्त्याज्य तत्सुतम् २८
इलियासरं तानि परिधापयामास ततो हारोणस्तत्र गिरेः शृङ्गे ममार,
ततो मूसा इलियासरश्च पर्व्वताद् अवारोहतां। हारोणो मृत इति २९
ज्ञात्वा सर्व्वे समाजीया अर्थाद् इस्रायेल्वंशाः सर्व्वे हारोणस्य कृते त्रिंशद्-
दिनानि यावत् शुशुचुः।

---

२१ एकविंशोऽध्यायः।

१ हर्म्मायां किनानीयानां मारणं ४ लोकानां वाग्युद्धकारणाद् ज्वालकसर्पप्रेरणं ७ पित्तलीयसर्पं प्रति दृष्टिकरणात् तेषां स्वास्थ्यं १० इस्रायेल्लोकानां यात्रा २१ सीहोन-राजस्य पराजितत्वं ३३ ओगराजस्य पराजितत्वञ्च।

इस्रायेल्वंशा अथारीममार्गेणागच्छन्ति इति श्रुत्वा दक्षिणप्रदेशवासी १
किनानीयो ऽरादस्य राजा तेषां प्रतिकूलं युयोध तेषां कतिपयान्
लोकान् धृत्वा बन्धीचकार च। तत इस्रायेल्वंशाः परमेश्वरम् उद्दिश्य २
प्रतिश्रुत्य कथयामासुः, यदि त्वम् एतान् अस्माकं करेषु समर्पयसि तर्हि
वयं तेषां नगराणि समूलं उच्छेत्स्यामः। ततः परमेश्वर इस्रायेल्वंशी- ३
यानां प्रार्थनायां मनो निधाय तान् किनानीयान् तेषां करेषु समर्प-
यामास, तत इस्रायेल्वंशास्तान् तेषां पुराणि च समूलम् उदछिनत्
तस्य स्थानस्य नाम च हर्म्मां (समूलोच्छिन्नामिति) चकार।

अपरं तेषु होर्गिरेर् इदोम्देशं परिवेष्टितुं सुफार्णवगामिपथेन ४
प्रस्थितेषु पथश्रमात् लोकानां प्राणा व्यरज्यन्त। ततो लोका ईश्वरस्य ५
मूससश्च प्रतिकूलं वक्तुमारेभिरे यूयम् अस्मान् प्रान्तरे मारयितुं
मिसर्देशात् कुतो वहिरानयत? पश्यतास्माकम् यूपः पानीयञ्च न
विद्येते इदं लघ्वन्नम् अस्माकं प्राणेभ्यो न रोचते। तदानीं परमेश्वरो ६
जनानां मध्यं ज्वालयितृन् भुजगान् प्रेषयामास तै र्लोकेषु दष्टेषु
इस्रायेल्वंशस्य बहवो लोका अम्रियन्त।

अतो लोका मूससोऽन्तिकम् आगत्य बभाषिरे वयं परमेश्वरस्य तव ७
च प्रातिकूल्यगदनेन कलुषम् अकार्ष्म, परमेश्वरोऽस्माकं निकटाद्

भुजगान् एतान् नयतु तस्मिन् त्वमिदं प्रार्थयस्व, ततः स लोकानां कृते
८ प्रार्थयाञ्चक्रे। तदा परमेश्वरो मूससं गदितवान्, त्वम् एकं ज्वालयिता-
रम् अहिं निर्म्माय केतोरुपरि स्थापय, तस्मात् सर्पदष्टो यः कश्चित्
९ तं प्रति निरीक्षिष्यते, स जीविष्यति। तदा मूसाः पित्तलस्य पृदाकुं
निर्म्माय केतोरग्रे स्थापितवान्, ततः सर्पदष्टो यः कश्चित् तं पित्तलीयं
विषधरं प्रति निरैक्षत सोऽजीवत्।
१० इस्रायेल्वंशा यात्रां कृत्वा ओवोते शिविरं स्थापयामासुः। ओवोतात्
११ यात्रां कृत्वा रव्युदयदिशि मोयाबस्य सम्मुखस्थे प्रान्तरे इयी-अबारीमि
१२ शिविरं स्थापयामासुः। तस्माद् यात्रां कृत्वा ते सेरदोपत्यकायां शिविरं
१३ स्थापयाञ्चक्रुः। तस्मात् यात्रां कृत्वा इमोरीयाणां सीमानिर्गतप्रान्तर-
स्थिते अर्णोनपारे शिविरं स्थापयामासुः, यस्माद् अर्णोननदो मोया-
१४ बीयानां इमोरीयाणाञ्च मध्यवर्त्ती मोयाबदेशस्य सीमासीत्। तेन
परमेश्वरस्य युद्धपुस्तक इदं लिखितमास्ते यथा।

चक्रवातेन वाहेवम् अर्णोन्स्रोतस्तटानि च।
१५ आराख्यनगरीगन्त्री मोयाबस्य सीमास्थिता।
निम्ना भूः स्रोतसा सिक्ता तेनैतानि जितानि हि॥

१६ तस्मात् ते बेराख्यं कूपस्थानं समागताः। त्वम् अत्र लोकान् संग्रहा-
णाहं तेभ्यस्तोयं दास्यामीति वाचं परमेश्वरो यत्र मूससम् अवोचत्
१७ तदिदं बेराख्यं स्थानं। तदानीम् इस्रायेल्वंशा इदं गीतं जगुः,

त्वं समुत्तिष्ठ हे कूप यूयं तमधि गायत।
१८ अध्यक्षैः स प्रधिः खातः कुलीनैः स्रोतयष्टिभिः।
व्यवस्थापिन आदेशात् सएव पर्य्यखन्यत।

१९ ते प्रान्तरात् मत्तानां मत्तानातो नहलीयेलं नहलीयेलाद् वामोतं,
२० वामोतात् मोयाबदेशान्तःपातिन्या निम्नभूम्या यिशीमोनस्याभिमुखपि-
स्गागिरेः शृङ्गं जग्मुः।
२१ इस्रायेल्वंशा इमोरीयाणां भूपतेः सीहोनस्य समीपं दूतं प्रहित्य
२२ वच इदं जगदुः, त्वं स्वदेशेनास्मान् यातुम् अनुजानीहि वयं शस्यक्षेत्रं
द्राक्षाक्षेत्रं वा न प्रवेक्ष्यामः प्रहेः पानीयं न पास्यामः यावत् तव
२३ सीमां नातिक्राम्यामस्तावत् राजमार्गेण यास्यामः। किन्तु सीहोनः
स्वसीमया इस्रायेल्वंशं यातुं नानुज्ञाय स्वसैन्यं गृहीत्वेस्रायेल्वंशेन साकं
योद्धुं प्रान्तरं निरगमत्, यहसम् उपस्थायेस्रायेल्वंशेन समं युयोध च।

तत इस्रायेल्वंशीयाः खड्गधारैस्तान् ताडयित्वार्णोनमारभ्य यव्वोकं यावद् २४
अर्थाद् अम्मोनवंशीयानां स्थानं यावत् तस्य देशम् अधिचक्रुः, यस्माद्
अम्मोनवंशीयानां सीमा गाढासीत्। इत्थम् इस्रायेल्वंशास्तानि २५
सर्व्वाणि पुराणि करतलीकृत्य इमोरीयाणां सर्व्वेषु पुरेषु हिष्वोनि
तन्निकटस्थ सर्व्वेषु पुरेषु च न्युवास। तद् हिष्वोन् इमोरीयाणां राज्ञः २६
सीहोनस्य नगरमासीत्, स सीहोनो मोयाबीयस्य पूर्व्वराजस्य प्रति-
कूलं युद्धा अर्णोनं यावत् तस्य सर्व्वदेशं तस्य कराभ्याम् आहृतवान्।
तस्मात् कवयः कथयन्ति, यथा। २७

आयात हिष्वोनं यूयं सीहोनो यत् पुरन्तु तत्।
सुनिर्माय पुनर्व्वारं वयमासादयामहे।
हिष्वोनोऽग्निर्हि निर्याय सीहोनो नगरात् शिखा। २८
मोयाबीयार्पुरं चार्णोन्तीरस्थश्टगुमादहत्।
हे मोयाव् तव सन्तापः किमोश्दासा व्यनश्यत। २९
इमोरिभूपसीहोनः करयोः स पलायितान्।
सुतान् समर्पयामास तथा बन्दीकृताः सुताः।
विनष्टं दीवनं यावद् हिष्वोनं नः शराहतैः। ३०
नोफाहं मेदिबास्थं ते यावच्छिन्नाश्च सर्व्वशः।

इत्थम् इस्रायेल्वंश इमोरीयदेशे वस्तुम् आरेभे। मूससा याशेरनगरं ३१
निरीक्षितुं लोकेषु प्रहितेषु तैस्तदीयानि सर्व्वनगराणि वशीकृतानि ३२
तत्रस्था इमोरीयलोकाश्च दूरीकृताः।

पश्चात् ते परावृत्य वाशनदेशस्य पथा जग्मुस्ततो वाशनीयः भूपतिर् ३३
ओगस्तदीयाः सर्व्वे लोकाश्च वहिरागत्य तेषां प्रतिकूलं योद्धुम् इद्रियिं
जग्मुः। तदा परमेश्वरो मूससम् उवाच त्वम् एतस्मान् मा भैषी, यस्माद् ३४
स तत्सर्व्वप्रजा देशश्च तव करे मया समर्पितः, त्वं हिष्वोनवासिनम्
इमोरीयराजं सीहोनं प्रति यथा कृतवान् एनं प्रत्यपि तथा करि-
ष्यसि। ततो यावत् तेषां कोप्यवशिष्टो नातिष्ठत् तावत् स तस्य पुत्रा ३५
लोकाश्च तैस्ताडितास्तस्य देशोऽप्यधिकृतश्च।

---

२२ द्वाविंशोऽध्यायः।

१ मोयाबस्य समीपम् इस्रायेल्वंशस्य यानं २ विलियमं प्रति वालाकस्य दूतप्रेषणं १५

द्विर्दूतप्रेषणं विलियमस्य यात्रा २२ तस्य प्रत्यूहकरणार्थं परमेश्वरस्य दूतस्यागमनं वालाकेन विलियमस्यातिथ्यञ्च।

१ पश्चाद् इस्रायेल्वंशा यात्रां कृत्वा यिरीहोः समीपे यर्द्दनस्य पूर्व्व-
पारे मोयावीयप्रान्तरे शिविरं स्थापयामासुः।
२ इस्रायेल्वंश इमोरीयान् प्रति यद्यद् व्यवहृतवान् तत्सिप्पोरस्य पुत्रो
३ वालाको ददर्श। तेषां लोकबाहुल्यात् मोयावीयमहीपतिरत्यन्तां भी-
४ रुतां प्राप्त इस्रायेल्वंशात् महद् उद्विवेजे च। तस्मात् मोयावीयो भूप-
तिर्मिदियनीयमुख्यान् अवदत्, क्षेत्रीयतृणानि यथा गवा ग्रस्यन्ते, तथा-
स्मच्चतुष्पार्श्वीयानि सर्व्वाणि लोकनिवहेनानेन ग्रसिष्यन्ते। तदा सि-
५ प्पोरसुतो वालाको मोयावीयानां राजासीत्। अतः स वियोरसुतस्य
विलियमस्य समक्षं तज्जातेर्जन्मभूमिं फरातनदीतटस्थं पिथोरनगरं
दूतान् प्रहित्य तम् इमाम् आह्वानवाचं जगाद, पश्य यो लोकनिवहो
मिसरदेशाद् वहिरागमत्, सो ऽवनीमण्डलम् आच्छाद्य मम सम्मुखे
६ विद्यते। अहं निवेदयामि इमे मत्तो बलवन्तस्तस्मात् त्वमिदानीम्
एत्य मत्कृत एतान् जनान् अभिशपस्व, तेन जयिना मया तान् देशाद्
दूरयितुं शक्ष्यते, यतस्त्वं यस्मै आशिषं ददासि स एवाशीःप्राप्तः, यस्मै
७ च त्वं शापं ददासि सएवाभिशप्त इत्यहं जानामि। पश्चात् मोया-
वीया मिदियनीयाश्च मुख्यजनाः पारितोषिकं करे कृत्वा प्रतस्थिरे,
८ विलियमसमीपम् उपस्थाय वालाकस्य वाचं तस्मै कथयामासुः। ततः
स तान् प्रत्यवोचत् यूयम् अद्य रजन्याम् अत्र स्थाने तिष्ठत, परमेश्वरो
९ मां यद् आदेक्ष्यति तदहं युष्मान् वक्ष्यामि। तदा मोयावीया अध्यक्षा
१० विलियमेन सार्कं प्रावसन्। ईश्वरो विलियमम् उपस्थाय तमवदत्
त्वत्सहिता इमे लोकाः के? तदा विलयम ईश्वरं गदितवान् मोया-
वीयराजः सिप्पोरसुतो वालाक इति कथयित्वा मम समीपं लोकान्
११ प्रैरयत्, पश्य यो जननिवहो मिसर्देशाद् वहिरागच्छत् तेन देश
आच्छाद्यते, तस्माद् इदानीं त्वम् आगत्य मत्कृते तान् लोकान् शपस्व,
१२ तेनाहं तान् पराजित्य दूरयितुं शक्ष्यामि। तत ईश्वरो विलियमं
बभाषे, त्वं तैः समं मा गच्छ तान् जनान् मा शपस्व च, यस्मात्त आशीः-
१३ पात्राणि। ततो विलियमः प्रातरुत्थाय वालाकस्याध्यक्षान् अवादीत्,
यूयं स्वदेशं यात, यस्माद् युष्माभिः सार्कं मम गमनं परमेश्वरस्य
१४ न सम्मतं। ततो मोयावीया अध्यक्षा उत्थाय वालाकस्य समीपं

गत्वा प्रावोचन् अस्माभिः साकम् आगन्तुं विलियमेन न स्वीकृतं ।
ततो वालाकस्तेभ्योऽधिकान् सम्मानितांश्चान्यान् अध्यक्षान् प्रेरया- १५
मास। ते विलियमसमीपम् आगत्य तमवोचन्, सिप्पोरस्य सुतो वालाक १६
इति वाचं वक्ति, निवेदयाम्यहं मम समीपम् आगन्तुं तव कश्चन विघ्नो
मा भवतु। अहं त्वाम् अतीव सम्मानार्हं करिष्यामि यद्यदाज्ञापयिष्यसि १७
तदेव करिष्यामि च, अतोऽहं विनये त्वमागत्य लोकानेतान् मत्कृते शपस्व।
ततो विलियमो वालाकस्य दासान् प्रत्यवदत्, यद्यपि वालाको रूप्यैः १८
स्वर्णैश्च पूर्णं निजवेश्म मह्यं दद्यात् तथापि क्षुद्रेण महता वा कर्म्मणा
निजप्रभोः परमेश्वरस्य निदेशं लङ्घितुं मया न शक्यते। तेन निवेद- १९
याम्यहं यूयमप्यत्र स्थाने निशां यापयत, परमेश्वरो मह्यं पुनर्यत् कथयि-
ष्यति तदहं युष्मान् ज्ञापयिष्यामि। तत ईश्वरो रजन्यां विलियम- २०
समीपम् उपस्थाय तं गदितवान्, ते जना यदि त्वामाह्वातुम् आगत-
वन्तस्तर्हि त्वयोत्थाय तैः साकं यातुं शक्यते, किन्तु मया तुभ्यं यत्
कथयिष्यते तदेव त्वं करिष्यसि। ततो विलियमः प्रातरुत्थाय स्वग- २१
र्द्दभीं सज्जयित्वा मोयाबीयाध्यक्षगणेन साकं गतवान्।

अनन्तरं तस्य गमनाद् ईश्वरस्य क्रोधे प्रज्वलिते परमेश्वरस्य दूत- २२
स्तस्य प्रतिकूलः सन् रिपुरिव तस्य वर्त्मनि तस्थौ, तदा स्वगर्द्दभ्यारूढः
स द्वाभ्यां दासाभ्यां समं याति। तदा गर्द्दभी वर्त्ममध्ये दण्डायमानं २३
निष्कोषासिकरं परमेश्वरस्य दूतं विलोक्य वर्त्मनो वहिर्भूय क्षेत्रं
जगाम, ततो मार्गमानेतुं विलियमस्तां गर्द्दभीं प्रजहार। अपरं पर- २४
मेश्वरस्य दूत उभयत्र प्राचीरयुक्ते द्राक्षाक्षेत्रस्य सङ्कीर्णमार्गे तस्थौ।
ततो गर्द्दभ्या परमेश्वरस्य दूतं विलोक्य प्राचीरे स्वगात्रं घृष्टं, तेन २५
प्राचीरे विलियमस्य पादघर्षणे जाते स पुनस्ताम् आहतवान्। परमे- २६
श्वरस्य दूतः पुनः किञ्चिदग्रं गत्वा दक्षिणे वामे वा परावर्त्तनाय यत्र
स्थानं नास्ति तादृशे सङ्कुचिते वर्त्मनि स्थितवान्। तदा गर्द्दभी २७
परमेश्वरस्य दूतं दृष्ट्वा विलियमस्य नीचभूमौ पपात, तेन विलियमस्य
क्रोधे प्रज्वलिते स यष्ट्या गर्द्दभीम् आजघान। तदा परमेश्वरेण गर्द्दभ्यै २८
वाक्सामर्थ्ये दत्ते सा विलियमं जगाद मया तव किम् अपराद्धं यत्त्वं
मां त्रिः प्रहृतवान्? विलियमो गर्द्दभीं गदितवान् त्वं माम् अवजा- २९
नासि, मम करे यद्यसिरस्थास्यत् तर्हि त्वाम् अधुनैवाहनिष्यम्। पश्चाद् ३०
गर्द्दभी विलियमं प्रोक्तवती आ जन्म त्वम् अद्य यावद् यदुपरि

समारोहसि तवाहं सा गर्द्दभी नास्मि किं? त्वां प्रतीदृग् व्यवहरणं
३१ किं मम निसर्गः? ततः स गदितवान्, नहि । तदा परमेश्वरेण
बिलियमस्य नेत्रयोः प्रसन्नीकृतयोः स वर्त्ममध्ये तिष्ठन्तं निष्कोषासि-
३२ करं परमेश्वरस्य दूतं ददर्श, ततः स तं प्रणम्य न्युब्जः पपात। तदा
परमेश्वरस्य दूतस्तं जगाद, त्वं निजगर्द्दभीं कुतो वारत्रयं प्राहरः?
पश्याहं तव रिपुवद् बहिरागमं यतो मम साक्षात् त्वया कुमार्गे
३३ गम्यते। गर्द्दभी मां विलोक्येदं वारत्रयं मम सम्मुखाद् विमुखाभवत्
यदि सा मम सम्मुखाद् विमुखा नाभविष्यत् तर्हि मया त्वमेवाहनिष्यथाः
३४ सा चारक्षिष्यत । तदा बिलियमः परमेश्वरस्य दूतम् अवोचत्, मया-
पराद्धं, त्वं मम विपरीतं वर्त्मनि तिष्ठसि तन्मया न ज्ञातं, किन्त्वधुना
३५ यदि त्वम् असन्तुष्टो भवेस्तर्ह्यहं परावृत्य यामि। तदा परमेश्वरस्य
दूतो बिलियमं बभाषे, त्वमेतैः साकं यातुं शक्नोषि, किन्त्वहं यां वाचं
तुभ्यं कथयिष्यामि त्वं तामेव कथयिष्यसि। ततो बिलियमो बालाकस्या-
ध्यक्षैः साकं जगाम।
३६ पश्चाद् बालाको बिलियमस्यागमनवार्त्तां श्रुत्वा देशस्य सीमायाः
प्रान्तस्थिते ऽर्णानीयप्रदेशस्थे मोयाबीयनगरे तं साक्षात् कर्त्तुं गतवान्।
३७ तदा बालाको बिलियमं गदितवान्, अहं त्वाम् आह्वातुम् अतीव
यत्नेन किं लोकान् न प्रेषितवान्? तस्मात् त्वं मम समीपं कुतो नागतोसि?
३८ त्वां सम्मानार्हं कर्त्तुं किं मया न शक्यते? ततो बिलियमो बालाकं
प्रत्यवादीत् पश्याधुनापि तव समीपम् आगतेन मया किं किमपि वक्तुं
३९ शक्यते? ईश्वरो मदास्ये यां वाचं दास्यति सैव मया वक्तव्या। ततो
४० बिलियमो बालाकेन समं गत्वा किरियोत्-हूषोतम् उपतस्थे। बालाको
गोमेषान् छेदयित्वा बिलियमस्य तत्सङ्गिनाम् अध्यक्षाणाञ्च समीपं
प्रेषयामास।

---

२३ त्रयोविंशोऽध्यायः।

१ बालाकस्य बलिदानं बिलियमस्य प्रथमा कथा १४ अन्यस्थाने बलिदानं बिलियमस्य द्वितीया कथा २५ बालाकस्यासन्तोषः २७ अन्यस्थानं गत्वा तस्य बलिदानञ्च।

१ प्रत्यूषे बालाको बिलियमं गृहीत्वा लोकानां परिसीमां दर्शयितुं तं
बाल उच्चस्थानम् आरोहयाञ्चकार तदा बिलियमो बालाकं जगाद
त्वम् अत्र स्थाने मत्कृते सप्त वेदी निर्म्मापय, सप्त गोवत्सान् सप्त मेषां-

आसादय। ततो वालाको विलियमस्य वाक्यानुसारात् तथैव चकार, २
तदा वालाकविलियमावेकैकस्यां वेद्यां एकैकं गोवत्सं एकैकं मेषम्
उत्सृष्टवन्तौ। ततो विलियमो वालाकं गदितवान् त्वं निजहोमस्य ३
सन्निधौ तिष्ठ, अहं यामि चेत् परमेश्वरो मां साक्षात् करिष्यति,
स मां यद् ज्ञापयिष्यति तदहं तुभ्यं कथयिष्यामि। ततः स उच्चस्थानं
गतः। तदा ईश्वरेण विलियमे साक्षात्कृते स तं बभाषे, अहं सप्त ४
वेदीर्निर्म्मितवान् एकैकस्यां वेद्याम् एकैकं गोवत्सं एकैकं मेषञ्च
समुत्सृष्टवान्। तदा परमेश्वरो विलियमस्यास्ये वाचं दत्त्वा तस्मै ५
कथितवान्, त्वं वालाकस्य समीपं परावृत्य गत्वा तमिमां वाचं वद। ततः ६
स तत्समीपं परावृत्य गतवान् तदा वालाको मोयावीया अध्यक्षाश्च
सर्व्वे होमस्य सन्निधौ दण्डायमाना आसन्। ततो विलियमो वाणीम् ७
आरभ्य कथयामास।

आनयन् मामरामाद्रि प्राचीस्थगिरिवर्त्तिनः।
मोयावीयन्टपो बालाक् निगद्य वचनन्त्विदं।
'मदर्थं त्वं समागच्छ शापं देहि च याकुवे।
एस्रीलायेलवंशजेभ्यो ऽभिशापं परिदेहि च।'
नाशपदीश्वरो यन्तु शप्स्ये स कथं मया। ८
न शप्तो यः परेशेन शप्स्यते स कथं मया।
तमहं परिपश्यामि शिखरात् पर्व्वतस्य हि। ९
शिलोच्चयान्मया तस्य दर्शनं परिलभ्यते।
पश्य लोकसमूहोयम् स्वातन्त्र्येण निवत्स्यति।
अन्यजातीयलोकानां मध्ये न गणयिष्यते।
याकुवो हि रजःसङ्ख्यां कर्त्तुं कः पारयिष्यति। १०
इस्रायेलश्चतुर्थांशमेकं को गणयिष्यति।
धार्म्मिकस्य यथा मृत्युस्तथा मृत्युर्भवेन्मम।
यादृशी चरमावस्था तस्यास्तु तादृशी मम॥

ततो वालाको विलियमाय कथितवान् त्वया मां प्रति किमिदं कृतं? ११
मम रिपुगणं शप्तुं त्वं मयानीतः, किन्तु पश्य त्वं तान् सर्व्वथाशिषं
भाषितवान्। ततः स प्रतिजगाद, परमेश्वरो ममास्ये यां वाचं दत्तवान् १२
मनोनिधाय तामेव वदितुं किं मम नोचितं? वालाको गदितवान् १३
अहं निवेदयामि, त्वं यस्मात् स्थानात् तान् द्रष्टुं प्राप्स्यसि, किन्तु

तेषां सर्व्वं द्रष्टुं न प्राप्य प्रान्तभागमात्रं द्रष्टुं प्राप्स्यसि तादृशम् अन्य-
स्थानं मया सहागत्य तत्र स्थित्वा मत्कृते तान् शपस्व।
१४ ततो वालाकस्तं पिस्गागिरेः पृष्ठस्थितं प्रहरिक्षेत्रं नीत्वा तत्र
सप्त वेदी निर्म्ममे, एकैकवेद्याम् एकैकं गोवत्सं एकैकं मेषञ्च समुत्ससर्ज।
१५ स वालाकं गदितवान् अहं यावत् तत्र स्थाने ईश्वरं साक्षात् करोमि
१६ तावत् त्वमत्र स्वहोमस्थाने तिष्ठ। पश्चात् परमेश्वरो विलियमं साक्षात्-
कृत्य तदास्ये वाचं दत्त्वा तमवादीत् त्वं वालाकसमीपं पुनर्गत्वा वाचमेतां
१७ ब्रूहि। ततः स तस्य समीपम् उपस्थितवान् तदा वालाको मोया-
बीयाधिपतिभिः सार्कं स्वीयहोमस्य समीपे स्थितवान्, तदा वालाकस्तं
१८ पप्रच्छ परमेश्वरः किमुक्तवान्? ततो विलियमो वाणीम् आरभ्य जगाद,

हे वालाक् त्वं समुत्थाय श्रवणं कुरु साम्प्रतं।
सिप्पोरस्तनय त्वं मे वाक्ये मनो निधेहि च।
१९ न भवेदीश्वरस्तुल्यो मिथ्याभाषिनरस्य हि।
पश्चात्तापिमनुष्यस्य सन्ततेः सदृशो नहि।
उक्त्वा किं नहि कर्त्ता स प्रोच्य साधयिता नहि।
२० पश्याहमाशिषं दातुं निदेशं परिलब्धवान्।
सोप्याशिषं ददौ तस्यान्यथा कर्त्तुं क्षमे नहि।
२१ नो पर्य्यदृश्यते तेन किल्विषं याकुबोऽन्वये।
इस्रायेलन्वये नैव दृश्यते दण्डनीयता।
आस्ते तेषां सहायो हि प्रभुस्तेषां परेश्वरः।
जयध्वनिश्च नृपतेस्तेषां मध्ये हि वर्त्तते।
२२ ईश्वरो मिसरो राष्ट्रात् तान् वहिष्कृत्य चानयत्।
बलवन्तो हि ते सर्व्वे मनुजा गण्डका इव।
२३ अतो हि याकुबो वंशे मायाशक्ति र्न विद्यते।
इस्रायेलीयवंशेन मन्त्रं न व्यवक्रियते।
ईशेन कीदृशं कर्म्म कृतं पश्यत वागिदं।
तल्लक्षणाद् उच्यते याकुबिस्रायेलन्वयावधि।
२४ उत्थास्यति मृगेन्द्रीव पश्चायं नरसञ्चयः।
गात्रोत्थानं करिष्यन्ति मृगेन्द्रा इव ते नराः।
यावदाखेटलब्धन्तु नहि तैः परिभुज्यते।
पीयतेसृं हतानां न तावन्नहि शयिष्यते॥

ततो वालाको विलियमं गदितवान् त्वं तेभ्यः शापं मा दा आशिषञ्च २५
मा दाः। ततो विलियम् उक्तवान् परमेश्वरो मह्यं यत् कथयिष्यति तत् २६
सर्व्वम् अहं कथयिष्यामि इदं किं तुभ्यं नाकथयं?

तथापि वालाको विलियमं बभाषे विनीय कथयाम्यहम्, आगच्छ २७
त्वामहं स्थानान्तरं नयामि तत्र स्थाने चेत् मत्कृते तान् शप्तुम्
ईश्वरस्य सन्तोषो जायेत। ततो वालाको यिशीमोनाभिमुखं पियोर- २८
शृङ्गं विलियमं नीतवान्। तत्र विलियमो वालाकम् उक्तवान् अत्र २९
स्थाने सप्त वेदी निर्म्माहि, मत्कृते सप्त गोवत्सान् सप्त मेषान् आसा-
दय। तदा वालाको विलियमस्य वाक्यानुसारात् प्रतिवेद्येकैकं गोवत्सं ३०
एकैकं मेषम् उत्सृष्टवान्।

---

२४ चतुर्विंशोऽध्यायः।

१ इस्रायेलीयवंशमधि विलियमो भविष्यद्वाक्यं १० तत्कारणात् तस्मै वालाकस्य क्रोधनं
१५ याकूवीयं तारादिकमधि विलियमस्य भविष्यद्वाक्यं।

अनन्तरम् इस्रायेलीयान्वयायाशिषं दातुं परमेश्वरस्य परमा १
तुष्टिरिति विज्ञाय विलियमः पूर्व्ववत् मायाफलम् अन्वेष्टुं न प्रवर्त्त-
मानः प्रान्तराभिमुखो बभुव। ततो विलियमो निजनेत्रे उन्मील्य निखि- २
लान्वयैः समं वासिन इस्रायेल्लोकान् ददर्श, अपरं ईश्वरीयात्मा तम्
अधिष्ठितवान्। तदानीं स वाचम् आरभ्य जगाद, ३

वियोरतनयो वाचं विलियम् परिभाषते।
यस्य प्रोन्मीलिते नेत्रे आचष्टे स नरो गिरं।
वचांसि पारमेशानि निशामयति यः पुमान्। ४
सर्व्वशक्तिविशिष्टस्य दर्शनं लभते च यः।
प्रोन्मीलितदृशा तेनाभिभूतेनाभिधीयते।
याकूवन्वय कीदृक्षा निवेशाः सुषमास्तव। ५
इस्रायेल्वंश कीदृक्षा आवासास्ते मनोरमाः।
पृथुलोपत्यकावत् ते तटस्थोद्यानसन्निभाः। ६
परेशरोपितानां ते ऽगुरूणां शाखिनां समाः।
शाखिनाञ्चैरसाख्यानां कीलालतटवर्त्तिनां।
तदीयकलसादेव कीलालमुच्चलिष्यति। ७

सेच्यन्ते हि तदीयानि वीजानि बहुभि र्जलैः।
तद्राजउन्नतोऽगागात् तद्राज्यञ्च समेधिता।
८ मिसर्देशात् परेशस्तं वहिष्कृत्य समानयत्।
खड्गीव स बली शत्रून् ग्रसिष्यत्यन्यजातिजान्।
चूरिष्यते तदस्थीनि भेत्स्यन्ते तच्छरैश्च ते।
९ शयिष्यते नतो भूत्वा मृगेन्द्रीव मृगेन्द्रवत्।
उत्थापयिष्यते तत्र स केन मानुषेण वै।
यस्तस्मा आशिषं दाता तेनाशीः परिलप्स्यते।
येन स शप्स्यते तेन शापः समभिलप्स्यते॥

१० तदानीं विलियमाय वालाकस्य क्रोधे प्रज्वलिते स निजकरेण करम्
आजघान। अपरं वालाको विलियमम् अभाषिष्ट, रिपून् शप्तुं मया
११ त्वमानायिथाः परन्तु त्वं वारत्रयं सर्व्वथा तेभ्य आशिषं अददाः। इदानीं
त्वं स्वस्थानं पलायस्व, मया त्वं भृशं संमानिष्यसे इति चिन्तितवानहं,
१२ परन्तु पश्य परमेश्वरः सम्मानलाभात् त्वां न्यवारयत्। ततो विलियमो
वालाकम् अवोचत् वालाकेन हेमरजताभ्यां परिपूर्णे निजभाण्डागारे
मह्यं प्रदत्तेपि निजेच्छया भद्रमभद्रं वा कर्त्तुमहं परमेश्वरीयाज्ञां लङ्घितुं
१३ न पारये; परमेश्वरो यद् वदिष्यति तदेवाहं करिष्यामीति वचो मया
१४ किं त्वत्प्रेषितदूतेभ्योऽपि नावादि? इदानीं पश्याहं निजजातीयानां
सन्निधिं यामि, एहि लोका इमे शेषयुगे त्वदीयलोकान् प्रति यत् करि-
ष्यन्ति तत् त्वां विज्ञापयामि।

१५ अनन्तरं स वाणीम् आरभ्य कथयामास।
वियोरस्यात्मजो वाणीं विलियम् प्रब्रवीति हि।
दृष्टी प्रोन्मीलिते यस्य तेन पुंसा निगद्यते।
१६ य ईश्वरीयवाक्यानि निशामयति मानवः।
सर्व्वशक्तिविशिष्टस्य दर्शनं लभते च यः।
प्रोन्मीलितदृष्ट्या तेनाभिभूतेनाभिधीयते।
१७ मया स ईक्ष्यते किन्तु सोऽधुना नोपतिष्ठति।
मया लभ्या हि तद्दृष्टिः परन्तु निकषा न हि।
तारका याकुबो मध्याद् उदयं प्रकरिष्यति।
इस्रायेलन्वयादेकः प्रोत्पद्य राजदण्डकः।
मोयाबीयस्य पार्श्वस्य समाघातं करिष्यति।

विरोधकारिणां वंशं सएव संहरिष्यति।
इदानीम् तेषां मनुष्याणाम् अधिकारो भविष्यति। १८
सेयीराख्यो रिपुर्देशस्तैरेवाधिकरिष्यते।
महावीरइवाचारीस्रायेल्वंशो भविष्यति।
याकूवतः समुत्पन्नः शासनं प्रकरिष्यति। १९
तेन व्यापादयिष्यन्ते ऽवशिष्टपौरमानुषाः॥

अनन्तरं स अमालेके दृष्टिं विधाय वाणीम् आरभ्य कथयामास, २०
अमालेगयमन्यासां जातीनामग्रगण्यकः।
किन्तु शेषे विनंक्ष्यन्ति तदीयनिखिलानि हि॥

अनन्तरं स केनीयान् प्रति दृष्टिं विधाय वाचम् आरभ्य कथयामास, २१
निवासस्ते महागाढो नीडमस्ति शिलोच्चये।
तथापि तावकं नीडं विनाशमुपयास्यति। २२
वह्वदूरमश्रूर् युष्मान् वन्दीकृत्य हि नेष्यति॥

अनन्तरं स पुनर्वाणीम् आरभ्य कथयामास, २३
हा हा यदा परेशेन कर्म्मेदं प्रकरिष्यते।
तदानीं केन लोकेन जीवनं धारयिष्यते।
कित्तीमीयप्रतीराद्धि पोता आगत्य भूरिशः। २४
क्लेशं दास्यन्त्यश्रूराय दुःखानि त्वेवराय वै।
किन्तु तैरपि शेषे हि विनाश उपयास्यते॥

अनन्तरं विलियम उत्थाय स्वस्थानं जग्मिवान्, अपरं वालाकोऽपि २५
निजवर्त्मना जगन्वान्।

---

२५ पञ्चविंशोऽध्यायः।

१ इस्रायेलीयलोकानां वाल्पियोरदेवार्चनं ६ सिमेः कस्व्याश्च बधः १० तद्वधकारणात्पीनिहसस्य पुरस्कारः १६ मिदियनलोकान् दुःखयितुम् ईश्वरीयाज्ञा।

अनन्तरम् इस्रायेलीयान्वये शिटीमम् अध्युषितवति लोका मोयावी- १
याभिर्योषिद्भिः समं व्यभिचारे कर्म्मणि प्रवर्त्तिरे। यतस्तासां देवप्रसा- २
दभोजनाय ताभिर्निमन्त्रिताः लोका भुक्त्वा तासां देवान् प्रणेमुः।
इत्थं ते वाल्पियोर्देवासक्ता भवितुं आरेभिरे, तस्माद् इस्रायेलन्व- ३
याय परमेश्वरस्य कोपः प्रजज्वाल। ततः परमेश्वरो मूससम् अवादीत्, ४
त्वं लोकानां अधिपनिवहं धृत्वा दिनकरसम्मुखीकृत्य तान् उल्लम्बय,

५ तत इस्रायेलन्वयात् परमेश्वरस्य प्रचण्डः कोपो निवर्त्तिष्यते। तदानीं
मूसा इस्रायेलन्वयस्याधिपनिवहं जगाद, युष्माकम् एकैकजनेन बाल्-
पियोरदेवासक्ताः स्वस्वलोका हन्यन्तां।
६ अनन्तरं समाजावासस्य समीपे रुदत इस्रायेल्वंशीयस्य निखिल-
समाजस्य मूससश्च गोचरे इस्रायेलन्वयस्य जन एको निजभ्रातृनि-
७ वहस्य समीपं मिदियनीयां नारीमेकां आनिनाय। ततो हारोण-
याजकस्य पौत्र इलीयासरस्य पुत्रः पीनिहसस्तद् विलोक्य समाजमध्याद्
८ उत्थाय हस्ते शक्तिं गृहीतवान्। स इस्रायेल्वंशीयस्य तज्जनस्य पश्चात्
कोष्ठं प्रविश्य तयो र्द्वयोरर्थाद् इस्रायेलीयपुरुषस्य तस्या योषितश्च
गुह्यस्थानं विधन् विभेद, तत इस्रायेल्वंशात् सा मारी निवृत्ते।
९ तया मार्य्या ये मृता लोकास्ते चतुर्विंशतिसहस्राणि।
१० पश्चात् परमेश्वरो मूससं गदितवान् हारोणयाजकस्य पौत्र इलिया-
११ सरस्य पुत्रः पीनिहसो मत्कृते लोकानां मध्ये क्रोधेन प्रज्वलितः सन्
इस्रायेल्वंशात् मम क्रोधं निवर्त्तयामास, तेन मया क्रोधाद् इस्रायेल्-
१२ वंशीयलोका न विनाशिताः। तस्मात् त्वं कथय, पश्याहं तस्मै स्वीयशा-
१३ न्तिकरं नियमम् अदां। तेन याजकत्वाधिकारो नित्यं तस्य तद्वंशपरम्प-
रायाश्च स्थास्यति, यतः स स्वेश्वरस्य कृते क्रोधेन प्रज्वलितवान् इस्रा-
१४ येल्वंशस्य कृते प्रायश्चित्तं चकार च। इस्रायेल्वंशस्य यः पुमान्
तया मिदियनीयया योषिता समम् अहन्यत स शिमियोनीयानां पितृ-
१५ वंशाधिपतिः सालोः पुत्रस्तन्नाम सिम्रिरासीत्। हतायास्तस्या मिदि-
यनीयाया योषित आख्या कस्वी, सा सूरस्य कन्या, स सूरो मिदियनीयः
प्रधानवंशाधिप आसीत्।
१६ परमेश्वरो मूससमवादीत् त्वं मिदियनीयलोकान् क्लिश्नीहि ताडय
१८ च। यतः पियोरदेवविषयकेन छलेन तत्पियोरनिमित्तके मारीदिवसे
तेषाम् आत्मीया या कस्व्याख्या मिदियनीया राजतनया हता तद्वि-
षयकेन च छलेन ते युष्मान् छलयित्वा क्लिष्टवन्तः।

२६ षड्विंशोऽध्यायः।

१ सर्व्वजनानां संख्यातुम् ईश्वराज्ञा ५ इस्रायेलः सर्व्ववंशस्य संख्या ५२ भूमिविभाग-कथनं ५७ लेवीयवंशसंख्या ६७ मिसरो निर्गतानां मध्ये कालेबं यिहोशूयञ्च विना नान्येषां गणितत्वञ्च।

तन्मारीतः परं परमेश्वरो मूससं हारोणस्य सुतं याजकम् इलिया- १
सरञ्च जगाद, युवां इस्रायेलीयसमाजस्यैकैकपितृवंशानुसारतो विंशति- २
वर्षाधिकवयस्कान् अर्थाद् इस्रायेलीयसैन्यश्रेण्यन्तर्गतान् सर्व्वान् गण-
यतं। ततो मूससं प्रति परमेश्वरीयादेशात् मूसा याजक इलियासरञ्च ३
यिरीहोः समीपस्थयर्द्दनान्तिके मोयाबीयप्रान्तरे तान् बभाषाते, विं-
शतिवर्षाधिकवयस्काः सर्व्वे गण्यन्तां। मिसर्देशान्निर्गता इस्रायेलीय- ४
वंशा इम आसन्।

इस्रायेलो ज्येष्ठः सुतो रूबेनः, तस्य रूबेनस्य सुतो हनोकः, ततो ५
हनोकाद् हनोकीयवंशः, पल्लूतः पल्लूयीयवंशो भवति, हिष्रोणाद् ६
हिष्रोणीयवंशो भवति, कर्म्मेः कर्म्मीयवंशो भवति। एते रूबेनीय- ७
वंशाः, गणितास्ते त्रिंशदधिकसप्तशताधिकत्रिचत्वारिंशत् सहस्राणि।
पल्लूसुत इलीयाबः। इलीयाबस्य सुता निमूयेलो ऽदायनो ऽवीरामश्च, ८
कोरहस्य समाजो यदा परमेश्वरस्य प्रतिकूलं विवादम् अकरोत्, तदा ९
समाजे विख्यातौ यौ दाथनावीरामौ मूसोहारोणाभ्यां सार्कं व्यवदतां
तावेतावास्तां। तदा धरास्यं व्यादाय तौ कोरहञ्च जग्रास, तस्मिन् निवहे १०
नष्टे वह्निः सार्द्धशतद्वयजनान् ददाह ते दृष्टान्तविषया बभूवुः। किन्तु ११
कोरहस्य सन्ताना न मम्रुः।

स्ववंशानुसारात् शिमियोनीयवंशाः, निमूयेलात् निमूयेलीयवंशः, १२
यामीनाद् यामीनीयवंशः, याखीनाद् याखीनीयवंशः, सेरहात् सेरही- १३
यवंशः, शौलात् शौलीयवंशश्च। अत्र शिमियोनीयवंशेषु शतद्वयाधिकद्वा- १४
विंशतिसहस्राणि जना आसन्।

स्ववंशानुसाराद् गादीयवंशाः, सिफोनात् सिफोनीयवंशः, हग्गे १५
र्हग्गीयवंशः, शूनेः शूनीयवंशः, ओष्णेर् ओष्णीयवंशः, एरेर् एरीयवंशः, १६
अरोदेर् अरोदीयवंशः, अरेलेर् अरेलीयवंशश्च। एतेषु गादीयवंशेषु १८
गणितेषु तत्र पञ्चशताधिकचत्वारिंशत् सहस्राणि लोका आसन्।

यिहूदाः सुताव् एर ओननश्च, एतावेरोननौ किनानदेशे मृतौ। १९
स्वस्वयंशानुसाराद् यिहूदा एते वंशाः, शेलातः शेलायीयवंशः, पेरसात् २०
पेरसीयवंशः, सेरहात् सेरहीयवंशश्च। पेरसीयवंशा एते, हिष्रोणाद् २१
हिष्रोणीयवंशः, हामूलात् हामूलीयवंशश्च। एतेषु यिहूदावंशेषु गणितेषु २२
तत्र संख्यया पञ्चशताधिकषट्सप्ततिसहस्राणि लोका आसन्।

स्ववंशानुसाराद् इषाखरीयवंशाः, तोलयात् तोलयीयवंशः, पूयात् २३

२४ पूयीयवंशः, याशूबाद् याशूबीयवंशः, शिम्रोणात् शिम्रोणीयवंशश्चाभूत् ।
२५ एतेष्विषाखरीयवंशेषु गणितेषु तत्र संख्यया शतत्रयाधिकचतुःषष्टिसहस्राणि लोका आसन् ।

२६ स्ववंशानुसारात् सिबूलूनीयवंशाः, सेरदात् सेरदीयवंशः, एलोनाद्
२७ एलोनीयवंशः, यह्लेलाद् यह्लेलीयवंशश्च । एतेषु सिबूलूनीयवंशेषु गणितेषु तत्र संख्यया पञ्चशताधिकषष्टिसहस्राणि लोका आसन् ।

२८ स्ववंशानुसाराद् यूषफः पुत्रौ मिनशीफ्रयिमौ । एते मिनशेर्वंशाः,
२९ माखीराद् माखीरीयवंशः, तस्य माखीरस्य सुतो गिलियदः, तस्माद्
३० गिलियदात् गिलियदीयवंशः । तस्य गिलियदस्य सन्ताना एते,
३१ ईयेषराद् ईयेषरीयवंशः, हेलकाद् हेलकीयवंशः, अस्रीयेलाद् अस्री-
३२ येलीयवंशः, शेखमात् शेखमीयवंशः, शिमिदातः शिमिदायीयवंशः,
३३ हेफराद् हेफरीयवंशश्च । तद्धेफरसुतस्य सिलफादस्य सुतो नासीत् केवलं कन्या आसन्, तासां सिलफादकन्यानां नामानि मह्ला नोया
३४ हग्ला मिल्का तिर्सा च । एतेषु मिनशेर्वंशेषु गणितेषु तत्र सप्तशताधिकद्विपञ्चाशत् सहस्राणि लोका आसन् ।

३५ स्ववंशानुसाराद् इफ्रयिमस्यैते वंशाः । शूथलहात् शूथलहीयवंशः,
३६ बेखराद् बेखरीयवंशः, तहनात् तहनीयवंशश्च । एते शूथलहीयवंशाः,
३७ एरणाद् एरणीयवंशाः । एतेष्विफ्रयिमीयवंशेषु गणितेषु तत्र संख्यया पञ्चशताधिकद्वात्रिंशत् सहस्राणि लोका आसन् । वंशानुसाराद् इमे यूषफः सन्तानाः ।

३८ स्ववंशानुसाराद् बिन्यामीनीयवंशाः, बेलातो बेलायीयवंशः, अस्-
३९ बेलाद् अस्बेलीयवंशः, अहीरामाद् अहीरामीयवंशः, शूफमात् शूफ-
४० मीयवंशः, हूफमात् हूफमीयवंशश्च । बेलाः सुताव् अर्दनामानौ, अर्दाद्
४१ अर्दीयवंशः, नामानात् नामानीयवंशः । एतेषु बीन्यामीनीयवंशेषु स्ववंशानुसाराद् गणितेषु तत्र संख्यया षट्शताधिकपञ्चचत्वारिंशत् सहस्राणि लोका आसन् ।

४२ स्ववंशानुसाराद् एते दानवंशाः । शूहमात् शूहमीयवंशाः, इमे
४३ स्ववंशानुसाराद् दानवंशाः । एतेषु शूहमीयवंशेषु गणितेषु तत्र संख्यया चतुःशताधिकचतुःषष्टिसहस्राणि लोका आसन् ।

४४ स्ववंशानुसाराद् एत आशेरीयवंशाः, यिम्नाद् यिम्नीयवंशः, यिस्वे
४५ यिस्वीयवंशः, बिरियाद् बिरियीयवंशश्च । बिरियस्य सन्तानानां मध्ये

हेवराद् हेवरीयवंशः, मल्कीयेलाद् मल्कीयेलीयवंशः। तदाशेरस्य ४६
कन्याया नाम सारहा। एतेष्वाशेरीयवंशेषु गणितेषु संख्यया तत्र ४७
चतुःशताधिकत्रिपञ्चाशत् सहस्राणि लोका आसन्।

स्वस्ववंशानुसारात् नप्तालीयवंशाः, यहसीयेलाद् यहसीयेलीयवंशः, ४८
गूने गूनीयवंशः, येत्सराद् येत्सरीयवंशः, शिल्लेमात् शिल्लेमीयवंशश्च। ४९
स्वस्ववंशानुसाराद् एतेषु नप्तालीयवंशेषु गणितेषु तत्र संख्यया चतुःश- ५०
ताधिकपञ्चचत्वारिंशत् सहस्राणि जना आसन्।

इस्रायेलीयवंशमध्ये गणिता एते लोकास्त्रिंशदधिकसप्तशताधिक- ५१
सहस्राधिकषट्लक्षसंख्यकाः।

परमेश्वरो मूससं जगाद नामसंख्यानुसाराद् अधिकारायैतेषां मध्ये ५२
देशो विभज्यते। फलतो यत्र वंशेऽधिका लोकास्तेभ्योऽधिकभूम्यधिकारं ५३
दास्यसि, यत्र वंशेऽल्पलोकास्तेभ्यो ऽल्पभूम्यधिकारं दास्यसि, यस्मिन् ५४
निवहे यावन्तो लोका गण्यन्ते तस्मै तावद्भूम्यधिकारं दास्यसि।
देशो गुटिकापातेन विभक्ते ते स्वस्वपितृवंशनामानुसाराद् अधिकारं ५५
प्राप्स्यन्ति। वंशोऽधिको न्यूनो वा भवतु, अधिकरिष्यमाणा भूमिर्गुटिका- ५६
पातेन विभज्यते।

स्वस्ववंशानुसारात् लेवीयवंशमध्य एते गणिताः, गेर्शोनाद् गेर्शो- ५७
नीयवंशः, किहातात् किहातीयवंशः, मिरारे मिरारीयवंशश्च। एते ५८
लेवीयवंशाः, लिब्नीयवंशो हिब्रोणीयवंशो महलीयवंशो मूशीयवंशः
कोरहीयवंशश्च। किहातस्य सुतो ऽम्रामः, मिस्रदेशे जाता लेवेर् ५९
औरसी कन्या योखेवद्नामा अम्रामस्य भार्य्यासीत्, सा अम्रामस्य सुतौ
हारोणमूससौ तयोर्भगिनीं मरियमञ्च प्रसुसुवे। हारोणस्य औरस- ६०
सुता नादबो ऽबीहूर् इलियासर इथामरश्च जज्ञिरे। पश्चात् नादबो ६१
ऽबीहूश्च परमेश्वरस्य साक्षात् साधारणं वह्निं निवेद्य प्राणान् तत्यजतुः।
एषां मध्ये मासैकाधिकवयस्काः पुरुषसन्ताना गणितास्त्रयोविंशसह- ६२
स्राणि जना आसन्, यत इस्रायेल्वंशमध्ये तेभ्यः कुत्राप्यधिकारस्याद-
त्तत्वात् त इस्रायेल्वंशमध्ये नागण्यन्त।

यिरीहोः समीपस्थयर्द्दनान्तिके मोयाबीयप्रान्तरे मूससेलियासर- ६३
याजकेन चेस्रायेल्वंशस्य गणनासमये ते सर्व्वे लोका गणिताः। किन्तु ६४
सीनयप्रान्तरे मूससा हारोणयाजकेन चेस्रायेल्वंशस्य गणनासमये ये
ऽगण्यन्त तेषामेकोपि नैतेषां मध्य आसीत्। यतः परमेश्वरेण तानध्यवादि ६५

ते ऽवश्यम् अत्र प्रान्तरे मरिष्यन्ति, यिफुन्नेः सुतं कालेबं नूनसुतं
यिहोशूयञ्च विना तेषामवशिष्ट एकोपि न स्थास्यति ।

२७ सप्तविंशोऽध्यायः ।

१ सिलफादस्य कन्यानां कथनं ६ भूम्यधिकारव्यवस्था १२ मूसं प्रतीश्वराज्ञा १५ ईश्वराय मूसानिवेदनं १८ मूसामरणात् परं तत्कर्म्म कर्त्तुं यिहोशूयस्य निरूपणञ्च ।

१ ततो यूषफसुतस्य मिनशिवंशमध्ये मिनशेर्वृद्धप्रपौत्त्रस्य माखीर-
प्रपौत्त्रस्य गिलियदपौत्त्रस्य हेफरपुत्त्रस्य सिलफादस्य कन्या अर्थात्
२ महला-नोया-हगला-मिल्का-तिर्सा-नामानः कन्याः समाजावासस्य
समीपम् आगत्य मूसस इलियासरयाजकस्याधिपानां सर्व्वसमाजी-
३ यानाञ्च सम्मुखे तिष्ठन्त्य एतां वाचं कथयामासुः । अस्मत्पिता प्रान्तरे
मृतः, स परमेश्वरस्य प्रतिकूलं विरोधिनः कोरहीयनिवहस्य मध्ये
४ नासीत् तथापि स्वपापेन मृतः, स अपुत्त्रक आसीत् । किन्तु अस्मत्पितुः
पुत्त्रो नास्ति तस्मात् तदीयवंशात् तस्य नाम कुतो लोप्स्यते? अस्माकं
५ पितृवंशीयभ्रातॄणां मध्ये ऽस्मभ्यम् अधिकारं देहि । तदा मूसाः परमे-
श्वरस्य साक्षात् तासां विवादम् उपस्थापितवान् ।

६ ततो मूससं परमेश्वर उक्तवान् सिलफादस्य कन्याभिर्यद् उच्यते तद्
७ भद्रं । त्वं तासां पितृवंशीयानां मध्ये ऽवश्यं ताभ्यो भूम्यधिकारं
८ दास्यसि, तासां पितुर्भूम्यधिकारं ता अधिकारयिष्यसि । त्वम् इस्रा-
येल्वंशाय कथय कस्मिंश्चिद् अपुत्त्रके मानुषे मृते यूयं तस्य कन्यायै
९ तदधिकारं दास्यथ । यदि तस्य कन्यापि न तिष्ठति तर्हि तस्य भ्रातृभ्य-
१० स्तस्याधिकारं दास्यथ । यदि तस्य भ्रातरोऽपि न तिष्ठन्ति तर्हि तस्य
११ पितृव्येभ्यस्तस्याधिकारं दास्यथ । यदि पितृव्या अपि न तिष्ठन्ति तर्हि
तस्य वंशीयान्तिकज्ञातये तदधिकारं दास्यथ, स तमधिकरिष्यति ।
मूससं प्रति परमेश्वराज्ञानुसाराद् इस्रायेल्वंशं प्रत्येष विचारविधि-
र्भविष्यति ।

१२ परमेश्वरो मूससम् उक्तवान् त्वम् एतम् अवारीमं गिरिम् आरुह्य
१३ इस्रायेल्वंशेभ्यो मया दत्तं देशं निरीक्षस्व, तस्मिन् निरीक्षिते सति यथा
तव भ्राता हारोणः संगृहीतस्तथा त्वमपि स्वपितृलोकानां समीपे संग्र-
१४ हीष्यसे । यतः सीनप्रान्तरे समाजविवादे युवां तोयसन्निधावर्थात्

सीनप्रान्तरस्य कादेशस्थमिरीवातोयस्य समीपे समाजस्य गोचरे माम्
अनादृत्य मम निदेशं लंघितवन्तौ।

ततो मूसाः परमेश्वरम् उक्तवान् हे सर्व्वशरीरस्थानाम् आत्मनां १५
प्रभो परमेश्वर, परमेश्वरस्य समाजो यथा रक्षकहीनमेषपालवत् न १६
भवेत् तदर्थं यस्तेषां वहिर्गमनकाले ऽभ्यन्तरमागमनकाले च तेषाम् १७
अग्रगामी सन् तान् वहिश्चाभ्यन्तरञ्च गमयेत्, तादृशं मानुषमेकं
समाजोपरि नियोजय।

ततः परमेश्वरो मूससम् अवदत् नूनपुत्रस्य यिहोशूयस्यान्तर १८
आत्मास्ते, त्वं तमादाय तस्य गात्रे स्वकरम् अर्पय, इलियासरयाजकस्य १९
सर्व्वसमाजस्य च सम्मुखे तं संस्थाप्य तेषां समक्षं तमाज्ञापय। त्वं २०
तं स्वसम्मानभागिनं कुरु तत इस्रायेल्वंशस्य सर्व्वसमाजस्तदाज्ञाग्राही
भविष्यति। स इलियासरयाजकस्य सम्मुखे स्थास्यति, इलियासरस्त- २१
त्कृत ऊरीमद्वारा परमेश्वरं प्रक्ष्यति, स तेन सहितास्चेस्रायेल्वंशाः सर्व्वे
समाजीयाश्च तदाज्ञया वहि र्यास्यन्ति तदाज्ञयाभ्यन्तरम् आगमिष्यन्ति
च। ततो मूसाः परमेश्वराज्ञया सर्व्वं कर्म्म कृतवान् स यिहोशूयमादाय २२
इलियासरयाजकस्य सम्मुखे सर्व्वसमाजस्य च सम्मुखे तं संस्थापितवान्।
मूससा परमेश्वरो यथाज्ञापयत् तथा तस्य गात्रे स्वकरम् अर्पयित्वा २३
स आदिष्टः।

---

२८ अष्टाविंशोऽध्यायः।

१ होमार्थं परमेश्वराज्ञा ३ प्रातःकालसन्ध्याकालयो र्होमकथनं ९ विश्रामवारस्य होमकथनं ११ प्रतिपदो होमकथनं १६ निस्तारोत्सवस्य होमकथनं २६ पवित्रसभाकथनञ्च।

पश्चात् परमेश्वरो मूससं गदितवान् त्वम् इस्रायेल्वंशान् आज्ञापय १
तेभ्य इदं कथय, मम वह्निकृतसुगन्ध्युपहारार्थकं यद् भक्ष्यनैवेद्यं तद् २
यूयं निरूपितसमये माम् उद्दिश्य निवेदयितुं यतिष्यध्वे।

त्वं तेभ्य इदं कथय परमेश्वराय वह्निकृतोपहारार्थं युष्माभि र्यन्नि- ३
वेदयितव्यं तदिदं। प्रतिदिनं नित्यहोमार्थं एकवर्षीयौ द्वौ निर्दोषौ ४
मेषवत्सौ, तयोरेकः प्रातरन्यश्च सन्ध्यायाम् उत्सृज्यते। भक्ष्योपकरणार्थं ५
हिनचतुर्थांशपरिमितेनालोडिततैलेन मिश्रितम् ऐफादशमांशगोधूमचूर्णं
दास्यते। एष नित्यहोमबलिः सीनयगिरौ परमेश्वरोद्देश्यवह्निकृतसुगन्धु- ६

७ पहारार्थं निरूपितः। तस्य पेयोपकरणम् एकैकमेषवत्सार्थं हिनचतुर्थांशं
भविष्यति, स पेयोपकरणीयद्राक्षारसः परमेश्वराय पवित्रस्थाने ऽवता-
८ रिष्यते। द्वितीयो मेषवत्सः सन्ध्याकाल उत्सृक्ष्यते, प्रातरिव भक्ष्यपेयोपक-
रणाभ्यां समं सोऽपि परमेश्वराय वह्निकृतसुगन्ध्युपहारार्थम् उत्सृक्ष्यते।
९ विश्रामदिने एकहायनं निर्दोषं मेषवत्सद्वयं तैलपक्वं दशमांशद्वयं
१० गोधूमचूर्णोपकरणं पेयोपकरणञ्च निवेदयिष्यते। नित्यहोमं तत्पे-
योपकरणञ्च विना प्रतिविश्रामवारम् एष होमो भविष्यति।
११ मासस्यारम्भे यूयं परमेश्वराय होमार्थं द्वौ गोवत्सौ मेषमेकम् एक-
१२ वर्षीयनिर्दोषसप्तमेषवत्सान् उत्सृक्ष्यथ। गोवत्सैकेन समं तैलपक्वदश-
१३ मांशत्रयं, एकमेषेण समं तैलपक्वदशमांशद्वयं, एकैकेन मेषवत्सेन समं
तैलपक्वदशमांशैकञ्च गोधूमचूर्णोपकरणं भविष्यति, तेन स होमबलिः
१४ परमेश्वराय वह्निकृतसुगन्ध्युपहारो भविष्यति। गोवत्सैकार्थं हिनार्द्ध-
परिमितो मेषैकार्थं हिनतृतीयांशपरिमित एकमेषवत्सार्थं हिनचतु-
र्थांशपरिमितो द्राक्षारसः पेयोपकरणं भविष्यति। नित्यहोमं तत्पे-
१५ योपकरणञ्च विना वर्षस्य प्रतिमासं होमबलिरयं। परमेश्वरम् उद्दिश्य
पापप्रायश्चित्तबलिश्छागैकञ्च युष्माभि र्दातव्यः।
१६ प्रथममासस्य चतुर्दशदिने परमेश्वरस्य निस्तारोत्सवो भविष्यति।
१७ मासस्य पञ्चदशदिनात् सप्त दिनानि यावत् किण्वशून्यपूपभोजनोत्सवो
१८ भविष्यति। प्रथमदिने पवित्रसभा भविष्यति, तद्दिने यूयं किमपि विषय
१९ कर्म्म न करिष्यथ। किन्तु परमेश्वराय वह्निकृतसुगन्धिहोमबलिरूपेण दातुं
२० द्वौ गोवत्सौ मेषैक एकहायना निर्दोषाः सप्त मेषवत्साः, उपकरणार्थम्
२१ एकेन गोवत्सेन समं दशमांशत्रयं, मेषैकेन समं दशमांशद्वयं, सप्त मेष-
२२ वत्सानाम् एकैकेन वत्सेन समम् एकैको दशमांशस्तैलपक्वं गोधूमचूर्णं, तेषां
२३ प्रायश्चित्तार्थं प्रायश्चित्तबलिरेकश्छागश्च, एतानि सर्व्वाणि युष्माभिर्नित्य-
२४ होमस्य प्रातर्होमं विना निवेदयिष्यन्ते। एतद्विध्यनुसारात् सप्त दिना-
नि यावत् प्रत्यहं परमेश्वराय भक्ष्यरूपं वह्निकृतं सुगन्ध्युपहारं निवेद-
२५ यिष्यते, नित्यहोमं तत्पेयोपकरणञ्च विना तन्निवेदिष्यते। सप्तमेऽह्नि
युष्माकं पवित्रसभा भविष्यति तदा यूयं किमपि विषयकर्म्म न करिष्यथ।
२६ प्रथमफलानां दिने सप्तसप्ताहेभ्यः परं यदा यूयं परमेश्वराय नूतनं
भक्ष्यनैवेद्यम् आनेष्यथ तदा युष्माकं पवित्रा सभा भविष्यति तदा कि-
२७ मपि विषयकर्म्म न करिष्यथ। किन्तु परमेश्वराय सुगन्धिहोमार्थं द्वौ

गोवत्सौ मेषैक एकहायनाः सप्त मेषवत्साः, उपकरणार्थं गोवत्- २८
सैककृते दशमांशत्रयं, एकमेषकृते दशमांशद्वयं, सप्त मेषवत्सानाम् २९
एकैकवत्सकृते एकैकदशमांशस्तैलपक्वं गोधूमचूर्णं, युष्माकं प्रायश्चित्तार्थं ३०
छागैकश्च, एतानि सर्व्वाणि युष्माभि र्नित्यहोमं तदुपकरणञ्च विना निवे- ३१
दयिष्यन्ते, सर्व्वाण्येतानि निर्दोषाणि पेयोपकरणयुक्तानि च भविष्यन्ति।

---

२९ ऊनत्रिंशोऽध्यायः।

१ तूरीवादनकालस्य होमकथनं ७ पवित्रसभासमयस्य होमबलिदानादि १७ उटजोत्सवकालस्य होमबलिदानादि च।

सप्तममासस्य प्रथमदिने युष्माकं पवित्रसमिति र्भविष्यति तदा यूयं १
विषयकर्म्म मा करिष्यथ तद्दिनं युष्माकं तूरीवादनकालो भविष्यति।
तद्दिने परमेश्वराय सुगन्धिहोमबल्यर्थम् एकः पुंगोवत्स एको मेष एक- २
हायनाः सप्त निर्दोषा मेषवत्साः, उपकरणार्थम् एकगोवत्सकृते दश- ३
मांशत्रयं, एकमेषकृते दशमांशद्वयं, सप्तमेषवत्सानाम् एकैकमेषवत्स- ४
कृते एकैको दशमांशस्तैलपक्वं गोधूमचूर्णं, स्वेषां प्रायश्चित्तार्थं प्रायश्चित्त- ५
बलिश्छागैकश्च, एतानि सर्व्वाणि युष्माभि र्निवेदयिष्यन्ते। मासिकहोमं ६
तदीयभक्ष्योपकरणं दैवसिकहोमं तदीयभक्ष्योपकरणं तयो र्विध्यनुया-
यीणि पेयोपकरणानि च विना सर्व्वमेतत् परमेश्वराय वह्निकृतसुगन्ध्यु-
पहारार्थं युष्माभिः कर्त्तव्यं।

तत्सप्तममासस्य दशमदिने युष्माकं पवित्रसमिति र्भविष्यति, तदा ७
यूयं स्वस्वप्राणान् क्लेक्ष्यथ किमपि विषयकर्म्म न करिष्यथ। किन्तु परमे- ८
श्वराय सुगन्धिहोमबल्यर्थं एको गोवत्सो मेषैक एकहायनाः सप्त मेष-
वत्साः, उपकरणार्थम् एकगोवत्सकृते दशमांशत्रयं, एकमेषकृते दश- ९
मांशद्वयं, सप्त मेषवत्सानां एकैकवत्सकृते एकैकदशमांशस्तैलपक्वं १०
गोधूमचूर्णं स्वेषां प्रायश्चित्तबलिश्छागैकश्च, एतानि सर्व्वाणि युष्माभिः ११
प्रायश्चित्तदिवसीयपापबलिं नित्यहोमं तदीयभक्ष्यपेयोपकरणानि च
विना निवेदयिष्यन्ते।

सप्तममासस्य पञ्चदशदिने युष्माकं पवित्रसमिति र्भविष्यति तदा १२
यूयं किमपि विषयकर्म्म न करिष्यथ तदारभ्य सप्त दिनानि यावत् परमे-
श्वरं उद्दिश्य महं करिष्यथ। परमेश्वराय वह्निकृतसुगन्धिहोमबल्यर्थं १३

त्रयोदश गोवत्सा द्वौ मेषावेकहायना निर्दोषाश्चतुर्दश मेषवत्साः, उप-
१४ करणार्थं त्रयोदशानां पुंगवानाम् एकैककृते दशमांशत्रयं द्वयो र्मेषयो
१५ रेकैककृते दशमांशद्वयं चतुर्दशानां मेषवत्सानाम् एकैकवत्सकृत एकैको
१६ दशमांशस्तैलपक्वं गोधूमचूर्णं, प्रायश्चित्तार्थं छागैकश्च, एतानि सर्व्वाणि
युष्माभि र्नित्यहोमं तदीयभक्ष्यपेयोपकरणञ्च विना निवेदयिष्यन्ते ।

१७ द्वितीयदिने द्वादश गोवत्सा द्वौ मेषावेकहायना निर्दोषाश्चतुर्दश
१८ मेषवत्साः, गोवत्समेषमेषवत्सानां कृते तत्संख्यया विध्यनुयायीनि
१९ तदीयानि भक्ष्यपेयोपकरणानि, प्रायश्चित्तार्थं छागैकश्च, एतानि सर्व्वाणि
युष्माभि र्नित्यहोमं तदीयं भक्ष्यपेयोपकरणञ्च विना निवेदयिष्यन्ते ।

२० तृतीयदिवसे एकादश गोवत्सा द्वौ मेषावेकहायना निर्दोषाश्चतुर्दश
२१ मेषवत्साः, गोवत्समेषमेषवत्सानां कृते तत्संख्यया विध्युक्तानि तदी-
२२ यानि भक्ष्यपेयोपकरणानि, प्रायश्चित्तार्थं छागैकश्च, एतानि सर्व्वाणि
युष्माभि र्नित्यहोमं तदीयं भक्ष्यपेयोपकरणञ्च विना निवेदयिष्यन्ते ।

२३ चतुर्थदिने दश गोवत्सा द्वौ मेषावेकहायना निर्दोषाश्चतुर्दश मेष-
२४ वत्साः, गोवत्समेषमेषवत्सानां कृते तत्संख्यया विध्युक्तानि तदीयानि
२५ भक्ष्यपेयोपकरणानि, प्रायश्चित्तार्थं छागैकश्च, एतानि सर्व्वाणि युष्माभि
र्नित्यहोमं तदीयं भक्ष्यपेयोपकरणञ्च विना निवेदयिष्यन्ते ।

२६ पञ्चमदिने नव गोवत्सा द्वौ मेषावेकहायना निर्दोषाश्चतुर्दश
२७ मेषवत्साः, गोवत्समेषमेषवत्सानां कृते तत्संख्यया विध्युक्तानि तदीयानि
२८ भक्ष्यपेयोपकरणानि, प्रायश्चित्तार्थं छागैकश्च, एतानि सर्व्वाणि युष्माभि
र्नित्यहोमं तदीयं भक्ष्यपेयोपकरणञ्च विना निवेदयिष्यन्ते ।

२९ षष्ठदिने अष्टौ गोवत्सा द्वौ मेषावेकहायना निर्दोषाश्चतुर्दश मेष-
३० वत्साः, गोवत्समेषमेषवत्सानां कृते तत्संख्यया विध्युक्तानि तदीयानि
३१ भक्ष्यपेयोपकरणानि, प्रायश्चित्तार्थं छागैकश्च, एतानि सर्व्वाणि युष्माभि
र्नित्यहोमं तदीयं भक्ष्यपेयोपकरणञ्च विना निवेदयिष्यन्ते ।

३२ सप्तमदिने सप्त गोवत्सा द्वौ मेषावेकहायना निर्दोषाश्चतुर्दश मेष-
३३ वत्साः, गोवत्समेषमेषवत्सानां कृते तत्संख्यया विध्युक्तानि तदीयानि
३४ भक्ष्यपेयोपकरणानि, प्रायश्चित्तार्थं छागैकश्च, एतानि सर्व्वाणि युष्माभि
र्नित्यहोमं तदीयं भक्ष्यपेयोपकरणञ्च विना निवेदयिष्यन्ते ।

३५ अष्टमदिने युष्माकं महासमिति र्भविष्यति, तद्दिने युष्माभिः किमपि
३६ विषयकर्म्म न कर्त्तव्यं । किन्तु परमेश्वराय वह्निकृतसुगन्धिहोमार्थम्

एको गोवत्स एको मेष एकहायना निर्दोषाः सप्त मेषवत्साः, गोवत्समेष- ३७
मेषवत्सानां कृते तत्संख्यया विध्युक्तानि तदीयानि भक्ष्यपेयोपकरणानि,
प्रायश्चित्तार्थं छागैकश्च, एतानि सर्व्वाणि युष्माभि र्नित्यहोमं तदीय- ३८
भक्ष्यपेयोपकरणञ्च विना निवेदयिष्यन्ते। होमबलीन् भक्ष्यपेयनैवेद्यानि ३९
मङ्गलार्थकबलींश्चाधि युष्माभि र्यत् प्रतिश्रुतं स्वेच्छादत्तञ्च तद्विना यूयम्
एतानि निरूपितमहेषु परमेश्वराय निवेदयिष्यथ। पश्चात् परमेश्व- ४०
राज्ञया मूसा इस्रायेल्वंशाय तत्सर्व्वं गदितवान्।

---

३० त्रिंशत्तमोऽध्यायः।

१ प्रतिश्रुतव्रतानां पालनमधि व्यवस्था ३ पित्रा दुहितुर्व्रतस्य सफलनिष्फलत्वकथनं ६ पत्या जायायाः प्रतिश्रुतसफलनिष्फलत्वकथनं ९ विधवायाः प्रतिश्रुतसफलनिष्फलत्वस्य कथनञ्च।

अनन्तरं मूसा इस्रायेल्वंशाधिपेभ्यः कथितवान्, परमेश्वर एतान्या- १
ज्ञापयत्। यदि कश्चित् पुमान् परमेश्वराय किञ्चित् प्रतिशृणोति यद्वा २
व्रतेन स्वं बद्धुं शपथं करोति, तर्हि स स्ववाक्यं मुधा न कृत्वा वक्त्रात्
निर्गतं वाक्यं सफलं करिष्यति।

यदि काचित् कुमारी पितृगेहे वसन्ती परमेश्वराय किञ्चित् प्रति- ३
शृणोति व्रतेन वा स्वां बध्नाति, तत्पिता च यदि तस्याः प्रतिश्रुतं येन वा स्वां ४
बध्नाति तद् व्रतवाक्यं श्रुत्वा तस्यै किमपि न कथयति, तर्हि तस्याः सर्व्वं
प्रतिश्रुतं स्थिरीभविष्यति येन च स्वां बध्नाति तद् व्रतवाक्यं निश्चितं
भविष्यति। किन्तु श्रवणदिने यदि तस्याः पिता तां निषेधति तर्हि ५
तस्याः प्रतिश्रुतं येन च स्वां बध्नाति तद् व्रतवाक्यं निश्चितं न भविष्यति
तस्याः पितु र्निषेधात् परमेश्वरस्तां क्षमिष्यते।

तस्याः प्रतिश्रवणकाले येन वा स्वां बध्नाति तद्व्रतवाक्यस्य तस्या ६
आस्यात् निर्गमकाले यदि तस्याः पतिस्तिष्ठति, स पतिश्च यदि तत्- ७
श्रवणदिने किमपि न कथयति, तर्हि तस्याः प्रतिश्रुतं येन च स्वां बध्नाति
तद् व्रतवाक्यं निश्चितं भविष्यति। किन्तु श्रवणदिने यदि तस्याः पतिस्तां ८
निषेधति, तर्हि सा यत् प्रतिशृणोति येन च स्वां बध्नाति तत् मुधा
भविष्यति, तेन परमेश्वरस्तां क्षमिष्यते।

विधवा स्वामित्यक्ता वा स्त्री येन स्वां बध्नाति स्म तद् व्रतवाक्यं ९
स्थिरीभविष्यति। सा यदि स्वामिगेहे प्रतिश्रुतवती वा व्रतेन शपथेन १०

११ बद्धा भवेत्, तस्याः पतिश्च यदि तत् श्रुत्वा तामनिषिध्य मौनीभूतस्तर्हि
तस्याः सर्व्वं प्रतिश्रुतं निश्चितं भविष्यति येन च स्वां बद्धवती तद् व्रत-
१२ वाक्यं निश्चितं भविष्यति। किन्तु श्रवणदिने तस्याः पति र्यदि तत् सर्व्वं
मुधा कृतवान्, तर्हि तस्याः प्रतिश्रवणे बन्धने च या वाक् तदास्यात्
निरगच्छत सा निश्चिता न भविष्यति, तस्याः पत्या व्यर्थकरणात् परमे-
श्वरस्तां क्षमिष्यते।
१३ योषितः सर्व्वं प्रतिश्रवणं क्लेशदं शपथश्च तस्याः स्वामिना निश्चितं व्यर्थञ्च
१४ भवितुं शक्यते। तस्याः पति र्यदि कतिपयानि दिनानि यावत् सर्व्वथा
निःशब्दो भवति तर्हि श्रवणदिने निःशब्दत्वात् स तस्याः सर्व्वं प्रतिश्रवणं
१५ वा सर्व्वं व्रतं निश्चितं करोति। तच्छ्रवणात् परं यदि केनापि प्रकारेण
१६ स तद् व्यर्थं करोति तर्हि तस्या दोषं स एव भोक्ष्यते। पुरुषं पत्नीञ्चाधि
पितरं बाल्यकाले पितृगृहस्थां कुमारीञ्चाधि मूससं प्रति परमेश्वरेणा-
ज्ञापिता आदेशाः समाप्ताः।

---

३१ एकत्रिंशत्तमोऽध्यायः।

१ मिदियनीयलोकानां दण्डनं बिलियमस्य वधः १३ स्त्रीणां रक्षणाद् योद्धृभ्यो मूससः क्रोधः २१ तेषां शुचित्वं २५ लोठितद्रव्यविभागः ४८ परमेश्वराय सेनापतीनां दानं।

१ अनन्तरं परमेश्वरो मूससं जगाद त्वम् इस्रायेल्वंशकृते मिदियनी-
२ यान् प्रतिकुरु पश्चात् त्वं पितृलोकानां समीपे संग्रहीष्यसे। ततो
३ मूसा लोकान् अवदत्, युष्माकं कतिपया लोका युद्धार्थं सज्जिता परमे-
४ श्वरार्थं मिदियनीयान् प्रतिकर्त्तुं तेषां प्रतिकूलं योद्धुं गच्छन्तु। यूयम्
५ इस्रायेलन्वयस्य एकैकवंशाद् एकैकसहस्रं लोकान् योद्धुं प्रेषयत। तत
इस्रायेलन्वयस्य एकैकवंशमध्यात् सहस्रजनेषु गृहीतेषु योद्धुं द्वादश-
६ सहस्रलोका असज्जन्त। इत्थं मूसा एकैकवंशस्य एकैकसहस्रं जनान्
पवित्रपात्राणि वाद्यकरतूर्य्यौ च धरन्तं याजकस्येलियासरस्य पुत्रं
७ पीनिहसं युद्धाय प्रेषयामास। ते मूससं प्रति परमेश्वरस्याज्ञानुसारात्
८ मिदियनीयानां प्रतिकूलं युद्ध्वा सर्व्वपुरुषान् जघ्नुः। अत्र तै र्हतान्
इतरजनान् विना इवि-रेकम-सूर-हूर-रेवाख्या मिदियनीयानां पञ्च
राजानोऽपि हताः, बियोरस्य सुतो बिलियमोऽपि खड्गेन विनाश-
९ याञ्चक्रे। इस्रायेल्वंशा मिदियनीयानां सर्व्वयोषितो बालकांश्च
बन्दी कृतवन्तः, तेषां सर्व्वपशून् मेषव्रजान् सर्व्वसम्पत्तिञ्च लोठयित्वा

नीतवन्तः। तेषां निवासस्थानानि नगराणि दुर्गाणि च वह्निना दाहया- १०
मासुः। अनन्तरं ते मानुषपशुप्रभृतिलोठितं अपहृतञ्च सर्व्वद्रव्यं निन्युः, ११
यिरीहोः समीपस्थयर्द्दनतीरस्थिते मोयाबीयप्रान्तरे स्थितं शिविरं मूसस १२
इलियासरयाजकस्य इस्रायेल्वंशीयसर्व्वसमाजस्य चान्तिकं तान् बन्दि-
नोऽपहृतानि लोठितानि द्रव्याणि च निन्युः।

ततो मूसा इलियासरयाजकः समाजाधिपाश्च तान् साक्षात् कर्त्तुं १३
शिविराद् वहिर्ययुः। रणादागतेभ्यः सेनापतिभ्यो ऽर्थात् सहस्रपतिभ्यः १४
शतपतिभ्यश्च मूसाः क्रुध्यन् तान् अवदत् यूयं किं सर्व्वा योषितो जीवन्ती १५
रक्षितवन्तः? पश्यत इमा विलियमस्य मन्त्रणया पियोर्द्देवमधि परमे- १६
श्वरस्य प्रतिकूलम् इस्रायेल्वंशं पापं कारितवत्यस्तस्मात् परमेश्वरस्य
समाजे महामारी जाता। अतो यूयं बालकानां मध्ये सर्व्वान् पुंबालकान् १७
हत, पुरुषोपभुक्ता योषितश्च हत, किन्तु या बालिकाः पुरुषोपभुक्ता १८
नहि ता रक्षत। यूयं सप्त दिनानि शिविराद् वहि र्वसत, युष्माभि- १९
र्मानुषा हता हतानाञ्च शवाः स्पृष्टास्तस्माद् यूयं तृतीयदिने सप्तमदिने
च स्वान् बन्दिनश्च पावयत। सर्व्वजातीयं वसनं चर्म्मनिर्म्मितं वस्तु २०
छागरोमनिर्म्मितं वस्तु काष्ठनिर्म्मितं पात्रञ्च शुची कुरुत।

पश्चाद् इलियासरयाजको रणागतान् योद्धृन् अवदत्, परमेश्वरो २१
मूससम् इमां व्यवस्थाम् अवादीत्। स्वर्णरूप्यपित्तललौहरङ्गसीसकादीनि २२
यानि वस्तूनि वह्निना न नश्यन्ति तानि वह्निना गमितानि शुचीनि २३
भविष्यन्ति, तथापि यूयं तानि शुचिजनके तोये धाविष्यथ; यानि वस्तूनि
वह्नौ नश्यन्ति तानि यूयं तोयेन गमयिष्यथ। सप्तमे दिने यूयं स्वेषां २४
वसनानि धाविष्यथ, ततः शुचयः सन्तः शिविरं प्रवेक्ष्यथ।

ततः परमेश्वरो मूससं बभाषे, त्वम् इलियासरयाजकश्च समाजस्य २५
पितृवंशाधिपाश्च मानुषपशुप्रभृतिलोठितवस्तूनां सङ्ख्यां कुरुत। तानि २६
लोठितद्रव्याणि द्विधा कृत्वा युद्धागतयोद्धृनां सर्व्वसमाजीयानाञ्च मध्ये २७
विभजस्व। युद्धागतयोद्धृभ्यः परमेश्वराय करं गृहाण, अर्थात् तेषां २८
स्वभ्यार्द्धभागान्तर्गतेभ्यो मानवगोगर्द्दभमेषेभ्यश्च पञ्चशतप्राणिनाम् एकैकं २९
प्राणिनमादाय परमेश्वरायोत्तोलनीयनैवेद्यार्थं इलियासरयाजकाय
देहि। इस्रायेल्वंशस्यार्द्धभागान्तर्गतेभ्यो मानुषेभ्यो गोगर्द्दभमेषादिपशु- ३०
भ्यश्च पञ्चाशत् प्राणिनां एकैकं प्राणिनमादाय परमेश्वरस्यावासस्य रक्ष-
णीयरक्षकेभ्यो लेवीयेभ्यो देहि। ततो मूससं प्रति परमेश्वराज्ञया मूसा ३१

३१ इलियासरयाजकश्च सर्व्वं कर्म्म कृतवन्तौ। योद्धृभि र्लोठिता या सम्पत्ति-
३२ रियती सा, पञ्चसप्ततिसहस्राधिकानि षट्लक्षाणि मेषा द्विसप्तति-
३५ सहस्राणि गाव एकषष्टिसहस्राणि गर्दभाः पुरुषानुपभुक्ता द्वात्रिंशत्
३६ सहस्राणि योषितश्च। तस्माद् युद्धगतानाम् अर्द्धांशस्य सङ्ख्येयं पञ्चशता-
३७ धिकसप्तत्रिंशत्सहस्राधिकं लक्षत्रयं मेषाः। तेषां मध्ये परमेश्वरस्य करः
३८ पञ्चसप्तत्यधिकषट्शतानि मेषाः। गावः षट्त्रिंशत्सहस्राणि तासां मध्ये
३९ द्वासप्ततिः परमेश्वरस्य कररूपाः। गर्दभाः पञ्चशतत्रिंशत्सहस्राणि तेषां
४० मध्ये एकाधिकषष्टिः परमेश्वरस्य कररूपाः। मानुष्यः षोड़शसहस्राणि
४१ तासां मध्ये द्वात्रिंशत् परमेश्वरस्य कररूपाः। मूसाः परमेश्वरस्याज्ञया
परमेश्वरस्य करम् अर्थाद् उत्तोलनीयं नैवेद्यम् इलियासरयाजकाय
४२ ददौ। योद्धृगणस्य भागात् मूससा बिभिन्नो य इस्रायेल्वंशस्यार्द्धभागः,
४३ स समाजीयार्द्धभागः संख्यया पञ्चशताधिकसप्तत्रिंशत्सहस्राधिकं लक्षत्रयं
४५ मेषाः षट्त्रिंशत्सहस्राणि गावः पञ्चशताधिकत्रिंशत् सहस्राणि गर्दभाः
४७ षोड़श सहस्राणि मानुष्यश्च। ततो मूसा इस्रायेल्वंशस्य तदर्द्धांशात्
निश्चितं करमर्थात् मानुषपशुभ्यः पञ्चाशत्प्राणिनामेकं प्राणिनं गृहीत्वा
परमेश्वराज्ञात आवासस्य रक्षणीयरक्षिभ्यो लेवीयेभ्यो ददौ।

४८ ततः सहस्रसैन्यशासकाः सहस्रपतयः शतपतयश्च मूससो निकट-
४९ मेत्य तं जगदुः, तव दासा हस्तगतानां योद्धृणां संख्यां कृतवन्तः, तेषाम्
५० एकोऽपि न्यूनो नाभूत्। तस्माद् वयं परमेश्वरस्य सम्मुखे स्वप्राणानां कृते
प्रायश्चित्तं कर्त्तुं लब्धसम्पत्तेः स्वर्णपात्रं नूपुरं बलयं अङ्गुरीयकं कुण्डलं
५१ हारं वा परमेश्वराय नैवेद्यं आनीतवन्तः। मूसा इलियासरयाजकश्च
५२ तानि शिल्पकृताभरणरूपाणि स्वर्णानि तेभ्यो जगृहतुः। परमेश्वरम्
उद्दिश्य सहस्रपतिभिः शतपतिभिश्च निवेदितं स्वर्णं पञ्चाशदधिकसप्त-
५३ शताधिकषोडशसहस्रशेकलपरिमितम् आसीत्। यत एकैको योद्धा
५४ स्वार्थं लोठितं द्रव्यम् आनयत्। ततो मूसा इलियासरश्च सहस्रपति-
शतपतिभ्यस्तानि स्वर्णानि गृहीत्वा परमेश्वरम् उद्दिश्येस्रायेल्वंशस्य
स्मरणाय समाजावासम् आनिन्यतुः।

---

३२ द्वात्रिंशोऽध्यायः।

१ यर्दनस्य पूर्व्वदिशि गाद्वंशस्य रूबेनवंशस्य चाधिकारप्रार्थना ६ तान् प्रति मूसस तिरस्कारः १६ तेषामुत्तरं २० तेषां कथातो मूसोऽङ्गीकारः ३४ नगराणां निर्म्माणञ्च।

रूबेनवंशीयानां गादवंशीयानाञ्च बहवः पशव आसन् तेन यासेर- १
देशं गिलियद्देशञ्च पशुचरणयोग्यं वीक्ष्य गादरूबेनवंशीया एत्य २
मूससम् इलियासरयाजकं समाजाधिपांश्च जगदुः, अटारोतं दीवोनं ३
यासेरं निम्रा हिष्वोनं इलियाली सिवमा निवो वियोनञ्चैतानि
यानि स्थानानि प्रति परमेश्वर इस्रायेल्समाजस्य सम्मुख आहतवान् ४
तान्येव पशुचरणयोग्यानि, तव दासानाञ्च पशवः सन्ति। अतएव तेऽ- ५
वदन् यदि वयं तव दृष्ट्यनुग्रहं प्राप्तास्तर्हि देशमेनं अधिकर्त्तुं भवद्दा-
सेभ्यो देहि यर्दनपारं मास्मान् नय।

ततो मूसा गादवंशीयान् रूबेनवंशीयांश्च गदितवान् युष्माकं भ्रातरः ६
किं योद्धुं यास्यन्ति यूयञ्च किमत्रोपवेक्ष्यथ? परमेश्वरेण दत्तं देशं यातुं ७
यूयं कुत इस्रायेल्वंशानां मनांसि भग्नाशानि कुरुथ? यदाहं युष्माकं ८
पितॄन् देशं वीक्षितुं कादेशबर्णेयात् प्रैरयं, तदानीं तेऽपीत्थं कृतवन्तः।
फलत इष्कोलोपत्यकां यावत् ते गत्वा देशे निरीक्षिते सति परमेश्व- ९
रेण दत्तं देशं यातुं इस्रायेल्वंशानां मनांसि तै भग्नाशानि कृतानि।
अतस्तदानीं परमेश्वरस्य क्रुधि प्रज्वलिते स शपमान उक्तवान् अहं १०
यं देशमधि इब्राहीम इस्हाको याकूबश्चान्तिके शपथम् अकार्षं, ११
तं देशं मिसराद् आगतानां विंशतिवर्षाधिकवयस्कानां लोकानां
मध्ये कोऽपि वीक्षितुं न प्राप्स्यति यस्मात् ते सर्व्वे मम सम्यगनुगता
नहि। केवलं किनसीययिफुन्नेः पुत्रः कालेवो नूनस्य पुत्रो यिहो- १२
शूयश्चैतौ तं द्रक्ष्यतः, यतस्तौ सर्व्वथा परमेश्वरस्यानुगतौ। इत्थं इस्रा- १३
येल्वंशं प्रति परमेश्वरस्य क्रोधे प्रज्वलिते यावत् परमेश्वरस्य दृष्टौ
कुकर्म्मकारी सर्व्ववंशो न व्यनश्यत् तावत् चत्वारिंशद्वर्षं यावत् स तान्
प्रान्तरे भ्रामयामास। पश्यत पापिष्ठवंशाद् उत्पन्ना यूयम् इस्रायेल्- १४
वंशाय परमेश्वरस्य क्रोधं वर्द्धयितुं स्वपितॄणां पदं गृहीतवन्तः। यतो १५
यदि यूयं तस्य पश्चाद्गमनात् परावर्त्तध्वं तर्हि इस्रायेल्लोकांस्तेन पुनः
प्रान्तरे त्यक्ष्यन्ते युष्माभिश्चैते सर्व्वे लोका विनाशयिष्यन्ते।

ततः परं ते समीपमेत्य कथयामासुः वयमत्र स्वपशुकृते गोष्ठानि १६
स्वबालककृते नगराणि च निर्म्मास्यामः। यावच्च वयं इस्रायेल्वंशान् १७
स्वस्थानं न प्रवेशयामस्तावत् तेषामग्रेऽग्रे सज्जमाना गमिष्यामः, किन्त्व-
स्माकं बालका देशनिवासिभ्यो भयात् प्राचीरवेष्टितपुरेषु वत्स्यन्ति।
इस्रायेल्वंशस्य सर्व्वे जना यावत् स्वाधिकारं नाप्नुवन्ति तावद् वयं १८

१९ स्वस्वपरिजनानां समीपं न प्रत्यागमिष्यामः। यर्द्दनस्य पारे तैः साकं
वयं नाधिकारं ग्रहीष्यामः, किन्तु यर्द्दनस्य पूर्व्वपारे ऽस्माकम् अधिकारो
भविष्यति।
२० ततो मूसास्तान् अवदत्, यदि यूयम् इदं कुरुथ, अर्थात् सज्जमानाः
२१ परमेश्वरस्य सम्मुखे योद्धुं गच्छथ, स च यावत् स्वरिपून् स्वसम्मुखाद्
वहि र्न करिष्यति तावद् यूयं सर्व्वे यदि परमेश्वरस्य सम्मुखे सज्जमाना
२२ यर्द्दनतटिनीपारं यास्यथ, ततो देशे परेशस्य वशीभूते यूयं पुनरागमिष्यथ, तर्हि यूयं परमेश्वरस्य इस्रायेल्वंशस्य च समीपे निर्द्दोषा भवि-
ष्यथ, परमेश्वरस्य सम्मुखे देशेऽस्मिन् युष्माकम् अधिकारो भविष्यति।
२३ किन्तु यूयं यदि तन्न करिष्यथ, तर्हि पश्यत परमेश्वरस्य प्रतिकूलं
अपरात्स्यथ, युष्माकं पापं युष्माकम् उद्देशं प्राप्स्यतीति निश्चयं
२४ जानीथ। यूयं स्वस्वबालकानां कृते नगराणि पशूनाञ्च कृते गोष्ठानि
२५ निर्म्मात, स्वास्यात् निर्गतवाक्यानुसारात् कुरुत। पश्चाद् गादवंशीया
रूबेनवंशीयाश्च मूससम् ऊचुः प्रभुरस्माकं यथाज्ञापयत् भवद्दासा वयं
२६ तथैव करिष्यामः। अस्माकं बालका जायाः पशुव्रजाश्च सर्व्वे ऽत्र
२७ गिलियदस्य सर्व्वनगरे स्थास्यन्ति। अस्माकं प्रभोराज्ञया भवद्दासाः सर्व्वे
२८ सज्जमाना योद्धुं परमेश्वरस्य सम्मुखे पारं यास्यामः। ततो मूसास्तानधि
याजकम् इलियासरं नूनपुत्त्रं यिहोशूयम् इस्रायेल्वंशाधिपांश्चादिष्ट-
२९ वान्। मूसास्तान् गदितवान्, गादवंशीया रूबेनवंशीयाश्च यदि
परमेश्वरस्य सम्मुखे युष्माभिः साकं सज्जमाना योद्धुं यर्द्दनतटिनीपारं
यान्ति, तर्हि युष्माकं सम्मुखे देशे वशीभूते यूयं तेभ्यो गिलियदं देशम्
३० अधिकर्त्तुं दास्यथ। किन्तु यदि ते सज्जमाना युष्माभिः साकं नदीपारं न
३१ गच्छन्ति, तर्हि ते युष्माभिः समं किनानदेशे वत्स्यन्ति। ततो गादवंशीया
रूबेनवंशीयाश्च प्रत्यवदन्, परमेश्वरो भवद्दासान् यदादिशत् वयं
३२ तदेव करिष्यामः। वयं परमेश्वरस्य सम्मुखे सज्जमानाः पारं गत्वा
किनानदेशं यास्यामः, तेन यर्द्दनस्य पूर्व्वपारे ऽस्माकम् अधिकारो
३३ भविष्यति। ततो मूसास्तेभ्यो गादवंशीयेभ्यो रूबेनवंशीयेभ्यश्च यूषफ-
सुतस्य मिनशेरर्द्धवंशाय च इमोरीयाणां भूपस्य सीहोनस्य राज्यं
वाशनस्य भूपतेर् ओगस्य राज्यम् अर्थात् नानाप्रदेशस्थनगरविशिष्टं
जनपदं चतुष्पार्श्वीयनगराणि च ददौ।
३४ ततो दीबोनं अटारोतं अरोयेरं अट्रोतं शोफनं यासेरं यग्विहं

वैतन्निम्रा वैथारणश्चैतन्नामविशिष्टानि प्राचीरवेष्टितानि नगराणि २६
गोष्ठानि च गादवंशीयै र्निर्म्मितानि। हिष्वोनम् इलियाली किरि- ३७
याथयिमं नामपरिवर्त्तिते निवोवाल्मियोने शिव्मा चैतानि पुराणि ३८
रूवेनवंशीयै र्निर्म्मितानि स्वनिचितपुराणां नामानि च कृतानि। मिनशेः ३९
सुतस्य माखीरस्य वंशो गिलियदं गत्वा तदाचक्रमे तत्स्थाननिवासिन
इमोरीयान् अनधिकारिणो ऽकरोत्। ततो मूससा मिनशेः सुतस्य ४०
माखीरस्य वंशाय गिलियदे दत्ते स तन्मध्ये उवास। मिनशिवंशीयो ४१
यायीरो गत्वा तस्य ग्रामान् करतलीकृत्य तेषां नाम हावोत्-यायीरं
(यायीरग्रामाणीति) चकार। नोवहश्च गत्वा किनातं तस्य शाखानगराणि ४२
च वशीकृत्य स्वनामानुरूपं तन्नाम नोवहं कृतवान्।

---

३३ त्रयस्त्रिंशोऽध्यायः।

१ इस्रायेल्वंशस्य द्वाचत्वारिंशावस्थानानां कथनं ५० किनानीयलोकान् नाशयितुं आदेशश्च।

य इस्रायेल्वंशीयाः स्वस्वसैन्यैः साकं मूसोहारोणाभ्यां मिसरदेशाद् १
वहिरानीतास्तेषाम् अवस्थितिकथनं। मूसाः परमेश्वराज्ञया तेषां २
यात्रानुसाराद् अवस्थितीनां विवृतिं लिलेख। तेषाम् अवस्थितीनां
विवृतिरियं। प्रथममासस्य पञ्चदशदिने निस्तारमहदिनस्य प्रातर् ३
इस्रायेल्वंशा मिस्रीयाणां समक्षं महाबलेन रामिषेषाद् वहिर्भूय प्रत-
स्थिरे। तद्दिने मिस्रीयाः शवान् श्मशाने न्यदधत, यतः परमेश्वरस्तेषां ४
मध्ये प्रथमजान् सर्व्वान् अबधीत्, परमेश्वरश्च तेषां देवानप्यदण्डयत्।
इस्रायेल्वंशो रामिषेषात् प्रस्थाय सुक्कोते शिविरम् अस्थापयत्। सुक्को- ५
तात् प्रस्थाय प्रान्तरस्य प्रान्तस्थ एथमे शिविरं स्थापितवान्। एथमात् ७
प्रस्थाय वाल्सिफोनस्य सम्मुखस्थं पीहहीरोतं परावृत्य मिग्दोलस्य
पूर्व्वदिशि शिविरं स्थापितवान्। ते पीहहीरोताद् यात्रां कृत्वा ८
सागरमध्येन प्रान्तरं प्रविविशुः, एथमप्रान्तरेण दिनत्रयं गत्वा मारायां
शिविरं स्थापयामासुः। मारातो यात्रां कृत्वा एलीमम् उपस्थाय तत्र ९
शिविरं स्थापितवन्तः, एलीमे द्वादश प्रस्रवणाः सप्तति खर्ज्जूरपादपा-
श्चासन्। एलीमात् प्रस्थाय सुफार्णवसमीपे शिविरं स्थापितवन्तः। १०
सुफार्णवाद् यात्रां कृत्वा सीनप्रान्तरे शिविरं स्थापयामासुः। सीन- ११
प्रान्तराद् यात्रां कृत्वा दप्कायां शिविरं स्थापयामासुः। दप्कातो १२

१४ यात्रां कृत्वा आलूशे शिविरं स्थापयामासुः। आलूशाद् यात्रां कृत्वा
रिफीदीमे शिविरं स्थापयामासुः, तत्र लोकानां पानार्हं तोयं नासीत्।
१५ रिफीदीमाद् यात्रां कृत्वा सीनयप्रान्तरे शिविरं स्थापितवन्तः।
१६ सीनयप्रान्तराद् यात्रां कृत्वा किब्रोद्धत्तावायां शिविरं स्थापयामासुः।
१७ किब्रोद्धत्तावातो यात्रां कृत्वा हत्सेरोते शिविरं स्थापयामासुः। हत्सेरो-
१९ ताद् यात्रां कृत्वा रित्मायां शिविरं स्थापयामासुः। रित्मातो
२० यात्रां कृत्वा रिम्मोणपेरषे शिविरं स्थापयामासुः। रिम्मोणपेरषाद्
२१ यात्रां कृत्वा लिब्नायां शिविरं स्थापयामासुः। लिब्नातो यात्रां कृत्वा
२२ रिस्सायां शिविरं स्थापितवन्तः। रिस्सातो यात्रां कृत्वा किहेलायां
२३ शिविरं स्थापयामासुः। किहेलातो यात्रां कृत्वा शेफराद्रौ शिविरं
२४ स्थापयामासुः। शेफराद्रे र्यात्रां कृत्वा हरादायां शिविरं स्थापयामासुः।
२५ हरादाया यात्रां कृत्वा मखेलोते शिविरं स्थापयामासुः। मखेलोताद्
२७ यात्रां कृत्वा तहते शिविरं स्थापयामासुः। तहताद् यात्रां कृत्वा तेरहे
२८ शिविरं स्थापयामासुः। तेरहाद् यात्रां कृत्वा मिल्कायां शिविरं स्थाप-
२९ यामासुः। मिल्काया यात्रां कृत्वा हश्मोनायां शिविरं स्थापयामासुः।
३० हश्मोनाया यात्रां कृत्वा मोषेरोते शिविरं स्थापयामासुः। मोषेरोताद्
३२ यात्रां कृत्वा विनेयाकने शिविरं स्थापयामासुः। विनेयाकनाद् यात्रां
३३ कृत्वा होर्हगिद्गदे शिविरं स्थापयामासुः। होर्हगिद्गदाद् यात्रां
३४ कृत्वा यट्वाथायां शिविरं स्थापयामासुः। यट्वाथाया यात्रां कृत्वा
३५ अब्रोणायां शिविरं स्थापयामासुः। अब्रोणाया यात्रां कृत्वा त इत्सि-
३६ योनगेवरे शिविरं स्थापयामासुः। इत्सियोनगेवराद् यात्रां कृत्वा
३७ सीनप्रान्तरीयकादेशे शिविरं स्थापयामासुः। कादेशाद् यात्रां कृत्वा
३८ तैर् इदोमदेशस्य प्रान्तरीयहोराद्रौ शिविरं स्थापितं। तदा हारोणो
याजकः परमेश्वराज्ञया होराद्रिम् आरूढवान् तत इस्रायेल्वंशस्य
मिसराद् वहिरागमनस्य चत्वारिंशद्वर्षस्य पञ्चममासस्य प्रथमेऽह्नि तत्र
३९ मृतः। होराद्रौ हारोणयाजकस्य मृतिकाले स त्रयोविंशाधिकशतवत्सर-
४० वयस्क आसीत्। तत्र किनानदेशस्य दक्षिणसीमावासी किनानीयाराद-
४१ भूप इस्रायेल्वंशागमनस्य वार्त्तां श्रुतवान्। अपरं ते होराद्रे र्यात्रां
४२ कृत्वा सल्मोनायां शिविरं स्थापितवन्तः। सल्मोनाया यात्रां कृत्वा
४३ पूनोने शिविरं स्थापयामासुः। पूनोनाद् यात्रां कृत्वा ओवोते
४४ शिविरं स्थापयामासुः। ओवोताद् यात्रां कृत्वा मोयावप्रान्तरस्थ इयी-

अवारीमे शिविरं स्थापयामासुः। इयी-अवारीमाद् यात्रां कृत्वा दिवो- ४५
नगादे शिविरं स्थापयामासुः। दीवोनगादाद् यात्रां कृत्वा त अल्मोन- ४६
दिव्लाथयिमे शिविरं स्थापयामासुः। अल्मोन-दिव्लाथयिमाद् यात्रां ४७
कृत्वा निवोः सम्मुखस्थ अवारीमाद्रौ शिविरं स्थापितवन्तः। अवारी- ४८
माद्रे यात्रां कृत्वा यिरीहोः सम्मुखस्थयर्दनसमीपस्थे मोयावीयप्रान्तरे
शिविरं स्थापयामासुः। ते यर्दनसमीपे बैत्-यिशीमोतम् आरभ्य आवेल- ४९
शिट्टीमं यावत् मोयावीयप्रान्तरे शिविरं स्थापयित्वा तस्थुः।

तदा परमेश्वरो यिरीहोः समीपस्थयर्दनसन्निधौ मोयावीयप्रान्तरे ५०
मूससं जगाद, इस्रायेल्वंशेभ्यः कथय तान् एतां वाचं वद, यूयं यदा ५१
यर्दनतटिनीपारं गत्वा किनानदेशं प्राप्स्यथ, तदा स्वेषां सम्मुखात् ५२
तद्देशवासिनो वहिः करिष्यथ, तेषां सर्व्वाः प्रतिमा भंच्यथ सर्व्वान्
सिक्तविग्रहान् विनाशयिष्यथ, तेषां सर्व्वमुच्चस्थानम् उच्छेत्स्यथ। तद्देश- ५३
निवासिनो ऽनधिकारिणो विधाय देशमध्ये यूयं वत्स्यथ, यतो ऽहम्
अधिकर्त्तुम् युष्मभ्यं तं देशं दत्तवान्। यूयं गुटिकापातेन स्वस्ववंशा- ५४
नुसाराद् देशं विभज्य ग्रहीष्यथ, तत्र बहुसंख्यकेभ्यो ऽधिकांशं अल्प-
संख्यकेभ्यो ऽल्पांशं दास्यथ, यस्य गुटिका यत्र पतति तत्रैव तस्यांशो-
भविष्यति, इत्थं यूयं स्वस्वपितृवंशानुसाराद् अधिकरिष्यथ। किन्तु ५५
यूयं यदि स्वसम्मुखात् तान् देशवासिनो वहि र्न कुरुथ तर्हि युष्माभि
र्न विनष्टा ये ऽवशेक्ष्यन्ते ते युष्मन्नेत्रेषु कण्टकानि युष्माकं पार्श्वेषु ती-
क्ष्णकण्टकानि च भविष्यन्ति युष्माकं तत्र निवासदेशे युष्मान् क्लेक्ष्यन्ति
च। अहमपि तान् प्रति यथा व्यवहर्त्तुं मतिं कृतवान् तथैव युष्मान् ५६
प्रति व्यवहरिष्यामि।

---

३४ चतुस्त्रिंशोऽध्यायः।

१ इस्रायेल्लोकान् प्रति प्रतिज्ञातस्य देशस्य सीमानिर्णयः १० देशं विभक्तुं निरूपि-
ताधिपानां नामानि च।

अनन्तरं परमेश्वरो मूससम् अवदत्, त्वम् इस्रायेल्वंशान् इत्था- १
दिश तेभ्य इति वद, युष्मासु किनानदेशं प्राप्तेषु स देशो ऽर्थात् २
स्वप्रदेशैः समं किनानदेशो युष्माभिरधिकरिष्यते। युष्माकं दक्षि- ३
णकोणाद् इदोमसमीपस्थात् सीनप्रान्तराद् युष्माकं दक्षिणसीमा

४ पूर्व्वदिशि लवणसागरस्य कूलं भविष्यति। ततः सीमा दक्षिणदिशं
परावृत्य अक्रव्वीमाख्येनारोहणपथेन सीनपर्य्यन्तं यास्यति, तस्मात्
कादेशवर्णेयदक्षिणे हत्सर-अदरम् आगत्य अस्मोनं यावद् यास्यति।
५ सा सीमा अस्मोनाद् मिसरनदीं यावद् गमिष्यति महासमुद्रस्तद्दक्षि-
६ णसीमायाः शेषो भविष्यति। महासमुद्रो युष्माकं पश्चिमसीमा भवि-
७ ष्यति, एषैव युष्माकं पश्चिमसीमा भविष्यति। युष्माकम् उत्तरसीमा चेयं,
८ महासमुद्रात् होरपर्व्वतो युष्माभि र्लक्ष्यतां। होराद्रे र्हमातप्रवेश-
९ स्थानं लक्ष्यतां, तस्मात् सा सीमा सिदादं यावद् यास्यति। सा
सीमा सिफ्रोणं यावद् यास्यति, हत्सरैननं तस्याः शेषं भविष्यति,
१० एषा युष्माकम् उत्तरसीमा भविष्यति। पूर्व्वसीमार्थं युष्माभिर्हत्सरैननात्
११ शिफामं लक्ष्यतां। तस्मात् सा सीमा ऐनस्य पूर्व्वदिशा शिफामाद्
रिब्लां यावद् यास्यति, सा सीमा किन्नेरतडागस्य पूर्व्वकूलेन यास्यति।
१२ तस्मात् सा सीमा यर्द्दनेन यास्यति लवणसमुद्रश्च तस्याः शेषो भविष्यति,
१३ इति चतुर्दिक्स्थसीमाभि र्युष्माकं देशो बद्धो भविष्यति। ततो मूसा
इस्रायेल्वंशान् इत्यादिदेश, परमेश्वरः सार्द्धनववंशेभ्यो यं देशं
दातुम् आज्ञापयत् अर्थाद् यं देशं यूयं गुटिकापातेन अधिकरिष्यथ स
१४ एष देशः। यतो रूबेनीयवंशो गादीयवंशो मिनशेरर्द्धवंशश्च स्वस्वपितृ-
१५ वंशानुसारात् स्वस्वाधिकारं प्राप्ताः। यर्द्दनस्य पारे यिरीहोः समीपे
पूर्व्वस्यां सूर्य्योदयदिशि ते सार्द्धद्वयवंशा अधिकारं प्राप्ताः।
१६ परमेश्वरो मूससं जगाद, ये नरा युष्मदर्थं देशम् अंशयिष्यन्ति,
१७ तेषां नामानीमानि, इलियासरयाजको नूनस्य सुतो यिहोशूय एकै-
१८ कस्माद् वंशाद् एकैकाधिपश्चैतान् नरान् यूयं देशम् अंशयितुं वरीष्यथ।
१९ तेषां नामानि, यिहूदावंशाद् यिफुन्निसुतः कालेवः। शिमियोनवंशाद्
२१ अम्मीहूदस्य सुतः शिमूयेलः। विन्यामीनवंशात् किष्लोनस्य पुत्र इली-
२२ ददः। दानवंशाद् यग्लेः सुतो वुक्किरध्यक्षः। यूषफ्वंशाद् अर्थात्
२४ मिनशिवंशाद् एफोदस्य सुतो हन्नीयेलोऽध्यक्षः। इफ्रयिम्वंशात् शिप्त-
२५ नस्य सुतः किमूयेलो ऽधिपः। सिवूलूनवंशात् पर्णकस्य पुत्र इलीषाफनो-
२६ ऽधिपः। इषाखरवंशाद् अस्सनस्य पुत्रः पल्टियेलोऽधिपः। आशेरवंशात्
२८ शिलोमिपुत्रो ऽहीहूदोऽधिपः। नप्तालिवंशाद् अम्मीहूदस्य सुतः पिदहे-
२९ लोऽधिपः। किनानदेशम् इस्रायेल्वंशार्थम् अंशयितुं परमेश्वरेणैते
जना निर्द्दिष्टाः।

३५ पञ्चत्रिंशोऽध्यायः।

१ लेवीयानां नगराणां तदीयपरिसराणाम् आश्रयनगराणाञ्च निरूपणं ९ हन्तृ-प्रतिहन्त्रो र्विधिः ३० वधकेभ्य उत्कोचग्रहणे प्रतिषेधश्च।

परमेश्वरो मोयावीयप्रान्तरे यिरीहोः समीपस्थयर्दननद्याः सन्निधौ १
मूससं गदितवान् त्वं स्वस्वभूम्यधिकारात् कतिपयानि निवासनगराणि २
तेषां नगराणां चतुर्दिक्स्थान् परिसरांश्च लेवीयेभ्यो दातुम् इस्रायेल्वंशम्
आदिश। तानि सर्व्वपुराणि तेषां निवासाय भविष्यन्ति ते च परिसरा- ३
स्तेषां पशुसम्पत्तिजन्तूनां कृते भविष्यन्ति। यूयं यद्यत् पुरं लेवीयेभ्यो ४
दास्यथ तत्परिसरो नगरप्राचीरस्य वहिश्चतुष्पार्श्वेषु सहस्रहस्तपरि-
मितो भविष्यति। यूयं नगरस्य वहिःस्थितां पूर्व्वसीमां द्विसहस्रहस्तपरि- ५
मितां दक्षिणसीमां द्विसहस्रहस्तपरिमितां पश्चिमसीमां द्विसहस्रहस्त-
परिमिताम् उत्तरसीमाञ्च द्विसहस्रहस्तपरिमितां करिष्यथ, तन्मध्ये पुरं
भविष्यति तच्च तेषां नगरपरिसरो भविष्यति। घातकानां पलायनाय ६
यानि षड् आश्रयपुराणि युष्माभि र्दास्यन्ते तानि तेभ्योऽन्यानि द्विचत्वा-
रिंशत् पुराणि च यूयं लेवीयेभ्यो दास्यथ। साकल्यतो युष्माभिरष्ट- ७
चत्वारिंशत् पुराणि तदीयपरिसराश्च लेवीयेभ्यो दास्यन्ते। यूयम् एकैकस्य ८
वंशस्य प्राप्तांशानुसाराद् इस्रायेल्वंशस्याधिकृतभूमे र्लेवीयेभ्यस्तानि नग-
राणि दास्यथ, अधिकादधिकं अल्पादल्पं दास्यथ।

परमेश्वरो मूससं जगाद त्वम् इस्रायेल्वंशेभ्यः कथय तान् इति ९
वाचं वद यदा यूयं यर्दनपारं गत्वा किनानदेशं प्राप्स्यथ, तदा येन केन- ११
चिद् अज्ञानतो नरो हन्यते स हन्ता यत् पुरं पलायमानो रक्षामियात्
तादृशान्याश्रयनगराणि युष्माभिः संस्थाप्यन्तां। तेन हन्ता विचाराय १२
समाजसम्मुखम् उपस्थितेः प्राक् यथा न म्रियेत तदर्थं तानि नगराणि
प्रतिहन्तु र्हस्ताद् युष्माकम् रक्षास्थानानि भविष्यन्ति। युष्माभिरे- १३
तदर्थं यानि नगराणि दातव्यानि तान्याश्रयनगराणि षट्संख्यकानि
भविष्यन्ति। तेषां मध्ये त्रीणि पुराणि यर्दनस्य पूर्व्वपारे त्रीणि पुराणि १४
च किनानदेशे युष्माभि र्दास्यन्ते, तान्येवाश्रयपुराणि भविष्यन्ति।
इस्रायेल्वंशीयेन वा तन्मध्यवासिना विदेशिना येन केनचिदज्ञानात् १५
नरो हन्यते स यथा तत् स्थानं पलायेत तत्कृते तानि षट् पुराणि
आश्रयरूपाणि भविष्यन्ति। यदि कश्चित् लौहास्त्रेण कञ्चनाहन्ति १६
तेन च स म्रियते तर्हि स नरहा, स च हन्तावश्यं हननीयः। वा येन १७

नरं मारयितुं शक्नोति तादृशं पाषाणं करेणादाय यदि कञ्चनाहन्ति
१८ तेन च स म्रियते तर्हि स नरहा, स च हन्तावश्यं घानिष्यते। यदा येन
मारयितुं शक्नोति तादृशं काष्ठमयम् अस्त्रं करेणादाय यद्याहन्ति तेन
१९ च स म्रियते तर्हि स नरहा, स च हन्तावश्यं घानिष्यते। प्रतिहन्ता
२० स नरहा हननीयः, स तेन दृष्टएव हननीयः। यदि कश्चित् द्वेषात्
कञ्चनाहन्ति वा व्याधवत् संलक्ष्य तदुपर्य्यस्त्रं निक्षिपति तेन च स
२१ म्रियते, यदि वा शत्रुत्वात् करेणाहन्ति तेन च स म्रियते, तर्हि स
येनाहतः सोऽवश्यं घानिष्यते, यतः स नरहा, स च हन्ता प्रतिहन्त्रा
२२ दृष्टएव हननीयः। शत्रुत्वं विना यदि कश्चिद् अज्ञानतः कञ्चनाहन्ति
२३ वा गवेषणं विनास्त्रं निक्षिपति, वा येन मारयितुं शक्नोति तादृशं
पाषाणं नरं न वीक्ष्य कस्यचिद् उपरि निक्षिपति तेन च स म्रियते,
२४ किन्तु यदि स तस्य रिपुरनिष्टचेष्टी वा न भवति, तर्हि हन्तृप्रतिहन्त्रो
२५ र्विचारो समाजेनैतद्विध्यनुसारात् निश्चेतव्यः। समाजः प्रतिहन्तुः
करात् तं हन्तारम् उद्धरिष्यति, स च यत्र पलायितस्तस्मिन् आश्रयनगरे
पुनस्तं प्रेषयिष्यति, स च पूततैलेनाभिषिक्तस्य महायाजकस्य मृतिं यावत्
२६ तत्र स्थास्यति। किन्तु यो हन्ता यदाश्रयपुरं पलायितः, कदाचिद्
२७ यदि स तत्सीमातो बहिर्भूय प्रतिहन्त्रा तदाश्रयपुरस्य सीमाया बहिः
प्राप्यते, तर्हि स हन्ता प्रतिहन्त्रा हननीयो भवति, तस्मिंश्च रक्तपाताप-
२८ राधो न भविष्यति। यतो महायाजकस्य मृतिं यावद् आश्रयपुरे तेन
न्युषितव्यं, किन्तु महायाजके मृते सति स हन्ता स्वीयभूम्यधिकारं
२९ प्रत्यागमिष्यति। एतानि वचनानि युष्माकं सर्व्वनिवासे युष्मत्पुरुष-
परम्परया विचारविधिरूपेण मान्यानि भविष्यन्ति।

३० यो हन्ता कञ्चन जनं हन्ति स साक्षिणां वाक्येन घानिष्यते, किन्त्वेकस्य
३१ साक्षिणो वाक्यात् कस्यापि प्राणदण्डो न कर्त्तव्यः। प्राणदण्डयोग्यस्य हन्तुः
३२ प्राणरक्षार्थं यूयम् उत्कोचं मा ग्रहीष्यथ सोऽवश्यं घानिष्यते। आश्रय-
पुरे पलायितो नरो यथा याजकस्य मरणात् प्राक् स्वदेशं प्रत्यागत्य
३३ वसेत्, तदर्थं तस्मात् किञ्चिद् उत्कोचं मा गृह्णीत। यूयं स्वनिवास-
देशम् अपूतं मा कुरुत, यतो रुधिरं देशम् अपूतं करोति रुधिर-
३४ पातिनो रुधिरं विना देशस्य प्रायश्चित्तं न भवति। अतो यूयं यं देशम्
अधिकरिष्यथ, तत्राहं वसामि तमपूतं मा कुरुत यतः परमेश्वरो-
ऽहम् इस्रायेल्मध्यवासी।

३६ षट्त्रिंशोऽध्यायः।

१ सिलफदस्य कन्यानाम् अधिकारकथनं ५ वंशाधिकारं रक्षितुं स्ववंशे तासां विवाह-निरूपणं १० निरूपणानुरूपं कर्म्म करणञ्च।

ततः परं यूषफवंशान्तर्गता मिनशिवंशीयमाखीरस्य सुतस्य गिलि- १
यदस्य पितृवंशाधिपा मूसस इस्रायेलीयपितृवंशाधिपानाञ्च समक्षम्
एत्य कथयामासुः। ते जगदुः, परमेश्वरो गुटिकापातेनेस्रायेल्वंशाय २
देशम् अंशयितुं मत्प्रभुम् आदिष्टवान्, अस्माकं भ्रातुः सिलफदस्य
भूमिं तत्कन्या अधिकारयितुम् अस्मत्प्रभुम् आज्ञापितवांश्च। किन्त्वि- ३
स्रायेल्वंशमध्येऽन्यवंशीयेन केनचित् साकं यदि तासां विवाहो भवति,
तर्ह्यस्माकं पैतृकभूम्यधिकारात् तासाम् अधिकारविशिष्टा भूमिर्नायि-
ष्यते, ता यद्वंशान्तर्गतास्तद्वंशाधिकारे योक्ष्यते च, इत्थं सा अस्मदधिकृतां-
शाद् हरिष्यते। तत इस्रायेल्वंशस्य महामहे भूते ता यद्वंशान्तर्गता- ४
स्तद्वंशस्य भूम्यधिकारे तासां भूमि र्योक्ष्यते, इत्थम् अस्मत्पितृवंशात्
तासां भूम्यधिकारो हारिष्यते।

ततो मूसाः परमेश्वरस्याज्ञया इस्रायेल्वंशाय कथितवान्, यूषफ- ५
वंशीया न्याय्यं कथयन्ति। परमेश्वरः सिलफदकन्या अधीत्यादिशत्, ६
ता यान् कांश्चन वृणते तेषामेव जाया भविष्यन्ति, किन्तु केवलं स्वपितृ-
वंशमध्ये स्वकुलस्यान् उद्वक्ष्यन्ति। इस्रायेल्वंशीयानां भूम्यधिकार एक- ७
वंशाद् अन्यवंशं न परिवर्त्तिष्यते, इस्रायेल्वंशाः सर्व्वे स्वस्वपितृवंशा-
धिकारे स्थास्यन्ति। सर्व्व इस्रायेल्वंशो यथा स्वस्वपैतृकभूम्यधिकारं ८
भुंक्ते, तदर्थम् इस्रायेल्वंशमध्येऽधिकारिणी सर्व्वा कन्या स्वपितृवंशी-
यस्य कस्यचित् नरस्य जाया भविष्यति। तत एकवंशाद् अन्यवंशम् ९
अधिकारो न परिवर्त्तिष्यते, इस्रायेलीयानाम् एकैको वंशः स्वस्वपि-
त्रधिकारे स्थास्यति।

अनन्तरं मूसाः परमेश्वरेण यथादिष्टस्तथा सिलफदस्य कन्याभिर- १०
कारि। यतो मह्ला-तिर्सा-हग्ला-मिल्का-नोयानामानः सिलफदस्य ११
कन्याः स्वस्वपितृव्यपुत्त्रैरूढाः। यूषफसुतस्य मिनशे र्वंशान्तर्गतैः साकं १२
तासां विवाहे निष्पन्ने तासां भूम्यधिकारस्तासां पितृवंशएव स्थितः।
परमेश्वरो यिरीहोः समीपस्थयर्द्दनतटे मोयावीयप्रान्तरे मूसाद्वारा १३
इस्रायेल्वंशं प्रति एता आज्ञा नीतिवाक्यानि चादिष्टवान्।

द्वितीयोपदेशः

अर्थात्

मूसोलिखितं पञ्चमपुस्तकं।

---

१ प्रथमोऽध्यायः।

१ यात्राया श्चत्वारिंशद्वर्षे इस्रायेल्वंशाय मूससः कथनं ६ परमेश्वरस्य प्रतिज्ञा ९ अधिपानां निरूपणं १९ इमोरीयलोकानां गिरिं प्रति यात्रा २२ अग्रे चाराणां प्रेषणं चाराणां वाक्यात् लोकानां कलहः ३४ तान् प्रति परमेश्वरस्य कोपः प्रतिज्ञादिश्च।

१ पारण-तोफल-लावन-हत्सेरोत्-दीषाहवानां मध्यस्थले सूफसम्मु-
खस्थे प्रान्तरे ऽर्थात् यर्दननद्याः पूर्व्वपारस्थप्रान्तरे मूसाः सर्व्वान् इस्रा-
२ येल्वंशान् प्रति एतान् उपदेशान् कथितवान्। सेयीरगिरिणा होरेव-
३ मारभ्य कादेश्बर्णेयं यावत् एकादशदिनगम्यो मार्ग आस्ते। चत्वारिंश-
द्वर्षस्यैकादशमासस्य प्रथमेऽह्नि मूसाः परमेश्वरेण यथादिष्टस्तथैव तेभ्यः
४ कथयामास। हिष्वोननिवासिन इमोरीयसीहोनराजस्य बधात् परम्
५ अस्तारोत्निवासिनि वाशानीयभूप ओगेऽपीद्रिय्यां हते सति, मूसा
यर्दनस्य पूर्व्वपारे मोयावीयदेशे शास्त्रमिदं व्याहर्तुम् आरभत।
६ अस्माकं प्रभुः परमेश्वरो होरेवेऽस्मभ्यं कथितवान्, यूयम् अस्मिन्
७ गिरौ बहुदिनान्युषितवन्तः, इदानीं परावृत्य इमोरीयाणां गिरिश्रेणीं
तन्निकटस्थं प्रान्तरं गिरिं तलभूमिं दक्षिणदेशं सागरतटञ्चार्थात
किनानीयानाम् निखिलदेशं लिवानोनाद्रिञ्च गत्वा फरादाख्यं महानदं
८ यावत् यात्रां कुरुत। पश्यताहं युष्माकं सम्मुखे तं देशं समार्पयं,
तस्मात् परमेश्वरो युष्मत्पूर्व्वपुरुषेभ्य इब्राहीम इस्हाके याकूबे च तेषां
पश्चात् तेषां वंशाय च यं देशं दातुं प्रतिज्ञातवान् यूयं तं देशं
गत्वाधिकुरुत।
९ तत्कालेऽहं युष्मभ्यम् अकथयं, युष्माकं भारं सोढुम् एकेन मया
१० न साध्यं। यस्माद् युष्मत्प्रभुना परमेश्वरेण वर्द्धिता यूयमिदानीं बहु-
११ त्वात् आकाशस्य तारागण इव जाताः। युष्माकं पैतृकः प्रभुः परमेश्वरो

यथाङ्गीकृतवान् तथैव युष्मान् पुनः सहस्रगुणान् करोतु आशिषञ्च
ददातु। युष्माकम् एतावन्तं भारं गुरुत्वं विवादञ्च वोढुम् एकेन मया १२
किं शक्यते? यूयं स्वस्ववंशानां बुद्धिमज्ज्ञानिनः परिचितांश्च लोकान् १३
वृणीत, तानहं युष्माकं मुख्यान् करिष्यामीति वाक्ये मया कथिते १४
यूयं प्रत्यवदत त्वं यत् कर्त्तुम् आदिशसि, तद् भद्रं। ततोऽहं युष्माकं १५
वंशानां मुख्यान् ज्ञानिनः परिचितांश्च जनान् आदाय युष्माकम् अधि-
पान् कृत्वा सहस्रपतीनां शतपतीनां पञ्चाशत्पतीनाञ्च पदानि दत्त्वा
युष्मद्वंशानां शास्तृत्वे नियुक्तवान्। तदाहं तान् विचारकान् इत्यादिशं, १६
यूयं वादिप्रतिवादिनां स्वस्वभ्रातॄणां वचांसि श्रुत्वा वादिनं तद्भ्रातरञ्च
वा विदेशिनञ्च न्याय्यं विचारयिष्यथ। विचारे यूयं कस्यापि पक्षपातं मा १७
कार्ष्ट यथा क्षुद्रस्य तथा महतोपि वाचं शृणुत, मानुषास्यात् मा
बिभीत, यतो विचार ईश्वरस्यैव; यस्य विचारो युष्माभि र्दुर्गम्यः स
विवादो मदन्तिकम् आनीयतां तमहं श्रोष्यामि। इत्थं तदानीं युष्माकं १८
कर्त्तव्यं सर्व्वकर्म्माधि मयादिष्टं।

अनन्तरमस्मत्प्रभुपरमेश्वराज्ञानुसाराद् वयं होरेवात् प्रस्थाय इमो- १९
रीयाणां गिरियानमार्गे युष्माभि र्यद् भयानकं महाप्रान्तरं दृष्टं तन्म-
ध्येन यात्रां कृत्वा कादेशवर्णेयम् आगताः। अहं युष्मभ्यम् अकथयं प्रभुः २०
परमेश्वरो ऽस्मभ्यं येषां देशं दास्यति तेषाम् इमोरीयाणां गिरिं यूयं
प्राप्ताः। पश्यत युष्माकं प्रभुः परमेश्वरो युष्माकं करेषु देशम् समर्पितवान् २१
अतो यूयं स्वेषां पैतृकप्रभोः परमेश्वरस्याज्ञानुसाराद् गत्वा तमधि-
कुरुत ततो मा बिभीत निराशाश्च मा भूत।

तदा यूयं सर्व्वे मदन्तिकम् आगत्य कथितवन्तः, आदौ वयं तद्देशे २२
लोकान् प्रेषयाम तेऽस्मत्कृते देशं निरीक्ष्य अस्माभिः केन पथा यातव्यं
कानि पुराणि चाक्रम्याणि तद्वार्त्तां आनयन्तु। तदा तत्कथयाहमपि २३
तुष्टवान् युष्माकम् एकैकस्माद् वंशाद् एकैकं जनम् आदाय द्वादश
जनान् गृहीतवान्। ते प्रस्थाय गिरिमारुह्य इष्कोलोपत्यकां प्राप्य २४
देशं वीक्षाञ्चक्रिरे। तद्देशीयानि कतिपयानि फलानि च गृहीत्वा- २५
स्माकं समीपमानीय वार्त्तां जगदुः, अस्माकं प्रभुः परमेश्वरो ऽस्मभ्यं यं
देशं दास्यति स उत्तमो देशः। तथापि यूयं तत्र यातुम् अनिच्छन्तः २६
स्वेषां प्रभोः परमेशस्याज्ञाविरुद्धाचारिणो जाताः। स्वस्वदूष्ये च २७
वाग्युद्धं कृत्वा कथितवन्तः, परमेश्वरो द्वेषाद् अस्माकं विनाशायास्मान्

२८ इमोरीयाणां करेषु समर्पयितुं मिसर्देशाद् वहिरानयत्। वयं क्व
यामः? यतस्तद्देशीयजना अस्मत्तो बहुप्रजा दीर्घकायाश्च, तेषां
पुराणि च वृहन्ति गगणस्पर्शिप्राचीरयुक्तानि सन्ति, तत्रास्माभिर-
नाकीयवंशा अपि दृष्टा इति वार्त्तयास्माकं भ्रातरोऽस्मान् भीरून्
२९ चक्रुः। तदाहं युष्मानवदं मा त्रस्यत तेभ्यो मा बिभीत। परमेश्वरेण
३० मिसर्देशे युष्मदर्थं युष्माकं समक्षं यानि कर्माणि कृतानि प्रान्तरे
ऽस्मिन्नपि युष्माभि र्यानि दृष्टानि, तदनुसाराद् युष्माकं प्रभुः परमेश्वरो
३१ युष्माकम् अग्रगामी भूत्वा युष्मत्कृते योत्स्यति। यतः स्वतनयवाही पितेव
युष्माकं प्रभुः परमेश्वरो युष्माकम् अत्रागमनं यावत् निखिलमार्गे युष्मान्
३२ ऊढवान्। तथापि युष्माकं यः प्रभुः परमेश्वरो रात्रौ वह्निना दिवा
३३ मेघेन गन्तव्यं मार्गं दर्शयन् युष्माकं शिविरनिधानस्थानं वीक्षितुं
युष्माकम् अग्रेऽग्रे गच्छति, तस्मिन् यूयं न व्यश्वसित।

३४ ततः परमेश्वरो युष्माकं वाक्यमाकर्ण्य क्रुध्यन् इति शपथं कृतवान्,
३५ अहं युष्माकं पूर्व्वपुरुषेभ्यो यं देशं दातुं शपथं कृतवान् एतेषां दुष्टमानु-
३६ षाणां मध्ये न कोपि तमुत्तमं देशं द्रक्ष्यति। केवलं यिफुन्नेः पुत्त्रः
कालेवस्तं द्रक्ष्यति, स यत्र देशे पद्भ्यां व्रजितवान् तं देशं तस्मै तद्वंशाय
३७ च दास्यामि यतः स परमेश्वरस्य सम्यगनुगतः। परमेश्वरो युष्मत्का-
३८ रणात् मह्यमपि क्रुध्यन् अवदत्, त्वमपि तत् स्थानं न प्रवेक्ष्यसि। तव
परिचारको नूनस्य पुत्त्रो यिहोशूयस्तं देशं प्रवेक्ष्यति, त्वं तमाश्वासय,
३९ यतः स इस्रायेल्वंशं तमधिकारयिष्यति। एतेऽपहारिष्यन्त इति यूयं
यानधि कथितवन्त इदानीमपि ये भद्राभद्रज्ञानम् अप्राप्ताः, युष्माकं ते
वालकास्तं देशं प्रवेक्ष्यन्ति, मया तस्मिन् तेभ्यो दत्ते ते तमधिकरिष्यन्ति।
४० इदानीं यूयं परावृत्य सुफार्णवगामि प्रान्तरं यात। तदा यूयं मां प्रत्य-
४१ वदत, वयं परमेश्वरस्य विरुद्धं पापं कृतवन्तः, वयं प्रभोः परमेश्वरस्य
सर्व्वाज्ञानुसाराद् गत्वा युध्यामहे, इत्युक्त्वा यूयं सर्व्वे युद्धास्त्रैः सज्ज-
४२ माना गिरिमारोढुं दुःसाहसं कृतवन्तः। तदा परमेश्वरो माम् उक्तवान्
त्वं तान् वद, अहं युष्मन्मध्यवर्त्ती नास्मि, अतो यूयं यथा रिपूणां समक्षं
४३ नाहन्येध्वं तदर्थं योद्धुं मा यात। वचने ऽस्मिन् युष्मभ्यम् मया कथितेऽपि
यूयं तन्न श्रुत्वा परमेश्वरस्याज्ञाया विरुद्धाचारिणो दुःसाहसिनश्च
४४ भूत्वा पर्व्वतमारोहत। तस्मात् तद्गिरिवासिन इमोरीयलोका युष्मद्वि-
रुद्धं वहिर्भूय युष्मान् मधुमक्षिकावत् ताडयित्वा सेयीरे हर्म्मां यावत्

व्यकिरन्। तदा यूयं परावृत्य परमेश्वरस्य समीपे रुदितवन्तः, किन्तु ४५
परमेश्वरो युष्माकं रवे मनो न न्यधत्त न च तमाकर्णयत्। ततो यूयं ४६
कादेशे उषित्वा तत्र बहुकालं स्थितवन्तः।

---

२ द्वितीयोऽध्यायः।

१ इदोमीयलोकैः समं योद्धुं निषेधः ९ मोयाबीयैः समं योद्धुं निषेधः १७ अम्मोनीयैः समं योद्धुं निषेधः २४ इमोरीयसीहोनभूपेन युद्ध्वा तं दमितुमाज्ञा।

अनन्तरं वयं परमेश्वराज्ञया सुफार्णवगामिना प्रान्तरेण यात्रां १
कृत्वा बहुदिनैः सेयीराद्रिं वेष्टितवन्तः। परमेश्वरो मामवादीत् अलं २
युष्माकम् एतदद्रिवेष्टनेन, इदानीम् उत्तरं यात। लोकनिवहम् इत्यादिश, ४
सेयीरवासिनां युष्मद्भ्रातॄणाम् एषौवंशीयानां सीमया युष्माभि र्यातव्यं,
ते युष्मत्तो भेष्यन्ति, तस्माद् यूयं सावधाना भवत, तैः समं मा विरुन्ध, ५
यस्मादहं तेषां देशस्य किमपि युष्मभ्यं न दास्यामि पादैकमितां भुव-
मपि न दास्यामि, एनं सेयीराद्रिम् अधिकर्त्तुम् अहम् एषावे दत्तवान्।
रूप्येण तेभ्यः क्रीतमन्नं युष्माभि र्भक्ष्यं रूप्येण च क्रीतं तोयं पेयं। ६
यतो युष्माकं प्रभुः परमेश्वरो युष्माकं करकर्म्माणि युष्मान् आशिषम् ७
उक्तवान् एतस्मिन् महाप्रान्तरे युष्माकं यात्रां ज्ञातवांश्च, एतानि
चत्वारिंशद् वर्षाणि परमेश्वरो युष्माभिः समं विद्यते, तेन युष्माकं कस्या-
प्यभावो नास्ति। इत्थं वयं प्रान्तरस्थमार्गेणैलतेनेत्सियोनगेबरेण च ८
गत्वा सेयीरनिवासिनाम् अस्मदेषौवंशीयभ्रातॄणां सम्मुखस्थेन पथा
मोयाबीयप्रान्तरगामिनं मार्गं परावृत्ताः।

ततः परं परमेश्वरो मह्यं कथितवान् यूयं मोयाबीयान् मा क्लिश्नीत ९
युद्धेन तैः समं मा विरुन्ध तेषां देशं युष्मभ्यमहं न दास्यामि, यस्माद्
आरपुरम् अधिकर्त्तुं लोटवंशाय दत्तवान्। पुरा तत्र य एमीया १०
अवसन् त अनाकीया इव महान्तो बहुप्रजा दीर्घकायाश्चासन्।
अनाकीया इव वीरत्वेनापि मान्या आसन्, मोयाबीयास्तान् एमीयान् ११
वदन्ति। तथा सेयीरे पुरा होरीया न्यवसन् किन्त्वेषौवंशीया स्वसम्मु- १२
खात् तान् वहिष्कृत्य तेषां स्थानम् अधिकृत्य तत्र न्यवसन्। इस्रायेल्-
वंशीयैः परमेश्वरात् प्राप्तायां स्वाधिकृतायां भुवि यादृशं कृतं तादृशं तैर-
प्यकारि। इदानीं यूयम् उत्थाय सेरदनदीपारं यात तस्यैतद्वाक्याद् वयं १३

१४ सेरदनदीपारं गताः। भ्रमणेनास्माकं कादेशाद् आ आगमनात् सेरदनदी-
पारगमनं यावद् अष्टात्रिंशत् वत्सराणि गतानि ; तेषु वत्सरेषु परमे-
श्वरस्य शपथकारणात् तत्कालीया योद्धारः सर्व्वे शिविरमध्यात् लुप्ताः।
१५ यतः शिविरमध्यात् निःशेषं यावद् तान् लोप्तुं तेषां प्रतिकूलं पर-
१६ मेश्वरस्य हस्तो विस्तारितोऽभूत्। इत्थं लोकानां मध्यात् सर्व्वेषु योद्धृषु
१७ मृत्युना संहृतेषु परमेश्वरो माम् उक्तवान् अद्य युष्माभिर् आरपु-
१९ राख्या मोयाबीयसीमा लंघ्यते । यूयम् अम्मोनवंशीयानां सम्मुखम्
उपस्थाय तान् मा क्लिश्नीत तैः समं मा विरुन्ध, अहं युष्मभ्यम् अम्मोन-
वंशीयानां देशस्य किञ्चिदप्यधिकारार्थं न दास्यामि, यस्मादहं तमधि-
२० कर्त्तुं लोटवंशाय दत्तवान् । स देशोऽपि वीरदेश इति विख्यात
आसीत्, यस्माद् अम्मोनीयै र्ये समसुम्मीया इति गदितास्ते वीरवंशीयाः
२१ पुरा तत्र न्यवसन्। ते महान्तो बहुप्रजा अनाकीया इव दीर्घकायाश्चा-
सन्, किन्त्वम्मोनवंशीयाः स्वसम्मुखे परमेश्वरेण विनष्टान् तान् अन-
२२ धिकारिणः कृत्वा तेषां देशे न्यवसन्। सेयीरवासिनाम् एषौवंशीयानां
कृते तेन तथैव कृतं, तेषां सम्मुखे होरीयलोकेषु तेन विनष्टेषु त
एषौवंशीयास्तान् अनधिकारिणः कृत्वाद्य यावत् तेषां देशे निवसन्ति।
२३ येऽव्वीयलोका असां यावत् हत्सेरीमे न्यवसन् तेऽपि कप्तोराद् आगतैः
कप्तोरीयलोकै र्विनष्टास्तेषाञ्च देशे तै न्यूषितं।

२४ परमेश्वर उवाच । यूयम् उत्तिष्ठत यात्रां कृत्वार्णोननद्याः पारं
यात, पश्यत हिष्वोनवासीमोरीयाणां राजा सीहोनस्तद्देशश्च युष्म-
त्करेषु मया समर्पितः, यूयं तमधिकर्त्तुम् आरभ्य रणेन तैः सार्द्धं वि-
२५ रुन्ध। अद्यारभ्याहम् आकाशाधःस्थाः सर्व्वजातीर्युष्मत्त्रासयिष्यामि
भीषयिष्यामि च, ता युष्मद्वार्त्तां श्रुत्वा युष्मतः कम्पिष्यन्ते व्यथिष्यन्ते
२६ च। ततोऽहं हिष्वोनवासिनः सीहोनस्य समीपं किदेमोतप्रान्तरात् दूतं
२७ प्रहित्य प्रणयवाक्यमिदं कथितवान् त्वं स्वदेशमध्येन मां यातुम् अनु-
जानीहि, अहं दक्षिणं वामं वा न परावृत्य राजमार्गेणैव यास्यामि।
२८ अस्माकं प्रभुः परमेश्वरोऽस्मभ्यं यं देशं दास्यति, वयं यर्द्दननद्याः पारं
गत्वा यावत् तं देशं न प्राप्स्यामस्तावत् सेयीरनिवासिभिरेषौवंशीयै-
२९ रारवासिभिर्मोयाववंशीयैश्च मां प्रति यथाचरितं तथा त्वया-
प्याचर्य्यतां रूप्यं गृहीत्वा मह्यम् अन्नं दीयतां रूप्यं गृहीत्वा पातुं
३० तोयञ्च दीयतां, केवलमहं पद्भ्यां पारं यास्यामि। किन्तु हिष्वोनीयो

राजा सीहोनः स्वदेशमध्येनास्मान् यातुं नान्वजानात्, यतो युष्मत्प्रभुः
परमेश्वरो युष्माकं करेष्वद्यवत् तं समर्पयितुं तन्मनः कठिनीकृतवान्
तदन्तःकरणं कठोरं कृतवान्। परमेश्वरो मह्यं कथितवान् पश्य कर्म्मणि ३१
प्रवृत्तेन मया सीहोनस्तदीयदेशश्च तव करे समर्पितः, त्वयापि कर्म्मारभ्य
तस्य देशोऽधिक्रियतां। ततःपरमस्माकं प्रतिकूलं वहिर्भूय यहसे योद्धुमा- ३२
गताः सीहोनस्तस्य सर्व्वप्रजाश्चास्माकं प्रभुणा परमेश्वरेणास्मत्करेषु सम- ३३
र्पिताः स तत्सुतास्तल्लोकाश्चास्माभि र्हताः। तदा तस्य सर्व्वनगराण्य- ३४
प्यस्माभि र्गृहीतानि प्रतिपुरस्थाः पुंस्त्रीबालकाः निःशेषं नाशितास्तेषा-
मेकोपि न शेषितः। किन्तु पशून् वशीभूतनगरीयं लोठितं वस्तुजातञ्च ३५
वयं स्वार्थमग्रहीष्म। अर्णोननद्याः तटस्थारोयेरं नदीमध्यस्थपुरञ्चारभ्य ३६
गिलियदं यावत् पुरैकमप्यस्माकम् अगम्यं नासीत्, अस्मत्प्रभुणा पर-
मेश्वरेण तत्सर्व्वम् अस्मत्करेषु समर्पितं। केवलं अम्मोनवंशस्य देशोऽर्थात् ३७
यव्वोकतटिनीपार्श्वस्थः प्रदेशः पर्व्वतस्थानि पुराणि च यान्यन्यस्थानान्यधि
परमेश्वरोऽस्मान् प्रतिषिद्धवान्, तानि स्थानानि युष्माभि र्नाक्रमितानि।

---

३ तृतीयोऽध्यायः।

१ ओगाख्यस्य वाशानभूपस्य पराजयः १२ रूवेणगाद्वंशीयेभ्यः परास्तभदानाज्ञा २१ यिहोशूयं प्रति मूससं उपदेशः २३ देशं प्रवेष्टुं मूससः प्रार्थना च।

ततोऽस्मासु परावृत्य वाशानपथेन गतेषु वाशानभूप ओगस्तस्य सर्व्व १
लोकाश्चास्माकं प्रतिकूलं योद्धुम् इद्रियीम् आगमन्। परमेश्वरो मह्यम् २
अकथयत्, त्वं तस्मान् मा बिभीहि यतोऽहं तं तस्य सर्व्वलोकान् देशञ्च
तव करे समर्पयिष्यामि, हिष्वोन्वासिनम् इमोरीयराजं सीहोनं प्रति
त्वया यथा कृतं तथा तमपि प्रति क्रियतां। इत्थं वाशानभूप ओगोऽपि ३
तदीयसर्व्वलोकाश्चास्माकं प्रभुणा परमेश्वरेणास्माकं करेषु समर्पिता
अस्माभिश्च विनष्टानां तेषाम् एकोऽपि जनो नावशिष्टः। तदा वयं तस्य ४
सर्व्वाणि पुराणि वशे कृतवन्तः वाशानीयनरपतेरोगस्य जनपदेऽर्गोबा-
ख्यदेशे स्थितानां षष्टिनगराणाम् एकमपि नगरम् अस्माभिरजेयं
नातिष्ठत्। तानि नगराणि प्रोच्चप्राचीरवेष्टितानि द्वारैरर्गलैश्च सुरक्षि- ५
तान्यासन् तदतिरिक्तानि प्राचीरशून्यान्यनेकानि नगराणि चासन्।
हिष्वोनीयभूपं सीहोनं प्रत्यस्माभि र्यत् कृतं तद्वत् तेऽप्यस्माभि र्विनष्टाः, ६

७ वयं पौरान् तेषां योषितो बालकांश्च निःशेषं नाशितवन्तः, किन्तु तेषां
८ सर्व्वपशून् नगरीयद्रव्यादि लोठयित्वा स्वार्थं गृहीतवन्तः। तदा वयम्
अर्णोननदीतो हर्म्मोणाद्रिं यावत् सर्व्वदेशं यर्द्दनपारस्थानाम् इमोरी-
९ याणां राजद्वयाद् हृतवन्तः। सीदोनीयास्तं हर्म्मोणं शिरियोणम् इमो-
१० रीयाश्च सीनीरं गदितवन्तः। सल्खाम् इद्रियीञ्च यावद् वयम् अधि-
त्यकास्थं सर्व्वं नगरं सर्व्वं गिलियदं वाशानं वाशानीयभूपतेरोगराजस्य
११ नगराणि च वशे कृतवन्तः। यस्माद् अवशिष्टवीराणां मध्ये वाशानीयभूप
ओगमात्रः शेषोऽतिष्ठत्, पश्य तस्य खट्वा लौहमयी सा किम् अम्मोनीय-
वंशस्य रब्बायां नास्ति? मानुषहस्तपरिमाणेन सा नवहस्तदीर्घा चतु-
र्हस्तविस्तृता चास्ति।
१२ तदा जनपदेऽस्मिन् अस्माभिरधिकृतेऽर्णोननदीस्थम् अरोयेरम्
आरभ्य गिलियदगिरेरर्द्धांशस्तन्नगराणि चाहं रूवेणवंशगादवंशाभ्यां
१३ दत्तवान्। गिलियदस्यावशिष्टमंशम् ओगस्य जनपदञ्च अर्गोवप्रदेशाख्यं
सर्व्वं वाशानदेशमहं मिनशेरर्द्धवंशाय दत्तवान्। पुरा स कृत्स्नो
१४ वाशानदेशो वीरदेश इति विख्यात आसीत्। गिशूरीयाणां
माखाथीयानाञ्च सीमां यावत् कृत्स्नम् अर्गोवदेशं मिनशे र्वंशीयो
यायीरो वशीकृत्य स्वनामानुरूपम् अद्य यावत् तेषां वाशानीय-
१५ नगराणां नाम हवोत्-यायीरं कृतवान्। अहं माखीराय गिलि-
१६ यदं दत्तवान्। गिलियदादर्णोननदीं यावत् तदीयाम् अर्द्धोपत्यकां
१७ सीमाञ्च यावद् अम्मोनवंशस्य सीमां यव्वोक्नदीञ्च यावत् किन्नेरताच
प्रान्तरस्थकदम् अर्थात् असदोत्पिस्गाया अधःस्थं लवणाब्धिं यावत्
पूर्व्वदिक्स्थं प्रान्तरं यर्द्दननदीं तदीयसीमाञ्चाहं रूवेणवंशाय गादवंशाय
१८ च दत्तवान्। तदाहं युष्मान् इदमादिशं, युष्माकं प्रभुः परमेश्वरोऽधिकर्त्तुं
देशमिमं युष्मभ्यं दत्तवान् किन्तु युष्माकं योद्धारः सर्व्वे सज्जमाना
१९ युष्माकमिस्रायेल्वंशीयानां भ्रातॄणां सम्मुखे पारं यास्यन्ति। मया यानि
नगराणि युष्मभ्यं दत्तानि, तत्र युष्माकं जायासुतपशवो वत्स्यन्ति, यतो
२० युष्माकं पशवो बहुसंख्यकाः सन्ति तदहं वेद्मि। अपरं युष्मदिव युष्माकं
भ्रातृभ्योऽपि परमेश्वरेण विश्रामे दत्ते तैश्च युष्मत्प्रभुपरमेश्वरात् प्राप्ये
यर्द्दनपारस्थे देशेऽधिकृते सति यूयमत्र मया दत्तां स्वस्वाधिकृतभूमिं
प्रत्यागमिष्यथ।
२१ तदाहं यिहोशूयम् आदिशं युष्मत्प्रभुः परमेश्वर इमोरीयन्टपावेतौ

प्रति यदकरोत् तत् त्वं स्वनेत्राभ्यां दृष्टवान्; त्वं यत्र पारं गमिष्यसि,
तत्रस्थानि सर्व्वराज्यानि प्रति परमेश्वर इत्थं करिष्यति। यूयं तेभ्यो मा २२
भैष्ट यतो युष्माकं प्रभुः परमेश्वरः स्वयं युष्मत्कृते योत्स्यति।
तदाहं परमेश्वरे विनीतवान् हे प्रभो परमेश्वर त्वं स्वं महिमानं स- २३
प्रभावकरञ्च स्वदासाय प्रकाशयितुम् आरब्धवान्, स्वर्गे मर्त्ये वा त्वत्कर्म्मेव २४
त्वत्प्रभाववत् कर्त्ता क ईश्वर आस्ते? यर्द्दनस्य पारस्थं तमुत्तमं देशं तं २५
रम्यं लिवानोनं गिरिं द्रष्टुं मां यातुम् अनुजानीहि मयैतत् प्रार्थितं।
किन्तु परमेश्वरो युष्मत्कृते मत्प्रतिकूलं क्रुध्यन् मद्वाचं न श्रुत्वावदत् २६
अलमनेन, एतदधि पुनर्मां मा वद। पिस्गायाः शृङ्गमारुह्य पश्चि- २७
मोत्तरदक्षिणपूर्व्वदिश आलोक्य स्वनेत्राभ्यां पश्य यस्मात् त्वं यर्द्दनपारं
न यास्यसि। त्वं यिहोशूयम् आदिश्याश्वासय बलीकुरु च यस्मात् २८
स एतेषां लोकानाम् अग्रगामी सन् पारं यास्यति, स एव च त्वया
दृक्ष्यमाणं तं देशं तान् अधिकारयिष्यति। इत्थं वयं बैत्पियोरस्य सम्मुख- २९
स्थितायाम् उपत्यकायां न्यवसाम।

---

४ चतुर्थोऽध्यायः।

१ आज्ञां पालयितुं मूससो विनयः ४१ यर्द्दनस्य पूर्व्वदिश्यास् आश्रयपुरत्रयनिरूपणं।

हे इस्रायेल्वंशा अहं यान् विधीन् व्यवस्थाश्च पालयितुं युष्मान् शिक्ष- १
यामि तत्र मनो निधत्त तेन यूयं जीविष्यथ, युष्माकं पैतृकः प्रभुः पर-
मेश्वरो युष्मभ्यं यं देशं दास्यति तं प्रविश्याधिकरिष्यथ च। अहं युष्मान् २
यद् वाक्यम् आदिशामि तदधिकं मा कुरुत स्तोकमपि न कुरुत, मयोक्तां
युष्मत्प्रभोः परमेश्वरस्याज्ञां सर्व्वां पालयत। बाल्पियोरमधि परमे- ३
श्वरो यद् कृतवान् तद् यूयं स्वस्वनेत्रै र्दृष्टवन्तः, स बाल्पियोरस्य पश्चा-
द्गामिसर्व्वजनान् युष्माकं मध्याद् व्यनाशयत्। किन्तु स्वप्रभौ परमेश्वर ४
आसक्ता यूयं सर्व्वे अद्य यावत् जीवथ। पश्यत मम प्रभुः परमेश्वरो ५
मां यथादिशति, अहं युष्मान् तथा विधीन् व्यवस्थाश्च ज्ञापयामि,
अस्माद् यूयं यं देशं अधिकर्त्तुं याथ तत्र तादृग् आचरिष्यथ। तथा ६
कृत्वा तदनुसाराद् आचरिष्यथ, यतो तदेवान्यजातीनां बोधे युष्माकं
ज्ञानबुद्ध्योः प्रमाणं भविष्यति, त एतान् विधीन् श्रुत्वा वदिष्यन्ति, एषा
महाजाति र्ज्ञानबुद्धिमती चेति सत्यं। अस्माकं प्रभुः परमेश्वरो ऽस्माकं ७

सर्व्वप्रार्थनाकाले यथास्माकं सविधो भवति तथा सविधो देवः केषां
८ महाजातीयानामास्ते? अद्याहं युष्मत्समक्षं यादृशं शास्त्रं ददामि तादृशो
९ न्याय्यविधिव्यवस्थाः कस्या महाजातेः सन्ति? यूयं यथा स्वनेत्रदृष्टानि
कर्म्माणि न विस्मरेत तानि च यथा युष्मज्जीवत्काले युष्मच्चेतसो न निः-
सरेयुस्तस्मिन् मनो निधाय स्वप्राणानधि सावधाना भवत, युष्माकं पुत्त्र-
१० पौत्त्रान् एतानि शिक्षयत च। विशेषतो होरेवे युष्मत्प्रभुपरमेश्वरस्य
सम्मुखे तिष्ठतां युष्माकं स्थितिदिनं मा विस्मरत। तदा परमेश्वरो माम्
अवदत् त्वं मदन्तिके लोकान् मेलय, अहं स्ववाक्यानि तान् श्रावयिष्यामि,
ते यावज्जीवनं यथा मत्तो बिभ्यति तत्कृते तानि तैः शिक्ष्यन्तां स्वसन्ता-
११ नांश्च ग्राह्यन्तां। तदा यूयं सविधाः सन्तः पर्व्वताधोऽवस्थिताः स चाद्रि-
रग्निना ज्वलित आकाशान्तरञ्च यावत् तमिस्रेण मेघेन ध्वान्तेन च
१२ व्याप्तश्च। ततो वह्निमध्यात् परमेश्वरो युष्माभिः समभाषत, यूयं तद्वाचो
ध्वनिं श्रुतवन्तः, किन्तु कामपि मूर्त्तिं नापश्यत केवलो ध्वनिरभूत्।
१३ स यं नियमं पालयितुं युष्मान् आदिशत् तमर्थात् दशाज्ञाः प्रचार्य्य
प्रस्तरद्वये लिखितवान्।
१४ यूयं यं देशम् अधिकर्त्तुं पारं याथ तत्र युष्माभिः पालनीया विधि-
१५ व्यवस्था युष्मान् शिक्षयितुम् अहं तदा परमेश्वरेणादिष्टः। अतो यदा
परमेश्वरो होरेवे वह्निमध्याद् युष्माभिः संभाषितवान् तस्मिन् दिने
१६ युष्माभिः कापि मूर्त्ति र्न दृष्टा। अतो यूयं यथा भ्रष्टा भूत्वा स्वार्थं
१७ पुंसः स्त्रियो वा मूर्त्तिविशिष्टं विग्रहं भूचरजन्तुगगणोड्डीयमानपक्षि-
१८ भूचरकीटभूम्यधःस्थजलचरजन्तूनां कस्यचित् मूर्त्तिं वा न निर्म्मेयात,
१९ वा भ्रमित्वा गगणे नेत्रे उन्मील्य युष्माकं प्रभुः परमेश्वरो यानि व्योमाधः-
स्थानां सर्व्वजातीनां कृते स्थापितवान् तानि गगणस्थानि रविसोमभानि
विलोक्य च नत्वा न सेवेध्वं तदर्थं यूयम् अतिसावधानास्तिष्ठत।
२० यतो यूयम् अद्येव यथा परमेश्वरस्य विशेषलोका भवेत तदर्थं पर-
२१ मेश्वरो लौहकुण्डस्वरूपात् मिसर्देशाद् युष्मान् वहिरानयत्। युष्मत्का-
रणात् परमेश्वरो मह्यमपि क्रुध्यन् एतं शपथं कृतवान् त्वं यर्द्दन-
नदीपारं न यास्यसि तस्माद् युष्मत्प्रभुः परमेश्वरो युष्मभ्यं यं देशम्
२२ अधिकर्त्तुं दास्यति तमुत्तमं देशं प्रवेष्टुं न शक्नोम्यहं। मयैतद्देशे मर्त्तव्यं
यर्द्दननद्याः पारं न यातव्यं किन्तु यूयं पारं गत्वा तमुत्तमं देशम् अधि-
२३ करिष्यथ। यूयं यथा स्वैः समं निश्चितं युष्मत्प्रभुपरमेश्वरस्य नियमं

न विस्मरेत युष्मत्प्रभुणा परमेश्वरेण प्रतिषिद्धां कस्यचित् प्राणिनस्तच्छितां
मूर्त्तिं वा न निर्म्मयात तत्कृते स्वानधि सावधाना भवत। यतो युष्माकं २४
प्रभुः परमेश्वरो ज्वलदग्निस्वरूपः स्वगौरवरक्षक ईश्वरश्च।

युष्माभिः सुतान् सुतसुतांश्च जनयित्वा बहुकालं देश उपोषिते सति २५
यदि यूयं भ्रंशमानाः कस्यचित् प्राणिनस्तच्छितमूर्त्तिं निर्म्माय युष्माकं
प्रभुं परमेश्वरं क्रोधयितुं तत्साक्षात् कुकर्म्म कुरुथ, तर्ह्यहमद्य युष्माकं २६
प्रतिकूलं स्वर्गं मर्त्यञ्च साक्षिणौ कृत्वा कथयामि यूयं यं देशम् अधिकर्त्तुं
यर्दननद्याः पारं याथ तद्देशात् तूर्णं निःशेषं विनंक्ष्यथ तन्मध्ये बहुकालं
नावस्थास्यध्वे किन्तु समूलम् उच्छेत्स्यध्वे। परमेश्वरोऽन्यजातीनां मध्ये २७
युष्मान् विकरिष्यति, तत्रान्यदेशीयलोकानां मध्ये परमेश्वरेण नीता
यूयं अल्पसंख्यका अवशेक्ष्यध्वे। तत्र मानुषकरकृतान् काष्ठमयान् २८
प्रस्तरमयान् दर्शनश्रवणभोजनासमर्थान् देवान् सेविष्यध्वे। किन्तु २९
तत्र यदि स्वप्रभुं परमेश्वरं गवेषयध्वे तर्हि स्वसर्व्वान्तःकरणेन साकं
सर्व्वप्राणैः साकं मार्गङ्कि युष्माभिः स प्राप्स्यते। यदा क्लिष्टान् युष्मान् ३०
प्रत्येतानि घटिष्यन्ते तत्र भविष्यत्काले यूयं स्वप्रभुं परमेश्वरं प्रति
परावृत्य तद्वाचं श्रोष्यथ, यतो युष्मत्प्रभुः परमेश्वरो दयावान् ईश्वरः, ३१
स युष्मान् न त्यक्ष्यति न च नाशयिष्यति युष्मत्पूर्व्वपुरुषाणां समीपे
यं नियमं शपथेन निश्चितवान् तं न विस्मरिष्यति। पश्य पृथ्व्यां ३२
परमेश्वरस्य आ नरसृष्टिदिनाद् युष्माकमग्रवर्त्तिपूर्व्वपुरुषान् व्योमैक-
दिशोऽन्यदिशं यावत् समस्तलोकान् इति पृच्छथ, एतन्महाकार्य्यसमं
कार्य्यं किं कदापि जातं? कदापि वा किमेतादृशं श्रुतं? यूयं यथा ३३
किमन्ये केचन लोकास्तथा वह्निमध्ये वाक्यवादिन ईश्वरस्य रवं श्रुत्वापि
जीवन्तोऽतिष्ठन्? वा युष्माकं प्रभुणा परमेश्वरेण मिसर्देशे युष्माकं ३४
समक्षं यथा कृतं, तथा परीक्षाचिह्नलक्षणरणान् पराक्रमिकरं विस्ती-
र्णबाहुं महाभयङ्करत्वादि प्रकाशयित्वा भिन्नजातिमध्यात् स्वार्थं एक-
जातिं गृहीतुं किं कोपि देव उद्युक्तवान्? परमेश्वर एव प्रभुस्तदन्यः कोपि ३५
नहीति युष्मान् ज्ञापयितुं तानि सर्व्वाणि युष्मचक्षुर्गोचरे प्राकाश्यत।
स युष्मान् उपदेष्टुं स्वर्गात् स्ववाक्यं श्रावितवान् धरण्युपरि च स्वमहाग्निं ३६
दर्शितवान्, यूयमग्निमध्यात् तद्वाचं श्रुतवन्तः। स युष्मत्पूर्व्वपुरुषेषु ३७
स्नेहमकरोत् तस्मात् तेषां पश्चात् तेषां वंशमपि वरीतवान्। युष्मत्तो ३८
बलवत्तरबृहज्जाती र्युष्मत्साक्षात् वहिष्कर्त्तुं युष्मान् तेषां देशं प्रवेश-

यित्वाद्यवद् अधिकारयितुं स निजास्यप्रसादात् स्वमहाबलेन युष्मान्
३९ मिसर्देशाद् बहिरानयत् । अत ऊर्द्धस्थस्वर्गेऽधःस्थधरण्यां परमेश्वर-
एव प्रभुरन्यः कोपि नहीति यूयमद्य जानीत स्वस्वमनसि विवेचयत
४० च । अहमद्य तस्य या विधिव्यवस्था आदिष्टवान् ता आचरत तेन
यूयं युष्मत्परतो युष्मद्वंशश्च मङ्गलं लप्स्यध्वे; युष्माकं प्रभुः परमेश्वरो
युष्मभ्यं यां भूमिं चिरकालार्थं दास्यति, तस्यां युष्मदवस्थिते दिनानि
बहूनि भविष्यन्ति ।

४१ तदा यर्द्दनपूर्व्वपारे सूर्य्योदयदिशि मूससा हन्तृणाम् आश्रयपुराणि
४२ त्रीणि निश्चितानि । स्वयं पूर्व्वद्विष्टो नरो येन केनचिदज्ञानाद् हन्यते,
४३ स हन्ता तन्नगराणाम् एकं नगरं पलाय्य प्राणरक्षां गमिष्यति । तान्ये-
तानि, रूबेणीयानां समभूमस्थकाननस्थं बेत्सरं, गादीयानां गिलियदस्थं
रामोतं, मिनशीयानां वाशानस्थं गोलनञ्च ।

४४ शास्त्रम् एतत् मूससा इस्रायेल्वंशानां समक्षं स्थापितं । मिसराद्
४५ इस्रायेल्वंशस्यागमनात् परं हिष्वोन्वासिन इमोरीयराजस्य सी-
४६ होनस्य देशे यर्द्दनतटस्थबैत्पियोरस्य सम्मुखस्थसमभूमौ मूसास्तेभ्य
एतानि प्रमाणवाक्यानि विधिव्यवस्थाश्च ददौ, यतो मिसराद् आगते-
४७ रिस्रायेलीयवंशैः मूससा च स सीहोनो हतस्तस्य वाशानीयभूपतेरोगस्य
४८ चैतयो र्यर्द्दनपूर्व्ववासिनोरिमोरीयराजयो र्देशो ऽर्थाद् अर्णोननदीत-
टस्थम् अरोयेरम् आरभ्य सीयोनापरनामकं हर्म्मोणं यावत् समस्तदेशो
४९ ऽसदोद्पिस्गाधःस्थितप्रान्तरस्थं सागरञ्च यावत् यर्द्दनस्य पूर्व्वपारे
सूर्य्योदयदिशि स्थितं सर्व्वप्रान्तरञ्च वशेऽकारि ।

---

५ पञ्चमोऽध्यायः ।

१ होरेबे नियमस्य निरूपणं ६ दशाज्ञाकथनं २९ लोकानां प्रार्थनया मूससा दशाज्ञाया ईश्वरतो ग्रहणं ।

१ मूसाः सर्व्वेस्रायेल्वंशान् आहूय बभाषे हे इस्रायेल्वंशा अहं
शिक्षार्थं रक्षणार्थं पालनार्थञ्च युष्माकं कर्णगोचरे यान् विधीन् याश्च
२ व्यवस्था वदामि तत्र मनो निधद्ध्वं । अस्माकं प्रभुः परमेश्वरो होरेबे
३ सहास्माभिर्नियममेकं कृतवान् । परमेश्वरस्तं नियमं नास्माकं पूर्व्वपुरुषैः
४ साकं कृतवान् किन्त्वद्य जीवद्भिरस्माभिः साकं तं कृतवान् । परमेश्व-
५ रोऽग्नौ युष्माकं सम्मुखीभूय युष्माभिः सम्भाषितः । किन्तु यूयं वह्नेः

बिभ्यतः पर्व्वतं नारोहत ततः परमेश्वरस्य वाक्यं युष्मान् ज्ञापयितुमहं
तत्र परमेश्वरस्य युष्माकञ्च मध्येऽतिष्ठं।

परमेश्वर उवाच, दास्यगेहाद् अर्थतो मिसर्देशाद् त्वदीयोद्धार- ६
यिताहमेव तव प्रभुः परमेश्वरः। मम साक्षात् तव काचिदन्या ७
देवता न तिष्ठतु। निजार्थं काञ्चित् तक्षितप्रतिमाम् अर्थाद् उपरिस्थे ८
स्वर्गे वा नीचस्थायां पृथिव्यां वा धरण्या अधःस्थे तोये स्थितस्य
कस्यचिद् वस्तुनो मूर्त्तिं मा निर्म्माहि। ता न नम, ता न सेवस्व, ९
यतोऽहं तव प्रभुः परमेश्वरः स्वगौरवरक्षीश्वरः, ये पितृलोका माम्
ऋतीयन्ते, तृतीयचतुर्थपुरुषान् यावत् तेषां सन्तानेभ्योऽधर्म्मफलदाता;
किन्तु ये मयि प्रीयन्ते ममाज्ञाश्च पालयन्ति तेषां सहस्रपुरुषान् यावद् १०
दयाकृदहं। त्वं निजप्रभोः परमेश्वरस्य नाम निरर्थकं मा गृहाण, यतो ११
यः कश्चित् तस्य नाम निष्प्रयोजनं गृह्णाति, परमेश्वरस्तं निरपराध इति
न गणयति। त्वं स्वप्रभोः परमेश्वरस्याज्ञानुसाराद् विश्रामदिनं पालयन् १२
पवित्रीकुरु। षड् दिनानि श्रमित्वा तव वाणिज्यादि सर्व्वं कर्म्म कुरु; १३
किन्तु सप्तमदिनं तव प्रभोः परमेश्वरस्य विश्रामदिनमेव, तस्मिन् १४
त्वया वा तव पुत्रेण वा तव दुहित्रा वा तव दासेन वा दास्या वा
गोगर्द्दभादिपशुना वा द्वारवर्त्तिना विदेशिना केनापि किमपि कार्य्यं
मा क्रियतां; तत्र तव दासदास्यौ त्वया समं विश्रमिष्यतः। स्मर १५
त्वं मिसर्देशे दास्ये स्थितः, किन्तु प्रभुः परमेश्वरः पराक्रमिकरेण
विस्तीर्णबाहुना तस्माद् त्वां वहिरानयत्, अतो तव प्रभुः परमेश्वरो
विश्रामदिनं पालयितुं त्वाम् आज्ञापयत्। त्वं स्वप्रभोः परमेश्वरस्या- १६
ज्ञानुसारात् निजपितरं मातरञ्च सम्मन्यस्व, तेन तव प्रभुः परमे-
श्वरो यं देशं तुभ्यं दास्यति, तस्मिन् देशे तव दीर्घकालम् आयु-
र्मङ्गलञ्च भविष्यति। नरहत्यां मा कार्षीः। परदारान् मा गच्छ। १७
चौर्य्यं मा कार्षीः। स्वस्य समीपवासिनो विरुद्धं मिथ्यासाक्ष्यं मा २०
देहि। स्वसमीपवासिनो योषिति मा लोभं कुरु। स्वसमीपवासिनो २१
गृहक्षेत्रदासदासीगोगर्द्दभेषु प्रतिवासिनः कुत्रापि द्रव्ये मा लोभं कुर्य्याः।

परमेश्वरो गिरौ मेघघोरतमिस्रवह्निमध्यात् सर्व्वसमाजीयान् प्रति २२
वाक्यान्येतानि प्रोच्चैरुक्तवान् नापरं किमपि भाषितवान्। तानि वाक्या-
नि च प्रस्तरपत्रद्वये लिखित्वा मयि समार्पयत्। तदाद्रौ वह्निना २३
प्रज्वलिते युष्माभिश्च तमिस्रमध्यात् तस्मिन् रवे श्रुते युष्माभिरर्थात्

२४ युष्मद्वंशाधिपैः प्राचीनैश्च मदन्तिकम् एत्य वाक्यमिदम् उक्तं, पश्यास्माकं
प्रभुः परमेश्वरोऽस्माकं समीपे स्वमहिमगौरवे प्राकाशयत् वयं वह्नि-
मध्यात् तद्वाचं श्रुतवन्तः, ईश्वरेण सम्भाषितोऽपि नरो जीवितुं शक्नोतीति
२५ वयमद्य दृष्टवन्तः। किन्त्विदानीं वयं कुतो म्रियेमहि? एष महाग्निर-
स्मान् धक्ष्यति वयं यदि स्वप्रभोः परमेश्वरस्य शब्दं पुनः शृणुयाम तर्हि
२६ मरिष्यामः। यस्माद् वयमिव वह्निमध्ये वदतो जीवदीश्वरस्य शब्दं श्रुत्वा
२७ जीवन्नतिष्ठत् प्राणिमध्य एवम्भूतः कोऽस्ति? अतोऽस्माकं प्रभुः परमेश्वरो
यद्यद् गदति भवता समीपं गत्वा तत्सर्व्वं श्रूयताम्, अस्माकं प्रभोः परमे-
२८ श्वरस्य सर्व्वं वाक्यं भवतास्मभ्यं कथ्यतां, वयं तत् श्रुत्वा पालयिष्यामः।
वाक्यमिदं मां भाषमाणानां युष्माकं ध्वनिं श्रुत्वा परमेश्वरो मामवदत्
एते लोकास्तुभ्यं यदकथयन् तस्य ध्वनिमहं श्रुतवान्, त उचितं भाषित-
२९ वन्तः। हा हा मत्तो भेतुं मदाज्ञां सर्व्वां ग्रहीतुञ्च सदा यदि तेषां मति-
३० स्तिष्ठेत् तर्हि तेषां तद्वंशस्य च चिरं शुभं भवेत्। त्वं तान् स्वं स्वं दूष्यं
३१ यातुं वद। किन्तु त्वं मदन्तिकेऽत्र तिष्ठ, या आज्ञाविधिव्यवस्थास्तैः
शिक्षितव्या अधिकारार्थं मद्दास्यमाने देशे च तैराचरणीयास्ता अहं
३२ त्वां वदिष्यामि। अतो युष्माकं प्रभुः परमेश्वरो युष्मान् यद्यद् आदिशत्
३३ तस्य दक्षिणं वामं वा न परावृत्य तद् आचरत। युष्माकं प्रभुः
परमेश्वरो यद्यन्मार्गे गन्तुम् आदिशत् तै मार्गैर्गच्छत, तेन यूयं
जीविष्यथ युष्माकं शुभं भविष्यति स्वाधिकरिष्यमाणे देशे च यूयं
दीर्घायुषो भविष्यथ।

---

६ षष्ठोऽध्यायः।

१ व्यवस्थाभिप्रायः २ ताम् आचरितुं विनयवाक्यं।

१ परमेश्वर एता आज्ञाविधिव्यवस्था युष्मान् शिक्षयितुम् आदिष्टवान्
यूयं यं देशम् अधिकर्त्तुं पारं याथ तत्र ता युष्माभिराचरणीयाः।
२ यदि यूयं स्वप्रभोः परमेश्वराद् भीत्वा यावज्जीवं पुत्रपौत्रादिपरम्प-
रासु मदुक्तान् आज्ञाविधीन् आचरत तर्हि युष्माकम् आयुर्वर्द्धिष्यते।
३ अतो हे इस्रायेल्वंशा मनो निधाय ता आचरितुं यतध्वं, तेन
युष्माकं पूर्व्वपुरुषाणां प्रभुः परमेश्वरो यत् प्रतिज्ञातवान् तदनुरूप-
मेव दुग्धमधुप्रवाहिनि देशे युष्माकं क्षेमं भविष्यति, यूयं वर्द्धिष्णवो

भविष्यथ च। हे इस्रायेल्वंशाः शृणुत, प्रभुरस्माकं परमेश्वर एकएव ४
परमेश्वरः। यूयं सर्व्वान्तःकरणैः सर्व्वप्राणैः सर्व्वशक्तिभिश्च स्वप्रभौ ५
परमेश्वरे प्रेम कुरुत। अधुनाहं युष्मान् यान्याज्ञापयामि तानि सर्व्वाणि ६
युष्माकं मनसि तिष्ठन्तु। यूयं स्वसन्तानान् यत्नेन तानि शिक्षयत ७
स्वगृहे उपवेशनकाले मार्गे गमनकाले शयनकाले उत्थानकाले च तान्यधि
भाषध्वञ्च। तानि युष्माभिः स्वकरेषु चिह्नरूपाणि बध्यन्तां युष्माकं ८
नेत्रयोर्मध्ये ललाटभूषणरूपाणि भवन्तां। युष्माकं गृहाणां द्वारका- ९
ष्ठेषु गोपुरेषु च तत् सर्व्वं लिख्यतां। युष्मभ्यं दातुं युष्माकं पूर्व्वपुरुषाणाम् १०
इब्राहीम्-इस्हाक्-याकूबां समक्षं युष्माकं प्रभुणा परमेश्वरेण यं
देशमधि शपथः कृतस्तं देशं तेनानीता यूयं यदा स्वैरनिचितानि ११
वृहन्ति चारूणि पुराणि स्वैरपूरितान्युत्तमद्रव्यैः पूर्णानि गृहाणि
स्वैरखनितान् प्रहीन् स्वैररोपितानि द्राक्षाक्षेत्राणि जितक्षेत्राणि च
लप्स्यध्वे यदा च भुक्त्वा तर्प्स्यथ, तदा सावधाना भवत दासत्वागारात् १२
मिसर्देशाद् युष्मान् वहिरानेतारं परमेश्वरं मा विस्मरत। यूयं स्वप्रभोः १३
परमेश्वराद् बिभीत तं सेवध्वं तन्नाम्ना शपध्वं। यूयम् इतरदेवानाम् १४
अर्थात् चतुर्दिक्स्थजनदेवानां पश्चात् मा यात। युष्माकं मध्यवर्त्ती प्रभुः १५
परमेश्वरः स्वगौरवरक्षक ईश्वरः; तस्य युष्मत्प्रभोः परमेश्वरस्य कोपे
युष्मत्प्रतिकूलं प्रज्वलिते स देशाद् युष्मान् विनाशयिष्यति।

मसायां यूयं यथा स्वप्रभुं परमेश्वरं पर्य्यैक्षध्वं तथा तं मा परीक्षध्वं। १६
युष्माकं प्रभुणा परमेश्वरेणादिष्टा आज्ञाः प्रमाणवाक्यानि विधींश्च १७
यत्नात् पालयत। परमेश्वरस्य गोचरे यन्न्याय्यं सच्च तदेवाचरत तेन १८
युष्माकं मङ्गलं भविष्यति। परमेश्वरो युष्माकं सम्मुखात् सर्व्वं रिपुं १९
दूरयितुं यं देशमधि युष्माकं पूर्व्वपुरुषाणां समीपे शप्तवान् तमुत्तमं
देशं यूयं परमेश्वरस्य वाक्यानुसारात् प्रविशन्तोऽधिकरिष्यथ।

अस्माकं प्रभुः परमेश्वरो युष्मभ्यं याः प्रमाणवाक्यविधिव्यवस्था दत्त- २०
वान् ताः कीदृशा इति भविष्यत्काले युष्माकं सन्तानैः पृष्टा यूयं तान् २१
वदिष्यथ वयं मिसर्देशे राज्ञः फिरौणो दासा आस्म, ततः परमेश्वरः
पराक्रमिकरेणास्मान् मिसराद् वहिरानयत्, अस्माकं साक्षात् मिसरं २२
फिरौणं तत्परिजनञ्च महान्ति क्लेशदानि चाद्भुतकर्म्माणि चिह्नानि च
दर्शितवान्, किन्त्वस्मान् तद्देशाद् उद्धृतवान् यञ्च देशम् अस्मभ्यं दातुम् २३
अस्माकं पूर्व्वपुरुषाणां समीपे शप्तवान् तमस्मान् आनीतवान्। वयं २४

यथायथवत् नित्यं हितार्थं प्राणरक्षणार्थञ्चास्माकं प्रभोः परमेश्वरात्
बिभीयाम तदर्थं स प्रभुः परमेश्वर एतान् विधीन् आचरितुम् अस्मान्
२५ आदिशत्। अधुना वयं यदि स्वप्रभोः परमेश्वरस्याज्ञानुसारात् तत्-
सम्मुख एतान् सर्व्वविधीन् आचरामस्तर्हि तदस्माकं पुण्यं भविष्यति।

---

७ सप्तमोऽध्यायः।

१ देवार्च्चकैः समं व्यवहारनिषेधः १२ एतदाज्ञाचरणफलम् आशिषःकथनं २५ विग्रहान् नाशयितुम् आज्ञा।

१ यूयं यं देशम् अधिकर्त्तुं याथ तत्र युष्माकं प्रभुः परमेश्वरो यदा युष्मान्
प्रवेशयिष्यति युष्मत्साक्षाद् बहुसंख्यका जातीरर्थात् हित्तीयगिर्गाशीये-
मोरीयकिनानीयपिरिषीयहिव्वीययिबूषीयाणां या जातयो युष्मत्तो
२ बृहत्यो बलवत्यश्च ता युष्मत्सम्मुखाद् बहिःकरिष्यति, तदा यूयं स्वप्रभुणा
परमेश्वरेण युष्माकं करेषु समर्पितान् तान् ताडयित्वा समूलम् उच्छे-
३ त्स्यथ, तैः समं कमपि नियमं न करिष्यथ तान् न दयिष्यध्वे, तैः
सह विवाहसम्बन्धं न करिष्यथ तेषां पुत्रेभ्यः स्वकन्या न दास्यथ स्वपुत्रे-
४ भ्यश्च तेषां कन्या न ग्रहीष्यथ। यस्मात् ते युष्माकं पुत्रान् इतरदेवं सेवितुं
मत्तः परावर्त्तयिष्यन्ति तेन युष्मभ्यं परमेश्वरस्य क्रोधः प्रज्वलन् युष्मान्
५ तूर्णं नाशयिष्यति। अतो यूयं तान् प्रति इत्थम् आचरत, तेषां वेदीर्ना-
शयत विग्रहान् भंक्त चैत्यवृक्षान् छिन्त तक्षितमूर्त्तीर्वह्निना दाहयत।
६ यतो यूयं स्वप्रभोः परमेश्वरस्य पूतलोकाः सर्व्वमहीस्थलोकेभ्यः प्रभोः
७ परमेश्वरस्य विशेषलोका भवितुं तेनानुगृहीताः। यूयं सर्व्वजातिभ्यः
संख्ययाधिका इति कारणात् परमेश्वरो युष्मान् स्निग्धवान् वरीत-
८ वांश्च तन्न यतो यूयं सर्व्वलोकेभ्यः स्तोकाः। किन्तु परमेश्वरो युष्मासु
प्रीयते युष्माकं पूर्व्वपुरुषाणां समीपे यत् शप्तवान् तत् पालयतीति-
हेतुना परमेश्वरः पराक्रमिकरेण युष्मान् मिस्रियभूपस्य फिरौणः
९ करादुद्धृत्य दासत्वागारात् मोचितवान्। अतो युष्माकं प्रभुपरमेश्वर
एव ईश्वरः, स विश्वसनीय ईश्वरः सन् स्वप्रेमकारिणाम् आज्ञाग्राहिणां
१० सहस्रपुरुषान् प्रति नियमितानुग्रहम् आचरति, स्वद्वेषिणश्च संहर्त्तुं
प्रकाश्य फलं ददाति, फलतो न विलम्ब्य द्वेषिभ्यः प्रकाश्य फलं ददातीति
११ जानीत। अतोऽहं पालयितुम् अद्य युष्मान् या आज्ञाविधिव्यवस्था
वदामि ता आचरितुं यतध्वं।

यूयं यद्यासु व्यवस्थासु मनो निधाय ता आचरत तर्हि युष्माकं प्रभुः १२
परमेश्वरो युष्माकं पूर्व्वपुरुषाणां समीपे यौ नियमानुग्रहावधि शप्तवान्
तौ युष्मान् प्रति सफलौ कुर्व्वन् युष्मासु प्रेष्यते युष्मान् आशिषं गदित्वा १३
वर्द्धिष्णून् करिष्यति, विशेषाद् युष्मभ्यं यं देशं दातुं युष्माकं पूर्व्वपुरुषाणां
समीपे शप्तवान् तत्र देशे युष्माकं गर्भफलानि भूम्युत्पन्नानि शस्यद्राक्षारस-
तैलानि गोनिवहमेषव्रजांश्च वर्द्धयिष्यति। यूयं सर्व्वलोकेभ्योऽप्याशिषं १४
प्राप्स्यथ युष्मत्पशूनां मध्ये युष्माकं मध्ये वा स्त्रीपुंसौ बन्ध्यौ न भवि-
ष्यतः। परमेश्वरो युष्मत्तः सर्व्वाः पीडा दवयिष्यति मिसर्देशीया या महा- १५
व्याधयो युष्माभिर्दृष्टास्ता युष्मान् प्रति न घटयिष्यति किन्तु युष्माकं द्वेषिणः
प्रति घटयिष्यति। अतो युष्माकं प्रभुः परमेश्वरो युष्माकं करेषु यान् १६
लोकान् समर्पयति यूयं तान् ग्रासयत तान् प्रति नेत्रै र्मा लज्जध्वं तेषां
देवान् मा सेवध्वं यतो युष्माकं तद् उन्माथरूपं। एता भिन्नजातयो १७
ऽस्मत्तोपि बहुप्रजा वयम् एताः कथम् अधिकारात् च्योतयिष्यामइति
चिन्तयित्वा तेभ्यो मा बिभीत। युष्माकं प्रभुः परमेश्वरो राज्ञे फिरौणे १८
सर्व्वमिसर्देशाय च यद्यत् कर्म्म कृतवान् यद्यद् अद्भुतं कर्म्म यूयं प्रत्यक्षम् १९
अपश्यत यैश्च चिह्नैश्चित्रकर्म्मभिः पराक्रमिकरेण विस्तारितबाहुना
च युष्माकं प्रभुः परमेश्वरो युष्मान् बहिरानयत् तानि स्मरत यूयं
येभ्यो बिभीथ तान् सर्व्वजातीयान् प्रति युष्माकं प्रभुः परमेश्वरस्तथा
करिष्यति। येऽवशिष्टा युष्मत् स्वान् गोपयिष्यन्ति ते यावत् न २०
विनंक्ष्यन्ति तावद् युष्माकं प्रभुः परमेश्वरस्तेषां मध्यं वरटाः प्रेर-
यिष्यति। यूयं तेभ्यो मा बिभीत यतो युष्माकं मध्यवर्त्ती युष्मत्प्रभुः २१
परमेश्वरो बली भयङ्कर ईश्वरः। युष्माकं प्रभुः परमेश्वरो युष्मत्- २२
सम्मुखात् तान् जातीयान् क्रमाद् दवयिष्यति, युष्माकं प्रतिकूलं यथा
वन्यपशवो न वर्द्धन्ते तदर्थं यूयम् एकदा तान् नाशयितुं न शक्ष्यथ।
किन्तु युष्माकं प्रभुः परमेश्वरो युष्माकं करेषु तान् समर्पयिष्यति यावत् २३
ते समूलं न विनंक्ष्यन्ति तावत् महामारणेन तान् मारयिष्यति। तेषां २४
भूपतीन् युष्माकं करेषु दास्यति, यूयं गगणाधस्तेषां नामानि लोप्स्यथ,
यावत् तान् न विनाशयिष्यथ तावद् युष्माकं सम्मुखे कोऽपि न स्थास्यति।
यूयं तेषां तक्षितमूर्त्तीर्वह्निना दाहयिष्यथ, यथा यूयम् उन्माथग्रस्ता २५
न भवथ तदर्थं तेषां गात्रीये रौप्ये स्वर्णे वा लोभं न करिष्यथ स्वार्थं तन्न
ग्रहीष्यथ यस्मात् तद् युष्माकं प्रभोः परमेश्वरस्य घृण्यं वस्तु। यूयं यथा २६

तदिवाभिशप्ता न भवथ, तदर्थं तद् घृण्यं वस्तु स्वगृहाणि नानेष्यथ किन्तु तद् ऋतीयिष्यध्वे अतितुच्छं करिष्यथ च।

८ अष्टमोऽध्यायः।

इस्रायेल्लोकान् प्रति परमेश्वरस्य कृपानुग्रहत्वात् तदाज्ञां ग्रहीतुं मूससा विनयः।

१ अद्याहं युष्मान् यद्यदाज्ञापयामि यत्नात् तत् सर्व्वम् आचरत, तेन
जीविष्यथ वर्द्धिष्यध्वे च परमेश्वरो यं देशमधि युष्माकं पूर्व्वपुरुषाणां
२ समीपे शप्तवान् तत्र यूयं प्रविशन्तस्तमधिकरिष्यथ। यूयं तदाज्ञा
ग्रहीष्यथ नवेति युष्मान् परीक्षितुं युष्माकं मनोगतं प्रकाशयितुं युष्मान्
नम्रयितुञ्च युष्माकं प्रभुः परमेश्वर एतानि चत्वारिंशद् वर्षाणि प्रान्तरे
३ येन येन पथा युष्मान् अगमयत् तान् स्मरत। मनुजः केवलपूपेन न
जीवति किन्तु परमेश्वरस्य वदनाद् यानि यानि वचांसि निःसरन्ति
तैरेव जीवतीति युष्मान् ज्ञापयितुं स युष्मान् नतान् क्षुधितांश्च कृत्वा
४ युष्माकं पूर्व्वपुरुषैरज्ञाता या मान्ना तया युष्मान् अपुष्णात्। एतेषु
चत्वारिंशद् वर्षेषु युष्माकं गात्रीयवस्त्राणि न जीर्णानि युष्माकं पादाश्च
५ न स्फीताः। मानुषो यथा स्वपुत्रं शास्ति युष्माकं प्रभुः परमेश्वरो युष्मान्
६ तथा शास्तीति यूयं मनसि विचारयत। यूयं स्वप्रभोः परमेश्वरस्याज्ञासु
७ मनो निधाय तत्पथेन गच्छत तत्तश्च बिभीत। युष्माकं प्रभुः परमेश्वरो
युष्मान् उत्तमं देशम् आनेष्यति तत्र देशे निम्नभूमेः पर्व्वताच्च निर्गतानि
८ जलस्रोतांसि प्रस्रवणानि जलाशयाश्च सन्ति। तत्र देशे गोधूमयवद्राक्षो-
९ डुम्बरदाडिम्बजिततैलमधूनि जायन्ते। तत्र देशे भक्ष्यं भोक्तुं प्राप्स्यथ
तस्य न्यूनं न भविष्यति युष्माकं कस्यापि वस्तुनोऽभावो न भविष्यति; तस्य
१० देशस्य प्रस्तरा लौहमयाः; तस्य गिरिभ्यो यूयं पित्तलं खनिष्यथ। तत्र यूयं
भुक्त्वा तृप्त्वा प्रभुणा परमेश्वरेण दत्तदेशस्योत्तमत्वात् तं धन्यं वदिष्यथ।
११ किन्तु अवधद्धं युष्माकं प्रभुं परमेश्वरं मा विस्मरत, तस्य या आज्ञावि-
१२ धिव्यवस्था अद्याहं युष्मभ्यं ददामि ता आचरत। भुक्त्वा युष्मासु तृप्तेषु
१३ सुनिर्म्मितगृहेषूषितेषु युष्माकं गोमेषादिव्रजेषु वर्द्धितेषु युष्माकं स्वर्ण-
१४ रौप्येषु बहुषु युष्माकं सर्व्वैश्वर्य्ये एधिते यूयं मा गर्व्विष्ट, यो मिसर्दे-
१५ शाद् दासत्वागाराद् युष्मान् वहिरानयद् युष्माकं नम्रतापरीक्षाभा-
विक्षेमार्थं ज्वालयित्रहिवृश्चिकैः पूर्णेन महाभयङ्करेण काननेन युष्मान्

अगमयद् युष्मत्कृते मरुभूमौ वह्निप्रस्तरमयगिरेस्तोयं निरगमयत् युष्मत्- १६
पूर्व्वपुरुषैरज्ञाता या मान्ना तया युष्मान् प्रान्तरेऽपुष्णात् तादृशं युष्मत्प्रभुं
परमेश्वरं न विस्मरत। वयं स्वविक्रमबाहुबलाभ्याम् एतदैश्वर्य्यं प्राप्ता १७
इति मनःसु मा विचारयत। किन्तु प्रभुं परमेश्वरं स्मरत, यस्मात् स १८
युष्माकं पूर्व्वपुरुषाणां साक्षात् शपमानो यं नियमं कृतवान् तम् अद्य-
वत् स्थिरीकर्त्तुं युष्मभ्यं धनप्राप्तेः शक्तिमदात्। किन्तु यदि यूयं केनापि १९
प्रकारेण स्वप्रभुं परमेश्वरं विस्मृत्य इतरदेवान् अनुगम्य सेवध्वे भजध्वे
च तर्हि युष्माकं विरुद्धम् इदं साक्ष्यम् अद्याहं ददामि यूयं विनंक्ष्यथ।
युष्माकं सम्मुखे परमेश्वरो या जाती र्विनाशयति ताइव यूयमपि वि- २०
नंक्ष्यथ; युष्माभिः स्वप्रभुपरमेश्वरस्य वाक्ये ऽवधोरिते विनाशो लप्स्यते।

---

९ नवमोऽध्यायः।

१ स्वस्वधर्म्मे निर्भरं न कर्त्तुं मूससो निवेदनं ७ आज्ञालङ्घनवर्णनञ्च।

हे इस्रायेल्वंशा यूयं मनो निधद्धं युष्मत्तो महतीर्बलवतीश्च जातीरन- १
धिकारिणीः कर्त्तुम् अद्य युष्माभि र्यर्द्दननदीपारं गम्यते ; तेषां लोकानां
नगराणि वृहन्ति गगणस्पर्शिप्राचीरवेष्टितानि च। ता जातयो वृहत्यो २
दीर्घकायाश्च, ते च लोका युष्माभिर्विदिता अनाकवंशीयाः, यतो ऽनाक-
वंशीयानां सम्मुखे स्थातुं केन शक्यत इति वाग्युष्माभिः श्रुता। किन्तु ३
दाहकाग्निस्वरूपो युष्माकं प्रभुः परमेश्वरः स्वयं युष्माकम् अग्रे गमिष्यती-
ति जानीत स तान् नाशयिष्यति युष्माकं साक्षात् तान् वशी करिष्यति
यूयं परमेश्वरवाक्येन तूर्णं तान् अनधिकारिणः कृत्वा नाशयिष्यथ। किन्तु ४
युष्माकं प्रभुणा परमेश्वरेण युष्माकं सम्मुखात् तेषु वहिष्कृतेषु परमेश्वरो
ऽस्माकं धर्म्माद् इमं देशम् अधिकारयितुमस्मान् आनीतवान् इति
मनसि मा चिन्तयत, यतः परमेश्वर आसां जातीनां पापाद् युष्माकं
सम्मुखात् एता अधिकारच्युताः करिष्यति। यूयं स्वस्वधर्म्मात् स्वमनः- ५
सारल्याद्वा तासां देशमधिकर्त्तुं यास्यथ तन्न किन्तु परमेश्वरो युष्माकं
पूर्व्वपुरुषान् इब्राहीम्-इस्हाक्-याकूबः प्रति यत् शप्तवान् तत् पालयितुं
युष्माकं प्रभुः परमेश्वर आसां जातीनां दुष्टत्वात् युष्माकं सम्मुखात् ता
अधिकारच्युताः करिष्यति। अतो युष्माकं प्रभुः परमेश्वरो यदिमं उत्तमं ६
देशमधिकर्त्तुं युष्मभ्यं दास्यति तन्न युष्माकं पुण्यस्य फलम् इति जानीत
यतो यूयम् अवाध्यलोकाः।

७ यूयं प्रान्तरे स्वप्रभुं परमेश्वरं यदक्रोधयत तत् स्मरत मा विस्मरत ;
यूयं मिसर्देशाद् आ प्रस्थानाद् अत्रागमनं यावत् परमेश्वरस्याज्ञा-
८ लङ्घिनो भवथ। होरेवे च परमेश्वरम् अक्रोधयत, ततः परमेश्वरः क्रुध्यन्
९ युष्मान् नाशयितुम् उद्यतः। तदाहं प्रस्तरपत्रद्वयम् अर्थाद् युष्माभिः सह
परमेश्वरस्य नियमपत्रं ग्रहीतुं गिरिमारुह्य चत्वारिंशद् अहोरात्राणि
१० न भुक्त्वा न पीत्वा गिरौ स्थितवान्। ततः परमेश्वरः समागमदिने पर्व्वत-
शृङ्गे वह्निमध्याद् युष्मान् सम्भाष्य यान्यकथयत् तेषु वाक्येष्वीश्वरीयाङ्गुल्या
११ तत्प्रस्तरपत्रयो र्लिखितेषु परमेश्वरस्तत्प्रस्तरद्वयं मह्यमदात्। तदा चत्वा-
रिंशद् अहोरात्रेषु गतेषु परमेश्वरस्तत् प्रस्तरद्वयम् अर्थात् नियम-
१२ पत्रद्वयं मह्यं दत्त्वा कथितवान्, उत्तिष्ठ स्थानादितस्तूर्णम् अवरुह्य
याहि, यस्मात् त्वं मिसर्देशाद् यान् लोकान् वहिरानीतवान् ते
भ्रष्टाः, अहं यं पन्थानं दर्शितवान् ते तूर्णं तत्पथाद् वहिर्भूय
१३ स्वार्थं सिक्तां मूर्त्तिं निर्म्मितवन्तः। परमेश्वरो मह्यं पुनः कथितवान्
१४ एते लोका अबाध्या इत्यहं दृष्टवान्, अतस्त्वं मत्तोऽपसर तान् अहं
नाशयानि व्योमाधस्तेषां नाम लुम्पानि; त्वामेवाहं तेभ्योऽपि बलवद्बृह-
१५ ज्जातिं करिष्यामि। ततोऽहं परावृत्य हस्ताभ्यां नियमपत्रे गृहीत्वा
१६ प्रज्वलितवह्निपर्व्वताद् अवरुह्यागतः। यूयं प्रभुपरमेश्वरस्य विरुद्धं
पापम् अकुर्व्वत स्वार्थं सिक्तगोवत्सम् अनिर्म्मात परमेश्वराज्ञापितपथात्
१७ तूर्णं वहिरभवत, इत्यहं विलोक्य दृष्टवान्। ततोऽहं तत् प्रस्तरपत्र-
१८ द्वयं वेगेन हस्तात् निक्षिप्य युष्माकं साक्षाद् भग्नवान्। परमेश्वरं
क्रोधयितुं तस्य दृष्टौ कुकर्म्म कुर्व्वद्भिर्युष्माभिस्तस्य यद् अपराद्धं
तस्माद् युष्मदपराधादहं पूर्व्ववत् परमेश्वरसम्मुखे न्युब्जीभूय चत्वारिंशद्
१९ दिवारात्रीः पूपभोजनजलपाने न कृतवान्। यतो युष्मान् नाशयितुं
क्रोधेन तापातिशयेन च प्रज्वलितात् परमेश्वराद् भीतोऽहं, किन्तु तदापि
२० परमेश्वरो मन्निवेदनं श्रुतवान्। परमेश्वरे हारोणं नाशयितुं तस्मायपि
२१ क्रुद्धे मया तत्कृते प्रार्थितं। युष्माकं पापमर्थाद् यूयं यं गोवत्समनिर्म्मात
तमहं गृहीत्वा वह्निना दग्धवान् यावच्च स धूलीवत् सूक्ष्मो नाभवत्
तावत् तं पिष्ट्वा चूर्णीकृतवान्, अपरं गिरेर्निर्गतनद्यां तस्य धूलीर्नि-
२२ क्षिप्तवान्। यूयं तवियेरायां मसायां किब्रोथत्तावायाञ्च परमेश्वरम्
२३ अक्रोधयत। तथा परमेश्वरो यदा कादेशवर्णेयाद् युष्मान् प्रेषयन् अक-
थयत्, यूयं प्रस्थाय मया दास्यमानं देशमधिकुरुत, तदापि यूयं स्वप्रभुं

परमेश्वरं न प्रतीत्य तत्कथायां मनो न निधाय तदाज्ञां लङ्घितवन्तः।
युष्माभिः समं मम परिचयदिनाद् यूयं परमेश्वरस्याज्ञालङ्घिन आस्थ। २४
अहं प्रथमवत् तदापि चत्वारिंशद् दिवारात्रीः परमेश्वरस्य सम्मुखे २५
न्युब्जः स्थितवान्, यतः परमेश्वरो युष्मान् विनाशयिष्यतीति स्वयं कथित-
वान्। अहं परमेश्वरस्य समीप इति प्रार्थितवान् हे प्रभो परमेश्वर २६
त्वं स्वाधिकारस्वरूपान् यान् लोकान् स्वमहिम्ना मोचितवान् पराक्रमि-
करेण मिसरो वहिष्कृत्यानीतवांश्च तान् न विनाशय। तव दासान् २७
इब्राहीम्-इसहाक्-याकूबः स्मर, एतल्लोकानाम् अबाध्यतादुष्टतापापानि
प्रति मा पश्य। यस्मात् त्वम् अस्मान् यद्देशाद् वहिरानयस्तद्दे- २८
शीयलोका इति कथयिष्यन्ति, परमेश्वरस्तेभ्यो यं देशं दातुं प्रतिज्ञात-
वान् तं देशं तान् नेतुं नाशक्नोत्, तत्कारणात् तान् ऋतीय हन्तुं
प्रान्तरे वहिरानयत्। त्वं स्वपराक्रमेण विस्तीर्णबाहुना च यान् वहि- २९
रानीतवान् एतएव तव ते लोका अधिकारश्च।

---

१० दशमोऽध्यायः।

१ द्वितीयवारं दशाज्ञाकथनं ६ हारोणस्य मरणात् परं तस्य पुत्त्रस्य याजकत्वपदे नियोगः ८ लेवीयानां पृथक्त्वं १० ईश्वराज्ञा १२ ईश्वराज्ञाः पालयितुं मूससो विनयः।

तदा परमेश्वरो मह्यं कथितवान् त्वं पूर्व्ववत् प्रस्तरद्वयं तक्षित्वा मद- १
न्तिकं गिरिमारोह काष्ठीयां मञ्जूषामेकां निर्म्माहि च। त्वया भग्नयोः २
पूर्व्वप्रस्तरपत्त्रयो यानि वाक्यान्यासन्, तेषु मया तत्र प्रस्तरयो र्लिखितेषु
त्वं तौ मञ्जूषायां स्थापयिष्यसि। ततोऽहं शिटीमकाष्ठेन मञ्जूषां निर्म्मित- ३
वान् पूर्व्ववत् द्वौ प्रस्तरौ तक्षित्वा तौ कराभ्याम् आधाय गिरिमारूढ-
वान्। ततः परमेश्वरः समागमदिने गिरौ वह्निमध्याद् या दशाज्ञा ४
युष्मभ्यं कथितवान् ताः पूर्व्वलिपिवत् तयोः प्रस्तरपत्त्रयो र्लिखित्वा
परमेश्वरस्ते मह्यमदात्। अहं मुखं परावर्त्त्य गिरेरवरुह्य परमे- ५
श्वरस्याज्ञया मन्निर्म्मितायां मञ्जूषायां प्रस्तरद्वयं निहितवान्, तस्मात्
तत् प्रस्तरद्वयं तत्र तिष्ठति।

इस्रायेलवंशेन वेरोत्-विनेयाकनात् मोषेरोतं यात्रायां कृतायां ६
तत्र हारोणो मृतवान्, तत्स्थाने तस्य श्मशानमभूत् तेन तत्सुत
इलियासरस्तस्य याजकत्वपदे नियुक्तः सेवां कृतवान्। ते तत्स्थानाद् ७

गुद्गोदायां यात्रां कृतवन्तः, गुद्गोदातः सजलस्रोतोदेशं योटवाथां
प्रस्थितवन्तः।
८ तदाद्यवत् परमेश्वरस्य नियममञ्जूषां वोढुं परमेश्वरस्य परिचर्य्यायै
तत्साक्षात् स्थातुं तन्नाम्ना चाशिषं दातुं परमेश्वरो लेवीयवंशं पृथक्
९ कृतवान्। अतः स्वभ्रातृगणमध्ये लेवीयानां कोप्यंशोऽधिकारो वा न
तिष्ठति, युष्माकं प्रभुपरमेश्वरस्य वाक्यानुसारात् परमेश्वर एव तेषा-
मधिकारः।
१० अतः पूर्व्ववत् तदापि चत्वारिंशद् दिवारात्रीः पर्व्वते तिष्ठतो मम
११ निवेदनं परमेश्वरस्तदापि श्रुत्वा युष्मान् न नाशयितुं स्वीकृतवान्। परमे-
श्वरो मह्यं कथितवान्, उत्तिष्ठ प्रस्थानार्थं लोकानाम् अग्रे गच्छ; अहं
तेभ्यो यं देशं दातुं तेषां पूर्व्वपुरुषाणां समीपे शप्तवान् स तैः प्रविश्य-
ताम् अधिक्रियताञ्च।
१२ हे इस्रायेल्वंशाः, युष्माकं प्रभुपरमेश्वराद् भयं तस्य सर्व्वपथेन
गमनं तस्मिन् प्रेमकरणं सर्व्वान्तःकरणैः सर्व्वप्राणैः समं युष्मत्प्रभु-
१३ परमेश्वरस्य सेवनं युष्माकं हितार्थमहं परमेश्वरस्य यानाज्ञाविधीन्
अद्य ददामि तदनुसाराद् आचरणञ्च विना युष्माकं प्रभुः परमे-
१४ श्वरो युष्मत्तः किं याचते? पश्यत व्योमोपरिस्थः स्वर्गः पृथ्वी तन्मध्यस्थं
१५ सर्व्वं वस्तु च युष्माकं प्रभुपरमेश्वरस्य। परमेश्वरो युष्माकं पूर्व्वपुरुषेषु प्रेतुं
तान् प्रति तुष्टवान् तेभ्यः परं तेषां वंशम् अर्थाद् युष्मान् अद्यवत् सर्व्वजा-
१६ तिमध्याद् वरीतवान्। अतो यूयं स्वस्वान्तःकरणानां त्वचं छिन्त पुनर-
१७ वाध्या मा भूत। यतो युष्माकं प्रभुः परमेश्वर ईश्वराणामीश्वरः, प्रभूणां
प्रभुर्महान् सर्व्वशक्तिमान् भयङ्करश्चेश्वरः स पक्षपातं न करोति उत्कोचं
१८ न गृह्णाति। स पितृहीनानां विधवानाञ्च विचारं निष्पादयति खाद्यवस्त्रे
१९ दातुं विदेशिनि प्रीयते। अतो यूयं विदेशिनि प्रीयध्वं यतो यूयं मिसर्देशे
२० विदेशिन आस्त। यूयं स्वप्रभुपरमेश्वराद् बिभीत तं सेवध्वं, तस्मिन्
२१ आसज्यध्वं तस्य नाम्नि शपध्वं। स युष्माकं स्तवो युष्माकम् ईश्वरश्च
यूयं यानि वृहन्ति भयङ्कराणि च कर्म्माणि स्वनेत्रैरपश्यत तानि
२२ तेनैव युष्मदर्थं कृतानि। युष्माकं पूर्व्वपुरुषाः सप्ततिजनसंख्यकाः सन्तो
मिसरं गताः, इदानीं यूयं स्वप्रभुणा परमेश्वरेण व्योमतारका इव
बहुसङ्ख्यका विधत्ताः।

११ एकादशोऽध्यायः ।

१ ईश्वरस्य महाकर्म्मकारणात् तदाज्ञां पालयितुं विनयः १० देशवर्णनं १३ आज्ञापालनफलनिर्णयः १८ सन्तानान् उपदेष्टुम् आज्ञा २२ आज्ञापालनफलं २६ शापाशिषोः कथनं ।

यूयं स्वप्रभुपरमेश्वरे प्रीयध्वं तस्य रक्षणीयविधिव्यवस्थाज्ञाः सदा १
पालयत । युष्माकं सन्तानै र्यन्नादर्शि न चाज्ञायि, तद् अद्य युष्माभिरे- २
वाभिज्ञायतां, फलतो युष्मत्प्रभोः परमेश्वरस्य शासनं तस्य महिमा
पराक्रमिहस्तो विस्तीर्णबाहुराश्चर्य्यलक्षणानि मिसर्देशमध्ये मिसर्देशीय- ३
राजं फिरौणं प्रति तस्य सर्व्वदेशञ्च प्रति कृतानि कार्य्याणि च, स मिस्री- ४
याणां हयरथसैन्यानि प्रति यद् अकरोत्, तेषां युष्मत्पश्चाद् धावनकाले
स सुफार्णवतोयानि तेषामुपर्य्यवाहयत् तेन त अद्य यावत् परमेश्वरेण
व्यनश्यन्, अत्र युष्मदागमं यावत् स युष्माकं कृते प्रान्तरे यदकरोत्, ५
रुवेणवंशीयैलीयावस्य सुतौ दाथनावीरामौ प्रति स यदकरोत्, ६
फलतः पृथ्वी यत् स्वास्यं विस्तार्य्य इस्रायेल्वंशमध्ये तौ तत्परिजनान्
तद्दूष्याणि तदधिकृतसर्व्वसम्पत्तीश्चाग्रसत् । यूयं परमेश्वरकृतं सर्वं ७
महाकर्म्म स्वनेत्रै र्दृष्टवन्तः । अतोऽद्याहं युष्मभ्यं या आज्ञा ददामि, ८
यूयं ता आचरत, तेन यूयं यं देशम् अधिकर्त्तुं पारं याथ,
बलवद्भि र्युष्माभिः स देशः प्रवेक्ष्यतेऽधिकरिष्यते च, यं देशं युष्म- ९
त्पूर्वपुरुषेभ्यस्तेषां वंशाय च दातुं परमेश्वरः शप्तवान्, तस्मिन् दुग्धमधु-
प्रवाहिनि देशे युष्माकम् अवस्थिति र्दीर्घकालीया भविष्यति ।

यूयं यस्मात् मिसरदेशाद् वहिरागतास्तत्र वीजान्युप्त्वा शाकोद्यानवत् १०
पदै र्जलं सिक्तवन्तः, किन्तु यं देशम् अधिकर्त्तुं याथ, स देशो मिसरवत्
नहि । यतो यं देशम् अधिकर्त्तुं यूयं पारं गच्छथ स पर्वतमयो निम्न- ११
भूमिमयश्च, स च व्योमवृष्ट्या सिच्यते । तत्र देशे युष्माकं प्रभुः परमेश्वरो १२
मनो निधत्ते, आ वर्षप्रथमात् शेषं यावद् युष्माकं प्रभोः परमेश्वरस्य
दृष्टिः सदा तं प्रति तिष्ठति ।

अद्याहं या आज्ञा युष्मभ्यं ददामि ता आरचन्तो यूयं यदि स्वस- १३
र्व्वान्तःकरणैः सर्व्वप्राणैश्च समं स्वप्रभुपरमेश्वरे प्रीयध्वे तञ्च सेवध्वे
तर्हि यूयं यथा स्वशस्यद्राक्षारसतैलानि संग्रहीतुं शक्नुयात, तदर्थम् अहं १४
प्रथमद्वितीययो र्वर्षाकालयो र्युष्मद्देशाय वृष्टिं दास्यामि, युष्माकं पशूनां १५
कृते क्षेत्रीयतृणान्युत्पादयिष्यामि च, तेन यूयं भुक्त्वा तर्प्स्यथ । यूयम् अव- १६

धद्धं, युष्माकं मनोभ्रान्ति र्न भवतु, यूयं विपथगामिनो मा भवत,
१७ इतरदेवान् मा सेवध्वं तांश्च मा नमत। नो चेद् युष्मान् प्रति प्रज्व-
लितक्रोधेन परमेश्वरेण व्योम्नि रुद्धे वृष्टि र्न भविष्यति भूमौ च शस्यादि
नोत्पत्स्यते, परमेश्वरस्य युष्मभ्यं यम् उत्तमं देशं दास्यति, तत्र यूयं
तूर्णं विनंक्ष्यथ।

१८ यूयं ममैतानि वाक्यानि स्वान्तःकरणेषु मनःसु च निधद्धं चिह्नरूपाणि
च स्वकरेषु बध्नीत, तानि भूषणरूपाणि युष्माकं नेत्रद्वयमध्ये तिष्ठन्तु।
१९ यूयं तानि स्वस्वबालकान् शिक्षयन्तो गेह उपवेशनकाले पथगमनकाले
२० शयनकाल उत्थानकाले च भाषध्वं। गृहद्वारस्य पार्श्वकाष्ठयो र्गोपुरेषु
२१ च तान्युल्लेखत। तेन परमेश्वरो युष्माकं पूर्व्वपुरुषेभ्यो यां भूमिं दातुं
शप्तवान्, तत्र भूमौ युष्माकम् अवस्थितिः पृथिव्युपरिस्थव्योमस्थितिवत्
दीर्घकालीया भविष्यति।

२२ या एता आज्ञा अहं युष्मभ्यं ददामि यदि यूयं ता आचरन्तः
स्वप्रभुपरमेश्वरे प्रीयध्वे तस्य सर्व्वमार्गैश्चलथ दृढञ्च तस्मिन्नासज्यध्वे,
२३ तर्हि परमेश्वरो युष्माकं सम्मुखाद् एता जातीस्ताड़यित्वा वहिः
करिष्यति यूयं युष्मत्तो वृहतीनां बलवतीनाञ्च जातीनां देशमधि-
२४ करिष्यथ। युष्माकं पादा यत्र यत्र पतिष्यन्ति तत्सर्व्वस्मिन् युष्माकमधि-
कारो भविष्यति, प्रान्तरं लिवानोनाद्रिर्नदी फरात् पश्चिमसागरश्च
२५ युष्माकं सीमा भविष्यन्ति। युष्माकं सम्मुखे स्थातुं कस्यापि सामर्थ्यं
न भविष्यति यूयं यं यं देशं व्रजिष्यथ युष्मत्प्रभुः परमेश्वरः स्ववाक्यानु-
सारात् तान् देशान् युष्मत्तो भयाशङ्काभ्यां व्यापयिष्यति।

२६ पश्यताद्याहं युष्माकं सम्मुखे शापाशिषौ स्थापितवान्, अहं युष्मान्
२७ या आज्ञा ज्ञापितवान् प्रभुपरमेश्वरस्य ता आज्ञा यदि यूयम् आ-
२८ चरत, तर्ह्याशिषं लप्स्यध्वे। यदि च स्वप्रभोः परमेश्वरस्याज्ञा न पालयथ,
अद्याहं युष्मान् यन्मार्गमधि आदिशं तं विहाय यदि स्वैरज्ञातान्
२९ इतरदेवान् अनुगच्छथ, तर्हि शापं लप्स्यध्वे। यं देशमधिकर्त्तुं यूयं
याथ, तं यदा युष्माकं प्रभुः परमेश्वरो युष्मान् प्रवेशयिष्यति, तदा
३० यूयम् आशिषं गिरिषीमाद्रौ शापम् एवलाद्रौ निधास्यथ। पश्यत तौ
गिरी यर्दनपारे सूर्य्यास्तपथान्ते गिल्गलस्य सम्मुखस्थसमभूवासिकिना-
३१ नीयानां देशे मोर्य्युद्यानान्तिके स्थितौ। यतो युष्माकं प्रभुः परमे-
श्वरो युष्मभ्यं यं देशम् अधिकर्त्तुं दास्यति तं देशं प्रवेष्टुं यूयं यर्दननद्याः

पारं यास्यथ तमधिकरिष्यथ तत्र वत्स्यथ च। अतोऽहमद्य युष्माकं ३२
सम्मुखे या विधिव्यवस्था निदधामि ता आचरितुम् अवधद्धं।

---

१२ द्वादशोऽध्यायः।

१ प्रतिमाप्रभृतिं नाशयितुमाज्ञा ४ परमेश्वरनिश्चितस्थाने तं सेवितुं यातुमाज्ञा १७ विशेषाज्ञा २० पूतस्थाने पूतवस्तु भोक्तुमाज्ञा २९ देवार्च्चकवत् कर्म्म कर्त्तुं निषेधः।

युष्माकं पैतृकः प्रभुः परमेश्वरो युष्मभ्यम् अधिकारार्थं यं देशं दास्यति १
तत्र देशे युष्माभिरिहलोके ऽवस्थितिकालं यावद् या विधिव्यवस्था
मनःसु निधातव्या आचरितव्याश्च, ता एताः। यूयं या या जातीरधिकारात् २
च्योतयिष्यथ ता उच्चाद्रिभृगूपरि प्रतितेजस्विद्रुमाधश्च च यत्र यत्र
स्वदेवान् असेवन्त तानि स्थानानि यूयं समूलं विनाशयिष्यथ। यूयं तेषां ३
वेदीर्विनाशयिष्यथ प्रतिमा भंक्ष्यथ चैत्यान् वह्निना दाहयिष्यथ तच्चित-
देवप्रतिमाश्छेत्स्यथ तत्स्थानात् तेषां नाम लोप्स्यथ।

यूयं स्वप्रभुपरमेश्वरं प्रति तथा न करिष्यथ। किन्तु युष्माकं प्रभुः पर- ४
मेश्वरः स्वनाम निधातुं युष्माकं सर्व्ववंशमध्ये यत् स्थानं वरीष्यति तस्य ५
तद् वासस्थानं गवेषयिष्यथ, तत् स्थानं गत्वा यूयं स्वस्वहोमादिबलीन् ६
दशमांशान् हस्तोत्तोलितान् प्रतिश्रुतान् स्वेच्छादत्तांश्चोपहारान् गोमे-
षादिव्रजानां प्रथमजांश्चानेष्यथ। तत्र च यूयं सपरिवारा युष्माकं ७
प्रभुपरमेश्वरस्य सम्मुखे भोक्ष्यध्वं युष्माकं प्रभुपरमेश्वरो युष्मान् आशिषं
उक्तवान् तत्कारणाद् युष्माकं कराणां कर्म्मभिरानन्दिष्यथ। अत्र स्थाने ८
ऽस्माकम् एकैको जन इदानीं यथा स्वस्वमनसोऽभिलाषानुसाराद्
आचरति यूयं तथा न करिष्यथ। यस्माद् युष्माकं प्रभुपरमेश्वरो युष्मभ्यं ९
यद् विश्रामस्थानम् अधिकारञ्च दास्यति तं यूयं नेदानीं प्राप्ताः।
किन्तु यदा यूयं यर्द्दननदीपारं गत्वा स्वप्रभुपरमेश्वरेण दातव्याधि- १०
कारदेशे वत्स्यथ यदा च यूयं चतुर्दिक्स्थरिपुभ्यस्तेन विश्रामे दत्ते निर्व्विघ्नं
वत्स्यथ, तदा युष्माकं प्रभुपरमेश्वरः स्वनाम निधातुं यत् स्थानं वरिष्यति ११
तत्र यूयं मदाज्ञानुयायिनो होमादिबलीन् दशमांशान् परमेश्वरोद्दे-
श्यान् हस्तोत्तोलितान् स्वेच्छया प्रतिश्रुतांश्चोपहारान् निवेदयिष्यध्वे।
यूयं युष्माकं पुत्राः कन्या दासा दास्यो युष्मन्मध्ये ऽधिकारांशहीना १२
युष्मन्नगरद्वारान्तरस्था लेवीया यूयञ्च युष्माकं प्रभुपरमेश्वरस्य सम्मुख

१३ आनन्दिष्यथ। यूयम् अवधद्धं स्वदृष्टे सर्व्वस्थाने होमबलिं न दास्यथ।
१४ किन्तु युष्माकं कस्यचित् वंशस्य मध्ये परमेश्वरेण यत् स्थानं वरीष्यते,
तत्र स्वस्वहोमबलीन् दास्यथ तत्र चाज्ञानुरूपाणि यज्ञकर्म्माणि करि-
१५ ष्यथ। युष्माकं प्रभुपरमेश्वरो युष्मभ्यं यामाशिषं दास्यति तदनुरूपं
सर्व्वनगरद्वाराभ्यन्तरे यूयं पशून् हत्वा मनोभिलाषानुरूपं मांसं भोक्ष्यध्वे
यथा कृष्णसारस्य हरिणस्य मांसं तथा तदपि शुच्यशुचिभिः सर्व्वलोकै
१६ र्भक्षणीयं। यूयं केवलं रुधिरं न भोक्ष्यध्वे तत् भूमौ जलवत् निक्षेप्स्यथ।
१७ स्वस्वशस्यद्राक्षारसतैलानां दशमांशा गोमेषादीनां प्रथमजाः प्रति-
श्रुताः स्वेच्छादत्ता हस्तोत्तोलिता उपहाराश्च युष्माभिः स्वस्वनगर-
१८ द्वारमध्ये न भोजनीयाः। किन्तु युष्माकं प्रभुः परमेश्वरो यत् स्थानं
वरीष्यति तत्र युष्मत्प्रभुपरमेश्वरस्य सम्मुखे यूयं युष्माकं पुत्राः
कन्या दासा दास्यश्च नगरद्वारान्तरस्थलेवीयलोकाश्च तद् भोक्ष्यध्वे,
यूयं यत्र हस्तार्पणं करिष्यथ युष्माकं प्रभुपरमेश्वरस्य सम्मुखे तेनानन्दि-
१९ ष्यथ। अवधद्धं यूयं देशेऽवस्थितिकालं यावत् लेवीयान् मा त्यजत।
२० युष्माकं प्रभुपरमेश्वरेण स्वाङ्गीकारानुसाराद् युष्माकं सीमायां
विस्तारितायां, मांसं भोक्ष्यामहे वाणियं यदि मांसबुभुक्षुभि र्युष्मा-
भिरुच्यते, तर्हि युष्माकं मनोभिलाषानुसारात् मांसं भक्षिष्यते।
२१ युष्माकं प्रभुपमेश्वरः स्वनाम निधातुं यत् स्थानं वरीष्यति तद् यदि
युष्मत्तो बहूदूरं भवति, तर्हि परमेश्वरेण दत्ताद् युष्माकं गोमेषादि-
व्रजात् पशून् गृहीत्वा मदाज्ञानुसाराच् छेत्स्यथ स्वस्वमनोभिलाषानु-
२२ सारात् नगरद्वाराभ्यन्तर उपविश्य मांसं भोक्ष्यध्वे च। यथा कृष्णसार-
हरिणानां मांसं तथा तदपि भक्षिष्यथ, शुचिरशुचिर्व्वा सर्व्वो लोक-
२३ स्तद् भक्षितुं शक्नोति। केवलं रुधिरं युष्माभि र्न भक्षितव्यं तत्रावधद्धं
२४ यतो रुधिरमेव जीवनं, अतो मांसेन समं प्राणान् न भोक्ष्यध्वे। यूयं तत्
२५ न भुक्त्वा भूमौ जलवत् निक्षेप्स्यथ। यूयं तन्न भोक्ष्यध्वं परमेश्वरस्येप्सित-
२६ कर्म्मणि कृते युष्माकं युष्मद्भाविवंशस्य च क्षेमं भविष्यति। किन्तु युष्माकं
पूतवस्तूनि प्रतिश्रुतवस्तूनि च गृहीत्वा परमेश्वरेणानुगृहीतं स्थानं
२७ युष्माभि र्गन्तव्यं। यूयं स्वस्वहोमबलीन् अर्थात् तेषां मांसरुधिरे
युष्माकं प्रभुपरमेश्वरस्य वेद्याम् उत्सर्क्ष्यथ, युष्मदीयबलीनां रुधिरं
प्रभुपरमेश्वरस्य वेद्यां निक्षेप्स्यथ, किन्तु तेषां मांसं यूयं भक्षिष्यथ।
२८ यूयं मयादिष्टान्येतानि सर्व्ववाक्यानि श्रुत्वा पालयत तेन प्रभु-

परमेश्वरस्य गोचरे ग्राह्योत्तमकर्म्मणि कृते युष्माकं युष्मद्भाविवंशस्य सदा
शुभं भविष्यति।
यूयं यान् भिन्नजातीयान् अधिकाराच् च्योतयितुं याथ तेषु युष्माकं २९
प्रभुणा परमेश्वरेण युष्मत्सम्मुखाद् उच्छिन्नेषु यूयं यदा तेषां देशमधिकृत्य
तत्र वत्स्यथ, तदा स्वसमक्षं तेषां विनाशात् परं यूयं तेषां पश्चाद्गत्वा ३०
यदुन्माथे न पतथ तदर्थम् अवधद्धं, ता जातयः स्वस्वदेवान् कथम्
असेवन्त? वयमपि तादृव सेविष्यामहे, इति कथयन्तस्तासां देवान्
मानुसरत। यूयं स्वप्रभुपरमेश्वरं प्रति तथा न करिष्यथ ते स्वदेवान् ३१
प्रति परमेश्वरस्य घृणितं सर्व्वं कर्म्म कुर्व्वन्ति, ते देवान् उद्दिश्य स्व-
पुत्त्रकन्या अपि वह्नौ जुह्वति। अहं यद्यद् युष्मान् आदिशामि तत् सर्व्वं ३२
पालयितुं यतिष्यध्वे तस्य न्यूनमधिकं वा न करिष्यथ।

---

१३ त्रयोदशोऽध्यायः।

१ देवमर्च्चितुं प्रवर्त्तकलोकहननं ६ देवमर्च्चितुं प्रवर्त्तकज्ञातिकुटुम्बवधः १२ देवार्च्चकनगरं नाशयितुमाज्ञा।

यदि युष्माकं मध्ये कश्चन भविष्यद्वक्ता स्वप्नार्थवक्ता वोत्पद्य युष्मान् १
चिह्नं चित्रं वा कर्म्म निर्णीयेति वदति, वयं युष्माभिरविदितान् इतरदे- २
वान् अनुगम्य सेविष्यामहे, तर्हि तेन यत् चिह्नं चित्रं वा कर्म्म निर्णीतं
तस्मिन् फलितेऽपि यूयं तस्य भविष्यद्वक्तुः स्वप्नार्थवक्तुर्वा वाक्ये मनो न ३
निधास्यध्वे यतो यूयं सर्व्वान्तःकरणैः सर्व्वप्राणैः समं स्वप्रभुपरमेश्वरे
प्रीयध्वे न वेति ज्ञातुं युष्माकं प्रभुपरमेश्वरो युष्मान् परीक्षिष्यते। यूयं ४
स्वप्रभुं परमेश्वरम् अनुगच्छत तत्तो बिभीत तदाज्ञाः पालयत तत्कथां
मन्यध्वं तं सेवध्वं तस्मिन् आसज्यध्वञ्च। स भविष्यद्वक्ता स्वप्नार्थवक्ता वा ५
हन्तव्यः, यतो मिसर्देशाद् युष्मान् वहिष्कृत्य दासत्वागारात् मोचयित्वा-
नयत् यो युष्माकं प्रभुः परमेश्वरस्तस्माद् युष्मान् परावर्त्तयितुं, युष्माकं
प्रभुः परमेश्वरो येन पथा यातुं युष्मान् आदिशत् तस्माद् युष्मान्
च्योतयितुञ्च तस्य मन्त्रणा। यूयं स्वमध्यात् तं पापिष्ठं दवयत।
युष्माकं सहोदरः पुत्त्रः कन्या वक्षस्थायिनी जाया प्राणसममित्त्रं ६
वा यदि युष्मान् भ्रमयति, अर्थाद् युष्मच्चतुर्दिक्स्थजातिसेवितान् समीप- ७
स्थान् पृथिव्या आद्योपान्तस्थितान् दूरवर्त्तिनो वा देवानधि यदि युष्मान्
इति वदति, आगच्छत, वयं युष्माभिर्युष्मत्पूर्व्वपुरुषैश्चाज्ञातान् इतर-

देवान् सेवामहै, तर्हि यूयं न स्वीकृत्य तस्य कथायां मनो न निधद्ध्वं
९ तं प्रति नेत्रे न लज्जध्वं तं न दयध्वं न क्षमध्वञ्च। किन्तु यूयं
तं हनिष्यथ, तस्य हननाय प्रथमं युष्माभिस्ततः परं सर्व्वजनैः कराः
१० प्रसार्य्यन्तां। प्राणवियोगं यावत् तं प्रस्तरैराहनिष्यथ यतो दासत्वा-
गारात् मिसरदेशाद् युष्मान् वहिरानयद् यो युष्माकं प्रभुः परमे-
११ श्वरस्तस्माद् युष्मान् परावर्त्तयितुं स चेष्टितवान्। सर्व्वेस्रायेल्वंशैस्तत्
श्रुत्वा भयं प्राप्स्यते युष्मन्मध्ये तादृशं कुकर्म्म पुनर्न करिष्यते च।
१२ आगच्छत वयम् अज्ञातान् इतरदेवान् सेवामहै, इति वाचा
युष्माकं मध्यत उत्पन्नाः कतिपया दुष्टलोकाः स्वनगरवासिनोऽभ्रमयन्
१३ इति संवादं यदि युष्माकं निवासार्थं प्रभुपरमेश्वरेण दत्तानां नगराणां
१४ मध्ये किञ्चन नगरमधि शृणुथ, तर्हि युष्माभिरनुसरणेऽनुसन्धाने च कृते
सम्यक् पृष्टे च तत् तथ्यं युष्माकं मध्य एतादृशं घृणार्हं कुकर्म्म जातम्
१५ इति यदि निश्चीयेत, तर्हि यूयम् असिना तन्नगरवासिनः प्रहरत,
१६ तन्नगरं तन्मध्यस्थितं पश्वादिसर्व्वम् असिना समूलम् उच्छिन्त, लोठि-
तद्रव्याणि च तस्य हट्टपथमध्ये संगृह्य तन्नगरं तत्सर्व्वद्रव्यञ्च परमेश्वरम्
उद्दिश्य वह्निना दाहयत तत् नित्यं राशीभूय तिष्ठतु तन्नगरं पुन-
१७ र्निचितं न भवेत्। तेषां शप्तद्रव्याणां किञ्चिदपि युष्माकं करेषु न तिष्ठतु,
तेन परमेश्वरः स्वक्रोधात् परावृत्य युष्मान् दयिष्यते। अहमद्य युष्माकं
प्रभुपरमेश्वरस्य या आज्ञा युष्मान् वदामि यूयं यदि ताः पालयन्तस्तस्य
वाक्ये मनो निधाय युष्मत्प्रभोः परमेश्वरस्य दृष्ट्या यद् भद्रं तदाचरथ,
१८ तर्हि स युष्माकं पूर्व्वपुरुषान् प्रति प्रतिज्ञानुसाराद् युष्मान् प्रति दया-
शीलः सन् युष्मान् वर्द्धयिष्यति।

१४ चतुर्दशोऽध्यायः।

१ मृतार्थं शरीरच्छेदननिषेधः ३ शुच्यशुचिपशूनां निर्णयः ९ शुच्यशुचिजलचरजन्तूनां निर्णयः २१ दशमांशादिकथनं।

१ यूयं स्वप्रभुपरमेश्वरस्य सन्तानास्तस्मात् स्वशरीरच्छेदनं न करिष्यथ,
२ मृतानां कृते स्वभ्रूमध्यस्थलक्षौरं न करिष्यथ। यतो यूयं स्वप्रभुपरमेश्व-
रस्य पूतलोकाः, परमेश्वरः स्वविशेषलोकान् कर्त्तुं भूमिस्थसर्व्वजातितो
युष्मान् अनुगृहीतवान्।

किमपि घृणार्हद्रव्यं युष्माभि र्मा भुज्यतां। एते पशवो युष्माभि र्भोज- ३
नीयाः, गौ र्मेषश्छागो हरिणः कृष्णसारो वन्यगवो वन्यच्छागो गवयः पृषतो ५
वातप्रमी च। जन्तूनां मध्ये ये द्विखण्डविभक्तखुरिणो भूत्वा रोमन्था- ६
यन्ते ते युष्माभि र्भोजनीयाः। किन्तु ये रोमन्थायन्ते द्विखण्डखुरिणो वा ७
सन्ति, तेषां मध्य एते युष्माभि र्न भोजनीयाः, उष्ट्रः शशकः शाफणश्च,
यतस्ते रोमन्थायन्ते किन्तु न द्विखण्डखुरिणः, अतो युष्मान् प्रति ते न
शुद्धाः। सूकराश्च द्विखण्डखुरिणः सन्ति, किन्तु न रोमन्थायन्ते, तस्मात् ८
ते युष्मान् प्रत्यशुद्धाः, यूयं तेषां मांसं न भुञ्जीध्वं तेषां शवं न स्पृशत।

जलजन्तूनां मध्ये ये पक्षवन्तः शल्कलिनश्च सन्ति ते युष्माभि र्भक्ष्याः, ९
किन्तु येषां पक्षवल्कलानि न सन्ति तान् न भुञ्जीध्वं ते युष्मान् प्रति १०
न शुचयः।

सर्व्वे शुचिपक्षिणो युष्माभि र्भक्ष्याः, किन्तु नैते भक्ष्याः, उत्क्रोशः ११
क्रौञ्चः कुररो गृध्रश्चिल्लः स्वस्वजात्यनुसारात् शङ्करचिल्लश्च स्वजात्य- १४
नुसारात् सर्व्वकाकाः उष्ट्रपक्षी रात्रिश्येनो गांचिल्लश्च स्वजात्यनु- १५
सारात् श्येनः पेचको महापेचको दीर्घगलहंसः शोनहंसः शकुनि- १७
र्मत्स्यरङ्कः सारसः स्वजात्यनुसाराद् वको टिट्टिभो जतुका च। चतुष्पदे १९
र्गन्तारः पक्षिणो युष्मान् प्रति न शुचयो यूयं तान् न भुञ्जीध्वं। २०
तदन्यः सर्व्वशुचिः पक्षी युष्माभि र्भक्ष्यः।

यूयं स्वयं मृतस्य कस्यचित् प्राणिनो मांसं न भुञ्जीध्वं तत् स्वनगर- २१
द्वारान्तरस्थाय विदेशिने भोजनार्थं दातुं कस्यचिद् विदेशिनो वा निकटे
विक्रेतुं शक्नुथ यतो यूयं स्वप्रभुपरमेश्वरस्य पूतलोकाः। यूयं छागवत्सस्य
मांसं तन्मातृदुग्धेन न पक्ष्यथ।

युष्माकं क्षेत्रमध्ये प्रतिवर्षं वीजाद् उत्पन्नस्य सर्व्वशस्यस्य दशमांशं २२
यूयं पृथक् करिष्यथ। युष्माकं प्रभुः परमेश्वरः स्वनाम निधातुं यत् स्थानं २३
वरीष्यति तत्र यूयं स्वस्वशस्यद्राक्षारसतैलानां दशमांशान् गोमेषा-
दिव्रजानां प्रथमजातान् तस्य सम्मुखे भुञ्जीध्वं, स्वप्रभुपरमेश्वरात्
सदा भेतुं शिक्षध्वं। स पन्था यदि युष्माभि र्दुर्गम्यो भवति, युष्माकं २४
प्रभुः परमेश्वरः स्वनाम निधातुं यत् स्थानं मनोनीतं करिष्यति तस्य
दूरत्वाद् यूयं यदि परमेश्वरस्य महाशीर्व्वादाल्लब्धानि सर्व्वद्रव्याणि
तत्स्थानं नेतुं न शक्तास्तर्हि यूयं तैर्द्रव्यै र्मुद्राः कृत्वा ता मुद्रा गृहीत्वा २५
युष्माकं प्रभुपरमेश्वराभिमतं स्थानं यास्यथ। ततः स्वस्वप्राणेच्छानुसारात् २६

तां मुद्रां दत्त्वा गोमेषादिद्राक्षारसमद्यानां यत्र द्रव्ये युष्माकं मनोभिलाषो
जायते तत् क्रीत्वा तत्र युष्माकं स्वप्रभुपरमेश्वरस्य सम्मुखे भुक्त्वा सपरि-
२७ वारम् आनन्दिष्यथ। युष्माकं नगरद्वारान्तरस्थान् लेवीयान् न त्यक्ष्यथ,
यतो युष्माभिः सह तेषां कश्चिद् अधिकारोंऽशश्च नास्ति।
२८ यूयं तृतीयस्य वर्षस्य शेषे तद्वत्सर उत्पन्नानां शस्यादीनां दश-
२९ मांशान् बहिरानीय नगरद्वाराभ्यन्तरे सञ्चिनुत युष्माभिः सह येषां
लेवीयानाम् अधिकारांशौ न स्तः, ते द्वारान्तरस्थविदेशिनः पितृहीन-
बाला विधवाश्चागत्य तत् भुञ्जानास्तर्प्स्यन्ति, तेन युष्माकं प्रभुपरमेश्वरो
युष्माकं करकृतकर्म्मार्थं युष्मान् आशिषं वदिष्यति।

---

१५ पञ्चदशोऽध्यायः।

१ ऋणमोचनवर्षकथा ७ ततो दातुमसम्मतिनिषेधः १२ सप्तवर्षात् परं दासमुक्तिकथा
१९ परमेश्वराय प्रथमजपशून् पृथक् कर्त्तुमाज्ञा।

१ यूयं सप्तवर्षतः परं क्षमाम् आचरिष्यथ, तस्याः क्षमाया व्यवस्थेयं।
२ य उत्तमर्णः स्वसमीपवासिन ऋणं ददाति स स्वदत्तमृणं क्षमिष्यते,
परमेश्वरीयक्षमेति नाम्ना विख्याते तस्मिन् वर्षे कश्चित् प्रतिवासितो
३ भ्रातृतो वा ऋणशोधं न ग्रहीष्यति। विदेशितो यूयं तद् ग्रहीतुं
शक्नुथ, किन्तु यावद् युष्मन्मध्याद् दारिद्र्यशेषो न भवेत् तावद्
४ युष्माकं भ्रातरि युष्माकं यदस्ति तत् क्षमिष्यध्वे। यतो युष्मत्प्रभुः परमे-
श्वरो यं देशम् अधिकारार्थं युष्मभ्यं दास्यति तत्र देशे युष्मान् आशिषं
५ वदिष्यति। अद्याहं युष्मान् यदादेक्ष्यामि तत् पालयितुं सावधानाः
६ सन्तो युष्माकं प्रभुपरमेश्वरवाक्ये मनो निधद्ध्वं। यतो युष्माकं प्रभुपर-
मेश्वरो युष्मान् प्रति स्वाङ्गीकारानुसाराद् युष्मान् आशिषं वदिष्यति यूयं
बहुजातीयेभ्य ऋणं दास्यथ किन्तु ऋणं न ग्रहीष्यथ, बहुजातीयानाम्
आधिपत्यं करिष्यथ किन्तु ते युष्माकम् आधिपत्यं न करिष्यन्ति।
७ युष्माकं प्रभुपरमेश्वरदत्तदेशे नगरद्वारान्तरस्थभ्रातृणां मध्ये यदि
कश्चिद् दुर्गतस्तिष्ठति तर्हि यूयं तं प्रति मनःकाठिन्यं न करिष्यथ,
८ दुर्गतभ्रातरं प्रति स्वकरौ मा रुत्स्यथ। किन्तु तं प्रति मुक्तहस्ता भूत्वा
९ तत्प्रयोजनानुसाराद् अवश्यं तस्मायृणं दास्यथ। यूयं सावधाना
भवत, सप्तमवर्षम् अर्थात् परमेश्वरीयक्षमावर्षं सविधम् इति कथयित्वा

दुष्टान्तःकरणे मा कुचिन्तयत। यूयं यदि स्वस्वदरिद्रभ्रातरं प्रति
कुदृष्टिं कृत्वा तस्मै किमपि न दत्थ तर्हि तेन युष्माकं प्रतिकूलं
परमेश्वरे प्रार्थनायां कृतायां युष्माकम् अपराधो भविष्यति। अतो १०
यूयं तस्मै दास्यथ दानकाले च मनसि मा दुःखिनो भवत, यस्मात्
सत्कर्म्मकारणाद् युष्मत्प्रभुपरमेश्वरो युष्माकं सर्व्वकर्म्मसु यूयं यत्र
हस्तार्पणं करिष्यथ तत्र युष्माकं क्षेमं करिष्यति। यतो युष्माकं देशे ११
दुर्गताभावो न भविष्यति तस्मादहं युष्मान् इत्यादिशं, यूयं स्वदे-
शस्थान् दुर्गतदुःखिभ्रातॄन् प्रति मुक्तहस्ता भवत।

यदि युष्मदन्तिके युष्मद्भ्राता कश्चिद् इब्रीयः पुमान् स्त्री वा विक्रीयते १२
तर्हि तेन षट् वर्षाणि यावत् सेवितस्त्वं सप्तमवर्षे तं मोचयित्वा स्वतो
विस्रक्ष्यसि। मुक्तस्य तस्य विसर्जनकाले तं रिक्तहस्तं न विस्रक्ष्यसि। १३
त्वं पशुशस्यद्राक्षारसेभ्यस्तस्मै प्रचुरं दास्यसि, तव प्रभुपरमेश्वरा- १४
शीर्व्वादानुसारात् तस्मै दास्यसि। यूयं मिसर्देशे दासत्व आस्त प्रभु- १५
परमेश्वरो युष्मान् अमोचयत् तद् यत् स्मरथ तदर्थम् अहमद्य युष्मान्
इत्यादिशामि। त्वत्तः क्षेमं प्राप्तः स यदि त्वयि तव गृहे च प्रीयमाणस्तु- १६
भ्यं कथयति त्वामहं न विहास्यामि, तर्हि त्वं सूचिं गृहीत्वा द्वारकाष्ठेन १७
सह तस्य कर्णं भिंत्स्यसि तेन स सदा तव दासः स्थास्यति, दासीं
प्रति च तथा करिष्यसि। तेन षड्वर्षाणि त्वत्सेवनेन स वेतनजीवि- १८
भृत्यादपि त्वां प्रति द्विगुणफलदोऽभूत् तस्मात् त्वं तं मोचयित्वा
विस्रष्टुं कठिनं न ज्ञास्यसि, तेन तव प्रभुपरमेश्वरस्तव सर्व्वकर्म्मसु
तुभ्यम् आशिषं दास्यति।

यूयं स्वस्वगोमेषादिपशुव्रजाद् उत्पन्नान् सर्व्वप्रथमजान् पुंपशून् १९
स्वप्रभुपरमेश्वरमुद्दिश्य पवित्री करिष्यथ यूयं गोः प्रथमजेन किञ्चन कर्म्म
न करिष्यथ प्रथमजमेषस्य च रोम न छेत्स्यथ। युष्माकं प्रभुपरमेश्वरस्य २०
सम्मुखे परमेश्वरानुगृहीते स्थाने सपरिवाराः प्रतिवर्षं तान् भोक्ष्यध्वे।
किन्तु तत्र यदि कश्चिद् दोषस्तिष्ठति अर्थात् स पशुवत्सो यदि खञ्जान्धा- २१
दित्वदोषी स्यात् तर्हि यूयं स्वप्रभुपरमेश्वराय तं बलिरूपेण न दास्यथ।
किन्तु नगरद्वाराभ्यन्तरे तं भोक्ष्यध्वे, शुचिरशुचिर्व्वा लोको हरिणकृष्ण- २२
सारवत् तं भोक्ष्यते। यूयं केवलं तस्य रुधिरं मा भक्षत, तद् भूमौ २३
तोयवत् निक्षेप्तव्यं।

१६ षोड़शोऽध्यायः।

१ निस्तारपर्व्वकथा ९ सप्त सप्ताहात् परं उत्सवकथा १३ उटजोत्सवकथा १६ वर्षे वारत्रयं धर्म्मधामगमनकथा १८ विचारकर्त्तृनिरूपणकथा २१ चैत्यप्रतिमास्थापन-निषेधः।

१ यूयं च्चावीव्मासं मंस्यथ युष्माकं प्रभुपरमेश्वरम् उद्दिश्य निस्तार-
पर्व्वं पालयिष्यथ, यतो युष्माकं प्रभुपरमेश्वर आवीव्मासे रात्रौ
२ युष्मान् मिसर्देशाद् वहिरानयत्। परमेश्वरः स्वनामनिवासार्थं यत्
स्थानं वरीष्यति तत्र यूयं स्वप्रभुपरमेश्वराय मेषान् गाश्च गृहीत्वा
३ निस्तारपर्व्वीयबलिरूपेणोत्स्रक्ष्यथ। तेन बलिना समं किण्वं न
खादिष्यथ, यूयं यावज्जीवं मिसरो निर्गमनदिनं स्मर्त्तुं सप्तदिनानि
किण्वशून्यान् पूपान् अर्थाद् दुःखसूचकान् पूपान् भोक्ष्यथ, यतो यूयं
४ मिसर्देशात् तूर्णं वहिरागताः। सप्त दिनानि युष्माकं सर्व्वसीमायां किण्वं
मा दृश्यतां, प्रथमदिनसन्ध्यायां हतबलेर्मांसस्य किमपि प्रातर्यावत्
५ शेषं मा तिष्ठतु। युष्माकं प्रभुपरमेश्वरो युष्मभ्यं यानि नगराणि
दास्यति तेषां कुत्रापि द्वारे निस्तारपर्व्वीयबलि र्युष्माभिर्न दातव्यः।
६ किन्तु युष्माकं प्रभुपरमेश्वरः स्वनामनिवासार्थं यत् स्थानं वरीष्यति
तत्रैव सन्ध्यायां सूर्य्यास्तकाले ऽर्थात् मिसर्देशाद् युष्माकं वहिराग-
७ मनस्य वेलायां निस्तारोत्सवीयं बलिं दास्यथ। तत्र प्रभुपरमेश्वरस्या-
नुगृहीतस्थाने तं जलेन पक्का भोक्ष्यध्वे प्रात यूंयं परावृत्य स्वस्वदूष्ये
८ यास्यथ। यूयं षड्दिनानि किण्वशून्यान् पूपान् भक्षिष्यथ, किन्तु
सप्तमे दिने युष्माकं प्रभुपरमेश्वरम् उद्दिश्य महासभा भविष्यति तत्र
किमपि कर्म्म न करिष्यथ।

९ ततः परं यूयं सप्त सप्ताहान् गणयित्वार्थात् शस्ये दात्रदानमा-
१० रभ्य सप्त सप्ताहान् गणयित्वा युष्माकं प्रभुपरमेश्वराशीर्व्वादानुसारात्
स्वेच्छादत्तोपहारेण युष्माकं प्रभुपरमेश्वरम् उद्दिश्य सप्ताहमहं पाल-
११ यिष्यथ। युष्माकं प्रभुपरमेश्वरेण स्वनामनिवासार्थम् अनुगृहीते स्थाने
युष्माकं प्रभुपरमेश्वरस्य सम्मुखे यूयं युष्माकं पुत्त्रकन्यादासदास्यो द्वार-
वर्त्तिलेवीया युष्माकं मध्यवासिविदेशिपितृहीनविधवाश्च सर्व्वे आन-
१२ न्दिष्यथ। यूयं मिसर्देशे दासत्वे स्थितास्तत् स्मरत। विधीनेतान्
पालयन्त आचरत।

१३ शस्यद्राक्षारसानां संग्रहणात् परं यूयं सप्तदिनानि यावद् उटजमहं

करिष्यथ। तत्र मद्दे यूयं युष्माकं पुत्रकन्यादासदास्यो द्वारस्थलेवीया १४
विदेशिपितृहीनविधवाश्च सर्व्व आनन्दिष्यथ। यूयं स्वपरमेश्वरानुगृही- १५
तस्थाने स्वप्रभुपरमेश्वरम् उद्दिश्य सप्तदिनानि महामहं करिष्यथ, युष्माकं
प्रभुपरमेश्वरो युष्माकं सर्व्वप्राप्तिषु करकृतसर्व्वकर्म्मसु च युष्मान् आशिषम्
अवोचत् ततो यूयमानन्दिष्यथ। युष्माकमेकैकः पुमान् वर्षमध्ये वारत्रयं १६
अर्थात् किण्वशून्यपूपमहे सप्ताहमहे उटजमहे च परमेश्वरस्यानुगृहीते
स्थाने युष्माकं प्रभुपरमेश्वरस्य सम्मुखे दर्शनं दास्यति, किन्तु परमेश्वर-
सम्मुखे रिक्तहस्तो दर्शनं न दास्यति। स्वप्रभुपरमेश्वरेण दत्ताशीर्व्वा- १७
दानुसाराद् युष्माकम् एकैको जनः शक्त्यनुसाराद् उपहारं दास्यति।

युष्माकं प्रभुपरमेश्वरो युष्माकं वंशानुसाराद् युष्मभ्यं यानि नगराणि १८
दास्यति तेषां द्वारमध्ये यूयं स्वार्थं विचारकान् शासकांश्च नियोजयत,
ते न्यायतो लोकान् विचारयन्तु। यूयम् अन्यायविचारं मा कुरुत, १९
कमपि नानुरुध्यध्वम् उत्कोचं मा गृह्लीत, यत उत्कोचो ज्ञानिनां
नेत्राण्यन्धी करोति धार्म्मिकानां वाक्यं वक्री करोति च। तस्मात् सर्व्वथा २०
न्याय्यम् अनुगच्छत तेन यूयं जीवित्वा स्वप्रभुपरमेश्वरेण दास्यमानं
देशम् अधिकरिष्यथ।

यूयं स्वप्रभुपरमेश्वराय यां वेदिं निर्म्मास्यथ तदन्तिके कमपि चैत्य- २१
वृक्षं मा रोपयत। परमेश्वरेण घृणितां प्रतिमां मा स्थापयत। २२

---

१७ सप्तदशोऽध्यायः।

१ निर्द्दोषबलेरावश्यकता २ देवार्च्चकवधाज्ञा ८ याजकविचारकाभ्यां कठिनविचार-
निष्पत्तिः १२ साहसिकपापिवधाज्ञा १४ राजत्वनिर्णयः।

यूयं स्वप्रभुपरमेश्वराय सकलङ्कदोषिगोमेषादिबलिं न दास्यथ यतः १
स युष्माकं प्रभुपरमेश्वरस्य घृणितं वस्तु।

युष्माकं मध्येऽर्थात् प्रभुपरमेश्वरदत्ते युष्माकं कस्मिंश्चित् नगरे यदि २
पुमान् स्त्री वा युष्माकं प्रभुपरमेश्वरस्य साक्षात् कुकर्म्म कुर्व्वन्
तन्नियमं लङ्घते, फलतः स गत्वा यदीतरदेवान् सेवते ममाज्ञायाः ३
प्रातिकूल्येन वा चन्द्रसूर्य्यादिव्योमीयवस्तूनि पूजयतीति वचसि युष्माकं ४
साक्षात् केनापि कथिते यूयं साक्षिणः श्रुत्वा यत्नात् मृगयित्वा
तत् सत्यं निश्चितं तद् घृणार्हकार्य्यम् इस्रायेल्वंशमध्ये कृतमभूत्, इति

५ यदि पश्यथ, तर्हि यूयं तं कुकर्म्मकारिपुरुषं स्त्रियं वा स्वनगरद्वार-
निकटे बहिरानेष्यथ पुरुषः स्त्री वा भवेत् तस्य प्राणवियोगपर्य्यन्तं तं
६ प्रस्तरैराहनिष्यथ। बधयोग्यो नर एकस्य साक्षिणो वाक्येन न हनिष्यते
७ किन्तु द्वयोस्त्रयाणां वा वाक्येन हनिष्यते। तान् हन्तुं प्रथमं साक्षिभिः
पश्चात् सर्व्वजनै र्हस्ताः प्रसार्य्यन्तां, इत्थं यूयं स्वमध्यात् पापिष्ठं
दूरयिष्यथ।

८ युष्माकं विचारस्थाने रक्तपातं प्रहारमधि वा वादिप्रतिवादिनोर्वि-
वाद उपस्थिते यदि तस्य विचारोऽतिदुर्ज्ञेयः स्यात् तर्हि यूयम् उत्थाय
९ युष्माकं प्रभुपरमेश्वरेणानुगृहीतं स्थानं यास्यथ। लेवीययाजकानां
तत्कालीयविचारकस्य च निकटं गत्वा प्रक्ष्यथ, ते युष्मान् विचारनिष्पत्तिं
१० वदिष्यन्ति। यूयं परमेश्वरेणानुगृहीतस्थानस्थितानां तेषां निष्पत्त्यनु-
सारात् कर्म्म करिष्यथ ते युष्मान् यद् वदिष्यन्ति तत् कर्त्तुं मनो निधा-
११ स्यध्वे। ते युष्मान् यां व्यवस्थां वदिष्यन्ति याञ्च विचारनिष्पत्तिं करिष्यन्ति
यूयं तदनुसारात् करिष्यथ ते युष्मान् यद् आदेक्ष्यन्ति, यूयं तस्य दक्षिणं
वामं वा न परावर्त्तिष्यध्वे।

१२ किन्तु यो नरो दुःसाहसात् कर्म्म करोति तत्र स्थाने युष्माकं प्रभुपर-
मेश्वरं सेवितुं दण्डायमानानां याजकानां विचारकानाञ्च वाक्ये मनो न
निधत्ते, स हनिष्यते, यूयम् इस्रायेल्वंशात् तं पापिष्ठं दूरयिष्यथ।
१३ तेन सर्व्वलोकास्तत् श्रुत्वा भेष्यन्ति दुःसाहसात् पुनर्नाचरिष्यन्ति।

१४ यूयं यदा स्वप्रभुपरमेश्वरेण दास्यमानं देशं प्रविश्य तमधिकृत्य
तन्मध्ये वत्स्यथ तदास्माकं चतुर्दिक्स्थसर्व्वजातिवद् वयमपि स्वोपरि
१५ राजानमेकं नियोक्ष्यामहे इति वाचि युष्माभिः कथितायां युष्माकं
प्रभुपरमेश्वरो यं नरं वरीष्यति तमेव यूयं राजानं करिष्यथ, स्व-
भ्रातृणां मध्याद् राजानं गृहीत्वा स्वोपरि नियोक्ष्यध्वे, किन्तु भ्रातृभिन्ना-
१६ न्यदेशीयं कमपि स्वोपरि राजानं न करिष्यथ। स राजा स्वार्थं बहु-
हयान् न संग्रहीष्यति विशेषतो बहुहयग्रहणार्थं मिसर्देशं लोकान्
न प्रेषयिष्यति यतः परमेश्वरेणोक्तं, इतः परं यूयं तेन पथा पुनर्न
१७ यास्यथ। तस्य मनो यन्न परावर्त्तते तदर्थं स बहुस्त्री र्न विवक्ष्यति
१८ स्वार्थं रूप्यस्य स्वर्णस्य वा बाहुल्यं न संग्रहीष्यति। स राजसिंहासनोप-
वेशनकाले लेवीययाजकानां सम्मुखस्थितव्यवस्थाशास्त्रस्यानुरूपमेकं शास्त्रं
१९ लिखित्वा स्वसमीपे स्थापयिष्यति यावज्जीवं नित्यं पठिष्यति च तेन स

स्वप्रभुपरमेश्वराद् भेतुम् एतद्व्यवस्थायाः सर्व्ववाक्यविधीन् पालयितुञ्च
शिक्षित्वा स्वभ्रातृणाम् उपरि न गर्व्विष्यति विधितश्च दक्षिणं वामं वा २०
न परावर्त्तिष्यति, ततो हेतोरिस्रायेल्वंशमध्ये स तस्य सन्तानाश्च दीर्घ-
कालं यावद् राजत्वं करिष्यन्ति।

१८ अष्टादशोऽध्यायः।

१ परमेश्वरस्य याजकलेवीयानां अधिकारस्वरूपत्वं ३ याजकानां प्राप्तिनिर्णयः ६ लेवीयानां प्राप्तिनिर्णयः ९ किनानीयवत् व्यवहर्त्तुं निषेधः १५ विशेषभविष्यद्वक्तारं मन्तुमाज्ञा २० मिथ्याभविष्यद्वक्तृदण्डकथा।

लेवीययाजका लेवेः सर्व्ववंशाश्चेस्रायेल्वंशेन सह अंशाधिकारौ न १
प्राप्स्यन्ति, केवलं परमेश्वरस्य वह्निकृतोपहारस्वरूपोऽधिकारस्तै र्भोक्तव्यः।
ते स्वभ्रातृणां मध्ये कमपि भूम्यधिकारं न प्राप्स्यन्ति, किन्तु परमेश्वरः २
स्वयं स्ववाक्यानुसारात् तेषाम् अधिकारो भविष्यति।

लोकेभ्यो याजकानां प्राप्तेरियं व्यवस्था, गोमेषबलिदलोका बलेः स्कन्ध- ३
गलनाड़ी र्याजकाय दास्यन्ति। यूयं स्वस्वप्रथमोत्पन्नशस्यद्राक्षारस- ४
तैलानि मेषाणां प्रथमच्छिन्नलोमानि च तस्मै दास्यथ। यतः परमेश्वरस्य ५
नाम्नि सदा परिचरितुं युष्माकं प्रभुपरमेश्वरो युष्माकं सर्व्ववंशमध्यात्
तं तस्य भाविवंशं वरीतवान्।

युष्माकम् अर्थाद् इस्रायेल्वंशस्य कस्मिंश्चिन्नगरद्वारे प्रवसन् कश्चिल्ले- ६
वीयो यदि स्वमनोभिलाषात् परमेश्वरेण निश्चितं स्थानम् आगत्य तत्र ७
परमेश्वरस्य सम्मुखे दण्डायमानलेवीयभ्रातृगणवत् स्वप्रभुपरमेश्वरं सेवते
तर्हि स तेषां समांशं लप्स्यते, स्वीयपैतृकभूमे र्विक्रयमूल्यमपि लप्स्यते। ८

यूयं यदा स्वप्रभुपरमेश्वरदत्तं देशं प्राप्स्यथ, तदा तद्देशीयभिन्न- ९
जातीयानां घृणार्हकर्म्मवत् कर्म्म कर्त्तुं न शिक्षिष्यध्वे। पुत्रकन्याहो- १०
टद्दैवज्ञः कालविवेचको मोहको डाकिनी गुणी भौतिको मायिको ११
भूतानां मन्त्रणार्थी कश्चिद् युष्मन्मध्ये मा विद्यतां। यतः परमेश्वर एतान् १२
ऋतीयते युष्माकं प्रभुपरमेश्वर एतद्घृणार्हकर्म्मकारणाद् युष्माकं
सम्मुखात् तान् दूरयिष्यति। यूयं स्वप्रभुपरमेश्वरम् उद्दिश्य सरलम् १३
आचरत। यतो यूयं या जाती र्बहिः करिष्यथ ताः कालविवेचकदैव- १४
ज्ञानां वचःसु विश्वसन्ति, किन्तु युष्माकं प्रभुपरमेश्वरो युष्मभ्यं तत्
कर्त्तुं नानुजानाति।

१५ युष्माकं प्रभुपरमेश्वरो युष्माकं भ्रातृगणमध्यात् मत्सदृशं भविष्यद्व-
१६ क्तारम् उत्पादयिष्यति तद्वचःसु यूयं मनो निधास्यध्वे। वयं स्वप्रभु-
परमेश्वरवाक्यं पुनर्न शृणुयाम महाग्निमिमं न पश्येम न म्रियेमहि
चेति होरेबि तिष्ठद्भिर्युष्माभिः समारोहदिने स्वप्रभुपरमेश्वरः प्रार्थितः।
१७ ततः परमेश्वरो मामवदत्, इम उत्तमं कथयन्ति। अहम् एतेषां कृते
१८ एतेषां भ्रातृगणमध्यात् तव सममेकं भविष्यद्वक्तारम् उत्पादयिष्यामि
तदास्ये मम वाक्यं दास्यामि च, अहं यदाज्ञापयिष्यामि तत् स तान्
१९ वदिष्यति। स मम नाम्नि यां वाचं कथयिष्यति तां यो न श्रोष्यति तस्मै
समुचितं फलमहं दास्यामि।
२० यां वाचं कथयितुम् अहं नादिशामि तां यो भविष्यद्वक्ता मम
नाम्नि दुःसाहसात् कथयिष्यति यो वेतरदेवानां नाम्नि कथयिष्यति
२१ स हनिष्यते। किन्तु परमेश्वरेणानुक्तं यद् वाक्यं तद् वयं कथं ज्ञातुं
२२ शक्नुयाम? यूयं यदीदं भावयथ, तर्हि केनचिद् भविष्यद्वक्त्रा परमेश्वर-
नाम्नि वाक्ये कथिते तद्वाक्यं यदि न फलति तत्फलं नोपतिष्ठति च तर्हि
तद्वाक्यं परमेश्वरोक्तं नहि, तत् तेन भविष्यद्वक्त्रा दुःसाहसाद् उक्तं, यूयं
ततो न भेष्यथ।

१९ ऊनविंशोऽध्यायः।

१ आश्रयनगरनिरूपणं ४ तत्र बधकानां रक्षाकथनं ११ स्वेच्छाबधकस्य न रक्षा १४ सीमाचिह्नं दूरयितुं निषेधः १५ साक्षिद्वयेन विचारनिष्पत्तिः १६ मृषासाक्षिदण्डः।

१ युष्माकं प्रभुपरमेश्वरो येषां जातीयानां देशं युष्मभ्यं दास्यति तेषु
तेनोच्छिन्नेषु यदा यूयं तेषां स्थानमधिकृत्य तेषां नगरेषु गृहेषु च
२ वत्स्यथ, तदा यूयमधिकारार्थं प्रभुपरमेश्वरदत्तदेशमध्ये स्वार्थं पुरत्रयं
३ पृथक् करिष्यथ। हन्तृलोकास्तत् स्थानं पलाय्य यद् रक्षां गच्छेयु-
स्तदर्थं पन्थानं करिष्यथ युष्मत्प्रभुपरमेश्वरदत्तदेशस्य सीमां त्रिधा
करिष्यथ च।
४ तत्स्थानपलायमानो यो हन्ता प्राणरक्षायोग्यस्तस्य निर्णयोऽयं।
यः कश्चित् पूर्व्वं समीपवासिनं न द्विष्ट्वा तमज्ञानाद् हन्ति, स एव।
५ तदुदाहरणमिदं कस्मिंश्चिद् इन्धनानि छेत्तुं समीपवासिना साकं वनं गते
तरुं छेत्तुं तेनोत्तोलितः कुठारो यदि त्सरोरपसृत्य समीपवासिनो
गात्रे पतेत् तेन च स म्रियेत तर्हि स एतेषामेकं नगरं पलाय्य प्राणान्

रक्षिष्यति। पूर्व्वमृतीयितत्वात् स बधापराधी न भवति। अतो रक्त- ६
पातप्रतिहन्ता तस्य हन्तुः पश्चाद् धावन् क्रोधेन प्रज्वलन् दीर्घपथत्वात्
तं धृत्वा नाशयितुं यन्न शक्नुयात् तदर्थम् अहं युष्मान् आदिशामि यूयं ७
स्वार्थं नगरत्रयं पृथक् करिष्यथ। युष्माकं प्रभुपरमेश्वरो युष्माकं पूर्व्व- ८
पुरुषान् प्रति शपथानुसाराद् यदि युष्माकं सीमां वर्द्धयति, यान्
देशान् दातुं युष्माकं पूर्व्वपुरुषाणां साक्षात् प्रतिज्ञातवान् तान् ददाति,
अहं युष्मान् प्रभुपरमेश्वरे प्रेतुं तस्य पथि चलितुञ्च यद् आदिशं तद् यदि ९
यूयं पालयथ, तर्हि यूयमेतन्नगरत्रयं विनान्यनगरत्रयं पृथक् करिष्यथ।
युष्माकं प्रभुपरमेश्वरो युष्मभ्यं यं देशं दास्यति तन्मध्ये निरपराधस्य रक्तं १०
न पात्यतां, रक्तपातापराधश्च युष्मान् मा गच्छतु।

यदि कश्चित् स्वसमीपवासिनं द्विषन् व्याधवद् गुप्तस्तिष्ठन् तत्प्रति- ११
कूलम् उत्थाय तं मर्म्मान्तम् आहन्ति तेन च स म्रियते स च हन्ता
यद्येतेषां नगराणाम् एकस्मिन् नगरे पलायते, तर्हि तस्य निवासनगरस्य १२
प्राचीनलोका नरान् प्रहित्य तस्मात् तम् आनीय प्रतिहन्तुः करे समर्प-
यिष्यन्ति स च हनिष्यते। यूयं नेत्रैर्न लज्जिष्यध्वे, इत्थम् इस्रायेल्वंशात् १३
निरपराधरक्तपातदोषं दूरयिष्यथ तेन युष्माकं शुभं भविष्यति।

युष्माभिरधिकरिष्यमाणायां भूमौ युष्मत्प्रभुपरमेश्वरेण दातव्ये देशे १४
यूयं पूर्व्वपुरुषैः स्थापितां प्रतिवासिनः सीमां मा स्थानान्तरी कुरुत।

कस्यचिद् अपराधस्य पापस्य दोषस्य वा विचारे सति कस्यचित् १५
प्रातिकूल्येनैकः साक्षी मा भवेत्, किन्तु द्वयोस्त्रयाणां वा साक्षिणां
मुखात् सर्व्वा कथा निश्चिता भविष्यति।

अन्यायसाक्ष्यं दातुं यदि मृषासाक्षी कस्यापि प्रतिकूलं भवति तर्हि १६
तौ वादिप्रतिवादिनौ परमेश्वरसम्मुखे ऽर्थात् तत्कालीययाजकविचार- १७
कानां सम्मुखे स्थापयिष्येते। विचारकैर्यत्नाद् विचारिते स साक्षी यदि १८
मृषा भवति स्वभ्रातृप्रतिकूलं मृषा साक्ष्यम् अदात्, तर्हि स स्वभ्रातरं १९
प्रति यथा कर्त्तुमकल्पत तं प्रति यूयं तथा करिष्यथ, इत्थं स्वमध्यात्
पापिष्ठं दूरयिष्यथ। यस्मात् तत् श्रुत्वा शेषलोका भेष्यन्ति तदारभ्य २०
युष्माकं मध्ये कुकर्म्म न करिष्यन्ति। तं प्रति यूयं नेत्रैर्न लज्जिष्यध्वे २१
किन्तु प्राणानां विनिमयेन प्राणा नेत्रस्य विनिमयेन नेत्रं दन्तस्य विनिम-
येन दन्तो हस्तस्य विनियमेन हस्तः पादस्य विनिमयेन पादस्तेन त्यक्तव्यः।

२० विंशोऽध्यायः ।

१ रणकाले याजककथा ५ सेनापतिकथा १० रिपुनगरं प्रति व्यवहारनिर्णयः १६ सप्तजातीयानां नाशाज्ञा १९ रणकाले फलवत्तरुनाशनिषेधः ।

१ यूयं स्वरिपुप्रतिकूलं योद्धुं वहिर्भूय यदि स्वतोऽधिकहयरथजनताः
पश्यथ तथापि मा बिभीत यतो यो मिसर्देशाद् युष्मान् आनयद् युष्माकं
२ स प्रभुपरमेश्वरो युष्माभिः सह स्थास्यति । यूयं यदा रणसमीपम् उप-
गमिष्यथ तदा याजक आगत्य लोकान् संभाषमाण इति वदिष्यति,
३ हे इस्रायेल्वंशाः शृणुत यूयमद्य रिपुभिः समं योद्धुं याथ किन्तु मनःसु
४ निराशा मा भवत मा बिभीत मा कम्पध्वं तेभ्यो मा त्रस्यत । यतो
युष्माकं प्रभुपरमेश्वरो युष्मान् जयिनः कर्त्तुं युष्माकं रिपूणां प्रतिकूलं
योद्धुं युष्माभिः समं याति ।

५ ततः परम् अधिपतयो लोकान् इति वदिष्यन्ति युष्मन्मध्य एवम्भूतः
को विद्यते यो नवीनगृहं निर्म्माय तत्प्रतिष्ठां न कृतवान्? रणे तस्मिन्
मृते यद् अन्यलोकेन तत्प्रतिष्ठा न क्रियेत, तदर्थं स गृहं परावृत्य
६ यातु । एवम्भूतो वा को विद्यते यो द्राक्षाक्षेत्रं कृत्वा तत्फलं न
भुक्तवान्? रणे तस्मिन् मृतेऽन्यलोको यत् तत्फलं न भुञ्जीत तदर्थं स
७ स्वगृहं परावृत्य यातु । एवम्भूतो वा को विद्यते यो वाग्दाने कृते
विवाहं न कृतवान्? रणे तस्मिन् मृतेऽन्यलोको यत् तस्य जायां न
८ गृह्णीयात् तदर्थं स गृहं परावृत्य यातु । अधिपतयो लोकेभ्यः पुनः
कथयिष्यन्ति भीरुर्व्यर्थमना वा लोकः कोऽस्ति? तन्मनोवत् तस्य भ्रातॄणां
मनांसि यत् निराशानि न भवेयुस्तदर्थं स गृहं परावृत्य यातु ।
९ अधिपतयो लोकैः समं कथां समाप्य लोकान् युद्धं नेतुं सैन्योपरि
सेनापतीन् नियोक्ष्यन्ते ।

१० कस्यापि नगरस्य प्रतिकूलं युद्धं करणार्थं युष्माभिस्तत्समीपे प्राप्ते
११ सन्धिकथा घोषयिष्यते । ततो यदि ते पौराः सन्धीच्छवो युष्मदर्थं
द्वारं मोचयन्ति तर्हि तन्नगरीयसर्व्वलोका युष्मभ्यं करं दास्यन्ति युष्मान्
१२ सेविष्यन्ते च । यदि ते सन्धिं न कृत्वा युष्माभिः समं युयुत्सन्ति, तर्हि
१३ यूयं तेषां नगरम् अवरोत्स्यथ । ततो युष्माकं प्रभुपरमेश्वरेण तेषु
युष्माकं करे समर्पितेषु यूयं तन्नगरीयान् सर्व्वपुरुषान् असिधारै
१४ र्हनिष्यथ, किन्तु तेषां स्त्रीबालकपश्वादि नगरस्य सर्व्वस्वं स्वार्थं लोठित-
रूपं गृहीत्वा युष्माकं प्रभुणा परमेश्वरेण दत्तं रिपुलोठितं भोक्ष्यध्वे ।

युष्मत्तोऽतिदूरे यानि पुराणि तानि प्रतीत्थं करिष्यथ किन्त्वत्रस्थजाती- १५
यानां पुराणि प्रति नेत्थं करिष्यथ। यतो युष्माकं प्रभुः परमेश्वर एतेषां १६
लोकानां यद्यत् पुरमधिकर्त्तुं युष्मभ्यं दास्यति तेषां मध्ये कमपि प्राणिनं
जीवन्तं न स्थापयिष्यथ। यूयं स्वप्रभुपरमेश्वराज्ञया तान् अर्थात् १७
हित्तीय-इमोरीय-किनानीय-पिरिषीय-हिव्वीय-यिबूषीयलोकान् समू-
लम् उच्छेत्स्यथ। नो चेद् यद्यद् घृणार्हं कर्म्म ते स्वदेवान् उद्दिश्य १८
कुर्व्वन्ति तद् युष्मान् शिक्षयिष्यन्ति, तेन यूयं स्वप्रभुपरमेश्वरस्य
प्रतिकूलम् अपराधिनो भविष्यथ।

युद्धेन नगरं वशीकर्त्तुं युष्माभिस्तदवरुध्य बहुकाले यापिते परशुना १९
तन्नगरस्य तरवो न छेदनीयाः, तत्फलानि युष्माभि र्भक्ष्याणि, किन्तु
पुरावरोधार्थं तरवोऽच्छेदनीयाः यतः क्षेत्रतरुर्मानुषस्य जीवनोपायः।
किन्तु यान् तरून् अभक्ष्यफलान् जानीथ तान् नाशयितुं कर्त्तितुञ्च २०
शक्ष्यथ। युष्माभिः समं युद्धकारि पुरं यावन्न पराजयते तावत् तत्-
पुरप्रतिकूलं तैस्तरुभिर्दुर्गं निर्म्मास्यथ।

---

२१ एकविंशोऽध्यायः।

१ अनिश्चितवधप्रायश्चित्तं १० सुन्दरीबन्दीस्त्रिया विवाहनियमः १५ अप्रियाजातज्येष्ठपु-
त्राधिकारनिर्णयः १८ अबाध्यपुत्रवधाज्ञा २२ उद्बन्धनस्थापननियमः।

अधिकर्त्तुं युष्माकं प्रभुपरमेश्वरेण दास्यमाने देशे क्षेत्रमध्ये यदि हत- १
लोकः प्राप्यते किन्तु स केन हत इति न ज्ञायते तर्हि युष्माकं प्राचीना २
विचारकाश्च वहिर्गत्य तं शवमारभ्य चतुर्दिक्स्थपुराणि यावत्
मापयिष्यन्ति। यत् पुरं हतलोकस्य समीपं भविष्यति, तत्प्राचीन- ३
लोका युगवहनादिसर्व्वकर्म्माप्रवृत्तां गोवत्सां ग्रहीष्यन्ति। तत्पुर- ४
प्राचीना अकृष्टानुप्तनित्यजलस्रोतोवाहिखातं तां गोवत्साम् आनीय
तत्र तस्या मस्तकं छेत्स्यन्ति। लेवीययाजकाश्च समीपमुपस्थास्यन्ति, यतो ५
युष्मत्प्रभुपरमेश्वरं परिचरितुं परमेश्वरनाम्नाशिषं दातुञ्च ते तेनानुगृही-
तास्तेषाञ्च वाक्यात् सर्व्वविवादो दण्डविचारश्च निश्चेतव्यः। शवसमीप- ६
स्थपुरमुख्याश्च तत्र जलस्रोतसि छिन्नमस्तकगोवत्सोपरि स्वस्वकरान् ७
प्रक्षाल्य वाक्यमिदं वदिष्यन्ति, न हस्तैरस्माकम् एष रक्तपातः कृतो न
चास्मन्नेत्रै र्दृष्टः। हे परमेश्वर भवता मुक्तस्य स्वीयेस्रायेल्वंशस्येदं कर्म्म ८

क्षम्यतां स्वीयेस्रायेल्वंशं प्रति निरपराधरक्तपातदोषो नार्प्यतां, तेन तान्
९ प्रति तद्रक्तपातदोषः क्षमिष्यते। इत्थं युष्माभिः परमेश्वराभिलषिते
धर्म्मे आचरिते स्वमध्यात् निरपराधरक्तपातदोषो दूरयिष्यते।

१० युष्माभिः स्वरिपुप्रतिकूलं युद्धयात्रायां कृतायां परमेश्वरेण युष्मत्-
११ करेषु समर्पितानां तेषां केषुचिद् युष्माभि र्बन्दीकृतेषु यदि त्वं बन्दीनां
१२ मध्ये सुन्दरीं स्त्रियं विलोक्य तां विवोढुम् इच्छेस्तर्हि त्वया स्वगृहमानीता
१३ सा स्वमस्तकमुण्डनं नखच्छेदनञ्च कुर्य्यात्, बन्दित्ववसनं त्यक्त्वा तव गृहे
वसेत् पूर्णमेकमासं स्वपितरं मातरञ्च शोचेत्, ततः परं त्वं ताम् उप-
१४ गन्तुं विवोढुञ्च शक्ष्यसि, सा च तव जाया भविष्यति। किन्तु यदि
तस्यां त्वं न तुष्येस्तर्हि सा स्वमनोभिलाषात् त्वया विस्रष्टव्या, न रूप्येण
विक्रेतव्या न वा विनिमातव्या, यस्मात् त्वं ताम् उपागमत्।

१५ यस्य नरस्य प्रियाप्रिये द्वे पुत्त्रवत्यौ स्त्रियौ स्तस्तस्य ज्येष्ठपुत्त्रो
१६ यद्यप्रियाजातो भवेत्, तर्हि स्वपुत्त्रेभ्यः स्ववित्तदानकाले सो ऽप्रियाजातं
ज्येष्ठपुत्त्रम् अवज्ञाय प्रियाजाताय पुत्त्राय ज्येष्ठाधिकारं दातुं न शक्ष्यति।
१७ अप्रियाजातो ज्येष्ठ इति तेनाङ्गीकर्त्तव्यं तस्मै च सर्व्वस्वस्यांशद्वयं दातव्यं,
यतः स तद्बलस्य प्रथमफलं ज्येष्ठाधिकारश्च तस्यैव सम्भवति।

१८ यदि कस्यचित् पुत्त्रोऽबाध्यो विपथगामी च भवति पित्रोराज्ञा न गृह्णाति
१९ शासितोऽपि तौ न समाद्रियते, तर्हि तस्य पितरौ तं धृत्वा नगरीय-
२० प्राचीनानां समीपे निवासस्थानस्य गोपुरान्तिकम् आनीय नगरीयप्राची-
नेभ्यः कथयिष्यतः, आवयोरेषः पुत्त्रोऽबाध्यो विपथगामी च स आवयो-
२१ राज्ञा न गृह्णाति स उदरम्भरी मद्यपश्च। ततो नगरीयलोकास्तं प्रस्तरै
र्हनिष्यन्ति, इत्थं यूयं स्वमध्यात् पापिष्ठं दूरयिष्यथ तेन सर्व्व इस्रायेल्-
वंशस्तत् श्रुत्वा भेष्यति।

२२ यदि कश्चिद् बधयोग्यं पापं कृत्वा प्राणदण्डं प्राप्य युष्माभिस्तरावु-
२३ द्बध्येत, तर्हि तस्य शवस्तरूपरि कृत्स्नरात्रिं न स्थापितव्यः किन्तु तद्दिने
श्मशाने निधातव्यः, यतो यः कश्चित् तरावुल्लम्ब्यते स ईश्वरेणाभिशप्तः।
अधिकर्त्तुं युष्माकं प्रभुपरमेश्वरेण दत्तो देशो युष्माभि र्नाशुचीकर्त्तव्यः।

---

२२ द्वाविंशोऽध्यायः।

१ भ्रातृगणस्यापकारनिषेधः ४ मिश्रितसूत्रजवस्त्रपरिधाननिषेधः ५ सशावकपक्षिणी-
धरणनिषेधः ८ हर्म्म्यपृष्ठप्राचीरकरणाज्ञा ९ अयुग्मयोगनिषेधः १२ वस्त्रे ग्रन्थि-

विधानं १९ वध्यपमानेषु दण्डः २२ परदारेषु दण्डः २२ व्यभिचारेषु दण्डः २६ बलात् मैथुनेषु दण्डः।

युष्माकं भ्रातुर्बलीवर्दं मेषादिकं वा विपथेन गच्छन्तं दृष्ट्वा यूयं तत्र १
मनो निधास्यध्वे, भ्रातुः समीपं तं परावर्त्य यापयिष्यथ। यदि २
युष्माकं स भ्राता दूरवर्त्त्यपरिचितो वा भवेत् तर्हि युष्मद्भ्राता यावत्
तं पशुं न मृगयते तावद् यूयं तं स्वगृहमानीय स्थापयिष्यथ, पश्चात् तस्मै
दास्यथ। यूयं तस्य गर्द्दभं वस्त्रं प्रति च तथा करिष्यथ, युष्माकं भ्रातु- ३
र्हारितं यद् द्रव्यं युष्माभिः प्राप्यते तत्सर्व्वं प्रति तथा करिष्यथ यूयं तत्र
मनो निधास्यध्वे।

युष्माकं भ्रातुर्गर्द्दभं बलीवर्द्दं वा पथि पतितं दृष्ट्वा यूयं तं प्रति मनो ४
निधास्यध्वे, तम् उत्थापयितुं तमुपकरिष्यथ।

स्त्री पुंसो वस्त्रं पुमान् वा स्त्रिया वस्त्रं न परिदध्यात्, यः कश्चन तत् ५
करोति स युष्माकं प्रभुपरमेश्वरस्य घृणार्हो भवति।

पथपार्श्वस्थतरौ भूमौ वा युष्माकं सम्मुखे यदि कस्यापि पक्षिणो नीडे ६
शावका डिम्बा वा तिष्ठन्ति तदुपरि च पक्षिणी तिष्ठति, तर्हि तैः
शावकैः समं पक्षिणीं न धरिष्यथ। स्वार्थं शावकान् गृहीत्वा पक्षिणीं ७
त्यक्ष्यथ तेन युष्माकं शुभम् आयुर्वृद्धिश्च भविष्यति।

गृहपृष्ठात् मानुषस्य पतनेन यथा युष्मद्गृहेषु रक्तपातापराधो ८
नायाति तदर्थं यूयं नवीनगृहनिर्म्माणकाले तत्पृष्ठेष्वालीन् निर्म्मास्यथ।

युष्माभी रोपितवीजफलानि द्राक्षाफलानि च यद् युष्माकमव्यवहा- ९
र्य्याणि न भवेयुस्तदर्थं यूयं द्राक्षाक्षेत्रे मिश्रितवीजानि न वप्स्यथ।

कर्षणार्थं युष्माभि र्वृषगर्द्दभौ न योक्तव्यौ। यूयं रोमकार्पासयो १०
र्मिश्रितसूत्रजवस्त्रं न परिधास्यथ।

स्वीयावरणार्थगात्रीयवस्त्रस्य चतुष्कोणेषु ग्रन्थीन् निधास्यथ। १२

यदि कश्चिद् विवह्य स्त्रीसङ्गं कृत्वा तामृतीयते ऽपवदते च तस्या १३
दुर्नाम कुर्व्वन् कथयति, स्त्रियमेतामहं व्यवहं किन्तु सङ्गकालेऽस्याः १४
कौमार्य्यचिह्नं न प्राप्तवान्, तदा तस्याः कन्यायाः पितरौ तस्याः कौमार्य्य- १५
चिह्नमादाय गोपुरं गत्वा पुरस्य प्राचीनानां समीपं वहिरानेष्यतः।
कन्यायाः पिता प्राचीनान् वदिष्यति, अहम् अनेन मानुषेण सह १६
स्वकन्यां व्यवाहयं किन्त्वेषस्तामृतीयते, तव कन्यायाः कौमार्य्यचिह्नं मया १७
न प्राप्तम् इति कथयन् ताम् अपवदते, किन्तु मत्कन्यायाः कौमार्य्यचिह्न-

मिदं पश्यतेत्युक्ता ताभ्यां नगरप्राचीनसाक्षात् तद्वस्त्रं विस्तारयिष्यते।
१८ नगरप्राचीनास्तं पुरुषं धृत्वा दण्डयिष्यन्ति। तस्य शतशेकलरूप्यं
१९ दण्डयित्वा कन्यापित्रे दास्यन्ति, यतः स इस्रायेल्वंशीयकन्याया दुर्नाम
कृतवान्, पश्चात् सा तस्य भार्य्या भविष्यति, स पुरुषो यावज्जीवं तां
२० त्यक्तुं न शक्ष्यति। किन्तु तद् वाक्यं यदि सत्यं भवेत् कन्यायाः कौमार्य्य-
२१ चिह्नं न प्राप्येत, तर्हि सा कन्या तै र्वहिरानीय स्वपितुर्गृहद्वारसमीपे
संस्थाप्यतां, नगरीयलोकाश्च प्रस्तरैस्तां घ्नन्तु। यतः सा पितृगृहे
व्यभिचारं कृत्वा इस्रायेल्वंशे कुकर्म्म कृतवती, इत्थं यूयं स्वमध्यात्
पापिष्ठां दूरयिष्यथ।
२२ परनार्य्या समं संसर्गे कश्चन पुमान् यदि ध्रियते तर्हि स संसर्गकारी
पुमान् सा च नारी द्वौ हनिष्येते, इत्थं यूयम् इस्रायेल्वंशमध्यात् पापिष्ठं
२३ दूरयिष्यथ। यदि कश्चन वराय वाग्दत्तां कुमारीं पुरमध्ये प्राप्योपग-
२४ च्छति तर्हि यूयं तौ द्वौ नगरद्वारसमीपं वहिरानीय प्रस्तरै र्हनिष्यथ;
सा कन्या हन्तव्या यतः सा पुरमध्ये तिष्ठत्यपि नोच्चैःस्वरं कृतवती;
पुमांश्च हन्तव्यो यतः स स्वसमीपवासिनो जायामुपागमत्, इत्थं यूयं
स्वमध्यात् कलुषं दूरयिष्यथ।
२५ यदि कश्चन पुमान् वाग्दत्तां कन्यां प्रान्तरे प्राप्य बलाद् आक्रम्यो-
२६ पगच्छति तर्हि केवलम् उपगतपुमान् हनिष्यते, किन्तु यूयं कन्यां प्रति
किमपि न करिष्यथ,तस्या मरणार्हदोषो नास्ति यतो यथा कश्चन मानुषः
२७ स्वसमीपवासिनः प्रतिकूलम् उत्थाय तं हन्ति, तदपि तथा। पुमान्
प्रान्तरे तां प्राप्तवान्, तस्माद् उच्चैःशब्दं कृतवत्यास्तस्या वाग्दत्तायाः
कन्याया रक्षकः कोपि नाविद्यत।
२८ यदि कश्चिद् अवाग्दत्तां कुमारीं प्राप्य तां धृत्वोपगच्छति, तर्ह्यु-
२९ पगतः पुमान् कन्यायाः पित्रे पञ्चाशत्शेकलमुद्रा दास्यति सा च
तस्य भार्य्या भविष्यति, तस्या उपगमात् पुमान् तां त्यक्तुं यावज्जीवं
न शक्ष्यति।
३० मनुजः स्वतातस्य जायां नोपगमिष्यति स्वपितुराच्छादनीयं न मोच-
यिष्यति।

२३ त्रयोविंशोऽध्यायः।

१ समाजं यातुं कतिपयजनानां निषेधः ७ केषाञ्चन जनानां ग्रहणं ९ अशुचित्वात्

सावधानाज्ञा १५ पलायितं दासं समर्पयितुं निषेधः १७ अभिचारादिनिषेधः १९ वार्धुषिकग्रहणनिषेधः २१ प्रतिश्रुतसिद्धकरणाज्ञा २४ प्रतिवासिद्रव्यभोजनविधिः।

निष्कोषश्छिन्नलिङ्गो वा जनः परमेश्वरस्य समाजं न प्रवेक्ष्यति। १
जारजः परमेश्वरस्य समाजं न प्रवेक्ष्यति, ते दशमपुरुषेऽपि परमेश्वरस्य २
समाजं न प्रवेक्ष्यन्ति। अम्मोनीया मोयाबीयाश्च परमेश्वरस्य समाजं ३
न प्रवेक्ष्यन्ति, दशमपुरुषेऽपि परमेश्वरस्य समाजं न प्रवेक्ष्यन्ति, यतस्ते
मिसर्देशाद् आगच्छतो युष्मान् अन्नजलदानेन पथि न साक्षात् ४
कृतवन्तः, किन्तु युष्मान् अभिशप्तुं युष्माकं प्रतिकूलम् अरामनहर-
यिमस्थपिथोरनिवासिनं बियोरस्य पुत्रं बिलियमस्य वेतनं दत्तवन्तः।
युष्माकं प्रभुपरमेश्वरो बिलियमस्याभिमतं न स्वीकृत्य युष्मासु स्नेहात् ५
तम् अभिशापं परावर्त्याशिषं विधत्तवान्। यूयं यावज्जीवं तेषां ६
शान्तिशुभे कदापि न यतिष्यध्वे।

यूयम् इदोमीयलोकान् न घृणिष्यथ, यस्मात् ते युष्माकं भ्रातरः, ७
मिस्रीयानपि न घृणिष्यथ यतो यूयं तेषां देशे प्रावसत। तृतीयपुरुषे ८
तेभ्य उत्पन्नाः सन्तानाः परमेश्वरस्य समाजं प्रवेक्ष्यन्ति।

रिपुगणैः समं योद्धुं यात्राकरणकाले यूयं स्वान् सर्व्वथा कुकर्म्मतो रक्षि- ९
ष्यथ। युष्माकं मध्ये यदि कश्चन रात्रिघटिताशौचाद् अशुचिर्भवेत्, तर्हि १०
स शिविराद् वहिर्गच्छेत् शिविरं न प्रविशेत्। स सन्ध्याकाले जले ११
स्नात्वा सूर्य्यास्तकाले शिविरं प्रविशेत्। यूयं शिविराद् वहिः स्थानमेकं १२
निरोप्य तं वहिर्देशं गमिष्यथ। यूयं स्वस्वसामग्रीमध्ये अस्त्रमेकं १३
गृहीत्वा भूमावुपवेशनकाले तेनास्त्रेण मृत्तिकां खनिष्यथ, ततः परं
निर्गतमलं छादयिष्यथ। यतो युष्मान् रक्षितुं युष्माकं रिपून् युष्मत्करेषु १४
समर्पयितुञ्च युष्माकं प्रभुपरमेश्वरो युष्मच्छिविरमध्ये भ्रमति, स यथा
युष्माकम् अपवित्रतादर्शनाद् युष्मत्तः पराङ्मुखो न भवेत् तदर्थं युष्माकं
शिविरेण पवित्रेण स्थातव्यं।

यो दासः स्वस्वामिनः समीपात् पलाय्य युष्मान् आश्रयते यूयं तं १५
तत्स्वामिनः करे न समर्पयिष्यथ। स युष्माकं कुत्रचिन्नगरद्वारे स्वीय- १६
मनोऽभिलषितस्थाने युष्माकं मध्ये वत्स्यति यूयं तं नोपद्रोष्यथ।

इस्रायेल्वंशस्य कापि कन्या वेश्या न भवेत्, कश्चन पुमान् पुङ्गामी न १७
भवेत्। वेश्यावेतनं कुक्कुरमूल्यं वा प्रतिश्रुतार्थं युष्माकं प्रभुपरमेश्वरस्य १८
वेश्म नानेष्यथ यस्मात् तदुभयं युष्मत्प्रभुपरमेश्वरेण घृणितं।

१९ यूयं कुसीदार्थम् अर्थाद् रूप्यखाद्यद्रव्यादेः कुसीदं प्राप्तुं स्वभ्रात्रे
२० ऋणं न दास्यथ। लाभार्थं विदेशिने ऋणं दास्यथ किन्तु स्वभ्रात्रे न
दास्यथ तेन यूयं यं देशम् अधिकर्त्तुं याथ तत्र युष्माकं प्रभुपरमेश्वरो
युष्माकं करकृतं सर्व्वकर्म्म शुभान्वितं करिष्यति।

२१ यूयं स्वप्रभुपरमेश्वराय यत् प्रतिश्राष्यथ तद् दातुं न विलम्बिष्यध्वे
यतो युष्माकं प्रभुपरमेश्वरो ऽवश्यं युष्मत्तस्तस्यादानं करिष्यति, तस्मिन् न
२२ दत्ते युष्माकं पापं भविष्यति। किन्तु यूयं यदि न प्रतिशृणुथ तर्हि पापं
२३ न भविष्यति। यूयं स्वोष्ठात् निर्गतं वाक्यं पालयिष्यथ, युष्माकं प्रभु-
परमेश्वराय युष्माकं मुखेभ्यो निर्गतं यत् प्रतिश्रुतवाक्यं तदनुसारात्
स्वेच्छोपहारो दातव्यः।

२४ स्वसमीपवासिनां द्राक्षाक्षेत्रे युष्माभिः प्रविष्टे यूयं स्वेच्छया तृप्तिं
यावद् द्राक्षाफलानि भोक्ष्यध्वे किन्तु युष्मद्भाजने किञ्चिदपि न निधास्यथ।
२५ समीपवासिनः शस्यक्षेत्रे युष्माभिः प्रविष्टे यूयं स्वकरैः कणिशान्युत्पाट-
यिष्यथ किन्तु स्वसमीपवासिनः शस्यं दात्रेण युष्माभि र्न छेदनीयं।

---

२४ चतुर्व्विंशोऽध्यायः।

१ त्यागपत्रदानविधिः ५ कृतनवोनोद्वाहपुंसो रणगमननिषेधः ६ बन्धकविधिः ७ मनुजस्तेनदण्डः ८ कुष्ठात् सावधानाज्ञा १० बन्धकस्यापरकथा १४ वेतनजीविने वेतनदानाज्ञा १७ अन्यायं कर्त्तुं निषेधः १९ शस्यकर्त्तनफलाशातनविधिः।

१ कश्चित् पुमान् काञ्चन स्त्रियम् ऊढ्वा यदि तस्या दोषात् तां नानु-
गृह्णाति तर्हि स त्यागपत्रं लिखित्वा तस्याः करे दत्त्वा स्वगृहात् तां
२ विस्रक्ष्यति। सा स्त्री तस्य गृहाद् बहिर्भूय यदि पुमांसमन्यं विवहति स
३ द्वितीयः पतिरपि यदि ताम् ऋतीयते त्यागपत्रं तस्याः करे दत्त्वा
स्वगृहात् तां बहिष्करोति च, वा स विवाहकृद् द्वितीयः स्वामी यदि
४ म्रियते, तर्हि येन प्रथमस्वामिना सा त्यक्ता स तस्या अशुचित्वात् परं
तां पुनर्व्विवोढुं न शक्ष्यति, यतस्तत् परमेश्वरसम्मुखे घृणार्हं कर्म्म ततो
यूयम् अधिकारार्थं प्रभुपरमेश्वरेण दास्यमानं देशं पापेन न लेप्स्यथ।

५ कोपि मनुजो नवीनं विवाहं कृत्वा रणं न यास्यति कस्यापि कर्म्मणो
भारं न ग्रहीष्यति, स वर्षपर्य्यन्तं निष्कर्म्मा स्वगृहे नवीनजायाया
मनोरञ्जनं करिष्यति।

कोपि मनुजोऽन्यस्य पेषण्या अधऊर्द्धं वा प्रस्तरं बन्धकार्थं न गृह्णीयात् ६
तद्ग्रहणं जीवनहरणमेव।

येन केनचिद् इस्रायेल्वंशीयो भ्राता चोरयित्वा विनिमीयते विक्री- ७
यते वा, स यदि म्रियते तर्हि स चौरो हनिष्यते, इत्थं स्वमध्याद्
यूयं दोषं दूरयिष्यथ।

यूयं कुष्ठरोगे ऽवधास्यध्वे, लेवीययाजका युष्मान् यद्यत् ज्ञापयि- ८
ष्यन्ति तत्सर्व्वं कर्त्तुं यूयम् अतीव यतिष्यध्वे, ते मया यथादिष्टा यूयं
यत्नेन तथैवाचरिष्यथ। मिसरदेशाद् युष्माकम् आगमनकाले प्रभुपरमे- ९
श्वरः पथि मरियमं प्रति यदकरोत् तत् स्मरत।

यूयं स्वभ्रात्र ऋणं दत्त्वा बन्धकं ग्रहीतुं तद्गृहं न प्रवेक्ष्यथ। यूयं १०
बहिः स्थास्यथ, ऋणी च बन्धकं बहिष्कृत्य युष्माकं समीपम् आनेष्यति। ११
किन्तु स ऋणी यदि दुर्गतो भवेत् तर्हि तस्य बन्धकं गृहीत्वा न १२
निद्रास्यथ। सूर्य्यास्तकाले तस्य बन्धकं तस्मिन् पुनः समर्पयिष्यथ तेन १३
स स्ववस्त्रे शयिष्यते युष्मान् आशिषं वदिष्यति च युष्माकं प्रभुपर-
मेश्वरस्य साक्षात् तत् पुण्यं भविष्यति।

यूयं स्वजातीयं वा युष्मन्नगरद्वारे प्रवसन्तं विदेशीयं दरिद्रं १४
दीनं वा वेतनजीविनं नोपद्रोष्यथ। यूयं निरूपितदिने तस्य वेतनं १५
दास्यथ सूर्य्यास्तं यावत् न स्थापयिष्यथ यतः स दरिद्रः स्ववेतन-
माकाङ्क्षते। नो चेत् स युष्मत्प्रतिकूलं परमेश्वरम् उद्दिश्य प्रार्थयिष्यते,
तेन यूयम् अपराधिनो भविष्यथ।

पुत्रस्य विनिमयात् पिता पितु र्विनिमयात् पुत्रो न हनिष्यते, एकैको १६
जनः स्वस्वपापाद् हनिष्यते। यूयं विदेशिपितृहीनान् अन्यायं न १७
विचारयिष्यथ विधवाया वस्त्रं बन्धकं न ग्रहीष्यथ। यूयं मिसर- १८
देशे दासा आस्त प्रभुपरमेश्वरश्च तस्माद् युष्मान् अमोचयत् तत्
स्मारयितुम् अहम् एतानि कर्म्माणि कर्त्तुं युष्मान् आदिशामि।

यूयं शस्यच्छेदनकाले यदि मुष्टिमेकं क्षेत्रे विस्मरथ तर्हि तं १९
ग्रहीतुं पुनर्न यास्यथ स विदेशिनां पितृहीनानां विधवानाञ्च भविष्यति,
तेन युष्माकं प्रभुपरमेश्वरो युष्माकं करकृतकर्म्म शुभान्वितं करिष्यति।
यूयं जिततरूणां फलानि शातयित्वा पुनः शाखासु न मृगयिष्यध्वे तत्र २०
यत् तिष्ठति तद् विदेशिपितृहीनविधवानां भविष्यति। युष्माभि र्द्राक्षा- २१
क्षेत्रस्य द्राक्षाफलेषु संगृहीतेषु शेषं पुनर्न संग्रहीष्यते तद् विदेशि-

२२ पितृहीनविधवानां भविष्यति। यूयं मिसर्देशे दासा आस्त तत्
स्मारयितुम् अहमेतानि कर्म्माणि कर्त्तुं युष्मान् आदिशामि।

---

२५ पञ्चविंशोऽध्यायः।

१ चत्वारिंशत्प्रहाराधिकदण्डनिषेधः ४ शस्यमर्द्दकवृषस्यास्यबन्धननिषेधः ५ भ्रातृवंश-
वर्द्धनविधिः ११ निर्लज्जस्त्रिया दण्डः १३ तोलनमापनयोरन्यायकरणनिषेधः १७
अमालेकवचनं।

१ मनुजयो विवादे जाते तौ यदि विचारार्थं विचारकान्तिकं यात-
२ स्तदा स निर्द्दोषं निर्द्दोषं दोषिणञ्च सदोषं करिष्यति। यदि दोषी
प्रहारयोग्यो भवेत् तर्हि विचारकस्तं शाययित्वा तदपराधानुसारात्
३ प्रहारसंख्यां निश्चीय स्वसाक्षात् तं प्रहारयेत्। चत्वारिंशत् प्रहारं
कुर्य्यात् तदधिकं न कुर्य्यात्। न चेत् तदधिकं महाप्रहारं प्राप्य
युष्माकं साक्षाद् भ्राता तुच्छो भविष्यति।

४ यूयं शस्यमर्द्दकवृषस्यास्यं न भंत्स्यथ।

५ यदि सहोदरगण एकत्र वसति, तेषामेको निरपत्यो म्रियेत तर्हि
मृतस्य जायां कश्चिद् वहिःस्थः पुमान् न विवहेत् तस्या देवर-
६ स्ताम् ऊढ्वोपगच्छेत् तां प्रति देवरकर्म्म कुर्य्यात्। तस्मात्तस्यां यो ज्येष्ठ-
सुतो जनिष्यते स मृतभ्रातुरुत्तराधिकारी भविष्यति, तेनेस्रायेल्वंशात्
७ तन्नाम न लोप्स्यते। स पुमान् यदि भ्रातृजायां ग्रहीतुम् अनिच्छुकः
स्यात् तदा सा स्त्री नगरद्वारसमीपं गत्वा मम देवर इस्रायेल्वंश-
मध्ये स्वभ्रातु र्नाम रक्षितुं नेच्छति मां प्रति देवरकर्म्म न करोति इति
८ वाक्यं प्राचीनानां साक्षाद् वदेत्। नगरप्राचीनास्तमाहूय सम्भाषेरन्
यदि स नितान्तम् अनिच्छुकः सन् नाहम् एनां ग्रहीष्यामीति वदेत्,
९ तदा तस्य भ्रातृजाया प्राचीनानां साक्षात् तदन्तिकमागत्य तत्पादैकाद्
उपानहं मोचयित्वा तदास्ये निष्ठीव्य वाक्यमिदं वदेत्, यः स्वभ्रातु
१० र्वंशं न रक्षति तं प्रतीत्थं कर्त्तव्यं। तत इस्रायेल्वंशमध्ये तस्य मुक्तपादुक-
वंश इति नाम भविष्यति।

११ विवदमानयोः पुंसोरेकस्य पत्नी यदि प्रहारकस्य करात् स्वपतिं
१२ मोचयितुं स्वकरेण प्रहारकस्य मेढ्रं धरति, तर्हि यूयं तस्याः करं
छेत्स्यथ तत्र नेत्रै र्न लज्जध्वे।

युष्मत्सम्पुटके लघुगुरुणी द्वे माने मा तिष्ठेतां। युष्मद्गृहेषु च १४
क्षुद्रमहती द्वे मानपात्रे न तिष्ठेतां। यूयं न्याय्यं यथार्थञ्च मानं न्याय्यं १५
यथार्थञ्च मानपात्रं स्थापयिष्यथ, तेन युष्माकं प्रभुपरमेश्वरदत्तदेशे
युष्माकम् अवस्थितिकालो वर्द्धिष्यते। इत्थमन्यायं ये कुर्व्वन्ति ते युष्माकं १६
प्रभुपरमेश्वरस्य घृण्याः।

मिसर्देशाद् युष्माकं वहिरागमनकाले पथि युष्मान् प्रति अमालेक- १७
वंशो यदकरोद् अर्थाद् युष्माकं श्रमक्लमकाले स पथि युष्माभिः समं १८
मिलित्वा ईश्वरान्न भीत्वा युष्माकं पश्चाद्वर्त्तिनो दुर्ब्बललोकान् आक्रमत्
तत् स्मरत। युष्माकं प्रभुपरमेश्वरो यं देशम् अधिकारार्थं युष्मभ्यं १९
दास्यति तत्र देशे युष्माकं प्रभुपरमेश्वरेण चतुर्दिक्स्थरिपुभ्यो युष्मभ्यं
विश्रामे दत्ते यूयं व्योमाधोऽमालेकवंशस्य स्मरणचिह्नं लोप्स्यथ, तन्न
विस्मरिष्यथ।

---

२६ षड्विंशोऽध्यायः।

१ प्रथमफलोत्सर्गकारिणः स्वीकारः १२ तृतीयवर्षे दशमांशोत्सर्गकारिणः प्रार्थना १६ लोकैः सह परमेश्वरस्य नियमः।

युष्मत्प्रभुपरमेश्वरो युष्मभ्यम् अधिकारार्थं यं देशं दास्यति, यूयं यदा १
तं प्रविश्याधिकृत्य च तत्र वत्स्यथ, तदा युष्मत्प्रभुपरमेश्वरदत्तदेशस्य २
प्रथमोत्पन्नफलानां कानिचित् समादाय डल्लके निधाय स्वनामरक्षार्थं
प्रभुपरमेश्वरेणाभिलषितं स्थानं गमिष्यथ। तत्कालीययाजकस्य ३
समीपं गत्वा तत्सम्मुखे वाक्यमिदं गदिष्यथ, परमेश्वरोऽस्मभ्यं यं देशं
दातुम् अस्मत्पूर्व्वपुरुषाणां समीपे शप्तवान् तं देशम् अहं प्रविष्टोऽस्मी-
त्यहमद्य तव प्रभुपरमेश्वरस्य साक्षात् स्वीकरोमि। ततः परं याजको ४
युष्माकं करेभ्यो डल्लकं गृहीत्वा परमेश्वरस्य वेदिसम्मुखे निधास्यति।
यूयञ्च स्वप्रभुपरमेश्वरस्य समीपे वाचमेतां कथयिष्यथ, म्रतकल्प एको ५
ऽरामीयोऽस्माकं पूर्व्वपुरुष आसीत्, सोऽल्पपरिवारैः सह मिसर्देशम्
उत्तीर्य्य तत्र प्रावसत् तत्र महिमबलान्वितबहुवंशो ऽभूत्। मिस्रीय- ६
लोका अस्मान् उपाद्रवन् अक्लिश्नन् कठिनदासत्वभारम् अस्मास्वर्पयन्,
ततो वयं स्वपूर्व्वपुरुषाणां प्रभुपरमेश्वरम् उद्दिश्य प्रार्थयामहि परमेश्वरो ७
ऽस्माकं वाक्यं श्रुत्वास्माकं दुःखकष्टोपद्रवान् दृष्टवान्। स च परमे- ८

स्वरः पराक्रमिकरं विस्तीर्णबाहुं महाशङ्कां चित्राश्चर्य्यकर्म्माणि च
९ प्रकाश्य मिसर्देशाद् अस्मान् बहिरानयत्, अत्र चानीय दुग्धमधुप्रवाहिनं
१० देशमिमं अस्मभ्यमदात्। हे परमेश्वर त्वं मह्यं यां भूमिमदास्तस्याः
प्रथमजातफलान्यहमानीतवान् इत्युक्त्वा यूयं स्वप्रभुपरमेश्वरसम्मुखे
११ तन्निधाय प्रभुपरमेश्वरं प्रणंस्यथ। युष्मत्प्रभुपरमेश्वरो युष्माकं युष्म-
त्परिवाराणाञ्च यद् यत् क्षेमं कृतवान् तेन यूयं लेवीयलोका युष्म-
न्मध्यनिवासिनो विदेशीयलोकाश्चानन्दिष्यथ।

१२ तृतीयवर्षे ऽर्थाद् दशमांशकरणवर्षे युष्माभिस्तत्पन्नशस्यादे र्दश-
मांशकरणे समाप्ते यूयं तान् दशमांशान् लेवीयविदेशिपितृहीनविध-
१३ वाभ्यो दास्यथ, ताश्च युष्मद्ग्रामपुरेषु तान् भुक्त्वा तर्प्स्यन्ति। तदा यूयं
स्वप्रभुपरमेश्वरस्य सम्मुखे वाचमेतां गदिष्यथ, त्वदाज्ञापितवाक्यानु-
सारात् मया स्वगृहात् पवित्रद्रव्याण्यानीतानि लेवीयविदेशिपितृ-
१४ हीनविधवाभ्यश्च दत्तानि त्वदाज्ञा मया न लङ्घिता न वा विस्मृताः। शोक-
काले तेषां किञ्चिदपि मया न भुक्तम् अशौचकाले तेषां किञ्चिदपि
मया न गृहीतं मृतलोकमुद्दिश्य तेषां किञ्चिदपि मया न दत्तं,
अस्मत्प्रभुपरमेश्वरस्याज्ञा मयाचरिता त्वदादेशानुरूपाणि सर्व्वकर्म्माणि
१५ कृतानि। भवान् पवित्रनिवासाद् अर्थाद् स्वर्गाद् अवलोकताम् अस्म-
त्पूर्व्वपुरुषान् प्रति यथा शप्तवान् तदनुसाराद् भवल्लोकस्येस्रायेलवंशस्य
स्वदत्तदुग्धमधुप्रवाहिदेशस्य च शुभं विधत्तां।

१६ युष्माकं प्रभुपरमेश्वर एता या विधिव्यवस्था आचरितुम् अद्य युष्मान्
आदिशति, ता यूयं सर्व्वान्तःकरणप्राणैः सममाचरितुं यतध्वं।
१७ परमेश्वर एवास्माकम् ईश्वरो भविष्यति, वयं तस्य मार्गैश्चलिष्यामस्त-
स्याज्ञाविधिव्यवस्था आचरिष्यामस्तस्य वाचं शिरःसु धारयिष्याम इति
१८ यूयम् अद्य परमेश्वराय प्रतिश्रुतवन्तः। परमेश्वरश्चाद्य युष्मभ्यमिदं
प्रतिश्रुतवान्, यूयं मम वाक्यानुसारात् मम विशेषलोका भविष्यथ,
१९ मम सर्व्वाज्ञाम् आचरिष्यथ, तेन यूयं मत्सृष्टसर्व्वजातीयेभ्यः श्रेष्ठा
विधास्यध्वे प्रशंसाख्यातिसमादरपात्राणि भविष्यथ युष्मत्प्रभुपरमेश्व-
रस्य वाक्यानुसारात् तमुद्दिश्य पवित्रलोका भविष्यथ।

२७ सप्तविंशोऽध्यायः।

१ प्रस्तरोपरि व्यवस्थालेखनाज्ञा ९ वेदिनिर्म्माणविधिः ११ गिरिषीम-एवल्गिर्य्यो-रिस्रायेल्वंशस्य विभजनं १४ एवलगिरौ शापकथनं।

मूसा इस्रायेल्वंशीयप्राचीनवर्गश्च लोकान् इत्याज्ञापयत्, अद्याहं १
युष्मान् यद् यद् आदिशामि यूयं तत्सर्व्वम् आचरत। युष्मत्प्रभुः २
परमेश्वरो युष्मभ्यं यं देशं दास्यति, तं देशं प्रवेष्टुं यूयं यदा यर्द्दन-
नदीपारं गमिष्यथ, तदा वृहत्प्रस्तरान् स्थापयिष्यथ चूर्णेन च लेप्स्यथ।
युष्मत्प्रभुपरमेश्वरेण युष्मत्पूर्व्वपुरुषेभ्यो यत् प्रतिश्रुतं तदनुसाराद् ३
युष्मभ्यं तेन दास्यमानं दुग्धमधुप्रवाहिदेशं प्राप्तुं यदा पारं यास्यथ,
तदा तत्प्रस्तरेषु व्यवस्थाया अस्याः सर्व्ववाक्यानि लेखिष्यथ। अहमद्य ४
यान् प्रस्तरानधि युष्मान् आदिशामि, तान् यूयं यर्द्दननदीपारगमनकाल
एवल्पर्व्वते स्थापयिष्यथ चूर्णेन च लेप्स्यथ। तत्र स्वप्रभुपरमेश्वराय ५
वेदिमेकां करिष्यथ, सा प्रस्तरै र्निर्मातव्या किन्तु तत्र लौहास्त्रं न तोल-
यितव्यं। युष्माकं प्रभुपरमेश्वरस्य तां वेदिम् अनासादितप्रस्तरै र्निर्मा- ६
यिष्यथ तदुपरि युष्माकं प्रभुपरमेश्वराय होमबलीन् उत्स्रक्ष्यथ। मङ्ग- ७
लार्थकबलींश्च दास्यथ तत्र भुक्त्वा युष्माकं प्रभुपरमेश्वरस्य समक्षम् आन-
न्दिष्यथ। तत्र प्रस्तरेषु व्यवस्थाया अस्याः सर्व्ववाक्यानि स्पष्टं लेखिष्यथ। ८

मूसा लेवीययाजकान् इस्रायेल्वंशस्य सर्व्वलोकांश्च पुनरवदत् हे ९
इस्रायेल्वंश यूयं शृणुत मद्वाक्यम् आकर्णयत च, यूयम् अद्य प्रभुपरमे-
श्वरस्य लोका जाताः, अतः स्वप्रभुपरमेश्वरस्य वाक्यं मनःसु निधाय १०
अद्य मद्दत्तास्तदीयविधिव्यवस्थाज्ञा आचरत।

तद्दिने मूसा लोकान् इदमादिशत् युष्मासु यर्द्दन्नदीपारं गतेषु ११
लोकान् आशिषं वक्तुं शिमियोन्-लेवि-यिहूदा-इषाखर-यूषफ-बिन्या- १२
मीनवंशीया गिरिषीमगिरौ स्थास्यन्ति। रूवेण-गाद-आशेर-सिबूलून् १३
दान-नप्तालिवंशीयाश्च शप्तुम् एवलगिरौ स्थास्यन्ति।

ततः परं यो नरः परमेश्वरेण घृणितां शिल्पकरकरकृतां तक्षितां १४
सिक्तां वा मूर्त्तिं निर्म्माय निभृते स्थापयति स शप्त इति लेवीयलोकैरि- १५
स्रायेल्वंश उच्चैरुच्यतां, ततः सर्व्वलोका वदन्तु तथास्तु। यः स्वपितरौ १६
अवजानाति स शप्त इत्युक्ते सर्व्वलोका वदन्तु तथास्तु। यः समीपवासिनो १७
भूमिचिह्नं स्थानान्तरं करोति स शप्त इत्युक्ते सर्व्वलोका वदन्तु तथास्तु।

१८ योऽन्धं पथो वहिः करोति स शप्त इत्युक्ते सर्व्वलोका वदन्तु तथास्तु। यो
१९ विदेशिपितृहीनविधवानां विचारेऽन्यायं करोति स शप्त इत्युक्ते सर्व्व-
२० लोका वदन्तु तथास्तु। यः पितृजायां गच्छति पितुरावरणीयाना-
२१ च्छादनात् स शप्त इत्युक्ते सर्व्वलोका वदन्तु तथास्तु। यः पशुमुपगच्छति
२२ स शप्त इत्युक्ते सर्व्वलोका वदन्तु तथास्तु। यः स्वभगिनीम् अर्थात् स्वपि-
तुर्मातु र्वा कन्यामुपगच्छति स शप्त इत्युक्ते सर्व्वलोका वदन्तु तथास्तु।
२३ यः स्वश्वश्रूमुपगच्छति स शप्त इत्युक्ते सर्व्वलोका वदन्तु तथास्तु। यो
२४ गुप्तं स्वसमीपवासिनं हन्ति स शप्त इत्युक्ते सर्व्वलोका वदन्तु तथास्तु।
२५ यो निरपराधिनं हन्तुम् उत्कोचं गृह्लाति स शप्त इत्युक्ते सर्व्वलोका
२६ वदन्तु तथास्तु। य एतस्या व्यवस्थायाः सर्व्ववाक्यानि निश्छिद्रं न पाल-
यति स शप्त इत्युक्ते सर्व्वलोका वदन्तु तथास्तु।

२८ अष्टविंशोऽध्यायः।

आज्ञावहनस्याज्ञालङ्घनस्य च फलं।

१ यूयं यदि स्वप्रभुपरमेश्वरस्य वाक्यानि मनःसु निधाय तस्य या आज्ञा
अद्य मयादिश्यध्वे ताः सर्व्वा आचरितुं यतध्वे, तर्हि युष्मत्प्रभुपरमेश्वरः
२ पृथ्वीस्थसर्व्वजातितो युष्मान् श्रेष्ठान् विधास्यति। स्वप्रभुपरमेश्वरस्य
वाक्यानि मनःसु निदधानान् युष्मान् इमानि शुभान्यनुवर्त्तिष्यन्त
३ आश्रयिष्यन्ते च। यूयं पुरे शुभान्विताः क्षेत्रे च शुभान्विता भविष्यथ।
४ युष्माकं देहफलं भूमिफलं गोमेषादेर्वत्सरूपपशुफलञ्च शुभान्वितं
५ भविष्यति। युष्माकं डल्लकपूपपात्राणि शुभान्वितानि भविष्यन्ति। यूयं
६ गेहागमनकाले शुभान्विता वहिर्गमनकाले च शुभान्विता भविष्यथ।
७ परमेश्वरो युष्माकं प्रतिकूलम् उत्थितान् रिपून् युष्माकं समक्षं नाशयि-
ष्यति, ते युष्माकं प्रतिकूलम् एकपथेनागमिष्यन्ति किन्तु युष्माकं
८ सम्मुखात् सप्तपथैः पलायिष्यन्ते। परमेश्वरो युष्माकं कोषागारेषु
युष्माकं करार्पितसर्व्वकर्म्मणि च युष्मान् शुभान्वितान् करिष्यति।
युष्माकं प्रभुपरमेश्वरो युष्मभ्यं यं देशं दास्यति तत्र युष्मान् आशिषं
९ वदिष्यति। स्वप्रभुपरमेश्वराज्ञाः पालयन्तस्तस्य पथि चलन्तश्च यूयं
१० परमेश्वरेण स्वशपथानुसारात् पवित्रलोकत्वेन स्थापयिष्यध्वे। यूयं
परमेश्वरस्य नाम्ना प्रसिद्धा इति विदिते पृथ्वीस्थसर्व्वलोका युष्मत्तो

भेष्यन्ति। परमेश्वरो युष्मभ्यं यं देशं दातुं युष्मत्पूर्व्वपुरुषाणां समीपे ११
शप्तवान् तत्र देहफलानां पशुफलानां भूमिफलानाञ्च बाहुल्यदानेन पर-
मेश्वरो युष्माकं क्षेमं विधास्यति। परमेश्वर उपयुक्तकाले युष्माकं देशे १२
वृष्टिं दातुं युष्माकं करकृतं सर्व्वकर्म्म शुभान्वितं कर्त्तुञ्च स्वयोमरूपम्
उत्तमं भाण्डागारं मोचयिष्यति। यूयं बहुजातिभ्य ऋणं दास्यथ, ऋणं
न ग्रहीष्यथ। युष्माकं प्रभुपरमेश्वरस्यैता या आज्ञा ग्रहीतुम् आचरि- १३
तुञ्चाहं युष्मान् अद्यादिशामि ता यदि यूयं मनःसु निधद्ध्वे, तर्हि
परमेश्वरो युष्मान् उत्तमाङ्गस्वरूपान् न च लाङ्गूलस्वरूपान् करिष्यति
यूयम् उन्नता एव न चावनता भविष्यथ। अद्याहं युष्मान् यद् यद् १४
आदिशामि तस्माद् दक्षिणं वामं वा न परावर्त्तध्वम् इतरदेवान्
सेवितुं तान् नानुगमिष्यथ।

किन्त्वहमद्य युष्मान् यान् आज्ञाविधीन् आदिशामि तान् ग्रहीतुम् १५
आचरितुञ्च यदि यूयं स्वप्रभुपरमेश्वरस्य वाक्यानि न मनःसु निधद्ध्वे
तर्ह्येते शापा युष्मान् अनुवर्त्तिष्यन्त आश्रयिष्यन्ते च। यूयं पुरे शप्ताः १६
क्षेत्रे च शप्ता भविष्यथ। युष्माकं डल्लकपूपपात्राणि शप्तानि भविष्यन्ति। १७
युष्माकं देहफलानि भूमिफलानि गोमेषादेर्वत्सरूपपशुफलानि च १८
शप्तानि भविष्यन्ति। यूयं गेहागमनकाले शप्ता वहिर्गमनकाले च शप्ता १९
भविष्यथ। युष्माकं दुष्टक्रियाहेतोरर्थात् मत्त्यागहेतोर्यावद् युष्माकं लोपो २०
नाशश्च तूर्णं न भवेत् तावद् युष्माकं करकृतकर्म्मसु परमेश्वरो युष्मान्
प्रति शापोद्वेगतिरस्कारान् प्रेषयिष्यति। यूयं यं देशमधिकर्त्तुं याथ २१
तस्माद् यावत् नोच्छेत्स्यध्वे तावत् परमेश्वरो युष्मासु महामारीं
लागयिष्यति। परमेश्वरो यक्ष्माज्वरज्वालातिदाहखड्गशुष्कम्लानशस्यै २२
र्युष्मान् आहनिष्यति, तानि युष्माकं नाशं यावद् युष्मान् अनुवर्त्तिष्यन्ते।
युष्माकं मस्तकोपरि स्थितव्योम पित्तलवद् अधःस्थितभूमिश्च लौहवद् २३
भविष्यति। परमेश्वरो युष्माकं भूमौ तोयविनिमयेन धूलिसिकता २४
वर्षिष्यति, यावद् युष्माकं नाशो न भवेत् तावत् तद् गगणाद् युष्मासु
पतिष्यति। परमेश्वरो युष्माकं रिपुसम्मुखे युष्मान् ताड़यिष्यति २५
यूयं रिपुप्रतिकूलम् एकपथेनागमिष्यथ किन्तु तेषां सम्मुखात् सप्तपथैः
पलायिष्यध्वे, पृथ्वीस्थसर्व्वलोकानां समक्षं निन्दास्पदं भविष्यथ।
व्योमपक्षिणो भूमिपशवश्च युष्माकं शवक्रव्यं भोक्ष्यन्ते तान् कोपि २६
न दूरयिष्यति। परमेश्वरो युष्मान् अप्रतिकार्य्यै र्मिस्रीयनाड़ीव्रणार्शः- २७

२८ पामकण्डूभिः प्रहरिष्यति। परमेश्वरो वातुलतान्धत्वमनोविस्मयताभि
२९ र्युष्मान् प्रहरिष्यति। यथान्धोऽन्धकारे हस्तामर्शं करोति तथा यूयं
मध्याह्ने हस्तामर्शं करिष्यथ, युष्मत्पथो ऽशुभो भविष्यति यूयं सदो-
३० पद्रुता अपहृताश्च भविष्यथ, कोपि युष्मान् नोद्धरिष्यति। वाग्दत्ता
कन्या वरादन्यनरेणोपगमिष्यते, स्वनिर्म्मिते गृहे यूयं न वत्स्यथ स्वकृतस्य
३१ द्राक्षाक्षेत्रस्य फलानि यूयं न संचेष्यथ। स्वसम्मुखे हतायाः स्वगो-
र्मांसं यूयं न भोक्ष्यध्वे युष्माकं गर्द्दभा युष्माकं साक्षात् बलात् हरि-
ष्यन्ते, युष्मभ्यं परावर्त्त्य न दास्यन्ते, युष्माकं मेषादि व्रजाद् युष्माकं
३२ रिपुभ्यो दास्यन्ते, कोपि युष्मान् नोपकरिष्यति। युष्माकं पुत्त्रकन्या
अन्यजातिभ्यो दास्यन्ते कृत्स्नं दिनं तेषां दिदृक्षूणां युष्माकं दृष्टिः
३३ क्षेष्यते तान् द्रष्टुं न शक्ष्यथ। युष्माकं भूमिश्रमफलानि युष्मदज्ञातलोकै
३४ र्भोक्ष्यन्ते यूयं सदा केवलं उपद्रुताः पीड़िताश्च भविष्यथ। युष्मन्नेत्रै
३५ र्यद्यद् द्रक्ष्यते, तद्दर्शनाद् यूयम् उन्मदिष्यथ। परमेश्वरो युष्माकम् आजा-
नुजङ्घापदतलात् शिरो यावद् अप्रतीकार्य्यनाड़ीव्रणेन प्रहरिष्यति।
३६ परमेश्वरो युष्मान् युष्मन्नियुक्तं राजानञ्च युष्माकं युष्मत्पूर्व्वपुरुषाणा-
ञ्चाज्ञातजातीयानां देशं नेष्यति, तत्र यूयं शिलाकाष्ठमयान् इतर-
३७ देवान् सेविष्यध्वे। परमेश्वरो युष्मान् येषां जातीयानां देशं नेष्यति,
३८ यूयं तेषां चमत्कारपुरावृत्तोपकथास्पदो भविष्यथ। क्षेत्रे युष्माभि
र्बहुशस्येषूप्तेष्वल्पशस्यं संग्रहीष्यते यतः शूककीटास्तद् विनाशयि-
३९ ष्यन्ति। स्वनिर्म्मितस्य स्वकृष्टस्य द्राक्षाक्षेत्रस्य द्राक्षारसो युष्माभि र्न
४० पास्यते द्राक्षाफलानि न चेष्यन्ते यतः कीटाः सर्व्वं खादिष्यन्ति। युष्माकं
सर्व्वसीम्नि जिततरुषु सत्सु यूयं तैलमर्दनं न करिष्यथ यतस्तत्फलानि
४१ पतिष्यन्ति। यूयं पुत्त्रकन्या जनयिष्यथ किन्तु तेषु युष्माकं स्वत्वं
४२ न स्थास्यति यस्मात् ते बन्दीभूय दूरं यास्यन्ति। शूककीटा युष्माकं
४३ सर्व्ववृक्षान् क्षेत्रोत्पन्नफलानि च भोक्ष्यन्ते। युष्माकं मध्यवर्त्तिविदे-
शीयलोका युष्मत्तोपि उन्नता भविष्यन्ति यूयम् उत्तरोत्तरम् अवनता
४४ भविष्यथ। ते युष्मभ्यम् ऋणं दास्यन्ति किन्तु यूयं तेभ्य ऋणं न दास्यथ
४५ ते उत्तमाङ्गस्वरूपा भविष्यन्ति यूयं लाङ्गूलस्वरूपा भविष्यथ। यावद्
युष्माकं विनाशो न भवेत् तावद् एते शापा युष्माकं प्रतिकूलम् आगत्य
युष्मान् अनुवर्त्तिष्यन्त आश्रयिष्यन्ते च, यतो युष्माकं प्रभुपरमेश्वरेणा-
४६ दिष्टान् आज्ञाविधीन् आचरितुं यूयं तद्वाक्ये मनांसि न न्यधद्ध्वं। अतस्ते

चिह्नार्थमाश्चर्य्यलक्षणार्थञ्च युष्मदुपरि युष्मद्वंशोपरि च सदा स्थास्यन्ति।
यतो युष्मत्प्रभुपरमेश्वरः सन्ततेर्बाहुल्याद् आनन्दिते हृष्टान्तःकरणैश्च ४७
युष्माभि र्न सेवितः। परमेश्वरो युष्माकं प्रतिकूलं यान् रिपून् प्रेष- ४८
यिष्यति ते सर्व्वाभावात् क्षुधातृष्णानग्नतार्त्तै र्युष्माभिः सेविष्यन्ते, यावद्
युष्माकं विनाशो न भवेत् तावत् ते युष्माकं स्कन्धे लौहयुगं स्थापयिष्यन्ति।
उड्डयमानोत्क्रोशपक्षिवच्छीघ्रगामिनी जातिरेकातिदूरात् पृथिव्याः ४९
सीमातो युष्मत्प्रभुणा परमेश्वरेण युष्मत्प्रतिकूलम् आनेष्यते, तज्जा-
तीयलोकानां भाषा युष्माकं बोधागम्या। ते परुषवदना वृद्धान् न ५०
समादरिष्यन्ते बालांश्च न दयिष्यन्ते। यावद् युष्माकं नाशो न भवेत् ५१
तावत् ते युष्माकं पशुवत्सान् भूमिफलानि च भोक्ष्यन्ते तेन युष्माकं
नाशं यावद् युष्मच्छस्यद्राक्षारसतैलानां गोमेषादेर्वत्सानाञ्च किञ्चिदपि
नावशेक्ष्यते। युष्मद्देशीयान्युच्चसुरक्षितप्राचीराणि युष्माकं विश्वास- ५२
भूमयस्तेषां प्राचीराणां पतनं यावद् यूयं युष्मत्सर्व्वनगरेषु तैरवरो-
त्स्यध्वे युष्माकं प्रभुपरमेश्वरदत्तदेशस्य सर्व्वनगरेषु यूयं तैरवरोत्स्यध्वे।
इत्थं शत्रुणा युष्मदवरोधे क्लेशे च जाते स्वदेहफलम् अर्थात् प्रभु- ५३
परमेश्वरेण दत्तानां स्वपुत्त्रकन्यानां मांसं युष्माभि र्भोक्ष्यते। युष्माकं ५४
मध्ये यः पुमान् सर्व्वेभ्यः कोमलो सुखभोगी च, स स्वभ्रातरं वक्षःस्थजायाम्
अवशेषबालकांश्च प्रति कुदृष्टिं करिष्यति, यतो रिपुभि र्युष्माकं सर्व्व- ५५
नगरेषु युष्माकमवरोधे क्लेशे च जाते स सर्व्वभक्ष्याभावात् यत् स्वपुत्त्रस्य
मांसं बुभुक्षिष्यते तस्य किञ्चिदपि तेषां कस्मैचिन्न दास्यति। या स्त्री कोम- ५६
लतासुखभोगाभ्यां पदतले भूमौ निधातुं कदापि न प्रवृत्ता, युष्माकं
सर्व्वाभ्यः कोमलाङ्गी सुखभोगिनी च सा नारी स्ववक्षःस्थस्वामिनं स्वपुत्त्र-
कन्याश्च प्रति कुदृष्टिं करिष्यति। यतो रिपुभि र्युष्मन्नगरेषु युष्मा- ५७
कम् अवरोधे क्लेशे च जाते सा सर्व्वभक्ष्याभावात् स्वपादद्वयमध्यात्
निर्गतं गर्भपुष्पं स्वप्रसूतान् बालकांश्च गुप्तं भोक्ष्यते। यूयं स्वप्रभुपर- ५८
मेश्वरइति श्रीयुक्तभयानकनाम्नो भेतुम् अत्र पुस्तके लिखितानि
सर्व्वव्यवस्थावाक्यानि पालयितुं यदि नावधद्ध्वे, तर्हि परमेश्वर ५९
आश्चर्य्यरूपं बहुकालस्थायिमहाघातै र्बहुकालस्थायिदुष्टरोगैश्च युष्मान्
युष्मद्वंशञ्चाहनिष्यति। यूयं यतो बिभीथ तान् मिस्रीयमहाव्याधीन् ६०
युष्माकं मध्यं पुनरानेष्यति। तेन ते युष्मान् आश्रयिष्यन्ति। अप- ६१
रम् अत्र पुस्तके ये न लिखितास्तादृशान् रोगाघातान् युष्माकं विनाश-

६२ पर्य्यन्तं युष्मान् प्रति परमेश्वर आनेष्यति । व्योमतारकावद् बहु-
संख्यानां युष्माकम् अल्पजना अवशेक्ष्यन्ते यतो यूयं स्वप्रभुपरमेश्वरस्य
६३ वाक्यं नागृह्णीत । परमेश्वरो युष्माकं क्षेमं कर्त्तुं युष्मान् वर्द्धयितुञ्च
यथा आह्लादित आसीत् तथा युष्मान् नाशयितुं लोप्तुञ्चाह्लादिष्यते,
६४ यूयं यं देशम् अधिकर्त्तुं याथ ततो दूरीकारिष्यध्वे । परमेश्वरो युष्मान्
पृथिव्या एकसीमातो ऽन्यसीमां यावत् सर्व्वजातीयानां मध्ये विकी-
रिष्यति तत्र युष्माभि र्युष्मत्पूर्व्वपुरुषैश्चाज्ञाताः काष्ठपाषाणमया
६५ इतरदेवा युष्माभिः सेविष्यन्ते । तेषां भिन्नजातीयानां मध्ये यूयं
किमपि सुखं न प्राप्स्यथ युष्माकं पदतलानि कुत्रापि न विश्रमिष्यन्ति
किन्तु परमेश्वरस्तत्र युष्मभ्यं चित्तकम्पं नेत्रक्षीणतां मनःशोकञ्च
६६ दास्यति । यूयं स्वप्राणेषु निराशा भविष्यथ दिवानिशं शङ्किष्यध्वे
६७ स्वप्राणरक्षाम् असम्भवां ज्ञास्यथ । यूयं मनःसु यत् शङ्किष्यध्वे नेत्रैश्च
यद् द्रक्ष्यथ, तस्मात् प्रातः कथयिष्यथ हा हा यदि सन्ध्याभविष्यत्,
६८ सन्ध्याकाले च कथयिष्यथ हा हा यदि प्रातरभविष्यत् । एष पन्था
युष्माभिः पुनर्न दर्शिष्यत इत्यहं युष्मभ्यं यं पन्थानमधि कथितवान् पर-
मेश्वरस्तेन मिसरदेशपथेन पोतैर्युष्मान् पुनर्नेष्यति, तत्र यूयं स्वरि-
पूणां दासा दास्यश्च भवितुं विक्रेष्यध्वे किन्तु कोऽपि युष्मान् न क्रेष्यति ।
६९ परमेश्वरो होरेवि इस्रायेल्वंशेन सह यं नियमं कृतवान् तदन्यं
यं नियमं तान् प्रति कथयितुं मोयाबदेशे मूससम् आदिशत् तस्य
नियमस्य वाक्यानि समाप्तानि ।

---

२९ ऊनत्रिंशोऽध्यायः ।

१ आज्ञां पालयितुं विनयः १० ईश्वरेण समं नियमः १८ आज्ञालङ्घनफलं ।

१ मूसाः सर्व्वम् इस्रायेल्वंशम् आहूय कथितवान् परमेश्वरो मिसर्देशे
२ फिरौणं तस्य सर्व्वदासान् सर्व्वदेशञ्च प्रति यानि कर्म्माणि कृतवान्
३ तानि यूयं स्वनेत्रै र्दृष्टवन्तः, अर्थात् महापरीक्षा महाश्चर्य्यचिह्न-
४ कर्म्माणि युष्माभिः स्वनेत्रै र्दृष्टानि, तथापि परमेश्वरो ज्ञानग्राहीणि
चित्तानि दर्शनग्राहिणश्चक्षुषः श्रवणग्राहीणि कर्णाणि नाद्यापि युष्मभ्यं
५ दत्तवान् । अहमेव युष्माकं प्रभुः परमेश्वर इति यूयं यथा जानीयात,
तदर्थम् अहं चत्वारिंशद् वर्षाणि प्रान्तरेण युष्मान् गमयितवान् तत्र

गात्रेषु युष्माकं वस्त्राणि न जीर्णानि पादेषु च पादुकाः पुरातनत्वं न गताः; ६
यूयं पूपं नाभुंग्ध्वं द्राक्षारसं सुरां नापिवत। युष्माभिः स्थानेऽत्र प्राप्ते वयम् ७
अस्माभिः सह योद्धुं वहिरागतं हिष्वोनीयं सीहोनं भूपं वाशानी-
यम् ओगं भूपञ्चाहनाम, तेषां देशं वशीकृत्य रुवेणीयेभ्यो गादीयेभ्यो ८
मिनशेरर्द्धवंशाय चाधिकर्त्तुम् अदाम। अतो यूयं यथा सर्व्वकर्म्मसु ९
कृतार्था भवेत, तदर्थं नियमस्यैतस्य वाक्यानि मनःसु निधायाचरत।

परमेश्वरो युष्मान् यद् गदितवान् युष्माकं पूर्व्वपुरुषान् इब्राहीमं १०
इसहाकं याकूवं प्रति यच्छप्तवान् तदनुसाराद् यूयं तेन स्वकीय- ११
लोकत्वे निरूपिष्यध्वे स च युष्मदीश्वरो भविष्यतीति यं नियमं दिव्यञ्च
युष्माकं प्रभुपरमेश्वरोऽद्य युष्माभिः समं स्थिरयितुम् उद्यतोऽस्ति,
युष्माकं प्रभुपरमेश्वरेण सह तं स्थिरयितुं युष्माकं वंशपतयः प्राचीना १२
अध्यक्षा इस्रायेलीयाः सर्व्वपुरुषा युष्मत्सन्ताना भार्य्या युष्माकं शिवि- १३
रान्तरस्थविदेशिलोकाः काष्ठच्छेदकजलवाहकैः सहिता यूयं सर्व्वेऽद्य
स्वप्रभुपरमेश्वरस्य साक्षात् तिष्ठथ। अहम् इमं नियमं दिव्यञ्च १४
केवलं युष्माभिः सह करोमि तन्न, किन्त्वस्माकं प्रभुपरमेश्वरस्य १५
समक्षम् अस्माभिः सहाद्य वर्त्तमानैरवर्त्तमानैश्च सर्व्वैः सहाद्याहं
नियममेनं करोमि।

मिसर्देशेऽस्माकं प्रवासो नानाजातीयानां मध्येनास्माकं यात्रा च १६
युष्माभि र्ज्ञाता तेषां काष्ठपाषाणरौप्यस्वर्णमया घृणार्हा मूर्त्तयो १७
युष्माभि र्दृष्टाः। अस्माकं प्रभुपरमेश्वरं त्यक्तुं तेषां भिन्नजातीयानां १८
देवान् सेवितुञ्च प्रवृत्तमनाः पुमान् स्त्री परिवारो वंशो वा कोप्यद्य
युष्मन्मध्ये मा भवतु, विषवृक्षस्य नागदमनकस्य वा मूलं युष्मन्मध्ये नोत्-
पद्यताम्। अस्य शापस्य कथां श्रुत्वा कोपि स्वमनोमध्य आत्मानमित्या- १९
शिषं मा वदतु, तृष्णया मत्तस्यापि स्वमनोभिलाषाचलतो मम शुभं
भविष्यति। परमेश्वरस्तं नरं क्षन्तुम् अनिच्छुको भविष्यति, तस्य २०
प्रतिकूलं परमेश्वरः क्रोधाग्निं ज्वालयिष्यति पुस्तकेऽत्र लिखिताः शापाः
सर्व्वे तमाक्रमिष्यन्ति, परमेश्वरो व्योमाधस्तस्य नाम लोप्स्यति। परमे- २१
श्वर एतद्व्यवस्थाग्रन्थे लिखितनियमस्य सर्व्वशापानुरूपम् तस्मायशुभं
दातुम् इस्रायेल्वंशेभ्यस्तं पृथक् करिष्यति। युष्माकं पश्चाद् उत्पन्ना २२
युष्माकं भाविवंशा दूरदेशादागता विदेशिलोकाश्च यदा देशस्यैतस्या-
घातान् परमेश्वरेण कृतानि क्षतानि च गन्धकलवणाच्छन्नां दग्धाम् २३

अनुप्ताम् अनङ्कुरां तृणादिहीनां भूमिञ्च क्रोधात् प्रतापाच्च परमेश्वरेणो-
२४ च्छिन्नसिदोममोराह्मासिवोयिमा इवोच्छिन्नां द्रक्ष्यन्ति, तदा ते भिन्न-
जातीयाश्च सर्व्वे इति वक्ष्यन्ति, परमेश्वर एतद्देशं प्रति कुत इत्थं कृत-
२५ वान्? तस्य महाक्रोधज्वलनस्य किं कारणं? तदा त इदं वदिष्यन्ते,
मिसर्द्देशात् तेषां वहिरानयनकाले तेषां पैतृकः प्रभुपरमेश्वरस्तैः समं यं
२६ नियममकरोत् तं नियमं ते लङ्घितवन्त इतरदेवांश्चानुगतवन्तः सेवित-
२७ वन्तः स्वैरज्ञातान् परमेश्वरादत्तान् देवान् प्रणतवन्तश्च। अत एतत्-
पुस्तके लिखितान् शापान् एनं देशम् आक्रमयितुं तं प्रति परमेश्वर-
२८ क्रोधः प्राज्वलत्। परमेश्वरो महाक्रोधप्रतापकोपैस्तद्देशात् तान्
२९ उत्पाट्य अद्यवद् अन्यदेशे निरक्षिपत्। यद्यद् गुप्तं तद् अस्माकं
प्रभुपरमेश्वरस्य, किन्तु यद्यत् प्रकाशितं तत् सदास्माकम् अस्मद्-
भाविवंशस्य चास्ति, तदनुसाराच्चैतस्या व्यवस्थाया वाक्यान्यस्माभिरा-
चरितव्यानि।

---

३० त्रिंशोऽध्यायः।

१ अनुतापकृत्स्वनुग्रहं कर्त्तुम् ईश्वरप्रतिज्ञा ११ स्पष्टम् आज्ञाप्रकाशकथनं १५ लोकानां सम्मुखे मृत्युजीवनस्थापनकथा।

१ एतानि यान्याशीःशापयो र्वाक्यानि युष्मत्सम्मुखे मया स्थापितानि
तानि यदा युष्मान् आश्रयिष्यन्ते, तर्हि स्वप्रभुपरमेश्वरेण दूरीकृता यूयं
२ यत्र वत्स्यथ तत्र भिन्नजातीयानां देशेषु यदि मनोनिधाय प्रभुपरमेश्वरं
प्रति परावर्त्तध्वे, अद्याहं युष्मभ्यं या आज्ञा ददामि तदनुरूपं यदि
३ यूयं युष्माकं वंशाश्च स्वान्तःकरणप्राणैः समं तद्वाक्यं गृह्णीथ, तर्हि युष्माकं
प्रभुपरमेश्वरो युष्मान् दयमानो बन्दित्वात् मोचयिष्यति यत्र यत्र स्थाने
येषां जातीयानां मध्ये यूयं तेन विकीर्णास्तस्मात् सर्व्वस्थानात् पुनर्युष्मान्
४ संग्रहीष्यति। यूयं यदि व्योमप्रान्तस्थसीमायां दूरीकृतास्तिष्ठेत तर्हि
५ युष्माकं प्रभुपरमेश्वरस्तस्माद् युष्मान् आनीय संग्रहीष्यति। युष्माकं
पूर्व्वपुरुषा यं देशम् अधिकृतवन्तः, युष्माकं प्रभुपरमेश्वरस्तं देशं युष्मान्
आनेष्यति यूयं तमधिकरिष्यथ, स युष्माकं पूर्व्वपुरुषेभ्यो युष्मभ्यमधिकं
६ शुभं दास्यति युष्मान् वर्द्धयिष्यति च। यूयं यथा स्वान्तःकरणप्राणैः
समं स्वप्रभुपरमेश्वरे प्रीयमाणा जीवथ तदर्थं युष्माकं प्रभुपरमेश्वरो

युष्माकं युष्मद्वंशस्य चान्तःकरणत्वचं छेत्स्यति। युष्माकं प्रभुपरमेश्वरो ७
युष्मद्द्वेषणात्कृतताड़नाकर्त्तृरिपून् प्रति तान् शापान् दास्यति। परा- ८
वृत्तमनसो यूयं परमेश्वरस्य वाक्यानि ग्रहीष्यथ, अद्याहं युष्मान् तस्य
या आज्ञा आदिशामि ताः पालयिष्यथ। युष्माकं प्रभुपरमेश्वरो युष्मत्- ९
क्षेमार्थं युष्माकं करकृतकर्म्मभि र्देहफलैः पशुफलै र्भूमिफलैश्च युष्मान्
वर्द्धयिष्यति। यतः परमेश्वरो युष्माकं पूर्व्वपुरुषानधि यथानन्दं कृतवान् १०
तथा शुभं कर्त्तुं युष्मान् प्रत्यपि पुनरानन्दिष्यति। यस्माद् यूयं स्वान्तः-
करणप्राणैः समं स्वप्रभुपरमेश्वरं प्रति परावृत्यैतद्व्यवस्थाग्रन्थे लिखितान्
स्वप्रभुपरमेश्वरस्य आज्ञाविधीन् पालयितुं तस्य वाक्यानि ग्रहीष्यथ।

अद्याहं युष्मान् यदादिशामि तद् युष्माकं बुद्धेरगम्यं दूरं वा नहि। ११
तत् स्वर्गे स्थितं नहि अतो वयं यथा तत् श्रुत्वा पालयाम एतदर्थम् अस्मत्- १२
कृते कः स्वर्गमारुह्य तद् आनेष्यति इति वाग् युष्माभि र्न गदितव्या।
तत् सागरपारे स्थितं नहि, अतो वयं यथा तत् श्रुत्वा पालयाम १३
एतदर्थम् अस्मत्कृते सागरपारं गत्वा कस्तद् आनेष्यतीति वागपि
युष्माभि र्न गदितव्या। किन्तु तद्वाक्यं पालयितुं युष्माकं समीपस्थम् १४
अर्थाद् युष्माकं वदने मनसि चास्ते।

पश्यताहमद्य युष्माकं समक्षं जीवनक्षेमं मृत्युक्लेशञ्च निधत्तवान्, १५
यतो ऽहमद्य स्वप्रभुपरमेश्वरे प्रेम कर्त्तुं तस्य पथा चलितुं तस्याज्ञावि- १६
धिव्यवस्थाः पालयितुञ्चादिशामि, तदनुरूपम् आचरन्तो यूयं जीविष्यथ
वर्द्धिष्यध्वे च, यूयं यं देशम् अधिकर्त्तुं याथ तत्र युष्माकं प्रभुपरमेश्वरो
युष्मान् आशिषं वदिष्यति। किन्तु यदि यूयं मनः परावर्त्त्य ममादेशं १७
न गृहीत्वा विपथगामिनो भवथ, इतरदेवान् प्रणमथ सेवध्वे च,
तर्ह्यहमद्य युष्मान् ज्ञापयामि यूयं नितान्तं नंक्ष्यथ; यूयं यं देशं १८
प्राप्तुम् अधिकर्त्तुञ्च यर्द्दननदीपारं याथ तत्र युष्माकम् अवस्थिते र्दिनानि
न वर्द्धिष्यन्ते। अहमद्य युष्माकं प्रतिकूलं द्यावापृथिव्यौ साक्षिणौ करोमि, १९
अहं युष्माकं सम्मुखे जीवनमृत्यू शापाशिषौ स्थापितवान्। अतो यूयं युष्म- २०
द्वंशश्च यथा जीवेत, तदर्थं जीवनं गृह्णन्तः स्वप्रभुपरमेश्वरे प्रेम कुरुत
तदाज्ञा आचरत तस्मिन् आसक्तास्तिष्ठत, यतोऽनेन युष्माकं जीवन-
दीर्घायुषी स्तः। इति कृते परमेश्वरो युष्मभ्यं यं देशं दातुं युष्माकं पूर्व्व-
पुरुषेभ्य इब्राहीम्-इस्हाक्-याकूब्भ्यः शप्तवान् तत्र युष्माकं बहुकालं
वासो भविष्यति।

३१ एकत्रिंशोऽध्यायः।

१ न भेतुं लोकान् प्रति मूसोनिवेदनं ७ यिहोशूयं प्रति निवेदनं ९ लेवीययाजकान् प्रति व्यवस्थासमर्पणं १४ यिहोशूयं प्रति ईश्वराज्ञा १६ गीतं लेखितुं मूसमं प्रति ईश्वराज्ञा २३ यिहोशूयं प्रति आज्ञा २४ लेवीययाजकेषु पुस्तकसमर्पणं २८ प्राचीनानां साक्षाद् गीतोच्चारणं।

१ मूसा गत्वा इस्रायेलः सर्व्ववंशाय वाक्यान्येतानि कथितवान् तान्
२ अवदच्च, अहमद्य विंशत्यधिकशतवर्षवयस्को ऽभवम् इतः परं वहिर्यातुम्
अन्तरागन्तुं न शक्ष्यामि परमेश्वरो मामवदत् त्वं यर्द्दनदीपारं न
३ यास्यसि। युष्माकं प्रभुपरमेश्वर एव युष्माकम् अग्रे पारं यास्यति स
युष्माकं साक्षात् तान् भिन्नजातीयान् नाशयिष्यति यूयं तान् अनधिकारान् करिष्यथ; परमेश्वराज्ञया यिहोशूयो युष्माकमग्रे पारं यास्यति।
४ परमेश्वरो यं सीहोनम् ओगम् इमोरीयानाम् एतौ राजानौ नाशितवान् तौ तयो र्देशञ्च प्रति यथाकरोत् एतान् प्रत्यपि तथा
५ करिष्यति। परमेश्वरो युष्माकं करे तान् समर्पयिष्यति तेन यूयं ममादे-
६ शानुसारात् तान् प्रत्याचरिष्यथ। यूयं शक्तिमन्तः साहसिनश्च भवत
तेभ्यो मा बिभीत मा त्रस्यत। युष्माकं प्रभुपरमेश्वरः स्वयं युष्माभिः सह
यास्यति स युष्मान् न प्रहास्यति न त्यक्ष्यति।
७ ततः परं मूसा यिहोशूयम् आहूय इस्रायेलः सर्व्ववंशस्य साक्षात्
तं गदितवान्, त्वं शक्तिमान् साहसी च भव, यतः परमेश्वर एतेभ्यो
यं देशं दातुम् एतेषां पूर्व्वपुरुषाणां समीपे शप्तवान् तं देशं त्वमे-
८ वैतान् प्रवेशयिष्यस्यधिकारयिष्यसि च। परमेश्वरः स्वयं तवाग्रे यास्यति
तव सहायो भविष्यति स त्वां न हास्यति न त्यक्ष्यति तस्मात् त्वं माभैषी
र्मा त्रस्य।
९ अपरं मूसा लिखिता व्यवस्थैषा परमेश्वरनियममञ्जूषावाहकेषु
१० लेवीययाजकेष्विस्रायेलः प्राचीनेषु च समर्पिता। मूसास्तान् इत्या-
११ दिशत् सप्तसप्तवर्षाणां परतः क्षमावर्षाख्ये वत्सर उटजोत्सवे यदा
इस्रायेलः सर्व्ववंशः स्वप्रभुपरमेश्वरस्य मनोभिलषितस्थाने तस्य समक्षं
समागमिष्यति तदा यूयम् इस्रायेलः सर्व्ववंशसाक्षात् तेषां कर्ण-
१२ गोचरे व्यवस्थामेतां पठिष्यथ। ते ऽर्थात् पुरुषस्त्रीबालका द्वारान्तरस्थ-
विदेशिनः सर्व्वे यथा तां श्रुत्वा शिक्षेरन् स्वपरमेश्वरतो भीत्वा व्यव-
स्थाया एतस्या आज्ञाः पालयितुं यतेरन् तदर्थं यूयं तान् सर्व्वान्

मेलयिष्यथ। तेन युष्माकम् अज्ञानाः सन्तानास्तां श्रोष्यन्ति, यं देशम् १३
अधिकर्त्तुं यूयं यर्द्दननदीपारं याथ, तत्र युष्माकं अवस्थितेः सर्व्वदिनानि
स्वप्रभुपरमेश्वरतो भेतुं तैः शिक्षिष्यते।

परमेश्वरो मूससं जगाद पश्य तव मृत्युदिनम् आगतं त्वं यिहोशूयम् १४
आहूय युवां द्वौ समाजावासमुपतिष्ठतम्, अहं तम् आदेक्ष्यामि, ततो
मूसोयिहोशूयौ गत्वा समाजावासमुपस्थितौ। परमेश्वरो मेघस्तम्भमध्य १५
आवासे दर्शनं ददौ स मेघस्तम्भ आवासद्वारोपरि स्थितः।

परमेश्वरो मूससं जगाद पश्य स्वपितृलोकैः सह त्वयि शयित एते १६
लोका यं देशं प्रवेष्टुं यान्ति तद्देशीयैरितरदेवैः समं व्यभिचरिष्यन्ति मां
त्यक्त्वा स्वैः सह मत्कृतं नियमं लङ्घिष्यन्ते। तदा तान् प्रति मम क्रोधे १७
प्रज्वलिते ऽहं तान् त्यक्ष्यामि तेभ्यः स्वमुखम् आच्छादयिष्यामि च तेन
ते मृगरूपाः सन्तो ऽमङ्गलमहाक्लेशरूपै र्ग्रासै र्भक्ष्यन्ते, तदा ते वदिष्यन्ति,
अस्माकमीश्वरो ऽस्माकं मध्यवर्त्ती नहीति हेतोः किम् एतान्यमङ्गलान्य-
स्मान् प्राप्तानि? किन्तु तैरितरदेवान् अनुगम्य यद्यद् अपराद्धं तस्मात् १८
तदाहं तेभ्यो मुखं छादयिष्यामि। अधुना युष्माभिः स्वार्थम् एतद्गीतं १९
लिख्यताम् इस्रायेलवंशश्च त्वया तत् शिक्ष्यतां कण्ठपाठश्च कार्य्यतां तत
एतद्गीतम् इस्रायेलवंशप्रतिकूलं मम साक्षि भविष्यति। अहं यं दुग्ध- २०
मधुप्रवाहिनं देशं तेभ्यो दातुं तेषां पूर्व्वपुरुषाणां समीपे ऽशपे तं
देशं मयानीतास्ते भुक्त्वा तृप्ता यदा हृष्टपुष्टा भविष्यन्ति तदेतरदेवान्
प्रति परावृत्य तान् सेविष्यन्ते मम नियमम् ऋतीयित्वा लङ्घिष्यन्ते। ततो २१
यदामङ्गलमहाक्लेशास्तान् प्राप्स्यन्ति तदा गीतमेतत् मम साक्षात् तेषां
प्रतिकूलं साक्ष्यं भविष्यति यतस्तेषां वंशः कण्ठपाठं गानमिदं न विस्म-
रिष्यति। अहं यं देशमधि शप्तवान् तं देशं तेषामानयनात् पूर्व्व-
मधुनैव ते यन्मनःकल्पनायां प्रवर्त्तन्ते तामहं जानामि। ततो मूसास्तद्दिन २२
इदं गीतं लिखित्वा इस्रायेलवंशं शिक्षयामास।

स नूनस्य पुत्रं यिहोशूयम् आदिशन् जगाद त्वं शक्तिमान् साहसी २३
च भव, अहम् इस्रायेल्वंशेभ्यो यं देशं दातुं शप्तवान् तं देशं त्वं तान्
नेष्यसि, अहं तव सहायो भविष्यामि।

मूसाः समाप्तिपर्य्यन्तं एतस्या व्यवस्थाया वाक्यानि पुस्तके लिखित्वा २४
परमेश्वरस्य नियममञ्जूषावाहकान् लेवीयान् इत्यादिशत्, यूयम् एनं २५
व्यवस्थाग्रन्थं गृहीत्वा स्वप्रभुपरमेश्वरस्य नियममञ्जूषायाः पार्श्वे स्थापयत २६

२७ तत्र स युष्माकं प्रतिकूलं साक्षिवत् तिष्ठतु । यतो युष्माकमाज्ञालङ्घनत्वम्
अवाध्यत्वञ्चाहं जानामि । पश्यताद्य युष्माभिः समं मयि विद्यमाने
यूयं परमेश्वरस्याज्ञां लङ्घध्वे, मयि मृते युष्माभिः किं न कारिष्यते ?
२८ यूयं स्ववंशप्राचीनान् अध्यक्षांश्च मम समीपे मेलयत, अहं तेषां प्रति-
कूलं व्योमपृथिव्यौ साक्षिणीकृत्य तेषां कर्णेषु वाच एताः कथयिष्यामि ।
२९ यतो मम मरणात् परं यूयं सर्व्वथा दुष्टा भविष्यथ मयादिष्टपथः
पराङ्मुखा भविष्यथ तदहं जानामि । यूयं स्वहस्तनिर्म्मितवस्तुना
परमेश्वरं क्रोधयितुं तत्साक्षात् पापं करिष्यथ, तस्मात् शेषे युष्माकम्
३० अशुभं भविष्यति । ततः परं मूसाः समाप्तिपर्य्यन्तम् इस्रायेल्वंशस्य
सर्व्वसमाजीयानां कर्णेष्वेतद्गीतवाक्यं कथयितुम् आरेभे ।

३२ द्वात्रिंशोऽध्यायः ।

१ गीतस्याभासः ७ गीते ईश्वरानुग्रहस्य वर्णनं १५ लोकानां भाविदोषदण्डौ ४४ मूसेनिवेदनं ४८ निवोपर्व्वतमारोढुं मूससं प्रत्याज्ञा ।

१ अहं वदामि हे व्योमन् त्वं कर्णेन निशामय ।
आकर्णय च हे क्षौणि मदास्यान्निर्गतं वचः ।
२ उपदेशो मदीयो हि प्रवर्षिष्यति वृष्टिवत् ।
क्षरिष्यन्ति मदीयानि वचनानि सुधीमवत् ।
शीकरस्तृणजीवीव शाकसेचकवर्षवत् ।
३ अहं प्रचारयिष्यामि नामधेयं परेशितुः ।
सङ्कीर्त्तयत यूयञ्च महत्त्वमीश्वरस्य नः ।
४ सोऽचलः सिद्धकर्म्मा च सरलः सर्व्ववर्त्मसु ।
स सत्यवान् अदम्भी च न्याय्यः सरल ईश्वरः ।
५ इमे भ्रष्टा न तत्पुत्राः कलङ्काश्च त आत्मनां ।
विमार्गगामिनो वक्रा अन्ववाया भवन्ति ते ।
६ हे मूढा ज्ञानहीनाश्च सकला मनुजा इमे ।
समाचरथ किं यूयम् ईदृशं परमेश्वरे ।
युष्माकं क्रयकर्त्ता स जनकश्च न किं भवेत् ।
युष्माकं सृष्टिकर्त्ता स स्थितिकर्त्ता सएव च ॥
७ यूयं स्मरत पूर्व्वस्य समयस्य दिनानि हि ।

आलोचयत वर्षाणि पैतृकाणि गतानि च ।
परिपृच्छत युष्माकं पूर्व्वीयपुरुषान् निजान् ।
तेन ते कथयिष्यन्ति युष्मभ्यं सकलाः कथाः ।
यूयं पृच्छत प्राचीनान् युष्मान् वक्ष्यन्ति तेऽखिलं ॥
जातीनामधिकारस्य निरूपणदिने पुरा । ८
यदादमः सुतव्रातः सर्व्वेशेन पृथक् कृतः ।
इस्रायेल्वंशसंख्यातो लोकसीमा निरूपिताः ।
समाजः परमेशस्य तदीयांशः स एव हि । ९
यतस्तदधिकारो हि भवेत् केवलयाकूबि ।
स प्रान्तरे पशुक्रन्दे मरुभूमौ तमाप्तवान् । १०
स तं वेष्टितवान् तस्मै ज्ञानञ्च परिदत्तवान् ।
स तं रक्षितवान् स्वस्य नेत्रस्य तारकामिव ।
यथा नीडसमीपे हि कुररो जागृयात् स्वयं । ११
घूर्णायमानस्तिष्ठेच्च यथा स्वशावकोपरि ।
विस्तीर्णपक्षयुग्मेन शावकान् तोलयेत् स च ।
पक्षाश्रितान् स्ववत्सान् तु वहन् नयेच्च दूरतः ।
तथा परेश एकाकी तान् जनान् परिणीतवान् । १२
तेन साकं तदानीं वै देवः कोपि न चेतरः ।
उड्डीय स पृथिव्युच्चे गमयामास तान् स्वयं ।
क्षेत्रोत्पन्नेन शस्येन स एव तान् अपोषयत् । १३
गिरेर्मधु रवेरङ्गेस्तथा तैलमपाययत् ।
गव्यं तु नवनीतं हि मेषजानि दधीनि च । १४
पशुशावकमेदांसि मेषान् छागांश्च वाशनः ।
भद्रगोधूमचूर्णानि स हि तेभ्यो वितीर्णवान् ।
रक्तवर्णं रसं म्रद्यास्तानेव पर्य्यपाययत् ॥
स्थूलकलेवरो भूत्वा यिशुरुन् प्रत्यहन् पदैः । १५
ते स्थूलदृप्तपीनाश्चाजहन् स्रष्टारमीश्वरम् ।
लघुज्ञानम् अकार्षुश्च स्वपरित्राणपर्व्वतं ।
स्वपूजितान्यदेवैश्च विरक्तं चक्रिरे हि तं । १६
स्वीयघृण्यक्रियाभिश्च तत्कोपम् उदपादयन् ।
भूतेभ्योऽनीश्वरेभ्यश्च ते स्वानुदसृजन् बलीन् । १७

ते देवास्तैः पुराज्ञाता नूतना ह्यधुनागताः।
युष्माकं पितृलोकाश्च नाकुर्व्वन् साध्वसं ततः॥
१८ स्वं तातमचलं त्यक्त्वा ते पित्रीशं विसस्मरुः।
१९ इति वीक्ष्य परेशस्तु तेषां चक्रे विनिग्रहं।
विरक्तः स्वीयपुत्राणां पुत्रीणामपि कर्म्मभिः।
२० स चावादीदहं तेभ्यश्छादयिष्ये निजं मुखं।
तेषां शेषदशा का स्यात् तदेवाहं लुलोकिषे।
ते वक्रगामिनो वंशा न विश्वास्याः प्रजाश्च मे।
२१ एते यथा ममोत्तापम् पर्य्यकुर्व्वन्ननीश्वरैः।
माम् अक्लिश्नन् इमे यद्वद् अलीकैः सुरविग्रहैः।
अहमुत्तापयिष्ये तान् अगण्यमानवैस्तथा।
क्लेक्ष्यामि जातिम् एताश्च प्रोन्मत्तभिन्नजातिभिः।
२२ ज्वलितो मम कोपाग्निः स्थितं नरकमप्यधः।
प्रतप्स्यति धरित्रीश्च तत्सर्व्वाणि च लोप्स्यति।
मूलानि पर्व्वतानाश्च स एव संग्रसिष्यति।
२३ सञ्चेष्याम्यहमेतेषाम् अशुभानि शिरःसु वै।
यावन्तश्च शरा मे स्युः सर्व्वान् त्यक्ष्यामि तान् प्रति।
२४ क्षेष्यन्ते ते हि दुर्भिक्षात् मार्य्या नंक्ष्यन्ति ते जनाः।
व्याधीनामपि संघातात् प्रक्षेष्यन्ते तथा मया।
प्रति तान् व्याघ्रदन्तांश्च पन्नगानां विषाणि च।
२५ अन्तर्भीत्या वहिः खड्गैस्तेषां नंक्ष्यन्ति मानवाः।
तरुणाश्च तरुण्यश्च स्तनपाः पलितं गताः॥
२६ रिपोर्दर्पकथाभ्यश्चेत् नाकरिष्यमहं भयं।
तदा तान् ध्वंसयिष्यामि मानवानाञ्च मध्यतः।
तेषां नामापि लोप्स्यामि समवक्ष्यमिदं वचः।
२७ तद् दृष्ट्वा शत्रवस्तेषां नाभ्यज्ञास्यन्त कर्म्म मे।
अवदिष्यंश्च दोषो नः स्वयमेवोन्नतिं गताः।
न परेशेन संसिद्धिं गतान्येतानि सर्व्वशः॥
२८ हतधीजातयस्ते हि विवेकहीनमानुषाः।
२९ हा हा चेत्ते विजानीयु र्बुध्येरंश्च कथामिमां।
यदि शेषदशायास्ते कुर्य्युश्च सद्विवेचनां।

कथं तु द्रावयेद् एको रिपुस्तेषां सहस्रकं। ३०
अयुतं वा कथं तेषां पलायेत रिपुद्वयात्।
स्वाद्रिणा चेन्न विक्रीता रुद्धा ईश्वेन चेन्न ते।
यतो रिपुगणस्यैवास्मदीयस्य विचारणात्। ३१
अस्माकं गिरिणा तुल्यस्तेषां कश्चिद् गिरिर्न हि॥
ते सिदोमीयगुल्मिन्या प्रजाता गोस्तनीलताः। ३२
क्षेत्रोत्पन्ना अमोरायास्तत्फलं विषतुल्यकं।
तिक्तास्तदीयगुच्छाश्च रसस्तेषामहेर्विषं। ३३
निष्ठुरतमसर्पाणां गरलैर्वा समो भवेत्॥
तन्मया सञ्चितं किं न गुप्तञ्च मम कोषके। ३४
दानं फलस्य मत्कर्म्म सूचितं प्रददाम्यहं। ३५
योग्यकाले स्खलिष्यन्ति स्वपदे मनुजा इमे।
विद्यते निकटासन्नं दिनं तेषां भयङ्करं।
मया निरूपिता तेषां तूर्णमेष्यति दुर्गतिः।
यतो विचारयिष्यन्ते परेशेन निजाः प्रजाः। ३६
प्रदर्शयिष्यते तेन दया स्वसेवकान् प्रति।
दौर्ब्बल्यं पश्यता तेषां क्षयञ्च मुक्तबद्धयोः॥
वदिष्यन्ते तु तेनेदं युष्मद्देवा गताः क्व वै। ३७
विश्वासभूमयो ये वो बलिमेदांसि वश्च यैः। ३८
भुक्तानि यैश्च पीतो वो रसो मद्या निवेदितः।
त उत्थायोपकुर्व्वन्तु भवन्तु युष्मदाश्रयाः॥
पश्यतैकोऽहमेवास्मि विना मां कोपि नेश्वरः। ३९
मृत्युजीवनयो र्दाताहं रोगारोग्ययोरपि।
उद्धर्त्तुं मम हस्ताच्च न हि शक्नोति कश्चन।
उत्तोल्य मत्करं स्वर्गे शपेऽहनमरः सदा। ४०
स्वासिं क्षणप्रभातुल्यं शाणयिष्याम्यहं यदा। ४१
दण्डदाने प्रवृत्तौ च करौ मम भविष्यतः।
तदैवाहं रिपुभ्यो मे दास्ये समुचितं फलं।
ये जना माम् ऋतीयन्ते दण्डयिष्यामि तानपि।
मज्जयिष्यामि मद्बाणान् शोणिते हतबन्दिनोः। ४२
तर्पयिष्यामि खड्गं मेऽरिपते मूर्द्धमेदसा।

४३ हे अन्यजातयो यूयं समं नन्दत तज्जनैः।
स दासरक्तपातस्य प्रतीकारं करिष्यति।
तथा स्वकीयशत्रुभ्य उचितञ्च प्रदास्यति।
स स्वदेशस्वलोकेषु दयाशीलो भविष्यति।

४४ ततो मूसा नूनपुत्रो यिहोशूयश्चागत्य लोकानां श्रवणे गीतमिदं
४५ कथितवन्तौ। मूसा इस्रायेल्वंशस्य समीप एताः कथाः समाप्य तान-
४६ वदत् अहमद्य युष्माकं मध्ये यत् साक्ष्यं दत्त्वाकथयं यूयं तत्सर्व्वं मनःसु
निधाय व्यवस्था एता मन्तुं पालयितुञ्च स्वस्वसन्तानान् आदिशत।
४७ तद्वाक्यं युष्माकं निरर्थकं न हि यत एतेन युष्माकं जीवनं विद्यते
यूयञ्च यं देशम् अधिकर्त्तुं यर्दननदीपारं यास्यथ तत्र युष्माकम् अव-
स्थितेर्द्दिनानि वाक्येनैतेन बहूनि भविष्यन्ति।

४८ तस्मिन्नेव दिने परमेश्वरो मूससम् अवदत् त्वम् इमम् अवारिमं
४९ गिरिम् अर्थात् मोयाबदेशस्थं यिरीहोसम्मुखस्थं निबोपर्व्वतम् आरुह्य
५० अधिकारार्थं इस्रायेल्वंशाय मद्दास्यमानं किनानदेशं निरीक्षस्व। यथा
तव भ्राता हारोणो होराद्रौ मृत्वा स्वलोकानां समाजे गृहीतस्तथा त्वं
५१ यं गिरिम् आरोक्ष्यसि तत्र मृत्वा स्वलोकानां समाजे ग्राहीष्यसे। यत
इस्रायेलवंशस्य मध्ये युवां सीनप्रान्तरे कादेशस्थमिरीवाजलनिकटे
५२ मदाज्ञां लङ्घितवन्तौ, इस्रायेलवंशमध्ये माम् अवज्ञातवन्तौ। तस्माद्
अहम् इस्रायेलवंशाय यं देशं दास्यामि स स्वनेत्राभ्यां त्वया द्रक्ष्यते,
किन्तु न त्वया प्रवेक्ष्यते।

---

३३ त्रयस्त्रिंशोऽध्यायः।

१ ईश्वरमहिमकथा ६ इस्रायेलो द्वादशवंशाय मूसाभविष्यद्वाक्यं।

१ ईश्वरस्य लोको मूसाः स्वमृत्युतः पूर्व्वम् इस्रायेल्वंशम् इमा आशिषो
२ जगाद। स उवाच,

परेश्वरः समायातः सीनयाख्यशिलोच्चयात्।
तान् लोकान् प्रति सेयीराद् उदितः स रविर्यथा।
पारणात् पर्व्वतात् तेन निजतेजः प्रकाशितं।
हस्तस्य पुण्यलोकानां तदा दशसहस्रकैः।
तेषां कृते करात्तस्य निर्गतो वह्निवद् विधिः।

प्रीयते स स्वलोकेषु स्वभक्तास्तत्कराश्रिताः। ३
तत्पादौ समुपाविश्य गृह्णन्ति मूर्द्धि तद्वचः।
मूसाश्च तं विधिं तस्माद् अस्मभ्यं परिदत्तवान्। ४
याकूबीयसमाजस्य स एव नैत्यिको निधिः॥
कुलीनेषु सभास्थेषु त्विस्रायेलन्वयैः सह। ५
यिश्रुरूणस्य मध्ये स राजा स्वयमवर्त्तत॥

तदा स रूबेणवंशमधीत्युवाच, ६

संजीविष्यति रूबेणो निधनं न गमिष्यति।
तथापि तस्य लोकानां संख्या स्वल्पा भविष्यति॥

यिहूदावंशमधि स इत्युवाच, ७

यिहूदावंशवाक्यानि संश्रोष्यति परेश्वरः।
समीपं निजलोकानां समानेष्यति तं स हि।
स्वकीयाभ्यां कराभ्यां स तत्साहाय्यं करिष्यति।
रक्षणात् तस्य शत्रुभ्य उपकारं करिष्यति॥

लेविवंशमधि सोऽवदत्, ८

त्वया पुरा मसायां हि कृतं यस्य परीक्षणं।
तोयान्तिके मिरीवायाः सार्द्धं येन विरोधितं।
तेन पुण्यवता लब्धे त्वदीयदीप्तिसिद्धते।
पितरं स्वं न जानेऽहं मातरञ्चेति वक्ति सः। ९
न मन्यते स्वसन्तानान् सहजान् स्वीकरोति न।
अवद्भिस्तव वाक्यानि रक्षद्भिर्नियमं तव। १०
तैरेवादेक्ष्यते याकूबन्वयस्तावकान् विधीन्।
इस्रायेलं व्यवस्थाञ्च शिक्षयिष्यन्ति ते तव।
समक्षं तव धूपस्तै र्वेद्याञ्च दास्यते बलिः।
परेश आशिषं तेषां सम्पत्तिं प्रति वक्ष्यति। ११
तेषां करकृतैः कार्य्यैः सन्तोषं स प्रयास्यति।
तेषां दृणाकृच्छत्रूणां कटिभङ्गं करिष्यति।
तेन ते न हि शक्ष्यन्ति समुत्थातुं कदाचन॥

स बिन्यामीन्वंशमधि कथितवान्, १२

निष्प्रत्यूहं परेशस्यान्तिके वत्स्यति तत्प्रियः।
रक्षिष्यति परेशस्तं नित्यं तत्सन्निधौ वसन्॥

१३ स यूषफ्वंशमधि कथितवान्,
सुषीम उत्तमो व्योम्नोऽधोविस्तृतो जलाशयः।
१४ फलानि सूर्य्यपक्वानि मासैः पक्वफलानि च।
१५ पुरातनाद्रिजातानि चिरशैलोद्भवानि च।
१६ मह्या उत्तमवस्तूनि सर्व्वस्थानोद्भवानि हि।
एतैः परेश्वरात् तस्य देशः शुभमवाप्स्यते॥
भ्रातृभ्यो यः पृथग् यूषफ् तस्य वंशस्य मस्तके।
भवितानुग्रहः स्तम्बे वासिन ईश्वरस्य हि।
१७ महोक्षस्य बलं यद्वत् तदीयं तादृशं बलं।
शृङ्गिनः शृङ्गवत्तस्य भवेत् शृङ्गद्वयं किल।
अयुतम् इफ्रयिम्सैन्यं सहस्रं मिनशेस्य तत्।
स तेन धरणीसीमास्थितलोकान् हनिष्यति॥
१८ स सिबूलून्वंशमधि कथितवान्,
नन्दिता सिबुलून् लाभाद् शिविरेभ्यः इषाखरः।
१९ तौ निमन्त्र्य जनान् अद्रौ धर्म्मबलीन् प्रदास्यतः।
अब्धिद्रव्याणि भोक्ष्येते धनञ्च गुप्तसैकतं॥
२० गादवंशमधि स कथितवान्,
गादविस्तारको धन्यः सिंहीव शयिता च सः।
मृगाणां बाहुशीर्षे च खण्डं खण्डं करिष्यति॥
२१ देशस्य प्रथमांशं स निजार्थं परिदृष्टवान्।
तत्राधिकारस्तस्याभूत् विधायकनिरूपितः।
तथापि हि स लोकानाम् अग्रतः परिगच्छति।
न्याय्यं यत् परमेशस्य यच्च तेन निरूपितम्।
इस्रायेलीयवंशाय प्रसाधयति तत्तु सः॥
२२ दानवंशमधि स कथितवान्,
वाशनो लम्फकर्त्ता च दान्वंशः सिंहवत्सवत्॥
२३ नप्तालिवंशमधि स कथितवान्,
नप्ताल्यनुग्रहात् तृप्त आशीःपूर्णः परेशितुः।
प्रतीचीं दक्षिणाञ्चैव दिशावधिकरिष्यति॥
२४ आशेर्वंशमधि स कथयामास,
आशिषं प्राप्त आशेरो भविष्यति वरप्रजः।

तैलाक्तचरणो भावी भ्रातृभिश्च ग्रहीष्यते।
तस्यार्गलं लोहमयं पैत्तलञ्च भविष्यति। २५
यादृशञ्च दिनं तस्य तादृक् शक्ति र्भविष्यति॥
यिशूरूणीशसंकाशो देवः कोपि न विद्यते। २६
साहाय्यं तव कर्त्तुं स आरूढो नभसो रथं।
आयाति चान्तरीक्षेण स्वमहामहिमान्वितः।
हे इस्रायेल् अनादिः स ईश एव तवाश्रयः। २७
सदास्थितौ च तद्बाहू तवालम्बस्वरूपकौ।
स तव सम्मुखात् सर्व्वान् रिपून् दूरान् करिष्यति।
विनश्यन्तु च ते सर्व्वे इत्यमाज्ञापयिष्यति।
इस्रायेल्वंश एकाकी सुखं वत्स्यति नीरिपुः। २८
शस्याढ्यां मृद्विकाढ्याञ्च याकूव् द्रक्ष्यति स्वक्षितिं।
वियतस्तत्कृते नित्यं सुषीमः संक्षरिष्यति॥
इस्रायेल्वंश धन्यस्त्वं के सन्ति सदृशास्तव। २९
त्वमेव परमेशेन रक्षिता जातिरेकिका।
स खड्गस्ते प्रभाकारी फलकश्च तवोपकृत्।
तव शत्रुगणाः सर्व्वा भविष्यति वशे तव।
उच्चस्थानैश्च तेषां त्वं करिष्यसि गमागमौ॥

---

३४ चतुस्त्रिंशोऽध्यायः।

१ मूससो देशावलोकनं ५ तस्य मरणं ९ यिहोशूयस्य तत्पदप्राप्तिः १० मूससः सुख्यातिश्च।

मूसा मोयावप्रान्तरात् निवोपर्व्वतम् अर्थात् यिरीहोसम्मुखस्थं पिस्- १
गाशिखरं आरोहत्। परमेश्वरो गिलियदमारभ्य दानं यावत् सर्व्वं
देशं सर्व्वं नप्तालिम् इफ्रयिमो मिनशेश्च देशं प्रतीचीस्थसिन्धुं यावत् २
यिहूदासर्व्वदेशं सर्व्वं दक्षिणदेशं सोयरं यावत् प्रान्तरमर्थात् ताल- ३
तरुनगरस्य यिरीहोस्तलभूमिञ्च तं दर्शितवान्। परमेश्वरस्तमवदत् ४
अहं तव वंशाय देशमिमं दास्यामीति यं देशमधि इब्राहीम्-इस्हाक्-
याकूवां समीपे प्रत्यजानां तं देशं त्वाम् अदर्शयं किन्तु त्वं तत्र
न यास्यसि।

५ परमेश्वरस्य दासो मूसाः परमेश्वरस्य वाक्यानुसारात् तत्र मोयाब्‌देशे
६ ममार। स बैत्‌पियोरसम्मुखस्थायां मोयाब्‌देशस्थिततलभूमौ तस्य
७ श्मशानं कृतवान् तत्स्थानमद्यापि कोपि न वेत्ति। मूसा विंशत्यधिकशत-
तवर्षवयसि मृतवान् तथापि तस्य नेत्रे क्षीणे न जाते तस्य स्वाभाविक-
८ बलस्य ह्रासो नाभूत्। इस्रायेल्‌वंशा मूससोऽर्थं मोयाब्‌प्रान्तरे त्रिंशद्-
दिनानि शुशुचुः, ततो मूससोऽर्थं तेषां रोदनशोचनदिनानि पूर्णानि।
९ मूसा नूनसुतयिहोशूयस्य गात्रे करमार्पयत् तस्माद् यिहोशूयो ज्ञान-
दायिनात्मना पूर्ण आसीत्। ततो मूससं प्रति परमेश्वराज्ञया तस्य
वाचि इस्रायेल्‌वंशो मनो निवेश्य सर्व्वकर्म्म चकार।
१० किन्तु मिसर्देशे फिरौणं तस्य सर्व्वदासान् सर्व्वदेशान् प्रति यद्यत्
११ कर्त्तुं मूसाः परमेश्वरेण प्रेषितस्तैः सर्व्वलक्षणैश्चित्रकर्म्मभिः सर्व्वेस्रायेल्‌वं-
शस्य दृष्टौ प्रकाशितेन महाप्रबलकरेण कृतसर्व्वमहाभयङ्करकर्म्मणा च
१२ मूससस्तुल्यः कोपि भविष्यद्वक्ता नेस्रायेल्‌वंशेऽजायत, यतः परमेश्वरस्तस्य
सम्मुखी भवन् तं समभाषत। इति।

यिहोशूयपुस्तकं।

१ प्रथमोऽध्यायः।

१ यिहोशूयं प्रति परमेश्वरस्य कथनं १० लोकान् प्रति यिहोशूयस्य कथनं १६ यिहोशूयं प्रति लोकानां स्वीकारो निवेदनञ्च।

१ परमेश्वरसेवकस्य मूससो मरणात् परं परमेश्वरो नूनस्य पुत्रं यिहो-
२ शूयनामानं मूससः सेवकं जगाद, मम सेवको मूसा मृतः, इदानीं
त्वमुत्तिष्ठ लोकैरेतैः सह सरितमेतां यर्द्दनमुत्तीर्य्य तेभ्य इस्रायेलो वंशे-
३ भ्योऽहं यं देशं दास्यामि तं प्रति यात्रां कुरु। यत्र यत्र स्थाने यूयं
पदमर्पयिष्यथ तानि सर्व्वस्थानान्यहं मूससं प्रति स्ववाक्यानुसाराद्
४ युष्मभ्यं दास्यामि। एतौ प्रान्तरलिबानोनावारभ्य फरातारव्यां महा-
नदीं यावत् सूर्य्यास्तयानदिशि महासागरञ्च यावत् हित्तीयानां सर्व्वे
५ देशा युष्माकं सीमानो भविष्यन्ति। तव यावज्जीवनं त्वत्सम्मुखे स्थातुं

केनापि रिपुणा न शक्ष्यते, यथाहं मूससा सार्द्धमासं तथा त्वया सार्द्धं
स्थास्यामि त्वां न त्यक्ष्यामि न त्वां हास्यामि। त्वं शक्तिमान् उत्साहवांश्च ६
भव यत एतेभ्यो यं देशं दातुम् एतेषां पूर्व्वपुरुषाणां समीपेऽहं शप्तवान् तं
त्वमेतल्लोकान् अधिकारयिष्यसि। अतस्त्वं शक्तिमान् अत्युत्साहवांश्च सन् ७
सावधानपूर्व्वकं मत्सेवकमूससादिष्टसमस्तव्यवस्थानुसारात् कर्म्म कुरु
तद्व्यवस्थामार्गाद् दक्षिणस्मै वामाय वा न परावर्त्तस्व तेन यत् किञ्च-
नोपक्रमिष्यसे, तत्र कृतार्थो भविष्यसि। इमं व्यवस्थाग्रन्थं निरन्तरं ८
कण्ठे कुरु तन्मध्ये लिखितं सर्व्वादेशमाचरितुं दिवानिशं तमालो-
चय, तेन त्वं यद्यद् उपक्रमिष्यसे तस्मिन् कृतार्थो भविष्यसि तव
कार्य्यञ्च संसेत्स्यति। अपरमहं किं त्वां नाज्ञापयं त्वं शक्तिमान् उत्साह- ९
वांश्च भव भीतो निराशश्च माभूः, यतस्त्वं यद्यद् उपक्रमिष्यसे तस्मिन्नेव
तव प्रभुः परमेश्वरस्तव सहायो भविष्यति।

तेन यिहोशूयो लोकानामध्यक्षान् आज्ञापयत् यूयं शिविरस्य मध्येन १०
गत्वा लोकानिति वाचं वदत यूयं स्वेषां कृते पाथेयसामग्रीन् ११
आसादयत यतो युष्माकं प्रभुः परमेश्वरो यं देशमधिकर्त्तुं युष्मभ्यं
दास्यति तं देशं प्रविश्याधिकर्त्तुं दिनत्रयमध्ये युष्माभिरिमां यर्द्दन-
सरितम् उत्तीर्य्य यातव्यं। ततो यिहोशूयो रूवेणवंशं गादवंशं मिन- १२
शेरर्द्धवंशञ्च गदितवान् यूयं परमेश्वरसेवकस्य मूसस आज्ञां स्मरत, १३
युष्माकं प्रभुः परमेश्वरो युष्मभ्यं विश्रामस्थानार्थम् एतं देशं दत्तवान्।
अधुना युष्माकं योषितो बालकाः पशवश्च मूससा दत्ते यर्द्दनस्यावा- १४
रस्थिते देशे तिष्ठन्तु, किन्तु यूयम् अर्थाद् वीरत्ववन्तः सर्व्वे जनाः
सज्जमानाः स्वस्वभ्रातृणामग्रे गच्छन्तस्तान् उपकुरुत। पश्चात् परमे- १५
श्वरेण युष्मभ्यमिव युष्माकं भ्रातृभ्यो विश्रामे दत्ते प्रभुपरमेश्वरेण
दत्ते देशे च तैरधिकृते यूयं यर्द्दनावारे सूर्य्योदयदिशि परमेश्वरस्य
सेवकमूससा दत्तमधिकर्त्तव्यं देशं परावृत्यागत्य तं भोक्ष्यथ।

तेन ते यिहोशूयमवदन् त्वया यद्यद् आदिष्टं तत् सर्व्वं वयं १६
करिष्यामः त्वमस्मान् यत् स्थानं प्रहेष्यसि तत् स्थानं यास्यामः।
वयं यथा मूससो वाक्यानि गृहीतवन्तस्तथैव तव वाक्यानि ग्रहीष्यामः, १७
तव प्रभुः परमेश्वरो यथा मूससा सहावर्त्तत तथा त्वयापि सह वर्त्ततां।
यः कश्चित् तवाज्ञां लङ्घते त्वयाज्ञापिते वचसि मनो न निवेशयति स १८
घानिष्यते, त्वं शक्तिमान् उत्साहवांश्च भव।

२ द्वितीयोऽध्यायः।

१ शिट्टीमाद् द्वयोश्चारयो र्देशनिरीक्षणार्थं प्रेषणं वेश्यया राहबा तच्चारयोर्ग्रहणं ८
चाराभ्यां सह राहबो नियमकरणं २३ चारयोः पुनरागमो वार्त्ताकथनञ्च।

१ अनन्तरं नूनस्य पुत्रो यिहोशूयो द्वौ चारौ शिट्टीमाद् गुप्तं प्रहितवान्
तौ चेदम् उक्तवान् युवां गत्वा देशं यिरीहो नगरञ्च निरीक्षेथां,
२ तेन तौ गत्वा राहबाख्याया वेश्याया गृहं प्रविश्य तत्राशयातां। किन्तु
पश्य श्वो रात्रौ देशं निरीक्षितुम् इस्रायेल्वंशस्य द्वौ चारावत्रायातौ
३ वच इदं यिरीहो नृपस्य कर्णगोचरीभूतं। ततः स यिरीहोरधिपो
दूतै राहबम् इत्याज्ञापयत्, यौ जनौ त्वामुपेत्य तद्गेहं प्रविश्यासाते
४ तौ वहिष्कृत्यानय यतस्तौ सर्व्वं देशं निरीक्षितुमागतौ। सा योषित्
तौ जनौ गोपयित्वावादीत् तौ जनौ मामुपागताविति सत्यं किन्तु
५ तौ कुत्रत्याविति मया न ज्ञातं। नगरद्वाररोधकाले ऽन्धकारे सति
तौ वहिर्गतौ किन्तु क्व गताविति मया न ज्ञायते यूयं तूर्णं तयोः पश्चाद्
६ गच्छत तेन तौ धरिष्यथ। किन्तु सा वेश्या तौ स्वगेहपृष्ठमानीय तत्र
७ राशीकृतकार्पासैः संगोप्य निदधे। पश्चाद् दूता यर्द्दनमार्गेण पारावार-
घट्टपर्य्यन्तं तयोः पश्चाद् गताः, तयोः पश्चाद्गामिनां वहिर्भवनमात्रं
लोका नगरद्वारमरुन्धन्।

८ अनन्तरं तयोश्चारयोः शयनात् पूर्व्वं सा वेश्या गृहपृष्ठे तावुपागत्य
९ ताववदत् ईश्वरोऽस्मद्देशं युष्मभ्यमदात् तदहं जानामि युष्मत्तो ऽस्माकं
१० भीति र्जाता देशवासिनश्च सर्व्व उद्वेगं गताः। यतो मिसरो युष्माकं
वहिरागमनकाले परमेश्वरो युष्माकं सम्मुखे केन प्रकारेण सूफाब्धे-
स्तोयान्यशोषयत् यूयं यर्द्दनः पारे स्थितानाम् इमोरीयाणाम् श्वोगसी-
होननामानौ द्वौ नृपौ प्रति कथं व्यवहृत्य तौ निःशेषं व्यनाशयत तद-
११ स्माभिः श्रुतं। श्रवणमात्रादस्माकं हृदयं व्याकुलितं युष्मत्कृते कस्यापि
मनसि साहसो नोदेति यतो युष्माकं प्रभु र्यः परमेश्वरः सएव स्वर्गपृथि-
१२ व्योरीश्वरः। अत इदानीं विनयेऽहं युवां मयोपकृतौ, अतः कारणाद्
युवामपि मत्पितु र्निवेशनमनुग्रहीष्यथः परमेश्वरस्य नाम गृहीत्वा
१३ शपथमिमं कुरुतं। युवां मम पितरं मातरं भ्रातॄन् भगिनीश्च तेषां
सर्व्वस्वञ्च रक्षिष्यथो मरणादस्माकं प्राणान् उद्धरिष्यथ एतदर्थं सत्य-
१४ चिह्नमेकं मह्यं दत्तं। तेन तौ प्रत्यवदतां यदि यूयमावयोरिदं कार्य्यं न

प्रकाशयेत तर्हि युष्माकं प्राणानां विनिमयेनावयोः प्राणा भविष्यन्ति,
यदा परमेश्वरोऽस्मभ्यं देशं दास्यति तदावां त्वय्यनुग्रहं सत्यञ्चा-
चरिष्यावः। ततः सा वातायनद्वारेण रज्ज्वा ताववारोहयत् १५
यतस्तस्या निवेशनं नगरस्य भित्तावासीत् सा प्राचीरे न्यवसत्। सा १६
ताववदत् पश्चाद्गामिनो जना यथा युवां न धरेयुस्तदर्थं युवां
गिरिमाश्रित्य दिनत्रयं गुप्तौ तिष्ठतं तदनन्तरं पश्चाद्गामिलोकेषु परा-
वृत्यागतेषु युवां स्वमार्गेण चलिष्यथः। तेन तौ तामवदतां त्वमावां यं १७
शपथमकारयस्तत्रावां निरपराधौ भविष्यावः। पश्य यद्रक्तरज्ज्वावां १८
त्वयावरोहितौ तामेव रज्जुम् अस्माकमेतद्देशागमनकाले वातायने
भन्त्स्यसि तव पितरौ भ्रात्रादीन् पितुः सर्व्वपरिवारान् स्वनिवेशन-
मध्ये संग्रहीष्यसि। तेन यः कश्चित् तव निवेशनद्वारात् मार्गं निर्गच्छति १९
तद्रक्तपातापराधस्तस्यैव शिरसि भविष्यति, आवां निर्दोषौ भविष्यावः
यस्तु सार्द्धं त्वया निवेशनमध्ये स्थास्यति तस्मिन् यदि कश्चिद् हस्तम-
र्पयिष्यति तर्हि तस्य रक्तपातापराध आवयोः शिरसो भविष्यति।
किन्तु यदि त्वम् आवयोरिदं कार्य्यं प्रकाशयसि तर्हि त्वमावां यं शप- २०
थमकारयस्तस्माद् आवां मुक्तौ भविष्यावः। ततः सावादीद् युवयो २१
र्वाक्यानुसारात् तथैव भवतु पश्चात् तया विसृष्टौ तौ प्रतस्थाते सा
च तां रक्तरज्जुं वातायनेऽबध्नात्। अनन्तरं तौ गत्वा गिरिमाश्रित्य २२
पश्चाद्गामिनां पुनरागमनपर्य्यन्तं दिनत्रयं न्यवसतां तेन पश्चाद्गामिनो
जनाः सर्व्वमार्गेषु तावन्विष्य कुत्रापि तयोरुद्देशं न लेभिरे।
तदनन्तरं तौ चारौ परावृत्य पर्व्वतादवरुह्य पारं गत्वा नूनपुत्रं २३
यिहोशूयं जग्मतुः स्वौ प्रति यद्यद् अघटत तत् सर्व्वम् आचख्यतुश्च। तौ २४
यिहोशूयम् ऊचतुः, परमेश्वर एतान् सर्व्वदेशान् अस्माकं करेषु समार्प-
यदिति सत्यं, यत एतद्देशनिवासिनः सर्व्वे अस्मत्कारणाद् उद्वेगं प्राप्ताः।

३ तृतीयोऽध्यायः।

१ यर्द्दननदीतटे यिहोशूयस्योपस्थितिः ७ यिहोशूयाय परमेश्वरस्याश्वासदानं ९ लोकेभ्यो यिहोशूयस्याश्वासदानं १४ सरित्तोयस्य भिन्नत्वं।

अनन्तरं यिहोशूयः प्रत्यूष उत्थाय इस्रायेलः सर्व्वंशेन समं शिटी- १
माद् यात्रां कृत्वा यर्द्दननदीकूलं प्राप्य पारमगत्वा तत्र यामिनीं यापि-

२ तवान्। दिनत्रयात् परं सेनापतयः शिविरमध्येन गच्छन्तो लोकान्
३ इत्याज्ञापयन् यदा यूयं स्वप्रभोः परमेश्वरस्य नियममञ्जूषां तद्वा-
हिनो लेवीययाजकांश्च द्रक्ष्यथ तदा स्वस्वस्थानाद् उत्थाय तत्पश्चाद्
४ गमिष्यथ। किन्तु तस्या युष्माकञ्च मध्ये द्विसहस्रहस्ता भूमयो व्यवहिताः
स्थास्यन्ति यूयं तस्याः संविधा न भविष्यथ, तेन यूयं गन्तव्यपथं
५ ज्ञातुं शक्ष्यथ, यतो यूयं पूर्व्वं तेन मार्गेण कदापि नागच्छत। पश्चाद्
यिहोशूयो लोकान् अवदत् श्वः परमेश्वरो युष्माकं मध्य आश्चर्य्याणि
६ कर्म्माणि विधास्यति, अतएवं यूयं स्वान् पवित्रीकुरुत। यिहोशूयो
याजकान् आज्ञापयत्, यूयं नियममञ्जूषाम् आदाय लोकानाम् अग्रेऽग्रे
पारं यात तेन ते नियममञ्जूषां गृहीत्वा लोकानाम् अग्रेऽग्रे गतवन्तः।
७ तदा परमेश्वरो यिहोशूयम् अवदत् अहं यथा मूससा सार्द्धम् आसं
त्वया सार्द्धमपि तथास्मीति यद् इस्रायेल्वंशा जानीयुस्तदर्थमहम्
८ अद्यारभ्य तेषां सर्व्वेषां साक्षात् त्वां महान्तं करोमि। त्वं नियम-
मञ्जूषावाहिनो याजकान् इत्याज्ञापय यूयं यर्द्दनसरितो जलं प्राप्य तत्र
यर्द्दनमध्ये तिष्ठत।
९ ततो यिहोशूय इस्रायेल्वंशं जगाद यूयमत्रागत्य स्वप्रभोः परमे-
१० श्वरस्य वाक्यानि शृणुत। यिहोशूयः पुनरवदत्, अमरः परमेश्वरो
युष्माकं मध्ये वर्त्तते युष्माकं सम्मुखात् किनानीय-हित्तीय-हिव्वीय-
पिरिषीय-गिर्गाशीय-इमोरीय-यिबूषीयलोकान् दवयिष्यतीति यूयम्
११ एतेन ज्ञातुं शक्ष्यथ। पश्यत सर्व्वजगतः स्वामिनो नियममञ्जूषा युष्माकम्
१२ अग्रेऽग्रे यर्द्दनं प्रवेक्ष्यति। यूयम् इस्रायेल एकैकवंशाद् एकैकं जनमित्थं
१३ द्वादशवंशेभ्यो द्वादश जनान् गृह्णीत। सर्व्वजगतः स्वामिनः परमेश्वरस्य
नियममञ्जूषावाहिनां याजकानां पदतलै र्यर्द्दनतोयस्पर्शमात्राद् यर्द्दनतो-
यानि प्रच्छेत्स्यन्ते, ऊर्द्धस्थानाद् आगच्छन्ति तोयानि राशिवत् स्थास्यन्ति।
१४ यर्द्दनः पारं यातुं लोकेषु स्वशिविरेभ्यः प्रस्थितेषु याजकेषु च लोका-
१५ नाम् अग्रेऽग्रे नियममञ्जूषां वहत्सु यदा मञ्जूषावाहिभिर्यर्द्दनसरिति
प्राप्तायां मञ्जूषावाहिनां याजकानां चरणानि जलेऽमज्जन्, तदा या
यर्द्दननदी शस्यच्छेदनस्य सर्व्वकालं यावत् सर्व्वं तटमाक्रम्य पूर्णास्ति,
१६ तस्या ऊर्द्धस्थानाद् आगच्छन्ति तोयानि सर्त्तनस्य समीपस्थं आदम्-
पुरमारभ्य विदूरे राशिवद् उत्थाय तस्थुः, प्रान्तरीयजलधिम् अर्थात्
लवणजलधिं प्रति गच्छन्ति तोयानि च प्रच्छिन्नानि क्षयं प्रापुः, तेन

लोका यिरीहोः सम्मुखे पारं गताः। किन्तु यावत् सर्व्वे जना निःशेषं १७
पारं नागमन् तावत् परमेश्वरस्य नियममञ्जूषावाहिनो याजका यर्द्दनो
मध्ये शुष्कभूमौ स्थिरा अतिष्ठन् तेन सर्व्वे इस्रायेल्वंशाः शुष्कभूम्या
पारं जग्मुः।

---

४ चतुर्थोऽध्यायः।

१ यर्द्दनो द्वादशप्रस्तरग्रहणं यर्द्दनि तदन्यद्वादशप्रस्तरस्थापनं १४ लोकानां पारयानकथनं १९ गिल्गले चिह्नार्थं तद्द्वादशपाषाणस्थापनं।

इत्थं लोकेषु निःशेषं पारं गतेषु परमेश्वरो यिहोशूयं जगाद, १
लोकानां एकैकवंशाद् एकैको जन एतादृशा द्वादश जना युष्माभि र्गृह्य- २
न्ताम् इत्याज्ञाप्यन्तांश्च यत्र याजकानां चरणाः स्थिरा आसन् यर्द्दन- ३
स्तस्मात् मध्यस्थानाद् यूयं द्वादशपाषाणान् आदाय स्वैः सार्द्धं पारम्
आनयत, अद्य रजन्यां यूयं यत्र प्रवत्स्यथ तत्र रात्रिप्रवासस्थाने
तान् स्थापयत। तेन यिहोशूय इस्रायेल्वंशस्यैकैकवंशाद् एकैको जन ४
इत्थं द्वादश जनान् निश्चित्याकयत्, तांश्चेदम् आज्ञापयत् यूयं स्वप्रभोः ५
परमेश्वरस्य मञ्जूषाया अग्रं गत्वा यर्द्दनो मध्यं यात, इस्रायेल्लोकानां
वंशसंख्यानुसाराद् एकैको जन एकैकं पाषाणं स्कन्धे गृह्णीत तेन युष्माकं
मध्ये तदेव चिह्नं स्थास्यति। भाविकाले एते पाषाणाः किङ्कारणा ६
इति स्वसन्तानैः पृष्टा यूयं तान् प्रतिवदिष्यथ, परमेश्वरस्य नियम- ७
मञ्जूषासम्मुखे यर्द्दनो नीराणि प्रच्छिन्नानि, तस्या यर्द्दनः पारयानकाले
यर्द्दनोऽम्बूनि छिन्नानि प्रस्तरा इमे सर्व्वदा इस्रायेल्वंशस्य तत्स्मा-
रकाः। पश्चाद् यिहोशूयो यथाज्ञापयत् तथैवेस्रायेलीयलोकाश्चक्रुः, ८
यिहोशूयं प्रति परमेश्वरस्य वाक्यात् तैरिस्रायेलो द्वादशवंशानुसाराद्
यर्द्दनसरितो मध्याद् द्वादश प्रस्तरा उत्तोलिताः स्वैः सार्द्धञ्च पारमानीता
रात्रिप्रवासस्थाने स्थापिताश्च। यर्द्दनो मध्ये यत्र नियममञ्जूषावाहि- ९
याजकानां पदाः स्थिरा आसन् तत्र यिहोशूयो द्वादश पाषाणान्
स्थापितवान् अद्यापि ते तत्रासते। यिहोशूयं प्रति मूससं आज्ञानु- १०
सारात् लोकान् यद्यद् आदेष्टुं परमेश्वरो यिहोशूयम् आज्ञापयत्
तत्सिद्धिं यावत् मञ्जूषावाहिनो याजका यर्द्दनो मध्ये स्थिता लोकाश्च
शीघ्रं पारं गताः। सर्व्वेषु लोकेषु पारं गतेषु परमेश्वरस्य मञ्जूषा ११
याजकाश्च लोकानां साक्षात् पारं गताः। रूबेणवंशो गादवंशो १२

मिनशेरर्द्धवंशश्च मूससो वाक्यानुसारात् सज्जमाना इस्रायेल्वंशा-
१३ नामग्रेऽग्रे पारं गताः । अर्थाद् योद्धुं चत्वारिंशत् सहस्राणि सज्जमाना
लोका यिरीहोः प्रान्तरे परमेश्वरस्य सम्मुखे पारं गताः ।
१४ तद्दिने परमेश्वरः सर्व्वेस्रायेल्वंशस्य साक्षाद् यिहोशूयं महान्तं
चकार, तेन लोका यावज्जीवं यथा मूससमाद्रियन्त यिहोशूयमपि तथा-
१५ द्रियन्त । परमेश्वरो यिहोशूयम् अवादीत् त्वं साक्ष्यमञ्जूषावाहिनो
१७ याजकान् यर्द्दन उत्थायागन्तुम् आज्ञापय । तेन यूयं यर्द्दन उत्थाया-
१८ गच्छतेति वचसि यिहोशूयेन याजकान् आज्ञापिते यर्द्दनमध्याद् उत्था-
यागच्छतां परमेश्वरस्य नियममञ्जूषावाहिनां याजकानां पदतलेन यदा
शुष्कभूमिः स्पृष्टा तदा यर्द्दनो जलानि स्वस्वस्थानमागत्य पूर्व्ववत्
सर्व्वतीरम् आक्रमन्त ।
१९ इत्थं लोकाः प्रथममासस्य दशमदिवसे यर्द्दन्नदीपारं गत्वा यिरीहोः
पूर्व्वसीम्नि गिल्गले शिविरं स्थापयामासुः ।
२० पुन र्यिहोशूयो यर्द्दनो मध्यात् तैरानीतान् तान् द्वादशप्रस्तरान्
२१ गिल्गले स्थापयामास । स इस्रायेल्वंशं जगाद एतत्पाषाणाः किङ्का-
२२ रणा इति भाविकाले यदा युष्माकं सन्तानाः स्वस्वपितॄन् प्रक्ष्यन्ति तदा
यूयं स्वसन्तानान् वदिष्यथ, इस्रायेल्वंशाः शुष्कभूम्या यर्द्दननदीपारम्
२३ आगताः । यतो युष्मत्प्रभुः परमेश्वरो ऽस्माकं पारयानपर्य्यन्तं यथा
सूफ्सागरं शुष्कीकृतवान् तथा यूयं यावत् पारं न गतास्तावद्
युष्माकं प्रभुः परमेश्वरो युष्माकं सम्मुखे यर्द्दनो नीरं शुष्कीचकार ।
२४ अतः परमेश्वरस्य करौ पराक्रान्ताविति पृथिवीस्थैः सर्व्वलोकै र्ज्ञातव्यं
युष्माभिश्च सदा स्वप्रभोः परमेश्वराद् भेतव्यं ।

---

५ पञ्चमोऽध्यायः ।

१ किनानीयानां भयकथनं २ त्वकछेदनकथनं १० निस्तारपर्व्वपालनकथनं १२
मान्नाशेषः १३ परमेश्वरस्य सेनापते र्यिहोशूयं प्रति प्रकाशितत्वं ।

१ अपरं वयं यावत् निःशेषं पारं नागतास्तावत् परमेश्वर इस्रा-
येल्वंशस्य सम्मुखे यर्द्दननदीं शुष्कीकृतवान् इति वाग् यदा यर्द्दनः
पश्चिमदिशि स्थितैरिमोरीयन्टपै र्जलधिसमीपस्थकिनानीयन्टपैश्च श्रुता
तदा ते व्याकुलितचित्ता इस्रायेल्वंशाद् उत्साहहीनाश्चाभवन् ।

तदा परमेश्वरो यिहोशूयं जगाद त्वं तीक्ष्णास्त्राणि निर्म्माय द्विती- २
यवारम् इस्रायेल्वंशस्य त्वक्छेदं कुरु। तेन यिहोशूयस्तीक्ष्णास्त्राणि ३
निर्म्माय त्वग्गिराविस्रायेल्वंशस्य त्वचश्छेदयामास। यिहोशूयेन त्वक्- ४
छेदस्य कारणमिदं, मिसर्देशाद् आगतसर्व्वलोकानां मध्ये यावन्तः
पुरुषा योद्धार आसन् ते सर्व्वे मिसरान्निर्गमनमार्गेऽर्थात् प्रान्तरे म्रताः।
निर्गताः सर्व्वे लोकाश्छिन्नत्वच आसन्, किन्तु मिसरादागमनात् परं ५
ये ये मार्गे प्रान्तरेऽजायन्त तेषां त्वक्छेदः केनापि न क्रतः। यतो ६
मिसरादागतानां सर्व्वसैन्यानां लोपं,यावद् इस्रायेल्वंशाश्चत्वारिंशद्
वर्षाणि प्रान्तरे भ्रमणं चक्रुः। यतस्तैः परमेश्वरस्य वाक्ये न गृहीते
परमेश्वरस्तानधि शपथमिमं चकार, अहं यं दुग्धमधुप्रवाहिदेशं लोकेभ्यो
दातुम् एतेषां पूर्व्वपुरुषाणां समीपे शप्तवान् तम् एतान् न दर्शयि-
ष्यामि। अतस्तेषां विनिमयेन तेषां ये सन्ताना उदपद्यन्त मार्गे तेषां ७
त्वचु न छिन्नेषु यिहोशूयस्तेषां त्वक्छेदाभावात् तेषां त्वचश्छेदयामास।
तेषां सर्व्वलोकानां त्वचु छिन्नेषु यावत् ते न सुस्थास्तावत् शिविरमध्ये ८
स्वस्वस्थाने तस्थुः। ततः परमेश्वरो यिहोशूयम् अवदत्, अद्याहं युष्मत्तो ९
मिसरीयापमानं दूरीक्रतवान्, ततो हेतोरद्यापि तत्स्थानस्य नाम
गिल्गल् (दूरीकरणमिति) चकार।

इस्रायेल्वंशास्तस्मिन् गिल्गलि शिविरं संस्थाप्य मासस्य चतुर्दश- १०
दिनस्य सायंकाले यिरीहोः प्रान्तरे निस्तारमहं चक्रिरे। तस्य परदिन ११
एव ते देशोत्पन्नेन शस्येन किण्वशून्यपूपान् भृष्टकणांश्च बुभुजिरे।

तस्मिन्नेव परेऽहनि अर्थात् तेषां देशोतान्नशस्यस्य भोजनदिने मान्ना- १२
निवृत्तिरभूत्, तदारभ्य इस्रायेल्वंशेन पुनर्मान्ना नाप्ता, ते तद्वर्षे किनान्-
देशस्य फलं बुभुजिरे।

पश्चाद् यिहोशूयो यिरीहोः सविधः सन् चक्षुरुन्मील्य स्वसम्मुखे १३
निष्कोषासिकरं पुरुषमेकं ददर्श, ततो यिहोशूयस्तमुपागत्य त्वं किम-
स्माकं पक्षीयो वा रिपुपक्षीयो लोक इति पप्रच्छ। ततः स उवाच, १४
अहं परमेश्वरस्य सेनापतिरधुनागतोऽस्मि, तदा यिहोशूयो भूमौ
न्युब्जः पतन् तं प्रणम्यावदत् स्वदासं प्रति मत्प्रभोः काज्ञा? ततः परमे- १५
श्वरस्य सेनापति र्यिहोशूयं जगाद, स्वपादाभ्यां त्वं पादुके दूरीकुरु
यतस्त्वं यत्र तिष्ठसि तत् मेध्यं स्थानं, तदा यिहोशूयस्तत् चकार।

६ षष्ठोऽध्यायः।

१ यिरीहोनगरस्य रोधनम् २ तदवरोधं ईश्वराज्ञा १२ मञ्जूषामुत्तोल्य याजकानां नगरवेष्टनं १६ नगरस्य ग्रहणं २० प्राचीरभञ्जनं नगरस्य पराजयः २८ तस्य पुनर्निर्म्माणनिषेधः।

१ तदानीं बद्धद्वारं यिरीहोनगरम् इस्रायेल्वंशाद् भीतैः पौरै रुरुधे
कोपि वहिरन्तश्च गमनागमने नाकरोत्।
२ ततः परमेश्वरो यिहोशूयं जगाद पश्याहं यिरीहोनगरमिदं तस्य
३ नृपं बलवतो योद्धृंश्च तव हस्ते समर्पयामि। यूयं सर्व्वसैन्यै र्नगरमिदं
वेष्टयित्वा प्रतिदिनम् एकहत्वः प्रदक्षिणं कुरुत, इत्थं षड्दिनानि युष्माभिः
४ कर्त्तव्यम्। सप्तयाजका मञ्जूषाया अग्रसरा भूत्वा महाशब्दकारिणीः सप्त-
तूरीर्वहन्तु, पश्चात् सप्तमदिने यूयं सप्तवारान् तत्पुरं प्रदक्षिणीकरि-
५ ष्यथ याजकास्तूरी र्वादयिष्यन्ति च। अपरं महाशब्दकारिणीषु तूरीषु
तैरुच्चैःस्वरं वादितासु तत् श्रुत्वा सर्व्वे लोका उच्चैः शब्दं करिष्यन्ति तेन
नगरस्य प्राचीरं पतन् समभूमि र्भविष्यति, ततो लोकानाम् एकैको जनः
६ स्वसम्मुखस्थितमार्गेण प्रवेक्ष्यति। अनन्तरं नूनपुत्रो यिहोशूयो याज-
कान् आहूय जगाद, यूयं नियममञ्जूषामुत्तोलयत, सप्त याजकाश्च
परमेश्वरस्य मञ्जूषाया अग्रसरा भूत्वा महाशब्दकारिणीः सप्त तूरी
७ र्वहन्तु। स लोकान् अवदत्, यूयम् अग्रसरा भूत्वा नगरं वेष्टयत, यः
कश्चित् सुसज्जोऽस्ति स परमेश्वरस्य मञ्जूषाया अग्रसरो भूत्वा गच्छतु।
८ ततो लोकान् प्रति यिहोशूयस्याज्ञानुसारात् महाशब्दकारिसप्ततूरी-
वाहिनः सप्त याजकास्तूरीर्वादयन्तः परमेश्वरस्याग्रगामिनो बभूवुः
९ परमेश्वरस्य नियममञ्जूषा तेषां पश्चात् चलिता। सुसज्जलोकास्तूरी-
वादकानां याजकानाम् अग्रसरा भूत्वा चलिताः, पश्चाद्गामिनो जना
१० मञ्जूषायाः पश्चात् जग्मुः, याजकैश्च गच्छद्भिस्तूरीशब्दोऽकारि। तदा
यिहोशूयो लोकान् अवदत्, यूयमुच्चैः शब्दं मा करिष्यथ स्वस्वरेण
कमपि शब्दं न करिष्यथ, युष्माकं मुखेभ्यः किमपि वचो न निर्गमिष्यति,
पश्चादहं यस्मिन् दिन उच्चैः शब्दं कर्त्तुमाज्ञापयिष्यामि तस्मिन् दिने
११ यूयम् उच्चैः शब्दं करिष्यथ। अनन्तरं ते परमेश्वरस्य मञ्जूषां नगरस्य
चतुर्दिक्षु वारमेकं प्रदक्षिणं कारयित्वा शिविरमागत्य तत्र शिविरे
रात्रिं न्यूषुः।

अपरं यिहोशूयः प्रत्यूष उत्तस्थौ याजकाश्च परमेश्वरस्य मञ्जूषाम् १२
उत्तोलयामासुः। महाशब्दकारिसप्ततूरीधारिणः सप्त याजकाः परमेश्व- १३
रस्य मञ्जूषाया अग्रेऽग्रे चलन्तस्तूरी र्वादयामासुः सुसज्जमानास्तेषाम्
अग्रसरा भूत्वा चलिताः पश्चाद्गामिनश्च परमेश्वरस्य मञ्जूषायाः पश्चात्
जग्मुः, याजकैश्च गच्छद्भिस्तूरीशब्दोऽकारि। तथा ते द्वितीयदिवसेऽपि १४
वारमेकं पुरं प्रदक्षिणीकृत्य शिविरं प्रत्यागताः। इत्थं ते षड्दिनानि
चक्रुः। अनन्तरं सप्तमदिने ते प्रत्यूष अरुणोदयकाल उत्थाय सप्त कृत्वः १५
पुरं प्रदक्षिणीचक्रुः केवलमस्मिन् दिने सप्तकृत्वः पुरं प्रदक्षिणं चक्रुः।

अपरं सप्तमवारे याजकैस्तूरीषु वादितासु यिहोशूयो लोकान् १६
जगाद परमेश्वरो युष्मभ्यं नगरं प्रादात्, युष्माभिरुच्चैः शब्दः क्रियतां।
इदं पुरं पुरस्थं सर्व्वं वस्तु च परमेश्वरेण शप्तं भविष्यति तन्मध्ये १७
केवलं वेश्या राहव् अर्थात् सा तस्याः निवेशनस्थाः सर्व्वे सङ्गिनो
जनाश्च जीविष्यन्ति यतः सास्माकं प्रहितौ दूतौ गोपितवती। अतो १८
यूयं शप्तद्रव्यात् सावधाना भवत, शप्तद्रव्यग्रहणेन स्वान् शापग्रस्तान् मा
कुरुत, इस्रायेल्वंशस्य सकलजनान् शप्तान् मा कुरुत मा वा दुःखयत।
रौप्यसौवर्ण्यपैत्तललौहपात्राणि परमेश्वरमुद्दिश्य पवित्राणि भविष्यन्ति १९
परमेश्वरस्य भाण्डागारं तान्यानेतव्यानि।

अनन्तरं तूरीषु वादितासु लोका उच्चैःशब्दं चक्रुः, तूरीशब्दं श्रुत्वा २०
लोकैरत्युच्चैः शब्दः कृतः, ततः पुरस्य प्राचीरं पतित्वा समभूमिरभूत्,
ततो लोकाः स्वस्वसम्मुखस्थमार्गेण प्रविशन्तो नगरं वशे चक्रुः। असिधारैः २१
पुरस्य स्त्रीपुरुषबालवृद्धगोमेषगर्द्दभादीन् निःशेषं विनाशयामासुः।
किन्तु यिहोशूयो देशनिरीक्षणकारिणौ द्वौ जनावाज्ञापयत्, युवां स्व- २२
शपथानुसारात् तस्या वेश्याया गृहं गत्वा तां तस्याः सर्व्वांश्च वहिष्कृ-
त्यानयतं। तेन तौ युवचारौ प्रविश्य राहवं तस्याः पितरौ भ्रातृन् २३
तस्याः सर्व्वस्वञ्च सर्व्वपरिजनञ्च वहिष्कृत्यानीयेस्रायेल्वंशस्य शिविरस्य
वहिः स्थापयामासतुः। अनन्तरं ते पुरं तन्मध्यस्थसर्व्ववस्तूनि च वह्निना २४
दाहयामासुः, रौप्यसौवर्ण्यपैत्तललौहपात्राणि च परमेश्वरावासस्य
भाण्डागारे निदधुः। किन्तु यिहोशूयो वेश्यां राहवं तस्याः पित्रादि- २५
परिवारं सर्व्वस्वञ्च ररक्ष तेन साद्यापीस्रायेल्वंशमध्ये वसति यतः सा
यिरीहो निरीक्षणाय यिहोशूयेन प्रहितौ दूतौ गोपयाञ्चकार।

तदानीं यिहोशूयो शपथं कुर्व्वन् जगाद यः कश्चिद् उत्थाय २६

पुनरिदं यिरीहूपुरं निर्म्मास्यति स परमेश्वरस्य साक्षात् शप्तो भवेत्,
स ज्येष्ठपुत्त्रेण पणेन भित्तिमूलं स्थापयिष्यति, कनिष्ठपुत्त्रेण पणेन च
२७ नगरद्वाराणि स्थापयिष्यति। तेन यिहोशूयेन समं परमेश्वर आसीत
तस्य यशसा च सर्व्वदेशो व्याप्तः।

---

७ सप्तमोऽध्यायः।

१ अयस्य समीप इस्रायेल्वंशस्य कतिपयलोकानां रणे हतत्वं ६ तदधि यिहोशूयस्य विलापः १० तत्कारणम् ईश्वरेण प्रकाशितं १६ आखनस्य दोषनिश्चयः २२ दोषात् तस्य सर्व्वनाशः।

१ अपरम् इस्रायेल्वंशाः शप्तवस्तुनापराधिनो बभूवुः, यतो यिहूदा-
वंशीयः सेरहस्य प्रपौत्त्रः शब्देः पौत्त्रः कर्म्मेः पुत्त्र आखनः शप्तवस्तूनां
किञ्चिद् अपजहार, तत इस्रायेल्वंशं प्रति परमेश्वरस्य क्रोधः प्रजज्वाल।
२ पश्चाद् यिहोशूयो यिरीहोः कांश्चन दूतान् बैथेलस्य पूर्व्वदिक्स्थितं
बैथावनस्य समीपस्थम् अयं प्रहित्यावदत्, यूयं गत्वा देशं निरीक्षध्वं,
३ ततस्ते गत्वा अयपुरं निरीक्षाञ्चक्रिरे। यिहोशूयं प्रत्यागत्य जगदुश्च,
तत्स्थानं सर्व्वैर्न यातव्यं द्वे सहस्रे त्रीणि सहस्राणि वा लोका गत्वा अयं
४ वशीकुर्व्वन्तु, तत्र सर्व्वैर्लोकैः श्रमो न कर्त्तव्यः यतस्तेऽल्पलोकाः। तेन
त्रीणि सहस्राणि लोका तत्र यात्रां कृत्वा अयलोकानां सम्मुखात् पलायनं
५ चक्रुः। यस्माद् अयलोकास्तेषां षट्त्रिंशत् जनान् जघ्नुः, ते नगरद्वारात्
शिवारीम्पर्य्यन्तं तान् विद्रावयन्तोऽधोगामिमार्गे तान् जघ्नुः, तेन भयात्
सर्व्वेषाम् अन्तःकरणं जलवद् द्रवीभूतं।
६ तदा यिहोशूय इस्रायेल्वंशस्य प्राचीनलोकाश्च स्वं स्वं वस्त्रं छित्त्वा
परमेश्वरस्य मञ्जूषासम्मुखे अधोमुखीभूय सन्ध्यापर्य्यन्तं भूमौ पतित्वा
७ तस्थुः, स्वे स्वे शिरसि धूलिं विचकरुश्च। ततः परं यिहोशूयो जगाद,
हा हा, हे प्रभो परमेश्वर, विनाशायास्मान् इमोरीयाणां करेषु
समर्पयितुम् एते जनास्त्वया यर्द्दनः पारं कुत आनीताः? हा हा, यदि
८ वयं क्षान्ता यर्द्दनः पारेऽस्थास्याम। हे प्रभो, इस्रायेल्वंशे स्वरिपूणां
९ सम्मुखे पराङ्मुखीभूतेऽहं किं वदेयं? यत इति संवादं श्रुत्वा किनानीया
देशनिवासिनश्च सर्व्वे लोका अस्मान् वेष्टयित्वा क्षितेरस्माकं नाम
लोप्स्यन्ति तेन स्वमहानामकृते त्वं किं कुर्य्याः?
१० ततः परमेश्वरो यिहोशूयं जगाद त्वं कुतोऽधोमुखीभूय पति-

तोऽसि ? त्वमुत्तिष्ठ, इस्रायेल्वंशाः पापमकुर्व्वन् मयाज्ञापितनियमम् ११
अलङ्घयन्, ते शप्तवस्तूनां किञ्चिद् गृहीतवन्तः, चोरितवन्तश्च प्रतार्य्य
तत् स्वसंस्थानमध्ये स्थापितवन्तः। अतःकारणाद् इस्रायेल्वंशः स्वरिपूणां १२
सम्मुखे स्थातुमशक्ताः शत्रुभ्यः पराङ्मुखोऽभूत् यतः स शप्तः, तच्छापास्पदं
यावद् युष्माभिर्न लोप्स्यते तावद् युष्माभिः सह नाहं स्थास्यामि। त्वम् १३
उत्तिष्ठ लोकान् पावय तांश्च वद यूयं श्वः कृते स्वान् पावयत, यत इस्रा-
येलः प्रभुः परमेश्वर इति वक्ति हे इस्रायेलवंशाः, युष्माकं मध्ये शापास्पदं
विद्यते, तद् यावद् युष्माकं मध्यात् न दूरयिष्यते तावद् यूयं स्वरिपूणां
सम्मुखे स्थिराः स्थातुं न शक्ष्यथ। अतो यूयं प्रातर्महावंशानुसारात् सर्व्वे १४
उपस्थास्यथ ततः परमेश्वरेण यो महावंशो निश्चेष्यते तस्य महावंशस्य
एकैकवंश उपस्थास्यति, ततः परमेश्वरेण यो वंशो निश्चेष्यते तस्यैकैक-
निवेशनम् उपस्थास्यते ततः परमेश्वरेण यन्निवेशनं निश्चेष्यते तस्यैकैक-
पुरुष उपस्थास्यति। तेन शप्तवस्तुग्राही यो जनो धरिष्यते स तस्य सर्व्वस्वञ्च १५
वह्निना दाहयितव्यः, यतः स परमेश्वरस्य नियमं लङ्घितवान् इस्रायेल
वंशे कुकर्म्म कृतवान्।

अनन्तरं यिहोशूयः प्रत्यूष उत्थायेस्रायेल्लोकं स्वस्वमहावंशानुसाराद् १६
उपास्थापयत् तेन यिहूदावंशो निश्चितः। पश्चात् तेन यिहूदा एकैकवंश १७
उपस्थापिते सेरहवंशो निरचीयत, पश्चात् तेन सेरहवंशे पुरुषानुक्रमाद्
उपस्थापिते सब्देर्निवेशनं निरचीयत। ततस्तेन तस्य परिजनगणे पुरु- १८
षानुक्रमाद् उपस्थापिते यिहूदावंशस्य सेरहस्य प्रपौत्त्रः सब्देः पौत्त्रः
कर्म्मेः पुत्त्र आखनो निरचीयत। तदा यिहोशूय आखनं बभाषे हे मम १९
वत्स विनयेऽहं त्वम् इस्रायेलः प्रभुं परमेश्वरम् आद्रियस्व तस्यान्तिके
दोषं स्वीकुरु च, त्वं किं कृतवान् तन्मां वद, मत्तस्तन् मा गोपय। तत २०
आखनो यिहोशूयम् उक्तवान् अहम् इस्रायेलः प्रभोः परमेश्वरस्य
प्रतिकूलं पापमकार्षं तत् सत्यं, मयामुकं कार्य्यं कृतं। अर्थात् लोठित- २१
द्रव्यमध्य उत्तमं बाबिलीयमहावस्त्रमेकं रूप्यशेकल्शतद्वयं पञ्चाशत्
शेकल्परिमाणं स्वर्णखण्डमेकञ्च दृष्ट्वा लुब्धेन मया गृहीतानि, पश्य
तानि मम दूष्यमध्ये मृदि गुप्तानि सर्व्वाधो रूप्यमास्ते।

ततो यिहोशूयेन प्रहिता दूता धावित्वा तस्य दूष्यं जग्मुः, तत्र च २२
गुप्तानि तानि तदधः स्थितं रजतञ्च ददृशुः। तदा ते दूष्यमध्यात् तत्सर्व्वं २३
गृहीत्वा यिहोशूयस्येस्रायेल्सर्व्ववंशानाञ्च समीपम् आनयन् परमेश्वरस्य

१४ सम्मुखे तद् यस्तारयंश्च। ततो यिहोशूय इस्रायेल्वंशस्य सर्व्व लोकाश्च
सेरहवंशीयम् आखनं तानि रूप्यवस्त्रस्वर्णखण्डानि तस्य पुत्रकन्या
गोगर्द्दभमेषान् दूष्यम् अन्यत् सर्व्वस्वञ्च गृहीत्वा आखोराख्याम् उप-
२५ त्यकामानिन्युः। अनन्तरं यिहोशूयस्तमवदत् त्वया वयं कुतः क्लिष्टाः?
अस्मिन् दिने परमेश्वरस्त्वां क्लेक्ष्यति, तत इस्रायेलः सर्व्वे वंशा प्रस्तरा-
२६ घातैस्तान् जघ्नुः, वह्निना दाहयामासुः प्रस्तरैश्चाच्छादयामासुः। ततस्ते
तदुपरि पाषाणानां महाराशिं चक्रुः स राशिरद्यापि विद्यते, इत्थं
परमेश्वरः स्वप्रचण्डक्रोधात् न्यवर्त्तत, अतः कारणात् तत्स्थानम् अद्यापि
आखोरोपत्यका (क्लेशोपत्यकेति) नाम्ना विख्यातमास्ते।

---

८ अष्टमोऽध्यायः।

१ यिहोशूयस्य परमेश्वरेणाश्वसनं यिहोशूयं प्रति सेनागणस्य गोपनं स्थातुमाज्ञा ९ अयनगराक्रमणं १४ नगरीयसर्व्वलोकानां विनाशः ३० वेदिनिर्म्माणं व्यवस्थायाः शापाशीर्व्वादयोः प्रचारणञ्च।

१ अनन्तरं परमेश्वरो यिहोशूयं जगाद त्वं भीतो निराशश्च माभूः सर्व्व-
सैन्यं गृहीत्वा अयं प्रति युद्धयात्रां कुरु, पश्याहम् अयराजं तदीय-
२ लोकान् नगरं जनपदञ्च तव हस्ते समार्पयं। त्वं यिरीहं तस्य नृपं
प्रति यथाकरोः, अयं तस्य नृपं प्रति च तथा करिष्यसि, केवलं तस्य
लोठद्रव्याणि पशूंश्च यूयं स्वार्थं ग्रहीष्यथ, त्वं नगरस्य पश्चात् सैन्यदलमेकं
गोपयिष्यसि।
३ तदा यिहोशूयः सर्व्वसैन्यञ्च अयस्य विरुद्धं युद्धयात्रां चक्रुः, यिहो-
शूयस्त्रिंशत्सहस्राणि बलवतो लोकान् उद्धृत्य रात्रौ विसृज्येदमाज्ञा-
४ पयत् पश्यत युष्माभि र्नगरस्य प्रतिकूलं नगरस्य पश्चाद् गुप्तं स्थातव्यं
५ नगरादतिदूरं न यातव्यं किन्तु सर्व्वैः प्रस्तुतैः स्थातव्यं। पश्चादहं मत्स-
ङ्गिनो लोकाश्च नगरसमीपम् उपस्थास्यामः, तेन तेषु पूर्व्ववद् अस्माकं
६ विरुद्धं बहिर्भूतेषु वयं तेषाम् अग्रे पलायिष्यामहे बहिर्भूतान् तान्
नगराद् आकृष्य दूरयिष्यामश्च, यत इमे पूर्व्ववद् अस्मत्तः पलायन्ते
७ वचनमिदं ते वदिष्यन्ति। अपरम् अस्मासु तेषामग्रे पलायमानेषु यूयं
गोपनस्थानाद् उत्थाय हठात् नगरमाक्रम्य हस्तगतं करिष्यथ यतो युष्माकं
८ प्रभुः परमेश्वरस्तद् युष्माकं हस्तगतं करिष्यति। यूयं हस्तगतं पुरं परमे-
श्वराज्ञया वह्निना दाहयिष्यथ पश्यताहं युष्मान् इदम् आज्ञापयं।

इत्थं यिहोशूयेन विसृष्टास्ते गोपनस्थानं गत्वा अयस्य पश्चिम अयवै- ९
थेलयोर्मध्ये तस्थुः, किन्तु यिहोशूयो लोकानां मध्ये तां रात्रिं यापयामास।
परेऽहनि यिहोशूय इस्रायेल्वंशस्य प्राचश्च प्रत्यूष उत्थाय लोकान् १०
गणयित्वा तेषामग्रेग्र अयं प्रति यात्रां चक्रुः। तस्य सङ्गिसर्व्वसैन्यं गत्वा ११
समीपमेत्य नगरस्य सम्मुख उपस्थायोत्तरदिशि शिविरं स्थापयामास,
तेषाम् अयस्य च मध्य उपत्यकैकासीत्। पश्चात् स पञ्च सहस्राणि लोका- १२
नादाय नगरस्य पश्चिमदिशि अयवैथेलयो र्मध्ये गुप्तं स्थापितवान्।
इत्थं लोकान् अर्थात् नगरस्योत्तरस्थं सैन्यं पश्चिमदिक्स्थं गुप्तसैन्यञ्च निरू- १३
पितस्थले स्थापयित्वा यिहोशूयस्तस्यां रजन्यामुपत्यकाया मध्यं जगाम।
तदा अयस्य राजा तद् दृष्ट्वा प्रत्यूषे तूर्णमुत्थाय नगरस्थलोकैः सह १४
निरूपितस्थाने प्रान्तरस्य सम्मुख इस्रायेल्वंशस्य विरुद्धं योद्धुं वहिर-
भूत्, किन्तु सैन्यदलमेकं नगरस्य पश्चात् तस्य विरुद्धं गुप्तमस्तीति स
नाजानात्। ततो यिहोशूयः सर्व्व इस्रायेल्लोकाश्च तेषां सम्मुखे स्वान् १५
पराजितानिव दर्शयित्वा प्रान्तरस्य मार्गेण पलायिताः। तेन अयस्य लोकाः १६
सर्व्वे मिलित्वा तेषां पश्चाद् अधावन्, यिहोशूयस्य पश्चाद् धावन्तस्ते
नगराद् दूरीभूताः। इस्रायेल्लोकानां पश्चाद्गामी नाभूत् एतादृश १७
एकोऽपि जन अये वैथेले च न तस्थौ सर्व्वे स्वपुरं मुक्तद्वारं विहायेस्राये-
लीयानां पश्चाद् दधावुः। तदा परमेश्वरो यिहोशूयं जगाद त्वं स्वकरस्थं १८
शल्यम् अयपुरदिशि विस्तारय तेनाहं तत्पुरं त्वत्करगतं करिष्यामि,
ततो यिहोशूयः स्वकरस्थं शल्यं पुरदिशि व्यस्तारयत्। तेन हस्तविस्त- १९
रणमात्राद् गुप्तसेनास्तत्क्षणात् स्वस्थानादुत्थाय वेगेन गत्वा पुरं प्रविश्य
करगतं चक्रिरे शीघ्रं वह्निना पुरं दाहयामासुः। ततो ऽयलोकाः पश्चात् २०
दृष्ट्वा गगणं प्रति नगरधूम उत्तिष्ठतीति वीक्षाञ्चक्रिरे, किन्तु कयापि
दिशा पलायितुं तेषां शक्तिर्नाभूत्, अरण्ये पलायमाना इस्रायेल्लोकाश्च
स्वविद्रावयितॄन् प्रति परावृत्ताः। यतो गुप्तसेनाः पुरं करगतं कृतवन्त २१
इति नगरस्य धूमोत्थानदर्शनात् ज्ञात्वा यिहोशूयः सर्व्व इस्रायेल्-
वंशाश्च परावृत्य अयलोकान् संजघ्नुः। अन्यदिश्यपि लोकास्तेषां विरुद्धं २२
नगरात् निर्गताः, अत एके लोका अस्मिन् पार्श्वे ऽन्ये लोकाश्च परस्मिन्
पार्श्वे तान् आक्रामन् तेन ते इस्रायेलीयानां मध्यवर्त्तिनो बभूवुः
तैश्चेत्थम् आहता यत् तेषाम् एकोऽपि जनो जीवन्नावशिष्यत। किन्तु २३
तैर् अयराजो जीवन् धृतो यिहोशूयान्तिकम् आनीतश्च। इत्थम् २४

अयनिवासिनां ये जना इस्रायेल्वंशस्य पश्चाद् धावन्तः प्रान्तरं
गतास्तेषु तत्रस्थरणस्थले खड्गाघातेन निःशेषं यावत् हतेष्विस्रायेल्-
२५ लोका परावृत्य अयमागत्य तत्रस्थलोकानपि खड्गे जघ्नुः। तस्मिन् दिने
२६ अयनिवासिनां सर्व्वे स्त्रीपुरुषा द्वादशसहस्राणि हताः। यतो यिहो-
शूयोऽयनिवासिनां निःशेषं विनाशपर्य्यन्तं धृतशल्यं विस्तृतकरं पुनः
२७ सङ्कुचितं नाकरोत्। इस्रायेल्वंशो यिहोशूयं प्रति परमेश्वरस्याज्ञानु-
२८ सारात् केवलं तत्पुरस्य पशून् लोठ्यवस्तूनि च स्वार्थं जग्राह। यिहो-
शूयो ऽयपुरं वह्निना दाहयित्वा चिरकालार्थं राशिम् उच्छिन्नस्थानञ्च
२९ चकार। स अयराजं वृक्ष उद्बध्य सन्ध्याकालं यावद् परिहातवान्,
सूर्य्यास्तकाले यिहोशूयस्तस्य शवं वृक्षाद् अवरोह्य पुरद्वारप्रवेशस्थाने
निक्षिप्य पाषाणराशिनाच्छादयामास, स राशिरद्याप्यास्ते।
३० अनन्तरं यिहोशूय एबल्शैल इस्रायेलः प्रभुपरमेश्वरम् उद्दिश्य वेदिं
३१ निर्म्ममे। अर्थात् इस्रायेल्वंशं प्रति परमेश्वरस्य सेवकेन मूससा
दत्ताज्ञानुसारात् मूसाव्यवस्थाग्रन्थे यत् लिखितमास्ते तदनुसारात् सा
वेदि लौहास्त्रेणास्पृष्टैरतक्षितैः पाषाणै र्निर्म्मिता, तत्र ते परमेश्वर-
३२ मुद्दिश्य होमार्थकान् मङ्गलार्थकांश्च बलीन् उत्ससृजुः। स इस्रायेल्-
वंशस्य सम्मुखे मूससा लिखिताया व्यवस्थाया अनुलेखनं तत्र पाषा-
३३ णेषु लिलेख। इस्रायेल्वंशास्तेषां प्राचोऽधिपा विचारका स्वजातीया
प्रवासिनश्च सर्व्वे मञ्जूषायाः पार्श्वयोः परमेश्वरीयनियममञ्जूषावाहिनां
याजकानां समक्षं तस्थुः, इस्रायेल्लोकानाम् आशीरर्थं परमेश्वरस्य सेवको
मूसाः पुरा यद् आदिष्टवान् तदनुसारात् तेषाम् अर्द्धं गिरिषीमगिरे-
३४ र्दिशि, अर्द्धम् एबल्गिरेर्दिशि तस्थौ। अनन्तरं स व्यवस्थाया वाक्या-
नुसाराद् व्यवस्थाग्रन्थे लिखितयोराशीःशापयोः सर्व्वं वाक्यं पपाठ।
३५ मूससा यद्यद् आदिष्टं तत्सर्व्वम् इस्रायेलः सर्व्वसमाजस्य योषितां
बालानां तन्मध्ये प्रवासिविदेशीयानाञ्च सम्मुखे पठितुं यिहोशूय एकमपि
वाक्यं न परिजहौ।

---

९ नवमोऽध्यायः।

१ इस्रायेल्वंशेन समं कृतयुद्धानां राज्ञां कथनं ७ इस्रायेल्वंशेन सह छलात् गिबि-योनलोकानां सन्धिकरणं १६ छलप्रकाशः २२ छलकरणात् तेषां दासत्वे नियोगः।

१ अपरं पर्व्वतस्थाः समभूस्था लिवानोन्सम्मुखस्थमहाजलधितटस्थाश्च

यर्द्दनावारस्थाः हित्तीय-इमोरीय-किनानीय-पिरिषीय-हिव्वीय-यिबू-
षीयाः सर्व्वे नृपा इमं संवादं श्रुत्वैकचित्ता यिहोशूयस्येस्रायेल्वंशस्य च १
प्रतिकूलं योद्धुं मिलिताः।

अनन्तरं यिरीहम् अयञ्च प्रति यिहोशूयो यत् कर्म्म कृतवान् ३
तन्निशम्य गिबियोनलोकाश्छलम् आश्रीयन्त, ते यात्रिकवेशं परिधाय ४
स्वेषां गर्द्दभानां पृष्ठेषु पुरातनानि पुटकानि पुरातना जीर्णा योटनयुक्ता
द्राक्षारसकुतूश्चारोहयन्, पुरातना योटनयुक्ताः पादुकाः पदेष्वददुः ५
पुरातनानि वसनानि गात्रेष्वददुः पाथेयार्थं शुष्कान् सकलङ्कांश्च
पूपान् जगृहुः। ततस्ते गिल्गलस्थितशिबिरे यिहोशूयमुपागत्य तमि- ६
स्रायेलो वंशञ्च जगदुः, वयं दूरदेशादागता यूयमस्माभिः समं सन्धिं
कुरुत। इस्रायेल्वंशो हिव्वीयलोकान् प्रत्यवदत् को जानाति यूयं ७
यद्यस्माकं मध्यस्था भवेत, तर्हि वयं युष्माभिः समं कथं सन्धिं कुर्य्याम?
ततस्ते यिहोशूयम् अवदन् वयं भवतो दासाः। तदा यिहोशूयः ८
पप्रच्छ यूयं के? कुत आयाताः? तेऽब्रुवन् भवतो दासा वयं भवतः ९
प्रभुपरमेश्वरस्य नाम श्रुत्वा बहुदूराद् आगताः, यतस्तस्य यशोऽर्थात्
मिसर्द्देशे तेन यत् कृतं, तथा हिष्वोनीयसीहोनोऽस्तारोतनिवासी १०
वाशानीय ओगश्च, यर्द्दनपारस्थावेताविमोरीयराजौ प्रति तेन यत् कृतं
तत्सर्व्वस्य संवादोऽस्माभिः श्रुतः। अतोऽस्माकं प्राचीना देशवासिनश्च ११
सर्व्वे लोका अस्मान् अवदन् यूयं करेषु पाथेयवस्तूनि गृहीत्वा तान्
साक्षात् कर्त्तुं गत्वा वाचमिमां वदत, वयं युष्माकं दासा अत इदानीं
यूयमस्माभिः सह सन्धिं कुरुत। युष्माकं समीपम् आगन्तुं यद्दिने वयं १२
प्रयातास्तद्दिने गेहाद् यान् तप्तान् पूपान् अगृह्णाम पश्यत त इमे
पूपा अधुना शुष्काः सकलङ्काश्च जाताः, याश्च नवीनाः कुतूर्द्राक्षा- १२
रसैरपूरयाम, पश्यत ताश्छिन्नाः, अस्माकं वस्त्राण्युपानहश्चापि पथो-
ऽतिदीर्घत्वात् जीर्णानि। तत इस्रायेल्लोका परमेश्वरात् मन्त्रणाम- १४
पृष्ट्वा तेषां भक्ष्यद्रव्याणां किञ्चित् जगृहुः। यिहोशूयस्तैः सह सन्धिं कृत्वा १५
तेषां प्राणरक्षां स्वीकृतवान् समाजाध्यक्षाश्च तान् प्रति शपथं चक्रुः।

सन्धिकरणस्य दिनत्रयात् परम् एतेऽस्माकं समीपवासिनोऽस्माकं १६
मध्ये वसन्तीति तैः श्रुतं। इस्रायेल्वंशो यात्रां कुर्व्वंस्तृतीयदिवसे १७
गिबियोन-किफीरा-बेरोत-किरियत्यियारीमनामानि तेषां नगराणि
प्रापुः। समाजाध्यक्षा इस्रायेलः प्रभुपरमेश्वरस्य नाम्ना शपथं कृत- १८

चन्तस्तस्माद् इस्रायेल्लोकास्तान् न जघ्नुः, किन्तु सर्व्वसमाजोऽधिपानां
१९ प्रतिकूलं वचसा युयोध। ततोऽधिपाः सर्व्वसमाजीयान् अवदन् वयं
तान् प्रति इस्रायेलः प्रभोः परमेश्वरस्य नाम्ना शपथमकुर्म्म अतस्तान्
२० स्प्रष्टुं न शक्नुमः। वयं तथैव करिष्यामः, तान् जीवतो रक्षिष्यामः
नो चेत् तान् प्रति यं शपथमकुर्म्म तस्माद् अस्मान् प्रति क्रोधः प्रकाशि-
२१ ष्यते। अतोऽधिपा अवदन्, ते जीवन्तस्तिष्ठन्तु किन्तु सर्व्वसमाजीयानां
कृते काष्ठच्छेदका जलवाहकाश्च भवन्तु।
२२ अनन्तरं यिहोशूयस्तान् आहूय जगाद, यूयम् अस्माकं समीपस्था
२३ अतो युष्मत्तो वयं बहुदूरस्था इति वाचा कुतोऽस्मान् प्रावञ्चयत? अतो
यूयं शप्ता जाता अतोऽस्मत्परमेश्वरीयावासस्य काष्ठच्छेदकानां जल-
२४ वाहिनाञ्च दास्यकर्म्मणः कदापि मुक्तिं न प्राप्स्यथ। ततस्ते यिहोशूयं
प्रत्यवदन् तव प्रभुः परमेश्वरो युष्मभ्यम् एतान् देशान् दातुं युष्माकं
सम्मुखाद् एतद्देशनिवासिनः सर्व्वलोकान् विनाशयितुञ्च स्वसेवकं मूससं
यद् आज्ञापयत् तत् तव दासैरस्माभिः श्रुतम् अतो युष्मत्तः प्राणभयाद्
२५ भीतैरिदं कार्य्यम् अकारि। पश्चाधुना वयं तव हस्तगता आस्म, अस्मान्
२६ प्रति कर्त्तुं त्वया यद् भद्रं न्याय्यञ्च बुध्यते तदेवास्मान् प्रति कुरु। ततः स
तान् प्रतीत्थं कृत्वा इस्रायेल्वंशस्य हस्तात् तान् ररक्ष, तेन ते तान् न
२७ जघ्नुः। किन्तु यिहोशूयस्तद्दिने परमेश्वरस्य मनोभिलषितस्थाने परमेश्व-
रस्य वेद्याः कर्म्मार्थं समाजस्य काष्ठच्छेदनाय जलवहनाय च तान् न्ययुङ्क्त।

---

१० दशमोऽध्यायः।

१ गिबियोनलोकैः समं पञ्चनृपाणां योधनं ६ यिहोशूयाय वार्त्तादानं ८ पञ्चभि र्नृपैः समं यिहोशूयस्य योधनं १२ यिहोशूयाज्ञया पष्पदन्तयोः खे स्थगितत्वं १५ तेषां पञ्चनृपाणां गुहायां स्थापनं २२ वहिष्कृत्य तेषां हननं २८ मक्केदा-लिब्ना-लाखीश-गेषर-इग्लोन-हिब्रोणादिदेशानां दक्षिणभागस्य च वशीकरणं।

१ अनन्तरं यिहोशूयेन अयपुरं वशीकृतं निःशेषं नाशितञ्च, यिरीहो
तस्य नृपस्य प्रति यथाचरितम् अयं तस्य नृपस्य प्रति तथाचरितं, गिबि-
योननिवासिभिश्चेस्रायेल्वंशेन समं सन्धिं कृत्वा तन्मध्ये स्थानं लब्धम्,
२ इति वार्त्तां श्रुत्वा यिरूशालमीयभूपतिरदोनीषेदको ऽतीवाबिभेत्,
यतो गिबियोनं राष्ट्रस्य महानगरीवद् बृहत् पुरम् अयतोऽपि बृहदा-
३ सीत् तस्य सर्व्वे लोकाश्च बलवन्त आसन्। अनन्तरं यिरूशालमीयादो-

नीषेदको राजा हिब्रोणीयहोहमस्य नृपस्य यर्म्मूतीयपिरामस्य नृपस्य
लाखीशीययाफियस्य नृपस्य इग्लोनीयदिवीरस्य नृपस्य समीपं दूतान्
प्रहित्य वच इदं जगाद, यूयं मदन्तिकम् आगत्य माम् उपकुरुत, ४
गिबियोनीयलोका अस्माभि र्हन्यन्तां यतस्ते यिहोशूयेनेस्रायेल्वंशेन
च समं सन्धिमकुर्व्वन्। अतो यिरूशालमीयराजो हिब्रोणीयराजो ५
यर्म्मूतीयराजो लाखीशीयराज इग्लोनीयराजश्च इमोरीयाणां ते पञ्च
नृपा मिलित्वा ससैन्या गत्वा गिबियोनस्य सम्मुखे शिविरं स्थापयित्वा
तत्प्रतिकूलं युयुधुः।

ततो गिबियोनीया गिल्गलस्थशिविरं दूतं प्रहित्य यिहोशूयं जगदुः ६
त्वं स्वदासान् प्रति शैथिल्यमकृत्वा तूर्णमागत्यास्मान् रक्षोपकुरु च यतः
शैलवासिन इमोरीयाः सर्व्वे नृपा अस्माकं विरुद्धं मिलिताः। ततो ७
यिहोशूयः सर्व्वसेना वीरांश्च गृहीत्वा गिल्गलाद् यात्रां चकार।

अपरं परमेश्वरो यिहोशूयं बभाषे त्वं तेभ्यो मा भैषीः, तव करेऽहं तान् ८
समर्पयिष्यामि तेषां कोपि त्वत्सम्मुखे स्थातुं न शक्ष्यति। ततो यिहोशूयो ९
गिल्गलात् कृत्स्नां यामिनीं गत्वाकस्मात् तेषां सन्निधिमुपतस्थौ। ततः १०
परमेश्वर इस्रायेल्वंशस्य साक्षात् तान् म्लानमुखान् कृत्वा गिबियोने
महाप्रतिघातेनाजघान, बैथोरोणस्योर्द्धगामिना मार्गेण तान् विद्रा-
वयन् असेकां मक्केदाञ्च यावत् ताड़यामास। ततो यदा त इस्रायेल्- ११
वंशस्य सम्मुखाद् बैथोरोणस्य निम्नगामिना मार्गेण पलायाञ्चक्रिरे तदा
परमेश्वरो ऽसेकां यावद् आकाशात् तेषामुपरि महाशिला ववर्ष ततस्ते
मृतवन्तः, इस्रायेलवंशेन खड्गैस्तेषां ये हतास्तेभ्योऽधिकाः शिलाभिर्म्मम्रुः।

इस्रायेल्वंशस्य करे परमेश्वरेणेमोरीयाणां समर्पणदिने यिहोशूय १२
इस्रायेल्वंशस्य साक्षात् परमेश्वरं प्रति निवेद्य जगाद हे सूर्य्य त्वं गिबि-
योनोपरि हे चन्द्र त्वम् अयालोनीयत्यकायां तिष्ठ। तेन लोका यावद् १३
रिपून् नादण्डयन् तावत् पुष्पदन्तौ तस्थतुः, तत् किं याशरग्रन्थे लिखितं
न हि? इत्थं व्योममध्ये रविः स्थिरस्तस्थौ सम्पूर्णमेकदिनम् अस्तं यातुं
विललम्बे। तत्पूर्व्वं परं वा परमेश्वरो यस्मिन् दिने मनुष्यवाक्य इत्थं श्रुती १४
ददौ तादृशं किमपि दिनं नाभूत्, यतः परमेश्वरः स्वयम् इस्रायेल्वंशस्य
पक्षः सन् युयोध। ततो यिहोशूयः सर्व्वम् इस्रायेल्वंशं गृहीत्वा गिल्ग- १५
लस्थशिविरं प्रत्यागन्तुं परावर्त्तत। ते पञ्च नृपाः पलाय्य मक्केदास्थगुहायां १६
गुप्तास्तस्थुः। मक्केदास्थगुहायां ते पञ्च नृपा गुप्ताः सन्तीति वार्त्तां १७

१८ यिहोशूयः श्रुत्वावदत् यूयं तद्गुहाया आस्ये महापाषाणान् स्थापयित्वा
१९ तान् रक्षितुं लोकान् नियुङ्ध्वं। विलम्बमकृत्वा रिपूणां पश्चाद्गामिनो
भूत्वा तेषां पार्ष्णिस्थजनान् उच्छिन्त तान् स्वं स्वं नगरं प्रवेष्टुं मा दत्त
२० युष्माकं प्रभुः परमेश्वरस्तान् युष्माकं करेष्वार्पयत्। यिहोशूयेनेस्रायेल्-
वंशेन च तेषां विनाशं यावत् तेषु महाप्रतिघातेन व्यापादितेषु शेष-
२१ लोकाः पलाय्य प्राचीरवेष्टितानि पुराणि प्रविविशुः। अनन्तरं सर्व्वे
लोका मक्केदायां यिहोशूयस्य समीपे शिविरं कुशलेन प्रत्यागमन् तत
इस्रायेल्वंशस्य प्रतिकूलं कोपि जिह्वामपि न लाडयामास।
२२ ततो यिहोशूय आज्ञापयत् यूयं गुहाद्वारं मोचयित्वा ततस्तान्
२३ पञ्च नृपान् बहिष्कृत्य मदन्तिकम् आनयत। तथा कृते ते यिरूशालमन्नृपं
हिब्रोणन्नृपं यर्मूतन्नृपं लाखीशन्नृपम् इग्लोनन्नृपञ्च गुहातो बहिष्कृत्य
२४ तदन्तिकम् आनिन्युः। इत्थं तैस्तेषु राजसु यिहोशूयान्तिकम् आनीतेषु
यिहोशूयः सर्व्वान् इस्रायेल्पुरुषान् आहूय स्वसङ्गिनः सेनापतीन्
आज्ञापयत् यूयं समीपमेत्य राज्ञामेतेषां ग्रीवासु पादान् निधद्धं ततस्ते
२५ समीपमागत्य तेषां ग्रीवासु पादान् ददुः। अपरं यिहोशूयस्तान् जगाद
भीता निराशाश्च मा भूत शक्तिमन्तोऽतीवोत्साहवन्तश्च भवत, यूयं यै
२६ रिपुभिर्योत्स्यथ तान् सर्व्वान् प्रति परमेश्वर इत्थं करिष्यति। ततो
यिहोशूय आघातेन तान् पञ्च नृपान् हत्वा पञ्चसु तरुषूल्लम्बयामास
२७ ततस्ते सायं पर्य्यन्तं तरुषूल्लम्बितास्तस्थुः। सूर्य्यास्तकाले यिहोशूयाज्ञया
लोकास्तान् तरुतोऽवरोह्य ते यस्यां गुहायां गुप्ता आसन् तन्मध्ये तान्
निक्षिप्य तद्गुहास्ये महापाषाणान् निदधिरे ते ऽद्यापि विद्यन्ते।
२८ अनन्तरं तस्मिन् दिने यिहोशूयो मक्केदां वशीकृत्य खड्गाघातेन विनाश्य
तन्नृपं तन्मध्यस्थितान् सर्व्वप्राणिनो निःशेषं जघान, कमपि न ररक्ष;
यिरीहोन्नृपं प्रति यथाकार्षीत् मक्केदान्नृपं प्रति च तथाकरोत्।
२९ ततो यिहोशूयः सर्व्वान् इस्रायेल्वंशान् आदाय मक्केदातो लिव्नां
३० प्रगत्य तत्प्रतिकूलं युयोध। ततः परमेश्वरो लिव्नां तदीयन्नृपञ्चेस्रायेल्-
वंशस्य करेष्वार्पयत् स तन्नगरं तन्मध्यस्थान् सर्व्वप्राणिनश्च खड्गेनाजघान,
कमपि शेषं न ररक्ष, यिरीहोन्नृपं प्रति यथाकार्षीत् तस्य नृपं प्रत्यपि
तथाकरोत्।
३१ अपरं यिहोशूयः सर्व्वान् इस्रायेल्वंशान् आदाय लिव्नातो लाखीशं
३२ प्रगत्य तद्विरुद्धं शिविरं संस्थाप्य तत्प्रतिकूलं युयोध। ततः परमेश्वरेण

लाखीश् इस्रायेल्वंशस्य करेष्वर्पिते स द्वितीयदिवसे लाखीशं वशीकृत्य
लिब्नां प्रति यथाकार्षीत् तथैव कृत्वा तन्नगरं तन्मध्यस्थान् सर्व्वप्राणिनश्च
खड्गेनाजघान।

तदा होरमनामा गेषरीयराजो लाखीशस्य साहाय्यं कर्त्तुम् आगमत् ३३
यिहोशूयस्तं तल्लोकांश्च समाजघान तस्य कमपि नावशेषयत्।

ततो यिहोशूयः सर्व्वान् इस्रायेल्वंशान् आदाय लाखीशत इग्लोनं ३४
प्रगत्य तत्सम्मुखे शिविरं संस्थाप्य तत्प्रतिकूलं युयोध। तद्दिने ते तन्न- ३५
गरं वशीकृत्य यथा लाखीशं प्रत्यकार्षुस्तथैव कृत्वा खड्गेनाहत्य तत्
तन्मध्यस्थान् सर्व्वप्राणिनश्च निःशेषं जघ्नुः।

ततो यिहोशूयः सर्व्वेस्रायेल्वंशान् आदाय इग्लोनतो हिब्रोणं प्रगत्य ३६
तत्प्रतिकूलं युयोध। तद् वशीकृत्य ते तन्नगरं तस्य नृपं तदुपनगराणि ३७
तन्मध्यस्थितान् सर्व्वप्राणिनश्च खड्गैरघ्नन् इग्लोनं प्रति यथाकार्षुस्तथैव
कृत्वा तस्य कमपि शेषं न रक्षित्वा तन्नगरं तन्मध्यस्थान् सर्व्वप्राणिनश्च
निःशेषं जघ्नुः।

ततो यिहोशूयः परावृत्य सर्व्वान् इस्रायेल्वंशान् आदाय दिवीरं ३८
प्रगत्य तत्प्रतिकूलं युयोध। ते तन्नगरं तस्य नृपं तदुपनगराणि च हस्ते ३९
कृत्वा खड्गैराहत्य तन्मध्यस्थसर्व्वप्राणिनो निःशेषं जघ्नुस्तस्य कमपि शेषं
न ररक्षुः, ते हिब्रोणं प्रति लिब्नां तस्य नृपञ्च प्रति यथा कृतवन्त-
स्तथैव दिवीरं तस्य नृपञ्च प्रति चक्रुः।

इत्थं यिहोशूयः पर्व्वतीयदेशं दक्षिणदेशं समभूमिम् उपत्यकाश्च ४०
कृत्स्नमेव देशं वशीकृत्य तत्रत्यान् सर्व्वनृपान् जघान तेषां कमपि शेषं
नारक्षत् स इस्रायेलः प्रभोः परमेश्वरस्याज्ञया सर्व्वप्राणिनो निःशेषं
जघान। इत्थं यिहोशूयः कादेशबर्णेयमारभ्य घसां यावत् तान् गिबियोनं ४१
यावत् सर्व्वं गोशनदेशञ्च व्यनाशयत्। यिहोशूय एतान् नृपान् देशांश्च ४२
युगपद् वशीचकार यत इस्रायेलः प्रभुः परमेश्वर इस्रायेल्वंशस्य पक्षः
सन् युयोध। ततो यिहोशूयः सर्व्वान् इस्रायेल्वंशान् आदाय गिल्ग- ४३
लस्थशिविरं प्रत्याजगाम।

---

११ एकादशोऽध्यायः।

१ इस्रायेल्वंशस्य विरुद्धं देशोत्तरभागस्थानां बहुनृपाणां मेलनं ६ तेषां विनाशः १० हात्सोरनगरस्य ग्रहणं दाहनञ्च १६ बहुदेशवशीकरणं २१ अनाकीयलोकानामुच्छेदः।

१ अपरं याबीननामा हात्सोरीयराज इमां वार्त्तां श्रुत्वा योववनाम्नो
२ मादोनीयनृपस्य शिम्रोणीयनृपस्याक्षफीयनृपस्य च समीपं तथा पर्व्व-
तीयदेशे किन्नेरतस्य दक्षिणस्थे प्रान्तरे समभूमौ पश्चिमदिक्स्थदोरदेशे
३ च निवसताम् उत्तरीयनृपाणां समीपं पूर्व्वपश्चिमदेशीयकिनानीयानाम्
इमोरीयाणां हित्तीयानां पिरिषीयाणां गिरिस्थयिबूषीयाणां हर्म्मोणगिरे
४ मूलस्थहिव्वीयानां समीपञ्च दूतान् प्रेषयामास । ततस्ते सर्व्वे ससैन्या
५ जलधितीरस्थसिकतावद् बहुलोकान् रथांश्च गृहीत्वा वहिर्बभूवुः । सर्व्वे
नृपा मिलित्वा इस्रायेल्वंशस्य प्रतिकूलं योद्धुं मेरोमाख्यजलाशय-
समीपमागत्य शिविरं स्थापयामासुः ।
६ अनन्तरं परमेश्वरो यिहोशूयं बभाषे त्वं तेभ्यो माभैषीः । श्व एतत्-
समयेहम् इस्रायेल्वंशस्य सम्मुखे तान् सर्व्वान् हतान् निधास्यामि तेन
त्वं तेषां हयानां पदशिरां छेत्स्यसि रथान् वह्निना दाहयिष्यसि ।
७ ततो यिहोशूयः सर्व्वसेना आदाय मेरोमतोयसमीपम् अकस्मात् तेषां
८ सन्निधिमुपस्थाय तान् आचक्रमे । ततः परमेश्वरेण तेष्विस्रायेल्वंशानां
करे समर्पितेषु ते तान् ताडयित्वा महासीदोनं मिस्रिफोत्-मयिमञ्च
यावत् मिस्पाः पूर्व्वीयाम् उपत्यकाञ्च यावद् विद्रावयामासुस्तेषां कमपि
९ शेषं न रक्षन्तः सर्व्वान् जघ्नुः । ततो यिहोशूयः परमेश्वराज्ञया तेषां
हयानां पादशिरां चिच्छेद रथांश्च वह्निना दाहयामास ।
१० तदानीं यिहोशूयः प्रत्यागत्य हात्सोरं वशीकृत्य खड्गेन तस्य नृपं
आजघान यतः पूर्व्वं हात्सोरं तेषां सर्व्वराष्ट्राणां मुख्यं पुरम् आसीत् ।
११ तन्मध्यनिवासिनः सर्व्वप्राणिनः खड्गैराहत्य निःशेषम् अबधीत् कमपि
१२ प्राणिनं नावशेषयत्, ततः स हात्सोरं वह्निना दाहयामास । यिहो-
शूयस्तेषां नृपाणां सर्व्वपुराणि तेषां सर्व्वनृपांश्च वशीकृत्य परमेश्वरस्य
सेवकमूसस आज्ञानुसारात् खड्गैस्तान् आहत्य निःशेषं नाशयामास
१३ तथापि गिरेः शृङ्गस्थितानि नगराणीस्रायेल्वंशेन न दाहितानि केवलं
१४ हात्सोरं यिहोशूयेन दाहितं । इस्रायेल्वंशास्तेषां पुराणां वस्तूनि
पशूंश्च स्वार्थं लोठयामासुः, किन्तु सर्व्वमनुष्यान् खड्गे निःशेषं जघ्नुस्तेषां
१५ मध्ये कमपि नावशेषयामासुः । परमेश्वरेण स्वसेवको मूसा यथादिष्ट-
स्तथैव मूससा यिहोशूय आदिष्टस्तथैव च यिहोशूयेन कृतं, परमेश्वरो
मूससं यद्यद् आदिशत् तन्मध्य एकमपि वाक्यम् असिद्धं नातिष्ठत् ।
१६ इत्थं तत्रत्यः सर्व्वदेशः पर्व्वतः सर्व्वदक्षिणदेशो गोशनदेशः समभूमिः

प्रान्तरम् इस्रायेल्पर्व्वतस्तस्य समभूमिश्चार्थात् सेयीरं प्रति गामिनं १७
हालक्पर्व्वतम् आरभ्य हर्म्मोणपर्व्वतस्य नितम्बस्थायां लिवानोनोपत्य-
कायां स्थितं वालगादं यावत् सर्व्वदेशो यिहोशूयेन वशीकृतस्तत्रत्या
नृपाश्च धृताः प्रहारेण हताश्च। यिहोशूयस्तै र्नृपैः समं बहुकालं युयोध। १८
गिबियोननिवासिनो हिव्वीयलोकान् विना केपि नागरिकलोका इस्रा- १९
येल्वंशैः समं सन्धिं नाकुर्व्वन् तेऽन्यसर्व्वान् रणेन वशीचक्रुः। यतस्ते २०
यन्निःशेषं हन्येरन् दयिता न भवेयुः, किन्तु मूससं प्रति परमेश्वराज्ञानु-
साराद् विनाश्येरन् तदर्थम् इस्रायेल्वंशेन समं योद्धुमागमनाय तेषा-
मन्तःकरणानि कठिनानि कर्त्तुं परमेश्वरस्य मतिरासीत्।

तदानीं यिहोशूय आगत्य पर्व्वतीयदेशाद् हिब्रोणाद् दिवीराद् २१
आनवाद् यिहूदाः सर्व्वशैलेभ्य इस्रायेलश्च सर्व्वशैलेभ्य अनाकीयान्
उच्चिच्छेद यिहोशूयस्तेषां पुरैः समं निःशेषं तान् व्यनाशयत्। इस्रायेल्- २२
वंशस्य देशे ऽनाकीयानां केपि नावशिष्टाः केवलम् असायां गाते
ऽस्दोदे च तेषां शेषः स्थितः। इत्थं मूससं प्रति परमेश्वरस्याज्ञानुसा- २३
राद् यिहोशूयः कृत्स्नं देशं वशीकृत्य वंशानाम् अंशानुसाराद् अधि-
कर्त्तुम् इस्रायेल्वंशाय भोगार्थं ददौ पश्चाद् देशे युद्धं विरराम।

---

१२ द्वादशोऽध्यायः।

१ मूससा न्पयोर्देशविभजनं ७ यिहोशूयेनैकत्रिंशन्नृपाणामधिकारवशीकरणं।

अपरं यं यं राजानम् इस्रायेलवंशो हत्वा तेषां देशमधिचकार १
तेषां राज्ञां नामानि। यर्द्दनस्य पूर्व्वकूले सूर्य्योदयदिशि अर्णोननदी-
मारभ्य हर्म्मोणगिरिं यावत् समस्तदेशे पूर्व्वदिक्स्थप्रान्तरे च हिष्वोण-
निवासीमोरीयाणां सीहोन् राजा। स अर्णोननदीतीरस्थारोयेरं २
नदीमध्यञ्चारभ्य अम्मोन्वंशस्य सीमां यव्वोकनदीं यावद् गिलियद-
देशस्यार्द्धस्य तथा किन्नेरतह्रदस्य पूर्व्वतटं यावद् वैत्यिषीमोतपथसन्निधौ ३
प्रान्तरस्थलवणसागरस्य पूर्व्वतटञ्च यावत् प्रान्तरस्य अस्दोत्पिस्गाधः-
स्थितदक्षिणदेशस्य च भूपतिरासीत्। तथा तैरोगनाम्नो वाशानीय- ४
राजस्य जनपदो वशीकृतः, स वृहत्कायलोकानां शेषः, अस्तारोतम्
इद्रियी च तस्य वासस्थाने आस्तां। स गिशूरीयाणां माखाथीयानाञ्च ५
सीमां यावत् हर्म्मोणगिरेः सल्खायाः सर्व्ववाशानस्य तथा हिष्वोणीय-

सीहोनस्य राज्ञः सीमानिकटवर्त्तिनो ऽर्द्धगिलियदस्य भूपतिरासीत्।
६ परमेश्वरस्य सेवकेन मूससेस्रायेल्वंशेन च तयो राज्ञो वंशीकृतयोः
परमेश्वरस्य सेवको मूसास्तं देशम् अधिकर्त्तुं रूवेणवंशाय गादवंशाय
मिनशेरर्द्धवंशाय च ददौ।
७ यर्द्दनद्याः पारे पश्चिमदिशि लिवानोनोपत्यकास्थं वालगादम्
आरभ्य सेयीरं प्रति गामिनं हालकपर्व्वतं यावत् पर्व्वतस्थसमभूमिस्थ-
प्रान्तरस्थोपत्यकास्थकाननस्थदक्षिणदेशस्थानां हित्तीयानाम् इमोरीयाणां
८ किनानीयानां पिरिषीयाणां हिव्वीयानां यिवूषीयाणाञ्च ये नृपा यिहो-
शूयेनेस्रायेल्वंशेन च वशीकृता येषां देशश्च वंशानाम् अंशानुसाराद्
९ अधिकर्त्तुं यिहोशूयेनेस्रायेल्वंशाय दत्तस्तेषां नृपाणां नामानि। यिरी-
१० होरेको राजा वैथेलसमीपस्थस्य अयस्यैको राजा। यिरूशालमस्यैको राजा
१२ हिब्रोणस्यैको राजा। यर्म्मूतस्यैको राजा लाखीशस्यैको राजा। इग्लोन-
१३ स्यैको राजा गेषरस्यैको राजा। दिवीरस्यैको राजा गेदरस्यैको राजा।
१५ हर्म्माया एको राजा अरादस्यैको राजा। लिब्नाया एको राजा,
१७ अदुल्लमस्यैको राजा। मक्केदाया एको राजा वैथेलस्यैको राजा। तपूह-
१८ स्यैको राजा हेफरस्यैको राजा। अफेकस्यैको राजा लशारोणस्यैको
२० राजा। मादोनस्यैको राजा हात्सोरस्यैको राजा। शिम्रोणमिरोणस्यैको
२१ राजा, अक्षफस्यैको राजा। तानकस्यैको राजा मगिद्दोरेको राजा।
२२ केदशस्यैको राजा कर्म्मिलस्थयग्नियामस्यैको राजा। दोरसीमास्थ-
२४ दोरस्यैको राजा गिल्गलदेशीयानाम् एको राजा। तिर्साया एको राजा
च, सर्व्वे एते एकत्रिंशद् राजान आसन्।

१३ त्रयोदशोऽध्यायः।

१ शेषदेशानां कथा १५ रूवेणवंशभोग्यभूमेः कथा २४ गाद्वंशभोग्यभूमेः कथा २९ मिनशेरर्द्धवंशभोग्यभूमेः कथा च।

१ अपरं परमेश्वरो प्रवयसं वृद्धं यिहोशूयमवदत् त्वं वृद्धः स्थाविर-
२ प्राप्तश्च, इदानीमपि वशीकर्त्तव्यो बहुदेशः शेषोऽस्ति। तस्यावशिष्टदेशस्य
३ निर्णयोयं, पिलेष्टीयानां सर्व्वजनपदो गिशूरीयाणां सर्व्वदेशश्च। मिसर-
सम्मुखस्थशीहोरमारभ्योत्तरदिक्स्थम् इक्रोणं यावत् किनानीयानाम्
अधिकारेण गणितो देशः। असातीय-अश्दोदीय-अस्किलोनीय-गातीय-

इक्रोणीयपिलेष्टीयानाम् एतेषां पञ्चनृपाणां जनपदा अव्वीयदेशश्च।
दक्षिणदिशि किनानीयानां सर्व्वो देशः, अफेकाम् इमोरीयाणां सीमाञ्च ४
यावत् सीदोनीयानाम् अधीना मियारा, गिव्लीयानां देशः, हर्म्मोण- ५
पर्व्वतस्य मूलस्थितं वालगादम् आरभ्य हमातप्रवेशस्थानं यावत् सूर्य्यो-
दयदिक्स्थः सर्व्वलिवानोनपर्व्वतः। तं लिवानोनम् आरभ्य मिस्रिफोत- ६
मयिमं यावत् पर्व्वतनिवासिनां सीदोनीयानाञ्च देशः। अहम् इस्रायेल-
वंशस्य सम्मुखात् तान् दूरीकरिष्यामि अहं यथा त्वाम् आज्ञापयं तथैव
त्वं लोकानां स्वस्ववंशेन भोग्यां भूमिम् अंशय, इदानीं नववंशानां मिनशे- ७
रर्द्धवंशस्य च कृते तै भोग्यो देशस्त्वया विभक्तव्यः। तस्यान्यार्द्धवंशो ८
रूवेणवंशो गाद्वंशश्च यर्द्दनसरितः पारे पूर्व्वदिशि मूससा दत्तं स्वं भोग्यं
देशं लेभिरे, यतो परमेश्वरस्य सेवको मूसास्तेभ्योऽर्णोनसरितस्तटस्थम् ९
अरोयेरं तथा सरिन्मध्यस्थनगरम् आरभ्य दीवोनं यावत् मेदिवायाः
सर्व्वसमभूमिं, तथा अम्मोनवंशस्य सीमां यावत् हिष्वोणनिवासिन १०
इमोरीयाणां सीहोननाम्नो महीपतेः समस्तं नगरं, तथा गिलियदं ११
गिशूरीयाणां माखाथीयानाञ्च जनपदं सर्व्वं हर्म्मोणपर्व्वतं सल्खां
यावत् सर्व्ववाशानम् अर्थाद् अस्तारोत इद्रिय्याञ्च निवसतो वृहत्काय- १२
वंशाद् अवशिष्टस्य ओगनाम्नो वाशानीयराजस्य राष्ट्रञ्च दत्तवान्।
यतो मूसा एतान् प्रहृत्य दूरीकृतवान्। तथापीस्रायेल्वंशो गिशूरीयान् १३
माखाथीयांश्च न दूरीचकार तेन गिशूरीया माखाथीयाश्चाद्यापीस्रा-
येल्वंशस्य मध्ये वसन्ति। स लेवेर्वंशाय काञ्चन भोग्यभूमिं नाददत् १४
परमेश्वरस्याज्ञानुसारेणेस्रायेलः प्रभोः परमेश्वरस्य वह्निकृतोपहारस्तस्य
भोग्यांशो बभूव।

तस्मिन् समये रूवेणवंशीयानां परिजनानुसारेण मूसास्तेभ्यो भोग्यं १५
देशं दत्तवान्। तेषां देशस्य निर्णयोयम् अर्णोनसरितस्तटस्थम् अरो- १६
येरम् आरभ्य सरितो मध्यस्थितं नगरं मेदिवायाः समीपस्था समस्तसम-
भूमिस्तथा हिष्वोणं समभूमौ स्थितानि तस्य समस्तनगराणि दीवोनं १७
वामोत्-वालं वैत्-वाल्-मियोनं यहसं किदेमोतं मेफातं किरियाथयिमं १८
सिव्मा निम्नभूमेः पर्व्वतस्थं सेरतनगरं वैत्पियोरम् अस्दोत्-पिस्गा २०
वैत्-यिशीमोतं समभूमौ स्थितानि समस्तनगराणि हिष्वोणनिवासिन २१
इमोरीयराजस्य सीहोनस्य निखिलो जनपदः, यतो मूसास्तम् इविं रेकमं
सूरं हूरं रेवाञ्च सीहोनस्य सेनान्यस्तद्देशनिवासिन एतान् मिदियनीय-

२२ पतीन् विनाशयामास। इस्रायेल्वंशः खड्गधारेण यान् अवधीत्, तेषां
२३ मध्यगतं बियोरपुत्रं मायाविनं बिलियममपि जघान । अपरं यर्द्दननदी
तस्याः प्रदेशश्च रूवेणवंशस्य सीमासीत्, इति परिजनानुसाराद् रूवेण-
वंशेन भोग्यस्य देशस्य नगराणां ग्रामाणाञ्च निर्णयः ।

२४ अनन्तरं मूसा गादवंशस्य परिजनानुसारेण गादवंशायांशमेकं
२५ दत्तवान्। तस्य निर्णयोऽयं यासेरं गिलियदस्य सर्व्वनगराणि रब्बायाः
२६ सम्मुखस्थम् अरोयेरं यावद् अम्मोनवंशस्यार्द्धदेशश्च, अपरं हिष्बोणस्य
रामतमिस्पाश्च मध्यस्थानं बिटोनीमञ्च महनयिमस्य दिबीरसीमायाश्च
२७ मध्यस्थानं, समभूमिस्थबैथारमं बैत्निम्रा सुक्कोतं साफोनं हिष्बोणी-
यसीहोनाख्यन्टपस्यापरो जनपदः, अपरं यर्द्दनपारे पूर्व्वदिशि स्थितं
२८ किन्नेरतड़ागस्य तटं यावद् यर्द्दननदी तस्याः प्रदेशश्च। इति स्वपरिजना-
नुसाराद् गादवंशेन भोग्यस्य देशस्य नगराणां ग्रामाणाञ्च निर्णयः ।

२९ अनन्तरं मूसा मिनशेरर्द्धवंशस्य परिजनानुसारात् मिनशेरर्द्धवंशायां-
३० शमेकं दत्तवान् । तस्य निर्णयोयं महनयिमम् आरभ्य कृत्स्नो बाशान-
देशो बाशानीयराजस्य ओगस्य सर्व्वजनपदो बाशानस्थानि सर्व्वाणि
३१ यायीरनगराणि अर्थात् षष्टिनगराणि, अपरं गिलियदस्यार्द्धम् ओग-
राजस्य अस्तारोतम् इद्रियी च बाशानस्थे एते राजपुर्य्यौ । एतानि
मिनशिः पुत्रस्य माखीरस्य वंशायार्थात् परिजनानुसारेण माखीरस्यार्द्ध-
३२ वंशाय दत्तानि । इति यर्द्दनस्य पूर्व्वपारे यिरीहोः समीपे मोयाब-
३३ प्रान्तरे मूससांशीकृतानां देशानां निर्णयः। स मूसा लेविवंशाय कामपि
भूमिं भोगार्थं नाददात्, इस्रायेलः प्रभुः परमेश्वरस्तान् प्रति स्वीय-
वाक्यानुसारेण स्वयं तेषां भोग्यांशस्वरूपो बभूव ।

---

१४ चतुर्दशोऽध्यायः ।

१ सार्द्धनववंशानां ६ कालेबस्य च भोग्यांशस्य कथनं ।

१ अपरं किनान्देशे इस्रायेलवंशै र्भोग्यां यां यां भूमिम् इलियासरो
२ याजको नूनपुत्रो यिहोशूय इस्रायेल्वंशानां कुलमुख्याश्च मूससा दत्तया
परमेश्वरस्याज्ञया गुटिकापातेन सार्द्धनववंशमध्य अंशीचक्रुस्तासां
३ भूमीनां निर्णयोयं । यर्द्दनः पारे मूसाः सार्द्धवंशद्वयाय भोग्यभूमिं
४ दत्तवान् किन्तु लेविवंशाय तेषां मध्ये भोग्यभूमिं न दत्तवान्। यूषफ-

वंशीयानां मिनशेरिफ्रयिमस्य च द्वौ वंशावास्तां, अपरं लेवे र्वंशाय
वासनगराणि पश्वादिसंस्थानार्थं तेषां परिसरांश्च विना कोप्यंशो न
दत्तः। परमेश्वरो मूससं यदादिशत् तदेवाचरन्त इस्रायेलीयलोकाः ५
स्वेषां मध्ये देशं विभज्य जगृहुः।

तस्मिन् समये यिहूदावंशे गिल्गलि यिहोशूयस्य समीपमागते ६
किनसीययिफुन्नेः पुत्रः कालेवस्तं जगाद परमेश्वरस्त्वाम् माञ्चाधि
कादेशवर्णेये स्वसेवकं मूससं यद्वाक्यम् अवदत् तत् त्वं ज्ञातोऽसि। मम ७
चत्वारिंशद् वर्षवयःसमये परमेश्वरस्य सेवको मूसा देशं निरीक्षितुं
कादेशवर्णेयात् मां प्रैषयत्। तेनाहं तस्य समीपम् आगत्य यथाबुद्धि
वार्त्ताम् उक्तवान्। मम सहगामिनो भ्रातरो लोकानां मनांसि ८
विषण्णानि कृतवन्तः किन्त्वहं सम्पूर्णरूपेण स्वप्रभोः परमेश्वरस्यानु-
गतोऽतिष्ठं। इति कारणात् मूसास्तस्मिन् दिने शपथं कुर्व्वन् अकथयत्, ९
यस्या भूमेरुपरि तव पादार्पणं जातं सा त्वया तव वंशेन च सदा भोग्या
भविष्यति यतस्त्वं सम्पूर्णरूपेण मम प्रभोः परमेश्वरस्यानुगतो विद्यसे।
इदानीं पश्य, इस्रायेल्वंशस्य प्रान्तरेण गमनस्य यस्मिन् समये पर- १०
मेश्वरो मूससं तां वाचमवदत् तमारभ्य परमेश्वरः स्ववाक्यानुसारेण
पञ्चचत्वारिंशद्वत्सरान् मां जीवन्तं रक्षितवान् अद्याहं पञ्चाशीति-
वर्षवयस्कोऽस्मि। मूसा यस्मिन् दिने मां प्रेषितवान् तस्मिन् दिने ११
मम यद् बलम् आसीत्, तदेव बलम् अधुनापि ममास्ते, युद्धं कर्त्तुम्
अन्तर्वहिर्गमनागमनं कर्त्तुञ्च मम तदानीं यादृशी शक्तिरासीद् इदा-
नीमपि तादृश्यास्ते। अतः कारणात् तस्मिन् दिवसे परमेश्वरो यं गिरि- १२
मधि कथितवान् स एष पर्व्वतो मह्यं दीयतां। अनाकीयास्तत्र स्थाने
तिष्ठन्ति तेषां नगराणि वृहन्ति प्राचीरवेष्टितानि चेति तस्मिन् दिने
त्वयाश्रावि किन्तु परमेश्वरो यदि मया सार्द्धं तिष्ठेत् तर्हि परमेश्वरस्य
वचनानुसारेण तानहं वहिः करिष्यामि। ततो यिहोशूयस्तस्मा आशिषं १३
ददौ, अपरं स यिफुन्नेः सुतेन कालेवेन भोग्यमंशं हिव्रोणं तस्मै ददौ।
इत्थं हिव्रोणम् अद्यापि किनसीययिफुन्नेः सुतस्य कालेवस्य वंशभोग्या १४
भूमिरास्ते, यतः स सम्पूर्णत्वेनेस्रायेलः प्रभोः परमेश्वरस्यानुगत आसीत्।
पूर्व्वं तस्य हिव्रोणस्य नाम किरियथर्वम् आसीत् सोऽर्व्वोऽनाकीयानां १५
मध्ये मुख्य एको मानव आसीत्। पश्चाद् देशे रणस्य विरामो बभूव।

१५ पञ्चदशोऽध्यायः।

१ यिहूदावंशस्य सीमानिर्णयः १३ हिब्रोणं जित्वा कालेवस्याधिकारप्राप्तिः १६ दिवीरं जित्वा कालेवस्य दुहितृप्रदातुरत्नीयेलस्य कथनं २० यिहूदावंशस्य देशान्तःपातिनगराणां निर्णयो यिवूषीयाणां पराजयकथनञ्च।

१ अपरं स्वस्वपरिजनानुसारेण यिहूदावंशीयानाम् अंशस्य सीमा-
निर्णयोऽयं, दक्षिणदिशि इदोमदेशस्य पार्श्वस्थं सीन्प्रान्तरं तेषां दक्षिण-
२ प्रान्त आसीत्। तेषां दक्षिणसीमा लवणजलधेः प्रान्तमर्थाद् दक्षिणदि-
३ गभिमुखं खातम् आरभ्य दक्षिणदिशं प्रति माले-अक्रब्बीमनाम्ना
ऊर्द्धगामिवर्त्मना सीनपर्य्यन्तं याति, अपरं कादेशवर्णेयस्य दक्षिण-
पार्श्वेन हिस्रोनं यावद् गत्वा तत ऊर्द्धगामिनी भूत्वा अदरं गत्वा
४ वक्रमार्गेण कर्कां प्रगच्छति। अनन्तरं अस्मोनं प्रति गत्वा मिसर-
सरिता समुद्रं निर्गच्छति स एव तस्याः सीमाया अन्तः। इयं
५ युष्माकं दक्षिणसीमा भविष्यति। अपरं यर्द्दनस्य शेषं यावत् लवणज-
लधिः पूर्व्वसीमा। अपरम् उत्तरदिशः सीमेयं, यर्द्दनस्य प्रान्तग्राहि-
६ खातम् आरभ्य सा सीमा वैथग्लां प्रति गत्वा वैथरावाया उत्तर-
७ पार्श्वेन रूवेणवंशीयवोहनस्य पाषाणं यावद् गच्छति। अनन्तरं सा
सीमा आखोरोपत्यकया दिवीरं गत्वा ततः सरितो दक्षिणपारस्थस्य
अदुम्मीमस्योर्द्धगामिनः पथः सम्मुखस्थं गिल्गलं प्रति मुखं कृत्वा उत्तर-
दिशं गच्छति, ततःपरम् एनशेमशनामकं तोयं प्रति चलति, तस्यान्त-
८ भाग एनरोगेलम् अस्ति। सा सीमा विनहिन्नोमनामिकोपत्यकया प्रगत्य
यिवूषस्यार्थाद् यिरूशालमस्य दक्षिणपार्श्वं गच्छति, अनन्तरं सा सीमा
पश्चिमे हिन्नोमोपत्यकाभिमुखस्य रिफायिमनामिकायाः समभूमेरुत्तर-
९ प्रान्ते स्थितस्य पर्व्वतस्य शृङ्गं गच्छति। अनन्तरं सा सीमा तस्य पर्व्वतस्य
शिखरात् निप्तोहस्तोयस्य प्रस्रवणं यावद् वक्रीभूयेफ्रोणपर्व्वतस्थनगराणि
प्राप्नोति, अपरं सा सीमा वालानगरेणार्थात् किरियतयियारीमनगरे-
१० णाकृष्यते। पश्चात् सा सीमा वालातः पश्चिमदिशि वक्रीभूय सेयीर-
पर्व्वतेन यियारीमपर्व्वतस्योत्तरपार्श्वेनार्थात् किषालेन वैत्शेमशं प्राप्य
११ तिम्नायां प्रगच्छति। अपरं सा सीमा इक्रोणस्योत्तरपार्श्वं गच्छति, पश्चात्
सा सीमा शिक्रोणं यावद् विस्तार्य्यते, अपरं वालापर्व्वतं गत्वा यब्नीयेलं
१२ यावद् गच्छति, समुद्रश्च तस्याः सीमायाः अन्तो भवति। अपरं पश्चिम-

सीमा महासमुद्रस्तदीयप्रदेशश्च, इति परिजनानुसारेण यिहूदावंशस्य
चतुर्दिक्स्थितसीमानिर्णयः समाप्तः।

अपरं यिहोशूयं प्रति परमेश्वरस्याज्ञया यिहूदावंशस्य मध्याद् अना- १३
कस्य पितुरर्ब्वस्य नाम्ना विख्यातं किरियथर्व्वमर्थात् हिब्रोणनगरं यिफुन्नेः
सुताय कालेवायादायि। अपरं कालेवस्तस्माद् अनाकीयवीरत्रयम् १४
अर्थाद् अनाकस्य शेशय-अहीमान-तल्मयनाम्नः सुतान् दूरीचकार।
अनन्तरं तस्माद् दिवीरनिवासिनां प्रतिकूलं जगाम, पूर्व्वं तद् दिवीरं १५
किरियतसेफरनाम्ना विख्यातम् आसीत्।

तस्मिन् समये कालेवो जगाद यः किरियतसेफरम् आक्रम्य हस्तगतं १६
करिष्यति, अहम् अक्षानामिकां निजकन्यां तं विवाहयिष्यामि। ततः १७
कालेवस्य भ्राता यः किनसस्तस्य सुतेनात्नियेलेन तन्नगरे हस्तगते कृते स
अक्षानामिकां निजकन्यां तं विवाहयामास। अपरं भर्त्तुः समीपम् आग- १८
मनकाले सा कन्या स्वपितुः सकाशाद् एकं क्षेत्रं याचितुं भर्त्तुरनुमतिं
ययाचे, तदा तस्यां निजगर्द्दभाद् अवरूढायां कालेवस्तां पप्रच्छ त्वं किं
याचसे? सा प्रत्यवदत्, भवान् मह्यम् आशिषं ददातु, यतो दक्षिणस्यां १९
भूमिं मह्यम् अददात्, इदानीं तोयप्रस्रवणानि मह्यं ददातु, ततः स
उपरिस्थानि अधःस्थानि च प्रस्रवणानि तस्यै दत्तवान्।

अपरं स्वस्ववंशानुसारेण यिहूदावंशेन भोग्याया भूमेर्निर्णयोयं। २०
दक्षिणदिशि इदोमः सीमायाः समीपस्थानि यिहूदावंशस्य प्रान्तस्थितानि २१
नगराणीमानि, कब्सेलम् एदरं यागुरं कीना दीमोना अदादा केदशं २२
हात्सोरं यित्नं सीफं टेलमं वालोतं हात्सोरहदत्ता किरियोतं २५
हिष्रोणं वा हात्सोरम् अमामं शिमा मोलादा हत्सरगद्दा हिष्मोणं २७
बैत्पेलटं हत्सरशियालं बेर्शेवा बिषियोथिया वाला इयीमम् एत्समम् २९
इल्तोलदं किषीलं हर्म्मा सिक्लगं मद्मन्ना सन्सन्ना लिवायोतं ३१
शिल्हीमम् ऐनं रिम्मोणञ्च, इमान्यूनत्रिंशन्नगराणि तेषां ग्रामाश्च।
अपरं समभूमौ इष्टायोलं सरियम् अस्ना सानोहम् ऐनगन्नीमं तपूहं ३३
ऐनमं यर्मूतम् अदुल्लमं सोखुः असेका शारयिमम् अदीथयिमं गिदेरा ३६
गिदेरोथयिमञ्च, इमानि चतुर्दश नगराणि तेषां ग्रामाश्च। अपरं ३७
सिननं हदाशा मिग्दलगादं दिलियनं मिस्पी यक्तेलं लाखीशं वस्कतम् ३९
इग्लोनं कब्बोनं लहमषं कित्लीषं गिदेरोतं बैत्दागोनं नयमा मक्केदा ४१
च, इमानि षोडश नगराणि तेषां ग्रामाश्च। तथा लिब्ना एथरम् ४२

४४ आश्नं यिप्तहम् अश्ना नित्सीवं कियीला अक्षीवं मारेशा च, इमानि
४५ नव नगराणि तेषां ग्रामाश्च। अपरम् इक्रोणं तस्य शाखानगराणि
४६ ग्रामाश्च। इक्रोणमारभ्य जलधिं यावद् अस्दोदस्य समीपस्थः प्रदेशः
४७ सर्व्वे ग्रामाश्च। अपरम् अस्दोदं तदीयशाखानगराणि ग्रामाश्च, असा
मिसरसरितं यावद् तदीयशाखानगराणि ग्रामाश्च, महाजलधिश्च
सीमासीत्।

४८ पर्व्वते शामीरं यत्तीरं सोखः दन्ना किरियतसन्ना अर्थाद् दिवीरम्
५१ आनवम् इष्टिमोयम् आनिमं गोशनं होलोनं गिलुश्च, इमान्येकादश
५२ नगराणि तेषां ग्रामाश्च। अपरम् अरवं दूमा इशियनं यानूमं वैत्तपूहम्
५४ अफेका जुम्टा किरियथर्व्वमर्थात् हिब्रोणं सीयोरञ्च, इमानि नवनग-
५६ राणि तेषां ग्रामाश्च। अपरं मायोनं कर्म्मिलं सीफं यूटा यिषियेलं यग्-
५७ दियामं सानोहं कयिनं गिबिया तिम्ना च, इमानि दश नगराणि तेषां
५९ ग्रामाश्च। अपरं हल्हूलं वैत्सूरं गिदोरं मारतं वैथनोतम् इल्तिकोनञ्च,
६० इमानि षट् नगराणि तेषां ग्रामाश्च। अपरं किरियतवालम् अर्थात्
किरियतयियारीमं रब्बा च, इमे द्वे नगरे तयो ग्रामाश्च।

६१ प्रान्तरे वैथरावा मिद्दीनं सिकाखा निव्शनं लवणनगरम् ऐनगिदी
६२ च, इमानि षट् नगराणि तेषां ग्रामाश्च। किन्तु यिहूदावंशा यिरूशा-
लमनिवासिनो यिवूषीयान् दूरयितुं न शशाक, ततो हेतो यिवूषीया
अद्यापि यिहूदावंशेन समं यिरूशालमे वसन्ति।

१६ षोडशोऽध्यायः।

१ यूषफवंशस्य सीमानिर्णयः ५ विशेषत इफ्रयिमवंशस्य सीमाया निर्णयः।

१ अपरं यूषफवंशस्यांशो निरणीयत। स यिरीहोः समीपस्थयर्द्दनम्
अर्थात् पूर्व्वदिक्स्थितं यिरीहोस्तोयं यिरीहोर्वैथेलपर्व्वतगामि प्रान्तर-
२ श्चारभ्य वैथेलेन लूसं गच्छति, ततोऽर्कीयसीमाम् अटारोतं गच्छति।
३ अपरं पश्चिमदिशि यफ्लेटीयसीमां प्रति गत्वा नीचस्थवैथोरोणस्य
४ सीमां गेषरञ्च प्राप्नोति तस्यान्तभागो जलधौ विद्यते। यूषफो वंशीयो
मिनशिरिफ्रयिमश्च द्वावंशौ जगृहतुः।

५ स्ववंशानुसारेण इफ्रयिमवंशस्यांशस्य निर्णयोऽयं। तस्य सीमा
६ पूर्व्वदिश्यट्रोताद्दरम् आरभ्योर्द्धस्थवैथोरोणं यावत् प्रगच्छति। ततः

सा सीमा पश्चिमदिशि मिक्मिथाया उत्तरपार्श्वं गच्छति, पश्चात् सा सीमा पूर्व्वदिशि वक्रीभूय तानतशीलुं प्राप्य तेन पूर्व्वदिशि यानोहं
गच्छति। अनन्तरं यानोहतः सा अटारोतं नारताञ्च गच्छति, ततो ७
यिरीहूं प्राप्य यर्द्दनं निर्गच्छति। पश्चात् सा सीमा तपूहात् काना- ८
सरिता पश्चिमदिशं गच्छति तस्या अन्तभागो जलधावास्ते। इति स्वस्व-
वंशानुसारेणेफ्रयिमवंशस्यांशस्य निर्णयः। इफ्रयिमवंशस्य विभिन्नानि ९
कतिपयनगराणि तेषां ग्रामाश्च मिनशिवंशीयानां भूमिमध्य आसन्। ते १०
गेषरवासिनः किनानीयान् न दूरयामासुस्ततस्ते किनानीया अद्यापीफ्र-
यिमवंशेन समं वसन्ति कराधीनाः सन्ति च।

---

१७ सप्तदशोऽध्यायः।

१ मिनशिवंशस्यांशनिर्णयः ७ देशस्य सीमादीनां निर्णयः १४ यूषफवंशं प्रति यिहोशूयस्य कथनं।

अनन्तरं मिनशिवंशस्यांशो निरणीयत यतः स यूषफो ज्येष्ठः सुतः, १
अपरं गिलियदः पिता मिनशेर्ज्येष्ठः सुतो माखीरो योद्धृत्वकारणाद्
गिलियदं वाशानञ्च प्राप। ततः स्वस्ववंशानुसारेण मिनशेरन्यवंशानाम् २
अर्थाद् अवीयेषरवंशस्य हेलकवंशस्य अस्रीयेलवंशस्य शेखमवंशस्य
हेफरवंशस्य शिमीदावंशस्य च एतेषां अंशो निरणीयत, एते स्वस्वपरि-
जनानुसाराद् यूषफसुतस्य मिनशेः पुत्रसन्ताना आसन्। किन्तु मिनशे- ३
र्वृद्धप्रपौत्रस्य माखीरप्रपौत्रस्य गिलियदपौत्रस्य हेफरपुत्रस्य सिलफदस्य
पुंसन्तानो नासीत्, महला-नोया-हग्ला-मिल्का-तिर्सानामिकाः केवलं
कतिपयाः कन्या आसन्। ता इलियासरस्य याजकस्य नूनपुत्रस्य यिहो- ४
शूयस्याधिपानाञ्च साक्षाद् आगत्येदं निवेदयाञ्चक्रिरे, अस्माकं भ्रातृणां
मध्येऽस्मभ्यं भोग्यभूमिं दातुं परमेश्वरो मूससमाज्ञापयत्, ततः स परमे-
श्वरस्याज्ञया भ्रातृणां मध्ये ताभ्योऽपि भोग्यभूमिं दत्तवान्। इत्थं ५
यर्द्दनस्य पारस्थितं गिलियदं वाशानञ्च विना मिनशेर्दशांशा बभूवुः।
यतो मिनशेः पुत्राणां मध्ये तस्य कन्या अपि भोग्यभूमिं प्रापुः, अपरं ६
मिनशेः शेषपुत्रा गिलियददेशं प्रापुः।
मिनशेः सीमा आशेरमारभ्य शिखिमस्य सम्मुखस्थं मिक्मिथतं यावत् ७
प्रगच्छति। सा सीमा दक्षिणदिशं गत्वा ऐनतपूहनिवासिनां देशं

८ गच्छति । मिनशिस्तपूहदेशं प्राप किन्तु मिनशेः सीमास्थं तपूहनगरम्
९ इफ्रयिम्वंशस्य बभूव । सा सीमा कान्नासरितो दक्षिणतटेनावरुह्य
गच्छति, तत्रत्यानीफ्रयिमीयनगराणि मिनशेर्नगराणां मध्ये सन्ति, सरित
१० उत्तरतटं मिनशेः सीमास्ते, अपरं तस्या अन्तभागो जलधावास्ते। दक्षिण-
तटम् इफ्रयिमस्य, उत्तरतटञ्च मिनशे र्भूमिरास्ते, अपरं जलधिस्तस्याः
सीमास्ते । अपरम् उत्तरदिशि सा आशेरेण, पूर्व्वदिशि इषाखरेण
११ युक्तास्ते । अपरम् इषाखराशेरयोर्मध्ये वैत्शानं तस्य ग्रामा यिब्लियमं
तस्य ग्रामा दोरं तस्य ग्रामा ऐन्दोरं तस्य ग्रामास्तानकं तस्य ग्रामा मगि-
१२ द्दस्तस्या ग्रामा अर्थात् प्रदेशत्रयं मिनशेर्वंशायादायि । तथापि मिनशे-
र्वंशस्तन्नगरीयान् जनान् दूरयितुं न शशाक, किनानीयलोकाश्च तस्मिन्नेव
१३ देशे वस्तुं मतिं चक्रुः । अनन्तरम् इस्रायेल्वंशः पराक्रमी भूत्वा किना-
नीयान् करदान् चकार किन्तु निःशेषं न दूरयाञ्चकार ।
१४ अनन्तरं यूषफवंशा यिहोशूयं विज्ञाप्य जगदुः, त्वम् अस्माभि र्भोग्य-
भूम्यर्थम् अस्मभ्यं केवलमेकांशम् एकभागञ्च कुतो दत्तवान्? परमेश्वर-
१५ स्याशीर्व्वादाद् वयमधुना विशालवंशा अभवाम। ततो यिहोशूयस्तान्
अवदत्, यदि यूयं विशालवंशास्तर्हि काननस्थलं यात, एष इफ्रयि-
मपर्व्वतो यदि संङ्कीर्णो बुध्यते तर्हि तस्मिन् स्थाने पिरिषीयाणां
१६ रिफायिमवंशीयानाञ्च देशे निजार्थं द्रुमान् छिन्त । तेन यूषफवंशो
जगाद तस्मिन् पर्व्वतेऽस्माकं समावेशो न जायते, अपरं समभूमिनि-
वासिनां सर्व्वेषां किनानीयानां विशेषतो वैत्शानस्थानां तद्ग्रामस्थानाञ्च
१७ तथा यिष्रियेल्समभूमिवासिनां लौहा रथाः सन्ति। अनन्तरं यिहो-
शूयो यूषफवंशाविफ्रयिमं मिनशिञ्च जगाद यूयं विशालवंशा महा-
१८ पराक्रमाश्च युष्माकं केवलमेकांशो न भविष्यति । किन्तु पर्व्वतो युष्माकं
भविष्यति, तत्र वनमास्ते, तद्वने युष्माभिः छिन्ने तस्याधोभागो युष्माकं
भविष्यति, रथादिबलेन पराक्रान्ताः किनानीया युष्माभिर्दूरयिष्यन्ते।

१८ अष्टादशोऽध्यायः ।

१ आवासस्य स्थापनं २ देशनिर्णयार्थं जनप्रेषणं १० देशविभजनं ११ बिन्यामीनस्यांश-
निर्णयो नगराणां नामानि च ।

१ अनन्तरम् इस्रायेल्वंशस्य सर्व्वे समाजीयाः शीलो मिलित्वा तत्र
स्थाने समाजावासं स्थापयामासुर्देशश्च तेषां सम्मुखे पराजित आसीत् ।

तस्मिन् समये इस्रायेल्वंशस्य मध्ये अलब्धभोग्यभूमयः सप्तवंशा १
अवशिष्टा आसन्। ततो यिहोशूय इस्रायेल्वंशान् बभाषे यूयं स्वेषां २
पैतृकेण प्रभुणा परमेश्वरेण दत्तं देशम् अधिकर्त्तुं गमनाय कियत्कालं
विलम्बं करिष्यथ? एकैकस्य वंशस्य मध्यात् त्रीन् त्रीन् नरान् दत्त मया ४
प्रेषितैस्तैर्गत्वा देशो निरीक्ष्यतां स्वेषां प्राप्तव्यांशानुसारेण कृतस्तस्य
निर्णयो मम समीपम् आनीयताञ्च। ते तं विभज्य सप्तांशं करिष्यन्ति, ५
दक्षिणदिशि स्वसीमायां यिहूदाः स्थास्यति तथोत्तरदिशि स्वसीमायां
यूषफवंशः स्थास्यति। यूयं देशं सप्तांशं कृत्वा निर्णीय तन्निर्णयपत्रं मम ६
समीपम् आनयत, ततोऽहमत्र स्थाने ऽस्माकं प्रभोः परमेश्वरस्य साक्षाद्
युष्मन्निमित्तं गुटिकापातं करिष्यामि। किन्तु युष्माकं मध्ये लेवीयानां ७
कश्चिदंशो न भविष्यति यतः परमेश्वरस्य याजकत्वकर्म्मैव तेषाम् अंश-
स्वरूपं। तथा गादवंशाय रूबेणवंशाय मिनशेरर्द्धवंशाय च परमेश्वरस्य
सेवकेन मूससा यो देशो ऽदायि, ते तत्र यर्द्दनस्य पारे पूर्व्वदिशि स्वैर्भो-
ग्यान् अंशान् गृहीतवन्तः। अनन्तरं तैर्लोकैरुत्थाय यात्राऽकारि यिहो- ८
शूयेन च देशस्य निर्णयपत्रमधि तेभ्यो ऽयमादेशोऽदायि, यूयं गत्वा देशस्य
सर्व्वत्र भ्रमन्तो देशनिर्णयपत्रं लिखित्वा मम समीपं प्रत्यागच्छत ततोऽहम्
अत्र शीलो परमेश्वरस्य साक्षाद् युष्माकं कृते गुटिकापातं करिष्यामि।
अनन्तरं ते लोका गत्वा देशस्य सर्व्वत्र भ्रमन्तस्तं सप्तांशं कृत्वा नग- ९
रादीनां निर्णयं पत्रे लिलिखुः। अनन्तरं शीलुस्थं शिविरं यिहोशूयस्य
समीपं प्रत्याजग्मुः।

ततो यिहोशूयः शीलो परमेश्वरस्य साक्षात् तेषां कृते गुटिकापातं १०
चकार, इत्थं यिहोशूयस्तस्मिन् स्थाने इस्रायेलीयानाम् अंशानुसारेण
देशं विभज्य तेभ्यो ददौ।

स्वपरिजनानुसारेण विन्यामीनवंशस्य भागनिर्णयः, तेषाम् अंशस्य ११
सीमा यिहूदावंशयूषफवंशयोर्मध्ये बभूव। उत्तरप्रान्ते सा सीमा १२
यर्द्दनमारभ्य यिरीहोरुत्तरपार्श्वं गत्वा ततः पर्व्वतस्य मध्येन पश्चिमदिशं
गच्छति बैथावनप्रान्तरे तस्या अन्तभाग आस्ते। अपरं सा सीमा तस्मात् १३
लूसं प्रगत्य बैथेलस्य दक्षिणस्थेन लूसस्य पार्श्वेन गच्छति, तस्माद् अटारो-
ताद्दरं प्रत्यवरुह्य अधःस्थबैथोरोणस्य दक्षिणदिक्स्थं पर्व्वतं प्राप्नोति।
अपरं सा सीमा तस्माद् आकृष्टा दक्षिणगामिनी पश्चिमसीमा जाता १४
बैथोरोणस्य सम्मुखस्थेन पर्व्वतेन दक्षिणदिशं गच्छति किरियतवालम्

अर्थात् किरियतयियारीमनामकं यिहूदावंशस्य नगरं तस्या अन्तभागो
१५ भवति, सा पश्चिमसीमा। अपरं दक्षिणसीमा किरियतयियारीमस्य
प्रान्तमारभ्य पश्चिमदिशं गत्वा निप्तोहस्य प्रस्रवणं यावद् गच्छति।
१६ अपरं सा सीमा रिफायिमसमभूमेरुत्तरदिक्स्थस्य विनहिन्नोमो-
पत्यकायाः सम्मुखस्थस्य पर्व्वतस्य प्रान्तं यावदवरुह्य तथा हिन्नोमोपत्य-
१७ कया यिवूषस्य दक्षिणपार्श्वेनावरुह्य ऐनरोगेलं प्राप्नोति। तत्र सा
उत्तरदिश्याकृष्टीभूय ऐनशेमशं गत्वा अदुम्मीमोर्द्धगामिमार्गस्य सम्मु-
खस्थं गिलीलोतं प्रति निर्गत्य रूवेणवंशीयवोहनस्य पाषाणं यावद्
१८ गच्छति। अपरं सा अरावाया उत्तरपार्श्वेन अरावाख्यं प्रान्तरं याति।
१९ अपरं सा सीमा वैथग्लाया उत्तरपार्श्वं प्राप्नोति। यर्द्दनस्य दक्षिणान्तो-
ऽर्थात् लवणजलधेरुत्तरीयमहाखातं तस्या अन्तभागो भवति, एषा
२० दक्षिणसीमा। अपरं पूर्व्वदिशि यर्द्दनसरिद् विन्यामीनस्य सीमासीत्,
इति स्वस्वपरिजनानुसारेण विन्यामीनवंशेन भोग्याया भूमेश्चतुर्द्दिक्स्थ-
२१ सीमाया निर्णयः। स्वस्वपरिजनानुसारेण विन्यामीनवंशस्य नगराणी-
२२ मानि बभूवुः, यिरीहो वैथग्ला किसीससमभूमि वैथरावा सिमारयिमं
२४ वैथेलम् अव्वीमं पारा अफ्रा कफरम्मोनी अफ्नि गेवा च, इमानि द्वादश
२६ नगराणि तेषां ग्रामाश्च। अपरं गिवियोनं रामतं वेरोतं मिस्पी किफीरा
२७ मोत्सा रेकमं यिर्पेलं तरला सेला एलफं यिवूषम् अर्थाद् यिरूशालमं।
२८ अपरं गिविया किरियतश्च, एतानि चतुर्दश नगराणि तेषां ग्रामाश्च।
इति स्वस्वपरिजनानुसारेण विन्यामीनवंशस्य भूमे र्निर्णयः।

---

१९ ऊनविंशोऽध्यायः।

१ शिमियोनवंशस्य भागः १० सिवूलून्वंशस्य भागः १७ इषाखरवंशस्य भागः २४ आशेरवंशस्य भागः ३२ नप्तालिवंशस्य भागः ४० दानवंशस्य भागः ४१ यिहोशूयस्य भागश्च।

१ अनन्तरं द्वितीयांशः शिमियोनस्यार्थात् स्वस्वपरिजनानुसारेण शिमि-
योनवंशीयानां बभूव। ते भोग्या भूमि र्यिहूदावंशेन भोग्याया भूमे
२ र्मध्य आसीत्। तस्या भूमेर्मध्य इमानि नगराण्यासन् वेर्षेवा शेवा
५ मोलादा हत्सरशूयालं बाला एत्समम् इल्तोलदं विथूलं हर्म्मा सिक्लगं
६ वैतमर्कावोतं हत्सरसुषीमं वैतलिवायोतं सारुहनश्च, इमानि त्रयोदश
७ नगराणि तेषां ग्रामाश्च। अपरम् ऐनं रिम्मोणम् एथरम् आशनश्च,

इमानि चत्वारि नगराणि तेषां ग्रामाश्च। अपरं बालतबेरं दक्षिण- ८
देशस्थं रामतञ्च यावत् तेषां नगराणां चतुर्दिक्स्थाः सर्व्वे ग्रामाः, इति
स्वस्वपरिजनानुसारेण शिमियोनवंशीयांशस्य निर्णयः। शिमियोन- ९
वंशेन भोग्यैषा भूमि र्यिहूदावंशेन भोग्याया भूमे र्मध्य आसीत्, यतो
यिहूदावंशस्यांशस्तस्य प्रयोजनाद् अधिक आसीत्, अतः शिमियोन-
वंशस्तेन भोग्याया भूमेर्मध्ये भोग्यभूमिं लब्धवान्।

अपरं तृतीयांशः स्वस्वपरिजनानुसारेण सिवूलूनवंशस्य बभूव। सा- १०
रीदं यावत् सिवूलूनवंशीयै र्भोग्याया भूमे र्निर्णयोयं। तेषां सीमा पश्चिमं ११
अर्थात् मरियलादिशं गत्वा दव्वेशतं प्राप्य यक्नियामस्य सम्मुखस्थां सरितं
यावद् गच्छति। अपरं सारीदतः पूर्व्वदिशमर्थात् सूर्य्योदयदिशं प्रति १२
परावृत्य किस्लोततावोरस्य सीमां यावद् गच्छति, पश्चाद् दाविरतं
यावत् निर्गत्य याफियम् उत्थाय गच्छति। अपरं तस्मात् पूर्व्वदिशं गत्वा १३
गातहेफरेण एतकात्सीनं यावद् गत्वा रिम्मोणमिथियोरं नेयञ्च यावद्
गच्छति। सा सीमा उत्तरदिशि तत्स्थानं वेष्टयित्वा हन्नाथोनं प्रगच्छति १४
यिप्तहेलोपत्यकायाञ्च तस्या अन्त आस्ते। अपरं तेषां कटतं नहलोलं १५
शिम्रोणं यिदाला वैतलेहमञ्च साकल्यतो द्वादश नगराणि तदीयग्रामा-
श्चासन्। इति स्वस्वपरिजनानुसारात् सिवूलूनवंशेन भोग्याया भूमेस्त- १६
दीयनगराणां ग्रामाणाञ्च निर्णयः।

अनन्तरं चतुर्थांश इषाखरवंशस्यार्थात् स्वस्वपरिजनानुसारेणेषाख- १७
रवंशीयानां बभूव। तेषां भूमे र्निर्णयोयं, यिष्रियेलं किसुल्लोतं शूनेमं १८
हफारयिमं शीयोनम् अनहरतं रव्वीतं किशियोनम् एवसं रेमतम् २१
ऐनगन्नीमम् ऐनहद्दा वैतपत्सेषञ्च। अपरं सा सीमा तावोरं शहत्सीमं २२
वैत्शेमशञ्च यावद् गच्छति, यर्द्दननदी तेषां सीमाया अन्त आस्ते। साक- २३
ल्यतस्तेषां षोडश नगराणि तदीयग्रामाश्च। इति स्वस्वपरिजनानुसाराद्
इषाखरवंशेन भोग्याया भूमेस्तदीयनगराणां ग्रामाणाञ्च निर्णयः।

अनन्तरं पञ्चमांशः स्वस्वपरिजनानुसाराद् आशेरवंशस्य बभूव। २४
तस्य सीमाया निर्णयोयं, हिल्कतं हली वेटनम् अक्षफम् अलम्मेलकम् २६
अमियादं मिशियलञ्च सा सीमा पश्चिमदिशि कर्म्मिलं शीहोरलिव्नाञ्च
प्राप्नोति। अपरं सूर्य्योदयदिशि वैतदागोनं प्रति वक्रीभूय सिवूलूनं २७
यिप्तहेलोपत्यकाञ्च यावत् प्रगच्छति उत्तरदिशि च वैथेमकं न्यीयेलञ्च
प्राप्नोति, ततो वामदिशि काबुलम् इब्रोणं रिहोवं हम्मोनं कान्नाञ्च २८

२९ प्रगत्य मह्लासीदोनं यावद् याति। अनन्तरं सा सीमा वक्रीभूय रामां
सोरनामकं दुराक्रमं नगरञ्च यावद् गच्छति। अपरं सा वक्रीभूय होषां
३० गच्छति, अक्षीवदेशम् आरभ्य समुद्रस्तस्या अन्त आस्ते। अपरम् उम्मा
अफेकं रिहोवञ्च साकल्यतस्तेषां द्वाविंशति नगराणि तदीयग्रामाश्च।
३१ इति स्वस्वपरिजनानुसाराद् आशेरवंशेन भोग्याया भूमेस्तदीयनगराणां
ग्रामाणाञ्च निर्णयः।

३२ अनन्तरं षष्ठांशो नप्तालेरर्थात् स्वस्वपरिजनानुसारेण नप्तालिवंशीयानां
३३ बभूव। तेषां सीमा हेलफं सानन्नीमस्य समीपस्थम् अलोन्वृक्षञ्चा-
रभ्य अदामीनेकवेन यब्नियेलेन च लक्कुमं यावद् गच्छति यर्द्दननदी
३४ च तस्या अन्तभाग आस्ते। अपरं सा सीमा पश्चिमदिशं परावृत्य
अस्नोततावोरं गत्वा तस्माद् ऊक्कोकां प्रगच्छति दक्षिणपार्श्वे सिवूलूनं
पश्चिमपार्श्वे आशेरं सूर्य्योदयदिशि च यर्द्दनसमीपस्थां यिहूदां प्राप्नोति।
३५ अपरं प्राचीरवेष्टितानि नगराणीमानि, सिद्दिमं सेरं हमातरक्कातं
३७ किन्नेरतम् अदामा रामा हात्सोरं केदशम् इद्रियी ऐनहात्सोरं
३८ यिरोणं मिगदलेलं होरेमं बैथनातं बैतशेमशश्च। साकल्यतस्तेषाम्
३९ ऊनविंशति नगराणि तदीयग्रामाश्च। इति स्वस्वपरिजनानुसारात्
नप्तालिवंशेन भोग्याया भूमेस्तदीयनगराणां ग्रामाणाञ्च निर्णयः।

४० अनन्तरं सप्तमांशः स्वस्वपरिजनानुसारेण दानवंशीयानां बभूव।
४१ तै भोग्याया भूमे र्निर्णयोयं, सरियम् इष्टायोलम् ईरशेमशं शालब्बीमम्
४४ अयालोनं यित्ला एलोनं तिम्नाथा इक्रोणम् इल्तिकी गिब्बिथोनं
४६ वालतं यिहूदं विनेविरकं गातरिम्मोणं मेयर्कोनं रक्कोनं याफोः सम्मु-
४७ खस्था सीमा च। दानवंशीयानां सीमा तेषां प्रयोजनाद् अल्पासीत्,
अतो दानवंशीया लेशमस्य प्रतिकूलं योद्धुं गत्वा तन्नगरं वशे चक्रुस्तत्रत्य-
लोकांश्चासिभि र्हत्वा तेषां देशमधिकृत्य तन्मध्य ऊषुः स्वेषां पूर्व्व-
४८ पुरुषस्य दानस्य नामानुसारेण लेशमस्य नाम दानं चक्रुश्च। इति
स्वस्वपरिजनानुसाराद् दान्वंशेन भोग्याया भूमेस्तदीयनगराणां
ग्रामाणाञ्च निर्णयः।

४९ इत्थं स्वस्वसीमानुसारेणाधिकर्त्तुं तैर्द्देशविभजने समापित इस्रायेल्-
५० वंशाः स्वेषां मध्ये नूनसुतेन यिहोशूयेन भोग्यां भूमिं तस्मै ददुः। ते
परमेश्वरस्याज्ञया तेन याचितं नगरम् अर्थाद् इफ्रयिमपर्व्वतस्थं तिम्नत-
५१ सेरहं तस्मै ददुः, ततः स तन्नगरं निर्म्माय तन्मध्य उवास। इत्थम्

इलियासरो याजको नूनसुतो यिहोशूय इस्रायेल्वंशस्याधिपाश्च शीलो परमेश्वरस्य सम्मुखे समाजावासस्य द्वारसमीपे गुटिकापातेन सर्व्वेषाम् अंशान् निर्णीय देशस्य विभजनं समापयामासुः।

२० विंशोऽध्यायः।

१ आश्रयनगराणि निरूपयितुम् ईश्वरस्याज्ञा ७ तेषां निरूपणञ्च।

अनन्तरं परमेश्वरो यिहोशूयं जगाद, त्वम् इस्रायेल्वंशेभ्यः कथय, १
अहं यान्याश्रयनगराण्यधि मूससा युष्मान् आदिष्टवान्, यूयं स्वार्थं २
तानि निरूपयत। तेन यः कश्चिद् हठाद् अज्ञानतो वा नरं हन्ति, स ३
तत्स्थानं पलायितुं शक्ष्यति तानि नगराणि शोणितपातस्य प्रतिफलदातू
रक्षार्थं युष्माकम् आश्रयस्थानानि भविष्यन्ति। अपरं तेषां किमपि नगरं ४
पलायितो हन्ता नगरद्वारस्य विचारस्थान उपतिष्ठन् नगरस्य प्राची-
नानां कर्णगोचरे स्वकार्य्यं ज्ञापयिष्यति, तदा ते तं नगरमध्ये स्वेषां समी-
पमानीय स्वेषां मध्ये वस्तुं स्थानं तस्मै दास्यन्ति। अपरं शोणितप्रति- ५
फलदातरि तस्य पश्चाद् आगते ते तस्य हस्ते तं नरहन्तारं न समर्पयि-
ष्यन्ति यतः स अज्ञानतो निजसमीपवासिनम् अवधीत् पूर्व्वं तं प्रति
द्वेषं नाकरोत्। अतः स यावद् विचारार्थं समाजस्य साक्षात् नोप- ६
तिष्ठति, अर्थात् तत्कालीयप्रधानयाजकस्य मरणं न भवति तावत् स
तस्मिन् नगरे वत्स्यति। अनन्तरं स नरहन्ता स्वं नगरं स्वं गृहञ्च
अर्थाद् यन्नगरात् पलायितस्तत् स्थानं पुनर्यास्यति।

ततस्ते नप्तालिपर्व्वतस्थं गालीलदेशस्थं केदशम् इफ्रायिमपर्व्वतस्थं शिखिमं ७
यिहूदापर्व्वतस्थं किरियथर्व्वञ्चार्थतो हिब्रोणं निरूपयामासुः। तथा पूर्व्व- ८
दिशि यिरीहोः समीपस्ययर्द्दनपारे रूवेणवंशस्य देशमध्ये समभूमौ स्थितं
वेत्सरं गादवंशस्य देशमध्ये गिलियदस्थं रामोतं मिनशिवंशस्य देशमध्ये
वाशानस्थं गोलनञ्च निरूपयामासुः। यः कश्चिद् अज्ञानतो नरं हन्ति ९
स यथा तत्र पलायेत यावच्च समाजस्य समीपे तेन नोपस्थातव्यं तावत्
शोणितप्रतिफलदातुः करेण न हन्येत, तदर्थम् एतानि नगराणीस्रायेलः
समस्तवंशस्य तन्मध्ये प्रवासिनां विदेशीयानाञ्च कृते न्यरूप्यन्त।

२१ एकविंशोऽध्यायः।

१ लेविवंशस्य कृते नगरनिरूपणं ९ हारोणवंशस्य कृते नगरनिरूपणं २० किहातवंशस्य कृते नगरनिरूपणं २७ गेर्शोनवंशस्य कृते नगरनिरूपणं ३४ मिरारिवंशस्य कृते नगरनिरूपणं ४३ विभागस्य समाप्तिश्च।

१ अनन्तरं लेविवंशस्य मुख्यनरा इलियासरस्य याजकस्य नूनसुतस्य
२ यिहोशूयस्येस्रायेल्वंशानां प्राचीनानाञ्च समीपमागमन्। ते किनान-
देशस्थशीलो तान् जगदुः, अस्माकं वासार्थं नगराणि पशूनां कृते
तदीयपरिसरांश्चास्मभ्यं दातुं परमेश्वरो मूससा युष्मान् आज्ञापयत्।
३ तत इस्रायेल्वंशाः परमेश्वरस्याज्ञया स्वेषां भोग्यभूमेर्मध्यात् लेवि-
४ वंशीयेभ्यो निम्नलिखितानि नगराणि तेषां परिसरांश्च ददुः। किहा-
तीयवंशस्यांशस्य निर्णयोयं। लेवीयानां मध्ये याजकहारोणस्य वंशो
गुटिकापातेन यिहूदाशिमियोनविन्यामीनवंशेभ्यस्त्रयोदश नगराणि लेभे।
५ किहातस्यान्यवंशो गुटिकापातेन इफ्रयिमदानवंशाभ्यां मिनशिवंश-
६ स्यार्द्धाच्च दश नगराणि लेभे। गेर्शोनवंशो गुटिकापातेन इषाखराशेर-
नप्तालिवंशेभ्यो वाशानस्थात् मिनशिवंशस्यार्द्धाच्च त्रयोदश नगराणि लेभे।
७ मिरारिवंशश्च स्वस्वपरिजनानुसाराद् गुटिकापातेन रूबेणगादसिबू-
८ लूनवंशेभ्यो द्वादशनगराणि लेभे। परमेश्वरो मूससा यथादिष्टवान्
तथेस्रायेल्वंशा निम्नलिखितानि नगराणि तेषां परिसरांश्च ददुः।
९ ते यिहूदावंशस्य शिमियोनवंशस्य च भूम्या एतानि वक्ष्यमाण-
१० नगराणि ददुः। तानि लेविवंशीयानां मध्ये किहातीयवंशोद्भवानां
हारोणसन्तानानां बभूवुः, यतस्तेषां प्रथमांश आसीत्। अनाकस्य
११ पितुरर्बस्य नगरम् अर्थाद् यिहूदापर्व्वतस्थं हिब्रोणनगरं तस्य चतु-
१२ र्दिक्स्थः परिसरश्च तेभ्योऽदायि। किन्तु तस्य नगरस्य क्षेत्रं तस्य
१३ ग्रामाश्च वंशभोग्यभूम्यर्थं यिफुन्नेः सुताय कालेवाय दत्ताः। अतो याजक-
हारोणस्य सन्तानेभ्य इमानि नगराणि दत्तानि। नरहन्तुराश्रयनगरं
१४ हिब्रोणं तस्य परिसरश्च लिब्ना तस्याः परिसरश्च, यत्तीरं तस्य
१५ परिसरश्च, इष्टिमोयं तस्य परिसरश्च, होलोनं तस्य परिसरश्च दिवीरं
१६ तस्य परिसरश्च, ऐनं तस्य परिसरश्च युटा तस्याः परिसरश्च वैतशेमशं
तस्य परिसरश्च, अनयोर्द्वयोर्वंशयो भूमिमध्याद् एतानि नव नगराणि।
१७ अपरं विन्यामीनवंशस्य भूमिमध्याद् गिबियोनं तस्य परिसरश्च, गेवा
१८ तस्याः परिसरश्च, अनाथोतं तस्य परिसरश्च, अल्मोनं तस्य परिसरश्च,

एतानि चत्वारि नगराणि। साकल्येन त्रयोदश नगराणि तदीयपरि- १९
सराश्च हारोणवंशीययाजकानां बभूवुः।

अपरं किहातवंशीयलेवीयेभ्योऽर्थात् किहातवंशस्य शेषलोकेभ्य इफ्र- २०
यिम्वंशस्य भूमिमध्यात् कतिपयनगराणि दत्तानि। तानीमानि, नर- २१
हन्तुराश्रयनगरम् इफ्रयिमपर्वतस्थं शिखिमं तस्य परिसरश्च, गेषरं
तस्य परिसरश्च, किव्सयिमं तस्य परिसरश्च, बैथोरोणं तस्य परिस- २२
रश्च, एतानि चत्वारि नगराणि। अपरं दानवंशस्य भूमिमध्याद् २३
इल्तिकी तस्याः परिसरश्च गिब्बिथोनं तस्य परिसरश्च, अयालोनं तस्य २४
परिसरश्च गातरिम्मोणं तस्य परिसरश्च,एतानि चत्वारि नगराणि।
अपरं मिनशेरर्द्धवंशस्य भूमिमध्यात् तानकं तस्य परिसरश्च गातरि- २५
म्मोणं तस्य परिसरश्च, एते द्वे नगरे। साकल्येन दश नगराणि तेषां २६
परिसरश्च किहातीयशेषवंशस्य बभूवुः।

अनन्तरं स्वस्वपरिजनानुसाराद् गेर्शोनवंशीयेभ्यो लेवीयेभ्य इमानि २७
नगराणि दत्तानि, मिनशेरर्द्धवंशस्य भूमिमध्यात् नरहन्तुराश्रयनगरं
वाशानस्थं गोलनं तस्य परिसरश्च विष्टिरा तस्याः परिसरश्च, एते द्वे
नगरे। अपरम् इषाखरवंशस्य भूमिमध्यात् किशियोनं तस्य परिसरश्च २८
दाबिरतं तस्य परिसरश्च, यर्म्मूतं तस्य परिसरश्च, ऐनगन्नीमं तस्य २९
परिसरश्च, एतानि चत्वारि नगराणि। अपरम् आशेरवंशस्य भूमि- ३०
मध्यात् मिशियलं तस्य परिसरश्च अब्दोनं तस्य परिसरश्च हिलकतं ३१
तस्य परिसरश्च रिहोवं तस्य परिसरश्च, इमानि चत्वारि नगराणि।
अपरं नप्तालिवंशस्य भूमिमध्यात् नरहन्तुराश्रयनगरं गालीलस्थं केदशं ३२
तस्य परिसरश्च हम्मोतं तस्य परिसरश्च दोरं तस्य परिसरश्च कर्त्तनं
तस्य परिसरश्च, एतानि त्रीणि नगराणि। साकल्येन त्रयोदश नगराणि ३३
तेषां परिसराश्च स्वस्वपरिजनानुसारेण गेर्शोनवंशस्य बभूवुः।

अनन्तरं स्वस्वपरिजनानुसारात् मिरारिवंशीयेभ्योऽर्थाद् अवशिष्ट- ३४
लेविवंशीयेभ्य इमानि नगराणि दत्तानि। सिबूलूनवंशस्य भूमिमध्याद्
यग्नियामं तस्य परिसरश्च कार्त्ता तस्याः परिसरश्च, दिम्ना तस्याः परि- ३५
सरश्च, नहलोलं तस्य परिसरश्च, एतानि चत्वारि नगराणि। अपरं ३६
रूवेणवंशस्य भूमिमध्याद् बेत्सरं तस्य परिसरश्च यहसं तस्य परिसरश्च
किदेमोतं तस्य परिसरश्च मेफातं तस्य परिसरश्च, एतानि चत्वारि नग- ३७
राणि। अपरं गादवंशस्य भूमिमध्यात् नरहन्तुराश्रयनगरं गिलियदस्थं ३८

३९ रामोतं तस्य परिसरञ्च मह्ननयिमं तस्य परिसरञ्च हिष्वोणं तस्य
४० परिसरञ्च, यासेरं तस्य परिसरञ्च, चत्वार्य्येतानि नगराणि। साकल्येन
द्वादश नगराणि स्वस्वपरिजनानुसारात् मिरारिवंशेनार्थाद् अवशिष्ट-
४१ लेविवंशीयैर्लब्धानि। साकल्येनेस्रायेल्वंशीयानां भूमिमध्ये लेविवंशी-
४२ यानाम् अष्टचत्वारिंशन्नगराणि सपरिसराणि बभूवुः। तेषां सर्व्वेषां
नगराणां मध्य एकैकस्य चतुर्दिक्षु तदीयपरिसर आसीत्।
४३ इत्थं परमेश्वर इस्रायेलवंशीयानां पूर्व्वपुरुषाणां समीपे यं देशम् अधि
शपथमकरोत् तं कृत्स्नं देशं स तेभ्यो ददौ, अपरं ते तमधिकृत्य तत्र वासं
४४ चक्रुः। परमेश्वरस्तेषां पूर्व्वपुरुषाणां समीपे यथा शप्तवान् तथैव चतु-
र्दिक्षु तेभ्यो विश्रामं ददौ, तेषां शत्रूणां मध्ये कोपि तेषां सम्मुखे स्थातुं न
४५ शशाक, परमेश्वरस्तेषां सर्व्वान् रिपून् तेषां हस्तगतान् चकार। इस्रा-
येल्वंशमधि परमेश्वरस्य यति मङ्गलार्थकानि प्रतिश्रुतवचनानि तेषाम्
एकमपि निष्फलं न बभूव, सर्व्वमेव सिषेध।

---

२२ द्वाविंशोऽध्यायः।

१ प्राप्ताशिषः सार्द्धवंशद्वयस्य पारगमनकथनं ९ यर्द्दनतटे वेदिनिर्म्माणं ११ वेद्या वार्त्तां श्रुत्वा असन्तुष्टेस्रायेल्लोकै र्दूतानां प्रेषणं २१ दूतान् प्रति तेषामुत्तरं ३० तान् प्रति पीनिहसस्य कथनं ३२ तेषां प्रतिवचनं श्रुत्वा इस्रायेल्वंशस्य सन्तुष्टिः।

१ अनन्तरं यिहोशूयो रूवेणवंशं गादवंशं मिनशेरर्द्धवंशञ्चाहूय जगाद
२ परमेश्वरस्य सेवको मूसा युष्मान् यद्यदादिशत् तद् युष्माभिः सिद्धम्,
३ अहञ्च युष्मान् यद्यदादिशं युष्माभिस्तत्रापि मनो निहितं। बहुदिन-
मारभ्याद्य यावद् यूयं स्वस्वभ्रातॄन् न त्यक्त्वा स्वप्रभोः परमेश्वरस्याज्ञाः
४ पालयथ। इदानीं युष्माकं प्रभुः परमेश्वरः स्वप्रतिज्ञानुसारेण युष्माकं
भ्रातृभ्यो विश्राममददात् अत इदानीं यूयं स्वस्ववासस्थानम् अर्थात्
परमेश्वरस्य सेवकेन मूससा दत्तं स्वेषां भोग्यं देशं यर्द्दनपारं प्रति
५ गच्छत। अपरं परमेश्वरस्य सेवको मूसा युष्मभ्यं याम् आज्ञां व्यवस्था-
ञ्चोक्तवान् अधुना तदनुसारेणाचरितुं युष्माकं प्रभुपरमेश्वरे प्रेतुं तस्य
सकलमार्गेण गन्तुं तस्याज्ञा ग्रहीतुं तस्मिन् आसक्ता भवितुं सर्व्वान्तः-
६ करणैः सर्व्वप्राणैश्च समं तं सेवितुञ्चातीव यतध्वं। अनन्तरं यिहोशूय-
७ स्तान् आशिषमुक्त्वा विससर्ज ततस्ते स्वस्ववासस्थानं जग्मुः। मूसा मिनशे-
रर्द्धवंशाय वाशाने भूमिं दत्तवान् यिहोशूयश्च तस्यान्यार्द्धवंशाय यर्द्दनस्य

पश्चिमदिशि स्वभ्रातृणां मध्ये भूमिं ददौ, अनन्तरं स्वस्ववासस्थानं प्रति
तेषां विसर्जनकाले यिहोशूयस्तान् आशिषमुक्त्वा जगाद, यूयं पशुरूप्यस्वर्ण- ८
पित्तललोहवस्त्रादीनि प्रचुरधनानि समादाय स्वस्ववासस्थानं पुनर्यात,
यूयं रिपुभ्यो लोठितानि द्रव्याणि स्वस्वभ्रातृभिः सार्द्धं विभज्य गृह्लीत।
ततो रूबेणवंशो गादवंशो मिनशेरर्द्धवंशश्चेस्रायेल्वंशे विसृष्टाः ९
किनानदेशस्थशीलोः प्रतस्थिरे, मूसाः परमेश्वरस्याज्ञया तै र्भोग्यं यं देशं
तेभ्यो दत्तवान् स्वेषां वंशभोग्यं तं गिलियददेशं प्रति यात्रां चक्रिरे।
अनन्तरं किनान्देशस्थं यर्द्दनप्रदेशं प्राप्य रूबेणवंशो गादवंशो मिनशेरर्द्ध- १०
वंशश्च तत्र यर्द्दनस्य समीपे बृहदाकृतिम् एकां वेदिं निर्म्ममिरे। अपरं ११
पश्यत, रूबेणवंशो गादवंशो मिनशेरर्द्धवंशश्च किनानदेशस्य सम्मुखे यर्द्द-
नस्य प्रदेश इस्रायेल्वंशस्य पारयानस्थाने वेदिमेकां निर्म्मितवन्त इति
वच इस्रायेलवंशः शुश्राव। इस्रायेल्वंशेन तस्मिन् श्रुते तेषां प्रतिकूलं १२
योद्धुं गमनार्थं इस्रायेलवंशस्य सर्व्वसमाजः शीलौ मिलितः। अपरं १३
रूबेणवंशस्य गादवंशस्य मिनशेरर्द्धवंशस्य च समीपम् इलियासरस्य
याजकस्य पुत्त्रः पीनिहसस्तेन सार्द्धम् इस्रायेलः समस्तवंशानाम् एकैको १४
ऽधिप इत्थं दशाधिपा इस्रायेल्वंशे गिलियददेशं प्रहिताः, ते ऽधिपा
इस्रायेल्वंशीयसहस्रलोकानां मध्ये स्वस्वपितृवंशस्य मुख्या आसन्।
अनन्तरं ते गिलियददेशे रूबेणवंशस्य गादवंशस्य मिनशेरर्द्धवंशस्य १५
च समीपमागत्य तान् इति वचो जगदुः, परमेश्वरस्य सर्व्वः समाज १६
इति वाचं वदति, यूयम् अद्य परमेश्वरस्य प्रातिकूल्येनाचरितुं यज्ञ-
वेदिनिर्म्माणेन परमेश्वरस्यानुगतेः परावर्त्तमाना इस्रायेल ईश्वरस्य यद्
अपराध्यत, युष्माकं तस्यापराधस्य किं कारणं? परमेश्वरस्य समाजमध्ये १७
येन महामारी जाता यस्माच्च वयम् अद्यापि न परिष्कृतास्तत् पियो-
रीयपापं युष्माभिः किं लघुतरं बुध्यते? इति हेतो र्यूयं किम् अद्य १८
परमेश्वरस्यानुगतेः परावर्त्तध्वे? युष्माभिरद्य परमेश्वरस्य प्रातिकूल्येना-
चरिते श्वः स इस्रायेलवंशस्य सर्व्वसमाजं प्रति क्रुद्धो भविष्यति। युष्माकं १९
वंशभोग्यो देशो यद्यशुचि र्भवति तर्हि पारं गत्वा परमेश्वरस्यावास-
विशिष्टं परमेश्वरेणाधिकृतं देशम् आगत्यास्माकं मध्ये स्वै र्भोग्यां
भूमिं गृह्लीत; किन्त्वस्माकं प्रभोः परमेश्वरस्य यज्ञवेदिं विना स्वेषां
कृते अन्ययज्ञवेद्या निर्म्माणेन परमेश्वरस्य प्रातिकूल्येनास्माकञ्च प्राति-
कूल्येन माचरत। शप्तद्रव्यमधि सेरहसुतेनाखनेनापराद्धे ईश्वरस्य २०

क्रोधः किम् इस्रायेलः सर्व्वसमाजं प्रति प्रकाशितो नाभवत्? इति
कारणात् स मनुष्यः स्वपापेन केवलम् एकाकी विनष्टो नाभवत्।
२१ ततो रूवेणवंशगादवंशमिनशेरर्द्धवंशा इस्रायेल्वंशीयसहस्रपतीन्
२२ प्रतिजगदुः, प्रभूणां प्रभुः परमेश्वरः प्रभूणां प्रभुः परमेश्वर एव तज्जा-
नाति, अपरम् इस्रायेल्वंशोपि तज्ज्ञास्यति, यदि परमेश्वरस्य प्राति-
कूल्याद् अपराधेच्छया वा तत् कर्म्मास्माभिः कृतं तर्हि भवान् अद्यास्मान्
२३ मा क्षमतां। परमेश्वरस्यानुगमनात् परावर्त्तितुं तदुपरि होमं नैवेद्यं
मङ्गलार्थकबलींश्चोत्स्रष्टुं वा यद्येषा यज्ञवेदिरस्माभि र्निरमायि, तर्हि
२४ परमेश्वरः स्वयं तस्य फलं ददातु। तत् कर्म्मास्माभि र्भयात् कृतं,
२५ अर्थाद् इस्रायेलः प्रभुणा परमेश्वरेण सह युष्माकं कः सम्बन्धः? हे
रूवेणवंश हे गादवंश युष्माकमस्माकञ्च मध्ये परमेश्वरो यर्द्दनसरितं
सीमां कृतवान् अतः परमेश्वरे युष्माकं कश्चिदंशो नास्तीति वाचं भा-
विकाले युष्मत्सन्तानाश्चेद् अस्मत्सन्तानान् वदेयुः, चेच्च युष्माकं वंशो-
२६ ऽस्माकं वंशं परमेश्वराद् भीतिं त्याजयेदिति भयाद् वयम् उक्तवन्तः,
वयं वेदिमेकां निर्म्मातुम् उद्यमं करवाम, होमं वा बलिं दातुं तां
२७ निर्म्मामेति न हि। किन्तु होमबलिभि र्मङ्गलार्थकादिबलिभिश्च परमे-
श्वरस्य साक्षात् तं परिचरितुमस्माकम् अधिकार आस्त इति प्रमाणाय
सा वेदि र्युष्माकम् अस्माकञ्च मध्येऽस्मत्तः परत्रास्मद्वंशयोश्च मध्ये
साक्षिणी भविष्यति; तेन परमेश्वरे युष्माकं कोप्यंशो नास्तीति वाचं
२८ भाविकाले युष्माकं वंशोऽस्माकं वंशं वक्तुं न शक्ष्यति। अपरं वयं कथित-
वन्तस्ते यदि भविष्यत्काल अस्मान् अस्माकं वंशं वा वाचमिमां वदेयुः,
तर्हि वयं वदिष्यामः परमेश्वरीययज्ञवेद्याः समानाकृतिं वेदिमिमां
निरीक्षध्वं सा अस्मत्पूर्व्वपुरुषै र्निर्म्मिता होमादिबलिदानार्थिका न हि,
२९ किन्तु सा युष्माकम् अस्माकञ्च मध्ये साक्षिणी विद्यते। वयं यत् स्वेषां
प्रभोः परमेश्वरस्यावासस्य सम्मुखस्थितां तस्य यज्ञवेदिं विना होम-
नैवेद्यबलिदानार्थिकाम् अन्ययज्ञवेदिं निर्म्मातुं परमेश्वरस्यानुगमनाद्
अद्य परावर्त्तमहि परमेश्वरस्य प्रातिकूल्येनाचरेम वा, इत्थं मा भवतु।
३० तदानीं याजकपीनिहसस्तस्य सहवर्त्तिनः समाजाधिपा इस्रायेल-
वंशस्य सहस्राणाम् अधिपाश्च रूवेणवंशेन गादवंशेन मिनशेरर्द्धवंशेन
३१ चोक्तान्येतादृशानि वचांसि निशम्य सन्तुष्टा बभूवुः। याजकेलियासरस्य
सुतः पीनिहसो रूवेणवंशं गादवंशं मिनशेरर्द्धवंशञ्च बभाषे परमेश्वरो-

ऽस्माकं मध्ये विद्यत इति वयमद्याजानाम, यतो युष्माभिः परमेश्वरस्य किमपि नापराद्धम् अपरं यूयम् इदानीम् इस्रायेल्वंशं परमेश्वरस्य कराद् उद्धृतवन्तः।

अनन्तरं याजकेलियासरस्य सुतः पीनिहसोऽधिपाश्च रूबेणवंशस्य ३२
गादवंशस्य च समीपाद् गिलियददेशात् किनानदेशं प्रत्यागत्य इस्रायेल्-
वंशं तेषामुत्तरस्य वार्त्तां जगदुः। तत इस्रायेल्वंशास्तेन तुष्टिं गत्वेस्रायेल- ३३
वंशानाम् ईश्वरस्य धन्यवादं चक्रिरे, रूबेणवंशस्य गादवंशस्य च निवास-
देशं विनाशयितुं युद्धाय गमनस्य पुनः किमपि न बभाषिरे। अनन्तरं ३४
रूबेणवंशो गादवंशश्च तस्या वेद्या एदः (साक्षिणीति) नाम चक्रुः,
यतः परमेश्वर एव प्रभुरस्ति, सास्माकं मध्य एतस्य साक्षिणी भविष्यति।

---

२३ त्रयोविंशोऽध्यायः।

मरणात् पूर्व्वम् इस्रायेलः सर्व्ववंशान् प्रति यिहोशूयस्य कथनं।

इत्थं परमेश्वरेण इस्रायेल्वंशाय तस्य चतुर्दिक्षु स्थितेभ्यः सकल- १
रिपुभ्यो विश्रामे दत्ते बहुकालात् परं यिहोशूयो बहुवयस्को वृद्धो
भूत्वा सर्व्वान् इस्रायेल्वंशान् तेषां प्राचीनान् अधिपान् विचारकान् २
सेनापतींश्चाहूय गदितवान् अहं बहुवयस्को जरनभवं। युष्माकं ३
प्रभुणा परमेश्वरेण युष्माकं साक्षाद् एता जातीः प्रति यद्यत् कर्म्माकारि
तद् युष्माभि र्लोचनैरदर्शि युष्माकं प्रभुः परमेश्वरः स्वयं युष्माकं पक्षीयो
भवन् अयुद्धत्। पश्यत यर्द्दनमारभ्य पश्चिमदिक्स्थं महाजलधिं ४
यावद् या जातयो नयोच्छिन्ना याश्चावशिष्टाः सन्ति, तासां देशान्
अहं युष्माकं वंशानुसारेण गुटिकापातेनांशितवान्। अपरं युष्माकं प्रभुः ५
परमेश्वरो युष्माकं सम्मुखात् तास्ताडयिष्यति युष्माकं दृष्टिगोचराद्
दूरयिष्यति च, अपरं यूयं स्वेषां प्रभोः परमेश्वरस्य वाक्यानुसारेण
तासां देशान् अधिकरिष्यथ। अतो यूयं मूससो व्यवस्थाग्रन्थे लिखितं ६
सकलवाक्यं ग्रहीतुम् आचरितुञ्चातीव दृढमनसो भवत, तस्य दक्षिणं
वामं वा प्रति न परावर्त्तध्वं। अपरं युष्मन्मध्य अवशिष्टानाम् एतद्देशस्थ- ७
जातीयानां मध्ये गतायातं मा कुरुध्वं तेषां देवतानां नामान्युच्चारयन्तः
शपथं न कुरुत तान् मा सेवध्वं मा प्रणमत च। किन्तु यूयम् अद्य ८
यावद् यादृशं कुरुथ, तादृशं स्वप्रभौ परमेश्वरे समासक्तास्तिष्ठत।

९ यतः परमेश्वरो युष्माकं सम्मुखाद् बृहती र्बलवती र्जातीरदूरयत्, अद्य
१० यावद् युष्माकं सम्मुखे स्थातुं केनापि न शक्यते। युष्माकम् एको जनो
रिपूणां सहस्रजनान् विद्रावयिष्यति यतो युष्माकं प्रभुः परमेश्वरो युष्मान्
११ प्रति स्वप्रतिज्ञानुसारेण स्वयं युष्मत्पक्षे योत्स्यति। ततो यूयं स्वेषां क्षते
१२ भृशं सावधानाः सन्तः स्वेषां प्रभौ परमेश्वरे प्रेम कुरुत। नोचेद् यूयं
यदि परावृत्य युष्मन्मध्ये निवासिभिरेतैरवशिष्टै र्भिन्नजातीयैः संयुज्यध्वे
तैश्च सह युष्माकं विवाहसम्बन्धो भवति तेषां समीपं युष्माकं युष्माकञ्च
१३ समीपं तेषां समागमो जायते, तर्हि युष्माभिरिदं निश्चितं ज्ञायतां,
युष्माकं प्रभुः परमेश्वरो युष्माकं सम्मुखात् तान् भिन्नजातीयान् दूरयितुं
निवर्त्तिष्यते, तेन युष्माकं प्रभुणा परमेश्वरेण दत्ताद् अस्माद् उत्तम-
देशाद् यावद् यूयं न लोप्स्यध्वे तावत् ते युष्माकम् उन्माथा जालानि
१४ कटिप्रहारककशा नेत्राणां कण्टकानि च भविष्यन्ति। पश्यत सर्व्वमर्त्त्यै
र्येन मार्गेण गम्यते तेनाद्याहं गच्छामि, अपरं प्रभुणा परमेश्वरेण
युष्मानधि यति मङ्गलसूचकानि वाक्यान्युक्तानि तेषां नैकस्यापि न्यूनत्वम्
अकारि सर्व्वाणि सिद्धानि, एकमपि निष्फलं नाभूत्, एतद् युष्माभिः
१५ सर्व्वान्तःकरणैः सर्व्वबुद्धिभिश्च ज्ञायतां। अतो युष्माकं प्रभुः परमेश्वरो
युष्मानधि यानि मङ्गलदायकानि वाक्यानि जगाद तानि यथा युष्मान्
प्रति सिद्धान्यभवन्, तथा युष्माकं प्रभुणा परमेश्वरेण दत्तादस्माद्
उत्तमदेशाद् युष्माकं निराकरणं यावद् युष्मान् प्रति स्वोक्तं सर्व्वमङ्गल-
१६ सूचकं वाक्यं साधयिष्यते। यदा यूयं स्वप्रभुणा परमेश्वरेणाज्ञापितं
नियमं लङ्घिष्यथ गत्वा चेतरदेवान् सेविष्यध्वे तान् प्रणंस्यथ च तदा
युष्मान् प्रति परमेश्वरस्य क्रोधः प्रज्वलिष्यति, तस्माद् यूयं तेन दत्ताद-
स्माद् उत्तमदेशात् तूर्णं विनंक्ष्यथ।

---

२४ चतुर्विंशोऽध्यायः।

१ सर्व्वेषाम् इस्रायेल्वंशानां यिहोशूयेन मेलनं २ संक्षेपेण तेषां पूर्व्वपुरुषाणां पुरावृत्त-
कथनं १४ तैः सह नियमस्थिरीकरणं २६ नियमस्य साक्षिण एकस्य पाषाणस्य
स्थापनं २९ यिहोशूयस्य मरणं ३२ यूषफस्यास्थ्नां श्मशाने स्थापनम् इलियासरस्य
मरणञ्च।

१ अनन्तरं यिहोशूय इस्रायेलः सकलवंशान् शिखिमे मेलयामास तेषां
प्राचीनान् अधिपतीन् विचारकान् सेनापतींश्चाजुहाव, तेन ते परमे-
श्वरस्य समक्षम् उपतस्थुः।

तदानीं यिहोशूयः सर्व्वलोकान् अवदत्, इस्रायेलः प्रभुः परमेश्वर २
इति वाचं वक्ति, इब्राहीमस्य नाहोरस्य च पिता तेरहो युष्माकमन्ये
पूर्व्वपुरुषाश्च पूर्व्वं फरातसरितः पारे वसन्त इतरदेवान् असेवन्त।
ततोऽहं युष्माकं पूर्व्वपुरुषम् इब्राहीमं तस्याः सरितः पाराद् गृहीत्वा ३
किनानदेशस्य सर्व्वत्र भ्रमयामास, अपरं तं बहुप्रजं कर्त्तुम् इस्हाकं
सुतं अददां। इस्हाकाय च याकूबम् एषौनामकञ्च सुतौ दत्तवान् ४
एषौनामकस्याधिकारार्थं तस्मै सेयीरपर्व्वतं दत्तवान् किन्तु याकूबस्तस्य
वंशश्च मिसर्देशम् अगच्छत्। अनन्तरम् अहं मूससं हारोणञ्च प्रेषित- ५
वान्, अपरं मिस्रीयाणां मध्ये यानि कर्म्माण्यकरवं तैस्तान् अताडयं,
अनन्तरम् अहं युष्मान् वहिष्कृत्यानयं। ततो मया मिसर्देशाद् युष्माकं ६
पितृलोकेषु वहिष्कृतेषु यूयं जलधिं प्राविशत, अपरं मिस्रीयलोका
रथान् अश्वारूढसैन्यानि च गृहीत्वा सूफजलधे र्मध्यं यावद् युष्माकं
पितृलोकानां पश्चाद् अधावन्। ततस्तैः परमेश्वरम् उद्दिश्य प्रार्थनायां ७
कृतायां स मिस्रीयाणां युष्माकञ्च मध्ये तिमिरमस्थापयत् जलधिना तान्
समाच्छादयच्च, मया मिस्रीयान् प्रति यत् कर्म्माकारि तद् युष्माभि र्नेत्रै-
रदर्शि अनन्तरं यूयं बहुकालं प्रान्तर अवसत। ततः परं यर्द्दनः पारवा- ८
सिनाम् इमोरीयाणां देशं युष्मानहं आनयं ततो युष्माभिः सार्द्धं युध्यत्सु
तेषु मया युष्मत्करे समर्पितेषु यूयं तेषां देशम् अध्यकुरुत, इत्यहं
युष्माकं साक्षात् तान् अमारयं। अनन्तरं मोयाबस्य राजा सिप्पोरसुतो ९
बालाक उत्थायेस्रायेल्वंशेन सहायुध्यत्, अपरं लोकं प्रहित्य युष्मान् शप्तुं
वियोरसुतं विलियमं आह्वाययत्। किन्त्वहं विलियमस्य वाक्ये मनो नि- १०
धातुं नैच्छं ततः स युष्मभ्यम् आशिषमददात्, इत्थं मया तस्य कराद् यूयं
मोचिताः। अनन्तरं युष्मासु यर्द्दनसरितः पारमागत्य यिरीहो समुप- ११
स्थितेषु यिरीहोर्लोका इमोरीयाः पिरिषीयाः किनानीयाः हित्तीया
गिर्गाशीया हिव्वीया यिबूषीयाश्च लोका युष्माकं प्रतिकूलमयुध्यन् ततो
ऽहं युष्माकं करेषु तान् समार्पयं। अपरमहं तान् इमोरीयराजद्वया- १२
दीन् युष्माकं सम्मुखाद् दूरयितुं नीलाङ्गक्षिगणं युष्माकं अग्रेऽग्रे प्रहित-
वान् ते युष्माकं खड्गै र्धनुर्भि र्वा पराजितास्तन्नहि। अपरं यूयं यदर्थं श्रमं १३
नाकुरुत तादृशं देशं येषां निर्म्माणं नाकुरुत तादृशानि नगराणि चाहं
युष्मभ्यम् अददां यूयञ्च तन्मध्ये वसथ, अपरं येषां द्राक्षाक्षेत्राणां जित-
वृक्षक्षेत्राणाञ्च रोपणं युष्माभि र्न कृतं तस्य फलं भुज्यते।

१४ इदानीं यूयं परमेश्वराद् बिभीत, सरलान्तःकरणैः सत्यतया च तं
सेवध्वम्, अपरं युष्माकं पूर्व्वपुरुषा महानद्याः पारे मिसरे च यान्
१५ देवान् असेवन्त तान् दूरयित्वा परमेश्वरं सेवध्वं। यदि परमेश्वरस्य
सेवनं युष्माभिरशुभं बुध्यते तर्हि नदीपारे वसनकाले युष्माकं पूर्व्वपुरुषैः
सेवितानां देवानां मध्ये वा युष्माकं निवासदेशीयैरिमोरीयैः सेवितानां
देवानां मध्ये कं सेविष्यध्वे तम् अद्यैव निर्णयत, किन्त्वहं मम परिज-
१६ नाश्च वयं परमेश्वरं सेविष्यामहे। ततो लोकाः प्रतिजगदुः, वयं यद्
१७ इतरदेवान् सेवितुं परमेश्वरं त्यजामस्तन्माभूत्। परमेश्वरोऽस्माकम्
ईश्वरः स एवास्मान् अस्मत्पितृलोकांश्च मिसरस्थदासत्वागाराद्
आनीतवान् अस्माकं दृष्टिगोचरे महाचिह्नानि प्रकाशितवान् अस्माकं
यात्रायाः सर्व्वस्मिन् समये तथा येषां मध्येन वयम् आगतास्तेषां
१८ लोकानां मध्ये ऽस्मान् रक्षितवान्। परमेश्वरो देशनिवासिन इमो-
रीयादीन् सर्व्वलोकान् अस्माकं सम्मुखाद् दूरीकृतवान्, अतो वय-
१९ मपि परमेश्वरं सेविष्यामहे यतः स एवेश्वरः। ततो यिहोशूयो लोकान्
जगाद, परमेश्वरस्य सेवनं युष्माभिरशक्यं भवेत् यतः स पवित्र ईश्वरः
स्वगौरवरक्षक ईश्वरश्च स युष्माकम् आज्ञालङ्घनं पापञ्च न क्षंस्यते।
२० यदि यूयं परमेश्वरं विहायेतरदेवान् सेवध्वे तर्हि स परावृत्य युष्मान्
२१ क्लेक्ष्यति मङ्गले कृते च युष्मान् संहरिष्यति। अनन्तरं लोका यिहोशूयं
२२ अवदन्, नहि, वयं परमेश्वरमेव सेविष्यामहे। यिहोशूयो लोकान्
बभाषे यूयं परमेश्वरं सेवितुं तमेव निरणयत, एतस्मिन् यूयं स्वेषां
प्रतिकूलं स्वयं साक्षिणोऽभूत, ततस्ते जगदुः सत्यं वयं साक्षिणोऽभूम।
२३ अनन्तरं स जगाद, यूयम् अधुना स्वेषां मध्यस्थान् इतरदेवान् दूरयत,
इस्रायेलः प्रभुं परमेश्वरम् उद्दिश्य स्वेषां मनांसि समासादयत च।
२४ अनन्तरं लोका यिहोशूयं बभाषिरे वयं स्वेषां प्रभुं परमेश्वरं सेविष्या-
२५ महे तस्य वाक्यं ग्रहीष्यामश्च। ततो यिहोशूयस्तस्मिन् दिने लोकैः समं
नियमं स्थिरीकृत्य शिखिमे तेषां कृते व्यवस्थां विधिञ्च स्थापयामास।
२६ अनन्तरं यिहोशूयस्तानि वाक्यानि परमेश्वरस्य व्यवस्थाग्रन्थे लिलेख,
अपरं वृहन्तं पाषाणं गृहीत्वा परमेश्वरस्य पवित्रावाससमीप अलोन-
२७ तरोरधः स्थापयामास। अनन्तरं यिहोशूयः सर्व्वान् जनान् जगाद,
पश्यत पाषाणोऽयं अस्मान् प्रति साक्षी भविष्यति यतः परमेश्वरोऽस्मान्
यां यां वाचं अवदत् ता वाचः स श्रुतवान् अतो यूयं यत् स्वेषाम् ईश्वरं

न वञ्चयेत तदर्थं स युष्मान् प्रति साक्षी भविष्यति। अनन्तरं यिहो- २८
शूयः प्रतिजनं स्वस्वभोग्यभूमिं गन्तुं विससर्ज।
इतः परं नूनस्य सुतः परमेश्वरस्य सेवको यिहोशूयो दशाधिकं शतं २९
वर्षाणि जीवित्वा ममार। ततो लोका इफ्रयिमपर्व्वते गाशभृगोरुत्तर- ३०
दिक्स्थिते तस्य स्वीयभूमेः सीम्नि तिम्नतसेरहे तस्य श्मशानं चक्रुः।
तस्य यिहोशूयस्य यावज्जीवनं ये च प्राचीना इस्रायेलः कृते परमेश्वरेण ३१
कृतानि सर्व्वकार्य्याणि वीक्ष्य यिहोशूयस्य मरणात् परम् अजीवन्
तेषामपि यावज्जीवनम् इस्रायेल्वंशः परमेश्वरं सिषेवे।
अनन्तरं यां भूमिं याकूबः शतरूप्यमुद्राभिः शिखिमस्य पितुर्हमोरस्य ३२
वंशाद् अक्रीणात् तन्मध्य इस्रायेल्लोका मिसरत आनीतानि यूषफस्या-
स्थीनि निदधिरे, अपरं तस्यां भूमौ यूषफवंशस्याधिकारो बभूव।
अनन्तरं हारोणस्य सुत इलियासरो ममार, ततो लोका इफ्रयिम- ३३
पर्व्वते तस्य सुताय पीनिहसाय दत्ते प्रत्यन्तपर्व्वते तस्य श्मशानं चक्रुः।

सूचीपत्रं।

Bible O.T. Sanskrit. 1848.

THE

HOLY BIBLE

IN THE

SANSCRIT LANGUAGE.

VOL. II.

CONTAINING THE HISTORICAL BOOKS
FROM JUDGES TO ESTHER.

TRANSLATED OUT OF THE ORIGINAL TONGUES

BY THE

CALCUTTA BAPTIST MISSIONARIES,

WITH NATIVE ASSISTANTS.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS, CIRCULAR ROAD.

1852.

Library of the Theological Seminary,
PRINCETON, N. J.

Presented by Rev. T. S. Wynkoop, 1882

Division BS315
Section S22
Shelf............ *Number* 1848
v.2

इङ्गरेजीयभाषातो व्याकृतः

धर्म्मग्रन्थः

तस्य द्वितीयं खण्डं

यद्वा

यिहोशूयस्य मरणात् परम् इस्रायेलीयलोकानां

पुरावृत्तपुस्तकसङ्ग्रहः ।

कलिकातानगरे

ग्रन्थोऽयं मुद्राङ्कितोऽभूत् ।

शकाब्दा १७७४ इं १८५२

सूचीपत्रं ।

विचारयितृकर्म्माणि।

१ प्रथमोऽध्यायः।

१ यिहूदाशिमियोनयोः कर्म्मकथनं ९ कालेवस्य दुहितुः कथनं १६ नानानगराणां जयकथनं २२ यूषफवंशस्य बैथेलनगरवशीकरणं २७ मिनशिवंशस्य कर्म्मकथनं २९ इफ्रयिमवंशस्य कर्म्मकथनं ३० सिवूलूनवंशस्य कर्म्मकथनं ३१ आशेरवंशस्य कर्म्मकथनं ३३ नप्तालिवंशस्य कर्म्मकथनं ३४ दानवंशस्य कर्म्मकथनं।

१ यिहोशूयस्य मरणात् परम् इस्रायेल्वंशाः परमेश्वरं वाचमिमां
पप्रच्छुः किनानीयानां प्रतिकूलं योद्धुं प्रथमतोऽस्माकं को गमिष्यति ?
२ ततः परमेश्वर उवाच, यिहूदा गच्छतु, पश्यताहं तस्य करे तं देशं समर्प-
३ यामि। अनन्तरं यिहूदाः स्वभ्रातरं शिमियोनं बभाषे, त्वं ममांशे मया
सार्द्धम् आगच्छ, आवां किनानीयैः समं युध्यावः, अपरम् अहमपि
४ तवांशे त्वया समं यास्यामि, ततः शिमियोनस्तेन समं जगाम। अनन्तरं
यिहूदालोकै र्यात्रायां कृतायां परमेश्वरस्तेषां करेषु किनानीयान् पिरि-
षीयांश्च समर्पयाञ्चकार, ततस्ते वेषके तेषां दशसहस्रलोकान् अबधिषुः।
५ अपरम् अदोनीवेषकं वेषके प्राप्य तेन समं युयुधुः, ततस्तैः किनानीयाः
६ पिरिषीयाश्च लोका जघ्निरे। अदोनीवेषकश्च पलायाञ्चक्रे, ततस्ते तस्य
७ पश्चाद् धावन्तस्तं धृत्वा तस्य हस्तपादानाम् अङ्गुष्ठान् चिच्छिदुः।
ततोऽदोनिवेषको जगाद, येषां हस्तपादानाम् अङ्गुष्ठाश्छिन्नास्तादृशाः
सप्ततिर्नृपा मम भोजनासनस्याधः खाद्यं समगृह्णन्, मया यादृशं
कर्म्म कृतम् ईश्वरो मह्यं तदनुरूपं फलमदात्, अनन्तरं स लोकै
८ र्यिरूशालमम् आनीतस्तत्र ममार। अनन्तरं यिहूदावंशो यिरूशाल-
मविरुद्धं युद्धा तद् वशीकृत्य खड्गै र्नागरिकान् जघान नगरञ्च वह्निना
दाहयाञ्चकार।

९ अनन्तरं यिहूदावंशः पर्व्वतदक्षिणदेशसमभूमिषु निवासिभिः किना-
१० नीयैः समं योद्धुम् अवरुरोह। ततो यिहूदावंशो हिब्रोणवासिकिना-
नीयानां विरुद्धं युद्धयात्रां कृत्वा शेशयम् अहिमानं तल्मयञ्च जघान,
११ पूर्व्वं तस्य हिब्रोणस्य नाम किरियथर्व्वमासीत्। अनन्तरं तस्मात् ते

दिवीरनिवासिनां प्रतिकूलं यात्रां चक्रुः, पूर्व्वं दिवीरस्य नाम किरियत-
सेफरमासीत्। ततः कालेवः कथयामास यः कश्चित् किरियतसेफरं १२
जित्वा वशीकरिष्यति तमहम् अक्षानामिकां स्वदुहितरं विवाहयि-
ष्यामि। अनन्तरं कालेवस्य कनिष्ठभ्रातुः किनसस्य पुत्रो ऽत्नीयेलस्तन्नगरं १३
वशीचकार, ततः स तम् अक्षानामिकां स्वदुहितरं विवाहयामास।
अपरं सा कन्या तत्समीपमागता स्वजनकं क्षेत्रं याचितुं भर्त्तुरनुमतिं १४
ययाचे, ततस्तस्यां स्वगर्द्दभाद् अवरूढायां कालेवस्तां पप्रच्छ, त्वं
किमिच्छसि? सा तमब्रवीत् माम् आशिषं वदतु, भवान् मह्यं १५
दक्षिणदिक्स्थितां भूमिं दत्तवान्, इदानीं तोयप्रस्रवणानि मह्यं ददातु,
ततः कालेव ऊर्द्ध्वस्थान्यधःस्थानि च प्रस्रवणानि तस्यै ददौ।

अनन्तरं मूससः श्वशुरस्य केनीयस्य वंशो यिहूदावंशेन समं तालवृक्ष- १६
नगराद् अरादस्य दक्षिणदिक्स्थितं यिहूदाप्रान्तरं जगाम, अपरं तत्
स्थानं गत्वा लोकानां मध्ये वसतिं चकार। अनन्तरं यिहूदावंशः स्वभ्रातुः १७
शिमियोनस्य वंशेन समं गत्वा सिफातवासिकिनानीयान् हत्वा निःशेषम्
उच्छिद्य तस्य नगरस्य नाम हर्म्मा (निःशेषोच्छेदनमिति) चकार।
अपरं यिहूदा असां तस्याः प्रदेशम् अस्किलोनं तस्य प्रदेशम् इक्रोणं तस्य १८
प्रदेशञ्च वशीचकार। परमेश्वरो यिहूदावंशेन समम् आसीत्, अतः १९
कारणात् ते पर्व्वतनिवासिनो दूरयाञ्चक्रुः, किन्तु समभूमिनिवासिनां
लोहनिर्म्मिता रथा आसन्, तस्मात् तान् दवयितुं नाशक्नुवन्। अन- २०
न्तरं ते मूसस आज्ञानुसारेण कालेवाय हिब्रोणं ददुः, स च तस्माद्
अनाकस्य सुतत्रयं दवयामास। किन्तु विन्यामीनवंशो यिरूशालमनि- २१
वासिनो यिवूषीयान् न दवयामास, ततो यिवूषीया जना अद्यापि
यिरूशालमे विन्यामीनवंशेन समं वसन्ति।

अनन्तरं यूषफवंशीया बैथेलस्य प्रतिकूलं यात्रां चक्रुः, तत्र परमेश्व- २२
रस्तैः समम् आसीत्। अनन्तरं यूषफवंशीया बैथेलं निरीक्षितुं दूतान् २३
प्रेषयामासुः पूर्व्वं तस्य बैथेलस्य नाम लूषम् आसीत्। तेन चरास्तस्मान्न- २४
गरात् निर्गच्छन्तं नरमेकं वीक्ष्य तं जगदुः, वयं विनयामहे त्वं नगरस्य
प्रवेशमार्गम् अस्मान् दर्शय ततो वयं त्वाम् अनुग्रहिष्यामः। ततः स तान् २५
नगरस्य प्रवेशमार्गं दर्शयामास ततस्ते खड्गधारैस्तन्नगरमाजघ्नुः किन्तु
तं मनुष्यं सपरिवारं ररक्षुः। अनन्तरं स हित्तीयानां देशं गत्वा नगर- २६
मेकं निर्म्माय तस्य नाम लूषं चकार तदद्यापि तेन नाम्ना विख्यातमास्ते।

२७ अपरं वैतशानं तस्य ग्रामाश्च तानकं तस्य ग्रामाश्च दोरं तस्य ग्रा-
माश्च यिब्लियमं तस्य ग्रामाश्च मगिद्दस्तस्या ग्रामाश्च, एतानि स्थानानि
मिनशेवंशो नाधिचकार, तेन किनानीयास्तस्मिन् देशे वस्तुं मतिं चक्रुः।
२८ अनन्तरम् इस्रायेल्वंशो बलवान् भूत्वा किनानीयान् निःशेषं न
दूरयित्वा कराधीनान् चकार।
२९ अपरम् इफ्रयिमवंशीया गेषरनिवासिनः किनानीयान् न दवया-
मासुस्ततः किनानीया गेषरे तेषां मध्ये न्यवसन्।
३० अपरं सिबूलून्वंशीयाः किट्रोणस्य नह्लोलस्य च निवासिनो न
दवयामासुस्ततः किनानीयास्तेषां मध्ये न्यवसन् कराधीनाश्चाभवन्।
३१ अपरम् आशेरवंशीया अक्कोः सीदोनस्याह्लवस्याक्षीवस्य हिल्वा-
३२ या अफिकस्य रिहोवस्य च निवासिनो न दवयामासुः। तत आशेरीय-
लोका देशनिवासिनः किनानीयान् न दवयित्वा तेषां मध्ये न्यवसन्।
३३ अपरं नप्तालिवंशीया वैतशेमशस्य वैथनातस्य च निवासिनो न दव-
यित्वा देशनिवासिकिनानीयानां मध्ये न्यवसन्, अपरं वैतशेमशस्य
वैथनातस्य च निवासिनस्तेभ्यः करं ददुः।
३४ अपरम् इमोरीयलोका दान्वंशीयान् निम्नभूमिम् अवरोढुं न दत्त्वा
३५ बलेन तान् पर्व्वते रुरुधुः। तत इमोरीया हेरसपर्व्वते अयालोने शाल-
३६ वीमे च न्यवसन्, अपरं यूषफवंशेन जितास्ते करं ददुः। तेषाम् इमो-
रीयाणां सीमा सेलाप्रभृतिस्थानमारभ्य अक्रब्बीमनामानम् ऊर्द्धगामिनं
पन्थानं यावद् आसीत्।

---

२ द्वितीयोऽध्यायः।

१ बोखीमस्थाने लोकानां तिरस्कारिदूतस्य कथनं ६ यिहोशूयस्य मरणात् परं नूतन-
लोकानां जन्मदुष्टतयोः कथनं १४ तान् प्रति परमेश्वरस्य क्रोधदये २० इस्रायेल्-
वंशस्य परीक्षार्थं रचितस्य किनानीयलोकानां शेषस्य कथनं।

१ अनन्तरं परमेश्वरस्य दूतो गिल्गलाद् बोखीममागत्य जगाद, अहं
युष्मान् मिसरदेशाद् आनयं, अपरं यं देशं दातुं युष्माकं पितृणां सन्निधौ
शपथमकरवं तमेव देशं युष्मान् आनयं, अपरमिदम् अकथयं, युष्माभिः
२ सार्द्धं मम यो नियमस्तमहं कदापि न भंक्ष्यामि। यूयमप्येतद्देशनिवा-
सिभिः समं सन्धिं मा कुरुत, तेषां सर्व्वा वेदीश्च भंक्त। किन्तु युष्माभि
३ र्मम वाचि मनांसि न न्यधीयन्त, यूयं किमिदं कर्म्म कृतवन्तः? तस्मादहं

वदामि, युष्माकं सम्मुखाद् एतान् लोकान् न दवयिष्यामि ते युष्माकं
पार्श्वे कण्टकरूपा भविष्यन्ति तेषां सुराश्च युष्माकम् उन्मायरूपा भवि-
ष्यन्ति। तदानीं परमेश्वरस्य दूतेनेस्रायेलः सर्व्ववंशेभ्य इति वाचि कथि- ४
तायां लोका उच्चैःस्वरं रोदितुम् आरेभिरे। ततो हेतोस्ते तस्य ५
स्थानस्य नाम वोखीमं (रोदनस्थानमिति) चक्रुः, अपरं ते तत्र परमेश्वरम्
उद्दिश्य बलीन् ददुः।

यस्मिन् काले यिहोशूय इस्रायेल्वंशं व्यसृजत् तदा देशम् अधि- ६
कर्त्तुम् एकैको जनः स्वेन भोग्यां भूमिं जगाम। तत्कालमारभ्य यिहोशूयस्य ७
यावज्जीवनं तथा ये प्राञ्च इस्रायेल्वंशस्य कृते परमेश्वरेण कृताः सर्व्वा
महतीः क्रिया वीक्ष्य यिहोशूयस्य मरणात् परं जीवन्तोऽतिष्ठन् तेषामपि
यावज्जीवनं लोकाः परमेश्वरं सिषेविरे। अपरं नूनसुतः परमेश्वरस्य ८
सेवको यिहोशूयो दशाधिकशतवर्षवयस्कः सन् ममार। ततो लोका ९
गाशपर्व्वतस्योत्तरपार्श्वे इफ्रयिमपर्व्वतस्थे तिम्नत्हेरसे तस्य भोग्यभूमेः
सीम्नि तस्य श्मशानं चक्रुः। इत्थं तदानीन्तनसर्व्वलोकेष्वपि स्वस्वपितृलो- १०
कानां समीपे संगृहीतेषु परमेश्वरमधीस्रायेल्वंशार्थं तेन कृतां सकल-
क्रियाञ्चाप्यनभिज्ञा नूतनलोका उत्पन्ना बभूवुः। अनन्तरम् इस्रायेल्वंशः ११
परमेश्वरस्य साक्षात् कुकर्म्म वाल्देवानां सेवनञ्च चकार। अपरं यस्तान् १२
मिसर्देशाद् वहिष्कृत्यानिनाय स्वेषां पैतृकं तं प्रभुं परमेश्वरं विहाय
ते स्वेषां चतुर्दिक्स्थितलोकैः सेवितानाम् इतरदेवानाम् अनुगामिनो
बभूवुः, तांश्च प्रणेमुरित्थं परमेश्वरं क्रोधयामासुः। ते परमेश्वरं विहाय १३
वाल्देवान् अस्तारोतदेवीश्च सिषेविरे।

तत इस्रायेल्वंशस्य प्रतिकूलं परमेश्वरस्य क्रोधे प्रज्वलिते स तान् १४
लोठकानां करेषु समर्पयामास, ततस्ते तान् लोठयाञ्चक्रुः, अपरं स तेषां
चतुर्दिक्स्थानां रिपूणां करेषु तान् विचिक्राय ततस्ते रिपूणां सम्मुखे
पुनः स्थिराः स्थातुं न शेकुः। अपरं परमेश्वरस्तानधि यद् वाक्यम् अवदत् १५
यच्च शपथमकरोत् तदनुसारेण ते यद्यत् कर्म्म कर्त्तुम् उपक्राम्यन्ते तेन
परमेश्वरस्तेषाम् अमङ्गलं करोतीत्थं तेषाम् अतिक्लेशो भवति। अनन्तरं १६
परमेश्वरेण कृपां कृत्वा रिपूणां करेभ्यस्तान् मोचयितुं विचारकेषूत्पादि-
तेषु ते स्वेषां विचारकाणामपि वाक्येषु मनांसि न निवेश्येतरदेवान् १७
अनुगम्य व्यभिचरन्ति तांश्च प्रणमन्ति, तेषां पूर्व्वपुरुषाः परमेश्वरस्याज्ञा
आचरन्तो येन मार्गेणागच्छन्, ते तदनुसारादकृत्वा तस्मात् मार्गात्

१८ शीघ्रं वहिर्भवन्ति। उपद्रविभ्यः क्लेशकेभ्यश्च तेषां कातरोक्तिं श्रुत्वा पर-
मेश्वरेण कृपां कृत्वा विचारयितृषूत्पादितेषु विचारकस्य साहाय्ये कृते
१९ च तद्विचारयितु र्यावज्जीवनं शत्रुभ्य उद्धृता अपि ते तद्विचार-
यितु र्मरणात् परं पुनः स्वेषां पूर्व्वपुरुषेभ्योपि भ्रष्टा भूत्वा इतरदे-
वान् अनुगम्य सेवन्ते प्रणमन्ति च स्वकर्म्मभ्यः कुमार्गाच्च न परावर्त्तिरे।
२० तत इस्रायेल्वंशस्य प्रतिकूलं परमेश्वरस्य क्रोधे प्रज्वलिते सोऽ-
कथयत् एतेषां लोकानां पूर्व्वपुरुषाणां समीपेऽहं यं नियमम् आदिष्ट-
२१ वान् एते तं लङ्घन्ते मम वचसि मनो न निवेशयन्ति। अतो यिहोशूयेन
मरणकाले ये भिन्नजातीया अवशिष्टास्तेषां कमप्येतेषां सम्मुखान्न दव-
२२ यिष्यामि। तेषां पितरो यथा परमेश्वरस्य मार्गेण गच्छन्तस्तस्याज्ञा
अगृह्णन्, ते तादृशं करिष्यन्ति न वेतीस्रायेल्वंशीयान् परीक्षितुं
२३ परमेश्वरस्तान् जातीयान् शीघ्रं वहिर्न कृत्वा यिहोशूयस्य करे न
समर्प्यावशेषयामास।

---

३ तृतीयोऽध्यायः।

१ इस्रायेलीयानाम् अवशिष्टलोकेषु मिश्रितत्वात् कुकर्म्मकरणं ८ कूशनरिशियाथयिमाद् अत्नीयेलद्वारा तेषां रक्षणं १२ इग्लोननाम्नो मोयावदेशीयराजत एहूद्द्वारा तेषां रक्षणं ३१ शम्गरस्य कथनं।

१ इस्रायेल्वंशस्य मध्ये ये जनाः किनानदेशीययुद्धानि नावगतास्तान्
२ परीक्षितुं, ये च पूर्व्वं योद्धुं नाजानन् तान् इस्रायेलीयवंशान् युद्धं
शिक्षयितुं परमेश्वरेण ये भिन्नजातीया अवशिष्टास्तेषां निर्णयोऽयं।
३ पिलेष्टीयानां पञ्चाधिपा वाल्हर्म्मोणपर्व्वतमारभ्य हमातस्य प्रवेश-
मार्गं यावत् लिवानोनपर्व्वतनिवासिनः सर्व्वे किनानीयसीदोनीय-
४ हिव्वीयलोकाश्च। परमेश्वर इस्रायेलीयानां पितृलोकान् प्रति मूससा
यद्यद् आज्ञापयत्, ते तत्र मनांसि निवेशयिष्यन्ति न वेति ज्ञातुं तान्
५ परीक्षितुं ते भिन्नजातीया अवशिष्टाः। तत इस्रायेल्वंशाः किनानीय-
हित्तीय-इमोरीय-पिरिषीय-हिव्वीय-यिवूषीयाणां मध्ये न्यवसन्।
६ अपरं ते तेषां दुहितृर्व्यवहन् तेषां पुत्रांश्च स्वेषां दुहितृर्व्यवाहयन् तेषां
७ देवान् असेवन्त च। इत्थम् इस्रायेल्वंशीया परमेश्वरस्य साक्षात्
कुकर्म्म चक्रुः स्वेषां प्रभुं परमेश्वरं विस्मृत्य वाल्देवान् चैत्यवृक्षाणि च
सिषेविरे।

तत इस्रायेल्वंशं प्रति परमेश्वरस्य क्रोधे प्रज्वलिते सति सोऽराम- ८
नहरयिमीयभूपस्य कूशनरिशियाथयिमस्य करे तान् व्यक्रीणात् तत
इस्रायेल्वंशीया अष्टवर्षाणि यावत् कूशनरिशियाथयिमस्य भूपते र्दासा
आसन्। अनन्तरम् इस्रायेल्वंशीयैः परमेश्वरम् उद्दिश्य प्रार्थनायां ९
कृतायां परमेश्वरस्तेषां कृते कालेवस्य कनिष्ठभ्रातुः किनसस्य सुतम् अत्नी-
येलं तेषाम् उद्धारकं निरूप्य तान् उद्धारयामास। अपरं परमेश्वर- १०
स्यात्मनि तदधिष्ठिते सति स इस्रायेल्वंशं विचारयाञ्चकार, अपरं
तस्मिन् योद्धुं निर्गते परमेश्वरोऽरामीयभूपतिं कूशनरिशियाथयिमं
तस्य करे समर्पयामास, तेन स कूशनरिशियाथयिमं जितवान्। तत- ११
श्चत्वारिंशद्वर्षाणि यावद् देशो निष्कण्टकस्तस्थौ, अनन्तरं किनसस्य
सुतोऽत्नीयेलो ममार।

अनन्तरम् इस्रायेल्वंशीयाः परमेश्वरस्य दृष्टौ पुनः पापं कुर्व्वते, अतः १२
परमेश्वरस्य दृष्टौ तेषां पापकरणात् परमेश्वर इस्रायेल्वंशस्य प्रति-
कूलं मोयावीयराजम् इग्लोनं सबलं चकार। सो ऽम्मोनीयलोकान् १३
अमालेकीयलोकांश्च स्वसमीपे संगृह्य यात्रां कृत्वेस्रायेल्वंशं जित्वा
तालवृक्षनगरम् अध्यकरोत्। तत इस्रायेल्वंशोऽष्टादशवत्सरान् यावत् १४
मोयावीयराजम् इग्लोनं सिषेवे। अपरम् इस्रायेलीयलोकाः परमे- १५
श्वरम् उद्दिश्य प्रार्थयाञ्चक्रिरे, ततः परमेश्वरेण तेषां कृते वामहस्त-
कर्म्मकारी विन्यामीनवंशीयगेरसः पुत्र एहूद उद्धारको न्यरूप्यत, इस्रा-
येल्वंशास्तेन मोयावीयराजस्येग्लोनस्य समीप उपहारं प्राहिन्वन्।
तत एहूदः स्वस्य कृते हस्तप्रमाणं द्विधारयुक्तं खड्गमेकं निर्म्माय स्वदक्षि- १६
णोरौ वस्त्रमध्ये गोपयाञ्चकार। अनन्तरं स मोयावीयभूपतेरिग्लो- १७
नस्य समीपम् उपहारम् आनिनाय, स इग्लोनो ऽतिस्थूलकायो
मनुष्य आसीत्। अनन्तरम् उपहारदाने समाप्ते स तदुपहारवाह- १८
कान् विससर्ज। किन्तु स गिल्गलस्थपाषाणाकरात् परावृत्यागत्य १९
जगाद, हे राजन् भवतः समीपे मम गोपनीयं वच एकम् आस्ते, राजा-
वदत् मौनीभवत, ततः समीपस्था लोकास्तस्य समक्षाद् वहि र्जग्मुः।
तदानीम् एहूदः केवलं तस्यार्थं निर्म्मिते शैत्यगृहे समुपविशतो राज्ञः २०
समीपं गत्वा तं बभाषे भवन्तं प्रतीश्वरस्य वाक्यमेकं ममास्ते, ततः स
स्वासनाद् उदतिष्ठत्। अनन्तरम् एहूदः स्ववामहस्तेन दक्षिणोरुतः २१
खड्गमादाय तस्योदरं तादृग् विद्धवान् येन खड्गेन समं खड्गत्सरुरपि २२

कुक्षिं प्रविवेश पृष्ठेन स खड्गो वहिर्बभूव च, अपरं मेदसा तस्मिन् खड्गे
२२ रुद्धे सति स तं कुक्षितो वहिर्नाकरोत्। अनन्तरम् एहूदो ऽलिन्देन
२४ वहिर्निर्गत्य शैत्यगृहस्य द्वारं रुद्धा कुञ्चिकया बद्धवान्। अपरं तस्मिन्
वहिर्गते नृपस्य भृत्या आगत्य शैत्यगृहद्वारम् अर्गलेन बद्धं वीक्ष्य
२५ कथयामासुः, शैत्यकोष्ठे राजा किं विश्राम्येत्? अनन्तरं तेन शैत्यगृहस्य
द्वारे न मोचिते ते लज्जिता यावद् तावत् विलम्बाञ्चक्रुः, अनन्तरं तैः
कुञ्चिकया द्वारे मोचिते स्वेषां प्रभु र्भूमौ पतितो मृतश्च ददृशे।
२६ तेषु विलम्बमानेष्वेहूदः पलाय्य तं पाषाणाकरम् अतिक्रम्य सियीरां
२७ प्राप्नोत्। तत् स्थानं प्राप्य स इफ्रयिमपर्व्वते तूरीं वादयामास, अनन्तरम्
इस्रायेल्वंशाः सह तेन पर्व्वताद् अवारोहन् ततः स तेषामग्रगामी
२८ भवन् चलितवान्। अपरं स तान् अवदत्, यूयं मम पश्चाद् आगच्छत
परमेश्वरो युष्माकं रिपून् मोयावीयान् युष्माकं करेषु समार्पयत्, ततस्ते
तस्य पश्चाद् अवरुह्य मोयावीयानाम् अग्रे यर्द्दनस्य घट्टान् वशीचक्रुः
प्राणिनमेकमपि पारं गन्तुं नानुजज्ञुः।
२९ अस्मिन् समये ते मोयावीयानां प्रायो दशसहस्राणि लोकान् अव-
३० धिषुः, ते हृष्टकाया बलवन्तश्च, किन्तु तेषां कोपि रक्षां न प्राप। इत्थं
मोयावीयलोकेष्विस्रायेल्वंशे वशीकृतेषु देशो ऽशीतिवत्सरान् यावत्
निष्कण्टकं तस्थौ।
३१ ततः परम् अनातस्य सुतः शम्गर उदतिष्ठत्, स गोचारणदण्डेन
पिलेष्टीयानां षट्शतानि लोकान् अबधीत्, सोऽपि इस्रायेल्वंशस्य
उद्धारको बभूव।

---

४ चतुर्थोऽध्यायः।

१ इस्रायेल्वंशीयानां पापं तेषां विचारयित्र्या दिवोरायाः कथनं १० दिवोराबार-काभ्याम् इस्रायेल्वंशस्योद्धारः १८ यायेल्स्त्रीद्वारा सीषिरःसेनापतेर्वधः।

१ अनन्तरम् एहूदस्य मरणात् परम् इस्रायेल्वंश ईश्वरस्य दृष्टौ पुनः
२ पापं चकार। ततः परमेश्वरो हात्सोरनिवासिनः किनानीयराजस्य
यावीनस्य हस्ते तान् व्यक्रीणात् हरोशतगोयिमनिवासी सीषिरास्तस्य
३ नृपस्य सेनापतिरासीत्। तस्य नवशतानि लौहरथा आसन्, स
विंशतिवर्षाणि यावद् इस्रायेल्वंशं भृशं चिक्लेश, तत इस्रायेल्वंशः
परमेश्वरमुद्दिश्य प्रार्थनाञ्चकार।

तदानीं लप्पीदोतस्य भार्य्या दिवोरानामिका भविष्यद्वक्त्रीस्रायेल्- ४
वंशस्य विचारं चकार। सा रामतवैथेलयोर्मध्य इफ्रयिमपर्व्वते दिवो- ५
रानामकस्य तालवृक्षस्य मूले न्यवसद् इस्रायेल्वंशस्य विचारार्थं
तत्समीपम् अगच्छत्। अपरं सा लोकं प्रहित्य नप्तालिवंशस्यकेद- ६
शाद् अवीनोयमस्य सुतं वारकम् आहूय बभाषे, पश्य, त्वम् इस्रायेलः
प्रभुणा परमेश्वरेणेदम् आदिश्यसे, त्वं नप्तालिसिबूलूनवंशयो र्दशस-
हस्रलोकान् आदाय तावोरपर्व्वतं याहि। अहं यावीनस्य सेनापतिं ७
सीषिरसं तस्य रथान् सैन्यनिवहञ्च कीशोनसरितस्तटे तव समीपम्
आकृष्य तव करे समर्पयिष्यामि। ततो वारकस्तां जगाद, यदि त्वं ८
मया सह यास्यसि तदाहं यास्यामि, किन्तु मया सह त्वयि न गते नाहं
यास्यामि। सा बभाषे, अहमवश्यं त्वया सह यास्यामि, किन्तु युद्धयात्रा- ९
यामस्यां तव यशो न भविष्यति, यतः परमेश्वरः सीषिरसं स्त्रिया हस्ते
विक्रेष्यति, अनन्तरं दिवोरोत्थाय वारकेण समं केदशं जगाम।

अनन्तरं वारकेण सिबूलूननप्तालिवंशयोः केदश आहूतयो र्दश- १०
सहस्राणि पदातिसैन्यानि तस्य पार्ष्णौ जग्मुः, दिवोरापि तेन समं
जगाम। तस्मिन् समये मूससः श्वशुरस्य होववस्य वंशोद्भवः केनीयहे- ११
बरोऽन्यकेनीयवंशात् पृथग् भूत्वा केदशस्य समीपवर्त्तिनि सानन्नीमोद्याने
स्वदूष्यं स्थापितवान्। अनन्तरम् अविनोयमसुतो वारकस्तावोरपर्व्वतम् १२
आरोहतीति वार्त्तां प्राप्य सीषिराः स्वीयसर्व्वरथान् अर्थात् नवश- १३
तानि लौहरथान् निजसङ्गिनो निखिललोकांश्च संगृह्य हरोशत-
गोयिमात् कीशोनसरितं जगाम। तदानीं दिवोरा वारकम् अवदत्, १४
उत्तिष्ठ, परमेश्वरोऽद्यैव सीषिरसं तव करे समर्पयति, परमेश्वरः
किं तवाग्रगामी नास्ति? ततो वारको दशसहस्रसैन्यैः सहावारोहत्।
अनन्तरं परमेश्वरो वारकस्य सम्मुखे सीषिरसं तस्य समस्तरथान् १५
सैन्यानि च खड्गैराहन् ततः सीषिराः स्वरथाद् अवरुह्य पदव्रजेन
पलायत। अपरं वारको हरोशतगोयिमं यावत् तस्य रथानां सैन्यानाञ्च १६
पश्चाद् धावितवान्, ततः सीषिरसः सर्व्वसैन्यानि खड्गधारै र्व्यापादितानि
एकमप्यवशिष्टं नातिष्ठत्। किन्तु सीषिराः पदव्रजेन पलायमानः केनीय- १७
हेवरस्य भार्य्याया यायेलो दूष्यं जगाम यतो यावीननाम्नो हात्सोरीय-
भूपतेः केनीयहेवरस्य वंशेन सह तदानीम् ऐक्यमत्यमासीत्।

ततो यायेल् सीषिरसं साक्षात् कर्त्तुं वहिर्भूय तं बभाषे हे मम १८

प्रभो, अभ्यन्तरम् आगच्छतु मम समीपम् आगच्छतु मा बिभेतु, ततः स
दूष्यमध्यं तस्याः समीपं गतवान् सा च कम्बलेन तं समाच्छादयत्।
१९ तदानीं सीषिरास्तां जगाद, विनयेऽहं पातुं मह्यं किञ्चित् तोयं देहि
पिपासितोऽहं, ततः सा दुग्धस्य कूतुं मोचयित्वा पाययित्वा तमाच्छादयत्।
२० अपरं सीषिरास्तां पुनर्बभाषे त्वं दूष्यद्वारे तिष्ठ, यदि कश्चिद् आगत्य
स्थानेऽत्र कश्चित् पुरुषो विद्यते न वेति पृच्छति तर्हि त्वं वदिष्यसि न
२१ हि। अपरं हेवरस्य भार्य्या यायेल् दूष्यस्य कीलकमेकं मुद्गरञ्च करा-
भ्यामादाय धीरं धीरं तस्य समीपं गत्वा कर्णमूलं विद्ध्वा तं कीलकं मृत्ति-
कायां प्रवेशयामास, यतः स श्रान्तो निद्रितश्चासीत्, इत्थं स ममार।
२२ अनन्तरं यायेल् सीषिरसः पश्चाद् धावन्तं बारकं साक्षात् कर्त्तुं वहि-
रागत्य तस्मै कथयामास, आगच्छ त्वं यस्यान्वेषणं करोषि तं नरमहं
त्वां दर्शयिष्यामि, ततस्तस्मिन् अभ्यन्तरे तस्याः समीपं गते स भूमौ पतितं
२३ सीषिरसं मृतं तस्य कर्णमूलञ्च कीलकेन विद्धं ददर्श। इत्थं परमेश्वर-
स्तस्मिन् दिने किनानीयराजं यावीनम् इस्रायेल्वंशस्य साक्षाद् वशीभूतं
२४ चकार। इस्रायेल्वंश उत्तरोत्तरं बलवान् भूत्वा किनानीयभूपतेर्यावी-
नस्य संहारपर्य्यन्तं किनानीयभूपतिं यावीनं जिगाय।

---

५ पञ्चमोऽध्यायः।

दिवोरावारकयोर्गीतं।

१ अपरं तस्मिन् दिने दिवोरा अवीनोयमसुतो वारकश्च गीतमिदं जगतुः।

२ इस्रायेलीयवंशानां मुख्या यत्नं प्रचक्रिरे।
नरा अप्युत्सुका जातास्तस्मात् स्तुत परेश्वरं।
३ मनो निधत्त हे भूपाः कर्णान् दत्त नराधिपाः।
अहमेव हि गास्यामि समीपे परमेशितुः।
इस्रायेल्प्रभुमुद्दिश्य गास्यामि परमेश्वरं।
४ हे परेश्वर सेयीरात् कृते विनिर्गमे त्वया।
इदोमप्रान्तराद् याने भूमेः कम्पो बभूव ह।
आकाशादपतद् वृष्टिर्मेघास्तोयमवर्षयन्।
५ पर्व्वताः परमेशस्य साक्षादेव द्रवं गताः।
इस्रायेलः प्रभोः साक्षात् सीनयाद्रिर्द्रवं गतः।

अनातवंशजातस्य शमगरस्य दिनेषु हि । ६
यायेलनामिकायाश्च योषितः समये तथा ।
सकला राजमार्गा हि विहीनाः पथिकैर्जनैः ।
पान्था वक्रोपमार्गेण गमनञ्च प्रचक्रिरे ।
शास्ता नासीत् तदा कोपि यावन्नोत्थितवत्यहं । ७
दिवोरानामिकेस्रायेल्वंशानां मातृरूपिका ।
तावन्मुख्यजना नासन् इस्रायेलीयनीवृति ।
वृतेषु नूतदेवेषु गोपुराण्यागमद् रणः । ८
चत्वारिंशत्सहस्राणामिस्रायेल्संभुवां तदा ।
किमेकं फलकं वासीद् अथवा शल्यमेककं ।
इस्रायेलोऽधिपानां ये लोकानाञ्च य उत्सुकाः । ९
आस्ते तेषु मम प्रीतिर्यूयं स्तुत परेश्वरं ।
हे चित्रगर्द्दभारूढा उपविष्टाः सुचेलके । १०
भ्रमन्तः पथिभिः सर्व्वैर्यूयं तमुपगायत ।
निपानेषु च कामिन्यो लोध्रदथ्यविभागतः । ११
यत्र प्रकुर्व्वते नादं सर्व्वैस्तत्र प्रकीर्त्त्यतां ।
धर्म्मकर्म्म परेशस्य धर्म्मकर्म्म च शासितुः ।
इस्रायेलीयदेशे यः परेशेन निरूपितः ।
ततः परेशितुर्लोकैः पुरद्वारं प्रविश्यतां ॥
जागृहि हे दिवोरे त्वं सचैतन्या भव स्वयं । १२
प्रगाय तव गीतञ्च त्वमप्युत्तिष्ठ वारक ।
अवीनोयमपुत्र त्वमादाय याहि बन्दिनः ।
आयातास्तत्र लोकानां ये मुख्याः परिशेषिताः । १३
बलवच्छत्रुभिर्योद्धुं परेशो माम् उपाकरोत् ।
एतेषां मध्यतोऽमालेक्देशीयेफ्रयिमप्यभूत् । १४
मध्ये तव मनुष्याणां बिन्यामीनोऽनुगाम्यभूत् ।
माखीराद् आयुरध्यक्षाः सिवूलूनाच्च लेखकाः ।
इषाखरीयमुख्याश्च सार्द्धमासन् दिवोरया । १५
अवलम्बनरूपश्च वारकस्य त्विषाखरः ।
अधावत् समभूमिं हि तेनैव सहितस्तदा ।
आसीद् गुर्व्वी मनःपीडा रूबेणसरितां तटे ।

१६ हुवेणवंश मेषाणां रवं श्रोतुं व्रजस्य वै।
मेषस्थानस्य मध्ये हि कुतो वासः कृतस्त्वया।
आसीद् गुर्व्वी मनःपीडा हुवेणसरितां तटे।
१७ लोका गिलियदीयाश्च यर्द्दन्पारे विशश्रमुः।
दाने ये संस्थिता लोकाः पोते तस्थुः कुतो हि ते।
आशेरोऽस्थात् तटे सिन्धोः खातेषु स उपाविशत्।
१८ नप्तालिसिवुलून्वंशौ संग्रामस्य भृगुस्थले।
यावत् स्वमरणं तावद् अकुर्व्वाताम् असोः पणं।
१९ कृतं युद्धं नृपैरेत्य मगिद्दोस्तोयसन्निधौ।
किनाननृपवर्गेण कृतं युद्धञ्च तानके।
न हि रूप्यं धनं किञ्चित् तैर्जनैः समलम्भि च।
२० अभवद् गगणे युद्धं भानि स्वस्वगमे पथि।
सीषिरःप्रतिकूलं हि समीकं समकुर्व्वत।
२१ कीशोनसरिच्च प्राचीना भासयित्वाहरच्च तान्।
मामकीनमनस्त्वन्तु सबलीभूय संचल।
२२ वेगात् सञ्चालिताश्वानां वीरैः खुरमभज्यत।
२३ परेशदूत आहेति मेरोसः परिशप्यतां।
तन्निवासिजनेभ्यश्च दत्त शापं कटूल्वणं।
साहाय्यार्थं परेशस्य यतस्ते न समागताः।
बलवच्छत्रुभिर्योद्धुं पद्दीयाः परमेशितुः।
२४ केनीयहेवरो भार्य्या यायेल् धन्यास्ति योषितां।
दूष्यसंवासिनारीभ्यो वरप्राप्ता भविष्यति।
२५ सीषिरसार्थिते तोये तया दुग्धमदीयत।
नृपोपयुक्तपात्रेणानीय क्षीरमदायि हि।
२६ आदाय कीलकं हस्ते दक्षहस्ते च मुद्गरं।
साहन् सीषिरसं तेनाविधत् तस्य च मस्तकं।
कपोलं तस्य विद्धा च परिभिन्नं चकार सा।
२७ स नरः पादयोस्तस्या नमन् पतंश्च लम्बते।
स तस्याः पादयोर्यत्र नमन्नेव पपात हि।
तत्रैव स नमस्कृत्य प्रपतन् निधनं गतः।
२८ तदानीं सीषिरोमाता गवाक्षेण समीक्ष्य वै।

वातायनात् समाहूय वच एतद् अभाषत।
रथस्तस्य समायातुं विलम्बं कुरुते कुतः।
तदीयरथचक्राभ्यां विलम्बः क्रियते कुतः।
ज्ञानवत्यः सखायास्ता उत्तरं दातुमुद्यताः। २९
सा चापि निजवाक्यस्य जगाद स्वयमुत्तरं।
लब्धानि यानि वस्तूनि विभज्यन्ते न तानि तैः। ३०
एकैकस्मै पुमांसे किं द्वेकन्या न दीयते।
सीषिरसे च वस्त्रं न विचित्रं सूचिकर्म्मणा।
सूचिभिर्निर्म्मितं वास आहृतं बन्दिकण्ठतः।
परेश रिपवः सर्व्वे तव नश्यन्तु ते तथा। ३१
तव प्रेमक्तः सर्व्वे भवन्तूदितभानुवत्॥
अनन्तरं चत्वारिंशद्वर्षाणि यावद् देशो निष्कण्टकं तस्थौ।

---

६ षष्ठोऽध्यायः।

१ पापकारणात् मिदियनीयैरिस्रायेल्वंशस्योपद्रुतत्वं तस्माद् भविष्यद्वादिनः कथनं ११ गिदियोनं प्रति परमेश्वरीयदूतस्य कथनं १७ दूतं प्रति गिदियोनस्य निवेदनं नैवेद्यञ्च २५ बालो वेद्या भञ्जनं २८ लोकानां विरुद्धं पुत्रस्य कृते योयाशस्य विरोधः ३३ गिदियोनसमीपे लोकानां मेलनं ३६ गिदियोनेन प्रार्थितचिन्नचिह्नानां कथनं।

अनन्तरम् इस्रायेल्वंशेन परमेश्वरस्य साक्षात् पापे कृते परमेश्वरः १
सप्तवर्षाणि यावत् मिदियनीयलोकानां करेषु तान् समार्पयत्। तत २
इस्रायेल्वंशस्य प्रतिकूलं मिदियनीयलोकाः प्रबला बभूवुरत इस्रायेल्-
वंशास्तेभ्यो भयात् पर्व्वतस्थेषु स्रोतोमार्गेषु गुहासु दुर्गमस्थेषु स्थानेषु
च स्वेषां वासान् निदधिरे। अपरम् इस्रायेल्वंशीयैर्वीजे उप्ते मिदिय- ३
नीया अमालेकीयाः पूर्व्वदेशीयाश्च तेषां प्रतिकूलम् आगत्य तेषां सम्मुखे ४
शिविरं स्थापयन्ति, अससायाः प्रवेशस्थानं यावद् भूमेरुत्पन्नानि शस्या-
दीनि सर्व्वाणि विनाशयन्ति, तथेस्रायेल्देशे मेषगोगर्द्दभादीनां खाद्यं
किमपि वस्तु नावशेषयन्ति च। यतः पशुभिः सहितेषु तेष्वागतेषु बाहु- ५
ल्येन शूककीटवत् तेषां दूष्याणाम् आगमनं भवति ते तेषां महाङ्गाश्चा-
संख्याः सन्ति ते च देशं विनाशयितुं तं प्रविशन्ति। इत्थं मिदियनीयैरि- ६
स्रायेल्वंशस्यातिदुर्गतिर्जाता तस्माद् इस्रायेल्वंशः परमेश्वरमुद्दिश्य
कातरोक्तिं चकार।

७ अनन्तरम् इस्रायेल्वंशेन मिदियनीयेभ्यः परमेश्वरम् उद्दिश्य कात-
८ रोक्तौ कृतायां परमेश्वर इस्रायेल्वंशं प्रति भविष्यद्वादिनमेकं प्रेषया-
मास, सोऽवदत् इस्रायेलः प्रभुः परमेश्वर इति वाचं गदति, अहं
९ युष्मान् मिसराद् आनयं दासत्वागाराद् अमोचयं मिस्रीयादिभ्यो युष्म-
दुपद्राविभ्यश्च युष्मान् उदधारयं युष्माकं सम्मुखात् तान् दूरीकृत्य
१० तेषां देशं युष्मभ्यमददाञ्च। अपरं युष्मानहमुक्तवान् अहमेव युष्माकं
प्रभुः परमेश्वरः, यूयं येषां देशे वसथ तेषाम् इमोरीयाणां देवान् माभि-
यध्वं, किन्तु यूयं मम वचसि मनो न न्यवेशयत।
११ अनन्तरं परमेश्वरस्य दूत आगत्य अवीयेस्रीययोयाशेनाधिकृतायाम्
अफ्रायाम् अलोनवृक्षस्य मूले समुपाविशत्, तदानीं तस्य सुतो गिदि-
योनो मिदियनीयेभ्यो रक्षितुं द्राक्षापेषणार्थककुण्डमध्ये गोधूमान् अम-
१२ र्दयत्। तत्र परमेश्वरस्य दूतस्तस्मै दर्शनं दत्त्वा तम् अभाषत, हे
१३ महावीर परमेश्वरस्तव सहाय आस्ते। ततो गिदियोनः प्रत्यवदत् हा
हा हे मत्प्रभो परमेश्वरो यद्यस्माकं सहाय आस्ते तर्ह्यस्मान् प्रत्येतानि
कुतो घटन्ति? परमेश्वरः किमस्मान् मिसरान्नानयदिति वचसास्मत्-
पूर्व्वपुरुषैरस्मान् प्रति प्रकाशितानि तस्याश्चर्य्यकर्म्माणि कुत्राधुना?
१४ परमेश्वरोऽस्मान् विहाय मिदियनीयानां करेषु समर्पितवान्। ततः परमे-
श्वरस्तं समालोक्य बभाषे त्वं स्वस्य बलेनानेन गच्छ त्वं मिदियनीयानां
१५ करेभ्य इस्रायेल्वंशम् उद्धारयिष्यसि त्वं किं मया न प्रहितोऽसि? ततः स
तमवदत्, हा हा हे मम प्रभो पश्य मिनशेवंशमध्ये मम कुलं सर्व्वस्मात्
क्षुद्रं, अपरं मम तातस्य निवेशनेऽहं सर्व्वस्मात् क्षुद्रः, अतोऽहं केन प्रका-
१६ रेणेस्रायेल्वंशम् उद्धारयिष्यामि? ततः परमेश्वरस्तं जगाद, अहमेव तव
सहायो भविष्यामि, त्वं मिदियनीयान् मनुष्यैकमिव व्यापादयिष्यसि।
१७ सोऽवदत् यद्यहं भवतो दृष्ट्या कृपां प्राप्तवान्, तर्हि भवानेव मां
१८ सम्भाषत इति चिह्नमेकं मह्यं ददातु। अहं विनये यावदहम् अभ्यन्तरं
गत्वा नैवेद्यमादाय भवतः साक्षात् नोत्सृजामि, तावद् भवता स्थाना-
न्तरं मा गम्यतां, ततः स उक्तवान् यावन्न प्रत्यागमिष्यसि तावदहं
१९ विलम्बिष्यामि। तदा गिदियोनोऽभ्यन्तरं गत्वा छागवत्समेकम् एकैफा-
परिमितस्य गोधूमचूर्णस्य किण्वशून्यपिष्टकांश्च कृत्वा तन्मांसादीनि
डल्लके यूषञ्च मृत्पात्रे निधाय वहिरेलावृक्षस्य मूलमानीय तस्य समीपे
२० उत्ससर्ज। तत ईश्वरस्य दूतस्तमवदत्, त्वम् एतन्मांसं किण्वशून्यपूपां-

आदाय पाषाणस्यास्योपरि निधाय यूषेण निषिञ्च तदा तेन तथैव कृते
परमेश्वरस्य दूतः स्वहस्तस्थितदण्डस्याग्रं विस्तार्य्य तन्मांसं किण्वशून्य- २१
पिष्टकांश्च पस्पर्श ततस्तस्मात् पाषाणाद् वह्निर्निर्गत्य तन्मांसं पिष्टकांश्च
ददाह, अनन्तरं परमेश्वरस्य दूतस्तत्समीपात् प्रतस्थे। तदा स परमे- २२
श्वरस्य दूत एवेति वीक्ष्य गिदियोनो बभाषे हा हा हे प्रभो परमेश्वर,
परमेश्वरस्य दूतः सम्मुखासम्मुखी भूतो मया दृष्टः। ततः परमेश्वरस्तम् २३
अवदत् शुभं तव माभैषीः, न मरिष्यसि। अनन्तरं गिदियोनस्तत्र २४
परमेश्वरमुद्दिश्य वेदिमेकां निर्म्माय तस्या नाम यिहोवाः-शालोम्
(परमेश्वरः शुभकर इति) चकार। अबीयेश्रीयाणाम् अफ्रायाम्
अद्यापि सा विद्यते।

अनन्तरं तस्यां रजन्यां परमेश्वरस्तं व्याजहार त्वं स्वतातस्य युव- २५
बलीवर्दं सप्तवर्षवयस्कं द्वितीयं बलीवर्दञ्च गृहीत्वा तव तातस्य बाल्-
देवोद्दिष्टा या वेदिरास्ते तां भंग्धि तत्समीपस्थं चैत्यवृक्षञ्च छिन्धि।
अपरम् अस्य दृढपर्व्वतस्य शिखरे निरूपितस्थाने स्वप्रभुं परमेश्वरम् २६
उद्दिश्य यज्ञवेदिं निर्म्माहि, अपरं तं द्वितीयं बलीवर्दं गृहीत्वा छेद-
नीयस्य चैत्यवृक्षस्य काष्ठैर्जुहुधि। ततो गिदियोनः स्वभृत्यगणाद् दश- २७
नरान् गृहीत्वा परमेश्वरेणादिष्टं कर्म्म चकार, किन्तु स्वतातस्य परि-
जनेभ्यो नगरस्थलोकेभ्यश्च भयाद् दिवा तद् अकृत्वा रात्रौ चकार।

अपरं बालो वेदिर्भग्ना समीपस्थचैत्यवृक्षश्च छिन्नो नवनिर्म्मिताया २८
वेद्या उपरि द्वितीयबलीवर्द उत्सृष्ट इति नगरस्थलोकाः प्रत्यूष उत्थाय
वीक्ष्य परस्परं बभाषिरे कर्म्मैतत् केनाकारि? अनन्तरं यत्नतोऽनु- २९
सन्धानेन बुद्ध्वा व्याहरन्, योयाशस्य सुतेन गिदियोनेन कृतमेतत्।
ततो नगरस्था लोका योयाशं व्याहरन् तव सुतं बहिरानय स बधयोग्यो ३०
यतो बालो वेदिं भग्नवान् तत्समीपस्थं चैत्यवृक्षं छिन्नवांश्च। तदा ३१
योयाशः स्वस्य प्रतिकूलं समुत्थितान् सर्व्वान् जगाद, यूयं किं बालो
योद्धारः? यूयं वा किं तं जयिनं विधास्यथ? यो जनस्तस्य कृते युध्यति,
एतत्प्रभातसमये तस्यापमृत्युर्भवतु, स यदि देवः स्यात् तर्हि स्वकृते
स्वयं युध्यतु यतस्तस्यैव वेदिर्भग्ना। अतः स यस्य वेदिं भग्नवान् स बाल् ३२
तेन युध्यतु वचसानेन तद्दिनमारभ्य तस्य नाम यिरुब्बालो बाल्
युध्यत्विति चक्रे।

तदानीं मिदियनीया अमालेकीयाः पूर्व्वदेशीयाश्च लोका मिलित्वा पारं ३३

३४ गत्वा यिष्रीयेलप्रान्तरे शिविरं स्थापयामासुः । किन्तु गिदियोनः परमे-
श्वरस्यात्मनाविष्टः सन् तूरीं वादयामास तत अबीयेष्रीयलोकास्तस्य
३५ समीपे मिलिताः । अपरं तेन मिनशिवंशस्य सर्व्वत्र दूतेषु प्रहितेषु
तद्वंशीया अपि तस्य समीपे मिलिताः। अनन्तरं तेन आशेरवंशस्य
सिवूलूनवंशस्य नप्तालिवंशस्य च समीपं दूतेषु प्रहितेषु ते वंशीयास्तत्स-
मीपम् आगच्छन् ।
३६ अनन्तरं गिदियोन ईश्वरं बभाषे, यदि भवान् स्ववाक्यानुसारेण
३७ मम कराभ्याम् इस्रायेल्वंशं मोचयति, तदाहं शस्यमर्द्दनस्थाने मेषाणां
यानि छिन्नलोमानि स्थापयिष्यामि केवलं तेषां लोम्नामुपरि यदि
शिशिरस्तिष्ठति सर्व्वा भूमिश्च शुष्का तिष्ठति तर्हि भवान् स्ववाक्यानु-
३८ सारेण मम कराभ्याम् इस्रायेल्वंशं मोचयिष्यतीति ज्ञास्यामि। तत-
स्तस्मिन्नेव कर्म्मणि घटिते परदिने स प्रत्यूष उत्थाय तानि लोमानि
३९ निष्पीड्य तेभ्यः पूर्णं कंसमेकं शिशिरं चिक्षेप। तदा गिदियोन ईश्वरं
व्याजहार, भवान् मह्यं न क्रोत्स्यति केवलम् अहं पुनरेकं वचो वदि-
ष्यामि विनयेऽहं लोमभिः पुनरेककृत्वोऽहं परीक्षिष्ये, अधुना केवलं
४० लोम्नां शुष्कत्वं भवतु सर्व्वभूमेरुपरि शिशिरस्तिष्ठतु । अनन्तरम् ईश्वर-
स्तस्यां रजन्यां तथैव चकार तेन केवलं लोम्नां शुष्कता बभूव सर्व्वभूमौ
च शिशिरः पपात ।

---

७ सप्तमोऽध्यायः ।

१ गिदियोनस्य सैन्यानां न्यूनीकरणं ९ स्वप्नस्य कथां श्रुत्वा गिदियोनस्य मनसः स्थिरता १५ सैन्यं प्रति गिदियोनस्याज्ञा १९ अपरं प्रदीपतूरीवटैर्मिदियनीयानां पराजयः २४ ओरेबस्य सेबस्य च नृपयोर्वशीकरणं ।

१ अनन्तरं यिरुब्बालोऽर्थाद् गिदियोनस्तस्य सङ्गिनश्च सर्व्वे लोकाः
प्रत्यूष उत्थाय ऐनहरोदनामकस्थाने शिविरं स्थापयामासुः, किन्तु
मिदियनीयानां शिविरं तेषामुत्तरदिशि मोरिपर्व्वतस्य समीपस्थोपत्य-
२ कायाम् आसीत् । अनन्तरं परमेश्वरो गिदियोनं व्याजहार तव
सङ्गिजनानां बाहुल्यमधिकं, अतस्तेषां करेषु मिदियनीया मया न
समर्पयिष्यन्ते, समर्पितेषु तेषु वयं स्वबाहुबलैर्जयिनोऽभवामेति वाचं
३ वदन्त इस्रायेल्लोका मम प्रतिकूलं दर्पिष्यन्ति । अतस्त्वं गत्वा लोकानां
श्रुतिषु कथामिमां घोषय यो जनो भयार्त्तः कम्पमानश्च स प्रत्यूषे गिलि-

यदपर्व्वतेन परावर्त्ततां ततो लोकानां मध्याद् द्वाविंशति सहस्राणि लोकाः
परावृत्य गता दशसहस्राणि चावशिष्टाः। अनन्तरं परमेश्वरो गिदियोनं ४
व्याहरत्, लोका अधुनापि अधिकाः सन्ति, त्वं तान् तोयसमीपम्
आनय, तत्राहं तव कृते तान् परीक्षिष्ये ततस्त्वया समम् अयं यास्यतीति
वाचं यमधि गदिष्यामि स एव त्वया समं यास्यति, यञ्चाधि नायं यास्यतीति
वदिष्यामि स त्वया समं न यास्यति। ततस्तेन तोयसमीपं लोकेष्वानीतेषु ५
परमेश्वरो गिदियोनं जगाद ये सारमेयवद् रसनाभिस्तोयं लिहन्ति
तान् पृथक् स्थापय, तथा ये पातुं जानूनि पातयन्ति तानपि पृथक्
स्थापय। ततः शतत्रयसंख्या नरा वदनेषु करान् दत्त्वा तोयं लिहन्तः ६
पपुः किन्त्वन्ये सर्व्वे पातुं जानूनि पातयामासुः। अनन्तरं परमेश्वरो ७
गिदियोनं बभाषे, लिहन्तस्तोयपायिनो य एते शतत्रयलोका एतैरहं
युष्मान् मोचयिष्यामि मिदियनीयान् युष्माकं करेषु समर्पयिष्यामि च,
तदन्यलोकाः सर्व्वे स्वस्वस्थानं गच्छन्तु। अनन्तरं ते लोकाः स्वस्वकरै ८
र्भक्ष्यद्रव्याणि तूरीश्च जगृहुः, अपरं स इस्रायेल्वंशस्यावशिष्टान् सर्व्व-
जनान् स्वस्वस्थानं विसृज्य तान् शतत्रयमनुष्यान् स्वसमीपे निदधे,
तदानीं मिदियनीयसैन्यानि तस्याध उपत्यकायाम् अतिष्ठन्।

अनन्तरं तस्यां रजन्यां परमेश्वरस्तं व्याजहार, उत्तिष्ठ तेषां शिविरं ९
याहि यतोऽहं तद् युष्माकं करेषु समार्पयं। यदि त्वं यातुं बिभेषि तर्हि १०
तव दासं फूरसं सङ्गिनं कृत्वा शिविरं याहि। अपरं सेना यद् वदन्ति ११
तत् शृणु ततस्त्वं बलवान् भविष्यसि, अतस्तेषां शिविरं याहि। ततः
स स्वदासेन फूरसा समं शिविरस्थानां सुसज्जलोकानाम् अग्रं
जगाम। ते मिदियनीया अमालेकीयाः पूर्व्वदेशीयाश्च लोका बहुत्वका- १२
रणात् शूककीटवत् प्रान्तरम् आच्छादयन्, अपरम् उष्ट्रा अपि बहुत्व-
कारणात् जलधितटस्थसिकता इव असंख्या आसन्। अनन्तरं गिदियोने १३
प्रविष्टे तेषां मध्य एको जनः स्वबन्धवे स्वप्नकथामिमामकथयत् पश्याहं
स्वप्नेऽपश्यं यद् यवचूर्णै र्निर्म्मित एकः पूपो मिदियनीयानां शिविरमध्येन
लुठन् दूष्यगृहसमीपमुपस्थाय तदाहन् तेन दूष्यं न्युब्जीभूय दिर्घाकारं
निपपात। ततस्तस्य बन्धुः प्रत्यवदत् तद् इस्रायेल्वंशीयो यो यो- १४
याशस्तत्सुतस्य गिदियोनस्य खड्गं विनान्यत् किं भवेत्? ईश्वरो मिदि-
यनीयलोकान् कृत्स्नं शिविरञ्च तस्य करे समार्पयत्।

तदा गिदियोनस्तत्स्वप्नस्य कथां तस्या अर्थञ्च श्रुत्वा प्रणम्य इस्रायेल्- १५

वंशस्य सैन्यानां मध्यं प्रत्यागत्य जगाद उत्तिष्ठत परमेश्वरो युष्माकं करेषु
१६ मिदियनीयानां शिविरं समार्पयत्। अनन्तरं स तान् शतत्रयलोकान्
त्रीन् अंशान् कृत्वा सर्व्वेषां करेष्वेकैकां तूरीम् एकैकं शून्यघटं तन्मध्ये
१७ प्रदीपञ्च ददौ। अपरं स तान् अवदत्, यूयं मां प्रति निरीक्ष्य ममेव
कर्म्म कुरुत, शिविरस्य प्रान्तप्राप्तेन मया यत् कारिष्यते, युष्माभिरपि
१८ तदेव कर्त्तव्यं। मया मम सङ्गिभिश्च तूरीषु वादितासु यूयमपि
शिविरस्य चतुःषु पार्श्वेषु तुरीर्वादयित्वा परमेश्वरस्य गिदियोनस्य च जय
इति वाचं वदिष्यथ।

१९ अनन्तरं मध्यप्रहरस्य प्रथमे नूतनरक्षिणां नियोगात् किञ्चित् परं
गिदियोनस्तस्य सङ्गिन एकशतलोकाश्च शिविरस्य प्रान्तं प्राप्य तूरीर्वाद-
२० यामासुः स्वस्वहस्तस्थितान् घटांश्च बभञ्जुः। इत्थं त्र्यंशा लोकास्तूरीर्वा-
दयामासुः घटांश्च बभञ्जुः, अपरं वामकरेषु प्रदीपान् दक्षिणकरेषु
च वादनीयास्तूरी र्जगृहुः, अपरं परमेश्वरस्य गिदियोनस्य च खड्गायेति
२१ वाचम् उच्चैः कथयामासुः। तेषाम् एकैको जनः शिविरस्य चतुर्दिक्षु
स्वस्वस्थानेऽतिष्ठत् ततो रिपूणां सर्व्वसैन्यान्याटाट्यन्त शब्दायमानानि
२२ च पलायन्त। यतस्तैः शतत्रयलोकैस्तूरीषु वादितासु परमेश्वरः शिविर-
स्थान् सर्व्वखड्गधारिणः परस्परं योधयामास ततः सैन्यानि सिरे-
दास्थवैतशिट्टां टव्वतश्च यावद् आवेलमिहोलायाः सीमादिशं पलाया-
२३ ञ्चक्रिरे। अनन्तरं नप्ताल्याशेरमिनशिवंशीया इस्रायेल्लोका मिलित्वा
मिदियनीयानां पश्चाद् धावन्तो जग्मुः।

२४ अनन्तरं गिदियोन इफ्रयिमपर्व्वतस्य सर्व्वत्र प्रेरितै र्दूतै र्वाचमिमां
घोषयामास यूयं मिदियनीयानां प्रतिकूलम् अवरुह्यागच्छत तेषामग्रे च
वैतवारां यावद् घट्टान् यर्द्दननदीञ्च वशीकुरुत, तत इफ्रयिमीयाः सर्व्वे
२५ लोका मिलित्वा वैतवारां यावद् घट्टान् यर्द्दननदीञ्च वशीचक्रुः। अपरं ते
ओरेवसेवनामानौ मिदियनीयनृपौ धृत्वा ओरेवनामकशैल ओरेवं जघ्नुः
सेवनामकस्य द्राक्षापेषणकुण्डस्य च समीपे सेवं जघ्नुः। अनन्तरं ते
मिदियनीयानां पश्चाद् दधावुः किन्त्वोरेवस्य सेवस्य च शिरसी यर्द्द-
नस्य पारे गिदियोनस्य समीपम् आनिन्युः।

---

८ अष्टमोऽध्यायः।

१ इफ्रयिमलोकान् प्रति गिदियोनस्य कथनं ४ गिदियोनं प्रति सुक्कोतीयानां पिनू-

येल्लोयानाञ्च लोकानां तिरस्कारकथनं १० सेवहसल्मुन्नयोर्हतत्वं १३ सुक्कोतपिनूयेललोकानां शास्तिः १८ द्वयो र्न्टपयो र्वधः २२ राजत्वं कर्त्तुम् अनिच्छता गिदियोनेन लब्धैर्लोठितकुण्डलैरेफोदनिर्म्माणं २८ मिदियनीयानां पराजयः २९ गिदियोनस्य सन्ततेर्म्मृत्योश्च कथनं ३२ इस्रायेलवंशस्याकृतज्ञता।

अनन्तरम् इफ्रयिमलोका गिदियोनाय कथयामासुः, त्वं मिदियनीय- १
लोकैः सह योद्धुं गमनकाले यदस्मान् नाह्वयोऽस्मान् प्रति त्वया कुत
ईदृग् व्यवहृतम् इति वाचा तैस्तेन समं भृशं व्यवादि। ततः स २
तान् अवदत् युष्माकं कर्म्मवद् अधुना किं कर्म्म मया कृतं? अवीयेषरस्य
सकलद्राक्षाफलानां चयनाद् इफ्रयिमस्यावशिष्टद्राक्षाफलानाम् उञ्छनं
किं श्रेयो नहि? ईश्वर ओरेवसेवनामानौ मिदियनीयानां द्वौ राजानौ ३
युष्माकमेव करतलीकृतवान् युष्माकं कर्म्मवत् मया किं कर्म्म कर्त्तुं शक्के?
एतादृशि वचने कथिते तं प्रति तेषां क्रोधो निववृते।

गिदियोनस्तस्य सङ्गिनः शतत्रयलोकाश्च श्रान्ताः सन्तोपि पश्चाद् ४
धावन्तो यर्द्दनमागत्य पारं गताः। ततः स सुक्कोतस्थलोकान् अवदत्, ५
यूयं मम पश्चाद्गामिभ्यो लोकेभ्यो भक्ष्यद्रव्याणि दातुम् अर्हथ यतस्ते
श्रान्ता अभवन्, अहं सेवहसल्मुन्ननाम्नोर्मिदीयनीयानां राज्ञोः पश्चाद्
धावामि। ततः सुक्कोतस्याधिपा अकथयन्, सेवहसल्मुन्नयोः सैन्यानि ६
किमिदानीं तव वशे सन्ति यद् वयं तव सैन्येभ्यो भक्ष्याणि दातुम्
अर्हामः? ततो गिदियोनोऽवदत् यदेश्वरः सेवहसल्मुन्नौ मम वशौ ७
करिष्यति तदाहं काननस्य शृगालकोलिकण्टकैर्युष्माकं मांसं छेत्स्यामि।
अनन्तरं स तस्मात् पिनूयेलं प्रगत्य तत्रस्थलोकानपि तादृशं जगाद, ८
ततः सुक्कोतस्थलोका यादृगवदन् पिनूयेलस्थलोका अपि तादृशं जगदुः।
तदा स तान् पिनूयेलस्थलोकानपि व्याजहार, मया कुशलेनागमन- ९
काले युष्माकं दुर्गमिदं भंक्ष्यते।

तस्मिन् काले सेवहसल्मुन्नौ कर्क्कोर आस्तां ताभ्यां समं पूर्व्वदेशीय- १०
लोकानां सर्व्वसैन्यानामवशिष्टाः सर्व्वसेना अर्थतः पञ्चदशसहस्राणि
लोका आसन् यतो विंशतिसहस्राधिकं लक्षम् अस्त्रधारिणो लोका
जघ्निरे। अनन्तरं गिदियोनो नोवहस्य यग्विहस्य च पूर्व्वस्यां दिशि ११
दूष्यनिवासिनां मार्गेणोर्द्धं गत्वा सेना आजघान यस्मात् ताः सेना
निष्कण्टकम् अवसन्। अनन्तरं सेवहसल्मुन्नौ पलायितौ स च तयोः १२
पश्चाद् धावन् सेवहसल्मुन्ननामानौ तौ मिदियनीयराजौ दधार तयोः
सर्व्वाः सेनाश्चोद्वेजयाञ्चकार।

१३ अनन्तरं योयाशस्य सुतो गिदियोनो हेरसाख्येनोर्द्धगामिमार्गेण
१४ युद्धात् परावृत्यागत्य सुक्कोतनिवासिनमेकं तरुणं धृत्वापृच्छत् ततः स
१५ तन्निकटे सुक्कोतस्याध्यक्षाणां सप्ताधिकसप्ततिनामानि लिलेख। अनन्तरं
स सुक्कोतीयलोकानां समीपमुपस्थाय जगाद, सेवहस्य सल्मुन्नस्य च
सैन्यानि किमिदानीं तव वशे सन्ति तन्निकटे किं वयं तव क्लान्त-
लोकेभ्यो भक्ष्याणि दातुम् अर्हाम इति वाचा यूयं यावधि मां तिरस्कृत-
१६ वन्तस्तौ सेवहसल्मुन्नौ पश्यत। अपरं स तस्य नगरस्य प्राचीनान् धृत्वा
काननस्य कण्टकैः शृगालकोलिभिश्च तान् सुक्कोतीयलोकान् शिक्षया-
१७ मास। अनन्तरं स पिनूयेलस्य दुर्गं भंक्त्वा तस्य नगरस्य लोकान्
अवधीत्।
१८ अनन्तरं स सेवहं सल्मुन्नञ्च जगाद, ताबोरे युवाभ्यां हता लोकाः
कीदृशाः? ततस्तौ प्रत्यवदतां भवान् यादृशस्तेपि तादृशाः, सर्व्वे राज-
१९ पुत्रा इवासन्। ततः स कथयामास ते मम सहोदराः, नित्यजीविनः
परमेश्वरस्य नाम गृहीत्वाहं कथयामि यदि युवां तेषां प्राणान् अरक्षि-
२० ष्यतं तर्हि युवामहं नाहनिष्यं। अनन्तरं स स्वज्येष्ठसुतं येथरं जगाद
त्वमुत्थाय तौ जहि किन्तु स बालक एतत्कारणाद् भयात् खड्गं
२१ न वहिश्चकार। ततः सेवहसल्मुन्नौ कथितवन्तौ, भवान् उत्थायावां
हन्तु, यतो यो यादृशः पुरुषस्तादृशमेव तस्य वीरत्वं, अनन्तरं गिदियोन
उत्थाय सेवहसल्मुन्नौ जघान, अपरं तयोर्महाङ्गानां कण्ठानां सर्व्वान्
चन्द्रहारान् जग्राह।
२२ अनन्तरम् इस्रायेल्वंशा गिदियोनं जगदुः, त्वं पुत्रपौत्रादिपरम्पर-
यास्माकमाधिपत्यं कुरु यतस्त्वमस्मान् मिदियनीयानां करेभ्यो रक्षित-
२३ वान्। ततो गिदियोनोऽवदत्, अहं युष्माकम् अधिपतित्वं न करिष्यामि
मदीयसुतोपि युष्माकम् अधिपतित्वं न करिष्यति, यतः परमेश्वरो
२४ युष्माकं अधिपतिरास्ते। अनन्तरं गिदियोनः कथयामास, युष्मानहं
निवेदयामि यूयं स्वस्वलोठितं कर्णकुण्डलं मह्यं दत्त, यतो हतानाम्
२५ इस्मायेलीयलोकानां सौवर्णानि कर्णकुण्डलान्यासन्। ततस्ते प्रत्यवदन्
वयं तान्यवश्यं दास्यामः, अनन्तरं तैर्वसनमेकं पातयित्वा स्वस्वलोठि-
२६ तानि स्वर्णकुण्डलानि तत्र निक्षिप्तानि। ततः कण्ठभूषाः कर्णपुष्पाणि
मिदियनीयनृपतीनां परिधेयानि कापिलरङ्गवस्त्राणि तेषां महाङ्गानां
कण्ठाभरणानि विना तेन प्रार्थितकर्णकुण्डलानां परिमाणं सप्तशता-

धिकसहस्रशेकल्सुवर्णानि बभूव । अनन्तरं गिदियोनस्तेनैकम् एफोदं १७
निर्म्माय स्ववसतिपुर्य्याम् अफ्रायां तत् स्थापयाञ्चकार, तेन सर्व्व इस्रा-
येल्वंशस्तस्मिन् स्थाने तस्य पश्चाद् व्यभिचारी बभूव तच्च गिदियोनस्य
तस्य परिजनस्य चोन्माथरूपं बभूव ।

इत्थम् इस्रायेल्वंशस्य सम्मुखे पराजिता मिदियनीयाः स्वं स्वं शिरः १८
पुनरुत्तोलयितुं न शेकुः अनन्तरं गिदियोनस्य समये चत्वारिंशद् वत्स-
रान् यावद् देशो निष्कण्टक आसीत् ।

अनन्तरं योयाशस्य सुतो यिरुब्बालो निजगृहं गत्वा न्यवसत् । तस्य १९
गिदियोनस्यौरसपुत्राः सप्ततिरासन् यतस्तस्य वह्व्यो जाया आसन् । ३०
शिखिमे तस्य या उपपत्न्यासीत् सापि तस्य सुतमेकं प्रसुषुवे, अपरं तस्य ३१
नाम अवीमेलक इति चकार ।

अनन्तरं योयाशस्य सुतो गिदियोनोऽति वृद्धावस्थायां ममार, ३२
अवीयेश्रीयाणाम् अफ्रायां स्वस्य पितुर्योयाशस्य श्मशाने तस्य श्मशानं
बभूव । अनन्तरं गिदियोने मृत इस्रायेल्वंशाः पुनर्वाल्देवानाम् ३३
अनुगमनेन व्यभिचारिणो भवन्तो वाल्विरीतं स्वेषाम् इष्टदेवं चक्रिरे ।
ते चतुर्दिक्स्थरिपूणां करेभ्यः स्वेषाम् उद्धारयितारं प्रभुं परमेश्वरं ३४
विसस्मरुः । तथा यिरुब्बालो ऽर्थतो गिदियोन इस्रायेल्वंशं यादृशम् ३५
उपाकरोत् इस्रायेल्लोकास्तदनुसारेण तस्य वंशं न तादृशं प्रत्युपचक्रुः ।

---

९ नवमोऽध्यायः ।

१ भ्रातृगणं हत्वा अवीमेलकस्य राजत्वकरणं ७ योथमस्य दृष्टान्तः २२ अवीमेलकस्य विरुद्धं गालस्य कुमन्त्रणा ३० सिवूलस्य तत्प्रकाशनं ३४ युद्ध अवीमेलकस्य जयः ४६ बाल्विरीतदेवस्य दुर्गदहनं ५० तेवेषनगरे स्त्रीनिक्षिप्तपाषाणेनावीमेलकस्य बधः ५६ योथमस्य वाक्यस्य सफलत्वं ।

अनन्तरं यिरुब्बालस्य सुतो ऽवीमेलकः शिखिमे निजमातुलानां १
समीपं गत्वा तान् स्वमातामहस्य सर्व्वपरिजनांश्च वाचम् इमां बभाषे
निवेदयामि यूयं शिखिमस्थानां सर्व्वगृहस्थानां कर्णगोचरे कथामिमां २
कथयत, यिरुब्बालस्य सर्व्वेषां सुतानाम् अर्थात् सप्ततिजनानाम् अधिप-
तित्वं किमेकस्य जनस्याधिपतित्वम्, अनयोर्मध्ये युष्माकं भद्रतरं किं?
अपरमहं युष्माकम् अस्थिमांसस्वरूप एतदपि स्मरत । ततस्तस्य मातुल- ३
गणेन शिखिमस्य सर्व्वगृहस्थानां कर्णगोचरे तत्कथायां कथितायाम्

अवीमेलकस्यानुगामिनो भवितुं तेषां सम्मति र्बभूव, यतस्ते बभाषिरे,
४ असावस्माकं भ्राता। अपरं तैर्बालबिरीतस्य मन्दिरात् तस्मै सप्ततिरूप्य-
मुद्रासु दत्तास्ववीमेलको वातुलेभ्य आत्मश्लाघिभ्यश्च लोकेभ्यो वेतनार्थं ता
५ रूप्यमुद्रा अददात् ते च तस्य पार्ष्णिग्राहिणो बभूवुः। अनन्तरं सोऽफ्रायां
स्वपितुर्निवेशनं गत्वा यिरुब्बालस्य सुतान् स्वसप्ततिभ्रातॄन् पाषाणै-
कोपरि जघान, किन्तु योथम्नामा यिरुब्बालस्य कनिष्ठः सुतो गूढ-
६ मानोऽवाशिष्यत। अनन्तरं शिखिमस्य सर्व्वे गृहस्था वैतमिल्लुस्थाः सर्व्वे
लोकाश्च मिलित्वा शिखिमस्थितस्तम्भस्य समीपवर्त्तिन एलोन्वृक्षस्य
सविधं गत्वा तमवीमेलकं राजानं चक्रुः।
७ अनन्तरं लोकैर्योथमाय वार्त्तायां दत्तायां स गत्वा गिरिषीमपर्व्व-
तस्य शिखरे तिष्ठन् उच्चैस्तेभ्य इमां वाचं कथयामास, हे शिखिमस्य
सर्व्वे लोका मम कथायां मनो निवेशयत ततः परमेश्वरो युष्माकं कथायां
८ मनो निवेशयिष्यति। पादपराज्ये राजानं नियोक्तुं प्रवर्त्तमानाः पादपा
९ जितवृक्षं बभाषिरे, त्वमस्माकं नृपो भव। ततो जितवृक्ष उवाच
मम यस्मात् तैलाद् देवा मनुजाश्च माम् आद्रियन्ते तस्मान्निवृत्य किमहं
१० शाखिनामुपर्य्युन्नतमूर्द्धा भवितुं प्रवर्त्तिष्ये? अनन्तरं पादपा उडुम्बरतरुं
११ बभाषिरे त्वमागत्यास्माकं नृपो भव। तत उडुम्बरतरुः प्रत्युवाच किमहं
स्वीयमिष्टताया उत्तमफलत्वाच्च निवृत्य तरूणामुपर्य्युन्नतमूर्द्धा भवितुं
१२ प्रवर्त्तिष्ये? अनन्तरं पादपा द्राक्षावल्लीं बभाषिरे त्वमागत्यास्माकं
१३ नृपो भव। ततो द्राक्षावल्ली जगाद मम येन रसेन देवा मनुजाश्च
तृप्यन्ति तस्मान्निवृत्य किमहं तरूपर्य्युन्नतमूर्द्धा भवितुं प्रवर्त्तिष्ये?
१४ अनन्तरं पादपाः कण्टकतरुं बभाषिरे त्वमागत्यास्माकं नृपो भव। ततः
१५ कण्टकितरुणान्यतरवो भाषिताः, युष्माभिर्मम राज्याभिषेको यदि सत्य-
तया क्रियेत तदा यूयमागत्य मम छायाम् आश्रयत, किन्तु तद् यदि
न भवेत्, तर्हि कण्टकतरोर्वह्निर्निर्गत्य लिवानोनीयान् एरसतरून्
१६ दहतु। पश्यताधुना अवीमेलकस्य राज्याभिषेको यदि सत्यं याथार्थ्य-
ञ्चाचरद्भि र्युष्माभिः कृतः स्यात्, यदि च यिरुब्बालं तस्य वंशञ्च प्रति
भद्रम् आचरद्भि र्युष्माभिस्तस्य कर्म्मणः प्रतिफलं तस्मै दीयेत, तर्हि भद्रं।
१७ मम यो जनको युष्माकं कृते युद्धवान् स्वप्राणान् पणीकृत्य मिदियनीयानां
१८ करेभ्यो युष्मान् उद्धृतवांश्च यूयमद्य तस्य मज्जनकस्य वंशस्य प्रति-
कूलम् उत्थाय पाषाणैकोपरि तस्य सप्ततिसुतान् हत्वा तस्य दासीसुतम्

अवीमेलकं स्वेषां भ्रातृत्वात् शिखिमीयगृहस्थानाम् उपरि नृपमकुरुत।
अतो यिरुब्बालं तस्य वंशञ्च प्रति युष्माकम् अद्यतनाचरणं यदि सत्यं १९
न्याय्यञ्च भवेत् तर्हि यूयम् अवीमेलकम् अभिनन्दत स च युष्मान्
अभिनन्दतु। किन्तु यदि न तथा भवेत् तदावीमेलकाद् वह्निर्निर्गत्य २०
शिखिमीयगृहस्थान् मिल्लोः परिजनांश्च दहतु, तथा शिखिमीयगृह-
स्थेभ्यो मिल्लोः परिजनेभ्यश्च वह्निर्निर्गत्यावीमेलकं दहतु। अनन्तरं २१
योथमः पलाय्य वेरं गत्वा स्वभ्रातुरवीमेलकस्य भयात् तत्र न्यवसत्।

अनन्तरम् अवीमेलक इस्रायेल्वंशस्योपरि वर्षत्रयं यावद् राजत्वं २२
चकार। ततः परं यिरुब्बालस्य सप्ततिसुतान् प्रति कृतस्य निर्द्दय- २३
कार्य्यस्य फलं यद् आगच्छेत् तेषां रुधिरपातापराधश्च यत् तेषां
हन्तुस्तेषां भ्रातुरवीमेलकस्य मूर्द्ध्नि तथा स्वभ्रातृबधे तस्य सहकारिणां
शिखिमीयगृहस्थानां मूर्द्धसु वर्त्तेत, तदर्थम् अवीमेलकस्य शिखिमीयगृह- २४
स्थानाञ्च मध्य ईश्वरेण दुर्बुद्धाम् उत्पादितायां शिखिमीयगृहस्था अवी-
मेलकं प्रति विश्वासघातकत्वं चक्रुः। अपरं शिखिमीयगृहस्थास्तद्घाते २५
पर्व्वतशिखरेषु गोपनेन लोकान् उपवेशयामासुः, ततो यावन्तो लोका-
स्तेषां समीपमार्गेण गच्छन्ति तेषां द्रव्याणि ते लोठयित्वा गृह्णन्तीति
वाग् अवीमेलकस्य कर्णगोचरीबभूव। अनन्तरम् एवदस्य सुते गाले २६
स्वीयभ्रातृभिः सार्द्धम् आगत्य शिखिमं प्रविष्टे शिखिमस्य गृह-
स्थास्तम् आश्रयन्। अपरं तैः क्षेत्रं गत्वा द्राक्षाक्षेत्रस्थफलानां चयने २७
मर्द्दने च समाप्ते यदा प्रमोदोऽक्रियत तदानीं ते स्वदेवस्य मन्दिरं
गत्वा भोजनं पानञ्च कुर्व्वन्तोऽवीमेलकं शेपिरे। विशेषत एवदस्य सुतो २८
गालः कथयामास, अवीमेलकः कः? शिखिमश्च कः? वयं कुतोऽमुं
सेवामहे? असौ किं यिरुब्बालस्य सुतो न हि? अपरं सिवूलः किं
तस्य सेनापति र्न हि? यूयं शिखिमस्य पितुर्हमोरस्य लोकान् सेवध्वं,
किमर्थं वयम् अमुं सेवामहे? हा हा लोकेऽस्मिन् मम वशीभूतेऽहम् २९
अवीमेलकं दवयिष्ये, अनन्तरं सोऽवीमेलकम् उद्दिश्य जगाद त्वं स्वकीयां
बहुसेनाम् आदाय वहिरागच्छ।

अनन्तरं नगराधिपतिः सिवूल एवदसुतस्य गालस्य तानि वाक्यानि ३०
निशम्य क्रोधेन प्रजज्वाल। गोपनेन चावीमेलकस्य समीपं दूतान् ३१
प्रहित्यावदत् पश्य, एवदस्य पुत्रो गालस्तद्भ्रातरश्च शिखिमम् आगता
अपरं पश्य ते तव विरुद्धं नगरे कुप्रवृत्तिं जनयन्ति। अतस्त्वं स्वीय- ३२

३२ सङ्गिभिर्लोकैः समं रजन्यामुत्थाय क्षेत्रे गुप्तस्तिष्ठ। अनन्तरं प्रातःकाले
सूर्य्योदय एवोत्थाय नगरमाक्राम्य ततः पश्य तस्मिन् तत्सङ्गिषु लोकेषु
च तव विरुद्धं वहिर्गतेषु त्वं तान् प्रति यत् कर्त्तुं शक्नोषि तदेव कुरु।
३४ अनन्तरम् अवीमेलकस्तस्य सङ्गिनश्च लोका रजन्यामुत्थाय चत्वारः
३५ संघा भूत्वा शिखिमस्य विरुद्धं गुप्ता अतिष्ठन्। अपरम् एवदस्य
पुत्रो गालो वहिर्गत्वा नगरस्य द्वारप्रवेशस्थानेऽतिष्ठत् तदावीमेलके
३६ तस्य सङ्गिलोकेषु च गोपनाद् उत्थितवत्सु गालो लोकान् दृष्ट्वा सिवूलं
जगाद, पश्य पर्व्वतशृङ्गेभ्यो जना अवरुह्यागच्छन्ति, ततः सिवूलस्तम-
३७ वदत् त्वं पर्व्वतानां छायां लोकनिवहमिव पश्यसि। अनन्तरं गालः
पुनरुवाच पश्य भूगुस्थानाल्लोका अवरुह्यागच्छन्ति अपरैकसंघो मियो-
३८ निनीयनाम्न एलोनतरोरागच्छति। ततः सिवूल उवाच, अवीमेलकः कः?
कुतो वयं तं सेवामहे? वाचमिमां त्वं येन वदनेनावदस्तव तद्वदनमधुना
कुत्र? त्वं यान् अतुच्छय एते किं ते लोका न हि? विनयेहं त्वमिदानीं
३९ वहिर्भूय सार्द्धमेतै युध्य। ततो गालः शिखिमीयगृहस्थानामग्रगामी
४० भवन् वहिर्गत्वावीमेलकेन समं युयोध। ततोऽवीमेलकेन विद्रावितः स
तत्सम्मुखात् पलायाञ्चक्रे, अपरं द्वारप्रवेशस्थानं यावद् बहवो लोका
४१ हता अपतन्। अपरम् अवीमेलक आरुमायां न्यवसत् सिवूलश्च
४२ गालं तस्य भ्रातृगणञ्च शिखिमनिवासाद् दवयामास। परदिने लोका
४३ वहिर्भूय क्षेत्रं गच्छन्तीति वार्त्तां प्राप्यावीमेलको लोकान् आदाय
त्रीन् सङ्घान् कृत्वा क्षेत्रे गुप्तस्तस्थौ, अनन्तरं लोका नगराद् वहिर्भूया-
४४ गच्छन् इति निरीक्ष्य स तेषां विरुद्धम् उत्थाय तान् आजघान। अपरम्
अवीमेलकस्तस्य सङ्गिसङ्घश्च द्रुतं गच्छन्तो नगरद्वारस्य प्रवेशस्थानेऽति-
ष्ठन् इतरौ द्वौ सङ्घौ च क्षेत्रस्थानां सर्व्वलोकानां विरुद्धमुत्थाय तान्
४५ अवधिष्टां। अपरम् अवीमेलकस्तत् कृत्स्नं दिनं तस्य नगरस्य विरुद्धं
युद्ध्वा नगरं वशीचक्रे तन्मध्यस्थितान् लोकान् अवधीच्च, अपरं नगरम्
उच्छिद्य तस्य स्थाने लवणं विचकार।
४६ अनन्तरं शिखिमस्य दुर्गस्थिताः सर्व्वे गृहस्था इति वाचं निशम्य
४७ विरीतदेवस्य मन्दिरस्थं दृढस्थानं प्रविविशुः। अनन्तरं शिखिमस्य
दुर्गस्थिताः सर्व्वे गृहस्था अमिलन् इति वाच्यवीमेलकस्य कर्णगोचरी-
४८ भूतायाम् अवीमेलकस्तत्सङ्गिनश्च सल्मोनपर्व्वतम् आरुरुहुः, अवीमेल-
कश्च कुठारमेकं करेणादाय वृक्षशाखामेकां छित्त्वा स्वस्कन्धे निधाय

स्वीयसङ्गिलोकान् जगाद, यूयं यत् कुर्व्वन्तं मां पश्यथ तदनुसारं शीघ्रं
कुरुत। ततः सर्व्वे लोकास्तद्रीत्यनुसारेण शाखाश्छित्त्वादाय अबीमेलकस्य ४९
पश्चात् चलिताः, अनन्तरं दुर्गस्य समीपे ताः शाखा निधाय तत्र
वह्निं ददुः ततः शिखिमस्य दुर्गस्थाः सर्व्वे लोका अर्थतो नार्य्यः पुरुषाश्च
प्रायः सहस्रलोका निधनं गताः।

अनन्तरम् अबीमेलकस्तेवेषं गत्वा तस्य विरुद्धं शिबिरं स्थापयित्वा ५०
तद् वशीचक्रे। किन्तु तस्य नगरस्य मध्ये दुराक्रमं दुर्गमेकमासीत् तस्मात् ५१
पुरुषा नार्य्यश्च नगरस्य सर्व्वे गृहस्थलोकास्तद्दुर्गमाश्रित्य द्वारं रुद्धा दुर्ग-
पृष्ठमारुरुहुः। अनन्तरम् अबीमेलकस्तस्य दुर्गस्य समीपमुपस्थाय तस्य ५२
विरुद्धं युयोध वह्निना दुर्गद्वारं दाहयितुं तस्य समीपं जगाम च।
ततः काचिद् योषित् पेषण्याः खण्डमेकम् अबीमेलकस्य शिरसि निक्षिप्य ५३
तस्य शिरसः कपालं बभञ्ज। ततः स तूर्णं निजास्त्रवाहकं युवान- ५४
माहूय जगाद स नार्य्या मारित इति वाचं यल्लोका मामधि न वदेयु-
स्तदर्थं त्वं खड्गं निष्कोष्य मां जहि, ततस्तेन यूनाहतः स ममार।
अनन्तरम् अबीमेलको मृत इति दृष्ट्वा इस्रायेल्वंशीयाः सर्व्वे स्वस्वस्थानं ५५
प्रति प्रतस्थिरे।

इत्थम् अबीमेलको निजसप्ततिभ्रातॄणां बधेन स्वतातस्य विरुद्धं ५६
यत् कुकर्म्माकरोत् तस्य समुचितो दण्डः, शिखिमस्य गृहस्थाश्च यद्यत् ५७
कुकर्म्माकुर्व्वन्, तेषामपि समुचितो दण्ड ईश्वरेणादायि यिरुब्बाल-
सुतस्य योथमस्य शापश्च तान् प्रति सफलो बभूव।

---

१० दशमोऽध्यायः।

१ तोलयनाम्नो विचारयितुः कथनं ३ यायीरनाम्नो विचारकर्त्तुः कथनं ७ पाप-
कारणात् इस्रायेल्लोकानां दुःखं १० परमेश्वरं प्रति निवेदनम् ईश्वरस्योत्तरञ्च
१५ लोकानां पापाङ्गीकारस्तान् प्रतीश्वरस्य दया च।

अबीमेलकस्य मरणात् परम् इषाखरवंशीयो दोदयस्य पौत्रः पूयसः १
पुत्रस्तोलय इस्रायेल्वंशस्य रक्षणायोदपद्यत, स इफ्रयिमपर्व्वतस्थे
शामीरनगरे न्यवसत्, त्रयोविंशतिवत्सरान् यावद् इस्रायेल्लोकान् २
विचारयाञ्चकार च ततः स ममार शामीरे च तस्य श्मशानं बभूव।

ततः परं गिलियदीयो यायीर उत्पन्नः सन् द्वाविंशतिवत्सरान् ३
यावद् इस्रायेल्वंशस्य विचारं चकार। त्रिंशद् गर्द्दभारोहिणस्तस्य ४

त्रिंशत्पुत्रा आसन्, तेषाञ्च हवोतयायीरनाम्ना विख्यातानि नगरा-
५ ण्यासन् तान्यद्यापि गिलियद्देशे विद्यन्ते। अनन्तरं यायीरे मृते कामोने
६ तस्य श्मशानं बभूव। ततः परम् इस्रायेल्वंशाः परमेश्वरस्य साक्षात्
पुनर्व्वारं पापं चक्रुर्वाल्देवान् अस्तारोतदेवीररामीयदेवान् सीदोनी-
यदेवान् मोयाबीयदेवान् अम्मोनवंशीयदेवान् पिलेष्टीयदेवांश्च सिषे-
विरे, ते परमेश्वरम् असेवमानास्तत्यजुः।
७ तत इस्रायेल्वंशस्य प्रतिकूलं परमेश्वरस्य क्रोधे प्रज्वलिते स पिलेष्टी-
८ यानाम् अम्मोनवंशीयानाञ्च करेषु तान् व्यक्रीणात्। ततस्तं वत्सर-
मारभ्याष्टादशवत्सरान् यर्द्दनपारे इमोरीयाणां गिलियदाख्यप्रदेश-
९ वासिनः सर्व्वे इस्रायेल्वंशास्तैः क्लिष्टा उपद्रुताश्च। तदन्यद् अम्मोन-
वंशीया यिहूदाबिन्यामीनेफ्रयिमवंशीयैः समं योद्धुं यर्द्दनस्य पारम्
आजग्मुस्तत इस्रायेल्वंशो भृशं क्लेशं प्राप।
१० अनन्तरम् इस्रायेल्वंशः परमेश्वरमुद्दिश्य प्रार्थनामिमां चकार,
वयं निजेश्वरं त्यक्त्वा बाल्सुरान् असेवामहीति कर्म्मणा तव प्रतिकूलं
११ पापमकुर्म्महि। ततः परमेश्वर इस्रायेल्वंशाय कथयामास मिस्रीये-
१२ मोरीयाम्मोनीयपिलेष्टीयलोकेभ्यः किमहं युष्मान् नामोचयं? तथा
सीदोनीयामालेकीयमायोनीयलोकै र्युष्मासूपद्रुतेषु युष्माभि र्मामुद्दिश्य
१३ प्रार्थितं, ततोऽहं तेषामपि करेभ्यो युष्मानमोचयं। तथापि यूयं मां
परित्यज्येतरदेवगणं सेवितवन्तस्तस्मादहं युष्मान् पुन र्नोद्धारयिष्यामि।
१४ यूयं गत्वा स्वैरभिरुचितान् देवान् उद्दिश्य प्रार्थयध्वं ते क्लेशसमये
युष्मानुद्धारयन्तु।
१५ तत इस्रायेल्वंशः परमेश्वरमवदत्, अस्माभिः पापमकारि, इदानीं
त्वं यत् क्षेमं मन्यसे तदेवास्मान् प्रति कुरु, अद्यमात्रमस्मान् उद्धारयेति
१६ वयं प्रार्थयामहे। अपरं ते स्वेषां मध्याद् इतरदेवान् दवयित्वा पर-
मेश्वरम् असेवन्त तत इस्रायेल्वंशस्य दुःखेन तस्य मनो दुःखितं।
१७ तस्मिन् समये ऽम्मोनवंशाः सर्व्वे मिलित्वा गिलियदे शिविरं स्थापया-
१८ मासुः, इस्रायेल्वंशाश्च मिलित्वा मिस्प्यां शिविरं स्थापयामासुः। ततो
गिलियदस्य मुख्यलोकाः परस्परमवदन् अम्मोनवंशेन सह योद्धुं गमने
कः प्रथमो भविष्यति? स गिलियदनिवासिनां सर्व्वेषां राजा भविष्यति।

११ एकादशोऽध्यायः।

१ यिप्तहस्य दूरीकरणं ४ तं पुनरानेतुं लोकप्रेषणं १२ इस्रायेलः सेनापतित्वे नियुक्तेन यिप्तहेनाम्मोनवंशस्य नृपतेः समीपं दूतप्रेषणं तस्यासम्मतिः २९ यिप्तहस्य प्रतिश्रुतिः ३२ तस्य जयः ३४ प्रतिश्रुत्यनुसारेण निजकन्यासमर्पणं।

तस्मिन् काले गिलियदीयो यिप्तहोऽतीव वीर आसीत्। स गिलिय- १
दाद् वेश्याजातपुत्त्र आसीत्। अपरं गिलियदस्य जायया पुत्त्रेषु प्रसूतेषु २
तस्य ते जायापुत्त्रा यौवनप्राप्ताः सन्तो यिप्तहं दवयितवन्तो गदितवन्तश्च
त्वं तातस्यापपत्न्याः पुत्त्रः पितृधनस्याधिकारं न प्राप्स्यसि। ततो यिप्तहः ३
स्वभ्रातृणां सम्मुखात् पलाय्य टोवदेशे प्रवासं चकार। अपरं कतिपया
दुष्टलोका यिप्तहेन समं मिलित्वा तेन सह गमनागमनं चक्रुः।

कतिपयकालात्परं अम्मोनवंश इस्रायेल्वंशेन समं युयोध। अम्मोन- ४
वंशीया यदा युद्धमारेभिरे तदा गिलियदस्य प्राचीना यिप्तहं टोव- ५
देशाद् आनेतुं गताः। ततस्ते यिप्तहमवदन् त्वम् आगत्यास्माकं सेना- ६
पति र्भव वयम् अम्मोनवंशेन सह योत्स्यामः। ततो यिप्तहो गिलियदस्य ७
प्राचीनान् अवदत्, अहं किं युष्माभि र्न सन्तापितः पैतृकनिवेशनाद्
दूरीकृतश्च? अत इदानीं विपद्ग्रस्ता यूयं मम समीपं कुत आगच्छथ?
ततो गिलियदस्य प्राचीना यिप्तहमवदन्, त्वम् अस्माकम् अग्रसरो ८
भूत्वा अम्मोनवंशेन सह युद्ध्वा यदस्माकम् अर्थाद् गिलियदनिवासिनां
सर्व्वेषां लोकानां मुख्यो भव, एतत्कृते वयम् अधुना पुनस्तव समीपं
प्रत्यावृत्यागताः। यिप्तहो गिलियदस्य प्राचीनान् अवदत्, अम्मोनवंशैः ९
समं योद्धुं मयि युष्माभिः पुनः स्वदेशम् आनीते परमेश्वरो यदि मम
करे तान् समर्पयिष्यति तर्हि किमहं युष्माकं प्रधानीभविष्यामि? ततो १०
गिलियदस्य प्राचीना यिप्तहम् अवदन्, वयं यदि तव वाक्यानुसारेण
न कुर्म्महे तर्हि परमेश्वरोऽस्माकं विचारं करिष्यति। अनन्तरं यिप्तहो ११
गिलियदस्य प्राचीनजनैः समं जगाम, ततो लोकास्तं तेषां प्रधानं
सेनापतिञ्च चक्रुः, अपरं यिप्तहो मिस्पायां परमेश्वरस्य साक्षात् स्वां
समस्तां वाचं निवेदयामास।

अनन्तरं यिप्तहो ऽम्मोनवंशस्य नृपतेः समीपं दूतं प्रहित्य जगाद १२
मया सह तव कः सम्बन्धो यत् त्वं मया सह योद्धुं मम देशम् आगच्छः?
ततो ऽम्मोनवंशस्य राजा यिप्तहस्य दूतान् उवाच, इस्रायेल्वंशो १३
यदा मिसराद् वहिर्भूयागच्छत् तदा सोऽर्णोनम् आरभ्य यब्बोकं

यर्द्दनञ्च यावत् मम भूमिं हृतवान्, अत इदानीं निर्विरोधं तां पुन
१४ र्देहि। ततो यिप्तहोऽम्मोनवंशस्य नृपतेः समीपं पुनर्दूतान् प्रहितवान्
१५ दूतास्तमूचुः, यिप्तह इदं वदति मोयाबस्य भूमिरम्मोनवंशस्य च भूमि-
१६ रिस्रायेल्वंशेन हृता तन्नहि। किन्त्विस्रायेल्वंशो मिसराद् आग-
१७ मनकाले सूफसागरं यावत् प्रान्तरस्य मध्येन गत्वा कादेशं प्राप। ततः
परम् इदोमीयनृपस्य समीपं दूतान् प्रहित्य तं गदितवान् वयं निवे-
दयामहे त्वं स्वदेशस्य मध्येनास्मान् यातुं देहि, किन्त्विदोमराजस्तद्वाक्यं
न मेने, अपरं तथैव मोयाबीयराजस्य समीपमपि दूतेषु प्रहितेषु सोपि
१८ न मेने तदानीम् इस्रायेल्वंशः कादेशे न्यवसत्। अनन्तरं ते प्रान्तरस्य
मध्येन गत्वा इदोमदेशं मोयाबदेशञ्च प्रदक्षिणीकृत्य मोयाबदेशस्य
पूर्व्वपार्श्वेनागत्य अर्णोनस्य पारे शिविरं स्थापयामासुः, किन्तु मोयाबस्य
१९ सीमामध्यं न प्राविशन् यतोऽर्णोनो मोयाबस्य सीमासीत्। अपरम्
इस्रायेल्वंशो हिष्वोनभूपालस्येमोरीयराजस्य सीहोनस्य समीपं दूतान्
प्रहित्य तमुवाच त्वं स्वदेशस्य मध्येनास्मान् स्वगन्तव्यस्थानं यातुम् अनुजा-
२० नीहि। ततः सीहोनः स्वीयसीम्ना यातुं दातुम् इस्रायेल्वंशे न विश्वस्य स्व-
सर्व्वलोकान् संगृह्य यहसे शिविरं स्थापयित्वेस्रायेल्वंशेन सह युयोध।
२१ तत इस्रायेलः प्रभुः परमेश्वरः सीहोनं तस्य सकललोकांश्चेस्रायेल्-
वंशानां करेषु समर्पयामास ततस्ते तान् आजघ्नुः, इत्थं यस्मिन् देशे
२२ इमोरीया न्यवसन् स कृत्स्नो देश इस्रायेल्वंशैरधिचक्रे। ते ऽर्णोनम्
आरभ्य यब्बोकं यावत् प्रान्तरञ्चारभ्य यर्द्दनं यावद् इमोरीयाणां सर्व्व-
२३ सीमानम् अधिचक्रुः। इत्थम् इस्रायेलः प्रभुः परमेश्वरः स्वलोकस्येस्रायेल्-
वंशस्य सम्मुख इमोरीयान् अधिकारात् च्युतान् चकार, इदानीं त्वं किम्
२४ अस्मान् अधिकारात् च्युतान् करिष्यसि? तव किमोशदेवेन दत्ता भूमि-
स्त्वया भोग्या, अस्माकञ्च प्रभुणा परमेश्वरेणास्माकं सम्मुखाद् दूरीकृतानां
२५ जातीनां भूमिरस्माभि र्भोग्येति किं सत्यं नहि? मोयाबीयनृपतेः सिप्पो-
रस्य सुताद् बालाकात् किं त्वं श्रेष्ठः? इस्रायेल्वंशस्य प्रतिकूलं स किं
२६ व्यवदत्? तेषां विरुद्धं स किं युयोध? हिष्वोने तदीयग्रामेषु तथा-
रोयेरे तदीयग्रामेषु अर्णोनतटसमीपस्थेषु सर्व्वनगरेषु च शतत्रय-
वत्सरान् इस्रायेल्वंशो वसति, तद्दीर्घकालमध्ये यूयं कुतस्तानि न
२७ पुनर्गृहीतवन्तः? अतस्तव किमपि मया नापराद्धं, किन्तु मया
सह योधनात् त्वं मां हिंसि। इस्रायेल्वंशस्याम्मोनवंशस्य च मध्ये

विचारयिता परमेश्वरोऽद्य विचारयतु। तथाप्यम्मोनवंशीयो राजा २८
यिप्तहेन प्रेषितवाक्येषु मनो न निदधे।

ततः परमेश्वरस्यात्मनाविष्टो यिप्तहो गिलियदमिनशिप्रदेशाभ्यां २९
गिलियदस्थमिस्पीं जगाम, अपरं गिलियदस्य मिस्पीतो ऽम्मोनवंशस्य
समीपं जगाम। अपरं तस्मिन् काले यिप्तहः परमेश्वरम् उद्दिश्य प्रति- ३०
श्रुत्य जगाद त्वं यद्यम्मोनवंशं मम हस्ते समर्पयसि, तदाम्मोनवंशात् ३१
मम कुशलेन प्रत्यागमनकाले मां साक्षात् कर्त्तुं मम निवेशनद्वारात्
निर्गन्ता परमेश्वराय भविष्यति परमेश्वरमुद्दिश्य च होमबलिस्वरूपस्य
मयोत्सृक्ष्यते।

अनन्तरम् अम्मोनवंशीयैः सह योद्धुं यिप्तहे तेषां समीपं पारं गते ३२
परमेश्वरस्तान् तस्य करे समर्पितवान्। ततः सो ऽरोयेरम् आरभ्य ३३
मिन्नीत उत्तरणं यावद् आबेलकिरामीमञ्च यावद् विंशतिनगराणि
वशीकृत्य तान् महानिहननेन जघान, इत्थम् अम्मोनवंश इस्रायेल्-
वंशस्य साक्षात् नम्रो बभूव।

अनन्तरं मिस्पायां स्वनिवेशने यिप्तहस्यागमनकाले तस्य दुहिता मुरज- ३४
वाद्यनृत्यकारिणीभि र्वेष्टिता सती तं साक्षात् कर्त्तुम् आजगाम यिप्तहस्य
सैव सन्ततिरासीत् तदन्यः सुतः सुता वा नासीत्। तदा स स्वदुहितरं ३५
दृष्ट्वा वस्त्रं छित्त्वा बभाषे हा हा हे मम सुते त्वं मां भृशं दुःखिनम्
अकार्षीः, मम क्लेशदायकानां मध्ये त्वमप्येकाभूः, यतोऽहं परमेश्वरम्
उद्दिश्य प्रतिश्रुतकथामकथयम् अधुना तामन्यथा कर्त्तुं न शक्नोमि।
ततः सा तमवदत् हे मत्तात त्वं यदि परमेश्वरमुद्दिश्य प्रतिश्रुतमकरो- ३६
स्तर्हि निजप्रतिश्रुतवाक्यानुसारेण मां प्रति व्यवहर, यतः परमेश्वरस्तव
रिपुभ्योऽम्मोनवंशीयेभ्यस्त्वेष्टं समुचितम् अदात्। अनन्तरं सा निज- ३७
तातं जगाद मदर्थं कर्म्मैकं त्वया क्रियतां मासद्वयार्थं मां विसृज ततोऽहं
पर्व्वतेषु गमनागमने कुर्व्वती निजानूढात्वमधि सखीभिः सह विलपामि।
ततः स याहीति वदन् मासद्वयार्थं तां व्यसर्जत् तदा सा पर्व्वतोपरि ३८
गत्वा निजानूढात्वमधि स्वसखीभिः समं विललाप। अपरं मासद्वये गते ३९
सा स्वपितुः समीपं प्रत्यागमत्, ततः स स्वकृतप्रतिश्रुत्यनुसारेण तां प्रति
व्यवजहार, सा केनापि पुरुषेण नोपभुक्ता। तदारभ्य इस्रायेलीय- ४०
कन्या गिलियदीययिप्तहस्य कन्यामधि वत्सरमध्ये चत्वारि दिनानि
विलपितुं प्रतिवत्सरं यान्ति व्यवहारोयम् इस्रायेल्देश उदपादि।

१२ द्वादशोऽध्यायः।

१ यिप्तहेन समम् इफ्रयिमलोकानां विवादः ७ यिप्तहस्य मरणं ८ इप्सनस्य कथनं ११ एलोनस्य कथनं १२ अब्दोनस्य कथनञ्च।

१ अनन्तरम् इफ्रयिमवंशीयाः सर्व्वे समाहूता उत्तरदिशं गत्वा यिप्तहं
बभाषिरे त्वया सह गन्तुम् अस्मान् अनाहूय त्वम् अम्मोनवंशेन सह
२ योद्धुं कुतः पारमगमः? अतो वयं तव गृहं वह्निना दाहयिष्यामः। ततो
यिप्तहस्तान् अवदत्, अम्मोनवंशेन समं मम मदीयलोकानाञ्च महाविरोधे
समुपस्थिते युष्मानहम् आह्वयं किन्तु यूयं तेषां करेभ्यो मां नोद्धारित-
३ वन्तः। अनन्तरं युष्माभिरहं नोद्धारित इति वीक्ष्याहं स्वप्राणान् करे
कृत्वाम्मोनवंशस्य प्रतिकूलं पारमगमं ततः परमेश्वरो मम करे तान्
समार्पयत्, अतो यूयम् इदानीं मया समं योद्धुं कुतो मम समीपमा-
४ गच्छथ? अनन्तरं यिप्तहो गिलियदस्य सर्व्वलोकान् संगृह्णन् इफ्रयिमवं-
शीयैः समं युयोध गिलियदीयलोकाश्चेफ्रयिमलोकान् आजघ्नुः, यतस्ते
ऽवदन् यूयम् इफ्रयिमात् पलायिता लोका गिलियदीया इफ्रयिममि-
५ नश्योर्मिश्रिता लोकाः। अनन्तरं गिलियदीयलोका इफ्रयिमवंशस्याग्रे
गत्वा यर्द्दनस्य सर्व्वघट्टान् वशीकृतवन्तः, तत इफ्रयिमीयानां पलायि-
तेन लोकेन मां पारं गन्तुं देहीति वचसि कथिते गिलियदीयलोकास्तं
६ पप्रच्छुः, त्वं किम् इफ्रयिमीयो नरः? तेन नाहमिति गदिते तेऽवदन्
त्वं शिब्बोलत् शब्दमुच्चारय ततः स यथार्थम् उच्चारयितुम् अशक्तः
सिब्बोलदित्युवाच, ततः परं ते तं धृत्वा यर्द्दनस्य घट्टे ऽबधिषुः। तस्मिन्
काले इफ्रयिमवंशस्य द्विचत्वारिंशत् सहस्राणि लोका अहन्यन्त।
७ स गिलियदीयो यिप्तहः षड्वत्सरान् यावद् इस्रायेल्वंशं शासित्वा
ममार, ततो गिलियदस्य नगरैकस्मिन् तस्य श्मशानं बभूव।
८ अपरं बैतलेहमीय इप्सन इस्रायेल्वंशस्य विचारयिता बभूव, तस्य
९ त्रिंशत् सुतास्त्रिंशत् कन्याश्चासन्, अपरं स तं कन्यागणं विवाहयित्वा
स्वसुतेभ्यस्त्रिंशत् कन्या जग्राह, स सप्तवत्सरान् यावद् इस्रायेल्वंशम्
१० अशिषत्। अनन्तरम् इप्सने प्रमीते बैतलेहमे तस्य श्मशानं बभूव।
११ अनन्तरं सिबूलूनवंशीय एलोन इस्रायेल्वंशस्य विचारयिता बभूव
१२ स दशवत्सरान् यावद् इस्रायेल्वंशम् अशिषत्। अनन्तरं सिबूलून-
वंशीय एलोनो ममार, ततः सिबूलूनदेशस्य अयालोने तस्य श्मशानं
बभूव।

अनन्तरं हिल्लेलस्य सुत अब्दोननामा पिरियाथोनीय एको जन १३
इस्रायेल्वंशस्य विचारकर्त्ता बभूव। तस्य चत्वारिंशत् पुत्रास्त्रिंशत् १४
पौत्राश्चासन् ते सप्ततिगर्द्दभान् आरोहन्ति स्म। सोऽष्टवर्षाणि यावद्
इस्रायेलम् अशिषत्। अनन्तरं पिरियाथोनीये हिल्लेलसुते ऽब्दोने मृते १५
अमालेकीयपर्व्वत इफ्रयिम्देशस्थे पिरियाथोने तस्य श्मशानं बभूव।

---

१३ त्रयोदशोऽध्यायः।

१ इस्रायेल्वंशस्य पापकरणं २ मानोहस्य भार्य्यां प्रति दूतस्य दर्शनं ८ मानोहं प्रति दूतस्य दर्शनं १५ मानोहस्य नैवेद्योत्सर्जनं दूतस्यान्तर्द्धानं २४ शिम्शोनस्य जन्मकथनं।

अनन्तरम् इस्रायेल्वंशीयैः परमेश्वरस्य साक्षात् पुनः पापे समा- १
चरिते परमेश्वरश्चत्वारिंशद् वर्षाणि यावत् तान् पिलेष्टीयानां
करेषु समर्पयामास।
दान्वंशस्य सरियनिवासी मानोहनामा मनुष्यैक आसीत् तस्य २
जाया बन्ध्या निरपत्या चासीत्। अनन्तरं परमेश्वरस्य दूतस्तस्यै स्त्रियै ३
दर्शनं दत्त्वा तां बभाषे पश्य त्वं बन्ध्या निरपत्या चासि, किन्तु त्वं गर्भं
धृत्वा पुत्रं प्रसविष्यसे। अतस्त्वामहं विनये त्वं सावधाना भव द्राक्षारसं ४
सुरां वा न पिब किञ्चनाशुचि वस्तु मा भुंक्ष्व। पश्य-त्वं गर्भं धृत्वा यं पुत्रं ५
प्रसविष्यसे तस्य शिरः क्षुरेण न स्प्रक्ष्यते यतः स बालको गर्भस्थितिमार-
भ्येश्वराय नासरीयो भविष्यति, अपरं पिलेष्टीयानां करेभ्य इस्रायेल्-
वंशम् उद्धारयितुं स आरप्स्यते। अनन्तरं सा नारी समागत्य स्वपतिं ६
बभाषे, ईश्वरस्य लोक एको ममान्तिकम् आगच्छत्, तस्य वदनम् ईश्व-
रीयदूतस्य वदनमिवातिभयङ्करं किन्तु स कस्मादागच्छद् इत्यहं तं
नापृच्छं, अपरं सोपि स्वनाम मह्यं नाकथयत्। स मामवदत् पश्य त्वं ७
गर्भं धृत्वा पुत्रमेकं प्रसविष्यसे तस्मात् कञ्चन द्राक्षारसं सुरां वा न पिब
किञ्चनाशुचिवस्तु मा भुंक्ष्व यतः स बालको गर्भस्थितिमारभ्य मरणदिनं
यावद् ईश्वराय नासरीयो भविष्यति।
ततो मानोहः परमेश्वरम् उद्दिश्य विनीय कथयामास हे प्रभो त्वया ८
प्रहित ईश्वरस्य लोक आवयोः समीपं पुनरागच्छतु तं भाविबालक-
मध्यावाभ्यां यत् कर्त्तव्यं तच्छिक्षयतु च। तदानीम् ईश्वरो मानोहस्य ९
वाक्यं गृहीतवान् अनन्तरं सा योषित् क्षेत्र उपविशत्येतस्मिन् समय

ईश्वरस्य दूतः पुनस्तस्याः समीपम् आजगाम किन्तु तस्याः पतिर्मानोह-
१० स्तया सह नासीत्। ततः सा नारी तूर्णं धावन्ती निजपतिं वार्त्तां जगाद,
पश्चान्यस्मिन् दिने यो लोको मम समीपम् आगच्छत् स पुनर्मह्यं दर्शनं
११ दत्तवान्। ततो मानोह उत्थाय स्वजायायाः पश्चाद् गत्वा तस्य लोकस्य
समीपं प्राप्य तमवदत्, इमां स्त्रियं यो लोकः सम्भाषितवान् स किं
१२ भवान्? स उवाच, अहमेवास्मि। अनन्तरं मानोह उवाच भवतो
वाक्ये सफले सति बालकमधि केन नियमेनावाभ्याम् आचरितव्यं?
१३ ततः परमेश्वरस्य दूतो मानोहमवदत् इमां स्त्रियं यद्यत् मयादिष्टं तदधि
१४ सा सावधाना तिष्ठतु। सा द्राक्षाफलजातं किमपि वस्तु मा भुंक्तां
तथा द्राक्षारसं सुराञ्च मा पिवतु नाशुचिद्रव्यं भुङ्क्तां, तामहं यद्यत्
समाज्ञापयं सा तत्सर्व्वम् आचरतु।
१५ अनन्तरं मानोहः परमेश्वरदूतम् उवाच भवान् अस्मदनुरोधात्
१६ किञ्चिद् विलम्बतां भवतः कृते आवां छागवत्समेकं पक्ष्यावः। तत
ईश्वरस्य दूतो मानोहमवदत् यद्यपि त्वं मां विलम्बयसे, तथापि तवान्नं
नाहं भक्षिष्यामि, यदि च होमबलिं दातुम् इच्छसि तर्हि स
परमेश्वराय दातव्यः, किञ्च स परमेश्वरस्य दूत इति मानोहो नाज्ञा-
१७ सीत्। अनन्तरं मानोहः परमेश्वरस्य दूतम् अवदत् भवतः किन्नाम?
१८ भवतो वाक्ये सफले सत्यावां भवन्तं समादरिष्यावहे। ततः पर-
मेश्वरस्य दूतस्तमवदत् त्वं कुतो मम नाम पृच्छसि? मम नामाश्चर्य्यं।
१९ अनन्तरं मानोहस्तं छागवत्सं तदीयनैवेद्यञ्च गृहीत्वा तत्रस्थपाषा-
णोपरि परमेश्वरमुद्दिश्य निवेदयामास ततो मानोहस्य तज्जायायाश्च
२० दृष्टिगोचरे तेन दूतेनाश्चर्य्यरूपमाचरितं। यतो यदा यज्ञवेद्या अग्नि-
शिखा गगणदिशम् उदगच्छत्, तदा मानोहस्य तज्जायायाश्च दृष्टि-
गोचरे परमेश्वरस्य दूतो यज्ञवेद्याः शिखाम् आश्रित्योर्द्धं जगाम,
२१ ततस्तौ मृत्तिकायां न्युब्जीभूय पपततुः। इतः परं परमेश्वरस्य दूतो
मानोहं तस्य जायाञ्च स्वं पुनर्नादर्शयत् तदा स परमेश्वरस्य दूत इति
२२ मानोहो ज्ञातवान्। अनन्तरं मानोहः स्वीयां जायां जगाद आवाम्
२३ ईश्वरं अदर्शाव तत्कारणाद् अवश्यं मरिष्यावः। किन्तु तस्य जाया तं
बभाषे, परमेश्वरो यद्यावां हन्तुम् ऐषिष्यत् तर्हि स आवयोः करतो
होमं नैवेद्यञ्च नाग्रहीष्यद् एतानि चावां नादर्शयिष्यत् किञ्च समये
ऽस्मिन् यानि कथितवान् तान्यपि नाकथयिष्यत्।

अनन्तरं सा नारी पुत्त्रं प्रसूय तस्य नाम शिम्शोन इति चकार २४
किञ्च स बालको वर्द्धितुमारेभे परमेश्वरश्च तस्मै वरं ददौ। अपरं परमे- २५
श्वरस्यात्मा सरियस्येष्टायोलस्य च मध्ये दानीयशिविरे प्रथमं तस्मिन्
आविर्बभूव।

---

१४ चतुर्दशोऽध्यायः।

१ पिलेष्टीयानां कन्यैकस्याः शिम्शोनस्य विवाहेच्छा ५ तिम्नाथायां गमनकाले सिंहवधः ८ तिम्नाथायां द्वितीययात्रायां सिंहस्य कुणपे मधुलाभः १० शिम्शोनस्य विवाहभोज्यं १२ भोजनसमये शिम्शोनस्य प्रहेलिकाकथनं १९ प्रहेलिकार्थकथनफलं।

अनन्तरं शिम्शोने तिम्नाथां गते तत्र पिलेष्टीयां कन्यामेकां वीक्ष्य १
प्रत्यागत्य निजपितरौ वार्त्तामिमां बभाषे मया तिम्नाथायां पिलेष्टीया २
कन्यैका दृष्टा, अतस्तामानीय मां विवाहयतं। ततस्तस्य पितरौ जगदतुः ३
तव भ्रातृणां मध्ये ऽस्मदीयसर्व्वलोकानाञ्च मध्ये किं कन्या नास्ति यत् त्वम्
अच्छिन्नत्वचां पिलेष्टीयानां कन्यां विवोढुं यास्यसि? शिम्शोनः
स्वपितरं बभाषे, त्वं मदर्थं तामेवानय मम दृष्ट्या सा मनोहरा। किन्तु ४
स यत् पिलेष्टीयानां प्रतिकूलं छिद्रं प्राप्तुं चेष्टेत तदर्थं परमेश्वरादिदं
भवतीति तस्य पितरौ न विविदतुः। तदानीं पिलेष्टीया इस्रायेल्वंश-
स्याधिपतित्वं चक्रुः।

तस्मिन् काले शिम्शोनस्तस्य पितरौ च तिम्नाथाम् अगमन्, तेषु ५
तिम्नाथास्थानि द्राक्षाक्षेत्राणि प्राप्तेषु तत्रैको युवसिंहो गर्ज्जन् शिम्शो-
नस्यान्तिकम् आगमत्। तदा परमेश्वरस्यात्मनाविष्टः शिम्शोनः शून्य- ६
हस्तोऽपि सन् छागवत्सवत् तं सिंहं चिच्छेद, किन्तु स तत् कृतवा-
निति स्वपितरौ न जगाद। अनन्तरं शिम्शोनेन गत्वा तया कन्यया ७
मिथः संलापे कृते सा तस्य दृष्टौ मनोहरा बभूव।

अनन्तरं कस्मिंश्चित् समये गते यदा स तां कन्यां विवोढुं तत् स्थानं ८
पुनरगच्छत् तदा तस्य सिंहस्य कुणपं द्रष्टुं मार्गात् जगाम, तत्र तत्-
सिंहकुणपमध्ये मधुमक्षिकायूथं मधुकोषञ्च दृष्ट्वा स्वहस्तेनादाय मधु ९
भक्षन् जगाम, किञ्च पित्रोः समीपम् उपस्थाय ताभ्यामपि किञ्चिद्
ददौ ततस्तौ तद् बुभुजाते, किन्तु सिंहकुणपात् मधु गृहीतमिति ताभ्यां
स न कथयामास।

अनन्तरं तस्य ताते तस्याः कन्यायाः समीपं गते शिम्शोनस्तत्र स्थाने १०

११ भोज्यमासादितवान्, यतो वराणां तादृशो व्यवहार आसीत्। अनन्तरं
तं दृष्ट्वा पिलेष्टीयलोकास्तस्य समीपे स्थातुं त्रिंशत् सहचरान् आनिन्युः।
१२ अनन्तरं शिम्शोनस्तान् जगाद युष्मानहं प्रहेलिकामेकां पृच्छामि
यदि यूयम् अस्य महस्य सप्तदिनमध्ये तस्या अर्थं निश्चित्य मह्यं कथयितुं
शक्नुथ तर्हि युष्मभ्यमहं त्रिंशद् उत्तरासङ्गान् त्रिंशद् वस्त्रयुगानि च
१३ दास्यामि। किन्तु यदि तस्या अर्थं वक्तुं न शक्नुथ तर्हि यूयं मह्यं त्रिंशत्
प्रावारान् त्रिंशद् वस्त्रयुगानि च दास्यथ, ततस्ते जगदुः, तव प्रहेलिकां
१४ त्वं ब्रूहि वयं शृणुमः। स उवाच,

निरगाद् भक्षकाद् भक्ष्यं मिष्टञ्च बलिनस्तथा॥

१५ ततस्ते त्रिभिर्दिनैस्तस्याः प्रहेलिकाया अर्थं कथयितुं नाशक्नुवन्। अन-
न्तरं सप्तमे दिवसे ते शिम्शोनस्य जायाम् अवदन् त्वं निजं स्वामिनं
स्वप्रहेलिकाया अर्थं कथयितुं प्रवर्त्तय नोचेत् वयं त्वां तव पितृनिवेशनञ्च
वह्निना दाहयिष्यामः; अस्माकं सम्पत्तिम् अपहर्त्तुं किं यूयम् अस्मान्
१६ निमन्त्रितवन्तः? ततः शिम्शोनस्य जाया तस्य साक्षाद् रुदती बभाषे
त्वम् अवश्यं माम् ऋतीयसे किञ्चिदपि मयि न प्रीयसे, यतस्त्वं मम
लोकान् प्रहेलिकामेकामवादीः किन्तु मां नावादीः। ततः स उक्त-
वान् पश्याहं तां कथां स्वपितरावपि नावदं तर्हि किं तुभ्यं तां कथयि-
१७ ष्यामि? ततस्तस्य जाया महीयसप्ताहस्य शेषदिनं यावत् तस्य साक्षात्
तादृग् रुदितवती, ततः स तया व्यग्रः सन् सप्तमे दिवसे तस्यै कथया-
१८ मास, ततः सा योषित् स्वलोकेभ्यः प्रहेलिकाया अर्थं कथयामास। अन-
न्तरं सप्तमे दिवसे सूर्य्येऽस्तमगते तन्नगरस्थमनुष्यास्तम् ऊचुः,

मधुतः किं भवेन्मिष्टं बलवान् को मृगेन्द्रतः॥

ततः स तान् अवदत्,

नाभेत्स्यध्वं मम श्लोकं चेन्नाक्रक्ष्यत मे गवा॥

१९ अनन्तरं परमेश्वरस्यात्मनि तस्मिन् अधिष्ठिते सोऽस्किलोनं गत्वा तत्र-
त्यान् त्रिंशत् जनान् हत्वा तेषां वस्त्राणि गृहीत्वा प्रहेलिकार्थकथकेभ्यः
पूर्व्वोक्तानि वस्त्राणि ददौ, किन्तु तस्य क्रोधस्य प्रज्वलनात् तत्स्थानात्
२० स्वपितुर्निवेशनं जगाम। अनन्तरं शिम्शोनस्य यः सहचर आसीत्
तस्मै तस्य जायादीयत।

---

१५ पञ्चदशोऽध्यायः।

१ जायायाः समीपं गन्तुं शिमशोनस्य निषेधः चैत्रस्थस्य शस्यस्य दाहः ६ तस्य जायाश्वशुरयोर्दाहः शिमशोनेन बहुलोकहननं ९ यिहूदीयलोकैस्तस्य बद्धत्वं समर्पितत्वञ्च १४ गर्दभस्य हन्वा सहस्रलोकानां बधः १८ पिपासानिवारणार्थं तोयपानञ्च।

अनन्तरं गोधूमशस्यकर्त्तनकाले शिमशोनश्छागवत्समेकं गृहीत्वा स- १
जायां साक्षात् कर्त्तुं गत्वा जगाद स्वजायायाः समीपं अन्तःपुरमहं
यास्यामि, किन्तु तस्याः पिता तमन्तरं गन्तुं नानुजज्ञौ। किञ्च तस्या २
जनको जगाद त्वं ताम् ऋतीयितवान् इति निश्चित्य मया सा तव सह-
चराय दत्ता, तस्याः कनिष्ठभगिनी किं तस्याः सुन्दरी नहि? अहं
निवेदयामि त्वं तस्या विनिमयेन तां गृहाण। ततः शिमशोनोऽवदत् ३
अहमिदानीं पिलेष्टीयान् हिंसित्वापि तेभ्योऽधिकं निर्दोषो भविष्यामि।
अनन्तरं शिमशोनो गत्वा त्रीणि शतानि शृगालान् धृत्वा बहूल्का ४
आनीय द्वौ द्वौ शृगालौ योजयित्वैकैकाम् उल्कां तेषां पुच्छयुगेषु बबन्ध।
अनन्तरं तासूल्कासु वह्निं दत्त्वा पिलेष्टीयानां शस्यक्षेत्रेषु तान् त्यक्त्वा ५
बद्धशस्यमुष्टीन् अच्छिन्नशस्यानि जितवृक्षोद्यानानि च दाहयामास।

तदानीं पिलेष्टीया अपृच्छन् कर्म्मैतत् केन कृतं? लोका अवदन् ६
तिम्नाथीयस्य जामात्रा शिमशोनेनेदं कृतं यतस्तस्य जायापहृता तस्य
सहचराय दत्ता, ततः पिलेष्टीया आगत्य तां स्त्रियं तस्याः पितरञ्च
वह्निना दाहयामासुः। ततः शिमशोनस्तान् अवदत्, यदि युष्माभिरे- ७
तादृशं कर्म्म क्रियेत तर्हि युष्मभ्यं तत्फलमदत्त्वा नाहं क्षमिष्यामि। ततः ८
परं स सर्व्वथा महाघातेनाहत्य तान् अबधीत्, अनन्तरम् ऐटमपर्व्व-
तस्य गह्वरं गत्वा न्यवसत्।

तदानीं पिलेष्टीया गत्वा यिहूदाप्रदेशे शिविरं स्थापयित्वा लिहीं ९
यावद् व्याप्य तस्थुः। ततो यिहूदाया लोका अपृच्छन् यूयम् अस्माकं १०
प्रतिकूलं कुत आगच्छत? ते कथयामासुः शिमशोनोऽस्मान् प्रति यद-
करोत् तं प्रति तद्वत् कर्त्तुं तं बन्धुञ्च वयं समागताः। तदानीं यिहूदाया- ११
स्त्रीणि सहस्राणि लोका ऐटमपर्व्वतस्य गह्वरं गत्वा शिमशोनाय कथ-
यामासुः, पिलेष्टीया अस्माकम् अधिपतय इति किं त्वं न जानासि?
त्वमस्मान् प्रति किं कृतवान्? स कथयामास ते मां प्रति यदकुर्व्वन्
अहमपि तान् प्रति तद्वदकरवं। ते तस्मै कथयामासुः, वयमिदानीं त्वां १२
बद्धा पिलेष्टीयानां करेषु समर्पयितुम् आगताः। शिमशोनस्तान्

१३ अवदत् यूयं मां न हनिष्यथेति मम समीपे शपथं कुरुत। ततस्तेऽव-
दन्, न, वयं केवलं त्वां दृढं बद्धा तेषां करेषु समर्पयिष्यामः किन्तु
नितान्तं त्वां न हनिष्यामः। अनन्तरं ते नूतनरज्जुद्वयेन तं बद्धा तस्मात्
पर्व्वतात् तमादाय गताः।
१४ अनन्तरं तस्मिन् लिहीं प्राप्ते तस्य प्रतिकूलं पिलेष्टीया उच्चैः शब्दं
चक्रुः किन्तु परमेश्वरस्यात्मनि तस्मिन्नधिष्ठिते तस्य बाहुस्थिते रज्जू
वह्निना दग्धशणा इव बभूवतुस्तस्य बन्धनानि च तस्य हस्तद्वयान्निपेतुः।
१५ अनन्तरं स आर्द्रां गर्द्दभहनूमेकां दृष्ट्वा करं विस्तार्य्यादाय तद्द्वारा
१६ सहस्रं लोकान् अवधीत्। तदानीं शिम्शोनः कथयामास,

एको राशिर्द्वितीयश्च हतौ हन्वा खरस्य हि।
सहस्रं मम शत्रूणां हतं हन्वा खरस्य हि॥

१७ अनन्तरं कथां समाप्य हस्ताद् हनूं निक्षिप्य तत्स्थानस्य नाम रामत्-
लिही (हनूनिक्षेप इति) चकार।
१८ अनन्तरं सोऽतीव तृष्णार्त्तो भूत्वा परमेश्वरस्य समीपे प्रार्थनां चकार
त्वं स्वदासं महोद्धारकर्म्मेदं कारितवान् इदानीं किमहं तृष्णया मरि-
१९ ष्यामि चाच्छिन्नत्वचां वशी भविष्यामि? ततः परमेश्वरेण लिहीस्थिते
कुण्डाकारे छिद्रे सृष्टे तस्मात् तोयं निर्जगाम तदा स तोयं पीत्वा प्राणान्
प्राप्य सचैतन्यो बभूव तस्मात् स तत्स्थानस्य नाम ऐनहक्कोरि (प्रार्थ-
२० कस्य प्रस्रवणमिति) चकार, तत्स्थानम् अद्यापि लिह्यां विद्यते। पिले-
ष्टीयानां काले शिम्शोनो विंशतिवत्सरान् यावद् इस्रायेल्वंशस्य
विचारयितासीत्।

---

१६ षोडशोऽध्यायः।

१ शिम्शोनस्यासागमनं ४ दिलीलायां प्रेमासक्तता तस्य गुप्तकथां ज्ञातुं दिलीलायाः चेष्टा शिम्शोनस्य न प्रकाशनं १५ गुप्तकथाप्रकाशनात् तस्य बलहानिः २१ तस्य कारायां बन्धनं पिलेष्टीयैः सह तस्य मरणं।

१ तदानीं शिम्शोनोऽसां गत्वा तत्र वेश्यामेकां वीक्ष्य तस्या गृहं प्रावि-
२ शत्। ततः शिम्शोन एतत्स्थानम् आगच्छद् इति श्रुत्वा असातीयास्तद्
वेष्टयित्वा कृत्स्नां रजनीं तत्कृते नगरद्वारे गुप्ता अतिष्ठन्, यतः
प्रातःकाले दिने जाते तं वयं हनिष्याम इति गदित्वा ते कृत्स्नां रजनीं
३ तुष्णींभूय तस्थुः। अपरं शिम्शोनो मध्यरात्रिं यावत् शयित्वा मध्यरा-

चोत्थाय नगरद्वारस्य सार्गलौ कवाटौ स्तम्भद्वयञ्च गृहीत्वा प्रतस्थे किञ्च
स्कन्धे कृत्वा हिब्रोणाभिमुखस्य पर्व्वतस्य शिखरे तानि निदधौ।

अनन्तरं सोरेकोपत्यकावासिनी दिलीलानामिका या स्त्री स तस्यां ४
प्रेम्णा ससञ्जे। ततः पिलेष्टीयानाम् अधिपतयस्तस्या योषितः समी- ५
पम् आगत्य तां बभाषिरे, त्वं तं परिवञ्चयस्व केन तस्य महापराक्र-
मोऽयं जायते केन वा वयं तं जित्वा क्लेशनार्थं बन्धुं शक्नुमस्तन्निश्चिनु
सतो वयं प्रत्येकम् एकादशशतानि रूप्यमुद्रास्तुभ्यं दास्यामः। अनन्तरं ६
दिलीला शिम्शोनम् अवदत्, विनयेऽहं तवायं महापराक्रमः केन
जायते केन वा त्वं परेण बद्धा क्लेष्टुं शक्यसे तन्मां वद। ततः शिम्- ७
शोनस्तस्यै कथयामास सप्तभिर्नवीनैरशुष्कै र्वेत्रै र्यद्यहं बध्ये तदा
दुर्ब्बलो भवन् अन्यलोकस्य सदृशो भविष्यामि। अनन्तरं पिलेष्टी- ८
यानाम् अधिपतयः सप्ताशुष्कनवीनवेत्राण्यानीय तस्यै ददुस्ततः सा तैस्तं
बबन्ध। तदानीं तस्या अन्तरागारे लोका गुप्ता आसन् अनन्तरं सा ९
तमवदत्, हे शिम्शोन पिलेष्टीयास्त्वामाक्राम्यन्ति ततो वह्निस्पृष्टशाण-
सूत्राणि यथा छिद्यन्ते तथा तानि वेत्राणि तेन छिन्नानि, इत्थं तस्य बलस्य
तत्त्वं न ज्ञातं। अनन्तरं दिलीला शिम्शोनाय कथयामास, पश्य त्वं मां १०
परिहस्य मृषा गदितवान्, विनयेऽहं केन त्वं बन्धुं शक्यसे तन्मां
वद। ततः स तस्यै कथितवान् याभिः किञ्चन कर्म्म नाकारि तादृशीभि- ११
र्नूतनरज्जुभि र्यद्यहं बध्ये तदाहं दुर्ब्बलो भवन् अन्यलोकस्य सदृशो
भविष्यामि। ततो दिलीला नूतनरज्जूरानीय ताभिस्तं बबन्ध तदा तस्या १२
अन्तरागारे लोका आसन् सा तस्मै कथयामास हे शिम्शोन पिले-
ष्टीयास्त्वाम् आक्राम्यन्ति ततः स निजबाहुतः सूत्राणीव तांश्चिच्छेद।
अनन्तरं दिलीला शिम्शोनाय कथयामास त्वम् इदानीमपि मां परि- १३
हस्य मृषा वाचमवादीः। केन त्वं बन्धुं शक्यसे तन्मां वद। स
कथयामास, यदि त्वं मम शिरसः सप्तकेशरज्जूः सूत्रैः सह वस्त्रवद्
वयसि तर्हि तत् शक्यं भविष्यति। ततः सा कीलेन ता बद्धा तस्मै १४
कथयामास, हे शिम्शोन पिलेष्टीयास्त्वाम् आक्राम्यन्ति। ततः स निद्रातो
जागरित्वा सूत्रैः समं व्यूतं कीलञ्चापजहार।

अनन्तरं दिलीला तस्मै कथयामास, मां प्रति तव मनो नास्ति तर्हि १५
त्वय्यहं प्रीये वच इदं कथं वक्तुं शक्नोषि? पश्य वारत्रयं त्वं मां परिहस्य
केन तव महापराक्रमो जायते तन्मह्यं नाकथयः। इत्थं सा प्रतिदिनं १६

वाक्यैस्तमाक्राम्यत्, ततः स व्याकुलो भूत्वा जीवनेऽपि विरक्तो बभूव।
१७ ततः स स्वमनोवाक्यं व्यक्तीकृत्य तस्यै कथयामास, मम शिरः कदापि
क्षुरेण न स्पृष्टं यतोऽहं गर्भस्थितिमारभ्येश्वराय नासरीयोऽस्मि, यद्यहं
शिरो मुण्डयामि तर्हि मम बलं मां त्यक्ष्यत्यहञ्च दुर्ब्बलो भवन् अन्यलो-
१८ कस्य सदृशो भविष्यामि। अनन्तरं तेन स्वमनोवाक्यं व्यक्तीकृतम् इति
बुद्ध्वा दिलीला दूतं प्रहित्य पिलेष्टीयानाम् अधिपतीन् आहूय कथया-
मास, इदानीं यूयम् आगच्छत यतः स स्वमनसः सर्व्वं वाक्यं मह्यं कथि-
तवान्, ततः पिलेष्टीयानाम् अधिपतयः स्वहस्तैर्मुद्रा आदाय तस्याः
१९ समीपम् आगच्छन्। अनन्तरं सा निजजानूपरि तं निद्राप्य जनमे-
कमाहूय तस्य शिरसः सप्तकेशरज्जूः क्षौरयामास ततः परं सा यदा
२० तं क्लेशयितुम् आरभत तदा स बलहीन आसीत्। अथतः सा कथ-
यामास हे शिम्शोन पिलेष्टीयास्त्वाम् आक्राम्यन्ति ततः स निद्रातो
जागरित्वा मनसि कथितवान् अन्यसमय इव बहिर्गत्वाहम् आत्मानं
मोचयिष्यामि, किन्तु स परमेश्वरेण त्यक्त इति स नाजानात्।
२१ अनन्तरं पिलेष्टीयास्तं धृत्वा तस्य चक्षुषी बहिष्कृत्य तम् असापुरी-
मानीय पित्तलनिगडै र्बबन्धुः, अनन्तरं स कारागारे शस्यान्यपिनट्।
२२ तथापि तस्य शिरोमुण्डनानन्तरं तस्य शिरसः केशाः पुनर्वर्द्धितुमारे-
२३ भिरे। अपरं पिलेष्टीयानाम् अधिपाः स्वेषां सुरस्य दागोनस्य समीपे
महानैवेद्यं निवेदयितुम् आनन्दितुञ्च सर्व्वे मिलिता यतस्ते कथयामासुः,
२४ अस्माकं देवोऽस्माकं रिपुं शिम्शोनम् अस्माकं करगतमकरोत्। अपरं
तं वीक्ष्य प्रजाः स्वेषां देवं प्रशशंसुः किञ्च कथयामासुरस्माकं देवोऽस्मद्देश-
२५ नाशकं बहुलोकघातिनञ्चास्माकं रिपुं करेऽस्माकं समार्पयत्। अनन्तरं ते
हृष्टचित्ताः सन्तः कथितवन्तः शिम्शोन आहूयताम् अस्माकं साक्षात्
कौतुकं करोतु च ततो लोकाः कारागृहात् शिम्शोनम् आहूयानीय
२६ स्तम्भानां मध्ये तमस्थापयन् स च तेषां साक्षात् कौतुकं चकार। अनन्तरं
शिम्शोनः स्वहस्तधारिणं बालकमवादीत् मां त्यज यस्य स्तम्भद्वयस्यो-
परि गृहस्य भार आस्ते तद् द्वयमहं स्पृशानि, तत्र भारं दत्त्वा
२७ तिष्ठानि च। तदानीं स्त्रीभिः पुरुषैश्च तद्गृहं परिपूर्णमासीत् पिलेष्टी-
यानां सर्व्वेऽधिपतयोऽपि तत्रासन्, किञ्च स्त्रियः पुरुषाश्च सहस्र-
२८ त्रयलोका गृहपृष्ठेऽतिष्ठन् ते सर्व्वे शिम्शोनस्य कौतुकमदर्शन्। ततः
शिम्शोनः परमेश्वरमुद्दिश्य प्रार्थनां कुर्व्वन् जगाद हे प्रभो परमेश्वर

विनयेहं मां स्मर हे ईश्वर विनयेऽहं केवलमेकवारमात्रं मां बलिनं कुरु,
अहं चक्षुर्द्वययोः परिशोधार्थं पिलेष्टीयेभ्यः समुचितं ददानि। अपरं २९
मध्यस्थितयो र्ययो र्द्वयो स्तम्भयोरुपरि गृहस्य भार आसीत् शिम्शोनो
नतः सन् तयोरेकं दक्षिणबाहुनान्यञ्च वामबाहुना परिगृह्य स्वस्य भारं
ददौ। अनन्तरं पिलेष्टीयैः समं मत्तः प्राणाः वियुज्यन्तामिति वाक्य- ३०
मुक्त्वा शिम्शोनो निजसकलबलेन भारमदात्, ततस्तद्गृहम् अध्यक्षाणां
तन्मध्यस्थितसर्व्वलोकानाञ्चोपरि पपात, ततो जीवनकाले तेन ये
हतास्तेभ्योऽधिका लोका मरणकाले ऽहन्यन्त। अनन्तरं तस्य भ्रातरः ३१
पितृवंशीयाश्चागत्य तमादाय सरियेष्टायोलयोर्मध्यस्थाने तत्पितुर्मानो-
हस्य श्मशाने तस्य श्मशानं चक्रुः, स विंशतिवत्सरान् इस्रायेल्वंशस्य
विचारयितासीत्।

१७ सप्तदशोऽध्यायः।

१ मीखायेन रूप्यचौर्य्यं मूर्त्तिनिर्म्माणं ७ मूर्त्तिसेवनाय याजकनियोगश्च।

इफ्रयिमपर्व्वते मीखायनामा लोक एक आसीत्। स स्वमातरं जगाद १
चोरितं यत् शताधिकसहस्रशेकल्परिमितं रूप्यमधि त्वया शाप उक्तो २
मम कर्णौ श्रावितश्च तद् रूप्यं मया गृहीतं मत्समीपे विद्यते, ततस्तस्य
माता बभाषे, हे मम पुत्र त्वं परमेश्वरस्याशिषं प्राप्नुहि। अनन्तरं स ३
तत् शताधिकसहस्रशेकल्रूप्यं स्वमात्रे पुनर्ददौ तदा तस्य माता कथ-
यामास, अहं निषिक्तामेकां मूर्त्तिं तक्षिताञ्चैकां मूर्त्तिं निर्म्मापयितुं स्वपु-
त्रस्य मङ्गलार्थं तद् रूप्यं परमेश्वरायोदसृजं तदर्थञ्चेदानीं तुभ्यं पुनरदां।
तथापि तेन स्वमात्रे तस्मिन् रूप्ये पुनर्दत्ते सा शतद्वयशेकल्रूप्यं ४
गृहीत्वा निर्म्मात्रे ददौ ततः स तेन निषिक्तामेकां तक्षिताञ्चैकां मूर्त्तिं
निर्म्मितवान् ते मूर्त्ती मीखायस्य गृहे तस्थतुः। तस्य मीखायस्यैको ५
देवालय आसीत्, अपरम् एकम् एफोदस्तम् एका पुत्तलिका च तेन
निर्म्मिता तथा स्वीयपुत्राणामेकः पवित्रीकृतः स च तस्य याजको
बभूव। तस्मिन् काले इस्रायेल्वंशे कोपि राजा नासीत् यो यत् ६
क्षेमम् अमन्यत स तदेवाकरोत्।

तदानीं यिहूदादेशस्यबैतलेहमयिहूदानगरीयो लेवीय एकस्तरुणस्तत्र ७
प्रावसत्। स यत्र तत्र प्रवासं कर्त्तुं बैतलेहमयिहूदानगरान्निर्गत्य ८
यात्रां कुर्व्वन् इफ्रयिमपर्व्वते मीखायस्य निवेशनम् आजगाम। ततो ९

मीखायस्तं पप्रच्छ त्वं कस्माद् आगतोऽसि? स प्रत्यवदत् लेवीयोऽहं
१० बैतलेहमयिहूदाया आगतोऽस्मि यत्र तत्र प्रवस्तुं पर्य्यटामि। ततो
मीखायस्तं बभाषे त्वं मया सार्द्धं तिष्ठ मम पुरोहितः पितृरूपश्च भव
मया संवत्सरे तुभ्यं दशशेकलूरजतं वस्त्रयुग्मं तव भक्ष्यद्रव्याणि च
११ दायिष्यन्ते। ततः स लेवीयस्तस्य गृहं गत्वा तेन सार्द्धं वस्तुं मतिं चकार,
१२ इत्थं स तरुणस्तस्य पुत्त्रैकइव बभूव। अनन्तरं मीखायस्तं लेवीयं
पवित्रं चकार, ततः स तरुणस्तस्य पुरोहितो भूत्वा मीखायस्य निवेशने
१३ न्यवसत्। ततो मीखायः कथयामास परमेश्वरो मम मङ्गलं करिष्यती-
त्यहम् इदानीम् अजानां, यतो लेवीयलोको मम पुरोहितोऽभवत्।

---

१८ अष्टादशोऽध्यायः।

१ अधिकारम् अनुसन्धातुं दानवंशस्य पञ्चजनप्रेषणं ७ लयिशानुसन्धानस्य कथनं ११ षट्शतानि लोकानां तदाक्रमितुं गमनं १४ पथिमध्ये मीखायस्य विग्रहादिचौर्य्यं २२ मीखायस्य कथाम् अगृहीत्वा तै र्लयिशं गत्वा तस्य हस्तगतकरणं ३० तत्र स्थाने विग्रहस्थापनं।

१ तस्मिन् काल इस्रायेल्वंशे कोपि राजा नासीत्। तदानीं दानवंशः
स्ववासार्थम् अधिकरणीयं देशमचेष्टत, यतस्तद्दिनं यावद् इस्रायेल्-
२ वंशानां मध्ये तेनाधिकर्त्तव्या भूमि र्न प्रापि। अतो दानवंशीयाः स्वेषां
प्रदेशाद् अर्थात् सरियेष्टायोलेभ्यः स्ववंशस्य पञ्चवीरान् देशं पर्य्यटितुं
वीक्षितुञ्चेदं कथयित्वा प्रेषयामासुः, यूयं गत्वा देशं निरीक्षध्वं, ततस्ते
३ इफ्रयिमपर्व्वते मीखायस्य गृहमागत्य तत्र यामिनीं यापयामासुः। ते
यदा मीखायस्य परिजनैः सार्द्धम् आसन् तदा तं लेवीयतरुणम् उच्चा-
रणेन परिचित्याभ्यन्तरं गत्वा तं पप्रच्छुः, त्वाम् एतत्स्थानं क आनयत्?
४ स्थानेऽत्र त्वं किं कर्म्म करोषि? अपरं स्थानेऽत्र तव किं किमास्ते? ततः
स तेभ्यः कथयामास मीखायो मया सार्द्धम् अमुकरूपं व्यवहृत्य मह्यं
५ वृत्तिं दातुं प्रतिश्रुतवान् अतोऽहं तस्य पुरोहितोऽभवं। ततस्ते ऽक-
थयन् वयं विनयामहे, अस्माकं गन्तव्ये पथि शुभं भविष्यति न वेति
६ त्वम् ईश्वरस्य समीपे पृच्छ। ततः पुरोहितस्तान् अवदत् यूयं कुशलेन
गच्छत, युष्माकं गन्तव्यः पन्थाः परमेश्वरस्य गोचर आस्ते।
७ अनन्तरं तैः पञ्चभि र्जनै र्यात्रां कृत्वा लयिशे लब्धे तत्र निवासिनो
लोकाः सिदोनीयलोकानां रीत्यनुसारेण निर्भया निश्चिन्ताः सन्तो

मिष्पाण्टकं निवसन्ति किञ्च तत्र देशे तान् दमयितुं कोपि शास्ता नास्ति
ते सीदोनाद् दूरस्थाः किञ्च भिन्नलोकैः समं तेषां सम्बन्धो नास्ति
तैरिति दृष्टं। अनन्तरं सरियेष्टायोलयोः स्वभ्रातॄणां समीपं प्रत्यागत्य ८
तैः का वार्त्तेति पृष्टे ते कथयामासुः, उत्तिष्ठत वयं तेषां विरुद्धम् उत्थाय ९
याम यतः स देशोऽतीवोत्तम इति वयं दृष्टवन्तः, यूयं कुतो निष्कर्म्माण
आध्वे? तं देशं गन्तुं प्रविश्याधिकर्त्तुञ्च नालस्यं कुरुत। युष्माभिस्तत्र १०
गमने कृते निश्चिन्तं निवसन्तो लोका लप्स्यन्ते, स देशश्च विस्तारितः,
तत्र पृथिवीजातस्य कस्यापि वस्तुनोऽभावो नास्ति युष्माकं करेषु तं
देशम् ईश्वरः समर्पयिष्यति।

अनन्तरं सरियेष्टायोलाभ्यां दानवंशीयाः षट् शतानि लोका युद्धास्त्रैः ११
सुसज्जमाना यात्रां चक्रुः। ते गत्वा यिहूदादेशस्थे किरियतयिया- १२
रीमे शिविरं स्थापयाञ्चक्रुस्तस्मात् कारणाद् अद्यापि तस्य स्थानस्य
महनेदानं (दानस्य शिविरमिति) नामास्ते तत् किरियतयियारीमस्य
पश्चात् स्थितं।

अपरं तैस्तस्माद् इफ्रयिमपर्व्वतं गत्वा मीखायस्य निवेशने प्राप्ते १३
लयिशदेशं निरीक्षितुं गन्तारः पञ्चजनाः स्वजातीयान् अवदन्, अस्मिन् १४
निवेशन एकम् एफोद्वस्त्रं पुत्तलिका निषिक्ता मूर्त्तिस्तक्षिता मूर्त्तिश्च
विद्यन्ते तत् किं यूयं जानीथ? अत इदानीं युष्माभिः किं कर्त्तव्यं तद्
विविच्यतां। ततस्तेऽभ्यन्तरं गत्वा मीखायस्य निवेशनस्थं लेवीयतरुणस्य १५
वासं प्रविश्य तस्य कुशलं पप्रच्छुः। अपरं युद्धास्त्रैः सुसज्जमानाः षट् १६
शतानि दानवंशीयलोका गोपुरप्रवेशस्थाने स्थिताः। अनन्तरं देशं १७
निरीक्षितुं गन्तारः पञ्च जना उत्थायाभ्यन्तरं गत्वा तां तक्षितमूर्त्तिम्
एफोदं पुत्तलिकां निषिक्तमूर्त्तिञ्च जगृहुः किन्तु तदानीं पुरोहितो
युद्धास्त्रैः सुसज्जितानां षट् शतानां लोकानां सन्निधौ गोपुरप्रवेशस्थाने
समुत्तिष्ठमान आसीत्। इत्यवसर इमे मीखायस्य निवेशनं प्रविश्य १८
तां तक्षितमूर्त्तिम् एफोदं पुत्तलिकां निषिक्तमूर्त्तिञ्चानिन्युः। तदा
पुरोहितस्तान् अवदत्, यूयं किं कुरुथ? ततस्ते प्रत्यवदन् त्वं निःशब्दो १९
भव निजवदने करं दत्त्वास्माभिः समम् आगच्छास्माकञ्च पितृस्व-
रूपः पुरोहितो भव। एकस्य परिजनस्य तव पुरोहितत्वम् इस्रायेल
एकस्य वंशस्य तव पुरोहितत्वञ्चैतयोर्मध्ये किं भद्रं? ततः स पुरोहितो २०
मनोहर्षं गत्वा एफोद्पुत्तलिकातक्षितमूर्त्तीरादाय तेषां लोकानां मध्ये

२१ जगाम। ततः परं ते प्रवृत्ता यात्रां चक्रिरे किञ्च बालकान् पशून्
भारांश्च खेषाम् अग्रसरान् चक्रुः।
२२ तेषु मीखायस्य निवेशनात् कियद्दूरं गतेषु मीखायस्य निवेशन-
समीपस्थगृहनिवासिनो लोका मिलित्वा दानवंशीयानां पश्चाद् दधावुः।
२३ अपरं ते दानवंशीयान् प्रति प्रोच्चैः स्वरे कृते ते वदनानि परावर्त्य
मीखायमवदन् तव किं जातं? त्वं लोकनिवहम् आदाय कुत आग-
२४ च्छसि? ततः स जगाद यूयं मन्निर्म्मितदेवगणं पुरोहितञ्चापहृत्य
गच्छथ मम शेषं किमास्ते? अतस्तव किं जातमिति मां कुतः पृच्छथ?
२५ दानवंशीयास्तं जगदुः, अस्मान् त्वया शब्दो मा श्राव्यतां, श्राविते
क्रोधिलोका युष्मान् आक्रमिष्यन्ति तेन तव प्राणास्तव परिजनानाञ्च
२६ प्राणा विनंक्ष्यन्ति। अनन्तरं दानवंशीयाः स्वमार्गेण जग्मुः किञ्च मीखा-
यस्तान् स्वस्माद् अधिकबलवतो विज्ञाय परावृत्य स्वनिवेशनं जगाम।
२७ अनन्तरं दानवंशीया मीखायस्य निर्म्मितवस्तु पुरोहितञ्चादाय निश्चिन्तं
निष्कण्टकं वसतां लोकानां प्रातिकूल्येन लयिशं गत्वा खड्गैस्तान् अबधिषुः
२८ नगरञ्च वह्निना दाहयामासुः। तस्य रक्षिता कोऽपि नासीद् यतस्तत्
सीदोनाद् दूरमासीद् अन्यलोकैश्च समं तत्रत्यानां सम्बन्धो नासीत् किञ्च
तद् बैतरिहोबस्य समीपस्थोपत्यकायाम् आसीत्, अनन्तरं ते तन्न-
२९ गरं पुनर्निर्म्माय तन्मध्ये न्यूषुः। खेषां पूर्व्वपुरुषस्य इस्रायेल्सुतस्य
दानस्य नामानुसारेण तन्नगरस्य नाम दानमिति चक्रुः किन्तु पूर्व्वं तस्य
नगरस्य नाम लयिशम् आसीत्।
३० अनन्तरं सा तक्षितमूर्त्ति र्दानवंशीयैः स्वार्थं स्थापिता तथा तद्देशस्य
लोकानां बन्दीभवनपर्य्यन्तं मिनशेः पौत्रो गेर्शोमस्य पुत्रो योनाथन-
३१ स्तस्य वंशश्च दानवंशस्य पुरोहिता बभूवुः। अनन्तरम् ईश्वरस्यावासो
यावत् शीलावतिष्ठत् तावत् मीखायेन निर्म्मिता तक्षितमूर्त्तिस्तैः
संस्थाप्य सेविता।

१९ ऊनविंशोऽध्यायः।

१ उपपत्नीं ग्रहीतुं लेवीयस्य बैतलेहमनगरे गमनकथनं १६ प्रत्यागमनकाले गिवियानगरे तयोः कस्यचिद् वृद्धलोकस्य गृहे ऽतिथिभवनं २२ गिवियाया लोकैस्तदुपपत्न्या मरणं यावद् बलात् करणं २९ उपपत्न्याः शवं द्वादशखण्डीकृत्य तेनेस्रायेलो द्वादशवंशान् प्रति प्रेषणं।

१ तस्मिन् काले इस्रायेल्वंशस्य मध्ये राजा नासीत्, अपरम् इफ्रयिम-

पर्व्वतस्य पार्श्वे प्रवासी कश्चिल्लेवीयो बैतलेहमयिहूदात उपपत्नीमेकां
जग्राह। किन्तु सोपपत्नी तस्य विरुद्धं वेश्याचारं कृत्वा तं विहाय २
बैतलेहमयिहूदायां स्वपितुर्निवेशनं गत्वा तत्र चतुरो मासान् तस्थौ।
अनन्तरं तस्या उपपतिः स्वदासं द्वौ गर्द्दभौ च समादाय प्रीतिपूर्व्वकं ३
तां सम्भाषितुं पुनरानेतुञ्च तस्याः पश्चात् जगाम ततः सा तं स्वता-
तस्य निवेशनम् आनिनाय तस्या युवत्याः पिता च तं दृष्ट्वा तस्यागमनाद्
आननन्द। तदानीं स श्वशुरेणार्थात् तस्या युवत्याः पित्रावलम्बित- ४
स्तेन सह दिनत्रयम् उषितवान्, अपरं ते भोजनपाने कृत्वा तत्र
स्थाने रात्रिं यापयामासुः। अपरं चतुर्थदिवसे तेषु प्रस्थातुम् अतिप्रत्यूषे ५
समुत्थितेषु योषितः पिता जामातरं जगाद त्वं किञ्चिद् अन्नं भुक्त्वान्तः-
करणं सुस्थिरं कुरु पश्चात् स्वमार्गेण गच्छ। ततस्तावुपविश्य मिलित्वा ६
भोजनपाने चक्रतुः, अनन्तरं तस्या योषितः पिता तं जगाद निवेदया-
म्यहं त्वं रात्रिं यापयित्वा स्वमनस्तुष्टं कर्त्तुम् अर्हसि। किन्तु तस्मिन् ७
गन्तुमुत्थिते तस्य श्वशुरस्तं व्यग्रं चकार तेन स विलम्ब्य तां यामिनीमपि
यापयामास। अनन्तरं पञ्चमे दिने तस्मिन् गन्तुं प्रत्यूष उत्थिते योषितः ८
पिता कथितवान् निवेदयामि निजान्तःकरणं सुस्थिरं कुरु तेन ते
तृतीयप्रहरं यावद् विललम्बिरे तौ द्वौ जनौ च भोजनं चक्रतुः। अन- ९
न्तरं तस्मिन् पुरुषे तस्योपपत्न्यां दासे च गन्तुम् उत्थितेषु तस्य श्वशुरो-
ऽर्थतस्तस्या युवत्याः पिता तं बभाषे, पश्याधुना दिवावसानं जातं वि-
नयेऽहं यूयमत्र रजनीं यापयत, पश्य दिवाशेषोऽभूत्, अतस्त्वमत्र रात्रिं
यापय स्वान्तःकरणं हृष्टं कुरु च, श्वो मार्गेण यातुं प्रत्यूष उत्थाय स्वगृहं
यास्यसि। किन्तु स लोकस्तां यामिनीं विलम्बितुम् अनिच्छन् उत्थाय १०
यात्रां कृत्वा यिवूषस्यार्थतो यिरूशालमस्य सम्मुखमागमत् तेन समं
सज्जमानौ द्वौ गर्द्दभौ तस्य उपपत्नी चासीत्। यिवूषस्य सम्मुखं तेषूप- ११
स्थितेषु दिवावसानं बभूव, तेन तस्य दासः स्वप्रभुमवदत् निवेदयामि
आगच्छ, वयं यिवूषीयाणाम् एतन्नगरं प्रविश्य यामिनीं यापयाम।
अनन्तरं तस्य प्रभुरवदत्, इस्रायेल्वंशादन्यजातीयानां नगरमिदं वयं १२
न प्रवेक्ष्यामः, वयम् अग्रं गत्वा गिबियां यामः। अनन्तरं स स्वदासम् १३
अवदत्, आगच्छ वयं निकटवर्त्ति किञ्चन स्थानं गत्वा गिबियायां
वा रामायां रात्रिं यापयाम। अनन्तरं तेऽग्रं गत्वा स्वपथेन जग्मुः, १४
अनन्तरं बिन्यामीनदेशस्थगिबियायाः समीपं तेषूपस्थितेषु सूर्य्योऽस्तं

१५ गतः। तदा ते तत्र यामिनीं यापयितुं गिबियां प्रविश्य नगरस्य सन्निवेशे
उपविविशुः यतः स्वनिवेशने यामिनीं यापनार्थं कोपि तेषामातिथ्यं
न चकार।
१६ अनन्तरं सन्ध्यासमये वृद्ध एकः क्षेत्रस्य कर्म्मण आगच्छत् स इफ्र-
यिमपर्व्वतीयो लोकः किन्तु गिबियायां प्रावसत् किञ्च तन्नगरीयलोका
१७ बिन्यामीनवंशीया आसन्। अनन्तरं स ऊर्द्ध्वदृष्टिं कृत्वा नगरस्य
सन्निवेशे तं पथिकं ददर्श ततो वृद्धः पृष्टवान् त्वं कुत्र यास्यसि कुतो
१८ वागतोऽसि? सोवदद् वयं बैतलेहमयिहूदात इफ्रयिमपर्व्वतस्य पार्श्वं
गच्छामः, अहं तत्स्थानस्य मानुषो बैतलेहमयिहूदाम् अगच्छम् इदानीं
परमेश्वरस्यावासं गच्छामि कोपि स्वगृहे स्थानं दातुं ममातिथ्यं न
१९ करोति। अस्माभिः सह स्वीयगर्द्दभयो र्भक्ष्यतृणानि धान्यानि चासते,
अपरं भवतो दासस्य समीपे मम कृते भवतो दास्या मत्परिचारकस्य च
२० कृते पूपा द्राक्षारसाश्च सन्ति कस्यापि द्रव्यस्याभावो नास्ति। ततः स
वृद्धो बभाषे स्वागतोऽसि तव यत्र यत्र प्रयोजनं तदहं दास्यामि त्वमत्र
२१ सन्निवेशे रात्रिं मा यापय। अनन्तरं स वृद्धस्तं स्वनिवेशनम् आनीय तस्य
गर्द्दभाभ्यां तृणानि ददौ ते च पादान् प्रक्षाल्य भोजनपाने चक्रुः।
२२ अनन्तरं तेषु हृष्टचित्तेषु सत्सु तन्नगरीया लम्पटलोकास्तन्निवेशनं
वेष्टयित्वा द्वारम् आहत्य निवेशनस्याधिपतिं तं वृद्धं जगदुः, तव
निवेशनं यः पुरुष आगमत् तं वहिरानय वयं तमुपगमिष्यामः।
२३ ततो निवेशनाधिपतिः स नरो वहिर्भूय तेषां समीपं गत्वा जगाद हे मम
भ्रातरो नहि नहि विनयेहम् एतादृशं दुष्टाचरणं मा कुरुत स पुरुषो
मम निवेशनेऽतिथिरभूत् तस्मात् तं प्रति नैतादृशं त्रपायाः कर्म्म कुरुत।
२४ पश्यत ममानूढां कन्यां तस्योपपत्नीञ्च वहिरानयामि यूयं ते उपगच्छत
ते प्रति युष्माकं यथा वाञ्छा जायते तथैवाचरत किन्त्वेतं पुरुषं
२५ प्रतीदृशीं दुष्टक्रियां मा कुरुत। तथापि तैस्तस्य वाक्ये न गृहीते स
पुरुषः स्वीयाम् उपपत्नीं धृत्वा तेषां समीपं वहिरानयत् ततस्ते तामुप-
जग्मुः प्रभातपर्य्यन्तं सकलां रात्रिं तां प्रत्यत्याचारं कृत्वा प्रभाते सति
२६ तां परित्यज्य जग्मुः। अपरं सा स्त्री सूर्य्योदयात् पूर्व्वमागत्य पत्युराति-
थ्यकारिणो वृद्धस्य निवेशनद्वारसन्निधौ पतित्वा सूर्य्योदयपर्य्यन्तं तत्रैव
२७ तस्थौ। अनन्तरं प्रातःकाले तस्याः पतिरुत्थाय यदा गृहद्वारं मोचयित्वा
मार्गेण गमनार्थं वहिरागमत् तदा गृहस्य द्वारसमीपे तस्योपपत्नी

पतिता शिला च तस्याः कराभ्याम् अर्पितेति ददर्श। तदानीं स कथ- २८
यामास, उत्तिष्ठ वयं यात्रां करवाम किन्तु सा न प्रत्यवदत्, अनन्तरं
स पुरुषो गर्द्दभोपरि तां निधाय स्वस्थानं जगाम।

अनन्तरं स स्वनिवेशनम् आगत्यास्त्रं गृहीत्वा ताम् उपपत्नीं छित्वा २९
सास्थिकां द्वादशखण्डीकृत्येस्रायेलः सर्व्वप्रदेशं प्रेषयामास। ततस्तद्दृष्ट्वा ३०
सर्व्वेऽकथयन् इस्रायेल्वंशस्य मिसर्द्देशाद् बहिर्गमनदिनमारभ्याद्य
यावद् एतादृशं कर्म्मेस्रायेल्वंशमध्ये कदापि नाक्रियत नादृश्यत च,
विषयेऽस्मिन् विविच्य मन्त्रयित्वा किं कर्त्तव्यं तद्वदत।

२० विंशतितमोऽध्यायः।

१ सभायाः कथनं ८ सभानिरूपणं १२ इस्रायेल्वंशेन समं विन्यामीनवंशस्य युद्धं कर्त्तुं सज्जमानत्वं १७ प्रथमयुद्ध इस्रायेल्वंशानां द्वाविंशति सहस्रलोकानां हतत्वं २२ द्वितीययुद्धे तेषाम् अष्टादशसहस्रलोकानां हतत्वं २९ तृतीययुद्धे विन्यामीनवंशस्य सर्व्वथा परास्तत्वं।

अनन्तरं गिलियद्देशस्थलोकैः समं दानमारभ्य बेर्शेबां यावद् १
इस्रायेलः सर्व्वे वंशा एकमानुषइव मिस्पाम् आगत्य परमेश्वरस्य
साक्षात् समाजे मिलिताः। ततः सर्व्वलोकानाम् अर्थत इस्रायेलः २
सर्व्ववंशानाम् अधिपतयश्चत्वारि लक्षाण्यस्त्रधारिणः पदातयश्चेश्वरस्य
लोकानां समाजम् उपस्थितवन्तः। तदानीम् इस्रायेल्वंशा मिस्पीं गता ३
इति वार्त्तां विन्यामीनवंशः शुश्राव, अनन्तरम् इस्रायेल्वंशीया अव-
दन् एषा दुष्टता केन प्रकारेण जाता तत् कथ्यतां। ततस्तस्या हताया ४
योषित उपपति र्लेवीयपुरुषः कथयामास, अहं मदुपपत्नी च यामिनीं
यापयितुं विन्यामीनदेशस्थां गिबियामगच्छाव। ततो गिबियाया ५
गृहस्था मम प्रतिकूलम् उत्थाय यामिन्यां गृहस्य चतुर्दिशं वेष्टयामासुः,
ते मां हन्तुम् उद्यता मदुपपत्नीञ्च प्रति बलात् कुकर्म्म कृतवन्तस्ततः सा
ममार। अनन्तरम् अहम् उपपत्नीं छित्वा खण्डखण्डीकृत्येस्रायेल्वंशेना- ६
धिकृतं सर्व्वदेशं प्रहितवान् यतस्त इस्रायेलीयेषु तादृशं क्षपाकरं
लम्पटत्वं चक्रुः। पश्यत यूयं सर्व्व इस्रायेल्वंशाः समागता अत एतस्मिन् ७
विषये संमन्त्र्य कर्त्तव्यत्वं निश्चिनुत।

ततः सर्व्वे लोका एकजनइवोत्थाय जगदुः, वयं केपि स्वस्ववासस्थानं ८
न गमिष्यामः स्वस्वपरिवारं पुन र्न यास्यामः किन्त्वधुना गिबियायाः ९

१० प्रतिकूलं गुटिकापातेन कर्म्मेदं करिष्यामः। लोकानां कृते भक्ष्य-
द्रव्याण्यानेतुम् इस्रायेलः शतलोकानां मध्याद् दशनराः सहस्राणां
मध्यात् शतं नरा दशसहस्राणां मध्यात् सहस्रं नरा अस्माभि र्निश्ची-
यन्तां, तेषु पुनरागतेषु विन्यामीनदेशस्थगिवियामाक्रम्येस्रायेलीयेषु कृतस्य
११ तत्रत्यानां सकलकुकर्म्मणः फलं दीयतां। अतः सर्व्व इस्रायेल्वंशा एक-
मनुष्य इव संयुज्य तस्य नगरस्य प्रतिकूलं मिलिताः।
१२ अनन्तरम् इस्रायेल्वंशा विन्यामीनवंशस्य सर्व्वत्र दूतान् प्रहित्य
१३ जगदुः, युष्माकं मध्ये किमिदं कुकर्म्म कृतं? यूयं गिवियानिवासिनस्तान्
लम्पटलोकान् समर्पयत वयं तान् हनिष्याम इस्रायेलः कलङ्कं दूरी-
करिष्यामश्च, किन्तु विन्यामीनवंशः स्वभ्रातॄणाम् इस्रायेलवंशानां कथां
१४ ग्रहीतुं न समियेष। अनन्तरं विन्यामीनवंशीया इस्रायेल्वंशैः समं
१५ योद्धुं स्वनगरेभ्यो वहिर्भूय गिवियायां मिलिताः। तदानीं विन्यामीन-
वंशस्य नगरेभ्य आगता अस्त्रधारिणो लोका गणनया षड्विंशति
सहस्राण्यासन् तदन्या गिवियानिवासिनः सङ्ख्यया सप्त शतान्यभिरु-
१६ चितलोका आसन्। तेषां सर्व्वलोकानां मध्ये वामहस्तेन योधिनः सप्त
शतान्यभिरुचितलोका आसन् ते सर्व्वेऽश्मक्षेपकगुणेन प्रस्तरचालनैः केशं
भेदितुं समर्थाः।
१७ विन्यामीनवंशाद् अन्येस्रायेलवंशानाम् अस्त्रधारिणो गणनया लक्षं
१८ लोका आसन्, ते सर्व्वे योद्धार आसन्। अनन्तरम् इस्रायेल्वंशा
उत्थाय वैथेलं गत्वेश्वरस्य समीपे जिज्ञासाञ्चक्रिरे विन्यामीनवंशेन समं
योद्धुम् अस्माकं कः प्रथमं यास्यति? ततः परमेश्वरः कथयामास
१९ प्रथमं यिहूदावंशो यास्यति। अनन्तरम् इस्रायेलवंशाः प्रातरुत्थाय
२० गिवियायाः सम्मुखे शिविरं स्थापयाञ्चक्रिरे। इस्रायेल्लोकै र्विन्यामीन-
वंशेन समं योद्धुं वहिर्भूय गमने कृते गिवियायाञ्च युद्धार्थं सैन्यानां
२१ श्रेण्यां रचितायां विन्यामीनवंशो गिवियातो वहिरागत्य तद्दिवस
इस्रायेल्वंशानां द्वाविंशतिसहस्राणि लोकान् संहृत्य भूमौ पातयामास।
२२ अनन्तरम् इस्रायेल्वंशीयाः स्वान् आश्वस्य प्रथमदिवसे यत्र स्थाने
२३ सैन्यानां श्रेणीं रचितवन्तः पुनर्वारं तत्रैव स्थाने व्यूहं चक्रुः। अपरम्
इस्रायेल्वंशा उत्थाय गत्वा सन्ध्याकालं यावत् परमेश्वरस्य साक्षात्
चक्रन्दुः परमेश्वरम् इदं वाक्यं पप्रच्छुश्च वयं स्वभ्रात्रा विन्यामीन-
वंशेन समं योद्धुं पुनर्वारं किं यास्यामः? ततः परमेश्वरः कथयामास,

तस्य प्रतिकूलं यात। अनन्तरम् इस्रायेल्वंशेषु द्वितीयदिवसे विन्यामीन- २४
वंशस्य प्रतिकूलम् उपस्थितेषु विन्यामीनवंशो द्वितीयदिवसे पुनर्वारं २५
तेषां प्रतिकूलं गिवियातो निर्गत्येस्रायेल्वंशानां खड्गधारकान् अष्टादश-
सहस्रलोकान् संहृत्य भूमौ पातयामास।

अनन्तरम् इस्रायेलः सर्व्वे वंशाः सर्व्वे लोकाश्च वैथेलं गत्वा तत्र सन्ध्यां २६
यावत् परमेश्वरस्य सम्मुख उपविष्टाः क्रन्दनेनोपवासेन च तं दिवसं
यापयित्वा परमेश्वरस्य साक्षाद् होमार्थकान् मङ्गलार्थकांश्च बलीन्
उत्सृजुः। तस्मिन् काले तत्र स्थाने परमेश्वरस्य नियममञ्जूषासीत् २७
हारोणस्य पौत्त्र इलियासरस्य पुत्त्रः पीनिहसश्च तदा तत्सम्मुखे तस्य
परिचर्य्याम् अकरोत्। अपरम् इस्रायेल्वंशास्तेन परमेश्वरम् इति २८
वाचं पप्रच्छुः, वयं स्वभ्रात्रा विन्यामीनवंशेन समं योद्धुं किं पुनर्वारं
यास्यामः? किं निवर्त्तिष्यामहे? ततः परमेश्वरः कथयामास, गच्छत
श्वो मया युष्माकं करेषु ते समर्पयिष्यन्ते। अनन्तरम् इस्रायेल्वंशा २९
गिवियायाश्चतुर्दिक्षु लोकान् लुक्कायितान् स्थापयामासुः। अपरं तृतीय- ३०
दिवस इस्रायेल्वंशा विन्यामीनवंशस्य प्रतिकूलं गत्वा पूर्व्वरीत्यनु-
सारेण गिवियाया विरुद्धं सैन्यश्रेणीं रचयाञ्चक्रुः। अपरं विन्यामीन- ३१
वंशीया लोकानां विरुद्धं वहिरागत्य नगराद् दूरं प्रावर्त्तन्त राजमार्ग-
योश्चार्थतो वैथेलं गन्तरि मार्गे प्रान्तरस्थगिवियां गन्तरि मार्गे च
पूर्व्ववत् लोकान् आघ्नन् अमारयंश्चेत्थम् इस्रायेल्वंशानां प्रायेण त्रिंशत्
जनान् जघ्नुः। यत इमेऽस्माकं सम्मुखे पूर्व्ववत् पराजीयन्त इति विन्या- ३२
मीनवंशीया बुबुधिरे किन्त्विस्रायेल्वंशा अवदन् वयं पलायामहै,
इमे राजमार्गौ यावद् अस्माभिर्नगराद् वहिराकृष्यन्तां। अनन्तरम् ३३
इस्रायेल्वंशीयाः सर्व्वे लोका स्वस्वस्थानाद् उत्थाय वाल्तामरे स्वेषां
सैन्यानि रचयाञ्चक्रुरिस्रायेल्वंशस्य लुक्कायिता लोकाश्च स्वस्वस्थानाद-
र्थतो गिवियायाः प्रान्तरात् निरगच्छन्। इस्रायेलः सर्व्ववंशानां दश- ३४
सहस्राण्यभिरुचितास्ते लोका गिवियानगरस्य प्रतिकूलं वहिराजग्मु-
स्ततो घोरतरः संग्रामो जातः, किन्तु वयं विपदं गन्तुम् उद्यता इति
विन्यामीनवंशीया नाजानन्। अनन्तरं परमेश्वर इस्रायेल्वंशानां ३५
सम्मुखे विन्यामीनवंशं पराजिगाय, तस्मिन् दिवसे विन्यामीनवंशस्य
शताधिकपञ्चविंशतिसहस्राण्यस्त्रधारिणो लोका इस्रायेल्वंशीयै र्जघ्निरे।
ततो वयं पराजिता इति विन्यामीनवंशो ददर्श, यतो गिवियायाः ३६

समीपे स्थापितेषु लुक्कायितलोकेषु विश्वस्तेस्रायेल्वंशीयै यदा विन्या-
३७ मीनवंशस्य समीपाद् अपायात, तदा लुक्कायितलोका धावन्तो गिबिया-
नगरम् आक्रम्यास्त्रधारेण नगरस्थान् सकललोकान् आहन्तुं प्रावर्त्तन्त।
३८ लुक्कायितलोकै नगराद् ऊर्द्धगामिधूममेघश्चिह्नार्थम् इस्रायेल्वंशीयान्
३९ दर्शयिष्यत इति मन्त्रणा तैरकारि। अनन्तरं संग्राम इस्रायेल्वंशिष्वपया-
तवत्सु विन्यामीनवंशः प्रायस्तेषां त्रिंशत् जनान् आहत्य मारयामास
प्रथमयुद्धवद् एतद्वारमपीमे सम्मुखेऽस्माकं पराजीयन्त इति बुबुधे
४० च। इत्यनन्तरं स्तम्भाकृति धूममेघो नगरात् समुदतिष्ठत् विन्यामीन-
लोकाश्च स्वेषां पश्चात् निरीक्ष्य कृत्स्नं नगरम् अग्निलं प्राप्य शून्यम्
४१ उड्डीयत इति ददृशुः। अपरम् इस्रायेल्लोकेषु पुनः परावृत्तेषु वयं
४२ विपद्ग्रस्ता इति वीक्ष्य विन्यामीनवंश उद्विविजे। अनन्तरं त इस्रायेल्-
वंशानां सम्मुखे प्रान्तरस्य मार्गदिशं परावृत्तिरे ततस्तस्मिन् स्थानेऽपि
४३ संग्राम उपस्थिते नगरेभ्य आगता लोकास्तन्मध्ये हताः। विन्यामीन-
वंशश्चतुर्दिक्षु तै र्वेष्टितो विद्रावितो ऽनायासं गिबियायाः सम्मुखे
४४ सूर्य्योदयदिशि निपातितश्च। इत्थं विन्यामीनवंशस्याष्टादशसहस्राणि
४५ योद्धृवीरा अहन्यन्त। अनन्तरम् अवशिष्टेषु प्रान्तरस्य दिशं परावृत्य
रिम्मोणशैलं पलायमानेषु तेषामपि पञ्च सहस्राणि लोका राजमार्गेषु
हताः शत्रवश्च गिदियोमं यावत् तेषां पश्चाद् गत्वा तेषां द्वे सहस्रे
४६ लोकान् जघ्नुः। ततस्तस्मिन्नेव दिने विन्यामीनवंशस्यास्त्रधारिणः पञ्च-
४७ विंशतिसहस्राणि लोका निपेतुः, ते सर्व्वे एव वीरा आसन्। अपरं षट्
शतानि लोकाः परावृत्य प्रान्तरस्थितं रिम्मोणपर्व्वतम् आश्रित्य तस्मिन्
४८ रिम्मोणपर्व्वते चतुरो मासान् ऊषुः। किन्त्विस्रायेल्वंशा विन्यामीनदे-
शम् आक्रम्य नगरनिवासिनो लोकान् तेषां पश्वादिसम्पत्तीश्च खड्गधारै-
राजघ्नुस्तेषाञ्च यति नगराण्यासन् तानि सर्व्वाणि वह्निना दाहयामासुः।

---

२१ एकविंशोऽध्यायः।

१ विन्यामीनवंशमधि लोकानां विलपनं ८ यावेशगिलियदीयलोकानां विनाशमात्
चतुःशतकन्यालाभः १६ शीलो न्टत्यन्तीः कन्या धर्त्तुं विन्यामीनवंशाय मन्त्रणादानं।

१ वयं कोपि विवाहार्थं विन्यामीनवंशाय स्वकन्यां न दास्याम इति
२ शपथो मिस्प्याम् इस्रायेल्वंशैरकारि। अनन्तरं लोका ईश्वरस्यावा-
समागत्य सन्ध्यां यावत् तस्मिन् स्थाने ईश्वरस्य सम्मुखे तिष्ठन्त उच्चैर्वि-

लपन्तो जगदुः, हे इस्रायेलः प्रभो परमेश्वर अद्येस्रायेल्वंशानाम् एको ३
लुप्त इस्रायेल्मध्ये कुत ईदृशं घटितं? परदिवसे लोकाः प्रत्यूष उत्थाय ४
तत्र स्थाने यज्ञवेदिं निर्म्माय होमार्थकान् मङ्गलार्थकांश्च बलीन्
उत्ससृजुः। अपरम् इस्रायेल्वंशा अवदन् ईश्वरस्य समीपं समाजं ५
नागमद् इस्रायेलः सर्व्ववंशानां मध्य एतादृशः क आस्ते? यतो मिस्पां
परमेश्वरस्य समीपं यो नागमिष्यति स घानिष्यत इति महाशपथेन
स तैरभिशप्तः। अनन्तरम् इस्रायेल्वंशाः स्वभ्रातु र्विन्यामीनवंशस्य कृते ६
अनुतप्य जगदुः, अद्येस्रायेल्वंशाद् एको वंशः कृत्तः। इदानीं तस्या- ७
वशिष्टलोकानां विवाहार्थम् अस्माभिः किं कर्त्तव्यं? वयं तेभ्यो विवाहार्थं
स्वकन्यां न दास्याम इति कथयित्वा वयं परमेश्वरस्य नाम गृह्णन्तः
शपथम् अकुर्म्म।

अपरं तैरुक्तं मिस्पां परमेश्वरस्य समीपं नागमद् इस्रायेल्वंशानां ८
मध्य एतादृशः को वंश आस्ते? अपरं पश्यत यावेशगिलियदस्य लोक
एकोपि शिविरस्थां समज्यां नागमत्। यतो निखिललोकेषु गणितेषु ९
यावेशगिलियदनिवासिनाम् एको जनस्तस्मिन् स्थाने नासीत्। ततः १०
समाजः श्रेष्ठबलिनां मध्याद् द्वादश सहस्राणि लोकान् तत्स्थाने प्रेषण-
काल इत्याज्ञापयत्, यूयं गत्वा यावेशगिलियदनिवासिनस्तेषाम् आबा-
लवनिताश्चास्त्रैराहत। अपरं कर्म्मैतत् कुरुत, सकलपुरुषान् पुरुषाभि- ११
गता योषितश्च निःशेषं मारयत। अनन्तरं ते यावेशगिलियदनिवा- १२
सिनां मध्ये पुरुषै र्नाभिगताश्चतुःशतानि अनूढयुवतीः प्राप्य शीलो
किनानदेशस्थं शिविरं ता आनयन्। अनन्तरं सर्व्वसमाजीया रिम्मोण- १३
पर्व्वतस्थितेन विन्यामीनवंशेन समं दूतैरालप्य सन्धेः कथां जगदुः।
तदानीं विन्यामीनवंशः पुनराजगाम ततस्ते यावेशगिलियदस्था याः १४
कन्या अजीवयन् ता भार्य्यार्थं तेभ्योऽददन् तथापि तेषां न्यूनत्वं बभूव।
अनन्तरं परमेश्वर इस्रायेल्वंशानां मध्ये एकं वंशं लुप्तवान् इति १५
कारणात् लोका विन्यामीनवंशमध्यन्वतप्यन्त।

अनन्तरं समाजस्य प्राचीना अवदन् विन्यामीनवंशस्य स्त्रियो हता १६
अतः शेषाणां विवाहाय किम् अस्माभिः कर्त्तव्यं? इस्रायेल्वंशानाम् १७
एको वंशो यन्न लुप्येत तदर्थं विन्यामीनवंशस्य शेषलोकेभ्योऽधिकारो
दातव्यः। किन्तु तेभ्यः स्वकन्या दातुम् अस्माभिर्न शक्यं, यतो यो विन्या- १८
मीनवंशाय कन्यां दास्यति स शापग्रस्त इतीस्रायेल्वंशः शप्तवान्।

१९ अपरं ते ऽवदन् शीलो वैथेलस्योत्तरदिशि वैथेलात् शिखिमगामिनो
मार्गस्य पूर्व्वदिशि लिवोनाया दक्षिणदिशि च परमेश्वराय वार्षिको
२० महो भवति। ततस्ते विन्यामीनवंशम् आदिशन् यूयं गत्वा द्राक्षाक्षेत्रेषु
२१ गुप्ता वीक्षध्वं शीलोः कन्या नृत्यन्त्यो वहिरागच्छन्तीति दृष्ट्वा यूयं द्राक्षा-
क्षेत्रेभ्यो वहिर्भूय शीलोः कन्यानां मध्यात् स्वस्वजायां धृत्वा विन्यामीन-
२२ देशं नयत। अनन्तरं तासां पितरो भ्रातरो वावेदयितुं यद्यस्माकं
समीपमागच्छन्ति तर्हि वयं तान् वदिष्यामः, यूयम् अस्मत्कृते तान्
अनुगृह्णीत, यतो युद्धकाले वयं सर्व्वेषां जाया न प्राप्ताः, इदानीं ता
२३ युष्माभि र्न दत्ताः किमपि वा नापराद्धं। ततो विन्यामीनवंशास्तदेव
कुर्व्वन्तो नृत्यकाले योषितोऽपहरन्तः स्वेषां संख्यानुसाराद् भार्य्या
अलभन्त, अनन्तरं स्वदेशं गत्वा नगराणि पुनर्निर्म्माय तन्मध्य ऊषुः।
२४ अनन्तरम् इस्रायेलीयानामपि वंशाः परिजनाश्च तस्मात् प्रस्थाय
२५ स्वस्वदेशं प्रत्याजग्मुः। तदानीम् इस्रायेल्वंशे कोपि राजा नासीत्
यो यत् क्षेमम् अमन्यत, स तदेवाकरोत्।

रूतोपाख्यानं।

---

१ प्रथमोऽध्यायः।

१ दुर्भिक्षकारणाद् इलीमेलकस्य नयमीनामिकायास्तस्य योषितः पुत्रयोश्च मोयाव-
देशगमनं मोयावीयकन्ययो र्विवहनं ६ नयम्याः स्वदेशगमनकाले पुत्रवधूद्वयो र्न
यातुं विनयनं १४ अर्पायास्तदङ्गीकरणं रूतायास्तस्याः सङ्गात्यजनं १९ नयमी-
रूतयो र्वैतलेहम उपस्थानं।

१ विचारयितृणां शासनकाले देशे दुर्भिक्षे जाते वैतलेहमयिहूदाया
२ एको जनस्तस्य जाया द्वौ सुतौ च मोयावदेशे प्रवस्तुं जग्मुः। तस्य नरस्य
नामासीद् इलीमेलकस्तस्य जायाया नाम नयमी तस्य द्वयोः सुतयो
र्नामनी महलोनः किलियोनश्च, सर्व्व एते वैतलेहमयिहूदानगरनि-
३ वासिन इफ्राथीयलोकाः, इमे मोयावदेशं गत्वा तत्र प्रोषुः। अनन्तरं
४ नयम्याः पतावलीमेलके मृते सा तस्या द्वौ सुतौ च शेषा अतिष्ठन्।
अपरं तौ अर्पारूतानामिके द्वे मोयावीयकन्ये व्यूह्य दशवत्सरान् यावत्

तत्र स्थाने प्रोषतुः। अनन्तरं मह्लोनकिलियोनावपि मम्रतुस्ततो नयमी ५
पतिपुत्रै र्विहीनावशिष्टा।
अपरं परमेश्वरः स्वलोकानां दशाम् अवेक्ष्य तेभ्यो भक्ष्यवस्तूनि दत्त- ६
वान् इति वाचं सा मोयावदेशे निशम्य स्वपुत्त्रवध्वौ गृहीत्वा मोयाव-
देशात् पुनर्गन्तुम् उत्तस्थौ। सा तस्याः पुत्त्रवध्वौ च स्ववासस्थानाद् ७
वहिर्भूय यदा यिहूदादेशं प्रत्यागन्तुं मार्गेण गच्छन्ति, तदा नयमी द्वे ८
पुत्त्रवध्वौ जगाद युवां स्वस्वमातु र्निवेशनं परावृत्य यातं, मृतौ प्रति मां
प्रति च युवाभ्यां यादृशी प्रीति र्व्यवहारि परमेश्वरेण युवां प्रति तादृशी
प्रीति र्व्यवक्रियतां। परमेश्वरो युवाम् अनुगृह्य युवाभ्यां स्वस्वपत्यु ९
र्निवेशने विश्रामं ददातु, अनन्तरं सा ते चुचुम्बे ततस्तेऽपि प्रोच्चैरुरुदतुः।
अनन्तरं ते तां बभाषाते, आवां त्वया समं तव लोकानां समीपं गमि- १०
ष्यावः। नयमी जगाद, हे मम कन्ये युवां परावृत्य यातं, मया समं ११
कुतो गमिष्यथः? युवयोः पती भविष्यतस्तादृशौ सन्तानौ किमिदानीं
मम जठरे विद्येते? हे मम कन्ये परावृत्य यातं यतोऽहं वृद्धा पत्या १२
ग्रहीतुं न शक्ये; अपरं मम प्रत्याशास्ते इत्युक्त्वा यद्यद्य यामिन्यां पतिं
गृहीत्वा सुतौ प्रसूयेऽहं, तर्हि युवां किं तयो र्यौवनप्राप्तिं यावद् विल- १३
म्बिष्येथे तत्कृते च पती ग्रहीतुं निवर्त्तिष्येथे? हे मम कन्ये तन्नहि मम
क्लेशो युवाभ्यामसह्यो यतः परमेश्वरेण स्वकराभ्याम् अहं निगृहीता।
अनन्तरं ते पुनरुच्चैस्वक्रन्दतुरपरम् अर्पा स्वश्वश्रूं चुम्बित्वा जगाम १४
किन्तु रूता तां न जहौ। ततः सा बभाषे तव देवरस्य पत्नी स्वलो- १५
कानां स्वदेवानाञ्च समीपं परावृत्य गता त्वमपि स्वीयदेवरस्य जायायाः
पश्चात् परावृत्य याहि। रूता जगाद, त्वां विहाय तव पश्चाद्गमनात् १६
निवर्त्तितुं मां मा विनयस्व त्वं यत् स्थानं गमिष्यस्यहमपि तत् स्थानं
यास्यामि, अपरं त्वं यत्र वत्स्यसि, अहमपि तत्र वत्स्यामि, तव जातिरेव
मम जातिस्तवेश्वर एव ममेश्वरश्च भविष्यति। अपरं त्वं यत्र स्थाने १७
मरिष्यसि तत्रैव स्थानेऽहमपि मरिष्यामि तत्र स्थाने श्मशानं प्राप्स्यामि
मृत्युतोऽन्येन केनापि यदि त्वत्तो मम विच्छेदो जायते तर्हि परमेश्वर-
स्तदनुरूपं ततोधिकञ्च प्रतिफलं मह्यं ददातु। अनन्तरं रूता मया साकं १८
गन्तुम् एकमना आस्ते इति वीक्ष्य सा तां प्रति कथयितुं निववृते।
अपरं ते द्वे वैतलेहमप्राप्तिपर्य्यन्तं जग्मतुः, यदा वैतलेहमं प्राविशतां १९
तदा तयो र्विषये कृत्स्ननगरे जनरवो जातो योषितश्च पप्रच्छुः किमियं

२० नयमीति? तदा सा प्रत्युवाच मां नयमीं (सुखिनीं) मा वदत किन्तु
मारां (क्लिष्टाम्) इत्युक्ताह्वयत यतः सर्व्वशक्तिमान् मां प्रति बहुदुःख-
२१ मघटयत्। अहं सम्पूर्णा सती प्रातिष्ठे किन्त्वधुना परमेश्वरो रिक्तहस्तां
मां परावर्त्यानयत् परमेश्वरो माम् अक्लिश्नात् सर्व्वशक्तिमान् मां
२२ दुःखिनीमकरोत्, अतो यूयं कुतो मां सुखिनीति वदथ? इत्थं नयमी
मोयाबीया रूतानाम्नी तस्याः पुत्रवधूश्च मोयाबदेशात् परावृत्यागच्छतां
ते यवशस्यच्छेदनारम्भकाले बैतलेहमं प्रापतुः।

२ द्वितीयोऽध्यायः।

१ बोयसस्य क्षेत्रे रूतायाः शस्यसंग्रहणं ४ तां परिचित्य बोयसस्यानुग्रहणं १८ श्वश्र्वाः समीपं सकलशस्यनयनं।

१ तस्या नयम्याः स्वामिन इलीमेलकस्य वंशीयो बोयसनामा धनवानेको
२ ज्ञातिरासीत्। अनन्तरं मोयाबीया रूता नयमीमवदत्, अहं क्षेत्रं
गत्वा यस्य दृष्टावनुग्रहं प्राप्नोमि तस्य पश्चात् शस्यकणिशान्युञ्छानि, ततः
३ सा बभाषे हे मम कन्ये याहि। अनन्तरं सा गत्वा क्षेत्रं प्राप्य शस्य-
च्छेदकानां पश्चात् शस्यानि सञ्जग्राह घटनात इलीमेलकस्य वंशीयस्य
बोयसस्य भूमिखण्डे सोपतस्थौ।
४ अनन्तरं बोयसो बैतलेहमाद् आगत्य शस्यच्छेदकान् अवदत् परमे-
श्वरो युष्माकं सङ्गी भवतु ते प्रत्यवदन् परमेश्वरस्तुभ्यम् आशिषं ददातु।
५ अपरं बोयसः शस्यच्छेदकानाम् अध्यक्षं निजभृत्यं पप्रच्छ, एषा युवती
६ कस्य? तदा शस्यच्छेदकाध्यक्षो भृत्यो जगाद, इयं सा मोयाबीया
७ युवती या नयम्या साकं मोयाबदेशाद् आगमत्। इयं मामवदत् विनये-
ऽहं शस्यच्छेदकानां पश्चात् मुष्टीनां मध्ये संग्रहीतुं माम् अनुजानीहि,
ततः सा प्रातःकाल आगत्य तदारभ्याधुना यावद् अत्र तिष्ठति, निवेशने
८ तस्याः स्थितिरल्पिका। अनन्तरं बोयसो रूतां जगाद हे मम कन्ये त्वं
शृणु, त्वं संग्रहीतुम् अन्यक्षेत्रं मा गच्छ, स्थानान्तरं मा याहि, किन्त्वत्र
९ मम दासीभिः समं तिष्ठ। शस्यकर्त्तका यत्र स्थाने शस्यानि छिन्दन्ति
तन्निरीक्ष्य तेषां पश्चाद् गच्छ तव स्पर्शनात् तरुणाः किं मया न निवा-
रिताः? अपरं त्वं यदि पिपासिष्यसि तर्हि पात्राणां सन्निधिं गत्वा
१० तरुणैरुत्तोलितं तोयं पिव। ततः सा न्युब्जीभूय भूमौ पतित्वा तं व्याहरत्,

भवान् विदेशिनीं मां परिचितवान् एतावन्तमनुग्रहं कुतोऽहं प्राप्नवं?
वोयसस्तां बभाषे तव स्वामिनो मरणात् परं तव श्वश्रूं प्रति त्वया यत् ११
सद्वृत्तम् आचरितं यच्च स्वपितरौ जन्मदेशञ्च विहायाज्ञातपूर्व्वजाति-
समीपमागतम् एतत् सर्व्वमहं श्रुतवान्। परमेश्वरस्तव कर्म्मणः फलं १२
ददातु त्वं यस्येस्रायेलः प्रभोः परमेश्वरस्य पक्षाध आश्रयितुमागता स
त्वां सम्पूर्णं कर्म्मफलं ददातु। ततः सा व्याहरत्, हे मम प्रभो भवतो १३
दृष्टावनुग्रहमहं प्राप्ता भवताहं सान्त्विता च अहं भवतो दासीतुल्या
नास्मि तथापि भवान् स्वदासीं प्रीत्या सम्भाषितवान्। वोयसोऽवदत् १४
भोजनकाले त्वमेतत् स्थानमागत्य पूपं भुंक्ष्व अपरं स्वभक्ष्यम् अम्लरसे
मज्जय, तदा तस्यां शस्यकर्त्तकानां पार्श्वे उपविष्टायां स भृष्टशस्यान्यानीय
तस्यै दत्तवान् ततः सा भुक्त्वा तृप्तिं गता तथा किञ्चिद् अवाशिष्यत।
अनन्तरं तस्यां चेतुम् उत्थितायां वोयसो निजतरुणान् आदिशत् १५
मुष्टिमध्येऽपि चयन्तीम् एनां मा व्रीडयत। अपरम् अस्याः कृते गुच्छत १६
आकृष्य कतिपयानि युष्माभिरवशेषितव्यानि तान्यनया चीयन्तां यूयम्
एनां मा तिरस्कुरुत। ततः सा सन्ध्यां यावत् तस्मिन् क्षेत्रे चिकाय, अन- १७
न्तरं सञ्चितशस्येषु मर्द्दितेषु तस्याः प्राय ऐफैकपरिमिता यवा बभूवुः।

अनन्तरं सा तान् गृहीत्वा नगरं जगाम, अपरं स्वसञ्चितशस्यानि १८
श्वश्रूं दर्शयामास तथा तृप्तेः परं यदवशिष्टं तद् वहिष्कृत्य तस्यै ददौ।
तेन तस्याः श्वश्रूस्तां पप्रच्छ त्वमद्य कुत्राचैषीः? कुत्र वा कर्म्माकार्षीः? १९
यस्त्वां पर्य्यचैषीत् स धन्यो भवतु तदा सा यस्य समीपे कर्म्माकार्षीत् तं
श्वश्रूं ज्ञापयन्ती बभाषे यस्य समीपेऽद्य कर्म्माकार्षं स नाम्ना वोयसः।
ततो नयमी स्वपुत्रवधूं जगाद स परमेश्वरस्याशिषं लभतां, स जीव- २०
द्भ्यो मृतेभ्यश्च स्वीयानुग्रहं न निवर्त्तयति, नयमी पुन र्व्याहरत् स
मनुष्योऽस्माकम् आसन्नसम्बन्धीयोऽस्माकं स्वजनानाम् एको जनः। मोया- २१
वीया रूतावदत् स माम् इत्यपि प्रोक्तवान् मम सकलशस्यकर्त्तनसमाप्तिं
यावत् त्वं मम तरुणलोकानां सङ्गं मा त्यज। ततो नयमी स्वपुत्रवधूं २२
रूतां बभाषे, हे मम कन्ये तस्य दासीभिः समं गमनं तव भद्रं लोकाः
कुत्रचिद् अन्यक्षेत्रे त्वां न पश्यन्तु। अतो यवगोधूमशस्यानां कर्त्तन- २३
समाप्तिं यावत् सा चिन्वती वोयसस्य दासीभिः समं तस्थौ स्वीयश्वश्वा
समं न्युवास च।

३ तृतीयोऽध्यायः ।

१ नयम्या उपदेशेन बोयसस्य पदयो रूताया आश्रयणं ८ मध्यरात्रौ बोयसेन चमत्करणं स्वजनस्य कर्त्तव्यं कर्त्तुम् अङ्गीकरणं १४ षट् पात्राणि यवान् दत्त्वा गेहं प्रेषणं ।

१ अपरं तस्याः श्वश्रू नयमी तां बभाषे हे मम कन्ये तव यत् क्षेमो
२ जायते तत्कृते किमहं तव विश्रामं न चेष्टिष्ये? त्वं यस्य बोयसस्य
दासीभिः सममासीः स किमस्माकं ज्ञाति र्नहि? पश्य सोऽद्य यामिन्यां
३ शस्यमर्द्दनस्थाने यवान् प्रस्फोटयिष्यति। अतस्त्वं स्नाहि तैलं मर्दय
स्ववस्त्रे परिधाय शस्यमर्द्दनस्थानं व्रज किन्तु तेन मनुजेन भोजनपानयोः
४ समापने न कृते त्वम् आत्मानं न परिचायय। अनन्तरं स यदा
शयिष्यते तदा तस्य शयनस्थानं वीक्ष्य तत्स्थानं व्रजित्वा तस्य पादावपा-
५ वृत्य शयिष्यसे, ततस्त्वया किं कर्त्तव्यं तत् सएव त्वां वदिष्यति। ततः
६ सा प्रतिजगाद त्वं यद् भाषसे तत् सर्व्वमेवाहं करिष्ये। अनन्तरं सा
७ शस्यमर्द्दनस्थानम् इत्वा स्वश्वश्रा यद् आदिष्टं तत् सर्व्वं चक्रे। अपरं
बोयसो भोजनपाने कृत्वा हृष्टचित्तः सन् शस्यराशेः प्रान्ते शयितुं वव्राज,
अनन्तरं रूता धीरमागत्य तस्य पादावपावृत्य शयितवती।
८ अनन्तरं मध्ययामिनीकाले स पुरुषः शरीरं परिवर्त्य चमच्चकार
९ यतस्तस्य पदयोः समीपे योषिदेका शयिता। तदानीं स पप्रच्छ, का त्वं?
सा प्रत्यवादीत् भवतो दासी रूताहं भवान् मह्यम् आश्रयं ददातु
१० यतो भवान् मम स्वजनः। ततः स जगाद हे मम कन्ये त्वं परमेश्वरे
धन्यासि यतस्त्वं पूर्व्वसद्भावात् शेषेऽधिकं सद्भावं दर्शयन्ती धनिनं दरिद्रं
११ वा कञ्चन युवानं नानुगतवती। ततो हे कन्ये मा भैषीः, अहं त्वत्कृते
त्वयोक्तं सर्व्वं साधयिष्यामि यतस्त्वं साध्वीत्यस्मन्नगरद्वारगामिनः सर्व्वे
१२ जानन्ति। अहं तव स्वजन इति सत्यं किन्तु मत्तोपि तव समीप-
१३ सम्बन्धीयोऽपर एकः स्वजन आस्ते। अद्य यामिन्यां तिष्ठ प्रातःकाले स
यदि स्वजनस्य कर्त्तव्यं कर्म्म चिकीर्षति तर्हि भद्रं स तत् कर्म्म करोतु,
किन्तु यदि स त्वां प्रति स्वजनस्य कर्त्तव्यं कर्त्तुं नेच्छति तर्हि परमे-
श्वरस्य नाम्ना शपथं करोमि त्वां प्रति स्वजनस्य कर्त्तव्यं कर्म्माहं करि-
ष्यामि त्वं प्रातःकालं यावत् शेष्व।
१४ ततो रूता प्रातःकालपर्य्यन्तं तस्य पादसमीपे शयाना तस्थौ तत एक-
जनोऽन्यं परिचेतुं शक्नोति एतादृक्कालस्य पूर्व्वम् उदतिष्ठत्, यतो

बोयसोऽवदत्, एषा शस्यमर्द्दनस्थानम् आगच्छद् इति न प्रकाश्यतां।
सोऽन्यदपि कथयामास तव गात्रीयवस्त्रं विस्तारय ततस्तस्मिन् वस्त्रे तया १५
विस्तारिते स षट्पात्राणि यवान् परिमाय तस्या मूर्द्ध्नि ददौ पश्चाद् रूता
नगरं जगाम। अपरं स्वश्वश्र्वाः समीपम् तस्यामागतायां तस्याः श्वश्रूः १६
पप्रच्छ, हे मम कन्ये किं जातं? ततः सा स्वां प्रति तेन पुरुषेण कृतं
सकलं कर्म्म तां ज्ञापयामास। अपरं कथितवती श्वश्र्वाः समीपं रिक्त- १७
हस्ता मा याहीति वदन् स मह्यम् एतान् षट्पात्रमितयवान् दत्तवान्।
अनन्तरं तस्याः श्वश्रूस्ताम् उवाच हे मम कन्ये विषयेऽस्मिन् किं घटिष्यते १८
यावत् तन्न ज्ञास्यसि तावत् तिष्ठ, यतः स नरोऽद्यैतत्कर्म्मणः शेष-
मकृत्वा न विश्रमिष्यति।

---

४ चतुर्थोऽध्यायः।

१ विचारस्थाने बोयसस्य गमनं ज्ञातेराह्वानं ६ ज्ञातेरस्वीकारे तेनेलीमेलकस्य क्षेत्र-
क्रयणं १३ रूताया विवाहः सन्तानप्रसवश्च १८ पेरसस्य वंशावलिः।

अनन्तरं बोयसो नगरद्वारं गत्वा तत्र स्थान उपाविशत्। अपरं यं १
स्वजनमधि गदितवान् तं तेन मार्गेणागच्छन्तं दृष्ट्वा बोयसो जगाद हे
अमुक त्वम् अत्रागत्योपविश, ततः स पार्श्वमागत्योपविवेश। अनन्तरं २
बोयसो नगरस्य प्राचीनानां दशजनान् आहूय जगाद यूयमप्यत्र स्थान
उपविशत ततस्त उपविविशुः। तदा बोयसस्तं स्वजनम् अवदत्, मोयाब- ३
देशादागता नयम्यस्मदीयभ्रातुरिलीमेलकस्य भूमिखण्डं विचिक्रीषते।
अतोऽहं त्वां तां वार्त्तां ज्ञापयितुं मतिं कृतवान् त्वं नगरनिवासिनाम् ४
अस्मदीयलोकानाञ्च प्राचीनानां साक्षात् तत् क्रीणीहि यदि त्वं तत्
प्रतिजिघृक्षसि तर्हि प्रतिगृहाण किन्तु यदि न प्रतिजिघृक्षसि तर्हि
तत् मह्यं कथय ज्ञातुमिच्छाम्यहं यतस्तत् प्रतिग्रहीतुं त्वमेवार्हसि
तव पश्चाच्चाहमेवार्हामि। ततः स कथितवान् अहं तत् प्रतिग्रही-
ष्यामि। बोयसः प्रतिजगाद त्वं नयम्या हस्ताद् यस्मिन् दिने तत् क्षेत्रं ५
क्रेष्यसि मृतजनेनाधिकृतायां भूमौ तस्य नाम रक्षितुं तस्मिन् दिने तस्य
जाया मोयाबीया रूतापि त्वया प्रतिग्रहीतव्या।

ततः स स्वजनः कथयामास, तत् प्रतिग्रहीतुं नाहं शक्नोमि तथा कृते ६
स्वीयसम्पत्तिं नाशयिष्यामि, ममाधिकारं त्वं प्रतिगृहाण नाहं प्रति-
ग्रहीतुं शक्नोमि। पूर्व्वं सर्व्वकार्य्यं सम्पादयितुं स्वजनत्वाधिकारविनिमया- ७

दिष्विस्रायेल्वंशे व्यवहार एकोऽयमासीत् लोकः स्वपादुकां मोचयित्वा
समीपवासिनेऽददात् एतद् इस्रायेल्वंशस्य मध्ये साक्ष्यरूपम् अभवत्।
८ अतः स स्वजनस्त्वं तत् क्रीणीहीति वोयसमुक्त्वा स्वपादुकां मोचयित्वा
९ तस्मै ददौ। अनन्तरं वोयसः प्राचीनान् लोकान् अवदत्, इलीमेलकस्य
किलियोनस्य मह्लोनस्य च यद्यद् आसीत् तदहं नयमीतो ऽक्रीणाम्
१० अद्य यूयमत्र साक्षिणः। अपरं स्वभ्रातॄणां मध्यात् स्वनगरद्वाराच्च
मृतस्य जनस्य नाम यन्न लुप्येत तदर्थं तेनाधिकृतायां भूमौ मृतस्य नाम-
रक्षार्थं मह्लोनस्य जाया मोयाबीया रूतापि भार्य्यार्थं मया प्रतिगृ-
११ हीता तस्यापि साक्षिणो यूयमद्य जाताः। ततो द्वारवर्त्तिनः सर्व्वे लोकाः
प्राचीनाश्च बभाषिरे वयं साक्षिणोऽभूम परमेश्वरस्तव परिवारीभू-
ताम् एनां योषितम् इस्रायेल्वंशवर्द्धिन्यौ राहेल्लेयानामिके द्वे योषि-
ताविव करोतु त्वम् इफ्राथायां वर्द्धिष्णु र्भव वैतलेहमे च सुख्या-
१२ तिमांश्च भव। परमेश्वर एतस्या युवत्या गर्भाद् यं सन्तानं तुभ्यं
दास्यति तेन तामराया गर्भजातस्य यिहूदासुतस्य पेरसस्य वंशवत्
तव वंशो भवतु।

१२ अनन्तरं वोयसेन रूतायां व्यूढायां सा तस्य जाया बभूव, अपरं
वोयसे तामुपगते सा परमेश्वराद् गर्भधारणशक्तिं प्राप्य पुत्रमेकं प्रसु-
१४ षुवे। अनन्तरं योषितो नयमीं बभाषिरे, धन्यः परमेश्वरः, यतः सोऽद्य
त्वां स्वजनविहीनां नाकरोत् इस्रायेलो मध्ये तस्य नाम प्रशस्यतां।
१५ स बालकस्तव प्राणरक्षको वृद्धावस्थायां तव प्रतिपालकश्च भविष्यति
यतस्तव या पुत्रवधूस्त्वयि प्रीयमाणा सप्तभ्यः सुतेभ्योऽप्युत्तमा सेमं बालकं
१६ प्रसूतवती। तदा नयमी तं बालकं गृहीत्वा स्ववक्षःस्थले स्थापयामास
१७ तस्य धात्रीरूपा बभूव च। अनन्तरं नयम्या एकः सुतोऽजायतेति वाचं
गदित्वा तस्याः समीपवासिन्यस्तस्य नाम ओवेदः (सेवक इति) चक्रुः स
दायूदः पितामहो यिशयस्य पितासीत्।

१८ पेरसस्य वंशावलिः। पेरसस्य पुत्रो हिष्रोणः, हिष्रोणस्य पुत्रो
२० ऽरामः, अरामस्य पुत्रो ऽम्मीनादवः, अम्मीनादवस्य पुत्रो नह्शोनः,
२१ नह्शोनस्य पुत्रः सल्मोनः, सल्मोनस्य पुत्रो वोयसः, वोयसस्य पुत्र
२२ ओवेदः, ओवेदस्य पुत्रो यिशयः, यिशयस्य पुत्रो दायूद्।

शिमूयेलस्य प्रथमं पुस्तकं ।

१ प्रथमोऽध्यायः ।

१ द्वाभ्यां स्त्रीभ्यां समं शीलो भजनं कर्त्तुम् इल्कानाह्नस्य वर्षे वर्षे गमनं ४ हन्नापिनिन्नयोर्विरोधकथनं ९ पुत्रार्थं हन्नाया ईश्वरे प्रार्थनं १२ हन्नां प्रत्येलेः कथनं १९ हन्नायाः पुत्रप्रसवाद् गृहे स्थितिः २४ प्रतिश्रुत्यनुसारात् परमेश्वराय पुत्रदानं ।

इफ्रयिमपर्व्वतस्थरामाथयिमसोफीमनिवासील्कानाह्ननाम्ना कश्चित् १
जन इफ्रायीयलोक आसीत् स सूफस्य वृद्धप्रपौत्रः तोहोः प्रपौत्र
इलीहोः पौत्रो यिरोहमस्य पुत्र आसीत्। तस्य द्वे भार्य्ये आस्ताम् २
एकस्या नाम हन्ना, अन्याया नाम पिनिन्ना पिनिन्नाया अपत्यान्यजायन्त
किन्तु हन्ना निरपत्यासीत् । स नरः शीलो सैन्याध्यक्षं परमेश्वरम् ३
आराधयितुं तस्मै बलीन् दातुञ्च प्रतिवर्षं निजनगराद् अगच्छत् तत्र
स्थान एलेर्द्वौ पुत्रौ हफ्निपीनिहसौ परमेश्वरस्य याजकावास्तां ।

अनन्तरम् इल्कानाहो यज्ञकरणकाले स्वजायायै पिनिन्नायै तस्याः ४
सकलपुत्रकन्याभ्यश्चांशान् ददौ । तथा हन्नायै द्विगुणांशं ददौ यतः पर- ५
मेश्वरेण तस्या गर्भे रुद्धेऽपि स हन्नायामेवाप्रीयत । परमेश्वरेण तस्या ६
गर्भस्य रुद्धत्वात् तस्याः सपत्नी तां दुःखयितुं निन्दयाक्लिश्नात् । इत्थं ७
प्रतिवर्षं परमेश्वरस्य मन्दिरे गमनकाले पत्या सत्कृता सपत्न्या च क्लिष्टा
सा क्रन्दन्ती किमपि न भुङ्क्ते । तेन तस्याः पतिरिल्कानाहस्तां वदति ८
हे हन्ने त्वं कुतः क्रन्दसि ? कुतश्च न भुंक्षे ? तव मनः शोकाकुलं कुतः ?
तव समीपे दशभ्यः पुत्रेभ्योपि किमहं नोत्तमः ?

एकदा शीलो भोजने पाने च कृते हन्ना प्रोत्थाय तस्थौ तदा ९
एलिर्याजकः परमेश्वरस्य मन्दिरद्वारसमीप आसन उपविष्ट आसीत् ।
एवं काले हन्ना दुःखितमनाः सती परमेश्वरमुद्दिश्य प्रार्थयमाना बहु १०
ररोद । अपरं व्रतं कुर्व्वन्ती जगाद, हे सैन्याध्यक्ष परमेश्वर यदि त्वं ११
स्वीयदास्याः दुःखं निरीक्ष्य मां स्मरसि स्वदासीम् अविस्मृत्य स्वीयदास्यै
पुत्रमेकं ददासि, तर्हि तस्य यावज्जीवनमहं तं परमेश्वरमुद्दिश्य निवे-
दयिष्यामि तस्य शिरः क्षुरेण न स्प्रक्ष्यते ।

१२ परमेश्वरस्य साक्षाद् दीर्घकालं प्रार्थयमानायास्तस्या वदनम् एलिना
१३ याजकेन समदृश्यत। यतो मनसि प्रार्थयमानाया हन्नाया ओष्ठावलडतां
१४ कापि वाक् नाश्रूयत तत्कारणाद् एलिस्तां मत्तां विवेद। अपरम्
एलिस्तां बभाषे त्वं कियत् कालं मत्ता सती स्थास्यसि? तव द्राक्षारसं
१५ त्वत्तो दूरय। ततो हन्ना प्रत्यवदत् हे मम प्रभो तन्नहि, अहं दुःखित-
मना नारी द्राक्षारसं सुरां वा नापिवं, किन्तु परमेश्वरस्य साक्षाद्
१६ अहं मनोऽभिप्रायं व्यक्तीकृत्य कथितवती। त्वं स्वीयदासीं दुष्टां योषितं
मा ज्ञासी र्मम चिन्ताशोकयो र्बाहुल्यात् तदारभ्य मया वचोऽवादि।
१७ तत एलिः प्रत्यवदत्, त्वं कुशलेन याहि, इस्रायेल ईश्वरमुद्दिश्य त्वया
१८ यद् अप्रार्थि तत् स तुभ्यं ददातु। अनन्तरं भवान् स्वदृष्ट्या स्वदासीम् अनु-
गृह्णात्वित्युक्त्वा सा स्वपथेन गत्वा बुभुजे तस्या मुखञ्च पुनर्विषण्णं न बभूव।

१९ अनन्तरं ते प्रत्यूष उत्थाय परमेश्वरं प्रणम्य परावृत्य रामतं
निजनिवेशनम् आजग्मुः, अनन्तरम् इल्कानाहे स्वभार्य्यां हन्नाम्
२० उपगते परमेश्वरस्तां सस्मार। ततो हन्ना गर्भं धृत्वा काले पूर्णे पुत्रं
प्रसुषुवे; अपरं परमेश्वरात् तमयाचत तत्कारणात् तस्य नाम शिमू-
२१ येल (ईश्वरदत्त) इति चकार। अनन्तरम् इल्कानाहः सपरिवारः
२२ परमेश्वराय वार्षिकं बलिं दातुं प्रतिश्रुतं निवेदयितुञ्च जगाम। किन्तु
हन्ना न जगाम यतः सा स्वस्वामिनमवदत् बालकेन स्तन्यपाने त्यक्ते
ऽहं तमादाय गमिष्यामि, ततः स परमेश्वरं साक्षात्कृत्य तत्र स्थाने
२३ सर्व्वदा स्थास्यति। ततस्तस्याः स्वामील्कानाहस्तां जगाद त्वं यत् क्षेमं
मन्यसे तदेव कुरु तस्य स्तन्यपानत्यागपर्य्यन्तं विलम्बस्व परमेश्वरः केवलं
स्वीयवाक्यं चिरस्थं करोतु। ततः सा स्त्री तिष्ठन्ती बालकस्य स्तन्यपान-
त्यागं यावत् तं स्तन्यं पाययामास।

२४ अनन्तरं तेन स्तन्यपाने त्यक्ते सा त्रीन् वृषभान् एफापरिमितं गो-
धूमचूर्णं द्राक्षारसपूर्णकुतूञ्च समादाय शीलो परमेश्वरस्यावासं तम्
२५ आनिनाय तदा बालको ऽल्पवयस्क आसीत्। अनन्तरं तौ वृषभान्
२६ मारयित्वा बालकम् एलेः समीपम् आनिन्यतुः। अपरं हन्ना बभाषे, हे
मम प्रभो भवतः प्राणानां शपथं कृत्वाहं कथयामि हे मम प्रभो, स्थाने-
ऽत्र परमेश्वरम् उद्दिश्य प्रार्थयमाना या नारी भवतः सम्मुखे समुद-
२७ तिष्ठत् सैवाहं। बालकमेनमहं याचितवती परमेश्वरस्य समीपे यदह-
२८ मयाचे स तत् मह्यमदात्। ततो हेतोरहं तं यावज्जीवनं परमेश्वराय

न्यवेदयं यतः स परमेश्वरस्य कृते मया याचितः। अनन्तरं बालकस्तत्र स्थाने परमेश्वरं प्रणनाम।

---

२ द्वितीयोऽध्यायः।

१ हन्नाया गीतं ११ गृहगमनम् एलेः पुत्त्रयोः पापाचरणं १८ शिमूयेलस्य कर्म्म २० एलेर्वरेण हन्नायाः पुनः पुत्त्रप्रसवः २२ स्वपुत्त्रयोरेलेस्तिरस्करणं २७ एलेर्वंशस्य विरुद्धमभिशापकथनं।

अनन्तरं सा हन्ना प्रार्थयमाना बभाषे। १

समाह्लादं समायाति परमेशात् मनो मम।
भाग्यञ्च मे परेशेन संप्रयाति समुन्नतिं।
समक्षमेव शत्रूणां मद्वक्त्रञ्च प्रसीदति।
त्राणेन त्वत्कृतेनैव प्रहर्षामितरामहं।
परमेशस्य तुल्यो हि पवित्रो नहि कश्चन। २
विना त्वमीश्वरः कश्चिदपरो नहि विद्यते।
अस्माकमीशतुल्यश्च ह्यचलो नास्ति कश्चन।
मनःसमुन्नते र्वा वाक् श्रूयतां न पुनः पुनः। ३
युष्माकं वदनेभ्यो न निर्यातु निष्ठुरं वचः।
यत्परेशो हि सर्व्वज्ञः परिमाता स कर्म्मणां।
प्रभज्यते च तेनैव वीरस्यापि शरासनं। ४
प्रदीयते स्खलद्भ्यश्च शृङ्खलं बलरूपकं।
विक्रीणन्ति निजान् भक्ष्यै र्ये पुष्टा मनुजास्तु ते। ५
कल्याणं परिगच्छन्ति ये क्षुधार्त्ता नराः पुरा।
सूते सप्तसुतान् बन्ध्या क्षीयते बहुपुत्त्रिका।
मृत्युजीवनयोर्दाता सएव परमेश्वरः। ६
नयेत प्रेतलोकं स आनयेच्च पुनस्ततः।
अपहर्त्ता च दाता च सम्पत्तेः परमेश्वरः। ७
निपातस्योन्नतेश्चापि स एवैकाधिपः स्मृतः।
धूलेरुन्नम्य दीनांश्च भिक्षूंश्चोत्थाप्य सारतः। ८
वासयेत् स नृपैः सार्द्धम् स्वदत्ते ज्योतिरासने।
पृथिव्या भित्तिमूलानि परमेशस्य सन्ति हि।
तेषामुपरि तेनैव स्थापितं सकलं जगत्।

९ स्वीयपूतमनुष्याणां चरणौ स हि रक्षति।
परुषा निधनं यान्ति वीरो जयति नो बलैः।
१० ते तु भग्ना भविष्यन्ति रिपवो ये परेशितुः।
स्वर्गे स्थित्वा स तेष्वेव गर्जनं कारयिष्यति।
आभूम्यन्तं परेशो हि करिष्यति विचारणं।
स स्वकीयाय भूपाय बलञ्च परिदास्यति।
अवस्थां स्वाभिषिक्तस्य प्रोन्नताञ्च करिष्यति।

११ अनन्तरम् इल्कानाहो रामतनगरे स्वनिवेशनं जगाम किन्तु स बालक
१२ एलो याजकस्य सम्मुखे तिष्ठन् परमेश्वरं परिचरितुम् आरेभे। एलेः
१३ सुतौ दुष्टस्वभावौ तौ परमेश्वरं नामन्येतां। तौ याजकौ लोकान् प्रतीत्थं
व्यवाहरतां केनचित् जनेन बलौ दास्यमाने तस्य मांसपाकसमये याज-
१४ कस्य दासस्त्रिशूलं हस्तेनादायागच्छत्। अपरं भ्राष्ट्रे कटाहे स्थाल्याम्
ऋजीषे वा निहितेन त्रिशूलेन यति मांसम् उदक्षिप्यत तदेव याजकः
स्वस्य कृतेऽग्रह्णात् तत्र शीलावागतान् सर्व्वान् इस्रायेल्वंशीयान् प्रति
१५ ताभ्याम् इत्थम् आचारि। मेदोदाहात् पूर्व्वमेव याजकस्य दास आगत्य
यजमानम् अकथयत्, याजकाय शूल्यमांसं देहि यतः स त्वत्तः सिद्ध-
१६ मांसं न जिघृक्षति किन्त्वामं जिघृक्षति। तेन मेदो ऽधुनैव धक्ष्यते,
तस्मिन् दग्धे सति त्वं स्वमनोभिलाषानुसारेण ग्रहीतुं शक्ष्यसीति वाच्यु-
क्तायां त्वम् इदानीमेव देहि नोचेदहं बलेन ग्रहीष्यामीति स प्रत्यवदत्।
१७ अतः परमेश्वरस्य साक्षात् तयोस्तरुणयोरतीव पापं ववृधे, यतो लोकाः
परमेश्वरस्य नैवेद्यम् ऋतीयितुं प्रावर्त्तन्त।

१८ तदानीं शिमूयेलो बालकः कार्पासनिर्म्मितम् एफोदं परिधाय पर-
१९ मेश्वरं पर्य्यचरत्। तस्य माता प्रतिवत्सरं निजपतिना समं वार्षिकं बलिं
दातुं यदागच्छत् तदा तस्य कृते गात्रीयं क्षुद्रवस्त्रं निर्म्मायानीय तस्मै
प्राददात्।

२० अनन्तरम् एलिरिल्कानाहं तस्य जायाञ्चेत्याशिषं जगाद, परमे-
श्वरस्य कृते तवानया भार्य्यया याचितस्य बालकस्य विनिमयेन परमेश्व-
२१ रस्तुभ्यम् अस्या अपरान् सन्तानान् ददातु। अनन्तरं तयोः स्वस्थानं
गतयोः परमेश्वरो हन्नाया दशाम् अवेक्षाञ्चक्रे तेन सा गर्भवती भूत्वा
क्रमेण त्रीन् पुत्रान् द्वे कन्ये प्रसुषुवे, तदानीं शिमूयेलो बालकः परमे-
श्वरस्य साक्षाद् वर्द्धितुमारेभे।

तदानीम् एलिरतिशयस्थविर आसीत्, अनन्तरम् इस्रायेलः सकल- २२
वंशान् प्रति स्वपुत्रयो र्व्यवहारं समाजावासद्वारसमीपम् आगताभिः
परिचारिकाभि र्योषिद्भिः समं तयोः शयनस्य वार्त्ताञ्च श्रुत्वा तौ व्याह-
रत्, सकललोकानां प्रमुखाद् युवयो र्दुर्वृत्ते र्वार्त्तां शृणोमि, युवां कुत २३
एतादृग् दुर्वृत्तम् आचरथः? हे मम पुत्रौ नहि नहि मया या २४
ख्यातिः श्रूयते सा न भद्रा युवां परमेश्वरस्य लोकान् आज्ञा लङ्घ-
येथे। मनुजेन यदि मनुजस्य किमप्यपराध्यते तर्हीश्वरस्तं विचा- २५
रयति, किन्तु परमेश्वरस्य येनापराध्यते तत्कृते को विनेष्यते? तथापि
तौ स्वपितु र्वाचि मनो न निदधाते यतस्तौ विनाशयितुं परमेश्वरस्य
मतिरासीत्। अपरम् उत्तरोत्तरं वर्द्धमाने शिमूयेले बालके परमेश्वरो २६
मनुजाश्चातुष्यन्।

अनन्तरम् ईश्वरस्य कश्चित् लोक एलेः समीपम् आगत्य जगाद पर- २७
मेश्वर इति वाचं वक्ति, यस्मिन् काले तव पूर्व्वपुरुषा मिसरदेशे
फिरौणो राष्ट्र आसन् तदानीमहं तान् प्रति दर्शनमदां, मम यज्ञवेद्या २८
उपरि बलीन् उत्स्रष्टुं सुगन्धिधूपं ज्वालयितुं मम साक्षाद् एफोदं
परिधातुञ्च ते यथा मम याजकत्वं कुर्य्युस्तदर्थम् इस्रायेलः सर्व्ववंशे-
भ्यस्ते मयाभिरुचिता इस्रायेल्वंशीयानां वह्निकृताः सकलोपहाराश्च
तव पितृवंशाय मया दत्ताः किमिति न सत्यं? अतोऽहं स्वीयावासे २९
यानि बलिनैवेद्यान्युत्स्रष्टुम् आज्ञापयं यूयं तानि कुतः पदैरभ्याहथ?
त्वं मम लोकस्येस्रायेल्वंशस्य श्रेष्ठनैवेद्यैः स्वान् पुष्टान् कर्त्तुं मत्तोपि
स्वीयपुत्रावधिकं सम्मन्यसे। अत इस्रायेलः प्रभुः परमेश्वरो गदति, ३०
तव वंशस्तव पूर्व्वपुरुषाणां वंशश्च सर्व्वदा मां साक्षात् परिचरिष्यति
वाक्यमिदमहम् उक्तवान्, किन्त्वधुना परमेश्वरः कथयति तत् मम
समीपाद् दूरीभवतु मत्सम्मानकारिणो मया सम्मंस्यन्ते मत्तुच्छकारिण-
श्चावज्ञास्यन्ते। पश्याहं यस्मिन् काले तव त्वत्पितृवंशस्य च बाहूच्छेदं ३१
करिष्यामि तव वंशे स्थविर एकोपि न स्थास्यति स समय आयाति।
स्वरिपुं ममावास इस्रायेल्वंशाय मद्दत्ते सर्व्वमङ्गले च नियोजितं वीक्षि- ३२
ष्यसे तदा तव वंशे कदापि स्थविर एकोपि न स्थास्यति। अपरम् अहं ३३
स्वयज्ञवेदितस्तव यं मनुजं नाच्छेत्स्यामि स तव चक्षुःक्षयहेतुक आन्तरिक-
शोकहेतुकश्च भविष्यति, तव वंशोद्भवाः सर्व्वे लोकास्तारुण्यकाले मरि-
ष्यन्ति। अपरं हफ्निपीनिहसाख्यौ तव द्वौ पुत्रौ प्रति यद् घटिष्यते तत् ३४

३५ तवैकं चिह्नं भविष्यति तौ द्वौ जनावेकस्मिन्नेव दिने मरिष्यतः। अहमेकं
विश्वास्यं याजकम् उत्पादयिष्यामि स ममाभिमतम् इष्टञ्च समाचरि-
ष्यति, तस्मादहम् एकं चिरस्थायिवंशम् उत्पादयिष्यामि, स सर्व्वदा
३६ ममाभिषिक्तं साक्षात् परिचरिष्यति। अपरं तव वंशस्यावशिष्ट एकैको
जन आगत्यैकरौप्यमुद्रार्थम् एकखण्डपूपार्थञ्च तं प्रणम्य वदिष्यति,
विनयेऽहं येन खण्डैकं पूपं भक्षितुं प्राप्नोमि तादृशे कस्मिंश्चिद् याजक-
त्वपदे मां नियोजय।

---

३ तृतीयोऽध्यायः।

१ शिमूयेलं प्रति परमेश्वरस्याह्वानं ११ शिमूयेलं प्रति एलेर्वंशस्य विनाशनस्य प्रका-
शितत्वं १५ एलेः समीपे शिमूयेलेन तस्य प्रकाशितत्वं शिमूयेलस्य यशोवृद्धिश्च।

१ अनन्तरं शिमूयेलो बालक एलेः साक्षात् परमेश्वरं पर्य्यचरत् तस्मिन्
काले परमेश्वरस्य वाक्यं दुर्लभमासीत् प्रायेण प्रकाशितं दर्शनं नासीत्।
२ अपरं क्षीणदृष्टित्वाद् एलेर्दृष्टिशक्ति र्नासीत्। एकरात्रावीश्वरस्य
३ प्रदीपे न निर्व्वाणे स्वस्थान एलिरशेत शिमूयेलश्चेश्वरस्य मञ्जूषा यत्र
४ स्थान आसीत् तत्र परमेश्वरस्यावासमध्य अशेत। तत्काले परमे-
५ श्वरः शिमूयेलम् आह्वयत्, ततोऽत्राहम् इत्युक्त्वा स एलेः समीपं धावित्वा
जगाद, अत्राहमस्मि भवान् किं माम् आह्वयति? ततः स उक्तवान् नाह-
६ माह्वयं त्वं पुनः शेष्व तदा स गत्वा शयितवान्। अनन्तरं परमेश्वरः
पुनराह्वयत् हे शिमूयेल, ततः शिमूयेल उत्थायैलेः समीपं गत्वा व्याह-
रत्, अत्राहमस्मि भवान् किं माम् आह्वयति? स बभाषे हे मम पुत्र
७ नाहमाहूतवान् त्वं पुनः शेष्व। तदानीं शिमूयेलेन परमेश्वरस्य शब्दो
८ न परिचितः परमेश्वरस्य वाक्यमपि तस्य समीपे न प्रकाशितं। अनन्तरं
परमेश्वरस्तृतीयवारं शिमूयेलम् आह्वयत्, ततः स उत्थायैलेः समीपं
गत्वावदत् अत्राहमस्मि भवान् किं मामाह्वयति? तदानीं परमेश्वरेण
९ बालकोऽयम् आहूयत इत्येलि र्विज्ञाय शिमूयेलं बभाषे, त्वं गत्वा शेष्व,
स यदि पुनर्व्वारं त्वामाह्वयति तर्हि हे परमेश्वर कथयतु, तव दासः
१० शृणोतीति वाचं वद, ततः शिमूयेलो गत्वा स्वस्थाने शिश्ये। अनन्तरं
परमेश्वर आगत्य तिष्ठन् पूर्व्ववद् आह्वयत् हे शिमूयेल हे शिमूयेल, ततः
शिमूयेलः प्रतिजगाद कथयतु तव दासः शृणोति।
११ तदानीं परमेश्वरः शिमूयेलं जगाद, पश्याहम् इस्रायेल्मध्ये कर्म्मैकं

करिष्यामि तद् यः कश्चन श्रोष्यति तस्य कर्णद्वयं शब्दायिष्यते। एलेः १२
परिवारेषु मया यद्यद् उक्तं तान्यारभ्यैकस्मिन्नेव दिने निःशेषं सम्पाद-
यिष्यामि। तस्य पुत्रौ धर्म्माद् भ्रष्टाविति सोऽवगतः सन् तौ नादाम्यद् १३
एतदपराधकारणाद् अहं तस्य वंशं सदा दण्डयिष्यामीति वाक्यं तम-
वोचं। अपरं बलिदाननैवेद्यैरपि तस्य वंशस्यापराधः कदापि मया न १४
क्षमिष्यत इति शपथमहम् एलेः परिवारमधि कृतवान्।

अनन्तरं शिमूयेलः पुनरशेत, ततः परं प्रभाते जाते परमेश्वरावासस्य १५
कवाटौ मुमोच, किन्तु शिमूयेल एलेः समीपे तद्दर्शनं प्रकाशयितुं भीतः।
अनन्तरम् एलिः शिमूयेलम् आहूय जगाद हे मम पुत्र शिमूयेल, १६
ततः स प्रतिजगाद, अहमेषः। तदानीम् एलिः पप्रच्छ तव समीपे तेन १७
किं वाक्यं व्याहारि? अहं विनये तत् मह्यं मापह्नुष्व त्वां प्रतीश्वरेण
यद्यद् अवाचि तस्यैकमेव वाक्यं यदि मह्यम् अपह्नुषे तर्हि सोऽमुकं
तदधिकञ्च फलं तुभ्यं ददातु। तदानीं शिमूयेलस्तस्मै सर्व्वाणि कथया- १८
मास किमपि नापजुह्नुवे। तत एलि र्व्याजहार स परमेश्वर एव स्वीय-
दृष्ट्या यत् क्षेमं मन्यते तदेव करोतु।

अनन्तरं शिमूयेलस्य वयसि वर्द्धिते परमेश्वरस्तेन सार्द्धं तिष्ठन् तस्य १९
किञ्चन वाक्यं व्यर्थं भवितुं न ददौ। ततः शिमूयेलः परमेश्वरेण २०
निश्चितो भविष्यद्वक्ता इति दानमारभ्य वेर्श्वेवां यावद् इस्रायेलीयैः
सर्व्वैरज्ञायत। अतः परमेश्वरः शीलो पुनरात्मदर्शनं दातुम् आरेभे २१
यतः परमेश्वरः स्वीयवाक्येन शिमूयेलस्य समीपे शीलो स्वं प्राकाशयत्,
ततः शिमूयेलस्य वाक्यं सर्व्वान् इस्रायेलीयान् प्रति प्रबभूव।

---

४ चतुर्थोऽध्यायः।

१ एवनेषरस्थाने इस्रायेलवंशस्य पराजितत्वं ३ शीलुतो नियममञ्जूषायाः शिविर आनयनं १० पुनः पराजितत्वम् एलेः पुत्रद्वयस्य हतत्वं १२ तत् श्रुत्वा एलेर्मरणं १९ तस्य पुत्रवध्वाः प्रसवो मरणञ्च।

अनन्तरम् इस्रायेल्वंशाः पिलेष्टीयैः समं योद्धुं निर्गत्य एवनेषरे १
शिविरं स्थापयामासुः पिलेष्टीया अप्यफेके शिविरं स्थापयामासुः।
अनन्तरं पिलेष्टीया इस्रायेल्वंशस्य विरुद्धं सैन्यानि रचयाञ्चक्रिरे २
तेन युद्धे व्याप्ते सति इस्रायेल्वंशः पिलेष्टीयानां सम्मुखे पराजित-
स्तस्याः सैन्यश्रेण्याः प्रायेण चतुःसहस्राणि लोकाः क्षेत्रे हताश्च।

३ अपरं लोकेषु शिविरं प्रविष्टेष्विस्रायेल्वंशस्य प्राचीना अकथयन
परमेश्वरोद्य पिलेष्टीयानां सम्मुखेऽस्मान् कुतः पराजितान् अकार्षीत्?
वयं शीलुतोऽस्माकं समीपं परमेश्वरस्य नियममञ्जूषाम् आनयामहै
४ ततः सोऽस्माकं मध्यमुपस्थाय रिपूणां करेभ्योऽस्मान् रक्षिष्यति। अनन्तरं
लोकाः शीलुं दूतान् प्रहित्य तस्मात् स्थानात् किरूवमध्यवासिनः सैन्या-
ध्यक्षपरमेश्वरस्य नियममञ्जूषाम् आनिन्युः, तदानीं हफ्निपीनि-
हसनामानावेलेः पुत्रौ तत्र स्थान ईश्वरस्य नियममञ्जूषया सार्द्धम्
५ आस्तां। अनन्तरं परमेश्वरस्य नियममञ्जूषायां शिविर उपस्थितायाम्
इस्रायेलः सर्व्वे वंशा महासिंहनादम् अकुर्व्वन् तेन पृथिवी कम्पिता।
६ तदानीं पिलेष्टीयास्तस्य सिंहनादस्य ध्वनिं निशम्य पप्रच्छुः, इब्रीयाणां
शिविरे महासिंहनादः कुतो जायते? ततः परमेश्वरस्य नियममञ्जूषा
७ शिविरमानीतेति ज्ञातवन्तः। अनन्तरम् ईश्वरः शिविरम् आगत इति
गदन्तः पिलेष्टीया बिभीय पुनरवदन् अस्मान् धिक्, इतः पूर्व्वं
८ कदापि नैतादृग् अघटत। अस्मान् धिक्, एतस्य पराक्रमिण ईश्वरस्य
हस्ताद् अस्मान् क उद्धारयिष्यति? अयमीश्वरः प्रान्तरे सर्व्वप्रकारा-
९ घातै र्मिस्रीयान् जघान। हे पिलेष्टीया बलं प्रकाशयत स्वान् वीरानिव
दर्शयत, इम इब्रीयलोका यद्वद् युष्माकं दासा बभूवुस्तद्वद् यूयं तेषां
दासा न भवत स्वान् वीरानिव दर्शयन्तो युध्यत।
१० ततो युध्यद्भिः पिलेष्टीयैः पराजितानाम् इस्रायेल्वंशानाम् एकैको
जनः स्वस्ववासस्थानं पलायाञ्चक्रे, तस्मिन् महानिहनन इस्रायेल्वंशस्य
११ त्रिंशत्सहस्राणि पदातयो हताः। अपरम् ईश्वरस्य नियममञ्जूषा रिपु-
हस्तगता बभूव, एले र्द्वौ पुत्रौ हफ्निपीनिहसावप्यहन्यतां।
१२ ततः सैन्यश्रेण्याः पलायमानश्छिन्नवस्त्रो धूल्याच्छन्नमूर्द्धा बिन्यामीन-
१३ वंशीयो जन एकस्तस्मिन्नेव दिने शीलुम् आगमत्। तस्यागमनसमये
तत्र स्थाने पथपार्श्व आसने समुपविष्ट एलिः प्रतीक्षितवान्, यतस्त-
स्यान्तःकरणम् ईश्वरस्य मञ्जूषायाः कृते चकम्पे तेन मनुजेन नगर-
मध्यं गत्वा तस्यां वार्त्तायाम् उक्तायां नगरस्थाः सर्व्वे लोका हाहा-
१४ कारं चक्रुः। तदानीम् एलिस्तस्य हाहाकारस्य शब्दं श्रुत्वा पप्रच्छ,
अस्य कलहशब्दस्य किं कारणं? ततः स लोकः शीघ्रमागत्यैलिं जगाद।
१५ तदानीम् एलिरष्टानवतिवत्सरवयस्क आसीत् स च क्षीणदृष्टिकार-
१६ णाद् द्रष्टुं न शशाक। स मनुष्य एलिं बभाषे, सैन्यश्रेण्या आगतो

लोकोऽहम् अद्यैव सैन्यश्रेण्याः पलायित्वागमं, तत एलिः पप्रच्छ हे
मम पुत्र का वार्त्ता? स दूतः प्रतिजगाद, इस्रायेल्वंशीयाः पिलेष्टीयानां १७
सम्मुखात् पलायाञ्चक्रिरे लोकानां महानिहननं जातञ्च हफ्निपीनि-
हसाख्यौ तव द्वौ पुत्रावपि हतौ तथेश्वरस्य मञ्जूषा रिपुभिरपहृता।
तदानीम् ईश्वरस्य मञ्जूषाया नाम्नि तेनोच्चारिते सत्येलिरासनात् १८
पश्चाद् गोपुरपार्श्वे निपपात तेन तस्य ग्रीवाभञ्जनात् स ममार यतः
स वृद्धो गुरुश्चासीत्, स एलिश्चत्वारिंशद्वत्सरान् यावद् इस्रायेल्-
वंशम् अशिषत्।

तदानीं तस्य पुत्रवधूः पीनिहसस्य भार्य्या गर्भवती तस्याः प्रसव- १९
कालः सविधश्चासीत्, अत ईश्वरस्य मञ्जूषा रिपुहस्तगता मम
श्वशुरः पतिश्च मृताविति वार्त्तां निशम्य साधोमुखी भूत्वा प्रसुषुवे
यतस्तदानीं तस्याः प्रसववेदना समुपातिष्ठत्। तदानीं तस्यां मृत- २०
कल्पायां सत्यां तस्याः सन्निधाववतिष्ठमाना नार्य्यस्तां जगदुः, भीति
र्नास्ति त्वं पुत्रं प्रसूता किन्तु सा न प्रतिजगाद तत्र मनश्च न निदधे।
अनन्तरं सा तनयस्य नाम ईखावोदो (निस्तेजा) इति चक्रे तथेश्वरस्य २१
मञ्जूषाया रिपुहस्तगतत्वात् स्वश्वशुरस्य पत्युश्च मरणाच्च बभाषे, इस्रा-
येल्वंशात् तेजो विगतं। ईश्वरस्य मञ्जूषाया रिपुहस्तगतत्वादेव सा २२
जगाद, इस्रायेल्वंशात् तेजो विगतं।

---

५ पञ्चमोऽध्यायः।

१ दागोनदेवस्य मन्दिरे मञ्जूषानिधानं ३ दागोनस्य भग्नत्वम् अपरम् अस्दोदस्य गातस्य च लोकानां पीडितत्वं विनष्टत्वञ्च १० इक्रोणे मञ्जूषायाः प्रेषणं।

अनन्तरं पिलेष्टीयैरपहृतेश्वरमञ्जूषा एवनेषराद् अस्दोदम् आ- १
नीता। ततः परं पिलेष्टीया ईश्वरस्य मञ्जूषां गृहीत्वा दागोनदेवस्य २
मन्दिरमानीय दागोनस्य पार्श्वे स्थापयामासुः।

ततः परदिने अस्दोदीयलोकाः प्रत्यूष उत्थाय दागोनदेवं परमे- ३
श्वरस्य मञ्जूषायाः सम्मुखे ऽधोमुखं भूमौ पतितं ददृशुः, ततस्ते दागोनदेवं
धृत्वा पुनः स्वस्थाने स्थापयामासुः। अपरं तस्य परदिवसेऽपि लोकाः ४
प्रत्यूष उत्थाय दागोनदेवः परमेश्वरस्य मञ्जूषायाः सम्मुखे ऽधोमुखो
भूमौ पतित इति दागोनस्य शिरः करद्वयञ्च प्रच्छिन्ने शिलायां

५ स्थिते केवलं तस्य मत्स्याकारो देहोऽवशिष्ट इति ददृशुः। एतत्का-
रणाद् दागोनस्य पुरोहिता दागोनमन्दिरगामिनो लोकाश्च अस्-
६ दोदे स्थितायां दागोनशिलायाम् अद्यापि पादौ न निदधते। पर-
मेश्वरस्तान् अस्दोदीयलोकान् भृशं क्लिश्नन् नाशयामास तथा हि
७ सोऽस्दोदीयलोकान् तच्चतुर्दिक्स्थलोकांश्चार्शोरोगेणाजघान। अनन्तरम्
अस्दोदीयलोका एतादृशं विलोक्य जगदुः, इस्रायेल ईश्वरस्य मञ्जूषा
नास्माकं समीपे स्थास्यति यतः सोऽस्मान् अस्मद्देवं दागोनञ्च भृशं
८ क्लिश्नाति। अतस्ते दूतान् प्रहित्य पिलेष्टीयानाम् अधिपतिगणं स्वेषां
समीपमानीय जगदुः, इस्रायेल ईश्वरस्य मञ्जूषामध्यस्माभिः किं कर-
णीयं? अधिपतयोऽवदन् इस्रायेल ईश्वरस्य मञ्जूषा गातनगरं नीयतां,
९ ततस्त इस्रायेल ईश्वरस्य मञ्जूषां तत्स्थानं निन्युः। तदा तस्यां तत्र
नीतायां परमेश्वरो महाहननेन तन्नगरम् अक्लिश्नाद् अर्थतस्तस्य नगरस्य
क्षुद्रान् महतश्च सर्व्वलोकान् आजघान, तेन तेषां गुह्यस्थानेष्वर्शो-
रोगो बभूव।

१० अनन्तरम् ईश्वरस्य मञ्जूषा तैरिक्रोणं प्रेषिता तत ईश्वरस्य मञ्जूषा-
याम् इक्रोणम् आगतायाम् इक्रोणनगरीया उच्चैरवदन् अस्माकम्
अस्मल्लोकानाञ्च बधार्थम् इस्रायेल ईश्वरस्य मञ्जूषास्माकं समीपं
११ तैरानायि। ततस्ते दूतान् प्रहित्य पिलेष्टीयानाम् अधिपतिगणं संगृह्य
जगदुः, इस्रायेल ईश्वरस्य मञ्जूषा युष्माभि र्विसृष्टा पुनः स्वस्थानं प्रति-
गच्छतु सोऽस्मान् अस्मदीयप्रजाश्च न नाशयतु यतस्तन्नगरस्य सर्व्वत्र
१२ महाहननं जातं, तत्र स्थानम् ईश्वरेण भृशमक्लिश्यत। अपरं ये
लोका अजीवन् ते ऽर्शोरोगेण पीडितास्ततो नगरीयलोकानाम् आर्त्तस्वर
आकाशं यावद् उदतिष्ठत्।

---

६ षष्ठोऽध्यायः।

१ इस्रायेल्लोकानां समीपं मञ्जूषां प्रेरयितुं पिलेष्टीयानां मन्त्रणा १० मञ्जूषाप्रेरणं १९ वैतशेमशे मञ्जूषायां दृष्टिपातनात् लोकानां मध्ये महामारीसमुत्पत्तिः २१ किरियत-यियारीमं प्रति मञ्जूषाप्रेरणं।

१ परमेश्वरस्य मञ्जूषा पिलेष्टीयानां देशे सप्तमासान् यावत् तस्थौ।
२ अपरं पिलेष्टीयाः पुरोहितान् गणकांश्चाहूय व्याहरन् परमेश्वरस्य

मञ्जूषामधि किं करणीयम् अस्माभिः? वयं केन प्रकारेण तां स्वस्थानं
प्रेषयिष्यामः? तद् अस्मान् ज्ञापयत। ते ऽवदन् यदि यूयम् इस्रायेल २
ईश्वरस्य मञ्जूषां विसृजथ तर्हि शून्यां तां न विसृजत किन्तु दोषार्थ-
कदानानि तस्मै दत्त ततः स युष्मान् निरामयान् करिष्यति, अपरं युष्मान्
क्लेष्टुं स कुतो न न्यवर्त्ततेदं ज्ञास्यथ। तेन ते पप्रच्छुः, दोषार्थकदानीयं ४
वयं किं द्रव्यं तस्मायुत्स्रक्ष्यामः? ते ऽवदन् पिलेष्टीयाध्यक्षाणां संख्यानु-
सारात् पञ्च स्वर्णार्शांसि पञ्च स्वर्णमूषिकांश्च दद्ध्वं यतो युष्माकं सर्व्वेषां
युष्मदध्यक्षाणाञ्चैकरूप एव क्लेशो जातः। अतो यूयं युष्माकम् अर्शसां ५
देशनाशकमूषिकाणाञ्च प्रतिमा निर्म्मायेस्रायेल ईश्वराय ददतस्तं
समादरिष्यध्वे तेन भवितुं शक्नोति स युष्मभ्यं युष्मद्देवगणाद् देशाच्च
क्लेशं निवारयिष्यति। मिस्रीयलोकाः फिरौन् राजा च यादृशं स्वेषाम् ६
अन्तःकरणान्यकठिनयन् यूयमपि तादृशम् अन्तःकरणं कुतः कठि-
नयथ? तेषां मध्ये तेनाश्चर्य्यकर्म्मसु कृतेषु लोकास्तैः किं न विसृष्टाः?
ततस्ते किं न गताः? अतः सम्प्रति यूयं नूतनं शकटमेकं निर्म्मात यच्च युगं ७
कदापि नावहत् तादृशं दुग्धवतीगोद्वयम् आनीय शकटे योजयत
तयो र्वत्सौ तयोः पश्चाद् गृहमानयत च। अपरं परमेश्वरस्य मञ्जूषां ८
गृहीत्वा तच्छकटोपरि स्थापयत, अपरं दोषार्थकप्रायश्चित्तस्वरूपाणि
स्वर्णाभरणानि पात्रे निधाय तत्पार्श्वे स्थापयत, अनन्तरं तद् यातुं
विसृजत। तत् शकटं यदि परमेश्वरस्य सीमाया मार्गेण वैतशेमशं याति ९
तर्ह्यस्माकं महदमङ्गलं तेनैव कृतं, यदि तु न याति तर्हि न तस्य करेण
वयम् आहताः किन्त्वस्मान् प्रति दैवी घटनाभवत् इति युष्माभि र्ज्ञास्यते।

अनन्तरं लोकैस्तदेवाकारि दुग्धवतीगोद्वयं गृहीत्वा शकटे योजितं १०
तयो र्वत्सौ च गृहे निबबन्धाते। अनन्तरं परमेश्वरस्य मञ्जूषा स्वर्णमू- ११
षिकार्शःप्रतिमाधारपात्रञ्च शकटोपरि निदधाते। अनन्तरं तद्गवी- १२
द्वयम् ऋजुमार्गेण गच्छत् वैतशेमशस्य दिशं जगाम, तत् शब्दायमानम्
एकमनो राजमार्गेणैव जगाम दक्षिणं वामं वा न परावर्त्तत; पिलेष्टी-
यानाम् अधिपतयश्च वैतशेमशस्य सीमां यावत् तस्य पश्चात् जग्मुः।
तदानीं वैतशेमशनिवासिनः समभूमौ गोधूमं कृन्तन्ति त ऊर्द्ध्वदृष्टिं १३
कृत्वा मञ्जूषां ददृशुस्तां दृष्ट्वा चाजह्लादिरे। तदानीं तत् शकटं वैत- १४
शेमशीययिहोशूयस्य क्षेत्रमुपस्थाय स्थगितं बभूव तत्र स्थाने महाप्रस्तर
एक आसीत् ते शकटस्य काष्ठानि छित्त्वा तद्गवीद्वयं होमबलिरूपेण

१५ परमेश्वराय ददुः। अनन्तरं लेवीयाः परमेश्वरस्य मञ्जूषां तत्समीपस्थं
स्वर्णालङ्काराधारपात्रञ्चावरोह्य तस्मिन् महाप्रस्तरे निदधिरे, अपरं
वैतशेमशीयलोकास्तस्मिन् दिने परमेश्वरमुद्दिश्य होमार्थकादीन् बलीन्
१६ उत्ससृजुः। तद् दृष्ट्वा पिलेष्टीयानां पञ्चाधिपतयस्तस्मिन् दिन इक्रोणं
१७ प्रत्याजग्मुः। अपरं दोषार्थकदानरूपेण पिलेष्टीयैरस्दोदस्य निमित्तम्
एकम् असाया निमित्तम् एकम् अस्किलोनस्य निमित्तम् एकं गातस्य
निमित्तम् एकम् इक्रोणस्य निमित्तम् एकञ्चैतानि पञ्चस्वर्णार्शांसि,
१८ पिलेष्टीयानां यावन्ति नगराणि, पञ्चानाम् अधिपतीनाम् अधीनान्या-
सन् (तानि प्राचीरवेष्टितानि नगराणि सामान्यग्रामा वा स्युः) तावन्ति
स्वर्णमूषिकाश्च परमेश्वरमुद्दिश्य तत्रानीयन्त। यस्मिन् महाप्रस्तर
ईश्वरस्य मञ्जूषा निरधायि स महाशोकाख्यः प्रस्तरोऽद्यापि वैतशेम-
शीययिहोशूयस्य क्षेत्रे विद्यते।
१९ अनन्तरं वैतशेमशीयलोकाः परमेश्वरस्य मञ्जूषायां दृष्टिं पातया-
मासुः, तत्कारणात् स तान् आजघानार्थतस्तेषां सप्तत्यधिकपञ्चसहस्राणि
लोकान् विनाशयाञ्चकार परमेश्वर एतेन महाप्रहारेण तान् आजघान
२० ततो हेतो र्लोका विललपुः। अपरं वैतशेमशीयलोका अवदन् एतस्य
पवित्रस्य प्रभोः परमेश्वरस्य साक्षात् के संस्थातुं शक्नुवन्ति सोऽस्मत्तः
कस्य समीपं यास्यति?
२१ अनन्तरं लोकाः किरियतयियारीमनिवासिनां समीपं दूतान् प्रहित्य
जगदुः, पिलेष्टीयाः परमेश्वरस्य मञ्जूषां पुनरानयन् यूयम् एत्य तां स्वेषां
समीपं नयत।

---

७ सप्तमोऽध्यायः।

१ अवीनादवस्य गेहे मञ्जूषानिधानं ३ मिस्पाम् इस्रायेल्लोकानाम् अनुतपनं ८ पिलेष्टीयानां युद्धं कर्त्तुं सज्जीभवनं ९ शिमूयेलस्य बलिदानं प्रार्थनञ्च तदानीं महा-झञ्झावातैः पिलेष्टीयानां पराजितत्वं १३ पिलेष्टीयानां वशीभूतत्वं १५ शिमूयेलस्य विचारणकथनञ्च।

१ अनन्तरं किरियतयियारीमीयलोका आगत्य परमेश्वरस्य मञ्जूषां
गृह्णन्तः पर्व्वतस्थितम् अवीनादवस्य निवेशनम् आनयन्, अपरं
परमेश्वरस्य तां मञ्जूषां रक्षितुं तस्य पुत्रम् इलियासरं पवित्रं चक्रुः।
२ परमेश्वरस्य सा मञ्जूषा किरियतयियारीमे दीर्घकालम् अर्थाद् विंशति

वत्सरान् यावत् तस्थौ। अनन्तरम् इस्रायेलीयाः सर्व्वे विलपन्तः परमेश्वरम् अनुगन्तुम् आरेभिरे।

ततः शिमूयेल इस्रायेलः सकलवंशान् अवदत्, यदि यूयं स्वीय- ३
सर्व्वान्तःकरणैः समं परमेश्वरं प्रति परावर्त्तितुम् इच्छथ तर्हि स्वेषां मध्याद् इतरदेवान् अस्तारोत्देवीश्च दवयत परमेश्वरे च मनांसि निवेश्य केवलं तमेव सेवध्वं तेन स पिलेष्टीयानां करेभ्यो युष्मान् उद्धा-
रयिष्यति। तत इस्रायेलः सर्व्वे वंशाः वाल्देवान् अस्तारोतदेवीश्च ४
दवयित्वा केवलं परमेश्वरं सेवितुम् आरेभिरे। तदानीं शिमूयेलो ५
व्याहरत् मिस्पाम् इस्रायेलः सकललोकान् संगृह्णीत युष्माकं कृतेऽहं
परमेश्वरम् उद्दिश्य प्रार्थयिष्ये। ततस्ते सर्व्वे मिस्पां मिलित्वा तोयानि ६
तोलयित्वा परमेश्वरस्य साक्षाद् भूमौ न्यक्षिपन् अपरं तस्मिन् दिने उपवसन्तस्तत्र स्थाने जगदुः, परमेश्वरस्य विरुद्धं पातकमस्माभिरकारि। अनन्तरं शिमूयेलो मिस्पाम् इस्रायेल्वंशस्य विचारं चकार।

अनन्तरम् इस्रायेल्वंशा मिस्पां मिलिता इति वार्त्तायां पिलेष्टीयैः ७
श्रुतायां तेषाम् अध्यक्षा इस्रायेलवंशस्य विरुद्धम् आगच्छन् इस्रायेल्-
वंशास्तत् श्रुत्वा पिलेष्टीयेभ्यो बिभ्युः। अपरम् इस्रायेल्वंशाः शिमूयेलम् ८
अवदन् अस्माकं प्रभुः परमेश्वरः पिलेष्टीयानां करेभ्यो यदस्मान् उद्धारयेत् तदर्थं तस्य समीपे प्रार्थयितुं त्वं मा विरम।

तदानीं शिमूयेलो दुग्धपोष्यं मेषवत्सं गृहीत्वा परमेश्वरमुद्दिश्य ९
कृत्स्नहोमबलिरूपेणोत्ससर्ज, अपरं शिमूयेल इस्रायेल्वंशस्य कृते परमेश्वरस्य सन्निधौ प्रार्थयाञ्चक्रे ततः परमेश्वरस्तस्मै प्रत्युत्तरं ददौ।
यस्मिन् काले शिमूयेलो होमबलिम् उदसृजत् तस्मिन् काले पिलेष्टीया १०
इस्रायेल्वंशेन समं योद्धुं तस्य समीपम् आगमन्, किन्तु तस्मिन् दिने परमेश्वरो मेघनादेनातीव गर्जन् पिलेष्टीयान् व्याकुलान् चकार,
तेन त इस्रायेल्वंशेन पराजिता बभूवुः। तदानीम् इस्रायेल्- ११
वंशो मिस्पा वहिर्भूय पिलेष्टीयानां पश्चाद् धावन्तो बैतकरस्याधःस्थानं यावत् तान् आजघ्नुः। ततः शिमूयेलः पाषाणमेकं गृहीत्वा मिस्पी- १२
शेनोर्मध्यस्थाने स्थापयामास, परमेश्वरोऽस्मान् एतत् स्थानं यावद् उपकृतवान् इत्युक्त्वा तस्य पाषाणस्य नाम एवनेषरम् उपकारसूचकपाषाण इति चकार।

इत्थं पराजिताः पिलेष्टीया इस्रायेल्वंशस्य देशं पुन र्नागमन् अपरं १३

१४ परमेश्वरः शिमूयेलस्य यावज्जीवनं पिलेष्टीयान् अक्लिश्नात्। अपरं
यानि नगराणि पिलेष्टीयैरिस्रायेल्वंशाद् अपहृतानि तानि पुनरिस्रा-
येलीयैरधिचक्रिरे, इक्रोणं गातं तयोः सीमाश्च यावत् सर्व्वदेशः पुन-
रिस्रायेल्वंशेन पिलेष्टीयेभ्य उद्धारयाञ्चक्रे, अपरम् इमोरीयैः समम्
इस्रायेल्वंशस्य सन्धि र्बभूव।
१५ स शिमूयेलो यावज्जीवनम् इस्रायेल्वंशम् अशिषत्। स प्रतिवत्सरं
१६ बैथेलं गिल्गलं मिस्पीञ्च पर्य्यटन् तेषु स्थानेष्विस्रायेल्वंशम् अशिषत्।
१७ अपरं यत्र स्थाने तस्य निवेशनमासीत् तद् रामतनगरं प्रत्यागत्य तत्र
स्थानेऽपीस्रायेल्वंशम् अशिषत् स च तत्र स्थाने परमेश्वरमुद्दिश्य वेदि-
मेकां निर्म्मितवान्।

८ अष्टमोऽध्यायः।

१ शिमूयेलस्य पुत्रयोरन्यायकारणात् लोकानां राजनीच्छा ६ तेषां याच्ञायां शिमूयेलस्यातुष्टिः १० भाविराजानां वर्णनं १९ राजानं नियोजयितुं शिमूयेलं प्रतीश्वरस्याज्ञा।

१ अनन्तरं वार्द्धक्यं प्राप्तः शिमूयेलः स्वपुत्राविस्रायेल्वंशस्योपरि विचा-
२ रयितृपदे न्ययुङ्क्त। तस्य ज्येष्ठपुत्रस्य नाम योयेल इति द्वितीयपुत्रस्य च
३ नामाबिय इत्यासीत्; तौ बेर्शेवायां विचारयितारौ बभूवतुः। किन्तु
तस्य पुत्रौ पितुर्मार्गेण न चलन्तौ लोभानुगामिनौ बभूवतुस्तावुत्कोचं
४ गृहीत्वा विचारेऽन्यायं कृतवन्तौ। अत इस्रायेल्वंशस्य प्राचीना मिलित्वा
५ रामते शिमूयेलस्य समीपमागत्य तमवदन् पश्य त्वं वृद्धो जातस्तव
पुत्रौ च तव मार्गेण न चलतोऽतस्त्वं भिन्नदेशीयानिवास्मान् शासितुं
राजानमेकं नियोजय।
६ अस्मान् शासितुं राजानमेकं नियोजयेति तैरुक्तेन वचसा शिमूयेलो
७ विरेजे, ततः शिमूयेलः परमेश्वरम् उद्दिश्य प्रार्थयाञ्चक्रे। तदानीं
परमेश्वरः शिमूयेलम् अवोचत् एते लोकास्तव समीपे यद्यद् व्याहृ-
रन्ति तेषां तत् सर्व्ववाक्यं त्वं गृहाण यतस्तैस्त्वं न परित्यक्तः किन्त्वहं
८ यत् तेषां राजा न भवेयं तदर्थमहमेव तैः परित्यक्तः। मिसर्देशात्
मया तेषाम् आनयनदिनमारभ्याद्य यावत् ते स्वेषां सर्व्वकर्म्मभि र्यथा
९ मां त्यजन्त इतरदेवान् सेवन्ते तथा त्वां प्रत्यपि व्यवहरन्ति। अधुना

त्वं तेषां वचनानि गृहाण किन्तु तान् सुदृढरूपं प्रबोध्य तेषां शासन-
कारिणो भाविभूपते रीतिं तान् ज्ञापय।
अनन्तरं राजप्रार्थकानां समीपे परमेश्वरीयाणि वचांस्येतानि शिमू- १०
येलेनोक्तानि। स व्याजहार युष्माकमुपरि राजत्वकारिणो राज्ञ एता- ११
दृशी रीति र्भविष्यति स युष्माकं पुत्रान् गृहीत्वा स्वरथाश्वारोहिगणेषु
निधास्यति तेषां कांश्चन स्वरथस्याग्रे धाविनः करिष्यति। स तान् सहस्र- १२
पतीन् पञ्चशतपतींश्च करिष्यति, तांश्च स्वीयभूमिं कर्षयिष्यति स्वीयश-
स्यानि छेदयिष्यति युद्धास्त्राणि रथसज्जाश्च निर्म्मापयिष्यति। अपरं स १३
युष्माकं कन्या गृहीत्वा स्वस्य सूपकाराः सूदा आपूपिकाश्च करिष्यति।
अपरं युष्माकम् उत्तमानि शस्यक्षेत्राणि द्राक्षाक्षेत्राणि जितवृक्षांश्च १४
गृहीत्वा स्वभृत्येभ्यो दास्यति। अपरं युष्माकं शस्यानां द्राक्षाणाञ्च दश- १५
मांशं गृहीत्वा राजसभासद्भ्यो दास्यति। अपरं स युष्माकं दासान् १६
दासीरुत्तमतरुणान् गर्द्दभांश्च गृहीत्वा तै र्निजकार्य्यं कारयिष्यते। स १७
युष्माकं मेषाणां दशमांशं ग्रहीष्यति यूयञ्च तस्य दासा भविष्यथ।
तदानीं यूयं स्वैरभिरुचितस्य राज्ञः कारणाद् विलपिष्यथ किन्तु परमे- १८
श्वरस्तदानीं युष्माकं वचो न श्रोष्यति।
तथापि लोकाः शिमूयेलस्य वाक्यम् अगृहीत्वा जगदुः, नहि नहि, १९
राजैकोऽस्माभि र्नियुज्यतां, तेन वयं भिन्नजातीयैः समा भूत्वा स्वराजेन २०
शासिष्यामहे स चास्माकमग्रसरः सन् युद्धं गमिष्यति। तदानीं शिमूयेलो २१
लोकानां सर्व्ववाचं निशम्य परमेश्वरस्य कर्णगोचरे निवेदयामास। ततः २२
परमेश्वरः शिमूयेलं बभाषे त्वं तेषां वाक्यं गृहाण तेषां राजानमेकं नियुंक्ष्व
च। अनन्तरं शिमूयेल इस्रायेल्वंशं जगाद यूयं स्वस्वनगरं गच्छत।

---

९ नवमोऽध्यायः।

१ शौलेन पितुर्गर्द्दभीनां गवेषणं ११ शिमूयेलस्य समीपगमनं १५ शिमूयेलेन समं शौलस्य भोजनं २५ तं विसृष्टुं तेन सह वहिर्गमनं।

तदानीम् अफीहस्य वृद्धप्रपौत्रो विखोरतस्य प्रपौत्रः सिरोरस्य १
पौत्रोऽवीयेलस्य पुत्रः कीशनामा बिन्यामीनवंशीयः कश्चित् महावीर्य्य-
वान् लोक आसीत्। अपरं शौलनामा तस्य परमसुन्दरस्तरुणः पुत्र २
आसीत्, इस्रायेल्वंशेषु तस्मात् सुन्दरः कोपि पुरुषो नासीत्, स

३ शिरसा सकललोकेभ्यो दीर्घ आसीत्। अनन्तरं तस्य शौलस्य पितुः
कीशस्य गर्द्दभीषु हारितासु स निजपुत्त्रं शौलं जगाद त्वं दासानाम्
४ एकं सङ्गिनं कृत्वा गर्द्दभीर्गवेषयितुं याहि। ततः स इफ्रयिमपर्व्वतेन
भ्रमित्वा शालिशाप्रदेशं पर्य्याटत् किन्तु तासाम् उद्देशं न प्राप, अनन्तरं
तौ शालिमप्रदेशं पर्य्यटितवन्तौ तत्रापि न प्रापतुरनन्तरं स विन्यामी-
५ नदेशं जगाम किन्तु तत्रापि न प्राप। अनन्तरं तयोः सूफप्रदेशं प्राप्तयोः
शौलः स्वसङ्गिनं दासं जगाद, आगच्छावां परावर्त्तावहै नो चेत् मम
६ तातो गर्द्दभीनां चिन्ताया विरम्यावयोः कृते चिन्तयिष्यति। ततः स
कथितवान्, पश्य नगरेऽस्मिन् ईश्वरस्य मनुष्य आस्ते सोतीव मान्यस्तेन
यद्यद् उच्यते तत् सर्व्वं सिद्ध्यति तस्माद् आवाम् अधुना तत्स्थानं याव,
७ भवेत्तु स गन्तव्यं मार्गम् आवां दर्शयिष्यति। शौलो दासमवदत् पश्य
गमने कृत आवां तस्मै नराय किं दास्यावः? आवयोः पात्रस्थभक्ष्यस्य
शेषो जातः। ईश्वरस्य लोकाय दातुम् आवयोः पारितोषिकं नास्ति,
८ आवयोः किमास्ते? ततः स दासः शौलं प्रत्यवदत्, पश्यात्र मम हस्ते
शेकलस्य चतुर्थांशं रजतं विद्यते पन्थानं दर्शयितुम् ईश्वरीयलोकाय
९ तदेव दास्यामि। ततः शौलो व्याजहार, सम्यगुक्तवान् आवां याव। तत-
१० स्तावीश्वरीयलोकस्य निवासनगरस्य दिशं जग्मतुः। पूर्व्वकाल इस्रा-
येलो मध्ये य ईश्वरस्य समीपे प्रष्टुम् अगच्छन् ते वयं प्रदर्शकस्य समीपं
यामेति वचोऽवादि यतः पूर्व्वकाले भविष्यद्वादिन उपाधिः प्रदर्शक
इत्यासीत्।
११ यदा तावूर्द्धगामिमार्गेण नगरं गच्छतस्तदा तोयमुत्तोलयितुं वहि-
र्गामिनीः कतिपययुवती दृष्ट्वा पृष्टवन्तौ स्थानेऽत्र प्रदर्शकः किं विद्यते?
१२ ता अवदन् विद्यते पश्य स तवाग्रे विद्यते, शीघ्रं गच्छ सोऽद्य
१३ नगरमागमत् यत उच्चस्थाने लोकानाम् अद्य यज्ञो भविष्यति। युवाभ्यां
नगरं प्रविश्यैव भोजनार्थं उच्चस्थाने तस्य गमनात् प्राक् स म्रग-
यितव्यो यतस्तस्मिन् नागते लोका भोजनं न करिष्यन्ति, यतस्तेन
यज्ञद्रव्येषु आशिष्युक्तायां सत्यां निमन्त्रिता भुञ्जते तस्माद् एतस्मिन्नेव
१४ क्षणे उत्थाय यातं यतोऽधुनैव स युवाभ्यां द्रष्टुं शक्यते। तदानीं तयो
र्नगरं गत्वा नगरस्य मध्यं प्राप्तयोः शिमूयेल उच्चस्थानं गन्तुं स्वनिवेशनात्
निर्गच्छन्नेव तौ साक्षाच्चकार।
१५ तस्य शौलस्योपस्थितेः पूर्व्वदिवसे परमेश्वरः शिमूयेलस्य कर्णगोचरे

कथितवान्, श्व एतस्मिन् समये मनुष्य एको बिन्यामीनप्रदेशात् तव १६
समीपं मया प्रेषयिष्यते मम लोकस्येस्रायेल्वंशस्य राज्ये स त्वयाभिषि-
च्यतां, स एव पिलेष्टीयानां करेभ्यो मम लोकान् उद्धारयिष्यति यतो मम
लोकानां विलापस्य मम कर्णगोचरीभूतत्वात् तान् प्रति मया कृपादृष्टिः
कृता। अनन्तरं शिमूयेलेन शौले दृष्टे परमेश्वरस्तमवदत्, अहं यमधि १७
त्वां समभाषे सोऽयमेव नरः, एष पुमान् मम लोकान् शासिष्यति।
तदानीं शौलो द्वारमध्ये शिमूयेलं प्राप्य पृष्टवान् विनयेऽहं प्रदर्शकस्य १८
भवनं कुत्र मां वद? ततः शिमूयेलः शौलं प्रत्यवदत्, अहमेव प्रदर्शको १९
ममाग्रेऽग्र उच्चस्थानमागच्छ युवामद्य मया सह भोक्ष्यथः श्वः प्रत्यूषेऽहं
त्वां विस्रक्ष्यामि अपरं तव मनसः समस्तं वाक्यं त्वां ज्ञापयिष्यामि। अद्य २०
दिनत्रयं जातं तव या गर्दभ्यो हारितास्तासां कृते मनसि मा चिन्तय
ताः पुनर्लब्धा याताः। इस्रायेल्वंशस्य परमेच्छा कं प्रति? किं त्वां तव
सकलपितृवंशं प्रति नहि? ततः शौलः प्रत्यवदत्, अहं किं बिन्या- २१
मीनवंशीयो नहि? इस्रायेल्वंशस्य मध्ये बिन्यामीनवंशः किं सर्व्वेभ्यः
क्षुद्रो नहि? अपरं बिन्यामीनवंशस्य मध्ये मम गोत्रं किं सर्व्वेभ्यः
क्षुद्रं नहि? तर्हि भवान् मां कुत इत्थं वचो वदति। अनन्तरं शिमू- २२
येलः शौलं तस्य दासञ्च गृहीत्वा भोजनशालाम् आनिनाय, अपरं प्रायेण
त्रिंशत् जनानां निमन्त्रितानां मध्ये तावुत्तमस्थान उपावेशयत्। अपरं २३
शिमूयेलः पाचकं जगाद इदं गोपयेति यत् मांसखण्डमधि तुभ्यं गदित-
वान् तदानय। ततः पाचकेन स्कन्धे तस्योपरि यदासीत् तस्मिंश्चानीते २४
शौलस्य सम्मुखे स्थापिते च शिमूयेलो बभाषे पश्य त्वं गुप्तमिदं खण्डं
स्वसम्मुखे निधाय भुंक्ष्व, यतो मया यस्मिन् काले लोका निमन्त्रितास्तमा-
रभ्य त्वत्कृते रक्षितमिदमास्ते, ततस्तस्मिन् दिवसे शौलः शिमूयेलेन
सार्द्धं भोजनं चकार।

अनन्तरं तेषूच्चस्थानात् नगरम् अवरूढेषु शिमूयेलो गृहपृष्ठे शौलेन २५
सार्द्धं संललाप। अनन्तरं ते प्रत्यूष उत्थितवन्तो यतोऽरुणोदयसमये २६
शिमूयेलो गृहपृष्ठे स्थितं शौलम् आहूय जगाद, उत्तिष्ठ त्वं मया विस-
ष्टव्यः। ततः शौल उत्थिते स शिमूयेलश्च वहिर्जग्मतुः। अनन्तरं पथे- २७
नावरोहतोस्तयो र्नगरस्य प्रान्तभागं प्राप्तयोः शिमूयेलः शौलं बभाषे
तव दासम् आवयोरग्रेऽग्रे यातुं वद, किन्तु त्वं कियत्कालं तिष्ठ त्वाम-
हम् ईश्वरस्य वाक्यं श्रावयामि। ततो दासो अग्रेऽग्रे चलितः।

१० दशमोऽध्यायः।

१ शौलस्याभिषिक्तत्वं गृहगमनसमये घटनाप्रकाशनं ९ शौलस्यान्यप्रकारमनुष्यभवनं १४ मातुलस्य समीपे शिमूयेलस्य कथाप्रकाशनं १७ शौलस्य राजत्वमनोनीतत्वं २६ तं प्रति लोकानां प्रेमाप्रेमे।

१ अनन्तरं शिमूयेलस्तैलाधारशृङ्गमादाय तस्य शिरसि तैलं निषिषेच,
अपरं तं चुम्बित्वा बभाषे परमेश्वरः स्वाधिकारोपरि त्वां राजत्वपदे
२ ऽभिषिक्तवानिति किं सत्यं नहि? त्वमद्य यदा मम समीपाद् गमि-
ष्यसि तदा विन्यामीनप्रदेशस्य सीमास्थिते सेल्सहे राहेलस्य श्मशान-
समीपे द्वौ जनौ प्राप्स्यसि तौ त्वां वदिष्यतः त्वं या गर्द्दभीरन्वेष्टुं गत-
वान् ताः सर्व्वाः प्राप्ताः, अपरं पश्य तव तातो गर्द्दभीविषयिकां चिन्तां
विहाय पुत्त्रस्य कृते किं करिष्यामीति वदन् युवयोः कृते शोचति।
३ अनन्तरं त्वयि तस्मात् स्थानादग्रसरो भूत्वा ताबोरस्थम् एलोन-
वृक्षं प्राप्ते तत्र स्थाने छागवत्सत्रयवाहको जन एकः पूपत्रयवाहको जन
एको द्राक्षारसीयकुतूवाहक एको जनश्च वैथेल ईश्वरस्य समीपगन्तार
४ एते त्रयो जनास्त्वां साक्षात् करिष्यन्ति। ते तव मङ्गलं प्रक्ष्यन्ति तुभ्यं
५ द्वौ पूपौ दास्यन्ति च त्वञ्च तेषां करेभ्यस्तौ ग्रहीष्यसि। अनन्तरं यत्र
पिलेष्टीयानां सैन्यदलानि सन्ति तम् ईश्वरपर्व्वतं प्राप्य त्वं तत्र स्थाने
नगरं प्रविशन् उच्चस्थानाद् अवरोहन्तं मुरजमृदङ्गवंशीवीणावाद्येन
सहितं भविष्यद्वादिनां गणं साक्षात् करिष्यसि ते भविष्यद्वाक्यं
६ वदिष्यन्ति। तदानीं परमेश्वरस्यात्मा त्वयि अधिस्थास्यति त्वञ्च तैः
सह भविष्यद्वाक्यं वदिष्यसि, अन्यप्रकारो मनुजो भविष्यसि च।
७ एतेषु सकललक्षणेषु त्वयि घटितेषु त्वं निजोपस्थितप्रयोजनात् करि-
८ ष्यसि यतः परमेश्वरस्त्वया सार्द्धं विद्यते। अनन्तरं त्वं ममाग्रेऽग्रे गिल्-
गलं यास्यसि, पश्चाहं होमबलीन् मङ्गलार्थकबलींश्चोत्स्रष्टुं तव समीपं
यास्यामि, यावदहं तव समीपं न प्राप्नोमि तावत् सप्तदिनानि विलम्बं
करिष्यसि, अपरम् अहं तव कर्त्तव्यं त्वां ज्ञापयिष्यामि।
९ अनन्तरं तेन शिमूयेलस्य समीपाद् यातुं ग्रीवायां परावर्त्तितायाम्
ईश्वरस्तस्य मानसान्तरं चकार, अपरं तस्मिन् दिने तानि सर्व्वाणि
१० लक्षणानि तस्य प्रत्यक्षीबभूवुः। तयोस्तत्र पर्व्वतम् उपस्थितयो भवि-
ष्यद्वादिनां गणस्तेन सार्द्धं मिलितस्तत ईश्वरस्यात्मनि तस्मिन् अधि-
११ ष्ठिते तेषां मध्ये सोऽपि भविष्यद्वाक्यानि वक्तुमारेभे। तदानीं स

भविष्यद्वादिनां मध्ये भविष्यद्वाक्यानि वदतीति वीक्ष्य तस्य पूर्व्वपरि-
चितलोकाः परस्परं जगदुः, कीशसुतस्य किं जातं? शौलोऽपि किं
भविष्यद्वादिनाम् एको जातः? ततस्तत्रत्यो जन एकः प्रतिजगाद १२
तेषां जनकः कः? इत्थं भविष्यद्वादिनां मध्ये शौलोपि किमेको जन इति
वचनं लोकानां मध्ये प्रमाणवाक्यं बभूव। अनन्तरं स भविष्यद्वाक्यकथ- १३
नाद् विरम्य भृगुस्थानं जगाम।

अनन्तरं शौलस्य मातुलस्तं तस्य दासञ्च पप्रच्छ युवां क्क गतवन्तौ? १४
सोऽवदत् गर्द्दभी गवेषयितुं किन्तु गर्द्दभ्यः कुत्रापि स्थाने न विद्यन्त
इति वीक्ष्यावां शिमूयेलस्य समीपं गतवन्तौ। शौलस्य मातुलो बभाषे १५
विनयेऽहं शिमूयेलो युवां किं गदितवान्? तत् मां वद। ततः शौलो १६
मातुलं जगाद सर्व्वा गर्द्दभ्यः प्राप्ता इति स आवां स्पष्टमवदत्। किन्तु
राजत्वमधि शिमूयेलेन यद् उक्तं तत् स तस्मै न कथयामास।

अनन्तरं शिमूयेलो लोकान् मिस्पायां परमेश्वरस्य समीपम् आहूये- १७
स्रायेल्वंशान् जगाद, इस्रायेलः प्रभुः परमेश्वरो वदति मयेस्रायेल- १८
वंशो मिसरदेशाद् बहिष्कृत्यानायि, तथा युष्मदुपद्रवकारिणां मिस्री-
याणां तदन्येषां नृपाणाञ्च करेभ्यो मयैव यूयम् उद्धारयाञ्चकृढ्वे। किन्तु १९
समस्तदुर्दशाभ्यो दुर्गतिभ्यश्च युष्मदुद्धर्त्ता यो युष्माकम् ईश्वरो यूय-
मद्य तम् अगृहीत्वा वदथ अस्माकमुपरि राजानमेकं नियोजय, अतो
यूयम् इदानीं स्वस्ववंशानुसारेण सहस्रसंघानुसारेण च परमेश्वरस्य
समीपम् उत्तिष्ठत। अनन्तरम् इस्रायेलः सकलवंशेषु शिमूयेलेन समीप- २०
मानीतेषु विन्यामीनवंशो निरचीयत। अपरं विन्यामीनवंशस्य परि- २१
वारेषु समीपमानीतेषु मट्रिपरिवारो निरचीयत। अपरं तन्मध्ये
कीशस्य सुतः शौलो निरचीयत, किन्तु गवेषणे कृते तस्योद्देशो
नाप्रापि। तस्मात् ते परमेश्वरस्य समीपे पुनः पप्रच्छुः स किम् एतत्- २२
स्थानम् आगतोऽस्ति? ततः परमेश्वरः कथयामास पश्य स भाराणां
मध्ये लुक्कायित आस्ते। अनन्तरं ते धावित्वा तस्मात् तमानयामासुः। २३
लोकानां मध्ये ऽवतिष्ठन् सो ऽन्यलोकेभ्यो मस्तकेन दीर्घ आसीत्।
अनन्तरं शिमूयेलो लोकान् जगाद परमेश्वरेणाभिरुचितं पुरुषमेनं २४
वीक्षध्वं लोकानां मध्ये तस्य तुल्यः कोपि न विद्यते, ततो लोका उच्चैः-
स्वरं बभाषिरे, राजा चिरजीवी भवतु। अनन्तरं शिमूयेलो लोकान् २५
राजनीतिं ज्ञापयामास, अपरं तां ग्रन्थे लिखित्वा परमेश्वरस्य साक्षात्

निदधे। अनन्तरं शिमूयेलः सर्व्वान् लोकान् स्वं स्वं निवेशनं यातुं विससर्ज।

२६ शौलोऽपि गिबियानगरे स्वनिवेशनं प्रतिजगाम, तथेश्वरो येषां सैन्यानाम् अन्तःकरणेषु प्रवृत्तिं दत्तवान् तानि च तेन साद्धं

२७ जग्मुः। किन्तु पुरुषेणानेन वयं किम् उपकारिष्यामहे इति वाचम् उक्ता केचिद् दुष्टलोकास्तं तुच्छीकृत्योपायनं न ददुः ततः स वधिर इव स्थितवान्।

११ एकादशोऽध्यायः।

१ नाहशस्यानियमकथनं ४ शौलस्येस्रायेल्वंशस्य च समीपे दूतप्रेषणं तेन रक्षणं ११ शौलस्याऽभिषिक्तत्वं।

१ अनन्तरम् अम्मोनीयनाहश आगत्य याबेशगिलियदस्य सम्मुखे शिविरं स्थापयामास ततो याबेशीयलोका नाहशं बभाषिरे त्वमस्माभिः

२ साद्धं नियमं कुरु, वयं त्वां सेविष्यामहे। अम्मोनीयो नाहशस्तान् प्रतिजगाद, अहं युष्माकं सर्व्वेषां दक्षिणनेत्रमुत्पाटयिष्यामीत्यम् इस्रायेलः सकलवंशस्य कलङ्कं स्थापयिष्यामि युष्माभिः समम् एनं नियमं करि-

३ ष्यामि। ततो याबेशस्य प्राचीना अवदन् त्वं सप्तदिनान्यस्मान् प्रति क्षमस्व वयम् इस्रायेल्वंशस्य सकलप्रदेशं दूतान् प्रेषयामः, ततः कोपि यद्यस्मान् न रक्षति तर्हि वयं तव समीपं बहिरागमिष्यामः।

४ अनन्तरं दूताः शौलस्य वासस्थानं गिबियाम् उपस्थाय लोकानां कर्णगोचरे तां वार्त्तां कथयामासुस्ततः सर्व्वे लोका उच्चैःस्वरं क्रन्दितु-

५ मारेभिरे। अपरं शौलः क्षेत्राद् वृषभाणां पश्चाद् आगत्य पप्रच्छ लोकानां किमभूत्? ते कुतो रुदन्ति? ततो लोका याबेशीयदूतानां

६ वार्त्तां तस्मै कथयामासुः। तद्वार्त्ताश्रवणसमय ईश्वरस्यात्मनि शौल-

७ मधिष्ठिते तस्य क्रोधोऽतिशयं प्रजज्वाल। अपरं स वृषभद्वयं गृहीत्वा खण्डखण्डीकृत्य दूतैरिस्रायेल्देशस्य सर्व्वत्र प्रहृत्य जगाद यः कश्चित् शौलस्य शिमूयेलस्य च पश्चात् नागमिष्यति तस्य वृषभान् प्रतीत्थं कारिष्यते। ततः परमेश्वरात् लोकानां भये जाते ते सर्व्वे एको नर इव

८ बहिर्बभूवुः। अनन्तरं वेषके तेषु गणितेष्विस्रायेल्वंशस्य त्रीणि लक्षाणि

९ यिहूदावंशस्य च त्रिंशत् सहस्राणि लोका आसन्। अनन्तरं त आगतान् दूतान् जगदुः, यूयं श्वः प्रखररौद्रसमय उपकारं प्राप्स्यथेति

वाक्यं यूयं गत्वा याबेशगिलियदीयलोकान् वदत, ततो दूता आगत्य
याबेशीयलोकान् तां वार्त्तां जगदुः ततस्त आनन्दिता बभूवुः। अनन्तरं १०
याबेशीयलोका अवदन् श्वो वयं युष्माकं समीपं बहिर्भूय गमिष्यामस्ततो
यूयं यद्यद् क्षेमं मंस्यध्वे तद् अस्मान् प्रति कुरुत। परदिवसे शौलः ११
स्वलोकान् त्रिसंघीकृत्य प्राक्प्रयामे शत्रुसैन्यमध्यं प्रविश्य प्रचण्डरौद्र-
पर्य्यन्तम् अम्मोनीयान् पराजिग्ये ततस्तेषाम् अवशिष्टलोकानां विकी-
र्णत्वाद् द्वौ जनावेकस्थाने न तस्थतुः।

अनन्तरं लोकाः शिमूयेलं जगदुः शौलः किमस्माकं राजा भवेदिति १२
वाचं क उक्तवान्? तान् मनुष्यान् आनय, वयं तान् हनिष्यामः।
ततः शौलोऽवदत्, अद्य कोऽपि न हन्तव्यो यतोऽद्य परमेश्वर इस्रायेल्- १३
वंशं रक्षितवान्। अनन्तरं शिमूयेलो लोकान् अवदत्, आगच्छत १४
वयं गिल्गलं गत्वा तत्र राज्यं पुनः स्थिरीकरवाम। अनन्तरं सर्व्वे १५
लोका गिल्गलं गत्वा तत्र परमेश्वरस्य साक्षात् शौलं राज्येऽभिषिषि-
चुरपरं तस्मिन् स्थाने परमेश्वरम् उद्दिश्य मङ्गलार्थकान् बलीन् उत्-
ससृजुश्च, ततः शौल इस्रायेलः सर्व्वे मनुष्याश्च तत्र महानन्दं चक्रिरे।

---

१२ द्वादशोऽध्यायः।

१ शिमूयेलस्य निर्द्दोषत्वं ६ लोकानाम् अकृतज्ञत्वप्रकाशः १६ शस्यच्छेदनस्य समये मेघगर्ज्जनेन तेषां भीतत्वं २० शिमूयेलस्य तेभ्यः सान्त्वनोपदेशदानं।

अनन्तरं शिमूयेल इस्रायेलः सकलवंशान् जगाद, पश्यत यूयं मां १
यद्यद् अवोचत युष्माकं तानि वाक्यानि गृहीत्वाहं युष्माकमुपरि रा-
जानमेकं नियुक्तवान्। पश्यतायं राजा युष्माकम् अग्रसरश्चरति, अहञ्च २
वृद्धः पक्वकेशश्च जातः, पश्यत मम पुत्रौ युष्माभिः समं स्तः, बाल्यका-
लमारभ्याद्य यावद् अहं युष्माकं समक्षं चरामि। अतोऽधुना यूयं ३
परमेश्वरस्य तेनाभिषिक्तस्य च साक्षात् मामधि साक्ष्यं दत्त कस्य गौ
र्गर्द्दभो वा मयापहृतः? को वा मया क्लिष्टो वा हिंसितः? अथवा स्वनेत्रे
अन्धी कर्त्तुं कस्य हस्तात् मयोत्कोचो गृहीतः? तदहं परावर्त्य युष्मभ्यं
दास्यामि। ते अवदन् भवान् अस्मान् न क्लिष्टवान् न वा हिंसितवान् ४
कस्यापि हस्तात् किमपि न गृहीतवान्। अनन्तरं स तेभ्योऽकथयत् ५

युष्माकं किमपि द्रव्यं मम करे युष्माभि र्न प्राप्तं, परमेश्वरस्तेनाभिषिक्त-
श्चाद्य तस्य साक्षिणौ विद्येते। ते प्रत्यवदन् साक्षिणौ विद्येते।
६ अनन्तरं शिमूयेलो लोकान् अवदत्, परमेश्वरो मूससं हारोणञ्च
न्ययुङ्क्त स च युष्माकं पूर्व्वपुरुषान् मिसरदेशाद् वहिष्कृत्यानिनाय।
७ अतो यूयम् इदानीम् अवतिष्ठत, युष्मान् युष्माकञ्च पितॄन् प्रति
परमेश्वरेण कृतानि समस्तधर्म्मकर्म्माणि परमेश्वरस्य साक्षात् मया
८ सह युष्माभि र्विचार्य्यन्तां। याकूबि मिसरदेशमागते यदा युष्माकं
पूर्व्वपुरुषाः परमेश्वरस्य साक्षात् प्रार्थनां चक्रिरे तदा स मूसोहा-
रोणौ प्रहितवान् तौ च मिसरदेशाद् युष्माकं पूर्व्वपुरुषान् वहिरा-
९ नीय स्थानेऽस्मिन् वासयामासतुः। अनन्तरं तैः स्वीयप्रभौ परमे-
श्वरे विस्मृते स हात्सोरीयसेनापतेः सीषिरसः पिलेष्टीयानां मोया-
वीयभूपतेश्च करेषु तान् समर्पितवान् ततस्ते तैः सार्द्धं युद्धं चक्रिरे।
१० अनन्तरं वयं परमेश्वरं परित्यज्य वाल्देवान् अस्तारोत्देवींश्चासे-
वामहीति कर्म्मणा पापम् अकुर्म्म, किन्तु त्वमधुना शत्रुहस्ताद् अस्मान्
उद्धारय ततो वयं त्वां सेविष्यामहे इति वदन्तो यदा ते परमेश्वरम्
११ उद्दिश्य प्रार्थयन्त, तदा परमेश्वरो यिरुव्वालं वारकं यिप्तहं शिमूयेलञ्च
प्रहित्य युष्माकं चतुर्दिक्स्थानां रिपूणां करेभ्यो युष्मान् उद्धार ततो
१२ यूयं निर्विघ्नम् अवसत। अनन्तरम् अम्मोनवंशीयो राजा नाहशो
युष्माकं प्रतिकूलम् आगच्छतीति दृष्ट्वा युष्मत्प्रभुपरमेश्वरे युष्माकं राजनि
सत्यपि यूयं माम् अवदत न तथा किन्तु राजैकोऽस्मान् शास्तु।
१३ अतो युष्माभिरभिरुचितं याचितञ्च राजानम् एनं पश्यत, परमेश्वरो
१४ युष्माकमुपरि राजानं नियुक्तवान्। यदि यूयं परमेश्वराद् बिभीथ
तर्हि तमेव सेवध्वं तस्याज्ञाः समाचरत परमेश्वरस्य निदेशं न लङ्घध्वं
१५ यूयं युष्मच्छास्ता राजा च प्रभुं परमेश्वरम् अनुगच्छत च। किन्तु यदि
परमेश्वरस्याज्ञा न समाचरथ परमेश्वरस्य निदेशं लङ्घध्वे च, तर्हि
परमेश्वरो युष्मत्पूर्व्वपुरुषाणामिव युष्माकमपि प्रतिकूलो भविष्यति।
१६ इदानीमेव यूयम् अवतिष्ठमाना युष्मत्समक्षं परमेश्वरेण कारिष्यमाणं
१७ महाकर्म्म पश्यत। अद्य किं गोधूमशस्यकर्त्तनस्य समयो नहि? परमे-
श्वरम् उद्दिश्य मया प्रार्थनायां कृतायां तेन मेघगर्जनवर्षणे प्रेषयिष्येते,
ततो यूयं राजप्रार्थनया परमेश्वरस्य साक्षाद् अतीवापराधिनो जाता
१८ इति यूयं दृष्ट्वा भोत्स्यध्वे। अनन्तरं शिमूयेलेन परमेश्वरम् उद्दिश्य

प्रार्थनायां कृतायां परमेश्वरस्तस्मिन्नेव दिवसे मेघगर्जनं वर्षाञ्च प्रेष-
यामास, ततः सर्व्वे लोकाः परमेश्वरात् शिमूयेलाच्च भृशं बिभ्युः। अपरं १९
सर्व्वे लोकाः शिमूयेलं बभाषिरे वयं यन्न म्रियामहे तदर्थं त्वं स्वदासानां
कृते स्वप्रभोः परमेश्वरस्य समीपे प्रार्थयस्व, यतो वयं राजप्रार्थनया
पापोपरि पापं वर्द्धितवन्तः।

अनन्तरं शिमूयेलो लोकान् अवदत्, यूयं मा बिभीत। यद्यपि सर्व्वमे- २०
तत् दुष्टत्वम् आचरत तथापि परमेश्वरस्य पश्चाद्गमनात् न निवृत्य
स्वेषां सर्व्वान्तःकरणैः समं परमेश्वरं सेवध्वं। यूयम् असारान् सुरान् २१
अनुगन्तुं विपथगामिनो मा भवत ते कमप्युपकर्त्तुम् उद्धारयितुं वा न
शक्नुवन्ति यतस्त असारा एव। परमेश्वरः स्वीयमहानाम्नोऽनुरोधात् २२
स्वलोकान् न परित्यक्ष्यति, युष्माकं स्वलोककरणं परमेश्वराय रोचते।
अहं परमेश्वरस्य विरुद्धं पापं कुर्व्वन् यद् युष्माकं कृते प्रार्थनातो विर- २३
मामि, नैतादृग् भवतु, अहं युष्मान् उत्तमम् ऋजुं मार्गं दर्शयिष्यामि।
यूयं केवलं परमेश्वराद् बिभीत स्वेषां सर्व्वान्तःकरणैः समं सत्यरूपेण २४
तं सेवध्वं, अपरं स युष्माकं कृते यद्यत् महाकर्म्म कृतवान् तद् आलो-
चध्वं। नोचेद् यदि यूयं दुष्टा भवथ, तर्हि यूयं युष्माकं राजा च २५
विनाशं गमिष्यथ।

---

१३ त्रयोदशोऽध्यायः।

१ सहस्रत्रयलोकानां शौलेन वरणं ५ युद्धं कर्त्तुं पिलेष्टीयानां मेलनं ८ शिमूयेलेऽनुप-
स्थितेऽपि शौलस्य होमकरणं ११ शौलं प्रति शिमूयेलस्य तिरस्करणं १७ पिलेष्टी-
यानां संघातत्रयकथनं १९ इस्रायेलो मध्ये कर्म्मकारस्याभावः।

शौलो वत्सरमेकं राजत्वमकरोत्, अनन्तरं वत्सरद्वयम् इस्रायेल्- १
वंशस्योपरि राजत्वं कृत्वा शौल इस्रायेल्वंशस्य त्रीणि सहस्राणि सैन्यानि २
वव्रे, तेषां द्वे सहस्रे मिक्मसे वैथेलपर्व्वते च शौलेन सह तस्थतुः, अपरं
सहस्रमेकं बिन्यामीनप्रदेशस्थगिबियायां योनाथनेन सार्द्धं तस्थौ; अपरं
अन्यलोकान् स्वस्ववासस्थानं प्रति व्यसृजत्। अनन्तरं योनाथनो गेबास्थितं ३
पिलेष्टीयानां सैन्यदलं जितवान् ततः पिलेष्टीयैस्तद्वार्त्तायां श्रुतायां
शौलो देशस्य सर्व्वत्र तूरीवाद्येन घोषयामास इब्रीयलोकैः श्रूयतां।
ततः पिलेष्टीयानां दलस्य शौलेन जितत्वाद् इस्रायेल्वंशः पिलेष्टीयानां ४
घृणास्पदं बभूवेति वार्त्तां सर्व्व इस्रायेल्लोकाः शुश्रुवुः। अनन्तरं लोकाः
शौलस्य पश्चाद् गिल्गले मिलिता बभूवुः।

५ अनन्तरं पिलेष्टीया इस्रायेल्वंशेन समं योद्धुं त्रिंशत् सहस्राणि
रथान् षट् सहस्राणि हयारोहिणः सागरतटस्थसिकतावद् बहुसं-
ख्यकानि सैन्यानि च संगृहीतवन्तः, त आगत्य वैथावनस्य पूर्व्वदिशि
६ मिक्मसे शिविरं स्थापयामासुः। तदा क्लेशकारणाद् इस्रायेल्वंशाः
स्वान् विपन्नान् विलोक्य गुहासु स्तम्बेषु पर्व्वतेषु भगुस्थानेषु गर्त्तेषु च
७ स्वान् गोपयाञ्चक्रिरे। इब्रीयाणां केचिद् यर्दनस्य पारं गत्वा गाददेशं
गिलियददेशञ्च जग्मुः। शौलो गिल्गले ऽवातिष्ठत्, किन्तु तस्य पश्चा-
द्गामिनः सर्व्वे मनुष्याश्चकम्पिरे।

८ अनन्तरं शिमूयेलेन यः समयो निरूपितस्तदनुसारेण शौलेन सप्त
दिनानि विलम्बे कृते शिमूयेलो गिल्गलं नागमत् लोकाश्च तस्य समीपाद्
९ विकीर्णा अगमन्। ततः शौलोऽत्रस्थाने मम समीपं होमबलिं मङ्गलार्थ-
१० कबलींश्चानयतेत्युक्त्वा होमबलिम् उत्ससर्ज। होमबलिदानस्य समाप्तिमात्रे
शिमूयेल उपतस्थौ, ततः शौलस्तं नमस्कर्त्तुं साक्षात् कर्त्तुञ्च वहिर्जगाम।
११ अनन्तरं शिमूयेलो बभाषे त्वया किं कृतं? शौलो निवेदयामास,
लोका मम समीपाद् विकीर्णा गच्छन्ति निरूपिते समये भवानपि नाग-
१२ मत् पिलेष्टीयाश्च मिक्मसे मिलन्तीति वीक्ष्य मया कथितम्, अप्राप्त-
परमेश्वरप्रसादस्य ममान्तिकं पिलेष्टीया गिल्गलम् आगमिष्यन्तीति
१३ भयादहं साहसं कृत्वा होमबलिम् उत्सृष्टवान्। ततः शिमूयेलः शौलं
व्याहरत् अज्ञानेनेव त्वया कर्म्म कृतं, तव प्रभुणा परमेश्वरेणादि-
ष्टाज्ञा च त्वया लंघिता, त्वं यदि तन्नाकरिष्यस्तर्हि परमेश्वरोऽधुना
१४ इस्रायेल्वंशस्योपरि तव राजत्वं नित्यस्थाय्यकरिष्यत्। इदानीं तव राजत्वं
स्थिरं न स्थास्यति, परमेश्वरः स्वमनोभिलषितं जनमेकं निरीक्ष्य स्वलो-
१५ कानां राजत्वे नियोक्ष्यते, यतः परमेश्वरस्याज्ञा त्वया लंघिता। अनन्तरं
शिमूयेल उत्थाय गिल्गलाद् विन्यामीनीयगिवियां प्रतस्थे, ततः शौलस्य
समीपे विद्यमाना लोकास्तेन गणितास्ते संख्यया प्रायेण षट्शतान्यासन्।
१६ शौलस्तस्य पुत्रो योनाथनस्तयोः समीपे विद्यमाना लोकाश्च विन्यामी-
नीयगेवायां तस्थुः, पिलेष्टीयाश्च मिक्मसे शिविरं स्थापयित्वा तस्थुः।
१७ अनन्तरं पिलेष्टीयानां शिविराद् विनाशकसैन्यं सङ्घत्रयं निरगमत्
१८ तस्यैकः संघोऽफ्रामार्गेण शियालदेशं जगाम। द्वितीयः संघो वैथोरोणस्य
पन्थानं प्रति परावृते तृतीयश्च संघः प्रान्तरस्थसिवोयिमोपत्यकाभि-
मुखस्य जनपदस्य पथा जगाम।

तस्मिन् समय इस्रायेलः सकलदेशे कर्म्मकारा नासन् यतः पिलेष्टीया १९
अवदन् इब्रीयलोकैः स्वेषां कृते खड्गाः शल्यानि च न निर्म्मीयन्तां। अत २०
इस्रायेलीयाः सर्व्वे स्वस्वफालं छूरिकां कुठारं कुद्दालं वा शाणयितुं
पिलेष्टीयानां समीपम् अगच्छन्। अर्थतः फालस्य वा छुरिकाया वा २१
त्रिशूलस्य वा कुठारस्य तीक्ष्णत्वे तथाङ्कुशस्याग्रभागे नष्टे तेऽगच्छन्।
एतत्कारणाद् युद्धकाले शौलयोनाथनयोः सङ्गिलोकानां करेषु खड्गाः २२
शल्यानि वा नासन्, केवलं शौलस्य तत्पुत्त्रस्य च कर आसन्। अनन्तरं २३
पिलेष्टीयानाम् एकं सैन्यदलं मिक्मसस्य घट्टं वहिर्भूयागच्छत्।

---

१४ चतुर्दशोऽध्यायः।

१ पिलेष्टीयानां सैन्यदलं प्रति योनाथनस्याक्रमणं ४ तद्दलस्य पराजयः १९ परास्तलोकानां पश्चाद् गन्तुं लोकानां मेलनं २४ शौलस्य शपथो योनाथनेन च तस्य लङ्घनं ३२ शोणितेन समं मांसभोजनेन लोकानाँ दोषकथनं ३६ लोकै र्योनाथनस्य रक्षणं ४६ शौलस्य नानाकर्म्म ४९ शौलस्य वंशावलिश्च।

एकस्मिन् दिवसे शौलस्य सुतो योनाथनः स्वीयास्त्रवाहकं युवानम् १
अवदद् आगच्छावां पारं गत्वा पिलेष्टीयानां सैन्यदलस्य समीपं याव
किन्तु स एतत्कथां स्वपितरं न ज्ञापितवान्। तदा शौलो गिबियायाः २
प्रान्तभागे मिग्रोणस्थदाडिम्बवृक्षस्य मूल आसीत्, अपरं तेन सह
प्रायेण षट्शतानि लोका आसन्। पुरा य एलिः शीलौ परमेश्वरस्य ३
याजक आसीत् तस्य पौत्त्रस्य पीनिहससुतस्येखावोदस्य भ्रातुरहीटूवस्य
पुत्त्रोऽहियस्तदानीम् एफोदवस्त्रधारक आसीत्, अपरं योनाथनो
वहिर्भूय गत इति लोका नावगच्छन्।

अपरं योनाथनो येन घट्टेन पिलेष्टीयानां सैन्यदलं प्राप्तुम् अचे- ४
ष्टत तस्य घट्टस्यैकपार्श्वे एकं शैलशृङ्गम् अन्यपार्श्वे चान्यत् शैलशृङ्गम्
आसीत् तयोरेकस्य नाम वोत्सेषम् अन्यस्य च नाम सेनिरासीत्।
तयोरेकं शृङ्गं मिक्मसाभिमुखम् उत्तरस्यां दिशि, अन्यच्च गिबिया- ५
भिमुखं दक्षिणस्यां दिश्यासीत्। अनन्तरं योनाथनः स्वीयास्त्रवाहकं ६
युवानम् अवदत्, आगच्छावां पारं गत्वैतेषाम् अच्छिन्नत्वचां सैन्यदलं
याव ततो भवितुं शक्नोति परमेश्वर आवाम् उपकरिष्यति यतो
बहुभिरल्पै र्वा उद्धारयितुं परमेश्वरस्य कापि वाधा नास्ति। तत- ७
स्तस्यास्त्रवाहकस्तमवदत् तव सर्व्वमनोगतं कुरु, अग्रसरो भव पश्य तव

८ मनोवाञ्छानुसारेणाहं त्वया सार्द्धम् आसे। ततो योनाथनोऽवदत्
पश्यावां पारं गत्वा लोकानामेतेषां समीपं गच्छन्तौ निजौ प्रकाश-
९ याव। ततस्ते यद्यावां वाचमिमां वदन्ति, यावद् वयं युवयोः समीपं
नागच्छामस्तावद् विलम्बं कुरुतं, तदावां स्वस्थाने स्थास्यावस्तेषां समीपं
१० न यास्यावः। किन्त्वस्माकं समीपम् ऊर्द्धम् आगच्छतमिति यदि वदन्ति
तर्ह्यावाम् ऊर्द्धं यास्यावो यतः परमेश्वर आवयो र्हस्ते तान् समर्पयिष्य-
११ त्येतद् आवयोश्चिह्नं भविष्यति। अपरं तौ पिलेष्टीयानां सैन्यदलसमीपे
स्वौ प्राकाशयतां ततः पिलेष्टीया अवदन् पश्यतेब्रीयलोका येषु गर्त्तेषु
१२ लुक्कायिता आसन् तेभ्यो वहिर्भवन्ति। अनन्तरं सैन्यदलस्य लोका
योनाथनं तस्यास्त्रवाहिनञ्च जगदुः, युवाम् अस्माकं समीप ऊर्द्धम्
आगच्छतं वयं युवां किञ्चित् शिक्षयिष्यामः। ततो योनाथनः स्वीयास्त्र-
वाहिनं बभाषे त्वं मम पश्चाद् आगच्छ, परमेश्वर एतान् इस्रायेलो
१३ हस्तगतान् करिष्यति। अनन्तरं योनाथनः करपादैरूर्द्धं जगाम
तदीयास्त्रवाही च तस्य पश्चाद् वव्राज, ततः केचित् मनुजा
१४ योनाथनेन पातितास्तदनुगामिनास्त्रवाहिना हताश्च। योनाथनेन
तदीयास्त्रवाहिना च प्रथमं वृषभद्वयकर्षणयोग्यायां भूमौ प्रायेण
१५ विंशति जना अहन्यन्त। ततः शिविरे क्षेत्रे च कृत्स्नसैन्यदलस्य कम्पो
जातो नाशकलोका अपि चकम्पिरे, तथा भूमिश्च चकम्पे, इत्थम्
१६ ईश्वरकृतो महाकम्पो जज्ञे। अपरं रिपुगणो विभीय विकीर्णत्वं याति
तस्य व्याकुलता वर्द्धते चेति विन्यामीनीयगिवियास्थिताः शौलस्य
१७ रक्षिणो ददृशुः। तदानीं शौलः स्वीयसंगिनो मनुजान् अवदत्,
अस्माकं मध्यात् को गतस्तत् ज्ञातुं गणना क्रियतां। अनन्तरं तै र्गणनायां
१८ कृतायां योनाथनस्तस्यास्त्रवाही च न विद्येते इति ददृशे। तस्मिन्
समय ईश्वरस्य मञ्जूषेस्रायेल्वंशस्य मध्य आसीत् तस्मात् शौलो ऽहियं
जगाद ईश्वरस्य मञ्जूषामत्रानय।
१९ अनन्तरं शौलो यदा याजकं समभाषत तदा पिलेष्टीयानां शिविर-
मध्य उत्तरोत्तरं कोलाहलो ऽवर्द्धत, ततः शौलो याजकम् अवदत् त्वं
२० कर्म्मणो विरम। अनन्तरं शौलस्तस्य सङ्गिलोकाश्च मिलित्वा योद्धुं जग्मुः।
किन्तु रिपूणां शिविरे लोकानां परस्परं खड्गाघातेन महाकोला-
२१ हलो बभूव। ये सर्व्वे इब्रीयलोकाश्चतुर्दिक्स्थस्थानेभ्यः पिलेष्टीयैः सार्द्धं
तेषां शिविरमध्यम् आगमन् ते तदा पूर्व्ववत् पिलेष्टीयानां मध्ये

तिष्ठन्तोऽपि शौलयोनाथनयोः सङ्गिनाम् इस्रायेलीयानां पक्षिणो
बभूवुः। अपरं य इस्रायेलीयमनुजा इफ्रयिमपर्व्वते लुक्कायिता आसन् २२
तेऽपि पिलेष्टीयानां पलायनप्रवृत्तिं निशम्य योद्धुं तेषां पश्चाद् अधा-
वन्। तस्मिन् दिवसे परमेश्वरेणेस्रायेल्वंश उदधारि, युद्धञ्च वैथावनं २३
यावद् विस्तीर्णं बभूव।

तस्मिन् दिन इस्रायेल्लोका अतीवाक्लिश्यन्त, यतः शौलो मनुजान् २४
एतं शपथमकारयत्, वैरिभ्यः समुचिते फले मया न दत्ते यः कश्चित्
सायंकालात् पूर्व्वम् अन्नं भोक्ष्यते स शप्तो भविष्यति, तत्कारणात् सर्व्वे
मनुजाः किमपि भक्ष्यं नास्वादयामासुः। अनन्तरं सर्व्वे काननं प्राप्तवन्तः, २५
तत्र मृद उपरि बहूनि मधून्यासन्। तत्र स्थाने मधुनो बाहुल्ये सत्यपि २६
अरण्यं प्रविष्टानां लोकानां कोपि किमपि करेणादाय वक्त्रे न ददौ
यतस्ते तस्मात् शपथाद् भीता आसन्। किन्तु तस्य तातः शपथेन मनुजान् २७
यदाज्ञापयत् तस्याश्रवणाद् योनाथनः स्वकरस्य दण्डाग्रं विस्तार्य्य मधु-
कोषेऽमज्जयत् ततः करे वक्त्रम् आनीते तस्य नेत्रे प्रसन्ने बभूवतुः। तदानीं २८
लोकानाम् एकस्तं व्याजहार, तव तातः शपथेन लोकान् इत्या-
ज्ञापयत्, यो जनोऽद्य खाद्यं भोक्ष्यते स शप्तो भविष्यति, किन्तु लोकाः
सर्व्वे क्लान्ता अभूवन्। योनाथनोऽवदत् मम जनको लोकान् अदुःखयत् २९
पश्यताधुनैतस्य मधुन आस्वादनात् मम नेत्रे कीदृक् प्रसन्ने जाते।
यदि रिपुभ्यो लब्धै र्लोठितद्रव्यैरद्य लोकानां यथेष्टं भोजनम् अभ- ३०
विष्यत्, तर्ह्यधुना पिलेष्टीयानां निहननं किं गुरुतरं नाभविष्यत्?

तस्मिन् दिने ते मिक्मसमारभ्यायालोनं यावत् पिलेष्टीयान् ताडया- ३१
मासुस्ततो लोका अतीव क्लान्ता बभूवुः। अपरं लोका लोठितद्रव्यम् ३२
अभिपत्य मेषान् गा गोवत्सांश्च धृत्वा मृद उपरि हत्वा शोणितेन
समं मांसं भोक्तुमारेभिरे। ततः पश्य लोकाः सशोणितं मांसं भुञ्जमानाः ३३
परमेश्वरस्य विरुद्धं पातकं कुर्व्वन्तीति वार्त्तां निशम्य शौलोऽवदत् युष्मा-
भिराज्ञालङ्घनं क्रियते, यूयम् अधुना मम समीपं वृहन्तं पाषाणमेकम्
आनयत। शौलोऽपरमप्यवदत् यूयं लोकानां मध्यमित्वा तान् वदत ३४
युष्माभिरेकैकस्य गौ र्मेषो वा मम समीपम् आनीयतां स्थानेऽस्मिन् मार-
यित्वा भुज्यताञ्च सशोणितमांसभोजनेन परमेश्वरस्य विरुद्धं पापं मा
क्रियतां। ततस्तस्यां रजन्याम् एकैको जनः स्वां स्वां गां करेणानीय तत्र

३५ स्थाने जघ्नुः। अपरं शौलः परमेश्वराय यज्ञवेदीमेकां निर्म्ममे। सा
परमेश्वरमुद्दिश्य तेन निर्म्मिता प्रथमा यज्ञवेदिः।
३६ अनन्तरं शौलो जगाद, वयम् अस्यां रजन्यां पिलेष्टीयानां पश्चाद्
गत्वारुणोदयं यावत् तेषां द्रव्याणि लोठयाम, तेषाम् एकजनमपि
नावशेषयाम। ततस्ते ऽवदन् त्वया यत् क्षेमं बुध्यते तदेव क्रियतां।
३७ अनन्तरं याजकोऽवदद् वयमत्र स्थाने ईश्वरस्य समीपं याम। अनन्तरं
शौल ईश्वरं पृष्टवान्, मया किं पिलेष्टीयानां पश्चाद् गन्तव्यं? त्वं किं
तान् इस्रायेल्वंशस्य हस्ते समर्पयिष्यसि? किन्तु तस्मिन् काले स तस्मै
३८ नोत्तरं दत्तवान्। तदानीं शौलो व्याहरत् लोकानां मुख्याः सर्व्वे समीपम्
आगच्छन्तु पापमिदं केन जातं तद् युष्माभिः परीक्ष्य विविच्यतां।
३९ इस्रायेल उद्धर्त्तुः परमेश्वरस्य नाम्ना शपथं करोमि, स यदि मम
पुत्त्रो योनाथनः स्यात् तर्हि तेनापि मर्त्तव्यं। किन्तु लोकानां मध्ये कोपि
४० तस्मै नोत्तरं दत्तवान्। अनन्तरं स सर्व्वान् इस्रायेल्वंशान् जगाद, यूयम्
एकदिशि तिष्ठत, अहं मम सुतो योनाथनश्चान्यस्यां दिशि स्थास्यावः। ततो
४१ लोकाः शौलम् अवदन् त्वया यद् भद्रं बुध्यते तदेव क्रियतां। अनन्तरं
शौल इस्रायेलः प्रभुं परमेश्वरं बभाषे यथार्थं गुटिकापातं करोतु,
४२ ततः शौलयोनाथनौ निरचीयेतां लोकास्त्वाहीयन्त। अपरं शौलो
व्याहरत् मम मत्पुत्त्रस्य योनाथनस्य च विषये गुटिकापातं कुरुत, ततो
४३ योनाथनो निरचीयत। तदा शौलो योनाथनं जगाद त्वया किं कृतं तत्
मह्यं कथ्यतां। योनाथनोऽवदत्, अहं करस्थदण्डेन स्वल्पं मधु गृहीत्वा
४४ खादितवान् पश्य तेन मया मर्त्तव्यं। शौलोऽवदत्, ईश्वरो मह्यम् अमुकं
४५ दण्डं ततोधिकञ्च ददातु हे योनाथन त्वया मर्त्तव्यमेव। किन्तु लोकाः
शौलम् अवदन्, इस्रायेल्वंशस्य येन तादृक् महोद्धारः कृतः स यो-
नाथनः किं मरिष्यति? तन्न भवतु। परमेश्वरो यद्यमरो भवति, तर्हि
तस्य शिरस एकः केशोपि भुवि न पतिष्यति, यतोऽद्य स ईश्वरेण
समं कृतकार्य्यो ऽभवत्। इत्थं लोकै रक्षितो योनाथनो न ममार।
४६ अनन्तरं शौलः पिलेष्टीयानां पश्चाद्गमनात् निवृत्य जगाम, पिले-
४७ ष्टीया अपि स्वीयस्थानं जग्मुः। इस्रायेल्वंशस्य राज्यं लब्ध्वा शौलश्चतु-
र्दिक्षु सकलशत्रुभिर्यतो मोयाबीयैरम्मोनवंशीयैरिदोमीयैः सोबाया
नृपतिभिः पिलेष्टीयैश्च सह युयोध यं कञ्चनाचक्रमे तमेव पराजिग्ये।

इत्थं वीर्य्यं प्रकाश्य तथामालेकीयान् पराजित्य लोठकानां करेभ्य इस्रा- ४८
येल्वंशम् उद्दधार।

योनाथनो यिश्वि मल्किशूयश्चेति नामभिः शौलस्य त्रयः सुता ४९
आसन्, अपरं तस्य द्वे कन्ये ज्येष्ठाया नाम मेरवा कनिष्ठाया नाम
मीखलासीत्। अपरम् अहीनोयमी नामाहीमासस्य सुता तस्य भार्य्या- ५०
सीत्, अपरम् तस्य पितृव्यस्य नेरस्याब्नेरनामा पुत्त्रस्तस्य सेनाप-
तिरासीत्। शौलस्य जनकस्य नाम कीश इत्यासीद् अब्नेरस्य जन- ५१
कस्य नाम नेर इत्यासीत् तयो र्जनकस्य नामावीयेल आसीत्।
शौलस्य यावज्जीवनं पिलेष्टीयैः समं घोरतरे युद्धे सति शौलेन यः ५२
कश्चन बलवान् पुरुषो वीरो वादृश्यत स तेन स्वसमीपं समगृह्यत।

---

१५ पञ्चदशोऽध्यायः।

१ अमालेकीयान् प्रति शौलस्य प्रेषणं ६ केनीयान् प्रति तस्यानुग्रहो ऽमालेकीयान् प्रति निग्रहः १० शालेनेश्वराज्ञालङ्घनं २४ आज्ञालङ्घनात् शिमूयेलेन तस्य दण्डप्रकाशः ३२ अगागस्य हननं ३४ शिमूयेलस्य गृहगमनं।

अपरं शिमूयेलः शौलं जगाद परमेश्वरः स्वलोकानाम् अर्थत इस्रा- १
येल्वंशानां राजत्वपदे त्वाम् अभिषेक्तुं मां प्राहिणोत्, अत इदानीं त्वं
परमेश्वरस्य वाक्यानि गृहाण। सैन्याध्यक्षः परमेश्वर इति वदति २
मिसराद् इस्रायेलीयानां वहिरागमनकाले ऽमालेकीयास्तान् मार्ग
आक्रामन् इति कार्य्यं मया स्मर्य्यते। त्वं गत्वा तान् अमालेकीयान् आघा- ३
तय, तेषां सर्व्वस्वं निःशेषं विनाशय, तान् न दयस्व यूयं तेषां नारीपुरु-
षबालकस्तनपायिशिशून् गोमेषान् उष्ट्रगर्द्दभांश्च मारयत। अनन्तरं ४
शौलो लोकान् आहूय टिलायीमे गणयामास ततो द्वे लक्षे पदातय
आसन्, तेषां दशसहस्राणि यिहूदावंशीयलोकाः। अनन्तरं शौलो ५
ऽमालेकीयानां नगरमागत्य उपत्यकायां लुक्कायितस्तस्थौ।

शौलः केनीयान् अवदत्, यूयं स्थानान्तरं यात, अमालेकीयानां ६
मध्याद् गच्छत, नो चेत् तैः सह ययूमपि मया विनङ्क्ष्यथ, किन्तु
मिसराद् इस्रायेल्वंशस्यागमनकाले यूयं तं प्रति प्रेमाकुरुत। ततः
केनीया अमालेकीयानां मध्यात् प्रतस्थिरे। अनन्तरं शौलो हवीलाम् ७
आरभ्य मिसरदेशसम्मुखस्थस्य शूरस्य प्रान्तं यावद् अमालेकीयान्

८ जघान। स अमालेकीयानाम् अगागं राजानं जीवन्तं दधार अपरं
९ सकललोकान् खड्गधारेण निःशेषं जघान। किन्तु शौलो लोकाश्चागागं
उत्तमान् मेषगोपुष्टपशुमेषशावकान् उत्तमवस्तूनि च दयमाना निःशेषं
विनाशयितुम् अनिच्छुका अभवन् किन्तु तुच्छनीयम् अकर्म्मण्यञ्च सर्व्वं
द्रव्यं निःशेषं नाशयामासुः।
१० अनन्तरं परमेश्वरः शिमूयेलं व्याजहार शौलस्य राजकरणात् ममा-
११ नुतापो भवति यतः स मत्तः पराङ्मुखो बभूव मदाज्ञां न साधयामास।
ततः शिमूयेलः शोकान्वितः सन् कृत्स्नां रजनीं परमेश्वरम् उद्दिश्य
१२ प्रार्थयाञ्चक्रे। अपरं शिमूयेले शौलं साक्षात् कर्त्तुं प्रत्यूष उत्थिते पश्य
शौलः कर्म्मिलं प्राप्य जयस्तम्भं स्थापितवान् अनन्तरं तस्मात् प्रस्थाय
१३ गिल्गलं गतवान् इति वार्त्ता शिमूयेलेनाश्रावि। शिमूयेले शौलस्य
समीपम् आगते शौलस्तं जगाद भवान् परमेश्वरेण धन्यो भवतु परमे-
१४ श्वरस्याज्ञा मया साधिता। ततः शिमूयेलो जगाद तर्हि मेषादीनां यत्
क्रन्दनं मम कर्णकुहरम् आयाति यश्च गवां शब्दो मया श्रूयते स किं?
१५ शौलो ऽवदत्, मनुजा उत्तमान् गोमेषान् अनुकम्प्य तव प्रभुं परमेश्वरम्
उद्दिश्य बलिदानार्थम् अमालेकीयतस्तान् आनयन् अन्ये सर्व्वेऽस्माभि
१६ र्निःशेषं विनष्टाः। तदानीं शिमूयेलः शौलम् अवोचत्, अवतिष्ठ गत-
रजन्यां परमेश्वरो मां यद् अवदत् तदहं त्वां ज्ञापयामि। स उक्तवान्
१७ कथयतु। अनन्तरं शिमूयेलो बभाषे, यत्काले त्वं स्वदृष्ट्या क्षुद्र आसी-
स्तदा किं त्वम् इस्रायेल्वंशानां मूर्द्धा नाजायथाः? अपरं परमेश्वरेण
१८ किम् इस्रायेल्वंशस्य राज्ये नाभ्यषिच्यथाः? अपरं परमेश्वरस्त्वां युद्ध-
यात्रां कर्त्तुं प्रहित्यादिष्टवान्, याहि पापिष्ठान् अमालेकीयान् निःशेषं
१९ विनाश्य तेषां लोपं यावत् तैः सह रणं कुरु। अतस्त्वं परमेश्वरस्य
तम् आदेशं कुतो न समाचरः? कुतो लोठितद्रव्याण्यभिपतन् परमेश्व-
२० रस्य साक्षात् पापम् अकार्षीः? शौलः शिमूयेलं जगाद परमेश्वरस्य
वाक्यमहं समाचरितवान् अपरं यां यात्रां कर्त्तुं परमेश्वरो मां प्रहित-
वान् तां कृतवानहम्, अमालेकीयो नृपतिरगागश्च मयानीतोऽमालेकी-
२१ याश्च निःशेषं विनष्टाः। किन्तु मनुजा गिल्गले तव प्रभवे परमेश्वराय
बलिरूपेण निवेदितानि श्रेष्ठद्रव्याणि दातुं लोठ्यद्रव्यमध्याद् उत्तमान्
२२ गोमेषान् आनयन्। ततः शिमूयेलोऽवदत् परमेश्वरीयाज्ञाग्रहणेन
परमेश्वरो यथा तुष्यति, तथा स किं होमादिबलिदानैस्तुष्यति?

पश्चाज्ज्ञाग्रहणं यत्तद् बलिदानेभ्य उत्तमं।
वाक्ये मनोनिधानञ्च श्रेयो मेषस्य मेदसः।
पापं गणकतातुल्यं भवेद् आदेशलङ्घनं। २३
देवपूजकपाषण्डात्रिवावाध्योऽपि पातकी।

त्वं परमेश्वरस्य कथां दूरीकृतवान् अतः कारणात् स त्वां राजत्वाद् दूरीकृतवान्।

अनन्तरं शौलः शिमूयेलम् अवोचत्, अहं लोकेभ्यो भीत्वा तेषां २४
कथायां मनो निधाय परमेश्वरस्याज्ञां तव वाक्यञ्च लङ्घितवान् इति
कर्म्मणा मया पापं कृतं। अहमिदानीं विनये मम पातकं क्षमस्व परमे- २५
श्वरस्य भजनं कर्त्तुं मया समं परावृत्यागच्छ। ततः शिमूयेलः शौलम् २६
अवदत् अहं त्वया समं परावृत्य न यास्यामि यतस्त्वं परमेश्वरस्य वाक्यं
नाग्रहीः अतः कारणात् परमेश्वरस्त्वाम् इस्रायेल्वंशस्य राजत्वाद्
अग्राह्यम् अकरोत्। तदा शिमूयेले परावृत्य गन्तुम् उद्यते शौलस्तस्य २७
वस्त्रस्याञ्चलं धृत्वाकर्षत्, ततस्तत् चिच्छिदे। ततः शिमूयेलस्तं जगाद, २८
परमेश्वरोऽद्य त्वत्त इस्रायेल्वंशस्य राजत्वम् आच्छिनत् त्वत्त उत्तमाय
तव समीपवासिने दत्तवान्। इस्रायेलो विश्वासभूमिरीश्वरो मृषावाक्यं २९
न वक्ति नानुतपति च यतः सोऽनुतापी मनुष्यो न हि। ततः स जगाद ३०
अहं पापमकरवम् अधुना विनये मदीयलोकमुख्यानाम् इस्रायेल्वंशस्य
च समक्षं माम् आद्रियस्व तव प्रभोः परमेश्वरस्य भजनं कर्त्तुं मया सह
परावृत्यागच्छ। ततः शिमूयेलः शौलस्य पश्चात् जगाम, अपरं शौलः ३१
परमेश्वरम् अभजत।

अनन्तरं शिमूयेलो व्याजहार, यूयं स्थानेऽस्मिन् मम समीपम् अमाले- ३२
कीयानां राजानम् अगागं आनयत, तस्माद् अगागः स्वच्छन्दं तस्य
समीपम् आगमत् यतो मृत्युयातना निश्चयं गतेत्यगागेनाबुध्यत। अपरं ३३
तव खड्गेन योषितो यादृग् अपत्यहीना जातास्तादृग् योषितां मध्ये
तव प्रसूरपि सन्तानहीना भविष्यतीत्युक्त्वा शिमूयेलो गिल्गले परमे-
श्वरस्य साक्षाद् अगागं खण्डखण्डीचकार।

अनन्तरं शिमूयेलो रामतनगरं जगाम, शौलोऽपि शौलीयगिबियां ३४
स्वीयनिवेशनं जगाम। तदारभ्य शिमूयेलो मरणदिनं यावत् शौलं ३५
पुन र्न साक्षात् चकार, तथापि शिमूयेलः शौलम् अनुशुशोच, अपरम्
इस्रायेल्वंशोपरि शौलस्य राजत्वकरणात् परमेश्वरोऽनुतताप।

१६ षोडशोऽध्यायः।

१ यिशयस्य समीपं शिमूयेलस्य प्रेरणं ६ यिशयस्य सर्व्वान् पुत्त्रान् दृष्ट्वा तेन दायूदो ऽभिषिक्तत्वं १४ शौलस्य दुष्टात्मनो दमनार्थं ाकद्वारा दायूद आकानं १९ राज्ञः साचात् तस्योपस्थितिः।

१ अनन्तरं परमेश्वरः शिमूयेलं बभाषे इस्रायेलो राजत्वात् मया
च्यावितः शौलः कतिकालं त्वयानुशोचिष्यते? अधुना त्वं स्वीयशृङ्गं तैलेन
पूरयित्वा गच्छ त्वामहं बैतलेहमीययिशयस्य समीपं प्रेषयामि यतोऽहं
२ तस्य पुत्त्राणां मध्याद् एकं राजानं कर्त्तुं रोचितवान्। ततः शिमूयेलो
ऽवदत्, अहं केन प्रकारेण यास्यामि? वार्त्ताम् इमां श्रुत्वैव शौलो मां
हनिष्यति। परमेश्वरः कथयामास त्वं गोवत्सामेकां करेण गृहीत्वा
३ परमेश्वरमुद्दिश्य यज्ञं कर्त्तुम् आगतोऽहम् इति वाचं वद। अनन्तरं
यज्ञेन यिशयं निमन्त्रय ततः परं त्वया यत् कर्त्तव्यं तदहं त्वां ज्ञापयि-
४ ष्यामि, अहं यमधि त्वाम् आदेच्यामि स एव त्वयाभिषेक्तव्यः। अनन्तरं
शिमूयेलः परमेश्वरस्य वाक्यानुसारेण सर्व्वं कर्म्म कृतवान्। बैतलेहमे
तस्यागमनकाले नगरस्य प्राचीनाः कम्पमानास्तं साक्षात् कृत्वा पप्रच्छुः
५ भवत आगमनस्य कुशलं? सोऽवदत् कुशलम् अहं परमेश्वरमुद्दिश्य यज्ञं
कर्त्तुम् आगमं। यूयं स्वान् पवित्रीकृत्य मया समं यज्ञम् आगच्छतेति
कथयित्वा स यिशयं तस्य सुतांश्च पवित्रीकृत्य यज्ञेन निमन्त्रयामास।
६ अनन्तरं तेष्वागतेषु शिमूयेल इलीयावं निरीक्ष्य मनसा कथयामास,
७ परमेश्वरेणाभिषेक्तव्यस्तस्य गोचरोऽभवत्। किन्तु परमेश्वरः शिमू-
येलं बभाषे त्वम् अस्य रूपं दीर्घताञ्च मावलोकय, अहं तम् अग्राह्यं
कृतवान्, यतो मनुष्येण यद् दृश्यते तद् असारं, मनुष्येण वाह्यं रूपमेव
८ दृश्यते किन्तु परमेश्वरेणान्तःकरणञ्च दृश्यते। अनन्तरं यिशयोऽवीनादवम्
आहूय शिमूयेलस्य सम्मुखेन गमयाञ्चकार, ततः शिमूयेलो जगाद,
९ एष परमेश्वरेण नाभिरुचितः। अनन्तरं यिशयः शम्मं तस्य सम्मुखेन
गमयाञ्चकार ततः स बभाषे, एषोऽपि परमेश्वरेण नाभिरुचितः।
१० इत्थं यिशयः स्वस्य सप्तपुत्त्रान् शिमूयेलस्य सम्मुखेन गमयाञ्चकार ततः
शिमुयेलो यिशयं व्याहरत्, एतेषां कोऽपि परमेश्वरेण नाभिरुचितः।
११ शिमूयेलो यिशयं बभाषे, युवलोकानां किं शेषो जातः? स कथयामास
केवलं कनिष्ठोऽवशिष्ट आस्ते स मेषान् चारयति। ततः शिमूयेलो
यिशयम् अवदत्, त्वं दूतं प्रहित्य तमानय तस्मिन् अनागते वयं भोक्तुं

नोपवेक्ष्यामः। अनन्तरं स दूतेनानिन्ये स ईषद्रक्तवर्णः सुनयनः सुदृ- १२
श्यश्चासीत्; तदानीं परमेश्वरः कथयाञ्चकार, उत्तिष्ठ सोऽयम् एनम्
अभिषिञ्च। ततः शिमूयेलस्तैलाधारशृङ्गम् आदाय भ्रातॄणां मध्ये तम् १३
अभिसिषेच। अपरं तद्दिनमारभ्य परमेश्वरस्यात्मा दायूदम् अधितस्थौ।
अनन्तरं शिमूयेल उत्थाय रामतं जगाम।

किन्तु परमेश्वरस्यात्मा शौलं परितत्याज परमेश्वरस्यानुमत्या दुष्ट १४
आत्मा तम् उदवेजयत्। अनन्तरं शौलस्य दासास्तं जगदुः परमेश्वरस्या- १५
नुमत्या दुष्ट आत्मा त्वाम् उद्वेजयति, तस्मात् अस्मत्प्रभुरेकं निपुणं १६
वीणावादकं मृगयितुं भवतः समीपस्थदासान् आज्ञापयतु ततो यदे-
श्वरस्यानुमत्या दुष्टात्मा त्वाम् अधितिष्ठति तदा तेन कराभ्यां वादिते
भवान् उपशमं लप्स्यते। अनन्तरं शौलः स्वदासान् आज्ञापयत् यूयं १७
निपुणमेकं वीणावादकं गवेषयित्वा मम समीपमानयत। ततो दासा- १८
नाम् एकोऽवदत् पश्याहं बैतलेहमीययिशयस्य सुतमेकं दृष्टवान् स
वीणां वादयितुं निपुणो महावीरो योद्धा कार्य्ये तत्परो रूपवान्
परमेश्वरोऽपि तेन समं तिष्ठति।

अनन्तरं शौलो यिशयस्य समीपं दूतान् प्रहित्य बभाषे दायूद्नामा १९
तव यः सुतो मेषान् चारयति तं मम समीपं प्रहिणु। ततो यिशयो २०
निजपुत्त्रं दायूदं तेन सह गर्द्दभमेकं तेन वहनीयान् पूपान् द्राक्षारसकुतूं
छागवत्समेकञ्च शौलस्य समीपं प्रेषयामास। अनन्तरं दायूद् शौलस्य २१
समीपमागत्य तस्य परिचर्य्यां चकार शौलश्च तस्मिन् अतीवाप्रियत
तेन स तस्यास्त्रवाहको बभूव। अनन्तरं शौलो दूतेन यिशयं जगाद २२
त्वामहं विनये दायूदं मम सम्मुखे स्थातुम् अनुजानीहि, स मम प्रिय-
पात्रमभवत्। यत ईश्वरस्यानुमत्या दुष्टात्मना शौले क्लिष्टे दायूद् २३
कराभ्यां वीणां वादयति तेन शौल आप्यायितः सन् उपशाम्यति दुष्टात्मा
च तस्माद् अपसरति।

---

१७ सप्तदशोऽध्यायः।

१ पिलेष्टीयैः समम् इस्रायेल्लोकानां योद्धुं सज्जीभवनं ४ जालूताख्यवीरस्येस्रायेल्-सैन्यानां तुच्छीकरणं १२ सैन्यस्य मध्यं भ्रातॄणां समीपे दायूदो गमनं २० राज्ञः पारितोषिककथाश्रवणं २८ स्वज्येष्ठभ्रातुः कथाश्रवणं ३० राज्ञः समीप आनीतत्वं योद्धुं स्वीकरणञ्च ३२ राज्ञः साक्षात् कथाकथनं ४८ वीरेण समं युद्धा तस्य जयनं ५२ पिलेष्टीयलोकानां हननं ५५ शौलस्य समीपे पुनरानीतत्वं।

१ अनन्तरं पिलेष्टीया योद्धुं स्वेषां सैन्यानि सङ्गृह्य यिहूदाप्रदेशस्य-
सोखो मिलित्वा सोखसेकयोर्मध्य एफसदम्मीमे शिविरं स्थापयामासुः।
२ अपरं शौल इस्रायेल्लोकाश्च मिलित्वा पिलेष्टीयानाम् अग्रत एलाख्यो-
३ पत्यकायां शिविरं स्थापयामासुः। ततः पिलेष्टीया एकस्यां दिशि
गिराविस्रायेल्वंशीयाश्चान्यस्यां दिशि गिरौ तस्थुस्तेषां मध्ये चोपत्यकै-
वासीत्।
४ अनन्तरं पिलेष्टीयानां शिविराद् एको मध्यस्थो वहि र्बभूव, गातीयो
५ जालूत इति तस्य नाम, स सार्द्धषड्हस्तदीर्घ आसीत्। तस्य शिरसि
पित्तलमयं शिरस्त्रमासीत्, अपरं स पञ्चसहस्रशेकल्परिमितेन पित्त-
६ लवर्म्मणा सज्जित आसीत्। अपरं तस्य पादौ पित्तलपत्रैरावृतावास्तां
७ तस्य स्कन्धे पित्तलमयं क्षुद्रशल्यमासीत्। तस्य महाशूलस्य दण्डस्तन्तु-
वायस्य तन्तुदण्डतुल्य आसीत् तच्छूलस्याग्रं षट्शतशेकल्लौहस्यासीत्।
८ अपरं तस्याग्रेऽग्र एकः फलकपाणिश्चलितवान्। अनन्तरं सोऽवतिष्ठमान
इस्रायेल्वंशस्य सैन्यश्रेणीः सम्बोध्य प्रोच्चै र्जगाद यूयं योद्धुं सैन्यं रचयितुं
कुतो वहिरागच्छत? अहं किम् एकः पिलेष्टीयो नहि? अपरं यूयं किं
शौलस्य दासा न भवत? यूयं स्वेषां मध्यात् जनमेकं वृणुध्वं स ममा-
९ न्तिकम् आगच्छतु। स यदि मया सह युद्धा मां पराजित्य हन्ति तर्हि
वयं युष्माकं दासा भविष्यामः, किन्तु यद्यहं तं पराजित्य हन्मि तर्हि
१० यूयम् अस्माकं दासा भूत्वा अस्मान् परिचरिष्यथ। स पिलेष्टीयो
ऽपरमपि जगाद, अद्याहम् इस्रायेल्वंशान् स्पर्द्धये, यूयं नरमेकं दत्त
११ सोऽहञ्च परस्परं युद्धं कुर्व्वः। तदा शौलः सर्व्व इस्रायेल्वंशाश्च पिले-
ष्टीयस्य तानि वाक्यानि श्रुत्वा निराशा अतीव भीताश्च बभूवुः।
१२ वैतलेहमयिहूदानिवासी य इफ्राथीययिशयनामको दायूदस्तात
आसीत्, तस्याष्टौ सुता आसन् अपरं स शौलस्य समये लोकै
१३ र्वृद्धगणमध्येऽगण्यत। अपरं यिशयस्य ज्येष्ठपुत्त्रत्रयं शौलस्य पश्चाद्
योद्धुम् अगमत्, तस्य तत्संग्रामगामिनां त्रयाणां पुत्राणां ज्येष्ठस्य नामे-
लीयावो द्वितीयस्य नामावीनादवस्तृतीयस्य नाम च शम्म आसीत्
१४ अपरं दायूद् कनिष्ठ आसीत् ज्येष्ठास्त्रयो जनाः शौलस्यानुगामिनो
१५ बभूवुः। किन्तु दायूद् स्वतातस्य मेषान् चारयितुं शौलस्य समीपाद्
१६ वैतलेहमं गमनागमने कृतवान्। अपरं स पिलेष्टीयो नरश्चत्वारिंशद्
दिनानि यावत् प्रातःकाले सन्ध्याकाले च तेषां समीपे स्वं दर्शयामास।

तदानीं यिशयो निजपुत्रं दायूदं जगाद त्वम् अधुना निजभ्रातृगणार्थम् १७
इदम् एकैफाभ्रष्टशस्यं दशपूपांश्च गृहीत्वा युद्धस्थाने भ्रातॄणां समीपं
तूर्णं गच्छ। एतान् दश दधिभवपूपांश्च गृहीत्वा तेषां सहस्रपतये १८
देहि, अपरं तव भ्रातॄन् मङ्गलं पृष्ट्वा तेषां चिह्नमेकं गृहाण।

तदानीं शौलो यिशयस्य पुत्राः सर्व्व इस्रायेल्वंशाश्च एलाखोपत्य-
कायां तिष्ठन्तः पिलेष्टीयैः सह योद्धुम् उद्यता आसन्। अनन्तरं दायूद्
प्रत्यूष उत्थाय मेषगणम् अन्यरक्षकस्य करे समर्प्य यिशयस्याज्ञानु- १९
सारेण तद् भारं गृहीत्वा जगाम। अपरं यस्मिन् काले सैन्यानि
श्रेणीभूय वहि र्यान्ति संग्रामाय सिंहनादं कुर्व्वन्ति च तदानीं दायूद् २०
परिखायाः समीप उपतस्थौ। इस्रायेल्वंशः पिलेष्टीयाश्च परस्परं सम्मु- २१
खासम्मुखीभूय सैन्यश्रेण्यौ रचयाञ्चक्रुः। अनन्तरं दायूद् भाररक्षकस्य २२
करे निजभारं निधाय सैन्यश्रेण्या मध्यं धावन् निजभ्रातॄणां समीपम्
आगत्य तेषां मङ्गलं पप्रच्छ। अपरं तैः सार्द्धं तस्य संलपनसमये २३
पिलेष्टीयानां श्रेणीमध्यात् स गातीयजालूताख्यः पिलेष्टीयो नरो मध्यस्थ-
रूपेणागत्य पूर्व्ववद् वाचं वक्ति स्म ताश्च दायूद् शुश्राव। तं पुरुषं
वीक्ष्य इस्रायेल्वंशस्य सर्व्वे लोका अतीव भीत्वा तस्य सम्मुखात् २४
पलायाञ्चक्रिरे। अनन्तरम् इस्रायेल्वंशस्य मनुजाः परस्परम् ऊचिरे २५
योऽयं मनुज आयाति एनं किं यूयं पश्यथ? एष इस्रायेल्वंशं स्पर्द्ध-
यितुम् आगमत्। एनं यो जनो हनिष्यति राजा तं विपुलधनै र्धनवन्तं
करिष्यति निजदुहितरञ्च विवाहयिष्यति.तस्य पितृवंशमपीस्रायेल्वंश-
मध्ये निष्करं करिष्यति। अनन्तरं दायूद् स्वसमीपे तिष्ठतो मनुजान् २६
पप्रच्छ, अस्य पिलष्टीयस्य हननेन यो जन इस्रायेल्वंशम् अपमानात्
मोचयिष्यति तं प्रति किं कारिष्यते? कोऽयम् अच्छिन्नत्वक् पिलेष्टीय- २७
लोको यद् अमरेश्वरस्य सैन्यश्रेणी र्निन्देत्? ततो मनुजाः पूर्व्ववद्
ऊचुः, तस्य हन्त्रे तत् फलं दास्यते।

अपरं तै र्लोकैः समं तस्य संलपनं निशम्य तस्य ज्येष्ठो भ्रातेलीयावो २८
दायूदो विरुद्धं क्रोधेन प्रज्वल्य बभाषे, त्वं कुतोऽत्रागतोऽसि? तेऽल्पमेषाः
प्रान्तरमध्ये कस्य समीपे त्वया समर्पिताः? अहं तव प्रगल्भतां मनोदुष्ट-
ताञ्च जानामि त्वं युद्धं द्रष्टुमागतोऽसि। दायूद् अवदत्, मया किम् २९
अपराद्धं? एतत् किं वाङ्मात्रं नहि?

अनन्तरं स तस्माद् अन्यस्य कस्यचित् समीपं परावृत्य तथैव पप्रच्छ, ३०

३१ अतस्ते लोका अपि तस्मै पूर्व्ववद् उत्तरं ददुः। तदानीं दायूदा यद्यद् उक्तं
तस्य किंवदन्त्यां शौलेन श्रुतायां शौलस्तं स्वसमीपम् आगन्तुम् अनुजज्ञौ।
३२ अपरं दायूद् शौलम् अवदत्, तस्य कृते कस्यापि मानसं निराशं
३३ न भवतु। भवत एष दासो गत्वा तेन पिलेष्टीयेन समं योत्स्यति। ततः
शौलो दायूदम् अवदत्, त्वं तं पिलेष्टीयम् आक्रम्य तेन समं योद्धुं
३४ न शक्नोषि यतस्त्वं बालः स च बाल्यकालमारभ्य योद्धा। दायूद्
३५ शौलं बभाषे, भवत एष दासोऽहं मत्तातस्य मेषान् अचारयं, तन्मध्ये
सिंहभल्लूकावाजग्मतुस्तयोरेकेन व्रजमध्यात् मेषवत्से हृतेऽहं तस्य
पश्चाद् गत्वा तं मारयित्वा तस्य मुखात् तं वत्सम् उदधारयं, अनन्तरम्
अन्यस्मिन् मम विरुद्ध उत्थितेऽहं तस्य श्मश्रु धृत्वा तं ताडयन् व्यापा-
३६ दितवान्। इत्थं भवतो दासेन सिंहभल्लूकौ व्यापादितौ, अमरेश्वरस्य
सैन्यश्रेणीनां निन्दको योऽयम् अच्छिन्नत्वक् पिलेष्टीयः सोऽपि तयोरे-
३७ कस्य तुल्यो भविष्यति। दायूद् अपरमपि व्याजहार, सिंहभल्लूकयोः
करतो ममोद्धर्त्ता परमेश्वरोऽस्य पिलेष्टीयस्य करतोऽपि माम् उद्धारयि-
ष्यति। ततः शौलो दायूदम् अवदत् याहि परमेश्वरस्तव सङ्गी भवतु।
३८ अनन्तरं शौलो निजसज्जया दायूदं सज्जयन् तस्य शिरसि पित्तल-
३९ मयं शिरस्त्रं निदधे तस्य गात्रे वर्म्म च ददौ। अपरं दायूद् तत्सज्जो-
परि खड्गं बद्ध्वा गन्तुमुद्यतः, किन्तु दायूद् पूर्व्वं तस्याः परीक्षाया
अकरणात् शौलमवदत्, अनया सज्जया नाहं गन्तुं शक्नोमि यतो
४० मया तस्याः परीक्षा नाकारि तस्माद् दायूद् तां विमुमुचे। अपरं
स निजयष्टिं करेण जग्राह स्रोतसस्य पञ्च मार्ज्जितपाषाणान् वृत्वा
मेषपालकयोग्ये स्वीयपात्रे ऽर्थतः सम्पुटे निदधे, अपरम् अश्मक्षेपक-
४१ गुणं करेणादाय तस्य पिलेष्टीयस्याग्रं जगाम। ततः पिलेष्टीयोऽग्रं गच्छन्
दायूदः समीपवर्त्ती बभूव, तस्य फलकवाही च तस्याग्रेऽग्रे चलितवान्।
४२ अपरं पिलेष्टीयेन चतुर्दिशं निरीक्ष्य दायूदे सन्दृष्टे स तं तुच्छं बुबुधे
४३ यतः सोऽल्पवयस्क ईषद्रक्तवर्णः सुन्दरवदनश्चासीत्। अनन्तरं स पिले-
ष्टीयो दायूदं जगाद, किमहं कुक्कुरो यत् त्वं दण्डं गृहीत्वा मम
समीपम् आगच्छसि? अपरं स पिलेष्टीयः स्वदेवानां नामानि वदन्
४४ दायूदं शशाप। पिलेष्टीयो दायूदम् अपरमपि जगाद, त्वं मम समी-
पम् आगच्छाहं तव मांसं खगेभ्यः प्रान्तरस्य पशुभ्यश्च ददामि।
४५ ततो दायूद् तं पिलेष्टीयं जगाद, त्वं खड्गं शूलं शल्यञ्च गृहीत्वा मम

समीपम् आगच्छसि किन्त्वहं त्वया निन्दितस्य सैन्याधिपस्य प्रभोः पर-
मेश्वरस्यार्थत इस्रायेलः सैन्यश्रेणीनाम् ईश्वरस्य नाम्ना तव समीपम्
आगच्छामि। अद्य परमेश्वरस्त्वां मम हस्तगतं करिष्यति तेनाहं त्वामा- ४६
हत्य तव शिरश्छेदं करिष्यामि पिलेष्टीयानां सैन्यानां शवांश्चाद्य
खगेभ्यो वनपशुभ्यश्च दास्यामि, तेनेस्रायेलः सहाय एक ईश्वर आस्त
इति पृथिवीनिवासिनः सर्व्वे ज्ञास्यन्ति। अपरं परमेश्वरो न खड्गशूलै ४७
र्जेतीत्यपि समागता इमे लोका ज्ञास्यन्ति यतो युद्धं परमेश्वरस्यैव तेन
च यूयम् अस्माकं करेषु समर्पयिष्यध्वे। अनन्तरं तस्मिन् पिलेष्टीय ४८
उत्थाय दायूदा सह मेलितुं समुपस्थिते दायूद् शीघ्रं पिलेष्टीयेन समं
मेलितुं सैन्यश्रेण्याः सम्मुखेन दधाव। अनन्तरं दायूद् स्वसम्पुटके करं ४९
दत्त्वा पाषाणमेकं वहिष्कृत्याश्मक्षेपकगुणेन परिक्षिप्य तस्य पिलेष्टीयस्य
भाले तादृग् आजघान येन स पाषाणस्तस्य भालं प्रविवेश तेन स भूमा-
वधोमुखीभूय निपपात। इत्थं दायूद् गुणपाषाणाभ्यां तं पिलेष्टीयं ५०
जित्वाहत्य मारयामास किन्तु दायूदः करे खड्गो नासीत्। अनन्तरं ५१
दायूद् धावन् तस्य पिलेष्टीयस्य पार्श्वे तिष्ठन् तस्य खड्गं गृहीत्वा कोषाद्
वहिष्कृत्य तं हत्वा तस्य शिरश्चिच्छेद। अनन्तरं पिलेष्टीयाः स्वेषां
वीरस्य मरणं वीक्ष्य पलायाञ्चक्रिरे।

तत इस्रायेलो यिहूदायाश्च लोका उत्थाय जयनादं कृत्वा समभूमेः ५२
प्रान्तम् इक्रोणस्य गोपुराणि च यावद् पिलेष्टीयानां पश्चाद् दधावुस्ततः
पिलेष्टीयानां हतलोकाः शारयिमस्य वर्त्मनि गातस्येक्रोणस्य च समीपे नि-
पेतुः। अनन्तरम् इस्रायेल्वंशीयाः पिलेष्टीयानां पश्चाद् गमनात् परावृ- ५३
त्यागत्य तेषां शिविरं लोठयामासुः। अनन्तरं दायूद् तस्य पिलेष्टीयस्य ५४
शिरो गृहीत्वा यिरूशालमम् आनिनाय तस्य सज्जाश्च निजदूष्ये निदधे।

तस्य पिलेष्टीयस्य विरुद्धं दायूदो निर्गमनकाले शौलस्तं विलोक्य ५५
निजसेनापतिम् अब्नेरं पप्रच्छ, हे अब्नेर, एष युवा कस्य सुतः?
अब्नेरोऽवदत्, हे राजन् अहं तव जीवनस्य शपथं कृत्वा वदामि,
तदहं न जानामि। ततो राजा जगाद, अयं युवा कस्य सुत इति ५६
त्वं पृच्छ। अनन्तरं पिलेष्टीयस्य हननाद् दायूदः प्रत्यागमनकाले अब्- ५७
नेरः पिलेष्टीयस्य शिरः करेण वहन्तं दायूदं शौलस्य समीपम् आनि-
नाय। तदा शौलस्तं पृष्टवान्, हे युवन् त्वं कस्य सुतोऽसि? दायूद् ५८
प्रत्यवदद् अहं भवतो दासस्य बैतलेहमीययिशयस्य सुतोऽस्मि।

१८ अष्टादशोऽध्यायः।

१ दायूदं प्रति योनाथनस्य प्रीतिः ५ शौलस्येर्ष्या १० दायूदं हन्तुं चेष्टा १२ भीतत्वं १७ ज्येष्ठकन्यां दातुं स्वीकारः २० कनिष्ठकन्याञ्च दातुं स्वीकरणं २८ दायूदः कृतकार्य्यताकारणात् भीतिवृद्धिश्च।

१ अपरं शौलेन सह तस्य कथायां समाप्तायां योनाथनस्य प्राणानां
दायूदः प्राणैः सह मिलितत्वाद् योनाथनः स्वीयप्राणतुल्ये तस्मिन् प्रेम
२ कर्त्तुमारेभे। अपरं शौलस्तस्मिन् दिवसे तं गृहीत्वा तस्य तातस्य निवे-
३ शनं गन्तुं न ददौ। अपरं योनाथनो दायूदि स्वप्राणतुल्यं प्रेम कुर्व्वन्
४ तेन समं नियममेकं चकार। अपरं योनाथनो निजगात्रस्थं वसनं
सज्जां खड्गं धनुः कटिबन्धनञ्चापि स्वस्माद् विमोच्य दायूदे दत्तवान्।
५ अनन्तरं शौलो दायूदं यद्यत् कर्म्म कर्त्तुं प्रहितवान् दायूद् गत्वा
तदेव सफलं चकार, ततः शौलो योद्धृणाम् अधिपतित्वपदे तं न्ययुङ्क्त,
६ अपरं सर्व्वलोकाः शौलस्य भृत्याश्च तस्मिन् अतुष्यन्। अनन्तरं पिले-
ष्टीयं वीरं हत्वा दायूदः प्रत्यागमनकाले लोकेषूपतिष्ठमानेषु योषितो
मुरजध्वनिना हर्षनादेन त्रितन्त्रीवाद्येन च नृत्यं गानञ्च कुर्व्वत्यः शौल-
७ राजं प्रत्युद्यातुम् इस्रायेल्वंशस्य सकलनगरेभ्यो वहिर्भूयाजग्मुः। अपरं
वाद्यवादनकाले योषितः परस्परम् ऊचिरे,

शौलेनारिसहस्राणि हतानि समराङ्गने।
दायूदापि विपक्षाणामयुतानि हतानि च॥

८ तद्वाक्येनासन्तुष्टः शौलो भृशं क्रुद्धो जगाद ता दायूदम् अयुतानां मां
केवलं सहस्राणाम् जेतारमवदन्, एतेन राजत्वं विना तस्यापरं किम्
९ अलभ्यं? तं दिवसमारभ्य शौलो दायूदं प्रति कुदृष्टिं चकार।
१० परदिवस ईश्वरस्यानुमत्या दुष्ट आत्मनि शौलमाश्रिते स गेहमध्ये
प्रलापवाक्यानि वक्तुमारेभे, अपरं दायूद् प्रतिदिनं यथाकरोत् तथा
११ कराभ्यां वादयामास ; तदानीं शौलस्य करे शूलैकम् आसीत् शौल-
स्तच्छूलं लक्ष्ये निक्षिप्य जगाद, अहं दायूदं भित्त्या समं व्यत्स्यामि किन्तु
दायूद् वारद्वयं तस्य समीपाद् अपससार।
१२ अपरं परमेश्वरः शौलं विहाय दायूदा सार्द्धं तस्थौ तेन शौलो
१३ दायूदो विभयाञ्चकार। ततः शौलः स्वसमीपात् तं दूरयित्वा सहस्रसे-
नापतिपदे नियुक्तवान् ततः स लोकानाम् अग्रसरो भूत्वा गमनागमने
१४ चकार। अनन्तरं दायूद् स्वीयसकलयात्रासु कृतकार्य्यो बभूव परमे-

ग्वरस्य तेन समं तस्थौ। ततो दायूद् कृतकार्य्य एवेति दृष्ट्वा शौलस्तस्माद् १५
विभयाञ्चकार। किन्त्विस्रायेलो यिहूदायाश्च सर्व्वे वंशा दायूदि १६
पिप्रियिरे यतः स तेषाम् अग्रसरो भूत्वा गमनागमने कृतवान्।

अनन्तरं शौलो दायूदं जगाद, मेरवानामिकां मम ज्येष्ठां दुहितरं १७
पश्य, अहं तां भार्य्यार्थं तुभ्यं दास्यामि, त्वं मम पक्षे वीर्य्यवान् भूत्वा
परमेश्वरस्य कृते संग्रामं कुरु। यत एष मम करेण न हन्तव्यः पिले-
ष्टीयानां हस्ते हन्यतामिति वाचं शौलो मनसा बभाषे। दायूद् शौलम् १८
उक्तवान् अहं कः, मम प्राणाश्च के, इस्रायेल्वंशमध्ये मम पितृवंशश्च कः
यदहं नृपस्य जामाता भवेयं? अपरं शौलस्य दुहितु र्मेरवाया दायूदं १९
प्रति दानसमय उपस्थिते सा मिहोलातीयाद्रीयेलाय भार्य्यार्थम् अदायि।

अनन्तरं शौलस्य कन्या मीखला दायूदि प्रेमाकरोत्, ततः शौल- २०
स्तद्वार्त्तां श्रुत्वा समतुष्यत्। अनन्तरं शौलः कथयामास, अहम् एनां २१
दुहितरं तस्मै दास्यामि सा तस्योन्माथो भवतु पिलेष्टीयैः स हन्यतां।
अतः शौलो द्वितीयवारं दायूदम् अवदत् तमद्य मम जामाता भव।
अनन्तरं शौलो निजभृत्यान् आदिदेश, यूयं गुप्तं दायूदा समम् २२
आलप्येदं वदत, पश्य राजा त्वयि तुष्यति तस्य सर्व्वे भृत्या अपि त्वयि
प्रीयन्ते अतस्त्वं नृपस्य जामाता भवितुम् अर्हसि। ततो दायूदः कर्ण- २३
गोचरे शौलस्य भृत्यैस्तादृक्षु वाक्येषूक्तेषु दायूद् अवदत् राजजामातृत्वं
किं युष्माभि र्लघु बुध्यते? अहं दरिद्रोऽल्पमान्योऽस्मि। अनन्तरं २४
शौलस्य भृत्यास्तं तद्वृत्तान्तं ज्ञापयामासुः, दायूद् तानि वाक्यानि वक्ति।
ततः शौलः कथयामास, युष्माभि र्दायूदे कथैषा कथ्यतां, राजा त्वत्तः २५
किञ्चन पणं न याचते केवलं नृपस्य शत्रुप्रतीकारार्थं पिलेष्टीयानां शतं
लिङ्गाग्रत्वचो याचते, यतः शौलः पिलेष्टीयानां करे दायूदं निपातयितुं
मतिञ्चकार। अनन्तरं राजभृत्यैस्तानि वाक्यानि ज्ञापितो दायूद् २६
राजजामाता भवितुं भद्रं मेने। तदानीं विवाहस्य समयेऽनुपस्थिते २७
दायूद् तस्य मनुजाश्च गत्वा पिलेष्टीयानां द्वे शते लोकान् जघ्नुः स च
तेषां लिङ्गाग्रत्वच आनिनाय तासु राजजामातृत्वस्य पणरूपं राज्ञे
दत्तासु शौलः स्वदुहितरं मीखलां तस्मै ददौ।

अनन्तरं परमेश्वरो दायूदा सममास्त इति शौलेन चाक्षुषं दृष्टं, २८
शौलस्य दुहिता मीखला च तस्मिन् अप्रीयत। अतो हेतोः शौलो दायूद- २९
मधि पूर्व्वस्मादधिकं विभयाञ्चकार ततः शौलो यावज्जीवनं दायूदः शत्रु-

१० स्तस्थौ। अनन्तरं पिलेष्टीयानाम् अधिपतयो वहिरगच्छन् अपरं यति
वारान् वहिरगच्छन् तति वारान् शौलस्य सकलभृत्यानां मध्ये दायूद्
कृतकार्य्यो बभूव तेन तस्य नामातीव मान्यं बभूव।

---

१९ ऊनविंशोऽध्यायः।

१ दायूदा सार्द्धं योनाथनस्य संलपनं ४ दायूदमधि पितुः समीपे निवेदनं ८ दायूदं प्रति शौलस्य द्वेषस्तं हन्तुं तस्य गेहं लोकप्रेषणं १२ दायूदः पलायनं १८ रामतिं शिमूयेलस्य समीपे गमनं।

१ अनन्तरं शौलो दायूदं हन्तुं निजपुत्रेण योनाथनेन सकलभृत्यैश्च
२ समं मन्त्रणां चकार। किन्तु शौलस्य पुत्रो योनाथनो दायूदि भृशम्
अप्रीयत। अतो योनाथनो दायूदं जगाद, मम तातः शौलस्त्वां हन्तुं
चेष्टते तस्मादहं विनये त्वं प्रातःकाले सावधानो भूत्वा गुप्तस्थानम्
३ आश्रित्य छन्नस्तिष्ठ। अपरं त्वं यत्र क्षेत्रे स्थास्यसि तत्र स्थाने वहि-
र्भयाहं गत्वा निजतातस्य पार्श्वे तिष्ठन् त्वामधि निजतातं सम्भाषिष्ये,
यच्च द्रक्ष्यामि तत् त्वां ज्ञापयिष्यामि।
४ अनन्तरं योनाथनः स्वतातस्य शौलस्य समीपे दायूदमधीति सद्वा-
क्यानि व्याजहार, राजा निजदासस्य दायूदः प्रतिकूलं पातकं न
करोतु, यतस्तेन भवतः किमपि नापराद्धं तस्य कर्म्मभिश्च भवान् अती-
५ वोपकृतः। स स्वप्राणान् निक्षिप्य तं पिलेष्टीयम् अवधीत् ततः पर-
मेश्वरेणेस्रायेल्वंशस्य महोद्धारे कृते भवान् तद् दृष्ट्वानन्दितवान्।
अत इदानीं भवान् कुतो दायूदं हत्वा निर्दोषस्य शोणितपातेन पातकी
६ भविष्यति? ततः शौलो योनाथनस्य वचसि मनो निधाय शपथं कृत्वा
७ व्याहरत् परमेश्वरो यद्यमरोऽस्ति तर्हि स न घानिष्यते। अनन्तरं
योनाथनो दायूदम् आहूय तद्वृत्तान्तं तं ज्ञापयामास। अपरं शौलस्य
समीपं योनाथनेनानीतो दायूद् पूर्व्वकालवत् तस्य साक्षात् तस्थौ।
८ अनन्तरं पुनश्च रणे उपस्थिते दायूद् वहिर्गत्य पिलेष्टीयैः समं
युद्ध्वा तेषां महानिहननं कृतवान् ते च तस्य सम्मुखात् पलायाञ्चक्रिरे।
९ अनन्तरं दुष्ट आत्मा परमेश्वरस्यानुमत्या शौलम् आश्रितवान् तदा
शूलहस्तः शौलो निजगेहे उपाविशत् दायूद् अपि कराभ्यां वाद्यम्
१० अवादयत्। एतस्मिन् काले शौलः शूलेन दायूदं भित्त्वा समं वेद्धुम्

অযতত, কিন্তু স শৌলস্য সম্মুখাদ্ অপাসরত্ তেন শূলেন ভিত্তি-
র্বিদ্ধা ততো দাযূদ্ তস্যাং রজন্যাং পলায্য রক্ষাং প্রাপ। অনন্তরং ১১
শৌলো দাযূদং নিরীক্ষিতুং প্রাতঃকালে হন্তুঞ্চ তদ্গেহসমীপং দূতান্ প্রেষ-
যামাস, তদানীং দাযূদো জাযা মীখলা তদ্বার্ত্তাং তং শ্রাবয়িত্বা জগাদ,
যদি ত্বম্ অস্যাং রজন্যাং প্রাণান্ ন রক্ষসি তর্হি শ্বো বানিষ্যসে।

অনন্তরং মীখলা বাতাযনেন দাযূদম্ অবরোহযামাস, ততঃ স গত্বা ১২
পলাযনং কৃত্বা রক্ষাং প্রাপ। অপরং মীখলা পুত্তলিকামেকাং গৃহীত্বা ১৩
শয্যাযাং শাযযামাস তস্যাঃ শিরসি চ ছাগলোমনির্ম্মিতম্ একং কন্দুকং
নিধায বসনেন তামাচ্ছাদযামাস। অনন্তরং শৌলেন দাযূদং ধর্ত্তুং ১৪
দূতগণে প্রহিতে মীখলা কথযামাস স পীডিত আস্তে। ততঃ শৌলো ১৫
দাযূদং বীক্ষিতুং দূতান্ প্রহিত্য জগাদ তং খট্বযা সমং মম সমীপম্
আনযত তমহং হনিষ্যামি। অনন্তরং দূতা অভ্যন্তরম্ আগত্য খট্বাযাং ১৬
পুত্তলিকামেকাং তস্যাঃ শিরসি ছাগলোম্নাং গেণ্ডুকঞ্চ দদৃশুঃ। অতঃ ১৭
শৌলো মীখলাং জগাদ ত্বং মাং কুত ইত্থং প্রাবঞ্চযঃ? মম রিপুঃ কুতস্ত্বযা
বিসৃষ্টো রক্ষিতশ্চ? মীখলা শৌলম্ অবোচত্ স কথিতবান্ ত্বং মাং
বিসর্জ, কস্মাদহং ত্বাং হনিষ্যামি?

অপরং দাযূদ্ পলাযনেন রক্ষাং প্রাপ্য রামতনগরে শিমূযেলস্য সমীপং ১৮
গত্বা স্বং প্রতি শৌলেন যদ্যত্ কৃতং তত্ সর্ব্বং তং জ্ঞাপযামাস, অনন্তরং স
শিমূযেলশ্চ গত্বা মঠেষু ন্যবসতাং। অনন্তরং পশ্য দাযূদ্ রামতস্থমঠেষু ১৯
বিদ্যত ইতি বার্ত্তাং শ্রুত্বা শৌলো দাযূদং ধর্ত্তুং দূতান্ প্রেষযামাস। তৈর্দূতৈ ২০
র্ভবিষ্যদ্বাক্যানি কথযতাং ভবিষ্যদ্বাদিনাং গণে তান্ অধিতিষ্ঠতি শিমূ-
যেলে চ সন্দৃষ্টে ঈশ্বরস্যাত্মা শৌলস্য তান্ দূতান্ অধিতস্থৌ, ততস্তেঽপি
ভবিষ্যদ্বাক্যানি কথযিতুম্ আরেভিরে। তদ্বার্ত্তাং শ্রুত্বা শৌল ইতর- ২১
দূতান্ প্রেষযামাস ততস্তেঽপি ভবিষ্যদ্বাক্যং কথযিতুমারেভিরে। অনন্তরং
শৌলস্তৃতীযবারং দূতান্ প্রেষযামাস, তেঽপি ভবিষ্যদ্বাক্যং কথযিতুমারে-
ভিরে। অতঃ শৌলঃ স্বযং রামতং গত্বা সেখুস্থং বৃহত্কূপং প্রাপ্য শিমূ- ২২
যেলদাযূদৌ কুত্র বিদ্যেতে ইতি পপ্রচ্ছ। ততঃ পশ্য তৌ রামতস্থেষু মঠেষু ২৩
বিদ্যেতে ইতি লোকৈরুক্তে শৌলো রামতস্থমঠান্ জগাম ততঃ পরমেশ্বর-
স্যাত্মা তমপ্যধিতস্থৌ ততো রামতস্থমঠেষু তস্যোপস্থিতিং যাবত্ সোঽপি
গচ্ছন্ ভবিষ্যদ্বাক্যানি কথযামাস। তথা বস্ত্রং মোচযিত্বা শিমূ- ২৪
যেলস্য সম্মুখে ভবিষ্যদ্বাক্যানি জগাদ কৃত্স্নদিবারাত্রঞ্চ বস্ত্রহীনঃ

सन् शयित्वा तस्थौ। तस्मात् लोका वदन्ति शौलोऽपि किं भविष्यद्वादिनाम् एको जनः ?

२० विंशोऽध्यायः।

१ योनाथनदायूदोः कथोपकथनं ११ तयोः क्षेत्रगमनं शपथेन नियमकरणं २४ प्रतिपदि दायूदो ऽनुपस्थिते योनाथनं प्रति शौलस्य क्रोधकरणं ३५ दायूदं प्रति योनाथनस्य वार्त्तादानं ४१ दायूदो विसर्जनं।

१ अनन्तरं दायूद् रामतस्थमठेभ्यः पलाय्य योनाथनस्य समीपमागत्य
जगाद, मया किं कृतं किं वापराद्धं तव पितुः समीपे वा मम पापं किं
२ यत् स मम प्राणान् हन्तुं चेष्टते? ततः स तं बभाषे नैवं भवतु त्वं न मरि-
ष्यसि। पश्य माम् अज्ञापयित्वा मम पिता वृहत् क्षुद्रं वा किमपि कर्म्म
न कुरुते तर्हि मम तात एतत् कर्म्म मत्तोऽपहृत्य कुतः करिष्यति? तद्
३ भवितुं न शक्नोति। ततो दायूद् शपथं कृत्वा पुनरब्रवीत्, अहं त्वया-
नुगृहीत इति तव पिता सम्यक् जानाति, अतः कारणात् स कथयति
योनाथनो यन्न दुःखितो भवेत् तदर्थम् एतन्न ज्ञाप्यतां। अहम् अम-
रस्य परमेश्वरस्य तव प्राणानाञ्च शपथं करोमि, मम मृत्योश्चैकपद-
४ मात्रं विच्छेद आस्ते। योनाथनो दायूदं बभाषे तव मनो यद् अभिल-
५ षति तदेवाहं करिष्यामि। दायूद् योनाथनं जगाद पश्य श्वः प्रतिपदि
नृपेण समं भोजनाय मयोपवेष्टव्यं, त्वं मां विसर्ज तेनाहं तृतीयदिनस्य
६ सायंकालं यावत् क्षेत्रे छन्नस्तिष्ठामि। ततस्तव तातो यदि ममानुपस्थितेः
कारणं पृच्छति तदा त्वं वदिष्यसि दायूद् निजनगराय वैतलेहमाय
तूर्णं गमनार्थं ममानुमतिं याचितवान् यतस्तत्र स्थाने सकलपरिज-
७ नार्थं वार्षिको यज्ञो भविष्यति। ततस्तेन यदि भद्रमित्युच्यते तर्हि तवै-
तस्य दासस्य मङ्गलं भविष्यति, नो चेत् स यदि चोकुप्यते तर्हि ममामङ्गलं
८ निश्चितमिति त्वया ज्ञास्यते। अतस्त्वं निजमेतं दासं प्रति प्रीतिम् आच-
रिष्यसि यतस्त्वं स्वेन समं स्वीयमेनं दासं परमेश्वरस्य नियमेनैकेन बद्धम्
अकरोः। यदि वा मया किञ्चनापराद्धं तर्हि त्वमेव मां जहि, तव
९ तातस्य समीपं मां कुतो नेष्यसि? ततो योनाथनो जगाद, एवं मा
चिन्तय, मम पिता तवामङ्गलं निश्चितवान् इति मया ज्ञाते त्वं किं
१० तद्वार्त्तां न श्रावयिष्यसे? दायूद् योनाथनं बभाषे, केन श्रावयिष्ये? तव
तातस्त्वां कीदृग् निष्ठुरं कुभाषिष्यते ?

अनन्तरं योनाथनो दायूदं व्याहरत्, आगच्छावां क्षेत्रं यावः । ११
ततस्तौ वहिर्भूय क्षेत्रं जग्मतुः । अनन्तरं योनाथनो दायूदं व्याहृतवान् १२
इस्रायेलः प्रभुं परमेश्वरं साक्षिणं कृत्वा वदाम्यहं श्व एतस्मिन् समये
वा परश्वो मया यतित्वा तातस्य मनसि विज्ञाते तव मङ्गलम् आस्त इति
वोध्याहं तव समीपं दूतं प्रहित्य तद्वार्त्तां त्वां श्रावयिष्यामि । यदि १३
च तवामङ्गलं कर्त्तुं मम पितु र्मतिस्तिष्ठति, तर्ह्यप्यहं तद्वार्त्तां त्वां श्राव-
यिष्यामि, नो चेत् परमेश्वरोऽमुकं ततोधिकञ्च दण्डं योनाथनाय ददातु ।
अहं त्वां विस्रक्ष्यामि त्वं कुशलेन यास्यसि, अपरं परमेश्वरो यथा मम
तातस्य सहाय आसीत् तथा तवापि सहायो भवतु । यदहं न म्रिये १४
तदर्थं मम यावज्जीवनं त्वया परमेश्वरम् उद्दिश्य मां प्रति किं प्रीतिरेव
नाचरितव्या? मम वंशादपि प्रीतिः कदापि त्वया न छेदनीया, दायूदो १५
रिपुगणे परमेश्वरेण भूमण्डलमध्याद् उच्छिन्नेऽपि सा प्रीति र्न छेद-
नीया । इत्थं योनाथनो दायूदो वंशेन समं नियमं विधाय जगाद, पर- १६
मेश्वरो दायूदो रिपुभ्यः समुचितं ददातु । अनन्तरं योनाथनो दायूदि १७
प्रेमकरणकारणात् पुनरपि दायूदं शपथं कारयाञ्चकार यतः स निज-
प्राणेष्विव तस्मिन् प्रेमाकरोत् । अनन्तरं योनाथनस्तमवदत् श्वः प्रति- १८
पद् भविष्यति तत्र त्वदीयासने शून्यीभूते तवानुपस्थिति र्वेदिष्यते । त्वं १९
परश्वः शीघ्रमुत्तीर्य्य पूर्व्वकार्य्यस्य समये यत्र स्थाने छन्न आसीस्तत्र
स्थान एषलाख्यस्य ग्रावण समीप उपविशन् स्थास्यसि । लक्ष्यवेधनच्छले- २०
नाहं त्रीन् शरान् तस्य पार्श्वे क्षेप्स्यामि । ततः परं पश्य बालकमेकं प्रहित्य २१
तं वदिष्यामि, त्वं गत्वा शरान् गवेषय । अपरं पश्य शरास्तवैतत्पार्श्वे
विद्यन्ते तान् संगृहाणेति यदि स बालको मयादिश्यते तर्हि त्वमागच्छ,
अमरस्य परमेश्वरस्य शपथं करोमि तव मङ्गलं, कापि कुमन्त्रणा नास्ति ।
पुनः पश्य वाणास्तवान्यपार्श्वे विद्यन्त इति मयादिष्टे त्वं स्थानान्तरं याहि २२
यतः परमेश्वरस्त्वां व्यसर्जत् । पश्यावयोरेतत्कथाकथनमधि परमेश्वरः २३
सर्व्वदावयो र्द्वयोः साक्षी भवतु ।

अपरं दायूद् क्षेत्रम् आश्रितवान् । अनन्तरं प्रतिपद्दिवस उपस्थिते २४
राजा भोक्तुम् उपविवेश । राज्ञि स्वधारानुसारेण भित्तिसमीपस्थे स्वकी- २५
यासन उपविष्टे योनाथनेऽवतिष्ठमानेऽव्नेरे च शौलस्य पार्श्वे उपविष्टे
दायूदः स्थानं शून्यं तस्थौ । तथापि शौलस्तस्मिन् दिने किमपि न जगाद, २६
यतो दैवघटितमिदं सोऽशुचिः, तस्याशौचं भविष्यतीति मनसि चिन्त-

२७ यामास। परदिवसेऽर्थात् मासस्य द्वितीयदिवसे दायूदः स्थानस्य
शून्यस्थितिकारणात् शौलो निजसुतं योनाथनं पप्रच्छ यिशयस्य पुत्रो
२८ ह्योऽद्य च भोक्तुं कुतो नागच्छति? योनाथनः शौलं जगाद, दायूद् बैत-
२९ लेहमाय गमनार्थं ममानुज्ञां याचितवान्। स माम् अवदत् अहं विनये
मां विसर्जतु नगरे ऽस्माकं परिजनानां कृते यज्ञ एको भविष्यति तत्-
कारणात् मम भ्राता मां गन्तुम् आज्ञापयत्, अतोऽहं विनये यदि भवान्
मय्यनुग्रहं करोति तर्हि छन्नोऽहं गत्वा निजभ्रात्रादीन् पश्यामि। तस्मात्
३० स नृपस्य भोजनासनं नागच्छति। ततो योनाथनं प्रति शौलस्य क्रोधे
प्रज्वलिते स तं जगाद, अरे विपथगामिन् आज्ञालङ्घनकारिन् त्वं
निजलज्जां मातुरावरणीयलज्जाञ्च प्रकाशयितुं यिशयस्य सुतं वृतवान्
३१ तदहं किं न जानामि? यिशयस्य तनयो भूमौ यति कालं जीविष्यति
तति कालं त्वं तव राज्यं वा स्थिरं न भविष्यति, अत इदानीं दूतान्
३२ प्रहित्य तं मम समीपम् आनय यतस्तेन मर्त्तव्यमेव। ततो योनाथनः
३३ स्वजनकं शौलं बभाषे स कुतो घानिष्यते? तेन किं कृतं? तदा शौलस्तं
हन्तुं शूलमेकं निचिक्षेप, ततो निजपिता शौलो दायूदं हन्तुं निश्चि-
३४ तवान् इति योनाथनो बुबुधे। तदानीं योनाथनो महाक्रुद्धो भोज-
नासनाद् उदतिष्ठत्, मासस्य द्वितीयदिवसे स किञ्चन न बुभुजे यत-
स्तस्य पित्रा दायूदोऽपमानितत्वात् तस्य मनःपीडा जाता।

३५ अनन्तरं योनाथनो दायूदा समं यं समयं कृतवान् तदनुसारात्
३६ क्षुद्रमेकं बालकं सङ्गिनं कृत्वा बहिः क्षेत्रं जगाम। ततः स्वबालकं
गदितवान् अहं यान् शरान् निक्षिपामि त्वं धावन् तान् गवेषय। तत-
३७ स्तस्मिन् बालके धावति स तस्यान्यपार्श्वे शरं निचिक्षेप। अपरं
योनाथनेन निक्षिप्तस्य शरस्य समीपं बालक उपस्थिते योनाथनो बाल-
३८ कम् आहूय जगाद तवान्यपार्श्वे किं वाणो नास्ति? योनाथनः पुनश्च
बालकमाहूय बभाषे तूर्णं धावन् गच्छ विलम्बं मा कुरु। तेन योनाथ-
३९ नस्य स बालकः शरान् संगृह्य निजाधिपस्य समीपम् आजगाम। किन्तु
स बालकः किमपि न ज्ञातवान्, केवलं योनाथनदायूदौ तत्कार्य्यं
४० ज्ञातवन्तौ। अनन्तरं योनाथनो निजधनुर्वाणान् तस्मै स्वसङ्गिने बाल-
काय दत्त्वा तम् उक्तवान् एतानि गृहीत्वा नगरं याहि।

४१ अनन्तरं तस्मिन् बालके गते सति दायूद् दक्षिणदिक्स्थात् स्थानैक-
स्माद् उत्थाय न्युब्जः सन् पतित्वा वारत्रयं प्रणनाम। अपरं तौ परस्परं

चुम्बनं रोदनञ्च चक्रतुः किन्तु दायूद् अधिकं रुरोद। अनन्तरं योना- ४२
थनो दायूदं व्याजहार, त्वं कुशलं याहि, आवाभ्यां द्वाभ्यां परमेश्वरस्य
नाम्ना शपथोऽकारि, परमेश्वरो मम तव च मम वंशस्य तव वंशस्य च
नित्यं सहवर्त्ती भवतु। अनन्तरं स उत्थाय प्रतस्थे योनाथनञ्च नगरं
गतवान्।

---

२१ एकविंशोऽध्यायः।

१ अहीमेलकाद् दायूदः पवित्रपूपप्राप्तिः ७ तत्र स्थाने दोयेगस्योपस्थितिः ८ दायूदा पिलेष्टीयजालूतस्य खङ्गप्राप्तिः १० गातोयन्टपस्य साचाद् उन्मत्तवद् व्यवहरणं।

अनन्तरं दायूद् नोव्यां याजकस्याहीमेलकस्य समीपम् उपतस्थौ ततो १
ऽहीमेलकः कम्पमानो दायूदं साक्षात् कृत्वा पप्रच्छ त्वमेकः कुतः?
तव सङ्गी कोऽपि नास्ति कुतः? ततो दायूद् अहीमेलकं याजकं व्याहरत् २
राजा मां कार्य्यमेकं कर्त्तुम् आदिश्य गदितवान, यत् कर्म्म कर्त्तुम्
अहं त्वाम् आदिश्य प्रहिणोमि तस्य किञ्चिदपि कोऽपि न ज्ञाप्यतां।
अपरम् अमुकस्थानम् आगन्तुं दासनिवहो मया न्ययोजि।
इदानीं तव समीपे किमास्ते? पूपपञ्चकं यदि भवेत् यदेव वा भवेत् ३
तदेव मह्यं देहि। ततो याजको दायूदं प्रत्यवदत्, मम करे सामान्यः ४
पूपो नास्ति किन्तु तरुणगणो यदि योषितः पृथग् अभवत्, तर्हि
पवित्रपूपान् दातुं शक्नोमि। ततो दायूद् याजकं प्रत्यवदत् मम निर्ग- ५
मनमारभ्य द्वौ त्रीन् वा दिवसान् अस्मत्तो योषितो विच्छेद आस्ते तदा
च तरुणलोकानां वस्त्रादीनि पवित्राण्यासन्, यात्रैषा च यद्यप्यपवित्रा
भवेत् तथाप्यद्यापि वस्त्रादिभिः पूता भवितुं शक्नोति। ततो याजकः ६
पवित्रपूपान् तस्मै ददौ, यतस्तत्र स्थान इतरपूपा नाविद्यन्त, केवलम्
उत्तमपूपानां स्थापनसमये ये दर्शनीयपूपाः परमेश्वरस्य साक्षाद् अप-
सारितास्त एवाविद्यन्त।

तस्मिन् काले शौलस्य भृत्यानाम् एकः कयाचिद् बाधया तत्र परमे- ७
श्वरस्य साक्षाद् आसीत्, इदोमीयदोयेग इति तस्य नाम, स शौलस्य
पालकानां मुख्य आसीत्।

अनन्तरं दायूद् अहीमेलकं जगाद, स्थानेऽत्र तव करे शूलं खङ्गो वा ८
किमपि किं नास्ति? राज्ञः कार्य्यं तूर्णं करणीयम् इति हेतो र्मया
स्वखङ्गाद्यस्त्राणि नानीतानि। ततो याजको गदितवान् पश्य, एलाखो- ९

पत्यक्रायां त्वया हतस्य पिलेष्टीयजालूतस्य खड्गो वसनेन वेष्टित एफोदस्य
पश्चाद् विद्यते, यदि तं जिघृक्षसि, तर्हि गृहाण, तं विना स्थानेऽत्रान्यद्
अस्त्रं नास्ति। ततो दायूद् गदितवान् सोऽनुपम एव, तं मह्यं देहि।
१० अनन्तरं दायूद् उत्थाय तद्दिवसे शौलस्य समीपात् पलाय्य गातीय-
११ नृपस्याखीशस्य समीपं जगाम। तत आखीशस्य भृत्यास्तम् अवदन् अयं
जनः किं देशस्य राजा दायूद् न हि? अपरं,

शौलेनारिसहस्राणि हतानि समराङ्गने।
दायूदापि विपक्षाणामयुतानि हतानि च॥

१२ इति वाचं योषितो नृत्यं कुर्व्वत्यः किमेतमधि न जगुः? दायूद् तां
कथां स्वमनसि न्यधित, अपरम् आखीशाख्यस्य गातीयराजस्य कारणात्
सोतीव भीतो तेषां साक्षाद् आचारान्तरं कृत्वा तेषां समीप उन्मत्त
इव व्यवहारं कुर्व्वन् द्वारकपाटानि व्यलिखत् निजश्मश्रूपरि च लालाम्
१४ अक्षरयत्। तत आखीशः स्वीयभृत्यान् जगाद, पश्यतायं मानुष उन्मत्त
१५ एव, स युष्माभि र्मम समीपं कुत आनायि? मम किम् उन्मत्तानाम्
अभाव आस्ते यद् यूयं मम समीपे निजोन्मत्ततां दर्शयितुम् एनम्
आनयत? किमेष मम गृहम् आगच्छेत्?

---

२२ द्वाविंशोऽध्यायः।

१ अदुल्लमगुहायां दायूदो रक्षाप्रापणं ३ मोयाबीयराजस्य समीपे पितृमात्रोः
स्थापनं ५ गादाख्यभविष्यद्वक्तु र्मन्त्रणया यिहूदादेशाय दायूदो गमनं ६ दायूदमधि
शौलेन स्वदासानां तिरस्करणं ९ शौलं प्रति दोयेगस्य कथनं ११ याजकान् हन्तुं
शौलस्य निदेशः १७ तेषां नद्दोयनगरस्य च नाशनं २० अबियाथरस्य पलायनं।

१ अनन्तरं दायूद् तस्मात् स्थानात् प्रस्थाय अदुल्लमाख्यां गुहाम् आश्रि-
तवान् ततस्तस्य भ्रातरः पितृपरिवाराश्च तन्निशम्य तस्य समीपं गतवन्तः।
२ अपरम् ऋणिदुःखिविरक्तमानसलोकेषु सर्व्वेषु तस्य सन्निधौ मिलितेषु
स तेषां सेनापति र्बभूव। इत्थं प्रायेण चत्वारि शतानि लोकास्तस्य
सङ्गिनो बभूवुः।
३ अनन्तरं दायूद् तस्मात् मोयाबीयमिस्पीं नगरीं गत्वा मोयाबीय-
महीपतिं व्याहरत्, अहं विनये, ईश्वरो मां प्रति किं करिष्यति तद्
यावन्न वेद्मि तावद् भवतः समीपमागत्य प्रवस्तुं मम पितरं मातरञ्चा-

नुजानातु। ततस्तौ मोयाबीयमहीपतेः साक्षात् तेनानीतौ, यावच्च ४
दायूद् दुर्गमस्थाने तस्थौ तावत् तौ तेन नृपेण साकं न्यवसतां।

अनन्तरं गाद्नामा भविष्यद्वादी दायूदं जगाद, त्वं पुनर्दुर्गमस्थाने ५
न तिष्ठ, यात्रां विधाय यिहूदादेशं याहि। ततो दायूद् प्रस्थाय हेर-
ताख्यवनम् आश्रितवान्।

तदानीं दायूदस्तस्य सङ्गिनामप्युद्देशः प्राप्त इति निशम्य शौलो ६
गिबियाया रामतस्थस्यैकस्याधः शल्यहस्तः सन् उपाविशत् तस्य
भृत्याश्च सर्व्वेऽवतिष्ठमानास्तम् अवेष्टन्त। अपरं शौलो निजचतुर्दिक्ष्व- ७
वतिष्ठमानान् भृत्यान् जगाद, हे बिन्यामीनवंशीया नराः, यूयम् आक-
र्णयत, यिशयस्य सुतः किं युष्माकम् एकैकस्मै शस्यक्षेत्राणि द्राक्षा-
क्षेत्राणि च दास्यति? स किं युष्माकम् एकैकं सहस्रसेनापतिं शतसेना-
पतिं वा करिष्यति, यद् यूयं सर्व्वे मम प्रातिकूल्येन कुमन्त्रणाम् अकु- ८
रुत? यिशयस्य पुत्त्रेण साकं मम पुत्त्रो नियमं कृतवान् इति युष्माकं
कोऽपि मम कर्णगोचरं नाकरोत्। अपरम् अद्य छद्मना मां हिंसितुं मम
किङ्करो मत्सुतेन प्रवर्त्तित इति वार्त्तां मां ज्ञापयितुं युष्माकं कोऽपि
मां नानुकम्पते।

अनन्तरं शौलस्य भृत्यगणमध्ये ऽवतिष्ठमान इदोमीयदोयेगः प्रत्य- ९
वदत् अहं नोब्याम् अहीटूबस्य पुत्त्रस्याहीमेलकस्य समीपं गच्छन्तं
यिशयस्य पुत्त्रं दृष्टवान्। स तस्य कृते परमेश्वरं पृष्टवान् तस्मै पाथेय- १०
द्रव्याणि दत्तवान् तथा पिलेष्टीयजालूतस्य खड्गमपि तस्मै दत्तवान्।

ततो ऽहीटूबस्य पुत्त्रम् अहीमेलकं याजकं तस्य सकलं पितृवंशम् ११
अर्थतो नोबवासिनो याजकान् आह्वातुं राज्ञा दूतेषु प्रहितेषु ते सर्व्वे
नृपस्य समीपम् आगताः। अनन्तरं शौलोऽवदत् हे अहीटूबस्य पुत्त्र, १२
अधुना शृणु। स प्रत्यवदत् हे मम प्रभो, अहम् उपस्थित आसे। अनन्तरं १३
शौलस्तं जगाद त्वं यिशयस्य पुत्त्रश्च मम विरुद्धं कुतो राजद्रोहं कृत-
वन्तौ? अपरम् अद्य स यत् मां हिंसेत् तदर्थं त्वं तस्मै कुतो भक्ष्यं खड्गञ्च
दत्त्वा तस्य कृते ईश्वरम् अपृच्छः? ततो ऽहीमेलको राजानं प्रत्यवदत्, १४
भवतो भृत्यगणमध्ये दायूदिव विश्वास्यो राजजामाता राजमन्त्रणावगतो
भवतो गेहे सम्मानितश्च को भवेत्? तस्य कृत ईश्वरं प्रष्टुम् अहं किम् १५
अद्यारब्धवान्? तत् मत्तो दूरीभवतु, राजा निजदासं दासस्य परि-
वारांश्च प्रति नेमं दोषम् अर्पयतु। भवतो दास एतदर्थस्य न्यूनाधिकं

१६ किमपि नावगच्छत्। किन्तु राजा जगाद, हे अहीमेलक त्वया तव
कृत्स्नेन पितृवंशेन च मर्त्तव्यमेव।
१७ अनन्तरं राजा स्वचतुर्दिक्ष्ववतिष्ठमानान् पदातिकान् अवदत् यूयं
परावृत्य परमेश्वरस्य याजकान् हत यतस्तेऽपि दायूदस्य सहाया अभ-
वन् अपरं तस्य पलायनं ज्ञात्वापि मम कर्णगोचरं नाकुर्व्वन्। किन्तु
परमेश्वरस्य याजकान् हन्तुं नृपस्य दासाः करान् विस्तारयितुं नाङ्गी-
१८ कृतवन्तः। अनन्तरं राजा दोयेगम् अवदत् त्वमेव परावृत्य याजकान्
जहि। तत इदोमीयदोयेगः परावृत्य याजकान् आक्रम्य तस्मिन् दिवसे
१९ कार्पाससूत्रनिर्म्मितैफोदपरिधायिनः पञ्चाशीति जनान् जघान। अपरं
स नोवनामकं याजकानां नगरं खड्गेन व्यनाशयद् अर्थाद् योषित्पुरुष-
बालकस्तनपायिशिशून् गोगर्द्दभमेषांश्च खड्गेन जघान।
२० तस्मिन् काल अवियाथरनामा अहीटूवस्य पौत्रोऽहीमेलकस्य पुत्रो
२१ रक्षां प्राप्य दायूदः पश्चात् पलायाञ्चक्रे। शौलः परमेश्वरस्य याज-
२२ कान् अबधीदिति वार्त्तां सोऽवियाथरो दायूदं जगाद। ततो दायूद्
अवियाथरं बभाषे, इदोमीयदोयेगस्तत्र स्थान आसीत् तस्मात् स
शौलं मम वार्त्तां वदिष्यतीति मया तस्मिन्नेव दिने बुद्धं। तव पितृवंशी-
२३ यानां बधस्य कारणमहमेवाभवं। त्वं मया सार्कं तिष्ठ मा भैषीः, मम
प्राणनाशम् अचेष्टित्वा कोपि तव प्राणनाशं न चेष्टिष्यते, तव रक्षार्थम्
अहमेव तवाश्रयो भविष्यामि।

२३ त्रयोविंशोऽध्यायः।

१ कियीलाया आक्रमणं ७ अधिदायूदं शौलस्य कथनं ९ दायूदं परमेश्वरस्य प्रति-
वदनं १३ दायूदः सीफारण्ये पलायनं योनाथनेन समं साक्षात् करणं १९ शौलं
प्रति सीफीयलोकानां वार्त्तावदनं दायूदः पश्चाद्गमनात् शौलस्य निवृत्तिः।

१ अनन्तरं पिलेष्टीयाः कियीलया समं रणं कुर्व्वन्ति शस्यमर्द्दनस्थानानां
२ शस्यानि हरन्ति चेति वार्त्तां श्रुत्वा दायूद् परमेश्वरं पप्रच्छ तान् पिले-
ष्टीयान् आहन्तुं मया किं गन्तव्यं? ततः परमेश्वरो दायूदं बभाषे याहि
३ पिलेष्टीयान् आहत्य कियीलां रक्ष। ततो दायूदो लोकास्तं जगदुः
पश्यात्र यिहूदादेशे तिष्ठद्भिरस्माभि र्भेतव्यं, तर्हि कियीलायां पिले-
४ ष्टीयसैन्यश्रेणीनां प्रतिकूलं गत्वास्माभिः किं ततोधिकं न भेतव्यं? अनन्तरं
दायूद् पुनरपि परमेश्वरं पप्रच्छ, ततः परमेश्वरः प्रत्यवदत्, त्वमुत्थाय

क्रियीलां याहि, अहं पिलेष्टीयान् तव करे समर्पयिष्यामि। अतो ५
दायूद् तस्य लोकाश्च क्रियीलां गत्वा पिलेष्टीयैः समं रणं कृत्वा महा-
हननेन तान् हत्वा तेषां पशून् गृहीत्वा जग्मुः। इत्थं दायूद् क्रियीला-
निवासिनो ररक्ष। क्रियीलायां दायूदः समीपं पलायनसमयेऽही- ६
मेलकस्य पुत्रोऽवियाथर एकम् एफोदं करेणादायाजगाम। अनन्तरं ७
दायूद् क्रियीलां प्राविशदिति वार्त्तां श्रुत्वा शौलो जगाद, तद्दीश्वरो
मम करे तं समार्पयत् यतो द्वारार्गलयुक्तनगरे प्रवेशनात् सोऽवरुद्धो
जातः। अनन्तरं शौलो दायूदं तस्य लोकांश्च रोधयितुं क्रियीलां ८
गमनार्थं निजान् सकललोकान् रणायाह्वयत्।

अनन्तरं शौलो गुप्तं मम हिंसां चिकीर्षतीति दायूद् ज्ञात्वाविया- ९
थरं याजकम् अवदत्, एफोदम् अत्रानय। अनन्तरं दायूद् जगाद, १०
हे इस्रायेलः प्रभो परमेश्वर विनयेऽहं निजदासस्य प्रार्थनां शृणोतु
यतो मत्कारणात् क्रियीलानगरं विनाशयितुं शौलोऽत्रागन्तुं यतते।
क्रियीलाया गृहस्थाः किं मां तस्य हस्ते समर्पयिष्यन्ति? भवतो दासेन ११
यथा श्रुतं तथा शौलः किम् आगमिष्यति? हे इस्रायेल ईश्वर तत्
स्वदासं ज्ञापयतु। ततः परमेश्वरोऽवदत् स आगमिष्यति। ततो दायूद् १२
पप्रच्छ, क्रियीलाया गृहस्थाः किं मां मम नरांश्च शौलस्य हस्ते समर्पयि-
ष्यन्ति? ततः परमेश्वरः कथयामास ते समर्पयिष्यन्ति।

ततो दायूद् तस्य प्रायेण षट्शतानि सङ्गिनो मनुजाश्चोत्थाय क्रियी- १३
लायाः प्रस्थाय यत्र तत्र गताः। अनन्तरं दायूद् क्रियीलातः पला-
यांचक्र इति वार्त्तां श्रुत्वा शौलो यातुं निववृते। अपरं दायूद् निर्जन- १४
देशस्य दूराक्रमाणि स्थानान्याश्रित्य सीफाख्यस्य निर्जनदेशस्य पर्व्वते
वासं चकार। अनन्तरं शौलेन प्रतिदिनं तस्मिन् गवेषितेऽपीश्वरस्तस्य
करे तं न समर्पयामास। तथापि शौलो दायूदः प्राणनाशार्थं वहि- १५
र्भूयागच्छतीति दायूद् ददर्श। अपरं सीफप्रदेशस्यारण्ये दायूदि तिष्ठति
शौलस्य पुत्रो योनाथन उत्थाय दायूदः समीपं तद्वनं गत्वा ईश्वरेण तस्य १६
मानसस्थिरत्वं जनयामास। अपरं तं बभाषे मा भैषीः, मम तातः १७
शौलस्त्वां स्वहस्तगतं कर्त्तुं न शक्ष्यति। त्वमिस्रायेलवंशस्य राजा
भविष्यसि, अहन्तु तव द्वितीयो भविष्याम्येतत् मम पिता शौलोऽपि
वेत्ति। अनन्तरं ताभ्यां परमेश्वरस्य साक्षात् नियमे कृते दायूद् वने १८
तस्थौ योनाथनश्च निजगृहं जगाम।

१९ अपरं सीफीयमनुजा गिबियायां शौलस्य समीपं गत्वा कथयामासुः,
दायूद् किम् अस्माकं सन्निधौ काननस्थेषु दुर्गमस्थानेष्वर्थतो यिशीमो-
२० नस्य दक्षिणदिक्स्थहखीलापर्व्वते छन्नो न तिष्ठति ? अतो हे राजन्
भवान् स्वमनोभिलाषानुसारादेवागच्छतु भवतो हस्ते तस्य समर्पणम्
२१ अस्माभिः साधयिष्यते । शौलस्तान् अवदत्, यूयं परमेश्वरे धन्या
२२ यतो माम् अनुकम्पध्वे । अहं विनये यूयं गत्वा तस्य रहःस्थानं कुत्र
तत्र स्थाने च तं को दृष्टवान् इति पुन र्विविच्य निरीक्ष्य निश्चिनुत,
२३ यतः सोऽतीव चतुरताचारीति मयाश्रावि । अतो रहःस्थानानां मध्ये
कस्मिन् रहःस्थाने स तिष्ठति तद्दृष्ट्वा निश्चिनुत, ततः परं मम समीपं
निश्चितवृत्तान्तं गृहीत्वागच्छत, ततोऽहं युष्माभिः समं यास्यामि । स
यदि देशमध्ये तिष्ठेत् तर्ह्यहं यिहूदायाः सहस्राणां मध्ये तस्योद्देशं
२४ प्राप्स्यामि । ततस्त उत्थाय शौलस्याग्रं सीफं जग्मुः, किन्तु दायूद्
तस्य लोकाश्च यिशीमोनस्य दक्षिणदिशि मायोनाख्यस्य निर्जनप्रदेशस्य
२५ प्रान्तरे तस्थुः । अनन्तरं शौलस्तस्य लोकाश्च तं मृगयितुं जग्मुः किन्तु
लोकै र्दायूदे तस्यां वार्त्तायां कथितायां स शैलम् आश्रित्य मायोनाख्ये
निर्जनप्रदेशे स्थितवान् । तत् श्रुत्वा शौलो दायूदं मृगयितुं मायोनप्रदेशं
२६ जगाम । अपरं शौले पर्व्वतस्यैकपार्श्वं गते दायूद् तस्य लोकाश्च तत्प-
र्व्वतस्यान्यपार्श्वं जग्मुः, अपरं दायूद् भयात् स्थानान्तरं यातुं त्वरां
चकार किन्तु शौलस्तं तस्य लोकांश्च धर्त्तुं स्वलोकैः सह वेष्टयन् तस्थौ ।
२७ तदानीं दूत एकः शौलस्य समीपमागत्य भवान् शीघ्रमागच्छतु यतः
२८ पिलेष्टीया देशमाक्रामन् इति वार्त्तां तं जगाद । ततः शौलो दायूदः
पश्चाद् गमनात् परावृत्य पिलेष्टीयानां विरुद्धं जगाम, तत्कारणात्
तस्य स्थानस्य नाम सेलाहम्महलिकोतं (चलाचलपर्व्वत) इति बभूव ।
२९ ततो दायूद् तस्मात् प्रस्थाय ऐनगिदीस्थेषु दुराक्रमणस्थानेषु न्युवास ।

---

२४ चतुर्विंशोऽध्यायः ।

१ ऐनगिदीस्थगुहायां दायूदा शौलस्य वस्त्राग्रं छित्त्वा प्राणरक्षाकरणं ८ तेन कर्म्मणा शौलस्य समीपे निजनिर्दोषत्वप्रकाशनं १६ निजदोषं स्वीकृत्य दायूदं शपथयित्वा शौलस्य स्वगृहगमनं ।

१ अनन्तरं पिलेष्टीयानां पश्चाद्गमनात् प्रत्यागतेन शौलेन दायू[^] ऐन

गिदीनाम्नि निर्जनस्थाने विद्यत इति वार्त्ता शुश्रुवे। ततः शौलः सर्व्वेभ्य २
इस्रायेल्वंशेभ्यः सहस्रत्रयलोकान् वृत्वा गच्छन् वनच्छागानां शैलेषु
दायूदं तस्य लोकांश्च गवेषयितुं जगाम। तस्मिन् वर्त्मनि स्थितानि ३
मेषस्थानानि प्राप्य शौलः स्वचरणावाच्छादयितुं तत्रत्यां गुहामेकां
प्रविवेश। तदानीं दायूद् तस्य लोकाश्च तस्या एव गुहायाः प्रान्तःस्थान
उपविष्टा आसन्। अपरं दायूदो मनुजास्तं जगदुः पश्य मया तव ४
रिपुस्तव हस्ते समर्पयिष्यते तदा त्वं यद् इच्छसि तदेव तं प्रति करि-
ष्यसीति वाचं परमेश्वरो यं दिवसमधि त्वाम् अवदत्, स दिवस एष
एव। ततो दायूद् उत्थाय रहः शौलस्य वसनाग्रं चिच्छेद। किन्तु ततः ५
परं शौलस्य वसनाग्रच्छेदनात् दायूदो ऽन्तःकरणं विद्धं बभूव। ततः ६
स स्वलोकान् जगाद, परमेश्वरेणाभिषिक्तं मत्प्रभुं प्रत्येतत्कर्म्मकरणाद्
अर्थतस्तस्य विरुद्धं करविस्तारणात् परमेश्वरो मां रक्षतु यतः स
परमेश्वरेणाभिषिक्तः पुमान्। अपरं दायूद् वाक्यै र्निजदासान् ७
तर्जयन् शौलम् आक्रमितुं प्रतिषिद्धवान्। अनन्तरं शौलो गुहातो
निर्गत्य मार्गेण जगाम।

तदा दायूद् उत्थाय गुहातो निर्गत्य हे मम प्रभो राजन् इत्युक्त्वा ८
शौलमाजुहाव ततः शौलेन पश्चात् परावृत्य दृष्टे दायूद् भूमौ पतन्
प्रणनाम। अपरं दायूद् शौलं जगाद, दायूद् तव हिंसां चेष्टत इति ९
लौकिकीं वाचं त्वं कुतः शृणोषि? पश्याद्य परमेश्वरो गुहाया मध्ये त्वां १०
मम करे समार्पयत् तदा केनचित् त्वां हन्तुम् आदिष्टोऽप्यहं त्वाम्
अनुकम्प्य कथितवान् निजप्रभोः प्रतिकूलं नाहं करं विस्तारयिष्यामीति
यतः स परमेश्वरेणाभिषिक्तः पुमान्। हे मम तात पश्य, मम करे ११
स्थितं तवैतदुत्तरीयवसनाग्रं निरीक्षस्व। मया तवोत्तरीयवसनाग्रस्य
छेदनसमये त्वं न हत एतेनाहं हिंसां द्रोहं वा न समाचरामि तव
विरुद्धं पापं वा न करोमीति त्वया विविच्य दृश्यतां तथापि त्वं मम
प्राणनाशाय मां मृगयसे। परमेश्वरो मां त्वाञ्चाधि विचारयिष्यति १२
मम कृते तुभ्यं समुचितं दास्यति, किन्त्वहं त्वयि करं नार्पयिष्यामि।

क्रिया तु या भवेत् दुष्टा सा दुष्टेन विधीयतां। १३

इति प्राचीनैरुक्ता नीतिकथा, अतोऽहं स्वकरेण त्वां न स्प्रक्ष्यामि।
इस्रायेलो राजा कस्य पश्चाद् वहि र्गतः? भवान् कं धर्त्तुं धावति? १४
किं मृतं कुक्कुरं वा मशकमेकं? परमेश्वरो विचारयिता भवन् १५

मां त्वाञ्चाधि विचारयिष्यति, स मां प्रति दृष्टिं विधाय मम पक्षपाती
भवन् तव करात् मामुद्धारयिष्यति।
१६ शौलेन समं दायूदस्तदालापे समाप्ते शौलः पप्रच्छ हे मम पुत्त्र
१७ दायूद्, किमयं तव स्वरः? इत्युक्त्वा शौल उच्चै रुरोद दायूदञ्च जगाद,
मत्तोपि त्वं धार्म्मिकोऽसि यतो मयापकृतोऽपि त्वं माम् उपकृतवान्।
१८ परमेश्वरेण मयि तव करे समर्पितेऽपि त्वं मां नावधीरनेनाद्य मां
१९ प्रति तव हिताचरणं त्वया प्रकाशितं। यतो मनुष्यः स्वरिपुं प्राप्य
किं तं कुशलेन विसर्जति? अद्य मां प्रति यत् कृतं तत्कारणात् परमे-
२० श्वरस्तव समुचितं मङ्गलं करोतु। पश्य त्वं राजा भविष्यसि तव हस्ते
२१ इस्रायेल्वंशस्य राज्यं स्थिरं स्थास्यति च तदहं जानामि। अतस्त्वं
मम पश्चात् मम वंशं न लोप्स्यसि मम पितृवंशादपि मम नाम
२२ नोच्छेत्स्यसि परमेश्वरस्य नाम गृह्णन् इमं शपथं कुरु। ततो दायूद्
शौलस्य समीपे शपथं चकार। अनन्तरं शौलः स्वगृहं जगाम,
किन्तु दायूद् तस्य लोकाश्च दुराक्रमस्थानम् आश्रितवन्तः।

---

२५ पञ्चविंशोऽध्यायः।

१ शिमूयेलस्य मरणं २ नावलस्य तस्य भार्य्याया अवीगयिलायाश्च कथनं ४ नावलं प्रति दायूदो दूतप्रेषणं १० तस्य निन्दाकारणात् नावलं हन्तुं दायूदः सज्जीभवनं १४ अवीगयिलायै दासस्य वार्त्तादानं १८ द्रव्यादि समासाद्य दायूदः समीपम् अवीगयिलाया गमनं २२ दायूदा तस्या अनुग्रहणं ३६ नावलस्य मरणं ३९ दायूदा समम् अवीगयिलाया विवाहो दायूदो भार्य्याया मीखलाया अन्यपुरुषाय दानं।

१ तदानीं शिमूयेलो ममार तत इस्रायेलः सर्व्वे वंशा मिलित्वा तम-
ध्यनुशुशुचू रामतस्थे तस्य निवेशने तस्य श्मशानं चक्रुश्च। अनन्तरं दायूद्
उत्थाय पारणाख्यं निर्जनप्रदेशं जगाम।
२ मायोनप्रदेशनिवासी कर्म्मिलाधिकारी महान् एको मनुष्य आसीत्,
३ तस्य त्रीणि सहस्राणि मेषाः सहस्रमेकं छागाश्चासन्। तस्य नाम
नावल इति तस्य जायाया नाम चावीगयिलेति सा नारी सुबुद्धिमती
सुवदना चासीत् किन्तु स पुमान् निष्ठुरो दुर्वृत्तश्च स कालेववंशज
आसीत् स कर्म्मिले निजमेषाणां लोमानि कर्त्तयितुं प्रावर्त्तत।
४ अपरं नावलो निजमेषाणां लोमानि कर्त्तयिष्यतीति वार्त्तां प्रान्तरमध्ये

दायूद् श्रुत्वा निजदशयूनः प्रेषयामास तान् जगाद च, यूयं कर्म्मिलं ५
नावलस्य समीपं गत्वा मम नाम्ना तस्य कल्याणं पृच्छत, तस्मै वाच-
मिमाञ्च कथयत, भवान् चिरञ्जीवी भवतु भवतो भवत्परिवारस्य ६
भवत्सर्व्वस्वस्य च सर्व्वदा मङ्गलं भूयात्। भवतो लोमच्छेदका आ- ७
गता इति मयाश्रावि, परन्तु भवतो मेषपालका यावत्कालं कर्म्मिले
आसन् तावद् अस्माभिः सार्द्धम् आसन् ते चास्माभि र्न क्लेशिता-
स्तेषां किञ्चन वा न हारितं। भवान् स्वयूनः पृच्छतु ते तदेव वदिष्यन्ति। ८
तस्मात् तरुणा इमे भवतानुगृह्यन्तां यतो वयं शुभदिवस आगच्छाम,
अतो भवतः करे यदस्ति तस्य किञ्चित् निजदासेभ्यो निजसुताय दायूदे
च दीयतां। ततो दायूदो युवानो गत्वा दायूदो नाम्ना नावलसमीपे ९
तानि वाक्यानि निवेदयित्वा नीरवा बभूवुः।

अनन्तरं नावलो दायूदो दासान् अवदत् दायूद् कः? यिशयस्य १०
पुत्रो वा कः? समयेऽस्मिन् बहवः किङ्कराः स्वं स्वं स्वामिनं विहाय
बम्भ्रम्यन्ते। इदानीम् अहं किं मम पूपान् तोयानि मदीयलोमकर्त्त- ११
कानां कृते हतानां पशूनां मांसानि च गृह्णन् अज्ञातस्थानाद् आगन्तुक-
लोकेभ्यो दास्यामि? ततो दायूदो युवानो निजपथेन परावृत्य तत्समी- १२
पमागत्य तं वृत्तान्तं तस्मै कथयामासुः। ततो दायूद् निजलोकान् १३
अवदत्, यूयं सर्व्वे स्वखड्गान् बध्नीत, ततस्ते सर्व्वे स्वं स्वं खड्गं बबन्धु र्दायू-
दपि निजं खड्गं बबन्ध। अनन्तरं प्रायेण चतुःशतं लोका दायूदम्
अनुजग्मु र्द्रव्यादिरक्षार्थञ्च द्वे शते लोकास्तस्थुः।

तस्मिन् काले एकस्तरुणो दासो नावलस्य भार्य्यायै अवीगयिलायै १४
कथयामास, पश्य दायूद् अस्माकं प्रभुं नमस्कर्त्तुं प्रान्तराद् दूतान्
प्रहितवान् ततोऽस्माकं प्रभुस्तान् अभिगर्जितवान्। ते मनुजा अस्माकं १५
महोपकारिण आसन् प्रान्तरेऽस्माकम् अवस्थितिकाले यावत् तैः साकम्
अतिष्ठाम तावद् वयं तै र्न क्लेशिता अस्माकं किमपि वा न हारितं।
वयं मेषान् चारयन्तस्तैः समं यावत्कालं न्यवसाम तावत् ते दिवानि- १६
शम् अस्माकं चतुर्दिक्षु प्राचीरस्वरूपा आसन्। अत इदानीं तव किं १७
कर्त्तव्यं तद् आलोच्य बुध्यतां यतोऽस्माकं प्रभोस्तस्य सकलपरिजनाना-
ञ्चामङ्गलं निश्चितमेव स चैतादृशो दुश्चरित्रो यत् केनापि तं सम्भाषितुं
न शक्यते।

तदनन्तरम् अवीगयिला तूर्णं द्वे शते पूपान् द्राक्षारसपूर्णौ द्वे कुतू १८

पञ्च दग्धा मेषाः पञ्चद्रोणा भृष्टकलाया एकं शतं शुष्कद्राक्षाफलगुच्छा
द्वे शते शुष्कोडुम्बरगुच्छा एतानि सर्व्वाण्यादाय गर्द्दभानामुपरि निदधे।
१९ अपरं निजदासान् अवदत्, यूयं मदग्रेऽग्रे चलत पश्यताहं युष्माकं
पश्चात् पश्चाद् यामि किन्त्वेतत् सा निजस्वामिनं नावलं नाज्ञापयत्।
२० अनन्तरं सा गर्द्दभमारुह्य पर्व्वतस्य रहोवर्त्मना यातवती तदन्तरे
दायूद् तस्य लोकाश्च ममाभिमुखम् आगच्छन्ति तस्मात् ते मया साक्षात्
२१ कर्त्तव्या इति ददर्श। पूर्व्वं दायूद् कथयामास, एतस्य जनस्य प्रान्तर-
स्थितं सकलं वस्तु रक्षितवानहं तस्य सर्व्वेषां द्रव्याणां किञ्चिदपि न
हारितमभूत् कर्म्मेदं मम वृथा जातं स उपकारस्य विनिमयेन ममा-
२२ पकारं चकार। यद्यहं सूर्य्योदयपर्य्यन्तं तस्य कृत्स्नपरिवारस्यैकमपि
पुमांसम् अवशेषयेयं तर्हीश्वरो दायूदः शत्रुभ्योऽमुकं तदधिकञ्च फलं
२३ ददातु। अनन्तरम् अवीगयिला दायूदं वीक्ष्य गर्द्दभात् तूर्णमवरुह्य
२४ दायूदः सम्मुखे भूमौ पतित्वा प्रणनाम। अपरं तस्य चरणयोः पतित्वा
कथयामास हे मम प्रभो, अयमपराधो मम जातः, निजदासीं स्वकर्ण-
२५ गोचरे कथां कथयितुम् अनुजानातु निजदास्या वाचं शृणोतु। भवान्
तं दुर्वृत्तपुरुषं नावलं दृष्ट्वाय न मन्यतां, यादृशं तस्य नाम तादृशस्तस्य
स्वभावः। नावलो (मूर्ख) इति तस्य नाम मूर्खता च तस्यान्तरे विद्यते।
२६ किन्तु भवत इयं दासी मत्प्रभुणा प्रेरितान् यूनो नापश्यत्। तथापि
हे मम प्रभो, परमेश्वरस्यामरताया भवतः प्राणानाञ्च शपथं कृत्वाऽहं
वदामि शोणितपातार्थम् आगमनात् निजकरेणापमानस्य प्रतिकर-
णाच्च परमेश्वरो भवन्तं निवर्त्तयति, किन्तु भवतो रिपूणां मत्प्रभो-
२७ रहितैषिणाञ्च दशा नावलस्य दशेव भवतु। मत्प्रभोः समीपे भवतो
दास्या आनीतम् इदम् उपायनं भवतोऽनुगामिभ्यो युवभ्यो दीयतां
२८ भवतो दास्या अपराधः क्षम्यताञ्च। परमेश्वरो मत्प्रभो वंशं चिरस्थायिनं
करिष्यति यतो मत्प्रभुः परमेश्वरस्य रिपुभिः सह योत्स्यति यावज्जीवनं
२९ निर्दोषो भविष्यति च। मनुजेनोत्थाय भवतस्ताडने प्राणनाशार्थकयत्ने
च कृते मत्प्रभोः प्राणा भवतः प्रभुणा परमेश्वरेण स्वसमीपे जीवन-
सम्पुटके बद्धा गोपिष्यन्ते, किन्तु भवतो रिपूणां प्राणा अश्मक्षेपकगुणेन
३० परिक्षिप्तप्रस्तरा इव भविष्यन्ति। परमेश्वरेण मत्प्रभुमधि यद्यत् प्रतिश्रुतं
तस्मिन् मङ्गले साधिते सति यदा भवान् इस्रायेल्वंशानां राज्ये तेन
३१ नियोक्ष्यते, तदानीम् अकारणशोणितपातस्य स्वकरेण समुचितदानस्य

च फलस्वरूपौ शोकमनस्तापौ मत्प्रभुणा न भोक्तव्यौ । किन्तु यदा
परमेश्वरो मम प्रभो र्मङ्गलं करिष्यति तदानीं भवत एतां दासीं
स्मरिष्यति भवान्।

अनन्तरं दायूद् अबीगयिलां जगाद त्वमद्य मां साक्षात् कर्त्तुं येन ३१
प्रहिता स इस्रायेलः प्रभुः परमेश्वरो धन्यः । अपरं तव विवेचना ३२
धन्या त्वमपि धन्या यतः शोणितपातार्थम् आगमनात् निजकरेण समु-
चितफलदानाचाहम् अद्य त्वयैव रक्षितः। तव हिंसनात् मन्निवर्त्तको ३४
य इस्रायेलः प्रभुः परमेश्वरस्तस्यामरतायाः शपथं कृत्वा कथयामि.यदि
त्वं मां साक्षात् कर्त्तुं तूर्णं नागमिष्यस्तर्हि नाबलस्य गेहे एकोपि पुमान्
प्रभातं यावद् नावाशेक्ष्यत । अनन्तरं दायूद् तयानीतान्युपायन- ३५
द्रव्याणि तस्याः कराद् गृहीत्वा तां जगाद त्वं कुशलेन स्वनिवेशनं याहि
पश्य तव कथायां मनो निधायाहं त्वाम् अनुगृहीतवान्।

अनन्तरम् अबीगयिला यदा नाबलस्य समीपम् आगच्छत् तदा ३६
राजभोज्यवत् तस्य भोज्ये सति स हृष्टमना अतीवमत्तश्चासीत् तस्मात्
सा सूर्य्योदयात् पूर्व्वं तस्या घटनायाः काश्चनापि वार्त्तां तं न जगाद।
प्रातःकाले नाबलस्य मत्ततायां निवृत्तायां तस्य जाया तं तत्सर्व्ववृत्तान्तं ३७
ज्ञापयामास, ततस्तस्यान्तरस्थं हृदयं मृतकल्पं देहश्च पाषाणवद्
बभूव। इतो दशदिनेभ्यः परं परमेश्वरेणाहतो नाबलो ममार। ३८

अनन्तरं नाबलो मृत इति वार्त्तां निशम्य दायूद् कथयामास परमे- ३९
श्वरो धन्यो यतः स नाबलेन कृतस्य ममापमानस्य समुचितं फलं ददौ
निजदासञ्च कुकर्म्मणो ररक्ष। नाबलस्य दुष्टतायाः समुचितं फलं तेनैव
नाबलाय दत्तं। अनन्तरं दायूद् अबीगयिलां विवोढुम् इच्छन् तां
सम्भाषितुं दूतान् प्रेषयामास। ततो दायूदो दासाः कर्म्मिलेऽबीगयि- ४०
लायाः समीपं गत्वा तां जगदुः, दायूद् त्वां विवोढुम् इच्छन् तव
समीपम् अस्मान् प्रहितवान्। ततः सा प्रोत्थाय भूमिष्ठा सती व्याज- ४१
हार पश्यत भवतां दासी मम प्रभो र्दासानां पादप्रक्षालिका दास्येव
भवतु । अनन्तरम् अबीगयिला त्वरितमुत्थाय गर्द्दभमारुह्य निज- ४२
पश्चानुचारिणीभिः समं दायूदो दूतानां पश्चाद् गत्वा तस्य जाया बभूव।
तां विना दायूद् यिष्रियेलीयाम् अहिनोयमाञ्च व्यूढवान् ततो द्वे इमे ४३
तस्य जाये बभूवतुः। किन्तु शौलो मीखलानामिकां निजसुतां दायूदो ४४
जायां गृहीत्वा गल्लीमनिवासिनो लयिशस्य पुत्राय पल्टये दत्तवान्।

२६ षड्विंशोऽध्यायः।

१ दायूदः पश्चात् शौलस्य हखीलापर्व्वताय गमनं ५ शौलात् शूलं पानपात्रञ्चापहृत्य तस्य बधाकरणं १२ अब्नेरं प्रति दायूदस्तिरस्कारः २१ दायूदं प्रति शौलस्य कथनं।

१ अनन्तरं सीफीयलोका गिवियायां शौलस्य समीपं गत्वा कथयामासुः
२ दायूद् किं यिशीमोनस्य सम्मुखे हखीलापर्व्वते छन्नो न तिष्ठति? ततः
शौल उत्थायेस्रायेल्वंशस्य त्रीणि सहस्राण्यभिरुचितलोकान् सङ्गिनः
३ कृत्वा दायूदं गवेषयितुं सीफाख्यं निर्जनप्रदेशं जगाम। शौलः पथ-
पार्श्वीये यिशीमोनसम्मुखस्थे हखीलापर्व्वते शिविरं स्थापयामास।
तस्मिन् काले दायूद् निर्जनप्रदेशे न्यवसत्। अपरं शौलो मम पश्चात्
४ निर्जनप्रदेशम् आगच्छतीत्यनुमाय दायूद् चारान् प्रेषयित्वा शौलो
निश्चितमागतवान् इति ज्ञातवान्।
५ अनन्तरं दायूद् उत्थाय शौलस्य शिविरस्थानम् आगत्य शौलस्य
तस्य सेनापते र्नेरसुतस्याब्नेरस्य च शयनस्थानं निरीक्षितवान्। तदानीं
शौलो रथप्राकारमध्येऽशेत मनुजाश्च तस्य चतुर्दिक्षु समावृता आसन्।
६ अनन्तरं दायूद् हित्तीयाहीमेलकं सिरूयायाः सुतं योयाबस्य भ्रातरम्
अबीशयञ्चोक्तवान् शिविरे शौलस्य समीपं मया साकं को यास्यति?
७ ततोऽबीशयः प्रत्युवाच, अहं त्वया सह यास्यामि। अनन्तरं रजन्यां
दायूद् अबीशयश्च लोकनिवहस्य समीपम् आगमतां। तदानीं शौलो
रथप्राकारस्य मध्ये शयानो निद्रितश्चास्ते तस्य शिरसः समीपे तस्य शूलं
भूमिं विद्ध्वा विद्यते, अपरम् अब्नेरः सर्व्वे लोकाश्च चतुर्दिक्षु शयानाः
८ सन्तीति ताभ्याम् अदर्शि। तदानीम् अबीशयो दायदं बभाषे, ईश्व-
रोऽद्य भवतो रिपुं भवतो हस्ते समार्पयत्। अत इदानीं निवेदयामि,
एकेन शूलाघातेन भूम्या साकं तं वेद्धुम् आदिशतु, नाहमेनं वारद्वयम्
९ आहनिष्यामि। ततो दायूद् अबीशयं जगाद एनं मा विनाशय पर-
मेश्वरेणाभिषिक्तस्य प्रतिकूलं हस्तं प्रसार्य्य को निरपराधी भविष्यति?
१० परमेश्वरस्यामरतायाः शपथं कृत्वाऽहं वदामि परमेश्वरस्तम् आहनि-
ष्यति, यद्वा तस्य चरमदिन उपस्थिते स मरिष्यति यद्वा स संग्रामं गतो
११ घानिष्यते। किन्तु परमेश्वरेणाभिषिक्तस्य विरुद्धं मत्करप्रसारणात्
परमेश्वरो मां रक्षतु। त्वं तस्य शिरःसमीपस्थे शूलजलपात्रे गृही-
१२ त्वागच्छ, आवां यावः। अनन्तरं शौलस्य शिरःसमीपात् तस्य शूलजल-

पात्रयो र्दायूदा गृहीतयोस्तौ प्रतस्थाते, तत्कर्म्म केनापि न दृष्टं न वा
ज्ञातं कोपि न जागरितवान् सर्व्वे निद्राणास्तस्थु र्यतस्ते परमेश्वरेण
घोरं निद्रापिताः।

अनन्तरं दायूद् पारं गत्वा तदन्यपर्व्वतस्य शृङ्गे दूरे तस्थौ तयोर्मध्ये १३
बहुस्थानं व्यवहितमासीत्। तदानीं दायूद् जनतां नेरस्य सुतम् १४
अब्नेरञ्चाहूय कथितवान् हे अब्नेर त्वं कुत उत्तरं न ददासि? ततो
ऽब्नेरः प्रत्यवदत् कस्त्वं यद् राजानम् आह्वयसि? अनन्तरं दायूद् १५
अब्नेरं जगाद त्वं किं वीरो न भवसि? इस्रायेल्वंशे कस्तव सदृशः?
तर्हि त्वं निजप्रभुं राजानं कुतो न रक्षसि? तव प्रभुं राजानं विना-
शयितुमेको जन आगमत्। तवेदं कर्म्म न भद्रं। परमेश्वरस्यामरतायाः १६
शपथं कृत्वाऽहं वदामि, यूयं बधदण्डार्हा यतो यूयं परमेश्वरेणाभिषिक्तं
निजप्रभुं नारक्षत। नृपस्य शिरोनिकटस्थे शूलजलपात्रे कुत्र तत्
पश्य। तदा शौलो दायूदः स्वरं विज्ञाय जगाद, हे मम पुत्त्र दायूद् १७
किमयं तव स्वरः? ततो दायूद् कथयामास सत्यं प्रभो राजन् ममैव
स्वरोऽयं। सोऽपरमपि जगाद मत्प्रभु र्निजदासस्य पश्चात् पश्चात् १८
कुतो धावति? किमहं कृतवान्? मम को दोषः? इदानीं विनयेऽहं १९
हे मम प्रभो राजन् निजदासस्य वचांसि शृणोतु, भवान् मां क्लेष्टुं
यदि परमेश्वरेण प्रवर्त्तितस्तर्हि स एकं नैवेद्यं गृह्णातु। अपरं यदि
भवान् मनुष्यैः प्रवर्त्तितस्तर्हि ते परमेश्वरस्य साक्षाद् अभिशप्यन्तां
यतस्त्वं गच्छन् इतरदेवान् सेवस्वेति वदन्तस्तेऽद्य परमेश्वरेणाधिकृतानां
लोकानां सङ्घात् मां दवयन्ति। यद्यपि पर्व्वते धावन्तं तित्तिरपक्षिण- २०
मिव मशकैकस्वरूपकं मां मृगयितुम् इस्रायेलो राजा वहिरागच्छत्,
तथापि मम शोणितं परमेश्वरस्य दृष्टे दूरस्थभूम्यां न पततु।

ततः शौलोऽवदत् हे मम पुत्त्र दायूद्, अहं पापं कृतवान्, त्वं २१
परावर्त्तस्व। तवाहितं पुन र्न करिष्यामि, यतस्त्वमद्य मम प्राणान्
बहुमूल्यान् अमन्यथाः। अहं वातुल इव कर्म्माकार्षं महाभ्रान्तिमांश्चा-
भवं। दायूद् प्रत्यवदत् इदं पश्य नृपस्य शूलं तरुणानाम् एकः पारमा- २२
गत्य शूलमिदं गृहीत्वा यातु। परमेश्वर एकैकस्मै जनाय तद्धर्म्मविश्व- २३
स्ततयोः फलं ददातु। सोद्य त्वां मम करे समर्पितवान् किन्त्वहं परमे-
श्वरेणाभिषिक्तस्य विरुद्धं करं प्रसारयितुं नाङ्गीकृतवान्। पश्याद्याहं २४
यथा भवतः प्राणान् बहुमूल्यान् अमन्ये तथा परमेश्वरो मम प्राणान्

२५ बहुमूल्यान् मत्वा समस्तक्लेशात् माम् उद्धारयिष्यति। अनन्तरं शौलो
दायूदं बभाषे, हे मम पुत्त्र दायूद् त्वं धन्यः, त्वं कर्म्मशूरः कृतकृत्यश्च
भविष्यसि। अनन्तरं दायूद् निजपथेन जगाम शौलोऽपि पुनः स्वस्थानं
जगाम।

२७ सप्तविंशोऽध्यायः।

१ पिलेष्टीयानां देशाय दायूदो गमनं ५ सिक्लगनगरे दायूदो वसनं ७ अन्यदेशोपरि दायूद आक्रमणं।

१ अनन्तरं दायूद् मनसा चिन्तितवान् इत्थं कस्मिंश्चिद् दिनेऽहं
शौलस्य करतो विनंक्ष्यामि पिलेष्टीयानां देशाय पलायनं विना ममा-
परः कश्चिदुपायो नास्ति। तथा कृते शौल इस्रायेलः प्रदेशे मम गवेषणं
वृथा ज्ञात्वा निराशो भविष्यति, अपरं तस्य हस्तादहं रक्षां प्राप्स्यामि।
२ अनन्तरं दायूद् तस्य षट्शतानि सङ्गिनश्चोत्थाय मायोकस्य पुत्त्रस्या-
३ खीशाख्यस्य गातीयनृपस्य समीपं जग्मुः। अपरं दायूद् तस्य सर्व्वे
लोकाश्च सपरिवारा गात आखीशेन साकम् उषितवन्तः, विशेषतो
दायूद् यिष्रियेलीयाहीनोयमा मृतस्य नावलस्य जाया कर्म्मिलीया-
४ वीगयिला चैताभ्यां जायाभ्यां समं न्यवसत्। अनन्तरं दायूद् पलाय्य
गातं गतवानिति वार्त्तां शौलो निशम्य पुनस्तं न गवेषयामास।
५ अनन्तरं दायूद् आखीशं जगाद, यद्यहं भवतो दृष्ट्यानुगृहीतोऽस्मि
तर्हि जनपदस्यैकस्मिन् नगरे मम वासार्थं स्थानं ददातु यतो भवतो
६ दासो भवता समं राजधान्यां कुतो निवत्स्यति? तत आखीशस्तस्मिन्
दिने सिक्लगनगरं तस्मै दत्तवान् अतः कारणात् तन्नगरेऽद्यापि यिहूदीय-
राजवर्गस्याधिकारोऽस्ति।
७ तस्मिन् पिलेष्टीयानां देशे दायूद् चतुर्मासाधिकवत्सरैकप्रमाणं
८ कालम् उवास। तस्मिन् समये दायूद् तदीयलोकाश्च गत्वा गिशू-
रीयगेषरीयामालेकीयान् लोकान् आचक्रमिरे यतः पूर्व्वं त एव शूरं
९ मिसरञ्च यावत् तत्र देशे न्यूषुः। दायूद् यं जनपदम् आक्राम्यत्
तन्मध्ये जीवन्तं कमपि पुरुषं स्त्रियं वा नावशेषयत्, अपरं मेष-
गोगर्द्दभोष्ट्रान् वस्त्राणि चापहृत्याखीशस्य समीपं परावृत्यागच्छत्।
१० अनन्तरं युष्माभिरद्य को देश आक्रान्त इत्याखीशेन पृष्टे दायूद्

कथयामास, दाक्षिणात्या यिहूदीयानां यिरह्मेलीयानां केनीयानाञ्च
देशाः। किन्तु दायूद् एतादृशं कर्म्म कुरुत इति वार्त्तास्मान् अधि ११
केनापि न प्रकाश्यताम् इति चिन्तयन् दायूद् गाते वार्त्तानेतारं
कञ्चन पुरुषं स्त्रियं वा जीवन्तं नावाशेषयत्; स यावत् पिलेष्टीयानां
देशे प्रावसत् तावद् एतादृशं व्यवहृतवान्। अनन्तरम् आखीशो १२
दायूदि व्यश्वसत्, यतः सोऽचिन्तयत् दायूद् निजलोकस्येस्रायेल्वंशस्य
समीपे स्वं घृणास्पदं कृतवान् अतो हेतोः सर्व्वदा मम दासः स्थास्यति।

---

२८ अष्टाविंशोऽध्यायः।

१ आखीशस्य दायूदि विश्वसनं ३ शिमूयेलस्य मरणं गणिभूतज्ञानां दूरीकरणं ४ पिलेष्टीयेभ्यः शौलस्य भीतत्वं ७ भूतज्ञायाः स्त्रियाः समीपे शौलस्य गमनं शिमूयेलम् उत्थापयितुम् आज्ञादानं १५ शौलं प्रति शिमूयेलस्य कथनं तेन कथनेन शौलस्य त्रासः।

अनन्तरं पिलेष्टीया इस्रायेल्वंशेन समं योद्धुं सैन्यानि संजगृहुः। १
आखीशस्तदा दायूदं जगाद त्वया तव मनुजैश्च युद्धाय मया समं
गन्तव्यमिति ज्ञायतां। ततो दायूद् आखीशं बभाषे निजदासेन यद्यत् २
कर्म्म साधयिष्यते तद् भवता ज्ञास्यते। आखीशो दायूदम् उक्तवान्
अहं त्वां नित्यं मच्छिरोरक्षणपदे नियोक्ष्ये।
तत्कालात् पूर्व्वं शिमूयेले मृत इस्रायेलीयलोकास्तदर्थं शोकं कृत्वा ३
रामतनाम्नि तस्य नगरे तस्य श्मशानं चक्रुः। अपरं शौलो भूतज्ञान्
दैवज्ञांश्च लोकान् देशाद् दूरीकृतवान्।
अनन्तरं पिलेष्टीया एकत्र मिलित्वागत्य शूनेमे शिविरं स्थापयाञ्चक्रुः ४
शौलोऽपि सर्व्वान् इस्रायेल्लोकान् संगृह्य गिल्बोये शिविरं स्थापया-
मास। किन्तु शौलः पिलेष्टीयानां सैन्यानि निरीक्ष्य विभयाञ्चकार ५
तस्य हृद् अतीव चकम्पे च। ततः स परमेश्वरं पप्रच्छ, किन्तु परमेश्वरः ६
स्वप्नेन वा ऊरीमेन वा भविष्यद्वादिभिः किञ्चनोत्तरं तस्मै न ददौ।
ततः शौलो निजभृत्यान् आज्ञापयामास यूयं भूतज्ञां स्त्रियमेकां ७
गवेषयत तस्याः समीपं गत्वाहं तया भावि विविदिषिष्यामि। अनन्तरं
तस्य भृत्या ऊचुः पश्य ऐन्दोरे भूतज्ञा योषिदेका विद्यते। ततः शौल- ८
श्छद्मवेशार्थम् इतरवसनानि परिधायापरौ द्वौ जनौ सङ्गिनावादाय

याञ्चाञ्चकार। अपरं रजन्यां तस्या योषितः समीप उपस्थाय बभाषे
अहं विनये त्वं मत्कृते भौतिकं मन्त्रं पठ यस्य नाम मया कथ्यते
९ तम् उत्थाप्यानय च। ततः सा नारी तमुक्तवती पश्य शौलो भूतज्ञान्
देवज्ञांश्च देशमध्याद् उच्छिन्नवान् तेषां प्रातिकूल्येन यदिदं व्यवहृत-
वान् तत् त्वं जानासि। त्वम् इदानीं मां घातयितुं मम प्राणानां विरुद्धं
१० कुत उन्माथं योजयसि? ततः शौलः परमेश्वरस्य नाम गृहीत्वा
तस्याः समीपे शपथं कुर्व्वन् जगाद, परमेश्वरो यद्यमरो भवेत् तर्हि
११ कार्य्येऽस्मिन् तव काचिदपि विपद् न घटिष्यते। तदानीं सा योषित्
पप्रच्छ अहं तव समीपं कमुत्थाप्यानयामि? ततः स उक्तवान् शिमू-
१२ येलमुत्थाप्यानय। अनन्तरं तया योषिता शिमूयेले दृष्ट उच्चैः शब्दं कृत्वा
१३ शौल उक्तः, त्वं शौलः, कुतो मां प्रतारितवान्? राजा जगाद मा
भैषीः, त्वया किं दृष्टं? सावदत्, अहं विचारयितारं भूमित उत्तिष्ठ-
१४ न्तम् अदर्शं। शौलः पप्रच्छ, तस्याकारः कीदृशः? सावदत्, एकः स्थविरो
मानुष उत्तिष्ठति स आप्रपदीनेनाच्छादित आस्ते। ततः स शिमूयेल
एव इति विज्ञाय शौलो भूमिष्ठः सन् प्रणनाम।
१५ अपरं शिमूयेलः शौलं पृष्टवान् त्वं कुतो माम् उत्थापयन् क्लिश्नासि?
ततः शौलोऽवदत् अहम् अतीवोद्विग्नोऽस्मि, यतः पिलेष्टीया मया
सह युध्यन्ति, ईश्वरोऽपि मामत्यजद् भविष्यद्वादिभिः स्वप्नै र्वा मह्यं
किञ्चनोत्तरं न ददाति, अतो हेतो र्मया किं कर्त्तव्यं तद् भवान् यन्मां
१६ वदेत् तदर्थमहं भवन्तम् आहूतवान्। शिमूयेलो ऽवदत् परमेश्वरस्त्वां
१७ परित्यज्य यदि तव रिपु र्जातस्तर्हि मां कुतः पृच्छसि? परमेश्वरो
मया यदवदत् तदेव कृतवान् स तव कराद् राज्यम् अपहृत्य तव समी-
१८ पवासिने दायूदे दत्तवान्। यतस्त्वं परमेश्वरस्य वचनम् अवमत्यामा-
लेकीयलोकान् प्रति तस्य प्रचण्डकोपं सफलं न कृतवान् एतत्कारणाद्
१९ अद्य परमेश्वरस्त्वां प्रति कर्म्मैतत् कृतवान्। अपरं त्वया समम्
इस्रायेल्वंशोऽपि परमेश्वरेण पिलेष्टीयानां करे समर्पयिष्यते। श्वस्त्वया
तव पुत्त्रैश्च मम सङ्गिभि र्भवितव्यम् इस्रायेलः सैन्यान्यपि परमेश्वरेण
पिलेष्टीयानां करेषु समर्पयिष्यन्ते।
२० ततः शौलस्तत्क्षणाद् भूमौ दण्डवत् निपपात, अपरं शिमूयेलस्य वाचः
श्रुत्वातीव भीतो बलहीनश्च बभूव, यतः स गतं कृत्स्नं दिवारात्रं
२१ किमपि न भुक्तवान्। अनन्तरं सा नारी शौलस्य समीपमागत्य तम-

तोव व्याकुलं वीक्ष्य बभाषे, पश्य भवतो दासीयमहं भवत आज्ञां
गृहीत्वा प्राणपणेन भवदुक्ते वचसि मनो न्यदधे। अतो विनयेऽहम् २१
अधुना भवतो दास्या वचो भवतापि गृह्यतां। भवतः सम्मुखे किञ्चिद्
भक्ष्यम् आनयेऽहं ततो यात्राकरणार्थं भवतः शक्ति र्यद् भवेत् तत्कृते
तद् भुङ्क्तां। किन्तु सोऽनुररीकुर्व्वन् जगाद, नाहं भोक्ष्ये। अनन्तरं २३
सा नारी तस्य भृत्याश्च बहु विनीतवन्तस्ततः स तेषां वाक्यानि गृहीत्वा
भूमित उत्थाय खट्वायाम् उपविवेश तदानीं तस्या गृहे यः पुष्ट- २४
गोवत्स आसीत् सा तं तूर्णं मारयित्वा गोधूमचूर्णानि गृहीत्वा
मर्दयित्वा किण्वशून्यपूपान् आसाद्य शौलस्य तस्य भृत्यानाञ्च सम्मुखम् २५
आनिनाय ते च भुक्तवन्तः। ततस्ते तस्यां रजन्यामुत्थाय यात्रां चक्रिरे।

---

२९ ऊनत्रिंशोऽध्यायः।

१ दायूदो युद्धाय गमनं पिलेष्टीयन्टपवर्गस्यासन्तुष्टिः ६ दायूदं प्रशंस्याखीशस्य विसर्जनं।

तस्मिन् काले पिलेष्टीयाः स्वेषां कृत्स्नं सेनागणम् अफेके संजगृहुः। १
अपरम् इस्रायेलीयमनुजा यिष्रियेलस्थस्य प्रस्रवणस्य समीपे शिविरं
स्थापयामासुः। अनन्तरं पिलेष्टीयानाम् अधिपतयः शतं शतं सहस्रं २
सहस्रं सैन्यान्यानीयाजग्मुस्ततः सेनानां पश्चाद् आखीशेन साकं दायूद्
तस्य लोकाश्चागताः। ततः पिलेष्टीयानाम् अधिपतयः पप्रच्छुः, इमे ३
इब्रीयमनुजा अत्र किं कुर्व्वन्ति? आखीशः पिलेष्टीयानाम् अधि-
पतीन् प्रत्यवदत्, इस्रायेलीयन्टपस्य शौलस्य दासो दायूद् किमेष
नहि? स वर्षैकं वर्षद्वयं वा मम सन्निधौ प्रवसति, अपरं यद्दिने मम
पक्षो ऽभवत् तदारभ्याद्य यावत् तस्य कोपि दोषो नादर्शि मया।
तेन पिलेष्टीयानाम् अधिपतयस्तस्मै चुक्रुधुः। अपरं पिलेष्टीयानाम् ४
अधिपतयस्तमूचुः, त्वं तं परावर्त्त्य प्रेषय स परावृत्य त्वया निरूपितं
निजस्थानं यातु नास्माभिः साकं युद्धायागच्छतु रणे चास्माकं रिपु र्न
भवतु, यतः स एतेषां मनुजानां शिरांसि विनापरेण केन पारितो-
षिकेन निजप्रभुणा समं सन्धिं करिष्यति? अपरं, ५

शौलेनारिसहस्राणि हतानि समराङ्गने।
दायूदापि विपक्षाणामयुतानि हतानि च॥

इदं गीतं योषितो यमधि समगायन् स दायूद् किमयं नहि?

६ तदानीम् आखीशो दायूदम् आहूय जगाद, परमेश्वरस्यामरतायाः
शपथं कुर्व्वन् अहं वदामि त्वं सरलताम् आचरसि, अपरं सैन्यमध्ये
मया सह तव गमनागमनेऽहं भद्रे मन्ये यतो मम समीपे तवागमनदि-
नमारभ्याद्य यावत् तव कोपि दोषो मया न प्रापि, तथापि नृपवर्ग-
७ स्त्वयि न तुष्यति। अतस्त्वं पिलेष्टीयनृपाणाम् असन्तुष्टिम् अकृत्वा
८ कुशलेन परावृत्य याहि। दायूद् आखीशं प्रतिजगाद, किम् अपराद्धं
मया? यद्दिने भवतः समक्षम् आगच्छं तदारभ्याद्य यावद् भवतो
दासस्य को दोषो भवता प्रापि यन्मत्प्रभो नृपस्य शत्रुभिः समं योद्धुं मया
९ न गन्तव्यं? तत आखीशो दायूदं प्रत्यवदत्, त्वम् ईश्वरस्य दूतैकइव मम
साक्षात् तुष्टिजनक आसे ममायम् आशयः, किन्तु पिलेष्टीयनृपा वदन्ति,
१० अस्माभिः समं तेन रणाय न गन्तव्यं। अतस्त्वं त्वया सहागतास्तव
११ प्रभो दासाश्च प्रत्यूष उत्थायालोके जाते यात्रां कुरुध्वं। ततो दायूद्
तस्य लोकाश्च प्रत्यूष उत्थाय प्रातःकाले पिलेष्टीयानां देशं परावृत्य गताः
पिलेष्टीयाश्च यिष्रियेलं जग्मुः।

---

३० त्रिंशोऽध्यायः।

१ अमालेकीयैः सिक्लगनगरस्य लोठनं ३ तदधि दायूदस्तल्लोकानाञ्च दुःखं ९ अमा-
लेकीयानां पश्चाद्गमनं वार्त्ताप्रापणं १९ रिपूणां वधो लोठितद्रव्याणां पुनर्ग्रहणं
२१ लोठितद्रव्याणां विभजने व्यवस्थास्थिरीकरणं २६ बन्धुसमीपं दायूदो लोठित-
द्रव्याणां प्रेषणं।

१ अनन्तरं दायूद् तस्य लोकाश्च तृतीयदिवसे सिक्लगनगरमुपतस्थुः
किन्तु तदन्तरम् अमालेकीयलोका दक्षिणां दिशं सिक्लगञ्चाक्रम्य सिक्लगं
२ निहत्य वह्निना दाहयामासुः। अपरम् आबालवृद्धवनितमनुजान् न
हत्वा वन्दीकृत्य नीतवन्तः स्वमार्गेण गतवन्तश्च।
३ अनन्तरं दायूद् तदीयलोकाश्च नगरमुपस्थाय नगरं भस्मराशिं स्वेषां
४ नारीसुतदुहितरश्च वन्दीकृत्य दूरं नीता इति ददृशुः। तदानीं दायूद्
५ तस्य लोकाश्च रोदितुं यावच्छक्तास्तावद् उच्चै रुरुदुः। तस्मिन् काले
यिष्रियेलीयाहीनोयमा कर्म्मिलीयावीगयिला च मृतस्य नावलस्य जाया
६ दायूद इमे द्वे भार्य्येऽपि बन्दीत्वं गते। अपरं सर्व्वलोकानां मनांसि
स्वपुत्त्रकन्यानां कृते शोके मग्नानि ततस्ते दायूदं पाषाणाघातेन हन्तुं
कथितवन्तः, तेन दायूद् अतीव व्याकुलो बभूव, किन्तु निजप्रभौ पर-

मेश्वर आत्मानम् आश्वासितवान्। अनन्तरं दायूद् अह्वीमेलकस्य सुतम् ७
अबियाथरम् अवदत्, विनयेऽहं त्वम् एफोदम् अत्रानय। ततोऽबिया-
थरो दायूदः समीपम् एफोदम् आनिनाय। तदानीं दायूद् परमेश्वरं ८
पप्रच्छ, एतस्य सेनानिवहस्य पश्चात् मया किं धावितव्यं? तं प्राप्तुं मया
किं शक्यते? ततः स उक्तास्त्वं तस्य पश्चाद् याहि तं प्राप्तुं शक्ष्यसि सर्व्वा-
ण्युद्धारयिष्यसि च।

अनन्तरं दायूद् तस्य सङ्गिनः षट्शतलोकाश्च गत्वा बिषोराख्य- ९
स्रोतस्वतीतीरं प्रापुः केचिच्च तत्रावशिष्टास्तस्थुः। अपरं दायूद् तस्य १०
सङ्गिनश्चत्वारि शतानि मनुजा रिपूणां पश्चात् जग्मुः किन्तु द्वे शते
लोकाः क्लान्तिकारणाद् बिषोरस्रोतस्वत्याः पारं गन्तुम् अशक्नुवन्तस्त-
स्मिन् स्थानेऽवतस्थिरे। अपरं क्षेत्रमध्ये लोकैरेकस्मिन् मिस्रीयमनुजे ११
प्राप्ते ते तं दायूदः समीपम् आनीय पूपान् खादयामासुः पानीयञ्च पाय-
यामासुः। अपरं स तै र्दत्तम् उडुम्बरगुच्छस्य खण्डमेकं शुष्कद्राक्षाद्वयञ्च १२
भुक्त्वा चेतनां प्राप यतः स त्रीणि दिवारात्राण्यन्नं न भुक्तवान् तोयञ्च
न पीतवान्। अनन्तरं दायूद् तं पृष्टवान् त्वं कस्य मानुषः? कस्माद् १३
आगतोऽसि? स कथितवान् अमालेकीयस्यैकस्य दासो मिस्रीयतरुणो-
ऽहं दिनत्रयं यातं मम प्रभुः पीडितं मां परित्यज्य गतवान्। वयं १४
किरेथीयानां दक्षिणप्रदेशं यिहूदाधीनं कालेबाधीनञ्च दक्षिणप्रदेशम्
आक्रान्तवन्तः सिक्लगनगरं वह्निना दाहितवन्तश्च। अनन्तरं दायूद् १५
तं पप्रच्छ त्वं तस्य निवहस्य समीपं मां नेतुं शक्नोषि? स उक्तवान् त्वं
मां न हनिष्यसि मम प्रभो र्हस्तगतञ्च न करिष्यसि एतद् यदि परमेश्व-
रस्य नाम्ना शपसे तर्हि तस्य संघस्य समीपं त्वां नेष्यामि।

अनन्तरं तेन दायूदि तेषां समीपम् आनीते ते पिलेष्टीयानां यिहू- १६
दीयानाञ्च देशाद् बहुलोठितस्यानयनकारणाद् बहुभूमौ विस्तीर्णाः
सन्तो भुञ्जते पिबन्ति नृत्यन्ति चेति दृष्टं। ततो दायूद् सूर्य्योदयमारभ्य १७
परदिनस्य सन्ध्याकालं यावत् तान् आजघान ततस्तेषां केवलं चत्वारि
शतानि तरुणा उष्ट्रारोहणेन पलायमाना रक्षां प्रापुः, अपरेषाम्
एकोऽपि रक्षां न प्राप। अनन्तरम् अमालेकीया यानि यानि गृहीत्वा १८
गतास्तानि सर्व्वाणि दायूदा पुनः प्राप्तानि विशेषतो दायूदो द्वे भार्य्ये
ऽपि मोचिते। तैरपहृतानां पुत्रपुत्रीणां लोठितद्रव्याणाञ्च क्षुद्रं महद् १९
वा किञ्चिदपि न्यूनं नाभूत् सर्व्वाण्येव दायूदा पुनर्लब्धानि। अपरं २०

दायूदा गोमेषेषु गृहीतेषु लोकास्तं पशूनां व्रजम् अग्रे कृत्वा गच्छन्तः
कथयामासुः, एतानि दायूदो लोठितद्रव्याणि।
२१ अनन्तरं क्लान्तिकारणाद् दायूदः पश्चाद् गन्तुम् अक्षमा ये द्वे शते
लोका बिसोरस्रोतस्त्यास्तटे स्थातुं तैः समादिष्टास्तेषां समीपं दायूदि
समुपस्थिते ते दायूदं तस्य सङ्गिनो लोकांश्च साक्षात्कर्त्तुं बहिरागत-
२२ वन्तः; ततो दायूद् तेषां समीपमुपस्थाय तान् कुशलं पप्रच्छ। किन्तु
दायूदः सङ्गिनां मध्ये ये दुश्चरिता दुष्टाश्च मनुजास्त ऊचिरे, इमेऽ-
स्माभिः समं न गतवन्तस्ततो हेतो र्वयम् एतेभ्यो लब्धलोठितद्रव्याणां
किञ्चिदपि न दास्यामः केवलम् एकैकस्मिन् जायां बालकांश्च दास्यामः,
२३ तान् नीत्वा ते गमिष्यन्ति। ततो दायूद् प्रत्यवदत् हे मम भ्रातरः, यः
परमेश्वरोऽस्मान् रक्षित्वास्माकं प्रतिकूलगामिनोः सेना अस्माकं करेषु
समर्पितवान् सोऽस्मभ्यं यानि वस्तूनि दत्तवान् तान्यधि यूयम् अविहितम्
२४ आचरथ। युष्माकं वचः को ग्रहीष्यति? योद्धुं गमनकारिणो यादृ-
शोंशो भाराणां समीपस्थायिनोऽपि तादृशोंशो भविष्यति तौ समा-
२५ नांशिनौ भविष्यतः। अपरं दायूद् इस्रायेल्वंशस्य कृते यमेतं विधिं
व्यवस्थाञ्च स्थापयामास स तं दिवसमारभ्य यावदद्य चलति।
२६ अनन्तरं दायूद् सिक्लगम् उपस्थाय वैथेलं दक्षिणरामतं यत्तीरम्
२७ अरोयेरं सिफ्मोतम् इष्टिमोयं राखलं यिरह्मेलीयनगराणि केनीय-
२९ नगराणि हर्म्मा कोराशनम् अथाकं हिब्रोणञ्चेत्यादीनि यानि यानि
३० स्थानानि दायूद् तस्य लोकाश्च पर्य्यटवन्तस्तत्रत्यानां यिहूदाप्रदेशस्य
३१ प्राचीनानां निजबन्धूनां समीपं लोठितद्रव्यमध्याद् दातव्यानि प्रहित्य
कथयामास, परमेश्वरस्य रिपुभ्यो लोठितद्रव्यमध्याद् एतानि पारितो-
षिकानि भवद्भि र्गृह्यन्तां।

---

३१ एकत्रिंशोऽध्यायः।

१ शौलस्य तस्य पुत्राणाञ्च मरणं ७ इस्रायेला त्यक्तेषु नगरेषु पिलेष्टीयानां निवसनं ८ शौलस्य तस्य पुत्राणाञ्च शवानाम् अपमानितत्वं ११ याबेशीयलोकैस्तेषां शवानां हरणं श्मशाने स्थापनञ्च।

१ अनन्तरम् इस्रायेल्वंशेन समं पिलेष्टीयेषु युध्यत्सु इस्रायेल्वंशः
पिलेष्टीयानां सम्मुखात् पलायाञ्चक्रे गिल्बोयपर्व्वते च लोकास्तै-

राहताः सन्तो निपेतुः। अपरं पिलेष्टीयाः शौलं तस्य पुत्त्रांश्च प्राप्य २
योनाथनो ऽवीनादवो मल्किशूयश्चेतिनामकान् शौलस्य पुत्त्रान् जघ्नुः।
अपरं शौलमधि घोरतरे संग्रामे जाते धनुर्धारिषु च तं प्रति शरान् ३
निक्षिपत्सु स धनुर्धारिभिरतीव क्षताङ्गक्षतः। ततः शौलो निजास्त्र- ४
वाहिनं जगाद, त्वं स्वखड्गं निष्कोषं कृत्वा मां छिन्धि नो चेद् अच्छिन्न-
त्वच एत आगत्य मां विद्ध्वा ममापमानं करिष्यन्ति। किन्तु तस्यास्त्रवाही
अतीव भीतत्वकारणात् तत् कर्त्तुम् ऊररी न चकार, तस्मात् शौलः
खड्गं गृहीत्वा स्वयं तदुपरि निपपात। ततः शौलो ममारेति वीक्ष्य ५
तस्यास्त्रवाहकोऽपि निजखड्गोपरि निपतन् तेन समं ममार। अनेन ६
प्रकारेण तस्मिन् दिने शौलस्तस्य त्रयः पुत्त्रा अस्त्रवाही चेमे सर्व्वे
युगपद् अम्रियन्त।

अनन्तरं समभूमेः पारस्था यर्द्दनस्यान्यपारस्थाश्च य इस्रायेल्वंशा- ७
स्त इस्रायेलीयानां पलायनं शौलस्य तस्य पुत्त्राणाञ्च मरणमपि वीक्ष्य
सर्व्वनगराणि परित्यज्य पलायाञ्चक्रिरे, ततः पिलेष्टीया आगत्य तेषां
मध्ये न्यवसन्।

परदिवसे पिलेष्टीया हतमनुष्याणां वस्त्रादीन्यपहर्त्तुम् आगत्य ८
गिल्बोयपर्व्वते शौलस्य तस्य त्रयाणां पुत्त्राणाञ्च देहान् प्राप्य तस्य ९
मस्तकं छित्त्वा तस्य सज्जादि मोचयित्वा स्वेषां देवालयेषु लोकानां समीपे
च वार्त्तां घोषयितुं पिलेष्टीयानां देशस्य चतुर्दिशं दूतान् प्रेषयामासुः।
अपरं ते तस्य सज्जाम् अस्तारोतदेव्या मन्दिरे निदधिरे तस्य देहञ्च १०
वतशानस्य भित्तावुल्लम्बयामासुः।

अनन्तरं शौलं प्रति पिलेष्टीयानां तस्यापकारस्य वार्त्तायां यावेशगि- ११
लियदनिवासिभि र्लोकैः श्रुतायां सर्व्वे बलवन्तो लोका उत्थाय तां कृत्स्नां १२
रजनीं व्रजित्वा शौलस्य तस्य पुत्त्राणाञ्च शरीराणि वैतशानस्य भित्तितो
यावेशम् आनीय दाहयामासुस्तेषाम् अस्थीनि च गृहीत्वा यावेशस्थस्य
कस्यचित् तरोर्मूले भूमौ पोथयामासुः। अनन्तरं ते सप्तदिनानि यावद् १३
उपवासं चक्रिरे।

शिमूयेलस्य द्वितीयं पुस्तकं।

१ प्रथमोऽध्यायः।

१ शौलस्य योनाथनस्य च मरणवार्त्तायां कथितायां कस्यचिद् अमालेकीयस्य मरणं
१७ शौलस्य योनाथनस्य च मरणमधि गीतगानं।

१ शौलस्य मरणकाले दायूद् अमालेकीयानां निहननात् प्रत्यागत्य
२ शिक्लगनगरे दिनद्वयम् उषितवान्। ततः परं तृतीयदिवसे छिन्नवस्त्रो
धूलीलिप्तमस्तकश्चैको जनः शौलस्य शिविराद् दायूदः समीपम् आगत्य
३ भूमिष्ठः सन् तं प्रणनाम। ततो दायूद् तं पप्रच्छ, त्वं कुत आगतो-
४ ऽसि? स कथितवान् इस्रायेलः शिविरात् पलाय्याहम् आगच्छं। दायूद्
पप्रच्छ, त्वां विनयेऽहं तत्र किं जातं? तत् मह्यं कथय। ततः स कथित-
वान् मनुष्या रणात् पलायाञ्चक्रिरे बहवो निपत्य पञ्चत्वं प्राप्ताश्च
५ विशेषतः शौलस्तस्य पुत्रो योनाथनोऽपि मृतवन्तौ। दायूद् तं वार्त्ता-
वक्तारं तरुणं पप्रच्छ शौलस्तस्य पुत्रो योनाथनश्चाम्रियेताम् इति
६ त्वं केन प्रकारेण ज्ञातवान्? ततः स वार्त्तावादी तरुणस्तं जगाद,
घटनाक्रमेण गिल्बोयपर्व्वतमुपस्थितोऽहं शूलावलम्बदेहं शौलं तस्य
७ पश्चाद् बहून् रथान् हयारोहिणश्च तुमूलीभूतान् अपश्यं। तदा स
पश्चाद् अवलोक्य मां वीक्ष्याहूतवान् ततोऽत्र स्थानेऽहम् इति मया
८ निगदिते स मां पृष्टवान् कस्त्वं? अहमुक्तवान् अमालेकीयोऽहम्।
९ अनन्तरं स माम् अवदत्, विनयेऽहं त्वं मम सन्निधिमागत्य मां जहि
१० यतोऽहं मूर्च्छापन्नोऽस्मि तथापि मम प्राणा न यान्ति। ततोऽहं तस्य
समीपे तिष्ठन् तं हतवान्, अतस्तत्पतनात्परं स पुन र्जीवितुं न शक्नो-
तीत्यहं निश्चितं वेद्मि। अनन्तरम् अहं तस्य शिरसः किरीटं हस्ताद्
११ वलयञ्च गृहीत्वा निजप्रभोः समीपम् एतत् स्थानम् आनैषं। ततो
दायूद् निजवस्त्राणि धृत्वा छिन्नवान् अपरं तस्य सङ्गिनः सर्व्वेऽपि
१२ तथैव कृतवन्तः। अपरं शौलस्तस्य पुत्रो योनाथनश्च परमेश्वरस्य
लोकाश्चेस्रायेल्वंशाश्च खड्गे निहतास्तत्कारणात् ते सन्ध्यां यावत् शोक-
१३ विलापोपवासै र्दिनं यापयामासुः। अनन्तरं दायूद् तं वार्त्तावादिनं

तरुणं पप्रच्छ, त्वं कुत्रत्यो मनुजः? स व्याहरत्, अहं प्रवासिनोऽमा-
लेकीयस्य कस्यचित् सुतः। तं दायूद् ऊचे त्वं परमेश्वरेणाभिषिक्तस्य १४
हननाय निजं करं प्रसारयितुं किं नाभैषीः? ततो दायूद् तरुणमेकम् १५
आहूयादिदेश, त्वम् एनम् आक्रम्य जहि। ततस्तेनाहतः स ममार।
अपरं दायूद् तं बभाषे तव शोणितपातापराधम् त्वय्येव तिष्ठतु, यतो- १६
ऽहं परमेश्वरेणाभिषिक्तम् अवधिषम् इति प्रमाणं त्वदीयवदनेन तव
विरुद्धम् अभिहितम्।

अनन्तरं दायूद् शौलं तस्य पुत्रं योनाथनञ्चाधि कोदण्डगीतनामकं १७
विलापगीतमिदं रचयित्वा यिहूदावंशं शिक्षयामास। तद् याशेरपुस्तके १८
लिखितमास्ते।

इस्रायेल्वंश ते व्याघ्रा उच्चस्थानेषु जघ्निरे। १९
हा हा त्वदीयशूरास्तु कीदृङ्निधनतां गताः॥
वार्त्ता नाख्यायतां गातेऽस्किलोन्रथ्यासु नोच्यतां। २०
नो चेन्नन्दिष्यते नूनं पिलेष्टीयाबलाजनैः।
तथाच्छिन्नत्वचां स्त्रीभि र्गर्व्ववाक्यं वदिष्यते॥
गिल्वोयपर्व्वताः सर्व्वे युष्मान् प्रति पुन र्नहि। २१
तुषारपतनं वर्षं भूयात् क्षेत्रञ्च शस्यकृत्।
यतो युष्मासु वीराणां निपेतुः फलकास्तदा।
तैलेनानभिषिक्तस्य फलको निपतेद् यथा।
तथैव चर्म्म शौलस्य तत्र न्यक्षिप्यताशुभं॥
अलब्ध्वेऽसृजि योद्धॄणाम् अप्राप्ते शूरमेदसि। २२
योनाथनस्य कोदण्डं न कदापि न्यवर्त्तत।
न च शौलस्य खड्गोऽपि परावर्त्तत निष्फलं॥
प्रियौ मनोहरावास्तां जीवत्काले परस्परं।
शौलयोनाथनावेतौ विभिन्नौ न मृतावपि। २३
कुररात् वेगिनौ तौ तु सबलौ च मृगेन्द्रतः॥
इस्रायेलङ्गनाः शौलो युष्माभिरेव शुच्यतां। २४
यतो लोहितवासांसि रम्याण्याभरणानि च।
तेन दत्तानि युष्मभ्यं तेनैव वः सुचेलकाः।
चिचिताः स्वर्णजातैश्च नानाविधविभूषणैः॥
हा हा रणस्थले शूराः कीदृङ्निधनतां गताः। २५

हा हा योनाथनस्त्वैव निहतस्तव पर्व्वते।
२६ हे योनाथन मद्भ्रातस्त्वत्कृते पीडितोऽस्म्यहं।
मदीयमनसो रत्नं त्वमेवैकः समस्थिथाः।
श्रेयः प्रेम तवामन्ये प्रेमतो योषितामपि।
२७ हा हा शूराः कथं पेतु र्नेशु र्युद्धबलानि च॥

---

२ द्वितीयोऽध्यायः।

१ ईश्वरस्य निदेशाद् हिब्रोणं गत्वा दायूदो राजत्वकरणं ५ याबेशगिलियदीयमनुजान् प्रति दायूदः प्रशंसनं ८ ईश्बोशतस्य इस्रायेलो नृपतीकरणं १२ योयाबाव्नेरयोस्तरुणलोकानां योधनं १८ असाहेलस्य मरणं २५ अव्नेरस्य वचनाद् योयाबस्य परावर्त्तनं ३२ असाहेलस्य श्मशाने स्थापनं।

१ अनन्तरं दायूद् परमेश्वरं पृष्टवान् किमहं यिहूदायाः काञ्चन नगरीं
यास्यामि? परमेश्वरः कथयामास, याहि। अनन्तरं दायूद् पप्रच्छ,
२ मया किं स्थानं गन्तव्यं? स कथयामास हिब्रोणं व्रज। ततो दायूद्
यिष्रियेलीयाहीनोयमा मृतस्य कर्म्मिलीयनाबलस्य जायाबीगयिला
३ चेतिनामिके तस्य भार्य्ये च तन्नगरं जग्मुः। अपरं दायूद् सपरिवारान्
निजसङ्गिनो जनानप्यानीतवान् ते च हिब्रोणप्रदेशस्य नगरेषु न्यवसन्।
४ अनन्तरं यिहूदीयमनुजा आगत्य तत्र स्थाने दायूदं यिहूदावंशोपरि
राज्यपदेऽभिषिषिचुः।

५ अनन्तरं याबेशगिलियदीयमनुजाः शौलं श्मशाने निहितवन्त इति
वार्त्तायां दायूदा श्रुतायां दायूद् याबेशगिलियदीयलोकानां समीपं
दूतान् प्रहित्य तान् जगाद, यूयं परमेश्वरे धन्या यतो यूयं निजप्रभुं
६ शौलं प्रति करुणामिमां कृत्वा तस्य देहं श्मशानेऽस्थापयत। अतो हेतोः
परमेश्वरो युष्मान् प्रति सत्यताम् अनुग्रहञ्चाचरिष्यति; अपरं
युष्माभिरेतत्कर्म्माकारि तत्कारणाद् अहमपि युष्मान् सत् करिष्यामि।
७ इदानीं युष्माकं हस्ता बलिनो भवन्तु यूयञ्च शूरा भवत यस्माद् युष्माकं
प्रभौ शौले पञ्चत्वं गते यिहूदावंशीयाः स्वेषां राजत्वपदे मामभिषिषिचुः।

८ अनन्तरं शौलस्य सेनापति र्नेरस्य तनयोऽव्नेरः शौलस्य सुतम् ईश्-
९ बोशतं गृहीत्वा महनयिमम् आनीय गिलियदाशूरियिष्रियेलफ्रयिम-
१० बिन्यामीनादीनाम् इस्रायेल्वंशानां राजानं चकार। शौलस्य सुतः

स ईश्‌बोशतश्चत्वारिंशद्वत्सरवयसीस्रायेलो राजत्वं लेभे स द्वौ वत्सरौ
राजत्वं चकार केवलं यिहूदावंशो दायूदः पक्षीयो बभूव। ततो दायूद् ११
हिब्रोणे षन्मासाधिकान् सप्तवत्सरान् यिहूदावंशस्य राजत्वं चकार।

अनन्तरं नेरस्य सुतोऽव्‌नेरः शौलसुतस्येश्‌बोशतस्य दासाश्च महन- १२
यिमाद् गिबियोनं जग्मुः। तथा सिरूयायाः सुते योयावे दायूदो १३
दासेषु च वहिर्भूतेषु गिबियोनस्थपुष्करिण्याः समीप उभये लोकाः
सम्मिलिताः पश्चात् संघ एकः पुष्करिण्याः प्रतीरे तदन्यः संघश्च
पुष्करिण्याः पारे तस्थौ। अपरम् अव्‌नेरो योयावम् ऊचे, इदानीं १४
तरुणा उत्थायास्माकं सम्मुखे क्रीडन्तु ततो योयावोऽभिदधे त
उत्तिष्ठन्तु। अनन्तरं शौलस्य सुतेरीश्‌बोशतस्य पक्षीया बिन्या- १५
मीनीया द्वादशजनास्तथा दायूदो दासानां द्वादशजना उत्थाय सङ्ख्या-
नुसारतः पारं गतवन्तः। अपरं तेषाम् एकैकेन जनेन स्वप्रति- १६
योद्धुः शिरो धृत्वा कक्षः खड्गेन विद्धस्तत उभयपक्षीया मनुजा युग-
पन्निपेतुः, अतो हेतो र्गिबियोनस्थं तत्स्थानं हिल्‌कत्-हत्सुरिम् खड्ग-
क्षेत्रमिति नाम्ना प्रसिद्धं बभूव। अनन्तरं तस्मिन् दिने महति १७
घोरतरे संग्रामे जाते ऽव्‌नेर इस्रायेलो मनुजाश्च दायूदः सेनानिवहस्य
सम्मुखे पराजिग्यिरे।

तस्मिन् स्थाने योयाबावीशयासाहेलश्चेतिनामकाः सिरूयायाः सुता- १८
स्रय आसन्। असावसाहेलो वन्यमृगइव चरणाभ्यां द्रुतगन्तासीत्।
असाहेलोऽव्‌नेरस्य पश्चाद् अधावद् अव्‌नेरस्य पश्चाद्गमनाद् दक्षिणं १९
वामं वा न परावृत्ते। अनन्तरम् अवनेरः पश्चाद् वीक्ष्य पप्रच्छ २०
त्वं किम् असाहेलः? स प्रत्यवदत्, अहं स एव। ततोऽव्‌नेरस्तं २१
बभाषे, त्वं दक्षिणं वामं वा परावृत्य तरुणानामेकं धृत्वा तस्य सज्जां
लोठय। किन्त्वसाहेलस्तस्य पश्चाद्गमनात् निवर्त्तितुं नैच्छत्। अनन्तरम् २२
अव्‌नेरोऽसाहेलं पुनरपि जगाद, त्वं मम पश्चाद्गमनात् निवर्त्तस्व
नोचेद् यद्यहं त्वाम् आहत्य भूमौ निपातयामि तर्हि केन प्रकारेण तव
भ्रातरं योयावं मद्वदनं दर्शयिष्यामि? तथापि स निवर्त्तितुं नैच्छत्। २३
तस्माद् अव्‌नेरो निजशूलाग्रेण तस्य कुक्षिम् इत्थं विद्धवान् यत् शूलं
तस्य पृष्ठमपि विद्ध्वा निरक्रामत् तेन स तस्मिन् स्थाने पतन् तत्रैव
ममार। अपरं यावन्तो मनुजा असाहेलस्य पतनमरणयोः स्थानम् उपत-
स्थिरे ते सर्व्वएव तत्रावतस्थिरे। अनन्तरम् अव्‌नेरस्य पश्चाद् धावन्तौ २४

योयाबावीशयौ सूर्य्यास्तसमये गिवियोनसमीपस्थनिर्जनप्रदेशगामिनो
मार्गस्य पार्श्ववर्त्तिनो गीहस्य सम्मुखस्थम् अम्माख्यपर्व्वतं प्रापतुः।
२५ अनन्तरं विन्यामीनवंशीयलोका अब्नेरस्य समीपे मिलित्वा एकसंघी-
२६ भूय कस्यचित् पर्व्वतस्य शिखरे तस्थुः। तदानीम् अबनेरो योयाबम्
आहूय व्याजहार खड्गः किं निरन्तरं हनिष्यति? शेषे तिक्ततां गमिष्यति
किमेतत् त्वं न जानासि? त्वं निजभ्रातॄणां पश्चाद्गमनात् निवर्त्तितुं निज-
२७ मनुजान् कतिकालं न निदेक्ष्यसि? ततो योयाबः कथयामास, त्वया यदि
किमपि नावदिष्यत, तर्हि मनुजाः प्रातःकाल एव निजभ्रातॄणां पश्चाद्गम-
२८ नात् न्यवर्त्तिष्यन्त। अनन्तरं योयाबस्तूरीं वादयामास, तेन सर्व्वे मनुजाः
२९ स्थगिता बभूवुः पुनरिस्रायेलः पश्चान्न दधावू रणञ्च न चक्रुः। ततोऽब्नेर-
स्तस्य मनुजाश्च तां कृत्स्नां रजनीं प्रान्तरस्थवर्त्मना व्रजित्वा यर्दन-
३० तटिन्याः पारं गत्वा कृत्स्नविथ्रोणेन महनयिमम् उपतस्थिरे। अपरं
योयाबेनाब्नेरस्य पश्चाद्गमनात् परावृत्य सर्व्वमनुजेषु संगृहीतेषु
दायूदो दासानां मध्य ऊनविंशति जनानाम् असाहेलस्य चाभावो
३१ बभूव। किन्तु दायूदो मानुषै र्विन्यामीनीयानाम् अब्नेरस्यानुचराणाञ्च
मध्ये षष्ठ्यधिकशतत्रयं मनुजा मारिताः।
३२ अनन्तरं मनुजा असाहेलस्य देहं गृहीत्वा वैतलेहमस्थे पैतृकश्मशाने
निहितवन्तः। अपरं योयाबस्तस्य मनुजाश्च तां कृत्स्नां रजनीं व्रजन्तः
प्रत्यूषे हिब्रोणम् उपतस्थिरे।

---

३ तृतीयोऽध्यायः।

१ दायूदो बलवृद्धिः २ तस्य पुत्त्राणां नामानि ६ ईश्बोशतं प्रति विरक्तस्याब्नेरस्य दायूदं प्रति गमनं १३ अब्नेरेण साकं नियमकरणे निजभार्य्याया मीखलाया याचनं १७ अब्नेरेण समं भोज्यभोजनं तस्य विसर्जनं २२ क्रुद्धेन योयाबेनाब्नेरस्य हननं २९ दायूदा योयाबस्य शपनं ३१ अब्नेरं प्रति दायूदो विलपनं।

१ अनन्तरं शौलस्य दायूदश्च वंशयोर्मध्ये बहुतिथकालं रणमभवत्।
ततो दायूद् उत्तरोत्तरं बलवृद्धिं जगाम शौलवंशश्चोत्तरोत्तरं क्षीण-
तां जगाम।
२ अपरं हिब्रोणे दायूदः पुत्त्राः प्रसुषुविरे। यिस्रियेलीयाहीनोय-
३ माया गर्भजातोऽम्नोननामा तस्य ज्येष्ठः पुत्त्रो बभूव। अपरं मृतस्य

कर्म्मिलीयनाबलस्य जायाया अबीगयिलाया गर्भजातः किलावनामा
द्वितीयः पुत्रो बभूव; अपरं गिशूरीयन्तपस्य तल्मयस्य दुहितुर्माखायाः
गर्भजातोऽब्शालोमनामा तृतीयः पुत्रो बभूव। अपरं हग्गीताया गर्भ- ४
जातोऽदोनियनामा चतुर्थः पुत्रो बभूव। अपरम् अबीटलाया गर्भजातः
सिफटियनामा पञ्चमः पुत्रो बभूव। अपरं दायूदो जायाया इग्लाया ५
गर्भजातो यित्रियमनामा षष्ठः पुत्रो बभूव। इमे सर्व्व एव दायूद
औरसपुत्रा हिब्रोणे ऽजायन्त।

यतिकालं शौलवंशस्य दायूदवंशेन समं योधनमासीत् ततिकालम् ६
अब्नेरः शौलवंशे समासक्त आसीत्। अनन्तरम् अयाया दुहिता रिस्पे- ७
ति नाम्ना शौलस्योपपत्न्येकासीत् तामधीश्बोशतोऽब्नेरं जगाद त्वं मम
पितुरुपपत्नीं कुत उपगतवान्? ततो ऽब्नेर ईश्बोशतस्य कथातोऽतीव ८
कुपितो भवन् कथितवान्, सारमेयकपालः किम् अहं? तव पितुः
शौलस्य वंशं भ्रातृगणं बन्धुगणञ्च प्रत्यद्यापि सद्भावम् आचरन् दायूदः
करे त्वां न समार्पयं योऽहम् अहं किं यिहूदापक्षीयोऽस्मि? तत्कृते
त्वम् एतां सीमन्तिनीमधि मह्यद्य दोषमारोपयसि? परमेश्वरो दायूद- ९
मधि यथा शपथं कृतवान्, तदनुसारेण यद्यहं शौलवंशात् राजत्वं १०
गृहीत्वा दानमारभ्य बेर्शेबां यावत् सर्व्वेषाम् इस्रायेलीयानां यिहूदी-
यानाञ्चोपरि दायूदः सिंहासनं न स्थापयामि तर्हीश्वरोऽब्नेराया-
मुकं ततोऽधिकञ्च फलं ददातु। ततः सोऽब्नेराय पुनरेकामपि कथां ११
कथयितुं न शशाक यतो हेतोः स तस्माद् बिभयाञ्चकार।

अनन्तरम् अब्नेरोऽविलम्बं दायूदः समीपं दूतान् प्रहित्य जगाद, १२
अयं देशः कस्य? यदि भवान् मया सह नियमं करोति, तर्हि पश्ये-
स्रायेल्वंशं भवतः पक्षम् आनेतुं भवतः साहाय्यकारी भविष्याम्यहं।

ततो दायूद् अवदत्, भद्रं मया त्वया सार्कं नियमः करिष्यते किन्तु १३
मया त्वत्त एकं कार्य्यं याचितव्यं तद् ब्रवीमि, यदा त्वं मां साक्षात् कर्त्तुम्
आगमिष्यसि तदा शौलस्य कन्यायां मीखलायां प्रथमं नानीतायां मां
साक्षात् कर्त्तुं त्वया न शक्ष्यते। अनन्तरं दायूद् शौलस्य पुत्रस्येश्बोश- १४
तस्य समीपं दूतान् प्रहित्य जगाद, अहं पिलेष्टीयानां शतं छिन्नत्वचो
दत्त्वा यां व्यूढवान् त्वं मम तां जायां मीखलां देहि। तत ईश्बोशतो १५
लोकं प्रहित्य तस्याः स्वामिनो लयिशस्य पुत्रात् पल्टियेलात् मीखलां
जग्राह। ततस्तस्याः स पतिः क्रन्दन् क्रन्दन् वह्वरीमं यावत् तस्याः १६

पश्चात् जगाम। अनन्तरम् अब्नेरस्तं जगाद याहि परावृत्य याहि,
ततः स परावृत्य गतवान्।
१७ अनन्तरम् अब्नेर इस्रायेल्वंशस्य प्राचीनैः समम् इत्थं मन्त्रणां
१८ चकार, पूर्व्वं यूयं दायूदं स्वेषां राजानं कर्त्तुं चेष्टितवन्तः। इदानीं
तदेव कुरुत यतोऽहं स्वदासस्य दायूदः कराभ्यां निजलोकम् इस्रायेल्-
वंशं पिलेष्टीयानां करेभ्यः सकलरिपूणां करेभ्यश्च मोचयिष्यामीति
१९ परमेश्वरो दायूदमधि प्रतिश्रुतवान्। अपरम् अब्नेरो विन्यामीन्-
वंशीयानां कर्णगोचरेऽपि तदेव बभाषे। अनन्तरम् अब्नेर इस्रा-
येल्वंशस्य कृत्स्नविन्यामीन्वंशस्य च मनोऽभिलाषं दायूदः कर्णगोचरे
२० कथयितुं हिब्रोणं जगाम। अतोऽब्नेरो विंशतिं लोकान् सङ्गिनः
कृत्वा हिब्रोणे दायूदः समीपम् उपस्थितवान्, ततो दायूद् अब्नेरस्य
२१ तत्सङ्गिनाञ्च कृते भोज्यम् आसादयामास। अनन्तरम् अब्नेरो दायूदं
बभाषे, अहमुत्थायेस्रायेलः सकलवंशान् मम प्रभो राज्ञः समीपे सङ्ग्रहीतुं
गच्छामि, ततस्ते भवता समं नियमे स्थिरीकृते भवान् निजमनोवाञ्छानु-
सारेण तेषां राजत्वं करोतु। अनन्तरं दायूदा विसृष्टोऽब्नेरः कुशलेन
प्रस्थानं चकार।
२२ अनन्तरं दायूदो दासा योयावश्च युद्धयात्रायाः परावृत्य बहूनि
लोठितद्रव्याणि समानयन्त आजग्मुः। तदानीम् अब्नेरो हिब्रोणे
दायूदः समीपे नाविद्यत यतो हेतो दायूदा विसृष्टः स कुशलेन गमन-
२३ मकरोत्। अपरं योयावे तस्य सङ्गिषु सैन्येषु चागतेषु मनुजा योया-
वम् अज्ञापयन् नेरस्य पुत्रोऽब्नेरो नृपतेः समीपम् आगच्छत् नृपेण
२४ च विसृष्टः स कुशलेन गतवान्। तदानीं योयावो नृपतेः समीपं गत्वा
न्यवेदयत् भवता किं कर्म्माकारि? पश्याब्नेरो भवतः समीपमागत-
२५ वान्, स भवता विसृष्टः कुतः कुशलेन गतवान्? नेरस्य पुत्रोऽब्नेरः
कीदृशस्तत्किं न जानासि? त्वां वञ्चयितुं तव गमनागमने ऽनुसन्धातुं
२६ त्वया यद्यत् क्रियते तत्सर्व्वं ज्ञातुञ्च स आगतवान्। अनन्तरं योयावेन
दायूदः समीपाद् वहिर्गत्याब्नेरस्य पश्चाद् दूताः प्रेरितास्ते सिरा-
ख्यकूपस्य समीपात् तं परावर्त्त्यानयन्, किन्तु दायूद् एतत् न ज्ञात-
२७ वान्। अपरम् अब्नेरे हिब्रोणं परावृत्यागते योयावस्तेन साकं रह
आलापं कर्त्तुं गोपुरस्य मध्ये तं नीत्वा गतवान् अपरं निजभ्रातुरसा-
हेलस्य बधकारणात् तस्योदरं विव्याध तेन स मृतवान्।

अनन्तरं दायूद् तां वार्त्तां निशम्य गदितवान् नेरपुत्रस्याब्नेरस्य २८
बधमिममधि परमेश्वरस्य साक्षात् मम मदीयराज्यस्य च निर्दोषता
सदा स्थास्यति। अयमपराधो योयाबस्य तस्य समस्तपितृवंशानाञ्च २९
शिरःसु फलतु। अपरं योयाबस्य वंशे प्रमेही वा कुष्ठी वा दण्डे समव-
लम्बी वा खड्गविद्धो वा भक्ष्यहीन एतादृशां मनुजानाम् अभावो कदाच
न भूयात्। इत्थं गिबियोनीयरणे तयो र्भ्रातुरसाहेलस्य बधकारणाद् ३०
योयाबस्तस्य भ्राताबीशयश्चाब्नेरं जघ्नतुः।

अनन्तरं दायूद् योयाबं तस्य सङ्गिनः सर्व्वलोकांश्च जगाद, यूयं ३१
स्वेषां वस्त्राणि छित्त्वा शणजं वसनं परिधद्धम् अब्नेरमधि शोचत च;
अपरं दायूद् नृपतिश्च शवस्य खट्वायाः पश्चात् पश्चात् चलितवान्।
अनन्तरं ते हिब्रोणेऽब्नेरस्य देहं श्मशाने निदधिरे राजा चाब्नेरस्य ३२
श्मशानसमीप उच्चैः स्वरं रुदितवान् तथान्ये सर्व्वे मनुजाश्च रुरुदुः।
अपरम् अब्नेरमधि राजा विलापम् अगायत्। ३३

हाब्नेरो बत किं मूढनरवत् निधनं गतः।
बद्धौ नास्तां करौ द्वौ ते न बद्धौ निगडे पदौ। ३४
नरघातकलोकस्य समक्षं यादृशं जनः।
कश्चित् पतति तादृक् त्वं पतनं समुपेयिवान्॥

ततः सर्व्वे मनुजाः सूर्य्यास्तगमनात् किञ्चित् पूर्व्वं दायूदं भोजयितुम् ३५
आगताः। तदा दायूद् इमं शपथं चकार, सूर्य्ये नास्तं गते यद्यहं
पूपम् अन्यत् किमपि वाखादामि तर्हीश्वरो मह्यम् अमुकं ततोऽधिकञ्च
फलं ददातु। ततः सर्व्वे लोकास्तस्यां वाचि मनो निदधिरे तुष्ट- ३६
वुश्च, राजा यद्यत् कृतवान् तच्चैव सर्व्वे लोकाः सन्तुष्टा बभूवुः। अनन्तरं ३७
नेरस्य पुत्रोऽब्नेरोऽहन्यत तद् राज्ञ आदेशात् न जातमिति सर्व्वे
मनुजाः सर्व्व इस्रायेल्वंशाश्च तस्मिन्नेव दिने बुबुधिरे। अनन्तरं ३८
राजा निजभृत्यान् अवदत्, अद्य इस्रायेल अधिपतिरेको महापुरुषः
पतितवान् एतत् किं यूयं न जानीथ? अपरम् अद्याहं राज्याभि- ३९
षिक्तोऽपि सन् दुर्बलो जातोऽस्मि, सिरूयायाः सन्तानाविमौ पुरुषौ
ममावाध्यौ, किन्तु परमेश्वरः कुकर्म्मकारिणे तत्कुकर्म्मानुरूपं फलं
दास्यति।

४ चतुर्थोऽध्यायः।

१ अव्नेरस्य मरणाद् ईश्बोशतस्य दुःखं २ वानाहरेखवयो र्मिफीबोशतस्य च कथन
५ वानाहरेखवाभ्याम् ईश्बोशतस्य वधः ९ दायूदा तयो र्हतत्वं।

१ अनन्तरम् अव्नेरो हिब्रोणनगरे मृत इति वार्त्ता यदा शौलस्य
पुत्त्रेण श्रुता तदा तस्य हस्तौ दुर्ब्बलौ बभूवतुः सर्व्व इस्रायेल्वंशास्च
व्याकुला बभूवुः।
२ एतस्य शौलपुत्त्रस्य द्वौ संघपती आस्तां प्रथमस्य नाम वानाह इति
द्वितीयस्य नाम रेखव इति चासीत् तौ बिन्यामीनवंशजातस्य वेरोतीय-
३ रिम्मोणस्य पुत्त्रौ। तद् वेरोतं बिन्यामीन्प्रदेशमध्येऽगण्यत, किन्तु वेरो-
४ तीया गित्तयिमं पलाय्याद्ययावत् तत्र स्थाने प्रवसन्ति। अपरं शौल-
पुत्त्रस्य योनाथनस्य मिफीबोशतनामा द्वाभ्यां चरणाभ्यां खञ्ज एकः पुत्त्र
आसीत्। यदा यिस्रियेलात् शौलयोनाथनयो र्मरणवार्त्ता समागच्छत्
तदानीं तं पञ्चमवर्षीयं बालकम् आदाय तस्य धात्री पलायाञ्चक्रे तदा
पलायनस्य शीघ्रगतेरसौ बालकः पतन् खञ्जो बभूव।
५ अनन्तरं वेरोतीयरिम्मोणस्य पुत्त्रौ रेखववानाहौ गत्वा मध्याह्नकाल
ईश्बोशतस्य निकेतनं प्रविविशतुः। तदानीं मध्याह्नघर्म्मात् स खट्वायां
६ शयितवान्। ततस्तौ गोधूमग्रहणच्छलेन निकेतनस्य मध्यस्थानं यावद्
गत्वा तस्योदरम् आजघ्नतुः; अनन्तरं रेखवस्तस्य भ्राता वानाहस्च
७ पलायाञ्चक्राते। तयो र्गृहप्रवेशनसमये स गर्भागारे खट्वायाम् अशेत
तदा तौ तम् आहत्यावधिष्टां तस्य शिरश्छित्त्वा तच्छिर आदाय कृत्स्नां
८ रात्रिं प्रान्तरेण जग्मतुः। अनन्तरं तावीश्बोशतस्य शिरो हिब्रोणं
दायूदः समीपम् आनीय राजानं न्यवेदयतां भवतः प्राणनाशेच्छुको यो
रिपुस्तस्य शौलसुतस्येश्बोशतस्य शिर एतत् पश्य। परमेश्वरः प्रभो-
रस्माकं भूपतेः कृते शौलाय तस्य वंशाय चाद्य समुचितं फलं दत्तवान्।
९ अनन्तरं दायूद् वेरोतीयरिम्मोणस्य पुत्त्रं रेखवं तस्य भ्रातरं वाना-
हञ्चैतत् प्रत्यवदत् सर्व्वविपत्तितो मत्प्राणानां मोचयितुः परमेश्वरस्या-
१० मरतायाः शपथं कृत्वा कथयामि। यो जनः शौलस्य मृत्युवार्त्तां मह्यं
कथितवान् स मङ्गलवार्त्तावाद्यहमित्यमन्यत किन्तु स सिक्लगे मया
११ धृतो हतस्च। तस्मै यद्यहम् एतादृशं पुरस्कारम् अददां तर्हि निजगेहे
खट्वायां शयानो धार्म्मिकः पुरुषो यै र्मारितस्तादृशान् पातकिनः प्रति

मया किं कर्त्तव्यं? तस्य शोणितस्य परिशोधः किं युवाभ्यां न ग्रहीतव्यः?
युवां किं पृथिवीतोऽपि मया नापसारयितव्यौ? अतो दायूदा समादिष्टै- १२
स्तस्य तरुणैस्तौ हतौ तयोः कराः पादाश्च छिन्ना हिव्रोणस्थपुष्करिण्या-
स्तीर उद्बबन्धिरे किन्त्वीश्बोशतस्य शिरस्ते गृहीत्वा हिव्रोणस्थाव्नेरस्य
श्मशाने स्थापितं।

---

५ पञ्चमोऽध्यायः।

१ सर्व्वैरिस्रायेल्लोकै दायूदोऽभिषेचनं ६ यिवूषीयेभ्यः सियोनदुर्गस्य वशीकरणं ११ हीरमेण दायूदः समीपं दूतप्रेषणं १३ यिरूशालमे जातानां दायूदः पुत्त्राणां नामानि १७ बाल्पिरासीमस्थाने पिलेष्टीयानां दायूदा जयकरणं २२ रिफायिमोपत्यकायां तेषां पुनः पराजयः।

अनन्तरम् इस्रायेलः सर्व्वे वंशा हिव्रोणे दायूदः समीपम् आगत्य १
निवेदयामासुः पश्य वयं तव कीकशमांसानि। अपरं पूर्व्वं यदा शौलो- २
ऽस्माकं राजासीत् तदापि त्वमेवेस्रायेलं वहिरभ्यन्तरे च गमनागमने
ऽकारयः। अपरं ममेस्रायेल्लोकानां पालकेनाग्रगण्येन च त्वया भवि-
तव्यमिति त्वं परमेश्वरेणोक्तः। इत्थम् इस्रायेलः सकलप्राचीनलोकेषु ३
हिव्रोणे राज्ञः समीपम् आगतेषु दायूदा नृपेण हिव्रोणे परमेश्वरस्य
साक्षात् तैः साकं नियमोऽकारि ते च दायूदम् इस्रायेलो राज्येऽभि-
षिषिचुः। दायूद् त्रिंशद्वत्सरवयसि राजत्वं लब्ध्वा चत्वारिंशद्वत्सरं ४
यावद् राजत्वं चकार। स हिव्रोणे यिहूदावंशस्योपरि षण्मासाधिकान् ५
सप्तवत्सरान् राजत्वं चकार ततः परं यिरूशालमे समस्तस्येस्रायेलो
यिहूदायाश्चोपरि त्रयस्त्रिंशद्वत्सरान् यावद् राजत्वं चकार।

अनन्तरं राज्ञा तस्य मनुजैश्च देशोत्पन्नयिवूषीयानां विरुद्धं यिरू- ६
शालमं प्रति यात्रायां कृतायां ते दायूदम् ऊचुः, एतत् स्थानं प्रवेष्टुं
त्वया न शक्ष्यते यतः स्थानम् एतद् दायूदा न प्रवेष्टव्यमिति वाचं
वदन्तोऽन्धाः खञ्जाश्चैव त्वां दवयिष्यन्ति। किन्तु दायूद् सियोनाख्यं ७
दुर्गं वशीचकार तस्य दुर्गस्य दायूद्नगरमिति नामान्तरमास्ते। तस्मिन् ८
दिने दायूद् कथयामास यो जनः यिवूषीयान् निहत्य प्रणालीं दायूदा
घृणितं खञ्जान्धगणाश्चाक्रमिष्यति, स प्रधानसेनापति र्भविष्यति। तत्का-
रणाद् अन्धेन खञ्जेन वा राजनिकेतनं न प्रवेष्टव्यमिति लोकैरुच्यते।
अतो दायूद् दुर्गं उषितवान् तस्य दायूद्नगरमिति नाम कृतवान्। ९

अपरं दायूद् प्राचीरेण मिल्लमारभ्याभ्यन्तरस्थानं यावत् तद् वेष्टयामास।
१० अनन्तरं दायूद् क्रमशो वर्द्धमानो महान् बभूव सेनाध्यक्षः परमेश्वरश्च
तस्य सहायस्तस्थौ।
११ अनन्तरं सोरीयराजो हीरमो दायूदः समीपम् एरसकाष्ठानि
सूत्रधरान् स्थपतीन् लोकांश्च दूतैः प्रेषयामास ततस्ते दायूदः कृते
१२ प्रासादं निर्म्ममिरे। ततः परमेश्वर इस्रायेलो राजत्वपदे मां संस्थापि-
तवान् तथा निजेस्रायेल्वंशस्यानुरोधात् मम राज्यस्योन्नतिं कृतवान्
इति दायूद् बुबुधे।
१३ अपरं दायूद् हिब्रोणाद् आगत्य यिरूशालमेऽन्यजाया उपपत्नीश्च
१४ जग्राह, ततो दायूदोऽपरे पुत्राः दुहितरश्चाजायन्त। यिरूशालमे
१५ शम्मूयः शोववो नाथनः सुलेमान् यिभर इलीशूयो नेफगो याफिय
१६ इलीशामा इलियादा इलीफेलटश्चेतिनामानस्तस्य पुत्रा अजायन्त।
१७ अनन्तरं सर्व्वैरिस्रायेल्वंशीयै र्दायूद् इस्रायेलो राज्येऽभिषिक्त इति
१८ वार्त्तां श्रुत्वा सर्व्वे पिलेष्टीयाः दायूदं गवेषयितुम् आजग्मुः। अपरं
दायूदि तत् श्रुत्वा दुर्गं गतवति पिलेष्टीया आगत्य रिफायिमसमभूमौ
१९ विस्तीर्णा बभूवुः। अनन्तरं दायूद् परमेश्वरं पृष्टवान् पिलेष्टीयानां
विरुद्धं मया किं गन्तव्यं? त्वं किं मम करे तान् समर्पयिष्यसि? ततः
परमेश्वरो दायूदं जगाद, याहि मयावश्यं पिलेष्टीयास्तव करे सम-
२० र्पयिष्यन्ते। अपरं दायूद् बाल्पिरासीमम् आगत्य तान् पराजित्य
जगाद परमेश्वरो मम सम्मुखे मम रिपून् स्रोतोभङ्गवद् बभञ्ज। तस्मात्
तस्य स्थानस्य नाम बाल्पिरासीमं देवताभङ्गस्थानमिति कृतवान्।
२१ अनन्तरं ते स्वेषां प्रतिमास्तत्र परित्यज्य गता दायूद् तस्य सङ्गिलोकाश्च
ता गृहीत्वा जग्मुः।
२२ अनन्तरं पिलेष्टीयाः पुनरागत्य रिफायिमसमभूमौ विस्तीर्णा बभूवुः।
२३ ततो दायूदा परिपृष्टः परमेश्वरः कथितवान् त्वम् इदानीं मा गच्छ,
तेषां पश्चाद् व्याघुट्यागत्य वाकास्थानस्य सम्मुखे तान् आक्रमिष्यसि।
२४ वाकाया उच्चस्थानेषु गमनशब्दे त्वया श्रुते त्वम् उद्यमं करिष्यसि यत-
स्तदा परमेश्वरः पिलेष्टीयानां सैन्यं विनाशयितुं तवाग्रसरो भविष्यति।
२५ अनन्तरं दायूद् परमेश्वरस्याज्ञानुसारेण कर्म्म कुर्व्वन् गेवातो गेषरमुप-
स्थितिं यावत् पिलेष्टीयान् अवधीत्।

६ षष्ठोऽध्यायः।

१ दायूदः परमेश्वरस्य मञ्जूषानयनं ६ उषस्याघातो मञ्जूषाया ओवेदेदोमस्य गेहे स्थापनं १२ बलिदानं नृत्यञ्च विधाय दायूदः परमेश्वरस्य मञ्जूषाया आनयनं १७ आवासे तस्याः स्थापनं २० दायूदं प्रति मीखलाया निन्दावचनं।

अनन्तरं दायूद् इस्रायेल्वंशस्य त्रिंशत्सहस्राणि वृतमनुजान् संज- १
ग्राह। अपरं दायूद् निजसङ्गिनः सकललोकान् गृह्णन् उत्थाय किरू- २
बयोर्मध्ये निवासिनः सैन्याधिपपरमेश्वरस्य नाम्ना विख्यातां मञ्जूषां
बालीयिहूदात आनेतुं यात्रां चकार। अनन्तरं त ईश्वरस्य नियम- ३
मञ्जूषां नूतनं शकटम् आरोह्य पर्व्वतस्थाद् अवीनादवस्य वेश्मनस्तां
वहिश्चक्रुः। अपरम् अवीनादवस्य पुत्रावुषोऽहियश्च तत् नूतनं शकटं
चालयामासतुः। अपरं ताभ्यां पर्व्वतस्थाद् अवीनादवस्य भवनाद् ४
ईश्वरस्य मञ्जूषया सार्कं तस्मिन् आनीते ऽहियो मञ्जूषाया अग्रेऽग्रे
चलितवान्। अपरं दायूद् इस्रायेलः सकलवंशाश्च परमेश्वरस्य ५
सम्मुखे देवदारुकाष्ठनिर्म्मितान् वल्लकीशुषिरमुरजान् जयघण्टाणि
भेरीश्च वादयन्तो जयध्वनिम् अकुर्व्वन्।

अनन्तरं तेषु नाखोनस्य शस्यमर्दनस्थान उपस्थितेषु गावावबाध्ये ६
जाते तत उषो हस्तौ विस्तार्य्येश्वरस्य मञ्जूषां दधार। तत उषं प्रति ७
परमेश्वरस्य क्रोधे प्रज्वलिते तस्य भ्रमकारणाद् ईश्वरस्तस्मिन् स्थाने तम्
आहतवान्, ततः स ईश्वरस्य मञ्जूषायाः समीपे ममार। परमेश्वर ८
उषम् आहतवान् इति कारणाद् दायूद् असन्तुष्टो बभूव, अपरं स
तस्य स्थानस्य नाम पेरसुषम् उषाघातस्थानमिति कृतवान् अद्यापि तस्य
तन्नाम विद्यते। अपरं दायूद् तस्मिन् दिने परमेश्वराद् भीत्वा कथया- ९
मास तर्हि परमेश्वरस्य मञ्जूषा केन प्रकारेण मम समीपम् आगमि-
ष्यति? अनन्तरं दायूद्नगरं निजसमीपं परमेश्वरस्य मञ्जूषाम् आनेतुम् १०
अनिच्छन् दायूद् पथपार्श्वस्थं गातीयस्यौवेदेदोमस्य निवेशनं तां नीत्वा
स्थापयामास। ततः परमेश्वरस्य मञ्जूषायां गातीयस्यौवेदेदोमस्य निवे- ११
शने त्रीन् मासान् स्थितायां परमेश्वर ओवेदेदोमस्य तस्य सकलपरिज-
नस्य च क्षेमं चकार।

अनन्तरं परमेश्वरो निजमञ्जूषायाः कारणाद् ओवेदेदोमस्य तस्य १२
सर्व्वस्वस्य च क्षेमम् अकुर्व्वदिति वार्त्तां श्रुत्वा दायूद् गच्छन् ओवेदेदोमस्य
निवेशनाद् आनन्देन परमेश्वरस्य मञ्जूषां दायूद्नगरम् आनिनाय।

१३ अपरं परमेश्वरस्य मञ्जूषावाहिषु षटपदानि प्रगतेषु स गावं पुष्टपशुमे-
१४ कञ्च जुहाव। अपरं दायूद् कार्पाससूत्रनिर्म्मितम् एफोदं परिधाय
१५ परमेश्वरस्य सम्मुखे यथाशक्ति ननर्त्त। इत्थं दायूद् इस्रायेलः सर्व्वे
वंशास्वानन्दध्वनिना तूरीध्वनिना च परमेश्वरस्य मञ्जूषाम् आनिन्युः।
१६ अनन्तरं परमेश्वरस्य मञ्जूषाया दायूद्नगरप्रवेशकाले शौलस्य दुहिता
मीखला वातायनेन निरीक्षमाणा परमेश्वरस्य साक्षाद् उल्लम्फयन्तं
नृत्यन्तञ्च राजानं दायूदं वीक्ष्य मनसा तं तुच्छीचकार।
१७ अनन्तरं मनुजाः परमेश्वरस्य मञ्जूषाम् अभ्यन्तरम् आनीय स्वस्थाने
ऽर्थाद् दायूद् तस्या निमित्तं यद् दूष्यम् आसादितवान् तस्य मध्ये स्थाप-
यामासुः, अपरं दायूद् परमेश्वरस्य साक्षात् होमबलीन् मङ्गलार्थक-
१८ बलींश्च प्रोत्ससर्ज। अपरं होमबलीनां मङ्गलार्थकबलीनाञ्चोत्सर्गं
समाप्य दायूद् सैन्याधिपपरमेश्वरस्य नाम्ना लोकेभ्य आशिषं ददौ।
१९ अपरं सकलप्रजानां मध्ये ऽर्थाद् इस्रायेल्वंशसमूहमध्ये प्रतिपुरुषं प्रति-
नारि चैकं पूपम् एकं पात्रं द्राक्षारसम् एकम् उडुम्बरखण्डञ्च परिवे-
षितवान्। अनन्तरं सर्व्वे लोका निजं निजं स्थानं प्रतस्थिरे।
२० अनन्तरं दायूदि निजपरिजनेभ्य आशिषं दातुं परावृत्यागते शौलस्य
दुहिता मीखला दायूदं साक्षात् कर्त्तुं वहिरागत्य बभाषे, इस्रायेलो
राजाद्य सम्यक् महिमान्वितो ऽभूत् यतः कश्चित् कापुरुषो यादृग्
विवस्त्रो भवति, तादृक् सोऽपि स्वभृत्यानां दासीनां साक्षाद् विवस्त्रो-
२१ ऽभूत्। तदानीं दायूद् मीखलां जगाद, परमेश्वरस्य लोकस्येस्रायेलो
राजत्वपदे मां नियोजयितुं यस्तव तातात् सकलपितृवंशाच्च मां वृत-
वान् तस्य परमेश्वरस्य साक्षात् तत् कृतवानहं परमेश्वरस्य साक्षात्
२२ नृत्तवानहं, एतस्मादपि लघिष्ठो निजदृष्टौ न्यक् च भविष्यामि, तथापि
२३ त्वया यासां दासीनां वाक्यम् उक्तं ताभिरादरणीयो भविष्यामि। अतः
शौलस्य दुहिता मीखला मरणं यावत् निरपत्या तस्थौ।

---

७ सप्तमोऽध्यायः।

१ मन्दिरं निर्म्मातुं दायूदोऽभिलाषः नाथनस्य सम्मतिः ४ परमेश्वरस्यादेशात् नाथ-
नस्य तस्य वारणं १२ दायूद्वंशं प्रतीश्वरस्य प्रतिज्ञानं १८ दायूदः प्रार्थनप्रशंसने।

१ अनन्तरं परमेश्वरेण राज्ञश्चतुर्दिक्स्थेषु रिपुषु दमितेषु स यदा
२ निजगेहे न्यवसत् तदा राजा भविष्यद्वादिनं नाथनं जगाद, पश्य

मयैरसकाष्ठे निर्म्मिते प्रासाद उष्यते किन्तु परमेश्वरस्य मञ्जूषा यव-
निकानां मध्ये वसति। ततो नाथनो राज्ञे कथयामास भद्रं त्वं ३
निजमनोगतं साधय परमेश्वरस्तव सहाय आस्ते।

अपरं तस्यां रजन्यां परमेश्वरस्य वाक्यमिदं नाथनस्य निकटं समा- ४
गच्छत्, त्वं गत्वा मम दासं दायूदं वद परमेश्वर इति वाचं वक्ति त्वं किं ५
मम वासार्थं मन्दिरमेकं निर्म्मास्यसि? इस्रायेल्वंशस्य मिसरदेशात् ६
समानयनदिवसमारभ्याद्य यावत् मन्दिरे मया न न्युष्यते, केवलं दूष्य
आवासे च भ्रम्यते। तथापीस्रायेल्वंशानां मध्ये मम भ्रमणकाले मम ७
पालस्येस्रायेल्लोकस्य पालकत्वपदे नियुक्त इस्रायेलीयानां कश्चिद् वंशः
कदापि किं मया पृष्ट इदं, युष्माभि र्मत्कृते कुत एरसकाष्ठमयं गृहं न
निर्म्मीयते? इदानीं त्वं मम दासं दायूदं वद, सेनाधिपः परमेश्वर ८
एतां वाचं वक्ति मम लोकानाम् इस्रायेल्वंशीयानां राजानं कर्त्तुमहं
त्वां मेषस्थानकात् मेषाणाम् अनुचरणाच गृहीतवान्। अपरं त्वं यद्यद् ९
उपक्रमितवान् तत्सर्व्वस्मिन् अहं तव सहायो भवन् तव सम्मुखे तव
सकलशत्रून् उच्छिन्नवान् अपरं चक्रवर्त्तिनां महतां लोकानां नामवत्
तव महानाम च कृतवान्। तदन्यत् मया निजलोकानाम् इस्रायेल्वंशी- १०
यानां कृते स्थानमेकं निश्चित्य ते तस्मिन् स्थाने समस्थाप्यन्त, ते तत्र स्वस्थाने
निवसन्ति पुनश्चालिता न भविष्यन्ति। पूर्व्वकाले यदाहं मदीयेस्रायेल्- ११
वंशान् शासितुं विचारयितॄन् न्ययोजयं तदा च यादृशं ते दुष्टै र्मान-
वैरक्लिश्यन्त तादृशं पुन र्न क्लेक्ष्यन्ते। सकलरिपुभ्यश्चाहं तुभ्यं विश्रामं
दत्तवान्। परमेश्वरस्त्वत्कृते वंशमेकं स्थापयिष्यतीति वाचमपि परमे-
श्वरस्त्वां ज्ञापयति।

अपरं त्वयि सम्पूर्णायुषि सति निजपितृलोकैः समं महानिद्रां गत- १२
वति चाहं तव पश्चात् तवौरसवंशं स्थापयिष्यामि तस्य राज्यं स्थिरी-
करिष्यामि च। स मम नामार्थं मन्दिरमेकं निर्म्मास्यति, अहञ्च तस्य १३
राजसिंहासनम् अनन्तकालं यावत् स्थिरीकरिष्यामि। अहं तस्य पिता १४
भविष्यामि स च मम पुत्त्रो भविष्यति; यदि सोऽपराधी भवति तर्ह्यहं
मनुष्याणां दण्डै र्मानवसन्तानानाञ्च प्रहारैस्तं दण्डयिष्यामि। किन्तु १५
मया तव साक्षात् दूरीकृतो यः शौलस्तस्माद् यादृशोनुग्रहो ऽपसारि-
तस्तादृक् तत्तो ममानुग्रहो नापसारिष्यते। तव सम्मुखे तव वंशस्तव १६
राज्यञ्चानन्तकालं यावत् स्थिरो भविष्यति तव सिंहासनमप्यनन्तकालं

१७ यावत् स्थिरं भविष्यति। अनन्तरं तानि सकलवाक्यानि तच्च दर्शनं
यथातथ्यं नाथनेन दायूदे कथयाञ्चक्रिरे।
१८ ततो राजा दायूद् अभ्यन्तरं गत्वा परमेश्वरस्य सम्मुख उपविश्य कथ-
यामास हे प्रभो परमेश्वर कोऽहं मम वंशश्च कः, यत् त्वं माम् एतत्-
१९ पर्य्यन्तम् उन्नामितवान्? तथापि हे प्रभो परमेश्वर त्वम् एतदपि स्वदृष्टौ
क्षुद्रं कार्य्यं मत्वा निजदासस्य सुदीर्घाय भाविवंशायापि मङ्गलं प्रति-
२० श्रुतवान्। हे मम प्रभो परमेश्वर किमयं मानुषस्य धर्म्मः? एतदन्यत्
दायूद् किमपरं निवेदयितुं शक्नोति? हे मम प्रभो परमेश्वर त्वं निज-
२१ दासं वेत्सि। त्वं निजवाक्यकारणात् निजमनोभिलाषाच्चैतादृशं माहात्म्यं
२२ विदधत् स्वदासं सर्व्वमेतत् ज्ञापितवान्। अतो हे प्रभो परमेश्वर त्वं
महान् अस्माभिः स्वकर्णै र्यद्यत् श्रुतं तत्सर्व्वस्मिन् तव सदृशः कश्चिदपि
२३ नास्ति त्वां विना परः कश्चिद् ईश्वरो नास्ति। अपरं तवेस्रायेल्लोकस्य
तुल्या का जातिरास्ते? एवम्भूतैकापि जाति र्भूमण्डले किं विद्यते
यस्या मोचनेन स्वकीयजातिं लब्धुं महायशो ग्रहीतुञ्च स्वयम् ईश्वर
उपागतवान्? मिसरदेशाद् भिन्नजातीयेभ्यो लोकेभ्यो देवेभ्यश्च भवतैव
मुक्ताया जात्याः समीपे भवदर्थं महायशः प्रकाशितं स्वदेशे च भयङ्क-
२४ राणि कर्म्माणि कृतानि। यतस्त्वेस्रायेल्वंशो यद् अनन्तकालं यावत्
तव जाति र्भवेत् तदर्थं त्वं स्वार्थं तं समस्थापयस्तथा हे परमेश्वर त्वमेव
२५ तेषाम् ईश्वरोऽभवः। इदानीं हे प्रभो परमेश्वर स्वदासमधि तस्य
वंशमधि च त्वया प्रतिश्रुतं वाक्यम् अनन्तकालं यावत् स्थिरीक्रियतां,
२६ त्वया यदुक्तं तदेव क्रियतां। सेनाधिपः परमेश्वर इस्रायेल्वंशस्येश्वर
इति तव यन्नामास्ते तद् अनन्तकालं यावद् महद् भवतु तव दासस्य
२७ दायूदो वंशश्च तव साक्षात् स्थिरो भवतु। हे इस्रायेलः प्रभो सेनाधिप
परमेश्वर तव वंशमहं वर्द्धयिष्यामीति वाक्यं त्वयैव तव दासस्य
कर्णगोचरीकृतं ततो हेतोस्तव समीपे प्रार्थनामिमां निवेदयितुं तव
२८ दासस्य मनस्युत्साहो जायते। हे मम प्रभो परमेश्वर त्वमेव सत्य
ईश्वरस्तव वचनानि च सत्यानि त्वं निजदासाय शुभमिदं प्रतिश्रुत-
२९ वान्। अतो हे प्रभो परमेश्वर तव दासस्य वंशो यथानन्तकालं यावत्
तव समक्षं स्थिरो भवेत् तथा तमध्याशिषं वक्तुं त्वमेवार्हसि, यतस्त्वमेव
तत् प्रतिश्रुतवान् तवाशीर्व्वादेन च तव दासस्य वंशोऽनन्तकालं यावद्
आशीःप्राप्तो भविष्यति।

८ अष्टमोऽध्यायः।

१ पिलेष्टीयमोयाबीयलोकानां दायूदा दमनं ३ हददेषरस्यारामीयलोकानाञ्च पराजयः ९ दायूदः समीपं तोयिन्नृपस्य पुत्रप्रेषणं १४ इदोमदेशे दुर्गस्थापनं १६ दायूदः पारिषदानां नामानि।

अनन्तरं दायूद् पिलेष्टीयान् पराजित्य नम्रौ चकार तेषां करेभ्यः १
प्रधाननगरस्य नायकत्वम् अपजहार च। अपरं स मोयाबीयान् परा- २
जित्य भूमौ पातयित्वा रज्जुभिः परिममे ऽर्थाद् रज्जुद्वयप्रमाणान् बधार्थं
सम्पूर्णरज्जुप्रमाणांश्च जीवनार्थं परिममे ततो मोयाबीया दायूदो वशी-
भूय करदायिनो बभूवुः।

अनन्तरं फरातटिन्याः समीपस्थदेशे निजकर्तृत्वं पुनः संस्थापयितुं ३
सोबाया राज्ञि रिहोबस्य पुत्रे हददेषरे गते दायूद् तं पराजित्य
तस्य सप्तशताधिकं सहस्रं हयारोहिणो विंशति सहस्राणि पदातिकान् ४
निजग्राह रथहयानां पादशिराश्चिच्छेद च किन्तु तेषां मध्ये शतं रथान्
अवशेषयामास। अनन्तरं दम्मेशकस्थारामीयेषु सोबान्नृपस्य हद- ५
देषरस्य साहाय्यं कर्त्तुमागतेषु दायूद् अरामीयानां द्वाविंशतिसह-
स्राणि लोकान् अवधीत्। अपरं दायूद् अरामीयदम्मेशकप्रदेशे ६
सैनिकाः स्थापयामास, ततोऽरामीया दायूदो वशीभूय करदायिनो
बभूवुः। अनेन प्रकारेण दायूद् यद्यद् उपाक्रामत् तत्सर्व्वस्मिन्
परमेश्वरस्तं जयिनं चकार। अपरं दायूद् हददेषरस्य दासानां गात्र- ७
स्थानि स्वर्णफलकानि गृहीत्वा यिरूशालमम् आनिनाय। अपरं ८
दायूद् राजा हददेषरस्याधीनाभ्यां बेटहं बेरोथाश्चेतिनामकाभ्यां नग-
राभ्यां भूयिष्ठानि पित्तलान्यानिनाय।

अनन्तरं दायूदा हददेषरस्य सर्व्वाणि सैन्यानि पराजितानीति ९
वार्त्तां निशम्य तोयिनामा हमातीयनृपति र्दायूदः कल्याणं प्रष्टुं १०
युध्यता तेन हददेषरस्य पराजितत्वकारणात् दायूदो धन्यवादं
कर्त्तुञ्च स्वपुत्रं योरामं राज्ञो दायूदः समीपं प्रेषयामास, यतो हद-
देषरेण सार्द्धं तोयिनाम्नोऽपि युद्धम् आसीत्, अनन्तरं स दुर्वर्णस्य
सुवर्णस्य पित्तलस्य च पात्राणि गृहीत्वाजगाम। ततोऽराममोयाबा- ११
म्मोनपिलेष्टीयामालेकप्रभृतयो याः सर्व्वा जातयो दायूदा पराजिता-
स्ताभ्यः सोबान्नृपात् रिहोबस्य पुत्राद् हददेषराच्च लोठितानि यानि १२

दुर्वर्णसुवर्णानि दायूदा समुत्सृष्टानि तैः सह तानि सर्व्वाण्यपि परमे-
१३ श्वरमुद्दिश्य समुत्ससृजिरे । अपरं दायूद् लवणाख्यायाम् उपत्यका-
याम् अष्टादशसहस्राण्यरामीयलोकान् हत्वा प्रत्यागमनकाले महतीं
ख्यातिं लेभे ।

१४ अपरं दायूद् इदोमे सैनिकाः स्थापयामास, स इदोमदेशस्य सर्व्वत्रैव
सैनिकाः स्थापयाञ्चकार, इदोमीयाश्च सर्व्वे दायूदो दासा बभूवुः;
अपरं दायूद् यद्यत् स्थानं जगाम तत्सर्व्वस्थाने परमेश्वरस्तं जयिनं
१५ चकार। इत्थं दायूद् इस्रायेलः सकलवंशोपरि राजत्वं कुर्व्वन् निज-
सकललोकान् प्रति सुविचारं न्यायव्यवहारञ्चाचचार ।

१६ तस्मिन् काले सिरूयायाः पुत्रो योयावः प्रधानसेनापतिरासीत् ।
१७ अहीलूदस्य पुत्रो यिहोशाफटश्चेतिहासलेखक आसीत् । अहीटूवस्य
सुतः सादोकोऽवियाथरस्य सुतोऽहीमेलकश्च याजकावास्तां सिरायश्च
१८ लेखक आसीत् । यिहोयादस्य सुतो विनायः किरेथीयानां पिलेथी-
यानाञ्चाध्यक्ष आसीत् तथा दायूदः पुत्रा राजसभासद आसन् ।

---

९ नवमोऽध्यायः ।

१ शौलवंशमधि दायूदो जिज्ञासा ५ दायूदः समीपे मिफीवोशतस्यानयनं ७ मिफीवोशताय निजभोजनासने स्थानदानं शौलस्य सकलभूमिदानं ९ मिफीवोशतस्य भृत्यस्य सीवस्य कथा ।

१ अनन्तरं दायूद् पृष्टवान् अहं योनाथनस्य कृते यं प्रति प्रेमाचरितुं
२ शक्नोमि शौलवंशमध्ये तादृशः कोपि किम् अवशिष्ट आस्ते? ततः सीव
इतिनामा शौलस्य परिजनानां य एको दास आसीत् तस्मिन्
दायूदः समीप आनीते राजा तं पप्रच्छ त्वं किं सीवः? सोऽवदत् अहं
३ भवतः स दास एव । अनन्तरं राजा पृष्टवान् अहं यं प्रतीश्वरस्य
नाम्नि प्रेमाचरितुं शक्नोमि शौलस्य वंशे तादृशः कश्चित् किम् अवशिष्ट
आस्ते? ततः सीवो नृपतिं ज्ञापयामास, उभयचरणाभ्यां खञ्जो योना-
४ थनस्यैकः सुतोऽवशिष्ट आस्ते । तदा राजा तं पप्रच्छ स कुत्र? सीवो
राजानं व्यज्ञापयत्, पश्यतु स लोदिवारे ऽम्मीयेलसुतस्य माखीरस्य
निवेशन आस्ते ।

५ अपरं राजा दायूद् लोदिवारं दूतं प्रहित्याम्मीयेलसुतस्य माखीरस्य
६ निवेशनात् तम् आनाययामास । तदानीं शौलस्य पौत्रो योनाथनस्य

पुत्रो मिफीबोशतो दायूदः समीपम् आगत्य न्युब्जः सन् तं प्रणनाम।
ततो दायूद् अवदत् हे मिफीबोशत। स प्रत्यवदत् भवतो दास उप-
स्थित आस्ते।
अनन्तरं दायूद् तं जगाद, भयं माकार्षीः, अहं तव पितु र्योनाथनस्य ७
कृते त्वां प्रति सद्भावम् आचरिष्यामि तव पितामहस्य शौलस्य सर्व्वा
भूमीश्च तुभ्यं परावर्त्य दास्यामि, अपरं त्वं नित्यं मम भोजनासने
भोक्ष्यसे। ततः स दण्डवद् भवन् बभाषे भवतो दासोऽहं को यत् ८
मृतकुक्कुरतुल्यं मां प्रति भवता सुदृष्टिः क्रियते?
अनन्तरं राजा शौलस्य दासं सीवम् आहूय जगाद शौलस्य तस्य ९
वंशस्य च यद्यद् आसीत् तत्सर्व्वम् अहं तवाधिपतेः पुत्राय दत्तवान्।
अतस्त्वया तव सुतैश्च तव दासैश्च तस्या भूमेः कृषिकर्म्म कृत्वा तवाधि- १०
पते र्भोज्यार्थं तदुत्पन्नं द्रव्यमानीय दास्यते, किन्तु तवाधिपतेः पुत्रो
मिफीबोशतो मम भोजनासने भोजनं करिष्यति। तस्य सीवस्य
पञ्चदशपुत्रा विंशति र्दासाश्चासन्। अनन्तरं सीवो महीपतिं जगाद ११
मम प्रभुणा नृपेण यद्यद् आज्ञापितं तत्सर्व्वं भवतो दासेन कारि-
ष्यते। राजा व्याजहार मिफीबोशतो राजपुत्र इव मम भोजनासने
भोजनं करिष्यति। मिफीबोशतस्य मीखानामक एकः शिशुपुत्र १२
आसीत्। अपरं सीवस्य गृहवासिनः सर्व्वे लोका मिफीबोशतस्य दासा
बभूवुः। किन्तु मिफीबोशतो यिरूशालमे न्यवसत् यतो भूपते र्भोज- १३
नासने स नित्यं समश्नात्, स उभाभ्यां पादाभ्यां खञ्ज आसीत्।

---

१० दशमोऽध्यायः।

१ हानून प्रति दायूदा प्रेषितानां दूतानाम् अपमानितत्वं ६ अम्मोनीयानाम् अरामीयाणाञ्च पराजितत्वं १५ अन्यारामीयैः समं शोवकस्य हतत्वं।

ततः परम् अम्मोनवंशस्य राज्ञि मृते तस्य पुत्रो हानूनो राज्यपदं १
प्राप। ततो दायूद् अवदत् हानूनस्य पिता नाहशो मां प्रति यादृशं २
सद्भावम् आचरद् अहमपीदानीं हानूनं प्रति तादृशं सद्भावम् आच-
रिष्यामि। अतो दायूद् तस्य पितरमधि तं सान्त्वयितुं स्वदासान् प्रेषया-
मास। दायूदस्तेषु दासेष्वम्मोनवंशीयानां देशमुपस्थितेष्वम्मोनवंशीयानां ३
मुख्याः स्वप्रभुं हानूनं जगदुः, दायूदा तव समीपं सान्त्वयितारो
जनाः प्रहिता इति कर्म्म तव पितुः सम्मानार्थं तेन कृतं त्वं किमित्थं

बुध्यसे? दायूद् नगरं निरीक्ष्यानुसन्धाय च नाशयितुम् इच्छतीति
४ हेतोः स निजदासान् प्रहितवान् इति किं नहि? ततो हानूनो
दायूदो दासान् धृत्वा तेषां श्मश्रूणामर्द्धमर्द्धं क्षौरयित्वा नितम्बपर्य्यन्तं
५ तेषां वस्त्राणि छित्त्वा च तान् विसृष्टवान्। अनन्तरं ते दायूदम् एत-
द्वार्त्तायां ज्ञापितायां तेषाम् अतीव त्रपाकारणाद् राजा तान् साक्षात्
कर्त्तुं लोकान् प्रहित्येदम् आदिदेश, यावद् युष्माकं श्मश्रूणि न वर्द्धन्ते
तावद् यूयं यिरीहो तिष्ठत पश्चात् परावृत्यागच्छत।
६ अनन्तरं वयं दायूदः सम्मुखे घृणार्हा अभवामेति वीक्ष्याम्मोन-
वंशीया दूतान् प्रहित्य वेतनम् अङ्गीकृत्य वैतरिहोबस्थानां सोबा-
स्थितानाञ्चारामीयाणां विंशतिः सहस्राणि पदातिकान् माखाया राज्ञ
एकसहस्रं लोकान् टोबदेशीयान् द्वादशसहस्राणि लोकांश्चानिन्युः।
७ तां वार्त्तां निशम्य दायूद् योयाबं बलवन्ति सर्व्वसैन्यानि च तत्र
८ प्रेषयामास। ततो ऽम्मोनवंशीया बहिरागत्य गोपुरप्रवेशस्थाने सैन्यानि
रचयाञ्चक्रिरे तद्भिन्नाः सोबातो रिहोबाच्चागता अरामीयाः टोबात्
९ माखातश्चागता लोका अपि क्षेत्रे व्यूहं रचयाञ्चक्रिरे। इत्थम् अग्र-
दिशि पश्चाद्दिशि च द्वयो र्दिशो र्मद्विरुद्धं युद्धं जायत इति दृष्ट्वा
योयाब इस्रायेलः सर्व्वेभ्यः परीक्षितलोकेभ्यो लोकान् वृत्वा स्वयम्
१० अरामीयाणां विरुद्धं व्यूहं रचयामास। अवशिष्टलोकेषु च निजभ्रातर्य्य-
वीशये तेन समर्पितेषु सोऽम्मोनीयानां विरुद्धं व्यूहं रचयाञ्चकार।
११ अपरं योयाबस्तं जगाद, अरामीयाश्चेत् मत्तो बलवन्तो भवन्ति
तर्हि त्वं मामुपकरिष्यसि, अम्मोनीयाश्च चेत् त्वत्तो बलवन्तो भवन्ति
१२ तर्ह्यहं गत्वा त्वामुपकरिष्यामि। त्वं प्रबलो भव वयं स्वलोका-
नाम् अस्मदीश्वरस्य नगराणाञ्च कृते पुरुषत्वं प्रकाशयिष्यामहे परमे-
१३ श्वरो यत् क्षेमं मन्यते तदेव करिष्यति। अनन्तरं योयाबे तस्य सङ्गि-
लोकेषु चारामीयैः समं योद्धुं प्रगतेषु ते तस्याग्रेऽग्रे पलायाञ्चक्रिरे।
१४ अपरम् अरामीयाः पलायन्त इति दृष्ट्वा अम्मोनवंशीया अबीशयस्याग्रे
ऽग्रे पलाय्य नगरं प्रविविशुः। ततो योयाबोऽम्मोनवंशीयानां समीपात्
परावृत्य यिरूशालमम् आगमत्।
१५ अनन्तरं वयम् इस्रायेल्वंशीयैः पराजिता इति वीक्ष्यारामीया
१६ अमिलन्। अपरं फरातनद्याः पारस्था अरामीया हददेषरेण
दूतान् प्रहित्य वहिष्कृताः सन्तो हेलमम् आगच्छन् तस्य हददेष-

रस्य सेनापतिः शोवकश्च तेषाम् अग्रगामी बभूव। अनन्तरं दायूद् १७
तां वार्त्तां निशम्येस्रायेलः सकलवंशान् संगृह्य यर्दनतटिन्याः पारं
गत्वा हेलमम् उपतस्थे। ततोऽरामीयलोका दायूदो विरुद्धं व्यूहं रच-
यित्वा तेन साकं युयुधुः। अपरम् अरामीया इस्रायेल्वंशस्य सम्मुखात् १८
पलायाञ्चक्रिरे ततो दायूद् अरामीयाणां सप्तशतानि रथान् चत्वारिंशत्
सहस्राणि हयारोहिणश्च नाशयामास अपरं तेषां सेनापतिः शोव-
कोऽपि तत्राहतः सन् ममार। अनन्तरं वयम् इस्रायेल्वंशीयैः परा- १९
जिता इति वीक्ष्य हदरेषरस्याधीनाः सर्व्वे नृपतय इस्रायेल्वंशैः समं
सन्धिं कृत्वा तेषां वशे बभूवुः। अतो ऽरामीया अम्मोनवंशीयान्
पुनरुपकर्त्तुं बिभयाञ्चक्रुः।

---

११ एकादशोऽध्यायः।

१ रब्बाया अवरोधनं २ बतशेबया समं दायूदो व्यभिचरणं ६ ऊरियेण समं दायूदो व्यवहरणं १४ ऊरियस्य बधार्थं योयावस्य समीपे पत्रप्रेषणं १८ ऊरियस्य हतत्ववार्त्ताया दायूदं प्रति प्रेषणं २१ योयावं प्रति दायूद उत्तरं २६ बतशेबाया दायूदा विवहनं।

अनन्तरं तस्मिन् बत्सरे गते सति राज्ञां युद्धगमनसमये दायूद् १
योयावं तेन समं निजदासान् सर्व्वान् इस्रायेल्लोकांश्च प्रेषयामास
ततस्ते अम्मोनवंशीयदेशं नाशयित्वा रब्बानगरीम् अवरुरुधुः। किन्तु
दायूद् यिरूशालमि तस्थौ।

अपरम् एकस्मिन् दिवसे सन्ध्याकाले दायूद् खट्वात उत्थाय राज- २
प्रासादस्य पृष्ठे विहरतीत्यन्तरे प्रासादपृष्ठात् परमसुन्दरीं योषि-
देकां स्नान्तीं वीक्ष्य दायूद् तस्यास्तत्त्वं ज्ञातुं लोकं प्रेषयामास। ततः स ३
जगाद सा इलियामस्य दुहिता हित्तीयस्योरीयस्य जाया बतशेबा
किं नहि? तदानीं दायूद् दूतान् प्रहित्य ताम् आनाययत् अपरम् ४
तस्याम् आगतायां दायूद् तया समं शयितवान् तदानीं सा ऋतुस्ना-
तासीत्, अनन्तरं सा निजनिवेशनं परावृत्य जगाम। तदानीं सा ५
नारी गर्भधारणाद् दूतेन दायूदं वार्त्तामवदत् अहं गर्भवती जातेति।

अनन्तरं दायूद् दूतेन योयावम् आज्ञापयामास त्वं हित्तीयम् ६
ऊरियं मत्समीपं प्रेषयेति। ततो योयावो दायूदः समीपम् ऊरियं
प्रेषयामास। अपरम् ऊरिये दायूदः समीपम् आगते दायूद् तं ७

८ योयावस्य मङ्गलं लोकानां मङ्गलं युद्धस्य मङ्गलञ्च पप्रच्छ। अपरं दायूद्
ऊरियं जगाद त्वं स्वगेहं गत्वा निजपादौ प्रक्षालय। ततो राज-
निवेशनाद् वहिर्गतस्योरियस्य पश्चाद् राज्ञो निकटात् कतिपयानि
९ भक्ष्यद्रव्याणि प्रेषितानि। तथाप्यूरियो राजप्रासादस्य द्वारप्रवेशस्थाने
स्वप्रभो दासगणेन सह शिश्ये स्वगेहं न जगाम। अत ऊरिय निजनिवे-
१० शनं नागमद् इति वार्त्तां लोका दायूदं व्यज्ञापयन्। ततो दायूद् ऊरियं
बभाषे त्वं किं यात्रात आगतो नासि? तर्हि कुतः स्वगेहं न गच्छसि?
११ ऊरियो दायूदं प्रतिजगाद, परमेश्वरस्य मञ्जूषयेस्रायेल्वंशीयै यिहूदा-
वंशीयै र्लोकैश्च दूष्येषु उष्यते मम प्रभु र्योयावोऽपि मम प्रभो र्दासाश्च
प्रान्तरे शिविरे वसन्ति, तथा सति भोजनपानार्थं जायया सह
शयनार्थञ्च मया किं स्वगेहं गमिष्यते? भवतो भवज्जीवनस्य च शपथं
१२ कृत्वाहं वदामि, एतादृशं कर्म्म मया न करिष्यते। ततो दायूद्
ऊरियं बभाषे त्वम् अद्यापि स्थानेऽस्मिन् तिष्ठ श्वस्त्वां विस्रक्ष्यामि।
१३ तत ऊरियस्तद्दिनं परदिनञ्च यिरूशालमे तस्थौ। अपरं दायूदा निम-
न्त्रितः स तस्य साक्षाद् भोजनपाने कृतवान् तेन च मत्तीकृतोऽपि।
सन्ध्याकाले स वहिर्गत्य निजप्रभो र्दासैः साकं निजशय्यायां शयितवान्
किन्तु निजगृहं न जगाम।
१४ अपरं प्रातःकाले दायूद् पत्रमेकं लिखित्वोरियेण योयावस्य समीपं
१५ प्रेषयामास। तस्मिन् पत्रे लिखितमेतदासीत् एष ऊरियो युष्माभि-
स्तुमुलयुद्धस्य सम्मुखे नियुज्यतां ततः परं तस्य पश्चाद् अपसर्त्तव्यं
१६ ततः स आहतो मरिष्यति। अनन्तरं योयावो यदा नगरम् अवे-
क्ष्यत् तदा यत्र स्थाने बलवन्तो लोकाः सन्ति तद् वीक्ष्य तत्रैवोरियं
१७ नियुक्तवान्। अनन्तरं नगरस्था लोका वहिर्भूय योयावेन साकं युद्ध-
वन्तः, ततो दायूदो दासानां मध्ये कतिपया जना हतास्तेषां मध्ये स
हित्तीयोरियोऽप्यहन्यत।
१८ अपरं योयावो दूतेन युद्धस्य वार्त्तां दायूदं ज्ञापयामास। स तं
१९ दूतम् इदम् आदिदेश, राज्ञः समीपे युद्धवार्त्तानिवेदने त्वया समा-
२० पिते राजा कोपं गत्वा, यूयं कुतो योद्धुं नगरसन्निधिं गतवन्तः? प्राची-
२१ रात् पौरै र्वाणा निक्षेप्स्यन्त इति यूयं नाजानीत? यिरुब्बेशतस्य सुतो-
ऽवीमेलकः केन हतः? एकया स्त्रिया प्राचीरात् पेषणीखण्डे निक्षिप्ते
स तेवेषे ममारेति किं सत्यं नहि? तर्हि यूयं कुतो नगरसन्निधिं

गतवन्त इति चेद् वदेत्, तर्हि भवतो दासो यो हित्तीयोरियः सोऽपि हत इति त्वया वक्तव्यं।

ततः स दूतो गत्वा दायूदं प्राप्य योयावेनादिष्टां वार्त्तां जगाद। २२
स दूतो दायूदं व्यज्ञापयत् ते लोकाः प्रबला भूत्वा प्रान्तरेऽस्माकं २३
समीपं बहिरागच्छन् तदानीं वयं द्वारप्रवेशस्थानं यावत् तैः साकं
रणम् अकुर्म्म। ततो धनुर्द्धराः प्राचीराद् भवतो दासान् प्रति २४
शरान् अक्षिपन् ततो भूपतेः कतिपया दासा अहन्यन्त तेषां मध्ये
भवतो दासो हित्तीय ऊरियोऽप्यहन्यत। तदानीं दायूद् तं दूतं २५
जगाद त्वं योयावायेदं कथय त्वमेतेन नासन्तुष्टो भव यतः खड्ग एकं
यद्वत् तादृग् अन्यमपि विनाशयति, त्वं नगरस्य प्रतिकूलं पुन र्दृढं युद्धा
तद् वशीकुरु, इत्थं तम् आश्वासय।

अनन्तरम् ऊरियस्य जाया स्वपतेरूरियस्य मरणवार्त्तां निशम्य २६
स्वामिनं शुशोच। अपरं शोकदिवसेषु व्यतीतेषु दायूद् दूतं प्रहित्य तां २७
निजनिवेशनम् आनाययत्, ततः सा तस्य जाया भूत्वा तस्य पुत्त्रमेकं
प्रसुषुवे किन्तु दायूदा कृतं कर्म्मेदं परमेश्वरस्यातुष्टिकरं बभूव।

---

१२ द्वादशोऽध्यायः।

१ नाथनेन मेषस्य दृष्टान्तकथनं दायूदं प्रति भर्त्सनञ्च १५ दायूदः शिशो र्मरणकथनं २४ सुलेमनो जन्म २६ रब्बानगरस्य वशीकरणं।

अनन्तरं परमेश्वरो दायूदः समीपं नाथनं प्रेषयामास स चागत्य १
तस्मै कथयामास, एकस्मिन्नगरे धनवानेको दरिद्रश्चैको द्वावास्तां।
तस्य धनिनोऽतीव बहवो गोमेषव्रजा आसन्। अपरं तस्य दरिद्रस्यैकां २
क्षुद्रां मेषवत्सां विनान्यत् किमपि नासीत्, स तां क्रीत्वापालयत् ३
सा च तेन तद्बालकैश्च सह वसती क्रमेणावर्द्धत सा तस्य स्वभक्ष्यद्रव्यम्
अभुङ्क्त तस्य पात्रेऽपिबच्च तस्य वक्षःस्थले ऽशेत तस्य कन्येव चासीत्।
अपरम् एकस्मिन् पथिके तस्य धनवतो गृहेऽतिथौ भूते सोऽतिथये ४
तस्मै पक्तुं निजगोमेषादीनां व्रजेभ्यः किञ्चिद् ग्रहीतुम् अनिच्छन्
तस्य दरिद्रस्य मेषवत्सां गृहीत्वा तामेव तदतिथये पक्तवान्। ततो ५
दायूद् तं धनवन्तं प्रति महाक्रोधेन प्रज्वलन् नाथनं जगाद, परमे-
श्वरस्यामरतायाः शपथं कृत्वा वदाम्यहं तत्कर्म्मकारी लोकोऽवश्यं

६ घानिष्यते। तस्या मेषवत्सायाश्चतुर्गुणं तेन परावर्त्त्य दातव्यं यतः स
दयाम् अकृत्वा तादृशं कर्म्म चकार।
७ तदा नाथनो दायूदं जगाद त्वमेव स मनुष्यः। इस्रायेलः प्रभुः परमे-
श्वर इति वाचं वक्ति, त्वम् इस्रायेल्वंशस्य राजा भवितुं मयाभिषिक्तः
८ शौलस्य हस्ताद् उद्धृतश्च; अपरं तव प्रभोः परिजनगणो मया तुभ्यं
दत्तस्तस्य जायागणस्तव वक्षःस्थले समर्पितश्च तथेस्रायेल्वंशो यिहूदा-
वंशश्च मया तव वशीकृतः। अपरं सर्व्वमेतत् काय्यं यद्यल्पम् अभविष्यत्
९ तर्ह्यहं तुभ्यं पुनरमुकम् अमुकं वस्त्वप्यदास्यं। इदानीं त्वं परमेश्वरस्य
साक्षात् पापं कृत्वा कुतस्तस्याज्ञां तुच्छामकरोः? त्वं हित्तीयम् ऊरियं
खड्गेनावधीस्तस्य जायां निजजायामकरोस्तथाम्मोनवंशीयानां खड्गे-
१० नाघातयः। अतः खड्गस्तव निवेशनात् कदापि नापसरिष्यति यतस्त्वं
११ माम् अवज्ञायोरियस्य जायां निजजायाम् अकार्षीः। परमेश्वर एनां
वाचं वदति, पश्याहं तव परिवारत एव तवामङ्गलम् उत्पादयि-
ष्यामि तव साक्षात् तव भार्य्यागणं गृहीत्वा तव सहवासिने दास्यामि
च ततः स एतस्य सूर्य्यस्य साक्षात् तव जायाभिः सह शयिष्यते।
१२ एतत् त्वया गोपने कृतं किन्तु तत्काय्यं सर्व्वेषाम् इस्रायेलीयानां सूर्य्यस्य
१३ च साक्षादेव मया कारिष्यते। ततो दायूद् नाथनं बभाषे परमेश्वरस्य
विरुद्धं मया पापमकारि। ततो नाथनो दायूदम् अवदत्, परमेश्वरस्तव
१४ पापं दूरीकृतवान् एतेन त्वं न मरिष्यसि। किन्तु त्वम् एतेन कर्म्मणा
परमेश्वरस्य रिपून् अतीवानिन्दय इति कारणात् तवौरसोऽयं पुत्रो
मरिष्यति। अनन्तरं नाथनो निजगृहं प्रतस्थे।

१५ अनन्तरम् ऊरियस्य जायाया गर्भजाते दायूदः पुत्रे परमेश्वरेणा-
१६ हते सोऽतीव पीडितो बभूव। ततो दायूद् बालकस्य कृत ईश्वरस्य
समीपे प्रार्थयाञ्चक्र उपोवास च गेहं प्रविश्य कृत्स्नां रजनीं भूमौ निपत्य
१७ तस्थौ च। ततस्तस्य गृहस्य प्राचीनास्तं परिहृत्य भूमित उत्थापयितुं
प्रयेतिरे, किन्तु स नाङ्गीचकार तैः समं भोजनमपि न चकार।
१८ अपरं सप्तमे दिवसे बालको ममार, ततो बालकोऽम्रियतेति वार्त्तां
दायूदं वक्तुं तस्य दासा बिभयाञ्चक्रुः, यतस्ते गदितवन्तः पश्यत बालके
सजीवे सति सोऽस्माभिर्बहु गदितोऽपि नास्माकं वाक्यान्यगृह्णात् तर्हि
बालकोऽम्रियतेति वार्त्तां तं गदितुं कथं शक्नुमः? तेन सोऽहितं कर्म्म
१९ करिष्यति। किन्तु दासाः परस्परं प्रति वाचं प्रजपन्तीति दायूद् ददर्श

ततो बालको मृत इति बुद्धा दायूद् दासगणं पप्रच्छ, बालकः किं मृतः?
त ऊचुः स मृत इति। तदानीं दायूद् भूमित उत्थाय स्नात्वा गात्र- २०
मार्ज्जनं कृत्वा वस्त्राणि परिवर्त्त्य परमेश्वरस्यावासं प्रविश्य भजनं चकार,
अनन्तरं स्वगृहम् आगतेन तेन समाज्ञापितास्ते तत्सम्मुखे भक्ष्यद्रव्याणि
परिवेषयाञ्चक्रिरे ततः स बुभुजे। एतेन तस्य दासास्तं बभाषिरे भवता २१
किमिदं क्रियते? बालके जीवति भवान् तस्य कृत उपोषितवान् रोदि-
तवांश्च, बालके मृते भवान् समुत्थाय खाद्यं भुङ्क्ते। ततः स कथयामास २२
बालके जीवति सति को जानाति परमेश्वरश्चेत् मां प्रति प्रसन्नो भवेत्
तर्हि बालको जीविष्यतीति विज्ञायाहम् उपावसम् अरोदञ्च। इदानीं स २३
मृत एव किमर्थम् उपवत्स्यामि? तं पुनरानेतुं किं मया शक्यं? अहं
तस्य समीपं यास्यामि किन्तु स मम समीपं पुन र्नागमिष्यति।

अनन्तरं दायूद् निजजायां वतशेवां सान्त्वयित्वा तस्याः समीपं २४
गत्वा तया साकम् अशेत ततः सा पुत्त्रमेकं प्रसूय तस्य नाम सुलेमानं
शान्तिदायकं चकार। अपरं परमेश्वरस्तस्मिन् अप्रीयत। अनन्तरं २५
तेन प्रेषितो नाथनो भविष्यद्वादी परमेश्वरस्य प्रेमकारणात् तस्य नाम
यिदीदियः परमेश्वरस्य प्रिय इति चकार।

अनन्तरं योयावोऽम्मोनदेशस्थरब्बायाः प्रतिकूलं युध्यन् राजपुरीं २६
वशीकृत्य दायूदः समीपं दूतान् प्रहित्य ज्ञापयामास, अहं रब्बया समं २७
रणं कृत्वा जलपुरीं वशीकृतवान्। इदानीं मया नगरे वशीकृते मम २८
नाम यद् विख्यातं न जायते, तदर्थं त्वम् अवशिष्टसैन्यानि संगृह्य
नगरस्य समीपे शिविरं स्थापयित्वा तद् वशीकुरु। ततो दायूद् २९
सर्व्वाणि सैन्यानि संगृह्य रब्बां गत्वा तस्या विरुद्धं रणं कुर्व्वन् तां वशी-
चकार। अपरं रत्नसुवर्णानां किक्करैकपरिमाणं तद्देशीयराजमुकुटं ३०
राज्ञो मस्तकाद् आददात् तच्च दायूदो मस्तकेऽदीयत अपरं स तस्मात्
नगराद् बहूनि लोठितद्रव्याणि वहिष्कृत्यानिनाय। अनन्तरं दायूद् ३१
तन्मध्यवर्त्तिनो लोकान् वहिष्कृत्यानीय कर्त्तनीनां लौहमयानां लोष्ट-
घ्नानां कुठाराणाञ्च कर्म्मसु न्ययुङ्क्त, इष्टकपाकस्थानेषु च गमनागमने
कारयामास। सोऽम्मोनवंशस्य सकलनगराणि प्रति तादृशं चकार।
अनन्तरं दायूद् तस्य सर्व्वे लोकाश्च यिरूशालमं परावृत्य जग्मुः।

१३ त्रयोदशोऽध्यायः।

१ अम्नोनस्य निजभगिन्यां तामरायाम् अनुरक्तिः ६ छलं कृत्वा तस्य पीडितत्वदर्शनं भगिन्या बलात्करणं १५ अनन्तरं तां ऋतीयित्वा दूरीकरणं २१ अवशालोमस्य कथनं २२ अवशालोमस्य मेषलोमच्छेदनकथनं २८ अम्नोनस्य हननं ३० दायूदः समीपे वार्त्ताकथनं ३७ अवशालोमस्य पलायनं।

१ दायूदः पुत्त्रस्यावशालोमस्य तामरानामिका परमसुन्दरी सहोदर्य्-
२ कासीत् तां प्रति दायूदः पुत्त्रो ऽम्नोनः कामासक्त आसीत्। निजभगि-
न्यास्तामरायाः कृते व्याकुलत्वात् सोऽस्वस्थो बभूव यतः सानूढासीत्
३ तथाप्यम्नोनस्तां प्रति किञ्चित् कर्त्तुं दुष्करं बुबुधे। अनन्तरं दायूदो
भ्रातुः शिमियस्य पुत्त्रो योनादवनामकोऽम्नोनस्यैको बन्धुरासीत् स
४ योनादवोऽतीव चतुरः। सोऽम्नोनं पप्रच्छ त्वं राजपुत्त्रोऽपि सन् दिनं
दिनम् एतादृशः कृशः कुतो भवसि तन्मां किं न ज्ञापयिष्यसे? ततो
ऽम्नोनस्तं बभाषे निजभ्रातुरवशालोमस्य भगिनीं तामरां प्रति कामा-
५ तुरोऽहमासे। ततो योनादवस्तम् उवाच त्वं निजखट्वायां शयित्वा
पीडितत्वं छलं कुरु, ततस्तव पितरि त्वां वीक्षितुम् आगते त्वं तस्मै
कथामिमां कथय, विनयेऽहं मम भगिनी तामरा मम समीपम् आगत्य
मह्यं खाद्यं ददातु वीक्ष्याहं यत् तस्याः करात् तद् भुञ्जे तदर्थं सा मम
साक्षादेव तत् खाद्यं पचतु।
६ अनन्तरम् अम्नोनः पीडितत्वस्य छलं कृत्वा शयितवान् ततो राज्ञि तं
वीक्षितुम् आगतेऽम्नोनो राजानम् उक्तवान् अहं विनये मम भगिनी
तामरागत्य मम साक्षाद् द्वौ पिष्टकौ पचतु ततोऽहं तस्या हस्ताद्
७ भोक्ष्ये। तदा दायूद् तामरायाः समीपे गर्भागारं लोकं प्रहित्य तां
जगाद, विनयेऽहं निजभ्रातुरम्नोनस्य गृहं गत्वा तस्मै किञ्चित् पथ्यं
८ पक्का देहि। अतस्तामरा निजभ्रातुरम्नोनस्य गृहं जगाम तदानीं सो-
ऽशेत। सा तु सिक्तानि गोधूमचूर्णानि गृहीत्वा तस्य साक्षात् मर्द्दयित्वा
९ पिष्टकान् पपाच, पात्रमेकं गृहीत्वा तस्य सम्मुखे तान् तत्र निदधे च किन्तु
स भोक्तुं नैच्छत्। अनन्तरम् अम्नोन उक्तवान् मम समीपात् पुरुषाः
१० सर्व्वे वहिर्यान्तु ततः सर्व्वे पुरुषास्तस्माद् वहिर्जग्मुः। तदानीम् अम्नोन-
स्तामराम् उक्तवान् त्वं भक्ष्यद्रव्यम् एतत् शयनागारम् आनय ततोऽहं
तव हस्ताद् भोक्ष्ये। ततस्तामरा निजकृतान् तान् पिष्टकान् गृहीत्वा
११ निजभ्रातुरम्नोनस्य समीपं शयनागारं जगाम। अपरं तया तं भोज-

यितुं तस्य समीपं तेष्वानीतेष्वम्नोनस्तां धृत्वा जगाद हे मम भगिनि
एहि मया समं शेष्व। ततः सा प्रत्यवदत् हे मम भ्रात नहि नहि मां १२
बलात् मा कुरु यत इस्रायेल्वंशस्य मध्य एतादृशं कर्त्तव्यं नहि, त्वमे-
तद् दुष्कर्म्म मा कार्षीः। अहं निजलज्जां कुत्र निधास्ये? त्वमपीस्रा- १३
येल्वंशे दुष्टलोकानां मध्ये गणयिष्यसे। विनयेऽहं त्वं राजानं सम्भा-
षस्व स तुभ्यं मां दातुम् अनिच्छुको न भविष्यति। किन्तु स तस्या १४
वाचं नागृह्लात् किञ्च तस्या बलवान् सन् बलात्कारेण तया साकं शिश्ये।
अनन्तरम् अम्नोनस्ताम् भृशम् ऋतीयितवान् पुरा तां प्रति १५
तस्य यः काम आसीत् ततोऽप्यधिका घृणा बभूव तस्माद् अम्नोनस्ताम्
उक्तवान् त्वम् उत्थाय याहि। सा तं जगाद त्वया पूर्व्वं मम यद् १६
अपराद्धं ततोऽधिकं मां वहिष्कुर्व्वता त्वयापराध्यते। किन्तु स तस्या १७
वचनम् अगृहीत्वा स्वपरिचारकं तरुणम् आहूय गदितवान् एषा
मम समीपाद् वहिष्क्रियतां द्वारे चार्गलं दीयतां। तस्याः कन्याया १८
गात्रे नानावर्णीयं वसनमासीत् यतोऽनूढा राजकुमार्य्यस्तादृशानि वस-
नानि पर्य्यदधत। अनन्तरं तस्य दासस्तां वहिष्कृत्य द्वारेऽर्गलं ददौ।
तदानीं तामरा निजशिरसि भस्म ददौ स्वगात्रस्थं नानावर्णवसनं १९
छित्त्वा शिरसि हस्तं दत्त्वा रुदती वव्राज च। ततस्तस्याः सहोदरोऽव- २०
शालोमस्तां पप्रच्छ तव भ्राताम्नोनः किं त्वाम् उपागमत्? हे मम
भगिनि मौनी भव स तव भ्राता त्वम् एतत् मनसि न निधत्स्व। तत-
स्तामरा निजसहोदरस्यावशालोमस्य गेहे ऽनाथा सती तस्थौ।
अनन्तरं नृपो दायूद् एतानि सर्व्वाणि श्रुत्वा भृशं चुक्रोध। अपरम् २१
अवशालोमो निजभ्रातरम् अम्नोनं भद्रम् अभद्रं वा किमपि नाभा- २२
षत, यतो निजसहोदराया तामराया बलात्करणाद् अवशालोमस्तम्
ऋतीयितवान्।
सम्पूर्णवत्सरद्वयात् परम् इफ्रयिमसीमास्थे बाल्हात्सोरे ऽवशा- २३
लोमस्य मेषलोमच्छेदनं बभूव ततोऽवशालोमः सकलान् राजपुत्त्रान्
निमन्त्रयामास। अवशालोमो राज्ञः समीपमागत्य निवेदितवान् २४
पश्यतु भवतो दासस्य मेषलोमच्छेदनं भविष्यति, अतो राजा भवतो
भृत्याश्च भवतो दासेन समम् आगच्छन्तु। ततो नृपोऽवशालोमं बभाषे २५
हे मम पुत्त्र तन्नहि, सर्व्वेषाम् अस्माकं गमनात् तवाधिकव्ययो
भविष्यति। तथापि स बहुप्रार्थयाञ्चक्रे किन्तु राजा गन्तुमनिच्छन्

२६ तमाशिषं बभाषे। अनन्तरम् अवशालोम उक्तवान् यद्यपि तथा न
भवेत् तर्हि मम भ्रातरम् अम्नोनं मया सह गन्तुम् आज्ञापयतु। ततो
२७ राजा तं जगाद स कुतस्त्वया समं यास्यति? किन्त्ववशालोमेन बहु
प्रार्थिते नृपोऽम्नोनं सकलराजपुत्रांश्च तेन साकं गन्तुं विससर्ज।
२८ अपरम् अवशालोमो निजदासान् इत्याज्ञापयामास यूयं निरीक्ष-
ध्वम् अम्नोनस्य चित्ते द्राक्षारसेन प्रफुल्लिते यूयम् अम्नोनं मारयतेति
मयादिष्टे युष्माभिः स हन्यतां भीति र्न क्रियतां यतोऽहमेव तद्
२९ आज्ञापये तस्माद् युष्माभि र्भयवर्जितै र्वीरै र्भवितव्यं। अनन्तरम्
अवशालोमस्य दासा अवशालोमस्याज्ञानुसारेणाम्नोनं प्रति तदकुर्व्वन्
ततो राजपुत्राः सर्व्वे उत्थाय स्वं स्वं खचरम् आरुह्य पलायाञ्चक्रिरे।
३० अपरं तेषां मार्गेणागमनकाले राजकुमाराः सर्व्वेऽवशालोमेन हतास्ते-
षाम् एकोप्यवशिष्टो नास्तीति किंवदन्ति र्दायूदः समीप उपागच्छत्।
३१ ततो नृप उत्थाय निजवसनानि छित्त्वा भूमौ पपात तस्य सर्व्वे दासाश्च
३२ छिन्नवसनाः सन्तस्तस्य समीपेऽतिष्ठन्। तदानीं दायूदो भ्रातुः शिमि-
यस्य पुत्रो योनादवो जगाद, राजकुमाराः सर्व्वे हता इति मत्प्रभु
र्नानुमन्यतां, केवलम् अम्नोनो जघ्ने यतोऽवशालोमस्य सहोदराया-
स्तामराया अम्नोनेन बलात्कारणदिवसमारभ्यावशालोम एतत् निर-
३३ चिनोत्। अतः सर्व्वे राजपुत्रा मृता इति चिन्तयन् मम प्रभू राजा
३४ न शोचतु केवलम् अम्नोनो हतः। अनन्तरम् अवशालोमः पलायाञ्चक्रे।
ततः परम् एकस्तरुणः प्रहरी निजनेत्रे उन्मील्य स्वपश्चात् पर्व्वतपार्श्व-
३५ वर्त्मना बहवो लोका आगच्छन्तीति ददर्श। ततो योनादवो राजानम्
उक्तवान् अमी राजपुत्रा आगच्छन्ति पश्य भवतो दासेन यद् उक्तं
३६ तदेवाजायत। इति तेन गदित एव राजपुत्रा उपस्थाय प्रोच्चैरुरुदुः
राजापि तस्य सकलदासाश्च भृशं रुरुदुः।
३७ अनन्तरम् अवशालोमः पलाय्य गिशूरीयनृपस्याम्मीहूदसुतस्य तल्म-
यस्य समीपं जगाम, अपरं दायूद् निजपुत्रमधि बहुदिनानि शुशोच।
३८ किन्त्ववशालोमः पलाय्य गिशूरं प्राप्य तत्र स्थाने त्रीन् वत्सरान् प्रोवास।
३९ अनन्तरं दायूद् राजा मृतम् अम्नोनं प्रति शान्तो भूत्वावशालोमस्य
समीपं गन्तुं ववाञ्छ।

१४ चतुर्दशोऽध्यायः।

१ तिकोयीययोषितो योयाबेनानयनं ४ अवशालोमम् आनाययितुं तस्या योषितो दृष्टान्तकथनं २१ योयाबेनावशालोमस्य यिरूशालम आनयनं २५ अवशालोमस्य सौन्दर्य्यस्य वंशस्य च कथनं २८ विभ्यो वत्सरेभ्यः परं दायूदो नृपस्य समीपम् अवशालोमस्य गमनं।

अनन्तरम् अवशालोमं प्रति नृपते र्मन आकृष्टमिति सिरूयायाः १
सुतेन योयाबेन बुबुधे। ततः स योयाबस्तिकोयं दूतं प्रहित्य तत्स्थानात् २
ज्ञानवतीं स्त्रियमेकाम् आनाय्य ताम् अवदत्, विनयेऽहं त्वं छलेन
शोकान्विता भूत्वा शोकसूचकं वेशं परिधेहि गात्रे तैलं न मर्दय किन्तु
मृतस्य कृते बहुकालं शोककारिणी काचित् योषिदिव भव। अपरं ३
नृपतेः समीपं गत्वा तस्मै कथामेतादृशीं कथय, ततस्तद् वक्तव्यं वचो
योयाबस्ताम् आदिदेश।

अनन्तरं सा तिकोयीया योषित् नृपतिं सम्बभाषे। सा न्युब्जीभूय ४
भूमौ पतित्वा प्रणम्य निवेदयामास, हे भूपते मामुपकरोतु। भूपतिः ५
पृष्टवान् तव किम् अभूत्? ततः सा बभाषे, अहमेका विधवा मम पति
र्मृतः। अपरं भवतो दास्या द्वौ सुतावास्तां क्षेत्रे तयोः परस्परं युद्धे जाते ६
निवारकस्याभावाद् एको जनोऽन्यजनम् आहत्य मारितवान्। इदानीं ७
सर्व्वे परिजना भवतो दास्या विरुद्धम् उत्थाय वदन्ति स भ्रातृघातक-
स्त्वया प्रदीयतां वयं तेन हतस्य भ्रातुः प्राणानां परिवर्त्तेन तस्य प्राणान्
ग्रहीष्याम उत्तराधिकारिणमपि विनाशयिष्यामहे। अनेन प्रकारेण देशे
मम स्वामिनो नाम किमपि वा शेषं यन्न तिष्ठेत् तदर्थं ते ममावशिष्टम्
अङ्गारं निर्व्वापयितुं चेष्टन्ते। तदानीं राजा तां योषितं जगाद ८
त्वं निजनिवेशनं याहि त्वामध्यहमाज्ञापयिष्यामि। अनन्तरं सा ९
तिकोयीया योषिद् राजानं व्याजहार हे मम प्रभो राजन् सोऽप-
राधो मम मत्पितृवंशस्य च भवतु किन्तु राजा भवतः सिंहासनञ्च
निरपराधो भवतु। ततो राजा जगाद यः कश्चित् त्वां किञ्चिद् वदति १०
तं मम समीपम् आनय, स त्वां पुन र्न स्प्रक्ष्यति। अनन्तरं सा बभाषे ११
निवेदयाम्यहं महाराजेन स्वं प्रभुं परमेश्वरं स्मृत्वा पुन र्मानवं हन्तुं
शोणितपातप्रतिहन्ता वार्य्यतां नोचेत् मम पुत्रो विनाशयिष्यते।
राजा जगाद परमेश्वरस्यामरतायाः शपथं कृत्वा वदामि तव पुत्रस्य
केश एकोपि मृत्तिकायां न पतिष्यति। सा योषिद् अवदद् विनयेऽहं १२

भवतो दासीं मम प्रभो राज्ञः समीपे वाक्यम् एकं वदितुम् अनुजा-
१३ नातु; ततो नृपतिरवदत् कथय। अनन्तरं सा योषित् जगाद
ईश्वरस्य लोकानधि भवान् कुत एतादृशं विचारयति? एतादृश्या
आज्ञायाः कथनाद् देशवहिष्कृतस्यात्मीयलोकस्य पुनरनानयनेन नृपतिः
१४ स्वयं दोषीव भवति। अस्माभि र्मर्त्तव्यमेव भूमौ पतितानि यानि
तोयानि पुनः सञ्चेतुं केनापि न शक्यते तत्तुल्यैरस्माभि र्भवितव्यं तथा
चेश्वरेणापि ममतां प्रकाश्य दूरीकृतो नरो यद् दूरे न तिष्ठेत् तदर्थम्
१५ उपाया निश्चीयन्त इति किं सत्यं नहि? अहम् एतद् वचनं मम
प्रभो राज्ञः समीपे निवेदयितुम् आगमं यतो लोकैर्मम साध्वस उत्पा-
दिते भवतो दास्या गदितम्, अहं नृपतेः समीपे मदीयवाचं निवेदयि-
ष्यामि तेन भवितुं शक्नोति राजा निजदास्याः प्रार्थितं साधयिष्यति।
१६ मम पुत्रेण सह मामीश्वरस्याधिकृतदेशाद् उच्छेत्तुं चेष्टकस्य मनुजस्य
१७ करात् निजदासीम् उद्धारयितुं नृपतिश्चेद् अङ्गीकुर्य्यात्, तर्हि
मम प्रभो राज्ञो वाक्यम् अवश्यं सान्त्वनादायकं भविष्यतीति भवतो
दास्या बुद्धं यतो भद्राभद्रविवेचनामधि मम प्रभु र्नृप ईश्वरीयदूत-
तुल्यो भवति, अतो भवतः प्रभुः परमेश्वरो भवतः सहायो भवतु।
१८ अनन्तरं राजा तां योषितं जगाद, विनयेऽहं त्वां यत् प्रक्ष्यामि
तत् मह्यं मापह्नुष्व। ततः सा व्याजहार, मम प्रभु र्नृपतिः कथ-
१९ यतु। नृपतिरवदत् कार्य्येऽस्मिन् त्वया समं किं योयावस्य मन्त्रणा
नास्ति? ततः सा व्याहरत्, हे मम प्रभो राजन्, भवतः प्राणानां
शपथेन वदामि, मम प्रभु र्भूपति र्यत् कथयति तत्तो दक्षिणं वामं वा
परावर्त्तितुं केनापि न शक्यते। भवतो दासो योयाव एव माम् आदिश्य
२० सर्व्वा एताः कथा भवतो दासीमशिक्षयत्। तद्विषयं रूपान्तरीकर्त्तुं
भवतो दासो योयाव एतत्कर्म्म कृतवान्। पृथिवीस्थेषु सर्व्वकर्म्मसु
मम प्रभुरीश्वरस्य दूत इव ज्ञानवान् आस्ते।
२१ अनन्तरं राजा योयावं जगाद त्वया कार्य्यमिदं साधितम् अतस्त्वं
२२ गत्वा तं युवानम् अवशालोमं पुनरानय। ततो योयावो न्युब्जीभूय
भूमौ पतित्वा प्रणम्य राजानं धन्यं वदन् व्याजहार हे मम प्रभो राजन्
भवताहम् अनुगृहीत इत्यद्य भवता स्वदासस्य निवेदनग्रहणाद् भवतो
२३ दासेन मया बुद्धं। अनन्तरं योयाव उत्थाय गिशूरं गत्वावशालोमं
२४ यिरूशालमम् आनिनाय। अनन्तरं राजा व्याहरत्, स परावृत्य

निजनिवेशनं यातु मम वदनं तेन न द्रष्टव्यं। ततोऽवशालोमो निज-
निवेशनं परावृत्य जगाम राज्ञो मुखं न ददर्श।

इस्रायेल्वंशमध्ये सोऽवशालोम इव रूपेण स्लाघ्यः कोपि नासीत् १५
तस्यापादमस्तकं निर्दोषम् आसीत्। स संवत्सरान्ते केशभारात् स्वशिरो- १६
ऽमुण्डयत् ततः शिरोमुण्डनकाले कचेषु तुलितेषु राजकीयपरिमाणा-
नुसारेण ते शेकलशतद्वयपरिमिता अभवन्। तस्यावशालोमस्य त्रयः १७
पुत्रास्तामरानामिका परमसुन्दरी दुहितैका चासन्।

अनन्तरम् अवशालोमः सम्पूर्णवत्सरद्वयं यिरूशालमे वसन् राज्ञो १८
वदनं न दृष्टवान्। अनन्तरं स राज्ञः समीपं प्रेषयितुं योयावं दूते- १९
नाजुहुवे, किन्तु स तस्य समीपम् आगन्तुं नैच्छत् द्वितीयवारं दूते
प्रहितेऽपि स आगन्तुं नैच्छत्। अतः स निजदासान् व्याहरत्, पश्यत २०
मम स्थानस्य समीपे योयावस्य क्षेत्रम् एकमास्ते तत्र स्थाने तस्य ये
यवा आसते यूयं गत्वा तत्र वह्निं दत्त। ततोऽवशालोमस्य दासाः क्षेत्रे
वह्निं ज्वालयामासुः। अनन्तरं योयाव उत्थायावशालोमस्य गृहे २१
तत्समीपम् आगत्य तं पप्रच्छ तव दासैः मम क्षेत्रे कुतो वह्निः ज्वालितः?
ततोऽवशालोमो योयावं जगाद पश्याहं तव समीपं दूतं प्रहित्य २२
त्वाम् अवदं मम समीपम् एहि, गिशूरात् मया कुत आगतं? अद्यापि
तत्र स्थाने चेदहम् अस्थास्यं तर्हि मम क्षेमम् अभविष्यत्। इदानीं
राज्ञो वदनं मया दृश्यतां यदि वा ममापराधो विद्यते तर्हि स मां
हन्तु वाचम् एतां राज्ञः समीपे निवेदयितुम् अहं त्वां प्रेषयिष्यामि।
अनन्तरं योयावेन राज्ञः समीपं गत्वा तद्वाक्ये निवेदिते राजावशा- ३३
लोमम् आगन्तुम् आज्ञापयामास ततः स राज्ञः समीपं गत्वा नृपतेः
सम्मुखे भूमौ पतित्वा प्रणनाम भूपतिश्चावशालोमं चुचुम्बे।

---

१५ पञ्चदशोऽध्यायः।

१ अवशालोमस्येस्रायेल्लोकानां मनोहरणं ७ व्रतच्छलेन हिब्रोणे तस्य गमनं १० तस्य राजद्रोहः १३ दायूदस्य पलायनं १९ इत्तयस्य दायूदो न त्यजनं २४ सादोका-वीयाथरयोः प्रत्यावर्त्तनं ३० दायूदो रोदनं ३१ अहीथोफलम् अधि कथनं ३२ हूशयस्य प्रत्यावर्त्तनं।

ततः परम् अवशालोम आत्मकृते रथं हयान् अग्रे गामिनः पञ्चाशत्- १
लोकांश्च न्ययुङ्क्त। अपरम् अवशालोमः प्रत्यूष उत्थाय नगरद्वारस्य पथ- २

पार्श्वे तिष्ठति, अपरं यः कश्चिद् विवादस्य विचारार्थं राज्ञः समीपं
जिगमिषत्यवशालोमस्तमाहूय त्वं कस्मान्नगराद् आगतोऽसीति पृच्छति।
ततो भवतो दासोऽहम् इस्रायेलोऽमुकवंशाद् आगच्छम् इति तेन
३ प्रतिगदितेऽवशालोमस्तं वदति पश्य तव विवादस्य कथा भद्रा
४ यथार्थाश्च किन्तु तव वाचं श्रोतुं राज्ञा नियुक्तः कोऽपि नास्ति। अव-
शालोमोऽपरमपि व्याहरति, यद्यहं देशे विचारयितृपदे न्ययोक्ष्ये तर्हि
यस्य कस्यचिद् विवादो निवेदनं वास्ति तस्मिन् मम समीपम् आगते
५ ऽहं तमधि न्याय्यं विचारम् अकरिष्यं। अपरं तं नमस्कर्त्तुं कस्मिंश्चित्
६ तस्य समीपम् आगते स करं प्रसार्य्य तमालिङ्ग्य चुम्बते। इस्रायेलो यः
कश्चिद् विचारनिष्पत्त्यर्थं राज्ञः समीपं जिगमिषति तं प्रत्यवशालोम इत्थं
करोति। अनेन प्रकारेणावशालोम इस्रायेल्लोकानां मनांसि जहार।
७ अपरं चत्वारिंशद् वत्सरेषु व्यतीतेष्ववशालोमो राजानं व्याहरत्
परमेश्वरमुद्दिश्य मयैकं व्रतं प्रत्यश्रावि तत् साधयितुं हिब्रोणं मां गन्तुम्
८ अनुजानातु। अरामदेशस्थे गिशूरे भवतो दासस्य प्रवासकाले मया
व्रतेनैतत् प्रतिश्रुतं यदि परमेश्वरो मां यिरूशालमं पुनरानयेत् तर्ह्यहं
९ परमेश्वरं सेविष्ये। ततो राजा जगाद कुशलेन गच्छ। तस्मात् स
उत्थाय हिब्रोणं प्रतस्थे।
१० सर्व्वेषाम् इस्रायेल्वंशीयानां समीपेऽवशालोमेन चरान् प्रहित्य
वार्त्तैषा ज्ञापयाञ्चक्रे तूरीध्वनिं श्रुत्वैव युष्माभिरवशालोमो हिब्रोणे
११ राजाभवदिति वक्तव्यं। अपरं यिरूशालमाद् द्वे शते निमन्त्रिता लोका
अवशालोमेन सहागच्छन् ते किमपि नावगत्य मनःसारल्येन जग्मुः।
१२ अनन्तरम् अवशालोमो बलिदानसमये दायूदो मन्त्रिणं गीलनीयम्
अहीथोफलं दूतेन तदीयनगराद् गीलत आनिनाय तेन महाराज-
द्रोहे जातेऽवशालोमस्य पक्षीयलोकाः क्रमशोऽवर्द्धन्त।
१३ अनन्तरम् एको जनो दायूदः समीपम् आगत्य वार्त्तामिमाम् अव-
१४ दत्, इस्रायेल्लोकानाम् अन्तःकरणान्यवशालोमस्य पक्षे भवन्ति। ततो
दायूद् यिरूशालमस्थान् निजनिकटवर्त्तिनो भृत्यान् जगाद वयमुत्थाय
पलायामहै नोचेद् अवशालोमस्य कराद् अस्माकं रक्षा न भविष्यति,
शीघ्रं गच्छत नोचेत् स तूर्णम् अस्मान् प्राप्य विपन्नान् करिष्यति खड्गधा-
१५ रेण च नगरं विनाशयिष्यति। ततो राज्ञो भृत्या राजानम् अवदन्
पश्यत्वस्माकं प्रभो भूपतेरभिलषितं कर्म्म कर्त्तुं भवतो दासा उद्यताः।

अनन्तरं राजा तत्पश्चात् तस्य सकलपरिजनाश्च पद्भिः प्रवव्रजुः। गृह- १६
रक्षार्थं दशोपपत्न्यो राज्ञाहीयन्त। अनन्तरं राजा सर्व्वलोकाश्च पद्भि १७
र्व्रजन्तो वहिर्गत्य वैतहम्मिर्हके तस्थुः। तस्य सर्व्वभृत्याः किरेथीयाः १८
पिलेथीयाश्च सर्व्वे लोका अपि च गातीया लोका अर्थाद् गातनग-
राद् दायूदा समम् आगताः षट्शतानि लोका राज्ञः सम्मुखेऽव्रजन्।

अनन्तरं राजा गातीयम् इत्तयं जगाद, अस्माभिः सह त्वमपि कुतो १९
यासि? त्वं परावृत्त्य गत्वा राज्ञा समं तिष्ठ यतस्त्वं विदेशी स्वदेश-
च्युतश्च लोकः। ह्यो मात्रम् आगतोऽसि, अद्यास्माभिः सह किं २०
मया भ्रामयिष्यसे? अहं यत्स्थानं गन्तुं शक्नोमि तत्स्थानं गमि-
ष्यामि त्वं परावृत्त्य याहि निजभ्रातॄनपि गृहीत्वा गच्छ, अनुग्रहः
सत्यता च तव सहवर्त्तिनौ भवतां। तत इत्तयो राजानं प्रत्यवदत्, २१
परमेश्वरस्यामरताया निजप्रभो राज्ञः प्राणानाञ्च शपथं कृत्वा वदाम्यहं
जीवने मरणे वा मम प्रभू राजा यत्र स्थाने स्थास्यति भवतो दासोऽपि
तत्रैव स्थास्यति। अनन्तरं दायूद् इत्तयं जगाद, त्वम् अग्रसरो भव। २२
ततो गातीय इत्तयस्तस्य सर्व्वे लोकाश्च तस्य सङ्गिनः सर्व्वे बालका-
श्चाग्रसरा बभूवुः। सर्व्वलोकानाम् अग्रगमनकाले देशीयाः सर्व्वे प्रोच्चै २३
रुरुदुः। अपरं प्रान्तरगामिनं मार्गं प्राप्तुं नृपतिः किद्रोणस्रोतस्वत्याः
पारं जगाम तस्य सकललोकाश्च पारं जग्मुः।

सादोकस्तेन सह सर्व्वे लेवीयलोकाश्चेश्वरीयनियममञ्जूषां वहन्त- २४
स्तत्रासन् अपरं नगराद् आगच्छतां सकललोकानां पारगमनं यावद्
ईश्वरस्य मञ्जूषा तैरवारोप्यत ततोऽवीयाथर आरुरोह। अनन्तरं २५
राजा सादोकं जगाद त्वम् ईश्वरस्य मञ्जूषां नगरं परावृत्त्य नय,
यदि परमेश्वरो माम् अनुगृह्णीयात् तर्हि स मां पुनरानीय तां निज-
निवासञ्च दर्शयिष्यति। किन्तु त्वयि मम तुष्टिर्नास्तीति यदि स वदेत् २६
तर्हि पश्याहम् उपस्थित आसे स यत् क्षेमं मन्यते तदेव मां प्रति
करोतु। अनन्तरं राजा सादोकं याजकं जगाद पश्य त्वं कुशलेन नगरं २७
प्रति परावृत्त्य याहि तव पुत्रोऽहीमासोऽवीयाथरस्य पुत्रो योनाथनश्च
युवयोरिमौ द्वौ पुत्रावपि युवाभ्यां सार्द्धं गच्छतां। पश्य युवयोः समी- २८
पाद् यावत् निश्चिता वार्त्ता नागच्छति तावदहं प्रान्तरस्य निर्ज्जनस्थानेषु
विलम्बिष्ये। ततः सादोकावीयाथरावीश्वरस्य मञ्जूषां परावर्त्य यिरू- २९
शालमं नीत्वा तत्र स्थाने तस्थतुः।

३० अनन्तरं दायूद् जितवृक्षाणां मार्गेणारुरोह, ऊर्द्ध्वगमनसमये सो-
ऽक्रन्दद् आच्छन्नमस्तकोऽनावृतपदश्च सन् अव्रजत् तस्य सङ्गिनो लोका
अपि सर्व्वे स्वं स्वं शिर आच्छाद्योर्द्ध्वगमनसमये रुदन्तोऽव्रजन्।
३१ अपरम् अवशालोमस्य सङ्गिनां राजद्रोहिणां मध्येऽहीथोफलोऽपि
विद्यत इति वार्त्तायां दायूदा श्रुतायां स जगाद हे परमेश्वर विनयेऽहं
त्वम् अहीथोफलस्य मन्त्रणां मूढीकुरु।
३२ यत्र स्थाने लोकैरीश्वरः प्राणम्यत तत् पर्व्वतशृङ्गं दायूद् यदोपा-
तिष्ठत् तदार्कीयो हूशयश्छिन्नवस्त्रो धूलीमच्छितमस्तकश्च सन् दायूदं
३३ साक्षात्कर्त्तुम् आजगाम। ततो दायूद् तं बभाषे यदि त्वं मया समं गच्छसि
३४ तर्हि मम भारइव भविष्यसि। किन्तु त्वं नगरं परावृत्य गत्वा हे राजन्
अहं भवतो दासो भविष्यामि पूर्व्वं यथा तव पितु र्दास आसं तथा
भवतो दासो भविष्यामीति वाक्यम् अवशालोमं यदि वदेस्तर्हि मम कृते
३५ ऽहीथोफलस्य मन्त्रणां व्यर्थां कर्त्तुं शक्ष्यसि। तत्र स्थाने सादोकावीया-
थरौ याजकौ किं त्वया समं न स्थास्यतः? तस्मात् त्वं राजगृहे यां
काञ्चित् वार्त्तां श्रोष्यसि तां सादोकावीयाथरौ याजकौ वदिष्यसि।
३६ अपरं पश्य तत्र स्थाने ताभ्यां सह सादोकस्य पुत्रोऽहीमासोऽवीयाथ-
रस्य पुत्रो योनाथनश्च तयोरेतौ पुत्रावासाते युष्माभि र्यां काञ्चिद्
३७ वार्त्तां श्राविष्यते सा ताभ्यां मम समीपं प्रेषयिष्यते। ततोऽवशालोमस्य
यिरूशालमप्रवेशकाले दायूदो बन्धु र्हूशयोऽपि नगरम् आगच्छत्।

---

१६ षोडशोऽध्यायः।

१ उपहारेण मिथ्यापवादेन च सीवस्य निजप्रभोः सम्पत्तिप्राप्तिः ५ दायूदः शिमि-
यिना शपनं ९ दायूदः सहिष्णुत्वं १५ अवशालोमेन समं हूशयस्य कथाकथनं २०
अहीथोफलस्य मन्त्रणा।

१ अनन्तरं पर्व्वतशृङ्गे दायूदातिक्रान्ते मिफीबोशतस्य दासः सीवः
सज्जितगर्द्दभद्वयोपरि द्वे शते पूपान् शतं शुष्कद्राक्षाफलानि शतम्
उडुम्बरपिष्टकान् एकां कुतूं द्राक्षारसञ्चारोप्य तेन समं मिलित-
२ वान्। अनन्तरं राजा सीवम् अवदत्, एतानि किमर्थं? ततः सीवः
कथयामास, गर्द्दभौ राजपरिजनानां वहनार्थम् अपरं फलानि
यूनां भोजनार्थं द्राक्षारसाश्च निर्जनस्थाने क्लान्तलोकानां पानार्थं भवि-
३ ष्यन्ति। अनन्तरं नृपति र्जगाद तव प्रभोः पुत्रः कुत्र? सीवो राजानम्

अवदत् स यिरूशालमेऽवातिष्ठत् यत इस्रायेल्वंशो ऽद्य मम पैतृकं
राज्यं मह्यं परावर्त्त्य दास्यतीति स बुध्यते। ततो राजा सीवम् अवदत्, ४
मिफीबोशतस्य सर्व्वस्वं तव भवतु। सीवोऽवदत् हे मम प्रभो राजन्,
प्रणम्य निवेदयामि भवान् माम् अनुगृह्णातु।

अनन्तरं दायूदि बहूरीमं प्राप्ते शौलवंशसम्भवो गेराः पुत्त्रः ५
शिमियिनामा कश्चित् पुरुषो वहिर्भूयागच्छन् आगच्छन् शेपे। स ६
दायूदं प्रति दायूद्राजस्य समस्तदासांश्च प्रति तस्य दक्षिणे वामे च
व्रजतो लोकान् वीरांश्च प्रति पाषाणान् निचिक्षेप। शिमियिः शपमान ७
इदं व्याजहार, हे शोणितपातिन् हे नारकिन् त्वं दूरीभव दूरीभव।
त्वं यस्य विनिमयेन राजत्वम् अकार्षीस्तस्य शौलवंशस्य सकलशोणित- ८
पातस्य फलं परमेश्वरस्तुभ्यम् अददात्, स च परमेश्वरस्तव पुत्त्रस्याबशा-
लोमस्य हस्ते राज्यं समार्पयत्, शोणितपातित्वात् त्वं विपन्नोऽभवः।

ततः सिरूयायाः पुत्त्रोऽबीशयो राजानं जगाद, अयं मृतः श्वा कुतो ९
मम प्रभुं राजानं शपते? विनयेऽहं तस्य शिरश्छेदनार्थं पारं गन्तुं
माम् अनुजानीहि। राजा जगाद हे सिरूयायाः पुत्त्रौ युवाभ्यां १०
समं मम कः सम्बन्धः? स मां शपतां यतो दायूदं शपस्वेति स
परमेश्वरेण प्रोक्तः, अतस्त्वं कुत एतादृशं कर्म्म करोषीति तं प्रष्टुं केन
शक्यते? अपरं दायूद् अबीशयं निजसकलदासांश्च जगाद पश्यत मम ११
शरीरान्निर्गतः पुत्त्रो मम प्राणान् गवेषयति तर्हि विन्यामिनीयो
लोकोऽयं किं न करिष्यति? यूयं तं त्यजत स शपतां यतः परमेश्वर-
स्तमाज्ञापयत्। भवितुं शक्नोति ममाश्रुपातम् आलोक्य परमेश्वरो १२
ऽद्य तद्दत्तशापस्य विनिमयेन मम मङ्गलं करिष्यति। अनन्तरं दायूद् १३
तस्य लोकाश्च वर्त्मनाव्रजन्। स शिमियिरपि तदभिमुखस्थेन पर्व्वतपार्श्वेन
व्रजितवान् अपरं व्रजन् व्रजन् अशपत पाषाणान् निरक्षिपत् धूली-
भिस्तान् आच्छादयच्च। अनन्तरं राजा तस्य सङ्गिनो मनुजाश्च श्रान्ता १४
भूत्वा तत् स्थानं प्राप्य तत्र विशश्रमुः।

अनन्तरम् अबशालोमस्तेन सार्द्धम् अहीथोफल इस्रायेल्वंशीय- १५
लोकाश्च सर्व्वे यिरूशालमं प्रविविशुः। अनन्तरं दायूदो बन्धुरक्तीयो १६
हूशयोऽबशालोमस्य समीपम् आजगाम। स हूशयोऽबशालोमं जगाद,
राजा चिरं जीवतु चिरं जीवतु। ततोऽबशालोमो हूशयं जगाद तव १७
मित्रं प्रति तव किमीयं प्रीतिः? त्वं स्वमित्रेण समं कुतो न गतोऽसि?

१८ हूशयोऽवशालोमं जगाद तन्नहि परमेश्वर एते लोका इस्रायेलः सर्व्वे
१९ वंशाश्च यं वृणते तस्यैवाहं भवामि तेनैव समं तिष्ठामि च। अपरम्
अहं तदन्यं कं परिचरिष्यामि? तस्य पुत्रं किं नहि? यादृगहं तव
तातं पर्य्यचरं तादृग् भवन्तमपि परिचरिष्यामि।
२० अनन्तरम् अवशालोमोऽहीथोफलं पृष्टवान् इदानीम् अस्माभिः किं
२१ कर्त्तव्यं? तदधि युष्माभि र्मन्त्रणा प्रोच्यतां। ततोऽहीथोफलोऽवशालोमं
जगाद, तव तातो गृहरक्षार्थं या उपपत्नी र्विहाय गतवान् त्वं ता
उपगच्छ तस्मात् सर्व्वैरिस्रायेल्लोकैस्तत् श्रुत्वा त्वं स्वतातेन घृणितोऽभव
२२ इति भोत्स्यते तव सङ्गिनां सर्व्वेषाञ्च बलं वर्द्धिष्यते। अनन्तरं प्रासा-
दपृष्ठे लोकैरवशालोमस्य कृते दूष्ये संस्थापितेऽवशालोमः सर्व्वेषाम्
२३ इस्रायेल्लोकानां साक्षात् निजपितुरुपपत्नीरुपजगाम। तत्कालेऽही-
थोफलेन या मन्त्रणा प्रोच्यत सा ईश्वरीयवचनमिवागण्यत, दायूदा यथा
तथावशालोमेनाप्यहीथोफलस्य सर्व्वा मन्त्रणा तादृगगण्यत।

---

१७ सप्तदशोऽध्यायः।

१ अहीथोफलस्य मन्त्रणाया विरुद्धं हूशयस्य मन्त्रणा १५ मन्त्रणामधि दायूदे वार्त्ता-
कथनं २३ अहीथोफलस्य स्वयोद्बन्धनं २४ दायूदः पारगमनम् अवशालोमेना-
मासायस्य सेनापतिकरणं २७ महनयिमनगरे दायूदो भक्ष्यप्राप्तिः।

१ अनन्तरम् अहीथोफलोऽवशालोमम् अपरमपि जगाद इदानीं
द्वादशसहस्राणि लोकान् वृत्वाहमद्य निशायामुत्थाय दायूदः पश्चाद्
२ धाविष्यामि। ततो मया श्रान्तो दुर्ब्बलश्च प्राप्तः स त्रासयिष्यते तस्य
सङ्गिनः सर्व्वे लोकाश्च पलायिष्यन्ते तेनाहं केवलं राजानम् आहनि-
३ ष्यामि। इत्थमहं सकललोकान् तव समीपम् आनेष्यामि यतस्त्वं यं
गवेषयसि तस्यानयनं सर्व्वेषामानयनस्य समानं तेन सर्व्वे लोकाः
४ शान्ता भविष्यन्ति। सा तु मन्त्रणावशालोमस्येस्रायेलः सकलप्राचीना-
५ नाञ्च तुष्टिकारिणी बभूव। तथाप्यवशालोमो बभाषे, इदानीम् अर्कीयो
६ हूशयोऽप्याहूयतां स किं वदिष्यति तद् अस्माभिः श्रूयतां। ततो हूशये-
ऽवशालोमस्य समीपमागतेऽवशालोमस्तं पप्रच्छ, अहीथोफल एतादृशीं
मन्त्रणाम् अददात् इदानीं तस्य मन्त्रणानुसारेणास्माभिः कर्त्तव्यं नवेति
७ त्वं वद। ततो हूशयोऽवशालोमं गदितवान् अहीथोफलेनादिष्टैषा

मन्त्रणा न भद्रा। हूशयोऽपरमपि जगाद त्वं निजपितरं तस्य लोकांश्च ८
जानासि ते वीराः क्षेत्रे हृतवत्सा भल्लूकीव निष्ठुरमनसश्च तव पिता
च महान् योद्धा स लोकैः सार्द्धं रात्रौ न विलम्बिष्यते। पश्येदानीमेव ९
स कस्मिंश्चिद् गर्त्ते रहःस्थाने वा छन्नस्तिष्ठति। प्रथमे यदि तव लो-
कानां कश्चिद् हन्येत तर्हि केनचित् तन्निशम्यावशालोमस्य पश्चाद्गामि-
लोकानां निहननं जातमिति गदिते सिंहवदभयहृदयो यो वीरः १०
सोऽपि नितान्तं गलितबलो भविष्यति, यतस्तव पिता वीरस्तस्य
सङ्गिनो मनुजाश्च वीर्य्यवन्त इति सर्व्व इस्रायेल्वंशा जानन्ति। अतो ११
ममैषा मन्त्रणा, दानमारभ्य बेर्शेबां यावत् सर्व्व इस्रायेल्लोकाः समु-
द्रसिकतावद् बहुसंख्या भूत्वा तव समीपे मिलन्तु ततः परं त्वं स्वयं
रणं गच्छ। ततो यत्र कुत्रापि स्थाने स विद्यते वयं तत्रैव तम् आक्रम्य १२
भूमौ शिशिरपतनवत् तस्य विरुद्धं सम्पतिष्यामस्तेन स तत्सहाय-
लोकानाम् एकोऽपि नावशेक्ष्यते। यदि वा स किमपि नगरम् आश्रयेत, १३
तर्हि सर्व्वैरिस्रायेल्लोकैस्तस्य नगरस्य समीपे रज्जव आनेष्यन्ते तच्चा-
स्माभिराकृष्य सरिति निक्षेप्स्यते यावत्खण्डम् एकमपि तत्र नावशे-
क्ष्यते। अनन्तरम् अवशालोम इस्रायेलः सर्व्वे लोकाश्चावदन्, अहीथो- १४
फलस्य मन्त्रणात अर्कीयहूशयस्य मन्त्रणा सूत्तमा, यतः परमेश्वरोऽवशा-
लोमं प्रत्यमङ्गलं घटयितुम् अहीथोफलस्योत्तमां मन्त्रणां निरर्थकां कर्त्तुं
निश्चितवान्।

अनन्तरं हूशयः सादोकावीयाथरौ याजकाववदत्, अहीथोफलो- १५
ऽवशालोमायेस्रायेलः प्राचीनगणाय च मन्त्रणामिमां ददौ किन्त्वहं
मन्त्रणामेतां दत्तवान्। अतो युवां तूर्णं दूतं प्रहित्य दायूदं वदतं, १६
त्वमद्य प्रान्तरस्थेषु निर्जनस्थानेषु यामिन्यां न विलम्बस्व, तूर्णं पारं याहि,
नो चेद् राजा तस्य सङ्गिनां निवहेन च ग्रसिष्यसे। तदानीं योनाथ- १७
नाहीमासावैनरोगेले स्थितवन्तौ तत एकया बालिकया गत्वा वार्त्तां
ज्ञापितौ तौ वार्त्तावदनार्थं राज्ञो दायूदः समीपं गन्तुम् उद्यतौ, यतस्तौ
केनापि यन्न दृश्येयातां तदर्थं ताभ्यां नगरं न प्रवेशितव्यं। तथापि बालक १८
एकस्तौ वीक्ष्यावशालोमं वार्त्तां जगाद, किन्तु तौ तूर्णं व्रजित्वा बहुरी-
मनिवासिनः कस्यचित् मनुष्यस्य निवेशनं प्रापतुस्तस्य प्राङ्गणे कूप एक
आसीत् तौ तु तत्कूपमध्यमवरुरुहतुः। अनन्तरं गृहिणी कूपस्य १९
मुखम् आवरणेनाच्छाद्य तस्योपरि मर्द्दितशस्यानि विस्तारयामास तेन

२० केनापि किमपि ज्ञातुं नाशक्यत। अनन्तरम् अवशालोमस्य दासास्तस्या
योषितः समीपे निवेशनमध्यम् आगत्य पप्रच्छुः, अहीमासयोनाथनौ
कुत्र? सा नारी तानवदत् तौ जलस्रोतःपारं गतौ। अनन्तरं ते मृग-
२१ यित्वा तयोरुद्देशं न प्राप्य यिरूशालमं प्रत्यावृत्य गताः। अपरं राज-
दासेषु गतेषु तौ कूपमध्यादुत्थाय गत्वा दायूदं राजानं वार्त्तामिमां
जगदुः, अहीथोफलो भवतां विरुद्धम् एतां मन्त्रणां दत्तवान् अतो
२२ यूयम् उत्तिष्ठत शीघ्रं नदीपारं गच्छत। ततो दायूद् तस्य सङ्गिनो
लोकाश्चोत्थाय यर्द्दननद्याः पारं गताः प्रभाते यर्द्दननद्याः पारम्
अगतस्तेषाम् एकोऽपि जनो नावशिष्यत।

२३ अपरं निजमन्त्रणा नाग्रह्यतेति दृष्ट्वाहीथोफलो निजगर्द्दभं सज्ज-
यित्वा प्रस्थाय निजनगरस्थं स्वगेहं जगाम, अपरं गृहस्य सर्व्वस्वमधि
समाज्ञाप्य स्वयम् उद्बन्धनेन मृत्वा पैतृकश्मशाने निदधे।

२४ अनन्तरं दायूदि मह्नयिमम् आगते सर्व्वैरिस्रायेल्लोकैः समम् अव-
२५ शालोमो यर्द्दनसरितः पारं जगाम। अपरम् अवशालोमो योयावस्य पदे
अमासायं प्रधानसेनापतिं चक्रे सोऽमासायो यित्रनाम्न इस्रायेलीयलोकस्य
पुत्र आसीत् स यित्रो योयावस्य मातुः सिरूयाया भगिनीं नाहशस्य
२६ दुहितरम् अवीगयिलाम् उपगतवान्। अनन्तरम् अवशालोम इस्रा-
येल्वंशाश्च गिलियद्देशे शिविरं स्थापयामासुः।

२७ अपरं दायूदि मह्नयिमम् उपस्थिते लोकाः प्रान्तरे बुभुक्षिताः
पिपासिताः श्रान्ताश्च विद्यन्त इति चिन्तयित्वाम्मोनवंशीयदेशस्थरब्वा-
नगरनिवासी नाहशस्य पुत्रः शोवि र्लोदिवारनिवास्यम्मीयेलस्य पुत्रो
२८ माखीरो रोगिलीमनिवासी गिलियदीयो वर्षिल्लयश्चेम आगत्य दायू-
दस्तस्य सङ्गिनां लोकानाञ्च कृते शय्याः पाकपात्राणि मृत्पात्राणि तेषां
२९ भोजनार्थं गोधूमयवानि चूर्णानि भृष्टानि च शस्यानि शिम्बीर्मसूरान्
भृष्टकलायान् मधूनि नवनीतानि मेषान् गोः शुष्कक्षीरांश्चानिन्युः।

---

१८ अष्टादशोऽध्यायः।

१ दायूदः सैन्यानां प्रेषणं ६ इस्रायेल्लोकानां पराजयनं ९ अवशालोमस्य हननं १८ अवशालोमस्य स्तम्भस्य कथनं १९ दायूदे ऽवशालोमस्य मरणवार्त्तादानं दायूदो विलपनं।

१ अनन्तरं दायूद् निजसङ्गिनो लोकान् गणयित्वा तेषामुपरि सहस्र-

पतीन् शतपतींश्च न्ययुङ्क्त। अपरं दायूद् योयावस्य हस्ते लोकानां २
तृतीयांशमेकं योयावस्य भ्रातुः सिरूयायाः पुत्रस्याबीशयस्य हस्ते तृती-
यांशमेकं गातीयेत्तयस्य हस्ते च तृतीयांशमेकं समर्प्य प्रेषयामास।
अपरं राजा लोकान् अवदत् अहमपि युष्माभिः समं बहिर्यास्यामि।
मनुजा अवदन् त्वं बहि र्मा गच्छ यतो यदि वयं पलायेमहि तर्हि तै ३
र्लाभः प्राप्त इति न गणयिष्यते, अस्माकम् अर्द्धलोकानां मृत्युरपि तै
र्लाभमध्ये न गणयिष्यते किन्तु त्वमस्माकं दशसहस्राणीव तै र्गण्यसे, अतो
ऽस्माकम् उपकारार्थं तव नगरे स्थितिः श्रेयसी। ततो राजा जगाद ४
युष्माभि र्यत् क्षेमं बुध्यते तदेवाहं करिष्यामि। अतो नरपति र्द्वारपार्श्वे
तस्थौ लोकाश्च सर्व्वे शतं शतं सहस्रं सहस्रञ्च सङ्घीभूय बहि र्निर्जग्मुः।
तदानीं राजा योयावम् अबीशयम् इत्तयञ्च जगाद यूयं ममानुरोधेन ५
तं तरुणम् अवशालोमं प्रति कोमलं व्यवहरत। अवशालोममधि सर्व्वान्
सेनापतीन् प्रति राज्ञः स आदेशः सर्व्वैरेव मनुजैरश्रूयत।

अनन्तरम् इस्रायेल्वंशस्य प्रतिकूलं लोकेषु बहिर्भूय समरस्थलं ६
गतेष्विफ्रयिमारण्ये समरो बभूव। तत्र स्थान इस्रायेल्लोका दायूदो ७
दासानां सम्मुखे पराजिग्यिरे तस्मिन् दिने च महानिहनने जाते तेषां
विंशतिसहस्राणि लोका जघ्निरे। यतस्तत्कृत्स्नप्रदेशे युद्धेन व्याप्ते तस्मिन् ८
दिने खड्गै र्ये लोका विनष्टास्ततोऽपि बहुतरा वनवृक्षै र्व्यनश्यन्।

अपरम् अवशालोमो दायूदो दासैः प्राप्तः। अवशालोमः खचरमेकम् ९
आरूढवान् तत एकस्य महत एलातरोः शाखाधस्तस्य खचरस्य
गमनसमयेऽवशालोमस्य मस्तकं तस्य तरोः शाखासु बबन्धे ततस्तस्या-
धःस्थखचरस्य प्रस्थानात् स आकाशपृथिव्यो र्मध्य उल्लम्बितस्तस्थौ।
अनन्तरम् एको मनुजस्तं निरीक्ष्य योयावं जगाद, अवशालोमम् एक- १०
स्मिन् एलावृक्ष उल्लम्बितं दृष्टवानहं। योयावस्तं वार्त्तावादिनं जगाद ११
तं दृष्ट्वैव त्वं कुतस्तं तत्र भूमौ निपातयन् न हतवान्? तथाकृतेऽहं
तुभ्यं दशशेकलपरिमाणं रूप्यं कटिबन्धनमेकञ्चादास्यं। अनन्तरं स १२
पुरुषो योयावं प्रतिजगाद यद्यहं सहस्रशेकलमानानि रूप्याणि
स्वकरे ऽतुलयिष्यं तथापि तस्य राजपुत्रस्य प्रतिकूलं हस्तं न प्रासा-
रयिष्यं, यतोऽस्माकं कर्णगोचरे नृपतिस्त्वाम् अबीशयम् इत्तयञ्चेदम्
आज्ञापयत् मत्कृते युष्माभिरवशालोममधि सावधानै र्भवितव्यं। यद्यहं १३
तद् अकरिष्यं तर्हि निजप्राणान् व्यनाशयिष्यं यतो राजतः किञ्चन कर्म्म

१४ छन्नं न तिष्ठति अपरं त्वमपि मम प्रतिकूलोऽभविष्यः। ततो योयावो
जगाद तव सम्मुखे मया न विलम्बितव्यं ततः स हस्ते शल्यत्रयं गृहीत्वा
१५ निक्षिप्यावशालोमस्य हृदयं विद्धवान्। किन्त्वेलाहृत्तस्य मध्येऽवशालोमे
जीवति तिष्ठति योयावस्यास्त्रवाहका दशतरुणा अवशालोमं वेष्टयन्त
१६ आहत्य मारयामासुः। अनन्तरं योयावेन तूर्य्यां वादितायां लोका
इस्रायेल्वंशस्य पश्चाद्गमनात् प्रत्यावर्त्तिरे यतस्ते योयावेन नियताः।
१७ अपरं तेऽवशालोमं गृहीत्वा काननस्थे वृहति खाते निक्षिप्य तदुपरि
महान्तं पाषाणराशिं चक्रुः किन्त्विस्रायेलीयमनुजाः सर्व्वे स्वं स्वं वासस्थानं
पलायाञ्चक्रिरे।

१८ अवशालोमो जीवत्काले निजार्थं राज्ञ उपत्यकायां स्तम्भमेकम्
अस्थापयत् यतः स जगाद मम नाम रक्षितुं मम पुत्रो नास्ति, तत्-
कारणात् तस्य नामानुसारेण तस्य स्तम्भस्यावशालोमस्तम्भ इति नाम
बभूव तस्य तन्नामाद्यापि विद्यते।

१९ अपरं सादोकस्य पुत्रोऽहीमासो जगाद, परमेश्वरः केन प्रकारेण
नृपते रिपून् दण्डितवान् एतस्य शुभवार्त्तां राजानं वेदयितुं मां
२० धावितुम् अनुजानीहि। ततो योयावस्तमवदत् अद्य त्वं शुभवार्त्तावादी
न भविष्यसि, अन्यस्मिन् दिवसे शुभवार्त्तां वदिष्यसि किन्त्वद्य त्वया
२१ वार्त्ता न गदितव्या यतो राजपुत्रो ममार। अनन्तरं योयावः कूशिम्
उक्तवान् त्वया यद् दृष्टं तद् गत्वा राजानं ज्ञाप्यतां। ततः कूशि
२२ र्योयावं प्रणम्य दधाव। अनन्तरं सादोकस्य पुत्रो अहीमासः पुनर्व्वारं
योयावं जगाद, यद्भवेत् कूशेः पश्चाद् धावितुं मामप्यनुजानीहि। ततो
योयावः कथयामास, हे वत्स तव वक्तव्या काचित् वार्त्ता न विद्यते त्वं
२३ कुतो धाविष्यसि? स उक्तवान् यद्भवेत् मां धावितुं अनुजानीहीति तेन
प्रतिगदिते स उक्तवान् धाव। ततो ऽहीमासः समभूमे मार्गेण
२४ धावन् कूशेरग्रे जगाम। तदानीं दायूद् द्वयो र्द्वारयोर्मध्यवर्त्तिनि स्थान
उपाविशद् एतस्मिन् समये रक्षी गोपुरस्य पृष्ठे प्राचीरोपरि गमना-
गमने कुर्व्वन् चक्षुरुन्मील्य जनएक एकाकी धावन् आयातीति ददर्श।
२५ ततः स रक्षक उच्चैःस्वरेण राजानं तत् ज्ञापयामास, ततो राजा
जगाद स यदि एकक आयाति तर्हि शुभवार्त्तां वदिष्यति। इत्यवसर
२६ आगच्छति तस्मिन् निकटवर्त्तिनि भूते रक्षी द्वितीयं जनं धावन्तं दृष्ट्वा
दौवारिकम् उच्चैःस्वरेण ज्ञापयामास पश्यापर कश्चित् मनुज एकको

धावन् आगच्छति। ततो राजा जगाद, सोऽपि शुभवार्त्तामानयति।
अनन्तरं रक्षी व्याहरत्, अग्रगामिनः पुरुषस्य धावनं सादोकपुत्रस्या- २७
हीमासस्य धावनं बुध्यते। राजा कथितवान् स सज्जनो मङ्गलवार्त्तां
गदितुम् आगच्छति। तदानीम् अहीमासो राजानम् उच्चैर्व्याहरत् २८
भवतो मङ्गलं भवतु, अपरं स भूमौ न्युब्जीभूय पतन् राजानं व्यज्ञापयत्
तव प्रभुः परमेश्वरो धन्यो भवतु यतो मम प्रभो नरपतेः प्रातिकूल्येन
ये नराः स्वहस्तान् प्रसारितवन्तस्ते तेन दमिताः। अनन्तरं राजा २९
पप्रच्छ तरुणोऽवशालोमः किं कुशली विद्यते? ततोऽहीमास उक्तवान्
योयावो यदा महाराजस्य दासं माञ्च व्यसर्जत् तदा महान् कलहो
जात इति दृष्टवानहं किन्तु किं जातं तन्न ज्ञातवान्। अनन्तरं राजा ३०
समादिशत् त्वं पार्श्वं गत्वा स्थानेऽस्मिन् तिष्ठ ततः स पार्श्वं गत्वातिष्ठत्।
ततः कूशिरागत्य व्यज्ञापयत्, हे मम प्रभो राजन् मङ्गलवार्त्ता, ३१
परमेश्वरोद्य भवतः प्रतिकूलं समुत्थितान् सकलान् दण्डितवान्। राजा ३२
कूशिं पप्रच्छ तरुणोऽवशालोमः किं कुशली विद्यते? ततः कूशिरव-
दत् मम प्रभो नृपतेः सर्व्वे रिपवो यावन्तो नराश्च भवतोऽमङ्गलार्थं
भवतः प्रातिकूल्येनोत्तिष्ठन्ति ते सर्व्वे तस्य तरुणस्य सदृशा भवन्तु।
ततो नरपतिरतीव व्याकुलो भवन् गोपुरोपरि स्थितं चौमं गत्वा ३३
रुरोद, अपरम् इतस्ततो गच्छन् गच्छन् व्याहरत् हा हा मम पुत्र
अवशालोम, हा हा मम स्वकीयपुत्र अवशालोम, यदि तव विनिमये-
नाहम् अमरिष्यं। हा हा अवशालोम, हा हा मम पुत्र मम पुत्र।

---

१९ ऊनविंशोऽध्यायः।

१ दायूदः शोकस्य योयावेन निवारणं ९ राजानं पुनरानेतुं इस्रायेलीयलोकानां यतनं ११ यिहूदावंशस्य मनः प्रवर्त्तयितुं याजकानां प्रेषणं १६ शिमियै दोषक्षमनं २४ मिफीवोशतस्य कथनं ३१ वर्षिल्लयस्य विसर्जनं तस्य पुत्रस्य किम्हमस्य स्वसमीपे स्थापनं ४१ राजानम् अधि यिहूदीयानाम् इस्रायेलीयानाञ्च विवदनं।

अनन्तरं पश्य, अवशालोमस्य कृते राजा रोदिति शोचति चेति १
वार्त्ता योयावेन शुश्रुवे। राजा निजपुत्रमधि व्यथत इति लोकैस्तस्मिन् २
दिवसे श्रुते तस्य दिवसस्य जयः सर्व्वलोकानां शोकदो बभूव। अपरं ३
रणस्थलात् पलायमाना लोका यादृक् लज्जमानाश्चौरवद् व्रजन्ति
तादृक् लोकास्तस्मिन् दिवसे नगरप्रवेशकाले चौरवद् वव्रजुः। राजा ४

निजवदनम् आच्छाद्य हा हा मम पुत्र अवशालोम, हा हा मम पुत्र
५ अवशालोम, हा हा मम पुत्र इत्युच्चैःस्वरेण व्याहरत्। अनन्तरं योयावो
निवेशनमध्ये राज्ञः समीपं गत्वा जगाद त्वं निजरिपुषु प्रीयसे निजा-
त्मीयलोकान् ऋतीयसे च तस्मात् तव प्राणास्तव पुत्राणां कन्यानाञ्च
प्राणास्तव जायानां प्राणास्तवोपपत्नीनां प्राणाश्चाद्य यैररक्ष्यन्त तव ते
६ दासा अद्य त्वया लज्जायुक्ता बभूवुः, यतस्त्वं सैन्यपतीन् दासांश्च तृणाय
न मन्यस इत्यद्य प्रकाशितवान् यतोऽद्य यद्यवशालोमोऽजीविष्यत् वयं
७ सर्व्वे चामरिष्याम तर्हि त्वम् अतोक्ष्य इति मयाद्य बुद्धं। त्वमिदानीम्
उत्तिष्ठ वहि र्गत्वा निजदासान् मधुरवचोभिरालप। परमेश्वरस्य
नाम्नाहं शपथं कृत्वा वदामि यदि त्वं वहि र्न गच्छेस्तर्हि रजन्यामस्यां
त्वया सार्कं जन एकोपि न स्थास्यति, अपरं तव बाल्यावस्थामारभ्य
यावदेतत्कालं यावन्त्यशुभानि त्वाम् आक्रामन् तेभ्यः सकलेभ्योपि तवे-
८ दम् अमङ्गलम् गुरुतरं भविष्यति। ततो नरपतावुत्थाय गोपुर उप-
विष्टे सकललोकै र्वार्त्तेयम् अश्रावि, पश्यत राजा गोपुर उपविष्ट
आस्ते तेन सर्व्वे लोका राज्ञः सम्मुखम् आजग्मुः किन्त्विस्रायेलीयलोकाः
सर्व्वे स्वं स्वं वासस्थानं पलायाञ्चक्रिरे।
९ अनन्तरम् इस्रायेलः सकलवंशानां लोकाः विचारयन्तो जगदुः, रिपूणां
हस्तेभ्योऽस्माकम् उद्धारयिता पिलेष्टीयानां करेभ्यश्चास्माकं मोचयि-
तासौ यो राजा स इदानीम् अवशालोमस्य भयाद् देशात् पलायित-
१० वान्। अपरम् अस्माभी राज्याभिषिक्तो योऽवशालोमः स रणेऽहन्यत।
तस्माद् यूयं राजानं परावर्त्त्यानेतुं कुतो मौनिनो भवत ?
११ अपरं दायूद् नरपति र्याजकयोः सादोकावीयाथरयोः समक्षं दूतं
प्रहित्यावदत्, युवां यिहूदावंशस्य प्राचीनान् वाचमिमां वदतं सर्व्व-
स्रायेल्वंशस्य निवेदनं राज्ञः साक्षाद् गृह उपातिष्ठत्, अतो यूयं
१२ राजानं निजगृहं परावर्त्त्यानेतुं कुतोऽन्त्यलोका भवथ? यूयं मम
भ्रातरो ममास्थिमांसरूपा अतो राजानं परावर्त्त्यानेतुं यूयं कुतोऽन्त्य-
१३ लोका भविष्यथ? युवाम् अमासायञ्चेदं वदतं त्वं किं ममास्थिमांसरूपो
नासि? यदि त्वं नित्यं मम साक्षाद् योयावस्य विनिमयेन प्रधान-
सेनापति र्न भवसि तर्हीश्वरो मह्यम् अमुकं दण्डं ततोऽधिकञ्च ददातु।
१४ अनन्तरम् एकजनस्येव यिहूदावंशस्य समस्तलोकानां हृदयेषु तेनानतेषु
ते सार्कं प्रहित्य राजानम् अवदन् भवान् भवतो दासाश्च सर्व्वे पुनरा-

गच्छन्तु। ततो राजनि परावृत्य यर्दनस्य सन्निधिम् आगते यिहूदीयलोका १५
राजानं साक्षात् कर्त्तुं तं यर्दनस्य पारं नेतुञ्च गिल्गलम् आगच्छन्।
अपरं बिन्यामीनवंशीयो बहूरीमनिवासी गेराः पुत्त्रः शिमियिस्तूर्णं १६
दायूदं नरपतिं साक्षात् कर्त्तुं यिहूदीयलोकैः सार्द्धम् आजगाम।
अपरं बिन्यामीनवंशस्य सहस्रं लोकाः तेन सार्द्धमासन् शौल- १७
वंशस्य दासः सीवस्तेन समं तस्य पञ्चदशपुत्त्रा विंशतिर्दासा अपि
राजानं साक्षात् कर्त्तुं यर्दनस्य पारं गताः। अपरं नृपतेः परिजनान् १८
पारं कर्त्तुं तेनाज्ञापितं कर्म्म कर्त्तुञ्च नौ गमनागमनेऽकरोत्।
अनन्तरं राजनि यर्दनस्य तीरमागते गेराः पुत्त्रः शिमियि र्नरपतेः
सम्मुखे न्युब्जीभूय पतन् राजानमवदत् मम प्रभु र्ममापराधं क्षमतां, १९
यस्मिन् दिने मम प्रभु र्यिरूशालमाद् वहिरागच्छत् तस्मिन् दिने
भवतो दासोऽहं यं विरुद्धाचारम् अकरवं तं भवान् स्मरणाद् दूरी-
कृत्य मनसि न दधातु। भवतो दासोऽहं पापमकरवं तत् जानामि, २०
तत्कारणात् मम प्रभुं नरपतिं साक्षात् कर्त्तुम् अद्याहं यूषफवंशी-
यानां सर्व्वेषाम् अग्रे समागमं। ततः सिरूयायाः पुत्त्रोऽवीशयः प्रत्य- २१
वदत् योऽसौ शिमियिः परमेश्वरस्याभिषिक्तम् अभिशप्तवान् स तत्-
कारणात् किं न हन्तव्यः? ततो दायूद् जगाद हे सिरूयायाः पुत्त्रौ २२
युवयोः समं मम कः सम्बन्धः? युवाभ्याम् अद्य कुतो मां प्रति विपक्षता
क्रियते? इस्रायेल्वंशीयः कोपि जनः किमद्य हन्तव्यः? अद्याहम्
कृत्स्नस्येस्रायेलो नृपतिरभवं तत्किं न जानामि? अनन्तरं नरपतिः २३
शिमियिं बभाषे त्वं न घानिष्यसे। ततो भूपतिः शपथं कृत्वा तदवोचत्।
अपरं शौलस्य पौत्त्रो मिफीबोशतो राजानं साक्षात् कर्त्तुम् आज- २४
गाम। स नृपते र्निर्गमनदिनमारभ्य कुशलेन प्रत्यागमनदिवसं यावत्
पादसेवनं श्मश्रूणां क्षौरञ्च न चकार वस्त्राणि च धौतानि न चकार।
राजानं साक्षात् कर्त्तुं यिरूशालमनिवासिलोकेष्वागतेषु राजा तं २५
जगाद हे मिफीबोशत त्वं कुतो मया समं न गतवान्? स प्रत्यवदत् २६
हे मम प्रभो नरपते मम दासो मां वञ्चयाञ्चक्रे भवतो दासोऽहं खञ्जो-
ऽस्मि ततो हेतोरहं गर्द्दभं सज्जयित्वा तमारुह्य नरपतेः समीपं यास्या-
मीति मम वाञ्छासीत्। किन्तु स मम प्रभो र्नरपतेः साक्षात् माम् २७
अपावदत् किन्तु मम प्रभु र्नरपतिरीश्वरीयदूतस्य सदृशोऽस्ति भवता
यत् क्षेमं बुध्यते तदेव क्रियतां। मम प्रभो र्नरपतेः साक्षात् मम कृत्स्नः २८

पितृवंशो बधार्ह आसीत्, तथापि भवतो भोजनासने भोक्तृभिः
समम् उपवेष्टुं मह्यं स्थानं भवान् दत्तवान्, अतो नृपतये पुनरावेदनं
२९ कर्त्तुं मम कोऽधिकारः? ततो नृपतिस्तं बभाषे त्वं पुन र्मह्यं निज-
वाक्यानि निवेदयसि कुतः? त्वं सीवश्चोभौ तां भूमिं विभज्य गृह्णीत-
३० मित्यहमवोचं। अनन्तरं मिफीवोशतो राजानम् उक्तवान् तेन सर्व्वमेव
गृह्यतां यत इदानीं मम प्रभु र्नरपतिः कुशलेन स्वगृहं प्रत्यावृत्या-
गतवान्।
३१ अपरं गिलियदीयो वर्षिल्लयो रोगिलीमाद् आगम्य यर्दनस्य पारं
३२ यावद् राजानम् अनुव्रजितुं तेन समं यर्दनस्य पारं जगाम। स वर्षि-
ल्लयोऽशीतिवत्सरवयस्कोऽतीव वृद्ध आसीत् राजा च यावत् मह-
नयिमेऽतिष्ठत् तावत् तेनैवापुष्यत यस्मात् सोऽतीव धनवान् आसीत्।
३३ अनन्तरं नरपतिर्वर्षिल्लयं व्याहरत् त्वं मया समं पारं गच्छ त्वामहं
३४ यिरूशालमे मम सन्निधौ सम्पोष्यामि। ततो वर्षिल्लयो नरपतिं व्याज-
हार, ममापरं कत्यायुरास्ते यदहं नरपतिना समं यिरूशालमं
३५ यास्यामि? अद्याहमशीतिवत्सरवयस्कोऽभवं भद्राभद्रयो र्विशेषं
बोद्धुं किं मया शक्यते? यद्भुञ्जे यच्च पिबामि तव दासोऽहं किं तयो-
रास्वादं बोद्धुं शक्नोमि? गायकगायिकानां स्वरं किं श्रोतुं शक्नोमि?
३६ भवतो दासोऽहं कुतो मम प्रभो र्नरपते र्भार इव भविष्यामि? भवतो
दासो यर्दनस्य पारं गत्वा नरपतिना समं स्तोकं वर्त्म यास्यति, किन्तु
३७ नरपतिः कुतस्तस्यैतादृक् पुरस्करिष्यति? विनयेऽहं भवतो दासं
प्रत्यावृत्य गन्तुम् अनुजानातु। अहं निजनगरे मम पित्रोः श्मशान-
समीपे मुमूर्षे। किन्तु भवान् स्वदासं किम्हमं प्रति दृष्टिं करोतु स
मम प्रभुना नरपतिना समं पारं गच्छतु भवता च यद् भद्रं बुध्यते तं
३८ प्रति तदेव क्रियतां। ततो नरपतिः प्रत्युवाच, किम्हमः पारं गत्वा मया
समं यास्यति त्वया यद् भद्रं बुध्यते मया तदेव तं प्रति कारिष्यते मत्तः
३९ प्राप्तुं त्वं यद् अभिलषसि त्वत्कृते तदेव मया कारिष्यते। अनन्तरं
सर्व्वे मनुजा यर्दनसरितः पारं गताः। अपरं नृपतिः पारं प्राप्य वर्षि-
ल्लयं चुम्बितवान् स च तस्मै आशिषं दत्त्वा निजस्थानं प्रत्यावृत्य जगाम।
४० अपरं नरपतिः पारं गत्वा गिल्गलम् इयाय, तेन समं किम्हमोऽपि
वव्राज। अपरं यिहूदावंशीयाः सर्व्वे मनुजा इस्रायेल्वंशानाम् अर्द्ध-
मनुजाश्च नरपतिम् अनुव्रज्य नीतवन्तः।

अनन्तरम् इस्रायेल्वंशानां सर्व्वे लोका भूपतिमुपजिगमिषवो भूत्वा ४१
राजानं व्याहरन्, अस्माकं भ्रातरो यिहूदावंशीया मनुजा भवन्तमप-
हृत्य भवन्तं भवतः परिजनांश्च यर्द्दनसरितः पारं कुत आनैषुः? तदानीं
दायूदः सर्व्वे लोकास्तेन समम् आसन्। ततो यिहूदावंशीयलोका ४२
इस्रायेल्वंशीयलोकान् प्रत्यवदन् राजास्माकं निकटकुटुम्बः, यूयम् एतत्-
कार्य्याय कुतः क्रुध्यथ? वयं किं राज्ञः किञ्चन द्रव्यमभुञ्ज्महि? स
वा किमस्मभ्यं किञ्चन दानमदत्त? अनन्तरम् इस्रायेल्वंशा यिहूदा- ४३
वंशं व्याहरन् राजन्यस्माकं दशमांशाः सन्ति दायूदि युष्माकं योधिकार-
स्तस्माद् अस्माकम् अधिकोऽप्यास्ते यूयम् अस्मान् तुच्छीकृत्यास्माकं
भूपतिं परावर्त्यानेतुं प्रथमं कुतोस्माकं मन्त्रणां नागृह्णीत? तत इस्रा-
येल्वंशानां वाक्यतो यिहूदावंशस्य वाक्यम् अधिकनिष्ठुरं बभूव।

---

२० विंशतितमोऽध्यायः।

१ इस्रायेलः कलहे शेवस्य कथनं ३ दायूदः पुनर्गृहागमनं ४ अमासायस्य सेनापते र्योयाबेन हतत्वं १४ आबेलनगरस्यावरोधनं १६ स्त्रीद्वारा योयाबाय शेवस्य मस्तक-दानं २३ राज्ञो विशेषाणाम् अध्यक्षाणां नामानि।

तस्मिन् समये बिन्यामीनवंशीयो बिख्रेः पुत्रः शेवनामक एको दुष्ट- १
लोकस्तत्र स्थान आसीत् स तूरीं वादयन् अवदत् दायूदि कश्चनां-
शोऽस्माकं नास्ति यिशयस्य पुत्रे वा नास्माकमधिकारोऽस्ति, हे इस्रा-
येल्वंशा यूयं सर्व्वे स्वं स्वं वासस्थानं गच्छत। तत इस्रायेलीयाः सर्व्वे २
लोका दायूदोऽनुगमनात् परावृत्य बिख्रेः पुत्रस्य शेवस्यानुगामिनो
बभूवुः किन्तु यिहूदावंशीया लोका यर्द्दनमारभ्य यिरूशालमं यावत्
स्वेषां राजन्यासक्तास्तस्थुः।

अनन्तरं दायूद् यिरूशालमे निजगृहम् आजगाम ततः परं राजा ३
स्वीया या दशोपपत्नी र्गृहरक्षार्थं विहाय गतवान् ता गर्भागारे रुद्धा-
पोषयत् तासां समीपं पुन र्न जगाम ततस्ता मरणदिवसं यावद् रुद्धा
विधवा इव तस्थुः।

अनन्तरं नरपतिरमासायम् अवदत् त्वं दिनत्रयमध्ये यिहूदावंशी- ४
यान् सकललोकान् मम सन्निधौ संगृहाण त्वमपि स्थानेऽत्र समुपतिष्ठ।
ततोऽमासाये यिहूदीयान् सकललोकान् संग्रहीतुं गते निरूपितसम- ५
यात् तस्याधिको विलम्बो बभूव। ततो दायूद् अवीशयं व्याहरत्, ६

इदानीं विख्रेः पुत्त्रः शेबोऽवशालमतो ऽस्माकम् अधिकक्षतिं करिष्यति,
त्वमेव निजप्रभो दासान् गृहीत्वा तस्य पश्चाद् धाव नो चेत् स
७ प्राचीरवेष्टितानि नगराण्याश्रित्यास्माकं करेभ्यो रक्षां प्राप्स्यति। ततो
योयावस्य लोकाः किरेथीयलोकाः पिलेथीयलोकाः सर्व्वे बलवन्तो
मनुजाश्च तस्य पश्चाद् वहिर्भूय विख्रेः पुत्त्रस्य शेवस्य पश्चाद् धावितुं
८ यिरूशालमात् प्रतस्थिरे। अनन्तरं तेषु गिबियोनस्थस्य महाप्रस्तरस्य
समीपमुपस्थितेषु अमासायस्तान् साक्षात् कर्त्तुम् आजगाम, तदानीं
योयावस्य वसनं तस्य परिधानमासीत् तच्च येन कटिबन्धेन बद्धम्
आसीत् तन्मध्ये कटिदेशे कोषेण छन्नः खड्ग एक आसीत्, किन्तु
९ गमनात् स निष्पपात। ततो योयावोऽमासायम् अवदत् हे मम भ्रात-
स्तव किं मङ्गलम् आस्ते? अनन्तरं योयावस्तं चुम्बितुं दक्षिणकरेण
१० तस्य श्मश्रूणि दधार। किन्तु योयावस्य करस्थितात् चन्द्रहासाद् अमा-
सायस्य सावधानताभावात् स तेन तस्य कुक्षिं विदीर्णवान् तेन तस्य
नाडीगणे वहिर्भूय पतिते पुनराघातं विनैव स ममार। अनन्तरं
योयावस्तस्य भ्राताबीशयश्च विख्रेः पुत्त्रस्य शेवस्य पश्चाद् दधावतुः।
११ अनन्तरं योयावस्य दासानाम् एकः कुणपस्य समीपे तिष्ठन् व्याजहार
यो जनो योयावे प्रीयते दायूदः पक्षश्च भवति स योयावस्य पश्चात्
१२ यातु। तथापि राजवर्त्ममध्ये शोणिते लुठितस्यामासायस्य समीपे
सर्व्वे लोकास्तिष्ठन्तीति वीक्ष्य स जनोऽमासायं मार्गात् क्षेत्रं नीत्वा
तस्य गात्रं वसनेनाच्छादयामास यतो यावन्तो मनुजास्तस्य समीपेन
१३ यान्ति ते सर्व्वे तत्र स्थाने तिष्ठन्तीति स ददर्श। तदानीम् अमासाये
राजमार्गाद् वहिष्कृते लोका विख्रेः पुत्त्रस्य शेवस्य पश्चाद् धावनार्थं
योयावम् अनुजग्मुः।
१४ अनन्तरं शेव इस्रायेलः सकलवंशानां वेरीयलोकानाञ्च मध्येनावे-
लवैतमाखां यावत् जगाम ततो मनुजा मिलित्वा तम् अनुजग्मुः।
१५ अनन्तरं लोका आवेलवैतमाखायां तं वेष्टयित्वा नगरस्य समीपे सेतुं
निर्म्ममिरे। इत्थं नगरे वेष्ठिते योयावस्य सङ्गिनो लोकाः प्राचीरं
भूमिसात् कर्त्तुं तद् भंक्तुमारेभिरे।
१६ अनन्तरं नगरस्य मध्याद् एका बुद्धिमती योषिद् उच्चैःस्वरेण व्याज-
हार शृणुत शृणुत विनयेऽहं योयावं सम्भाषिष्ये तत्कारणात् तमेतत्
१७ स्थानमागन्तुं वदत। अनन्तरं योयावे तस्याः समीपं गते सा योषिद्

अप्राक्षीत् त्वं किं योयावः? स प्रत्यवदत्, अहमेव। ततः सा योषित्
जगाद भवान् स्वदास्या वाक्यानि निशामयतु। स प्रत्यवदत्, शृणोमि।
अनन्तरं सा योषिद् व्याजहार, प्राक् सम्भाषणं क्रियताम् अर्थत १८
आवेलनिवासिनः परिपृच्छ्यन्तां ततस्तव कार्य्यं सेत्स्यति। इस्रायेलो १९
मध्येऽहम् अविरोधिनी विश्वास्या च नगरी किन्तु त्वम् इस्रायेलो मातृ-
स्वरूपां नगरीं नाशयितुं चेष्टसे परमेश्वरस्याधिकारं कुतो ग्रसिष्यसि?
ततो योयावः प्रतिजगाद ग्रसनं नाशनं वा मत्तो दूरे तिष्ठतु दूरे तिष्ठतु २०
तन्नहि किन्तु विख्रेः पुत्त्रः शेवनामको य इफ्रयिमपर्व्वतीयो जनो २१
दायूदो नरपतेः प्रतिकूलं हस्तौ प्रासारयत् केवलं स एव युष्माभिः
प्रदीयतां ततोऽहं नगरात् प्रस्थास्ये। तदानीं सा योषिद् योयावं
व्याहरत्, पश्य प्राचीरात् तस्य शिरस्तव समीपं निक्षेप्स्यते। अनन्तरं २२
सा योषित् निजबुद्ध्या सकललोकानां समीपं जगाम, ततो मनुजा
विख्रेः पुत्त्रस्य शेवस्योत्तमाङ्गं छित्त्वा योयावस्य समक्षं न्यक्षिपन् ततस्तेन
तूर्य्यां वादितायां तस्य सकललोका नगरं त्यक्त्वा स्वं स्वं वासस्थानं
प्रतस्थिरे, योयावश्च यिरूशालमे नरपतेः समीपं प्रतिजगाम।

तस्मिन् समये योयाव इस्रायेलः सकलवंशानां प्रधानसेनापति- २३
रासीत्, यिहोयादस्य पुत्त्रो बिनायश्च किरेथीयानां पिलेथीयानाञ्चा-
धिपतिरासीत्। अदोरामश्च कराध्यक्ष आसीत्, अहीलूदस्य पुत्त्रो २४
यिहोशाफटश्च पुरावृत्तरचक आसीत्, सिरायश्च लेखक आसीत्, २५
सादोकोऽवीयाथरश्च याजकावास्तां। यायीरीय ईरा अपि दायूदः २६
सभासद् आसीत्।

---

२१ एकविंशोऽध्यायः।

१ गिबियोनीयलोकानां वधकरणाद् वत्सरत्रयं दुर्भिक्षभवनं शौलस्य पुत्त्रपौत्त्राणां वधः
१० हतलोकान् प्रति रिस्पाया अनुग्रहः शौलयोनाथनयोरस्थ्नां श्मशाने स्थापनं १५
पिलेष्टीयैः समं वारत्रयरणस्य कथनं।

अनन्तरं दायूदोऽधिकारसमये क्रमेण वत्सरत्रयं दुर्भिक्षे जाते दायूद् १
तदधि परमेश्वरं पप्रच्छ ततः परमेश्वरस्तं प्रतिजगाद, शौलस्तस्य
शोणितपातको वंशश्च मूलमेतस्य यतः स गिबियोनीयलोकान् अव-
धीत्। ततो राजा गिबियोनीयान् आहूय सम्बभाषे। ते गिबि- २
योनीयलोका इस्रायेल्वंशसम्भवा नहि त इमोरीयाणाम् अवशि-

ष्टानां मध्यीया इस्रायेल्वंशीयास्तान् जीवयितुं शपथं चक्रिरे किन्तु
शौल इस्रायेल्यिहूदावंशयो र्निमित्तं निजोद्योगेन तान् हन्तुम् अचे-
३ ष्टत। अतो दायूद् गिबियोनीयान् अवदत्, युष्माकं कृते मया किं
कर्त्तव्यं? यूयं यत् परमेश्वरस्याधिकारम् आशिषं गदेत तत्कृते मया
४ किं प्रायश्चित्तं कर्त्तव्यं? गिबियोनीयमनुजाः प्रत्यवदन् वयं शौलस्य
तस्य वंशस्य वा समीपात् किञ्च रजतं काञ्चनं वा न ग्रहीष्याम इस्रा-
येल्वंशानां मध्ये वा कमपि न हनिष्यामः। अनन्तरं स जगाद
५ युष्माभिः किम् उच्यते? मया युष्माकं कृते तदेव कारिष्यते। ततस्ते
राजानं व्याजह्रुः, यो मनुष्योऽस्माकं क्षयमकरोत् यद्वयम् इस्रायेलः
कुत्रापि प्रदेशे न तिष्ठाम एतदर्थम् अस्मान् विनाशयितुं कुमन्त्रणाम-
६ करोत्, तस्य वंशस्य सप्त पुमांसो ऽस्मासु समर्प्यन्तां वयं परमेश्वरेणा-
भिरुचितस्य शौलस्य गिबियायां परमेश्वरम् उद्दिश्य तान् उद्बन्धनेन
७ हनिष्यामः। ततो राजा कथयामास दास्यामि किन्तु शौलस्य पुत्त्रेण
योनाथनेन समं दायूदः परमेश्वरीयशपथ आसीत् तत्कारणात् नृपतिः
८ शौलस्य पौत्त्रं योनाथनस्य पुत्त्रं मिफीबोशतं ररक्ष। किन्त्वयाया दुहितू
रिस्पाया गर्भे शौलाद् यावर्म्मोणिमिफीबोशतनामानौ द्वौ पुत्त्राव-
जायेतां तौ मिहोलातीयवर्षिल्लयस्य पुत्त्रस्याद्रीयेलस्यौरसजाता ये पञ्च-
९ पुत्त्राः शौलस्य कन्यया मीखलयापुष्यन्त तानपि राजा गृहीत्वा गिबि-
योनीयानां करेषु समर्पयामास ततस्ते परमेश्वरस्य सम्मुखे शिलोच्चये तान्
उद्बबन्धुः ते सप्त जना युगपत् पपतुः। ते प्रथमशस्यच्छेदनसमये यवच्छे-
दनारम्भकाले ऽहन्यन्त।

१० अनन्तरम् अयाया दुहिता रिस्पा शाणवसनं गृहीत्वा शिलोच्चयो-
परि विस्तार्य्य आ शस्यच्छेदनारम्भकालात् तेषामुपर्य्याकाशीयजलवर्षणं
यावत् तत्र तिष्ठती दिवा शून्यस्य पक्षिगणात् निशायां वन्यपशुगणाच्च
११ तान् ररक्ष। अपरम् अयाया दुहिता रिस्पा शौलस्योपपत्नी कर्म्मेदं
करोतीति वाग् दायूदे नृपतये कथिताभूत्।

१२ अपरं पिलेष्टीयै र्गिल्वोयगिरौ शौलस्य हननकाले बैतशानस्य
सन्निवेशे तैरुद्बध्य स्थापितौ शौलस्य तत्पुत्त्रस्य योनाथनस्य च शवौ ये
याबेशगिलियदीयमनुजैस्तस्मात् स्थानाद् अपहृतौ दायूद् गत्वा तेभ्य-
१३ स्तयोरस्थीनि जग्राह। स तस्मात् स्थानात् शौलस्य तत्पुत्त्रस्य योना-
थनस्य चास्थीन्यानिनाय; अपरं लोकैस्तेषाम् उद्बद्धलोकानाम् अस्थिषु

सङ्गृहीतेषु शौलस्य तत्पुत्रस्य योनाथनस्य चास्थीनि विन्यामीनदेशस्थ- १४
सेलायां तस्य तातस्य कीशस्य श्मशानमध्ये स्थापयाञ्चक्रिरे। नृपतेः
सकलादेशस्तैः साधयाञ्चक्रे ततः परम् ईश्वरो लोकानां प्रार्थनां गृहीत्वा
देशं प्रत्यानुकूल्यं चकार।

अनन्तरं पिलेष्टीयैः समं पुनर्वारम् इस्रायेल्वंशस्य समरे समुपस्थिते १५
दायूद् तदीयदासाश्च तत् स्थानं जग्मुस्ततः पिलेष्टीयलोकैः समं तेषां
युद्धकाले दायूद् क्लान्तो बभूव। ततः शतत्रयशेकलपरिमितपित्तल- १६
मयशक्तिधारी यिश्बिविनोवनामा वृहत्कायवंशीय एको मनुजो नूतन-
खड्गेन सुसज्जितो भूत्वा दायूदं हन्तुं मतिं चकार। किन्तु सिरूयायाः १७
पुत्रोऽवीशयस्तम् उपकुर्व्वन् आघातेन तं पिलेष्टीयं जघान। तदानीं
दायूदो मनुजास्तस्य साक्षात् शपथं कृत्वा कथयामासुः, त्वमस्माभिः समं
रणाय पुन र्न यास्यसि नो चेद् इस्रायेलः प्रदीपो निर्वास्यति। अनन्तरं १८
गोवे पिलेष्टीयैः समं पुनः संग्राम उपस्थिते हूशातीयः सिव्विखयो
वृहत्कायवंशीयं सफम् अवधीत्। पुनर्वारं पिलेष्टीयैः समं गोवे रणे १९
आरब्धे तत्र यार्य्योरिगोमस्य पुत्रो बैतलेहमीय इल्हाननो तन्तुदण्डनि-
भमहाशक्तिधारिणं गातीयजालूतस्य भ्रातरम् अवधीत्। अनन्तरं गाते २०
पुन र्युद्धे जाते प्रतिहस्तं प्रतिपदञ्च षट् षट् अङ्गुल्यः साकल्येन चतुर्विं-
शत्यङ्गुल्यो यस्यासन् एवम्भूत एको वृहत्कायो नरस्तत्रासीत् सोऽपि तद्वृ-
हत्कायवंशीय एको जनः। स इस्रायेलीयलोकान् स्पर्द्धयामास, ततो २१
दायूदो भ्रातुः शिमियस्य पुत्रो योनाथनस्तमवधीत्। गातीयवृहत्काय- २२
वंशीया एते चत्वारो जना दायूदा तस्य दासैश्च जघ्निरे।

---

२२ द्वाविंशोऽध्यायः।

रक्षार्थं नानाविधानुग्रहार्थञ्च परमेश्वरं प्रति दायूदा कृतं प्रशंसागीतं।

यदा परमेश्वरः स्वदासं दायूदं सर्व्वरिपूणां शौलस्य च हस्तेभ्य उद्धृत- १
वान् तदा दायूद् परमेश्वराय यद्गीतम् अकरोत् तद्गीतमिदं।

त्वं मे गिरिश्च दुर्गञ्च रक्षकश्च परेश्वर। २
ईश्वरश्चाचलो मे त्वं त्वञ्च विश्वसितो मया। ३
फलकं बलवांस्त्राता दुर्गमुच्चं मयाश्रितं।
त्वम् उद्धारयिता मे सन् रक्षसि माम् उपद्रवात्।

४ स्तवनीयेश्वरं प्रार्थ्य प्राप्ता रक्षा द्विषो मया।
५ वेष्टितो मृत्युरज्जूभिस्त्रासितः प्रलयोर्म्मिभिः।
६ बद्धो नारकपाशेन मृत्युजालेन संवृतः।
७ अहमित्थं व्यथित्वैवाह्वतवान् परमेश्वरं।
ईश्वरो यो मदीयस्तम् अहमाह्वतवान् तदा।
मदीयार्त्तस्वरोऽश्रावि तेनैव निजमन्दिरे।
तत्कर्णगोचरीभूतं तदाह्वानं मया कृतं।
८ धरणी तस्य कोपेन कम्पित्वा चलिताभवत्।
मूलानि चान्तरीक्षस्य कम्पित्वापगतानि च।
९ तदीयनासिकारन्ध्राद् धूम उद्गतवांस्तदा।
जग्रास सकलं वह्निस्तदीयमुखनिर्गतः।
अङ्गारा ज्वलितास्तद्वत् निर्द्दिप्तास्तेन सर्व्वतः।
१० आनामितेन चागच्छत् स स्वयं सुरवर्त्मना।
विस्तार्य्य पदयो र्निम्ने वस्त्रं तिमिरनिर्म्मितं।
११ ततः किरूवमारुह्य तूर्णमुड्डयते स्म सः।
नभस्वत्पक्षयो र्युग्ममाश्रित्य दर्शनं ददौ।
१२ तमोमयीं चतुर्द्दिक्षु स्वां तिरस्करणीं दधे।
वारिवाहसमूहैश्च पयोदमालयापि हि।
१३ प्रजज्वलुस्तदाङ्गारास्तस्याग्रवर्त्तितेजसा।
१४ प्रजगर्ज स आकाशे तदानीं परमेश्वरः।
सर्व्वेषामुपरिस्थो यो घोरशब्दं चकार सः।
१५ निक्षिप्तै र्व्यकिरद् वाणैस्तडिद्भिश्चाभ्यहन् रिपून्।
१६ हुङ्कारेण परेशस्य निश्वासपवनेन च।
रत्नाकरस्य पात्राणि गतानि दृश्यतां तदा।
धरण्या अपि मूलानि प्रादुर्भूतानि सर्व्वतः।
१७ ऊर्द्धात् प्रसार्य्य हस्तौ द्वौ सोऽरक्षत् स्वयमेव मां।
बहुकीलालमध्यान्माम् उद्धरन् निर्गृहीतवान्।
१८ बलवद्वैरितो मां स परिरक्षितवान् स्वयं।
यतस्ते वैरिणः सर्व्वे मत्तोऽपि बलवत्तमाः।
१९ यदा ते मां समाक्राम्यन् आशङ्काजनके दिने।
तदानीं परमेशोऽभून्ममालम्बनयष्टिका।

आनीतवान् सुविस्तीर्णं स्थानमेकं सएव मां। २०
तुष्टत्वान्मयि तस्यैव मां समुद्धृतवांस्तदा।
मम धर्म्मानुसारान्मां सत्कुर्व्वन् परमेश्वरः। २१
मेध्यत्वात् करयो मह्यं दत्तवान् उचितं फलं।
यतोऽहं परमेशस्य पदव्याः पथिकोऽभवं। २२
प्रतिकूलं निजेशस्य पापञ्च न कृतं मया।
आसन् तदीयराजाज्ञा मदीयेन्द्रियगोचरे। २३
न वा हि विधयस्तस्य मया त्यक्ताः कदाचन।
अहं साधुस्वभावश्चाभवं तद्दृष्टिगोचरे। २४
अहमात्मीयपापेभ्य आत्मानं परिगुप्तवान्।
गोचरे तस्य पुण्यं मे पूतत्वञ्च यथाभवत्। २५
तथैव सुफलं मह्यं दत्तवान् परमेश्वरः।
अनुग्राहिमनुष्येषु करोषि त्वमनुग्रहं। २६
सदाचारिमनुष्येषु सदाचारं करोषि च।
पूताचारिमनुष्येषु पूताचारं करोषि च। २७
विरुद्धाचारिलोकेषु त्वं विरुद्धं करोषि च।
दीनान् रक्षसि चाहंयून् पातनार्थं निरीक्षसे। २८
भवानेव प्रदीपं मे मत्प्रभो परमेश्वर। २९
मदीयमन्धकारं त्वं ज्योतीरूपं करोषि च।
त्वत्साहाय्येन शक्नोमि सैन्यमध्येन धावितुं। ३०
ममेश्वरस्य साहाय्यात् प्राचीरश्चोन्नतं प्लवे।
स ईशो निर्म्मलाचारो वाक्यं तस्य परीक्षितं। ३१
तदाश्रितमनुष्याणां स स्वयं फलकं भवेत्।
ईश्वरो विद्यते को हि तस्मादन्यः परेश्वरात्। ३२
अस्माकमीश्वरादन्यः कोऽचलो परिविद्यते।
एवम्भूतो य ईशः सोऽभवद् दुर्गं दृढं मम। ३३
पदवीं मामकीनाञ्च निर्व्विघ्नामकरोत् स तु।
पादौ मदीयौ तेनैव मृगपादसमौ कृतौ। ३४
तथा संस्थापयामास प्रोच्चस्थाने स एव मां।
स मदीयौ करौ सम्यग् युद्धं कर्त्तुमशिक्षयत्। ३५
तेनैव मम बाहुभ्यां भग्नं ताम्रमयं धनुः।

३६ परित्राणस्वरूपं त्वं फलकं मे प्रदत्तवान्।
तव नम्रतयाहञ्च प्रोन्नतः परिज्ञातवान्।
३७ मत्पादन्यसनार्थाय शस्तं स्थानं कृतं त्वया।
ततो हेतो र्न कुत्रापि स्खलनं जायते मम।
३८ परिधावन् द्विषां पश्चादहं तांस्तु व्यनाशयं।
असंहार्य्य समूलञ्च न परावृत्तवांस्तदा।
३९ आहतास्ते मया लोका न्यपतन् पादयोरधः।
पतित्वा पुनरुत्थातुं न शक्तास्ते कदाचन।
४० योधनार्थं त्वया बद्धा विक्रमेण कटि र्मम।
इत्थं रिपुगणः सर्व्वस्त्वया मम वशीकृतः।
४१ शत्रवो मे त्वया सर्व्वे कृता मत्तः पराङ्मुखाः।
ये ये मां समृतीयन्ते ते जनाः संहृता मया।
४२ परितस्ते व्यलोकन्त न कोऽपि तानुपाकरोत्।
लोकितस्तैः परेशोऽपि न प्रादात् किञ्चनोत्तरं।
४३ अचूर्णयं तदाहं तान् भूम्याच्छादकधूलिवत्।
रथ्यास्थकर्द्दमं यद्वत् मृदित्वा तान् अवाकिरं।
४४ स्वजातीयरिपुभ्यो मां त्वमेवोद्धृतवानसि।
अन्यजातीयलोकानाम् अकरो मां शिरोमणिं।
लोकाश्च मदविज्ञाता जाता मे परिचारकाः।
४५ परवंशा विदेशीया मानवा मां स्तुवन्ति च।
पालयन्ति मदीयाज्ञां श्रुत्वैव वचनं मम।
४६ मया परिचिता नो ये क्षीणतां प्राप्नुवन्ति ते।
वेपमानाः स्वकीयेभ्यो दुर्गेभ्यो निःसरन्ति च।
४७ धन्यः पर्व्वतरूपो मे सोऽमरः परमेश्वरः।
मत्तारकाचलो भूयात् स ईशः सर्व्वदोन्नतः।
४८ ईश त्वं मम शत्रुभ्यः प्रादाः समुचितं फलं।
मन्निमित्तं त्वया नाना मनुजा मद्वशीकृताः।
४९ मम वैरिसमूहात्त्वं मां समुद्धृतवानसि।
अकार्षीरुन्नतिं त्वं मे मद्विपक्षगणादपि।
दुर्वृत्तेभ्यो मनुष्येभ्यस्त्वमेव माममोचयः।
५० अतोऽहं सम्मुखे तिष्ठन् भिन्नदेशनिवासिनां।

स्तुवंस्त्वां परिगास्यामि तव नाम्नि परेश्वर।
त्राणं महत्त्वेन कृतस्य राज्ञः कृत्वाभिषिक्तेऽपि च दायूदाख्ये। ५१
तदीयसन्तानगणे त्वयैव कारिष्यतेऽनुग्रह एव नित्यं॥

---

२३ त्रयोविंशोऽध्यायः।

१ दायूदः शेषकथा ८ तस्य प्रधानलोकानां नामानि विवृतिश्च।

दायूदः शेषकथा। १
यिशयस्य सुतो दायूद् इतिनाम्ना तु यो नरः।
उन्नतिं लेभ ईशाच्च याकूबस्याभिषेचनं।
मधुरस्वरगाता स इस्रायेलः प्रभाषते।
मामकीनेन वक्त्रेण वक्त्यात्मा परमेशितुः। २
वचनानि तदीयानि जिह्वाग्रे मम सन्ति हि।
इस्रायेलो य ईशोऽस्ति प्रोक्तवान् माम् इदं स हि। ३
इस्रायेलोऽचलेनैव वाक्यमेतदकथ्यत॥
भविता नरलोकस्य राजैकोऽतीव धार्म्मिकः।
ईशात् स साध्वसं कुर्व्वन् राजत्वं प्रकरिष्यति।
उदेष्यति तथा यद्वत् प्रभाततेजसा रविः। ४
अहर्मुखीय आकाशे मेघहीने सुनिर्म्मले।
भूमावलङ्कृतायाञ्च नवीनैर्वृष्टिजैस्तृणैः॥
मदीयवंश ईशस्य समक्षं किं स्थिरो नहि। ५
सुनिश्चितश्च सर्व्वत्र विश्वास्यो नित्य एककः।
अकारि नियमस्तेन सहितेन मया पुरा।
मामकं यदिदं त्राणं सर्व्ववाञ्छाप्रसाधकं।
विधास्यते किमेतद्धि तेनैव सफलं नहि॥
दुर्जना दवयिष्यन्ते सर्व्वे हि कण्टकानि व। ६
यतो हेतोः करांस्तेषां कोपि धर्त्तुं न पारयेत्।
असौ यो मनुजस्तेषां स्पर्शमेव करिष्यति। ७
स तै र्लौहेन शक्तेश्च दण्डेन व्यत्स्यते तदा।
किन्तु वासस्थले लोकास्ते धक्ष्यन्ते हि वह्निना॥

८ दायूदो बलवतां लोकानां नामानि। वीराणां मध्ये तखमोनीयो
योशेव्वशेवतो मुख्य आसीत् सोऽष्टानां शतानां लोकानां विरुद्धं शूलं
९ धृत्वा तान् युगपद् अबधीत्। अपरम् अहोहीयस्य दोदयस्य पुत्र
इलियासरो द्वितीय आसीत्। यदा इस्रायेलीयलोका अनागता
आसन् तस्मिन् काले मिलितान् पिलेष्टीयान् अस्पर्द्धन्त ये दायूदः सङ्गि-
१० नस्तेषां वीरास्तेषां मध्येऽयमेको जन आसीत्। स उत्थाय यावत् तस्य
हस्तः श्रान्तो नाभवत् तावद् हस्ते संहतेन खड्गेन पिलेष्टीयान्
मारयामास। तस्मिन् दिने परमेश्वरो महाजयं कारयामास, तदा
११ लोका लोठनार्थमेव तस्य पश्चाद्गामिनो बभूवुः। अपरं हरारीयस्या-
गेस्तनयः शम्मस्तृतीय आसीत्; एकस्य मसूरक्षेत्रस्य समीपे पिलेष्टीयेषु
१२ सङ्घीभूतेषु यदा लोकाः पिलेष्टीयेभ्यः पलायन्त, तदानीं शम्मस्तत्क्षेत्र-
मध्ये तिष्ठन् तद् रक्षितवान् पिलेष्टीयांश्च निहतवान् ततः परमेश्वरो
१३ महाजयं कारयामास। त्रिंशत्प्रधानलोकानां मध्ये त्रयो जना एते
१४ शस्यच्छेदनसमयेऽदुल्लमगुहायां दायूदः समीपम् आगच्छन्, तदा पिले-
ष्टीयानां निवहो रिफायीमतलभूमौ शिविरं स्थापयाञ्चकार वैतले-
१५ हमेऽपि पिलेष्टीयानां सैन्यवृन्दम् एकमासीत्। अपरं दायूद् दुराक्र-
मणस्थाने वसन् पिपासितः सन् जगाद हा हा वैतलेहमस्य गोपु-
१६ रसमीपस्थस्य प्रहेः पानीयमानीय मह्यं पातुं को दास्यति? ततस्ते
त्रयो नराः पिलेष्टीयानां शिविरमध्येन गत्वा वैतलेहमस्य गोपुरनिकट-
स्थस्य प्रहेः पानीयमुत्तोल्य गृहीत्वा दायूदः समीपम् आगच्छन्, किन्तु
१७ दायूद् तत् पातुं नैच्छद् ईश्वरमुद्दिश्य तत्तोयं निक्षिप्तवान्, वाक्यमिदं
बभाषे च, हे परमेश्वर एतादृशं कर्म्म नाहं करिष्ये, तोयमेतत्
प्राणपणेन गतवतां मानवानां शोणितमेव। अतः स तत् पातुं नैच्छत्।
१८ ते तु त्रयो बलिनो जनास्तत्कर्म्म चक्रुः। अपरं सिरूयायाः पुत्रस्य
योयावस्य सहोदरोऽवीशयोऽन्येषां त्रयाणां जनानां मध्ये मुख्य
आसीत्। स शतत्रयाणां लोकानां विरुद्धं शूलं धृत्वा तान् विनाश्य
१९ त्रयाणां मध्ये लब्धनामा बभूव। स किं तेषां त्रयाणां मध्ये मान्यो
नहि? तस्मात् स तेषां सेनापति र्बभूव, तथापि स प्रथमत्रयाणां
२० तुल्यो नहि। अपरं कब्सेलीयस्यैकस्य बलिनः पौत्रो यिहोयादस्य पुत्रो
विनायो ऽनेककार्य्यकर्त्तासीत्; स सिंहतुल्यौ द्वौ मोयाबीयलोकौ
जघान, तदन्यत् स हिमानीसमये गत्वा गर्त्तमध्ये सिंहमेकं मारया-

मास। अपरं उत्तमबलवन्तं मिस्रीयमेकम् अबधीत्, तस्य मिस्रीयस्य २१
हस्ते शूलमेकमासीत् किन्त्वस्य हस्ते दण्ड एक आसीत्, ततः स गत्वा
मिस्रीयस्य हस्तात् शूलम् आच्छिद्य तस्यैव शूलेन तं जघान। यिहोया- २२
दस्य पुत्त्रो विनाय एतानि कर्म्माणि चकार, ततः स (द्वितीयानां)
त्रयाणां पराक्रमिणां मध्ये लब्धनामा बभूव। स तेभ्यस्त्रिंशज्जनेभ्यो २३
विख्यात आसीत् किन्तु प्रथमत्रयाणां समतां न प्राप, अपरं स दायूदा
स्वरक्षकसैन्यस्य सेनापति र्नियुक्तो बभूव। अपरं त्रिंशतो मध्ये योया- २४
बस्य सहजोऽसाहेलो मुख्य आसीत्, अपरं दोदयस्य पुत्त्रो वैतले-
हमीय इल्हाननः, हरोदीयः शम्मः, हरोदीय इलीकाः, पल्टीयो २५
हेलसः, इक्केशस्य पुत्त्रस्तिकोयीय ईराः, अनाथोतीयो ऽबीयेषरः, हूशा- २७
तीयो मिवुन्नयः, अहोहीयः शल्मोनः, निटोफातीयो महरयः, २८
बानाहस्य पुत्त्रो निटोफातीयो हेलदः, बिन्यामीनवंशीयदेशस्थगिबिया- २९
निवासिरीवयस्य पुत्त्र इत्तयः, पिरियाथोनीयो विनायः, गाशीयस- ३०
रितो निकटवासी हिद्दयः, अर्ब्बतीयोऽबीयल्बोनः, बहरूमीयोऽस्मा- ३१
वतः, शालबीय इलियहवाः, याशेनस्य पुत्त्रो योनाथनः, हरारीयः ३२
शम्मः, साखरस्य पुत्त्रो हरारीयो ऽहीयमः, अपरं माखातीयस्य पौत्त्रो ३४
ऽहस्वयस्य पुत्त्र इलीफेलटः, अहीथोफलस्य पुत्त्रो गिलोनीय इलीयामः,
कर्म्मिलीयो हिष्रयः, अर्ब्बीयः पारयः, नाथनस्य पुत्त्रः सोबानिवासी ३५
यिगालः, गादीयो वानिः, अम्मोनीयः सेलकः, सिरूयायाः पुत्त्रस्य योया- ३७
बस्यास्त्रवाहको बेरोतीयो नहरयः, यित्रीय ईराः, यित्रीयो गारेवः, ३८
हित्तीय ऊरियश्चेमे साकल्येन सप्तत्रिंशज्जना आसन्। ३९

---

२४ चतुर्विंशोऽध्यायः।

१ लोकान् गणयितुं दायूद आज्ञा ५ लोकानां गणनं १० तिसृणां विपदाम् एकां वरीतुं परमेश्वरस्य निदेशात् दायूदो महामार्य्या वरणं १५ महामारीतो यिरूशालमस्य रक्षा १८ अरौणाहस्य शस्यमर्दनस्थानं क्रीत्वा दायूदा तत्र स्थाने वेदिनिर्म्मापणं।

अनन्तरम् इस्रायेलो वंशं प्रति परमेश्वरस्य क्रोधाग्निः पुनर्वारं प्रज- १
ज्वाल तस्माद् इस्रायेल्वंशस्य यिहूदावंशस्य च गणनां कुरुतेत्याज्ञा-
पयितुं तेषां विरुद्धं दायूदः प्रवृत्ति र्जज्ञे। अनन्तरं राजा स्वसमीपस्थस्य २
सैन्यस्य पतिं योयाबम् आज्ञापयामास, यूयं दानमारभ्य बेर्शेबां यावद्

इस्रायेलः सर्व्ववंशानां देशान् भ्रमन्तो लोकान् गणयत, अहं लोकानां
२ सङ्ख्यां विविदिषामि। ततो योयावो भूपतिं जगाद, इदानीं यावन्तो
लोका आसते तव प्रभुः परमेश्वरस्तान् शतगुणं वर्द्धयतु मम प्रभु नर-
पतिश्च स्वनेत्राभ्यां तत् पश्यतु, किन्तु कर्म्मैतत् मम प्रभवे नरपतये
४ कुतो रोचेत? तथापि योयावस्य सेनापतीनाञ्च वचनात् नृपते र्वचनं
प्रबलं बभूव, ततो योयावः सेनापतिगणश्चेस्रायेलीयलोकान् गणयितुं
राज्ञः समक्षात् जग्मुः।
५ अनन्तरं ते यर्द्दनसरितः पारं गत्वारोयेर उपत्यकाया मध्यस्थितस्य
नगरस्य दक्षिणे शिविरं स्थापयाञ्चक्रुरपरं यासेरीयप्रदेशं गादञ्च
६ गणयामासुः। अनन्तरं ते गिलियददेशं तह्तीमह्दशिप्रदेशञ्च जग्मुः।
७ ततः परं दानायानेन गच्छन्तः परिक्रम्य सीदोनम् उपतस्थुः। अन-
न्तरं सूरस्य दृढदुर्गेण हिव्वीयकिनानीयानां नगरैश्च गत्वा यिहूदाया
८ दक्षिणदिक्स्थबेर्शेवां यावत् जग्मुः। अनेन प्रकारेण ते देशस्य
सर्व्वत्र भ्रमन्तो विंशतिदिवसाधिके नवमासे यिरूशालमं प्रत्याजग्मुः।
९ अनन्तरं योयाव इस्रायेल्वंशस्य बलवताम् अस्त्रधारिणां मनुजानां
संख्याष्टौ लक्षाणि यिहूदावंशीयानाञ्च संख्या पञ्चलक्षाणीति राजानं
ज्ञापयामास।
१० इत्थं लोकेषु गणितेषु दायूद् निजहृदये महाघातं प्राप, ततो दायूद्
परमेश्वराय कथयामास, कार्य्येणानेन मया महापापमकारि, हे परमे-
श्वर विनयेऽहं निजदासस्य पापं क्षमस्व, मयातीव मूढस्य कर्म्माकारि।
११ अनन्तरं दायूदि प्रत्यूष उत्थिते दायूदः प्रदर्शकं भविष्यद्वादिनं गादं
१२ प्रति परमेश्वरस्येदं वाक्यम् आगच्छत, त्वं गत्वा दायूदं वद, परमेश्वर
इमां वाचं वदति, तव सम्मुखे मया त्रयो दण्डा निधीयन्ते तेषामेको
१३ व्रियतां, मया स एव त्वां प्रति कारिष्यते। ततो गादो दायूदः समीपं
गत्वा तं ज्ञापयन् जगाद तव देशे सप्त वत्सरान् व्याप्य किं दुर्भिक्षो
भविष्यति? अथवा त्रीन् मासान् यावत् तव पश्चाद् धावतां रिपूणाम्
अग्रेऽग्रे पलायनं करिष्यसि? यद्वा त्रीणि दिनानि यावद् देशे महा-
मारी भविष्यति? तद् इदानीम् आलोच्य निश्चिनु यतो मत्प्रेरयित्रे
१४ मयोत्तरं दातव्यं। ततो दायूद् गादं बभाषे, मम महती मनःपीडा
जाता, इदानीं परमेश्वरस्य हस्ते पतितुमिच्छाम्यहं यतस्तस्य कृपा
१५ प्रचुरा नाहं मनुष्याणां हस्तेषु पतितुम् इच्छामि। अनन्तरं प्रत्यूषमारभ्य

निरूपितसमयं यावत् परमेश्वर इस्रायेल्वंशं प्रति महामारीं प्रेषया-
मास, तेन दानमारभ्य बेर्शेबां यावत् सप्ततिसहस्राणि लोकाः पञ्चत्वं
गताः। अनन्तरं यिरूशालमस्य विनाशार्थं तन्नगरोपरि दूतस्य हस्त- १६
प्रसारणसमये परमेश्वरस्तस्मै विपदे ऽनुतप्य तं लोकमारकं दूतं जगाद,
अलमनेन त्वं स्वकरं सङ्कोचय। तदानीं परमेश्वरस्य दूतो यिबू-
षीयस्यारोणाहस्य शस्यमर्द्दनस्थान आसीत्। अनन्तरं दायूद् तं लोक- १७
हन्तारं दूतं वीक्ष्य परमेश्वरं बभाषे, मयैव पापमकारि ममैव सोऽप-
राधोऽस्ति मेषैरेतैः किमपराद्धं? विनयेऽहं मम मदीयपितृवंशस्य च
विरुद्धं तव हस्तः प्रसार्य्यतां।

तस्मिन् दिने गादो दायूदः समीपं गत्वा तं जगाद, त्वं गत्वा १८
यिबूषीयस्यारोणाहस्य शस्यमर्द्दनस्थाने परमेश्वराय यज्ञवेदिमेकां
निर्म्मापय। अनन्तरं परमेश्वरीयनिदेशानुसारेण गादस्य कथातो दायूदा १९
गमने कृतेऽरोणाहो विलोक्य राजा तस्य भृत्याश्च मम सन्निधिम् २०
आगच्छन्तीति वीक्ष्य वहिर्गत्वा भूमिष्ठः सन् राजानं प्रणनाम। अपरम् २१
अरोणाहः पप्रच्छ, मम प्रभु र्नरपति र्निजदासस्य सन्निधिं कुत आग-
मत्? दायूद् अवदत्, लोकानां मध्यात् महामारी यन्निवर्त्तेत तत्कृते
परमेश्वराय यज्ञवेदिमेकां निर्म्मापयितुम् अहं तव सकाशात् शस्य-
मर्द्दनस्थानम् इदं क्रेतुम् आगमं। ततोऽरोणाहो दायूदं बभाषे, मम प्रभु २२
र्नरपति र्यद् भद्रं बोधते तदेव गृहीत्वोत्सृजतु, पश्यतु होमबले
र्निमित्तं वृषा इन्धननिमित्तञ्च मर्द्दनयन्त्राणि वृषाणां सज्जाश्चासते।
अनन्तरम् अरौणाहो राजेव तानि सर्व्वाणि राज्ञे ददौ। अरौणाह २३
इदमपि बभाषे तव प्रभुः परमेश्वरस्त्वाम् अनुगृह्णातु। किन्तु नृपति- २४
ररौणाहं जगाद, तन्न भवतु, मूल्येनाहं त्वत्त एतानि सर्व्वाणि क्रेष्यामि,
नाहं स्वप्रभवे परमेश्वराय विनामूल्यलब्धान् होमबलीन् उत्स्रक्ष्यामि।
अनन्तरं दायूद् पञ्चाशत्शेकलमानरजतैस्तत् शस्यमर्द्दनस्थानं वृषांश्च २५
क्रीत्वा जग्राह। अपरं दायूद् तत्र स्थाने परमेश्वराय यज्ञवेदिं निर्म्माप्य
होमबलीन् मङ्गलार्थकबलींश्च प्रोत्ससर्ज। ततः परमेश्वरेण प्रार्थनां
गृहीत्वा देशं प्रत्यनुकम्पायां कृतायाम् इस्रायेलो महामारी निववृते।

राजावल्याः प्रथमं पुस्तकं ।

१ प्रथमोऽध्यायः ।

१ दायूदो वार्द्धक्यसमयेऽवीशगायास्तस्य परिचर्य्याकरणं ५ राजत्वं प्राप्तुम् अदोनीयस्य उद्यमः ११ बतशेबां प्रति नाथनस्य मन्त्रणा १५ दायूदं प्रति बतशेबाया निवेदनं २२ दायूदं प्रति नाथनस्य कथनं २८ बतशेबां प्रति दायूदः पुनः शपथकरणं ३२ दायूदो निदेशात् सुलेमनोऽभिषिक्तत्वं ४१ अदोनीयस्य तेन निमन्त्रितानां लोकानाञ्च पलायनं ५० अदोनीयं प्रति सुलेमनः क्षमाकरणञ्च ।

१ अनन्तरं राजा दायूद् स्थविरः सम्पूर्णवयस्कश्च भूत्वा बहुभि र्वस्त्रै-
२ राच्छादितोऽपि नोष्णो बभूव । एतत्कारणात् तस्य दासास्तं बभाषिरे, अस्माकं प्रभो नरपते र्निमित्तं एकाम् अनूढां युवतीं गवेषयामहे, सा नृपतेः सम्मुखे तिष्ठती नृपतेः परिचारिका भविष्यति, अपरम् अस्माकं प्रभो र्नरपतेर्गात्रं यद् उष्णीभवेत् तदर्थं भवतो वक्षःस्थले शयिष्यते ।
३ अनन्तरं त इस्रायेलः सर्व्वस्यां सीमायां सुन्दरीं युवतीं मृगयित्वावी-
४ शगानामिकां शुनेमीयां प्राप्य नरपतेः समीपम् आनिन्युः । सा तरुणी परमसुन्दरी तत्कारणात् सा राज्ञः परिचारिका भूत्वा तं सिषेवे किन्तु राजा तां नोपजगाम ।
५ तस्मिन् समये हग्गीताया गर्भजातोऽदोनीयोऽभिमानी भूत्वाहं राजत्वं करिष्यामीति वदन् रथम् अश्वारोहिणः पश्चाशच्चाग्रगामिन-
६ स्तासादयामास । किन्तु त्वं कुत एतादृशं करोषीति वाचा तस्य तातः पूर्व्वं तं कदापि नाक्लेशयत् सोऽवशालोमात् परं जातः स्वयमपि परम-
७ सुन्दरो युवा चासीत् । अनन्तरं सिरूयायाः सुतेन योयावेन सार्द्धं याजकेनावीयाथरेण च सार्द्धं तेन मन्त्रणायां कृतायां तावदोनीय-
८ स्यानुगतौ भूत्वा तस्य साहाय्यं चक्रतुः । किन्तु याजकः सादोको यिहो-यादस्य सुतो विनायो भविष्यद्वादी नाथनः शिमियि रेयिश्च दायूदः
९ समीपस्थौ बलवन्तौ लोकौ चेमेऽदोनीयस्यानुगता न बभूवुः । अनन्तरम् अदोनीय एनरोगेलस्य पार्श्वस्थस्य सोहेलताख्यपाषाणस्य समीपे मेषान् वृषभान् पुष्टपशूंश्च हत्वा स्वसहजान् राजपुत्त्रान् सर्व्वान्

यिहूदावंशीयान् राजभृत्यांश्चाहूतवान्। किन्तु भविष्यद्वादिनं नाथनं १०
विनायं बलिनो लोकांश्च निजभ्रातरं सुलेमानञ्च न निमन्त्रयामास।
अतो नाथनः सुलेमनो मातरं बतशेवां बभाषे, अस्मत्प्रभुना दायूद्- ११
नृपेणाविज्ञातं हग्गितायाः सुतोऽदोनीयो राजत्वं करोतीति किं त्वया
नाश्रावि? अत आगच्छाहम् इदानीं त्वां मन्त्रणां वदामि तेन त्वं निज- १२
प्राणान् स्वपुत्रस्य सुलेमनश्च प्राणान् रक्षिष्यसि। त्वं गत्वा दायूदं १३
नरपतिम् उपस्थाय वाक्यमिदं निवेदय, हे मम प्रभो राजन् भवता
शपथं कृत्वा निजदास्यै किं प्रतिश्रुतं नहि मम पश्चात् तव पुत्रः सुलेमान्
राजत्वं करिष्यति स एव मम सिंहासन उपवेक्ष्यतीति? तर्हीदानीम्
अदोनीयः कुतो राजत्वं करोति? अपरं पश्य तवैतत्कथनसमये मया १४
तव पश्चाद् गत्वा तव वाक्यं दृढयिष्यते।
अनन्तरं बतशेवा गर्भगृहमध्ये राज्ञः समीपं जगाम, तदानीं नृपति- १५
रतीव स्थविर आसीत्, अपरं शुनेमीयाबीशगा राजानम् असेवत।
ततो बतशेवा दण्डवद् भूत्वा राजानं प्रणनाम, ततो नरपतिः पप्रच्छ, १६
तवेच्छा का? ततः सा बभाषे, हे मम प्रभो भवता निजप्रभोः परमे- १७
श्वरस्य नाम गृहीत्वा निजदास्याः समीपे किं शपथो न कृतः, मम पश्चात्
तव सुतः सुलेमानेव राजत्वं करिष्यति मम सिंहासन उपवेक्ष्यति
चेति? किन्तु पश्य साम्प्रतम् अदोनीयो राजत्वं करोति, हे मम प्रभो १८
राजन् भवता तन्न ज्ञायते। स बहून् वृषभान् पुष्टपशून् मेषांश्चावधीत् १९
समस्तराजपुत्रान् याजकम् अबीयाथरं सेनापतिं योयाबम् आहूत-
वांश्च किन्तु भवतो दासं सुलेमानं नाहूतवान्। इदानीं हे मम प्रभो २०
राजन् भवतः परं मम प्रभो महीपतेः सिंहासने केनोपवेष्टव्यं तद्
भवता वयं ज्ञापयिष्यामहे इति प्रतीक्ष्य सर्व्वस्येस्रायेल्वंशस्य दृष्टिर्भवन्तं
प्रति विद्यते। भवान् यदि तन्न ज्ञापयति तर्हि मम प्रभौ राजनि २१
पितृलोकानामिव महानिद्रां गते मम पुत्रः सुलेमान् अहञ्च दोषीकृतौ
भविष्यावः।
राज्ञा समं तस्या ईदृशः संलापो भवति तदन्तरे भविष्यद्वादी नाथन २२
आजगाम। ततः कश्चिद् भूपतिं व्यज्ञापयत्, भविष्यद्वादी नाथन २३
उपतिष्ठति; अनन्तरं नाथनो नरपतेः सम्मुखम् एत्य भूमिष्ठः सन्
राजानं प्रणम्य कथामिमां निवेदयामास, हे मम प्रभो राजन्, मत्तः २४
परम् अदोनीयेन राजत्वं कर्त्तव्यं मम सिंहासने चोपवेष्टव्यमिति किमा-

२५ ज्ञापितं भवता? यतः सोऽद्यैव गत्वा बहून् गवादीन् पुष्टपशून् मेषांश्च
हत्वा सकलान् राजपुत्त्रान् सेनापतीन् याजकम् अवीयाथरञ्चाहूतवान्
अपरं पश्यतु ते तस्य साक्षाद् भुञ्जते पिवन्ति च तदन्यद् अदोनीयो
२६ राजा चिरञ्जीवी भवत्विति वाचं वदन्ति च। किन्तु भवतो दासो योऽहं
मां याजकं सादोकं यिहोयादस्य सुतं विनायं भवतो दासं सुलेमानञ्च
२७ नामन्त्रितवान्। मम प्रभो र्नरपतेः परं भवतः सिंहासने केनोप-
वेष्टव्यं तन्निजदासं न ज्ञापयित्वा मम प्रभु र्नरपतिरेतत्कर्म्म कृतवानिति
किं सत्यं?

२८ ततो दायूद् नरपतिः प्रत्युवाच वतशेवां मम सन्निधिम् आहूयान-
२९ यत। अनन्तरं तस्यां राज्ञः समीपम् आगत्य तस्य सम्मुखे तिष्ठन्त्यां
नरपतिरिमं शपथं कृत्वा जगाद, सर्व्वविपद्भ्यो मम प्राणरक्षकः परमे-
३० श्वरो यद्यमरो भवेत् तर्हि मत्तः परं तव सुतेन सुलेमनैव राजत्वं
कर्त्तव्यं मम पदे मम सिंहासने चोपवेष्टव्यमिति तव समीप इस्रायेलः
प्रभोः परमेश्वरस्य नाम गृहीत्वा मया यः शपथो ऽकारि सोऽद्यैव
३१ सफलीकारिष्यते। तदानीं वतशेवा भूमिष्ठा सती राजानं प्रणम्य
जगाद मम प्रभू राजा दायूद् चिरञ्जीवी भवतु।

३२ अनन्तरं राजा दायूद् जगाद याजकं सादोकं भविष्यद्वादिनं
नाथनं यिहोयादस्य सुतं विनायञ्च मम समीपमाहूयानयत। अनन्तरं
३३ तेषु नरपतेः समीपमागतेषु नरपतिस्तान् आज्ञापयत् यूयं निजप्रभोः
सेवकान् सङ्गिनः कृत्वा मदीयपुत्त्रं सुलेमानं मम श्रेष्ठम् अश्वतरम्
३४ आरोह्य गीहोनं नयत। तत्र स्थाने याजकः सादोको भविष्यद्वादी
नाथनश्चेस्रायेल उपरि तं राज्याभिषिक्तं कुरुताम् अपरं यूयं सर्व्वे तूरीं
३५ वादयन्तो राजा सुलेमान् चिरञ्जीवी भवत्विति वाचं घोषयत। अनन्तरं
स युष्माभिरनुव्रज्यमानो मम सिंहासन उपवेष्टुम् आगच्छतु मम पदे
राजत्वं करोतु च यत इस्रायेलो यिहूदायाश्चोपरि राजत्वं कर्त्तुं स
३६ एव मया निर्णीतः। ततो यिहोयादस्य सुतो विनायो नरपतिम्
उक्तवान् तदेव भवतु मम प्रभो र्नरपतेः प्रभुः परमेश्वरस्तदेव कथयतु।
३७ यथा परमेश्वरो मम प्रभो र्नरपतेः सहायोऽभूत् तथा सुलेमनोऽपि
सहायो भवतु, अपरं मम प्रभो राज्ञो दायूदो राजसिंहासनादपि
३८ तस्य सिंहासनम् उन्नतं करोतु। अपरं याजकः सादोको भविष्यद्वादी
नाथनो यिहोयादस्य सुतो विनायः क्रिरेथीयाः पिलेथीयाश्च गत्वा

सुलेमानं राज्ञो दायूदोऽश्वतरम् आरोप्य गीहोनं निन्युः। याजकः ३९
सादोकश्च पवित्रावासस्य मध्यात् तैलपूर्णं शृङ्गं गृहीत्वा सुलेमानम्
अभिषिषेच, अनन्तरं तूर्य्यां वादितायां सर्व्वे लोका ऊचुः; राजा सुले-
मान् चिरं जीवतु। अपरं सर्व्वे लोकास्तम् अनुव्रजन्तो महानन्देन ४०
तादृशं वाद्यम् अवादयन् यत् तेन शब्देन पृथिवी विदद्रे।

अनन्तरं भोजने समाप्ते सअदोनीयस्तस्य सङ्गिन आहूता लोकाश्च ४१
तं तूरीध्वनिं शुश्रुवुस्ततो योयाबस्तूरीशब्दं श्रुत्वा व्याजहार, कृत्स्न-
नगरे एतावान् कलरवः कुतो जायते? तस्मिन् इदं पृच्छति सत्य- ४२
यीयाथरस्य याजकस्य सुतो योनाथन आजगाम, तदानीम् अदोनी-
यस्तं जगाद, समीपमागच्छ त्वं भद्रो लोकोऽसि शुभवार्त्तानेतासि।
तदानीं योनाथनोऽदोनीयम् उक्तवान् सत्यम् अस्माकं प्रभु र्नरपति- ४३
र्दायूद् सुलेमानं राजत्वपदे नियुक्तवान्। राजा याजकं सादोकं ४४
भविष्यद्वादिनं नाथनं यिहोयादस्य पुत्त्रं बिनायं किरेथीयान् पिले-
थीयांश्च तेन समं प्रहितवान् ते च तं नृपतेरश्वतरम् आरोपितवन्तः,
अपरं याजकः सादोको भविष्यद्वादी नाथनश्च तं गीहोने राज्यम् ४५
अभिषिक्तवन्तौ ततः परं तेऽत्यानन्देन प्रफुल्लेषु तस्मात् स्थानाद् आग-
च्छत्सु कृत्स्नं नगरं हर्षनादेन पर्य्यपूर्य्यत स एव निनादो युष्माभिर-
श्रावि। तदन्यत् सुलेमान् राजकीयसिंहासन उपाविशत्। अपरं ४६
नरपते र्भृत्या अस्माकं प्रभुं दायूदं नृपतिम् आशिषम् अवदन् ४७
ईश्वरस्त्वदीयनामतः सुलेमनो नाम वर्द्धयतु तव सिंहासनाच्च तस्य
सिंहासनं वर्द्धयत्विति। ततः शयनीय उपविष्टो राजा (परमेशाय)
प्रणनाम। अपरं नृपतिरपि वाचमिमां व्याहरत्, अद्य मम चक्षुर्गोचरे ४८
मम सिंहासन उपवेष्टुं पुत्त्रमेकं प्रायच्छत् य इस्रायेलः प्रभुः परमेश्वरः
स धन्यः। तत आमन्त्रिता अदोनीयस्य सङ्गिनस्त्रस्ताः सर्व्वे स्वं स्वं ४९
स्थानं जग्मुः।

अपरम् अदोनीयः सुलेमनो भीतः सन् उत्थाय गत्वा होमवेद्या- ५०
श्चूड़ा आशिश्रिये। अनन्तरम् अदोनीयो राज्ञः सुलेमनो भयाद् होम- ५१
वेद्याश्चूड़ा आश्रितवान् कथितवांश्च राजा सुलेमान् निजदासं खड्गेन
न हनिष्यति मम समीपे ऽद्यैव शपथमिमं करोत्विति वार्त्तां केनचित्
ज्ञापितो सुलेमान् जगाद स यदि स्वं भद्रपुरुषं दर्शयति तर्हि तस्य ५२
कचैकोपि भूमौ न पतिष्यति किन्तु यदि तस्य कश्चिद् अपराधः

५१ प्रकाशते तर्हि तेन मर्त्तव्यमिति। अनन्तरं राज्ञा सुलेमना प्रेरिता
दूतास्तं वेदितोऽवरोह्यानिन्युः, ततस्तेनागत्य राज्ञि सुलेमनि प्रणते
सुलेमान् तं जगाद त्वं निजगृहं याहि।

---

२ द्वितीयोऽध्यायः।

१ सुलेमानं प्रति दायूदः शेषकथा ५ योयावमधि बर्षिल्लयस्य पुत्त्रानधि शिमियिमधि च तस्य कथनं १० दायूदो मरणं सुलेमनो राजत्वकरणकथनं १२ अदोनीयेऽवीशगं विवोढुम् इच्छति सुलेमना तस्य हतत्वं २६ रचितस्यावीयाथरस्य पदच्युतत्वं २८ योयावस्य वेद्याश्रितत्वं ३५ योयावस्य पदे विनायस्य नियोजनम् अवीयाथरस्य पदे सादोकस्य नियोजनं ३६ राज्ञ आज्ञां विना गातनगरगमनकारणात् शिमियेर्हतत्वं।

१ अनन्तरं दायूदो मरणसमये सविधे सति स निजपुत्त्रं सुलेमानम्
२ इत्यादिदेश, पृथिवीस्थैः सर्व्वैर्येन वर्त्मना गन्तव्यं तेनाहं गच्छामि, त्वं
३ बलवान् भूत्वा पुरुषत्वं प्रकाशय। त्वं यद्यत् करिष्यसि यस्मिन् कर्म्मणि
वा प्रवर्त्तिष्यसे तत्र तत्र यत् कृतार्थो भवेस्तदर्थं निजप्रभोः परमेश्वरस्य
विधानं पालयन् तस्य मार्गेण गच्छ मूसाग्रन्थे लिखितानि तस्य विधिव्य-
४ वस्थाप्रमाणवाक्यानि पालय च। ततस्तव सन्ताना यदि सकलान्तःकरणैः
सकलमनोभिश्च मम सम्मुख आचरितुं स्वेषां मार्गे सावधाना भवेयु-
स्तर्हीस्रायेलः सिंहासन उपवेष्टुं तव वंशस्याभावो न भविष्यतीति
परमेश्वरो मामधि यदिदं वचनं प्रतिश्रुतवान् तत् सिद्धं करिष्यति।
५ अपरं सिरूयायाः सुतो योयावो मां प्रति यदकरोत् नेरस्य पुत्त्रो
ऽवनेरो येथरस्य पुत्त्रोऽमासाश्चेमाविस्रायेलो द्वौ सेनापती च प्रति
स यदकरोत् तत् त्वमज्ञासीः स तौ हत्वा सन्धिसमये रणसमयवत्
शोणितम् अपातयत् तच्छोणितेन च स्वकटिबन्धनं पादस्थिते पादुके
६ चालिम्पत्। अतस्त्वं निजबुद्धितस्तं प्रति कुरु पक्वकेशविशिष्टं तं निर्विघ्नं
७ परलोकं गन्तुं मा देहि। किन्तु गिलियदीयस्य बर्षिल्लयस्य तनयान्
प्रति प्रीतिं दर्शय तव भोजनासन उपविष्टानां नराणां मध्ये तेभ्यः
स्थानं देहि च यतो यस्मिन् काले तव भ्रातुरवशालोमादहं पलायित-
८ वान् तस्मिन् काले ते मम सन्निधौ स्थिरा अतिष्ठन्। अपरं बहूरीम-
निवासी विन्यामिनीयो गेराः सुतो शिमियिरपि तव सन्निधावास्ते मच्च-
नयिमे मम गमनदिवसे स मां कटु शप्तवान् ततः परं मां साक्षात्
कर्त्तुं तस्मिन् यर्द्दनमागते परमेश्वरस्य नाम गृहीत्वाहं शपथमिमं

कृतवान् त्वां खड्गेन न हनिष्यामि। अतस्त्वं तं निरपराधं मा जानीहि, ९
त्वं बुद्धिमान् तं प्रति त्वया यत्कर्त्तव्यं तन्निश्चीयतां, पलितं तं गलच्छोणितं
परलोकं प्रेषय।

अनन्तरं दायूद् निजपितृलोका इव महानिद्रां गत्वा दायूदो नगरे १०
श्मशानं लब्धवान्। एष दायूद् हिब्रोणे सप्तवत्सरान् यिरूशालमे च ११
त्रयस्त्रिंशद् वत्सरान् साकल्येन चत्वारिंशद् वत्सरान् यावद् इस्रायेल्-
वंशोपरि राजत्वं चकार। अनन्तरं सुलेमान् निजतातस्य दायूदः १२
सिंहासन उपविवेश तस्य राज्यञ्च स्थैर्य्यं बभूव।

अनन्तरं हग्गीतायाः सुतोऽदोनीयः सुलेमनो मातु र्वतशेवायाः १३
समीपं जगाम तदा सा तं पप्रच्छ त्वं किं कुशलेनागमः? ततः स उक्त-
वान् कुशलेनैव। अपरमवदत् तव समीपे मम किञ्चिद् वक्तव्यम् आस्ते। १४
वतशेवा कथयामास तत् कथय। अनन्तरं स उक्तवान् राज्यं ममै- १५
वासीत् मया राजत्वं कारिष्यत इतीस्रायेलः सकलमनुजाः प्रत्यैक्षन्त
तत् त्वया ज्ञायते किन्तु राज्यं मत्तो गत्वा मम भ्रातुः करगतम् अभवत्
परमेश्वर एतद् अघटयत्। इदानीं मया तव समीपे कर्म्मैकं याच्यते १६
त्वम् अकृतार्थं मां मा विसृज। ततः सा बभाषे तद् वद। अनन्तरम् १७
अदोनीयो जगाद, विनयेऽहं शुनेमीयाम् अवीशगां मां विवाहयितुं
त्वं सुलेमानं नरपतिं कथय स त्वाम् अकृतार्थां न विस्रक्ष्यति। ततो वत- १८
शेवा प्रत्युवाच भद्रं तव कृतेऽहं नरपतिं सम्भाषिष्ये। अनन्तरं वत- १९
शेवादोनीयस्य वाक्यं निवेदयितुं नरपतेः सुलेमनः समीपं जगाम। ततो
राजा तस्याः समक्षम् उत्थाय तस्यै प्रणनाम। अनन्तरं स निजसिंहासन
उपविवेश राजजनन्याः कृतेऽप्यासनं स्थापयित्वा तां स्वस्य दक्षिण-
दिश्युपवेशयामास। अपरं सा जगाद क्षुद्रैको वरस्त्वत्तो मया याचि- २०
तव्यः, त्वं माम् अकृतार्थां मा विसृज। ततो राजा जगाद हे मातः
कथय, मया त्वम् अकृतार्था न विस्रक्ष्यसे। तदानीं सा कथयाञ्चकार, २१
शुनेमीयावीशगा विवाहार्थं तव भ्रात्रेऽदोनीयाय दीयतां। ततो २२
नृपतिः सुलेमान् स्वजननीं प्रतिजगाद, अदोनीयस्य कृते शुनेमीयावी-
शगा कुतस्त्वया याच्यते? स मम ज्येष्ठो भ्राता, अतस्तस्य याजकस्यावी-
याथरस्य च सिरूयायाः पुत्त्रस्य योयावस्य च कृते राज्यं याच्यतामिति
वरं। अनन्तरं सुलेमान् नरपतिः परमेश्वरस्य नाम गृहीत्वा शपथं २३
कुर्व्वन् जगाद एतद्वाक्यकथनाद् अदोनीयो हनिष्यते न चेद् ईश्वरो

२४ मह्यम् अमुकं दण्डं ततोऽधिकं वा ददातु। निजप्रतिज्ञानुसारेण माम्
अस्थापयत् मम पितु र्दायूदः सिंहासने च माम् उपावेशयत् मह्यं
वंशमप्यददात् यः परमेश्वरस्तस्यामरतायाः शपथं कृत्वा वदाम्यहम्
२५ अदोनीयोऽद्यैव हनिष्यते। तदानीं राज्ञा सुलेमना प्रेषितो यिहोया-
दस्य सुतो विनायस्तमाक्रम्य हतवान्।
२६ अनन्तरं नृपति र्याजकम् अवीयाथरं जगाद, त्वमपि बधार्होऽसि,
किन्तु पूर्व्वं मम पितु र्दायूदः सम्मुखे प्रभोः परमेश्वरस्य मञ्जूषाम् अवहस्त्वं
मम पित्रा समं बहुक्लेशं भुक्तवांश्चैतत्कारणादहम् अद्य त्वां न हनि-
२७ ष्यामि त्वम् अनाथोतं निजक्षेत्रं याहि। इत्थं सुलेमान् याजकम्
अवीयाथरं परमेश्वरस्य याजनकर्म्मणो दूरीचकार ततः परमेश्वरेण
शीलावेलिवंशमधि यदुक्तं तत् सिद्धिं गतं।
२८ योयावो यद्यप्यवशालोमस्य पक्षपाती नासीत् तथाप्यदोनीयस्य पक्ष-
पाती बभूव तत्कारणाद् एतस्यां वार्त्तायां तेन श्रुतायामेव स परमे-
२९ श्वरस्यावासं पलाय्य होमवेद्याश्चूड़ा आशिश्रिये। अनन्तरं योयावः
परमेश्वरस्यावासं पलाय्य वेद्याः समीप आस्त इति वार्त्तायां केनचिद्
राज्ञे सुलेमने कथितायां स यिहोयादस्य पुत्रं विनायं प्रहित्यादिदेश
३० त्वं गत्वा तम् आक्रमस्व। ततो विनायः परमेश्वरस्यावासं गत्वा तं
जगाद राजा वदति त्वं वहिरागच्छेति। ततः स प्रत्युवाच, नहि नहि
मया स्थानेऽस्मिन् मरिष्यते। तदानीं विनायेन तस्योत्तरं राज्ञे विज्ञा-
पितं योयाव एतादृशं वचो वक्ति स एतादृशम् उत्तरं दत्तवान्।
३१ तदानीं नृपतिरुक्तवान् तेन यद् उक्तं तदेव त्वया क्रियतां त्वं तत्रैव
स्थाने तं हत्वा श्मशाने स्थापय, तत् कुर्व्वन् योयावेन पातितस्य निर-
३२ पराधानां शोणितस्य पापं मत्तो मत्पितृवंशाच्च दवय। परमेश्वरस्तस्य
शोणितपातरूपमपराधं तमेव प्रति वर्त्तयतु यत इस्रायेलः सेनापति-
र्नेरस्य पुत्रोऽवनेरो यिहूदावंशस्य सेनापति र्येथरस्य पुत्रोऽमासाश्चैतौ
यौ द्वौ नरौ तस्मादपि धार्म्मिकावुत्तमौ चास्तां स मम पित्रा दायूदा-
३३ विज्ञातं तावाक्रम्य खड्गेन हतवान्। तयोः शोणितपातजनितोऽपराधो
योयावं प्रति तस्य वंशं प्रति च सर्व्वदा वर्त्तिष्यते, किन्तु परमेश्वरात्
दायूदं तस्य वंशं परिजनान् सिंहासनञ्च प्रति शान्तिः सर्व्वदा वर्त्तिष्यते।
३४ अनन्तरं यिहोयादस्य सुतो विनायस्तस्य समीपं गत्वा योयावम् आक्रम्य
जघान, अपरं प्रान्तरस्थिते तस्य निवेशने तस्य श्मशानम् अकारि।

अनन्तरं राजा तस्य पदे यिहोयादस्य पुत्रं विनायं सेनापतिं चकार, ३५
अबीयाथरस्य पदे च सादोकं याजकं चकार।

ततः परं राजा दूतं प्रहित्य शिमियिम् आनाय्य जगाद त्वं यिरूशा- ३६
लमे स्वस्य कृते गेहमेकं निर्म्मापय तत्रैव च निवस तस्मात् स्थानात्
स्थानान्तरं मा गच्छ। यस्मिन् दिने त्वं वहि र्गत्वा किद्रोणस्रोतःपारं ३७
गमिष्यसि तस्मिन्नेव दिने त्वया मर्त्तव्यमिति निश्चितं जानीहि तव
शोणितपातजनितो ऽपराधस्त्वामेव प्रति वर्त्तिष्यते। ततः शिमियि र्नर- ३८
पतिं बभाषे वच इदम् उत्तमं मम प्रभु र्नरपति र्यद् गदितवान् भवतो
दासस्तदनुसारेणैव करिष्यति। अनन्तरं शिमियि र्बहूदिनानि यावत्
यिरूशालम उवास। त्रिभ्यो वत्सरेभ्यः परं शिमिये र्द्वौ दासौ पलाय्य ३९
माखाहस्य पुत्त्र आखीश इतिनाम्नो गातीयन्टपतेः समीपं जग्मतुः।
ततस्तव दासौ गात आसाते इति वार्त्ता लोकैः शिमियये कथिता;
ततः स उत्थाय गर्द्दभं सज्जीकृत्य दासयो र्गवेषणार्थं गातम् आखीशस्य ४०
समीपं जगाम। इत्थं शिमियि र्गत्वा गातात् निजदासौ समानि-
नाय। अनन्तरं शिमियि र्यिरूशालमाद् गातमगच्छत् प्रत्यागमच्च ४१
वार्त्तामिमां कश्चित् सुलेमने निवेदयामास ततो राजा दूतं प्रेष्य ४२
शिमियिम् आनाय्य तं जगाद यस्मिन् दिने त्वं वहि र्गत्वा स्थाना-
न्तरं भ्रमिष्यसि तस्मिन्नेव दिने त्वया मर्त्तव्यमिति निश्चितं जानीहि
परमेश्वरस्य नाम्ना त्वामहं शपथं कारयित्वा किमेतां वाणीं दृढप्रतिज्ञां
कृत्वा नाकथयं? ततस्त्वया कथितं मया या वाक् श्रुता सैवोत्तमा।
तर्हि त्वं परमेश्वरस्य शपथं तुभ्यं दत्तां ममाज्ञाञ्च कुतो नापालयः? ४३
राजा शिमियिं पुनरवदत् यत् समूहदुष्टत्वं तव मनसि गुप्तं यच्च दुष्टत्वं ४४
मम पितरं दायूदं प्रति त्वयाकारि तत् त्वम् अज्ञासीः। अतः परमे-
श्वरात् त्वदीयदुष्टतायाः फलं त्वयि वर्त्तते। किन्तु राजा सुलेमान् ४५
आशिषं प्राप्स्यति, परमेश्वरस्य सम्मुखे दायूदः सिंहासनमपि सर्व्वदा
स्थिरं स्थास्यति। अनन्तरं न्टपतिनाज्ञापितो यिहोयादस्य सुतो विनायो ४६
गत्वा तमाक्रम्य जघान। इत्थं सुलेमनः करे राज्यं स्थैर्य्यं बभूव।

---

३ तृतीयोऽध्यायः।

१ फिरौणः कन्यायाः सुलेमना विवहनं २ उच्चस्थाने बलिदानं ५ ज्ञानार्थम् ईश्वरस्य समीपे प्रार्थनं १६ द्वयोः पुंश्चल्यो र्बालकावधि विचारणं तेन तस्य सुख्यातिश्च।

१ अनन्तरं सुलेमान् नरपति र्मिसरदेशीयराजेन फिरौणा समं
मैत्रं विधाय फिरौणो दुहितरम् उद्वाह्य यावच्च निजप्रासादं परमे-
श्वरस्य मन्दिरं यिरूशालमस्य चतुर्दिक्स्थं प्राचीरञ्च न निरमात् तावत्
तां दायूद्नगरम् आनिनाय ।
२ अपरं तत्काले परमेश्वरस्य नाम्नि किञ्चन मन्दिरं निर्म्मितं नासीत्
३ तत्कारणात् लोकै र्भृगुस्थानेषु बलिदानम् अकारि । सुलेमान् निज-
तातस्य दायूदो विधीन् समाचरन् परमेश्वरे प्रेम चकारेति सत्यं
४ तथापि भृगुस्थानेषु बलिदानान्यकरोत् धूपान् अज्वालयच्च । विशेषतो
नरपति र्बलिदानार्थं गिबियोनम् अगच्छत् यतस्तत्रैव श्रेष्ठं भृगुस्थानम्
आसीत् । सुलेमान् तस्यां वेद्यां सहस्रं होमबलीन् उत्ससर्ज ।
५ गिबियोने परमेश्वरो रजन्यां स्वप्ने सुलेमने दर्शनं ददौ । तदानीम्
६ ईश्वरस्तं जगाद मया दातव्यं वरं त्वं प्रार्थयस्व । ततः सुलेमान् जगाद
तव दासो मम तातो यो दायूद् सत्यतया धर्म्मेण च तव गोचरे सर-
लान्तःकरणेनाचरणम् अकरोत् तं प्रति त्वं महतीं दयां व्यदधा विशे-
षतस्तं प्रति महानुग्रहमिमम् अकरो यत् तस्य सिंहासनेऽध्युपवेष्टुं
७ पुत्रमेकं दत्तवान् । इदानीं हे मम प्रभो परमेश्वर त्वं मम पितु र्दायूदः
पदे निजदासं मां राज्याभिषिक्तमकरोः किन्त्वहं क्षुद्रस्तरुणो वहिर्ग-
८ न्तुम् अन्तः प्रवेष्टुञ्च न वेद्मि । तवायं दासस्त्वयाभिरुचितानां त्वदीयानां
येषां लोकानां मध्ये विद्यते तेऽतीवबाहुल्याद् अपरिमेया अगण्याश्च ।
९ अतस्त्वदीयानामेतेषां लोकानां विचाराय भद्राभद्रयो र्विशेषज्ञानार्थं
तव दासाय सुबुद्ध्यन्तःकरणं देहि नो चेत् त्वदीयानाम् एतावतां
१० लोकानां विचारं कर्त्तुं केन शक्यते ? तदानीं परमेश्वरः सुलेमन एता-
११ दृश्या प्रार्थनया सन्तुष्टः सन् बभाषे, त्वं केवलम् एतत् प्रार्थयथाः;
दीर्घमायु र्न प्रार्थयथाः स्वार्थं द्रविणञ्च न प्रार्थयथा निजरिपूणां
प्राणांश्च न प्रार्थयथाः किन्तु विचाराय स्वार्थं केवलं ज्ञानं प्रार्थयथाः
१२ पश्य तन्निमित्तम् अहं त्वद्वाक्यानुसारेणैवाकार्षं । पश्य तुभ्यम् एतादृशं
ज्ञानवद् बुद्धिमच्चान्तःकरणम् अदां येन तव पूर्व्वं तव तुल्यः कोऽपि
१३ नाभवत् परतोऽपि तव तुल्यः कोऽपि कदापि न भविष्यति । तदन्यत् त्वया
यद्धनं सम्मानञ्च न प्रार्थि तदपि मया तुभ्यं तादृगदायि येन राज-
१४ वृन्दानां मध्ये यावज्जीवनं तव समः कोऽपि न भविष्यति । तव तातेन
दायूदा यादृशमाचरणं कृतं तादृक् त्वया यदि ममाज्ञा विधींश्च पाल-

यता मम मार्गेणाचरणं क्रियते तर्हि मया त्वदीयायुर्वर्धयिष्यते। अन- १५
न्तरं जाग्रता सुलेमना एष स्वप्न एवेति बुबुधे। अनन्तरं स यिरूशालमं
गत्वा परमेश्वरस्य नियममञ्जूषायाः सम्मुखे तिष्ठन् होमबलीन् मङ्ग-
लार्थकबलींश्च समुत्सृज्य स्वकीयानां सर्व्वेषां दासानां कृते भोज्यमेकं
चकार च।

तस्मिन् काले द्वे पुंश्चल्यौ नृपतेः समीपम् आगत्य तस्य सम्मुखे तस्थतुः। १६
तयोरेका नारी निवेदयामास हे मम प्रभो, अहमेषा चावां स्त्रियौ १७
द्वे एकस्मिन् निवेशने तिष्ठावः। अपरं सममेतया गेहे तिष्ठन्त्या
मया सन्तानः प्रासावि। मम प्रसवतः परं तृतीयदिवसे एतयापि १८
प्रासावि तदानीम् आवां द्वे स्त्रियौ विना गृहे नान्यः कश्चिद् आसीत्।
अनन्तरं रजन्याम् एतस्याः स्वबालकोपरि शयनाद् एतस्या बालको १९
मृतः। ततः सा मध्यरात्रावुत्थाय निद्रिताया मम समीपात् मम २०
बालकं गृहीत्वा निजवक्षःस्थलेऽशाययत् निजं मृतबालकञ्च मम
वक्षःस्थलेऽशाययत्। प्रातःकाले निजबालकं दुग्धं पाययितुं समुत्थित- २१
या मया स मृत इति दृष्टं किन्तु स मया प्रसूतो बालको नहीति
प्रात र्विविच्य दृष्टं। अपरं द्वितीया नारी जगाद तन्नहि जीवत्पुत्रो २२
मम मृतपुत्रस्तव। ततः प्रथमा कथितवती नहि नहि मृतपुत्र-
स्तव जीवत्पुत्रो मम, इत्थं द्वे नार्य्यौ राज्ञः समीपे निवेदयामा-
सतुः। महीपतिरवदद् एका योषित् कथयति जीवत्पुत्रो मम मृतः २३
पुत्रस्तवेति, तथैवान्या नारी कथयति नहि नहि जीवत्पुत्रो मम मृतः
पुत्रस्तवेति। अनन्तरं नरपतिराज्ञापयत्, मम समीपं खड्गमेकम् २४
आनयत। ततो राज्ञः समीपं खड्गे समानीते राजा जगाद, इमं २५
जीवन्तं बालकं द्विखण्डीकृत्यार्द्धम् एकस्यै दत्तान्यस्यै चार्द्धं दत्त।
ततो यस्याः पुत्रो जीवन् आसीत् सा योषित् निजपुत्रमधि २६
मर्म्मभेदिनीं पीडां गत्वा राजानं विनयाञ्चक्रे हे मम प्रभो जीवन्
बालकोऽस्यै दीयतां बालको मा हन्यतां। किन्त्वन्या योषित् कथया-
मास बालक एष मम न भवतु तवापि न भवतु युष्माभिरेष
द्विखण्डीक्रियतां। तदा नरपतिराज्ञापयत् जीवन् बालकोऽस्यै २७
दीयतां स युष्माभि र्न हन्तव्यो यत एषैव तस्य माता। राजा विचारस्य २८
यम् इमं सिद्धान्तम् अकरोत्, तं निशम्य सर्व्व इस्रायेल्लोका राजानं
समाद्रियन्त यतो न्यायं कर्त्तुम् ईश्वरदत्तं ज्ञानं तस्यास्तीति ते बुबुधिरे।

४ चतुर्थोऽध्यायः।

१ सुलेमनः प्रधानाधिपतीनां नामानि ७ द्रव्याणामायोजनकर्तॄणां द्वादशानाम् अधिपतीनां नामानि २० निष्कण्टकं राजत्वकरणकथनं २२ प्रात्यहिकभक्ष्याणां परिमाणकथनं २६ तस्य हयशालानां संख्या २९ तस्य ज्ञानस्य कथनञ्च।

१ इत्थं सुलेमान् सर्व्वेषाम् इस्रायेलीयानाम् उपरि राजत्वं चकार।
२ तस्य प्रधानाधिपतीनां नामानि। याजकस्य सादोकस्य तनयो ऽसरियः
३ सिरायस्य तनयाविलीहोरफाहीयौ च लेखका आसन्। अहीलूदस्य
४ तनयो यिहोशाफटः पुरावृत्तलेखक आसीत्। यिहोयादस्य पुत्रो
५ विनायः सेनापतिरासीत् सादोकावीयाथरौ महायाजकावास्तां। नाथनस्य पुत्रोऽसरियो प्रदेशाधिपतीनाम् अध्यक्ष आसीत् नाथनस्य तनयः
६ साबूदः सभासत् नरपतेः सुहृच्चासीत्। अहीसारो राजगृहाधिपतिरासीत् अब्दस्य तनयोऽदोनीरामः कारुश्रेणीनाम् अधिपतिरासीत्।
७ अपरं सर्व्वेषाम् इस्रायेलीयानाम् उपरि सुलेमनो द्वादश प्रदेशाध्यक्षा आसन् ते राजानं राजनिवेशनस्थांश्चाभोजयन्। तेषाम् एकैको जनो
८ वत्सरस्य मास एकैकस्मिन् द्रव्यायोजनम् अकुर्व्वत्। तेषां नामानि, इफ्रयिमपर्व्वते हूरस्य तनयः। अपरं माकसे शाल्वीमे वैतशेमश एलोने
९
१० वैयानने च देकरस्य तनयः। अपरम् अरुब्बोते हेषदस्य तनयः सोखो
११ हेफरप्रदेशे च तस्याधिकारित्वमासीत्। अपरं दोरस्य सकलदेशेष्ववी-
१२ नादवस्य तनयः स सुलेमनः कन्यां टाफतां व्यवहत्। अपरं तानके मगिद्दो सर्तनस्य समीपे यिस्रियेलस्याधो वैतशानमारभ्यावेलमिहोलां यक्मियामस्य पारञ्च यावत् सर्व्ववैतशाने ऽहीलूदीयतनयो यो वानास्तस्याधिकार
१३ आसीत्। अपरं रामोतगिलियदे गेवरस्य तनयः, मिनशेः पुत्रस्य यायीरस्य गिलियदस्था ग्रामा वाशनस्थोऽर्गोवाख्यः प्रदेशश्च साकल्यतः प्राचीरवेष्टितानि पित्तलीयार्गलयुक्तानि षष्टि र्वृहन्ति नगराणि तस्याधीना-
१४ न्यासन्। अपरं महनयिम इद्दोः पुत्रोऽहीनादवः। नप्तालावहीमासः
१५ सोऽपि सुलेमनो दुहितरं वाशिमतां व्यवहत्। अपरम् आशेरे वालोते
१६ च हूशयस्य तनयो वानाः। इषाखरे पारूहस्य पुत्रो यिहोशाफटः।
१७
१८ अपरं विन्यामीन एलाः पुत्रः शिमियिः। गिलियददेशेऽर्थत इमोरीयसीहोनाख्यस्य नृपते र्वाशनदेशीयराजस्योगस्य च देशे ऊरेः पुत्रो गेवरस्य। एकैकस्मिन् प्रदेश एकैकोऽध्यक्षो न्यवसत्।
२० तदानीं यिहूदावंशा इस्रायेल्वंशाश्च वृद्धिं प्राप्य सागरस्य तटस्थानां

सिकतानामिवागण्या भोजनपानानन्दैः प्रफुल्लाश्च बभूवुः। अपरं २१
फरातनदम् आरभ्य पिलेष्टीयानां जनपदं मिसरस्य सीमानञ्च यावत्
सकलराज्यीयानाम् उपरि सुलेमना राजत्वमक्रियत तेन तैः सुलेमनो
यावज्जीवनं तस्मायुपायनं व्यतारि तस्य परिचर्य्या चाकारि।

सुलेमनो नित्यभोजनीयानि द्रव्याणि। त्रिंशद्भारपरिमितानि सूक्ष्म- २२
गोधूमचूर्णानि षष्टिभारपरिमितानि गोधूमचूर्णानि। अपरं हरिण- २३
मृगकृष्णसारपुष्टपक्षिभिः सहिता दश पुष्टगावः प्रान्तराद् आनीता
विंशति गावः शतं मेषाश्च सर्व्वाण्येतानि तस्यैकदिनस्य भोज्यान्यासन्।
अपरं तिप्सहम् आरभ्य यावद् असां फराताख्यनदस्य पश्चिमदिशि २४
स्थितानां सर्व्वेषां नीवृतां नृपतीनाञ्चोपरि स राजत्वं चकार। अपरं
तस्य चतुर्दिक्षु निष्कण्टकत्वात् सुलेमनो यावज्जीवनं दानमारभ्य बेर्शेवां २५
यावत् सर्व्वे यिहूदावंशा इस्रायेलीयवंशाश्च निजनिजद्राक्षालताया
उडुम्बरतरोश्च छायासु निर्व्विघ्नं न्यूषुः।

सुलेमनः स्यन्दनार्थं चत्वारिंशद् हयशाला द्वादशसहस्राणि हया- २६
रोहिणश्चासन्। अपरं सुलेमनो राज्ञस्तदीयभोजनासने भोजनकारि- २७
णाञ्च निमित्तं देशाध्यक्षाणाम् एकैको जन एकैकस्मिन् मासे राज्ञो भक्ष्य-
द्रव्याणाम् आयोजनं कुर्व्वन् सुलेमानं राजानम् अभोजयत् कस्यापि
वस्तुनो न्यूनं नाकरोत्। तदन्यद् राजा यस्मिन् स्थाने न्यवसत् तत्र २८
स्थाने हयादीनां पशूनामपि कृते निदेशानुसारेण तेषाम् एकैकेन यवा-
स्तृणानि च समचीयन्त।

अपरम् ईश्वरः सुलेमने सागरतटस्थसिकतेवापरिमितं ज्ञानं मनोवि- २९
स्तीर्णत्वञ्च ददौ। पूर्व्वदेशीयलोकेभ्यो मिसीयलोकेभ्योऽपि सुलेमनोऽधिकं ३०
ज्ञानं बभूव। इस्राहीय एथनो माहोलस्य सुता हेमनः कल्कोलो ३१
दर्द्दश्चैतेभ्योऽन्येभ्यः सर्व्वनरेभ्यश्च स ज्ञानवान् बभूव ततश्चतुर्दिक्षु सकल-
देशेषु तस्य सुख्याति र्व्यानशे। स त्रीणि सहस्राणि श्लोकान् कथयामास ३२
तत्कृतानि गीतानि च पञ्चाधिकसहस्रमासन्। स लिवानोने जातम् ३३
एरसतरुमारभ्य प्राचीरे जातम् एषोवतृणं यावत् सर्व्वद्रुमान् वर्णया-
ञ्चक्रे तद्वत् पशुपक्ष्युरोगमत्स्यानामपि वर्णनं चक्रे। अपरं पृथिवीस्थिता ३४
ये ये राजानः सुलेमनो ज्ञानस्य वार्त्ताम् अशृण्वन् तेषां राज्येभ्यो नाना-
जातीयमनुजाः सुलेमनो ज्ञानवाक्यानि श्रोतुम् आजग्मुः।

५ पञ्चमोऽध्यायः ।

१ काष्ठानां कृते हीरमस्य समीपं सुलेमनो लोकप्रेषणं ७ हीरमस्य काष्ठप्रेषणं १० तयोः परस्परं नियमोपकारकरणं १३ सुलेमनः कारूणां संख्या च ।

१ स्वतातस्य विनिमयेन सुलेमान् लोकै राज्येऽभ्यषेचि कथामिमां निशम्य
सोरीयराजो हीरमः सुलेमनः समीपं निजदासान् प्रेषयामास यतो
२ यावज्जीवनं दायूदो हीरमस्य च प्रीतिरासीत् । ततः सुलेमान्
३ हीरमाय वाचमिमां कथयितुं लोकान् प्रेषयामास यावत् परमेश्वरो
मम तातस्य दायूदो रिपून् तस्य वशीभूतान् नाकरोत् तावत् तस्य
चतुर्दिक्षु यद् युद्धमभवत् तत्कारणात् स निजप्रभोः परमेश्वरस्य नाम्ने
४ भवनं निर्म्मातुं नाशक्नोदिति त्वं वेत्सि । किन्त्वधुना मम प्रभुः पर-
मेश्वरश्चतुर्दिग्भ्यो मह्यं विश्रामं व्यतरत् मम विपक्षः कोपि न विद्यते
५ विपद्घटना च काचन न विद्यते । अतः पश्य मया तव पदे तव यः
सुतः सिंहासन उपवेशयिष्यते स मम नाम्ने मन्दिरमेकं निर्म्माप-
यिष्यति यामिमां वाचं परमेश्वरो मम जनकाय दायूदे प्रत्यश्रृणोत्
तदनुसारेण निजप्रभोः परमेश्वरस्य नाम्ने भवनमेकं निर्म्मातुं मया
६ चिन्त्यते । इदानीं मत्कृते लिवानोनं गत्वा एरसकाष्ठानि छेत्तुं
त्वं निजमनुजान् समादिश मदीयदासाश्च त्वदीयदासानां सङ्गिनो
भविष्यन्ति त्वया यथा निर्णेष्यते तदनुसारेण मया त्वदीयदासेभ्यो
वेतनं वितारिष्यते, यतः काष्ठच्छेदने सीदोनीयानामिव विज्ञो-
ऽस्माकं मध्ये कश्चिदपि न विद्यत इति त्वं वेत्सि ।
७ तदानीं हीरमः सुलेमनो वचो निशम्य भृशमानन्दितः सन् व्याजहार
महत्या एतस्या जातेरुपरि राजत्वं कर्त्तुं दायूदे ज्ञानिनं तनयं दत्तवान्
८ यः परमेश्वरः सोऽद्य धन्यः । अनन्तरं हीरमः सुलेमनः समीपं दूतं
प्रहित्य जगाद त्वं यत्कृते मम समीपं लोकं प्रैषयस्तन्मया बुद्धम्
९ एरसदेवदारूणां काष्ठान्यधि तत्र वाञ्छासिद्धिं करिष्यामि । मम दासै
र्लिवानोनात् तेषु सागरतटं समानीतेषु मयोडुपानि बद्ध्वा सागरेण
त्वया निर्द्दिष्टं स्थानं प्रेषयिष्यन्ते तत्र स्थाने विमोचयिष्यन्ते च ततस्त्वं
तानि काष्ठानि ग्रहीष्यसि । अपरं मम परिजनान् पालयितुं मदीय-
वाञ्छासिद्धिं करिष्यसि ।
१० इत्थं सुलेमनो यथाभिलाषं तथा हीरम एरसकाष्ठानि देवदारु-

काष्ठानि च विततार। अपरं सुलेमान् हीरमस्य परिजनानां भक्ष्य- ११
निमित्तं तस्मै विंशतिसहस्रभारपरिमितान् गोधूमान् विंशतिभार-
परिमितानि निर्म्मलतैलानि च विश्राणयामास। इत्थं सुलेमान् प्रति-
वत्सरं हीरमाय विश्राणयामास। अपरं परमेश्वरो निजप्रतिज्ञानु- १२
सारेण सुलेमने ज्ञानं विततार; ततः परं हीरमसुलेमनौ सन्धिं
नियमञ्च चक्रतुः।

अनन्तरं राजा सुलेमान् इस्रायेल्वंशस्य मध्याद् एकां कारुनिवहं १३
अर्थात् त्रिंशत्सहस्राणि कारून् संजग्राह। स मासिकपर्य्यायानुसारेण १४
तेषां दशसहस्राणि जनान् लिवानोनं प्रेषयामास ततस्ते मासैकं यावत्
लिवानोने तस्थुर्द्वौ मासौ च निजनिवेशनेषु तस्थुः; अदोनीरामस्तस्य
निवहस्याधिपतिरासीत्। अपरं सुलेमनः सप्ततिः सहस्राणि भार- १५
वाहका अशीतिः सहस्राणि छेदकाश्च पर्व्वत आसन्। तदन्याः कर्म्म- १६
कृतां मनुजानां त्रीणि सहस्राणि त्रीणि शतानि च प्रमुखाः कर्म्माध्यक्षा
आसन्। अपरं राज्ञ आज्ञानुसारेण ते तक्षितपाषाणैर्मन्दिरस्य १७
भित्तिमूलं कर्त्तुं बहुमूल्यान् महापाषाणान् चखुः। अनन्तरं सुलेमनो १८
हीरमस्य च स्थपतयः पर्व्वतीया लोकाश्च तान् चिच्छिदुः, इत्थं मन्दिर-
निर्म्माणयोग्याः काष्ठपाषाणास्तैरासादिताः।

---

६ षष्ठोऽध्यायः।

१ मन्दिरस्य निर्म्माणारम्भः ११ तदधि परमेश्वरस्य प्रतिज्ञा १४ मन्दिरस्य प्रष्ठादीनां कथनं २३ किरूवयोः कथनं ३१ द्वारयोः कथनं ३६ प्राङ्गणस्य कथनं निर्म्माणसमयस्य कथनञ्च।

अनन्तरम् इस्रायेल्वंशस्य मिसरदेशाद् आगमनात् परं साशीतिक- १
चतुःशतवत्सरेषु गतेष्विस्रायेल उपरि सुलेमनो राजत्वस्य चतुर्थ-
वत्सरस्य सिवनामके द्वितीयमासे सुलेमान् परमेश्वराय मन्दिरं
निर्म्मातुम् आरेभे। सुलेमान् राजा परमेश्वराय यन्मन्दिरं निर्म्ममे २
तद् दैर्घ्ये षष्टिहस्तप्रमाणं प्रस्थे विंशतिहस्तप्रमाणम् उच्चत्वे च त्रिंश-
द्धस्तप्रमाणं। अपरं मन्दिरस्याग्रेऽलिन्द एकस्तेन निर्म्ममे तस्य दैर्घ्यं ३
मन्दिरस्य प्रस्थवद् विंशतिहस्तपरिमाणं प्रस्थञ्च मन्दिरस्याग्रे दशहस्त-
परिमाणं। अपरं मन्दिरस्य निमित्तम् ऊर्द्धस्थितानि सङ्कोचितानि ४
वातायनानि निर्म्ममे। अपरं मन्दिरस्य चतुर्दिक्षु कोष्ठानां श्रेणीं ५

चकार। अर्थात् चतुर्दिक्षु मन्दिरस्येश्वरीयवाक्यस्थानस्य च भित्तेर्गात्रे
६ कोष्ठानां श्रेणीं चकार, इत्थं चतुर्दिक्षु कोष्ठानि निर्म्ममे। अधःस्था
कोष्ठश्रेणी पञ्चहस्तप्रस्था मध्यमा कोष्ठश्रेणी षड्हस्तप्रस्था तृतीया
कोष्ठश्रेणी च सप्तहस्तप्रस्थासीत् यतः काष्ठानि यद् भित्तेर्मध्ये बन्ध-
नीयानि न भवेयुस्तदर्थं स चतुर्दिक्षु भित्तिं सोपानाकारां कृतवान्।
७ अपरं प्रस्तराकरात् लब्धैः खनितैः प्रस्तरै र्मन्दिरं निर्म्ममे, इति हेतो
र्मन्दिरनिर्म्माणकालेऽयोघनस्य कुठारस्य वा कस्यचित् लौहास्त्रस्य शब्दो
८ नाश्रूयत। अपरं मध्यमायाः कोष्ठश्रेण्या द्वारं मन्दिरस्य दक्षिणदिश्या-
सीत् ततो वक्रसोपानै र्मध्यमश्रेणीं मध्यमश्रेणीतश्च तृतीया श्रेणीं चाग-
९ म्यत। इत्थं स मन्दिरनिर्म्माणं समाप्तवान् अपरम् एरसीयै र्गृहकाष्ठैः
१० पत्रैश्च मन्दिरम् आच्छादयामास। अपरं कृत्स्नमन्दिरस्योपरि पञ्चह-
स्तोच्चां कोष्ठश्रेणीं चकार मन्दिरं वृहद्भिरेरसकाष्ठै र्दृढयाञ्चकार च।
११ अनन्तरं परमेश्वरस्य वचनमिदं सुलेमनः समीपमुपतस्थौ त्वं मन्दिर-
१२ मिमं निर्म्मासि किन्तु यदि मम विधीन् आचरसि मदीयादेशानुसा-
रात् कर्म्म करोषि ममाज्ञाः पालयसि च तर्हि मया तव ताताय दायूदे
१३ यत् प्रतिश्रुतं तत् त्वां प्रति साधयिष्यते। अहम् इस्रायेल्वंशमध्ये
वत्स्यामि निजलोकान् इस्रायेलीयवंशान् न त्यक्ष्यामि च।
१४ अनन्तरं सुलेमान् मन्दिरस्य निर्म्माणं समापयामास। स गृह-
१५ स्याधःस्थानमारभ्य गृहपृष्ठं यावद् एरसकाष्ठीयपत्रैरभ्यन्तरे गृहस्य
गात्राण्याच्छादयामास गृहस्य मध्यदेशञ्च देवदारुकाष्ठीयपत्रैराच्छा-
१६ दितवान्। तद्वद् गृहस्य विंशतिहस्तपरिमितं पश्चाद्भागम् अधःस्थानम्
आरभ्य पृष्ठं यावद् एरसकाष्ठीयपत्रैराच्छादयामास। स ईश्वरीय-
वाक्यस्थानार्थम् अर्थात् महापवित्रस्थानार्थं तम् अन्तरागारम् आसा-
१७ दयामास। तस्याग्रस्थितं चत्वारिंशद्धस्तपरिमाणं यद् गेहं तदेव
१८ मन्दिरं बभूव। गृहस्य मध्यस्थितानि तान्येरसकाष्ठानि कलिकाभि
र्विकसितैः पुष्पैश्च चित्रितान्यासन् कृत्स्नं गेहम् एरसकाष्ठमयं बभूव,
१९ किञ्चिन्मात्रः प्रस्तरो न दृश्यो बभूव। अपरम् ईश्वरस्य नियम-
मञ्जूषायाः स्थापनार्थं मन्दिरस्याभ्यन्तर ईश्वरस्य वाक्यस्थानं निर्म्ममे।
२० ईश्वरस्य वाक्यस्थानस्य दैर्घ्यम् अग्रभागे विंशतिहस्तप्रमाणं प्रस्थं विंश-
तिहस्तप्रमाणम् उच्चत्वञ्च विंशतिहस्तप्रमाणं कृत्वा निर्म्मलसुवर्णेन तत्
२१ खचितवान् एरसकाष्ठीयधूपवेदीमपि तथैव खचितवान्। अपरं

सुलेमान् अभ्यन्तरे मन्दिरस्य कुड्यं निर्म्मलस्वर्णैः खचितवान् अपरम्
ईश्वरीयवाक्यस्थानस्याग्रे स्वर्णशृङ्खलैरावरणमेकं चकार सुवर्णेन च तत्
खचितवान्। यावत् समाप्ति र्न जाता तावत् सकलमन्दिरं सुवर्णेन २२
खचितवान् अपरम् ईश्वरीयवाक्यस्थानस्य निकटस्थां हृत्खधूपवेदीमपि
सुवर्णेन खचितवान्।

अपरम् ईश्वरीयवाक्यस्थाने जितकाष्ठै र्दशदशहस्तप्रमाणौ द्वौ किरूवौ २३
निर्म्ममे। तयोः प्रथमस्य किरूवस्य पक्षमेकं पञ्चहस्तम् अन्यत् पक्षमपि २४
पञ्चहस्तं चकार, तत एकपक्षस्याग्रभागाद् अन्यपक्षस्याग्रभागं यावद्
दशहस्ता बभूवुः। अपरं द्वितीयं किरूवं दशहस्तं, द्वयोः किरूवयोः २५
समं परिमाणं सममाकारञ्च चकार। एकः किरूवो यथा दशहु- २६
स्तोच्चोऽन्यकिरूवोऽपि तथैव दशहस्तोच्च आसीत्। अनन्तरं स तौ २७
किरूवौ गर्भागारे स्थापयामास अपरं किरूवाविस्थं विस्तीर्णपक्षौ
निर्म्मितौ यद् एकस्य पक्ष एकां भित्तिम् अन्यस्य पक्षस्तेतरां भित्तिं
पस्पर्श अपरं गृहमध्यस्थितौ तयोः पक्षौ परस्परं पस्पृशतुः। अनन्तरं २८
स तौ किरूवौ सुवर्णैः खचितवान्। अपरं मन्दिरस्य सकलकुड्यानि २९
वहिरभ्यन्तरे च चतुर्दिक्षु किरूवाणां तालवृक्षाणां विकसितपुष्पाणाञ्च
खनिताकृतिभिः शोभयाञ्चकार; अपरं गृहस्य मध्यं वहिरभ्यन्तरे च ३०
सुवर्णेन खचितं चकार।

अपरम् ईश्वरीयवाक्यस्थानस्य प्रवेशद्वारार्थं जितकाष्ठीयं कवाट- ३१
द्वयं निर्म्ममे सनासापार्श्वकाष्ठद्वयं तद् द्वारं कुड्यस्य पञ्चमो भागः। ३२
तस्मिन् जितकाष्ठमये कवाटद्वये किरूवाणां तालवृक्षाणां विकसित-
पुष्पाणाञ्चाकृतीः खनित्वा तत् सुवर्णखचितं चकार विशेषतस्ताः किरू-
वाकृतीस्तालवृक्षाकृतीश्च स्वर्णेन खचिताश्चकार। अपरं मन्दिरस्य ३३
प्रवेशद्वारार्थं कुड्यस्य चतुर्थभागपरिमाणं जितकाष्ठीयं पार्श्वकाष्ठद्वयं
चकार। अपरं देवदारुकाष्ठै र्द्वे कवाटे चकार तयो र्द्वारयोरेकस्य ३४
कवाटद्वयं यादृक् कब्जायां खेलितम् अन्यस्य कवाटद्वयमपि तादृक्
कब्जायां खेलितं। अपरं तस्योपरि किरूवान् तालवृक्षान् विकसित- ३५
पुष्पाणि च खनित्वा तत्खनितवस्तुनि सुवर्णम् आरोप्य खचितवान्।

अनन्तरं स खनितप्रस्तराणां पङ्क्तित्रयेणैरसीयानां स्थूलकाष्ठानां ३६
पंक्त्यैकया चाभ्यन्तरप्राङ्गणं निर्म्ममे। चतुर्थवत्सरस्य सिवनामके मासे ३७
परमेश्वरस्य मन्दिरस्य भित्तिमूलं निर्म्ममे। ततः परम् एकादशवत्स- ३८

रस्य वूलनामके ऽष्टममासे निरूपिताकारानुसारेण सकलैरंशै मन्दिर-
निर्म्माणं समापितम् अतस्तस्य निर्म्माणं सप्तवत्सरान् व्यानशे।

---

७ सप्तमोऽध्यायः।

१ सुलेमनो राजगृहनिर्म्माणकथनं २ लिवानोनारण्यगृहस्य निजजायाया गृहस्य च निर्म्माणकथनं १२ हूरमस्य कथनं १५ तस्य स्तम्भद्वयनिर्म्माणकथनं २७ पित्तलीय-समुद्रपात्रस्य निर्म्माणकथनं २७ तस्यावलम्बनस्य कथनं ३८ प्रचालनपात्राणां कथनं ४० अन्यपात्राणां कथनञ्च।

१ अनन्तरं सुलेमना त्रयोदशवत्सरान् व्याप्य निजनिवेशनं निर्म्मा-
पयता कृत्स्ननिवेशनस्य निर्म्माणं समाप्तं।
२ अपरं स लिवानोनारण्यनाम निवेशनं निर्म्ममे तस्य दीर्घत्वं शत-
हस्तपरिमितं प्रस्थत्वं पञ्चाशद्धस्तपरिमितम् उच्चत्वञ्च त्रिंशद्धस्तपरि-
मितम् आसीत्। तत् चतसृणाम् एरसकाष्ठीयस्तम्भानां श्रेणीनाम्
उपरि स्थापितं तेषां स्तम्भानाम् उपर्य्येरसीयगृहकाष्ठानि निदधिरे।
३ एकैकस्यां श्रेण्यां पञ्चदश साकल्येन पञ्चचत्वारिंशत् स्तम्भा आसन्
तेषाम् उपरि कोष्ठानि स्थापितानि तदुपर्य्येरसकाष्ठै गृहपृष्ठं निर्म्ममे।
४ अपरं गृहकाष्ठानां तिसृषु श्रेणीषु सतीषु तिसृणां वातायनानि
५ परस्परं सम्मुखानि बभूवुः। अपरं द्वाराणि तदीयकाष्ठवेष्टनानि च
सर्व्वाणि चतुष्कोणानि बभूवुः, अपरं तिसृणां श्रेणीनां वातायनानि
६ परस्परं सम्मुखानि बभूवुः। अपरं स स्तम्भालिन्दमेकं चकार
तस्य दीर्घत्वं पञ्चाशद्धस्तपरिमाणं प्रस्थत्वं त्रिंशद्धस्तपरिमाणं तस्याग्रे
७ द्वितीयम् अलिन्दं तदग्रे च देहलीं चकार। अपरं यस्मिन् सिंहा-
सनालिन्दे विचारमकरोत् तं विचारालिन्दं निर्म्ममे मध्यदेशस्यैकां
दिशम् आरभ्यापरां दिशं यावत् तम् एरसकाष्ठैराच्छादयामास च।
८ अपरं तस्य वासगृहम् अलिन्दस्य पश्चात् प्राङ्गणे तादृक् निर्म्मितम्
अपरं सुलेमान् फिरौणो यां दुहितरम् ऊढवान् तस्याः कृतेऽपि
९ तदलिन्दवद् गृहं निर्म्ममे। एतानि भित्तिमूलमारभ्यालिं यावद्
वहिर्द्दिशञ्चारभ्य महाप्राङ्गणं यावत् तक्षितपाषाणवद् दृहद्भिः वहि-
१० रभ्यन्तरे च कर्त्रिकया तक्षितै बंडमूल्यैः पाषाणैस्तैन निर्म्ममिरे। अपरं
भित्तिमूलं बडमूल्यै र्वृहत्पाषाणैर्यथाद् दशहस्तपरिमितैरष्टहस्तप-
११ रिमितैश्च पाषाणै र्निर्म्ममे। तदुपरि तक्षितपाषाणवद् वृहन्तो बडु-

मूल्यान् पाषाणान् एरसकाष्ठानि चारोपयामास। अपरं महाप्राङ्गणस्य १२
परमेश्वरीयमन्दिरस्य मध्यप्राङ्गणस्य निजगृहस्यालिन्दस्य च चतुर्दिक्षु
तक्षितपाषाणानां तिस्रः श्रेणीरेरसकाष्ठानाञ्चैकां श्रेणीं चकार।

अनन्तरं सुलेमान् भूपति र्दूतं प्रहित्य सोरतो हूरमम् आनायित- १३
वान्। तस्य हूरमस्य माता नप्तालिवंशीयैका विधवा तस्य पिता च १४
सोरनगरीयः कश्चित् कांस्यकार आसीत्। स पित्तलस्य समस्तकर्म्मसु
सुज्ञानी बुद्धिमान् निपुणश्चासीत्। स एव सुलेमनो नरपतेः समीपम्
आगत्य तस्य सर्व्वाणि शिल्पकार्य्याणि चकार। स पित्तलस्य द्वौ स्तम्भौ १५
निर्म्ममे तयोः स्तम्भयोरेकैकस्योच्चत्वम् अष्टादशहस्तपरिमितं, द्वादशहस्त-
परिमितं सूत्रञ्चैकैकं स्तम्भम् अवेष्टत। अपरं द्वयोः स्तम्भयो र्मस्तकयोरा- १६
रोपणार्थं स सिक्तौ पित्तलीयौ द्वौ मूर्द्धानौ चकार तयोरेकस्य मूर्द्ध उच्चत्वं
पञ्चहस्तपरिमितम् अन्यस्य मूर्द्ध उच्चत्वमपि पञ्चहस्तपरिमितं चकार।
अपरं स्तम्भोपरिस्थयो र्मूर्द्धोरारोपणार्थं शृङ्खलवत् क्रियया गुणिताभी १७
रज्जूभि र्जालीनि शिल्पकार्य्याणि निर्म्ममे। स तयोरेकस्य मूर्द्धः कृते सप्त
जालान्यन्यस्य मूर्द्धः कृतेऽपि सप्त जालानि चकार। अपरं स तौ स्तम्भौ १८
निर्म्माय तदुपरिस्थयो र्मूर्द्धोराच्छादकजालवत्कार्य्यस्यैकस्य वेष्टनार्थं
दाडिम्बानां श्रेणीद्वयं चकार द्वितीयस्य मूर्द्धः कृतेऽपि तादृक् चकार।
अपरम् अलिन्दे स्तम्भयोरुपरि स्थितौ मूर्द्धानौ चतुर्हस्तपरिमितशो- १९
शनपुष्पाकृती आस्तां। जालवत्कार्य्यस्याभ्यन्तरे स्थितस्य स्थूलदेशस्य २०
समीप ऊर्द्धेऽपि तयोः स्तम्भयोरुपरि मूर्द्धानावास्तां। द्वितीयो मूर्द्धा
च दाडिम्बानां शतद्वयेन वेष्टितः। अनन्तरं स तौ स्तम्भौ मन्दिर- २१
स्यालिन्दे स्थापयामास। तयोरेकं स्तम्भं दक्षिणदिशि स्थापयित्वा तस्य
नाम याखीनः (स्थिरकारक इति) चकार द्वितीयञ्च स्तम्भं वाम-
दिशि स्थापयित्वा तस्य नाम बोयसो (बलीति) चकार। अनयो २२
र्द्वयोः स्तम्भयोरुपरि शोशनपुष्पाकृति शिल्पकार्य्यम् आसीत्। इत्थं
स्तम्भनिर्म्माणं समाप्तं।

अनन्तरं स सिक्तधातुना गोलाकारं सागररूपं पात्रं चकार। २३
एकम् अग्रम् आरभ्य द्वितीयम् अग्रं यावत् तस्य परिसरो दशहस्त-
परिमितस्तस्योच्चत्वं पञ्चहस्तपरिमितञ्च त्रिंशद्धस्तपरिमितं सूत्रञ्च तद्
अवेष्टत। अपरं तस्य चतुर्दिक्षु कर्णस्याधः प्रतिहस्तं दश दश गोला- २४
कारा आसन् ते तं सागरम् अवेष्टन्त। पात्रसेचनसमये ते श्रेणीद्वये

१५ ऽसिच्यन्त । तत् समुद्ररूपं पात्रं द्वादशानां गवाम् उपरि स्थापितं
तासां तिस्र उत्तरमुख्यस्तिस्रः पश्चिममुख्यस्तिस्रो दक्षिणमुख्यस्ति-
स्रश्च पूर्व्वमुख्यो बभूवुः । अपरं सागरपात्रं तासाम् उपरि तस्थौ
१६ तासां पश्चाद्भागा अन्तरे तस्थिरे। तत्पात्रस्य स्थूलत्वं चतुरङ्गुलपरिमाणं
तस्य कर्णः कंसवत् शोशनपुष्पाकारो द्वे सहस्रे वाताख्यपरिमाणानि च
तेन धृतानि ।

१७ अनन्तरं स चतुर्हस्तदीर्घाणि चतुर्हस्तप्रस्थानि त्रिहस्तोच्चानि पित्त-
१८ लमयानि दश पीठानि निर्म्ममे । तेषां निर्म्माणमित्थमभूत् तेषां
१९ क्षेत्राण्यासन् तानि क्षेत्राणि च शिराभि र्वेष्टितानि। अपरं शिरामध्य-
स्थितानां क्षेत्राणामुपरि सिंहगोकिरूवाकृतयश्चित्रिताः शिराणाञ्चो-
परिभागेऽपि तादृग् आसीत् अपरं सिंहानां गवाञ्चाधोऽधः सूक्ष्म-
२० कार्य्यस्य कति कति स्रज आसन् । एकैकस्य पीठस्य पित्तलमयानि
चत्वारि चक्राणि पित्तलमया अक्षदण्डाश्चासन् चतुर्षु कोणेषु च स्थापि-
तान्यवलम्बनान्यासन् तानि सिक्तान्यवलम्बनानि प्रक्षालनपात्रस्याधः
२१ स्थापितानि तेषाम् एकैकस्य पार्श्वे च स्रज आसन्। मूर्द्धमध्ये तदूर्द्ध्वे च
तस्य वदनं हस्तैकपरिमितं तच्च वदनं वर्त्तुलं स्तम्भाकृति सार्द्धहस्तपरि-
मितञ्च। तस्मिन् वदनेऽपि शिल्पकार्य्याण्यासन् तदीयक्षेत्राणि वर्त्तु-
२२ लानि नहि चतुष्कोणानि बभूवुः । अपरं क्षेत्राणाम् अधश्चत्वारि
चक्राण्यासन्। तेषां चक्राणाम् अक्षदण्डौ पीठेन समं निर्म्मितावा-
२३ स्ताम् एकैकं चक्रं सार्द्धहस्तोच्चं । रथचक्रमिव तेषां चक्राणामा-
२४ कृतिस्तेषाम् अक्षदण्डनेमिनाभिशलाकाः सर्व्वाः सिक्ताः । अपरम्
एकैकस्य पीठस्य चतुर्षु कोणेषु स्थापितानि चत्वार्य्यवलम्बनान्यासन्
२५ तान्यवलम्बनानि पीठेन समं निर्म्मितानि । एकैकस्य पीठस्य मूर्द्धार्द्ध-
हस्तोच्चो वर्त्तुलाकारश्च तत्पीठमूर्द्ध्नि तेन समं निर्म्मितान्यवलम्बनानि
२६ क्षेत्राणि च बभूवुः। अवलम्बनपृष्ठेषु क्षेत्रेषु च स्वपरिमाणविशिष्टाः
२७ किरूवाः सिंहास्तालवृक्षाश्च तदेष्टकाः स्रजश्च तेन लिलिखिरे । इत्थं
स तानि पित्तलमयानि दशपीठान्येकसेचन एकपरिमाणान्येकाका-
राणि च निर्म्ममे ।

२८ अनन्तरं स पित्तलमयानि दशप्रक्षालनपात्राणि निर्म्ममे तेषाम्
एकैकं पात्रं चतुर्हस्तपरिमितम् एकैकं पात्रं चत्वारिंशद्वाताख्य-
परिमाणानि दधार । एकैकपीठोपरि तेषाम् एकैकं प्रक्षालनपात्रं

निदधे। अपरं स मन्दिरस्य दक्षिणपार्श्वे पञ्चपीठानि वामपार्श्वे च पञ्च ३९
पीठानि निदधे अपरं गृहस्य दक्षिणपार्श्वे दक्षिणकोणात् पूर्व्वदिशि
सागररूपं भाजनं स्थापयामास।

हूरमः प्रक्षालनभाजनानि दर्व्वीः कुण्डानि च निर्म्ममे। इत्थं नृपतेः ४०
सुलेमन आज्ञातः परमेश्वरीयमन्दिरस्य कृते हूरमेण यावन्ति शिल्प-
कार्य्याणि कर्त्तव्यानि तानि सर्व्वाणि समाप्तानि। इत्थं द्वौ स्तम्भौ द्वयोः ४१
स्तम्भयोरुपरि स्थितौ वर्त्तुलाकारौ द्वौ मूर्द्धानौ स्तम्भद्वयोपरिस्थमूर्द्धद्वया-
च्छादके द्वे जाले, तज्जालद्वयवेष्टनार्थं चतुःशतानि दाडिम्बाकारा अर्थतः ४२
स्तम्भद्वयोपरिस्थयो र्वर्त्तुलाकारमूर्द्धोराच्छादकजालद्वयस्यैकैकस्य जालस्य
कृते दाडिम्बाकाराणां द्वे श्रेणी, दशपीठानि पीठोपरिस्थानि दश- ४३
प्रक्षालनपात्राणि, सागररूपं पात्रमेकं तत्सागरपात्रस्याधो द्वादशगाव- ४४
स्तदन्यद् ऋजीषाणि दर्व्वः कुण्डान्येतानि तदन्यानि च यावन्ति भाज- ४५
नानि सुलेमन आज्ञातः परमेश्वरीयमन्दिरस्य कृते हूरमेण निर्म्मि-
तानि तानि सर्व्वाणि तेजोमयपित्तलै र्निर्म्मितानि। राजा यर्दनस्य ४६
प्रान्तरे सुक्कोतसर्त्तनयो र्मध्यस्थितायां घनमृदि भूमौ सिक्तधातुना
तानि निर्म्मापयामास। अपरं भाजनानाम् अतिबाहुल्यकारणात् ४७
सुलेमान् तानि न मापयामास, ततस्तेषां पित्तलानां परिमाणं न
ज्ञेयं। अपरं सुलेमान् परमेश्वरीयमन्दिरस्याभ्यन्तरे स्थापनार्थम् एतानि ४८
सकलवस्तूनि चकार स्वर्णवेदी दर्शनीयपूपयाहि सुवर्णासनम्, ईश्व-
रीयवाक्यस्थानस्य सम्मुखे दक्षिणे पञ्च वामे च पञ्च निर्म्मलसुवर्णमया ४९
दीपवृक्षास्तदीयानि सुवर्णमयानि पुष्पाणि प्रदीपा वर्त्तिकाच्छेदन-
कर्त्तर्य्यश्च, निर्म्मलसुवर्णमया भ्राष्ट्राश्छुरिका ऋजीषाणि खेदन्यो वह्निपा- ५०
त्राणि च, अन्तःस्थितस्य महापवित्रस्थानस्य मन्दिरस्य कवाटानां कृते
हेममयाः कजाश्च। इत्थं परमेश्वरस्य गृहार्थं सकलकार्य्याणि सुलेमना ५१
समापितानि। ततः परं सुलेमान् स्वतातेन दायूदा पवित्रीकृतानि
सकलद्रव्याणि तन्मध्यम् आनिनाय। स तानि रजतहेमपात्राणि परमे-
श्वरीयमन्दिरे स्थितेषु धनागारेषु निदधे।

८ अष्टमोऽध्यायः।

१ मन्दिरोत्सर्गकरणोत्सवः १२ सुलेमन आशीर्वचनकथनं २२ सुलेमनः प्रार्थनाकथनं ६२ बलिदानाद्युत्सर्जनं।

१ अपरं सुलेमान् इस्रायेलीयलोकानां प्राचीनान् वंशानां मुख्यनरां-
श्चार्थत इस्रायेल्वंशानां प्रधानपितृलोकान् परमेश्वरीयनियममञ्जूषाया
दायूद्नगरात् सियोनात् स्थानान्तरीकरणार्थं यिरूशालमे राज-
२ समीपे संजग्राह। तत एथानीमनाम्नि सप्तममास उत्सवसमय इस्रा-
३ येलीयलोकाः सर्व्वे सुलेमनो नृपतेः समीपे मिलितवन्तः। अनन्तरम्
इस्रायेलीयानां प्राचीनगणे समुपस्थिते याजका मञ्जूषां स्थानान्तरं निन्युः।
४ परमेश्वरस्य मञ्जूषा समाजावास आवासस्यान्तःस्थानि सकलपवित्र-
भाजनानि चैतानि सर्व्वाणि स्थानान्तरं निन्यिरे। याजका लेवीयाश्च
५ तानि निन्युः। ततः सुलेमान् नृपतिस्तस्य समीपे सम्मिलिता इस्राये-
लीयलोकाश्च मञ्जूषायाः सम्मुखं गत्वा बहुत्वकारणाद् असङ्ख्यकान् अप-
६ रिमेयांश्च मेषान् गाश्चोत्ससृजुः। अनन्तरं याजका मन्दिरमध्य ईश्वरस्य
वाक्यस्थानाख्येऽतिपवित्रस्थाने किरूवयोः पक्षाणामधो निरूपितस्थाने
७ परमेश्वरस्य नियममञ्जूषां निदधिरे। तौ किरूवौ स्वपक्षान् मञ्जूषायाः
स्थानोपरि विस्तारयामासतुरतस्तौ किरूवौ मञ्जूषां तदीयवहनदण्डौ
८ चाच्छादयामासतुः। तयो दण्डयो दीर्घत्वाद् तयोरग्राणीश्वरस्य वाक्य-
स्थानस्याग्रभागे पवित्रस्थानाद् दृश्यानि बभूवुः किन्तु वहिर्दृश्यानि
९ न बभूवुः, तान्यद्यापि तत्र स्थाने विद्यन्ते। तत्र मञ्जूषायाम् अन्यत्
किमपि नासीत्, केवलं मिसरदेशाद् इस्रायेलीयवंशानां निर्गमन-
काले परमेश्वरस्तैः सार्द्धं यं नियमं चक्रिवान् तदीयपत्रयुक्तं प्रस्तरफल-
कद्वयं तन्मध्य आसीत् यतो होरेवे मूसास्तत् मञ्जूषामध्ये स्थापित-
१० वान्। अपरं पवित्रस्थानस्य मध्याद् याजकानां वहिर्गमनकाले पर-
११ मेश्वरस्य मन्दिरं पयोदेन तादृक् पर्य्यपूर्य्यत यद् याजकाः पयोदात्
सेवनम् अनुष्ठातुम् असमर्था बभूवुः, यतः परमेश्वरस्य तेजः परमेश्वरीयं
मन्दिरं पूरयामास।
१२ तदानीं सुलेमान् व्याजहार परमेश्वरो घोरान्धकारे वसतीति तेन
१३ निगदितं। तवाधिष्ठानार्थं मन्दिरमेकं मया निरमायि तव नित्यवा-
१४ सार्थं तन्निवेशनं सृष्टं। अपरम् इस्रायेलीयानाम् अखिले समाजेऽव-
तिष्ठमाने राजा स्वास्यं परावृत्येस्रायेलीयानां कृत्स्नं समाजम् आशिषं
१५ जगाद। राजा कथयामास, इस्रायेलः प्रभुः परमेश्वरो धन्यः; स
मम पित्रे दायूदे स्ववक्त्रेण यत् प्रतिज्ञातवान् तत् स्वकरेण साधित-
१६ वान्, यथा, मम प्रजागणम् इस्रायेलीयवंशं यस्मिन् दिने मिसरदे-

शात् मया वहिष्कृतस्तद्दिनम् आरभ्याहम् अत्र स्थाने मम नाम्नोऽधि-
ष्ठानार्थं मन्दिरं निर्म्मातव्यमित्यभिप्रायेणेस्रायेलीयानां कस्यापि वंशस्य
किमपि नगरं नाभिरोचितवान् किन्तु मदीयप्रजागणस्येस्रायेलीयवंश-
स्याधिपतित्वाय दायूदम् अभिरोचितवान्। अपरम् इस्रायेलः प्रभोः १७
परमेश्वरस्य नाम्ने मन्दिरमेकं निर्म्मातुं मत्तातो दायूद् मनो निदधे। १८
किन्तु परमेश्वरो मम तातं दायूदं वाक्यमिदं जगाद, त्वं मम नाम्ने
मन्दिरं निर्म्मातुं मनो निरधत्था इति तव मनोगतं भद्रमेव। तथापि १९
तन्मन्दिरं त्वया न निर्म्मातव्यं किन्तु तवौरसेनात्मजेन मम नामार्थकं
तन्मन्दिरं निर्म्मातव्यम् इति परमेश्वरेण यद् वचनं प्रतिज्ञातं तदेव २०
साधितं, ततः परमेश्वरस्य वाक्यादहं निजतातस्य दायूदः पदं प्राप्येस्रा-
येलीयराजसिंहासन उपाविशम् इस्रायेलः प्रभोः परमेश्वरस्य नाम्ने
मन्दिरम् इदं निरमापयञ्च। परमेश्वरेणास्मत्पूर्व्वपुरुषाणां मिसरदेशाद् २१
वहिष्करणकाले तैः सह यो नियमोऽकारि तदीयपत्रस्याधारो या
मञ्जूषा तस्याः कृतेऽपि तत्र मन्दिरे स्थानमेकं मया निरूपितं।
अनन्तरं सुलेमान् इस्रायेलः कृत्स्नसमाजस्य साक्षात् परमेश्वरस्य २२
होमवेद्याः समीपम् उपस्थायाकाशं प्रति करौ प्रसार्य्य व्याजहार, हे २३
इस्रायेलः प्रभो परमेश्वर, ऊर्द्धस्थिते स्वर्गेऽधःस्थितायां पृथिव्याञ्च तव
तुल्यो नापरः कश्चनेश्वर आस्ते। तव यावन्तो दासाः सर्व्वान्तःकरणैस्तव
चक्षुर्गोचरे चरन्ति तान् प्रति स्वनियमं स्वप्रीतिञ्च साधयसि। विशे- २४
षतः स्वदासाय दायूदे त्वं यत् प्रत्यशृणोस्तद् असाधयः स्ववक्त्रेणोक्तं
वचनं स्वकरेण सफलम् अकार्षीश्च। हे इस्रायेलः प्रभो परमेश्वर, २५
स्वदासाय मत्ताताय दायूदे भवता यत् प्रतिज्ञातं तदधुना साध्यतां
यथा, मम चक्षुर्गोचरे त्वं यद्वद् अचरस्तद्वत् तव सन्तानाश्चेत् स्वस्व-
मार्गमधि सावधानाः सन्तो मम दृष्टिगोचरे चरन्ति तर्हीस्रायेली-
यराजसिंहासनोपवेष्टृपुरुषस्याभावस्तव वंशे कदापि न भविष्यतीति।
हे इस्रायेल ईश्वर, स्वदासाय मदीयजनकाय दायूदे भवता यत् २६
कथितं तत् स्थिरं भवत्विति प्रार्थयेऽहं। किन्त्वीश्वरः पृथिव्यां निव- २७
त्स्यतीति किं सत्यं भवेत्? पश्य स्वर्गः स्वर्गोपरिस्थः स्वर्गश्च भवन्तं न
धरति ततो मन्निर्म्मितं मन्दिरमिदं किं धरेत्? हे मम प्रभो परमेश्वर २८
त्वं स्वदासस्य प्रार्थनां निवेदनञ्च गृहाण तव दासेनाद्य या काकूक्तिः
प्रार्थना च क्रियते सा भवता श्रूयतां। अत्र स्थाने मम नाम स्थास्यतीति २९

वाक्यं यत् स्थानमिदं मन्दिरमिदमधि भवतोक्तं तत् स्थानं प्रति भवता
३० स्वनयने उन्मील्यैतत्स्थानोद्देश्या भवतो दासस्य प्रार्थना श्रूयतां। एतत्-
स्थानम् उद्दिश्य प्रार्थयमानेन भवद्दासेन भवत्प्रजागणेनेस्रायेलीयवंशेन
च या प्रार्थना क्रियते भवान् तां शृणोतु। त्वं स्वकीयस्वर्गनिवासे तिष्ठन्
तां निशामय निशम्य क्षमस्व च।
३१ केनचित् स्वसमीपवासिनः कस्मिंश्चिद् अपराद्धे लोका यदि शपथं
निश्चित्य तेन तं शापयन्ति स च शपथो यदि मन्दिरेऽस्मिन् तव वेद्याः
३२ समीपम् उपतिष्ठति तर्हि त्वं स्वर्गान्निशम्य कर्त्तव्यं कुर्व्वन् निजदासान्
विचारयार्थतो दोषिणां सदोषं कृत्वा तस्य कर्म्मणः समुचितं फलं तस्मै
वितर निर्द्दोषस्य निर्द्दोषं कृत्वा तस्य निर्द्दोषत्वस्य फलं तस्मै विश्राणय।
३३ अपरं तव विरुद्धं पातककरणाद् रिपुभिः पराजितास्तवेस्रायेलीय-
प्रजागणा यदि त्वां प्रति परावृत्य तव नाम स्तुवन्तस्तव साक्षात् मन्दिरे
३४ ऽस्मिन् विनयन्ते प्रार्थयन्ते च तर्हि त्वं स्वर्गान्निशम्य तवेस्रायेलीयलो-
कानां पापं क्षमस्व तेषां पूर्व्वपुरुषेभ्यो यमिमं देशं दत्तवानसि तं देशं
पुनर्व्वारं तान् आनय च।
३५ अपरं तव विरुद्धं तेषां पातककरणाद् गगणे रुद्धीभूते यदि वृष्टि र्न
भवति तेन ते यदि स्थानस्यैतस्य दिशि प्रार्थयमानास्तव नाम स्तुवन्ति
३६ त्वया तेषां क्लेशो जात इति विविच्य स्वपापेभ्यः परावर्त्तन्ते च, तर्हि
त्वं स्वर्गान्निशम्य तव दासानाम् इस्रायेलीयलोकानां पापं क्षमस्व गन्तव्यम्
उत्तममार्गञ्च तान् आदिश तव प्रजागणाय यं देशं भोगार्थं दत्तवानसि
तस्मिन् देशे वृष्टिं कारय च।
३७ अपरं देशे दुर्भिक्षे जाते महामार्य्यां वा जातायां शस्यानां वा
शुष्कत्वे म्लानत्वे वा जाते शुकादिपतङ्गेषु वा जातेषु देशस्थनगरेषु वा
३८ रिपुभिरवरुद्धेषु कस्यांश्चित् मार्य्यां पीडायां वा बलवत्यां तवेस्रायेलीय-
प्रजानां मध्ये केनचित् मानवेन निजमनःपीडां बुद्ध्वा यदि काचित्
प्रार्थना किञ्चन निवेदनं वा क्रियते मन्दिरस्यास्य दिशि च करद्वयं
३९ प्रसार्य्यते, तर्हि त्वं निजनिवासात् स्वर्गान्निशम्य क्षमित्वा कर्त्तव्यं कुरु,
त्वमेव सर्व्वमनुजानाम् अद्वितीयोऽन्तर्य्याम्यसि ततस्तस्य मनुष्यस्य यम्
आन्तरिकभावं जानासि तदनुसारेण तस्याचरणस्य समुचितं फलं तस्मै
४० देहि। तथा कृते त्वं तेषां पूर्व्वपुरुषेभ्यो यं देशं दत्तवानसि तन्मध्ये
ते यावज्जीविष्यन्ति तावत् त्वत्तो भेष्यन्ति।

अपरं तव महानाम्नः सबलकरस्य प्रसारितबाहोश्च वार्त्ता भिन्न- ४१
जातीयैरपि निशामयितव्या; ततस्तवेस्रायेलीयवंशे न जातः कश्चिन्नरो ४२
यदि तव नामार्थं दूरदेशाद् आगत्य मन्दिरस्यास्य दिशि प्रार्थनां कुरुते
तर्ह्यपि त्वया स्ववासस्थानात् स्वर्गान्निशम्य तस्य भिन्नजातीयस्य नरस्य ४३
प्रार्थनानुसाराद् यद्यत् कर्त्तव्यं तत् क्रियतां, तथा कृते पृथिवीस्थजा-
तीयाः सर्व्वे तव नाम्नो ज्ञानं लब्ध्वा तवेस्रायेलीयप्रजागणा इव त्वत्तो
भेष्यन्ति मन्निर्म्मितमिदं मन्दिरं तव नाम्ना विख्यातमेतदपि ज्ञास्यन्ति।

अपरं युद्धयात्रार्थं त्वया प्रेषितास्तव लोका यदि रिपुभिः सह योद्धुं ४४
वहि र्गत्वा त्वयाभिरुचितं नगरं तव नामार्थं मया निर्म्मितं मन्दिरञ्चो-
द्दिश्य परमेश्वरस्य साक्षात् प्रार्थनां कुर्व्वते, तर्हि त्वं स्वर्गात्तेषां प्रार्थनां ४५
विनयञ्च निशम्य तेषां विचारस्य निष्पत्तिं कुरु। अपरं ते यदि तव ४६
विरुद्धं पापं कुर्व्वन्ति (यतः पापं न करोत्येवम्भूतः कोपि मानवो नास्ति)
त्वया च तेभ्यः क्रुद्धा रिपूणां करेषु समर्पितास्ते यदि विजेतृभि र्दूरस्थं
निकटस्थं वा रिपुदेशं नीयन्ते, ततः परं यस्मिन् देशे ते नीतास्तत्र यदि ४७
मनसि स्वदशां चिन्तयित्वा परावृत्य तत्र विजेतॄणां देशे त्वाम् उद्दिश्य
प्रार्थयमाना अस्माभिरपराद्धं पातकं दुष्टत्वञ्च कृतमिति वदन्ति, इत्थं ४८
ते यदि स्वविजेतॄणां रिपूणां देशे सर्व्वान्तःकरणैः सर्व्वप्राणैश्च सह त्वां
प्रति परावर्त्तन्ते तेषां पूर्व्वपुरुषेभ्यस्त्वया दत्तं स्वकीयदेशं त्वयाभिरुचितं
नगरं तव नाम्ने मया निर्म्मितं मन्दिरञ्चोद्दिश्य तव साक्षात् प्रार्थनां
कुर्व्वते च, तर्हि त्वं स्ववासस्थानात् स्वर्गात् तेषां प्रार्थनां विनयञ्च निशम्य ४९
तेषां विचारस्य निष्पत्तिं कुरु, तव विरुद्धं कृतपापैस्तव प्रजागणै ५०
र्यद्यद् अपराद्धं तत्सर्व्वं क्षमस्व तेषां विजेतारश्च यथा तान् प्रति दयां
कुर्य्युस्तथा तान् करुणायुक्तान् कुरु च। यतस्तएव तव प्रजास्त्वया लौह- ५१
कुण्डात् मिसरदेशाद् आनीतास्त्वयोपार्जितलोकाश्च। अतो हेतोस्त्वा- ५२
यं दासस्तवेस्रायेलीयप्रजागणश्च यम् अनुनयं कुरुते तस्मिन् भवता
दृष्टिरारोप्यतां याञ्च प्रार्थनां भवन्तम् उद्दिश्य कुरुते सा निशम्यतां।
हे प्रभो परमेश्वर, अस्मत्पूर्व्वपुरुषाणां मिसरदेशाद् वहिष्करणकाले ५३
भवान् स्वदासेन मूससा यद्वद् गदितवान् तद्वद् भवानेवास्मान् स्वोपा-
र्ज्जितत्वे नियोक्तुं पृथिवीस्थाभ्यः सर्व्वजातिभ्यो विशेषितवान्।

सुलेमान् परमेश्वरस्य समीपे कृत्स्नाम् एतां प्रार्थनां निवेदनञ्च ५४
समाप्य परमेश्वरस्य होमवेद्याः सम्मुखे जानुपातनाद् उत्थाय गगणस्य

५५ दिशि हस्तौ प्रसार्य्यावतिष्ठमानः सन् उच्चैःस्वरेण वाक्यैरेतैरिस्रायेली-
५६ यानां कृत्स्नं समाजम् आशिषं जगाद, परमेश्वरो धन्यो भवतु, यतः
स यद्वत् कथितवान् तद्वदेव स्वकीयायेस्रायेलीयप्रजागणाय विश्रामं
व्यतरत्। स स्वदासेन मूससा यावन्ति मङ्गलवाक्यानि गदितवान् तेषां
५७ सर्व्वेषां मध्य एकमपि निष्फलं नाभवत्। अस्माकं प्रभुः परमेश्वरो
यादृग् अस्मत्पूर्व्वपुरुषाणां सहाय आसीत् तादृग् अस्माकमपि सहायो
५८ भवतु सोऽस्मान् न जहातु न वा त्यजतु। किन्त्वस्मत्पूर्व्वपुरुषास्तेन
यान्याज्ञाविधिविधानान्यादिष्टास्तानि वयं पालयन्तो यत् तस्य सर्व्व-
मार्गैश्चरेम तदर्थम् अस्माकम् अन्तःकरणानि स्वसमीपम् आकर्षतु।
५९ परमेश्वरस्य सम्मुखे यानीमानि वाक्यानि मया निवेदितानि तानि
दिवानिशम् अस्मत्प्रभोः परमेश्वरस्य सन्निधौ तिष्ठन्तु तेन च स्वदा-
सस्यैतस्य स्वकीयेस्रायेलीयप्रजागणस्य च विचारः प्रतिदिनं यथा कर्त्तव्य-
६० स्तथैव साध्यतां। ततः परमेश्वर एवाद्वितीय ईश्वरस्तदन्यः कोपी-
६१ श्वरो नास्तीति पृथिवीस्थैः सर्व्वजातीयैर्ज्ञास्यते। वयञ्चाद्यैव सर्व्वदा
यथा तस्य विधीन् आचरेम तस्याज्ञाश्च पालयेम तथास्मत्प्रभुं परमेश्वरं
प्रत्यस्माकं मनांसि स्थिराणि स्थास्यन्ति।
६२ अनन्तरं राजा तेन समं सर्व्व इस्रायेलीयलोकाश्च परमेश्वरस्य
६३ सम्मुखे बलिदानम् अनुतस्थुः। सुलेमना द्वाविंशतिसहस्राणि गावो
विंशतिसहस्राधिकं लक्षं मेषाश्च मङ्गलार्थकबलिरूपेण परमेश्वराया-
६४ दीयन्त, इत्थं राज्ञेस्रायेलीयलोकैश्च मन्दिरं पावितं। तस्मिन् दिवसे
परमेश्वरीयमन्दिरस्य सम्मुखस्थप्राङ्गणस्य मध्यदेशो राज्ञा पवित्रीकृतो
यतो होमार्थका बलयो निवेदितवस्तूनि मङ्गलार्थकबलीनां मेदांसि च
तत्रैव तेनोत्सृष्टानि यतो हेतोः परमेश्वरस्य सम्मुखे स्थिता पित्तलमयी
यज्ञवेदिः क्षुद्रत्वात् होमबलीन् निवेदितवस्तूनि मङ्गलार्थकबलीनां
६५ मेदांसि च धर्त्तुं नाशक्नोत्। तस्मिन् समये सुलेमान् तेन सह हमातस्य
प्रवेशस्थानमारभ्य मिसरदेशीयां सीमास्थसरितं यावत् सर्व्वेषाम् इस्रा-
येलीयलोकानां महासमाजस्य समाहद्वयम् अर्थतश्चतुर्दशदिनानि
६६ यावत् स्वप्रभोः परमेश्वरस्य साक्षाद् उटजोत्सवं चक्रे। अनन्तरम्
अष्टमे दिने लोका राज्ञा विसृष्टास्तम् आशिषं जगदुः। ततः परं
परमेश्वरेण स्वदासं दायूदं स्वप्रजागणम् इस्रायेलीयवंशञ्च प्रति यद्यत्
मङ्गलं कृतं तेन प्रफुल्लचित्ता हर्षिताश्च ते स्वं स्वं वासस्थानं जग्मुः।

९ नवमोऽध्यायः।

१ द्वितीयदर्शने जाते सुलेमना सार्द्धम् ईश्वरस्य नियमः १० सुलेमन्हीरमयोः परस्परम् उपायनदानं १५ नानानगराणां निर्म्माणं २० किनानीयप्रभृतीनां दासत्वस्य कथनं २४ फिरौणो दुहितु र्निजगृहगमनं २५ सुलेमनः सांवत्सरिकबलिदानादि २६ तस्य पोतानां कथनं।

परमेश्वरीयमन्दिरस्य राजप्रासादस्य च निर्म्माणे तदन्यानि यावन्ति १
निवेशनानि सुलेमनोऽभिलाषात् निर्म्मितानि तेषामपि निर्म्माणे समाप्ते
परमेश्वरो यादृग् गिबियोने सुलेमने दर्शनमददात् तादृग् द्वितीयवारं २
तस्मै दर्शनं ददौ। परमेश्वरस्तं जगाद त्वं मम साक्षाद् यां प्रार्थनां यच्च ३
निवेदनं कृतवान् तत् मया श्रुतं त्वञ्च मदीयनाम्नो नित्यस्थित्यर्थं यन्मन्दिरं निरमापयस्तदपि मया पवित्रीकृतं तत्रैव मम दृष्टि र्मनश्च
सर्व्वदा स्थास्यति। अपरं तव तातो दायूद् यादृक् चरितवान् तादृक् ४
त्वमपि यदि सिद्धमनसा सारल्येन च मम साक्षात् चरन् मया
यथादिष्टं तथैव कर्म्म करिष्यसि मम विधीन् आज्ञाश्च पालयिष्यसि
च, तर्हीस्रायेलीयराजसिंहासनोपविष्टपुरुषस्याभावस्तव वंशे कदापि ५
न भविष्यतीति मया तव तताय दायूदे यत् प्रतिज्ञातं तदनुसारात्
तवेस्रायेलीयराजसिंहासनं सदोन्नतं स्थास्यति। किन्तु यूयं युष्मद्वंशाश्च ६
यदि मत्तोऽपसृत्य मयादिष्टान् आज्ञाविधीन् न पालयिष्यथ, यदि
च विपथगामिनो भूत्वेतरदेवान् सेविष्यध्वे प्रणंस्यथ च, तर्हीस्रायेलीय- ७
वंशेभ्यो यो देशो मया दत्तस्तस्मात् त उत्पाटयिष्यन्ते यच्च मन्दिरं मम
नामार्थं पवित्रीकृतं तदपि मया स्वदृष्टिगोचराद् दवयिष्यते तेनेस्रायेलीयवंशः सर्व्वजातीयानां परिभाषणपरिहासयोरुदाहरणं भविष्यति।
ततो ये लोका एतस्य प्रांशुमन्दिरस्य सन्निधिना व्रजिष्यन्ति ते चमत्- ८
कृताः सन्तो निश्वसिष्यन्ति देशमेतं मन्दिरञ्च प्रति परमेश्वरः कुत एतादृशं कृतवान्? इति प्रक्ष्यन्ति च। तेन लोकाः प्रतिवक्ष्यन्ति लोकानामे- ९
तेषां पूर्व्वपुरुषा येन मिसरदेशाद् बहिरानीता इमे खेषां तं प्रभुं परमेश्वरं विहायेतरदेवान् आश्रित्य तान् प्राणमन् असेवन्त च तत्कारणात्
परमेश्वरस्तान् इत्थम् आपन्नामङ्गलान् कृतवान्।

परमेश्वरस्य मन्दिरं राजनिवेशनञ्चेमे द्वे वेश्मनी निर्म्मापयता सुले- १०
मना ये विंशतिवत्सरा यापितास्तेषु सोरीयराजो हीरमः सुलेमनो ११
यथाभिलषितं तथैव तम् एरसकाष्ठै र्देवदारुकाष्ठैः सुवर्णैश्चोपकृत-

वान् ततो हेतोः सुलेमान् हीरमाय गालीलप्रदेशस्थानि विंशतिं
१२ नगराणि व्यश्राणयत्। अतस्तेषु वत्सरेषु गतेषु हीरमः सुलेमना दत्तानि
तानि नगराणि द्रष्टुं सोराद् आजगाम किन्तु तानि तस्मै नारोचन्त ।
१३ ततः स जगाद हे मम भ्रातस्त्वयैतानि कीदृशानि नगराणि मह्यं
वितीर्णानि ? तत्कारणात् तस्य देशस्य काबूलो (ऽतुच्छिकर इति) नाम
१४ तेन कृतं तस्य तदेव नामाद्यापि विद्यते । हीरमो विंशत्यधिकशतकि-
क्कारपरिमितं हेम राज्ञे प्रेषयामास ।

१५ अथ सुलेमनः कारुनिबन्धस्य वृत्तान्तोऽयं । स निबन्धः परमेश्वरीयमन्दि-
रस्य स्वनिवेशनस्य मिल्लो यिरूशालमीयप्राचीरस्य हात्सोरस्य मगिद्दो
१६ गेषरस्य च निर्म्माणार्थं तेन सङ्गृहीतः । मिसरदेशीयो भूपतिः फिरौन्
युद्धेन तद् गेषरनगरं वशीकृत्य वह्निना दाहयित्वा तन्निवासिनः
किनानीयलोकान् निहत्य च स्वदुहित्रे सुलेमनो जायायै तद् ददिवान् ।
१७ अतस्तद् गेषरम् अधःस्थितं बैथोरोणं बालतं देशमध्यस्थे प्रान्तरे स्थितं
१८ तद्मोरं सुलेमनः कोषनगराणि रथनगराण्यश्वारोहिणां नगराणि
तदन्यद् यिरूशालमे लिबानोने कृत्स्नराष्ट्रे च यद्यन्निर्म्मापयितुं सुलेमान्
अभ्यलषत् तदपि, सर्व्वाण्येतानि यथाभिलाषं सुलेमना निर्म्मापितानि ।

२० इस्रायेलीयवंशाद् अपरवंशोद्भवा य इमोरीयहित्तीयपिरिषीयहि-
२१ व्वीययिबूषीयलोका अवशिष्टाः सन्त इस्रायेलीयवंशै विनंष्टुं न शेकिरे
तेभ्य उत्पन्नो देशे चावशिष्टो वंशः सुलेमना सङ्गृहीतोऽद्य यावद् दास-
२२ त्वापन्नकारुनिबन्धो ऽकारि । इस्रायेलीयवंशोद्भवाः केऽपि सुलेमना दासा
न चक्रिरे ते तस्य योद्धारो मन्त्रिणोऽध्यक्षा रथिनो रथाधिपतयो
२३ हयारोहिणश्च बभूवुः । सुलेमनः कर्म्माध्यक्षाणां मध्ये पञ्चाशदधिक-
पञ्चशतानि मुख्यनराः कर्म्मकारिणां कारुनिबन्धम् अशिषन् ।

२४ अपरं फिरौणो दुहिता दायूद्नगरात् स्वार्थं हर्म्यं तत्तस्याः कृते
राजा यन्निवेशनं निरमापयत् तत्राजगाम ततः परं स मिल्लुं निर्म्मा-
पयाञ्चकार ।

२५ सुलेमान् परमेश्वरस्य कृते यां होमवेदिं निर्म्मितवान् तस्यां प्रतिवर्षं
त्रीन् वारान् होमार्थकान् मङ्गलार्थकांश्च बलीन् अच्छेदयत् परमेश्वरस्य
सम्मुखे स्थितायां वेद्याञ्च धूपान् अज्वालयत् । इत्थं मन्दिरनिर्म्माणं तेन
समापितं ।

२६ अपरम् इदोमदेशे सूफाख्यसागरस्य तट एलतस्य पार्श्वे स्थितं यद्

इत्सियोनगेवरनामकं स्थानं तत्र सुलेमान् पोतान् निर्म्मापयामास।
तेषु पोतेषु हीरमः सुलेमनो दासैः सार्द्धं सागरकोविदान् स्वकीयान् २७
नियामकान् दासान् अप्रेषयत्। त ओफीरदेशं गत्वा तत्र विंशत्यधि- २८
कचतुःशतकिक्करपरिमितानि स्वर्णानि गृहीत्वा सुलेमनः समीपम्
आनयन्।

---

१० दशमोऽध्यायः।

१ शिवादेशीयराज्ञ्याः कथनं ११ हीरमस्य राज्ञः कथनं १४ सुलेमना सुवर्णमयफल-
कानां निर्म्माणं १८ सिंहासनस्य वर्णना २४ तस्य समीपे लोकानां समागमस्य रथा-
नाम् अश्वानाञ्चानयनस्य कथनं।

अपरं परमेश्वरस्य नामार्थं सुलेमनः कीर्त्तिः शिवादेशस्य महिष्या- १
श्रूयत ततः सा प्रवह्लिकाभिस्तं परीक्षितुम् आजगाम। सा सुगन्धिद्रव्य- २
प्रचुरस्वर्णमणिवाहिनां महाङ्गानां निवहेन महासमारोहेण चाहता
यिरूशालमम् आगच्छत् सुलेमानम् उपस्थाय च सर्व्वं स्वमनोगतमधि
तं समभाषत। ततः सा यद्यद् अपृच्छत् तत् सर्व्वं सुलेमान् तां जगाद, ३
तन्मध्ये नृपेणागम्यं किमपि वाक्यं नासीत् स तां सर्व्वमेव ज्ञापितवान्।
अतः सुलेमनो ज्ञानं तन्निर्म्मितं मन्दिरं तस्य भोजनासनस्थभक्ष्यद्रव्याण्य- ४
मात्यानां परिषद् परिचारकानां श्रेणीवेशौ पानपात्रवाहिगणः पर- ५
मेश्वरस्य मन्दिरे तस्यारोहणञ्चैतानि सर्व्वाणि दृष्ट्वा सा शिवादेशस्य
महिषी हतज्ञाना बभूव। सा तु राजानं जगाद, भवतः कर्म्माणि ६
ज्ञानञ्चाधि या किंवदन्ती स्वदेशे मयाश्रावि सा सत्यैव। किन्त्वहं ७
यावदागत्य स्वनेत्राभ्यां सर्व्वं नापश्यं तावत् तां जनश्रुतिम् असत्याम्
अमन्ये, किन्तु पश्चार्द्धमप्यहं न श्रुतवती। भवतो ज्ञानम् उत्तमत्वञ्च
मच्छ्रुतां किंवदन्तीम् अतिशेते। धन्या भवतो नरा धन्या भवतो भृत्या ८
यतस्ते नित्यं भवतः साक्षात् तिष्ठन्तो भवतो ज्ञानालापं शृण्वन्ति।
धन्यो भवतः प्रभुः परमेश्वरो यतः स भवति तुष्टेस्रायेलीयराजसिंहा- ९
सने भवन्तम् उपावेशयत्। परमेश्वरो नित्यम् इस्रायेलवंशे प्रीयत
इतिकारणाद् भवान् यन्न्यायं धर्म्मञ्च समाचरेत् तदर्थं स भवन्तं
राज्याभिषिक्तम् अकरोत्। सा तु राज्ञे विंशत्यधिकशतकिक्करपरिमि- १०
तानि सुवर्णानि प्रचुराणि सुगन्धिद्रव्याणि मणींश्च ददौ। शिवादेशस्य

राज्ञी सुलेमने नृपतये यादृशानि सुगन्धिद्रव्याण्यददात् तादृशानि सुग-
न्धिद्रव्याणि बाहुल्यरूपेण तत् स्थानं पुनः कदापि नानीतानि।
११ अपरं हीरमस्य यैः पोतैरोफीरदेशात् सुवर्णान्यानीयन्त तैः प्रचु-
राणि मलयजकाष्ठानि मणयश्च तस्माद् ओफीरदेशाद् आनीयन्त।
१२ राजा तै र्मलयजकाष्ठैः परमेश्वरस्य मन्दिरस्य राजप्रासादस्य च
निमित्तं चुद्रस्तम्भानि गायकानाञ्च कृते वल्लकीः वंशादीनि यन्त्राणि
च निर्म्मापयामास। तादृशानि मलयजकाष्ठान्यद्य यावत् पुन र्नानीतानि
१३ न दृष्टानि वा। अनन्तरं शिबाया महिष्याः प्रार्थनातस्तस्याः सर्व्वो
मनोरथः सुलेमना राज्ञा साधितस्तदपराण्युपायनान्यपि सुलेमनो
राज्ञो वदान्यत्वात् तया लब्धानि, ततः परं सा स्वभृत्यगणेन सार्द्धं
स्वदेशं परावृत्य जगाम।
१४ अनन्तरं सार्थवाहगणाद् वाणिजगणाद् वशीभूतनृपगणात् प्रदेशा-
१५ ध्यक्षगणाच्च सुलेमान् यानि धनान्यलभत, तानि विना संवत्सरे
षट्षष्ठ्यधिकषट्शतकिक्करपरिमितानि हेमानि सुलेमनः समीपं समा-
१६ गतानि। ततः सुलेमान् नरपतिस्ताडितसुवर्णै र्द्वे शते वर्त्तुलाका-
रफलकानि निर्म्मापयामास तेषामेकैकस्मिन् फलके षट्शतशेकल-
१७ परिमितं सुवर्णं प्रयुक्तं। अपरं स ताडितसुवर्णैस्त्रीणि शतानि
चर्म्माणि निर्म्मापयाञ्चकार तेषामेकैकस्मिन् चर्म्मणि त्रिसेटकपरिमितं
सुवर्णं प्रयुक्तं। अनन्तरं राजा लिवानोनारण्यगृहे तानि निदधे।
१८ अनन्तरं राजा दन्तिदन्तमयं सिंहासनमेकं निर्म्मापयामास तच्चो-
१९ त्तमसुवर्णै र्मण्डयामास। तस्य सिंहासनस्य षट् सोपानान्यासन् सिं-
हासनस्योर्द्ध्वभागश्च पश्चात् वर्त्तुलाकार आसीत् उपवेशनीयस्थानस्य
पार्श्वयोश्च हस्ताकारे अवलम्बने आस्तां तयोश्चावलम्बनयोरग्रे द्वौ
२० सिंहावतिष्ठतां। तेषु षट्सोपानेषु पार्श्वयो र्द्वादश सिंहा अतिष्ठन्
२१ एतादृशं सिंहासनं कस्मिंश्चिद् राष्ट्रे न निरमायि। सुलेमनो नृपतेः
सर्व्वाणि पानभाजनानि हेममयान्यासन् तद्वत् लिवानोनारण्यगृहे
स्थितानि सर्व्वाणि भाजनानि निर्म्मलसुवर्णमयान्यासन् रजतमयं
किञ्चन भाजनं नासीत्। सुलेमनो राजत्वसमये रजतानां किमपि
२२ मूल्यं नासीत्। यतो हीरमस्य पोतैः सार्द्धं राज्ञोऽपि तर्शीशगामी पोत-
निवहः समुद्र आसीत्। वर्षत्रयात् परं वारमेकं स तर्शीशगामी
पोतनिवह आगत्य हेम रजतम् इभदन्तान् कपीन् शिखिनश्चानयत्।

अनेन प्रकारेण वित्तविद्याभ्यां सुलेमान् नरपति र्मेदिनीस्थानाम् इतरेषां २३
सकलभूपतीनां प्रधानो बभूव।
ईश्वरेण सुलेमनो मनसि यत् ज्ञानं निहितं तस्य तज्ज्ञानस्य २४
वचांसि श्रोतुं मनुजाः सुलेमानं साक्षात् कर्त्तुम् अयतन्त। ते च प्रति- २५
वर्षं स्वं स्वम् उपायनम् अर्थतो रजतमयानि हेममयानि च भाजनानि
वसनान्यस्त्राणि सुगन्धिद्रव्याणि हयान् अश्वतरांश्च समानिन्युः।
अनन्तरं सुलेमान् स्यन्दनानि हयारोहिणश्च संजग्राह तस्य चतुः- २६
शताधिकसहस्रं रथा द्वादशसहस्राणि हयारोहिणश्चासन् ते च
तेन रथनगरेषु यिरूशालमे च राजनिकटे निदधिरे। राजा यिरू- २७
शालमे बाहुल्यकारणाद् रजतानि पाषाणवद् एरसकाष्ठानि च प्रान्त-
रस्थोडुम्बरेन्धनवत् साधारणानि चकार। सुलेमनो हया मिसरदेशाद् २८
आनीयन्त राजवणिजाम् एकैकेन निवहेनैकैको हयनिवहो मूल्येना-
लभ्यत। तेन मिसरदेशाद् आनीतस्यैकस्य रथस्य मूल्यं षट्शतानि २९
रजतमुद्रा हयस्यैकस्य च मूल्यं सार्द्धशतं मुद्रा इत्यनेन मूल्येन ते
हित्तीयानाम् इमोरीयानाञ्च भूपतीनां कृते समानिन्यिरे।

११ एकादशोऽध्यायः।

१ योषिद्भिः सुलेमनो देवतापूजनं ९ तं प्रति परमेश्वरेण तिरस्करणं १४ तस्य रिपो र्हददस्य कथनं २३ तस्य रिपो रिषोणस्य कथनं २६ तस्य रिपो र्यारबियामस्य कथनं ४१ सुलेमनो मरणकथनञ्च।

सुलेमान् नरपतिः फिरौणो दुहितरं विना बह्वीष्वितरदेशीया- १
स्वर्थतो मोयाबीयाम्मोनीयेदोमीयसीदोनीयहित्तीयवंशीयासु योषित्स्व-
प्रीयत। यूयं तेषां मध्यं मा गच्छत तानपि युष्माकं मध्यम् आगन्तुं मानु- २
जानीत यतो हेतोस्ते युष्माकं मनांसि स्वदेवान् प्रत्यवश्यम् आक्रक्ष्य-
न्तीति वाक्यं यानधि परमेश्वरेणोक्तं तादृशेष्वितरजातीयेषु सुलेमान्
प्रेमार्थम् आसज्यत। तस्य सप्तशतानि महिष्यस्त्रीणि शतानि उपपत्न्य- ३
श्चासन् तास्तु तदीयं मनो विपथे समाकर्षन्। ततः सुलेमनो वार्द्ध- ४
क्यकाले तस्या मनसि स्वयोषिद्भिरितरदेवानाम् अनुगमनाय समा-
कृष्टे तस्य तातस्य दायूदोऽन्तःकरणं यादृक् स्वप्रभुं परमेश्वरं प्रति
सरलमासीत् तस्यान्तःकरणं तादृक् सरलं न तस्थौ। किन्तु सुलेमान् ५
सीदोनीयानाम् अस्तारोताख्याया देव्या अम्मोनीयानां मिल्कमाख्यस्य

६ दृष्णदेवस्य चानुगामी बभूव। अनेन प्रकारेण सुलेमान् परमेश्वरस्य
साक्षात् पातकमाचरत् स निजताता दायूद् इव सर्व्वतोभावेन परमेश्व-
७ रस्यानुगामी न बभूव। तस्मिन् काले सुलेमान् मोयाबीयानां किमोशा-
ख्यस्य दृष्णदेवस्य कृते ऽम्मोनीयानां मोलकाख्यस्य दृष्णदेवस्य कृते च
८ यिरूशालमस्य सम्मुखस्थे पर्व्वते भूगुस्थानं निर्म्मापयामास। तस्य सर्व्वा-
साम् इतरजातीययोषितामनुरोधात् तेन तथैव कृते ताः स्वकीयान्
इष्टदेवान् उद्दिश्य धूपान् अज्वालयन् बलिदानञ्चाकुर्व्वन्।
९ इस्रायेलो यः प्रभुः परमेश्वरो वारद्वयं सुलेमने दर्शनमददात् तं
१० विहाय तस्य मनो विपथाकृष्टमभवत् यस्यादेशेन च स इतरदेवानाम्
अनुगमनात् निवारितस्तस्य परमेश्वरस्य तमादेशं स लङ्घितवान्
११ एतस्मात् कारणात् परमेश्वरः सुलेमानं प्रति चुकोप। अतः परमेश्वरः
सुलेमानं जगाद कर्म्मैतत् त्वया कृतं मयादिष्टनियमविधाने त्वया
लङ्घिते चेतिहेतो मया राजत्वं त्वत्तोऽपहारिष्यते तव दासाय दास्यते
१२ च। किन्तु तव तातस्य दायूदोऽनुरोधात् तव जीवनकाले तन्मया
१३ न करिष्यते तव सुतस्य करात् राजत्वम् अपहारिष्यते। अनन्तरं मम
दासस्य दायूदो ममाभिरुचितस्य यिरूशालमनगरस्य चानुरोधान्मया
कृत्स्नं राष्ट्रं नापकृष्य वंश एकस्तव पुत्राय दास्यते।
१४ अनन्तरं परमेश्वरः सुलेमनो विरुद्धम् इदोमीयहददनामानं वैरि-
णम् एकम् उदस्थापयत् स राजवंशोद्भव आसीद् इदोमदेशे च न्यव-
१५ सत्। इदोमदेशे दायूदोऽवस्थितिसमये सेनापति र्योयावो हतलोकान्
१६ श्मशाने स्थापयितुं गत्वेदोमीयानां सर्व्वपुंसो हतवान्। योयाव इस्राये-
लीयाः सर्व्वे लोकाश्चेदोमीयानां सर्व्वपुरुषाणां हननं यावत् षण्मासान्
१७ तत्रावातिष्ठन्त। किन्तु स हददस्तेन सहितास्तत्तातस्य भृत्यानां मध्ये
कतिपया इदोमीयलोकाश्च मिसरदेशगमनाय पलायन्त तदानीं हददः
१८ क्षुद्रो बालक आसीत्। ते तु मिदियनात् प्रस्थाय पारणं प्रापुः।
अनन्तरं पारणस्थान् कतिपयान् लोकान् सङ्गिनः कृत्वा मिसरदेशं
गत्वा मिसरीयराजस्य फिरौणः साक्षाद् उपतस्थिरे स च हददाय निवे-
१९ शनं ददौ वृत्तिं निरूपयामास भूमिं विततार च। ततः फिरौन् हददे
ऽतीव तुष्टः स्वभार्य्यायास्तह्पिनेषाख्याया महिष्या भगिनीं तं विवा-
२० हयामास। अपरं तह्पिनेषाया भगिन्यां तस्य गिनुवतनामके पुत्रे
जाते तह्पिनेषा फिरौणः प्रासादे तमपालयत् ततः स गिनुवतः

फिरौणः सुतानां मध्ये फिरौणो निवेशने न्यवसत्। अपरं दायूद् स्वपि- २१
तृगण इव महानिद्रां गतः सेनापति र्योयावश्च मृत इति वार्त्तां मिस-
रदेशे श्रुत्वा हददः फिरौणं जगाद भवान् मां विसृजतु मया स्वदेशो
गन्तव्यः। ततः फिरौन् तं पप्रच्छ मम समीपे तव कस्यापि वस्तुनोऽभाव २२
आस्ते यत्त्वं स्वदेशगमनाय यतसे? स उक्तवान् कस्याप्यभावो नास्ति
तथापि भवान् मां विस्रष्टुम् अर्हति।

अपरम् ईश्वरः सुलेमनो विरुद्धम् इलियादस्य पुत्रं रिषोणं वैरिणम- २३
प्युदस्थापयत्। स स्वप्रभोः सोवान्टपते र्हददेषरस्य समक्षात् पलायाञ्चक्रे।
दायूदा तस्य नृपते र्लोकानां हननकाले स पुरुषान् स्वसमीपे संगृह्य दस्यु- २४
संघस्याधिपति र्बभूव, ततस्ते दम्मेषकं गत्वा तत्र न्यवसन् दम्मेषके राज-
त्वञ्चाकुर्व्वन्। इत्थं हददस्य विपक्षतां विना तेनापि सुलेमनो याव- २५
ज्जीवनं इस्रायेलो वैपरीत्येन वैरित्वमकारि, इस्रायेलम् ऋतीयित्वा
सोऽरामस्योपरि राजत्वं चक्रिवान्।

इफ्रियिमीयनिवाटस्य पुत्रः सिरेदानिवासी यारवियाम इति नाम्ना २६
सुलेमन एको दास आसीत् सिरूयानामिका तस्य माता विधवा-
सीत् सोऽपि राज्ञो विपक्षताम् आचचार। राज्ञः प्रातिकूल्येन तस्य २७
विपक्षताचरणस्य वृत्तान्तोऽयं; सुलेमान् मिल्लुं निरमापयत् स्वतातस्य
दायूदो नगरस्य भग्नस्थानानि च पूनरपूरयत्। स च यारवियामो २८
वीर्य्यवान् पुरुष आसीत्, अतः सुलेमान् तं युवानं कर्म्मशूरं बुद्धा
यूषफवंशीयस्य कृत्स्नस्य कारुनिवहस्य कर्त्तृत्वे नियुक्तवान्। तदानीम् २९
एकदा यारवियामे यिरूशालमात् वहि र्गते शीलोनीयाहियनामा
भविष्यद्वादी परिहितनूतनवसनं तं वर्त्मनि साक्षाच्चकार, तदा तौ द्वौ
विना क्षेत्रे कोऽपि नासीत्। ततोऽहियस्तस्य गात्रस्थितं नूतनवसनं ३०
धृत्वा सञ्छिद्य द्वादशखण्डानि चकार, यारवियामं जगाद च त्वमात्मनः ३१
कृते दशखण्डानि गृहाण यत इस्रायेलः प्रभुः परमेश्वरो वदति पश्य
सुलेमनः करात् मया राष्ट्रमपहृत्य दशवंशास्तुभ्यं दास्यन्ते। मम दासस्य ३२
दायूदोऽनुरोधाद् इस्रायेलीयानां सर्व्ववंशानां मध्ये मयाभिरुचितस्य
यिरूशालमनगरस्य चानुरोधाद् अवशिष्ट एको वंशस्तस्य स्थास्यति।
यतो हेतोस्ते मां विहाय सीदोनीयानां अस्तारोताख्यां देवीं मोयावी- ३३
यानां किमोशाख्यं देवं अम्मोनवंशीयानां मिल्कमाख्यं देवञ्चापूजयन्;
तस्य तातो दायूद् इव ममाभिलाषं विध्याज्ञाश्च समाचरितुं ते मदीय-

३४ मार्गेषु न चरन्ति। किन्त्वहं तस्य करात् कृत्स्नं राजत्वं नाक्रक्ष्यामि,
मदीयादेशविध्याचरणात् मयाभिरुचितस्य मदीयदासस्य दायूदोऽनु-
३५ रोधाद् अहं तस्य यावज्जीवनं तं नराधिपतित्वे स्थास्नु करिष्यामि। ततः
३६ परं तस्य सुतस्य करात् मया राष्ट्रमाकृष्य दशवंशास्तुभ्यं दास्यन्ते, तस्य
पुत्राय चैको वंशो दास्यते, यतो मम नाम्नः स्थापनार्थं यन्नगरं यिरूशा-
लमं मयाभिरुचितं तत्र मम दासस्य दायूदः प्रदीपेन मम साक्षान्नित्यं
३७ ज्वलितव्यं। अनन्तरं मयानुगृहीतस्त्वं यदा यथाभिलाषं राजत्वं कुर्व्वन्
३८ इस्रायेलीयभूपति र्भविष्यसि, तदा यदि मदीयाज्ञा ग्रहीष्यसि मम
मार्गेषु चरिष्यसि मम दासो दायूद् इव मदीयान् आदेशविधीन्
आचरन् ममेष्टकर्म्माणि करिष्यसि च, तर्हि तव साहाय्यं कुर्व्वता मया
दायूदो वंश इव तव वंशोऽपि सुस्थिरः कारिष्यते, इस्रायेलीयलोकाश्च
३९ तुभ्यं दास्यन्ते। तदपराधाद् दायूदो वंशो मया क्लेशिष्यते किन्तु
४० तन्नित्यं नहि। ततः परं सुलेमनि यारवियामं हन्तुं यतमाने यारवि-
यामो मिसरदेशं पलाय्य मिसरदेशीयं शीशकं राजानम् आश्रित्य
सुलेमनो मरणं यावत् मिसरदेशे तस्थिवान्।

४१ सुलेमनोऽवशिष्टं चरित्रं तस्य सर्व्वकर्म्माणि ज्ञानञ्चैतानि किं सुले-
४२ मनश्चरित्राख्ये ग्रन्थे न लिखितानि? स सुलेमान् चत्वारिंशद्
वर्षाणि यावद् यिरूशालमे वसन् कृत्स्नेस्रायेल उपरि राजत्वं चकार।
४३ अनन्तरं सुलेमान् स्वपितृगण इव महानिद्रां गत्वा स्वतातस्य दायूदो
नगरे श्मशाने स्थापितः। ततस्तस्य पुत्रो रिहबियामस्तस्य पदे राजत्वं
चकार।

---

१२ द्वादशोऽध्यायः।

१ रिहबियामस्य समीपे लोकानां निवेदनं ६ तरुणसङ्गिनां मन्त्रणया लोकान् प्रति रिहबियामस्य कठिनोत्तरप्रदानं १६ इस्रायेलो दशवंशानां राजद्रोहकरणं २१ तैः सह योधनाद् भविष्यद्वाक्येन रिहबियामस्य निवारणं २५ दशवंशानाम् उपरि यारबियामस्य राजत्वं प्रतिमाद्वयस्थापनञ्च।

१ अनन्तरम् इस्रायेलीयवंशेषु सर्व्वेषु रिहबियामस्याभिषेकार्थं शिखिमे
२ समागतेषु रिहबियामोऽपि शिखिमं जगाम। इत्यनन्तरे मिसरदेश-
प्रवासी निबाटस्य सुतो यारबियामस्तां वार्त्तां श्रुतवान्। स यार-
३ बियामः सुलेमनो राज्ञः सम्मुखात् पलाय्य मिसरदेशे प्रावसत्। ततः

परं दूतैराहूतः पुनरागतः। स तु यारवियामः सम्मिलिता इस्रायेलीय-
लोकाश्च रिहवियामाय वाक्यमेतन्निवेदयामासुः, तव तातोऽस्मासु गुरु ४
युगम् आरोपितवान्, कठिनदासत्वरूपं यद् गुरु युगम् अस्मास्वारोपितं
तद् अधुना त्वया लघुतरं क्रियतां तथा कृते वयं त्वां सेविष्यामहे इति।
ततः स तान् प्रतिजगाद यूयं गच्छत दिनत्रयात् परं पुन र्ममान्तिकम् ५
आगच्छतेति। ततो लोकाः प्रस्थिताः।

अनन्तरं सुलेमनो जीवनकाले ये तं पर्य्यचरन् राजा रिहवियामस्तैः ६
प्राचीनैः सह मन्त्रयित्वा तान् पप्रच्छ युष्माकं मन्त्रणया लोका इमे
मया किं प्रतिगदितव्याः? ततस्ते तम् ऊचुः. भवान् यद्यद्य लोकानाम् ७
एतेषां किङ्करो भूत्वा तान् सेवते मधुरवचनैश्च तान् प्रत्युत्तरं वदति
तर्हि ते सर्व्वदा भवतो दासा भविष्यन्ति। किन्तु स तैः प्राचीनै र्निवे- ८
दितां तां मन्त्रणां विहाय तस्य समवयस्का ये तरुणास्तं पर्य्यचरन्
तैः सह मन्त्रयित्वा तान् पप्रच्छ युष्माकं मन्त्रणया लोका इमेऽस्माभिः ९
किं प्रतिगदितव्याः? ते मां व्याहरन्, तव तातेनास्मासु यद् युगम्
आरोपितं तत् त्वया लघुतरं क्रियतामिति। ततस्तस्य समवयस्कास्तरु- १०
णास्तम् ऊचुः, तव पित्रा यद् गुरु युगम् अस्मास्वारोपितं तत् त्वया
लघुतरं क्रियतामिति वाक्यं यै र्भवान् उक्तस्तान् इमान् लोकान् प्रति
भवता यद् उत्तरं कर्त्तव्यं तदिदं। भवान् तान् वदतु, मम तातस्य
कटिदेशात् मम कनिष्ठाङ्गुलिरपि स्थूलतरः। अतो मम पिता यद् ११
गुरु युगं युष्मास्वारोपितवान् तद् युष्मदीययुगं मया गुरुतरं कारिष्यते,
मम तातेन यूयं कशाभि र्दण्डिताः किन्तु मया ग्रन्थियुक्ताभिस्ताडनीभि
र्दण्डयिष्यध्वे इति। अनन्तरं दिनत्रयात् परं युष्माभि र्ममान्तिके १२
पुनरागन्तव्यं राज्ञ एतस्माद् आदेशाद् यारवियामे सर्व्वेषु लोकेषु च
तृतीयदिवसे रिहवियामस्य समक्षम् आगतेषु राजा कठिनवचनै १३
र्लोकान् आबभाषे। स प्राचीनै र्निवेदितां मन्त्रणां विहाय यूनां मन्त्र- १४
णानुसारेण तान् जगाद मम तातेन यद् गुरु युगं युष्मास्वारोपितं
तन्मया गुरुतरं कारिष्यते, मम तातेन यूयं कशाभि र्दण्डिताः किन्तु
मया ग्रन्थियुक्ताभिस्ताडनीभि र्दण्डयिष्यध्वे इति। अनेन प्रकारेण १५
राज्ञा लोकानां प्रार्थितम् अस्वीकृतं। यतः परमेश्वरो निवाटस्य पुत्रं
यारवियामं प्रति शीलोनीयाहियेन यद् वाक्यं भाषितवान् स्वस्य तद्-
वाक्यस्य सिद्ध्यर्थं परमेश्वर एतन्निरूपितवान्।

१६ अनन्तरम् अस्माकं निवेदनं राज्ञा न स्वीकृतम् इतीस्रायेलीयैः सर्व्वै
र्दृष्टं। ततो लोका राजानं प्रतिजगदुः, दायूद्यस्माकं कोंऽश आस्ते?
यीशयस्य पुत्रेऽस्माकं कोऽप्यधिकारो नास्ति। हे इस्रायेलीयवंशा युष्माभिः
स्वं स्वं गृहं गम्यतां, हे दायूद् इतः परं त्वं स्ववंशस्यैवाध्यक्षो भव।
१७ तत इस्रायेलीयवंशाः स्वं स्वं वेश्म जग्मुः। यिहूदादेशस्थनगरेषु य
इस्रायलीयवंशा न्यवसन् केवलं तेषां राजत्वं रिहबियामेन लब्धं।
१८ अनन्तरं रिहबियामेन राज्ञा प्रेषितः कारुनिवहस्याधिपतिरदोराम
इस्रायेलीयलोकैः पाषाणाघातै र्हतः। ततो राजा रिहबियामो यिरू-
१९ शालमं पलायितुं त्वरितं रथं समारुरोह। इत्थमिस्रायेलीयवंशा
२० अद्यवद् दायूद्वंशस्याधीनत्ववर्जिता बभूवुः। अनन्तरं यारबियामः
पुनरागत इति वार्त्तां निशम्येस्रायेलीयवंशीयाः सर्व्वे दूतेन तं समा-
जायाहूय सर्व्वेषाम् इस्रायेलीयानां राज्येऽभिषिषिचिरे। ततः केवलं
यिहूदावंशं विनान्यः कोऽपि वंशो दायूद्वंशस्यानुगामी न तस्थौ।
२१ अनन्तरं राज्यं यत् सुलेमनः पुत्रं रिहबियामं प्रति पुन र्वर्त्तेत
तत्कृत इस्रायेलीयवंशैः सह योधनार्थं यिहूदावंशीया बिन्यामीनवं-
शीयाश्च सर्व्वेऽर्थतोऽशीतिसहस्राधिकलक्षसङ्ख्यका अभिरुचिता योद्धारो
२२ यिरूशालमं प्रत्यागतेन रिहबियामेन सम्मेलिताः। तत ईश्वरीय-
२३ लोकं शिमयियं प्रतीश्वरस्यैतद् वाक्यम् उपतस्थौ, त्वं यिहूदादेशीयं
नृपतिं सुलेमनस्तनयं रिहबियामं यिहूदाबिन्यामीनवंशाववशिष्टान्
२४ सर्व्वान् लोकांश्च वद, परमेश्वरो भाषते, युष्माभि र्यात्रा न कर्त्तव्या,
इस्रायेलीयवंशीयै युष्मद्भ्रातृभि र्न योद्धव्यं किन्तु स्वं स्वं गृहं गन्तव्यं,
यत एतत्सर्व्वं मत्तोऽभवत्। ततस्ते परमेश्वरस्याज्ञां गृहीत्वा परमेश्वरस्य
वाक्यानुसारात् परावृत्य गताः।
२५ अनन्तरं यारबियाम इफ्रयिमपर्व्वतस्थं शिखिमनगरं पुन र्निर्म्माय
तत्र न्यवसत् तस्मात् स्थानात् प्रस्थाय च पिनूयेलमपि निर्म्मापयाञ्च-
२६ कार। ततः परं यारबियामो निजमनसि विवेचयामास, इदानीं
२७ राज्यं दायूदो वंशं प्रति पुनर्वर्त्तिष्यते। लोका इमे यदि परमेश्वरस्य
मन्दिरे बलिदानार्थं यिरूशालमं गच्छन्ति तर्हि तेषां लोकानां मनांसि
स्वप्रभौ सुलेमनः पुत्रे रिहबियामे पुनरासंक्ष्यन्ते ते च मां हत्वा
२८ यिहूदादेशीयराजं रिहबियामं प्रति पुनरावर्त्तिष्यन्ते। ततो नृपति
र्मन्त्रयित्वा स्वर्णमयं गोवत्सद्वयं निर्म्माय तान् जगाद, यिरूशालमे

गमनं युष्माकं क्लेशदं, हे इस्रायेल्‌वंश, पश्य तव यो देवो मिसरदेशात्
त्वां वहिरानयत् सोऽयं। ततः स तयोरेकं वत्सं वैथेले द्वितीयञ्च २९
दाने निदधे, तत् तु कर्म्म पातकं बभूव, इस्रायेलीयलोकाश्च तयोरेकं ३०
साक्षात् कर्त्तुं दानं यावद् अगच्छन्। स भृगुस्थानीयगृहाण्यपि निर्म्मा- ३१
पयामास ये च लेवीयवंशोद्भवा नासन् तादृशान् नीचतमान् लोकान्
याजकत्वे नियोजयामास। अपरं यिहूदादेशे यादृश उत्सवोऽभवत् ३२
यारवियामोऽष्टममासस्य पञ्चदशे दिने तादृशम् उत्सवम् अकरोत्
वेद्याञ्च बलीन् अददात् इत्थं स स्वेन निर्म्मितयो र्वत्सयोः कृते वैथेले
बलिदानं निरूपयामास, स्वेन नियुक्तान् भृगुस्थानीययाजकान् वैथेले
स्थापयामास च। इत्थं यो मासः स्वकीयाभिलाषात् तेन निश्चितस्त- ३३
स्याष्टममासस्य पञ्चदशे दिने स वैथेले स्वेन कृतायां वेद्यां बलीन्
अददाद् इस्रायेलीयवंशानां कृत उत्सवं निरूपयामास धूपदहनार्थं
तां वेदिं समारुरोह च।

---

१३ त्रयोदशोऽध्यायः।

१ यारवियामस्य समीप ईश्वरीयलोकस्य कथनं ११ ईश्वरीयलोकं प्रति प्राचीनभविष्यद्वादिनो मृषावदनं २० तद्वचनग्रहणात् तं प्रतीश्वरस्यानुयोगः २७ तस्य मरणं श्मशाने स्थापनञ्च ३३ यारवियामस्य महापातकञ्च।

अनन्तरं धूपदहनार्थं यारवियामे वेद्या उपरि तिष्ठति सति परमे- १
श्वरीयवाक्ययुक्त एक ईश्वरीयलोको यिहूदादेशाद् वैथेल उपतस्थौ।
स तु परमेश्वरस्य वाक्येन तद्वेद्या विरुद्धं वाणीम् एताम् घोषयामास, २
हे वेदि हे वेदि परमेश्वर एतद् वदति दायूद्वंशे जनिष्यमाणो योशि-
यनामक एकः कुमारस्तवोपरि धूपदाहकान् याजकान् तवोपरि
छेदयिष्यति तवोपरि लोका मनुष्याणाम् अस्थीनि दाहयिष्यन्ति च।
अपरं स तस्मिन् दिने लक्षणं निश्चित्य जगाद परमेश्वरेण प्रकाशितं ३
लक्षणमिदं, पश्य वेदिरेषा भंक्ष्यते तदुपरिस्थितं भस्म च भूमौ निपा-
तयिष्यते। ततो वैथेलस्थवेद्या विरुद्धम् ईश्वरीयलोकेन घोषितं तद् ४
वाक्यं निशम्य यारवियामो राजा तत्क्षणाद् वेदितः करं प्रसार्य्य, एनं
धरतेति व्याजहार, किन्तु तस्य विरुद्धं प्रसारितस्तस्य करः शुष्कत्वं गत्वा
पुनस्तेन सङ्कोचयितुं नाशक्यत। परमेश्वरस्य वाक्येनेश्वरीयलोकेन यत् ५
लक्षणं निर्द्दिष्टं तदनुसाराद् वेदिरपि भग्ना भस्म च वेदितो निपातितं।

६ ततो नृपतिरीश्वरीयलोकमुवाच त्वं स्वप्रभुं परमेश्वरम् प्रसादय मम
करो यन्मां प्रति परावर्त्तेत मदर्थमेतत् प्रार्थयस्व च। तत ईश्वरीयलोकेन
परमेश्वरे प्रसादिते नृपतेः करस्तं प्रति परावृत्य पूर्व्ववद् बभूव।
७ अपरं नृपतिरीश्वरीयलोकं बभाषे भवान् मया सह मम गृहं गत्वा
८ तृप्यतु मत्त उपायनं गृह्णातु च। किन्त्वीश्वरीयलोको नृपतिं प्रतिजगाद,
भवान् यद्यपि मह्यं स्वनिवेशनस्यार्द्धं दद्यात् तथाप्यहं भवता सह तत्र
९ प्रवेक्ष्यामि स्थानेऽस्मिन् भक्ष्यं न भोक्ष्ये तोयं न पास्यामि च। यतः
परमेश्वरस्य वाक्येनाहमिदमादिष्टः, त्वया भक्ष्यं न भोक्तव्यं तोयमपि
१० न पातव्यं येन मार्गेण गमिष्यसि तेन च न प्रत्यागन्तव्यं। ततः परं स
इतरेण मार्गेण प्रस्थितः, येन मार्गेण बैथेलमागतवान् तदन्येन परावृत्तः।
११ तदानीं बैथेल एको वृद्धो भविष्यद्वादी न्यवसत् तस्य पुत्रो गृह-
मागत्य तस्मिन् दिन ईश्वरीयलोकेन कृतानि कर्म्माणि राज्ञे कथितानि
वाक्यानि च वर्णयामास। ततः स्वपुत्रैस्तत्सर्व्वं ज्ञापितः पिता तान्
१२ पप्रच्छ स केन मार्गेण गतवान्? ततो यिहूदादेशादागत ईश्वरीय-
१३ लोको येन मार्गेण गतवान् तस्मिन् पुत्रै निश्चिते पिता तान् जगाद
यूयं मदर्थं गर्द्दभं सज्जयत। ततः परं तै गर्द्दभे सज्जिते स तमारुह्येश्व-
१४ रीयलोकस्य पश्चाद् गत्वा कस्यचिद् एलावृक्षस्याध उपविष्टं तं प्राप्य
व्याजहार, य ईश्वरीयलोको यिहूदादेशाद् आगतः स किं त्वमसि?
१५ स उवाच, अहमेव। स तु तं जगाद त्वं मया सह मद्गृहमागच्छान्नं
१६ भुंक्ष्व च। स प्रत्युवाच, अहं त्वया सह परावृत्य तव वेश्म प्रवेष्टुं तत्र
१७ स्थाने त्वया सार्द्धं भक्ष्यमत्तुं तोयं पातुञ्च न शक्नोमि। यतः परमेश्वरस्य
वाक्येनाहमिदमादिष्टः, तत्र स्थाने त्वयान्नं न भोक्तव्यं तोयमपि न पातव्यं
१८ येन मार्गेण च गमिष्यसि तेन न परावर्त्तितव्यमिति। अपरं स जगाद
अहमपि त्वत्सदृशो भविष्यद्वाद्यस्मि दूत एकश्च परमेश्वरस्य वाक्येन
मामिदमादिशद् असौ त्वया परावर्त्त्य तव गृहमानीयतां तत्रान्नं भुंक्तां
१९ तोयं पिबतु च। किन्तु तेन मृषा वचोऽभाषि। ततः स तेन सार्द्धं
परावृत्य तस्य गृहे ऽन्नमभक्षत् तोयञ्चापिबत्।
२० भोजनासने तयोरुपवेशनसमये तत्परावर्त्तकं भविष्यद्वादिनं प्रति
२१ परमेश्वरस्य वाक्य उपस्थिते स यिहूदादेशाद् आगतं तम् ईश्वरीयलोकं
उच्चैःस्वरेणाभाष्य जगाद, परमेश्वरो वागियमुच्यते परमेश्वरस्याज्ञा
त्वया लङ्घिता तव प्रभुना परमेश्वरेण च त्वं यद् आदिष्टस्तदतिक्रम्य

परावर्त्तनं कृतं यत् स्थानञ्चाध्यहं त्वामाज्ञापितवान् त्वया तत्रान्नं न २२
भोक्तव्यं तोयञ्च न पातव्यमिति तस्मिन्नेव स्थाने त्वयान्नं भुक्तं तोयञ्च पीतं,
ततो हेतोस्तव कुणपस्तव पितृपुरुषाणां श्मशानं न प्राप्स्यति।

अपरं तेनान्ने भुक्ते पीते च यो भविष्यद्वादी पुनरानीतस्तस्य कृते गर्द्दभे २३
सज्जिते च प्रस्थितं तं सिंह एको मार्गे प्राप्य जघान ततस्तस्य कुणपो २४
मार्गे निपतितस्तदन्तिके च गर्द्दभोऽवतिष्ठत सिंहोऽपि तस्य कुणपस्या-
न्तिकेऽवतिष्ठत। ततः परं मार्गे पतितः स कुणपः कुणपस्यान्तिकेऽवति- २५
ष्ठमानः सिंहश्च कैश्चित् पथिकै र्दृष्टौ तस्य वृद्धस्य भविष्यद्वादिनो
वसतिनगरमागत्य वर्णितौ च। ततो यो भविष्यद्वादी तं मार्गात् २६
परावर्त्तयत् स तां वार्त्तां निशम्य जगाद, असौ परमेश्वरीयाज्ञालङ्घी
स ईश्वरीयलोक एव; स परमेश्वरेण यथोक्तस्तथैव परमेश्वरेण सिंहस्य
करे समर्पितस्तेन विदीर्णो हतश्च। अपरं स स्वपुत्रान् जगाद यूयं २७
मदर्थं गर्द्दभं सज्जयत। ततस्तैर्गर्द्दभे सज्जिते स गत्वा वर्त्मनि निपतितं २८
कुणपं तत्कुणपस्यान्तिकेऽवतिष्ठमानौ गर्द्दभसिंहौ च प्राप सिंहेन कुणपो
न भक्षितो गर्द्दभोऽपि न विदीर्णः। ततः स भविष्यद्वादी तस्येश्वरीय- २९
लोकस्य कुणपमुत्थाप्य गर्द्दभ आरोप्य परावृत्तः। अपरं स वृद्धो भवि-
ष्यद्वादी तं विलपितुं श्मशाने स्थापयितुञ्च स्वं नगरम् आजगाम।
अतस्तस्य कुणपे तेन स्वश्मशाने स्थापिते लोकास्तं प्रति विलपन्तो व्याहरन् ३०
हा हा भ्रातरिति। श्मशाने तस्य स्थापनात् परं स स्वपुत्रान् जगाद ३१
यत्र स्थान ईश्वरीयलोकोऽसौ निहितः श्मशानस्य तस्मिन्नेव स्थाने
ऽहमपि मरणात् परं युष्माभि र्निधातव्यस्तस्यास्थ्नामन्तिके ममास्थीनि
च स्थापितव्यानि। यतो वैथेलस्थवेद्या विरुद्धं शोमिरोणदेशीयनग- ३२
रेषु स्थितानां भृगुस्थानीयगृहाणाञ्च विरुद्धं परमेश्वरस्य वाक्येन या
वाणी तेन घोषिता सावश्यं सफला भविष्यति।

ततः परं यारवियामः स्वकीयं कुमार्गं न विहाय पुनर्व्वारं लोकानां ३३
मध्ये नीचतमान् भृगुस्थानानां याजकत्वपदे न्ययोजयत्। स यमभ्यलषत्
तमेव पावयित्वा भृगुस्थानीययाजकम् अकरोत्। किन्तु तत् कर्म्म ३४
यारवियामवंशस्य पातकं तस्य लोपजनकं पृथिवीत उच्छिन्नताजनकञ्च
बभूव।

१४ चतुर्दशोऽध्यायः।

१ पुत्त्रस्य पीडाहेतोरहियस्य समीपं यारवियामस्य जायाया गमनं ५ अहियस्य दुःखदायकवार्त्तावदनं १७ अवियस्य मरणं श्मशाने निधानञ्च २१ रिहवियामस्य कुराजत्वकथनं २५ मिसरदेशीयशीशकराजेन यिहूदादेशस्य लोठनं २९ रिहबियामस्य पदेऽवियस्याभिषिक्तत्वञ्च।

१ तस्मिन् काले यारवियामस्य तनयेऽवियेे रोगग्रस्ते सति यारवियामः
२ स्वजायां जगाद, त्वमुत्थायाच्छन्नवेशं धर, त्वं यारवियामस्य जायेति
केनापि न बुध्यतां ततः परं शीलुं गच्छ; पश्य मयैतेषां लोकानां
राज्ञा भवितव्यम् इत्यहं येनोक्तः सोऽहियनामा भविष्यद्वादी तत्र
३ विद्यते। त्वया स्वहस्ते दशपूपान् कतिपयान् मोदकान् मधुना परिपूर्णं
भाण्डमेकञ्च गृहीत्वा तस्य समीपं गम्यतां; ततो बालकस्य का दशा
४ भविता तत् त्वं तेन ज्ञापिष्यसे। अनन्तरं यारवियामस्य जाया तथैव
कृत्वा प्रोत्थाय शीलुं प्राप्याहियस्य निकेतनं प्रविवेश; तस्मिन् काले
वार्द्धक्यकारणाद् अहियस्य नेत्रयोः क्षीणता जाता तस्मात् स द्रष्टुं
नाप्नोत्।
५ इत्यनन्तरे परमेश्वरोऽहियं बभाषे पश्य यारवियामस्य जाया निज-
पुत्त्रस्य भाविदशां त्वां प्रष्टुम् आयाति यतः स रोगग्रस्तः, अतस्त्वयै-
तानि वाक्यानि तस्यै कथितव्यानि, अधिकन्तु पश्य साच्छन्नवेशं धृत्वा-
६ गच्छति। अपरं द्वारेण प्रविशन्त्यास्तस्याश्चरणयोः शब्दं निशम्या-
हियस्तत्क्षणाद् व्याजहार हे यारवियामस्य जाये त्वमागच्छ; कुत
आच्छन्नवेशं परिहितासीः? अहं कठिनां वार्त्तां वक्तुं त्वामुप प्रेषितो-
७ ऽस्मि। त्वं गत्वा यारवियामं भाषस्व, इस्रायेलः प्रभुः परमेश्वरो
वाचमिमां वदति, लोकानां मध्यात् त्वं मयोन्नानितो मदीयेस्रायेलीय-
८ प्रजागणस्याधिपतित्वे नियुक्तश्च, दायूद्वंशात् मयाकृष्टं राज्यमपि तुभ्यं
दत्तं किन्तु मम यो दासो दायूद् मदीयाज्ञाः समाचरत् केवलं मत्तुष्टि-
जनकं कर्म्म कर्त्तुं सर्व्वान्तःकरणेन ममानुगाम्यभवच्च त्वं तस्य सदृशो
९ नाभवः, किन्तु त्वत्पूर्व्ववर्त्तिभ्यः सर्व्वेभ्यो दुष्टाचारी विपथगामी च भूत्वा
मां क्रोधयितुं स्वकृत इतरदेवान् सिक्तमूर्त्तीश्च निरमापयो माञ्च
१० पृष्ठतोऽकरोः। अतो हेतोः पश्य यारवियामवंशं प्रत्यमङ्गलं मया
वर्त्तयिष्यते यारवियामवंशीयाः सर्व्वे पुमांस इस्रायेलीयदेशे रुद्धा
मुक्ताश्च सर्व्वे मया विनाशयिष्यन्ते, लोकैश्चावकरा यद्वत् सर्व्वतोभावेन

प्रम्टज्यन्ते तद्वद् यारवियामवंशस्य पश्चात् मया सम्मार्जनं कारिष्यते।
यारवियामवंशीयो यः कोऽपि नगरमध्ये मरिष्यति स कुक्कुरै र्भक्षिष्यते ११
यश्च क्षेत्रे मरिष्यति स विहगै र्भक्षिष्यते यतः परमेश्वर एतदुक्तवान्।
अतस्त्वमुत्थाय स्वगृहं गच्छ, गोपुरे त्वया पादार्पणमात्रे तव बालको १२
मरिष्यति। अपरम् इस्रायेलीयलोकाः सर्व्वे तमधि विलप्य श्मशाने १३
निधास्यन्ते, यारवियामवंशमध्ये केवलः स एव श्मशानं प्राप्स्यति यतो
यारवियामवंशमध्य इस्रायेलः प्रभुं परमेश्वरं प्रति तस्यैव सद्भावस्य
किञ्चिद् दृष्टं। अपरम् इस्रायेलीयानामेको नृपतिः परमेश्वरेणोत्पाद- १४
यिष्यते स एकस्मिन्नेव दिने यारवियामवंशम् उच्छेत्स्यति तदन्यद्
अधुनापि किं न घटते? अपरं परमेश्वरो जलस्थं चपलं तृणमिवे- १५
स्रायेलीयवंशम् आहनिष्यति तस्य पूर्व्वपुरुषेभ्यस्तेन दत्तादुत्तमदेशाद्
एतस्माद् इस्रायेलीयलोकान् उत्पाद्य फरातनदस्य पारे विकरिष्यति
च यतस्ते स्वकीयचैत्यवृक्षसेवया परमेश्वरम् अक्रोधयन्। यारवियामो १६
यानि पापानि कृतवान् इस्रायेलीयवंशञ्च कारितवान् तेभ्य इस्रायेलीय-
वंशं बन्दित्वावस्थायां समर्पयिष्यति।

अनन्तरं यारवियामस्य जाया प्रोत्थाय गत्वा तिर्षां प्राप। अपरं गृह- १७
द्वारस्य शिलायां तस्याः पादे प्रक्षिप्ते स बालको ममार। ततः परमेश्वरः १८
स्वदासेनाहियेन यद् वाक्यम् उक्तवान् तदनुसाराद् इस्रायेलीयलोकाः
सर्व्वे तं श्मशाने निधाय विललपुः। यारवियामस्यावशिष्टकर्म्मणां १९
युद्धराजत्वयोश्च विवरणम् इस्रायेलीयभूपानां पुरावृत्तपुस्तके लिखित-
मास्ते। यारवियामो द्वाविंशतिवर्षाणि यावद् राजत्वं कृत्वा स्वपितृ- २०
लोकाइव महानिद्रां लेभे; ततस्तस्य पुत्रो नादवस्तस्य पदे राज्याभि-
षिक्तो बभूव।

यिहूदादेशे सुलेमनस्तनयो रिहवियामो राजत्वमकरोत्। राज्य- २१
प्राप्तिसमये स रिहवियाम एकचत्वारिंशद् वर्षवयस्क आसीत् तत
इस्रायेलीयानां सर्व्ववंशानां मध्ये यन्नगरं परमेश्वरेण स्वनामस्थाप-
नार्थम् अभिरुचितं तत्र यिरूशालमे स सप्तदशवर्षाणि यावद् राजत्वं
चक्रिवान् तस्य जनन्या अम्मोनीया नयमेति नामासीत्। अनन्तरं २२
यिहूदावंशीयाः परमेश्वरस्य साक्षात् कुत्सिताचारिणो भूत्वा यानि
पापान्यकुर्व्वन् तैः परमेश्वरं स्वपूर्व्वपुरुषेभ्योऽप्यधिकम् अक्रोधयन्।
एकैकस्मिन् उच्चगिरावेकैकस्य हरिद्वर्णवृक्षस्याधश्च तैरपि भगुस्थानानि २३

२४ मूर्त्तयश्चैत्यवृक्षाश्च निरूपिताः। देशे पुङ्गामिनो नरा अप्यविद्यन्त,
इस्रायेलीयलोकानां सम्मुखाद् इतरजातीया ये लोकाः परमेश्वरेण
दूरीकृतास्तेषां घृण्यकर्म्माणि तैरपि समाचरितानि।
२५ अपरं रिहवियामस्य राजत्वस्य पञ्चमवत्सरे मिसरदेशीयनृपतिः
२६ शीशको यिरूशालमस्य विरुद्धमागत्य परमेश्वरीयमन्दिरस्य धनानि
राजपुर्य्याश्च धनानि जहार, सर्व्वाण्येव तेन हृतानि। सुलेमना निर्म्मि-
२७ तानि सर्व्वाणि स्वर्णमयफलकान्यपि तेन हृतानि। अनन्तरं तेषां विनि-
मयेन पित्तलीयफलकानि राज्ञा रिहवियामेन निर्म्मापितानि राज-
पुर्य्यां द्वारपालकानां पदातीनाम् अध्यक्षाणां करेषु समर्पितानि च।
२८ ततो यतिवारं राजा परमेश्वरस्य मन्दिरमगच्छत् ततिवारं पदातय-
स्तान्यधारयन् अनन्तरं पदातिशालायां पुन र्न्यदधुः।
२९ तस्य रिहवियामस्य चरित्रं तेन कृतानि सर्व्वाणि कर्म्माणि च यिहू-
३० दादेशीयभूपतीनां पुरावृत्तपुस्तके लिखितानि किं न विद्यन्ते? रिह-
३१ वियामयारवियामयो र्मध्ये नित्यं युद्धमासीत्। ततः परं रिहवि-
यामः स्वपितृगण इव महानिद्रां गत्वा निजपितृलोकैः समं दायूद्नगरे
श्मशाने स्थापितः। तस्य जनन्या अम्मोनीया नयमेति नाम आसीत्।
अनन्तरं तस्य तनयोऽवियस्तस्य पदे राजत्वं प्राप्तः।

---

१५ पञ्चदशोऽध्यायः।

१ अवियस्य कुराजत्वकथनं ९ तस्य तनयस्यासाः सुराजत्वकथनं १६ तेन सार्द्धम् इस्रा-
येलीयवाशाराजस्य युद्धं २२ तस्य मरणं यिहोशाफटनाम्नस्तस्य तनयस्याभिषेचनं
२५ नादवस्य वाशाश्च कथनं।

१ निवाटपुत्रस्य यारवियामस्याष्टादशे राजत्ववत्सरेऽवियो यिहूदादेशे
२ राजा बभूव। तेन त्रीन् वत्सरान् यावद् यिरूशालमे राजत्वम-
क्रियत; अवशालोमस्य माखानामिका दुहिता तस्य मातासीत्।
३ तस्य पूर्व्वं तस्य तातो यानि पापानि समाचरत् सोऽपि तानि सर्व्वाणि
समाचरत् तस्य पूर्व्वपुरुषस्य दायूदो मन इव तस्य मनः स्वप्रभुं परमे-
४ श्वरं प्रति सरलं नासीत्। तथापि दायूदोऽनुरोधात् तस्य प्रभुना पर-
मेश्वरेण तस्मै यिरूशालमे प्रदीपमेकं दत्त्वा तस्य परं तस्य वंश उन्नमितो
५ यिरूशालमनगरञ्च संस्थापितं। यतो दायूद् परमेश्वरस्य तुष्टिकरं कर्म्म
समाचरत्, हित्तीयोरियस्य कथां विनान्येन केनापि कर्म्मणा यावज्जी-

वनमीश्वरीयादेशं नालङ्घत। यारबियामस्य यावज्जीवनं तस्य रिह- ६
बियामवंशस्य च परस्परं युद्धमासीत्। तस्याबियस्य चरित्रं सर्व्वकर्म्माणि ७
च यिहूदादेशीयनृपतीनां पुरावृत्तग्रन्थे लिखितानि किं न विद्यन्ते?
अबिययारबियामयोः परस्परं युद्धमासीत्। अनन्तरम् अबियः स्वपि- ८
तृगण इव महानिद्रां गतो लोकै र्दायूद्नगरे श्मशाने स्थापितश्च, तस्य
पुत्र आसास्च तस्य पदे राजा बभूव।

इस्रायेलीयभूपते र्यारबियामस्य विंशे राजत्ववत्सर आसा यिहू- ९
दादेशस्य राजत्वं प्राप्तवान्। तेन यिरूशालम एकचत्वारिंशद्वर्षाणि १०
यावद् राजत्वमक्रियत; अवशालोमस्य माखानामिका दुहिता तस्य
पितामह्यासीत्। स आसाः स्वपूर्व्वपुरुषो दायूद् इव परमेश्वरस्य ११
तुष्टिकरं कर्म्म समाचरत्। पुङ्गामिनो लोकास्तेन देशाद् वहिष्कृता- १२
स्तस्य पूर्व्वपुरुषाश्च यानि घृणार्हवस्तून्यस्थापयन् तानि सर्व्वाण्यपि
तेन दवितानि। तस्य पितामह्या माखया चैत्यवृक्षस्य मूले प्रतिमायां १३
स्थापितायां सापि राज्ञीपदात् तेन भ्रंशिता तस्याः प्रतिमा च भग्ना
किद्रोणतटिनीतटे दग्धा च। किन्तु भृगुस्थानानि न लुप्तानि तथाप्यासा १४
यावज्जीवनं परमेश्वरं प्रति सरलमना आसीत्। तस्य जनको यद् यत् १५
पावितवान् स स्वयञ्च यद् यत् पावितवान् तत्सर्व्वं दुर्व्वर्णसुवर्णपात्रं
परमेश्वरस्य मन्दिरे तेन निहितं।

इस्रायेलीयराजेन वाशा सार्द्धम् आसा यावज्जीवनं युद्धं बभूव। १६
विशेषतः कश्चिन्निर्गत्य यिहूदादेशीयभूपतेरासाः पक्षीयो भवितुं यन्न १७
पारयेत् तदर्थम् इस्रायेलीयनृपति र्वाशा यिहूदादेशस्य विरुद्धं गत्वा
रामतपुरीं दृढीकर्त्तुम् उपचक्रमे। तत आसाः परमेश्वरीयभवनस्य १८
भाण्डागारेष्ववशिष्टानि रजतहेमानि राजनिवेशनस्य धनानि चादाय
स्वभृत्यानां करेषु समर्पयामास। अपरम् आसाराजेन प्रेरितास्ते
हिषियोणस्य पौत्त्रं टब्रिम्मोणस्य पुत्त्रं विन्हदद इतिनामानं दम्मेष-
कनिवासिनम् अरामीयनृपतिं जगदुः, त्वया सह मम त्वत्पित्रा च १९
सह मत्पितु र्नियमो विद्यते तस्मात् पश्चाहम् उपायनार्थं रजतहेमानि
तव समीपं प्रहिणोमि; अत इस्रायेलीयनृपति र्वाशा यन्मत्तोऽपसरेत्
तदर्थं तेन सह तव यो नियम आस्ते स त्वया भज्यतां। ततो विन्हदद २०
आसाराजस्य वाक्यं गृहीत्वा निजबलानाम् अध्यक्षान् इस्रायेलीय-
देशस्थनगराणां विरुद्धं प्रहित्येयोनं दानम् आबेलबैतमाखां किन्नेरतास्वं

२१ कृत्स्नं प्रदेशं कृत्स्नं नप्तालिदेशञ्च वशीचक्रे। वार्त्तामिमां निशम्य वाशा
२२ रामतनिर्म्माणात् निवृत्य तिर्सायां वसतिं चक्रे। अनन्तरम् आसा
नरपति र्यिहूदादेशीयान् सर्व्वान् आह्वयत् कमपि नात्यजत्; ततो
निर्म्माणार्थं वाशाराजेन सञ्चितान् रामतनगरस्य पाषाणान् काष्ठानि
च ते स्थानान्तरं निन्युः। अपरम् आसाराजस्तैरेव पाषाणादिभि
र्विन्यामीनदेशस्थगेवां मिस्पाञ्च निर्म्मापयामास।
२३ तस्यासा अवशिष्टं सर्व्वचरित्रं सर्व्वकर्तृत्वं सर्व्वकर्म्माणि च तेन
निर्म्मितानां नगराणां नामानि च यिहूदादेशीयराजानां पुरावृत्त-
पुस्तके लिखितानि किं न विद्यन्ते? वार्द्धक्ये गतस्य तस्य पादरोगो
२४ बभूव। अपरं स आसाः स्वपितृगणइव महानिद्रां गत्वा स्वपितृगणस्य
समीपे निजपूर्व्वपुरुषस्य दायूदो नगरे श्मशाने निदधे; अनन्तरं तस्य
पुत्रो यिहोशाफटस्तस्य पदे राजा बभूव।
२५ यिहूदादेशीयस्यासानाम्नो नरपते र्द्वितीये राजत्ववत्सरे यारबिया-
मस्य सुतो नादव इस्रायेल्देशस्योपरि राजत्वं कर्त्तुम् आरभ्य वत्स-
२६ रद्वयम् इस्रायेल उपरि राजत्वं चकार। स परमेश्वरस्य साक्षात्
कुत्सिताचारं कुर्व्वन् स्वतातस्य मार्गम् अर्थतः स इस्रायेलं यानि पापानि
२७ कारितवान् तान्येवाचचार। अनन्तरम् इषाखरवंशीयोऽहियस्य पुत्रो
वाशास्तस्य विरुद्धं कुमन्त्रणां विधाय पिलेष्टीयानां गिव्वियोनाख्य-
नगरस्य समीपे तं जघान; यतस्तदानीं नादव इस्रायेलीयलोकाश्च
२८ तद् गिव्वियोनम् अवारुन्धन्। यिहूदादेशीयस्यासास्तृतीये राजत्ववत्सरे
२९ वाशा नादवं निहत्य तस्य पदे राजत्वं प्राप। राजत्वं प्राप्यैव स कृत्स्नं
यारबियामवंशम् उदच्छिनत् तद्वंशीयम् एकमपि प्राणिनं नावाशेषयत्,
३० यतो यारबियामो यानि पापानि कृतवान् इस्रायेलवंशं कारितवांश्च
यैः क्रोधजनकैः कर्म्मभिरिस्रायेलः प्रभुं परमेश्वरं क्रोधितवांश्च तत्-
कारणात् परमेश्वरः शीलोनीयाहियनाम्ना निजदासेन तद्विनाशसूचकं
३१ वाक्यं प्रोक्तवान्। तस्य नादवस्यावशिष्टं चरित्रं तस्य कर्म्माणि चेस्रा-
३२ येलीयभूपतीनां पुरावृत्तपुस्तके लिखितानि किं न विद्यन्ते? आसा-
राजस्येस्रायेलीयवाशाराजस्य च यावज्जीवनं तयोर्मध्ये समरो बभूव।
३३ यिहूदादेशीयस्यासास्तृतीये राजत्ववत्सरेऽहियस्य सुतो वाशास्तिर्सायां
कृत्स्नस्येस्रायेलीयवंशस्य राजा भूत्वा चतुर्विंशतिवर्षाणि यावद् राजत्वं
३४ चकार। स परमेश्वरस्य साक्षात् कुत्सिताचारं कुर्व्वन् यारबिया-

मस्य मार्गम् अर्थतः स चेस्रायेलीयवंशं यानि पापानि कारितवान्
तान्याचचार।

---

१६ षोडशोऽध्यायः।

१ वाशा विरुद्धं येहोर्भविष्यद्वाक्यं ८ सिम्रेर्विश्वासघातित्वं ११ येहो र्भविष्यद्वाक्यस्य
सिद्धिः ११ अम्रे राज्याभिषिक्तत्वं सिम्रेर्दग्धत्वं २१ अम्रिणा तिब्नेः पराजितत्वं २७
तेन शोमिरोणस्य निर्म्माणं तस्य कुराजत्वकरणं मरणञ्च २९ अम्रेः सुतस्याहावस्य
राज्यप्राप्तिः कुराजत्वकरणञ्च ३४ यिरीहोः पुनर्निर्म्माणञ्च।

अनन्तरं वाशा विरुद्धं हनानेः पुत्रं येहूं प्रति परमेश्वरस्येदं वाक्य- १
मुपतस्थौ, त्वं मया धूलेर्मध्याद् उत्थापितो मम प्रजागणस्येस्रायेलीयवं- २
शस्य राजत्वे नियुक्तश्च, किन्तु त्वं यारबियामस्य मार्गे चरसि ममेस्राये-
लीयवंशाश्च यत् स्वपापै र्मां कोपयेयुस्तदर्थं तान् पापानि कारयसि च।
अतः पश्याहं वाशां तदीयवंशञ्च लोप्स्यामि, निवाटसुतस्य यारबिया- ३
मस्य वंशमिव तस्य वंशमपि करिष्यामि च। वाशावंशीयो यः कश्चित् ४
नगरमध्ये मरिष्यति स कूक्कुरै र्भक्षिष्यते यश्च क्षेत्रे मरिष्यति स खचरै-
र्भक्षिष्यते। तस्य वाशा अवशिष्टानि चरित्रकर्म्मकर्तृत्वानि किम् इस्राये- ५
लीयभूपतीनां पुरावृत्तपुस्तके लिखितानि न विद्यन्ते? अनन्तरं वाशाः ६
स्वपितृगण इव महानिद्रां गत्वा तिर्सायां श्मशाने स्थापितस्ततस्तस्य पुत्र
एलाहस्तस्य पदे राजा बभूव। स वाशाः परमेश्वरस्य साक्षाद् यं ७
कुत्सिताचारं कुर्व्वन् स्वक्रियाभिस्तमकोपयत् यारबियामवंशस्य तुल्यो-
ऽभवच्च तस्मात् कुत्सिताचारात् तद्वंशस्य हननाच्च वाशा विरुद्धमपि
हनानेः पुत्रेण येहुना भविष्यद्वादिना परमेश्वरस्य वाक्यं प्रकाशितं।
अपरं यिहूदादेशीयस्यासाः षड्विंशे राजत्ववत्सरे वाशाः सुत एलाह ८
इस्रायेलीयवंशस्य राजा भूत्वा वर्षद्वयं यावद् तिर्सायां राजत्वं चकार।
ततः परं तस्यैको दासोऽर्थतो रथानाम् अर्द्धस्याधिपतिः सिम्रिस्तस्य वि- ९
रुद्धं कुमन्त्रणां चकार। राज्ञि तिर्सायां तत्रत्यराजपूर्य्या अध्यक्षस्यार्संस्य
निकेतने मद्यपानेन मत्ततां गते सिम्रिरागत्य तं हत्वा जघान। यिहूदा- १०
देशीयस्यासाः सप्तविंशे राजत्ववत्सरे स तं हत्वा तस्य पदे राजा बभूव।
ततः परं राजसिंहासन उपवेशनकाले स वाशाः कृत्स्नं वंशं जघान ११
तस्यैकमपि पुमांसं ज्ञातिं बन्धुं वा नावशेषयामास। वाशास्तस्य पुत्र १२
एलाहश्च यानि पापानि कृतवन्ताविस्रायेलः प्रभुं परमेश्वरम् असार-

१३ देवपूजया कोपयितुमिस्रायेलीयवंशं यानि पापानि कारितवन्तौ,
तत्कारणात् परमेश्वरो येहो भविष्यद्वादिनो वदनेन वाशा विरुद्धं यद्
वाक्यम् उक्तवान् तदनुसाराद् वाशाः कृत्स्नो वंशः सिम्रिणोच्छिन्नः ।
१४ तस्यैलाहस्यावशिष्टं चरित्रं सर्व्वं कर्म्म च किम् इस्रायेल्देशीयनृप-
तीनां पुरावृत्तपुस्तके लिखितं न विद्यते ?
१५ यिहूदादेशीयस्यासाः सप्तविंशे राजत्ववत्सरे सिम्रिस्तिर्सायां सप्ताहं
यावद् राजत्वं चक्रे । तदानीं सैन्यानि पिलेष्टीयानां गिब्बिथोननगरम्
१६ अवारुन्धन् । अतः सिम्रिणा कुमन्त्रणां कृत्वा राजा हत इति वार्त्तायां
तत्र शिविरस्थसेनाभिः श्रुतायां तस्मिन्नेव दिने तत्र शिविर इस्राये-
लीयसैन्यनिवहस्याधिपतिरम्रिः सर्व्वैरिस्रायेलीयलोकै राजत्वे नियुक्तः ।
१७ ततः सोऽम्रिस्तेन सह सर्व्व इस्रायेलीयलोकाश्च गिब्बिथोनात् प्रस्थाय
१८ तिर्साम् अवरोद्धुम् उपचक्रमिरे । ततः परं नगरं तै वंशीकृतमिति
दृष्ट्वा सिम्री राजपुर्य्या गर्भागारं गत्वा स्वोपरिस्थितं राजवेश्म
१९ वह्निना दाहयित्वा निधनं गतः । स परमेश्वरस्य साक्षात् कुत्सि-
ताचारं कृत्वा यारवियामस्य मार्गम् अर्थतः स इस्रायेलीयवंशं यानि
पापानि कारितवान् तान्याचरितवान् तेषां पापानां कारणात् स
२० विनाशं गतः । सिम्रेरवशिष्टं चरित्रं तेन कृतो राजद्रोहश्चेस्रायेलीय-
भूपतीनां पुरावृत्तपुस्तके लिखितं किं न विद्यते ?
२१ तदानीम् इस्रायेलीयवंशे द्विसङ्घीभूतेऽर्द्धलोका गीनतस्य सुतं तिब्निं
राजानं कर्त्तुं तस्यानुगामिनो बभूवुस्तदन्येऽर्द्धलोकास्त्वम्रेरनुगामिनो
२२ बभूवुः । शेषेऽम्रेरनुगामिभि र्लोकैस्तिब्नेरनुगामिषु पराजितेषु तिब्नि
पञ्चत्वं जगामाम्रिश्च राजा बभूव ।
२३ यिहूदादेशीयस्यासा एकत्रिंशे राजत्ववत्सरेऽम्रिरिस्रायेल्देशस्य राजा
भूत्वा द्वादशवत्सरान् यावद् राजत्वं चकार । स षड्वत्सरान् तिर्सायां
२४ राजत्वम् अकरोत् । ततः परं शेमराय शतद्वयकिक्कारपरिमितं रूप्यं दत्त्वा
शोमिरोणाख्यं शिलोच्चयं क्रीत्वा तदुपरि नगरमेकं निर्म्मापयामास तस्य
पर्व्वतस्याधिकारिणः शेमरस्य नामानुसारात् स्वेन निर्म्मापितस्य तस्य
२५ नगरस्य शोमिरोणमिति नाम चकार च । सोऽम्रिः परमेश्वरस्य साक्षात्
कुत्सिताचारं कुर्व्वन् निजपूर्व्ववर्त्तिभ्यः सर्व्वनृपेभ्यो दुष्टतरो बभूव ।
२६ निवाटस्य सुतो यारवियामो यस्मिन् मार्गे चरन् असारदेवपूजयेस्रा-
येलः प्रभुं परमेश्वरं कोपयितुम् इस्रायेलीयवंशं पापानि कारितवान्,

तस्मिन्नेव मार्गे सोऽपि चचार। तस्याम्रेरवशिष्टं चरित्रं कर्त्तृत्वञ्च किम् २७
इस्रायेलीयभूपतीनां पुरावृत्तपुस्तके लिखितं न विद्यते? ततः परम् २८
अम्रिः स्वपितृगण इव महानिद्रां गत्वा शोमिरोणे श्मशाने स्थापित-
स्तस्य सुत आहावो राजा बभूव च।

यिहूदादेशीयस्यासा अष्टत्रिंशे राजत्ववत्सरेऽम्रेस्तनय आहाव इस्रा- २९
येल्वंशस्य राजा भूत्वा द्वाविंशतिवर्षाणि यावत् शोमिरोणे राजत्वं
चकार। अम्रेः सुतः स आहावः परमेश्वरस्य साक्षात् स्वपूर्व्ववर्त्तिभ्यः ३०
सर्व्वेभ्योऽधिकं कुत्सिताचारं चकार। स निवाटपुत्त्रस्य यारवियामस्य ३१
पापमार्गे गमनं लघु मत्वा सीदोनीयन्टपतेरित्वालो दुहितरम् ईषेवलं
व्यूह्य वाल्देवस्यानुगामी भूत्वा तम् अपूजयत् शोमिरोणे च वाल्म- ३२
न्दिरं निर्म्माप्य तन्मध्ये वालः कृते वेदिमेकां चकार। स आहावस्चैत्य- ३३
वृक्षमपि रोपयाञ्चक्रे। इस्रायेलः प्रभुं परमेश्वरं कोपयितुं स आहावः
पूर्व्ववर्त्तिभ्य इस्रायेलीयन्टपतिभ्यः सर्व्वेभ्योऽधिकानि कुकर्म्माणि चकार।

तस्य राजत्वसमये वैथेलीयो हीयेलो यिरीहूनगरं पुन र्निर्म्ममे, ३४
ततो नूनस्य पुत्त्रं यिहोशूयं प्रति परमेश्वरेण यद्वद् उक्तं तद्वत् सोऽवी-
रामाख्येन ज्येष्ठपुत्त्रेण पणेन भित्तिमूलं स्थापयामास, सिगूवाख्येन
कनिष्ठपुत्त्रेण पणेन च नगरद्वाराणि स्थापयाञ्चकार।

---

१७ सप्तदशोऽध्यायः।

१ किरीताख्यजलस्रोतस्तटे एलियस्य गमनं तत्र काकैस्तस्य पालितत्वं ८ सारिफत-निवासिन्या कस्याश्चिद् विधवायाः समीपे तस्य प्रेषितत्वं १७ तस्या विधवाया पुत्त्राय जीवनदानं २४ तस्या विधवाया विश्वासश्च।

तदानीं गिलियददेशनिवासिनां मध्ये तिश्वीय एलिय इतिनामा नर १
एक आसीत्। स आहावं जगाद, अहं यम् इस्रायेलः प्रभुं परमेश्वरं
परिचरामि स यद्यमरः स्यात् तर्ह्येतेषु कतिपयवत्सरेषु मदीयमुखनि-
र्गताम् आज्ञां विना शिशिरवृष्टी न भविष्यतः। अनन्तरं परमेश्वर- २
स्येदं वाक्यं तस्य सन्निधावुपातिष्ठत्, त्वम् अस्मात् स्थानात् प्रस्थाय ३
पूर्व्वदिशं गत्वा यर्द्दनस्य पारे स्थितस्य किरीताख्यस्य स्रोतसो निकटे
प्रच्छन्नस्तिष्ठ। तत्र त्वं स्रोतसो जलं पिव तुभ्यं भक्ष्याणि दातुञ्च काका ४
मयादेक्ष्यन्ते। ततः स व्रजित्वा परमेश्वरेण यद् उक्तं तदेव चकार। स ५

६ गत्वा यर्द्दनस्य पारे किरीतनाम्नः स्रोतसो निकटे प्रावसत्। ततः प्रति-
प्रभातं काकैस्तत्समीपे पूपमांसान्यानीयन्त प्रतिसन्ध्याकालमपि पूप-
७ मांसान्यानीयन्त स च स्रोतसस्तोयान्यपिवत्। कतिपयकालात् परं देशे
ऽनावृष्टिहेतोस्तत् स्रोतः शुष्कतां गतं।
८ ततस्तं प्रति परमेश्वरस्येदं वाक्यं समुपातिष्ठत्, त्वं सीदोनदेशस्थं
९ सारिफतनगरं गत्वा तत्र प्रवस पश्य त्वां भक्षयितुं तत्रत्या काचिद्
१० विधवा मयादिष्टा। तत्र तस्मिन् उत्थाय सारिफतं गत्वा नगरद्वारं
प्राप्ते काचिद् विधवा तत्रेन्धनानि संगृह्णातीति दृष्ट्वा स ताम् आहूय
जगाद, भवति, त्वया मदर्थं पात्रेणैकेन किञ्चित् सलिलम् आनीयतां
११ पास्याम्यहं। ततस्तस्यां तदानयनार्थं गच्छन्त्यां स ताम् आहूय जगाद,
१२ त्वं मदर्थं पूपमेकमपि करेण समानय। ततः सा व्याजहार, तव प्रभोः
परमेश्वरस्यामरतायाः शपथं कृत्वाहं वदामि ममैकोऽपि पूपो न विद्यते,
केवलम् अलिञ्जरे मुष्ट्येकपरिमितं गोधूमचूर्णं भाण्डे च किञ्चित् तैलं
विद्यते तस्मान्मयेन्धनानि संगृह्यन्ते, संगृहीतेषु मया गत्वा मम मत्पुत्रस्य
च कृते ते गोधूमतैले पक्ष्येते, ततः परम् आवां भुक्त्वा मृत्युं गमिष्यावः।
१३ एलियस्तां जगाद, मा भैषीः, त्वया यद् उक्तं तदेव गत्वा क्रियतां,
तथापि तेन प्रथमं मदर्थम् एकं क्षुद्रं पूपं पक्त्वा मम सन्निधिम् आनय,
१४ ततः परं गत्वा तव त्वत्पुत्रस्य च कृते पक्तुं शक्ष्यसि। यत इस्रायेलः
प्रभुः परमेश्वरो वाक्यमिदं गदति, परमेश्वरो यावत् मेदिन्यां वृष्टिं न
करिष्यति तावत् सोऽलिञ्जरो गोधूमहीनो न भविष्यति तत् तैलभा-
१५ ण्डमपि शून्यतां न गमिष्यति। ततः सा व्रजित्वैलियेन यत् कथितं तदेव
चकार। इत्थम् एलियः सा योषित् तस्या परिजनाश्च बहुदिनानि
१६ यावद् आहारं लेभिरे। परमेश्वर एलियेन यत् कथितवान् तदनु-
सारात् सोऽलिञ्जरो गोधूमहीनो न बभूव तैलभाण्डमपि शून्यतां न गतं।
१७ अनन्तरं तस्या गृहिण्याः पुत्रो रोगग्रस्तो बभूव तस्य रोगस्य तादृशी
१८ वृद्धिं जगाम यत् तस्य प्राणवियोगोऽभवत्। ततः सा योषिद् एलियं
जगाद भो ईश्वरीयलोक त्वया समं मम कः सम्बन्धः? त्वं किं ममाप-
राधं स्मारयितुं मम तनयं मारयितुञ्च मम समीपम् आगतोऽसि?
१९ ततः स तां प्रतिजगाद तव पुत्रं मह्यं देहि। अनन्तरं स तस्या वक्षस-
स्तं बालकं गृहीत्वा स्वयं यत्र न्यवसत् तत्र गृहपृष्ठस्थिते क्षौमे नीत्वा
२० स्वशय्यायां शाययामास। अनन्तरं परमेश्वरम् आहूय बभाषे हे मम

प्रभो परमेश्वर यया विधवया समं मयोष्यते त्वं किं तस्यास्तनयं मार-
यितुं तस्या अप्यमङ्गलं करिष्यसि? अनन्तरं स त्रीन् वारान् तस्य २१
बालकस्योपरि स्वशरीरं विस्तार्य्य परमेश्वरम् आहूय बभाषे, हे मम
प्रभो परमेश्वर, अस्यान्तरे प्राणाः पुनः सन्तिष्ठन्तां। तत एलियस्य वाक्ये २२
परमेश्वरेण गृहीते तस्य बालकस्यान्तरे प्राणाः पुनः समतिष्ठन्त तेन स
सजीवो बभूव। तदानीम् एलियस्तं बालकं गृहीत्वा गृहपृष्ठस्थकोष्ठाद् २३
गृहमध्यम् आनीय तस्य मात्रे दत्त्वा कथयामास पश्य तव पुत्रो जीवति।
ततः सा योषिद् एलियं बभाषे त्वम् ईश्वरीयलोक एवासि तव २४
वक्त्रस्थितम् ईश्वरीयवाक्यञ्च प्रकृतमिति मयाधुना बुद्धं।

---

१८ अष्टादशोऽध्यायः।

१ दुर्भिक्षसमय आहावस्य समीपम् एलियस्य गमनं ७ ओबदियस्य साक्षात् करणं तयोः कथोपकथनञ्च १७ आहावस्य साक्षात् करणं तयोः कथोपकथनञ्च २१ आकाशात् पतितेन वह्निना बले दग्धत्वं बालः पुरोहितानां शोडितत्वञ्च ४१ प्रार्थनया वृष्टिप्राप्तिराहावस्याग्र एलियस्य गमनञ्च।

बहुतिथकाले गते तृतीयवत्सरे परमेश्वरस्य वागियम् एलियस्य १
समीपमुपतस्थौ त्वं गत्वाहावाय दर्शनं देहि यतो मया मेदिन्यां वृष्टिः
कारिष्यते। तत एलिय आहावाय दर्शनं दातुं गतः। तदानीमपि २
शोमिरोणेऽतीव दुर्भिक्षम् आसीत्। अत आहावो निजनिवेशनस्या- ३
धिपतिम् ओबदियम् आह्वयत्। स ओबदियः परमेश्वरस्यातीव भक्तः।
यस्मिन् काले ईषेवल् परमेश्वरस्य भविष्यद्वादिन उदच्छिनत् तस्मिन् ४
काले स ओबदियः शतं भविष्यद्वादिन आदाय पञ्चाशत् पञ्चाशत् तान्
गह्वरमध्ये गोपयित्वान्नतोयदानेन जीवयामास। आहावस्तम् ओब- ५
दियं जगाद, अस्माकं सर्व्वे पशवो यन्न विनश्येयुस्तत्कृते त्वं जनपदस्य
सर्व्वाणि पयःप्रस्रवणानि स्रोतांसि च गच्छ तेन को जानाति वाजि-
नाम् अश्वतराणाञ्च प्राणरक्षणायास्माभिस्तृणानि लप्स्यन्ते। अनन्तरं तौ ६
जनपदं पर्य्यटितुं तं द्विभागं चक्राथे तत आहाव एकाकी मार्गेणैकेन
जगाम, ओबदियस्त्वेकाकी तदन्यवर्त्मना जगाम। अपरम् ओबदियो ७
यदा यात्राम् अकरोत् तदानीम् एलियस्य साक्षात् प्राप, ततः स तं
परिचीय भूमिष्ठः सन् बभाषे, भवान् किं मम प्रभुरेलियः? ततः स ८
तं प्रतिजगाद, अहमेव। त्वं गत्वा निजप्रभुम् आवेदय, पश्य एलीय

९ आगतः। स प्रत्यवदत्, मया को दोषोऽकारि यत् त्वं निजदासं मां
१० घातयितुम् आहाबस्य करे समर्पयसि? मया तव प्रभोः परमेश्वरस्या-
मरत्वस्य शपथं कृत्वा निगद्यते मम प्रभुना राज्ञा तवान्वेषणार्थं यत्र दूता
न प्रेषिता एतादृश एकोपि देश एकमपि राष्ट्रं वा न विद्यते, तैः सर्व्वै
र्दूतैरुदितं सोऽत्र नास्ति; अपरं तेषां राष्ट्राणां देशानाञ्च लोकैरपि त्वं
११ न दृष्ट एतस्मिन्नपि नृपतिस्तान् शपथं कारयामास। इदानीं त्वं मां
१२ वदसि, एलिय आगत इति वार्त्तां त्वं गत्वा निजप्रभवे निवेदय। तत-
स्तव समीपात् मम गमनात् परं परमेश्वरस्यात्मा यदि मया न विदितं
किञ्चन स्थानं त्वां नयेत् तर्हि मया गत्वाहाबाय वार्त्तायां कथितायां
स त्वाम् अप्राप्य मां हनिष्यति। किन्तु तव दासोऽहम् आबाल्यात्
१३ परमेश्वरस्य भक्तोऽस्मि। ईषेबला परमेश्वरस्य भविष्यद्वादिनां हनन-
काले मया यद् अकारि तत् किं मम प्रभुः केनापि न ज्ञापितः? अहं
परमेश्वरस्य शतसङ्ख्यानां भविष्यद्वादिनां पञ्चाशत् पञ्चाशद् गह्वरे गोप-
१४ यित्वान्नतोयदानेनाजीवयं। इदानीं त्वं मां वदसि पश्य, एलिय आगतो
वार्त्तामिमां त्वं गत्वा निजप्रभुम् आवेदय, तथा कृते स मां हनिष्यति।
१५ एलियः कथयाञ्चकार यः सैन्याध्यक्षः परमेश्वरो मया परिचर्य्यते तस्या-
१६ मरत्वस्य शपथं कृत्वा वदामि, अद्यैवाहं तस्मै दर्शनं दास्यामि। अन-
न्तरम् ओबदिय आहाबं साक्षात् कर्त्तुं गत्वा तं वार्त्तां न्यगदत् तत
आहाब एलियं साक्षात् कर्त्तुं यात्रां चकृवान्।

१७　अनन्तरम् आहाब एलियं विलोक्य व्याहरत्, इस्रायेलः क्लेष्टा त्वं
१८ किम् आगतोऽसि? एलिय ऊचिवान् इस्रायेल् मया न क्लिष्टः किन्तु
त्वया तव पितृवंशेन च यतो यूयं परमेश्वरीयनिदेशान् विहाय बाले-
१९ ऽनुगामिनो जाताः। इदानीं त्वं दूतान् प्रहित्य सर्व्वान् इस्रायेलीय-
लोकान् ईषेबलो भोजनासने भुञ्जानान् बालः सार्द्धचतुःशतानि भवि-
ष्यद्वादिनस्तैत्यवृक्षस्य चतुःशतानि भविष्यद्वादिनश्च कर्म्मिलशिलोच्चये
२० मम समीपे संगृहाण। तत आहाबः सर्व्वेषाम् इस्रायेलीयवंशानां
समीपं दूतान् प्राहिणोत् तान् भविष्यद्वादिनोऽपि कर्म्मिलशिलोच्चये
समगृह्णाच्च।

२१　अनन्तरम् एलियः सकललोकानां समीपं समीय प्रोवाच यूयं कति
कालं द्वयो र्भावोश्वरयो स्थापयिष्यथ? यिहोवा यदीश्वरोऽस्ति तर्हि
तमेवानुव्रजत यदि च बाल् ईश्वरोऽस्ति तर्हि तमेवानुव्रजत। ततो लोका

एकमपि वचस्तं न प्रत्यवदन्। तत एलियो लोकान् अवोचत् परमे- २२
श्वरस्य भविष्यद्वादिनाम् एकाक्यहमेवावशिष्टोऽस्मि किन्तु वालो भवि-
ष्यद्वादिनः सार्द्धचतुःशतानि जनाः विद्यन्ते। तैरस्मत्सन्निधिं द्वौ वृष- २३
भावानीयेताम् अपरं स्वेषां कृते तयोरेकतरो वृषभो व्रियतां। ते तं
छित्त्वा काष्ठानाम् उपरि निदधतां किन्तु तत्र वह्निस्तै र्न दातव्यः।
अपरम् अहम् अन्यतरं वृषभं परिष्कृत्य काष्ठानाम् उपरि निधास्ये
किन्तु तत्र वह्निं न दास्यामि। अनन्तरं यूयं स्वीयदेवस्य नाम्ना प्रार्थनां २४
कुरुध्वम् अहञ्च यिहोवा नाम्ना प्रार्थयिष्ये ततस्तयो र्मध्ये यो वह्निरूपम्
उत्तरं दास्यति स एव सत्य ईश्वरो भविष्यति। तदानीं सकललोकाः
प्रत्यवदन् एषा वागुत्तमा। अनन्तरम् एलियो वालो भविष्यद्वादिनो २५
जगाद, यूयं बहवः स्थ तस्माद् यूयम् अग्रे स्वेषां कृते वृषभमेकं वृत्वा
परिष्कुरुध्वं पश्चात् स्वेषां देवस्य नाम्ना प्रार्थयध्वं किन्तु तत्र वह्निं न
दत्त। अनन्तरं तेभ्यो यो वृषभोऽदीयत तमादाय ते पर्य्यस्कुर्व्वन्त। २६
अपरं हे वाल् अस्मभ्यम् उत्तरं देहीति वाचा प्रातःकालमारभ्य मध्याह्न-
कालं यावद् वालो नाम्ना प्रार्थयाञ्चक्रिरे किन्तु कापि वाणी किमप्युत्तरं
वा केनापि नाश्रूयत ततस्ते तस्यां निर्म्मितायां वेद्याम् उत्प्लोतुम् उप-
चक्रमिरे। अनन्तरं मध्याह्नकाल एलियस्तान् आकारयन् व्याहरत् २७
यूयम् उच्चैःस्वरम् आह्वयत स देव एव स ध्यायति विहरति वा यात्रां
करोति वा किं वा भवितुं शक्नोति स निद्रागतो युष्माभि र्जागरयि-
तव्यश्च। अनन्तरं त उच्चैःस्वरं समाह्वयन् स्वेषां रीत्यनुसारेण शोणित- २८
निःसरणं यावत् स्वानि शरीराणि छूरिकाभिरस्त्रैश्चाजघ्नुः। अपरं २९
मध्याह्नकालेऽतीतेऽपि ते सन्ध्याकालीयं बलिदानं यावत् प्रालपन् तथापि
कापि वाणी किमप्युत्तरं वा केनापि नाश्रूयत मनोनिधायकश्च कोपि
नासीत्। अनन्तरम् एलियः सकललोकान् व्याहरत्, यूयं मम समीप- ३०
मागच्छत, तेन सकललोकेषु तस्य समीपं समीतेषु स परमेश्वरस्य भग्नां
वेदिं पुन र्निर्म्ममे। तव नामधेयम् इस्रायेल् भविष्यतीति परमेश्वरो यं ३१
याकूवम् उक्तवान् एलियस्तस्य पुत्राणां वंशानां सङ्ख्यानुसारेण द्वादश-
पाषाणान् गृहीत्वा तैः पाषाणैः परमेश्वरस्य नाम्ने यज्ञवेदिमेकां निर्म्ममे।
अपरं वेद्याश्चतुर्दिक्षु या भारद्वयपरिमितानि धान्यानि धारयितुं ३२
शक्नोति तादृशीं परिखामेकां चखान। अनन्तरं स इन्धनानि संस्थाप्य ३३
वृषभं छित्त्वा खण्डं खण्डं कृत्वा चेन्धनानामुपरि निधाय बभाषे चतुः-

३४ कलसान् तोयैः परिपूरयत हव्योपरीन्धनोपरि च तान्यवतारयत। अन-
न्तरम् एलिय ऊचे द्वितीयवारं तत् कुरुत ततस्ते द्वितीयवारं तद्
अकुर्व्वन्। अनन्तरं स उक्तवान् तृतीयवारं तत् कुरुत, ततस्ते तृतीय-
३५ वारं तद् अकुर्व्वन्। ततो वेद्याश्चतुर्दिक् तोयं जगाम खातमपि तैस्तोयैः
३६ पर्य्यपूर्य्यत। अपरं सन्ध्याकालीयबलिदानसमय एलियो भविष्यद्वादी
समीपमेत्य जगाद, हे इब्राहीम इस्हाक इस्रायेलश्च प्रभो परमेश्वर,
त्वम् इस्रायेलो मध्य ईश्वरोऽस्यहञ्च तव दासोऽस्मि तव वचसा च मया
३७ कर्म्माण्येतानि क्रियन्त इदमद्य सर्व्वैर्ज्ञायतां। हे परमेश्वर मम वाचं
निशामय मम वाचं निशामय, हे यिहोवा त्वमेवेश्वरोऽसीति लोकैरेतै
३८ र्ज्ञायतां त्वञ्च तेषां मनांसि परिवर्त्तय। तदानीं परमेश्वरीयवह्निः पतन्
होमबलिम् इन्धनानि पाषाणान् धूलीश्च प्रददाह परिखास्थितानि
३९ तोयानि शोषयाञ्चकार च। तदानीम् एतद् विलोक्य सर्व्वे लोका भूमौ
निपत्य प्रणेमु वाचमिमां जगदुश्च यिहोवा एवेश्वरोऽस्ति यिहोवा
४० एवेश्वरोऽस्तीति। अनन्तरम् एलियस्तान् अवदत्, यूयं बालो भवि-
ष्यद्वादिनो धरत तेषाम् एकोऽपि न पलायतां। ततस्तैस्तेषु धृतेष्वेलियः
कीशोनस्रोतसस्तटेऽवरोह्य तत्र तान् अवधीत्।

४१ अनन्तरम् एलिय आहाबं व्याहरत् त्वं गत्वा भुंक्ष्व पिब च यतो
४२ महावृष्टेः शब्दो मया श्रूयते। तत आहाबे भोक्तुं पातुञ्च गत एलियः
कर्म्मिलस्य शिखरम् आरुह्य भूमौ जानुनी पातयित्वा निजशिरो जानू-
४३ परि स्थापितवान्। अपरं निजदासं जगाद त्वं गत्वा सागरस्य दिश-
मवलोकय। ततः स व्रजित्वा विलोक्य व्याहरत् किमपि नास्ति।
४४ इत्थम् एलियः सप्तवारान् तम् अवोचत्, याहि। अपरं सप्तमे वारे स
गदितवान्, पश्य मनुष्यस्य कर इवैकः क्षुद्रो मेघः समुद्राद् उत्तिष्ठति।
तदानीम् एलियः कथयामास, त्वं गत्वाहाबं ब्रूहि वृष्ट्या यत् त्वं बाधां
४५ न लभसे तदर्थं रथमारुह्य व्रज। इत्यनन्तरे मेघवाताभ्यां गगने कृष्ण-
वर्णे जाते महावृष्टि र्बभूव। तत आहाबो यानमारुह्य यिष्रियेलं नगरं
४६ जगाम। अपरं परमेश्वर एलिये समधिष्ठिते स कटिदेशं बद्धा यिष्रि-
येलः प्रवेशस्थानं यावद् आहाबस्याग्रेऽग्रे धावितवान्।

---

१९ ऊनविंशोऽध्यायः।

एलियस्य पलायनं ४ प्रान्तरे जीवने तस्य विरक्तत्वं स्वर्गदूतेन सान्त्वनाप्राप्तिः ९ होरेवगिरावीश्वरस्य दर्शनम् अपरं हसायेलस्य येहोरिलीशायस्य चाभिषेकार्थं तस्य प्रेषितत्वं १९ इलीशायस्य कुटुम्बादीनां त्यजनम् एलियस्य पश्चाद्गमनञ्च।

अनन्तरम् एलियेन यद्यत् कृतं सर्व्वे भविष्यद्वादिनश्च यत् खड्गाघा- १
तेन तेन हता इति वार्त्तायाम् आहाबेनेषेबलं कथितायाम् ईषेवल् २
एलियस्य समीपं दूतमेकं प्रहित्य वाचमिमां तं श्रावयामास, श्व एत-
स्मिन् समये तेषाम् एकस्य प्राणानिव तव प्राणान् यदि न करिष्ये तर्हि
देवा मह्यम् अमुकं दण्डं ततोऽधिकञ्च दण्डं ददतु। तत एलियस्तद् ३
विज्ञाय प्राणरक्षार्थं प्रस्थाय यिहूदादेशस्थां वेर्शेवाम् उपस्थाय तत्र
स्थाने निजदासं विजहौ।

अनन्तरं स एकाकी दिनमेकं प्रान्तरेण गत्वा कस्यचिद् रोतमतरो- ४
रध उपविवेश, अपरं मृत्युं प्रार्थयमानो व्याजहार हे परमेश्वर, अलं
जीवनेनेदानीं मम प्राणान् गृहाण यतोऽहं निजपूर्व्वपुरुषेभ्य उत्तमो
नास्मि। अनन्तरं तस्मिन् रोतमतरोरधः शयित्वा निद्रां गते दूत एक ५
आगत्य तं स्पृष्ट्वा बभाषे, उत्तिष्ठ भुंक्ष्व च। ततस्तेन दृष्टौ कृतायां निज- ६
शिरःस्थानेऽङ्गारोपरि पक्वः पूप एको भाण्डमेकं तोयञ्च विद्येते इति
ददृशे तस्मात् स भुक्त्वा पीत्वा च पुनर्वारम् अशेत। अपरं परमेश्वरस्य ७
दूतो द्वितीयवारं तस्य समीपं समेत्य तं स्पृष्ट्वा जगाद त्वयोत्थाय
भुज्यतां यतो यः पन्था त्वया गन्तव्यः स त्वयाशक्यः। ततः स उत्थाय ८
भोजनपाने चक्रे तस्य भोजनशक्त्या च चत्वारिंशद् दिवारात्रीरीश्वरस्य
शिलोच्चयं होरेवं यावद् ययौ।

तत्र स गह्वरमेकं प्रविश्य यामिनीं यापयामास; तदानीं परमेश्व- ९
रस्य वच इदं तस्य समीपम् उपातिष्ठत्, हे एलिय त्वयात्र किं क्रियते?
ततः स ऊचे, अहं सैन्याध्यक्षस्य प्रभोः परमेश्वरस्य कृतेऽतीवोत्सुको- १०
ऽभवं; यत इस्रायेलीयवंशैस्तव नियमं विहाय तव यज्ञवेद्यो भग्ना-
स्तव भविष्यद्वादिनः खड्गे हतास्च तेषां मध्येऽहम् एकाक्यवशिष्टोऽस्मि;
अपरं ते मम प्राणान् नाशयितुं मामपि मृगयितवन्तः। अनन्तरं स ११
उदितवान् त्वं वहिर्भूय पर्व्वतोपरि परमेश्वरस्य सम्मुखे तिष्ठ, पश्य
परमेश्वरस्तेन स्थानेन गतिं करिष्यति। ततो गिरिभेदकः पाषाणभञ्जकश्च
प्रबलप्रचण्डवायुः परमेश्वरस्याग्रे ययौ तस्मिन् वाते परमेश्वरो नाविद्यत।

वातात् परं भूमिकम्पो बभूव, तस्मिन् भूमिकम्पेऽपि परमेश्वरो नावि-
१२ द्यत। भूमिकम्पात् परं वह्नि र्बभूव तस्मिन् वह्नावपि परमेश्वरो नावि-
१३ द्यत। वह्नेः परम् ईषच्छब्दकारी क्षुद्र एकः स्वरो बभूव। तदानीम्
एलियस्तं श्रुत्वा वस्त्रेण मुखमाच्छाद्य वहिर्गत्य गह्वरस्य द्वार्य्यतिष्ठत् ततस्तं
१४ प्रति वाणीयम् उपातिष्ठत् हे एलिय त्वयात्र किं क्रियते? तेनोदितम्
अहं सेनाध्यक्षस्य प्रभोः परमेश्वरस्य कृतेऽतीवोत्सुकोऽभवं यत इस्रा-
येलीयवंशैस्तव नियमं विहाय तव यज्ञवेद्यो भग्नास्तव भविष्यद्वादिनः
खड्गै र्हतास्च तेषां मध्येऽहम् एकाक्यवशिष्टोऽस्मि, अपरं ते मम प्राणान्
१५ नाशयितुं मामपि मृगयितवन्तः। परमेश्वरो व्याजहार त्वं प्रान्तरेण
परावृत्य दम्मेषकं याहि तत्रोपस्थाय हसायेलम् अरामदेशस्य राजत्वे
१६ ऽभिषिञ्च। अपरं निम्शेः पुत्त्रं येहूम् इस्रायेल्देशस्य राजत्वेऽभि-
षिञ्च, अपरम् आबेलमिहोलानिवासिनं शाफटस्य पुत्त्रम् इलीशायं
१७ तव विनिमयेन भविष्यद्वादित्वेऽभिषिञ्च। यो जनो हसायेलस्य खड्गाद्
रक्षिष्यते स येहूना हनिष्यते यश्च येहोः खड्गाद् रक्षिष्यते स इलीशायेन
१८ हनिष्यते। किन्तु बालः सम्मुखे यै र्जानुनी न पातिते येषां वदनैश्च स न
चुम्बितस्तादृशाः सप्तसहस्राणि मनुजा इस्रायेलो मध्ये मयावशेषिताः।
१९ अनन्तरं स तस्मात् स्थानात् प्रस्थाय शाफटस्य सुतस्येलीशायस्य
सम्मुखं प्राप, तदानीं तस्याग्रे गवां द्वादशयुग्मानि क्षेत्रम् अकर्षन् तेषां
द्वादशेन युग्मेन सार्द्धं स स्वयम् आसीत्। अनन्तरम् एलियः समीपं
२० समीय निजम् उत्तरीयवसनं तस्य गात्रे निचिक्षेप। ततः स गा
विहायैलियस्य पश्चाद् धावन् बभाषे भवान् यद्यनुजानाति तर्ह्यहं
निजं पितरं मातरञ्च चुम्बित्वा भवन्तम् अनुव्रजिष्यामि। ततः स तम्
२१ अवादीत्, अहं तव किमकार्षं? त्वं गत्वा परावृत्यागच्छ। अनन्तरं स
तस्य समीपात् परावृत्य गत्वा तद् गोयुग्मं गृहीत्वा छेदयामास युगे-
न्धनैश्च तयो र्मांसं पपाच तस्मिन् लोकेभ्यो वितरिते ते तद् बुभुजिरे च
अनन्तरं स उत्थायैलियस्य पश्चाद् गत्वा तस्य परिचारको बभूव।

---

२० विंशतितमोऽध्यायः।

१ बिन्हददेन शोमिरोणस्यावरोधनं १३ भविष्यद्वादिनो मन्त्रणयारामीयलोकानां हतत्वं २२ भविष्यद्वाक्यानुसाराद् अरामीयलोकानां पुनरागमनं २८ भविष्यद्वा-

दिनो मन्त्रणयारामीयाणां पुनर्व्वारं हतत्वं ३१ पराजितेन विन्हददेनोपायन-
दानं ३५ आहाबं प्रति दृष्टान्तकथनं भविष्यद्वचनञ्च।

अनन्तरम् अरामीयो विन्हददो नृपतिः स्वीयसकलसैन्यानि निज- १
सहायान् द्वात्रिंशद् राजानो हयान् रथांश्च संगृह्य शोमिरोणम्
अवरुन्धन् तद्विरुद्धं युयोध। अपरं स इस्रायेलीयनृपतेराहाबस्य समीपं २
नगरं दूतान् प्रहित्य जगाद, विन्हदद इमां वाचं वक्ति, त्वदीयानि ३
दुर्व्वर्णसुवर्णानि ममैव तव प्रियतमा जाया बालकाश्च मदीयाः। तत ४
इस्रायेलीयभूपतिः प्रतिजगाद हे मम प्रभो राजन् तव वाक्यानुसाराद्
अहमपि भवदीयो मदीयं सर्व्वस्वञ्च भवदीयं। अनन्तरं दूताः पुन- ५
रागत्य बभाषिरे विन्हदद इमां वाचं ब्रवीति त्वं निजं हेम रजतं
जाया पुत्रांश्च मह्यं देहीत्यहं दूतैस्त्वामाज्ञापितवान्। अतः श्व एतस्मिन् ६
समये मया तव समीपं भृत्याः प्रेषयिष्यन्ते ते तव निकेतनं तव भृत्यानां
वेश्मानि चानुसन्धाय तव मनोरम्यं यद् यद् विद्यते तत् सर्व्वं हस्तैरा-
दाय स्थानान्तरं नेष्यन्ति। तत इस्रायेलीयनृपति र्जनपदस्य प्राचीन- ७
मनुजान् सर्व्वान् आहूय जगाद एष मानुषः कुचेष्टामाचरतीति युष्माभि
र्बुध्यतां दृश्यताञ्च, मम जाया पुत्रा रजतहेमानि चाधि तेन दूतै-
राज्ञापितोऽहं नानङ्गीकृतवान्। ततः प्राचीना लोकाश्च सर्व्वे तं जगदुः, ८
तस्याज्ञा त्वया न ग्रहीतव्या नाङ्गीकर्त्तव्या च। अनन्तरं स विन्हददस्य ९
दूतान् जगाद, यूयं स्वप्रभवे राज्ञे कथयत भवतो दूतैरहं प्रथमवारं
यद् आज्ञापितस्तत् सर्व्वं साधयिष्यामि किन्त्वाज्ञामेनां साधयितुं न
शक्नोमि। ततस्ते दूताः प्रस्थाय तं वार्त्तां जगदुः। अनन्तरं विन्हददो १०
दूतान् प्रहित्य तं जगाद, एतस्य शोमिरोणस्य धूलयो यदि मम पश्चा-
द्गामिनां लोकानां मुष्टीन् पूरयितुं पारयेयुस्तर्हि देवा मह्यम् अमुकं
दण्डं ततोऽधिकं दण्डं वा ददतु। तत इस्रायेलीयो नरपतिः प्रत्यब्रवीत्, ११
तस्मै कथयत सज्जात्यागीव सज्जाग्राही न श्लाघतां। तस्मिन् समये विन्- १२
हददस्तदीयसहाया राजानश्च दूष्येष्वपिवन् इत्यनन्तरे स तां वार्त्तां
निशम्य निजदासान् अब्रवीत् नगरमाक्राम्यत ततो लोकैर्नगरमाक्रम्यत।

अनन्तरम् इस्रायेलीयाहाबस्य नृपतेः समीपम् एको भविष्यद्वादी १३
समेत्य कथयामास परमेश्वर इमां वाचं वदति त्वं किम् एतद् वृहद्
लोकारण्यम् अपश्यः? मयाद्य तव हस्ते ते नराः समर्पयिष्यन्ते तेनाहमेव
परमेश्वर इति भोत्स्यसे त्वं। आहाबो गदितवान् केन तान् समर्पयि- १४

ष्यसि? भविष्यद्वादी गदितवान् परमेश्वर इति वाचं ब्रवीति मण्डले-
श्वराणां तरुणलोकैः। ततो राजा पृष्टवान् को युद्धायोपक्रमिष्यते?
१५ स उक्तवान् त्वमेव। अनन्तरं तेन मण्डलेश्वराणां तरुणेषु गणितेषु
ते सङ्ख्यया द्वे शते द्वात्रिंशत् जना आसन् ततः परम् इस्रायेलीयवंशानां
१६ सकललोकेषु गणितेषु ते सङ्ख्यया सप्तसहस्राणि लोका आसन्। अन-
न्तरं ते मध्याह्नकाले वहिरगच्छन् तस्मिन् समये विन्हददस्तस्य सहाया
१७ द्वात्रिंशद् राजानश्च दूष्येषु मद्यपानेन मत्ता आसन्। अपरं यदा
मण्डलेश्वराणां तरुणा अग्रे वहिरगच्छन् तदानीं विन्हददेन दूताः
प्रहिताः। त आगत्य वार्त्तामिमाम् अवदन् शोमिरोणात् कतिपयलोका
१८ वहिरगच्छन्। तदानीं स आदिदेश ते यदि सन्धिनिमित्तं वहिरागता-
स्तर्हि युष्माभिर्जीवग्राहं गृहीतव्याः, यदि वा रणनिमित्तं वहिर्गतास्त-
१९ र्ह्यपि युष्माभिर्जीवग्राहं गृहीतव्याः। अनन्तरं प्रदेशाधिपतीनां तरुणेषु
२० तेषां पश्चाद्ग्रामिसैन्येषु च नगराद् वहिर्भूतेषु तेषाम् एकैको जनोऽरा-
मीयाणाम् एकैकं जनम् अवधीत् ततोऽरामीयेषु पलायितेष्विस्रायेलीय-
लोकास्तेषां पश्चाद् अधावन्। अपरम् अरामीयो विन्हददो मही-
२१ पतिर्हयमारुह्य सादिभिः सह पलाय्य रक्षां प्राप। अपरम् इस्रायेलीयो
राजा वहिर्गत्य तेषां वाजिनो रथांश्च पराजयत्। इत्थं तेनारामीयाणां
महाहननं कृतं।

२२ अनन्तरं स भविष्यद्वादी इस्रायेलीयनरपतेः समीपं समीय जगाद
त्वं गत्वात्मानं बलिनं कुरु सावधानो भवन् निजकर्त्तव्यं विवेचय यत
२३ आगामिवत्सरेऽरामीयो राजा तव विरुद्धं पुनरागमिष्यति। अनन्तरम्
अरामीयनरपतेर्भृत्यास्तम् अवदन् तेषां देवाः पर्व्वतानां देवाः सन्त्ये-
तत्कारणात् तेऽस्मत्तो बलाधिकाः। किन्तु वयं यदि तैः समं समभूमौ
२४ युध्यामस्तर्हि तेभ्योऽवश्यं बलवन्तो भविष्यामः। अतस्त्वम् इदं कर्म्म कुरु
सर्व्वान् भूपतीन् स्वपदेभ्यो दवयित्वा तेषां विनिमयेन सेनापतीन् नियो-
२५ जय। अपरं तव यावन्ति हयरथादीनि बलानि व्यनश्यन् तावन्ति
हयरथादीनि बलानि संगृह्य वयं समभूमौ तैः समं योत्स्यामस्ततो
ऽवश्यं तेभ्यो बलाधिका भविष्यामः। अनन्तरं विन्हददेन तेषां मन्त्रणां
२६ गृहीत्वा तदनुसारेण कृतं। अपरं परस्मिन् वत्सरे उपस्थिते विन्-
हददोऽरामीयान् गणयित्वेस्रायेलीयलोकैः समं योद्धुम् अफेकं जगाम।
२७ इस्रायेलीयवंशाश्च गणिता भूत्वा भक्ष्यद्रव्यादीनि समादाय तेषां विरु-

द्धम् इयुः। तत इस्रायेलीयलोका अरामीयाणां सम्मुखे शिविरं स्थापयित्वा छागशावकानां द्वौ क्षुद्रौ व्रजाविव बभूवुः किन्त्वरामीयैर्देशो व्याप्तः।

अनन्तरम् ईश्वरीय एको लोक आगत्येस्रायेलीयं भूपतिं जगाद २८
परमेश्वर इमां वाचं ब्रवीति, अरामीया अवदन् यिहोवाः पर्व्वतानाम्
ईश्वरः किन्तु समभूमीनाम् ईश्वरो नहीति तत्कारणाद् अहं तं महा-
जननिवहं तव करे समर्पयिष्यामि तेनाहमेव परमेश्वर इति यूयं
वेदिष्यथ। अपरं तेषु शिविरे स्थित्वा सप्ताहं सम्मुखासम्मुखीभूतेषु २९
सप्तमे दिने युद्धं प्रजघटे तत इस्रायेलीयलोका एकस्मिन् दिनेऽरा-
मीयाणां लक्षं पदातीन् व्यनाशयन्। ततोऽवशिष्टाः सेनाः पलाय्याफे- ३०
कनगरं प्रविविशुः किन्तु तेषाम् अवशिष्टानां सप्तविंशतिसहस्राणां
लोकानाम् उपरि प्राचीरं निपपात। अपरं विन्हददः पलाय्य नगरा-
भ्यन्तरस्थं गर्भागारमेकं प्रविवेश।

अनन्तरं तस्य भृत्यास्तम् अब्रुवन् इस्रायेल्वंशीया राजानः करुणा- ३१
युक्ता इत्यस्माभिः श्रुतं तस्माद् वयं निवेदयामः कटिषु शाणवसनानि
परिधाय कण्ठांश्च रज्जुभि र्वेष्टित्वास्माभिरिस्रायेलीयमहीपतेः समीपं
गम्यतां, भवितुं पारयति स तव प्राणान् रक्षिष्यति। अनन्तरं ते ३२
कटिषु शाणवसनानि परिधाय कण्ठांश्च रज्जुभि र्वेष्टित्वेस्रायेलीयरा-
जस्य समीपम् एत्य जगदुः, भवतो दासो विन्हदद आवेदयति, भवान्
मम प्राणान् जीवयितुम् अर्हति। ततः स उदितवान् स किम् इदानी-
मपि जीवति? स मम भ्राता। तदानीं ते नरास्तद् वाक्यं शुभलक्षणं ३३
बुद्ध्वा तूर्णं तस्य भावम् अनुसन्धाय कथयामासुः, विन्हददो भवतो
भ्रातैव। अनन्तरं स गदितवान् यूयं गत्वा तमानयत। ततो विन्हददे
बहिर्भूय तस्य समीपम् आगते स निजरथे तम् उपवेशयाञ्चकार।
तदानीं विन्हददस्तम् अब्रवीत् मम जनकेन तव जनकाद् यानि यानि ३४
नगराण्यपहृतानि तानि मया परावर्त्य दायिष्यन्ते, अपरं मम तातेन
शोमिरोणे यादृक् निजकृते रथ्या अक्रियन्त तादृक् त्वया निजकृते
दम्मेषके रथ्याः क्रियन्तां। तत आहाबेन गदितं मया नियममिमं कृत्वा
त्वं विस्रक्ष्यसे। अनन्तरं तेन समं नियमं विधाय स विससृजे।

अनन्तरं भविष्यद्वादीनां शिष्याणाम् एको जनः परमेश्वरस्य वचसा ३५
निजं सहशिष्यम् अब्रवीत् विनयेऽहं त्वं मां ताडय किन्तु स तं ताड-
यितुं नान्वमन्यत। ततः स तमवदत् त्वं परमेश्वरस्य वाक्यं नागृह्णा ३६

अतो मम समीपात् त्वया गमने कृते सिंह एकस्त्वां हनिष्यति। अनन्तरं
३७ तस्य समीपात् तस्मिन् गते सिंह एकस्तं प्राप्य जघान। अनन्तरं स
जनमन्यं प्राप्य जगाद, विनयेऽहं मां ताडय ततः स तं ताडयन् विक्ष-
३८ तवान्। अनन्तरं स भविष्यद्वादी गत्वा प्रच्छन्नवेशार्थम् उष्णीषवस्त्रेण
३९ चक्षुष्याच्छाद्य वर्त्मनि राजानं प्रतीक्ष्य तस्थिवान्। अपरं राजनि
मार्गेणागच्छति स राजानं प्रति प्रोच्चैःस्वरम् आवेद्य कथयामास तव
दासे मयि समरं गते पश्य जन एकः पार्श्वादागत्य मम समीपं पुमांस-
मेकमानीय गदितवान् एनं मनुजं रक्ष, एष यदि केनापि प्रकारेणा-
प्राप्यो भवेत् तर्हि तस्य प्राणानां विनिमयेन तव प्राणा यास्यन्ति नो चेत्
४० त्वया किक्करैकपरिमितं रजतं दायिष्यते। किन्तु तव दासे मयि तत
इतो व्यग्रे सति स गतवान्। अनन्तरम् इस्रायेलीयो महीपतिस्तं
४१ जगाद त्वं निजदण्डनं निरचिनोः। अनन्तरं तेन तूर्णं निजचक्षुर्भ्यां
वस्त्रेऽपसारिते स यद् भविष्यद्वादिनाम् एको जन इतीस्रायेलीयेन नर-
४२ पतिना परिचितं। अनन्तरं तेन नरपति र्व्याजह्रे परमेश्वर एतां वाचं
ब्रवीति यो जन उच्छिन्नतायै मया निरूपितः स त्वया निजहस्तात्
मोचित एतत्कारणात् तस्य प्राणानां विनिमयेन तव प्राणा आदायिष्यन्ते
४३ तस्य लोकानाञ्च विनिमयेन तव लोका आदायिष्यन्ते। तत इस्रायेलीयो
महीपति र्विमर्षोऽसन्तुष्टश्च निजभवनं गच्छन् शोमिरोणं प्रविवेश।

---

२१ एकविंशोऽध्यायः।

१ नावोतस्य क्षेत्रम् अप्राप्याहावस्य विमर्षणं ५ ईषेवला नावोतस्य हतत्वं १५ नावो-
तस्य क्षेत्राहरणम् आहावेन १७ आहावेषेवलो र्दण्डनस्य भविष्यद्वचनं २५ आहाव-
स्यानुतपनकारणात् तस्य दण्डनस्य क्षमणं।

१ एतेषां घटनानां पश्चाद् यिष्रियेलीयस्य नावोतस्य गोस्तनीक्षेत्रमेकं
यिष्रियेलनगर आसीत् तत् शोमिरोणीयभूपतेराहावस्याट्टालिकायाः
२ पार्श्वे स्थितं। अत आहावो नावोतं जगाद, तव गोस्तनीक्षेत्रं मह्यं
देहि मया तत् शाकक्षेत्रं कारिष्यते यतस्तत् मम भवनस्य सन्निधौ
तस्य पार्श्वे स्थितं, तस्य विनिमयेन ततोऽप्युत्तममपरं गोस्तनीक्षेत्रमेकं
तुभ्यं मया दायिष्यते यद्वा यदि तुभ्यं रोचते तर्हि तस्य मूल्यं रजतं तुभ्यं
३ दायिष्यते मया। ततो नावोत आहावम् अब्रवीत् मया तुभ्यं निजपैतृका
४ भूमि र्वितीर्य्यते परमेश्वरस्तन्नानुमन्यतां। अनन्तरं मया पैतृका भूमि-

तुभ्यं न वितरिष्यते यिस्रियेलीयस्य नाबोतस्यैतेन वचसाहाबो विमर्षो
ऽसन्तुष्टश्च भूत्वा निजभवनं गतवान् अपरं शय्यायां निपत्य विवर्ण-
वदनश्च भूत्वा किञ्चन भोक्तुं नैच्छत्।

अनन्तरं तस्य जायेषेवल् तस्य समीपं समीय तम् अपृच्छत् तव ५
मानसम् एतादृग् विमर्षं कुतः? त्वया किञ्चन न भुज्यते च कुतः? ततः ६
स तामवदत्, अहं यिस्रियेलीयं नाबोतं सम्भाष्य तम् अवदं, रौप्यविनि-
मयेन तव द्राक्षाक्षेत्रं त्वया मह्यं दीयतां यद्वा यदि तुभ्यं रोचते तर्हि
तस्य विनिमयेन द्राक्षाक्षेत्रमपरमेकं तुभ्यमहं दास्ये ततः स प्रत्यवदत्
मया निजं गोस्तनीक्षेत्रं तुभ्यं न दायिष्यते। तदानीं तस्य जायेषेवल् ७
जगाद तथा सति त्वया किम् इस्रायेलीयजनपदस्य राजत्वं कारिष्यते?
उत्तिष्ठ भुंक्ष्व त्वदीयं मानसं हृष्टं भवतु यिस्रियेलीयनाबोतस्य गोस्तनी-
क्षेत्रं मयैव तुभ्यं दायिष्यते। अनन्तरम् आहाबस्य नाम्ना सा पत्राणि ८
लिखित्वा तस्य मुद्राक्षरेण मुद्राङ्कितानि कृत्वा नाबोतस्य समीपवासिनां
नगरस्य मुख्यानां प्राचीनानाञ्च लोकानां सविधं प्रेषयाञ्चकार। तेषु ९
पत्रेषु लिखितमेतद् वचः, युष्माभिरुपवासो घोष्यतां नाबोतश्च लोकानां
मध्य उच्चस्थाने समुपवेश्यतां। अनन्तरं त्वम् ईश्वरं राजानञ्चानङ्गी- १०
कृतवान् तस्य विपरीतम् एतत् साक्षित्वं कर्त्तुं दुराचारौ द्वौ नरौ युष्मा-
भिस्तस्य सम्मुखे स्थाप्येतां ततः परं यूयं तं वहिष्कृत्य पाषाणै र्मारयत।
अनन्तरम् ईषेवला प्रेषितेषु पत्रेषु यद्यत् लिखितं यद्यत् तयाज्ञापितञ्च ११
तदेव तन्नागरिकै र्लोकैरर्थतो नगरनिवासिभिः प्राचीनैः प्रधानमनुजैः
कृतं। तदुपवासो घोषितो नाबोतश्च लोकानां मध्य उच्चस्थान उपवे- १२
शितः। अपरं दुराचारौ द्वौ नरावागत्य तस्य सम्मुख उपविविशतुः। १३
तौ द्वौ दुराचारौ नरौ सकललोकानां समक्षं नाबोतस्य विरुद्धं वच
इदं वदन्तौ साक्षित्वं चक्रतुः, नाबोत ईश्वरं राजानञ्चानङ्गीकृतवान् ततः
स मनुजै र्नगराद् वहिष्कृतः पाषाणै र्मारितश्च। अनन्तरं त ईषेवलः १४
समीपं वार्त्तामिमां प्रेषयाञ्चक्रिरे नाबोतः पाषाणैराहतो मृतश्च।

अपरं नाबोतः पाषाणाघातैरम्रियत वच इदम् ईषेवल् निशम्याहाबं १५
बभाषे, उत्तिष्ठ यिस्रियेलीयनाबोतो मुद्रामूल्येन यद् द्राक्षाक्षेत्रं तुभ्यं
दातुं नाभ्यलषत् तद् भुंक्ष्व यतो नाबोतो न जीवति स मृत एव।
तदानीं नाबोतो मृतो वच इदम् आकर्ण्य आहाब उत्थाय यिस्रियेलीय- १६
नाबोतस्य गोस्तनीक्षेत्रम् अधिकर्त्तुं जगाम।

१७ इत्यवसरे परमेश्वरस्य वच इदं तिश्बीयस्यैलियस्य समीपम् उपाति-
१८ ष्ठत्, त्वमुत्थाय शोमिरोणनिवासिनम् इस्रायेलीयनरपतिम् आहावं
साक्षात् कर्त्तुं याहि, पश्य स नाबोतस्य गोस्तनीक्षेत्रे विद्यते यतस्तद्
१९ अधिकर्त्तुं स तत्रागच्छत् । त्वं तस्मै कथय परमेश्वर एतां भारतीं
भाषते त्वया किं नरहत्या कृता परसम्पत्ति र्लब्धा च ? पुनरपि तं वद,
परमेश्वरो भाषते श्वानो यत्र स्थाने नाबोतस्य रुधिरम् अवलीढवन्त-
२० स्तत्रैव स्थाने श्वानस्तवापि रुधिरम् अवलेक्ष्यन्ति । तदानीम् आहाव
एलियं गदितवान् हे मम रिपो त्वं किं मां प्राप्नोः ? ततः स उदित-
वान् प्राप्नवं यतस्त्वं परमेश्वरस्य साक्षात् कुत्सिताचारं कर्त्तुम् आत्मानं
२१ व्यक्रीणाः । अतएव (तेन निगद्यते) पश्याहम् अमङ्गलं त्वाम् अभिवर्त्त-
यिष्यामि, तव पश्चात् तव वंशम् उच्छेत्स्याम्याहाववंशीयान् सर्व्वपुरुषान्
२२ इस्रायेले मध्ये मुक्तान् बद्धांश्च सकलान् विनाशयिष्यामि च । त्वं येन
दुराचारेण माम् अकोपय इस्रायेलीयलोकान् पापम् अकारयश्च
तत्कारणाद् अहं निवाटपुत्रस्य यारवियामस्य वंशमिवाहियस्तस्य
२३ वाशा वंशमिव च तव वंशं करिष्यामि । अपरं परमेश्वर ईषेवलमधि
वच इदं वदति श्वानो यिष्रियेलस्य प्राचीरसमीप ईषेवलं भक्षिष्यन्ति ।
२४ आहाववंशीयो यः कश्चिन्नगरे मरिष्यति स कुक्कुरै र्भक्षिष्यते यश्च क्षेत्रे
मरिष्यति स शून्यस्य विहगै र्भक्षिष्यते ।
२५ अपरं निजजाययेषेवला प्रवर्त्तितो य आहावः परमेश्वरस्य समक्षं
कुत्सिताचारं कर्त्तुम् आत्मानं व्यक्रीणात् तस्य तुल्योऽपरः कोऽपि न
२६ बभूव । परमेश्वरो यान् इमोरीयान् इस्रायेलीयवंशस्य सम्मुखात् अद-
वयत् तेषां सकलक्रियानुसारेण स देवानाम् अनुगमनेनातीव घृणार्हं
२७ कर्म्म कृतवान् । स एवाहावस्तानि वचांस्याकर्ण्य निजवसनानि चि-
च्छेद गात्रे शाणवसनं परिदध उपवसन् शाणवसने शिश्ये नम्रत्वम्
२८ आचचार च । ततः परमेश्वरस्य वचनमिदं तिश्बीयस्यैलियस्य सविध
२९ उपातिष्ठत्, आहावो मम समक्षं नम्रीभूतस्त्वया किं तन्न दृश्यते ? मम
समक्षं तस्य नम्रत्वाचरणकारणाद् अहं तस्य यावज्जीवनम् अमङ्गलं न
वर्त्तयिष्यामि । किन्तु तस्य तनयस्य जीवनसमयेऽमङ्गलं तस्यान्वयम्
अधि वर्त्तयिष्यामि ।

२२ द्वाविंशोऽध्यायः।

१ आहावेन नरपतिना मीखायस्य भविष्यद्वादिन आह्वानं १५ मीखायस्य भविष्यद्वचनं २४ वचनकारणात् तस्य दण्डनं २९ आहावेन समं यिहूदादेशीययिहोशाफटस्य नृपतेः समरगमनं ३४ आहावस्य हननं ३७ तस्य श्मशानदानं ४१ यिहोशाफटस्य विवरणं निधनञ्च ५१ आहावस्य तनयस्याहसियस्य विवरणञ्च।

अपरम् अरामीयलोका इस्रायेलीयलोकाश्च वत्सरत्रयपर्य्यन्तं विश्रम- १
मुस्तेषां परस्परं समरं नाभवत्। अनन्तरं तृतीये वत्सरे यिहूदादेशीयो २
भूपति र्यिहोशाफट इस्रायेलीयनरपतेः सविधम् अगच्छत्। तदानीम् ३
इस्रायेलीयो नरपतिः स्वीयभृत्यान् अब्रवीत् गिलियददेशस्थं रामोत-
नगरम् अस्माकमेवेति किं युष्माभि र्न ज्ञायते? किन्तु वयम् अरामीय-
भूपते र्हस्तात् तद् अनपहृत्यालसास्तिष्ठामः। अपरं स यिहोशाफटं ४
पप्रच्छ त्वं किं रामोतगिलियदे समरं कर्त्तुं मया सार्कं गमिष्यसि?
ततो यिहोशाफट इस्रायेलीयं भूपतिं जगाद, त्वम् अहञ्च समानौ तव
लोका मम लोकाश्च समानास्तव तुरगा मम तुरगाश्च समानाः। अनन्तरं ५
यिहोशाफट इस्रायेलीयं भूपतिं गदितवान्, अहं विनये, एतस्मिन्
परमेश्वरस्य का भारती साद्य त्वया पृच्छ्यतां। तत इस्रायेलीयो भूपतिः ६
प्रायेण चतुःशतानि भविष्यद्वादिनः संगृह्य पप्रच्छ युद्धार्थं रामोतगिलि-
यदं किं मया गन्तव्यं किं वा ततो निवर्त्तितव्यं? तदानीं ते कथितवन्तः
भवता गम्यतां प्रभु र्भूपते र्हस्ते तत् समर्पयिष्यति। अनन्तरं यिहोशा- ७
फटोऽपृच्छत् योऽस्माभिः प्रष्टुं शक्यते तादृशः परमेश्वरस्यापरः कोऽपि
भविष्यद्वादी किमत्र न विद्यते? तदानीम् इस्रायेलीयो भूपति र्यिहो- ८
शाफटं जगाद, वयं येन परमेश्वरं प्रष्टुं पारयामस्तादृशोऽपर एको
जनो विद्यते किन्त्वहं तम् ऋतीये यतः स मामध्यशुभवचनं विना
शुभवचनं न वदति यिम्लस्य सुतो मीखाय इति तस्य नाम। ततो
यिहोशाफटः कथयामास नरपतिनैतादृशं वाक्यं मा गद्यतां। तदानीम् ९
इस्रायेलीयो नरपतिः स्वगृहस्याध्यक्षमेकम् आहूय निदिदेश यिम्लस्य
सुतं मीखायं तूर्णम् अत्रानय। तदानीम् इस्रायेलीयो नरपति र्यिहूदा- १०
देशीयो यिहोशाफटो नरपतिश्च राजकीयपरिच्छदान्वितौ शोमिरोणस्य
गोपुरनिकटस्थे समानस्थाने स्वसिंहासनयोरुपविष्टावास्तां ते सर्व्वे
भविष्यद्वादिनश्च तयोः सम्मुखे भविष्यद्वचनम् अकथयन्। विशेषतः ११
खिनानाहस्य पुत्रः सिदिकियो लौहमये शृङ्गे निर्म्माय कथितवान्,

परमेश्वर एतां वाचं ब्रवीति, एताभ्यां त्वम् अरामीयान् निःशेषं यावद्
१२ वितोत्स्यसि। अपरे सर्व्वे भविष्यद्वादिनोऽपि तथैव भविष्यद्वाक्येनाकथ-
यन् त्वं रामोतगिलियदं गत्वा कृतार्थीभव, परमेश्वरेण तद् भूपते-
१३ र्हस्तगतं कारिष्यते। अपरं यो दूतो मीखायम् आह्वातुं गतवान् स तम्
अब्रवीत् पश्य सर्व्वे भविष्यद्वादिन एकजन इव नरपतेः शुभवचो गदन्ति,
अतोऽहं विनये त्वमपि तेषाम् एकजन इव वचो ब्रूहि शुभवाक्यं भाषस्व
१४ च। ततो मीखायो बभाषे, मया परमेश्वरस्यामरत्वस्य शपथं विधाय
निगद्यते, परमेश्वरो मां यद् आदेक्ष्यति, तदेव मया कथयिष्यते।
१५ अनन्तरं राज्ञः सविधं तस्मिन् समीते नरपतिस्तं परिपृष्टवान् हे
मीखाय, युद्धार्थम् आवाभ्यां रामोतगिलियदं गन्तव्यं किं वा ततो
निवर्त्तितव्यं? ततः स तमब्रवीत् त्वं गत्वा कृतार्थीभव, परमेश्वरस्तद्
१६ भूपतेः करे समर्पयिष्यति। अनन्तरं राजा तं जगाद त्वं परमेश्वरस्य
नाम्ना तथ्यवचो विनापरं किमपि मां न वदिष्यस्येतदधि कतिवारान्
१७ मया शपथं कारयिष्यसे? ततः स बभाषे, अहम् इस्रायेलः सकल-
लोकान् अरक्षकान् मेषानिव शिलोच्चयोपरि विकीर्णान् अपश्यं ततः
परमेश्वर उक्तवान् एतेषां स्वामी नास्ति, एकैको जनः स्वं स्वं निवेशनं
१८ कुशलेन परावृत्य व्रजतु। अनन्तरम् इस्रायेलीयो भूपतिर्यिहोशाफटम्
अभाषत, स मामध्यशुभवचनं विना शुभवचनं न वदिष्यतीत्यहं
१९ किं पूर्व्वं तुभ्यं नाकथयं? अनन्तरं मीखायो बभाषे, त्वया पारमेश्वरं
वचो निशम्यतां। अहं सिंहासनोपविष्टं परमेश्वरं तस्य दक्षिणवाम-
२० पार्श्वयो र्दण्डायमानं स्वर्गीयं सकलसैन्यञ्चापश्यं। परमेश्वर उदितवान्
आहाबो यथा रामोतगिलियदं गत्वा पतेत् तथा कस्तं भ्रमयिष्यति?
तत्र एको जन एकं प्रकारम् अन्यो जनस्त्वान्यं प्रकारं कथितवान्।
२१ अनन्तरम् एक आत्मा समेत्य परमेश्वरस्य समक्षं तिष्ठन् कथितवान्
२२ अहं तं भ्रमयिष्यामि। परमेश्वर उदितवान् केन? स उक्तवान् अहं
गत्वा तस्य सकलानां भविष्यद्वादिनां वदनेषु मृषावादक आत्मा भवि-
ष्यामि। तदानीं तेन निगदितं त्वं तं भ्रमयित्वा जयी भविष्यसि वहि-
२३ र्निर्य्याय तदेव कुरु। अनेन प्रकारेण पश्य परमेश्वरस्त्वदीयानां सर्व्व-
भविष्यद्वादिनां वदनेषु मृषाभाषकम् आत्मानं निहितवान् परमेश्वरे-
णैव त्वामध्यमङ्गलं निश्चितं।
२४ तदानीं खिनानाहस्य पुत्रः सिदिकियः समीपमागत्य मीखायस्य

गण्डम् आहत्य कथितवान् परमेश्वरीय आत्मा त्वां सम्भाषितुं मम
समीपात् केन मार्गेण गतवान्? मीखाय उदितवान् पश्य यस्मिन् दिने २५
त्वं प्रच्छन्नत्वार्थं गर्भागारं प्रवेक्ष्यसि तस्मिन् दिने तद् भोत्स्यसे। अन- २६
न्तरम् इस्रायेलीयराजो भृत्यमेकं समादिशत् त्वं मीखायं धृत्वा नगरा-
ध्यक्षस्यामोनस्य राजपुत्त्रस्य योयाशस्य च समीपं नय। अपरं ताभ्यां २७
कथय, महीपतिरिति वाचं वदति, एनं कारागारे बध्नीतं यावच्चाहं
कुशलेन परावृत्त्य नागच्छामि तावद् एनं दुःखरूपम् अन्नं भोजयतं
दुःखरूपं तोयं पाययतञ्च। ततो मीखायो व्याजहार, यदि त्वं कुशलेन २८
परावृत्त्यागमिष्यसि तर्हि परमेश्वरो मया न भाषते। अनन्तरं स
कथयामास, हे लोकाः सर्व्वे यूयम् अत्र मनो निधद्ध्वं।

अनन्तरम् इस्रायेलीयराजो यिहूदादेशीयो यिहोशाफटो राजा च २९
रामोतगिलियदं जग्मतुः। ततः परम् इस्रायेलीयो महीपति र्यिहो- ३०
शाफटं जगाद, अहं छन्नवेशं धारयन् समरं प्रविशामि त्वञ्च निजं
परिच्छदं परिधेहि। अनन्तरम् इस्रायेलीयो महीपतिश्छन्नवेशं
धारयन् समरं प्रविवेश। ततः पूर्व्वम् अरामीयो महीपतिः स्वकीयान् ३१
द्वाविंशतिरथाध्यक्षान् इत्याज्ञापयत्, यूयं केवलम् इस्रायेलीयभूपतिं
विना क्षुद्रेण महता वापरेण केनापि साकं न युध्यत। ततस्ते रथाध्यक्षै ३२
र्यिहोशाफटं निरीक्ष्योक्तम् एष एवेस्रायेलीयो भूपतिरिति, ततस्तेन
समं योद्धुम् उपाक्राम्यन्त किन्तु यिहोशाफटेनोच्चैःशब्दे कृते स इस्रा- ३३
येलो भूपति र्नहीति विज्ञाय रथाध्यक्षास्तस्यानुगमनात् निववृतिरे।

अनन्तरम् एकेन जनेन लक्ष्यं विना धनुर्गुणम् आकृष्येस्रायेलीयो ३४
नृपति र्वर्म्मणः सन्धिस्थाने शरेणाहतः। ततः स निजं सारथिं बभाषे
त्वं करौ परावर्त्य सैन्यमध्यात् मां नय यतोऽहं व्यथितोऽस्मि। तस्मिन् ३५
दिवसे समरस्तुमुलोऽभवत् नरपतिश्चारामीयाणां विरुद्धं निजे स्यन्दने
कूवरम् आलम्ब्यातिष्ठत्, किन्तु सायङ्काले ममार, तस्य क्षतस्य रुधिरं
स्यन्दनमध्ये पपात च। अनन्तरं रवेरस्तगमनसमय एकैको जनः स्वं ३६
स्वं नगरं स्वं स्वं जनपदञ्च गच्छत्विति निनादेन शिविरं व्याप्तं।

अनन्तरं नरपति र्मृतो लोकैः शोमिरोणम् आनीतस्तत्र शोमिरोणे ३७
श्मशाने निहितश्च। ततः परं लोकैर्यदा शोमिरोणस्य पुष्करिण्याः पार्श्वे ३८
स्यन्दनम् अक्षाल्यत तदा तस्य सञ्ज्ञायां क्षालितायां परमेश्वरस्य वचना-
नुसारात् सारमेयास्तस्य रुधिरं अवलिलिहुः। एतस्याहावस्य सर्व्वं ३९

चरित्रम् अवशिष्टाः क्रियास्तेन निर्म्मापितं दन्तिदन्तमयं निकेतनं तेन
निर्म्मितानि नगराणि चैतानि सर्व्वाणि किम् इस्रायेलीयभूपतीनां पुरा-
४० वृत्तपुस्तके लिखितानि न विद्यन्ते? आहाबे स्वपितृगण इव महानिद्रां
समीते तस्य तनयोऽहसियस्तस्य पदे राजा बभूव।
४१ इस्रायेलीयस्याहाबस्य नृपते राजत्वस्य चतुर्थवत्सर आसाः सुतो
४२ यिहोशाफटो यिहूदादेशे राजत्वं कर्त्तुम् आरेभे। यिहोशाफटः पञ्च-
त्रिंशद्वत्सरवयस्को राजत्वं कर्त्तुं प्रारभ्य यिरूशालमे पञ्चविंशति वत्स-
रान् यावत् राजत्वं चकार। असूवानामिका शिल्हे र्दुहिता तस्य प्रसू-
४३ रासीत्। स निजजनकस्यासा मार्गेणाचरत् तस्मात् न परावृत्त्य पर-
मेश्वरस्य साक्षात् सदाचारं चक्रे किन्तु भृगुस्थानानि नोदच्छिद्यन्त
४४ लोकास्तदानीमप्युच्चस्थानेषु बलिदानं धूपदाहनञ्चाकुर्व्वन्। यिहोशाफट
४५ इस्रायेलीयभूपतिना साकं सन्धिं चकार। एतस्य यिहोशाफटस्याव-
शिष्टा क्रिया विक्रमो योधनञ्चैतानि सर्व्वाणि यिहूदादेशीयभूपतीनां
४६ पुरावृत्तपुस्तके लिखितानि किं न विद्यन्ते? तस्य जनकस्यासाः समये
ये ये पुङ्गामिनो मनुजा अवशिष्टास्ते तेन जनपदाद् व्यापादिताः।
४७ एतस्मिन् समय इदोमदेशस्य कोऽपि भूपतिर्नासीत् एकः प्रतिनिधिः
४८ राजत्वम् अकरोत्। अनन्तरं यिहोशाफट ओफीरात् महारजता-
नाम् आनयनार्थं तर्शीशीयपोतनिवहं निर्म्मापयाञ्चकार किन्तु स
४९ पोतनिवहो न जगाम यत इत्सियोनगेबरे सर्व्वे ऽभज्यन्त। तदानीम्
आहाबस्य तनयोऽहसियो यिहोशाफटं व्याहरत् मम दासेयाः भवतो
दासेयैः साकं पोतैर्यात्रां कुर्व्वन्तु किन्तु यिहोशाफटस्य तस्मिन् मति
५० र्न बभूव। अनन्तरं यिहोशाफटो निजपितृगण इव महानिद्रां गत्वा
निजपूर्व्वपुरुषस्य दायूदो नगरे पूर्व्वपुरुषाणां समीपे श्मशाने निदधे
ततस्तस्य तनयो योरामस्तस्य पदे राजा बभूव।
५१ यिहूदादेशीययिहोशाफटस्य नृपते राजत्वस्य सप्तदशे वत्सर आहाबस्य
पुत्रोऽहसिय इस्रायेलीयानां राजत्वं कर्त्तुम् आरेभे स वत्सरद्वयं यावद्
५२ इस्रायेलदेशस्य राजत्वं चकार। स परमेश्वरस्य साक्षात् कुत्सिताचारं
चकार किञ्च निजपित्रो मार्गे येनेस्रायेल्वंशः पापे प्रवर्त्तितस्तस्य निवाट-
५३ पुत्रस्य यारबियामस्य मार्गे च चरितवान्। स स्वपितुः क्रियानुसाराद्
बालः सेवां पूजाञ्च कुर्व्वन् इस्रायेलः प्रभुं परमेश्वरं क्रोधयाञ्चकार।

राजावल्या द्वितीयं पुस्तकं।

---

१ प्रथमोऽध्यायः।

१ निजपीडायाः समयेऽहसियस्य देवसमीपं दूतानां प्रेषणं ५ दूतानां समीपम् एलियस्य प्रेषितत्वं ९ एलियं धर्त्तुं सैनिकद्वयस्य प्रेषितत्वं तेषां विनाशः १३ तृतीयसैनिकस्य प्रेषितत्वं तस्य रक्षा १७ अहसियस्य निधनञ्च।

आहावस्य निधनात् परं मोयाबीयमनुजा इस्रायेलोऽधीनत्वं तत्यजुः। १
अपरम् अहसियः शोमिरोणस्थितस्य स्वीयोच्चगेहस्य वातायनेनाधः २
पतित्वा रुग्णो बभूव। ततः स दूतान् वाचमिमां गदित्वा प्रेषयामास
अहमेतस्माद् व्याधे रक्षां प्राप्स्यामि नवेति यूयं गत्वेक्रोणीयदेवं बाल्-
सिवूवं पृच्छत। किन्तु परमेश्वरस्य दूतस्तिश्वीयम् एलियं व्याजहार, ३
त्वमुत्थाय शोमिरोणस्य भूपते दूतान् साक्षात् कुरु तान् इदं वचो ब्रूहि
च, इस्रायेलो मध्य ईश्वरो नास्त्येतत्कारणाद् यूयं किम् इक्रोणीयदेवं
बाल्सिवूवं परिप्रष्टुं व्रजथ? इतिहेतोः परमेश्वर एतां भारतीं गदति ४
त्वं यां शय्याम् आरूढोऽसि तस्याः पुन र्नावरोक्ष्यसि त्वया मर्त्तव्यमेव।
तत एलियः प्रतस्थे।

अनन्तरं नृपतेः समीपं परावृत्ता दूतास्तेन पृष्टाः, यूयं कुतः परा- ५
वृत्त्यागताः? ते प्रत्यवदन् एको जन आगत्यास्मान् साक्षात् कृत्वा गदित- ६
वान् येन राज्ञा यूयं प्रहितास्तस्य समीपं व्याघुट्य गत्वा गदत परमे-
श्वर इमां भारतीं भाषते, इस्रायेलो मध्य ईश्वरो नास्त्येतत्कारणात् त्वं
किम् इक्रोणीयदेवं बाल्सिवूवं परिप्रष्टुं लोकान् प्रहिणोषि? त्वं यां
शय्याम् आरूढोऽसि तस्याः पुन र्नावरोक्ष्यसि त्वया मर्त्तव्यमेव। नरपति- ७
स्तान् पप्रच्छ युष्मान् साक्षात् कर्त्तुं समीय येन मनुजेन वच इदमभाषि
तस्याकारः कीदृशः? ते प्रत्यवदन् स लोमशस्तस्य कटौ च चर्म्मशृङ्खलं ८
बद्धमासीत्। ततो नरपतिरुदितवान् स तिश्वीय एलियः।

अनन्तरं नृपतिः पञ्चाशल्लोकैः सहितं पञ्चाशत्पतिमेकं जनं तस्य ९
समीपं प्रेषयामास। तदानीम् एलिय एकस्य शिलोच्चयस्य शिखरे सम्-
पाविशत्। ततः स तस्य समीपम् ऊर्द्ध्वं गत्वा तं व्याजहार, हे ईश्वरीय-

१० लोक, नृपतिरादिशति त्वमवरोह। तत एलियस्तं पञ्चाशत्पतिं प्रत्यव-
दत्, यद्यहम् ईश्वरीयलोको भवेयं तर्हि गगनाद् वह्निः पतित्वा त्वां
तव पञ्चाशल्लोकांश्च दहतु। तत आकाशाद् वह्निः पतित्वा तं तस्य
११ पञ्चाशल्लोकांश्च ददाह। अनन्तरं नृपतिः पुनर्व्वारं पञ्चाशल्लोकैः सहि-
तम् अपरम् एकं पञ्चाशत्पतिं प्रेषयामास। ततः स तम् उक्तवान् हे
१२ ईश्वरीयलोक नरपतिरादिशति त्वं तूर्णम् अवरुह्यागच्छ। एलियस्तान्
प्रत्यवादीत्, यद्यहम् ईश्वरीयलोको भवेयं तर्हि गगनाद् वह्निः पतित्वा
त्वां तव पञ्चाशल्लोकांश्च दहतु। तत आकाशाद् ईश्वरीयवह्निः पतित्वा
तं तस्य पञ्चाशल्लोकांश्च ददाह।
१३ अनन्तरं राजा पुनर्व्वारं पञ्चाशल्लोकैः सहितं तृतीयम् एकं पञ्चाशत्-
पतिं प्रेषयामास। स तृतीयः पञ्चाशत्पति र्यात्रां विधाय समुपस्थाय
एलियस्य समक्षं जानुनी पातयित्वा विनयेन बभाषे हे ईश्वरीयलोक
मम प्राणा भवत एतेषां पञ्चाशद्दासानां प्राणाश्च भवतो दृष्टौ बहुमूल्या
१४ भवन्तु। पश्यतु पूर्व्वम् आकाशाद् वह्निः पतित्वा द्वौ पञ्चाशत्पती तयोः
पञ्चाशतं पञ्चाशतं सेनाश्च दग्धवान्, अधुना मम प्राणा भवतो दृष्टौ
१५ बहुमूल्या भवन्तु। ततः परमेश्वरस्य दूत एलियं जगाद, सममेतेना-
वरुह्य याहि, एतस्मात् मा भैषीः। ततः स उत्थाय तेन साकं राज्ञः
१६ समीपं जगाम। अपरं स राजानं व्याजहार, परमेश्वरो वच इदं
ब्रवीति त्वं यं परिप्रष्टुं शक्नोषि तादृश ईश्वरः किम् इस्रायेलो मध्ये
नास्त्येतत्कारणात् त्वं किम् इक्रोणीयदेवं वाल्सिबूवं परिप्रष्टुं दूतान्
प्राहिणोः? इतिहेतोस्त्वं यां शय्याम् आरूढोऽसि तस्याः पुन र्नावरो-
क्ष्यसि त्वया मर्त्तव्यमेव।
१७ अनन्तरम् एलियेन गदितात् परमेश्वरीयवाक्यात् स ममार तस्य
तनयाभावाच्च यिहूदादेशीयनरपते र्यिहोशाफटस्य पुत्रस्य योरामस्य
१८ द्वितीये राजत्ववत्सरे यिहोरामस्तस्य पदे राजा बभूव। एतस्याहसि-
यस्यावशिष्टं चरित्रं तेन च यद्यत् कृतं तत् सर्व्वम् इस्रायेलीयनरपतीनां
पुरावृत्तपुस्तके लिखितं किं न विद्यते?

२ द्वितीयोऽध्यायः।

१ एलियेलीशाययो र्यात्राकरणं नद्याः पारगमनं वाक्यवदनम् एलियस्य स्वर्गारो-

हणं १२ इलीशायस्य पुनरागमनं नदीतरणं भविष्यद्वचनेन सम्मानप्राप्तिः १९
तस्य प्रथमाश्चर्य्यक्रिया २२ द्वितीयम् आश्चर्य्यकर्म्म च।

अनन्तरम् एलियं घूर्णवायुना स्वर्गं नेतुं परमेश्वर उद्यतवत्येलिये- १
लीशायौ गिल्गलात् प्रतस्थाते। अपरम् एलिय इलीशायं बभाषे २
त्वयात्रैव स्थीयतां यतः परमेश्वरो मां बैथेलं यावत् प्रहितवान्। तत
इलीशायः प्रतिजगाद यदि परमेश्वरोऽमरो भवेत् भवतः प्राणाश्च
सजीवा भवेयुस्तर्हि मया भवान् न परित्यक्ष्यते। अतस्तौ बैथेलं
जग्मिवांसौ। तदानीं बैथेलस्था भविष्यद्वादिनां शिष्या इलीशायस्य ३
सविधं समीय तम् अवदन् अद्य परमेश्वरेण तव समक्षात् तव प्रभु
र्नेष्यते त्वया किमेतत् ज्ञायते? स उदितवान् मयापि तत् ज्ञायते यूयं
निःशब्दा भवत। ततः परम् एलियेन स न्यगद्यत, हे इलीशाय त्वयात्र ४
स्थानेऽवस्थीयतां यतः परमेश्वरो मां यिरीहूं यावत् प्राहिणोत्। ततः
स उदितवान् यदि परमेश्वरोऽमरो भवेत् भवतः प्राणाश्च सजीवा
भवेयुस्तर्हि मया भवान् न परित्यक्ष्यते। तस्मात् तौ यिरीहूं जग्मि-
वांसौ। तदानीं यिरीहूस्था भविष्यद्वादिनां शिष्या इलीशायस्य सविधं ५
समेत्य तं व्याजह्रुः, अद्य परमेश्वरेण तव समक्षात् तव प्रभु र्नेष्यते त्वया
किम् एतत् ज्ञायते? ततः स प्रतिबभाषे मयापि तत् ज्ञायते यूयं
निःशब्दा भवत। अनन्तरम् एलियस्तम् आचष्ट त्वयात्र स्थानेऽवस्थीयतां ६
यतः परमेश्वरो मां यर्द्दनं यावत् प्राहिणोत्। ततः स प्रत्यब्रवीत्,
यदि परमेश्वरोऽमरो भवेत् भवतः प्राणाश्च सजीवा भवेयुस्तर्हि
भवान् मया न परित्यक्ष्यते। अनन्तरं तौ द्वौ जनौ जग्मतुः। अपरं ७
भविष्यद्वादिनां शिष्याणां पञ्चाशज्जना व्रजित्वा किञ्चिद् दूरे तयोः
समक्षम् अतिष्ठन्। अपरं यर्द्दनस्य तटे तौ द्वौ जनावप्यवतस्थाते।
ततः परम् एलियः स्वीयं गात्रीयं वसनं धृत्वा सङ्कोचयित्वा च तोय- ८
माजघान तेन तोयेषु विभिन्नेषु तौ द्वौ जनौ शुष्कमार्गेण पारं जग्मि-
वांसौ। पारं प्राप्यैलिय इलीशायम् अब्रवीत् तव समीपात् मम ९
नयनस्य पूर्व्वं तव कृते मया यत् कर्त्तव्यं तत् त्वया याच्यतां। तत इली-
शायो जगाद त्वदीयात्मनो द्वावंशौ माम् अधितिष्ठेतां मदीया प्रार्थ-
नैषा। तेन भाषितं त्वया यदप्रार्थि तद् दुर्लभं तथापि यदि तव १०
सविधात् नयनसमये त्वयाहं वीक्ष्येय तर्हि त्वां प्रति तद् वर्त्तिष्यते
किन्तु मयि न दृष्टे न वर्त्तिष्यते। तौ गच्छन्तौ सम्भाषेते इत्यनन्तरे पश्य ११

वह्निमय एको रथो वह्निमयौ हयौ च समीय तौ पृथग् अकुर्व्वन् अप-
रम् एलियो घूर्णवायुना स्वर्गमारुरोह।
१२ तदानीम् इलीशायस्तद् वीक्षमाणो वत मम तात वत मम तात वत
इस्रायेलो स्यन्दनरथिगणेत्युच्चै र्विललाप ततः परं पुनस्तं न वीक्षाञ्चक्रे।
१३ अनन्तरं स निजवसनानि धृत्वा छित्त्वा द्विखण्डानि चकार। अपरं स
एलियस्य गात्रात् पतितं वसनम् आदाय परावृत्य यर्द्दनस्य तटे तस्थि-
१४ वान्। अनन्तरं स एलियात् पतितं गात्रीयं वसनं धृत्वा तेन तोयान्या-
हत्य व्याजहार, एलियस्य प्रभुः परमेश्वरः कुत्र? सोऽवश्यं स एवास्ते।
१५ ततस्तेन ताडितेषु वारिषु विभिन्नेष्विलीशायः पारं जगाम। तदानीं
यिरीहोनिवासिनो भविष्यद्वादिनां शिष्याः सम्मुखस्थानात् तद् वि-
लोक्य बभाषिरे, एलियस्यात्मा इलीशायेऽध्यतिष्ठत्। अनन्तरं ते तं
१६ साक्षात् कर्त्तुं समीय भूमौ दण्डवद् बभूवुः। अपरं तैः स ऊचे, पश्य
तव दासानां मध्ये पञ्चाशद्बलवन्तो मनुजा अत्र स्थाने विद्यन्ते तै
र्गत्वा तव प्रभुरन्विष्यतां को जानाति परमेश्वरस्यात्मा तम् उत्थाप्य
कस्मिंश्चित् शिलोच्चये कस्याञ्चिद् उपत्यकायां वा निक्षिप्तवान्। स उक्त-
१७ वान् मा प्रेषयत। तथापि तैः पुनः पुनर्याचित्वा लज्जितः सन् स
व्याचचक्षे तान् प्रेषयत। तस्मात् पञ्चाशल्लोकास्तैः प्रेषिताः सन्तो दिन-
१८ त्रयं यावत् तं गवेषयामासुः किन्तु तं न प्राप्य परावृत्य तस्य समीपम्
आजग्मुः। तदानीं स यिरीहावासीत्। ततः स उदितवान् युष्माभि
र्न गम्यतामिति मया किं नाभाषि?
१९ अनन्तरं तन्नगरस्य मनुजा इलीशायं व्याचचक्षिरे, पश्यतु भवान्,
एतस्य नगरस्य स्थानं रम्यमित्यस्मत्प्रभु र्वीक्षते, किन्तु तोयानि कुत्सि-
२० तानि भूमिश्चापत्यनाशिका। ततः स व्याजहार, मम समीपं नवीनं
२१ भाजनमेकमानीय तत्र लवणं निधद्धं। अनन्तरं तत् तैरानीतं। ततः
स पानीयस्य प्रस्रवणं समीय तत्र लवणं निक्षिप्य बभाषे परमेश्वरः
प्राह, मया पानीयमेतद् भद्रम् अकारि, अद्यारभ्य नैतत् निधनजनकम्
२२ अपत्यनाशकं वा भविष्यति। अनन्तरम् इलीशायेन यद् गदितं तदनु-
साराद् अद्य यावत् तन्नीरं भद्रं बभूव।
२३ अनन्तरं स तस्मात् स्थानाद् बैथेलं जग्मिवान् ततस्तस्मिन् वर्त्मना
गच्छति कतिपयाः क्षुद्रबालका नगराद् बहिरागत्य तं निन्दन्तो बभा-
षिरे, हे खल्वाट त्वम् ऊर्द्धम् आगच्छ, हे खल्वाट त्वम् ऊर्द्धम् आगच्छ।

तदानीं स मुखं परावर्त्त्य तान् दृष्ट्वा परमेश्वरस्य नाम्ना शशाप। ततः २४
काननाद् द्वे भल्लूक्यौ समागत्य तेषां द्विचत्वारिंशद् बालकान् विदार-
यामासतुः। अनन्तरं स तस्मात् स्थानात् कर्म्मिलं शिलोच्चयं गतवान् २५
अपरं तस्मात् स्थानात् शोमिरोणं प्रत्याययौ

---

३ तृतीयोऽध्यायः।

१ यिहोरामस्य राजत्वकथनं ४ मोयाबीयराजेनेस्रायेलोऽधीनत्वत्यजनं ६ यिहोरामो यिहोशाफट इदोमीयनरपतिश्चैतेषु तोयाभावात् क्लिष्टेष्विलीशायात् तोयस्य जयस्य च प्रतिज्ञा लभनं २१ मोयाबीयानां पराजितत्वं २६ मोयाबीयराजेन निजतनयस्य बलिदानम् इस्रायेलीयलोकानां निजजनपदं प्रति पुनरागमनञ्च।

यिहूदाया भूपते र्यिहोशाफटस्य राजत्वस्याष्टादशे वत्सर आहा- १
वस्य तनयो यिहोराम इस्रायेल उपरि राजत्वं कर्त्तुं प्रारभ्य द्वादश-
वत्सरान् यावद् राजत्वं चक्रिवान्। स परमेश्वरस्य साक्षात् कुत्सि- २
ताचारं चकार। स यद्यपि निजपितु र्मातुश्च सदृशो न भवन् तातेन
निर्म्मितं बालः प्रतिमानं दवयामास, तथापि निवाटस्य तनयो यो ३
यारबियाम इस्रायेलीयवंशं पापम् अकारयत् तस्य पापान्याचचार
तानि न विजहौ।

मोयाबदेशस्य राजा मेशा मेषाधिकार्य्यासीत् तेनेस्रायेलीयनरपतये ४
लक्षमेकं मेषवत्सा लक्षमेकं सलोममेषाश्च करत्वेनादीयन्त। किन्त्वा- ५
हाबस्य निधनात् परं मोयाबीयो भूपतिरिस्रायेलीयभूपतेरधीनत्वं
पर्य्यत्यजत्।

तस्मिन् समये यिहोरामो नरपतिः शोमिरोणात् प्रस्थाय सकलान् ६
इस्रायेलीयमनुजान् अगणयत्। अपरं यिहूदादेशीयनरपते र्यिहोशा- ७
फटस्य सविधं दूतं प्रहित्य बभाषे, मोयाबीयो नृपति र्ममाधीनत्वं
पर्य्यत्याक्षीत्, अतस्त्वं मोयाबीयैः समं समरं कर्त्तुं किं मया सार्कं गमि-
ष्यसि? स प्रत्यवादीत्, अहं यास्यामि त्वम् अहञ्च समानौ तव लोका
मम लोकाश्च समानास्तव तुरगा मम तुरगाश्च समानाः। स पृष्टवान् ८
वयं केन वर्त्मना गमिष्यामः? ततः स आचष्ट, इदोमदेशीयप्रान्तरस्य
मार्गेण। अनन्तरम् इस्रायेलीयो नरपति र्यिहूदादेशीयनरपतिरि- ९
दोमीयो नरपतिश्च यात्रां विधाय वक्रमार्गेण सप्तदिनानि जग्मि-
वांसः। तदानीं सैन्यानां तदनुगामिनां पशूनाञ्च कृते तोयं नासीत्।

१० तत इस्रायेलीयो नरपति र्व्याजहार हा हा मोयाबीयलोकानां करेषु
समर्पयितुं परमेश्वर इमान् त्रीन् भूपतीन् एतत् स्थानं समानयत्।
११ किन्तु यिहोशाफटो व्याजहार, वयं येन परमेश्वरं परिप्रष्टुं पारयाम-
स्तादृशः परमेश्वरस्य भविष्यद्वादी किम् अत्र स्थाने कोऽपि नास्ति?
तत इस्रायेलीयनरपतेरेको भृत्यो बभाषे यो जन एलियस्य करे पानी-
यमसिञ्चत्, शाफटस्य तनयः स इलीशाय एतस्मिन् स्थाने विद्यते।
१२ यिहोशाफटो व्याचष्ट, परमेश्वरस्य वचनं तस्यान्तरे विद्यते। तत इस्रा-
येलीयभूपति र्यिहोशाफट इदोमीयभूपतिश्चेलीशायस्य सविधं जग्मि-
१३ वांसः। तदानीम् इलीशाय इस्रायेलीयं महीपतिं व्याहरत् त्वया सार्कं
मम कः सम्बन्धः? त्वं निजतातस्य भविष्यद्वादिनां स्वजनन्याश्च भवि-
ष्यद्वादिनां सन्निधिं याहि। तत इस्रायेलीयो महीपतिरुवाच, मैतद्
वद मोयाबदेशीयानां करेषु समर्पयितुं परमेश्वर एतान् त्रीन् नरप-
१४ तीन् समानयत्। इलीशाय ऊचिवान् अहं यं सैन्याधिपतिं परमेश्वरं
परिचरामि तस्यामरत्वस्य शपथं कुर्व्वे यद्यहं यिहूदादेशीयनरपतिं
यिहोशाफटं नादरिष्ये तर्हि त्वां प्रति दृष्टिं नाकरिष्ये त्वां नाज्ञास्यञ्च।
१५ इदानीं मम सन्निधिम् एकं यन्त्रवादिनम् आनयत। अनन्तरं तेन
यन्त्रवादिना वीणायां वादितायां परमेश्वर इलीशायम् अध्यतिष्ठत्।
१६ ततः सोऽब्रवीत् परमेश्वर एतत् कथयति, इमाम् उपत्यकां खातमयीं
१७ कुरुत। यतः परमेश्वर इमां भारतीं भाषते, युष्माभि र्वातो न दर्शि-
ष्यते वृष्टिश्च न दर्शिष्यते किन्तु युष्माकं युष्मदीयानां पशूनां वाहना-
१८ नाञ्च पानार्थम् एषोपत्यका पानीयैः परिपूरयिष्यते। एतदपि परमेश्व-
रस्य दृष्टौ क्षोदिष्ठं कर्म्म स मोयाबीयान् युष्माकं करेषु समर्पयिष्यति।
१९ युष्माभिः प्राचीरवेष्टितानि नगराण्युत्तमानि नगराणि च जायिष्यन्ते
सर्व्व उत्तमा महीरुहाश्च कर्त्तिष्यन्ते सर्व्वे प्रह्वयो मृद्भिः पूरयिष्यन्ते
२० सर्व्वाण्युत्तमानि क्षेत्राणि खण्डप्रस्तरै र्विनाशयिष्यन्ते च। अनन्तरं
प्रातःकाले बलिदानसमय इदोमजनपदस्य वर्त्मना पानीयं समीय नीवृतं
परिपूरयामास।

२१ इत्यवसरे ते राजानोऽस्माभिः सार्कं समरं कर्त्तुं समीयुरिति वार्त्तां
निशम्य मोयाबीयलोकानाम् अस्त्रधारणनिपुणाः सर्व्वे मनुजा मिलित्वा
२२ जनपदस्य सीमायाम् अवातिष्ठन्त। अपरं प्रत्यूषे दिवाकरे पानीयोपरि
देदीप्यमाने मोयाबीयैः समुत्थाय स्वसम्मुखे शोणितवद् रक्तवर्णानि

तोयान्यदृश्यन्त। ततस्तैरुदितं, एतत् शोणितमेव तै र्भूपतिभिः परस्परं २३
विवदमानैः स्वबन्धूनां लोका हता अतो हे मोयाबीया यूयं लोप्त्रार्थं
गच्छत। अनन्तरं तेष्विस्रायेलीयानां शिविरमुपस्थितेष्विस्रायेलीय- २४
लोका उत्थाय मोयाबीयलोकान् तादृशम् आघ्नन् यत् ते तेषां सम्मु-
खात् पलायन्त। अनन्तरं देशस्य मध्येऽपि मोयाबीयान् आहन्तुं तेषां
पश्चाद् अगच्छन्। सकलनगराणि तै र्भग्नानि सर्व्वाण्युत्तमानि क्षेत्राणि २५
चैकैकेन जनेन निक्षिप्तैः पाषाणैः परिपूरितानि सर्व्वे सजलप्रस्रवयस्व
मृद्भिस्तैः पूरिता उत्तमा महीरुहास्व सर्व्वे तैश्छिन्नाः केवलं कीर्हरसस्य
प्राचीरम् अवाशिष्यत तेनाश्मक्षेपकयन्त्रधारिणस्तस्य चतुर्दिशं गत्वा
तद् आचक्रमुः।

अपरं समरो मयानिवार्य्यो भवतीति विलोक्य मोयाबीयो भूपति- २६
रिदोमीयभूपतेः समीपं सैन्यानि विभिद्य गन्तुं सप्तशतानि खड्गधारकान्
स्वेन समं जग्राह किन्तु ते न पारयामासुः। अनन्तरं तस्य मरणात् २७
परं येन राज्ञा भवितव्यं स्वस्य तं ज्येष्ठं पुत्त्रं गृहीत्वा स भित्तेरुपरि
बलिमिव कृतवान् तत इस्रायेलीयानां विरुद्धं महान् क्रोध उदपद्यत।
अनन्तरं ते तस्य समीपात् प्रस्थाय निजजनपदं परावृत्य जग्मुः।

---

४ चतुर्थोऽध्यायः।

१ इलीशायेन विधवायास्तैलवर्द्धनं ८ शूनेमीयायै स्त्रियै पुत्त्रवरदानं १८ पुत्त्रे मृते सति तस्य पुन र्जीवयनं ३८ गिल्गले प्राणनाशकव्यञ्जनस्य भद्रकरणं ४२ अत्यल्प-भक्ष्येण बहुलोकानां भोजनञ्च।

ततः परं भविष्यद्वादिनां शिष्याणाम् एका योषिद् इलीशायं प्रोच्चै १
र्व्याहरत्, तव दासो मम स्वामी मृतः स परमेश्वरस्य भक्त आसीत् तत्
त्वं जानासि, इदानीम् उत्तमर्णो मम द्वौ पुत्त्रौ निजदासौ कर्त्तुम् आग-
च्छति। इलीशायः पप्रच्छ मया तव कृते किं कर्त्तव्यं? तव गेहे किं २
विद्यते? तन्मां वद। सा जगाद भाण्डम् एकं तैलं विना तव दास्या गेहे
नापरं किमपि विद्यते। तदानीं स कथयामास त्वया गत्वा वहिः- ३
स्थानाद् अर्थतः स्वीयसमीपवासिभ्यः सर्व्वेभ्यः शून्यभाजनानि याचित्वा-
नीयन्ताम् तान्यल्पानि न भवन्तु। ततः परं पुत्त्राभ्यां सार्द्धं निजगेहा- ४
भ्यन्तरं गत्वा तस्य द्वारं रुद्धा तानि सर्व्वाणि पात्राणि तैलेन पूर्य्यन्तां

५ यद्यद् भाजनं पूर्णं तत् पृथक् निधीयताञ्च। अनन्तरं तस्य सविधाद्
गत्वा तया स्वपुत्राभ्यां सार्द्धं गेहं प्रविष्टं रुद्धञ्च ताभ्याञ्चानीतेषु भाजनेषु
६ तैलम् अवतारितं। अनन्तरं सर्व्वेषु भाजनेषु पूर्णेषु सा तयोरेकं पुत्रं
बभाषे, त्वम् अपरमेकं भाजनं देहि ततः स जगाद भाजनमपरं नास्ति
७ तस्मात् तैलस्रावो विरराम। अनन्तरं सा गत्वेश्वरीयलोकं वार्त्तां
व्याचचक्षे। ततः स उदितवान् त्वं गत्वा तैलं विक्रीय ऋणं परिशोधय
अपरं तदवशिष्टेन त्वं त्वदीयतनयौ च जीवत।

८ अपरम् एकदा इलीशाये शूनेमं समीते तत्रत्या काचिद् धनवती
नारी सविनयं तं भोजनाय निमन्त्रयामास। अनन्तरं स यति वारान्
तेन वर्त्मना गतवान् तति वारान् भोजनाय तत् स्थानं गतवान्।
९ अनन्तरं सा नारी निजं पतिं व्याचष्ट पश्य योऽयं नरोऽस्माकं सविधेन
१० नित्यं गतागतं करोति मया बुध्यते स ईश्वरस्य पवित्रो लोकः। अत-
स्तस्य निमित्तम् आवाभ्यां भित्तेरुपरि क्षुद्रं कोष्ठमेकं निर्म्मीयतां तन्मध्ये
पर्य्यङ्को भोजनासनं पीठासनं दीपवृक्षञ्च निधीयतां सोऽस्मन्निवेशनम्
११ आगत्य तस्मिन् स्थाने वसतु। एकस्मिन् दिन इलीशायेन तत् स्थानं
१२ गत्वा तत् कोष्ठं प्रविश्य शयने कृते स निजदासं गेहसिं व्याचष्ट त्वं
तां शूनेमीयाम् आह्वय। ततस्तेनाहूतायां तस्यां नार्य्यां तस्य सम्मुखे
१३ तिष्ठन्त्याम् इलीशायो गेहसिं व्याजहार, त्वया सा भाष्यतां, पश्य त्वया-
वयो र्निमित्तम् एतानि चिन्तितानि, अधुना तव निमित्तम् आवाभ्यां
किं कर्त्तव्यं? तव कृते नरपतेः सेनापते र्वा सविधे किञ्चित् प्रार्थनीयं
किं विद्यते? सा भाषितवती, मया निजलोकानां मध्ये सुखम् उष्यते।
१४ अनन्तरम् इलीशायो बभाषे तस्याः कृते किं कर्त्तव्यं? ततो गेहसिना
१५ प्रतिगदितं सा निष्पुत्रा तस्याः पतिश्च वृद्धोऽस्ति। इलीशायः कथया-
१६ मास त्वं ताम् आह्वय। ततस्तेनाहूतायां तस्यां द्वारे तिष्ठन्त्याम् इली-
शाय उचिवान् एकवत्सरात् परम् एतस्मिन् ऋतौ त्वया तनयः क्रोडे
कारिष्यते। किन्तु सा बभाषे हे मम प्रभो हे ईश्वरीयलोक तन्नहि
१७ तन्नहि, निजदासीं प्रति मृषाभारतीं न भवान् भाषतां। अनन्तरं
सा नारी गर्भिणी भूत्वेलीशायस्य वाक्यानुसारात् संवत्सरात् परं तस्मिन्
ऋतौ पुत्रं प्रसुषुवे।

१८ अनन्तरं स बालकः क्रमशो वृद्धिं प्राप्यैकस्मिन् दिने निजतातस्य
१९ समीपे शस्यच्छेदकानां मध्यं जगाम। ततः परं तातम् उद्दिश्य हा मम

मस्तकं हा मम मस्तकम् इति तेन विलपिते स तरुणं दासमेकं
व्याहरत्, एतस्य मातुः समीपम् एनं वह। अनन्तरं स तेनोदुह्य मातुः २०
समीपं नीतो मध्याह्नकालं यावत् मातुरूरौ उपविश्य ममार। तदानीं २१
सा तं गृहीत्वा गत्वेश्वरीयलोकस्य खट्टायां शाययित्वा द्वारं रुद्ध्वा च
बहिराजगाम। अपरं दूतेन निजं पतिं बभाषे त्वया तरुणानाम् एको २२
जन एका गर्द्दभी च मम सन्निधिं प्रेष्येताम् अहम् ईश्वरीयलोकस्य
समीपं त्वरितं गत्वा पुनरागमिष्यामि। ततः स प्रोवाच, तस्य सविधम् २३
अद्य त्वया कुतो यास्यते? अद्यामावास्या नहि विश्रामदिनमपि नहि।
सा व्याचचक्षे मङ्गलं भविष्यति। अनन्तरं सा गर्द्दभीं सज्जयित्वा निज- २४
दासं जगाद त्वं गर्द्दभीं चालयन् व्रज मत्तो निदेशमप्राप्य मम गमनं
शिथिलं मा कुरु। अपरं तस्यां गत्वा कर्म्मिलपर्व्वत ईश्वरीयलोकस्य २५
समीपम् उपस्थितायाम् ईश्वरीयलोकः किञ्चिद् दूरात् तां विलोक्य
निजदासं गेहसिं जगाद पश्यासौ सा शूनेमीया। त्वं तां साक्षात् कर्त्तुं २६
धाव, तव मङ्गलं विद्यते? तव स्वामिनस्य मङ्गलं विद्यते? तव बालकस्य
मङ्गलं विद्यत इत्यापृच्छस्व। तेन तस्मिन् कृते सा प्रत्यवादीत् मङ्गलं
विद्यते। किन्तु शिलोच्चय ईश्वरीयलोकस्य सविधम् उपस्थाय सा तस्य २७
पादौ दधार। ततस्तां द्रावयितुं गेहसि निकटं जगाम, किन्त्वीश्वरीय-
लोक उक्तवान् एनां तद् अनुजानीहि यत एतस्या अन्तःकरणं शोका-
कुलमास्ते परमेश्वरश्च मत्तस्तत् प्रच्छाद्य मां न ज्ञापितवान्। तदानीं २८
सा नारी व्याचचक्षे मया निजप्रभुतः किं पुत्रो याचितः? किञ्च मां
न वञ्चयेति मया किं नोदितं? तदानीम् इलीशायेन गेहसि व्याहृतः, २९
त्वं बद्धकटि भूत्वा हस्तेन ममैतत् लगुडं गृहीत्वा व्रज केनचित् सा-
क्षात् कृतस्त्वं न नमस्कुरु केनापि नमस्कृतस्त्वं किमपि न प्रतिवद तस्य
बालकस्य वदनोपरि ममैतत् लगुडं निधेहि च। बालकस्य प्रसूः कथ- ३०
यामास परमेश्वरो यद्यमरो भवेत्, भवतः प्राणाश्च यदि सजीवा
भवेयुस्तर्हि भवान् मया न परित्यज्यते। ततः स उत्थाय तस्याः पश्चात्
जग्मिवान्। इत्यनन्तरे गेहसिना तयोरग्रेऽग्रे गत्वा बालकस्य वदने ३१
लगुडे निहिते शब्दश्चेतना वा तस्य न बभूव, तस्माद् गेहसिना तं
साक्षात् कर्त्तुं समीय स ऊचे, बालको न प्रबुद्ध इति। अनन्तरम् ३२
इलीशायेन गेहं प्रविश्य स बालको मृतः स्वस्य शयनीये शयानश्चेति
दृष्टं। अतः स एकाकी तस्य समीपं प्रविश्य द्वारं संरुध्य परमेश्वरस्य ३३

३४ सन्निधौ प्रार्थनां चकार। अपरं शय्याम् आरुह्य बालकस्योपरि शयित्वा
तस्य वदनोपरि निजं वदनं तस्य लोचनयोरुपरि निजे लोचने तस्य
करयोस्योपरि निजौ करौ समर्पयन् स्वयं बालकस्योपरि लम्बमानो
३५ बभूव ततो बालकस्य गात्रे तापो भवितुम् आरेभे। अनन्तरं सोऽ-
वरुह्य कोष्ठस्य तत इतो बभ्राम, पुनरारुह्य च तस्योपरि लम्बमानो
बभूव। ततो बालकः सप्तवारान् क्षुतं कृत्वा लोचने उदमीलत्।
३६ तदानीं स गेहसिं समाहूय व्याचचक्षे त्वं तां शूनेमीयाम् आह्वय
ततः सा तेनाहूता तस्य सविधम् आजगाम, ततः स उदितवान् त्वं
३७ निजं तनयं गृहाण। तदानीं साभ्यन्तरं समीय तस्य चरणयोः पतित्वा
प्रणनाम ततो निजं पुत्रं वहन्ती वहि र्जगाम।

३८ अनन्तरम् इलीशायः पुनर्व्वारं गिल्गलं जगाम। तस्मिन् समये
जनपदे दुर्भिक्षम् आसीत्, अपरं भविष्यद्वादिनां शिष्येषु तस्य सम्मुख
उपविष्टेषु स निजदासं समादिशत् वृहत् पाकभाजनम् आरोप्यैतेषां
३९ भविष्यद्वादिनां शिष्याणां कृते भक्ष्यं पच। तदानीं तेषाम् एको जनः
शाकानि संग्रहीतुं क्षेत्रं गत्वा वन्याम् इवारुलतां प्राप्य तस्याः फलै
र्वस्त्रं परिपूर्य्यानीय तानि खण्डयित्वा पाकस्थाल्यां निदधे किन्तु तानि
४० किं तत् ते नाज्ञायत। अनन्तरं लोकानां भोजनार्थं परिवेषणे कृते ते
शाकम् आस्वाद्योच्चैःस्वरेण व्याचचक्षिरे हे ईश्वरीयलोक पाकस्थाल्यां
४१ मृत्युरास्ते ततस्ते तद् भोक्तुं नापारयन्। तदानीं स उदितवान् किञ्चिद्
गोधूमचूर्णम् आनयत ततः स पाकस्थाल्यां तन्निक्षिप्य जगाद लोकानां
कृते परिवेषणं कुरु ते तत् भुञ्जतां। ततः पाकस्थाल्यां किञ्चिदपि नाशु-
भम् अतिष्ठत्।

४२ अनन्तरम् एको लोको बाल्शालिशायाः प्रथमशस्यस्य पूपान् अर्थतो
यवस्य विंशतिपूपान् वस्त्रपुटके च शस्यमञ्जरीरीश्वरीयलोकाय दातुम्
आनिनाय तत इलीशाय आचचक्षे एतानि लोकेभ्यो विश्राणय ते
४३ भुञ्जतां। ततस्तस्य परिचारक उदितवान् मया किं शतलोकेभ्य एतत्
परिवेषयिष्यते? स पुनर्व्वारं व्याजहार तानि मनुष्येभ्यो वितर ते
भुञ्ज्यन्तां यतः परमेश्वरेण निगद्यते तेषु भुक्तवत्स्वपि तस्य किञ्चिदव-
४४ शिष्टं स्थास्यति। तस्मात् तेन तेषां समक्षं तेषु निहितेषु परमेश्वरस्य
वचनानुसारात् सर्व्वेषु भुक्तवत्स्वपि किञ्चिद् अवशिष्टं तस्थौ।

५ पञ्चमोऽध्यायः।

१ कुष्ठरोगात् मुक्तिं लब्धुं नामानस्य शोमिरोणगमनं ८ इलीशायस्य निदेशाद् यर्द्दन-सरिति सप्तवारान् मज्जनं १५ मुक्तिहेतो र्नामानेन दत्तस्योपहारस्येलीशायेनाग्रहणं २० उपढौकनग्रहणाद् गेहसेः कुष्ठीभवनं।

अरामीयनरपते र्नामाननामक एकः सेनापतिरासीत् तेन च परमे- १
श्वरोऽरामीयान् जययुक्तान् अकरोत् तत्कारणात् स निजप्रभोः साक्षात्
महान् सम्मानितश्चासीत् स च वीर आसीत् किन्तु कुष्ठरोगवान्
आसीत्। एकस्मिन् समये ऽरामीयलोकानां सैनिकैः समीयेस्रायेलीय- २
देशात् क्षुद्रायां कस्याश्चिद् वन्दिबालिकायाम् आनीतायां सा नामानस्य
जायायाः परिचारिका बभूव। सा निजस्वामिनीं व्याचष्ट हा हा यदि ३
मम प्रभुः शोमिरोणस्थं भविष्यद्वादिनं साक्षात् कर्त्तुं शक्नुयात् तर्हि
स तेन कुष्ठरोगात् मोचयिष्यते। अनन्तरं स गत्वा निजप्रभुं गदित- ४
वान् इस्रायेलीयजनपदाद् आनीता बालिका वच इदं ब्रवीति। ततो ५
ऽरामीयनरपतिस्तं व्याहरत् त्वं तत् स्थानं याहि। इस्रायेलीयनर-
पतये मया पत्त्रं प्रेषयिष्यते। तदानीं स निजहस्तेन दशकिक्करपरि-
मितानि रजतानि षट्सहस्राणि स्वर्णमुद्रा दशयुग्मानि वसनानि च
गृहीत्वा प्रतस्थे। इस्रायेलीयस्य भूपतेः समीपं तेन यत् पत्त्रम् आनायि ६
तन्मध्य एतादृशं लिखितमासीत् मम भृत्यो नामानस्तव समीपं मया
प्रेषित इत्येतत् पत्त्रं प्राप्य त्वया बुध्यताम् अतस्तस्य कुष्ठरोगस्त्वयाप-
हर्त्तव्य इति। अनन्तरम् इस्रायेलीयो नरपतिस्तत् पत्त्रं पठित्वा ७
निजवस्त्रं छित्त्वा च व्याजहार मारणे जीवनदाने च समर्थ ईश्वरः
किमहमस्मि यदयं मनुष्य एकजनस्य कुष्ठरोगहरणाय मम समीपं तं
प्रहिणोति? मया विनीयते यूयं विविच्य पश्यत स मम छिद्रमेवा-
नुसन्दधाति।

अनन्तरम् इस्रायेलीयो नरपतिः स्ववसनम् अच्छिनत् वच इदं ८
निशम्येश्वरीयलोक इलीशायो राजानं प्रति दूतं प्रहित्य भारतीमिमां
बभाषे त्वया कुतो निजं वसनम् अच्छेदि स मम समीपम् आगच्छतु
तत इस्रायेलो मध्य एको भविष्यद्वादी विद्यत इति ज्ञास्यति। अतो ९
नामानो हयरथैः साकम् आगत्येलीशायस्य भवनद्वारेऽत्रातिष्ठत। तत १०
इलीशाय एकं दासं प्रहित्य तं व्याचचक्षे त्वं गत्वा यर्द्दनसरिति सप्त-
वारान् स्नाहि तेन तव मांसं नवीनीभविष्यति त्वञ्च शुचि र्भविष्यसि।

११ ततो नामानः क्रुद्धः सन् प्रस्थाय व्याजहार स वहिरागत्य मम समीपे
तिष्ठन् स्वीयप्रभोः परमेश्वरस्य नाम्ना प्रार्थनां कृत्वा कुष्ठस्थानोपरि करं
१२ चालयन् कुष्ठं मत्तोऽपहरिष्यतीति मया बुद्धं । दम्मेषकस्थे अवाना
पर्परा च सरितौ किम् इस्रायेल्देशस्य सकलसरिद्भ्य उत्तमे नहि ?
किमहं तयोः स्नात्वा शुचि र्भवितुं नाशक्नुवं ? इत्थं कोपं कृत्वा स परा-
१३ वृत्य जग्मिवान् । अनन्तरं तस्य दासाः सविधमागत्य तं व्याचचक्षिरे,
हे तात स भविष्यद्वादी यदि भवन्तं किञ्चन महाकर्म्माज्ञापयिष्यत्
तर्हि भवान् किं तन्नाकरिष्यत् ? अतः स्नात्वा शुचि र्भवेति तेन यद्
१४ आदिष्टं तद् भवतावश्यं कर्त्तव्यं । तदानीं स गत्वेश्वरीयलोकस्य निदे-
शानुसारेण यर्द्दनसरिति सप्तवारान् ममज्ज तेन क्षुद्रबालकस्येव तस्य
नवीनं मांसं बभूव स च शुचि र्बभूव ।
१५ अनन्तरं नामानो निजानुगामिलोकैः साकं परावृत्येश्वरीयलोकस्य
समीपमागत्य तस्य सम्मुखे तिष्ठन् उवाच पश्येस्रायेल्मध्यं विना पृथिव्याः
कुत्रापि सत्य ईश्वरो न विद्यत एतद् इदानीं मयाज्ञायि, अतोऽहं
१६ प्रार्थये निजदासात् क्षुद्रं दानं भवता गृह्यतां । किन्तु स उदितवान्
अहं यं परमेश्वरं परिचरामि स यद्यमरो भवेत् तर्हि मया किञ्चिदपि
न ग्राहिष्यते ततः स तद् ग्रहीतुं तं बहुप्रार्थितवान् तथापि स न
१७ स्वीकृतवान् । अनन्तरं नामान आचचक्षे प्रार्थयेऽहं द्वयोरश्वतरयो
र्भारं मृत्तिका किं तव दासाय न दायिष्यते ? यतोऽद्यारभ्य तव दासः
परमेश्वरं विना कञ्चनेतरं देवम् उद्दिश्य होमं बलिदानं वा न करि-
१८ ष्यति । केवलम् एतस्मिन् परमेश्वरस्तव दासं क्षमतां मम प्रभुः पूजनार्थं
रिम्मोणस्य मन्दिरप्रवेशनसमये यदि मम करम् आलम्बते तर्हि मया
रिम्मोणस्य मन्दिरे प्रणामः कारिष्यते ततो रिम्मोणस्य मन्दिरे प्रणाममधि
१९ परमेश्वरः स्वीयदासं क्षमतां । तत इलीशायस्तं व्याहरत् त्वं कुशलेन
याहि । ततः स प्रस्थाय कतिपयपन्थानं जग्मिवान् ।
२० अपरम् ईश्वरीयलोकस्येलीशायस्य परिचारको गेहसि मनसि कथि-
तवान् एषोऽरामीयो नामानो यद् आनीतवान् मम प्रभुस्तस्य हस्तात्
तन्न गृहीतवान् एतेन तं प्रति मृदुताचारं कृतवान् किन्तु परमेश्वरो
यद्यमरो भवेत् तर्हि मया तस्य पश्चाद् धावित्वा तस्मात् किञ्चिद्
२१ ग्राहिष्यते । अनन्तरं गेहसौ नामानस्य पश्चाद् गते नामानो निज-
पश्चाद् धावन्तं तं विलोक्य साक्षात् कर्त्तुं रथादवरुह्य पप्रच्छ किं

सर्व्वं मङ्गलं ? ततः स व्याचचक्षे सर्व्वं मङ्गलं किन्तु मम प्रभु मां प्रहित्य २२
वच इदं निवेदयति, एतस्मिन्नेव क्षणे इफ्रयिमशिलोच्चयाद् भविष्यद्वा-
दिनां द्वौ युवशिष्यावागतौ, भवान् ताभ्यां किक्कारमेकं रजतं द्वे युग्मे
वसनानि च ददातु। ततो नामानो जगाद, त्वं किक्कारद्वयं रजतं ग्रही- २३
तुम् अर्हसि। अनन्तरं स तं पुनः पुनः प्रार्थ्य द्वाभ्यां वसनयुग्माभ्यां
साकं वस्त्रपुटके किक्कारद्वयं रजतं बद्धा द्वयो र्दासयोः समर्पितवान्
ततस्तौ गेहसेरग्रेऽग्रे तद् ऊढवन्तौ। अनन्तरम् उपपर्व्वतं प्राप्य स २४
तयोः करेभ्यस्तत् सर्व्वं गृहीत्वा गेहे निदधे, तेन विसृष्टौ तौ लोकौ च
परावृत्य जग्मतुः। अनन्तरं गेहसिरभ्यन्तरम् इत्वा निजप्रभोः सम- २५
क्षम् अतिष्ठत् तत इलीशायस्तं बभाषे हे गेहसे त्वया कुत आगतं ?
स उक्तवान् तव दासेन किमपि स्थानं न गतं। किन्तु स उदितवान् २६
स मानवस्त्वां साक्षात् कर्त्तुं यदा स्यन्दनाद् अवरुह्यागमत् तदा मम
मनः किं त्वया साकं नागमत् ? रजतग्रहणस्य वसनजिततरुद्राक्षाक्षेत्र-
गोमेषव्रजदासदासीनां ग्रहणस्य च किमयं समयः ? तस्मात् नामा- २७
नस्य स कुष्ठरोगस्त्वयि तव वंशे च चिरं तिष्ठतु। ततो गेहसि र्हिमा-
नीवत् कुष्ठग्रस्तो भूत्वा तस्य सविधाद् वहि र्जगाम।

---

६ षष्ठोऽध्यायः।

१ इलीशायेन परशुफालस्य जलाद् उन्मज्जनं ८ इस्रायेलीयराजेनारामीयनरपते र्मन्त्रणाया निष्फलीभवनं १३ अरामीयसैन्यानाम् अन्धीकरणं १९ शोमिरोणे तेषाम् आनयनं पुनस्ततो विसर्जनं २४ दुर्भिक्षं २६ द्वयो र्नार्य्योः स्वीयबालकभक्षणं ३० इलीशायस्य हननाय राज्ञश्चेष्टा।

अनन्तरं भविष्यद्वादिनां शिष्या इलीशायं व्याचचक्षिरे, इदानीं वयं १
भवतः सम्मुखे यत्र स्थाने वसाम एतत् स्थानं सङ्कीर्णं। अतोऽस्माभि २
र्यर्द्दनस्य तीरं गम्यताम् एकैकेन जनेन तस्मात् स्थानाद् एकैकं गेहकाष्ठ-
मानीयताञ्च तेन वयं स्वेषां कृते तत्र स्थाने वासगृहं निर्म्मामः ; ततः
स उदितवान् यात। अनन्तरम् एको जनः कथयामास भवान् कृपां ३
विधाय निजदासैः समं व्रजतु। ततस्तेन कथितं मया यास्यते। तस्मिन् ४
तैः समं समीते ते यर्द्दनस्य समीपं गत्वा काष्ठानि चिच्छिदुः। एको ५
जनो गेहकाष्ठं छिनत्ति तदन्तरे कुठारस्य फालस्तोये निपपात ततः स
उच्चैरवदत् हा हा हे प्रभो स परतो मया धारितः। तदानीम् ईश्वरी- ६

यमनुजः पप्रच्छ तत् कुत्र पतितं? अनन्तरं तेन तत् स्थानं दर्शित
इलीशायः काष्ठमेकं छित्त्वा तत्र निचिक्षेप, तेन लौहम् उदमज्जत्।
७ तदानीम् इलीशायस्तं व्याचचक्षे, स्वसमीपे तं हर ततः स करं प्रसार्य्य
तं जग्राह।
८ तस्मिन् समयेऽरामीयो भूपतिरिस्रायेलीयलोकैः साकम् अयुध्यत्
अतस्तेन निजदासैर्मन्त्रयित्वामुकस्थाने मया शिविरं स्थापयिष्यत इति
९ गदित ईश्वरीयलोक इस्रायेलीयराजाय दूतेन निवेदयामास, साव-
धानो भव, अमुकस्थानस्योपेक्षां मा कार्षीः, तत् स्थानम् अरामीया
१० आगच्छन्ति। तत ईश्वरीयलोको यत् स्थानमधि वार्त्तां प्रहित्य तं साव-
धानम् अकरोत् तत् स्थानम् इस्रायेलीयो नृपतिः सैन्यं प्रहित्यात्मान-
११ मरक्षत्, एतादृशं बहुवारान् अकरोत्। अतस्तत्कारणाद् अरामीय-
महीपतेर्मनस्युद्विग्ने सति स निजभृत्यान् आहूय व्याचचक्षे, अस्मदीयानां
मध्य इस्रायेलीयमहीपतेः पक्षीयो लोकः क आस्ते तत् किं यूयं मह्यं न
१२ कथयिष्यथ? तदानीं तस्य भृत्य एक उक्तवान् हे मम प्रभो राजन्
कोऽपि नास्ति किन्त्विस्रायेलीयानां मध्यवर्त्तिनेलीशायनाम्ना भविष्यद्वा-
दिना तव शयनागारस्थमन्त्रणापीस्रायेलीयनरपतये निवेद्यते।
१३ स आचचक्षे यूयं समीय तस्य वासस्थानम् अन्विष्यत तेन मया
सैन्यं प्रहित्य स आनायिष्यते। ततः परं पश्य स दोथने विद्यते वच
१४ इदं केनापि तस्मै कथितं। ततः स वाजिनो रथान् महासैन्यानि च
१५ तत् स्थानं प्रेषयामास ते च निशायामागत्य तन्नगरं विवेष्टिरे। अन-
न्तरं प्रत्यूष ईश्वरीयलोकस्य दास उत्थाय वहिर्निर्गत्य वाजिरथमहा-
सैन्यानां संघो नगरं वेष्टत इति ददर्श ततः स दासस्तं बभाषे हा हा
१६ प्रभो अस्माभिः किं कर्त्तव्यं? स उदितवान् भयं मा कार्षीः, तेषां सङ्गि-
१७ लोकेभ्योऽस्माकं सङ्गिनो लोकाः अधिकाः। तदानीम् इलीशायः प्रार्थनां
कुर्व्वन् व्याजहार हे परमेश्वर, एष यद् द्रष्टुं प्राप्नोति तदर्थं तस्य
लोचने उन्मीलय। ततः परमेश्वरेण तस्य तरुणस्य लोचनद्वय उन्मी-
लिते स आलोच्येलीशायस्य चतुर्दिक्षु वह्निमयैर्हयरथैः परिपूर्णं
१८ शिलोच्चयं विलोकयामास। अनन्तरं सैन्यसमूहे तस्य सविधं समागत
इलीशायः परमेश्वरम् उद्दिश्य प्रार्थनां कुर्व्वन् उक्तवान् एष सङ्घस्त्वया-
न्धीक्रियतां। तत इलीशायस्य वचनानुसारात् स तान् अन्धीकृतवान्।
१९ अनन्तरम् इलीशायस्तान् उदितवान् एष पन्था नहि नगरमेतच्च

नहि मम पश्चाद् आगच्छत यं मनुजं यूयं गवेषयथ तस्य सविधं मया
नेष्यध्वे। अनन्तरं स तान् शोमिरोणं निनाय। तेषु शोमिरोणं प्रवि- २०
ष्टेष्विलीशाय आचचक्षे हे परमेश्वर, एते लोका यद् वीक्षितुं प्राप्नुवन्ति
तदर्थम् एतेषां लोचनान्युन्मीलय। ततः परमेश्वरेण तेषां लोचनेषू-
न्मीलितेषु शोमिरोणस्य मध्ये वयमास्मह इति तै र्दृष्टं। अपरम् २१
इस्रायेलीयो राजा तान् वीक्ष्येलीशायं जगाद, हे मम तात किमहं
मारयिष्यामि? किमहं मारयिष्यामि? इलीशायः कथयामास ते २२
त्वया न मारयितव्याः। ये लोकाः खङ्गधनुर्भ्यां त्वया वन्दीक्रियन्ते ते किं
त्वया मारयितव्याः? एतेषां समीपं पूपान् तोयानि च निधत्स्व ते भुक्त्वा
पीत्वा च निजप्रभोः समीपं गच्छन्तु। ततस्तेषां निमित्तं तेन महाभोज्ये २३
कृते ते बुभुजिरे पपुश्च ततः परं तेन विसृष्टाः स्वेषां प्रभोः सविधं समीयुः।
ततः परम् अरामीयसैन्यसङ्घा इस्रायेलीयं जनपदं पुन र्नागताः।

अनन्तरम् अरामीयो बिन्हददो नरपतिः स्वीयानि सर्व्वसैन्यानि २४
संगृह्य यात्रां कृत्वा शोमिरोणं नगरम् अवरुरोध। तेन शोमिरोणे २५
महादुर्भिक्षं बभूव तेषां नगरावरोधनाद् एकस्य गर्द्दभमस्तकस्य
मूल्यम् अशीतिमुद्रा बभूव, कपोतमलस्य कावाख्यपरिमाणस्य चतुर्थां-
शस्य च मूल्यं पञ्चमुद्रा बभूव।

एकदा नृपतिः प्राचीरस्योपरि भ्रमति तदनन्तर एका नारी प्रोच्चै २६
र्निवेदयामास हे मम प्रभो राजन् उपकुरु। राजा जगाद, यदि २७
परमेश्वरेण त्वं नोपक्रियसे तर्हि मया शस्यमर्द्दनस्थानात् द्राक्षारसकु-
ण्डाद्वा केन त्वम् उपकारिष्यसे? राजा पुनरुवाच तव किं दुःखं? ततः २८
सा प्रतिजगाद, आवयो र्भक्ष्यार्थम् अद्य तव पुत्त्रं त्वं देहि श्वो मम
पुत्त्र आवाभ्यां भक्षिष्यत इत्यनया नार्य्याहम् उक्ता। तत आवां मम पुत्त्रं २९
पक्त्वाभक्षिष्व, परदिन आवयो र्भक्षणार्थं तव पुत्त्रं त्वं देहीति मयोक्तं
किन्तु सा निजपुत्त्रम् अजूगुहत्।

तदानीं राजा तस्या नार्य्या वचनं निशम्य स्वीयं वसनं चिच्छेद, ततः ३०
प्राचीरभ्रमणसमये तस्य गात्रे शाणवसनं बद्धमिति लोकै र्दृष्टं। अन- ३१
न्तरं स कथितवान्, अद्य यदि शाफटपुत्रस्येलीशायस्य शिरस्तस्य
स्कन्धे तिष्ठति तर्हीश्वरो मह्यम् अमुकं ततोऽधिकञ्च फलं ददातु। तदा- ३२
नीम् इलीशायो निजगेहे समुपविष्ट आसीत् प्राचीनलोकाश्च तेन
समम् उपविष्टा आसन् ततो नृपतिना स्वसमीपाद् दूते प्रहिते तस्या-

गमनात् पूर्व्वम् इलीशायः प्राचीनान् आचचक्षे, पश्यत मम शिर-
श्छेदनार्थं तेन हत्याकारिणः सुतेन लोकः प्रहितः । अतः पश्यत तस्मिन्
दूत आगच्छति यूयं द्वारं रुद्धा तं वहिष्कुरुत तस्य प्रभोः पदयोः शब्दः
३३ किं तस्य पश्चात् नहि ? स तैः समं सम्भाषत इत्यनन्तरे स दूतस्तस्य
समीपम् आगत्य राज्ञा कथितम् एतद् वच उदितवान् इदम् अमङ्गलं
परमेश्वराद् आगमत्, मया परमेश्वरः कुतः पुनरपेक्षिष्यते ?

---

७ सप्तमोऽध्यायः ।

१ बहुलभक्ष्यसधीलीशायस्य भविष्यद्वचनं ३ चतुर्णां कुष्ठिलोकानाम् अरामीयाणां शिविरगमनं वार्त्तानयनञ्च १२ तेषां वार्त्तां सत्यां विदित्वा लोकैररामीयाणां शि-विरलोठनं १७ भविष्यद्वचनेऽविश्वासिन एकस्याधिपते र्मृत्यु ।

१ तदानीम् इलीशाय आचचक्षे यूयं परमेश्वरस्य वचो निशामयत
परमेश्वर एतां भारतीं वदति श्व एतस्यां वेलायां शोमिरोणस्य गोपुरे
दशशेटकपरिमितानां सूक्ष्मगोधूमचूर्णानाम् एकशेकलं मूल्यं भविष्यति
२ विंशतिशेटकपरिमितानां यवानाञ्चैकशेकलं मूल्यं भविष्यति । तदानीं
राजा यस्याध्यक्षस्य करम् आलम्बत तेनेश्वरीयलोक आचचक्षे पश्य
यद्यपि परमेश्वरेण वियति द्वाराणि क्रियन्ते तथापि तेन किम् एतत् कर्त्तुं
शक्यते ? सोऽभिहितवान् पश्य त्वया निजदृग्भ्यां तत् दर्शिष्यते किन्तु
किञ्चिन्न भक्षिष्यते ।
३ तदानीं गोपुरप्रवेशस्थाने चत्वारः कुष्ठिनोऽविद्यन्त । ते परस्परं बभा-
४ षिरे, अस्माभि र्निधनं यावत् कुत एतस्मिन् स्थाने उपविश्यते ? अस्माभि
र्नगरं प्रविश्यतामित्युक्ते तत्रापि दुर्भिक्षम् आस्ते तत्रास्माभि र्मरिष्यते ।
अपरम् अत्रापि तिष्ठद्भिरस्माभि र्मरिष्यते । अत आगच्छत वयम्
अरामीयाणां शिविरं गच्छामः, तै र्जीविता वयं जीविष्यामो मारिताः
५ केवलं मरिष्यामः । अतस्तैररामीयाणां शिविरं गन्तुं प्रत्यूष उत्थाया-
रामीयाणां शिविरस्य प्रान्तभागम् उपस्थितैस्तत्र कश्चन नास्तीति ददृशे ।
६ यतः प्रभुररामीयान् बहूनां रथिस्यन्दनहयानां शब्दम् अर्यतो महा-
चमूनिवहस्य शब्दं श्रावयाम स तेन ते परस्परं बभाषिरे पश्यतास्माकम्
आक्रमणार्थम् इस्रायेलीयो महीपति र्हित्तीयानां भूपतिवृन्दाय मिस्री-
७ याणां भूपतिवृन्दाय च मुद्राः प्राददात् । ततो हेतोस्तैः प्रत्यूष उत्थाय
पलायाञ्चक्रे ते स्वेषां पटोटजानि वाजिनो गर्द्दभान् सर्व्वशिविरञ्च

पूर्व्वावस्थया विहाय निजान् निजान् प्राणान् अवितुं पलायाञ्च-
क्रिरे। अनन्तरं ते कुष्ठिनो लोकाः शिविरस्य प्रान्तभागे पटोटज- ८
मेकं प्रविश्य बुभुजिरे पपुश्च। अपरं तस्मात् स्थानात् सुवर्णदुर्व्वर्ण-
वसनानि गृहीत्वा गोपयित्वा निदधिरे ततः परं पुनर्व्वारं समेत्य पटो-
टजमन्यत् प्रविश्य तस्मादपि द्रव्याणि समादाय व्रजित्वा सङ्गोप्य निद-
धिरे। अनन्तरं ते परस्परम् ऊचिरे, अस्माकम् एतत् कर्म्म न भद्रम् अद्य ९
शुभवार्त्ताया दिनं किन्तु वयं नीरवास्तिष्ठामः। यदि प्रभातं यावद्
विलम्बामहे तर्ह्यवश्यं दण्डनीया भविष्यामः। अत इदानीम् एत वयं
समीय राजमन्दिरे वार्त्तामेतां वदामः। अनन्तरं ते गत्वा नगरस्य दौ- १०
वारिकम् आहूय व्याचचक्षिरे, वयम् अरामीयाणां शिविरम् अगमाम,
पश्य तत्र कोऽपि न विद्यते मानुषस्य शब्दोऽपि नास्ति केवलं बद्धा
वाजिनो बद्धा गर्द्दभाश्च सन्ति वासःकुट्यश्च पूर्व्वावस्थया विद्यन्ते। ततस्तेन ११
द्वारिणा आहूतास्ते च राजमन्दिरस्याभ्यन्तरे तां वार्त्तां व्याचचक्षिरे।

अनन्तरं नृपतिः क्षणदायाम् उत्थाय निजभृत्यान् व्याजहार, अरा- १२
मीयैरस्मान् प्रति यत् कर्म्म क्रियते तदहं युष्मान् ब्रवीमि वयं बुभुक्षिता
आस्महे तैरेतद् ज्ञायते, अतस्तैः क्षेत्रे प्रच्छन्नाः स्थातुं शिविराद् वहि-
र्गत्वैषा मन्त्रणाकारि लोकेषु नगराद् वहिर्भूतेषु वयं तान् जीवग्राहं
ग्रहीष्यामो मध्येनगरं प्रवेक्ष्यामश्चेति। ततस्तस्य भृत्यानाम् एको जनः १३
प्रत्यब्रवीत् नगरे ये वाजिनोऽवशिष्टाः सन्ति वयं तेषाम् अवशिष्टानां
वाजिनां पञ्च गृहीत्वा प्रहित्य द्रक्ष्यामः पश्य ते नगरेऽवशिष्टानाम्
इस्रायेलीयानां निवहस्य समानाः, पश्य ते नष्टानाम् इस्रायेलीयानां
निवहस्यापि समाना भवन्ति। अनन्तरं ते द्वियुग्मे हयानां गृहीते १४
यूयं गत्वा पश्यतेति कथयित्वा नृपतिररामीयाणां पृतनानां पश्चात्
तान् प्रेषयामास। ततस्तेषु यर्द्दनं यावत् तेषां पश्चाद् गतेष्वरामीयाणां १५
तूर्णताकारणात् परित्यक्तै र्वसनै र्भाजनैश्च वर्त्म परिपूर्णम् इति ददृशुः।
तदानीं तै र्दूतैः परावृत्यागत्य राज्ञे वार्त्ता निगदिता। ततः परं लोकै १६
र्वहिर्भूयारामीयाणां शिविरे लोठिते परमेश्वरस्य वाक्यानुसाराद् दश-
शेटकपरिमितानि सूक्ष्मगोधूमचूर्णानि शेकलैकमूल्येन व्यक्रीयन्त विंश-
तिशेटकपरिमिता यवास्त्वैकशेकलमूल्येन व्यक्रीयन्त।

अनन्तरं नृपति र्यस्याधिपतेः करम् आलम्बितवान् तस्मिन् गोपुरम् १७
अवितुं नियुक्ते लोका गोपुरे चरणैस्तं विममृदुस्तत ईश्वरीयलोकस्य

सविधे भूपस्य गतिसमये तेन यदभाषि तदनुसारात् स निधनमितः।
१८ फलतः श्व एतस्यां वेलायां शोमिरोणस्य गोपुरे दशशेटकपरिमितानि
सूक्ष्मगोधूमचूर्णानि शेकलैकमूल्येन विक्रेष्यन्ते विंशतिशेटकपरिमिता
यवाश्च शेकलैकमूल्येन विक्रेष्यन्ते वचस्येतस्मिन् ईश्वरीयलोकेन राज्ञे
१९ कथिते सोऽधिप ईश्वरीयं लोकं प्रत्यवदत्, वीक्षस्व यद्यपि परमेश्वरेण
विहायसि द्वाराणि क्रियन्ते तथापि तत् किं भवितुं पारयति ? तत
ईश्वरीयलोकस्तम् अवादीत् पश्य त्वया तत् निजनेत्राभ्यां विलोकिष्यते
२० किन्तु किमपि न भक्षिष्यते। अतस्तस्य तादृशी दशा बभूव गोपुरे
लोकानां चरणै र्मर्द्दितः स ममार।

---

८ अष्टमोऽध्यायः।

१ दुर्भिक्षसमये शूनेमीयाया विहृतिः ७ हसायेलस्य विहृतिः १६ योरामस्य कुराजत्वं २० इदोमदेशेन लिब्नानगरेण च तस्याधिपतित्वत्यजनं २५ अहसियस्य कुराजत्वं २८ अतयुक्तं यिहोरामं साक्षात् कर्त्तुं तस्य यिष्रियेले गमनञ्च।

१ पूर्व्वम् इलीशायो यस्या नार्य्या मृतं पुत्रम् अजीवयत् ताम् अभाषत,
परमेश्वर एतं देशं दुर्भिक्षव्याप्तं करिष्यति तत् सप्तवत्सरान् यावद् एत-
स्मिन् जनपदे स्थास्यति, तस्मात् त्वम् उत्थाय परिजनैः समं यस्मिन् स्थाने
२ प्रवस्तुं शक्नोषि तत् स्थानं प्रवस्तुं व्रज। ततः सा योषिद् ईश्वरीयलोकस्य
वचनानुसारात् परिजनैः समं प्रस्थाय पिलेष्टीयानां जनपदे सप्तवत्स-
३ रान् यावत् प्रावसत्। अनन्तरं सप्तसु वत्सरेषु व्यतीतेषु सा नारी
पिलेष्टीयानां जनपदात् परावृत्यागत्य निजनिवेशनस्य भूमेश्च कृते
४ भूपतेः सविधे निवेदयितुं वव्राज। तस्मिन्नेव समये भूपतिरीश्वरीयलो-
कस्य परिचारकं गेहसिनं सम्भाषमाणोऽवदत्, इलीशायेन कृतानि
५ सकलमहान्ति कर्म्माणि मम समीपे समाख्याहि। तत इलीशायो
मृतं शरीरं पुनरजीवयद् एतदाख्याने भूपतये तेन कथ्यमाने यस्या
योषितो मृतः पुत्रो जीवनं प्राप्तः सा नारी निजनिवेशनस्य भूमेश्च
कृते भूपतेरभ्यासे निवेदयितुम् उपतस्थौ तदानीं गेहसिराचचक्षे
हे मम प्रभो राजन् एषैव सा नारी तस्याश्च यं तनयम् इलीशायो-
६ ऽजीवयत् स एषः। तदानीं नरपतिना पृष्टा सा योषित् सर्व्वं व्याच-
चक्षे तेन भूपतिस्तस्याः पक्षेऽध्यक्षमेकं नियोज्य व्याहरत् एतस्या

यत्किञ्चनाविद्यत तत् सर्व्वम् एषा च यस्मिन् दिने देशमिमं पर्य्यत्यजत् तद्दिनमारभ्याद्य यावद् एतस्याः क्षेत्रे यत्किञ्चन समुदपद्यत तत् सर्व्वमप्येतस्यै परावर्त्य वितर।

अनन्तरम् इलीशायो दम्मेषकम् आजगाम तदानीम् अरामीयो ७
नरपति र्विन्हददो रुग्न आसीत् तत ईश्वरीयलोक एतत् स्थानम् आगमत् एतां वार्त्तां कश्चित् भूपतये कथयामास। तदा नरपति र्हसायेलं ८
जगाद त्वं स्वहस्तेनोपायनम् आदायेश्वरीयलोकं साक्षात् कर्त्तुं व्रज, अपरम् एतस्माद् व्याधेरहं किं मोचयिष्ये? वचनम् इदं तेन परमेश्वरं प्रच्छय। अनन्तरं हसायेलस्तं साक्षात् कर्त्तुं जगाम। स चत्वारिंश- ९
न्महाङ्गैर्वोढव्यानि दम्मेषकस्योत्तमवस्तून्युपायनार्थं गृहीत्वा समागत्य तस्य सम्मुखे तिष्ठन् आचचक्षे किमहम् एतस्माद् व्याधे र्मोचयिष्ये? वाचमिमां परिप्रष्टुं तव तनयोऽरामीयभूपति र्विन्हददस्तव समीपं मां प्राहिणोत्। इलीशायस्तमुवाच त्वं स्वस्थो भविष्यसीति त्वं स- १०
मीप तं ब्रूहि तथापि तेन मर्त्तव्यमेवेति परमेश्वरो माम् अज्ञापयत्।
तदानीम् ईश्वरीयलोकस्तस्य त्रपासम्भवपर्य्यन्तं तस्य वदनं प्रति स्थिर- ११
दृष्टिं कुर्व्वन् रुरोद। ततो हसायेलः परिपृष्टवान् मम प्रभुः कुतो १२
रोदिति? स प्रतिजगाद, इस्रायेलीयवंशानां या हिंसा त्वया कारिष्यते तामहं वेद्मि त्वं तेषां दुर्गाणि वह्निना दाहयिष्यसि तेषां तरुणान् खड्गेन हनिष्यसि तेषां शिशून् भूमौ विकरिष्यसि गर्भवतीनाम् उदराणि विदारयिष्यसि च। हसायेलोऽवोचत् सारमेयतुल्यस्तवैष दासः १३
को य एतादृग् गुरु कर्म्म तेन कारिष्यते? इलीशाय उदितवान्
त्वम् अरामस्य राजा भविष्यसीति परमेश्वरो मां ज्ञापितवान्। अन- १४
न्तरं स इलीशायस्य सविधात् समेत्य निजप्रभोः समीपं जगाम। तदा नरपतिस्तं परिपप्रच्छ इलीशायस्त्वां किमवोचत्? स प्रत्यवादीत् त्वं स्वस्थो भविष्यसि भारतीमिमां स मामवादीत्। परेऽहनि स कम्बलमेकम् १५
आदाय तोये मज्जयित्वा राज्ञ आननस्योपरि विस्तारयामास, ततः स ममार। अनन्तरं हसायेलस्तदीयपदे राजा बभूव।

आहावतनयस्येस्रायेलीयभूपते र्यिहोरामस्य पञ्चमे राजत्ववत्सरे १६
यिहूदादेशीयनरपते र्यिहोशाफटस्य राजत्वसमये तस्य यिहोशाफटस्य पुत्रो योरामो राजत्वं कर्त्तुं प्रारेभे। स द्वात्रिंशद्वत्सरवयस्कः सन् १७
राजत्वं कर्त्तुं प्रारभ्य यिरूशालमेऽष्टवत्सरान् यावद् राजत्वं चकार।

१८ स आहावीयवंशवद् इस्रायेलीयभूपतीनां वर्त्मनि चचार यतः स
आहाबस्य दुहितरं व्युवाह तेन परमेश्वरस्य साक्षात् कुत्सिताचारं
१९ चकार। तथापि परमेश्वरो निजदासं दायूदं प्रति तस्य वंशाय चिर-
कालं प्रदीपदानस्य यां प्रतिज्ञाम् अकरोत् तन्निमित्तं यिहूदां विनाश-
यितुं नैच्छत्।
२० तस्य राजत्वसमय इदोमीयलोका यिहूदाया आधिपत्यं विहाय
२१ स्वेषामुपरि राजानमेकम् अभ्यसिषिचुः। अतो योरामस्तस्य रथिनश्च
सर्व्वे सायीरं समीय निशायां तत्रोत्थाय स्वान् वेष्टकान् इदोमीयान्
तेषां रथिनश्च जघ्नुस्ततो लोकाः स्वीयं स्वीयं वासस्थानं पलायाञ्च-
२२ क्रिरे। तथापीदोमीयलोका अद्यापि यिहूदाया अनधीना विद्यन्ते।
२३ तस्मिन्नेव समये लिब्नाया लोका अपि तस्याधीनत्वं तत्यजुः। एतस्य
योरामस्यावशिष्टं चरित्रं तेन कृतानि सर्व्वाणि कर्म्माणि च किं यिहू-
२४ दादेशस्य महीपतीनां पुरावृत्तपुस्तके लिखितानि न विद्यन्ते? अनन्तरं
योरामो निजपितृलोका इव महानिद्रां गत्वा दायूद्नगरे पितृलो-
कानां सन्निधौ श्मशाने निहितस्ततस्तस्य तनयोऽहसियस्तस्य पदे राजा
बभूव।
२५ इस्रायेलीयनृपतेराहावतनयस्य यिहोरामस्य द्वादशे राजत्ववत्सरे
२६ यिहूदादेशीययोरामस्य तनयोऽहसियो राजत्वं कर्त्तुम् आरेभे। राज्य-
प्राप्तिसमये सोऽहसियो द्वाविंशतिवत्सरवयस्क आसीत् स यिरूशा-
लमे वत्सरमेकं राजत्वं चकार। अथलियानामिकेस्रायेलीयराजस्याम्र
२७ दुहिता तस्य प्रसूरासीत्। स आहाववंशस्य वर्त्मनि चरन् आहावीय-
वंश इव परमेश्वरस्य साक्षात् कुत्सिताचारं चकृवान् यतः स आहा-
वीयवंशस्य जामातासीत्।
२८ अनन्तरं स आहावसुतस्य यिहोरामस्य सङ्गी भूत्वारामीयनर-
पतिना हसायेलेन समं समरं कर्त्तुं रामोतगिलियदं जग्मिवान् ततो
२९ ऽरामीयलोका यिहोरामं हतवन्तः। अनन्तरम् अरामीयमहीपतिना
हसायेलेन समं योधनसमये रामोतगिलियदे यिहोरामो नृपति र्यानि
क्षतानि लब्धवान् तेभ्यः स्वस्थो भवितुं स परावृत्य यिष्रियेलं जगाम।
तदानीं यिहूदादेशीयो महीपति र्योरामस्य सुतोऽहसिय आहाव-
तनयस्य यिहोरामस्य पीडाकारणात् तं वीक्षितुं यिष्रियेलं जग्मिवान्।

९ नवमोऽध्यायः ।

१ येहोराज्याभिषेकार्थं भविष्यद्वादिना कस्यचित् तरुणस्येलीशायेन प्रेषणं ४ तत्कर्म्म-साधनात् परं तस्य भविष्यद्वादिनः पलायनं ११ नावेतस्य क्षेत्रे येहूराजेन यिहोरामस्य हननं २७ अहसियस्यापि हननं ३० अहङ्कारिण्या ईषेवलो गवाक्षतो निक्षिप्तत्वं सारमेयै र्भक्षितत्वञ्च ।

अनन्तरं भविष्यद्वादीलीशाया भविष्यद्वादिनां शिष्यमेकम् आहूय १
गदितवान् त्वं बद्धकटि र्भूत्वा तैलभाण्डम् इदं करेणादाय रामोतगि-
लियदं गच्छ । तत् स्थानं प्राप्य निम्शेः पौत्रं यिहोशाफटस्य तनयं २
येहूं गवेषय, अपरं गेहं प्रविश्य तदीयभ्रातृणां मध्यात् तम् उत्थाप्य
गर्भागारमेकं नय । अपरं तैलभाण्डं गृहीत्वा तदीयशिरसि तैलं निषिच्य ३
तं ब्रूहि परमेश्वरेण वच इदं निगद्यते अहं त्वाम् इस्रायेलो राज्ये
ऽभ्यषिञ्चं । ततः परं त्वं द्वारं विमोच्य पलायस्व मा विलम्बस्व ।

अनन्तरं स भविष्यद्वादी तरुणो रामोतगिलियदं जगाम । तत्रो- ४
पस्थाय सेनापतीन् विलोक्य तेनोक्तं हे सेनापते त्वया सह मया ५
सम्भाषितव्यं । ततो येहूः परिपप्रच्छ, अस्माकं मध्ये केन सह ? स
जगाद हे सेनापते त्वयैव सार्द्धं । तदानीं येहावुत्थाय भवनस्य मध्यं ६
गते स तस्य शिरसि तैलं निषिच्य तम् ऊचिवान्, इस्रायेलः प्रभुः पर-
मेश्वर एतां भारतीं भाषते परमेश्वरस्य प्रजा य इस्रायेल्वंशास्तेषाम्
उपरि त्वामहं राजत्वे ऽभ्यषिञ्चं । त्वं स्वीयप्रभोराहावस्य वंशम् उच्छे- ७
त्स्यसि, ईषेवलो हस्तेन हतस्य मदीयसेवकानां भविष्यद्वादिनां रुधिर-
पातनस्य परमेश्वरीयाणां सकलसेवकानां रुधिरपातनस्य च फलं तस्यै
दास्यसि च । आहावस्य सर्व्वे वंशा विनंक्ष्यन्ति, तद्वंशीयाः सर्व्वपुमांस ८
इस्रायेलो मध्ये मुक्ता बद्धा वा सर्व्वजना मयोच्छेत्स्यन्ते । आहावीयवंशं ९
निवाटसुतस्य यारवियामस्य वंशमिवाहियतनयस्य वाशा वंशमिव च
करिष्याम्यहं । ततो यिष्रियेलस्थे क्षेत्रे सारमेया ईषेवलम् अत्स्यन्ति कश्चन १०
तां श्मशानं न नेष्यति । वचांस्येतान्युक्त्वा स द्वारं विमोच्य पलायाञ्चक्रे ।

अनन्तरं येहौ स्वीयप्रभो र्दासानां समीपं वहिरागते कश्चित् तं ११
पृष्टवान् सर्व्वं मङ्गलं ? स वातुलस्तव समीपं कुत आगमत् ? ततः स
ऊचिवान् यूयं तं मानवं तदीयभाषणञ्च विद । त आचचक्षिरे अलम् १२
अनेन प्रलापेन त्वम् अस्मान् सर्व्वमेव व्याहर । स उदितवान् स माम्
एतादृशीं भारतीम् अभाषिष्ट परमेश्वर इमां वाणीम् आह मया

१३ त्वम् इस्रायेलो राजत्वेऽभिषिक्तः। तदानीं तेषाम् एकैकेन जनेन तूर्णं स्वं
स्वं वसनं विमोच्य सोपानोपरि तस्य पदयोरधो निदधे, तूरीञ्च वाद-
१४ यित्वा कथितं येहू राजाभवत्। इत्थं निम्शेः पौत्त्रो यिहोशाफटस्य
पुत्त्रो येहू यिहोरामस्य विरुद्धं द्रोहं चकार। तदानीं यिहोरामः सकल
इस्रायेलीयलोकाश्चारामीयनरपते र्हसायेलाद् रामोतगिलियदम्
१५ अरक्षन्। किन्त्वारामीयराजेन हसायेलेन समं यिहोरामस्य समरस-
मयेऽरामीयलोकास्तस्य यानि क्षतानि कृतवन्तस्तेभ्यः स्वस्थो भवितुं स
यिष्रियेलम् अगच्छत्। तदानीं येहूः कथयामास यदि युष्माकम् इच्छा
जायेत तर्हि यिष्रियेलं वार्त्तां नेतुम् एतस्मात् नगरात् कोऽपि जनो
१६ वहिर्भूय न पलायतां। अनन्तरं येहूः स्यन्दनम् आरुह्य यिष्रियेलं जगाम
यतस्तत्रैव यिहोरामः शय्यागत आसीत्। तदानीं यिहूदाया नर-
१७ पतिरहसियोऽपि यिहोरामं वीक्षितुं तत् स्थानम् आगमत्। अपरं
यिष्रियेलस्यदुर्गोपरि यो रक्ष्यतिष्ठत् स येहोः सङ्गिनं सेनानिवहम्
आगच्छन्तं विलोक्य कथयामास मया लोकनिवह एको दृश्यते। ततो
यिहोरामो गदितवान् त्वं हयारोहिणम् एकं गृहीत्वा तेषां साक्षात्
१८ प्रेषय ते कुशलेनागच्छन्ति न वेति तेन पृच्छ्यन्तां। अनन्तरम् एको
जनो हयारोही तं साक्षात् कर्त्तुं समीय जगाद नरपतिः कथयति
किं सर्व्वं मङ्गलं? ततो येहूना स उक्तः, मङ्गलेन सह तव कः
सम्बन्धः? त्वं मम पश्चाद् याहि। अनन्तरं रक्षी वार्त्तामिमाम् उक्त-
१९ वान् स दूतस्तेषां समीपं समीय न प्रत्यागच्छति। अनन्तरं राज्ञा
द्वितीये हयारोहिणि प्रेषिते स तेषां समीपं समीय कथितवान् नृपति
र्गदति किं सर्व्वं मङ्गलं? किन्तु येहूना स उक्तः, मङ्गलेन सह तव
२० कः सम्बन्धः? त्वं मम पश्चाद् याहि। अनन्तरं रक्षी वार्त्ताम् अब्रवीत्
स दूतस्तेषां समीपं समीय न प्रत्यागच्छति किन्त्वेतस्य चालनं निम्शे-
२१ स्तनयस्य येहोश्चालनवत् प्रकाशते यतः सोऽतिरयेण चालयति। तदानीं
यिहोरामो जगाद स्यन्दने हयान् आयुङ्क्ष ततस्तेन हयेष्वायुक्तेष्वि-
स्रायेलीयो यिहोरामो राजा यिहूदादेशीयोऽहसियो राजा च स्वं स्वं
स्यन्दनम् आरुह्य येहूं साक्षात् कर्त्तुं गत्वा यिष्रियेलीयनावोतस्य क्षेत्रे
२२ तं प्रापतुः। तदानीं यिहोरामो येहूं विलोक्य पप्रच्छ, हे येहो त्वं किं
मङ्गलायागच्छसि? स प्रत्यवदत् यावत् तव जनन्या ईषेवलो व्यभि-
२३ चारो माया च तिष्ठति तावत् मङ्गलं किं? ततो यिहोरामो निजहस्तौ

परावर्त्त्य पलायाञ्चक्रेऽहसियं व्याजहार च हे अहसिय राजद्रोहो
भवति। अनन्तरं येहूः कृत्स्नबलेन चापम् आकृष्य यिहोरामस्य बाहु- २४
मूलद्वयमध्ये शरम् आजघान ततो बाणस्तस्य हृदयेन निर्जगाम ततः
स रथे नतो भूत्वा निपपात। तदानीं येहूः स्वीयं रथिनं विद्करम् २५
आज्ञापयत् त्वम् एनं तोलयित्वा यिष्रियेलीयनावोतस्य क्षेत्रे निक्षिप
यतो यदा त्वम् अहञ्च हयारूढौ सन्तौ तस्य पितुराहावस्य पश्चाद्
गतवन्तौ तदा परमेश्वरस्तं यदशपत् तत् स्मर। परमेश्वर आह मया २६
ह्यो नावोतस्य रुधिरं तदीयपुत्राणाञ्च रुधिरम् अदृश्यत। परमेश्वरः
कथयति, अहम् अस्मिन्नेव क्षेत्रे तुभ्यं समुचितं फलं दास्यामि। अत
इदानीं त्वं परमेश्वरस्य वचनानुसारात् तं नीत्वा क्षेत्रेऽस्मिन् निक्षिप।

तदानीं यिहूदादेशीयोऽहसियो नरपतिस्तद् विलोक्योद्यानस्थगेहस्य २७
पथा पलायाञ्चक्रे ततो येहूस्तस्य पश्चाद् धावन् कथयामास, एन-
मपि स्यन्दनस्य मध्ये हत। अनन्तरं ते यिब्लियमस्य समीपस्थे गूराख्य
ऊर्द्धगामिमार्गे तम् आजघ्नुः। ततः स मगिद्दं पलाय्य तस्मिन् स्थाने
ममार। ततस्तस्य दासास्तं स्यन्दनेन यिरूशालमं नीत्वा दायूद्नगरे २८
तदीयपितृलोकानां सन्निधौ तस्य निजश्मशाने तं निदधिरे। सोऽह- २९
सिय आहावतनयस्य यिहोरामस्यैकादशे राजत्ववत्सरे यिहूदाया
उपरि राजत्वं कर्त्तुम् आरेभे।

अपरं येहू यिष्रियेलम् उपतस्थिवान् तत ईषेबल् तन्निशम्य निज- ३०
लोचनयोरञ्जनम् आयुज्य केशवेशं विधाय वातायनेन समवलुलोके।
अनन्तरं येहौ गोपुरं प्रविष्टे सा कथयाञ्चकार निजप्रभुम् अवधीत् ३१
यः सिम्रिस्तस्य किं मङ्गलं समभवत्? ततो येहू वातायनं प्रति वद- ३२
नम् उत्थाप्य जगाद मम पक्षीयः कोऽस्ति? अनन्तरं द्वित्रा नपुंस-
कास्तं प्रत्यवलुलोकिरे। तदा येहूराज्ञापयामास ताम् अधो निक्षिपत। ३३
ततः सा तैरधो निक्षिप्ता तस्या रुधिरेण च भित्ति र्वाजिनश्चावकीर्णाः
स च रथेन तां ममर्द। अनन्तरं येहूरभ्यन्तरम् आगत्य भुक्त्वा पीत्वा ३४
च समीय जगाद यूयं गत्वा तां शापग्रस्तां नारीम् आलोक्य श्मशाने
निदद्धं यतः सा राजदुहिता। ततो लोकेषु तां श्मशाने निधातुं गत- ३५
वत्सु तस्याः शिरोस्थि पादौ पाणी च विनान्यत् किञ्चन ते न लेभे।
अतस्ते परावृत्यागत्य तं वार्त्तां बभाषिरे ततः स ऊचिवान् अनेन पर- ३६
मेश्वरस्य वाक्यं सिद्धम् अभवत् स निजदासस्य तिश्बीयैलियस्य वदनेन

वच इदं व्याहरत् सारमेया यिष्रियेलस्य क्षेत्रे ईषेवलः पललं खादि-
३७ ष्यन्ति। ईषेवलः कुणपं यिष्रियेलस्यक्षेत्रे आलवालवत् स्थास्यति, तत
ईषेवल् एषेति वदितुं केनापि न शक्ष्यते।

---

१० दशमोऽध्यायः।

१ येहूनाहाबस्य सप्ततिसुतानां शिरश्छेदनं ८ एलियस्य वचनेन येहोः स्वदोषप्रक्षालनं ११ अहसियस्य हननं १५ योनादबस्य साक्षात्कृतिः १८ छलेन बालः पूजकानां हननं २९ यारबियामस्य पथि येहोश्चरणं ३२ हसायेलस्योपद्रुति र्येहो र्निधनञ्च।

१ शोमिरोणे आहाबस्य सप्ततिः सुता आसन् तत्कारणात् येहूः शोमि-
रोणं यिष्रियेलस्य शासकान् प्राचीनलोकान् आहाबीयसन्तानपाल-
२ कांश्च प्रत्येतादृशं पत्रं लिखित्वा प्रेषयामास, युष्माकं प्रभोः पुत्रा
युष्माकं सन्निधौ सन्ति स्यन्दनानि वाजिनः प्राचीरवेष्टितानि नग-
३ राणि युद्धास्त्राणि चैतान्यपि युष्माकं हस्तगतानि विद्यन्ते। अतः
पत्रम् एतत् प्राप्य युष्माभिः स्वप्रभोः सुतानां मध्ये य उत्तमो ग्राह्यश्च
मन्यते स निश्चीयतां तस्य पितुः सिंहासन उपवेश्यताञ्च स्वप्रभो र्वंशस्य
४ निमित्तं युद्धं क्रियताञ्च। एतेन ते ऽतीव भीत्वा बभाषिरे पश्यत तस्य
५ सम्मुखे द्वाभ्यां राजाभ्यां स्थातुं नाशक्यत तर्ह्यस्माभिः कथं शक्ष्यते? अतो
गेहाध्यक्षो नगराध्यक्षः प्राचीनलोकाः शिशुपालकाश्च येहोः सविधम्
इमां भारतीं दूतेन प्राहिण्वन् वयं भवतो दासाः, भवता यद् आज्ञा-
पयिष्यामहे तदेव करिष्यामः कमपि राजत्वे न नियोक्ष्यामः, भवता
६ यद् भद्रमवगम्यते तदेव क्रियतां। अनन्तरं स तान् प्रति द्वितीयम्
एकं पत्रं प्रेषयामास, तस्मिन् लिखितम् इदं, यदि यूयं मदीया भवि-
ष्यथ मदीयाज्ञा ग्रहीष्यथ च तर्हि स्वेषां प्रभोः सुतानां शिरांस्यादाय
श्व एतस्यां वेलायां यिष्रियेले मम सन्निधिम् आगच्छत। ते राजकुमाराः
७ सप्तति र्जना आसन् नगरस्य प्रधानैः जनैश्च ते प्रत्यपाल्यन्त। तस्मिन्
पत्रे तेषां सविधमुपस्थिते ते सप्ततिं जनान् राजकुमारान् धृत्वा व्यापाद्य
च तेषां शिरांसि डल्लकेषु निधाय यिष्रियेले तस्य सन्निधिं प्रेषयामासुः।
८ अनन्तरं दूत एत्य तं वार्त्ताम् आचचक्षे, राजकुमाराणामुत्तमाङ्गानि
समानीयन्तेति। ततः स व्याजहार प्रभातं यावत् गोपुरस्य प्रवेश-
९ स्थाने द्वौ राशी कृत्वा तानि निधद्धं। अनन्तरं प्रभाते जाते स वहिः

समीय तिष्ठन् सकललोकान् बभाषे यूयं धार्म्मिका लोकाः पश्यत मया
स्वप्रभो र्द्रोहं विधाय सोऽघानि किन्त्वेते सर्व्वे केन हताः? अत आ- १०
हावस्य वंशमधि परमेश्वरेण यद्यद् उक्तं तस्य किञ्चन वचो निष्फलं
न भविष्यत्येतद् युष्माभि र्ज्ञायतां यतः परमेश्वरः स्वीयदासस्यैलियस्य
वदनेन यद्यद् अभाषिष्ट तत् सिद्धम् अकरोत्। अनन्तरं येहू र्यिष्रि- ११
येलेऽवशिष्टान् आहाववंशस्य सर्व्वान् लोकान् तस्य प्रधानलोकान्
ज्ञातीन् याजकांश्च जघान, स तस्यैकं जनमपि नावशेषयामास।

अपरं स उत्थाय गेहं जग्मिवान् अनन्तरं शोमिरोणं गच्छन् स १२
वर्त्मनि लोमच्छेदनगेहस्य समीपे यिहूदाया महीपतेरहसियस्य भ्रातॄ- १३
णां साक्षाद् बभूव। तदा स तान् पप्रच्छ यूयं के? ते जगदुः, वयम्
अहसियस्य भ्रातरो राज्ञो महिष्याश्च सन्तानान् नमस्कर्त्तुं व्रजामः।
तदानीं स व्याजहार तान् जीवग्राहं गृह्णीत ततो दासास्तान् जीवग्राहं १४
गृहीतवन्तः। अपरं लोमकर्त्तनगेहस्यावटसन्निधौ तान् जघ्नुः, द्विच-
त्वारिंशल्लोकानाम् एको जनोऽपि नावाशिष्यत।

अनन्तरं स तस्मात् स्थानात् प्रस्थाय निजसम्मुखाभिगामिनो रेखव- १५
तनयस्य यिहोनादवस्य साक्षाद् बभूव तं नमस्कृत्य प्रोचिवांश्च त्वां प्रति
मदीयं मनो यादृक् सरलं तादृक् मां प्रति तव मनः किं सरलम् अस्ति?
यिहोनादव आचचक्षे सरलमेव। तेनोक्तं तथा सति मह्यं करं
देहि। अनन्तरं तेन तस्मै करे दत्ते येहूस्तं स्यन्दनम् आरोह्य निजनिकटं
निनीवान्। अपरं स व्याजहार मया समम् आगत्य परमेश्वरस्य १६
निमित्तं ममोद्योगाचारं वीक्षस्व। अनन्तरं स तस्य स्यन्दनेन लोकैश्चा-
लितः। अनन्तरं शोमिरोणम् उपस्थाय येहूरेलियं प्रति परमेश्वरस्य १७
वाक्यानुसारेणाहाववंशस्य सर्व्वनाशं यावत् शोमिरोणेऽवशिष्टान्
तदीयान् सर्व्वान् जनान् जघान।

अनन्तरं येहूः सकललोकान् संगृह्य कथयामास, आहावो बालं १८
स्वल्पं सेवितवान् किन्तु येहूस्तं भृशं सेविष्यते। अतो युष्माभि र्बालो १९
भविष्यद्वादिनः सेवका याजकाश्च सर्व्वे मम सन्निधिम् आहूयन्तां कोऽप्य-
नागतो न तिष्ठतु यतो मया बालमुद्दिश्य महायज्ञ एकः कारिष्यते
तत्र यः कश्चिद् अनुपस्थितो भविष्यति तस्य प्राणा विनंक्ष्यन्ति। किन्तु
बालः सकलसेवकानां विनाशाय येहूना छलोऽयम् अकारि। अनन्तरं २०
येहूराज्ञापयामास बालमुद्दिश्य महोत्सवमेकं निरूपयत ततस्ते तं

२१ घोषयाञ्चक्रुः। अपरम् इस्रायेलः सर्व्वत्र येहूना लोकेषु प्रेषितेषु वालः
सकलसेवका आजग्मुस्तेषाम् अनागतः कोऽपि नावशिष्यत। अनन्तरं
तेषु वालो मन्दिरं प्रविष्टेषु सीमामेकामारभ्य सीमामन्यां यावद् वालो
२२ मन्दिरं परिपूर्णं बभूव। तदानीं स वस्त्रागारस्याधिपतिं जगाद त्वं
वालः सर्व्वसेवकानां कृते वसनानि वहिष्कृत्यानय। ततः स तेषां कृते
२३ वसनान्यानिनाय। अनन्तरं येहू रेखवस्य सुतो यिहोनादवश्च वालो
मन्दिरं प्रविश्य वालः सेवकान् बभाषाते वालः सेवकान् विना परमे-
श्वरस्य सेवकः कोऽपि यथा स्थानेऽस्मिन् युष्माकं मध्ये न तिष्ठति तथा
२४ युष्माभिरनुसन्धाय निश्चीयतां। अनन्तरं तेषु बलीन् दातुं होतुञ्चा-
भ्यन्तरं गतेषु येहूरशीतिं जनान् वहिः स्थापयित्वा निदिदेश, एते
यावन्तो लोका युष्माकं करेषु मया समर्प्यन्ते तेषाम् एको यदि पलायते
२५ तर्हि तस्य प्राणानां विनिमयेन युष्माकम् एकेन प्राणास्त्यक्तव्याः। अन-
न्तरं तस्य हवने समाप्तिं गते येहूः पदातीन् रथिनश्च समादिदेश
यूयम् अभ्यन्तरं समीय तान् हत, कमपि वहिरागन्तुं मानुमन्यध्वं।
तदानीं ते खड्गधारैस्तान् अवधिषुः। अपरं पदातयो रथिनश्च तान्
२६ वहि र्निक्षिप्य वालमन्दिरसमीपस्थं शाखानगरं ययुः। अपरं ते वालो
२७ मन्दिरात् सकला मूर्त्ती र्वहिष्कृत्य दाहयाञ्चक्रुः। विशेषतो वालो मूर्त्तीं
बभञ्जुरपरं वालो मन्दिरमपि भंक्त्वा तत्र स्थाने मलगेहमेकं निर्म्मापया-
२८ ञ्चक्रुस्तद् अद्यापि विद्यते। अनेन प्रकारेण येहूरिस्रायेलो मध्याद्
वालम् उच्चिच्छेद।

२९ निवाटस्य तनयो यो यारवियाम इस्रायेलीयवंशं पापं कारयामास
तस्य पापमार्गाद् अर्थतो वैथेले दाने च स्थितयोः सुवर्णमयवत्सयोर-
३० नुगमनाद् येहू र्न निववृते। ततः परं परमेश्वरो येहूम् आचचक्षे
ममाभिमतं कर्म्म साधयित्वा त्वया सदाचारः कृत आहावस्य वंशं प्रति
मम सर्व्वो मनोरथः सिद्धश्च तत्कारणात् चतुर्थं पुरुषं यावत् तव वंश
३१ इस्रायेलः सिंहासन उपवेक्ष्यति। तथापि येहूः सर्व्वान्तःकरणैः समम्
इस्रायेलः प्रभोः परमेश्वरस्य व्यवस्थानुसाराद् आचरितुं न येते किञ्च
यो यारवियाम इस्रायेलीयवंशं पापं कारयामास तस्य पापमार्गात् न
निववृते।

३२ तस्मिन् समये परमेश्वर इस्रायेल्वंशं न्यूनीकर्त्तुम् आरेभे। ततो
३३ यर्द्दनस्य पूर्व्वदिशि स्थित इस्रायेलीयः कृत्स्नो जनपदोऽर्थतो गादीय-

रूबेणीयमिनशीयानां या गिलियदाख्यो देश आसीद् अर्णोनसरित-
स्तटे स्थितम् अरोयेरनगरम् आरभ्य स कृत्स्नो गिलियदद्देशो वाशन-
देशश्च हसायेलेन पराजिग्ये। एतस्य येहोरवशिष्टं चरित्रं तेन यद्यत् ३४
कृतं तस्य विक्रमश्चैतानि सर्व्वाणि किम् इस्रायेलीयभूपतीनां पुरावृत्त-
पुस्तके लिखितानि न विद्यन्ते? अनन्तरं येहूः स्वीयपितृलोका इव ३५
महानिद्रां गतो लोकैः शोमिरोणे श्मशाने निहितश्च ततः परं तस्य
तनयो यिहोयाहसस्तस्य पदे राजा बभूव। एष येहूः शोमिरोणेऽष्टा- ३६
विंशतिवत्सरान् इस्रायेलीयानां राजत्वं चकार।

---

११ एकादशोऽध्यायः।

१ योयाशस्य रक्षा ४ यिहोयादायेन तस्य राज्याभिषेकः १३ अथलियाया हननं १७ यिहोयादायेन देवमन्दिरस्य भञ्जनं परमेश्वरस्य सेवनाय मनुजैः समं नियम-करणञ्च।

इत्यनन्तरे ऽहसियस्य जनन्यथलिया निजं पुत्त्रं मृतं विलोक्योत्थाय १
निखिलं राजवंशं विनाशयामास। किन्तु योरामस्य नृपते दुहिता- २
हसियस्य भगिनी या यिहोशेवा सा हन्यमानानां राजपुत्त्राणां मध्याद्
अहसियस्य तनयं योयाशं चोरयित्वा तं तस्य धात्रीञ्च शय्यागारे गोप-
यामास तस्माद् अथलियातो गूहितः सन् स न जघ्ने। अपरं स षड्व- ३
त्सरान् यावत् तस्याः सन्निधौ परमेश्वरस्य मन्दिरे प्रच्छन्नस्तस्थिवान्
अथलिया च देशस्य राजत्वं चकार।

अनन्तरं सप्तमे वत्सरे यिहोयादायो लोकान् प्रहित्य रक्षिणां द्रुतगा- ४
मिनाञ्च सैन्यानां शतपतीन् आहूय परमेश्वरस्य मन्दिरे स्वसमीपम्
आनिनाय तैः समं नियमं कृत्वा परमेश्वरस्य गेहे तान् शपथयित्वा च
राजपुत्त्रं दर्शयाञ्चकार च। अनन्तरं स तान् इदम् आदिदेश युष्माभिः ५
कर्म्मैतत् कर्त्तव्यं युष्माकम् एकेन तृतीयांशेन विश्रामदिने प्रविश्य राज-
निवेशनं रक्षितव्यं। अपरेण तृतीयांशेन सूरद्वारे स्थातव्यं शेषेण तृती- ६
यांशेन च द्रुतगामिनां पश्चात् स्थिते द्वारे स्थातव्यम् इत्थं पर्य्यायानुसाराद्
युष्माभि र्गेहं रक्षितव्यं। अपरं युष्माकं यौ द्वावंशौ विश्रामवारे वहि ७
र्गमिष्यतस्ताभ्यां नृपतेश्चतुर्दिक्षु परमेश्वरस्य मन्दिरम् अवितव्यं।
तदानीं यूयं सर्व्वे खड्गहस्ताः सन्तो राजानं वेष्टध्वं यः कश्चित् श्रेण्या ८
अभ्यन्तरम् आयास्यति स युष्माभि र्हन्यताम् अपरं नृपति र्यदा वहि

९ यास्यत्यभ्यन्तरम् आगमिष्यति वा तदानीं यूयं तेन समं तिष्ठतेति । इत्थं
यिहोयादायेन याजकेन यद्यद् आदिष्टं तदेव तैः शतपतिभिरकारि ।
तेषाम् एकैको जनो विश्रामवारे प्रवेशिनो विश्रामवारे निर्गामिनश्च
स्वान् स्वान् लोकान् आदाय यिहोयादायस्य याजकस्य समीपम् आज-
१० गाम । अपरं याजकः परमेश्वरस्य मन्दिरे स्थितान् दायूदो नरपतेः
११ शूलफलकान् तेभ्यः शतपतिभ्यो ददिवान् । अपरं द्रुतगामिन्यः पृतनाः
करैरस्त्राण्यादाय मन्दिरस्य दक्षिणं पार्श्वम् आरभ्य मन्दिरस्य वामं पार्श्वं
यावद् यज्ञवेद्या मन्दिरस्य च समीपे नृपतेश्चतुर्दिक्षु तस्थिवन्तः ।
१२ अनन्तरं स राजपुत्रं वहिरानीय तस्य शिरसि किरीटं निधाय तस्य
हस्ते साक्ष्यपुस्तकं समर्पितवान् ततस्ते तम् अभिषिच्य राजानं चक्रुः
करताल्या च बभाषिरे राजा चिरजीवी भूयादिति ।
१३ ततः परम् अथलिया द्रुतगामिसेनानां लोकानाञ्च कोलाहलं निशम्य
१४ परमेश्वरस्य मन्दिरे लोकानां समीपम् आजगाम । अपरं राजा
विध्यनुसारेण स्तम्भस्य समीपे तिष्ठति, अध्यक्षास्तूरीवादकाश्च राज्ञः
समीपे विद्यन्ते जनपदस्य सर्व्वे लोकाश्चानन्दं कुर्व्वन्ति तूरी वाद-
यन्ति चेति विलोक्याथलिया निजं वसनं छित्त्वा राजद्रोहो राज-
१५ द्रोह इत्युच्चैःस्वरेण बभाषे । ततो यिहोयादायो याजको बलेषु नियु-
क्तान् शतपतीन् समादिशन् बभाषे, एषा युष्माभिः श्रेणीमध्याद् वहि-
ष्क्रियतां, यः कश्चिद् एनाम् अनुव्रजिष्यति स खड्गेन हन्यताञ्चेति यतो
१६ याजकोऽब्रवीत् परमेश्वरस्य गेहमध्ये सा न हन्तव्या । अनन्तरं सा लोकै
र्धृत्वा राजधान्या हयद्वारं नीता तत्रैव जघ्ने ।
१७ ततः परं लोकाः परमेश्वरस्य प्रजा भविष्यन्ति यिहोयादायः परमे-
श्वरेण सह नृपतिं लोकांश्चैतादृशं नियमं कारयामास नृपतिना सह
१८ लोकानपि नियमं कारयामास । अनन्तरं जनपदस्य सर्व्वे मनुजा वालो
गेहं गत्वा तद् बभञ्जुस्तस्य वेदीरपि बभञ्जुस्तस्य प्रतिमाश्च सर्व्वथा
चूर्णयाञ्चक्रु र्वेदीनां सम्मुखे वालो याजकं मत्तनम् अवधिषुश्च ततः परं
१९ याजकः परमेश्वरस्य गेहे कर्म्मकारिणो नियोजयामास । अपरं शतप-
तिषु रक्षिषु द्रुतगामिषु सैन्येषु जनपदस्य लोकेषु च तेन समानीतेषु
ते राजानं परमेश्वरस्य गेहाद् द्रुतगामिसैन्यानां द्वारस्य मार्गेण राज-
२० निवेशनम् आनिन्युस्ततः स राजसिंहासन उपविवेश । ततो जनपदस्य
सकललोका आनन्दु र्नगरमपि सुस्थिरं तस्थौ केवलम् अथलिया तै

राजनिवेशने खड्गेन जघ्ने। स योयाशः सप्तवत्सरवयस्कः सन् राजत्वं २१
कर्त्तुम् आरेभे।

---

१२ द्वादशोऽध्यायः।

१ यिहोयादायस्य यावज्जीवनं योयाशस्य सुराजत्वं ४ ईश्वरीयभवनस्य जीर्णोद्धारार्थं तदीयनिदेशनं १७ मुद्राः प्राप्य हसायेलस्य यिरूशालमतः प्रत्यावर्त्तनं १९ योयाशस्य हतत्वं तस्य पदे तस्य तनयस्यामत्सियस्याभिषेचनञ्च।

येहो राजत्वस्य सप्तमे वत्सरे योयाशो राजत्वं कर्त्तुम् आरभ्य यिरू- १
शालमे चत्वारिंशद्वत्सरान् यावद् राजत्वं चक्रवान् वेर्शेवानिवा-
सिनी सिबिया तस्य प्रसूरासीत्। यिहोयादायो याजको यावन्ति २
दिनानि तम् आदिशत् तावन्ति दिनानि योयाशः परमेश्वरस्य साक्षात्
सदाचारम् अकरोत्। किन्तु भ्रगुस्थानानि नोदच्छिद्यन्त तदानीमपि ३
मानवा उच्चस्थानेषु बलिदानं धूपदाहञ्चाकुर्व्वन्।
अनन्तरं योयाशो याजकान् आचष्ट या या मेध्या मुद्राः परमेश्वरस्य ४
मन्दिरम् आनीयन्तेऽर्थतो गणितलोकानाम् एकैकस्य मूल्याय निरूपिता
मुद्राः परमेश्वरस्य मन्दिरम् आनीता मुद्रा लोकैः स्वेच्छया दत्ता मुद्राश्चैताः ५
सर्व्वा याजकानाम् एकैकेन जनेन निजपरिचितलोकानां करतो गृहीत्वा
मन्दिरस्य भग्नस्थानानां जीर्णोद्धारः क्रियतां। किन्तु योयाशस्य नृपते- ६
स्त्रयोविंशं राजत्ववत्सरं यावद् याजका मन्दिरस्य जीर्णोद्धारं नाकुर्व्वन्।
ततो योयाशो नरपति र्यिहोयादायं याजकम् अपरान् याजकांश्चाहूय ७
जगाद यूयं मन्दिरस्य जीर्णोद्धारं कुतो न कुरुथ? अतोऽद्यारभ्य यूयं
परिचितलोकानां समीपात् पुन र्मुद्रा न गृह्णीत यतो मन्दिरस्य जीर्णो-
द्धारार्थं ता युष्माभि र्दातव्याः। ततो याजका लोकानां करेभ्यो मुद्रा न ८
ग्रहीतुं मन्दिरस्य जीर्णोद्धारं न कर्त्तुञ्चाङ्गीचक्रिरे। अनन्तरं याजको ९
यिहोयादायो मञ्जूषामेकां गृहीत्वा तस्या आच्छादकफलके छिद्रमेकं
विधाय होमवेद्याः समीपे परमेश्वरीयमन्दिरस्य प्रवेशस्थानस्य दक्षिण-
पार्श्वे निदधे ततो द्वाररक्षिणो याजकाः परमेश्वरस्य मन्दिरम् आ-
नीताः सकलमुद्रास्तस्या मध्ये न्यदधत। अनन्तरं मञ्जूषायां प्रभूतमुद्राः १०
सञ्चिता इति दृष्टे राजलेखको महायाजकश्च समागत्य परमेश्वरस्य
मन्दिरे लब्धाः सकलास्ता मुद्रा पुटकेषु बद्ध्वा परिममाते। अनन्तरं ११
परिमितास्ता मुद्रास्ताभ्यां मन्दिरे नियुक्तानां कर्म्मकारिणां करेषु सम-

र्पितास्ते च परमेश्वरीयमन्दिरस्थेभ्यः कारुभ्योऽर्पितः सूत्रधरनिचायक-
१२ स्थपतिभास्करादिभ्यः परमेश्वरीयमन्दिरस्य जीर्णोद्धारार्थं काष्ठानां
खनितपाषाणानाञ्च क्रयाय परमेश्वरीयमन्दिरस्य दृढीकरणे प्रयोज-
१३ नीयाय सर्व्वव्ययाय च ता विश्राणयामासुः । किन्तु परमेश्वरस्य मन्दिरं
या मुद्रा आनीयन्त ताभिः परमेश्वरस्य मन्दिरार्थं रजतभाण्डा वर्त्तिका-
च्छेदन्यो घटास्तूर्य्योऽन्यानि सुवर्णमयानि रूप्यमयाणि भाजनानि वा न
१४ निरमीयन्त । ते परमेश्वरस्य मन्दिरजीर्णोद्धारार्थं कर्म्मकारिभ्य एव
१५ सकला मुद्रा ददुः । ते कारुभ्यो वितरणार्थं येषां मानवानां करेषु मुद्रा
१६ ददुस्तैः सह गणनां न चक्रुः, यतस्ते विश्वास्यत्वेन कर्म्माण्यकुर्व्वन् । अपरं
दोषार्थकाः पापार्थकाश्च या मुद्रास्ताः परमेश्वरस्य मन्दिरं नानीयन्त
ता याजकानां बभूवुः ।

१७ तस्मिन् समयेऽरामीयो राजा हसायेलो गातस्य विरुद्धं गत्वा समरं
विधाय तन्नगरं वशीचक्रे ततः परं हसायेलो यिरूशालमं गन्तुम् उन्मुखो
१८ बभूव । ततो यिहूदादेशीयो योयाशो महीपतिः स्वपूर्व्वपुरुषैर्यतो
यिहोशाफटो योरामोऽहसियश्चेतिनामकै र्यिहूदादेशीयभूपतिभिः स्वेन
च निवेदितानि पवित्रवस्तूनि परमेश्वरीयमन्दिरस्य भाण्डागारे राज-
निवेशनस्य भाण्डागारे च स्थितानि सर्व्वाणि सुवर्णानि चादायारामीय-
भूपते र्हसायेलस्य समीपं प्रेषयामास ततः स यिरूशालमात् परावृत्य
जग्मिवान् ।

१९ एतस्य योयाशस्यावशिष्टं चरित्रं तेन च यद्यत् कृतं तत्सर्व्वं किं यिहू-
२० दादेशीयभूपतीनां पुरावृत्तपुस्तके लिखितं न विद्यते? अनन्तरं तस्य
द्वौ दासावुत्थाय द्रोहं विधाय सिल्लाया मार्गे स्थिते मिल्लुनामके भवने
२१ तं जघ्नतुः । शिमियतस्य पुत्त्रो योषाखरो शिम्मीतस्य पुत्त्रो यिहोषावद-
श्चैताभ्याम् आहत्य स मारितः । ततः परं लोका दायूद्नगरे तस्य पितृ-
लोकानां सन्निधौ तं श्मशाने निदधिरे । अपरं तस्य पुत्त्रोऽमत्सियस्तस्य
पदे राज्यं लेभे ।

---

१३ त्रयोदशोऽध्यायः ।

१ इस्रायेलो नृपते र्यिहोयाहसस्य कुराजत्वं २ लोकानां विपत्तेः कथनं यिहोयाह-
सस्य निधनं १० तदीयतनयस्य योयाशस्य कुराजत्वं १४ इलीशायस्य भविष्य-

द्वचनं २० मृतस्येलीशायस्यास्थिस्पर्शाद् एकस्य कुणपस्य जीवनप्राप्तिः २२ इलीशा-
यस्य भविष्यद्वाक्यसिद्धिः।

यिहूदादेशीयनृपतेरहसियतनयस्य योयाशस्य त्रयोविंशे राजत्वव- १
त्सरे येहोः सुतो यिहोयाहस इस्रायेलीयवंशे राजत्वं कर्त्तुम् आरभ्य
सप्तदशवत्सरान् यावत् शोमिरोणे राजत्वं चकार। स परमेश्वरस्य २
साक्षात् कुत्सिताचारं चक्रवान् अर्थतो निवाटस्य सुतो यो यार-
बियाम इस्रायेलीयवंशं पापम् अकारयत् तस्य पापपथे चचार तस्मात्
न परावृत्ते।

तत इस्रायेलो विरुद्धं परमेश्वरः क्रोधेन ज्वलित्वारामीयनृपते र्हसा- ३
येलस्य हसायेलसुतस्य विन्हददस्य च यावज्जीवनं तयो र्हस्तेषु तान्
समर्पयामास। अनन्तरं यिहोयाहसेन परमेश्वरम् उद्दिश्य प्रार्थनायां ४
कृतायां परमेश्वरस्तस्य प्रार्थनायां मनो निदधे यतोऽरामीयनृपतिरि-
स्रायेलीयवंशं येनोपद्रवेणाक्लिश्नात् तं स दृष्टवान्। पुरा स यिहोया- ५
हसस्य बलानां कृते केवलं पञ्चाशतं हयारोहिणो दशरथान् दशसह-
स्राणि पदातिकांश्चावाशेषयत् यतोऽरामीयनृपतिस्तान् विनाशयामास
तान् मर्दित्वा धूलिवत् चकार च। किन्तु परमेश्वरेणेस्रायेलीयवंशेभ्य ६
एकस्मिन् उद्धारयितरि दत्ते तेऽरामीयाणां हस्तेभ्यो मोचनं लेभिरे
तस्माद् इस्रायेलीयवंशाः पूर्व्ववत् निजे निजे वासस्थान ऊषुः। तथापी- ७
स्रायेलीयवंशं पापम् अकारयद् यो यारबियामस्तदीयपापमार्गं ते न
विहाय तस्मिन्नेव चेरुः शोमिरोणे च चैत्यवृक्षस्तस्थौ। एतस्य यिहोया- ८
हसस्यावशिष्टं चरित्रं तस्य सर्व्वकर्म्म विक्रमश्चैतानि किम् इस्रायेलीय-
नृपतीनां पुरावृत्तपुस्तके लिखितानि न विद्यन्ते? अनन्तरं यिहोयाहसो ९
निजपितृलोकाइव महानिद्रां जग्मिवान् ततो लोकास्तं शोमिरोणे
श्मशाने निदधिरे तस्य तनयो योयाशश्च तस्य पदे राजा बभूव।

यिहूदादेशीययोयाशस्य नृपतेः सप्तत्रिंशे राजत्ववत्सरे यिहोया- १०
हसस्य सुतो योयाश इस्रायेले राजत्वं कर्त्तुम् आरभ्य षोडशवत्सरान्
यावत् शोमिरोणे राजत्वं चक्रवान्। स परमेश्वरस्य साक्षात् कुत्सिता- ११
चारं चकार; निवाटस्य तनयो यो यारबियाम इस्रायेलीयवंशं पापम्
अकारयत् तस्य पापमार्गं क्षणमपि न तत्याज तस्मिन्नेव चचार।
एतस्य योयाशस्यावशिष्टं चरित्रं तेन यद्यत् कृतं यिहूदादेशीयनृपति- १२
नामत्सियन समं योधनसमये यो विक्रमस्तेन प्रकाशितः सर्व्वाण्येतानि

किम् इस्रायेलीयनरपतीनां पुरावृत्तपुस्तके लिखितानि न विद्यन्ते?
१३ अनन्तरं योयाशो निजपितृलोका इव महानिद्रां गत इस्रायेलीयनृप-
तीनां सन्निधौ शोमिरोणे श्मशाने स्थापितश्च ततो यारबियामस्तस्य
सिंहासन उपविवेश।
१४ इलीशायेन यस्माद् रोगात् मर्त्तव्यं तेन यदा रुग्न आसीत् तदानीम्
इस्रायेलीययोयाशो राजा तस्य सविधं समीय तस्य वदने रुदित्वा
जगाद हा मम तात हा मम तात हा इस्रायेलो रथहयारोहिणः।
१५ इलीशायस्तं बभाषे त्वं धनुर्व्वाणं गृहाण ततः स धनुर्व्वाणं जग्राह।
१६ अनन्तरं स इस्रायेलीयराजम् आचचक्षे त्वं चापे हस्तम् आरोपय
ततः स चापे करम् आरोपयामास। अनन्तरम् इलीशायो राज्ञः
१७ करोपरि निजकरौ स्थापयित्वा जगाद, पूर्व्वदिक्स्थं वातायनं मोचय।
ततः स मोचयामास। अनन्तरम् इलीशायः कथयामास शरं निक्षिप।
ततस्तेन शरे निक्षिप्ते इलीशायः कथयामास, एष शरः परमेश्वरेण जय-
कृद् अरामस्य पराजयकारी च शरः, एतेन त्वम् अफेकेऽरामीयान्
१८ निःशेषं यावद् आहनिष्यसि। अनन्तरं स उक्तवान् शरान् गृहाण,
ततस्तेन शरेषु गृहीतेषु स इस्रायेलीयनरपतिं जगाद त्वं भूमिम् आह-
१९ न्यास्ततः स वारत्रयं भूमावाघातं कृत्वा निवृत्ते। तदानीम् ईश्वरीय-
लोकस्तस्मै क्रुद्धा कथयामास पञ्चवारान् षड्वारान् वा समाहननं
तवोचितमासीत् तथा कृते त्वम् अरामियान् निःशेषं पराजेतुम् अशक्ष्यः
किन्त्विदानीम् अरामीयान् केवलं त्रीन् वारान् पराजेष्यसि।
२० अनन्तरम् इलीशाये निधनं गते लोकास्तं श्मशाने निदधिरे। अपरं
२१ वत्सरस्यारम्भसमये मोयाबीया दस्युसङ्घा जनपदम् आचक्रमिरे। ततो
लोकैरेकं मनुजं श्मशाने निधातुं गत्वैकस्मिन् दस्युसङ्घे विलोकिते स
कुणप इलीशायस्य श्मशानस्थाने निचिक्षिपे। ततो दैवाद् इलीशायस्य
कीकसस्पर्शमात्रात् स शवः सजीवो भूत्वा निजचरणाभ्याम् उदतिष्ठत्।
२२ यिहोयाहसस्य यावज्जीवनम् अरामीयनरपति हसायेल इस्रायेली-
२३ यान् प्रत्युपद्रवं चकृवान्। ततः परं परमेश्वरस्तेषु प्रसन्नो भूत्वानुकम्पां
चकार, स इब्राहीमा इस्हाका याकूबा समं यं नियमम् अकरोत्,
तस्य निमित्तं तान् प्रति सुदृष्टिं विधाय तान् आपातेन विनाशयितुं नि-
२४ जसाक्षात् निक्षेप्तुञ्च नाभ्यलषत्। अनन्तरम् अरामीयनरपतौ हसायेले
२५ निधनं गते तस्य तनयो विन्हदद्स्तस्य पदे राजत्वं प्राप। स समरं

विधाय योयाशस्य जनकाद् यिहोयाहसाद् यानि नगराण्यपहृतवान्
तानि नगराणि योयाशो हसायेलस्य पुत्त्राद् हददेवरात् पुन र्जग्राह।
योयाशस्त्रीन् वारान् जित्वेस्रायेलीयनगराणि पुनर्व्वारं जग्राह।

---

१४ चतुर्दशोऽध्यायः।

१ अमत्सियस्य सुराजत्वं ५ स्वीयपितु र्निहन्त्रोरिदोमीयानाञ्च हननं ८ समरे तस्य पराजितत्वं १५ योयाशस्य निधनं १७ अमत्सियस्य हतत्वं २१ असरियस्य राज्याभिषेकः २२ यारवियामस्य कुराजत्वं २८ सिखरियस्य राज्याभिषेकश्च।

इस्रायेलीयनृपते र्यिहोयाहसपुत्त्रस्य योयाशस्य द्वितीये राजत्ववत्सरे १
यिहूदादेशीयनृपते र्योयाशस्य पुत्त्रोऽमत्सियो राजा बभूव। स पञ्च- २
विंशतिवत्सरवयस्कः सन् राज्यं लब्ध्वा यिरूशालम ऊनत्रिंशद् वत्सरान्
राजत्वं चकार। यिरूशालमनिवासिनी यिहोयद्दना तस्य जनन्या-
सीत्। स यद्यपि परमेश्वरस्य साक्षात् सदाचारम् अकरोत् तथापि ३
स्वपूर्व्वपुरुषस्य दायूदस्तुल्यो नाभवत्। स निजपितु र्योयाशस्य सकल-
कर्म्मेव कर्म्म चकार। तत उच्चस्थानानि नोच्छिन्नानि किन्तु लोकास्तदा- ४
नीमपि भृगुस्थानेषु बलिदानं धूपदाहञ्चाकुर्व्वन्।
अनन्तरं राज्ये तस्य सम्यग् वशीभूते सति तस्य याभ्यां दासाभ्यां तस्य ५
तातो राजा जघ्ने स तावबधीत्। किन्तु तयो र्घातकयोः सन्तानास्तेन न ६
जघ्निरे, यतो मूससो व्यवस्थाग्रन्थे परमेश्वरीयैषाज्ञा लिखितास्ते, यथा,
पुत्त्रस्य विनिमयात् पिता पितु र्विनिमयाच्च पुत्त्रो न हनिष्यते, एकैको
जनः स्वस्वपापाद् हनिष्यत इति। स लवणप्रान्तर इदोमीयानां सहस्र- ७
लोकान् अवधीत् समरेण च सेलानगरं स्ववशं कृत्वा तस्य नाम यक्तेल-
मिति चकार तस्य तन्नामाद्यापि विद्यते।
अनन्तरम् अमत्सिय इस्रायेलीयनरपतिं येहोः पौत्त्रं यिहोयाहसस्य ८
पुत्त्रं योयाशं प्रति दूतान् प्रहित्य कथयामास आगच्छावां परस्परं
साक्षात् कुर्व्वः। तत इस्रायेलीयो योयाशो नृपति र्यिहूदादेशस्याम- ९
त्सियं नरपतिं प्रति दूतान् प्रहित्य कथयामास लिवानोनस्थशृगाल-
कण्टकं लिवानोनस्थस्यैरसवृक्षस्य समीपं दूतं प्रहित्य कथयामास मम
पुत्त्रस्य विवाहार्थं तव दुहितरं देहीति। अनन्तरं लिवानोनस्थो वन्य-
पशुः समीय शृगालकोलिं बभञ्ज। त्वम् इदोमं जितवान् एतत्कारणात् १०
तव मनो गर्व्वितमभवत् त्वम् आदरेण दृप्तो निजनिकेतने तिष्ठ स्वक्षतये

कुतोऽनधिकारचर्चां करिष्यसि? तव यिहूदादेशस्य च पतनं कुतो
११ भविष्यति? किन्त्वमत्सियेन तन्नाश्रावि, अत इस्रायेलीयो योयाशो नर-
पतिराजगाम, तस्मात् स यिहूदाया नृपतिरमत्सियश्च यिहूदादेशस्थे
१२ वैतशेमशि परस्परं साक्षाच्चक्रतुः। तत इस्रायेलवंशानां सम्मुखे यिहू-
दाया लोकाः पराजिताः सन्तः सर्व्वे स्वं स्वं वासस्थानं पलायाञ्चक्रिरे।
१३ तत्र वैतशेमशि इस्रायेलीयो राजा योयाशोऽहसियस्य पौत्रं योयाशस्य
पुत्रं यिहूदाया अमत्सियं राजानं दधार यिरूशालमम् आगत्येफ्रयि-
मीयगोपुरम् आरभ्य कोणस्थगोपुरं यावद् यिरूशालमीयप्राचीरस्य
१४ चतुःशतिहस्तमितं खण्डं बभञ्ज च। अपरं परमेश्वरस्य मन्दिरे राजनि-
वेशनस्य भाण्डागारेषु च सञ्चितानि सकलहेमरजतानि सकलपात्राणि
चादाय बन्धकत्वेन लोकान् सङ्गिनः कृत्वा च शोमिरोणं प्रत्याजगाम।
१५ एतस्य योयाशस्यावशिष्टं चरित्रं तस्य क्रिया यिहूदाया नृपतिनाम-
त्सियेन सह योधनसमये तस्य विक्रमश्चैतानि सर्व्वाणि किम् इस्रायेली-
१६ यभूपतीनां पुरावृत्तपुस्तके लिखितानि न विद्यन्ते? अनन्तरं योयाशो
निजपितृलोका इव महानिद्रां गतः शोमिरोण इस्रायेलीयराजानां
निकटे श्मशाने निहितश्च। अपरं तस्य पुत्रो यारबियामस्तस्य पदे
राजा बभूव।

१७ अनन्तरम् इस्रायेलीयभूपते र्यिहोयाहसपुत्रस्य योयाशस्य निधनात्
परं यिहूदाया भूपति र्योयाशस्य पुत्रोऽमत्सियः पञ्चदश वत्सरान्
१८ अजीवत्। एतस्यामत्सियस्यावशिष्टं चरित्रं किं यिहूदाया भूपतीनां
१९ पुरावृत्तपुस्तके लिखितं न विद्यते? अनन्तरं लोका यिरूशालमे तस्य
विरुद्धं कुमन्त्रणां चक्रुस्तदा स लाखीशं प्रति पलायाञ्चक्रे, किन्तु ते तस्य
२० पश्चात् लाखीशं लोकान् प्रहित्य तत्र स्थाने तं घातयामासुः। अनन्तरं
ते हयैस्तम् आनीय यिरूशालमे दायूद्नगरे तस्य पितृलोकानां सन्निधौ
तमपि श्मशाने निदधिरे।

२१ अनन्तरं यिहूदायाः सर्व्वे लोकाः षोडशवत्सरवयस्कम् उषियं गृहीत्वा
२२ तस्य पितुरमत्सियस्य पदे राजत्वेऽभिषिषिचुः। राजनि पितृलोकवत्
महानिद्रां गतवति स एलतनगरं निर्म्माय पुनर्व्वारं यिहूदाया अधीनं
चकृवान्।

२३ यिहूदाया भूपते र्योयाशपुत्रस्यामत्सियस्य पञ्चदशे राजत्ववत्सरे
इस्रायेलो भूपते र्योयाशस्य पुत्रो यारबियामः शोमिरोणे राजत्वं कर्त्तुम्

आरभ्यैकचत्वारिंशद् वत्सरान् राजत्वं चकृवान्। स परमेश्वरस्य २४
साक्षात् कुत्सिताचारं चकृवान् अपरं निवाटस्य पुत्रो यो यारवियाम
इस्रायेलीयवंशं पापम् अकारयत् तदीयपापानुगमनात् न निववृते।
अपरम् इस्रायेलीयः प्रभुः परमेश्वरो गातहेफरीयस्यामित्तयपुत्रस्य २५
भविष्यद्वादिनो यूनसो वदनेन यां वाणीम् अवादीत् तदनुसारेण स
राजा हमातस्य प्रवेशस्थानम् आरभ्य प्रान्तरस्य समुद्रं यावद् इस्राये-
लीयां सीमां पुनर्व्वारं वशे चकृवान्। यत इस्रायेलवंशस्यातीव दुःखं २६
जातं तेषां मुक्ता बद्धाश्च सर्व्वे गताः कोप्युपकारको न विद्यते परमेश्वर
इति ददर्श। अपरम् अहम् इस्रायेलो नाम गगनस्याधो लोप्स्याम्ये- २७
तादृशीं वाचम् अनुक्त्वा परमेश्वरो योयाशसुतस्य यारवियामस्य
हस्तेन तान् उद्धार।

एतस्य यारवियामस्यावशिष्टं चरित्रं सकलाः क्रिया युद्धे विक्रम- २८
स्चैतेषां विवरणं स येन प्रकारेण दम्मेषकं हमातञ्चेस्रायेलीयवंशेन पुन-
र्व्वारं यिहूदाया वशे चकृवान् एतस्यापि विवरणं किम् इस्रायेलीय-
नरपतीनां पुरावृत्तपुस्तके लिखितानि न विद्यन्ते? अनन्तरं यारवि- २९
यामो निजपितृलोका इस्रायेलीयनरपतयइव महानिद्रां जगाम तत-
स्तस्य सुतः सिखरियस्तस्य पदे राजा बभूव।

---

१५ पञ्चदशोऽध्यायः।

१ उषियस्य सुराजत्वकरणं ५ तस्य कुष्ठीभवनात् तस्य पुत्रस्य विचारणं ८ सिखरियस्य कुराजत्वकरणं हतत्वञ्च १३ शल्लूमस्य कुराजत्वकरणं हतत्वञ्च १६ मिनहेमस्य विवरणं २१ तस्य पुत्रस्य पिकहियस्य राजत्वेऽभिषिक्तत्वं २३ पिकहियस्य हतत्वं २७ पेकहस्याभिषिक्तत्वं २९ इस्रायेलीयानां दुर्दशा ३० पेकहस्य हतत्वं ३२ योथमस्य चरित्रञ्च।

इस्रायेलीययारवियामस्य नरपतेः सप्तविंशे राजत्ववत्सरे यिहूदाया १
नृपतेरमत्सियस्य पुत्र उषियो राजत्वं कर्त्तुम् आरेभे। स षोडशवत्सर- २
वयस्कः सन् राजत्वं कर्त्तुम् आरभ्य यिरूशालमे द्विपञ्चाशद् वत्सरान्
यावद् राजत्वं चकृवान् यिरूशालमनिवासिनी यिखलिया तस्य प्रसू-
रासीत्। स निजपितुरमत्सियस्य कार्य्यानुसारेण परमेश्वरस्य साक्षात् ३
सदाचारं चकार। किन्तु भ्रगुस्थानानि नोच्चिच्छिदिरे तदानीमपि लोका ४
भ्रगुस्थानेषु बलिदानं धूपदाहञ्च चक्रुः।

अपरं परमेश्वरेणाहतः स राजा निधनदिनं यावत् कुष्ठरोगी भवन् ५

चिकित्सालये तस्थिवान् ततो योथमो राजकुमारो गेहस्याधिपति र्भूत्वा
६ देशीयलोकानां शासनं चक्रवान्। एतस्योषियस्यावशिष्टं चरित्रं तस्य
सर्व्वाः क्रियाश्च किं यिहूदाया भूपतीनां पुरावृत्तपुस्तके लिखिता न
७ विद्यन्ते? अनन्तरम् उषियो निजपितृलोका इव महानिद्रां गतो दायूद्-
नगरे पितृलोकानां सन्निधौ श्मशाने निहितश्च। ततस्तस्य पुत्रो योथम-
स्तस्य पदे राजा बभूव।

८ यिहूदाया नरपतेरुषियस्याष्टत्रिंशे राजत्ववत्सरे यारवियामस्य
सुतः सिखरियः शोमिरोणे राज्यं प्राप्य षण्मासान् इस्रायेलीयानां
९ राजत्वं चकार। स निजपितृलोकानां कर्म्मानुसारेण परमेश्वरस्य
साक्षात् कुत्सिताचारं चकार निवाटस्य सुतो यो यारवियाम इस्राये-
१० लीयवंशं पापम् अकारयत् तस्य पापानुगमनात् न निववृते। अनन्तरं
याबेशस्य तनयः शल्लुमो राजद्रोहं विधाय लोकानां सम्मुखे तं ताड-
११ यित्वा जघान तस्य पदे स्वयं राजा बभूव च। एतस्य सिखरियस्या-
वशिष्टं चरित्रं किम् इस्रायेलीयभूपतीनां पुरावृत्तपुस्तके लिखितं न
१२ विद्यते? इत्थं येहूं प्रति परमेश्वरेण यद् उक्तं तत् सिद्धतां जगाम।
स जगाद, चतुर्थं पुरुषं यावत् तव वंश इस्रायेलीयसिंहासन उपवे-
क्ष्यतीति तदेव च सत्यं बभूव।

१३ यिहूदाया भूपतेरुषियस्योनचत्वारिंशे राजत्ववत्सरे याबेशस्य तनयः
१४ शल्लुमो राज्यं प्राप्य मासमेकं शोमिरोणे राजत्वं चकार। यतो गादेः
सुतो मिनहेमस्तिर्षातो गत्वा शोमिरोणम् उपस्थाय शोमिरोणमध्ये याबे-
शस्य सुतं शल्लुमं ताडयित्वा जघान तस्य पदे स्वयं राजा बभूव च।
१५ एतस्य शल्लुमस्यावशिष्टं चरित्रं तेन कृतो राजद्रोहश्च किम् इस्राये-
लीयभूपतीनां पुरावृत्तपुस्तके लिखितं न विद्यते?

१६ अनन्तरं मिनहेमस्तिप्सहं तन्मध्यस्थितं सकलं तिर्षां यावत् तदीयां
सीमाञ्च जिगाय यतस्ते तस्य कृते द्वारं न मोचयामासुः। स तान् जघान
१७ तेषां सर्व्वासां गर्भवतीनाम् उदरं विदारयामास च। यिहूदाया
नरपतेरुषियस्योनचत्वारिंशे राजत्ववत्सरे गादेः पुत्रो मिनहेम इस्रा-
१८ येलीयानां राज्यं प्राप्य शोमिरोणे दशवत्सरान् राजत्वं चकार। स
परमेश्वरस्य साक्षात् कुत्सिताचारं चक्रवान् निवाटस्य पुत्रो यो यार-
वियाम इस्रायेलीयवंशं पापम् अकारयत् तस्य पापानुगमनाद् याव-
१९ ज्जीवनं न निववृते। अनन्तरम् अश्शूरीयराजे पूले तस्य देशस्य विरुद्धम्

आगते पूलस्य साहाय्येन यत् तस्य राजत्वं स्थिरं तिष्ठति तन्निमित्तं
मिनहेमः पूलाय सहस्रकिक्कारपरिमितानि रजतानि ददिवान्। अप- २०
रम् अश्शूरीयराजाय दानार्थं मिनहेमः सर्व्वेभ्यो धनिलोकेभ्यः पञ्चाशत्
पञ्चाशत् शेकलपरिमितानि रजतानि इस्रायेलीयानां मध्ये तानि
रजतानि सञ्चिचाय तस्माद् अश्शूरीयो नरपतिस्तस्मिन् जनपदे न
तिष्ठन् परावृत्य जग्मिवान्।

एतस्य मिनहेमस्यावशिष्टं चरित्रं सर्व्वाः क्रियाश्च किम् इस्रायेलीय- २१
भूपतीनां पुरावृत्तपुस्तके लिखितानि न विद्यन्ते? अनन्तरं मिनहेमे २२
निजपितृगणवत् महानिद्रां गते तस्य तनयः पिकहियस्तस्य पदे राजा
बभूव।

यिहूदाया उषियस्य नरपतेः पञ्चाशे राजत्ववत्सरे मिनहेमस्य पुत्रः २३
पिकहिय इस्रायेले राज्यं प्राप्य शोमिरोणे वत्सरद्वयं राजत्वं चक्रवान्।
स परमेश्वरस्य साक्षात् कुत्सिताचारं चकार निवाटस्य पुत्रो यो २४
यारवियाम इस्रायेलीयवंशं पापम् अकारयत् तदीयपापानुगमनान्न
निववृते। अनन्तरं रिमलियस्य तनयः पेकहनामा तस्य सेनापति- २५
रेकस्तस्य विरुद्धं राजद्रोहं विधाय शोमिरोणे राजनिवेशनस्यान्तःपुरे
तम् अर्गोवम् अरियिं तस्य सङ्गिनः पञ्चाशद् गिलियदीयजनांश्च हत्वा
तस्य पदे राजा बभूव। एतस्य पिकहियस्यावशिष्टं चरित्रं सर्व्वाः २६
क्रियाश्चेस्रायेलीयनरपतीनां पुरावृत्तपुस्तके लिखितानि विद्यन्ते।

यिहूदाया नरपतेरुषियस्य द्विपञ्चाशत्तमे राजत्ववत्सरे रिमलियस्य २७
सुतः पेकह इस्रायेलीयानां राज्यं प्राप्य विंशतिवत्सरान् यावत् शोमि-
रोणे राजत्वं चक्रवान्। स परमेश्वरस्य साक्षात् कुत्सिताचारं चकार २८
निवाटस्य पुत्रो यो यारवियाम इस्रायेलं पापम् अकारयत् तस्य पाप-
मार्गं न तत्याज।

अनन्तरम् इस्रायेलीयनरपतेः पेकहस्य राजत्वसमयेऽश्शूरीयो राजा २९
तिग्लत्पिलेषर आगत्य इयोनम् आवेलवैतमाखां यानोहं केदशं हात्-
सोरं गिलियददेशं गालीलदेशस्थं नप्तालेः कृत्स्नं जनपदञ्च जित्वा तत्र-
त्यान् मानवान् अश्शूरदेशं नीत्वा प्रवासयामास।

अनन्तरम् उषियपुत्रस्य योथमस्य विंशतितमे राजत्ववत्सर एला- ३०
हस्य पुत्रो होशेयो रिमलियपुत्रस्य पेकहस्य विरुद्धं राजद्रोहं विधाय
तम् आहत्य मारयामास तस्य पदे राजा बभूव च। एतस्य पेकहस्या- ३१

अवशिष्टं चरित्रं तस्य सर्व्वाः क्रियाश्चेस्रायेलीयभूपतीनां पुरावृत्तपुस्तके
लिखितानि विद्यन्ते।
३२ इस्रायेलीयनृपते रिमलियपुत्रस्य पेकहस्य द्वितीये राजत्ववत्सरे
३३ यिहूदाया राज्ञ उषियस्य पुत्रो योथमो राजत्वं कर्त्तुम् आरेभे। स
पञ्चविंशतिवत्सरवयस्कः सन् राज्यं प्राप्य यिरूशालमे षोडशवत्सरान्
३४ राजत्वं चकार। सादोकस्य दुहिता यिरूशा तस्य प्रसूरासीत्। स
परमेश्वरस्य साक्षात् सदाचारं चकार निजपितुरुषियस्य कार्य्यानुसा-
३५ रात् कार्य्यं चकार। केवलं भ्रगुस्थानानि नोच्छिद्रिरे लोकास्तदानी-
मपि भ्रगुस्थानेषु बलिदानात् धूपदाहाच्च न निवर्त्तिरे। परमे-
३६ श्वरीयमन्दिरस्योच्चं द्वारं तेनैव राज्ञा निर्म्ममे। एतस्य योथमस्यावशिष्टं
चरित्रं तस्य सर्व्वाः क्रियाश्च किं यिहूदाया भूपतीनां पुरावृत्तपुस्तके
३७ लिखितानि न विद्यन्ते? तस्मिन् समये परमेश्वरोऽरामीयं राजानं
रित्सीनं रिमलियस्य तनयं पेकहञ्च यिहूदाया विरुद्धं प्रेषयितुम् आर-
३८ ब्धवान्। अनन्तरं योथमो निजपितृलोकवत् महानिद्रां गतो निज-
पूर्व्वपुरुषस्य दायूदो नगरे स्वपितृलोकानां सन्निधौ श्मशाने निहितश्च
ततस्तस्य सुत आहसस्तस्य पदे राजा बभूव।

---

१६ षोडशोऽध्यायः।

१ आहसस्य कुराजत्वं ५ तस्य रुद्धत्वं ७ तस्य मुक्तत्वं १० नूतनवेदिनिर्म्माणं १७ मन्दिरलोठनं १९ तस्य निधनं।

१ रिमलियसुतस्य पेकहस्य सप्तदशे राजत्ववत्सरे यिहूदाया नृपते
२ योथमस्य सुत आहसो राजत्वं कर्त्तुम् आरेभे। स विंशतिवत्सरवयस्कः
सन् राज्यं प्राप्य यिरूशालमे षोडशवत्सरान् यावत् राजत्वं चकार।
स निजप्रभोः परमेश्वरस्य साक्षात् निजपूर्व्वपुरुषो दायूदिव सदा-
३ चारं न चकार, किन्त्विस्रायेलीयनरपतीनां मार्गे चचार। अपरं परमे-
श्वर इस्रायेलीयवंशस्य सम्मुखाद् यान् भिन्नजातीयान् दवयितवान्
तेषां घृण्यक्रिया आचरन् स निजात्मजमपि वह्निं प्रवेशयामास।
४ अपरं भ्रगुस्थानेषु पर्व्वतेषु सर्व्वेषां हरिद्वर्णानां तरूणाम् अधश्च बलि-
दानं धूपदाहञ्च चकार।
५ अनन्तरम् अरामीयो राजा रित्सीन इस्रायेलीयनृपती रिमलियस्य
पुत्रः पेकहश्च युद्धार्थं यिरूशालमम् आगत्याहसम् अवरुरुधतुः किन्तु

तं पराजेतुं न शेकतुः। तथाप्यरामीयो राजा रित्सीन एलतनगरं ६
पुनर्व्वारम् अरामस्य वशीचकार। तत एलतनगराद् यिहूदीयेषु
वहिष्कृतेष्वरामीयास्तत् स्थानम् आगत्याद्यापि तत्र वसन्ति।
अनन्तरम् आहसोऽसूरीयनृपतेस्तिग्लत्पिलेषरस्य समीपं दूतान् ७
प्रहित्य वाचमिमां जगाद, अहं तव दासः पुत्रश्च, त्वम् आगत्य
मद्विरुद्धं समरकारिणोररामीयेस्रायेलीययो राज्ञोः करेभ्यो माम्
उद्धर। अपरम् आहसः परमेश्वरीयमन्दिरे राजनिवेशनस्य भाण्डा- ८
गारेषु च विद्यमानानि सकलसुवर्णरजतानि गृहीत्वाऽसूरीयराजस्य
समीपं पारितोषिकं प्रेषयामास। ततोऽसूरीयराजस्तस्य वचसि मनो ९
निदधे। अपरम् असूरीयराजो दम्मेषकस्य विरुद्धं गत्वा तन्नगरं परा-
जिगाय तदीयप्रजाः कीरं नीत्वा प्रवासयामास रित्सीनं जघान च।
अपरम् आहसो नृपतिरसूरीयराजं तिग्लत्पिलेषरं साक्षात् कर्त्तुं १०
दम्मेषकं जगाम तत्र दम्मेषके यज्ञवेदिमेकां विलोक्य नृपतिराहस-
स्तस्या वेद्या अनुकृतिं तत्स्वशिल्पकर्म्मणो निदर्शनञ्च याजकस्योरियस्य
सविधं प्रेषयामास। ततो दम्मेषकाद् राज्ञ आहसस्य प्रत्यागमनात् ११
पूर्व्वं याजक ऊरियस्तत्सदृशीम् एकां यज्ञवेदीं निर्म्मापयामास राज्ञा-
हसेन दम्मेषकाद् यन्निदर्शनं प्रहितं तदनुसारेणैव याजक ऊरियस्तां
निर्म्मापयामास। अनन्तरं राजा दम्मेषकात् समागत्य वेदिं विलोक्य १२
तस्या वेद्याः समीपं गत्वा तदुपरि होमार्थकबलीन् ददौ। स तत्र १३
स्वीयहव्यानि भक्ष्यनैवेद्यानि च दाहयामास पेयनैवेद्यानि निषिषेच
तस्यां वेद्याञ्च स्वीयमङ्गलार्थकबलीनां शोणितं विचकार च। अपरं पर- १४
मेश्वरस्य सम्मुखे या पित्तलमयी वेद्यासीत् स तां मन्दिरस्य सम्मुखाद्
अर्थतः परमेश्वरीयमन्दिरस्य नूतनवेद्याश्च मध्याद् दवयित्वा नूतन-
वेद्या उत्तरपार्श्वे स्थापयाञ्चकार। अनन्तरं नृपतिराहसो याजकम् १५
ऊरियम् इमां वाचम् आज्ञापयामास बृहद्वेद्यां प्रात्यूषिकप्रादोषिकौ
होमार्थकबली राज्ञो होमार्थकबलयस्तस्य नैवेद्यानि चापरं देशीय-
लोकानां होमार्थकबलयस्तेषां भक्ष्यपेयनैवेद्यानि च त्वया दीयन्तां
तस्याञ्च होमार्थकानाम् अन्येषाञ्च बलीनां शोणितानि विकीर्य्यन्ताम्
अपरं पित्तलमयीं वेदिमधि मया विवेचनीयं। अनन्तरं याजक ऊरिय १६
आहसस्य नरपतेराज्ञानुसारेण तत् सर्व्वं चकार।
अनन्तरं नरपतिराहसः पीठानां मध्यदेशान् सर्व्वान् छित्त्वा तदु- १७

परितः प्रक्षालनपात्राणि स्थानान्तरीचकार पित्तलमयवृषभगणोप-
१८ रितस्य समुद्रपात्रम् अवरोह्य पाषाणमय्यां भूम्यां निदधे। अपरं ते
विश्रामदिनस्य कृते मन्दिरमार्गस्य यदाच्छादनं वहिस्थ नृपस्य प्रवेश-
मार्गस्य यद्द्वारं कृतवन्तस्तद् अस्सूरीयराजस्य साध्वसात् परमेश्वरीय-
मन्दिरस्य मध्ये निदधिरे।
१९ एतस्याहसस्यावशिष्टानां क्रियाणां विवरणं किं यिहूदाया भूपतीनां
२० पुरावृत्तपुस्तके लिखितं न विद्यते? अनन्तरम् आहसो निजपितृलोका
इव महानिद्रां गतो निजपितृलोकानां सन्निधौ दायूद्नगरे श्मशाने
निहितस्य। अपरं तस्य तनयो हिष्कियस्तस्य पदे राजा बभूव।

---

१७ सप्तदशोऽध्यायः।

१ होशेयस्य कुराजत्वं तस्य दण्डः ५ इस्रायेलीयलोकानां पातकं बन्दित्वञ्च २४ तेषां नगरेष्वन्यलोकानां स्थापनञ्च।

१ यिहूदाया आहसस्य राज्ञो द्वादशे राजत्ववत्सर एलाहस्य पुत्रो
होशेयः शोमिरोणे राजा भूत्वा नववत्सरान् यावद् इस्रायेले राजत्वं
२ चकृवान्। स परमेश्वरस्य साक्षात् कुत्सिताचारं चकार किन्तु पूर्व्व-
३ वर्त्तिनाम् इस्रायेलीयराजानां तुल्यो न बभूव। अनन्तरम् अस्सूरीये
राज्ञि शल्मनेषरे तस्य विरुद्धम् आगते होशेयस्तस्य दासो भूत्वा तस्मै
४ करं दातुम् आरेभे। अनन्तरम् अस्सूरीयो राजा होशेये विश्वासघा-
तित्वं प्राप्तवान् यतः स मिसरस्य सो नृपतेः समीपं दूतान् प्रेष्यास्सूरीय-
राजाय वार्षिकं करं पूर्व्ववन्नाददात् अतो ऽस्सूरीयो राजा तं बद्ध्वा
कारायां रुरोध।
५ अनन्तरम् अस्सूरीयो राजा कृत्स्नं देशम् आचक्राम शोमिरोणं गत्वा
६ त्रीन् वत्सरान् यावत् तन्नगरम् अवरुरोध च। अनन्तरं होशेयस्य
नवमे राजत्ववत्सरेऽस्सूरीयो राजा शोमिरोणं वशीकृत्येस्रायेलीयलो-
कान् अस्सूरदेशं निनाय तत्र च हलहे गोषणदेशीयहाबोरतटिनीतटे
७ मादीयानां नगरेषु च तान् प्रवासयामास। यतस्ते मिसरदेशात्
मिसरीयफिरौणो नरपतेरधीनत्वाद् इस्रायेल्वंशस्यानेतुः स्वेषां प्रभोः
८ परमेश्वरस्य विरुद्धं कलुषाणि कृत्वेतरदेवान् सेवितवन्तः। अपरं भि-
न्नजातीया ये लोकाः परमेश्वरेणेस्रायेल्वंशस्य सम्मुखाद् दवयाञ्चक्रिरे
तेषां विधीन् इस्रायेलीयनरपतिभि र्निर्णीतान् विधींश्चाचरितवन्तः।

यानि कर्म्माणि न कर्त्तव्यानि तानीस्रायेलीयलोकाः स्वीयप्रभोः परमेश्व- ९
रस्य विरुद्धं रहोऽकुर्व्वन् अपरं रक्षकगेहान्यारभ्य प्राचीरवेष्टितनग-
राणि यावत् स्वेषां सकलनगरेषु स्वेषां कृते भृगुस्थानानि निरमुः। अपरं १०
सर्व्वेषाम् उच्चपर्व्वतानां शृङ्गेषु सर्व्वेषां हरिद्वर्णवृक्षाणाम् अधश्च
प्रतिमा अस्थापयन् चैत्यवृक्षांश्चारोपयन्। अपरं ये भिन्नजातीयाः पर- ११
मेश्वरेण तेषां सम्मुखाद् दवयाञ्चक्रिरे त इव सर्व्वेषु भृगुस्थानेषु धूपान्
अज्वालयन् परमेश्वरं क्रोधयितुं कलुषाण्यकुर्व्वंश्च। अपरं परमेश्वरो १२
यदधि कथितवान् एतादृशं कर्म्म युष्माभि र्न कर्त्तव्यमिति तदेवार्थतः
प्रतिमापूजाम् अकुर्व्वन्। तथापि परमेश्वरः सर्व्वै र्भविष्यद्वादिभि १३
र्दर्शकैश्चेस्रायेलीयान् यिहूदीयांश्च लोकान् आदेशमेनं ज्ञापितवान् यूयं
स्वेषां पातकमार्गेभ्यः परावर्त्तध्वम् अहं युष्माकं पितृलोकान् यां व्यवस्थाम्
आदिष्टवान् मम दासानां भविष्यद्वादिनां हस्तै र्युष्माकं सन्निधिञ्च यां
शिक्षां प्रेषितवान् तदनुसारेण मदाज्ञा विधींश्च पालयतेति। किन्तु ते १४
तद् वाक्यं ग्रहीतुं मतिमकृत्वा स्वीयप्रभौ परमेश्वरे प्रत्ययवर्ज्जिताः पूर्व्व-
पुरुषा इव स्वेषां ग्रीवा दृढा अकुर्व्वन्। ते तस्य विधीन् तेषां पितृलो- १५
कान् प्रति स्थापितं तस्य नियमं तेभ्यो दत्तानि प्रमाणवाक्यानि चावज्ञा-
यासारमूर्त्तीनाम् अनुगामिनोऽभवन् किञ्च हतबुद्धयो भूत्वा येषाम्
अनुवर्त्तनात् ते परमेश्वरेण निवारितास्तेषां चतुर्दिक्स्थानाम् अन्यजा-
तीयानामेवानुगामिनोऽभवन्। ते स्वेषां प्रभोः परमेश्वरस्य सर्व्वा आज्ञा १६
लङ्घित्वा स्वेषां कृते निषिक्तौ द्वौ वत्सौ निरमुश्चैत्यवृक्षान् अस्थापयन्
गगनीयज्योतिर्गणान् अपूजयन् बालम् असेवन्त च। अपरं स्वेषां १७
पुत्रान् पुत्रीश्च वह्निं प्रावेशयन् गणकत्वं मायावित्वञ्च समाचरन् परमे-
श्वरस्य साक्षात् कुत्सिताचारं कर्त्तुं तं क्रोधयितुञ्च स्वेषां विक्रयम्
अकुर्व्वत च। एतत्कारणात् परमेश्वर इस्रायेल्वंशान् प्रति भृशं क्रुद्धा १८
निजसमक्षात् तान् दवयामास केवलं यिहूदावंशं विना नान्यः कोऽपि
वंशोऽवशिशिषे। अपरं यिहूदावंशीया लोका अपि निजप्रभोः परमे- १९
श्वरस्याज्ञा नापालयन् इस्रायेलीयलोकै र्निर्णीता विधयस्तैरप्यनुजग्मिरे।
अतः परमेश्वरः कृत्स्नम् इस्रायेलीयवंशं विहाय लोकान् क्लेशयामास २०
यावच्च निजसमक्षात् न दवयामास तावत् तान् नाशकानां हस्तेषु
समर्पयामास च। स एव दायूदो वंशाद् इस्रायेलीयलोकान् प्रचिच्छेद, २१
ते च निवाटस्य पुत्रं यारवियामं राजानं चक्रुः स यारवियामश्च परमे-

श्वरस्य सेवात इस्रायेलीयलोकान् निवर्त्त्य तान् महापापेन कलङ्कितान्
२२ अकरोत्। यतो यारवियामो यानि पापानि कृतवान् इस्रायेलीयलोका-
२३ स्तान्येवाचेरुस्तदनुगमनान्न निववृतिरे। अतो हेतोः परमेश्वरो निज-
सेवकानां भविष्यद्वादिनां वदनै र्यद्वत् कथयामास, तदनुसाराद् अव-
शेषम् इस्रायेलीयवंशं निजसम्मुखाद् दवयामास। इत्थम् इस्रायेलीय-
वंशा निजदेशाद् अशूरदेशं नीता अद्यापि तस्मिन् स्थाने प्रवसन्ति।
२४ अनन्तरम् अशूरीयराजो बाबिलात् कूथातो ऽव्वातो हमातात्
सिफर्वयिमाच्च लोकान् आनीयेस्रायेलो विनिमयेन शोमिरोणदेशस्थ-
नगरेषु वासयाञ्चकार ततस्ते शोमिरोणम् अधिकृत्य तत्रत्येषु नगरेषु
२५ वसतिं चक्रवांसः। तत्र स्थाने तेषां वासारम्भसमये ते परमेश्वरात् न
बिभयाञ्चक्रुरेतत्कारणात् परमेश्वरस्तेषां मध्यं सिंहान् प्राहिणोत् ते
२६ च तेषां कतिपयलोकान् विनाशयितुम् आरेभिरे। अतो लोका अशू-
रीयराजं बभाषिरे त्वं यान् जातीयान् देशान्तरीकृत्य शोमिरोणदेश-
स्थनगरेषु निवासितवान् ते तद्देशीयदेवस्य धर्म्ममतं न जानन्त्येतत्का-
रणात् स तेषां मध्यं केशरिणः प्रहितवान् अपरं पश्य तद्देशीयदेवस्य
२७ धर्म्ममतस्यानवगतत्वात् ते केशरिभि र्विनाश्यन्ते। अनन्तरम् अशूरीय-
राज इत्याज्ञापयामास यूयं तस्मात् स्थानाद् यान् याजकान् आनी-
तवन्तस्तेषाम् एकं जनं तं देशं प्रेषयत लोकास्तस्य समीपं गत्वा वसन्तु
२८ स च तान् तद्देशीयदेवस्य धर्म्ममतम् आदिशतु। ततः शोमिरोणात्
तैः प्रवासितानां याजकानां जन एको गत्वा वैथेले न्यवसत्, अपरं येन
२९ प्रकारेण परमेश्वरः सेवितव्यस्तत् तान् आदिशत्। तथाप्येकैकस्या जाते
र्लोकाः स्वं स्वं देवं निर्म्ममिरे ते नानाजातीयाः शोमिरोणीया लोका
येषु नगरेषु न्यवसन् तन्मध्ये भ्रगुस्थानीयमन्दिराणि निर्म्माय तत्रैकैकस्या
३० जाते र्देवान् स्थापयाञ्चक्रिरे। इत्थं बाबिलीया लोकाः सुक्कोद्बिनोतं
३१ कूथीयलोका नेर्गलं हमातीयलोका अशीमम् अव्वीयाश्च निभसं तर्त-
कञ्च निर्म्ममिरे सिफर्व्वीयाश्चाद्रम्मेलकानम्मेलकाविति नामानौ सिफ-
३२ र्व्वीयदेवावुद्दिश्य निजबालकान् अग्निना दाहयाञ्चक्रुः। ते परमेश्वरम्
असेवन्त नीचलोकानां मध्यात् स्वेषां कृते भ्रगुस्थानीयमन्दिरेषु यज्ञ-
३३ कारिणो याजकान् वव्रिरे च। ते यथा परमेश्वरम् असेवन्त तथा
यस्माद् यस्मात् देशाद् आनीयन्त तेषां धर्म्ममतानुसारेण स्वं स्वं देव-
३४ गणमप्यसेवन्त। तेऽद्यापि पूर्व्वकालीयाचारवद् आचरन्ति परमेश्वरात्

न बिभ्यति तस्य विधिव्यवस्थानुसारेणार्थतः परमेश्वरो यस्य नामेस्रायेलं
चकार तस्य याकूबो वंशं याम् आज्ञां व्यवस्थाञ्चादिष्टवान् तदनुसारेण
नाचरन्ति। यतः परमेश्वरस्तद्वंशीयैः समं नियमं विधाय तान् इत्था- ३५
ज्ञापितवान् यूयम् इतरदेवेभ्यो न बिभीत तान् न प्रणमत तान् न
सेवध्वं तेभ्यो बलीन् न दद्ध्वं। किन्तु यः परमेश्वरो महापराक्रमेण वि- ३६
स्तीर्णबाहुना च मिसरदेशाद् युष्मान् आनीतवान् तस्माद् बिभीत तं
प्रणमत तस्मै बलीन् दद्ध्वञ्च। अपरं स युष्माकं कृते यान् विधीन् राज- ३७
नितीश्च यां व्यवस्थाम् आज्ञाञ्च लेखयितवान् यूयं मनो निधाय तदनु-
सारेण सर्व्वदाचरत नेतरदेवगणाद् बिभीत। मया युष्माभिः समं यो ३८
नियमोऽकारि तं न विस्मरत नेतरदेवगणाद् बिभीत। स्वेषां प्रभोः ३९
परमेश्वरादेव बिभीत तेन स सकलरिपूणां हस्ताद् युष्मान् उद्धारयि-
ष्यति। किन्तु ते तानि वाक्यान्यगृहीत्वा स्वेषां पूर्व्वीयाचारवद् आचा- ४०
रम् अकुर्व्वन्। इत्थं ते भिन्नजातीया लोकाः परमेश्वराद् भेतुं स्वेषां ४१
निषिद्धाः प्रतिमा अपि सेवितुञ्चोपचक्रमिरे तेषां पुत्राः पौत्राश्च स्वेषां
पूर्व्वपुरुषाणाम् आचारमिवाद्याप्याचारं कुर्व्वन्ति।

---

१८ अष्टादशोऽध्यायः।

१ हिष्किियस्य सुराजत्वकरणं ४ देवपूजनद्रवयनं ९ शोमिरोणस्य पराजितत्वं १३ सन्हेरिबस्य यिहूदादेशाक्रमणं पारितोषिकप्राप्तिश्च १७ रब्शाके निन्दाकथनञ्च।

एलाहपुत्रस्येस्रायेलीयनरपते र्होशेयस्य तृतीये राजत्ववत्सरे यिहू- १
दाया आहसस्य नृपतेः पुत्रो हिष्कीयो राजा बभूव। स पञ्चविंशति- २
वत्सरवयस्कः सन् राजत्वं कर्त्तुमारभ्यैकोनत्रिंशद्वत्सरान् यावद् यिरू-
शालमे राजत्वं चकार सिखरियस्य दुहिताबी तस्य जनन्यासीत्। स ३
निजपूर्व्वपुरुषो दायूदिव परमेश्वरस्य साक्षात् सदाचारं चकृवान्।

स भृगुस्थानान्युदच्छिनत् प्रतिमा अभनक् चैत्यतरूंश्चाच्छिनत् अपरं ४
मूसा यं पित्तलमयं सर्पं निर्म्मितवान् तमपि बभञ्ज यत इस्रायेल्वंशा-
स्तत्कालपर्य्यन्तं तमुद्दिश्य धूपान् अज्वालयन् अपरं स तस्य नाम
निहुष्टन् (पित्तलखण्डमिति) चकृवान्। स इस्रायेलः प्रभौ परमेश्वरे ५
ऽविश्वसत् यिहूदाया भूपतीनां मध्ये तत्पूर्व्वं परतो वा तस्य समानः
कोऽपि नासीत्। स परमेश्वर आसक्तो बभूव तस्य पश्चाद्गमनात् न परा- ६
वृते किञ्च परमेश्वरो मूसां यद्यद् आज्ञापयत् तत् पालयाञ्चकार।

७ अपरं परमेश्वरस्तस्य साहाय्यं चकार स यस्मिन् कर्म्मणि प्रवृत्ते
तस्मिन् कृतार्थो बभूव। सोऽश्शूरीयनरपतेरधीनत्वं विहाय तं पुन र्न
८ सिषेवे। अपरम् असौ तस्य सीमाञ्च यावद् आरक्षकदुर्गात् प्राचीर-
वेष्टितनगरपर्य्यन्तं पिलेष्टीयान् पराजिग्ये।
९ अनन्तरं हिष्कियस्य नरपतेश्चतुर्थे राजत्ववत्सर एलाहपुत्रस्येस्रा-
येलीयनरपते र्होशेयस्य सप्तमे राजत्ववत्सरेऽश्शूरीयः शल्मनेषरो राजा
१० शोमिरोणस्य विरुद्धम् आगत्य तद् अवरुरोध, वत्सरत्रयात् परं तद्
वशीचकार च। राज्ञो हिष्कियस्य षष्ठे राजत्ववत्सरेऽर्थत इस्रायेलो-
११ यराजस्य होशेयस्य नवमे राजत्ववत्सरे शोमिरोणं पराजिग्ये। अपरम्
अश्शूरीयराज इस्रायेलीयान् प्रवासयन् अश्शूरदेशं नीत्वा हलहे गोष-
णदेशस्थस्य हावरनदस्य तीरे मादीयानां नगरेषु च स्थापयाञ्चकार।
१२ यतस्ते स्वप्रभोः परमेश्वरस्य वचनं न गृहीतवन्तस्तस्य नियमं परमेश्वर-
दासस्य मूससः सर्व्वम् आदेशञ्च लङ्घितवन्तस्तं ग्रहीतुं पालयितुं वा
नाङ्गीकृतवन्तश्च।
१३ अनन्तरं हिष्कियराजस्य चतुर्दशे राजत्ववत्सरेऽश्शूरीयः सन्हेरिबो
राजा यिहूदायाः प्राचीरवेष्टितानां सर्व्वनगराणां विरुद्धम् आगत्य
१४ तानि वशीचकार। ततो यिहूदाया हिष्कियो राजा लाखीशनगरे
ऽश्शूरीयनरपतेः समीपं दूतं प्रहित्य कथयामास, अहम् अपराधं कृत-
वान् त्वं मम समीपात् परावृत्य गच्छ त्वं मयि यं भारम् अर्पयिष्यसि
१५ तमहं सहिष्ये। अतोऽश्शूरीयो राजा यिहूदाया हिष्कियनरपते र्दण्डार्थं
शतत्रयकिक्करपरिमितं रजतं त्रिंशत्किक्करपरिमितं सुवर्णञ्च निरू-
१६ पयामास। अतो हिष्कियः परमेश्वरस्य मन्दिरे राजगृहस्य भाण्डा-
गारेषु च विद्यमानानि सकलरजतानि तस्मै ददिवान्। यिहूदाया
राजा हिष्कियः परमेश्वरीयमन्दिरस्य द्वारस्य ये कपाटे यौ स्तम्भौ च
स्वर्णेन मण्डितवान् तेषामपि सुवर्णं तत्काले हिष्कियेन कृत्तान्यश्शूरीय-
राजाय दत्तानि च।
१७ अनन्तरम् अश्शूरीयो राजा बहुभिः सैन्यसामन्तैः सार्द्धं तर्त्तनं रब्-
सारीषं रब्शाकिञ्च लाखीश्नगराद् यिरूशालमे हिष्कियस्य नृपस्य
समीपं प्रेषयामास; ते तु प्रस्थाय यिरूशालमं जग्मुस्तत्रोपस्थाय चो-
र्द्धस्थितायाः पुष्करिण्याः प्रणाल्यां रजकक्षेत्रस्य मार्गे ऽवस्थितवन्तः।
१८ ततो राजनि तैराहूते हिष्कियस्य पुत्र इलियाकीमनामा राजगृहा-

ध्यक्षः शिब्नो लेखक आसाफस्य पुत्रो योयाहनामा पुरावृत्तरचकश्च
तान् साक्षात् कर्त्तुं वहि र्जग्मुः। ततो रब्शाकिस्तान् जगाद, यूयं १९
हिष्कियम् इमां कथां भाषध्वम्, अस्सूरीयो भूपति र्महाराजः कथ-
यति, त्वं यं विश्वासं करोषि स कीदृशो विश्वासः? संग्रामाय मम २०
मन्त्रणा बलञ्चास्त इति त्वं कथयसि, किन्तु तत् शब्दमात्रं। तस्मात् त्वं
कस्मिन् विश्वस्य मदीयाधीनतां त्यक्तवान् असि? पश्य त्वं तस्यां भग्न- २१
नलरूपायां यष्ट्याम् अर्थात् मिसरि विश्वसिषि; किन्तु यः कश्चित् ताम्
आलम्बते तस्य हस्तस्तया विद्धः क्षतयुक्तश्च भवति, स्वीयशरणागतान्
सर्व्वान् प्रति मिस्रीयः फिरौन् राजा तादृशः। यूयं यदि मां वदथ २२
वयं स्वप्रभौ परमेश्वरे विश्वसिमस्तर्हि यस्य प्रांशुस्थानानि वेदीश्च दव-
यित्वा हिष्कियो यिहूदीयान् यिरूशालमनिवासिनश्च मनुष्यान् भाषि-
तवान् यूयं केवलम् अत्र यिरूशालम एतस्या वेद्याः सम्मुखे भजध्वं स
किम् एष नहि? इदानीं त्वं मम प्रभुनाश्सूरीयराजेन सह पणं कुरु; २३
त्वं यद्यारोहिलोकान् प्राप्तुं शक्नुयास्तर्हि द्वे सहस्रे हयानहं तुभ्यं दा-
स्यामि। तस्मिन् असाध्ये सति मम प्रभोरतिक्षुद्राणां भृत्यानां मध्य २४
एकं सेनापतिमपि कथं जेष्यसि? किन्तु त्वं रथानां हयानाञ्च कृते
मिसरि विश्वसिषि। परमेश्वरीयाज्ञां विना स्थानमिदम् उच्छेत्तुम् २५
किमहम् इदानीमागमं? त्वं तं देशं गत्वा विनाशयेति परमेश्वरेणैवाहम्
आज्ञापितः।

तत इलियाकीमः शिब्नो योयाहश्च रब्शाकये कथयामासुः, प्रार्थ- २६
यामहे वयम्, अरामीयभाषया निजदासान् सम्भाषतां यतो वयं तां
बुध्यामहे; प्राचीरोपरिस्थितानां लोकानां कर्णगोचरे ऽस्मान् यिहूदि-
भाषया न सम्भाषतां। रब्शाकिस्तान् प्रत्युवाच, मम प्रभुः किम् एत- २७
द्वाक्यकथनार्थं केवलं तव राजानं त्वाञ्च प्रति मां प्रेषितवान्? अमी ये
लोका युष्माभिः सार्द्धं स्वां स्वां विष्ठां भोक्तुं स्वं स्वं मूत्रं पातुञ्च प्राची-
रोपविष्टाः सन्ति तेषां सर्व्वेषामपि सन्निधिं किमहं न प्रेरितः? तदन- २८
न्तरं रब्शाकिरुत्तिष्ठन् उच्चकै र्यिहूदिभाषया वदितुम् आरब्धवान्,
स जगाद, यूयं महाराजस्यार्थाद् अस्सूरीयस्य नृपतेः कथां शृणुत।
महाराजः कथितवान्, हिष्कियो युष्मान् न प्रवञ्चयतु; यतो मम २९
कराद् युष्मान् रक्षितुं स न शक्नोति। तथा परमेश्वरो ऽस्मान् अवश्यम् ३०
उद्धरिष्यति नगरमिदं कदापि नाश्सूरीयस्य राज्ञो हस्ते समर्पयिष्यत

३१ इति कथयित्वा हिष्कियो युष्मान् परमेश्वरे न विश्वासयतु। हिष्कि-
यस्य कथां मा शृणुत, यतोऽश्शूरीयो राजा कथितवान्, यूयं मया
सन्धाय मदन्तिकमायात यावद् अहम् आगत्य युष्मद्देशवत् शस्य-
द्राक्षारसौ भक्ष्यं द्राक्षाक्षेत्रं तैलदजितवृक्षं मधु चैतैर्युक्तं कमपि देशं
३२ युष्मान् न नयामि तावद् युष्माकम् एकैको जनः स्वानि स्वानि द्राक्षा-
फलान्युडुम्बरफलानि च भक्षतु स्वस्वपुष्करिण्या जलञ्च पिबतु तथा
कृते यूयं जीविष्यथ न मरिष्यथ। परमेश्वरोऽस्मान् उद्धरिष्यतीति
३३ वाक्येन हिष्कियो युष्मान् न वञ्चयतु। अन्यदेशीयानां देवा अश्शूरीयस्य
३४ नृपते र्हस्तात् किं स्वं स्वं देशम् अरक्षन्? हमातार्पदीया देवाः कुत्र?
सिफर्व्वयिमदेशीया हेनादेशीया अव्वादेशीयाश्च देवाः कुत्र? देवाः किं
३५ मदीयहस्तात् शोमिरोणम् अरक्षन्? यद्येतेषां देशानां देवानां मध्ये
कोपि मम हस्तात् स्वदेशं रक्षितुं नाशक्नोत् तर्हि यिहोवा मम हस्तात्
३६ किं यिरूशालमं मोचयिष्यति? किन्तु लोका निरुत्तराः सन्तो ऽतिष्ठन्
एकस्या अपि वाचः प्रत्युत्तरं नोक्तवन्तः यतस्तमुत्तरं मा ब्रूतेति ते राज्ञा
३७ प्रागाज्ञापिताः। अनन्तरं हिल्कियस्य पुत्र इलियाकीमो राजगृहाधि-
पतिः शिब्नो लेखक आसाफस्य पुत्रो योयाह इतिहासरचयिता च
स्ववस्त्राणि छित्त्वा हिष्कियस्य समीपम् आगत्य रब्शाके र्वाक्यानि तं
ज्ञापयामासुः।

---

१९ ऊनविंशोऽध्यायः।

१ यिशायियस्य समीपं हिष्कियस्य दूतप्रेषणं यिशायियस्योत्तरञ्च ८ हिष्कियस्य समी-
पम् अशूरराजेन दूतस्य पुनर्व्वारं प्रेषणं १४ हिष्कियस्य प्रार्थनं २० यिशायियस्य
भविष्यद्वाक्यं ३५ सन्हेरिबस्य सामन्तस्य विनाशस्तस्य निधनञ्च।

१ राजा हिष्कियस्तानि वाक्यानि श्रुत्वा निजवस्त्राणि छित्त्वा शाण-
२ वसनं परिधाय च परमेश्वरस्य मन्दिरं जगाम। अपरं परिहितशाण-
वसनान् राजगृहाधिपम् इलियाकीमं शिब्नं लेखकं प्राचीनयाजकांश्चा-
३ मोषस्य पुत्रस्य भविष्यद्वक्तु र्यिशायियस्य समीपं प्रेषयामास। ततस्ते तं
जगदुः हिष्कियोऽकथयत्, अद्यतनं दिनं क्लेशभर्त्सनापमानानां दिनं, यतो
४ बालकप्रसवस्य समय उपस्थितः किन्तु प्रसवाय शक्ति र्नास्ति। रब्-
शाकेः प्रभुरश्शूरीयो नृपतिरमरस्येश्वरस्य निन्दार्थं यं रब्शाकिं प्रेषित-
वान् तस्य वाक्यानि तव प्रभुना परमेश्वरेण श्रूयन्तां तव प्रभुः परमेशस्तानि

श्रुत्वा समुचितं फलं तस्मै ददातु; अतएव त्वम् अवशिष्टलोकानां मङ्गलं
प्रार्थयस्व। इत्थं हिष्कियस्य नृपस्य दासगणे यिशायियस्य समीपमुप- ५
स्थिते सति यिशायियस्तान् अवदत्, युष्माकं स्वामिनं वदत, परमेश्वरो ६
ऽकथयत्, त्वं यानि वचांस्यश्रौषी र्यैश्चाशूरीयस्य राज्ञो दासा माम्
अनिन्दन् तेभ्यो मा भैषीः। पश्य मया तन्मध्यम् एक आत्मा प्रवेशयिष्यते, ७
स काञ्चित् वार्त्तां श्रुत्वा स्वं देशं परावृत्य यास्यति ततोऽहं तं स्वदेशे
खड्गेन नाशयिष्यामि।
ततः परम् अशूरीयो राजा लाखीशनगराद् प्रस्थितवान् इति वार्त्तां ८
निशम्य रब्शाकिः परावृत्य लिब्नानगरम् अवरुन्धता तेन राज्ञा सार्द्धं
मिलितवान्। तदानीं कूशदेशीयो राजा तिर्हकस्त्वया सह संग्राममयि- ९
तुम् आगच्छति वार्त्तामेतां स श्रुतवान्, ततः स पुन र्हिष्कियस्य समीपं
दूतान् प्रहित्य कथितवान्, यूयं यिहूदीयं हिष्कियं नृपं वदत, यिरूशा- १०
लमम् अशूरीयराजस्य करे न समर्पयिष्यत इति वाचा तव विश्वासभूमि-
रीश्वरस्त्वां न वञ्चयतु। पश्य सर्व्वदेशानां विनाशायाशूरीयराजै र्यद्यद् ११
अकारि तत् त्वं श्रुतवान् अतस्त्वं कथम् उद्धरिष्यसे? मम पूर्व्वपुरुषै र्विना- १२
शितानां गोषणहारणरेत्सफदेशीयानां तिलसरनिवासिनाम् एदन-
वंशीयानां देवाः किं तान् उदधरन्? हमातस्य राजा कुत्र? अर्पदस्य १३
राजा च कुत्र? सिफर्व्वयिमनगरस्य हेनाया अव्वयाश्च राजानो वा क्व?
ततो हिष्कियो दूतानां हस्तात् तत्पत्रं नीत्वा पपाठ; पश्चात् परमे- १४
श्वरस्य मन्दिरं गत्वा परमेश्वरस्य सम्मुखे तद् विस्तारयामास। तदा १५
हिष्कियः परमेश्वराय प्रार्थनामेतां न्यवेदयत्, हे किरूवयो र्मध्यवासिन्
इस्रायेल ईश्वर यिहोवाः केवलस्त्वमेव पृथिव्याः सर्व्वराज्यानामीश्वरः,
स्वर्गः पृथिवी च त्वया सृष्टजाते। हे परमेश्वर कर्णौ निधाय शृणु, हे १६
परमेश्वर स्वचक्षुषी उन्मील्यावलोकय। अमरेश्वरस्य निन्दार्थं सन्हेरी-
बेन या याः कथाः प्रहितास्ताः शृणु। हे परमेश्वर, सत्यम् अशूरीया १७
राजानः सर्व्वजातीयान् तेषां देशांश्च व्यनाशयन् तेषां देवांश्चाग्नौ न्यक्षि- १८
पन् यतस्ते नेश्वराः किन्तु मानुषाणां हस्तकृतानि काष्ठमयानि प्रस्तरम-
याणि च वस्तूनि, तस्मात् ते तान् नाशितवन्तः। हे अस्माकं प्रभो परमे- १९
श्वर साम्प्रतं त्वं तस्य हस्ताद् अस्मान् उद्धर, तेन हे यिहोवास्त्वमेवेश्वरो-
ऽसीति पृथिव्याः सर्व्वराष्ट्रीया जना ज्ञास्यन्ति।
ततः परम् आमोषस्य पुत्रो यिशायियो हिष्कियं प्रति कथामेतां २०

प्रेषयामास; इस्रायेलः प्रभुः परमेश्वर इमां कथां कथयति, त्वम् अश्रू-
२१ रीयं सन्हेरीबं नृपतिमधि मह्यं यन् न्यवेदयस्तन्मयाश्रावि। तदधि
परमेश्वरः कथामेतां कथयति।

सियोनाख्या तु कन्या त्वां संविहस्यावमन्यते।
तव पश्चाद् यिरूशालमदुहिता लाडयेत् शिरः।
२२ त्वं कस्य निन्दनं कस्य वापमानं विधत्तवान्।
उच्चशब्दोर्द्धदृष्टी चाकरोः कस्य विरुद्धतः।
इस्रायेल्धर्म्मरूपो यः किं तदीयविरुद्धतः।
२३ निजै र्दूतैः परेशं त्वं निन्दित्वेति वचोऽवदः।
शिलोच्चयस्य शृङ्गाणि प्रभूतस्यन्दनैरहं।
अर्थात् पार्श्वं लिवानोनः समुपारूढवानहम्।
तदीयानेरसान् वृक्षान् उन्नतांश्छिन्नवानहं।
अच्छिद्यन्तोत्तमास्तस्य देवदारुद्रुमा मया।
तदीयोच्चतमं स्थानं चोत्तमं काननं गतं।
२४ अहं निखन्य दुष्प्राप्यं कीलालं परिपीतवान्।
प्राचीरवेष्टितानाञ्च नगराणां जलाशयान्।
सर्व्वान् पादतलैः स्वीयैः संशुष्कीकृतवानपि।
२५ अपरं किं त्वया नैव प्रसमाकर्णितं त्विदं।
जीर्णराशीकरिष्यन्ते दृढपूर्य्यस्त्वया किल।
मया पुरा यदेतद्धि समकारि निरूपणं।
निश्चितञ्च मया यत् प्राक् तत् सिद्धिमधुना गतं।
२६ अतस्तेषां प्रजा भीतिं दौर्ब्बल्यञ्च त्रपां गताः।
क्षेत्रशस्यं तृणं नव्यं गृहोपरि तृणं यथा।
अपक्वशुष्कशस्यं वा प्राभवन् हि तथैव ते।
२७ किन्तूपवेशनं यत् ते वहिर्गमनमेव च।
अभ्यन्तरायागमनं मद्विरुद्धञ्च कोपनं।
एतानि सर्व्वकर्म्माणि संपरिज्ञातवानहं।
२८ मद्विरुद्धं त्वदीयौ यौ क्रोधदर्पौ प्रकाशितौ।
एतावप्युपतस्थाते मदीयं कर्णकोटरं।
अतएव प्रदास्यामि नासायां वडिशं तव।
खलीनं संप्रदास्यामि त्वदीयवदने निजं।

त्वां परावर्त्तयिष्यामि त्वदागमनवर्त्मना।
हे हिष्किय त्वदीयार्थं चिह्नमेतद् भविष्यति। १९
एतस्मिन् वत्सरे यत्तु शस्यमुत्पद्यते स्वयं।
द्वितीयवत्सरे तस्माद् यद् भविष्यति शस्यकं।
तच्च वर्षद्वयं यावद् युष्माभिः परिभोक्ष्यते।
तृतीये वत्सरे शस्यम् उप्तं कर्त्तिष्यते पुनः।
द्राक्षाक्षेत्रञ्च कृत्वा तत्फलं भक्षिष्यते पुनः।
रक्षिता अवशिष्टाश्च यिहूदावंशमानवाः। २०
तत्स्वरूपञ्च यन्मूलं तदधो वृद्धिमेष्यति।
उपरिष्टात् तदीयानि फलिष्यन्ति फलानि च।
यद् यिरूशालमात् शेषाः सियोनाख्यशिलोच्चयात्। २१
रक्षिता मानवा ये ते भविष्यन्ति वहिर्गताः।
सैन्याध्यक्षपरेशस्य स्वद्योगात् तच्च सेत्स्यति।
अतोऽस्सूरीयराजाय परेशः कथयेदिति। २२
स एतस्मिन् पुरे नैव करिष्यति प्रवेशनं।
नात्र क्षेप्स्यति वाणं नो फलकं दर्शयिष्यति।
तथा विरुद्धमेतस्य स्तूपं न योजयिष्यति।
परेशः कथयेद् येन पथा स समुपागतः। २३
तेनैव च परावृत्य पुनः परिगमिष्यति।
एतस्मिन् नगरे तेन प्रवेशो न करिष्यते।
स्वकृतेऽहं स्वदासस्य दायूदोऽपि कृते तथा। २४
वेष्टनं नगरस्यास्य करिष्यामि च रक्षणं॥

तस्यां रात्रौ परमेश्वरस्य दूतोऽस्सूरीयाणां शिविरं गत्वा तेषां पञ्चा- २५
शीतिसहस्राधिकलक्षं लोकान् व्यनाशयत्; ततोऽवशिष्टा लोकाः प्रत्यूष
उत्थाय तान् सकलान् मृतानपश्यन्। अतएवास्सूरीयो राजा सन्हे- २६
रीबः प्रस्थाय निनिवीनगरं प्रत्यागत्य न्यवसत्। पश्चात् स निष्रोकनाम्न २७
इष्टदेवस्य मन्दिरे पूजयति तदानीम् अद्रम्मेलकशरेत्सरनामकौ तदीय-
पुत्रौ खड्गाभ्यां तं नाशयित्वारारटदेशं प्रति पलायेतां; तत एषर्ह-
द्दाननामा तस्यान्यः पुत्रस्तस्य पदे राजा बभूव।

---

२० विंशतितमोऽध्यायः।

१ हिष्कियस्य मरणवार्त्ताकथनं प्रार्थनया रक्षणं ८ रक्षायाश्चिह्नं १२ हिष्कियस्य समीपे दूतानाम् उपस्थितिः सकलैश्वर्य्यदर्शनं १४ तदधि यिशायियस्य भविष्यद्वाक्यं २० हिष्कियस्य निधनं।

१ तदानीं हिष्कियस्य मारके व्याधौ जात आमोषस्य पुत्रो यिशायियो
भविष्यद्वक्ता समुपागत्य कथयामास, परमेश्वरः कथयति, त्वं स्वप-
२ रिवारायादेशं विधत्स्व, यतस्त्वं मरिष्यसि न जीविष्यसि। ततो
३ हिष्कियो भित्तेः सम्मुखीभूय परमेश्वरं प्रति संप्रार्थ्य कथयामास, हे
परमेश्वर, विनयेऽहं सत्यतया सरलान्तःकरणेन च त्वत्समक्षं यादृश-
महमाचरं, तव दृष्टौ यादृशं सत्कर्म्माकरवं, तत् स्मर, ततो हिष्कियो
४ ऽतीव क्रन्दितुमारेभे। तदा यिशायियस्य मध्यप्राङ्गण उपस्थितेः प्राक्
५ परमेश्वरस्य वाक्यमिदं समुपतस्थौ, त्वं परावृत्य गत्वा हिष्कियं वद, तव
पूर्व्वपुरुषस्य दायूदः प्रभुः परमेश्वर इति कथयति, मया तव प्रार्थनम्
अश्रावि तव नेत्राम्बु चादर्शि पश्चादहं त्वां निरामयं करिष्यामि तृतीये
६ दिवसे त्वं परमेश्वरस्य मन्दिरं व्रजिष्यसि। अहं तवायुः पञ्चदश वत्स-
रान् वर्द्धयिष्यामि किञ्चाशूरीयराजस्य हस्तात् त्वाम् एतन्नगरञ्च रक्षि-
ष्यामि मत्कृते निजदासस्य दायूदः कृते चाहं नगरस्यैतस्य पालकस्वरूपो
७ भविष्यामि। अनन्तरं यिशायियो जगाद यूयम् उडुम्बरफलानां पूप-
मेकमानयत ततो लोकैरानीय विस्फोटकोपरि तस्मिन् निहिते स स्वस्थो
बभूव।

८ तस्मिन् काले हिष्कियो यिशायियम् आचष्ट परमेश्वरेण स्वस्थीकृतोऽहं
९ तृतीये दिवसे परमेश्वरस्य मन्दिरं यास्याम्येतस्य किं चिह्नं? ततो यिशा-
यियेन भाषितं, परमेश्वरेण स्वोक्तं वचनं सफलं कारिष्यते तस्येदं चिह्नं
परमेश्वरात् त्वं प्राप्स्यसि, कालबोधकयन्त्रे छाया दशांशान् यावद् अग्र-
१० गामिनी वा दशांशान् यावत् पश्चाद्गामिनी भविष्यति। हिष्किये-
नोदितं छाया यद् दशांशान् यावद् अग्रगामिनी भवतीति क्षुद्रं कार्य्यं,
११ किन्तु छाया दशांशान् यावत् परावर्त्ततां। अनन्तरं भविष्यद्वादिना
यिशायियेन परमेश्वरमुद्दिश्य प्रार्थनायां कृतायाम् आहसस्य कालबोध-
कयन्त्रे छाया यावतोंऽशान् अगच्छत् स तेषां दशांशान् यावत् तां
परावर्त्तयामास।

१२ तस्मिन् काले वलदनस्य पुत्रो मिरोदकवलदननामा बाबिलीयो

राजा हिष्कियस्य पीडाया वार्त्तां श्रुत्वा दूतैस्तस्य समीपं पत्राण्युपायनञ्च प्रेषयामास । ततो हिष्कियस्तान् साक्षात्कृत्य निजभाण्डागाराणि रज- १३
तसुवर्णानि सुगन्धिद्रव्याणि बहुमूल्यतैलानि निजास्त्रागाराणि स्वकोषेषु स्थितानि सकलवस्तूनि च दर्शयामास । हिष्कियेन तान् न दर्शितं यत् तादृशं किमपि वस्तु तस्य निवेशने कृत्स्ने राष्ट्रे च नासीत् ।

अनन्तरं भविष्यद्वादी यिशायियो नरपतिं हिष्कियम् उपागत्य १४
पप्रच्छ ते मनुजाः किमगदन्? ते च कस्मात् स्थानात् तव समीपम् आ-
गच्छन्? ततो हिष्कियो गदितवान् एते दूरदेशाद् बाबिलाद् आग-
च्छन् । स पप्रच्छ एते तव निवेशने किं किम् अपश्यन्? हिष्कियो जगाद १५
मम निवेशने यद्यद् आस्ते तत् सर्व्वं ते दृष्टवन्तः। अहं तान् यन्न दर्शित-
वान् तादृशं किमपि द्रव्यं मम कोषमध्ये न विद्यते । अनन्तरं यिशायियो १६
हिष्कियम् अब्रवीत्, परमेश्वरस्य वचो निशामय। पश्य तव पूर्व्वपुरुषा- १७
दिभिरद्य यावत् सञ्चितं यद्यत् तव निवेशने विद्यते तत् सर्व्वं यस्मिन् काले
बाबिलनगरं नेष्यते तादृशः समय उपस्थास्यति तस्य किञ्चिदप्यवशिष्टं
न स्थास्यति परमेश्वर इति वचनं ब्रवीति । अपरं तवौरससन्तानानां १८
मध्यात् कतिपया नीता बाबिलीयराजस्य निवेशने छिन्नपुंस्काः सन्तः
स्थास्यन्ति । ततो हिष्कियो यिशायियं जगाद त्वं परमेश्वरस्य यद् वचो १९
भाषितवान् तद् उत्तमं । अपरं गदितवान् मम राजत्वसमये मङ्गलं
सत्यता च भविष्यति ।

एतस्य हिष्कियस्यावशिष्टं चरित्रं विक्रमश्च तेन पुष्करिणीं प्रणा- २०
लीञ्च कृत्वा नगराय तोयानयनञ्चैतानि सर्व्वाणि यिहूदादेशीयभूपतीनां
पुरावृत्तपुस्तके लिखितानि किं न विद्यन्ते? अनन्तरं हिष्किये निजपितृ- २१
लोकवत् महानिद्रां गते तस्य सुतो मिनशिस्तस्य पदे राजा बभूव ।

---

२१ एकविंशोऽध्यायः ।

१ मिनशेः कुराजत्वं देवार्च्चनञ्च १० तस्य विरुद्धं परमेश्वरस्य दण्डाज्ञापनं १७ तस्य निधनं १९ आमोनस्य कुराजत्वं २३ तस्य निधनञ्च ।

मिनशि र्द्वादशवत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्य पञ्चपञ्चा- १
शद् वत्सरान् यिरूशालमे राजत्वं चक्रवान् हिफ्सीवा च तस्य प्रसू-
रासीत् । परमेश्वर इस्रायेल्वंशानां सम्मुखाद् यान् भिन्नजातीयान् २
द्रवयाञ्चकार तेषां घृणार्हाचारसमं कुत्सिताचारं स परमेश्वरस्य सा-

३ द्धात् चकृवान्। तस्य जनको हिष्कियो यानि भगुस्थानानि विना-
शितवान् स तानि पुनर्व्वारं निर्म्मापयाञ्चकार, अपरम् इस्रायेलीय
आहावो नरपतिरिव बालः कृते वेदीश्चैत्यवृक्षांश्च स्थापयामास, आका-
४ शीयनक्षत्रगणं प्रणनाम सिषेवे च। अपरं मया यिरूशालमे निजनाम
स्थापयिष्यत इति वाक्यं परमेश्वरो यन्मन्दिरमधि कथयामास तस्मिन्
५ परमेश्वरीयमन्दिरे देववेदी र्निर्म्मापयाञ्चकार च। अपरं परमेश्वरीय-
भवनस्य द्वयोः प्राङ्गणयोः स आकाशीयतारकाणां कृते वेदी र्निर्म्माप-
६ याञ्चकार। स निजपुत्रं वह्निं प्रवेशयाञ्चकार गणकत्वं मोहनञ्चाचचार
भूतविदां गुणिनाञ्च कर्म्म चकृवान् इत्थं स परमेश्वरं कोपयितुं तस्य
७ साक्षाद् बहूनि कुत्सितकर्म्माणि चकृवान्। अपरं स स्वनिर्म्मितां चैत्य-
प्रतिमां मन्दिरे स्थापयामास, किन्तु तन्मन्दिरम् अधि परमेश्वरो दायूदे
तदीयसुताय सुलेमने च वच इदं कथितवान्, एतस्मिन् मन्दिरे सर्व्वे-
षाम् इस्रायेलीयवंशानां मध्यात् मयाभिरुचिते यिरूशालमे निजं नाम
८ नित्यं मया स्थापयिष्यते। किञ्च मया ते यद्यद् आज्ञापिता मम दासेन
मूससा च ते यत् शास्त्रम् आदिष्टास्तदनुसारेणैव कर्म्मकरणाय यदि
यतन्ते तर्हि यो जनपदस्तेषां पूर्व्वपुरुषेभ्यो मया व्यतारि तस्य जनपदस्य
९ मध्याद् इस्रायेलीयवंशं पदमेकमपि नापसारयिष्यामीति। किन्तु ते तद्
वाक्यं न जगृहुरपरं परमेश्वर इस्रायेलवंशस्य सम्मुखाद् या या जाती
र्व्यनाशयत् ताभ्योऽप्यधिककुकर्म्मकरणाय मिनशिस्तान् प्रवर्त्तयामास।
१० अनन्तरं परमेश्वरः स्वीयदासानां भविष्यद्वादिनां वदनै र्वाचमिमां
११ जगाद, यिहूदाया राजा मिनशिरेतानि घृणार्हकर्म्माणि कृतवान्
तस्मात् पूर्व्वं य इमोरीयलोका आसन् तेभ्योऽप्यधिकदुष्टाचारी जातो
१२ निजप्रतिमाभि र्यिहूदावंशमपि पापं कारितवांश्चेति हेतोरिस्रायेलीय-
प्रभुः परमेश्वर इमां वाचम् आचष्टे पश्याहं यिरूशालमं यिहूदाञ्च प्रति
तादृशीं दुर्गतिम् आनेष्यामि यस्याः श्रवणात् सकललोकानां कर्णद्वयं
१३ सशब्दं भविष्यति। अहं यिरूशालमस्योपरि शोमिरोणस्य सूत्रम् आहा-
वीयवंशस्य सूत्रलम्बनञ्च विस्तारयिष्यामि, यादृक् कश्चिन्मानवो भो-
जनपात्रं प्रमृज्य न्युब्जीकरोति तादृक् मया यिरूशालमं परिमार्क्ष्यते।
१४ मया निजाधिकारस्यावशिष्टा लोकास्त्यक्ष्यन्ते रिपुहस्ते समर्पयिष्यन्ते च
१५ ते निजसकलरिपुभि र्ग्रस्या लोप्याश्च भविष्यन्ति। यतो मिसरदेशात्
तेषां पितृलोकानां बहिरागमनदिनमारभ्याद्य यावत् ते मम साक्षात्

कुत्सिताचारं कुर्व्वन्तो मां कोपयन्ति । मिनशि बहूनां निर्दोषाणां १६
रुधिरं पातयित्वा यिरूशालमम् एकस्मात् सीम्नोऽन्यसीमानं यावद्
रुधिरेण पूरयामास तदन्यत् परमेश्वरस्य साक्षात् कुत्सिताचारकरणाय
स यिहूदावंशमपि पापं कारयित्वा पातकी जातः ।

एतस्य मिनशेरवशिष्टं चरित्रं तस्य सर्व्वक्रिया पापाचरणञ्चैतानि १७
सर्व्वाणि यिहूदादेशीयभूपतीनां पुरावृत्तपुस्तके लिखितानि किं न
विद्यन्ते ? अनन्तरं मिनशि र्निजपितृलोकवत् महानिद्रां गत्वा निज- १८
निवेशनस्योद्यानेऽर्थत उषस्योद्याने श्मशानं लब्धवान् ततस्तस्य सुत आ-
मोनस्तस्य पदे राजा बभूव ।

आमोनो द्वाविंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्य यिरू- १९
शालमे द्वौ वत्सरौ राजत्वं चकृवान् यट्बानिवासिनो हारूषस्य दुहिता
मिशुल्लेमता तस्य प्रसूरासीत् । तस्य जनको मिनशि यादृक् कृतवान् २०
सोऽपि तादृक् परमेश्वरस्य साक्षात् कुत्सिताचारं चकार । तस्य तातो २१
यस्मिन् वर्त्मनि चरितवान् सोऽपि तस्मिन्नेव चचार । तस्य तातो यान्
विग्रहान् पूजितवान् सोऽपि तानेव पूजयामास प्रणनाम च । स नि- २२
जपितृलोकानां प्रभुं परमेश्वरं तत्याज परमेश्वरस्य वर्त्मनि न चचार ।

अनन्तरम् आमोनस्य भृत्यास्तं प्रति द्रोहं विधाय तस्य गृहे राजानं २३
जघ्नुः । ततो देशीयलोका राज्ञ आमोनस्य द्रोहकान् सर्व्वान् हत्वा तस्य २४
तनयं योशियं तस्य पदे राजत्वेऽभिषिषिचिरे । एतस्यामोनस्यावशिष्टं २५
चरित्रं यिहूदादेशीयभूपतीनां पुरावृत्तपुस्तके किं लिखितं न विद्यते ?
अपरं स उषस्योद्यानस्थिते निजश्मशाने निहितस्ततस्तस्य तनयो यो- २६
शियस्तस्य पदे राजा बभूव ।

---

२२ द्वाविंशोऽध्यायः ।

१ योशियस्य सुराजत्वं ३ मन्दिरस्य जीर्णोद्धारणं ८ ईश्वरीयव्यवस्थापुस्तकस्य प्राप्तिः
१५ भविष्यद्वादिन्या हुल्दायाः सविधं दूतानां प्रेषणं तस्या भविष्यद्वाक्यञ्च ।

योशियोऽष्टवत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्यैकत्रिंशद्वत्सरान् १
यिरूशालमे राजत्वं चकार वस्कतीयस्यादायाहस्य दुहिता यिदीदा
तस्य प्रसूरासीत् । स परमेश्वरस्य साक्षात् सत्कर्म्माणि चकार निज- २
पर्व्वपुरुषस्य दायूदो वर्त्मनि चचार तस्य दक्षिणं वामं वा प्रति न
परावृत्ते ।

३ योशियस्याष्टादशे राजत्ववत्सरे मिशुल्लमस्य पौत्रोऽत्सलियस्य पुत्रः
शाफनो लेखको राज्ञा परमेश्वरस्य मन्दिरं प्रहितो वच इदम् उक्तश्च।
४ त्वं प्रधानयाजकस्य हिल्कियस्य समीपं व्रजित्वा परमेश्वरस्य भवनम्
आनीतान्यर्थतो लोकानां करेभ्यो द्वारपालैः संगृहीतानि सर्व्वाणि
५ रजतानि गणय। अपरं ये परमेश्वरीयभवनाध्यक्षाः कार्य्यं साधयन्ति
तेषां करेषु तानि समर्प्यन्तां, अपरं ते मन्दिरस्य जीर्णोद्धारकरणार्थं
६ परमेश्वरीयमन्दिरस्य कर्म्मकारिणां करेषु तानि समर्पयन्तु। अर्थतः
सूत्रधारनिचायकस्थपतीनां वेतनार्थं गृहस्य जीर्णोद्धाराय काष्ठानां
७ खनितपाषाणानाञ्च क्रयार्थञ्च तानि समर्पयन्तु। किन्तु तेषां करेषु
या मुद्राः समर्पयिष्यन्ते ता अधि तैः समं गणना न भविष्यति यतस्ते
विश्वास्यत्वेन कर्म्म कुर्व्वन्ति।

८ अनन्तरं प्रधानयाजको हिल्कियः शाफनं लेखकं जगाद मया परमे-
श्वरस्य मन्दिरे व्यवस्थापुस्तकमिदं प्रापि। अनन्तरं हिल्कियेन शाफ-
९ नाय तत्पुस्तके दत्ते स तत् पपाठ। अपरं शाफनो लेखको राज्ञः
समीपं समीय तं वार्त्तामिमां बभाषे, मन्दिरे यावत्यो मुद्रा आसन्
ताः सर्व्वास्तव दासैः संगृहीताः परमेश्वरीयमन्दिरे नियुक्तानां कार्य्या-
१० ध्यक्षाणां हस्तेषु समर्पयाञ्चक्रिरे। अनन्तरं लेखकः शाफनो राजानं वच
इदं ज्ञापयामास, याजको हिल्कियो मह्यं पुस्तकमिदं ददिवान्,
११ अनन्तरं शाफनो राज्ञः साक्षात् तत् पपाठ। तदानीं राजा तस्य व्यव-
१२ स्थापुस्तकस्य वचांसि निशम्य निजवसनं चिच्छेद। अपरं राजा याजकं
हिल्कियं शाफनस्य तनयम् अहीकामं मीखायस्य तनयम् अक्बोरं
१३ लेखकं शाफनम् असायनामानं नृपते र्दासमेकञ्चेत्यादिदेश, यूयं गत्वा
मम कृते लोकानाञ्च कृत्स्नस्य यिहूदावंशस्य च निमित्तं तस्य लब्धस्य
पुस्तकस्य वाचोऽधि परमेश्वरं पृच्छत यत एतस्मिन् पुस्तके यद्यल्लि-
खितम् आस्ते तदाचरणायास्माकं पूर्व्वपुरुषैरेतस्य पुस्तकस्य वाक्यानि
न गृहीतान्येतत्कारणाद् अस्माकं विरुद्धं परमेश्वरस्य महाक्रोधः प्र-
१४ ज्वलितः। अतो याजको हिल्कियोऽहीकामोऽक्बोरः शाफनोऽसा-
यश्च वस्त्रागारस्याधिपते र्हर्हसपौत्रस्य तिक्वाहतनयस्य शल्लूमस्य भार्य्यां
ऊल्दां भविष्यद्वादिनीम् उपाजग्मुः सा यिरूशालमस्थपाठशालायाम्
अवसत्। अनन्तरं तां समभाषन्त।

१५ सा तु तान् आचचक्षे, इस्रायेलः प्रभुः परमेश्वर इति वाचं ब्रवीति

यो मानुषो युष्मान् मम समीपं प्रैषयत् तं ब्रूत, परमेश्वर इति वाचं १६
निगदति पश्चादहम् एतत् स्थानं तन्निवासिनश्च प्रत्यमङ्गलम् अर्थतो
यिहूदाया राज्ञा यत् पुस्तकम् अपाठि तत्र लिखितं सकलम् अमङ्गलं
घटयिष्यामि। यतस्ते निजनिजहस्तानां क्रियाभि र्मां कोपयितुं मां वि- १७
हायेतरदेवान् उद्दिश्य धूपान् अज्वालयन् एतत्कारणाद् एतस्य स्थानस्य
विरुद्धं मम क्रोधाग्निः प्रज्वलितवान् स न निर्व्वास्यते। परमेश्वरं प्रष्टुं १८
युष्मान् प्रेषितवान् यो यिहूदाया राजा तम् इदं वचो ब्रूत त्वं यानि
वचनान्याकर्णयस्तान्यधीस्रायेलः प्रभुः परमेश्वर इति वाचं वदति,
स्थानम् एतत् तन्निवासिनश्च चमत्कारशापास्पदानि भविष्यन्तीति तेषां १९
विरुद्धं मया यद् उक्तं तस्मिन् त्वया श्रुते त्वदीयान्तःकरणं कोमलम्
अभवत् त्वञ्च परमेश्वरस्य साक्षात् नम्रोऽभवो निजवसनं छित्त्वा मम
सम्मुखेऽक्रन्दश्चैतत्कारणात् परमेश्वरः कथयति मयापि त्वदीयं वच
आकर्णितं। अहं तव पितृलोकैः समं त्वां संग्रहिष्यामि त्वं शान्त्या २०
निजश्मशाने शयिष्यसे किञ्चाहम् एतत् स्थानं यान्यमङ्गलान्यानेष्यामि
तानि तव चाक्षुषाणि न भविष्यन्ति। अनन्तरं ते राजानं तां वार्त्तां
जगदुः।

---

२३ त्रयोविंशोऽध्यायः।

१ सभायां पुस्तकस्य पठनं ३ लोकैः समं नियमस्य स्थिरीकरणं देवपूजायास्तदीय-द्रव्यस्थानानाञ्च नाशनं १५ बैथेलस्य वेद्या अशुचिकरणं २१ निस्तारपर्व्वपालनं २४ दुष्टलोकानां दूरीकरणं २६ यिहूदाया लोकान् प्रतीश्वरस्य क्रोधः २९ समरे योशियस्य निधनं ३१ तदीयतनयस्य यिहोयाहसस्य बन्धनं ३६ यिहोयाकीमस्य कुराजत्वञ्च।

अनन्तरं राज्ञा प्रहिता दूता यिहूदादेशस्य यिरूशालमस्य च १
सर्व्वान् प्राचीनलोकान् तस्य समीपं समानिन्युः। अनन्तरं नरपतिः २
परमेश्वरस्य मन्दिरं जगाम यिहूदादेशीया यिरूशालमनिवासिनश्च सर्व्वे
लोका याजका भविष्यद्वादिनः क्षुद्रा महान्तश्च सर्व्वे मनुजास्तेन समं
जग्मुः। अनन्तरं राजा परमेश्वरीयमन्दिरे लब्धस्य नियमपुस्तकस्य
सकलवचांसि तेषां कर्णगोचरे पाठयामास।

अपरं नरपतिः स्तम्भस्यैकस्य समीपे तिष्ठन् परमेश्वरस्य साक्षात् ३
नियमम् इमं चकार, वयं परमेश्वरम् अनुगमिष्यामः सकलमनोभिः

प्राणैश्च समं तस्याज्ञाः साक्ष्यवचनानि विधींश्चाचरिष्यामोऽस्मिन् पुस्तके
लिखितानि सर्व्वाणि नियमवाक्यानि पालयिष्यामश्चेति, ततः सर्व्वे लोका
४ अपि तं नियमम् अङ्गीकृतवन्तः। अपरं वालस्यैत्यवृक्षस्य गगनस्थ-
नक्षत्राणाञ्च निमित्तं निर्म्मितानि यावन्ति पात्राणि तानि परमेश्व-
रस्य मन्दिराद् वहिष्कुरुतेत्याज्ञां राजा प्रधानयाजकं हिल्कियं द्विती-
यपर्य्यायस्य याजकान् द्वारपालांश्च समादिशत्। अनन्तरं स यिरू-
शालमस्य वहिः किद्रोणस्य प्रान्तरे तानि दाहयित्वा तदीयभस्मानि
५ वैथेलं निनाय। अपरं यिहूदादेशीयभूपतिभि र्नियुक्ता ये देवार्चका
याजका यिहूदादेशीयनगराणां निकटे यिरूशालमस्य चतुर्दिक्षु चोच्च-
स्थानेषु धूपान् अज्वालयन् ये च वाले सूर्य्याय चन्द्राय ग्रहेभ्य आका-
६ शीयज्योतिर्गणाय च धूपम् अज्वालयन् तान् पदच्युतान् चकार। अपरं
परमेश्वरीयमन्दिरस्य मध्यात् चैत्यप्रतिमां वहिष्कृत्य यिरूशालमस्य
वहिः किद्रोणस्रोतसः समीपम् आनीय किद्रोणस्रोतसि तां दाहया-
मास पेषणेन धूलीवत् चूर्णयित्वा सामान्यलोकानां श्मशानेषु तां धूलीं
७ विचकार च। अपरं यत्र नार्य्यश्चैत्यमूर्त्तेः कृते दूष्यवस्त्राणि निर्म्मितव-
त्यस्तत्र परमेश्वरीयमन्दिरस्य समीपे स्थितान् पुंशृङ्गारकारिणां गृहान्
८ बभञ्ज। अपरं स सकलान् याजकान् यिहूदानगरेभ्यः समानिनाय
किञ्च गेवाम् आरभ्य वेर्शेवां यावद् यत्र याजका धूपान् अज्वालयन्
तान्युच्चस्थानानि सर्व्वाण्यशुचीनि चकार किञ्च गोपुराणां निकटे
स्थितानि भृगुस्थानानि विशेषतो नगरप्रवेशिनां वामपार्श्वे स्थितं नगरा-
९ ध्यक्षस्य यिहोशूयस्य गोपुरस्थं भृगुस्थानं बभञ्ज। किन्तु भृगुस्थानीय-
याजका यिरूशालमे स्थितायाः परमेश्वरीययज्ञवेद्याः समीपं नाग-
च्छन् ते केवलं स्वेषां भातृणां मध्ये तिष्ठन्तः किण्वशून्यान् पूपान् अभु-
१० ञ्जत। कश्चिद् यत् मोलकम् उद्दिश्य निजतनयं तनयां वा वह्निं न
प्रवेशयेत् तदर्थं स हिन्नोमवंशस्य निम्नभूमौ स्थितं तोफताख्यं स्थानम्
११ अमेध्यं चकार। अपरं यिहूदादेशीयै राजभि र्ये वाजिनः सूर्य्याय
दत्तास्तान् परमेश्वरीयमन्दिरस्य मध्याद् अर्थत उपनगरनिवासिनो
नियनमेलकनाम्नः कृतनपुंसकस्य वासातो दवयाञ्चकार वह्निना सूर्य्य-
१२ रथं दाहयामास च। अपरं नृपतिराहसस्य प्रासादोपरिस्थकोष्ठस्य
पृष्ठे यिहूदादेशीयराजै र्निर्म्मिता वेदीः परमेश्वरीयमन्दिरस्य प्राङ्ग-
णयोश्च मिनशिना निर्म्मिता वेदी र्भङ्क्त्वा स्थानान्तरीकृत्य च तासां धूलीं

किद्रोणखोतसि निचिक्षेप। अपरम् इस्रायेल्वंशस्य राजा सुलेमान् १३
यिरूशालमस्य सम्मुखे विनाशकशिलोच्चयस्य दक्षिणे सीदोनीयानाम्
अस्तारोतनाम्नो घृणार्हदेवस्य निमित्तं मोयाबीयानां किमोशाख्यस्य
घृणार्हदेवस्य निमित्तम् अम्मोनवंशस्य मिल्कमाख्यस्य घृणार्हदेवस्य
निमित्तञ्च यानि भ्रगुस्थानानि निर्म्मितवान् तानि नृपतिरशुचीनि च-
कार। अपरं ताः सकलाः प्रतिमा बभञ्ज चैत्यवृक्षांश्च चिच्छेद तेषां १४
स्थानानि मनुष्याणां कीकसैः पूरयामास च।

अनन्तरं निवाटस्य सुतो यो यारबियाम इस्रायेल्वंशं पापं कारि- १५
तवान् तेन निर्म्मिता या यज्ञवेदी यच्च भ्रगुस्थानं बैथेलेऽतिष्ठत् सा
यज्ञवेदी तच्च भ्रगुस्थानमपि योशियेन बभञ्जे। स भ्रगुस्थानस्य प्रतिमां
वह्निना दाहयित्वा धूलीवत् चूर्णयामास चैत्यमूर्त्तिं दाहयामास च।
अपरं योशियेन मुखं परावर्त्त्य तत्र पर्व्वते श्मशानेषु दृष्टेषु पुरा येनेश्व- १६
रीयलोकेन तानि कर्म्माणि निर्द्दिष्टानि तेन घोषितानां परमेश्वरीय-
वाक्यानाम् अनुसारेणैव राज्ञा दूतान् प्रहित्य तेभ्यः श्मशानेभ्यः कीक-
सानि समानीय वेद्या उपरि दाहयित्वा वेदिरशुचिरकारि। अनन्तरं १७
स पप्रच्छ मया योऽसौ स्तम्भो दृश्यते स किम्भूतः? ततो नगरीयलो-
कास्तं प्रतिजगदुः पुरा य ईश्वरीयलोको यिहूदात आगत्य बैथेलस्थाया
यज्ञवेद्या विरुद्धं त्वया क्रियमाणानाम् एतेषां कर्म्मणां कथां घोषित-
वान् इदं तस्य श्मशानं। ततो राजा जगाद, एनं विजहीत कश्चिद् १८
एतस्य कीकसानि न स्थानान्तरीकुर्य्यात्। अतः शोमिरोणाद् आगतस्य
भविष्यद्वादिनः कीकसैः समं तस्य कीकसानि लोकै र्विजहिरे। अपरं १९
शोमिरोणदेशस्य सकलेषु नगरेषु यानि क्रोधजनकानि भ्रगुस्थानीय-
मन्दिराणीस्रायेलीयराजै र्निर्म्मितानि तानि सर्व्वाण्यपि योशिय उच्चि-
च्छेद बैथेले स यद्यत् कृतवान् तत्तदेव तान्यपि प्रति चकार। तत्रत्यान् २०
भ्रगुस्थानीययाजकान् सर्व्वांश्च वेदीनाम् उपरि जघान तदुपरि मनु-
ष्याणां कीकसानि दाहयामास च। ततः परं स यिरूशालमं परावृत्य
जग्मिवान्।

अनन्तरं राजा सकललोकान् इत्याज्ञापयामास यूयम् एतस्य निय- २१
मपुस्तकस्य लेखनानुसारात् स्वेषां प्रभुं परमेश्वरम् उद्दिश्य निस्तारो-
त्सवं कुरुध्वं। इस्रायेलीयवंशस्य शासकानां विचारयितॄणां समयमा- २२
रभ्येस्रायेलीयनरपतीनां यिहूदादेशीयनरपतीनाञ्च राजत्वसमये तत्स-

२३ दृशो निस्तारोत्सवो नाकारि। योशियस्याष्टादशे राजत्ववत्सरे यिरू-
शालमे परमेश्वरोद्देशकः स निस्तारोत्सवोऽकारि।
२४ परमेश्वरस्य मन्दिरे याजकेन हिल्कियेन लब्धे पुस्तके यानि व्यवस्था-
वचांसि लिखितान्यासन् तानि सर्व्वाणि स्थिरीकर्त्तुम् इच्छन् योशियो
यिहूदादेशे यिरूशालमे च विद्यमानान् भूतज्ञान् गुणिनो विग्रहान्
२५ प्रतिमा घृण्यवस्तूनि च सर्व्वाण्युच्छिच्छेद। सर्व्वान्तःकरणेन सर्व्वप्राणैः
सर्व्वशक्त्या च मूससो निखिलव्यवस्थानुसारात् परमेश्वरं प्रति मनः-
परिवर्त्तने तस्य तुल्यः कोऽपि नरपतिस्तस्मात् पूर्व्वं नोदभवत् तस्मात्
परमपि कोऽपि तस्य तुल्यो नाभवत्।
२६ तथापि मिनशि यैः क्रोधजनकैः कर्म्मभिः परमेश्वरं क्रोधयामास
तत्कारणाद् यिहूदावंशस्य प्रतिकूलं परमेश्वरस्य यो महाकोपोऽभ्यजा-
२७ यत, तस्मात् परमेश्वरो न परावृत्ते। अपरं परमेश्वर आचचक्षे मया
यादृग् इस्रायेल्वंशो निजदृष्टितो दवितस्तादृग् यिहूदावंशो दवयि-
ष्यते यच्च नगरं मयाभिरुचितं तन्नगरं किञ्च मम नामधेयम् एतस्मिन्
स्थाने स्थास्यतीति वचो यन्मन्दिरमधि मया कथितं तदपि मया परि-
२८ त्यक्ष्यते। एतस्य योशियस्यावशिष्टं चरित्रं यच्च तेन कृतं तत् सर्व्वं यिहू-
दादेशीयनृपतीनां पुरावृत्तपुस्तके लिखितं किं न विद्यते?
२९ तस्य समये मिस्रीयो नरपतिः फिरौन् निखुरस्सूरीयनृपतेर्विरुद्धं
फरातसरितः सविधं जगाम ततो योशियेन राज्ञा तस्य विरुद्धं युद्ध-
३० यात्रायां कृतायां स तं साक्षात् प्राप्य मगिद्दो जघान। अपरं तस्य दासा-
स्तस्य कुणपं रथ आरोप्य मगिद्दो यिरूशालमं नीत्वा तं तस्य निज-
श्मशाने निदधिरे। अनन्तरं देशीयलोका योशियस्य तनयं यिहोयाहसं
नीत्वाभिषिच्य तस्य पदे राजानं चक्रुः।
३१ यिहोयाहसस्त्रयोविंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्य
यिरूशालमे त्रीन् मासान् राजत्वं चकार लिब्नानिवासिनो यिरि-
३२ मियस्य दुहिता हमूटल् तस्य प्रसूरासीत्। स निजपितृलोकानां
३३ कर्म्मानुसारतः परमेश्वरस्य साक्षात् कुत्सिताचारं चकार। किन्तु स
यद् यिरूशालमे राजत्वं न कुर्य्यात् तदर्थं फिरौन् निखु र्हमातदेश-
स्थरिब्लायां तं बबन्ध देशे च शतक्किक्कारपरिमितं रजतम् एकक्किक्कार-
३४ परिमितं स्वर्णञ्च दण्डं निरूपयामास। अनन्तरं फिरौन् निखु र्यो-
शियस्य पुत्रम् इलियाकीमं तस्य जनकस्य योशियस्य पदे राजानं

कृत्वा तस्य नाम यिहोयाकीम इति चकार यिहोयाहसञ्च निनाय
ततः स मिसरदेशं गत्वा तत्र स्थाने ममार। अनन्तरं यिहोयाकीमः ३५
फिरौणे तानि दुर्वर्णानि सुवर्णानि च ददौ किन्तु फिरौण आज्ञानुसा-
रात् तेषां रजतादीनां परिशोधार्थं जनपदे करं निरूपयामास, स
फिरौणे निखवे दानार्थम् एकैकलोकस्य सम्पदनुसाराद् देशीयप्रजाभ्यो
रजतं सुवर्णञ्चाददे।

यिहोयाकीमः पञ्चविंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्य ३६
यिरूशालम एकादशवत्सरान् राजत्वं चकार रूमानिवासिनः पिदा-
यस्य दुहिता सिवुदा तस्य प्रसूरासीत्। स निजपितृलोकानां कर्म्मानु- ३७
सारात् परमेश्वरस्य साक्षात् कुत्सिताचारं चकार।

---

२४ चतुर्विंशोऽध्यायः।

१ यिहोयाकीमस्य बाबिलीयनृपतेरधीनत्वास्वीकरणं ५ तस्य मृत्युः ८ तत्सुतस्य यिहोयाखीनस्य कुराजत्वं १० तस्य तदीयबहुलोकानाञ्च वन्दीभवनं १७ सिदिकियस्य कुराजत्वं बाबिलीयभूपतेरधीनत्वास्वीकरणञ्च।

यिहोयाकीमस्य राजत्वसमये बाबिलीयो महीपति र्निवूखद्नित्सर १
आजगाम, यतः स त्रीन् वत्सरान् यावत् तस्याधीनतायां स्थित्वा तस्या-
धीनत्वं पुनरनङ्गीकृतवान्। अपरं परमेश्वरेण तस्य विरुद्धं कस्दीयानाम् २
अरामीयाणां मोयाबीयानाम् अम्मोनवंशीयानाञ्च दस्युनिवहाः प्रेरया-
ञ्चक्रिरे; परमेश्वरः स्वीयदासानां भविष्यद्वादिनां वदनै र्यद् वच उक्त-
वान् तदनुसारेण स यिहूदादेशं विनाशयितुं तस्य विरुद्धं तान् प्रेषया-
मास। तत् सर्व्वम् अमङ्गलं परमेश्वरस्यैवाज्ञया यिहूदावंशम् आच- ३
क्राम, यतो मिनशिना यानि सर्व्वाणि पापानि चक्रिरे तत्कारणात् स तं
वंशं स्वसम्मुखाद् दवयितुं निरूपयामास। मिनशि र्निर्दोषाणां रुधिरं ४
पातयन् तेन निर्दोषाणां रुधिरेण यिरूशालमं परिपूरयामास ततः
परमेश्वरः क्षमितुं मतिं न चकार।

एतस्य यिहोयाकीमस्यावशिष्टं चरित्रं सर्व्वकर्म्म च यिहूदादेशीय- ५
भूपतीनां पुरावृत्तपुस्तके लिखितानि किं न विद्यन्ते? अनन्तरं यिहोया- ६
कीमे निजपितृगणवत् महानिद्रां गते तस्य सुतो यिहोयाखीनस्तस्य पदे
राजा बभूव। अनन्तरं मिसरो महीपतिः स्वीयदेशात् पुन र्नाजग्मि- ७

वान् यतो मिसरः सरितमारभ्य फरातनदं यावत् मिस्रीयनरपते
र्यद्यद् आसीत् तत् सर्व्वं बाबिलीयो नरपति र्जितवान्।
८ यिहोयाखीनोऽष्टादशवत्सरवयस्कः सन् राजत्वं कर्त्तुमारभ्य यिरू-
शालमे त्रीन् मासान् राजत्वं चकार। यिरूशालमनिवासिन इल्ना-
९ थनस्य दुहिता निहुष्टा तस्य प्रसूरासीत्। स निजपितुः कर्म्मवत् पर-
मेश्वरस्य साक्षात् कुत्सिताचारं चकार।
१० तस्मिन् समये बाबिलीयनरपते र्निवुखद्नित्सरस्य दासेया यिरू-
११ शालमं समीय नगरम् अरुन्धन्। अपरं तस्य भृत्यै र्नगरे रुध्य-
माने बाबिलीयराजो निवुखद्नित्सरः स्वयं नगरस्य प्रतिकूलम् आज-
१२ गाम। ततो यिहूदावंशीयो यिहोयाखीनो महीपतिस्तस्य माता भृत्या
मुख्या राजगृहस्याध्यक्षाश्च बाबिलीयमहीपते राजत्वस्याष्टमवत्सरे तेन
१३ दध्रिरे। अनन्तरं परमेश्वरेण यथोक्तं तद्वत् स तस्मात् स्थानात् पर-
मेश्वरीयमन्दिरे स्थितं सकलं स्वापतेयं राजनिवेशने स्थितं निखिलं स्वा-
पतेयञ्च निनायेस्रायेलः सुलेमना नरपतिना निर्म्मितानि यावन्ति हेम-
१४ भाजनानि परमेश्वरीयभवन आसन् तान्यपि छित्त्वा जग्राह। अपरं
स यिरूशालमस्थितान् सकलमनुजान् अखिलान् अधिपतीन् निखि-
लान् बलिनो भटांश्च प्रवासयामास, दशसहस्राणि लोका निखिलशि-
ल्पिनः कर्म्मकारिणश्च तेन प्रवासयाञ्चक्रिरे ततो जनपदे दुर्गतमनुजे-
१५ भ्योऽपरः कोपि नावशिष्यत। अपरञ्च स यिहोयाखीनं नृपतिमपि बा-
बिलि प्रवासयामास। राजा राज्ञो माता महिष्यो राजपुर्य्या अध्यक्षा
१६ जनपदस्य मुख्यमनुजाश्च तेन यिरूशालमाद् बाबिलं निन्यिरे। इत्थं
सर्व्वे बलिनो लोका अर्थतः सप्तसहस्राणि मानवा बलिनो युद्धयोग्याश्च
सहस्रं शिल्पकाराः कर्म्मकाराश्च मनुजा बाबिलि प्रवासार्थं बाबिलीय-
राजेन स्थानान्तरीकृताः।
१७ अनन्तरं बाबिलीयो राजा यिहोयाखीनस्य मातुलं मत्तनियं तस्य
पदे राजत्वे नियोजयामास तदीयं नामधेयं वर्णान्तरीकृत्य सिदिकिय
१८ इति चकार च। स सिदिकिय एकविंशतिवत्सरवयस्कः सन् राजत्वं
कर्त्तुं प्रारभ्यैकादशवत्सरान् यावद् यिरूशालमे राजत्वं चकार। लिब्-
१९ नानिवासिनो यिरिमियस्य दुहिता हमूटल् तस्य प्रसूरासीत्। स
यिहोयाकीमस्य निखिलकर्म्मानुसारात् परमेश्वरस्य साक्षात् कुत्सिता-
२० चारं चकार। अपरं यिरूशालमनगरं यिहूदावंशञ्च प्रति परमेश्वरस्य

क्रोधात् तौ यत् तस्य सम्मुखाद् दूरीभवेताम् एतदर्थम् एतादृशी दशा जघटे । अपरं सिदिकियो बाबिलीयराजस्याधीनत्वम् अनङ्गीकृतवान् ।

---

२५ पञ्चविंशोऽध्यायः ।

१ यिरूशालमस्यावरोधनं ४ सिदिकियस्य धृतत्वं लोकानाञ्च वन्दित्वाय नयनं १३ मन्दिरस्य वस्तूनां लोठनं १८ प्रधानलोकानां वधः २२ गिद्लियस्य शासनपदे नियुक्तत्वं २७ बाबिलीयनरपते राजसभायां यिहोयाखीनस्य समुन्नतिः ।

अनन्तरं तस्य राजत्वस्य नवमवत्सरे दशममासस्य दशमे दिने १
बाबिलीयमहीपति र्निवुखद्नित्सरस्तस्य निखिलसैन्यानि च यिरूशा-
लमस्य विरुद्धं समेत्य शिविरं स्थापयाञ्चक्रिरे तस्य चतुर्दिक्षु दुर्गाणि नि-
र्म्ममिरे च । सिदिकियस्यैकादशं राजत्ववत्सरं यावत् नगरं रुध्यमानं २
तस्थौ । ततश्चतुर्थमासस्य नवमे दिने नगरे महादुर्भिक्षं बभूव जनप- ३
दस्य मनुजानां निमित्तं भक्ष्यं किमपि नासीत् ।
अनन्तरं नगरे भग्नत्वं गते सर्व्वे योद्धारो निशायां राजोद्यानस्य ४
समीपस्थयो र्द्वयो र्भित्त्यो र्द्वारस्य मार्गेण पलायनं विधाय प्रान्तरगा-
मिनं पन्थानं जग्मुः किन्तु कस्दीयाश्चतुर्दिक्षु नगरम् अवेष्टन्त । अन- ५
न्तरं कस्दीयानां पृतना नरपतेः पश्चाद् धावित्वा यिरीहोः प्रान्तरे
तं प्रापुस्ततस्तस्य निखिलसैन्यानि तस्य सविधाद् व्यकीर्य्यन्त । अतस्ते नर- ६
पतिं धृत्वा रिब्लायां बाबिलीयभूपतेः सविधम् आनीय तं प्रति दण्ड
आदेशि । ततः सिदिकियस्य समक्षं तस्य तनया जघ्निरे सिदिकियस्य ७
लोचने उत्पाटयाञ्चक्राते स च पित्तलीयनिगडै र्बद्धो बाबिलं निन्ये ।
अपरञ्च पञ्चममासस्य सप्तमे दिने बाबिलीयमहीपते र्निवूखद्नित्स- ८
रस्योनविंशे राजत्ववत्सरे रक्षकसेनानाम् अध्यक्षो निवूषरदननामा
बाबिलीयभूपस्य भृत्यो यिरूशालमम् आगत्य परमेश्वरस्य मन्दिरं राज- ९
सदनं यिरूशालमस्य निखिलगृहान् विशेषतो वृहदट्टालिकाः सर्व्वा
वह्निना दाहयामास । अपरं रक्षकसेनापतेरनुगामिन्यः कस्दीयाः १०
सेना यिरूशालमस्य चतुर्दिक्षु प्राचीरम् अभञ्जन् । ततः परं नगरेऽव- ११
शिष्टा मनुजा बाबिलीयनरपतेः पक्षं गताः पलातका अन्येऽवशिष्टा लो-
काश्च रक्षकसेनापतिना निवूषरदनेन प्रवासयाञ्चक्रिरे । केवलं द्राक्षा- १२

क्षेत्रसेवनाय भूमिकर्षणाय च कतिपया दुर्गतलोका रक्षकसेनापतिना
प्रेषयाञ्चक्रिरे।
१३ अपरं कस्दीयैः परमेश्वरीयमन्दिरे स्थितौ पित्तलमयौ स्तम्भौ पीठानि
परमेश्वरीयमन्दिरे स्थितं पित्तलमयं सागरपात्रञ्च खण्डं खण्डं विधाय
१४ तेषां पित्तलं बाबिलं निन्ये। अपरम् ऋजीषाणि दर्व्वः कुण्डानि खेदन्य-
स्थेत्यादीनि यावन्ति सेवार्थकानि भाजनान्यासन् तानि सर्व्वाणि तैरप-
१५ हृतानि। स्वर्णमयानां वह्निपात्रकटाहादीनां सुवर्णानि रूप्यमयपात्राणां
१६ रूप्याणि च रक्षकसेनापतिना हृतानि। सुलेमान् परमेश्वरीयमन्दिरस्य
कृते यत् स्तम्भद्वयं सागरपात्रमेकं यानि च पीठानि निर्म्मितवान् तेषां
१७ निखिलपात्राणां पित्तलानां परिमाणम् असंख्यमासीत्। यतस्तयोरे-
कस्य स्तम्भस्योच्चत्वम् अष्टादशहस्तपरिमितं तदुपरि च यः पित्तलमयो
मूर्द्धासीत् तस्य मूर्द्ध उच्चत्वं हस्तत्रयपरिमितं किञ्च स मूर्द्धा येन जाला-
कृतिशिल्पकर्म्मणा दाडिम्बस्रजा चावेष्ट्यत तत् सर्व्वमपि पित्तलमयम्
आसीत् अपरं जालकर्म्म विना द्वितीयस्तम्भः प्रथमस्य समान आसीत्।
१८ अनन्तरं रक्षकसेनापतिः प्रधानयाजकं सिरायं द्वितीयं याजकं सिफ-
१९ नियं त्रीन् द्वारपालांश्च दधार। अपरं नगरस्य योद्धॄणाम् अध्यक्षमेकं
नगरे लब्धान् पञ्चजनान् राजसभासदो जनपदीयसेनानाम् अध्यक्षं
सेनागणयितारं लेखकमेकं नगरे लब्धान् जनपदीयषष्टिजनांश्च दधार।
२० रक्षकसेनापति र्निबूषरदनस्तान् धृत्वा रिब्लायां बाबिलीयनरपतेः स-
२१ न्निधिं निनाय। अनन्तरं बाबिलीयो नरेश्वरो हमातदेशस्थायां रि-
ब्लायां तान् ताडयित्वा मारयामास। इत्थं यिहूदावंशीयलोका निजदे-
शाद् दूरे प्रवासयाञ्चक्रिरे।
२२ बाबिलीयमहीपतिना निबूखद्नित्सरेणावशेषिता ये लोका यिहूदा-
जनपदेऽतिष्ठन् तेषां शासकपदे शाफनस्य पौत्रो ऽहीकामस्य पुत्रो
२३ गिदलियस्तेन नियुयुजे। अनन्तरं बाबिलीयनरपतिना गिदलियः शा-
सकपदे न्ययुज्यतेति वार्त्तायां सेनापतिभिस्तेषां लोकैश्च श्रुतायां निथ-
नियस्य पुत्र इस्मायेलः कारेहस्य पुत्रो योहाननो निटोफातीयस्य
तन्हूमतस्य पुत्रः सिरायो माखातीयस्य पुत्रो यासनियस्तेषां लोकाश्च
२४ मिस्पायां गिदलियस्य समीपम् आजग्मुः। अनन्तरं गिदलियस्तेषां
समीपे तेषां लोकानाञ्च समीपे शपथं कृत्वा जगाद, यूयं कस्दीयानां
दासेभ्यो मा भीत्वा जनपदे वसत बाबिलीयनरपतिं सेवध्वञ्च तेन युष्माकं

क्षेमं भविष्यति। किन्तु सप्तमे मासि राजवंशजात इलीशामस्य पौत्रो २५
निथनियस्य पुत्र इस्मायेलस्तेन सहापरे दशजनास्चागत्य गिदलियं
मिस्पायां तस्य सन्निधौ वर्त्तमानान् यिहूदीयान् कस्दीयांश्च ताडयित्वा
जघ्नुः। अनन्तरं क्षुद्रा महान्तश्च निखिलमनुजाः सेनापतयश्च समुत्थाय २६
मिसरदेशं जग्मु र्यतस्ते कस्दीयेभ्यो बिभयाञ्चक्रुः।

अपरं यिहूदावंशीयनृपस्य यिहोयाखीनस्य प्रवासस्य सप्तत्रिंशव- २७
त्सरस्य द्वादशमासस्य सप्तविंशे दिवसेऽर्थतो बाबिलीयनृप इविल्मि-
रोदको यस्मिन् वत्सरे राजत्वं कर्त्तुम् आरेभे तस्मिन् समये स यिहो-
याखीनं राजानं कारातो मोचयामास। अपरं तं प्रति प्रीत्यालापं २८
चकार यावन्तो भूपतयश्च तेन समं बाबिल्यासन् तेषां सर्व्वेषाम् आस-
नेभ्यस्तस्मै श्रेष्ठम् आसनं ददौ तदीयानि कारावसनानि परिवर्त्तया- २९
मास च। ततः स यावज्जीवनं तेन समं भोजनपाने अकरोत्। अपरं ३०
तस्य कृते नित्यवृत्तौ राज्ञा निरूपितायां तस्य यावज्जीवनं प्रतिदिनं
नित्यजीवनोपायस्तस्मै व्यश्राण्यत।

वंशावल्याः प्रथमं पुस्तकं।

१ प्रथमोऽध्यायः।

१ नोहपर्य्यन्ता वंशावलिः ५ येफतो वंशावलिः ८ हामो वंशावलिः १७ शामो वंशावलिः २४ इब्राहीमो वंशावलिः २९ इस्मायेलो वंशावलिः ३२ किटूराया इस्हाकस्य वंशावलिः ३५ एषावो वंशावलिः ४७ तदीयवंशस्याधिपतीनां नामानि च।

आदम् शेत् इनोश् कैनन् महललेल् येरद् हनोक् मिथूशेलह लेमक् १
नोह शाम् हाम् येफत्। ४

एतस्य येफतः सन्ताना गोमर् माजूज् मादय् यूनान् तूवल् मेशक् ५
तीरस्। तस्य गोमरः सन्ताना अस्किनस् रीफत् तोगर्म्म च। अपरं ७
यूनानः सन्ताना इलीशा तर्शीश् कित्तीम् दोदानीम्।

हामः सन्तानाः कूश् मिसर् पूट् किनान्। कूशः सन्तानाः सिवा ८
हवीलाः सव्ता रयमाः सव्तिखाश्च, अपरं रयमाः सन्तानौ शिवादि- ९

१० दनौ। कूशः सुतो निम्रोद् स पृथिवीमध्ये पराक्रमी भवितुम् आरभत।
११ अपरं मिसरः सन्ताना लूदीयानामीयलिहावीयनप्तुहीयपथ्रुषीयाश्च
१३ लोकाः पिलेष्टीयानाञ्चादिपुरुषाः कस्लूहीयाः कप्तोरीयाश्च लोकाः। अपरं
१४ किनानो ज्येष्ठः पुत्रः सीदोन् ततः परं हित्तीययिवूषीयेमोरीयगिर्गा-
१६ शीयहिव्वीयार्कीयसीनीयार्व्वदीयसिमारीयहमातीया मनुजाः।
१७ अपरञ्च शामः सन्ताना एलम् अशूर् अर्फक्षद् लूद् अराम् ऊष् हूल्
१८ गेथर् मश्। एतस्य अर्फक्षदः सन्तानः शेलहः शेलहस्य सन्तान एवर्।
१९ एवरो द्वौ पुत्रौ, एकस्य नाम पेलग् (अर्थतो विभागः) यतस्तदानीं
२० पृथिवी विभक्ता बभूव, तस्य भ्रातु र्नाम यक्तन्। एतस्य यक्तनः सन्ताना
२१ अल्मोदद् शेलफ् हत्सर्मावत् येरहो हादोराम् ऊषल् दिक्ला ओवल्
२३ अवीमायेल् शिवा ओफीर् हवीला योवव्, एते सर्व्वे यक्तनः सन्तानाः।
२४ शाम् अर्फक्षद् शेलह एवर् पेलग् रियूः सिरूग् नाहोर् तेरह
२८ इब्राम् अर्थत इब्राहीम्। इब्राहीमः सुताविस्हाक् इस्मायेल् च।
२९ तयो र्वंशावलिः। इस्मायेलो ज्येष्ठः पुत्रो निवायोत् पश्चात् केदर्
३१ अद्बेल् मिब्सम्, मिश्मो दूमा मसा हदर् तेमाः, यिटूर् नाफीश्
केदिमा एते सर्व्वे इस्मायेलो वंशाः।
३२ इब्राहीम उपपत्न्याः किटूरायाः सन्तानाः सिम्रन् यक्षन् मिदान्
मिदियन् यिश्बक् शूहश्च। अपरं तस्य यक्षणः सन्तानौ शिवादि-
३३ दनौ। किञ्च मिदियनः सन्ताना ऐफा एफर् हनोक् अवीद इल्दाया
३४ एते सर्व्वे किटूराया वंशाः। अपरम् इब्राहीमः पुत्रो य इस्हाक् तस्य
पुत्रावेषाविस्रायेलौ।
३५ एषावः पुत्रा इलीफस् रूयेल् यियूश् यालम् कोरहश्च। तस्येलीफसः
३७ पुत्राः, तैमन् ओमार् सिफो गयितम् किनस् तिम्ना ऽमालेक्। अपरं
३८ रूयेलः पुत्रा नहत् सेरहः शम्मो मिसा च। सेयीरः सुता लोटन्
३९ शोवल् सिवियोन् अना दिशोन् एत्सर् दीशन् च। अपरं लोटनः
४० सन्तानौ होरिहेममौ। लोटनश्च तिम्नानामिका भगिन्यासीत्। अपरं
शोवलः सन्ताना अल्वन् मानहत् एवल् शिफो ओनम्। अपरम्
४१ अया अनाश्च सिवियोनः सन्तानौ। अपरम् अनाः सन्तानो दिशोन्
४२ दिशोनः सन्ताना हिम्दन् इश्वन् यित्रन् किरान्। अपरम् एत्स-
रस्य सन्ताना विल्हन् सावन् याकन्। अपरम् ऊष् अरान् च दीशनः
सन्तानौ।

इस्रायेलो जनपदे राजत्वात् पूर्व्वम् एते राजान इदोमदेशे राजत्वं ४३
चक्रुः। बियोरो बेलानामा सुतः, दिन्हावानगरञ्च तस्य राजधान्या-
सीत्। अनन्तरं बेले मृतवति बस्रानिवासिनः सेरहस्य पुत्रो योबव् ४४
तस्य पदे राजत्वं चकार। अपरं योबवि मृते सति तैमन्देशीयो हूशम् ४५
तस्य पदे राजत्वं चकार। अपरं हूशमि मृते सति बिददः सुतो यो ४६
हदद् मोयाबीयप्रान्तरे मिदियनं जितवान् स तस्य पदे राजत्वं
चकार तस्य राजधान्याश्च नामधेयम् अवीत् आसीत्। अपरं हददि ४७
मृते सति मस्रेकानिवासी सम्लस्तस्य पदे राजत्वं चकार। अपरं सम्ले ४८
मृते सति फराततटिन्याः समीपस्थरिहोबोतनिवासी शौल् तस्य पदे
राजत्वं चकार। अपरं शौलि मृते सत्यक्बोरः पुत्रो बाल्हानन् तस्य ४९
पदे राजत्वं चकार। अपरं बाल्हाननि मृते सति हदर् तस्य पदे ५०
राजत्वं चकार पायूनगरञ्च तस्य राजधान्यासीत् मेषाहवस्य दौहित्री
मट्रेदो दुहिता मिहेटबेल् च तस्य जायासीत्। अनन्तरं हदर् निधनं ५१
जगाम। इदोमीयराजानां नामानि, प्रथमं तिम्नः पश्चाद् अल्वा
यिथेत् अहलीबामा एलाः पीनोन् किनस् तैमन् मिव्सर् मग्दीयेल् ५४
ईरम्। इम इदोमदेशस्य राजान आसन्।

२ द्वितीयोऽध्यायः।

१ इस्रायेलो वंशावलिः ३ यिहूदा वंशावलिः १८ कालेवस्य वंशावलिः २१ हिष्रोणस्य वंशावलिः २५ यिरह्मेलस्य वंशावलिः ३४ शेशनस्य वंशावलिः ४२ कालेवतनयस्य मेशा वंशावलिः ५० कालेवतनयस्य हूरस्य वंशावलिश्च।

इस्रायेल एते तनयाः, रूबेन् शिमियोन् लेवि यिहूदा इषाखर् सिबू- १
लून् दान् यूषफ् बिन्यामीन् नप्तालि गाद् आशेर्। २
किनानीयशूयस्य दुहितु गर्भे यिहूदास्त्रयः सन्ताना जज्ञिरे, एर् ३
ओनन् शेलाश्च, तेषां मध्ये यिहूदा ज्येष्ठः पुत्रः एर् परमेश्वरस्य
साक्षाद् दुष्टो भत्वा परमेश्वरेण व्यापादयाञ्चक्रे। अनन्तरं यिहूदाः ४
पुत्रवध्वास्तामरो गर्भे तस्यौरसौ पेरससेरहौ जज्ञाते यिहूदास्ते पञ्चपुत्रा
बभूवुः। तस्य पेरसस्य तनयौ हिष्रोणहामूलौ द्वौ। अपरञ्च सेरहस्य ६
तनयाः सब्दिरेथनो हेमनः कल्कोलो देराश्चैते पञ्चजनाः। किञ्च सब्देः ७
पौत्रः कर्म्मेः पुत्र आखनो निवेदितं द्रव्यमधि निदेशं लङ्घित्वेस्रायेलो
विघ्नं चकृवान्। अपरम् एथनस्य तनयोऽसरियः। अपरं हिष्रोणस्य ९

१० तनया एते यिरह्मेलोऽरामः कालेवश्च। अरामस्य तनयोऽम्मीनादव-
११ स्तस्याम्मीनादवस्य पुत्रो यिहूदावंशस्याध्यक्षो नह्शोनः। नह्शोनस्य
१२ तनयः सल्मोनः सल्मोनस्य तनयो वोयसः। अपरं वोयसस्य तनय
१३ ओवेदः, ओवेदस्य पुत्रो यिशयः। एतस्य यिशयस्य ज्येष्ठः पुत्र इली-
१४ यावः, द्वितीयोऽवीनादवः, तृतीयः शम्मः, चतुर्थो निथनेलः, पञ्चमो
१६ रद्दयः, षष्ठ ओत्समः, सप्तमो दायूद्। तेषां भगिन्यौ सिरूयावीगयिलौ
१७ किञ्च सिरूयायास्त्रयः पुत्रा अवीशयो योयावोऽसाहेलश्च। अपरम् अवी-
गयिलः सुतोऽमासास्तस्यामासा जनक इस्मायेलीयो येथर आसीत्।
१८ अपरं हिष्रोणस्य तनयः कालेवो निजजाययो र्यिरियोतासूवयो
१९ गर्भयो र्येशरं शोववम् अर्दोनञ्च जनयामास। अपरम् असूवायां मृतायां
२० कालेव इफ्राथां व्यवहत् तस्याञ्च हूरो जज्ञे। हूरस्य सुत ऊरिः, ऊरेः
सुतो वित्सलेलः।
२१ हिष्रोणः षष्टिवत्सरवयस्कः सन् गिलियदजनकस्य माखीरस्य दुहि-
२२ तरं व्यूह्योपजग्मिवान् तस्या गर्भे च तस्मात् सिगूवोऽजायत। तस्य
सिगूवस्य पुत्रो यो यायीरस्तस्य गिलियदजनपदे त्रयोविंशतिनगराण्या-
२३ सन्। परन्तु गिशूरीया अरामीयाश्च यायीरस्य तानि नगराणि किनातं
तत्सीमास्थितग्रामांश्च साकल्येन षष्टिनगराणि तेभ्योऽपहृत्य वशीचक्रिरे।
२४ एते निखिला गिलियदतातस्य माखीरस्य वंशा आसन्। अनन्तरं
कालेवेफ्राथायां हिष्रोणे मृतवति हिष्रोणस्य जायाया अवियाया गर्भे
तदौरसस्तिकोयस्य जनकोऽशहूरोऽजायत।
२५ हिष्रोणस्य ज्येष्ठतनयो यो यिरह्मेलस्तस्य ज्येष्ठतनयोऽरामोऽपराश्च
२६ पुत्रा वूना ओरण ओत्समोऽहियश्च। अपरम् अटारानामिका यिर-
२७ ह्मेलस्यापरा जायैकासीत् तस्या आत्मज ओनमः। अपरञ्च यिरह्-
मेलस्य ज्येष्ठतनयो योऽरामस्तस्य पुत्रो माषोऽपरौ यामीन एकरश्च।
२८ ओनमस्य पुत्रौ शम्मयो यादाश्च शम्मयस्य तनयौ नादवावीशूरौ।
२९ किञ्च अवीहयिल्नामिकाया जायाया गर्भेऽवीशूरस्य तनयावह्वान-
३० मोलीदावजायेतां। अपरं नादवस्य तनयौ सेलदाप्पयिमौ, स सेलदो
३१ निरपत्यो ममार। अपरम् अप्पयिमस्य तनयो यिशयि र्यिशयेः पुत्रः
३२ शेशनः शेशनस्य तनयोऽहलयः। अपरं शम्मयस्य भ्रातु र्यादास्तनयौ
३३ येथरयोनाथनौ, स येथरो निरपत्यो ममार। अपरं योनाथनस्य
तनयौ पेलतः सासाश्च। एते निखिला यिरह्मेलस्य वंशाः।

शेशनस्य तनयो नासीत्, केवलं दुहितर आसन् किञ्च यार्हानामा ३४
शेशनस्य मिस्रीय एको दासेय आसीत्। अनन्तरं शेशनेन निजकन्या ३५
स्वदासाय यार्हं विवाहार्थम् अदायि ततस्तस्याम् अत्तयोऽजायत। तस्या- ३६
त्तयस्य तनयो नाथनः, नाथनस्य तनयः सावदः, सावदस्य तनय ३७
इफ्ललः, इफ्ललस्य तनय ओवेदः, ओवेदस्य तनयो येहूः, येहोस्तनयो ३८
ऽसरियः, असरियस्य तनयो हेलसः, हेलसस्य तनय इलियासाः, इलि- ३९
यासास्तनयः सिस्मयः, सिस्मयस्य तनयः शल्लुमः, शल्लुमस्य तनयो ४१
यिकमियः, यिकमियस्य तनय इलीशामाः।

यिरह्मेलस्य सहजस्य कालेवस्य ज्येष्ठः सुतो मेशाः, मेशाः सुतः ४२
सीफः, सीफस्य सुतो मारेशाः, मारेशाः सुतो हिब्रोणः, हिब्रोणस्य सुताः ४३
कोरहतपूहो रेकमः शेमाश्च। अपरं शेमाः सुतो यर्कियमस्य जनको ४४
रेकमः, रेकमस्य सुतः शम्मयः, शम्मयस्य सुतो मायोनः, मायोनस्य ४५
सुतो वैत्सूरः। अपरं कालेवस्योपपत्न्या ऐफायाः सुता हारणो मोत्सा ४६
गासेसश्च, किञ्च हारणस्य सुतो येहदयः। येहदयस्य तनया रेगमो ४७
योथमो गेशनः पेलट ऐफाः शाफश्च। अपरं कालेवस्योपपत्न्या माखायाः ४८
सुतौ शेवरस्तिर्हनौ। परन्तु तस्यां मद्मन्ना जनकः शाफो मग्वेनागि- ४९
विययोश्च जनकः शिवा आह्सानामिका कालेवस्य दुहिता च जज्ञिरे।

कालेवस्य वंशा एते। इफ्राथाया गर्भजातो ज्येष्ठतनयो हूरः किरि- ५०
यतयियारीमस्य पिता शोवलो वैत्लेहमस्य पिता शल्मो वैत्गादेरस्य ५१
पिता हारेफश्च। अपरं किरियतयियारीमस्य पितुः शोवलस्यात्मजौ ५२
हराया हत्सीहम्मनूखोतश्च। किरियतयियारीमस्य वंशा यित्रीयपूथी- ५३
यशूमाथीयमिश्रायीयाः। अपरं तेभ्यः सरियीयेष्टायोलीयौ समुत्पन्नौ।
शल्मस्य वंशा वैतलेहमो निटोफा अट्रोतो वैतयोयावः सरियोयो हत्सी- ५४
हम्मनूखीयश्च किञ्च यावेसे वासकारी सोफेरीयवंशः किञ्च तिरिया- ५५
थीयशिमियतीयसूखाथीयाः। एते निखिला रेखववंशस्य पितु र्हामस्य
सन्तानाः केनीयनाम्ना विख्यातास्वासन्।

---

३ तृतीयोऽध्यायः।

१ दायूदो वंशावलिः १० सुलेमनो वंशावलिः १७ यिखनियस्य वंशावलिश्च।

हिब्रोणे दायूद एते पुत्राः प्रसुषुविरे। यिस्रीयेलीयाहीनोयमाया १

गर्भजातोऽम्नोननामा दायूदो ज्येष्ठः पुत्रो बभूव ; अपरं कर्म्मिलीयावी-
२ गयिलाया गर्भजातो दानियेलो द्वितीयः पुत्रो बभूव ; अपरं गिशूरस्य
नृपतेस्तल्मयस्य दुहितु र्माखाया गर्भजातोऽवशालोमनामा तृतीयः
पुत्रो बभूव ; अपरं हगीताया गर्भजातोऽदोनियनामा चतुर्थः पुत्रो
३ बभूव ; अपरम् अवीटलाया गर्भजातः शिफटियनामा पञ्चमः पुत्रो
बभूव ; किञ्च तस्य जायाया इग्लाया गर्भजातो यित्रियमनामा षष्ठः
४ पुत्रो बभूव। हिब्रोणे तस्यैते षट्तनया जज्ञिरे, किञ्च दायूद् तत्र
स्थाने षण्मासाधिकान् सप्तवर्षान् राजत्वं चकार। ततः परं यिरूशा-
५ लमे त्रयस्त्रिंशद्वत्सरान् यावद् राजत्वं चकार। अपरं तदीया एते
तनया यिरूशालमे जज्ञिरे। शिमियः शोववो नाथनः सुलेमान् च,
६ एते चत्वारः पुत्रा अम्मीयेलस्य दुहितु र्वतशेवाया गर्भजाताः। तदन्ये
८ यिभर इलीशूय इलीफेलटो नोगहो नेफगो याफिय इलीशामा इली-
९ यादा इलीफेलटश्चैते नवजनाः। दायूद उपपत्नीनां पुत्रान् विहाय
सर्व्वे एते तेषां भगिनी तामरा च दायूदोऽपत्यान्यासन्।

१० सुलेमनः सुतो रिहबियामः, रिहबियामस्य सुतोऽवियः, अवियस्य
११ सुत आसाः, आसाः सुतो यिहोशाफटः, यिहोशाफटस्य सुतो योरामः,
१२ योरामस्य सुतोऽहसियः, अहसियस्य सुतो योयाशः, योयाशस्य सुतो
१३ ऽमत्सियः, अमत्सियस्य सुत उषियः, उषियस्य सुतो योथमः, योथमस्य
सुत आहसः, आहसस्य सुतो हिष्कियः, हिष्कियस्य सुतो मिनशिः,
१५ मिनशेः सुत आमोनः, आमोनस्य सुतो योशियः, योशियस्य ज्येष्ठपुत्रो
योहाननः, द्वितीयः पुत्रो यिहोयाकीमः, तृतीयः सुतः सिदिकियः,
१६ चतुर्थः सुतश्च शल्लुमः। किञ्च यिहोयाकीमस्य पुत्रौ यिहोयाखीनः
सिदिकियश्च।

१७ वन्दिनो यिहोयाखीनस्य सुताः शल्टीयेलो मल्कीरामः पिदायः शिन-
१९ त्सरो यिकमियो होशामा निदवियश्च। अपरं पिदायस्य सुतौ सिरु-
व्वाविलः शिमियिश्च किञ्च सिरुव्वाविलस्यापत्यानि मिस्तुल्लमो हना-
२० नियश्च तयो र्भगिनी शिलोमीता च। हसुवा ओहेलो वेरिखियो
२१ हसदियो यूशवहेषदश्चेमे पञ्च जनाः। अपरं हनानियस्य पुत्रौ पिल-
टियो यिशयियश्च तयोः सुताः रिफायोऽर्णन ओवदियः शिखनियश्च।
२२ शिखनियस्य तनयः शिमयियः, शिमयियस्य तनया हटुशो यिगालो
२३ वारीहो नियरियः शाफटो हसरियश्चैते षड् जनाः। अपरं नियरियस्य

सन्ताना इलीयवैनयो हिष्कियोऽस्रीकामश्चैते त्रयो जनाः। अपरम् २४
इलीयवैनयस्य सुता होदविय इलीयाशीवः पिलायोऽक्कुबो योहाननो
दिलायोऽनानिश्च सप्त जना एते।

---

४ चतुर्थोऽध्यायः।

१ यिहूदा वंशावलिः ५ अस्हूरस्य वंशावलिः ११ किलूबस्य वंशावलिः २१ शेला वंशावलिः २४ शिमियोनस्य वंशावलिः २९ मुख्याध्यक्षाणां कथनञ्च।

यिहूदा अपत्यानि पेरसो हिष्रोणः कर्म्मि हूरः शोबलश्च। अपरं १
शोबलस्य सुतो रायाः, रायाः सुतो यहतः, यहतस्य सुतावहूमयो लह- २
दश्च। एते निखिलाः सरियीयवंशनाम्ना विख्याताः। एटमस्य पितुर- ३
पत्यानि यिष्रियेलः यिश्मा यिद्बशस्तेषां हत्सिलिल्पोनीनामिका भगिनी
च। अपरं पिनूयेलस्य पिता गिदोरो हूशस्य तात एसरश्च वैतलेह- ४
मस्य पितुरिफ्राथा ज्येष्ठपुत्रस्य हूरस्य सुतावास्तां।

तिकोयस्य पितुरश्हूरस्य नाम्ना हिला नारा च द्वे जाये आस्तां। ५
तस्यौरसा नारायाः सुता अहुषमो हेफरस्तैमिनिरहष्टरिश्चैते ना- ६
रायाः सन्तानाः। किञ्च हिलाया अपत्यानि सेरतो यित्सोहर इत्- ७
ननः कोसश्च। कोसस्य सन्ताना आनवः सोबेवा हारुमतनयस्याह- ८
र्हेलस्य वंशाश्च। अपरम् अहर्हेलस्य पुत्रो याबेषो निजभ्रातृगणतः ९
सम्मानित आसीत्। अहं दुःखेन गर्भधारणमकार्षम् इति कथयित्वा
तस्य जननी तस्य नामधेयं याबेषः (दुःखदायकः) इत्यकरोत्। परन्तु १०
याबेष इस्रायेलीयेश्वरं प्रति प्रार्थनां कुर्व्वन् बभाषे हे ईश्वर त्वमेव
मह्यम् आशिषं देहि ममाधिकारं बर्द्धय तव करौ मम सविधौ भवतां
मया यत् कष्टं न लभ्यते तत्कृते तस्मात् माम् अव। तत ईश्वरेण
तस्मै तत् प्रार्थितम् अदायि।

शूहस्य भ्राता यः किलूबस्तस्य तनयो मिहीरः, मिहीरस्य च तनय ११
इष्टोनः। इष्टोनस्य तनया वैतराफा पासेह ईरनाहशस्य जनकस्ति- १२
हिन्नश्च, एते निखिला रेखाहवंशाः। अपरं किनसस्य सन्तानावती- १३
येलः सिरायश्च। अतीयेलस्य तनयौ हथतो मियोनोथयश्च। मियो- १४
नोथयस्य तनयोऽफ्राः, सिरायस्य तनयः शिल्पकरीयप्रान्तस्थलोकानां
जनको योयावः, यतस्ते शिल्पिन आसन्। अपरं यिफुन्नेः पुत्रो यः १५
कालेबस्तस्य तनया ईरु एलाहो नयमश्च। एलाहस्य सुतौ किनसो

१६ यिहल्लिलेलस्य। अपरं यिहल्लिलेलस्य सुताः सीफः सीफाहस्तीरियो
१७ ऽसारेल इस्राहस्य। अपरम् इस्राहस्यापत्यानि येथरो मेरद एफरो या-
लोना च, किन्तु यालोनाया अपत्यानि मरियम् शम्मय इष्टिमोयस्य तातो
१८ यिश्वहस्य। अपरं तस्य जायाया यिहूदीयायाः सुतो गिदोरस्य जनको
येरदः सोखोः पिता हेबरः सानोहस्य जनको यिकूथीयेलस्य। अपरं
स फिरौणो विथियानामिकां यां दुहितरं व्यवहत् तस्याः सुतो मेरदः।
१९ नहयस्य भगिनी या होदियस्य जाया तस्याः सन्तानौ कियीलाः पिता
२० गर्मि माखाथीय इष्टिमोयस्य। अपरं शीमोनस्य सन्ताना अम्नोनो रिन्नो
विन्हाननस्तीलोनो यिश्यिस्य। यिश्येः सुतौ सोहेतो विन्सोहेतस्य।
२१ यिहूदाः सुतस्य शेलाः सन्ताना लेकाहस्य पिता एरो मारेशाः पिता
लादाहो ऽपरम् असवेयवंशीया ये लोकाः सूक्ष्मवसनानि वयुस्तेषां
२२ वंशा योकीमः कोषेबा मानवा योयाशः सारफश्चेतिनामानौ मोया-
२३ वदेशस्य जेतारौ याशूबिलेहमस्य। एताः कथा अतीव पुरातन्यः। इमे
कुम्भकारा आसन् उद्यानेषु प्राचीरविशिष्टस्थानेषु च न्यवसन्, यतस्ते
राज्ञः कार्य्यार्थं तस्य सन्निधौ न्यवसन्।
२४ शिमियोनस्य सन्ताना निमूयेलो यामीनो यारीवः सेरहः शौलस्य।
२५ शौलस्य सन्तानः शल्लुमः, शल्लुमस्य सुतो मिव्समः, मिव्समस्य सुतो
२६ मिश्मः। मिश्मस्य तनयो हमूयेलः, हमूयेलस्य तनयः सक्कूरः, सक्कूरस्य
२७ तनयः शिमयिः। तस्य शिमयेः षोडश तनयाः षट् दुहितरश्चासन्
किन्तु तस्य सहजानां बहवः सुता नासन् तेषां वंशाश्च यिहूदावंश इव
२८ न ववृधिरे। ते बेर्शेवायां मोलादायां हत्सरशियाले वालायाम् एत्समे
२९ तोलदे विथूयेले हर्म्मायां सिक्लगे बैतमर्काबोते हत्सरसूषीमे बैतबिर्य्यां
शारयिमे च समूषुः। दायूदो राजत्वपर्य्यन्तम् एतानि नगराणि तैर-
३२ ध्यक्रियन्त। अपरम् ऐटमम् ऐनं रिम्मोणं तोखेनम् आशनञ्च ग्रामैः
३३ समम् एतानि पञ्च नगराणि तेषामेवासन्। अपरं वालं यावद् एतेषां
नगराणां चतुर्दिक्स्थिताः सकलग्रामाः। तेषां निवासस्थानान्येतानि
वंशावली चैषा।
३४ मिशोववो यम्लेकोऽमत्सियस्य सुतो योशा योयेलोऽसीयेलस्य प्रपौत्रः
३५ सिरायस्य पौत्रो योशिवियस्य पुत्रो येहूः, अपरम् इलियवैनयो याको-
३६ वाहो यिशोहायोऽसायोऽदोयेलो यिषीमीयेलो विनायश्च, किन्तु शिम-
यियस्यातिवृद्धप्रपौत्रः शिम्रे वृद्धप्रपौत्रो यिदयियस्य प्रपौत्रोऽलोनस्य

पौत्रः शिफियेः पुत्रः सीषः। इमे लब्धनामा निजनिजवंशस्याधिपतयो ३८
बहुगोष्ठ्यश्चासन्।

ते स्वेषां पशुव्रजानां चरणयोग्याया भूमेरन्वेषणार्थं गिदोरस्य प्रवेश- ३९
स्थानम् अर्थतः प्रान्तरस्य पूर्व्वपार्श्वं यावत् जग्मुः। ततस्ते बहुतृणाम् ४०
उत्तमां चरणयोग्यभूमिं प्रापुः स च देशः प्रशस्तः शान्तो निर्व्विरोध-
श्चासीत् यस्मात् हाम्वंशीया मनुजाः पूर्व्वं तत्रावसन्। यिहूदादे- ४१
शीयराजस्य हिष्कियस्य राजत्वसमये पूर्व्वलिखितास्ते लोका व्रजित्वा
तेषां मनुजानां दूष्याणि तत्र लब्धान् मियूनीयांश्च विनाश्य निःशेषम्
उच्छिद्दुः। अद्यापि ते तत्र स्थाने निवसन्ति यतस्तत्र स्थाने तेषां
पशुव्रजानां चरणयोग्या भूमि र्व्विद्यते। अपरं तेषां शिमियोनीयवंशस्य ४२
पञ्चशतसंख्यजनाः यिशयेः पुत्रान् पिलटियं नियरियं रिफायम् उषी-
येलञ्च सेनापतीन् विधाय सेयीरं शिलोच्चयं जग्मुः। अपरम् अमा- ४३
लेकीयानां ये ऽवशिष्टा मनुजा जीवन्त आसन् तान् ताडयित्वा तस्मिन्
स्थाने वसतिं कृत्वाद्यापि तत्र निवसन्ति।

---

५ पञ्चमोऽध्यायः।

१ रूबेणस्य वंशावलिः ११ गादस्य वंशावलिः १८ रूबेणीयानां गादीयानां मिनशेर-र्द्धवंशस्य च चरित्रं।

रूबेण इस्रायेलो ज्येष्ठतनय आसीत् परन्तु स निजजनकस्य शय- १
नीयम् अपवित्रं कृतवान् एतत्कारणाद् इस्रायेलः सुतस्य यूषफस्य
सुताभ्यां तस्य ज्येष्ठाधिकारो ऽदीयत किन्तु वंशावल्यां तयो र्नामनी
ज्येष्ठस्य श्रेण्यां न लिलिखाते। यतो यिहूदा निजसहजगणमध्ये बल- २
वत्तमः सन् तस्य पदे प्रधानाधिपतित्वं प्राप तथापि ज्येष्ठाधिकारो
यूषफस्य बभूव। इस्रायेलो ज्येष्ठतनयस्य रूबेणस्य सन्ताना हनोकः ३
पल्लु र्हिष्रोणः कर्म्मिश्च। किञ्च योयेलस्य सुतः शिमयियः,शिमयियस्य सुतो ४
जूजः, जूजस्य सुतः शिमियिः, शिमियेः सुतो मीखाहः, मीखाहस्य ५
सुतो रायाहः, रायाहस्य सुतो वाल्, वालः सुतो वेराहः, स रूबेण- ६
वंशीयानाम् अध्यक्षः सन् अशूरस्य नरपतिना तिग्लतपिलेषरेण प्रावा-
स्यत। यदा तेषां वंशावलिरलिख्यत तदा निजनिजवंशानुसारेण ७
तस्यैते सहजगणा आसन्। मुख्यो यियूयेलो ऽपरः सिखरियः। अपरं ८
योयेलस्य प्रपौत्रः शेमाः पौत्र आससस्य पुत्रो वेलाः, सोऽरोयेरस्य

९ समीपे निवुं वालमियोनञ्च यावद् अवसत्। अपरं पूर्व्वदिशि फरात-
सरितः समीपस्थप्रान्तरस्य प्रवेशस्थानं यावद् वसतिम् अकरोत्, यतो
१० गिलियद्देशे तेषां पशुनिवहस्य बाहुल्यम् अजायत। अपरं शौलस्य
राजत्वसमये ते हाजिरीयैः समं युध्यन्तस्तान् वशीकृत्य गिलियद-
जनपदस्य कृत्स्ने पूर्व्वभागे तेषां दूष्येषु न्यवसन्।
११ अपरं गादवंशीया वाशनजनपदस्थां सल्खां यावत् तेषां सम्मुखे
१२ ऽवसन्। तेषां मध्ये योयेलो मुख्य आसीत् तस्य पश्चात् शाफमः,
१३ अनन्तरं यानयः शाफटश्चेमे वाशनेऽवसन्। किञ्च तेषां पितृवंश-
सम्बन्धीया भ्रातरो मीखायेलो मिशुल्लमः शेवा योरयो याकनः सीय
१४ एवरश्चैते सप्त जना आसन्। अपरं वूषस्य सुतो यहदुः, यहदोः सुतो
यिशीशयः, यिशीशयस्य सुतो मीखायेलः, मिखायेलस्य तनयो गिलियदः,
गिलियदस्य तनयो यारोहः, यारोहस्य तनयो हूरिः, हूरेः सुतो
१५ ऽवीहयिलः, ते तस्यावीहयिलस्य वंशाः। अपरं गूनेः पौत्रो ऽब्दिये-
१६ लस्य सुतो ऽहिस्तेषां पितृवंशस्य मुख्य आसीत्। ते गिलियदे वाशने
१७ तत्रत्येषु ग्रामेषु स्वकीयसीमास्थितस्य शारोणस्य ग्रामेषु चावसन्। अपरं
यिहूदादेशीयस्य योथमस्य इस्रायेल्देशीयस्य यारवियामस्य च राजत्व-
समये तेषां सर्व्वेषां वंशावलिर्लिख्यत।
१८ तत्र रूवेणवंशस्य गादवंशस्य मिनशेरर्द्धवंशस्य च फलकखड्गधनुर्धा-
रिणो युद्धे निपुणा युद्धगामिनश्च सप्तशतषष्ट्यधिकानि चतुश्चत्वारिंशत्-
१९ सहस्राणि जना योद्धार आसन्। हाजिरीयै र्यिटूरेण नाफिशेन
२० नोदवेन च समं तैः समरं कृत्वा तेषां विपरीतम् उपकारो लेभे ततो
हाजिरीयास्तेषां सर्व्वे सहायाश्च तेषां हस्तगता बभूवुः, यतः समरे
तैरीश्वरस्य सन्निधौ प्रार्थनायां कृतायां स तेषां प्रार्थनां शुश्राव यतस्ते
२१ तस्मिन् व्यश्वसन्। अतस्ते तेषां पञ्चाशत्सहस्राणि महाङ्गान् पञ्चाशत्-
सहस्राधिके द्वे लक्षे मेषान् द्वे सहस्रे गर्दभान् लक्षमेकं मनुजान् वशी-
२२ कृत्य लेभिरे। तं समरम् ईश्वर एव कृतवान् एतत्कारणाद् बहवो
ऽहन्यन्त, अपरम् इस्रायेलीयलोका यावन्न प्रावास्यन्त तावत् ते तेषां
२३ देश ऊषुः। अपरं मिनशेरर्द्धवंशस्तस्मिन् जनपदे वाशनम् आरभ्य
वालहर्म्मोणं शिनीरं हर्म्मोणं शिलोच्चयञ्च यावद् वसतिं कुर्व्वन्तो वव-
२४ धिरे। तेषां पितृवंशानां मध्य एते मनुजा मुख्या आसन् एफरो
यिशयिरिलीयेलोऽस्रीयेलो यिरमियो होदवियो यहदीयेलश्चैते बलवन्तो

विख्याताश्च नरा निजनिजपितृवंशस्याध्यक्षा आसन्। परन्तु ते निज- २५
पितृलोकानाम् ईश्वरस्य विरुद्धम् अपराधिनो बभूवुस्तेषां सम्मुखाद्
ईश्वरेण तद्देशीया ये लोका दवयाञ्चक्रिरे तेषां सुरान् अनुगन्तुं विपथ-
गामिनो बभूवुश्च। तस्माद् इस्रायेलीयेनेश्वरेण पूलस्तिग्लतपिलेष- २६
रश्चैतयोरस्सूरीययो भूपत्यो र्मनसि प्रवर्त्तिते तौ तान् रूवेणवंशीयान्
गादवंशीयान् मिनशेरर्द्धवंशस्य लोकांश्च प्रवासयाञ्चक्रतुः किञ्च तान्
हलहं हावोरं हारां गोषणसरितञ्च समानिन्यतुस्ते तत्र स्थाने ऽद्यापि
निवसन्ति।

---

६ षष्ठोऽध्यायः।

१ लेवेर्वंशावलिः ४ इलियासरस्य वंशावलिः १६ गेर्शोनस्य किहातस्य मिरारेश्च वंशावलयः ४९ हारोणवंशस्य कर्म्मणां कथनं ५४ याजकानां लेवीयानाञ्च नगराणां निर्णयश्च।

लेवेः सुता गेर्शोनः किहातो मिरारिश्च। अपरं किहातस्य तनयो १
ऽम्रामो यिस्हरो हिब्रोण उषीयेलश्च। अपरम् अम्रामस्य सन्ताना २
हारोणो मूसा मरियम् च किञ्च हारोणस्य सुता नादवोऽविहूरिलिया-
सर ईथामरश्च।

अपरम् इलियासरस्य तनयः पीनिहसः, पीनिहसस्य सुतो ऽवीशूयः, ४
अवीशूयस्य सुतो वुक्किः, वुक्केः सुत उषिः, उषेः सुतः सिरहियः, सिर- ६
हियस्य सुतो मिरायोतः, मिरायोतस्य सुतो ऽमरियः, अमरियस्य सुतो ७
ऽहीटूवः, अहीटूवस्य सुतः सादोकः, सादोकस्य सुतो ऽहीमासः, अही- ९
मासस्य सुतो ऽसरियः, असरियस्य सुतो योहाननः, योहाननस्य सुतो १०
ऽसरियः, एष असरियो यिरूशालमे सुलेमना निर्म्मिते मन्दिरे ऽयजत।
अपरम् असरियस्य तनयो ऽमरियः, अमरियस्य तनयो ऽहीटूवः, अही- ११
टूवस्य सुतः सादोकः, सादोकस्य सुतः शल्लुमः, शल्लुमस्य सुतो हिल्कियः, १२
हिल्कियस्य सुतो ऽसरियः, असरियस्य सुतः सिरायः, सिरायस्य सुतो १३
यिहोसादकः। यस्मिन् समये परमेश्वरो निवूखद्नित्सरस्य करे यिहूदां १५
यिरूशालमञ्च समर्पयामास तस्मिन् समये एष यिहोसादको वन्दीभूय
जग्मिवान्।

लेवेः सुता गेर्शोनः किहातो मिरारिश्च। अपरं गेर्शोनस्य सुतौ १६
लिव्निः शिमियिश्च। अपरं किहातस्य सुता अम्रामो यिष्हरो हिब्रोण १८

१९ उषीयेलश्च। अपरं मिरारेः सुतौ मह्लि मूंशिश्च। स्वीयस्वीयपूर्व्वपुरु-
२० षानुक्रमेण लेवीया वंशा एते। गेर्शोनस्य सुतो यो लिब्निस्तस्य सुतो
२१ यहतः, यहतस्य सुतः सिम्मः, सिम्मस्य सुतो योयाहः, योयाहस्य सुत
२२ इद्दुः, इद्दोः सुतः सेरहः, सेरहस्य सुतो यियत्रयः। अपरं किहातस्य सुतो
२३ ऽम्मीनादवः, अम्मीनादवस्य सुतः कोरहः, कोरहस्य सुतो ऽसीरः, असी-
रस्य सुत इल्कानाः, इल्कानाः सुतो ऽवीयासफः, अवीयासफस्य सुतो
२४ ऽसीरः, असीरस्य सुतस्तहतः, तहतस्य सुत ऊरीयेलः, ऊरीयेलस्य सुत
२५ उषियः, उषियस्य सुतः शौलः। अपरम् इल्कानाः सुतावमासयो ऽही-
२६ मोतश्च। अपरम् इल्काना अन्यः सुतः सूफः, सूफस्य सुतस्तोहः, तोहस्य
२७ सुत इलीयावः, इलीयावस्य सुतो यिरोहमः, यिरोहमस्य सुत इल्कानाः।
२८ इल्कानाः सुतः शिमूयेलः, शिमूयेलस्य ज्येष्ठः सुतो योयेलो ऽपरो ऽबियः।
२९ किञ्च मिरारेः सुतो मह्लिः, मह्लेः सुतो लिब्निः, लिब्नेः सुतः शि-
३० मियिः, शिमियेः सुत उषः, उषस्य सुतः शिमियः, शिमियस्य सुतो
३१ हगियः, हगियस्य सुतो ऽसायः। मञ्जूषाया अवस्थितेः परं दायूद्
परमेश्वरस्य मन्दिरे यान् जनान् गीतसेवायां न्ययोजयत् तेषां नामानि!
३२ यावत् सुलेमान् यिरूशालमे परमेश्वरस्य मन्दिरं न निरमापयत्
तावत् ते समाजस्य पवित्रावासस्य सम्मुखे गानेन पर्य्यचरन् स्वीयस्वीय-
३३ पर्य्यायानुसारेण च क्रियाम् अन्वतिष्ठन्। ते ऽनुष्ठातारस्तेषां पुत्राश्चेम
आसन्। किहातीयवंशस्य मध्ये हेमनो गायकः, तस्य हेमनस्य जनको
३४ योयेलः, योयेलस्य जनकः शिमूयेलः, शिमूयेलस्य जनक इल्कानाः,
इल्काना जनको यिरोहमः, यिरोहमस्य जनक इलीयेलः, इलीयेलस्य
३५ जनकस्तोहः, तोहस्य जनकः सूफः, सूफस्य जनक इल्कानाः, इल्काना
३६ जनको माहतः, माहतस्य जनको ऽमासयः, अमासयस्य जनक इल्-
कानाः, इल्काना जनको योयेलः, योयेलस्य जनको ऽसरियः, असरि-
३७ यस्य जनकः शिफनियः, शिफनियस्य पिता तहतः, तहतस्य जनको
ऽसीरः, असीरस्य जनको ऽवीयासफः, अवीयासफस्य जनकः कोरहः,
३८ कोरहस्य पिता यिष्हरः, यिष्हरस्य पिता किहातः, किहातस्य पिता
३९ लेविः, लेवे र्जनक इस्रायेल्। हेमनस्य दक्षिणे तस्य भ्रातासफो
ऽतिष्ठत्, तस्यासफस्य जनको बेरिखियः, बेरिखियस्य जनकः शिमियः,
४० शिमियस्य जनको मीखायेलः, मीखायेलस्य जनको बासेयः, बासेयस्य
४१ जनको मल्कियः, मल्कियस्य जनक इत्निः, इत्ने र्जनकः सेरहः, सेरहस्य

जनको ऽदायाः, अदाया जनक एथनः, एथनस्य जनकः सिम्मः, सिम्मस्य ४१
जनकः शिमियिः, शिमिये र्जनको यहतः, यहतस्य जनको गेर्शोनः, गेर्शो- ४२
नस्य जनको लेविः। एतेषाम् एथनादयो मिरारिवंशीया भ्रातरो वाम- ४४
दिश्यतिष्ठन् तस्यैथनस्य जनकः कीशिः, कीशे र्जनको ऽब्दिः, अब्दे र्जनको
मल्लूकः, मल्लूकस्य जनको हशबियः, हशबियस्य जनको ऽमत्सियः, अम- ४५
त्सियस्य जनको हिल्कियः, हिल्कियस्य जनको ऽम्सिः, अम्से र्जनको ४६
बानिः, वाने र्जनकः शेमरः, शेमरस्य जनको महलिः, महले र्जनको ४७
मूशिः, मूशे र्जनको मिरारिः, मिरारे र्जनको लेविः। तेषां भ्रातरो ४८
लेवीया ईश्वरमन्दिरीयावासस्य निखिलकार्य्यार्थं निवेदिता आसन्।
परन्तु हारोणस्तस्य सुताश्च महापवित्रस्थानस्य निखिलकार्य्यानुसा- ४९
राद् होमवेदिधूपवेद्योरुपरि दत्तवस्तून्यदाहयन्; ईश्वरसेवकस्य मूसस
आज्ञानुसाराद् इस्रायेलः कृते प्रायश्चित्तञ्चाकुर्व्वन्। अपरम् एते सर्व्वे ५०
हारोणस्य वंशाः, हारोणस्य सुत इलियासरः, इलियासरस्य सुतः
पिनीहसः, पिनीहसस्य सुतो ऽवीशूयः, अवीशूयस्य सुतो बुक्किः, बुक्केः ५१
सुत उषिः, उषेः सुतः सिरहियः, सिरहियस्य सुतो मिरायोतः, मिरा- ५२
योतस्य सुतो ऽमरियः, ऽमरियस्य सुतो ऽहीटूवः, अहीटूवस्य सुतः ५३
सादोकः, सादोकस्य सुतो ऽहीमासः।
सीमानुसारेण दुर्गानुसारेण च किहातीयान्वयोद्भवानां हारोण- ५४
वंशीयानाम् इमानि वासस्थानानि बभूवुः, यतस्तेषामेव (प्रथमं) गुटि-
कापातो बभूव। चतुर्दिक्स्थप्रान्तरेण समं यिहूदादेशस्थं हिब्रोणं तेभ्यो ५५
ऽदीयत। परन्तु तस्य नगरस्य क्षेत्राणि ग्रामाश्च यिफुन्नेः सुताय काले- ५६
वायादीयन्त। अपरं हारोणवंशाय (यिहूदादेशे) नगराणीमान्यदीयन्त, ५७
आश्रयनगरं हिब्रोणम्, अपरं प्रान्तरेण सह लिव्ना प्रान्तरेण समं
यत्तीरम् इष्टिमोयश्च ? प्रान्तरेण समं हिलेनं प्रान्तरेण समं दिवीरं प्रा- ५८
न्तरेण समम् आशनं प्रान्तरेण समं वैतशेमशश्च। अपरं विन्यामीनवंशे ६०
प्रान्तरेण समं गेवा प्रान्तरेण समम् आलेमतं प्रान्तरेण समम् अनाथो-
तश्च। इत्थं वंशानुसारेण तेषां साकल्येन त्रयोदशनगराण्यासन्। अन- ६१
न्तरं किहातीयवंशस्यावशिष्टेभ्यो मनुजेभ्यो गुटिकापातं विधाय मिनशे-
रर्द्धवंशाद् दशनगराणि प्रादीयन्त। अपरं गेर्शोनीयवंशायेषाखरवंशाद् ६२
आशेरवंशात् नप्तालिवंशाद् वाशनस्थात् मिनशेरर्द्धवंशाच्च त्रयोदश-
नगराणि प्रादीयन्त। किञ्च मिरारिवंशाय रूवेणवंशात् सिवूलूनवंशाच्च ६३

६४ गुटिकापातं विधाय द्वादशनगराणि प्रादीयन्त। अनेन प्रकारेणेस्रायेे-
६५ लीयलोका लेवीयेभ्यो प्रान्तरैः समं तानि निखिलनगराणि ददुः। ते
यिहूदावंशात् शिमियोनवंशाद् विन्यामीनवंशाच्च गुटिकापातेन नग-
राण्येतानि तेभ्यो ददुस्तानि च तेषां नामभि विंख्यातानि भवन्ति।
६६ अपरं किहातीयवंशस्यावशिष्टा मनुजा इफ्रयिमवंशात् स्वस्वसीमा-
६७ नगराणि लेभिरे। ते तेभ्य आश्रयनगरमेकम् अर्थतः प्रान्तरेण समम्
६८ इफ्रयिमशिलोच्चयस्थं शिखिमं प्रान्तरेण समं गेषरं, प्रान्तरेण समं
६९ यग्मियामं प्रान्तरेण समं वैथोरोणं, प्रान्तरेण समम् अयालोनं प्रान्त-
७० रेण समं गातरिम्मोणं, मिनशेरर्द्धवंशात् प्रान्तरेण समम् अनेरं प्रान्त-
रेण समं यिव्लियमञ्चेमानि नगराणि किहातीयवंशस्यावशिष्टेभ्यो मनु-
७१ जेभ्यो ददुः। अपरं गेर्श्शोनीयवंशाय मिनशेरर्द्धवंशात् प्रान्तरेण समं
७२ वाशनस्थं गोलनं प्रान्तरेण समम् अस्तारोतञ्चादीयत। अपरम् इषा-
७३ खरवंशात् प्रान्तरेण समं केदशं प्रान्तरेण समं दाविरतं, प्रान्तरेण समं
७४ रामोतं प्रान्तरेण समम् आनेमञ्च तेभ्योऽदीयत। अपरम् आशेरवंशात्
७५ प्रान्तरेण समं मिशालं प्रान्तरेण समम् अब्दोनं, प्रान्तरेण समं ऊक्कोकं
७६ प्रान्तरेण समं रिहोवञ्च तेभ्योऽदीयत। अपरं नप्तालिवंशात् प्रान्तरेण
समं गालीलस्थं केदशं प्रान्तरेण समं हम्मोनं प्रान्तरेण समं किरिया-
७७ थयिमञ्च तेभ्योऽदीयत। अपरं मिरारेरवशिष्टवंशाय सिवूलूनवंशात्
७८ प्रान्तरेण समं रिम्मोणं प्रान्तरेण समं तावोरञ्चादीयत। अपरं यिरीहोः
समीपे यर्द्दनस्य पारेऽर्थतो यर्द्दनस्य पूर्व्वदिशि रूवेणवंशात् प्रान्तरेण
७९ समं काननस्थं वेत्सरं प्रान्तरेण समं यहसं, प्रान्तरेण समं किदेमोतं
८० प्रान्तरेण समं मेफातञ्च तेभ्योऽदीयत। अपरं गादवंशात् प्रान्तरेण समं
८१ गिलियदस्थं रामोतं प्रान्तरेण समं मह्नयिमं, प्रान्तरेण समं हिश्बोनं
प्रान्तरेण समं यासेरञ्च तेभ्योऽदीयत।

---

७ सप्तमोऽध्यायः।

१ इषाखरस्य वंशावलिः ६ विन्यामीनस्य वंशावलिः १३ नप्ताले वंशावलिः १४ मिनशे वंशावलिः २० इफ्रयिमस्य वंशावलिः ३२ सावदस्य वंशावलिः २८ तेषाम् अधिकारः ३० आशेरस्य वंशावलिश्च।

१ इषाखरस्य सुतास्तोलयः पूयो याशूवः शिम्रोणश्चैते चत्वारो जनाः।
२ अपरं तोलयस्य सुता उषिः रिफायो यिरीयेलो यह्मयो यिव्समः

शिमूयेलश्च । इम स्वीयपितृवंशस्यार्थतस्तोलयवंशस्य मुख्या निजलो-
कानां मध्ये पराक्रान्ताश्चासन् अपरं दायूदः समये ते संख्यया षट्-
शताधिकद्वाविंशतिसहस्राणि लोका आसन् । अपरम् उषेः सुतो ३
यिम्राहियः, यिम्राहियस्य तनया मीखायेल ओवदीयो योयेलो यिशिय-
श्चैते पञ्च जना मुख्या आसन्। अपरं युद्धार्थं तेषां पितृवंशानुसारेण ४
षट्त्रिंशत्सहस्राणि सैन्यान्यासन् यतस्तेषां जाया सुताश्चानेक आसन् ।
अपरम् इषाखरवंशीयास्तेषां भ्रातरः सर्व्वे महापराक्रमिण आसन् ५
ते निजनिजवंशानुसारेण गणिताः सप्ताशीतिसहस्राणि लोका आसन्।
अपरं विन्यामीनस्य सुता वेला वेखरो यिदीयेलश्चैते त्रयो जनाः। ६
अपरं वेलाः सुता इष्वोन उषिरुषीयेलो यिरेमोत ईरश्च । एते ७
पञ्च जना निजनिजपितृवंशे मुख्याः पराक्रमिणश्चासन् । वंशानुसारेण
गणितास्तेषां द्वाविंशतिसहस्राणि लोका आसन्। अपरं वेखरस्य तनयाः ८
शिमीरो योयाश इलियेसर इलीयवैनयो ऽम्रि यिरेमोतो ऽवियो ऽना-
थोत आलेमतश्चैते वेखरस्य सन्तानाः। तेषां पितृवंशीयमुख्यलोकानां ९
वंशावली गणिता विंशतिसहस्राणि द्वे शते पराक्रमिणो लोका लि-
खिता आसन् । अपरं यिदीयेलस्य सुतो विल्हनः, विल्हनस्य सुता १०
यियूशो विन्यामीन एहूदः खिनानाः सेथनस्तर्शीशो ऽहीशहरश्च ।
यिदीयेलस्यैते निखिलाः सन्ताना निजनिजपितृवंशानां मुख्याः परा- ११
क्रमिणो लोका आसन्। अपरं तेषां समरगमनयोग्या द्विशताधिक-
सप्तसहस्राणि योद्धार आसन्। अपरम् ईरस्य सुतौ शुप्पीमो ऊप्पी- १२
मश्च, अहेरस्य च सुतो हूशीमः ।

अपरं विल्हाया गर्भजातस्य नप्तालेः सुता यहसियेलो गूनि येत्सरः १३
शल्लूमश्च ।

मिनशेः सुतावस्रियेलो ऽरामीयाया उपपत्न्या जातो गिलियदस्य १४
पिता माखीरश्च । स माखीरो ऊप्पीमशुप्पीमयोर्भगिनीं माखाम् उदु- १५
वाह तस्य द्वितीयपुत्त्रस्य नाम सिलफाद आसीत् तस्य सिलफादस्य
केवलं दुहितर आसन्। अपरं माखीरस्य जाया माखा पुत्त्रं प्रसूय १६
तस्य नाम पेरश इति चकार, तस्य सहोदरस्य नाम शेरशः, अपरं
पेरशस्य सुतयोर्नामनी ऊलमो रेकमश्च । ऊलमस्य सुतो विदानः, १७
मिनशेः पौत्त्रो माखीरस्य पुत्त्रो गिलियद एतेषां सर्व्वेषाम् आदिपुरुष
आसीत्। अपरं तस्य भगिन्या हम्मोलेकतायाः सुता इश्होदो ऽवीये- १८

१९ सरो मह्लाः शिमीदाश्च। अपरं शिमीदाः सुता अहीयनः शेखमो
लिक्हिरनीयामश्च।

२० इफ्रयिमस्य सुतः शूथलहः, शूथलहस्य सुतो वेरदः, वेरदस्य सुतस्त-
२१ हतः, तहतस्य सुत इलियादाः, इलीयादाः सुतस्तहतः, तहतस्य सुतः
सावदः, सावदस्य सुताः शूथेलह एत्सर इलियादश्च, परन्तु देशनि-
वासिनो गातीया लोकास्तान् अवधिषुः, यतस्ते तेषां पशून् नेतुम्
२२ आजग्मुः। ततस्तेषां जनक इफ्रयिमो बहुदिनानि यावद् अशोचत्
तस्य भ्रातरश्च तं सान्त्वयितुम् आगच्छन्।

२३ अनन्तरं तस्मिन् निजभार्य्यामुपगते तस्य जाया गर्भवती भूत्वा पुत्र-
मेकं प्रसूय तस्य नाम विरियम् (अमङ्गलमिति) चकार यतस्तदानीं तस्य
२४ निवेशने ऽमङ्गलम् अभवत्। तस्य दुहिता शीरा चोपरिस्थं नीचस्थञ्च
२५ वैथोरोणम् उषेणशीराञ्च निर्म्मापयामास। तस्य सुतौ रेफहरेशफौ,
२६ रेशफस्य सुतस्तेलहः, तेलहस्य सुतस्तहनः, तहनस्य सुतो लादनः,
२७ लादनस्य सुतो ऽम्मीहूदः, अम्मीहूदस्य सुत इलीशामाः, इलीशामाः
सुतो नूनः, नूनस्य सुतो यिहोशूयः।

२८ एतैरधिकृतानि देशनिवासस्थानानि चेमानि, बैथेलं तदीयग्रामाश्च,
अपरं पूर्व्वस्यां दिशि नारणं पश्चिमायां दिशि च गेषरं तदीयग्रामाश्च
२९ शिखिमं तदीयग्रामाश्च, असा तदीमग्रामाश्च। अपरं मिनशिवंशस्य
सीमायाः समीपस्थं वैतशानं तदीयग्रामाश्च तानकं तदीयग्रामाश्च मगि-
द्दुस्तदीयग्रामाश्च दोरं तदीयग्रामाश्च। एतेषु स्थानेष्विस्रायेलः पुत्रस्य
यूषफस्य वंशा न्यूषुः।

३० आशेरस्यापत्यानि यिम्नो यिश्वो यिश्वि विरियस्तेषां भगिनी सेरहा
३१ च। विरियस्य तनयौ हेवरो विर्षैतस्य पिता मल्कियेलश्च। हेवरस्या-
३२ पत्यानि यफ्लेटः शेमरो होथमस्तेषां भगिनी शूया च। यफ्लेटस्य
३३ सुताः पासको विम्हलोऽश्वतश्च, एते सर्व्वे यफ्लेटस्य वंशाः। अपरं
३४ शेमरस्य सुता अहिः रोहगो यिहब्बो ऽरामश्च। अपरं तस्य भ्रातुर्हेल-
३५ मस्य सुताः सोफहो यिम्नः शेलश आमलश्च। सोफहस्य च सुताः
३६ सूहो हर्णेफरः शियालो वेरि यिम्रो वेत्सरो होदः शम्मः शिल्शो
३७ यित्रणो वेराश्च। अपरं येथरस्य सुता यिफुन्निः पिस्पो ऽराश्च। अपरम्
४० उल्लस्य सुता आरहो हन्नीयेलो रित्सियश्च। एते सर्व्वे आशेरस्य वंशाः
स्वीयपितृवंशानां मुख्या महाविक्रान्ताश्च मनुजा अधिपतीनां मध्ये

अयाश्वासन् एतेषां समरगमनयोग्याः षड्विंशतिसहस्राणि लोका
वंशावली लिखिता आसन्।

---

८ अष्टमोऽध्यायः।

१ विन्यामीनस्य प्रधानापत्यानां वंशावलिः ३३ शैालयोनाथनयो वंशावलिश्च।

विन्यामीनस्य ज्येष्ठः सुतो वेला द्वितीयोऽस्वेलस्तृतीयो ऽहर्हश्चतुर्थो १
नोहाः पञ्चमो राफाः। अपरं वेलाः सुता अद्दरो गेरा अवीहूदो ऽवी- २
शूयो नामानो ऽहोहो गेराः शिफूफनो हूरमश्च। इम एहूदस्य सुता ६
गेवानिवासिनां मध्ये पितृवंशानां मुख्याश्चासन् अनन्तरं ते तान् मान-
हतं स्थानान्तरं निन्युः। विशेषतो नामानो ऽहियो गेराश्च, स एव ७
तान् दूरीचकार, तस्य गेराः सुता उषो ऽहीहूदः शहरयिमश्च। अपरं ८
तेषु स्थानान्तरीकृतेषु शहरयिमो मोयावजनपदे सुतान् जनयामास
तस्य ऊशीमा वारा चेतिनामिके द्वे जाये आसन्। अपरं निजभा- ९
र्य्याया होदशाया गर्भजातास्तस्य तनया योवबः सिवियो मेशा मल्कमो
यियूशः शखियो मिर्मश्च तस्यैते सुता निजपितृवंशानां मुख्या आसन्। १०
अपरं हूशीमाया गर्भजातो तस्य सुतावबीटूव इल्पालश्च। तस्येल्पा- १२
लस्य सुता एवरो मिशियम शेमो लोदस्य तदन्तःपातिग्रामाणाञ्च नि-
र्म्माता शामदश्च। अपरं विरियः शेमाश्चैतावयालोनिवासिनां मध्ये पि- १३
तृवंशानां मुख्यावास्तां तो गातनिवासिनो दवयाञ्चक्राते। अपरं वेरियस्य १४
सुता अहियुः शाशको यिरेमोतः सिवदियो ऽराद एदरो मीखायेलो १६
यिश्पा योहश्च। अपरम् इल्पालस्य सुताः सिवदियो मिशुल्लमो हिष्कि- १७
र्हेवरो यिश्मिरयो यिष्लियो योवबश्च। अपरं शिमियेः सुता याकीमः १९
सिखिः सब्दिः इलीयवैनयः सिल्लियय इलीयेलोऽदाया विरायाः शि- २१
म्नतश्च। अपरं शाशकस्य सुता यिश्पन एवर इलीयेलो ऽब्दीनः २२
सिखि र्हाननो हनानिय एलमो ऽन्तोथियो यिफिदियः पिनूयेलश्च। २५
अपरं यिरोहमस्य सुताः शम्शिरयः शिहरियो ऽथलियो यारिशिय २६
एलियः सिखिश्च। एते स्वीयपितृवंशानां मुख्याः सन्तो यिरूशालमे २८
न्यवसन्। अपरं गिवियोनस्य जनको गिवियोने न्यवसत्, तस्य जायाया २९
नाम माखा। अपरं तस्य ज्येष्ठः सुतो ऽब्दोनो ऽपराः सूरः कीशो वाल् ३०
नादवो गिदोरो ऽहियुः सक्कूरो मिल्कोतश्च, मिल्कोतस्य च सुतः शि- ३१
मियः, एते यिरूशालमे स्वीयभ्रातृणां समीपे न्यवसन्।

३३ नेरस्य सुतः कीशः, कीशस्य सुतः शौलः, शौलस्य सुता योनाथनो
३४ मल्कीशूयो ऽवीनादव इश्बाल् च। अपरं योनाथनस्य सुतो मिरीवाल्,
३५ तस्य च तनयो मीखाः। अपरं मीखाः सुताः पिथोमो मेलकस्तहरेय
३६ आहसश्च। आहसस्य सुतो यिहोयादाः, यिहोयादाः सुता आलेमतो
३७ ऽस्मावतः सिम्रिश्च, सिम्रेः सुतो मोत्साः। मोत्साः सुतो विनियाः, वि-
नियाः सुतो राफाः, राफाः सुत इलीयासाः, इलीयासाः सुत आत्सेलः।
३८ तस्यात्सेलस्य षट् सुता बभूवुः, तेषां नामान्यस्रीकामो वोखिरुः इस्मा-
३९ येलः शियरिय ओवदियो हाननश्चैते सर्व्वे आत्सेलस्य वंशाः। अपरं
तस्य भ्रातुरेशकस्य ज्येष्ठः सुत उलमः, द्वितीयो यियूशस्तृतीय एलीफेलटः।
४० अपरम् उलमस्य सुता महाविक्रमा धनुर्धरा बहुप्रजाश्चासन् तेषां
सार्द्धशतं पुत्त्रपौत्त्रा आसन् एते सर्व्वे विन्यामीनस्य वंशाः।

---

९ नवमोऽध्यायः।

१ वंशावलिलिखनस्य कथनं २ वाविलः प्रत्यागतलोकानां कथनं १० याजकानां लेवीयानाञ्च कथनं २७ लेवीयानां विशेषकर्म्मणां कथनं ३५ शौलस्य चरित्रञ्च।

१ अनेन प्रकारेण कृत्स्नस्रेस्रायेलो वंशावलयो रचयाञ्चक्रिरे इस्राये-
लीयभूपतीनां पुस्तके लिलिखिरे च। अनन्तरं यिहूदीयमनुजाः स्वस्व-
दोषेण वाविलं निन्यिरे।
२ अनन्तरम् इस्रायेल्जनपदे याजका लेवीया निथीनीयाश्च प्रथमं
३ स्वीयस्वीयाधिकृतनगरेषु न्यवसन्। अपरं यिरूशालमे यिहूदावंशस्य
विन्यामीनवंशस्येफ्रयिमवंशस्य मिनशिवंशस्य च कतिपया मनुजा न्यव-
४ सन्। यिहूदाः सुतो यः पेरषस्तस्य वंशस्य मध्ये वाणेर्वृद्धप्रपौत्त्र इम्रेः
५ प्रपौत्त्रो ऽम्रेः पौत्त्रो ऽम्मीहूदस्य सुत ऊथयः। अपरं शीलोनीयानां
६ मध्ये ज्येष्ठो ऽसायस्तस्य पुत्त्राश्च। अपरं सेरहवंशस्य मध्ये यूयेलस्तस्य
७ नवत्यधिकषटशतानि भ्रातरश्च। अपरं विन्यामीनवंशस्य मध्ये हसि-
८ नुयस्य प्रपौत्त्रो होदवियस्य पौत्त्रो मिशुल्लमस्य पुत्त्रः सल्लुः, अपरं यि-
रोहमस्य पुत्त्रो यिव्नियः, मिख्रेः पौत्त्र उषेः पुत्त्र एलाः, यिव्नियस्य
९ प्रपौत्त्रो रूयेलस्य पौत्त्रः शिफटियस्य सुतो मिशुल्लमश्च। एते तेषां
भ्रातरश्च निजनिजवंशानुसारेण षटपञ्चाशदधिकनवशतानि मानवा
आसन्। इमे निखिलाः स्वीयस्वीयवंशस्य मुख्या आसन्।
१० अपरं याजकानां मध्ये यिदयियो यिहोयारीवो याखिनश्च, अपरम्

ईश्वरीयमन्दिरस्याधिपति र्यो ऽहीटूवस्तस्यातिवृद्धप्रपौत्रो मिरायो- ११
तस्य वृद्धप्रपौत्रः सादोकस्य प्रपौत्रो मिशुल्लमस्य पौत्रो हिल्कियस्य पुत्रो
ऽसरियः, अपरं मल्कियस्य प्रपौत्रः पश्हूरस्य पौत्रो यिरोहमस्य १२
पुत्रो ऽदायाः, अपरम् इम्मेरस्यातिवृद्धप्रपौत्रो मिशिल्लेमोतस्य वृद्ध-
प्रपौत्रो मिशुल्लमस्य प्रपौत्रो यहसेराः पौत्रो ऽदीयेलस्य पुत्रो मासयः,
अपरं तेषां षष्ट्यधिकसप्तशताधिकसहस्रं भ्रातरः, ते निजनिजपि- १३
तृवंशस्य मुख्या ईश्वरीयमन्दिरस्य कर्म्म कर्त्तुम् अतिनिपुणाश्चासन्।
लेवीयानां मिरारिवंशस्य मध्ये हशवियस्य प्रपौत्रो ऽस्रीकामस्य पौत्रो १४
हस्सूवस्य पुत्रः शिमयियः। अपरं वक्वकरो हेरशो गालल आसफस्य १५
प्रपौत्रः सिख्रेः पौत्रो मीखाः पुत्रो मत्तनियश्च, अपरं यिदूथूनस्य १६
प्रपौत्रो गाललस्य पौत्रः शिमयियस्य पुत्र ओवदियः, अपरम् इल्-
कानाः पौत्र आसाः पुत्रो निटोफातीयानां ग्रामेषु वासकारी वेरिखियः।
अपरं द्वारिणः शल्लूमोऽक्कूवः टल्मोनोऽहीमानस्तेषां सहजाश्च किन्तु १७
शल्लूम एतेषां मुख्य आसीत्। ते पूर्व्वदिक्स्थिते राजद्वारे ऽतिष्ठन् अपरं १८
लेविवंशसमूहस्य मध्ये द्वारपाला आसन्। अपरं कोरहस्य प्रपौत्रो १९
ऽवीयासफस्य पौत्रः कोरेः पुत्रः शल्लुमस्तस्य पितृवंशीयाः कोरहीया
भ्रातरश्च सेवाकर्म्मणि नियुक्ता आसन्। यस्मिन् समये परमेश्वरस्य २०
साहाय्यं प्राप्त इलीयासरस्य तनयः पीनिहसस्तेषाम् अध्यक्ष आ-
सीत् तस्मिन् पूर्व्वस्मिन् समये यादृक् तेषां पितृलोकाः परमेश्वरीय-
शिविरस्य प्रवेशस्थानम् अरक्षन् तादृग् इमे मन्दिरस्य द्वाररक्षा-
कर्म्मणि नियुक्ता आसन्। मिशेलिमियस्य तनयः सिखरियः समाजी- २१
यावासस्य द्वारपालक आसीत्। द्वारपालनकार्य्ये नियुक्ता इमे मनुजा २२
द्वे शते द्वादशजना आसन्; अपरं निजनिजग्रामानुसारेण तेषां वंशाव-
लयोऽलिख्यन्त दायूद् शिमूयेलश्च प्रदर्शकस्तान् एतस्मिन् निरूपिते कार्य्ये
नियोजयामासतुः। अतस्ते तेषाम् अपत्यानि च परमेश्वरीयमन्दिरस्यावा- २३
सस्य वा द्वारपालनकर्म्मणि पर्य्यायानुक्रमेण न्ययुज्यन्त। एते द्वारपा- २४
लकाः पूर्व्वस्यां पश्चिमायाम् उत्तरस्यां दक्षिणस्यां चेति चतुर्दिक्ष्वतिष्ठन्।
अपरं ग्रामस्थास्तेषां सहजाः स्वस्वसमये सप्ताहं यावत् तेषां सविधं समा- २५
गच्छन्। यतो लेवीयानां मध्ये चत्वारो मुख्या द्वारपालकाः स्वीयस्वीय- २६
निरूपितपदे नित्यं तिष्ठन्तः परमेश्वरीयमन्दिरस्य कोष्ठानां भाण्डागा-
राणाञ्चाधिपा आसन्।

२७ रक्षकपदे नियुक्तास्ते जना रात्रावीश्वरीयमन्दिरस्य चतुर्दिक्ष्वशेरत
२८ प्रतिप्रभातञ्च द्वारममोचयन्। अपरं तेषां कतिपया मनुजाः सेवार्थ-
कानि भाजनानि रक्षितुं गणयित्वा वहिरन्तः समानेतुञ्च नियुक्ता
२९ आसन्। अपरं पवित्रस्थानस्य पात्राणि गोधूमचूर्णानि गोस्तनीरसा-
स्तैलानि कुन्दुरूणि गन्धद्रव्याणि चेत्यादीनि सर्व्वद्रव्याणि रक्षितुं वीक्षि-
३० तुञ्च तेषां कतिपया नरा नियुक्ता आसन्। अपरं कतिपया याजकसुता
३१ गन्धद्रव्यार्थकं तैलं निर्म्मितवन्तः। अपरं लेवीयानां मध्ये कोरहीयस्य
शल्लुमस्य ज्येष्ठः सुतो मत्तथियः पाकस्थानीयकर्म्मणो ऽध्यक्ष आसीत्।
३२ अपरं तेषां किहातीयभ्रातॄणां मध्ये कतिपया जनाः प्रतिविश्रामवारं
३३ दर्शनपूपानां स्थापने नियुक्ता आसन्। अपरं लेवीयानां प्रधानपितृ-
लोका ये गायकास्ते कोष्ठीयकर्म्मणो मुक्ता अभवन् यतस्ते दिवानिशं
३४ तस्मिन् कर्म्मणि प्रवृत्ता आसन्। इमे पुरुषपरम्परायां लेवीयानां मध्ये
वंशानां मुख्या लोका आसन्, स्वस्ववंशानां मुख्याः सन्त इमे यिरूशालमे
न्यवसन्।

३५ अपरं गिबियोनस्य जनको यियीयेलो गिबियोने न्यवसत् तस्य
३६ जायाया नामधेयं माखा आसीत्। तस्य ज्येष्ठः सुतो ऽब्दोनो ऽपरे च
३७ सुताः सूरः कीशो वाल् नेरो नादबो गिदोरो ऽहियुः सिखरियो
३८ मिक्लोतश्च। अपरं मिक्लोतस्य सुतः शिमियामः, एते स्वेषां सहजैः समं
३९ यिरूशालमे न्यवसन्। अपरं नेरस्य सुतः कीशः, कीशस्य सुतः शौलः,
४० शौलस्य सुता योनाथनो मल्कीशूयो ऽबीनादब इश्बाल् च। अपरं
४१ योनाथनस्य सुतो मिरीबाल्, मिरीबालः सुतो मीखाः, मीखाः सुताः
४२ पीथोनो मेलकस्तहरेय आहसश्च। आहसस्य सुतो यारः, यारस्य
४३ सुता आलेमतो ऽस्मावतः सिम्रिश्च, सिम्रेः सुतो मोत्साः। मोत्साः पुत्रो
बिनियाः, बिनियाः सुतो रिफायः, रिफायस्य सुत इलियासाः, इलि-
४४ यासाः सुत आत्सेलः। आत्सेलस्य षट् सुता आसन्, तेषां नामान्यस्त्रि-
कामो बोखिरुः इस्मायेलः शियरिय ओवदियो हाननश्चैते सर्व्वे
आत्सेलस्य सुताः।

---

१० दशमोऽध्यायः।

१ शौलस्य पराजितत्वं ८ पिलेष्टीयानां जयः ११ याबेशगिलियदीयलोकानां प्रगल्भता १३ पापकारणात् शौलस्य निधनस्य कथनं।

इस्रायेल्वंशेन समं पिलेष्टीयेषु युध्यत्सु इस्रायेल्वंशः पिलेष्टीयानां १
सम्मुखात् पलायाञ्चक्रे गिल्बोयपर्व्वते च लोकास्तैराहताः सन्तो नि-
पेतुः। अपरं पिलेष्टीयाः शौलं तस्य पुत्रांश्च प्राप्य योनाथनो ऽवीना- २
दवो मल्कीशूयश्चेतिनामकान् शौलस्य पुत्रान् जघ्नुः। अपरं शौलमधि ३
घोरतरे संग्रामे जाते धनुर्धारिषु च तं प्रति शरान् निक्षिपत्सु स धनु-
र्धारिभिः क्षताङ्गीकृतः। ततः शौलो निजास्त्रवाहिनं जगाद, त्वं स्वखड्गं ४
निष्कोषं कृत्वा मां छिन्धि नो चेद् अच्छिन्नत्वच एत आगत्य ममा-
पमानं करिष्यन्ति। किन्तु तस्यास्त्रवाहकोऽतीव भयकारणात् तत्
कर्त्तुम् ऊररी न चकार, तस्मात् शौलः खड्गं गृहीत्वा स्वयं तदुपरि
निपपात। ततः शौलो मृतवानिति वीक्ष्य तस्यास्त्रवाहकोऽपि निजखड्गो- ५
परि निपतन् ममार। अनेन प्रकारेण शौलस्तस्य त्रयः पुत्राः कृत्स्नवंशश्च ६
सर्व्वे युगपद् अम्रियन्त।

अनन्तरं समभूमिनिवासिन इस्रायेलीयलोका इस्रायेलीयानां पला- ७
यनं शौलस्य तस्य पुत्राणाञ्च मरणमपि वीक्ष्य स्वस्वनगराणि परित्यज्य
पलायाञ्चक्रिरे, ततः पिलेष्टीया आगत्य तेषां मध्ये न्यवसन्।

परदिवसे पिलेष्टीया हतमनुष्याणां वस्त्रादीन्यपहर्त्तुम् आगत्य ८
गिल्बोयपर्व्वते शौलस्य तस्य त्रयाणां पुत्राणाञ्च देहान् प्राप्य तस्य ९
वस्त्रादीनि मोचयित्वा तस्य मस्तकं सज्जाश्च नीत्वा स्वेषां देवानां लोका-
नाञ्च समीपे वार्त्तां घोषयितुं पिलेष्टीयानां देशस्य चतुर्दिशं दूतान्
प्रेषयामासुः। अपरं ते तस्य सज्जां स्वकीयदेवताया मन्दिरे निदधिरे १०
तस्य शिरश्च दागोनस्य मन्दिरमध्य उल्लम्बयामासुः।

अनन्तरं शौलं प्रति पिलेष्टीयानां तस्यापकारस्य वार्त्तायां यावेश- ११
गिलियदनिवासिभि र्लोकैः श्रुतायां सर्व्वे बलवन्तो लोका उत्थाय १२
शौलस्य तस्य पुत्राणाञ्च शरीराणि वहन्तो यावेशम् आनीय तेषाम्
अस्थीनि यावेशस्थस्य कस्यचिद् आलोनतरो र्मूले भूमौ पोथयामासुः।
अनन्तरं ते सप्तदिनानि यावद् उपवासं चक्रिरे।

शौलः परमेश्वरस्याज्ञां लङ्घित्वा परमेश्वरस्य विरुद्धम् अपराधं १३
कृतवान् अपरं तत्त्वं वेत्तुं भूतं पृष्टवान् इति कारणात् ममार। स १४
परमेश्वरं न पृष्टवान् इति हेतोस्तेन जघ्ने तस्य राजत्वञ्च यिशयस्य सुते
दायूदि समर्पयाञ्चक्रे।

११ एकादशोऽध्यायः।

१ हिब्रोणे दायूदो राजत्वप्राप्तिः ४ यिरूशालमस्य जयकरणं १० प्रथमानां त्रयाणां प्रधानसेनापतीनां कथनं १५ तेषां कर्म्माणि २० द्वितीयानां त्रयाणां प्रधानसेनापतीनां कथनं २६ प्रधानलोकानां नामानि च।

१ अनन्तरम् इस्रायेलः सर्व्वे वंशा हिब्रोणे दायूदः समीपं समागत्य
२ निवेदयामासुः पश्य वयं तव कीकशमांसानि। अपरं पूर्व्वं यदा शौलो
ऽस्माकं राजासीत् तदापि त्वमेवेस्रायेलं वहिरभ्यन्त गमनागमने
ऽकारयः। अपरं ममेस्रायेल्लोकानां पालकेनाग्रगण्येन च त्वया भवि-
३ तव्यमिति त्वं परमेश्वरेणोक्तः। इत्थम् इस्रायेलः सकलप्राचीनलोकेषु
हिब्रोणे राज्ञः समीपम् आगतेषु दायूदा नृपेण हिब्रोणे परमेश्वरस्य
साक्षात् तैः साकं नियमोऽकारि परमेश्वरस्य शिमूयेलेन यद् वाक्यं
कथितवान्, तदनुसारात् ते दायूदम् इस्रायेलो राज्ये ऽभिषिषिचुः।
४ अपरं दायूद् निखिला इस्रायेल्मानवाश्च यिरूशालमम् अर्थतो
५ यिवूषं जग्मुः, तदानीं देशे जाता यिवूषीयास्तत्र स्थाने न्यवसन्। ततो
यिवूषनिवासिनो दायूदम् अवादिषुः, एतत् स्थानं प्रवेष्टुं त्वया न
शक्ष्यते, तथापि दायूद् सियोनं दुर्गम् अर्थतो दायूद्नगरं वशीचकार।
६ दायूद् कथयामास, यो जनो ऽग्रे यिवूषीयान् हनिष्यति स प्रधान-
सेनापति र्भविष्यति। ततः सिरूयायाः सुतो योयावः प्रथमगमनात्
७ प्रधानसेनापति र्बभूव। अपरं दायूद् तस्मिन् दुर्गे उवास, तेन लोका-
८ स्तदीयं नाम दायूद्नगरं चक्रवांसः। अपरं स चतुर्दिक्ष्वर्थतो मिल्लुम्
आरभ्य चतुर्दिक्षु दायूदो नगरस्य जीर्णोद्धारं चकार योयावश्च नगर-
९ स्यावशिष्टानां स्थानानां जीर्णोद्धारं चकार। अनन्तरं दायूद् क्रमशो
वर्द्धमानो महान् बभूव सैन्याध्यक्षः परमेश्वरस्य तस्य सहायस्तस्थौ।
१० इस्रायेलमधि परमेश्वरस्य वाक्यानुसारेण दायूदं राजानं कर्त्तुं दायूद
एते पराक्रमिणो मनुजा निखिलेस्रायेलीयैः साकं राजत्वे तस्य प्रबलाः
११ सहकारिणो बभूवुः। दायूदः प्रधानमनुजानाम् एषा गणना। प्रथमानां
त्रयाणां जनानां प्रधानं हक्मोनीयो याशवियामः, स त्रयाणां शतानां
१२ लोकानां विरुद्धं शूलं धृत्वा तान् युगपद् अवधीत्। अपरम् अहोही-
यस्य दोदयस्य तनय इलीयासरोऽपि तेषां त्रयाणां पराक्रमिणां मध्ये
१३ एको जन आसीत्। स एफषदम्मीमे दायूदा समम् आसीत् तस्मिन्

स्थाने कस्यचिद् यवक्षेत्रस्य समीपे पिलेष्टीयेषु समरार्थं मिलितेषु यदा
लोकाः पिलेष्टीयेभ्यः पलायन्त तदानीम् इमे तत्क्षेत्रमध्ये तिष्ठन्तस्त- १४
दरक्षन् पिलेष्टीयांश्च न्यघ्नन् ततः परमेश्वरो महाजयं कारयामास।

त्रिंशत्प्रधानलोकानां मध्ये त्रयो जना एते दुराक्रमणस्थानेऽर्थतोऽदु- १५
ल्लमगुहायां दायूदः समीपम् आगच्छन्, तदा पिलेष्टीयानां निवहो १६
रिफायिमतलभूमौ शिबिरं स्थापयाञ्चकार वैतलेहमेऽपि पिलेष्टीयानां
सैन्यवृन्दम् एकम् आसीत्। अपरं दायूद् दुराक्रमणस्थाने वसन् १७
पिपासितो भूत्वा जगाद हा हा वैतलेहमस्य गोपुरसमीपस्थात् प्रहेः
पानीयम् आनीय को मां पाययिष्यति? ततस्ते त्रयो नराः पिलेष्टीयानां १८
शिबिरमध्येन गत्वा वैतलेहमस्य गोपुरसमीपस्थात् प्रहेः पानीयम्
उत्तोल्य गृहीत्वा दायूदः सविधम् आगच्छन् किन्तु दायूद् तत् पातुं
नैच्छत्, स परमेश्वरमुद्दिश्य तत् तोयं निचिक्षेप। वाक्यमिदं बभाषे च १९
हे मदीश्वर, एतादृशं कर्म्म नाहं करिष्ये प्राणपणेन गतवताम् एतेषां
नराणां रुधिरं किं मया पास्यते? यत इमे निजप्राणपणेन तोयमेतद्
आनीतवन्तः। अतो हेतोः स तत् पातुं नैच्छत्। ते तु त्रयो बलिनो
जनास्तत् कर्म्म चक्रुः।

अपरं योयावस्य सहोदरोऽवीशयो (द्वितीयस्य) नरत्रयस्य मध्ये मुख्य २०
आसीत्। स शतत्रयाणां लोकानां विरुद्धं शूलं धृत्वा तान् विनाश्य
त्रयाणां मध्ये लब्धनामा बभूव। स किं तेषां त्रयाणां मध्येऽन्यद्वाभ्यां २१
मान्यो नहि? तस्मात् स तेषां सेनापतिर्बभूव तथापि स प्रथमानां
त्रयाणां तुल्यो नहि। अपरं कब्सेलीयस्यैकस्य बलिनः पौत्रो यिहो- २२
यादस्य पुत्रो विनायो ऽनेककार्य्यकर्त्तासीत्। स सिंहतुल्यौ द्वौ मोया-
बीयलोकौ जघान, तदन्यत् स हिमानीसमये गत्वा गर्त्तमध्ये सिंहमेकं
मारयामास। अपरं स पञ्चहस्तदीर्घं मिस्रीयमेकम् अवधीत् तस्य मिस्री- २३
यस्य करे तन्तुवायस्य तन्तुदण्डतुल्यं शूलमेकमासीत् किन्त्वस्य करे
दण्ड एक आसीत् ततः स गत्वा मिस्रीयस्य करात् शूलमाच्छिद्य गृहीत्वा
तस्यैव शूलेन तं जघान। यिहोयादस्य सुतो विनाय एतानि कर्म्माणि २४
चकार तेन स द्वितीयानां त्रयाणां पराक्रमिणां मध्ये लब्धनामा बभूव।
स तेभ्यस्त्रिंशज्जनेभ्यो विख्यात आसीत् किन्तु प्रथमत्रयाणां समतां २५
न प्राप, अपरं स दायूदा रक्षकसैन्यानां सेनापतिर्नियुक्तो बभूव।

अपरं सैन्यानां मध्ये एते नरा वीरा आसन् योयावस्य सहजोऽसा- २६

२७ हेलः, अपरं दोदयस्य सुतो वैतलेहमीय इल्हाननः, अपरं हरोरीयः
२८ शम्मोतः, अपरं पिलोनीयो हेलसः, अपरम् इक्कोशस्य सुतस्तिकोयीय
२९ ईराः, अपरम् अनाथोतीयोऽवीयेषरः, अपरं हूषातीयः शिव्विखयः,
३० अपरम् अहोहीय ईलयः, अपरं निटोफातीयो महरयः, अपरं वाना-
३१ हस्य सुतो निटोफातीयो हेलदः, अपरं विन्यामीनदेशस्थगिवियानिवा-
३२ सिनो रीवयस्य तनय इत्तयः, अपरं पिरियाथोनीयो विनायः, अपरं
३३ नहलगाशनिवासी हूरयः, अपरम् अर्व्वतीयोऽवीयेलः, अपरं वाहरू-
३४ मीयोऽस्मावतः, अपरं शाल्वीय इलीयहवाः, अपरं गिषोणीयो विने-
३५ हाशेमः, अपरं शागेः सुतो हरारीयो योनाथनः, अपरं साखरस्य
३६ तनयो हरारीयोऽहीयामः, अपरम् ऊरस्य सुत इलीफालः, अपरं
३७ मिखेरातीयो हेफरः, अपरं पिलोनीयोऽहियः, अपरं कर्म्मिलीयो
३८ हिस्रयः, अपरम् ईष्वयस्य सुतो नारयः, अपरं नाथनस्य सहजो
३९ योयेलः, अपरं हग्रेः सुतो मिभरः, अपरम् अम्मोनीयः सेलकः, अपरं
४० सिरूयायाः सुतस्य योयावस्यास्त्रवाही वेरोतीयो नहरयः, अपरं यि-
४१ त्रीय ईराः, अपरं यित्रीयो गारेवः, अपरं हित्तीय ऊरीयः, अपरम्
४२ अहलयस्य सुतः सावदः, अपरं रूवेणीयशीषाः सुतोऽदीनाः, स रूवे-
४३ णीयानां सेनापतिरासीत् तस्यानुगामिनस्त्रिंशज्जना आसन्, अपरं
४४ माखाः सुतो हाननः, अपरं मित्नीयो योशाफटः, अपरम् अस्तिरो-
तीय उषियः, अपरम् अरोयेरीयस्य होथमस्य सामा यियीयेलश्चेतिना-
४५ मानौ द्वौ सुतौ, अपरं शिम्रेः सुतो यिदीयेलस्तस्य सहजश्च तीषीयो
४६ योहाः, अपरं महवीय इलीयेलः, अपरम् इल्नामस्य यिरीवयो यो-
शवियश्चेतिनामानौ द्वौ सुतौ, अपरं मोयावीयो यित्माः, अपरम्
४७ इलीयेल ओवेदो मिषोवायीयो यासीयेलश्च।

---

१२ द्वादशोऽध्यायः।

१ दायूदो विन्यामिनीयोपकारिणां नामानि ८ गादियोपकारिणां नामानि १६ अमासां प्रति दायूदः कथनं १९ मिनशिवंशीयानां कतिपयलोकानां कथनं २३ सर्व्ववंशीयोपकारिणां संख्या।

१ यस्मिन् काले दायूद् कीशस्य पुत्रात् शौलाद् भीत्वा सिक्लगे रुद्ध
आसीत् तस्मिन् समय एते मनुजाः दायूदः समीपम् आगच्छन्, ते वी-
२ राणां मध्ये गणिताः समरे चोपकारिण आसन्। विशेषतो धनुर्द्धारिणो

वामदक्षिणहस्ताभ्यां पाषाणां धनुर्व्वाणानाञ्च निक्षेपणे निपुणाश्च कति-
पया विन्यामीनीयाः शौलस्य सहजा आगच्छन् । गिवियातीयस्य २
शिमायस्य सुतावहीयेषरो योयाशश्च तेषां मुख्यावास्तां, अपरं चास्-
मावतस्य सुतौ यिषीयेलपेलटौ विराखा अनाथोतीयो येहूश्चापरं त्रिं- ४
शज्जनानां मध्ये बलवान् त्रिंशत उपरि नियुक्तो गिवियोनीयो यिश्म-
यियो यिरिमियो यहसीयेलो योहाननो गिदेराथीययोषावद इलि- ५
यूषयो यिरेमोतो वालियाः शिमरियो हरूफीयशिफटिय इल्काना ६
यिशियोऽसरेलो योयेषरो याशवीयामश्चैते सर्व्वे कोरहीयलोकाः, अपरं ७
गिदोरनिवासिनो यिरोहमस्य पुत्रौ योयेलाः सिवदियश्च ।

अपरं गादीयानां मध्ये युद्धयोग्या बलवन्तः फलकशूलधारिणः ८
सिंहवदनाः शिलोच्चयस्थहरिणवद् द्रुतगामिनश्च कतिपयलोकाः प्रा-
न्तरस्थिते दुराक्रमणस्थाने दायूदः समीपम् आगच्छन् । प्रथम एषरः, ९
द्वितीय ओवदियः, तृतीय इलीयावः, चतुर्थो मिश्मन्नाः, पञ्चमो यिरि- १०
मियः, षष्ठो ऽत्तयः, सप्तम इलीयेलः, अष्टमो योहाननः, नवम इल्- १२
सावदः, दशमो यिरिमियः, एकादशो मग्वन्नयः । गादवंशीया एते १४
नराः सेनापतय आसन् क्षुद्रो जनः शतपतिरासीत् महांल्लोकश्च सह-
स्रपतिरासीत् । प्रथममासे यस्मिन् समये यर्द्दनसरितस्तोयानि तटं १५
समप्लावयन् तदानीम् एते तस्याः पारं गत्वा पूर्व्वदिशि पश्चिमदिशि च
प्रान्तरस्थान् निखिलमनुजान् पलायनं कारयाञ्चक्रुः ।

अपरं विन्यामीनयिहूदावंशयोः कतिपयलोकेषु दुराक्रमणस्थाने १६
दायूदः सन्निधिम् आगतेषु दायूद् तान् साक्षात् कर्त्तुं वहिर्गत्वा तान् १७
जगाद, यदि यूयं मामुपकर्त्तुं निर्व्विरोधं मम सन्निधिमागच्छथ, तर्हि
मदीयं मनो युष्मान् प्रत्येकाग्रं भविष्यति, किन्तु यदि निरुपद्रवं मां
रिपूणां करेषु समर्पयितुम् इच्छथ तर्ह्यस्माकं पितृलोकानाम् ईश्वर-
स्तत् पश्यन् भर्त्सयतु । तदानीम् आत्मा प्रधानरथिनम् अमासयम् १८
अध्यतिष्ठत् तस्मात् स कथयामास, हे दायूद् वयं तव पक्षीयाः, हे
यिषयस्य तनय वयं तव सङ्गिलोकाः । मङ्गलं भूयात् तवैव मङ्गलं
भूयात् तवोपकारिणाञ्च मङ्गलं भूयात् यतस्तवेश्वरस्त्वाम् उपकरोति ।
तदानीं दायूद् तान् अनुगृह्य स्वीयसेनानिवहानां सेनापतीन् चकार ।
अनन्तरं शौलेन सह योधनार्थं पिलेष्टीयानां सहायत्वेन दायूदि गत- १९
वति मिनशिवंशस्य कतिपयलोका दायूदः पक्षा बभूवुः किन्तु तदानीं

स पिलेष्टीयान् नोपाकरोत् यतः पिलेष्टीयानाम् अधिपतिगणेन विविच्य
भारतीमिमां निगद्य स विससृजे, यथा, सोऽस्माकं शिरांसि दत्त्वा
२० स्वीयप्रभुना शौलेन साकं सन्धास्यति। अनन्तरं यदा दायूद् सिक्लगम्
अगच्छत् तदानीम् अद्नहो योषावदो यिदीयेलो मीखायेलो योषावद
इलीहूः सिल्लियथश्च मिनशीयसैन्यानां सहस्राधिपतय इमे मिनशीया
२१ लोकास्तस्य पक्षा बभूवुः। ते दस्युनिवहस्य विपक्षं दायूदम् उपाकुर्व्वन्
२२ यतस्ते महावीराः सेनापतयश्चासन्। तस्मिन् समये दायूदम् उपकर्त्तुं
प्रतिदिनं सैन्येष्वागच्छत्सु ईश्वरीयसैन्यानीव तस्य बहुसैन्यानि बभूवुः।
२३ अपरं परमेश्वरस्य वचनानुसारात् शौलस्य राजत्वं दायूदि सम-
र्पयितुं ये सैन्यनिवहाः समरार्थं सज्जिताः सन्तो हिब्रोणे तस्य सन्नि-
२४ धिम् अगच्छन् तेषां गणनैषा। यिहूदावंशीयाः फलकशूलधारिणः
२५ समरार्थं सज्जिता अष्टशताधिकषट्सहस्राणि लोकाः। शिमियोन-
२६ वंशीया रणे महावीराः शताधिकसप्तसहस्राणि मनुजाः। लेविवंशीयाः
२७ षट्शताधिकचतुःसहस्राणि लोकाः। अपरं हारोणवंशस्याधिपति र्यि-
होयादास्तस्यानुगामिनः सप्तशताधिकानि त्रीणि सहस्राणि मानवाश्च।
२८ अपरं तरुणो महावीरः सादोकस्तस्य पितृवंशीया द्वाविंशतिः प्रधान-
२९ मानवाश्च। अपरं शौलस्य स्वजातीयविन्यामीनवंशीयास्त्रीणि सहस्राणि
मानवाः, किन्तु तत्समयं यावत् तेषाम् अधिकलोकाः शौलवंशस्य
३० पक्षा आसन्। अपरम् इफ्रयिमवंशीया अष्टशताधिकविंशतिसह-
स्राणि पराक्रमिणो मानवास्ते निजे निजे पितृवंशे विख्याता आसन्।
३१ अपरं मिनशेरर्द्धवंशाद् अष्टादशसहस्राणि मानवास्ते दायूदं राजानं
३२ कर्त्तुं निजनिजनाम्ना निरूपिताः सन्त आगच्छन्। अपरम् इषाखर-
वंशीया द्वे शते प्रधानमनुजास्ते ज्ञानिनः परिणामदर्शिनश्चासन् तस्मिन्
समये चेस्रायेल्लोकै र्यत् कर्त्तव्यं तद् अबुध्यन्त तेषां सहजाश्च सर्व्वे तेषाम्
३३ आज्ञाग्राहिण आसन्। अपरं सिबूलूनवंशीयाः समरगामिनो व्यूहं
रचयितुं निपुणाः समरार्थं शस्त्रास्त्रधारिण एकचित्ताः पञ्चाशत्सहस्राणि
३४ मानवा आसन्। अपरं नप्तालिवंशीयाः सहस्रं सेनापतयस्तैः साकं
३५ फलकशूलधारिणः सप्तत्रिंशत्सहस्राणि मानवाश्च। अपरं दानवंशीया
व्यूहं रचयितुं निपुणाः षट्शताधिकाष्टाविंशतिसहस्राणि मानवाः।
३६ अपरम् आशेरवंशीया व्यूहं रचयितुं निपुणाश्चत्वारिंशत्सहस्राणि यो-
३७ द्धारो मानवाः। अपरं यर्दनस्य पूर्व्वपाराद् रूवेणवंशीया गादवंशीया

मिनशेरर्द्धवंशसम्बन्धीयाश्च समरार्थं सर्व्वविधास्त्रधारिणो विंशतिसहस्रा-
धिकलक्षं मानवा आगच्छन्। समरे व्यूहरचणे च निपुणा एते ३८
निखिला मनुजा दायूदम् इस्रायेलीयानां राजानं कर्त्तुं सरलान्तःकरणै
र्हिब्रोणम् आजग्मुः, अपरम् इस्रायेलोऽवशिष्टाः सकललोका अपि दा-
यूदं राजत्वे ऽभिषेक्तुम् एकचित्ता अभवन्। अपरं ते त्रीणि दिनानि ३९
तस्मिन् स्थाने दायूदः सन्निधौ तिष्ठन्तो बुभुजिरे पपुश्च यतस्तेषां
सहजास्तेषां कृते पेचुः। तेषां समीपवासिन इषाखरसिबूलूननप्तालि- ४०
वंशीया मनुजाश्च महाङ्गगर्द्दभाश्वतरगवां पृष्ठेषु भक्ष्याणि गोधूमज-
द्रव्याण्युडुम्बरपिष्टकान् द्राक्षास्तवकान् द्राक्षारसान् तैलानि गोमे-
षांश्च प्रभूतान् आनिन्युः, यत इस्रायेलीयलोकानां महानन्दो ऽभवत्।

---

१३ त्रयोदशोऽध्यायः।

१ नियममञ्जूषाया आनयनार्थं दायूदो मन्त्रणा ९ आनयनसमय उषस्य निधनञ्च।

तदनन्तरं दायूद् सहस्रपतिभिः शतपतिभि र्निखिलैरधिपतिभिश्च १
साकम् अमन्त्रयत्। अपरं दायूद् इस्रायेलो निखिलं समाजं बभाषे यद्ये- २
तद् युष्माकं प्रभोः परमेश्वरस्य चाभिमतं भवेत् तर्हीस्रायेलः कृत्स्ने
जनपदे निवसन्तो ऽस्माकम् अवशिष्टाः सहजाः प्रान्तरयुक्ते स्वस्व-
नगरे निवसन्तो याजका लेवीयाश्च यद् अस्माकं सविधं समायान्ति
तत्कृते वयं तेषां सर्व्वस्थानं दूतान् प्रेषयिष्यामः। अस्माकम् ईश्वरस्य ३
मञ्जूषास्माभिः पुनर्व्वारं स्वेषां सविधं समानेष्यते यतः शौलस्य समये
वयं तस्यान्वेषणं न कृतवन्तः। ततो निखिलमनुजेभ्यस्तस्मिन् वाक्ये रोच- ४
माने समाजीयाः सर्व्वे तत् कर्त्तुम् अङ्गीचक्रुः। अनन्तरं किरीयतयि- ५
यारीमाद् ईश्वरीयमञ्जूषाया आनयनार्थं दायूद् मिसरीयशीहोरतटि-
नीम् आरभ्य हमातप्रवेशस्थानं यावत् सकलान् इस्रायेलीयान् सञ्ज-
ग्राह। अपरं किरूवयो र्मध्ये निवासिनः परमेश्वरस्य नाम्ना विख्याताम् ६
ईश्वरीयमञ्जूषाम् आनेतुं दायूद् निखिला इस्रायेलीयमानवाश्च वालाम्
अर्थतो यिहूदादेशस्थं किरियतयियारीमं जग्मुः। अनन्तरम् ईश्वरीय- ७
मञ्जूषां नूतनं शकटम् आरोह्याबीनादवस्य वेश्मनस्तां वहिश्चक्रुः, अप-
रम् उषो ऽहियश्च तत् शकटं चालयामासतुः। अपरं दायूद् नि- ८
खिला इस्रायेलीयमनुजाश्च यथाशक्ति गायन्तो वल्लकीशुषीरमुरजान्
करतालान् तूरीश्च वादयन्त ईश्वरस्य साक्षाद् आनन्दन्।

९ ततः परं तेषु कीदोनस्य शस्यमर्दनस्थान उपस्थितेषु गावाववशे जाते
१० तत उष ईश्वरीयमञ्जूषां धारयितुं करौ प्रसारयामास। तत उषं
प्रति परमेश्वरस्य क्रोधे प्रज्वलिते मञ्जूषां प्रति तस्य करप्रसारणकार-
णाद् स तम् आजघान तेन स तस्मिन्नेव स्थान ईश्वरस्य समक्षं ममार।
११ परमेश्वर उषम् आहतवान् इति कारणाद् दायूद् असन्तुष्टो बभूव,
अपरं स तस्य स्थानस्य नाम पेरसुषम् उषाघातस्थानमिति कृतवान्
१२ अद्यापि तस्य तन्नाम विद्यते। अपरं दायूद् तस्मिन् दिन ईश्वराद्
भीत्वा जगाद तथात्वे केन प्रकारेणाहं मम सन्निधिम् ईश्वरस्य मञ्जूषाम्
१३ आनेष्यामि? तस्मात् स दायूद्नगरे निजनिकटं तां मञ्जूषां नानीय
१४ पथपार्श्वस्थं गातीयस्योवेदेदोमस्य निवेशनं नीत्वा स्थापयामास। ततः
परम् ईश्वरस्य मञ्जूषायाम् ओवेदेदोमस्य निवेशने ऽर्थतस्तस्य निकेतने
मासत्रयं स्थितायां परमेश्वर ओवेदेदोमस्य तदीयसकलपरिजनस्य च
क्षेमं चकार।

१४ चतुर्दशोऽध्यायः।

१ दायूदं प्रति हीरमस्य प्रणयः ३ दायूदः सुतानां नामानि ८ द्विः पिलेष्टीयानां पराजितत्वं।

१ अनन्तरं सोरीयराजो हीरमः प्रासादनिर्म्माणार्थं दायूदः सन्निधिम्
२ एरसकाष्ठानि स्थपतीन् सूत्रधरांश्च मनुजान् दूतैः प्रेषयाञ्चकार। ततः
परमेश्वर इस्रायेलो राजत्वपदे मां संस्थापितवान् यतो निजेस्रायेल्-
वंशस्यानुरोधात् मम राज्यस्योन्नतिस्तेनाकारीति दायूद् बुबुधे।
३ अपरं दायूद् यिरूशालमे जाया अन्या जग्राह ततो दायूदोऽपरे
४ पुत्रा दुहितरश्च जज्ञिरे। यिरूशालमे शम्मूयः शोववो नाथनः सुलेमान्
५ यिभर इलीशूय इल्पेलटो नोगहो नेफगो याफीय इलीशामा वीलि-
७ यादा इलीफेलटश्चेतिनामानस्तस्य पुत्रा जज्ञिरे।
८ अनन्तरं दायूद् निखिलेस्रायेल्वंशोपरि राजत्वे ऽभिषिक्त इति वार्त्तां
निशम्य सर्व्वे पिलेष्टीया दायूदं गवेषयितुम् आजग्मुः। अपरं दायूदि
९ तन्निशम्य तेषां विरुद्धं वहिरागतवति पिलेष्टीयाः समेत्य रिफायिम-
१० तलभूमौ विस्तीर्णा बभूवुः। अनन्तरं दायूद् ईश्वरं पृष्टवान् पिलेष्टी-
यानां विरुद्धं मया किं गन्तव्यं? त्वं किं मम करे तान् समर्पयिष्यसि?
११ ततः परमेश्वरस्तं जगाद, याहि मया ते तव करे समर्पयिष्यन्ते। अपरं

तेषु वाल्पिरासीमम् समागतेषु दायूद् तस्मिन् स्थाने तान् पराजिग्ये।
ततः परं दायूद् बभाषे, ईश्वरो मदीयकरेण मम रिपून् स्रोतोभङ्गवद्
बभञ्ज। तस्मात् तस्य स्थानस्य नाम वाल्पिरासीमम् देवताभङ्गस्थान-
मिति बभूव। अनन्तरं तैः स्वेषां प्रतिमासु तत्र परित्यक्तासु लोका १२
दायूदो निदेशात् ता वह्निना दाहयाञ्चक्रुः।

ततः परं पिलेष्टीयाः पुनरागत्य तस्यां समभूमौ विस्तीर्णा बभूवुः। १३
ततो दायूदा पुनः परिपृष्ट ईश्वरः कथयामास त्वं तेषां पश्चात् मा १४
गच्छ किन्तु तेषां समीपाद् व्याघुट्यागत्य वाकास्थानस्य सम्मुखे तान्
आक्रमिष्यसि। वाकाया उच्चस्थानेषु गमनस्य निनादे त्वया श्रुते त्वं १५
समरं कर्त्तुं व्रजिष्यसि यतस्तदेश्वरः पिलेष्टीयानां सैन्यानि निहन्तुं
तवाग्रगामी भविष्यति। अनन्तरम् ईश्वरस्य निदेशानुसारेण दायूदा १६
कर्म्मणि कृते गिबियोनम् आरभ्य गेषरं यावत् पिलेष्टीयानां सैन्यानि तै
र्जघ्निरे। तेन दायूदो यशः सकलान् जनपदान् व्यानशे परमेश्वरश्च १७
सर्व्वान् भिन्नजातीयान् तस्मात् त्रासयुक्तान् चकार।

१५ पञ्चदशोऽध्यायः।

१ नियममञ्जूषाया आनयनार्थं लेवीयानां याजकानाञ्च दायूदा नियोजनं ११ सादो-
काबियाथरप्रभृतीनां निदेशनं १६ अन्यलेवीयानां गायकपदे नियोजनं २५ मञ्जू-
षानयनं २९ मीखलया दायूदस्तुच्छीकरणं।

अनन्तरं दायूद्नगरे दायूदा स्वस्य कृते वेश्म निर्म्मापयाञ्चक्रे ईश्व- १
रीयमञ्जूषायाश्च कृते स्थानं निरूपयाञ्चक्रे तस्या निमित्तं पटोटजं स्थाप-
याञ्चक्रे च।

अपरं दायूद् आज्ञापयामास, ईश्वरीयमञ्जूषावहने लेवीयान् विना २
कस्याप्यन्यस्याधिकारो न विद्यते यत ईश्वरीयमञ्जूषाया वहनार्थं नित्यं
सेवनार्थञ्च परमेश्वरः केवलं तानेव वरीतवान्। अनन्तरं दायूद् ३
ईश्वरीयमञ्जूषायाः कृते यत् स्थानं निरूपितवान् तत् स्थानं तस्या आन-
यनार्थं स निखिलेस्रायेलीयान् यिरूशालमे सञ्जग्राह। अपरं दायूद् ४
हारोणवंशीयान् लेवीयवंशीयांश्च सञ्जग्राह। ऊरीयेलः किहातवंशस्य ५
मुख्य आसीत् तस्य भ्रातरो विंशत्यधिकशतं नराः। अपरम् असायो ६
मिरारिवंशस्य मुख्य आसीत् तस्य भ्रातरो विंशत्यधिकं शतद्वयं नराः।
अपरं योयेलो गेर्षोणवंशस्य मुख्य आसीत् तस्य भ्रातरस्त्रिंशदधिकं ७

८ शतं नराः। अपरं शिमयिय इलीषाफनवंशस्य मुख्य आसीत् तस्य भ्रातरो
९ द्वे शते नराः। अपरम् इलीयेलो हिब्रोणवंशस्य मुख्य आसीत् तस्य
१० भ्रातरो ऽशीतिजनाः। अपरम् अम्मीनादव उषीयेलवंशस्य मुख्य आसीत्
तस्य भ्रातरो द्वादशाधिकं शतं नराः।
११ अनन्तरं दायूद् सादोकाबियाथरौ याजकौ लेवीयांश्चार्थत ऊरियेलम् असायं योयेलं शिमयियम् इलीयेलम् अम्मीनादवञ्च समाहूय
१२ तेभ्यः कथयाञ्चकार, यूयं लेवीयपितृवंशानां मुख्या नरा अत इस्रायेलः प्रभोः परमेश्वरस्य मञ्जूषायाः कृते मया निरूपितं स्थानं ताम् आनेतुं
१३ यूयं युष्माकं सहजाश्च पवित्रीभवत। यतो युष्माभिस्तत् पूर्व्वं नाक्रियतैतत्कारणाद् अस्माकं प्रभुना परमेश्वरेणास्माकं मध्य आघातोऽकारि
१४ यतो वयं विधिवत् तस्यान्वेषणं नाकुर्म्म। अनन्तरम् इस्रायेलः प्रभोः परमेश्वरस्य मञ्जूषाम् आनेतुं याजकाः लेवीयाश्च स्वान् मेध्यान् अकुर्व्वत।
१५ अपरं परमेश्वरीयवाक्यात् मूसा यद्वद् आदिष्टवान् तद्वत् लेविवंशीया नरा वहनदण्डाभ्यां स्वीयस्कन्धैरीश्वरीयमञ्जूषाम् अवहन्।
१६ अपरं दायूदा लेवीयानां मुख्यलोकाः पुनरगद्यन्त यूयं मुरजवल्लकीकरतालादियन्त्रै र्वाद्यकरणाय हर्षध्वनिकरणाय च स्वेषां सहजान् गाथ-
१७ कान् नियोजयत। ततो लेवीयाः योयेलस्य सुतं हेमनं तस्य सहजानां मध्ये बेरिखियस्य तनयम् आसफञ्च मिरारिवंशीयानां स्वकीयभ्रातृ-
१८ णाञ्च मध्ये कूशायाः सुतम् एथनं नियोजयामासुः। अपरं तैः सार्कं तेषां द्वितीयपदस्थान् सहजान् अर्थतः सिखरियो बिनो यासीयेलः शिमीरामोतो यिहीयेल उन्निरिलीयावो बिनायो मासेयो मत्तथिय इलीफिलेङ्ग मिंमेय ओवेदेदोमो यियूयेलश्चेतिनामकान् द्वारपालकान् नि-
१९ योजयाञ्चक्रुः। अतो हेमन आसफ एथनश्चैते गाथकाः पित्तलीयकर-
२० तालैरुच्चै र्ध्वनिकरणाय सिखरियोऽसीयेलः शिमीरामोतो यिहीयेल
२१ उन्निरिलीयावो मासेयो बिनायश्चैते मुरजैरलामोताख्यस्वरवादनायापरं मत्तथिय इलीफिलेङ्ग मिंमेय ओवेदेदोमो यियूयेलो ऽससियश्चैते वल्लकीभि र्जयध्वनिकरणार्थं शिमीनीताख्यस्वरवादनाय नियुक्ता बभूवुः।
२२ अपरं लेवीयानां मध्ये प्रधानीभूतो यः किननियो गाने निपुण आसीत्
२३ स गानाय नियुक्तः सन् गानमधि समादिशत्। अपरं बेरिखिय इल्का-
२४ नाश्च मञ्जूषाया द्वाररक्षकावास्तां। अपरम् ईश्वरीयमञ्जूषायाः सम्मुखे शिवनियो यिहोशाफटो निथनेलो ऽमासयः सिखरियो बिनाय इली-

येषरश्चैते तूरीरवादयन् अपरम् ओवेदेदोमो यिहियश्च मञ्जूषाया
द्वाररक्षकावास्तां।

अनन्तरं दायूद् इस्रायेलः प्राचीनलोकाः सहस्रपतयश्चानन्दन्त १५
ओवेदेदोमस्य निवेशनात् परमेश्वरीयां नियममञ्जूषाम् आनेतुं जग्मुः।
अपरं परमेश्वरीयनियममञ्जूषाया वाहकानां लेवीयानाम् ईश्वरेणोप- १६
कृतत्वात् ते सप्त वृषभान् सप्त मेषांश्चोदसृजन्। दायूद् नियममञ्जूषा- १७
वोढारो लेवीया गायकाश्च गायकैः साकं गानाधिपतिः किननियश्चा-
तसीयवसनानि पर्य्यदधत दायूदो वपुषि चातसीयम् एफोदाख्यवसनम्
आसीत्। अनेन प्रकारेणोच्चैः स्वरैः शृङ्गतूरीकरतालमुरजवल्लकीवाद- १८
नेन च निखिलेस्रायेलीयमनुजाः परमेश्वरीयां नियममञ्जूषाम् आनिन्युः।
अनन्तरं दायूद्नगरे परमेश्वरीयमञ्जूषायाः प्रवेशनसमये शौलस्य १९
दुहिता मीखला गवाक्षेण निरीक्ष्योत्प्लवमानं नृत्यन्तञ्च दायूदं नरपतिं
विलोक्य स्वान्ते तं तुच्छीचकार।

---

१६ षोडशोऽध्यायः।

१ दायूदो यज्ञकर्म्म ४ गायकानां नियोजनं ७ प्रशंसागीतं ३७ सेवकानां वाहकानां याजकानां वादकानाञ्च नियोजनं।

अनन्तरं मानवा ईश्वरीयां मञ्जूषामानीय दायूदा निर्म्मितस्य वस्त्र- १
वेश्मनो मध्ये स्थापयाञ्चक्रुरीश्वरस्य समक्षं होमबलीन् मङ्गलार्थकब-
लींश्च समुत्ससृजुश्च। अपरं होमबलीनां मङ्गलार्थकबलीनाञ्चोत्सर्गं २
समाप्य दायूद् परमेश्वरस्य नाम्ना लोकान् आशिषं जगाद। अपरं ३
निखिलेस्रायेलीयमनुजानां मध्ये प्रतिपुरुषं प्रतिनारि चैकैकं पूपम् एकैकं
पात्रं द्राक्षारसम् एकैकम् उडुम्बरखण्डञ्च परिवेशयाञ्चकार।
अपरं तेन परमेश्वरीयमञ्जूषायाः समक्षम् इस्रायेलः प्रभोः पर- ४
मेश्वरस्य स्मारणधन्यवादस्तोत्रादिसेवनाय लेवीयानां कतिपयमानवाः
न्ययुज्यन्त। तेषां मुख्य आसफो द्वितीयः सिखरीयः अपरे यियूयेलः ५
शिमीरामोतो यिहीयेलो मत्तथिय इलीयावो विनाय ओवेदेदोमश्चैत
आसन् किन्तु यियूयेलो मुरजं वल्लकीञ्चावादयत् आसफस्तु करतालम्
अवादयत्। अपरं विनायो यहसीयेलश्च याजकावीश्वरीयनियम- ६
मञ्जूषायाः सम्मुखे नित्यं तूरीवाद्यम् अकुर्व्वातां।

७ अपरं दायूद् तस्मिन् दिने परमेश्वरस्य धन्यवादार्थम् आसफस्य तस्य सहजानाञ्च करेषु प्रथमं गीतमिदं समर्पयाञ्चकार।

८ परेशं स्तुत तन्नाम्ने कुर्य्यात प्रार्थनामपि।
तदीयाश्चर्य्यकर्म्माणि प्रकाशयत लोकतः।
९ प्रगायत तमुद्दिश्य गीतं गायत तं प्रति।
तदीयाश्चर्य्यकर्म्माणि सञ्चिन्तयत सर्व्वशः।
१० तदीयस्य पवित्रस्य नाम्नः श्लाघां विधत्त च।
सदा तिष्ठतु सानन्दं परेशान्वेषिणां मनः।
११ परेशितुश्च तच्छक्तेः प्रकुरुध्वं गवेषणां।
सर्व्वदा तस्य वक्त्रस्य प्रकुरुध्वं गवेषणां।
१२ हे दासस्य तदीयस्य त्विस्रायेलः कुलोद्भवाः।
हे मनोभिमतास्तस्य याकूवो वंशजा नराः।
१३ स्मर्य्यन्तां चित्रकर्म्माणि तेनैव साधितानि हि।
अद्भुतानि च चिह्नानि दण्डाज्ञास्तन्मुखोद्गताः॥
१४ भवति प्रभुरस्माकं सएव परमेश्वरः।
व्याप्नोति मेदिनीं कृत्स्नां तदीयं राजशासनं।
१५ स्मर्य्यतां नियमस्तस्य युष्माभि र्हि निरन्तरं।
वाक्यञ्चाज्ञापितं तेन सहस्रं पुरुषानभि।
१६ इब्राहीमा समं तेन नियमः स स्थिरीकृतः।
इस्हाकं प्रति पश्चाच्च कथितः शपथेन हि।
१७ याकूवश्च व्यवस्थार्थं सोऽपि तेन निरूपितः।
इस्रायेलश्च विध्यर्थं वाक्यमेतदकथ्यत।
१८ अधिकारं किनान्देशे दास्ये तुभ्यं सुनिश्चितं।
१९ तदा ते बहुसंख्या नो विदेशेऽल्पाः प्रवासिनः।
२० स्थानात् स्थानान्तरं प्रापन् राष्ट्राद् राष्ट्रान्तरं तथा।
२१ उपद्रवाय तेषां तु नानुमेने स कञ्चन।
भर्त्सयंश्च कृते तेषां नृपतीनिदमब्रवीत्।
२२ मयाभिषिक्तलोकानां कुरुध्वं स्पर्शनं नहि।
कुरुध्वं नाशुभं किञ्चित् भविष्यद्वादिनां मम॥
२३ परमेश्वरमुद्दिश्य गीतं गायत भूगताः।
कृतं तेन परित्राणं प्रकाशयत प्रत्यहं।

मध्येऽन्यदेशिनां तस्य संवर्णयत गौरवं। २४
आश्चर्य्याश्च क्रियास्तस्य नरलोकस्य सर्व्वतः।
महान् अति प्रशस्यश्च जायते परमेश्वरः। २५
यावत्यो देवताः सन्ति ताभ्यो भेतव्य एव सः।
अन्यदेशीयलोकानाम् असाराः सकलाः सुराः। २६
किन्तु सर्जनकर्त्तास्ति गगनस्य परेश्वरः।
समादरः प्रशंसा च तदीयाग्रे हि वर्त्तते। २७
तिष्ठतः शक्तिसौन्दर्य्ये तदीयधर्म्मवेश्मनि।
यूयं मनुष्यसन्तानाः परमेशं प्रशंसत। २८
महिमानं परेशस्य विक्रमञ्च प्रशंसत।
परमेशीयनाम्नश्च महिमानं प्रशंसत। २९
नैवेद्यानि समादाय प्रयात तस्य सन्निधिं।
पवित्रशोभया तत्र कुरुध्वं प्रणिपातनं।
पृथिवीस्था जनाः सर्व्वे तस्य साक्षाद् बिभीत वै। ३०
संस्थापितं जगत् तेन न कदापि स्खलिष्यति।
नन्दन्तु सकलाः स्वर्गा हर्षो व्याप्नोतु मेदिनीं। ३१
कथ्यताम् अन्यदेशेषु राजति परमेश्वरः।
समुद्रस्तस्य मध्यस्थाः सर्व्वे कुर्व्वन्तु गर्ज्जनं। ३२
क्षेत्रक्षेत्रस्थिताः सर्व्वे भवन्त्वाह्लादसंयुताः।
वन्यवृक्षाः परेशस्य साक्षादुच्चं ध्वनन्तु हि। ३३
स समायाति मेदिन्या विचारं कर्त्तुमेव हि।
परेशं ब्रूत धन्यञ्च प्रशंसत परेश्वरं। ३४
यतः क्षेमप्रदाता स चिरस्थस्तदनुग्रहः।
यूयं भाषध्वम् अस्माकं त्राता त्वं परमेश्वर। ३५
त्रायस्व सङ्गृहाणास्मान् उद्धर चान्यजातितः।
तस्मात् तव पवित्रस्य नाम्नो वर्द्धिष्यते स्तवः।
अस्माकमपि श्लाघा ते प्रशंसातो जनिष्यते।
इस्रायेलः प्रभु र्योऽस्ति स प्रभुः परमेश्वरः। ३६
भूयाद् आद्यन्तपर्य्यन्तं धन्यो धन्यश्च सर्व्वदा॥
अनन्तरं सर्व्वे लोकास्तथास्त्वित्युक्त्वा परमेश्वरं तुष्टुविरे।
अपरं प्रत्यहं कर्त्तव्यक्रियानुसारेण मञ्जूषायाः सम्मुखे सेवनार्थम् ३७

३८ आसफ ओवेदेदोमस्तयोरष्टषष्टिसहजाश्च परमेश्वरीयनियममञ्जूषायाः
सम्मुखे तस्थुः, अपरं यिदूथूनस्य सुत ओवेदेदोमो होषाश्च द्वारपाल-
३९ कावास्तां। किञ्च परमेश्वर इस्रायेलं यां व्यवस्थाम् आज्ञापयत् तन्मध्ये
४० लिखितानां सर्व्वक्रियाणां करणार्थं विशेषतः प्रत्यहं प्रातःकाले सन्ध्या-
काले च होमवेद्यां परमेश्वराय होमार्थकबलिदानार्थं याजकः सादोक-
स्तस्य याजका भ्रातरश्च गिबियोनस्थे भृगुस्थाने परमेश्वरीयावासस्य
४१ सम्मुखे तस्थुः। अपरं चिरस्थस्तदनुग्रह इत्यादिना गीतेन परमेश्वरस्य
धन्यवादार्थं तैः सार्कं हेमनो यिदूथूनोऽपरेषाञ्च येषां नामानि लिखि-
४२ तानि ते वृता लोकास्तस्थुः। विशेषत उच्चध्वनिकरणार्थम् ईश्वरीययन्त्र-
वादनार्थञ्च तूरीकरतालधारिणां कृते हेमनयिदूथूनौ तैः सार्कं तस्थतुः।
४३ यिदूथूनस्य तनयाश्च द्वारपाला बभूवुः। अनन्तरं सर्व्वे लोका निजं निजं
निवेशनं प्रतस्थिरे किञ्च दायूद् निजपरिजनान् आशिषं निगदितुं
परावृत्य जगाम।

१७ सप्तदशोऽध्यायः।

१ मन्दिरनिर्म्माणमधि नाथनस्य परमेश्वरस्य च कथनं अपरं दायूदमधि कथनं १६ परमेश्वरं प्रति दायूदः प्रार्थना प्रशंसनञ्च।

१ अनन्तरं दायूद् यदा निजगेहे न्यवसत्, तदा स भविष्यद्वादिनं
नाथनं जगाद, पश्य मयैरसकाष्ठे निर्म्मिते प्रासाद उष्यते किन्तु परमे-
२ श्वरीयनियममञ्जूषा यवनिकानाम् अधस्तिष्ठति। ततो नाथनो दायूदं
बभाषे त्वं निजमनोगतं साधय परमेश्वरस्तव सहाय आस्ते।
३ अपरं तस्यां रजन्याम् ईश्वरस्य वाक्यमिदं नाथनस्य निकटं समाग-
४ च्छत्, त्वं गत्वा मम दासं दायूदं वद, परमेश्वर इति वाचं वक्ति, मम
५ वासार्थं त्वया मन्दिरं न निर्म्मातव्यं। इस्रायेल्वंशस्याचानयनदिनमा-
रभ्याद्य यावत् मया मन्दिरे न न्युष्यते किन्त्वेकं वस्त्रवेश्म विहायान्यद्
६ वस्त्रवेश्मैकञ्च स्थानं विहायान्यत् स्थानं गम्यते। तथापीस्रायेल्वंशमध्ये
मम पर्य्यटनकाले मम प्रजापालकत्वपदे नियुक्तः कश्चिद् विचाराधि-
पतिः कदापि किं मया एष्ट इदं, युष्माभि र्मत्कृते कुत एरसकाष्ठमयं
७ गृहं न निर्म्मीयते? इदानीं त्वं मम दासं दायूदं वद, सेनाधिपः
परमेश्वर एतां वाचं वक्ति मम प्रजानाम् इस्रायेल्वंशीयानां राजानं
कर्त्तुम् अहं त्वां मेषस्थानात् मेषाणाम् अनुचरणाच्च गृहीतवान्।

अपरं त्वं यद्यद् उपक्रमितवान् तत्सर्व्वस्मिन् अहं तव सहायो भवन् ८
तव सम्मुखे तव सकलशत्रून् उच्छिन्नवान् चक्रवर्त्तिनां महतां लोकानां
नामवत् तव महानाम च कृतवान्। तदन्यत् मया निजप्रजानाम् ९
इस्रायेल्वंशीयानां कृते स्थानमेकं निश्चित्य ते तस्मिन् स्थाने समस्था-
प्यन्त, ते तत्र स्वस्थाने निवसन्ति पुनश्चालिता न भविष्यन्ति। पूर्व्वकाले
यदा चाहं मदीयेस्रायेलीयलोकान् शासितुं विचाराधिपतीन् न्ययो- १०
जयं तदा ते यादृशं दुष्टै र्मानवैरक्लिश्यन्त तादृशं पुन र्न क्लेच्यन्ते।
तव रिपवः सर्व्वे मया दमिताः परमेश्वरस्त्वत्कृते वंशमेकं स्थापयिष्यतीति
वाक्यमपि मया कथितं।

अपरं त्वयि सम्पूर्णायुषि सति निजपितृलोकानां सन्निधिं गतवति ११
चाहं तव सन्तानजं भाविवंशं स्थापयिष्यामि तस्य राज्यं स्थिरीकरि-
ष्यामि च। स मदर्थं मन्दिरमेकं निर्म्मास्यति, अहञ्च तस्य राजसिंहा- १२
सनम् अनन्तकालं यावत् स्थिरीकरिष्यामि। अहं तस्य पिता भवि- १३
ष्यामि स च मम पुत्त्रो भविष्यति। तवाग्रवर्त्तिनो राजतो मया
यादृक् स्वानुग्रहोऽपसारितस्तादृक् तत्तो ममानुग्रहो नापसारयिष्यते।
किन्तु मम गृहे मम राज्ये च स मयानन्तकालं यावत् संस्थापयिष्यते १४
तस्य राजसिंहासनमप्यनन्तकालं यावत् स्थिरं स्थास्यति। अनन्तरं १५
तानि सकलवाक्यानि तच्च दर्शनं यथातथ्यं नाथनेन दायूदे कथया-
ञ्चक्रिरे।

ततो राजा दायूद् अभ्यन्तरं गत्वा परमेश्वरस्य सम्मुख उपविश्य १६
कथयामास हे प्रभो परमेश्वर कोऽहं मम वंशश्च कः यत् त्वं माम् एतत्प-
र्य्यन्तम् आनीतवान्? तथापि हे ईश्वर, त्वम् एतदपि स्वदृष्टौ क्षुद्रं १७
कार्य्यं मन्यसे, हे प्रभो परमेश्वर त्वं निजदासस्य सुदीर्घं भाविवंशम-
ध्यधि वाचम् उक्तवान् माञ्चोच्चपदस्थलोकवत् ज्ञातवान्। एतदन्यत् १८
भवतो दासस्य सम्मानमधि दायूदा किं वदितुं शक्यते? त्वं निजदासं
वेत्सि। हे परमेश्वर त्वं स्वदासस्य कृते स्वमनोऽभिलाषाद् एतादृशं १९
सम्पूर्णं माहात्म्यं विदधत् एतानि सर्व्वाणि महत्कार्य्याणि प्रकाशित-
वान्। हे परमेश्वर, अस्माभिः स्वकर्णै र्यद्यत् श्रुतं तस्मिन् सर्व्वस्मिन् २०
तव सदृशः कश्चिदपि नास्ति त्वां विना कश्चिद् ईश्वरो नास्ति। अपरं २१
तवेस्रायेल्लोकस्य तुल्या काप्यन्या जाति र्भूमण्डले किं विद्यते यस्या
मोचनेन स्वकीयजातिं लब्धुम् ईश्वरः स्वयम् आगतवान्? त्वं महद्भि

भयङ्करैश्च कर्म्मभि र्महायशःप्राप्त्यर्थं तदेव कृत्वा मिसरदेशात् निजलो-
कान् मोचयित्वा तेषां सम्मुखाद् अन्यजातीयान् लोकान् दवयितवान्,
२२ निजेस्रायेल्वंशीयांश्चानन्तकालार्थं स्वकीयप्रजाः कृतवान् अपरं हे पर-
२३ मेश्वर त्वमेव तेषाम् ईश्वरोऽभवः। इदानीं हे परमेश्वर स्वदासमधि
तस्य वंशमधि च त्वया प्रतिश्रुतं वाक्यम् अनन्तकालं यावत् स्थिरीभवतु,
२४ त्वया यदुक्तं तदेव क्रियतां। तत् स्थिरीभवतु किञ्च सेनाधिपतिः परमे-
श्वरो य इस्रायेल्वंशस्येश्वरः स एवेस्रायेल्वंशस्येश्वरोऽभवदिति वाचा
तव नाम नित्यं महद् भवतु तव दासस्य दायूदो वंशश्च तव साक्षात्
२५ स्थास्नु भवतु। हे मम प्रभो तव वंशमहं वर्द्धयिष्यामीति वाक्यं त्वयैव
तव दासस्य कर्णगोचरीकृतं ततो हेतोस्तव समीपे प्रार्थनामिमां निवे-
२६ दयितुं तव दास उत्सुकोऽभवत्। हे परमेश्वर त्वमेव सत्य ईश्वरः,
२७ त्वं निजदासाय शुभं प्रतिश्रुतवान् अतस्तव दासस्य वंशो यथानन्त-
कालं तव समक्षं स्थिरो भवेत् तथा तव दासस्य वंशं प्रत्याशिषं
वक्तुं त्वमेवार्हसि यतस्तवाशीर्व्वादेन सोऽनन्तकालार्थम् आशीःप्राप्तो
भविष्यति।

---

१८ अष्टादशोऽध्यायः।

१ पिलेष्टीयानां मोयाबीयानाञ्च लोकानां दायूदा दमनं ३ हददेषरस्यारामीय-
लोकानाञ्च जयनं ९ दायूदं प्रति तोयिराजप्रभृतीनाम् उपायनं १२ इदोमीयानां
जयो देशे दुर्गस्थापनञ्च १४ दायूदः सैन्याधिपतीनां नामानि च॥

१ अनन्तरं दायूद् पिलेष्टीयान् पराजित्य नम्रीचकार तेषां करेभ्यो
२ गातं तदीयोपनगराणि चापजग्राह। अपरं स मोयाबीयान् परा-
जिग्ये ततो मोयाबीया दायूदो वशीभूय करदायिनो बभूवुः।
३ अनन्तरं फरातनटिन्याः समीपस्थदेशे निजकर्तृत्वं संस्थापयितुं सो-
४ बाया राज्ञि हददेषरे गतवति दायूद् हमाते तं पराजित्य तस्य सहस्रं
रथान् सप्तसहस्राणि हयारोहिणो विंशतिसहस्राणि पदातिकांश्च
जग्राह रथहयानां पादशिराश्चिच्छेद च किन्तु तेषां मध्ये शतं
५ रथान् अवशेषयामास। अनन्तरं दम्मेशकस्थारामीयेषु सोबान्टपस्य
हददेषरस्य साहाय्यं कर्त्तुम् आगतेषु दायूद् तेषाम् अरामीयाणां द्वाविं-
६ शतिसहस्राणि लोकान् अवधीत्। अपरं दायूद् अरामीयदम्मेशक-
प्रदेशे सैनिकाः स्थापयामास ततोऽरामीया दायूदो वशीभूय करदा-

यिनो बभूवुः। अनेन प्रकारेण दायूद् यद्यद् उपाक्राम्यत् तत्सर्व्वस्मिन्
परमेश्वरस्तं जयिनं चकार। अपरं दायूद् हददेषरस्य दासानां गात्र- ७
स्थानि स्वर्णफलकानि गृहीत्वा यिरूशालमम् आनिनाय। अपरं ८
दायूद् हददेषरस्याधीनाभ्यां टिभतं कूनश्चेतिनामकाभ्यां नगराभ्यां
भूयिष्ठानि पित्तलान्यानिनाय तैरेव सुलेमान् पित्तलमयं सागररूपं
पात्रं स्तम्भद्वयं पित्तलमयभाजनानि च निर्म्मितवान्।

अनन्तरं दायूदा सोवान्टपस्य हददेषरस्य सर्व्वाणि सैन्यानि परा- ९
जितानीति वार्त्तां निशम्य तोयिनामा हमातीयन्टपती राज्ञो दायूदः
कल्याणं प्रष्टुं युध्यता तेन हददेषरस्य पराजितत्वकारणात् तस्य धन्य- १०
वादं कर्त्तुञ्च तस्य समीपं स्वपुत्त्रं हदोरामं तेन सार्द्धञ्च रौप्यमयाणि
सुवर्णमयानि पित्तलमयानि च सर्व्वविधभाजनानि प्रेषयामास यतो
हददेषरेण सार्द्धं तोयिनाम्नोऽपि युद्धम् आसीत्। तत इदोममोयावा- ११
म्मोनपिलेष्टीयामालेकप्रभृतिभ्यः सर्व्वजातिभ्यो लोठितै र्दुर्व्वर्णसुवर्णैः सह
तानि सर्व्वाण्यपि राज्ञा दायूदा परमेश्वरम् उद्दिश्य समुत्सृजिरे।

अनन्तरं सिरूयायाः सुतो योयावो लवणाख्यायाम् उपत्यकायाम् १२
अष्टादशसहस्राणीदोमीयलोकान् जघान। अपरं स इदोमदेशे सैनिकाः १३
स्थापयामास, इदोमीया लोकाश्च सर्व्वे दायूदो दासा बभूवुः। अपरं
दायूद् यद्यत् स्थानं जगाम तत्सर्व्वस्थाने परमेश्वरस्तं जयिनं चकार।

इत्थं दायूद् इस्रायेलः सर्व्ववंशोपरि राजत्वं कुर्व्वन् निजसकल- १४
प्रजाः प्रति सुविचारं न्यायञ्चाचचार। तस्मिन् काले सिरूयायाः पुत्त्रो १५
योयावः प्रधानसेनापतिरासीत्। अहीटूवस्य सुतः सादोकोऽवियाथ- १६
रस्य सुतोऽहीमेलकश्च याजकावास्तां सिरायश्च लेखक आसीत्। यि- १७
होयादस्य सुतो विनायः किरेथीयानां पिलेथीयानाञ्चाध्यक्ष आसीत्।
तथा दायूदः सुता नरपतेः प्रधानसभासद आसन्।

---

१९ ऊनविंशोऽध्यायः।

१ हानूनेन दायूदो दूतानां वसनच्छेदनं ६ अम्मोनीयलोकानां पराजितत्वं १६ तेषाम् उपकारिणः अरामस्य पराजितत्वं।

ततः परम् अम्मोनवंशस्य राज्ञि नाहशे मृतवति तस्य पुत्त्रस्तस्य पदे १
राजा बभूव। ततो दायूद् अवदत्, हानूनस्य जनको नाहशो मां २

प्रति यादृशं सद्भावम् आचरद् अहमपीदानीं हानूनं प्रति तादृशं
सद्भावम् आचरिष्यामि। अतो दायूद् तस्य पितरमधि तं सान्त्वयितुं
३ दूतान् प्रेषयामास। दायूदस्तेषु दासेष्वम्मोनवंशीयानां देशे तस्य सम-
क्षम् उपस्थितेष्वम्मोनवंशीयानां मुख्या हानूनं जगदुः, दायूदा तव
समीपं सान्त्वयितारो जनाः प्रहिता इति कर्म्म तव पितुः सम्मानार्थं
तेन कृतं त्वं किमित्थं बुध्यसे? दायूदो दासा देशं निरीक्ष्यानुसन्धाय च
४ नाशयितुं तव समीपम् आगच्छन्निति किं नहि? ततो हानूनो दायूदो
दासान् धृत्वा तेषां श्मश्रूणाम् अर्द्धमर्द्धं क्षौरयित्वा नितम्बपर्य्यन्तं तेषां
५ वस्त्राणि छित्त्वा च तान् विससर्ज। अनन्तरं केनचिद् गत्वा वार्त्तामेनां
दायूदि ज्ञापिते तेषाम् अतीव त्रपाकारणाद् राजा तेषां साक्षात्कर-
णार्थं लोकान् प्रहित्येदम् आदिदेश, यावद् युष्माकं श्मश्रूणि न वर्द्धन्ते
तावद् यूयं यिरीहौ तिष्ठत पश्चात् परावृत्यागच्छत।
६ 　अनन्तरं वयं दायूदः सम्मुखे घृणार्हा अभवामेत्यम्मोनवंशीयै र्दृष्टे,
ततो हानूनोऽम्मोनवंशीयाश्चारामनहरयिमाद् अराममाखातः सोबा-
तश्च वेतनग्राहिणां रथहयारोहिणाम् आनयनार्थं दूतैरेकसहस्रकि-
७ क्कारपरिमितं रौप्यं प्रेषयामासुः। तैस्तु वेतनम् अङ्गीकृत्य द्वात्रिंशद्-
रथेषु माखाया राज्ञि तस्य लोकेषु च लब्धेषु ते समागत्य मेदिवायाः
सम्मुखे शिबिरं स्थापयामासुस्ततोऽम्मोनवंशीया अपि स्वस्वनगरेभ्यः
८ समागत्य युद्धायाजग्मुः। तां वार्त्तां निशम्य दायूद् योयावं बलवन्ति
९ सर्व्वसैन्यानि च तत् स्थानं प्रेषयामास। ततोऽम्मोनवंशीया बहिर्भूय
गोपुरप्रवेशस्थाने सैन्यानि रचयाञ्चक्रिरे ते च समागता राजानः क्षेत्रे
१० पृथग् व्यूहं रचयाञ्चक्रिरे। इत्थम् अग्रदिशि पश्चाद्दिशि च द्वयो र्दिशो
र्विरुद्धं युद्धं जायत इति दृष्ट्वा योयाव इस्रायेलः सर्व्वेभ्यः परीक्षि-
११ तलोकेभ्यो लोकान् वृत्वारामीयाणां विरुद्धं व्यूहं रचयामास। अव-
शिष्टलोकेषु च निजसहजे ऽवीशये तेन समर्पितेषु सोऽम्मोनीयानां
१२ विरुद्धं व्यूहं रचयाञ्चकार। अपरं योयावस्तं जगाद, अरामीयाश्चेत्
मत्तो बलवन्तो भवन्ति तर्ह्यहं त्वयोपकर्त्तव्यः, अम्मोनीयाश्च चेत् त्वत्तो
१३ बलवन्तो भवन्ति तर्ह्यहं त्वाम् उपकरिष्यामि। त्वं प्रबलो भव, वयं
स्वलोकानाम् अस्मदीयेश्वरस्य नगराणाञ्च कृते पुरुषत्वं प्रकाशयिष्यामहे
१४ परमेश्वरश्च यत् क्षेमं मन्यते तदेव करिष्यति। अनन्तरं योयावे तस्य
सङ्गिलोकेषु चारामीयैः समं योद्धुं प्रगतेषु ते तस्याग्रेऽग्रे पलायाञ्चक्रिरे।

अपरम् अरामीयाः पलायन्त इति दृष्ट्वाम्मोनवंशीया अपि तस्य भ्रातु- १५
रवीशयस्याग्रे पलाय्य नगरं प्रविविशुः। ततो योयावो यिरूशालमं
जगाम।

अनन्तरं वयम् इस्रायेल्वंशीयैः पराजिता इति वीक्ष्यारामीया १६
दूतान् प्रहित्य फरातनद्याः पारस्थान् अरामीयान् वहिरानिन्युः, हद-
देषरस्य सेनापतिः शोवकश्च तेषाम् अग्रगामी बभूव। अनन्तरं दायूद् १७
तां वार्त्तां निशम्येस्रायेलः सकलवंशान् संगृह्य यर्द्दनतटिन्याः पारं गत्वा
तेषां सन्निधिम् उपस्थाय तेषां विरुद्धं व्यूहं रचयाञ्चक्रे ततोऽरामीय-
लोकानां विरुद्धं दायूदा युद्धाय व्यूहरचनायां कृतायां ते तेन सह
युयुधुः। किन्त्वरामीया इस्रायेल्वंशस्य सम्मुखात् पलायाञ्चक्रिरे ततो १८
दायूद् अरामीयाणां सप्तसहस्राणि रथान् चत्वारिंशत्सहस्राणि पदा-
तींश्च नाशयामास विशेषतस्तेषां सेनापतिं शोवकं जघान। अनन्तरं १९
वयम् इस्रायेल्वंशीयैः पराजिता इति वीक्ष्य हददेषरस्य भृत्या दायूदा
सह सन्धिं कृत्वा तस्य वशीबभूवुः। अतो ऽरामीया अम्मोनवंशीयान्
पुनरुपकर्त्तुं नैच्छन्।

---

२० विंशोऽध्यायः।

१ दायूदः शत्रनाभी रब्बानगरस्य पराजितत्वं ४ पिलेष्टीयानां त्रयाणां दीर्घवपुषां लोकानां हननं।

अनन्तरं तस्मिन् वत्सरे गते सति राज्ञां रणयात्रासमये योयावः १
सैन्यान्यादाय जगाम ततः सोऽम्मोनवंशीयानां देशं नाशयामास किञ्च
रब्बानगरीं गत्वा संरुरोध, किन्तु दायूद् यिरूशालमे तस्थौ। अन- २
न्तरं योयावो रब्बां पराजित्य विनाशयामास। अपरं दायूदा रत्न-
सुवर्णानां किक्कारैकपरिमाणे राजमुकुटे तद्देशीयनृपस्य मस्तकाद् आदत्ते
तद् दायूदः शिरस्यारोप्यत, अपरं स तस्मात् नगरात् प्रभूतानि लोठि-
तद्रव्याणि वहिष्कृत्यानिनाय। अनन्तरं दायूद् तन्मध्यवर्त्तिनो मनुजान् ३
वहिष्कृत्यानीय करपत्राणां लौहमयानां लोष्टघ्नानां परश्वनाञ्च कर्म्मसु
न्ययुङ्क्त। दायूद् अम्मोनवंशस्य सकलनगराणि प्रति तादृशं चकार।
ततः परं दायूद् तस्य निखिला मनुजाश्च यिरूशालमं प्रत्याजग्मुः।

अनन्तरं गेषरे पिलेष्टीयैः सार्कं संग्राम उपस्थिते हूशातीयः सिब्बि- ४
ख्यस्तस्य दृहत्कायस्य तनयं सफं व्यापादयामास। पुनर्व्वारं पिलेष्टीयैः ५

समं समर आरब्धे तत्र यायीरस्य सुत इल्हाननस्तन्तुदण्डवन्महास्त्र-
६ लधारिणं गातीयजालूतस्य भ्रातरं लह्मिं व्यापादयामास। अनन्तरं
गाते पुन र्युद्धे जाते प्रतिहस्तं प्रतिपदञ्च षट् षट् अङ्गुल्यः साकल्येन
चतुर्विंशत्यङ्गुल्यो यस्यासन् एवम्भूतस्तस्य वृहत्कायस्यातीव दीर्घकाय
७ एकस्तनय इस्रायेलं नरं स्पर्द्धयामास ततो दायूदो भ्रातुः शिमियस्य पुत्रो
८ योनाथनस्तं व्यापादयामास। गातीया वृहत्कायवंशीया एते चत्वा-
रो जना दायूदा तस्य दासैश्च जघ्निरे।

---

२१ एकविंशोऽध्यायः।

१ दायूदा लोकानां गणनं ९ गादेन दायूदं प्रति दण्डत्रयकथनं १४ सप्ततिसहस्रेषु लो-
केषु हतेषु यिरूशालमः क्षते दायूदः प्रार्थनं १८ अरौणाहस्य शस्यमर्द्दनस्थाने
वह्निना दायूदे उत्तरदानं २८ तत्र स्थाने यज्ञवेदिनिर्म्माणं मन्दिरनिर्म्माणाय
निदेशश्च।

१ अनन्तरं शयतान इस्रायेल्वंशस्य प्रतिकूलम् उत्थायेस्रायेल्वंशस्य
२ गणनाय दायूदं प्रवर्त्तयाञ्चकार। अनन्तरं दायूद् योयावं मनुजानां
मुख्यांश्च समादिदेश यूयं वेर्शेवामारभ्य दानं यावद् इस्रायेलीयमनु-
जान् गणयत ततः परं मम सन्निधिं वार्त्ताम् आनयत, अहं तेषां संख्यां
३ विविदिषामि। ततो योयावः कथयाञ्चकार, इदानीं यावन्तो मनुजा
विद्यन्ते परमेश्वरस्तस्य शतगुणं निजलोकान् वर्द्धयतु किन्तु भो मम
प्रभो राजन् ते सर्व्वे किं मत्प्रभो र्दासेया नहि? तर्हि मम प्रभु र्नृपति-
४ रेतस्मिन् कर्म्मणि प्रवृत्त्या कुत इस्रायेलो दोषस्य मूलं भवेत्? तथापि
योयावस्य वचनाद् राज्ञो वचने प्रबले सति योयावः प्रस्थायेस्रायेलीय-
जनपदस्य सर्व्वत्र पर्य्यटितवान् ततः परं यिरूशालमं पुनराजगाम।
५ अनन्तरं योयावो लोकानां गणनस्य संख्यां दायूदं ज्ञापयामास तत्रे-
स्रायेलीयवंशस्यैकादशलक्षाणि खड्गधारिणो मानवा यिहूदावंशस्य च
सप्ततिसहस्राधिकानि चतुर्लक्षाणि खड्गधारिणो मानवा आसन्।
६ परन्तु तेषां मध्ये स लेवीयान् विन्यामीनवंशीयांश्च न गणयाञ्चकार
७ यतो योयावो महीपतेस्ताम् आज्ञां घृणार्हाम् अमन्यत। अपरं कार्य्ये-
८ णैतेनेश्वरस्यासन्तोषे जाते स इस्रायेल्वंशम् आजघान। अनन्तरं दायूद्
ईश्वरम् अवोचत् कार्य्येणानेन मया महाकलुषम् अकारि, इदानीं
विनयेऽहं निजदासस्य कलुषं क्षमस्व मयातीव मूढस्य कर्म्माकारि।

अनन्तरं परमेश्वरो दायूदः प्रदर्शकं गादं वच इदम् अवोचत्, त्वं ९
गत्वा दायूदं ब्रूहि परमेश्वरेण वच इदम् उच्यते तव सम्मुखे मया त्रयो १०
दण्डा निधीयन्ते तेषाम् एकस्त्वया व्रियतां मया स एव त्वां प्रति कारि-
ष्यते। ततो गादो दायूदः सन्निधिं गत्वा तम् अवोचत् परमेश्वरो ब्रवीति ११
त्रीन् वत्सरान् दुर्भिक्षोऽथवा त्रीन् मासान् यावत् तव पश्चाद् १२
अरीणां खड्गेषु तिष्ठतु तेषां सम्मुखे तव विनाशोऽथवा त्रीन् दिवसान्
यावत् जनपदे परमेश्वरस्य खड्गस्वरूपाया महामार्या अर्थत इस्रा-
येलः कृत्स्ने जनपदे विनाशकदूतस्य भ्रमणम् एतत्त्रयस्य मध्ये त्वयैकं
व्रियतां मत्प्रेरयित्रे मया किमुत्तरं दातव्यं तदिदानीं त्वयालोच्यतां।
ततो दायूद् गादं बभाषे मम महती मनःपीडा जाता, इदानीं परमे- १३
श्वरस्य हस्ते पतितुमिच्छाम्यहं यस्मात् तस्य कृपा प्रचुरा नाहं मनुष्याणां
हस्तेषु पतितुम् इच्छामि।

• अनन्तरं परमेश्वर इस्रायेल्वंशं प्रति महामारीं प्रेषयाञ्चकार तत १४
इस्रायेलीयानां सप्ततिसहस्राणि मनुजा अम्रियन्त। अपरम् ईश्वरो १५
यिरूशालमस्य विनाशार्थं यं दूतं तत् स्थानं प्रहितवान् तस्य विनाशन-
समये परमेश्वरो विलोक्य विपद्यनुतप्य तं विनाशकं दूतम् अब्रवीत्,
अलमनेन त्वं स्वकरं सङ्कोचय। तदानीं परमेश्वरस्य दूतो यिबूषीय-
स्यारौणाहस्य शस्यमर्द्दनस्थानस्य सन्निधाववातिष्ठत्। अनन्तरं दायूद् १६
ऊर्द्ध्वदृष्टि र्भवन् द्यावाभूम्यो र्मध्यपथिस्थितं परमेश्वरस्य दूतं तस्य करे
च यिरूशालमस्योपरि प्रसारितं निष्कोषं खड्गं ददर्श ततो दायूद् प्रा-
चीनमनुजाश्च परिहितशाणवसनाः सन्तो न्युब्जीभूय न्यपतन्। अन- १७
न्तरं दायूद् ईश्वरं बभाषे मनुजानां गणनस्यादेशः किं मया नाकारि?
मयैव पापमकारि ममैव सोऽपराधोऽस्ति मेषैरेतैः किम् अपराद्धं?
हे मम प्रभो परमेश्वर विनयेऽहं मम मदीयपितृवंशस्य च विरुद्धं त्वया
करः प्रसार्य्यतां परन्तु निजप्रजानाम् आघाताय न प्रसार्य्यतां।

अनन्तरं परमेश्वरस्य दूतो गादं बभाषे त्वं दायूदम् इदम् आदिश, १८
त्वं गत्वा यिबूषीयस्यारौणाहस्य शस्यमर्द्दनस्थाने परमेश्वराय यज्ञ-
वेदीमेकां निर्म्मापय। अनन्तरं परमेश्वरस्य नाम्ना गादो यद् आज्ञापि- १९
तवान् तदनुसारेण दायूद् यात्रां विदधे। तदानीम् अरौणाहो गोधू- २०
मान् अमर्द्दयत्, अनन्तरं स परावृत्य दूतम् अदर्शत् ततः स तस्य
चत्वारः सुताश्च प्रच्छन्ना बभूवुः। अनन्तरं दायूदरौणाहस्य समी २१

पम् उपस्थितवति स दृष्टिं कुर्व्वन् दायूदं विलोक्य शस्यमर्द्दनस्थानाद्
२१ वहि र्गत्वा भूमिलग्नशिराः सन् दायूदं प्रणनाम। तदानीं दायूद्
अरौणाहम् अब्रवीत् त्वम् इदं शस्यमर्द्दनस्थानं मह्यं देहि त्वया सम्पूर्णं
मूल्यमादाय तत् मह्यं दीयतां, मनुजानां मध्यात् महामारी यन्निवर्त्तेत
२२ तत्कृते मयात्र स्थाने परमेश्वराय यज्ञवेदिरेका निर्म्मापयिष्यते। ततो
ऽरौणाहो दायूदं बभाषे, गृह्णातु, मम प्रभुना पार्थिवेन यत् क्षेमं
बुध्यते तदेव क्रियतां। पश्यतु होमबले र्निमित्तं वृषभा इन्धननिमित्तं
मर्द्दनयन्त्राणि नैवेद्यस्य निमित्तं गोधूमाश्च मया दीयन्ते सर्व्वाण्येतानि
२४ मया त्यज्यन्ते। अनन्तरं दायूद् अरौणाहं जगाद तन्न भवतु मया
सम्पूर्णं मूल्यमेव दत्त्वा सर्व्वाण्येतानि क्रायिष्यन्ते नाहं परमेश्वराय तव
२५ सम्पदं दास्यामि विनामूल्यलब्धान् होमबलीन् वोत्स्रक्ष्यामि। अनन्तरं
दायूद् षट्शतशेकलपरिमितानि महारजतानि दत्त्वारौणाहात् तत्
२६ स्थानं चिक्राय। अपरं दायूद् तस्मिन् स्थाने परमेश्वराय यज्ञवेदीं
निर्म्माप्य होमबलीन् मङ्गलार्थकबलींश्च प्रोत्ससर्ज परमेश्वरम् उद्दिश्य
प्रार्थनां चकार च। ततः स होमार्थकयज्ञवेद्युपरि स्वर्गात् समेतेन
२७ कृतवहेन तस्मायुत्तरं ददौ। अनन्तरं परमेश्वरेण दूते समादिष्टे स
निजमसिं कोषे निदधे।

२८ अनेन प्रकारेण परमेश्वरो यिवूषीयारौणाहस्य शस्यमर्द्दनस्थाने
मह्यम् उत्तरं दत्तवान् इति विलोक्य दायूद् तदारभ्य तत्रैव बलीन् अद-
२९ दात्। परन्तु प्रान्तरे मूससा परमेश्वराय निर्म्मापित आवासो होम-
३० वेदिश्च तदानीं भ्रगुस्थाने गिबियोन आस्तां। किन्त्वीश्वरं प्रष्टुं दायूद्
तस्य समक्षं गन्तुं नाशक्नोत्, यतः स परमेश्वरीयदूतस्य चन्द्रहासाद्
बिभयाञ्चकार। अनन्तरं दायूद् बभाषे स्थानम् एतत् प्रभोः परमेश्व-
रस्य मन्दिरम् इस्रायेलो होमवेद्याः स्थानञ्च भविष्यति।

---

२२ द्वाविंशोऽध्यायः।

१ मन्दिरस्य निर्म्माणार्थं दायूदा बहुद्रव्याणां संग्रहणं ६ सुलेमानं प्रति मन्त्रणा निदे-
शश्च १७ सुलेमन उपकारार्थम् अधिपतीनाम् आज्ञापनं।

१ अनन्तरं दायूद् इस्रायेलीयजनपदे प्रवासिनां सर्व्वेषां विदेशिनां
२ संग्रहणम् आज्ञापयाञ्चकार, अपरम् ऐश्वरमन्दिरस्य निर्म्माणार्थं यो-
३ ग्यपाषाणानां कर्त्तनाय भास्करान् नियुयुजे। अपरं द्वारीयकवाटानां

कीलानां कृते कब्जानां कृते चापरिमितान् आयसान् अपरिमितान्
आरकूटांश्च सङ्गृहीतवान्। अपरम् असंख्यान्येरसकाष्ठानि संगृहीत- ४
वान् यतः सीदोनीयाः सोरीयाश्च दायूदः समीपं बहून्येरसकाष्ठानि
समानिन्युः। दायूद् कथयामास मम तनयः सुलेमान् अल्पवयस्को ५
मृदुश्चास्ति परन्तु परमेश्वरस्य कृते यत् मन्दिरं निर्म्मातव्यं तेनातीव
महता भवितव्यं तस्य यशसा शोभया च सर्व्वे देशा व्याप्तव्याः, अतोऽहं
तत्कृते द्रव्यसङ्ग्रहं करिष्यामि। तस्मात् दायूद् स्वनिधनात् पूर्व्वं तस्य
कृते बाहुल्यतः सङ्ग्रहं चकार।

ततः परं दायूद् निजतनयं सुलेमानम् आहूयेस्रायेलीयस्य प्रभवे ६
परमेश्वराय मन्दिरनिर्म्माणम् आज्ञापयाञ्चकार। दायूद् सुलेमानं ७
जगाद, हे मम तनय, मदीयप्रभोः परमेश्वरस्य नाम्नेऽहं मन्दिरं निर्म्माप-
यिष्यामीति मम मनोरथे जाते परमेश्वरस्य भारतीयं मां प्रति समुपा- ८
तिष्ठत् त्वया बहूनि रुधिराण्यपात्यन्त महान्तः समराश्चाक्रियन्त तत्-
कारणात् त्वया मम नाम्ने मन्दिरं न निर्म्मापितव्यं यतः पृथिव्यां मम
गोचरे बहूनि रुधिराणि त्वयापात्यन्त। पश्य तवैकः सुतो जनिष्यते स ९
शान्तो मानवो भविष्यति मया तस्मै चतुर्दिक्स्थितेभ्यः परिपन्थिभ्यो
विश्रामो वितारिष्यते तदीयं नामधेयं सुलेमान् शान्त इति भविष्यति,
तस्य राजत्वसमयेऽहम् इस्रायेलीयेभ्यः शान्तिं निष्कण्टकत्वञ्च विश्राण-
यिष्यामि। स एव मम नाम्ने मन्दिरं निर्म्मापयिष्यति स मम तनयो १०
भविष्यत्यहञ्च तस्य पिता भविष्यामीस्रायेलीयानाम् उपरि तस्य राज-
सिंहासनम् अनन्तकालं स्थैर्य्यं करिष्यामि च। हे मम तनय, परमेश्वर ११
इदानीं तव सहायो भवतु स त्वामधि यादृग् उक्तवान् तदनुसारेण त्वं
भाग्यवान् भूत्वा निजप्रभोः परमेश्वरस्य मन्दिरं निर्म्मापय। तदन्यद् १२
इस्रायेलीयानाम् आधिपत्यार्थं स्वप्रभोः परमेश्वरस्य व्यवस्थाया आच-
रणार्थञ्च परमेश्वरस्तुभ्यं ज्ञानबुद्धी प्रदेयात्। परमेश्वर इस्रायेलः कृते १३
मूससं यान् विधीन् याश्चाज्ञा आदिशत् ताः पालयितुं यदि मनो नि-
धत्से तर्ह्येव त्वं भाग्यवान् भविष्यसि, तस्मात् शक्तिमान् उत्सुकश्च भव
भीतो निराशश्च माभूः। पश्याहं निजदुःखसमये परमेश्वरीयमन्दिरस्य १४
कृते लक्षकिक्कारपरिमितानि सुवर्णानि दशलक्षकिक्कारपरिमितानि
दुर्व्वर्णानि प्रचुरत्वाद् अपरिमेयान् आरकूटान् लोहांश्च समगृह्लम्
अपरम् अहं काष्ठानि पाषाणांश्च समगृह्लं त्वमप्यपरान् सङ्ग्रहीतुं

१५ शक्ष्यन्ते। अपरं तव सन्निधौ बहवः शिल्पिनो ऽर्थतः पाषाणतक्षकाः सूत्र-
१६ धराः सर्व्वविधकर्म्मसु निपुणाः सर्व्वविधलोकाश्च विद्यन्ते। सुवर्णदुर्व्वर्ण-
पित्तललोहाश्चापरिमेयाः सन्ति, तस्मात् त्वम् उत्तिष्ठ कर्म्मणि उद्योगं
कुरुष्व, परमेश्वरस्तव सहायो भूयात्।
१७ अनन्तरं दायूद् इस्रायेलः सकलान् अधिपतीन् निजपुत्त्रस्य सुलेमन
१८ उपकारायादिशन् जगाद, युष्माकं प्रभुः परमेश्वरो युष्माकं सहायो भूत्वा
किं सर्व्वदिक्षु युष्मभ्यं विश्रामं न प्रादात्? जनपदनिवासिषु तेनैव
मदधीनीकृतेषु परमेश्वरस्य तदीयप्रजानाञ्च गोचरे नीवृत् पराजिता
१९ ऽभवत्। अतो निजप्रभोः परमेश्वरस्य गवेषणे स्वेषाम् अन्तःकरणानि
चित्तानि च निधद्ध्वम्, अपरम् उत्तिष्ठत, परमेश्वरस्य नाम्ने यन्मन्दिरं
निर्म्मापयिष्यते तन्मध्ये परमेश्वरस्य नियममञ्जूषाया ईश्वरीयाणां मेध्य-
भाजनानाञ्चानयनार्थं स्वप्रभोः परमेश्वरस्य पवित्रं स्थानं निर्म्मापयत।

---

२३ त्रयोविंशोऽध्यायः।

१ सुलेमनो राज्ये नियोगो २ लेविवंशस्य विभजनं ७ गेर्शोनीयवंशस्य नामधेयानि १२ किहातीयवंशस्य नामधेयानि २१ मिरारिवंशस्य नामधेयानि २४ लेवीयानां कर्म्माणि च।

१ ततः परं दायूदि स्थविरे सम्पूर्णायुषि च जाते स निजतनयं सुले-
२ मानम् इस्रायेलीयानां राजत्वे नियुयोज। स याजकै र्लेवीयैश्च सार्द्धम्
३ इस्रायेलीयान् अधिपतीन् संजग्राह। ते लेवीयास्त्रिंशद्वर्षवयस्कास्ततो
ऽधिकवत्सरवयस्काश्चासन् अपरं तेषां शिरोगणनया ते ऽष्टत्रिंशत्स-
४ हस्राणि पुरुषा आसन्। अपरं दायूद् अवोचत्, तेषां मध्यीयाश्चतुर्विं-
शतिसहस्राणि मनुजाः परमेश्वरीयमन्दिरकार्य्याध्यक्षा भवन्तु, अपरं
५ षट्सहस्राणि मानवाः शासितारो विचारयितारश्च भवन्तु। अपरं
चत्वारि सहस्राणि पुरुषा दौवारिका भवन्तु। मया प्रशंसार्थानि यानि
वाद्ययन्त्राणि निर्म्मापितानि तेषु नियुक्ताः परमेश्वरस्ताविनश्चत्वारि सह-
६ स्राणि लोका भवन्तु। अपरं दायूद् गेर्शोनीयः किहातीयो मिरारीय-
श्चेतिनामकान् लेविवंशान् विभज्य तेषां पर्य्यायान् निरूपयामास।
७ तेषां गेर्शोनीयानां मध्ये लादनः शिमियिश्च। अपरं लादनस्य त्रयः
८ सुता आसन्, ज्येष्ठो यिहीयेलः, अपरौ सेथमो योयेलश्च। किञ्च शिमि-

यस्त्रयः सुता आसन् शिलोमीतो हसीयेलो हारणश्च, इमे लादनवंशस्य
मुख्या आसन्। अपरं शिमियेः पुत्रा यहतः सीषो यियूशो विरियश्च, १०
शिमियेरेते ये चत्वारः सुता आसन्। तेषां मध्ये ज्येष्ठो यहतो द्वितीयश्च ११
सीष आसीत्। अपरं यियूशस्य विरियस्य च बहवः सन्ताना नासन्
एतत्कारणात् ते पितृवंशानुसारत एकस्मिन् पत्रे गणिता अभवन्।

अपरं किहातस्य चत्वारः पुत्रा आसन् अम्रामो यिष्हरो हिब्रोण १२
ऊषीयेलश्च। अपरम् अम्रामस्य सुतौ हारोणो मूसाश्च, एष हारोण- १३
स्तस्य पुत्राश्च यथा महापावित्र्येण पवित्रीक्रियेरन् परमेश्वरस्य सम्मुखे
धूपान् ज्वालयेयुः सेवाम् अनुतिष्ठेयुस्तस्य नाम्ना नित्यम् आशिषं वदेयुश्च
तदर्थं चिरकालकृते पृथक्कृता बभूवुः। ईश्वरीयलोकस्य मूससः पुत्रौ १४
लेविवंशस्य मध्ये गणितावास्तां। मूससः सुतौ गेर्शोम इलीयेषरश्च। १५
तस्य गेर्शोमस्य सन्तानानां मध्ये शिवूयेलो मुख्य आसीत्। इलीयेषरस्य १७
च सन्तानानां मध्ये रिहवियो मुख्य आसीत्। तस्येलीयेषरस्य नापरः
सुत आसीत्, परन्तु रिहवियस्य बहवः सुता आसन्। अपरं यिष्ह- १८
रस्य सुतानां मध्ये शिलामीतो मुख्य आसीत्। अपरं हिब्रोणस्य ज्येष्ठः १९
सुतो यिरियः, द्वितीयो ऽमरीयः, तृतीयो यहसीयेलः, चतुर्थो यिक्रमि-
यामः। अपरम् उषीयेलस्य ज्येष्ठः सुतो मीखाः, द्वितीयो यिशियः। २०

अपरं मिरारेः सुतौ महलि मूशिश्च। महलेः सुताविलियासरः २१
कीशश्च। अयम् इलियासरो यदा मृतवान् तदा तस्य सुतो नासीत्, २२
केवलं दुहितर आसन् ततो ज्ञातेः कीशस्य सुतास्ता व्यवहन्। अपरं २३
मूशेस्त्रयः सुता आसन्, महलिरेदरो यिरेमोतश्च।

निजनिजपितृवंशानुसारेणेमे लेवीयानां मध्ये स्वस्वपितृवंशस्य मुख्या २४
आसन् एतेभ्यो वर्गेभ्यश्च परमेश्वरीयमन्दिरस्य सेवार्थं लेवीयानां मध्ये
ये विंशतिवत्सरवयस्कास्ततो ऽधिकवत्सरवयस्काश्च तेषां सर्व्वेषां नामानि
शिरांसि च गणयाञ्चक्रिरे। यतो दायूद् अब्रवीत्, इस्रायेलीयानां प्रभुः २५
परमेश्वरो निजलोकेभ्यो विश्रामं व्यतरत्, स च सर्व्वदा यिरूशालमे
निवत्स्यति। अपरं लेवीयैरपि दूष्यं तत्सेवार्थकभाजनानि च पुन र्न २६
वोढव्यानि। एतत्कृते दायूदः शेषाज्ञया विंशतिवत्सरवयस्कास्ततो २७
ऽधिकवत्सरवयस्काश्च लेवीया गणयाञ्चक्रिरे। अपरं परमेश्वरीयमन्दिरस्य २८
सेवायां हारोणवंशीयानाम् उपकारः प्राङ्गणानां कोष्ठानाञ्चाध्यक्षत्वम्
अर्थतो निखिलानां पवित्रवस्तूनां परिष्करणम् ईश्वरीयमन्दिरस्य परि-

२९ चर्य्याकर्म्म, अपरं दर्शनीयपूपा नैवेद्यार्थकगोधूमचूर्णानि किरवशून्यपि-
ष्टकाः पक्वानि भ्रष्टानि वा द्रव्याणि निखिलपरिमाणानि तौलानि चैतेषां
३० सर्व्वेषां कर्म्म. अपरं प्रतिप्रातः प्रतिसन्ध्यञ्च परमेश्वरस्य प्रशंसार्थं धन्य-
३१ वादार्थञ्चोपस्थितिरपरं विश्रामवासरेष्वमावस्यासु वार्षिकपर्व्वसु च
परमेश्वरस्य साक्षात् नित्यं संख्यानुसारेण विधिवत् परमेश्वरोद्देश्यहो-
३२ मार्थकबलिदानञ्चैतेषु सर्व्वेषु ते न्ययुज्यन्त। अपरं परमेश्वरीयमन्दिरस्य
सेवायां समाजावासस्य रक्षा पवित्रस्थानस्य रक्षा स्वीयभ्रातॄणां हारोण-
वंशीयानां परिचर्य्या च तैरेव कर्त्तव्या।

---

२४ चतुर्विंशोऽध्यायः।

१ गुटिकापातेन चतुर्विंशतिवर्गै हारोणवंशस्य विभजनं २० किहातवंशस्य विवृतिः
२६ मिरारिवंशस्य विवृतिश्च।

१ हारोणवंशस्य पर्य्यायाणां विवृतिः। हारोणस्य सुता नादवो ऽवीहू-
२ रिलियासर ईथामरश्च। तेषां मध्ये नादवो ऽवीहूश्च स्वजनकस्याग्रे
मृतवन्तौ। तयोः सन्ताना नासन्, अत इलियासर ईथामरश्च याज-
३ कत्वं प्रापतुः। अनन्तरं दायूद् इलियासरवंशीयः सादोक ईथामर-
वंशीयो ऽहीमेलकश्च तान् विभज्य निजनिजसेवापदेषु न्ययोजयन्।
४ तदानीम् ईथामरवंशीयेभ्य इलियासरवंशीयानां मध्ये बहुतरेषु प्रधान-
पुरुषेषु विद्यमानेषु ते तान् इत्थं विबभजुः। इलियासरवंशमध्ये पितृ-
वंशानुसारेण षोडशजना ईथामरवंशमध्ये च पितृवंशानुसाराद् अष्ट-
५ जनाः प्राधान्यप्राप्ता अभवन्।ते तान् अविशेषेण गुटिकापातेन व्यभजन्,
यतः पवित्रस्थानस्याध्यक्षा ईश्वरीयाध्यक्षाश्चेलियासरवंशस्येथामरवंशस्य
६ च मध्ये बभूवुः। अपरं राज्ञो ऽधिपतीनां सादोकयाजकस्याबिया-
थरसुतस्याहीमेलकस्य याजकीयलेवीयपितृवंशानां प्रधानलोकानाञ्च
साक्षात् लेवीयनियनेलस्य सुतः शिमयियो लेखकस्तेषां नामानि लिखि-
तवान् अपरम् ईथामरस्यैकः पितृवंशस्ततः परम् इलियासरस्यैकः पितृ-
७ वंश इत्थम् एकैकः पितृवंशो ऽलिख्यत। ततः प्रथमे गुटिकापाते यिहो-
८ यारीवस्य गुटिकोदतिष्ठत्, द्वितीये यिदयियस्य, तृतीये हारीमस्य,
९ चतुर्थे सियोरीयस्य, पञ्चमे मल्कियस्य, षष्ठे मियामीनस्य, सप्तमे कोसस्य,
११ अष्टमे ऽवियस्य, नवमे येशूयस्य, दशमे शिखनियस्य, एकादश इलिया-

शीवस्य, द्वादशे याकीमस्य, त्रयोदशे हुप्पस्य, चतुर्द्दशे येशवावस्य, १२
पञ्चदशे विल्गाः, षोडश इम्मेरसस्य, सप्तदशे हेषीरस्य, अष्टादशे १३
हप्पीसेसस्य, ऊनविंशे पिथाहियस्य, विंशतितमे यिहिष्केलस्य, एकविं- १५
शतितमे याखीनस्य, द्वाविंशतितमे गामूलस्य, त्रयोविंशतितमे दिलायस्य, १६
चतुर्विंशतितमे पाते च मासियस्य गुटिका समुदतिष्ठत्। इस्रायेलः १९
प्रभुः परमेश्वरो यादृक् तेषां पूर्व्वपुरुषं हारोणम् आज्ञापयाञ्चकार
तादृक् स्वेषां विधिमतानुसारेण परमेश्वरीयमन्दिरप्रवेशादिसेवाकर्म्मणि
तेषाम् एते पर्य्याया बभूवुः।

लेवेरन्येषामपत्यानां विवृतिः। अम्रामवंशस्य मध्ये शिवूयेलः, शिवू- २०
येलवंशस्य मध्ये येहदियः। अपरं रिहवियस्य विवृतिरियं। रिहवियस्य २१
सुतानां मुख्यो यिशियः। यिष्हरीयाणां मध्ये शिलोमीतः, शिलोमीतस्य २२
सुतानां मध्ये यहतः। अपरं हिब्रोणस्य ज्येष्ठः सुतो यिरियः, द्वितीयो २३
ऽमरियः, तृतीयो यहासीयेलः, चतुर्थो यिकमियामः। अपरम् उषीये- २४
लस्य तनयो मीखाः, मीखाः सुतानां मध्ये शामीरः। मीखा भ्राता यि- २५
शियः, यिशियस्य पुत्त्राणां मध्ये सिखरियः।

अपरं मिरारे वंशा महलि मूंशिश्च तस्य तृतीयपुत्त्रस्य यासियस्य २६
सन्तानाश्च। अपरं मिरारेः सुतस्य यासियस्य वंशाः शोहमः सक्कूर २७
इब्रिश्च। अपरं महलेः सुत इलियासरः, तस्य सुतो नासीत्। कीशस्य २९
विवृतिः, कीशस्य तनयो यिरहमेलः। अपरं मूशेः सुतो महलिरेदरो ३०
यिरेमोतश्च, इमे स्वीयस्वीयपितृवंशानुसारेण लेवीयवंशाः। एते ऽपि ३१
दायूदो महीपतेः सादोकस्याहीमेलकस्य याजकीयलेवीयपितृप्रधाना-
नाञ्च साक्षात् स्वेषां भ्रातु र्हारोणस्य वंशा इव गुटिकापातं चक्रिरे, तेषां
पितृप्रधानमनुजास्तदीयकनिष्ठभ्रातरश्चैकमतं चक्रिरे।

---

२५ पञ्चविंशोऽध्यायः।

१ गायकानां विवृतिः ८ गुटिकापातेन चतुर्विंशभागेषु तेषां विभजनं।

अपरं दायूद् उपासकानां मुख्याश्च वल्लकीमुरजकरतालवाद्यार्थम् १
आसफस्य हेमनस्य यिदूथूनस्य च सन्तानान् विभज्य न्ययुङ्क्त तेषां कर्म्मा-
नुसारेण कर्म्मकारिणां सङ्ख्येयं। आसफवंशस्य विवृतिः। आसफस्य २
सन्तानाः सक्कूरो यूषफो निथनियो ऽसारेलश्च। अपरं नरपतेः पार्श्वे

३ आसफो वाद्यं कुर्व्वति ते तस्य साहाय्यम् अकुर्व्वन्। यिदूथूनस्य कथनं।
यिदूथूनस्य सन्ताना गिदलियो यिस्रिः (शिमियि) यिशयियो हशवियो
मत्तथियश्च। परमेश्वरस्य धन्यवादार्थं प्रशंसार्थञ्च वीणावाद्ये क्रियमाणे
४ इमे निजतातस्य यिदूथूनस्य साहाय्यम् अकुर्व्वन्। हेमनस्य कथनं।
हेमनस्य सन्ताना वुक्कियो मत्तनिय उषीयेलः शिवूयेलो यिरेमोतो
हनानियो हनानिरिलीयाथा गिद्दल्ती रोमाम्तियेषरो यश्बिकाशा
५ मल्लोथि होथीरो महसीयोतश्च। यो हेमन ईश्वरस्य वाक्यमधि राज्ञः
प्रदर्शक आसीत् तस्योन्नतये तस्यैते सर्व्वे पुत्रा आसन्। ईश्वरो हेमनाय
६ चतुर्द्दशपुत्रान् तिस्रः पुत्रीश्च ददौ। एते सर्व्वे ईश्वरीयमन्दिरस्य सेवार्थं
करतालवल्लकीमुरजैः परमेश्वरस्य मन्दिरे गानार्थञ्च निजपितुः साहा-
य्यम् अकुर्व्वन्, अपरम् आसफो यिदूथूनो हेमनश्च राज्ञः पार्श्वेऽतिष्ठन्।
७ परमेश्वरस्य शिक्षितगीतास्ते तेषां बुद्धिमन्तो भ्रातरश्च संख्ययाष्टाशी-
त्यधिके द्वे शते जना आसन्।
८ अनन्तरं ते क्षुद्राणां महताञ्च गुरूणां शिष्याणाञ्च पर्य्यायान् गुटिका-
९ पातेन स्थिरीचक्रुः। तत आसफस्य सुतस्य यूषफस्य कृते प्रथमा गुटिका
उदतिष्ठत्, द्वितीया गिदलियस्य कृते, स तस्य भ्रातरः सुताश्च द्वादश
१० जनाः। तृतीया सक्कूरस्य कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः।
११ चतुर्थी यिस्रेः कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः। पञ्चमी
१२ निथनियस्य कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः। षष्ठी वुक्कियस्य
१४ कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः। सप्तमी यिशारेलाः कृते,
१५ स तस्य भ्रातरः सुताश्च द्वादश जनाः। अष्टमी यिशयियस्य कृते, स तस्य
१६ भ्रातरः सुताश्च द्वादश जनाः। नवमी मत्तनियस्य कृते, स तस्य भ्रातरः
१७ सुताश्च द्वादश जनाः। दशमी शिमियेः कृते, स तस्य भ्रातरः सुताश्च
१८ द्वादश जनाः। एकादशी असरेलस्य कृते, स तस्य भ्रातरः सुताश्च द्वादश
१९ जनाः। द्वादशी हशवियस्य कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः।
२० त्रयोदशी शिवूयेलस्य कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः।
२१ चतुर्द्दशी मत्तथियस्य कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः।
२२ पञ्चदशी यिरेमोतस्य कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः।
२३ षोडशी हनानियस्य कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः।
२४ सप्तदशी यश्बिकाशाः कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः।
२६ अष्टादशी हनानेः कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः। ऊनविंशी

मल्लोथेः कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः। विंशतितमी हल्लो- १७
याथाः कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः। एकविंशतितमी १८
होथीरस्य कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः। द्वाविंशतितमी १९
गिद्दल्तेः कृते, स तस्य भ्रातरः सुताश्च द्वादश जनाः। त्रयोविंशतितमी ३०
मह्सीयोतस्य कृते,स तस्य भ्रातरः सुताश्च द्वादश जनाः। चतुर्विंशति- ३१
तमी गुटिका रोमाम्त्येषरस्य कृत उदतिष्ठत्, स तस्य भ्रातरः सुताश्च
द्वादश जना आसन्।

---

२६ षड्विंशोऽध्यायः।

१ दौवारिकाणां विवृतिः १२ गुटिकापातेन दौवारिकाणां निरूपणं २० भाण्डागार-रक्षार्थं लेवीयानां नियोजनञ्च।

दौवारिकाणां पर्य्यायाणां विवृतिः। कोरहीयाणां मध्ये कोरेः सुतो १
मिशेलिमिय आसफवंशीयो लोक आसीत्। मिशेलिमियस्य ज्येष्ठः सुतः २
सिखरियः, द्वितीयो यिदीयेलः, तृतीयः सिबदियः, चतुर्थो यत्नीयेलः,
पञ्चम एलमः, षष्ठो यिहोहाननः, सप्तम इलियो-ऐनयः। अपरम् ओबे- ४
दिदोमस्य ज्येष्ठः सुतः शिमयियः,द्वितीयो यिहोषावदः,तृतीयो योयाहः,
चतुर्थः साखरः, पञ्चमो निथनेलः, षष्ठो ऽम्मीयेलः, सप्तम इषाखरः, ५
अष्टमः पियुल्तयः, यतः परमेश्वरस्तस्मा आशिषं दत्तवान्। अपरम् ६
ओबेदिदोमस्य सुतस्य शिमयियस्य तनयनिवहो जज्ञे, ते बलवन्तो लोका
भूत्वा पितृवंशे ऽधिपतित्वं चक्रिरे। शिमयियस्य तनया अत्नी रिफायेल ७
ओबेद इल्सावदश्च तस्य भ्रातराविलीहूः सिमखियश्चेमे बलवन्तो
मनुजा आसन्। एते ऽपि सन्ताना ओबेदिदोमस्य, अपरम् इम एतेषां ८
सुता भ्रातरश्च सेवार्थकबलेन बलवन्त आसन्,ओबेदिदोमस्य वंशजाता
द्विषष्टिजना आसन्। अपरं मिशेलिमियस्य तनया भ्रातरश्चाष्टादश ९
बलवन्तो मनुजा आसन्। अपरं मिरारिवंशीयस्य होषाः सुतानां मध्ये १०
शिम्रि मुख्य आसीत्, ज्येष्ठो न सन्नपि स स्वपित्रा प्रधानीचक्रे। द्वितीयो ११
हिल्कियः, तृतीयः टिबलियः, चतुर्थः सिखरियः। होषास्तनया भ्रात-
रश्च साकल्येन त्रयोदश जना आसन्। परमेश्वरीयमन्दिरसेवार्थं १२
भ्रातृनिवहेन समं रक्षाकर्म्मसु लोकसंख्यानुसारेण दौवारिकाणां पर्य्या-
या एतेषामेवाभवन्।

१३ अपरं ते प्रधानाप्रधानत्वेन निजनिजपितृवंशानुसारेणैकैकस्य द्वारस्य
१४ कृते गुटिकापातं चक्रिरे। प्रथमं शेलिमियस्य कृते पूर्व्वदिक्स्थद्वारस्य
गुटिका समुदतिष्ठत्। अनन्तरं मन्त्रणातत्परस्य तस्य पुत्त्रस्य सिखरियस्य
१५ कृते गुटिकापाते कृत उत्तरदिक्स्थद्वारस्य गुटिका समुदतिष्ठत्। अपरम्
ओवेदिदोमस्य कृते दक्षिणदिक्स्थद्वारस्य गुटिका तस्य सुतानाञ्च कृते
१६ भाण्डागारस्य गुटिका समुदतिष्ठत्। अपरं शुप्पीमस्य होषाश्च कृते पश्चि-
मदिक्स्थद्वारस्यार्थत ऊर्द्ध्वगामिपथस्य निकटस्थं यत् शल्लेखतनाम द्वारं
तस्य गुटिका समुदतिष्ठत् तस्य द्वौ रक्षकनिवहौ परस्परम् अभिसम्मु-
१७ खावास्तां। अपरं पूर्व्वस्यां दिशि लेवीयानां षट् जनाः, उत्तरस्यां दिवा
चत्वारः, दक्षिणस्यां दिवा चत्वारः, एकैकस्मिन् भाण्डागारे च द्वौ द्वौ
१८ जनौ। अपरं पश्चिमदिशि स्थितस्योपनगरस्य द्वारे राजवर्त्मनि चत्वारो
१९ जना उपनगरे च द्वाविमे नियुक्ता आसन्। अनेन प्रकारेण कोरहस्य
मिरारस्य वंशयो र्मध्ये दौवारिकाणां पर्य्याया न्यरूप्यन्त।

२० अपरं लेवीयानां मध्ये ऽहियः परमेश्वरीयमन्दिरस्य धनागारस्य
२१ पवित्रीकृतद्रव्याणां धनागारस्य चाध्यक्ष आसीत्। अपरं लादनस्य तन-
यानां विवृतिः। गेर्शोनीयलादनस्यैतान्यपत्यानि पितृवंशानां प्रधानान्या-
२२ सन्। गेर्शोनीयलादनस्य तनयो यिहीयेलिः, यिहीयेलेः सुतः सेथमस्तस्य
२३ भ्राता योयेलश्चेमे परमेश्वरीयमन्दिरस्य धनाध्यक्षा आसन्। अपरम्
२४ अम्रामीयाणां यिष्हरीयाणां हिब्रोणीयानाम् उषीयेलीयानाञ्च मध्ये
मूससः सुतो यो गेर्शोमस्तस्य तनयः शिवूयेलो धनाधिपतिरासीत्।
२५ अपरम् इलीयेषरवंशीयास्तस्य भ्रातरो रिहवियस्तस्य तनयो यिशयियः,
यिशयियस्य तनयो योरामः, योरामस्य सुतः सिखिः, सिखेः सुतश्च
२६ शिलोमीतः। दायूद् महीपतिः पितृवंशानां प्रधानलोकाः सहस्रपतयः
शतपतयः सेनापतयश्च यानि द्रव्याणि न्यवेदयन् तेषां पवित्रीकृतद्रव्या-
२७ णाम् अध्यक्षत्वं स शिलोमीतस्तदीयभ्रातृनिवहश्च लेभिरे। परमेश्वरीय-
मन्दिरस्य निर्म्माणार्थं समरलब्धानि बहूनि द्रव्याणि तैः पवित्रीकृतानि।
२८ अपरं शिमूयेलः प्रदर्शकः कीशस्य सुतः शौलो नेरस्य सुतो ऽव्नेरः सिरू-
यायाः सुतो योयावश्चैतै र्यानि द्रव्याणि पवित्रीकृतानि तान्यन्यानि च
सर्व्वाणि पवित्रीकृतद्रव्याणि शिलोमीतस्य तदीयभ्रातृनिवहस्य च करेषु
२९ समार्प्यन्त। अपरं यिष्हरीयाणां मध्ये किननियस्तस्य पुत्त्रनिवहश्चेसा-
येलीयानां वाह्यकर्म्मणि नियुक्ताः सन्तो ऽधिपतयो विचारयितारश्चा-

भवन्। अपरं हिब्रोणीयानां मध्ये हशवियस्तस्य भ्रातृनिवहश्चार्थतः ३०
सप्तशताधिकं सहस्रं बलवन्तो मानवाः परमेश्वरीयकार्य्येषु राजकर्म्म
कर्त्तुं पश्चिमायां दिशि यर्द्दनतीरस्थदेशे इस्रायेलीयलोकानाम् अध्यक्ष-
त्वपदे न्ययुज्यन्त। निजनिजपितृवंशानुसारेण हिब्रोणीयलोकानां मध्ये ३१
यिरियो मुख्य आसीत्। दायूद्राजस्याधिकारस्य चत्वारिंशद्वत्सरे तेषां
परीक्षायां कृतायां गिलियदस्थे यासेरनगरे तेषां मध्ये बलवन्तो लोकाः
प्राप्यन्त। अपरं तस्य तद्भ्रातृनिवहस्य सप्तशताधिके द्वे सहस्रे बलवन्तो ३२
मनुजाः पितृवंशस्य प्रधानान्यासन्। अपरं दायूद् नरपतिरीश्वरीय-
कर्म्मार्थं राजकर्म्मार्थञ्च तान् रूवेणीयानां गादीयानां मिनशेरर्द्धवंशस्य
चाध्यक्षत्वपदे नियोजयामास।

---

२७ सप्तविंशोऽध्यायः।

१ मासिकसेनापतीनां नामानि १६ द्वादशवंशाधिपतीनां नामानि २३ लोकानां गण-
नायाम् आपत्तिः २५ दायूदो नरपतेरधिपतीनां नामानि च।

इस्रायेलीयवंशस्य संख्यानुसारेण पितृवंशानां ये प्रधानलोकाः सहस्र- १
पतयः शतपतयो ऽधिपतयश्च राजानं नित्यम् असेवन्त अर्थात् ये पर्य्याये
विभक्ताः सन्तो वत्सरस्यैकैकमासं यावत् कर्म्मार्थम् आगत्य पश्चात्ततो
न्यवर्त्तन्त तेषाम् एकैकस्मिन् पर्य्याये चतुर्विंशतिसहस्राणि लोका आसन्।
प्रथममासस्य प्रथमपर्य्याये सब्दीयेलस्य तनयो याशवियामो नियुक्त २
आसीत् तस्य पर्य्याये चतुर्विंशतिसहस्राणि मनुजा आसन्। प्रथममासे ३
नियुक्तः स पेरसवंशोद्भवो नरः सर्व्वेषां सेनानीनां मुख्य आसीत्। अपरं ४
द्वितीयमासस्य पर्य्याये ऽहोहीयो दोदयो नियुक्त आसीत्, तस्मिन् पर्य्याये
मिक्लोतो मुख्य आसीत्, अपरं तस्य पर्य्याये चतुर्विंशतिसहस्राणि मनुजा
आसन्। अपरं तृतीयमासस्य पर्य्याये तृतीयसेनानी यिहोयादा याज- ५
कस्य सुतो विनायो नियुक्त आसीत्, अपरं तस्य पर्य्याये चतुर्विंशति-
सहस्राणि मनुजा आसन्। अयं विनायस्त्रिंशज्जनानां मध्ये पराक्रान्त- ६
स्तेषाम् अधिपश्चासीत्, अपरं तस्य पर्य्याये तदीयतनयो ऽम्मीषावद
आसीत्। अपरं चतुर्थमासस्य पर्य्याये चतुर्थः सेनानी योयावस्य भ्राता ७
असाहेलस्तस्य निधनात् परं तस्य तनयः सिवदियश्च नियुक्त आसीत्,तस्य
पर्य्याये चतुर्विंशतिसहस्राणि मनुजा आसन्। अपरं पञ्चममासस्य पर्य्याये ८

पञ्चमः सेनानी यिंम्राहीयः शम्होतो नियुक्त आसीत्, तस्य पर्य्याये चतु-
९ र्विंशतिसहस्राणि मनुजा आसन्। अपरं षष्ठमासस्य पर्य्याये षष्ठः
सेनानीरिक्केशस्य पुत्तस्तिकोयीय ईरो नियुक्त आसीत्, तस्य पर्य्याये
१० चतुर्विंशतिसहस्राणि मनुजा आसन्। अपरं सप्तममासस्य पर्य्याये
सप्तमः सेनानीरिफ्रयिमवंशोद्भवः पिलोनीयो हेलसो नियुक्त आसीत्,
११ तस्य पर्य्याये चतुर्विंशतिसहस्राणि मनुजा आसन्। अपरं अष्टममासस्य
पर्य्याये ऽष्टमः सेनानीः सेरहवंशीयो हूशातीयः सब्बिखयो नियुक्त
१२ आसीत्, तस्य पर्य्याये चतुर्विंशतिसहस्राणि मनुजा आसन्। अपरं
नवममासस्य पर्य्याये नवमः सेनानी विन्यामीनवंशोद्भवो ऽनाथोतीयो
ऽवीयेषरो नियुक्त आसीत्, तस्य पर्य्याये चतुर्विंशतिसहस्राणि मनुजा
१३ आसन्। अपरं दशममासस्य पर्य्याये दशमः सेनानीः सेरहवंशीयो
निटोफातीयो महरयो नियुक्त आसीत्, तस्य पर्य्याये चतुर्विंशति-
१४ सहस्राणि मनुजा आसन्। अपरम् एकादशमासस्य पर्य्याय एका-
दशः सेनानीरिफ्रयिमवंशोद्भवः पिरियाथोनीयो विनायो नियुक्त
१५ आसीत्, तस्य पर्य्याये चतुर्विंशतिसहस्राणि मनुजा आसन्। अपरं
द्वादशमासस्य पर्य्याये द्वादशः सेनानीरत्नीयेलवंशीयो निटोफा-
तीयो हिल्दयो नियुक्त आसीत्, तस्य पर्य्याये चतुर्विंशतिसहस्राणि
मनुजा आसन्।

१६ अपरम् इस्रायेलीयवंशानां मध्ये रूवेणवंशे सिख्रेः सुत इलीयेषरः
१७ शास्ता, शिमियोनवंशे माखाः सुतः शिफटियः, लेविवंशे किमूयेलस्य
१८ सुतो हशवियः, हारोणवंशे च सादोकः, यिहूदावंशे दायूदः सहज
१९ इलीहुः, इषाखरवंशे मीखायेलस्य पुत्रो ऽम्रिः, सिवूलूनवंश ओवदियस्य
२० सुतो यिश्मयियः, नप्तालिवंशे ऽस्रीयेलस्य सुतो यिरेमोतः, इफ्रयिमवंशे
२१ ऽससियस्य सुतो होशेयः, मिनशेरर्द्धवंशे पिदायस्य सुतो योयेलः, गि-
लियदस्थमिनशेरर्द्धवंशे सिखरियस्य सुतो यिद्दोः, विन्यामीनवंशे ऽव्-
२२. नेरस्य सुतो यासीयेलः, दानवंशे च यिरोहमस्य सुतो ऽसरेलः। इमे
इस्रायेल्वंशानाम् अधिपतय आसन्।

२३ दायूद् विंशतिवत्सरवयस्कान् ततो न्यूनवयस्कांश्च लोकान् न गण-
यामास, यतः परमेश्वरः कथयामास, इस्रायेल्वंशो मया गगनीय-
२४ तारागण इव वर्द्धिष्यते। सिरूयायाः सुतो योयावो गणयितुम् आरेभे
परन्तु तेन समाप्तौ न कृतायां तत्कारणाद् इस्रायेल्वंशस्य विरुद्धं

परमेश्वरस्य कोपः प्रजास्वासीत् ततो हेतोस्तेषां संख्यापि दायूदो नृपतेः पुरावृत्तपुस्तके नालिख्यत।

राजधनाध्यक्षो ऽदीयेलस्य सुतो ऽस्मावतः, अपरं क्षेत्रनगरग्रामदुर्गेषु २५
ये कोषागारा आसन् उषियस्य तनयो यिहोनाथनस्तेषाम् अध्यक्ष
आसीत्। अपरं क्षेत्राणां कृषिकर्म्माणि कुर्व्वताम् अधिपतिः किलूबस्य २६
तनय इब्रिः। अपरं द्राक्षाक्षेत्राणाम् अधिपती रामाथीयः शिमियिः, २७
अपरं द्राक्षाक्षेत्रस्थितानां द्राक्षारसशालानाम् अधिपतिः शिफमीयः
सब्दिः। अपरं निम्नभूमिस्थितानां जिततरूणाम् उडुम्बरतरूणाञ्चाधिपति २८
र्गिदेरीयो बाल्हानन:, अपरं तैलभाण्डागाराणाम् अधिपति र्योयाशः।
अपरं शारोणस्थानां गोधनानाम् अधिपतिः शारोणीयः सिट्रयः, प्रान्तर- २९
स्थानाञ्च गोधनानाम् अधिपतिरद्लयस्य तनयः शाफटः। उष्ट्राणाम् ३०
अधिपतिरिस्मायेलीय ओबीलः, गर्द्दभीनाम् अधिपति र्मेरोणोथीयो
येहदियः। अपरं मेषव्रजानाम् अधिपति र्हाग्रिरीयो यासीषः, एते ३१
दायूदो महीपतेः सम्पदो ऽधिपतय आसन्। अपरं दायूदो भूपतेः ३२
पितृव्यो योनाथनो मन्त्री परिणामदर्शी च भवन् लेखक आसीत्।
अपरं हक्मोनेः सुतो यिहीयेलो राजतनयानां सभास्तार आसीत्।
अहीथोफलो राजमन्त्र्यासीत्, अर्कीयहूशयो राज्ञो मित्रमासीत्। ३३
अपरं विनायस्य तनयो यिहोयादा अवियाथरश्चाहीथोफलस्य सहा- ३४
यावास्ताम्, अपरं योयाबो राज्ञः सेनानीरासीत्।

---

२८ अष्टाविंशोऽध्यायः।

१ निखिलाध्यक्षेषु मिलितेषु तान् प्रति दायूदो मन्त्रणा ९ सुलेमानं प्रति दायूदो मन्त्रणा ११ सुलेमनि मन्दिरादर्शसमर्पणं स्वर्णरूप्यादिसमर्पणञ्च २० दायूदो ऽन्यत् कथनञ्च।

अनन्तरं दायूद् इस्रायेलः सर्व्वान् मुख्यनरान् अर्थतो वंशाध्यक्षान् १
पर्य्यायानुसारेण राज्ञः सेवाकारिणां पर्य्यायाग्र्यान् सहस्रपतीन् शतप-
तीन् राज्ञो राजपुत्राणाञ्च सम्पदो ऽध्यक्षान् राजगृहाध्यक्षान् पराक्रा-
न्तान् बलवन्तश्च लोकान् सर्व्वान् यिरूशालमे संजग्राह। तदानीं दायूद् २
चरणाभ्यां तिष्ठन् अवोचत्, हे मम भ्रातरः, हे मम प्रजाः, मम वाचं
शृणुत। परमेश्वरीयनियममञ्जूषायाः कृते ऽस्माकम् ईश्वरस्य पादपीठस्य
च कृते विश्रामार्थकं मन्दिरमेकं निर्म्मातुं मदीयमतिरभवत् तेन मया

३ निर्म्माणार्थं वस्तूनाम् आयोजनम् अकारि। परन्तु ईश्वरो माम् अवो-
चत्, मम नामधेयमुद्दिश्य मन्दिरनिर्म्माणं त्वया न कर्त्तव्यं यतस्त्वं योद्धा
४ भवन् रुधिरपातम् अकार्षीः। तथापीस्रायेलीयानां प्रभुः परमेश्वर
इस्रायेलीयानाम् उपरि नित्यराजत्वप्राप्त्यर्थं मम कृत्स्नपितृवंशात् मां
वरीतवान्। स शासनपदार्थं यिहूदावंशं यिहूदावंशे च मम पितृवंशं
वरीतवान्, मम पितुः पुत्राणां मध्ये च मयि तुष्ट्वा कृत्स्नस्येस्रायेलो राजत्वे
५ मां नियोजितवान्। अपरं परमेश्वरो मह्यं यान् बहून् तनयान् अद-
दात् मम तेषां निखिलतनयानां मध्य इस्रायेलीयलोकानां मध्ये परमे-
श्वरीयराजसिंहासन उपवेशयितुं मदीयतनयं सुलेमानं वरीतवान्।
६ अपरं स माम् अब्रवीत्, तव तनयः सुलेमानेव मम मन्दिरं मम प्राङ्ग-
णानि च निर्म्मास्यति, अहं निजतनयमिव तं वरीतवान् अहञ्च तस्य
७ तातो भविष्यामि। अपरञ्च स यदि मम निदेशान् विधींश्च पालयितु-
मद्यवद् बलवान् भवेत् तर्हि मया तस्य राजत्वं चिरस्थायि कारिष्यते।
८ अत इदानीं परमेश्वरस्य समाजो यो निखिलेस्रायेल्वंशस्तद्दृष्टिगोचरे
ऽस्माकम् ईश्वरस्य कर्णगोचरे च (वदामि, यूयम्) अस्माकं प्रभोः परमे-
श्वरस्य सर्व्वान् आदेशान् पालयितुं यतध्वं तेनोत्तमम् इमं जनपदं
भोक्ष्यध्वे युष्माकं परतो ऽपि स्वकीयसन्तानेषु चिरकालीयाधिकारार्थं तं
समर्पयिष्यथ।

९ हे मम तनय सुलेमन् त्वं स्वीयतातस्येश्वरम् अभिजानीहि सरला-
न्तःकरणेन प्रसन्नमनसा च तं सेवस्व यतः परमेश्वरः सर्व्वेषाम् अन्तःकर-
णानां परीक्षकः सर्व्वमनःसङ्कल्पज्ञश्च। त्वं यदि तस्यान्वेषणं कुर्य्यास्तर्हि
तं प्राप्स्यसि, किन्तु यदि तं परित्यजेस्तर्हि स त्वां सदाकालार्थं दवयि-
१० ष्यति। अधुना सावधानो भव, पवित्रस्थानार्थं मन्दिरनिर्म्माणाय परमे-
श्वरस्त्वां वरीतवान्, अतस्त्वया बलवता कर्म्म क्रियतां।

११ अनन्तरं दायूद् निजतनयाय सुलेमने मन्दिरस्यादर्शम् अर्थतस्तस्या-
लिन्दः कोष्ठानि भाण्डागाराण्युपरिस्थितकोष्ठान्यन्तःस्थितागाराणि पा-
१२ पावरणस्य स्थानञ्चैतेषाम् आदर्शं दत्तवान्। अपरं परमेश्वरीयमन्दिरस्य
प्राङ्गणानि चतुर्दिक्स्थकोष्ठानीश्वरीयमन्दिरस्य भाण्डागाराणि पवित्रद्र-
१३ व्यार्थकभाण्डागाराणि याजकानां लेवीयानाञ्च पर्य्यायाः परमेश्वरीय-
मन्दिरस्य परिचर्य्याया निखिलकर्म्म परमेश्वरीयमन्दिरस्य सेवार्थकानि
सर्व्वभाजनानि चैतत् सर्व्वमधि तस्मा आत्मना प्रदत्तो य आदर्शस्तमपि

तस्मै दत्तवान्। अपरं सर्व्वप्रकारसेवार्थकानां सुवर्णमयानां भाजनानां १४
कृते काञ्चनानि तोलयित्वा व्यतरत्। अपरं सर्व्वप्रकारसेवार्थकानां रज-
तमयानां भाजनानां कृते रजतानि तोलयित्वा दत्तवान्। अपरं स्वर्ण- १५
दीपवृक्षाणां स्वर्णदीपानाञ्च कृत एकैकस्य दीपवृक्षस्य तदीयदीपानाञ्च
परिमाणानुसारेण सुवर्णानि तोलयित्वा दत्तवान्। अपरं रजतमय-
दीपवृक्षाणां दीपानाञ्च कृत एकैकस्य दीपवृक्षस्य कर्म्मानुसारेण रज-
तानि तोलयित्वा दत्तवान्। अपरं दर्शनीयपूपानाम् आसनानां कृते १६
ऽर्थत एकैकस्यासनस्य कृते सुवर्णानि तोलयित्वा ददौ। अपरं रजत-
मयासनानां कृते रजतानि तोलयित्वा ददौ। अपरं त्रिशूलानां चुल्ली- १७
नाम् आच्छादकपात्राणाञ्च निर्म्माणार्थं निर्म्मलानि सुवर्णानि सुवर्णमय-
भाजनानाम् एकैकस्य भाजनस्य कृते ऽपि सुवर्णानि तोलयित्वा ददौ।
रूप्यमयभाजनानाञ्चैकैकस्य भाजनस्य कृते रजतानि तोलयित्वा ददौ।
अपरं धूपवेद्याः कृते निर्म्मलकाञ्चनानि, अपरं वाहनाकृते र्निमित्तम् १८
अर्थतो विस्तृतपक्षाभ्यां परमेश्वरीयनियममञ्जूषाच्छादकयोः किरूवयो
र्निमित्तं काञ्चनानि तोलयित्वा ददौ। अपरं दायूद् आचचक्षे, परमे- १९
श्वरो मयि हस्तार्पणं कृत्वा ग्रन्थे लिखितम् एतदादर्शसम्बन्धीयकार्य्या-
णाम् आदेशम् अबोधयत्।

अनन्तरं दायूद् निजतनयं सुलेमानम् अवोचत् बलवान् उत्साह- २०
वांश्च भव कर्म्म कुरुष्व च, भयं माकार्षीः, निराशो मा भव, यतो मदी-
येश्वरः प्रभुः परमेश्वरस्तव सहायो भविष्यति; परमेश्वरीयमन्दिरस्य
परिचर्य्याया निखिलं कर्म्म यावन्न सेत्स्यति तावत् स त्वां न विहास्यति
न वा परित्यक्ष्यति। पश्य, ईश्वरीयमन्दिरस्य निखिलपरिचर्य्यायाः २१
कृते याजकानां लेवीयानाञ्च पर्य्याया विद्यन्ते। अपरं सर्व्वप्रकारशिल्प-
कर्म्मणः कृते सर्व्वप्रकारपरिचर्य्यायाः कृते च सर्व्वे विद्वांसो लोका
इच्छुका भवन्तस्तव वशे विद्यन्ते, अपरम् अधिपतयः सर्व्वाः प्रजाश्च
सर्व्वथा तवाज्ञाग्राहिणः सन्ति।

२९ ऊनत्रिंशोऽध्यायः।

१ दायूदा कृतस्यायोजनस्य कथनं ६ अधिपतीनां प्रजानाञ्च दानानि १० दायूदः प्रार्थना २० बलिदानं द्वितीयवारं सुलेमनो राज्ये नियोगः २६ दायूदो राजत्वं निधनञ्च।

अनन्तरं नरपति र्दायूद् कृत्स्नं समाजं व्याजहार, ईश्वरः केवलं मदी- १

यतनयं सुलेमानं वरीतवान् स तरुणो ऽविचक्षणश्च विद्यते कर्म्मेदञ्च
महागुरु यत एष प्रासादो मनुजाय न निर्म्मास्यते किन्तु प्रभवे परमे-
२ श्वराय । अत एवाहं निजशक्त्यनुसारेण मदीयेश्वरस्य मन्दिरस्य कृते
द्रव्याणाम् आयोजनं कृतवान्, अर्थतः काञ्चनमयवस्तूनां कृते काञ्चनानि,
रजतमयवस्तूनां कृते रजतानि, आरकूटमयवस्तूनां कृत आरकूटान्,
लोहमयवस्तूनां कृते लोहान्, काष्ठमयवस्तूनां कृते काष्ठानि, अपरं
वैदूर्य्यमणीन् खचनार्थकप्रस्तरान् तेजस्विप्रस्तरान् चित्रवर्णपाषाणान्,
अपरं सर्व्वप्रकारान् बहुमूल्यपाषाणान् प्रभूतत्वेन मर्मरपाषाणांश्च
३ सञ्चितवान् । अपरं तस्य पवित्रमन्दिरस्य निमित्तं यद्यद् आयोजनम्
अकरवं तदतिरिक्तम् अहं निजेश्वरस्य मन्दिरे ऽनुरागकारणात् निजात्
स्वापतेयादपि निजेश्वरस्य मन्दिरनिमित्तं काञ्चनानि रजतानि च ददा-
४ मि, अर्थतो मन्दिरस्य भित्तिषु खचनार्थं सहस्रत्रयकिक्कारपरिमि-
तान्योफीरीयसुवर्णानि सप्तसहस्रकिक्कारपरिमितानि निर्म्मलदुर्व्वर्णानि
५ च ददामि । हेममयवस्तूनां कृते हेमानि रजतमयवस्तूनां कृते रज-
तानि शिल्पकरैः कर्त्तव्यानां सर्व्वप्रकारवस्तूनां कृते च यत् प्रयोजनीयं
तदहं वितीर्णवान् । अपरम् अद्य युष्माकं मध्ये को मुक्तहस्तः सन् परमे-
श्वरस्य सन्निधिम् आगन्तुम् इच्छति ?

६ ततः पितृवंशानां मुख्यनरा इस्रायेलो वंशाध्यक्षाः सहस्रपतयः शत-
७ पतयो राजकर्म्माध्यक्षाश्च स्वेच्छया दानम् अकुर्व्वन् । ईश्वरीयमन्दिरस्य
कार्य्यस्य कृते ते सुवर्णानां पञ्चसहस्राणि किक्कारान् दशसहस्राण्यदर्को-
णाख्यमुद्राश्च, रजतानां दशसहस्राणि किक्कारान्, पित्तलानाम् अष्टा-
८ दशसहस्राणि किक्कारान्, लोहानाञ्च लक्षमेकं किक्कारान् ददुः । अपरं
येषां मणय आसन् ते गेर्शोनीयस्य यिहीयेलस्य करे परमेश्वरस्य मन्दि-
९ रस्य भाण्डागारे तान् समर्पयामासुः । ततो लोकास्तेषां दातृत्वाद् आ-
नन्दं चक्रिरे, यतस्ते सरलान्तःकरणैः स्वेच्छया परमेश्वराय दानं ददुः ।
दायूद् महीपतिरपि महानन्दं चकार ।

१० अपरं दायूद् निखिलसमाजस्य साक्षात् परमेश्वरस्य धन्यवादं
चकार । दायूद् व्याजहार, हे अस्माकं पितुरिस्रायेलः प्रभो परमेश्वर,
११ त्वं सदाकालं धन्यो ऽसि । हे परमेश्वर, महत्त्वं पराक्रम ऐश्वर्य्यं जयः
प्रशंसा चैतानि तवैव सन्ति, यतो हेतोः स्वर्गे पृथिव्याञ्च यद्यद् विद्यते
तत् सर्व्वं तवैव विद्यते । हे परमेश्वर राजत्वं भवतो ऽस्ति भवान्

सर्व्वोपरि समुन्नतमूर्द्धा। अपरं त्वत्तो धनाढ्यता सम्मानश्च जायते १२
भवान् अखिलानां राजत्वं करोति बलपराक्रमौ भवतः करे विद्येते
सर्व्वेभ्यो वृद्धिबलदानं भवतः करस्य कर्म्म। अतो हे अस्माकम् ईश्वर, १३
वयं भवन्तं धन्यं वदामो भवत ऐश्वर्य्यवतो नामधेयस्य प्रशंसां कुर्म्महे च।
किन्त्वहं कः? मम प्रजागणश्च वा कः? यद् वयम् अनेन प्रकारेण १४
स्वेच्छया दानं कर्त्तुं समर्था भवेम? यतो भवतो निखिलं परिलब्धं,
वयञ्च भवता दत्तं द्रव्यमेव तुभ्यम् अददाम। यतोऽस्माकं सर्व्वे पितृलोका १५
इव वयं तव सम्मुखे विदेशिनः प्रवासिनश्च। पृथिव्याम् अस्माकं जी-
वनकालश्छायासदृशः क्षणस्थायी च। हे अस्माकं प्रभो परमेश्वर, तव १६
पवित्रनामधेयमुद्दिश्य वयं तव मन्दिरनिर्म्माणार्थं यान्येतानि बहुद्रव्याणि
सञ्चितवन्तस्तानि निखिलानि त्वदीयहस्तात् लब्धानि निखिलानि च
त्वदीयानि विद्यन्ते। हे मदीश्वर, त्वम् अन्तःकरणं परीक्षसे सरलतया १७
तुष्यसि च तन्मया ज्ञायते। अहमेव स्वान्तःकरणस्य सरलतया सर्व्वाण्ये-
तानि स्वेच्छया प्राददाम्, इदानीञ्चात्र समुपस्थितं तव प्रजागणमपि त्वाम्
उद्दिश्य स्वेच्छया दानकर्म्मण्यानन्दितं पश्यामि। हे अस्माकं पितृलोकानाम् १८
इब्राहीम इस्हाक इस्रायेलश्च प्रभो परमेश्वर, भवान् स्वीयप्रजानाम्
अन्तःकरणानां कल्पनाया एतादृशं भावं सन्ततं निश्चित्य रक्षतु भवन्तं
प्रति तेषाम् अन्तःकरणानि दृढम् आकर्षतु च। अपरं मम तनयः १९
सुलेमान् यद् भवत आज्ञा विधीन् व्यवस्थाश्च पालयन् कर्म्म कुर्य्यात्
यस्य प्रासादस्य कृते मयायोजनं कृतं तं निर्म्मापयेच्च तदर्थं तस्मै सरला-
न्तःकरणं ददातु।

अनन्तरं दायूद् अखिलसमाजं व्याजहार, इदानीं स्वेषां प्रभोः २०
परमेश्वरस्य धन्यवादं कुरुध्वं। ततः कृत्स्नः समाजः स्वेषां पितृलोकानां
प्रभोः परमेश्वरस्य धन्यवादं चकार शिरोभिः प्रणम्य परमेश्वरं भेजे
राजानञ्च प्रणनाम। अपरं परेऽहनि ते कृत्स्नस्रायेलः कृते परमेश्वरमु- २१
द्दिश्य बलिदानं चक्रिरे होमबलीन् उत्ससृजुश्चार्थत उपयुक्तैः पेयनैवेद्यैः
समं सहस्रं वृषभान् सहस्रम् ऊर्णायून् सहस्रं मेषशावकांश्चेत्यादीन्
बहून् बलीन् उत्ससृजुः। अपरं तस्मिन्नहनि महानन्देन परमेश्वरस्य २२
साक्षाद् बुभुजिरे पपुश्च दायूद आत्मजञ्च सुलेमानं द्वितीयवारं राजानं
चक्रुः। अपरं नराधिपमिव तं याजकमिव च सादोकं परमेश्वरमुद्दि-
श्याभिषिषिचुः। ततः सुलेमान् स्वीयजनकस्य दायूदः पदेन राजा २३

भूत्वा परमेश्वरीयसिंहासन उपविवेश भाग्यवान् बभूव च, इस्रा-
२४ येलीयाः सर्व्वे मनुजास्तस्याज्ञाग्राहिणो बभूवुः। विशेषतोऽधिपतयः
पराक्रमिणो मनुजाश्च दायूदो नरपतेस्तनयाश्च नृपतेः सुलेमनो वशी-
२५ बभूवुः। अपरं परमेश्वरः कृत्स्नस्येस्रायेलः साक्षात् सुलेमानं महोन्नतं
चकार। स तस्मै यादृशं राजकीयप्रतापं ददिवान् पूर्व्वम् इस्रायेलीयानां
कस्यचिद् भूपतेस्तादृशः प्रतापो नाभवत्।
२६ यिशयस्य तनयो दायूद् कृत्स्नस्येस्रायेल उपरि राजत्वं कृतवान्। स
२७ चत्वारिंशद्वत्सरान् यावद् इस्रायेल उपरि राजत्वं चकार, तन्मध्ये सप्त-
वत्सरान् हिब्रोणे त्रयस्त्रिंशद्वत्सरांश्च यिरूशालमे राजत्वं चकृवान्।
२८ अनन्तरं स सम्पूर्णम् आयुषं धनं सम्मानञ्च भुंक्त्वा शुभवार्द्धक्यसमये
२९ प्राणान् तत्याज तस्य तनयश्च सुलेमान् तस्य पदेन राजत्वं लेभे। तस्य
दायूद आद्यन्तक्रिया तदीयराजत्वपराक्रमयो र्वृत्तिस्तं प्रतीस्रायेलं
प्रति भूमण्डले स्थितान्यन्यानि सर्व्वाणि राष्ट्राणि प्रति च यद्यद् अवटत
१० तत् सर्व्वं प्रदर्शकस्य शिमूयेलस्य पुस्तके भविष्यद्वादिनो नाथनस्य पुस्तके
प्रदर्शकस्य गादस्य पुस्तके च लिखितं विद्यते।

वंशावल्या द्वितीयं पुस्तकं।

१ प्रथमोऽध्यायः।

१ गिबियोने सुलेमनो बलिदानं ७ बुद्धिज्ञानयो र्वरप्रार्थनं १४ तस्य रथानां घोटका-
नाञ्च कथनं।

१ अनन्तरं दायूद आत्मजः सुलेमान् स्वीयं राजत्वम् अदृढयत् तस्य
प्रभुः परमेश्वरश्च तस्य सहायो भवन् तस्योन्नतिम् अतीव वर्द्धयामास।
२ अनन्तरं सुलेमान् कृत्स्नम् इस्रायेलं विशेषतः सहस्रपतीन् शतपतीन्
विचारयितॄन् इस्रायेलीयानां सर्व्वान् अध्यक्षान् पितृवंशानां मुख्य-
३ नरांश्चाह्वाययामास। अनन्तरं सुलेमान् तेन समं निखिलसमाजश्च

गिबियोने भजनस्थानं जग्मुः, यतः परमेश्वरस्य किङ्करेण मूससा प्रान्तरे
निर्म्मित ईश्वरीयसमाजस्यावासस्तत्राविद्यत, केवलम् ईश्वरीयमञ्जूषा ४
दायूदा किरियतयियारीमात् स्थानान्तरीकृत्य तदर्थं निर्म्मितं स्थानम्
अर्यतो यिरूशालमे दायूदा तत्कृते यद् दूष्यं स्थापितं तद् दूष्यम् आनी-
ताभवत्। किन्तु हूरस्य पौत्र ऊरेः पुत्रो बित्सलेलो याम् आरकूटमयीं ५
वेदीम् अकरोत् सा तत्र परमेश्वरीयावासस्यान्तिके ऽविद्यत, ततः
सुलेमान् समाजश्च तत्रैवेश्वरं गवेषयामासुः। अपरं सुलेमान् परमेश्वरम् ६
उद्दिश्य समाजावासस्यान्तिकस्थायाम् आरकूटमयवेद्यां बलिदानं
कुर्व्वन् सहस्रं होमबलीन् उदसृजत्।

तस्यां रजन्याम् ईश्वरः सुलेमने दर्शनं दत्त्वा व्याजहार, मया तुभ्यं ७
यो वरो दातव्यस्तं प्रार्थयस्व। ततः सुलेमान् ईश्वरम् उवाच त्वं मम ८
पितरं दायूदं प्रति महानुग्रहं कृत्वा तस्य पदेन मां राजत्वे ऽभ्यषिञ्चः।
इदानीं हे प्रभो परमेश्वर मदीयजनकाय दायूदे त्वया यत् प्रतिश्रुतं ९
तत् सफलं भवतु, यतः पृथिव्या धूलीवद् बहुसंख्यलोकनिवहस्योपरि
त्वं मां राजानम् अकार्षीः। अतो ऽहं यद् एतेषां मानवानाम् अग्रगामी १०
भूत्वा बहिरभ्यन्तरे गमनागमनं कर्त्तुं शक्नुयां तत्कृते मह्यं बुद्धिं ज्ञानञ्च
विश्राणय, नो चेत् तवैतावत्प्रजानां शासनं केन कर्त्तुं शक्यते?
अनन्तरम् ईश्वरः सुलेमानम् अवादीत्, तव हृदय एतदासीत्, ऐश्वर्य्यं ११
वा सम्पत्तिं वा सम्मानं वा रिपूणां प्राणनाशो वा दीर्घायुस्त्वया न
प्रार्थितः, किन्त्वहं येषाम् उपरि त्वां नरपतिम् अकार्षं तेषां मदीय-
प्रजानां सुशासनार्थं बुद्धिज्ञाने प्रार्थयेथाः। अतस्ते बुद्धिज्ञाने मया १२
तुभ्यम् अदायिषाताम्, अधिकन्तु तुभ्यम् एतावद् ऐश्वर्य्यं धनञ्च वितरि-
ष्यामि यत् तव पूर्व्वं कस्यचित् पृथिवीपतेस्तादृशं नासीत् त्वत्तः पश्चादपि
कस्यचित् तादृशं न भविष्यति।

अनन्तरं गिबियोनीयभजनस्थानस्थात् समाजावासात् सुलेमान् यिरू- १३
शालमम् आगत्येस्रायेल उपरि राजत्वं कर्त्तुमारेभे।

अनन्तरं सुलेमान् रथान् अश्वारोहिलोकांश्च संजग्राह। तस्य चतुः- १४
शताधिकं सहस्रं रथा द्वादशसहस्राण्यश्वारोहिणश्चासन्। स तान्
रथनगरेषु यिरूशालमे च राजसन्निधौ स्थापयामास। राजा यिरू- १५
शालमे बहुत्वकारणाद् दुर्व्वर्णं सुवर्णञ्च पाषाणवत्, एरसकाष्ठानि च
प्रान्तरस्थोडुम्बरेन्धनवत् साधारणं चकृवान्। सुलेमनो घोटका मिसर- १६

देशाद् आनीयन्त, फलतो राजवणिजां निवहो विशेषमूल्यं दत्त्वाश्वानां
१७ निवहम् अक्रीणात्। मिसरत आगतस्य समानीतस्य च रथस्यैकस्य मूल्यं
षट्शतानि रूप्यमुद्राः, एकस्य वाजिनश्च मूल्यं सार्द्धशतं रूप्यमुद्राः।
अनेन प्रकारेण ते हित्तीयानाम् अरामीयाणाञ्च महीपतीनां कृते
समानयन्।

२ द्वितीयोऽध्यायः।

१ मन्दिरस्य कर्म्मकारिणां संख्या ३ निपुणलोकस्य कृते हीरमस्य समीपं लोकप्रेषणं ११ तस्य सन्निधिं हीरमेण गुणवतः कस्यचित् मनुजस्य प्रेषणं १७ प्रवासिलोकानां संख्या च।

१ अनन्तरं सुलेमान् परमेश्वरस्य नामधेयमुद्दिश्य मन्दिरमेकं स्वार्थञ्च
२ राजगृहमेकं निर्म्मातुं मतिं चक्रवान्। अपरं भारवहनार्थं सप्ततिसह-
स्राणि लोका गिरिषु काष्ठादीनां छेदनार्थम् अशीतिसहस्राणि लोका-
स्तेषाम् अधिपतित्वे च षट्शताधिकानि त्रीणि सहस्राणि लोकाः सुले-
मना नियोजयाञ्चक्रिरे।
३ अनन्तरं सुलेमान् सोरस्य महीपते र्हीरमस्य सन्निधिं दूतान् प्रहित्य
कथयामास, मम तातं दायूदं प्रति त्वया यद्वत् कृतम् अर्थतस्तस्य
वासगृहनिर्म्माणार्थं तस्य सन्निधिं यद्वद् दारूणि प्रेषितानि तद्वत् मां
४ प्रति च कुरु। पश्य, इस्रायेलीयलोकै र्यद्वत् सदा कर्त्तव्यं तद्वत् निजप्रभोः
परमेश्वरस्य सम्मुखे सुगन्धिधूपदाहार्थं नित्यं दर्शनीयपूपस्थापनार्थं प्रति-
प्रातः प्रतिसन्ध्यञ्च विश्रामवारेष्वमावस्यास्वस्माकं प्रभोः परमेश्वरस्य वा-
र्षिकोत्सवेषु च होमबलिदानार्थम् अहं तस्य नामधेयम् उद्दिश्य पावित्र्यं
५ मन्दिरमेकं निर्म्मापयितुम् उद्यतो ऽस्मि। मया यन्मन्दिरं निर्म्मापयि-
ष्यते तद् विशालं भविष्यति यतो ऽस्माकम् ईश्वरो निखिलसुरेभ्यो
६ महान्। परन्तु स्वर्गः स्वर्गोपरिस्थः स्वर्गो ऽपि यं धारयितुं न पार-
यति तस्य कृते मन्दिरं निर्म्मातुं कः समर्थो भवेत्? अहं वा को यदहं
तस्य सम्मुखे धूपज्वालनाभिप्रायाद् अन्याभिप्रायेण तस्य कृते मन्दिरं
७ निर्म्मातुं शक्नुयां? अत इदानीं मम जनकेन दायूदा नियुक्ता ये
गुणवन्तो मानवा यिहूदादेशे यिरूशालमे च मम सन्निधौ विद्यन्ते
तैः समं सुवर्णदुर्व्वर्णारकूटलोहानां धूम्ररक्तनीलवर्णसूत्राणाञ्च कार्य्येषु
८ निपुणं मणिकर्त्तने तत्परञ्चैकं मानवं मम सन्निधिं प्रेषय। अपरं लिबा-

नोनाद् एरसकाष्ठानि देवदारुकाष्ठानि चन्दनकाष्ठानि च मम सन्निधिं प्रेषय यतो भवतः किङ्करा लिवानोनस्थकाष्ठानि कर्त्तितुं निपुणा इति मया बुध्यते। अपरं पश्य भवतः किङ्करैः सार्द्धं ममापि किङ्करा विद्यन्ते।
अतो मत्कृते प्रभूतदारूणि संगृह्यन्तां यतो मया यन्मन्दिरं निर्म्मापयि- ९
ष्यते तेन महताद्भुतेन च भवितव्यं। पश्य मया तव दारुच्छेदकदासेयेभ्यो १०
विंशतिसहस्रपरिमाणा गोधूमा विंशतिसहस्रपरिमाणा यवा विंशतिसहस्रभाजनपरिमाणा द्राक्षारसा विंशतिसहस्रभाजनपरिमाणानि तैलानि च वितारिष्यन्ते।

अनन्तरं सोरीयो राजा हीरमः सुलेमानं प्रत्युत्तरमिदं लिखित्वा ११
प्रेषयामास, परमेश्वरो निजप्रजागणे प्रीयते कारणादतस्तेषामुपरि त्वां
राजानम् अकरोत्। हीरमो ऽपरमपि व्याजहार स्वर्गपृथिव्योः सृष्टि- १२
कर्त्ता य इस्रायेलः प्रभुः परमेश्वरः स धन्यो भवतु, यतः परमेश्वरस्य कृते मन्दिरमेकं राजगृहमेकञ्च यो निर्म्मापयिष्यति तादृशं परिणामदर्शिनं बुद्धिमन्तं ज्ञानिनं तनयमेकं स राज्ञे दायूदे दत्तवान्। इदानीं १३
मया हूरम आविर्नामा गुणवान् धीमांश्च मनुज एकः प्रहीयते। स १४
दानवंशीयायाः नार्य्या आत्मजस्तस्य जनकः सोरराष्ट्रीयमनुजः, जातरूपरजतारकूटलोहपाषाणदारूणां कार्य्येषु धूम्रनीलसूक्ष्मवस्त्राणां रक्तवर्णवसनानाञ्च कार्य्येषु स निपुणो मणिकर्त्तने ऽपि यत् किमपि कार्य्यं वा तम् आदिश्यते तस्मिन् स तत्परो ऽस्ति। भवतो गुणवद्भि र्लोकैः समं मम प्रभु र्यो भवतो जनको दायूद् तस्यापि गुणवद्भि र्लोकैः समं स
कार्य्यं करिष्यति। अपरं मम प्रभुना यथा प्रतिश्रुतं तथैव भवतः किङ्क- १५
राणां कृते गोधूमयवतैलद्राक्षारसाः प्रेष्यन्तां। भवतो यावतां दारूणां १६
प्रयोजनं भविष्यति वयं लिवानोने तावन्ति दारूणि कर्त्तिष्याम उडूपानि बद्ध्वा जलधिमार्गेण याफोनगरं भवतः सन्निधिम् उपस्थापयिष्यामश्च, अनन्तरं भवता तानि यिरूशालममानयिष्यन्ते।

सुलेमान् निजजनकेन दायूदा गणनाकरणात् परम् इस्रायेलीयजन- १७
पदप्रवासिनो विदेशिलोकान् गणयाञ्चकार तत्र षट्शताधिकं त्रिपञ्चाशत्सहस्राधिकं लक्षं मनुजा अगण्यन्त। तेषां मध्ये स सप्ततिसहस्राणि १८
लोकान् भारवहनकर्म्मणि, अशीतिसहस्राणि लोकान् शिलोच्चये काष्ठच्छेदनकर्म्मणि षट्शताधिकानि त्रीणि सहस्राणि लोकांश्च तेषां मानवानां कार्य्ये प्रवर्त्तनार्थम् अध्यक्षत्वे नियोजयामास।

३ तृतीयोऽध्यायः।

१ मन्दिरनिर्म्माणार्थं स्थानसमययो र्निरूपणं ३ मन्दिरस्य भूषणादीनां विवृतिः १४ तिरस्करिण्याः स्तम्भयोश्च विवृतिः।

१ तस्य जनको दायूद् यत् स्थानम् दर्शितो ऽर्थतो यिवूषीयस्यारौणाहस्य
शस्यमर्दनस्थाने दायूद् यत् स्थानं निरचिनोत् यिरूशालमस्थस्य मोरि-
याख्यगिरेस्तस्मिन्नेव स्थाने सुलेमान् परमेश्वरस्य मन्दिरं निर्म्मापयितुम्
२ आरेभे। स निजाधिकारस्य चतुर्थवत्सरस्य द्वितीयमासस्य द्वितीयदिने
निर्म्मापयितुम् आरब्धवान्।
३ सुलेमान् ईश्वरीयमन्दिरनिर्म्माणमधि यम् उपदेशम् अलभत तदनु-
सारेण हस्तस्य पूर्व्वीयपरिमाणेन मन्दिरस्य दीर्घत्वं षष्टिहस्तान् प्रस्थत्वञ्च
४ विंशतिहस्तान् अकरोत्। अपरं मन्दिरस्याग्रे सो ऽलिन्दमेकं निर्म्ममे
मन्दिरस्य प्रस्थत्वानुसारेण तस्य दैर्घ्यं विंशतिहस्ता उच्चता च विंशत्यधि-
५ कशतं हस्तास्तस्याभ्यन्तरं स निर्म्मलसुवर्णेन मण्डयाञ्चकार। अपरं स
प्रमुखभवनस्य भित्तिम् उत्तमसुवर्णेन मण्डितै र्देवदारुभिराच्छादया-
६ मास, तदुपरि तालतरूणां शृङ्खलानाञ्चाकृतीश्चकार। अपरं शोभा-
निमित्तं भवनं मणिभिरलञ्चकार। अपरं कणकानि पर्व्वयिमदेशीया-
७ न्यासन्। अपरं तद्भवनाभ्यन्तरमर्थतो गेहकाष्ठानि शिलाः कुड्यानि
कपाटानि च कणकै र्मण्डितवान् अपरं कुड्येषु किरूवाकारान् चकार।
८ अपरं स यत् महापवित्रं भवनं निर्म्मापयामास तस्य दीर्घत्वं मन्दिरस्य
प्रस्थत्वमिव विंशतिहस्ताः प्रस्थत्वमपि विंशतिहस्ताः, अपरं स षट्शत-
९ किक्करपरिमाणैरुत्तमकाञ्चनैस्तत् प्रत्युप्तवान्। अपरं कीलानां कणकानां
परिमाणं पञ्चाशत्शेकलाः, अपरं स उपरिस्थानि कोष्ठान्यपि काञ्चनैः
१० प्रत्युप्तवान्। अपरं स महापवित्रस्थाने कर्णिकाकार्य्येण द्वौ किरूवौ
११ निर्म्मापयाञ्चकार काञ्चनैश्च तौ मण्डयामास। तयोः किरूवयोः पक्षा
विंशतिहस्तदीर्घाः, तयोरेकस्य पञ्चहस्तपरिमित एकः पक्षो भवनस्य
कुड्यम् अस्पृशत् पञ्चहस्तपरिमितस्तस्यान्यः पक्षश्च द्वितीयस्य किरूवस्य
१२ पक्षम् अस्पृशत्। द्वितीयस्य किरूवस्यापि पञ्चहस्तपरिमित एकः पक्षो
भवनस्य कुड्यम् अस्पृशत् पञ्चहस्तपरिमितो ऽपरः पक्षश्च प्रथमस्य कि-
१३ रूवस्य पक्षम् अस्पृशत्। तयोः किरूवयोः पक्षा विंशतिहस्तविस्तारिता
बभूवुः, अपरं तौ पद्भिरुदतिष्ठतां तयो र्वदने चान्तरं प्रत्यवर्त्ततां।

अपरं स नीलवार्त्ताकीयरक्तवर्णैः सूक्ष्मैश्च सूत्रै र्निम्मितम् एकम् १४
आच्छादनवसनं समासादयत् तस्मिन् किरूवाकारान् चकार च। अपरं १५
भवनस्य सम्मुखे पञ्चत्रिंशत्हस्तप्रोच्चौ द्वौ स्तम्भौ चक्रवान् तयोरुपरि-
स्थितौ द्वौ मूर्द्धानौ पञ्चहस्तोच्चौ। अपरं स वाक्यस्थाने यादृक् तादृक् १६
स्तम्भयोः शिरसोरपि शृङ्खलाकृतीः स्थापयामास, अपरं शतं दाडिम्बा-
कारान् कृत्वा तयोः शृङ्खलाकृतिषु निदधे। अपरं तौ स्तम्भौ मन्दिरस्य १७
सम्मुखे दण्डायमानौ चकार, एकं दक्षिणे तदन्यं वामे निदधे, अपरं
दक्षिणस्थितस्य नामधेयं याखीनः (स्थिरकारक इति) चकार वामे
स्थितस्य च नामधेयं वोयसः (बलीति) चकार।

---

४ चतुर्थोऽध्यायः।

१ पित्तलस्य वेद्याः कथनं २ सागरस्य तस्य गवाञ्च कथनं ६ प्रक्षालनपात्राणां दीप-वृक्षाणां दार्व्वासनानां चत्वरस्य च कथनं ११ पित्तलीयवस्तूनां कथनं १९ कणकमयवस्तूनाञ्च कथनं।

अनन्तरं सुलेमान् पित्तलमयीं वदिमेकां निर्म्मापयाञ्चकार तस्या १
दीर्घत्वं विंशतिहस्ताः प्रस्थता विंशतिहस्ता उच्चता च दशहस्ताः।

अनन्तरं स सिक्तधातुना वर्त्तुलाकारं सागररूपं पात्रं निर्म्मापयाञ्च- २
कार; एकम् अग्रम् आरभ्य द्वितीयम् अग्रं यावत् तस्य परिसरो दश-
हस्तपरिमितस्तस्योच्चत्वञ्च पञ्चहस्तपरिमितं त्रिंशद्धस्तपरिमितं सूत्रञ्च
तद् अवेष्टत। अपरं तस्य चतुर्द्दिक्षु कर्णस्याध एकैकहस्तपरिमाणान्तरे ३
सागरभाजनवेष्टनकारका दश दश वर्त्तुलाकारा आसन्, पात्रसेचन-
समये ते श्रेणीद्वयेनासिच्यन्त। तत् सागरभाजनं द्वादशानां गवाम् ४
उपरि स्थापितं तासां तिस्र उत्तरमुखास्तिस्रः पश्चिममुखास्तिस्रो दक्षिण-
मुखास्तिस्रः पूर्व्वमुखा बभूवुः। अपरं सागरभाजनं तासामुपरि तस्थौ
तासां गवां पश्चाद्भागा अन्तरे तस्थिरे। तत्पात्रस्य स्थूलत्वं चतुरङ्गुल- ५
परिमाणं तस्य कर्णः कंसकर्णवत् शोषणपुष्पाकारः। त्रीणि सहस्राणि
वाताख्यपरिमाणानि तेन धृतानि।

अपरं स दश प्रक्षालनभाजनानि कारयामास तेषां पञ्च भाजनानि ६
दक्षिणे पञ्च भाजनानि च वामे स्थापयामास। तानि प्रक्षालनार्थकानि
तन्मध्ये होमार्थबलिदानसम्बन्धीयानि वस्तूनि प्राक्षाल्यन्त किन्तु याज-
कानां स्नानार्थं सागरभाजनम् आसीत्। अपरं स उपयुक्ताकारान् ७

काञ्चनमयान् दश दीपाधारान् कृत्वा मन्दिरे स्थापयाञ्चकार तेषां पञ्च
८ दक्षिणे पञ्च च वामे निदधे। अपरं स दश दार्व्वासनानि निर्म्माप्य
तेषां पञ्च दक्षिणे पञ्च च वामे मन्दिरे निदधे, अपरं स शतं काञ्चन-
मयान् चषकान् निर्म्मापयामास।
९ अपरं स याजकानां चत्वरं वृहत् चत्वरञ्च निर्म्मापयामास, अपरं
चत्वरस्य द्वाराणि निर्म्माप्य तदीयकवाटानि पित्तलेन मण्डयामास।
१० अपरं पूर्व्वदिशः सम्मुखे कियद्दक्षिणे जलधिभाजनं स्थापयाञ्चकार।
११ अपरं हूरमः कटाहान् दर्व्वीस्तुल्लीश्च निर्म्ममे, अनेन प्रकारेण नृपतेः
सुलेमन आज्ञात ईश्वरीयमन्दिरस्य कृते हूरमेण यावन्ति कार्य्याणि
१२ कर्त्तव्यानि तेषां सर्व्वेषां निर्म्माणं समाप्तं। इत्थं द्वौ स्तम्भौ द्वयोः स्तम्भ-
योरुपरि स्थितौ वर्त्तुलाकारौ द्वौ मूर्द्धानौ स्तम्भद्वयोपरिस्थवर्त्तुलाकार-
१३ मूर्द्धद्वयाच्छादके द्वे जाले तज्जालद्वयवेष्टनार्थं चतुःशतानि दाडिम्बाकारा
अर्थतः स्तम्भद्वयोपरिस्थयो वर्त्तुलाकारमूर्द्धोराच्छादकजालद्वयस्यैकैकस्य
१४ कृते दाडिम्बाकाराणां द्वे श्रेणी चैतानि तेन निर्म्मितानि। अपरं
दश पीठान्यपि निर्म्मितानि पीठोपरिस्थितानि दश प्रक्षालनपात्राणि,
१५ सागररूपं पात्रमेकं तत्सागरपात्रस्याधो द्वादशगावस्तदन्यद् ऋजीषाणि
१६ दर्व्वस्त्रिशूलान्येतानि तदन्यानि च यावन्ति भाजनानि सुलेमन आज्ञातः
परमेश्वरीयमन्दिरस्य कृते हूरमेण निर्म्मितानि तानि सर्व्वाणि तेजो-
१७ मयपित्तलै र्निर्म्मितानि। राजा यर्द्दनस्य प्रान्तरे सुक्कोतसिरेदयो र्मध्य-
१८ स्थितायां घनमृदि भूमौ सिक्तधातुना तानि निर्म्मापयामास। सुलेमान्
यान्येतान्यतीव बहूनि भाजनानि निर्म्मापयाञ्चकार तेषां पित्तलानां
परिमाणं न ज्ञेयं।
१९ अपरम् ईश्वरीयमन्दिरस्याभ्यन्तरे स्थापनार्थम् एतानि सकलवस्तूनि
२० सुलेमना निर्म्मितानि। स्वर्णवेदी दर्शनीयपूपग्राहीण्यासनानि वाक्यस्थान-
स्यान्तिके विध्यनुसारेण प्रज्वलितव्या दीपा दीपवृक्षाश्चैतानि निर्म्मल-
२१ सुवर्णमयानि, पुष्पाकाराः प्रदीपा वर्त्तिकाच्छेदनकर्त्तन्यश्चैते सुवर्णमयाः,
२२ छुरिका ऋजीषाणि स्रेदन्यो वह्निपात्राणि चैतानि निर्म्मलसुवर्णम-
यानि, महापवित्रस्थानस्य मन्दिरस्य चान्तःस्थितयो र्द्वारयोः कवाटानि
चेमानि सुवर्णमयान्यासन्।

---

५ पञ्चमोऽध्यायः।

१ निवेदितवस्तूनां भाण्डागारे निधानं २ महापवित्रस्थानाय मञ्जूषाया आनयनं ११ परमेश्वरीयप्रशंसाकरणसमये तस्य तेजसः प्रकाशितत्वं।

अनन्तरं परमेश्वरीयमन्दिरार्थं सुलेमना कृते सर्व्वस्मिन् कार्य्ये समाप्तिं १
गते तस्य जनकेन दायूदा निवेदितानि वस्तूनि काञ्चनानि रजतानि सर्व्वाणि भाजनानि च सुलेमना समानीयेश्वरस्य मन्दिरस्य भण्डागारेषु निदधिरे।

अपरं सुलेमान् इस्रायेलीयलोकानां प्राचीनान् वंशानां मुख्यनरां- २
स्चार्थत इस्रायेलीयानां प्रधानपितृलोकान् परमेश्वरीयनियममञ्जूषाया दायूद्नगरात् सियोनात् स्थानान्तरीकरणार्थं यिरूशालमे सञ्जग्राह।
ततः सप्तममास उत्सवसमय इस्रायेलीयलोकाः सर्व्वे नरपतेः समीपे ३
मिलितवन्तः। अनन्तरम् इस्रायेलीयप्राचीनगणे समुपस्थिते लेवीय- ४
लोका मञ्जूषाम् ऊहुः। मञ्जूषा समाजावासस्तदावासस्यान्तःस्थितानि ५
सर्व्वाणि पवित्रभाजनानि च लेवीययाजकैरूहिरे। अपरं सुलेमान् ६
नरपति र्मञ्जूषायाः सम्मुखे सम्मिलित इस्रायेलीयलोकानां कृत्स्नः समाजश्च बहुत्वकारणाद् असङ्ख्यान् अपरिमेयांश्च मेषान् गाश्चोत्ससृजुः।
अनन्तरं याजका मन्दिरस्यवाक्यस्थानाख्ये महापवित्रस्थाने किरूवयोः ७
पक्षाणामधो निरूपितस्थाने परमेश्वरस्य नियममञ्जूषां निदधिरे। तौ ८
किरूवौ स्वपक्षान् मञ्जूषायाः स्थानोपरि विस्तारयामासतुरतस्तौ किरूवौ मञ्जूषां तदीयवहनदण्डौ चाच्छादयामासतुः। तयो र्दण्डयो ९
र्दीर्घत्वात् मञ्जूषाया अन्तिके वाक्यस्थानस्याग्रभागे तयोरग्रे दृश्ये बभूवतुः किन्तु वहिर्दृश्ये न बभूवतुः, अद्यापि ते तत्र स्थाने विद्येते। तत्र १०
मञ्जूषायाम् अन्यत् किमपि नासीत्, केवलं मिसरदेशाद् इस्रायेलीयवंशानां निर्गमनकाले परमेश्वरस्तैः सार्द्धं यं नियमं चकृवान् तदीयपत्रयुक्तं प्रस्तरफलकद्वयं तन्मध्य आसीत् यतो होरेवे मूसास्तत् तन्मध्ये स्थापितवान्।

ते समागता याजकाः सर्व्वे स्वान् पवित्रीकृतवन्तः, परन्तु पर्य्यायानु- ११
सारेण कार्य्याणि न चक्रिरे। अपरं पवित्रस्थानाद् याजकानां वहि- १२
र्गमनकाल आसफो हेमनो यिदूथूनस्तेषां तनया भ्रातरश्चेत्यादयः सर्व्वे गायका लेवीयाः परिहितसूक्ष्मवसनाः सन्तः करतालमूरजवल्लकी धार-

यन्तश्च वेद्याः पूर्व्वदिश्यतिष्ठन् तूरीवादका विंशत्यधिकशतं याजका अपि
१३ तैः सार्द्धम् अतिष्ठन्। ते तूरीवादका गायकाश्च सर्व्वे एकस्वरेण परमे-
श्वरस्य स्तुतिं धन्यवादञ्चाकुर्व्वन्। अपरं यदा ते तूरीकरतालादिभि
र्वाद्ययन्त्रैः समं महाशब्दं कुर्व्वन्तः, परेशः क्षेमदातास्ति चिरस्थस्तदनु-
ग्रहः, इति वाक्येन तस्य स्तुतिम् अकुर्व्वन् तदानीं गृहम् अर्थतः
१४ परमेश्वरस्य मन्दिरं मेघेन तादृक् पर्य्यपूर्य्यत, यद् याजका मेघकारणात्
सेवनम् अनुष्ठातुम् असमर्था बभूवुः, यतः परमेश्वरस्य तेज ईश्वरीय-
मन्दिरं पूरयामास।

---

६ षष्ठोऽध्यायः।

१ सुलेमना लोकेभ्य आशीर्व्वदनं परमेश्वरस्य च प्रशंसनं १२ मन्दिरप्रतिष्ठासमय
सुलेमनः प्रार्थनञ्च।

१ तदानीं सुलेमान् व्याजहार, परमेश्वरो घोरान्धकारे वसतीति तेन
२ निगदितं। तवाधिष्ठानार्थं मन्दिरमेकं मया निरमायि तव नित्यवासार्थं
३ तन्निवेशनं स्थं। अपरम् इस्रायेलीयानाम् अखिले समाजे ऽवतिष्ठ-
माने राजा स्वास्यं परावर्त्त्येस्रायेलीयानां कृत्स्नं समाजम् आशिषं
४ जगाद। स कथयामास, इस्रायेलः प्रभुः परमेश्वरो धन्यः, स मम पित्रे
दायूदे स्ववक्त्रेण यत् प्रतिज्ञातवान्, तत् स्वकराभ्यां साधितवान्, यथा,
५ मम प्रजागण इस्रायेलीयवंशो यस्मिन् दिने मिसरदेशात् मया
वहिष्कृतस्तद् दिनम् आरभ्याहम् अत्र स्थाने मम नाम्नो ऽधिष्ठानार्थं
मन्दिरं निर्म्मातव्यमित्यभिप्रायेणेस्रायेलीयानां कस्यापि वंशस्य किमपि
नगरं नाभिरोचितवान् किन्तु मदीयप्रजागणस्येस्रायेलीयवंशस्याधिपति-
६ त्वाय कमपि नरं न वरीतवान्। अधुना मम नामधेयस्य वासस्थानार्थं
यिरूशालमं, मम प्रजागणस्येस्रायेलीयवंशस्याधिपतित्वार्थञ्च दायूदं
७ वरीतवान्। अपरम् इस्रायेलः प्रभोः परमेश्वस्य नाम्ने मन्दिरमेकं नि-
८ र्म्मातुं मत्तातो दायूद् मनो निदधे। किन्तु परमेश्वरो मम तातं दायूदं
वाक्यमिदं जगाद, त्वं मम नाम्ने मन्दिरं निर्म्मातुं मनो निरधत्था इति
९ तव मनोगतं भद्रमेव। तथापि तन्मन्दिरं त्वया नो निर्म्मातव्यं, किन्तु
१० तवौरसात्मजेन मम नामार्थकं तन्मन्दिरं निर्म्मातव्यमिति परमेश्वरेण
यद् वचनं प्रतिज्ञातं तदेव साधितं, ततः परमेश्वरस्य वाक्यादहं निज-

तातस्य दायूदः पदं प्राप्येस्रायेलीयराजसिंहासन उपाविशम् इस्रायेलः
प्रभोः परमेश्वरस्य नाम्ने मन्दिरमिदं निरमापयञ्च। परमेश्वरो ऽस्मत्पूर्व्व- ११
पुरुषैः सह यं नियमं कृतवान् तदीयपत्रस्याधारो या मञ्जूषा तामपि
तत्र न्यदधं।

अनन्तरं स इस्रायेलः कृत्स्नसमाजस्य साक्षात् परमेश्वरस्य यज्ञवेद्या १२
अन्तिकम् उपस्थाय करौ प्रासारयत्। यतः सुलेमान् पञ्चहस्तदीर्घं पञ्च- १३
हस्तप्रस्थं हस्तत्रयप्रांशुं पित्तलमयं मञ्चमेकं निर्म्माप्य चत्वरमध्ये ऽस्था-
पयत् तस्योपरि तिष्ठन् स इस्रायेलः कृत्स्नसमाजस्य साक्षात् जानुपातं
कृत्वा गगनं प्रति करौ प्रसार्य्य व्याजहार, हे इस्रायेलः प्रभो परमेश्वर, १४
स्वर्गे पृथिव्यां वा तव तुल्यो नापरः कश्चनेश्वर आस्ते। तत्र यावन्तो
दासाः सर्व्वान्तःकरणैस्तव चक्षुर्गोचरे चरन्ति तान् प्रति स्वनियमं
स्वप्रेम च साधयसि। विशेषतः स्वदासाय मत्ताताय दायूदे त्वं यत् १५
प्रत्यशृणोस्तद् असाधयः स्ववक्त्रेणोक्तं वचनम् अद्य स्वकरेण सफलम्
अकार्षीश्च। हे इस्रायेलः प्रभो परमेश्वर, स्वदासाय मत्ताताय दायूदे १६
भवता यत् प्रतिज्ञातं तदधुना साध्यतां, यथा, मम चक्षुर्गोचरे त्वं यद्वद्
आचरस्तद्वत् तव सन्तानाश्चेत् स्वस्वमार्गमधि सावधानाः सन्तो मम व्यव-
स्थाम् आचरन्ति तर्हि मम साक्षाद् इस्रायेलीयराजसिंहासनोपवेष्टृ-
पुरुषस्याभावस्तव वंशे कदापि न भविष्यतीति। हे इस्रायेलः प्रभो १७
परमेश्वर, स्वदासाय मदीयजनकाय दायूदे भवता यत् कथितं भवत-
स्तद् वाक्यमिदानीं स्थिरं भवतु। किन्त्वीश्वरो मनुष्यैः सह पृथिव्यां १८
निवत्स्यतीति किं सत्यं भवेत्? पश्य स्वर्गः स्वर्गोपरिस्थः स्वर्गश्च भवन्तं न
धरति, ततो मन्निर्म्मितं मन्दिरमिदं किं धरेत्? हे मम प्रभो परमेश्वर, १९
त्वं स्वदासस्य प्रार्थनां निवेदनञ्च गृहाण, तव दासेन या काकूक्तिः
प्रार्थना च क्रियते सा भवता श्रूयतां। अत्र स्थाने मम नाम स्थापयि- २०
ष्यामीति वाक्यं यत् स्थानमिदम् अर्थतो यन्मन्दिरमिदमधि भवतोक्तं तत्
प्रति भवतो नयने दिवारात्रम् उन्मीलिते तिष्ठताम् एतत्स्थानोद्देश्या
भवतो दासस्य प्रार्थना च भवता श्रूयतां। एतत् स्थानम् उद्दिश्य २१
प्रार्थयमानेन भवद्दासेन भवत्प्रजागणेनेस्रायेलीयवंशेन च या प्रार्थना
क्रियते, भवान् तां शृणोतु। भवान् स्वकीयवासस्थाने स्वर्गे तिष्ठन् तां
निशामयतु निशम्य च क्षमतां।

केनचित् समीपवासिनः कस्मिंश्चिद् अपराद्धे लोका यदि शपथं २२

निश्चित्य तं शापयन्ति स च शपथो यदि मन्दिरे ऽस्मिन् तव वेद्याः
२३ समीपम् उपतिष्ठति, तर्हि त्वं स्वर्गे निशम्य कर्त्तव्यं कुर्व्वन् निजदासान्
विचारयार्थतो दोषिणो फलं दत्त्वा तस्य कर्म्मणः समुचितं दण्डं तस्य
मस्तके वर्त्तय निर्द्दोषञ्च निर्द्दोषं कृत्वा तस्य निर्द्दोषत्वस्य फलं तस्मै
वितराणय।

२४ अपरं तव विरुद्धं पातककरणाद् रिपुभिः पराजितास्तवेस्रायेलीय-
प्रजागणा यदि त्वां प्रति परावृत्य तव नाम स्तुवन्तस्तव साक्षात् मन्दिरे
२५ ऽस्मिन् विनयन्ते प्रार्थयन्ते च, तर्हि त्वं स्वर्गे निशम्य तवेस्रायेलीयप्रजा-
नाम् अपराधं क्षमस्व तेभ्यस्तेषां पूर्व्वपुरुषेभ्यश्च यं देशं दत्तवानसि तं
देशं पुनर्व्वारं तान् आनय च।

२६ अपरं तव विरुद्धं तेषां पातककरणाद् गगने रुद्धीभूते यदि वृष्टि
र्न भवति तेन ते यदि स्थानस्यैतस्य दिशि प्रार्थयमानास्तव नाम स्तुवन्ति
२७ त्वया तेषां क्लेशो जात इति विविच्य स्वपापात् परावर्त्तन्ते च, तर्हि त्वं
स्वर्गे निशम्य तव दासानाम् इस्रायेलीयप्रजानाम् अपराधं क्षमस्व गन्तव्यम्
उत्तममार्गञ्च तान् आदिश तव प्रजागणाय यं देशं भोगार्थं दत्तवानसि
तस्मिन् देशे वृष्टिं कारय च।

२८ अपरं देशे दुर्भिक्षे जाते महामार्य्यां वा जातायां शस्यानां वा
शुष्कत्वे म्लानत्वे वा जाते शुककीटादिपतङ्गेषु वा जातेषु देशस्थनगरेषु वा
२९ रिपुभिरवरुध्यमानेषु कस्यांश्चित् मार्य्यां पीडायां वा बलवत्यां यदि केन-
चित् मानवेन तव कृत्स्नेनेस्रायेलीयप्रजागणेन वा स्वकीयपीडां स्वकीय-
क्लेशञ्च बुद्धा काचित् प्रार्थना किञ्चन निवेदनं वा क्रियते मन्दिरस्यास्य
३० दिशि च करद्वयं प्रसार्य्यते, तर्हि त्वं निजवासस्थाने स्वर्गे निशम्य
क्षमित्वा यस्य मनुष्यस्य यम् आन्तरिकभावं जानासि तदनुसारेण तस्या-
चरणस्य समुचितं फलं तस्मै देहि, यतस्त्वमेव मनुष्यसन्तानानाम् अद्वि-
३१ तीयो ऽन्तर्य्याम्यसि। तथा सति त्वम् अस्मत्पूर्व्वपुरुषेभ्यो यं जनपदं
दत्तवानसि तन्मध्ये ते यावत् जीविष्यन्ति तावत् त्वत्तो भीत्वा तव
मार्गेषु चरिष्यन्ति।

३२ अपरं तवेस्रायेलीयप्रजागणाद् भिन्नजातीयः कश्चिन्नरो यदि तव
महानामकारणात् सबलकरस्य प्रसारितवाहोश्च हेतुना दूरदेशाद्
३३ आगत्य मन्दिरस्यास्य दिशि प्रार्थनां कुरुते, तर्ह्यपि त्वया स्ववासस्थाने
स्वर्गे निशम्य तस्य भिन्नजातीयस्य नरस्य प्रार्थनानुसारात् कार्य्यं क्रियतां,

तथा कृते पृथिवीस्थजातीयाः सर्व्वे तव नाम्नो ज्ञानं लब्ध्वा तवेस्रायेलीय-
प्रजा इव त्वत्तो भेष्यन्ति मन्निर्म्मितस्यास्य मन्दिरस्योपरि तव नाम
सङ्कीर्त्तितमेतदपि ज्ञास्यन्ति।
अपरं युद्धयात्रार्थं त्वया प्रेषितास्तव लोका यदि रिपुभिः सह योद्धुं ३४
वहि र्गत्वा त्वयाभिरुचितम् एतन्नगरं तव नामार्थं मया निर्म्मितं
मन्दिरञ्चोद्दिश्य तव साक्षात् प्रार्थनां कुर्व्वते, तर्हि त्वं स्वर्गे तेषां प्रार्थनां ३५
विनयञ्च निशम्य तेषां विचारस्य निष्पत्तिं कुरु। अपरं ते यदि तव ३६
विरुद्धं पापं कुर्व्वन्ति (यतः पापं न करोत्येवम्भूतः को ऽपि मानवो
नास्ति) त्वया च तेभ्यः क्रुद्धा रिपूणां करेषु समर्पितास्ते यदि विजेतृभि
र्दूरस्थं निकटस्थं वा देशं नीयन्ते, ततः परं यस्मिन् देशे ते नीतास्तत्र ३७
यदि मनसि स्वदशां चिन्तयित्वा स्वीयप्रवासदेशे त्वाम् उद्दिश्य प्रार्थय-
माना अस्माभिः पापम् अपराधो ऽधर्म्मश्चाकारीति वदन्ति, इत्थं ते ३८
यदि स्वकीयप्रवासस्थाने ऽर्थतः स्वविजेतॄणां देशे सर्व्वान्तःकरणैः सर्व्व-
प्राणैश्च त्वां प्रति परावर्त्तन्ते, तेषां पूर्व्वपुरुषेभ्यस्त्वया दत्तं स्वकीयदेशं
त्वयाभिरुचितं नगरं तव नाम्ने मया निर्म्मितं मन्दिरञ्चोद्दिश्य प्रार्थनां
कुर्व्वते च, तर्हि त्वं स्ववासस्थाने स्वर्गे तेषां प्रार्थनां विनयञ्च निशम्य तेषां ३९
विचारस्य निष्पत्तिं कुरु, तव प्रजागणेन तव विरुद्धं यद्यद् अपराद्धं
तत् सर्व्वं क्षमस्व च। इदानीं हे मदीयेश्वर, स्थाने ऽस्मिन् या प्रार्थना ४०
क्रियते तां प्रति भवतः श्रोत्रे सुगम्ये चक्षुषी चोन्मीलिते भवतां। इदानीं ४१
हे प्रभो परमेश्वर, भवान् भवतः शक्तिस्वरूपा मञ्जूषा च स्वविश्राम-
स्थानम् आरोहतु। हे प्रभो परमेश्वर, वसनं त्राणरूपं ते याजकैः
परिधीयतां, पुण्यवन्तश्च ते सर्व्वे नन्दन्तु स्वीयमङ्गले। हे प्रभो परमेश ४२
त्वं स्वाभिषिक्तं न वञ्चय, निजदासस्य दायूदो वरश्च स्मर्य्यतां त्वया।

---

७ सप्तमोऽध्यायः।

१ सुलेमनः प्रार्थनातः परम् आकाशाद् वह्नेः पतनं ४ तस्य यज्ञकर्म्म ८ उत्सवकरणात्
परं लोकानां विसर्जनं १२ सुलेमानं प्रति परमेश्वरस्य प्रतिज्ञानं।

सुलेमना प्रार्थनायां समापितायां गगनाद् हुताशो ऽवरुह्य हव्यं १
बलींश्च जग्रास मन्दिरञ्च परमेश्वरस्य तेजसा परिपूरयाञ्चक्रे। परमे- २
श्वरस्य तेजसा परमेश्वरीयमन्दिरस्य पूर्णत्वाद् याजकाः परमेश्वरस्य

३ मन्दिरं प्रवेष्टुम् असमर्था बभूवुः। इस्रायेलीयवंशाः सर्व्वे तम् अग्निपातं मन्दिरोपरि परमेश्वरीयतेजश्च विलोक्य पाषाणमयभूमौ न्युब्जीभूय प्रणम्य भजनं चक्रुः परमेश्वरं स्तुवन्तश्च न्यगदन् स एव क्षेमदातास्ति नित्यश्च तदनुग्रहः।

४ अनन्तरं नरपतिः सर्व्वे लोकाश्च परमेश्वरस्य सम्मुखे बलिदानम्
५ अकुर्व्वन्। तत्र राज्ञा सुलेमना द्वाविंशतिसहस्राणि गावो विंशतिसहस्राधिकं लक्षं मेषाश्च बलिरूपेणादीयन्त, अनेन प्रकारेण राज्ञा
६ समस्तलोकैश्चेश्वरीयमन्दिरस्य प्रतिष्ठाकारि। याजकाः स्वीयस्वीयपदस्य कार्य्याण्यन्वतिष्ठन् लेवीयाश्च स्वकरै दायूदादिष्टं स्तुतिवाद्यं कुर्व्वन्तो ऽर्थतः परमेश्वरस्यानुग्रहो नित्यस्थायी तत्कारणात् तस्य प्रशंसार्थं राज्ञा दायूदा निरूपितान् वाद्ययन्त्रान् वादयन्तो ऽतिष्ठन्, अपरं याजकास्तेषां सम्मुखे तूरीरवादयन्, अपरम् इस्रायेलीया निखिललोका उपातिष्ठन्।
७ तस्मिन् समये परमेश्वरीयमन्दिरस्य सम्मुखस्थप्राङ्गणस्य मध्यदेशः सुलेमना पवित्रीकृतः, यतो होमार्थका बलयो मङ्गलार्थकबलीनां मेदांसि च तत्रैव तैनोत्सृष्टानि, यतो हेतोः सुलेमना निर्म्मिता यज्ञवेदी होमबलीन् निवेदितवस्तूनि मेदांसि च धर्त्तुं नाशक्नोत्।

८ तस्मिन् समये सुलेमान् तेन सहितो हमातस्य प्रवेशस्थानम् आरभ्य मिसरदेशीयां सीमास्थसरितं यावत् सर्व्वेषाम् इस्रायेलीयलोकानां
९ महासमाजश्च महं चक्रिरे। किन्त्वष्टमे दिने ते विश्रामम् अकुर्व्वन् यतस्ते सप्ताहमेकं यावद् वेद्याः प्रतिष्ठाम् अन्यसप्ताहं यावद् उटजोत्सवञ्च
१० चक्रिरे। अनन्तरं परमेश्वरो दायूदं सुलेमानं स्वीयेस्रायेलीयप्रजाश्च प्रति यानि यानि मङ्गलानि कृतवान् तैरानन्दिता हृष्टचित्ताश्च लोकाः सप्तममासस्य त्रयोविंशे दिने निजं निजं वासस्थानं यातुं राज्ञा विस-
११ सृजिरे। अनेन प्रकारेण सुलेमान् परमेश्वरीयमन्दिरस्य राजभवनस्य च निर्म्माणं समापयामास, अपरं परमेश्वरस्य मन्दिरे निजप्रासादे च यद्यत् कर्त्तुं सुलेमान् अभिलषितवान् तदेव सिद्धमकरोत्।

१२ अपरं परमेश्वरो निशायां सुलेमने दर्शनं दत्त्वा कथयामास, मया
१३ तव प्रार्थना श्रुता यज्ञभवनार्थं स्थानमिदमपि वृतं। मया गगनं रुद्धा वृष्ट्यां निवारितायां शूककीटेषु जनपदं नाशयितुम् आदिष्टेषु निज-
१४ प्रजानां विरुद्धं वा महामार्य्यां प्रेषितायां यदि मम नाम्ना विख्याता मदीयप्रजा नम्रीभूय प्रार्थनां मदीयमुखान्वेषणञ्च कुर्य्युः स्वकीयकुमार्गे-

भ्यश्च परावर्त्तेरन् तर्हि स्वर्गे तिष्ठता मया तत् श्रुत्वा तेषाम् अपराधाः
क्षमिष्यन्ते तेषां जनपदस्य मङ्गलानि च कारिष्यन्ते। अत्र स्थाने या १५
प्रार्थना भविष्यति तां प्रति मम चक्षुष्युन्मीलिते श्रोत्रे च सुगम्ये भवि-
ष्यतः। इदानीं मदीयनाम्नो नित्यस्थित्यर्थं मन्दिरमिदं मयाभिरुचितं १६
पवित्रीकृतञ्च मम दृष्टि र्मम मनश्च सततं स्थाने ऽस्मिन् स्थास्यतः।
अपरं तव तातो दायूद् यादृक् चरितवान् तादृक् त्वमपि यदि मम १७
साक्षात् चरन् मया यथादिष्टं तथैव कर्म्म करिष्यसि मम विधीन्
राज्यनीतीश्च पालयिष्यसि च, तर्हीस्रायेलीयानां शासनकर्त्तृपुरुषस्या- १८
भावस्तव वंशे कदापि न भविष्यतीति मया तव ताताय दायूदे यत्
प्रतिज्ञातं तदनुसारात् तव राजसिंहासनं स्थिरीकारिष्यते। किन्तु १९
यदि यूयं मत्तो ऽपसृत्य ममादिष्टान् विधीन् राज्यनीतीश्च न पालयि-
ष्यथ, यदि च विपथगामिनो भूत्वेतरदेवान् सेविष्यध्वे प्रणंस्यथ च,
तर्ह्यहं युष्मभ्यं यं मदीयदेशं दत्तवान् तस्माद् युष्मान् उच्छेत्स्यामि यच्च २०
मन्दिरमिदं मम नामार्थं पवित्रीकृतवान् अस्मि तदपि स्वदृष्टिगोचराद्
दवयिष्यामि सर्व्वजातीयानां गालिपरिहासयोरुदाहरणं करिष्यामि
च। ततो यावन्तो लोका एतस्य प्रांशुमन्दिरस्य सन्निधिना व्रजिष्यन्ति, २१
ते चमत्कृता भविष्यन्ति, देशमेतं मन्दिरमेतच्च प्रति परमेश्वरः कुत
एतादृशं कृतवान्? इति प्रक्ष्यन्ति च। तेन लोकाः प्रतिवक्ष्यन्ति, लोका- २२
नाम् एतेषां पूर्व्वपुरुषा येन मिसरदेशाद् वहिरानीता इमे स्वेषां तं
पत्रिकं प्रभुं परमेश्वरं विहायेतरदेवान् आश्रित्य तान् प्राणमन् असे-
वन्त च तत्कारणात् स तान् इत्थं विपद्ग्रस्तान् कृतवान्।

---

८ अष्टमोऽध्यायः।

१ सुलेमना नगरनिर्म्मापणं ७ अन्यदेशीयानां कराधिनीकरणं ११ प्रासादे निज-
जायाया नयनं १२ धर्म्मविधीनां पालनं १४ याजकानां लेवीयानाञ्च निरूपणं १७
ओफीरात् काञ्चनानामानयनञ्च।

परमेश्वरस्य मन्दिरं स्वकीयनिवेशनञ्चैतयोः प्रासादयो र्निर्म्माणेन सुले- १
मना विंशतिवत्सरा यापिताः। अपरं हीरमः सुलेमने यानि नगराणि २
दत्तवान् सुलेमान् तानि निर्म्माप्येस्रायेलीयवंशान् तन्मध्ये वासया-
ञ्चकार। अनन्तरं सुलेमान् हमातसोवां गत्वा तां पराजिगाय। अपरं ३
मरुभूम्यां तद्मोरनगरं हमाते च यानि नगराणि धनरक्षार्थं निरमाप- ४

५ यत् तान्यपि तदानीं निर्म्मापयाञ्चकार। अपरं स ऊर्द्धस्थं बैथोरोणम्
अधःस्थं बैथोरोणञ्चेमे द्वे नगरे दुर्गवत्प्राचीरगोपुरार्गलै र्दृढे चकार।
६ अपरं सुलेमान् बालतं कोषनगराणि रथनगराणि सादिनां नगराणि
तदन्यद् यिरूशालमे लिवानोने स्वकीयस्य कृत्स्नराष्ट्रस्य सर्व्वत्र च यद्यत्
निर्म्मापयितुम् ऐच्छत् तत् सर्व्वं निर्म्मापयाञ्चकार।
७ इस्रायेलीयवंशाद् अपरवंशोद्भवा ये हित्तीयेमोरीयपिरिषीयहिव्वीय-
८ यिबूषीयलोका अवशिष्टाः सन्त इस्रायेलीयवंशै र्विनंष्टुं न शेकिरे तेभ्य
उत्पन्नो देशे चावशिष्टो वंशः सुलेमना संगृहीतोऽद्य यावद् दासत्वापन्न-
९ कारुनिवहोऽकारि। इस्रायेलीयवंशोद्भवाः केऽपि सुलेमना स्वकीयराजत्वे
दासा न चक्रिरे, ते योद्धारो रथिनो रथाधिपतयो हयारोहिणश्च
१० बभूवुः। अपरं तेषां मध्ये पञ्चाशदधिके द्वे शते जनाः सुलेमनो राज्ञः
कारुनिवहाध्यक्षा भूत्वा लोकान् अशिषन्।
११ अनन्तरं सुलेमान् फिरौणो दुहितु र्निमित्तं यं प्रासादं निरमापयत
तं प्रासादं दायूदो नगरात् तां महिषीम् आनिनाय, यतः स गदित-
वान् मम जाया इस्रायेलीयराजस्य दायूदः प्रासादे न वत्स्यति यतो
परमेश्वरीयमञ्जूषा यानि स्थानानि प्राविशत् तानि पवित्राणि सन्ति।
१२ अपरं सुलेमान् अलिन्दस्य सम्मुखे परमेश्वरीयां यां वेदिं निर्म्मितवान्
१३ तदुपरि परमेश्वराय होमबलीन् दातुम् आरेभे। मूसा यद् आदिष्ट-
वान् तदनुसारेण स विश्रामवारेष्वमावास्यासु त्रिषु वार्षिकमहोत्सवेषु
चार्थात् किण्वशून्यपूपानां महे सप्ताहानां महे उटजनिर्म्माणमहे च
यस्मिन् दिने यथा निरूपितं तस्मिन् दिने तथैव बलिदानम् अकरोत्।
१४ अपरं स निजजनकस्य दायूदो निरूपणानुसारेण कर्त्तव्यक्रियाणां कृते
याजकानां पर्य्यायान् निरूपयामास अपरं यस्मिन् दिने यथा कर्त्तव्यं
तस्मिन् तथैव स्तुतिं याजकानां सम्मुखे परिचर्य्याञ्च कर्त्तुं लेवीयान्
निरूपयाञ्चकार। अपरं तेषां पर्य्यायानुसारेण द्वारेषु दौवारिकान् नि-
१५ रूपयाञ्चकार यत ईश्वरीयलोको दायूद् तद् आज्ञापयाञ्चकार। अपरं
राजा याजकान् लेवीयांश्चाधि धनागारानधि वा यत् किञ्चनाज्ञापयत्
१६ ते तदन्यथा नाकुर्व्वन्। इत्थं परमेश्वरीयमन्दिरस्य भित्तिमूलकरणम्
आरभ्य तस्य समाप्तिं यावत् सुलेमनो निखिले कार्य्ये निरूपितं सिद्धिं
गते पारमेश्वरीयमन्दिरस्य निर्म्माणं सम्पूर्णं बभूव।
१७ तदानीं सुलेमान् इदोमजनपदं जलनिधितटस्थम् इत्सियोनगेवरम्

इलतञ्च जगाम। अपरं हीरमो निजदासैस्तस्य सन्निधिं पोतान् निपुण- २८
नाविकांश्च प्रेषयामास ते च सुलेमनो दासैः समम् ओफीरं समीय
पञ्चाशदधिकचतुःशतकिक्कारपरिमाणानि काञ्चनानि गृहीत्वा तस्मात्
स्थानात् सुलेमनो नरपतेः सन्निधिम् आनिन्युः।

९ नवमोऽध्यायः।

१ सुलेमनो ज्ञानं श्रोतुं शिवायाः राज्ञा यिरूशालम आगमनं १० सुलेमनः कनकानां कथा १३ सुवर्णफलकानां कथनं १७ दन्तिदन्तमयसिंहासनस्य कथनं २० पात्रादि-कथनम् उपढौकनकथनं २६ रथहयानां कथनं २६ करादीनां कथनं २९ तस्य राजत्वस्य निधनस्य च कथनं।

अपरं शिवादेशस्य राज्ञी सुलेमनः कीर्त्तिं निशम्य प्रवह्लिकाभिस्तं १
परीक्षितुम् अतीवमहाडम्बरेण सुगन्धिद्रव्यप्रचुरस्वर्णमणिवाहिनां महा-
ङ्गानां निवहेन चावृता यिरूशालमम् आजगाम, सुलेमनः सन्निधिमेत्य
सर्व्वं स्वमनोगतमधि तं सम्बभाषे च। ततः सा यद्यद् अपृच्छत् तत् २
सर्व्वं सुलेमान् तां जगाद, तन्मध्ये सुलेमनागम्यं किमपि वाक्यं नासीत्
स तां सर्व्वमेव ज्ञापितवान्। अतः सुलेमनो ज्ञानं तन्निर्म्मितं मन्दिरं ३
तस्य भोजनासनस्थभक्ष्यद्रव्याण्यमात्यानां परिषद् परिचारकाणां श्रेणी- ४
वेशौ पानपात्रवाहिनां संख्या वेशश्च परमेश्वरीयमन्दिरारोहणाय
तस्य सोपानश्चैतानि सर्व्वाणि दृष्ट्वा सा शिवादेशस्य महिषी हतज्ञाना
बभूव। सा तु राजानं जगाद, भवतो वाक्यानि ज्ञानञ्चाधि या ५
किंवदन्ती स्वदेशे मयाश्रावि सा सत्यैव। किन्त्वहं यावद् आगत्य स्वने- ६
त्राभ्यां सर्व्वं नापश्यं तावत् तां जनश्रुतिम् असत्याम् अमन्ये किन्तु पश्य
तव महाज्ञानस्यार्द्धमप्यहं न श्रुतवती। भवान् मच्छ्रुतां किंवदन्तीम्
अतिरिच्यते। धन्या इमे भवतो नरा धन्याश्चेमे भवतो भृत्या यत इमे ७
नित्यं भवतः साक्षात् तिष्ठन्तो भवतो ज्ञानालापं शृण्वन्ति। धन्यो ८
भवतः प्रभुः परमेश्वरो यतः स भवति तुष्टा भवतः प्रभोः परमेश्वरस्य
कृते भवन्तं राजसिंहासन उपावेशयत्। भवत ईश्वर इस्रायेल्वंशे
प्रीयमाणो ऽनन्तकालं यावत् तं स्थापयितुम् इच्छत्येतत्कारणाद् भवान्
यन्न्यायं धर्म्मञ्च समाचरेत् तदर्थं भवन्तं तस्योपरि राज्याभिषिक्तम् अक-
रोत्। सा तु राज्ञे विंशत्यधिकशतकिक्कारपरिमितानि सुवर्णानि प्रचु- ९

राणि सुगन्धिद्रव्याणि मणींश्च ददौ। शिवादेशस्य राज्ञी सुलेमने नृपतये
यादृशानि सुगन्धिद्रव्याण्यददात् तादृशानि सुगन्धिद्रव्याणि तत् स्थानं
पुन र्नानीतानि।
१० अपरं हीरमस्य सुलेमनश्च ये किङ्करा ओफीरात् कनकान्यानयन् ते
११ मलयजकाष्ठानि मणींश्चानयन्। अनन्तरं नरपतिस्तै र्मलयजकाष्ठैः
परमेश्वरीयमन्दिरस्य राजप्रासादस्य च निमित्तं सोपानानि गायकानां
कृते वल्लकी र्वंशीश्च निर्म्मापयाञ्चकार। तादृशानि काष्ठानि यिहूदादेशे
१२ पूर्व्वं केनापि न दृष्टानि। अनन्तरं सुलेमान् महीपतिः शिवाया महिष्या
वाञ्छितं यत् किमप्ययाच्यत तत् सर्व्वं तस्यै ददौ तदन्यत् सा राज्ञः समीपं
यद्यद् आनीतवती (तस्य शोधमपि स ददौ), ततः परं सा स्वभृत्यगणेन
सार्द्धं निजजनपदं परावृत्य जगाम।
१३ सुलेमनो नरपतेः समीपं प्रतिवर्षं षटषष्ट्यधिकषटशतकिक्कारपरिमि-
१४ तानि कनकान्यानीयन्त। तदन्यानि सार्थवाहै र्वणिग्भिश्च समानीयन्त,
अपरम् आरवीयाः सर्व्वे महीपतयो देशाध्यक्षाश्च सुलेमनः सन्निधिं
१५ सुवर्णानि दुर्वर्णानि चानयन्। ततः सुलेमान् नरपतिस्ताडितसुवर्णै र्द्वे
शते वर्त्तुलाकारफलकानि निर्म्मापयामास तेषाम् एकैकस्मिन् फलके
१६ षट्शतशेकलपरिमितं ताडितं सुवर्णं प्रयुक्तं। अपरं ताडितसुवर्णैस्त्रीणि
शतानि चर्म्माणि निर्म्मापयामास तेषाम् एकैकस्मिन् चर्म्मणि त्रिशत-
शेकलपरिमितानि कनकानि प्रयुक्तानि। अनन्तरं भूपति र्लिवानोनार-
ण्यगृहे तानि निदधे।
१७ अनन्तरं राजा दन्तिदन्तमयं महासिंहासनं निर्म्माप्य निर्म्मलकाञ्च-
१८ नेन खचयाञ्चकार। तस्य सिंहासनस्य षट् सोपानान्यासन् सुवर्णमयं
पादपीठमेकञ्च तत्र बद्धमासीत्। उपवेशनीयस्थानस्य पार्श्वयोश्च हस्ता-
१९ कारे अवलम्बने आस्तां तयोश्चावलम्बनयोरग्रे द्वौ सिंहावतिष्ठतां। तेषु
षट् सोपानेषु पार्श्वयो र्द्वादश सिंहा अतिष्ठन्। एतादृशं सिंहासनं
कस्मिंश्चिद् राष्ट्रे न निरमायि।
२० सुलेमनो महीपतेः सर्व्वाणि पानभाजनानि कनकमयान्यासन् तद्वत्
लिवानोनारण्यगृहे स्थितानि सर्व्वाणि भाजनानि निर्म्मलकनकमया-
२१ न्यासन्। सुलेमनो राजत्वसमये रजतानां किमपि मूल्यं नासीत्। यतो
हीरमस्य दासैः सह नरपतेस्तर्शीशगामिनः पोता आसन् वर्षत्रयात्
परं वारमेकं ते पोता आगच्छन्। ते तर्शीशीयपोताः सुवर्णं दुर्वर्णम्

इभदन्तान् कपीन् शिखिनश्चानयन्। अनेन प्रकारेण वित्तविद्याभ्यां २२
सुलेमान् नृपतिः पृथिवीस्थेभ्यो ऽन्यनिखिलराजेभ्यः श्रेष्ठो बभूव।
ईश्वरेण सुलेमनो मनसि यत् ज्ञानं निहितं तस्य तज्ज्ञानस्य वचां- २३
सि श्रोतुं वसुन्धरायाः सर्व्वे महीपतयस्तं साक्षात् कर्त्तुम् अयतन्त। ते च २४
प्रतिवर्षं स्वं स्वम् उपायनम् अर्थतो रजतमयानि कनकमयानि च भाज-
नानि वसनान्यस्त्राणि सुगन्धिद्रव्याणि हयान् अश्वतरांश्च समानयन्।
अपरं वाजिनां स्यन्दनानाञ्च निमित्तं सुलेमनश्चत्वारि सहस्राणि भव- २५
नान्यासन्, अपरं तस्य द्वादशसहस्राणि हयारोहा आसन् ते च तेन
रथनगरेषु यिरूशालमे च राजनिकटे निदधिरे।
स सुलेमान् फरात्तटिनीम् आरभ्य पिलेष्टीयानां जनपदं मिसर- २६
देशस्य सीमाञ्च यावत् निखिलभूपतीनाम् उपरि राजत्वं चकार।
अपरं राजा यिरूशालमे प्रभूतत्वकारणाद् रजतानि पाषाणवद् एरस- २७
काष्ठानि प्रान्तरस्थोडुम्बरेन्धनवत् साधारणानि चकार। अपरं मनुजा २८
मिसरदेशात् निखिलजनपदाच्च सुलेमनः कृते वाजिन आनिन्युः।
एतस्य सुलेमन आद्यन्तं निखिलं चरित्रं भविष्यद्वादिनो नाथनस्य २९
पुस्तके शीलोनीयाहियस्य भाविवाक्यग्रन्थे निवाटसुतस्य यारवियामस्य
विरुद्धं यिद्दोःपरिदर्शकस्य यद् दर्शनं तन्मध्ये च लिखितं किं न विद्यते?
स सुलेमान् यिरूशालमे वसन् इस्रायेल उपरि चत्वारिंशद्वत्- ३०
सरान् यावत् राजत्वं चकार। अनन्तरं सुलेमान् स्वपितृगण इव महा- ३१
निद्रां प्राप्य निजजनकस्य दायूदो नगरे श्मशानं लब्धवान्। ततस्तस्य
सुतो रिहवियामस्तस्य पदे राजत्वं चकार।

---

१० दशमोऽध्यायः।

१ रिहवियामम् अभिषेक्तुम् इस्रायेलीयलोकानां शिखिमे गमनं तं प्रति लोकानां प्रार्थनं ६ तेषां प्रार्थनमधि प्राचीनमन्त्रिभि र्युवलोकैश्च सह मन्त्रणा २२ यूनां मन्त्रणानुसारेणोत्तरप्रदानं १६ इस्रायेलीयलोकानाम् अनाज्ञाग्रहणं कारनिवहाधिपस्य हननञ्च।

अनन्तरम् इस्रायेलीयवंशेषु सर्व्वेषु रिहवियामस्याभिषेकार्थं शिखिमं १
समागतेषु रिहवियामोऽपि शिखिमं जगाम। इत्यनन्तरे मिसरदेश- २
प्रवासी निवाटस्य सुतो यारवियामस्तां वार्त्तां श्रुतवान्। स यारवि-
यामः सुलेमनो राज्ञः सम्मुखात् पलाय्य मिसरदेशे प्रावसत्। ततः परं ३

दूतैराहूतः पुनरागतः। स तु यारवियामः सर्व्व इस्रायेलीयलोकाश्च
४ रिहवियामे वाक्यमेतन्निवेदयामासुः, तव तातो ऽस्मासु गुरु युगम् आ-
रोपितवान्, तव तातेन यत् कठिनं दासत्वं यच्च गुरु युगम् अस्मास्वा-
रोपितं, तद् अधुना त्वया लघुतरं क्रियतां, तथा कृते वयं त्वां सेविष्या-
५ मह इति। ततः स तान् प्रतिजगाद, दिनत्रयात् परं पुन र्ममान्तिकम्
आगच्छतेति। ततो लोकाः प्रस्थिताः।

६ अनन्तरं निजतातस्य सुलेमनो जीवनकाले ये तं पर्य्यचरन् राजा
रिहवियामस्तैः प्राचीनैः सह मन्त्रयन् तान् पप्रच्छ, युष्माकं मन्त्रणया
७ लोका इमे मया किं प्रतिगदितव्याः? ततस्ते तम् ऊचुः, भवान् यदि
लोकान् एतान् अनुगृह्य तोषयति मधुरवचनैश्च तान् प्रत्युत्तरं वदति
८ तर्हि ते सर्व्वदा भवतो दासा भविष्यन्ति। किन्तु स तैः प्राचीनै र्निवे-
दितां तां मन्त्रणां विहाय तस्य समवयस्का ये तरुणास्तं पर्य्यचरन् तैः
९ सह मन्त्रयन् तान् पप्रच्छ, युष्माकं मन्त्रणया लोका इमे ऽस्माभिः किं
प्रतिगदितव्याः? ते मां व्याहरन्, तव तातेनास्मासु यद् युगम् आरो-
१० पितं तत् त्वया लघुतरं क्रियतामिति। ततस्तस्य समवयस्कास्तरुणास्तम्
ऊचुः, तव पित्रा यद् गुरु युगम् अस्मास्वारोपितं तत् त्वया लघुतरं
क्रियतामिति वाक्यं यै र्भवान् उक्तस्तान् लोकान् प्रति भवता यद् उत्तरं
कर्त्तव्यं तदिदं। भवान् तान् वदतु मम तातस्य कटिदेशात् मम कनि-
११ ष्ठाङ्गुलिरपि स्थूलतरः। अतो मम पिता यद् गुरु युगं युष्मास्वारोपित-
वान् तद् युष्मदीययुगं मया गुरुतरं कारिष्यते, मम तातेन यूयं कशाभि
र्दण्डिताः किन्तु मया ग्रन्थियुक्ताभिस्ताडनीभि र्दण्डयिष्यध्व इति।

१२ अनन्तरं तृतीये दिने युष्माभि र्ममान्तिके पुनरागन्तव्यं राज्ञ एतस्माद्
आदेशाद् यारवियामे सर्व्वेषु लोकेषु च तृतीयदिवसे रिहवियामस्य
१३ समक्षम् आगतेषु राजा कठिनवचनै र्लोकान् आबभाषे। राजा रिह-
१४ वियामः प्राचीनानां मन्त्रणां विहाय यूनां मन्त्रणानुसारेण तान् जगाद,
मम तातेन यद् गुरु युगं युष्मास्वारोपितं तन्मया गुरुतरं कारिष्यते;
मम तातेन यूयं कशाभि र्दण्डिताः किन्तु मया ग्रन्थियुक्ताभिस्ताडनीभि
१५ र्दण्डयिष्यध्व इति। अनेन प्रकारेण राज्ञा लोकानां प्रार्थितम् अस्वी-
कृतं। यतो परमेश्वरो निवाटस्य पुत्रं यारवियामं प्रति शीलोनीयाही-
यस्य प्रमुखाद् यद् वाक्यं भाषितवान् स्वस्य तद्वाक्यस्य सिद्ध्यर्थम् ईश्वर
एतन्निरूपितवान्।

अनन्तरम् अस्माकं निवेदनं राज्ञा न स्वीकृतमितीस्रायेलीयैः सर्व्वै १६
दृष्टं। ततो लोका राजानं प्रतिजगदुः, दायूदस्माकं को ऽंश आस्ते?
यिशयस्य पुत्त्रे ऽस्माकं कोप्यधिकारो नास्ति। हे इस्रायेलीयवंशाः,
युष्माभिः स्वं स्वं गृहं गम्यतां, हे दायूद्, त्वं स्ववंशस्यैवाध्यक्षो भव। तत
इस्रायेलीयवंशाः स्वं स्वं वेश्म जग्मुः। यिहूदादेशस्थनगरेषु य इस्राये- १७
लीयवंशा न्यवसन् केवलं तेषां राजत्वं रिहबियामेन लब्धं। अनन्तरं १८
रिहबियामेन राज्ञा प्रेषितः कारुनिवहस्याधिपतिरदोरामः सर्व्वैरि-
स्रायेलीयलोकैः पाषाणाघातै र्हतः। ततो राजा रिहबियामो यिरूशा-
लमं पलायितुं त्वरितं रथं समारुरोह। इत्थम् इस्रायेलीयवंशा अद्य- १९
पर्य्यन्तं दायूद्वंशस्याधीनत्ववर्जिता बभूवुः।

---

११ एकादशोऽध्यायः।

१ समरं कर्त्तुं रिहबियामस्य परमेश्वरेण निषिद्धत्वं ५ नगराणां दृढीकरणं १३ तस्य सन्निधिं याजकानां लेवीयानाञ्च गमनं १८ तस्य भार्य्यापुत्त्रादीनां नामानि च।

अनन्तरं राज्यं यद् रिहबियामं प्रति पुन र्वर्त्तेत तत्कृत इस्रायेलीय- १
वंशैः सह योधनार्थं यिहूदावंशीया विन्यामीनवंशीयाश्च लोका अर्थतो
ऽशीतिसहस्राधिकलक्षसङ्ख्यका अभिरुचिता योद्धारो यिरूशालमं
प्रत्यागतेन रिहबियामेन सम्मेलिताः। तत ईश्वरीयलोकं शिमयियं २
प्रति परमेश्वरस्यैतद् वाक्यम् उपतस्थौ, त्वं यिहूदादेशीयं नृपतिं सुले- ३
मनस्तनयं रिहबियामं यिहूदाविन्यामीनदेशनिवासिनश्च सर्व्वान् इस्रा-
येलीयलोकान् वद, परमेश्वरो भाषते, युष्माभि र्यात्रा न कर्त्तव्या, युष्मद्- ४
भ्रातृभिः सह न योद्धव्यं, किन्तु स्वं स्वं गृहं गन्तव्यं यत एतत् मत्तो
ऽभवत्। ततस्ते परमेश्वरस्याज्ञां गृहीत्वा यारबियामस्य विरुद्धं गमनात्
परावृत्य गताः।

अनन्तरं रिहबियामो यिरूशालमे निवसन् यिहूदाजनपदे कति- ५
पयानि नगराणि सुदृढानि चक्रे। विशेषतो बैत्लेहमम् एटमं तिकोयं ६
बैत्सूरं सोखुरदुल्लमं गातं मारेशा सीफम् अदोरयिमं लाखीशम् असेका ७
सरियम् अयालोनं हिब्रोणञ्चैतानि नगराणि तेन दृढीकृतानि। यिहू- १०
दाविन्यामीनदेशयोरेतानि सुदृढानि नगराणि। अपरं स दुर्गाणि ११
दृढीकृत्य तन्मध्ये सेनापतीन् सञ्चितानि भक्ष्यद्रव्याणि तैलानि द्राक्षा-

११ रसांश्च स्थापयाञ्चकार। अपरं यिहूदाविन्यामीनवंशयोस्तत्पक्षीभूतयोः
स प्रतिनगरं फलकानि शूलानि च निदधे नगराणि महागाढानि
चकार च।
१३ अपरं कृत्स्नेस्रायेलीयजनपदे ये याजका लेवियाश्चासन् ते स्वीया-
१४ धिकारात् प्रस्थायागताः। लेवीयाः स्वेषां ग्रामान् भूमीश्च विहाय यिहू-
दादेशं यिरूशालमञ्च समाजग्मुः, यतस्ते यारविवामेन तस्य तनयैश्च
१५ परमेश्वरस्योपासनातो दवयाञ्चक्रिरे। अपरं स भृगुस्थानानां भूत-
गणानां स्वनिर्म्मितगोवत्सयोश्च कृत इतरान् याजकान् नियोजयाञ्चकार।
१६ अपरम् इस्रायेलीयानां सर्व्ववंशानां मध्ये यावन्तो लोका इस्रायेलः प्रभुं
परमेश्वरम् ईहितुं मनोभिरुद्यमम् अकुर्व्वन् ते स्वेषां पूर्व्वपुरुषाणां
प्रभुं परमेश्वरम् उद्दिश्य बलीन् प्रदातुं तेषां (लेवीयानां) पश्चाद् आग-
१७ च्छन्। ते यिहूदाया राजत्वं गाढं चक्रिरे वत्सरत्रयं यावत् सुलेमनः
सुतं रिहबियामं बलवन्तं विदधिरे च, यतस्ते त्रीन् वत्सरान् यावद्
दायूदः सुलेमनश्च वर्त्मना प्रावर्त्तन्त।
१८ अनन्तरं रिहबियामो दायूदः पौत्त्रीं यिरेमोतस्य दुहितरं महलतं
१९ यिशयस्य पौत्त्रीम् इलीयावस्य दुहितरम् अवीहयिलञ्च व्युवाह। तस्या
२० गर्भे यियूशः शिमरियः सहमश्च तस्यैते सुता अजायन्त। अतः परं तेनाव-
शालोमस्य दुहितरि माखायाम् उदूढायां तस्या गर्भे ऽवियो ऽत्तयः
२१ सीषः शिलोमीतश्चाजायन्त। रिहबियामः स्वकीयानां निखिलजायानाम्
उपजायानाञ्च मध्ये ऽवशालोमस्य दुहितरि माखायाम् अधिकम् अप्री-
यत, किञ्च तस्याष्टादश जायाः षष्टिरुपजायाश्चासन् ताभ्यो ऽष्टाविंशतिः
२२ पुत्त्राः षष्टिः पुत्त्र्यश्च जज्ञिरे। अनन्तरं रिहबियामो माखाया गर्भजातम्
अवियं मुख्यं कृत्वा भ्रातृनिवहस्य मध्ये ऽधिपं चकार यस्मात् स तमेव
२३ राजानं कर्त्तुं मतिमकरोत्। स बुद्धिं प्रकाशयन् यिहूदाविन्यामीनजन-
पदयोः सर्व्वेषु स्थानेषु प्राचीरवेष्टितेषु नगरेषु च निजतनयान् नियो-
जयाञ्चकार तेभ्यः प्रभूतानि भक्ष्यद्रव्याणि ददौ तेषां कृते बह्वीः कन्या
अन्विवेष च।

---

१२ द्वादशोऽध्यायः।

१ परमेश्वरत्यागित्वाद् रिहबियामस्य दण्डनं ५ पातकस्य कृते ऽनुतापकरणकारणाद्
दण्डस्य ह्रासत्वं १३ तस्य राजत्वनिधनयोः कथनञ्च।

अनन्तरं रिहवियामेन राजत्वं स्थिरीकृत्य पराक्रमे लब्धे स तेन समं १
निखिलेस्रायेलीयलोकाश्च परमेश्वरस्य व्यवस्थां पर्य्यत्यजन्। अपरं ते पर- २
मेश्वरस्य विरुद्धम् अपराधं कृतवन्त एतत्कारणाद् राज्ञो रिहविया-
मस्याधिकारस्य पञ्चमे वत्सरे मिस्रीयः शीशको नरपति र्यिरूशालमस्य
विरुद्धम् आजगाम। तस्य द्वादश शतानि रथाः षष्टिः सहस्राणि हया- ३
रोहिणो ऽसङ्ख्यका लोकाश्चासन् यतो लूबीयाः सुक्कीयाः कूशीयाश्च
लोकास्तेन सह मिसरदेशाद् आगच्छन्। अपरं स यिहूदादेशस्य ४
प्राचीरवेष्टितानि नगराणि वशे कृत्वा यिरूशालमम् आजगाम।

तस्मिन् समये रिहवियामस्य सन्निधिं शीशकाद् भयेन यिरूशालमे ५
समागतानां यिहूदावंशस्याधिपानां सन्निधिञ्च भविष्यद्वादी शिमयिय
आगत्य तान् बभाषे, परमेश्वर इति वाचं वदति यूयं मां पर्य्यत्यजत
तत्कारणात् मयापि यूयं शीशकस्य करे पर्य्यत्यज्यध्वं। तत इस्रायेलीया ६
अधिपा नृपश्च नम्रीभूय कथयामासुः परमेश्वरो न्यायकारी। तदानीं ७
परमेश्वरेण तेषां नम्रतायां दृष्टायां शिमयियस्य समीपं परमेश्वरस्य
वागियम् उपतस्थौ, ते नम्रा अभवन् एतत्कारणात् मया न विनाशयि-
ष्यन्ते किन्तु स्वल्पकालात् परम् उद्धारिष्यन्ते शीशकस्य करेण यिरूशाल-
मस्योपरि मम कोपः पूर्णत्वेन न वर्षिष्यति। किन्तु मम परिचर्य्या भिन्न- ८
देशीयराज्यानां परिचर्य्या च यत् तै र्बुध्येत तत्कृते ते तस्य परिचारका
भविष्यन्ति।

अपरं मिसरदेशीयनृपतिः शीशको यिरूशालमस्य विरुद्धम् आगत्य ९
परमेश्वरीयमन्दिरस्य धनानि राजपुर्य्याश्च धनानि जहार, सर्व्वाण्येव
तेन हृतानि। सुलेमना निर्म्मितानि कनकमयानि फलकान्यपि तेन
हृतानि। अनन्तरं तेषां विनिमयेन पित्तलीयफलकानि रिहवियामेन १०
राज्ञा निर्म्मापितानि राजपूर्य्या द्वारपालकानां पदातीनाम् अध्यक्षाणां
करेषु समर्पितानि च। ततो यतिवारं राजा परमेश्वरीयमन्दिरम् अग- ११
च्छत्, ततिवारं पदातय आगत्य तान्युदधारयन् अनन्तरं पदातिशा-
लायां पुन र्न्यदधुः। रिहवियामे नम्रे जाते परमेश्वरस्य कोपस्तस्मात् १२
निवृत्य तस्य सर्व्वनाशजनको न बभूव। यिहूदायामपि केषाञ्चित्
सद्भावो ऽविद्यत।

अपरं राजा रिहवियामो यिरूशालमे पराक्रमी भवन् राजत्वं १३
चकार। राजत्वप्राप्तिकाले रिहवियामस्य वय एकचत्वारिंशद्वत्सराः।

परमेश्वरो निजनामधेयं स्थापयितुम् इस्रायेलीयानां सर्व्ववंशानां मध्ये यन्नगरं वरीतवान् तस्मिन् स सप्तदश वत्सरान् यावद् राजत्वं चकार।
१४ तस्य जनन्या अम्मोनीया नयमेति नामासीत्। स कदाचारम् अकरोत्
१५ यतः स परमेश्वरं गवेषयितुं स्वमनो न निदधे। एतस्य रिहवियाम-
स्याद्यन्ताः सकलाः क्रियाः शिमयियस्य भविष्यद्वादिन इद्दोः प्रदर्शकस्य
च पुरावृत्तपुस्तके लिखिताः किं न विद्यन्ते? रिहवियामयारवियामयो
१६ र्मध्ये नित्यं युद्धमासीत्। अनन्तरं रिहवियामः स्वपितृगणइव महानिद्रां
गत्वा दायूद्नगरे श्मशाने स्थापितः। अनन्तरं तस्य तनयो ऽवियस्तस्य
पदेन राजत्वं प्राप्तः।

१३ त्रयोदशोऽध्यायः।

१ यारवियामेन समम् अवियस्य योधनं ४ यारवियामं प्रत्यवियस्य कथनं १२ परमेश्वरे विश्वासाद् अवियस्य जयः २१ अवियस्य भार्य्यापुत्त्रादीनां कथनं।

१ यारवियामस्य नृपस्याष्टादशे राजत्ववत्सरे ऽवियो यिहूदाजनपदे
२ राजा बभूव। तेन त्रीन् वत्सरान् यावद् यिरूशालमे राजत्वम् अक्रि-
यत, गिवियानिवासिन ऊरीयेलस्य मीखायानामिका दुहिता तस्य
३ मातासीत्। अवियायारवियामयो र्मध्ये युद्धम् आसीत्। अवियश्चतुर्लक्षै-
रभिरुचितै र्बलवद्भि र्योद्धृभिः समरसज्जां चकार, किञ्च यारवियामो
ऽष्टभि र्लक्षैरभिरुचितै र्बलवद्भि र्योद्धृभिस्तस्य विरुद्धं रणसज्जां चकार।
४ अपरम् अविय इफ्रयिमपर्व्वतस्थसिमारयिमाख्यस्य शिलोच्चयस्योपरि
तिष्ठन् व्याजहार हे यारवियाम हे निखिलेस्रायेलीयलोकाः, मदीय-
५ वचनं निशामयत। इस्रायेलः प्रभुः परमेश्वर इस्रायेलीयराजत्वपदं
सदाकालार्थं दायूदे दत्तवान् अर्थाद् अमोघनियमेन तस्मै तस्य वंशाय
६ च दत्तवान् इति युष्माकं परिज्ञानं किमुचितं नहि? तथापि दायूदः
सुतस्य सुलेमन एकः किङ्करो यो निवाटस्य तनयो यारवियामः स
७ उत्थाय निजप्रभोरधीनताम् अस्वीकृतवान्। अपरं चञ्चला दुष्टाश्च लोका-
स्तदीयपक्षे मिलित्वा सुलेमनः सुतस्य रिहवियामस्य विरुद्धं बलवन्तो
बभूवुः। तदानीं रिहवियामस्तरुणः कोमलबुद्धिश्चासीत् तेषां विरुद्धं
८ कठोरो नाभवत्। इदानीं यूयमपि दायूदो वंशस्य हस्तगतं परमेश्वरीय-
राज्यं पराजेतुं मतिं कुरुथ। यूयं बहव आध्वे यौ गोवत्सौ यारवियामेन

युष्माकं देवतार्थं निर्म्मितौ तावपि युष्माभिः सह विद्येते। युष्माभिः पर- ९
मेश्वरीययाजकान् अर्थतो हारोणवंशान् लेवीयांश्च दवयित्वा किम् इतर-
देशस्थजातिभिरिव तेषां कृते याजका न नियुक्ताः? यः कश्चित् तरुणम्
एकं वृषभं सप्त मेषांश्च बलित्वेन दत्त्वा पवित्रीकृतो भवितुम् आग-
च्छति स तयोरनीश्वरयो र्याजको भवति। किन्तु परमेश्वर एवास्माकम् १०
ईश्वरोऽस्ति, वयं तं न पर्य्यत्यजाम, किञ्च परमेश्वरस्य परिचर्य्याकारिणो
हारोणवंशीया याजका लेवीयाश्च निजनिजकार्य्यम् अनुतिष्ठन्ति, परमे- ११
श्वरमुद्दिश्य प्रतिप्रातः प्रतिसन्ध्यञ्च होमार्थकबलिदानं कुर्व्वन्ति सुगन्धिधू-
पान् ज्वालयन्ति च, किञ्च निर्म्मलदार्व्वासनोपरि दर्शनीयपूपान् निदधते
अपरं प्रतिसन्ध्याकालं ज्वालयितुं दीपैः समं कनकमयदीपवृक्षम् आसा-
दयन्ति, यतो वयं तेषां प्रभुना परमेश्वरेण निरूपितं कार्य्यं कुर्म्मः, किन्तु
यूयं तं पर्य्यत्यजत। पश्यतास्माकं सहायो मूर्द्धि ईश्वरस्ततः परं तस्य १२
याजका युष्माकं विरुद्धं घोरनादं कर्त्तुं शब्दकारिण्यस्तूर्य्यश्च विद्यन्ते,
तस्माद् हे इस्रायेलीयलोकाः तेषां पूर्व्वपुरुषाणां प्रभोः परमेश्वरस्य
विरुद्धं समरं मा कुरुत यतस्तस्मिन् कृते यूयं कृतार्था न भविष्यथ।
अपरं यारवियाम एकं प्रच्छन्नं सैन्यसंघं तेषां पश्चात् प्रेषयामास, १३
तस्य लोका यिहूदावंशीयानाम् अग्र आसन् प्रच्छन्नसङ्घश्च पश्चादासीत्।
अनन्तरं यिहूदाया लोका मुखं परावृत्य तेषाम् अग्रे पश्चाच्च समरं १४
विलोक्य परमेश्वरस्य सन्निधौ प्रार्थनां चक्रुः याजकाश्च तूरी र्वादयाञ्चक्रुः।
ततो यिहूदाया लोकाः सिंहनादम् अकुर्व्वन् तेषु सिंहनादं कुर्व्वत्स्वीश्वरो १५
ऽवियस्य यिहूदाया लोकानाञ्च सम्मखे यारवियामं निखिलेस्रायेलीय-
वंशञ्च समाजघान। तत इस्रायेलीयवंशीयेषु यिहूदाया लोकानाम् १६
अग्रात् पलायमानेष्वीश्वरस्तान् तेषां करेषु समर्पयामास। तस्माद् १७
अवियस्तस्य लोकाश्च महाहननेन तान् आजघ्नुः। तत इस्रायेलीयानां
पञ्चलक्षाण्यभिरुचिता मनुजा हताः। तस्मिन् समय इस्रायेलीयवंशीया १८
अवनता यिहूदावंशीयास्तु पराक्रमिणो बभूवुः, यतस्ते तेषां पितृलो-
कानां प्रभौ परमेश्वरे प्रत्याशाञ्चक्रुः। अनन्तरम् अवियो यारवियामस्य १९
पश्चाद् धावन् तस्य कतिपयनगराण्यर्थतो बैथेलं तदीयग्रामांश्च यिशानां
तदीयग्रामांश्च इफ्रोणं तदीयग्रामांश्च वशीचकार। एतस्याबियस्य जीव- २०
नकाले यारवियामः पुन र्बलवान् न बभूव, शेषे स परमेश्वरेणाहतो
निधनं लेभे।

२१ अनन्तरम् अबिय उत्तरोत्तरं पराक्रमी भवन् चतुर्दश जाया उवाह
२२ ततस्तस्य द्वाविंशतिः सुताः षोडश दुहितरश्च जज्ञिरे। एतस्याबियस्या-
वशिष्टाः क्रियास्तस्य चरित्रम् उपदेशकथाश्च भविष्यद्वादिन इद्दो ग्रंथे
लिखितानि किं न विद्यन्ते?

---

१४ चतुर्दशोऽध्यायः।

१ आसाः सुरपूजानिवारणं ६ दुर्गैः सैन्यैश्च राजत्वस्थिरीकरणं ९ परमेश्वरस्य साहा-
य्येन रिपूणां पराजयः।

१ अनन्तरम् अबियः स्वपितृगण इव महानिद्रां गतो लोकै दायूद्नगरे
श्मशाने स्थापितश्च, तस्य पुत्र आसास्तु तस्य पदे राजा बभूव। अपरं तस्य
२ राजत्वकाले जनपदो दश वत्सरान् यावत् निर्व्विरोधो ऽतिष्ठत्। स
आसा निजप्रभोः परमेश्वरस्य साक्षाद् उत्तमं सरलञ्च कर्म्म समाचरत्।
३ स इतरदेवानां वेदी र्भृगुस्थानानि च दूरयाञ्चकार प्रतिमूर्त्तीर्बभञ्ज
४ चैत्यवृक्षान् चिच्छेद च। स यिहूदावंशं निजपितृलोकानां प्रभोः पर-
५ मेश्वरस्यान्वेषणं तस्य व्यवस्थाविधीनां पालनञ्चाज्ञापयामास। अपरं स
यिहूदाया निखिलनगराणां मध्याद् भृगुस्थानान्यादित्यप्रतिमूर्त्तीश्च
दूरयाञ्चकार तेन तस्य साक्षाद् देशो निर्व्विरोधो बभूव।
६ परमेश्वरेण तस्मै शान्तौ दत्तायां देशः स्थैर्य्य आसीत् तस्मिन् समये
समरो नाभवत् तस्मात् स यिहूदादेशे प्राचीरवेष्टितानि नगराणि नि-
७ र्म्मापयाञ्चकार। अपरं स यिहूदावंशम् अवोचत्, वयम् एतानि नग-
राणि निर्म्मीय चतुर्दिक्षु प्राकारान् दुर्गाणि कपाटान्यर्गलानि च निर्म्मा-
पयामः, यतो वयं स्वेषां प्रभोः परमेश्वरस्यान्वेषणं कृतवन्तस्तस्मात् जन-
पदो ऽद्याप्यस्माकं वशे तिष्ठति, अस्माभिस्तस्यान्वेषणं कृतं तत्कारणात् सो
ऽस्मभ्यं चतुर्दिक्षु शान्तिम् अददात्। अपरं ते नगराणि निर्म्माय कृतार्था
८ बभूवुः। तस्य आसाः सैन्यमध्ये यिहूदावंशस्य त्रीणि लक्षाणि फलक-
शूलधारिणो मानवाः, बिन्यामीनवंशस्य चाशीतिसहस्राधिके द्वे लक्षे
चर्म्मचापधारिणो मानवा आसन् सर्व्व इमे वीर्य्यवन्तो नराः।
९ अनन्तरं कूशदेशीयः सेरहस्तेषां विरुद्धं दशलक्षाणि सैन्यानि त्रीणि
१० शतान् स्यन्दनांश्च सङ्गिनः कृत्वागत्य मारेशायाम् उपस्थितः। तत
आसा तस्य विरुद्धं युद्धयात्रायां कृतायां तौ मारेशाया निकटस्थायां

सिफाथाख्योपत्यकायां व्यूहरचनां चक्रतुः। अपरम् आसा निजप्रभोः ११
परमेश्वरस्य सन्निधौ निवेदयन् जगाद, हे परमेश्वर बलवतो बलही-
नस्य वा साहाय्यकरणे तव कोऽपि प्रभेदो नास्ति। हे अस्माकं प्रभो
परमेश्वर, अस्माकं साहाय्यं कुरु; वयं त्वयि प्रत्याशां कुर्व्वन्तस्तव नाम
गृहीत्वा जनताया एतस्याः प्रतिकूलम् आगच्छाम, त्वमेवास्माकं प्रभुः
परमेश्वरो ऽसि, तव विरुद्धं मर्त्त्याः पराक्रमिणो न भवेयुः। ततः १२
परमेश्वर आसा यिहूदावंशस्य च सम्मुखे तान् कूशीयान् आजघान,
कूशीयाश्च पलायनं चक्रुः। अपरम् आसास्तस्य सङ्गिनो लोकाश्च १३
गिरारं यावत् तेषां पश्चाद्धावन्तो वव्रजुः, ततः कूशीयानाम् एतादृशो
निपातो ऽभवद् यत् ते पुन र्जीवितुं नाशक्नुवन्, यतो हेतोस्ते परमे-
श्वरस्य तदीयसैन्यानाञ्च सम्मुखे भग्नाः। अपरं तेषां बहूनि द्रव्याणि
लुण्ठितानि। अनेन प्रकारेण निखिलानां मानवानां परमेश्वरात् १४
साध्वसे संजाते ते गिरारस्य चतुर्दिक्स्थानि नगराणि सर्व्वाण्याहत्य
लुण्ठयामासुः। तत्र स्थाने प्रभूतं लोठनं बभूव। अपरं ते तेषां पशूनां १५
शाला अपि विनाश्य प्रभूतान् मेषान् महाङ्गांश्चापहृत्य यिरूशालमं
प्रत्याजग्मुः।

---

१५ पञ्चदशोऽध्यायः।

१ प्रदर्शकस्यासरियस्य वाक्यं ८ तस्य वचनकारणात् मनुजै र्नियमस्य शपथस्य च करणं १६ सुरपूजनकरणकारणाद् राज्ञा पदच्युतिः १८ निवेदितवस्तूनां मन्दिर आनयनञ्च।

अनन्तरम् ओदेदस्य तनयो ऽसरिय ईश्वरस्यात्मनाविष्टो भूत्वा आसां १
साक्षात् कर्त्तुं वहिर्भूय तं बभाषे, हे आसा हे यिहूदाविन्यामीनवंशयोः २
सर्व्वे लोकाः,यूयं मम वचनं निशामयत,यूयं यावत् परमेश्वरस्य सन्निधौ
स्थास्यथ, तावत् स युष्माकं सहायो भविष्यति, अपरं यदि तं गवेषयध्वे
तर्हि स युष्माभिः प्राप्यो भविष्यति किन्तु यदि युष्माभिः स त्यज्येत तर्हि
तेनापि यूयं त्यक्ष्यध्वे। पूर्व्वम् इस्रायेलवंशा बहुकालं सत्येश्वरहीनाः शि- ३
क्षकयाजकहीना व्यवस्थाहीनाश्च स्थित्वा स्वदुर्दशासमये यदेस्रायेलः प्रभुं ४
परमेश्वरं प्रति परावृत्य तम् अन्वैच्छन्, तदा स तैः प्रापे। तस्मिन् ५
समय वहिरभ्यन्तरञ्च गमनागमनकारिणां किञ्चन मङ्गलं नाभवत्
किञ्च सर्व्वदेशवासिनां बहुविधः क्लेशो ऽजायत। एका जातिरपरां ६

जातिम् एकञ्च नगरम् अन्यत् नगरं व्यनाशयत्। यत ईश्वरः सर्व्ववि-
७ धविपत्त्या तान् अक्लिश्नात्। किन्त्विदानीं यूयं साहसिनो भवत युष्माकं
हस्ता दुर्बला न भवन्तु यतो युष्माकं कार्य्याणि सफलानि सन्ति।
८ भविष्यद्वादिन ओदेदस्यैतानि भविष्यद्वाक्यान्यासा निशम्य साहसं
लब्ध्वा यिहूदाविन्यामीनवंशयो र्निखिलदेशाद् इफ्रयिमपर्व्वते च यानि
नगराणि वशीकृतवान् तेभ्यो घृणार्हाः प्रतिमूर्त्ती र्दूरयाञ्चकार, परमेश्व-
रीयालिन्दस्य सम्मुखस्थायाः परमेश्वरीयाया वेद्या जीर्णोद्धारं कार-
९ यामास च। अनन्तरं स यिहूदाविन्यामीनवंशयोः सर्व्वान् मनुजान्
इफ्रयिममिनशिशिमियोनवंशेभ्यः समागतांश्च तेषां प्रतिवासिनः सम्मे-
लयामास, यतस्तस्य प्रभुः परमेश्वरस्तस्य सहायो विद्यत इति विलोक्य
१० बहवो लोका इस्रायेल्देशाद् आगत्य तस्य पक्षा बभूवुः। आसा राज-
११ त्वस्य पञ्चदशवत्सरस्य तृतीये मासे ते यिरूशालमे समभिलन्। अपरं
तैरानीतलोठितद्रव्याणां मध्यात् सप्तशतानि वृषभाः सप्तसहस्राणि
१२ मेषाश्च परमेश्वरमुद्दिश्य तस्मिन् समये बलिरूपेण ददिरे। अपरं स्वेषां
निखिलान्तःकरणै र्निखिलमनोभिश्च स्वेषां पितृलोकानां परिवृढं पर-
१३ मेश्वरं गवेषयितुं तै र्नियमो ऽकारि। अपरं महान् क्षुद्रो वा पुरुषो
नारी वा भवेत् येन केनचिद् इस्रायेलः प्रभुः परमेश्वरो न गवेषयिष्यते
१४ स हन्तव्य एष नियमो ऽकारि। त उच्चैःस्वरेण सिंहनादं कुर्व्वन्तस्तूरीः
१५ शृङ्गानि च वादयन्तः परमेश्वरस्य साक्षात् शपथं चक्रिरे। एतस्मिन्
शपथे यिहूदाः सकलमनुजा आनन्दं चक्रिरे यतः सर्व्वान्तःकरणैः समं
शपथं कृत्वा सम्पूर्णाकाङ्क्षया च तं गवेषयित्वा स तैः प्रापे। अपरं पर-
मेश्वरश्चतुर्दिक्षु तेभ्यो विश्रामं ददिवान्।
१६ अपरम् आसा नृपस्य पितामही माखापि तेन राज्ञीपदाद् भ्रंशिता,
यतः सा चैत्यवृक्षस्य मूले प्रतिमूर्त्तिमेकां स्थापयाञ्चकार, अपरम् आसा-
स्तस्याः प्रतिमूर्त्तिम् उच्छिद्य चूर्णयामास किद्रोणतटिन्यास्तटे दाहया-
१७ मास च। भग्नस्थानानीस्रायेलो मध्यात् न दूरीकृतानि, तथाप्यासा
यावज्जीवनं सरलमना आसीत्।
१८ अपरं तस्य जनको यानि पावितवान्, स स्वयञ्च यानि पावितवान्
तानि रजतकनकानि भाजनानि चेश्वरस्य मन्दिरे तेन निहितानि।
१९ एतस्यासा राज्ञो ऽधिकारस्य पञ्चत्रिंशं वत्सरं यावत् समरो नाभवत्।

१६ षोडशोऽध्यायः।

१ अरामीयाणाम् उपकाराद् आसा राज्ञा वाशा भूपतेः पराजयः ७ तिरस्कारिप्रदर्शकस्य तेन कारागेहे निधानं ११ पादरोगसमये तेनेश्वरं विहाय वैद्यानां गवेषणं १३ तस्य निधनं श्मशाने स्थापनञ्च।

अनन्तरम् आसा राज्ञो ऽधिकारस्य षट्त्रिंशवत्सर इस्रायेलीयो नर- १
पति र्बाशा यिहूदा विरुद्धं गत्वा, कश्चिन्निर्गत्य यिहूदादेशीयभूपतेरा-
साः पक्षीयो भवितुं यन्न पारयेत् तदर्थं रामतनगरं दृढयितुम् उपच-
क्रमे। तत आसाः परमेश्वरीयमन्दिरस्य राजनिवेशनस्य च भाण्डागारेभ्यो २
रजतकनकानि वहिष्कृत्य दम्मेषकनिवासिनो ऽरामीयनरपते र्बिन-
हदस्य सन्निधिं प्रेषयित्वा जगाद, त्वया सह मम त्वत्पित्रा च सह ३
मत्पितु र्नियमो विद्यते, पश्चाहं तव समीपं रजतहेमानि प्रहिणोमि,
अत इस्रायेलीयनृपति र्बाशा यन्मत्तो ऽपसरेत् तदर्थं तेन सह तव
यो नियम आस्ते स त्वयागत्य भज्यतां। ततो बिनहदद आसाराजस्य ४
वाक्यं गृहीत्वा निजबलानाम् अध्यक्षान् इस्रायेलीयदेशस्थनगराणां वि-
रुद्धं प्रेषयामास, ते त्रियोनं दानम् आबेलमयिमं नप्तालिदेशस्थवित्तनग-
राणि च वशीचक्रिरे। वार्त्तामिमां निशम्य वाशा रामतनिर्म्माणात् निवृत्य ५
स्वराष्ट्रे तस्थौ। अनन्तरम् आसा नरपति र्यिहूदादेशीयान् सर्व्वान् ६
सङ्गिनश्चकार, ततो वाशा यत् रामतनगरं निरमापयत् तस्य पाषाण-
काष्ठेषु तैरपहृतेषु स तद्द्वारा गेवां मिस्पाञ्च निर्म्मापयामास।

तस्मिन् समये प्रदर्शको हनानि र्यिहूदादेशस्य राज्ञ आसाः सन्निधिम् ७
आगत्य कथयामास त्वं निजप्रभौ परमेश्वरे प्रत्याशाम् अकुर्व्वन् अरामी-
यनरपतौ प्रत्याशामकरोरेतत्कारणाद् अरामीयनरपते र्बलानि तव
हस्ताद् उद्धारं प्रापुः। कूशीया लूबीयाश्च मनुजा रथानाम् अश्वारो- ८
हिणाञ्चातीव बाहुल्यात् किं महासैन्यानि नासन्? तथापि त्वया परमे-
श्वरे प्रत्याशाकरणात् स तान् तव हस्ते समर्पयाञ्चकार। यतः परमेश्वरं ९
प्रति सरलान्तःकरणान् मानवान् बलवतः कर्त्तुं तस्य दृष्टि र्वसुन्धरायाः
सर्व्वस्थानं पर्य्यटति। अत्र त्वयाज्ञानस्य कर्म्म कृतं यत इतः परं त्वां प्रति
युद्धानि समुपस्थास्यन्ति। तदानीम् आसास्तस्मै प्रदर्शकाय प्रकुप्य तं १०
कारागृहे स्थापयाञ्चकार यतः स तद्वचनात् कोपयुक्तो बभूव। अपरं
तस्मिन् समय आसाः प्रजानाम् अपरान् कतिपयलोकान् प्रति दौ-
रात्म्यं चकार।

११ एतस्यासा आद्यन्तं कर्म्म यिहूदादेशीयानाम् इस्रायेल्देशीयानाञ्च
१२ नरपतीनां पुरावृत्तपुस्तके लिखितं विद्यते। एतस्यासा अधिकारस्योन-
चत्वारिंशवत्सरे तस्य पादरोगे जाते ऽतीव पीडा बभूव तथापि स
रोगस्य समये ऽपि परमेश्वरस्य गवेषणम् अकृत्वा वैद्यानां गवेषणं चकार।
१३ अनन्तरम् आसा. स्वपितृगणेन सह महानिद्रां गतः। राज्याधिका-
१४ रस्यैकचत्वारिंशवत्सरे तस्य प्राणवियोगो बभूव। ततः स दायूदो नगरे
स्वार्थं यं शवाधारम् अखनत् तन्मध्ये मनुजास्तं निदधिरे। तत्र गन्ध-
वणिजां क्रियया कृतैस्तैलादिसुगन्धिद्रव्यैः परिपूर्णायां शय्यायां तं शाय-
यामासुस्तस्य कृते महाधूपदाहं चक्रुश्च।

---

१७ सप्तदशोऽध्यायः।

१ यिहोशाफटस्य सुराजत्वं ७ यिहूदीयमनुजानां शिक्षार्थं लेवीयानां याजकानाञ्च प्रेषणं १० नृपतये लोकानाम् उपायनदानं १२ तस्योन्नतेः सेनापतीनां सैन्यानाञ्च कथनं।

१ अनन्तरम् आसाः पदेन तस्य सुतो यिहोशाफटो राजत्वं प्राप्येस्राये-
२ लीयानां विरुद्धम् आत्मानं बलवन्तं चकार। स यिहूदादेशस्य सर्व्वेषु
प्राकारवेष्टितनगरेषु सैन्यानि स्थापयाञ्चकार, अपरं यिहूदाजनपदे
तस्य जनकेनासा वशीकृतेष्विफ्रयिमदेशस्थनगरेषु च सैनिकान् अस्था-
३ पयत्। अपरं परेश्वरो यिहोशाफटस्य सहायो बभूव, यतः स निज-
पूर्व्वपुरुषस्य दायूदः पुरातनमार्गेष्वचरत्। स वाल्देवान् न गवेषयाञ्च-
४ कार, किन्तु निजपूर्व्वपुरुषस्येश्वरं गवेषयन् तस्य विधीन् समाचरत्,
५ स इस्रायेलीयलोकानां क्रियानुरूपम् आचारं न चकृवान्। तस्मात्
परमेश्वरस्तस्य करे राजत्वं दृढयाञ्चकार, तेन यिहूदादेशीयाः सर्व्वे
यिहोशाफटायोपायनम् अददुः। इत्थं तस्यैश्वर्य्यं गौरवञ्च भृशं ववृधे।
६ अपरं परमेश्वरीयवर्त्मनि तस्यान्तःकरणम् आसज्यत ततो हेतोः स
भगुस्थानानि चैत्यतरूंश्च यिहूदादेशमध्याद् दवयाञ्चकार।
७ अनन्तरं तस्य राजत्वस्य तृतीयवत्सरे स यिहूदादेशस्थनगरेषूपदेष्टुं
विनहयिल ओवदियः सिखरियो निथनेलो मीखायश्चेतेषां स्वकीयलो-
८ काध्यक्षाणां समीपं निदेशं प्रेषयाञ्चकार। अपरं शिमयियो निथनियः
सिवदियो ऽसाहेलः शिमीरामोतो यिहोनाथनो ऽदोनियः टोवियः
टोवादनियश्चैते लेवीयास्तेषां सङ्गिनाविलीशामायिहोरामौ याजकौ

च तेषां सहाया बभूवुः। ततस्ते यिहूदावंशम् उपादिशन्। परमेश्वरस्य ९
व्यवस्थापुस्तकम् आदाय ते यिहूदादेशस्य कृत्स्ननगराणि पर्य्यटन्तो मनु-
जान् उपादिशन्।

ततो यिहूदादेशस्य चतुर्दिक्स्थराष्ट्रनिवासिनः परमेश्वरेण त्रासिता १०
यिहोशाफटेन साकं समरं न चक्रुः। परन्तु पिलेष्टीयानां कतिपयलोका ११
यिहोशाफटस्य सन्निधिम् उपायनं राजकरार्थकं रजतञ्चानिन्युः। आर-
बीयाश्च तस्य सन्निधिं पशुनिवहम् अर्थतः सप्तशताधिकसप्तसहस्राणि
मेषान् सप्तशताधिकसप्तसहस्राणि छागांश्चानिन्युः।

अनेन प्रकारेण यिहोशाफटो नित्यं वर्द्धमानो महामहिमा भवन् १२
यिहूदादेशे दुर्गाणि भाण्डागारार्थनगराणि च निरमापयत्। अपरं १३
यिहूदादेशस्थनगरेषु तस्य प्रभूता सम्पद आसन् यिरूशालमे च तस्य
योद्धारो वीरमनुजाश्चातिष्ठन्। तेषां पितृवंशानुसारेण तेषामियं १४
सङ्ख्या, यिहूदावंशीयसहस्रपतीनां मध्ये मुख्यो वाहिनीपतिरद्नः, तेन
साकं त्रीणि लक्षाणि महाबलवन्तो योद्धार आसन्। तस्य न्यग् यिहो- १५
हाननो वाहिनीपतिरासीत् तेन साकम् अशीतिसहस्राधिके द्वे लक्षे
मनुजा आसन्। तस्य न्यग् आत्मदानेन परमेश्वराय निवेदितः सिख्रेः १६
सुतोऽमसियो वाहिनीपतिरासीत् तेन साकं द्वे लक्षे महाबलवन्तो
मनुजा आसन्। विन्यामीनवंशमध्य इलीयादानामको महाबलवान् १७
एको वाहिनीपतिरासीत् तेन साकं द्वे लक्षे धनुःफलकधरा मनुजा
आसन्। तस्य न्यग् यिहोषावदो वाहिनीपतिरासीत् तेन साकं सम- १८
रार्थं सुसज्जा अशीतिसहस्राधिकं लक्षं मनुजा आसन्। क्षितिपतिः १९
कृत्स्नयिहूदादेशस्य प्राकारवेष्टितेषु नगरेषु यान् निदधे तान् विना
लोका इमे क्षितिपतेः परिचर्य्याम् अकुर्व्वन्।

---

१८ अष्टादशोऽध्यायः।

१ आहावेन समं यिहोशाफटस्य मैत्र्यं २ तेन साकं रामोतगिलियदे गमनं मीखायस्य भविष्यद्वादिनः काराग्रहे निधानं २८ समरे आहावस्य हतत्वं।

अपरं यिहोशाफटो महैश्वर्य्यवान् महामहिमा च भूत्वाहावेन साकं १
मैत्री चकार।

कतिपयवत्सरेभ्यः परं स शोमिरोण आहावस्य सन्निधिं जगाम, २

तत आहावस्तस्य तत्सङ्गिनां मनुजानाञ्च निमित्तं बहून् मेषान् वृषभांश्च
मारयाञ्चकार रामोतगिलियदे युद्धयात्राकरणाय तं प्रवर्त्तयामास च।
३ इस्रायेलीयः क्षितिपतिराहाबो यिहूदादेशीयनरपतिं यिहोशाफटं
पप्रच्छ, त्वं किं मया समं रामोतगिलियदं गमिष्यसि? ततः स व्याजहार
त्वम् अहञ्च समानौ तव लोका मम लोकाश्च समानास्ततो वयं समरे
४ तव सहाया भविष्यामः। अनन्तरं यिहोशाफट इस्रायेलीयं महीप-
तिम् उवाच, विनये ऽहम् एतस्मिन् परमेश्वरस्योक्तिः का साद्य त्वया
५ पृच्छ्यतां। तत इस्रायेलीयो राजा चतुःशतानि भविष्यद्वादिनः संगृह्य
पप्रच्छ युद्धार्थं रामोतगिलियदं किम् आवाभ्यां गन्तव्यं किं वा ततो मया
निवर्त्तितव्यं? तदानीं त ऊचुः, भवता गम्यताम् ईश्वरो नृपते र्हस्ते तत्
६ समर्पयिष्यति। अनन्तरं यिहोशाफटः पप्रच्छ यो ऽस्माभिः प्रष्टुं शक्यते
७ तादृशः परमेश्वरस्यापरः कोऽपि भविष्यद्वादी किमत्र न विद्यते? तदा-
नीम् इस्रायेलीयो नृपो यिहोशाफटं जगाद वयं येन परमेश्वरं प्रष्टुं
पारयामस्तादृशो ऽपर एको जनो विद्यते, किन्त्वहं तम् ऋतीये यतः स
मामध्यशुभवचनं विना शुभवचनं कदाच न वदति, यिम्लस्य पुत्रो
मीखाय इति तस्य नाम। ततो यिहोशाफटो व्याजहार, नरपतिनैता-
८ दृशं वाक्यं न गद्यतां। तदानीम् इस्रायेलीयो नृपः खगृहस्याध्यक्षमेकम्
९ आहूय समादिदेश यिम्लस्य तनयं मीखायं त्वरितम् अत्रानय। अपरम्
इस्रायेलीयो राजा यिहूदादेशीयो यिहोशाफटो राजा च राजकीय-
परिच्छदभूषितौ शोमिरोणस्य पुरद्वारनिकटस्थे समानस्थाने खसिंहास-
नयोरुपविष्टावास्तां ते सर्व्वे भविष्यद्वादिनश्च तयोः सम्मुखे भविष्यद्वचनम्
१० अकथयन्। विशेषतः खिनानाहस्य सुतः सिदिकियो लोहमये शृङ्गे
निर्म्माय कथयामास, परमेश्वर इमां वाणीं वदति, एताभ्यां त्वम् अरा-
११ मीयान् निःशेषं यावद् आहनिष्यसि। अपरे सर्व्वे भविष्यद्वादिनोऽपि
तथैव भविष्यद्वाक्येनाकथयन् त्वं रामोतगिलियदं गत्वा कृतार्थो भव
१२ परमेश्वरेण तत् नृपतेः करगतं कारिष्यते। अपरं यो दूतो मीखायम्
आह्वातुं गतवान् स तं बभाषे पश्य सर्व्वे भविष्यद्वादिन एको जन इव
नरपतेः शुभवचनं गदन्ति, अतो मया विनीयते त्वमपि तेषामेकजन इव
१३ वचो ब्रूहि शुभवाक्यं भाषस्व च। ततो मीखायो ऽवदत्, अहं परमेश्व-
रस्यामरत्वस्य शपथं कृत्वा वदामि, मदीयेश्वरो मां यद् आदेक्ष्यति, तदेव
१४ मया कथयिष्यते। अनन्तरं तस्मिन् नरपतेः सविधमागते नृपस्तं पप्रच्छ

हे मीखाय युद्धार्थम् आवाभ्यां रामोतगिलियदं गन्तव्यं किं वा ततो
निवर्त्तितव्यं? ततः स बभाषे, युवां गत्वा कृतार्थौ भवतं तत्रत्यलोका
युवयोः करेषु समर्पयिष्यन्ते। अनन्तरं राजा तं जगाद त्वं परमेश्वरस्य १५
नाम्ना सत्यं विनापरं किमपि मां न वदिष्यस्येतदधि कतिवारान् मया
शपथं कारयिष्यसे? ततः स कथयामास, अहम् इस्रायेलीयान् १६
सकललोकान् अरक्षकान् मेषानिव शिलोच्चयोपरि विकीर्णान् अपश्यं,
ततः परमेश्वर उक्तवान् एतेषां स्वामी नास्ति, एकैको जनः स्वं स्वं निवे-
शनं कुशलेन परावृत्य व्रजतु। अनन्तरम् इस्रायेलीयः क्षितिपो यिहो- १७
शाफटं व्याजहार, स मामध्यशुभवचनं विना शुभवचनं न वदिष्यतो-
त्यहं किं पूर्व्वं तुभ्यं नाकथयं? अनन्तरं मीखायो बभाषे युवाभ्यां १८
पारमेश्वरं वचो निशम्यतां। अहं सिंहासनोपविष्टं परमेश्वरं तस्य
दक्षिणवामपार्श्वयो र्दण्डायमानं स्वर्गीयं सकलसैन्यञ्चापश्यं। परमेश्वर १९
उदितवान्, इस्रायेलीयो नरपतिराहावो यथा रामोतगिलियदं गत्वा
पतेत् तथा कस्तं भ्रमयिष्यति? तत एको जन एकं प्रकारम् अपरो
जनश्चान्यं प्रकारं कथितवान्। अनन्तरम् एक आत्मा समागत्य परमे- २०
श्वरस्य समक्षं तिष्ठन् कथितवान्, अहं तं भ्रमयिष्यामि। परमेश्वर
उदितवान्, केन? स जगाद, अहं गत्वा तस्य निखिलभविष्यद्वादिनां २१
वदनेषु मृषावादक आत्मा भविष्यामि। तदानीं तेन गदितं त्वं तं
भ्रमयित्वा जयी भविष्यसि, वहि र्निर्य्याय तदेव कुरु। अनेन प्रकारेण २२
पश्य परमेश्वरस्तवैतेषां भविष्यद्वादिनां वदनेषु मृषाभाषकम् आत्मानं
निहितवान् किन्तु परमेश्वरेण त्वामध्यमङ्गलं निश्चितं। तदानीं खिना- २३
नाहस्य सुतः सिदिकियो निकटम् आगत्य मीखायस्य गण्डम् आहत्य
जगाद, परमेश्वरीय आत्मा त्वां सम्भाषितुं मम समीपात् केन मार्गेण
गतवान्? मीखायो गदितवान् पश्य यस्मिन् दिने त्वं प्रच्छन्नत्वार्थं गर्भा- २४
गारं प्रवेक्ष्यसि तस्मिन् दिने तद् भोत्स्यसे। अनन्तरम् इस्रायेलीयो नर- २५
पतिरादिदेश यूयं मीखायं धृत्वा नगराध्यक्षस्यामोनस्य राजपुत्त्रस्य योया-
शस्य च समीपं नयत। अपरं ताभ्यां कथयत, भूपतिरिमां वाचं गदति, २६
एनं कारागारे बध्नीतं यावच्चाहं क्षेमेण परावृत्य नागमिष्यामि तावद्
एनं दुःखरूपमन्नं भोजयतं दुःखरूपं तोयं पाययतञ्च। ततो मीखायो २७
जगाद यदि त्वं क्षेमेण परावृत्यागमिष्यसि, तर्हि परमेश्वरो मया न भा-
षते। अनन्तरं स उदितवान्, हे लोकाः सर्व्वे यूयम् अत्र मनांसि निधद्धं।

२८ अनन्तरम् इस्रायेलीयो नृपो यिहूदादेशीयो यिहोशाफटो नृपश्च
२९ रामोतगिलियदं जग्मतुः। ततः परम् इस्रायेलीयक्षितिपो यिहोशा-
फटम् आचचक्षे अहं छन्नवेशं धारयन् समरं प्रविशामि त्वञ्च निजं
परिच्छदं परिधेहि। अनन्तरम् इस्रायेलीयभूपतिना छन्नवेशे धारिते
३० तौ समरं प्रविविशतुः। ततः पूर्व्वम् अरामीयो महीपतिः स्वकीयान्
रथाध्यक्षान् इत्याज्ञापयामास यूयं केवलम् इस्रायेलीयनरपतिं विना
३१ क्षुद्रेण महता वापरेण केनापि समं न युध्यत। ततस्ते रथाध्यक्षे यिहो-
शाफटं निरीक्ष्योक्तम् एष एवेस्रायेलीयो नृपतिरिति, ते तु तेन समं
योद्धुम् उपाक्राम्यन्, किन्तु यिहोशाफटेन प्रोच्चैःस्वरे कृते परमेश्वरस्तम्
३२ उपकृतवान्, अपरम् ईश्वरस्तस्य सन्निधितस्तान् निवर्त्तयामास। स
इस्रायेलीयो भूपति र्नहीति दृष्ट्वा रथाध्यक्षास्तस्यानुगमनात् निववृतिरे।
३३ अनन्तरम् एकेन जनेन लक्ष्यं विना धनुर्गुणमाकृष्येस्रायेलीयो नर-
पति र्वर्म्मणः सन्धिस्थाने शरेणाहतः। ततः स निजं सारथिं बभाषे
३४ त्वं करौ परावर्त्त्य एतनामध्यात् मां नय, व्यथितो ऽहमभवं। तस्मिन्
दिवसे तुमूलं समरं बभूव, इस्रायेलीयो नृपश्चारामीयाणां विरुद्धं
सन्ध्याकालं यावत् स्यन्दने तस्थौ, किन्तु सूर्य्ये ऽस्तं गते स निधनं प्राप।

---

१९ ऊनविंशोऽध्यायः।

१ यिहोशाफटे स्वीयराष्ट्रं प्रत्यागते भविष्यद्वादिना येहूना तस्य भर्त्सना ४ विचारयि-
तॄन् प्रति तस्योपदेशनं ८ लेवीयान् याजकांश्च प्रति तस्योपदेशकथनञ्च।

१ अनन्तरं यिहूदादेशीयनृपतौ यिहोशाफटे क्षेमेण यिरूशालमे
२ निजभवनं गतवति हनानेः सुतः प्रदर्शको येहूस्तं साक्षात् कर्त्तुं व्रजित्वा
नरपतिं यिहोशाफटं व्याजहार त्वया किं दुश्चरित्र उपकर्त्तव्यः? पर-
मेश्वरद्वेषिषु वा प्रेम कर्त्तव्यं? एतत्कारणात् परमेश्वरस्य कोपस्त्वयि
३ वर्त्तते। तथापि तव कानिचित् सत्कर्म्माण्यभवन् त्वं जनपदात् चैत्यतरून्
दवितवान् ईश्वरस्यान्वेषणार्थं मानसं सुस्थिरं कृतवांश्च।
४ अनन्तरं यिहोशाफटो यिरूशालमे वसतिं चकार, अपरं बेर्शेबाम्
आरभ्येफ्रयिमधराधरं यावत् प्रजानां मध्ये पुनः पुनः पर्य्यटन् तेषां
५ पूर्व्वपुरुषाणां प्रभुं परमेश्वरं प्रति मानवान् परावर्त्तयामास। अपरं
जनपदे प्रतिनगरम् अर्थतो यिहूदादेशस्य प्राचीरवेष्टितेषु सर्व्वेषु नगरेषु

विचारयितृन् नियुयुजे। स तान् विचारयितृन् जगाद युष्माभि र्यत् ६
क्रियते तत्र सावधाना भवत, यतो युष्माभि र्मनुजानां कृते विचारो
न कारिष्यते किन्तु परमेश्वरस्य कृते, विचारकर्म्मणि स युष्माकम्
अधिष्ठाता। अतो हेतो र्यूयं परमेश्वराद् भीतिं विधाय सावधाना ७
भवन्तः कर्त्तव्यं कुरुध्वं, यतो ऽस्माकं प्रभोः परमेश्वरस्य सन्निधावन्यायो
मुखापेक्षणम् उत्कोचग्रहणञ्च न सम्भवति।
अनन्तरं यिहोशाफटो यिरूशालमे ऽपि परमेश्वरीयविचारार्थं वि- ८
वादभञ्जनार्थञ्च लेवीयानां याजकानाम् इस्रायेलीयपितृप्रधानानाञ्च
कतिपयान् मनुजान् नियुयुजे। तेषु यिरूशालमम् उपागतेषु स तान् ९
इत्थमादिदेश यूयं परमेश्वरस्य भीत्या विश्वास्यत्वेन सरलान्तःकरणैश्च
प्रकारेणानेन कर्त्तव्यं कुरुध्वं, शोणितपाते शास्त्राज्ञाविधिव्यवस्थासु च यः १०
कश्चन विवादो युष्माकं नगरनिवासिभि र्भ्रातृभि र्युष्मदन्तिकम् उपनी-
यते तेन ते यथा परमेश्वरस्य सन्निधौ दोषिणो न भवेयुः, युष्मान्
युष्माकं भ्रातॄंश्च प्रति यथा क्रोधो न वर्त्तेत तथैव तान् उपदिशत। इत्थं
कृते दोषिणो न भविष्यथ। पश्यत सर्व्वस्मिन् परमेश्वरीयविचारे या- ११
जको ऽमरियः सर्व्वस्मिन् राजकीयविचारे च यिहूदावंशस्याधिपति-
रिस्मायेलस्य सुतः सिवदियो युष्माकं मूर्द्धि स्थास्यतः। लेवीया अध्यक्षा
अपि युष्माकं प्रत्यक्षा भविष्यन्ति। यूयं साहसेन कर्त्तव्यं कुरुध्वं परमे-
श्वरश्च सज्जनस्य सहायो भविष्यति।

---

२० विंशतितमोऽध्यायः।

१ ससाध्वसेन यिहोशाफटेनोपवासप्रचारणं ५ तस्य प्रार्थना १४ यहसीयेलस्य भविष्यद्वचनं २० यिहोशाफटेन गायकानां नियोजनं २२ रिपूणां पराजयः २६ जयिलोकानां प्रत्यागमनं ३१ यिहोशाफटस्य सुराजत्वकरणं ३५ इलीयेषरस्य भविष्यद्वचनानुसारात् पोतानां भग्नत्वञ्च।

अनन्तरं मोयाबवंशा अम्मोनवंशास्तैः समं कतिपया मायोनीयमनु- १
जाश्च यिहोशाफटस्य विरुद्धं समरं कर्त्तुम् आगताः। तदानीं केचित् २
जना आगत्य यिहोशाफटं जगदुः, अरामदेशाद् हृदस्य पारस्थमार्गेण
विशालो लोकनिवहस्तव विरुद्धम् आगतः, ते हत्सेसोनतामरे ऽर्थत
ऐनगिद्यां विद्यन्ते। ततो यिहोशाफटो विभीय परमेश्वरं गवेषयितुम् ३
उद्योगं चक्रे यिहूदादेशे सर्व्वत्रोपवासं घोषयामास च। ततो यिहूदा- ४

वंशस्य निखिला लोकाः परमेश्वराद् उपकारं याचितुं मिलिताः, विशेषतो
यिहूदादेशस्य सर्व्वनगरेभ्यो मनुजाः परमेश्वरं गवेषयितुम् आगच्छन्।
५ अनन्तरं यिहोशाफटः पारमेश्वरमन्दिरीयनूतनप्राङ्गणस्य सम्मुखे
६ यिहूदा यिरूशालमस्य च मध्येसभम् उत्तिष्ठन् बभाषे, हे अस्माकं
पूर्व्वपुरुषाणां प्रभो परमेश्वर, त्वं किं स्वर्गस्य ईश्वरो नासि? त्वम् अन्य-
देशीयानां राज्याणां शास्ता, तव करे शक्तिः पराक्रमश्च विद्येते तव विरु-
७ द्धम् उत्थातुं केनापि न शक्यते। हे अस्माकम् ईश्वर, त्वया किं निजेस्रा-
येलीयप्रजानां सम्मुखाद् एतद्देशीयमनुजा न दूरीकृताः? जनपद एष
८ च किं स्वीयमित्रस्येब्राहीमो वंशाय चिरकालार्थं न दत्तः? तस्मात्
ते जनपदे ऽस्मिन् वसन्तस्तन्मध्ये तव नाम्ने पवित्रं स्थानमेकं निर्म्माय
९ कथयामासुः, यदि चन्द्रहासो वा विचारदण्डो वा महामारी वा
दुर्भिक्ष इत्यादिदुःखम् अस्मान् आक्राम्येत्, तर्हि मन्दिरे ऽस्मिन् त्वदीय-
नाम्नः स्थितिकारणाद् वयम् एतन्मन्दिरस्यान्तिके तव साक्षात् तिष्ठन्तो
दुर्दशाकारणात् त्वाम् उद्दिश्य प्रार्थनां करिष्यामहे, तथा कृते त्वम्
१० अस्माकं प्रार्थनां श्रुत्वास्मान् उपकरिष्यसि। साम्प्रतम् अम्मोनवंशीया
मोयाववंशीयाः सेयीरपर्व्वतीयाश्च लोकास्त्वया दृश्यन्तां। मिसरदेशाद्
आगमनकाल इस्रायेलीयलोकास्तेषां मध्येन गमनात् त्वया निवारिता-
११ स्तेषां विनाशं न कुर्व्वन्तो ऽपरेण मार्गेण यात्रां विदधिरे। पश्य तत्परि-
शोधार्थं तव भूमितो ऽर्थतस्त्वम् अस्मभ्यं यस्या अधिकारं दत्तवान् ततो
१२ ऽस्मान् द्रवयितुं त आगच्छन्ति। हे अस्माकम् ईश्वर, त्वं किं तेषां विचारं
न करिष्यसि? अस्मत्प्रतिकूलम् आगतस्यैतस्य विशालजननिवहस्य निवा-
रणार्थम् अस्माकं कापि शक्ति र्नास्ति, किं कर्त्तव्यं तन्न जानीमः, केवलं
१३ त्वां प्रति दृष्टिं कुर्म्मः। अनेन प्रकारेण बालवनितापुत्रैः सहिता यिहूदा-
वंशीयाः सर्व्वे लोकाः परमेश्वरस्य साक्षाद् दण्डायमाना बभूवुः।
१४ तत आसफवंशीयो मत्तनियस्य वृद्धप्रपौत्रो यियूयेलस्य प्रपौत्रो बि-
नायस्य पौत्रः सिखरियस्य पुत्रो यिहसियेलनामको लेवीयो मध्येसमाजं
१५ परमेश्वरस्यात्मनाविष्टो भूत्वा जगाद, हे यिहूदीयलोकाः, हे यिरूशा-
लमनिवासिनो मनुजाः, हे राजन् यिहोशाफट, यूयं सर्व्वे मम वचो
निशामयत। परमेश्वरेण युष्मभ्यं वागियं कथ्यते, यूयम् एतस्मात् महा-
निवहात् मा बिभीत सशङ्काश्च मा भवत, यतः समरो ऽयं न युष्माकं
१६ किन्त्वीश्वरस्य जायते। अतः श्वो यूयं तेषां विरुद्धम् अवरोहत, पश्यत

ते सीसाख्येन मार्गेणारोहन्ति यिरूयेलप्रान्तरस्यान्तिकस्थोपत्यकायाः
प्रान्तभागे यूयं तान् प्राप्स्यथ। अत्र युष्माभि र्न योद्धव्यं केवलं सुसज्जी- १७
भूतैः स्थातव्यं, तदा युष्माकं सहायेन परमेश्वरेण करिष्यमाणम् उद्धारं
वीक्षिष्यध्वे। हे यिहूदीया यिरूशालमनिवासिनश्च मनुजाः सर्व्वे, सा-
ध्वसं शङ्काञ्च न विधाय श्वस्तेषां विरुद्धं यात्रां कुरुत, परमेश्वरो युष्माकं
सहायो भविष्यति। ततो यिहोशाफटः शिरो नमयन् भुवि प्रणनाम १८
अपरं यिहूदीया यिरूशालमनिवासिनश्च मनुजाः परमेश्वरस्य सम्मुखे
दण्डवद् भवन्तः परमेश्वरम् अभजन्त। अपरं किहातवंशीयाः कोर- १९
हवंशीयाश्च लेवीया उत्थायात्युच्चैःस्वरैरिस्रायेलः प्रभुं परमेश्वरं प्रशंसि-
तुम् आरेभिरे।

अनन्तरं ते प्रत्यूष उत्थाय तिकोयप्रान्तरं जग्मुः। गमनसमये यिहो- २०
शाफट उत्तिष्ठन् व्याजहार, हे यिहूदीया यिरूशालमनिवासिनश्च
मनुजाः, मम गिरं निशामयत, यूयं निजे प्रभौ परमेश्वरे विश्वसित तेन
सुस्थिराः स्थास्यथ, तस्य भविष्यद्वादिषु विश्वसित तेन कृतकार्य्या भवि-
ष्यथ। इत्थं लोकान् आमन्त्र्य स परमेश्वरीयगायकान् पवित्रशोभा- २१
भूषितान् स्तावकांश्च नियुज्य एतनानाम् अग्रे गमनं, तथा 'ब्रूत परेश्वरं
धन्यं यन्नित्यस्तदनुग्रहः' इति कथनम् आदिदेश।

अनन्तरं तै र्गाने स्तुतिवादे चारब्धे परमेश्वरो यिहूदाः प्रतिकूलम् २२
आगतानाम् अम्मोनमोयाबवंशीयानां सेयीरपर्व्वतनिवासिनाञ्च विरुद्धं
समरं कर्त्तुं दस्यून् प्रवर्त्तयामास तेन त आहता बभूवुः। अपरम् अम्मो- २३
नवंशा मोयाबीयलोकाश्च ध्वंसार्थं विनाशार्थञ्च सेयीरपर्व्वतनिवासिनां
विरुद्धम् उत्तस्थिरे, अपरं सेयीरनिवासिनो व्यापाद्य ते परस्परम् वि-
नाशयितुम् आरेभिरे। अनन्तरं यिहूदीयमनुजैः प्रान्तरस्थं प्रहरिस्थानं २४
प्राप्य जननिवहं प्रति दृष्टिपाते कृते तेषां लोकानां क्षितौ पतितानि
कुणपानि ददृशिरे, उद्धृतः को ऽपि न दृष्टः। तदानीं यिहोशाफटस्तदीय- २५
मनुजाश्च तेषां लोट्यानि वस्तूनि सङ्ग्रहीतुं प्रगत्य तेषां कुणपैः समं प्रभूतानि
वित्तानि महामूल्याभरणानि च लेभिरे। ते स्वेषां कृते तान्यादाय
वहनशक्त्यतीतं भारं संगृहीतवन्तः। तेषां लोट्यवस्तूनां बाहुल्यकारणात्
तत्सङ्ग्रहणेन दिनत्रयं तै र्यापितं।

चतुर्थे दिवसे ते विराखाभिधानायां निम्नभूमौ मिलितवन्तः। तस्मिन् २६
स्थाने ते परमेश्वरं धन्यम् अवदन् एतत्कारणात् तत् स्थानम् अद्यापि

२७ विराखार्थतो धन्यवाद इतिनाम्ना विख्यातं विद्यते। अनन्तरं यिहूदा
यिरूशालमस्य च सर्व्वे लोकास्तेषाम् अग्रगामी यिहोशाफटश्च परावृत्य
सानन्दं यिरूशालमं प्रत्यागच्छन्, यतः परमेश्वरस्तेषां रिपूणां पराज-
२८ येन तान् आनन्दितान् चकार। अपरं ते मुरजवल्लकीतूरीणां वाद्यै
२९ र्यिरूशालमं प्रविश्य परमेश्वरीयं मन्दिरं जग्मुः। इत्थं परमेश्वर इस्रा-
येल्वंशस्य रिपुभिः सह समरं कृतवान् वार्त्तामिमाम् अन्यदेशीयराष्ट्र-
निवासिभिः सकलमनुजैराकर्णिता ततस्त ईश्वरात् साध्वसं गताः।
३० इत्थं यिहोशाफटस्य राजत्वं निष्कण्टकं बभूव चतुर्दिक्षु चेश्वरेण तस्मै
शान्तिरदायि।
३१ यिहोशाफटो यिहूदा राजत्वं चकृवान्, स वयसः पञ्चत्रिंशे वत्सरे
राजत्वं प्राप्य पञ्चविंशतिवत्सरान् यिरूशालमे राजत्वं चकार, अजूबा-
३२ नामिका शिल्हे र्दुहिता तस्य प्रसूरासीत्। स निजतातस्य आसा
वर्त्मनि चरन् तस्मात् न निवृत्य परमेश्वरस्य दृष्टिगोचरे यदुत्तमं तदवा-
३३ करोत्। तथापि भ्रगुस्थानानि न दवयाञ्चक्रिरे लोकाश्च तदानीमपि
३४ स्वेषां पूर्व्वपुरुषाणाम् ईश्वरं प्रति मनांसि न निवेशयाञ्चक्रुः। एतस्य
यिहोशाफटस्याद्यन्तक्रियाणाम् इतिहास इस्रायेलीयनरपतीनां पुरावृ-
त्तपुस्तकान्तर्गते हनानेः सुतस्य येहोः पुस्तके लिखितो विद्यते।
३५ अनन्तरं यिहूदादेशीयो यिहोशाफटो भूपतिरिस्रायेलीयनरपतिना
३६ दुश्चरित्रेणाहसियेन साकं मैत्र्यं चकार। ततस्तस्मिन् तर्शीशगामिपो-
तानां निर्म्माणार्थं तं स्वसहायं कृतवति ताविस्त्सियोनगेवरे पोतान् नि-
३७ र्म्मापयाञ्चक्रतुः। तदानीं मारेशानिवासी दोदावाहस्य सुत इलीयेषरो
यिहोशाफटस्य विरुद्धम् इदं भविष्यद्वचनं व्याजहार, त्वम् अहसियस्य
सहायो जातस्तत्कारणात् परमेश्वरस्तव कर्म्म विनाशयिष्यति। अनन्तरं
ते पोता भग्नास्तर्शीशं गन्तुं न पारयामासुः।

---

२१ एकविंशोऽध्यायः।

१ यिहोशाफटस्य निधनम् राज्याभिषिक्तेन योरामेण सहजानां हननं ५ तस्य कुरा-
जत्वं ८ इदोमदेशस्य लिब्नायाश्च मनुजैस्तस्य निघ्नत्वविहानं १२ तस्य विरुद्धम्
एलियस्य भविष्यद्वचनं १६ पिलेष्टीयैरारवीयैश्च तस्य क्लेशनं १८ अनिवार्य्यया पीडया
तस्य निधनं श्मशाने निधानञ्च।

१ अनन्तरं यिहोशाफटः स्वपितृगणेन सह महानिद्रां समीय पितृमणेन

समं दायूद्नगरे श्मशानं लेभे। अनन्तरं तस्य तनयो योरामस्तस्य पदे
राजत्वं प्राप। असरियो यिहीयेलः सिखरियो ऽसरियो मीखायेलः २
शिफटियश्चैत इस्रायेलीयन्टपस्य यिहोशाफटस्य सुता योरामस्य भ्रातर
आसन्। तेषां जनकेन तेभ्यो रजतानि सुवर्णानि बहुमूल्यद्रव्याणि ३
यिहूदाजनपदस्थानि प्राकारवेष्टितानि नगराणि च दानानि वितीर्णानि
किन्तु राजत्वं योरामाय ददे यतः स एव ज्येष्ठ आसीत्। अनन्तरं ४
योरामो निजजनकस्य राजत्वं प्राप्य बलवान् भूत्वा स्वकीयान् सर्व्वान्
सहजान् इस्रायेलीयानां कतिपयान् अध्यक्षांश्च चन्द्रहासेन न्यवधीत्।
योरामो द्वात्रिंशद्वत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्य यिरूशा- ५
लमे ऽष्टवत्सरान् यावद् राजत्वं चकार। स आहाबीयवंशवद् इस्रा- ६
येलीयमहीपतीनां वर्त्मनि चचार, यतः स आहाबस्य दुहितरं व्युवाह
तेन परमेश्वरस्य साक्षात् कुत्सिताचारं चकार। तथापि परमेश्वरो ७
दायूदा सह यं नियमं कृतवान् अर्थतस्तस्मै तस्य वंशाय च चिरकालं
प्रदीपदानस्य यां प्रतिज्ञां कृतवान् तन्निमित्तं स दायूदो वंशं विनाश-
यितुं नैच्छत्।
तस्य राजत्वसमय इदोमीयलोका यिहूदा अधीनत्वं विहाय स्वेषाम् ८
उपरि राजानमेकं नियुयुजिरे। अतो योरामो निजाध्यक्षै र्निखिलर- ९
थैश्च सह प्रगत्य रजन्यामुत्थाय स्वान् वेष्टकान् इदोमीयान् तेषां रथिनश्च
विनाशयामास। तथापीदोमीयलोका अद्यापि यिहूदावंशस्यानधीना १०
विद्यन्ते। तस्मिन्नेव समये लिब्नाया लोका अपि तस्याधीनत्वं तत्यजुः,
यतः स स्वीयपूर्व्वपुरुषाणां प्रभुं परमेश्वरं तत्याज। अधिकन्तु स यिहू- ११
दादेशस्थशिलोच्चयेषु भ्रगुस्थानानि कृत्वा यिरूशालमनिवासिनो व्यभि-
चारं यिहूदावंशञ्च विपथगमनं कारयामास।
अनन्तरं भविष्यद्वादिन एलियस्य समीपात् तस्य सन्निधिम् एतद्वचः- १२
सूचकं पत्रमेकम् आजगाम, तव पूर्व्वपुरुषस्य दायूदः प्रभुः परमेश्वर
इति वाचं वदति, यस्मात् त्वं निजतातस्य यिहोशाफटस्य वर्त्मनि यि-
हूदादेशीयन्टपस्यासाश्च वर्त्मसु न चरितवान्, किन्त्विस्रायेलीयनर- १३
पतीनां वर्त्मनि चरन् आहाबवंशस्य व्यभिचारानुसारेण यिहूदावंशं
यिरूशालमनिवासिनश्च व्यभिचारं कारितवान् अपरं त्वत्त उत्तमान्
त्वदीयपितृवंशजान् भ्रातॄन् अवधीस्तस्मात् पश्य परमेश्वरस्तव प्रजास्तव १४
बालकान् जायाश्च तव निखिलसम्पत्तीश्च महाघातेन प्रहरिष्यति।

१५ अपरम् अन्त्रपीडया तवातीव यन्त्रणा भविष्यति, तया पीडया बहुदि-
नानि यावत् तावकीनमन्त्रं पुनः पुन र्निर्पतिष्यति।
१६ अनन्तरं परमेश्वरेण योरामस्य प्रातिकूल्ये कूशीयानां समीपवासिनां
१७ पिलेष्टीयानाम् आरवीयाणाञ्च मनःसु प्रवर्त्तितेषु ते यिहूदाजनपदम्
आगत्य यिरूशालममाक्रम्य प्रविश्य च राज्ञो निवेशने विद्यमाना
निखिलसम्पत्तीस्तस्य तनयान् जायाश्च निन्युः, ततस्तस्य कनिष्ठपुत्रम्
अहसियं विना तस्य तनय एको ऽपि नावाशिष्यत।
१८ एताभ्यो घटनाभ्यः परं परमेश्वरस्तम् अप्रतिकार्य्येणान्त्ररोगेणाशा-
१९ सत्। ततो बहुदिनानि यावद् वारं वारं विशेषतो वत्सरद्वयस्यान्ते
तया पीडया तस्यान्त्रं निपपात, तस्मात् सो ऽतीव यन्त्रणया ममार, तस्य
प्रजाश्च पूर्व्वपुरुषाणां रीत्यनुसारेण तस्य कृते धूपदाहं न विदधुः।
२० स द्वात्रिंशद्वत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्य यिरूशालमे ऽष्टौ
वत्सरान् राजत्वं चकृवान्। तस्य निधनात् लोकानां शोको न बभूव,
ते च दायूद्नगरे तं श्मशाने निदधिरे किन्तु नृपतीनां श्मशाने न
निदधिरे।

२२ द्वाविंशोऽध्यायः।

१ अहसियस्य कुराजत्वं ५ येहूना तस्य हतत्वं १० अथलियया योयाशं विना निखिलं राजवंशं व्यापाद्य राजत्वप्राप्तिः।

१ अनन्तरं यिरूशालमनिवासिनस्तस्य कनिष्ठतनयम् अहसियं तस्य
पदे राजत्वे नियोजयामासुः, यत आरवीयाणां शिविरयुक्तो यः सङ्घ
आगमत् तेन तस्य ज्येष्ठा भ्रातरो जघ्निरे। अतो यिहूदीयनृपस्य योरा-
२ मस्य सुतो ऽहसियो राजत्वं लेभे। सो ऽहसियो द्वाविंशतिवत्सरवयस्कः
सन् राजत्वं कर्त्तुम् आरभ्य यिरूशालमे वत्सरमेकं राजत्वं चकृवान्।
३ अम्रे र्दुहिताथलिया तस्य प्रसूरासीत्। सो ऽप्याहाववंशस्य वर्त्मना
४ चरितवान् यतस्तस्य जननी दुराचारार्थं तस्य मन्त्रयित्री बभूव। स
आहाववंशीया इव परमेश्वरस्य साक्षात् कुत्सिताचारं चकृवान् यतस्तस्य
जनकस्य निधनात् परं त एव तस्य विनाशार्थं तस्य मन्त्रिण आसन्।
५ तेषामेव मन्त्रणाम् आचरन् स इस्रायेलीयनृपतेराहाबसुतस्य यिहो-
रामस्य सहायो भूत्वारामीयनरपतिना हसायेलेन साकं समरं कर्त्तुं

रामोतगिलियदं जगाम, तत्रैवारामीया मनुजा यिहोरामम् आजघ्नुः।
अनन्तरम् अरामीयहसायेलेन नरपतिना साकं योधनसमये यिहो- ६
रामो रामोते यद्यत् क्षतं प्राप्नोत् तत्प्रतीकारार्थं यदा स यिष्रियेलं
प्रत्यागमत् तदा यिहूदीयक्षितिपति र्यारामस्य तनयो ऽहसिय आहाव-
सुतस्य यिहोरामस्य पीडाकारणात् तं वीक्षितुं यिष्रियेलं जगाम।
किन्तु यिहोरामस्य सन्निधिगमनेन परमेश्वराद् अहसियस्य निपातो ७
बभूव, यतस्तत् स्थानं गत्वा स यिहोरामेण सार्द्धम् आहाववंशस्य लो-
पार्थं परमेश्वरेणाभिषिक्तं निम्शेः सुतं येहूं साक्षात् कर्त्तुं प्रययौ।
अनन्तरं यस्मिन् समये येहूराहावस्य वंशम् अदण्डयत् तस्मिन् समये स ८
यिहूदा अध्यक्षान् अहसियस्य परिचारकान् भ्रातृपुत्त्रांश्च धृत्वावधीत्।
अनन्तरं तेनाहसिये गवेषिते मनुजाः शोमिरोणे प्रच्छन्नम् अहसियं ९
धृत्वा येहोः समीपम् आनीय जघ्नुः, तथापि तं श्मशाने निदधिरे यतो
हेतोस्ते ऽब्रुवन् यो यिहोशाफटः सर्व्वान्तःकरणेन परमेश्वरम् अगवेष-
यत् तस्य वंशो ऽसौ। ततः परं राज्यशासनार्थम् अहसियवंशस्य कापि
शक्ति र्नातिष्ठत्।

अनन्तरम् अहसियस्य जनन्यथलिया यदा निजं तनयं मृतम् अपश्यत् १०
तदा सा समुत्थाय कृत्स्नं यिहूदीयराजवंशं व्यापादयामास। तथापि ११
नृपस्य दुहिता यिहोशेवाहसियस्य तनयं योयाशं गृहीत्वा हन्यमानानां
राजकुमाराणां मध्यात् चोरयित्वा तं तस्य धात्रीञ्च कस्मिंश्चित् शय्या-
गृहे निदधे। अनेन प्रकारेण योरामस्य नृपस्य दुहिताहसियस्य भगिनी
या यिहोशेवा यिहोयादायस्य याजकस्य भार्य्यासीत् सा तम् अथलि-
यायाः सन्निधितो गोपयामास तस्मात् स तया न जघ्ने। अनन्तरं १२
योयाशः षड्वत्सरान् यावत् तैः साकम् ईश्वरस्य मन्दिरे प्रच्छन्नस्तस्थि-
वान् अथलिया च जनपदस्य राजत्वं चकार।

---

२३ त्रयोविंशोऽध्यायः।

१ याजकेन यिहोयादायेन सैन्यनिबद्धं निरुन्ध्य योयाशस्य राज्याभिषेकः १२ अथलि-
याया हननं २९ सुराद्यातः पुनर्व्वारम् ईश्वरं प्रति यिहोयादायेन लोकानां
परावर्त्तनं।

अनन्तरं सप्तमे वत्सरे यिहोयादाय आत्मानं बलवन्तं विधाय शतप- १
तीन् अर्थतो यिरोहमस्य सुतम् असरियं यिहोहाननस्य सुतम् इस्मा-

येलम् ओवेदस्य सुतम् असरियम् अदायाह्स्य सुतं मासेयं सिखेः सुतम्
२ इलीशाफटञ्चात्मना समं नियमेन जग्राह। अनन्तरं ते यिहूदादेशं
पर्य्यटन्तो यिहूदाः सर्व्वेभ्यो नगरेभ्यो लेवीयान् इस्रायेलीयपितृवंशानां
३ प्रमुख्यांश्च लोकान् संगृह्य यिरूशालमम् आजग्मुः। अपरं निखिलसमाज
ईश्वरीयमन्दिरे नरपतिना सार्कं नियमं चकृवान्। अपरं यिहोयादाय-
स्तान् जगाद, पश्यतायं राजपुत्त्रः, दायूदो ऽवंशमधि परमेश्वरेण यद्
४ उक्तं तदनुसाराद् अनेन राजत्वं कर्त्तव्यं। यूयं कर्म्मेदं करिष्यथ, विश्रा-
मवारे युष्माकम् अर्थतो याजकानां लेवीयानाञ्चैकस्तृतीयभाग आगत्य
५ द्वारपालो भविष्यति। अपरस्तृतीयांशो राजनिवेशने स्थास्यति, शेषश्च
तृतीयांशो भित्ते द्वारे स्थास्यति लोकाश्च सर्व्वे परमेश्वरीयमन्दिरस्य
६ प्राङ्गणेषु स्थास्यन्ति। अपरं याजकान् लेवीयानां मध्ये परिचारकलोकांश्च
विना कमप्यपरं परमेश्वरस्य मन्दिरं प्रवेष्टुं वारयत, त एव प्रवेक्ष्यन्ति
यतस्ते पवित्राः। परन्तु निखिला अन्यमनुजा परमेश्वरस्य निरूपितं
७ कर्म्म करिष्यन्ति। अपरं लेवीया अस्त्रहस्ताः सन्तो राजानं वेष्टन्तां।
यः कश्चित् मन्दिरस्याभ्यन्तरम् आयास्यति स घानिष्यते। अपरं नृपति
र्यदा वहि र्यास्यत्यभ्यन्तरम् आगमिष्यति वा तदानीं यूयं तेन सार्द्धं
८ स्थास्यथ। इत्थं यिहोयादायेन याजकेन यद्यद् आदिष्टं तदेव लेवीयै
र्निखिलयिहूदीयमनुजैश्चाकारि। तेषाम् एकैको जनो विश्रामवारे प्रवे-
शिनो विश्रामवारे निर्गामिनश्च स्वान् स्वान् लोकान् जग्राह, यतो
९ याजको यिहोयादायस्तेषां पर्य्यायाणां लोकान् न विससर्ज। अपरं
याजको यिहोयादाय ईश्वरस्य मन्दिरे स्थितानि नृपते र्दायूदः शूलचर्म्म-
१० फलकानि शतसेनापतिषु समर्पयाञ्चकार। अपरं तान् अस्त्रधारिणो
निखिलमनुजान् मन्दिरस्य दक्षिणं पार्श्वम् आरभ्य मन्दिरस्य वामं पार्श्वं
यावद् यज्ञवेद्या मन्दिरस्य च समीपे नृपस्य चतुर्दिक्षु स्थापयामास।
११ अनन्तरं ते राजतनयं वहिरानीय तस्य शिरसि किरीटं निधाय तस्मै
साक्ष्यपुस्तकं दत्त्वा राजानं चक्रिरे, अपरं यिहोयादायेन तस्य पुत्त्रैश्च
तस्मिन् अभिषिक्ते सति ते बभाषिरे, राजा चिरजीवी भूयात्।
१२ अपरम् अथलिया द्रुतगामिनां राजस्तावकानाञ्च लोकानां कोलाहलं
१३ निशम्य परमेश्वरस्य मन्दिरे लोकानां समीपम् आजगाम। अपरं
प्रवेशस्थाने राजा निजस्तम्भस्य समीपे तिष्ठति, अध्यक्षास्तूरीवादकाश्च
राज्ञः समीपे विद्यन्ते जनपदस्य निखिललोकाश्चानन्दं कुर्व्वन्ति तूरी

वादयन्ति च गायकाश्च वाद्यैः समं गायन्ति स्तुवन्ति चेति निरीक्ष्याथ-
लिया निजवसनं छित्त्वा राजद्रोहो राजद्रोह इति ललाप। ततो १४
याजको यिहोयादायो बलेषु नियुक्तान् शतसेनापतीन् समादिशन्
बभाषे, एषा युष्माभिः श्रेणीमध्याद् वहिष्क्रियतां, यः कश्चिद् एनाम्
अनुव्रजिष्यति, स खड्गेन हन्यताञ्चेति, यतो याजको ऽब्रवीत् परमेश्वरस्य
गेहमध्ये सा न हन्तव्या। अतो लोकास्तां हस्ते धृत्वा राजधान्या हयद्वा- १५
रस्य प्रवेशस्थानं नीत्वा तत्रैव जघ्नुः।

अनन्तरं लोकाः परमेश्वरस्य प्रजा भविष्यन्ति यिहोयादाय आत्मना १६
सह नृपतिं लोकांश्चैतादृशं नियमं कारयामास। अनन्तरं लोकाः सर्व्वे १७
वालो गेहं गत्वा तद् बभञ्जुस्तस्य वेदीरपि प्रतिमाश्च चूर्णयाञ्चक्रुः, वेदीनां
सम्मुखे वालो याजकं मत्तनम् अवधिषुश्च। अपरं दायूदो रीत्यनुसारे- १८
णानन्दगीताभ्यां समं मूससो व्यवस्थायां लिखितविधितः परमेश्वराय
होमार्थकबलिदानाय ये लेवीया याजका दायूदा नियोजयाञ्चक्रिरे
तेषां करेषु यिहोयादायः परमेश्वरीयमन्दिरस्य कर्म्मणाम् अध्यक्षत्वं स-
मर्पयामास। अपरं कथञ्चिद् अशुचिमनुजा यन्न प्रविशेयुस्तत्कृते स १९
परमेश्वरीयमन्दिरस्य द्वारेषु दौवारिकान् नियोजयामास। अनन्तरं २०
शतपतिषु मान्यमनुजेषु लोकशासकेषु जनपदस्य सर्व्वेषु लोकेषु च तेन
समानीतेषु स राजानं परमेश्वरीयमन्दिराद् वहिरानिनाय, ते च
प्रोच्चद्वारेण राजनिवेशनं प्रविश्य राजानं राजसिंहासन उपवेशया-
ञ्चक्रुः। तदा जनपदस्य निखिलमनुजा आननन्दु नगरमपि निष्कण्टकं २१
बभूव, केवलम् अथलिया तैः खड्गेन जघ्ने।

२४ चतुर्विंशोऽध्यायः।

१ यिहोयादायस्य यावज्जीवनं योयाशस्य सुराजत्वकरणं ४ ईश्वरीयमन्दिरस्य जीर्णोद्धारार्थं तस्याज्ञा १५ यिहोयादायस्य निधनं श्मशाने निधानं १७ देव-पूजायां प्रवृत्तेन योयाशेन यिहोयादायसुतस्य सिखरियस्य हननं २२ अरामीयै-स्तस्य पराजयो दासाभ्याञ्च तस्य बधः २७ योयाशस्य विवृतिः।

योयाशः सप्तवत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्य यिरूशालमे १
चत्वारिंशद् वत्सरान् यावत् राजत्वं चक्रवान्। बेर्शेवानिवासिनी
सिबिया तस्य प्रसूरासीत्। एष योयाशो याजकस्य यिहोयादायस्य २

३ यावज्जीवनं परमेश्वरस्य साक्षात् सदाचारम् अकरोत्। अपरं यिहो-
यादायस्तं द्वे कन्ये विवाहयामास, ततस्तस्य तनया दुहितरश्चाजायन्त।
४ अनन्तरं परमेश्वरीयमन्दिरस्य जीर्णोद्धारं कर्त्तुं योयाशस्य मानसे
५ जाते स याजकान् लेवियांश्च संगृह्य कथयामास, यूयं यिहूदादेशस्थ-
नगराणि गत्वा प्रतिवत्सरं निजेश्वरस्य मन्दिरस्य जीर्णोद्धारार्थम् इस्रा-
येलीयनिखिलमनुजेभ्यो ऽर्थान् संगृह्णीत कर्म्मैतत् त्वरितं कुरुत। किन्तु
६ लेवीयास्तत्र त्वरां न चक्रुः। अनन्तरं नरपतिस्तेषां मुख्यं यिहोया-
दायम् आहूय कथितवान् साक्ष्यदूष्यस्य कृत ईश्वरस्य दासेन मूससेस्रा-
येलीयसमाजेन च निरूपितो यः करस्त्वं यिहूदातो यिरूशालमाच्च
७ तस्यानयनार्थं लेवीयान् कुतो नादिशः? यतस्तस्या दुष्टाया अथलियायाः
पुत्त्रा ईश्वरस्य मन्दिरम् अभञ्जन् परमेश्वरीयमन्दिरे निवेदितानि नि-
८ खिलवस्तूनि च वाले ऽददुः। अनन्तरं नृपतेराज्ञया ते मञ्जूषामेकां
९ निर्म्माय परमेश्वरीयमन्दिरस्य द्वारसमीपे वहिः स्थापयाञ्चक्रुः। अपरम्
ईश्वरस्य दासो मूसाः प्रान्तर इस्रायेलं यं करम् आज्ञापितवान् पर-
मेश्वरस्य सन्निधौ तस्यानयनं यिहूदादेशे यिरूशालमे च घोषयाञ्चक्रुः।
१० ततः सर्व्वे ऽध्यक्षाः प्रजाश्चानन्दं गत्वा करम् आनीय पूर्णतां यावत् तस्यां
११ मञ्जूषायां निचिक्षिपुः। अपरम् उपयुक्ते समये लेवीयै र्निजहस्तैस्तां
मञ्जूषां राजभाण्डागारम् आनीय तन्मध्ये बहुमुद्रासु दृष्टासु राजलेखको
महायाजकेन नियुक्त एको जनश्चागत्य मञ्जूषां शून्याम् अकुरुताम् अपरं
सा तैः पुनर्व्वारम् उत्थाप्य स्वस्थानम् आनीयत। प्रतिदिनम् इत्थं कृत्वा
१२ ते प्रभूतानि वित्तानि समगृह्णन्। अनन्तरं नृपो यिहोयादायश्च तानि
परमेश्वरीयमन्दिरस्य कर्म्माधिपतिभ्यो ऽदत्तां ते च परमेश्वरीयमन्दि-
रस्य जीर्णोद्धारार्थं तक्षभ्यः स्थपतिभ्यश्च वेतनानि प्राददन् अपरं पर-
मेश्वरीयमन्दिरस्य जीर्णोद्धारार्थम् आयसकर्म्मकर्त्तृभ्य आरकुटीयकर्म्म-
१३ कर्त्तृभ्यश्च वेतनानि प्राददुः। इत्थं कर्म्मकारिलोकैः क्रियमाणे कर्म्मणि
तेषां श्रमैः सिद्धिं गते तैरीश्वरीयमन्दिरस्य जीर्णोद्धारं विधाय तत्
१४ पूर्व्ववद् दृढितं। कर्म्मणि समाप्ते ते ऽवशिष्टमुद्रा नृपस्य यिहोयादायस्य च
समक्षम् आनिन्युः, ततस्तौ ताभि र्मुद्राभिः परमेश्वरीयमन्दिरस्योपास-
नार्थकभाजनानि विशेषतो होमपात्राणि स्रुदनीश्चेत्यादीनि हेममयानि
रजतमयानि च भाजनानि निर्म्मापयाञ्चक्रुः। अनन्तरं यिहोयादायस्य
यावज्जीवनं नित्यं परमेश्वरस्य मन्दिरे ते होमार्थकबलयो ऽदीयन्त।

अनन्तरं यिहोयादायः स्थविरः सम्पूर्णायुश्च भूत्वा निधनं लेभे। नि- १५
धनसमये तस्य द्वात्रिंशदधिकं शतं वत्सरा वयो ऽभवत्। स इस्रायेलो १६
मध्य ईश्वरमधि तदीयमन्दिरमधि चोत्तमं कर्म्माकरोत् तत्कारणात्
मनुजा दायूद्नगरे राजनिवहस्य मध्ये तं श्मशाने निदधिरे।

यिहोयादायस्य निधनात् परं यिहूदा अध्यक्षा आगत्य राजानं प्रा- १७
णमन्। ततो राजा तेषां वचांसि जग्राह। ते तु स्वेषां पितृलोकानां १८
प्रभोः परमेश्वरस्य मन्दिरं परित्यज्य चैत्यवृक्षान् प्रतिमाश्च पूजयितुम्
आरेभिरे, एतदपराधकारणाद् यिहूदां यिरूशालमञ्च प्रति क्रोधो
ऽवर्त्तत। तथापि परमेश्वरं प्रति तान् परावर्त्तयितुं तेषां सन्निधिं १९
परमेश्वरेण प्रेषिता भविष्यद्वादिनस्तेषां विरुद्धं साक्ष्यम् अददुः किन्तु
तत्रापि ते मनांसि न निदधिरे। अनन्तरं परमेश्वरस्यात्मनि याजकस्य २०
यिहोयादायस्य सुतं सिखरियम् आविष्टवति स लोकानाम् उपरिष्टात्
संस्थाय तान् अब्रवीत्, ईश्वरो युष्मान् इति वाचं गदति, यूयं कुतः
परमेश्वरस्य निदेशान् लङ्घध्वे? अनेन कृतार्था भवितुं न पारयिष्यथ।
युष्माभिः परमेश्वरः परित्यक्तस्तस्माद् यूयमपि तेन परित्यक्ष्यध्वे। ततो २१
मनुजा नृपतेराज्ञानुसारेण तस्य विरुद्धं द्रोहं विधाय परमेश्वरीयमन्दि-
रस्य प्राङ्गणे तं पाषाणाघातैरबधिषुः। तस्य जनको यिहोयादायो २२
नृपतिं प्रति यं सदाचारं कृतवान् नृपति र्योयाशस्तं न संस्मृत्य तस्य
तनयं जघान। निधनकाले स बभाषे परमेश्वरेणैतत् प्रति दृष्टिं विधा-
यैतस्य समुचितं फलं दायिष्यते।

अनन्तरम् एकस्मिन् वर्षे ऽतीते ऽरामीयपृतनानिवहस्तस्य विरुद्धम् २३
आजगाम। ते यिहूदां यिरूशालमञ्च समागत्य लोकानां प्रमुख्यनरान्
अबधिषु र्निखिलानि लोठितवस्तूनि दम्मेषकस्य क्षितिपतेः सन्निधिं
प्रेषयाञ्चक्रुश्च। यद्यप्यरामीयाणाम् अल्पसैन्यं बलम् आगच्छत् तथापि २४
परमेश्वरस्तेषां करेष्वतीव महासैन्यानि समर्पयाञ्चकार यतो हेतो र्मनु-
जाः स्वेषां पूर्व्वपुरुषाणां प्रभुं परमेश्वरम् अत्यजन्। इत्थम् अरामीया
योयाशं दण्डयामासुः। अपरं तं प्रभूताघातै र्विक्षतं विहाय तैस्तस्य २५
सन्निधितो यात्रायां कृतायां तस्य द्वौ दासौ याजकस्य यिहोयादायस्य
सुतानां हननकारणात् तस्य विरुद्धं मन्त्रणां विधाय शय्यागतं तं
जघ्नतुः। इत्थं तस्मिन् निधनं गते लोका दायूद्नगरे तं श्मशाने निदधिरे
किन्तु राजनिवहस्य श्मशाने न निदधिरे। अम्मोनीयाशिमियतस्तनयः २६

सावदो मायाबीयाश्मीतस्तनयो यिह्वोषावदश्चैतौ तस्य विरुद्धं मन्त्रयामासतुः।
२७ अपरं तस्य तनयानां कथा तस्य दत्तकरस्य भार ईश्वरीयमन्दिरस्य जीर्णोद्धारश्चैतानि निखिलानि नरपतीनां पुरावृत्तपुस्तके लिखितानि सन्ति। अनन्तरं तस्य तनयो ऽमत्सियस्तस्य पदे राजत्वं प्राप।

---

२५ पञ्चविंशोऽध्यायः।

१ अमत्सियस्य राजत्वकरणं ७ राजघातकयो र्हननं ५ इस्रायेलीयपृतनानां विसर्जनं ११ इदोमीयलोकानां हननं १३ इस्रायेलीयलोकै र्विसर्ज्जनं प्राप्य यिहूदादेशस्याक्रमणं १४ न्टपेणेदोमीयानां देवानामर्च्चनं भविष्यद्वादिनां वचनाश्रवणं १७ तस्य दण्डनं २५ तस्य राजत्वनिधनयोः कथनञ्च।

१ अमत्सियः पञ्चविंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्य यिरूशालम ऊनत्रिंशद्वत्सरान् यावद् राजत्वं चकार। यिरूशालम-
२ निवासिनी यिहोयद्दना तस्य प्रसूरासीत्। स परमेश्वरस्य गोचरे सदाचारम् अकरोत् किन्तु सरलान्तःकरणेन नाकरोत्।
३ अनन्तरं राज्ये तस्य सम्यग् वशीभूते तस्य याभ्यां दासाभ्यां तस्य तातो
४ राजा जघ्ने स तावबधीत्। किन्तु तयोरपत्यानि नाबधीत् यतो मूससो व्यवस्थाग्रन्थे परमेश्वरीयैषाज्ञा लिखितास्ते, यथा, तनयानाम् अपराधेन जनका न हन्तव्याः, जनकानाञ्चापराधेन तनया न हन्तव्याः। एकैको जनः स्वस्वपापात् हन्तव्य इति।
५ अनन्तरम् अमत्सियो यिहूदावंशं संगृह्य यिहूदा निखिलजनपदे बिन्यामीनस्य निखिलजनपदे च पितृवंशानुसारेण शतपतीनां सहस्रपतीनाञ्च निघ्नत्वे तान् नियुयुजे, किञ्च विंशतिवत्सरवयस्कान् ततो ऽधिकवत्सरवयस्कांश्च मनुजान् गणयित्वा त्रीणि लक्षाणि शूलफलकधारिणः
६ समरसमर्थान् अभिरुचितान् मनुजान् अलभत। अपरं किक्कारशतैकपरिमाणं रजतं वेतनं विधायेस्रायेलदेशीयान् लक्षवीरान् आनि-
७ नाय। किन्त्वीश्वरीयः कश्चिल्लोकस्तस्य सन्निधिं समेत्य व्याजहार हे राजन् इस्रायेलीया पृतना त्वया समं न यातु, यतः परमेश्वर इस्रायेल्-
८ वंशेन सह न विद्यते, इफ्रयिमवंशेन सहापि न विद्यते। किन्तु त्वमेव गत्वा समरं कर्त्तुं साहसिको भव, नोचेद् ईश्वरः शत्रूणां समक्षं त्वां निपातयिष्यति यतो हितोपकर्त्तुम् अधःपातयितुञ्चेश्वरस्य शक्ति र्विद्यते।

तदनन्तरम् अमत्सियस्तम् ईश्वरीयलोकं जगाद, इस्रायेलीयसङ्घाय ९
मया यत् किक्कारशतप्रमाणं रजतम् अदायि तदधि किं कर्त्तव्यं? ईश्व-
रीयलोक उदितवान् परमेश्वरेण ततोऽपि प्रभूतं तुभ्यं दातुं शक्यते।
ततोऽमत्सियस्तान् अर्थत इफ्रयिमाद् आगतं तं सेनानिवहं स्वस्थाने १०
गमनार्थं विससर्ज। अतो यिहूदा विरुद्धं तेषां महाक्रोधानले प्रज्वलिते
सति ते महाकोपेन स्वं स्वं स्थानं परावृत्य वव्रजुः।

अनन्तरम् अमत्सिय आत्मानं बलवन्तं कृत्वा स्वीयलोकान् बहिरा- ११
नीय लवणप्रान्तरं व्रजित्वा सेयीरवंशस्य दशसहस्राणि मनुजान् अब-
धीत्। अपरा दशसहस्राणि लोका जीवन्तो यिहूदावंशै र्वन्दीकृताः १२
शैलशृङ्गं निन्यिरे तस्मात् शैलशृङ्गाच्चाधो निक्षिप्ताः सर्व्वे चूर्णा बभूवुः।

किन्त्वमत्सियो यं एतनानिवहं स्वेन समं समराय न नीत्वा परावर्त्य १३
प्रेषितवान् ते शोमिरोणम् आरभ्य बैथोरोणं यावद् यिहूदादेशस्य नग-
राण्याक्रम्य तेषां त्रीणि सहस्राणि मनुजान् अबधिषुः प्रभूतानि लोठित-
व्यवस्तूनि च जगृहुः।

इदोमीयानां हननात् प्रत्यागमनात् परम् अमत्सियः सेयीरवंशीयानां १४
सुरान् आनीय निजेष्टदेवानिव स्थापयित्वा तेषां सम्मुखे प्रणन्तुं तान्
उद्दिश्य धूपान् ज्वालयितुञ्चोपचक्रमे। तस्माद् अमत्सियं प्रति परमेश्व- १५
रस्य क्रोधे प्रज्वलिते स कञ्चन भविष्यद्वादिनं तस्य सन्निधिं प्रेषयामास।
स तम् आचचक्षे, तेषां लोकानां ये सुरास्तव कराभ्यां निजप्रजा उद्धर्त्तुं
नापारयन् कुतस्तान् गवेषयसि? तेनैतस्मिन् वाक्ये उदिते राजा तं १६
जगाद, त्वं किं राजमन्त्रिपदे न्ययुङ्क्थाः? निवर्त्तस्व, कुतो हनिष्यसे?
तेन भविष्यद्वादी निवर्त्तमानो बभाषे त्वया कर्म्मैतत् कृत्वा मम मन्त्रणा
न गृहीता तस्माद् ईश्वरस्तव विनाशं निश्चितवान् इत्यहं जानामि।

अपरं यिहूदावंशीयो नरपतिरमत्सियो मन्त्रणां गृहीत्वेस्रायेलीय- १७
नृपं येहोः पौत्रं यिहोयाहसस्य पुत्रं योयाशं प्रति दूतान् प्रहित्य कथ-
यामास, आगच्छावां परस्परं साक्षात् कुर्व्वः। तत इस्रायेलीयो योयाशो १८
नृपो यिहूदादेशस्यामत्सियं नरपतिं प्रति दूतान् प्रहित्य कथयामास,
लिवानोनस्थं शृगालकण्टकं लिवानोनस्थस्यैरसवृक्षस्य सन्निधिं दूतं
प्रहित्य कथयामास, मम तनयस्य विवाहार्थं तव दुहितरं देहीति।
अनन्तरं लिवानोनस्थो वन्यपशुः समीय शृगालकोलिं बभञ्ज। त्वं कथ- १९
यसि, इदोमीया मया व्यनाश्यन्त, तेन त्वदीयं मनस्त्वां गर्व्वे प्रवर्त्तयति।

त्वं निजनिवेशने तिष्ठ। तवामङ्गलाय कुतो ऽनधिकारचर्चां करिष्यसि?
१० तव त्वया सार्कं यिहूदावंशस्य च पतनं कुतो भविष्यति? किन्त्वमत्सियेन
तद् वचनं नाश्रावि यत इदोमीयदेवानाम् अनुगमनात् ते यद् रिपूणां
११ करेषु पतेयुस्तदर्थम् एतत् सर्व्वम् ईश्वराद् बभूव। अनन्तरम् इस्रायेलीयो
योयाशो नरपतिराजगाम, तस्मात् स यिहूदानरपतिरमत्सियश्च यिहू-
१२ दादेशस्थे वैतशेमशे परस्परं साक्षाच्चक्रतुः। तत इस्रायेल्वंशानां सम्मुखे
यिहूदा मनुजाः पराजिताः सन्तः सर्व्वे स्वीयं स्वीयं वासस्थानं पलाया-
१३ ञ्चक्रिरे। तत्र वैतशेमशे इस्रायेलीयो राजा योयाशो ऽहसियस्य पौत्रं
योयाशस्य सुतं यिहूदा अमत्सियं महीपतिं धृत्वा यिरूशालमम् आनि-
नाय, अपरम् इफ्रयिमीयगोपुरम् आरभ्य कोणस्थगोपुरं यावद् यिरू-
१४ शालमीयप्राचीरस्य चतुःशतीहस्तमितं खण्डं बभञ्ज। अपरम् ईश्वरीय-
मन्दिर ओवेदेदोमस्य हस्तगतानि सकलकनकरजतानि सकलभाजनानि
च राजनिवेशनस्थं कोषञ्चादाय बन्धकत्वेन लोकान् सङ्गिनः कृत्वा च
शोमिरोणं प्रत्याजगाम।
१५ तस्येस्रायेलीयभूपते र्यिहोयाहसपुत्त्रस्य योयाशस्य निधनात् परं
यिहूदा भूपति र्योयाशस्य सुतो ऽमत्सियः पञ्चदशवत्सरान् अजीवत्।
१६ एतस्यामत्सियस्याद्यन्तम् अवशिष्टं चरित्रं किं यिहूदा इस्रायेलस्य मही-
पतीनां पुरावृत्तपुस्तके लिखितं न विद्यते?
१७ परमेश्वरस्यानुगमनाद् अमत्सियस्य निवृत्तिकालम् आरभ्य मनुजा
यिरूशालमे तस्य विरुद्धं कुमन्त्रणां चक्रुस्तदा स लाखीशं पलायाञ्चक्रे।
किन्तु ते तस्य पश्चात् लाखीशं लोकान् प्रहित्य तस्मिन् स्थाने तं घातया-
१८ मासुः। अनन्तरं ते हयैस्तं समानीय यिहूदादेशस्य प्रधाननगरे तस्य
पितृलोकानां सन्निधौ तमपि श्मशाने निदधिरे।

---

२६ षड्विंशोऽध्यायः।

१ सिखरियस्य विद्यमानसमय उषियस्य सुराजत्वकरणं १६ याजकानां कर्म्मसु प्रवर्त्त-
नात् तस्य कुष्ठरोगित्वं २२ तस्य निधनञ्च।

१ तदानीं यिहूदा निखिललोकाः षोडशवत्सरवयस्कम् उषियम् आ-
२ दाय तस्य जनकस्यामत्सियस्य पदे राजत्वे ऽभिषिषिचुः। राजनि
पितृगण इव महानिद्रां गतवति स एलोतनगरं निर्म्माप्य पुनर्व्वारं

यिह्नदा ध्यधीनौ चक्रवान्। उषियः षोडशवत्सरवयस्कः सन् राजत्वं २
कर्त्तुं प्रारभ्य यिरूशालमे द्विपञ्चाशद्वत्सरान् यावद् राजत्वं चक्रवान्।
यिरूशालमनिवासिनी यिखलिया तस्य प्रसूरासीत्। स निजपितुरम- ४
त्सियस्य सर्व्वकार्य्यानुसारेण परमेश्वरस्य साक्षात् सदाचारं चकार।
अपरम् ईश्वरीयदर्शने बुद्धिमान् यः सिखरियस्तस्य यावज्जीवनं स ईश्व- ५
रम् अन्वगच्छत्। स यतिकालान् परमेश्वरम् अन्वगच्छत् ततिकालान्
ईश्वरस्तं कृतकार्य्यम् अकरोत्। विशेषतः स यात्रां विधाय पिलेष्टीयैः ६
समं समरं कृत्वा गातं यव्निरस्दोदश्चैतेषां नगराणां प्राचीराणि बभञ्ज।
अपरम् असदोदस्य सीमायां पिलेष्टीयानां सीमायाञ्च नगराणि निर्म्मा- ७
पयाञ्चकार। अपरम् ईश्वरः पिलेष्टीयानां गूर्व्वालनिवास्यारबीयाणां
मियूनीयानाञ्च विरुद्धं तस्य साहाय्यं चक्रवान्। अम्मोनीयैरप्युषियायो- ८
पायनं ददे, इत्थम् अतीव पराक्रमात् तस्य यशो मिसरं प्रविश्य व्या-
नशे। अपरम् उषियो यिरूशालमे कोणद्वार उपत्यकाद्वारे प्राकारस्य ९
कोणेषु च दुर्गाणि निर्म्माप्य तानि दृढयाञ्चकार। तद्वत् स प्रान्तरेऽपि १०
दुर्गाणि निर्म्मापयामास बहून् प्रहींश्च चखान यतो निम्नभूमौ प्रान्तरे
च तस्य प्रभूताः पशव आसन्, अपरं पर्व्वतेषु कर्म्मिले च तस्य कृषीवला
द्राक्षाक्षेत्राजीवाश्चासन्, यतः स कृषिकर्म्मणि प्रीतवान्। अपरं लेख- ११
कस्य यियूयेलस्य शासकस्य मासेयस्य च हस्ते लिखितसंख्यानुसारेण सङ्घं
सङ्घं युद्धे गमनकृद् य उषियस्य पृतनानिवह आसीत् स राजकीय-
सेनापते र्हनानीयस्याधीन आसीत्। महावीरलोकानां पितृप्रधान- १२
समुदाये षट्शताधिके द्वे सहस्रे मनुजा आसन्। रिपूणां विरुद्धं नरपतेः १३
साहाय्यार्थं तेषाम् आज्ञाधीनाः पराक्रमेण समरकारिण्यः सार्द्धसप्त-
सहस्राधिकानि त्रीणि लक्षाणि पृतना आसन्। अपरम् उषियः सर्व्व- १४
पृतनानां निमित्तं फलकानि शूलानि शिरस्त्राणि वर्म्माणि धनूंषि पाषा-
णक्षेपणगुणांश्च निर्म्मापयामास। अपरं दुर्गेभ्यः प्राकारेभ्यश्च वृहद्वाणपा- १५
षाणानां प्रक्षेपार्थं निपुणशिल्पकानां कल्पनया कृतानि यन्त्राणि यिरू-
शालमे कारयाञ्चकार। एतादृगाश्चर्य्यरूपेणोपकृतो भूत्वा स महापरा-
क्रमी बभूव ततस्तस्य यशो दूरदेशं व्यानशे।

किन्तु पराक्रमप्राप्तेः परं तस्य मनसि विनाशोत्पादकेन गर्व्वेण ग- १६
र्व्विते सति स निजप्रभोः परमेश्वरस्य विरुद्धम् अपराधं चकार, फलतो
धूपवेद्यां धूपं ज्वालयितुं परमेश्वरस्य मन्दिरं प्रविवेश। ततो याजको १७

ऽसरियस्तेन समं परमेश्वरस्य याजका अशीतिजना बलवन्तो लोका-
१८ स्तस्य पश्चात् प्रविविशुः। ते नरपतेरुषियस्य प्रतिकूलं सन्तिष्ठमानास्तं
वभाषिरे, हे उषिय परमेश्वरोद्देशो धूपदाहस्त्वया न कर्त्तव्यः किन्तु
धूपज्वालनार्थं पाविते र्हारोणवंशजातै र्याजकैरेव। त्वं पवित्रस्थानात्
वहि र्याहि यतस्त्वयापराधः क्रियते तेन प्रभुपरमेश्वरात् तव सम्मानं न
१९ जनिष्यते। तदानीम् उषियः प्राकुप्यत् तस्य हस्ते च धूपज्वालनार्थं धूपा-
धार एको ऽविद्यत, किन्तु तस्मिन् याजकेभ्यः क्रुद्ध्यति याजकानां समक्षं
परमेश्वरस्य मन्दिरे धूपवेद्या अन्तिके कुष्ठरोगस्तस्य भाले प्रचकाशे।
२० तदानीं प्रधानयाजकेनासरियेण निखिलयाजकैश्च तं प्रति मुखं परावर्त्त्य
तस्य ललाटे कुष्ठरोगे दृष्टे ते तस्मात् तं दवयाञ्चक्रुः, अपरं स स्वयमपि
२१ वहि र्गन्तुं त्वरां विदधौ यतः परमेश्वरेण स आजघ्ने। ततो नृपति-
रुषियो मरणदिनं यावत् कुष्ठी तस्थौ कुष्ठित्वाच्च चिकित्साभवने निव-
सन् परमेश्वरस्य मन्दिराच्छिन्नस्तस्थौ। अपरं तस्य तनयो योथमो राज-
निवेशनस्याधिपति र्भूत्वा जनपदीयमनुजानां शासनम् अकरोत्।
२२ एतस्योषियस्याद्यन्ता अवशिष्टाः क्रिया आमोसस्य तनयेन यिशायियेन
२३ भविष्यद्वादिना लिलिखिरे। अनन्तरम् उषियः स्वीयपितृलोका इव
महानिद्रां जग्मिवान् ततो मनुजा नृपतीनां शवनिधानक्षेत्रे तदीय-
पितृलोकानां सन्निधौ तं श्मशाने निदधिरे, यस्मात् ते कथयामासुः स
कुष्ठीति। अपरं तस्य तनयो योथमस्तस्य पदे राजत्वं चकार।

२७ सप्तविंशोऽध्यायः।

१ योथमस्य सुराजत्वकरणं ५ अम्मोनीयानां पराजयः ७ तस्य राजत्वस्य कथनं निधनञ्च।

१ योथमः पञ्चविंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुं प्रारभ्य यिरू-
शालमे षोडशवत्सरान् राजत्वं चकृवान्। सादोकस्य दुहिता यिरूशा
२ तस्य प्रसूरासीत्। स निजपितुरुषियस्य कर्म्मानुसारेण परमेश्वरस्य
गोचरे सदाचारं चकार, तथापि स परमेश्वरस्य मन्दिरं न प्रविवेश
३ मनुजाश्च तदानीमपि दुष्टत्वम् आचेरुः। स परमेश्वरीयमन्दिरस्य
प्रोच्चद्वारं निर्म्मापयाञ्चकार तद्वद् ओफलस्थप्राकारस्याधिकांशं निर्म्माप-
४ याञ्चकार। अपरं यिहूदाः पर्व्वतीयदेशे नगराणि मरुभूमौ च दुर्गाण्यु-
च्चगृहाणि च निर्म्मापयाञ्चकार।

सो ऽम्मोनवंशीयानां महीपतिना समं समरं विधाय तान् जिगाय ५
तस्माद् अम्मोनवंशीयास्तस्मिन् वत्सरे किक्कारशतं रजतं दशसहस्रकोर-
परिमितान् गोधूमान् दशसहस्रकोरपरिमितान् यवांश्च तस्मै ददुः,
द्वितीये तृतीये च वत्सरे ऽप्यम्मोनवंशीयास्तस्मै तावन्ति ददुः। अनेन ६
प्रकारेण योथमो निजप्रभोः परमेश्वरस्य साक्षाद् ऋजुमार्गगामी सन्
प्रतापयुक्तो बभूव।

एतस्य योथमस्यावशिष्टाः क्रियास्तस्य निखिलसमरा निखिलव्यवहा- ७
राश्चेस्रायेलो यिहूदाश्च भूपतीनां पुरावृत्तपुस्तके लिखिता आसते। स ८
पञ्चविंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुं प्रारभ्य यिरूशालमे षोडश-
वत्सरान् राजत्वं चक्रवान्। अनन्तरं योथमो निजपितृलोका इव महा- ९
निद्रां गतो लोकै र्दायूद्नगरे श्मशाने निहितश्च, ततस्तस्य तनय आहा-
सस्तस्य पदे राजा बभूव।

२८ अष्टाविंशोऽध्यायः।

१ आहसस्य कुराजत्वकरणं तन्निदानाद् अरामीयै र्दण्डप्रापनं ६ इस्रायेलीयलोकैरपि दण्डप्राप्ति र्वन्दिलोकानां मोचनं १६ अशूरीयलोकैस्तस्य वञ्चितत्वं २२ सुरार्चनं तदन्यमहापापकरणञ्च २६ तस्य निधनञ्च।

आहसो विंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुं प्रारभ्य यिरूशालमे १
षोडशवत्सरान् यावद् राजत्वं चकार। स परमेश्वरस्य साक्षात्
निजपूर्व्वपुरुषो दायूदिव सदाचारं न चकार। किन्त्विस्रायेलीयमही- २
पतीनां मार्गेषु चरन् द्रवीभूतधातुना वालः प्रतिमूर्त्ती र्निर्म्मापयाञ्चकार।
अपरं स हिन्नोमसुतस्योपत्यकायां धूपान् प्राज्वालयत् किञ्च परमेश्वर ३
इस्रायेलीयवंशस्य सम्मुखाद् यान् भिन्नजातीयान् दवयाञ्चकार तेषां
घृण्यक्रियानुसारेण स निजात्मजान् वह्निना दाहयाञ्चकार। अपरं भग- ४
स्थानेषु पर्व्वतेषु सर्व्वेषां हरिद्वर्णानां तरूणाम् अधश्च बलिदानं धूपदा-
हञ्च चकार। तत्कारणात् तस्य प्रभुना परमेश्वरेण तस्मिन् अरामी- ५
याणां नरपतेः करे समर्पिते सति ते तं प्रहृत्य तस्य प्रभूतलोकान् वन्दी-
कृत्य दम्मेषकं निन्युः। तदधिकम् इस्रायेलीयनरपतेः करे तस्मिन् सम-
र्पिते सो ऽपि तं महाप्रहारेणाजघान।

अपरं रिमलियस्य तनयः पेकहो यिहूदावंशीयान् विंशतिसहस्रा- ६

धिकं लक्षं बलवतो लोकान् एकस्मिन्नेव दिने मारयामास यस्मात् ते स्वेषां
७ पितृलोकानां प्रभुं परमेश्वरं त्यक्तवन्तः। अपरं सिख्रिनामक इफ्रयिमीयो
वीरो राजतनयं मासेयं निवेशनाध्यक्षम् अस्रीकामं मुख्यराजपुरुषम्
८ इल्कानाहञ्च जघान। अपरम् इस्रायेलीयवंशाः स्वेषां भ्रातृणां द्वे लक्षे
जायापुत्रदुहितॄन् बन्दीकृत्य निन्युः, तेषां बहूनि वस्तूनि च लोठया-
९ ञ्चक्रुः, अपरं तानि निखिललोठितवस्तूनि शोमिरोणं निन्युः। तस्मिन्
स्थान ओदेदनामा परमेश्वरस्य भविष्यद्वादी कश्चिद् आसीत् स शोमि-
रोणे समागतं तं सैन्यनिवहं साक्षात् कर्त्तुं व्रजित्वा तान् सैन्यीयलोकान्
जगाद, पश्यत युष्माकं पितृलोकानां प्रभुः परमेश्वरो यिहूदावंशेभ्यः क्रुध्यन्
तान् युष्माकं करेषु समार्पयत् ततो यूयं गगनस्पर्शिक्रोधाग्निना तान्
१० अवधिष्ट। इदानीं यूयं यिहूदा यिरूशालमस्य च लोकान् वशीकृत्य
दासान् दासीश्च कर्त्तुं मतिं कुरुध्वे। युष्मत्प्रभोः परमेश्वरस्यापराधाः
११ किं युष्माभिरपि न कृताः? अत इदानीं मम वाचं शृणुत। यूयं स्वकी-
यभ्रातृणां समीपाद् यं बन्दिनिवहम् आनीतवन्तस्तं मुक्तीकुरुत यतः
१२ परमेश्वरस्य प्रचण्डकोपो युष्मासु वर्त्तते। तत इफ्रयिमवंशानां कतिपयाः
प्रधानलोका अर्थतो यिहोहाननस्य तनयो ऽसरियो मिशिल्लेमोतस्य
तनयो वेरिखियः शल्लुमस्य पुत्रो यिहिष्कियो हद्लयस्य तनयो ऽमासा-
१३ श्चैते रणात् प्रत्यागतानां लोकानां सम्मुख उत्तिष्ठन्तस्तान् जगदुः, बन्दिनो
लोका युष्माभिरेतत् स्थानं नानेतव्याः, यतो युष्माकं मन्त्रणा परमेश्वरस्य
साक्षाद् अस्माकम् अपराधस्य हेतुः, सास्माकं पापस्यापराधस्य च
वृद्धिजनिका। अस्माकम् अपराधो गुरुतरः परमेश्वरस्य च क्रोध इस्रा-
१४ येलं प्रति प्रज्वलित आस्ते। ततो ऽस्त्रधारिणो लोकास्तान् बन्दिनस्तानि
लोठितवस्तूनि चानीयाध्यक्षाणां निखिलसमाजस्य च साक्षात् निद-
१५ धिरे। अनन्तरं येषां नामानि लिलिखिरे ते नरा उत्थाय बन्दिनो
लोकान् आदाय तेषां मध्ये यावन्तो लोका नग्ना आसन् तान् लोठित-
वस्तुभ्यः परिहितवस्त्रान् चक्रुः, ते तेभ्यो वस्त्राणि पादुका भक्ष्याणि पेयानि
मर्द्दनीयतैलानि च ददुः, तेषाञ्च यावन्तो लोका दुर्बला अभवन् तान्
गर्दभान् आरोह्य तेषां भ्रातृणां समीपं तालवृक्षनगरम् अर्थतो यिरीहों
निन्युः, ततः परं ते शोमिरोणं पुनराजग्मुः।
१६ तस्मिन् समये नृपतिराहसः साहाय्ययाचनायाश्शूरदेशीयभूपतीनां
१७ समीपं दूतान् प्रेषयामास। यत इदोमीयास्तदानीमप्यागत्य यिहूदा-

जनपदम् आक्राम्यन् लोकांश्च वन्दीकृत्यानयन्। पिलेष्टीयलोका अपि १८
निम्नभूमे र्यिहूदादक्षिणजनपदस्य च नगराण्याक्रम्य वैतशेमशम् अया-
लोनं गिदेरोतं सोखुं तदीयशाखानगराणि तिम्नायां तदीयशाखानग-
राणि गिम्सुं तदीयशाखानगराणि च वशीकृत्य तत्र न्युषितवन्तः।
यत इस्रायेलीयन्टपतेराहसस्य हेतुना परमेश्वरो यिहूदावंशं खर्व्वी- १९
चकार यतः स राजा यिहूदावंशम् अत्याचारिणं कृत्वा परमेश्वरस्य
विरुद्धम् अतिशयमपराधं कारयामास। अनन्तरं तिग्लत्पिलेषरनामको २०
ऽश्शूरीयमहीपतिस्तस्य सन्निधिम् आजगाम किन्तु तस्य साहाय्यमकृत्वा
तं भृशं क्लेशयामास। यद्यप्याहसः परमेश्वरस्य मन्दिरं राजनिवेशनम् २१
अधिपतींश्चार्थहीनान् कृत्वा सर्व्वस्वम् अश्शूरीयराजाय ददौ तथापि
तस्मात् तस्योपकारो नाजायत।

एष नरपतिराहसः क्लेशस्य समये परमेश्वरस्य विरुद्धम् अधिकाप- २२
राधं चकार। स स्वप्रहारकान् दम्मेषकीयान् देवान् उद्दिश्य बलीन् २३
ददौ। यतः स उक्तवान् इमे ऽरामीयनृपतीनाम् इष्टदेवाः, इमे तेषां
सहायाः। अतो ऽहम् एतेभ्यो बलीन् दास्यामि तथा कृत एतैरुपकारिष्ये।
किन्तु त एव तस्य निखिलेस्रायेलश्च निपातकारिणो बभूवुः। अनन्तरम् २४
आहस ईश्वरीयमन्दिरस्य भाजनानि संगृह्य तानि सर्व्वाणीश्वरीय-
मन्दिरस्य पात्राणि कर्त्तयामास परमेश्वरीयमन्दिरस्य कवाटे बबन्ध च।
अपर स यिरूशालमस्य सर्व्वेषु कोणेषु स्वार्थं वेदी र्निर्म्मापयामास।
अपरम् इतरदेवानां कृते धूपदाहार्थं यिहूदादेशस्यैकैकस्मिन् नगरे २५
भृगुस्थानानि निर्म्मापयाञ्चकार। अनेन प्रकारेण स निजपितृलोकानां
प्रभुं परमेश्वरं क्रोधयाञ्चकार।

तस्यावशिष्टाः क्रिया आद्यन्तं चरित्रञ्च यिहूदा इस्रायेलश्च नृपतीनां २६
पुरावृत्तपुस्तके लिखितानि विद्यन्ते। अपरम् आहसो निजपितृगण इव २७
महानिद्रां गतो लोकैरिस्रायेलीयमहीपतीनां श्मशाने न निहितः किन्तु
यिरूशालमनगरस्थश्मशाने निहितः। ततः परं तस्य तनयो हिष्किय-
स्तस्य पदे राजत्वं लेभे।

---

२९ ऊनत्रिंशोऽध्यायः।

१ हिष्कियस्य सुराजत्वकरणं २ परमेश्वरस्य मन्दिरं परिष्कर्त्तुं निदेशनं १२ मन्दिरस्य परिष्करणकथनं २० हिष्कियस्य बलिदानादीनां कथनञ्च।

१ हिष्कियः पञ्चविंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुं प्रारभ्य ऊनत्रिं-
शद्वत्सरान् यावद् यिरूशालमे राजत्वं चकार। अवियानामिका
२ सिखरियस्य दुहिता तस्य प्रसूरासीत्। स निजपूर्व्वपुरुषस्य दायूदः
कर्म्मानुसारेण परमेश्वरस्य गोचरे सदाचारं चकार।
३ स निजराजत्वस्य प्रथमवत्सरस्य प्रथमे मासे परमेश्वरीयमन्दिरस्य
४ कवाटे मोचयित्वा तयो र्जीर्णोद्धारं कारयामास। अपरं स याजकान्
५ लेवीयांश्च प्रवेश्य पूर्व्वदिक्स्थे महाप्राङ्गणे मेलयित्वा तेभ्यः कथयामास, हे
लेवीयाः, मदीयं वचो निशामयत। इदानीं स्वान् प्रयतान् कुरुत, स्वेषां
पितृलोकानां प्रभोः परमेश्वरस्य मन्दिरं पवित्रीकुरुत पवित्रस्थानाद्
६ अवकरान् वहिष्कुरुत च। यतो ऽस्माकं पितृलोका अपराधिनो जाता
अस्माकं प्रभोः परमेश्वरस्य गोचरे दुराचारम् अकुर्व्वन् ते तम् अत्य-
७ जन् परमेश्वरस्य वासस्थानात् पराङ्मुखा भूत्वा तं पृष्ठतो ऽकुर्व्वन्। अपरं
अलिन्दस्य कवाटे अबन्धन् प्रदीपान् निरवापयन् पवित्रे स्थान इस्राये-
८ लीयेश्वरस्य कृते धूपान् नाज्वालयन् होमार्थकबलींश्च नाददुः। एतत्-
कारणाद् यिहूदां यिरूशालमञ्च प्रति परमेश्वरस्य कोपो ऽवर्त्तत, तेन
यादृशं स्वलोचनैः पश्यथ तादृशं स तान् क्लेशे विस्मये व्रीडायाञ्च समार्प-
९ यत्। पश्यत तत्कारणाद् अस्माकं पितृलोकाश्चन्द्रहासै र्न्यपात्यन्त, अस्माकं
१० तनया दुहितरो जायाश्च वन्दीभूताः स्थानान्तरम् अनीयन्त। तस्माद्
अस्मत्तस्तस्य कोपाग्नि र्यन्निवर्त्तेत तदर्थम् इस्रायेलः प्रभुना परमेश्वरेण
११ समं नियममेकं कर्त्तुम् इदानीं मम मानसं जातं। हे मम तनयाः,
यूयम् एतस्मिन् शिथिलमनसो मा भवत, यतो यूयं यत् परमेश्वरस्य
सम्मुखे तिष्ठन्तस्तस्योपासनां कुर्य्यात तस्य परिचारका धूपज्वालयितारश्च
भवेत, तदर्थं स युष्मान् वरीतवान्।
१२ तदानीं किहातवंशीयानाम् अमासयस्य तनयो महतो ऽसरियस्य
तनयो योयेलश्च, मिरारिवंशीयानाम् अब्देः पुत्त्रः कीशो यिहलिलेलस्य
तनयो ऽसरियश्च, गेर्शोनवंशीयानां सिम्मस्य तनयो योयाहो योयाहस्य
१२ तनय एदनश्च, इलीषाफनवंशीयानां शिम्रि र्यियूयेलश्च, आसफवंशी-
१४ यानां सिखरियो मत्तनियश्च, हेमनवंशीयानां यिहीयेलः शिमियिश्च,
१५ यिदूथूनवंशीयानां शिमयिय उषीयेलश्चैते सर्व्वे लेवीया उत्थाय स्वेषां
भ्रातॄन् संगृह्य स्वान् प्रयतान् चक्रिरे। अपरं परमेश्वरस्य वाक्येन
राज्ञा यथादिष्टं तथा परमेश्वरस्य मन्दिरं परिष्कर्त्तुं प्रविविशुः।

याजकाः परिष्कारकरणार्थं परमेश्वरीयमन्दिरस्याभ्यन्तरं प्रविश्य तत्र १६
परमेश्वरीयप्रासादे यान् अवकरान् प्रापुस्तान् सर्व्वान् वहिष्कृत्य परमे-
श्वरीयमन्दिरस्य प्राङ्गणम् आनिन्युः, अनन्तरं लेवीयास्तान् सङ्गृह्य कि-
द्रोणस्रोतो निन्युः। ते प्रथममासस्य प्रथमे ऽहनि तत्पावनं प्रारभ्य मास- १७
स्याष्टमे दिने परमेश्वरस्यालिन्दम् आजग्मुः, ततः परम् अष्टाहमध्ये
परमेश्वरीयं मन्दिरं पावयामासुः, प्रथममासस्य षोडशदिने कर्म्म समा-
पयाञ्चक्रुः। अनन्तरं ते हिष्कियस्य नरपते र्भवनं व्रजित्वा कथयामासुः, १८
परमेश्वरस्य कृत्स्नं मन्दिरं होमवेदी तदीयनिखिलभाजनानि च दर्शनी-
यपूपानां दार्वासनं तदीयनिखिलभाजनानि चैतान्यस्माभिः परिष्कृ-
तानि। अपरम् आहसो नृपति र्निजराजत्वकाले ऽपराधं कुर्व्वन् यानि १९
भाजनान्यमेध्यानि कृतवान् तानि सर्व्वाण्यस्माभिः संस्थापितानि पावि-
तानि च, पश्य तानि परमेश्वरस्य वेद्याः सम्मुखे विद्यन्ते।

अपरं हिष्कियो महीपतिः प्रत्यूष उत्थाय नगराधिपतीन् संगृह्य पर- २०
मेश्वरस्य मन्दिरं जगाम। अपरं ते राष्ट्रस्य पवित्रस्थानस्य यिहूदा- २१
वंशस्य च निमित्तं प्रायश्चित्तार्थं सप्त वृषभान् सप्तावीन् सप्त मेषशावकान्
सप्त छागांश्चोपानिन्युः, अपरं स परमेश्वरस्य वेद्यां होमार्थकबलित्वेन
तेषां दानं हारोणवंशीयान् याजकान् आज्ञापयामास। अतस्तै र्वृषभेषु २२
छेदितेषु याजका रुधिरम् आदाय वेदिप्रोक्षणं कृतवन्तः, अपरम्
अविषु छेदितेषु तेषां रुधिरेण वेदिप्रोक्षणं चक्रुः, अपरं मेषशावकेषु
छेदितेषु तेषां रुधिरेण वेदिप्रोक्षणं चक्रुः। अपरं प्रायश्चित्तार्थकेषु २३
छागेषु नृपस्य समाजस्य च साक्षाद् उपानीतेषु ते तेषाम् उपरि
हस्तान् अर्पयामासुः। अपरं याजकास्तान् छेदित्वा तेषां रुधिरै र्नि- २४
खिलेस्रायेलो निमित्तं वेद्यां प्रायश्चित्तं चक्रुः, यतो राजा निखिलेस्रा-
येलो निमित्तं होमं प्रायश्चित्तञ्च कर्त्तुम् आदिदेश। अपरं स राज्ञो २५
दायूदः प्रदर्शकस्य गादस्य भविष्यद्वादिनो नाथनस्य चाज्ञानुसारेण
करतालमुरजवल्लकीहस्तान् लेवीयान् परमेश्वरस्य मन्दिरे स्थापया-
मास, यस्मात् परमेश्वरो निजभविष्यद्वादिभिरिदम् आदिदेश। अतो २६
दायूदा निरूपितानि वाद्ययन्त्राणि धारयन्तो लेवीयास्तूरीहस्ता याज-
काश्च समतिष्ठन्त। अनन्तरं वेद्यां होमकरणार्थं हिष्कियेणाज्ञापिते २७
यदा होमस्यारम्भो ऽभवत् तदानीम् इस्रायेलीयेन दायूदा महीपेन
निरूपितैस्तूरीप्रभृतिभि र्वाद्यैः परमेश्वरीयगीतस्यारम्भो बभूव। ततो २८

होमस्य समाप्तिं यावत् कृत्स्नसमाजो भजनं चकार गायकाश्च गानं
२९ चक्रुस्तूरीवादकाश्च तूरी र्वादयाञ्चक्रुः। अनन्तरं होमे बलिदाने च
समाप्यमाने नृपतिस्तत्समीपवर्त्तिनो मनुजाश्च सर्व्वे जानूनि पातयित्वा
३० भजनं चक्रुः। अपरं हिष्कियो नरपतिरधिपतयश्च दायूदः प्रदर्शक-
स्यासफस्य च वचोभिः परमेश्वरमुद्दिश्य प्रशंसार्थकगानं लेवीयान्
आज्ञापयामासुः, ततस्ते सानन्दाः प्रशंसार्थकगीतं जगुः शिरांसि नम-
३१ यन्तो भजनं चक्रुश्च। तदानीं हिष्कियो व्याजहार यूयं परमेश्वरस्य
निमित्तं स्वान् प्रयतान् कृतवन्तः। इदानीम् उपस्थाय मङ्गलार्थकान्
प्रशंसार्थकांश्च बलीन् परमेश्वरस्य मन्दिरम् उपानयत, ततः समाजो
मङ्गलार्थकान् प्रशंसार्थकांश्च बलीन् समानिनाय दानशौण्डा मनुजाश्च
३२ होमार्थकान् बलीन् समानिन्युः। समाजेन समानीतानां होमार्थकब-
लीनाम् इयं संख्या, सप्तति र्वृषभाः शतं मेषा द्वे शते मेषशावकाश्च सर्व्वे
३३ एते परमेश्वरोद्देश्या होमार्थकबलयः। अपरं पवित्रीकृताः षट्शतानि
३४ वृषभास्त्रीणि सहस्राणि मेषाश्चासन्। किन्तु याजकानाम् अल्पत्वकार-
णात् ते सर्व्वेषां होमार्थकबलीनां चर्म्माण्युन्मोचयितुं न पारयामासुः।
अतो यावत् तत् कर्म्म समाप्तिं नाप्नोत् यावच्चापरा याजकाः स्वान्
मेध्यान् नाकुर्व्वन् तावत् तेषां भ्रातरो लेवीयास्तान् उपचक्रुः, यतो
लेवीयाः स्वान् प्रयतान् कर्त्तुं याजकेभ्योऽपि सरलान्तःकरणा आसन्।
३५ अपरं मङ्गलार्थकबलीनां मेदोभिः समं होमसम्बन्धीयैः पेयनैवेद्यैश्च समं
बहवो होमार्थकबलयो ददिरे। अनेन प्रकारेण परमेश्वरीयमन्दिर-
३६ स्योपासनाया रीति र्निश्चिता बभूव। ईश्वरो लोकान् स्थिरीचकृवान्
एतस्मात् हिष्कियः सकलमनुजाश्चाननन्दुः, यतस्तत् कार्य्यं सहसा बभूव।

---

३० त्रिंशोऽध्यायः।

१ हिष्कियेण निस्तारोत्सवपालनस्य निरूपणं १३ लोकानां सुरमूर्त्तिभञ्जनं चतुर्दश-
दिनानि तदुत्सवस्य पालनं २७ याजकानां लेवीयानाञ्च लोकेभ्य आशीर्दानञ्च।

१ अनन्तरं मनुजा यद् इस्रायेलः प्रभुं परमेश्वरम् उद्दिश्य निस्तारो-
त्सवं पालयितुं यिरूशालमे परमेश्वरस्य मन्दिरम् आगच्छेयुस्तत्कृते
हिष्कियो निखिलस्येस्रायेल्वंशस्य यिहूदावंशस्य च समीपं दूतान् प्रेष-
यामास, इफ्रयिमवंशस्य मिनशिवंशस्य च सन्निधिं पत्राण्यपि प्रेषया-

मास। राजा तदीयाध्यक्षा निखिलसमाजश्च द्वितीये मासि यिरूशालमे २
निस्तारोत्सवं कर्त्तुं मन्त्रयाञ्चक्रुः। यतो हेतो र्याजकाः प्रयोजनीयसङ्ख्यया ३
स्वान् प्रयतान् न कृतवन्तो मनुजाश्च यिरूशालमं न समागताः,
तस्मात् स उत्सवः स्वसमये तैः कर्त्तुं नाशक्यत। अपरं तत् कर्म्म राज्ञः ४
कृत्स्नसमाजस्य च दृष्ट्या तोषजनकं बभूव। अतो लोका यद् यिरू- ५
शालमम् आगत्येस्रायेलः प्रभुं परमेश्वरम् उद्दिश्य निस्तारोत्सवं कुर्य्यु-
स्तत्कृते ते बेर्शेवाम् आरभ्य दानं यावद् इस्रायेलः सर्व्वत्र घोषयितुं
नियमं चक्रुः, यतस्ते चिरकालात् लिखितविध्यनुसारेण तं नाकुर्व्वन्।
अनन्तरं दूता नृपस्य तदीयाध्यक्षाणाञ्च हस्तेभ्यः पत्राण्यादायेस्रायेलो ६
यिहूदाश्च सर्व्वत्र व्रजित्वा नरपतेराज्ञानुसारेण वच इदं जगदुः, हे
इस्रायेल्वंशाः, यूयम् इब्राहीम इस्हाक इस्रायेलश्च प्रभुं परमेश्वरं प्रति
परावर्त्तध्वं, तेनाश्शूरीयनरपतीनां हस्तेभ्यो ऽवशिष्टा युष्माकं ये मानवा
रक्षां प्राप्तास्तान् प्रति स परावर्त्तिष्यते। युष्माकं पितरो भ्रातरश्च ७
स्वेषां पूर्व्वपुरुषाणां प्रभोः परमेश्वरस्य विरुद्धम् अपराधं कृतवन्तस्तत्का-
रणात् तेन विनाशे समर्पिता अभवन् युष्माभिरेतद् दृश्यते, ततो यूयं
तेषां सदृशा मा भवत। इदानीं यूयं स्वेषां पितृलोका इव स्वां स्वां ८
ग्रीवां न दृढयत, किन्तु परमेश्वरेण सह सन्धत्त, स च नित्यकालार्थं
यत् स्थानं पवित्रम् अकरोत् तदीयं तद् धर्म्मधामागत्य युष्मत्पूर्व्वपुरुषाणां
प्रभुं परमेश्वरं सेवध्वं; तथा कृते तस्य कोपाग्नि र्युष्मत्तो निवर्त्तिष्यते।
यदि यूयं परमेश्वरं प्रति परावर्त्तध्वं तर्हि युष्माकं भ्रातरो युष्माकम् ९
अपत्यानि च ये र्वन्दीकृत्य देशान्तरं निन्यिरे तैरनुकम्पिता जनपदमिमं
प्रत्यागमिष्यन्ति यतो युष्माकं प्रभुः परमेश्वरो ऽनुग्राहको दयालुश्च,
यदि यूयं तं प्रति परावर्त्तध्वं तर्हि स युष्मत्तः पराङ्मुखो न भविष्यति।
अपरं दूतेष्विफ्रयिमदेशस्य मिनशिदेशस्य च निखिलनगराणि सिवूलू- १०
नदेशञ्च गच्छत्सु मनुजास्तान् प्रति परिहासं कुर्व्वाणा आकारयन्।
तथाप्याशेरमिनशिसिवूलूनदेशेभ्यः कतिपयलोकाः स्वान् नम्रान् कुर्व्वाणा ११
यिरूशालमम् आजग्मुः। अपरं परमेश्वरस्य वाक्यानुसारेण नृपस्याधि- १२
पतीनाञ्चाज्ञाग्रहणार्थम् ईश्वरः साहाय्यं कुर्व्वन् यिहूदाजनपदीयान्
एकचित्तान् चकार।

अनन्तरं द्वितीये मासि किण्वशून्यपूपानाम् उत्सवकरणार्थं मनुजा- १३
नाम् अतीव महासमाजो यिरूशालमं समाजगाम। अपरं त उत्थाय १४

यिरूशालमस्थाः सुरवेदीः समस्ता दवयाञ्चक्रु धूपज्वालनार्थकाः सर्व्वा
१५ वेदीरप्यपसार्य्य किद्रोणस्रोतसि निचिक्षिपुः। अनन्तरं द्वितीयमासस्य
चतुर्दशे दिवसे ते निस्तारोत्सवीयबलीन् छेदयामासुः,ततो याजका लेवी-
यास्च व्रीडमानाः स्वान् प्रयतान् कृत्वा परमेश्वरस्य मन्दिरे होमार्थक-
१६ बलीन् उत्सृजुः। ईश्वरीयलोकस्य मूससो व्यवस्थानुसारेण ते यथा-
विधि स्वीयस्वीयस्थाने समतिष्ठन्त याजकास्च लेवीयानां करेभ्यो रुधिरम्
१७ आदाय सिषिचुः। समाजस्य मध्ये बहवो लोका अप्रयता आसन्
तन्निदानाद् यः कश्चित् प्रयतो नासीत् परमेश्वरस्य कृते तं प्रयतं कर्त्तुं
१८ लेवीयास्तेषां कृते निस्तारोत्सवीयबलिदाने न्ययुज्यन्त। अपरम् इफ्रयिम-
मिनशीयाखरसिबूलूनदेशेभ्य आगता बहवो मनुजाः स्वान् प्रयतान् न
कृत्वा लिखितविधेर्वैपरीत्येन निस्तारोत्सवीयबलिं बुभुजिरे।हिष्कियस्
१९ तेषां कृते प्रार्थनां विधाय कथयाञ्चकार, ये जना प्रयतस्थानस्य विध्य-
नुसारेण प्रयता न सन्तोऽपि निजपितृलोकानां प्रभोः परमेश्वरस्य गवे-
षणे निजान्तःकरणानि प्रावर्त्तयन् अनुग्राहकः परमेश्वरस्तान् क्षमतां।
२० तेन परमेश्वरो हिष्कियस्य वचसि मनो निधाय मनुजान् शुभंयून्
२१ अकरोत्। अनन्तरं यिरूशालमं समागता इस्रायेलीयवंशाः सप्तदि-
नानि यावत् महानन्देन किण्वशून्यपूपानाम् उत्सवं चक्रिरे। अपरं
लेवीया याजकास्च प्रतिदिनं परमेश्वरस्य स्तवार्थकै र्वादनैः परमेश्वरं
२२ प्रशशंसुः। अपरं ये सर्व्वे लेवीयाः परमेश्वरोद्देश्यधर्म्मज्ञाने पारदर्शिन
आसन् हिष्कियस्तै र्मधुरं संललाप। अनेन प्रकारेण त उत्सवस्य सप्त-
दिनानि यावत् मङ्गलार्थकान् बलीन् भुञ्जानाः स्वेषां पूर्व्वपुरुषाणां प्रभुं
२३ परमेश्वरं प्रशशंसुः। अनन्तरं निखिलसमाजः पुनः सप्तदिनान्युत्सवं
२४ कर्त्तुं सम्मन्त्र्य तानि सप्तदिनान्यानन्देन यापयामासुः। अपरं यिहूदीय-
नरपति र्हिष्कियः समाजाय सहस्रं वृषभान् सप्तसहस्राणि मेषांस्च
ददौ, अधिपतयस्च समाजाय सहस्रं वृषभान् दशसहस्राणि मेषांस्च
ददुः, अपरं याजकानां मध्यीया बहवः स्वान् प्रयतान् चक्रवांसः।
२५ अपरं याजकै र्लेवीयैस्च समं यिहूदावंशस्य निखिलसमाज इस्रायेल्-
वंशस्य मध्याद् आगतो निखिलसमाज इस्रायेल्देशात् समागताः प्रवा-
२६ सिनो यिहूदादेशनिवासिनस्च सर्व्व आनन्दं चक्रिरे। अनेन प्रकारेण
यिरूशालमे महान् आनन्दो बभूव,यत इस्रायेलीयनृपस्य दायूद्वंशीय-
सुलेमनः समयमारभ्य यिरूशालम एतादृक् नाभवत्।

अनन्तरं याजका लेवीयाश्च प्रोत्थाय लोकेभ्य आशिषं ददुः, तेषां २७
शब्दाश्चाश्रूयन्त, अर्थतस्तेषां प्रार्थना तस्य पवित्रं वसतिस्थानं स्वर्गं प्राप।

---

३१ एकत्रिंशोऽध्यायः।

१ पुत्तलिकादीनां विनाशः २ हिष्किथेण याजकानां पर्य्यायनिरूपणं ५ लोकैः प्रभूत-नैवेद्यानाम् आनयनं ११ याजकेभ्योऽंशदाने हिष्कियेणाध्यक्षाणां नियोजनं २० हिष्कियस्य सत्कर्म्म तस्य फलप्राप्तिश्च।

एतेषु समाप्तिं गतेषु तत् स्थानं समागता निखिलेस्रायेलीया लोका १
यिहूदादेशस्थनगराणि प्रविशन्तः प्रतिमानिवहं बभञ्जुश्चैत्यरूचान्
चिच्छिदुः, यावच्च सर्व्वथा सर्व्वेषां निःशेषं नाभवत् तावत् निखिलयि-
हूदादेशे विन्यामीनदेशे इफ्रयिमदेशे मिनशिदेशे च भ्रगुस्थानानि
वेदीश्च बभञ्जुः। अनन्तरम् इस्रायेल्वंशीयाः सर्व्वे स्वं स्वं विषयं स्वं स्वं
नगरञ्च पुन र्जग्मुः।

अपरं हिष्कियः परमेश्वरीयशिविरस्य द्वारेषु होमार्थकानां मङ्ग- २
लार्थकानाञ्च बलीनां दानार्थं परिचर्य्यार्थं धन्यवादार्थं प्रशंसार्थञ्च याज-
कानां लेवीयानाञ्चोपासनकर्म्मण्येकैकस्यांशानुसारेण याजकानां लेवीया-
नाञ्च पर्य्यायान् नियुयुजे। अपरं होमार्थम् अर्थतः परमेश्वरीयशा- ३
स्त्रस्य लेखनानुसारेण प्रातःकालिकानां सन्ध्याकालिकानां होमानां कृते
विश्रामवारेष्वमावस्यासु वार्षिकोत्सवेषु च कर्त्तव्यानां होमानां कृते च
नृपस्य सम्पत्तितो दातव्यम् अंशं निरूपयाञ्चकार। अपरं याजका ४
लेवीयाश्च यत् परमेश्वरीयशास्त्रे समासक्ता भवेयुरिति कृते स तेभ्यो
ऽंशदानार्थं यिरूशालमनिवासिनो मनुजान् आदिदेश।

एतस्य निदेशस्य प्रचारमात्राद् इस्रायेलीयवंशाः प्रथमजातानि ५
शस्यद्राक्षारसतैलमध्वादीनि भूम्युत्पन्नद्रव्याण्यतिबाहुल्येन समानिन्युः,
निखिलद्रव्याणां दशमांशानपि प्रभूतत्वेन समानिन्युः। अपरं यिहूदा- ६
देशस्थनगरेषु वसन्त इस्रायेल्वंशीया यिहूदावंशीयाश्च लोका अपि
गोमेषाणां दशमांशं निजप्रभोः परमेश्वरस्य कृते पवित्रीकृतानां पवित्र-
द्रव्याणां दशमांशञ्चानीय राशी चक्रुः। तृतीयमासे ते तेषां राशीनां ७
सञ्चयनम् आरभ्य सप्तमे मासि समापयामासुः। अनन्तरं हिष्कियो ८
ऽध्यक्षाश्च समागत्य तान् राशीन् विलोक्य परमेश्वरं तस्य प्रजा इस्राये-

९ स्वीयलोकांश्च धन्यान् जगदुः। अपरं हिष्कियस्तान् राशीनधि याज-
१० कान् लेवीयांश्च पप्रच्छ। ततः सादोकस्य वंशजातो ऽसरियनामा प्रधान-
याजकस्तं प्रतिजगाद, यदवधि लोकाः परमेश्वरस्य मन्दिरं नैवेद्यम्
आनेतुम् आरेभिरे तदवधि भोज्यं वस्तु प्रभूतं समभवत् प्रभूतञ्चाति-
रिच्यते यतः परमेश्वरः स्वीयलोकेभ्य आशिषं ददौ तेनैष धनराशिरव-
शिष्टो ऽभवत्।
११ अनन्तरं हिष्कियः परमेश्वरस्य मन्दिरे ऽगाराणां निर्म्माणायाज्ञा-
१२ पयाञ्चकार तेन ते ऽगाराणि निर्म्ममिरे। अपरं नैवेद्यानि दशमांशान्
पवित्रीकृतानि वस्तूनि च विश्वास्यत्वेन तन्मध्यम् आनिन्युः, तेषाम्
अध्यक्षाणां मध्ये लेवीयः काननियो मुख्यस्तस्य भ्राता शिमियिश्च द्वितीय
१३ आसीत्। अपरं यिहियेलो ऽसिसियो नहतो ऽसाहेलो यिरेमोतो योषा-
बद इलीयेलो यिश्मखियो माहतो विनायश्चेमे हिष्कियस्य नृपस्येश्वरी-
यमन्दिराध्यक्षस्यासरियस्य च निदेशात् काननियस्य तदीयभ्रातुः शि-
१४ मियेश्चाधीना अधिपतयो ऽभवन्। अपरं यिम्नाः सुतो लेवीयः कोरिः
प्राच्या दिशो द्वारपाल आसीत् स परमेश्वरोद्देशेन निवेदितवस्तूनां
महापवित्रवस्तूनाञ्चांशनार्थम् ईश्वरोद्देशेन स्वेच्छया निवेदितवस्तूनाम्
१५ अध्यक्ष आसीत्। तस्याज्ञाग्राहिण एदनो विन्यामीनो येशूयः शिमयियो
ऽमरियः शिखनियश्चेमे याजकानां नगरेषु स्वेषां क्षुद्रमहद्भ्यो भ्रातृभ्यो
१६ विश्वास्यत्वेनांशवितरणे नियुक्ता आसन्। तदतिरिक्तं वत्सरत्रयवयस्का-
स्ततो ऽधिकवयस्का वा ये पुरुषा वंशावलौ लिखिता आसन् ये च नि-
जपर्य्यायक्रमात् परिचर्य्यार्थं कार्य्यकरणार्थं वा दिने दिने परमेश्वरस्य
१७ मन्दिरं प्राविशन्, अपरं निजपितृवंशानुसारेण वंशावलौ लिखिता
विंशतिवत्सरवयस्कास्ततो ऽधिकवयस्का वा ये याजका लेवीयाश्च स्वीये
१८ स्वीये कार्य्ये पर्य्याये च नियुक्ता आसन्, वंशावलौ लिखितास्तेषां परि-
जनाश्चार्थतस्तेषां जायाः पुत्रा दुहितरश्चैतेषां सम्पूर्णसमूहाय तेरंशा
१९ अदीयन्त, यतस्ते विश्वास्यत्वेन स्वान् प्रयतान् अकुर्व्वन्। अपरं हारोण-
वंशीययाजकानां कृते तेषां नगराणां सीमान्तःपातिक्षेत्रेषु प्रतिनगरं
निर्णीतनामानो मानवा याजकानाम् एकैकस्मै पुरुषायांशवितरणार्थं
लेवीयानां मध्ये वंशावलौ लिखितेभ्यः सर्व्वेभ्यश्चांशवितरणार्थं नियुक्ता
आसन्।
२० हिष्कियो यिहूदाः सर्व्वत्रैतादृशं चकृवान् स निजप्रभोः परमेश्वरस्य

साक्षाद् उत्तमं तुष्टिजनकं सत्यञ्च कर्म्म चक्तवान्। स निजेश्वरस्यान्वेष- ११
णार्थम् ईश्वरीयमन्दिरस्य परिचर्य्यां शास्त्रं विधिञ्चाधि यस्मिन् कर्म्मणि
प्रावर्त्तत तत् निजनिखिलान्तःकरणेन समं कृत्वा श्रीमतो बभूवान्।

---

३२ द्वात्रिंशोऽध्यायः।

१ सन्हेरीवेन यिरूशालमस्य हिष्किियस्य च रोधनं ९ ईश्वरस्य वैपरीत्येन सन्हेरीवस्य कथनं १० हिष्कियस्य प्रार्थनं परमेश्वरस्योत्तरं २४ हिष्कियस्य पीडायाः प्रतीकारः २७ तस्य धनस्य कथनं ३२ तस्य निधनञ्च।

एतेभ्यः कर्म्मभ्यः सत्यतातञ्च परम् अश्शूरीयो नरपतिः सन्हेरीव १
आगत्य यिहूदाजनपदं प्रविवेश प्राकारवेष्टितानां नगराणां विरुद्धं
शिविरं स्थापयित्वा तानि पराजयितुं मतिं चकार च। ततो हिष्कियः २
सन्हेरीवस्यागमनं यिरूशालमस्य विरुद्धं सङ्ग्रामार्थं तस्य मनसञ्च
विज्ञाय नगरस्य वहिःस्थितानां प्रस्रवणानां सलिलानि रोद्धुं निजाध्यक्षैः ३
पराक्रमिलोकैश्च समं मन्त्रयाञ्चकार ततस्ते तस्य साहाय्यं चक्रुः। अपरम ४
अश्शूरीया नृपतय आगत्य कुतो बहु सलिलं प्राप्नुयुरिति गदित्वा बहवो लोकाः समेत्य सर्व्वाणि प्रस्रवणानि देशमध्येन वहत् स्रोतञ्च रुरुधुः।
अपरं हिष्कियः स्वं बलवन्तं विधाय भग्नप्राकाराणां सर्व्वेषां जीर्णोद्धारं ५
कृत्वा तान् प्राचे दुर्गसमानान् चक्तवान् तस्य वहिश्चापरमेकं प्राकारं
निर्म्मापयामास दायूद्नगरस्थमिल्लुनामकस्य स्थानस्य जीर्णोद्धारं चकार
प्रभूतान्यस्त्राणि फलकानि च सञ्चिचाय। अपरं लोकानाम् उपरि ६
सेनापतीन् नियोज्य नगरद्वारस्थसन्निवेशे स्वसम्मुखे तान् संगृह्याश्वास-
जनकं वच इदं जगाद, यूयं बलवन्तः साहसिनश्च भवत, अश्शूरीय- ७
नृपात् तस्य सहचरात् लोकनिवहाच्च मा बिभीत त्रासयुक्ता वा मा
भवत। पश्यत तस्य सहायेभ्यो ऽस्माकम् अधिकाः सहाया विद्यन्ते।
अपरं पश्यत मांसमयो बाहुस्तस्य सहायः किन्त्वस्माकम् उपकाराया- ८
स्मानधि याधनाय चास्माकं प्रभुः परमेश्वरो ऽस्माकं सहायो विद्यते।
ततो लोका यिहूदीयनरपते र्हिष्कियस्य वचसि विश्वासं चक्रिरे।

अनन्तरम् अश्शूरीयो नरपतिः सन्हेरीवो लाखीशस्य विरुद्धं एतना- ९
भिः समं स्थितिकाले यिहूदीयनरपते र्हिष्कियस्य समीपं यिरूशालमे
विद्यमानानां सर्व्वेषां यिहूदीयलोकानां समीपञ्च निजदासान् यिरूशा-

१० तमं प्रहित्य वाचमिमाम् आदिदेश, अश्शूरीयः क्षितिपतिः सन्हेरीबो
वच इदं वदति, यूयं दृढनगरे यिरूशालमे सन्तिष्ठमानाः कस्मिन्
११ विश्वासं कुरुध्वे? अस्माकं प्रभुः परमेश्वरो ऽस्मान् अश्शूरीयनृपस्य
हस्ताद् उद्धरिष्यतीति वाक्येन हिष्किय: किं युष्मान् क्षुधया तृष्णया च
१२ आपादयितुं न भ्रमयति? एष हिष्कियः किं तस्यैव भृगुस्थानानि वेदीश्च
नादवयत्? अपरं यूयम् एकस्या वेद्याः सम्मुखे भजनं करिष्यध्वे तदु-
परि धूपान् ज्वालयिष्यध्वे चेमाम् आज्ञां स किं यिहूदावंशं यिरूशालम-
१३ निवासिनश्च नादिशत्? मया मदीयपितृलोकैश्च परदेशीया निखिला
जातीः प्रति यद्यद् अकारि यूयं किं तन्न जानीत? परदेशीयजातीनां
१४ देवाः किं मम हस्तात् स्वं स्वं जनपदम् उद्धारयितुं शेकुः? मदीयपितृ-
लोका या या जातीरुदच्छिन्दन् तासां देवानां मध्ये को देवो निजप्रजा
मम हस्ताद् उद्धर्त्तुम् अशक्नोत्? तर्हि युष्माकम् ईश्वरः किं मम हस्ताद्
१५ युष्मान् उद्धर्त्तुं शक्ष्यति? अत इदानीं हिष्कियो युष्मान् न भ्रमयतु, स
युष्मान् न वञ्चयतु, यूयं तस्मिन् मा विश्वसित, यतः कस्याश्चिज्जाते
र्वा कस्यचिज्जनपदस्य कोऽपि देवो मदीयहस्तात् मदीयपितृलोकानां
हस्ताच्च स्वप्रजा उद्धारयितुं नाशक्नोत्, ततो हेतो र्युष्माकम् ईश्वरो ऽपि
१६ मदीयहस्ताद् युष्मान् उद्धारयितुं कदापि न शक्ष्यति। तद्भिन्नं सन्हेरी-
बस्य दासाः प्रभोः परमेश्वरस्य तदीयदासस्य हिष्कियस्य च विरुद्धं पुन-
१७ रधिकं बभाषिरे। अपरम् इस्रायेलः प्रभोः परमेश्वरस्य निन्दार्थम् अप-
वादार्थञ्च स पत्रैरेतादृशं लिलेख, यथा, अन्यजनपदीयानां देवा यादृक्
मदीयहस्तात् निजप्रजा उद्धारयितुं नाशक्नुवन् तादृक् हिष्कियस्येश्वरो
१८ ऽपि स्वीयप्रजा मदीयहस्ताद् उद्धारयितुं न शक्ष्यति। अपरं ते नगरं
वशीकर्त्तुम् इच्छन्तः प्राकारोपरिस्थानां यिरूशालमीयमनुजानां शङ्कार्थं
१९ त्रासार्थञ्च यिहूदीयभाषया तेषां समीपे कोलाहलं चक्रुः। अपरं भिन्न-
देशीयजातीनां ये मनुजहस्तनिर्म्मिता देवा यिरूशालमस्येश्वरं तेषां
सदृशं विज्ञाय ते तस्य वैपरीत्येन बभाषिरे।
२० अनन्तरं हिष्कियो नृप आमोसस्य तनयो भविष्यद्वादी यिशायियश्चै-
२१ तन्निमित्तं स्वर्गं प्रति प्रार्थनां परिदेवनाञ्च चक्रतुः। अपरं परमेश्वरेण
प्रहित एको दूतो ऽश्शूरीयनृपस्य शिविरे निखिलान् पराक्रमिणो मनु-
जान् प्रधानलोकान् सेनापतींश्च व्यापादयामास ततः सन्हेरीबो म्लान-
मुखः सन् निजं जनपदं प्रजगाम। अनन्तरं तस्मिन् निजदेवस्य

मन्दिरं प्रविष्टे तदीयात्मजौ तस्मिन्नेव स्थाने खड्गेन तम् अवधिष्टं। अनेन २२
प्रकारेण परमेश्वरो हिष्कियं यिरूशालमनिवासिनश्चाशूरीयनृपतेः
सन्हेरीवस्य हस्ताद् अपरेषामपि सर्व्वेषां हस्ताद् उद्धारयाञ्चकार
सर्व्वतो दिशो ररक्ष च। तस्माद् बहवो यिरूशालमम् आगत्य परमे- २३
श्वराय नैवेद्यानि यिहूदीयनृपतये हिष्कियाय चोपायनानि ददुः, स
च ततः परं सर्व्वासां जातीनां दृष्ट्या महान् बभूव।

तस्मिन् समये हिष्कियो मृतप्रायः पीडितः सन् परमेश्वरं प्रति २४
प्रार्थनां चकार, ततः स तं प्रतिजगादाश्चर्य्यक्रियाञ्च दर्शयामास। किन्तु २५
हिष्कियो यादृग् उपकृतस्तादृक् कृतज्ञो न भूत्वा गर्व्वितमना बभूव,
तत्कारणात् तं प्रति यिहूदां यिरूशालमञ्च प्रति क्रोध उद्बभूव। तथापि २६
हिष्किये यिरूशालमनिवासिषु च मनोगर्व्वं विहाय नम्रेषु भूतेषु हि-
ष्कियस्य जीवनसमये तान् प्रति क्रोधो न प्राकाशत।

एतस्य हिष्कियस्यातीव प्रभूतम् ऐश्वर्य्यं सम्मानञ्चासीत् स च स्वार्थं २७
रजतकाञ्चनमणीनां सुगन्धिद्रव्याणां फलकानां सर्व्वप्रकाराणां मनोहर-
भाजनानाञ्च भाण्डागाराणि निर्म्मापयामास। अपरं भूम्युत्पन्नानां शस्य- २८
द्राक्षारसतैलानामपि भाण्डागाराणि नानाविधपशूनां कृते गोष्ठानि
मेषव्रजानां कृते शालाश्च निर्म्मापयामास। अपरं स स्वस्य कृते नग- २९
राणि चकार गोमेषादीनाञ्च व्रजान् सञ्चिचाय यस्माद् ईश्वरस्तस्मै
प्रभूतं धनं प्रादात्। एष हिष्किय ऊर्द्ध्वस्थगीहोनाभिधानतोयानां ३०
धारां रुद्ध्वा भूम्यध ऋजुमार्गेण दायूद्नगरस्य पश्चिमपार्श्वम् आनि-
नाय, अपरं हिष्कियः सर्व्वकार्य्येषु कृतार्थो बभूव। किन्तु जनपदे कृत- ३१
स्याश्चर्य्यकर्म्मणो विवृतिं प्रष्टुं बाबिलीयाध्यक्षैस्तं प्रति दूतेषु प्रेषित-
वत्स्वीश्वरस्तं परीक्षितुं तस्य मनसः सर्व्वभावं प्रकाशयितुञ्चेच्छन् तं
परितत्याज।

हिष्कियस्यावशिष्टं चरित्रं तस्य धर्म्मकर्म्माणि चामोससुतस्य भवि- ३२
ष्यद्वादिनो यिशायियस्य दर्शनपुस्तके यिहूदीयानाम् इस्रायेलीयानाञ्च
क्षितिपतीनां पुरावृत्तपुस्तके च लिखितानि विद्यन्ते। अनन्तरं हिष्किये ३३
निजपितृलोकैः सार्द्धं महानिद्रां गते मनुजा दायूद्वंशस्य प्रोच्चश्मशाने
तं निदधिरे, अपरं यिहूदीया यिरूशालमनिवासिनश्च मनुजास्तस्य
निधनकाले तस्य सम्मानं चक्रिरे। ततः परं तस्य तनयो मिनशिस्तस्य
पदे राजत्वं प्राप।

३३ त्रयस्त्रिंशोऽध्यायः।

१ मिनशेः कुराजत्वं २ नानाविधदेवपूजनं ११ तस्य वन्दीभवनं पुनः स्वदेशागमनं परमेश्वरस्य परिचरणं १८ तस्य विवृतिः २० तदीयतनयस्यामोनस्य निधनञ्च।

१ मिनशि द्वादशवत्सरवयसि राजत्वं कर्त्तुम् आरभ्य यिरूशालमे पञ्च-
२ पञ्चाशद्वत्सरान् राजत्वं चकृवान्। किन्तु परमेश्वर इस्रायेलीयवंशस्य
सम्मुखाद् यान् अन्यजातीयान् दवयाञ्चकार, तेषां घृणार्हाचारसमानं
कुत्सिताचारं स परमेश्वरस्य साक्षात् चकृवान्।
३ तस्य जनको हिष्कियो यानि भृगुस्थानानि विनाशितवान् स तानि
पुनर्व्वारं निर्म्मापयाञ्चकार, अपरं बालो निमित्तं वेदी र्निर्म्मापयाञ्चकार
चैत्यवृक्षान् स्थापयाञ्चकार कृत्स्नम् आकाशीयनक्षत्रगणं प्रणनाम सिषेवे
४ च। अपरं यिरूशालमे मम नाम सदाकालार्थं स्थास्यतीति वाक्यं पर-
मेश्वरो यन्मन्दिरमधि कथयामास तस्मिन् परमेश्वरीयमन्दिरे स वेदी
५ र्निर्म्मापयामास, अपरं परमेश्वरीयभवनस्य द्वयोः प्राङ्गणयोः स गगनी-
६ यतारकाणां कृते वेदी र्निर्म्मापयाञ्चकार। अपरं स हिन्नोमोपत्यकायां
निजात्मजान् वह्निं प्रवेशयाञ्चकार गणकत्वं मोहनत्वञ्चाचचार माया-
विनां भूतविदां गुणिनाञ्च कर्म्म चकृवान् इत्थं स परमेश्वरं क्रोधयितुं
७ तस्य गोचरे बहूनि कुत्सितकर्म्माणि चकृवान्। अपरं स स्वनिर्म्मितां
प्रस्तरमयीं प्रतिमां मन्दिरे स्थापयामास, किन्तु तन्मन्दिरम् अधीश्वरो
दायूदे तदीयसुताय सुलेमने च वच इदं कथितवान् एतस्मिन् मन्दिरे
सर्व्वेषाम् इस्रायेलीयवंशानां मध्यात् मयाभिरुचिते यिरूशालमे च निजं
८ नाम नित्यं मया स्थापयिष्यते। किञ्चाहं तान् यद्यद् आज्ञापितवान्
मूससः करेण च यां व्यवस्थां यान् विधीन् याश्च राजनीतीस्तेभ्यो ऽददां
ताः सर्व्वाः पालयितुं यदि ते यतन्ते, तर्हि यो जनपदस्तेषां पूर्व्वपुरुषाणां
कृते मया न्यरूप्यत, तस्य जनपदस्य मध्याद् इस्रायेलीयवंशस्य पदम-
९ हम् इतः परं नापसरिष्यामीति। अनेन प्रकारेण मिनशि यिहूदीय-
लोकान् यिरूशालमनिवासिनश्च भ्रमयन् इस्रायेलीयवंशानां सम्मुखात्
परमेश्वरेणोच्छिन्नानाम् अन्यजातीयानां क्रियाभ्यो ऽप्यधमाः क्रियाः
१० कारयामास। अनन्तरं परमेश्वरो मिनशिं तदीयप्रजाश्चोपदेशभारतीं
व्याजहार किन्तु ते तत्र मनांसि न निदधिरे।
११ अनन्तरं परमेश्वरस्तेषां प्रतिकूलम् अशूरीयमहीपतेः सेनापतीन्

आनिनाय तेन ते कण्टकानां मध्ये मिनशिं धृत्वा रकूटीयशृङ्खले र्बद्ध्वा
बाबिलं निन्युः। तत्र सो ऽत्यन्तं क्लिष्टः सन् निजप्रभुं परमेश्वरं प्रसा- १२
दयाञ्चक्रे स्वीयपूर्व्वपुरुषाणाम् ईश्वरस्य गोचर आत्मानम् अतिशयं नम्रं
चकार च। इत्थं तस्य सन्निधौ तेन प्रार्थनायां कृतायां स प्रसन्नो १३
भूत्वा तस्य प्रार्थनां निशम्य तं पुन र्यिरूशालमम् आनीय प्राप्तराज्यं
चकार, ततो यिहोवा एवेश्वरो ऽस्तीति मिनशिः परिज्ञातवान्।
तदनन्तरं स दायूद्नगरस्य वहिःस्थप्राकारं गीहोनस्य पश्चिमपार्श्वे १४
उपत्यकायाः सन्निधौ मत्स्यद्वारं यावत् निर्म्माय्यातीवोच्चं कृत्वा विस्तार्य्य
ओफलाख्यगिरिणा सह संयोजयामास। अपरं यिहूदादेशस्य प्राकार-
वेष्टितेषु निखिलनगरेषु वाहिनीपतीन् नियोजयामास। अपरं स १५
इतरान् देवान्, विशेषतः परमेश्वरस्य मन्दिरस्थां प्रतिमां परमेश्वरीय-
मन्दिरस्य शिलोच्चये यिरूशालमे च स्वेन निर्म्मिता निखिला वेदी
र्दवयित्वा नगराद् वहि र्निचिक्षेप। अपरं परमेश्वरस्य वेदीं संस्थाप्य १६
तस्यां मङ्गलार्थकान् प्रशंसार्थकांश्च बलीन् ददौ, अपरं यिहूदावंशम्
इस्रायेलः प्रभोः परमेश्वरस्य परिचरणम् आदिदेश। तथापि मनुजा- १७
स्तदानीमपि भृगुस्थानेषु बलिदानम् अकुर्व्वन् किन्तु केवलं स्वेषां प्रभुं
परमेश्वरम् उद्दिश्य तद् अकुर्व्वन्।

एतस्य मिनशेरवशिष्टं चरित्रं निजेश्वरस्य सन्निधौ प्रार्थनम् इस्राये- १८
लीयप्रभोः परमेश्वरस्य नामधेयेन ये प्रदर्शकास्तेन सह सम्भाषितवन्त-
स्तेषां वचांसि चेस्रायेलीयक्षितिपतीनां पुरावृत्तपुस्तके लिखितानि वि-
द्यन्ते। अपरं तस्य प्रार्थना तस्यानुगृहीतत्वं तस्य निखिलं पापम् अत्या- १९
चारश्च, अपरं तस्य नम्रीभवनात् प्राक् स्थाने स्थाने भृगुस्थानचैत्यवृक्ष-
खनितप्रतिमूर्त्तीनां स्थापनञ्चैतेषां सर्व्वेषां विवृतिः प्रदर्शकानां ग्रन्थेषु
लिखिता विद्यते।

अनन्तरं मिनशिः स्वीयपितृलोकैः सह महानिद्रां जगाम ततो मनुजा- २०
स्तस्य निजगेहे तं श्मशाने निदधिरे, अपरं तस्य तनय आमोनस्तस्य
पदे राजत्वं प्राप। आमोनो द्वाविंशवत्सरवयस्कः सन् राजत्वं कर्त्तुम् २१
आरभ्य यिरूशालमे द्वौ वत्सरौ राजत्वं चकृवान्। तस्य जनको मिनशि २२
र्यादृक् कृतवान्, सो ऽपि तादृक् परमेश्वरस्य साक्षात् कुत्सिताचारं
चकार। तस्य तातो मिनशि र्या याः खनितप्रतिमूर्त्तीः कृतवान् ता
उद्दिश्यामोनो बलिदानं चकृवान् तासां परिचरणञ्च चकार। किञ्च २३

तस्य जनको मिनशिः परमेश्वरस्य सन्निधौ यादृग् आत्मानं नम्रम् अकरोत्
स तथा न चकार, किन्त्वामोनः क्रमशो ऽधिकम् अपराधं चकार।
२४ अनन्तरं तस्य भृत्यास्तं प्रति द्रोहं विधाय तस्य भवने तम् अवधिषुः।
२५ अपरं देशीयलोका आमोनस्य नरपते र्द्रोहकान् सर्व्वान् हत्वा तस्य पुत्रं
योशियं तस्य पदे राजत्वे ऽभिषिषिचिरे।

---

३४ चतुस्त्रिंशोऽध्यायः।

१ योशियस्य सुराजत्वं ३ सुराप्रतिमा दूरीकरणं ८ मन्दिरस्य जीर्णोद्धारार्थं लोकानां नियोजनं १४ व्यवस्थापुस्तकस्य प्रापणं राज्ञः सन्निधौ प्रेषणञ्च २२ हुल्दाया भविष्यद्वचनं २९ व्यवस्थापुस्तकस्य पठनम् ईश्वरेण साकं नियमकरणञ्च।

१ योशियो ऽष्टवत्सरवयस्कः सन् राजत्वं कर्त्तुम् उपक्रम्य यिरूशालम
२ एकत्रिंशद्वत्सरान् राजत्वं चकृवान्। स परमेश्वरस्य समक्षं सत्कर्म्माणि
चकार निजपूर्व्वपुरुषस्य दायूदो वर्त्मनि चचार तस्य दक्षिणं वामं वा
प्रति न परावर्त्तते।
३ तस्य राजत्वस्याष्टमे वत्सरे स तरुणः सन्नपि निजपूर्व्वपुरुषस्य दायूद
ईश्वरं गवेषयितुम् उपचक्रमे। अपरं द्वादशे वत्सरे स भृगुस्थानानि
चैत्यवृक्षान् खनितान् गलितधातुनिर्म्मितान् वा विग्रहांश्च दवयित्वा
४ यिहूदादेशं यिरूशालमञ्च परिष्कर्त्तुम् आरेभे। मनुजास्तस्य समक्षं
बालो वेदी र्बभञ्जुः, तदुपरि स्थापिता रवेः प्रतिमाश्च तेन छेदयाञ्चक्रिरे,
चैत्यवृक्षाः खनिता गलितधातुनिर्म्मिता वा विग्रहास्तेन भंक्त्वा
धूलिवत् चूर्णयाञ्चक्रिरे, अपरं ये तान् उद्दिश्य मखम् अकुर्व्वन् तेषां
५ श्मशानोपरिष्टात् तानि चूर्णानि व्यकीर्य्यन्त। याजकानाम् अस्थीनि च
तेषां यज्ञवेदीनाम् उपरिष्टात् तेन दाहयाञ्चक्रिरे। इत्थं स यिहूदा-
६ देशं यिरूशालमञ्च परिचस्कार। अपरं मिनशेरिफ्रयिमस्य शिमियोनस्य
७ च नगरेषु नप्तालिं यावत् स सर्व्वत्र लोकानां भवनान्यनुसन्दधे। वेदीश्चैत्यवृक्षांश्च भञ्जयामास खनितविग्रहान् धूलिवत् चूर्णयामास कृत्स्न
इस्रायेलीयजनपदे सूर्य्यप्रतिमाश्छेदयामास च, ततः परं यिरूशालमं
पुनराजगाम।
८ अपरं तस्य राजत्वस्याष्टादशे वत्सरे जनपदस्य निवेशस्य च परिष्करणात् परं स परमेश्वरीयमन्दिरस्य जीर्णोद्धारार्थम् अत्सलियस्य तनयं

शाफनं नगराध्यक्षं मासेयं योयाहसस्य तनयं योयाहं पुरावृत्तलेख-
कञ्च प्रेषयामास। ततस्तेषु महायाजकस्य हिल्कियस्य समीपम् उपस्थि- ९
तेषु परमेश्वरस्य मन्दिरम् आनीतानि रजतान्यर्थतो मिनशिवंशस्ये-
फ्रयिमस्य कृत्स्नस्यावशिष्टेस्रायेल्वंशस्य कृत्स्नस्य यिहूदावंशस्य विन्या-
मीनवंशस्य यिरूशालमनिवासिनाञ्च करेभ्यो लेवीयद्वारपालैः सङ्गृही-
तानि रजतानि तेभ्यो ऽदीयन्त। अपरं ये परमेश्वरीयभवनाध्यक्षाः १०
कार्य्यम् असाधयन् तेषां करेषु ते तानि समर्पयामासुः। ते तु मन्दिरस्य
जीर्णोद्धारं कर्त्तुं तद् दृढयितुञ्च परमेश्वरीयमन्दिरे नियुक्तेभ्यः कर्म्मका-
रिभ्यस्तानि ददुः। अर्थतः सूत्रधारस्थपतीनां वेतनार्थं खनितपाषाणानां ११
बन्धनकाष्ठानाञ्च क्रयार्थं यिहूदीयनृपै विनष्टानाम् अगाराणां गृहका-
ष्ठस्थापनार्थञ्च तानि ददुः। ते मनुजा विश्वास्यत्वेन कर्म्म चक्रवांसः। १२
अपरं तेषाम् अध्यक्षत्वे यहत ओवदियश्चैतौ मिरारिवंशीयौ लेवीयौ
सिखरियो मिशुल्लमश्चेतिनामानौ किहातीयौ तदन्यलेवीयाश्चार्यतो
वाद्यवादने निपुणाः सर्व्वे नियुक्ता आसन्। ते भारवाहकानां सर्व्व- १२
प्रकारकर्म्मकारिणाञ्चाप्यध्यक्षा आसन्। अपरं लेवीयानां मध्ये के ऽपि
लेखका अधिपतयो द्वारपालाश्चासन्।

अनन्तरं परमेश्वरस्य मन्दिरम् आनीतानां मुद्राणां वहिरानयनकाले १४
याजको हिल्कियो मूससो हस्तेन लिखितं परमेश्वरीयव्यवस्थापुस्तकं
लेभे। अनन्तरं हिल्किय उत्तरं कुर्व्वन् लेखकं शाफनं जगाद, मया पर- १५
मेश्वरस्य मन्दिरे व्यवस्थापुस्तकम् अलम्भि। अनन्तरं हिल्कियस्तत् पुस्तकं
शाफनाय ददौ। अपरं शाफनस्तत् पुस्तकं राज्ञः समीपं समानीय पुन- १६
र्व्वारं नरपतेः समक्षम् इति निवेदयामास, त्वद्दासान् प्रति भवता समा-
दिष्टानि निखिलकर्म्माणि तैः क्रियन्ते। परमेश्वरस्य मन्दिरे लब्धा निखि- १७
ला मुद्रास्तैः सङ्गृहीताः कर्म्माध्यक्षाणां कर्म्मकारिणाञ्च करेषु समर्पया-
ञ्चक्रिरे। अनन्तरं लेखकः शाफनो नरपतिं वच इदं विज्ञापयामास, १८
याजको हिल्कियो मह्यमिदं पुस्तकम् अददात्। अनन्तरं शाफनो मही-
पतेः साक्षात् तत् पपाठ। तदानीं राजा तस्य व्यवस्थापुस्तकस्य वचांसि १९
निशम्य निजं वसनं चिच्छेद। अपरं राजा हिल्कियं शाफनस्य तनयम् २०
अहीकामं मीखायस्य तनयम् अक्वोरं लेखकं शाफनम् असायनामकं
राज्ञ एकं दासञ्चेत्याज्ञापयाञ्चकार, यूयं गत्वा मम कृत इस्रायेल्वंशस्य २१
यिहूदावंशस्य चावशिष्टलोकानाञ्च निमित्तं तस्य लब्धस्य पुस्तकस्य

वाक्यान्यधि परमेश्वरं पृच्छत, यत एतस्मिन् पुस्तके यद्यल्लिखितम् आस्ते
तदाचरणायास्माकं पूर्व्वपुरुषाः परमेश्वरस्य वाक्यं न गृहीतवन्त एत-
त्कारणाद् अस्माकं विरुद्धं परमेश्वरस्य महाक्रोधः प्रज्वलित आस्ते।
२२ अनन्तरं हिल्कियो राज्ञा नियुक्ता लोकाश्च हर्हसपौत्रस्य तिक्वाह-
तनयस्य शल्लुमाख्यस्य वसनरक्षकस्य जायाया हुल्दाभिधानाया भवि-
ष्यद्वादिन्याः समीपं जग्मुः। सा यिरूशालमस्थपाठशालायाम् अवसत्।
अनन्तरं ते तद्वचस्तस्यै कथयामासुः।
२३ सा तु तान् आचचक्षे, इस्रायेलः प्रभुः परमेश्वर इदं वचो वदति,
२४ यो मनुजो युष्मान् मम समीपं प्राहिणोत् तस्मै वच इदं कथयत। पर-
मेश्वर इति वाचं ब्रवीति, पश्याहम् एतत् स्थानं तन्निवासिनश्च प्रत्यमङ्ग-
लम् अर्थतो यिहूदीयनृपस्य साक्षात् पठिते पुस्तके लिखितानां निखि-
२५ लशापानां फलं घटयिष्यामि। यतस्ते निजनिजहस्तानां क्रियाभि र्मां
कोपयितुं मां परित्यज्येतरदेवान् उद्दिश्य धूपान् अज्वालयन् एतत्कार-
णाद् एतस्य स्थानस्य विरुद्धं मम कोपाग्निः प्रज्वलितवान् न च निर्व्वा-
२६ स्यते। परमेश्वरं परिप्रष्टुं युष्मान् प्राहिणोत् यो यिहूदीयनरपतिस्तम्
इदं वचो ब्रूत, त्वं यानि वचनान्याकर्णयस्तान्यधीस्रायेलः प्रभुः पर-
२७ मेश्वर इति भारतीं भाषते, एतस्य स्थानस्य तन्निवासिनाञ्च विरुद्धं
मम वाक्येषु त्वया श्रुतेषु त्वदीयम् अन्तःकरणं कोमलम् अभवत्, त्वञ्चे-
श्वरस्य साक्षात् नम्रो ऽभवः, मम गोचरे नम्रीभूय निजवसनानि छित्त्वा
मम सम्मुखे ऽक्रन्दश्च तन्निदानात् परमेश्वरो ब्रवीति मयापि त्वदीयं वच
२८ आकर्णितं। पश्याहं त्वदीयपितृलोकैः समं त्वां संग्रहीष्यामि त्वं शान्त्या
निजश्मशाने संग्राहीष्यसे किञ्चाहम् एतत् स्थानं तन्निवासिनश्च प्रति
यान्यशुभानि घटयिष्यामि तानि तव चाक्षुषाणि न भविष्यन्ति। अन-
न्तरं ते राजानं तां वार्त्तां जगदुः।
२९ अनन्तरं राजा दूतान् प्रहित्य यिहूदादेशस्य यिरूशालमस्य च
३० निखिलान् प्राचीनलोकान् संजग्राह। अपरं नरपतिः परमेश्वरस्य
मन्दिरं जगाम, यिहूदादेशीयाः सर्व्वे नरा यिरूशालमनिवासिनो
लोका याजका लेवीया महान्तः क्षुद्राश्च निखिलमनुजास्तेन सह
वव्रजुः। अपरं स परमेश्वरस्य मन्दिरे लब्धस्य नियमपुस्तकस्य निखि-
३१ लानि वचांसि तेषां कर्णगोचरे पाठयामास। अपरं नरपतिः स्वकीय-
स्थाने तिष्ठन् परमेश्वरस्य साक्षात् नियमम् इमं चकार, वयं परमेश्वरम्

अनुगमिष्यामो निखिलमनोभि र्निखिलान्तःकरणैश्च तस्याज्ञाः प्रामाण्य-
वचनानि विधींश्च समाचरिष्यामः पुस्तके ऽस्मिन् लिखितानि सर्व्वाणि
नियमितवाक्यानि पालयिष्यामश्चेति। अपरं यिरूशालमे बिन्यामीन- ३२
देशे च विद्यमानाः सर्व्वे मनुजास्तस्याज्ञया तं नियमम् अङ्गीचक्रिरे यि-
रूशालमनिवासिनश्चेश्वरस्यार्थतः स्वेषां पूर्व्वपुरुषाणाम् ईश्वरस्य निय-
मानुसारेण कर्त्तुम् आरेभिरे। अपरम् इस्रायेल्वंशस्याधीना यावन्तो ३३
जनपदास्तेभ्यो देशेभ्यो योशियो निखिलानि घृणार्हवस्तूनि दवयाञ्चकार,
इस्रायेल्मध्ये विद्यमानान् सर्व्वान् मनुजान् परिचर्य्याम् अर्थतस्तेषां प्रभोः
परमेश्वरस्य परिचर्य्यां कारयाञ्चकार च। तस्य यावज्जीवनं ते स्वेषां
पूर्व्वपुरुषाणां प्रभोः परमेश्वरस्यानुगमनात् न निववृतिरे।

---

३५ पञ्चत्रिंशोऽध्यायः।

१ निस्तारोत्सवकरणं २० रणे योशियस्य हतत्वं तस्य शवनिधानञ्च २५ तस्य कृते लोकानां शोचनं विलपनञ्च।

अनन्तरं योशियो यिरूशालमे परमेश्वरम् उद्दिश्य निस्तारोत्सवं १
चकृवान्। मनुजाः प्रथममासस्य चतुर्दशदिने निस्तारोत्सवस्य बलीन्
चिच्छिदुः। अपरं स याजकान् तेषां पदेषु न्ययुङ्क्त, परमेश्वरीयमन्दिरस्य २
सेवनार्थं तान् आश्वसीच्च। अपरं स निखिलेस्रायेलः शिक्षकान् ३
ईश्वरार्थपवित्रान् लेवीयान् व्याजहार, इस्रायेलीयनृपस्य दायूदस्तनयः
सुलेमान् यन्मन्दिरं निरमापयत् तन्मध्ये यूयं पवित्रां मञ्जूषां स्थापयत
तदीयभारो युष्माकं स्कन्धेषु न भविष्यति, इदानीं यूयं निजप्रभोः
परमेश्वरस्य तदीयप्रजानाञ्चेस्रायेलीयलोकानां सेवनं कुरुत। अपरम् ४
इस्रायेलीयनृपस्य दायूदो लिखनानुसारेण तदीयतनयस्य सुलेमनो
लिखनानुसारेण च यूयं स्वेषां पितृवंशेषु स्वपर्य्यायेषु नियुक्ता भवत।
अपरं युष्मदीयभ्रातृणाम् अर्थतो लोकानां पितृवंशरूपशाखागणानुसा- ५
रेण लेवीयानां पितृवंशस्य विभागानुसारेण च प्रयतस्थाने तिष्ठत।
अपरं मूससा दत्तस्य परमेश्वरीयनिदेशस्य ग्रहणार्थं निस्तारोत्सवीय- ६
बलीन् छिनुत स्वान् प्रयतीकृत्य निजभ्रातृणां कृत उपकल्पयत। अपरं ७
योशियस्तत्र विद्यमानेभ्यः सर्व्वेभ्यो निस्तारपर्व्वीयबलिदानार्थं त्रिंशत्
सहस्राणि मेषशावकान् छागवत्सांश्च ददौ, तद्भिन्नं त्रीणि सहस्राणि

८ वृषभानपि ददौ। सर्व्वाण्येतानि नृपस्य सम्पत्तेरदीयन्त। अपरं तस्या-
धिपतयः स्वेच्छया लोकेभ्यो याजकेभ्यो लेवीयेभ्यश्च दानं ददिवांसः, वि-
शेषतो हिल्कियः सिखरियो यिहीयेलश्चैते परमेश्वरीयमन्दिरस्याध्यक्षा
निस्तारोत्सवीयबलिदानार्थं षट्शताधिके द्वे सहस्रे मेषशावकान् तद्भिन्नं
९ त्रीणि शतानि वृषभान् याजकेभ्यो ददिवांसः। अपरं काननियः शिम-
यियनिथनेलनामकौ तस्य भ्रातरौ हशवियो यियूयेलो योषावदश्चैते
लेवीयानाम् अध्यक्षा निस्तारोत्सवीयबलिदानार्थं पञ्चसहस्राणि मेषशा-
१० वकान् तद्भिन्नं पञ्चशतानि वृषभान् लेवीयेभ्यो ददिवांसः। अनेन प्रकारेण
परिचर्य्यायाम् उपकल्पितायां नृपतेराज्ञानुसारेण याजकाः स्वस्वस्थानेषु
११ लेवीयाश्च निजनिजनिरूपितपदेषु तस्थिवांसः। अपरं ते निस्तारम-
होत्सवीयबलीन् चिच्छिदुः, याजकाश्च स्वहस्ते रुधिरं विचकरुः, लेवी-
१२ याश्च पशूनां चर्म्माणि प्रोत्तोलयाञ्चक्रुः। अपरं ते होमार्थकबलीन्
लोकानां पितृवंशशाखागणानुसारेण तेभ्यो दानार्थं मूससः पुस्तके लेख-
नानुसारेण परमेश्वरम् उद्दिश्योत्सर्जनार्थञ्च पृथक् चक्रुः, तद्वद् वृषभा-
१३ नपि पृथक् चक्रुः। अनन्तरं ते विधिवत् निस्तारोत्सवीयबलीन् वह्निना
बभ्रज्जुः, किन्त्वन्यान् पवित्रमांसान् पाकस्थालीषु पैत्तलपात्रेषु कटाहेषु
१४ च पेचुः, निखिललोकेभ्यः शीघ्रं परिवेशयाञ्चक्रुश्च। अनन्तरं ते स्वेषां
याजकानाञ्च कृत उपकल्पयामासुः यतो हारोणवंशीया याजका रजनीं
यावत् होमेन मेदोदाहेन च व्यस्ता आसन् तस्मात् लेवीयाः स्वेषां
१५ हारोणवंशीययाजकानाञ्च निमित्तम् उपकल्पयामासुः। अपरं दायूद
आसफस्य हेमनस्य राजकीयप्रदर्शकस्य यिदूथूनस्य चाज्ञानुसाराद्
आसफवंशीयगाथकाः स्वेषां स्थानेष्वतिष्ठन् दौवारिकाश्च प्रतिद्वारम्
अतिष्ठन् ते स्वेषां कार्य्याणि न तत्यजुः, यस्मात् तेषां भ्रातरो लेवीया-
१६ स्तेषां कृत उपाकल्पयन्। अनेन प्रकारेण नृपते र्योशियस्याज्ञानुसारेण
निस्तारोत्सवकरणार्थं परमेश्वरस्य वेद्यां होमीयबलिदानार्थञ्च तस्मिन्
१७ दिने परमेश्वरस्य निखिला परिचर्य्या कल्पिता। समुपस्थिता इस्रायेलीय-
वंशास्तस्मिन् समये निस्तारोत्सवं ततः परं सप्तदिनानि यावत् किण्व-
१८ शून्यपूपानाम् उत्सवञ्च चक्रिरे। भविष्यद्वादिनः शिमूयेलस्य समयमार-
भ्यैतादृङ्निस्तारोत्सव इस्रायेलि कदापि नाकारि। अपरं तदानीं योशियो
याजका लेवीया निखिलयिहूदावंश इस्रायेलीयानाम् उपस्थिता लोका
यिरूशालमनिवासिनश्च यादृशं निस्तारोत्सवम् अकुर्व्वन् तादृशम् इस्रा-

येलीयन्टपगणो ऽपि न चक्रवान्। योशियस्य राजत्वस्याष्टादशे वत्सरे १९
एष निस्तारोत्सवो ऽकारि।

एतत्सर्व्वस्मात् परं योशियेन मन्दिरे स्थिते मिस्रीयो नृपति र्निखुः २०
फरातसरितः समीपे कर्किमीशे योधनार्थम् आजगाम ततो योशिय-
स्तस्य विरुद्धं जग्मिवान्। किन्तु स दूतान् प्रहित्य वच इदं कथयामास २१
हे यिहूदीयराज त्वया सह मम किं कार्य्यं? अहमद्य तव विरुद्धं
नागमं किन्तु येन वंशेन साकं मम समर आस्ते तस्य विरुद्धम् आगतवा-
नहम् ईश्वरश्च मां त्वरयितुं स्वीकृतवान्। अतो मम सहायाद् ईश्वरात्
निवर्त्तस्व, न चेत् स त्वां व्यापादयिष्यति। तथापि योशिय ईश्वरीय- २२
वदनान्निःसृतेषु निखो वचनेषु मनो न निधाय तस्मात् पराङ्मुखो न
भवन् तेन समं समरं कर्त्तुं परवेशं धारयामास मगिद्दुनामिकायां
निम्नभूमौ रणं कर्त्तुं जगाम च। ततो धनुर्द्धरै र्नृपते र्योशियस्य गात्रे २३
शरेषु निक्षिप्तेषु नृपतिः स्वीयदासान् जगाद, अहम् अतीव व्यथितो
ऽस्मि, मां स्थानान्तरं नयत। ततस्तस्य दासास्तस्माद् रथात् तं बहि- २४
ष्कृत्य तस्य द्वितीये रथे आरोप्य यिरूशालमं निन्युः, तदा स ममार
निजपितृलोकानां श्मशाने निदधे च। अनन्तरं यिहूदावंशीया इस्रा-
येल्वंशीयाश्च सर्व्वे लोका योशियस्य निमित्तं महाशोकं चक्रवांसः।

अपरं यिरिमियो योशियस्य निमित्तं विलापगीतानि रचयामास २५
तस्माद् गायका गायिकाश्चाद्यापि निजनिजविलापगानेषु योशियम्
उपगायन्ति लोकाश्च विधिमिव तानीस्रायेल्वंशम् आदिशन्। पश्य
तानि विलापपुस्तके लिखितानि विद्यन्ते। एतस्य योशियस्यावशिष्टं २६
चरित्रं परमेश्वरीयशास्त्रस्य लिखनानुयायीनि तस्य धर्म्मकर्म्माणि तस्या- २७
द्यन्ता निखिला वृत्तिश्चैतानि सर्व्वाणीस्रायेलीयानां यिहूदीयानाञ्च
नृपतीनां पुरावृत्तपुस्तके लिखितानि विद्यन्ते।

---

३६ षट्त्रिंशोऽध्यायः।

१ यिहोयाहसस्य राजत्वं पदच्युतत्वञ्च ५ कुराजत्वकारणाद् यिहोयाकीमस्य बाबिलि प्रवासः ९ कुराजत्वनिदानाद् यिहोयाखीनस्यापि बाबिलि प्रवासः ११ सिदिकियस्य राज्यप्राप्तिः पातककरणञ्च १४ पातकनिदानाद् यिरूशालमस्य दण्डनं विनाशनञ्च २२ खसस्य घोषणञ्च।

अनन्तरं देशीयमनुजा योशियस्य तनयं यिहोयाहसं गृहीत्वा तस्य १

१ जनकस्य पदे यिरूशालमे राजानं चक्रुः। यिहोयाहसस्त्रयोविंशति-
वत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्य यिरूशालमे त्रीन् मासान्
३ राजत्वं चकार। अनन्तरं मिस्रीयनरपति र्यिरूशालमे तं पदच्युतं
कृत्वा देशे शतकिक्कारपरिमितं रजतं किक्कारैकपरिमितं काञ्चनञ्च दण्डं
४ निरूपयामास। अनन्तरं मिस्रीयो राजा तस्य भ्रातरम् इलियाकीमं
यिहूदायिरूशालमयो राजानं चकार तदीयं नाम यिहोयाकीम इति
चकार च। अपरं निखुस्तस्य भ्रातरं यिहोयाहसं मिसरं निनाय।
५ यिहोयाकीमः पञ्चविंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्य
यिरूशालम एकादश वत्सरान् राजत्वं चकार, स निजप्रभोः परमे-
६ श्वरस्य गोचरे कुत्सिताचारं चकार। ततः परं बाबिलीयनृपति र्निवू-
खद्नित्सरस्तस्य विरुद्धम् आगत्य तं पित्तलीयशृङ्खलै र्बद्ध्वा बाबिलं नेतुम्
७ उद्यतवान्। अपरं निवूखद्नित्सरः परमेश्वरीयमन्दिरस्य कतिपयानि
८ भाजनान्यपि बाबिलं नीत्वा बाबिलस्थे निजप्रासादे निदधे। एतस्य यि-
होयाकीमस्यावशिष्टं चरित्रं तेन कृतानि घृणार्हकर्म्माणि तदीया निखि-
लदोषाश्चैतानि सर्व्वाणीस्रायेलीयानां यिहूदीयानाञ्च भूपतीनां पुरा-
वृत्तपुस्तके लिखितानि विद्यन्ते। अनन्तरं तस्य तनयो यिहोयाखीनस्तस्य
पदे राजा बभूव।
९ यिहोयाखीनो ऽष्टादशवत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्य त्रीन्
मासान् दश दिनानि च यिरूशालमे राजत्वं चकृवान्। स परमेश्वरस्य
१० गोचरे कुत्सिताचारं चकृवान्। तद्वत्सरान्ते मह्मीपति र्निवूखद्नित्सरो
लोकान् प्रहित्य तं परमेश्वरस्य मन्दिरस्थितानि वाञ्छनीयानि भाज-
नानि च बाबिलं नीतवान्। अपरं तस्य पितृव्यं सिदिकियं यिहूदा यि-
रूशालमस्य च राजत्वे नियोजयामास।
११ सिदिकिय एकविंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुम् आरभ्यैकादश-
१२ वत्सरान् यावद् यिरूशालमे राजत्वं चकार। स निजप्रभोः परमेश्व-
रस्य गोचरे कुत्सिताचारं चकृवान् परमेश्वरीयवाक्यप्रकाशकस्य भवि-
१३ ष्यद्वादिनो यिरिमियस्य सम्मुख आत्मानं न नम्रीचकार। अपरं यो
निवूखद्नित्सरो नरपतिस्तम् ईश्वरस्य नाम्ना शपथं कारयामास तस्य
विश्वासघातको भूत्वा स स्वग्रीवां दृढयित्वा निजम् अन्तःकरणं कठोरं
विधायेस्रायेलः प्रभुं परमेश्वरं प्रति न परावृत्ते।
१४ अपरं प्रधानयाजका देशीयलोकाश्चान्यजातीयानां घृणार्हकर्म्मानुसा-

रेण बहून् अपराधान् चक्रवांसः। अपरं परमेश्वरो यिरूशालमे यन्म-
न्दिरं पवित्रीकृतवान् तद् अशुचि चक्रुः। तेषां पितृलोकानां प्रभुः पर- १५
मेश्वरो निजप्रजाः स्वीयवासस्थानञ्च कम्पयित्वा महायत्नेन निजदूतान्
तेषां समीपं प्रेषयामास। किन्तु त ईश्वरस्य दूतान् प्रति परिहासं १६
विदधिरे तस्य वचनानि तुच्छीचक्रुस्तदीयभविष्यद्वादिन आकारयामा-
सुश्च तन्निदानात् स्वप्रजानां प्रतिकूलम् ईश्वरस्य कोपः समभवत् स
केनापि प्रतिकर्त्तुं नाशक्यत। ततः स तेषां विरुद्धं कस्दीयानां नर- १७
पतिम् आनिनाय स तेषां धर्म्मधाम्नि तेषां तरुणजनान् चन्द्रहासेन
जघान तरुणान् तरुणीः स्थविरान् पलितान् वा प्रति कृपां न चकार,
ईश्वरः सर्व्वमेव तस्य हस्ते समर्पयामास। स ईश्वरीयमन्दिरस्य क्षुद्राणि १८
महान्ति च निखिलभाजनानि परमेश्वरीयमन्दिरस्य वित्तानि राज्ञो
ऽध्यक्षाणाञ्च वित्तानि च सर्व्वमेव बाबिलं निनाय। अपरं तदीयलोका १९
ईश्वरीयं मन्दिरं दाहयामासु र्यिरूशालमस्य प्राचीरं बभञ्जुस्तत्या
निखिला अट्टालिका दाहयामासुः सर्व्वाणि मनोरम्यभाजनानि विनाश-
यामासुश्च। अपरम् असिनावशिष्टान् लोकान् स बाबिलं नीत्वा प्रवा- २०
सयामास। ततो यावत् पारसीकं राजत्वं नास्थाप्यत तावत् ते तस्य
तदीयवंशस्य च दासा बभूवुः। अपरं यिरिमियेणोक्तं परमेश्वरस्य २१
वाक्यं यत् सिद्धिं गच्छेत् तदर्थं यावत् जनपदः स्वीयं निरूपितं विश्रामं
न बुभोज तावद् अर्थतः सप्ततिवत्सरान् यावत् तेषां देशो ऽनुप्तस्तिष्ठन्
विश्रामं चकार।

अपरं यिरिमियेण प्रोक्तस्य परमेश्वरीयवचनस्य सिद्ध्यर्थं पारसीक- २२
नृपतेः खसस्य राजत्वस्य प्रथमे वत्सरे परमेश्वरः पारसीकनरपतेः खसस्य
मनः प्रवर्त्तयामास ततः स निजराष्ट्रस्य सर्व्वत्र घोषणया पत्रिकया च
वच इदं प्रचारयामास, पारसीकनृपतिः खस इमां भारतीं कथयति, २३
स्वर्गीयः प्रभुः परमेश्वरः पृथिव्या निखिलानि राष्ट्राणि मह्यम् अददात्,
अपरं यिहूदाजनपदस्थे यिरूशालमे तदीयमन्दिरस्य पुनर्निर्म्माणाय
माम् आज्ञापयत्। अतो युष्माकं मध्ये तस्य लोकः को विद्यते? तस्य
प्रभुः परमेश्वरस्तस्य सहायो भूयात्, स यात्रां विदधातु।

इष्राहस्य पुस्तकं।

१ प्रथमोऽध्यायः।

१ खसस्य नृपते र्घोषणं ५ यिरूशालमं प्रति गमनाय मनुजानां प्रवर्त्तनं ७ खसेण नृप-
· तिना यिहूदीयलोकेभ्यो मन्दिरस्य भाजनानां वितरणञ्च।

१ अपरं यिरिमियेण प्रोक्तस्य परमेश्वरीयवचनस्य सिद्ध्यर्थं पारसीक-
नरपतेः खसस्य राजत्वस्य प्रथमे वत्सरे परमेश्वरः पारसीकनृपतेः
खसस्य मनः प्रवर्त्तयामास, ततः स निजराष्ट्रस्य सर्व्वत्र घोषणया पत्रि-
२ कया च वच इदं प्रचारयामास, पारसीकनृपतिः खस इमां भारतीं
कथयति, स्वर्गीयः प्रभुः परमेश्वरः पृथिव्या निखिलानि राष्ट्राणि मह्यम्
अददात्, अपरं यिहूदाजनपदस्थे यिरूशालमे तदीयमन्दिरस्य पुनर्नि-
३ र्म्माणाय माम् आज्ञापयत्। अतो युष्माकं मध्ये तस्य लोकः को विद्यते?
तस्य प्रभुः परमेश्वरस्तस्य सहायो भूयात्। स यिहूदाजनपदस्थं यिरू-
शालमं व्रजित्वा तत्र यिरूशालम इस्रायेलः प्रभोः परमेश्वरस्य मन्दिरं
४ पुनर्निर्म्मातु यतः स एव सत्य ईश्वरः। अपरं तादृशोऽवशिष्टः कश्चिज्जनो
यत्र कुत्रचित् स्थाने प्रवसति तत्स्थाननिवासिनो मनुजा यिरूशालम-
स्थस्य परमेश्वरीयमन्दिरस्य कृते स्वेच्छानैवेद्यैः सार्द्धं रजतकाञ्चनादीनां
वित्तानां पशूनाञ्च दानेन तम् उपकुर्व्वन्तु।

५ ततो यिरूशालमे परमेश्वरीयमन्दिरस्य पुनर्निर्म्माणार्थं यिहूदावंशस्य
विन्यामीनवंशस्य च प्रधानमनुजा याजका लेवीयाश्चेत्यादीनां यावतां
६ लोकानां मनांसीश्वरेण प्रावर्त्त्यन्त ते सर्व्वे यात्रां प्रचक्रिरे। चतुर्दिक्स्था
निखिलमनुजाश्च स्वेच्छानैवेद्यैः सार्द्धं रजतमयभाजनानि काञ्चनानि
तदन्यवित्तानि पशून् बहुमूल्यद्रव्याणि च तेभ्यो दत्त्वा तान् उपचक्रिरे।

७ अपरं परमेश्वरीयमन्दिरस्य यानि भाजनानि निबूखद्नित्सरेण यिरू-
शालमत आनीय स्वीयदेवमन्दिरे निहितानि नृपतिः खसस्तानि बहि-
८ श्चकार। पारसीकनृपतिः खसस्तानि कोषाध्यक्षस्य मित्रिदातस्य कराद्
गृहीत्वा शेश्बसरनाम्नो यिहूदाः शासकस्य सन्निधौ तानि गणयित्वा

समर्पयामास। तेषां द्रव्याणाम् इयं संख्या। सुवर्णमयानि त्रिंशत् पा- ९
त्राणि रजतमयानि सहस्रभाजनानि, ऊनत्रिंशत् छुरिकाः, त्रिंशत् १०
काञ्चनमयानि पानभाजनानि दशाधिकानि चतुःशतानि रजतमयानि
मध्यमपात्राणि तदन्यपात्राणाञ्च सहस्रं, साकल्येन चतुःशताधिकानि ११
पञ्चसहस्राणि सुवर्णमयानि रजतमयानि च भाजनान्यासन्। एतानि
सर्व्वाणि बाबिलतो यिरूशालमं प्रति प्रवासिनां पुनरानयनकाले शेश्-
वसर आदाय जग्मिवान्।

---

२ द्वितीयोऽध्यायः।

१ यिरूशालम आगतानां वन्दिलोकानां संख्या २६ याजकानां संख्या ४० लेवीयानां संख्या ४१ गायकानां संख्या ४२ द्वारपालानां संख्या ४३ निथीनीयानां संख्या ५५ सुलेमनो दासवंशीयानां संख्या ६१ याजकवंशीयानां संख्या ६४ सर्व्वेषां संख्या तेषां द्रव्याणि च ६८ उत्कृष्टद्रव्याणां कथनञ्च।

बाबिलीयनृपेण निवूखद्नित्सरेण बाबिले प्रवासिता जनपदस्य ये १
वन्दिलोका यिरूशालमं यिहूदादेशीयानि निजनगराणि वा प्रत्यागन्तुं
यात्रां विधाय सिरुब्बाबिलो येशूयो निहिमियः सिरायो रियेलायो २
मर्दिखयो विल्शनः मिस्परो विग्वयो रिहूमो बानाह्रश्चैतैः समं परा-
वृत्य जग्मुस्तेषाम् इस्रायेलीयलोकानां संख्या। परियोशवंशस्य शताधिके ३
द्वे सहस्रे द्विसप्ततिजनाः। शिफटियवंशस्य शतत्रयद्विसप्ततिजनाः। ४
आरहवंशस्य सप्तशतानि पञ्चसप्ततिजनाः। पहतमोयाववंशस्य येशूय- ६
योयाववंशीया अष्टशताधिके द्वे सहस्रे द्वादशजनाः। एलमवंशस्य द्वि- ७
शताधिकसहस्रं चतुःपञ्चाशज्जनाः। सत्तूवंशस्य पञ्चचत्वारिंशदधिकानि ८
नवशतानि जनाः। सक्कयवंशस्य षष्ठ्यधिकानि सप्तशतानि जनाः। बानि- १०
वंशस्य द्विचत्वारिंशदधिकानि षट्शतानि जनाः। वेवयवंशस्य त्रयोविं- ११
शत्यधिकानि षट्शतानि जनाः। असगदवंशस्य द्विशताधिकसहस्रं द्वा- १२
विंशतिजनाः। अदोनीकामवंशस्य षट्षष्ठ्यधिकानि षट्शतानि जनाः। १३
विग्वयवंशस्य षट्पञ्चाशदधिके द्वे सहस्रे जनाः। आदीनवंशस्य चतुःप- १५
ञ्चाशदधिकानि चत्वारि शतानि जनाः। अपरं आटेर्वंशस्य हिष्कियवंशी- १६
या अष्टनवतिजनाः। वेत्सयवंशस्य त्रयोविंशत्यधिकानि त्रिशतानि जनाः। १७
योराहवंशस्य द्वादशाधिकशतं जनाः। हश्रूमवंशस्य त्रयोविंशत्यधिके द्वे १९
शते जनाः। गिब्बरवंशस्य पञ्चनवतिजनाः। अपरं बैतलेहमवंशस्य त्रयो- २१

२२ विंशत्यधिकं शतं जनाः। निटोफानिवासिनां षट्पञ्चाशत् जनाः। अना-
२४ थोतनिवासिनाम् अष्टाविंशत्यधिकं शतं जनाः। अस्मावतवंशस्य द्वि-
२५ चत्वारिंशज्जनाः। किरियतयियारीमवंशस्य किफीरावंशस्य वेरोतवंशस्य
२६ च त्रयश्चत्वारिंशदधिकानि सप्त शतानि जनाः। रामतवंशस्य गेवावंशस्य
२७ चैकविंशत्यधिकानि षट्शतानि जनाः। मिक्मसनिवासिनां द्वाविंशत्य-
२८ धिकं शतं जनाः। वैथेलनिवासिनाम् अयनिवासिनाञ्च त्रयोविंशत्यधिके
३० द्वे शते जनाः। निवोवंशस्य द्विपञ्चाशत् जनाः। मग्वीशवंशस्य षट्प-
३१ ञ्चाशदधिकं शतं जनाः। अन्यैलमवंशस्य चतुःपञ्चाशदधिकशतद्वयाधिकं
३२ सहस्रं जनाः। हारीमवंशस्य विंशत्यधिकानि त्रीणि शतानि जनाः।
३३ लोदवंशस्य हादीदवंशस्य ओनोवंशस्य च पञ्चविंशत्यधिकानि सप्त श-
३४ तानि जनाः। यिरीहुवंशस्य पञ्चचत्वारिंशदधिकानि त्रीणि शतानि
३५ जनाः। सिनायावंशस्य त्रिंशदधिकषट्शताधिकानि त्रीणि सहस्राणि
जना आसन्।

३६ याजकानां संख्येयं। येशूयवंशजयिदयियवंशस्य त्रिसप्तत्यधिकानि न-
३७ वशतानि जनाः। इम्मेरवंशस्य द्विपञ्चाशदधिकं सहस्रं जनाः। पशहूर-
३९ वंशस्य सप्तचत्वारिंशदधिकशतद्वयाधिकं सहस्रं जनाः। हारीमवंशस्य
सप्तदशाधिकं सहस्रं जना आसन्।

४० लेवीयानां संख्येयं। होदवियवंशे येशूयस्य कद्मीयेलस्य च वंशस्य
चतुःसप्ततिजना आसन्।

४१ गायकानां संख्येयं। आसफवंशस्याष्टाविंशत्यधिकं शतं जना आसन्।

४२ द्वारपालानां संख्येयं। शल्लूमवंशस्याटेरवंशस्य टल्मोनवंशस्याक्कूव-
वंशस्य हटीटावंशस्य शोवयवंशस्य च साकल्यत ऊनचत्वारिंशदधिकं
शतं जना आसन्।

४३ निथीनीयलोकानां संख्येयं। सीहो हसूफाः टव्वायोतः केरोसः सीयः
४७ पादोनो लिवानाहो हगावो ऽक्कूवो हागवः शल्मयो हाननो गिद्देलो
५० गहरो राया रित्सीनो निकोदो गसम उषः पासेहो वेषयो ऽस्नाहो
५२ मियूनीयो निफूषीयो वक्वूको हकूफा हरहूरो वस्लूतो मिहीदा
५४ हर्शा वर्कोसः सीषिराः तेमहो नित्सीहो हटीफाश्चैतेषां सर्व्वेषां वंश-
निवह आसीत्।

५५ सुलेमनो दासानां सन्ताननिवहस्य संख्येयं। सोटयः सोफेरतः पि-
५७ रूदाः यालाहो दर्कोनो गिद्देलः शिफटियो हटीलः पोखेरतहत्सीवा-

यीम आमिश्चैतेषां सर्व्वेषां सन्ताननिवह आसीत्। निथीनीयाः सुलेमनो ५८
दासानां सन्तानाश्च साकल्येन द्विनवत्यधिकानि त्रीणि शतानि जना
आसन्। अपरं तेल्मेलहात् तेलहर्षातः किरूवाद् अद्दनाद् इम्मेराच्चा- ५९
गता एते सर्व्वे लोका इस्रायेलीयवंशा भवन्ति नवेति निश्चयार्थं निज-
निजपितृवंशस्य गोत्रस्य च प्रमाणं दातुं न पारयामासुः, दिलायः ६०
टोबियो निकोदश्चैतेषां वंशानां द्विपञ्चाशदधिकानि षट् शतानि जनाः।
अपरं याजकवंशस्य मध्ये हवायस्य कोसस्य वर्सिल्लयस्य च सन्तानाः। ६१
एष वर्सिल्लयो गिलियदीय वर्सिल्लयस्य दुहितरमेकां व्यूह्य तस्य नाम्ना
विख्यातो ऽभवत्। वंशावल्यां गणितलोकानां मध्य इमे स्वेषां वंशपत्रं ६२
गवेषयित्वा न लेभिरे तन्निदानाद् अशुचयः सन्तो याजकपदाद् भ्रष्टा
बभूवुः। अपरं शासकस्तान् जगाद यावद् ऊरीमतुम्मीमयोरधिकारी ६३
याजक एको न भविष्यति तावत् प्रयतं वस्तु युष्माभि र्न भोक्तव्यं।

अपरं मिलिताः कृत्स्नसमाजीयाः षष्ट्यधिकशतत्रयाधिकानि द्वाचत्वा- ६४
रिंशत्सहस्राणि जना आसन्। तदन्ये तेषां दासा दास्यश्च सप्तत्रिंशद- ६५
धिकशतत्रयाधिकानि सप्त सहस्राणि जना आसन्। अपरं तेषां मध्ये
द्वे शते गायना गायन्यश्चासन्। तेषां हयाः षट्त्रिंशदधिकानि सप्त श- ६६
तान्यासन् अश्वतराश्च पञ्चचत्वारिंशदधिके द्वे शते आसन्। महाङ्गाश्च ६७
पञ्चत्रिंशदधिकानि चतुःशतानि गर्दभाश्च विंशत्यधिकसप्तशताधिकानि
षट्सहस्राण्यासन्।

अनन्तरं तेषु परमेश्वरीयमन्दिरस्य स्थानं यिरूशालममागतेषु पितृ- ६८
वंशानां कतिपये मुख्यलोकास्तस्य मन्दिरस्य स्वस्थाने निर्म्माणार्थं स्वेच्छया
दानानि ददिवांसः। ते निजनिजशक्त्यनुसारेण तस्य कर्म्मणो भाण्डागारे ६९
एकषष्टिसहस्रादर्कोनपरिमाणानि काञ्चनानि पञ्च सहस्राण्यर्द्धशेटक-
रजतानि याजकानां कृते शतं वसनानि च ददिवांसः। अनन्तरं याजका ७०
लेवीया अन्यलोकाश्चापरं गायका द्वारपाला निथीनीयाश्च निजे निजे
नगरे निखिलेस्रायेललोका निजे निजे नगरे वासं कर्त्तुम् आरेभिरे।

---

३ तृतीयोऽध्यायः।

१ ईश्वरस्य वेद्याः पुनर्निर्म्माणं ७ आनन्देन क्रन्दनेन च परमेश्वरीयमन्दिरस्य भित्ति-
मूलस्थापनं।

१ अनन्तरं सप्तमे मासे समुपस्थित इस्रायेलीयनगरनिवासिनो मनुजा
२ एको जन इव यिरूशालमि मिलितवन्तः। अपरं यिहोषादकस्य तनयो
येशूयस्तस्य याजका भ्रातरश्च शल्टीयेलस्य सुतः सिरुब्बाबिलस्तस्य भ्रा-
तृनिवहश्च समुत्थायेश्वरीयलोकस्य मूससो व्यवस्थानुसारेण होमार्थक-
३ बलीनाम् उत्सर्जनार्थम् इस्रायेलीयेश्वरस्य होमवेदिं पुनर्निर्ममिरे। ते
देशीयलोकानां भयात् तां वेदिं स्वस्थाने स्थापयाञ्चक्रिरे, अपरं परमेश्व-
रमुद्दिश्य तस्यां होमं चक्रिरे, अर्थतः प्रातःकाले सन्ध्याकाले च होमं
४ चक्रिरे। अपरं लिखितव्यवस्थानुसारत उटजानाम् उत्सवं पालयाञ्च-
क्रिरे विधिवत् यस्मिन् दिने यथा कर्त्तव्यं तस्मिन् तथैव निरूपितसङ्ख्यकं
५ होमार्थकबलिदानं चक्रिरे। अनन्तरं ते प्रत्यहम् अमावस्यासु परमेश्वरस्य
पवित्रीकृतेषु वार्षिकोत्सवेषु कस्यचिल्लोकस्य परमेश्वरमुद्दिश्य स्वेच्छया
६ नैवेद्यकरणसमये च कर्त्तव्यं होमं कर्त्तुम् आरेभिरे। सप्तममासस्य प्रथमं
दिनमारभ्य ते परमेश्वरम् उद्दिश्य होमं कर्त्तुम् आरेभिरे किन्तु तदानीं
परमेश्वरीयमन्दिरस्य भित्तिमूलं निर्म्मितं नाभवत्।
७ अपरं पारसीकन्टपतिः कोरसो यद्दानम् आज्ञापयत् तस्मात् ते तक्षकेभ्यो
निचायकेभ्यश्च मुद्रा ददिवांसः। अपरं लिवानोनाद् याफोः सागरस्य
तीरं यावद् एरषकाष्ठानाम् आनयनार्थं ते सीदोनीयेभ्यः सोरीयेभ्यश्च
८ लोकेभ्य भक्ष्यपेयद्रव्याणि तैलानि च ददिवांसः। अनन्तरं तेषु परमेश्वरीय-
मन्दिरं यिरूशालमम् आगतेषु द्वितीयवत्सरस्य द्वितीये मासि शल्टीये-
लस्य तनयः सिरुब्बाबिलो यिहोषादकस्य तनयो येशूयश्च तयोरवशिष्टो
भ्रातृनिवहो ऽर्थतो याजका लेवीया वन्दिदशातो यिरूशालमम् आगता
अपरे मनुजाश्च कर्म्मण आरम्भं चक्रिरे। अपरं परमेश्वरीयमन्दिरस्य
कार्य्याध्यक्षत्वार्थं विंशतिवत्सरवयस्कान् ततोऽधिकवत्सरवयस्कांश्च लेवी-
९ यान् न्ययुञ्जत। तदानीं येशूयस्तस्य पुत्त्रनिवहो भ्रातृनिवहश्चापरं यि-
हूदावंशीयः कद्मीयेलस्तस्य तनयनिवहश्चापरं लेविवंशीयहेनाददस्य
पुत्त्रनिवहस्तेषां पुत्त्रा भ्रातरश्चैको जन इवेश्वरीयमन्दिरस्य कर्म्मकारि-
१० णाम् अध्यक्षत्वार्थं समतिष्ठन्त। तेन निचायका यदा परमेश्वरीयमन्दि-
रस्य भित्तिमूलं निरमिमत तदानीम् इस्रायेलीयराजस्य दायूदो निरूप-
णानुसारेण परमेश्वरस्य प्रशंसनार्थं परिच्छदै र्विभूषितास्तूरीहस्ताश्च या-
११ जकाः करतालहस्ता आसफवंशीया लेवीयाश्चोपातिष्ठन्। ते परमेश्वरस्य
प्रशंसां धन्यवादश्च कुर्व्वन्तः पर्य्यायानुसारेण मिलित्वा समगायन्, यथा,

क्षेमङ्करः स एवास्ति प्रसादश्च तदीयकः।
इस्रायेलीयवंशेषु सर्व्वकालं भविष्यति॥

अपरं परमेश्वरीयमन्दिरस्य भित्तिमूलनिर्म्माणसमये परमेश्वरस्य प्रशंसां
कुर्व्वन्तो निखिललोका उच्चैःस्वरेणानन्दध्वनिं चक्रिरे। किन्तु याजकानां १२
लेवीयानां पितृवंशेषु मुख्यलोकानाञ्च मध्ये ये बहवः स्थविरा मनुजाः
पूर्व्वमन्दिरं दृष्टवन्तस्तेषां समक्षम् एतस्य मन्दिरस्य भित्तिमूले निर्म्मी-
यमाणे त उच्चैःस्वरेण क्रन्दितवन्तः परन्त्वपरे बहवः सानन्दं हर्षनादं
चक्रिरे। ततो हेतोरानन्दयुक्तसिंहनादः क्रन्दनस्य च रवो लोकै र्वि- १३
शिष्य निश्चेतुं नाशक्यत, यतो लोकैरुच्चध्वनिरक्रियत, स च रवो दूराद्
अश्रूयत।

४ चतुर्थोऽध्यायः।

१ विपक्षै र्यिहूदीयानां निचायनात् निवर्त्तनं ११ नरपतेः समीपं तैः प्रेषितस्याभियोगपत्रस्यानुरूपपत्रं १७ तान् प्रति राज्ञ आज्ञाप्रेरणं २३ निचायनस्य निवृत्तिश्च।

अनन्तरं वन्दिनो मनुजा इस्रायेलः प्रभुं परमेश्वरम् उद्दिश्य मन्दि- १
रस्य पुनर्निर्म्माणं कुर्व्वन्तीति वचो निशम्य यिहूदाबिन्यामीनयो रिपवः
सिरुब्बाबिलस्य समीपं पितृप्रधानानां समीपञ्च गत्वा तान् जगदुः, २
युष्माभिः समं वयमपि निचेष्यामो यतो यूयमिव वयमपि युष्माकं
ईश्वरं भजामहे। येनाश्शूरीयनृपेणैषरहद्दोनेन वयम् एतत् स्थानम् आ-
नीतास्तस्य राजत्वकालम् आरभ्य युष्माकम् ईश्वरम् उद्दिश्य बलिदानं
कुर्म्महे। ततः सिरुब्बाबिलो येशूय इस्रायेल इतरे निखिलाः पितृप्रधा- ३
नाश्च तान् अवदन् अस्माकम् ईश्वरस्य निमित्तम् अस्माभिः समं मन्दि-
रनिर्म्माणं युष्माभि र्न कर्त्तव्यं। पारसीकनृपतिः खसो ऽस्मान् यादृग् आ-
ज्ञापयत् तदनुसारेण केवलं वयम् इस्रायेलः प्रभोः परमेश्वरस्य मन्दिरं
निर्म्मास्यामहे। तेन देशीया मनुजा यिहूदीयलोकानां हस्तान् दुर्ब्बलान् ४
कर्त्तुं निर्म्माणे तान् क्लेशयितुञ्चारेभिरे। अपरं पारसीकनृपतेः खसस्य ५
राजत्वम् आरभ्य पारसीकनरपते र्दारा राजत्वं यावत् तेषाम् अभि-
प्रायं निरर्थकं कर्त्तुं तेषां विरुद्धं मन्त्रिणां उत्कोचं ददिवांसः। विशे- ६
षतो ऽहश्वेरस्य राजत्वस्य प्रथमे ते यिहूदायिरूशालमयो र्निवासिनां
विरुद्धम् एकम् अभियोगपत्रं लिलिखुः। अपरं अर्तसस्तस्य राजत्वकाले ७

विश्लमो मित्रिदातः टावेलस्तेषां सहायनिवहश्च पारसीकनरपतिम् अर्तसस्तं प्रति यत् पत्रं लिलिखुस्तद् अरामीयाक्षरै लिंखितम् अरा-
८ मीयभाषया बोधितञ्चासीत्। शासिता रिहूमो लेखकः शिम्शयश्च यिरूशालमस्य विरुद्धं अर्तसस्तं नृपतिं प्रति तत् पत्रं लिलिखतुः।
९ तदानीं शासिता रिहूमो लेखकः शिम्शयश्च तयोरपरे सहाया दीनीया अफर्सिखिया टर्पिलीया अफर्सीया अर्किलीया बाबिलीयाः शूशनीया
१० देहीया एलमीया महामहिम्नास्नप्परेणानीताः शोमिरोणनगरे स्थापितास्च जातयः फरातसरितो ऽवारस्था इतरा निखिला जातयश्च तादृशं पत्रं लिलिखुः।
११ ते नरपतिम् अर्त्तसस्तं प्रति यत् पत्रं प्रेषयाञ्चक्रिरे तस्यानुरूपं पत्रमित्थं। फरातसरितः पारस्था भवतो दासप्रभृतयः पत्रं लिखन्ति।
१२ नरपतेः सन्निधौ निवेदनमिदं यिहूदीया भवतः समीपाद् अस्माकं स्थानमिदं यिरूशालमम् आगत्य राजद्रोहिनगरं पुनर्निर्मिमते भित्तिमूलं
१३ निर्म्माय प्राकारं कर्त्तुम् उद्यमं कुर्व्वन्ति च। अतो नरपतये निवेदनमिदम्, एतस्मिन् नगरे पुनर्निर्म्मिते तस्य प्राकारे च स्थापिते सत्येते लोका करं राजस्वं शुल्कं वा पुन र्न दास्यन्ति तेन नृपते राजस्वस्य क्षति
१४ र्भविष्यति। वयं राजधान्या लवणभोक्तारस्तन्निदानात् नरपतेः क्षति-
१५ दर्शनम् अस्माभिरसह्यम् अतो हेतो र्दूतेन राजानं ज्ञापयामहे। निजपितृलोकानां पुरावृत्तपुस्तकम् अनुसन्धाय भवता दृश्यताम् इदं नगरं राजद्रोहि नृपाणां जनपदस्य च हानिजनकम् एतन्नगरनिवासिनश्च पूर्व्वकालम् आरभ्य कलहिनः सन्ति तन्निदानात् तद् व्यनाश्यत, एतत्
१६ तस्मात् पुरावृत्तपुस्तकात् निश्चितम् अवगमिष्यते। यदि नगरमिदं पुनर्निर्म्मीयते तस्य प्राकारश्च सम्पाद्यते तर्हि तेन सरितो ऽवारे तव कुत्राप्यधिकारो न स्थास्यति।
१७ अनन्तरं राजा शासकं रिहूमं लेखकं शिम्शयं शोमिरोणनिवासिनस्तेषाम् अपरान् सहायान् सरितो ऽवारस्थान् इतरलोकांश्च समुद्दिश्य
१८ प्रत्युत्तरं लिलेख, यूयं सर्व्वे मम नमस्कारं ज्ञास्यथ। मां प्रति यत् पत्रं
१९ युष्माभिः प्रहितं तत् मम सम्मुखे सुस्पष्टम् अपाठि, तेनाहम् आज्ञाप्यानुसन्धाय ज्ञातवान् पुरातनकालमारभ्य तन्नगरं राजद्रोह्यासीत् तन्मध्ये
२० राजद्रोह आज्ञालङ्घनञ्चाभवत्। यिरूशालमे ये पराक्रमिणो राजान आसन् ते सरितः पारस्थितानां सर्व्वेषाम् उपरिष्टाद् राजत्वम् अकुर्व्वन्

अपरं तेभ्यो राजस्वं राजकरः शुल्कश्चादीयन्त। अतस्तै र्लोकैस्तस्मात् २१
कर्म्मणो निवर्त्तितव्यं यावच्च मत्तः को ऽपि निदेशो न लभ्यते तावत् तन्नगरं
पुन र्न निर्म्मातव्यमित्याज्ञापयत। सावधानम् एतस्मिन् कर्म्मणि युष्मा- २२
कम् उपेक्षा न जायतां। राजगणस्य हानिरपचयश्च कुतो भविष्यति?
अनन्तरं रिहूमस्य लेखकस्य शिम्शयस्य तयोः सहायानाञ्च साक्षाद् २३
अर्त्तसस्तस्य पत्रे पठिते ते तूर्णं यिरूशालमे यिहूदीयानां समीपं गत्वा
बाहुबलेन तान् तस्मात् कर्म्मणो निवर्त्तयामासुः। ततो यिरूशालमस्थ- २४
स्येश्वरीयमन्दिरस्य कार्य्यं निवृत्तं बभूव, पारसीकनृपते र्दारा राजत्वस्य
द्वितीयं वत्सरं यावत् तत् निवृत्तं तस्थौ।

---

५ पञ्चमोऽध्यायः।

१ यिहूदीयानां पुनर्व्वारं निचयनारम्भः २ तान् निवारयितुं विपक्षाणां यतनं ६ दारां नरपतिं प्रति विपक्षाणाम् अनुरूपपत्रं।

अनन्तरं भविष्यद्वादी हगय इद्दोः सुतो भविष्यद्वादी सिखरियश्च १
यिहूदायिरूशालमस्थान् यिहूदीयान् प्रतीस्रायेल ईश्वरस्य नाम्ना भवि-
ष्यद्वचनं प्रचारयाञ्चक्रतुः। तेन शल्टीयेलस्य तनयः सिरुब्बाबिलो यिहो- २
षादकस्य तनयो येशूयश्च प्रोत्थाय यिरूशालम ईश्वरीयमन्दिरं पुनर्नि-
र्म्मापयितुम् आरेभाते, अपरम् ईश्वरस्य भविष्यद्वादिनौ तयोः साहाय्यं
कुर्व्वन्तौ तावुपचक्रतुः।
अनन्तरं सरितो ऽपारस्थो देशाध्यक्षस्तत्नयः सेथरबोषिनयश्च तयोः ३
सहायलोकाश्च तेषां समीपम् आगत्य तान् अवदन्, एतन्मन्दिरस्य
निर्म्माणार्थं प्राकारस्य सम्पादनार्थञ्च युष्मान् क आज्ञापयत्? तदानीं ४
यैरिदं निचयनं क्रियते तेषां कानि नामानीति वयं तेषां प्रश्नानुसारेण
कथितवन्तः। किन्तु यिहूदीयानां प्राचीनलोकेष्वीश्वरस्य कृपादृष्टौ सत्यां ५
वैरिणो दारा नृपतेराज्ञां विना तान् न निवारयामासुः। अनन्तरम्
एतत् कर्म्माधि ते पत्रं लिखित्वा प्रेषयाञ्चक्रिरे।
अनन्तरं सरितो ऽपारस्थो देशाध्यक्षस्तत्नयः सेथरबोषिनयो नद्या ६
अपारस्थास्तेषां सहाया अफर्सिखीया लोकाश्च नरपतिं दारां प्रति यत्
पत्रं प्रेषयाञ्चक्रिरे तस्यानुरूपं पत्रमेतत्। ते पत्रेण स्वनिवेदनं ज्ञापय- ७
न्तस्तं प्रत्येतानि वचांसि लिलिखुः, दारानरपतेः सर्व्वञ्च मङ्गलं भूयात्।

८ नरपतेः सन्निधौ निवेदनमस्माकं। वयं यिहूदादेशे महत ईश्वरस्य मन्दिरम् अगच्छाम, तत् तच्छितपाषाणैः कुड्येषु स्थापितैः काष्ठैश्च नि-
९ र्म्मीयते। तत् कर्म्म त्वरितं क्रियते तेषां करैरतिशयं वर्द्धते च। ततो वयं तान् प्राचीनलोकान् अपृच्छाम, एतन्मन्दिरनिर्म्माणार्थं प्राकारनि-
१० चयनार्थञ्च युष्मान् क आज्ञापयत्? अपरं वयं तेषां प्रमुखलोकानां ना-
११ मानि लिखित्वा त्वां ज्ञापयितुं तेषां नामान्यपि पृष्टवन्तः। तेन तैरस्मान् प्रतिगदितं वयं द्यावापृथिव्योरीश्वरस्य दासाः, इदञ्च यन्मन्दिरम् अस्माभिः पुन र्निर्म्मीयते तद् बहुवत्सरेभ्यः पूर्व्वं निरमायि, तत् केनचिद्
१२ इस्रायेलीयेन भूपतिना निर्म्माय स्थापितमासीत्। किन्त्वस्माकं पूर्व्वपुरुषैः स्वर्गीय ईश्वरे क्रोधिते सति स तान् बाबिलीयनरपतेः कस्दीयनिवुखद्नित्सरस्य हस्ते समार्पयत् तेनैवेदं मन्दिरं भग्नं लोकाश्च बाबिलं
१३ नीताः। किन्तु बाबिलीयनरपतेः खसस्य राजत्वस्य प्रथमे वत्सरे खसो
१४ नृप एतस्येश्वरीयमन्दिरस्य पुन र्निर्म्माणम् आज्ञापयत्। अपरं निवुखद्नित्सर ईश्वरीयमन्दिरस्य यानि कनकरजतमयानि भाजनानि यिरूशालमस्थमन्दिरात् समादाय बाबिलस्थप्रासादे न्यधत्त, तानि निखिलभाजनानि नृपतिः खसो बाबिलस्थप्रासादाद् गृहीत्वा शेषवसरनाम-
१५ कस्य शासकस्य करे समार्पयत्। अपरं तम् आचचक्षे, त्वम् एतानि भाजनान्यादाय यिरूशालमस्थं मन्दिरं गत्वेश्वरस्य मन्दिरं निजस्थाने पुन
१६ र्निर्म्मापय। तेन शेषवसर आगत्य यिरूशालमस्थमन्दिरस्य भित्तिमूलं चकार तं कालमारभ्य यावदद्यैतस्य निचयनं भवति समाप्ति र्नाभवत्।
१७ अत इदानीं यदि राज्ञे रोचते तर्हि नरपतिः खसो यिरूशालमस्थस्येश्वरीयमन्दिरस्य पुन र्निर्म्माणम् आज्ञापयत् न वैतस्यानुसन्धानं बाबिलस्थे राजकीयधनागारे क्रियताम्। एतस्मिन् विषये नृपतिरस्मान् प्रति निजाज्ञां प्रेषयतु।

---

६ षष्ठोऽध्यायः।

१ मन्दिरस्य निर्म्माणार्थं दारा नूतनो निदेशः १३ मन्दिरस्य कर्म्मसमापनं १६ मन्दिरस्य प्रतिष्ठापनं १९ निस्तारोत्सवस्य समाचरणञ्च।

१ अनन्तरं दारा नृपतेराज्ञया बाबिलस्थधनागारस्य लिपिशालायां
२ तस्य पत्रस्य गवेषणे कृते मादीयजनपदस्थाहमियानाम्नि राजनिवेशने

पत्रमेकम् अलम्भि तत्र स्मरणार्थकं वच इदं लिखितमासीत्। नरपतेः ३
खेसस्य प्रथमवत्सरे खेसो नृपो यिरूशालमस्थम् ईश्वरीयमन्दिरमधि
समाज्ञापयत्, मनुजा यत्र स्थाने बलिदानम् अकुर्व्वन् तन्मन्दिरं पुन
र्निर्म्मीयतां तस्य भित्तिमूलञ्च क्रियतां, अपरं तस्योर्द्ध्वत्वं षष्टिहस्ताः
प्रस्थत्वञ्च षष्टिहस्ता भविष्यति। अपरं तदर्थं पृथुलपाषाणानां तिस्रः ४
पङ्क्तयो नवीनकाष्ठानाञ्चैका पङ्क्ति र्निचीयतां राजनिवेशनाच्च तस्य धन-
व्ययो भवतु। अपरं निवुखद्नित्सरो यानि यानि काञ्चनमयानि रज- ५
तमयानि च भाजनानि यिरूशालमस्थमन्दिराद् गृहीत्वा बाबिलम्
आनयत् तानि सर्व्वाणि पुन र्दातव्यानि, तानि यिरूशालमस्थमन्दिरे
निजं स्थानं नायिष्यन्ते तत्रेश्वरस्य गृहे निधास्यन्ते च। इदानीं हे ६
नद्याः पारस्थदेशाध्यक्ष ततनय, हे शेथरबोषिनय, युवाभ्यां नद्याः पारस्थै
र्युवयोः सहायैरफर्सिखीयैश्च तस्माद् दूरे स्थातव्यं। ईश्वरीयमन्दिरस्य ७
कार्य्यं किञ्चिदपि मा बाधध्वं यिहूदीयानाम् अध्यक्षो यिहूदीयानां
प्राचीनलोकास्वेश्वरीयमन्दिरं तदीयस्थाने निर्म्मापयन्तु। अपरं तस्येश्व- ८
रीयमन्दिरस्य निचयनाय यिहूदीयानां प्राचीनलोका युष्माभिः कीदृग्
उपकर्त्तव्यास्तद् आज्ञापयामि तेषां यद् बाधा न जायते तत्कृते राजको-
षाद् अर्थतो नद्याः पारस्थदेशीयकरेभ्यो ऽर्थास्तेभ्यो दातव्याः। अपरं ते यत् ९
स्वर्गीयेश्वरम् उद्दिश्य सुगन्धियज्ञान् कुर्व्वन्ति यच्च नृपस्य तदीयपुत्राणाञ्च
जीवनं प्रार्थयन्ते तन्निमित्तं यिरूशालमस्थानां याजकानां निरूपणानु- १०
सारेण यानि वस्तूनि तेषामावश्यकानि तान्यर्थतः स्वर्गीयेश्वराय होमा-
र्थकबलिदानार्थं युववृषभा मेषा मेषशावकास्तथापरं गोधूमलवणद्राक्षा-
रसतैलान्यबाधं दिने दिने तेभ्यो दातव्यानि। अपरम् आज्ञापयामि ११
यः कश्चिद् इमाम् आज्ञां लङ्घति तस्य गृहात् नीतं काष्ठं भूमौ स्थाप्यतां
स च तस्मिन् बद्धो म्रियतां तस्य गृहञ्चावकराणां राशि र्भवतु। राजा १२
वा प्रजा यः कश्चिद् आज्ञालङ्घी भूत्वा यिरूशालमस्थस्येश्वरीयमन्दिरस्य
विनाशार्थं हस्तं प्रसारयिष्यति स तत्रैव स्वनामस्थापयित्रेश्वरेण विना-
श्यतां। अहं दारा निदेशं करोमि तूर्णमेतत् क्रियतां।

अपरं नद्या अवारस्थो देशाध्यक्षस्ततनयः शेथरबोषिनयस्तयोः सहा- १३
यलोकाश्च नृपस्य दारा निदेशप्रेरणात् तत् त्वरितम् अकुर्व्वन्। ततो १४
यिहूदीयानां प्राचीनमनुजा निर्म्मितिम् अकुर्व्वन् भविष्यद्वादिनो हग-
यस्येद्दोः पुत्रस्य सिखरियस्य चेश्वरीयवाण्या ते कृतार्था अभवन्। इस्रा-

येन ईश्वरेण प्रहिताज्ञानुसारेण पारसीकराजस्य खसस्य दारा अर्त्त-
सस्तस्य च निदेशानुसारेण च ते निर्म्मितिं कृत्वा कर्म्मसाङ्गम् अकुर्व्वन् ।
१५ नरपते र्दारा राजत्वस्य षष्ठे वत्सरे ऽदरमासस्य तृतीयदिने मन्दिरस्य
निर्म्माणं समाप्तिं प्राप्नोत् ।
१६ अनन्तरम् इस्रायेलीयवंशा याजका लेवीया अन्ये युद्धदासा मनु-
१७ जाश्च सानन्दम् ईश्वरीयमन्दिरं प्रतिष्ठापयामासुः । ईश्वरीयमन्दिरस्य
प्रतिष्ठायाः समये ते शतं वृषभान् द्वे शते मेषान् चतुःशतानि मेषवत्सांश्च
बलित्वेन ददिवांसः । अपरं निखिलेस्रायेलीयानां पातकप्रायश्चित्तबलि-
दानार्थम् इस्रायेलीयवंशानां संख्यानुसारेण द्वादश छागास्तैरुदसृज्यन्त ।
१८ अपरं मूससो ग्रन्थे यल्लिखितं तदनुसारेण यिरूशालम ईश्वरस्य परि-
चर्य्यार्थं याजकान् स्वीयपदेषु लेवीयांश्च स्वीयपर्य्यायेषु न्ययुंक्त ।
१९ अनन्तरं प्रथममासस्य चतुर्दशदिने युद्धदासानां सन्ताना निस्तारो-
२० त्सवम् अकुर्व्वन् । यतो याजका लेवीयाश्चैकस्मिन् समये स्वान् अपावयन्
सर्व्वे शुचयो ऽभवन् । अपरं युद्धदासानां स्वकीयभ्रातॄणां याजकानां स्वे-
२१ षाञ्च कृते निस्तारोत्सवीयबलीन् अच्छिन्दन् । अपरं वन्दित्वात् पुनरागता
इस्रायेलवंशा अपरम् इस्रायेलः प्रभोः परमेश्वरस्य भजनार्थं तेषां पक्षीया
भवितुं यावन्तो लोकास्तत्रत्यानाम् इतरजातीयलोकानाम् अशुचित्वात्
२२ स्वान् विभिन्नान् अकुर्व्वन् ते निखिलास्तान् बलीन् बुभुजिरे । अपरं
ते सप्तदिनानि यावत् सानन्दं किण्वशून्यानां पूपानाम् उत्सवम् अकु-
र्व्वन् । यतो हेतोः परमेश्वरस्तान् आनन्दयुक्तान् अकरोत् इस्रायेलीये-
श्वरस्य मन्दिरीयकार्य्ये तेषां हस्तानां सबलत्वकरणार्थम् अशूरीयनरपते
र्मनस्तान् प्रत्यनुकूलं कृतवांश्च ।

७ सप्तमोऽध्यायः ।

१ इस्राहप्रभृतीनां यिरूशालमं प्रति गमनं ११ इस्राहं प्रत्यर्तसस्तस्य निदेशः २७ इस्राहेण परमेश्वरस्य दण्डवत् प्रणमनं ।

१ तदनन्तरं प्रधानयाजकस्य हारोणस्य तनय इलियासरः, इलियास-
रस्य तनयः पीनिहसः, पीनिहसस्य तनयो ऽवीशूयः, अवीशूयस्य तनयो
२ वुक्किः, वुक्केस्तनय उषिः, उषेस्तनयः सिरहियः, सिरहियस्य तनयो मि-
३ रायोतः, मिरायोतस्य तनयो ऽसरियः, असरियस्य तनयो ऽमरियः, अम-
४ रियस्य तनयो ऽहीटूवः, अहीटूवस्य तनयः सादोकः, सादोकस्य तनयः

शल्लुमः, शल्लुमस्य तनयो हिल्कियः, हिल्कियस्य तनयोऽसरियः, असरि- ५
यस्य तनयः सिरायः, सिरायस्य तनय इस्राहः, एष इस्राहः पारसीकनर-
पतेरर्तसस्तस्य राजत्वसमये बाबिलत आजगाम। स मूससो व्यवस्थायां ६
अर्थत इस्रायेलः प्रभुना परमेश्वरेण दत्तायां व्यवस्थायां पारदर्श्यध्यापक
आसीत्। अपरं तदीयप्रभोः परमेश्वरस्य साहाय्येन राजा तस्य सर्व्वं
प्रार्थनीयम् अदात्। अपरं नरपतेरर्तसस्तस्य राजत्वस्य सप्तमे वत्सर ७
इस्रायेलीयसन्तानानां याजकानां लेवीयानां गायकानां द्वारपालानां
निथीनीयानाञ्च कतिपयलोका यिरूशालमं प्रस्थितवन्तः। अपरं नृपस्य ८
तस्य सप्तमवत्सरस्य पञ्चमे मासि स इस्राहो यिरूशालमम् उपस्थितो
ऽभवत्। यतः प्रथममासस्य प्रथमे दिने स बाबिलतो गन्तुं प्रारेभे, अपरं ९
तं प्रतीश्वरस्य मङ्गलदायकसाहाय्यात् पञ्चममासस्य प्रथमे दिने स यि-
रूशालम उपस्थितवान्। यत इस्राहः परमेश्वरस्य शास्त्रम् अध्येतुम् १०
आचरितुञ्चेस्रायेल्वंशीयांश्चाज्ञां विधिञ्च शिक्षयितुं निजान्तःकरणं दृढं
प्रावर्त्तयत्।

परमेश्वरेणादिष्टानां वाक्यानाम् इस्रायेलं प्रत्याज्ञापितानां विधीना- ११
ञ्चाध्यापको यो याजक इस्राहो नाम लेखकस्तस्मै नरपतिरर्तसस्तो यत्
पत्रं दत्तवान् तस्य विवृतिरियं। राजाधिराजोऽर्तसस्तः स्वर्गीयेश्वरस्य १२
सिद्धव्यवस्थाध्यापकं याजकम् इस्राहं प्रति पत्रमिदं लिलेखेत्यादि।
अहम् इमं निदेशं करोमि मम राष्ट्रनिवासिनो यावन्त इस्रायेलीया १३
लोका याजका लेवीया वा त्वया समं यिरूशालमं गन्तुम् इच्छन्ति ते
यान्तु। यतस्तव हस्ते स्थितस्य त्वदीयेश्वरस्य शास्त्रस्यानुसारेण यिहूदां १४
यिरूशालमञ्चाध्यनुसन्धानार्थम्, अपरं यिरूशालमनिवासिनम् इस्रा- १५
येल ईश्वरम् उद्दिश्य नृपेण तदीयमन्त्रिभिश्च यानि रजतानि कनकानि
च स्वेच्छया दत्तानि, अपरं यिरूशालमस्थस्य स्वेषाम् ईश्वरस्य मन्दिरस्य १६
कृते मनुजै र्याजकैश्च स्वेच्छया दत्तै र्दानैः समं यावन्ति रजतानि कन-
कानि च बाबिलस्य निखिलजनपदे त्वया प्राप्तुं शक्यन्ते, तेषां तत्र वहनार्थं
त्वं नृपेण तदीयसप्तमन्त्रिभिश्च प्रहीयसे। तेन धनेन त्वं वृषभान् मेषान् १७
मेषशावकांश्च तदुपयुक्तनैवेद्यपेयद्रव्याणि चाविलम्बेन क्रीत्वा यिरूशालम-
स्थस्य युष्माकम् ईश्वरस्य मन्दिरे वेद्याम् उत्सर्गं करिष्यसि। अपरम् अव- १८
शिष्टै रजतैः सुवर्णैश्च तुभ्यं तव भ्रातृभ्यश्च यत् कर्त्तुं रोचते तत् स्वेषाम् ईश्व-
रस्येच्छानुसारेण कुरुध्वं। अपरं तवेश्वरस्य मन्दिरस्य परिचर्य्यार्थं यानि १९

भाजनानि तुभ्यम् अदीयन्त, तानि यिरूशालम ईश्वरस्य साक्षात् सम-
१० र्पयिष्यसि। अपरं ततो ऽधिकं तवेश्वरस्य मन्दिरनिमित्तं प्रयोजनीयो
यो धनव्ययस्त्वया कारिष्यते, तदीयधनं राजभाण्डागाराद् गृहीतव्यं।
२१ अपरम् अहम् अर्तसस्तो नरपति र्नद्याः पारस्थितान् निखिलको-
२२ षाध्यक्षान् आज्ञापयामि। स्वर्गीयेश्वरस्य शास्त्राध्यापक इस्राहो या-
जको युष्माकं समीपात् शतकिक्कारपरिमाणं रजतं शतकोरपरिमाणा
गोधूमाः शतवातपरिमाणा द्राक्षारसाः शतवातपरिमाणानि तैलान्य-
२३ परिमितं लवणञ्चैतेषां मध्ये यद्यद् याचिष्यते तत् शीघ्रं क्रियतां। स्वर्गी-
येश्वरस्य मन्दिरनिमित्तं स्वर्गीयेश्वरेण समादिष्टं निखिलं कर्म्म यत्नतः
२४ कर्त्तव्यं, राष्ट्रे नृपे तदीयतनयेषु च कुतः क्रोधो वर्त्तेत? अपरं याज-
कानां लेवीयानां वादकानां द्वारपालानां निथीनीयानाम् ईश्वरीयम-
न्दिरस्यान्येषां कर्म्मकारिणाञ्च कस्माच्चिदपि राजस्वस्य करस्य शुल्कस्य
२५ ग्रहणं निषिद्धमिति युष्मान् ज्ञाप्यते। अपरं हे इस्राह, त्वदीश्वरविषयकं
यज्ज्ञानं तुभ्यम् अदायि तदनुसारेण सरितः पारस्थानां निखिललोकानां
ये जनास्त्वदीयेश्वरस्य शास्त्रं जानन्ति तेषां विचारकरणार्थं शासकान्
विचारकांश्च नियुंक्ष्व, अपरं ये जनास्तन्न जानन्ति ते युष्माभिः शिक्ष-
२६ यितव्याः। अपरं यः कश्चित् त्वदीयेश्वरस्य निदेशं नृपते र्निदेशञ्चाचरितुं
नेच्छति त्वरितं तस्य विचारो भवतु, स प्राणदण्डप्राप्तो यद्वा प्रवासितो
वा हृतधनो वा कारावद्धो भवतु।
२७ अस्मत्पितृणां प्रभुः परमेश्वरो धन्यो भूयात्, यतः स एव यिरूशा-
लमस्थस्य परमेश्वरीयमन्दिरस्य शोभनायैतादृशीम् इच्छां नरपतेरन्तः-
२८ करणे दत्तवान्। अपरं स एव मां प्रति नृपस्य तदीयमन्त्रिणाञ्च राज्ञो
निखिलानां पराक्रान्ताध्यक्षाणाञ्च प्रसन्नताम् उदपादयत्। तेन मां प्रति
मम प्रभोः परमेश्वरस्यानुग्रहाद् अहम् आश्वासं लब्ध्वा मया सार्कं गम-
नार्थम् इस्रायेलीयानां मध्यात् मुख्यमनुजान् समग्रह्णां।

---

८ अष्टमोऽध्यायः।

१ बाबिलतः पुनरागतलोकानां नामानि १५ मन्दिरस्य सेवकानां कृत दूदं प्रति दूतस्य प्रेषणं २१ उपवासकरणं २४ याजकानां करेषु सर्व्वधनानां समर्पणं ३१ अहमातो यिरूशालमे गमनं ३३ मन्दिरे कनकरजतादीनां तोलनं ३६ अध्यक्ष-निवहे राजाज्ञापत्रस्य समर्पणञ्च।

नृपस्यार्तक्षस्तस्य राजत्वसमये ये प्रमुखपितृलोका मया समं बाबि- १
लतो यात्राम् अकुर्व्वन् तेषां वंशावलिः। पीनिहसवंशे गेर्शोमः, ईथा- २
मरवंशे दानियेलः, दायूद्वंशे हटूशः। शिखनियवंशे परियोशवंशीयः ३
सिखरियः, तेन समं वंशानुसारेण सार्द्धशतं पुरुषा गणिता अभवन्।
अपरं पहतमोयाववंशे सिरहियस्य तनय इलीहो-ऐनयस्तेन समं द्वे शते ४
पुरुषाश्चासन्। अपरं शिखनियवंशे यहसीयेलस्य तनयस्तेन समं त्रीणि ५
शतानि पुरुषाश्चासन्। अपरम् आदीनवंशे योनाथनस्य तनय एवदस्तेन ६
समं पञ्चाशत् पुरुषाश्चासन्। अपरम् एलमवंशे ऽथलियस्य तनयो यि- ७
शायियस्तेन समं सप्ततिः पुरुषाश्चासन्। अपरं शिफटियवंशे मीखा- ८
येलस्य तनयः सिवदियस्तेन समम् अशीतिः पुरुषाश्चासन्। अपरं योया- ९
ववंशे यिहीयेलस्य तनय ओवदियस्तेन समम् अष्टादशाधिके द्वे शते
पुरुषाश्चासन्। अपरं शिलोमीतवंशे योषिफियस्य तनयस्तेन समं षष्ट्य- १०
धिकं शतं पुरुषाश्चासन्। अपरं वेवयवंशे वेवयस्य तनयः सिखरिय- ११
स्तेन समम् अष्टाविंशतिः पुरुषाश्चासन्। अपरम् अस्गदवंशे हकाट- १२
नस्य पुत्रो योहाननस्तेन समं दशाधिकं शतं पुरुषाश्चासन्। अपरम् १३
अदोनीकामस्यापरस्मिन् वंश इलीफेलटो यियूयेलः शिमयियश्च तैः
समं षष्टिः पुरुषाश्चासन्। अपरं विग्वयवंश ऊथयः सब्बुदश्च ताभ्यां १४
समं सप्ततिः पुरुषाश्चासन्।

अनन्तरम् अहम् अहवागामिन्याः सरितः समीपे तान् समगृह्णां, १५
तस्मिन् स्थाने वयं त्रीणि दिनानि शिविरे न्यवसाम। अपरम् अहं
लोकान् याजकांश्च निरीक्ष्य तत्र स्थाने लेविवंशस्य कश्चन नालभे। तदा- १६
नीम् अहं दूतैरिलियेषरो ऽरीयेलः शिमयिय इल्नाथनो यारिव
इल्नाथनो नाथनः सिखरियो मिशुल्लमश्चैतान् प्रमुखलोकान् अपरं
योयारीव इल्नाथनश्चैतौ बुद्धिमन्तौ जनौ चाह्वयं। अनन्तरं कासि- १७
फियानामकस्य स्थानस्य प्रमुखजनस्येद्दोः समीपं तान् प्रेषयन् अस्माकम्
ईश्वरस्य मन्दिरस्य कृते सेवकान् अस्माकम् अन्तिकम् आनयतेति वचः
कासिफियास्थानवासिनम् इद्दुं तस्य भ्रातॄन् निथीनीयांश्च गदितुं तान्
आज्ञापयं। ततो ऽस्माकं मङ्गलदायकेनेश्वरस्य साहाय्येन त इस्रायेलः १८
पौत्रस्य लेवेः सुतस्य महलेः वंशोद्भवम् एकं बुद्धिमन्तं नरम् अस्माकम्
अन्तिकम् आनयन्, अपरं शेरेबियं तदीयतनयान् भ्रातंश्च साकल्यतो
ऽष्टादशजनान्, अपरं हशबियं तेन समं मिरारिवंशीयं यिशायियं १९

२० तद्दीयभ्रातॄन् पुत्त्रांश्च साकल्यतो विंशति जनान्, अपरं दायूद् लोकाध्य-
क्षाश्च लेवीयानां परिचर्य्यार्थं यान् निरूपयाञ्चक्रिर एताद्दशानां निथी-
नीयानां मध्याद् विंशत्यधिके द्वे शते जनान् आनयन्, एतेषां सर्व्वेषां
नामानि लिखितान्यभवन्।
२१ अनन्तरं वयं स्वेषां निजनिजबालकानां सम्पत्तीनाञ्च निमित्तं शुभ-
यात्रां प्रार्थयितुं यत् स्वेषाम् ईश्वरस्य साक्षात् स्वान् क्लिश्नीयामैतदर्थम्
२२ अहम् अहवासरितः सन्निधावुपवसनस्य वचः प्राचारयं। यतो मार्गे
रिपुभ्यो ऽस्माकं रक्षार्थं नरपतिं एतनां हयारोहिणश्च याचितुम् अहं
लज्जितस्तस्माद् वयं राजानम् अवोचाम, अस्माकम् ईश्वरो ये भंक्ष्यन्ते
तेषां मङ्गलजनकं साहाय्यं स करोति किन्तु स यैस्त्यक्ष्यते तेषां विरुद्धं
२३ तस्य पराक्रमः क्रोधश्च समुपतिष्ठति। एतन्निदानाद् वयम् उपवासम्
अकुर्म्मापरम् अस्माकम् ईश्वरस्य सन्निधौ प्रार्थयामहि स चास्माकं
प्रार्थनां समग्रह्णात्।
२४ अनन्तरम् अहं याजकानां मध्याद् द्वादश प्रमुखलोकान् अर्थतः
शेरेवियं हशवियञ्च ताभ्यां समं तयो र्दश भ्रातॄंश्च पृथग् अकरवं।
२५ अपरं नरपतिस्तस्य मन्त्रिणो ऽध्यक्षाश्च तत्र विद्यमाना निखिलेस्राये-
लीयलोकाश्चास्माकम् ईश्वरस्य मन्दिरस्य निमित्तं यानि रजतानि का-
ञ्चनानि भाजनानि च ददिवांसस्तानि तेषां समक्षं तोलयित्वा समार्पयं।
२६ अर्थतः पञ्चाशदधिकषट्शतकिक्करपरिमितानि दुर्वर्णानि शतकिक्कर-
२७ परिमितानि रौप्यभाजनानि, शतकिक्करपरिमितानि काञ्चनानि, अपरं
सहस्रादर्कोणमूल्यानि विंशतिकनकमयभाजनानि, अपरं काञ्चनवद्
बहुमूल्यस्योत्तमस्य परिष्कृतस्य ताम्रस्य भाजनद्वयं तोलयित्वा तेषु समा-
२८ र्पयं। अपरं तान् समवोचं यूयं परमेश्वरार्थं प्रयता विद्यध्वे, एतानि
भाजनान्यपि प्रयतानि विद्यन्ते, अपरम् एतानि रजतानि महारज-
तानि च युष्माकं पितृलोकानां प्रभोः परमेश्वरस्य कृते स्वेच्छया दत्तानि
२९ नैवेद्यानि च विद्यन्ते। अतो हेतो र्यूयं यिरूशालमे परमेश्वरीयमन्दि-
रस्य कोष्ठेषु मुख्यानां याजकानां लेवीयानाम् इस्रायेलीयप्रधानपितॄणाञ्च
सन्निधौ यावत् तानि तोलयित्वा न समर्पयिष्यथ तावत् सतर्कास्तिष्ठन्तो
३० रक्षत। अनन्तरं याजका लेवीयाश्च रजतानां शातकुम्भानां भाजनानाञ्च
तत्परिमाणं भारं यिरूशालमे ऽस्माकम् ईश्वरस्य मन्दिरं नेतुम् अग्रह्णन्।
३१ अनन्तरं वयं यिरूशालमं गमनार्थं प्रथममासस्य द्वादशदिने ऽहवा-

नदीतः प्रस्थितवन्तः। तत ईश्वरो ऽस्माकं साहाय्यं कुर्व्वन् वर्त्ममध्ये रि-
पूणां दस्यूनाञ्च कराद् अस्मान् उदधरत्। अनन्तरं वयं यिरूशालमं ३२
प्राप्य तत्र स्थाने त्रीणि दिनानि व्यश्राम्याम।

अनन्तरं चतुर्थे दिने तानि रजतानि शातकुम्भानि पात्राणि चास्मा- ३३
कम् ईश्वरस्य मन्दिरे याजकस्योरियतनयस्य मिरेमोतस्य करे ऽस्माभि-
स्तोलयित्वा समर्पितानि। तेन समं पीनिहसस्य तनय इलीयासर आ-
सीत्। ताभ्यां समं येशूयस्य तनयो योषावदो विन्नूयेस्तनयो नोयदिय-
श्चैतौ लेवीयावास्तां। सर्व्वस्मिन् गणनया तुलनया च समर्पिते तस्मिन्नेव ३४
समये तस्यास्तुलायाः कृत्स्नं परिमाणं लिखितमभवत्। अपरं वन्दित्वा- ३५
वस्थात आगता युद्धदासा निखिलस्येस्रायेलो निमित्तम् इस्रायेलीयेश्वरम्
उद्दिश्य होमार्थकबलिरूपेण द्वाशदवृषभान् प्रायश्चित्तार्थञ्च षण्णवतिं
मेषान् सप्ताधिकसप्ततिं मेषशावकान् द्वादशच्छागान् एतान् परमेश्वर-
मुद्दिश्य होमं बलिदानञ्च चक्रिरे।

अनन्तरं ते राजप्रतिनिधिभ्यः सरितो ऽवारस्थेभ्यः शासकेभ्यश्च राजा- ३६
ज्ञापत्राण्यददुः, ततस्ते लोकानाम् ईश्वरीयमन्दिरस्य कार्य्यस्य चोपकारं
चक्रिरे।

---

९ नवमोऽध्यायः।

१ अन्यजातीयनारीभिः समं यिहूदीयानां मित्रताकरणकारणाद् इष्राहस्य विलापः
५ तस्य प्रार्थना च।

तस्मिन् कर्म्मणि समाप्ते ऽध्यक्षा मम समीपम् आगत्य कथामिमाम् १
अकथयन्, इस्रायेलीया लोका याजका लेवीयाश्चेतरदेशीयलोकेभ्यः
स्वान् पृथक् नाकुर्व्वन्। ते किनानीयानां हित्तीयानां पिरिषीयाणां यिबू-
षीयाणाम् अम्मोनीयानां मोयावीयानां मिस्रीयाणाम् इमोरीयाणां घृणा-
र्हक्रियाः समाचरन्ति। विशेषतः स्वेषां निमित्तं निजनिजपुत्राणाञ्च २
निमित्तं तेषां कन्या अगृह्णन् अनेन प्रकारेण प्रयतवंशजाता लोका इत-
रदेशीयैः समं मिश्रिता अभवन् अपरम् अध्यक्षाः शासकाश्च दोषस्यास्य
मूलम् अभवन्। एतां वाचं निशम्याहं निजपरिधेयम् उत्तरीयञ्च वसनम् ३
अच्छिनदं निजशिरसः श्मश्रुकेशान् छित्त्वा विस्मयापन्नो भवन् उपावि
शञ्च। तदानीं युद्धदासानाम् आज्ञालङ्घनमधीस्रायेल ईश्वरस्य निदेशेन ४

यावन्तो लोकाः कम्पिता अभवन् ते मम सन्निधौ मिलितवन्तः। अपरम् अहं सन्ध्याकालीयबलिदानसमयं यावद् विस्मयापन्नो भवन् उपाविशम्।
५ अनन्तरं सन्ध्याकालीयबलिदानसमये ऽहं शोकादुत्थाय छिन्नपरिधेयश्छिन्नोत्तरीयवसनश्च सन् जानुनी पातयित्वा निजप्रभोः परमेश्वरस्य
६ साक्षात् करौ प्रसार्य्य कथितवान्, हे मदीश्वर, हे मदीश्वर, अहं त्वां प्रति निजं वदनम् उत्थापयितुं व्रीडितो विवर्णश्च भवामि, यतो बाहुल्याद् अस्माकं पातकान्यस्माकं शिरसाम् ऊर्द्धम् उदतिष्ठन् अस्माकम् अप-
७ राधश्च गगनस्पर्शी जातवान्। अस्माकं पूर्व्वपुरुषाणां समयमारभ्याद्य यावद् वयं महत्यपराधे मग्ना आस्महे। अस्माकम् अपराधकारणाद् वयम् अस्माकं राजानो याजकाश्चाद्यतनदशानुसारेण वदनानां व्याकुलतायां लोठने वन्दित्वे चन्द्रहासेष्वितरदेशीयनरपतीनां हस्तेषु समर्पिता
८ अभवाम। किन्त्वधुनास्माकं कियतो ऽवशिष्टान् मनुजान् रक्षितुं भवतो धर्म्मधामन्यस्मभ्यम् आश्रयं दातुम् अस्माकं लोचनानीश्वरेण दीप्तिमन्ति कर्त्तुं वन्दित्वदशायां विश्रामं दातुञ्चास्माकं प्रभुः परमेश्वरः क्षणैककालं
९ प्रसन्नो ऽभवत्। वयं युद्धदासा आस्मस्तथाप्यस्माकम् ईश्वरो वन्दित्वावस्थायामप्यस्मान् न पर्य्यत्यजत् किन्त्वस्माकम् ईश्वरस्य मन्दिरं स्थापयितुं तस्य जीर्णोद्धारं कर्त्तुञ्च यिहूदादेशे यिरूशालमे चास्मभ्यं प्राकारं दातुम् अस्मान् जीवयितुञ्च सो ऽस्मान् प्रति पारसीकन्टपतीनां प्रसादम् अवर्त्त-
१० यत्। इदानीं हे अस्माकम् ईश्वर, इतः परं वयं किं वदिष्यामः? यतो
११ वयं भवतो निदेशान् पर्य्यत्यजाम। भवान् निजदासै र्भविष्यद्वादिभि र्वच इदं गदयामास, यूयं यं जनपदम् अधिकर्त्तुं प्रवेक्ष्यथ स इतरदेशीयलोकानाम् अशुचिक्रियाभिरर्थतो याभि र्घृणार्हक्रियाभिस्ते निज-
१२ मालिन्यात् तस्य दिग्दिगन्तरम् अपूरयन् ताभिरमेध्यो विद्यते। अतो हेतो र्यूयं तेषां तनयेभ्यो युष्माकं दुहितॄन् मा दत्त युष्माकं पुत्त्राणाञ्च विवाहार्थं तेषां दुहितॄन् मा गृह्णीत, अपरं तेषां मङ्गलं सौभाग्यञ्च कदापि न चेष्टध्वं तेन यूयं बलवन्तो भविष्यथ जनपदीयानि उत्तमवस्तूनि भोक्ष्यध्वे निजवंशस्य निमित्तं नित्याधिकारमिव तं निधाय यास्यथ च।
१३ किन्त्वस्माकं कुक्रियाभि र्महापराधेन चैतावत्यमङ्गले ऽस्मासु वर्त्तिते ऽपि, हे अस्माकम् ईश्वर, त्वम् अस्माकं कलुषेभ्यो ऽल्पतरं दण्डम् अददा अधि-
१४ कन्त्वस्माकं कतिपयान् जनान् इत्थम् उदधरः। एतद्दृष्टापि यदि वयं तव निदेशान् लंघित्वा पुनर्व्वारं घृणार्हकर्म्मकारिभिरेतै र्जातीयैः सार्कं मि-

ऽतां कुर्म्मस्तर्हि यावद् अस्माकं कश्चिद् रक्षितो ऽवशिष्टो वा न तिष्ठति
तावत् त्वम् अस्मभ्यं कुपित्वा किम् अस्मान् निःशेषं न नाशयिष्यसि? हे १५
इस्रायेलः प्रभो परमेश्वर त्वं धर्म्मस्वरूपः, यतो वयम् अद्य यावद् रक्षां
प्राप्यावशिष्टा विद्यामहे, पश्य वयं तव समक्षम् अपराधे मग्ना आस्महे
तत्कारणात् तव समक्षं स्थातुं न पारयामः।

---

१० दशमोऽध्यायः।

१ शिखनियेनेश्राहस्याश्वसनं ६ शोकान्वितेनेश्राहेण लोकानां संग्रहणं ९ लोकैरपराधं
स्वीकृत्य तं त्यक्तुम् अङ्गीकरणं १५ अन्यजातीययोषितां दवनार्थं लोकानां नियो-
जनं १८ अपराधिलोकानां नामानि।

अनेन प्रकारेणेश्वरीयमन्दिरस्यान्तिक इस्राहे प्रार्थनां कलुषस्वीकारं १
क्रन्दनं प्रणामञ्च कुर्व्वतीस्रायेलीयलोकानां मध्यात् स्त्रीपुरुषबालानाम्
अतीव महासमाजस्तस्य समीपे मिलितो बभूव, अपरं लोका अतीव
चक्रन्दुः। तदानीम् एलमवंशीयो यिहीयेलस्य तनयः शिखनिय इस्राहं २
वाचमिमां जगाद, वयं स्वेषाम् ईश्वरस्य विरुद्धम् अपराधिनो भूत्वै-
तद्देशीयानां मध्याद् इतरजातीयाः कन्या व्यवहाम, तथापि विषये
ऽस्मिन् इस्रायेलि प्रत्याशा विद्यते। मत्प्रभो र्भवतो मन्त्रणानुसारेणा- ३
स्माकम् ईश्वरस्य निर्देशात् कम्पितानां मनुजानां मन्त्रणानुसारेण च ता
योषितस्तासु जाता बालकाश्चास्माभिः परित्यक्ष्यन्त इति नियमो ऽस्मा-
कम् ईश्वरेण समं क्रियतां तत् कर्म्म व्यवस्थानुसारेण भवतु। उत्तिष्ठ ४
यतः कर्म्मैतत् त्वया कर्त्तव्यं वयमपि तव साहाय्यं करिष्यामः, त्वम्
उत्सुको भूत्वा कर्म्म कुरुष्व। तदानीम् इस्राहः समुत्थाय तद्वाक्यानुसा- ५
रेण करणार्थं प्रमुखयाजकान् लेवीयान् इस्रायेलीयनिखिललोकांश्च शपथं
कारयामास तेन ते शपथं चक्रवांसः।

अनन्तरम् इस्राह ईश्वरीयमन्दिरस्य सम्मुखाद् उत्थायेलियाशीवस्य ६
तनयस्य योहाननस्य कोष्ठं प्राविशत् तत् स्थानं गत्वा किञ्चन भक्ष्यं नाभुङ्क्त
पानीयञ्च नापिवत् यतो वन्धवस्थात आगतानां मनुजानाम् अपराधात्
सो ऽशोचत्। अनन्तरं युद्धदासा मनुजा यिरूशालमे समागमिष्यन्ति, ७
परन्तु यः कश्चनाधिपानां प्राचीनानाञ्च मन्त्रणानुसारेण दिनत्रयमध्ये ८
नागमिष्यति तदीयं सर्व्वस्वम् अपहारिष्यते, अपरं वन्धवस्थात आग-

तात् समाजात् स वहि र्भविष्यत्येतद् यिहूदायिरूशालमयोः सर्व्वत्र
घोषयाञ्चक्रे।
९ अनन्तरं यिहूदाबिन्यामीनयो र्निखिलमनुजा दिनत्रयमध्ये यिरू-
शालमे मिलितवन्तः। तदानीं नवममासस्य विंशतितमं दिनमासीत्।
मनुजा गुरुतरकार्य्यनिदानात् महावृष्टिनिदानाच्च प्रकम्पमाना ईश्वरी-
१० यभवनस्य महाप्राङ्गण उपविविशुः। ततः परं याजक इष्राहः समुत्थाय
तान् जगाद युष्माभिरिस्रायेलो दोषस्य वृद्धये ऽन्यजातीयाः कन्या व्यूढा
११ अनेनापराद्धं। अतो हेतोरिदानीं युष्माकं पितृलोकानां प्रभोः परमेश्व-
रस्य सन्निधौ तत् स्वीकुरुध्वं तस्य तुष्टिजनकं कर्म्म कुरुध्वञ्च, अपरं देशीय-
१२ मनुजेभ्य इतरजातीययोषिद्भ्यश्च स्वान् पृथक् कुरुध्वं। तदानीं निखिलः
समाजः प्रोच्चकैः स्वरैः प्रत्युवाच, भवता यादृशं गदितं तदनुसारेणा-
१३ स्माभिः कारिष्यते। परन्तु लोका अनेके वर्षाकालश्चोपस्थितवान्,
वयं वहिःस्थले स्थातुं न पारयामहे किञ्च कर्म्मेदं दिनैकेन दिनद्वयेन वा
१४ साध्यं नहि, यस्माद् वयमनेक एतेन कर्म्मणापराधिनो जाताः। अतः
कृत्स्नसमाजस्य कृते ऽस्माकम् अधिपतय एतस्मिन् नियुज्यन्ताम् अपरम्
अस्माकं नगरेषु यावन्तो लोका इतरजातीयाः कन्या व्यवहन् तैः सार्द्धम्
एकैकस्य नगरस्य प्राचीनलोका विचारयितारश्च निरूपितसमये समाग-
च्छन्तु तेन विषयेऽस्मिन् अस्माकम् ईश्वरस्य कोपाग्निरस्मत्तो निवर्त्तिष्यते।
१५ एतस्या मन्त्रणाया वैपरीत्येन केवलम् असाहेलस्य तनयो योनाथन-
स्तिक्काहस्य तनयो यहसियश्चोदतिष्ठतां किञ्च मिशुल्लमो लेवीयः सब्बि-
१६ ययश्च तयोः साहाय्यम् अकुरुतां। तथापि वन्दीकृता मनुजा विधिवद्
आचारम् अकुर्व्वन् याजक इष्राहः प्रधानपितृकाः कियन्तो लोकाश्च
निजनिजपितृवंशानुसारेण निजनिजनामानुसारेण च पृथक्कृताः सन्तो
१७ दशममासस्य प्रथमदिवसे तत्कार्य्यस्य विचारं कर्त्तुम् उपविविशुः। अपरं
प्रथममासस्य प्रथमे दिवसे त इतरजातीययोषिद्ग्राहिपुरुषाणां वि-
चारं समापयामासुः।
१८ याजकवंशानां मध्य इतरजातीयकन्याग्राहिण एते मनुजा अविद्यन्त,
यिहोषादकस्य सुतस्य येशूयस्य तनयानां भ्रातॄणाञ्च मध्ये मासेय इली-
१९ येषरो यारिवो गिदलियश्च। इमे निजा निजा जायाः परित्यक्तुं स्वाक्षरं
लिलिखुः, अपरम् अपराधित्वकारणात् मेषमेकं दोषार्थकबलिं ददुः।
२० अपरम् इम्मेरवंशे हनानिः सिवदियश्च। अपरं हारीमवंशे मासेय

एलियः श्रिमयियो यिहीयेल उषियस्च। अपरं पश्हूरवंशे इलियो- २१
ऐनयो मासेय इस्मायेलो निथनेलो योषावद इलियासाहस्च। अपरं २२
लेवीयानां मध्ये योषावदः शिमियिः किलायाहः (स एव किलीटः) पि-
थाहियो यिहूदा इलियेषरस्च। अपरं गायकानां मध्य इलियाशीवः। २४
द्वारपालानां मध्ये शल्लुमः टेलम ऊरिस्च। अपरम् इस्रायेलीयानां मध्ये २५
परियोशवंशे रिमायो यिषियो मल्कियो मियामीन इलियासरो
मल्कियो बिनायस्च। अपरम् एलमवंशे मत्तनियः सिखरियो यिही- २६
येलो ऽब्दि यिरेमोत एलियस्च। अपरं सत्तुवंशे इलियो-ऐनय इलिया- २७
शीवो मत्तनियो यिरेमोतः सावदो ऽसीसास्च। अपरं वेवयवंशे यि- २८
होहाननो हनानियः सव्वयो ऽतलयस्च। अपरं वानिवंशे मिशुल्लमो २९
मल्लूको ऽदायाहो याशूवः शालो रामोतस्च। अपरं पहतमोयाववंशे ३०
ऽद्नः किललो बिनायो मासेयो मत्तनियो बित्सलेलो बिन्नूयि मिनशिस्च।
अपरं हारीमवंशे इलियेषरो यिशियो मल्कियः शिमयियो शिमियोनो ३१
बिन्यामीनो मल्लूकः शिमरियस्च। अपरं हशूमवंशे मत्तिनयो मत्तत्तः ३३
सावद इलीफेलटो यिरेमयो मिनशिः शिमियिस्च। अपरं वानिवंशे ३४
मादयो ऽम्राम ऊयेलो बिनायो वेदियाहः किलूह वनियो मिरेमोत ३६
इलियाशीवो मत्तनियो मत्तिनयो यासयो वानि बिन्नूयिः शिमियिः ३८
शेलिमियो नाथनो ऽदायाहो मग्नद्बयः शाशयः शारयो ऽसरेलः शेलि- ४१
मियः शिमरियः शल्लूमो ऽमरियो यूषफस्च। अपरं निवुवंशे यियूयेलो ४२
मत्तथियः सावदः सिवीनो यादयो योयेलो बिनायस्च। इम इतरजाती- ४४
यकन्या व्यवहन् कतिपयानाञ्च तासु जायासु सन्ताना अजायन्त।

निहिमियस्य पुस्तकं।

१ प्रथमोऽध्यायः।

यिरूशालमस्य दुर्दशाया वार्त्तां निशम्य निहिमियस्य शोचनमुपवसनञ्च तदीया
प्रार्थना च।

अखलियस्य तनयस्य निहिमियस्य कर्म्माणि। विंशतितमवत्सरस्य १
किश्लेवमासि शूशन्राजधान्यामहमासम्। तदानीं हनानिनामा मम २

भ्रातृणामेको जनो यिहूदादेशीयाः कतिपया मनुजाश्च तत् स्थानमाग-
मन् तदा ते रक्षितान् अर्थतो युद्धदासत्वाद् अवशिष्टान् यिहूदीयलो-
३ कानधि यिरूशालमश्चाधि मया समपृच्छ्यन्त। तेन ते माम् अभाषन्त ते
ऽवशिष्टा लोका अर्थतो दासत्वाद् उच्छिष्टा मानवा महता दुःखेनापमा-
नेन च तत्र देशे निवसन्ति किञ्च यिरूशालमस्य प्राकारो भग्नो पुरद्वा-
राणि च वह्निदग्धानि विद्यन्ते।
४ तेषामेतानि वाक्यानि निशम्याहं कतिपयदिवसान् उपविश्य क्रन्दन्
५ अशोचं स्वर्गीयेश्वरस्य च गोचर उपवासं प्रार्थनाञ्चाकरवं। ईदृशीं
भारतीञ्चाकथयं हे स्वर्गीय प्रभो परमेश्वर,त्वमेव महान् भयङ्करश्चेश्वरः,
ये त्वयि प्रीयन्ते तवाज्ञा गृह्णन्ति च तान् प्रति त्वं नियमम् अनुकम्पाञ्च
रक्षसि। इदानीं भवतो ऽस्य दासस्य प्रार्थनाम् आकर्णयितुं भवतः
६ श्रोत्रे अवरुद्धे लोचने चोन्मीलिते भवतां। अहं भवदीयदासानाम्
इस्रायेलीयलोकानां निमित्तं दिवानिशं भवतो गोचरे प्रार्थये, इस्राये-
लीयलोकानां कलुषाणि स्वीकरोमि च, यतो भवतो विरुद्धम् अस्माभिः
७ पापम् अकारि, मयापि मम पितृवंशेन च पापम् अकारि। वयं भवतो
विरुद्धं कुकर्म्माण्यकुर्म्महि, किञ्च स्वदासेन मूससाज्ञापिता भवत आदेशा
८ विधयो राज्यनीतयश्चास्माभि र्नाचरिताः। तथाहि युष्माभिराज्ञाल-
ङ्घनात् मयि भिन्नजातीयानां मध्ये युष्मान् विकीर्णवति यदि यूयं मां
प्रति परावृत्य मदीयान् निदेशान् गृह्णीयात तदनुसारेण कर्म्माणि
९ कुर्व्वीध्वञ्च, तर्हि युष्माकं केषुचित् गगनस्य प्रान्तपर्य्यन्तं दवितेष्वपि ते
तस्मात् स्थानादपि मया संग्राहिष्यन्ते निजनाम्नो वासार्थं मयाभिरुचितं
स्थानम् आनेष्यन्ते च, यामिमां भारतीं भवान् मूससाज्ञापितवान्
१० विनयेहं तामिदानीं स्मरतु। त एव भवतो दासा प्रजाश्च सन्ति,
भवान् निजेन महापराक्रमेण बलवता करेण च तान् परिक्रीतवान्।
११ हे मत्प्रभो, विनयेऽहम् इदानीं स्वीयदासस्य प्रार्थनायां ये च भवतो
नाम्नो भक्त्यां तुष्यन्ति भवदीयानां तेषां दासानां प्रार्थनायां श्रवो निद-
धातु। अपरं विनयेऽहम् अद्य स्वीयदासस्य कर्म्म सिद्धं करोतु पुमांस
एतस्य समक्षञ्च माम् अनुकम्पितं विदधातु।

२ द्वितीयोऽध्यायः।

१ निहिमियस्य विवर्णवदनताया निदानं विदित्वा नृपेणार्तसस्तेन तस्य यिरूशालमं प्रति प्रेषणं ९ तस्मिन् तत्रोपस्थिते तदीयवैरिणां मनस्तापः ११ चण्डायां भग्नप्राकारस्यालोकनं १७ प्राकारस्य पुन र्निर्म्माणे यिहूदीयेभ्यः प्रवृत्तिदानं।

अहं महीपतेः पानभाजनवाट् आसं किञ्च नरपतेरर्तसस्तस्य राज- १
त्वस्य विंशतितमवत्सरस्य नीसने मासि महीपतेः सम्मुखे द्राक्षारसे
तिष्ठति मया स द्राक्षारस आदाय नरपतये व्यतारि। पूर्व्वमहं तस्य
समक्षं कदापि विषण्णो नाभवम्। एतन्निदानात् नरपति र्मामपृच्छत् त्वं २
निरामयोऽसि तथापि त्वदीयं वदनं कुतो विवर्णमभूत्? एतत् मनः-
पीडां विनान्येन केनापि हेतुना न जायते। एतेनाहम् अतीवोद्विजन् ३
नरनाथमवादिषं, राजा चिरजीवी भूयात्। किञ्च मदीयपूर्व्वपुरुषाणां
श्मशानं यन्नगरं तदधुनोच्छिन्नं विद्यते तदीयगोपुराणि चाग्निदग्धानि
सन्त्येतेन मदीयं वदनं कथं विवर्णं न भवेत्? तदानीं महीपति ४
र्मामप्राक्षीत् त्वं किं प्रार्थयसे? ततोऽहं स्वर्गीयेश्वरम् उद्दिश्य प्रार्थनां
विधाय राजानम् ऊचिवान्, यदि नरपतेरभिमतं जायेत यदि च ५
भवतो दासो भवतः साक्षादनुगृह्येत तर्हि निवेदनमिदं कुर्व्वेऽहं भवान्
मां यिहूदानीवृतं मदीयपितृलोकानां श्मशानं नगरं प्रेषयतु तेन मया
तत् पुनर्निर्म्मास्यते। ततो महीपतिः स्वीयपार्श्वे समुपविष्टा महिषी च ६
मामप्राष्टां, त्वदीययात्रायां कति दिनानि भविष्यन्ति? कदा च त्वं पुन-
रावर्त्तिष्यसे? इत्थं मां प्रेषयितुं भूपतेरभिमते जाते मया तस्य सन्निधौ
समयो निरूपितः। अधिकन्तु मया महीपतिरुदितः, यदि क्षितिपतेर- ७
भिमतं जायेत तर्हि यिहूदानीवृते ममोपस्थितिं यावद् यत् सरितः पा-
रस्था देशाधिपतयो मदीयव्रजनस्य साहाय्यं कुर्व्वीरन् कारणादतस्तान्
प्रति लिखितानि पत्राणि मह्यं दीयन्ताम्। अपरं भूभृतो वनरक्षक आ- ८
सफो यत् मन्दिरपार्श्वस्थस्य दुर्गस्य गोपुराणां नगरीयप्राकारस्य मदीय-
वेश्मनश्च गृहकाष्ठानां कृते मह्यं दारूणि देयात् तन्निमित्तं तं प्रति पत्रमेकं
वितरतु। तेन माम्प्रतीश्वरस्यानुग्रहेण नरपति र्मह्यं तत् सर्व्वं दत्तवान्।
अपरं नरनाथो मया समं वाहिनीपतीन् हयारोहिणश्च प्राहिणोत्। ९
अनन्तरम् अहं सरितो ऽवारस्थानां देशाधिपतीनाम् उपकण्ठम् उप-
स्थाय नृपतेः पत्राणि तेभ्यो ऽददाम्। तदानीम् इस्रायेलीयवंशस्य कल्याण- १०

चेष्टार्थं मानुष एक आगमदिति निशम्य होरोणीयसन्वल्लटस्याम्मो-
नीयदासस्य टोवियस्य च महती मनःपीडा जाता।
११ अनन्तरमहं यिरूशालमम् उपस्थाय तत्र स्थाने दिनत्रयं प्रोषितवान्।
१२ ततो ऽहं मम सङ्गिनः कतिपयलोकाश्च रजन्यामुदतिष्ठाम। किन्त्वीश्वरो
यिरूशालमस्य कृते यस्मिन् कार्य्ये मम मानसं प्रावर्त्तयत् तदहं कञ्चन न
ज्ञापितवान्। अपरमहं यं वाजिनम् आरोहं तं विना कोप्यन्यः पशुः
१३ सार्क मया नासीत्। अहं निशायां निम्नभुवो द्वारेण वहिर्गत्य नागकूपं
सारद्वारञ्च यावद् गच्छन् यिरूशालमस्य भग्नं प्राकारं वह्निदग्धानि
१४ पुरद्वाराणि च समलोकयम्। अपरम् अहं प्रस्रवणस्य द्वारं राजकीय-
पुष्करिणीञ्च यावद् व्रजितवान् तत्र मदीयवाहनस्य पशो र्गमनीये
१५ वर्त्मनि न सति क्षपायामहं स्रोतसो मध्येन व्रजन् प्राकारं समपश्यम्
१६ अनन्तरं पुनर्व्वारं निम्नभूमे र्द्वारेण प्रविश्य परावृत्यागच्छम्। किन्तु
मया यद्यत् स्थानम् अगम्यत यद्यच्चाक्रियत तद् अधिपतयो नाविदुः
किञ्च तं कालं यावद् अहं यिहूदीयलोकान् याजकान् प्रमुखनरान्
अधिपतीन् कर्म्मकारिणश्च तन्न ज्ञापितवान्।
१७ अनन्तरमहं तेभ्यो ऽकथयं, वयं कीदृग् दुर्दशापन्ना आस्महे तद्
युष्माभि र्दृश्यते यिरूशालमम् उच्छिन्नं तदीयगोपुराणि च वह्निदग्धानि,
तस्माद् आगच्छत, वयम् अद्यारभ्य यन्निन्दास्पदं न भवेम कारणादस्माद्
१८ यिरूशालमस्य प्राकारं पुन र्निर्म्मिमीमहे। अनन्तरं मां प्रतीश्वरस्य मङ्ग-
लदायको ऽनुग्रहो मां प्रति गदितानि नरपते र्वचनानि चैतानि तेषां
समक्षं मया वर्णितानि, तेन ते समभाषन्त भद्रं वयम् उत्थाय पुन
र्निर्म्माणं कुर्म्महे। अनेन प्रकारेण त एतस्योत्तमस्य कार्य्यस्य निमित्तं
१९ स्वान् बलवतो ऽकुर्व्वन्त। परन्तु होरोणीयः सन्वल्लटो ऽम्मोनीयदासः
टोविय आरवीयो गेशमश्च वाचमिमां निशम्यास्मान् प्रति परिहासम्
अवज्ञाञ्च विधाय गदितवन्तः, यूयं यदिदं कार्य्यं कुरुथ तत् किं? यूयं
२० किं राजद्रोहं करिष्यथ? तदानीमहम् उत्तरम् अददाम्, स्वर्गीय ईश्वरो
ऽस्माकं कार्य्यं सिद्धं करिष्यति। वयं तस्यैव दासास्तस्माद् अस्माभिरुत्थाय
निर्म्माणं करिष्यते। परन्तु यिरूशालमे युष्माकं को ऽपि भागो वाधि-
कारो वा स्मारकं चिह्नं न विद्यते।

३ तृतीयोऽध्यायः।

प्राकारो यैः पुन र्निरमायि तेषां नामानि स्थानानां निर्णयश्च।

अनन्तरं प्रमुखयाजक इलियाशीवस्तस्य याजका भ्रातरश्च समुत्थाय १
मेषद्वारं पुन र्निर्म्ममिरे तस्य कवाटे स्थापयित्वा तत् पावयाञ्चक्रिरे,
अर्थतो मेयादुर्गमारभ्य हननेलस्य दुर्गं यावत् तत् पवित्रयाञ्चक्रिरे।
तस्य सन्निधौ यिरीहो मानवाः प्राकारं पुन र्निर्म्ममिरे। तेषामुपकण्ठ २
इम्रेस्तनयः सक्कूरः पुन र्निर्म्ममे। अपरं सिनायाहस्य पुत्रा मत्स्यद्वारं ३
पुन र्निर्म्ममिरे तस्य वृहत्काष्ठानि चोत्थापयाञ्चक्रिरे किञ्च तस्य कवाटे
कुञ्जिका अर्गलानि च स्थापयाञ्चक्रिरे। तेषामुपकण्ठे कोसस्य पौत्र ४
ऊरियस्य पुत्रो मिरेमोतः पुन र्निर्म्ममे। तस्य सन्निधौ मिशेषवेलस्य पौत्रो
वेरिखियस्य पुत्रो मिशुल्लमः पुन र्निर्म्ममे। तस्यान्तिके वानाहस्य पुत्रः
सादोकः पुन र्निर्म्ममे। तस्य समीपे तिकोयीया मनुजाः पुन र्निर्म्ममिरे ५
परन्तु तेषां प्रमुखमानवाः स्वेषां परिवृढस्य कार्य्ये न प्रववृतिरे। अन- ६
न्तरं पासेहस्य पुत्रो यिहोयादायो विषोदियाहस्य पुत्रो मिशुल्लमश्च
पुरातनं द्वारं पुन र्निर्म्ममाते, तौ तस्य तिर्य्यक्काष्ठान्युत्थापयाञ्चक्राते तदी-
यकवाटे कुञ्जिका अर्गलानि च स्थापयाञ्चक्राते। तयोरुपकण्ठे गिबियो- ७
नीयो मिलटियाहो मिरोणोथीयो यादोनश्चापरं गिबियोनीया मिस्पा-
हीयाश्च मनुजाः सरितो ऽवारस्थदेशाधिपस्य सिंहासनं यावत् पुन
र्निर्म्ममिरे। तस्य सन्निधौ नाडीन्धमानां मध्यीयो हर्हयस्य तनय ८
उषीयेलः पुन र्निर्म्ममे। तस्योपकण्ठे गन्धवणिग्वंशीयो हनानियः पुन र्नि-
र्म्ममे किञ्च ते दीर्घप्राकारं यावद् यिरूशालमं दृढयाञ्चक्रिरे। तेषां समीपे ९
यिरूशालमप्रदेशस्यार्द्धभागस्याधिपति हूरस्य तनयो रिफायः पुन र्नि-
र्म्ममे। तस्य सन्निधौ हरूमफस्य तनयो यिदायाहो निजभवनस्य सम्मु- १०
खस्थं प्राकारं पुन र्निर्म्ममे। तस्य समीपे हशव्नियस्य तनयो हट्टूशः पुन
र्निर्म्ममे। अपरं हारीमस्य पुत्रो मल्कियः पहतमोयावस्य तनयो ११
हश्शूवश्च तदन्यभागं चुल्लिदुर्गञ्च पुन र्निर्म्ममाते। तदुपकण्ठे यिरूशाल- १२
मप्रदेशस्यार्द्धस्याधिपो हलोहेशस्य तनयः शल्लूमस्तदीयदुहितरश्च पुन
र्निर्म्ममिरे। अनन्तरं हानूनो सानोहनिवासिनश्च लोका निम्नभूमे र्द्वारं १३
पुन र्निर्म्ममिरे। ते तस्य निचयनं चक्रिरे किञ्च तस्य कवाटे कुञ्जिका
अर्गलानि च स्थापयाञ्चक्रिरे, अपरं सारद्वारं यावत् प्राकारस्य सहस्रं

१४ हस्तान् पुन र्निर्म्ममिरे। अपरं वैथक्केरमप्रदेशस्याधिपती रेखवस्य पुत्त्रा
मल्कियः सारद्वारं निर्म्ममे, स तस्य निचयनं चक्रिवान् किञ्च तस्य
१५ कवाटे कुञ्जिका अर्गलानि च स्थापयाञ्चक्रे। अपरं मिस्पाप्रदेशस्याधि-
पतिः कल्होषेस्तनयः शल्लूमः प्रस्रवणस्य द्वारं पुन र्निर्म्ममे, स तत्
निर्म्माय तदीयाच्छादनं चक्रवान् अपरं तस्य कवाटे कुञ्जिका अर्गलानि
च स्थापयाञ्चक्रे किञ्च दायूदो नगराद् अवरोहणार्थकं सोपानं यावत्
राज्ञ उद्यानस्य सम्मुखस्थायाः शीलोहपुष्करिण्याः प्राकारं पुन र्निर्म्ममे।
१६ तस्योपकण्ठे वैतसूरप्रदेशस्यार्द्धभागस्याधिपतिरस्वूकस्य तनयो निहि-
मियो दायूदः शवागाराणां सम्मुखे खनितायाः पुष्करिण्या अभ्यर्णं
१७ यावत् वीरलोकानां भवनानि च यावत् पुन र्निर्म्ममे। तस्य सन्निधौ
लेवीयानाम् अन्तर्गतो वानेस्तनयो रिहूमः पुन र्निर्म्ममे। तस्य सन्निधौ
कियीलाप्रदेशस्यार्द्धभागस्याधिपति र्हशवियः स्वीयभागं पुन र्निर्म्ममे।
१८ तस्य समीपे तेषां भ्रातृनिवहो ऽर्थतः कियीलाप्रदेशस्यार्द्धभागस्याधिपति
१९ र्हेनाददस्य तनयो ववयः पुन र्निर्म्ममे। तस्योपकण्ठे मिस्पाया अधिपति
र्येशूयस्य तनय एसरः प्राकारस्य वक्रभागे स्थितस्यास्त्रगृहस्य वर्त्मस-
२० म्मुखे स्थानमपरं पुन र्निर्म्ममे। तस्योपकण्ठे सव्वयस्य तनयो वारूको
यत्नं कृत्वा प्राकारस्य वक्रभागात् प्रधानयाजकस्येलियाशीवस्य गेहद्वारं
२१ यावत् स्थानमन्यत् पुन र्निर्म्ममे। तस्य समीपे कोसस्य पौत्त्र ऊरियस्य
पुत्त्रो मिरेमोत इलियाशीवस्य गेहद्वारम् आरभ्येलियाशीवस्य गेहस्य
२२ प्रान्तं यावत् स्थानमपरं पुन र्निर्म्ममे। तस्य सन्निधौ समभूमे र्याजकलोकाः
२३ पुन र्निर्म्ममिरे। तदुपकण्ठे विन्यामीनो हशूवश्च स्वीयगेहयोः सम्मुखे
पुन र्निर्म्ममाते। तत्सन्निधावननियस्य पौत्त्रो मासेयस्य पुत्त्रो ऽसरियः
२४ स्वीयगेहस्य सम्मुखे पुन र्निर्म्ममे। तस्योपकण्ठे हेनाददस्य पुत्त्रो विन्नूयि-
रसरियस्य भवनमारभ्य प्राकारस्य वक्रम् अर्थतः कोणं यावत् स्थानम-
२५ परं पुन र्निर्म्ममे। अनन्तरम् ऊषयस्य तनयः पाललो वक्रस्य सम्मुखस्थ-
प्राकारस्य सम्मुखे बन्धनालयस्य चत्वरस्य समीपस्थस्य राज्ञ ऊर्द्धप्रासा-
दाद् वहिर्वर्त्तिदुर्गस्य सम्मुखे च प्राकारं पुन र्निर्म्ममे। तस्य सन्निधौ
२६ परियोशस्य तनयः पिदायः पुन र्निर्म्ममे। निथीनीयलोका ओफले ऽर्थतो
नीरद्वारस्य पूर्व्वदिशः सम्मुखस्थं स्थानं वहिर्वर्त्तिदुर्गञ्च यावद् ऊषुः।
२७ तत्सन्निधौ तिकोयीया वहिर्वर्त्ति वृहद् दुर्गम् आरभ्य ओफलस्थप्राकारं
२८ यावद् अपरं स्थानमेकं पुन र्निर्म्ममिरे। हयद्वारस्य परदिशम् आरभ्य

याजकानाम् एकैको जनो निजगेहस्य सम्मुखं प्राकारं पुन र्निर्म्ममे।
तत्सन्निधाविम्मेरस्य तनयः सादोको निजगेहस्य सम्मुखं पुन र्निर्म्ममे। २९
तस्योपकण्ठे पूर्व्वद्वाररक्षकः शिखनियस्य तनयः शिमयियः पुन र्निर्म्ममे।
तस्योपकण्ठे शेलिमियस्य तनयो हनानियः सालफस्य षष्ठः पुत्रो हानूनश्च ३०
स्थानमपरमेकं पुन र्निर्म्ममाते। तत्समीपे वेरिखियस्य तनयो मिशुल्लमो
निजप्रकोष्ठस्य सम्मुखं पुन र्निर्म्ममे। तस्य सन्निधौ नाडीन्धमस्य तनयो ३१
मल्कियो निथीनीयानां वणिजाञ्च स्थानं यावत् मिप्कदद्वारस्य सम्मुखस्थं
प्राकारं कोणस्य वर्त्म यावत् पुनर्निर्म्ममे। अपरं कोणस्थमार्गस्य मेष- ३२
द्वारस्य च मध्ये नाडीन्धमा वणिजश्च पुन र्निर्म्ममिरे।

---

४ चतुर्थोऽध्यायः।

१ रिपूणां निन्दायाः कथनं ७ वैरिणां विरुद्धं रक्षकाणां स्थापनं १३ कर्म्मकारिणां हस्तेष्वस्त्रसमर्पणं १९ मानवान् प्रति निहिमियस्य मन्त्रणाकथनञ्च।

अपरं वयं प्राकारं पुन र्निर्म्मिमीमहे वाचमिमाम् आकर्ण्य सन्‌व- १
ल्लटस्तुकोप महाक्रोधान्वितः सन् यिहूदीयान् तिरस्कृतवांश्च। अपरं २
निजभ्रातृणां शोमिरोणीयबलानाञ्च साक्षात् वाचमिमां व्याहरत्, एते
जीर्णा यिहूदीयाः किं करिष्यन्ति? इमे कदा निवर्त्तिष्यन्ते? इमे किं
यज्ञं करिष्यन्ति? एकस्मिन् दिने किं कर्म्मैतत् साधयिष्यन्ति? भस्मी-
कृतान् पाषाणान् धूलिराशिभ्य उत्थाप्य किं सजीवान् करिष्यन्ति? तेन ३
तस्य समीपस्थो ऽम्मोनीयटोवियः कथयामास, ते यत् निचयनं कुर्व्वन्ति
तत्र यदि शृगाल आरोहति तर्हि स पाषाणनिर्म्मितः प्राकारो भिद्य-
मानः पतिष्यति। हे अस्माकम् ईश्वर श्रवणं कुरु, वयं निन्दिता अभ- ४
वाम। एतैः कृतम् अपमानम् एतान् प्रति परावर्त्तय। अपरं दासा-
गाररूपे देशे लोठितवस्तूनीवैतान् स्थापय। एतेषां कलुषं न गोपय, ५
एतेषाम् अधर्म्मं भवतः सम्मुखान्न लुप्यतां, यतस्ते निचायकानां सम्मुखे
तव कोपम् अजनयन्। तथापि वयं प्राकारं निरमिमीमहि, ततः स ६
कृत्स्नः प्राकार उच्चलस्यार्द्धं यावत् सम्पन्नो ऽभूत्। यतो लोकानां मनः
कर्म्मण्यासक्तम् आसीत्।

अनन्तरं यिरूशालमस्थप्राकारस्य पुनर्निर्म्माणं प्रवर्त्तते तस्य भग्न- ७
स्थानानां जीर्णोद्धार आरभ्यते चैतन्निशम्य सन्‌वल्लटः टोवियं आरवीया

८ अम्मोनीया अस्‌दोदीयाश्च भृशं क्रुद्धाः सन्तो यिरूशालमस्य विरुद्धं योध-
९ नार्थं तन्नगरस्य वृद्धे बाधनार्थञ्च सर्व्वे यात्रां कर्त्तुम् ऐक्यमत्यं चक्रिरे। तेन
वयं स्वेषाम् ईश्वरस्य सन्निधौ प्रार्थयामहि दिवानिशं तेषां विरुद्धं
१० रक्षकान् अस्थापयामहि च। अपरं यिहूदीयाः कतिपयलोका अवदन्
भारवाहका दुर्ब्बला जाता इदानीमपि बहु जीर्णं विद्यते, वयं प्राकारं
११ पुनर्निर्म्मातुं न पारयामः। अस्माकं वैरिणो ऽप्यकथयन् वयम् एतैरवि-
दिता अदृष्टाश्चैतेषां स्थानं प्रविश्यैतान् हनिष्यामस्तत् कर्म्म निवर्त्तयि-
१२ ष्यामश्च। अपरं तेषां समीपवासिनो यिहूदीया येभ्यः स्थानेभ्योऽस्मत्स-
मीपं गमनागमने अकुर्व्वन्, तेभ्यः सर्व्वेभ्यः स्थानेभ्यो दशवारान् अस्माकं
सन्निधिम् आगत्य तद् वचो ऽवदन्।
१३ अपरम् अहं तेषां स्थानानाम् अधः प्राकारस्य पश्चाद् अनावृतस्थलेषु
लोकान् नियुक्तवान् अर्थतश्चन्द्रहासशूलधनुर्धारिणो लोकान् वंश-
१४ क्रमेण नियुक्तवान्। अनन्तरम् अहम् अवालोकयं किञ्च प्रोत्थाय प्रमुख-
लोकान् अध्यक्षान् तदन्यनिखिललोकांश्च गदितवान् यूयं तेभ्यो मा
बिभीत, महान्तं भयङ्करं परमेश्वरं स्मरत, स्वेषां भ्रातॄणां पुत्रपुत्रीणां
१५ जायानां गेहानाञ्च निमित्तं समरं कुरुत। अनन्तरं तेषाम् अभिप्रायो
ऽस्माभि र्बुद्ध ईश्वरेण तेषां मन्त्रणा व्यर्थीकृता चेतिवार्त्तायाम् अस्माकं
रिपुभिः श्रुतायां वयं सर्व्वे पुनः प्राकारं गत्वा स्वीये स्वीये कार्य्ये प्रावर्त्ता-
१६ महि। तदेव दिनमारभ्य मम दासेयानाम् अर्द्धमनुजाः कार्य्यम् अकुर्व्वन्
अन्यार्द्धलोकाश्च शूलफलकधनुर्व्वर्म्माणि धारयन्तो ऽतिष्ठन् अपरं कृत्स्नस्य
१७ यिहूदावंशस्य पश्चात् सैन्याध्यक्षा अचरन्। ये प्राकारस्योपरिष्टात् नि-
चयनम् अकुर्व्वन् ये च भारान् अवहन् आरोपयन् वा ते सर्व्वे हस्ते-
१८ नैकेन कर्म्माकुर्व्वन् तदन्यहस्तेन च शूलम् अधारयन्। निचायकाश्च
सर्व्वे कटिषु बद्धखड्गा अचाययन् तूरीवादकश्च मम सन्निधावतिष्ठत्।
१९ अनन्तरम् अहं प्रमुखलोकान् अधिपतीन् तदन्यनिखिललोकांश्च
व्याहरं, कार्य्यमिदं सुमहत् सुविततञ्च वयमपि प्राकारस्योपरिष्टाद् वि-
२० कीर्णा मिथो दूरवर्त्तिनश्च। तस्माद् यत्र कुत्रापि स्थाने युष्माभिस्तूरीशब्दः
श्रोष्यते तत्रैवास्मत्समीपं समागन्तव्यम्। अस्माकम् ईश्वरो ऽस्माकं नि-
२१ मित्तं समरं करिष्यति। अनेन प्रकारेण वयं तस्मिन् कार्य्ये परिश्रमम्
अकुर्म्म, अस्माकम् अर्द्धमनुजाश्चारुणोदयमारभ्य तारकोदयं यावत्
२२ शूलानि धारयन्तः समतिष्ठन्त। तस्मिन् समये मया लोकाः पुनरु-

दिता एकैको जनः स्वदासेन समं यिरूशालमस्य मध्ये निशां यापयतु, तथा सति ते निशायाम् अस्माकं रक्षोपकारका दिने च कार्य्योपकारका भविष्यन्ति। तस्मात् मया मम भ्रातृभि र्मम दासै र्मम रक्षकानुचरैश्च ११ वसनानि न मोचितानि, एकैकस्य स्नानमेव स्नानम् अभवत्।

---

५ पञ्चमोऽध्यायः।

१ लोकानां कलहकथनं ६ कुसीदग्राहिणो लोकान् तिरस्कृत्य कुसीदस्य प्रतिदानाय निहिमियस्य निदेशनं १४ अध्यक्षत्वपदस्य वेतनं न गृहीत्वा निजवित्तेन बहुलोकानां भरणं।

अनन्तरं निजभ्रातॄणां यिहूदीयानां विरुद्धं साधारणलोकानां तदीय- १
योषिताञ्च महाकलह उदतिष्ठत्। केचिद् अवदन् अस्माकं बहवः पुत्रा २
दुहितरश्च सन्ति तस्माद् वयं यथा भुञ्जाना जीवेम तदर्थं शस्यानि
ऋणत्वेन गृहीतवन्तः। अपरे केचिद् अगदन् वयं स्वेषां शस्यक्षेत्राणि ३
द्राक्षाक्षेत्राणि गृहाणि च न्यासीकृत्य दुर्भिक्षसमये शस्यानि ऋणत्वेन
गृहीतवन्तः। अपरे केचिद् व्यवहरन् राजकरस्य निमित्तं वयं स्वेषां ४
भूमिद्राक्षाक्षेत्राणि न्यासीकृत्य मुद्रा ऋणत्वेनागृह्णीम। अस्माकं वपूंष्य- ५
स्मदीयभ्रातॄणां वपुषां तुल्यानि किञ्चास्माकं सन्तानास्तदीयसन्तानानां तुल्याः। किन्तु पश्यत तनया दुहितरश्चास्माभि र्दासत्वाधीनीकर्त्तव्याः, अस्माकं दुहितॄणां मध्ये काचिद् इदानीमपि दासत्वाधीनाः सन्ति तासां मोचनञ्चास्माकं न साध्यं यतोऽस्माकं शस्यक्षेत्राणि द्राक्षाक्षेत्राणि चापरेषां लोकानाम् अधिकारित्वे विद्यन्ते।

तदानीम् अहं तेषाम् एतादृशं कातरत्वशब्दम् एतानि वाक्यानि च ६
निशम्य भृशं कुपितवान्। अपरं निजे मानसे विविच्य प्रमुखलोकान् ७
अधिपतींश्च भर्त्सयन् तेभ्यो ऽवादिषं, यूयं निजनिजभ्रातृभ्यः कुसीदं
गृह्णीथ। अपरं तेषां विरुद्धं महासमाजं कृत्वागदं, अस्माकं भ्रातरो ये ८
यिहूदीयलोका इतरदेशीयेषु विक्रीता आसन् ते यथासाध्यम् अस्माभिः पर्य्यक्रीयन्त, इदानीं यूयमपि किं स्वेषां सहजान् विक्रीणीथ? ते किम् अस्माभिः क्रेतव्याः? तेन ते लोका नीरवाः सन्तो ऽतिष्ठन् किमपि
प्रतिभाषितुं नाशक्नुवन्। अपरं मया गदितं युष्माभि र्यत् क्रियते तन्न ९
भद्रम्। अस्माकं वैरिणाम् इतरजातीयलोकानां निन्दाभयाद् अस्मदीये-
श्वरस्य भक्तिः किं युष्माभि र्नाचरितव्या? अहं मदीयभ्रातरो मम दा- १०

सेयाश्च वयमपि मुद्राणां शस्यानाञ्च दानेन तेषाम् उत्तमर्णाः, किन्तु मया
११ विनीयते, एतत् कुसीदग्रहणम् अस्माभिरुज्झितव्यं। मया विनीयते
तेषां शस्यक्षेत्राणि द्राक्षाक्षेत्राणि जितवृक्षा गेहानि चास्माभिः पुन
र्दीयन्तां, युष्माभिश्च तेभ्यो यानि मुद्राशस्यद्राक्षारसतैलानि ऋणत्वेन
१२ दत्तानि तेषां वृद्धकुसीदमपि पुन र्दीयतां। तदानीं ते कथितवन्तः, वयं
तानि प्रतिदास्यामस्तान् किञ्चन न याचिष्यामहे त्वया यद् गद्यते तदेव
करिष्यामहे। तदानीम् अहं याजकान् आहूय तद्वाक्यानुसारेणास्माभिः
१३ कारिष्यत इति तान् अशपथयम्। अपरं मया वस्त्राञ्चलम् आस्फाल्य
गदितं, यो जन एतां प्रतिज्ञां न समाचरति, ईश्वरस्तस्य गृहाद् उपा-
र्ज्जितविषयाच्च तम् इत्थम् आस्फाल्य क्षिपतु स चेत्थम् आस्फालितो
ऽकिञ्चनश्च भवतु। ततः कृत्स्नः समाजस्तथास्त्वित्युक्त्वा परमेश्वरं धन्यम्
अवदत्। अनन्तरं मनुजास्तद्वाक्यानुयायिनम् आचारम् अकुर्व्वन्।
१४ यिहूदादेशस्याधिपतित्वपदे मम नियोगस्य दिनमारभ्यार्थतो नृपते-
रर्तसस्तस्य राजत्वस्य विंशतितमं वत्सरमारभ्य द्वात्रिंशत्तमं वत्सरं या-
वद् एतान् द्वादशवत्सरान् मया मम भ्रातृनिवहेन च देशाध्यक्षस्य भक्ष्यं
१५ नाभुक्ति। मत्पूर्व्ववर्त्तिनो ऽधिपतयो लोकेषु भारम् अर्पयन्तस्तेभ्यश्चत्वा-
रिंशच्छेकलपरिमितानि रौप्याणि तदन्यद् भक्ष्यं द्राक्षारसञ्च गृहीत-
वन्तः, अपरं तेषां दासेया अपि लोकानां शासकत्वम् अकुर्व्वन्, परन्त्वी-
१६ श्वराद् बिभ्यता मया तन्नाक्रियत। एतस्य प्राकारस्य कार्य्ये ममासक्ति-
हेतुना वयं किमपि क्षेत्रं नाक्रीणीम किञ्च मदीयाः सर्व्वे दासास्तस्मिन्
१७ स्थाने कर्म्मणि मिलितवन्तः। अपरं यिहूदीयानाम् अधिपतीनाञ्च सार्द्ध-
शतं जना अस्मच्चतुर्दिक्स्थानां भिन्नजातीयानां मध्याच्चास्माकम् उपकण्ठं
१८ आगता लोकाश्च मदीयभोजनासने समुपाविशन्। तस्मिन् समये मन्नि-
मित्तं प्रतिदिनम् एको वृषभः षट् उत्तममेषाश्चापच्यन्त पक्षिणो ऽप्य-
पच्यन्त। अपरं दशदिवसानां मध्ये वारमेकं यथेष्टो नानाविधो द्राक्षा-
रसश्चानीयत। तथापि लोकानां दासत्वभारस्य गरिष्ठत्वाद् अधिपति-
१९ त्वस्य वेतनं नायाचे। हे मदीयेश्वर, एतेषां लोकानां निमित्तं मया
यानि कर्म्माणि व्यधीयन्त तदनुसारेण कल्याणाय मां स्मर।

---

६ षष्ठोऽध्यायः।

१ सन्बल्लटस्य धूर्त्तता शमाञमरयो वेतनग्राहिणा भविष्यद्वादिना निहिमियं त्रासयितुं

तस्य चेष्टनं १५ कर्म्मणः समाप्तिप्राप्तत्वात् वैरिणाम् उद्वेजनं १७ रिपुभिः सह प्रमुखयिहूदीयानां गुप्तमन्त्रणायाः प्रकटीभवनं।

अनन्तरं मया प्राकारः पुनर्निर्म्मितस्तस्य मध्ये किञ्चन जीर्णं स्थानं १
न विद्यते केवलं द्वारैः कवाटानां संयोगस्तदानीमपि न कृत एतस्यां
वार्त्तायां सन्वल्लटेन टोवीयेनारवीयगेशमेनास्माकम् अन्यै र्वैरिभिश्च
श्रुतायां सन्वल्लटो गेशमश्च मां हिंसितुं मतिं विधाय दूतेन माम् प्रति २
वच इदं प्राहिणुताम्, आगच्छ वयम् ओनुप्रान्तरस्थेषु ग्रामेषु परस्परं
साक्षात् कुर्म्महे। ततो मया दूतैरिदं प्रतिवचनं तौ प्रति प्रहितम्, ३
अहम् एकं महत् कर्म्मानुतिष्ठामि, तत्रावरोढुं न पारयामि। मयि
शैथिल्यं विधाय युष्माकं सन्निधिं गते कर्म्म कुतो निवर्त्तिष्यते? इत्थं ४
चतुर्व्वारं तै र्ममोपकण्ठं लोका प्रहिता मयापि तान् प्रति तादृशं प्रत्यु-
त्तरं कृतं। अनन्तरं सन्वल्लटस्तेन प्रकारेण पञ्चमं वारं मम सन्निधिं ५
निजं दासेयं प्राहिणोत्। तस्य करे मुक्तं पत्रमेकमासीत् तन्मध्य एतादृ- ६
शानि वाक्यानि लिखितान्यविद्यन्त, त्वं यिहूदीयाश्च राजद्रोहं विधातुं
मतिं कुरुथ तन्निदानात् प्राकारं पुन र्निर्म्मिमीषे पश्चात् त्वं तेषां राजा
भविष्यसीति किंवदन्ती भिन्नजातीयानां मध्ये श्रूयते गेशमेनापि तदेवो-
च्यते। अपरं यिहूदीयानां नृपतिरेको विद्यते त्वं स्वस्य कृते यिरूशालमि ७
वच इदं घोषयितुं भविष्यद्वादिनो न्ययुङ्क्थाः। इदानीम् एतद्वा-
क्यानुयायिनी वार्त्ता नृपेण श्रोष्यते तस्माद् आगच्छावां मिलित्वा
मन्त्रयावः। तदानीम् अहं दूतेन तं प्रति वाचमिमामवादिषं त्वया ८
यद्यद् वचो गदितं तद् यथार्थं नहि, तत् तवैव मनसा कल्पितम्।
एतस्मिन् कर्म्मणि तेषां हस्ता दुर्ब्बला भवन्तु तेन तन्न सेत्स्यतीत्याशया ९
ते सर्व्वेऽस्मान् अत्रासयन्, अतो हे परमेश्वर त्वं मम हस्तौ बलिनौ
कुरु। अनन्तरं मिहेटवेलस्य पौत्रो दिलायस्य पुत्रो यः शिमयियो १०
ऽवरुद्ध आसीत् मयि तस्य निवेशनं गते सोऽवादीत्, ईश्वरस्य गेहे
ऽर्थतो मन्दिरस्य मध्यस्थाने मिलित्वास्माभि र्मन्दिरस्य द्वाराणि रुध्यन्तां
यतस्ते त्वां व्यापादयितुमागमिष्यन्ति क्षणदायामस्यामेव त्वां व्यापाद-
यितुम् आगमिष्यन्ति। तेनाहम अभाषे मत्तुल्यो मनुजः किं पलायि- ११
ष्यते? मत्तुल्यो मानवः प्राणरक्षार्थं किं मन्दिरम् आश्रयिष्यते? मया
तन्न प्रवेक्ष्यते। अनन्तरम् ईश्वरस्तं न प्राहिणोत् स मम वैरित्वात् तद् १२
भविष्यद्वचनम् अभाषत किञ्च टोवीयः सन्वल्लटश्च तस्मै वेतनं प्राय-

१३ च्छतां मया विविच्यैतद् अबोधि। अहं यद् बिभ्यत् तत् कर्म्म कुर्य्यां पात-
कञ्चाचरेयमित्थं तयोरभिमतात् कुख्यातिं गत्वा ताभ्यां निन्दनीयो
१४ भवेयम् एतत्कृते तौ तस्मै वेतनं व्यतरताम्। हे मदीश्वर टोबियः सन-
बल्लटो भविष्यद्वादिनी नोयदिया तदितरे च ये भविष्यद्वादिनो माम्
अभीषयन् ते निजक्रियानिदानात् त्वया स्मर्य्यन्तां।

१५ अनन्तरं द्विपञ्चाशद् दिवसानां मध्य इलूलमासस्य पञ्चविंशे दिवसे
१६ प्राकारः समाप्तिम् अगमत्। तदानीम् अस्माकं निखिलैः परिपन्थि-
भिस्तस्यां वार्त्तायां श्रुतायाम् अस्मच्चतुर्दिक्स्थभिन्नजातीयैश्च तस्मिन्
कर्म्मणि दृष्टे ते ऽतीव विवर्णवदना अभवन् यत एतत् कर्म्मास्माकम्
ईश्वराद् अभवदिति तैरबोधि।

१७ तस्मिन् समये यिहूदावंशस्य प्रमुखमानवाः टोबियस्य सन्निधिं बहूनि
पत्राणि प्राहिण्वन् तथा टोबियस्य पत्राण्यपि तेषां सन्निधिम् आग-
१८ च्छन्। यतः स आरहतनयस्य शिखनियस्य जामातासीत् किञ्च तस्य
तनयो यिहोहाननो बेरिखियतनयस्य मिशुल्लमस्य दुहितरं व्यूढवान्
एतन्निदानाद् यिहूदामध्ये बहवो मानवाः शपथेन तस्य वश्या जाताः।
१९ ते मम समक्षं तस्य नुतिम् अकुर्व्वन् अपरं मदीयवार्त्तामपि तस्य समक्षं
अगदन्, किञ्च टोबियो मां त्रासयितुं मां प्रति पत्राणि प्राहिणोत्।

---

७ सप्तमोऽध्यायः।

१ हनानेर्हनानियस्य च हस्तेषु यिरूशालमस्य समर्पणं ५ बाबिलाद् आगतानां वन्दिमनुजानां संख्या ३९ याजकानां लेवीयानां गायकानां द्वारपालानां निथीनीयानां सुलेमनो दासवंशीयानाम् अविदितवंशयाजकानाञ्च कथनं ६६ निखिललोकानां संख्या पश्वादीनां संख्या प्रधानलोकानां दानानि च।

१ अनन्तरं प्राकारे निर्म्मिते मया द्वारेषु कवाटान्ययुज्यन्त, अपरं द्वार-
२ पालका गायका लेवीयाश्च नियुक्ताः। अनन्तरं मया निजभ्राता हनानि
दुर्गाधिपति र्हनानियश्च यिरूशालमस्याध्यक्षत्वे नियुक्तौ यतो हनानियो
३ विश्वास्यः पुमान् ईश्वरभक्त्या बहुभ्यो विशिष्टश्चासीत्। अपरम् अहं
तौ समादिशं यावत् सूर्य्यरश्मिः सतापो न भवति तावद् यिरूशालमस्य
द्वाराणि युवाभ्यां न मोचयितव्यानि। अपरं मनुष्येषु खगेहानि न
प्रविष्टेषु द्वाराणि रोद्धव्यान्यर्गलैश्च बद्धव्यानि। किञ्च यिरूशालमनि-
वासिनो युवाभ्यां रक्षकवर्गेषु नियोक्तव्याः, एकैको जनः स्वीयरक्षकवर्गे

स्वीयगेहसम्मुखे च नियुज्यतां। यतो नगरं सुविततं सुमहच्चास्ति किन्तु ४
तन्मध्ये स्तोकलोका विद्यन्ते गेहनिर्म्माणञ्च न प्रवर्त्तते।

अपरम् अहं यत् प्रमुखलोकान् अधिपतीन् तदन्यलोकांश्च गणनार्थं ५
सङ्गृह्णीयाम् इत्यस्मिन् अर्थे मदीयेश्वरो मम मनः प्रावर्त्तयत् किञ्च मया
बाबिलाद् आगतानां मनुजानां वंशावलिसूचकं पत्रमेकम् अलम्भि
तत्रैतानि वचांसि लिखितान्यासन्।

बाबिलीयनृपेण निबूखद्नित्सरेण प्रवासिता जनपदस्य ये वन्दिलोका ६
यिरूशालमं यिहूदादेशीयानि निजनगराणि वा प्रत्यागन्तुं यात्रां वि-
धाय सिरुब्बाबिलो येशूयो निहिमियो ऽसरियो रयमाहो नहमानि ७
र्मर्दिखयो विल्शनो मिस्परो विग्वयो निहूमो बानाहश्चैतैः समं परा-
वृत्याजग्मुस्तेषाम् इस्रायेलीयलोकानां संख्या। परियोशवंशस्य शताधिके ८
द्वे सहस्रे द्विसप्ततिजनाः। शिफटियवंशस्य द्विसप्तत्यधिकानि त्रीणि ९
शतानि जनाः। आरहवंशस्य पञ्चसप्तत्यधिकानि षट्शतानि जनाः। १०
पहतमोयाववंशस्य येशूययोयाववंशीया अष्टादशाधिकाष्टशताधिके ११
द्वे सहस्रे जनाः। एलमवंशस्य चतुःपञ्चाशदधिकशतद्वयाधिकं सहस्रं १२
जनाः। सत्तूवंशस्य पञ्चचत्वारिंशदधिकान्यष्टशतानि जनाः। सक्कयवं- १४
शस्य षष्ट्यधिकानि सप्तशतानि जनाः। विन्नूयिवंशस्याष्टचत्वारिंशदधि- १५
कानि षट्शतानि जनाः। वेवयवंशस्याष्टाविंशत्यधिकानि षट्शतानि १६
जनाः। असगदवंशस्य द्वाविंशत्यधिकशतत्रयाधिके द्वे सहस्रे जनाः। १७
अदोनीकामवंशस्य सप्तषष्ट्यधिकानि षट्शतानि जनाः। विग्वयवंशस्य १९
सप्तषष्ट्यधिके द्वे सहस्रे जनाः। आदीनवंशस्य पञ्चपञ्चाशदधिकानि षट्- २०
शतानि जनाः। आटेरवंशस्य हिष्कियवंशीया अष्टनवतिजनाः। हशू- २२
मवंशस्याष्टाविंशत्यधिकानि त्रीणि शतानि जनाः। वेत्सयवंशस्य चतुर्विं- २३
शत्यधिकानि त्रीणि शतानि जनाः। हारीफवंशस्य द्वादशाधिकं शतं २४
जनाः। गिवियोनवंशस्य पञ्चनवतिजनाः। वैतलेहमीया निटोफाही- २६
याश्च मनुजा अष्टाशीत्यधिकं शतं जनाः। अनाथोतीया मनुजा अष्टा- २७
विंशत्यधिकं शतं जनाः। वैथस्मावतीया मनुजा द्विचत्वारिंशज्जनाः। २८
किरियतयियारीमोयाः किफीराहीया वेरोतीयाश्च मनुजास्त्रिचत्वा- २९
रिंशदधिकानि सप्तशतानि जनाः। रामोतीया गेवायीयाश्च मनुजा ३०
एकविंशत्यधिकानि षट्शतानि जनाः। मिक्मसीया मनुजा द्वाविंशत्य- ३१
धिकं शतं जनाः। वैथेलीया अयीयाश्च लोकास्त्रयोविंशत्यधिकशतं जनाः। ३२

२४ अन्यनिर्वोमनुजा द्विपञ्चाशज्जनाः। अन्यैलमवंशस्य चतुःपञ्चाशदधि-
२५ कशतद्वयाधिकं सहस्रं जनाः। हारीमवंशस्य विंशत्यधिकानि त्रीणि
२६ शतानि जनाः। यिरीहोवंशस्य पञ्चचत्वारिंशदधिकानि त्रीणि शतानि
२७ जनाः। अपरं लोदवंशस्य हादीदवंशस्य ओनोवंशस्य चैकविंशत्यधि-
२८ कानि सप्तशतानि जनाः। सिनायावंशस्य त्रिंशदधिकनवशताधिकानि
त्रीणि सहस्राणि जना आसन्।
३९ याजकानाम् इयं संख्या। येशूयवंशजयिदयियवंशस्य त्रिसप्तत्यधि-
४० कानि नवशतानि मनुजाः। इम्मेरवंशस्य द्विपञ्चाशदधिकं सहस्रं जनाः।
४१ पश्हूरवंशस्य सप्तचत्वारिंशदधिकशतद्वयाधिकं सहस्रं जनाः। हारी-
मवंशस्य सप्तदशाधिकं सहस्रं जनाः आसन्।
४३ लेवीयानामियं संख्या। होदवियवंशे येशूयस्य कद्मीयेलस्य च वंशस्य
चतुःसप्ततिजना आसन्।
४४ गायकानामियं संख्या। आसफवंशस्याष्टचत्वारिंशदधिकं शतं जना
आसन्।
४५ द्वारपालानामियं संख्या। शल्लुमवंशस्याटेरवंशस्य टल्मोनवंशस्या-
क्कूववंशस्य हटीटावंशस्य च साकल्येनाष्टात्रिंशदधिकं शतं जना आसन्।
४६ निथीनीयलोकानामियं संख्या। सीहो हसूफाः टब्बायोतः केरोसः
४७ सीयः पादोनो लिबानाहो हगावः शल्मयो हाननो गिद्देलो गहरो
५१ रायो रित्सीनो निकोदो गसम उषः पासेहो वेषयो मियूनीयो निफूषी-
५५ यो वक्बूको हकूफा हरहूरो वस्लूतो मिहीदा हर्शा वर्कोसः सीषिराः
५६ तेमहो नित्सीहो हटीफाश्चैतेषां निखिलानां वंशनिवह आसीत्।
५७ सुलेमनो दासानां वंशनिवहस्येयं संख्या। सोटयः सोफेरतः पिरूदा
५८ यालाहो दर्कोणो गिद्देलः शिफटियो हटीलः पोखेरतहत्सीवायीम
६० आमोनश्चैतेषां सर्व्वेषां सन्ताननिवह आसीत्। निथीनीयाः सुलेमनो
दासानां सन्तानाश्च साकल्येन द्वानवत्यधिकानि त्रीणि शतानि जना
६१ आसन्। अपरं तेल्मेलहात् तेल्हर्शातः किरूवाद् अद्दोनाद् इम्मेरा-
च्चागता एते मनुजा इस्रायेलीयवंशा भवन्ति न वेति निश्चयार्थं निज-
६२ निजपितृवंशस्य गोत्रस्य च प्रमाणं दातुं न पारयामासुः। दिलायः
टोबियो निकोदश्चैतेषां वंशानां द्विचत्वारिंशदधिकानि षट्शतानि
६३ जना आसन्। अपरं याजकवंशस्य मध्ये हबायस्य कोसस्य वर्सिल्लयस्य
च सन्तानाः। एष वर्सिल्लयो गिलियदीयवर्सिल्लयस्य दुहितरमेकां व्यूह्य

तस्य नाम्ना विख्यातोऽभवत्। वंशावली गणितलोकानां मध्य एते तेषां ६४
वंशपत्रं मृगयित्वा न लेभिरे तत्कारणाद् अशुचयः सन्तो याजकत्व-
पदाद् भ्रष्टा अभवन्। किञ्च शासकस्तान् अवदत्, यावद् ऊरीम- ६५
तुम्मीमयोरधिकारी याजक एको न भविष्यति तावत् पवित्रं वस्तु
युष्माभि र्न भोक्तव्यं।

अपरञ्च संगृहीताः कृत्स्नसमाजीयाः षष्ठ्यधिकशतत्रयाधिकानि द्वा- ६६
चत्वारिंशत्सहस्राणि जना आसन्। तदितरे तेषां दासा दास्यश्च सप्त- ६७
त्रिंशदधिकशतत्रयाधिकानि सप्तसहस्राणि जना आसन्। किञ्च तेषां
मध्ये पञ्चचत्वारिंशदधिके द्वे शते गायका गायिकाश्चासन्। तेषां हयाः ६८
षट्त्रिंशदधिकानि सप्तशतान्यासन् अश्वतराश्च पञ्चचत्वारिंशदधिके द्वे
शते आसन्। महाङ्गाश्च पञ्चत्रिंशदधिकानि चतुःशतानि गर्द्दभाश्च ६९
विंशत्यधिकसप्तशताधिकानि षट्सहस्राण्यासन्।

अनन्तरं पितृवंशानां केचित् मुख्यलोकास्तत्कर्म्मणि दानानि व्यत- ७०
रन्। विशेषतः शासको भाण्डागारे सहस्रैकादर्कोणपरिमितं काञ्चनं
पञ्चाशद् भाजनानि त्रिंशदधिकपञ्चशतानि याजकानां वसनानि च
व्यतरत्। अपरं प्रधानपितृकाः कतिपयलोकास्तत्कर्म्मणो भाण्डागारे ७१
विंशतिसहस्रादर्कोणपरिमितानि सुवर्णानि शतद्वयाधिके द्वे सहस्रे
अर्द्धशेटकरजतानि च व्यश्राणयन्। अपरं तदन्यलोकै र्यद्दायि तद्विं- ७२
शतिसहस्रादर्कोणपरिमितानि हेमानि द्वे सहस्रे अर्द्धशेटकरजतानि
सप्तषष्टियाजकीयवसनानि चासन्। अनन्तरं याजका लेवीया द्वार- ७३
पाला गायका अन्ये मनुजा निथीनीया निखिलेस्रायेलीयमनुजाश्च निजे
निजे नगरे निवस्तुम् आरभन्त।

---

८ अष्टमोऽध्यायः।

१ व्यवस्थाया वाक्यानां पठनं श्रवणञ्च ९ लोकानाम् आनन्दः १३ उपदेशबोधार्थं मनोनिधानं १६ उटजमहोत्सवाचरणञ्च।

अनन्तरं सप्तमे मासि समुपागत इस्रायेलीयलोकेषु च स्वीयनगरेषु १
वसतिं कृतवत्सु निखिला मनुजा नीरद्वारस्य सम्मुखस्थे सन्निवेशे जनैक-
वत् सम्भूयाध्यापकम् इष्राहम् अवदन्, परमेश्वर इस्रायेल्वंशं यां
व्यवस्थाम् आज्ञापयत् मूससस्तद्व्यवस्थापुस्तकं भवतानीयताम्। ततः २
सप्तममासस्य प्रथमे दिवसे याजक इष्राहः समाजस्य समक्षम् अर्थतो

नारीपुरुषादयो यावन्तो मनुजा निशम्य बोद्धुं शक्नुवन्ति तेषां सन्निधि
२ तत् शास्त्रम् आनिनाय। अपरं नीरद्वारस्य सम्मुखस्थे सन्निवेशे नारी-
पुरुषादयो यावन्तो मनुजा बोद्धुं शक्नुवन्ति तेषामुपकण्ठे स प्रभात-
मारभ्य मध्याह्नकालं यावत् तत् पपाठ तेन निखिला लोका व्यवस्था-
४ ग्रन्थश्रवणे श्रोत्राणि निदधिरे। अध्यापक इस्राहस्तत्कर्म्मणः कृते निर्म्मि-
तस्य काष्ठमयमञ्चस्योपरिष्टाद् उदतिष्ठत्, अपरं मत्तथियः शेमा अनाय
ऊरियो हिल्कियो मासेयाहश्चैते तस्य दक्षिणपार्श्वे किञ्च पिदायो
मीशायेलो मल्कियो हशुमो हस्वद्दानाहः सिखरियो मिशुल्लमश्चैते
५ तस्य वामपार्श्वे समतिष्ठन्त। ततोऽध्यापक इस्राहः सर्व्वलोकेभ्य उच्चतर-
स्थाने सन्तिष्ठमानो निखिललोकानां साक्षात् पुस्तकं मुक्तीचकार,
६ तेन पुस्तके मुक्तीक्रियमाणे सर्व्वे लोका उदतिष्ठन्। अनन्तरम् इस्राहो
महतः प्रभोः परमेश्वरस्य धन्यवादम् अकार्षीत् तेन निखिललोका ऊर्द्ध-
बाहवो भवन्तस्तथास्तु तथास्त्विति गदितवन्तः किञ्च शिरांसि नम-
७ यित्वा मुखै र्भुवं संस्पृश्य परमेश्वरस्य भजनम् अकुर्व्वत। अपरं येशूयो
बानिः शेरेबियो यामीनोऽक्कूवः शब्बियो होदियो मासेयाहः किलीटो
ऽसरियो योषावदो हाननः पिलायो लेवीयाश्च मनुजान् व्यवस्थाम्
८ अबोधयन् ततो मनुजाः स्वे स्वे स्थाने तस्थिवांसः। अनेन प्रकारेण ते
स्पष्टम् उच्चारयन्त ईश्वरस्य व्यवस्थां पठितवन्तः पठनसमये तदीयार्थं
कुर्व्वन्तो लोकान् अबोधयंश्च।
९ अपरं शासिता निहिमियो अध्यापक इस्राहो याजको लोकानां
शिक्षयितारो लेवीयाश्च निखिललोकान् अगदन्, इदं दिनं युष्माकं
परिवृढस्य परमेश्वरस्य प्रयतं दिनम्। अद्य युष्माभि र्न शोचितव्यं न वा
क्रन्दितव्यं। यतो व्यवस्थाया वाक्यानि शृण्वन्तः सर्व्वे लोकाः क्रन्दनम्
१० अकुर्व्वन्। पुनः स तान् अवादीत्, गच्छत पुष्टं वस्तु भुङ्ग्ध्वं मिष्टं वस्तु
पिवत च किञ्च येषां कृते किञ्चिदपि नोपकल्पितं विद्यते तेभ्यो भागान्
प्रहिणुत। अद्यतनम् अस्मदीयप्रभोः पवित्रं दिनं यूयं शोकं मा कुरुध्वं,
११ यतः परमेश्वरीयो य आनन्दः सैव युष्माकं शक्तिः। अनेन प्रकारेण
लेवीया निखिलान् लोकान् शान्तयन्तोऽवदन् नीरवा भवत, अद्य
१२ पवित्रं दिनं, यूयं शोकं मा कुरुध्वं। तदानीं सर्व्वे मनुजाः स्वान् प्रति
कथितानि वाक्यानि बुद्धा भोजनं पानं भागप्रेषणं भृशम् आनन्दञ्च
कर्त्तुम् आगमन्।

अपरं द्वितीये दिने सर्व्वलोकानां प्रधानपितरो नरा याजका लेवी- १३
याश्च मिलित्वा व्यवस्थाया वाक्यानि बोद्धुम् उपाध्यायस्येष्रायस्य सन्नि-
धिम् आव्रजन्। तदानीं परमेश्वरो मूससा यां व्यवस्थाम् आदिष्टवान्, १४
तन्मध्ये लिखितो ऽयं विधिस्तैरलम्भि, यथा, सप्तममासस्य पर्व्वसमय
इस्रायेलीयवंशैरुटजेषु वस्तव्यम्, अपरं यूयं लिप्यनुसारेणोटजान् नि- १५
र्म्मातुं पर्व्वतं गत्वा जितवृक्षाणां वन्यजितवृक्षाणां मेन्धीनां खर्ज्जूरवृक्षा-
णां बहुपर्णतरूणाञ्च शाखा आनयतेति वाक्यं तैः स्वेषां निखिलनगरेषु
यिरूशालमे च घोषयितव्यं प्रचारयितव्यञ्च।

तेन मनुजै र्बहि र्गत्वा शाखा आनीयैकैकस्य गेहपृष्ठे प्राङ्गणे चाप- १६
रम् ईश्वरीयमन्दिरस्य प्राङ्गणेषु नीरद्वारस्य सन्निवेशे इफ्रयिमीयद्वारस्य
सन्निवेशे च स्वेषां कृते उटजा निर्म्मिताः। युद्धदासत्वात् परावृत्तानां १७
लोकानां कृत्स्नः समाज उटजान् निर्म्माय तेषूटजेषु प्रावसन्। नूनपुत्रस्य
यिहोशूयस्य समयमारभ्य तद्दिनं यावद् इस्रायेलीयवंशास्तादृशं न कृत-
वन्तः। तस्मात् महानन्दो ऽभवत्। किञ्च प्रथमं दिनम् आरभ्य शेषं १८
दिवसं यावत् प्रतिदिनम् ईश्वरीयव्यवस्थापुस्तकस्य पाठो ऽभवत्। इत्थं
ते सप्तदिनान्युत्सवम् आचरन् किञ्च विध्यनुसारेणाष्टमे दिवसे कार्य्य-
त्यागो ऽजायत।

९ नवमोऽध्यायः।

१ उपवासस्य पश्चात्तापस्य च कथनं ४ परमेश्वरीयानुग्रहस्य स्वीयपापानाञ्च स्वीकरणं।

तस्य मासस्य चतुर्विंशे दिवस इस्रायेलीयवंशा उपवस्तुं शाणवस- १
नानि परिधातुं मस्तकेषु धूली र्म्रक्षयितुञ्च स्थान एकस्मिन् मिलिताः।
अपरम् इस्रायेलीयवंशाः परजातीयेभ्यो लोकेभ्यः पृथग्भूय सन्तिष्ठ- २
मानाः स्वेषां पापानि स्वपितृलोकानाञ्च दुरितानि च स्वीकृतवन्तः।
किञ्च तेषु स्वेषां स्थाने स्थितवत्सु दिवसस्य चतुर्थांशं यावत् तेषां परि- ३
वृढस्य परमेश्वरस्य व्यवस्थापुस्तकम् अपठ्यत, तदन्यं चतुर्थांशं यावत्
ते पापस्वीकारं स्वेषां परिवृढस्य परमेश्वरस्य भजनञ्चाकुर्व्वत।

अपरं येशूयो वानिः कद्मीयेलः शिबनियो बुन्निः शेरेबियो वानिः ४
किनानिश्च लेवीयानां मञ्च उत्तिष्ठन्तः स्वेषां प्रभुं परमेश्वरम् उद्दिश्य
प्रोच्चैःस्वरेण प्रार्थनाम् अकुर्व्वत। अनन्तरं येशूयः कद्मीयेलो वानि ५

हंशव्नियः शेरेवियो होदियः शिवनियः पिथाहियश्चैते लेवीया अग-
दन्, यूयम् उत्थाय स्वेषां परमेश्वरस्य नित्यस्थायिनं धन्यवादं विधत्त,
यथा, सर्व्वस्माद् धन्यवादात् स्तुतेश्च श्रेष्ठं यत् त्वदीयं गौरवान्वितं
६ नामधेयं तद् धन्यं भवतु। त्वमेवाद्वितीयः परमेश्वरः। गगनं सर्व्वोप-
रिस्थं स्वर्गं तदीयानि सर्व्वाणि बलानि च वसुमती तत्रत्यानि सर्व्वाणि
वस्तूनि च जलधिस्तत्रत्यानि सर्व्ववस्तूनि च त्वयैव ससृजिरे त्वमेव तेषां
७ सर्व्वेषां जीवयितासि स्वर्गीयबलानि च तव भजनं कुर्व्वते। हे यिहोवाः,
त्वमेव स ईश्वरो य इब्रामं वरित्वा कस्दीयानाम् ऊरनगराद् वहि-
८ ष्कृत्य तदीयं नामधेयम् इब्राहीमित्यकार्षीः। अपरं स्वसाक्षात् तस्य
मनसो विश्वास्यतां दृष्ट्वा तेन समं नियमं विधाय किनानीयानां हित्ती-
यानाम् इमोरीयाणां पिरिषीयाणां यिबूषीयाणां गिर्गाशीयानाञ्च जन-
पदं तदीयवंशाय दातुं प्रतिश्रुतवान् तव तद् वाक्यं साधितवांश्च,
९ यतस्त्वं धर्म्मस्वरूपः। त्वं मिसरदेशेऽस्माकं पूर्व्वपुरुषाणां दुर्गतिम् अद्रा-
१० क्षीरारवीयसागरस्य तीरे तेषां प्रार्थनाम् अश्रौषीश्च। अपरं फिरौण-
स्तस्य दासानां तदीयजानपदानां सर्व्वेषाञ्च समक्षं त्वं लक्षणान्याश्चर्य्य-
कर्म्माणि च दर्शितवान् यतो मिस्रीयास्तेषां विरुद्धं धर्षम् आचरन्
११ अत्र त्वं मनो निधायाद्येव यशः प्राप्तः। अपरं त्वया तेषां सम्मुखे जलधौ
द्विधा विभक्ते ते स्थलेनेव जलधे र्मध्येन पारं गताः किञ्च जलराशौ
यद्वत् पाषाणा निक्षिप्यन्ते तद्वत् तेषाम् अनुधावकास्त्वया गम्भीरतोयेषु
१२ निक्षिप्ताः। अपरं त्वं दिवा मेघस्तम्भेन रजन्याञ्च तेषां गन्तव्यमार्गदी-
१३ पकेन वह्निस्तम्भेन तान् अगमयः। अपरं त्वं सीनयगिरिम् अवरुह्य
गगनात् तैः समम् आलपितवान् तान् प्रति न्याय्यविचाराज्ञा यथार्थ-
१४ व्यवस्था उत्तमान् विधीन् आदेशांश्च समाज्ञापयः। किञ्च निजं प्रयतं
विश्रामदिनं तान् आज्ञापयः, अपरं निजदासेन मूससा तान् विधीन्
१५ आदेशान् व्यवस्थाञ्च समादिशः। किञ्च तेषां क्षुन्निवारणाय स्वर्गात् तेभ्यो
भक्ष्यम् अदाः, पिपासानिवारणार्थञ्च शैलात् तोयं निरगमयः, किञ्च
त्वं तेभ्यो यं नीवृतं दातुं शपथमकार्षीस्तत्परिग्रहणार्थं तं प्रवेष्टुं तान् आ-
१६ ज्ञापयामासिथ। तथाप्यस्माकं ते पूर्व्वपुरुषा धर्षम् आचेरुरबाध्याः
१७ सन्तस्त्वदीयाज्ञासु मनांसि न निदधिरे। ते वशताम् अस्वीकृत्य स्वेषां
निमित्तं त्वया कृतान्याश्चर्य्यकर्म्माणि विसस्मरुः, किन्त्वबाध्याः सन्तो नि-
देशलङ्घनेन पुनर्व्वारं दासत्वावस्थां गन्तुं नायकमेकं नियुयुजिरे। तथापि

क्षमावान् दयालुरनुकम्पावान् क्रोधे धीरो ऽनुग्रहे महान् ईश्वरो यस्त्वं
त्वया ते न तत्यजिरे। ते गलितधातुना वत्सप्रतिमां निर्म्माय जगदुः, १८
एषा सा देवता यया वयं मिसरत आनिन्यामहे। इत्थं महाक्रोधोत्पा-
दकेषु कर्म्मसु तै र्विहितेष्वपि त्वं निजप्रभूतानुकम्पातः प्रान्तरे तान् १९
न तत्यजिथ दिवा तेषां मार्गप्रदर्शको मेघस्तम्भो रजन्याञ्च गन्तव्यवर्त्मदी-
पको वह्निस्तम्भस्तेषां पुरतो नापससार। किञ्च त्वं तेभ्य उपदेशं प्रदातुं २०
निजं सदात्मानं तेभ्यो विश्राणयाञ्चकर्थ त्वया दत्तं मान्नाभक्ष्यं तेभ्यो ना-
पजहर्थ किञ्च पिपासायां जातायां तेभ्यो ऽम्भांसि वितेरिथ। त्वं २१
चत्वारिंशद्वत्सरान् यावत् प्रान्तरे तान् परिपालयाञ्चकर्थ तेषां कस्यापि
वस्तुनो ऽभावो न बभूव, तेषां वसनानि न जेरुस्तेषां पदानां स्फीत-
तामपि न बभूवे। अपरं त्वं राष्ट्राणि जातीश्च तेषु समर्प्य सर्व्वदिक्षु २२
तान् विस्तारयामासिथ तेन ते नृपतेः सीहोनो देशम् अर्थतो हिश्-
वोनीयनरपते र्जनपदं वाशनीयनृपतेरोगस्य जनपदञ्च भोगार्थं लेभिरे।
अपरं त्वं विहायसो नक्षत्राणीव तेषां वंशान् वर्द्धयाञ्चकर्थ किञ्च यूयम् २३
एनं जनपदं भोगार्थं प्रविशतेति वाक्यं तेषां पितृलोका यं जनपदमधि
त्वयोक्तास्तं जनपदं तान् आनिनयिथ। अनन्तरं तं जनपदं प्रविशन्त- २४
स्तेषां वंशास्तमधिचक्रिरे किञ्च त्वं तेषां समक्षं तद्देशनिवासिनः किना-
नीयान् पराजिग्यिषे किञ्च राजनिवहेन समं जनपदस्थान् निखिल-
मानवान् तेषां वशीकृत्य तान् प्रति स्वेच्छानुसारतः कर्त्तुं ददिथ। तेन २५
हेतुना ते तेषां गाढानि नगराण्युर्व्वरां भूमिञ्च जगृहुः सर्व्वविधवित्तैः
पूर्णानि गेहानि खनितान् प्रहीन् गोस्तनीक्षेत्राणि प्रभूतान् फलवतो
विटपिनश्च लेभिरे किञ्च भुञ्जानाः सौहित्यम् ईयुः पुष्टाश्च बभुवु
र्भवतो महावदान्यत्वेनापप्यायिरे च। तथापि तैः प्रतीपीभूय भवतः २६
प्रतिकूलाचरणं कृत्वा भवदीया व्यवस्था पृष्ठतश्चक्रे भवतो दासा ये
भविष्यद्वादिनस्त्वां प्रति तान् परावर्त्तयितुं तेषां विरुद्धं साक्षित्वं
ददिरे तान् ते व्यापादयाञ्चक्रु र्महाघृणोत्पादकानि कर्म्माणि चक्रिरे
च। ततः परं त्वया तेषु सपत्नानां करेषु समर्पितेषु तैस्ते चिक्लिशिरे २७
किञ्च क्लेशसमये त्वाम् उद्दिश्य तेषु प्रार्थनां कृतवत्सु त्वया स्वर्गे ताम्
आकर्ण्य स्वीयप्रभूतानुकम्पया तेभ्य उद्धारयितारो दत्तास्ते च परिपन्थिनां
करेभ्यस्तान् उद्धारयाञ्चक्रुः। इत्थं विश्रामं लब्ध्वा तेषु पुनर्व्वारं भवतः २८
समक्षं कुत्सिताचारं कर्त्तुं प्रवृत्तेषु भवान् तान् प्रत्यर्थिनां करेषु सम-

र्पयामास ततः प्रत्यर्थिषु तेषाम् उपरिष्टात् प्रभुत्वं कुर्व्वत्सु तैः पराहत्य
त्वाम् उद्दिश्य प्रार्थनायां कृतायां त्वं स्वर्गे तां निशम्य निजभूरिकृपानु-
२८ सारेण बहुवारान् तान् उद्धारयाञ्चकर्थ, किञ्च निजं व्यवस्थावर्त्म तान्
पुनर्व्वारम् आनयिष्यन् तेषां विरुद्धं साक्ष्यं वितेरिथ, तथापि ते गर्व्वि-
न्तस्तव निदेशेषु मनांसि न निदधिरे, परन्तु यासाम् आचरणेन मानवो
जीवति भवतस्तासां राजनीतीनां विरुद्धं कलुषं चक्रिरे, दुःशास्य-
स्कन्धाः स्तब्धग्रीवाश्च भूत्वा भवत आदेशे मानसानि न निदधिरे।
३० तथापि त्वं बहून् अब्दान् यावत् तान् प्रति सहिष्णुतां विधाय भवदीय-
दासानां भविष्यद्वादिनां मध्यवर्त्तिना भवदात्मना तेषां विरुद्धं साक्ष्यं
वितेरिथ किन्तु ते मनांसि न निदधिरे तेन हेतुना त्वया ते जनपदस्थ-
३१ जनानां शयेषु समर्पयाञ्चक्रिरे। किन्तु महानुकम्पानिदानात् सर्व्वथा
त्वया ते न विनाशयाञ्चक्रिरे न विजहिरे च यतस्त्वं दयावान् कृपामय-
३२ श्चेश्वरः। इदानीं हे अस्माकीन ईश्वर त्वं महान् शक्तिमान् भयङ्करश्च
तथा नियमानुकम्पापालक ईश्वरः, अश्शूरीयनृपतीनां समयमारभ्य
यावदद्यास्माकं नृपान् अधिपतीन् याजकान् भविष्यद्वादिनः पितृलो-
कान् भवदीयनिखिलप्रजाश्चाधितो ऽस्मान् प्रति यानि यानि दुःखान्यघ-
३३ टन्त तानि भवदीयदृष्ट्या क्षुद्राणि न बुध्यन्तां। अस्मान् प्रत्येतेषु सर्व्वेषु
घटितेषु भवान् धर्म्मस्वरूपो ऽस्ति भवता न्याय्यं कर्म्माकारि किन्तु वयं
३४ कलुषम् अकुर्म्महि। अपरम् अस्माकं राजानो ऽधिपतयो याजकाः
पितृलोकाश्च भवदीयव्यवस्थानुसारेण नाचारिषुः, किञ्च भवान् या
आदिशत् ता भवदीयाज्ञा राजनीतीश्च प्रति ते मनांसि न न्यधीयन्त।
३५ अपरं ते स्वकीयराजत्वसमये भवता दत्तस्य प्रभूतप्रसादस्य भोगकाले
भवता तेषां वशीकृते प्रशस्ते पीने देशे भवन्तं नासेवन्त स्वेषां कुत्सितेभ्यो
३६ दुष्कृतेभ्यः पराङ्मुखाश्च न बभूवुः। पश्यतु वयमद्य दासा आस्महे भवान्
अस्माकं पूर्व्वपुरुषेभ्यः फलानां शुभानाञ्च भोगार्थं यं देशम् अददात्
३७ तस्य मध्ये वयं दासेया आस्महे। भवान् अस्माकं कलुषकारणाद् अस्मा-
कम् उपरि यान् नरपतीन् नियुक्तवान् ते जनपदस्य प्रभूतान्युद्भूतवस्तूनि
भुञ्जन्ते स्वेषाम् इच्छानुसारतो ऽस्माकं वपुषां पशूनाञ्चोपरि राजत्वं
३८ क्रियते च वयञ्च महाकष्टापन्ना आस्महे। एतो हेतो र्वयं सत्यं नियम-
मेकं विधाय लेखिष्यामहे किञ्चास्माकम् अधिपतयो लेवीया याजकाश्च
तत्र मुद्राङ्कं करिष्यन्ति।

१० दशमोऽध्यायः।

१ नियमस्य मुद्राङ्ककारिणां नामानि २८ नियमस्य विवृतिश्च।

मुद्राङ्ककारकाणां नामानि। शासितार्थतो हखलियस्य तनयो निहि- १
मियः सिदिकियः सिरायाहो ऽसरियो यिरिमियः पशहूरो ऽमरियो २
हटूशः शिवनियो मल्लूको हारीमो मिरेमोत ओवदियो दानियेलो ६
गिन्नथोनो वारूको मिशुल्लमो ऽवियो मियामीनो मासियो विल्गयः ८
शिमयियश्चैमे याजका आसन्। अपरम् असनियस्य तनयो येशूयो ९
हेनाददवंशजो विन्नूयिः कद्मीयेलश्चापरं तेषां भ्रातरो ऽर्थतः शिवनियो १०
होदियः किलीटः पिलायो हाननो मीखा रिहोबो हशवियः सक्कूरः ११
शेरेवियः शिवनियो होदियो वानि विनीनुश्चैमे लेवीया आसन्। १२
अपरं परियोशः पहतमोयाव एलमः सत्तु वानि वुन्निरस्गदो वेवयो १५
ऽदोनियो विग्वय आदीन आटेरो हिष्कियो ऽस्सूरो होदियो हशुमो १८
वेत्सयो हारीफो ऽनाथोतो नेवयो मग्पीयशो मिशुल्लमो हेषीरो मि- २१
शेषवेलः सादोको यद्दूयः पिलटियो हाननो ऽनायो होशेयो हनानियो २२
हशूवो हल्लोहेशः पिल्हः शोवेको रिहूमो हशव्नाहो मासेयो ऽहियो २६
हाननो ऽनानो मल्लूको हारीमो वानाहश्चैमे मनुजानां प्रमुखा आसन्। २७
अनन्तरम् अवशिष्टा ये जनाः परजातीयेभ्यः पृथग्भूयेश्वरस्य व्यवस्थां २८
प्रति परावृत्तास्ते मनुजा याजका लेवीया द्वारिणो गाथका निथी-
नीयास्तेषां भार्य्याः पुत्राः कन्याश्चार्थतः सर्व्वे ज्ञानवन्तो बुद्धिमन्तश्च
मानवाः स्वेषां मान्येषु भ्रातृष्वासक्ताः सन्तः शपथेनेमां प्रतिज्ञां चक्रिरे, २९
यथा, वयम् ईश्वरस्य दासेन मूससा प्रदत्ताम् ईश्वरीयव्यवस्थाम् आ-
चरिष्यामः किञ्चास्माकं परिवृढस्य परमेश्वरस्य सर्व्वा आज्ञा विधीन्
राजनीतीश्च मन्यमानाः पालयिष्यामस्तथा देशीयलोकैः स्वेषां तनुजा ३०
न विवाहयिष्यामः किञ्च तेषां तनयाः स्वेषां सुतै र्न विवाहयिष्यामः,
अपरं विश्रामदिने देशीयलोकेषु विक्रेतव्यानि वा भक्ष्याणि द्रव्याणि ३१
विक्रयार्थम् आनीतवत्सु विश्रामदिने महोत्सवदिने वा तेभ्यस्तानि न
क्रेष्यामो ऽपरं सप्तमे सम्वत्सरे ऋणादानं विहास्याम इति। अधिकन्तु ३२
वयं स्वेषाम् ईश्वरीयमन्दिरस्य परिचर्य्यार्थम् अर्थतो दर्शनीयपूपानां ३३
नित्यनैवेद्यानां नित्यहोमानां विश्रामवाराणाम् अमावस्यानां वार्षिको-
त्सवानां प्रयतवस्तूनाम् इस्रायेल्वंशस्य प्रायश्चित्तार्थकपापबलीनाञ्च नि-

मित्तम् अस्माकम् ईश्वरीयमन्दिरस्य निखिलकर्म्मणां निमित्तञ्च प्रतिव-
त्सरं शेकलस्य तृतीयांशं दास्याम इति प्रतिज्ञाभारं स्वेषाम् उपरिष्टाद्
३४ अर्पयितुं व्यवस्थाम् अकार्ष्महि। अपरं व्यवस्थाया लेखनानुसारेणा-
स्माकं परिवृढस्य परमेश्वरस्य होमवेद्यां ज्वालनार्थम् अस्माकं पितृ-
वंशानामनुसारेण प्रतिवर्षं निरूपिते काले ऽस्माकम् ईश्वरस्य मन्दिरे
काष्ठानि समानेतुं काष्ठान्यधि वयं याजकानां लेवीयानां मनुजानाञ्च
३५ मध्ये गुटिकापातम् अकार्ष्महि। अपरम् अस्माकं कृत्स्नभुवः प्रथमफलानि
निखिलतरूणां प्रथमानि फलानि च वत्सरे वत्सरे परमेश्वरस्य मन्दिरं
३६ आनेष्यामः, किञ्च व्यवस्थाग्रन्थस्य लेखनानुसारेणास्माकं प्रथमजातान्
तनयान् पशूंश्चार्थतो ऽस्माकं गवां मेषाणाञ्च प्रथमजातान् अस्माकम्
ईश्वरीयमन्दिरस्य परिचारकाणां याजकानां समीपम् ईश्वरस्य मन्दि-
३७ रम् आनेष्यामः, किञ्च स्वेषां शक्तूनां प्रथमं भागम् उपहारान् सर्व्व-
विधतरूणां फलानि गोस्तनीरसान् तैलानि चेश्वरीयमन्दिरस्य प्रको-
ष्ठेषु याजकानाम् उपकण्ठम् आनेष्यामो ऽपरम् अस्माकं भुव उत्पन्न-
द्रव्याणां दशमांशं लेवीयानाम् अन्तिकम् आनेष्यामस्ते लेवीया अस्माकं
३८ निखिलकृषीबलनगरेषु दशमांशं लप्स्यन्त इति वयं निश्चितवन्तः। अपरं
यस्मिन् समये लेवीया दशमांशं लप्स्यन्ते तस्मिन् समये हारोणवंशीया
याजका अपि तत्रोपस्थास्यन्ते किञ्च लेवीया अस्माकीनेश्वरस्य मन्दिरम्
अर्थतो भाण्डागारस्य कोष्ठानि दशमांशस्य दशमांशम् आनेष्यन्ति।
३९ यतः प्रयतपात्राणि परिचारकयाजका द्वारपाला गायकाश्च येषु कोष्ठेषु
तिष्ठन्ति तन्मध्यम् इस्रायेलीयवंशै र्लेविवंशस्य गोस्तनीरसतैलानाम्
उपहाराः समानेतव्याः, स्वेषाम् ईश्वरस्य मन्दिरम् अस्माभि र्न परि-
त्यक्तव्यम्।

---

११ एकादशोऽध्यायः।

१ यिरूशालमे निवस्तुं गुटिकापातेन लोकानां नियोजनं ३ तेषां लोकानां नामानि
२० अवशिष्टानां लोकानां ग्रामेषु निवसनं।

१ तस्मिन् समये लोकानाम् अधिपतयो यिरूशालमे न्यवसन् ततः परं
धर्म्मनगरे यिरूशालमे वासार्थं दशजनानां मध्यात् जनमेकं तत् स्थानम्
आनेतुम् अन्यान् नवजनान् अन्यनगराणि वासयितुञ्चावशिष्टा लोका

गुटिकापातम् अकुर्व्वत। किञ्च ये ये लोकाः स्वेच्छया यिरूशालमम् २
आवस्तुम् आगमन् मनुजास्तेभ्य आशिषं व्यश्राणयन्।
देशीया ये ये प्रमुखलोका यिरूशालमम् अध्यवसन् तेषां नामानि। ३
इस्रायेलीयवंशा याजका लेवीया निथीनीयाः सुलेमनो दासानां सन्ता-
नाश्च यिहूदादेशस्थनगरेष्वेकैकस्य पैतृकभूमौ नगरे वा न्यवसन्। अपरं ४
यिहूदावंशस्य विन्यामीनवंशस्य च कतिपयलोका यिरूशालमम् आव-
सन्। यिहूदावंशीयानां मध्ये पेरसवंशोद्भवो महललेलस्यातिवृद्ध-
प्रपौत्त्रः शिफटियस्य वृद्धप्रपौत्त्रो ऽमरियस्य प्रपौत्त्रः सिखरियस्य पौत्त्र
उषियस्य पुत्त्रो ऽथायः, किञ्च शीलोनेरतिवृद्धप्रपौत्त्रः सिखरियस्य वृद्ध- ५
प्रपौत्त्रो योयारीवस्य प्रपौत्त्रो ऽदायाहस्य पौत्त्रो हसायस्य पुत्त्रो यः
कल्होषिस्तस्य पौत्त्रो बारूकस्य पुत्त्रो मासेयः। यिरूशालमनिवासिनः ६
पेरसवंशीया लोकाः साकल्यतो ऽष्टषष्ट्यधिकानि चतुःशतानि बलवन्तो
मनुजा आसन्। किञ्च विन्यामीनवंशीयानां मध्य एते आसन् यिशायि- ७
यस्यातिवृद्धप्रपौत्त्र ईथीयेलस्य वृद्धप्रपौत्त्रो मासेयस्य प्रपौत्त्रः कोलाया-
हस्य पौत्त्रः पिदायस्य पुत्त्रो यो योयेदस्तस्य पौत्त्रो मिशुल्लमस्य पुत्त्रः
साल्लुः। तदितरे गव्वयः सल्लयो ऽन्ये लोकाश्च साकल्यतो ऽष्टाविंशत्यधि- ८
कानि नवशतानि मनुजाः। अपरं सिखेः पुत्त्रो योयेलस्तेषाम् अधिप ९
आसीत् किञ्च सिनूयाहस्य सुतो यिहूदा नगरस्य द्वितीयो ऽधिपतिरा-
सीत्। याजकानां मध्य एते आसन् योयारीवस्य तनयो यिदयियो १०
याखीनश्च। अपरम् अहीटूवस्यातिवृद्धप्रपौत्त्रो मिरायोतस्य वृद्धप्रपौत्त्रः ११
सादोकस्य प्रपौत्त्रो मिशुल्लमस्य पौत्त्रो हिल्कियस्य तनयः सिराय ईश्व-
रीयमन्दिरस्य पतिरासीत्। किञ्च मन्दिरस्य कर्म्मकारिणस्तेषां भ्रातरो १२
द्वाविंशत्यधिकान्यष्टशतान्यासन्। अपरं मल्कियस्यातिवृद्धप्रपौत्त्रः पश्-
हूरस्य वृद्धप्रपौत्त्रः सिखरियस्य प्रपौत्त्रो ऽम्सेः पौत्त्रः पिललियस्य पुत्त्रो
यो यिरोहमस्तस्य पुत्त्रो ऽदायाहः। अपरं तस्य प्रधानपितृका भ्रातरो १३
द्विचत्वारिंशदधिकानि द्विशतानि जनाः किञ्च इम्मेरस्य वृद्धप्रपौत्त्रो
मिषिल्लेमोतस्य प्रपौत्त्रो ऽहसयस्य पौत्त्रो ऽसरेलस्य पुत्त्रो ऽमशयः।
अपरं तेषां भ्रातृनिवहो ऽष्टाविंशत्यधिकं शतं महावीरा आसन्। १४
किञ्च तेषाम् अधिपतिः सब्दीयेलः। स कस्यचिन् महतो लोकस्य सन्तान
आसीत्। लेवीयानां मध्य एते आसन् वुन्नेर्वृद्धप्रपौत्त्रो हशवियस्य प्रपौ- १५
त्त्रो ऽस्रीकामस्य पौत्त्रो हस्सूवस्य पुत्त्रः शिमयियः। अपरं प्रमुखलेवी- १६

यानां मध्ये सब्बियो योषावदश्चेश्वरीयमन्दिरस्य वहिर्भूतकार्य्यस्याधि-
१७ पती आस्तां। किञ्चासफस्य प्रपौत्त्रः सब्देः पौत्त्रो मीखाहस्य पुत्त्रो मत्त-
नियः, अपरं तस्य भ्रातॄणां मध्ये द्वितीयो वक्वुकियः किञ्च यिदूथूनस्य
प्रपौत्त्रो गाललस्य पौत्त्रः शम्मूयस्य तनयो ऽब्द एते प्रार्थनाधन्यवादयो
१८ र्नियन्तार आसन्। पवित्रनगरस्था लेवीयाः साकल्येन द्वे शते चतुर-
१९ शीति र्जना आसन्। अपरं द्वारपालकानां मध्य एते आसन् अक्कूवः
टल्मोनश्च तयो र्द्वारपाला भ्रातरो द्विसप्तत्यधिकं शतं जनाश्च।
२० इस्रायेलीयवंशानां याजकानां लेवीयानाञ्चान्ये निखिललोका यिहू-
२१ दादेशस्थनगरेष्वेकैकस्य पैतृकभूमौ न्यवसन्। किन्तु निथीनीया ओफ-
लम् अध्यवसन्। किञ्च सीहो गिष्पश्च निथीनीयानाम् अध्यक्षावास्ताम्।
२२ अपरं मीखा वृद्धप्रपौत्त्रो मत्तनियस्य प्रपौत्त्रो हशवियस्य पौत्त्रो वानेः
पुत्त्रो य उषिरासफवंशीयानां गायकानां मध्यवर्त्ती जन एक आसीत
स ईश्वरीयमन्दिरस्य कर्म्मणि यिरूशालमनिवासिनां लेवीयानाम् अधि-
२३ पतिरासीत्। यतस्तेषां विषये नरपतिरादिदेश, अपरं गायकानां
२४ कृते प्रतिदिनं निरूपितांशो ऽदीयत। अपरं यिहूदासुतस्य सेरहस्य
वंशोद्भवो मिशेषवेलस्य तनयः पिथाहियो लोकानां निखिलकार्य्या-
२५ ण्यधि नृपस्य सहकार्य्यासीत्। किञ्च बहवो यिहूदीयाः पल्लीग्रामेषु
निजनिजक्षेत्रेष्वर्थतः किरियथर्वे तदीयग्रामेषु दीवोने तदीयग्रामेषु
२७ यिकब्सेले तदीयग्रामेषु येशूये मोलादायां वैतपेलटे हत्सरशूयाले
२८ बेर्शेबायां तदीयग्रामेषु सिक्लगे मिकोनायां तदीयग्रामेष्वैनरिम्मोणे सरिये
३० यर्मूते सानोहे ऽदुल्लमे तेषां ग्रामेषु लाखीशे तदीयक्षेत्रेष्वसेकायां तदीय-
ग्रामेषु च न्यवसन्। इत्थं ते बेर्शेबामारभ्य हिन्नोमोपत्यकां यावत् न्यव-
३१ सन्। अपरं विन्यामीनवंशा गेवामारभ्य मिक्मसे ऽयायां वैथेले तदीय-
३४ ग्रामेष्वनाथोते नोवे ऽननियायां हात्सोरे रामते गित्तयिमे हादीदे सि-
३५ बोयीमे निवल्लाटे लोद ओनौ शिल्पकारकाणाम् उपत्यकायाञ्च न्यवसन्।
३६ अपरं यिहूदादेशीयलेवीयानां कतिपयलोका विन्यामीनदेशे न्यवसन्।

---

१२ द्वादशोऽध्यायः।

१ याजकानां लेवीयानाञ्च नामानि १० मुख्ययाजकानां नामानि २२ मुख्यलेवीयानां नामानि २७ प्राचीरप्रतिष्ठाया उत्सवः ४४ याजकानां लेवीयानाञ्च मन्दिरीय-कर्म्मणि निजे निजे पदे नियोजनं।

ये याजका लेवीयाश्च शल्टीयेलस्य तनयेन सिरुब्बाबिलेन येशूयेन १
च समम् आगमन् तेषां नामानि। सिरायो यिरिमिय इस्राहो ऽम- २
रियो मल्लूको हटूशः शिखनियो रिहूमो मिरेमोत इद्दु गिन्नियोनो ४
ऽबियो मियामीनो मोयदियो विल्गाहः शिमयियो योयारीवो यिद- ६
यियः सल्लुय आमोको हिल्कियो यिदयियश्च। एते येशूयस्य वर्त्तमान- ७
समये याजकानां निजभ्रातृनिवहस्य च मध्ये प्रमुखा आसन्। लेवीयानां ८
नामानि। येशूयो विन्नूयिः कद्मीयेलः शेरेबियो यिहूदा मत्तनियश्च।
एष मत्तनियस्तस्य भ्रातरश्च धन्यवादस्य नियन्तार आसन्। अपरं तेषां ९
भ्रातरौ वक्बुकिय उन्निश्च रक्षिवर्गाणां नियन्तारावास्ताम्।

अपरं येशूयस्य तनयो योयाकीमः, योयाकीमस्य सुतः इलियाशीवः, १०
इलीयाशीवस्य सुतो योयादः, योयादस्य तनयो योनाथनः योनाथनस्य ११
सुतो यद्दूयः। योयाकीमस्य विद्यमानसमय इमे प्रधानपितृका याजका १२
आसन्। सिरायवंशे मिरायः, यिरिमियवंशे हनानियः, इस्राहवंशे १३
मिशुल्लमः, अमरियवंशे यिहोहाननः, मल्लूकवंशे योनाथनः, शिवनिय- १४
वंशे यूषफः, हारीमवंशे ऽद्नः, मिरायोतवंशे हिल्कयः, इद्दुवंशे सिख- १६
रियः, गिन्नियोनवंशे मिशुल्लमः, अवियवंशे सिख्रिः, मियामीनवंशे एको १७
जनः, मोयदीयवंशे पिल्टयः, विल्गावंशे शम्मूयः, शिमयियवंशे यिहो- १८
नाथनः, योयारीववंशे मत्तिनयः, यिदयियवंश उषिः, सल्लयवंशे कल्लयः, २०
आमोकवंशे एवरः, हिल्कियवंशे हशवियः, यिदयियवंशे निथनेलः। २१

अपरम् इलियाशीवस्य योयादस्य योहाननस्य यद्दुयस्य च समये २२
लेवीयानां प्रधानपितृका लोकाः पारसीकराजस्य दारायः समये याज-
कानामपि प्रधानपितृका लोका वंशावलौ लिलिखिरे। किन्तु लेविवंशीय- २३
प्रधानपितृकाणां लोकानां नामानीलियाशीवस्य तनयस्य योहाननस्य
समयं यावद् वंशावलिग्रन्थे लिखितान्यासन्। लेवीयानां प्रधानलोका २४
हशवियः शेरेवियः कद्मीयेलस्य तनयो येशूयस्तेषां सहकारिणो भ्रातर-
श्चेश्वरीयलोकस्य दायूद आज्ञानुसारेण स्वस्वसङ्घे प्रशंसां धन्यवादश्च
कर्त्तुं न्ययुज्यन्त। अपरं मत्तनियो वक्बुकिय ओवदियो मिशुल्लमः २५
टल्मोनो ऽक्कूवश्चेमे रक्षिणो भूत्वा द्वाराणां देहलीषु सन्तिष्ठमाना
रक्षिणां कर्म्म चक्रवांसः। इमे योषादकस्य पौत्रस्य येशूयस्य पुत्रस्य २६
योयाकीमस्य समये किन्तु देशाधिपस्य निहिमियस्याध्यापकस्येस्राहस्य
याजकस्य च समये विद्यमाना आसन्।

२७ अपरं यिरूशालमस्य प्राचीरस्य प्रतिष्ठासमय आनन्देन धन्यवादै
र्गीतैः करतालमुरजवीणावाद्यैश्चोत्सवपालनार्थं लेवीयान् यिरूशालमं
२८ आनेतुं मनुजास्तेषां सर्व्वस्थानेषु तान् अमृगयन्त। किञ्च गायकवंशा
यिरूशालमस्य चतुर्दिक्स्थायाः समभूमे र्निटोफातीयानां ग्रामेभ्यो
२९ बैतगिल्गलाद् गेबाऽस्मावतयोः क्षेत्रेभ्यश्च समागमन्, यतो गायका
३० यिरूशालमस्य चतुर्दिक्षु स्वेषां कृते ग्रामान् आसादयन्। अनन्तरं
याजका लेवीयाश्च स्वान् पवित्रान् अकुर्व्वन्, किञ्च लोकान् पुरद्वाराणि
३१ प्राचीरञ्च पवित्राणि कृतवन्तः। अनन्तरम् अहं यिहूदावंशस्याधिप-
तीन् प्राकारे समारोहयं, किञ्च धन्यवादकारिणौ द्वौ महासंघौ न्यरू-
पयं। तयोरेकः संघः प्राकारस्य पृष्ठेन दक्षिणपार्श्वं सारद्वारं प्रति गत-
३२ वान्। तेषां पश्चात् होशयियो यिहूदावंशस्यार्द्धाधिपतयः किञ्चासरिय
३४ इस्राहो मिशुल्लमो यिहूदा बिन्यामीनः शिमयियो यिरिमियश्चाव्रजन्।
३५ अपरं तूरीवादिनो याजकानां कतिपयतनया अर्थत आसफस्याति-
वृद्धप्रपौत्रः सक्कूरस्य वृद्धप्रपौत्रो मीखायस्य प्रपौत्रो मत्तनियस्य पौत्रः
३६ शिमयियस्य तनयो यो योनाथनस्तस्य तनयः सिखरियः, तस्य भ्रातॄणां
मध्ये शिमयियोऽसरेलो मिललयो गिललयो माययो निथनेलो यिहूदा
हनानिश्चेम ईश्वरीयलोकेन दायूदा निरूपितानि वादनयन्त्राणि गृही-
३७ त्वा व्रजितवन्तः, किञ्चाध्यापक इस्राहस्तेषाम् अग्रे ऽग्रे ऽगमत्। ते प्रस्र-
वणद्वारस्य पृष्ठेन गत्वाग्रे ऽग्रे व्रजन्तो दायूद्नगरस्य सोपानम् अर्थतः
प्राचीरस्थितं सोपानम् आरुह्य दायूदो गेहस्य पृष्ठेन जलद्वारं यावद्
३८ अगच्छन्। अपरं धन्यवादकारी द्वितीयः संघः प्राकारस्य पृष्ठेन तदन्य-
दिशं गतवान् किञ्चाहम् अर्द्धमनुजाश्च तेषां पश्चाद् अव्रजाम। ते चुल्लि-
३९ दुर्गात् प्रशस्तं प्राकारं गत्वा तत इफ्रयिमीयद्वारस्य पुरातनद्वारस्य मत्स्य-
द्वारस्य च पृष्ठेन हननेलीयदुर्गेण मेयादुर्गेण च मेषद्वारं यावद् अगमन्
४० कारागृहद्वारे च स्थगिता अभवन्। अपरं धन्यवादकारिणौ तौ द्वौ
संघावहञ्च वयम् ईश्वरीयमन्दिरस्य समीपे स्थगिता अभवाम। मया
४१ सार्द्धम् अधिपतीनाम् अर्द्धजना आसन्। किञ्च याजकानां मध्य इलि-
याकीमो मासेयो मियामीनो मीखाय इलियो-ऐनयः सिखरियो हनानि-
४२ यश्चेमे तूरीवादका जनाः किञ्च मासेयः शिमयिय इलियासर उषि यि-
होहाननो मल्किय एलम एषरश्च तत्रासन्, अनन्तरं गायका उच्चैःस्वरै-
४३ रगायन् यिस्रहियस्तेषां नियन्तासीत्। तस्मिन् दिने ते भृशं यज्ञम्

आनन्दञ्चाकुर्व्वन् यत ईश्वरस्तान् महानन्देरानन्दयत् तेन तेषां जाया बालकाश्चापि समानन्दन् अतो बहुदूरं यावद् यिरूशालमस्यानन्दध्वनिराकर्ण्यत।

तस्मिन् दिने व्यवस्थानुसारेण याजकेभ्यो लेवीयेभ्यश्च दातव्यानाम् अं- ४४
शानाम् एकैकस्य नगरस्य क्षेत्रेभ्यः सङ्ग्रहणार्थं केचित् मनुजा धनानाम् अर्थत उत्तोलनीयद्रव्याणां प्रथमजातफलानां दशमांशानाञ्च कोषेषु न्ययुज्यन्त, यतो यिहूदावंशस्तत्र सन्तिष्ठमानान् याजकान् लेवीयांश्चाधि
महानन्दम् अकरोत्। अपरं दायूदस्तदीयतनयस्य सुलेमनस्य निदेशा- ४५
नुसारेण गाथका द्वारपालाश्च तेषाम् ईश्वरस्य रक्षणीयं पवित्रताया
रक्षणीयञ्च समरक्षिषुः। यतः पूर्व्वस्मिन् काले ऽर्थतो दायूद आसफस्य ४६
च समये प्रधानगाथका ईश्वरस्य प्रशंसाधन्यवादयो र्गाने नियुयुजिरे।
अपरं सिरुब्बाबिलस्य निहिमियस्य च समय इस्रायेलीया निखिल- ४७
लोका गायकेभ्यो द्वारपालेभ्यश्चैकैकस्य दिनस्य कृत एकैकमंशम् अददु र्लेवीयानाञ्च निमित्तं द्रव्याण्यपावयन् लेवीयाश्च हारोणवंशस्य निमित्तं द्रव्याण्यपावयन्।

---

१३ त्रयोदशोऽध्यायः।

१ व्यवस्थानुसारेण मिश्रितलोकेभ्यो यिहूदीयानां पृथक्करणं ४ निहिमियेन मन्दिरस्य प्रकोष्ठानां परिष्करणं १० मन्दिरस्य कार्य्ये लोकानां नियोजनं १५ विश्रामवारपालनाय नियमनं २३ अन्यजातीययोषितां त्यागायाज्ञापनञ्च।

तस्मिन् समये लोकानां कर्णगोचरे मूससः पुस्तके पठ्यमाने तत्र लि- १
खित एष आदेशः प्रापि, यथा, अम्मोनीया मोयाबीयाश्चेश्वरस्य समाजं
कदापि न प्रवेक्ष्यन्ति। यतस्त इस्रायेल्वंशान् अन्नजलदानाय पथि न २
साक्षात् कृतवन्तः परन्तु तान् अभिशप्तुं तेषां प्रतिकूलं बिलियमाय
वेतनं दत्तवन्तः किन्त्वस्माकम् ईश्वरस्तम् अभिशापं परावर्त्त्याशिषं
विहितवानिति। तदानीं ते व्यवस्थामेतां निशम्य मिश्रितजनान् इस्रा- ३
येलीयवंशात् पृथग् अकार्षुः।

इतः पूर्व्वम् अस्माकम् ईश्वरीयमन्दिरस्य प्रकोष्ठानाम् अध्यक्षो याजक ४
इलियाशीवः टोबियस्य मित्रत्वात् तस्य कृते महाप्रकोष्ठमेकम् आसाद- ५
यत्। तत्रैव पुरा लोकै र्निवेदितं वस्तु धूपः पात्राणि च किञ्च लेवीयानां गाथकानां द्वारपालानाञ्च निमित्तम् आज्ञापितः शस्यानां द्राक्षारसानां

६ तैलानाञ्च दशमांशो याजकानां नैवेद्यञ्च न्यधीयन्त। किन्त्वेतेषां घटनानां
समये ऽहं यिरूशालमे नासं, यतो बाबिलीयन्टपस्यार्तसस्तस्य राजत्वस्य
द्वात्रिंशे वत्सरे राज्ञः समीपम् अहं गतवान्, किञ्च कतिपयवत्सरेभ्यः
७ परं राजानं विसर्जनं याचित्वा यिरूशालमम् आगच्छं। अपरम्
ईश्वरीयमन्दिरस्य चत्वरे टोवियस्य कृते कोष्ठं निर्म्मायेलियाशीवेन यत्
८ कुकर्म्म कृतं तद् विदित्वाहं तस्मिन् कार्य्ये भृशम् असन्तोषं गत्वा
तस्मात् प्रकोष्ठात् टोवियस्य परिजनानां निखिलवस्तूनि वहि र्निक्षिप्त-
९ वान्। अपरं ममादेशात् लोकैस्तेषु प्रकोष्ठेषु पावितेष्वीश्वरीयभवनस्य
पात्राणि निवेदितवस्तूनि धूपाश्च मया पुनर्व्वारं तत्र न्यधीयन्त।
१०　अपरं लेवीयेभ्यो भागा न दीयन्ते तत्कारणात् कर्म्मकारिणो लेवीया
गायकाश्च सर्व्वे स्वीयां स्वीयां भूमिं पलायिता इत्यपि मया विदितं।
११ तदाहम् अधिपतीन् भर्त्सयित्वा कथितवान्, ईश्वरीयमन्दिरं कुतो
१२ ऽत्याजि? अनन्तरं मया तान् संगृह्य तेषां पदेषु ते ऽस्थाप्यन्त। अपरं
सर्व्वे यिहूदीया शस्यानां नूतनद्राक्षारसानां तैलानाञ्च दशमांशं को-
१३ षान् आनेतुम् आरभन्त। अपरम् अहं याजकं शेलिमियम् अध्यापकं
सादोकं लेवीयानां मध्यगतं पिदायञ्च तेषां साहाय्यार्थं मत्तनियस्य
पौत्त्रं सक्कूरस्य पुत्त्रं हाननञ्च कोषेषु न्ययोजयं यतस्ते विश्वास्यत्वेन
१४ गणिता आसन् किञ्च तेषां भ्रातृनिवहाय वितरणं तैरेव कर्त्तव्यं। हे
मदीश्वर, एतदधि मां स्मर। निजेश्वरस्य मन्दिरकृते तदीयविधानस्य
कृते च यत् शुभं कर्म्म मयाकारि तत् मा लुम्प।
१५　अपरं तस्मिन् समये मया यिहूदावंशीयाः कियन्तो लोका दृष्टाः, ते
विश्रामदिने द्राक्षाफलेभ्यो रसान् निरपीडयन् शस्यगुच्छान् समानयन्
गर्द्दभेषु भारान् आरोपयन् किञ्च विश्रामदिने द्राक्षारसान् द्राक्षोडुम्ब-
रफलानि सर्व्वविधद्रव्याणि यिरूशालमम् आनयन्। ततो ऽहं तेषां भक्ष्य-
१६ वस्तूनां विक्रयदिन एव तेषां विरुद्धं साक्ष्यमददां। अपरं यिरूशालमे
प्रवासिनः सोरीयलोका मत्स्यादीनि नानाविक्रेयवस्तून्यानीय विश्रामदिने
१७ यिहूदावंशीयेषु यिरूशालमे च व्यक्रीणत। तदानीम् अहं यिहूदाः प्रमुखै
र्नरैः समं विवदमानस्तान् अवोचं, यूयं विश्रामदिनम् अपवित्री कुर्व्वन्तः
१८ कुत एतत् कुकर्म्म कुरुध्वे? युष्माकं पितृलोकेषु तादृगाचारं कृतवत्स्वीश्वरः
किमस्मास्वेतन्नगरे च दुर्दशाः सर्व्वा एता नाघटयत्? तथापि यूयं वि-
श्रामदिनम् अपवित्री कुर्व्वन्त इस्रायेल्वंशे किम् अधिकं क्रोधं वर्त्तयेत?

अनन्तरं विश्रामदिनस्य पूर्व्वीयसन्ध्यायां जातायामहं यिरूशालमस्य १९
गोपुराणि बद्धुम् आदिष्टवान् विश्रामदिनस्य शेषं यावत् तेषां मोचनं
प्रतिषिद्धवांश्च, किञ्च विश्रामदिने येन कश्चन भारो ऽभ्यन्तरं नानीयेत
तदर्थं मम दासानां कतिपयजनान् द्वारेष्वस्थापयं। तत एककृत्वं द्वि २०
र्वा वणिजः सर्व्ववस्तुविक्रेतारश्च यिरूशालमस्य वहि र्निशाम् अया-
पयन्। तेन मया तेषां विरुद्धं साक्ष्यं प्रदाय ते निगदिता यूयं कुतः २१
प्राकारोपकण्ठे निशां यापयत? यदि पुनर्व्वारं तत् करिष्यध्वे तर्हि
मया धरिष्यध्वे। ततः परं ते विश्रामदिने पुन र्नायातम्। अनन्तरं २२
विश्रामदिनस्य पावनार्थं युष्माभिः पवित्रीभूयागते द्वाराणि रक्षितव्या-
नीति लेवीया मयादिष्टाः। हे मदीश्वर एतदप्यधि मां स्मर स्वीय-
प्रचुरानुकम्पानुसारेण मामनुकम्पस्व च।

अपरं तस्मिन् समये यैरस्दोदीया अम्मोनीया मोयावीयाश्च योषा २३
व्यूढास्तादृशा यिहूदीया मयादृश्यन्त। तेषां बालका अर्द्धम् अस्दोदीय- २४
भाषाम् अभाषन्त यिहूदीयभाषां भाषितुं नाविदुः किन्त्वितरजा-
तीयमनुजानां देशभाषानुसारेण व्यवाहरन्। ततो ऽहं तैः साकं २५
विवदमानस्तान् तिरस्कृतवान्, तेषां कतिपयलोकान् ताडयित्वा तेषां
कचान् उत्पाट्येश्वरस्य नामधेयेन तान् अशपयं, यूयं तेषां तनयैः स्वेषां
तनुजा न विवाहयिष्यथ स्वेषां तनयैश्च तेषां तनुजा न विवाहयिष्यथ।
इस्रायेलीयो राजा सुलेमान् एतादृशं कार्य्यं कृत्वा किम् अपराधी २६
नाभवत्? महतीनां जातीनां मध्ये ऽपि तेन सदृशः को ऽपि राजा
नाविद्यत, स ईश्वरस्यापि प्रिय आसीद् ईश्वरस्तं निखिलेस्रायेलीयवंशस्य
राजानम् अकरोत् तथापि विदेशीया योषितस्तमपि पापाचारे प्रवर्त्त-
याञ्चक्रुः। अतो विदेशीयानां विवाहेनास्माकम् ईश्वरस्याज्ञालङ्घनाय वयं २७
यया महापातकमिदं कुर्य्याम तथा किं युष्माकं वचो ऽस्माभिः श्रोतव्यं?
महायाजकस्येलियाशीवस्य पौत्राणां यिहोयादायाः पुत्राणाम् एको जनो २८
होरोणीयसन्वल्लटस्य जामातासीत्, तन्निदानाद् अहं निजोपकण्ठात्
तम् अद्रवयं। हे मदीश्वर, तान् स्मर, यस्मात् ते याजकतां याजकानां २९
लेवीयानामपि नियमञ्च विकृतवन्तः। अपरमहं सर्व्वेभ्य इतरजातीये- ३०
भ्यस्तान् शुचीन् अकरवं किञ्च याजकानां लेवीयानाञ्च संघान् विभज्य
स्वीयस्वीयपदेषु तान् न्ययोजयं। किञ्च निरूपिते समये काष्ठानां प्रथमजा- ३१
तफलानाञ्चानयनार्थं लोकान् न्ययोजयं। हे मदीश्वर, मङ्गलार्थं मां स्मर।

इष्टेरोपाख्यानं।

१ प्रथमोऽध्यायः।

१ अहश्वेरस्य नृपस्य भोज्यं १० महिष्या वाष्ट्या राजाज्ञालङ्घनं १२ मिमूखनस्य मन्त्रणया योषितां वशीकरणार्थं राज्ञ आज्ञाप्रचारणं।

१ अहश्वेरो नृपः सिन्धुनदमारभ्य कूशदेशं यावत् सप्तविंशत्यधिकशतैक-
२ देशानां राजत्वम् अकरोत्। तस्मिन् समये यदा स महीपालो ऽहश्वेरः
३ शूशनपुरे निजे राजसिंहासने समुपविष्ट आसीत् तदा स निजराज-
त्वस्य तृतीये वत्सरे स्वकीयामात्यानां भृत्यानाञ्च कृते भोज्यम् आसाद-
यामास। तत्र पारसमादियादेशयोः पराक्रमिणो लोकाः कुलीननरा
४ देशाधिपतयश्च तस्यान्तिकम् आगताः। स बहुदिनान्यर्थतो ऽशीत्य-
धिकशतं दिनानि यावत् तेषां पुरस्तात् निजराजत्वस्य गरिम्न ऐश्वर्य्यं
५ निजप्रतापस्य महिम्नस्तेजश्च चकासयाञ्चकार। अपरं तेषु दिनेषु गतेषु
नृपतिः शूशनपुरे समवस्थितानां क्षुद्राणां महताञ्च निखिललोकानां
कृते राजपुर्य्या उद्यानस्य प्राङ्गणे सप्तदिनानि यावद् भोज्यमासादया-
६ मास। तत्र धूम्रवर्णसूक्ष्मसूत्रै र्निर्म्मितै रज्जुभि र्बद्धा शुक्लहरितनीलवर्णा
यवनिका वर्त्तुलासु रौप्यग्रहणीषु मर्मरस्तम्भेषु चावालम्बन्त, अपरं रक्त-
नीलशुक्लकृष्णवर्णमर्मरप्रस्तरैः शोभिते भूपृष्ठे स्वर्णरूप्यमण्डिताः शय्या
७ आसन्। किञ्च विविधाकाराणि हैमभाजनानि द्राक्षारसैरपूर्य्यन्त तेषां
८ राजकीयद्राक्षारसानां राजार्हं महाधनमासीत्। तत्र पानसमये राजा-
देशात् को ऽपि केनापि बलान्नापाय्यत, यत एकैको जनः स्वेच्छानुसारेण
कर्म्म करोत्विति नृपतिः स्वीयराजधान्याः सर्व्वान् अधिपतीन् आज्ञा-
९ पयामास। अपरं महिषी वाष्टी तद्वद् अहश्वेरस्य राजनिवेशने नारी-
णां कृते भोज्यम् आसादयाञ्चकार।

१० अपरञ्च सप्तमे दिने राज्ञश्चित्ते द्राक्षारसेन प्रफुल्लिते सति मिहू-
मनो विस्था हर्वोणा विग्था अवगथः सेथरः कर्कसश्च नृपस्याहश्वेरस्य
श्रीमुखस्य परिचारका एते सप्त नपुंसकास्तेनेदम् ऊचिरे यूयं राजमुकुटेन
११ भूषितां राज्ञीं वाष्टीं नृपस्य समक्षम् आनयतेति। अनेन स लोकान्

अधिपतींश्च तस्याः सौन्दर्य्यं दर्शयितुम् ऐच्छत्, यतः सा परमसुन्दरी
स्थितवती। किन्तु सा वाष्टी राज्ञी नपुंसकै र्ज्ञापितात् क्षितिपतेरादेशात् १२
समायातुं मतिं न चकार। ततो नृपति र्भृशं चुकोप तस्य क्रोधाग्निः
प्रजज्वाल च।

तदानीं कर्शिनाः शेथरो ऽद्माथास्तर्शीशो मेरसो मर्षिणा मिमूखन- १३
श्चेतिनामानो नृपस्य मुखदर्शिनो राजसिंहासनस्य पार्श्वस्थे प्रधानस्थाने
समासीनाः पारसमादियादेशयोरेते सप्त कुलीना जना नरपतेः सन्नि-
धावासन्। तदानीं राजा व्यवस्थाज्ञान् राजनीतिज्ञान् मानवान् प्रति १४
कथनस्य रीत्यनुसारेण तान् विदुषः कालज्ञलोकांश्च प्रति वच इदं
बभाषे, राज्ञी वाष्टी नपुंसकै र्ज्ञापितम् अहश्वेरस्य नृपतेरादेशं यन्न १५
समाचारत्, तस्माद् व्यवस्थानुसारेण तां प्रति किं कर्त्तव्यम्? तत्र मि- १६
मूखनो नृपतेरध्यक्षाणाञ्च साक्षात् प्रतिजगाद, महिष्या वाष्ट्या यद्
अपराद्धं तत् केवलं राज्ञो नहि, किन्तु भूपालस्याहश्वेरस्य सर्व्वराष्ट्रेषु
यावन्तो ऽधिपतयो यावन्तो लोकाश्च सन्ति तेषां सर्व्वेषाम् अपराद्धं।
महिष्या एतत्कर्म्मणो वार्त्ता पतीनाम् अवज्ञायै सर्व्वासां नारीणां मध्यं १७
व्याप्स्यति यतो लोकै र्वदिष्यते भूपतिरहश्वेरो वाष्टीं राज्ञीं निजोपक-
ण्ठम् आनेतुम् आदिष्टवान् ततः सा नागमत्। अपरं पारसमादिया- १८
देशयो र्या कुलीना महिष्या एतत्कर्म्मणो वृत्तान्तं श्रोष्यन्ति ता अद्यैव
नरपतेः सर्व्वान् अधिपतीन् तादृशं भाषिष्यन्ते तेन महत्यवहेला क्रो-
धश्च समुद्भविष्यतः। अतो यदि नरपतेरभिमतं जायते तर्हि वाष्टी १९
नृपतेरहश्वेरस्य सन्निधिं पुनरायातुं न लप्स्यते, किञ्च राजा तस्या महि-
षीत्वं परिहृत्य तस्या उत्तमाय कस्यैचित् सीमन्तिन्यै विश्राणयिष्यतीति
राजाज्ञा भवता प्रकाश्यताम्, अपरं तस्या लोपो यन्न भवेत् तदर्थं साज्ञा
पारसमादियादेशयो र्व्यवस्थाया मध्ये लिख्यतां। अपरं जनपदः पृथुलो २०
ऽस्ति तस्मात् तस्य सर्व्वत्र सा राजाज्ञा प्रकाश्यतां तेन सर्व्वा योषितः
क्षुद्रं महान्तं वा निजं निजं पतिं सम्मंस्यन्ते। तदानीं तस्मिन् वचसि २१
नृपतेरध्यक्षाणाञ्च तोषकरे सति नृपो मिमूखनस्य मन्त्रणानुसारेण
चष्टवान्। स एकैकस्य जनपदस्य लिप्यनुसारत एकैकस्या जाते र्भाषा- २२
नुसारतश्च निजाधीनान् निखिलजनपदान् पत्राणि प्रेषयित्वा वच इदं
प्रचारयामास, एकैकः पुमान् निजे निजे वेश्मनि स्वामित्वं करोतु, निज-
जाते र्भाषया ताम् आज्ञां प्रचारयतु च।

२ द्वितीयोऽध्यायः।

१ बह्वी युवतीः संग्राहयितुं मन्त्रणाकरणं ५ इष्टेरायास्तदीयपालकपितुश्च कथनं ८ इष्टेरां प्रति स्त्रीपालकस्य हेगयस्यानुग्रहः १२ पावनस्य नृपतेरन्तिकगमनस्य च रीतिः १५ इष्टेरायां राज्ञस्तुष्टिः २१ राजद्रोहप्रकाशनात् नृपतेः पुरावृत्तपुस्तके मर्द्दिखयस्य नामलेखनं।

१ एतेभ्यो वृत्तान्तेभ्यः परं नृपतेरहस्वेरस्य क्रोधे शान्ते सति स वाष्टीं
२ तस्याः कार्य्यं तस्याः प्रतिकूलं कृतं नियमञ्च चिन्तयितुम् आरेभे। तत्र
राज्ञः सेविनो दासास्तमवदन् नरपतेः कृते सुन्दरीणां युवतीनां गवेषणं
३ क्रियतां। अपरं नरपतिः स्वराष्ट्रस्य सर्व्वदेशेषु नियामकान् नियुंक्तां तैः
सर्व्वाः सुन्दरी युवतीः कन्याः संगृह्य शूशनराजधान्या अन्तःपुरम् आनीय
नारीणाम् अवितरि राजकीयनपुंसके हेगये समर्प्यन्तां किञ्च भूषणार्थ-
४ कद्रव्याणि ताभ्यो दीयन्तां। तत्र या कन्या राज्ञे रोचिष्यते सा वाष्ट्याः
पदे महिषी भवतु। तदानीं राजा तस्मिन् वाक्ये तुष्टा तथैव चकार।
५ तदानीं शूशनपुरे मर्द्दिखयनामक एको यिहूदीयलोक आसीत्
स विन्यामीनवंशीयकीशस्य प्रपौत्त्रः शिमियेः पौत्त्रो यायीरस्य पुत्त्रः।
६ यिहूदीयनृपेण यिहोयाखीनेन साकं ये लोका बाबिलीयनृपेण निबूख-
द्नित्सरेण प्रवासयाञ्चक्रिरे तैः समं स मर्द्दिखयो ऽपि यिरूशालमात्
७ प्रवासितः। स निजपितृव्यस्य तनयां हदसाम् अर्थत इष्टेरां पर्य्यपालयत्
यतः सा पितृमातृहीना। सा तु युवती महासुन्दरी सुवदना चासीत्।
तस्या मातापित्रो र्मरणकाले मर्द्दिखयस्तां स्वदुहितृवद् गृहीतवान्।
८ अनन्तरं नृपस्य तस्मिन् नियमे निदेशे च प्रचारिते सति राजधान्यां
शूशने हेगयस्य समीपे बह्वीनां कन्यानां सङ्ग्रहणकाल इष्टेरापि राज-
९ धान्यां रमणीनाम् अध्यक्षस्य हेगयस्य समीपम् आनायि। सा तु तस्मै
रुचित्वा तस्यानुग्रहं लब्धवती, ततः स तस्मै दातव्यानि भूषणार्थकद्रव्याण्यं-
शांश्च किञ्च राजनिवेशनाद् अभिरुचिताः सप्त दासीश्च तस्यै त्वरितं
ददिवान् अन्तःपुरस्योत्तमस्थाने दासीभिः समं तां वासयामास च।
१० किन्त्विष्टेरा निजजातेरुत्पत्तेश्च परिचयं कमपि न जगाद यतो मर्द्दिख-
११ यस्तत्प्रकाशनात् तां प्रतिषिषेध। अनन्तरम् इष्टेराया मङ्गलं गतिञ्च
वेदितुं मर्द्दिखयः प्रतिदिनम् अन्तःपुरस्य चत्वरस्य सम्मुखे यातायातम्
अकरोत्।
१२ अपरं द्वादशमासान् तत्र स्थाने रमणीनां नियमितां सेवाम् उपगत्यै-

कैका युवती पर्य्यायेण राज्ञः समीपम् आनीयत, यतः षण्मासान् यावद्
गन्धरसतैलसेवया षण्मासांश्च यावत् सुगन्धिद्रव्याणां योषित्परिष्कारा-
र्थकद्रव्याणाञ्च सेवया ताः परिष्कर्त्तुम् एतावन्ति दिनानि व्यतियन्ति।
अपरं राज्ञः समीपं गमिष्यन्ती युवती स्वया सार्द्धम् अन्तःपुराद् राज- १३
निवेशनं गमनार्थं यद्यद् द्रव्यम् अयाचत तत्तत् तस्यै व्यतीर्य्यत। सा १४
सन्ध्याकाले ऽव्रजत् प्रातःकाले चोपपत्नीनाम् अवितू राजनपुंसकस्य
शाश्गसस्य समीपं द्वितीयान्तःपुरं परावृत्यायात्। राजा चेत् तस्यां
तुष्टा तस्या नाम्ना तां नाह्वयत् तर्हि सा नरपतेरग्रकक्षं पुन र्नागमत्।

अपरं मर्दिखयः स्वीयपितृव्यस्याबीहयिलस्य यां कन्याम् इष्टेरां १५
स्वपुत्रीमिव गृहीतवान् राजसन्निधौ गमनाय तस्याः पर्य्याय उपस्थिते
योषिताम् अविता राजनपुंसको हेगयो यद्यत् न्यरूपयत् तदतिरिक्तं
सा नापरं किञ्चिद् अयाचत, किन्तु यावन्तो जना इष्टेरां प्रति दृष्टिम-
कुर्व्वन् ते सर्व्वे तस्याम् अतुष्यन्। नृपस्य राजत्वस्य सप्तमवत्सरस्य दशमे १६
मास्यर्थतो टेवेतमासि नृपतेरहस्वेरस्य समीपं गमनार्थम् इष्टेरा राज-
निवेशनम् आनीयत। ततो नृपतिरन्याभ्यो योषिद्भ्य इष्टेरायां बह्वप्री- १७
यत किञ्च तदन्याभ्यः सर्व्वकन्याभ्यः सा तस्य दृष्टौ प्रसादम् अनुग्रहञ्च
लेभे तेन स तस्याः शिरसि राजकिरीटं निधाय वाष्ट्याः पदे तां महिषीं
चकार। अनन्तरं नृपतिरिष्टेरायाः सम्मानार्थं स्वस्य निखिलाध्यक्षाणां १८
दासानाञ्च कृते महाभोज्यम् आसादयाञ्चकार, अपरं निखिलप्रदेशानां
राजकरान् मोचयित्वा राजार्हदानम् अकरोत्।

कन्यासु द्वितीयवारं संगृह्यमाणासु मर्दिखयो राजद्वार उपविष्ट १९
आसीत्। इष्टेरा मर्दिखयस्य निदेशात् निजकुटुम्बानां जाते र्वा परिचयं २०
कमपि नावदत्। इष्टेरा मर्दिखयस्य सन्निधौ परिपालनसमये यादृग-
करोत् तदानीमपि तादृक् तस्य निदेशम् अगृह्णात्।

तस्मिन् समये ऽर्थतो राजद्वारे मर्दिखयस्योपवेशनसमये विग्थनतेर- २१
शनामानौ द्वारिणां मध्यगतौ द्वौ राजनपुंसकौ क्रोधाद् राजानम् अहस्वेरं
व्यापादयितुं चिचेष्टाते। ततो मर्दिखयस्तद् विज्ञाय राज्ञीम् इष्टेरां ज्ञा- २२
पयामास, इष्टेरा च मर्दिखयस्य नाम कृत्वा तं वृत्तान्तं राज्ञे निवेदया-
मास। अपरं तेनानुसन्धाय प्रमाणे लब्धे तौ द्वौ जनौ दण्डकाष्ठयोरुल्ल- २३
म्बयाञ्चक्राते किञ्च सा कथा नरपतेः साक्षात् पुरावृत्तपुस्तके समलिख्यत।

३ तृतीयोऽध्यायः।

१ हामनस्योन्नति र्यिहूदीयानां विनाशाय शुभदिननिरूपणार्थं गुटिकापातनं ८ यिहूदीयानां विनाशाय राज्ञः सकाशात् हामनस्याज्ञाप्राप्तिः सर्व्वत्र तत्प्रकाशनञ्च।

१ अनन्तरं नरपतिरहश्वेरो हम्मिदाथाः सुतस्यागागीयहामनस्य पदम्
एधयित्वा तम् उन्नतं चकार निजसङ्गिनां निखिलकुलीनानाम् आस-
२ नानाम् उपरिष्टात् तदीयमासनं स्थापयाञ्चकार च। तेन राजद्वार-
वर्त्तिनः सर्व्वे राजकीयदासा भूमिष्ठा भवन्तो हामनं प्रणन्तुम् आरे-
भिरे यतो राजा तम् उद्दिश्य तादृग् आदिदेश, किन्तु मर्दिखयो भूमि-
३ ष्ठो न भवति न च तं प्रणमति। तेन राजद्वारवर्त्तिनो राजभृत्या मर्दि-
४ खयं जगदुः, त्वं नरपते र्निदेशं कुतो लङ्घयसे? इत्थं ते प्रत्यहं तं व्याह-
रन्ति तथापि स तेषां वचांसि न गृह्णाति ततो मर्दिखयो यिहूदीय
इति तस्य प्रमुखाद् विज्ञाय तदीयवाक्यानि निश्चलानि न वेति निश्चेतुं
५ ते हामनं तत् ज्ञापयामासुः। अपरं मर्दिखयो भूमिष्ठो भवन् मां न
६ प्रणमतीति वीक्षमाणो हामनः कोपेन परिपूर्णो बभूव। अपरं मर्दि-
खयो यिहूदीयजातिरित्यवगम्य हामनः केवलं मर्दिखयं प्रति हस्तार्पणं
लघु विज्ञायाहश्वेरस्य राज्ञो निखिले राष्ट्रे मर्दिखयस्य स्वजातीयान्
७ निखिलान् यिहूदीयलोकान् व्यापादयितुं येते। अपरम् एतदधि नृपते-
रहश्वेरस्य राजत्वस्य द्वादशवत्सरस्य प्रथमे मासे ऽर्थतो नीषणमासे
हामनस्य साक्षाद् अदरनामकं द्वादशं मासं यावद् एकैकस्य दिनस्यैकै-
कस्य मासस्य च कृते गुटिकापातं बभूव।
८ अनन्तरं हामनो राजानम् अहश्वेरम् उदितवान् भवतो राष्ट्रस्य नि-
खिलदेशेष्वन्यान्यलोकानां मध्ये विकीर्णा विभिन्ना चैका जाति र्विद्यते।
अन्यलोकानां व्यवस्थातस्तज्जातीयानां व्यवस्था भिन्ना ते नरपते र्व्यवस्थां
९ न मन्यन्ते तस्मात् ते राज्ञा न सोढव्याः। यदि नरपतेरभिमतं जायेत
तर्हि तेषां व्यापादनार्थं राजाज्ञा लिख्यतां तेनाहं राजकार्य्ये नियुक्त-
लोकानां हस्तेषु राजकोषे स्थापनार्थं दशसहस्रकिक्कारपरिमाणानि रज-
१० तानि समर्पयिष्यामि। तदानीं नृपः स्वीयशयाद् अङ्गुरीयकम् अपाकृष्य
यिहूदीयानां परिपन्थिने हम्मिदाथाः पुत्रायागागीयहामनाय ददि-
११ वान्। अपरं नृपो हामनम् आचचक्षे तानि रजतानि ते लोकाश्च तुभ्यम्
१२ अदायिषत तान् प्रति निजेच्छानुसारेणाचर। अनन्तरं प्रथममासस्य
त्रयोदशे दिवसे राजलेखका आजूहुविरे तत एकैकस्मिन् देशे ये राज-

प्रतिनिधयो ऽध्यक्षाश्चासन् तान् प्रति किञ्चैकैकस्या जातेरेकैकस्य देशस्य
च मुख्यनरान् एकैकस्या जातेरक्षरै र्भाषया च नृपतेरहश्वेरस्य नाम्ना
हामनस्यादेशानुसारादेव पत्राणि लिखितानि नृपाङ्गुरीयकेण मुद्रा-
ङ्कितानि च। अपरम् एकस्मिन् दिने ऽर्थतो ऽदरनामकस्य द्वादशमा- १३
सस्य त्रयोदशे दिवसे युववृद्धशिशुयोषिद्भिः समं निखिलयिहूदीया
विनाशयितव्या हन्तव्या लोप्तव्याश्च तेषां वस्तूनि च लोठयितव्या इत्याज्ञा-
सम्बलितानि तानि पत्राणि दूतैः क्षितिपस्य निखिलप्रदेशान् प्रति
प्रेषयाञ्चक्रिरे। किञ्च तस्मिन् दिने सर्व्वे लोका यद् उद्यता भवेयुस्तदर्थं १४
निखिललोकानां ज्ञानायैकैकस्मिन् देशे ताम् आज्ञां प्रचारयितुं तल्लिपे-
रनुरूपं प्रादीयत। अनन्तरं दूता राजाज्ञातस्त्वरितं विधाय वहि- १५
र्ब्वव्रजुः। स आदेशो राजधान्यां शूशने प्राकाश्यत। ततः परं राजा
हामनश्च भक्षितुं पातुञ्चोपविविशतुः परन्तु शूशनपौरा उद्विविजुः।

---

४ चतुर्थोऽध्यायः।

१ मर्दिखयस्य यिहूदीयानाञ्च शोकस्य कथनं ४ तस्य संवादं श्रुत्वा मर्दिखयस्य समीपम् इष्टेराया लोकप्रेषणं तस्योत्तरञ्च १० इष्टेराया द्वितीयकथनं मर्दिखयस्योत्तरञ्च १५ इष्टेराया उपवासनिरूपणं।

अपरं मर्दिखयस्तं कृत्स्नं वृत्तान्तं विज्ञाय निजवसनानि चिच्छेद १
किञ्च शाणजं वसनं परिधाय भस्म विलिप्य मध्येनगरं व्रजन् उच्चैःस्वरेण
तीव्रं विलापं चकार। अनन्तरं राजद्वारस्य सम्मुखपर्य्यन्तम् आययौ, २
परन्तु राजद्वारं शाणपरिच्छिदेन केनापि न प्रवेष्टव्यम्। अपरम् एकै- ३
कस्य प्रदेशस्य यद्यत् स्थानं सा राजाज्ञा नियमपत्रञ्च जगाम, तेषां
स्थानानां यिहूदीयानां मध्ये महाशोक उपवासः क्रन्दनं विलापश्च
बभूवुः किञ्च बहवः शाणवसनं परिधाय भस्मसु शिश्यिरे।

अनन्तरम् इष्टेराया दास्यो नपुंसकाश्च समेत्य तं संवादम् इष्टेरां ४
विज्ञापयामासुः। तेन राज्ञी महाशोकवती सती मर्दिखयस्य शाणवस-
नम् अपाकर्षिष्यन्ती तं परिधापयिष्यन्ती च वासांसि प्रेषयामास किन्तु
स तानि न जग्राह। तेन किमभूत् कुतो ऽभूदिति वेदितुम् इष्टेरा ५
निजपरिचारकाणां राजनपुंसकानां मध्यवर्त्तिनं हथकम् आहूय मर्दि-
खयस्य समीपं व्रजेत्यादिदेश। अनन्तरं हथको वहि र्गत्वा राजद्वारस्य ६

७ सम्मुखस्थे नगरस्य सन्निवेशे मर्द्दिखयं प्राप। तेन मर्द्दिखयः स्वं प्रति
यद्यद् अघटत किञ्च यिहूदीयानां विनाशार्थं हामनो राजकोषे किम्प-
८ रिमाणं रजतं दातुं प्रत्यजानात् तत् तस्मै कथयामास। अपरं तेषां
विनाशार्थं यद् आज्ञापत्रं शूशने प्रादायि तस्यानुलिपिं तस्मै दत्त्वा
जगाद, इष्टेराम् एतद् दर्शय बोधय चेति। अपरं सा यत् स्वजा-
तीयलोकानां कृते विनेतुं प्रार्थयितुञ्च राज्ञः सन्निधिं प्रविशेत् तदपि
९ स कथयितुम् आज्ञापयामास। अनन्तरं हथकः समेत्य मर्द्दिखयस्य
वचनानीष्टेरां विज्ञापयामास।
१० अनन्तरम् इष्टेरा मर्द्दिखयं वच इदं वदितुं पुनर्व्वारं हथकम् आदि-
११ देश। पुमान् योषिद् वा यः कश्चिद् अनाहूतः सन् अभ्यन्तरचत्वरे राज्ञ
उपकण्ठं व्रजति तं प्रति नृपेण हैममये राजदण्डे प्रसारिते स जीवति,
किञ्च तदितरे सर्व्वे हन्तव्या इत्यनन्य आदेशो विद्यत एतत् सर्व्वे राज-
भृत्या राज्ञः सर्व्वदेशीयाः प्रजाश्च विदन्ति किञ्च त्रिंशद् दिनानि व्यती-
१२ तानि राज्ञः समीपम् एतुं नाहम् आहूये। अनन्तरं मर्द्दिखयाय म-
१३ हिष्या इष्टेराया एतस्मिन् वचसि निवेदिते स इष्टेराम् इदं प्रतिवाचं
गदितुम् आदिदेश, सर्व्वेषां यिहूदीयानां मध्ये त्वं राजनिवेशने तिष्ठन्ती
१४ रक्षां लप्स्यसे नैतत् चित्ते चिन्तय। यदि त्वं समयेऽस्मिन् वाचंयमा
तिष्ठेस्तर्ह्यपरेण केनाप्युपायेन यिहूदीयानाम् उपकारस्य निस्तारस्य च
पन्थाः सम्भविष्यति त्वन्तु निजपितृवंशेन सार्द्धं विनंक्ष्यसि किन्तु बोधो
ऽयं जायते त्वम् अस्य विपत्समयस्य निमित्तं राज्ञीत्वं प्राप्ता।
१५ तदानीम् इष्टेरा मर्द्दिखयम् इदं प्रतिवाचं वक्तुम् आदिदेश, त्वया
१६ व्रजित्वा शूशने संस्थितान् निखिलान् यिहूदीयान् संगृह्य दिनत्रयं यावत्
मदर्थम् उपवासः क्रियतां भक्ष्यं पेयं वा किमपि न भुज्यतां, किञ्च
मया मम दासीभिश्च उपवत्स्यते। इत्थमेव कृते ऽहं विधिविरुद्धं राज्ञः
१७ समक्षं यास्यामि, तेन यदि हन्तव्याहं तर्हि घानिष्ये। अनन्तरं मर्द्दिखयो
व्रजित्वेष्टेराया निदेशानुसारेण चकृवान्।

५ पञ्चमोऽध्यायः।

१ राज्ञः समीपं व्रजित्वा तस्यानुग्रहं प्राप्येष्टेरया तस्य हामनस्य च निमन्त्रणं ६ द्वितीयवारं तयो र्निमन्त्रणं ९ अभिमानिना हामनेन मर्द्दिखयस्यावहेला १४ तस्य कृते दण्डकाष्ठस्थापनञ्च।

अनन्तरं तृतीये दिवस इष्टेरा राजकीयवसनं परिधाय राजनिवेश- १
नस्याभ्यन्तरप्राङ्गणे भूपतेरागारसम्मुखे समुदतिष्ठत। तदानीं राजा
राजकीयागारे स्वीयराजसिंहासने ऽन्तरागारीयद्वारस्य सम्मुख उप-
विष्ट आसीत्। तदा राजा प्राङ्गणे समुपतिष्ठन्तीम् इष्टेरां राज्ञीम् २
अवलोक्य तां प्रति प्रसादः प्रकाशितः। अतो नृपेणेष्टेरां प्रति स्वशय-
स्थिते काञ्चनमये राजदण्डे प्रसारित इष्टेरा निकटं प्रगत्य राजदण्डस्या-
ग्रभागं पस्पर्श। ततो राजा तां पप्रच्छ हे इष्टेरे राज्ञि किम् अभूत्? ३
त्वं किं प्रार्थयसे? राजत्वस्यार्द्धमपि यदि याचसे तर्हि तदपि तुभ्यं
वितारिष्यते। तत इष्टेरा प्रतिजगाद यदि राज्ञो दृष्ट्या शुभबोधो ४
जायेत तर्हि भवतः कृते मयासादितं भोज्यम् अद्य राज्ञा हामनेन
चागम्यतां। तदानीं राजा व्याहरत्, इष्टेराया निदेशाचरणाय ५
हामनं त्वरयत। अनन्तरं राजा हामनश्चेष्टेरया समासादितं भोज्यम्
ईयतुः।

अनन्तरं नृपो द्राक्षारसपानसमय इष्टेरां बभाषे त्वया किं प्रार्थ्यते? ६
तत् तुभ्यं दायिष्यते। तव वाञ्छा का? अर्द्धराजत्वेन यदि भवेत् तर्हि
सा सेत्स्यति। तत इष्टेरा प्रत्यवदत्, इयं मम प्रार्थना वाञ्छा चास्ते, मयि ७
यदि नृपः प्रसन्नो भवेत् किञ्च मया प्रार्थितं दातुं वाञ्छितं साधयितुञ्च ८
यदि नृपतेरभिमतं स्यात् तर्हि यद्भोज्यमहम् आसादयिष्यामि, तत्र
हामनेन सार्द्धं नृपतिरायातु श्वो मया नृपतेरादेश आचरिष्यते।

तेन तस्मिन् दिने हामन आह्लादितो हृष्टचित्तश्च बहिरियाय। ९
परन्तु राजद्वारे यदा हामनो मर्दिखयम् अपश्यत् तदानीं स तस्य
समक्षं नोत्तस्थौ न प्रणनाम च तस्मात् हामनो मर्दिखयस्य विरुद्धं को-
पेन परिपुपूरे। तथापि हामनो धैर्य्यम् आललम्बे किञ्च स्वगेहं समेत्य १०
निजबन्धून् निजां जायां सेरशाञ्च समाहूयानिनाय। अपरं हामनस्तेषां ११
सन्निधौ निजैश्वर्य्यस्य गौरवं निजपुत्त्राणां बहुसंख्यत्वञ्च निवेदयामास
किञ्च राज्ञा तस्य पदम् एधयित्वा कुलीनानां राजभृत्यानाञ्चोपरिष्टात्
तस्य या उन्नतिः कृता तस्या अपि वर्णनां तान् श्रावयाञ्चकार। हामनो १२
ऽपरं जगाद राज्ञीष्टेरा स्वासादितं भोज्यं मां विना कमप्यपरं राज्ञा
सार्द्धं न समानिनाय श्वोऽर्थमपि नृपेण समम् अहं तया निमन्त्रितो
ऽस्मि। किन्तु यतिकालान् अहं राजद्वारे समुपविष्टं तं यिहूदीयं १३
मर्दिखयं समीक्षे ततिकालान् एतैः सर्व्वैर्मम तृप्तिर्न जायते।

१४ तदानीं तस्य जाया सेरशा बन्धवश्च तम् आचचक्षिरे, पञ्चाशद्धस्त-
योच्चं दण्डकाष्ठमेकं निर्म्माप्यतां तत्र मर्दिखयम् उल्लम्बयितुं श्वो नरपतिं
ब्रूहि, ततः परं हृष्टः सन् नृपेण साकं भोज्यं याहि। तदानीं तेन वचसा
हामनस्य सन्तोषे जाते स तादृशं दण्डकाष्ठं निर्म्मापयाञ्चकार।

---

६ षष्ठोऽध्यायः।

१ पुरावृत्तपुस्तके मर्दिखयस्य सत्कर्म्मणो विवृतिं पाठयित्वा नृपस्य तस्मै पारितोषिकं दातुं वाञ्छनं ४ मर्दिखयस्य व्यापादनाय प्रार्थनार्थं नृपस्यान्तिकं गतेन हामनेनाविज्ञानात् मर्दिखयाय सम्मानदानस्य मन्त्रणा १२ बन्धुनिवहं प्रति हामनस्य मनोगतकथायाः कथनं तस्योपकण्ठे तदीयभाविविनाशस्य कथाकथनञ्च।

१ तस्यां यामिन्यां महीपते र्निद्राया अभावात् स स्मरणीयपुरावृत्तपुस्त-
२ कस्यानयनम् आदिदेश ततो नृपतेः साक्षात् तत्पुस्तके पठ्यमाने तत्र लि-
खिता कथैषा प्रापि यद् विग्थनतेरशनामानौ यौ द्वारिणौ राजनपुंस-
कौ भूपालम् अहश्वेरं व्यापादयितुम् अचेष्टतां, तयो र्मन्त्रणा मर्दिखयेन
३ प्राकाश्यत। ततो राजा पप्रच्छ तत्कृते मर्दिखयाय किं सम्मानम् उच्चप-
दञ्च दत्तं? नृपस्य सेवका दासा जगदुः, तस्य निमित्तं किमपि नाकारि।
४ अनन्तरं भूपतिः पप्रच्छ, प्राङ्गणे को विद्यते? तदानीं हामनो मर्दि-
खयस्य निमित्तं निर्म्मापिते दण्डकाष्ठे तस्योल्लम्बनाय राज्ञा सह सम्भा-
५ षितुं राजनिवेशनस्य बहिःप्राङ्गणम् उपस्थितः। अतो नृपस्य दासा
जगदुः, पश्यतु हामनः प्राङ्गणे सन्तिष्ठमानो विद्यते। ततो नृप उवाच,
६ सोऽभ्यन्तरम् आयातु। अतो हामने प्रविष्टे राजा तम् आचचक्षे, नृपो
यस्य सम्मानेन हृष्यति तं प्रति किं कर्त्तव्यं? तदा हामनो मनसा चि-
७ न्तयामास, मदतिरिक्तं कस्यापरस्य सम्मानेन राजा हृष्येत्? अनन्तरं
८ हामनो राजानम् ऊचिवान् राजा यस्य नरस्य सम्माने हृष्यति तस्य
कृते किङ्करै राज्ञः परिधेयं राजकीयवसनं राजवाहको वाजी राज्ञः
९ शिरोभूषकः किरीटश्च समानीयन्तां। किञ्च तद्वसनं स वाजी च राज्ञः
कस्यचित् प्रधानकुलीनस्य करे समर्प्यतां ततो राजा यस्य नरस्य सम्मा-
नेन हृष्यति लोकास्तं तद् राजकीयवस्त्रं परिधाप्य तं वाजिनम् आरोह्य
नगरस्य सन्निवेशं गमयित्वा तस्य समक्षम् एतां भारतीं घोषयन्तु राजा
१० यस्य नरस्य सम्मानेन हृष्यति तं प्रत्येतादृश आचारः कर्त्तव्यः। तदानीं
नरपति र्हामनं निर्दिदेश त्वयेदं त्वरितं क्रियतां। त्वया यद्वद् उक्तं

तद्वद् राजवसनं राजवाजिनञ्च गृहीत्वा राजद्वारे समुपविष्टं यिहूदीयं
मर्दिखयं प्रति क्रियतां, त्वया यानि वचांसि गदितानि तेषाम् एकमपि
न परिहीयतां। तदानीं हामनस्तद्वसनं वाजिनञ्च गृहीत्वा मर्दिखयं ११
वसनं परिधाप्य वाजिनम् आरोह्य च नगरस्य सन्निवेशं गमयाञ्चकार
राजा यस्य नरस्य सम्मानेन हृष्यति तं प्रत्येतादृश आचारः कर्त्तव्य इति
वार्त्तां तस्य पुरस्तात् पुनः पुन घोषयाञ्चकार च।

अनन्तरं मर्दिखयः पुनर्व्वारं राजद्वारं जग्मिवान् परन्तु हामनः १२
शोकान्वित आच्छादितमस्तकश्च निजं भवनं गन्तुं त्वरयाञ्चक्रे। अपरं १३
हामनः स्वस्य तासां घटनानां कथां निजां भार्य्यां सेरशां स्वस्य सर्व्व-
बन्धूंश्च समाचचक्षे। तेन तस्य विज्ञलोकास्तदीया जाया सेरशा च
जगदुः, यस्य समक्षं तव पतनम् आरब्धं स मर्दिखयो यदि यिहूदि-
वंशीयो मनुजो भवेत् तर्हि त्वं तस्य प्रभवितुं न पारयिष्यसि किन्तु
तस्य सम्मुखे पतिष्यसि। तेन सह तेषां सम्भाषणकाल एव राजनपुंस- १४
काः समेत्य इष्टेरयासादितं भोज्यं तं नेतुं त्वरयाञ्चक्रिरे।

---

७ सप्तमोऽध्यायः।

१ इष्टेरायाः स्ववाञ्छाप्रकाशनं ५ हामनस्य दोषित्वकरणं ७ हामनस्योल्लम्बनाय राज्ञ
आदेशश्च।

अनन्तरं नृपे हामने च महिष्या इष्टेरया समं भोजनं कर्त्तुम् आया- १
तवतो राजा तस्मिन् द्वितीये दिने द्राक्षारसपानसमये इष्टेरां पुनर्व्वारं २
व्याजहार हे इष्टेरे राज्ञि तव प्रार्थितं किं? तत् तुभ्यं दायिष्यते, तव
वाञ्छा का? ममार्द्धराजत्वेन यदि भवेत् तर्हि सा सेत्स्यति। तदानीम् ३
इष्टेरा राज्ञी प्रतिजगाद, हे राजन् अहं यदि भवतो दृष्ट्यानुगृही-
ता स्यां यदि च भवतो ऽभिमतं भवेत् तर्हि मया प्रार्थिता मम प्राणा
मया वाञ्छिताश्च स्वजातीयानां प्राणा मह्यं दीयन्तां। यतो विनाशार्थं ४
बधार्थं लोपार्थञ्च वयम् अर्थतो ऽहं मदीयस्वजातीयाश्च विक्रीता अभ-
वाम। यदि वयं केवलं दासत्वार्थं दासीत्वार्थञ्च व्यक्रेष्यामहि तर्हि नीर-
वाहम् अस्थास्यं किन्तु राज्ञ एतया हान्यापि परिपन्थिनस्तृप्ति र्न जायते।

तदानीं नृपतिरहश्वेर इष्टेरां राज्ञीं जगाद, एतत् कर्म्म कर्त्तुं को ५
मतिमकरोत्? स कुत्रास्ते? इष्टेरा व्याहरत् स द्वेषी रिपुरेष दुष्टो ६
हामनः। ततो हामनो नृपते र्महिष्याश्च समक्षं वितत्रास।

७ अनन्तरं राजा क्रोधवान् द्राक्षारसस्य पानाद् उत्थाय राजनिवेशन-
स्योद्यानं जग्मिवान् ततो राजतो ममानिष्टं निरणायीति दृष्ट्वा हामनो
राज्ञीम् इष्टेरां निजप्राणान् प्रार्थयितुम् अतिष्ठत् । अनन्तरं राजा राज-
८ निवेशनस्योद्यानाद् द्राक्षारसपानस्यागारं पुनरागमत् । तदानीं हामन
इष्टेराया उपवेशनार्थकगेण्डुके पतित आसीत् तेन राजा व्याहरत् एष
किं ममैव समक्षं गेहमध्ये राज्ञीं धर्षयेत्? एतस्मिन् वचसि राज्ञो वद-
९ नात् निर्यात एव भृत्या हामनस्य वदनम् आच्छादयामासुः । अनन्तरं हु-
र्व्वोणाहनामक एको नपुंसको राजानम् ऊचिवान्, पश्यतु राज्ञो मङ्ग-
लाय शुभवादिनो मर्द्दिखयस्य वधनिमित्तं हामनेन निर्म्मापितं पञ्चाशद्ध-
स्तप्रांशु दण्डकाष्ठं हामनस्य निवेशने स्थापितं विद्यते । तदा राजा व्याज-
१० हार तस्मिन्नेवैनं समुल्लम्बयत । ततो मर्द्दिखयस्य वधार्थं निर्म्मापिते तस्मिन्
दण्डकाष्ठे हामनस्तैरुल्लम्बयाञ्चक्रे । इत्थं नरपतेः क्रोधो निववृते ।

---

८ अष्टमोऽध्यायः ।

१ मर्द्दिखयस्योन्नति ३ हामनेन लिखितस्य पत्रस्य मोघीकरणम् इतरदूतानां प्रेषणाय प्रार्थनं ७ रिपुभिः समं योधनाय यिहूदीयान् प्रति नृपतेरनुज्ञा १५ मर्द्दिखयस्योन्नत्या यिहूदीयलोकानाम् आनन्दश्च ।

१ तस्मिन् दिने नरपतिरहश्वेर इष्टेरायै महिष्यै यिहूदिद्वेषिणो हाम-
नस्य परिजनान् ददिवान् मर्द्दिखयश्च राज्ञः समीपम् उपस्थितवान् यतः
२ स तस्याः को ऽस्ति तद् इष्टेरा प्रकाशितवती । तेन राजा हामनाद्
अपहृतं निजाङ्गुरीयकम् अपाकृष्य मर्द्दिखयाय ददौ । अपरम् इष्टेरा
हामनस्य परिजनानां शासकत्वं मर्द्दिखये समर्पयामास ।
३ इष्टेरा पुनर्व्वारं नरपतेः समक्षं भाषमाणा तदीयचरणयोः पतन्ती रुद-
ती चागागीयहामनस्य कुमन्त्रणाया यिहूदीयलोकानधि तदीयसङ्कल्पस्य
४ च व्यर्थीकरणं प्रार्थयाञ्चक्रे । ततो नृपेणेष्टेरां प्रति हैममये राजदण्डे प्रसा-
५ रिते सा नृपस्य सम्मुखे तिष्ठन्ती व्याजहार, यदि नृपतेरभिमतं जायेत
किञ्च मया नृपस्य दृष्टावनुग्रहः प्राप्येत यदि मम वाक्यञ्च राज्ञा गृह्येत
यदि चाहं राज्ञे रोचेय तर्हि नृपस्य निखिलदेशस्थानां यिहूदीयानां वि-
नाशार्थम् अगागीयहम्मिदाथाः सुतस्य हामनस्य सङ्कल्पाद् यानि पत्राणि
६ लिलिखिरे तेषां व्यर्थीकरणार्थम् आज्ञा लिख्यतां । यतो मम लोकान्

प्रति या विपत्ति र्घटिष्यते तस्या दर्शनम् अहं केन प्रकारेण सोढुं शक्नुयां?
निजकुटुम्बानां विनाशदर्शनं वा केन रूपेण सोढुं शक्येत मया?

तदानीं क्षितिपतिरहश्वेरो राज्ञीम् इष्टेरां यिहूदीयं मर्दिखयञ्च ७
गदितवान् पश्य मया हामनस्य परिवारा इष्टेरायै दत्ता हामनश्च
दण्डकाष्ठ उल्लम्बितः, यतो हेतोः स यिहूदीयान् प्रति हस्तार्पणं कर्त्तुम्
उद्यतवान्। अतो युवां यिहूदीयानां निमित्तं स्वेच्छानुसारेण राज्ञो नाम्ना ८
पत्रं लिखतं राजकीयाङ्गुरीयेण मुद्राङ्कितं कुरुतञ्च, यतो राज्ञो नाम्ना
लिखितं नृपतेरङ्गुरीयकेण मुद्राङ्कितञ्च यत् पत्रं तत् केनापि न व्यर्थी-
कर्त्तव्यं। तदानीं तृतीयमासस्यार्थतः सीवनमासस्य त्रयोविंशे दिवसे ९
राज्ञो लेखकेषु समाहूतेषु यिहूदीयलोकानधि मर्दिखयस्य निदेशानु-
सारेण सिन्धुनदम् आरभ्य कूशदेशं यावत् सप्तविंशत्यधिकशतदेशानां
मुख्यलोकान् अध्यक्षान् प्रदेशाधिपतींश्च प्रत्येकैकस्य देशस्याक्षरैरेकैकस्या
जाते र्भाषया च यिहूदीयलोकांश्च प्रति तेषामेवाक्षरै र्भाषया च पत्राणि
लिखितानि। तानि नृपतेरहश्वेरस्य नाम्ना समलिख्यन्त नृपस्याङ्गुरीय- १०
केण मुद्राङ्कितानि चापरं हयारोहिभिरश्विनीजाताश्वतरवाहनारोहि-
भिश्च क्षिप्रगामिभि र्दूतैस्तानि प्रेषयाञ्चक्रिरे। तत्सारो ऽयं यद् दिनैक- ११
स्मिन् अर्थतो ऽदरनामकस्य द्वादशमासस्य त्रयोदशे दिवसे नृपतेरहश्वे-
रस्य सर्व्वदेशानाम् एकैकस्य नगरस्य निवासिनो यिहूदीया एकत्र स- १२
म्भूय स्वप्राणरक्षार्थं समुत्थातुं किञ्च यस्या जाते र्यस्य देशस्य वा लोकैस्ते
क्लिष्टास्तान् तेषां बालकान् योषितश्च लोप्तुं हन्तुं विनाशयितुं किञ्च तेषां
निखिलवस्तूनि लोठयितुं शक्ष्यन्तीति राज्ञानुज्ञातम् अभूत्।

अपरं यिहूदीयाः स्वेषां वैरिणां प्रतीकारार्थं यत् सज्जिता भवेयुस्त- १३
न्निमित्तं निखिलदेशेषु प्रचारयितव्यस्यैतस्याज्ञापत्रस्यानुलेखनं निखिल-
लोकान् प्रति प्रहितम्। अनन्तरम् अश्वतरवाहनारूढा द्रुतगामिनो १४
दूता नृपस्याज्ञया त्वरितं सर्व्वत्र जग्मिवांसः। शूशने राजधान्यामपि
स आदेशः प्रकाशितो बभूव।

अनन्तरं मर्दिखयो नीलपाण्डरवर्णं राजकीयवसनं परिधाय शिरसि १५
काञ्चनमयं वृहत् किरीटं दत्त्वा किञ्च सूक्ष्मरक्तवर्णवसनेन वस्त्रवान्
भूत्वा नृपतेः समीपात् जगाम तेन शूशनराजधान्यानन्देन हर्षेण च
परिपुपूरे। अपरं यिहूदीयानां दीप्त्यानन्दहर्षसम्मानानि समुदीयुः। १६
किञ्च प्रतिदेशं प्रतिनगरञ्च यत्र कुत्रचित् स्थाने नृपतेरादेशः प्रचारया- १७

श्चक्रे तत्र तत्र स्थाने यिहूदीयैरानन्दो हर्षो भोज्यम् उत्सवश्चाकारि
किञ्च जनपदीयानां मध्ये बहवो मनुजा यिहूदीयानां मतं जगृहु
र्यस्मात् ते यिहूदीयेभ्यो बिभयाम्बभूविरे।

---

९ नवमोऽध्यायः।

१ रिपूणां हामनस्य दशतनयानाञ्च यिहूदीयै र्व्यापादनं ११ द्वितीये दिने रिपूणां घातनं हामनस्य पुत्त्राणां दण्डकाष्ठ उल्लम्बनं २० पूरीमदिनस्य महोत्सवनिरूपणं।

१ अपरम् अदरनामकस्य द्वादशमासस्य यस्मिन् त्रयोदशदिने नृपस्या-
ज्ञया नियमेन च सिद्धिं गन्तव्या, अर्थतो यस्मिन् दिने यिहूदीयानां
वैरिणस्तेषां प्रभवितुं प्रत्यैक्षन्त तस्मिन् दिने तादृशी विपरीतघटना
२ बभूव यया यिहूदीया एव स्वद्वेषिणां प्रबभूवुः। तदानीं राज्ञोऽहश्वे-
रस्य सर्व्वेषु देशेषु यिहूदीयाः स्वेषां हिंसाचेष्टकेषु हस्तार्पणं कर्त्तुं स्वेषां
नगरेषु स्वान् मेलयाञ्चक्रुः, ततस्तेषां सम्मुखे को ऽपि संस्थातुं न शशाक
३ यतो जनपदीयाः सर्व्वे लोकास्तेभ्यो बिभयाञ्चक्रिरे। देशस्था मुख्यलोका
अध्यक्षा अधिपतयो राजकर्म्मकारिणश्च सर्व्वे यिहूदीयान् उपचक्रुः, ते
४ मर्दिखयाद् बिभयाम्बभूविरे। यतो मर्दिखयो राजनिवेशने प्रमुखमनुज
आसीत् तदीययशश्च सर्व्वप्रदेशान् व्यानशे तस्य मर्दिखयस्योन्नति र्निरन्त-
५ रम् अवर्द्धत। अनेन प्रकारेण यिहूदीयाः स्वेषां सर्व्वपरिपन्थिनां मध्ये
बहूनां खड्गाघातं संहारं विनाशञ्च चक्रुः, ते स्वेषां द्वेषिणः प्रति स्वेच्छा-
६ नुसारेणाचारं चक्रिरे। विशेषतः शूशने राजधान्यां यिहूदीयाः पञ्च-
७ शतलोकानां वधं विनाशञ्च चक्रिरे। तदानीं पर्शन्दाथो दल्फोनो ऽस्पा-
८ थाः पोरथा अदलिया अरीदाथाः परमस्तो ऽरीषयो ऽरीदयो वयिषा-
१० थाश्च यिहूदीयानां वैरिणो हम्मिदाथासुतस्य हामनस्यैते दश सुतास्तै
र्जघ्निरे किन्तु तेषां सम्पत्तौ तै र्हस्तार्पणं नाकारि।

११ तस्मिन् दिने राजधान्यां शूशने निहतानां लोकानां संख्या राज्ञे
१२ निवेदिता। ततो राजा राज्ञीम् इष्टेरां बभाषे, राजधान्यां शूशने यि-
हूदीयैः पञ्चशतानि लोका हामनस्य दश पुत्त्राश्च हता विनष्टाश्च। न
जाने ऽहं नृपतेरन्यदेशेषु तैः किमकारि। इदानीं त्वया प्रार्थितं किं? तत्
१३ तुभ्यं दायिष्यते; तवापरा का वाञ्छा? सा सेत्स्यति। इष्टेरा प्रतिब-
भाषे, यदि राज्ञो ऽभिमतं जायेत तर्ह्यद्यतननियमं श्वो ऽप्याचरितुं शूश-

नस्थान् यिहूदीयान् प्रत्यनुज्ञा भवतु किञ्च हामनस्य दश सुता दण्डकाष्ठ
उल्लम्ब्यन्तां। अनन्तरं राजा तत् कर्त्तुम् आदिदेश, ततः साज्ञा शूशनं १४
प्रचारिता हामनस्य दश तनयाश्चोल्लम्बिताः। अपरं शूशनस्था यिहूदीया १५
अदरमासस्य चतुर्दशदिने ऽपि मिलित्वा शूशने त्रीणि शतानि लोकान्
अवधिषुः किन्तु तेषां सम्पत्तौ हस्तार्पणं न चक्रिरे। एतस्मिन् समये १६
नृपतेरन्येषु देशेषु ये ये यिहूदीया आसन् ते समागत्य प्राणरक्षार्थं सम-
तिष्ठन्त तेन ते परिपन्थिनां प्रतीकारं कृत्वा वैरिणां पञ्चसप्ततिसहस्राणि
लोकान् व्यापादयामासुः परन्तु तेषां सम्पत्तौ हस्तार्पणं न चक्रिरे। मा- १७
सस्यादरस्य त्रयोदशदिने ते तत् कर्म्म चक्रुः, किञ्च चतुर्दशदिने विश्रम्य तत्
भोज्यस्योत्सवस्य च दिनं विदधिरे। परन्तु शूशनस्था यिहूदीयास्तस्य १८
मासस्य त्रयोदशे दिने चतुर्दशे दिने च मिलिताः किञ्च पञ्चदशे दिवसे
विश्रम्य तदेव भोज्यस्योत्सवस्य च दिनं चक्रिरे। एतत्कारणाद् निष्प्रा- १९
काराणां नगराणां निवासिनो यिहूदीया अदरमासस्य चतुर्दशं दिनम्
उत्सवस्य भोज्यस्य मङ्गलस्य परस्परम् अंशप्रेषणस्य च दिनं कुर्व्वन्ति।

अपरं नृपतेरहश्वेरस्य निखिलदेशेषु निकटस्था दूरस्थाश्च ये यिहू- २०
दीया निवसन्ति तेषां समीपं मर्दिखय एतान् वृत्तान्तान् लिखित्वा पत्रैः
प्रेषयाञ्चकार। अपरं यिहूदीया ययोरुभयो र्दिनयोः स्वेषां वैरिभ्यो २१
विश्रामं चक्रवांसः किञ्च यस्मिन्मासे तेषां दुःखं सुखं बभूव शोक उत्सवो
बभूव च तस्य मासस्य ते द्वे दिने भोज्यस्यानन्दस्य परस्परम् अंशप्रेषणस्य २२
दरिद्रेभ्यो वितरणस्य च दिने भविष्यतः, अर्थतः प्रतिवत्सरम् अदर-
मासस्य चतुर्दशदिनं पञ्चदशदिनञ्च तैः पालयिष्येते एतत् तैः पत्रै र्निरू-
पयाञ्चक्रे। ततो यिहूदीया यादृग् आरब्धवन्तो मर्दिखयश्च तान् प्रति २३
यादृगलिखत् ते तादृगाचरितुं मतिम् अकुर्व्वन्। सर्व्वेषां यिहूदीयानां २४
रिपु र्हम्मिदाथास्तनयो ऽगागीयो हामनस्तान् व्यापादयितुं मतिं विधाय
तेषां विपदर्थं क्षयविनाशार्थञ्च पूरम् अर्थतो गुटिकापातं कृतवान्।
परन्त्विष्टेरायां राज्ञः समक्षम् आगतवत्यां स इदम् आज्ञापत्रं ददिवान् २५
हामनो यिहूदीयानां विरुद्धं यम् अमङ्गलस्य सङ्कल्पं कृतवान् स तस्मि-
न्नेव वर्त्ततां स तस्य पुत्राश्च दण्डकाष्ठ उल्लम्ब्यन्तामिति। अतः पूरीमस्या- २६
र्थतो गुटिकापातस्य नामतस्तस्य दिवसस्य नाम पूरीमं बभूव किञ्च तस्य
पत्रस्य कृत्स्नवचसां कृते तथा ते तदधि यद् ददृशुस्तान् प्रति यद् अघटत
चैतेषां कृते यिहूदीया लिखितनिर्देशानुसारेण निरूपितसमयानुसारेण २७

च स्वेषां निमित्तं स्वकीयभाविवंशानां निमित्तं स्वकीयमतावलम्बिनाञ्च
निमित्तं प्रतिवत्सरं तद् दिनद्वयं पालयितुं केनापि प्रकारेण तन्न
१८ विहातुं निरूपयाञ्चक्रिरे। अपरं निखिलपुरुषपरम्परायां प्रतिवंशं
प्रतिदेशं प्रतिनगरञ्च ते उभे दिने स्मर्त्तव्ये पालयितव्ये च किञ्च तत् पूरी-
मपर्व्व यिहूदीयानां मध्ये कदापि लुप्तं न भविष्यति तेषां वंशस्य मध्ये
तयोः स्मरणस्य लोपो न भविष्यति।
१९ अबीहयिलस्य तनूजा राज्ञीष्टेरा यिहूदीयो मर्द्दिखयश्च पूरीमदिन-
२० मधि द्वितीयमिदं निदेशपत्रं स्थिरीकर्त्तुं सर्व्वपराक्रमेण लिलिखतुः। यिहू-
दीयो मर्द्दिखय इष्टेरा राज्ञी च यं निदेशम् अकुरुतां यिहूदीयलोकाश्च
स्वेषां निजभाविवंशस्य च निमित्तम् उपवासप्रार्थने अधि यं नियमं
२१ अकुर्व्वन् तदनुसारतो निरूपिते काले तत्पूरीमदिनस्य पालनार्थं नृपते-
रहस्वेरस्य राष्ट्रस्य सप्तविंशत्यधिकशतदेशेषु सर्व्वेषां यिहूदीयानां समीपं
२२ शान्तिकरैः सत्यैश्च वाक्यैः पत्राणि प्रेरितानि। इत्थम् इष्टेराया आज्ञया
पूरीमदिनस्य कर्त्तव्यं निश्चितं पुस्तके लिखितञ्च।

---

१० दशमोऽध्यायः।

नृपतेरहस्वेरस्य महिम्नो मर्द्दिखयस्योन्नतेश्च कथनं।

१ स नृपतिरहस्वेरो भूमण्डलस्य जलधेरुपद्वीपानाञ्च लोकान् राजसा-
२ हाय्यं कर्त्तुम् आदिदेश। तस्य पराक्रमस्य प्रभावस्य च सर्व्वाः कथाः किञ्च
राज्ञो दानात् मर्द्दिखयेन लब्धस्य महिम्नो विवृति र्मादियापारसदेश-
३ यो र्नृपाणां पुरावृत्तपुस्तके लिखिताः किं न विद्यन्ते? एष यिहूदीयम-
र्द्दिखयो नृपतेरहस्वेरस्य प्रधानमन्त्री भूत्वा यिहूदीयानां मध्ये प्रमुखः
स्वभ्रातृनिवहस्य मध्ये ग्राह्यः स्वजातीयानां हितैषी स्वीयसर्व्ववंशान् प्रति
मङ्गलवाक्यवादी च बभूव॥

Bible. O.T. Sanskrit. 1848

THE

HOLY BIBLE

IN THE

SANSCRIT LANGUAGE.

VOL. III.

CONTAINING THE POETICAL AND DEVOTIONAL BOOKS
FROM JOB TO CANTICLES.

TRANSLATED OUT OF THE ORIGINAL TONGUES

BY THE

CALCUTTA BAPTIST MISSIONARIES,

WITH NATIVE ASSISTANTS.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS, CIRCULAR ROAD.

1858.

Library of the Theological Seminary,
PRINCETON, N. J.
Presented by Rev. P. S. Wynkoop, 1882.
Division BS315
Section S22
Shelf .... Number 1848
v.3

इङ्गरेजीयभाषातो व्याकृतः

धर्म्मग्रन्थः।

तस्य तृतीयं खण्डं

यद्वा

आयूबस्य चरित्रपुस्तकं

गीतसंहिता

राज्ञा सुलेमना रचितानि काव्यानि च।

कलिकातानगरे

ग्रन्थोऽयं मुद्राङ्कितोऽभूत्।

शकाब्दाः १७७९ ई १८५८

PROPERTY OF
PRINCETON
REC. AUG 1882
THEOLOGICAL
SEMINARY.

सूचीपत्रं।

अशुद्धशोधनं।

पृष्ठे।	पङ्क्तौ।	अङ्के।	अशुद्धं।	शुद्धं।
१८	२२	६	वेत्स्यस्युपेक्षितं	ह्यास्यस्युपेक्षितं
२८	७	२१	मानवार्थं विवादं स सार्द्धमीशेन कुर्व्वतां।	विवादं सार्द्धमीशेन मानवार्थं करोतु सः।
३०	८	१३	सूतुना	सूनुना
६७	१४	२३	शैल्यं	शल्यं
७३	२०	२	मन्त्रयन्त्यग्रगा	मन्त्रयन्तेऽग्रगा
७४	२७	४	आह्वये परमेश्वरं	आह्वयामि परेश्वरं।
८२	२७	२	दुरात्मनो लोका	लोका दुरात्मान
९०	२२	४०	मानवा मां जिहिंसवः।	मज्जिहिंसिषवो नराः।
९४	८	११	मकुर्व्वंश्च	मकुर्व्वंस्व
११८	२२	३	गाथां	गीतिं
१३०	४	५	साधमानवान्	साधुमानवान्
१५४	२७	१९	महन्ति	महान्ति
१८४	२६	५	कोटिम्महन्ति	कोटिम्महान्ति
१८५	६	१०	षेच्यत	षेच्यते
१९१	२२	६	स तेभ्यः प्रार्थमानेभ्य उत्तरं व्यतरत् स्वयं॥	तेभ्यः प्रार्थयमानेभ्य उत्तरं सोऽददात् स्वयं॥
१९८	३१	३३	मदीश्वरः	मदीश्वरं
२३१	१९	५	वीक्ष्यसे	वीक्षिता
२३१	२०	६	वीक्ष्यसे	वीक्षिता
२५६	२६	३	जह्वीतां	जह्यातां
२५६	२९	४	लप्स्यसे	लप्स्यते
२६३	२	१०	करश्लिष्टा	करश्लिषा
२६४	१४	३५	पारितोषितं	पारितोषिकं
२६४	१९	२	मदाज्ञा	मदाज्ञाः
२६४	२६	६	स्वगहस्य	स्वगेहस्य

पृष्ठे।	पङ्क्तौ।	अङ्के।	अशुद्धं।	शुद्धं।
२६७	११	२४	निर्ज्झराः	निर्झराः
२६७	१४	२६	निर्म्मितेः	निर्म्मिते
२६७	१६	२७	पृष्टे	पृष्ठे
२६७	३१	३५	एवाप्नाति	एवाप्नोति
२९६	२२	६	बाहुल्येन च मन्त्रीणां	मन्त्रिणाञ्च बहुत्वेन
३०६	१७	८	प्रशस्यते	प्रशम्यते
३०६	२५	१३	मिलितो	मिलतो
३०८	३	४	ऽग्रहीद्दायं	ऽग्रहीद्दायुं
३०८	३१	१७	तद् श्रावकै	तच्छ्रावकै
३०९	८	२२	भक्तैस्तृप्तस्य	भक्त्यैस्तृप्तस्य

आयूबस्य चरित्रपुस्तकं।

१ प्रथमोऽध्यायः।

१ आयूबस्य धनं धर्म्मश्च ४ तस्य पुत्त्राणां रीतिः ६ शैतानेन तस्यापवादकथनं १३ आयूबस्य विपत्तिः २० तस्य धैर्य्यावलम्बनञ्च।

१ ऊषदेशे धार्म्मिकः सरल ईश्वरभक्तः कुक्रियात्यागी चैको जन आयू-
२ बनामक आसीत्। तस्य सप्त पुत्त्रास्तिस्रः पुत्त्र्यश्च जज्ञिरे। तस्य सप्तस-
३ हस्राणि मेषास्त्रीणि सहस्राणि महाङ्गाः पञ्चशतयुग्मानि वृषभाः पञ्च-
शतानि गर्द्दभ्यो बहवः परिवाराश्चासन् एतेन स पूर्व्वदेशनिवासिभ्यः
सर्व्वलोकेभ्यो ऽधिकधनवान् आसीत्।

४ तदीयपुत्त्राणाम् एकैको निजनिजजन्मदिने निजनिजगेहे भोज्यं
चकार दूतांश्च प्रहित्य स्वेन स्वेन सार्द्धं भोजनपानाय तिस्रो भगिनी-
५ र्निमन्त्रयामास। अनन्तरं तेषां भोज्यदिनेषु गतेष्वायूबस्तानाहूय पवि-
त्रीचकार किञ्च प्रत्यूष उत्थाय तेषां संख्यानुसारतो होमार्थकबलीन्
उत्ससर्ज, यस्माद् आयूबो जगाद को जानाति मम पुत्त्रा यदि पापा-
चारं कृत्वा मनोभिरीश्वराय जलाञ्जलिं दत्तवन्तः। आयूबः प्रतिवर्षं तत्
कृतवान्।

६ एकदा परमेश्वरं साक्षात् कर्त्तुम् ईश्वरस्य सन्तानेषु समुपस्थितेषु
७ तेषां मध्ये शैतानो ऽपि उपतस्थौ। तेन परमेश्वरस्तं पप्रच्छ त्वं कस्मादा-
गतः? शैतानः परमेश्वरं प्रत्युवाच पृथिवीपर्य्यटनात् तस्याम् इतस्ततो
८ भ्रमणाच्चागतो ऽस्मि। तेन परमेश्वरः शैतानं पृष्टवान् मम सेवकम् आयूबं
प्रति किं तव मनोयोगो जातः? तस्य तुल्यो धार्म्मिकः सरल ईश्वर-
९ भक्तः कुकर्म्मत्यागी च नरः पृथिव्यां को ऽपि न विद्यते। शैतानः परमेश्वरं
१० प्रतिजगाद, आयूबः किं विनालाभम् ईश्वरं सेवते? त्वं तस्य तदीय-
परिजनानां तदीयसर्व्वस्वस्य च चतुर्दिक्षु किं प्राचीरेण न वारितवान्?
तस्य हस्तगतानि कार्य्याणि किं सफलानि न कृतवान्? पृथिव्याञ्च किं
११ तस्य सम्पत्ति र्न व्यानशे? किन्तु त्वं यदि करं विस्तार्य्य तस्य सर्व्वस्वं
१२ स्पृशेस्तर्हि स किं तव साक्षात् तुभ्यं जलाञ्जलिं न दास्यति? तेन शैतानं

परमेश्वरो बभाषे पश्य तस्य सर्व्वस्वं तव हस्तगतमास्ते, केवलं तस्य गात्रे हस्तार्पणं मा कार्षीः। तेन शैतानः परमेश्वरस्य समीपाद् बहि र्जगाम।

अपरं कस्मिंश्चिद् दिने आयूबस्य पुत्त्राः पुत्त्र्यश्च ज्येष्ठभ्रातु र्गेहे ऽभु- १३
ञ्जत द्राक्षारसञ्चापिबन्। तदानीम् आयूबस्य सन्निधिं दूत एक आगत्य १४
वार्त्तामिमां जगाद, वृषभा हलानि वहन्ति गर्द्दभ्यस्तेषां पार्श्वे चरन्ति
चैतस्मिन्नन्तरे शिवायीयदस्युनिवह आक्रम्य खड्गधारेण भृत्यान् व्यापाद्य १५
सर्व्वान् पशून् नीतवान् एको ऽहं रक्षां प्राप्य त्वां वार्त्तां वक्तुम् आगमं।
स इति कथयति तन्मध्ये ऽपर एक आगत्य वार्त्तामिमां गदितवान्, आ- १६
काशाद् ईश्वराग्निः पतन् सर्व्वमेषान् मेषरक्षकांश्च दग्ध्वाग्रासीत्, एको
ऽहं रक्षां प्राप्य त्वां वार्त्तां वक्तुमागमं। स वार्त्तां वक्ति तदानीम् अपर १७
एक आगत्य वार्त्तामिमां बभाषे, कस्दीयास्त्रयो दस्युनिवहा आक्रम्या-
सिधारेण दाससमूहं हत्वा सर्व्वान् महाङ्गान् नीतवन्त एको ऽहं रक्षां
प्राप्य त्वां वार्त्तां वक्तुमागमं। स इति कथयति तदानीम् अपर एक १८
आगत्य वार्त्तामिमां जगाद, तव पुत्त्राः पुत्त्र्यश्च ज्येष्ठभ्रातु र्गेहे भुञ्जते
द्राक्षारसं पिबन्ति च। तदानीम् अकस्मात् प्रान्तरमध्येन प्रबलझञ्झा १९
समेत्य गेहस्य चतुरः कोणान् पर्य्यग्रहीत् तेन तेषां यूनामुपरि गृहस्य
पतनात् ते प्राणान् अत्यजन् एको ऽहं रक्षां प्राप्य त्वां वार्त्तां वक्तुम्
आगमं।

तदानीम् आयूब उत्थाय वसनं छित्त्वा शिरो मुण्डयित्वा भूमि लग्न- २०
शिराः प्रणम्यावदत्,

योऽहं निर्गतवान् नग्नो जनन्या गर्भतः पुरा। २१
सोऽहं पुनरितो नग्नः प्रतिगन्ता यथागतं॥
परमेशेन प्रादायि परेशेनापहारि च।
तस्यैव परमेशस्य धन्यं भवतु नाम हि॥

एतैः सर्व्वैरायूबः पापं न चकार, ईश्वरे दोषारोपणञ्च न चकार। २२

---

२ द्वितीयोऽध्यायः।

१ शतानस्य द्वितीयो ऽपवादः ७ आयूबाय पुन र्दुःखदानं ९ आयूबस्य स्वजायाया मन्त्रणाया अग्रहणं ११ आयूबं प्रबोधयितुं बन्धुत्रयागमनं।

अनन्तरं पुनरेकदा परमेश्वरं साक्षात् कर्त्तुम् ईश्वरस्य सन्तानेषूप- १

२ स्थितेषु शैतानो ऽपि परमेश्वरं साक्षात् कर्त्तुम् उपतस्थौ। तेन परमेश्वरः
शैतानं पप्रच्छ त्वं कस्माद् आगतो ऽसि? शैतानः परमेश्वरं प्रत्युवाच
३ पृथिवीपर्य्यटनात् तस्याम् इतस्ततो भ्रमणाच्चाहमागतो ऽस्मि। परमेश्वरः
शैतानं पृष्टवान् मम सेवकमायूबं प्रति किं तव मनोयोगो जातः? तस्य
तुल्यो धार्म्मिकः सरल ईश्वरभक्तः कुकर्म्मत्यागी च नरः पृथिव्यां को ऽपि
न विद्यते। यद्यपि त्वमकारणं तं नाशयितुं मां प्रावर्त्तयस्तथापि स
४ इदानीमपि स्वधर्म्मं रक्षति। तेन शैतानः परमेश्वरं प्रत्यवदत्,

चर्म्मार्थं चर्म्म जीवार्थं सर्व्वस्वञ्च त्यजेन्नरः।

५ किन्त्वधुना यदि त्वं करं विस्तार्य्य तस्यास्थिमांसे स्पृशेस्तर्हि स तव सा-
६ क्षात् तुभ्यं जलाञ्जलिं दद्यात्। ततः शैतानं परमेश्वर उक्तवान् पश्य स
तव हस्तगतः किन्तु तस्य प्राणान् मा विनाशय।

७ ततः शैतानः परमेश्वरस्य सम्मुखात् प्रस्थाय आयूबस्यापादमस्तकं
८ दुष्टव्रणान् जनयामास। तेन स कपालिकाम् आदाय भस्ममध्य उपविश्य
सर्व्वाङ्गानि घर्षितुम् आरेभे।

९ पश्चात् तस्य जाया तमवादीत् त्वं किमधुनापि स्वधर्म्मं रक्षसि?
१० ईश्वराय जलाञ्जलिं दत्त्वा प्राणान् त्यज। ततः स तां प्रत्यवदत् त्वम-
ज्ञानैकेव कथां कथयसि। ईश्वरात् शुभं गृहीत्वा वयं किम् अशुभं
११ न ग्रहीष्यामः? एतेनापि खोष्ठाभ्याम् आयूबः पापं न कृतवान्।

एताः सर्व्वा विपद आयूबम् आचक्रमुरिति वार्त्तायां तस्य त्रिभि
र्बन्धुभिः श्रुतायां ते ऽर्थतस्तैमनीय इलीफसः शूहीयो बिल्‌ददो नामा-
थीयः सोफरश्च स्वस्वस्थानाद् यात्रां विधाय तेन सह शोचितुं तं सा-
१२ न्त्वयितुञ्च तस्यान्तिकं गन्तुं मन्त्रितवन्तः। यदा ते दूरात् चक्षुरुन्मील्य तं
परिचेतुं न शक्तास्तदा त उच्चैः क्रन्दितुं वस्त्राणि छेत्तुं शिरसाम् ऊर्द्ध्वं
१३ गगनदिशि धूली विकरितुञ्च प्रारेभिरे। पश्चात् सप्त दिवारात्रीः सार्द्धं
तेन भूमावुपविष्टा अतिष्ठन् को ऽपि तेन न समभाषत यतस्ते तम् अतीव
क्लेशाकुलं ददृशुः।

---

३ तृतीयोऽध्यायः।

१ आयूबस्य स्वजन्मदिनाय शापदानं ११ स्वमृत्युप्रार्थनं २० जीवने विरक्तिश्च।

१ अनन्तरम् आयूबो वक्तुं व्यादाय निजजन्मदिनं शप्तुं प्रारभत।

आयूब उवाच । १

प्रणश्येत् तद्दिनं यस्मिन् उत्पत्तिरभवन्मम । २
प्रणश्येत् सा निशा यस्यां पुत्रो जात इतीरितं ॥
स एव वासरो यायात् महान्धतमसं किल । ४
मा तस्यान्वेषणं कुर्य्याद् उपरिस्थित ईश्वरः ।
तस्योपरि न चालोको दीपकत्वं प्रजायतां ॥
तमश्च मरणच्छाया कलङ्कैस्तद्विलिम्पतां । ५
आच्छादयतु मेघस्तद् राहुश्च परिभीषयेत् ॥
तमश्च तां हरेद्रात्रिं न योग्याब्ददिनेषु सा । ६
सङ्ख्यामध्ये च मासानां न तस्या गणना भवेत् ।
बन्ध्या भवतु सा रात्रिस्तत्रोल्लासो न वर्त्ततां ॥ ७
वासरश्च स शप्तव्यो दिनाय शापदातृभिः । ८
लिवियाथननागस्य प्रबोधे कुशलैरपि ॥
तारास्तस्य प्रभातीया गच्छन्तु सान्धकारतां । ९
दीप्तिं प्रतीक्षमाणञ्च नैराश्यं यातु तद्दिनं ।
अरुणस्योदयस्तेन दिनेन नहि दृश्यतां ॥
यतस्तन्मम मातु र्न गर्भद्वारमवारुणत् । १०
नेत्राभ्याञ्च मदीयाभ्यां तन्न दुःखमगोपयत् ॥
कुतो हेतोरहं गर्भे मरणं प्राप्तवान् नहि । ११
जरायो र्निर्गतस्यैव प्राणा मे न गताः कुतः ॥
ऊरुद्वयं जनन्याश्च मां प्रत्यैच्छत वा कुतः । १२
स्तन्यपानाय मे मातुः सम्प्रवृत्तौ कुतः स्तनौ ॥
तदभावे शयानोऽहं व्यश्रमिष्यन्तु साम्प्रतं । १३
निद्रागतस्य मे शान्तिरिदानीञ्चाजनिष्यत ॥
उत्सन्नवाटिकाः स्वेषां कृते यै र्निर्म्मिता पुरा । १४
तै र्महीपतिभिः सार्द्धं किं वा तै र्मन्त्रिभिः सह ॥
अध्यक्षैः काञ्चनाढ्यै र्वा रौप्यपूर्णगृहैः सह ॥ १५
अभविष्यमसन् वाहं प्रच्छन्नगर्भपातवत् । १६
अप्राप्तदीप्तिदृष्टीनां बालकानां समोऽपि च ॥
तस्मिन् लोके दुरात्मानो निवर्त्तन्त उपद्रवात् । १७
प्राप्नुवन्ति च विश्रामम् अवसन्नबला जनाः ॥

१८ शान्तिं गच्छन्ति चैकत्र कारागारस्थमानवाः।
न प्रजापीडकस्यापि रवस्तैः श्रूयते पुनः॥
१९ महाल्लोकस्य क्षुद्रस्य तत्स्थाने भवतां समौ।
प्रभोरधीनतातो ऽपि मुक्तिं दासस्य जायते॥
२० मानवायावसन्नाय कुतो दीप्तिः प्रदीयते।
कुतो दीनमनस्काय जीवितं वा प्रदीयते॥
२१ ये वाकाङ्क्षन्ति दुष्प्राप्यं मरणं मनुजा वृथा।
गवेषयन्ति ये लोकाः प्रच्छन्ननिधिवन्मृतिं॥
२२ देहत्यागस्थलं दृष्ट्वा रोमाञ्चकारिसम्मदः।
उल्लासश्च भवेद् येषां तेभ्यो वा दीयते कुतः॥
२३ प्रच्छन्नमार्गगन्त्रे वा निरुद्धायेश्वरेण च॥
२४ हाहाकारः प्रकर्त्तव्य आहारस्याग्रतो मया।
प्रेर्य्यते च विलापो मे पानीयस्य प्रवाहवत्॥
२५ महाभयं यतो ऽकार्षं तदेव वर्त्तते मयि।
येनाशङ्कामकार्षञ्च तद्धि मय्युपतिष्ठते॥
२६ प्राप्यते न मया शान्ति र्विश्रामो ऽपि न लभ्यते।
न प्राप्नोमि श्रमच्छेदं व्यथाक्रान्तः पुनः पुनः॥

---

४ चतुर्थो ऽध्यायः।

१ आयूबं प्रतीलीफसस्योत्तरं १२ तस्य स्वप्नदर्शनकथनञ्च।

१ अनन्तरं तैमनीय इलीफसः प्रत्यब्रवीत्।
२ अनुज्ञातः किमालापः क्लेशस्ते वा भवेत् ततः।
किन्तु केन भवेच्छक्यं वचनेभ्यो निवर्त्तितुं॥
३ पश्य हितोपदेशं त्वं बहुभ्यः परिदत्तवान्।
हस्तौ च शिथिलीभूतौ त्वयैव सबलीकृतौ॥
४ स्खलितो यो मनुष्यः स वाग्भिरुत्थापितस्तव।
यच्च जानुद्वयं भग्नं तत् त्वयैव स्थिरीकृतं॥
५ उपस्थिते च दुःखे त्वां त्वं किम् उद्विजसे ऽधुना।
परिस्पृष्टश्च क्लेशेन स्वयं किम् अवसीदसि॥
६ त्वदीयेश्वरभक्तिः किं न तवाशास्थलं भवेत्।

धर्म्माचारस्य ते किं न प्रत्याशावर्द्धकस्तव॥
निष्पापः को विनष्टो ऽभूदेतत् संस्मर्य्यतां त्वया। ७
क्व वा ते सरलाचाराः स्मृतं येषां विलोपनं॥
अधर्म्मकर्षणं कृत्वा हिंसाबीजं वपन्ति ये। ८
छन्तन्ति ते तथा शस्यमेतदीच्चितवानहं॥
विनाशो जायते तेषां निश्वासाद् ईश्वरस्य हि। ९
नासिकापवनात् तस्य ते गच्छन्ति विलोपनं॥
सिंहस्य रुध्यते नादो मृगेन्द्रस्यापि गर्जनं। १०
वनराजकुमाराणां भज्यन्ते दन्तपङ्क्तयः॥
भक्षणीयस्य चाभावात् क्षयं गच्छति केशरी। ११
सिंहीशावकवृन्दश्च चतुर्दिक्षु विकीर्य्यते॥
सुप्रच्छन्नं स्वरः कश्चिद् उपासर्पन्मदन्तिकं। १२
उपांशु कथितं तस्माद् गृहीतं श्रवणेन मे॥
नैशदर्शनजातानां भावनानाम् उपस्थितौ। १३
यस्मिन् काले मनुष्येषु निद्रा घोरतरा पतेत्॥
साध्वसं वेपथुश्चैव माम् उपाक्राम्यतां तदा। १४
मदीयास्थीनि सर्व्वाणि प्रारभन्त च कम्पितुं॥
एका छाया तदानीन्तु प्रासर्पत् सम्मुखेन मे। १५
तेन रोमाञ्चितो जातो मामकीनः कलेवरः॥
तस्याः समुत्थितायाः न स्पष्टं दृष्टा मयाकृतिः। १६
अतिष्ठत् प्रतिमैका हि मम लोचनयोः पुरः।
पश्चान्मन्दरवो जातो वाणियश्च श्रुता मया॥
ईश्वरस्य समक्षं किं मानवः पुण्यवान् भवेत्। १७
अथवा किं पवित्रः स्यात् मर्त्त्यः स्वस्रष्टुरन्तिके॥
पश्य स्वकीयदासेषु स विश्वासं करोति न। १८
निजस्वर्गीयदूतेषु चारोपयति मूढतां॥
तर्हि मृत्पिण्डजातेषु गेहेषु प्रवसन्ति ये। १९
धूलिनिर्म्मितमूर्त्तींस्तान् प्रति किं न करिष्यति।
सर्व्वे ते चूर्णयिष्यन्ते कीटेभ्यो ऽपि पराङ्मुखाः॥
प्रभातसाययो मध्ये गमिष्यन्ति निपातनं। २०
चिन्ता तत्र न कस्यापि ते नङ्क्ष्यन्ति निरन्तरं॥

२१ तेषामुत्तमता किं न तैः सह्यापगमिष्यति।
गन्तव्यः परलोकस्तैरज्ञानत्वदशाकुलैः॥

५ पञ्चमोऽध्यायः।

१ आयूबं प्रतीलीफसस्य धर्म्मकथनं मन्त्रणा च १७ परमेश्वरीयशास्तिफलस्य निर्णयश्च।

१ त्वयाह्वाने कृते कश्चित् किं त्वां प्रतिवदिष्यति।
मध्ये पुण्यवतां को वा यास्यते शरणं त्वया॥
२ कार्कश्यं हन्ति निर्ब्बोधम् अज्ञस्तापेन नश्यति॥
३ नरः कश्चिन्मया मूढो बद्धमूलो विलोकितः।
तत्क्षणादभिशप्तञ्च मया तस्य निकेतनं॥
४ तिष्ठन्ति तस्य सन्तानाः सुदूरे निर्भयस्थलात्।
राजद्वारे च चूर्ण्यन्ते कोऽपि निस्तारयेन्न तान्॥
५ तदीयक्षेत्रशस्यानि भुङ्क्ते क्षुत्पीडितो जनः।
कण्टकानां वनस्यापि मध्यात् तान्याचिनोति सः।
तृषापीडितलोकाश्च पिबन्ति तस्य वैभवं॥
६ विपन्निर्याति नो धूले दुःखं नोत्पद्यते मृदः॥
७ किन्तु व्यसनभोगार्थं मानवः सम्प्रसूयते।
उड्डीनत्वार्थम् अत्युच्चं जाता वह्निकणा इव॥
८ तस्मान्मतिरियं मे स्याद् ईश आश्रीयतां त्वया।
निवेद्यताञ्च ते वाक्यम् ईश्वरस्यैव सन्निधौ॥
९ साध्यन्तेऽनुपलभ्यानि महाकर्म्माणि तेन हि।
अद्भुतान्यपि कार्य्याणि सोऽसंख्यानि करोति च॥
१० महीमण्डलपृष्ठे स वृष्टिवारीणि सिञ्चति।
क्षेत्राणाम् उपरिष्टाच्च तोयानि प्रहिणोति सः॥
११ समुत्थाप्य स नीचस्थान् अत्युच्चान् विदधाति हि।
शोकार्त्ता रक्षितास्तेन प्राप्नुवन्ति समुन्नतिं॥
१२ सङ्कल्पान् धूर्त्तलोकानाम् निरर्थान् प्रकरोति सः।
तस्मान्न जायते तेषां करैः साध्या कृतार्थता॥
१३ स्वेषां चातुर्य्यजालेन बध्नाति ज्ञानिनः स हि।

मन्त्रणा वक्रभावानां भवत्यपूर्णकालजा॥
दिवसे ऽपि मनुष्यास्ते भ्रमन्ति तामसावृताः। १४
हस्तामर्षञ्च कर्त्तव्यस्ते मध्याह्ने ऽपि रात्रिवत्॥
असिनीकाशवक्त्रेभ्यस्तेषां हि परिरक्षति। १५
बलिष्ठस्य कराद् दीनम् उद्धारयति चेश्वरः॥
तस्माद् अकिञ्चनस्यापि प्रत्याशा हि प्रजायते। १६
अधर्म्मेण तथा स्वीयं रोधयितव्यमाननं॥
पश्य धन्यो मनुष्यः स ईशस्तिरस्करोति यं। १७
सर्व्वशक्तिमतः शास्ति नं चावज्ञायतां त्वया॥
स करोति क्षतं जातु स बध्नाति क्षतं पुनः। १८
विदधाति स आघातं तत्करौ च भिषज्यतः॥
षट्सु सङ्कटकालेषु स एव त्वाम् अविष्यति। १९
सप्तमे ऽपि समायाते न त्वां प्राप्स्यत्यमङ्गलं॥
दुर्भिक्षसमये स त्वां मरणादुद्धरिष्यति। २०
युद्धकाले ऽपि ते प्राणान् स रक्षिष्यत्यसे र्मुखात्॥
रसनायाः कशाघातात् त्वं सुगुप्तो भविष्यसि। २१
समागच्छत उत्पातान्न ते त्रासो जनिष्यते॥
दुर्भिक्षोत्पातयोः काले स्मेरस्ते सम्भविष्यति। २२
वनेचरपशुभ्यो ऽपि न कर्त्तव्यं त्वया भयं॥
यतः क्षेत्रस्थपाषाणैः सार्द्धं सन्धिः कृतस्त्वया। २३
आचरन्ति च निर्द्वन्द्वं त्वां प्रत्यारण्यजन्तवः॥
स्ववासस्य सुखावस्था त्वया चावगमिष्यते। २४
स्वगेहस्यानुसन्धाने कृते नो वञ्चयिष्यसे॥
समालोकिष्यसे वंशं स्वकीयं बहुसङ्ख्यकं। २५
पुत्रपौत्रान् स्वकीयांश्च क्षेत्रस्थतृणसन्निभान्॥
परिणामदशां प्राप्य परलोकं गमिष्यसि। २६
स्वकाले सङ्गृहीतस्य धान्यगुच्छस्य सन्निभः॥
पश्यास्माभि र्विनिश्चित्य यदिदं सत्यमुच्यते। २७
भवतापि तदाश्रुत्य निजक्षेमाय गृह्यतां॥

६ षष्ठोऽध्यायः।

१ इलीफसं प्रति आयूबस्योत्तरं दुःखस्य वर्णना ८ पुन र्मृत्युप्रार्थनं १४ शुष्कस्रोतोदृष्टान्तः २१ तस्य तात्पर्य्यं बन्धूनां निर्द्दयत्वं तान् प्रति भर्त्सनञ्च।

१ तदनन्तरम् आयूबः प्रत्युवाच।

२ हाहा तापस्य मे भारे सम्यक् केनापि निश्चिते।
एकस्मिन् मानदण्डे चेत् तुल्यते व्यसनं मम॥

३ सामुद्रसिकताभ्यः स गरीयान् जायते ऽधुना।
ततो हेतो र्व्यलीकानि सम्भूतानि वचांसि मे॥

४ सर्व्वशक्तिमतो वाणाः प्राविशन्नन्तरं मम।
पीयन्ते च मम प्राणास्तेषां गरलतेजसा।
ईशस्य त्राससैन्यानि वेष्टन्ते माञ्च सर्व्वतः॥

५ हरितशष्पमध्ये ऽपि रौति किं वन्यगर्द्दभः।
वृषो वा यावसं प्राप्य हम्भारावं करोति किं॥

६ यद् द्रव्यं नीरसं तत् किम् अद्यते लवणं विना।
किं वा डिम्भस्य लालायां विद्यते स्वादु किञ्चन॥

७ संस्पर्शमात्रतो येषां बैभत्स्यं जायते मम।
भोक्तव्यानि मया तानि दुःखानि व्याधिजानि हि॥

८ हाहा यत् प्रार्थये ऽहं तत् किं कदापि न सेत्स्यति।
प्रतीच्छे यदहं तत् किम् ईश्वरो न प्रदास्यति॥

९ मम चूर्णनम् ईशाय कुतो हेतो र्न रोचते।
स प्रसार्य्य निजं हस्तं न खण्डयति मां कुतः॥

१० तथा कृते ऽवशिष्टा मे ऽस्यास्यत् काचन सान्त्वना।
निर्द्दयक्लेशभोगेषु चानन्दो मे ऽजनिष्यत।
यस्माद् ईशस्य वाक्यानि नानङ्गीकृतवानहं॥

११ मदीयं किं बलं येन पारयामि तितिक्षितुं।
का वा मे परिणामाशा यया दीर्घायुम् अर्थये॥

१२ शैलानां यादृशी शक्तिः किं शक्ति र्मम तादृशी।
मामकीनानि मांसानि वारकूटमयानि किं॥

१३ प्रतीकारस्य किं कश्चिद् उपायो मे ऽवशिष्यते।
मत्तो दूरीकृतं सर्व्वं यदविद्यत कौशलं॥

दुःखार्त्तो यो मनुष्यः स दयितव्यः स्वबन्धुना । १४
न चेत् सन्त्यक्ष्यते तेन सर्व्वशक्तिमतो भयं ॥
भ्रातरो मम सञ्जाताः स्रोतस्तुल्याः प्रवञ्चकाः । १५
किं वा शैल्यनदीजानि सलिलानीव चञ्चलाः ॥
द्रवीभूतहिमात् तानि गच्छन्ति कृष्णवर्णतां । १६
अन्तर्धानञ्च तन्मध्ये तुषारस्यापि जायते ॥
पश्चात् सङ्कीर्णतां गत्वा नीरवानि भवन्ति हि । १७
ग्रीष्मकाले च स्वस्थानात् तानि भ्रश्यन्ति सर्व्वशः ॥
सार्थवाहसमूहास्तु निवृत्य स्वीयवर्त्मनः । १८
मरुभूमिं प्रगच्छन्तो विनाशं प्राप्नुवन्ति हि ॥
तेमादेशीयसार्थाश्च तान्याकांक्षन्ति वीक्षितुं । १९
प्राप्तुं तानि प्रतीक्षन्ते शिवादेशीययात्रिकाः ॥
इत्थं विश्वसनात् तेषां लज्जा समभिजायते । २०
तत्स्थाने गमनं कृत्वा म्लानवर्णा भवन्ति ते ॥
यूयमप्यधुना तद्वद् गतवन्तो व्यलीकतां । २१
समालोक्य विपत्तिं मे यूयं जाता भयातुराः ॥
दत्त मह्यमुपग्राह्यं किमिदं गदितं मया । २२
मत्कृते निजवित्तेभ्य उत्कोचं व्ययतेति वा ॥
विपक्षस्य करान्माञ्च रक्षतेति किम् आर्थये । २३
यूयं दुरात्मनां हस्तान्मां विमोचयतेति वा ॥
यूयम् अर्हथ देष्टुं माम् अहं स्थास्यामि नीरवः । २४
मया यद् अपराद्धं तत् मां बोधयितुम् अर्हथ ॥
तत्त्वज्ञानस्य वाक्यानि कीदृगतिबलानि हि । २५
युष्माकं शब्ददण्डेन को दोषः शोधयिष्यते ॥
युष्माकं किम् इयं चेष्टा शब्दान् यद् दण्डयिष्यथ । २६
वायुतुल्यानि वाक्यानि निराशस्य नरस्य वा ॥
अनाथो ऽपि मनुष्यः किं युष्माभिराक्रमिष्यते । २७
बन्धो वा पातनार्थं किं यूयं खातं खनिष्यथ ॥
अधुनानुग्रहं कृत्वा दृष्टिं कुरुत मां प्रति । २८
किम् असत्यम् अहं भाषे तद् युष्मदृष्टिसम्मुखं ॥
यतो हेतो निवर्त्तध्वम् अधर्म्मो नात्र जायतां । २९

निवर्त्तध्वं यतो ऽद्यापि धर्म्मो मे तिष्ठति स्थिरः॥
३० जिह्वायां मामकीनायां किम् अधर्म्मः प्रविद्यते।
रसज्ञा वा मदीया किं पापास्वादं न बुध्यते॥

---

७ सप्तमोऽध्यायः।

आयूबस्य विलापकथनं दुःखनिर्णयः पापस्वीकार ईश्वरं प्रति निवेदनञ्च।

१ वसुधा किं मनुष्यस्य युद्धभूमि र्न जायते।
भृतकस्य दिनानीव किं न तस्यापि वासराः॥
२ छायाम् आश्रयितुं यद्वद् अभिकाङ्क्षति किङ्करः।
यथा वेतनजीवी वा भृतिं प्राप्तुम् अपेक्षते॥
३ तथा व्यसनयुक्तानां मासानाम् अंशधार्य्यहं।
क्लेशीया रात्रयो मह्यं व्यतीर्य्यन्त च भाग्यवत्॥
४ भाषे शयनकाले ऽहम् उत्थास्यामि कदा पुनः।
सम्भविष्यति वा कर्हि रजन्याः परिपूर्णता।
प्रभातागमनं यावत् क्लाम्यामि प्रचलायितः॥
५ कीटाः कार्द्दमलोष्टानि चाच्छादयन्ति मे वपुः।
सङ्कुचितञ्च मे चर्म्म जायते गलितं पुनः॥
६ तुरीतस्तन्तुवायस्य सत्वरा मम वासराः।
मङ्गलाशाविहीनाश्च ते गच्छन्ति समापनं॥
७ स्मर्य्यतां भवतैतद्धि वायुवन्मम जीवनं।
मङ्गलं वीक्षितुं चक्षु र्मे न प्रत्यागमिष्यति॥
८ मद्दर्शकस्य नेत्रञ्च मां सन्द्रष्टुं न शक्ष्यति।
नाहं दृश्यो भविष्यामि दृक्पाते ऽपि कृते त्वया॥
९ क्षीयमाणो नभोधूमो भवत्यन्तर्हितो यथा।
तथावतीर्य्य पातालं नोत्थाता मानवः पुनः॥
१० स्वकीयं भवनं तेन नहि प्रत्यागमिष्यते।
वासस्थाने स्वकीये स न परिचेष्यते पुनः॥
११ अतो हेतोरहं नैव संरोत्स्यामि निजाननं।
मनोदुःखं प्रभाषिष्ये लपिष्याम्यान्तरीं व्यथां॥
१२ अस्म्यहं किम् अपान्नाथः किं वा नागः समुद्रजः।

तस्मादेव त्वया किं मे रक्षिवर्गो नियोजितः॥
यदा वदामि खट्वा मे सान्त्वनां जनयिष्यति। १३
शयनेन च मे क्लेशः प्रशमिष्यति लाघवं॥
तदानीमपि मां स्वप्नैस्त्वं करोषि भयाकुलं। १४
विकम्पयसि मे चित्तं स्वप्नकल्पितदर्शनैः॥
अतः श्वासावरोधो ऽपि रोचते मानसाय मे। १५
मन्ये मे मरणं क्षेमम् एतस्माद् अस्थिपिञ्जरात्॥
वैराग्यं मम सञ्जातं न जीविष्यामि सर्व्वदा। १६
भवान् निवर्त्ततां मत्तो निःसाराणि दिनानि मे॥
किम्भूतो मानवो यत् स त्वया सम्मन्यते महान्। १७
कुतो मनोनिवेशो वा त्वया तस्मिन् विधीयते॥
कुतः प्रतिप्रभातं स पुनरालोक्यते त्वया। १८
कुतस्तस्य परीक्षा वा विधातव्या प्रतिक्षणं॥
कतिकालं न मत्तस्ते दृष्टिपातो निवर्त्तिता। १९
लालाया गिलनार्थञ्च शान्तिं मह्यं न दास्यसि॥
मर्त्यरक्षक मे पापैः का हानि र्जायते तव। २०
शराणां तव लक्ष्यं मां कुतो हेतो र्न्यरूपयः।
तेन मे दुर्व्वहो भारः स्वयं सञ्जातवान् अहं॥
मामकीनो ऽपराधश्च कुतो न क्षम्यते त्वया। २१
मामकीनञ्च दोषं त्वं कुतो नेच्छस्यपेक्षितुं॥
तूर्णमेव रजोमध्ये शयनं मे भविष्यति।
तदा त्वयानुसन्धाय दृष्टि र्न प्राप्स्यते मम॥

---

८ अष्टमोऽध्यायः।

१ आयूबं प्रति बिल्ददस्योत्तरं ११ दुःखकारणं पापकथनं २० आयूबस्य दोषीकरणं तस्मै मन्त्रणादानञ्च।

अनन्तरं शूहीयो बिल्ददः प्रत्यवादीत्। १
वचांस्येतादृशानि त्वं कतिकालं गदिष्यसि। २
प्रचण्डवायुतुल्यानि वचनानि मुखस्य ते॥
विचारवैपरीत्यं किम् ईश्वरेण विधीयते। ३

यः सर्व्वशक्तिमान् किं स न्यायं वक्रीकरोति वा॥
४ तद्विरुद्धं कृते पापे त्वदीयैः पुत्त्रकैः पुरा।
स तेषाम् अपराधस्य भोगाय तान् समार्पयत्॥
५ किन्तु त्वमेव चेद् ईशं शरणम् आश्रयिष्यसि।
सर्व्वशक्तिमतश्चास्य चेत्त्वं प्रसादयिष्यसि।
६ निर्म्मलः सरलाचारश्चेत् त्वमेव भविष्यसि॥
तर्हि ते मङ्गलार्थे स तूर्णं गत्वा प्रबुद्धतां।
स्थापयिष्यति निःशङ्कं तव धर्म्मनिकेतनं॥
७ तत आदिदशारूपाद् अल्पिष्ठादपि वीजकात्।
तव शेषदशारूपो वृहच्छाखी जनिष्यते॥
८ अथैतद् अनुपृच्छ्यन्तां प्राक्तना मानवास्त्वया।
ज्ञप्तं यत्पितृभिस्तेषां मनस्तत्र निधीयतां॥
९ वयं ह्यो ह्यस्तना एव ज्ञानवन्तो वयं नहि।
छायातुल्यानि नीयन्ते पृथिव्याञ्च दिनानि नः॥
१० त्वां किं ते नोपदेक्ष्यन्ति बोधयिष्यन्ति किं न ते।
किं न निर्गमयिष्यन्ति वाचः स्वचित्तमध्यतः॥
११ निष्पङ्कायां नलो भूमौ किं शक्नोति समेधितुं।
स्थाने वा जलहीने किं धमनः परिवर्द्धते॥
१२ स प्राप्नोति हरिद्वर्णं न च कर्त्तनयोग्यतां।
तृणानां सकलानां स प्रथमः परिशुष्यति॥
१३ विस्मृतेश्वरलोकानां सर्व्वेषां तादृशी गतिः।
धर्म्महीनमनुष्यस्य प्रत्याशापि विनश्यति॥
१४ तस्य विश्वासभूमि र्या सा समुच्छिद्यते किल।
लूतातन्तुवितानाच्च निर्व्विशेषस्तदाश्रयः॥
१५ स वेश्मालम्ब्यमानञ्च तेन तिष्ठति न स्थिरं।
तेन सन्धार्य्यमाणञ्च तन्न स्थायि भविष्यति॥
१६ लतानिभः स तेजस्वी जायते किरणै रवेः।
नवीनाः पल्लवास्तस्य चोद्यानं व्याप्नुवन्ति हि॥
१७ अश्मराशिञ्च वेष्टन्ते तस्य मूलानि जालवत्।
शिलानाञ्चान्तरागारं सन्द्रष्टुं तेन शक्यते॥
१८ यदा तु मानवास्तस्य स्थानाद् उन्मूलयन्ति तं।

तर्ह्यङ्गीकृत्य तद् वक्ति त्वं न दृष्टो मया पुरा॥
तस्य गते यं आनन्दः पश्चैषा तस्य वर्णना। १९
अपरे धूलिमध्याच्च प्ररोक्ष्यन्ति पुनः पुनः॥
पश्य यो मानवः साधुस्तं न सन्त्यजतीश्वरः। २०
किन्तु दुष्कर्म्मिणां हस्तान् स न सन्धारयिष्यति॥
पूरयिष्यति शेषे स हसितैराननं तव। २१
आनन्दजातनादैश्च त्वदीयावधरावपि॥
लज्जया संवरीष्यन्ते सकला द्वेषिणस्तव। २२
दुश्चरित्रनराणाञ्च वासस्थानं विनंक्ष्यति॥

---

९ नवमोऽध्यायः।

१ बिल्ददं प्रति आयूबस्योत्तरं ईश्वरस्य शक्तिस्वीकारः धार्म्मिकाधार्म्मिकं प्रति तस्याङ्गीकरणं २५ स्वदुःखवर्णनञ्च।

अनन्तरम् आयूबः प्रत्युवाच। १
स्वीकृतम् एवमेवास्ति तत् परिज्ञायते मया। २
मर्त्य ईशस्य साक्षात् किं पुण्यवान् भवितुं क्षमः॥
ईशो विवदितुं येन मानवेन प्रतुष्यति। ३
सहस्रवचसाम् एकं स वक्तुं नहि शक्ष्यति॥
मनसा बुद्धिमान् सोऽस्ति बलेनापि पराक्रमी। ४
तेन विस्पर्द्धमानश्च कः कदा मङ्गलं गतः॥
स चापसारयत्यद्रीन् तेषाम् अज्ञानगोचरं। ५
स स्वकीयेन कोपेन चोन्मूलयति भूधरान्॥
वसुन्धरापि तेनैव निजस्थानाद् विचाल्यते। ६
मूलस्तम्भाश्च तस्यास्तु विभिद्यन्ते विकम्पिताः॥
आदिष्टः सविता तेन चोदयं विदधाति न। ७
नक्षत्राण्यवरुध्यन्ते तेन मुद्राङ्कितानि हि॥
स विस्तारितवान् एको विहायसो ऽपि मण्डलं। ८
समुद्रीयतरङ्गैश्च स करोति गमागमौ॥
सप्तर्षीन् मृगशीर्षञ्च बज्जलाश्च स सृष्टवान्। ९
दक्षिणाभिमुखानाञ्च नक्षत्राणां गृहाण्यपि॥

१० साध्यन्ते ऽनुपलभ्याणि महाकर्म्माणि तेन हि।
अद्भुतान्यपि कार्य्याणि सो ऽसंख्यानि करोति च॥
११ गच्छन् मदन्तिकेनैव स न सन्दृश्यते मया।
वायुवन्माम् अतिक्राम्यन् स मया नोपलभ्यते॥
१२ पश्य को ग्रसमाणं तं परावर्त्तयितुं क्षमः।
किं करोषीति वाक्यं वा कस्तं प्रतिवदिष्यति॥
१३ संहृणीते नहि क्रोधं स्वकीयम् ईश्वरो यदि।
तर्हि पतन्ति तस्याधः सहाया गर्व्विणो नताः॥
१४ अत एतादृशो ऽहं किं क्षमस्तं प्रतिभाषितुं।
सार्द्धं तेन विवादार्थं रोचयिष्यामि वा वचः॥
१५ न पुनर्भाषितुं शक्यो मया पुण्यवतापि सः।
प्रसादनञ्च कर्त्तव्यं मे विवादपते मया॥
१६ मया तस्मिन् समाहूते प्रदत्तवति चोत्तरं।
अश्रावि तेन मे वाक्यं प्रत्ययो ऽत्र न जायते॥
१७ यतः प्रचण्डझञ्झावद् उपाक्राम्यति मां स हि।
आघातैर्बहुसंख्यैश्च माम् आविध्यत्यकारणात्॥
१८ माञ्च प्रत्याश्वसिष्यन्तम् अपि स नानुमन्यते।
किन्तु तिक्तरसेनैव परिपूर्णं करोति मां॥
१९ वीक्षिष्ये किमहं शक्तिं स एव पश्य शक्तिमान्।
विचारं प्रार्थयिष्ये वा दिनं केन नियोच्यते॥
२० पुण्यवतो ऽपि मे वक्त्रं मां करिष्यति दोषिणं।
मयि सिद्धे ऽपि तेनैव वक्रतारोपयिष्यते॥
२१ अहन्तु पुण्यवान् अस्मि न दूषयति मां मनः।
जीवने मम सन्तोषः कश्चन नावशिष्यते॥
२२ अनन्यद् एवमेवास्ति मयेदम् उच्यते ततः।
पुण्यवान् अपराधी वा तेन संक्षियते नरः॥
२३ अकस्माच्चेत् कशाघातो दुष्टम् आहन्ति मानवं।
तथापि साधुलोकानां हस्यते तेन यातना॥
२४ पृथिवी दुष्टलोकस्य हस्तमध्ये समर्पिता।
तेन तच्छासकानाञ्च मुखान्याच्छादितानि हि।
इत्थं चेन्न भवेत् तर्हि कः स कुत्र व विद्यते॥

मे दिनानि प्रधावन्ति धावकादपि सत्वरं। २५
तानि तु व्यतिगच्छन्ति न च पश्यन्ति मङ्गलं॥
नलनिर्म्मितनौकाभिस्तरन्ति कालसागरं। २६
उड्डीयन्ते यथोत्क्रोशो भक्ष्यं जिघृक्षुः पतन्॥
व्यसनं मम विस्मृत्य म्लानम् आस्यं विहाय च। २७
भविष्यामि प्रफुल्लोऽहमिति सम्भाषिते मया॥
व्यथाभ्यो मम सर्व्वाभ्यः साध्वसं जायते पुनः। २८
त्वं मां निरपराधं न ज्ञास्यसीति प्रवेद्म्यहं॥
अहं दोषी भविष्यामि किं श्राम्यामि निरर्थकं॥ २९
हिमजातेषु तोयेषु क्षालनं प्रकरोमि चेत्। ३०
सर्व्वक्षारेण चेद्धस्तौ स्वकीयौ मार्जयामि च॥
तथापि गर्त्तमध्ये मां पङ्कमग्नं करिष्यसि। ३१
वस्त्रेभ्यश्च मदीयेभ्यो मे बैभत्स्यं जनिष्यते॥
स मत्तुल्यो मनुष्यो न यत्तं प्रतिवदाम्यहं। ३२
विचारस्थानम् एकं न मया तेन च गम्यते॥
विद्यते नावयोः कोऽपि मध्यस्थस्तादृशो जनः। ३३
यो द्वयोरावयोर्मूर्द्ध्नो र्हस्तावर्पयितुं क्षमः॥
तस्मात् तेन निजो दण्डो मद्दूरीद् अपसार्य्यतां। ३४
तस्य भयानकत्वञ्च नोत्पादयतु मे भयं॥
त्रासहीनस्तदा तस्मादहं शक्ष्यामि भाषितुं। ३५
इदानीन्तु नहि स्वस्थं हृदयं मे ऽन्तरे स्थितं॥

---

१० दशमोऽध्यायः।

ईश्वरं प्रत्यायूबस्य निवेदनं विलापकथनं मरणात् प्राक् किञ्चित् शान्तिप्रार्थनञ्च।

स्वकीये जीवने चित्तं मम निर्व्विण्णतां गतं। १
तस्माद् उदीरयिष्यामि गुरु मे परिदेवनं॥
मामकीनमनस्तापात् प्रभाषिष्ये वचांसि च। २
ईश्वरञ्च वदिष्यामि दोषिणं मा कुरुष्व मां॥
मया विवदसे कस्मिन् तन्मां प्रवक्तुम् अर्हसि। ३
स्वकीयाभ्यां कराभ्यां यत् त्वमेव सृष्टवान् स्वयं॥

तस्य विग्रहहानिभ्यां किं सुखं तव जायते।
दुष्टानां मन्त्रणायाञ्च किं प्रसन्नो भविष्यसि॥
४ किं मांसमयनेत्रस्त्वं मर्त्यदृष्ट्या किम् ईक्षसे॥
५ ते दिनानि मनुष्यस्य दिनानां सदृशानि किं।
वत्सरा वा त्वदीयाः किं पौरुषेयदिनोपमाः॥
६ तस्मादेवापराधस्य मे करोषि गवेषणं।
अन्वेषणञ्च पापस्य मदीयस्य विचेष्टसे॥
७ अहं निरपराधस्तत् त्वया विज्ञायते स्वयं।
उद्धर्त्तुं तव हस्ताच्च क्षमः को ऽपि न विद्यते॥
८ कराभ्यां तव सृष्टो ऽहं निर्म्मितश्च समन्ततः।
तादृशस्यैव मे नाशो भवता किं करिष्यते॥
९ त्वयाहं मृत्तिकाकारः सृष्टस्तत् स्मर्य्यतां त्वया।
मां त्वमेव पुनर्व्वारं धूलिलीनं करिष्यसि॥
१० त्वयाहं दुग्धवत् सिक्तो दधिवच्च घनीकृतः॥
११ आवृतश्चर्म्ममांसैश्च व्यूतश्च स्नायुकीकसैः॥
१२ दयां जीवनदानञ्च त्वं मां प्रति समाचरः।
तव समीक्षणेनैव जीवात्मा मम रक्षितः॥
१३ तथाप्येष मनस्कल्पश्चित्ते सङ्गोपितस्त्वया।
अभिप्रेतं तवैतद्धि तत् परिज्ञायते मया॥
१४ अहं चेत् कृतपापो ऽस्मि तर्हि त्वं मम रक्षकः।
मदीयादपराधाच्च मां न विमोचयिष्यसि॥
१५ अहं चेद् दुश्चरित्रो ऽस्मि तर्हि मे दारुणा गतिः।
पुण्यवानपि चेद् अस्मि शिरो नोन्नंस्यते मम।
सम्पूर्णस्यापमानेन दुर्दशादर्शनेन च॥
१६ उन्नतमस्तकं मां त्वम् आखेटिष्यसि सिंहवत्।
मां प्रत्यद्भुतम् आचारं भूयोभूयः करिष्यसि॥
१७ साक्षिणो मद्विपक्षांश्च समानेष्यसि नूतनान्।
मद्विरुद्धञ्च ते मन्युं सुतरां वर्द्धयिष्यसि।
सैनिका आक्रमिष्यन्ति मां पर्य्यायक्रमेण च॥
१८ कुतो हेतो र्जननया माम् उदराद् उदधारयः।
अनुद्भूतं गतप्रायं नाद्रक्ष्यत् किञ्चनाक्षि मां॥

असन्निवाभविष्यंश्च गर्भात् श्मशानं गतः॥ १९
किं न मे वासराः स्वल्पास्त्वया तस्माद् विरम्यतां। २०
मत्तः कियन्निवर्त्तस्व विश्रमिष्यामि किञ्चन॥
पश्चाद् यात्रां करिष्यामि नायास्यामि पुनस्ततः। २१
स देशस्तमसाच्छन्नो मरणच्छाययावृतः॥
स देशस्तिमिरीभूतो रात्रिवासस्य सन्निभः। २२
मरणच्छायया पूर्णः पारिपाट्येन वर्ज्जितः।
केवलाद् अन्धकाराच्च नान्यस्तस्य प्रभाकरः॥

---

११ एकादशोऽध्यायः।

१ आयूबं प्रति सोफरस्य कथनं ७ ईश्वरस्य निर्दोषत्वदर्शनं १३ आयूबं प्रति मन्त्रणा च।

अनन्तरं नामाथीयः सोफरः प्रतिजगाद। १
वचनानां बहुत्वस्य किं न दातव्यम् उत्तरं। २
वावदूकमनुष्यो वा किं निर्दोषो भविष्यति॥
वाचालत्वेन ते वीराः किं भविष्यन्ति नीरवाः। ३
किं परीहासकं वा त्वां को ऽपि न लज्जयिष्यति॥
त्वयैतद् भाषितं वाक्यम् आदेशो मम निर्म्मलः। ४
सम्भवामि पवित्रो ऽहम् ईश्वरस्यापि सम्मुखे॥
अहो मे साधयन् वाञ्छाम् ईश्वरो यदि भाषते। ५
असंवृताधराभ्याञ्च यदि त्वां प्रतिवक्ति सः॥
ज्ञानं त्वां बोधयन् गूढं बहुरूपञ्च कौशलं। ६
तर्हीशेन तवाघानां भागं वेत्स्युपेक्षितं॥
ईश्वरस्यानुसन्धानं कर्त्तुं किं शक्यते त्वया। ७
सर्व्वशक्तिमतस्तत्त्वं सम्पूर्णं वा किम् आप्स्यसि॥
तद् अन्तरीक्षवत् प्रांशु तत्र त्वं किं करिष्यसि। ८
पातालादपि गम्भीरं तत्र किं ज्ञास्यते त्वया॥
क्षित्या दीर्घप्रमाणं तत् विस्तृतञ्च महार्णवात्॥ ९
कञ्चनाक्रम्य बद्धा च तेन चेत् क्रियते सभा। १०
तर्हि किं विद्यते कश्चित् तं निवर्त्तयितुं क्षमः॥

११ स व्यलीकान् नरान् वेत्ति पापं पश्यत्यचिन्तयन्॥
१२ ज्ञानशून्यो मनुष्यो ऽत्र किमर्थं पण्डितायते।
स्वयते नरस्त्वर्या किं वन्यगर्द्दभशावकः॥
१३ त्वं चेच्चित्तं स्थिरीकृत्य करौ तस्मै प्रसारयेः॥
१४ हस्ते स्थितम् अधर्म्मञ्च चेद् दूरम् अपसारयेः।
आश्रयं दुष्टतायै चेन्न दद्याः स्वनिकेतनं॥
१५ तर्हि त्वं निष्कलङ्कः सन् स्वास्यम् उन्नामयिष्यसि।
त्वया सुस्थिरतां गत्वा साध्वसं न करिष्यते॥
१६ तदानीं विस्मरिष्यन्ते त्वया स्वव्यसनान्यपि।
स्मरिष्यन्त कदाचिद् वा व्यतीतस्रोतसो ऽम्बुवत्॥
१७ परमायुस्त्वदीयञ्च मध्याह्नादप्युदेष्यति।
तिमिरेणावृतश्च त्वं भविष्यस्यरुणोपमः॥
१८ प्रत्याशावर्त्तमानत्वात् त्वं निर्वृत्तो भविष्यसि।
लब्धाप्राप्तः पुरा त्वञ्च निर्व्विशङ्कः शयिष्यसे॥
१९ विश्रामं सेवमानं त्वां को ऽपि न त्रासयिष्यति।
आस्यं प्रसादयिष्यन्ति त्वदीयं बहवो नराः॥
२० निस्तेजांसि भविष्यन्ति लोचनानि दुरात्मनां।
नाशाय चाश्रयस्तेषाम् आशा प्राणव्ययाय च॥

---

१२ द्वादशोऽध्यायः।

१ सोफरं प्रति आयूबस्योत्तरं ७ ईश्वरस्य निर्दोषत्वाङ्गीकरणं १३ ईश्वरस्य सर्व्वाधिपतित्वञ्च।

१ अनन्तरम् आयूबः प्रत्यवादीत्।
२ वाढं यूयं बुधा युष्मान् विद्या चानुमरिष्यति॥
३ युष्माकन्तु धियस्तुल्या धीर्ममापि हि विद्यते।
युष्मत्तो नहि न्यूनो ऽहं को न वेत्तीदृशानि वा॥
४ आह्वतेनेश्वरेणापि यस्मै दीयत उत्तरं।
सो ऽहं हस्ये स्वमित्रेण धर्म्मी साधुश्च हस्यते॥
५ उल्कां निर्विघ्नकाले यः स्वचित्तेनावमन्यते।
पादस्खलनकालेषु तया सो ऽपि स्थिरीकृतः॥

दस्यूनां वटवेश्मानि मङ्गलावस्थितानि हि। ६
ईश्वरं क्रोधयन्तश्च सन्तिष्ठन्ते निरापदः।
तेषां हस्तेषु वित्तानि समर्पयति चेश्वरः॥
त्वम् इदानीं पशून् पृच्छ ततस्तैः शिक्षयिष्यसे। ७
किं वा विहङ्गमान् पृच्छ तैश्चापि बोधयिष्यसे॥
सम्भाषस्व धरण्या वा सापि त्वाम् उपदेक्ष्यति। ८
कथयिष्यन्ति तुभ्यञ्च मीनाः सागरवासिनः॥
एतेषामपि सर्व्वेषां मध्ये को न प्रवेत्ति तत्। ९
यद् एषा परमेशस्य हस्तेनानुष्ठिता क्रिया॥
सर्व्वेषां प्राणिनां प्राणास्तस्यैव हस्तवर्त्तिनः। १०
आत्मानो ऽपि मनुष्याणां सर्व्वेषां देहवासिनां॥
शब्दग्रहः किम् उक्तीनां न करोति परीक्षणं। ११
आस्वादनञ्च भक्ष्याणां तालुना किं न लभ्यते॥
वृद्धेषु वर्त्तते विद्या बुद्धि र्वयोगतेषु च॥ १२
विद्यापराक्रमौ तस्मिन् तस्मिंश्च बुद्धिमन्त्रणे॥ १३
पश्य यत् पातितं तेन न तद् उत्थाप्यते पुनः। १४
तेन यस्य गती रुद्धा स विमोचनवर्ज्जितः॥
पश्य तोयानि रुद्धानि तेन गच्छन्ति शुष्कतां। १५
उन्मूलयन्ति भूमिञ्च तेनैव प्रेरितानि हि॥
प्राबल्यकुशले तस्य भ्रमितभ्रमकावपि॥ १६
बद्धा तेनैव नीयन्ते विदेशं राजमन्त्रिणः। १७
धर्म्माधिकारिणश्चापि हतबुद्धीन् करोति सः॥
शासनं क्षितिपालानां स करोति विशृङ्खलं। १८
कटिस्थलानि तेषाञ्च स यन्त्रयति बन्धनैः॥
बद्धा तेन विदेशञ्च नीयन्ते मन्त्रदर्शिनः। १९
निपातयति भूमौ स नरान् स्थायिपराक्रमान्॥
विश्वास्यानां मनुष्याणां वाक्शक्तिं दूरयत्यपि। २०
हरति स्थविराणाञ्च सुविचारविशिष्टतां॥
प्रकरोत्यधिपानां स चाभिषेकम् अवज्ञया। २१
स पराक्रमिलोकानां वियोजयति मेखलाः॥
गम्भीराणि प्रकाश्यन्ते तेनोद्धृत्य तमिस्रतः। २२

तेनैव मरुणच्छाया नीयते तेजसः स्थलं॥
२३ संवर्धयति जातीः स निपातयति ताः पुनः।
विस्तारयति वंशान् स पुनर्दूरी करोति च॥
२४ प्रजागणस्य मुख्यानां बुद्धिस्तेनापसार्य्यते।
ते भ्रम्यन्ते च तेनैव मार्गहीने मरुस्थले॥
२५ हस्तामर्शञ्च कुर्व्वन्ति तिमिरे दीप्तिवर्ज्जिते।
चलन्ति भ्रमितास्तेन मदोन्मत्तमनुष्यवत्॥

---

१३ त्रयोदशोऽध्यायः।

१ बन्धून् प्रति आयूबस्य तिरस्कारः १४ अकापद्यप्रकाशस्य।

१ वीक्षध्वं सर्व्वमेवैतत् सन्दृष्टं चक्षुषा मम।
संश्रुतं मम कर्णेन मनसा च विनिश्चितं॥
२ युष्माकं यादृशं ज्ञानं ज्ञानं ममापि तादृशं।
युष्मत्तो यदहं न्यूनस्तन्न स्वीक्रियते मया॥
३ सर्व्वशक्तिमता साकम् अहन्त्विच्छामि भाषितुं।
कर्त्तुं वादानुवादञ्च सार्द्धम् ईशेन कामये॥
४ अतथ्यकल्पका यूयं सर्व्वे ऽलीकाश्चिकित्सकाः॥
५ तूष्णीम्भावः कुतो हेतो र्युष्माभि र्नावलम्ब्यते।
तद् भविष्यति युष्माकं सुविचारस्य लक्षणं॥
६ मम प्रत्युत्तरं यूयम् आकर्णयितुम् अर्हथ।
वहिर्गते ऽधराभ्यां मे हेतुवादे ऽवधीयतां॥
७ ईश्वरस्यानुरोधेन किम् अधर्म्मं वदिष्यथ।
तस्य वा शोधनार्थं किं भाषिष्यध्वे प्रतारणां॥
८ यूयं वा पक्षपातं किम् आचरिष्यथ तं प्रति।
ईश्वरस्य कृते यूयम् उत्तरं वा प्रदास्यथ॥
९ स चेत् परीक्षते युष्मान् तर्हि भूतिं किम् आप्स्यथ।
किं वा तं वञ्चयिष्यध्वे वञ्चनीयमनुष्यवत्॥
१० पक्षपाते हि युष्माभिः सुप्रच्छन्नम् अनुष्ठिते।
अवश्यमेव युष्माकं भर्त्सनां स करिष्यति॥

महिम्ना तस्य सन्त्रासो युष्माकं किं न जायते। ११
तस्य भयानकत्वञ्च किं नाक्राम्यति वो मनः॥
सन्ति भस्ममयाः श्लोकाः स्मरणीयवचांसि वः। १२
हेतुश्रेण्यश्च युष्माकं मृण्मयाः सैन्यपङ्क्तयः॥
तूष्णीम्भवत मत्साद्यात् मया वाक्यं गदिष्यते। १३
गदिते भवितव्यं यत् मे तदेव भविष्यति॥
कुतो हेतो र्निजं मांसं दन्तै र्धृत्वा वहाम्यहं। १४
किमर्थञ्च मम प्राणान् स्वकराभ्यां समर्पये॥
निहन्तव्यो ऽपि तेनाहं तस्मिन् स्थास्यामि विश्वसन्। १५
विन्यसिष्यामि चाचारं मदीयं तस्य सम्मुखे॥
तथा कृते परित्राणं मम तेनैव सेत्स्यति। १६
यस्मान्नरो दुराचारस्तस्याद्यान्नोपतिष्ठति॥
यूयन्तु मम वाक्यानि निशामयितुमर्हथ। १७
मदीयावेदनं तस्माद् कर्णैराकर्ण्यतां हि वः॥
पश्यतार्थो विवादस्य सुदृढं ज्ञापितो मया। १८
अहं यत् पुण्यवानस्मि तज्जानामि सुनिश्चितं॥
मया विवदमानः को मौन्यहं मरणोद्यतः॥ १९
केवलं द्वे क्रिये चेत् त्वं नाचरिष्यसि मां प्रति। २०
तर्ह्यहं तव सान्निध्यम् उपस्थास्याम्यनावृतः॥
मत्तो दूरय हस्तं ते त्रासस्ते मां न भीषयेत्॥ २१
तेन त्वयाहम् आहूतो दास्यामि तुभ्यमुत्तरं। २२
मया वा गदितं वाक्यं प्रतिभाषिष्यते भवान्॥
कति सन्त्यपराधा मे कति मे कलुषाणि वा। २३
दोषं मे मम पापञ्च मां ज्ञापयितुमर्हसि॥
कुतो वक्त्रं समाच्छाद्य भवान् मां मन्यते रिपुं॥ २४
वायुचालितपर्णस्य त्रासं किं जनयिष्यसि। २५
किं वा तृणस्य शुष्कस्य करिष्यस्यनुधावनं॥
तस्मान्मम विरुद्धं किम् अलेखीः कठिनां गतिं। २६
यौवनस्यापराधानां फलं मह्यं ददासि च॥
यन्त्रे बद्धा च मे पादौ सर्व्वां रक्षसि मे गतिं। २७
सर्व्वत्र पादमूले मे सीमयावरुणत्सि च॥

२८ जीर्णता परिगन्तव्या तादृशेन मया स्वयं।
असारकाष्ठवत् किं वा कीटभक्षितवस्त्रवत्॥

---

१४ चतुर्द्दशोऽध्यायः।

१ मानुषाणामल्पायुष्ककथनं ७ विचारं यावदनुत्थानं पापाद् दुःखस्योत्पत्तिः।

१ अबलाजनितो मर्त्त्यः स्वल्पायु र्भूरिवेपथुः।
२ पुष्पवत् स्फुटितो म्लाति छायेवात्येति सोऽस्थिरः॥
३ त्वयोन्मीलितचक्षुर्भ्यां तादृशः किम् अवेक्ष्यते।
नीये धर्म्मसभाञ्चाहं विवादाय त्वया सह॥
४ शुद्धं जातम् अशुद्धात् को वेत्ति नैकोऽपि विद्यते॥
५ वासरा यस्य निर्णीता मासाश्च गणितास्त्वया।
येन नो लङ्घितुं शक्या त्वया सीमा निरूपिता॥
६ तस्मान्निवार्य्यतां दृष्टिः स तदा विश्रमिष्यति।
भोक्ष्यते दिनमात्रञ्च हर्षं वेतनजीविवत्॥
७ विद्यते पादपस्याशा स छिन्नो वर्द्धते पुनः।
तस्य कोमलशाखाया अभावो न भविष्यति॥
८ भूमौ तस्य पदे जीर्णे धूल्यां स्थाणौ मृतेऽपि च॥
९ वारिगन्धात् पुनस्तस्य पल्लवो निर्गमिष्यति।
स च शोभिष्यते पर्णै र्नवरोपितवृक्षवत्॥
१० मर्त्त्यो मृत्वा क्षयं याति नरः प्रेत्य क्व गच्छति॥
११ सागराद् अपयान्त्यापो नदी क्षीणा विशुष्यति॥
१२ शयित्वा मानवास्तद्वत् समुत्तिष्ठन्ति नो पुनः।
अन्तरीक्षस्य लोपश्च यावत् ते नैव जाग्रति।
नहि सञ्जायते तेषां स्वनिद्रातः प्रबोधनं॥
१३ सङ्गोप्य प्रेतलोके मां प्रच्छाद्य क्रोधशान्तये।
समयं मे निरूप्य त्वं मामनुस्मर्त्तुमर्हसि॥
१४ पुरुषो मरणं गत्वा सञ्जीविष्यति किं पुनः।
तदा सङ्क्रामवृत्ते र्मे यावन्तः सन्ति वासराः।
तावतोऽहं प्रतीक्षिष्ये कार्य्यतो मम मोचनं॥
१५ पश्चात् त्वयाहम् आहूतो दास्यामि तुभ्यम् उत्तरं।

स्वीयहस्तेन सृष्टे च दया तेऽपि जनिष्यते ॥
अधुना पादविन्यासान् गणयित्वा मम त्वया। १६
क्रियते नहि पापस्य मम सूक्ष्मपरीक्षणं ॥
मुद्राङ्कितो ऽपराधो मे बद्धस्तिष्ठति सम्पुटे। १७
मामकीनञ्च दोषं त्वं सीवनेन जुगुप्ससि ॥
पतनोन्मुखतां गत्वा पर्व्वतोऽपि विशीर्य्यते। १८
तथैव स्थूलपाषाणः स्वस्थानात् भ्रश्यते किल ॥
मर्द्यन्ते प्रस्तरास्तोयैः र्म्हद्रेणुश्चापनीयते। १९
तेषां वेगेन तद्वत् त्वं मर्त्यस्याशाविनाशकः ॥
भूयोभूयस्त्वयाक्रान्तो याति लोकान्तरं नरः। २०
तस्य वक्त्रविकारञ्च कृत्वा सोऽपास्यते त्वया ॥
स्वपुत्त्रैः गौरवे प्राप्ते तेन तन्नावगम्यते। २१
अवज्ञातेषु वा तेषु तस्य बोधो न जायते ॥
केवलं दुःसहं तस्य मांसम् आप्नोति यातनां। २२
भारतुल्यश्च तस्यात्मा शोकापन्नोऽवतिष्ठते ॥

---

१५ पञ्चदशोऽध्यायः।

१ आयूबं प्रतीलिफसस्योत्तरं दोषीकरणं १४ पुरावृत्तकथया पापभोगस्य प्रमाणदर्शनञ्च।

तदनन्तरं तैमनीय इलीफसः प्रतिगदितवान्। १
पण्डितस्योत्तरे शिक्षा वातजा किं प्रयुज्यते। २
तेन पूरयितव्यं किं स्वोदरं पूर्व्ववायुना ॥
कर्त्तव्यस्तेन किं तर्कः फलवर्ज्जितवाङ्मयः। ३
प्रयोक्तव्यानि किं तेन कदर्थानि वचांसि वा ॥
उच्छिनत्सि च मन्ये त्वम् ईश्वरादपि साध्वसं। ४
ईश्वरस्य समक्षञ्च प्रार्थना ह्रास्यते त्वया ॥
त्वदीयेनैव वक्त्रेण तेऽपराधः प्रकाश्यते। ५
धूर्त्तानाञ्च मनुष्याणां तुभ्यं जिह्वापि रोचते ॥
नाहं त्वां दोषिणं कुर्व्वे त्वदीयास्यं करोति हि। ६
अधरौ च त्वदीयौ हि विपक्षसाक्षिणौ तव ॥

७ आदिजो मानवः किं त्वं गिरिभ्यः प्राक् प्रकल्पितः ।
८ ईश्वरस्य सभायां वा किं त्वया मन्त्रणा श्रुता ।
चोरयित्वा च किं तत्र लब्धं ज्ञानामृतं त्वया ॥
९ त्वं यज्जानासि तन्मध्ये न जानीमो वयं हि किं ।
त्वया यद् बुध्यते तस्य किम् अस्मासु न वर्त्तते ॥
१० विद्यते मध्यमस्माकं पक्वकेशस्तथा जरी ।
गुरु र्वर्षबहुत्वेन त्वदीयाज्जनकादपि ॥
११ त्वं किम् ईशस्य वाक्यानि सान्त्वदान्यवमन्यसे ।
तस्य वा कोमलालापं त्वया सार्द्धम् अनुष्ठितं ॥
१२ क्व त्वां हरति चित्तं ते लोलाक्षि र्जायसे कुतः ॥
१३ ईशमेव समुद्दिश्य कोपं कृत्वा शरासनं ।
प्रक्षिप्यन्ते निजाद्वक्त्राद् वाणा वाणीमयास्त्वया ॥
१४ को मर्त्त्यः किं स निर्दोषः कः स्त्रीजः किं स पुण्यवान् ॥
१५ पश्य स्वीयपवित्रेषु विश्वासं न करोति सः ।
तस्य दृश्यान्तरीक्षञ्च निष्कलङ्कं न मन्यते ॥
१६ किं नु गर्ह्यः कुगन्धश्च मर्त्त्योऽघं वारिवत् पिवन् ॥
१७ शृणुष्वाहं त्वां विनेष्यामि वदिष्यामि मयेक्षितं ।
१८ प्राज्ञै र्ज्ञप्तम् अनाच्छाद्य पितॄणामुपदेशनं ॥
१९ पृथिवी केवलं तेभ्यः पितृभ्यः प्रददे पुरा ।
तेषां मध्ये विदेशी च कोऽपि न प्राविशत् तदा ॥
२० वासरा यति दुष्टस्य क्लिश्यते तावदेव सः ।
वर्षाणां यावती संख्या निष्ठुराय निरूपिता ॥
२१ तावदेवापदां शब्दो वर्त्तते तस्य कर्णयोः ।
तस्य मङ्गलकालेऽपि तम् उपैति विनाशकः ॥
२२ तमिस्राच्च परावृत्तेराशा तस्य न जायते ।
चन्द्रहासेन बध्यः स तत्कृते परिरक्ष्यते ॥
२३ सोऽन्नार्थी भ्राम्यति क्वान्नम् अन्धकारमयं दिनं ।
निरूपितं स्वपार्श्वस्थम् एतदेव प्रवेत्ति सः ॥
२४ आयाससङ्कटाभ्यां स त्रासयित्वा विजीयते ।
समरार्थं सुसज्जेन पृथिवीपतिना यथा ॥
२५ यस्माद् विरुद्धम् ईशस्य स विस्तार्य्य निजं करं ।

सर्व्वशक्तिमता सार्द्धं युयुत्सां सम्प्रकाश्य च॥
उच्चीकृत्य निजां ग्रीवां तम् उद्दिश्य प्रधावति। २६
चर्म्मणां तस्य गण्डांश्च स्थूलाकारान् तुतुत्सति॥
यतो हेतोश्च सञ्छाद्य पीनत्वेन निजाननं। २७
यथेष्टं मांसलीकृत्य स्वीयमेव कटिस्थलं॥
नगरेषु विनष्टेषु निर्जनेषु च वेश्मसु। २८
पाषाणराशिकल्पेषु स्वं निवासं करोति सः॥
तस्मान्नो लप्स्यते वृद्धिं सम्पत्तिस्तस्य न स्थिरा। २९
भूमावबद्धमूलञ्च तस्यैश्वर्य्यं भविष्यति॥
अन्धकारमयात् स्थानात् प्रस्थातुं स न शक्ष्यति। ३०
पल्लवाः कोमलास्तस्य धक्ष्यन्ते वह्निजिह्वया।
मुखवातेन चेशस्य सोऽपि प्रस्थापयिष्यते॥
मा विश्वसेदलीके स विश्वसन् वञ्चयिष्यते। ३१
फलान्यलीकवृत्तस्य चालीकानि स लप्स्यते॥
अकाले तानि पक्ष्यन्ते तच्छाखा न समर्धिता॥ ३२
निपातयिष्यते तेन द्राक्षयेव निजं फलं। ३३
जितवृक्षोपमेनापि स्वपुष्पं च्यावयिष्यते॥
अधर्म्माचारिलोकानां शैलवन्निष्फला सभा। ३४
वेश्मान्युत्कोचकानाञ्च ग्रसिष्यन्ते हि वह्निना॥
दौरात्म्येन सगर्भास्ते जनयिष्यन्त्यलीकतां। ३५
उत्पादयिष्यते तेषां जठरेण प्रतारणा॥

---

१६ षोडशोऽध्यायः।

१ बन्धुवृन्दं प्रति आयूबस्य तिरस्करणं ६ निजदुःखस्य वर्णनं ११ तस्याधःपतनकथनं १५ तदीयं दुःखं १९ स्वर्गे तस्य साचित्वं।

तदनन्तरम् आयूबः प्रत्यवादीत्। १
एतादृशानि वाक्यानि बहूनि श्रुतवानहं। २
सान्त्वनावादिनो यूयं सर्व्वे आयासवर्द्धकाः॥
उक्तीनां वातजानां किम् अन्तः कोऽपि न विद्यते। ३
उत्तरस्य प्रदानाय किं त्वामेवोदतेजयत्॥

४ युष्माभि र्भाषितुं यादृक् मयापि शक्यते तथा।
प्राणानां मम चेत् स्थानं युष्मत्प्राणैरलप्स्यत॥
तर्ह्यशक्यं विरुद्धं वो व्यूहितुं वाक्यवाहिनीं।
युष्माकं प्रतिकूलञ्च निजं चालयितुं शिरः॥
५ युष्मान् वा सबलीकर्त्तुं मौखिकेन बलेन हि।
किं वा शमयितुं दुःखम् ओष्ठयोरनुकम्पया॥
६ भाषमाणस्य मे क्लेशो न्यूनत्वं नहि गच्छति।
वाक्यान्निवर्त्तमाने वा मयि किं स प्रतिष्ठति॥
७ इदानीं त्वीश्वरेणाहं सर्व्वतः परिशोषितः।
विनाशितं त्वया कृत्स्नं मम बान्धवमण्डलं॥
८ त्वयैवाहं यद् आक्रान्तस्तत् साक्ष्यं मद्विरुद्धतः।
व्याधि र्मेऽरिवदुत्थाय मत्साक्षान्माञ्च निन्दति॥
९ विदार्य्य तस्य कोपेन विरोधाचारिणो मयि।
स हि मत्प्रातिकूल्येन क्ष्वेडति स्वीयखादनैः।
शत्रुवन्मद्विरुद्धञ्च नेत्रे तीक्ष्णीकरोति सः॥
१० व्यादाय निजवक्त्राणि वीक्षन्ते माञ्च मानवाः।
तैरेव सापमानं मे गण्डदेशो विताड्यते।
सर्व्वे मत्प्रातिकूल्येन समागच्छन्ति सङ्घशः॥
११ ईश्वरो ऽधर्म्मिलोकस्य करयो र्मां समार्पयत्।
दुरात्मनाञ्च लोकानां हस्तेषु न्यक्षिपत् स मां॥
१२ अहमासं निरुद्वेगः स एव मां प्रभग्नवान्।
मामकीनं गलं धृत्वा खण्डशः कृतवांश्च मां।
स्वशरव्यार्थमेवाहं तेन संस्थाप्य कल्पितः॥
१३ शराणां तस्य मेघश्च वेष्टते मां समन्ततः।
स च निर्द्दयतां गत्वा विदारयति मे यकृत्।
मामकीनञ्च पित्तं स भूमावेव निषिञ्चति।
१४ अश्रान्तं छिद्रयित्वा मां वीरवच्चाभिधावति॥
१५ स्यूतोष्ट्रलोमजं वस्त्रं स्वचर्म्माच्छादितं मया।
निपात्य मामकीनञ्च शृङ्गं धूल्यां प्रलोठितं॥
१६ क्रन्दनान्मम वक्त्रञ्च कृष्णवर्णमुपागतं।
मम चक्षुर्भ्रुवोरूर्द्ध्वं मृत्युच्छायाधितिष्ठति॥

तथाप्यक्रूरहस्तोऽहं पवित्रा प्रार्थनापि मे ॥ १७
हे भू मोच्छाद्यतां पीत्वा मदीयं शोणितं त्वया। १८
कातरोक्ति मदीया च माप्नोतु कञ्चनाश्रयं ॥
इदानीमपि वीक्षस्व साक्षी मे दिवि विद्यते। १९
मम प्रमाणदाता च प्रांशुस्थानेषु तिष्ठति ॥
मध्यस्थो मम बन्धुर्मे ईशं वीक्षेऽश्रुलोचनः ॥ २०
मानवार्थं विवादं स सार्द्धमीशेन कुर्व्वतां। २१
स्वीयबन्धोश्च पक्षः स ब्रूयान्मनुजपुत्त्रवत् ॥
यस्माद् अत्यल्पसंख्येषु वत्सरेषु गतेषु हि। २२
स गन्तव्यो मया पन्था यस्मात् प्रत्यागमो न मे ॥

---

१७ सप्तदशोऽध्यायः।

१ ईश्वरं प्रत्यायूबस्य निवेदनं ११ मृत्योरपेक्षा च।

वियुक्ताः सन्ति मे प्राणा निस्तेजांसि दिनानि च। १
शववासाश्च मे नान्यत् किञ्चनेवावशिष्यते ॥
तथापीमे मया सार्द्धं तिष्ठन्ति परिहासकाः। २
तेषां विरोधचेष्टासु वर्त्तते लोचनं मम ॥
त्वं मम प्रतिभू भूत्वा स्वान्तिके क्षिप मे पणं। ३
न चेत् को मे करं धृत्वा प्रतिभू र्मे भविष्यति ॥
यस्मात् त्वं चित्तमेतेषां ज्ञानलाभान्न्यवारयः। ४
अतो हेतो र्न कर्त्तव्या ह्येतेषामुन्नतिस्त्वया ॥
लोप्त्रृणाम् अंशवद् येन निर्द्दिश्यन्ते स्वबन्धवः। ५
लोचनैस्तस्य पुत्त्राणां निस्तेजस्त्वं गमिष्यते ॥
तादृङ्नरेण लोकानां हास्यभूमिरहं कृतः। ६
सर्व्वेषामेव साक्षाच्च सञ्जातोऽहं घृणास्पदं ॥
दुःखान्नेत्रं मम क्षीणं छायातुल्याखिला तनुः। ७
अनेनाकुटिलाचाराः स्तम्भिताः सम्भवन्ति हि। ८
अधार्म्मिकाच्च रोमाञ्चो निर्द्दोषस्यापि जायते ॥
धार्म्मिकः स्थिरचित्तेन निजमार्गे प्रवर्त्तते। ९
शुचिहस्तमनुष्यस्य वर्धते च सदा बलं।

१० सर्व्वे यूयं परावृत्य समागच्छत पूर्व्ववत्।
युष्मन्मध्ये मया कोऽपि ज्ञानी नासादयिष्यते॥
११ मम दिनान्यतीतानि तथैवोच्छिन्नतां गताः।
सकला मम सङ्कल्पा अर्थाश्चित्तस्य मे प्रियाः॥
१२ तथापीमे मनुष्यास्तां रात्रिं कुर्व्वन्ति वासरं।
दीप्तिं वदन्ति चासन्नां तमिस्रस्याग्रगामिनीं॥
१३ यो ऽहं काङ्क्षामि पातालं मामकीननिवासवत्।
आस्तृणामि मदीयञ्च शयनीयं तमिस्रके॥
१४ क्षयं वच्मि पिता मे त्वं कीटी माता स्वसा च मे।
१५ आशा मे तादृशस्य क्व ममापेक्षां क ईक्षते॥
१६ पातालमवरूढे ते निरुद्धे तस्य चार्गलैः।
सार्द्धं ताभ्याञ्च विश्रामो धूल्यामेव मयाप्स्यते॥

---

१८ अष्टादशोऽध्यायः।

आयूबं प्रति विल्ददस्योत्तरं आयूबस्य दोषित्वकरणं तदीयपापस्य फलं विपद्दर्शनञ्च।

१ तदनन्तरं शूहीयो विल्ददः प्रतिजगाद।
२ शब्दानां मृगयां यूयं कति कालं करिष्यथ।
बुद्धिमाप्नुत तत्पश्चात् प्रभाषिष्यामहे वयं॥
३ पशूनामेव तुल्यार्घाः कुतो गण्यामहे वयं।
कुतो हेतोरमेध्याश्च युष्माकं दृष्टिगोचरे॥
४ कोपादात्मविदारिन् किं भूस्त्वदर्थं विहास्यते।
किं वा शिलोच्चयः स्वीयात् स्थानादुत्पाटयिष्यते॥
५ दुराचारमनुष्यस्य नूनं निर्व्वास्यति द्युतिः।
तस्य गेहे ऽनलस्यापि शिखा स्थास्यत्यनुज्ज्वला॥
६ तस्य वेश्मनि दीप्तिश्च तमोभूता भविष्यति।
तदूर्द्ध्वे च स्थितस्तस्य दीपो निर्व्वास्यति स्वयं॥
७ तदीयविक्रमस्यापि पदं सङ्कोचयिष्यते।
निजमन्त्रणया तस्य निपातश्च जनिष्यते॥
८ चरणौ च स्वकीयौ तं जाले निक्षेपयिष्यतः।
पाशानामुपरिष्टाच्च स विहारं करिष्यति॥

तदीये पादमूले च कूटयन्त्रेण सन्धृते । ९
अङ्कम् अग्रतमं तस्य गलपाशे निर्भंत्स्यते ॥
गुप्ते भूमौ तदुन्माथे तस्य जाले च पद्धतौ । १०
वेष्टयन्तस्तमुत्पातास्त्रासयिष्यन्ति सर्व्वतः । ११
ते तच्चोद्वेजयिष्यन्ति द्रावयन्तः पदात् पदं ॥
बले तस्य क्षुधाकारे नाशे पार्श्वस्थिते सति । १२
खादिष्यन्ते तदङ्गानि चर्म्ममात्रमयाणि हि । १३
खादिष्यन्ते तदङ्गानि मृत्योरादिजसूनुना ॥
निजाद् उत्पाटितो दूष्यात् स्वाश्रयाद् भयवर्ज्जितात् । १४
स नूनं त्रासराजस्य सम्मुखं गमयिष्यते ॥
यच्च स्थास्यति तस्यैव वस्त्रगेहे न तस्य तत् । १५
तदीये वसतिस्थाने गन्धको विकरिष्यते ॥
तस्याधःस्थितमूलानि प्रगमिष्यन्ति शुष्कतां । १६
तस्योर्द्धस्थितशाखापि परिम्लाना भविष्यति ॥
अनुस्मृतिस्तदीया च नरलोके विनंच्यति । १७
भूमण्डलस्य पृष्ठे च तस्य नाम न शेच्यते ॥
दीप्तितस्तमसो मध्यं तदा तस्मिन् प्रवासिते । १८
जीवाधारस्य मध्याच्च क्षते तस्यापसारणे ॥
न ह्यवशेच्यते देशे तस्य सन्तानसन्ततिः । १९
तस्य वेश्मसु नैकोऽपि स्थास्यते रक्षितो जनः ॥
स्तम्भिष्यन्ते प्रतीचीना मानवास्तस्य दुर्दिनात् । २०
पूर्व्वदेशीयलोकानां रोमाञ्चोऽपि जनिष्यते ॥
दुराचारस्य गेहानां वर्णनैषा यथास्थिता । २१
ईश्वानभिज्ञलोकस्य स्थानमेतादृगेव च ॥

---

१९ ऊनविंशोऽध्यायः ।

१ बिल्ददं प्रति आयूवस्योत्तरं दुःखस्य विशेषवर्णनं २२ श्मशानादुत्थानकथनञ्च ।

अनन्तरम् आयूबः प्रत्यवदत् । १
क्लेश्यय कतिकालं मां चूर्णयिष्यथ चोक्तिभिः ॥ २
अधुनाहं तु युष्माभि र्दशकृत्वोऽवमानितः । ३

लब्धीकृतश्च युष्माभि र्लज्जया परिवर्ज्जितैः॥
४ मम भ्रान्तस्य या भ्रान्तिः सा मामेवाधितिष्ठति॥
५ यूयं मद्वैपरीत्येन दर्पं किमाचरिष्यथ।
असम्मानकलङ्काद् वा माम् आक्षेप्तुं किम् इच्छथ॥
६ तर्हीदमेव बुध्यध्वम् अहम् ईश्वेन नामितः।
तेन ममोपरिष्टाच्च समाकृष्टा स्ववागुरा॥
७ पश्य रोदिमि दौरात्म्यात् कोऽपि न प्रतिवक्ति मां।
ईश्वराभ्यार्त्तनादश्च विचारो ऽपि न जायते॥
८ निरुद्धस्तेन मे मार्गो मया गन्तुं न शक्यते।
तमो ऽपि स्थापितं तेन मामकीनेषु वर्त्मसु॥
९ मम सम्भ्रमवस्त्रञ्च तेन मत्तो ऽवतारितं।
शिरःस्थितः किरीटो ऽपि मम तेनापसारितः॥
१० आक्लृष्टः सर्व्वतस्तेन तिरोगच्छाम्यहं किल।
पतत्युन्मूलिता तेन प्रत्याशा मम वृक्षवत्॥
११ मयि प्रज्वाल्य कोपाग्निं गण्ये ऽहं तेन शत्रुवत्॥
१२ अभ्यागच्छन्ति सम्भूय तस्य सैन्यबलानि च।
मामेवोद्दिश्य तैः स्वीयं विनिर्म्माय महापथं।
मद्गेहस्य चतुर्दिक्षु स्थाप्यते शिविरं निजं॥
१३ मम भ्रातृसमूहश्च तेन मत्तो ऽपसारितः।
उदासीनसमा जाता लोकाः परिचिता मम॥
१४ स्वजातीयैरहं त्यक्त आत्मीयैरपि विस्मृतः॥
१५ मद्गेहे प्रवसन्तो ऽपि मानवा दासिकाश्च मे।
मन्यन्ते माम् उदासीनं दृश्ये ऽहं तै र्विदेशिवत्॥
१६ समाहूतो ऽपि मे भृत्य उत्तरं न प्रयच्छति।
मामकीनेन वक्त्रेण कष्टं प्रसादयामि तं॥
१७ गर्ह्यते भार्य्यया श्वास आत्मजै र्विनति र्मम।
१८ बालैरप्यवमन्ये ऽहम् उत्तिष्ठंश्च तिरस्क्रिये।
१९ ममात्मीयाः सखायो ये तैरप्यस्म्यवगर्हितः।
ममातीव प्रिया ये ते गता मत्तः पराङ्मुखाः॥
२० आसज्यन्ते ममास्थीनि मदीयचर्म्ममांसयोः।
दन्तानाञ्च त्वचा सार्द्धं मे प्राणा एव रक्षिताः॥

दया दयैव युष्माभिः क्रियतां मयि बन्धवः। २१
ईश्वरस्य करेणाहं यतो हेतोः समाहतः॥
ईश्वरेणेव युष्माभि र्द्रोहो मे क्रियते कुतः। २२
अभुक्ता मम मांसं किं यूयं तृप्तिं न यास्यथ॥
हाहा मदीयवाक्यानि कुतो नो लिखितानि हि। २३
पत्रिकायां कुतस्तेषां रचना न विधीयते॥
कुतस्तानि न विद्यन्ते सीसे लौहशलाकया। २४
शिलोच्चयस्य शीर्षे हि तच्छितानि सदातनं॥
तथापीदमहं वेद्मि मोचको मम जीवति। २५
शेषे धूल्युपरिष्टाच्च स समुत्थास्यते ध्रुवं॥
गते ऽपि देहकोषे म एतस्मिन् जर्ज्जरीकृते। २६
मामकीनशरीरस्थः समीक्षिष्ये ऽहम् ईश्वरं॥
अहमेव समीक्षिष्ये मम सन्तर्पणाय तं। २७
द्रष्टव्यं लोचनाभ्यां मे न चापरस्य चक्षुषा।
हा हा वक्षःस्थले क्षीणा मम प्राणा भवन्ति हि॥
तस्य द्रोहं कुतो ऽकुर्म्म यूयमेतद् वदिष्यथ। २८
धर्म्मवृक्षस्य मूलञ्च प्राप्यते ऽभ्यन्तरे मम॥
चन्द्रहासस्य साक्षाद्धि युष्माकं जायतां भयं। २९
चन्द्रहासस्य ये दण्डास्ते कोपानलदाहवत्।
ततो ज्ञास्यथ यूयं तद् यद् विचारो विधीयते॥

---

२० विंशतितमोऽध्यायः।

आयूबं प्रति सोफरस्योत्तरं पापिनां दुर्द्दशादर्शनञ्च।

पश्चात् नामाथीयः सोफरः प्रतिजगाद। १
अनेनोत्तरदानाय मां प्रेरयति चण्डता। २
यतो हेतोरधैर्य्येण व्यग्रम् अभ्यन्तरं मम॥
उपदेशो मयाश्रावि लज्जार्थं मम कल्पितः। ३
उत्तरं तस्य मे ज्ञानाद् आत्मा मह्यं प्रयच्छति॥
प्रसिद्धम् आदिकालाद् यत् स्थापनादेव भूतले। ४
मानवानाञ्च यत् ख्यातं तत् किं न ज्ञायते त्वया॥

५ दुष्टस्य क्रूरस्य उल्लास आनन्दो ऽधर्म्मिणः क्षणं ॥
६ समारोहति चेत् तस्य महिमाकाशमण्डलं।
यदि स्पृशति वा तस्य शीर्षं जलधरानपि ॥
७ तथापि स्वीयविष्ठेव स विनंक्ष्यति सर्व्वथा।
ये लोकास्तमवैक्षन्त ते वदिष्यन्ति कुत्र सः॥
८ तच्च स्वप्नवद् उड्डीनं कोऽपि नासादयिष्यति।
रात्रीयं दर्शनं यद्वत् तद्वत् स द्रावयिष्यते ॥
९ येन स चक्षुषा दृष्टस्तेन न द्रक्ष्यते पुनः।
वासस्थानेन तस्यैव स न वीक्षिष्यते पुनः ॥
१० तस्य पुत्राश्च यान् दीनान् चूर्णयन्ति हि मानवान्।
तेभ्यस्तस्य करौ स्वीयं धनं शोधाय दास्यतः॥
११ तस्यास्थीनि च पूर्णानि यानि यौवनतेजसा।
धूलीमधिशयिष्यन्ते सार्द्धं तेनैव तान्यपि ॥
१२ मुखे सुस्वादु पापं चेज्जिह्वाधस्तेन गोप्यते।
१३ तस्मिन् प्रीत्वा तदत्यक्त्वा चेच्च तालुनि रक्ष्यते ॥
१४ तद्युदरस्य मध्ये हि तस्यान्नं विकरिष्यते।
गरलेन भुजङ्गानां व्याप्स्यते तस्य चान्तरं ॥
१५ गिलितं तेन यद् वित्तं पुनस्तदुद्वमिष्यते।
वह्निः करिष्यतीशस्तत् तदीयोदरमध्यतः ॥
१६ विषं पास्यति सोऽहीनां दिजिह्वैश्च हनिष्यते ॥
१७ मङ्गलस्रोतसां तेन दर्शनं नहि लप्स्यते।
नवनीतप्रवाहानां मधुधाराप्रसारिणां ॥
१८ अभुक्त्वा प्रतिदातव्यं तेन स्वोपार्ज्जितं धनं।
आयव्ययौ समौ तस्य स हर्षं न करिष्यति ॥
१९ चूर्णयित्वा यतस्तेन सन्त्यक्ता दीनमानवाः।
लोठयित्वा गृहं तेन न पुनस्तद् विनिर्म्मितं ॥
२० यस्माद् उदरदृप्तिञ्च नावगच्छत् स कर्हिचित्।
तस्मात् तुष्टिकरं किञ्चित् न शक्यं तेन रक्षितुं ॥
२१ तस्य बुभुक्षया कश्चिद् अवशिष्टो न विद्यते।
तस्मात् तस्य शुभावस्था स्थायित्वं न गमिष्यति ॥
२२ सम्पूर्णे तस्य चैश्वर्य्ये क्लेशस्तं पीडयिष्यति।

दुःखिनामापदः सर्व्वा आक्रमिष्यन्ति तं किल ॥
हा तस्योदरपूर्त्त्यर्थं निजकोपाग्निमीश्वरः। २३
तस्मै प्रेष्यान्नवत् तस्य मस्तके वर्षयिष्यति ॥
पलायने कृते तेन लौहसज्जासमीपतः। २४
अनुव्यत्स्यति तं शीघ्रम् आरकूटमयं धनुः ॥
वाणस्तेन समाकृष्टः पृष्ठतो निर्गमिष्यति। २५
निष्क्रान्ते तैजसे पित्तात् सन्त्रासस्तम् उपैष्यति ॥
अन्धकारसमूहो ऽस्ति सञ्चितस्तस्य वित्तवत्। २६
अनुपवीजितेनैव वह्निना स ग्रसिष्यते।
तदावासे ऽवशिष्टानां दुर्गतिः सम्भविष्यति ॥
गगनेनापराधश्च तस्य व्यक्तो करिष्यते। २७
तद्विपक्षस्य साक्षीव समुत्थास्यति मेदिनी ॥
तदीयभवनस्यापि सम्पत्तिं दूरयिष्यते। २८
तरङ्गिणीव कोपस्य दिने सापगमिष्यति ॥
अयमंशो मनुष्याय दुष्टायेशेन दीयते। २९
तेन चैतद्धि भोक्तव्यम् ईश्वरस्याज्ञया फलं ॥

---

२१ एकविंशोऽध्यायः।

१ सोफरं प्रति आयूवस्योत्तरं ७ पापिलोकानां सम्पत्तिः १६ तेषामपि विपत् २२ भद्राणां दुष्टलोकानाञ्च विपत्कथनं २७ पुराद्यत्तकथनं तस्यैको दृष्टान्तश्च।

अनन्तरम् आयूवो ऽवदत्। १
मनो निधाय युष्माभिः श्रूयतां वचनं मम। २
तदेव सान्त्वनादानं युष्माकं गणयिष्यते ॥
अहं यावत् प्रभाषिष्ये तावन्मां सोढुमर्हथ। ३
मयोदीरितवाक्यस्य पश्चात् त्वं विहसिष्यसि।
अहं मानवमुद्दिश्य कातरोक्तिं करोमि किं। ४
कुतो हेतो मदीयात्मा चासहिष्णु र्भवेन्नहि ॥
मां विलोक्य चमत्कारं मत्वा दत्त मुखे करं। ५
संस्मृत्याहमपि स्तम्भे रोमाञ्चितकलेवरः ॥ ६
कुतो दुष्टमनुष्याणां जीवनं परिरक्ष्यते। ७

जायन्ते स्थविरास्ते हि प्रोन्नता विक्रमेण च॥
८ तेषाञ्च सुस्थिरो वंशः साक्षात् तान् उपतिष्ठति।
बालापत्यानि तेषाञ्च विद्यन्ते दृष्टिगोचरे॥
९ सुखं तिष्ठन्ति तेषाञ्च वासा उत्पातवर्ज्जिताः।
तेषां मूर्द्धीश्वरस्यापि दण्डाघातो न वर्त्तते॥
१० गाम् उपैति वृषस्तेषां तत्रासिद्धि र्न जायते।
प्रसूते शृङ्गिणी तेषां नैव वेहायते च सा॥
११ अजाविकं यथा तद्वत् स्वबालान् प्रेषयन्ति ते।
तेषां सन्तानवर्गश्च प्रकरोति हि नर्त्तनं॥
१२ मृदङ्गवीणयो र्वाद्यं कुर्व्वन्त्युच्चैःस्वरेण ते।
वंशीवादनशब्देन हृष्टचित्ता भवन्ति च॥
१३ सुखेन वासरान् स्वीयान् सकलान् यापयन्ति ते।
तत्पश्चाद् अवरोहन्ति प्रेतलोकं क्षणान्तरे॥
१४ ईश्वरं ते वदन्तीदम् अपैह्यस्मत्समीपतः।
ज्ञानं यत् तव मार्गाणां तदस्मभ्यं न रोचते॥
१५ कः सर्व्वशक्तिमान् यत् तं निषेविष्यामहे वयं।
तस्मै प्रार्थयमानाश्च किं वा लप्स्यामहे फलं॥
१६ पश्य तेषाम् अभीष्टं यत् तन्न तेषां करे स्थितं।
दुष्टानां मन्त्रणा मत्तस्तिष्ठति दूरवर्त्तिनी॥
१७ कतिवारं हि दुष्टानां दीपो निर्वापणं गतः।
तेषामेव विनाशोऽपि कतिवारम् उपैति तान्।
व्यसनानि विभज्यन्ते कुपितेनेश्वरेण च॥
१८ वायुचालितनालानां तदा तुल्या भवन्ति ते।
झञ्झयापहृतानां वा तुषाणामेव सन्निभाः।
१९ ईश्वरस्तस्य पुत्रेभ्यस्तस्याघं परिरक्षति।
ददाति वा फलं तस्मै तत् स एव च भोक्ष्यते॥
२० स्वकीयं सर्व्वनाशञ्च द्रक्ष्यतः स्वस्य लोचने।
सर्व्वशक्तिमतो रोषं स एव परिपास्यति॥
२१ तस्यानुवर्त्तिवंशेन को हर्षस्तस्य जायते।
मासानां तस्य या संख्या सा समुच्छेत्स्यते किल॥
२२ ईशं कः शिक्षयेत् ज्ञानम् उन्नतानपि शास्ति सः।

सम्पूर्णस्वास्थ्यकाले हि नर एकः प्रमीयते। २३
सर्व्वथा मङ्गलप्राप्तो निर्व्विरोधः समन्ततः॥
सम्पूर्णा नवनीतेन विद्यन्ते तस्य नाडिकाः। २४
तदीयास्थ्नाञ्च मेदो ऽपि सम्यगाप्यायितं सदा॥
मनस्तापेन निर्व्विंसस्त्वान्यः कश्चित् प्रमीयते। २५
आस्वादो मङ्गलस्यापि तेन न प्रापि कर्हिचित्॥
एकत्राधिशयिष्येते धूलिं तौ मानवावुभौ। २६
उभावाच्छादयिष्येते कीटरूपेण वाससा।
वीक्षध्वम् अवगम्यन्ते युष्माकं कल्पना मया। २७
तर्का मत्प्रातिकूल्येन युष्माभी रचिता अपि॥
युष्माभि र्गद्यते कुत्र तस्य देशपते र्गृहं। २८
दुष्टानां वसतिस्थानं शिविरं कुत्र वा गतं॥
युष्माभिः किं न सम्पृष्टा मानवा अध्वगामिनः। २९
किं न दृष्टानि तेषाञ्च लोकानां लक्षणानि हि॥
विनाशस्य दिनं यावत् दुरात्मा परिरक्ष्यते। ३०
क्रोधस्यैव दिने नूनं स उपस्थापयिष्यते॥
कस्तं स्वकीयम् आचारं बोधयेत् तस्य सम्मुखे। ३१
तेन यत् क्रियते तस्य फलं दीयेत केन वा॥
असौ नीतः शवागारं तत्स्तूपमधितिष्ठति॥ ३२
निम्नभूमेश्च लोष्ट्राणि सुस्वादूनि स मन्यते। ३३
आकृष्यन्ते च तत्पश्चात् सकलास्तेन मानवाः।
तदग्रगामिलोकाश्च गणनातीतसंख्यकाः॥
ईदृग् असारवाक्यैः किं यूयं मां सान्त्वयिष्यथ। ३४
उत्तराणि हि युष्माकं व्यलीकोच्छिष्टभक्ष्यवत्॥

---

२२ द्वाविंशोऽध्यायः।

१ इलीफसस्योत्तरम् आयूबस्य दोषिलकरणं १५ परमेश्वरस्य निर्दोषकरणं २१ आयूबं प्रति मन्त्रणा च।

अनन्तरं तैमनीय इलीफसः प्रत्यवदत्। १
ईश्वरस्योपकारं किं कर्त्तुं शक्नोति मानवः। २

करोत्यात्मोपकारं हि मनुजः सुविचारकः॥
३ त्वं पुण्ययुक्त एतत् किं सर्व्वशक्तिमतो हितं।
त्वदीयाचारसिद्धत्वात् को लाभस्तस्य जायते॥
४ किं त्वत्तः साध्वसं कृत्वा स त्वां तिरस्करिष्यति।
किं विचारसभां वा स त्वया सार्द्धं गमिष्यति॥
५ न हि किं दुष्टता स्थूला तेऽनन्ताः कुक्रिया अपि॥
६ भ्रातृणामपि निक्षेपा क्रियन्तेऽकारणात् त्वया।
गात्रेभ्यश्चापहृष्यन्ते नग्नानां वसनान्यपि॥
७ अवसन्नाय पानार्थं तोयं नो दीयते त्वया।
क्षुत्पीडिताय दानञ्च भक्ष्यस्य त्वमपह्नुषे॥
८ बलसंयुक्तबाहू र्यो देशस्तस्यैव विद्यते।
सर्व्वसम्मानितेनैव सोऽधिवस्तुञ्च शक्यते॥
९ विसृष्टा रिक्तहस्ता हि विधवा योषितस्त्वया।
चूर्णिताः पितृहीनानां बालानां बाहवस्तथा॥
१० ततो हेतोश्च पाशास्त्वां वेष्टयन्ति समन्ततः।
अकस्माद् भयमुत्पद्य त्वां विह्वलीकरोति च॥
११ किं न निरीक्षसे ध्वान्तं त्वं छन्नस्तोयराशिना॥
१२ आकाशमण्डलादेव प्रोच्चः किम् ईश्वरो नहि।
ताराणां शीर्षकं पश्य तासां कीदृक् समुच्छ्रयः॥
१३ त्वयेदं गद्यते वाक्यं किं जानाति स ईश्वरः।
अन्धकारस्य मध्येन शासनं किं करोति सः॥
१४ मेघा आवरणं तस्य न शक्नोति स वीक्षितुं।
अन्तरीक्षस्य चक्रे च स विहारं करोति हि॥
१५ पूर्व्वकालिकलोकानां मार्गे त्वं किं चरिष्यसि।
दुर्वृत्ता मानवास्तत्र पथिका येऽभवन् पुरा॥
१६ अकाले ते हृतास्तेषां गेहं लीनं नदीसमं॥
१७ अस्मत्तोऽपैहि दूरं त्वम् इति तैरुक्त ईश्वरः।
सर्व्वशक्तिमता तेषां निमित्तं किं क्रियेत वा॥
१८ स हि पूरितवान् तेषां गेहान्युत्तमवस्तुभिः।
दुष्टानां मन्त्रणा मत्तो दूरमेवापसारिता॥
१९ धार्म्मिका वीक्षमाणास्तान् गमिष्यन्ति प्रफुल्लतां।

लोके निरपराधैश्च तान् विहस्य गदिष्यते॥
अस्माकं ये विपक्षाः किं न गतास्ते विलोपनं। २०
तेषां यद् द्रविणं तच्च वह्निना किं न भक्षितं॥
ईशं श्रद्धेहि तेन त्वं शान्तः प्राप्स्यसि मङ्गलं। २१
शिक्षां गृहाण तद्वक्त्रात् चित्ते कुरु च तद्वचः॥ २२
प्रभुं प्रति परावृत्य त्वं पुनः स्थापयिष्यसे। २३
अधर्म्मञ्च सुदूरं चेत् स्वगेहादपसारयेः।
तर्हि स्वर्णे च्युते धूल्यां हेम्नि स्रोतःशिलासु च। २४
प्रभुः स्वर्णं सुशुभ्रञ्च रजतं ते भविष्यति॥ २५
प्रभुरेव तदानीं ते हर्षभूमि र्भविष्यति॥ २६
त्वमपीश्वरम् उद्दिश्य मुखम् उन्नमयिष्यसि॥
तस्मै प्रार्थयमानस्य ते वाक्यं स ग्रहीष्यति। २७
यत् प्रतिश्रुतवान् तत् त्वं सर्व्वं संशोधयिष्यसि॥
त्वया सङ्कल्पितं वाक्यं त्वन्निमित्तञ्च सेत्स्यति। २८
मार्गास्ते दीपयिष्यन्ते चोर्द्धसंस्थेन तेजसा॥
अवनामितलोकांस्त्वं वक्ष्यस्युन्नतिमाप्नुय। २९
निस्तारयिष्यते तेन मनुजो नम्रलोचनः॥
यस्य निर्द्दोषता नास्ति सोऽपि तेनोद्धरिष्यते। ३०
उद्धारः प्राप्स्यते तेन शुचित्वात् करयोस्तव॥

---

२३ त्रयोविंशोऽध्यायः।

१ ईश्वरेण विचारार्थम् आयूबस्य प्रार्थना स्वस्य निर्द्दोषत्वप्रकाशनञ्च १७ ईश्वराद् आयूबस्य भीतिश्च।

अनन्तरम् आयूबः प्रत्यवदत्। १
तीव्रो ऽद्यैव विलापो मे श्वासो दण्डेन रुध्यते। २
आ इयं मम वाञ्छा यत् परिज्ञाय तमाप्नुयां। ३
यत् तदीयासनं यावत् समायातुञ्च शक्नुयां॥
तदा निवेदयिष्यामि मे विवादं तदन्तिके। ४
हेतुवादैश्च वक्त्रं मे पूरयिष्यामि निश्चितं॥
यच्च दास्यति मह्यं स वेदिष्यामि तदुत्तरं। ५

परिज्ञास्यामि वाक्यञ्च तेन मां प्रति भाषितं॥
६ किं स्वकीयमहाशक्त्या स मया विवदिष्यते।
नैवं किन्तु मनोयोगो मयि तेन करिष्यते।
७ मानवः सरलस्तत्र तेन सार्द्धं विचारयेत्।
उद्धारं प्राप्नुयाञ्चाहं नित्यं मे दण्डनायकात्।
८ पश्यत प्राङ् अहं यामि नहि तत्र स विद्यते।
पश्चाद् वा वर्त्तमानेन स मया नावगम्यते॥
९ सव्यदिश्यपि कर्म्मिष्ठं तं न शक्नोमि वीक्षितुं।
दक्षिणस्याञ्च गुप्तः स मया द्रष्टुं न शक्यते।
१० किन्तु स एव जानाति मार्गम् आचरितं मया।
कृतायां मे परीक्षायां निर्गमिष्यामि हेमवत्॥
११ मदीयचरणस्तस्य पादचिह्नानि नात्यजत्।
आश्रितस्तस्य पन्था च निश्चलेन मया सदा॥
१२ तस्य चाधरयो र्वाक्यान्नाहं जातः पराङ्मुखः।
तन्मुखान्निर्गता वाचस्त्वामन्ये खान्नतो वरं॥
१३ किन्तु स आत्मतन्त्रः कस्तं परावर्त्तयिष्यति।
यद् इष्टं मनसा तस्य तदेव तेन साध्यते॥
१४ यच्च मामधि निर्ण्णीतं तत् स सम्पादयिष्यति।
तादृशान्येव कर्म्माणि सन्ति तस्य बहूनि हि॥
१५ ततो हेतो र्मम त्रासो जायते तस्य सम्मुखे।
मया विवेचनां कृत्वा तस्मात् कम्पश्च गम्यते॥
१६ ईश्वेन मे मनो भग्नं स्तब्धोऽहं सर्व्वशक्तिना॥
१७ अन्धकारभयेनैव मे वाग्रोधो न जायते।
न वा मत्तो भयेनापि मौन्यहं तमसावृतः॥

---

२४ चतुर्विंशोऽध्यायः।

१ इह पापिनां दण्डस्य सदा न भवनकथनं कियद्दरण्यवासिनां तत्प्रमाणीभवनं ६ उपद्रविलोकस्य प्रमाणीभवनं १३ चन्तृव्यभिचारिलोकानां प्रमाणीभवनं १८ नानाविधलोकानां प्रमाणीभवनञ्च।

१ सर्व्वशक्तिमतश्चेन्न गुप्ताः कालास्तदा कुतः।

तस्य मित्रै र्न दृश्यन्ते तदीयानि दिनानि हि॥
केचित् क्षेत्रान्तचिह्नानि स्वस्थानाद् द्रवयन्ति हि। २
केचिन्मेषव्रजं हृत्वा तस्य कुर्व्वन्ति चारणं॥
केचिद् वा तातहीनानाम् अपनयन्ति गर्दभं। ३
केचिद् वा विधवाया गां गृह्णन्ति बन्धकीकृतां॥
केचिद् अकिञ्चनान् लोकान् वहिष्कुर्व्वन्ति मार्गतः। ४
गुप्यन्ते युगपत् तस्मात् देशस्था दुःखिता जनाः॥
पश्य प्रान्तरमाश्रित्य तै र्वन्यै र्गर्द्दभैरिव। ५
निजं विधीयते कार्य्यं भक्ष्यस्यैव गवेषणं।
मरुभूमिस्तदीयानां बालानाम् अन्नदायिनी॥
क्षेत्रे शाकानि कृन्तन्तस्ते संगृह्णन्ति भक्षणं। ६
दुष्टस्योपवने वा तैः शेषं सञ्चीयते फलं॥
वस्त्राभावाच्च ते नग्ना यामिनीं यापयन्ति हि। ७
किमप्याच्छादनं तेषां शीतकाले न विद्यते।
पर्व्वतीयेन वर्षेण जलसिक्ता भवन्ति ते। ८
आलम्बन्ते च ते शैलान् आश्रयेण विवर्जिताः।
केचिद् हरन्ति बालञ्च पितृहीनं स्तनादपि। ९
बन्धकस्यापहारेण दुर्गतान् पीडयन्ति च॥
वसनाभावतो नग्नास्ते कुर्व्वन्ति गमागमौ। १०
क्षुधार्त्ताः कृषणस्यैव शस्यभारान् वहन्ति ते॥
तस्य प्राकारमध्ये वा तैलं निष्पीडयन्ति हि। ११
द्राक्षाणां मर्द्दनं यद्वा तैः कर्त्तव्यं तृषातुरैः॥
नगरान्म्रियमाणानां श्रूयते परिदेवनं। १२
लोकानां हन्यमानानां प्राणा उच्चै रुदन्ति च।
न करोति मनोयोगम् ईश्वरस्तत्र पातके॥
आलोकद्वेषिणां मध्ये गणितव्या नरा अमी। १३
तस्य मार्गान् न जानन्ति नासते तस्य वर्त्मसु॥
प्रातरुत्थाय हन्तासौ हन्ति दीनमकिञ्चनं। १४
यामिन्यां तस्करेणैव निर्व्विशेषः स जायते॥
पारदारिकलोकस्य नेत्रं सन्ध्यामपेक्षते। १५
मां न द्रक्ष्यति कस्यापि चक्षुरिति प्रभाष्य सः।

स्वकीयं वदनं सम्यग् आच्छादयति वाससा॥
१६ केचिद् गेहेषु कुर्व्वन्ति तमिस्रे सन्धिकर्त्तनं।
दिवा मुद्राङ्कबद्धास्त आलोकं न विदन्ति हि॥
१७ मृत्युच्छायासमानं हि प्रभातं तैश्च मन्यते।
दारुणा मरणच्छाया तत् ते जानन्ति निश्चितं॥
१८ तादृशो मानवस्तूर्णं तरङ्गिण्यापनेष्यते।
मेदिन्यां तस्य वित्तञ्च परिशप्तं भविष्यति।
आरामाणाञ्च मार्गे स विहारं न करिष्यति॥
१९ अनावृष्टिनिदाघाभ्यां क्षीयते हिमजं जलं।
नरकेण मनुष्याश्च क्षेष्यन्ते कृतपातकाः॥
२० विस्मरिष्यति तं गर्भः कीटस्तं खादयिष्यति।
लोप्स्यते स्मरणं तस्य पापे छिन्ने पलाशिवत्॥
२१ वन्ध्यां हिंसत्यसूतां स नानुगृह्णात्यभर्त्तृकां॥
२२ धारयति स्वशक्त्या स बलिष्ठानपि मानवान्।
तस्माद् येनोन्नतिं लब्धा जीवने स न विश्वसेत्॥
२३ दत्ते तस्मै भयाभावे स्थिरता तस्य जायते।
किन्त्वीशस्येक्षणं तेषां पद्धतीरधितिष्ठति॥
२४ उन्नतिं प्राप्य तैः शीघ्रम् अन्तर्धानं प्रयास्यते।
उत्पन्ना संग्रहीष्यन्ते प्रेत्य तेऽन्यमनुष्यवत्।
म्लानत्वञ्च गमिष्यन्ति शस्यशीर्षस्य शूकवत्॥
२५ इत्थं चेन्नहि कस्तर्हि मे वाक्यं खण्डयिष्यति।
उक्तीनाञ्च मदीयानां दर्शयिष्यत्यलीकतां॥

---

२५ पञ्चविंशोऽध्यायः।

विल्ददस्योत्तरम् ईश्वरस्य निर्दोषत्वं मानुषस्य दोषित्वञ्च।

१ अनन्तरं शूहीयो विल्ददः प्रत्यवदत्।
२ प्रभुत्वं भीषणत्वञ्च तस्मिन्नेव प्रतिष्ठितं।
स्वकीयोच्चनिवासेषु मङ्गलं विदधाति सः॥
३ तदीयानां बलानाञ्च सङ्ख्या किं परिमीयते।
कं जनं प्रति वा तस्य दीपको नाभ्युदेति हि॥

तर्हीशस्य समक्षं किं मनुजः पुण्यवान् भवेत्। ४
अबलाजनितो मर्त्यः किं भविष्यति निर्म्मलः।
पश्य चन्द्रोऽपि तेनैव प्रभावान् नहि मन्यते। ५
तारास्तस्य समक्षञ्च शुचयो न भवन्ति हि॥
तर्हि का कीटकल्पस्य मनुष्यस्य पवित्रता। ६
कथं वा नरसन्तानः कृमितुल्यः शुचि र्भवेत्॥

---

२६ षड्विंशोऽध्यायः।

विल्‌ददं प्रति आयूबस्योत्तरम् ईश्वरस्य महिमप्रकाशनञ्च।

तत आयूब उक्तवान्। १
किमाश्चर्य्यमुपाकारि शक्तिहीनो नरस्त्वया। २
किमाश्चर्य्यं त्वया बाहु र्दुर्बलस्य स्थिरीकृतः॥
कीदृशी ज्ञानहीनाय त्वया दत्ता च मन्त्रणा।
कीदृक् प्रचुरकौशल्यं त्वया वा सम्प्रकाशितं॥ ३
कस्त्वयाध्यापितः श्लोकान् कस्य धीरीरिता त्वया॥ ४
प्रेताः क्षुभ्यन्ति तोयानां गर्भे च तन्निवासिनः॥ ५
तस्याग्रे नरको नग्नः संहारश्छादितो नहि॥ ६
शून्ये तेनोत्तरा स्तीर्णा लोके चोल्लम्बिता धरा॥ ७
आपः खाभ्रेषु बद्धाश्च घनस्ताभि र्न भिद्यते॥ ८
स्वीयसिंहासनस्यापि दर्शनं स निवारयन्। ९
स्वकीयमेघजालेन प्रच्छादयति तन्मुखं॥
अकूपारस्य विस्तारे चक्रस्तेनैव चित्रितः। १०
दीप्त्यन्धकारयोः सीमा येन सूक्ष्मं निरूप्यते॥
नभःस्तम्भाश्च कम्पित्वा त्रस्यन्ति तस्य भर्त्सनात्॥ ११
स स्वकीयमहाशक्त्या चोद्वेजयति सागरं। १२
निजया प्रज्ञया तेन तस्य गर्व्वोऽपि चूर्ण्यते॥
करोति निर्म्मलं तस्य श्वास आकाशमण्डलं। १३
नागं पलायमानञ्च तस्य हस्तः प्रविद्धवान्॥
पश्यैते तस्य मार्गाणां प्रान्ता एव भवन्ति हि। १४

कीदृशोघन्निनादस्तु ततो ऽस्माभि र्निशम्यते।
तदीयस्य महिम्नश्च गर्ज्जनं केन श्रोष्यते॥

---

२७ सप्तविंशोऽध्यायः।

१ आयूबस्य स्वनिर्दोषत्वकरणं ७ निजाकापद्यप्रकाशनम् इह पापिनां कदाचित् दण्डितत्वस्य स्वीकरणञ्च।

१ अनन्तरं स्वप्रसङ्गेन पुनरायूब इत्थं कथयामास।
२ मद्धर्म्मस्यापहर्त्ता य ईशः स यदि जीवति।
मत्प्राणक्लेशको वा चेज्जीवन् स्यात् सर्व्वशक्तिमान्॥
३ तर्हि यावन्मम श्वासो देहमध्येऽवतिष्ठते।
वायुरीशेन दत्तश्च नासिकायां प्रवर्त्तते॥
४ तावन्ममाधरौ दुष्टं वचनं न वदिष्यतः।
मदीया रसना कञ्चित् छलं नो कल्पयिष्यति॥
५ यथार्थवादिनो यूयमिति स्वीकरणं मया।
प्राणत्यागदिनं यावत् नैव भूयात् कदाचन।
नाहं वियोजयिष्यामि मत्तः स्वचित्तशुद्धतां॥
६ स्वपुण्यं धारयिष्यामि न हास्यामि कदाचन।
यावज्जीवञ्च मे चित्तं नहि मां दूषयिष्यति॥
७ भूयाद् दुष्टसमो मेऽरि र्मे विपक्षश्च पापिवत्।
८ आशा का धर्म्महीनस्य किं फलं तेन लप्स्यते।
ईश्वरो देहतस्तस्य प्राणान् वहिः करिष्यति॥
९ क्लेशाक्रान्तस्य किं तस्य रोदनं श्रोष्यतीश्वरः॥
१० सर्व्वशक्तिमता तस्य हृदयं किं प्रतुष्यति।
ईशमुद्दिश्य किं तेन प्रार्थना क्रियते सदा॥
११ ईश्वरस्य करे शिक्षा युष्मभ्यं दीयतां मया।
सर्व्वशक्तिमतो भावो मया न छादयिष्यते॥
१२ किं न युष्माभिरप्येतत् सर्व्वैरेव विलोकितं।
तर्ह्यलीकतया यूयं कुतो हेतो र्विमुह्यत॥
१३ अयमंशो मनुष्याय दुष्टायेशेन दीयते।
सर्व्वशक्तिमतश्चायं दायो लभ्यो दुरात्मना॥

वर्द्धते तस्य पुत्राणां सङ्ख्या खड्गस्य तृप्तये। १४
आहारेण न पूर्य्यन्ते शिशवस्तस्य कोमलाः॥
तेनावशिष्टवंशस्य शवदाही च मारकः। १५
तस्य या विधवास्ताभिः क्रन्दनं क्रियते नहि॥
रजतं किं कदाचित् स राशीकरोति धूलिवत्। १६
मृत्तिकाचयवत् वा किं सञ्चिनोति सुचेलकान्॥
भद्रं तथा कृते साधु वस्त्रान्वितो भविष्यति। १७
रजतञ्च विभक्ष्यन्ते मानवा दोषवर्ज्जिताः॥
पतङ्गस्य गृहं यादृग् वेश्म वा क्षेत्ररक्षिणा। १८
निर्म्मितं तादृशं स्वार्थं तेन निर्म्मीयते गृहं॥
धनी गत्वा महानिद्रां न समानीयते दिवं। १९
उन्मील्य निजनेत्रे स उपगच्छति लीनतां।
वन्येवोपैति तं त्रासो झञ्झा हरति तं निशि॥ २०
स पूर्व्ववायुना ग्रस्तो ऽपैति स्वस्थानतो हृतः॥ २१
निर्द्दयं ताड्यमानः स प्रधाविष्यति तत्करात्॥ २२
करतालं तमुद्दिश्य करिष्यन्ति च मानवाः। २३
श्वोष्ठशब्दञ्च कुर्व्वद्भिस्तैः स दूरीकरिष्यते॥

---

२८ अष्टाविंशोऽध्यायः।

१ पदार्थविषयकज्ञाने मनुष्याणां नैपुण्यकथनं १२ पारमार्थिकज्ञानस्य मूल्यकथनं २० परमार्थविषयकज्ञानस्य दुष्प्राप्यत्वकथनञ्च।

रौप्यस्य विद्यते योनिः स्थानं हेम्नः स्थलं तथा॥ १
धूलेरुद्धार्य्यते लौहं ताम्रायाश्मा विलाप्यते॥ २
अन्धकारस्य सीमापि मानवेन निरूप्यते। ३
मृत्युध्वान्ते तमिस्रे च स्थितानामश्मनामपि।
स करोत्यनुसन्धानं परिपूर्णमखण्डतः॥
जृम्भिते खातकूपे हि प्रवासस्थानपार्श्वतः। ४
विस्मृताश्चरणै र्लोका दोलायन्त इतस्ततः।
यान्ति चञ्चल्यमानास्ते स्थानं मानववर्ज्जितं॥
यया चोत्पाद्यते भक्ष्यं तस्या भूमेरधः स्थितं। ५

तलं विदार्य्यमाणं तै र्जायते ऽग्निवदुज्ज्वलं॥
६ तच्छिला नीलकान्तस्य स्थानं हेम्नश्च तद्रजः॥
७ पक्षिराजोऽपि तं मार्गं नाभ्यजानात् कदाचन।
न सन्दृष्टः कदाचित् स चक्षुषा दूरदर्शिनः॥
८ पशुराजस्य पोतै र्न कृतौ तत्र गमागमौ।
न कदाचिद् विहारो वा तत्र केशरिणा कृतः॥
९ क्रियते वज्रशैले हि मनुष्येण करार्पणं।
उत्पाद्यन्ते समूलश्च तेन महीधरा अपि॥
१० पाषाणानाञ्च मध्येन खन्यन्ते तेन निम्नगाः।
सकलान्येव रत्नानि दृश्यन्ते तस्य चाक्षिणा॥
११ सरितामश्रुपातश्च तेन बद्धा निवार्य्यते।
गूढं वस्तु वहिष्कृत्य दीप्तिस्थानञ्च नीयते।
१२ किन्तु क्व प्राप्यते विद्या धीस्थानमस्ति कुत्र वा॥
१३ मर्त्त्येनाज्ञेयमूल्या सा न प्राप्या जीवतां भुवि॥
१४ गम्भीरं वदति स्थानं मयि सा नहि विद्यते।
सागरो ऽपि तथा वक्ति सा न मत्सहवर्त्तिनी॥
१५ तप्तस्वर्णस्य दानं न तस्या विनिमयो भवेत्।
न तया सममूल्यं वा रजतस्यापि तोलनं॥
१६ ओफीरीयहिरण्येन तौले सा नोपमीयते।
वैदूर्य्येण महार्घेण नीलकान्तेन वा नहि॥
१७ नहि काञ्चनमच्छो वा याति तस्याः समानतां।
स्वर्णभूषापि नाप्नोति तत्पारिवर्त्तयोग्यतां॥
१८ विद्रुमस्फटिकानाञ्च नाम नोच्चार्य्यतामपि।
विद्यारत्नं यतो हेतो र्मुक्ताभ्यो ऽप्युत्तमं धनं॥
१९ कूशदेशीयपीतो न याति तस्याः समानतां।
निर्म्मलेन हिरण्येन तौले सा नोपमीयते॥
२० कुतश्चोत्पद्यते विद्या धीस्थानमस्ति कुत्र वा॥
२१ सा हि तिष्ठति संगुप्ता नेत्रेभ्यः सर्व्वजीविनां।
पक्षिणां खेचराणाञ्च दृष्टितः सा तिरोहिता॥
२२ ब्रूतः संहारकालौ हि नौ कर्णैस्तच्छ्रुतिः श्रुता।
२३ ईशो जानाति तन्मार्गं तस्याः स्थानञ्च वेत्ति सः॥

यस्माद् भूमण्डलस्यान्तान् यावद् दृष्टिं करोति सः॥ २४
आकाशमण्डलस्याधःस्थितं सर्व्वञ्च पश्यति॥
निश्चिन्वन् गुरुतां वायोरपां मानं निरूपयन्॥ २५
वर्षायाञ्चां यदा सोऽदाद् वज्राघाताय चायनं। २६
तस्मिन् काले समालोक्य सा तेनैवोपवर्णिता। २७
तां संस्थाप्यानुसन्धानं तस्यास्तेनाप्यनुष्ठितं॥
मानवञ्च समुद्दिश्य तेनेदमीरितं वचः। २८
पश्य प्रभो र्भयं विद्या दुष्टताप्रोज्झनञ्च धीः॥

---

२९ ऊनत्रिंशोऽध्यायः।

१ स्वपूर्व्वीयसौभाग्य आयूबस्य विलपनं ११ पूर्व्वीयसम्माने विलपनञ्च।

अनन्तरम् आयूबः स्वप्रस्तावतः पुनरवोचत्। १
पूर्व्वकालिकमासेषु रक्षितस्येश्वरेण मे। २
शुभकाले च यावस्था प्राप्तुमिच्छामि तां पुनः॥
तदानीं तस्य दीपेन मम शीर्षमदीप्यत। ३
अन्धकारोऽपि गन्तव्यो मयाभूत् तस्य तेजसा॥
मम वसन्तकालस्य लिप्सितां सुस्थितिं पुनः। ४
अध्यतिष्ठन्ममावासम् ईशस्यात्मीयता तदा॥
आसीन्मम सहायश्च तदानीं सर्व्वशक्तिमान्। ५
सन्ताना मामकीनाश्च मामवेष्टन्त सर्व्वतः॥
क्षीरेणाक्षालयञ्चाहं स्वकीयौ चरणौ व्रजन्। ६
मत्समीपस्थशैलश्च तैलस्रोतांस्यवाहयत्॥
वहिर्गत्य पुरद्वारं नगरस्य मुखे स्थितं। ७
सन्निवेशस्य मध्ये हि स्वासने स्थापिते मया॥
युवानो मां समालोक्य गूढस्थानं समाश्रयन्। ८
स्थविराश्च समुत्थायावातिष्ठन्त मदन्तिके॥
अध्यक्षाश्च वचो रुद्ध्वा मुखेऽकुर्व्वन् करार्पणं॥ ९
वाणीहीनकुलीनानां जिह्वासज्यत तालुनि॥ १०
यतः श्रुत्वैव कर्णेन मह्यमाशीरदीयत। ११
लोचनेनापि मां दृष्ट्वाक्रियत स्तवनं मम।

१२ यतो हेतो रुदन् दीनो बालकस्तातवर्ज्जितः।
साहाय्यहीनलोकश्चैतेषां रक्षा मयाभवत्॥
१३ विनाशोद्यतलोकस्य मयि चाशीरवर्त्तत।
विधवायाः स्त्रियश्चित्तञ्चाहं गीतमगापयं।
१४ अहं पर्य्यदधां धर्म्मं सोऽभवन्मे परिच्छदः।
मत्पुण्यं राजवस्त्रं मे किरीटञ्चाभ्यजायत॥
१५ अहं लोचनमन्धस्य पदः खञ्जस्य चाभवं॥
१६ तातश्चाहं दरिद्राणां यं नाजानामहं जनं।
अनुसन्धाय तस्यापि विसंवादं व्यचारयं॥
१७ भंक्ता दुरात्मनो दन्तान् तद्दन्तेभ्योऽहरं मृगं॥
१८ मया प्रोक्तं सनीडो हि प्रणमिष्याम्यहं मृतिं।
वासरा मे भविष्यन्ति भूयिष्ठाः सिकता इव॥
१९ विस्तीर्णमम्भसां पार्श्वे मम मूलं हि तिष्ठति।
मम पर्णशिखायाञ्च वर्त्तते रजनीजलं॥
२० नवतेजोविशिष्टोऽहम् अम्लानं मत्करे धनुः॥
२१ घ्रुष्वन्तो मम वाक्यानि प्रत्यैक्षन्त नरास्तदा।
मदीयां मन्त्रणां लोका अन्वरक्षंश्च नीरवाः॥
२२ मम वाक्यस्य पश्चात् ते किञ्चिन्नाकथयन् पुनः।
मामकीनोपदेशेन ते न्यसिच्यन्त भूमिवत्॥
२३ मां प्रत्यैक्षन्त ते सर्व्वे वर्षाकाङ्क्षिनरा इव।
व्यात्तमुखा अतिष्ठंश्च सेवतोयार्थिनो यथा॥
२४ तेषु विश्वासहीनेषु तानुद्दिश्याहमस्मये।
न व्यकार्य्यत वा तैर्मे वदनस्य प्रफुल्लता॥
२५ तदाहं रोचयन् तेषां मार्गं मुख्य उपाविशं।
आसीनो निजवाहिन्या वेष्टितो भूपति यथा।
शोकसागरमग्नानां वा प्रबोधयिता यथा॥

३० त्रिंशोऽध्यायः।

१ आयूबस्य सम्मानस्य विनिमयेन निन्दाभोगकथनं १५ तस्य दुःखवर्णनं १५ तस्य खेदोक्तिश्च।

इदानीन्तु विद्वस्योऽहं लोकै र्मत्तो जघन्यजैः। १
मम मेषव्रजानां हि रक्षकैः कुक्कुरैः सह।
वासात् तेषामहं तातान् अवज्ञाय न्यवारयं॥
तेषां हस्तबलादेव किं फलं मेऽजनिष्यत। २
यस्माल्लोपं गतं तेषां पलितं शिरसि स्थितं॥
शुष्का दैन्यक्षुधाभ्यां ते मरुभूमिं चरन्ति हि। ३
दीर्घकालात् समुच्छिन्नां नरशून्याञ्च सर्व्वशः॥
उत्कर्षन्ति च शाकानि स्तम्बानामेव पार्श्वतः। ४
रेतमाख्यस्य वृक्षस्य मूलं तेषाञ्च भोजनं॥
प्रजा निरस्य संसर्गाच्चौरान् संघोषयन्ति तान्॥ ५
दरी र्घोरा रजोगर्त्तान् शैलांश्चाप्याश्रयन्ति ते॥ ६
क्रोषन्ते झाटमध्ये ते गोक्षुराधो मिलन्ति च॥ ७
मूढानां ख्यातिहीनानां जनानां वंश एव ते। ८
कशाघातेन देशस्य मध्यतस्ते प्रवासिताः॥
अद्य तैरभवं गेयो तेषाञ्चाहं रसास्पदं॥ ९
माञ्चावगर्हमाणास्ते मत्तस्तिष्ठन्ति दूरतः। १०
अकार्पण्येन लालाञ्च निष्ठीवन्ति मदन्तिके॥
शिथिलीकृत्य मे रश्मिं मामक्लेशयदीश्वरः। ११
तस्मान्मुक्तखलीनास्ते सञ्जाता मम सम्मुखे॥
दक्षिणे सर्पवंशास्तु उत्थायाघ्नन्ति मे पदौ। १२
मामुद्दिश्य विनाशस्य मार्गान् ते रोचयन्ति च॥
ते प्रभञ्जन्ति मे वर्त्म मम भ्रंशाय संहताः। १३
कोऽपि तेषां प्रतीकारम् अनुष्ठातुं न चेष्टते॥
पृथुना सेतुभङ्गेन ते समायान्ति सिन्धुवत्। १४
झञ्झानादं प्रकुर्व्वन्तो विश्रुवन्त्यूर्म्मिमालिनः॥
त्रासा मत्सम्मुखीभूताः श्रीश्च मे वायुचालिता। १५
मामकीनञ्च कल्याणम् अतीतं व्योमधूमवत्॥
साम्प्रतं शोकमग्नस्य हृदयं मे विलीयते। १६
मम दुर्गतिकालस्य वासराश्च धरन्ति मां॥
विद्धा मत्तो वियुज्यन्ते यामिन्या कीकसानि मे। १७
निद्राश्च न हि गच्छन्ति मद्दंष्टारः कदाचन॥

१८ अतिरिक्तबलेनैव वेशो मे परिवर्त्तितः।
चोलवक्त्रं यथा ग्रीवां स पीडयति मां तथा॥
१९ निक्षिप्तस्तेन पङ्के ऽहं धूलिभस्मसमो ऽभवं॥
२० त्वां प्रति रुदते मह्यं न ददासि त्वमुत्तरं।
तिष्ठन्तं तव साक्षान्मां वीक्षषे स्तब्धलोचनः॥
२१ त्वं स्वभावान्तरं गत्वा मयि निष्करुणो ऽभवः।
निजबाहुबलेनैव हिंसितुं माञ्च चेष्टसे॥
२२ गन्धवाहं समारोप्य मां वाहयसि वेगतः।
आलीनमवसन्नञ्च साध्वसेन करोषि मां॥
२३ अहं जानामि यत् त्वं मां मरणं गमयिष्यसि।
सकलैरेव जीवद्भिस्तद् गन्तव्यं सभागृहं॥
२४ अस्तु किं गृहभङ्गे न लोकैर्विस्तार्य्यते करः।
निजसम्पत्तिनाशे वा विलापं न करोति कः॥
२५ मया दुर्गतलोकेषु किं नाक्रियत रोदनं।
दरिद्रस्य निमित्तं किं नाशोचद्धृदयं मम॥
२६ प्रत्यैक्षे मङ्गलं तस्मात् किन्त्वनिष्टमुपस्थितं।
दीप्तेराकाङ्क्षयातिष्ठं किन्तु ध्वान्तमुपस्थितं॥
२७ प्रज्वलन्ति मदन्त्राणि शान्तिं न प्राप्नुवन्ति हि।
मम दुर्गतिकालस्य दिवसा मामुपागताः॥
२८ परिभ्राम्याम्यहं म्लानो न च सूर्य्यस्य तापतः।
समुत्थाय समाजे ऽपि कुर्व्वे ऽहं परिदेवनं॥
२९ क्रोष्टूनामभवं भ्राता सखाहञ्चोष्ट्रपक्षिणां॥
३० कृष्णीभूतञ्च मे चर्म्म दह्यन्ते ऽस्थीनि तापतः।
३१ वीणा मे युज्यते शोकै वंशी मे रुदतां स्वरैः॥

३१ एकत्रिंशोऽध्यायः।

१ आयूबस्य कर्म्मणां निर्दोषत्वं १३ दासान् प्रति तस्य निर्दोषत्वं १६ दरिद्रान् प्रति तस्य निर्दोषता २४ अन्येषु नानाकर्म्मसु निर्दोषत्वं ३५ ईश्वरीयविचारप्रार्थनञ्च।

१ सार्द्धं स्वकीयचक्षुर्भ्यां नियमं कृतवानहं।
कुतो हेतोरहं कुर्य्यां तरुणीं प्रति वीक्षणं॥

कोऽंशो दीयत ईशेन प्रांशुस्थाननिवासिना। २
कं प्रयच्छति वा दायम् ऊर्द्धस्थः सर्व्वशक्तिमान्॥
किं न दुष्टाय दुर्भाग्यं पापकृद्भ्यश्च निग्रहं॥ ३
मामकीनानि वर्त्मानि परिपश्यति किं न सः। ४
सर्व्वे मे पादविक्षेपा गण्यन्ते किं न तेन च॥
किमहं वितथाचारी लघुपादश्छलाय वा॥ ५
धर्म्ममापनदण्डेन तोलनं मे विधीयतां। ६
तदा मदीयशुद्धत्वम् ईश्वरोऽवगमिष्यति॥
मदीयपादविक्षेपश्चेत् सन्मार्गाद् वहिर्गतः॥ ७
मदीयं हृदयं जातं नेत्रयोरनुगामि वा।
यदि मामकहस्ते वा कलङ्कस्य मलं लगेत्॥
तर्हि मयोप्यतां वीजं फलञ्चान्येन भुज्यतां। ८
यावन्तश्च प्ररोहा मे तेषामुन्मूलनं भवेत्॥
कदाचिद् यदि मे चित्तं विलुब्धं परयोषिति। ९
समीपवासिनो द्वारे चेत् प्रतीक्षा कृता मया॥
तर्ह्यन्यस्य निमित्तं मे भार्य्या पिंष्याद्धि पेषिणीं। १०
अपरै मानवैस्तस्याः सम्भोगश्च विधीयतां॥
यस्मात् तद् गुरु दुष्कर्म्म शास्यं तद् दण्डनायकैः॥ ११
यस्माद् तद् आश्रयध्वंसि संहारस्पर्शि दाहनं। १२
मामकीनञ्च सर्व्वस्वं तेनोदमूलयिष्यत॥
मम दासेन दास्या वा विसंवादे मया सह। १३
कृते यदि तयो र्धर्म्मः कदाचापकृतो मया॥
तर्हीश्वरो यदोत्थाता किं करिष्याम्यहं तदा। १४
कृते तेनानुसन्धाने वा दास्यामि किमुत्तरं॥
जरायौ येन सृष्टो ऽहं स्रष्टा दासस्य किं न सः। १५
एकस्मिन् गर्भकोषे किमावां निर्म्मितवान् न सः॥
दरिद्राणामभीष्टं चेत् प्रतिषिद्धं भवेन्मया। १६
लोचने विधवायाश्चेत् कृते निस्तेजसी मया॥
मदीयाहारभागश्चेद् भुक्त एकाकिना मया। १७
तातहीनेन बालेन चेत्तस्यांशो न भक्षितः॥
(मया यौवनमारभ्य तातेनेव स पालितः। १८

मातृगर्भाशयादेव रक्षिता विधवा मया ॥)
१९ नष्टकल्पे मनुष्ये च हीनवस्त्रे निरीक्षिते ।
अप्राप्ताच्छादने दृष्टे वा दरिद्रे जने मया ॥
२० तदीयकटिदेशस्य नाशीश्चेद् वर्त्तिता मयि ।
स चेन्मे मेषवत्सानां लोम्ना नोष्णीकृतो भवेत् ।
२१ मया धर्म्मसभायां वा स्वपक्षान् वीक्ष्य मानवान् ।
अनाथस्य विपक्षं चेत् कदाप्युत्तोलितः करः ॥
२२ तर्हि पतेत् मम स्कन्धो वियुक्तो बाहुमूलतः ।
प्रगण्डस्यास्थि चारभ्य मे भुजो ऽपि प्रभज्यतां ॥
२३ यतस्तदीश्वरस्यैव भेतव्यं निग्रहान्मया ।
तस्य राजप्रतापस्तु मया सोढुं न शक्यते ॥
२४ यदि विश्वासभूमिं मे जातरूपं मया कृतं ।
त्वं मदीयाश्रयो ऽसीति हेम्ने चेत् कथितं मया ।
२५ निजैश्वर्य्यमहत्त्वाद् वा यदि हर्षमहं गतः ।
हस्तस्थितधनेभ्यो वा चेन्मे जाता प्रफुल्लता ॥
२६ भानौ दृष्टे मया दीप्ते किंवा शुभ्रगतौ विधौ ।
२७ भ्रान्ते मे हृदि चेद् गुप्तं पाणिरास्येन चुम्बितः ॥
२८ तर्हि मे सोऽपराधोऽपि दण्ड्यो धर्म्माधिकारिभिः ।
उपरिस्थितमीशञ्च प्रति विश्वासघात्यहं ॥
२९ द्वेषिणो वा विनाशं किम् अभिनन्दितवानहं ।
तस्मिंश्चामङ्गलापन्ने जाता किं मे प्रफुल्लता ॥
३० नानुज्ञातं मया तत्र मद्वक्त्रस्यापि पातकं ।
द्वेषिणः प्राणनाशाय शापेन प्रार्थनञ्च वा ॥
३१ अतृप्तं तस्य मांसेन मानवं को निदर्शयेत् ।
मद्गेहस्यान्तरङ्गैः किं वच एतन्न भाषितं ॥
३२ विदेशी मानवो मार्गे नाकरोद् रात्रियापनं ।
पथिकानां कृते यस्मान्मया द्वारममुच्यत ॥
३३ आदमवत् स्वदोषो वा किं समाच्छादितो मया ।
मामकीनापराधश्च गोपितो निजवक्षसि ॥
३४ सत्यमुद्विग्नता जाता महामानुष्यकान्मम ।
भयोत्पादीकृतश्चाहं गोत्राणामपमानतः ।

मौनीभूय न गच्छामि सभास्थानमहं पुनः॥
हाहा किं मम वाक्यानां श्रोता कोऽपि न विद्यते। ३५
इदं पश्यत मे पत्रं मया हस्ताक्षरीकृतं॥ ३६
एतस्यैवोत्तरं मह्यं प्रयच्छेत् सर्व्वशक्तिमान्।
रचयेत् प्रतिवादी मे स्वकीयामपि पत्रिकां॥
स्कन्धेनैव तदाहं तां धारयिष्यामि वस्त्रवत्। ३७
मामकीनोत्तमाङ्गे वा तां भंत्स्यामि किरीटवत्॥
मत्पादन्याससङ्ख्याञ्च स मया ज्ञापयिष्यते। ३८
उपस्थास्यामि तञ्चाहं तदानीन्तु नरेन्द्रवत्॥
मद्विरुद्धं मम क्षेत्रम् आर्त्तनादं करोति चेत्। ३९
तस्य सीतासमूहश्च यदि क्रन्दति योगतः।
अदत्त्वा रजतं वा चेत् तत्फलं भक्षितं मया। ४०
चेद्वा वियोजिताः प्राणा मया तदधिकारिणः॥
तर्हि गोधूमभूमि र्मे कण्टकानां वनं भवेत्। ४१
विषवृक्षाः प्ररोहन्तु यवानाञ्च स्थले तथा॥
इत्यायूबस्य वाक्यानि समाप्तानि॥

---

३२ द्वात्रिंशोऽध्यायः।

१ इलीऊमधि कथनं ६ तस्य प्रस्तावस्यारम्भः ११ आयूबं तस्य बन्धूंश्च प्रति इलीहोस्तिरस्कारः।

अनन्तरं ते त्रयो मानवा आयूबस्य वाक्यं प्रतिवक्तुं तत्यजुः, यतो हेतो १
र्निजदृष्टौ स पुण्यवान्। तस्माद् अरामवंशीयो बूषीयवारखेलस्य सुत २
इलीऊः क्रोधेन प्रजज्वाल। आयूब ईश्वरस्य गोचरे स्वं पुण्यवन्तम्
अज्ञासीत् तस्मात् तं प्रति क्रोधेन प्रजज्वाल। आयूबस्य त्रयो बन्धवस्तस्य ३
वचनस्योत्तरं दातुं न पारयन्तस्तं दोषिणमकुर्व्वन् अतः कारणात् तान्
प्रति क्रोधेन प्रजज्वाल। इलीहोर्वयसस्तेषां सर्व्वेषां वयांस्यधिकान्यासन् ४
तत्कारणात् स आयूबस्य वाक्यानां समाप्तिं यावत् प्रतीक्षाञ्चक्रे। किन्तु ५
तेषां त्रयाणां वदनानि निरुत्तराणि दृष्ट्वा स महाक्रुद्धो बभूव।
अतः स बूषीयवारखेलस्य पुत्र इलीऊरित्थं प्रतिजगाद। ६
अहमल्पवयस्को ऽस्मि यूयं सर्व्वे वयोऽधिकाः।

तस्माद् विलम्ब्य भीत्वा च युष्मान् मे नावदं मतिं ॥
७ मयोक्तं वासरा ब्रूयु र्वर्षश्रेणी धियं दिशेत् ॥
८ तथाप्यात्मैव मर्त्त्यानाम् अन्तरं ह्यधितिष्ठति ।
सर्व्वशक्तिमतः श्वासो ज्ञानिनश्च करोति तान् ॥
९ न सर्व्वे प्रमुखा विज्ञा वृद्धा वा सुविचारकाः ॥
१० अतो हेतोरहं वच्मि मे वाक्यं श्रूयतां त्वया ।
तर्हि निजानुमानं यत् तन्मयापि गदिष्यते ॥
११ पश्यताहं व उक्तीनां समाप्तिं प्रत्यपालयं ।
आकर्षयन् विचारान् वः शब्दान्वेषणकारिणां ॥
१२ आयूबस्य वचःखण्डी तत्प्रत्युत्तरदायकः ।
कोऽपि नास्तीति सन्दृष्टं मया युष्मान् विलोक्य वै ॥
१३ युष्माभि र्नोच्यतामेतत् ज्ञानप्राप्ता नरा वयं ।
ईश्वरस्तं निराकर्त्तुं शक्नुयान्न च मानवः ॥
१४ तेन मत्प्रतिकूलं न रचिता वाक्यवाहिनी ।
नाहं युष्मद्वचोभि र्वा प्रतिवच्यामि तं किल ।
१५ विस्मिता अभवन्नेते न ददत्युत्तरं पुनः ।
वचनान्यपि सर्व्वाणि तान् त्यक्तापगतानि हि ।
१६ अधिकं किं प्रतीक्षिष्ये सञ्जाता नीरवा अमी ।
मौनीभूताश्च तिष्ठन्ति न ददत्युत्तरं पुनः ॥
१७ अतो ऽहमपि दास्यामि स्वपर्य्यायत उत्तरं ।
मामकीनानुमानं यत् तन्मयापि गदिष्यते ॥
१८ यस्मात् पूर्णस्य वाक्यै र्मे पीड्यते ऽन्तरमात्मना ॥
१९ रुद्धवक्त्रसुराया हि तुल्यं पश्य ममान्तरं ।
कुतूनां भिद्यमानानां वा नवमद्यतेजसा ॥
२० भाषिष्ये ऽहं ततः शान्ति र्मम नूनं जनिष्यते ।
मोचयित्वाधरौ वाक्यं मया चोदीरयिष्यते ॥
२१ पक्षपातं मनुष्यस्य न करिष्यामि कस्यचित् ।
स्तुतिवादञ्च मर्त्त्यस्य नानुष्ठास्यामि कर्हिचित् ।
२२ स्तुतिवादमनुष्ठातुं यतो हेतो र्न वेद्म्यहं ।
अनुष्ठिते च मे स्रष्टा सद्यो मां नाशयिष्यति ॥

३३ त्रयस्त्रिंशोऽध्यायः।

१ ईश्वरस्य प्रतिनिधीभूय इलीहूना तेषां दोषप्रकाशनं १९ शास्तेरभिप्रायप्रकाशनं २९ आयूबं प्रति मन्त्रणा च।

हे आयूब त्वयेदानीं श्रूयतां वचनं मम। १
मामकीनानि वाक्यानि चानुश्रोतुं त्वमर्हसि॥
पश्य मे वदनं मुक्तं वक्त्रे जिह्वा प्रभाषते॥ २
मम चित्तस्य सारल्याद् उत्पद्यन्ते वचांसि मे। ३
यज्ज्ञातञ्चाधराभ्यां मे शुद्धं ताभ्यां तदुच्यते॥
ईश्वरस्य य आत्मास्ति तेनैवाहं विनिर्म्मितः। ४
सर्व्वशक्तिमतः श्वासः सजीवञ्च करोति मां॥
त्वया चेच्छक्यते तर्हि दीयतां मह्यमुत्तरं। ५
सुसज्जीभूय मत्साक्षात् त्वं प्रत्युत्तिष्ठ वीरवत्॥
पश्य वाक्यानुसारात् त ईशस्य प्रतिभूरहं। ६
तच्छितो मृत्तिकाखण्डश्चाहमपि भवामि हि॥
पश्य भयानकत्वं मे त्वां न सन्त्रासयिष्यति। ७
मामकीनगुरुत्वञ्च भारस्ते न भविष्यति॥
त्वयोक्तं मम कर्णे ऽहं गिरमेतां न्यशामयं॥ ८
शुचिर्निरपराधो ऽहं निर्म्मलो दोषवर्जितः॥ ९
पश्य मद्वैपरीत्येन छिद्रान् मृगयते स मे। १०
स्वकीयद्वेषिणञ्चैव स हि मामभिमन्यते॥
यन्त्रे मे चरणौ बद्धा सर्व्वां रक्षति मे गतिं॥ ११
पश्यैतेन सदोषस्त्वं दातव्यञ्च मयोत्तरं। १२
यतो हेतो नरादीशो माहात्म्येनातिरिच्यते॥
तेन सार्द्धं विवादं त्वं किमर्थमनुतिष्ठसि। १३
सर्व्वेषां स्वीयवाक्यानां नोच्यन्ते तेन हेतवः।
यस्माद् ईशेन वक्तव्यम् एकक्रत्वो निगद्यते। १४
न चानुष्ठीयते तस्य द्वितीयं वारमीक्षणं॥
स्वप्ने वा दर्शने नैशे निद्रा घोरतरा यदा। १५
पतेन्मर्त्त्येषु शय्यायां सुषुप्तिं गतवत्सु हि॥
तदा तेन मनुष्याणां निर्गलीक्रियते श्रुतिः। १६

तेषां हितोपदेशस्य मुद्राङ्कञ्च विधीयते ॥
१७ स हि दुष्कर्म्मतो मर्त्त्यं निवर्त्तयितुमिच्छति ।
मानवाच्च तिरस्कर्त्तुम् अहङ्कारं विचेष्टते ॥
१८ तस्यात्मानं विनाशाच्च रक्षितुं सोऽभिवाञ्छति ।
शूलस्याग्रेण विद्धत्वात् तत्प्राणान् त्रायते च सः ॥
१९ स्वशय्यायां यदा मर्त्त्यो दण्ड्यते वेदनातुरः ।
तदीयास्थिषु सङ्ग्रामो जायते च निरन्तरः ॥
२० भोजनं गर्ह्यते प्राणैरिष्टमन्नञ्च देहिना ॥
२१ क्षीयमाणञ्च तन्मांसम् अदृश्यत्वं प्रगच्छति ।
अदृश्यानि पुरास्थीनि विहतानि भवन्ति च ॥
२२ प्राणा गर्त्तमुपायान्ति प्रेतलोकञ्च चेतना ॥
२३ तदा चेद् विद्यते दूतो मध्यस्थस्तस्य रक्षकः ।
सहस्रस्याग्रिमो मर्त्त्यं धर्म्मं ज्ञापयितुं क्षमः ॥
२४ तर्हीशेन प्रसन्नेन वाक्यमेतद् गदिष्यते ।
मुञ्चेमं पतनाद् गर्त्ते प्रायश्चित्तं मयार्जितं ॥
२५ ततः शोभिष्यते तस्य पललं शैशवादपि ।
स च यौवनकालस्य तेजः पुनः समाप्स्यति ॥
२६ ईश्वरञ्च समुद्दिश्य प्रार्थनां स करिष्यति ।
तेनानुगृह्य सानन्दो निजास्यं दर्शयिष्यते ।
स्वपुण्यञ्च मनुष्याय तेन दायिष्यते पुनः ॥
२७ मानवांश्च समुद्दिश्य तदा गायन् स वक्ष्यति ।
अपराधमकुर्व्वेऽहं सरलञ्च व्यकारयं ।
तस्य तुल्यप्रमाणञ्च नाहमन्वभुजं फलं ॥
२८ यतोऽधोगमनाद् गर्त्ते प्राणान् स मुक्तवान् मम ।
मामकीनश्च जीवात्मा भुंक्त आलोकदर्शनं ॥
२९ पश्यैतानि करोतीशो द्विस्त्रि र्वा मानवं प्रति ।
३० परावर्त्तयितुं तस्य प्राणान् गर्त्तावरोहणात् ॥
जीवतां तञ्च दीपेन दीपयितुं स चेष्टते ॥
३१ हे आयूब मनोयोगं विधाय शृणु मे वचः ।
मौनीभव मया तर्हि वक्तव्यं निगदिष्यते ॥
३२ उत्तरं यदि जानासि तर्हि देहि म उत्तरं ।

प्रभाषस्व यता मह्यं तव पुण्यं हि रोचते॥
उत्तरं चेन्न जानासि तर्ह्याकर्णय मे वचः। २२
मौनीभव तदाहं त्वां शिक्षयिष्यामि विज्ञतां॥

---

३४ चतुस्त्रिंशोऽध्यायः।

१ इलीहूना परमेश्वरस्य निर्दोषत्वकरणं आयूबस्य दोषित्वकरणं २० पापिनो जनान् प्रतीश्वरीयो दण्डः २९ तस्य तात्पर्य्यं ३१ आयूबं प्रति मन्त्रणा च।

अनन्तरम् इलीहूरपरं वक्तुमारेभे। १
हे विद्वांसो मदीयानि वाक्यानि श्रोतुमर्हथ। २
हे विज्ञा उपदेशो मे युष्माभिश्च निशम्यतां॥
यतः कर्णेन वाक्यानां क्रियते हि परीक्षणं। ३
भक्ष्यस्याखादनं यद्वत् तालुनैव विधीयते॥
ततो हेतो विचाराय प्रवर्त्तमहि साम्प्रतं। ४
यच्च भद्रं तदस्माभिः सम्यङ्निश्चीयतां मिथः॥
आयूब उक्तवान् एतत् अहमेवास्मि पुण्यवान्। ५
मामकीनश्च यो धर्म्मः स ईशेनापसारितः॥
भवितव्यं मया तस्मात् स्वधर्म्मे ऽनृतवादिना। ६
दुष्टबाणेन विद्धो ऽहम् अपराधेन वर्जितः॥
आयूबस्य समानः को दुर्वाक्यं जलवत् पिबन्॥ ७
दुष्क्रियाकारिभिः सार्द्धं सखित्वञ्च समाचरन्। ८
धर्म्महीनमनुष्यैश्च सहगामित्वमाश्रयन्॥
ईश्वरस्यानुरागेण किं नरस्य भवेत् फलं। ९
आयूबेन किमेतादृग् वाक्यं नोदीरितं पुरा॥
तस्मात् हे ज्ञानिनो यूयं श्रोतुमर्हथ मे वचः। १०
ईशस्य दुष्कृति र्नास्ति नाधर्म्मी सर्व्वशक्तिमान्॥
यस्मात् तेन मनुष्याय कर्म्मणो दीयते फलं। ११
नरस्य यादृगाचारो दीयते तादृशी गतिः॥
सत्यमेव वदाम्येतत् नैवास्तीशस्य दुष्कृतिः। १२
न करोति च धर्म्मस्य विकारं सर्व्वशक्तिमान्॥

१३ क्षौणिः केनार्पिता तस्मिन् कृत्स्नं कोऽस्थापयज्जगत्॥
१४ तेन चेन्निजसन्तोषे प्रगत्यैकाग्रचित्तता।
निजात्मा प्राणवायुश्च स्वं प्रत्याहृष्यते पुनः॥
१५ म्रियन्ते युगपत् तर्हि सकला एव जन्मिनः।
पुनर्व्वारं मनुष्यश्च धूलौ लीनः प्रजायते॥
१६ तुभ्यं चेद् रोचते बुद्धिस्तर्ह्येतत् श्रूयतां त्वया।
मामकीनोपदेशस्य निनादे चावधीयतां॥
१७ धर्म्मं यो द्वेष्टि तेनैव शासनं किं प्रयुज्यते।
त्वया दूषयितव्यः किं धार्म्मिको वा पराक्रमी॥
१८ नारकिन्निति वाक्यं किं राजानं कोऽपि भाषते।
यूयं दुष्टा इदं वा कः प्रमुखान् वक्ति मानवान्॥
१९ ईश्वरस्तु नरेन्द्राणां पक्षपातं करोति न।
धनिनश्च दरिद्रेभ्यो नाधिकं सोऽभिवीक्षते।
यस्मात् तस्यैव हस्ताभ्यां सकलास्ते विनिर्म्मिताः॥
२० ते क्षणेन मरिष्यन्ति रात्रिमध्य उपस्थिते।
चालिताश्च गमिष्यन्ति विनाशं सकलाः प्रजाः।
करादन्येन दण्डेन बली दूरीकरिष्यते॥
२१ यस्मान्नरस्य मार्गेषु दृष्टिरीशस्य वर्त्तते।
तदीयपादविक्षेपान् सर्व्वानेव स पश्यति।
२२ दुष्क्रियाकारिणो यत्र प्रच्छन्ना भवितुं क्षमाः।
तादृशं तिमिरं किं वा मृत्युच्छाया न विद्यते॥
२३ विचारार्थञ्च येनैव गन्तव्यमीश्वरान्तिकं।
न करोति चिरं चिन्तां तं मनुष्यमधीश्वरः॥
२४ अकृत्वा चानुसन्धानं पराक्रान्तान् भनक्ति सः।
स तेषां परिवर्त्ते च स्थापयत्यपरान् जनान्॥
२५ यतो हेतोः क्रियास्तेषां तस्यैव ज्ञानगोचराः।
तस्मात् स क्षणदायां तान् समुत्पाद्य क्षुणत्ति हि॥
२६ दुर्व्वृत्तानिव तान् सर्व्वान् दृश्ये स्थाने निहन्ति च॥
२७ यस्मात् तस्यानुगामित्वात् ते सञ्जाताः पराङ्मुखाः।
सकलान् तस्य मार्गांश्च प्रति भूत्वाविवेचकाः॥
२८ आर्त्तनादं दरिद्राणां तस्य प्रत्यक्षमानयन्।

दुर्गतानाञ्च चीत्कारं तस्यैव श्रोत्रगोचरं ॥
शान्तौ तेन प्रदत्तायाम् उपरोधं करोति कः। १९
समाच्छादितवक्त्रां वा कस्तं शक्नोति वीक्षितुं।
देशं प्रति नरैकं वा तेन तत् क्रियते हठात् ॥
नो चेत् प्राप्स्यति राजत्वं मानवो धर्म्मवर्ज्जितः। ३०
प्रजोन्मायस्वरूपाश्च भविष्यन्ति प्रजेश्वराः ॥
तस्माद् ईश्वरमुद्दिश्य मर्त्त्यो ब्रूयाद् इदं वचः। ३१
शास्ति र्लब्धा मया पापं पुन र्नहि करिष्यते ॥
यन्मे दृष्टे र्बहिर्भूतं मां शिक्षय त्वमेव तत्। ३२
यद्यहं कृतवान् दोषं करिष्यामि पुन र्नहि ॥
फलं किं तेन दातव्यं त्वदीयेच्छानुसारतः। ३३
अतुष्टो ऽसि न तुष्टि र्मे तव तुष्टि र्गरीयसी।
भद्रं यदभिजानासि तत् प्रभाषितुमर्हसि ॥
मम पक्षे वदिष्यन्ति मानवाः सुविवेचकाः। ३४
यो मनुष्यश्च मेधावी स ग्रहीष्यति मे वचः ॥
न ज्ञानाद् ब्रूत आयूबो न सुयुक्तास्तदुक्तयः ॥ ३५
अहं वाञ्छामि साद्यन्तम् आयूबस्य परीक्षणं। ३६
यस्माद् दुर्वृत्तलोकानां पक्षे स प्रत्यभाषत ॥
नो चेत् स धर्म्मलोपेन स्वपापं वर्द्धयिष्यति। ३७
अस्मन्मध्ये ऽपि दर्पेण दास्यते करतालिकां।
ईश्वरस्य विरुद्धञ्च बहुवाक्यानि वक्ष्यति ॥

---

३५ पञ्चत्रिंशोऽध्यायः।

१ परमेश्वरस्य महिम्नः कथनं ५ मानुषस्य धर्म्मेणेश्वरस्य लाभाभावो गर्व्विखेदिमनुष्याणां पापमार्ज्जनानधिकारित्वञ्च।

अनन्तरम् इलीहूः पुनरुवाच। १
ईश्वरस्यापि धर्म्माद्धि मम धर्म्मो ऽतिरिच्यते। २
त्वया किं प्रकृतं बुद्ध्वा वाक्यमेतदुदीर्य्यते ॥
किं लभ्यं तव धर्म्मेण तज्जिज्ञासुश्च पृच्छसि। ३
पापस्याचरणात् तेन किं फलं भविता मम ॥

४ तुभ्यं ते बान्धवेभ्यश्च प्रदास्याम्यहमुत्तरं॥
५ नभ उद्दिश्य वीक्षस्व पश्य खं त्वत्त उन्नतं।
६ त्वया चेत् क्रियते पापं का क्षतिस्तस्य जायते।
बहुभिस्ते ऽपराधैश्च का हानिस्तस्य जायते॥
७ धार्म्मिकेण त्वया वापि तस्मै किं वितरिष्यते।
स त्वदीयकराभ्यां कं वोपहारं ग्रहीष्यति॥
८ त्वत्तुल्याय मनुष्याय फलदा तव दुष्टता।
मानवस्य सुतायापि फलदा तव पुण्यता॥
९ दौरात्म्यस्य बहुत्वेन लोकाः कुर्व्वन्ति रोदनं।
महतां बाहुभाराच्च कुर्व्वते परिदेवनं॥
१० किन्तु कोऽपि न वक्तीदं कुत्र स्रष्टा म ईश्वरः।
यामिन्या अपि मध्ये यः सद्गीतानि प्रयच्छति॥
११ भूचरेभ्यः खगेभ्यश्च ज्ञानिनो ऽस्मान् करोति च॥
१२ न शृणोति स क्रन्दत्सु तेषु दर्पेण पापिनां॥
१३ यस्माद् व्यलीकतामीशो न कदाच ग्रहीष्यति।
सर्व्वशक्तिमता तत्र दर्शनं न करिष्यते॥
१४ मया द्रष्टुं न शक्यः स इति त्वं भाषसे कुतः।
विवादस्तस्य प्रत्यक्षः कुरु तस्य प्रतीक्षणं॥
१५ अधुनापि फलं तेन सकोपेन न दीयते।
तस्मादेव महापापं तेन किं नावगम्यते॥
१६ आयूबस्य तु वक्त्रेण वाष्पीयं वच ईर्य्यते।
ज्ञानहीनतया शब्दान् बहून् राशीकरोति सः॥

---

३६ षट्त्रिंशोऽध्यायः।

१ ईश्वरस्य सर्व्वकर्म्मसु तस्य सत्यत्वम् आयूबस्य कर्म्मसु दोषकथनं २४ ईश्वरीयं सर्व्वकर्म्म विवेच्यं।

१ अनन्तरम् इलीहूः पुनरुवाच।
२ प्रतीक्षस्व क्षणैकं मां त्वां शिक्षयितुमिच्छुकं।
अधुनापीश्वरार्थं मे प्रतिवादो ऽवशिष्यते॥
३ ज्ञानं दूरान्मयानीय स्रष्टा शोधयिष्यते॥

नूनं मदीयवाक्यानि व्यलीकानि न सन्ति हि। ४
पूर्णज्ञानो मनुष्यो ऽत्र त्वया साईंश्च विद्यते॥
ईशः पश्य पराक्रान्तो न च निन्दति कञ्चन। ५
प्राज्ञतायाः प्रभावेन स चातीव महाबलः॥
न जीवयति दुष्टं स स शोधयति दुःखिनः। ६
धार्म्मिकाच्च मनुष्यात् स स्वनेत्रे नापकर्षति। ७
नृपैः सिंहासनस्थैश्च सङ्गिनी तस्य लोचने।
उपवेश्य चिरार्थं तान् स करोति समुन्नतान्॥
यदा शृङ्खलबद्धान् तान् धृतांश्च क्लेशरज्जुभिः। ८
स बोधयति दुष्कर्म्म तेषां दोषांश्च गर्व्विणां। ९
उपदेशाय तेषाञ्च मोचयित्वा ध्वनिग्रहं। १०
दुराचारान्निवर्त्तध्वमिति तान् अभिभाषते॥
तदा वाक्यं गृहीत्वा तैः स्वीकृते तस्य सेवने। ११
सुस्थित्या यापयिष्यन्ते यावज्जीवं दिनानि हि।
वत्सरान् विहरिष्यन्ति सुखभोगेन ते तथा॥
आज्ञायाञ्चागृहीतायां प्रपतिष्यन्ति तेऽसिना। १२
परलोकञ्च यास्यन्ति ज्ञानहीनत्वकारणात्॥
धर्म्मवर्ज्जितचित्तैस्तु लोकैः कोपः प्रचीयते। १३
ईश्वरेण निबद्धास्ते हाहाकारं न कुर्व्वते॥
तेषां प्राणवियोगो ऽपि यौवने सम्भविष्यति। १४
भ्रष्टैरिव मनुष्यैस्तै र्जीवोत्सर्गः करिष्यते॥
ईश्वरो दुर्दशाकाल उद्धरिष्यति दुर्गतं। १५
स दौरात्म्यस्य मध्ये ऽपि तच्छ्रोत्रं मोचयिष्यति॥
विस्तीर्णं सङ्कटात् तेन स्थानं त्वय्यपि तारिते। १६
न भविष्यति सङ्कीर्णो मार्गस्ते पादयोरधः।
तव भोजनमञ्चोऽपि मेदोभारेण नंस्यति॥
किन्तु त्वं यदि दुष्टस्य विचारेणैव तृप्यसि। १७
विचारात् तर्हि दण्डाज्ञा न वियोज्या भविष्यति॥
तस्मात् त्वां तस्य रुष्टस्य प्रहारो मावतारयेत्। १८
प्रायश्चित्तस्य बाहुल्यम् अत्र त्वाञ्च न वञ्चयेत्॥
स किं ते मंस्यते वित्तं स सुवर्णं न मन्यते। १९

नैश्वर्य्यस्यापरं कञ्चिद् उपायं बलवर्द्धकं॥
२० रात्रिं मा काङ्क्ष लोकानां स्थानभ्रष्टत्वकारिणीं।
२१ सावधानो भवाधर्म्मं प्रति मा वर्त्ततां मनः।
यस्मात् स रोचते तुभ्यम् अधिकं दुःखभोगतः॥
२२ ईशः पश्य बलेनोच्चः शासने तस्य कः समः॥
२३ कस्तस्याचरणं तस्य साक्षाद् आविष्करिष्यति।
कृतो ऽन्यायस्त्वया वाक्यमिदं कस्तं गदिष्यति॥
२४ स्मर तस्य क्रियोच्चास्ति कीर्त्तिता मानवैश्च सा॥
२५ सर्व्वे पश्यन्ति तां मर्त्या दूरात् तां वीक्षते नरः॥
२६ पश्येशस्योच्छ्रयः कीदृक् सो ऽस्माभि र्नावगम्यते।
तस्य वत्सरसङ्ख्यापि विनिश्चेतुं न शक्यते॥
२७ आकृष्यन्ते यदा तेन तोयानां सूक्ष्मविन्दवः।
ते क्षरन्ति तदा वर्षं क्वाथवत् तेन निर्म्मितं॥
२८ उत्सृजन्ति हि मेघास्तं सिञ्चन्तो मानवान् बहून्॥
२९ नीलाभ्राणां वितानं किं बोद्धुं केनापि शक्यते।
आवासस्य तदीयस्य गर्ज्जनं को ऽवगच्छति॥
३० पश्य तस्योपरि स्वीया दीप्तिस्तेन विकीर्य्यते।
पारावारस्य मूलेञ्च स समाच्छाद्यते पुनः॥
३१ यस्माद् एतेन लोकानां विचारं विदधाति सः।
भक्ष्यद्रव्याणि वा तेभ्यो बाहुल्येन प्रयच्छति॥
३२ विद्युताच्छाद्य हस्तौ स रिपवे प्रहिणोति तां॥
३३ तमाख्याति ध्वनिस्तस्य तमायान्तञ्च गोव्रजः॥

---

३७ सप्तत्रिंशो ऽध्यायः।

१ झञ्झावर्णनं ६ हिमवर्णनं ९ दक्षिणवायुवर्णनं ११ विद्युद्वर्णनं १४ मेघादिवर्णनञ्च।

१ एतच्छब्देन मे चित्तं कम्पित्वोत्पतति स्थलात्।
२ युष्माभिः श्रूयतां तस्य रवस्येदञ्च गर्ज्जनं।
श्रूयतां सिंहनादश्च निर्गतस्तस्य वक्त्रतः॥
३ गगनाधः स्थितं सर्व्वं स्थानं स प्रहिणोति तं।
पृथिव्यन्तानि यावच्च निजां प्रेषयति द्युतिं॥

नादो नर्द्दति तत्पश्चाद् गर्ज्जतो जयनादिनः॥ ४
प्रतिनादितनादेन तेन को न धरिष्यते॥
तेन स्वकीयनादेन स्वाश्चर्य्यं गर्ज्जतीश्वरः। ५
स महाकर्म्मकृत् तत्र किं ज्ञातुं शक्नुमो वयं॥
भूमौ पतेति तेनैव हिमानीं प्रति गद्यते। ६
शीकरस्यातिवृष्टिश्च प्रति तच्छक्तिसूचकां॥
सर्व्वलोकस्य हस्तञ्च मुद्रितं स करोति हि। ७
तस्माज्जानन्तु तं सर्व्वे मानवास्तेन निर्म्मिताः॥
पशवो ऽप्याश्रयं प्राप्य तिष्ठन्ति स्वगुहागृहे॥ ८
झञ्झागच्छत्यवाचीत उदीच्याः शीतमेति च। ९
ईश्वरस्यैव निःश्वासाज्जायते हिमसंहतिः। १०
सलिलानाञ्च विस्तारो याति सङ्कीर्णतां तदा॥
ईशेनोदकभारोऽपि वारिवाहे समर्प्यते। ११
तस्य तडित्त्वतां माला पुनस्तेन विकीर्य्यते॥
रथवत् सा च तस्यैव चालनात् परिवर्त्तते। १२
तस्मात् तैरपि कर्त्तव्यं यद्यत् तस्य निदेशतः।
तत् सर्व्वं कर्म्म मेदिन्या मण्डले परिसाध्यते॥
दण्डार्थं वा स्वदेशार्थं वा हितार्थं निरूपितं॥ १३
आयूब त्वमिदं शृण्वन् मनसा भव सुस्थिरः। १४
ईश्वरस्य च कर्म्माणि स्वाश्चर्य्याणि विचिन्तय॥
मेघान् प्रतीश्वरस्याज्ञा बोद्धुं किं शक्यते त्वया। १५
किं तदीयपयोदस्य कृतं वा तेन दीपनं॥
नीलाभ्राणां वितानं वा किं बोद्धुं शक्यते त्वया। १६
सिद्धज्ञानविशिष्टस्य कर्म्माण्यत्यद्भुतानि वा॥
क्षित्यां सन्नीकृतायाञ्च तेन दक्षिणवायुतः। १७
कथमुष्णानि जायन्ते त्वदीयवसनानि वा॥
सिक्तधातुमयादर्श इव सम्यक् सुसंहतं। १८
अन्तरीक्षं त्वया वा किं तेन सार्द्धं परिस्तृतं॥
वयं तं किं वदिष्यामस्तदस्मान् वक्तुमर्हसि। १९
असमर्थास्तमिस्राद्धि तन्निरूपयितुं वयं॥
अहं किञ्चित् प्रभाषिष्य इति किं को ऽपि तं वदेत्॥ २०

अहं नश्यामि मर्त्यः किम् एतत् तस्मै निवेदयेत्॥
२१ अदृश्या साम्प्रतं दीप्तिः स मेघान् दीपयिष्यति।
तदा वायुः समागत्य तान् सर्व्वान् लोपयिष्यति॥
२२ उत्तरस्या दिशः स्वर्णम् उत्पन्नमुपतिष्ठति।
तेजसा च भयार्हेण समाच्छाद्यत ईश्वरः॥
२३ सर्व्वशक्तिविशिष्टः स नास्माभिस्तोपलक्ष्यते।
प्रोच्चशक्तिविचारः स महाधर्म्मो न पीडकः॥
२४ अतो हेतो मनुष्याणां भीतिस्तस्मात् प्रजायते।
प्राज्ञचित्तस्य कस्यापि मुखं नो स व्यपेक्षते॥

---

३८ अष्टत्रिंशोऽध्यायः।

१ झञ्झावातादायूबं प्रतिश्रुय परमेश्वरेण स्वकर्म्मणां महिम्नायूबस्य दुर्ब्बलत्वप्रकाशनं १२ आलोककथनं १६ समुद्रकथनं १९ अरुणकथनं २२ हिमकथनं २४ विद्युत्कथनं २८ दृष्ट्यादिकथनं ३३ गगनस्य मेघानाञ्च कथनं।

१ अनन्तरं परमेश्वरो झञ्झावातमध्याद् आयूबं प्रत्युवाच।
२ उक्तिभि र्ज्ञानहीनाभि र्मन्त्रमन्धीकरोति कः॥
३ इदानीं कटिदेशस्ते बध्यतां वीरवत् त्वया।
परिप्रच्छामि यच्चाहं देहि मह्यं तदुत्तरं॥
४ स्थाप्यमाने मया क्षित्या मूले त्वं क्वाभवः पुरा।
यदि बुद्धिविशिष्टो ऽसि तर्हि मां ब्रूहि तद् वचः॥
५ तस्या मानञ्च निर्णीय केन तुभ्यं निवेदितं।
परिमापकसूत्रं कस्तस्याः पृष्ठे ततान वा॥
६ तस्याः सर्व्वे पदाधारा बद्धमूलाः क्व सन्ति वा।
तस्याः कोणस्थपाषाणं को वा निक्षिप्तवान् पुरा॥
७ प्रभातीयास्तदा तारा अन्वतिष्ठन् महोत्सवं।
ईशस्यापि सुताः सर्व्वे हर्षनादमकुर्व्वत॥
८ कः कपाटद्वयेनेव सिन्धुनाथं निरुद्धवान्।
प्रपतन् निरगच्छत् स तदानीं निजयोनितः॥
९ वस्त्रार्थञ्च मया तस्मै मेघजालमदीयत।
गात्रसंवेष्टनार्थञ्च रात्रिवासो व्यतीर्य्यत॥

पर्य्यच्छिद्यत सीमा च तदर्थं कल्पिता मया। १०
अर्गलञ्च कपाटे च मया संस्थाप्य तत्कृते॥
उक्तं स्थानमिदं प्राप्य त्वया नातिक्रमिष्यते। ११
अत्र स्थाने तवोर्म्मीणां दर्पः संवारयिष्यते॥
यावज्जीवं त्वया वा किं प्रत्यूषस्य विधिः कृतः। १२
अरुणाञ्च निजं स्थानं किं समाज्ञापितस्त्वया॥
तस्मात् सर्व्वसहायाः किं कोणान् सन्धार्य्य तौ करैः। १३
विधून्वन्तौ दुराचारान् तस्या मध्यान्निरस्यतः॥
सा मुद्राङ्कितलाक्षावद् यात्याकारान्तरं तदा। १४
तौ परिच्छदवत् शुभ्रौ तदानीञ्चोपतिष्ठतः॥
दुराचारमनुष्येभ्यः स्वदीपस्य निवार्य्यते। १५
ऊर्द्ध्वमुत्तोलितो बाहुस्तदानीञ्च प्रभज्यते॥
सागरस्योद्गमस्थानं प्रविष्टस्त्वं कदापि किं। १६
जलधेरन्तरागारे ऽकरो वा किं गमागमौ॥
कृतान्तस्य कपाटे किं विस्तृते तव सम्मुखे। १७
मृत्युध्वान्तस्य द्वारे वा किं समालोकिते त्वया॥
भुवनस्यापि विस्तारः किं त्वया समवेक्षितः। १८
यदि जानासि तत् सर्व्वं तर्हि मह्यं निवेदय॥
दीप्तिवासस्य मार्गः क्व तिमिरस्य स्थलं क्व वा॥ १९
किं तयोः परिसीमां ते समानेतुं क्षमो ऽसि वा। २०
किं तदीयनिवासस्य पद्धतीश्चावगच्छसि॥
अवगच्छसि यस्मात् त्वं तदानीं समजायथाः। २१
तावत्कीनदिनानाञ्च सङ्ख्यातीव गरीयसी॥
त्वं तुषारस्य कोषेषु किं प्रविष्टः कदाचन। २२
करकाधनशाला वा किं कदापीक्षितास्त्वया॥
सा तु दुर्गतिकालस्य निमित्तं रक्ष्यते मया। २३
सङ्ग्रामस्य नियुद्धस्य वा दिनार्थं हि सञ्चिता॥
यत्र निर्भिद्यते दीप्तिः क्व तत्स्थानस्य पद्धतिः। २४
पूर्व्वीयवायुना चौणेराक्रमस्यायनं क्व वा॥
धारासारनिमित्तञ्च प्रणालः केन कल्पितः। २५
केन गर्ज्जनयुक्तायाः सौदामिन्याश्च पद्धतिः॥

२६ तेन निर्जनदेशे ऽपि जायते तोयसेचनं।
उद्यते मरुभूमिश्च मानवेन विवर्ज्जिता॥
२७ शून्यं निरालयं स्थानञ्चाच्छ्या परितृप्यति।
तत्रत्या शस्ययोनिश्च प्राप्नोत्यङ्कुरभूषणं॥
२८ वृष्टेः किं विद्यते तातो जन्मदः को निशाम्बुनः॥
२९ कस्या गर्भे हिमं जातं कया सूतं खवारि वा॥
३० पाषाणस्यैव वेशेन क्वाद्यन्ते सलिलान्यपि।
अपान्नाथस्य दृश्याङ्गं दृढपाशैश्च बध्यते॥
३१ बन्धनं बहुलानां किं त्वं संयोजयितुं चमः।
मृगशीर्षस्य पाशान् वा त्वं हि किं मोचयिष्यसि॥
३२ त्वया वा किं प्रणीयन्ते स्वीयमासेषु राशयः।
सप्तर्षीणां सवंशानां त्वं वा किं पथदर्शकः॥
३३ त्वं किं ज्योतिषचक्रस्य सकलान् बुध्यसे विधीन्।
पृथिव्यां तस्य कर्तृत्वं किं समस्थाप्यत त्वया॥
३४ त्वं स्वकीयरवं मेघान् यावत् किं गमयिष्यसि।
इत्यञ्चाप्लावितोयेन किं समाच्छादयिष्यसे॥
३५ प्रतिष्ठन्ति त्वया वा किं प्रेषिताः शतकोटयः।
अस्मानुपस्थितान् पश्य वागियं तैः किमुच्यते॥
३६ ज्ञानं केनार्पितं चित्ते धीर्दत्ता केन वा हृदे॥
३७ ज्ञानात् तोयधराणां वा सङ्ख्यां को निश्चिनोति हि।
केन न्युब्जीक्रियन्ते वा गगनस्था अलिञ्जराः॥
३८ तदा विलीयते धूली धातु र्द्रवकृतो यथा।
मृत्तिकायाश्च लोष्ट्राणि प्रसज्यन्ते परस्परं॥

---

३९ ऊनचत्वारिंशोऽध्यायः।

३९ सिंहीया कथा ४१ द्रोणकाकीया कथा १ छागीया कथा ५ वन्यगर्द्दभीया कथा ९ खड्गीया कथा १३ उष्ट्रपक्षीया कथा १९ अश्वीया कथा २६ वाजपक्षीया कथा गृध्रपक्षीया कथा च।

३९ केशरिण्या निमित्तं किं त्वं भक्ष्यं मृगयिष्यसे।
पशुराजस्य वत्सानां क्षुधां वा तर्पयिष्यसि॥

गह्वरेषु नताङ्गानां मांसार्थं गुप्तसेविनां॥ ४०
द्रोणकाकस्य सन्तानाः क्रन्दन्त ईश्वरं प्रति। ४१
यस्मिन् काले निराहारा विभ्रमन्ति समन्ततः।
तदा तस्य निमित्तं कः निश्चिनोत्युपजीविकां॥
छाग्याः पर्व्वतवासिन्याः सूतिकालमवैषि किं। १
किं प्रत्यक्षं त्वया दृष्टा मृगीणां गर्भवेदना॥
तासां वा पूर्णगर्भाणां मासाः किं गणितास्त्वया। २
तासां प्रसवकालो वा ज्ञातुं किं शक्यते त्वया॥
नत्वा ताभिरपत्यानि सुत्वा प्रस्थाप्यते व्यथा॥ ३
तासां वत्सा बलं प्राप्य वर्द्धन्ते शस्यभूमिषु। ४
ते प्रस्थाय पुनस्तासां समीपं प्रतियान्ति न॥
केन स्वाधीनता दत्त्वा विसृष्टो वनगर्द्दभः। ५
स आरण्यखरः केन बन्धनेभ्यो विमोचितः॥
निम्नभूमि मया तस्य सदनार्थं व्यवस्थिता। ६
ऊषरञ्च मरुस्थानं कृतं तस्य निकेतनं॥
पुरवासिमनुष्याणां जनता तेन हस्यते। ७
पशुताडयितुः शब्दो नहि तेन निशम्यते॥
गिरीणां पृष्ठतो दृष्टं स्थानं तस्य विहारभूः। ८
हरिद्वर्णञ्च यत् किञ्चित् स तदेवानुधावति॥
तव दासत्ववृत्त्यां किं गण्डकः परितोक्ष्यति। ९
तावकीनगवादन्याः पार्श्वे वा किं शयिष्यते॥
रज्जुना हलरेखायां किं त्वं भंत्स्यसि खड्गिनं। १०
स केदारान् समीकुर्व्वन् किं त्वत्पश्चाद् व्रजिष्यति॥
स महाबलवान् तस्मात् किं तस्मिन् विश्वसिष्यसि। ११
निजधान्यादिवित्तञ्च किं तस्मिन्नर्पयिष्यसि॥
किं विश्वसिषि तस्मिन् यत् ते शस्यानि स वक्ष्यति। १२
मर्द्दनस्थानतो धान्यं तत्र वा संग्रहीष्यति॥
दर्पिण्या उष्ट्रपक्षिण्या यो गरुत् स हि कीदृशः। १३
स वाजो वत्सलायाः किं लक्ष्मणायास्तनूरुहं॥
भूमौ त्यक्त्वा स्वडिम्बान् सा धूलावष्णीकरोति हि। १४
भंक्ष्यन्ते चरणैर्यत्ते किं वा यद् वनवासिभिः। १५

स्थापदैश्चूर्णयिष्यन्ते तन्न संस्मर्य्यते तया॥
१६ आत्मजान् परजान् मत्वा साऽस्ति तान् प्रति निष्ठुरा॥
जायते निष्फला तस्या व्यथा दुःसाहसेन च॥
१७ ज्ञानमीश्वरेण विस्मार्य्य न दत्ता सा धियोंऽशिनी॥
१८ ऊर्द्धमुखी यदा सा तु धावनाय प्रवर्त्तते।
तया तर्हि तुरङ्गस्य तदारोही च हस्यते॥
१९ वाजिने किं प्रभावो वा प्रदातुं शक्यते त्वया।
तस्य ग्रीवा त्वया वा किं मेघशब्देन वेष्ट्यते॥
२० किं त्वयैव स वा सृष्टः प्लवगामी पतङ्गवत्।
उग्रश्वासस्तदीयो हि प्रतापेन भयङ्करः॥
२१ खुरै र्लिखन् समां भूमिं स्वबलेन स नन्दति।
सुसज्जीभूतसेनानां विरुद्धश्चाभिगच्छति॥
२२ त्रासे हसत्यशङ्कः स खड्गतो न पलायते॥
२३ तस्मिन् स्वनति तूणीरः शैल्यं शक्तिश्च तैजसी॥
२४ स उद्वेगादमर्षाच्च रणभूमिं पिपासति।
तूरीवादनमाकर्ण्य गतशान्तिश्च जायते॥
२५ तूरीवादे नदत्युच्चै र्दूराज्जिघ्रति चाहवं।
गर्ज्जनञ्च पुरोगानां योधानाञ्च महाध्वनिं॥
२६ तव ज्ञानप्रभावेन श्येनो वा किं प्रडीयते।
दक्षिणां दिशमुद्दिश्य स्वपक्षौ विस्तृणोति च॥
२७ किं त्वदीयाज्ञया गृध्र ऊर्द्धं यात्युच्चनीडकृत्॥
२८ शैलस्तस्य निवासोऽस्ति रात्रौ तिष्ठति तत्र सः।
शिलोच्चयस्य शृङ्गाग्रे दुर्गमं दुर्गमाश्रितः॥
२९ तस्मात् स प्रेक्षते भक्ष्यं तन्नेत्रे दूरदर्शिनी॥
३० तद्वत्सा रक्तपातारः कुणपा यत्र तत्र सः॥

---

४० चत्वारिंशोऽध्यायः।

१ आयूबं प्रति परमेश्वरस्य वचनं ३ आयूबस्य स्वदोषाङ्गीकरणं ६ परमेश्वरस्य स्वीयाश्चर्य्यकर्म्मभिरायूबस्याज्ञानतायाः प्रकाशनं १५ विहेमोतपश्वोः कथनञ्च।

१ अनन्तरं परमेश्वर आयूबं जगाद।
२ सर्व्वशक्तिमता सार्द्धं विवादी किं तमादिशेत्।

ईश्वरस्यापवादी यः स तस्मै यच्छतूत्तरं॥

तत आयूवः परमेश्वरं प्रत्युवाच। ३

पश्याहं तुच्छनीयो ऽस्मि किं दास्ये तुभ्यमुत्तरं। ४
मामकीनमुखे तस्मात् करिष्यामि करार्पणं॥
एकक्रत्वो मयाभाषि नहि भाषिष्यते पुनः। ५
द्वौ वारावीरितं वाक्यं न पुनस्तेरयिष्यते॥

ततः परं परमेश्वरो झञ्झावाते तिष्ठन् आयूवं प्रतिजगाद। ६

इदानीं कटिदेशस्ते बध्यतां वीरवत् त्वया। ७
परिप्रक्ष्यामि यच्चाहं देहि मह्यं तदुत्तरं॥
मम धर्म्मविचारो ऽपि किं त्वया परिलोप्स्यते। ८
निजपुण्यस्य रक्षार्थं माञ्च किं दूषयिष्यसि॥
ईश्वरस्य भुजो यादृक् ते भुजस्तादृगस्ति किं। ९
किं तेनेवोच्चशब्देन शक्यते गर्ज्जितुं त्वया॥
तर्हि तेजो महत्त्वञ्च कुरुष्व स्वीयभूषणं। १०
गौरवञ्च प्रभावञ्च कुरुष्व स्वपरिच्छदं॥
तव क्रोधानलस्यापि शिखाः सर्व्वत्र विक्षिप। ११
यच्च किञ्चिद् उदग्रं तद् दृक्पातेन निपातय॥
यच्च किञ्चिद् उदग्रं तद् दृक्पातेन विनामय। १२
दुश्चरित्रांश्च तत्रैव स्वपदाभ्यां विमर्द्दय॥
धूलौ तान् गोपयैकत्र तमिस्रे संहताननान्॥ १३
तदानीन्तु प्रशंसा ते मयापि कीर्त्तयिष्यते। १४
निजदक्षिणहस्तेन त्वं यस्मादभवो जयी॥
विहेमोतं पशुं पश्य मया सृष्टं त्वया समं। १५
बलीवर्द्दो यथा तद्वत् तृणानि सोऽपि खादति॥
पश्य कीदृग् बलं तस्य कटिदेशे हि विद्यते। १६
कुक्षिस्नायुषु शक्तिश्च कीदृशी तस्य वर्त्तते॥
एरसाख्यतरोस्तुल्यं लाङ्गूलं तेन चाल्यते। १७
तस्य श्रोणितटस्थानां शिराणां योजनं दृढं॥
तस्यास्थीन्यारकूटस्य नालानाञ्च समानि हि। १८
लौहदण्डसमानानि सन्ति तत्कीकसानि वा॥
ईशनिर्म्मितवस्तूनां श्रेणामग्र्यः स एव हि। १९

तदीयस्रष्टिकर्त्ता च खड्गस्तस्मिन् समर्पितः॥
२० गिरयस्तन्निमित्तञ्च भक्ष्यमुत्पादयन्ति हि।
तत्र क्रीडन्ति सर्व्वे च पशवोऽरण्यवासिनः॥
२१ स स्तम्बानामधः शेते नलैः पङ्केन चावृतः॥
२२ स्तम्बानां छायया तस्य पर्णशाला च जायते।
स्रोतःपार्श्वस्थगुल्मैः स प्राचीरेणेव वेष्ट्यते॥
२३ उद्गतायां तरङ्गिण्यां तस्य त्रासो न जायते।
यर्द्दनेनापि सिक्तास्यो धैर्य्ययुक्तः स तिष्ठति॥
२४ साक्षाद् धृत्वा नरैस्तस्य नासा नास्रैश्च विध्यते॥

---

४१ एकचत्वारिंशोऽध्यायः।

१ लिवियाथनस्य कथनं १९ तदीयविशेषाङ्गानां वर्णनञ्च।

१ वडिशेन समर्थः किं त्वं वेद्धुं लिवियाथनं।
किं वा त्वं रज्जुना तस्य जिह्वां सम्पीडयिष्यसि॥
२ वेत्रं वा तस्य नासायां त्वया किं स्थापयिष्यते।
किं त्वया शक्यते तस्य हनु वेद्धुं शलाकया॥
३ त्वयि किं स बहुत्वेन देवनं वा करिष्यति।
स वा किं कोमलै र्वाक्यैरभिभाषिष्यते त्वया॥
४ नियमो वा त्वया सार्द्धं तेन किं स्थापयिष्यते।
चिरकालीयदासत्वे स त्वया किं नियोक्ष्यते॥
५ किं क्रीडिष्यसि वा तेन सार्द्धं त्वं पक्षिणा यथा।
त्वं किं स्वतरुणीनां वा कृते तं बन्धयिष्यसि॥
६ सार्थिकास्तस्य मूल्यार्थं किं करिष्यन्ति वा पणं।
किनानीयाश्च लोकाः किम् अंशयिष्यन्ति तं मिथः॥
७ पूरयिष्यसि किं तस्य चर्म्म तीक्ष्णाग्रकण्टकैः।
मीनवेधकशूलानां शिञ्जितेन च तच्छिरः॥
८ कुरु हस्तार्पणं तस्मिन् स्मृत्वा नो योत्स्यसे पुनः॥
९ पश्य निरर्थकैवास्ति प्रत्याशा तद्विरोधिनः॥
तस्य दर्शनमात्रात् स किं नो निपातयिष्यते॥
१० धृष्टो न विद्यते कोऽपि तमुद्वेजयितुं क्षमः।

तर्हि मदन्तिकं स्थातुं कः समर्थो भविष्यति॥
मया प्रत्युपकर्त्तव्यः को मे पूर्व्वोपकारकृत्। ११
कृत्स्नद्युमण्डलस्याधो यद्यदस्ति ममैव तत्।
अमूकेन मया तस्य सर्व्वाङ्गं वर्णयिष्यते। १२
प्रभावस्यापि वृत्तान्तः सज्जाया अपि सौष्ठवं॥
तद्वस्त्रस्य वहिर्भागं दूरीकर्त्तुं हि कः क्षमः। १३
तदीयद्विजपङ्क्तौ च प्रवेष्टुं पारको ऽस्ति कः॥
तन्मुखस्य कपाटे च को विस्तारयितुं क्षमः। १४
तस्य वक्रखुराणाञ्च चतुर्द्दिक्षु भयं स्थितं॥
तदीयचर्म्मणां रेखाः सन्त्यहङ्कारभूमयः। १५
मुद्रया दृढसन्ध्या च बध्यन्ते तानि सर्व्वतः।
एकमासज्यते ऽन्यस्मिन् प्रवेष्टुं वायुरक्षमः॥ १६
एकं संलग्नमन्यस्मिन् तेषां योगो न भिद्यते॥ १७
तत्क्षुतं रश्मिविच्छेपि नेत्रे चारुणनेत्रवत्। १८
उल्का निर्यान्ति तद्वक्त्रात् स्फुरन्त्यो ऽग्निकणा यथा। १९
तस्य नासाग्ररन्ध्राभ्यां धूममाला निरेति च। २०
कटाहादिव सन्तप्तात् तालवृन्तेन वीजितात्॥
तस्य श्वासेन चाङ्गारा अभिजायन्त उज्ज्वलाः। २१
तदीयाननमध्याच्च निर्यान्त्यग्निशिखा अपि॥
तस्य ग्रीवा बलावासः शङ्का नृत्यति तत्पुरः॥ २२
तस्य पुष्टानि चाङ्गानि सुसंसक्तानि धातुवत्। २३
तस्मिन् सिक्तानि तिष्ठन्ति न च गच्छन्ति चालनं॥
सिक्तधातुसमं तस्य चित्तं पाषाणसन्निभं। २४
अधःस्थः पेषणीपट्ट इव तद्धृदयं घनं॥
तस्मिन् समुत्थिते वीरा अपि त्रस्ता भवन्ति हि। २५
बड्रूपभयात् ते च जायन्ते हीनबुद्धयः॥
स येनाक्रम्यते तस्य खड्गो नाप्नोति सुस्थितिं। २६
न शूलं गोफणा वापि शिरस्त्रं वा कथञ्चन॥
स लौहं मन्यते नाडं रीतिञ्च शीर्णकाष्ठवत्॥ २७
न हि शरासनारोही तं विद्रावयितुं क्षमः। २८
गोफणास्थशिलास्तस्य कृते सन्ति तृणोपमाः॥

२९ स गदां मन्यते नाडं स शक्ते र्हसति ध्वनिं॥
३० तीक्ष्णाग्राश्छुरिकास्तस्य निम्नभागे ऽपि सन्ति हि।
छिदुरं तेन यानञ्च कर्द्दमोपरि चाल्यते॥
३१ तप्तस्थाली यथा तद्वत् तेन फेणायते ऽम्बुधिः।
स करोति पयोराशिम् यन्त्रकर्द्दमपात्रवत्॥
३२ तत्पश्चाद् राजते मार्गो दृश्यते पलितो ऽर्णवः॥
३३ तत्समो भूतले नास्ति स सृष्टो भयवर्ज्जितः॥
३४ ईक्षते सर्व्वमुच्चं स सर्व्वस्फीतात्मनां प्रभुः॥

---

४२ द्विचत्वारिंशोऽध्यायः।

१ ईश्वरस्य निर्द्दोषत्वम् आयूबेन स्वदोषाङ्गीकरणं ७ तद्बन्धूनां प्रायश्चित्तकथनं १० आयूबस्य पुनरैश्वर्य्यप्राप्तिः १२ तस्य कन्यापुत्त्रकथनं १६ तस्य मरणञ्च।

१ अनन्तरम् आयूबः परमेश्वरं प्रतिजगाद।
२ सर्व्वमेव त्वया कर्त्तुं शक्यं तज्ज्ञायते मया।
एको ऽपि त्वदसाध्यश्च सङ्कल्पो नहि विद्यते॥
३ "उक्तिभि र्ज्ञानहीनाभि र्मन्त्रमन्धीकरोति कः।"
मयैव ज्ञानहीनेन यन्न बोध्यमभाषि तत्।
यद्यन्मत्तो ऽद्भुतं तद्धि न ज्ञात्वा कथितं मया॥
४ "त्वया निशम्यतां तर्हि वाक्यं भाषिष्यते मया।
परिप्रक्ष्यामि यच्चाहं देहि मह्यं तदुत्तरं॥"
५ कर्णस्याकर्णनेनाहं ते श्रुतिं श्रुतवान् पुरा।
लोचनं मामकीनञ्च त्वामिदानीं निरीक्षते॥
६ तस्मादात्मतिरस्कारो मनस्तापश्च जायते।
उपविष्टस्य मे धूलावासीनस्य च भस्मनि॥

७ परमेश्वर आयूबं प्रत्येतानि वाक्यानि कथयित्वा तैमनीयम् इलीफसं व्याजहार, तुभ्यं तव बन्धुद्वयाय च मम क्रोधः प्राज्वलत्, यतो मम
८ सेवक आयूबो यादृगवोचत्, यूयं मामधि तादृक् सत्यं नावोचत। अतो यूयमिदानीं सप्त वृषभान् सप्त मेषांश्चादाय मम सेवकमायूवम् उपागत्यात्ममङ्गलार्थं होमार्थकयज्ञेन मह्यं दत्त, मम सेवक आयूबश्च युष्मन्नि-

मित्त्वं प्रार्थनां करोतु, यस्मात् तेनैवाहं प्रसादयिष्ये, न चेद् युष्मासु
मूढता सेत्स्यति, यतो हेतो मम सेवक आयूब इव यूयं मामधि सत्यं न
कथितवन्तः। ततस्तैमनीय इलीफसः शूहीयो विल्ददो नामाथीयः ९
सोफरश्च गत्वा परमेश्वरेण यदाज्ञापितास्तदेव चक्रुस्ततः परमेश्वर
आयूबेन प्रसादितः।

स्वबन्धूनां कृत आयूबेन प्रार्थनायां क्रियमाणायां परमेश्वरस्तस्य १०
दुर्द्दशां प्रतिचकार। फलतः परमेश्वर आयूबस्य सम्पत्तिं द्विगुणीकृत्य
वर्द्धयामास। ततस्तस्य सर्व्वा भ्रातृभगिन्यः पूर्व्वसंसर्गिणश्च सर्व्वे तमुपा- ११
गत्य तस्य गृहे तेन सार्द्धं बुभुजिरे परमेश्वरेण तस्मिन् प्रयोजितां
सर्व्वाम् आपदमधि तं शुशुचुः सान्त्वयामासुश्च, तेषां प्रत्येकश्च तस्मै
स्वर्णमुद्रामेकां स्वर्णकुण्डलमेकञ्च ददौ। अपरं परमेश्वरेणायूबस्य १२
प्रथमावस्थातः शेषावस्थायां कुशलीकृतायां तस्य चतुर्द्दशसहस्राणि
मेषाः षट्सहस्राणि महाङ्गा एकसहस्रं गोयुगान्येकसहस्रं गर्द्दभ्यश्च
बभूवुः।

तस्य सप्तपुत्रास्तिस्रो दुहितरश्च बभूवुः। स तासां ज्येष्ठाया यिमी- १३
मेति नाम द्वितीयायाश्च कित्सियेति नाम तृतीयायाश्च केरणहप्पूकेति १४
नाम विदधौ। आयूबस्य ता दुहितर इव रूपवत्यः कामिन्यः पृथिव्यां १५
कुत्रापि नाविद्यन्त, तासां तातश्च तासां भ्रातृणां मध्ये ताभ्योऽप्यंशान्
दायभागेन ददौ।

ततः परम् आयूबश्चत्वारिंशदधिकशतं वत्सरान् जीवन् चतुर्थपुरुष- १६
पर्य्यन्तं निजपुत्रपौत्रान् ददर्श। अनन्तरम् आयूबः स्थविरः पूर्णायुश्च १७
प्राणान् तत्याज।

गीतसंहिता।

---

१ प्रथमं गीतं।

पुण्यवतां सुखं पापवतां दुःखं।

१ धन्यः स मानवो यो न दुष्टानां मन्त्रणां चरेत्।
न तिष्ठेत् पापिनां मार्गे नासीत निन्दकासने॥
२ किन्तु शास्त्रे परेशस्य मनस्तुष्टिमवाप्नुयात्।
विदधीत च तस्यैव शास्त्रे ध्यानं दिवानिशं॥
३ स जलस्रोतसां पार्श्वे रोपितस्य तरोः समः।
फलदस्य निजे काले चाम्लानपल्लवस्य च।
यत् किञ्चित् क्रियते तेन तत् सर्व्वञ्च प्रसिध्यति॥
४ दुष्टा न तादृशाः किन्तु वायुकीर्णतुषोपमाः॥
५ अतो हेतो विचारेऽपि नहि स्थास्यन्ति दुर्जनाः।
धार्म्मिकाणां सभायाञ्च नहि स्थास्यन्ति पापिनः॥
६ धार्म्मिकाणां यतो मार्गं मन्यते परमेश्वरः।
किन्तु दुष्टमनुष्याणां मार्गो नाशं गमिष्यति॥

---

२ द्वितीयं गीतं।

१ ख्रीष्टस्य रिपूणां कथनं ४ तस्य राजत्वस्थापनस्य भविष्यद्वाक्यं १० राजसु निवेदनञ्च।

१ किमर्थं भिन्नजातीया लोकाः कुर्व्वन्ति गर्ज्जनं।
देशवासिप्रजाश्चापि चिन्तयन्ति व्यलीकतां॥
२ उत्तिष्ठन्ति महीपाला मन्त्रयन्त्यग्रगा मिथः।
परमेशस्य तेनैव चाभिषिक्तस्य शात्रवात्॥
३ ते सञ्जल्पन्ति छेत्स्यामो बन्धनानि तयो र्वयं।
सुदूरे च तयो रज्जूः क्षेप्स्यामोऽस्मत्समीपतः॥
४ स्वर्गवासी हसत्यत्र तांश्चाकारयति प्रभुः।
५ तानुद्दिश्य स्वकोपेन स प्रभाषिष्यते तदा।

तान् करिष्यति सन्त्रस्तान् निजक्रोधानलेन च॥
मयापि ह्यात्मसम्बन्धी सृष्टे पृथिवीपतिः। ६
मामकीने सियोनाख्ये पवित्रे धरणीधरे॥
विधिं निवेदयिष्यामि माम् अवोचत् परेश्वरः। ७
मदीयस्तनयोऽसि त्वम् अद्याहं त्वामजीजनं॥
मत्तो याचस्व तेनाहं तुभ्यं पैतृकवित्तवत्। ८
सर्व्वजातीः प्रदास्यामि क्षितेरन्तांश्च दायवत्॥
त्वञ्च लौहेन दण्डेन तान् लोकान् चारयिष्यसि। ९
पात्राणीव कुलालस्य तांश्च चूर्णीकरिष्यसि॥
अतो हे क्षितिपा यूयं ज्ञानिनो भवताधुना। १०
हे पृथिव्या नियन्तारो यूयं गृह्णीत शासनं॥
युष्माभिः साध्वसं प्राप्य सेव्यतां परमेश्वरः। ११
कम्पमानैस्तमुद्दिश्य क्रियताञ्च जयध्वनिः॥
पुत्त्रं चुम्बत नो चेत् स क्रोधाक्रान्तो भविष्यति। १२
मार्गे नंच्यत यूयञ्च तत्कोपो ज्वलिताचिरात्।
धन्यास्ते मानवाः सर्व्वे ये तस्मिन् विश्वसन्ति हि॥

---

३ तृतीयं गीतं।

ईश्वरात् प्राप्याया रक्षाया वर्णना।

दायूदो धर्म्मगीतं।

अवशालोमनामधेयस्य तनयस्य समीपात् पलायनकाले रचितं।

हे परेश विपक्षा मे जाताः किं बहुसंख्यकाः। १
बहुसंख्यकलोका हि मद्विरुद्धं समुत्थिताः॥
बहुभिश्च मम प्राणानधीदं वाक्यमीर्य्यते। २
ईश्वरेण परित्राणं तस्य नो सम्भविष्यति॥ सेला॥
हे परेश त्वमेवासि चर्म्म मत्परिवेष्टकं। ३
मम शोभा मदीयस्य मूर्द्धश्चोन्नतिकारकः॥
यदा स्वीयरवेणाहम् आह्वये परमेश्वरं। ४
स ददात्युत्तरं मह्यं तदा स्वपुण्यपर्व्वतात्॥ सेला॥

५ शयित्वाहं प्रनिद्रामि पुन र्जागर्म्मि सुस्थितः।
यतो हेतोः परेशो हि मामकीनावलम्बनं॥
६ न भेष्याम्ययुतैर्लोकै र्मत्समन्तं स्थितै र्वृतः॥
७ परमेश त्वमुत्तिष्ठ मां त्रायस्व मदीश्वर।
यस्मान्मे द्वेषिणः सर्व्वे त्वयैवाहतगण्डकाः।
त्वया दुष्टमनुष्याश्च सञ्जाता भग्नदन्तकाः॥
८ परेशे विद्यते त्राणं तवाशीस्त्वत्प्रजासु च॥ सेला॥

---

४ चतुर्थं गीतं।

१ ईश्वरं प्रति दायूदो निवेदनं २ शत्रून् प्रति भर्त्सनं ६ तथा बलेन नहि किन्त्वीश्वर-
स्यानुग्रहेण सुखस्य भवनं।

यन्त्रवाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं।

१ प्रतिब्रूह्याह्वयन्तं माम् ईश धर्म्मस्वरूप मे।
त्वं हि सङ्कटकालेषु विस्तृणोषि ममायनं।
अतो मयि प्रसन्नः सन् मदीयां प्रार्थनां शृणु॥
२ वीरपुत्राः कियत्कालं यूयं शप्स्यथ मे श्रियं।
प्रेष्यध्वे ऽलीकतायाञ्च मृषोक्तिञ्चानुयास्यथ॥ सेला॥
३ बुध्यध्वं परमेशेन स्वार्थं साधुः पृथक्कृतः।
श्रोष्यते तेन चाह्वानं तमुद्दिश्य मया कृतं॥
४ अतः संक्रुध्य युष्माभिः क्रियतां नहि पातकं।
स्वशय्यासु मनोमध्ये प्रभाषध्वं हि मौनिनः॥ सेला॥
५ यूयं धर्म्मबलीन् दत्त श्रद्धद्ध्वञ्च परेश्वरं॥
६ बहुभि र्गद्यते कोऽस्मान् दर्शयिष्यति मङ्गलं।
हे परेश त्वयास्मासु स्वमुखस्योदियाद् द्युतिः॥
७ शस्यद्राक्षारसास्तेषां जायन्ते प्रचुरा यदा।
तत्कालात् श्रेष्ठमाह्लादं हृदि मे दीयते त्वया॥
८ अहं शान्त्या शयिष्ये च निद्रास्यामि च तत्क्षणे।
यस्मादेकः परेश त्वं मां वासयसि निर्भयं॥

---

५ पञ्चमं गीतं ।

१ ईश्वराय दायूदो निवेदनं ८ शत्रूणां विरुद्धं धार्म्मिकाणां निमित्तञ्च तस्य प्रार्थना ।

वाद्यनियन्त्रे दातव्यं निह्वीलोन्नामकस्वरयुक्तं दायूदो धर्म्मगीतं ।

परेश शृणु मे वाचो बुध्यस्व चिन्तनं मम ॥ १
मम राजन् मदीश त्वं मे खेदोक्तिं निशामय । २
त्वामुद्दिश्य यतो हेतोः प्रार्थनां प्रकरोम्यहं ॥
हे परेश दिनारम्भे मे रवः श्रूयतां त्वया । ३
त्वत्साक्षात् प्रार्थनां प्रातो रचयामि प्रतीक्षकः ॥
यतो नासि कथञ्चित् त्वं दुष्टताप्रिय ईश्वरः । ४
दुश्चरित्रो मनुष्यस्त्वां न कदाप्यनुवत्स्यति ॥
तव लोचनयोरग्रे न स्थास्यन्त्यभिमानिनः । ५
विद्विष्यन्ते त्वया सर्व्वे चाधर्म्माचारिमानवाः ॥
त्वया विनाशयिष्यन्ते लोकास्चान्टतवादिनः । ६
रक्तपाती छली चापि परेश गर्ह्यते त्वया ॥
किन्त्वहं ते महास्नेहात् प्रवेक्ष्यामि तवालयं । ७
त्वाञ्चादृत्य प्रणंस्यामि पूतं ते मन्दिरं प्रति ॥
परेश मां स्वधर्म्मेण नय मद्द्वेषिणां कृते । ८
सरलं कुरु पन्थानं त्वदीयं मम सम्मुखे ॥
नास्ति तेषां मुखे सत्यं तेषामन्तर्भवा विपत् । ९
कण्ठस्तेषां मनुष्याणां शवगर्त्तो ह्यनावृतः ।
रसनाञ्च स्वकीयां ते कुर्व्वते चाटुवादिनीं ॥
दोषिणः कुरु तान् ईश निजमन्त्रैः पतन्तु ते । १०
अपराधबहुत्वाद्धि निक्षिप्यन्तां च ते त्वया ।
यतो हेतोरकुर्व्वन् ते तव शासनलंघनं ॥
तेन त्वदाश्रिताः सर्व्वे गमिष्यन्ति प्रफुल्लतां । ११
आनन्दिष्यन्ति नित्यञ्च रक्षिष्यन्ते त्वया च ते ।
त्वन्नाम्नि प्रीयमाणाश्च करिष्यन्ति जयध्वनिं ॥
यतो हे परमेश त्वं धन्यं करोषि धार्म्मिकं । १२
चर्म्मणेव प्रसादेन तञ्चाच्छादयसि ध्रुवं ॥

६ षष्ठं गीतं।

विपदि दायूदो विलापः।

यन्त्रवाद्यनियन्त्रे दातव्यम् अष्टमस्वरयुक्तं दायूदो धर्म्मगीतं।

१ परमेश्वर कोपेन नहि मां परिभर्त्सय।
तव क्रोधस्य तापेन दण्डनं मम मा कुरु॥
२ हे परेश विषस्रोऽहं प्रसादं कुरु मां प्रति।
हे परेश मदस्थीनि त्रस्यन्ति त्वं भिषज्य मां॥
३ त्रस्यन्त्यतीव मे प्राणास्त्वं परेश कियच्चिरं॥
४ हे परेश परागच्छ मम प्राणान् विमोचय।
तावकीनप्रसादेन परित्राणञ्च मे कुरु॥
५ यस्मात् प्राणवियोगे हि ते स्मृति र्नहि विद्यते।
प्रशंसा तव वा केन परलोके करिष्यते॥
६ मम क्लान्ति र्हि सञ्जाता दीर्घनिःश्वासतो मम।
कृत्स्नां रात्रिं निजां शय्यां जलसिक्तां करोम्यहं।
मामकीनाश्रुभिः खट्वां द्रवीभूतां करोमि च॥
७ मच्चक्षुः क्षीयते दुःखात् शत्रुसङ्घाच्च जीर्य्यति॥
८ हे दुष्कर्म्मकृतो यूयं सर्व्वे मत्तः प्रगच्छत।
यस्मान्मत्क्रन्दितं रावं श्रुतवान् परमेश्वरः॥
९ मदीयानुनयोक्ति र्हि परमेशेन संश्रुता।
प्रार्थना मामकीना च परमेशेन गृह्यते॥
१० लज्जिष्यन्ते त्रसिष्यन्ति चारयः सकला मम।
सर्व्वे प्रत्यागमिष्यन्ति चाकस्मादेव लज्जिताः॥

---

७ सप्तमं गीतं।

१ शत्रोः कूशस्यापवादे दायूदा स्वनिर्दोषत्वप्रकाशनं १० कूशस्य विनाशप्रकाशनञ्च।

विन्यामीनीयकूशस्य वाक्यान्यधि परमेश्वराय निवेदितं दायूदो व्याकुलतासूचकं गीतं।

१ हे मत्प्रभो परेश त्वां शरणं गतवानहं।
मदुपद्राविसङ्घात् त्वं मां त्रायस्वाभिरक्ष च॥

नो चेन्मज्जीवितं तेन सिंहेनेव विभेत्स्यते। २
परिदारयता मन्दं पश्चं रक्षकवर्ज्जितं॥
मया चेत् तत् कृतं कर्म्म मत्प्रभो परमेश्वर। ३
मम हस्तद्वये लग्ना खलता यदि विद्यते॥
स्वमित्रस्यापकारो वा मया चेत् परिकल्पितः। ४
माञ्च यो ऽकारणाद् द्वेष्टि स चेन्नग्नीकृतो मया॥
तर्हि मे जीवितं शत्रुरनुद्रुत्य समाप्नुयात्॥ ५
मत्प्राणान् मर्द्दयेद् भूमौ धूलौ मे वासयेत् श्रियं॥ सेला॥
परमेश त्वमुत्तिष्ठ निजकोपपुरःसरं॥ ६
मामकीनविपक्षेषु क्रोधाविष्टेषु प्रोन्नम।
मदर्थञ्च प्रबुध्यस्व त्वं विचारस्य नायकः॥
प्रजानाञ्च समाजस्त्वां चतुर्द्दिक्षु प्रवेष्टतां। ७
तदूर्द्ध्वेनैव चारोह स्थानमुच्चतमं पुनः॥
परमेशेन जातीनां विचारः संविधीयते। ८
परमेश त्वया तस्मान्मे विचारो विधीयतां।
पुण्यशुद्धत्वयो र्योग्यो मयि सन्तिष्ठमानयोः॥
प्रार्थये दुश्चरित्राणां दुष्टता शेषमाप्नुयात्। ९
धर्म्माचारिमनुष्यस्य त्वया संस्थाप्यतां ध्रुवं।
अन्तर्याम्यसि चित्तज्ञस्त्वं परेश्वर धार्म्मिक॥
मत्त्राणमीश्वरावस्थं स रक्षी सरलात्मनां॥ १०
ईश्वरेण विचारो हि धार्म्मिकस्य विधीयते। ११
परिक्रुध्यति सर्व्वाहम् ईश्वरो दुर्ज्जनाय च॥
न परावर्त्तिते तस्मिन् स खासिं शाययिष्यति। १२
स्वीयचापञ्च विस्फार्य्य मौर्व्वीं संयोजयिष्यति॥
तं कृतान्तस्य चास्त्राणां लक्ष्यवत् स्थापयिष्यति। १३
स्वकीयांश्च शरान् सर्व्वान् अग्निवाणान् करिष्यति॥
पश्य स व्यथयाधर्म्मम् उत्पादयितुमुद्यतः। १४
क्लेशस्तेन धृतो गर्भे व्यर्थता चाभिजायते॥
भूमिं छित्त्वा गभीरश्च कूपस्तेन विनिर्म्मितः। १५
तस्मिन्नात्मकृते खाते पतनं तस्य जायते॥
तेन सङ्कल्पितः क्लेशस्तच्छिरस्याश्रयिष्यति। १६

दौरात्म्यञ्च कृतं तेन तत्सीमन्ते पतिष्यति ॥
१७ परमेशं नविष्यामि तदीयन्यायकारणात्।
प्रगास्यामि परेशस्य सर्व्वोत्कृष्टस्य नाम च ॥

---

८ अष्टमं गीतं।

१ ईश्वरीयगुणानां २ मनुष्यान् प्रति तदीयानुग्रहस्य च प्रशंसनं।

वाद्यनियन्त्रे दातव्यं गित्तीन्नामकस्वरयुक्तं दायूदो धर्म्मगीतं।

१ परमेश्वर नः स्वामिन् सर्व्वत्र पृथिवीतले।
कीदृगादरणीयं हि त्वदीयं नाम विद्यते।
तव प्रतापदानेन शोभते व्योममण्डलं ॥
२ बालानां स्तनपानाञ्च वक्त्रात् त्वं व्यदधा बलं।
त्वदीयद्वेषिणां हेतोः शत्रो रेष्टुश्च दान्तये ॥
३ यदा पश्यामि ते व्योम त्वदीयाङ्गुलिभिः कृतं।
चन्द्रविम्बञ्च ताराश्च तत्र संस्थापितास्त्वया ॥
४ तदा वदामि मर्त्त्यः को यत् स संस्मर्य्यते त्वया।
को वा मानवसन्तानो यत् त्वया समवेक्ष्यते ॥
५ दिव्यदूतगणेभ्यः स किञ्चिन्न्यूनः कृतस्त्वया।
तेजोगौरवरूपेण किरीटेन च भूषितः ॥
६ करयोस्तव कार्य्याणां प्रभुत्वे स नियोजितः।
स्थापितञ्च त्वया सर्व्वं वस्तु तत्पादयोरधः ॥
७ मेषा गावश्च सर्व्वे हि सर्व्वे चारण्यजन्तवः ॥
८ खेचराः पक्षिणश्चापि मीनाश्चार्णववासिनः।
सामुद्रमार्गगामीनि सर्व्वाणि तद्वशानि च ॥
९ परमेश्वर नः स्वामिन् सर्व्वत्र पृथिवीतले।
कीदृगादरणीयं हि त्वदीयं नाम विद्यते ॥

---

९ नवमं गीतं।

१ जयस्य निमित्तमीश्वरस्य प्रशंसनं १३ भाविन उपकारस्य हेतोः प्रार्थनं।

वाद्यनियन्त्रे दातव्यं पुत्त्रमरणनामकस्वरयुक्तं दायूदो धर्म्मगीतं।

१ सर्व्वान्तःकरणेनाहं त्वां स्तोष्यामि परेश्वर।

वर्णयिष्यामि सर्व्वाणि ते कर्म्माण्यद्भुतानि च॥
त्वय्यहं परितोक्ष्यामि करिष्यामि च नन्दनं। २
उपगास्याम्यहं नाम तव सर्व्वोपरिस्थित॥
यतो हेतो र्विपक्षा मे पलायन्ते पराङ्मुखाः। ३
स्खलन्तस्तव साक्षात्ते विनाशं प्राप्नुवन्ति च॥
यतः कृत्वा विचारं त्वं धर्म्मं निर्णीतवान् मम। ४
स्वसिंहासन आसीनो न्यायकारी विचारकः॥
भर्त्सयित्वान्यजातीयान् दुरात्मानं विनाश्य च। ५
त्वमेवानन्तकालार्थं तेषां नाम विलुप्तवान्॥
वैरिणां जीर्णगेहानि ध्वंसितानि निरन्तरं। ६
त्वया पुरेषु भग्नेषु लुप्ता तेषामपि स्मृतिः॥
परमेशः सदाकालम् अध्यासीनो भविष्यति। ७
निजसिंहासनं तेन विचारार्थं स्थिरीकृतं॥
शासनं नरलोकस्य स न्यायेन विधास्यति। ८
जातीनाञ्च विचारं स याथार्थ्येन करिष्यति॥
पीडितस्य मनुष्यस्य प्रोच्चदुर्गं परेश्वरः। ९
सङ्कटस्यैव कालेषु प्रोच्चदुर्गस्वरूपकः॥
येऽभिजानन्ति ते नाम त्वयि ते विश्वसन्ति हि। १०
परमेश त्वदन्वेष्टॄन् त्वं न त्यक्ष्यसि कर्हिचित्॥
अध्यासीनाय सीयोने परमेशाय गायत। ११
तस्योत्कृष्टानि कर्म्माणि सर्व्वलोकेषु शंसत॥
यस्माद् रक्तानुसन्धाता रक्तपातो ऽनुचिन्त्यते। १२
दुर्गतानां विलापश्च तेन विस्मर्य्यते नहि॥
मां परेश दयस्व त्वं दुर्गतिं पश्य मेऽरिजां। १३
त्वं द्वारेभ्यः कृतान्तस्य मदीयोन्नतिकारकः॥
सियोनाख्यकुमार्य्या हि गोपुरेषु यतो मया। १४
वक्तव्या ते ऽखिला कीर्त्तिर्नन्दिता तव तारणात्॥
अमज्जन् स्वकृते गर्त्ते मानवा भिन्नवंशजाः। १५
अपतन् बद्धपादास्ते कूटयन्त्रे स्वपातिते॥
परमेशो विचारेण स्वकृतेन प्रकाशते। १६
जालबद्धोऽभवद्दुष्टः स्वहस्तकृतकर्म्मणा॥ हिगायोन्। सेला॥

१७ नरके निपतिष्यन्ति दुरात्मानो हि मानवाः।
भिन्नजातीयलोकाश्च सकला विस्मृतेश्वराः॥
१८ यतो हतोर्दरिद्रो न भविष्यत्यस्मृतः सदा।
दीनानाञ्च प्रतीक्षा न सर्व्वकाल विनंक्ष्यति॥
१९ परमेश त्वमुत्तिष्ठ मर्त्यो मा प्रबलो भवेत्।
मानवा अन्यजातीया विचार्य्यन्तां तवान्तिके॥
२० परमेश त्वया तेषां चित्ते त्रासो नियुज्यतां।
विजानन्त्वन्यजातीयाः स्वान् हि मर्त्त्यस्वरूपकान्॥ सेला॥

---

१० दशमं गीतं।

१ पापिलोकानां विषये दायूदः खेदकरणं १२ ईश्वरं प्रति तेभ्यो रक्षायाः प्रार्थन।

१ परमेश किमर्थं त्वं दूरवर्त्त्यवतिष्ठसे।
कुतो विपत्तिकालेषु तव नेत्रे निमीलिते॥
२ दुष्टलोकस्य दर्पेण ताप्यन्ते दीनमानवाः।
छलैः सङ्कल्पितैस्तेन जालबद्धा भवन्ति च॥
३ निजचित्तस्य लोभेन दुरात्मा कत्थते ध्रुवं।
प्राप्तलाभः परेशञ्च धन्यमुक्त्वावमन्यते॥
४ ऊर्द्ध्वदृष्ट्या दुरात्मा च न करोति विवेचनां।
सर्व्वासां तस्य चिन्तानां सारो नास्तीश्वरस्त्विति॥
५ सर्व्वकाले गतिस्तस्य समाप्नोति कृतार्थतां।
उन्नतास्तव दण्डाज्ञा न तस्येन्द्रियगोचराः॥
तस्य विरोधिनः सर्व्वे विध्मायन्ते च तेन हि॥
६ स स्वान्तःकरणे वक्ति न चलिष्यामि कर्हिचित्।
पुरुषानुक्रमं यावद् भविष्यामि निरापदः॥
७ शापकापट्यदौरात्म्यैः परिपूर्णं तदाननं।
तज्जिह्वाया अधः क्लेशो द्वेषभावश्च तिष्ठतः॥
८ स पल्लीनां रहःस्थाने चोपविष्टः प्रतीक्षते।
तिष्ठन् छन्नेषु वासेषु निर्द्दोषं हन्ति मानवं।
तस्य लोचनयुग्मञ्च दुःखार्त्तान् अनुसर्पति॥

स गुप्ते तिष्ठति स्थाने गह्वराश्रितसिंहवत्। ९
दीनहीनं मनुष्यञ्च दिधीर्षुः सोऽवतिष्ठते।
तेन स्वजालमाकृष्य ध्रियते दीनमानवः॥
चूर्णः सीदति दुःखार्त्तस्तस्य दोर्भ्याञ्च पात्यते॥ १०
चित्ते वक्ति दुरात्मेदम् ईश्वरो नष्टसंस्मृतिः। ११
वक्तमाच्छाद्य दृष्टिं स न कदापि करिष्यति॥
परमेश त्वमुत्तिष्ठ करमुत्थापयेश्वर। १२
दीनहीनमनुष्या न भवेयु र्विस्मृतास्त्वया॥
किमर्थमवजानीयाद् ईश्वरं दुष्टमानवः। १३
त्वया न क्रियते दृष्टिरिति चित्ते वदेत् कुतः॥
कृता दृष्टिस्त्वया यस्मात् निजहस्तेऽर्पयिष्यता। १४
क्लेशकोपौ त्वयेच्येते दुःखार्त्तस्य त्वमाश्रयः।
अनाथस्यापि लोकस्य त्वमेवास्युपकारकः॥
भंग्धि दुरात्मनो बाहुं दुश्चरित्रजनस्य च। १५
दुष्टतामनुसन्धाय तस्या लेशं न शेषय॥
अनन्तकालपर्य्यन्तं राजास्ते परमेश्वरः। १६
उच्छिद्यन्ते ऽन्यजातीया लोकास्तद्राष्ट्रमध्यतः॥
परमेश मनोवाञ्छा नम्राणां श्रूयते त्वया। १७
जायन्ते स्थिरचित्तास्ते कृत्वा चाकर्णनं त्वया॥
अनाथक्लिष्टयो धर्म्मः सम्यक् प्रकाशयिष्यते। १८
न पुन र्भूमिजो मर्त्त्यो दौरात्म्यमाचरिष्यति॥

---

११ एकादशं गीतं।

१ शत्रुभि र्दायूदः क्लिष्टत्वं ४ परमेश्वरे तस्याश्रयग्रहणं।

वाद्यनियन्त्रे दातव्यं दायूदो गीतं।

परेशं श्रद्दधानोऽस्मि पक्षिवत् स्वशिलोच्चयम्। १
उत्पत्य यात मत्प्राणान् ब्रूत यूयमिदं कुतः॥
पश्य दुरात्मनो लोकास्तमिस्रे सरलात्मनः। २
आहन्तुं धनुराकृष्य विन्यस्यन्ति गुणे शरं॥
उत्पाटितेषु मूलेषु किं करिष्यति धार्म्मिकः॥ ३

४ स्वकीये पुण्यप्रासादे विद्यते परमेश्वरः।
परेशस्यासनं स्वर्गे तन्नेत्रे सूक्ष्मदर्शिनी।
परीक्षेते नृसन्तानान् तदीयौ नयनच्छदौ॥
५ धार्म्मिकस्य परीक्षां हि विदधाति परेश्वरः।
दुष्टं दौरात्म्यकामञ्च स चित्तेनावगर्हते॥
६ स वर्षिष्यति दुष्टेषु पाशपावकगन्धकान्।
तेषां पानीयवत् कंसे चण्डवायु र्भविष्यति॥
७ धार्म्मिकः परमेशः स प्रीयते धर्म्मकर्म्मसु।
सरलं मानवं तस्य वदनञ्च निरीक्षते॥

---

१२ द्वादशं गीतं।

दायूदो निन्दितत्वं २ परमेश्वरे तस्याश्रयग्रहणं।

वाद्यनियन्त्रे दातव्यमष्टमस्वरयुक्तं दायूदो धर्म्मगीतं।

१ परेश कुरु साहाय्यं यतः साधु र्विलुप्यते।
नरसन्तानवर्गे च विश्वास्या यान्ति सङ्क्षयं॥
२ स्वमित्रं प्रति चैकैकः स्निग्धोष्ठं भाषते मृषा।
द्विप्रकारेण चित्तेन ते सम्भाषञ्च कुर्व्वते॥
३ उच्छेत्स्यन्ते परेशेन स्निग्धोष्ठाः सकला नराः।
तद्वदुच्छेत्स्यते तेन रसना प्रोच्चभाषिणी॥
४ तैरुक्तं प्रभविष्यामः स्वजिह्वाभि र्वयं किल।
स्वाधराः सहसेना नः को भविष्यति नः प्रभुः॥
५ दुःखिनां पीडितत्वाद्धि दुर्गतानाञ्च रोदनात्।
उत्तिष्ठाम्यधुनैवाहमिति ब्रूते परेश्वरः।
त्राणाकाङ्क्षी मया मर्त्त्यस्त्राणप्राप्तः करिष्यते॥
६ परमेशस्य या वाचस्ता वाचः सन्ति निर्म्मलाः।
ता भूपस्यामलं रौप्यं सप्तकृत्वः परिष्कृतं॥
७ रक्षिष्यन्ते मनुष्यास्ते त्वया हे परमेश्वर।
इदानीन्तनवंशात् त्वं सदा तान् उद्धरिष्यसि॥
८ चतुर्दिक्षु दुरात्मानो प्रकुर्व्वन्ति गमागमौ।
अधमो नरसन्तानैः सर्व्वोत्कृष्टः प्रगण्यते॥

१३ त्रयोदशं गीतं।

दायूदो विलपनं प्रार्थनं धन्यवदनञ्च।

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं।

परेश कतिकालं मां विस्मरिष्यसि किं सदा। १
कतिकालं निजं वक्त्रं मत्त आच्छादयिष्यसि॥
कतिकालमहं चिन्ताः स्थापयिष्यामि मे हृदि। २
प्रत्यहञ्च निजे चित्ते निधास्यामि मनोव्यथां।
कतिकालं मम द्वेषी मत्त उच्चो भविष्यति॥
मामालोक्योत्तरं देहि मत्प्रभो परमेश्वर। ३
प्रसन्ने कुरु मन्नेत्रे नो चेत् स्वप्स्यामि मृत्यवे॥
तेन वक्ष्यति मद्द्वेषी पश्यासौ विजितो मया। ४
विचलन्तञ्च मां दृष्ट्वा हर्षिष्यन्त्यरयो मम॥
अहन्तु श्रद्दधामि स्म तावकीनमनुग्रहं। ५
त्राणेन तावकीनेन चानन्दिष्यति मे मनः।
गास्याम्यहं परेशाय यस्मान्मां स उपाकरोत्॥ ६

---

१४ चतुर्द्दशं गीतं।

पापिलोकानां दुष्टता भाविदुःखञ्च।

वाद्यनियन्त्रे दातव्यं दायूदो गीतं।

ईश्वरो नास्ति वागेषा चित्ते मूढेन गद्यते। १
ते भ्रष्टा गर्हिताचारा नास्ति कोऽपि सुकर्म्मकृत्॥
स्वर्गान्मानवसन्तानान् परमेशो निरीक्षते। २
ज्ञानाचारीश्वरान्वेषी कोऽप्यस्तीति दिदृक्षते॥
सर्व्वे पराङ्मुखा जाता युगपद् विकृतिं गताः। ३
नास्ति कोऽपि सदाचार एकोऽपि नहि विद्यते॥
किं न जानन्ति किञ्चित् ते सर्व्वे दुष्कर्म्मकारिणः। ४
अन्नवन्मत्प्रजाभक्षा नाह्वयन्तः परेश्वरं॥
महात्रासेन सन्त्रस्तास्तत्र स्थाने भवन्ति ते। ५
यस्माद् धार्म्मिकवंशस्य मध्यवर्त्ती परेश्वरः॥

६ दुःखिना मन्त्रणां यूयं किं कलङ्कं करिष्यथ ।
तदीयाश्रयभूमिस्तु जायते परमेश्वरः ॥
७ इस्रायेलः परित्राणं सियोनाद् उदियाद् द्रुतं ।
बन्दीभूतान् निजान् लोकान् प्रत्यायाते परेश्वरे ।
आनन्दिष्यति याकूब इस्रायेलपि हर्षिता ॥

१५ पञ्चदशं गीतं ।

सियोननिवासिनो वर्णनं ।

दायूदो धर्म्मगीतं ॥

१ परमेश तवावासे कः करिष्यत्यवस्थितिं ।
पवित्रे तव शैले वा को निवासं करिष्यति ॥
२ मानवः सरलाचारो धर्म्मकृद्धृदि सत्यवाक् ।
३ जिह्वायाञ्च न वाग्दुष्टो मित्रं प्रति न हिंसकः ।
समीपवासिलोकञ्च प्रति नायशस्करः ॥
४ यस्य दृष्ट्या मनुष्यश्च धर्म्महीनोऽवमन्यते ।
परमेश्वरभक्तानां क्रियते येन सत्कृतिः ।
क्षतये शपथं कृत्वा येन न क्रियतेऽन्यथा ॥
५ स्वरौप्यं येन वृद्ध्यर्थं परस्मिन् न समर्प्यते ।
निर्द्दोषस्य विरुद्धञ्च येनोत्कोचो न गृह्यते ।
नर एतादृगाचारो न कदापि स्खलिष्यति ॥

१६ षोडशं गीतं ।

१ परमेश्वरे दायूद आश्रयणं ८ अनन्तपरमायुषः प्रतीक्षणञ्च ।

दायूदो गुप्तधनरूपं गीतं ।

१ हे मदीश्वर मां रक्ष यतो विश्वसिमि त्वयि ।
२ परेशं मन्मनो वक्ति त्वमेवासि प्रभु र्मम ।
क्षेमं त्वद्व्यतिरिक्तं हि मम किञ्चिन्न विद्यते ॥
३ पवित्राणामहं सङ्गी धरणीतलवासिनां ।

नृणामादरणीयानां येषु सर्व्वा रुचि र्मम॥
परदेवग्रहीतारो वर्द्धयन्ति स्वयातनाः। ४
तेषु रक्तनिषेकश्च मया नैव करिष्यते।
नाधराभ्यां ग्रहीष्यन्ते तेषां नामानि वा मया॥
परेशो मम दायांशः पानपात्रं स एव मे। ५
त्वञ्च भागं मया लब्धं सम्यक् समेधयिष्यसि॥
मत्कृते मापनीरज्जु र्न्यपतत् सुन्दरे स्थले। ६
मामकीनोऽधिकारोऽपि सम्यगेव विशोभते॥
धन्यं वच्मि परेशं तं यो मह्यं मन्त्रणामदात्। ७
अत्र मे हृदयं रात्रौ मह्यं यच्छति चेतनां॥
निजसाक्षादहं नित्यं स्थापयामि परेश्वरं। ८
स मद्दक्षिणपार्श्वस्थो न स्खलिष्यामि कर्हिचित्॥
तस्माद्धृष्यति मच्चित्तं मम स्वान्तञ्च नन्दति। ९
मामकीनशरीरञ्च निर्व्विघ्नं सुशयिष्यते॥
परलोके मम प्राणान् यस्मात् त्वं न विहास्यसि। १०
स्वकीयं पुण्यवन्तं त्वं क्षयं प्राप्तुं न दास्यसि॥
जीवनस्यापि पन्थानं त्वं मां विज्ञापयिष्यसि। ११
महानन्दस्य बाहुल्यं प्राप्यते तव सम्मुखे।
नित्यवर्त्तिविलासश्च विद्यते तव दक्षिणे॥

---

१७ सप्तदशं गीतं।

निन्दायां दायूदा आत्मनो निर्दोषीकरणम् अपवादकस्य विरुद्धं प्रार्थनञ्च।

दायूदः प्रार्थना।

परमेश शृणु न्यायं मद्रवञ्च निशामय। १
त्वमाकर्णय याच्ञाञ्च निष्कापट्याधरस्य मे॥
यो धर्म्मो मामकीनः स तव साक्षात् प्रकाशतां। २
तव नेत्रद्वयं सम्यक् सारल्यञ्च निरीक्षतां॥
अनुसन्धाय मच्चित्तं रात्रौ मामवलोक्य च। ३
त्वं परीक्षितवान् मां हि किन्तु दोषं न लब्धवान्।

मम मानसचिन्ताभ्यां विभिन्नं वदनं नहि ॥
४ मानवानां क्रिया दृष्ट्वा त्वदीयाधरनिर्गतैः।
वाक्यै र्विनाशकस्याहं पदवीः पर्य्यवर्ज्जयं ॥
५ कुरु मे पादविक्षेपान् तव मार्गेषु सुस्थिरान्।
चरणौ मामकीनौ च स्खलतां न कदाचन ॥
६ अहं त्वामाह्वयामीश त्वं ममोत्तरदायकः।
निधाय श्रवणं त्वं हि मम वाचं निशामय ॥
७ निजदक्षिणहस्तेन त्राणं विश्वसतां त्वयि।
प्रतिरोधिभ्य उद्धारिन् स्वकृपामद्भुतां कुरु ॥
८ अक्ष्णः कनीनिकां यद्वत् तद्वत् त्वं परिरक्ष मां।
त्वदीयपक्षयुग्मस्य छायया माञ्च गोपय ॥
९ मां नाशयन्ति ये दुष्टास्तेभ्यस्त्वं परिरक्ष मां।
रिपुभ्यो मां जिघांसुभ्यो यैरहं परिवेष्टितः ॥
१० मेदसा स्थूलकायास्ते भाषन्ते गर्व्वितै र्मुखैः ॥
११ अस्माकं पादविक्षेपान् इदानीं वेष्टयन्ति ते।
देशे पराङ्मुखत्वाय तिष्ठन्ति स्थिरदृष्टयः ॥
१२ विदारणेच्छुकस्यैव पशुराजस्य सन्निभाः।
युवसिंहस्य वा तुल्याः स्थितस्य निभृते स्थले ॥
१३ परमेश त्वमुत्तिष्ठ तमाक्रम्य निपातय।
यो दुष्टस्तव खड्गस्त्वं तस्मान्मज्जीवमुद्धर ॥
१४ ये नरास्तव मुष्टिश्च तेभ्यो रक्ष परेश मां।
नराः संसारनिष्ठास्त इह जीवनभोगिनः।
त्वया गूढधनैस्तेषां पूर्य्यन्ते जठराणि हि।
पुत्रैस्तृप्यन्ति ते वित्तं स्वबालेष्वर्पयन्ति च ॥
१५ अहं प्राप्स्यामि धर्म्मेण तव वक्त्रस्य दर्शनं।
जागरित्वा गमिष्यामि त्वत्सादृश्येन तर्पणं ॥

---

१८ अष्टादशं गीतं।

१ दायूदः कथा ४ परमेश्वरस्य नानाश्चर्य्यक्रिया १६ ईश्वरीयोपकारेण दायूदो रक्षणं ४४ तन्निमित्तं तस्य धन्यवदनं।

वाद्यनियन्त्रे दातव्यं परमेश्वरीयदासस्य दायूदो गीतं।
यस्मिन् काले परमेश्वरः सर्व्वेषां रिपूणां शौलस्य च हस्तात् दायूदम् उद्धार तस्मिन् काले स परमेश्वरम् उद्दिश्यैतद् गीतं जगौ।

दायूद् उवाच।

परमेश्वर मच्छक्ते त्वयि प्रेम करोम्यहं॥ १
परमेशोऽस्ति शैलो मे मद्दुर्गं मम रक्षकः। २
मदीशोऽद्रिस्वरूपो मे तमहं शरणं गतः।
चर्म्म मे मम शृङ्गञ्च मत्त्राता प्रांशु मे गृहं॥
अहं प्रशंसनीयं तम् आह्वये परमेश्वरं। ३
तेन मद्द्वेषकारिभ्यो जायते मम रक्षणं॥
वेष्टितो मरणोन्मार्थैस्त्रासितः पातकोर्म्मिभिः। ४
क्लिष्टो नारकपाशैश्च मृत्युजालैश्च संवृतः॥ ५
अहमान्तरिकोद्वेगात् परमेश्वरमाह्वयं। ६
मदीयेश्वरमुद्दिश्य चाकुर्व्वे परिदेवनं।
मदीयार्त्तस्वरस्तेन तदाश्रावि स्वमन्दिरे।
प्राविशत् तस्य कर्णौ च मदीयं परिदेवनं॥
तस्य कोपान्वितः पृथ्वी कम्पित्वा प्राचलत् तदा। ७
पर्व्वतानाञ्च मूलानि चलित्वा प्रचकम्पिरे॥
तदीयनासिकारन्ध्राद् धूम उद्गतवांस्तदा। ८
जग्रास सकलं वह्निं र्निर्गतस्तस्य वक्त्रतः।
तस्मादुत्पद्य चाङ्गाराः सर्व्वतः प्राज्वलन् तदा॥
आकाशं नमयित्वा स यथा तेनावरूढवान्। ९
अन्धकारश्च विस्तीर्णस्तदीयपादयोरधः॥
ततः किरूवमारुह्य तूर्णमुड्डयते स्म सः। १०
वायुपक्षौ समाश्रित्य गगनेन ययात च॥
तमश्चावरणं कृत्वा चतुर्द्दिक्षु स्ववेश्मवत्। ११
स्थापयामास नीलाभ्रान् जीमूतानाञ्च संहतिं॥
तत्प्रत्यक्षप्रतापेन ते घनाः सम्पलायिताः। १२
सञ्जाता च शिलावृष्टिरङ्गाराश्च प्रजज्वलुः॥
परमेश्वर आकाशे तदानीं प्रजगर्ज च। १३
सर्व्वेषामुपरिस्थः स प्रैरयच्च निजं रवं।

शिलावृष्टिं तथाङ्गारान् वह्निना चोज्ज्वलान् बहून्॥
१४ परिक्षिप्य निजान् वाणान् व्यकिरत् सर्व्ववैरिणः।
वज्राघातैश्च भूयिष्ठैस्तानुद्विग्नान् चकार च॥
१५ परेश तव हुङ्कारात् नासावायोश्च वेगतः।
जलराशीयखातानि सुदृश्यान्यभवन् तदा।
भूमण्डलस्य मूलानि तदैवाविष्कृतानि च॥
१६ ऊर्द्ध्वस्थानान्निजं हस्तं स प्रसार्य्य ररक्ष मां।
बहुकीलालमध्यान्माम् उद्धरन् निर्गृहीतवान्॥
१७ बलिष्ठेभ्यश्च वैरिभ्यः स मां रक्षितवान् तदा।
यतो हेतो र्बलाधिक्यात् दुर्ज्जयास्ते ऽभवन् मया॥
१८ यदा ते मां समाक्राम्यन् आशङ्काजनके दिने।
तदानीं परमेशो ऽभून्ममालम्बनयष्टिका॥
१९ विस्तीर्णं स्थानमानीय तेनाहं रक्षितस्तदा।
मयि यस्मात् तदीया हि मनस्तुष्टिरजायत॥
२० मम धर्म्मानुसारान्मां प्रत्यकार्षीत् परेश्वरः।
मेध्यत्वात् करयो र्मह्यं यथायोग्यमदात् फलं॥
२१ यतो ऽहं परमेशस्य पदव्याः पथिको ऽभवं।
मदीशस्य विरुद्धश्च नापराधो मया कृतः॥
२२ सकलास्तस्य राजाज्ञा आसन् मज्ज्ञानगोचरे।
तदीयांश्च विधीन् मत्तो न व्यसर्जं कदाचन॥
२३ आसं तं प्रति निर्द्दोषः सावधानः स्वपातके॥
२४ तस्मात्तान्मम यो धर्म्मः करयो र्या च मेध्यता।
तद्योग्यं सुफलं मह्यं दत्तवान् परमेश्वरः॥
२५ दयालवे दयालुस्त्वं सज्जनाय च सज्जनः॥
२६ शुद्धाचाराय शुद्धस्त्वं कुटिलः कुटिलाय च॥
२७ रक्षी दीनप्रजानां त्वं पातयस्युच्चलोचनान्॥
२८ त्वं ज्वालयसि मद्दीपं मत्प्रभुः परमेश्वरः।
मामकीनमपि ध्वान्तम् उज्ज्वलं विदधाति हि॥
२९ त्वत्साहाय्येन शक्नोमि सैन्यमध्येन धावितुं।
मदीशस्योपकारेण प्राचीराण्यप्यहं प्लवे॥
३० स ईशो निर्म्मलाचारः परेशस्य वचः शुचि।

तदाश्रितमनुष्याणां सर्व्वेषां फलकश्च सः॥
तस्मात् परेश्वरादन्य ईश्वरः को हि वर्त्तते। ३१
अस्मदीयेश्वराद् भिन्नः कोऽचलो वा प्रविद्यते॥
स ईशश्च बलं मह्यं दत्तवान् कटिबन्धनं। ३२
पदवीं मामकीनाञ्च कृतवान् विघ्नवर्ज्जितां॥
मदीयौ चरणौ तेन मृगीपादसमौ कृतौ। ३३
संस्थापितश्च तेनैव मदीयोच्चपदेष्वहं॥
मदीयं हस्तयुग्मं स युद्धं कर्त्तुमशिक्षयत्। ३४
ततो मदीयबाहुभ्यां भग्नं ताम्रमयं धनुः॥
परित्राणस्वरूपं त्वं फलकं मे प्रदत्तवान्। ३५
तव दक्षिणहस्तेन चाहमस्मि स्थिरीकृतः।
त्वदीयनम्रभावेन सम्पन्ना चोन्नति र्मम॥
पादक्षेपस्थलं शस्तं मदधस्तात् त्वया कृतं। ३६
तस्मान्न विचलन्ति स्म चरणग्रन्थयो मम॥
मामकीनरिपूंश्चाहम् अनुधावन्नवाप्नवं। ३७
अविनाश्य समूलं तान् नो परावृत्तवांस्तदा॥
मया खण्डीकृतास्ते च पुनरुत्थातुमक्षमाः। ३८
न्यपतन् लम्बमाना हि मदीयपादयोरधः॥
त्वं युद्धार्थं बलं मह्यं दत्तवान् कटिबन्धनं। ३९
मामकीनविपक्षांश्च व्यदधा मद्वशीकृतान्॥
शत्रवो मे त्वया सर्व्वे कृता मत्तः पराङ्मुखाः। ४०
समूलञ्च मयोच्छिन्ना मानवा मां जिहिंसवः॥
अकुर्व्वन्नार्त्तरावं ते नासीत् कोऽप्युपकारकः। ४१
तैराहूतः परेशो ऽपि न प्रादात् किञ्चनोत्तरं॥
अचूर्णयं तदाहं तान् वायुचालितधूलिवत्। ४२
रथ्यास्थं कर्द्दमं यद्वत् प्राक्षिपञ्चावमन्य तान्॥
स्वजातीयविपक्षेभ्यस्त्वयैवाहं समुद्धृतः। ४३
भिन्नजातीयलोकानां मूर्ध्नि संस्थापितस्तथा।
तेन लोका मदज्ञाताः कुर्व्वते मम सेवनं॥
कर्णाभ्यामेव येषाञ्च मया श्रुता जनश्रुतिः। ४४
परदेशीयलोकास्ते कीर्त्तयन्ति मम स्तुतिं॥

४५ क्षीणा विदेशिनो लोकाः स्वदुर्गेभ्यस्स्खलन्ति च ॥
४६ अमरः परमेशोऽस्ति धन्यो मे स शिलोच्चयः ।
ईश्वरस्त्राणदाता मे भविष्यत्युन्नतः सदा ॥
४७ कृतवैरप्रतीकारं मां करोति स ईश्वरः ।
दमयित्वा च तेनैव जातयो मद्वशीकृताः ॥
४८ मदीयद्वेषिलोकेभ्यस्त्वयाहं परिरक्षितः ।
त्वं मदीयविपक्षेभ्योऽप्युन्नतं मां करिष्यसि ।
दौरात्म्याचारिलोकाच्च मां त्वमेवोद्धरिष्यसि ॥
४९ अतोऽहं भिन्नजातीनां सन्निधौ परमेश्वर ।
त्वत्स्तवं कीर्त्तयिष्यामि गास्यामि तव नाम च ॥
५० आत्मसम्बन्धिने राज्ञे त्वं महात्राणदायकः ।
तस्मिन् त्वयाभिषिक्ते च दायूदि तस्य चान्वये ।
सर्व्वकालं दयाचारस्त्वया कारिष्यते ध्रुवं ॥

---

१९ ऊनविंशतितमं गीतं ।

१ परमेशस्य महिम्नस्तस्य कर्म्मभिः प्रकाशनं ७ शास्त्रेण च तस्य पवित्रतायाः प्रकाशन ।

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं ।

१ नभोमण्डलमीशस्य महिमानं प्रशंसति ।
तस्य हस्तकृतं कर्म्म वर्ण्यते गगनेन च ॥
२ दिनमेकं दिनञ्चान्यत् प्रति वार्त्ताप्रवाहकं ।
एका निशा निशाञ्चान्यां प्रति ज्ञानप्रकाशिका ॥
३ नात्र गी र्नात्र वाक्यानि तेषां न श्रूयते रवः ॥
४ कृत्स्नं भूमण्डलं गत्वा ध्वनिस्तेषां प्रविष्टवान् ।
जगतः प्रान्तभागेऽपि तेषां वाच उपस्थिताः ।
तत्र व्योम्नि स सूर्य्यस्य स्थापयामास मण्डपं ॥
५ स वरस्य समानश्च निर्गच्छन् वासगेहतः ।
गन्तव्ये पथि धाविष्यन्नभिनन्दति वीरवत् ॥
६ व्योमान्तादुदयस्तस्य परिवृत्ति र्दिगन्तगा ।
तस्य प्रतापतो गुप्तं वस्तु किञ्चिन्न विद्यते ॥

शास्त्रं सिद्धं परेशस्य मनसः परिवर्त्तकं । ७
साक्ष्यं सत्यं परेशस्य ज्ञानदञ्चाल्पमेधसे ॥
विधयः परमेशस्य न्याय्याश्चित्तस्य नन्दनाः । ८
आज्ञा शुद्धा परेशस्य नेत्रयो र्दीप्तिवर्द्धिनी ॥
परमेशाच्च या भीतिः सा शुचि र्नित्यवर्त्तिनी । ९
राज्यनीतिः परेशस्य सत्या साध्वी च सर्व्वथा ॥
वाञ्छनीया सुवर्णात् सा कनकात् प्रचुरादपि । १०
सुस्वाद्वी पुष्पनिर्यासात् मधुवासस्य वा रसात् ॥
अयं त्वदीयदासोऽपि भवत्येतैः सुशिक्षितः । ११
एतेषां पालनादेव लाभस्तोत्पद्यते महान् ।
स्वभ्रमाः केन बुध्यन्ते गुप्तायेभ्यो विमुञ्च मां ॥ १२
गर्व्वजेभ्योऽपि दोषेभ्यो निजदासं निवारय । १३
ममोपर्य्याधिपत्यं ते मा कुर्व्वन्तु कदाचन ।
तेन सिद्धो भविष्यामि महापातकतः शुचिः ॥
परमेश्वर मद्दुर्ग मत्त्रातस्तव दृष्टये । १४
रोचन्तां मम वक्त्रस्य वाचो ध्यानञ्च हृद्गतं ॥

---

२० विंशतितमं गीतं ।

१ राज्ञः कृते प्रजानां प्रार्थनं ६ तस्योत्तरं ७ परमेश्वरे प्रजानां प्रत्याशा च ।

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं ।

परमेशो विपत्काले गृह्णातु प्रार्थनां तव । १
याकूबीयेशितु र्नाम त्वां करोतु समुन्नतं ॥
स प्रेषयतु साहाय्यं त्वत्कृते धर्म्मधामतः । २
सियोनाद्रौ समास्थाय त्वां करोतु च सुस्थिरं ॥
त्वदीयान् उपहारांश्च सकलाननुचिन्तयेत् । ३
तव हव्यबले र्दानमपि तेनानुगृह्यतां ॥ सेला ॥
तव यद्यन्मनोऽभीष्टं तत्तत् तुभ्यं ददातु सः । ४
विदधातु कृतार्थांश्च सकलां तव मन्त्रणां ॥
वयं तव परित्राणात् करिष्यामो जयध्वनिं । ५

ध्वजञ्चोन्नामयिष्यामः स्वकीयेशस्य नामनि।
त्वदीयाः प्रार्थनाः सर्व्वाः साधयेत् परमेश्वरः॥
६ नरं स्वेनाभिषिक्तं यत् त्रायते परमेश्वरः।
तदिदानीमहं जाने स स्वपूतदिवि स्थितः।
तदीयप्रार्थनां श्रुत्वा सफलां विदधाति हि।
निजदक्षिणहस्तस्य त्राणदैः शौर्य्यकर्म्मभिः॥
७ स्यन्दनान् कीर्त्तयन्तीमे तुरङ्गान् कीर्त्तयन्त्यमी।
निजप्रभोः परेशस्य नामास्माभिस्तु कीर्त्त्यते॥
८ ते नत्वा पतिता जाता वयञ्चोत्थाय सुस्थिराः॥
९ परेश त्राहि शृणोतु राजास्मान् प्रार्थनादिने॥

---

२१ एकविंशतितमं गीतं।

१ जयस्य निमित्तम् ईश्वरस्य धन्यवदनं ८ उपकारार्थं तस्मिन् प्रत्याशा च

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं।

१ हे परेश्वर शक्त्या ते ह्लादते पृथिवीपतिः।
कीदृशस्त्वत्परित्राणाद् आनन्दस्तस्य जायते॥
२ यद्यत् तस्य मनोऽभीष्टं तत् त्वं तस्मै वितीर्णवान्।
ओष्ठाभ्यामीरिता तस्य वाञ्छा नापह्नुता त्वया॥ सेला॥
३ आशीर्व्वादैः शुभैस्तस्य विस्मयो जनितस्त्वया।
जातरौप्यः किरीटश्च स्थापितस्तस्य मस्तके॥
४ जीवनं याचितस्तेन त्वं तस्मै दत्तवान् वरं।
अनन्तकालमानञ्च दीर्घत्वं परमायुषः॥
५ तावकीनपरित्राणात् सुमहत् तस्य गौरवं।
महिमा च प्रतापश्च त्वया तस्मिन् समर्पितौ॥
६ नित्याशीर्व्वादपात्रार्थं स त्वया विनिरूपितः।
तव वक्त्रप्रसादाच्च स हर्षेण प्रफुल्लितः॥
७ यतो हेतो र्महीपालः श्रद्दधाति परेश्वरं।
स च सर्व्वोपरिस्थस्य कृपया न स्खलिष्यति॥
८ त्वत्करेण धरिष्यन्ते सकलास्तव वैरिणः।

तव दक्षिणहस्तेन धरिष्यन्ते ऽरयस्तव ॥
त्वं निजक्रोधदृष्ट्या तान् करिष्यस्यग्निचुल्लिवत्। ९
परमेशः स्वकोपेन तान् सर्व्वान् सङ्ग्रसिष्यते।
इन्धनानि यथा तद्वत् तान् भक्षिष्यति पावकः॥
त्वं तेषां फलमुच्छिद्य भुवनाद्दवयिष्यसि। १०
नरसन्तानमध्ये च तेषां वंशोऽपि लोप्स्यते॥
यस्मात् त्वत्प्रातिकूल्येन ते दौरात्म्यं न्यरूपयन्। ११
कुसङ्कल्पमकुर्व्वंश्च न च साद्धुमशक्नुवन्॥
यतो हेतोः करिष्यन्ते ते त्वयैव पराङ्मुखाः। १२
तेषामास्यदिशि ज्यायां त्वं शरान् योजयिष्यसि॥
परमेश त्वमुत्कृष्टो निजविक्रमहेतुतः। १३
गानवाद्ये करिष्यामो वयं त्वच्छौर्य्यकारणात्॥

---

२२ द्वाविंशतितमं गीतं।

१ खीष्टस्य विलापः १९ प्रार्थना च २२ प्रशंसनञ्च।

वाद्यनियन्त्रे दातव्यम् अरुणम्टगीनामकस्वरयुक्तं दायूदो धर्म्मगीतं।

हे मदीश मदीश त्वं मां परित्यक्तवान् कुतः। १
दूरे तिष्ठन् मम त्राणात् क्रन्दनाच्च मयेरितात्॥
दिवाह्वये मदीश त्वच्चोत्तरं न प्रयच्छसि। २
आह्वये क्षणदायाञ्च शान्तिं नाप्नोमि काञ्चन॥
पूतस्त्वं राजमश्चस्ते चेस्रायेला कृताः स्तवाः। ३
अकारि त्वयि विश्वासो ऽस्माकं पूर्व्वीयपूरुषैः। ४
अकारि तैर्हि विश्वासो रक्षितास्च त्वयैव ते॥
त्वामुद्दिश्याह्वयन्तस्ते सम्प्रापाः परिरक्षणं। ५
कृत्वा त्वय्येव विश्वासमभवन् लज्जिता न ते॥
किन्त्वहं कृमिसङ्काशो न गण्यो मानवेष्वपि। ६
निन्दनीयो मनुष्याणां प्रजाभिश्चापमानितः॥
यावन्तो मां निरीक्षन्ते ते सर्व्वे विहसन्ति मां। ७
वक्रीकृत्याधरौ मूर्द्धस्चालयन्ति च मां प्रति॥

८ परमेशे ऽर्पयन् भारमसौ तेनैव रक्ष्यतां।
असौ निस्तार्य्यतां तेन यतस्तस्मै हि रोचते॥
९ किञ्च त्वं जननीगर्भान्मां समुद्धृतवान् पुरा।
आसी र्विश्वासभूमिस्त्वं मे मातृस्तन्यपायिनः॥
१० गर्भकोषाच्च निष्क्रान्तस्त्वय्येवाहं समर्पितः।
आ मातृकुक्षिवासाच्च त्वमेवासि मदीश्वरः॥
११ मत्तो दूरे न वर्त्तस्व यतो दुःखमुपस्थितं।
उपकारी च कुत्रापि कोऽपि नो विद्यते मम॥
१२ बहुभिर्वृषभैश्चाहं समन्तात् परिवेष्टितः।
वाशनीयबलीवर्द्दै र्बलिष्ठैरहमावृतः॥
१३ मामुद्दिश्य स्ववक्त्राणां व्यादानं ते च कुर्व्वते।
पशोर्विदारणेच्छातो गर्ज्जयन् केशरी यथा॥
१४ अहं तोयवदुत्सृष्टो मदस्थीनि स्खयानि च।
मधूच्छिष्टसमं चित्तं द्रवीभूतं मदन्तरे॥
१५ मद्बलं भाण्डवच्छुष्कं लग्ना जिह्वा च तालुनि।
कालधर्म्मस्य धूलौ च त्वयैवाहं निपातितः॥
१६ मां श्वानः परिवृण्वन्ति खलसङ्घश्च वेष्टते।
छिद्रितं पाणियुग्मञ्च पादयुग्मञ्च तै र्मम॥
१७ गणयामि मदस्थीनि ते मां पश्यन्ति लोचनैः॥
१८ मामकीनानि वस्त्राणि स्वमध्ये विभजन्ति ते।
मम परिच्छदार्थञ्च गुटिकां पातयन्ति हि॥
१९ हे परेश भवान् मत्तो दूरवर्त्ती न तिष्ठतु।
मदीयशक्तिदातस्त्वम् उपकर्त्तुं त्वरस्व मां।
२० मत्प्राणान् खड्गतो रक्ष दीनं चेतः शुनः करात्॥
२१ त्रायस्व सिंहवक्त्रान्मां मत्तातः खड्गिशृङ्गतः॥
२२ प्रशंसिष्यामि ते नाम निजभ्रातृगणं प्रति।
समितेर्मध्यसंस्थो ऽहं करिष्यामि तव स्तवं॥
२३ हे हे परेशितु र्भक्ता यूयं तं समभिष्टुत।
हे याकूबो ऽखिला वंशा यूयं तं हि समर्चत।
इस्रायेलो ऽखिला वंशा यूयं तस्माद् बिभीत च॥
२४ यतः स दुःखिनो दुःखं नावजानादुपेक्षया।

स्वास्थं तस्मादनाच्छाद्य सोऽशृणोत् तस्य रवनं।
त्वामुद्दिश्य करिष्यामि महासंसद्यहं स्तुतिं। २५
त्वद्भक्तानां समक्षे च शोधयिष्यामि मे व्रतान्।
अन्नं सम्भक्ष्य तृप्स्यन्ति मानवा नम्रचेतसः॥ २६
स्तोष्यते परमेशश्च परमेशार्थिभि र्जनैः।
युष्माकमन्तरात्मा च नित्यजीवी भविष्यति॥
पृथिवीप्रान्तभागस्थैः सर्व्वैः कृत्वानुचिन्तनं। २७
परमेश्वरमुद्दिश्य परावृत्तिः करिष्यते॥
भिन्नजातीयलोकानां सकलानि कुलानि च।
भवतः सम्मुखे नत्वा करिष्यन्त उपासनां॥
यस्माद्राज्यं परेशस्य भिन्नजातिषु शास्ति सः॥ २८
पृथिवीवासिनां मध्ये यावन्तः पुष्टमानवाः। २९
अन्नं सम्भक्ष्य ते सर्व्वे करिष्यन्त उपासनां॥
धूलिमध्ये ऽवरोहन्तः प्राणरक्षणवर्जिताः।
यावन्तो मानवास्ते ऽपि प्रणंस्यन्ति मुखं तव॥
अन्ववायेन चैकेन तव सेवा विधास्यते। ३०
तेन कारिष्यते नित्यं प्रभुमुद्दिश्यकीर्त्तनं॥
ते च जनिष्यमाणानां नृणां मध्य उपस्थिताः। ३१
तस्य धर्म्मं गदिष्यन्ति यस्मात् सिद्धीचकार सः॥

---

२३ त्रयोविंशं गीतं।

पालकं परमेश्वरं प्रति प्रत्याशा।

दायूदो धर्म्मगीतं।

पालको ऽस्ति परेशो मे न भविष्यामि दुर्गतः॥ १
स मां हरितशष्पेषु क्षेत्रेषु शाययिष्यति। २
सुशान्तानां जलानाञ्च पार्श्वे मां चारयिष्यति॥
जीवयिष्यति मत्प्राणान् माञ्च स्वनामहेतुना। ३
धर्म्मरूपेषु मार्गेषु गमनं कारयिष्यति॥
मृत्युच्छायास्वरूपेण कन्दरेण व्रजन्नपि। ४

न भेष्याम्यापदो यस्मात् मत्सङ्गी त्वं भविष्यसि।
तव दण्डेन यष्ट्या च सान्त्वना मे जनिष्यते॥
५ ममारीणां समक्षं त्वं भोज्यं मे रचयिष्यसि।
त्वत्तस्तैलाक्तशीर्षोऽहं मत्कंसश्च समाप्लुतः॥
६ यावज्जीवञ्च मां क्षेमं दया चानुचरिष्यतः।
दीर्घकालञ्च वत्स्यामि परमेशस्य मन्दिरे॥

२४ चतुर्विंशं गीतं।

१ परमेश्वरस्य राजत्वं २ तदीयलोकानां वर्णनं ७ तदीयग्रहणीयलोकानां निवेदनं।

दायूदो धर्म्मगीतं।

१ अस्ति वसुन्धरा तस्याः पूरकञ्च परेशितुः।
तस्यैव जगती कृत्स्ना सहिता तन्निवासिभिः॥
२ यस्मात् सा स्थापयाञ्चक्रे तेन कीलालराशिषु।
सरितामुपरिष्टाच्च सा तेनैव विनिर्म्ममे॥
३ पर्व्वतं परमेशस्य समारोक्ष्यति को जनः।
कः करिष्यत्यवस्थानं तदीयधर्म्मधाम्नि वा॥
४ यस्य हस्तद्वयं शुद्धं यस्य चित्तञ्च निर्म्मलं।
न प्रवृत्तं मनोऽसारे न जातः शपथश्छलात्॥
५ शुभाशिषं मनुष्यः स लप्स्यते परमेश्वरात्।
स समाप्स्यति पुण्यञ्च निजत्राणाकरेश्वरात्॥
६ एतादृशो भवेद्वंशस्तवान्वेषणकारिणां।
ये तवास्यं दिदृक्षन्ते ते याकूबीयजातयः॥ सेला॥
७ भो भो द्वाराणि युष्माभिरुन्नम्यन्तां शिरांसि हि।
चिरस्थायिकवाटानि यूयं यात समुच्छ्रयं।
सुमहामहिमा राजा विदधातु प्रवेशनं॥
८ सुमहामहिमा राजा योऽसौ को नु भवेत् स वा।
परमेशो बली शूरो युद्धवीरः परेश्वरः॥
९ भो भो द्वाराणि युष्माभिरुन्नम्यन्तां शिरांसि हि।

चिरस्थायिकवाटानि यूयं यात समुच्छ्रयं।
सुमहामहिमा राजा विदधातु प्रवेशनं॥
सुमहामहिमा राजा योऽसौ को नु भवेत् स वा। १०
सैन्याध्यक्षः परेशो यः स महामहिमा प्रभुः॥

---

२५ पञ्चविंशं गीतं।

इस्रीयभाषया ककारादिर्गीतं तेन पापमार्ज्जनार्थमुपकारार्थञ्च दायूदः प्रार्थना।

दायूदो गीतं।

त्वामुद्दिश्य परेशाहम् उन्नयामि निजं मनः॥ १
श्रद्दधामि मदीश त्वां लज्जा मा सम्भवेन्मम। २
न करोतु मम द्वेषी जयगर्व्वञ्च मामधि॥
त्वामाकाङ्क्षन्ति यावन्तो व्रीडितत्वं न यान्ति ते। ३
निर्निमित्तकुलाचारा ये समाप्स्यन्ति ते त्रपां॥
त्वं परेश निजान् मार्गान् मां ज्ञापयितुमर्हसि। ४
देहि सुशिक्षणं मह्यं स्वकीयाः पदवीरधि॥
यापयन् मां स्वसत्येन देहि मह्यं सुशिक्षणं। ५
त्वं त्राणाकर ईशो मे त्वामाकाङ्क्षाम्यहं सदा॥
हे परेश निजं स्नेहं विविधाञ्च दयां स्मर। ६
यस्मादनादिकालात् सा विद्यमाना प्रकाशते॥
मम बाल्यस्य पापानि मम दोषांश्च मा स्मर। ७
स्मर स्वीयकृपातो मां सद्भावेन परेश ते॥
सद्भावः सरलात्मा च विद्यते परमेश्वरः। ८
तस्मात् पापिमनुष्यान् स बोधयिष्यति सत्पथं॥
नम्रलोकान् स धर्म्मेण गमनं कारयिष्यति। ९
दास्यते नम्रलोकेभ्यः स्वमार्गञ्चाधि शिक्षणं॥
ये लोका नियमादेशौ तस्याचरन्ति तान् प्रति। १०
परमेशस्य पन्थानः सर्व्वे सत्यदयामयाः॥
हे परेश स्वकीयस्य नामधेयस्य कारणात्। ११
त्वं क्षमस्वापराधं मे यस्मात् सोऽस्ति महत्तमः॥

१२ परमेश्वरतो भीतो मानवः कः प्रविद्यते।
यः पन्था तेन धर्त्तव्यस्तं स तं दर्शयिष्यति॥
१३ क्षेमे वत्स्यन्ति तत्प्राणास्तद्वंशो भोक्ष्यते धरां॥
१४ परमेशस्य सौहार्द्दं तद्भक्तेष्वेव वर्त्तते।
तस्य यो नियमस्तं स तानेव ज्ञापयिष्यति॥
१५ परमेशमपेक्षेते मम नेत्रे निरन्तरं।
यस्मात् स एव मत्पादावुद्धरिष्यति जालतः॥
१६ मां निरीक्ष्यानुकम्पस्वानाथो दीनो यतोऽस्म्यहं॥
१७ विरुद्धं मे मनोदुःखं त्वं मां कष्टेभ्य उद्धर॥
१८ वीक्षस्व दैन्यदुःखे मे सर्व्वाघानि क्षमस्व मे॥
१९ अवलोकय मद्द्विष्टॄन् यस्मात् ते बहुसंख्यकाः।
ते च दौरात्म्ययुक्तेन द्वेषेण प्रद्विषन्ति मां॥
२० मामकीनात्मनो रक्षां कुरु माञ्च समुद्धर।
मा सम्भवतु लज्जा मे यस्मात् त्वां श्रद्दधाम्यहं॥
२१ रक्षतां सिद्धिसारल्ये मां यतस्त्वदपेक्ष्यहं॥
२२ ईश त्वं सर्व्वदुःखेभ्य इस्रायेलं विमोचय॥

---

२६ षड्विंशं गीतं।

दायूदः सरलत्वं प्रार्थनञ्च।

दायूदो गीतं।

१ परमेश्वर धर्म्मं मे भवान् निर्णेतुमर्हति।
यतो ऽहं सरलाचारः परेशं शरणं गतः।
न कदाचन तस्मान्मे स्खलनं सम्भविष्यति॥
२ मां परेशानुसन्धेहि मत्परीक्षां विधेहि च।
मानसं मम चित्तञ्च निर्म्मलीक्रियतां त्वया॥
३ यस्मात् तव दया नित्यमस्ति मद्दृष्टिगोचरे।
त्वदीयसत्यमार्गेण गमनञ्च करोम्यहं॥
४ नरैरसारतासक्तैः सार्द्धं नोपविशाम्यहं।
छद्मयुक्तमनुष्याणां सभां न प्रविशामि च॥

समाजो दुश्चरित्राणां घृणार्हो मन्यते मया। ५
दुष्टानाञ्च समीपे ऽहं न करोम्युपवेशनं॥
शुद्धतारूपतोयेन क्षालयित्वा निजौ करौ। ६
वेदिं प्रदक्षिणीकुर्व्वन् तव हे परमेश्वर॥
अहमुच्चेन शब्देन कीर्त्तयामि तव स्तवान्। ७
तवाश्चर्य्याणि कर्म्माणि सर्व्वाणि कथयामि च॥
अहं परेश सम्प्रीये त्वदीयावासवेश्मनि। ८
तस्मिन्नेव स्थले यत्र महिमा ते ऽधितिष्ठति॥
मा संहर मम प्राणान् पापिभि र्मानवैः सह। ९
जीवितं मम वा लोकै रक्तपातप्रियैः सह॥
येषां हस्ताश्छलाधाराः पाणिश्चोत्कोचपूरितः॥ १०
किन्त्वहं सरलाचारो मां त्रायस्व दयस्व च॥ ११
चरणं मामकीनं तु समाने तिष्ठति स्थले। १२
अहं समाजमध्ये च त्वां स्तोष्यामि परेश्वर॥

---

२७ सप्तविंशं गीतं।

परमेश्वरं प्रति दायूदः प्रत्याशा प्रेमा प्रार्थना च।

दायूदो गीतं।

ज्योतिस्त्राणं परेशो मे कस्माद् भेष्याम्यहं पुनः। १
प्राणस्थैर्य्यं परेशो मे कस्मात् प्राप्स्यामि साध्वसं॥
दुश्चरित्रा मनुष्या ये पीडका द्वेषिणश्च मे। २
ते यदा मामुपातिष्ठन् मम मांसं बुभुक्षवः।
तदानीं स्खलनं गत्वा न्यपतन् स्वयमेव ते॥
शिविरेणापि रुद्धस्य मम चित्तं न भेष्यति। ३
मद्विरुद्धं रणे जातेऽप्यहं स्थास्यामि निर्भयः॥
परमेशादयाचेऽहं वरमेकं मयेप्सितं। ४
यावज्जीवं परेशस्य मन्दिरे निवसन्नहं।
शोभां परेशितु र्दृष्ट्वा ध्यातुं वाञ्छामि तद्गृहे॥
यस्मान्निजोटजे मां स गोपयिष्यति दुर्द्दिने। ५

खदूष्यस्य रहःस्थाने माञ्च प्रच्छादयिष्यति।
शिलोच्चयोपरिष्टाच्च मामध्यारोपयिष्यति॥
६ चतुर्द्दिक्स्थरिपुभ्यो मे ह्युन्नमत्यधुना शिरः।
तस्माद् दास्यामि तद्दूष्ये हर्षनादैर्बलीनहं।
करिष्यामि परेशस्य स्तुतये गानवादनं॥
७ शृणु मे परमेश त्वं स्वरवेणाहमाह्वये।
मां त्वमेवानुकम्पस्व देहि त्वं मह्यमुत्तरं॥
८ मद्वक्त्रं मार्गतेत्युक्ता पाथ्यते मन्मनस्त्वया।
अन्वेषिष्याम्यहं तस्मात् तव वक्त्रं परेश्वर॥
९ स्वकीयं वदनं मत्तो न समाच्छाद्यतां त्वया।
मा क्रुद्धापास्य ते दासं त्वं मदीयोपकारकः।
मा परित्यज मा प्रोज्झ मां मत्त्राणाकरेश्वर॥
१० पित्रा मात्रा च सन्त्यक्तं मां परेशो ग्रहीष्यति॥
११ त्वं परेश स्ववर्त्मानि मां ज्ञापयितुमर्हसि।
ममारीणां निमित्तं माम् ऋजुमार्गेण यापय॥
१२ माञ्च त्वं मद्विपक्षाणां स्वेच्छायां न समर्पय।
यतो हेतो र्विरुद्धं मे साक्षिणोऽनृतवादिनः।
क्रूरोद्गीरकलोकाश्च समुत्तिष्ठन्ति सर्व्वतः॥
१३ परमेशस्य सौजन्यं वीक्षिष्ये जीवतां भुवि।
करोम्येताद्दशीमाशां न चेत् किं मम मङ्गलं॥
१४ परमेशं प्रतीक्षस्व त्वमित्थं बलवान् भव।
सुस्थिरञ्चास्तु ते चित्तं प्रतीक्षस्व परेश्वरं॥

---

२८ अष्टाविंशं गीतं।

१ आत्मनो निमित्तम् आत्मीयलोकानाञ्च निमित्तं दायूदः प्रार्थना ६ परमेश्वरस्य धन्यवदनञ्च।

दायूदो गीतं।

१ त्वामुद्दिश्य मयाह्वानं क्रियते परमेश्वर।
हे मदीयगिरे त्वं मां प्रति मा भव नीरवः॥

नो चेत् त्वं यदि निःशब्दो भवे मां प्रति साम्प्रतं।
तर्हि गर्त्तेऽवरूढानां यास्यामि तुल्यतामहं॥
त्वमाकर्णय काकूक्तिं त्वां प्रति क्रन्दतो मम। २
पवित्रञ्च त्वदागारं प्रत्युत्तोलयतः करौ॥
मापसारय मां दुष्टै र्मा वा कुकर्म्मभिः सह। ३
मित्रं प्रति प्रियालापैश्चित्ते दौर्जन्यकल्पकैः॥
याद्दगस्ति क्रिया तेषां चरित्रस्य च दुष्टता। ४
फलदानं त्वया तेभ्यस्ताद्दगेव विधीयतां॥
हस्तानां कर्म्मणो योग्यं फलं तेभ्यो वितीर्य्यतां।
आचारो याद्दशस्तेषां ताद्दशं कुरु तान् प्रति॥
यतो हेतो र्मनुष्यास्त आचारान् परमेशितुः। ५
तस्य वा हस्तयोः कर्म्म न पर्य्यालोचयन्ति हि।
तस्मादुत्पाटनं तेषां न वृद्धिं स करिष्यति॥
धन्यः परेश्वरो यस्मात् काकूक्तिं मम सोऽशृणोत्॥ ६
बलं मे परमेशोऽस्ति फलकश्च स एव मे। ७
मच्चित्तं व्यश्वसत् तस्मिन् अहञ्चोपकृतोऽभवं।
तस्माद् हृष्यति मे चित्तं मद्गीतैः स्तोष्यते च सः॥
बलमस्ति स्वकीयानां प्रजानां परमेश्वरः। ८
स्वीयाभिषिक्तलोकस्य दुर्गञ्च त्राणदायि सः॥
त्वं त्रायस्व निजाँल्लोकान् स्वाधिकारे वदाशिषं। ९
चारयंश्च सदाकालं तान् विधेहि समुन्नतान्॥

---

२९ ऊनत्रिंशत्तमं गीतं।

मेघगर्जनेनेश्वरस्य महिम्नः प्रकाशनं।

दायूदो धर्म्मगीतं।

परमेशस्य युष्माभि र्हे पराक्रमिणां सुताः। १
परमेशस्य युष्माभिः स्तूयेतां बलगौरवे॥
यूयञ्च परमेशस्य नाम्नोऽभिष्टुत गौरवं। २
परेशाय प्रणामञ्च कुरुध्वं पूतशोभया॥

३ परमेशस्य निर्घोषः सलिलान्यधितिष्ठति।
सुमहामहिमा चेशो मेघनादं करोति हि।
राशीकृतानि तोयानि परमेशोऽधितिष्ठति॥
४ परमेशस्य निर्घोषो विद्यते सपराक्रमः।
परमेशस्य निर्घोषो विद्यते हि प्रतापवान्॥
५ परमेशस्य निर्घोषस्तरुराजविदारकः।
प्रभनक्त्येरसाख्यान् द्रून् लिवानोने परेश्वरः॥
६ स नर्त्तयति तान् शालान् धेनूनां शावकानिव।
लिवानोनशिरीयोणौ गिरी च खङ्गिवत्सवत्॥
७ परमेशस्य निर्घोषो वह्निजिह्वाविभेदकः॥
८ परमेशस्य निर्घोषान्मरुभूमिः प्रवेपते।
वेपते परमेशाच्च कादेशीयं मरुस्थलं॥
९ परमेशस्य निर्घोषो हरिणीः स्रावयत्यपि।
अरण्यानि च तेनैव निष्पत्राणि भवन्ति हि।
तत्प्रासादे स्थितं सर्व्वं गौरवञ्च प्रशंसति॥
१० आसीत् सिंहासनासीनो जलाप्लावे परेश्वरः।
राजवच्च सदासीनः संस्थाता परमेश्वरः॥
११ स्वप्रजाभ्यः परेशेन दीयते हि पराक्रमः।
स्वप्रजाभ्यः परेशेन दीयते शान्तये वरः॥

---

३० त्रिंशत्तमं गीतं।

१ विपदो निस्तारनिमित्तं धन्यवदनं ४ अनुग्रहप्राप्तिनिमित्तम् ईश्वरसन्निधौ धन्यवदनं प्रार्थनञ्च।

गृहप्रतिष्ठाकाले दायूदा कृतं गानार्थकं धर्म्मगीतं।

१ प्रशंसामि परेश त्वां यतोऽहं प्रोद्धृतस्त्वया।
मद्विरुद्धञ्च मेऽरीणां त्वया हर्षो निवारितः॥
२ मत्प्रभो परमेशाहं त्वामुद्दिश्यारुवं पुरा।
तदानीञ्च त्वयैवाहं स्वस्थतामाप्नवं पुनः॥
३ त्वं परेश्वर मत्प्राणान् परलोकाद् उदानयः।

गर्त्तमध्ये ऽवरोहन्तं माञ्च त्वं समजीजिवः॥
गीयतां परमेशाय युष्माभिस्तस्य साधुभिः। ४
तस्य पवित्रतायाश्च स्मरणे क्रियतां स्तुतिः॥
तत्कोपेन क्षणं दुःखं तत्प्रसादेन जीवनं। ५
रोदनं क्षणदास्थायि प्रात र्हर्षो ऽनुगच्छति॥
सम्पत्काले मयेत्युक्तं न स्खलिष्यामि कर्हिचित्॥ ६
परमेश प्रसादात् ते स्थापितो मद्गिरि र्दृढं। ७
किन्तु त्वया निजे वक्त्रे छादिते व्याकुलो ऽभवं॥
त्वामुद्दिश्य परेशाहम् आह्वानं कृतवान् तदा। ८
अकुर्व्वं परमेशञ्च प्रतीदं परिदेवनं॥
शोणिते मम को लाभः को मे गर्त्तावरोहणे। ९
रजसा किं तव स्तोत्रं सत्यं वा कीर्त्तयिष्यते॥
परमेश त्वयाकर्ण्य करुणा क्रियतां मयि। १०
क्रियताञ्चोपकारो मे त्वया हे परमेश्वर॥
त्वं शोकं मे ऽकरो र्नृत्यं शाणवस्त्रं विमोच्य मे। ११
मह्यमानन्दरूपञ्च प्राददाः कटिबन्धनं॥
तुभ्यं मे मनसा गानं प्रकर्त्तव्यममौनिना। १२
मत्प्रभो परमेशाहं त्वां नविष्यामि सर्व्वदा॥

---

३१ एकत्रिंशं गीतं।

१ उपकारार्थं परमेश्वरस्य सन्निधौ प्रार्थनं १४ अनुग्रहस्य निमित्तं प्रशंसनञ्च।

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं।

अद्धामि परेश त्वां मम लज्जा कदाचन। १
मा भवेत् त्वं स्वधर्म्मेण मम रक्षां कुरुष्व हि॥
मयि कर्णं निधत्स्व त्वं मामुद्धर्त्तुं त्वरस्व च। २
मदीयाश्रयशैलस्त्वं रक्षादुर्गञ्च मे भव॥
यस्मात् त्वमेव मच्छैलो मम दुर्गञ्च विद्यसे। ३
त्वं स्वनामनिमित्तं मां यापयन् चारयिष्यसि॥
उद्धरिष्यसि ते गुप्ताज्जालान्मां त्वं ममाश्रयः। ४

५ अहं स्वकीयमात्मानं निक्षिपामि करे तव।
मम त्राता परेशासि त्वं हे सत्यमयेश्वर॥
६ असाराणां व्यलीकानां वस्तूनां सेवकान् मया।
गर्हमाणेन विश्वासः क्रियते परमेश्वरे॥
७ तावकीनप्रसादेऽहम् आनन्दाम्युल्लसामि च।
यस्मात् त्वं वीक्ष्य मे क्लेशं रक्षित्वापत्सु मे मनः॥
८ न समर्पितवान् बद्धं मां विपक्षस्य हस्तयोः।
किन्तु विस्तारिते स्थाने मम स्थापितवान् पदं॥
९ त्वं परेशानुकम्पस्व मां यस्मादहमुद्विजे।
कातर्य्येण विशीर्य्यन्ते मन्नेत्रप्राणकुक्षयः॥
१० गतं मे जीवितं शोकाद् दीर्घश्वासाच्च मे वयः।
मत्पापान्मे बलं क्षीणं शीर्णानि कीकसानि च॥
११ मदरातिसमूहेन निन्दापात्रमहं कृतः।
अतिनिन्द्यं स्वमित्राणाम् आत्मीयानाञ्च भीषणं।
ये मां पश्यन्ति मार्गे ते पलायन्ते मदन्तिकात्॥
१२ अस्मृतोऽहं भवामि स्म प्रेतवन्मानसाच्युतः।
कस्यचिन्नष्टकल्पस्य भाजनस्य समोऽभवं॥
१३ निन्दां शृणोम्यनेकेषां सर्व्वतो वर्त्तते भयं।
यस्मान्मत्प्रातिकूल्येन मन्त्रयन्ते समेत्य ते।
मम प्राणविनाशार्थं कुर्व्वते च कुकल्पनां॥
१४ अहन्तु त्वयि विश्वासं कुर्व्वे हे परमेश्वर।
ईश्वरो मे त्वमेवासि वाक्यमेतद् ब्रवीमि च॥
१५ तव हस्ते हि विद्यन्ते समयाः सकला मम।
द्वेषिणां बाधकानाञ्च करेभ्यो मां त्वमुद्धर॥
१६ एतस्मिन् तव दासेये प्रसन्नवदनो भव।
तावकीनप्रसादेन मम त्राणं विधेहि च॥
१७ लज्जा मे मा भवेद् यस्मात् त्वां परेशाहमाह्वये।
दुष्टानां सम्भवेल्लज्जा नरके चास्यबन्धनं॥
१८ स्तब्धवाचोऽभिजायन्ताम् ओष्ठा निःसत्यवादिनः।
अहङ्कारावमानाभ्यां धार्म्मिके दर्पभाषिणः॥
१९ किं महत् तव सौजन्यं त्वद्भक्तानां कृते चितं।

त्वदाश्रितेषु चाभ्यस्तं नरवंशस्य सम्मुखे ॥
स्वमुखस्याश्रयेण त्वं विद्रोहाच्छादयन् नृणां। १०
रसनानां विवादात् तान् उटजे गोपयिष्यसि ॥
परमेशो भवेद् धन्यो यस्मात् तेनैव मां प्रति। २१
प्राकाश्यत महाश्चर्य्या करुणा नगरे दृढे ॥
अहं त्वद्दृष्टितश्छिन्न इत्युद्वेगान्मयोदितं। २२
त्वया त्वाश्रावि खेदोक्तिस्त्वां प्रति क्रन्दतो मम ॥
प्रीयध्वं परमेशे हि सकलास्तस्य साधवः। २३
विश्वास्यानां मनुष्याणां रक्षितास्ति परेश्वरः।
प्रचुरञ्च फलं तेन गर्व्वाचाराय दीयते ॥
जायध्वं बलिनः सर्व्वे हे परेशप्रतीक्षिणः। २४
स हि चित्तानि युष्माकं सुदृढानि करिष्यति ॥

---

३२ द्वात्रिंशं गीतं।

१ पापक्षमातः सुखस्य निर्णयः ३ क्षमार्थं खेदस्य पापस्वीकारस्य च प्रयोजनं ८ तस्य फलञ्च।

दायूद उपदेशगीतं।

धन्यं वदामि मुक्ताघं यस्य पापं तिरोहितं ॥ १
धन्यः स मानवो यस्य दोषाणां गणना नहि। २
क्रियते परमेशेन यस्यात्मा छलवर्ज्जितः ॥
अहं रुद्धमुखोऽतिष्ठं तदानीन्त्वखिलं दिनं। ३
कुर्व्वतो मम काकूक्तिं कीकसान्याप्नुवन् क्षयं ॥
गुरुरासीत् दिवारात्रं तव हस्तो ममोपरि। ४
व्यकारि मम हृत्पिण्डं ग्रीष्मकालिकतापतः ॥ सेला ॥
ततः परं निजं पापं मया तुभ्यं निवेदितं। ५
स्वापराधमनाच्छाद्य मयेदञ्चेरितं वचः।
स्वदोषान् स्वीकरिष्यामि परमेशस्य सम्मुखे।
मम पापस्य दोषित्वं त्वमेवाक्षमथास्तदा ॥ सेला ॥
इतो हेतो र्यदा प्राप्तुं मानवैः शक्यते भवान्। ६
तदानीं साधुरेकैकस्त्वां प्रति प्रार्थयिष्यते।

जाते महाजलाप्लावे स्पृच्यते नहि तेन सः ॥
७ ममाश्रयस्त्वमेवासि त्वं मां क्लेशादविष्यसि।
रक्षाकीर्त्तनगीतैश्च त्वं मां संवेष्टयिष्यसि ॥ सेला ॥
८ अहं त्वामुपदेक्ष्यामि गन्तव्यं वर्त्म दर्शयन्।
नयनेन मदीयेन तुभ्यं दास्यामि मन्त्रणां ॥
९ यूयं मा भूत निर्ब्बोधास्तुरङ्गाश्वतरा इव।
तेषां रश्मिः खलीनञ्च भूषणं दमनार्थकं।
यस्मात् तव सकाशं ते नोपतिष्ठन्ति कामतः ॥
१० दुराचारमनुष्यस्य वेदनाः सन्ति भूरयः।
परेशश्रद्दधानस्तु कृपया वेष्टयिष्यते ॥
११ धार्म्मिकाः कुरुतानन्दम् उल्लासञ्च परेश्वरात्।
यूयं हे सरलात्मानः सर्व्वे हर्षेण गायत ॥

---

३३ त्रयस्त्रिंशं गीतं।

१ अनुग्रहपराक्रमयो र्निमित्तं १० रक्षायाश्च निमित्तं परमेश्वरस्य प्रशंसनं।

१ परमेशेन हृष्यन्तो यूयं गायत धार्म्मिकाः।
प्रशंसैव मनुष्येषु सरलात्मसु युज्यते ॥
२ वीणया परमेशस्य कुरुध्वं गुणकीर्त्तनं।
युष्माभि र्वाद्यतां तस्मै दशतारञ्च नेवलं ॥
३ नूतनं गीतमेकञ्च तमुद्दिश्य प्रगायत।
कुरुध्वं जयनादेन सुश्राव्यं यन्त्रवादनं ॥
४ यतो हेतोः परेशस्य सरलं विद्यते वचः।
तस्य सर्व्वाणि कर्म्माणि विश्वास्यानि भवन्ति च ॥
५ धर्म्माचारे विचारे च प्रीयते परमेश्वरः।
कृपया परमेशस्य पूर्णा चास्ति वसुन्धरा ॥
६ परमेशस्य वाक्येन निर्म्ममे व्योममण्डलं।
एतना तस्य सर्व्वा च तदीयवक्त्रवायुना ॥
७ समुद्रस्यापि तोयानि राशिवत् सञ्चिनोति सः।
निदधाति स्वकोषेषु गभीराणि जलानि च ॥

हे भूलोकस्थिताः सर्व्वे प्रबिभीत परेश्वरात्। ८
जगन्निवासिनः सर्व्वे तस्मात् कुर्व्वन्तु साध्वसं॥
यतस्तेनोदिते सिद्धं तेनादिष्टे व्यवस्थितं॥ ९
परमेशोऽन्यजातीनां मन्त्रणां कुरुते वृथा। १०
क्रियन्ते विफलास्तेन कल्पनाः परदेशिनां॥
स्थास्यत्यनन्तकालं तु परमेशस्य मन्त्रणा। ११
वंशपरम्परां यावत् स्थिरास्तच्चित्तकल्पनाः॥
धन्यां वदामि तां जातिं यस्या ईशः परेश्वरः। १२
धन्यान् लोकांश्च तेनैव स्वाधिकाराय रोचितान्॥
स्वर्गतः परमेशेन दृष्टिपातो विधीयते। १३
स च मानवसन्तानान् सर्व्वानेव निरीक्षते॥
स स्ववासस्थलात् सर्व्वान् पश्यति क्षितिवासिनः॥ १४
स तेषां चित्तनिर्म्माता स तेषां सर्व्वकर्म्मवित्॥ १५
नास्ति सैन्यबहुत्वेन त्राणप्राप्तो महीपतिः। १६
वीरो बलमहत्त्वेन निस्तारं लभते नहि॥
त्राणार्थं निष्फलो वाजी महाशक्त्या न रक्षति॥ १७
पश्य परेशितु र्दृष्टिस्तस्य भक्तेषु वर्त्तते। १८
प्रतीक्षन्ते च ये तस्य दयां तेष्वपि वर्त्तते॥
यतः स मरणात् तेषां प्राणरक्षां करिष्यति। १९
दुर्भिक्षस्यापि काले तान् सजीवान् गोपयिष्यति॥
विदधाति मनोऽस्माकं प्रत्याशां परमेश्वरे। २०
अस्माकमुपकारी स सोऽस्माकं फलकं तथा॥
तस्मिन्नेव मनोऽस्माकम् आनन्दं प्रकरोति हि। २१
यतो हेतो र्वयं तस्य पुण्यनामावलम्बिनः॥
तावकीनकृपास्मासु वर्त्ततां परमेश्वर। २२
यतः प्रतीक्षमाणास्त्वामवतिष्ठामहे वयं॥

---

३४ चतुस्त्रिंशं गीतं।

१ इब्रीयभाषया ककारादिवर्णै र्गीतं तत्र रक्षार्थम् ईश्वरस्य प्रशंसा ११ दायूद उपदेशवाक्यञ्च।

यस्मिन् काले दायूद् अवीमेलकस्य समक्षं स्वीयबुद्धिगोपनहेतुतस्तेन वहिष्कृतः प्रतस्थौ तदानीन्तनं गीतं॥

१ अहं धन्यं वदिष्यामि सर्व्वकाले परेश्वरं।
नित्यं स्थास्यति तस्यैव प्रशंसा वदने मम॥
२ मामकीनं मनः श्लाघां परेशस्य करिष्यति।
आनन्दिष्यन्ति तत् श्रुत्वा मानवा नम्रचेतसः॥
३ मया सार्द्धं परेशस्य महिमानं प्रशंसत।
अस्माभिरेकचित्तैश्च तस्य नामानुकीर्त्यतां॥
४ परमेशो मयान्विष्टः प्राददान्मह्यमुत्तरं।
त्रासेभ्यः सकलेभ्यश्च स मामुद्धृतवान् स्वयं॥
५ तमेवोद्दिश्य दृक्पातं कृत्वा दिद्युतिरे च ते।
न हि वक्त्राणि वा तेषां विवर्णान्यभिजज्ञिरे॥
६ अनेन दुःखिनाहूतः परमेशो न्यशामयत्।
क्लेशेभ्यः सकलेभ्यश्च स तमुद्धृतवान् स्वयं॥
७ परमेशस्य दूतेन तद्भक्तानां समन्ततः।
शिविरं स्थापयित्वैव तेषां रक्षा विधीयते॥
८ यूयमास्वाद्य बुध्यध्वं सद्भावोऽस्ति परेश्वरः।
धन्यस्तस्मान्मनुष्यः स यो हि तं शरणं गतः॥
९ परमेशाद् भयं यात यूयं हे तस्य साधवः।
तस्माद् बिभ्यति ये तेषां दुर्गति र्न भविष्यति॥
१० दरिद्रति क्षुधार्त्ताश्च जायन्ते सिंहसूनवः।
परेशार्थिभिरप्राप्यं क्षेमं किञ्चिन्न विद्यते॥
११ बालका यूयमायात निशामयत मद्वचः।
शिक्षयिष्याम्यहं युष्मान् परमेशस्य सेवनं॥
१२ कस्तुष्टा जीवने क्षेमं दिदृक्षुरायुरीप्सति॥
१३ स्वजिह्वां दोषतो रक्ष स्वाधरौ छलवाक्यतः॥
१४ अपहृत्य दुराचारात् सदाचारं विधेहि च।
शान्तभावाय चेष्टस्व तं यत्नेनानुधाव च॥
१५ उन्मीलिते परेशस्य नयने धार्म्मिकान् प्रति।
तदीयश्रवणे तेषां खेदोक्तिं प्रति सुश्रुते॥

क्रोपदृष्टिः परेशस्य दुराचारिषु वर्त्तते । १६
स तेषां स्मरणं लुप्त्वा क्षितितो दवयिष्यति ॥
रुदत्सु धार्म्मिकेष्वेव संशृणोति परेश्वरः । १७
क्लेशेभ्यः सकलेभ्यश्च स तान् उद्धरति स्वयं ॥
भग्नान्तःकरणानां हि समीपस्थः परेश्वरः । १८
चूर्णमानसलोकानां परित्राणं करोति सः ॥
धार्म्मिकस्य मनुष्यस्य विपदो बहुसङ्ख्यकाः । १९
किन्तूद्धरति सर्व्वाभ्यस्ताभ्यस्तं परमेश्वरः ॥
सर्व्वास्थ्नां तस्य रक्षी स तेषामेकं न भज्यते ॥ २०
दुर्गतिं दुर्जनं हन्ति दण्ड्यन्ते धार्म्मिकारयः ॥ २१
परमेशः स्वदासानाम् आत्मानं मोचयिष्यति । २२
तं श्रद्दधति यावन्तस्ते भविष्यन्त्यदण्डिताः ॥

---

३५ पञ्चत्रिंशं गीतं ।

१ शत्रूणां दमनार्थं प्रार्थना १७ आत्मरक्षार्थं प्रार्थना च ।

दायूदो गीतं ।

मया ये विवदन्ते तै र्विवदस्व परेश्वर । १
ये मया सह युध्यन्ते त्वञ्च युध्यस्व तैः सह ॥
आदाय फलकं चर्म्म चोत्तिष्ठोपकृतौ मम ॥ २
मदुपद्राविणो मार्गं शल्यं धृत्वा निरोधय । ३
अहं त्वत्त्राणकर्त्तेति मामकीनं मनो वद ॥
मत्प्राणद्रोहिणां लज्जा व्रीडितत्वञ्च जायतां । ४
पराङ्मुखा विवर्णाश्च सन्तु मेऽनिष्टकल्पकाः ॥
वायोरग्रे तुषा यद्वत् विकीर्य्यन्तां तथैव ते । ५
परमेशस्य दूतेन ताड्यमानाः पुनः पुनः ॥
चिक्कणा सान्धकारा च तेषां भवतु पद्धतिः । ६
परमेशस्य दूतेन द्राव्यन्तां ते तया सदा ॥
यतो हेतो र्मदर्थं ते जालं गुप्तमकारणात् । ७
गर्त्तं मत्प्राणनाशाय खनिते तैरकारणात् ॥

८ तादृशं मानवं नाशः समाप्नोत्वनपेक्षितः।
स्वेन गुप्ते च जाले स धृतो नाशाय लम्बतां॥
९ उल्लसिष्यति तस्माद्धि मन्मनः परमेश्वरे।
कृते तेन परित्राण आनन्दञ्च करिष्यति॥
१० ममास्थीनि वदिष्यन्ति त्वत्समः कः परेश्वर।
बलिष्ठाद् दुःखिनं रक्षन् हारकाद् दीनदुर्गतौ॥
११ मद्विरुद्धं दुरात्मानः समुत्तिष्ठन्ति साक्षिणः।
यन्न जानाम्यहं तन्मां परिपृच्छन्ति ते जनाः॥
१२ ते हितस्यैव शोधार्थम् आचरन्तो ममाहितं।
मामकीनस्य चित्तस्य सम्पादयन्त्यनाथतां॥
१३ तेषां तु रोगकालेऽहं शाणं कृत्वा परिच्छदं।
विमना उपवासेन स्वप्राणान् पर्य्यतापयं।
चित्तविश्रान्तयेऽकुर्व्वे प्रार्थनाञ्च पुनः पुनः॥
१४ यथा मित्रं सगर्भं वा प्रति तद्वत् समाचरं।
मातृशोकेन शोकीव म्लानोऽहञ्चाभवं नतः॥
१५ ते मम स्खलने हृष्टाः समागच्छन्ति साम्प्रतं।
मद्विरुद्धं मदज्ञाताः समागच्छन्ति निन्दकाः।
माञ्च स्वकीयजिह्वाभि र्विदारयन्त्यमौनिनः॥
१६ पूपार्थं हासकाः पापा दन्तैः खेडन्ति मां प्रति॥
१७ हे प्रभो त्वं कियत्कालम् एतद् आलोकयिष्यसि।
तैः कृतात् सर्व्वनाशात् त्वं मत्प्राणान् पुनरानय।
करिभ्यो युवसिंहानाम् अनाथं रक्ष मे मनः॥
१८ ततो महासमाजेऽहं करिष्यामि तव स्तवं।
प्रबलानाञ्च लोकानां मध्ये त्वद्गुणकीर्त्तनं॥
१९ मद्विरुद्धं न हृष्यन्तु देषिणोऽन्टतवादिनः।
निर्निमित्तविपक्षा मे नेङ्गितं कुर्य्युरक्षिभिः॥
२० भाषन्ते न हितार्थं ते देशे ये शान्तचेतसः।
तेषामेव विरुद्धं ते कल्पयन्ति छलानि हि॥
२१ मां प्रति व्यात्तवक्त्राश्च प्रभाषन्त इदं वचः।
साधु साधु प्रियां दृष्टिम् अस्माकं नेत्रमीक्षते॥
२२ ईक्षसे परमेश त्वम् अत्र मा भव नीरवः।

हे मत्प्रभो भवान् मत्तो दूरवर्त्ती न तिष्ठतु ॥
मामकीनविचारार्थं त्वं प्रबुध्य सुजागृहि। २३
मामकीनविवादार्थं हे मदीश्वर मत्प्रभो ॥
परमेश मदीशस्त्वं मे विचारं स्वधर्म्मतः। २४
कुरु त्वं मयि शत्रूणां नानुजानीहि हर्षणं ॥
मा भाषन्तां स्वचित्तैस्ते साध्वस्माकं मनोगतं। २५
अवगीर्णोऽयमस्माभिरिति वा न ब्रुवन्तु ते ॥
मदनिष्टप्रियाः सर्व्वे विलज्जन्तां त्रपान्विताः। २६
क्लीव्रीडाभ्याञ्च वेष्ट्यन्तां नरा मय्यभिमानिनः ॥
ये च तुष्यन्ति मद्धर्म्मे ते हृष्यन्तूल्लसन्तु च। २७
महानस्तु स्वदासस्य शान्तौ तुष्टः परेश्वरः।
इति वाक्यञ्च ते लोकाः प्रभाषन्तां निरन्तरं ॥
वर्णयिष्यति मज्जिह्वा तव धर्म्मस्तवौ सदा ॥ २८

---

३६ षट्त्रिंशं गीतं।

१ मनुष्याणां दुष्टतायाः ५ परमेश्वरस्य भद्रतायाश्च वर्णनं।

वाद्यनियन्त्रे दातव्यं परमेश्वरीयदासस्य दायूदो गीतं।

दुष्टस्याधर्म्ममध्येषा वाण्युदेति मदन्तरे। १
नास्ति तच्चक्षुषोरग्रे परमेश्वरतो भयं ॥
यतो हेतोः स्वदृष्ट्या स विदधात्यात्मसान्त्वनं। २
स्वदोषस्यानुसन्धाने गर्हणे चाकुतोभयः ॥
तन्मुखोद्भववाक्यानि वितथानि छलानि च। ३
सुविवेकसदाचारौ दूरं तेनापसारितौ ॥
वितथा कल्पना तेन स्वशय्यायां विधीयते। ४
मार्गे तिष्ठति सोऽभद्रे दुष्टत्वान्न पराङ्मुखः ॥
परेश स्वर्गपर्य्यन्तं विस्तीर्णास्ति दया तव। ५
सत्यता तावकीना या गगनस्पर्शिनी च सा ॥
दिव्यानां भूधराणाञ्च तुल्यो धर्म्मस्त्वदीयकः। ६
विचाराज्ञास्त्वदीयाश्च गभीराम्भोनिधेः समाः।

मानवानां पशूनाञ्च रक्षकस्त्वं परेश्वर ॥
७ कीदृशन्तु महारत्नं भवेदीश्वर ते दया।
तस्मात् त्वत्पक्षयोश्छायां श्रयन्ते नरसूनवः ॥
८ ते सम्यग् अभिषेक्ष्यन्ते त्वद्गृहस्य धनार्णवात्।
त्वत्प्रीतिस्रोतसोऽम्भांसि त्वञ्च तान् पाययिष्यसि ॥
९ यतो हेतोस्त्वदासन्ने जीवनोत्सो हि विद्यते।
वयं त्वदीयदीप्त्यैव भवामो दीप्तिदर्शिनः ॥
१० विधेहि स्वदयां स्थायुं लोकान् त्वद्विदितान् प्रति।
स्वधर्म्मञ्च कुरु स्थायुम् ऋजुचित्तान् नरान् प्रति ॥
११ अहङ्कारस्य पादो मां न समाप्नोतु कर्हिचित्।
नहि विद्रावयेद् वा मां दुश्चरित्रजनानां करः ॥
१२ दुष्क्रियाकारिणो लोकाः स्वस्थाने न्यपतन् स्वयं।
प्रभ्रष्टाश्च समुत्थातुं न पुनः शक्नुवन्ति ते ॥

---

३७ सप्तत्रिंशं गीतं।

इब्रीयभाषया दायूदः ककारादिवर्णैः गीतं तत्र सांसारिकसुखार्थं पापिलोकान प्रतीर्ष्यणस्यानुपयुक्तत्वं परमेश्वरे विश्वसनस्य चोपयुक्तत्वं।

दायूदो गीतं।

१ त्वं मा क्रुध्य दुरात्मभ्यो मा कुकर्म्मिभ्य ईर्ष्य वा।
२ यतो हेतोस्तृणानीव छेत्स्यन्ते तेऽपि सत्वरं।
म्लानत्वञ्च गमिष्यन्ति ते हरिद्वर्णशष्पवत् ॥
३ परमेश्वरमाश्रित्य सदाचारं कुरुष्व हि।
स्वदेशे वस तेन त्वं सत्यतामनुभोक्ष्यसे ॥
४ परेशाद् हृष्य तस्मात् ते मनोऽभीष्टं स दास्यति ॥
५ तावकीनगते र्भारं परमेशे समर्पय।
तमेव शरणं गच्छ कर्त्तव्यं स करिष्यति ॥
६ दीप्तिवत् तव धर्म्मस्य चोदयं स विधास्यति।
त्वद्विचारस्य शोभाञ्च मध्याह्नसूर्य्यसन्निभां ॥
७ परमेश्वरमुद्दिश्य नीरवः प्रतिपालय।
मा सिद्धगतये क्रुध्य छलकारिनराय वा ॥

कोपतस्त्वं निवर्त्तस्व मनस्तापं परित्यज। ८
त्वया मा क्रियतां रोषः स दुराचारकारणं॥
ये कुर्व्वन्ति दुराचारं ते लोप्स्यन्ते न संशयः। ९
ये परेशं प्रतीक्षन्ते देशस्तैरेव भोक्ष्यते॥
अतीते क्षणकाले हि दुर्जनो नावशेक्ष्यते। १०
तस्य स्थानं निरीक्ष्यापि स त्वया नहि लप्स्यते॥
देशं नम्रास्तु भुञ्जाना हर्षिष्यन्ति महासुखात्॥ ११
धर्म्मिणे दुर्जनो द्रुह्यन् दन्तैः क्ष्वेडति तं प्रति॥ १२
प्रभु र्हसति तं तस्य दिनं पश्यन् उपागतं॥ १३
निष्कोषयन्त्यसिं दुष्टा आकर्षन्ति धनूंषि च। १४
पातार्थं दीननिःस्वानाम् हत्यायै सरलाध्वनां॥
तेन स्वीयासिना तेषां निजचित्तं प्रवेक्ष्यते। १५
भग्नत्वञ्च गमिष्यन्ति तेषां तानि धनूंष्यपि॥
बहूनां पापिनां कोषात् साधोरल्पधनं वरं॥ १६
भंक्ष्येते पापिनां बाहू साधून् धारयति प्रभुः॥ १७
मन्यते सिद्धलोकानां दिवसान् परमेश्वरः। १८
तेषां यस्ताधिकारः स नित्यस्थायी भविष्यति॥
विपत्कालेऽपि तेषां न सम्भविष्यति लज्जनं। १९
भक्ष्यैस्ते तर्पयिष्यन्ते दुर्भिक्षस्य दिनेष्वपि॥
किन्तु दुष्टा विनंक्ष्यन्ति परमेशस्य चारयः। २०
लोप्स्यन्ते मेषवत्सानाम् उपादेयादनं यथा।
यस्माद् अन्तर्हितास्तेऽपि लोप्स्यन्ते धूममालया॥
ऋणं संगृह्य तच्छोधं करोति नहि दुर्जनः। २१
किन्तु धार्म्मिकलोकेन दयां कृत्वा वितीर्य्यते॥
तस्याशीर्दानपात्राणि ये तै र्देशः प्रभोक्ष्यते। २२
तस्याभिशापपात्राणि चोच्छेत्स्यन्ते न संशयः॥
नरस्य पादविक्षेपे परेशेन स्थिरीकृते। २३
तदीयायां गतौ तस्य परितोषेऽप्यधिष्ठिते॥
स मनुष्यः पतित्वापि भूमिं नाधिशयिष्यते। २४
यस्मात् परेश्वरस्तस्य करं सन्धारयिष्यति॥
अहमासं युवा पूर्व्वम् इदानीं स्थविरोऽस्मि च। २५

धार्म्मिकं तु परित्यक्तं दृष्टवान् न कदाप्यहं।
न भक्ष्यं भिक्षमाणां वा दृष्टवान् तस्य सन्ततिं॥
२६ नित्यमेव दयाशील ऋणदानं करोति सः।
आशीर्दानस्य पात्रञ्च जायते तस्य सन्ततिः॥
२७ पापं त्यक्त्वा सदाचारं कुर्व्वन् त्वं सर्व्वदा वस॥
२८ परेशः प्रीयते धर्म्मे स्वसाधून् न जहाति सः।
सर्व्वदा तेऽभिरक्ष्यन्ते छेत्स्यन्ते दुष्टवंशजाः॥
२९ भोक्ष्यते धार्म्मिकै र्देशस्तत्र वत्स्यन्ति ते सदा॥
३० धार्म्मिकस्य मनुष्यस्य वक्त्रं ज्ञानं प्रभाषते।
उच्चारयति तज्जिह्वा सुविचारवचांसि च॥
३१ स्वकीयेशस्य शास्त्रञ्च तस्य चित्तेऽवतिष्ठते।
तदीयपादविक्षेपो न स्खलिष्यति कर्हिचित्॥
३२ दुह्यति धर्म्मिणे दुष्टस्तं हन्तुञ्च विचेष्टते॥
३३ नार्पयिष्यति तं त्यक्त्वा तस्य हस्ते परेश्वरः।
न वा विचार्य्यमाणं तं दोषिणं स करिष्यति॥
३४ परमेशं प्रतीक्षस्व तस्य मार्गञ्च पालय।
स च त्वामुन्नतं कृत्वा देशभोगे नियोक्ष्यति।
उत्पाटनञ्च दुष्टानां त्वं निरीक्षिष्यसे स्वयं॥
३५ मयादर्शि बली पापी हरिद्वृक्षोऽवविस्तृतः॥
३६ स त्वतीतो विलीनश्च मयान्विष्यापि नेक्ष्यत॥
३७ सिद्धलोकमवेक्षस्व सरलञ्च विलोकय।
शान्त्याचारिमनुष्यस्य स्थिरं पारत्रिकं फलं॥
३८ युगपच्च विनंक्ष्यन्ति मानवा धर्म्मलङ्घिनः।
उच्छिन्नं दुश्चरित्राणां चास्ति पारत्रिकं फलं॥
३९ धार्म्मिकाणां परित्राणं परमेशेन सेत्स्यति।
विपत्काले स एवास्ति दृढस्तेषां समाश्रयः॥
४० उपकुर्व्वन् परेशस्तान् परिरक्षिष्यति स्वयं।
रक्षित्वा दुष्टलोकेभ्यः स परित्रास्यते च तान्।
यतस्ते दृढविश्वासस्तस्मिन्नेव विधीयते॥

---

३८ अष्टत्रिंशं गीतं।

पापकारणात् शोचनं दुःखनिमित्तं विलपनञ्च।

दायूदा कृतं स्मरणार्थकं धर्म्मगीतं।

परमेश स्वकोपेन भर्त्सनं मम मा कुरु। १
स्वीयप्रचण्डरोषेण दण्डनं न विधेहि मे॥
यतोऽहं ते शरैर्विद्धस्त्वत्करो मम भारवत्॥ २
नास्ति स्वास्थ्यं ममाङ्गेषु त्वदीयामर्षकारणात्। ३
नास्ति शान्ति र्मदस्थ्नां वा मामकीनाघकारणात्॥
वन्ययेवापराधै र्मे मस्तकं समभिप्लुतं। ४
विसोढुं नहि शक्यन्ते मया ते गुरुभारवत्॥
निजमौर्ख्याच्च दुर्गन्धा विगलन्ति व्रणा मम॥ ५
उद्विग्नोऽतीव खिन्नोऽहं शोचन् वर्त्तेऽखिलं दिनं॥ ६
पूर्णा शोषेण मे श्रोणी स्वास्थ्यं नास्ति तनौ मम॥ ७
विषण्णोऽतीव चूर्णोऽहम् अन्तःक्रोशेन रोदिमि॥ ८
प्रभो कृत्स्ना ममाकाङ्क्षा विद्यते तव सम्मुखे। ९
मामकीनमनस्तापस्त्वत्तश्चान्तर्हितो नहि॥
हृत्कम्पेनाहमुच्छ्वासी वर्ज्जितः स्वबलेन च। १०
मम नेत्रद्वयस्यापि तेजः सन्तिष्ठते नहि॥
पृथक् तिष्ठन्ति मत्क्लेशात् स्नेहिनो बन्धवश्च मे। ११
मामकीनान्तरङ्गाश्च तिष्ठन्ति दूरवर्त्तिनः॥
मत्प्राणान् मृगयन्ते य उन्माथं योजयन्ति ते। १२
ममानिष्टार्थिनो लोकाः प्रभाषन्ते च दुष्टतां।
कृत्स्नमेव दिनं ते च चिन्तयन्ति प्रवञ्चनां॥
किन्त्वहं न निशाम्यामि वधिरो मानवो यथा। १३
रुद्धवक्त्रस्य मूकस्य सदृशश्च भवाम्यहं॥
येन न श्रूयते यस्य मुखञ्चोत्तरवर्ज्जितं। १४
तादृशस्य मनुष्यस्य तुल्यतां प्राप्तवानहं॥
यतो हेतोः प्रतीक्षेऽहं त्वामुद्दिश्य परेश्वर। १५
उत्तरं हि प्रदातव्यं त्वया प्रभो मदीश्वर॥
यतोऽहं वच्मि मे नाशात् त आनन्दितुमुद्यताः। १६

मत्पादस्खलनाज्जाता मां प्रति दर्पकारिणः॥
१७ पतने तु नियुक्तोऽहं व्यथा मेऽभिमुखा सदा॥
१८ स्वीकरोमि निजं दोषमुद्विजे च स्वपापतः॥
१९ मद्विपक्षास्तु जीवन्ति बलवन्तश्च सन्ति ते।
ये विद्विषन्ति मां मिथ्या ते जाता बहुसङ्ख्यकाः॥
२० ये हितस्यैव शोधार्थम् अहिताचरणे रताः।
मम धर्म्मानुगामित्वाद् वैरिणो मम सन्ति ते॥
२१ मा विधेहि परित्यागं मम हे परमेश्वर।
हे मदीश्वर मत्तस्त्वं दूरवर्त्ती न तिष्ठ वा॥
२२ त्वं त्वरस्वोपकर्त्तुं मां हे मत्त्राणाकर प्रभो॥

३९ ऊनचत्वारिंशं गीतं।

१ मानुषाणाम् असारत्वं ७ दायूदः प्रार्थना च।

यिदूथूनवर्गीयवाद्यनियन्त्रे दातव्यं दायूदो गीतं।

१ मयोक्तं सावधानोऽहं भविष्यामि स्ववर्त्मसु।
स्वकीयजिह्वया पापं नैव कारिष्यते मया॥
यावत्कालं दुरात्मा च मत्प्रत्यक्षोऽवतिष्ठते।
तावत्कालं खलीनेन संरोत्स्यामि निजं मुखं॥
२ नीरवो मौनभावेन व्यरमं क्षेमतोऽप्यहं।
मामकीना मनःपीडा तदानीं समवर्द्धत॥
३ अतापीन्मेऽन्तरे चित्तम् अपरं मयि चिन्तनं।
कुर्व्वति प्राज्वलद् वह्नि र्जिह्वया चाहमब्रुवं॥
४ मदीयजीवनस्यान्तं मां ज्ञापय परेश्वर।
मामकीनदिनानां यन्मानं ज्ञापय तच्च मां।
अहं कति क्षणस्थायी तन्मया भोत्स्यते तदा।
५ पश्य वितस्तिमानानि व्यदधास्त्वं दिनानि मे।
मामकीनं यदायुस्तत् तव साक्षादवस्तुवत्।
आ अ्सारत्वमात्रो हि सर्व्वमर्त्त्यो व्यवस्थितः॥ सेला॥
६ छायावदेव वीरोऽपि विदधाति गमागमौ।
सर्व्वे श्राम्यन्त्यसारार्थं सञ्चिनोति धनान्यसौ।

केन तानि तु लप्स्यन्ते तन्न शक्नोति वेदितुं ॥
अधुना किं प्रतीक्षेऽहं मदीयाशा त्वयि प्रभो ॥ ७
मामकीनापराधेभ्यः सर्व्वेभ्यः परिरक्ष मां। ८
अज्ञानस्य मनुष्यस्य मां न निन्दास्पदं कुरु ॥
मूकोऽस्मि रुद्धवक्त्रोऽहं यतोऽकारि त्वयैव तत्॥ ९
मत्तो दूरय ते दण्डं क्षीये त्वन्मुष्टिपाततः॥ १०
अपराधान्मनुष्यं चेत् त्वं दण्डयसि भर्त्सयन्। ११
कीटैरिव त्वया तस्य श्रीस्तदानीं विशीर्य्यते।
आ नितान्तमसारा हि सकलाः सन्ति मानवाः॥ सेला॥
परेश शृणु मे याच्ञां खेदोक्तिं मे निशामय। १२
मा भू र्मेऽश्रुषु मौनी त्वं यतोऽहं त्वद्गृहेऽतिथिः।
प्रवासी चास्मि सर्व्वे मे पूर्व्वजाः पितरो यथा॥
मत्तो विरम तेनाहं क्षणं प्राप्नोमि सान्त्वनां। १३
पश्चात् स्थानान्तरं गत्वा तिरोधानं व्रजामि च॥

---

४० चत्वारिंशं गीतं।

१ ईश्वरीयदयाया वर्णनं ६ ख्रीष्टस्य पुण्यवाक्यं १२ प्रार्थना च।

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं।

परमेश्वरमुद्दिश्य प्रतैक्षेऽहमतीच्छया। १
ततः कृतावधानः स खेदोक्तिं श्रुतवान् मम॥
कूपाच्चोद्धृत्य मां घोरात् कर्द्दमाच्च मलीमसात्। २
मत्पादौ स्थापयन् शैले मद्गतिं कृतवान् दृढां॥
मदास्येऽदान्नवां गाथां सोऽस्मदीश्वरवन्दनां। ३
बहवो वीक्ष्य सन्त्रस्ताः श्रद्धास्यन्ति परेश्वरं॥
धन्यः सोऽस्ति मनुष्यो यः परेशं शरणं गतः। ४
अहंयुभ्यो मृषामार्गे भ्रान्तेभ्यश्च पराङ्मुखः॥
परमेश्वर मत्स्वामिन् अस्मदर्थं त्वया कृताः। ५
चित्रक्रियाश्च चिन्ताश्च विद्यन्ते बहुसङ्ख्यकाः॥
त्वत्साक्षाद्रचनां तासां कर्त्तुं कोऽपि न पारकः।

ताः प्रशंसितुमाख्यातुञ्चाहमारब्धवान् यदा।
तदानीं गणना तासाम् अभवन्मङ्कातिगा॥
६ नैच्छस्त्वं बलिनैवेद्ये कर्णौ मे छिद्रितौ त्वया।
होमौ बलिश्च पापघ्नस्त्वया न सम्प्रयाचितौ॥
७ तदानीन्तु मयावादि पश्य कुर्व्वेऽहमागमं।
धर्म्मग्रन्थस्य सर्गे मे विद्यते लिखिता कथा॥
८ मदीश त्वदभीष्टस्य साधनं मम नन्दकं।
मदीयचेतसो मध्ये त्वच्छास्त्रञ्चावतिष्ठते॥
९ मया महासभायाञ्च धर्म्मवार्त्ता विघुष्यते।
पश्याहं नास्मि रुद्धोष्ठस्तत् त्वं वेत्सि परेश्वर॥
१० मया त्वदीयधर्म्मश्च स्वचित्ते नहि छादितः।
विश्वास्यत्वपरित्राणे तव विज्ञापिते मया।
नापह्नुते महासङ्घे करुणासत्यते तव॥
११ परमेश त्वया मत्तः स्नीयस्नेहो न रुध्यतां।
तव कारुण्यसत्यत्वे नित्यं मां परिरक्षतां॥
१२ यतोऽसङ्ख्यानि दुःखानि मां वेष्टन्ते समन्ततः।
स्वदोषैरहमाक्रान्तो न शक्नोम्यूर्द्धमीक्षितुं।
तेऽधिका मूर्द्धजेभ्यो मे हीनचेताश्च तैरहं॥
१३ परित्राणं विधातुं मे त्वं प्रसीद परेश्वर।
मामकीनोपकारार्थं त्वं त्वरस्व परेश्वर॥
१४ मत्प्राणान् मृगयन्ते ये तत्संहारं चिकीर्षवः।
लज्जान्विता विवर्णाश्च सर्व्व एव भवन्तु ते।
व्रीडिताश्च पलायन्तां मदनिष्टप्रिया जनाः॥
१५ ये मां वदन्ति हाहेति ते स्तम्भन्तां स्वलज्जया॥
१६ सर्व्वे त्वदर्थिनस्त्वत्त आनन्दन्तूल्लसन्तु च।
त्वत्त्राणमोदिनो नित्यं ब्रूयुः परेश्वरो जयी॥
१७ अहं दुःखी दरिद्रश्च किन्तु मां मन्यते प्रभुः।
त्वं मे रक्षी सहायश्च न चिराय मदीश्वर॥

---

४१ एकचत्वारिंशं गीतं।

१ दयालुलोकस्य धन्यत्वं ४ विश्वासघातकताया विषये दायूदो विलापः १० प्रार्थना च।

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं।

यो दीनं प्रति सद्भावो धन्य एव स मानवः। १
दुर्द्दिने परमेशेन तस्योद्धारो विधास्यते॥
रक्षित्वा परमेशेन जीवितः स च नीरुति। २
सुखं प्राप्स्यति शत्रूणां स्वेच्छायां न समर्पितः॥
परेशो व्याधिशय्यायां स्वयं तं धारयिष्यति। ३
रोगिणस्तस्य कृत्स्नाञ्च शय्यां सज्जीकरिष्यति॥
मयोक्तं परमेश त्वं करुणां कुरु मां प्रति। ४
स्वस्थं कुरु ममात्मानं यतस्त्वां प्रति दोष्यहं॥
मामुद्दिश्य कुभावेन भाषन्ते मम वैरिणः। ५
कदायं त्यक्ष्यति प्राणान् अस्य नाम च नंक्ष्यति॥
स चेन्मां द्रष्टुमायाति तदा मां सान्त्वयन् मृषा। ६
सञ्चिनोत्यहितं चित्ते वहि गत्वा च भाषते॥
मिथो मे द्वेषिणः सर्व्वे मां निन्दन्ति जनान्तिकं। ७
मद्विरुद्धञ्च कुर्व्वन्ति मदनिष्टाय कल्पनां॥
कुकर्म्मासज्जतेऽमुष्मिन् असौ यच्छयनं गतः। ८
तस्मात् पुनः समुत्थातुं कर्ह्हिचिन्नहि शक्ष्यति॥
मित्रं विश्वासपात्रं मे मत्पूपाशी च यो नरः। ९
सोऽपि मत्प्रातिकूल्येन पार्ष्णिक्षेपं करोति हि॥
अतो हे परमेश त्वं करुणां कुरु मां प्रति। १०
मामुत्थापय तेनैव तेभ्यो दास्याम्यहं फलं॥
मद्द्वेषी मद्विरुद्धं न जयनादं करिष्यति। ११
अनेनाहं विजानामि त्वत्तुष्टि र्मयि वर्त्तते॥
मदीयशुद्धताहेतो धारयिष्यति मां भवान्। १२
सदाकालं भवत्साक्षान्माञ्च संस्थापयिष्यति॥
इस्रायेलः प्रभुः परमेश्वरोऽनन्तकालं यावत् सदा धन्यो भूयात्॥ १३
तथास्तु। तथास्तु॥

४२ द्विचत्वारिंशं गीतं।

१ परमेश्वरस्य मन्दिरात् दूरीभवनात् दायूदो दुःखं ६ तत्समीपं पुनर्गन्तु तस्येच्छा च।

वाद्यनियन्त्रे दातव्यं कोरहीयवंशस्योपदेशगीतं।

१ तोयस्रोतांसि सम्प्राप्तुं मृगी चाकांक्षते यथा।
ईश्वर त्वां मदीयात्मा प्राप्तुं चाकांक्षते तथा॥
२ ईशार्थं मे मनस्तृष्णग् लिप्यतेऽमरमीश्वरं।
आगत्येश्वरप्रत्यक्षम् उपस्थास्याम्यहं कदा॥
३ जायते मम नेत्राम्बु देहयात्रा दिवानिशं।
यत् पृच्छ्यो ऽहं सदा लोकैरीशस्ते कुत्र विद्यते॥
४ ममैतत् स्मरतोऽन्तःस्थं निजचित्तं विलीयते।
यतोऽहं जनयात्राया अग्र ईशस्य मन्दिरं।
हर्षस्तुतिरवैर्यातः पार्व्वणैर्निवहैः सह॥
५ कुतः सीदसि मच्चित्त क्षोभसे च मदन्तरे।
प्रतीक्षस्वेश्वरं यस्मात् स मया स्तोष्यते पुनः।
स्तोष्यते च परित्राणं तदीयाननसम्भवं॥
६ हे मदीश्वर मच्चित्तम् अवसीदति मेऽन्तरे।
ततोऽहं संस्मरामि त्वाम् अत्र यर्द्दननीवृति।
हर्म्मोणाख्येषु शैलेषु मित्सियारे च भूधरे॥
७ त्वदीयस्रोतसां शब्दाद् अब्धिराहूयतेऽब्धिना।
सकलैस्तव कल्लोलैस्तरङ्गैश्चाहमाप्लुतः॥
८ मत्सेवायै परेशेन स्वकृपादेक्ष्यते दिवा।
स्थास्यति क्षणदायाञ्च गीतिर्मे सहवर्त्तिनी।
मह्यं जीवनदातारं चेश्वरं प्रति प्रार्थना॥
९ ईशं वक्ष्यामि मच्छैल कुतोऽहं विस्मृतस्त्वया।
कुतो भ्राम्यामि शोकार्त्तः शत्रोर्दौरात्म्यकारणात्॥
१० मदस्थिव्यापिमारीव निन्दा मे क्रियतेऽरिभिः।
सर्व्वदा भाषमाणैर्माम् ईशस्ते कुत्र विद्यते॥
११ कुतः सीदसि मच्चित्त क्षोभसे च मदन्तरे।
प्रतीक्षस्वेश्वरं यस्मात् स मया स्तोष्यते पुनः।
मामकीनस्य वक्त्रस्य त्राणकर्त्ता मदीश्वरः॥

४३ त्रिचत्वारिंशं गीतं।

परमेश्वरीयं मन्दिरं प्रति परिवर्त्तनकाल आनन्दपूर्व्वकम् ईश्वरमाराधयितुं दायूदो मानसं।

विधेहीश विचारं मे मदर्थञ्चोत्तरं वदन्। १
वादिभ्यो धर्म्महीनेभ्यो जनेभ्यः परिरक्ष मां।
धूर्त्ताद् अन्यायशीलाच्च मानवान्मां समुद्धर॥
ईशा मद्दुर्गरूपस्त्वं किमर्थं मां विगर्हसे। २
कुतो भ्राम्यामि शोकार्त्तः शत्रो र्दौरात्म्यकारणात्॥
स्वदीप्तिसत्यते प्रेष्य ताभ्यां मां वर्त्म दर्शय। ३
ते मां त्वत्पुण्यशैलञ्च त्वदावासांश्च नेष्यतः॥
ईशस्य वेदिमीशञ्च मे हर्षोल्लासदं तदा। ४
प्राप्याहं वीणया स्तोष्य ईश्वर त्वां मदीश्वरं॥
कुतः सीदसि मच्चित्त क्षोभसे च मदन्तरे। ५
प्रतीक्षस्वेश्वरं यस्मात् स मया स्तोष्यते पुनः।
मामकीनस्य वक्तस्य त्राणकर्त्ता मदीश्वरः॥

---

४४ चतुश्चत्वारिंशं गीतं।

१ समाजस्य विलापः २० प्रार्थना च।

वाद्यनियन्त्रे दातव्यं कोरहीयसन्तानानाम् उपदेशगीतं।

ईश्वराश्राविं नः कर्णैः पितृभि र्नो निवेदिता। १
क्रिया त्वया कृता तेषां काले पूर्व्वदिनेषु हि॥
स्वकरेणान्यजातीस्त्वम् उत्पाट्य तान् अरोपयः। २
नाशयित्वा प्रजास्तांश्च व्यदधा दीर्घपल्लवान्॥
यस्मात्ते न स्वखड्गेन प्रापु र्देशाधिकारितां। ३
निजबाहुबलाद् वा ते बभूवु र्जयिनो नहि॥
तव दक्षिणहस्तेन बाहुना च सिषेध तत्।
त्वन्मुखस्य प्रसादाच्च यतस्त्वं तेषु तुष्टवान्॥
ईश त्वं मम राजासि याकूबस्त्राणमादिश॥ ४
त्वया वयं विजेष्यामः शृङ्गाघातै र्विरोधिनः। ५

त्वन्नाम्ना मर्द्दयिष्यामः पादाभ्यां परिपन्थिनः ॥
६ यतो हेतोः स्वकोदण्डे विश्वासं न करोम्यहं।
मामकीनश्च खड्गो न जयिनं विदधाति मां ॥
७ किन्त्वस्माकमरातिभ्यस्त्वमस्मान् परिरक्षसि।
अस्माकं द्वेषिणश्च त्वं प्राप्तलज्जान् करोषि हि ॥
८ ईश्वरस्य वयं श्लाघां कुर्म्महे निखिलं दिनं।
अस्माभि र्भवतो नाम स्तूयते च निरन्तरं ॥ सेला ॥
९ तथापि गर्हयन्नस्मान् त्वं करोष्यपमानितान्।
अस्माकं वाहिनीनाञ्च मध्ये त्वं न प्रगच्छसि ॥
१० त्वमस्मांश्च विपक्षेभ्यः विदधासि पराङ्मुखान्।
अस्माकं द्वेषिणस्तस्मात् लोठयन्ति धनानि हि ॥
११ त्वमस्मान् बध्यमेषाणां तुल्यतायां नियुक्तवान्।
अन्यजातीयलोकानां मध्ये चास्मान् विकीर्णवान् ॥
१२ विना विनिमयं त्वञ्च विक्रीणासि निजाः प्रजाः।
तासां मूल्येन नाप्नोति वृद्धिं काञ्चन ते धनं ॥
१३ विदधासि त्वमस्मांश्च निन्द्यान् निकटवासिभिः।
हास्यास्पदमवज्ञेयं चतुर्द्दिक्स्थजनेष्वपि ॥
१४ विदधासि त्वमस्मांश्च दृष्टान्तं भिन्नदेशिनां।
शिरश्चालनपात्रञ्च परराष्ट्रनिवासिनां ॥
१५ सर्व्वदा मम लज्जा हि मत्प्रत्यक्षं वितिष्ठते।
आच्छादयति मां नित्यं वदनस्य विवर्णता ॥
१६ मत्परिहासकर्त्तुश्च निन्दकस्य च वाक्यतः।
द्वेषिणः प्रतिहन्तुश्च वैरित्वकारणादपि ॥
१७ सर्व्वैरेतैः समाक्रान्ता वयं त्वां व्यस्मराम नो।
न छलं कृतवन्तो वा त्वदीयं नियमं प्रति ॥
१८ अन्तःकरणमस्माकं नहि जातं पराङ्मुखं।
अस्माकं पादविक्षेपस्तव मार्गान्न निर्गतः ॥
१९ कुतो वयं त्वया चूर्णाः स्थाने नागनिसेविते।
किमर्थञ्च समाच्छन्ना मरणच्छायया वयं ॥
२० अस्मदीयेशितु र्नाम व्यस्मरिष्याम चेद् वयं।
इतरेश्वरमुद्दिश्याकरिष्याम कराञ्जलिं ॥

तर्हि तस्यानुसन्धानं नाकरिष्यत् किमीश्वरः। ११
यतो हेतोः स जानाति मनसो गुप्तकल्पनाः॥
त्वदर्थं जायते ऽस्माकं प्राणहत्याखिलं दिनं। १२
वध्यानामेव मेषाणां तुल्या गण्यामहे वयं॥
प्रबुध्यस्व किमर्थं त्वं निद्रितस्तिष्ठसि प्रभो। १३
त्वं सुजागृहि वैराग्यं त्वया न क्रियतां सदा॥
कुतो हेतो र्निजं वक्त्रं समाच्छाद्यावतिष्ठसे। १४
कुतो विस्मर्य्यतेऽस्माकं दैन्यं निन्दा च वा त्वया॥
धूलौ सीदन्ति नः प्राणा भूमौ तुन्दञ्च सज्जते। १५
नः साहाय्यार्थमुत्तिष्ठ स्वप्रेम्नास्मान् विमोचय॥ १६

---

४५ पञ्चचत्वारिंशं गीतं।

ख्रीष्टस्य सौन्दर्य्यजयराज्यविषये भविष्यद्वाक्यं।

वाद्यनियन्त्रे दातव्यं शोशन्नीमनामकस्वरयुक्तं कोरहीयवंशेन कृतं प्रेमविषयकं धर्म्मगीतं।

मच्चित्तं शुभवाक्येन समाकीर्णं प्रविद्यते। १
अहं निवेदयिष्यामि नरेन्द्राय निजाः क्रियाः।
मज्जिह्वा लिपिकर्त्तुश्च महावेगस्य लेखनी॥
भवान् मानवपुत्त्रेभ्यः सौन्दर्य्येण विशिष्यते। २
भवदीयाधराभ्याञ्च प्रसादः परिषिच्यते।
तस्मान्निरन्तरं तुभ्यं ददातीश्वर आशिषं॥
ऊरुदेशे महावीर त्वया खड्गो निबध्यतां। ३
तावकीनः प्रतापश्च महिमा च निबध्यतां॥
तव तेन महिम्ना त्वं जयारूढः प्रगच्छ च। ४
सत्यतायाः सधर्म्माया नम्रतायाश्च हेतुतः।
तेन भीमानि कर्म्माणि त्वामादेक्ष्यति ते करः॥
तीक्ष्णास्तव शरास्तैस्तु नंस्यन्ति त्वदधो जनाः। ५
महाराजस्य शत्रूणां व्यत्स्यन्ते हृदयानि च॥
हे ईश्वानन्तकालार्थं स्थिरं सिंहासनं तव।

न्यायस्य राजदण्डोऽस्ति राजदण्डस्त्वदीयकः॥
७ धर्म्मे प्रेम करोषि त्वं दुष्टताञ्च विगर्हसे।
तस्माद् ईशस्त्वदीयेशस्त्वत्सखिभ्योऽपि मानयन्।
हर्षरूपेण तैलेन स्वयं त्वामभिषिक्तवान्॥
८ गन्धरसागुरुभ्याञ्च त्वक्पत्रैरपि सर्व्वशः।
तावकीनानि वस्त्राणि वासितानि भवन्ति हि।
दन्तिदन्तमयेभ्यस्त्वं प्रासादेभ्यः प्रनन्द्यसे॥
९ स्त्रीरत्नानां त्वदीयानां काश्चित् सन्ति नृपात्मजाः।
राज्ञी तिष्ठति ते दक्ष ओफीरस्वर्णभूषिता॥
१० शृणु कन्ये निरीक्षस्व स्वीयकर्णौ निधत्स्व च।
त्वया विस्मर्य्यतां स्वीया जाति र्गेहञ्च पैतृकः॥
११ तावकीनञ्च सौन्दर्य्यं नरनाथो ऽभिकांक्षतु।
यस्मात् स ते प्रभुस्तस्मै प्रणामः क्रियतां त्वया॥
१२ तेन सोराभिधा कन्या समानेष्यत्युपायनं।
लोकैश्चातिधनाढ्यैस्ते मुखं प्रसादयिष्यते॥
१३ सर्व्वथा शोभया युक्ता पुरान्तःस्था नृपात्मजा।
स्वर्णसूचीयवासांसि सन्ति तस्याः परिच्छदः॥
१४ चित्रितै र्भूषिता वस्त्रै र्नीयते सा नृपान्तिकं।
सख्यः कन्याश्च तत्पश्चात् प्राप्यन्ते तव सम्मुखं॥
१५ हर्षनादेन नीतास्ताः प्रविशन्ति नृपालयं॥
१६ गतानां तव तातानां पदं प्राप्स्यन्ति ते सुताः।
त्वं कृत्स्नायाश्च मेदिन्याः प्रभुत्वे तान् नियोक्ष्यसि॥
१७ पुरुषानुक्रमेणाहं स्मारयिष्यामि नाम ते।
सार्व्वकालिकलोकाश्च करिष्यन्ति तव स्तवं॥

---

४६ षट्चत्वारिंशं गीतं।

जयकारणात् दायूदा परमेश्वरस्य धन्यवदनं।

कोरहवंशीयवाद्यनियन्त्रे दातव्यम् अलामोताख्यस्वरयुक्तं गीतं।

१ ईश्वरः स्वयमेवास्ति शरणञ्च बलञ्च नः।
उपकारी विपत्काले बहुधा सुपरीक्षितः॥

ततो हेतो र्न भेष्यामो विकृतायां क्षितावपि। २
महावारिनिधे र्मध्ये कम्पमानेषु चाद्रिषु॥
तस्य तोयेषु गर्जत्सु फेनमुत्पादयत्सु च। ३
वेपमानेषु शैलेषु तदीयोन्मादकारणात्॥ सेला॥
नद्येका विद्यते तस्याः प्रवाहैः परिहर्ष्यते। ४
ईश्वरस्य पुरी पूता सर्व्वश्रेष्ठस्य वेश्मभिः॥
ईशस्तिष्ठति तन्मध्ये तस्मात् सा न चलिष्यति। ५
ईश्वरोऽहर्मुखे तस्या उपकारं करिष्यति॥
गर्जन्ति भिन्नजातीया राष्ट्राणि प्रचलन्ति च। ६
ईरिते स्वरवे तेन मेदिनी विगलिष्यति॥
अस्माकं सहवर्त्ती तु सैन्याध्यक्षः परेश्वरः। ७
याकूवस्येश्वरोऽस्माकम् उच्चदुर्गवदाश्रयः॥ सेला॥
यूयमागत्य कर्म्माणि परमेशस्य पश्यत। ८
तेनैव मेदिनीमध्ये महोत्पातो विधीयते॥
पृथिवीप्रान्तपर्य्यन्तं प्रशाम्यन्ते रणानि च। ९
भज्यते तेन कोदण्डः शूलं तेन विभिद्यते।
रथोऽपि तेन युद्धस्य भस्मसात् क्रियतेऽग्निना॥
यूयं विरम्य बुध्यध्वम् अहमेवास ईश्वरः। १०
प्रभवाम्यन्यजातीनां मेदिन्याः प्रभवामि च॥
अस्माकं सहवर्त्ती तु सैन्याध्यक्षः परेश्वरः। ११
याकूवस्येश्वरोऽस्माकम् उच्चदुर्गवदाश्रयः॥ सेला॥

---

४७ सप्तचत्वारिंशं गीतं।

ईश्वरस्य वशीभूतत्वं प्रशंसाकरणञ्च।

वाद्यनियन्त्रे दातव्यं कोरहीयवंशस्य धर्म्मगीतं।

हे प्रजाः सकला यूयं करतालेन नन्दत। १
ईशार्थं हर्षनादेन कुरुध्वञ्च जयध्वनिं॥
यतो हेतोः परेशोऽस्ति सर्व्वश्रेष्ठो भयङ्करः। २
महान् राजाधिराजश्च कृत्स्नाया अवनेः प्रभुः॥

३ दमयित्वा प्रजालोकान् अस्मदश्यान् करोति सः
विदधात्यन्यजातीयान् अस्मत्पादतलस्थितान् ॥
४ अस्मत्कृते वृणीते स विषयञ्चास्मदीयकं।
तदीयप्रेमपात्रस्य याकूवस्य शिरोमणिं ॥ सेला ॥
५ कुरुते जयनादेन स्वर्गारोहणमीश्वरः।
कुरुते तूर्य्यवाद्येन स्वर्गारोहं परेश्वरः ॥
६ तमेवेश्वरमुद्दिश्य यूयं गायत गायत।
अस्माकं नृपमुद्दिश्य यूयं गायत गायत ॥
७ ईशः कृत्स्नक्षितेे राजा यूयं ज्ञानेन गायत ॥
८ ईशः करोति राजत्वं भिन्नजातिगणोपरि।
पुण्यसिंहासने स्वीये सुखासीनः स विद्यते ॥
९ समायान्ति प्रजाध्यक्षा इब्राहीमेशितुः प्रजाः।
सन्तीशस्यैव भूपालाः स त्वतीव समुन्नतः ॥

---

४८ अष्टचत्वारिंशं गीतं।

समाजस्य गौरवं सुखञ्च।

कोरहसन्तानानां धर्म्मगीतं।

१ अस्मदीयेशितुः पुर्य्यां स्वकीये पुण्यपर्व्वते।
महान् अतिप्रशंस्यश्च विद्यते परमेश्वरः ॥
२ अस्ति प्रांशुतया रम्यः कृत्स्नक्षित्याश्च नन्दनः।
उदीच्यन्ते सियोनाद्रि र्महाराजस्य पत्तनं ॥
३ ईश्वरस्तस्य हर्म्म्येषु सुविख्यातः समाश्रयः ॥
४ नृपाः पश्य समागत्य युगपत्तुमतां गताः ॥
५ ते निरीक्ष्यैव संक्षुब्धा उद्विग्नाश्च पलायिताः ॥
६ कम्पो दधार तान् तत्र प्रसूतामिव वेदना ॥
७ तार्शीशगामिपोतांस्त्वं भनक्षि पूर्व्ववायुना ॥
८ अस्माभि र्यादृगश्रावि तादृगेव निरीक्षितं।
सैन्याध्यक्षपरेशस्य पुरेऽस्मदीशितुः पुरे।
अनन्तकालपर्य्यन्तं तत् संस्थापयतीश्वरः ॥ सेला ॥

ईश त्वद्वेश्मनो मध्ये चिन्तयामः कृपां तव॥ ९
यादृगस्तीश ते नाम तादृगेव तव स्तवः। १०
पृथिवीप्रान्तपर्य्यन्तो धर्म्मपूर्णश्च ते करः॥
हर्षं याति सियोनाद्रि र्यिहूदाः पुत्रिका अपि। ११
पुर्य्यः कुर्व्वन्ति प्रोल्लासं विचाराज्ज्ञाप्तते तव॥
यूयं प्रदक्षिणीकृत्य सियोनं परिगच्छत। १२
युष्माभिस्तस्य दुर्गाणां गणना च विधीयतां॥
तत्प्राचीरे मनो धद्धं तत्प्रासादान् प्रपश्यत। १३
सर्व्वं कथयितुं तर्हि भाविवंशाय शक्ष्यथ॥
यतो हेतोरसावीशः सर्व्वदास्माकमीश्वरः। १४
मृत्युकालेऽपि चास्माकं मार्गदेष्टा भविष्यति॥

---

४९ ऊनपञ्चाशत्तमं गीतं।

धनजीवनयोरसारत्वं।

कोरहवंशीयवाद्यनियन्त्रे दातव्यं धर्म्मगीतं।

भो प्रजाः सकला यूयम् एतत् संश्रोतुमर्हथ। १
अत्र कर्णौ प्रयुंग्ध्वञ्च सर्व्वे पिष्टपवासिनः॥
क्षुद्रा मुख्याश्च साकल्यात् धनाढ्या दुर्गता अपि॥ २
यतो हेतो र्मदीयास्यं ज्ञानं प्रकाशयिष्यति। ३
मम मानसिकं ध्यानं सुबुद्धिञ्च प्रदास्यति॥
मया स्वकीयकर्णश्च न्यायवाक्ये प्रयोक्ष्यते। ४
वीणयाहं समारप्स्ये स्वकीयां मर्म्मभारतीं॥
दुर्द्दिने किं व्यथिष्येऽहं द्रोहिणामेनसा वृतः॥ ५
वित्ते विश्वसतां स्वीये दम्भिनाञ्च महाधनात्॥ ६
तेषां कोऽपि न शक्नोति विमोक्तुं भ्रातरं निजं। ७
दातुमीशाय वा मूल्यं तस्योद्धारोपयोगिनं॥
यतो हेतो र्महामूल्यस्तेषां प्राणपरिष्क्रयः। ८
अनन्तकालपर्य्यन्तं स निवर्त्तिष्यते ततः।
तदीयनित्यजीवित्वात् खातदर्शनवर्ज्जितात्॥ ९

१० यस्मात् द्रक्ष्यति गर्त्तं स म्रियन्ते ज्ञानिनो नराः।
एकरूपेण नश्यन्ति मूढा अज्ञाश्च मानवाः।
स्ववित्तानि परित्यज्य ते परेभ्यर्पयन्ति च॥
११ नित्यस्थायीनि वेश्मानि पुरुषान् प्रति सुस्थिराः।
वासाः स्यातञ्च देशेषु नाम तेषामिदं मनः॥
१२ नास्ति माने नरः स्थायी पशुवत् स विनश्यति॥
१३ इयं तेषां गतिस्तेभ्यो मूढतायाः फलप्रदा।
तथापि परतस्तेषां वाक्षु तुष्यन्ति मानवाः॥ सेला॥
१४ नरकं मेषवन्नीतान् मृत्युस्तान् चारयिष्यति।
प्रातस्तेषां प्रभुत्वञ्च प्राप्स्यते सरलैः नरैः।
सौन्दर्य्यं लोप्स्यते तेषां परलोकप्रवासिनां॥
१५ तथापीशो मम प्राणान् परलोकस्य हस्ततः।
उद्धरिष्यति यस्मात् स स्वयं मां संग्रहीष्यति॥ सेला॥
१६ धनित्वं जायते यस्य गृहैश्वर्य्यञ्च वर्धते।
तं दृष्ट्वापि त्वया त्रासो न कर्त्तव्यः कथञ्चन॥
१७ यतः स मृत्युकाले न किञ्चिदादाय यास्यति।
तदीयञ्च यदैश्वर्य्यं तत् तं नानुगमिष्यति॥
१८ जीवत्काले निजप्राणास्तेन सुश्लाघिताः स्वयं।
यः कश्चिच्चात्मसौख्यार्थी मानवैः स प्रशस्यते॥
१९ स तु गत्वा पितृस्थानं दीप्तिं द्रक्ष्यति न क्वचित्॥
२० सम्मान्योऽपि नरोऽज्ञानः पशुतुल्यो विनश्यति॥

---

५० पञ्चाशत्तमं गीतं।

१ परमेश्वरेण विचारकरणं ७ यज्ञकर्म्मादिभ्योऽपि भक्तेरावश्यकत्वं १६ कपटिलोकान् प्रति तिरस्कारश्च।

आसफस्य धर्म्मगीतं।

१ महाप्रतापवान् ईशः परमेशः प्रभाषते।
स सूर्य्यस्योदयादस्तं यावदाह्वयति क्षितिं॥
२ सियोनात् पूर्णसौन्दर्य्याद् ईश्वरः सम्प्रकाशते॥
३ ईश्वरोऽस्माकमायाति स न स्थास्यति नीरवः।

वह्नि र्ग्रसति तस्याग्रे वेष्टते तं प्रभञ्जनः॥
स्वप्रजानां विचारार्थम् ऊर्द्धस्थं व्योममण्डलं। ४
पृथिवीञ्च समाहूय तेनेदं वच्यते वचः॥
सङ्गृह्णीत मदासन्ने मदीयान् साधमानवान्। ५
बलिं दत्त्वा मया सार्द्धं नियमो यैरनुष्ठितः॥
आकाशमण्डलं तस्य धर्म्मं संवेदयिष्यति। ६
स्वयमेवेश्वरो यस्मान्न्यायाधीशो भविष्यति॥ सेला॥
हे मदीयप्रजा यूयं शृणुत व्याहराम्यहं। ७
इस्रायेलीयवंश त्वं शृणु साक्ष्यं ददामि ते।
अहमीश्वर एवास्मि तावकीनेश्वरोऽस्म्यहं॥
नाहं त्वां भर्त्सयिष्यामि यज्ञानां कारणात् तव। ८
बलयो हवनीयास्ते मत्साक्षात् सन्ति सर्व्वदा॥
गां नादास्ये तवागारात् न वा छागं त्वदाजकात्॥ ९
यतो हेतोररण्यस्था जीविनः सकला मम। १०
लक्षपालगिरीणाञ्च पशवः सकला मम॥
सकलानेव जानामि खगान् शैलनिवासिनः। ११
जन्तवः प्रान्तरस्थाश्च विद्यन्ते मम गोचरे॥
क्षुधायां मम जातायां न हि त्वां ज्ञापयाम्यहं। १२
यतो हेतो र्ममैवास्ति धरा तस्याश्च पूरकं॥
वृषमांसं किमत्स्यामि किं पास्याम्यजशोणितं॥ १३
प्रशंसारूपयज्ञेन प्रयजस्व त्वमीश्वरं। १४
तावकीनप्रतिज्ञाश्च सर्व्वश्रेष्ठाय शोधय॥
विपत्तेश्च दिने त्वं मां समुद्दिश्य समाह्वय। १५
अहं त्वामुद्धरिष्यामि त्वञ्च मां कीर्त्तयिष्यसि॥
पश्चाद् दुर्जनमुद्दिश्य प्रभाषिष्यत ईश्वरः। १६
त्वं कुतो मे विधीन् वक्षि मुखे मन्नियमं वहन्॥
त्वयादेशो विरक्तेन मद्वाचः पृष्ठतः कृताः॥ १७
त्वञ्च चौरं निरीक्ष्यैव तत्सङ्गेनानुरज्यसे। १८
पारदारिकलोकानां समानांशी च जायसे॥
पापे वक्त्रं प्रयुंक्ते च जिह्वया कल्पयन् छलं॥ १९
त्वमासीनो निजभ्रातुरपवादं करोषि हि। २०

स्वकीयसोदरस्यैव गुणघाती च जायसे ॥
२१ कुर्व्वति त्वयि चैतानि नीरवोऽहमवस्थितः।
तेन त्वादृश एवाहमिति त्वं समचिन्तयः।
किन्तु त्वां भर्त्सयिष्येऽहं सर्व्वं विन्यस्य ते पुरः ॥
२२ हे विस्मृतेश्वरा लोका युष्माभि र्बुध्यतामिदं।
नो चेद् विदारयिष्यामि युष्मान् रक्षकवर्ज्जितान् ॥
२३ प्रशंसायज्ञकारी यो मत्सम्मानं करोति सः।
स्थिरमार्गो मया त्राणं चैश्वरं दर्शयिष्यते ॥

---

५१ एकपञ्चाशं गीतं।

स्वीयपापस्य निमित्तं दायूदः खेदो विलापश्च।

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं।

वाच्छेवामुपगतस्य तस्य समीपं भविष्यद्वादिनि नाथने समागते गीतमिदं रचितमभूत्।

१ अनुकम्पस्व मामीश स्वकारुण्यानुरूपतः।
स्वकृपाया महत्त्वात् त्वं मेऽपराधांश्च दूरय ॥
२ निःशेषं क्षालनं कृत्वा कुरु मां दोषवर्ज्जितं।
पातकान्मामकीनाच्च परिष्कारं कुरुष्व मे ॥
३ यतो हेतो र्हि जानेऽहम् अपराधान् मया कृतान्।
सर्व्वदा मम पापञ्च मत्प्रत्यक्षं वितिष्ठते ॥
४ केवलं त्वद्विरुद्धं हि पापमाचरितं मया।
तव दृष्ट्या कदर्य्याञ्च दुष्क्रियां कृतवानहं।
अतः स्वकीयवाक्येन त्वं भविष्यसि धार्म्मिकः।
स्वविचाराज्ञयापि त्वं सुपवित्रो भविष्यसि ॥
५ पश्य जातोऽपराधेऽहं पापे मात्रा च धारितः ॥
६ पश्य त्वमन्तरस्थायां सत्यतायां हि प्रीयसे।
अतो गूढपथेनैव प्राप्तज्ञानं विधेहि मां ॥
७ एषोवेण पुनीया मां भविष्यामि शुचिस्तदा।
मां क्षालय ततः शुभ्रो भविष्यामि हिमादपि ॥

त्वं संश्रावय मां वाचम् आह्लादानन्ददायिनीं। ८
त्वया चूर्णानि चास्थीनि प्राप्नुवन्तु प्रफुल्लतां॥
आच्छादय निजं वक्त्रं मदीयं पातकं प्रति। ९
मम सर्व्वापराधानां दवनं क्रियतां त्वया॥
हे ईश मम मध्ये त्वं शुच्यन्तःकरणं सृज। १०
मदीयाभ्यन्तरे धीरं चात्मानं नूतनीकुरु॥
त्वदीयदृष्टितो दूरं माञ्च त्वं नापसारय। ११
स्वीयं पवित्रम् आत्मानं मत्तो वा नापहारय॥
त्वदीयत्राणजं हर्षं पुनर्मह्यं प्रदेहि च। १२
उदारेणात्मना माञ्च धारयन् सुस्थिरं कुरु॥
तदाहं शिक्षयिष्यामि ते मार्गान् अपराधिनः। १३
त्वाञ्चोद्दिश्य करिष्यन्ति पापिनः परिवर्त्तनं॥
रक्ष मां वधदोषात् त्वम् ईश मत्त्राणदेश्वर। १४
मदीया रसना तर्हि धर्म्मं ते परिगास्यति॥
हे प्रभो त्वं मदीयोष्ठौ स्वयं मुक्तौ कुरुष्व हि। १५
तदा मदीयवक्त्रं ते प्रशंसां कीर्त्तयिष्यति॥
यस्मान्न प्रीयसे यज्ञे यः कर्त्तुं शक्यते मया। १६
तुभ्यं होमार्थकस्यापि बलेर्दानं न रोचते॥
ईश्वरस्य प्रियो यज्ञो भग्न आत्मा हि विद्यते। १७
भग्नं चूर्णञ्च चित्तं त्वम् ईश नैवावमंस्यसे॥
त्वं स्वकीयप्रसादेन सियोनस्य हितं कुरु। १८
यिरूशालमपुर्य्यास्त्वं प्राचीरं निर्म्मिमीष्व च॥
धर्म्मयज्ञेषु होमे च सम्पूर्णे प्रेष्यसे तदा। १९
त्वदीययज्ञवेद्याञ्च होष्यन्ते वृषभास्तदा॥

५२ द्विपञ्चाशं गीतं।

दोयेगस्य दोषविनाशयोः कथनं।

वाद्यनियन्त्रे दातव्यं दायूद उपदेशगीतं।

यस्मिन् काल इदोमीयदोयेग उपस्थाय दायूद् अहीमेलकस्य गृहं प्राविशदिति वार्त्तां शौले निवेदयामास तात्कालिकं गीतं।

१ कुतो दुष्कर्म्मणः श्लाघां कुरुषे हे महाबल।
ईश्वरस्यैव कारुण्यं नित्यं तिष्ठति सुस्थिरं॥
२ त्वज्जिह्वा कल्पते हिंसां तीक्ष्णक्षुरसमा छलिन्॥
३ सदाचाराद् दुराचारे त्वन्तु सम्प्रीयसेऽधिकं।
धर्म्मवाक्यान्मृषावाक्ये चाधिकं परितुष्यसि॥ सेला॥
४ संहारोक्तिषु सर्व्वासु प्रीयसे छलजिह्वक॥
५ तद्धेतोरीश्वरोऽपि त्वां नित्यमुत्पाटयिष्यति।
त्वां स एव निराकुर्व्वन् गेहतः कर्षयिष्यति।
जीवतां भूमिमध्याच्च स त्वामुन्मूलयिष्यति॥ सेला॥
६ धार्म्मिका वीक्ष्य भेष्यन्ति वक्ष्यन्ति त्वां विहस्य च॥
७ पश्यासौ स नरो यो न शरणं गत ईश्वरं।
व्यश्वसीत् धनबाहुल्ये हिंसया चाभवद् बली॥
८ अहन्त्वीश्वरगेहस्थः सतेजोजितवृक्षवत्।
ईश्वरस्यैव कारुण्यम् आश्रितोऽस्मि निरन्तरं॥
९ प्रशंसिष्यामि नित्यं त्वां यस्मात् कर्म्म कृतं त्वया।
आकांक्षिष्यामि ते नाम श्रेष्ठं त्वद्धर्म्मिणां पुरः॥

---

५३ त्रिपञ्चाशं गीतं।

पापिलोकानां दुष्टता भाविदुःखञ्च।

वाद्यनियन्त्रे दातव्यं महलत्नामकस्वरयुक्तं दायूद उपदेशगीतं।

१ ईश्वरो नास्ति वागेषा चित्ते मूढेन गद्यते।
ते भ्रष्टा दुष्कृतै घृण्या नास्ति कोऽपि सुकर्म्मकृत्॥
२ स्वर्गान्मानवसन्तानान् ईश्वरो हि निरीक्षते।
ज्ञानाचारीश्वरान्वेषी कोऽप्यस्तीति दिदृक्षते॥
३ सर्व्वे पराङ्मुखा जाता युगपद् विकृतिं गताः।
नास्ति कोऽपि सदाचार एकोऽपि नहि विद्यते॥
४ किं न जानन्ति किञ्चित् ते सर्व्वे दुष्कर्म्मकारिणः।
अन्नवन्मत्प्रजाभक्षा ईश्वरं नाह्वयन्ति ते॥
५ अमुष्मिन् त्रासहीनेऽपि स्थाने त्रस्ता भवन्ति ते।

अस्थीनि व्यकिरद् यस्माद् ईश्वस्त्वामवरुन्धतां।
आप्नुवन्ति त्वया लज्जां गर्हिता ईश्वरेण ते॥
इस्रायेलः परित्राणं सियोनाद् उदियाद् द्रुतं। ६
वन्दिभूतान् निजांल्लोकान् प्रत्युपावृत्त ईश्वरे।
आनन्दिष्यति याकूब इस्रायेलपि हर्षिता॥

५४ चतुःपञ्चाशं गीतं।

सिफीयलोकेभ्यो रक्षार्थं दायूदः प्रार्थना।

वाद्यनियन्त्रे दातव्यं दायूद उपदेशगीतं।

यस्मिन् काले सिफीयलोका उपस्थाय शौलस्य समीपे व्याहरन् दायूद् किमस्माकं मध्ये प्रच्छन्नो न तिष्ठति तदानीन्तनं गीतमिदं।

त्रायस्वेश स्वनाम्ना मां स्वशक्त्या मां विचारय॥ १
प्रार्थनां मे गृहाणेश मन्मुखस्य वचः शृणु॥ २
यतो हेतो विरुद्धं म उत्तिष्ठन्ति विदेशिनः। ३
मां जिघांसन्ति दुर्वृत्ता अप्रत्यक्षीकृतेश्वराः॥ सेला॥
मां पश्योपकरोतीशः प्राणालम्बयस्ति मे प्रभुः॥ ४
स मदीयविपक्षेषु दुर्गतिं वर्त्तयिष्यति। ५
स्वीयसत्यतया तेषां स विनाशं करिष्यति॥
स्वेच्छयाहं बलीन् तुभ्यं प्रदास्यामि परेश्वर। ६
प्रशंसिष्यामि ते नाम यतो हेतोस्तदुत्तमं॥
यस्मात्तेनैव सर्व्वस्मात् सङ्कटादहमुद्धृतः। ७
मच्चक्षु र्मदरातीनां दर्शनेन च तृप्यति॥

५५ पञ्चपञ्चाशं गीतं।

विपदि दुष्टानां विरुद्धं दायूदः प्रार्थना।

वाद्यनियन्त्रे दातव्यं दायूद उपदेशगीतं॥

शृणु मे प्रार्थनामीश मे शोकान्न तिरो भव॥ १
त्वया निशम्य मे वाक्यं दीयतां मह्यमुत्तरं। २

अनिवार्य्यं निजां चिन्तां क्रियते गर्जनं मया ॥
३ विपक्षस्य महानादात् दुर्ज्जनस्याप्युपद्रवात्।
ते कल्पयन्ति मे हिंसां सकोपाश्च द्विषन्ति मां ॥
४ मदन्तर्वेपते चित्तं मृत्युत्रासा ग्रसन्ति मां ॥
५ भयकम्पैः समाक्रम्ये रोमाञ्चश्चावृणोति मां ॥
६ मयोक्तम् अा यदि स्यातां मम पक्षौ कपोतवत्।
तदा प्रोड्डीयमानेन विश्रामः प्राप्स्यते मया ॥
७ पश्य दूरं पलाय्याहं करिष्ये प्रान्तरे स्थितिं ॥ सेला ॥
८ प्रदोष्याम्याश्रयं प्राप्तुं चण्डवातात् प्रभञ्जनात् ॥
९ हे प्रभो ग्रस तान् लोकान् तेषां जिह्वाश्च भेदय।
यस्मात् पुरस्य मध्येऽहं वीक्षे दौरात्म्यवाग्रणौ ॥
१० प्राचीरेण दिवारात्रं पुरं तौ परिगच्छतः।
तदीयाभ्यन्तरे हिंसा दुरवस्था च तिष्ठतः ॥
११ तन्मध्ये विद्यतेऽन्यायस्तदीयाच्च चतुष्पथात्।
अभिद्रोहः प्रलम्भश्च कर्हिचिन्न प्रगच्छतः ॥
१२ न विपक्षेण निन्द्येऽहं शत्रुनिन्दामहं सहे।
न द्वेषी मय्यहङ्कारी जुगुप्से द्वेषिगर्व्वितः ॥
१३ त्वन्तु मत्तुल्यलोकोऽसि मत्सखा संस्तुतो मया ॥
१४ आवाभ्यां मधुवन्मिष्टा मिथोऽकारि हि मन्त्रणा।
आवां जनतया सार्द्धम् अयावेशस्य मन्दिरं ॥
१५ आक्रम्यन्तां विनाशैस्ते जीवन्तः प्रेत्य यान्तु च।
यस्मात् पापानि विद्यन्ते तेषां गेहेषु हृत्सु च ॥
१६ समाह्वास्याम्यहन्त्वीशं रक्षिता मां परेश्वरः ॥
१७ सायङ्काले प्रभाते च मध्याह्नसमयेऽपि च।
ध्यायन्नहं रविष्यामि स च श्रोष्यति मे रवं ॥
१८ स क्षेमेण मम प्राणान् संग्रामादुद्धरिष्यति।
यस्मान्मामुपतिष्ठन्ति विपक्षा बहुसंख्यकाः ॥
१९ श्रुत्वा प्रत्युत्तरं तेभ्यो दास्यति स्वयमीश्वरः।
अनादिकालमारभ्य राजसिंहासनाश्रितः ॥ सेला ॥
ते दुष्कर्म्मण्यविश्रान्ता ईश्वरान्नहि बिभ्यति ॥
२० असौ मित्रेऽर्पयन् हस्तं नियमं लंघते निजं ॥

दधिवत् स्निग्धवक्तास्य तस्य चित्तं युयुत्सते। २१
तैलतो मेदुरास्तस्य वाचो निष्कोषरिष्टयः।
परमेशे निजं भारं क्षिप स त्वां भरिष्यति। २२
धर्म्मिणः स्खलनं तेन न कदाप्यनुमंस्यते॥
ईश्वर त्वन्तु गम्भीरे गर्त्ते तान् पातयिष्यसि। २३
अर्द्धायु र्नहि प्राप्स्यन्ति वञ्चका रक्तपातिनः॥
किन्तु त्वय्येव विश्वासो मया कारिष्यते ध्रुवं॥

---

५६ षट्पञ्चाशं गीतं।

पिलेष्टीयलोकेभ्यो रक्षार्थं दायूदः प्रार्थना।

वाद्यनियन्त्रे दातव्यं येनदेलमरिहोकीमनामकस्वरयुक्तं दायूदो गुप्तधनरूपं गीतं। यदा पिलेष्टीया गातनगरे तं धृतवन्तस्तात्कालिकं गीतं।

ईश माननुकम्पस्व मर्त्त्या जिघ्रसिषन्ति मां। १
सर्व्वदा युध्यमानास्ते कुर्व्वते मम पीडनं॥
नित्यं जिघ्रसिषन्ते मां मदीयाः परिपन्थिनः। २
बहवश्च मया सार्द्धं युध्यन्ते प्रोच्चमस्तकाः॥
निजसाध्वसकालेऽहं परिविश्वसिमि त्वयि॥ ३
ईश्वरेण तदीयोक्तेः श्लाघा कारिष्यते मया। ४
ईश्वरे मेऽस्ति विश्वासो न करिष्यामि साध्वसं।
मां प्रति मांसपिण्डः किं विधातुं पारको भवेत्॥
मद्वाचां वैपरीत्यं ते कुर्व्वते निखिलं दिनं। ५
सकलाः कल्पनास्तेषां मद्विरुद्धाः कुकल्पनाः॥
ते समेत्य प्रपश्यन्ति चारवच्चतुरो दिशः। ६
मत्पार्ष्णी च निरीक्षन्ते मत्प्राणान्तप्रतीक्षिणः॥
दुश्चरित्रेण किं तेषां रक्षाप्राप्तिः प्रसेत्स्यति। ७
ईश कोपेन जातीनां त्वया भ्रंशो विधीयतां॥
मदीयभ्रमणस्यैव गणना क्रियते त्वया। ८
स्वकुलाय्च मदश्रूणि समाचेतुं त्वमर्हसि।
त्वद्ग्रन्थे किं न विद्यन्ते लेख्यारूढाणि तान्यपि॥

९ तस्मिन् मत्प्रार्थनाकाले प्रद्रोष्यन्ति ममारयः ।
ईश्वरो मे सहायोऽस्ति मयैतत्त्ववगम्यते ॥
१० ईश्वरेणैव वाक्यस्य श्लाघा कारिष्यते मया ।
परमेशेन वाक्यस्य श्लाघा कारिष्यते मया ॥
११ ईश्वरे मेऽस्ति विश्वासो न करिष्यामि साध्वसं ।
यस्मान्मां प्रति किं कर्त्तुं मानवः पारको भवेत् ॥
१२ व्रतानीश त्वदीयानि विद्यन्ते मम मस्तके ।
तस्मात् सम्पादयिष्यामि प्रशंसाकीर्त्तनं तव ॥
१३ यतो हेतो र्मम प्राणा मरणाद् रक्षितास्त्वया ।
स्खलनान्मम पादौ किं रक्षिष्येते त्वया नहि ।
तेनाहं जीवतां दीप्त्या यास्यामीशस्य सम्मुखं ॥

---

५७ सप्तपञ्चाशं गीतं ।

१ शौलस्य हस्तात् रक्षार्थं प्रार्थना ७ ईश्वरस्य धन्यवदनं ।

वाद्यनियन्त्रे दातव्यम् अल्तस्हेतनामकस्वरयुक्तं दायूदो गुप्तधनरूपं गीतं । यदा दायूद् शौलस्य सम्मुखात् पलाय्य गह्वरे तस्थौ तत्काले रचितं ।

१ मां दयस्व दयस्वेश त्वां चित्तं श्रद्दधाति मे ।
विपदोऽपगमं यावत् छायां त्वत्पक्षयोः श्रये ॥
२ सर्व्वोच्चमाह्वयामीशम् ईशं सिद्धिकरं मम ॥
३ स्वर्गात् प्रेष्योपकारं स मम रक्षां विधास्यति ।
ये मां जिग्रसिषन्ते ते मम कुर्व्वन्ति निन्दनं । सेला ।
ईश्वरो निजकारुण्यं सत्यत्वञ्च प्रहेष्यति ॥
४ वेष्ट्यते मे मनः सिंहैः शये चाग्निकणेष्वहं ।
निवसन् मनुजैः सार्द्धं शल्यवाणाग्रदन्तकैः ।
तीक्ष्णनिस्त्रिंशवद् येषां रसना विद्यते मुखे ॥
५ स्वर्गे प्रकाशतामीश तावकीना समुन्नतिः ।
मेदिन्या अपि सर्व्वत्र कीर्त्त्यतां महिमा तव ॥
६ मदीयौ चरणौ बद्धुं जालं ते योजितं जनैः ।

प्राणानाञ्च मदीयानां कृतं तैरवपीडनं।
मदग्रे खानितः कूपस्तन्मध्ये तेऽपतन् स्वयं॥ सेला॥
मच्चित्तं स्थिरमस्तीश मच्चित्तं ह्यस्ति सुस्थिरं। ७
अहं गानं करिष्यामि करिष्यामि प्रशंसनं॥
त्वं मनो मे प्रबुध्यस्व नेवल् वीणे च जाग्रतं। ८
अहं प्रजागरिष्यामि ह्यरुणोदयतः पुरा॥
हे प्रभो लोकमध्येऽहं कीर्त्तयिष्यामि ते स्तवं। ९
प्रशंसिष्यामि ते नाम जातीनामेव मध्यतः॥
यद्धेतोः स्वर्गपर्य्यन्तं विस्तीर्णास्ति कृपा तव। १०
त्वदीया सत्यता तद्वद् स्पृशति व्योममण्डलं॥
स्वर्गे प्रकाशतामीश तावकीना समुन्नतिः। ११
मेदिन्या अपि सर्व्वत्र कीर्त्त्यतां महिमा तव॥

---

५८ अष्टपञ्चाशं गीतं।

१ अन्यायविचारकाणां दोषः ६ विनाशश्च।

वाद्यनियन्त्रे दातव्यम् अल्तस्हेतनामकस्वरयुक्तं दायूदो गुप्तधन-
स्वरूपं गीतं।

मूका एव स्थ किं यूयं धर्म्मवाक्यप्रभाषणे। १
यथान्याय्यविचारे च भो भो मानवसूनवः॥
किञ्च यूयं मनोमध्ये दुष्कर्म्माण्यनुतिष्ठथ। २
कुरुध्वे च निजैर्हस्तै र्देशे दौरात्म्यतोलनं॥
आ मातृकुक्षिवासाद्धि प्रभ्रष्टाः सन्ति दुर्जनाः। ३
गर्भान्निष्क्रान्तिमारभ्य भ्राम्यन्त्यनृतवादिनः॥
तेषां यद् गरलञ्चास्ति तद् विषास्यविषोपमं। ४
सन्ति ते रुद्धकर्णाश्च वधिरः फणवानिव॥
अशृण्वन् मायिनः शब्दं मन्त्रपाठे पटोरपि॥ ५
तेषां वक्त्रस्थिता दन्ता भज्यन्तामीश्वर त्वया। ६
रदनान् युवसिंहानां भिन्धि हे परमेश्वर॥
गलिताः सलिलानां हि सदृशा विस्रवन्तु ते। ७
योजितास्तै र्निजा बाणाः सञ्छिन्नाग्रा भवन्तु च॥

८ इवशिम्बूकवत् ते च गलिता विद्रवन्तु हि ।
गर्भात् च्युतं यथापत्यं नेक्षन्तां ते तथा रविं ॥
९ स्थालीनां युष्मदीयानां कण्टकैस्तापनात् पुरा ।
पापान् पक्वान् अपक्वांश्च स हरिष्यति वात्यया ॥
१० आनन्दिष्यति धर्म्मी हि प्रतीकारस्य दर्शनात् ।
दुश्चरित्रस्य रक्ते स पादौ प्रक्षालयिष्यति ॥
११ मानवाश्च वदिष्यन्ति धार्म्मिकस्य फलं स्थिरं ।
न्यायाधीशश्च मेदिन्याम् ईश्वरोऽस्तीति निश्चितं ॥

---

५९ ऊनषष्टितमं गीतं ।

प्राणरक्षायां जातायां परमेश्वरस्य प्रशंसा ।

वाद्यनियन्त्रे दातव्यम् अलतस्हेतनामकस्वरयुक्तं दायूदो गुप्तधनरूपं गीतं । शौलेन प्रहिता लोका यदा दायूदं हन्तुं तस्य गेहं वेष्टयामासुस्तत्काले रचितं ।

१ मामकीनविपक्षेभ्यो रक्ष मां हे मदीश्वर ।
उत्थितेभ्यो विरुद्धं मे रिपुभ्यो मां समुद्धर ॥
२ कुकर्म्मिभ्यो मनुष्येभ्यो निस्तारं मे विधेहि च ।
रक्तपातिनरेभ्यश्च परित्राणं कुरुष्व मे ॥
३ पश्य मत्प्राणनाशार्थं ते विद्यन्ते तिरोहिताः ।
मद्विरुद्धं समायान्ति मानवा बलविक्रमाः ।
हे परेश न मे दोषात् न पापाद् वा मया कृतात् ॥
४ मयि चानपराधे ते द्रुत्वा तिष्ठन्ति सज्जिताः ।
त्वं प्रबुद्धो मया सार्द्धं मिलित्वा चावलोकय ॥
५ सैन्याधीश परेश त्वम् इस्रायेल ईश्वरः ।
भिन्नजातीयलोकानां परीक्षार्थं सुजागृहि ।
त्वया नानुग्रहीतव्याः सर्व्वे ते दुष्टवञ्चकाः ॥ सेला ॥
६ सन्ध्यायां पुनरागत्य क्रोशन्तः कुक्कुरा इव ।
नगरस्यैव सर्व्वत्र पर्य्यटन्ति हि ते नराः ॥
७ पश्य स्वकीयवक्त्रेभ्यो दुष्टवाचो वमन्ति ते ।
ओष्ठाः खड्गधरास्तेषां कः शृणोतीति जल्पतां ॥

किन्तु हे परमेश त्वं तानेवोपहसिष्यसि। ८
सकलान् भिन्नजातीयान् अवज्ञेयांश्च मंस्यसे॥
तेषां बलात् प्रतीक्षे त्वां यस्मान्मद्दुर्गमीश्वरः॥ ९
मदनुग्राहकस्त्वीश उपस्थास्यति मां स्वयं। १०
मदरीणां प्रतीकारम् ईशो मां दर्शयिष्यति॥
तान् न मारय नो चेत् तद् विस्मरिष्यन्ति मे प्रजाः। ११
भ्रमयन् स्वीयशक्त्या तान् पातयास्मत्फल प्रभो॥
ओष्ठाभ्यां निर्गतै र्वाक्यैस्तेषां वक्त्रं प्रदुष्यति। १२
स्वदर्पेण ध्रियन्तां ते शापमिथ्योक्तितोऽपि च॥
त्वं तान् संहर कोपेन संहरैको न तिष्ठतु। १३
ईशो याकूवि शास्तीति दिगन्तस्थैश्च बुध्यतां॥ सेला॥
सन्ध्यायां पुनरागत्य क्रोशन्तः कुक्कुरा इव। १४
नगरस्यैव सर्व्वत्र पर्य्यटिष्यन्ति ते नराः॥
ते भ्रमिष्यन्ति भक्ष्यार्थम् अतृप्ता रात्रियापिनः॥ १५
अहं गास्यामि ते शक्तिं प्रातः स्तोष्यामि ते कृपां। १६
यत आसी र्विपत्काल त्वं दुर्गश्चाश्रयश्च मे॥
मच्छक्ते त्वां समुद्दिश्य मया गानं करिष्यते। १७
यस्मात् त्वमीश मद्दुर्गं मदनुग्राहकेश्वरः॥

६० षष्टितमं गीतं।

१ युद्धकाले दायूदः प्रत्याशा ६ प्रार्थना च।

वाद्यनियन्त्रे दातव्यं शोशन्नेदूतस्वरयुक्तं दायूदो गुप्तधनरूपं शिक्षार्थकं गीतं। यदा सोऽरामनहरयिमम् अरामसोवाञ्च जिगाय योयावश्च परावृत्य लवणनिम्नभूमाविदोमीयानां द्वादशसहस्राणि लोकान् विनाशयामास तत्काले रचितं।

ईश त्वया वयं त्यक्ता विकीर्णाश्च त्वया वयं। १
अस्मभ्यं समकुप्यस्त्वं परावर्त्तस्व नः प्रति॥
नीवृतं कम्पयित्वा त्वम् अकार्षीस्तद्विदारणं। २
त्वं पूर्णीकुरु तद्भङ्गान् यस्माच्चाल्यते स तैः॥
त्वया स्वकीयलोका हि सङ्कटं परिदर्शिताः। ३

मद्यमुन्मत्तताकारं पायिताश्च वयं त्वया॥
४ स्वभक्तेषु तु लोकेषु पताकैकार्पिता त्वया।
तेभ्य उन्नतिदानार्थं सत्यतायाः प्रतापतः॥ सेला॥
५ यथा तव प्रिया लोकाः परित्राणमाप्नुयुः।
तदर्थं त्वं स्वहस्तेन त्रात्वा देहि न उत्तरं॥
६ स्वपवित्रतयावादीत् ईशस्तेनोल्लसाम्यहं।
शिखिमं तु विभक्ष्यामि मास्ये सुक्कोतप्रान्तरं॥
७ मदीयो गिलियादोऽस्ति मिनशिश्च मदीयकः।
इफ्रयिमः शिरस्त्रं मे यिहूदा विधिदायकः॥
८ मोयावो जलपात्रं मे क्षालनस्योपकारकं।
इदोमस्योपरि स्वीयां पादुकां प्रक्षिपाम्यहं।
पिलेष्टीयाख्यदेश त्वं जयनादं कुरुष्व मे॥
९ सुदृढं नगरं नीत्वा को मां तत् प्रापयिष्यति।
क इदोमपुरं यावन्मार्गं मां दर्शयिष्यति॥
१० ईशास्मान् त्यक्तवान् यस्त्वं त्वं किं तन्न करिष्यसि।
अस्माकं वाहिनीनाञ्च मध्ये किं न गमिष्यसि॥
११ अस्मान् क्लेशत उद्धर्त्तुम् उपकारं विधेहि नः।
उपकारो मनुष्येण कृतो निष्फल एव हि॥
१२ ईश्वरेणैव वीरत्वम् वयमाचरितुं क्षमाः।
स एवास्मद्विपक्षांश्च चरणाभ्यां विमर्द्दिता॥

---

६१ एकषष्टितमं गीतं।

परमेश्वरे दायूद आश्रयणं।

यन्त्रवाद्यनियन्त्रे दातव्यं दायूदो गीतं।

१ ईश त्वं शृणु मे रावं प्रार्थनां मे निशामय॥
२ आह्वयामि दिगन्तस्थस्त्वां चित्तोद्वेगहेतुना।
मम दुर्गम्यमुच्चत्वात् शैलं त्वं मां समानय॥
३ यतो हेतोस्त्वमेवासि मामकीनः समाश्रयः।
त्वञ्च मे सुदृढं दुर्गं परिपन्थिनिवारकं॥
४ अनन्तकालमेवाहं निवत्स्यामि तवोटजे।

त्वदीयपक्षयोश्छायां करिष्ये चाहमाश्रयं ॥ सेला ॥
यस्मान्मम व्रतानि त्वम् ईश्वरः श्रुतवानसि । ५
मह्यं स्वनामभक्तानां समांशित्वञ्च दत्तवान् ॥
भूपते दिनसङ्ख्याया वर्द्धनं त्वं विधास्यसि । ६
तद्वर्षाणाञ्च दीर्घत्वं पुरुषानुक्रमोपमं ॥
ईश्वरस्य समक्षं स सदासीनो भविष्यति । ७
करुणां सत्यताञ्च त्वं तस्य रक्षार्थमादिश ॥
तेनाहं परिगास्यामि तव नाम निरन्तरं । ८
शोधयन् मामकीनानि व्रतान्येव दिने दिने ॥

---

६२ द्वाषष्टितमं गीतं।

ईश्वरस्य सारत्वं मनुष्याणाम् असारत्वं।

यिदूथूनीयवर्गस्य वाद्यनियन्त्रे दातव्यं दायूदो गीतं।

ईशमेव समुद्दिश्य मौनि तिष्ठति मे मनः। १
मामकीनं परित्राणं तस्मादेव प्रजायते ॥
केवलं सोऽस्ति मे शैलो मम तारणकारणं। २
उच्चदुर्गं ममास्ते स नाहं प्रस्खलितातरां ॥
नर एकः कियत्कालं युष्माभिस्त्वाक्रमिष्यते। ३
यथा कुड्यं बहिर्लम्बं भग्नं वा वारणं यथा।
सर्व्वे यूयं कियत्कालं तं तथैव हनिष्यथ ॥
ते तस्योच्चपदादेव मन्त्रयन्ते निपातनं। ४
ते मृषोक्तिषु सन्तुष्टाः प्रददत्याशिषं मुखैः।
किन्तु शापं ददत्येव निजान्तःकरणेषु ते ॥ सेला ॥
ईशमेव समुद्दिश्य मौनि तिष्ठ मनो मम। ५
यस्मान्मम प्रतीक्षायाः सिद्धिस्तेनैव जायते ॥
केवलः सोऽस्ति मे शैलो मम तारणकारणं। ६
उच्चदुर्गं ममास्ते स न स्खलिष्याम्यहं ततः ॥
मामकीनपरित्राणं तेजस्वेश्वरमूलकं। ७
मदीयं सुदृढं दुर्गम् आश्रयो मम चेश्वरः ॥
तस्मिन् कुरुत विश्वासं सर्व्वकाले हि हे प्रजाः। ८

स्वमनो व्यंक्त तत्साक्षाद् ईश्वरोऽस्माकमाश्रयः ॥ सेला ॥
९ अलीका मर्त्यसन्ताना असारा वीरसूनवः ।
उत्पतन्ति तुलायां ते सर्व्वे वाष्पादगौरवाः ॥
१० मा विश्वसत दौरात्म्ये लुण्ठनाच्च न दृप्यत ।
सम्पत्तौ वर्द्धमानायां मा धद्धं तत्र मानसं ॥
११ वाक्यमेकं जगादेशो द्विर्मया तत् परिश्रुतं ।
वस्तुत ईश्वरस्यास्ति विक्रमस्याधिकारिता ॥
१२ क्षमायाश्चाधिकारित्वं तथैवास्ति तव प्रभो ।
यस्मात् त्वयैव दातव्यं सर्व्वेभ्यः कर्म्मणां फलं ॥

---

६३ त्रिषष्टितमं गीतं ।

ईश्वरानुग्रहस्याकाङ्क्षा शत्रून् जेतुमपेक्षा च ।

यिहूदायाः प्रान्तरे स्थितिकाले कृतं दायूदो धर्म्मगीतं ।

१ ईश्वर त्वं मदीयेशस्त्वामेवानुसराम्यहं ।
त्वदर्थं मे मनस्तृष्णक् त्वाञ्चाकाङ्क्षति मे तनुः ।
मरुभूम्यां सुशुष्कायां जलाभावेन सीदतः ॥
२ धर्म्मधाम्नि मया यादृक् सम्प्राप्तं तव दर्शनं ।
तादृगेव दिदृक्षोऽहं विक्रमं गौरवञ्च ते ॥
३ यतस्त्वदीयकारुण्यम् उत्तमं जीवनादपि ।
अधरौ मामकीनौ हि प्रशंसां कुरुतस्तव ॥
४ यावज्जीवं करिष्यामि धन्यवादं तवेदृशं ।
तावकीनाय नाम्ने च भविष्यामि कृताञ्जलिः ॥
५ तेनैव सारमेदोभ्याम् इव तर्प्स्यति मे मनः ।
हर्षनादकृदोष्ठाभ्यां मम वक्त्रञ्च गास्यति ॥
६ त्वां स्मरन् निजशय्यायां ध्यायामि प्रहरेष्वहं ॥
७ यतो हेतोस्त्वमेवासि मामकीनोपकारकः ।
तस्मात् त्वत्पक्षयोश्छायाम् आश्रितः प्रोल्लसाम्यहं ॥
८ मनस्त्वदनुरक्तं मे सन्धार्य्योऽहं करेण ते ॥
९ अमी स्वीयविनाशार्थं मम प्राणजिघांसवः ।

वसुधाया अधोभागं प्रवेक्ष्यन्ति निपातिताः॥
अर्पिता असिधारे ते विभच्यन्ते च जम्बुकैः॥ १०
किन्तु चौणिपते हर्षं ईश्वरात् प्रजनिष्यते। ११
यश्च शप्स्यति तन्नाम्ना श्लाघा तेन करिष्यते।
यस्माद् असत्यवक्तृणां वदनं सन्निरोत्स्यते॥

६४ चतुःषष्टितमं गीतं।

वैरिणां दोषो विनाशश्च।

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं।

चिन्तायुक्तस्य मे रावम् ईश्वर त्वं निशामय। १
विपचान्मम यत्त्रासस्तस्मान्मे रक्ष जीवनं॥
मां प्रच्छादय दुष्टानां मानवानां कुमन्त्रणात्। २
कलहाच्च मनुष्याणाम् अधर्म्माचारकारिणां॥
ते शाणवन्त्यसिवज्जिह्वां सन्धाय कटुवाग्विषुं॥ ३
साधुं प्रति रहःस्थाने प्रक्षेप्तुं चिन्तयन्ति च। ४
अकस्माच्च तमुद्दिश्य त्यजन्ति निर्भयाः शरान्॥
सङ्कल्पयन्ति ते लोका मिथो वाढं कुमन्त्रणां। ५
गुप्तमुन्माथयोगाय चालपन्ति परस्परं।
वयं केनेच्छितुं शक्या इति वाक्यं वदन्ति च॥
हिंसां सञ्चिन्त्य तैः सिद्धं युक्तिः पक्केति गद्यते। ६
एकैकस्य सुगम्भीरम् अन्तश्चित्तञ्च विद्यते॥
अकस्मात् तान् समुद्दिश्य वाणं प्रक्षेप्स्यतीश्वरः। ७
तदानीञ्च भविष्यन्ति स्वयं ते क्षतविक्षताः॥
ते चाधःपातयिष्यन्ते समाक्रान्ताः स्वजिह्वया। ८
यावन्तस्तानवेक्षन्ते ते विद्रोष्यन्ति सर्व्वतः॥
तेन सर्व्वे नरा भीता ईश्वरेण कृतां क्रियां। ९
वर्णयिष्यन्ति भोत्स्यन्ते तस्याचारञ्च ते तदा॥
हृष्टः परेश्वरात् साधुः शरणं तं गमिष्यति। १०
सर्व्वैः सरलचेतोभि र्धन्यवादः करिष्यते॥

६५ पञ्चषष्टितमं गीतं।

ईश्वरानुग्रहाशिषो वर्णनं।

वाद्यनियन्त्रे दातव्यं दायूदा कृतं गानार्थकं धर्म्मगीतं।

१ त्वामेवेश्वर सीयोने प्रशंसा सम्प्रतीक्षते।
त्वामुद्दिश्य व्रतस्यापि परिशोधः करिष्यते॥
२ त्वाञ्च हे प्रार्थनाश्रोतः सर्व्वेऽभ्येष्यन्ति मानवाः॥
३ मामकीनापराधा ये ते मत्तो बलवत्तमाः।
अस्मदीयास्तु ये दोषास्तान् त्वमेव क्षमिष्यसे॥
४ यो मनुष्यस्त्वया वृत्वा समानीतः स्वसन्निधिं।
प्राङ्गणेषु त्वदीयेषु निवसेत् धन्य एव सः॥
तर्प्स्यामस्तव गेहस्य कल्याणनिधिना वयं।
पवित्रे तव प्रासादे सङ्गृहीतः स विद्यते॥
५ भयप्रदानि धर्म्मेण प्रार्थनायाः फलानि हि।
अस्मभ्यं वितरिष्यन्ते त्वयास्मत्त्रातरीश्वर।
सर्व्वेषां क्षितिप्रान्तानां दूरपारस्य चाश्रय॥
६ स्वबलेनाद्रिनिर्म्मात बद्धश्रोणे च तेजसा॥
७ गर्जनं तोयराशीनां तदूर्म्मीणाञ्च गर्जनं।
जातीनां कलहस्यापि निःशब्दीक्रियते त्वया॥
८ लक्षणेभ्यस्त्वदीयेभ्यो बिभ्यत्युर्व्यन्तवासिनः।
सूर्य्योदयास्तयोः स्थाने त्वं प्रफुल्लीकरोषि च॥
९ महीं निरीक्ष्य सिञ्चंस्त्वं विदधासि धनान्वितां।
ईश्वरीयपयस्विन्या सलिलैः परिपूर्णया।
संस्करोषि नृणां धान्यम् इत्थं संस्कृतया भुवा॥
१० तोयैस्तोक्षसि तत्सीता आली नम्रीकरोषि च।
वृष्ट्या करोषि तां मृद्वीम् आशास्से च तदङ्कुरं॥
११ स्वकल्याणकिरीटेन वत्सरो भूष्यते त्वया।
तव स्यन्दननेमिभ्यः स्निग्धता स्यन्दते पथि॥
१२ स्यन्दते प्रान्तरस्थासु पशुचारणभूष्वपि।
पर्व्वता अपि शोभन्त उल्लासेन विभूषिताः॥

मेघै र्व्याप्ता हि केदाराः शस्याच्छन्ना उपत्यकाः। १३
तत्रत्याः सकला गानं हर्षनादञ्च कुर्व्वते ॥

---

६६ षट्षष्टितमं गीतं।

१ अनुग्रहप्राप्तिनिमित्तम् ईश्वरप्रशंसा १३ प्रतिश्रुतिकरणञ्च।

वाद्यनियन्त्रे दातव्यं गानार्थकं धर्म्मगीतं।

कुरुध्वं सकला मर्त्त्या ईश्वराय जयध्वनिं॥ १
परिगायत गीतेन तस्य नाम्नश्च गौरवं। २
तदीयायाः प्रशंसाया गौरवञ्चाभिसंस्तुत॥
ईशं वदत कीदृक् त्वं भेतव्योऽसि स्वकर्म्मभिः। ३
तव शक्तिमहत्त्वात् त्वां प्रियं वक्ष्यन्ति शत्रवः॥
भजनं ते करिष्यन्ति सकला मर्त्त्यवासिनः। ४
त्वामेवोद्दिश्य गास्यन्ति गास्यन्ति तव नाम ते॥ सेला॥
आयातेशस्य कर्म्माणि स्वाश्चर्य्याणि प्रपश्यत। ५
नृसन्तानान् प्रति स्वीयैः कर्म्मभिः सोऽस्ति भीतिदः॥
विकृत्य तोयराशिं स शुष्कभूमिं चकार हि। ६
पादै र्लोका नदीं तेरुस्तत्र तेन ननन्दिम॥
अनन्तं क्रियते राज्यं तेन स्वीयपराक्रमात्। ७
तस्य नेत्रे परीक्षेते भिन्नजातीयमानवान्।
नहि कुर्व्वन्त्वहङ्कारम् आज्ञालङ्घनकारिणः॥ सेला॥
हे प्रजाः सकला यूयं धन्यं ब्रूत न ईश्वरं। ८
तदीयायाः प्रशंसाया उच्चैः श्रावयत ध्वनिं॥
यस्माज्जीवद्दशायां नः स्थिरान् प्राणान् करोति सः। ९
नानुजानाति चास्माकं चरणानां विचालनं॥
अस्माकन्तु परीक्षापि कृता हे ईश्वर त्वया। १०
रौप्यसंशोधनेनेव वयं संशोधितास्त्वया॥
त्वया जालं प्रवेश्यास्मान् क्लिष्टो न्यस्तो नः कटौ॥ ११
अश्वारूढा मनुष्या नो मस्तकोपरि गामिताः। १२
वह्निना सलिलेनापि कृतवन्तो गमं वयं।

किन्त्वस्मान् त्वं समुद्धृत्य पुष्कलं स्थानमानयः ॥
१३ आदायाहं बलीन् हव्यान् प्रवेक्ष्यामि तवालयं।
प्रति त्वां शोधयिष्यामि मामकीनव्रतानि च ॥
१४ ईरितानि मदोष्ठाभ्यामुक्तान्यास्येन चापदि ॥
१५ होमार्थञ्च पशून् पुष्टान् मेषाणाञ्च सुगन्धिकं।
तुभ्यं दास्यामि छागैश्च सार्द्धं यक्ष्यामि पुङ्गवान् ॥ सेला ॥
१६ ईशभक्ता नरा यूयमागत्य शृणुताखिलाः।
स मदात्महितार्थं यत् कृतवान् तद् वदाम्यहं ॥
१७ मन्मुखेन स आहूतो जिह्वया च प्रशंसितः ॥
१८ दुष्टतां चेदपैक्षिष्ये निजान्तःकरणेन हि।
तर्हि तु प्रभुना क्वापि श्रवणं नाकरिष्यत ॥
१९ किन्त्वीशः श्रवणं कृत्वा मेऽग्रहीत् प्रार्थनारवं ॥
२० धन्यः स ईश्वरो येन नापास्ता प्रार्थना मम।
स्वकीयानुग्रहश्चापि नहि मत्तो वियोजितः ॥

---

६७ सप्तषष्टितमं गीतं।

सर्व्वेषां हिताय प्रार्थना।

यन्त्रवाद्यनियन्त्रे दातव्यं गानार्थकं धर्म्मगीतं।

१ ईशोऽस्मान् अनुगृह्णातु ददात्वस्मभ्यमाशिषं।
अस्मान् प्रति निजं वक्त्रं स प्रसन्नं करोतु च ॥ सेला ॥
२ पश्चात्ते ज्ञायतां मर्त्ये त्वत्त्राणं सर्व्वजातिभिः ॥
३ त्वां स्तोष्यन्ति प्रजा ईश त्वां स्तोष्यन्त्यखिलाः प्रजाः ॥
४ आनन्दं हर्षनादञ्च प्रकरिष्यन्ति जातयः।
यस्मात् त्वमेव धर्म्मेण विचारयिष्यसि प्रजाः।
पृथिवीवासिनी र्जातीस्त्वं स्वयञ्च विनेष्यसि ॥ सेला ॥
५ त्वां स्तोष्यन्ति प्रजा ईश त्वां स्तोष्यन्त्यखिलाः प्रजाः ॥
६ वसुधापि स्वकीयानि फलान्युत्पादयिष्यति।
दास्यत्याशिषमस्मभ्यम् ईश्वरोऽस्माकमीश्वरः ॥
७ स एवाशिषमस्मभ्यं दास्यति स्वयमीश्वरः।
सर्व्वे तस्माच भेष्यन्ति धरणीप्रान्तवासिनः ॥

६८ अष्टषष्टितमं गीतं।

१ दायूदः प्रार्थना ४ अनुग्रहस्य १५ समाजरचायाः १६ आश्चर्य्यकर्म्मणश्च कृते परमेश्वरस्य प्रशंसा १८ दायूदो विनयश्च।

वाद्यनियन्त्रे दातव्यं दायूदा कृतं गानार्थकं गीतं।

उत्तिष्ठतीश्वरस्तस्य विकीर्य्यन्ते च वैरिणः। १
तद्द्वेष्टारश्च कुर्व्वन्ति तस्य साक्षात् पलायनं॥
चाल्यते च यथा धूमस्ते चाल्यन्ते तथा त्वया। २
मधूच्छिष्टं यथा वह्नेः समक्षं द्रवतां व्रजेत्।
ईश्वरस्य समक्षं हि तथा नश्यन्ति दुर्जनाः॥
ईश्वरस्य समक्षञ्च विनन्दन्त्युल्लसन्ति च। ३
हर्षनादञ्च कुर्व्वन्ति परितोषेण धार्म्मिकाः॥
गानं कुरुध्वमीशाय तन्नाम्नो गायत स्तवं। ४
प्रान्तरे यो रथारूढो याति निर्म्मात तत्पथं।
यिहोवा इति तन्नाम्नाह्लादध्वं तस्य सम्मुखे॥
पितास्ति पितृहीनानां विधवानां विचारकः। ५
पवित्रे स्वीय आवासे विद्यमानः स ईश्वरः॥
निःसङ्गान् परिवाराणां मध्ये वासयतीश्वरः। ६
वन्दिनो मोचयित्वा स करोति प्राप्तमङ्गलान्।
निवसन्ति मरुस्थाने निदेशलङ्घिनो नराः॥
ईश्वर स्वीयलोकानाम् अग्रेऽग्रे त्वयि गच्छति। ७
प्रान्तरस्यैव मध्येन त्वयि यात्राञ्च कुर्व्वति॥ सेला॥
ईशसाक्षाचकम्पे भूराकाशोऽपि ववर्ष च। ८
तत्र सीनय ईशस्येस्रायेलीयेशितुः पुरः॥
प्रेरिता चोपहाराणां वृष्टि र्हे ईश्वर त्वया। ९
क्लान्तस्त्वाधिकारश्च त्वया सुस्थीकृतः पुनः॥
तावकीनसमाजश्च तत्र वासं समाप्तवान्। १०
दुःखिने सुस्थता दत्ता स्वसद्भावात् त्वयेश्वर॥
सुवार्त्ता प्रभुना दत्ता तद्वक्त्रीणां महासभा॥ ११
पलायन्त पलायन्त सैन्यानामधिपा नृपाः। १२
लोप्त्राणां प्रविभागञ्च व्यदधाद् गृहवासिनी॥

१३ अशेध्वं मेषवासानां मध्ये यूयं कपोतवत्।
रौप्यमण्डितपक्षा वा दीप्तस्वर्णतनूरुहाः॥
१४ सर्व्वशक्तिमता देशे विकीर्णेषु च राजसु।
सल्मोनाख्योऽपि क्षमाभृद्दिस्तुषारेण व्यशोभत॥
१५ वाशन ईश्वरीयोऽद्रि र्वाशनः कूटवान् गिरिः॥
१६ भो भोः शृङ्गवन्त उच्चाग्राः किमर्थं यूयमीर्ष्यथ।
गिरये निजवासार्थं रोचितायेश्वरेण हि।
अवश्यं सर्व्वदा तत्र परमेशो निवत्स्यति॥
१७ अयुतानि सहस्राणि सहस्राणीश्वितू रथाः।
प्रभुस्तन्मध्यवर्त्त्यस्ति धर्म्मधाम्न्यस्ति सीनयः॥
१८ त्वमेवोद्गतवानूर्द्ध्वं जेतॄन् बद्धा च नीतवान्।
गृहीष्यन् दानवन्मर्त्त्यान् अवाध्यांश्चापि मानवान्।
प्रभुना परमेशेन वसतिस्थानप्राप्तये॥
१९ दिने दिने प्रभुर्धन्योऽस्माकं क्षेमसमर्द्धकः।
अस्माकं त्राणकर्त्ता च स एव भवतीश्वरः॥ सेला॥
२० स ईशोऽस्मन्निमित्तञ्च भूयस्त्राणकृदीश्वरः।
विवृणोति मृते द्वारं स प्रभुः परमेश्वरः॥
२१ ईश्वरो निजशत्रूणां चूर्णयिष्यति मस्तकं।
स्वपापाचारिलोकानां मूर्द्धानं बहुकेशकं॥
२२ प्रभु र्वक्ति पुनश्चाहं तानानेष्यामि वाशनात्।
आनेष्यामि पुनश्चाहं गम्भीराज्जलधेरपि॥
२३ त्वया चूर्णयितव्यास्ते मत्पादेन शोणिते।
लेढव्यं द्वेषिणां रक्तं जीह्वया च शुनां तव॥
२४ हे ईश्वर मनुष्यैर्हि दृश्यते गमनं तव।
मदीयेशस्य मे राज्ञो गमनं धर्म्मधामनि॥
२५ गच्छन्ति गायका अग्रे तत्पश्चाद् यन्त्रवादकाः।
ढक्कावादिकुमारीणां निवहेन प्रवेष्टिताः॥
२६ समाजेष्वीश्वरस्यैव धन्यवादो विधीयतां।
प्रभोः स्तुतिश्च युष्माभिरिस्रायेलान्वयोद्भवैः॥
२७ तत्रैवास्ति द्विषां जेता विन्यामीनः कनिष्ठकः।
यिहूदास्याग्रगास्तेभ्यः प्रस्तराघातकारिणः।

सिबूलूनस्य चाध्यक्षा नप्तालेरग्रगा अपि॥
तावकीनबलस्याज्ञां दत्तवानीश्वरस्तव। २८
कर्म्मकृदस्मदर्थं त्वं हे ईश प्रबलीभव॥
यिरूशालमसंस्थस्य त्वत्प्रासादस्य हेतुतः। २९
त्वामुद्दिश्य महीपालाः समानेष्यन्त्युपायनं॥
जन्तून् भर्त्सय नद्यास्थान् वृषभानाञ्च संहतिं। ३०
प्रजारूपांश्च गोवत्सान् रौप्यखण्डानि तैर्नतैः।
दायिष्यन्ते विकीर्य्यन्तां लोका युद्धप्रियास्त्वया॥
मिसरादागमिष्यन्ति महाकुलीनमानवाः। ३१
भविष्यत्यचिरात् कूश ईश्वराय कृताञ्जलिः॥
धरणीस्थानि राज्यानि यूयमीशाय गायत। ३२
प्रभुमेव समुद्दिश्य यन्त्रवाद्येन गायत॥ सेला॥
वहते प्रांशुना व्योम्नातीव पूर्व्वतनेन सः। ३३
पश्य स स्वीयनादेन करोति प्रबलं रवं॥
ईश्वरस्यैव प्राबल्यं युष्माभिः परिकीर्त्त्यतां। ३४
इस्रायेलीशिता तस्य व्योमस्पर्शि च तद्बलं॥
ईश भयङ्करोऽसि त्वं स्वकीये धर्म्मधामनि। ३५
इस्रायेलो य ईशोऽस्ति स्वप्रजाभ्यो ददाति सः।
बलं पराक्रमञ्चापि धन्यो भूयात् स ईश्वरः॥

---

६९ ऊनसप्ततितमं गीतं।

१ विपदः समये प्रार्थना २९ तत्फलञ्च।

वाद्यनियन्त्रे दातव्यं शोशन्नीमनामकस्वरयुक्तं दायूदो गीतं।

परित्रायस्व मामीश जलं प्राप्नोत्यसून् मम॥ १
पङ्के मज्जामि गम्भीरे स्थातुं स्थानं न विद्यते। २
अम्बुराशौ प्रविष्टोऽहम् ऊर्म्मिभिश्च परिप्लुतः॥
आक्रानेन परिक्लान्तः शुष्ककण्ठो भवामि च। ३
हीयेते तेजसा नेत्रे ममेशस्य प्रतीक्षणात्॥
मूर्द्धजेभ्योऽधिकाः सन्ति ममाहेतुकवैरिणः। ४

प्रबला मम हन्तारः शत्रवोऽन्टतवादिनः।
नापहृत्य मया द्रव्यं कर्त्तव्यं पुनरर्पणं॥
५ त्वमेवेश्वर जानासि मामकीनमबोधनं।
मदीया अपराधाश्च त्वत्त आच्छादिता नहि।
६ ये लोकास्त्वां प्रतीक्षन्ते सैन्याध्यक्ष परेश्वर।
प्रभो मत्कारणात् तेषां व्रीडितत्वं न जायतां॥
ये लोका मृगयन्ते त्वां हे इस्रायेल ईश्वर।
मन्निमित्तं विवर्णास्ते न भवन्तु कदाचन॥
७ त्वन्निमित्तं सहे निन्दां व्रीडयाच्छादिताननः॥
८ भ्रातृभिश्च परो मन्ये सूदासीनश्च सोदरैः॥
९ त्वद्गेहस्यानुरागेण ग्रसनं जायते मम।
त्वदीयनिन्दकानाञ्च निन्दनं वर्त्तते मयि॥
१० करोमि रोदनञ्चाहं स्वप्राणान् उपवासयन्।
तत् कर्म्मापि च निन्दायाः कारणं जायते मम॥
११ शाणवस्त्रेण संवीतस्तेषां हास्यो भवामि च॥
१२ गोपुरेषूपविष्टा ये मद्धिंसां चिन्तयन्ति ते।
मद्विरुद्धञ्च गायन्ति मानवा मद्यपायिनः॥
१३ किन्त्वहं प्रार्थनां कुर्व्वे त्वामुद्दिश्य परेश्वर।
देहि प्रसन्नताकालम् स्वमहाकृपयेश्वर।
स्वीयत्राणदसत्यत्वाद् यच्छ त्वं मह्यमुत्तरं॥
१४ त्वं समुद्धर मां पङ्कात् मा भवेन्मम मज्जनं॥
द्वेष्टृभ्योऽगाधतोयेभ्यश्चोद्धारः सम्भवेन्मम॥
१५ मा मां सम्प्लावयेद् वेला जलराशि र्न मां ग्रसेत्।
कूपो ममोपरि स्वीयं वक्त्रं मा संवृणोतु हि॥
१६ परमेशोत्तरं देहि यतः श्रेष्ठा कृपा तव।
स्वानुकम्पामहत्त्वाच्च दृष्टिं वर्त्तय मां प्रति॥
१७ मा समाच्छाद्यतां वक्त्रं निजदासं प्रति त्वया।
यस्मादस्म्यहमुद्विग्नो देहि मे तूर्णमुत्तरं॥
१८ मम प्राणानुपस्थाय तेषां मुक्तिं विधेहि च।
मामकीनविपक्षाणां हेतो र्माञ्च समुद्धर॥
१९ त्वं जानासि ममावज्ञां वैवर्ण्यं व्रीडनं तथा।

क्लेष्टारो मम सर्व्वेऽपि विद्यन्ते तव सम्मुखे॥
निन्दया मे मनो भग्नं प्रतीच्चे पीडितो दयां। २०
सा तु नास्ति न चाप्नोमि सान्त्वयितॄन् अभीप्सितान्॥
ते लोके मम भक्ष्यार्थं पित्तद्रव्यं प्रदीयते। २१
तृष्णानिवारणार्थं मां पाययन्त्यम्लजं रसं॥
अतो भुक्त्यासनं तेषां सम्मुखे पाशवद् भवेत्। २२
निर्भये समये तेषां कूटयन्त्रञ्च जायतां॥
अन्धत्वाद् दृष्टिहीनानि तेषां नेत्राणि सन्तु च। २३
त्वं तेषां कटिदेशस्य नित्यं कम्पं विधेहि च॥
वर्ष तेषु निजं क्रोधं त्वत्कोपाग्निरुपैतु तान्॥ २४
तेषां वासो भवेच्छून्यस्तेषां गेहाश्च निर्जनाः॥ २५
यस्मात् त्वयाहतं लोकम् अभिधावन्ति ते नराः। २६
ये च विद्धास्त्वया तेषां यातनां वर्णयन्ति ते॥
त्वया सञ्चीयतां तेषां पातकोपरि पातकं। २७
त्वत्पुण्यप्राप्तितस्तेषां क्रियताञ्च निवारणं॥
जीवनग्रन्थमध्ये च तेषां लोपो विधीयतां। २८
मा भवेद् धार्म्मिकैः सार्द्धं तेषां नामाभिलेखनं॥
दीनं क्लिष्टञ्च मामीश ते त्राणं प्रोच्चयिष्यति॥ २९
ईश्वरस्यैव नामाहं प्रशंसिष्यामि गीतिभिः। ३०
धन्यवादेन तस्यैव कीर्त्तयिष्यामि गौरवं॥
परेशाय बलीवर्द्दात् तत्तु रोचिष्यतेऽधिकं। ३१
खुरशृङ्गविशिष्टाच्च वृषात् तेन स तोक्ष्यति॥
आनन्दिष्यन्ति तद् दृष्ट्वा मानवा नम्रचेतसः। ३२
हे ईशान्वेषिणो लोकाः सञ्जीविष्यति वो मनः॥
यतो हेतो दरिद्रेषु मनो धत्ते परेश्वरः। ३३
स्वीयवन्दिमनुष्यांश्च नहि तुच्छीकरोति सः॥
स्वर्गो मर्त्त्यः समुद्रश्च तेषां मध्ये चरन्ति च। ३४
यावन्तः प्राणिनस्तेऽपि सकलास्तं स्तुवन्तु हि॥
ईश्वरेण सियोनस्य परित्राणं विधास्यते। ३५
निर्म्मास्यन्ते पुनस्तेन यिहूदा नगराणि च।
लोकास्तत्र निवत्स्यन्ति प्राप्ता देशाधिकारितां॥

२९ तदीयसेवकानाञ्च वंशो भोक्ष्यति मीहतं।
तन्नाम्नि प्रीयमाणा ये लोका वत्स्यन्ति तत्र ते॥

७० सप्ततितमं गीतं।

पापिपरिपूर्णां विरुद्धं धार्म्मिकाणां प्रार्थना।

वाद्यनियन्त्रे दातव्यं दायूदः स्मरणार्थकं गीतं।

१ मामकीनपरित्राणं कर्त्तुमीश त्वमर्हसि।
मामकीनोपकारार्थं त्वं त्वरस्व परेश्वर॥
२ मत्प्राणान्वेषिलोकानां लज्जा व्रीडा च जायतां।
पलायन्तां विवर्णाश्च मदनिष्टप्रिया जनाः॥
३ ये मां वदन्ति हाहेति तेऽपयान्तु स्वलज्जया॥
४ सर्व्वे त्वदर्थिनस्त्वत्त आनन्दन्तूल्लसन्तु च।
त्वत्त्राणमोदिनो नित्यं भाषन्तां जयतीश्वरः॥
५ अहं दुःखी दरिद्रश्च मत्कृते त्वरयेश्वर।
त्वं मे रक्षी सहायश्च मा चिराय परेश्वर॥

७१ एकसप्ततितमं गीतं।

परमेश्वर आश्रयग्रहणं।

१ श्रद्दधामि परेश त्वां लज्जितं न विधेहि मां॥
२ त्वं स्वधर्म्मेण मां रक्ष ममोद्धारं कुरुष्व च।
मह्यं कर्णं निधाय त्वं मम त्राणं विधेहि हि॥
३ भव मे वासशैलस्त्वं सर्व्वदा सुगमो मम।
त्वं मत्त्राणविधातासि शैलो दुर्गश्च मे भवान्॥
४ हे मदीयेश्वर त्वं मां दुष्टलोकस्य हस्ततः।
दुर्वृत्तस्य खलस्यापि पाणिभ्यश्च समुद्धर॥
५ त्वं मदीयप्रतीक्षायाः स्थानं प्रभो परेश्वर।
त्वमेवा बाल्यकालाद्धि प्रत्याशाविषयो मम॥
६ आ कुक्षिवासकालाच्च त्वं मदीयावलम्बनं।

त्वमेवा मातृगर्भाच्च मम मार्गप्रदर्शकः।
त्वामेवोद्दिश्य नित्यञ्च प्रशंसा क्रियते मया॥
अनेकैश्चित्रवन्मन्ये त्वन्तु मे दृढ आश्रयः॥ ७
पूर्णमस्ति मदीयास्यं तावकीनप्रशंसया। ८
त्वच्छोभायाः स्तवस्तेन क्रियते च निरन्तरं॥
मापसारय मां वृद्धं मा मां क्षीणबलं त्यज॥ ९
यतो मत्प्रातिकूल्येन भाषन्ते मम वैरिणः। १०
मत्प्राणान्वेषिणो लोका मिथः कुर्व्वन्ति मन्त्रणां॥
ईश्वरेणापि सन्त्यक्तम् अमुं धर्त्तुं प्रधावत। ११
तदीयोद्धारकः कोपि नास्तीत्येव वदन्ति ते॥
हे ईश्वर भवान् मत्तो नहि दूरे ऽवतिष्ठतु। १२
मामकीनोपकाराय त्वं त्वरस्व मदीश्वर॥
मदात्मनो विपक्षाणां लज्जा नाशश्च जायतां। १३
निन्दायकीर्त्तिसञ्छन्नाः स्यु र्ममानिष्टचेष्टकाः॥
अहं नित्यं प्रतीक्षिष्ये वर्द्धयन् ते महास्तवं॥ १४
तावकीनस्य धर्म्मस्य त्त्राणस्य च वर्णना। १५
मामकीनेन वक्त्रेण सर्व्वदैव करिष्यते।
यतो हेतो र्मया कापि सङ्ख्या नैवावगम्यते॥
प्रभोः परेशितुः शक्त्या करिष्याम्यहमागमं। १६
धर्म्मं ते वर्णयिष्यामि केवलं धर्म्ममेव ते॥
ईश्वर बाल्यमारभ्य मां त्वमेवोपदिष्टवान्। १७
अद्य यावत् प्रकाश्यन्ते तवाश्चर्य्याः क्रिया मया॥
ईश त्वं पक्वकेशं मां वार्द्धक्ये नहि सन्त्यज। १८
बलं ते ज्ञापयिष्यन्तम् एतत्कालिकमानवान्।
तावकीनप्रभावञ्च सर्व्वान् उत्तरकालिकान्॥
हे ईश तव यो धर्म्मः स त्वतीव समुन्नतः। १९
महन्ति तव कर्म्माणि तव कस्तुल्य ईश्वर॥
अतितीव्रान् बहून् क्लेशान् यस्त्वं मां समदर्शयः। २०
स एव त्वं पुनर्व्वारं मां हि सञ्जीवयिष्यसि।
क्षितेश्चाधःस्थलेभ्यो मां पुनरुन्नमयिष्यसि॥
वर्द्धयंश्च महत्त्वं मे भूयो मां सान्त्वयिष्यसि॥ २१

१२ नेवलाख्येन यन्त्रेण त्वाञ्च स्तोष्याम्यहं तदा।
त्वदीयां सत्यतामेव संस्तोष्यामि मदीश्वर।
गास्यामि वीणयाहं त्वाम् ईस्रायेलः पवित्र राट्॥
१३ गायतस्त्वां समुद्दिश्य ममैतच्चाधरद्वयं।
त्वया मुक्तं मनश्चापि हर्षनादं करिष्यति॥
१४ मज्जिह्वापि दिनं कृत्स्नं धर्म्मं ते कीर्त्तयिष्यति।
यतो लज्जामकीर्त्तिञ्च प्राप्ता मेऽनिष्टचेष्टकाः॥

७२ द्विसप्ततितमं गीतं।

ख्रीष्टीयराजत्वे भविष्यद्वाक्यं।

सुलेमनुद्देश्यं गीतं।

१ हे ईश त्वं महीपालं स्वविचारविधीन् दिश।
क्षितीशस्य कुमाराय स्वीयधर्म्मं प्रदेहि च॥
२ शासनं तव लोकानां स न्यायेन विधास्यति।
सुविचारेण दीनानां त्वत्प्रजानाञ्च पालनं॥
३ तदानीञ्च भविष्यन्ति धर्म्मस्यैव प्रभावतः।
भूधराः क्षुद्रशैलाश्च प्रजानां शान्तिवाहकाः॥
४ दीनानाञ्च प्रजानां स सुविचारं करिष्यति।
निःस्वस्य सन्ततिं रक्षन् दुरात्मानञ्च चूर्णयन्॥
५ यावत् स्थास्यति सूर्य्यश्च यावच्छोभिष्यते विधुः।
तावत् प्रभेष्यति त्वत्तः पुरुषाणां परम्परा॥
६ यथा छिन्नतृणे वृष्टिस्तथा सोऽवतरिष्यति।
पृथिवीसेचनार्थस्य धारापातस्य वा समः॥
७ तस्य राजत्वकाले च प्रफुल्लिष्यति धार्म्मिकः।
चन्द्रस्य स्थितिपर्य्यन्तं महाशान्ति र्भविष्यति॥
८ सागरात् सागरं यावत् स राजत्वं करिष्यति।
नदीमारभ्य मेदिन्याः प्रान्तान् यावच्च शासनं॥
९ जानुपातं करिष्यन्ति तत्साक्षान्मरुवासिनः।
क्षितिधूलीञ्च लेक्ष्यन्ति सकलास्तस्य वैरिणः॥
१० द्वीपानां तर्शीशादीनां भूपा दास्यन्त्युपायनं।

शिवीयैश्च सिवीयैश्च नृपैरानेष्यते करः॥
तस्मै नमः करिष्यन्ति सकला भूमिपालकाः। ११
तस्य सेवां करिष्यन्ति सर्व्वजातीयमानवाः॥
यस्मात् समुद्धृतस्तेन दीनः खेदोक्तिमीरयन्। १२
मानवो दुर्द्दशापन्नो वर्ज्जितश्चोपकारिभिः॥
दुर्गतञ्च दरिद्रञ्च मनुष्यं सोऽनुकम्पते। १३
निर्धनस्यापि प्राणानां परित्राणं करोति सः॥
दौरात्म्यात् पीडितत्वाच्च स तेषां मोचयत्यसून्। १४
तस्माच्चाच्छोणितं तेषां महामूल्यञ्च मन्यते॥
जीवन्तस्ते शिवीयञ्च तस्मै दास्यन्ति काञ्चनं। १५
तन्निमित्तं करिष्यन्ति प्रार्थनाञ्च निरन्तरं।
करिष्यन्ति च तस्यैव धन्यवादं दिने दिने॥
देशे पर्व्वतशृङ्गेषु बहुशस्यं भविष्यति। १६
लिवानोनाटवीवच्च तद्धान्यं दोलयिष्यति।
भूम्युत्पन्नतृणानीव फुल्लिष्यन्ति पुरे नराः॥
तस्य नाम सदा स्थायि यावद् राजिष्यते रविः। १७
तावत् तदीयनामापि तेजोवृद्धिं गमिष्यति।
आशीःप्राप्तिश्च तेनैव मनुष्याणां भविष्यति।
तञ्च धन्यं वदिष्यन्ति सर्व्वजातीयमानवाः॥

धन्यः प्रभुः परेशः स इस्रायलीय ईश्वरः। १८
अद्वितीयः स एवास्ति सुमहाश्चर्य्यकर्म्मकृत्॥
धन्यं भूयात् सदा तस्य नामधेयं महायशः। १९
कृत्स्नं भूमण्डलं तस्य तेजसा परिपूर्य्यतां॥
तथास्तु। तथास्तु॥
यिशयसुतस्य दायूदः प्रार्थनाः सम्पूर्णतां प्राप्ताः॥ २०

---

७३ त्रिसप्ततितमं गीतं।

१ पापिलोकानां सुखं प्रतीर्ष्या १७ तस्याः प्रतीकारश्च।

आसफस्य धर्म्मगीतं।

१ इस्रायेले हितैष्येव शुद्धचित्तान् प्रतीश्वरः॥
२ किन्तु प्रायेण सञ्जातं पादयोः स्खलनं मम।
मदीयपादविक्षेपः कथञ्चिन्न हि प्राचलत्॥
३ यस्माद् ऐर्ष्यमहंयुभ्यः शान्तिं पश्यन् दुरात्मनां॥
४ मृत्यवे ते न बध्यन्ते तेषां स्थूलः कलेवरः॥
५ मर्त्त्यवत् ते न ताप्यन्ते न क्लिश्यन्ते नरा इव॥
६ तस्मात् तेषामहङ्कारो जायते कण्ठभूषणं।
ते च दौरात्म्यवस्त्रेण कुर्व्वते स्वाङ्गवेष्टनं॥
७ मेदोबाहुल्यतस्तेषां वहिस्तिष्ठन्ति दृष्टयः।
तेषां मानससङ्कल्पाः सीमानञ्चातिशेरते॥
८ आचरन्तोऽभिमानं ते भाषन्ते द्वेषभावतः।
दौरात्म्यसूचकं वाक्यम् औद्धत्येन वदन्ति च॥
९ स्वर्गारोहि मुखं तेषां जिह्वा क्षौणिविहारिणी॥
१० ततो हेतोः प्रजास्तस्य भ्राम्यन्त्यत्र पराङ्मुखाः।
सलिलानि निपीयन्ते चातीव प्रचुराणि तैः॥
११ ते च वाक्यं वदन्तीदं कथं विज्ञास्यतीश्वरः।
सर्व्वेषामुपरिस्थस्य बुद्धिः किं काचनास्ति वा॥
१२ पश्यैते दुर्जना नित्यं सुस्थाः सम्पत्तिवर्द्धकाः॥
१३ वृथाकारि मया तर्हि निजचित्तस्य शोधनं।
वृथा निर्दोषतातोये हस्तयोः क्षालनं मम॥
१४ यस्मान्नित्यमहं ताप्ये सम्भर्त्स्ये च प्रगे प्रगे॥
१५ ईदृग्वाचं प्रभाषिष्ये कथामेनां वदन्नहं।
अविश्वास्यो भविष्यामि त्वत्सन्तानान्वयं प्रति॥
१६ तद् बोद्धुमहमध्यायं मद्दृष्ट्या तद् व्यथाकरं॥
१७ ईशस्य धर्म्मधामानि प्राविशन्त मया यदा।
तदा शेषदशा तेषां बोधगम्याभवन्मम॥
१८ स्थानेषु चिक्कणेष्वेव स्थापितास्ते नरास्त्वया।

त्वया निपातितास्तत्र खण्डखण्डं भवन्ति ते॥
कीदृगुच्छिन्नतां यान्ति निमिषेकेन ते नराः। १९
ते लुप्यन्ते महात्रासैः सर्व्वनाशं व्रजन्ति च॥
यथा स्वप्नः प्रबुद्धेन तेषां मूर्त्तिः प्रभो तथा। २०
त्वया जाग्रदवस्थायां सर्व्वथैवावमंस्यते॥
इत्थं मे या मनःपीडा या च चित्तस्य यातना॥ २१
तया बालोऽहमज्ञानः पशुवच्चास्मि ते पुरः॥ २२
नित्यमस्मि त्वया सार्द्धं धृतदक्षकरस्त्वया। २३
त्वं स्वमन्त्रेण मां नीत्वा श्रिया पश्चाद् ग्रहीष्यसि॥ २४
स्वर्गे मे कोऽस्ति पृथ्व्याञ्च त्वत्समो नास्ति मे प्रियः॥ २५
देहे चित्ते च मे क्षीणे मच्चित्तस्य दृढाश्रयः। २६
नित्यस्थायी ममांशश्च विद्यते स्वयमीश्वरः॥
यतः पश्य विनंक्ष्यन्ति त्वत्तो दूरे स्थिता नराः। २७
त्वां त्यक्ताभिचरन्तं त्वम् एकैकं ध्वंसयिष्यसि॥
ईश्वरस्य तु सान्निध्यं मङ्गलोत्पादकं मम। २८
अहं प्रभोः परेशस्य समग्रक्षां समाश्रयं।
कर्म्मणां तस्य सर्व्वेषां वर्णनां कर्त्तुमिच्छुकः॥

---

७४ चतुःसप्ततितमं गीतं।

१ मन्दिरविषयको विलापः १० ईश्वरे प्रार्थना च।

आसफस्य ज्ञानसूचकं गीतं।

किमर्थं नित्यमेव त्वम् अस्मान् गर्हयसीश्वर। १
निजक्षेत्रस्थमेषेभ्यः कोपाग्ने धूममुत्क्षिपन्॥
पूर्व्वकाले त्वया क्रीतां स्वकीयां समितिं स्मर। २
ऋक्थांशश्च त्वया लब्धं सियोनाद्रिं त्वयाश्रितं॥
चिरात् खण्डीकृतेऽस्मिंश्च गेहे पादार्पणं कुरु। ३
धर्म्मधामनि सर्व्वं हि विनष्टं परिपन्थिना॥
तव मेलनशालानां मध्ये गर्ज्जन्ति तेऽरयः। ४
चिह्नार्थं स्वीयचिह्नानि तत्र संस्थापयन्ति च॥

५ पशून् विपिने घोर ऊर्द्धमुत्थापयन्ति ये।
तेषां वृक्षच्छिदां तुल्याः प्रकाशन्ते नरा इमे॥
६ कुठारै र्मुद्गरैश्चापि साम्प्रतं युगपच्च ते।
भञ्जन्ति शिल्पकर्म्माणि तत्रत्याणि हि सर्व्वशः॥
७ त्वदीयधर्म्मधामानि वह्निना दीपयन्ति ते।
तव नाम्नोऽपि वासस्तै र्भूमिसात्कृत्य दूष्यते॥
८ युगपत् तानि लोप्स्याम इत्युक्त्वा निजमानसैः।
सर्व्वाण्यैश्वरवेश्मानि देशे ते दाहयन्ति हि॥
९ न पश्यामः स्वचिह्नानि भाविवादी न शिष्यते।
एतेषाञ्चान्तवित् कोपि मध्येऽस्माकं न विद्यते॥
१० हे ईश द्वेषिणा निन्दा कियत्कालं करिष्यते।
सर्व्वदा च विपक्षेण तव नामावमंस्यते॥
११ हस्तो दक्षिणहस्तस्ते कुतः सङ्कोच्यते त्वया।
वक्षसस्तं वहिष्कृत्य कुरु शत्रुविलोपनं॥
१२ आ पुरातनकालात् तु मम राजा त्वमीश्वर।
पुनः पुन र्महीमध्ये परित्राणविधायकः॥
१३ स्वीयपराक्रमेण त्वं तोयराशिं द्विधाकरोः।
सलिलाध्यक्षनागानां शिरोभङ्गस्त्वया कृतः॥
१४ लिवियाथनजन्तोश्च मूर्द्धानः खण्डितास्त्वया।
भक्ष्यार्थं मरुवासिभ्यस्तस्य दत्तश्च विग्रहः॥
१५ शैलं भित्त्वा त्वमुत्सञ्च जलस्रोतश्च सृष्टवान्।
पुनः शोषितवांश्च त्वं तटिनी र्नित्यवाहिनीः॥
१६ दिवसस्तावकीनोऽस्ति तावकीना च शर्व्वरी।
दीप्ते र्दिवाकरस्यापि सृष्टिकर्त्ता त्वमेव हि॥
१७ वसुधायाश्च सीमानः सर्व्वे संस्थापितास्त्वया।
ग्रीष्महेमन्तकालानां त्वमेवासि विधायकः॥
१८ त्वया संस्मर्य्यतामेतत् परेशो निन्द्यते द्विषा।
ज्ञानवर्ज्जितया जात्या तव नामावमन्यते॥
१९ श्वापदे लोलभावे त्वं नार्पय स्वकलध्वनिं।
स्वीयदीनप्रजानाञ्च प्राणान् नित्यं न विस्मर॥
२० नियमं ते निरीक्षस्व यस्माद् भूमण्डलस्य हि।

तिमिरेणावृता देशाः पूर्णाः क्रौर्य्यस्य वेश्मभिः॥
न परावर्त्ततां क्लिष्टो नरस्त्वत्तोऽपि लज्जितः। २१
लोकै र्दीनै र्दरिद्रैश्च तव नाम प्रशस्यतां॥
ईश्वर त्वं समुत्तिष्ठ स्वविवादे वदस्व च। २२
स्मर त्वदीयनिन्दाञ्च ज्ञानहीनैः सदा कृतां॥
तावकीनविपक्षाणां निनादञ्च न विस्मर। २३
उद्गच्छत्यूर्द्धमश्रान्तं गर्ज्जनं वैरिणां तव॥

---

७५ पञ्चसप्ततितमं गीतं।

ईश्वरस्य धन्यवाद उपदेशकथनञ्च।

वाद्यनियन्त्रे दातव्यम् अल्तस्हितनामकस्वरयुक्तम् आसफन कृतं गानार्थकं धर्म्मगीतं।

ईश्वर त्वत्स्तुतिं कुर्म्मो वयं कुर्म्मस्तव स्तुतिं। १
समीपस्थञ्च ते नाम ज्ञाप्यतेऽद्भुतकर्म्मभिः॥
मया स्वसमयं प्राप्य न्याय्यं विचारयिष्यते॥ २
लीयन्ते मेदिनी तस्याः सकलाश्च निवासिनः। ३
स्तम्भानान्तु तदीयानां स्थायित्वं निश्चितं मया॥ सेला॥
गर्व्विलोकानहं वच्मि यूयं मा भूत गर्व्विणः। ४
उच्चशृङ्गा न जायध्वम् इति वच्मि च दुर्जनान्॥
निजशृङ्गञ्च युष्माभिरूर्द्धमुन्नम्यतां नहि। ५
न वा वाक्यान्युदीर्य्यन्तां साहङ्कारशिरोधिभिः॥
नैव सूर्य्योदयस्थानात् नैव सूर्य्यास्तदेशतः। ६
नैव शून्यमरुस्थानाद् उन्नतिः सम्भविष्यति॥
यतो हेतो र्विचारस्य विधाता स्वयमीश्वरः। ७
एकं करोति नीचं स तदन्यञ्च समुन्नतं॥
तस्य परेशितु र्हस्ते विद्यते पानभाजनं। ८
शोभते तच्च मद्येन पूर्णं मिश्रितवस्तुना।
तेन तत् पायितैः सर्व्वै र्दुर्जनैः क्षितिवासिभिः।
कंसे स्थितं मलञ्चापि परिलिह्य निपास्यत॥
सदा चाहं नविष्यामि गायन् याकूब ईश्वरं। ९

१० दुर्जनानाञ्च शृङ्गाणि प्रच्छेत्स्याम्यखिलान्यहं।
धार्म्मिकस्यैव शृङ्गाणि समाप्स्यन्ति समुन्नतिं॥

---

७६ षट्सप्ततितमं गीतं।

जयार्थमीश्वरीयगुणकीर्त्तनं।

वाद्यनियन्त्रे दातव्यम् आसफेन कृतं गानार्थकं धर्म्मगीतं।

१ सुविख्यातो यिहूदाख्ये देशे विद्यत ईश्वरः।
नामधेयं महत् तस्य चेस्रायेलीयनीवृति॥
२ दूष्यं तस्यास्ति शालेमे वासस्थानं सियोनि च॥
३ प्रभग्नं तेन तत्रैव वज्रतुल्यं शरासनं।
फलकश्चन्द्रहासश्च समरस्याखिलं बलं॥ सेला॥
४ तेजस्वी त्वं प्रतापी च चौरभूभृद्गणादपि॥
५ संहृता हि महानिद्रां यग्मु र्निश्चलचेतसः।
सर्व्वेषामेव वीराणां बभूवुरवशाः कराः॥
६ याकूबेश तवाक्रोशाद् रथा अश्वाश्च निद्रिताः॥
७ त्वं भेतव्यस्त्वयि क्रुद्धे त्वत्साक्षात् कोऽवतिष्ठते॥
८ तावकीनविचाराज्ञा स्वर्गतः श्राविता त्वया।
तेन पृथ्वी भयं प्राप्य निःशब्दा सम्बभूव हि॥
९ यस्माद् उत्थितवानीशो विचारं कर्त्तुमुद्यतः।
सकलान् पृथिवीस्थांश्च दीनान् सन्त्रास्यते हि सः॥ सेला॥
१० त्वत्प्रशंसा तु मर्त्त्यानां क्रोधेनोत्पादयिष्यते।
अतिरिक्तश्च यः क्रोधः स त्वया परिभन्त्स्यते॥
११ प्रभवे परमेशाय युष्माभि र्यत् प्रतिश्रुतं।
क्रियतां तस्य शोधोऽपि सर्व्वैस्तत्परिवेष्टकैः।
तं भयङ्करमुद्दिश्यानीयताञ्चोपढौकनं॥
१२ राज्ञां प्राणापहर्त्ता स भेतव्यश्च क्षितीश्वरैः॥

---

७७ सप्तसप्ततितमं गीतं।

१ विपदः समये विलपनं १० परमेश्वरे समाश्रयणञ्च।

यिदूथूनवर्गीयवाद्यनियन्त्रे दातव्यम् आसफस्य धर्म्मगीतं।

ईशं प्रत्युच्चशब्देन मयाह्वानं विधीयते। १
ईशं प्रत्युच्चशब्दस्य मम वाक् तेन गृह्यतां॥
मामकीनविपत्काले करोम्यन्वेषणं प्रभोः। २
यामिन्यां मे करः क्लिन्नो विरामं नहि गच्छति।
मानसं मामकीनञ्च सान्त्वनां नहि मन्यते॥
ईशस्य स्मरणं कृत्वा क्रन्दनं क्रियते मया। ३
कुर्व्वतश्च मम ध्यानम् अवसीदति मानसं॥ सेला॥
यामिन्यां नेत्रयुग्मं मे निद्रातो वार्य्यते त्वया। ४
उद्विग्नेन मया वाक्यं गदितुं नहि शक्यते॥
पूर्व्वदिनान्यनुध्यायन् वत्सरांश्च पुरातनान्। ५
यन्त्रवाद्यं स्मरिष्यामि रात्रिकाले मया कृतं। ६
मनसा चिन्तयिष्यामि मदात्मालोचयिष्यति॥
प्रभुनानन्तकालाय गर्हणं किं करिष्यते। ७
पुनश्चानुग्रहस्तेन नहि किं वाचरिष्यते॥
तत्कारुण्यस्य लोपः किं नित्यस्थायी भविष्यति। ८
पुरुषानुक्रमं यावद् किं वा नंक्ष्यति तद्वचः॥
ईश्वरस्य च किं जाता कृपाया अपि विस्मृतिः। ९
क्रुद्धत्वाद् वा स्वकीयं किं वात्सल्यं स निरुद्धवान्॥ सेला॥
पश्चादित्थं मया प्रोक्तं योऽयं व्याधि र्ममाभवत्। १०
सोऽपि सर्व्वोपरिस्थस्य दक्षहस्तस्य वत्सरः॥
परमेशस्य कर्म्माणि चिन्तयिष्याम्यहं पुनः। ११
स्मरिष्यामि च प्राक्काले कृतास्तेनाद्भुताः क्रियाः॥
ध्यास्यामि तेऽखिलं कर्म्म भावयिष्यामि ते क्रियाः॥ १२
त्वदीयं वर्त्म हे ईश पवित्रत्वेन शोभते। १३
अस्मदीशस्य तुल्यः को महान् विद्यत ईश्वरः॥
ईश आश्चर्य्यकर्म्मा त्वं व्यक्तशक्तिश्च जातिषु॥ १४
निजबाहुबलेन त्वं स्वकीया मुक्तवान् प्रजाः। १५

याकूवस्यैव सन्तानान् यूषफस्य च वंशजान्॥ सेला॥
१६ अब्धिस्त्वां दृष्टवानीश त्वां दृष्ट्वाब्धिरकम्पत।
गम्भीराण्यपि वारीणि सन्त्रस्तान्यभवन् तदा॥
१७ अवर्षंस्तोयमम्भांसि मेघास्तोदैरयन् ध्वनिं।
चतुर्दिक्षु व्यकीर्य्यन्त तावकीनशरा अपि॥
१८ पर्य्यभ्राम्यत् त्वदीयस्य स्तनितस्य च गर्जनं।
धरादीप्यत विद्युद्भिरुद्विग्नावेपतावनिः॥
१९ अर्णवे तव वर्त्मासीत् तव मार्गो महोदधौ।
आसंश्चानुपलक्ष्याणि पादयो र्लक्षणानि ते॥
२० मूसाहारोणयो र्हस्तैः स्वप्रजा नयतोऽविवत्॥

---

७८ अष्टसप्ततितमं गीतं।

इस्रायेलीयलोकान् प्रतीश्वरस्य शासनम् आश्चर्य्यं कर्म्म च।

आसफस्य ज्ञानसूचकं गीतं।

१ भो भो लोकाः स्वजातीया बुध्यध्वं शासनं मम।
श्रवणैः प्रतिगृह्णीत मम वक्त्रस्य भाषणं॥
२ अहं दृष्टान्तवाक्येन व्यादास्यामि निजं मुखं।
मया प्रव्याहरिष्यन्ते गूढार्थाः पूर्व्वकालिकाः॥
३ यच्छ्रुत्वा ज्ञायते ऽस्माभि र्निजतातै र्निवेदितं।
४ तत् तेषामात्मजेष्वेव नापह्नोष्यामहे वयं।
परेशस्य स्तवः शक्तिः कृतास्तेनाद्भुताः क्रियाः।
सर्व्वं हि भाविवंशायास्माभि र्निवेदयिष्यते॥
५ याकूवान्वयमध्ये स स्थापयामास शासनं।
इस्रायेलीयवंशे च स शास्त्रं विदधे तथा।
बालान् विनयतैतस्मिन्नित्यादिदेश च नः पितॄन्॥
६ तद् बुद्ध्वा सोष्यमाणैस्तैः सन्तानै र्भाविवंशजैः।
समुत्थाय स्वसूनुभ्यस्तच्छास्त्रं कथयिष्यते॥
७ ईश्वरं श्रद्दधानाश्च न विस्मृत्येशितुः क्रियाः।
ते तदीयनिदेशानाम् आचरिष्यन्ति वश्यतां॥

इत्थं ते न भविष्यन्ति निजतातगणोपमाः। ८
पथभ्रष्टा अबाध्या वा लोका अस्थिरचेतसः।
अविश्वास्यस्वभावा वा मानवा ईश्वरं प्रति॥
इफ्रयिमस्य सन्ताना धन्विनः शस्त्रपाणिनः। ९
सङ्ग्रामस्यैव काले हि ते बभूवुः पराङ्मुखाः॥
ईशितु र्नियमञ्चापि ते लोकाः न समाचरन्। १०
तस्य शास्त्रीयमार्गेऽपि गन्तुमासन् अनिच्छवः॥
व्यस्मरंस्ते क्रियास्तस्य स्वाश्चर्य्यास्तेन दर्शिताः॥ ११
कर्म्मातीवाद्भुतं तेषां पितॄणां दृष्टिगोचरे। १२
कृतं तेन मिसर्देशे सोयनस्यैव प्रान्तरे॥
स समुद्रं द्विधा कृत्वा तारयामास तान् स्वयं। १३
ऊर्द्धमुत्थापयामास सलिलान्यपि राशिवत्॥
दिवा मेघेन कृत्स्नायां रजन्यां वह्नितेजसा। १४
गन्तव्यं दर्शयन् मार्गं गमयामास तान् जनान्॥
मरुस्थानेऽपि तेनैव द्विधा कृत्वा शिलोच्चयान्। १५
ते गम्भीरार्णवस्येव बहुतोयानि पायिताः॥
निष्क्रान्ताः सरितः शैलात् सुस्रुवुः सागरोर्म्मिवत्॥ १६
तदा तस्य विरुद्धं ते पुनः पापं समाचरन्। १७
पुनः सर्व्वोपरिस्थञ्च तञ्च प्राकोपयन् मरौ॥
स्वीयलोभस्य शान्त्यर्थं भक्ष्यस्य प्रार्थनेन ते। १८
ईश्वरस्य परीक्षाञ्च चक्रिरे निजमानसैः॥
ईश्वरस्य विरुद्धं ते वाचमेनां बभाषिरे। १९
उपकल्पयितुं भोज्यं किं शक्नोतीश्वरो मरौ॥
पश्य तेनाहते शैले वारीणि प्रास्रवन् यथा। २०
सलिलानां प्रवाहाश्च विनिरक्रमिषु र्यथा।
किं तथैवान्नदानञ्च विधातुं तेन शक्यते।
स्वप्रजानां कृते वा किं मांसं स रचयिष्यति॥
इति हेतोः समक्रुध्यत् तच्छ्रुत्वा परमेश्वरः। २१
याकूबस्य विरुद्धञ्च कोपाग्निः प्राज्वलत् तदा।
इस्रायेलो विरुद्धञ्च रोषधूमः समुद्गतः॥
यस्मादीशे न विश्वस्य तत्त्राणं नाश्रयन्त ते॥ २२

२३ तेनादिश्योर्द्धगान् मेघान् व्योमद्वारं विमोच्य च ॥
२४ तेषु मान्नाभिधं भक्ष्यम् अवतार्य्यत वृष्टिवत्।
गोधूमो गगनोत्पन्नस्तेभ्यस्वादीयतान्नवत्॥
२५ इत्थं विक्रमिणां भक्ष्यम् एकैकेनोपभुज्यत।
स तेषां तृप्तिपर्य्यन्तं पाथेयं प्राहिणोत् तदा॥
२६ पुनस्तेन समुत्पाद्य पूर्व्ववायुं विहायसि।
समानीय स्वशक्त्या च दक्षिणाभिमुखानिलं॥
२७ अवतार्य्यन्त मांसानि तेषामुपरि धूलिवत्।
खगाः पक्षविशिष्टाश्च सामुद्रसिकता इव॥
२८ ते मध्ये शिविरं तेषां वासानां परितोऽपतन्॥
२९ तेन ते भोजनं कृत्वा महतीं तृप्तिमाप्नुवन्।
इत्थं तेन समानिन्ये द्रव्यं तैरभिलिप्सितं॥
३० अभीष्टादनिवृत्तानां मुखेष्वेवामिषे स्थिते।
३१ तेषां विरुद्धमीशस्य क्रोधः प्रादुर्बभूव हि।
तेषां मध्येऽतिपीनांश्च मारयामास मानवान्।
पातयामास चोत्कृष्टान् इस्रायेलीयवंशजान्॥
३२ तथा सत्यपि ते भूयस्चक्रे तं प्रति पातकं।
आचरद्भिरविश्वासं तदीयाश्चर्य्यकर्म्मसु॥
३३ तस्मात् स वासरांस्तेषां क्षययामास वाष्पवत्।
साध्वसेनैव तेषाञ्च सादयामास वत्सरान्॥
३४ यदाहन्यन्त ते तेन तदान्वैष्यंस्तमेव ते।
अकुर्व्वंश्च परावृत्ता ईश्वरस्य गवेषणं॥
३५ तदानीमीश्वरोऽस्माकं विद्यते हि शिलोच्चयः।
ईशः सर्व्वोपरिस्थश्च नस्त्रातास्तीति तेऽस्मरन्॥
३६ तदा तच्चास्तुवन् वक्त्रै जिह्वाभिश्चावदन् प्रियं॥
३७ किन्त्वन्तःकरणं तेषां नाभवत् तं प्रति स्थिरं।
न विश्वासेन वा तस्य नियमं ते समाचरन्॥
३८ सोऽनुकम्प्यपराधाच्च मुक्तिदो न विनाशकः।
तस्मात् संवारयामास निजकोपं पुनः पुनः।
न च प्रज्वलयामास पूर्णं क्रोधानलं निजं॥
३९ इमे मांसमया यच्च गत्वा न प्रतिगच्छति।

तस्य वायोः समाः सन्तीत्येव तेन विचिन्तितं॥
कतिवारान् मरुस्थाने तेऽत्यजन् तस्य वश्यतां। ४०
निर्ज्जने प्रान्तरे तस्य चामर्षमुदपादयन्॥
भूयो भूयश्च तेऽकार्षुरीश्वरस्य परीक्षणं। ४१
इस्रायेलः पवित्रञ्च राजानं तेऽवमेनिरे॥
तत्करं वैरितस्तेन मुक्तो घस्रञ्च विस्मृताः॥ ४२
दर्शितानि स्वचिह्नानि तेन मीसरनीवृति। ४३
स्वकीयाश्चर्य्यकार्य्याणि सोयनप्रान्तरेषु च॥
तत्रत्याः सरितस्तेन रक्तस्रोतांसि चक्रिरे। ४४
स्वनदीनाञ्च तोयानि लोकैः पातुं न शेकिरे॥
प्रहिता मशकास्तेन विदद्ंशुश्च मानवान्। ४५
प्रेषितास्तेन भेकाश्च तेषां नाशमसाधयन्॥
अर्पयामास कीटेषु तेषां शस्यधनानि सः। ४६
फलानि श्रमजातानि शलभेभ्यो ददौ तथा॥
शिलाभि र्नाशयामास स तेषां गोस्तनीलताः। ४७
आजघान तुषारैश्च तेषां सर्व्वानुडुम्बरान्॥
करकायां पशूंस्तेषां व्रजान् विद्युत्सु चार्पयत्॥ ४८
तान् प्रति प्रेषयामास निजक्रोधस्य चानलं। ४९
कोपं रोषं विपत्तिञ्चानिष्टानां दूतवाहिनीं॥
इत्थमेव स्वकोपार्थं मार्गं निर्म्माय विस्तृतं। ५०
तेषां प्राणान् कृतान्ताय दातुं तेन न निह्नुतं।
मार्य्यामेव स्वयं तेषाम् अर्पयामास जीवनं॥
सर्व्वान् मीसरदेशस्थान् अग्रजान् आजघान सः। ५१
हामवंशीयदूष्यस्थान् बलेनाग्रसरान् जनान्॥
पश्चात् प्रस्थापयामास स्वप्रजा एडकानिव। ५२
स्वलोकांश्च मरुस्थाने गमयामास पालवत्॥
निर्व्विघ्नं तेन नीतास्ते साध्वसं चक्रिरे नहि। ५३
किञ्च विद्वेषिणस्तेषां छादयामास तोयधिः॥
स तु तान् प्रापयामास स्वपुण्यावाससन्निधिं। ५४
एनमूर्व्वीधरं क्रीतं तस्य दक्षिणपाणिना॥
स तेषामग्रतो लोकान् दूरीकृत्यान्यजातिजान्। ५५

तद्देशस्याधिकारित्वं मानरज्ज्वा विभज्य च।
इस्रायेलान्वयांस्तेषां वासस्थानेष्ववासयत्॥
५६ सर्व्वश्रेष्ठं तमीशं ते परीक्ष्याकोपयन् पुनः।
तदीयादेशवाक्यानि न समाचरितानि तैः॥
५७ विमुखा वञ्चयामासुस्ते पूर्व्वपुरुषा इव।
शिथिलञ्च धनु र्यद्वत् ते प्रचुच्युविरे तथा॥
५८ ते स्वकीयभ्रगुस्थानैस्तं विरक्तञ्च चक्रिरे।
स्वकीयप्रतिमाभिश्च क्रोधं तस्योदपादयन्॥
५९ ईश्वरस्तु तदाकर्ण्य रोषयुक्तो बभूव हि।
इस्रायेलीयवंशे च तस्य जज्ञे महाघृणा॥
६० ततो हेतो र्नरैः सार्द्धं वसतस्तस्य यद् गृहं।
स तदेव परित्यज्य शीलुस्थं पटमन्दिरं॥
६१ बन्दित्वे स्वबलं शत्रो र्हस्ते च स्वश्रियं ददौ॥
६२ आर्पयत् स्वप्रजाः खड्गे स्वाधिकाराय चाकुपत्॥
६३ तेषां यूनोऽग्रसद् वह्नि र्युवत्यो व्यूहिरे नहि॥
६४ याजकास्त्वासिना पेतु र्विधवा व्यलपन् नहि॥
६५ तदा प्रभु र्जजागार भग्ननिद्रमनुष्यवत्।
गोस्तनीरसपानाद् वा हुङ्कारकारिवीरवत्॥
६६ स्वप्रद्वेषिमनुष्याणां पृष्ठदेशं प्रहृत्य च।
अपमानेन नित्येन योजयामास तान् रिपून्॥
६७ गर्हित्वा यूषफो दूष्यम् अतुष्टेफ्रयिमान्वये॥
६८ स वव्रे यिहूदावंशं सियोनाद्रिमभीप्सितं॥
६९ निर्म्ममे च स्वप्रासादम् उन्नतान् भूधरानिव।
चिरकालनिमित्तं वा स्वेन सृष्टां महीमिव॥
७० स चाभिरोचयामास दायूदाख्यं स्वसेवकं।
तं समादाय मेषाणां शालाभ्योऽपजहार च॥
७१ इत्थं तं स्तन्यदात्रीणां मेषीणामनुवर्त्तनात्।
समानीय स तस्मिन् हि याकूबाख्या निजाः प्रजाः।
इस्रायेलीयराष्ट्रञ्च पालनाय समार्पयत्॥
७२ स तु स्वचित्तशुद्धत्वात् पालयामास तान् जनान्।
हस्तयुग्मस्य दाक्ष्याच्च चारयामास ताः प्रजाः॥

७९ ऊनाशीतितमं गीतं।

यिरूशालमविषये विलापः परमेश्वरं प्रति प्रार्थना च।

आसफस्य धर्म्मगीतं।

हे ईश भिन्नजातीयाः प्राविशन् विषयं तव। १
प्रासादं तावकं पुण्यं मलिनं चक्रिरे च ते।
विदधुः प्रस्तराणां हि राशिवद् यिरुशालमं॥
कुणपांस्तव दासानां खगेभ्यो ददुरन्नवत्। २
त्वद्भक्तानां नृणां मांसं वन्यजन्तुगणाय च॥
यिरूशालमि सर्व्वत्र तेषां रक्तञ्च तोयवत्। ३
सुस्राव नाकरोत् कोऽपि तेषामन्त्यक्रियां तदा॥
अभवाम वयं तस्मान्निन्द्या निकटवासिभिः। ४
हास्यास्पदानि तुच्छानि चतुर्द्दिक्स्थनृणामपि॥
हे परेश कियत्कालं नित्यं क्रोधं करिष्यसि। ५
अमर्षस्तावकीनस्य प्रज्वलिष्यति वह्निवत्॥
ये लोका भिन्नजातीयास्त्वां न जानन्ति सर्व्वशः। ६
प्रार्थनां तव नाम्ना ये न कुर्व्वन्ति विदेशिनः।
तेषामेवोपरि स्वीयस्त्वया रोषोऽवतार्य्यतां॥
यतस्तै र्याकुवं ग्रस्त्वा वसतिस्तस्य नाशिता॥ ७
अस्मत्पूर्व्वापराधांस्त्वं नो विरुद्धं न संस्मर। ८
तावकीनानुकम्पास्मान् प्रतिगृह्णातु सत्वरं।
यतो हेतोरतिक्षीणा अभवाम वयं खलु॥
हे अस्मत्त्रातरीश त्वं स्वनाम्नस्तेजसः कृते। ९
अस्माकं कुरु साहाय्यं स्वीयनाम्नश्च हेतुतः।
विधायोद्धारमस्माकम् अपराधान् क्षमस्व नः॥
अमीषामीश्वरः क्केति ब्रूयुः कुतोऽन्यजातयः। १०
त्वदीयसेवकानां यन्निषिक्तं भुवि शोणितं।
बुध्यतां तत्प्रतीकारोऽस्मत्साक्षाद् अन्यजातिभिः॥
वन्दिनः कातरोक्तिश्च त्वत्साक्षादुपतिष्ठतु। ११
स्वमहाबाहुना लोकान् मुमूर्षूंस्त्वञ्च धारय॥

११ यया त्वां निन्दयामासुरस्मदन्तिकवासिनः।
त्वं तत्सप्तगुणां निन्दां तेषां क्रोडेऽर्पय प्रभो॥
१२ तत्प्रजास्तव केदारे स्थिता मेषाश्च ये वयं।
वयमेव प्रशंसां ते करिष्यामो निरन्तरं।
स्तवं ते वर्णयिष्यामः पुरुषानुक्रमं प्रति॥

---

८० अशीतितमं गीतं।

छिन्नद्राचालताम् इस्रायेलवंशं प्रति विलाप ईश्वरं प्रति प्रार्थना च।

वाद्यनियन्त्रे दातव्यं शोशन्नेदूतनामकस्वरयुक्तम् आसफस्य धर्मगीतं।

१ इस्रायेलीयवृन्दस्य यूथवत् प्रतिपालक।
मेषवद् यूषफोषस्य चारक त्वं निशामय।
किरूवयोः समासीन त्वं स्वतेजः प्रकाशय॥
२ इफ्रयीमस्य प्रत्यक्षं विन्यामीनस्य चाग्रतः॥
मिनशेश्च समक्षं त्वं निजशक्तिं प्रकाशय।
आगत्य स्वयमस्माकं परित्राणं कुरुष्व च॥
३ हे ईश्वर त्वयास्माकं परावृत्तिं विधाय हि।
प्रसन्नं क्रियतां स्वास्यं त्राणं लप्स्यामहे तदा॥
४ सैन्याध्यक्ष परेश त्वं प्रजानां प्रार्थनां प्रति।
कियत्कालं स्वकोपाग्ने धूममुद्गमयिष्यसि॥
५ अन्नं नेत्राम्बुरूपं त्वं स्वलोकेभ्यः प्रयच्छसि।
तान् पाययसि चाश्रूणि परिमाणातिगानि हि॥
६ विवादविषयान् अस्मान् करोष्यासन्नवासिनां।
उपहासञ्च कुर्व्वन्त्यस्माकं विद्वेषिणो मिथः॥
७ सैन्याधीश त्वयास्माकं परावृत्तिं विधाय हि।
प्रसन्नं क्रियतां स्वास्यं त्राणं लप्स्यामहे तदा॥
८ मिसर्देशात् समानीय त्वयैकां गोस्तनीलतां।
दूरीकृत्यान्यजातीयान् कृतं तस्या हि रोपणं॥
९ त्वया तस्या निमित्तन्तु स्थाने निष्कण्टकीकृते।

सम्यग् वर्धितमूला सा कृत्स्नं देशमपूपुरत्॥
समाच्छाद्यन्त तस्याश्च छायया धरणीधराः। १०
शाखाभिरीश्वरीयाश्च पादपा एरसाभिधाः॥
सा च महार्णवं यावत् स्वप्रसूनान्यवर्धयत्। ११
तथा महानदीं यावद् व्यस्तृणोत् स्वीयपल्लवान्॥
किमर्थं साम्प्रतं तस्या वारणी पातिता त्वया। १२
तस्मात् सा सकलैः पान्थै र्हृतपर्णा विधीयते॥
काननाच्च विनिर्गत्य वराहेण प्रमृद्यते। १३
नाश्यते खाद्यमाना च पशुभि र्वनचारिभिः॥
सैन्याधीश निवर्त्तस्व स्वर्गाद् दृष्टिं निपातय। १४
अवलोक्याभिगच्छ त्वम् इमां ते गोस्तनीलतां॥
पल्लवं तव हस्तेन दक्षिणेनैव रोपितं। १५
नन्दनं स्वनिमित्तञ्च त्वयैव प्रबलीकृतं॥
सा लता वह्निना दग्धा सम्यगुच्छिन्नतां गता। १६
त्वत्प्रजाश्च विनश्यन्ति तव वक्त्रस्य गर्ज्जनात्॥
अधितिष्ठतु ते हस्तो नरं त्वद्दक्षिणे स्थितं। १७
नृपुत्त्रं स्वनिमित्तञ्च त्वयैव प्रबलीकृतं॥
तेन नापसरिष्यामो वयं त्वत्तः पराङ्मुखाः। १८
जीवयास्मांस्तदास्माभिस्त्वन्नाम्ना प्रार्थयिष्यते॥
सैन्याधीश परेश त्वं कृत्वा नः परिवर्त्तनं। १९
स्वं प्रसन्नीकुरुष्वास्यं त्राणं लप्स्यामहे तदा॥

---

८१ एकाशीतितमं गीतं।

१ अनुग्रहस्य निमित्तम् ईश्वरस्य धन्यवादं कर्त्तुम् आसफस्य विनयः
६ आज्ञाग्रहणस्य फलञ्च।

वाद्यनियन्त्रे दातव्यं गित्तीतनामकस्वरयुक्तम् आसफस्य गीतं।

अस्मभ्यं बलदातारम् ईशं गानेन विष्टुत। १
याकूबीयेशमुद्दिश्य कुरुध्वञ्च जयध्वनिं॥
यूयं गातुं प्रवर्त्तध्वं कुरुतानकवादनं। २
वीणाघोषञ्च सुश्राव्यं नेवलाख्यततैः सह॥

३ यूयमस्मिन् शुभे मासि कुरुध्वं शृङ्गवादनं।
समये पूर्णचन्द्रस्य तस्मिन् नः पर्व्वणो दिने॥
४ इस्रायेलि तदादिष्टं याकूबेशस्य शासनं॥
५ मिसर्देशस्य मध्येन यस्मिन् काले स निर्गतः।
तदा स स्थापयामास तं विधिं यूषफान्वये।
तस्मिन् देशे मयाश्रावि वाणी बोधातिगा मम॥
६ मया वियोजयाञ्चक्रे भारः स्कन्धद्वयात् तव।
प्रापतु भाण्डकान्मुक्तिं तावकीनकरावपि॥
७ विपत्काले त्वयाहूतस्त्वां समुद्धृतवानहं।
वज्रमेघेषु प्रच्छन्नस्त्वाददां तुभ्यमुत्तरं।
मिरीवाख्यपयस्विन्यां चाकार्षं ते परीक्षणं॥ सेला॥
८ हे मदीयप्रजावर्ग शृणु त्वामादिशाम्यहं।
इस्रायेलान्वय त्वं मे वाक्यमादातुमर्हसि॥
९ कश्चनेतरदेवोऽपि तव मध्ये न वर्त्ततां।
कस्यापीतरदेवस्य पूजा मा क्रियतां त्वया॥
१० त्वत्प्रभुः परमेशोऽहं मिसरात् त्वामुदानयं।
स्वास्यं व्यादेहि सम्यक् त्वं मया तत् पूरयिष्यते॥
११ किन्तु मे स प्रजावर्गो नाश्रौषीद् वचनं मम।
इस्रायेलीयवंशश्च मयि सन्तुष्टवान् नहि॥
१२ तस्मात् स्वमनसां जाड्ये ते लोका अर्पिता मया।
सर्व्वे चाकुर्व्वताचारं स्वीयमन्त्रानुयायिनं॥
१३ मामकीनप्रजाभिश्चेत् समश्रोष्यत मे वचः।
इस्रायेलीयलोकाश्चेद् आचरिष्यन् ममायनं॥
१४ तूर्णं पर्य्यदमिष्यन्त तदा तेषां द्विषो मया।
अहं तेषां विपक्षेषु चाकरिष्यं करार्पणं॥
१५ शत्रवः परमेशस्य प्रावदिष्यंश्च तं प्रियं।
अभविष्यदनन्तञ्च लोकानां मम मङ्गलं॥
१६ अहं प्राभोजयिष्ये च गोधूमानुत्तमान् हि तान्।
मधुनातर्पयिष्यञ्च शैलादुत्पादितेन तान्॥

८२ द्व्यशीतितमं गीतं।

विचारकान् प्रति तिरस्कारः।

आसफस्य धर्म्मगीतं।

ईश्वरीयसमज्यायाम् अवतिष्ठत ईश्वरः। १
ईश्वराणाञ्च मध्ये स विचारं विदधाति हि॥
अन्यायेन कियत्कालं यूयं विचारयिष्यथ। २
कियत्कालञ्च दुष्टानां पक्षपातं करिष्यथ॥ सेला॥
दुर्गतं पितृहीनञ्च सद्विचारेण रक्षत। ३
दुःखिनां निर्धनानाञ्च निर्दोषत्वं प्रघोषत॥
दीनं निःस्वञ्च प्रोद्धृत्य कराद् रक्षत पापिनां॥ ४
अज्ञाना बुद्धिहीनाश्च भ्राम्यन्तीमे तमिस्रके। ५
मेदिन्या मूलवस्तूनि सकलानि चलन्ति हि॥
मयोक्तमीश्वरा यूयं सर्व्वे श्रेष्ठस्य चात्मजाः॥ ६
अवश्यं मर्त्त्यवद् यूयं परलोकं गमिष्यथ। ७
यथा वा कश्चनाध्यक्षस्तथा यूयं पतिष्यथ॥
ईश्वर त्वं समुत्थाय विचारं जगतः कुरु। ८
यस्मात् तवास्ति सर्व्वासां जातीनामधिकारिता॥

---

८३ त्र्यशीतितमं गीतं।

दुष्टरिपूणां विरुद्धम् आसफस्य प्रार्थनं।

आसफेन कृतं गानार्थकं धर्म्मगीतं।

ईश मा भव निःशब्द ईश मौनी न शाम्य हि॥ १
यतो हेतो र्विपक्षास्ते पश्य कुर्व्वन्ति गर्ज्जनं। २
त्वाञ्च दिषन्ति ये लोकास्ते व्रजन्त्युच्चमस्तकाः॥
त्वत्प्रजानां विरुद्धं ते कल्पयन्ति छलं मिथः। ३
गुप्तानां तव रत्नानाम् अहितं मन्त्रयन्ति च॥
ते वदन्ति समायात लोप्स्यामस्तान् अशेषतः। ४
इस्रायेलीयनामापि न संस्मारिष्यते पुनः॥
इदोमीयेस्मयेलीया मानवा दूष्यवासिनः। ५

मोयावीयमनुष्याश्च हाजिरीयजना अपि॥
६ गिवाल् अम्मोन् अमालेकः पिलेष्टी सोरवासिनः।
७ इमे सर्व्वे ससौहार्द्दं कृतवन्तः कुमन्त्रणां।
तवैव प्रातिकूल्येन नियमञ्च न्यरूपयन्॥
८ अशूरीयमहाराजस्तेषु चासज्यते दृढं।
लोटवंशीयलोकानां बाहुवत् सोऽभवत् स्वयं॥ सेला॥
९ तान् प्रत्याचर तादृक् त्वं यादृक् मिदीयनं प्रति।
यादृक् सीषिरयावीनौ प्रति वा कीसुनस्तटे॥
१० तत्रैन्दोरे विनष्टौ च भूम्याश्च सारतां गतौ॥
११ एतेषां कुरु चाध्यक्षान् समान् ओरेवसेवयोः।
यथा सेवहसल्मुन्नौ तथैतेषां पतीन् कुरु॥
१२ यतस्तैरुक्तमीशस्य वासान् भोक्ष्यामहे वयं॥
१३ तान् मदीश कुरुष्व भ्रान्तान् वायुचालितनालवत्॥
१४ यथारण्यं ग्रसेद् वह्निर्यथा लिह्याद् गिरीन् शिखा॥
१५ तद्वत् स्वचक्रवातेन त्वमेतान् अनुधाव हि।
तान् विधेहि च सन्त्रस्तान् प्रचण्डेन स्ववायुना॥
१६ वदनानि च तेषां त्वम् अपमानेन पूरय।
तदा गवेषयिष्यन्ति ते त्वन्नाम परेश्वर॥
१७ नो चेन्नित्यं सलज्जास्ते भविष्यन्ति भयातुराः।
व्रीडया च समाच्छन्नास्ते गमिष्यन्ति लुप्ततां॥
१८ तेन ज्ञास्यन्ति लोका यत् केवलस्त्वं परेश्वर।
कृत्स्नाया अवनेः सम्राट् इतिनाम्ना प्रसिध्यसि॥

---

८४ चतुरशीतितमं गीतं।

१ ईश्वरं मन्दिर आराधयितुमिच्छा ४ भजनाकारिणः सुखस्य वर्णनं ८ तत्-सुखभोगाय प्रार्थनञ्च।

वाद्यनियन्त्रे दातव्यं गित्तीतनामकस्वरयुक्तं कोरहीयवंशस्य गीतं।

१ कीदृक् प्रियास्तवावासाः सैन्याध्यक्ष परेश्वर॥
२ प्राङ्गणानि परेशस्याकाङ्क्ष्य सीदति मे मनः।
अमरेश्वरमुद्दिश्य नदतो हृत् तनुश्च मे॥

प्राप्तो हि पक्षिणा गेहः स्वनीडश्चातकेन च। ३
शावकानां निधानार्थं त्वदीया एव वेदयः।
परेश वाहिनीनाथ मम राजन् ममेश्वर॥
त्वद्गेहवासिनो धन्यास्त्वां स्तोष्यन्ति पुनश्च ते॥ सेला॥ ४
धन्यास्ते मानवा येषां शक्तिस्त्वय्येव विद्यते। ५
ऋजुमार्गस्वरूपाणि येषां चित्तानि सन्ति च॥
अश्रुदरीं तरन्तस्ते तां कुर्व्वन्ति जलाशयं। ६
सरोवराश्च शोभन्ते वृष्टिजातेन तेजसा॥
वर्धमानाः सदा शक्त्या भवन्त्यग्रसराश्च ते। ७
शेषे सियोनि चैकैकः प्राप्नोतीशस्य दर्शनं॥
सैन्याध्यक्ष परेश त्वं मदीयां प्रार्थनां शृणु। ८
क्रियतामवधानञ्च त्वया याकूब ईश्वर॥ सेला॥
हे अस्मत्फलकेश त्वं कुरुष्वात्र निरीक्षणं। ९
राज्ञस्त्वयाभिषिक्तस्य वदनञ्चावलोकय॥
श्रेष्ठं दिनसहस्रेभ्यो दिनमेकं तवाङ्गने। १०
पापवेश्मसु संवासाद् ईश्वरस्यैव मन्दिरे।
द्वारिवत् परिचर्य्यापि मह्यं हि रोचतेऽधिकं॥
यस्मात् प्रभुः परेशो यो भास्करः फलकश्च सः। ११
प्रसादञ्च महत्त्वञ्च परमेशः प्रयच्छति।
सरलाचारिलोकानां किञ्चित् क्षेमं न स क्षुते॥
नरस्त्वामाश्रितो धन्यः सैन्याध्यक्ष परेश्वर॥ १२

---

८५ पञ्चाशीतितमं गीतं।

पारमार्थिकसम्पदो निमित्तमीश्वरं प्रति प्रार्थनं तन्निमित्तमीश्वरे प्रत्याशनञ्च।

वाद्यनियन्त्रे दातव्यं कोरहवंशस्य धर्म्मगीतं।

पूर्व्वमासीः प्रसन्नस्त्वं स्वीयदेशे परेश्वर। १
अन्वयं याकूबीयञ्च दासत्वात् पर्य्यमूमुचः॥
त्वया स्वीयप्रजानाञ्च दोषो दूरीकृतस्तदा। २
सर्व्वमेव स्वलोकानां पापमाच्छादितं त्वया॥ सेला॥
तदानीं शमयित्वा च निजक्रोधमशेषतः। ३

त्वं स्वकोपानलस्यैव चण्डताता न्यवर्त्तथाः॥
४ अस्मत्त्राणकृदीश त्वं परावर्त्तस्व नः प्रति।
अस्मान् प्रति निजामर्षम् अधुनापि निवर्त्तय॥
५ त्वमस्मान् प्रति किं कोपं नित्यमेव करिष्यसि।
किं रक्षिष्यसि स्वक्रोधं पुरुषानुक्रमं प्रति॥
६ परावृत्य त्वमस्मान् किं नहि सञ्जीवयिष्यसि।
त्वत्तः स्वीयप्रजानान्तु हर्ष उत्पत्स्यते तदा॥
७ हे परेश त्वमेवास्मान् स्वप्रसादं विदर्शय।
त्वत्तो जातं परित्राणम् अस्मभ्यं दीयतां त्वया॥
८ वक्ष्यति प्रभुरीशो यत् मया तच्छ्रोष्यते वचः।
यस्मात् स्वीयप्रजानाञ्च स्वसाधूनाञ्च मङ्गलं।
स गदिष्यति ते किन्तु न पुन र्यान्तु मूढतां॥
९ तद्भक्तानां समीपस्थं तत्परित्राणमस्ति हि।
अस्मज्जनपदे तस्माद् अधिष्ठास्यति गौरवं॥
१० मिलनञ्च करिष्येते करुणासत्यते मिथः।
परस्परं करिष्येते धर्म्मः शान्तिश्च चुम्बनं॥
११ प्ररोक्ष्यत्यवनौ सत्यं स्वर्गाद् धर्म्मोऽवभास्यति॥
१२ परेशो दास्यति क्षेमं भू र्नः शस्यञ्च दास्यति॥
१३ धर्म्मो यास्यति तस्याग्रे पदाभ्यां वर्त्म कल्पयन्॥

---

८६ षडशीतितमं गीतं।

दायूदः प्रार्थनं।

१ हे परेश त्वयाकर्ण्य दीयतां मह्यमुत्तरं।
यतो हेतोरहं दीनो दरिद्रश्च भवामि हि॥
२ अभिरक्ष मम प्राणान् यतोऽहमस्मि पुण्यवान्।
हे मदीश निजं दासं त्वं त्रायस्व त्वदाश्रितं॥
३ प्रभो मामनुकम्पस्व त्वामाह्वयेऽखिलं दिनं॥
४ स्वीयदासस्य चित्तं त्वं हर्षयुक्तं विधेहि च।
यस्मात् त्वां प्रत्यहं चित्तम् उन्नयामि हि हे प्रभो॥

प्रभो त्वमेव सद्भावः क्षमायुक्तश्च विद्यसे। ५
यावन्तस्त्वाह्वयन्ति त्वां तान् प्रति त्वं कृपानिधिः॥
प्रार्थनां मामकीनां त्वं हे परेश निशामय। ६
क्रियतामवधानञ्च मम खेदोक्तिषु त्वया॥
त्वामाह्वये विपत्काले त्वं मे दातासि चोत्तरं॥ ७
हे प्रभो नास्ति देवानां मध्ये कोऽपि त्वया समः। ८
नैव कर्म्माणि विद्यन्ते तुल्यानि कर्म्मणां तव॥
त्वत्सृष्टाः सर्व्वजातीया उपस्थाय तवाग्रतः। ९
हे प्रभो त्वां प्रणंस्यन्ति स्तोष्यन्ति तव नाम च॥
महांश्चाद्भुतकर्म्मा त्वम् अद्वितीयस्त्वमीश्वरः॥ १०
परमेश स्वमार्गं त्वं मां दर्शयितुमर्हसि। ११
यतोऽहमभिवाञ्छामि सत्यमाचरितुं तव।
तव नाम्नो भयाय त्वम् एकाग्रं कुरु मे मनः॥
सर्व्वान्तःकरणेन त्वां स्तोष्ये मदीश्वर प्रभो। १२
अनन्तकालपर्य्यन्तम् अर्चयिष्यामि नाम ते॥
यतस्त्वदीयकारुण्यं सुमहद् वर्त्तते मयि। १३
अधःस्थात् परलोकाच्च मत्प्राणा उद्धृतास्त्वया॥
ईश मत्प्रातिकूल्येन समुत्तिष्ठन्ति गर्व्विणः। १४
दुर्वृत्तानां समाजश्च प्राणान्तं मम चेष्टते।
न स्थापयन्ति ते लोकास्त्वां स्वीयदृष्टिगोचरे॥
किन्तु प्रभो दयालुस्त्वम् अनुग्राहक ईश्वरः। १५
सहिष्णुश्च महान् प्रीत्या सत्यत्वेनापि विद्यसे॥
अतो मह्यं परावृत्य करुणां कुरु मां प्रति। १६
एतस्मै निजदासाय देहि स्वीयपराक्रमं।
स्वीयदासीसुतस्यैव परित्राणं विधेहि च॥
कुरु मां प्रति चाचारं शुभलक्षणरूपकं। १७
तद् दृष्ट्वा त्रपयिष्यन्ते सकला द्वेषिणो मम।
यतो मां परमेश त्वम् उपकृत्याश्वसान्त्वयः॥

---

८७ सप्ताशीतितमं गीतं।

समाजीयप्रशंसनं।

कोरहीयवंशेन कृतं गानार्थकं धर्म्मगीतं।

१ पर्व्वतेषु पवित्रेषु विद्यते तस्य निर्म्मितिः॥
२ परमेशः सियोनस्य द्वारेषु प्रीयते यथा।
याकूवः सर्व्ववासेषु स न सम्प्रीयते तथा॥
३ उच्यन्ते श्लाघ्यवाक्यानि हे ईशस्य पुरि त्वयि॥ सेला॥
४ रहवं वाविलञ्चाहं गणयामि स्वमित्रवत्।
फिलेष्टी सोरकूशौ च पश्येमे तत्र जज्ञिरे॥
५ सियोनाख्यपुरीञ्चाधि वाक्यमेतद् गदिष्यते।
एष लोको नरोऽसौ च तस्या मध्येऽभ्यजायत।
स्वयं सर्व्वोपरिस्थश्च सुस्थिरां विदधाति तां॥
६ जातिलेखनकाले च गणनां परमेश्वरः।
करिष्यतीदृशीं पश्य तत्रायं जन्म लब्धवान्॥ सेला॥
७ गायका वादकाश्चापि वदिष्यन्ति कथामिमां।
अस्माकं सकला उत्सा विद्यन्तेऽभ्यन्तरे तव॥

---

८८ अष्टाशीतितमं गीतं।

मुमूर्षुलोकस्य प्रार्थनं।

कोरहवंशेन कृतं गानार्थकं धर्म्मगीतं। वाद्यनियन्त्रे दातव्यं महलतलियन्नोतनामकस्वरयुक्तम् इस्राहीयहेमनस्योपदेशगीतं।

१ हे मदीयपरित्रातरीश हे परमेश्वर।
दिवा करोमि खेदोक्तिं निशायाञ्च तवाग्रतः॥
२ प्रार्थना मामकीना हि त्वदीयगोचरीभवेत्।
मामकीनार्त्तरावे त्वं निजकर्णं निधेहि च॥
३ पूर्णाः क्लेशै मम प्राणाः प्रेत्यासन्नाश्च मेऽसवः॥
४ गर्त्तेऽवरूढलोकानां मध्ये गण्योऽहमस्मि हि।
शक्तिहीनमनुष्यस्य समानश्च भवाम्यहं॥
५ विहस्तो वा प्रमीतेषु हतेष्ववटशायिषु।

न स्मृतेषु त्वया भूयः वियुक्तेषु करात् तव ॥
निहितोऽहञ्च गर्त्तेऽधो गम्भीरे तमसि त्वया ॥ ६
तव कोपेन चाक्रान्तः क्लिश्ये सर्व्वैस्तवोर्म्मिभिः ॥ सेला ॥ ७
त्वं दूरीकृत्य बन्धूनां गर्हणीयं करोषि मां। ८
अवरुद्धश्च विद्येऽहं निर्यातुं पारयामि न ॥
दुःखेन क्षीणनेत्रोऽहम् आह्वयाम्यखिलं दिनं। ९
स्वरेश परेश त्वां हस्तौ तुभ्यं प्रसारयन् ॥
मृतान् प्रति किमाश्चर्य्यं कर्म्म कारिष्यते त्वया। १०
प्रेता वा किं समुत्थाय करिष्यन्ति तव स्तुतिं ॥ सेला ॥
लोकाः किं वर्णयिष्यन्ति त्वत्कारुण्यं शवावटे। ११
सत्यतां तावकीनां वा सर्व्वनाशस्य वेश्मनि ॥
तिमिरे किं तवाश्चर्य्यं कर्म्म केनापि भोत्स्यते। १२
किं वा ते भोत्स्यते धर्म्मस्तत्र विस्मृतिनीवृति ॥
अहन्तु त्वां समुद्दिश्य परमेश्वर रोदिमि। १३
उपस्थास्यति प्रातश्च त्वामियं प्रार्थना मम ॥
हे परेश किमर्थं त्वं मत्प्राणान् परिगर्हसे। १४
किमर्थं निजवक्त्रञ्च मत्तः प्रच्छाद्यते त्वया ॥
बाल्यकालादहं दुःखी मृतकल्पो भवामि च। १५
तव भीषणभाराच्च नैराश्यं जायते मम ॥
त्वत्कोपेन समाच्छन्नं त्वत्त्रासा नाशयन्ति मां ॥ १६
वेष्टन्ते च जलानीव ते मामेव निरन्तरं। १७
ते सर्व्वे मां चतुर्द्दिक्षु परिगच्छन्ति सङ्घशः ॥
सुहृदं प्रियबन्धुञ्च त्वं मत्तोऽदवयः खलु। १८
अन्धकारात् किमन्यो हि मद्बन्धुरवशिष्यते ॥

---

८९ ऊननवतितमंगीतं।

१ आभाषः ५ परमेश्वरस्य गुणकीर्त्तन १९ दायूदं प्रतीश्वरस्य प्रतिज्ञा ३८ दुःखे विलापः ४६ प्रार्थना च।

इस्राहीयैथनस्य ज्ञानसूचकं गीतं।

गास्यामि परमेशस्य बहुरूपां कृपां सदा। १

अहं स्वकीयवक्त्रेण पुरुषानुक्रमं प्रति।
मानवान् ज्ञापयिष्यामि तव विश्वास्यतां प्रभो॥
२ मयोक्तं सर्व्वदा स्थायि कृपामन्दिरमेधते।
व्योम्न्येव स्थापिता चास्ति निजविश्वास्यता त्वया॥
३ स्वाभिरुचितलोकेन सह मे नियमः कृतः।
निजदासस्य दायूदः कृते दिव्यमकारि च॥
४ अहमेव विधास्यामि तव वंशं सदा स्थिरं।
पुरुषानुक्रमं यावद् दृढं सिंहासनञ्च ते॥ सेला॥
५ परमेश तवाश्चर्य्यं कर्म्म स्वर्गे प्रशस्यते।
पवित्राणां सभायाञ्च मध्ये विश्वास्यता तव॥
६ उपमेयः परेशेन को जनो विद्यते दिवि।
ईशसन्ततिमध्ये वा कः समानः परेशितुः॥
७ पवित्राणां सभामध्येऽतीव भेतव्य ईश्वरः।
यावन्तस्तञ्च वेष्टन्ते तेषां सोऽस्ति भयङ्करः॥
८ तव को विद्यते तुल्यः सैन्याधीश परेश्वर।
परमेशः पराक्रान्तः स्वविश्वास्यतयावृतः॥
९ आधिपत्यं करोषि त्वं सागरस्याभिमानिनः।
तदीयोच्चतरङ्गाणां शान्तिं त्वं विदधासि च॥
१० रहवञ्च त्वया चूर्णो यथा मर्त्त्योऽसिना हतः।
द्वेषिणश्च विकीर्णास्ते बलिना तव बाहुना॥
११ स्वर्ग एव त्वदीयोऽस्ति त्वदीयास्ति च मेदिनी।
विश्वं तत्पूरणञ्चापि सर्व्वं संस्थापितं त्वया॥
१२ उत्तरा दक्षिणा चोभे ह्यसृज्येतां त्वया दिशौ।
हर्षात् ताबोरहर्म्मोणौ तव नाम्नैव गायतः॥
१३ तावकीनश्च यो बाहुः स पराक्रमसंयुतः।
शक्तिमांस्तव पाणिश्च प्रोच्चस्ते दक्षिणः करः॥
१४ धर्म्मन्यायौ हि विद्येते मूले सिंहासनस्य ते।
करुणा सत्यता चेमे त्वत्पुरस्ताद्धि गच्छतः॥
१५ धन्यां वदामि तां जातिं या जानाति जयध्वनिं।
परमेश त्वदास्यस्य दीप्तौ लोका व्रजन्ति ते॥
१६ आनन्दं तव नाम्नैव ते कुर्व्वन्त्यखिलं दिनं।

तावकीनेन धर्म्मेण चाप्नुवन्ति समुन्नतिं॥
यतो हेतोस्त्वमेवासि शोभा तेषां बलप्रदा। १७
त्वप्रसादेन नः शृङ्गं त्वं करोषि समुन्नतं॥
यस्माद् यः फलकोऽस्माकं स एवास्ति परेशितुः। १८
इस्रायेलः पवित्रस्य राज्ञो दासोऽस्ति नो नृपः॥
तदा स्वसाधुलोकांस्त्वम् आलप्येत्थमभाषथाः। १९
उपकारस्य भारो हि मया वीरे समर्पितः।
प्रजानां मध्यतो हत्वा नरश्चोच्चीकृतो मया॥
मामकीनमिमं दासं दायूदं लब्धवानहं। २०
तमेव स्वीयतैलेन पवित्रेणाभिषिक्तवान्॥
स्थिरस्तस्य सहायश्च मम हस्तो भविष्यति। २१
तमेव मम बाहुश्च बलवन्तं करिष्यति॥
नोपद्रोष्यति तं द्वेषी न तं क्लेक्ष्यति दुर्जनः॥ २२
तस्याग्रे चूर्णयिष्यन्ते मया तत्परिपन्थिनः। २३
मया समाहनिष्यन्ते सकलास्तस्य वैरिणः॥
स्थास्यतस्तेन सार्द्धञ्च दया विश्वास्यता च मे। २४
उन्नतं मम नाम्ना च तस्य शृङ्गं भविष्यति॥
मत्साहाय्येन हस्तं स धुनीनाथेऽर्पयिष्यति। २५
स्वीयदक्षिणपाणिञ्च तटिनीषु निधास्यति॥
मम तातस्त्वमेवासि त्वमेवासि मदीश्वरः। २६
त्वं मम त्राणदः शैल इत्याह्वास्यति मां हि सः॥
पुनश्चाहं करिष्यामि तमेव ज्येष्ठमात्मजं। २७
उपर्य्युपरि सर्व्वेषां नृपाणां क्षितिवासिनां॥
तं प्रत्यनन्तकालार्थं रक्षिष्यामि कृपां मम। २८
तेन स्थास्यति सार्द्धञ्च निश्चलो नियमो मम॥
मया तदीयवंशश्च नित्यस्थायी विधास्यते। २९
तस्य सिंहासनञ्चापि व्योमवद् दीर्घकालिकं॥
मम शास्त्रं परित्यज्य राजनीतिं विहाय च। ३०
तदीयपुत्त्रपौत्त्राश्चेद् विलङ्घेरन् विधीन् मम। ३१
आज्ञानां मामकीनानां न कुर्य्युः परिपालनं॥
तर्हि दास्यामि दण्डेन तेभ्यो दुष्कर्म्मणः फलं। ३२

प्रहारैरपराधस्य करिष्यामि च शासनं॥
३३ नाहं निवर्त्तयिष्यामि तस्मात् स्वीयमनुग्रहं।
निजविश्वास्यतायाश्च न करिष्यामि वञ्चनं॥
३४ नियमो मामकीनश्च नहि लङ्घिष्यते मया।
निर्गतं यन्ममोष्ठाभ्यां तन्न कारिष्यतेऽन्यथा॥
३५ शपथो हि मयाकारि स्वपवित्रतया सकृत्।
दायूदं प्रति तत्राहं न भविष्याम्यसत्यवाक्॥
३६ सर्व्वदा वर्त्तमानश्च तस्य वंशो भविष्यति।
तस्य भद्रासनं स्थाता मत्साक्षाद् भास्करोपमं॥
३७ चन्द्रवत् तत् सदा स्थास्नु तत्साक्षी नियतो दिवि॥ सेला॥
३८ निराकुर्व्वन् विरक्तस्त्वं स्वाभिषिक्ताय कुप्यसि॥
३९ स्वदासस्य पणं भित्त्वा स्वजं धूलौ विकृत्य च॥
४० सकला वारणीस्तस्य छिद्रयुक्ताः करोषि हि।
तस्य दुर्गाणि शङ्कया वसती विदधासि च॥
४१ तत्रत्याः पथिकाः सर्व्वे तस्य द्रव्यं हरन्ति हि।
निन्दास्पदञ्च मन्यन्ते तं तदासन्नवासिनः॥
४२ त्वया तदीयशत्रूणाम् उन्नता दक्षिणाः कराः।
द्वेषिणः सकलास्तस्य हर्षयुक्ताः कृतास्त्वया॥
४३ भंक्ता तस्यासिवक्त्रं स त्वयाकार्य्यस्थिरो रणे॥
४४ तस्य शोभां त्वया लुप्ता क्षिप्तं सिंहासनं भुवि॥
४५ तथा ह्रासितकौमारः स त्वया लज्जयावृतः॥
४६ परमेश कियत्कालं गुप्तः स्थास्यसि सर्व्वदा।
कियत्कालञ्च कोपस्ते प्रज्वलिष्यति वह्निवत्॥
४७ स्मर मां कीदृगस्थास्नु ममायुश्चेति चिन्तय।
किमर्थं नरसन्तानाः सर्व्वे सृष्टा मुधा त्वया॥
४८ कुत्र जीवति मर्त्त्यः स मरणं न निरीक्ष्य यः।
स्वप्राणान् परकालस्य हस्ताभ्यामुद्धरिष्यति॥ सेला॥
४९ हे प्रभो कुत्र विद्यन्ते वरास्ते पूर्व्वकालिकाः।
स्वसत्येन त्वया शप्त्वा दायूदे हि प्रतिश्रुताः॥
५० प्रभो त्वद्भृत्यवर्गस्य निन्दां स्मर्त्तुं त्वमर्हसि।
सह्यते सा मया क्रोडे बलवज्जातिभिः कृता॥

तया निन्दितवन्तस्ते द्वेषिणस्ते परेश्वर। ५१
राज्ञस्त्वदभिषिक्तस्य पादचिह्नानि निन्दया॥
अनन्तानेहसं व्याप्य धन्यो भूयात् परेश्वरः॥ ५२
तथास्तु। तथास्तु॥

---

९० नवतितमं गीतं।

१ मनुष्याणामसारत्वं ११ ईश्वरे मङ्गलाय प्रार्थना।

ईश्वरीयलोकस्य मूससः प्रार्थनं।

प्रभो त्वमाश्रयोऽस्माकम् आपौरुषपरम्परं॥ १
यदा शैला अनुत्पन्ना भूर्जगच्च न निर्म्मितं। २
आ तत्कालात् त्वमेवास्यनाद्यनन्तक ईश्वरः॥
मर्त्त्यांस्त्वया परावर्त्त्य विधीयन्ते हि चूर्णवत्। ३
नरजाः परिवर्त्तध्वम् इति वाग् ईर्य्यते त्वया॥
त्वद्दृष्टौ वर्षसाहस्रं गतह्योदिवसोपमं। ४
रात्रेरेकेन यामेन समानं प्रतिभाति वा॥
त्वयैव स्राव्यमाणो हि स्वप्नतुल्योऽस्ति मानवः। ५
प्रातःकाले विकारं स तृणवत् परिगच्छति॥
प्रातःकाले प्रफुल्लः स विकारमधिगच्छति। ६
सायङ्काले परिच्छिन्नः शुष्कतां प्रतिगच्छति॥
यस्मात् त्वदीयकोपेन क्षीणतां प्राप्नुमो वयं। ७
तावकीनादमर्षाच्च वयं पर्य्युद्विजामहे॥
अस्मदीयापराधांस्त्वं निदधासि स्वसम्मुखे। ८
अस्माकं गुप्तपापानि स्वीयवक्त्रस्य तेजसि॥
यस्मान्नो दिवसाः सर्व्वे त्वत्कोपादतियन्ति हि। ९
सङ्कल्पा इव चास्माभि र्याप्यन्ते निजवत्सराः॥
अस्मदीयायुषो मानं सप्ततिः सन्ति वत्सराः। १०
अशीतिवर्षमानं चेद् भवेदायु र्महाबलात्।
तर्हि तस्यापि या शोभा सा सकष्टकदुर्द्दशा॥
इत्थं प्रचालितास्तूर्णं वयं दूरं डयामहे॥
तावकीनस्य कोपस्य प्राबल्यं केन बुध्यते। ११

याद्दग् आदरणीयत्वं तव क्रोधोऽपि तादृशः॥
१२ त्वमस्मान् स्वदिनानां तां गणनामभिशिक्षय।
स्वमनांसि यया सर्व्वे ज्ञानं नेष्यामहे वयं॥
१३ परमेश निवर्त्तस्व कतिकालं विलम्बसे।
त्वया स्वकीयदासेषु चानुकम्पा विधीयतां॥
१४ प्रातःकाले त्वमेवास्मान् स्वप्रसादेन तर्पय।
यावज्जीवं प्रफुल्लाश्च नन्दिष्यामो वयं ततः॥
१५ त्वत्तो नः क्लेशभोगस्य दिनानामनुसारतः।
दुःखदर्शनवर्षाणां साम्याचास्मान् प्रहर्षय॥
१६ तावकीनेषु दासेषु तव कार्य्यं प्रकाशतां।
त्वदीयो महिमा तेषां सन्तानेषु च दृश्यतां॥
१७ अस्मत्प्रभोः परेशस्य शोभास्मास्वधितिष्ठतु।
अस्मद्धस्तैः कृतं कर्म्म त्वं स्थिरीकुरु नः कृते।
कृतं यन्नः करैः कर्म्म तत् त्वमेव स्थिरं कुरु॥

---

९१ एकनवतितमं गीतं।

१ परमेश्वराश्रितानां जनानां निर्विघ्नत्वं १४ तान् प्रतीश्वरस्यानुग्रहश्च।

१ नरः सर्व्वोपरिस्थस्य गुप्तस्थानं समाश्रितः।
सर्व्वशक्तिमतस्तस्य छायायां सन्निवत्स्यति॥
२ परमेश्वरमुद्दिश्य भाषेऽहं त्वं ममाश्रयः।
मामकीनश्च दुर्गं त्वं ममाशाभूमिरीश्वरः॥
३ स त्वां व्याधस्य पाशाच्च पापमार्य्याश्च मोच्यति।
४ स्वकीयेन पतत्रेण स त्वामाच्छादयिष्यति।
त्वं तस्य पक्षयुग्माधः शरणञ्च गमिष्यसि।
भविता तस्य सत्यत्वं फलको वारणश्च ते॥
५ न भविष्यति ते त्रासो रात्रिकालिकभीषणात्।
न दिवाकाशमार्गेण पतता वा कलम्बतः।
६ न तमोगामिनो व्याधे र्न माध्याह्निकमारकात्॥
७ त्वत्पार्श्वस्थाः पतिष्यन्ति सहस्रसंख्यका जनाः।
अयुतं दक्षिणस्थाश्च त्वां न स्प्रक्ष्यति सा विपत्॥

केवलं स्वीयचक्षुर्भ्यां त्वं तामालोकयिष्यसि। ८
प्रतीकारश्च दुष्टानां प्रसमीक्षिष्यसे तरां॥
परमेश त्वमेवासि मामकीनसमाश्रयः। ९
सर्व्वोपरिस्थमेव त्वं हे मनः शरणं गतं॥
नोपस्थास्यत्यनिष्टं त्वां मारी नाप्स्यति ते गृहं॥ १०
आदेक्ष्यति स्वदूतान् स रक्षां ते सर्व्ववर्त्मसु। ११
यन्नाहन्याः पदं शैले तत् त्वां वक्ष्यन्ति ते करैः॥ १२
त्वं करिष्यसि सिंहे च विषास्ये च पदार्पणं। १३
पशुराजं पृदाकुञ्च पद्भ्यां मर्द्दिष्यसि स्वयं॥
आसक्तो मय्यसौ तस्मात् तं रक्षिष्याम्यहं किल। १४
उन्नतं तं करिष्यामि यस्मात् स मम नामवित्॥
मयि प्रार्थयमानाय तस्मै दास्यामि चोत्तरं। १५
अहमेव करिष्यामि साहाय्यं तस्य सङ्कटे।
तञ्च निस्तारयिष्यामि तस्मै दास्ये च गौरवं॥
सुदीर्घेणायुषा तस्य करिष्यामि च तर्पणं। १६
दर्शयिष्यामि तञ्चाहं परित्राणं मया कृतं॥

---

९२ द्विनवतितमं गीतं।

१ ईश्वरीयगुणानां कीर्त्तनं ६ पापिनां दुःखं पुण्यवतां सुखं।

विश्रामदिने गातव्यं धर्म्मगीतं।

उत्तमं परमेशस्य गुणानामनुकीर्त्तनं। १
गायनं नामधेये च तव सर्व्वोपरिस्थित।
नेवला दशतन्त्र्या च वीणया च गभीरया। २
प्रातस्तव प्रसादस्य निशि सत्यस्य बोधनं॥ ३
यस्मान्मां व्यदधा हृष्टं त्वं परेश स्वकर्म्मणा। ४
त्वदीयहस्तयोः कार्य्यैरुल्लासो जायते मम॥
कीदृङ्महन्ति विद्यन्ते त्वत्कार्य्याणि परेश्वर। ५
सन्ति चातीव गम्भीरा मनसः कल्पनास्तव॥
न वेत्ति पशुवल्लोको मूढश्चेदं न बुध्यते॥ ६
दुष्टानां तृणवद्वृद्धिः फुल्लतिश्च कुकर्म्मणां। ७

तेषां शाश्वतनाशेन सफला सम्भविष्यति ॥
८ किन्तु हे परमेश त्वं नित्यमासे समुन्नतः ॥
९ परेश त्वद्द्विषः पश्य विनंक्ष्यन्ति तव द्विषः।
दुष्क्रियाचारिणः सर्व्वे गमिष्यन्ति विकीर्णतां ॥
१० त्वं विधास्यसि मच्छृङ्गम् उच्छ्रितं खड्गिखड्गवत्।
सद्योजातेन तैलेन मच्छिरश्चाभिषेच्यत ॥
११ तृप्तिं यास्यति मच्चक्षु र्दर्शनाद् द्वेषिणां मम।
मम कर्णौ विपक्षाणां श्रवणाच्च दुरात्मनां ॥
१२ परिवर्द्धिष्यते सम्यग् धार्म्मिकस्तृणराजवत्।
स भविष्यति चात्युच्चो लिवानोन्येरसो यथा ॥
१३ धार्म्मिका रोपयिष्यन्ते परमेशस्य मन्दिरे।
वर्द्धिष्यन्ते च तेऽस्माकम् ईशस्य प्राङ्गणेषु हि ॥
१४ वार्द्धक्येऽपि फलिष्यन्ति सरसास्ते सतेजसः ॥
१५ परमेशो यथार्थोऽस्ति स एवास्माकमाश्रयः।
कपटस्तस्य नास्तीति ज्ञापयिष्यन्ति ते नराः ॥

९३ त्रिनवतितमं गीतं।

ईश्वरीयराजत्वस्य सौन्दर्य्यसुखयो र्वर्णनं।

१ परेशः कुरुते राज्यं महिम्ना परिभूषितः।
भूषितः परमेशोऽस्ति बद्धश्रोणि र्बलेन च।
तस्मादेव जगत् स्थास्नु निश्चलञ्च वितिष्ठते ॥
२ प्राक्कालात् ते स्थिरो मञ्चस्त्वमनादिश्च वर्त्तसे ॥
३ हे परेश नदा उच्चै र्नदा उच्चै र्नदन्ति हि।
उच्चैरेव तरङ्गिण्यः कल्लोलैः प्रधनन्ति च ॥
४ तोयराशे र्ध्वनिभ्योऽपि महोर्म्मिभ्यो ऽर्णवस्य च।
ऊर्द्ध्ववासिपरेशस्य महिमा त्वतिरिच्यते ॥
५ साक्ष्यवाक्यानि ते सम्यग् विश्वास्यानि भवन्ति हि।
पुण्यता शोभते नित्यं तव गेहे परेश्वर ॥

९४ चतुर्नवतितमं गीतं।

१ पातकिलोकानां विरुद्धं प्रार्थनं तान् प्रति तिरस्कारश्च १६ धार्म्मिकाणां सुखस्य वर्णनं।

कर्म्मणां फलदाता त्वं हे प्रभो परमेश्वर। १
कर्म्मणां फलदाता त्वम् ईश राजस्व सूर्य्यवत्॥
क्षौण्या नियन्तरुत्तिष्ठ फलमर्पय गर्व्विषु॥ २
कियत्कालं दुरात्मानो हर्षिष्यन्ति परेश्वर। ३
कियत्कालं दुरात्मानो करिष्यन्ति जयध्वनिं॥
वाचालत्वेन वाक्यानि निन्दार्थानीरयन्ति ते। ४
आत्मश्लाघाश्च कुर्व्वन्ति सर्व्वे दुष्कर्म्मकारिणः॥
चूर्णयन्ति प्रभो लोकांस्तव क्लिश्नन्ति च प्रजाः॥ ५
विधवाश्चातिथीन् घ्नन्ति निर्नाथान् मारयन्ति च॥ ६
ते नराश्च वदन्तीदं परमेशो न पश्यति। ७
याकूवोयेश्वरश्चात्र किञ्चिदेव न बुध्यते॥
प्रजामध्ये स्थिता मूढा यूयं बुद्धिमवाप्नुत। ८
हे निर्बोधाः कदा यूयं विज्ञतामाचरिष्यथ॥
श्रवणेन्द्रियस्रष्टा यस्तेन किं श्रूयते नहि। ९
दर्शनेन्द्रियनिर्म्माता किं समालोक्यते नहि॥
जातीनां बोधकः किं वा करोति नहि शासनं। १०
ज्ञानदाता मनुष्याणाम् अद्वितीयः स विद्यते॥
प्रभु र्वेत्ति नृणां चिन्ता यतोऽसारा हि सन्ति ते॥ ११
स धन्यो मानवो यस्मै विधाय शासनं त्वया। १२
स्वीयशास्त्रोद्धृता शिक्षा दीयते परमेश्वर॥
दुर्जनस्य कृते गर्त्तो यावन्नहि खनिष्यते। १३
तावत् त्वत्तो विपत्काले स विश्राममवाप्स्यति॥
यतो हेतोः परेशेन न त्यक्ष्यन्ते निजप्रजाः। १४
अधिकारः स्वकीयश्च तेन नैव विहास्यते॥
धर्म्मं प्रति विचारस्तु परिवर्त्तिष्यते पुनः। १५
तमेवानुचरिष्यन्ति सकला ऋजुमानसाः॥
क उत्थास्यति मत्पक्षे दुष्टानां प्रतिकूलतः। १६

दुष्क्रियाचारिभिः सार्द्धं मदर्थं को हि योत्स्यते॥
१७ मामकीनोपकारी चेन्नाभविष्यत् परेश्वरः।
तर्हि शीघ्रं मम प्राणा न्यवत्स्यन् मौनवेश्मनि॥
१८ विचलिष्यति मत्पाद इति वाक्ये मयेरिते।
परमेश तव प्रीतिः सुस्थिरं विदधाति मां॥
१९ बहुसंख्यासु चिन्तासु सञ्जातासु मदन्तरे।
तव प्रबोधवाक्यानि हर्षयन्ति मनो मम॥
२० किं सम्बन्धि तव स्यात् तत् पापाश्रयन्त्यासनं।
यत् करोति विधानेन दौरात्म्यस्य निरूपणं॥
२१ उपाक्रामन्ति ते लोका धार्म्मिकस्यैव जीवनं।
रक्तपाताय निर्दोषे दोषमारोपयन्ति च॥
२२ किन्तु मे प्रोन्नतं दुर्गं परमेशो भविष्यति।
मदीयाश्रयशैलश्च भविता हि ममेश्वरः॥
२३ स तेषामपराधानां फलं तान् प्रापयिष्यति।
तेषां दुष्टतया तांश्च समुच्छिन्नान् करिष्यति।
परेशः प्रभुरस्माकं तानुच्छिन्नान् करिष्यति॥

---

९५ पञ्चनवतितमं गीतं।

१ ईश्वरं प्रशंसितुं विनयः ६ अनादेशश्रुतां दण्डश्च।

१ आगच्छत प्रणंस्यामो वयं सर्व्वे परेश्वरं।
अस्मत्त्राणाद्रिमुद्दिश्य करिष्यामो जयध्वनिं॥
२ प्रशंसामेव कुर्व्वन्तो यास्यामस्तस्य सम्मुखं।
तं समुद्दिश्य गीतैश्च करिष्यामो जयध्वनिं॥
३ यतो हेतो र्महान् ईशः केवलः परमेश्वरः।
स महान् अधिराजश्च कृत्स्नदेवगणोपरि॥
४ मह्याः सर्व्वाणि मूलानि तस्य हस्ते स्थितानि हि।
गिरीणां दुर्गमाः कूटाः सर्व्वे तस्यैव सन्ति च॥
५ तस्यैवास्ति समुद्रोऽपि यस्मात् तेन स निर्म्मितः।
तथा शुष्कस्थलं तस्य हस्ताभ्यान्तु निरूपितं॥
६ आगच्छत करिष्यामो भजनं प्रणता वयं।

जानुपातञ्च नः स्रष्टुः परमेशस्य सम्मुखे॥
यतो हेतोः स एवास्तेऽद्वितीयोऽस्माकमीश्वरः। ७
वयं पाल्यप्रजास्तस्य मेषास्तत्पाणिना भृताः।
अद्य तस्य रवं यूयं यदि संश्रोतुमिच्छथ॥
कृतं तर्हि मिरीवाख्ये विवादस्य स्थले यथा। ८
प्रान्तरस्थमसायाञ्च परीक्षादिवसे यथा।
युष्माभिः स्वमनो नैव कठोरीक्रियतां तथा॥
युष्माकं पितरस्तत्र प्राकुर्व्वन् मत्परीक्षणं। ९
कृतं तै मेऽनुसन्धानं वीक्षमाणैः क्रिया मम॥
चत्वारिंशत् समा यावद् अखिद्येऽहं तदन्वये। १०
ततोऽहमवदं लोका भ्रान्तान्तःकरणा इमे।
मामकीनानि वर्त्मानि न जानन्ति नरा इमे॥
ततो हेतोरहं कोपात् शपथं कृतवानिमं। ११
मद्विश्रामस्थलं लोकैरेतै नैव प्रवेक्ष्यते॥

---

९६ षन्नवतितमं गीतं।

माहात्म्यस्य स्वामित्वस्य शासनस्य च निमित्तं परमेश्वरं धन्यं वक्तुं विनीतिः।

परमेश्वरमुद्दिश्य गीतं गायत नूतनं। १
सङ्गायत परेशाय सकलाः क्षितिवासिनः॥
सङ्गायत परेशाय वन्दध्वं तस्य नाम च। २
कृतं तेन परित्राणं समाख्यात दिने दिने॥
युष्माभि र्वर्ण्यतां तस्य गौरवं भिन्नजातिषु। ३
आश्चर्य्याश्च क्रियास्तस्य कथ्यन्तां सर्व्वदेशिषु॥
यतो हेतो र्महान् सम्यक् स्तोतव्यश्च परेश्वरः। ४
स एवादरणीयश्च कृत्स्नदेवगणोपरि॥
यतोऽन्यदेशिनां देवाः सर्व्वे निःसारमूर्त्तयः। ५
परन्तु परमेशेन निर्म्ममे व्योममण्डलं॥
महिमा च प्रतापश्च तिष्ठतस्तस्य सम्मुखे। ६
शक्तिः शोभा च विद्येते तदीयधर्म्मधामनि॥
हे वंशाः सर्व्वदेशीयाः सम्प्रयुंग्ध्वं परेश्वरं। ७

गौरवेण च श्रद्धया च सम्भर्युरध्वं परेश्वरं॥
८ स्वनाम्नो गौरवेणैव सम्भर्युरध्वं परेश्वरं।
उपहारं समादाय यात तत्प्राङ्गणानि च॥
९ भजनं परमेशस्य विधद्धं पूतशोभया।
बिभीत तस्य साक्षाच्च सकलाः क्षितिवासिनः॥
१० भिन्नजातिषु ब्रूतेदं राजत्वं कुरुते प्रभुः।
ततो हेतो जगत् स्थास्नु न कदापि चलिष्यति।
न्यायेन सर्व्वजातीनां विचारं विदधाति सः॥
११ अनेनानन्दतु स्वर्गो नरलोकश्च हृष्यतु।
गर्जनञ्च करोत्वब्धिस्तस्य सर्व्वञ्च पूरकं॥
१२ उल्लसन्तु च केदारास्तत्रत्यैः सकलैः सह।
जयनादञ्च कुर्व्वन्तु सकला वनपादपाः॥
१३ अग्रतः परमेशस्य यतः स आगमिष्यति।
वसुधाया विचारार्थम् आगमं स करिष्यति।
विचारं नरलोकस्य स धर्म्मेण विधास्यति।
स्वीयसत्यतया चैव शासनं सर्व्वदेहिनां॥

---

९७ सप्तनवतितमं गीतं।

ईश्वरस्य प्रशंसा धार्म्मिकाणां सुखवर्णना च।

१ परेशः कुरुते राज्यं तेन नन्दतु मेदिनी।
बहुसङ्ख्या अपि द्वीपास्तेन कुर्व्वन्तु हर्षणं॥
२ मेघमाला तमिस्रञ्च तच्चतुर्द्दिक्षु तिष्ठतः।
धर्म्मे च सुविचारे च स्थापितं तन्नृपासनं॥
३ वह्निस्तस्याग्रतो गच्छन् चतुःपार्श्वे दहत्यरीन्॥
४ तदीयमेघदीप्ता हि दीपयन्ति चराचरं।
तत् समालोकमाना च पृथिवी परिकम्पते॥
५ द्रवन्ति सिक्थवच्छैलाः परमेशस्य सम्मुखे।
कृत्स्नभूलोकनाथस्य परमेशस्य सम्मुखे॥
६ आकाशमण्डलं तस्य धर्म्ममेव प्रशंसति।
सर्व्वदेशीयलोकैश्च तस्य तेजो विलोक्यते॥

अवस्तुश्लाघिनः सर्व्वे लज्जन्तां मूर्त्तिपूजकाः। ७
युष्माभिः सकला देवा एष एव प्रणम्यतां॥
विचारांश्चास्तव श्रुत्वा सियोनाद्रिः प्रहृष्यति। ८
तासां कृते च नन्दन्ति यिहूदाः पुत्त्रिका अपि॥
उन्नतोऽसि परेश त्वं कृत्स्नभूमण्डलोपरि। ९
अतीवोच्चपदस्थश्च कृत्स्नदेवगणोपरि॥
हे परेशप्रिया यूयमतीवध्वमसाधुतां। १०
स्वीयसाधुमनुष्याणां प्राणान् स परिरक्षति।
दुरात्मनाञ्च हस्तेभ्यस्तान् स एवोद्धरिष्यति॥
दीप्त्युत्पादकवीजानि न्युप्यन्ते धर्म्मिणः कृते। ११
आनन्दस्य च वीजानि निमित्तं सरलात्मनां॥
हे नरा धार्म्मिका यूयं ह्लादध्वं परमेश्वरे। १२
स्मरन्तस्तस्य पावित्र्यं कुरुध्वञ्च प्रशंसनं॥

---

९८ अष्टनवतितमं गीतं।

परमेश्वरं प्रशंसितुं सर्व्वान् प्रति विनयः।

धर्म्मगीतं।

परमेश्वरमुद्दिश्य गीतं गायत नूतनं। १
यतो हेतोः स कर्म्माणि स्वाश्चर्य्याणि चकार हि।
पूतो दोर्द्दक्षहस्तश्च तस्य त्राणमसाधयत्॥
परेशः स्वकृतं त्राणं स्वयमज्ञापयज्जनान्। २
स्वधर्म्मः सर्व्वजातीनां साक्षात् तेन प्रकाशितः॥
इस्रायेलन्वयार्थं सो ऽस्मारीत् स्वसत्यताकृपे। ३
अदर्शिशस्य नस्त्राणं सर्व्वैः क्षित्यन्तवासिभिः॥
परेशं जयिनं ब्रूत सकलाः क्षितिवासिनः। ४
ह्लादध्वं हर्षनादेन यन्त्रवाद्येन गायत॥
परमेश्वरमुद्दिश्य गीतं गायत वीणया। ५
वीणया धर्म्मगीतस्य मधुरेण स्वरेण च॥
शृङ्गैश्च तूर्य्यशब्दैश्च कुरुध्वं हि जयध्वनिं। ६
विश्वलोकाधिराजस्य परमेशस्य सम्मुखे॥

७ गर्ज्जद्भिः ससामग्रि जगत् स्ववासिभिः सह॥
८ करतालं नदाः कुर्य्युः शैलाः सर्व्वे जयध्वनिं।
९ प्रभोरग्रे विचारार्थं मेदिन्या आगमिष्यतः।
विचारं नरलोकस्य स धर्म्मेण विधास्यति।
याथार्थ्येन च लोकानां शासनं सर्व्वदेशिनां॥

९९ ऊनशततमं गीतं।

आश्चर्य्यकर्म्मकारिणः प्रार्थनाश्रवणकारिणश्चेश्वरस्य प्रशंसनं।

१ परेशः कुरुते राज्यं कम्पन्ते जातयस्ततः।
किरूवयोः स आसीनो विचलत्यवनिस्ततः॥
२ परमेशः सियोनाद्रौ वर्त्तते महिमान्वितः।
उन्नतश्च स एवास्ति कृत्स्नवंशगणोपरि॥
३ भवतो नामधेयस्य महतो भीषणस्य च।
प्रशंसां ते करिष्यन्ति सुपवित्रो यतो भवान्॥
४ सुविचारप्रियस्यैव राज्ञस्तैः स्तोष्यते बलं।
यथार्थव्यवहारस्य त्वया स्थैर्य्यं निरूपितं।
सुविचारश्च धर्म्मश्च याकूवि स्थापितस्त्वया॥
५ अस्मत्प्रभोः परेशस्य महिमानं प्रशंसत।
पादपीठे नतास्तस्य सुपवित्रो यतोऽस्ति सः॥
६ मूसाहारोणनामानौ तदीयौ याजकाविमौ।
तन्नाम्ना प्रार्थिनश्चैकः शिमूयेलाभिधो नरः।
परमेश्वरमुद्दिश्य सदाकुर्व्वत प्रार्थनां।
स तेभ्यः प्रार्थमानेभ्य उत्तरं व्यतरत् स्वयं॥
७ मेघस्तम्भेऽधितिष्ठन् स समभाषत तैः सह।
स्वीयप्रमाणधारिभ्यस्तेभ्यः स दत्तवान् विधिं॥
८ अस्मत्प्रभो परेश त्वम् अददास्तेभ्य उत्तरं।
क्षमावान् ईश्वरश्च त्वम् अभवस्तान् नरान् प्रति।
किन्तु तेषाम् अधर्म्माणां प्रतीकारविधायकः॥
९ अस्मत्प्रभोः परेशस्य महिमानं प्रशंसत।

प्रकुरुध्वं प्रणामञ्च पविचे तस्य पर्व्वते।
यतो हेतोः पविचोऽस्ति नः प्रभुः परमेश्वरः॥

१०० शततमं गीतं।

महिमपराक्रमानुग्रहनिमित्तम् ईश्वरस्य प्रशंसनं।

प्रशंसार्थकं धर्म्मगीतं।

परेशं जयिनं ब्रूत सकलाः क्षितिवासिनः॥ १
आनन्देन कुरुध्वञ्च परमेशस्य सेवनं। २
हर्षनादेन तस्यैव समक्षमुपतिष्ठत॥
युष्माभि र्ज्ञायतामेतत् परेशः सत्य ईश्वरः। ३
अस्मत्सृष्टिः क्रिया तस्य सा त्वस्माकं क्रिया नहि।
वयं तस्य प्रजावर्गस्तत्क्षेचस्यावयो वयं॥
स्तुत्या कुरुत तस्यैव गोपुरेषु प्रवेशनं। ४
धर्म्मगानं प्रकुर्व्वन्तो यात तत्प्राङ्गणानि च।
कुरुध्वञ्च स्तवं तस्य नाम तस्य प्रशंसत॥
यतो हेतोः परेशः सन् करुणा तस्य शाश्वती। ५
पुरुषानुक्रमं यावत् स्थायिनी तस्य सत्यता॥

१०१ एकशततमं गीतं।

दायूदो भाननं प्रतिज्ञा च।

दायूदो धर्म्मगीतं।

दयां दण्डञ्च गास्यामि त्वां परेशोपवीणयन्॥ १
विज्ञतामाचरिष्यामि सिद्धमार्गे व्रजन्नहं। २
अभ्यागमो मदासन्ने कदा कारिष्यते त्वया।
सिद्धान्तःकरणेनाहम् आचरिष्यामि मद्गृहे॥
असाक्षान्नैव दुष्कर्म्म स्थापयिष्यामि लक्ष्यवत्। ३
गर्हे भ्रष्टस्य कर्म्माहं मयि तन्न लगिष्यति॥
वक्रभावो मनुष्यस्य मत्तो दूरं सरिष्यति। ४

दुर्ज्जनेन सहालापो नैव कारिष्यते मया॥
५ मित्रं निन्दति यो गुप्तं स समुच्छेत्स्यते मया।
ऊर्द्धाक्षो गर्व्विभावश्च न सह्यो मन्यते मया॥
६ विश्वास्यान् देशजान् वीक्षे ते वत्स्यन्ति मया सह।
सिद्धमार्गावलम्बी यः स मद्भृत्यो भविष्यति॥
७ मानवः कपटाचारी मम गेहे न वत्स्यति।
मृषावादी च मत्साक्षाद् अवस्थातुं न शक्ष्यति॥
८ उच्छेत्स्यामि प्रतिप्रात र्देशस्थान् सर्व्वदुर्ज्जनान्।
परेशस्य पुरात् सर्व्वान् परिक्षन्तन् कुकर्म्मिणः॥

१०२ द्विशततमं गीतं।

अवसन्नत्वात् परमेश्वराय स्वचिन्तां निवेदयतो दीनहीनस्य प्रार्थना।

१ प्रार्थनां मामकीनां त्वं परमेश्वर संशृणु।
मामकीनार्त्तरावश्च त्वत्साक्षाद् उपतिष्ठतु॥
२ मा समाच्छाद्यतां मत्तो भवता स्वीयमाननं।
मद्विपत्ते र्दिने त्वञ्च मयि श्रोत्रं निधेहि हि।
मदाह्वानदिने देहि त्वरितं मह्यमुत्तरं॥
३ यतो हेतो र्विलुप्यन्ते दिवसा मम धूमवत्।
उल्कावन्मामकीनानि कीकसानि ज्वलन्ति च॥
४ आहतं तृणवच्छुष्कम् अस्यन्तःकरणं मम।
तस्मान्मदीयचित्तस्य भोक्तुं भवति विस्मृतिः॥
५ मम खेदोक्तिशब्देन लगन्त्यस्थीनि चर्म्मणि॥
६ मरुभूमिस्थकङ्कस्य सादृश्यं प्राप्तवानहं।
तुल्योऽस्मि वायसारातेरुच्छिन्नालयवासिनः॥
७ जाग्रन् वर्त्ते च निःसङ्गः पटले चटको यथा।
८ मामकीनविपक्षा मां विनिन्दन्त्यखिलं दिनं।
ये च मां प्रति कोपान्धास्ते मां शापास्पदं विदुः॥
९ अन्नवद् भस्म भुञ्जामि मिश्रयाम्यश्रुभिः पयः॥
१० त्वदीयक्रोधरोषाभ्यां त्वयोन्नम्य निपातितः॥

साम्यच्छायावदायुर्मे परिम्लास्यामि घासवत्। ११
नित्यं सिंहासनासीनः स्थास्यसि त्वं परेश्वर। १२
पुरुषानुक्रमं यावत् स्थायिनी तव संस्मृतिः॥
त्वमुत्थाय सियोनाख्याम् अनुकम्पिष्यसे पुरीं। १३
अयं तत्प्रियताकालः समयः समुपागतः॥
यतस्तस्याः शिलाराशौ प्रीयन्ते तव सेवकाः। १४
तस्या धूलिसमूहे च करुणार्द्रा भवन्ति ते॥
भेष्यन्ते सर्व्वजातीयाः परमेशस्य नामतः। १५
सर्व्वे चौण्याश्च राजानस्त्वावकीनप्रतापतः॥
यतो हेतोः सियोनं स निर्म्मास्यति परेश्वरः। १६
तदा स्वीयप्रतापेन दर्शनं स प्रदास्यति॥
प्रार्थनायाञ्च दीनानां स प्रसन्नो भविष्यति। १७
लोकानां प्रार्थना तेषां नैव तेनावमंस्यते॥
भाविवंशीयलोकानां निमित्तं लिख्यते त्विदं। १८
सृक्ष्यते यः प्रजावर्गः स स्तोष्यति परेश्वरं॥
अधो विधाय दृक्पातं ऊर्द्ध्वस्थधर्म्मधामतः। १९
स्वर्गादेव समालोक्य पृथिवीं परमेश्वरः॥
कारावद्धस्य लोकस्य रावमाकर्णयिष्यति। २०
मृतकल्पमनुष्यस्य मोचनञ्च करिष्यति॥
ततः परेशसेवार्थं सर्व्वदेशनिवासिभिः। २१
सर्व्वराष्ट्रीयलोकैश्च युगपन्मिलने कृते॥
सियोने परमेशस्य नाम संवर्णयिष्यते। २२
यिरूशालमपुर्य्याञ्च तस्य कारिष्यते स्तवः॥
न्यूनं हि क्रियते तेन पथिमध्ये बलं मम। २३
मामकीनदिनानाञ्च छेदनं विदधाति सः॥
ततोऽहं वच्मि हे ईश मामर्द्धायुषि मा हर। २४
पुरुषानुक्रमं यावद् वत्सराः स्थास्नवस्तव॥
आदिकाले हि मेदिन्या मूलं संस्थापितं त्वया। २५
तथा त्वदीयहस्ताभ्यां निर्म्मितं व्योममण्डलं॥
उभे ते यास्यतो नाशं किन्तु त्वमवतिष्ठसे। २६
जीर्णताञ्च गमिष्यन्ति तानि सर्व्वाणि वस्त्रवत्।

अवाप्स्यन्ति विकारञ्च विकार्य्य वेशवत् त्वया॥
१७ त्वन्तु नित्यं स एवासि निरन्तास्तव वत्सराः॥
१८ त्वदीयसेवकानान्तु सन्ताने वास आप्स्यते।
सुस्थिरस्तव साक्षाच्च तेषां वंशो भविष्यति॥

१०३ त्रिशततमं गीतं।

दयानुग्रहयोः कृते परमेश्वरं प्रशंसितुं विनयः।

दायूदो गीतं।

१ परमेश्वरमेव त्वं वन्दस्व हे मनो मम।
वन्दस्व तस्य पूतञ्च नाम कृत्स्न मदन्तर॥
२ परमेश्वरमेव त्वं वन्दस्व हे मनो मम।
तदीयहितकर्म्माणि सकलानि न विस्मर॥
३ दोषाणां तव सर्व्वेषां मार्ज्जनं विदधाति सः।
व्याधीनां तव सर्व्वेषां प्रतीकारं करोति च॥
४ नाशतश्च तवासूनाम् उद्धारस्तेन साध्यते।
स दयाकरुणाभ्याञ्च त्वां करोति किरीटिनं॥
५ तर्पयत्युत्तमै र्द्रव्यैस्तावकीनाननञ्च सः।
यौवनं कुररस्येव नवीनं जायते तव॥
६ परमेश्वर एवास्ति न्यायकर्म्मविधायकः।
सर्व्वेषां पीड्यमानानां सुविचारं करोति सः॥
७ पुरा स्वकीयमार्गान् स ज्ञापयामास मूससं।
इस्रायेलीयवंशञ्च स्वीयकर्म्माण्यवेदयत्॥
८ अनुकम्पी दयालुश्च स्मृतः स परमेश्वरः।
क्रोधे विलम्बकारी स वरिष्ठोऽनुग्रहे तथा॥
९ न स वैरायते नित्यं न स कुप्यति सर्व्वदा॥
१० अस्मत्पापानुसारेण नाचचार स नः प्रति।
अस्मभ्यञ्चापराधानां न समं स ददौ फलं॥
११ भुवनोपरि यत्युच्चं भवेद् गगनमण्डलं।
तति गुर्व्वी कृपा तस्य स्वीयभक्तगणोपरि॥

उदयाद् यति दूरस्थ सूर्य्यास्तस्य स्थलं भवेत्। १२
अस्मत्तो निजपापानि तति दूरीकरोति सः॥
यादृशी निजपुत्त्रेषु जनकस्य दया भवेत्। १३
स्वभक्तेषु परेशस्य तादृशी जायते दया॥
किम्भूता सृष्टिरस्माकं सम्यग् वेत्ति स एव तत्। १४
वयं रेणुमया एतत् तेन संस्मर्य्यते ध्रुवं॥
तृणतुल्यानि मर्त्त्यस्य दिनानीह भवन्ति हि। १५
क्षेत्रे पुष्पं यथा फुल्लेत् तद्वदेव स फुल्लति॥
तं स्पृष्ट्वा पवने याते स निःस्वत्त्वं प्रगच्छति। १६
न स्वकीयस्थलेनापि स पुनः परिचीयते॥
परन्त्वनाद्यनन्तैव करुणा परमेशितुः। १७
भक्तेषु वर्त्तते तस्य धर्म्मः पुत्त्रसुतेषु च।
नियमाचारिणां तस्य स्मरतां कर्म्मभि र्विधीन्॥ १८
स्वर्गे संस्थापयामास परमेशो निजासनं। १९
करोति सीयराजत्वे स सर्व्वोपरि शासनं॥
वन्दध्वं परमेशं तं यूयं दूतास्तदीयकाः। २०
वीरा महाबला यूयं तदीयादेशसाधकाः।
तदीयादेशशब्दस्य श्रवणे नित्यमुद्यताः॥
वन्दध्वं परमेशं तं तस्य सर्व्वबलान्यपि। २१
तदीयसेवका यूयं तदभीष्टस्य साधकाः॥
वन्दध्वं परमेशं तं हे तदीयाखिलाः क्रियाः। २२
तदधीनस्य राष्ट्रस्य सर्व्वस्थानेषु विस्तृताः।
परमेश्वरमेव त्वं वन्दस्व हे मनो मम॥

---

१०४ चतुःशततमं गीतं।

ईश्वरस्य गुणकर्म्मणो र्वर्णनं प्रशंसा च।

परमेश्वरमेव त्वं वन्दस्व हे मनो मम। १
त्वमतीव महान् आसे हे परेश्वर मत्प्रभो।
तेजःशोभास्वरूपेण वाससा त्वं विभूषितः॥
त्वं परिच्छदवद् दीप्त्या चात्मानं परिवेष्टसे। २

उल्लोचञ्च यथा तद्वद् अन्तरीक्षं तनोषि हि ॥
३ जलैः स्वाट्टांश्च निर्म्मासि करोष्यभ्रान् निजं रथं ।
गन्धवाहस्य पक्षाभ्यां विदधासि समागमौ ॥
४ स्वदूतान् कुरुषे वायून् स्वभृत्यान् ज्वलितानलं ॥
५ स्वकीयभित्तिमूलेषु स्थापिता मेदिनी त्वया ।
न चलिष्यति तस्मात् सा सर्व्वकालावधि स्थिरा ॥
६ त्वं व्यस्तारी गभीराणि वारीण्यावरणं यथा ।
उदतिष्ठंश्च तोयानि तदानीं भूधरोपरि ॥
७ किन्तु तानि पलायन्त दूरं त्वदीयभर्त्सनात् ।
तव गर्ज्जनशब्दाच्च कम्पस्तेषामजायत ॥
८ उदतिष्ठन् तदा शैला अधोऽगच्छन्नुपत्यकाः ।
प्रत्येकञ्च त्वयादिष्टं स्वीयस्थानं समाश्रयन् ॥
९ तेषामलङ्घनीयञ्च सीमानं त्वं न्यरूपयः ।
न कदापि परावृत्य धरा तैश्छादयिष्यते ॥
१० निम्नभूमिषु तोयानाम् उत्सा उत्पादितास्त्वया ।
गिरीणामन्तरालेषु विसर्पन्तो व्रजन्ति हि ॥
११ सर्व्वेभ्यो वन्यजन्मिभ्यः पेयं तैः प्रतिपाद्यते ।
तृष्णां छिन्दन्ति तत्रैव गर्द्दभा वनवासिनः ॥
१२ तदूर्द्ध्वे कुर्व्वते वासं पक्षिणो व्योमचारिणः ।
शाखामध्ये सुखासीना गायन्त्युच्चरवेण च ॥
१३ स्वीयाट्टेभ्यो जलं प्रेष्य त्वं हि सिञ्चसि पर्व्वतान् ।
महीं त्वत्सृष्टवस्तूनां फलैस्तर्पयसि स्वयं ॥
१४ तृणं प्ररोह्य पश्वर्थं शाकं नृणां हिताय च ।
उत्पाद्यन्ते हि भक्ष्याणि धराया मध्यतस्त्वया ॥
१५ द्राक्षारसा मनुष्याणां हृत्सु हर्षप्रदायिनः ।
तैलात् तदीयवक्त्राणां प्रफुल्लत्वप्रवर्द्धकाः ।
गोधूमा अपि मर्त्त्यानां चित्ताप्यायनकारिणः ॥
१६ रसपूर्णा हि विद्यन्ते परमेशस्य पादपाः ।
एरसाख्या लिवानोने हस्ताभ्यां तेन रोपिताः ॥
१७ तत्र स्थाने प्रकुर्व्वन्ति स्वनीडान् क्षुद्रपक्षिणः
आलया लक्ष्मणानाञ्च विद्यन्ते देवदारवः ॥

उच्चशैलाः प्रयच्छन्ति वनछागेभ्य आश्रयं। १८
शाफटाभिधजन्तूनाम् आश्रयाश्च शिलोच्चयाः॥
कालपर्य्यायबोधार्थं त्वयासर्जि निशापतिः। १९
अस्तालम्बनकालञ्च विजानाति दिवाकरः॥
अन्धकारे त्वयानीते रजनी तूपतिष्ठति। २०
प्रसर्पन्ति तदा सर्व्वे पशवोऽरण्यवासिनः॥
सिंहा गर्जन्ति मांसार्थं याचन्ते चान्नमीश्वरात्॥ २१
सूर्य्योदयेऽपगच्छन्तः स्वगुहासु स्वपन्ति ते॥ २२
नरः कार्य्याय निष्क्रान्तः सन्ध्यां यावद् व्यवस्यति॥ २३
कीदृग् बहूनि विद्यन्ते त्वत्कर्म्माणि परेश्वर। २४
तानि सर्व्वाणि सज्ज्ञानं साधयाञ्चक्रिरे त्वया।
परिपूर्णा त्वदीयार्थैरियमस्ति वसुन्धरा॥
अमुं महार्णवं पश्य सुविस्तीर्णं समन्ततः। २५
असंख्यास्तत्र विद्यन्ते प्राणिनो वारिवासिनः।
तत्र क्षुद्रा महान्तश्च वर्त्तन्ते जलजन्तवः॥
विहारं कुर्व्वते तत्र पोताः सागरगामिनः। २६
क्रीडनार्थञ्च तन्मध्ये त्वत्सृष्टो लिवियाथनः॥
स्वकाले भक्ष्यदाता त्वं सर्व्वैरेतैरुदीक्ष्यसे॥ २७
त्वया यद् दीयते तेभ्यः सञ्चिन्वन्ति तदेव ते २८
त्वदीयमुक्तहस्तत्वात् तृप्यन्ति मङ्गलेन ते॥
त्वया प्रच्छादिते वक्त्रे पर्य्युद्विग्ना भवन्ति ते। २९
नासावायौ त्वया तेषां रुद्धे प्राणान् त्यजन्ति च।
जन्मस्थानं रजोरूपं पुनर्व्वारं प्रयान्ति च॥
स्वनिःश्वासं त्वया त्यक्ता तेषां सृष्टि र्विधीयते। ३०
भूमण्डलस्य रूपञ्च नवीनीक्रियते पुनः॥
प्रतापः परमेशस्य सदा स्थायी भविष्यति। ३१
स्वकीयेभ्यो हि कर्म्मभ्यस्तस्य हर्षो जनिष्यते॥
पृथिव्यां तेन दृक्पाते क्षते सा परिकम्पते। ३२
भूधरास्तेन संस्पृष्टा धूममूर्द्धं क्षिपन्ति च॥
गास्यामि जीवनं यावत् समुद्दिश्य परेश्वरं। ३३
प्राणानां धारणं यावद् वाद्यैः स्तोष्ये मदीश्वरः॥

१४ तस्मिन् मदीयकं ध्यानं सुखदायि भविष्यति।
आनन्दञ्च करिष्यामि परमं परमेश्वरे॥
१५ नंक्ष्यन्ति पापिनो मह्यां लोपं यास्यन्ति दुर्जनाः।
परमेश्वरमेव त्वं वन्दस्व हे मनो मम।
धन्यवादं परेशस्य कुरुध्वं सर्व्वमानवाः॥

१०५ पञ्चशततमं गीतं।

इस्रायेल्लोकान् प्रतीश्वरस्य व्यवहाराणां वर्णनं।

१ यूयं परेश्वरं स्तुध्वं तन्नाम्ना कुरुतार्थनं।
सर्व्वदेशीयलोकेषु तत्कर्म्माणि प्रशंसत॥
२ तस्मै गायत तस्मै च कुरुध्वं यन्त्रवादनं।
अनुध्यायत तस्यैव सकला अद्भुताः क्रियाः॥
३ तदीयस्य पवित्रस्य नाम्नः श्लाघां विधत्त च।
तिष्ठत्वानन्दसंयुक्तं परमेशार्थिनां मनः॥
४ कुरुध्वं परमेशस्य तच्छक्तेश्च गवेषणं।
तदीयमाननं प्राप्तुं विचेष्टध्वं निरन्तरं॥
५ अनुचिन्तयताश्चर्य्याः क्रियास्तेनैव साधिताः।
तदीयाद्भुतचिह्नानि तद्वक्त्रस्य विधीनपि॥
६ भो भो तदीयदासस्येब्राहीमाख्यस्य वंशजाः।
भो भो तेन गृहीतस्य याकूबोऽन्वयसम्भवाः॥
७ अस्मत्प्रभुः परेशः स कृत्स्नमह्या विचारकः॥
८ स्वकीयो नियमस्तेन स्मर्य्यते हि निरन्तरं।
सहस्रपुरुषान् यावद् आदिष्टं तेन तद् वचः॥
९ इब्राहीमे प्रतिज्ञातम् इस्हाके शपथेन च॥
१० याकूबीयस्य वंशस्य विधिवच्च निरूपितं।
अनन्तनियमार्थं तद् इस्रायेलि स्थिरीकृतं॥
११ स जगाद किनानाख्यं तुभ्यं दास्यामि नीवृतं।
युष्मदीयाधिकारार्थं मानरज्ज्वेव मापितं॥
१२ तदानीमाशुगण्यास्ते स्वल्पास्तत्र प्रवासिनः॥
१३ वंशाद् वंशान्तरं जग्मू राष्ट्राद् राष्ट्रान्तरं तथा॥

स तु तान् प्रति कस्यापि नान्वजानादुपद्रवं। १४
तेषां कृते महीपालान् भर्त्सयंश्चेदमब्रवीत्॥
मा स्पृशताभिषिक्तान् मे मत्प्रवक्तॄन् न हिंसत॥ १५
अपरं तेन दुर्भिक्षं समाहूय महीं प्रति। १६
सर्व्वमेवान्नरूपञ्च विनिर्भज्यावलम्बनं॥
अग्रगः प्रहितस्तेषां यूषफ् व्यक्रायि दासवत्॥ १७
निगडैः क्लिष्टपादस्य तस्यासून् लोहमस्पृशत्॥ १८
शेषे तदीयवाक्यस्य सफलत्वे प्रकाशिते। १९
परमेशस्य वाचा च सिद्धे तस्य परीक्षणे॥
राजोद्धार तं दूतै र्भूपालस्तममूमुचत्॥ २०
तं स्वगेहाधिपं कृत्वा सर्व्वस्वस्य च नायकं॥ २१
स्वकीयेच्छानुसारेण कुलीनानाञ्च बन्धनं। २२
मन्त्रिणां बोधनञ्चापि तस्मिन्नेव समार्पयत्॥
तदानीं मिसरं देशम् इस्रायेल् अभियातवान्। २३
हामो जनपदे याकूब् प्रवासी सम्बभूव च॥
ईशः स्वीयप्रजानाञ्च वंशं सम्यगवर्द्धयत्। २४
विपक्षाणां बलात् तासां बलं श्रेष्ठं चकार च॥
स्वप्रजाः प्रति विद्वेषं स्वदासान् प्रति धूर्त्ततां। २५
यथा कुर्य्युस्तथा तेषां द्विषां चित्तं प्रवर्त्त्य सः॥
स्वदासं मूससं प्रैषीत् हारोणञ्च प्रियं नरं॥ २६
तेषां मध्ये तु तौ तस्य लक्षणानि सुविस्तरं। २७
अद्भुतानि च कर्म्माणि चक्रतु र्हामनीवृति॥
प्रहिते तिमिरे तेन घोरसन्तमसावहे। २८
ते नरास्तस्य वाक्यानां न बभूवु र्विरोधिनः॥
तेषां तोयान्यसृक् कृत्वा तेषां मीनान् जघान सः॥ २९
भेकास्तेषां भुवं व्यापू राज्ञामन्तःपुरेष्वपि॥ ३०
तद्वाचा मशका आयन् यूकास्तेषाञ्च नीवृतं॥ ३१
वृष्ट्यर्थं स शिलास्तेभ्यो देशे चाग्निशिखा ददौ॥ ३२
आहन् द्राक्षालतास्तेषां सकलानप्युडुम्बरान्। ३३
तेषां देशे स्थितान् सर्व्वान् प्रबभञ्ज च पादपान्॥
तद्वाचा शलभा एत्य शूककीटाश्च कोटिशः॥ ३४

३५ तेषां जनपदे जातं चखादुः सकलं तृणं।
अभक्षिषु हिं सर्व्वाणि भूमिजानि फलानि ते ॥
३६ सकलान् अग्रजातांश्च तेषां देशे जघान सः।
सर्व्वमेव नृणां तेषां वीर्य्यजं प्रथमं फलं ॥
३७ स्वर्णरूप्यैः समं तेन स्वलोका निर्य्यरे वहिः।
तेषां वंशेषु नैकोऽपि चाभवत् स्खलनोन्मुखः ॥
३८ आनन्द हिं मिस्रीयास्तेषां निर्गमनात् तदा।
तेषां भयानकत्वेन सर्व्वे जाता भयातुराः ॥
३९ सोऽतानीत् मेघमुल्लोचं वह्निञ्च रात्रिदीपकं ॥
४० याचितस्तैः समानैषीत् दूराद् वर्त्तकपक्षिणः।
स्वर्गीयेण च भक्ष्येण तर्पयामास तान् जनान् ॥
४१ पाषाणे छिद्रिते तेन सलिलानि विसुस्रुवुः।
नदीवत् तान्यकुर्व्वंश्च मरुभूमौ विसर्पणं ॥
४२ स्मरन् स्वपूतवाक्यं स इब्राहीमञ्च सेवकं।
४३ प्रजा उद्धृत्य हर्षेण स्वप्रियानुत्सवेन च।
४४ भिन्नजातीयलोकानां देशान् तेभ्यो ददौ तदा।
तांश्चकारान्यवंशानां कर्म्मणः फलभोगिनः ॥
४५ किमर्थं ते यथा तस्य मन्येरन् सकलान् विधीन्।
तस्याज्ञाः पालयेयुश्च यूयं स्तुत परेश्वरं ॥

---

१०६ षट्शततमं गीतं।

ईश्वरं प्रतीखायेलीयलोकानां व्यवहारवर्णनं।

१ यूयं परेश्वरं स्तुध्वं परमेशं प्रशंसत।
यतो हेतोः स सद्भावो दया तस्य च शाश्वती ॥
२ केन कीर्त्तयितुं शक्याः परेशस्य महाक्रियाः।
कृत्स्नां तस्य प्रशंसां वा कः प्रकाशयितुं क्षमः ॥
३ धन्यो विचाररक्षी च धर्म्माचारी च सर्व्वदा ॥
४ हे परेश प्रसादेन स्वप्रजामिव मां स्मर।
समादाय निजत्राणम् आगमं कुरु मां प्रति ॥
५ त्वदीयानुगृहीतानां जनानां वीक्ष्य मङ्गलं।

त्वत्प्रजानां हि हर्षेण प्रहर्षिष्याम्यहं तदा।
उल्लासञ्च करिष्यामि तवाधीननरैः सह॥
पितरो नो वयञ्चापि पापाचारमकुर्म्महि। ६
तेनापराधिनो जाता दुर्ज्जनाश्च स्मृता वयं॥
पितरो नो मिसर्देशे न जज्ञुस्तेऽद्भुताः क्रियाः। ७
तावकीनप्रसादञ्च बहुरूपं न सस्मरुः।
सूफाब्धौ च बभूवुस्त ईश्वरस्य विरोधिनः॥
स्वनामार्थं स तान् तत्रे स्वप्रभावं प्रकाशयन्॥ ८
भर्त्सितस्तेन सूफाब्धिः प्राप्तवान् परिशुष्कतां। ९
तस्मात् स प्रान्तरेणेव समुद्रेण निनाय तान्॥
अरातेश्च करात् तत्रे द्विषो हस्ताद् ररक्ष च॥ १०
आप आच्छादयामासुस्तेषां सर्व्वविरोधिनः। ११
शत्रूणां मध्य एकोऽपि नावाशिष्यत रक्षितः॥
तस्य वाक्येषु विश्वस्य ते जगुस्तत्स्तवं तदा॥ १२
विस्मृत्य तत्क्रियास्तूर्णं मन्त्रणाञ्चाप्रतीक्ष्य ते। १३
प्रान्तरे लोभिनो जाताः पर्य्यैक्षन्तेश्वरं मरौ॥ १४
स तेभ्यः प्रार्थितं दत्त्वा प्राणेषु प्राहिणोत् क्षयं॥ १५
शिविराभ्यन्तरे तेषु लोकेष्वीर्ष्यत्सु मूससे। १६
परेशार्थं पविचाय हारोणाख्यनराय च।
मुखं व्यादाय जग्रास दाथनं मेदिनी स्वयं। १७
अवीरामस्य दलञ्चाच्छादयामास मण्डलीं॥
तेषां समाजमध्ये च प्रजज्वाल हुताशनः। १८
दुर्ज्जनाः प्रतिजग्मुश्च शिखाभिस्तस्य दग्धतां॥
वत्सं होरेवि कृत्वा ते धातुमूर्त्तिमपूजयन्॥ १९
तृणाशिनश्च गो मूर्त्त्या स्वशोभां पर्य्यवर्त्तयन्॥ २०
ते स्वीयत्राणदातारम् ईश्वरं तं विसस्मरुः। २१
येन महान्ति कर्म्माणि मिसर्नीवृति चक्रिरे।
हामदेशे च चित्राणि सूफाब्धौ भीषणानि च॥ २२
अतस्तान् नाशयिष्यामि वाक्यमेतत् स उक्तवान्। २३
किन्तु तस्य प्रियो मूसाश्छिद्रे स्थित्वा तदग्रतः।
तत्कोपं शमयित्वा च तं विनाशं न्यवारयत्॥

२४ रम्यदेशे विरक्तास्ते तदाक्ये व्यश्वसन् नहि ॥
२५ अपवद्य स्वदूत्येषु प्रभोराज्ञां न शुश्रुवुः ॥
२६ तदानीमूर्द्धबाहुः स इत्थं शेपे हि तानधि।
अहं निपातयिष्यामि जनान् एतान् मरुस्थले ॥
२७ जातीनां मध्य एतेषां पातयिष्यामि वंशजान्।
सकलेष्वेव देशेषु विकरीष्यामि तानहं ॥
२८ ते वाल्पियोरमालम्ब्य प्रेतयज्ञान् उपाश्य च।
२९ स्वकार्य्यैः कोपिते तस्मिन् मरकस्तान् समाक्रमीत् ॥
३० पीनिहसेन तूत्थाय दण्डिते व्यरमद्विपत् ॥
३१ तत् तस्मै गणितं पुण्यम् अनन्तं सर्व्वपौरुषं ॥
३२ मिरीवानामतोयेषु पुनस्तैः कोपिते प्रभौ।
तेषामेव कृतेऽनिष्टं मूससं प्रत्यवर्त्तत ॥
३३ यस्मात् स तै र्विरक्तात्मा स्वोष्ठाभ्यां सहसालपत् ॥
३४ निर्द्दिष्टान् परमेशेन मानवान् न विनाश्य ते।
३५ मिश्रिता भिन्नजातीयैः क्रियास्तेषां शिशिक्षिरे ॥
३६ विग्रहांश्चार्च्चयंस्तेषां स्वकीयोन्माथबन्धनान् ॥
३७ ते स्वपुत्त्रान् स्वपुत्त्रीश्च देवेभ्यो बलिवद्ददुः ॥
३८ इत्थं निरपराधानां तैरपात्यत शोणितं।
शोणितं पुत्त्रपुत्त्रीणां किनानीयसुरान् प्रति।
बलिवत् तैः प्रदत्तानां देशश्चादूष्यतासृजा ॥
३९ दुष्कृतैस्तेषु लिप्तेषु भ्रष्टेषु च स्वकर्म्मभिः।
४० प्राज्वलत् परमेशस्य कोपाग्निः स्वप्रजाः प्रति।
स्वकीयविषये तस्य गर्हणाचोदपद्यत ॥
४१ तस्मात् ते भिन्नजातीनां हस्ते तेन समर्पिताः।
तेषामरातयस्तेषाम् आधिपत्यमकुर्व्वत ॥
४२ पीडिता द्वेषिभिस्तेषां पाणिभारेण चानताः।
४३ ते लोकाः परमेशेन बहुकृत्वो ररक्षिरे।
पश्चात् तं क्रोधयामासु र्निजमन्त्रणया स्वयं।
इत्थं स्वीयापराधेन दुर्द्दशां लेभिरे पुनः ॥
४४ श्रुत्वा तेषां विलापन्तु स तान् क्लिष्टान् निरैक्षत ॥
४५ स्वकीयं नियमञ्चापि तेषां क्षेमार्थमस्मरत्।

निजानुग्रहबाहुल्यात् स्वयं तांश्चान्वकम्पत ॥
यैस्ते वन्दीकृतास्तेषां कृपापात्रं चकार तान् ॥ ४६
प्रभो परेश्वरास्माकं त्वं नस्त्राणं विधेहि हि। ४७
अन्यजातीयलोकानां मध्यान्नः सङ्गृहाण च।
तदानीं स्तोष्यतेऽस्माभिः पवित्रं तव नाम च।
स्तवानां तावकीनानां श्लाघा च प्रकरिष्यते ॥
अनादिकालतोऽनन्तं कालं यावदनुत्तमं। ४८
धन्यो भूयात् परेशः स इस्रायेलीय ईश्वरः।
प्रजाः सर्व्वा वदन्त्वामेन् यूयं स्तुत परेश्वरं ॥

---

१०७ सप्तशततमं गीतं।

१ भमिणः १० वन्दिनः १७ दुःखिनः २३ पोतोयान् ३३ तदन्यजनांश्च प्रतीश्वरानुग्रहस्य वर्णनं।

प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्यतां। १
यतो हेतोः स सद्भावः कृपा तस्य च शाश्वती ॥
इत्थं ब्रूयुः परेशेन मोचिताः सर्व्वमानवाः। २
द्वेषिणामेव हस्तेभ्यस्तेन ये प्रतिमोचिताः।
सङ्गृहीताश्च देशेभ्यः प्राक्प्रत्यगुत्तरार्णवात् ॥ ३
अभ्राम्यंस्ते मरुस्थाने प्रान्तरे मार्गवर्जिते। ४
नगरं किञ्चन प्राप्तुं नरसेवितमक्षमाः।
ते क्षुधार्त्तास्तृषार्त्ताश्चाभवन् मूर्च्छितचेतसः ॥ ५
तस्मिन्नेव विपत्काले ते परेश्वरमाह्वयन्। ६
तेषां क्लेशेभ्य उद्धारं तदा तेन विधाय हि।
ऋजुमार्गेण नीतास्ते प्रापुर्लोकालयं पुरं। ७
परमेश्वरमुद्दिश्य ते प्रशंसन्तु तत्कृपां। ८
समक्षं नरवंशानां तत्कर्म्माण्यद्भुतानि च ॥
यतः स तर्पयामास प्राणान् तृष्णावसीदतः। ९
असून् क्षुत्पीडितान् द्रव्यैस्तोषयामास चोत्तमैः ॥
अन्धकारमृतिच्छाये आश्रिताः केऽपि मानवाः। १०
निबद्धा दुःखलोहाभ्यां समवर्त्तन्त वन्दिवत् ॥

११ यस्माद् ऐश्वरवाक्यानां ते बभूवु र्विरोधिनः।
तथा सर्व्वोपरिस्थस्य मन्त्रणामवमेनिरे।
१२ तस्मात् स नमयामास क्लेशैस्तेषां मनांसि हि।
तदा ते स्खलनं प्रापुः कोऽपि नोपचकार तान्॥
१३ तस्मिन्नेव विपत्काले ते परेश्वरमाह्वयन्।
तेषां क्लेशेभ्य उद्धारं तदा तेन विधाय हि।
१४ मृत्युच्छायान्धकाराभ्यां ते मनुष्या वहिष्कृताः।
अपच्छिन्नानि तेषाञ्च सर्व्वाणि बन्धनान्यपि॥
१५ परमेश्वरमुद्दिश्य ते प्रशंसन्तु तत्कृपां।
समक्षं नरवंशानां तत्कर्म्माण्यद्भुतानि च॥
१६ यस्मात् ताम्रकपाटानि तेनैव प्रबभञ्जिरे।
तद्वद् बिभिदिरे तेन लौहिकान्यर्गलान्यपि॥
१७ स्वपापाचरणेनाज्ञा ये क्लिश्यन्ते स्वपातकैः।
१८ गर्हन्ते सर्व्वभक्ष्यं ते मृत्युद्वारं स्पृशन्ति च॥
१९ तस्मिन्नेव विपत्काले परेशञ्चाह्वयन्ति ते।
तेषां क्लेशेभ्य उद्धारं तदानीं विदधाति सः॥
२० स्ववचः प्रेष्य तान् स्वस्थान् कृत्वा नाशाच्च रक्षति॥
२१ परमेश्वरमुद्दिश्य ते प्रशंसन्तु तत्कृपां।
समक्षं नरवंशानां तत्कर्म्माण्यद्भुतानि च॥
२२ प्रशंसार्थबलीन् दत्त्वा चानुतिष्ठन्तु याजनं।
उल्लासेन च कुर्व्वन्तु क्रियाणां तस्य वर्णनां॥
२३ पोतै र्ये सागरं यान्ति जलधौ कर्म्मकारिणः।
२४ परमेशस्य कर्म्माणि वीक्षितुं प्राप्नुवन्ति ते।
तस्याश्चर्य्यक्रिया एव सुगम्भीरे महोदधौ॥
२५ तदाज्ञाद् वात्ययोत्पन्न प्रोत्थितेषु जलोर्म्मिषु।
२६ नभ आरोहतां तेषाम् अगाधे चावरोहतां।
प्राणा एव विलीयन्ते मग्ना आपत्सरित्पतौ॥
२७ नृत्यन्तस्ते चलन्तश्च मत्तवत् हतबुद्धयः।
२८ तस्मिन्नेव विपत्काल आह्वयन्ति परेश्वरं।
तेषां क्लेशेभ्य उद्धारं तदानीं विदधाति सः॥
२९ वायौ प्रशमिते तेन तरङ्गा विरमन्ति च॥

ते तु हृष्यन्ति विश्रामात् नीयन्ते चेष्टमाश्रयं ॥ ३०
परमेश्वरमुद्दिश्य ते प्रशंसन्तु तत्कृपां। ३१
समक्षं नरवंशानां तत्कर्म्माण्यद्भुतानि च ॥
प्रजानाञ्च समाजेऽपि तत्तत्वं वर्णयन्तु ते। ३२
अध्यक्षाणां सभायाञ्च तस्य कुर्व्वन्तु वन्दनां ॥
स नदीः प्रान्तरं कुर्य्यात् निर्झरांश्च मरुस्थलं। ३३
उर्व्वरां भूमिमूषञ्च दौर्जन्यात् तन्निवासिनां ॥ ३४
प्रान्तरञ्च सरः कुर्य्यात् मरुभूमिञ्च निर्झरान् ॥ ३५
वासितास्तेन दीनाश्च तत्र निर्म्मिमते पुरीं ॥ ३६
उप्त्वा क्षेत्रेषु वीजानि द्राक्षावल्लीः प्ररोप्य च। ३७
भूमिजातानि भूरीणि फलान्युत्पादयन्ति ते ॥
आशीर्व्वादे कृते तेन वर्द्धन्तेऽतीव ते नराः। ३८
तेषां गवादियूथानि नहि न्यूनीकरोति सः ॥
पुन र्द्दौर्हविपत्क्षोभैरल्पीभूय क्रसन्ति ते ॥ ३९
प्रकरोत्यधिपानां स चाभिषेकमवज्ञया। ४०
मार्गहीने मरुस्थाने भ्रान्तांस्तान् विदधाति च ॥
दीनश्चोन्नयति क्लेशात् मेषवद् बर्द्धितान्वयं ॥ ४१
तद् दृष्ट्वा सरलात्मानो लोका हर्षं प्रकुर्व्वते। ४२
अधर्म्मो निखिलः स्वीयं मुखं रुद्धं करोति च ॥
यः कश्चिज्ज्ञानवांस्तेन सर्व्वमेतद् विचार्य्यतां। ४३
कृत्स्ना तर्हि परेशस्य करुणा तेन भोत्स्यते ॥

---

१०८ अष्टशततमं गीतं।

परमेश्वरस्य प्रशंसा तस्मिन् प्रत्याशा च।

दायूदा कृतं गानार्थकं धर्म्मगीतं।

मच्चित्तं स्थिरमस्तीश मया गानं करिष्यते। १
मया कारिष्यते वाद्यं मनसापि प्रियेण मे ॥
नेवल्यन्त्र प्रबुध्यस्व हे वीणे त्वञ्च जागृहि। २
अहं प्रजागरिष्यामि ह्यरुणोदयतः पुरा ॥
परेश लोकमध्येऽहं कीर्त्तयिष्यामि ते स्तवं। ३

प्रशंसिष्यामि ते नाम जातीनामेव मध्यतः॥
४ यतः स्वर्गोपरिष्टाद्धि विस्तीर्णास्ति कृपा तव।
त्वदीया सत्यता तद्वत् स्पृशति व्योममण्डलं॥
५ स्वर्गे प्रकाशतामीश तावकीना समुन्नतिः।
मेदिन्या अपि सर्व्वत्र कीर्त्त्यतां महिमा तव॥
६ यथा तव प्रिया लोका परिरक्षणमाप्नुयुः।
तदर्थं त्वं स्वहस्तेन त्रात्वा देहि न उत्तरं॥
७ स्वपवित्रतयावादीत् ईशस्तेनोल्लसाम्यहं।
शिखिमं तु विभक्ष्यामि माप्ये सुक्कोतप्रान्तरं॥
८ मदीयो गिलियादोऽस्ति मिनशिश्च मदीयकः।
इफ्रयिमः शिरस्त्रं मे यिहूदा विधिदायकः॥
९ मोयावो जलपात्रं मे क्षालनस्योपकारकं।
इदोमस्योपरि स्वीयां पादुकां प्रक्षिपाम्यहं।
पिलेष्टीयाख्यदेशे च प्रकरोमि जयध्वनिं॥
१० सुदृढं नगरं नीत्वा को मां तत् प्रापयिष्यति।
क इदोमपुरं यावन्मार्गं मां दर्शयिष्यति॥
११ ईशास्मान् त्यक्तवान् यस्त्वं त्वं किं तन्न करिष्यसि।
ईश त्वं वाहिनीनां नो मध्ये किं न गमिष्यसि॥
१२ अस्मान् क्लेशत उद्धर्त्तुम् उपकारं विधेहि नः।
उपकारो मनुष्येण कृतो निष्फल एव हि॥
१३ ईश्वरेणैव वीरत्वम् वयमाचरितुं क्षमाः।
स एवास्मद्विपक्षांश्च चरणाभ्यां विमर्द्दिता॥

---

१०९ नवशततमं गीतं।

दुष्टारीणां विरुद्धं दायूदः प्रार्थना २१ परमेश्वराश्रयस्य।

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं।

१ हे मत्प्रशंसनीयेश मा सन्तिष्ठस्व नीरवः॥
२ पापमुखञ्च धूर्त्तञ्च मुखं व्यादाय मां प्रति।
लोका निःसत्यजिह्वाभिः संलपन्ति मया सह॥

रुन्धन्ति द्रोहवाक्यै र्मां युध्यन्ते च मया मृषा। ३
मत्प्रेमार्थं हि ते माञ्च द्विषन्ति प्रार्थनाश्रितं॥ ४
उपकारस्य शोधार्थं मेऽपकारञ्च कुर्व्वते। ५
मम प्रेम्नश्च शोधार्थम् आचरन्ति विरोधितां॥
ईदृशस्योपरि त्वञ्च दुरात्मानं नियोजय। ६
दक्षिणे तस्य पार्श्वे च शैतान् सन्तिष्ठतां स्वयं॥
विचारे स भवेद् दोषी प्रार्थना तस्य चाघवत्॥ ७
तस्य घस्रा भवन्त्वल्पा अन्यस्याप्नोतु तत्पदं॥ ८
अनाथाः सन्तु तद्बालास्तत्पत्नी विधवा भवेत्॥ ९
पर्य्यटन्तः सदा भिक्षां याचन्तां तस्य पुत्रकाः। १०
स्वोच्छिन्नवसतिस्थाने भक्ष्यमन्वेषयन्तु च॥
क्रियतामुत्तमर्णेन तत्सर्व्वस्वमशेषतः। ११
श्रमजातं फलं तस्य लुण्टयन्तु परा जनाः॥
अनुकम्पा न केनापि क्रियतां तं नरं प्रति। १२
तदीयानाथपुत्रेषु सदयः कोऽपि मा भवत्॥
फलं पारत्रिकं तस्य भवेदुच्छिन्नतार्थकं। १३
द्वितीये पुरुषे तेषां नाम लोपं प्रगच्छतु॥
स्मर्य्यतां परमेशेन तस्य पैतृकपातकं। १४
तस्य मातृकपापञ्च लुप्ततां नहि गच्छतु॥
परमेशस्य साक्षात् तत् सर्व्वदोपस्थितं भवेत्। १५
भवेदुत्पाटितं तेषां स्मरणं धरणीतलात्॥
यतो हेतोः कृपां कर्त्तुं न संस्मृत्यानुधावितः॥ १६
तेन दीनो दरिद्रश्च क्षुण्णात्मा च वधैषिणा॥
समप्रीयत शापे स आक्रमीच्च स एव तं। १७
आशी र्न रुरुचे तस्मै तस्माद्दूरं गता च सा॥
योऽभिशापः सदा तेन पर्य्यधीयत वस्त्रवत्। १८
तस्यान्तस्थाम्बुवद् व्याप्नोत् तस्यास्थीनि च तैलवत्।
परिधेयं यथा तस्य वसनं स तथा भवेत्। १९
यथा वा शृङ्खलं नित्यं कक्ष्यां बद्धं तथा भवेत्॥
ये मां द्विषन्ति मत्प्राणान् हन्तुं दुष्टं वदन्ति च। २०
इदमेव फलं सर्व्वे ते प्राप्स्यन्ति परेश्वरात्॥

११ प्रभो परेश मह्यं त्वं स्वनाम्नः कृत आचर।
उत्तमं तव कारुण्यम् अतस्त्वं मां समुद्धर॥
१२ दीनोऽहं दुर्गतश्चास्मि हृच्च विद्धं ममान्तरे॥
१३ दीर्घच्छायावदत्येमि प्रचाल्ये च पतङ्गवत्॥
१४ मज्जानुन्युपवासेन स्खलनाय समुद्यते।
तैलाभावेन मे मांसं म्लानत्वञ्च प्रगच्छति॥
१५ मनुष्याणां समीपे च निन्दनीयो भवाम्यहं।
सर्व्वे निरीक्षमाणा मां चालयन्ति शिरांसि हि॥
१६ मत्प्रभो परमेश त्वम् उपकारं कुरुष्व मे।
स्वकारुण्यानुसारेण मम त्राणं विधेहि च॥
१७ तेऽत्र जानन्तु हस्तं ते त्वत्क्रियाञ्च परेश्वर॥
१८ ते यदा दीयते शापस्तदाशी दीयतां त्वया।
यदोत्तिष्ठन्ति ते लोकास्तदा लज्जां प्रयान्तु ते।
किन्तु त्वदीयदासोऽयं हर्षमेवाधिगच्छतु॥
१९ वस्त्रेणेवापमानेन वेष्ट्यन्तां द्वेषिणो मम।
स्वीयप्रावारकेणेव प्रच्छाद्यन्तामवज्ञया॥
२० परमेशं स्ववक्त्रेण संस्तोष्यामितरामहं।
लोकारण्यस्य मध्येऽपि करिष्ये तत्प्रशंसनं॥
२१ यतो हेतोः स दीनस्य दक्षिणे समवस्थितः।
प्राणदण्डविधातृभ्यस्तं समुद्धरति स्वयं॥

---

११० दशाधिकशततमं गीतं।

ख्रीष्टस्य राज्ययाजकत्वजयेषु भविष्यद्वाक्यं।

दायूदो धर्म्मगीतं।

१ मम प्रभुमिदं वाक्यं बभाषे परमेश्वरः।
त्वच्छत्रून् पादपीठं ते यावन्नहि करोम्यहं।
अवतिष्ठस्व तावत् त्वम् आसीनो मम दक्षिणे॥
२ परेशो बलदण्डं ते सीयोनात् प्रेषयिष्यति।
राजत्वं निजशत्रूणां मध्ये त्वञ्च करिष्यसि॥
३ त्वज्जयस्य दिने तुभ्यं स्वयन्दत्तास्तव प्रजाः।

भास्वन्ति पूतया कान्त्यारुणजाच्छिशिरादपि।
स कुमारसमूहस्य शिशिरस्ते भविष्यति॥
परमेश इदं शेपे न च तेनानुतप्स्यते। ४
त्वं मल्कीषेदको रीत्या याजकः सार्व्वकालिकः॥
त्वदीयदक्षिणे पार्श्वे यः प्रभुः पर्य्युपस्थितः। ५
स्वीयक्रोधदिने भूपांश्चूर्णयिष्यति स ध्रुवं॥
अन्यजातीयलोकानां विचारं स विधास्यति। ६
भूतलञ्च स्वशत्रूणां कुणपैः परिपूरयन्।
रणक्षेत्रे सुविस्तीर्णे चूर्णयिष्यति मस्तकान्॥
स च मार्गे तरङ्गिण्याः सलिलानि प्रपास्यति। ७
ततो हेतो र्निजं तेन शिर उन्नमयिष्यते॥

---

१११ एकादशशततमं गीतं।

इब्रिभाषया ककारादिगीतेन परमेश्वरानुग्रहप्रशंसनं।

प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां॥ १
सर्व्वान्तःकरणेनाहं त्वां स्तोष्यामि परेश्वर।
सरलानां समज्यायां मनुष्याणाञ्च संसदि॥
परमेशस्य कर्म्माणि सुमहान्ति भवन्ति हि। २
यावन्तस्तेषु तुष्यन्ति तैस्तान्यालोचितानि च॥
मान्यं श्लाघ्यञ्च तत्कार्य्यं धर्म्मस्तस्य सदा स्थिरः॥ ३
निजाद्भुतक्रियास्तेन स्मरणार्थमनुष्ठिताः। ४
दयाशीलोऽनुकम्पी च विद्यते परमेश्वरः॥
स्वभक्तेभ्योऽन्नदाता स सदा स्वनियमं स्मरन्॥ ५
स्वप्रजा निजकार्य्याणां विक्रमं स न्यदर्शयत्। ६
भिन्नजातीयलोकानां देशं तासु समार्पयत्॥
सर्व्वं तत्करयोः कर्म्म फलं सत्यविचारयोः। ७
शासनं सकलं तस्य दृढविश्वासमर्हति॥
सर्व्वकालञ्च यावत् तत् सदा तिष्ठति निश्चलं। ८
सत्यत्वसरलत्वाभ्यां तत् सर्व्वं तेन साध्यते॥
प्राहिणोच्च परित्राणं स स्वकीयप्रजाः प्रति। ९

स स्वीयं नियमञ्चापि सर्व्वकालार्थमादिशत् ।
नामधेयञ्च यत् तस्य पवित्रं भीषणञ्च तत् ॥
१० परमेशात्तु या भीतिः सा प्रज्ञाया उपक्रमः ।
तदाज्ञापालकानाञ्च सर्व्वेषां बुद्धिरुत्तमा ।
प्रशंसा परमेशस्य सर्व्वदा तिष्ठति स्थिरा ॥

---

११२ द्वादशशततमं गीतं ।

इब्रिभाषया ककारादिगीतेन भद्रलोकस्य प्रशंसनं ।

१ प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां ।
धन्यं वच्मि मनुष्यं तं यो बिभेति परेश्वरात् ।
तस्य सर्व्वनिदेशेन यश्चातीव प्रतुष्यति ॥
२ पृथिव्यां तस्य वंशो हि पराक्रान्तो भविष्यति ।
शुद्धाचारस्य लोकस्य कुलमाशिषमाप्स्यति ॥
३ श्री र्धनञ्चास्ति तद्गेहे धर्म्मस्तस्य सदा स्थिरः ॥
४ उदेति ध्वान्ततो दीप्तिः शुद्धाचारनरं प्रति ।
दयाशीलोऽनुकम्पी च धार्म्मिकश्च स विद्यते ॥
५ सुजनः स दयां कुर्व्वन् ऋणदानं करोति हि ।
सुविचारात् स्वकार्य्याणां सिद्धत्वञ्चाधिगच्छति ॥
६ निश्चलः सर्व्वकाले स स्मर्त्तव्यो धार्म्मिकः सदा ॥
७ अनिष्टस्यापि वार्त्तायां स निःशङ्को ऽवतिष्ठते ।
तस्यान्तःकरणं धीरं परमेश्वरमाश्रितं ॥
८ स्थिरचित्तो ऽभयो ऽरीणां दर्शनं स प्रतीक्षते ॥
९ स विकीर्य्य निजं वित्तं दरिद्रेभ्यो ददाति हि ॥
धर्म्मस्तस्य सदा स्थायी तस्य श्रीः शोभयोन्नता ॥
१० तद्दृष्ट्वा दुर्ज्जनः क्रुद्धो दन्तैः क्ष्वेडन् विलीयते ।
दुराचारमनुष्याणां मनोऽभीष्टं विनंक्ष्यति ॥

---

११३ त्रयोदशशततमं गीतं।

अनुग्रहार्थमीश्वरस्य प्रशंसनं।

प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां। १
हे परेश्वरदासेया युष्माभिः स प्रशस्यतां।
परमेशस्य यन्नाम युष्माभिस्तत् प्रशस्यतां॥
अद्यारभ्य सदा धन्यं भूयान्नाम परेशितुः॥ २
उदयाचलमारभ्य यावदस्ताचलं रवेः। ३
नामधेयं परेशस्य प्रशंसायोग्यमस्ति हि॥
उन्नतः परमेशो ऽस्ति सर्व्वजातिगणोपरि। ४
अन्तरीक्षोपरिष्टाच्च महिमा तस्य राजते॥
को ऽस्मत्प्रभोः परेशस्य तुल्यः स ऊर्द्ध्ववासकृत्॥ ५
स्वर्गे मर्त्त्ये च सर्व्वाणि स निरीक्षत आनतः॥ ६
स धूले र्दीनमुत्थाप्य मलादुन्नम्य दुर्गतं। ७
आसयत्यधिपैः सार्द्धं स्वदेशीयाधिपैः सह॥ ८
बन्ध्या या गृहिणी तां स समावासयति ध्रुवं। ९
नन्दनानाञ्च सानन्दां जननीं विदधाति तां॥
प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां॥

---

११४ चतुर्द्दशशततमं गीतं।

परमेश्वरात् स्थलजलयो र्भयं।

वहि र्याति यदेस्रायेल् मिसर्देशस्य मध्यतः। १
परभाषीयजातेश्च मध्याद् याकूब आवलिः।
यिहूदाः परमेशस्य धर्म्मधामाभवत् तदा। २
इस्रायेलीयवंशस्च तस्य राष्ट्रमजायत॥
तद् दृष्ट्वा व्यद्रवद् वार्धि र्यर्द्दन् पश्चान्न्यवर्त्तत। ३
अन्टत्यन्नविवच्छैला गिरयो मेषवत्सवत्॥ ४
कुतस्त्वं व्यद्रवो वार्धे त्वञ्च यर्द्दन् न्यवर्त्तयाः। ५
अनर्त्तिष्टाविवच्छैला गिरयो मेषवत्सवत्॥ ६

७ हे भूः क्षुभ्य प्रभोः साक्षात् याकूबीयेशितुः पुरः ॥
८ करोत्यद्रिं तडागं स वज्रश्मानञ्च निर्झरं ॥

---

११५ पञ्चदशशततमं गीतं।

१ प्रतिमानामसारता ९ ईश्वरस्य सारतायाश्च वर्णनं।

१ हे परेश्वर नास्माकं नास्माकं गौरवं कुरु।
किन्तु त्वदीयनाम्नो हि गौरवं सम्प्रकाशय।
तावकीनकृपायाश्च सत्यतायाश्च हेतुतः ॥
२ अमीषामीश्वरः क्वेति ब्रूयु र्देवार्च्चकाः कुतः ॥
३ स्वर्गे त्वस्तीश्वरोऽस्माकं यच्च वाञ्छेत् करोति तत् ॥
४ रौप्यस्वर्णसुरास्तेषां मर्त्त्यहस्तै र्विनिर्म्मिताः ॥
५ सवक्त्रास्ते न भाषन्ते न पश्यन्ति सलोचनाः ॥
६ सकर्णाश्च न शृण्वन्ति न जिघ्रन्ति सनासिकाः ॥
७ न स्पृशन्ति सहस्तास्ते सपादा न चरन्ति च।
कञ्चन स्वीयकण्ठैश्च शब्दं नोदीरयन्ति ते ॥
८ तत्समाः कारवस्तेषां सर्व्वे तांश्चाश्रिता जनाः ॥
९ इस्रायेलीयवंश त्वं श्रद्धत्स्व परमेश्वरं।
स्वश्रद्धानलोकानां सहायः फलकश्च सः ॥
१० हे हारोणान्वया यूयं श्रद्धद्ध्वं परमेश्वरं।
स्वश्रद्धानलोकानां सहायः फलकश्च सः ॥
११ हे परेशार्च्चका यूयं श्रद्धद्ध्वं परमेश्वरं।
स्वश्रद्धानलोकानां सहायः फलकश्च सः ॥
१२ परमेशः स्मरत्यस्मान् आशिषं स प्रदास्यति।
इस्रायेलीयवंशेभ्य आशिषं स प्रदास्यति।
हारोणस्यान्ववायेभ्य आशिषं स प्रदास्यति ॥
१३ परमेशार्च्चकेभ्यः स आशिषञ्च प्रदास्यति।
क्षुद्रेभ्यश्च महद्भ्यश्च सकलेभ्यः प्रदास्यति ॥
१४ परेशो बर्द्धयेद् युष्मान् युष्मान् युष्मत्सुतानपि ॥
१५ धन्या यूयं परेशेन निर्म्मात्रा स्वर्गमर्त्त्ययोः ॥
१६ स्वर्गः परेशितुः स्वर्गो मर्त्त्यं सोऽदान्नृजातये ॥

न स्तुवन्ति प्रभुं प्रेता न मौनालयगामिनः॥ १७
वयमेव नविष्यामस्त्वद्यारभ्य सदा प्रभुं॥ १८
प्रशंसा परमेशस्य युष्माभिः संप्रकीर्त्त्यतां॥

११६ षोडशशततमं गीतं।

अनुग्रहादीश्वरस्य प्रशंसनं।

प्रीये परेश्वरे यत् स उक्तियाञ्ञे शृणोति मे॥ १
मयि कर्णौ निधत्ते स संङ्गास्ये तं सदा ततः॥ २
वेष्टितो रज्जुभि र्मृत्योराक्रान्तो नारकार्त्तिभिः। ३
कदाचिद् विषमं क्लेशम् उद्वेगञ्चाहमाप्नवं॥
तदानीं परमेशस्य नाम्नेत्थं प्रार्थितं मया। ४
हे परेश दयां कृत्वा मम प्राणान् समुद्धर॥
परेशः सदयो धर्म्मी सानुकम्पो न ईश्वरः॥ ५
परेशोऽल्पधियां रक्षी दीनं मां स उपाकरोत्। ६
हे मदीयमनो याहि स्वविश्रामस्थलं पुनः। ७
यतो हेतोः परेशेन हितमाचरितं तव॥
उद्धारः साधितस्तेन प्राणानां मम मृत्युतः। ८
अश्रुतो नेत्रयुग्मस्य स्खलनात् पादयोश्च मे॥
चरिष्यामि परेशस्य पुरोऽहं जीवतां भुवि॥ ९
अभवन्मम विश्वासस्ततो वाक्यमुदैरयं। १०
किन्त्वतीव महादुःखम् तदा मां समुपागमत्॥
सर्व्वमर्त्त्यो मृषाभाषीत्युदितं क्षोभतो मया॥ ११
किं फलं परमेशाय प्रतिदायिष्यते मया। १२
योग्यं सर्व्वोपकाराणां कृतानां तेन मां प्रति॥
त्राणकंसं गृहीत्वैव तन्नामाङ्गास्यते मया॥ १३
परमेश्वरमुद्दिश्य मया यद्यत् प्रतिश्रुतं। १४
तत् सर्व्वं पूरयिष्यामि तत्प्रजागणसम्मुखे॥
गुर्व्वी परेशितु र्दृष्टौ स्वीयपुण्यवतां मृतिः॥ १५
परेश तव दासोऽहं दास एव तवास्म्यहं। १६
तव दास्या हि पुत्रोऽहं मत्पाशा मोचितास्त्वया॥

१७ त्वामेवाहं प्रयक्ष्यामि प्रशंसाबलिना ततः।
परमेशस्य नाम्ना च करिष्ये प्रार्थनामहं॥
१८ परमेश्वरमुद्दिश्य मया यद्यत् प्रतिश्रुतं।
तत् सर्व्वं पूरयिष्यामि तत्प्रजागणसम्मुखे॥
१९ परमेशीयगेहस्याङ्गनानामेव मध्यतः।
हे यिरूशालमाख्याते पुरि मध्यस्थले तव॥
प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां॥

---

११७ सप्तदशाधिकशततमं गीतं।

परमेश्वरस्य प्रशंसा।

१ हे लोकाः सर्व्वजातीयाः परमेशं प्रशंसत।
हे नराः सर्व्वदेशस्था यूयं तं समभिष्टुत॥
२ यस्मात् सुमहती तस्य दयास्मासु प्रकाशते।
सत्यत्वञ्च परेशस्य नित्यस्थायि भविष्यति॥
प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां॥

---

११८ अष्टादशाधिकशततमं गीतं।

१ ईश्वरस्य प्रशंसा ५ विपदो रक्षणार्थं ईश्वरगुणकीर्त्तनं २२ ख्रीष्टे भविष्यद्वाक्यञ्च।

१ प्रभुं स्तुत स सद्भावः करुणा तस्य शाश्वती॥
२ इस्रायेल् अधुना ब्रूयात् करुणा तस्य शाश्वती॥
३ हारोणस्यान्वया ब्रूयुः करुणा तस्य शाश्वती॥
४ परमेशार्च्चका ब्रूयुः करुणा तस्य शाश्वती॥
५ परमेश्वरमुद्दिश्य सङ्कटे प्रार्थितं मया।
परमेशश्च विस्तीर्णे स्थलेऽदान्मह्यमुत्तरं॥
६ मत्पक्षे परमेशो ऽस्ति न करिष्यामि साध्वसं।
यस्मान्मां प्रति किं कर्त्तुं मानवः शक्तिमान् भवेत्॥
७ ममोपकारिणामेको मत्पक्षेऽस्ति परेश्वरः।
तस्मान्मद्द्वेषिणां दृष्ट्या लोचनं मम तर्प्स्यति॥
८ वरं परेश्वरे श्रद्धा न च श्रद्धा मनुष्यके॥

परं परेश्वरे श्रद्धा न च श्रद्धा न्टपेष्वपि ॥ ९
सर्व्वजातीयलोका मां संवेष्टन्ते समन्ततः। १०
परमेशस्य नाम्नाहं तान् उच्छेत्स्यामि निश्चितं ॥
ते हि संवेष्टमाना मां निरुन्धन्ति समन्ततः। ११
परमेशस्य नाम्नाहं तान् उच्छेत्स्यामि निश्चितं ॥
ते लोका मां चतुर्द्दिक्षु संवेष्टन्ते ऽलिवृन्दवत्। १२
किन्तु यास्यन्ति निर्व्वाणं दग्धकण्टकवह्निवत्।
परमेशस्य नाम्नाहं तान् उच्छेत्स्यामि निश्चितं ॥
हे शत्रो सन्निपातार्थं त्वं बलान्मामताडयः। १३
उपकारं मदीयन्तु कृतवान् परमेश्वरः ॥
परेशो मे बलं गीतं परित्राता च मे ऽभवत् ॥ १४
उत्सवो जयनादश्च धर्म्मिणामस्ति वेश्मसु। १५
दक्षिणः परमेशस्य हस्तो विक्रमसाधकः ॥
दक्षिणः परमेशस्य हस्त उन्नतिकारकः। १६
दक्षिणः परमेशस्य हस्तो विक्रमसाधकः ॥
न मरिष्याम्यहं तस्मात् किन्तु स्थास्यामि जीवितः। १७
वर्णनाञ्च करिष्यामि कर्म्मणां परमेशितुः ॥
भृशादेव परेशो मां न तु मृत्यौ समार्पयत् ॥ १८
धर्म्मद्वाराणि युष्माभि र्मोच्यन्तां मम सम्मुखे। १९
ततस्तानि प्रविश्याहं संस्तोष्यामि परेश्वरं ॥
इदं द्वारं परेशस्य प्रविशन्त्यत्र धार्म्मिकाः ॥ २०
त्वामेवाहं नविष्यामि यतोऽदा मह्यमुत्तरं। २१
मामकीनपरित्राता यतस्त्वञ्चाभवः स्वयं ॥
गृहनिर्म्मातृभि र्लोकै र्यः पाषाणो निराकृतः। २२
स एव गृहकोणस्थः प्रमुखः प्रस्तरो ऽभवत् ॥
परमेशस्य कर्म्मेदम् अस्मद्दृष्टौ तदद्भुतं ॥ २३
दृष्टं यत् परमेशेन दिनमेतद्धि तद्दिनं। २४
आगच्छत वयं तत्र नन्दाम प्रोल्लसाम च ॥
भोः परेश कुरु त्राणम् भोः परेश समेधय ॥ २५
परमेशस्य नाम्ना य आयाति धन्य एव सः। २६
धन्यान् युष्मान् वयं ब्रूमः परेशस्य गृहे स्थिताः ॥

१७ यिहोवाः सत्य ईश्वरोऽस्ति सोऽस्मभ्यं दत्तवान् द्युतिं।
वेद्याः शृङ्गेषु युष्माभि र्बध्यतां रज्जुभि र्बलिः॥
१८ मामकीनेश्वरोऽसि त्वं करिष्यामि तव स्तवं।
मामकीनेश्वरोऽसि त्वं प्रगास्यामि तवोन्नतिं॥
१९ प्रभुं स्तुत स सद्भावः करुणा तस्य शाश्वती॥

---

११९ ऊनविंशतिशततमं गीतं।

इब्रिभाषया ककारादिगीतं तत्र शास्त्रस्य गुणवर्णनं बहुप्रार्थनाप्रशंसास्तूपदेशाश्च।

א आलफ्।

१ धन्याः शुद्धायना लोकाः प्रभोः शास्त्रानुगामिनः॥
२ धन्यास्तस्य प्रबोधानां प्रतिपालनकारिणः।
सर्व्वान्तःकरणेनैव तस्यान्वेषणकारिणः॥
३ अधर्म्मं ते न कुर्व्वन्ति चरन्तस्तस्य वर्त्मसु॥
४ सयत्नं पालनार्थं त्वं स्वनियोगान् समादिशः॥
५ पदन्यासो मदीयोऽस्तु त्वद्विधीन् रक्षितुं स्थिरः॥
६ न प्राप्स्यामि तदा लज्जां सर्व्वाज्ञा लक्षयंस्तव॥
७ शिक्षित्वा धर्म्मनीतीस्ते स्तोष्ये त्वां शुद्धचित्ततः॥
८ त्वद्विधीन् पालयिष्यामि त्वं नितान्तं न मां त्यज॥

ב बैत्।

९ निजमार्गं युवा लोकः कथं शुचीकरिष्यति।
सावधानतया गच्छंस्तव वाक्यानुसारतः॥
१० सर्व्वान्तःकरणेनाहं करोम्यन्वेषणं तव।
त्वदीयाज्ञाः परित्यज्य च्योतुं मां न प्रवर्त्तय॥
११ पापं त्वत्प्रातिकूल्येन न क्रियेत मया यथा।
रक्ष्यन्ते तव वाक्यानि निजान्तःकरणे तथा॥
१२ हे परेश्वर धन्यस्त्वं स्वविधीन् मां नु शिक्षय॥
१३ त्वद्वक्त्रस्याखिलां नीतिं स्वोष्ठाभ्यां वर्णयाम्यहं॥
१४ त्वत्प्रबोधपथे ह्लादे राशीभूते धने यथा॥
१५ त्वन्नियोगाननुध्यायन् निरीक्षेऽहं पथस्तव॥
१६ त्वद्विधीनभिनन्दामि त्वद्वाचो विस्मरामि न॥

३ गिमल्।

निजदासं समुद्दिश्य त्वं विधेहि वदान्यतां। १७
ततो ऽहं जीवनं प्राप्य पालयिष्यामि ते वचः॥
मामकीनाक्षियुग्मस्य त्वमेवोन्मीलनं कुरु। १८
तव शास्त्रादहं तर्हि प्राप्स्याम्यद्भुतदर्शनं॥
भूतलेऽहं प्रवास्यस्मि मत्तः स्वाज्ञा न गोपय॥ १९
मन्मनो ऽस्ति सदा क्षुण्णं त्वद्विचारस्य काङ्क्षया॥ २०
सम्भर्त्सयोद्धतान् शप्तान् त्वदाज्ञाभ्यश्च्युतान् नरान्॥ २१
तिरस्कारमवज्ञाञ्च दूरं मत्तोऽपसारय। २२
यतो हेतोः प्रबोधांस्ते पालयामितरामहं॥
मद्विरुद्धे समासीनाः सम्भाषन्ते नृपा अपि। २३
तावकीनस्त्वयं दासो परिध्यायति ते विधीन्॥
त्वत्प्रबोधेष्वहं ह्लादे मन्त्रिणो मे भवन्ति ते॥ २४

४ दालत्।

मन्मनः सज्जते धूलौ मां स्ववाक्येन जीवय॥ २५
निजवृत्तस्वगतिं तुभ्यं पुराहं विन्यवेदयं। २६
त्वञ्चादा उत्तरं मह्यं स्वविधीन् मां नु शिक्षय॥
तावकीननियोगानां पदवीं माञ्च बोधय। २७
त्वदीयाद्भुतकर्म्माणि ध्यायिष्यन्ते तदा मया॥
शोकाद् गलन्ति मत्प्राणाः स्ववाक्यान्मां समुच्छ्रय॥ २८
मत्तोऽपास्य मृषाचारं मां स्वशास्त्रेण वर्द्धय॥ २९
सत्यमार्गो मयाग्राहि त्वन्नीति र्लक्ष्यते मया॥ ३०
त्वत्प्रबोधेषु सक्तोऽहं प्रभो त्वं मां न लज्जय॥ ३१
त्वदाज्ञारूपमार्गेऽहं प्रकरिष्यामि धावनं। ३२
ममान्तःकरणं यस्मात् त्वया विस्तारयिष्यते॥

५ हे।

विधीनां तव पन्थानं मां परेश निदर्शय। ३३
ततोऽहं शेषपर्य्यन्तं करिष्ये तस्य पालनं॥
ज्ञानं देहि तदा शास्त्रं पालयिष्याम्यहं तव। ३४
तत् समुपाचरिष्यामि सर्व्वान्तःकरणेन च॥
नय स्वाज्ञप्तिमार्गे मां तत्र तुष्याम्यहं यतः॥ ३५

३६ मन्मनस्त्वत्प्रबोधेषु न च लोभे प्रवर्त्तय ॥
३७ मायाया दर्शनात् त्वं मे परावर्त्तय लोचने।
तावकीनेषु मार्गेषु मह्यं देहि च जीवनं ॥
३८ प्रत्यजानाः स्वभक्त्यै यत् तत् स्वदासे हि साधय ॥
३९ त्वं निवारय मे निन्दां साध्वसोत्पादिकां मम।
यस्माद् या राजनीतिस्ते मन्ये सा नीतिरुत्तमा ॥
४० आकाङ्क्षामि नियोगांस्ते मां स्वधर्म्मेण जीवय ॥

ו वौ।

४१ हे परेश प्रसादस्ते प्रचुरो वर्त्ततां मयि।
कृतं त्वया परित्राणं निजवाक्यानुसारतः ॥
४२ तेन मन्निन्दकायाहं शक्ष्यामि दातुमुत्तरं।
यतस्त्वदीयवाणीं हि शरणं गतवानहं ॥
४३ मन्मुखात् सत्यवाक्यं त्वं नितान्तं नहि गोपय।
यतोऽहं त्वद्विचाराणाम् अवतिष्ठे प्रतीक्षया ॥
४४ त्वच्छास्त्रं पालयिष्यामि सर्व्वकाले निरन्तरं।
४५ पृथुमार्गे च यास्यामि त्वन्नियोगान् गवेषयन् ॥
४६ त्वत्प्रबोधान् प्रभाषिष्ये नृपाणामपि सम्मुखे।
न भविष्यति मे तत्र व्रीडाबोधः कथञ्चन ॥
४७ हर्षिष्यामि त्वदाज्ञासु तास्तु सन्ति प्रियाः मम ॥
४८ त्वदाज्ञानां समीपेऽहं भविष्यामि कृताञ्जलिः।
तास्च मम प्रिया मंस्येऽनुध्यास्यामि विधींस्च ते।

ז सयिन्।

४९ स्वदासार्थं स्मरोक्तिं तां यया त्वं मां व्यश्वसः ॥
५० जीव्ये ऽहं तव वाचा यत् तत् दुःखे मम सान्त्वनं ॥
५१ दर्पिभिः सूपहस्ये ऽहं न च त्वच्छास्त्रतश्च्यवे ॥
५२ प्रभो त्वत्प्राक्तनां नीतिं स्मरन् प्राप्नोमि सान्त्वनां ॥
५३ त्वच्छास्त्रत्यागिदुष्टेषु रोमाञ्चो जायते मम ॥
५४ प्रवासधाम्नि गीतानि मे ऽभवन् विधयस्तव ॥
५५ हे परेश्वर यामिन्यां तव नाम स्मरामि हि।
तावकीनस्य शास्त्रस्य पालनञ्च करोम्यहं ॥
५६ यद् रक्षामि नियोगांस्ते तदेवास्ति धनं मम ॥

ח हेत्।

दायो मे परमेशो ऽस्ति मनस्त्वद्वाक्यपालनं॥ ५७
स्वीयवाक्यानुसारेण त्वं दयां कुरु मां प्रति।
सर्व्वान्तःकरणेनाहं त्वां प्रसाद्येदमर्थये॥ ५८
स्वगतिं चिन्तयन् पादौ त्वत्प्रबोधान् नयाम्यहं॥ ५९
त्वदाज्ञापालनायाहम् अविलम्ब्य त्वरेतरां॥ ६०
दुष्टानां वेष्टितः सङ्घै र्न शास्त्रं विस्मरामि ते॥ ६१
उत्तिष्ठाम्यर्द्धरात्रे त्वां स्तोतुं त्वद्धर्म्मनीतितः॥ ६२
त्वद्भक्तानामहं मित्रं तथा त्वद्विधिपालिनां॥ ६३
पूर्णा त्वत्कृपया पृथ्वी प्रभो मां शाधि ते विधीन्॥ ६४

ט टेट्।

स्वदासस्य हिताचारी त्वं परेश स्ववाक्यतः॥ ६५
उत्तमं सुविचारं मां ज्ञानञ्च त्वं हि शिक्षय। ६६
यतो हेतोस्तवाज्ञासु विश्वासः क्रियते मया॥
दुःखतः पूर्व्वमभ्राम्यम् अधुना त्वद्वचो भजे॥ ६७
त्वं हितो हितकारी च स्वविधीन् मां नु शिक्षय॥ ६८
मद्विरुद्धं मृषावाक्यं कल्पयन्त्यभिमानिनः। ६९
सर्व्वान्तःकरणेनाहं नियोगान् पालयामि ते॥
हृत् तेषां मेदसा स्थूलं तव शास्त्रे त्वहं रमे॥ ७०
दुःखभोगः शुभं मे ऽभूत् विधींस्ते ऽशिक्षयत् स मां॥ ७१
त्वन्मुखान्निर्गतं शास्त्रं सुशुभं मन्यते मया। ७२
स्वर्णरूप्यीयमुद्राणां सहस्रेभ्यो ऽपि तच्छुभं॥

י यूद्।

त्वत्कराभ्यामहं सृष्टस्ताभ्याञ्चाहं स्थिरीकृतः। ७३
यथा शिक्षे त्वदीयाज्ञा बोधय त्वं तथैव मां॥
त्वद्भक्ता मानवाः सर्व्वे हर्षिष्यन्ति विलोक्य मां। ७४
यतो हेतोस्त्वदीयोक्तेः प्रतीक्षा क्रियते मया॥
धर्म्म्या यद् राजनीतिस्ते तज्जानामि परेश्वर। ७५
फलं विश्वास्यतायाश्च दुःखं मय्यर्पितं त्वया॥
स्वदासं प्रति ते वाक्यात् कृपा मां सान्त्वयेत् तव॥ ७६
वर्त्ततां मयि ते स्नेहस्तेन प्राप्स्यामि जीवनं। ७७

यस्मात् त्वदीयशास्त्रं यत् तन्ममानन्दकारकं ॥
७८ लज्जन्तां दर्पिणो यस्मात् ते मृषा पीडयन्ति मां।
तावकीननियोगानां ध्यानमेव करोम्यहं ॥
७९ त्वत्तो बिभ्यति ये लोकास्त्वत्प्रबोधांश्च ये विदुः।
सकलास्ते पुनर्वारं मम पक्षे भवन्तु हि ॥
८० यदहं व्रीडया युक्तो न भवेयं कथञ्चन।
तदर्थमस्तु मच्चित्तं संसिद्धं विधिभिस्तव ॥

ɔ कफ्।

८१ अवसीदन्ति मे प्राणास्त्वदीयत्राणकाङ्क्षया।
वाक्यस्य तावकीनस्य प्रतीक्षाञ्च करोम्यहं ॥
८२ क्षीयेते मम नेत्रे च त्वदीयवाक्यकाङ्क्षया।
वाचञ्चेमामहं भाषे कदा मां सान्त्वयिष्यसि ॥
८३ धूमस्थिता कुतू र्यद्वत् तद्वदेव भवाम्यहं।
तथापि त्वद्विधीनां न परिगच्छामि विस्मृतिं ॥
८४ तावकीनस्य दासस्य कति सन्ति दिनानि वै।
ममाभिद्रोहिणां दण्डः कदा कारिष्यते त्वया ॥
८५ मां पातयितुमिच्छन्तो गर्त्तान् खनन्ति गर्व्विणः।
तेषामेतादृशं कार्य्यं नास्ति त्वच्छास्त्रसम्मतं ॥
८६ पूर्णां विश्वासमर्हन्ति विधयः सकलास्तव।
द्रुह्यन्तीमे मृषा मह्यं त्वमेवोपकुरुष्व मां ॥
८७ भूमौ प्रायेण तै र्ध्वंस्ये न त्यजामि तु ते विधीन् ॥
८८ स्वकारुण्यानुसारेण मां त्वमेव हि जीवय।
त्वन्मुखान्निर्गतं साक्ष्यं पालयिष्याम्यहं तदा ॥

ל लामद्।

८९ हे परेश्वर नित्यस्त्वं स्थिरं स्वर्गे वचस्तव ॥
९० पुरुषानुक्रमं यावत् तव विश्वास्यता स्थिरा।
त्वया संस्थापिता चेयं वसुधापि वितिष्ठते ॥
९१ अद्यापि ते वितिष्ठेते त्वदीयराजनीतितः।
यतः सर्व्वाणि वस्तूनि किङ्करास्तव सन्ति हि ॥
९२ त्वच्छास्त्रं नाभविष्यच्चेत् मदीयानन्दकारकं।
सम्मानंक्ष्यमहं तर्हि स्वदुःखेन न सशंयः ॥

नैवाहं विस्मरिष्यामि त्वन्नियोगान् कदाचन। ९३
यतो हेतो र्नियोगैस्तै र्भवान् मां समजीवयत्॥
तवाहमस्मि मां रक्ष त्वन्नियोगानुवर्त्तिनं॥ ९४
दुर्जना मामपेक्षन्ते मां नाशयितुमिच्छवः। ९५
किन्त्वहं त्वत्प्रबोधेषु यत्नतो निदधे मनः॥
सर्व्वस्या एव संसिद्धेरन्तः सन्दृष्ट मया। ९६
किन्त्वतीव सुविस्तीर्णा भवत्याज्ञा त्वदीयिका॥

ῼ मेम्॥

त्वच्छास्त्रं कीदृशं प्रीये तद् ध्यायाम्यखिलं दिनं। ९७
ज्ञानवन्तं रिपुभ्योऽपि त्वं स्वाज्ञाभिः करोषि मां। ९८
यतो हेतो र्मया सार्द्धं ता वर्त्तन्ते निरन्तरं॥
मम सर्व्वगुरुभ्योऽपि बुद्धिमांश्च भवाम्यहं। ९९
यस्मात् तव प्रबोधानां चिन्तनं क्रियते मया॥
प्राचीनेभ्योऽप्यहं विज्ञस्त्वन्नियोगानुपालनात्॥ १००
कुमार्गादपि सर्व्वस्मात् स्वपादौ वारयाम्यहं। १०१
यतस्त्वदीयवाक्यस्य पालनार्थमहं यते॥
नीतितस्तव न भ्रंशे यतस्त्वं मामशिक्षयः। १०२
मामकीनरसज्ञा च कीदृक् ते स्वदते वचः। १०३
जायते मम वक्त्रे हि मधुरं मधुतोऽपि तत्॥
तावकीननियोगेभ्यो मयालम्भि विवेचनं। १०४
तस्मात् सर्व्वम्मृषामार्गं गर्हणं जायते मम॥

ı नून।

दीपो मदीयपादस्य मार्गे ज्योतिश्च ते वचः॥ १०५
धर्म्म्या या राजनीतिस्ते मया सा पालयिष्यते। १०६
शपथोऽयं मयाकारि सफलश्च करिष्यते॥
अतीव दुःखितं मां त्वं स्ववाक्याज्जीवय प्रभो॥ १०७
मदत्तास्य स्तवास्तुभ्यं रोचन्तां हे परेश्वर। १०८
स्वकीयराजनीतिश्च शिक्षय स्वयमेव मां॥
सर्व्वदा प्राणहस्तो ऽहं त्वच्छास्त्रं विस्मरामि न॥ १०९
मन्निमित्तं दुरात्मान उन्माथं योजयन्ति हि। ११०
तथापि त्वन्नियोगेभ्यो विपथे न व्रजाम्यहं॥

१११ तव प्रबोधवाक्यानि मन्ये पैटकदायवत् ।
यतस्तान्येव मच्चित्तम् कुर्व्वन्त्यानन्दसंयुतं ॥
११२ शेषं यावदहं नित्यं पालयिष्यामि ते विधीन् ।
एतस्मिन्नेव चित्तस्य निवेशः क्रियते मया ॥

D· सामक् ।

११३ गर्हे द्विमनसो लोकान् प्रीये त्वच्छास्त्र एव च ॥
११४ त्वं मदीयरहःस्थानं त्वञ्च मत्फलकस्तथा ।
तावकीनस्य वाक्यस्य प्रतीक्षा क्रियते मया ॥
११५ हे मनुष्या दुराचारा दूरं मत्तः प्रगच्छत ।
मामकीनेश्वरस्याज्ञाः पालयिष्याम्यहं ध्रुवं ॥
११६ धारय स्वीयवाक्यान्मां सञ्जीविष्याम्यहं तदा ।
मामकीनप्रतीक्षायां नहि मां लज्जितं कुरु ॥
११७ कुरु मां सुस्थिरं तस्मान्मया त्राणमवाप्स्यते ।
तावकीनविधीनाञ्चापेक्षा कारिष्यते सदा ॥
११८ त्वद्विधिभ्यश्च्युवन्ते ये तान् सर्व्वांस्त्वं विलोप्स्यसि ।
यस्मात् प्रवञ्चना तेषां जायते फलवर्ज्जिता ॥
११९ क्षितिस्थान् दुर्जनान् सर्व्वान् मलवत् त्वमपास्यसि ।
तस्मात् तव प्रबोधेषु मनः सम्प्रीयते मम ॥
१२० रोमाञ्चो जायते देहे त्वत्तो वित्रस्यतो मम ।
तावकीनविचाराज्ञाः शङ्काञ्चोत्पादयन्ति मे ॥

y अयिन् ।

१२१ न्यायं धर्म्मञ्च कुर्व्वेऽहं मार्पयेः पीडकेषु मां ॥
१२२ हितार्थं स्वीयदासस्य प्रतिभूस्त्वं भव स्वयं ।
अभिमानिमनुष्याश्च मैव मां पीडयन्तु हि ॥
१२३ त्वत्त्राणं धर्म्मवाक्यञ्चाकांक्ष्य दृक् क्षीयते मम ॥
१२४ स्वकारुण्यानुसारात् त्वं स्वीयदासे समाचर ।
तावकीनविधींश्चापि शिक्षय स्वयमेव मां ॥
१२५ अहं त्वदीयदासोऽस्मि बुद्धिं मह्यं प्रयच्छ हि ।
तस्मादहं भविष्यामि तावकीनप्रबोधवित् ॥
१२६ कर्म्म कर्त्तुं परेशस्य समयः समुपस्थितः ।
यतो हेतो नरैः सर्व्वैस्तव शास्त्रं विलङ्घ्यते ॥

सम्प्रीयेऽहं तवाज्ञासु स्वर्णाच्छ्रेष्ठाच्च काञ्चनात्॥ १२७
नियोगांस्तव सर्व्वंच सर्व्वान् मन्ये समञ्जसान्। १२८
सकलञ्च मृषामार्गं मन्ये गर्हणभाजनं॥

१७ फे।

आश्चर्य्या यत् प्रबोधास्ते तत् तान् रक्षति मे मनः॥ १२९
त्वद्वाक्यानां विकाशो यः स हि दीप्तिं प्रयच्छति। १३०
अल्पबुद्धिमनुष्यांश्च सुबुद्धीन् विदधाति सः॥
श्वसिमि व्यात्तवक्त्रोऽहं त्वदाज्ञानां प्रकाङ्क्षया॥ १३१
मयि दृष्टिं विधाय त्वं कुरु मां प्रत्यनुग्रहं। १३२
त्वन्नामप्रियलोकेषु यतस्तत् कर्त्तुमर्हसि॥
मदीयपादविक्षेपान् स्ववाक्येन कुरु स्थिरान्। १३३
प्रभुत्वं कश्चिदन्यायो न करोतु ममोपरि॥
विधेहि मम मुक्तिञ्च मनुष्याणामुपद्रवात्। १३४
ततोऽहं त्वन्नियोगानां प्रकरिष्यामि पालनं॥
स्वदासाय प्रसीद त्वं स्वविधीन् माञ्च शिक्षय॥ १३५
लोचनाभ्यां मदीयाभ्यां सरितो स्रवतोऽम्भसां। १३६
यतो हेतो र्न कुर्व्वन्ति नरास्त्वच्छास्त्रपालनं॥

१८ त्सादे।

धार्म्मिकोऽसि परेश त्वं स्वविचारे च नीतिमान्॥ १३७
त्वयादिष्टाः प्रबोधाश्च धर्म्म्याः सत्याश्च सर्व्वथा॥ १३८
यस्मात् त्वदीयवाक्यानि विस्मर्य्यन्ते ममारिभिः। १३९
ततो हेतो र्मनस्तापः स्वकीयः सङ्क्षिणोति मां॥
त्वद्वाक्यं सर्व्वथा शुद्धं दासस्ते तच्च प्रीयते॥ १४०
क्षुद्रोऽहमवमान्यश्च विस्मरामि न ते विधीन्॥ १४१
त्वद्धर्म्मो नित्यधर्म्मोऽस्ति त्वच्छास्त्रं सत्यमेव च॥ १४२
आक्रान्तं दुःखकष्टाभ्यां तवाज्ञा हर्षयन्ति मां॥ १४३
तावकीनप्रबोधानां धर्म्मः स्थास्यति शाश्वतः। १४४
बुद्धिं मह्यं प्रयच्छ त्वं सञ्जीविष्याम्यहं तदा॥

१९ कूफ्।

सर्व्वान्तःकरणेनाहम् उच्चैराकृयामि हि। १४५
प्रभो यच्छोत्तरं मह्यं पालयिष्यामि ते विधीन्॥

१४६ अहं समाह्वये त्वान्तु परित्राणं विधेहि मे।
तेनाहं त्वत्प्रबोधानाम् आचरिष्यामि पालनं॥
१४७ प्रार्थयेऽहं प्रभातात् प्राक् तव वाक्यस्य कांक्षया॥
१४८ मन्नेत्रं त्वद्वचो ध्यातुं यामान्तं न प्रतीक्षते॥
१४९ हे परेश स्वकारुण्यात् मामकीनरवं शृणु।
राजनीत्यनुसाराच्च त्वं सञ्जीवय मां स्वयं॥
१५० पापानुवर्त्तिनोऽभ्यर्णास्त्वच्छास्त्राद् दूरवर्त्तिनः॥
१५१ अभ्यर्णोऽसि परेश त्वं सत्याज्ञा सकला तव॥
१५२ प्रागजानां प्रबोधैस्ते यत् तान् अस्थापयोऽक्षयं॥

ר रेश।

१५३ मम दुःखं निरीक्षस्व ममोद्धारं कुरुष्व च।
यस्मात् त्वदीयशास्त्रस्य विस्मृतिं न व्रजाम्यहं॥
१५४ विवादे वद मत्पक्ष उत्तरं माञ्च मोचय।
स्वीयवाक्यानुसारेण माञ्च त्वं जीवय स्वयं॥
१५५ दूरं त्राणमधर्म्मिभ्यो यत्ते नेच्छन्ति ते विधीन्॥
१५६ तावकीनानुकम्पास्ति महती हे परेश्वर।
राजनीत्यनुसारेण त्वं मां सञ्जीवय स्वयं॥
१५७ मामनेकेऽनुधावन्ति बहवश्च द्विषन्ति मां।
तथापि त्वत्प्रबोधेभ्यो न भवामि पराङ्मुखः॥
१५८ वञ्चकान् वीक्ष्य गर्हे ऽहं त्वद्विधीन् नाचरन्ति ते॥
१५९ वीक्षस्व त्वन्नियोगेषु प्रेमाणं प्रकरोम्यहं।
स्वीयानुग्रहबाहुल्यान्मां परेश्वर जीवय॥
१६० भारत्यास्तावकीनायाः साकल्यं सत्यता भवेत्।
धर्म्म्या या राजनीतिस्ते सा च स्थास्यति सर्व्वदा॥

ש सिन्।

१६१ हिंसितुं मुख्यलोका माम् अनुधावन्त्यकारणं।
किन्तु त्वदीयवाक्येभ्यः प्रबिभेति मनो मम॥
१६२ तव वाक्येऽहमाह्लादे लब्धभूरिधनो यथा॥
१६३ अनृतं द्वेष्मि गर्हे च तव शास्त्रं मम प्रियं॥
१६४ राजनीत्यास्त्वदीयाया धर्म्ममय्या निदानतः।
सप्तकृत्वो दिवामध्ये धन्यवादं करोमि ते॥

त्वच्छास्त्रे प्रीयमाणेषु वर्त्तते परमं शुभं। १६५
नहि कश्चन तेषाञ्च विद्यते प्रतिबन्धकः॥
प्रभो त्राणं प्रतीक्षे ते त्वदाज्ञा आचरामि च॥ १६६
मन्मनस्त्वत्प्रबोधानाम् विधत्ते परिपालनं। १६७
आत्यन्तिकञ्च तत्रैव प्रेमाणं विदधाति हि॥
नियोगांश्च प्रबोधांश्च त्वदीयान् आचराम्यहं। १६८
यस्मान्मे सकला मार्गा विद्यन्ते तव सम्मुखे॥

ण् तौ।

हे परेश्वर याच्ञा मे त्वत्साक्षादुपतिष्ठतु। १६९
स्वीयवाक्यानुसारात् त्वं मह्यं बुद्धिं प्रयच्छ च॥
तव प्रत्यक्षमायातु मामकीननिवेदनं। १७०
स्वप्रतिज्ञानुसारात् त्वं ममोद्धारं विधेहि च॥
मामकीनाधराभ्यां हि क्षरिष्यन्ति तव स्तवाः। १७१
यतो हेतोः स्वयं त्वं मां स्वविधीन् शिक्षयिष्यसि॥
योग्यं त्वद्वचसो वाक्यं मज्जिह्वा प्रतिवक्ष्यति। १७२
यतो हेतोस्त्वदीयाज्ञाः सकलाः सन्ति धर्म्मजाः॥
त्वत्करो मत्सहायोऽस्तु त्वन्नियोगान् वृणे यतः॥ १७३
तावकीनपरित्राणम् आकाङ्क्षामि परेश्वर। १७४
तावकीनञ्च यच्छास्त्रं तन्ममानन्दकारकं॥
मन्मनो जीवनं प्राप्य त्वत्प्रशंसां करोतु हि। १७५
त्वदीयराजनीतिश्च भूयान्ममोपकारिणी॥
नष्टमेषमिव भ्रान्तं स्वदासं मां गवेषय। १७६
यतो हेतोस्त्वदीयाज्ञा विस्मर्य्यन्ते मया नहि॥

---

१२० विंशतिशततमं गीतं।

निन्दाप्राप्तिकाले मनश्चिन्ता।

यात्रागीतं।

परमेश्वरमुद्दिश्य विपत्तेः समये मया। १
प्रार्थनाकारि तेनापि प्रदत्तं मह्यमुत्तरं॥
मृषावाद्योष्ठयुग्मं यत् या च जिह्वा प्रतारिका। २

ताभ्यां हे परमेश त्वं मम प्राणान् समुद्धर ॥
३ हे प्रतारकजिह्वे किं त्वयि तेनार्पयिष्यते।
त्वया सार्द्धञ्च किं वस्तु तेन संयोजयिष्यते ॥
४ तीक्ष्णवाणाश्च वीरस्य तमाङ्गाराश्च कोलिजाः ॥
५ हा हा मेशकवंशस्य मध्येऽत्र प्रवसाम्यहं।
केदरीयमनुष्याणां शिविरेऽस्मि कृतालयः॥
६ सन्धिद्वेषिनरैः सार्द्धं वस्तुं क्लाम्यति मे मनः॥
७ सन्धिप्रियोऽहमित्युक्ते ते भवन्ति रणोद्यताः॥

---

१२१ एकविंशतिशततमं गीतं।

आश्रितलोकानां परमेश्वरेण रक्षणं।

याचागीतं।

१ पर्व्वतान् वीक्षमाणोऽहं चिन्तयाम्यूर्द्धलोचनः।
मामकीनोपकारो हि कुतः स्थानादुदेष्यति ॥
२ परेशात् स्वर्भुवोः स्रष्टुरुपकार उदेति मे ॥
३ नैव त्वदीयपादस्य स्खलनं स सहिष्यते।
तावकीनस्य रक्षी यः स तन्द्रां नहि यास्यति ॥
४ पश्यातन्द्रोऽस्त्यनिद्रश्च इस्रायेलः स रक्षिता ॥
५ रक्षिता तावकीनस्तु स्वयमस्ति परेश्वरः।
तव दक्षिणपार्श्वस्था छाया चास्ति परेश्वरः ॥
६ दिवा सूर्य्यो विधू रात्रौ नहि त्वामाहनिष्यतः ॥
७ त्वां रक्षिष्यति सर्व्वस्माद् अशुभात् परमेश्वरः।
मनसस्तावकीनस्य रक्षा तेन करिष्यते ॥
८ निर्गमस्तावकीनश्च तथा प्रत्यागमस्तव।
रक्षिष्येत परेशेन ह्यद्यारभ्य हि सर्व्वदा ॥

---

१२२ द्वाविंशतिशततमं गीतं।

परमेश्वरस्य मन्दिरं गन्तुमाह्लादः।

दायूदा कृतं याचागीतं।

आयात परमेशस्य यास्यामो मन्दिरं वयं। १
इति वाक्ये जनैरुक्त आनन्दो जायते मम॥
अस्मत्पादा यिरूशालम् तव द्वारेषु संस्थिताः॥ २
सुनिर्म्मितं यिरूशालम् सुसंयुक्तं पुरं यथा॥ ३
तत्र यान्ति प्रजावर्गाः प्रजावर्गाः परेशितुः। ४
नाम स्तोतुं परेशस्येस्रायेलीयविधानतः॥
यस्मात् तत्रैव विद्यन्ते न्यायाध्यक्षासनान्यपि। ५
दायूदीयस्य वंशस्य सन्ति तान्यासनानि हि॥
युष्माभिः प्रार्थ्यतां सर्व्वैः कल्याणं यिरूशालमः। ६
ये नरास्त्वयि प्रीयन्ते शान्तिमेवाप्नुवन्ति ते॥
कल्याणं तव प्राचीरे वसेत् शान्तिश्च वेश्मसु॥ ७
भ्रातॄणां मामकीनानां मित्राणाञ्चानुरोधतः। ८
मयेदं वक्ष्यते वाक्यं कल्याणं वसतु त्वयि॥
अस्मत्प्रभोः परेशस्य मन्दिरस्यानुरोधतः। ९
त्वदीयमङ्गलस्यैव चेष्टा कारिष्यते मया॥

---

१२३ त्रयोविंशतिशततमं गीतं।

परमेश्वराश्रयणं।

यात्रागीतं।

स्वर्गवासिन्नहं विद्ये त्वां प्रत्युन्नतलोचनः॥ १
लोचने यश्य दासानां यथा स्वीयप्रभोः करे॥ २
यथा वा तिष्ठतो दास्या नेत्रे स्वस्वामिनीकरे।
तथा तिष्ठति नो दृष्टिरस्मत्प्रभौ परेश्वरे।
तेन जीवनलाभस्य प्रतीक्षां कुर्म्महे यतः॥
त्वमस्माननुकम्पस्वानुकम्पस्व परेश्वर। ३
यस्मादात्यन्तिकी तृप्तिर्जातास्माकमवज्ञया॥
प्राप्नोदात्यन्तिकीं तृप्तिमस्मदीयमनः किल। ४
सुखिनामुपहासेन दर्पिणामप्यवज्ञया॥

---

१२४ चतुर्विंशतिशततमं गीतं।

रक्षार्थं परमेश्वरप्रशंसनं।

दायूदा कृतं यात्रागीतं।

१ इस्रायेलधुना वाक्यम् एतदर्हति भाषितुं।
अस्मदीयसहायश्चेन्नाभविष्यत् परेश्वरः॥
२ अस्माकं प्रातिकूल्येन मनुष्या उत्थिता यदा।
तदास्माकं सहायश्चेन्नाभविष्यत् परेश्वरः॥
३ तर्ह्यस्मद्वैपरीत्येन तेषां कोपस्य तापतः।
सकलान् जीवतोऽस्मांस्ते न्यगलिष्यन् न संशयः॥
४ वयं तोयसमूहेनाप्लावयिष्यामहि ध्रुवं।
अस्मत्प्राणान ऊर्द्धञ्च प्राक्रमिष्यत् तरङ्गिणी॥
५ अस्मत्प्राणान ऊर्द्धं ह्याक्रमिष्यद् गर्व्वितं जलं॥
६ भूयात् परेश्वरो धन्यस्तेषां दन्तेषु भक्ष्यवत्।
अस्माकमर्पणं यस्मात् सोऽभ्यनुज्ञातवान् नहि॥
७ व्याधपाशाद् यथा पक्षी निस्तीर्णो नो मनस्तथा।
स पाशः पश्य सञ्छिन्नो निस्तारञ्च गता वयं॥
८ अस्मद्गतिः प्रभो नाम्नि निर्म्मातुः स्वर्गमर्त्तयोः॥

---

१२५ पञ्चविंशतिशततमं गीतं।

परमेश्वरं शरणागतानां लोकानां मङ्गलं।

यात्रागीतं।

१ निश्चलस्थिरसंस्थश्च यः सीयोनाख्यपर्व्वतः।
तस्य तुल्या भविष्यन्ति परमेशाश्रिता नराः॥
२ यथा शैलै र्यिरूशालम् अद्यारभ्य सदावृतं।
स्वप्रजाः परमेशेन चतुर्द्दिक्ष्वावृतास्तथा॥
३ राजदण्डस्तु पापस्य न स्थायी धर्म्मिणां भुवि।
दौर्जन्ये धर्म्मिभि र्यस्मान्न कर्त्तव्यं करार्पणं॥
४ हितं कुरु परेश त्वं हितानां सरलात्मनां॥

वक्रमार्गेषु ये भ्रान्तास्ते तु दुष्कर्म्मभिः सह। ५
प्रभुना दवयिष्यन्ते इस्रायेलोऽस्तु मङ्गलं॥

---

१२६ षड्विंशतिशततमं गीतं।

वाबिलो निस्तारार्थं परमेश्वरस्य प्रशंसनं।

याचागीतं।

परमेशेन सीयोनो दासत्वे परिवारिते। १
दृष्टस्वप्नमनुष्याणाम् अभवाम वयं समाः॥
तदा हास्येन नो वक्त्रं जिह्वा गीतैरपूर्य्यत। २
भिन्नदेशीयलोकेषु प्राचरद् वागियं तदा।
कृते ऽमीषां महाकर्म्म कृतवान् परमेश्वरः॥
अस्मत्कृते महाकर्म्म कृतवान् परमेश्वरः। ३
एतेन वयमानन्दं परमन्वलभामहि॥
हे परेश त्वमस्माकं दासत्वं परिवारय। ४
दक्षिणीयमरुस्थाने स्रोतसां शुष्कतामिव॥
अश्रुपातेन वीजानां वपनं ये प्रकुर्व्वते। ५
उल्लासेनैव शस्यानां कर्त्तनं तैः करिष्यते॥
प्रवहन् वीजभारं यः क्रन्दन् क्षेत्रं प्रगच्छति। ६
प्रवहन् शस्यभारं स उल्लसन् गेहमेष्यति।

---

१२७ सप्तविंशतिशततमं गीतं।

ईश्वरानुग्रहात् सर्व्वोन्नतिमङ्गले।

सुलेमना कृतं यात्रागीतं।

सदनं परमेशेन विनिर्म्मीयेत चेन्नहि। १
निष्फलो जायते तर्हि श्रमो निर्म्माणकारिणां॥
नगरं परमेशेन परिरक्ष्येत चेन्नहि।
निष्फला जायते तर्हि रक्षिणो जागरूकता॥
प्रगे युष्माकमुत्थानं शयने च विलम्बनं। २

भोजनञ्चाधिसंयुक्तं सकलं जायते वृथा।
स्वप्रियाय तु निद्रायां स ददाति समं फलं॥
३ परेशात् प्राप्यवित्तानि पुत्त्रवित्तानि पश्य हि।
फलं गर्भस्य तेनैव दीयते पारितोषिकं॥
४ यथा वीरकरे वाणा युवजाताः सुतास्तथा॥
५ तैः शरै र्यस्य तूणीरः पूर्णो धन्यः स मानवः।
तेऽरिभिर्विवदिष्यन्ते लज्जामप्राप्य गोपुरे॥

---

१२८ अष्टविंशतिशततमं गीतं।

परमेश्वराश्रितानां लोकानां सुखस्य वर्णनं।

यात्रागीतं।

१ परमेश्वरतो भीत्वा गमनं तस्य वर्त्मसु।
समाचरति यः कश्चित् धन्य एव स मानवः॥
२ त्वं कृतस्य स्वहस्ताभ्यां कर्म्मणो भोक्ष्यसे फलं।
भविष्यसि च धन्यस्त्वं भविता तव मङ्गलं॥
३ त्वत्पत्नी गेहमध्यस्था सफला गोस्तनीलता।
त्वत्सुता जितशाखाश्च भोजनासनवेष्टकाः॥
४ नरः परेश्वराद् भीतः पश्याप्नोतीत्थमाशिषं॥
५ प्रदास्यत्याशिषं तुभ्यं सियोनस्थः परेश्वरः।
त्वं यावज्जीवनं क्षेमं वीक्ष्यसे यिरूशालमः॥
६ वीक्ष्यसे स्वीयपौत्त्रांश्चेस्रायेलि वर्त्ततां शुभं॥

---

१२९ ऊनत्रिंशच्छततमं गीतं।

उपद्रावि लोकानां विरुद्धं विलपनं प्रार्थनञ्च।

यात्रागीतं।

१ लोका आयौवनादेव बहुशो मामपीडयन्।
इस्रायेलधुना वाक्यम् एतदर्हति भाषितुं॥
२ लोका आयौवनादेव बहुशो मामपीडयन्।

तथापि मां पराजेतुं ते न शेकुः कदाचन॥
लाङ्गलं चालयन्तश्च मत्पृष्ठे लाङ्गलग्रहाः। ३
सुदीर्घा व्यदधुस्तत्र स्वीयलाङ्गलपद्धतीः॥
धार्म्मिकः परमेशोऽस्ति रज्जूः सोऽच्छिनत्त पापिनां॥ ४
सीयोनो द्वेषिणः सर्व्वे पश्चाद् यास्यन्ति लज्जिताः॥ ५
यत् तृणं गेहपृष्ठस्थं शुष्यत्युत्पाटनात् पुरा। ६
सकलास्ते भविष्यन्ति तुल्यास्तेन तृणेन हि॥
शस्यच्छेत्ता न पाणौ तत् न क्रोडे वाहकोऽर्पयेत्॥ ७
आशीर्व्वादः परेशस्य युष्माभिः सह वर्त्ततां। ८
वयं नाम्ना परेशस्य युष्मभ्यं दद्म आशिषं।
इति वाक्यञ्च तद् दृष्ट्वा पथिकै र्नहि गद्यते॥

---

१३० त्रिंशच्छततमं गीतं।

परमेश्वरे प्रत्याशा।

यात्रागीतं।

अहं गम्भीरतोये त्वाम् आह्वयामि परेश्वर॥ १
हे प्रभो मम रावं त्वम् आकर्णयितुमर्हसि। २
मदीयकातरोक्तौ हि त्वया श्रोत्रं निधीयतां॥
प्रभो त्वं चेत् स्मरे र्दोषान् तर्हि कः स्थास्यति प्रभो॥ ३
नरा यद् बिभ्यति त्वत्तस्तत् क्षमा विद्यते त्वयि॥ ४
परमेशं प्रतीक्षेऽहं मन्मनस्तं प्रतीक्षते। ५
वचने गदिते तेन विश्वासञ्च करोम्यहं॥
आकाङ्क्षन्ति प्रभातं ये प्रभाताकाङ्क्षिरक्षकाः। ६
समाकाङ्क्षति तेभ्योऽपि मामकीनमनः प्रभुं॥
इस्रायेलीयवंशस्तु परमेशं प्रतीक्षतां। ७
यस्मात् परेश्वरे संस्था कृपा पूर्णा च निष्कृतिः॥
निष्कृतिं सर्व्वदोषात् स इस्रायेलो विधास्यति॥ ८

---

१३१ एकत्रिंशच्छततमं गीतं।

नम्रताया वर्णनं।

दायूदा कृतं यात्रागीतं।

१ प्रभो न गर्व्वि चित्तं मे नाहमुन्नतलोचनः।
नैवाहं व्याप्रिये कार्य्ये गुरौ मत्तो महाद्भुते॥
२ पश्य शान्तिक्षमायुक्तं मयाकारि निजं मनः।
स्वीयमातु र्वशीभूतः त्यक्तस्तन्यः शिशु र्यथा।
मन्मनो मद्वशीभूतं त्यक्तस्तन्यः शिशु र्यथा॥
३ इस्रायेल् प्रभुमाकाङ्क्षेद् अद्यैवारभ्य सर्व्वदा॥

---

१३२ द्वात्रिंशच्छततमं गीतं।

१ परमेश्वरस्य सेवायां दायूद उद्योगः प्रार्थना च ११ तं प्रतीश्वरस्य प्रतिज्ञा च।

यात्रागीतं।

१ परेश स्मर दायूदं सर्व्वं तस्य च सङ्कटं॥
२ परमेश्वरमुद्दिश्य शपथं सोऽकरोदिमं।
वचः प्रत्यश्रृणोच्चेदं याकूबो बलदायिने॥
३ वासस्थानं परेशाय यावन्नासाद्यते मया।
यावन्न लभ्यते वेश्म याकूबो बलदायिने॥
४ मया तावत् स्वगेहस्य वासो नैव प्रवेक्ष्यते।
शयनार्थं स्वखट्वापि न समारोक्ष्यते मया॥
५ न चानुमंस्यते निद्रा स्वीयलोचनयो र्मया।
न नेत्रच्छदयुग्मस्य स्वप्नार्थं वा निमीलनं॥
६ इफ्रायायां वयं पश्य प्राप्तास्तस्या जनश्रुतिं।
उद्देशं लब्धवन्तस्तु यियारीमीयप्रान्तरे॥
७ आगच्छत वयं तस्य प्रविशाम निवेशनं।
तदीयपादपीठे च प्रणामं करवामहै॥
८ हे परेश समुत्थाय स्वविश्रामस्थलं व्रज।
स्वीयमञ्जूषया सार्द्धं महाशक्तिविशिष्टया॥
९ त्वदीययाजकै र्धर्म्मो वासोवत् परिधीयतां।

पुण्यवन्तश्च लोकास्ते कुर्व्वन्तूच्चै र्जयध्वनिं॥
स्वीयदासस्य दायूदोऽनुरोधादवधीयतां। १०
त्वयं स्वेनाभिषिक्तं त्वं न कुरुष्व पराङ्मुखं॥
परमेशोऽन्यथा यस्य न करिष्यति कर्हिचित्। ११
तादृशं शपथं सत्यं कृत्वा दायूदमब्रवीत्।
तनुजं ते करिष्यामि त्वत्सिंहासनसंस्थितं॥
मम यो नियमो ये च प्रबोधा ज्ञापिता मया। १२
तेषाञ्चेत् पालनं कुर्य्युस्तावकीनतनूद्भवाः।
तेषामप्यात्मजास्तर्हि भाविकाले निरन्तरं।
भविष्यन्ति सुखासीना राजसिंहासने तव॥
यतो हेतोः सियोनद्रिं वृतवान् परमेश्वरः। १३
तमेव स्वीयवासार्थं सोऽभिकाङ्क्षितवान् स्वयं॥
तेनोक्तम् एतदेवास्ति मद्विश्रामस्थलं सदा। १४
अत्र स्थाने निवत्स्यामीदं मह्यं रोचते यतः॥
एतत्स्थानीयभक्ष्याय प्रदास्याम्यहमाशिषं। १५
तर्पयिष्यामि चान्नेन तत्रत्यान् दुर्गतान् नरान्॥
परित्राणेन तत्रत्यान् भूषयिष्यामि याजकान्। १६
तत्रत्याः पुण्यवन्तश्च करिष्यन्ति जयध्वनिं॥
तत्र शृङ्गश्च दायूदो मया संवर्धयिष्यते। १७
नराय स्वाभिषिक्ताय दीपश्चासादयिष्यते॥
लज्जया द्वेषिणस्तस्य वेष्टयिष्यामि वस्त्रवत्। १८
तस्य मूर्द्ध्नि किरीटस्य शोभा राजिष्यते ध्रुवं॥

---

१३३ त्रित्रिंशदुत्तरशततमं गीतं।

ऐक्यस्य श्रेष्ठत्वं।

दायूदा कृतं यात्रागीतं।

भ्रातॄणां पश्य किं भद्रः किं रम्यो वास ऐक्यतः॥ १
तुल्यो मन्ये स संवासस्तेन तैलेन साधुना। २
हारोणस्य वराङ्गाद् यत् श्मश्रु यावद् अवातरत्।
श्मश्रुतो यच्च वस्त्राणां प्रान्तं यावदवातरत्॥

२ सदृशो वा स संवासो हर्म्म्याणामस्य वारिणा।
सियोनाख्यगिरिष्वेव पतनं यस्य जायते।
तत्र यस्मान्नियुक्ताशीः प्रभुनानन्तजीवनं॥

१३४ चतुस्त्रिंशच्छततमं गीतं।

परमेश्वरस्य प्रशंसार्थम् आश्वासः।

यात्रागीतं।

१ ह परेशस्य प्रासादे रात्रौ रात्रावुपस्थिताः।
दासाः परेशितुः सर्व्वे धन्यं ब्रूत परेश्वरं॥
२ धर्म्मधाम्न्यूर्द्धहस्ताश्च धन्यं ब्रूत परेश्वरं॥
३ धन्यवादञ्च युष्माकं हे प्रजाः स करिष्यति।
परमेशः सियोनस्थो निर्म्माता स्वर्गमर्त्त्ययोः॥

१३५ पञ्चत्रिंशच्छततमं गीतं।

अनुग्रहार्थं परमेश्वरस्य प्रशंसनं प्रतिमानाम् असारत्वञ्च।

१ प्रशंसा परमेशस्य युष्माभिः सम्यकीर्त्त्यतां।
स्तुत नाम परेशस्य स्तुत दासाः परेशितुः॥
२ उपतिष्ठथ ये यूयं परमेशस्य मन्दिरे।
अस्मदीयेश्वरस्यैव प्रासादस्याङ्गनेषु च॥
३ यूयं परेश्वरं स्तुध्वं परेशो यत उत्तमः।
यूयं गायत तन्नाम यस्मात् तद्धि मनोहरं॥
४ परेशेन वृतो याकूब् इस्रायेल् च स्वरत्नवत्॥
५ यस्मादहमिदं जाने महानस्मत्परेश्वरः।
अस्माकञ्च प्रभुः श्रेष्ठः कृत्स्नदेवगणादपि॥
६ स्वर्गमर्त्त्यसमुद्रेष्वगाधेष्वप्यखिलेषु च।
यत् किञ्चिद् रोचते तस्मै तत् करोति परेश्वरः॥
७ तेनैवोत्पाद्यते मह्याः प्रान्ततो वाष्पसङ्ग्रहः।
तथा सौदामिनी तेन क्रियते वृष्टिदायिनी।

वायु निःसार्य्यते तेन स्वभाण्डागारमध्यतः ॥
मिसर्देशे ऽग्रजान् नृणां पशूनाञ्च जघान सः ॥ ८
मध्ये तव मिसर्देश चिह्नानि चाद्भुताः क्रियाः। ९
फिरौणं प्रापयामास सर्व्वांस्तत्सेवकांश्च सः ॥
बहुसङ्ख्यकजातीश्च पराजिग्ये रणेन सः। १०
मारयामास राज्ञश्च महाशक्तिसमन्वितान् ॥
इमोरीयमनुष्याणां सीहोनाख्यं नराधिपं। ११
ओगनामविशिष्टञ्च वाशनस्य महीपतिं।
सर्व्वान् किनानदेशस्य पार्थिवान् स व्यनाशयत् ॥
स तेषां सर्व्वभूमिञ्च वितताराधिकारवत्। १२
स्वीयप्रजागणायैवेस्रायेले स्वाधिकारवत् ॥
सर्व्वकाले भवेत् स्थायि तव नाम परेश्वर। १३
स्थिरा शेषयुगं यावत् परमेश तव स्मृतिः ॥
यतो विचारयिष्यन्ते परेशेन निजाः प्रजाः। १४
प्रदर्शयिष्यते तेन दया स्वसेवकान् प्रति ॥
भिन्नजातीयलोकानां यावन्तो देवविग्रहाः। १५
रौप्यस्वर्णमयास्ते हि मर्त्त्यहस्तै र्विनिर्म्मिताः ॥
सवक्त्रास्ते न भाषन्ते न पश्यन्ति सलोचनाः ॥ १६
सकर्णाश्च न शृण्वन्ति नास्ति तेषां मुखे ऽनिलः ॥ १७
तत्समाः कारवस्तेषां सर्व्वे तांश्चाश्रिता जनाः ॥ १८
इस्रायेलन्वया यूयं धन्यं ब्रूत परेश्वरं। १९
हे हारोणान्वया यूयं धन्यं ब्रूत परेश्वरं ॥
हे लेविवंशजा यूयं धन्यं ब्रूत परेश्वरं। २०
हे परेशार्च्चका यूयं धन्यं ब्रूत परेश्वरं ॥
परेशं स्तुत सीयोनि यिरूशालमवासिनं। २१
प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां ॥

---

१३६ षट्त्रिंशच्छततमं गीतं।

नित्यकारुण्यहेतोः परमेश्वरस्य प्रशंसा।

यूयं परेश्वरं स्तुध्वं यतो हेतोः स उत्तमः। १

यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
२ यूयं तमेव विस्तुध्वम् ईश्वराणामधीश्वरं।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
३ यूयं तमेव विस्तुध्वं प्रभूनां परमं प्रभुं।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
४ यूयं स्तुताद्वितीयं तम् आश्चर्य्यकर्म्मकारिणं।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
५ सुविवेचनया तेन निर्म्ममे व्योममण्डलं।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
६ तेन विस्तारयाञ्चक्रे तोयानामुपरि क्षितिः।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
७ निर्म्ममाते च तेनैव द्वे महाज्योतिषी दिवि।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
८ दिवसस्याधिकारित्वे नियुक्तोऽसौ दिवाकरः।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
९ निशाराज्ये नियुक्तश्च सनक्षत्रो निशापतिः।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
१० मिसर्देशीयलोकानाम् अग्रजास्तेन जघ्निरे।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
११ इस्रायेलन्वयं तेषां मध्यतश्चोद्दधार सः।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
१२ बलयुक्तेन हस्तेन विस्तृतेन च बाहुना।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
१३ तथा सूफार्णवस्तेन द्विखण्डीकृत्य चिच्छिदे।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
१४ तस्य मध्येन चेस्रायेल् तदानीं तेन तारितः।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
१५ सूफाम्भोधौ तु निक्षिप्तः फिरौन् तस्य बलानि च।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
१६ मरुस्थानस्य मध्येन स निनाय निजाः प्रजाः।
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥

सुमहैश्वर्य्ययुक्तांश्च भूपतीन् आजघान सः। १७
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
मारयामास राज्ञश्च महाविक्रमसंयुतान्। १८
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
इमोरीयमनुष्याणां सीहोनाख्यं नराधिपं। १९
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
ओगनामविशिष्टञ्च वाशनस्य महीपतिं। २०
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
स तेषां सर्व्वभूमिञ्च विततारधिकारवत्। २१
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
स्वीयदासगणस्यैवेस्रायेलः स्वाधिकारवत्। २२
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
अस्माकं पतितावस्थां दृष्ट्वा तेन स्मृता वयं। २३
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
अस्मदीयविपक्षेभ्यो वयं तेन समुद्धृताः। २४
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
यावन्तः प्राणिनः सन्ति सर्व्वेभ्योऽन्नं ददाति सः। २५
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥
स्वर्गवासिन ईशस्य युष्माभिः क्रियतां स्तवः। २६
यस्मादनन्तकालेषु करुणा तस्य सुस्थिरा॥

---

१३७ सप्तत्रिंशच्छततमं गीतं।

१ वाबिल्देशे यिहूदीयानां दुःखानि ७ इदोमो वाबिलस्य दण्डे भविष्यद्वाक्यं।

वाबिलीयस्रवन्तीनां तीरेषूपाविशाम हि। १
अकुर्म्म क्रन्दनञ्चापि सीयोनः स्मरणाद् वयं॥
तत्र चाडवृक्षेषूदबध्नीम स्ववल्लकीः॥ २
धर्त्तारो नो यतस्तत्र गानमस्मान् ययाचिरे। ३
ये चास्मान् वन्दिनोऽकार्षुस्ते ऽस्मान् हर्षं ययाचिरे।
यूयं गायत सीयोनो गीतं किञ्चन नः कृते॥
विदेशे तु कथं गीतं प्रगास्यामः परेशितुः॥ ४

५ यिरूशालम् अहं चेत् त्वां विस्मरेयं कदाचन।
सदाहं विस्मरेत् तर्हि मामको दक्षिणः करः॥
६ अहं चेन्न स्मरेयं त्वां परमानन्दतश्च मे।
चेत् त्वय्येव यिरूशालम् न प्रीयेयाधिकं सदा।
मदीया रसना तर्हि सज्जतां मम तालुनि॥
७ इदोमीयमनुष्याणां दण्डार्थं हे परेश्वर।
त्वं यिरूशालमः शोचम् अन्तिमं दिवसं स्मर।
उच्छिन्तामूलमुच्छिन्तेमां वाचं ते ऽगदंस्तदा॥
८ हे नियुक्ते विनाशाय बाबिलाख्ये नृपात्मजे।
अस्मान् प्रति त्वयाचारो यादृशो ऽकारि तादृशं।
फलं दास्यति यस्तुभ्यं स हि धन्यो भविष्यति॥
९ यश्च हस्तेन सङ्गृह्य स्तन्यपायिशिशूंस्तव।
बलात् क्षेप्स्यति पाषाणे सोऽपि धन्यो भविष्यति॥

---

१३८ अष्टत्रिंशच्छततमं गीतं।

दयासत्यतयोः कृते परमेश्वरस्य प्रशंसनं।

दायूदो गीतं।

१ सर्व्वान्तःकरणेनाहं प्रकरिष्ये तव स्तवं।
देवतानां समक्षञ्च प्रगास्यामि गुणांस्तव॥
२ प्रणामञ्च करिष्येऽहं पूतं ते मन्दिरं प्रति।
दयासत्यतयो र्हेतोः संस्तोष्ये तव नाम च।
यस्मात् स्वीयमहानाम्नः श्रेष्ठाकारि स्ववाक् त्वया॥
३ ममाह्वानदिने मह्यम् उत्तरं त्वं प्रदत्तवान्।
दत्तवान् बलवन्तञ्च बलेनान्तरिकेण मां॥
४ निर्गतानि त्वदीयास्यात् वचनानि निशम्य तु।
पृथिवीस्था नृपाः सर्व्वे त्वां स्तोष्यन्ति परेश्वर॥
५ प्रगास्यन्ति च गीतानि परमेशस्य वर्त्मसु।
यतो हेतोः परेशस्य विद्यते गौरवं महत्॥
६ उन्नतः परमेशः स नम्रम् आलोकते नरं।

दूरस्थश्च विजानाति मानवं गर्व्वसंयुतं॥
क्लेशमध्येऽपि गच्छन्तं मां त्वं सञ्जीवयिष्यसि। ७
कोपं विस्तीर्णहस्तश्च मे ऽरीणां वारयिष्यसि।
स्वीयदक्षिणहस्तेन माञ्च निस्तारयिष्यसि॥
मदीयकर्म्मणः सिद्धिं परमेशः करिष्यति। ८
करुणा तव नित्यास्ति स्वपाण्योः कर्म्म मा त्यज॥

---

१३९ ऊनचत्वारिंशच्छततमं गीतं।

१ परमेश्वरस्य सर्व्वज्ञता १२ दृष्टेराश्चर्य्यकर्म्मणां वर्णनं १९ पापिनः प्रति घृणा च।

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं।

त्वं परेशानुसन्धाय मां परिज्ञातवानसि॥ १
त्वं मदीयोपवेशञ्च मदुत्थानञ्च वेत्सि हि। २
मम मानससङ्कल्पं बुध्यसे च सुदूरतः॥
वेत्से मार्गशय्ये मे वेत्थ सर्व्वाश्च मे गतिं॥ ३
सर्व्वथा ज्ञायते यन्न त्वया हे परमेश्वर। ४
जिह्वायां मम पश्यैकं तादृग् वाक्यं न विद्यते॥
अग्रे पश्चाच्च मां रुद्धा हस्तं धत्से ममोपरि॥ ५
इदं मत्तो ऽद्भुतं ज्ञानं ममागम्यं समुच्छ्रयात्॥ ६
आत्मना तव न प्राप्यं किं स्थानं यास्यते मया। ७
तव प्रत्यक्षतो वा क्व करिष्येऽहं पलायनं॥
समारोक्ष्यामि किं स्वर्गं त्वन्तु तत्रैव विद्यसे। ८
पाताले किं शयिष्ये वा त्वं तत्रापि प्रकाशसे॥
धृत्वारुणस्य पक्षौ वा किं वत्स्याम्यब्धिसीमनि॥ ९
तत्र स्थाने ऽपि मन्नेता तव हस्तो भविष्यति। १०
तव दक्षिणपाणिश्च मां तत्रापि धरिष्यति॥
आच्छादयतु मां ध्वान्तमिति किं वक्ष्यते मया। ११
यामिनी मच्चतुर्द्दिक्षु दीप्तियुक्ता भविष्यति॥
अन्धकारो ऽपि ते साक्षाद् अन्धकारायते नहि। १२
दिनवद् रजनी भाति समे चास्तां तमोद्युती॥
मामकीनशरीरान्तस्तव हस्तगतं किल। १३

मातृगर्भस्य मध्ये ऽपि त्वयैवाहं समावृतः॥
१४ भीमाश्चर्य्या च मूर्त्ति र्मे त्वां विष्टोस्याम्यहं ततः।
आश्चर्य्यं सर्व्वकार्य्यं ते सम्यक् तद् वेत्ति मे मनः॥
१५ सृज्यमानस्य गुप्तञ्चोयमानस्य क्षितेरधः।
सारांशो मम नैवासीत् प्रच्छन्नो दृष्टिस्तव॥
१६ नयनाभ्यां त्वदीयाभ्यां पिण्डाकारो ऽहमीक्षितः।
अदृष्टानि त्वया पश्चात् सकलानि दिनानि मे।
त्वद्ग्रन्थे लिखितान्यासन् नैकस्मिन्नप्युपस्थिते॥
१७ सङ्कल्पास्तव हे ईश मम कीदृङ्महाधनं।
कृते तद्गणने कीदृग् बङ्गो सङ्ख्याभिजायते॥
१८ कथं तान् गणयिष्यामि सिकताभ्योऽपि तेऽधिकाः।
निद्रातोऽपि प्रबुद्धोऽहम् अवस्थास्ये त्वया सह॥
१९ हे ईश त्वं दुरात्मानं नरं किं न हनिष्यसि।
हे रक्तपातिनो यूयं दूरं मत्तोऽपगच्छत॥
२० दुष्टभावेन ते लोकास्त्वन्नामोच्चारयन्ति हि।
विपक्षास्तव भूत्वा च प्रयुञ्जन्त्यन्तताय तत्॥
२१ त्वदीयद्वेषिणोऽहं किं न प्रद्वेश्मि परेश्वर।
तावकीनविपक्षान् किं न मन्ये दुःसहानहं॥
२२ पूर्णद्वेषेण तान् द्वेश्मि तांश्च मन्ये स्ववैरिणः॥
२३ ईश मामनुसन्धाय परिजानीहि मे मनः।
कृत्वा मम परीक्षाञ्च सङ्कल्पान् मम निश्चिनु॥
२४ मयि ह्रोहगतिः काचित् अस्तीति त्वं विलोकय।
अमरत्वस्य मार्गे च गमय स्वयमेव मां॥

१४० चत्वारिंशच्छततमं गीतं।

रिपुभ्यो रक्षणाय प्रार्थना।

वाद्यनियन्त्रे दातव्यं दायूदो धर्म्मगीतं।

१ त्वं दुर्वृत्तनरेभ्यो मां हे परेश समुद्धर।
दौरात्म्याचारिलोकेभ्यः स्वयं मां परिरक्ष च॥
२ ते मनुष्याः स्वचित्तेषु चिन्तयन्ति कुकल्पनाः।

प्रत्यहं समरं कर्त्तुम् एकस्थाने मिलन्ति च॥
सुतीक्ष्णां निजजिह्वाञ्च द्विजिह्वा इव कुर्व्वते। ३
तेषाञ्चाधरयो मध्ये फणिनो विद्यते विषं॥ सेला॥
दुर्जनानां करेभ्यस्त्वं हे परेश्वर मामव। ४
दौरात्म्याचारिलोकेभ्यः स्वयं मां परिरक्ष च।
मदीयपादविक्षेपं बाधितुं चिन्तयन्ति ते॥
गर्व्विणो ऽस्थापयन् गुप्तं पाशं रज्जूश्च मत्कृते। ५
व्यस्तृण्वन् पथि जालञ्चोन्माथञ्चायोजयन् मम॥ सेला॥
परमेशन्त्वहं वच्मि त्वमेवासि मदीश्वरः। ६
मन्निवेदनरावं त्वं हे परेश्वर संशृणु॥
हे प्रभो परमेश त्वं मम त्राणकरं बलं। ७
समरस्य दिने त्वञ्च मस्तकाच्छादको मम॥
दुर्जनस्येप्सितं तस्मै न प्रदेहि परेश्वर। ८
नैव साधय तस्याशां न चेत् स गर्व्वमेष्यति॥ सेला॥
ये मां रुन्धन्ति तेषान्तु नृणां वाङ्मयकण्टकाः। ९
सर्व्वे राशीकरिष्यन्ते तेषां स्वीयेषु मूर्द्धसु॥
तेषामुपरि चाङ्गाराः समाचेष्यन्त उज्ज्वलाः। १०
सकला वह्निमध्ये च क्षेप्स्यन्ते ते नरास्त्वया।
तोयेषु पातयिष्यन्ते ऽगाधेषूत्थातुमक्षमाः॥
दुर्मुखो मानवो मह्यां न भविष्यति सुस्थिरः। ११
दौरात्म्याचारिणं क्लेशस्ताडयन् श्रावयिष्यति॥
अहं जाने विपन्नानां लोकानां धर्म्मनिश्चयः। १२
दरिद्राणां विचारश्च परेशेन करिष्यते॥
अवश्यं धार्म्मिकैः सर्व्वै र्नाम विष्टोष्यते तव। १३
त्वत्साक्षाच्च निवत्स्यन्ति मानवा ऋजुचेतसः॥

---

१४१ एकचत्वारिंशच्छततमं गीतं।

रिपुभ्यो रक्षार्थं प्रार्थना।

दायूदो धर्म्मगीतं।

हे परेशाह्वयामि त्वां त्वं त्वरस्व कृते मम। १
समाकर्णय रावञ्च त्वामेवाह्वयतो मम॥

२ क्रमतां तव साक्षाद्धि धूपवत् प्रार्थना मम।
सान्ध्यनैवेद्यतुल्यश्च मामकीनकृताञ्जलिः॥
३ त्वं परेश मदीयास्ये द्वारपालं नियोजय।
मदीयाधररूपौ च कपाटौ परिरक्षय॥
४ दुष्कर्म्माचारिभिः सार्द्धं दुष्टत्वाक्षक्षितुं विधीन्।
नानुजानीष्व दौर्जन्ये मच्चित्तस्य प्रवृत्ततां।
न वा सुखादुभक्ष्याणां भोजनं मम तैः सह॥
५ मां दण्डयतु धर्म्मिष्ठः मंस्ये कारुण्यमेव तत्।
मां भर्त्सयतु मंस्ये तत् तैलं मस्तकशोभकं।
मामकीनशिरस्तस्माद् असुखं न समाप्स्यति।
अमीषान्त्वपकारेभ्यः करिष्ये प्रार्थनामहं॥
६ दृष्ट्वा स्वशासकानान्तु शैलस्थाने निपातनं।
ते मद्वाचो ग्रहीष्यन्ति यतस्ताः सन्ति सुप्रियाः॥
७ कर्षणेन विदीर्णायां भूमौ वीजानि यादृशं।
तादृशैव विकीर्य्यन्ते गर्त्तास्ये कीकसानि नः॥
८ हे प्रभो परमेश त्वां पश्यतो लोचने मम।
त्वामेव श्रद्दधानोऽस्मि मत्प्राणान् न निपातय॥
९ मन्निमित्तं मनुष्यैस्तै र्य उन्मायो नियोजितः।
मां तस्मादेव संरक्ष पाशेभ्यश्च कुकर्म्मणां॥
१० युगपत् स्वीयजालेषु निपतिष्यन्ति दुर्ज्जनाः।
उत्तीर्णो ऽहं गमिष्यामि स्वमार्गेण निरापदं॥

---

१४२ द्वाचत्वारिंशच्छततमं गीतं।

विपत्तिकाले दायूदः प्रार्थना।

गह्वरमध्ये प्रार्थनाकारिणो दायूद उपदेशगीतं।

१ परमेश्वरमुद्दिश्याह्वानं कुर्व्वे ऽहमुच्चकैः।
परमेश्वरमुद्दिश्य प्रोच्चैः कुर्व्वे निवेदनं॥
२ तस्य साक्षात् स्वचित्तस्य चिन्ताश्चोदीरयाम्यहं।
तस्य साक्षात् स्वकीयञ्च सङ्कटं वर्णयाम्यहं॥
३ क्षोभते मामकीनात्मा त्वन्तु वेत्सि ममायनं।

मम गन्तव्यमार्गे ते गुप्तं पाशमयोजयन्॥
पश्य मद्दक्षिणे कोऽपि मदभिज्ञो न विद्यते। ४
अहं नष्टाश्रयः कोऽपि मत्प्राणार्थं न चेष्टते॥
त्वां परेश समुद्दिश्य रुदन्नित्यमहं ब्रुवे। ५
मामकीनाश्रयोऽसि त्वं मद्धनं जीवतां भुवि॥
गृहाण कातरोक्तिं मे यतोऽहं सुलघूकृतः। ६
बाधकेभ्यश्च मां रक्ष मत्तो यत् ते महाबलाः॥
रोधान्मोचय मत्प्राणान् त्वन्नाम स्तोष्यते ततः। ७
वेष्टिष्ये धार्म्मिकैश्चाहं मम क्षेमे त्वया कृते॥

---

१४३ त्रिचत्वारिंशच्छततमं गीतं।

रक्षार्थं परमेश्वरे प्रार्थना।

दायूदो धर्म्मगीतं।

हे प्रभो शृणु मे याञ्चां गृहाण प्रार्थनां मम। १
स्वीयसत्यत्वधर्म्माभ्यां देहि त्वं मह्यमुत्तरं॥
स्वीयदासेन सार्द्धं त्वं मा विचारसभां व्रज। २
यस्माद् यस्त्वत्पुरो धर्म्मी स कुत्रापि न जीवति॥
मत्प्राणान् बाधते द्वेषी भूमौ मे चूर्णयत्यसून्। ३
माञ्च वासयति ध्वान्ते प्राक्कालीयमृतानिव॥
क्षोभते मामकीनात्मा चित्तञ्चोद्विज्यतेऽन्तरे॥ ४
अनुस्मरामि प्राक्कालं सर्व्वा ध्यायामि ते क्रियाः। ५
साधितं तव हस्ताभ्यां कर्म्मानुचिन्तयामि च॥
त्वामेवाहं समुद्दिश्य विस्तृणोमि करौ मम। ६
त्वामाकाङ्क्षन्ति मत्प्राणाः सलिलाकाङ्क्षिभूमिवत्॥ सेला॥
हे परेश त्वया तूर्णं दीयतां मह्यमुत्तरं। ७
क्षीयते मामकीनात्मा मत्तो माच्छादयाननं।
तस्मिन्नाच्छादिते तुल्यो भविष्याम्यवटङ्गतैः॥
प्रातर्मां बोधय प्रीतिं यस्माद् विश्वसिमि त्वयि। ८
मार्गमादिश गन्तव्यं त्वां प्रत्यूर्द्धमगा अहं॥
द्वेषिभ्यो मम मां रक्ष त्वां परेशाहमाश्रये॥ ९

१० शाधि मां त्वदशाचारं त्वं यतो ऽसि मदीश्वरः।
सद्भावो यस्त्वदीयात्मा स भुवं मां नयेत् समां॥
११ स्वीयनामनिमित्तं मां त्वं परेश्वर जीवय।
स्वीयधर्म्मानुसारेण क्लेशादुद्धर मे मनः॥
१२ स्वीयकारुण्यहेतोश्च मद्विपक्षान् विनाशय।
छिन्धि मत्प्राणविद्वेष्टॄन् यतो ऽहं तव किङ्करः॥

---

१४४ चतुश्चत्वारिंशच्छततमं गीतं।

रक्षायै जयाय च परमेश्वरप्रशंसनं।

दायूदो गीतं।

१ परमेशो भवेद् धन्यः स मदीयशिलोच्चयः।
मत्पाण्योः शिक्षको युद्धे मेऽङ्गुलीनाञ्च विग्रहे॥
२ मम श्रीर्मम दुर्गञ्च प्रासादो रक्षकश्च मे।
चर्म्म विश्वासपात्रं मे मद्वशे च प्रजादमः॥
३ हे परेश मनुष्यः को यत् सोऽभिज्ञायते त्वया।
को वा मानवसन्तानो यत् त्वया स विगण्यते।
४ वाष्पतुल्यस्य मर्त्त्यस्य घस्राश्छायेव चञ्चलाः॥
५ हे परेश भवान् व्योम नमयित्वावरोहतु।
भूधरा भवता स्पृष्टा धूममूर्द्ध्वं क्षिपन्तु च॥
६ वज्रैर्विकिर मच्छत्रून् स्वशरैस्तान् विलुम्प च॥
७ हस्तावूर्द्ध्वात् प्रसार्य्य त्वं ममोद्धारं विधेहि हि।
संरक्षागाधतोयान्मां करेभ्यश्च विदेशिनां।
८ मिथ्यावादि मुखं येषां दक्षहस्तश्च वञ्चकः॥
९ ईश्वर त्वां समुद्दिश्य गीतं गास्यामि नूतनं॥
नेवला दशतारेण तुभ्यं गास्याम्यहं किल॥
१० राज्ञां त्राणविधाता त्वं त्वन्तु खड्गाद् विनाशकात्।
स्वीयदासस्य दायूद उद्धारं प्राकरोः स्वयं।
११ त्वं मामुद्धर तेषाञ्च रक्ष हस्ताद् विदेशिनां।
मिथ्यावादि मुखं येषां दक्षहस्तश्च वञ्चकः॥
१२ वृक्षवद् यौवनेऽस्माकं पुत्राः सन्तु सतेजसः।

कन्याः प्रासादकोणस्थैस्तक्षितप्रस्तरैः समाः॥
नानाविधधनैः पूर्णा अस्मत्कोषा भवन्तु च। १३
सन्तु रथ्यासु नो मेषाः सहस्राण्ययुतानि च।
धुर्वहाः सन्तु नो गावो भङ्गोऽपायश्च मा भवेत्। १४
अस्माकं सन्निवेशेषु विलापः श्रूयतां नहि।
धन्यास्ते मानवा येषाम् अवस्था तादृशी भवेत्। १५
धन्यास्ताश्च प्रजा यासाम् ईश्वरोऽस्ति परेश्वरः॥

---

१४५ पञ्चचत्वारिंशच्छततमं गीतं।

इब्रीयभाषया ककारादिगीतं तत्र शरणागतलोकेष्वीश्वरानुग्रहस्य वर्णनं।

दायूदा कृतं प्रशंसनं।

त्वामेवाहं नविष्यामि हे राजन् हे मदीश्वर। १
धन्यश्चानन्तकालेषु प्रवदिष्यामि नाम ते॥
त्वदीयधन्यवादश्च करिष्यामि दिने दिने। २
त्वदीयनामधेयञ्च प्रशंसिष्यामि सर्व्वदा॥
महान् अति प्रशंस्यश्च विद्यते परमेश्वरः। ३
महिमा तस्य केनापि सन्धातुं नहि शक्यते॥
स्तोष्यन्ते त्वत्क्रिया लोकैरापौरुषपरम्परं। ४
तावकीनप्रभुत्वस्य वर्णना च करिष्यते॥
महातेजोविशिष्टस्य त्वत्प्रतापस्य गौरवं। ५
तवाश्चर्य्यक्रियाश्चाधि ध्यानं कारिष्यते मया॥
त्वदीयभीमकार्य्याणां वक्ष्यन्ति विक्रमं जनाः। ६
तावकीनमहिम्नश्च करिष्ये वर्णनामहं॥
सौजन्यं बहुरूपं ते स्मृत्वा व्याख्यास्यते जनैः। ७
त्वदीयधर्म्महेतोश्च तैरुल्लासः करिष्यते॥
दयावान् अनुकम्पी च विद्यते परमेश्वरः। ८
क्रोधे विलम्बकारी स वरिष्ठोऽनुग्रहे तथा॥
सज्जनः सकलेष्वेव स्मृतः स परमेश्वरः। ९
वर्त्तते करुणा तस्य तत्सृष्टे सर्व्ववस्तुनि॥
तव सर्व्वाणि कर्म्माणि त्वां स्तुवन्ति परेश्वर। १०

साधवस्तव लोकाश्च धन्यं त्वां प्रवदन्ति हि ॥
११ तावकीनस्य राज्यस्य गौरवं कीर्त्तयन्ति ते।
तावकीनप्रभुत्वस्य वर्णनाञ्च प्रकुर्व्वते ॥
१२ ज्ञापयन्तो नृसन्तानान् तावकीनपराक्रमं।
महातेजोविशिष्टञ्च त्वद्राजत्वस्य गौरवं ॥
१३ तावकीनन्तु यद्राज्यं राज्यं तत् सर्व्वकालिकं।
स्थिरन्ते चाधिकारित्वम् आपौरुषपरम्परं ॥
१४ पतनोन्मुखलोकानाम् आलम्बो परमेश्वरः।
नतानामपि सर्व्वेषां नृणामुत्थापकश्च सः ॥
१५ सर्व्वेषां प्राणिनां दृष्टिस्त्वामालोक्य प्रतीक्षते।
उपयुक्ते च काले त्वं तेभ्यो भक्ष्यं प्रयच्छसि ॥
१६ त्वया मुक्तकरेणाशा पूर्य्यते सर्व्वजीविनां ॥
१७ स्वीयमार्गेषु सर्व्वेषु धार्म्मिकोऽस्ति परेश्वरः।
स्वीयकर्म्मसु सर्व्वेषु साधुशीलश्च स स्मृतः ॥
१८ परमेशार्थिनां नृणां समीपस्थः परेश्वरः।
सकलानां तदासन्ने सत्यप्रार्थनकारिणां ॥
१९ तस्माद् बिभ्यति ये तेषाम् अभीष्टं तेन साध्यते।
श्रुत्वा कातरशब्दञ्च तेषां त्राणं विधीयते ॥
२० परेशं प्रीयमाणानां रक्षकः परमेश्वरः।
दुर्जनानाञ्च सर्व्वेषां विनाशं विदधाति सः ॥
२१ प्रशंसां परमेशस्य मम भाषिष्यते मुखं।
सर्व्वप्राणी सदा तस्य पूतं नाम च वन्दतां ॥

---

१४६ षट्चत्वारिंशच्छततमं गीतं।

परमेश्वरस्य गुणकारणात् तस्य प्रशंसनं।

१ प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां।
प्रशंसां परमेशस्य कुरु त्वं हे मनो मम ॥
२ यावज्जीवं करिष्यामि प्रशंसां परमेशितुः।
प्राणधारणपर्य्यन्तं प्रगास्यामि मदीश्वरं ॥
३ विश्वासो नैव युष्माभि र्नरेन्द्रेषु विधीयतां।

न कस्मिंश्चिन्नृसन्ताने स यस्मात् त्रातुमक्षमः॥
गते तत्प्राणवायौ स याति मृण्मयतां पुनः। ४
तस्मिन्नेव दिने तस्य विप्रणश्यन्ति कल्पनाः॥
स धन्यो यस्य साहाय्यं कुर्य्याद् याकूब ईश्वरः। ५
प्रत्याशा स्थापिता येन स्वप्रभौ परमेश्वरे॥
स्वर्गमर्त्त्यसमुद्राणां तन्मध्ये यद्यदस्ति च। ६
तस्य सर्व्वस्य स स्रष्टा सर्व्वदा सत्यसेवकः॥
क्लिष्टानां धर्म्मनिर्णेता क्षुधितेभ्योऽन्नदायकः। ७
काराबद्धमनष्याणां मोचकोऽस्ति परेश्वरः॥
दर्शनेन्द्रियहीनेभ्यो नेत्रदाता परेश्वरः। ८
लोकानाम् आनतानाञ्चोत्थापकः परमेश्वरः।
धार्म्मिकेषु मनुष्येषु प्रेमकारी परेश्वरः॥
प्रवासकारिलोकानां रक्षकोऽस्ति परेश्वरः। ९
विधवास्तातहीनांश्च बालान् उपकरोति सः।
किन्तु दुर्वृत्तलोकानां गतिं स क्षोभयिष्यति॥
सर्व्वकालेषु राजत्वं परमेशः करिष्यति। १०
ईश्वरस्तव हे सीयोन् आपौरुषपरम्परं॥
प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां॥

---

१४७ सप्तचत्वारिंशच्छततमं गीतं।

परमेश्वरस्य कर्म्मकारणात् तस्य प्रशंसनं।

प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां। १
अस्मदीयेश्वरोद्देश्यं प्रगानं यत उत्तमं।
यतो हेतोः सुरम्यं तत् प्रशंसा च मनोहरा॥
क्रियते परमेशेन निर्म्मितिं यिरूशालमः। २
इस्रायेलो विकीर्णांश्च स सङ्गृह्णाति मानवान्॥
भग्नान्तःकरणानाञ्च लोकानां स चिकित्सकः। ३
स्वयं तेषां क्षतानाञ्च बन्धनं विदधाति सः॥
तारागणामपि या सङ्ख्या सा तेनैव निरूपिता। ४
नामान्यादाय तासां स एकैकामाह्वयत्यपि॥

५ महान् स प्रभुरस्माकं महाशक्तिसमन्वितः ।
परिमाणातिरिक्तास्ति तदीया सुविवेचना ॥
६ परमेश्वर एवास्ति नम्राणामुपकारकः ।
किन्तु दुर्वृत्तलोकानां भूमिं यावन्निपातकः ॥
७ परमेश्वरमुद्दिश्य यूयं स्तोत्रेण गायत ।
अस्मदीश्वरमुद्दिश्य गीतं गायत वीणया ॥
८ मेघैराकाशमाच्छाद्य भुवे तोयं ददाति सः ।
गिरीनाप्लाव्य तैरेव तृणान्युत्पादयत्यपि ॥
९ पशुभ्यः सकलेभ्यो हि भक्ष्यं तेन प्रदीयते ।
काकानां शावकेभ्योऽपि विक्रोशद्भ्यो जिघत्सया ॥
१० वाजिनो विक्रमे तस्य सन्तोषो जायते नहि ।
चरणावपि वीरस्य स हि नैवानुरुध्यते ॥
११ तस्माद् बिभ्यति ये लोकास्तान् परेशोऽनुरुध्यते ।
तद्दयां ये प्रतीक्षन्ते स तेष्वेव प्रतुष्यति ॥
१२ यिरूशालम् कुरुष्व त्वं परेशस्य प्रशंसनं ।
हे सियोन्नगरि त्वञ्च धन्यं ब्रूहि निजेश्वरं ॥
१३ सुदृढार्गलयुक्तानि त्वद्द्वाराणि करोति सः ।
त्वदन्तर्वासिपुत्रेभ्य आशिषञ्च ददाति सः ॥
१४ तावकीनञ्च सीमानं शान्तियुक्तं करोति सः ।
गोधूमैरुत्तमैश्च त्वां सन्तर्पयति स स्वयं ॥
१५ स्वकीया भारती तेन धरां प्रति प्रहीयते ।
अतीव द्रुतया गत्या तस्य वाणी प्रधावति ॥
१६ ऊर्णायुलोमवत् तेन हिमानी च प्रदीयते ।
तुषारीयकणास्तेन विकीर्य्यन्ते च भस्मवत् ॥
१७ प्रक्षिप्यन्ते तथा तेन हिमखण्डानि पिण्डवत् ।
स्थातुं तदीयशीतस्य सम्मुखे केन शक्यते ॥
१८ तेन स्वीयवचः प्रेष्य सकलं क्रियते द्रवं ।
स्ववायौ चालिते तेन सर्व्वं क्षरति तोयवत् ॥
१९ याकूबं निजवाक्यं स इस्रायेलं निजान् विधीन् ।
स्वकीयां राजनीतिञ्च परिज्ञापितवान् स्वयं ॥
२० कांश्चन भिन्नजातीयान् प्रतीत्थं नाचचार सः ।

तदीयां राजनीतिञ्च नैव जानन्ति ते जनाः ॥
प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां ॥

---

१४८ अष्टचत्वारिंशच्छततमं गीतं।

परमेश्वरस्य प्रशंसनाय स्थावरजङ्गमेषु विनीतिः।

प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां। १
स्तुध्वं परेश्वरं स्वर्गे स्तुध्वमुच्चस्थलेषु तं ॥
स्तुध्वं हे तस्य दूतास्तं स्तुध्वं हे तद्बलानि तं ॥ २
स्तुवाथां सूर्य्यचन्द्रौ तं स्तुध्वं दीप्ताण्युडूनि तं ॥ ३
स्तुध्वं तं हे दिवः प्रोच्चा द्योरूर्द्धस्थाम्बु तं स्तुहि ॥ ४
स्तूयतां सकलैरेतै र्नामधेयं परेशितुः। ५
यस्मादुच्चार्य्य तेनाज्ञां सृष्टिस्तेषां समापिता ॥
तेनैवानन्तकालार्थं तेषां संस्थापनं कृतं। ६
प्रदत्तश्च विधिस्तेभ्यो नातिगम्यः कथञ्चन ॥
स्तुध्वं परेश्वरं मर्त्त्ये तिमयोऽगाधसागराः ॥ ७
वह्निः शिला हिमं धूमो झञ्झा तद्वाक्यसाधिका। ८
गिरयः क्षुद्रशैलाश्च फलदा एरसद्रुमाः। ९
जन्तवः पशवः सर्व्वे कीटाः पतत्रिणः खगाः। १०
महीपालाः प्रजावर्गा अध्यक्षा देशशासकाः। ११
युवानश्च युवत्यश्च प्राचीना बालकास्तथा। १२
स्तूयतां सकलैरेतै र्नामधेयं परेशितुः। १३
यद्धेतोः केवलं तस्य नामधेयं समुन्नतं।
स्वर्गमर्त्त्यौ च शोभेते महता तस्य तेजसा ॥
स्वप्रजानां कृते तेन सृष्टं शृङ्गमुन्नतं ॥ १४
निजसाधुमनुष्याणां सर्व्वेषां स्तुतिभाजनं।
निजासन्नप्रजानाञ्चेस्रायेलीयन्टणां कृते ॥
प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां ॥

---

१४९ ऊनपञ्चाशच्छततमं गीतं।

जयकारणात् परमेश्वरस्य प्रशंसा।

१ प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां।
परमेश्वरमुद्दिश्य गीतं गायत नूतनं।
साधूनाञ्च सभामध्ये कुरुध्वं तत्प्रशंसनं॥
२ इस्रायेल् कुरुतां हर्षं स्वकीये सृष्टिकर्त्तरि।
सीयोनस्यात्मजाः सर्व्वे उल्लसन्तु स्वराजनि॥
३ तदीयनामधेयञ्च नर्त्तनेन स्तुवन्तु ते।
गानं मृदङ्गवीणाभ्यां तमुद्दिश्य च कुर्व्वतां॥
४ यतो हेतो र्निजान् लोकान् परमेशोऽनुरुध्यते।
विदधाति च नम्राणां परित्राणेन शोभनं॥
५ कुर्व्वतां साधवो लोका उल्लासं गौरवान्विताः।
स्वखट्टासु शयानाश्च हर्षनादं प्रकुर्व्वतां॥
६ धृत्वेशस्य स्तवान् कण्ठे द्विधारांश्च करैरसीन्।
७ प्रतीकारो ऽन्यजातीनां दण्डनञ्च विदेशिनां।
८ तदीयभूपतीनाञ्च शृङ्खलैरेव बन्धनं।
मुख्यानां लौहपाशैश्च रोधनं तैः करिष्यते॥
९ लिखिता च विचाराज्ञा तैस्त्वेत्थं साधयिष्यते।
प्रताप एष सर्व्वेषु तस्य साधुषु वर्त्तते॥
प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां॥

---

१५० पञ्चाशच्छततमं गीतं।

नानाप्रकारेण परमेश्वरस्य प्रशंसनाय विनीतिः।

१ प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां।
ईश्वरस्य प्रशंसैव क्रियतां धर्म्मधामनि।
प्रशंसा क्रियतां तस्य व्योम्नि तच्छक्तिसूचके॥
२ प्रशंसा क्रियतां तस्य स्वमहाकर्म्मणां कृते।

प्रशंसा क्रियतां तस्य स्वमहैश्वर्य्यकारणात्॥
प्रशंसा क्रियतां तस्य तूरीणां ध्वनिभिः सह। ३
प्रशंसा क्रियतां तस्य स्वनै र्नेवलवीणयोः॥
प्रशंसा क्रियतां तस्य मृदङ्गै र्नर्त्तनेन च। ४
प्रशंसा क्रियतां तस्य सुषिरेण ततेन च॥
प्रशंसा क्रियतां तस्य घनैः सुशब्दनादितैः। ५
प्रशंसा क्रियतां तस्य घनैरुत्सवसूचकैः॥
प्रशंसा परमेशस्य क्रियतां सर्व्वजीविभिः। ६
प्रशंसा परमेशस्य युष्माभिः सम्प्रकीर्त्त्यतां॥

सुलेमनो हितोपदेशः ।

१ अध्यायः ।

१ आभाषः ७ तत्त्वज्ञानस्य कथनं १० पापिलोकेभ्योऽवश्यं पृथग् भवितव्यता २० प्रज्ञायाः कथनं २४ प्रज्ञाया भर्त्सनकथनञ्च ।

१ इस्रायेलीयवंशस्य यो दायूदाख्यभूपतिः ।
कृतो हितोपदेशोऽयं तत्सुतेन सुलेमना ।
२ प्रज्ञां यच्छति शिक्षाञ्च बुद्धिवाचाञ्च बोधनं ॥
३ ददाति ज्ञानदां शिक्षां धर्म्मं नीतिं यथार्थतां ।
४ विद्यां यच्छति चाज्ञेभ्यो युवभ्यो ज्ञानपाटवे ॥
५ एनं श्रुत्वा नरो ज्ञानी पाण्डित्यं वर्द्धयिष्यति ।
बुद्धिमांश्च मनुष्योऽपि लप्स्यतेऽत्र सुमन्त्रणाः ॥
६ श्लोको वाणी च गूढार्था नराणाञ्च मनस्विनां ।
वाचः सूत्राणि चैतेषां सर्व्वेषां बोधमाप्स्यति ॥
७ परमेशाद्धि या भीतिः स प्रज्ञाया उपक्रमः ।
प्रज्ञां सदुपदेशञ्च तुच्छीकुर्व्वन्त्यबुद्धयः ॥
८ हे मत्पुत्त्र स्वतातस्य सूपदेशं निशामय ।
स्वकीयमातुरादेशो न परित्यज्यतां त्वया ॥
९ यस्माच्चार्व्वी शिरोमाला कण्ठभूषा च ते तव ॥
१० पापिषु लोभयत्सु त्वां मैवाङ्गीकुरु मत्सुत ॥
११ त्वां वदिष्यन्ति ते लोका अस्माभिः सार्द्धमेहि हि ।
नराणां रक्तपाताय स्थास्यामो निभृते वयं ।
विचेष्टिष्यामहे धर्त्तुं निष्कलङ्कान् अकारणं ॥
१२ पातालवद् ग्रसिष्यामो वयं जीवत एव तान् ।
अखण्डांस्तान् ग्रसिष्यामो गर्त्तावरोहिणो यथा ॥
१३ अत्युत्कृष्टानि वित्तानि परिलप्स्यामहे ततः ।
स्वगेहान् पूरयिष्यामो वस्तुभि र्लोठितै र्वयं ॥
१४ अस्माभिः सार्द्धमेव त्वं समानांशी भविष्यसि ।

अस्माकं सकलानाञ्च कोष एको भविष्यति ॥
मत्पुत्र त्वं न तैः सार्कं याहि तेन कुवर्त्मना । १५
त्वं तेषां मार्गतः स्वीयौ चरणौ च निवारय ॥
यतो हेतोरनिष्टाय तेषां पादा द्रवन्ति हि । १६
ते च शोणितपाताय भवन्ति द्रुतगामिनः ॥
परन्तु पक्षिणां साक्षाज्जालं विस्तार्य्यते वृथा ॥ १७
स्वीयशोणितपाताय गुप्तास्तिष्ठन्ति ते नराः । १८
स्वीयप्राणविनाशाय चेष्टन्ते व्याधवच्च ते ॥
अन्यायात् कृतलाभस्य धनिनस्तादृशी गतिः । १९
स्वीयस्वामिन एवासौ लाभः प्राणापहारकः ॥
वहिः प्रक्रोशति प्रज्ञा रथ्यासूच्चैश्च भाषते ॥ २०
जनताकीर्णहट्टेषु सा करोति महाध्वनिं । २१
पुरद्वारस्य मार्गे च गदति स्वीयभारतीं ॥
बालिशत्वे कियत्कालं यूयं तोक्ष्यथ बालिशाः । २२
निन्दायाञ्च कियत्कालं तुष्टिं यास्यथ निन्दकाः ।
हे निर्बोधाः कियत्कालं ज्ञानद्वेषं करिष्यथ ॥
यूयं मदीयवाग्दण्डं प्रति वर्त्तितुमर्हथ । २३
पश्चाहं व्याहरिष्यामि युष्मान् प्रति मतिं मम ।
युष्मान् संज्ञापयिष्यामि मामकीनवचांसि च ॥
मयाह्वाने कृते यूयं यद् आयातुमनिच्छवः । २४
मम विस्तृतहस्तस्य वाक्यं श्रोतुञ्च नैच्छत ॥
अवाज्ञासिष्ट साद्यन्तां सकलां मम मन्त्रणां । २५
मामकीनञ्च वाग्दण्डं ग्रहीतुं न समैच्छत ॥
तस्मान्मयापि युष्माकं दुर्दशायां हसिष्यते । २६
आशङ्कायाञ्च युष्माकं घटितायां कखिष्यते ॥
यदायास्यति युष्माकम् आशङ्का चक्रवातवत् । २७
झञ्झावच्च यदा युष्मान् उपस्थास्यति दुर्दशा ।
आयासः परितापश्च यदा युष्मान् उपैष्यतः ॥
तदा तैरहमाहूतः प्रदास्याम्युत्तरं नहि । २८
तैश्च मां यत्नतोऽन्विष्य]ममोद्देशो न लप्स्यते ॥
यतो ज्ञानमवज्ञाय निराकृत्य प्रभो भयं । २९

१० मन्त्रणा मम तैस्त्यक्ता वाग्दण्डश्च विगर्हितः॥
११ स्वाचारस्य फलं तस्मात् ते लौकैरुपभोक्ष्यते।
स्वकीयमन्त्रणाभिश्च तृप्तिस्तैः परिलप्स्यते॥
१२ यस्माद् बालिशलोकानां भ्रंशस्तान् निहनिष्यति।
विनङ्क्ष्यन्ति च निर्बोधाः स्वनिश्चिन्ततया किल॥
१३ यस्तु शृणोति मद्वाक्यं स निर्विघ्नं निवत्स्यति।
स चानिष्टभयान्मुक्तः स्वस्थचित्तो भविष्यति॥

---

२ द्वितीयोऽध्यायः।

१ प्रज्ञाद्वारा रक्षणं १० पापिभ्यो निस्तरणं २० सत्पथेन गमनञ्च।

१ हे मदीयात्मज त्वं चेद् गृह्णीया वचनानि मे।
मामकीननिदेशांश्चेद् गोपयेर्निजमानसे॥
२ प्रज्ञायां निदधीथाश्च स्वकीयश्रवणेन्द्रियं॥
३ त्वं चेद् विवेचनायाञ्च निजचित्तं प्रवर्त्तयेः।
समाक्रयेश्च चेद् बुद्धिम् उच्चकैश्च विवेचनां॥
४ ताञ्च रौप्यवद् अन्विष्येर्मार्गयेर्गुप्तरत्नवत्॥
५ परमेश्वरभक्तिर्या त्वया सा तर्हि भोत्स्यते।
तदानीमीश्वरस्यैव ज्ञानञ्चावाप्स्यते त्वया॥
६ प्रज्ञादाता यतो हेतोः स्वयमस्ति परेश्वरः।
तस्यैव वक्त्रतो ज्ञानं सुबुद्धिश्च प्रवर्त्तते॥
७ लोकानामृजुचित्तानां कुशलं सञ्चिनोति सः।
सिद्धाचारमनुष्याणां फलकोऽस्ति स एव च॥
८ तेनैव न्यायमार्गाणां क्रियते परिपालनं।
स्वीयसाधुमनुष्याणां गतिस्तेन च रक्ष्यते॥
९ ततो हेतोस्त्वया तर्हि धर्म्मो न्यायश्च भोत्स्यते।
ज्ञास्यते च त्वया सर्व्वं सारल्यादि शुभायनं॥
१० तवान्तःकरणं प्रज्ञा यस्मिन् काले प्रवेक्ष्यति।
मनसे तावकीनाय ज्ञानं रोचिष्यते यदा॥
११ परिणामप्रदर्शित्वं तदा त्वां पालयिष्यति।
सुविवेचनया सम्यक् त्वञ्च रक्षिष्यसे तदा॥

उद्धृतः पापिनो मार्गाद् वक्रभाषिनरादपि ॥ १२
गन्तुं तामसरथ्यासु त्यक्तसारल्यमार्गतः ॥ १३
असत्कर्म्मणि सन्तुष्टात् कुकल्पैश्च प्रफुल्लतः ॥ १४
वक्रतारूपमार्गाच्च जिह्मवर्त्मनिगामिनः ॥ १५
उद्धृतः परदारेभ्यः स्निग्धवाचः परस्त्रियः ॥ १६
या सन्त्यक्तवती स्वीयं मित्रं यौवनकालिकं । १७
स्वकीयेश्वरसम्बन्धिनियमं या च विस्मृता ॥
यतो हेतो गृहं तस्या नमति प्रलयं प्रति । १८
तस्याः सर्व्वाणि वर्त्मानि प्रेतलोकं प्रयान्ति च ॥
गत्वा तस्याः समीपन्तु नैव कोऽपि निवर्त्तते । १९
नैव जीवनवर्त्मानि वाबाप्नोति कदाचन ॥
तस्माद् भद्रमनुष्याणां पदव्यां त्वं व्रजिष्यसि ॥ २०
धार्म्मिकाणाञ्च लोकानां पन्थानं पालयिष्यसि ॥
मानवाः सरलात्मानः सन्निवत्स्यन्ति नीवृति । २१
सिद्धाचारमनुष्याश्च तत्र स्थास्यन्ति सुस्थिराः ॥
देशस्य मध्यतः सर्व्व उच्छेत्स्यन्ते च दुर्जनाः । २२
सर्व्वे चोत्पाटयिष्यन्ते तस्य मध्यात् प्रवञ्चकाः ॥

---

३ तृतीयोऽध्यायः ।

१ आज्ञां पालयितुं विनयः ५ परमेश्वरे विश्वसितुं विनयः ७ ईश्वरं सेवितुं विनयः ११ ईश्वरस्य शास्तिं स्वीकर्त्तुं विनयः १३ ज्ञानेन लाभः २१ ज्ञानस्य फलं २७ ज्ञानोपदेशश्च ।

हे मत्पुत्त्र ममादेशं त्वं कदापि न विस्मरेः । १
तवान्तःकरणं सर्व्वान् मद्विधीन् परिरक्षतु ॥
यस्मात् तवायुषो दैर्घ्यं जीवनस्य च वत्सरान् । २
शान्तिञ्च वर्द्धयित्वा ते तुभ्यं दास्यन्ति निश्चितं ॥
करुणासत्यते यत् त्वां न जहीतां कदाचन । ३
तद् बधान स्वकण्ठे ते चित्तपत्त्रे च ते लिख ॥
तत् कृत्वा परमेशस्य मनुष्याणाञ्च सम्मुखे । ४
त्वयानुग्रह उत्कृष्टं कुशलञ्चोपलप्स्यसे ॥

५ सर्व्वान्तःकरणेनैव त्वं श्रद्धत्स्व परेश्वरं ।
मा कुर्व्वीथा निजां बुद्धिं तावकीनावलम्बनं ॥
६ तव सर्व्वगतिष्वेव स प्रतिस्मर्य्यतां त्वया ।
तदा स तव वर्त्मानि सरलाणि करिष्यति ॥
७ मा भवे र्ज्ञानसम्पन्नः स्वीयदृष्टिविचारतः ।
परमेश्वरतो भीतो भवेः पापात् पराङ्मुखः ॥
८ भविता वपुषः स्वास्थ्यम् आर्द्रतास्थ्नाञ्च तत् तव ॥
९ त्वं स्ववित्तस्य दानेन सम्मन्यस्व परेश्वरं ।
आदिजातेन सर्व्वस्य तवायस्य फलेन च ॥
१० वसुभिः पूरयिष्यन्ते कोषागाराणि ते तदा ।
गोस्तनीरसभाण्डानि भविष्यन्त्याप्लुतानि च ॥
११ हे मत्पुत्र परेशस्य शास्तिं त्वं न निराकुरु ।
तेन सम्भर्त्सितश्चापि न परिक्लाम्य कर्हिचित् ॥
१२ यस्माद् यः परमेशस्य प्रियः स तेन भर्त्स्यते ।
जनकेन यथा पुत्रो मनःसन्तोषकारकः ॥
१३ धन्यं ब्रवीमि तं मर्त्त्यं प्रज्ञा येनाधिगम्यते ।
धन्यमेव मनुष्यं तं बुद्धिर्येनोपलभ्यते ॥
१४ यस्माद् रजतवाणिज्यात् तस्या वाणिज्यमुत्तमं ।
जातरूप्यस्य लाभाच्च तस्या लाभोऽतिरिच्यते ॥
१५ मूल्यमस्ति महत् तस्या मुक्तानामपि मूल्यतः ।
तव हर्षदवस्तूनि तत्तुल्यानि न सन्ति हि ।
१६ दीर्घायु र्विद्यते पश्य तस्याः सव्येतरे करे ।
ऐश्वर्य्यं गौरवञ्चापि तस्या वामकरे स्थितं ॥
१७ तस्या यावन्ति वर्त्मानि रम्यवर्त्मानि तानि हि ।
पन्थानः सकलास्तस्या भवन्ति शान्तिदायकाः ॥
१८ ये तां धरन्ति तेषां सा भवत्यमृतपादपः ।
यस्तामालम्बते सोऽपि नरो धन्यो भविष्यति ॥
१९ प्रज्ञया स्थापयामास धरामूलं परेश्वरः ।
सुविवेचनया तेन निर्म्मितं व्योममण्डलं ॥
२० तस्य ज्ञानेन गम्भीराश्चख्निरे च जलाशयाः ।
आकाशमण्डलाच्चापि निशाजलं प्रवृष्यते ॥

हे मत्पुत्र स्वचक्षुर्भ्यां नानुज्ञायापसर्पणं। ११
परिणामप्रदर्शित्वं कुशलत्वाभिरक्ष हि॥
मनसे तावकीनाय जीवनं ते प्रदास्यतः। १२
त्वदीयकण्ठदेशस्य भूषणे च भविष्यतः॥
तदानीं निजमार्गेण त्वं व्रजिष्यसि निर्भयं। १३
नैव त्वत्पादयो बाधा गमने च भविष्यति॥
शयानस्य तव त्रासो न भविष्यति कश्चन। १४
त्वं प्रस्वप्स्यसि निद्रा च सुखदा ते भविष्यति॥
नैव प्राप्स्यसि शङ्कां त्वं भये ऽकस्मादुपस्थिते। १५
न वा दुष्टमनुष्याणां सर्व्वनाशे समागते॥
परमेशो यतो हेतोराश्रयस्ते भविष्यति। १६
उन्माथात् तव पादञ्च स संरक्षिष्यति स्वयं॥
हिताधिकारिलोकात् त्वं नोपसंहर तद्धितं। १७
यत् कर्त्तुं तावकीनेन पाणियुग्मेन शक्यते॥
याहि त्वं पुनरायाहि श्वो दास्यामीति वागपि। १८
त्वया हस्तगतार्थेन स्वमित्राय न कथ्यतां॥
एकस्थान त्वया सार्द्धं येन निर्भयमुष्यते। १९
अहितं तस्य मित्रस्य त्वं कदापि न चिन्तय॥
अहितं तव यो लोको न करोति कथञ्चन। ३०
विवादं तेन सार्द्धं त्वं मा कुर्व्वीथा अकारणं॥
दौरात्म्याचारिलोकाय त्वं मैवेर्ष्य कदाचन। ३१
मैव मन्यस्व गन्तव्यं तस्य किञ्चन वर्त्म वा॥
वक्रभावं नरं यस्माद् गर्हते परमेश्वरः। ३२
सरलाचारलोकैस्तु सार्द्धं तस्यास्ति मित्रता॥
अभिशापः परेशस्य वर्त्तते पापिनो गृहे। ३३
आशिषं धार्म्मिकाणाञ्च वासाय प्रददाति सः॥
उपहासकलोकानाम् उपहासक एव सः। ३४
किन्तु तेनैव नम्रेभ्यः प्रसादाद् दीयते वरः॥
सम्भ्रमो ज्ञानिनां दायो मूढानाञ्चोन्नतिस्त्रपा॥ ३५

---

४ चतुर्थोऽध्यायः।

१ सुलेमनो विनयवाक्यं १० तद्वाक्यस्य फलं १४ पापिभ्यः पृथग् भवितुं विनयः २० सावधानो भवितुं विनयस्य।

१ हे वत्साः पितुरादेशो युष्माभि र्विनिशम्यतां।
आबोद्धुं सुविचारस्य स्वीयश्रोत्रं निधीयतां॥
२ यतोऽहमुत्तमां शिक्षां युष्मभ्यं दातुमुद्यतः।
युष्माभिस्तोपदेशो मे न त्यक्तव्यः कदाचन॥
३ अहमप्यभवं यस्मात् निजतातस्य नन्दनः।
सुकुमारो ऽद्वितीयस्य स्वमातु र्दृष्टिगोचरे॥
४ स तु मां शिक्षयन्नाह मद्वाचो मनसा धर।
परिपालय चाज्ञा मे जीवनं लप्स्यसे तदा॥
५ परिक्रीणीष्व विद्वत्तां परिक्रीणीष्व शेमुषीं।
मैव विस्मर मद्वाचो मा भूस्ताभ्यः पराङ्मुखः॥
६ त्वया मा त्यज्यतां प्रज्ञा तदा सा त्वामविष्यति।
प्रेमार्णां कुरु तस्याश्च त्वां रक्षिष्यति सा तदा॥
७ श्रेयसी सर्व्वतः प्रज्ञा तस्मात् प्रज्ञामुपार्जय।
त्वदीयसर्व्वसम्पत्त्या क्रीणीहि सुविवेचनां॥
८ तां शिरोवर्त्तिनीं कुर्य्याः सा त्वामुन्नमयिष्यति।
तां समालिङ्ग सा तर्हि त्वां सम्मान्यं करिष्यति॥
९ सा तुभ्यं रमणीयञ्च शिरोवेष्टं प्रदास्यति।
शोभाढ्यकिरीटेन त्वाञ्च संवेष्टयिष्यति॥
१० हे मत्पुत्र त्वया श्रुत्वा गृह्यन्तां वचनानि मे।
बहुवर्षान्वितं तर्हि त्वदीयायु र्भविष्यति॥
११ प्रज्ञाया एव पन्थानमहं त्वां दर्शयामि हि।
ऋजुताया महावर्त्म त्वामहं गमयामि च॥
१२ गमने पादपातस्ते तस्मान्नो सङ्कुचिष्यति।
धावने स्खलनञ्चापि तव नो सम्भविष्यति॥
१३ दृढमेव धरेः शिक्षां स्रस्तहस्तो भवे र्नहि।
मद्यायत्नेन तां रक्ष यस्मात् सा तव जीवनं॥
१४ अधर्म्माचारिलोकानां वर्त्म त्वं प्रविश र्नहि।

दुश्चरित्रमनुष्याणाम् पदव्यामपि मा व्रजेः॥
ततो दूरं परिक्राम्ये नैव गच्छेस्तदन्तिकं। १५
ततः पराङ्मुखो भूत्वा स्वमार्गेऽग्रसरो भवेः॥
यस्माद् अकृतपापानां तेषां निद्रा न जायते। १६
अकृते च परभ्रंशे स्वप्नस्तेषां विलुप्यते॥
ते समश्नन्त्यधर्म्मान्नं द्रोहमद्यं पिबन्ति च॥ १७
धार्म्मिकाणान्तु यः पन्थाः स भानु र्दीप्तिमानिव। १८
सिद्धिं माध्याह्निकां प्राप्तुं तेजसा वर्द्धते सदा॥
दुर्जनानाञ्च यो मार्गः सदृशस्तिमिरेण सः। १९
केन ते प्रस्खलिष्यन्ति तत् तै र्ज्ञातुं न शक्यते॥

हे मत्पुत्र मदीयोक्त्यां त्वया चित्तं निवेश्यतां। २०
मामकीनेषु वाक्येषु त्वया श्रोत्रं निधीयतां॥
त्वं स्वीयदृष्टितस्तेषां नानुजानीहि निर्गमं। २१
निजान्तःकरणस्यैव मध्ये तानि सुगोपय॥
तान्यवाप्नोति यः कश्चित् जीवनं तस्य तानि हि। २२
तदीयसकलाङ्गानां रोगनाशकराणि च॥
सर्व्वयत्नान्महायत्नं कृत्वा रक्ष निजान्तरं। २३
तस्मादेव यतो हेतो र्जीवनस्योद्गमो भवेत्॥
स्वसान्निध्याच्च वक्त्रस्य वक्रतामपसारय। २४
ओष्ठयोरपि कौटिल्यं स्वतो दूरीकुरुष्व च॥
ऋजुदृष्टिं प्रकुर्व्वातां तावकीने तु लोचने। २५
त्वत्प्रत्यक्षमवक्रौ च वीक्षेतां नयनच्छदौ॥
सृतिः स्वकीयपादस्य त्वया सम्यग् विविच्यतां। २६
भविष्यन्ति स्थिरास्तर्हि सकला गतयस्तव॥
सव्यां प्रत्यपसव्यां वा दिशं न भ्राम्य कर्हिचित्। २७
चरणं तावकीनञ्च कुमार्गादपसारय॥

---

५ पञ्चमोऽध्यायः।

१ सुलेमनो विनयकथनं २ वेश्याया विरुद्धकथनं १५ विवाहप्रशंसनञ्च।

प्रज्ञायां मम हे पुत्र त्वं स्वचित्तं निवेशय। १

मदीयसुविचारे त्वं स्वीयश्रोत्रे निधत्स्व च॥
२ धारयिष्यसि तर्हि त्वं परिणामप्रदर्शितां।
तावकीनाधराभ्याञ्च ज्ञानं रक्षिष्यते तदा॥
३ ओष्ठौ वाराङ्गनायास्तु परिस्रावयतो मधु।
तैलतोऽपि स्त्रियास्तस्याः काकुदं मेदुरं भवेत्॥
४ फलं पारत्रिकं तस्यास्तिक्तं किराततिक्तवत्।
कण्टकैरतितीक्ष्णञ्च द्विधारचन्द्रहासवत्॥
५ तस्याश्चरणयुग्मञ्च मृत्युं प्रत्यवरोहति।
स्वीयगत्या च पाताले सा करोति पदार्पणं॥
६ जीवनस्य महामार्गस्तया नैव विविच्यते।
वर्त्माधः कम्पते तस्याः किन्तु सा तन्न बुध्यते॥
७ अतो हे बालका यूयं मद्वाक्यं श्रोतुमर्हथ।
निर्गतेभ्यो मदीयास्याद् वाक्येभ्यो मापगच्छत॥
८ अतिदूरं स्त्रियास्तस्यास्त्वं वियुंग्धि निजायनं।
तद्गेहद्वारसान्निध्यं त्वं न गच्छ कदाचन॥
९ गत्वान्येभ्यः स्वसम्मानं सम्प्रदायिष्यते त्वया।
दयाहीनरिपोर्हस्ते निजायुश्चार्पयिष्यते॥
१० तृप्तिं त्वदीयसम्पत्त्या परे यास्यन्ति मानवाः।
भविष्यति परं सद्म पूर्णं त्वच्छ्रमजैः फलैः॥
११ मांसे देहे च ते क्षीणे शेषे त्वं निष्टनिष्यसि॥
१२ वक्ष्यसि चेदमाः शिक्षां कुतो गर्हितवानहं।
ममान्तःकरणञ्चैव व्यनिन्दद् भर्त्सनां कुतः॥
१३ कुतोऽहं स्वगुरूणाञ्च भारतीं श्रुतवान् नहि।
ममोपदेशकानाञ्च वाण्यां न न्यदधे मनः॥
१४ प्रायः सर्व्वाहिते ऽमज्जं जनतासभयोः पुरः॥
१५ पिव त्वं स्वप्रहेस्तोयं स्वकूपादुद्धृतं जलं॥
१६ कुतस्त्वदुत्सजं नीरं वहिर्विस्तारयिष्यते।
नगर्य्या राजमार्गेषु तोयानां सरितो यथा॥
१७ तवैकस्यास्तु तत् तोयं न चान्येषां त्वया सह॥
१८ तावकीनप्रहिर्भूयाद् आशीर्व्वादसमन्वितः।
निजयौवनकालस्य कान्तायां त्वं प्रहृष्य च॥

तां मन्यस्व मृगीं चार्व्वीं हरिणीं वा मनोहरां। १९
स्तनमद्यश्च तस्यास्त्वां प्रमोदयतु सर्व्वदा।
प्रीतिभावेन तस्यास्त्व त्वं रमस्व निरन्तरं॥
हे मत्पुत्र कुतो हेतोस्त्वं वेश्यायां निरंस्यसे। २०
परस्या वक्षसि त्वं वा कुतः सक्तो भविष्यसि॥
प्रत्यक्षाः परमेशस्य सन्ति मार्गा नरस्य वै। २१
सम्यक् तेन मनुष्यस्य सर्व्ववर्त्म परीक्ष्यते॥
स्वीयदुष्कृतपाशै र्हि दुष्टो लोको धरिष्यते। २२
दृढं तस्य निभंक्ष्यन्ति स्वीयकिल्बिषरज्जवः॥
उपदेशविहीनत्वात् स विनाशं गमिष्यति। २३
मूढताया महत्त्वाच्च प्रपतिष्यति मत्तवत्॥

---

६ षष्ठोऽध्यायः।

१ प्रतिभूत्वनिषेधः ६ आलस्यविरुद्धकथनं १२ दुष्टलोकविरुद्धकथनं १६ सप्त घृणास्पदानि २० आज्ञापालनफलं २५ परदारगमनात् चतिश्च।

हे मदीयात्मज त्वञ्चेत् स्वबन्धो र्लग्नको भवेः। १
परार्थं दत्तहस्तो वा कुर्य्याः सत्यापनं यदि॥
स्वमुखान्निर्गतै र्वाक्यैस्तर्हि त्वं सन्धृतो ऽभवः। २
यथा पाशैस्तथा बद्धः स्ववक्त्रोच्चरितोक्तिभिः॥
अत्रैतत् कुरु मत्पुत्र त्वं स्वबन्धोः करङ्गतः। ३
स्वं रक्ष बन्धुमभ्येत्य प्रणिपत्य प्रसादय॥
स्वीयलोचनयो र्निद्रा त्वयानुज्ञायतां नहि। ४
न नेत्रच्छदयुग्मस्य वा स्वप्नार्थं निमीलनं॥
उद्धर स्वं मृगो यद्वत् पक्षी वा व्याधहस्ततः॥ ५
हे तुन्दपरिमार्ज त्वं पिपीलिकान्तिकं व्रज। ६
तस्या आचारमालोक्य ज्ञानलाभं कुरुष्व च॥
नास्ति कोऽप्यधिपस्तस्या न शास्ता न च नायकः॥ ७
तथापि ग्रीष्मकाले सा सङ्गृह्णाति स्वजेमनं। ८
शस्यकर्त्तनकाले ऽपि स्वभक्ष्यं सञ्चिनोति च॥
स्वप्स्यते कतिकालं हि हे आलस्यमते त्वया। ९

कदा स्वकीयनिद्रातस्त्वयोत्थानं करिष्यते॥
१० अल्पनिद्राल्पतन्द्रा स्यात् स्वप्ने स्वल्पकरश्लिषा॥
११ तया त्वदीयदारिद्र्यम् उपस्थास्यति दस्युवत्।
तव निष्किञ्चनत्वञ्च समायास्यति चर्म्मिवत्॥
१२ पापात्मातीव धूर्त्तोऽस्ति वाक्कौटिल्यञ्च सेवते।
१३ कुरुते नेत्रसङ्केतं पादाभ्यां बोधयत्यपि।
स्वकीयकरशाखाभिरुपदेशं करोति च॥
१४ चित्तं तस्य छलैः पूर्णं स कुसङ्कल्पकृत् सदा।
विवादस्य च बीजानि तेनोप्यन्ते निरन्तरं॥
१५ ततो हेतो र्हठात् तस्य विपत्तिः प्रभविष्यति।
स च ध्वंसिष्यतेऽकस्मात् प्रतीकारेण वर्ज्जितः॥
१६ परमेश्वर एतानि षड्वस्तूनि विगर्हते।
तद्युक्तं सप्तमञ्चापि मनसा स ऋतीयते॥
१७ ऊर्द्धदृष्ट्यक्षियुग्मञ्च जिह्वा चानृतवादिनी।
निर्द्दोषाणामसृक्पाते प्रवृत्तञ्च करद्वयं॥
१८ चित्तं कुमन्त्रणानाञ्च कल्पनेन सुतत्परं।
दुष्कर्म्मसाधनार्थञ्च द्रुतगामि पदद्वयं॥
१९ अनृती कूटसाक्षी च भ्रातृणाञ्चैक्यभेदकः॥
२० हे मत्पुत्र स्वतातस्याज्ञा त्वया परिपाल्यतां।
स्वीयमातुः सुशिक्षा च न परित्यज्यतां त्वया॥
२१ तां बधान सदा चित्ते कण्ठदेशे निधेहि च॥
२२ सा त्वां नेष्यति गच्छन्तं स्वपन्तं त्वामविष्यति।
उन्निद्रेण त्वया सार्द्धं संलापञ्च करिष्यति॥
२३ यद्धेतो र्दीपिकास्याज्ञा सुशिक्षा दीप्तिरस्ति च।
उपदेशस्य वाग्दण्डाः सन्ति जीवनवर्त्म च॥
२४ इत्थं पापिष्ठनारीतस्तव रक्षा भविष्यति।
स्निग्धजिह्वपरस्त्रीतस्त्वञ्चोद्धारमवाप्स्यसि॥
२५ त्वदीयचेतसे तस्याः सौन्दर्य्यं मैव रोचतां।
स्वीयनेत्रच्छदाभ्यां सा त्वां जालेनेव मा धरेत्॥
२६ वेश्याया अनुरोधस्तु शेषभक्ष्यापहारकः।
परस्त्री किन्त्वमूल्यानां प्राणानां ग्राहिका भवेत्॥

वक्षिं वक्षसि यो दध्यात् तद्वस्त्रं किं न धक्ष्यते॥ २७
तप्ताङ्गारेषु यो गच्छेत् तत्पादौ किं न तप्स्यतः॥ २८
समीपवासिनो भार्य्यां यो गच्छेत् स तथा भवेत्। २९
यः कश्चित् तां स्पृशेत् सोऽपि निर्द्दोषो न भविष्यति॥
चौर्य्यक्रियापि चौरस्य नैव लोकैरुपेक्ष्यते। ३०
स्वकीयप्राणरक्षाय क्षुधातस्तेन चोरिते॥
धृतेन तेन कर्त्तव्यं सप्तधा परिशोधनं। ३१
त्यक्तव्यं सकलञ्चैव स्वीयगेहे स्थितं वसु॥
परदारांस्तु यो गच्छेत् स नरो बुद्धिवर्ज्जितः। ३२
स्वीयप्राणापहर्त्ता स स्वयमेव स्वनाशकृत्॥
दण्डञ्चाप्नोत्यवज्ञाञ्च लज्जा तस्य न लुप्यते॥ ३३
स्वामिनो जारशङ्का या सा नरस्यातिचण्डता। ३४
प्रतीकारदिने तेन क्षमा नैव करिष्यते॥
न पारितोषितं किञ्चित् तस्मै रोचिष्यते तदा। ३५
उत्कोचे बहुमूल्येऽपि स तुष्टिं न गमिष्यति॥

---

७ सप्तमोऽध्यायः।

१ सुलेमनो विनयकथनं ६ वेश्याया व्यवहारवर्णनं २४ तस्याः स्वातन्त्र्यस्यावश्यकता च।

मद्वाचो रक्ष हे पुत्त्र मदाज्ञा हृदि गोपय॥ १
तथा जीवनलाभार्थं मदाज्ञा परिपालय। २
मम शिक्षाञ्च संरक्ष चक्षुःकनीनिकामिव॥
ता बधानाङ्गुलिष्वेव स्वहृत्पत्रे च ता लिख॥ ३
भगिन्येव ममासि त्वमिति प्रज्ञा त्वयोच्यतां। ४
मम ज्ञातिरियञ्चेति कीर्त्त्यतां सुविवेचना॥
इत्थमेव परस्त्रीतस्तव रक्षा भविष्यति। ५
स्निग्धवाक्परभार्य्यातस्त्वञ्चोद्धारमवाप्स्यसि॥
स्वगेहस्थगवाक्षस्य जालेनाहं व्यलोकयं॥ ६
तदानीं मन्दबुद्धीनां केषाञ्चित् प्राप्य दर्शनं। ७
यूनां मध्ये मयादर्शि युवैको ज्ञानवर्ज्जितः॥
स तस्या गेहकोणस्य सम्मुखेनात्यवर्त्तत। ८

तस्या निकेतनस्यैव वर्त्मना च समक्रमीत्॥
९ तदा गोधूलिरेवासीत् सन्ध्याकालेऽपराह्णिके।
यामिनीजान्धकारश्च समवाप्नोदुपक्रमं॥
१० एका स्त्री तु तमभ्यायात् वेश्यावेशा सुधूर्त्तधीः॥
११ कोलाहलप्रियाबाध्या तत्पादौ न स्थिरौ गृहे॥
१२ जातु भ्राम्यति मार्गे सा जातु याति चतुष्पथं।
जातु वा सर्व्वकोणेषु व्याधवत् सा प्रतीक्षते॥
१३ सा तं धृत्वा तदाचुम्बीत् धृष्टास्या चेदमब्रवीत्॥
१४ मङ्गलार्थं बलीन् दत्त्वा मयाद्य पूरितं व्रतं॥
१५ अतस्त्वां प्राप्तुमागच्छं मयान्विष्य त्वमीक्ष्यसे॥
१६ मत्खट्वास्तरणैः स्तीर्णा मिस्रीयैश्चित्रवादरैः॥
१७ अगुरुबोलसुत्वग्भि र्मम शय्या सुवासिता॥
१८ एह्यावामरुणं यावत् प्रेमभोगे रमावहै।
पूर्णकामविलासेन प्रमोदं करवावहै॥
१९ गृहस्वामी गृहे नास्ति दीर्घयात्रां करोति सः॥
२० स मुद्राग्रन्थिहस्तो ऽगात् पूर्णेन्दौ गेहमेष्यति॥
२१ इत्थं तं निजशिक्षाया बाहुल्येनाचकर्ष सा।
ओष्ठयो र्मेदुरत्वेन पथभ्रष्टं चकार च॥
२२ तदानीं स नरस्तस्याः पश्चादेवागमद्धठात्।
स तु पीनगवा तुल्यो घातस्थानं प्रगच्छता।
अबुद्धे र्दण्डनं प्राप्तुं याति नूपुरधारिवत्॥
२३ शेषे शीघ्रगवाणेन यकृत् तस्य विभेत्स्यते।
पक्षीत्थं प्रविशेत् पाशम् अज्ञात्वा प्राणसंशयं॥
२४ अतो हे बालका यूयं ममोक्तिं श्रोतुमर्हथ।
ममास्यान्निर्गतं वाक्यं युष्माभि र्विनिशम्यतां॥
२५ मा भवेत् त्वन्मनो भ्रष्टं तस्या मार्गे ऽवलम्बितुं।
मैव वा क्रियतां तस्या वर्त्मसु भ्रमणं त्वया॥
२६ बहुलोकास्तया यस्मात् क्षतीकृत्य निपातिताः।
तया व्यापादिताः सर्व्वे वाहिनी सुमहाबला॥
२७ नरकाध्वा गृहं तस्याः कालान्तःपुरगामि तत्॥

८ अष्टमोऽध्यायः।

१ प्रज्ञायाः सुख्यातिः श्रेष्ठता च १२ प्रज्ञया पराक्रमो धनञ्च २२ प्रज्ञाया अनादित्वं ३२ प्रज्ञया सुखवर्णनञ्च।

किं न घोषयति प्रज्ञा बुद्धिरुच्चैश्च भाषते॥ १
मार्गस्योपरि तिष्ठन्ती सूच्चं शृङ्गाटकालये॥ २
गोपुराणां समीपे वा नगरस्य मुखे स्थिता। ३
कपाटानां प्रवेशे सा प्रोच्चैरित्थं प्रभाषते॥
व्याह्वयामि नरा युष्मान् मनुजान् अभिवच्म्यहं॥ ४
हे मन्दबुद्धयो यूयं प्रगृह्णीत सतर्कतां। ५
हे मूढाः सकला यूयं शिक्षध्वं सुविवेचनां॥
युष्माभिः श्रूयतां यस्माद् उत्कृष्टानि वदाम्यहं। ६
मामकीनाधरद्वारात् न्याय्या निर्यान्ति चोक्तयः॥
तालु मे सत्यभाष्यस्ति पापं द्विष्टो ममाधरौ॥ ७
सकला मम वक्त्रस्य वाचो धर्म्मसमन्विताः। ८
वक्रोक्ता विपरीता वा मध्ये तासां न विद्यते॥
नृणां बुद्धिमतां दृष्टावृजवः सकलाश्च ताः। ९
ज्ञानप्राप्तमनुष्याणां विचारात् सरलाश्च ताः॥
रौप्याद् गृह्णीत शिक्षां मे ज्ञानञ्चोत्तमहेमतः॥ १०
यतो हेतोः प्रवालेभ्यः प्रज्ञा श्रेष्ठा न संशयः। ११
सर्व्वाणि प्रियवस्तूनि तत्समानि न सन्ति हि॥
अहं प्रज्ञेति विख्याता मम वेश्म सतर्कता। १२
लभ्यते च मया ज्ञानं परिणामप्रदर्शकं॥
परमेशात्तु या भीतिः सा घृणा पातकं प्रति। १३
तस्माद् दर्पो ऽभिमानश्च दुष्टताच्चपवर्त्म च।
विपरीतञ्च दौर्मुख्यं घृणान्येतानि सन्ति मे॥
मन्त्रणाकुशले स्तो मे प्रज्ञाहं विक्रमान्विता॥ १४
मया शासति राजानो भूपा धर्म्मं वदन्ति च॥ १५
मया जयन्ति शास्तारः शिष्टाश्च क्षितिनायकाः॥ १६
ये कुर्व्वन्ति मयि प्रेम तेषु प्रेम करोम्यहं। १७
यत्नान्मां मृगयन्ते ये मामवाप्स्यन्ति ते जनाः॥

१८ ममैवास्ति धनं तेजः स्वास्थ्य वित्तं पवित्रता ॥
१९ श्रेष्ठं मम फलं स्वर्णात् हिरण्यादपि निर्म्मलात्।
श्रेष्ठो मदीयलभ्यांश उत्तमाद् रजतादपि ॥
२० नयन्ती धर्म्ममार्गेण मध्येन न्यायवर्त्मना ।
२१ ममानुरागिणो लोकान् कुर्व्वे सम्पत्तिभागिनः ।
कोषागाराणि तेषाञ्च द्रव्यैः सम्पूरयाम्यहं ॥
२२ प्राप्ताहं परमेशेन स्वीयगत्या उपक्रमे ।
स्वकीयकर्म्मणामग्रे काले ऽतीव पुरातने ॥
२३ आदावेवाभिषिक्ताहं प्राक् क्षितेरुद्भवात् पुरा ॥
२४ मदीयोत्पत्तिकाले च नाविद्यन्त महार्णवाः।
भारिणस्तोयभारेण नाविद्यन्त च निर्झराः।
२५ गिरीणां रोपणस्याग्रे ऽहं जाताद्रिगणात् पुरा ॥
२६ तेनास्पृष्टेषु देशेषु निर्जनेषु स्थलेषु च ।
नरलोकस्थमृद्रेणो मंस्तके ऽपि न निर्म्मितः ॥
२७ यदा सोऽस्थापयद् व्योम तदैवासमुपस्थिता।
यदा सोऽपान्निधेः पृष्ठे व्यलिखत् परिमण्डलं ।
२८ यदाबध्नाद् घनानूर्द्ध्वे सैन्धवोत्साश्च प्राभवन् ॥
२९ यदा महासमुद्रस्य सीमानं स न्यरूपयत्।
निजाज्ञालङ्घनादेव सलिलानि निवारयन्।
वसुधायाश्च मूलानि स समस्थापयद् यदा ॥
३० तदानीं तस्य पार्श्वे ऽहम् अतिष्ठं कर्म्मकारिणी।
प्रत्यहं नन्दना तस्य तत्साक्षात् हर्षणा सदा॥
३१ हृष्टा भूमण्डले तस्य नन्दन्ती नृसुतैः सह ॥
३२ हे वत्सा अधुना यूयं निशामयत मद्वचः ।
मन्मार्गान् ये ऽवलम्बन्ते धन्या एव भवन्ति ते ॥
३३ उपदेशं गृहीत्वैव भवत ज्ञानसेवकाः ।
अत्याचारश्च युष्माभिः कथञ्चित् क्रियतां नहि ॥
३४ धन्य एव मनुष्यः स यः संशृण्वन् वचो मम ।
मामकीनकपाटेषु प्रजागर्त्ति दिने दिने ।
मम द्वारशिलायाञ्च द्वारिवदवतिष्ठते ॥
३५ यस्माद् यो मामवाप्नोति स एवाप्नोति जीवनं ।

प्रसादश्च परेशस्य स नरः परिलप्स्यते ॥
मम यश्चापराध्नोति निजप्राणान् छिनत्ति सः। २९
मां द्विषन्ति च यावन्तस्ते मृतौ प्रेम कुर्व्वते ॥

---

९ नवमोऽध्यायः।

१ प्रज्ञाया आह्वानं ७ उपदेशकथनं १२ अज्ञानतायाः कथनं फलञ्च।

स्वगेहं निर्म्ममे प्रज्ञा सप्त स्तम्भांस्ततक्ष च। १
पशून् जघान मांसार्थं मद्यञ्चामिश्रयत् तथा। २
रचयामास भोज्याय स्वकीयान्यासनानि च ॥
स्वदासीः प्रेष्य सा पुर्य्यां घोषयत्युच्चभूमिषु। ३
आगच्छेन्मन्दधीरत्र निर्ब्बोधांश्च ब्रवीति सा। ४
आयाताश्नीत भक्ष्यं मे मद्यं पिबत मत्कृतं ॥ ५
मन्दबुद्धीन् परित्यज्य जीवनं परिरक्षत। ६
मार्गे विवेचनायाश्च स्थिरपादैः प्रगच्छत ॥
निन्दकः शिक्ष्यते येन तेनावज्ञैव लभ्यते। ७
दुर्ज्जनो भर्त्स्यते येन जायते स कलङ्कितः ॥
निन्दकं भर्त्सयेथा न स त्वां द्वेक्ष्यति भर्त्सितः। ८
ज्ञानिनं भर्त्सयेथास्त्वं तस्मात् स प्रेष्यते त्वयि ॥
शिक्षय ज्ञानिनं तस्मात् सोऽतिज्ञानी भविष्यति। ९
बोधय धार्म्मिकं तस्मात् सोऽतिविद्वान् भविष्यति ॥
परमेशात्तु या भीतिः सा प्रज्ञाया उपक्रमः। १०
तथा धर्म्मस्य यज्ज्ञानं मन्ये तत् सुविवेचना ॥
मत्तस्त्वदीयघस्राणां सङ्ख्या वृद्धिमवाप्स्यति। ११
सुदीर्घाश्च भविष्यन्ति वत्सरा आयुषस्तव ॥
यदि त्वन्तु भवे ज्ञानी स्वार्थं ज्ञानी भविष्यसि। १२
निन्दाचारी भवे र्वा चेत् स्वार्थं दोषी भविष्यसि ॥
मूढताख्या तु या योषित् सा महाशब्दकारिणी। १३
स्थूलबुद्धिस्वभावा सा न जानीते च किञ्चन ॥
स्वगेहद्वार आसीना पुरस्योर्द्धस्थविष्टरे। १४

१५ समाकर्ययति सा पान्थान् ऋजुमार्गैः प्रगच्छतः॥
१६ आगच्छेन्मन्दधीरत्र निर्बोधांश्च ब्रवीति सा॥
१७ चोरितं वारि सुस्वादु गुप्तमन्नञ्च सुप्रियं॥
१८ प्रेता वसन्ति यत् तत्र तन्न जानन्ति ते नराः।
तया निमन्त्रिताः सर्व्वे चाधोभुवनगामिनः॥

---

१० दशमोऽध्यायः।

सुलेमनो नानाविधा हितोपदेशाः।

सुलेमनो हितोपदेशाः।

१ ज्ञानी पुत्त्रः स्वतातस्य भवेदानन्दकारकः।
मूर्खः पुत्त्रस्य शोकार्त्तां कुरुते निजमातरं॥
२ दुष्टतायुक्तवित्तानि नोपकुर्व्वन्ति किञ्चन।
किन्तु मृत्युत उद्धारं धर्म्म एवानुतिष्ठति॥
३ परेशो नानुजानाति धार्म्मिकस्य क्षुधार्त्ततां।
किन्तु संरोत्स्यते तेन दुष्टानामेव लुब्धता॥
४ कार्य्यं शिथिलहस्तेन ये कुर्य्युस्ते दरिद्रति।
महोत्साहमनुष्याणां करः सम्पत्तिवर्द्धकः॥
५ ग्रीष्मे फलावचायी यः स पुत्त्र एव बुद्धिमान्।
निद्रितः शस्यकाले यः स लज्जाजनकः सुतः॥
६ धर्म्मशीलस्य लोकस्य मूर्द्ध्याशीरधितिष्ठति।
वदनं दुर्जनानान्तु दौरात्म्येन समावृतं॥
७ आशिषे स्मर्य्यते धर्म्मो दुष्टानां नाम शीर्य्यते॥
८ गृह्णात्याज्ञाः सुधी लोको मूढोष्ठस्तु निपात्यते॥
९ ऋजुगाम्यभयं याति वक्रमार्गो धरिष्यते॥
१० सङ्कटाक्षो व्यथाकारी मूढोष्ठस्तु निपात्यते॥
११ धर्म्मिलोकस्य यद् वक्त्रं जीवनस्रोत एव तत्।
वदनं दुर्जनानान्तु दौरात्म्येन समावृतं॥
१२ विवादोत्पादको द्वेषः प्रेमा सर्व्वाघप्रच्छदः॥
१३ ओष्ठयो र्विज्ञलोकस्य प्राज्ञता वर्त्तते सदा।

बुद्धिवर्ज्जितलोकस्य पृष्ठे दण्डश्च युज्यते॥
ज्ञानवन्तो मनुष्या ये विद्यां गोपयन्ति ते। १४
किन्त्वज्ञानस्य यद् वक्त्रं तदासन्नतमः क्षयः॥
धनयुक्तस्य लोकस्य वित्तं गाढतमं पुरं। १५
दरिद्राणाञ्च दारिद्र्यं तेषां नाशस्य कारणं॥
धर्म्मिलोकस्य यत् कर्म्म तत्फलं जीवनावहं। १६
दुर्जनस्य च यो लाभस्तत्फलं पातकावहं॥
जीवनायनगामी स आदेशो येन पाल्यते। १७
किन्तु यः शासनत्यागी स हि भ्रान्तो भविष्यति॥
आच्छादयति यो द्वेषं तस्यौष्ठौ वदतोऽनृतं। १८
अपवादञ्च यः कुर्य्यात् सोऽपि मूढो न संशयः॥
वाग्बाहुल्ये ऽपराधानाम् अभावो नहि विद्यते। १९
स्वाधरौ यस्तु संयच्छेत् स नरो बुद्धिमान् भवेत्॥
धार्म्मिकस्यैव या जिह्वा सा परीक्षितरूप्यवत्। २०
दुर्ज्जनानाञ्च या बुद्धिस्तस्या मूल्यं भवेत् तृणं॥
अधरौ धर्म्मिलोकस्य बहूनां परिपालकौ। २१
ज्ञानाभावाच्च निर्ब्बोधाः प्राणत्यागं प्रकुर्व्वते॥
आशिषा परमेशस्य धनवान् जायते नरः। २२
व्यसनञ्च तया सार्द्धं तेन संयुज्यते नहि॥
क्रीडते दुष्कृतौ मूर्खः प्रज्ञायाञ्च सुधी नरः॥ २३
दुर्जनः शङ्कते यस्मात् तं तदेवाक्रमिष्यति। २४
आकाङ्क्षा धार्म्मिकाणाञ्च सफलत्वं गमिष्यति॥
यथा झञ्झानिलोऽतीतः पाप्यन्तर्धास्यते तथा। २५
धार्म्मिकः कुड्यमूलस्य सर्व्वदा स्थायिनः समः॥
दन्तेष्वम्लरसो यद्वत् धूमो वा नेत्रयो र्यथा। २६
तद्वदेवालसो दूतः प्रेरकस्य मतौ भवेत्॥
परमेश्वरतो भीति र्भवत्यायुःप्रवर्द्धिका। २७
किन्तु न्यूनीकरिष्यन्ते वत्सराः पापिनां नृणां॥
प्रत्याशा धार्म्मिकाणां या सा भवेत् हर्षदायिनी। २८
दुर्जनानां प्रतीक्षा या सा क्षयं परिगच्छति॥
परमेशस्य यन्मार्गं दुर्गं तत् सरलात्मनां। २९

किन्तु दुष्कर्म्मिलोकानां तदेवास्ति विनाशकं ॥
३० धार्म्मिकः सर्व्वदा स्थायी कदाचिन्न चलिष्यति ।
किन्तु ये दुश्चरित्रास्ते नैव वत्स्यन्ति मीदति ॥
३१ धार्म्मिकस्यैव यद् वक्तुं तस्मिन् प्रज्ञा प्ररोहति ।
या च वक्रवदा जिह्वा सा समुच्छेत्स्यते किल ॥
३२ अधरौ धार्म्मिकस्यैव प्रीतिभावस्य सङ्गिनौ ।
दुर्ज्जनानाञ्च यद् वक्तुं वक्रभावस्य सङ्गि तत् ॥

---

११ एकादशोऽध्यायः।

नानोपदेशकथनं।

१ वञ्चका या तुलायष्टिः घृण्या सा परमेशितुः ।
यथार्थं परिमाणं यत् तस्मिन्नेव स तुष्यति ॥
२ अभिमाने समायाते समायात्यवमानना ।
किन्तु नम्रस्वभावा ये प्रज्ञा तैः सह वर्त्तते ॥
३ शुद्धता सरलानां या सा तेषां पथिदर्शिका ।
वक्रता वञ्चकानां या सा तेषां नाशकारिणी ॥
४ कोपवक्रे दिने वित्तं किञ्चिन्नोपकरिष्यति ।
किन्तु मृत्युत उद्धारं धर्म्म एवानुतिष्ठति ॥
५ साधुलोकस्य धर्म्मेण सरलीक्रियते गतिः ।
किन्तु स्वकीयदौर्जन्याद् दुर्ज्जनो निपतिष्यति ॥
६ नृणां सरलचित्तानां धर्म्मस्तानुद्धरिष्यति ।
स्वकीयलोभपाशैस्तु धरिष्यन्ते प्रवञ्चकाः ॥
७ प्रत्याशा पापिलोकस्य मृत्युकाले विनश्यति ।
दुर्वृत्तानां प्रतीक्षा च तदा याति विलोपनं ॥
८ धार्म्मिको रक्ष्यते क्लेशात् पापी चाप्नोति तत्पदं ॥
९ कपटी स्वीयवक्त्रेण मित्रनाशं करोति हि ।
प्रज्ञया धार्म्मिकाणान्तु मित्ररक्षा विधीयते ॥
१० धार्म्मिकेषु समृद्धेषु पुर्य्यां हर्षः प्रजायते ।
दुर्जनेषु विनष्टेषु श्रूयते च जयध्वनिः ॥

आशीर्व्वादाद्दजूनां हि नगरस्योन्नति र्भवेत्। ११
दुष्टानां दुर्म्मुखत्वात्तूत्पाटनं तस्य जायते॥
स्वमित्रं योऽवजानाति स नरो बुद्धिवर्ज्जितः। १२
किन्तु बुद्धिविशिष्टः स स्वमुखं येन रुध्यते॥
यो भ्राम्यत्यपवादार्थी गुप्तवाक्यं व्यनक्ति सः। १३
यस्तु विश्वास्यभावः स कथामाच्छाद्य रक्षति॥
मन्त्रणाया अभावेन प्रजानां पतनं भवेत्। १४
बहुत्वे मन्त्रिणां किन्तु रक्षा तासां प्रजायते॥
लग्नकोऽज्ञातलोकस्य घोरां यास्यति दुर्द्दशां। १५
प्रतिभूत्वे घृणा यस्य निर्व्विघ्नं सोऽवतिष्ठते॥
या मनोहारिणी कान्ता सम्मानं धार्य्यते तया। १६
नरै र्विक्रमसंयुक्तैरैश्वर्य्यं धार्य्यते यथा॥
यो मनुष्यो दयाशीलः स करोत्यात्ममङ्गलं। १७
यश्च क्रूरस्वभावः स निजकायस्य पीडकः॥
दुरात्मा कुरुते कार्य्यं विपरीतफलप्रदं। १८
धर्म्मवीजस्य वप्ता यः स सत्यं लभते फलं॥
यो नरः सुस्थिरो धर्म्मे जीवनाय स चेष्टते। १९
योऽनुधावति पापं स चेष्टते स्वीयमृत्यवे॥
वक्रभावा मनुष्या ये गर्हते तान् परेश्वरः। २०
किन्तु ये सरलाचाराः स तानेवानुरुध्यते॥
पुरुषानुक्रमं यावत् पापी दण्डान्न मोच्यते। २१
धार्म्मिकाणान्तु यो वंशः स उद्धारमवाप्स्यति॥
नासिकायां वराहस्य सौवर्णं भूषणं यथा। २२
सुविचारविहीनायाः सौन्दर्य्यं योषितस्तथा॥
आकाङ्क्षा धर्म्मिलोकानां केवलं मङ्गलावहा। २३
दुर्ज्जनानां प्रतीक्षा या सा तु कोपानलावहा॥
स्वधनं विकिरन्तोऽपि वर्द्धन्ते केऽपि मानवाः। २४
न्याय्याद् दृढं धरन्तश्च जायन्ते केऽपि निर्धनाः॥
यो मनुष्यो वदान्यः स्यात् स आप्यायिष्यते स्वयं। २५
अभिवर्षति यस्त्वान्यान् सोऽभिवर्षिष्यते स्वयं॥
येन संरुध्यते शस्यं शपन्ते तं नरं जनाः। २६

येन विक्रीयते शस्यम् आशीस्तन्मूर्ध्नि वर्त्तते ॥
२७ यो मनुष्यो हितान्वेषी सोऽनुगच्छत्यनुग्रहं ।
आक्रमिष्यति चानिष्टम् अनिष्टान्वेषिणं जनं ॥
२८ स्वधने यस्य विश्वासः स मनुष्यः पतिष्यति ।
पल्लवास्तु यथा तद्वत् फुल्लिष्यन्ति हि धार्म्मिकाः ॥
२९ क्लिश्नाति परिवारान् यः सम्पत्तिस्तस्य वायुवत् ।
यश्च मूर्खः स विज्ञस्य दासेरत्वं करिष्यते ॥
३० प्राप्यं धार्म्मिकलोकेनामृतपादपजं फलं ।
मनांस्याकृष्य यो रक्षेत् स ज्ञानी नात्र संशयः ॥
३१ धार्म्मिकः पश्य मेदिन्यां दोषाणां लभते फलं ।
का नु दुर्व्वृत्तलोकस्य पापिनश्च दशा भवेत् ॥

---

१२ द्वादशोऽध्यायः ।

१ यः प्रतुष्यति शिक्षायां स विद्यायां प्रतुष्यति ।
भर्त्सनां गर्हते यस्तु पशुतुल्यः स मानवः ॥
२ सज्जनः परमेशस्य समवाप्नोत्यनुग्रहं ।
किन्तु धौर्त्त्यस्वभावो यस्तं करोति स दोषिणं ॥
३ नैव दुष्टतया कश्चित् कदाचित् क्रियते स्थिरः ।
धार्म्मिकाणान्तु यन्मूलं निश्चलं तद् वितिष्ठते ॥
४ शिष्टा स्त्री स्वामिनो माला क्लेदश्चास्थ्नां कलङ्किनी ॥
५ सङ्कल्पा धार्म्मिणां न्याय्या दुष्टानां मन्त्रणं छलं ॥
६ हत्यायै निभृते स्थातुं भाषन्ते दुर्ज्जना मिथः ।
धार्म्मिकाणान्तु जिह्वा तान् मरणात् परिरक्षति ॥
७ विनिपत्य दुरात्मानो नास्तित्वं प्राप्नुवन्ति हि ।
धार्म्मिकाणान्तु यत् सद्म सुस्थिरं तद् वितिष्ठते ॥
८ स्वीयमेधाप्रभावेन सुख्यातिं लभते नरः ।
किन्तु यो वक्रचित्तः स सकलैरवमन्यते ॥
९ वरं स्वकिङ्करः क्षुद्रो न च दर्प्यन्नवर्ज्जितः ॥
१० स्वपशोरपि प्राणेषु चिन्ताशीलोऽस्ति धार्म्मिकः ।

दुर्ज्जनानान्तु यः स्नेहः सोऽपि क्रूरतमो भवेत्॥
स्वभूमिः कृष्यते येन स एवान्नेन तर्प्यति। ११
निर्गुणांस्त्वनुगच्छेद् यो स एव बुद्धिवर्ज्जितः॥
दुश्चरित्रैः कृतं लाभं लिप्सते दुर्ज्जनो नरः। १२
धार्म्मिकाणान्तु यन्मूलं तत् फलोत्पादकं भवेत्॥
स्वकीयाधरयो दोंष उन्माथो दुर्ज्जनस्य हि। १३
किन्तु क्लेशत उद्धारं समवाप्नोति धार्म्मिकः॥
स्वमुखस्य फलान्मर्त्यो मङ्गलेन सुतर्प्यति। १४
कृतं यत् स्वीयहस्ताभ्यां तस्याप्नोति फलं नरः॥
पन्था अज्ञानलोकस्य सरलो निजदृष्टितः। १५
श्रूयते मन्त्रणा येन स एव ज्ञानवान् नरः॥
अज्ञानस्य मनस्तापस्तत्क्षणात् सम्प्रकाशते। १६
किन्तु स्वीयापमानं यश्छादयेत् स विचक्षणः॥
यो जनो भाषते सत्यं तेन धर्म्म उदीर्य्यते। १७
मृषावादी तु यः साक्षी स उदीरयति छलं॥
केषाञ्चिद् वावदूकानां खड्गाघातवदुक्तयः। १८
किन्तु ज्ञानवतां जिह्वा दुःखिनां रोगशान्तिदा॥
सत्योष्ठः सर्व्वदा स्थायी मृषाजिह्वा च नैमिषी॥ १९
कुसङ्कल्पकृतां चित्तं कापट्यस्याश्रयो भवेत्। २०
शान्त्यै तु मन्त्रणा येषाम् आनन्दस्तेषु वर्त्तते॥
मनुष्ये धार्म्मिके किञ्चिद् अनिष्टं नानुषंक्ष्यति। २१
किन्तु पूर्णा भविष्यन्ति सन्तापेन हि दुर्जनाः॥
मृषावाद्यधरान् लोकान् गर्हते परमेश्वरः। २२
सत्याचारन्तु ये कुर्य्युः स तेष्वेव प्रतुष्यति॥
समाच्छादयति ज्ञानं मनुष्यः सुविचक्षणः। २३
मानसं किन्तु मूढानां घोषयत्यनभिज्ञतां॥
कर्म्मशीलमनुष्यस्य हस्तो राज्यं करिष्यति। २४
यः करः शिथिलोद्योगः करदः स भविष्यति॥
मनुष्यस्य मनस्तापाज्जायतेऽवनतं मनः। २५
किन्त्वानन्दमवाप्नोति हितवाक्येन तत् पुनः॥
धर्म्मशीलो मनुष्यो यः सुस्थः स स्वीयमित्रतः। २६

दुर्ज्जनानान्तु यो मार्गः स तेषां भ्रान्तिकारणं ॥
२७ अलसेन मृगं धृत्वा तत्पाकः क्रियते नहि ।
कर्म्मशीलमनुष्यस्तु नररत्नममूल्यकं ॥
२८ जीवनं धर्म्ममार्गस्थं मृत्यु र्नास्ति च सत्पथे ॥

---

१३ त्रयोदशोऽध्यायः ।

१ उपदेशं स्वतातस्य ज्ञानी पुत्त्रः शृणोति हि ।
किन्तु यो निन्दकस्तेन भर्त्सना श्रूयते नहि ॥
२ स्वमुखस्य गुणान्मर्त्त्यो सुफलं परिभोक्ष्यते ।
वञ्चकानान्तु लोभस्य पीडितत्वं फलं भवेत् ॥
३ निजं रक्षति यो वक्त्रं निजप्राणान् स रक्षति ।
व्यात्तोष्ठस्य तु लोकस्य निपातः सम्भविष्यति ॥
४ अलसो वाञ्छयाकाङ्क्षी न च प्राप्नोति किञ्चन ।
प्राणा ये कर्म्मशीलानां ते भविष्यन्ति सुस्थिताः ॥
५ धार्म्मिको यो मनुष्यः स मृषावाक्यं विगर्हते ।
दुर्ज्जनः किन्तु दुर्गन्धी लज्जितश्च भविष्यति ॥
६ यो नरः सरलाचारो धर्म्मस्तं परिरक्षति ।
मनुष्यं पापिनं किन्तु दुष्टतैव निपातयेत् ॥
७ कोऽपि धनेश्वरायन्ते नास्ति तेषान्तु किञ्चन ।
केऽप्यन्ये दुर्गतायन्ते तेषान्त्वस्ति महाधनं ॥
८ नरस्य प्राणरक्षाया मूल्यं तस्य धनं भवेत् ।
धनहीनो मनुष्यस्तु न शृणोति हि भर्त्सनां ॥
९ धर्म्मिणां शोभते तेजो दीपः शाम्यति पापिनां ॥
१० वर्द्धनं यद् विवादस्य तद् दर्पादेव जायते ।
मन्त्रणां ये तु गृह्णन्ति प्रज्ञा तैः सह वर्त्तते ॥
११ वित्तान्यवस्तुमूलानि क्षीणतामाप्नुवन्ति हि ।
यस्तु सञ्चिनुयाद्धस्ते वर्द्धयिष्यति तानि सः ॥
१२ आशाया दीर्घसूत्रत्वं चित्तरोगस्य कारणं ।
सफलत्वञ्च वाञ्छाया अमृतोत्पादकस्तरुः ॥
१३ ध्यादेशं योऽवजानाति तस्य नाशो भविष्यति ।

आज्ञामाद्रियते यस्तु सुफलं तेन लप्स्यते॥
जीवोत्सो ज्ञानिनः शास्त्रं मृत्युपाशान्निवर्त्तकं॥ १४
शुभबुद्धेः फलं प्रीतिः कठिना छलिनां गतिः॥ १५
नरा विचक्षणाः सर्व्वं कार्य्यं ज्ञानेन कुर्व्वते। १६
ये तु मूर्खा मनुष्यास्ते विस्तृण्वन्ति स्वमूर्खतां॥
दुष्टो दूतः पतेत् दुःखे सत्यस्वारस्तु रोगहा॥ १७
यो नरो गर्हते शिक्षां दरिद्रोऽवमतश्च सः। १८
वाग्दण्डं सहते यस्तु स सम्मानमवाप्स्यति॥
सम्पूर्णा या मनोवाञ्छा स्वाद्वीं तां मन्यते मनः। १९
पापान्निवर्त्तनं मूढै र्मन्यतेऽतीव कुत्सितं॥
ज्ञानिभिः सह यो गच्छेत् स हि ज्ञानी भविष्यति। २०
निर्ब्बोधानान्तु यो बन्धुः स विनाशं गमिष्यति॥
विपत्तिः पापिनां पश्चात् द्रुतगत्या प्रगच्छति। २१
किन्तु धार्म्मिकलोकेभ्यो मङ्गलं प्रतिदीयते॥
कुरुते पुत्त्रपौत्त्रांश्च साधु र्वित्ताधिकारिणः। २२
धार्म्मिकस्य निमित्तन्तु सञ्चितं पापिनो धनं॥
जायते शस्यबाहुल्यं दीनानां भूमिकर्षणात्। २३
विचाराभावतो जातु शस्याभावश्च जायते॥
दण्डं नहि प्रयुङ्क्ते यः स प्रद्वेष्टि निजात्मजं। २४
पुत्त्रे यः प्रीयते तस्य शासनाय स चेष्टते॥
मनसस्तृप्तिपर्य्यन्तम् अन्नं खादति धार्म्मिकः। २५
उदरं दुर्ज्जनानान्तु नीरसं तिष्ठति क्षुधा॥

---

१४ चतुर्द्दशोऽध्यायः।

गृहिणी सविवेका या निर्म्मिमीते स्ववेश्म सा। १
निर्ब्बोधा तु स्वहस्ताभ्यां कुरुते तस्य भञ्जनं॥
यो नरः सरलाचारी परमेशाद् बिभेति सः। २
किन्तु यः कुटिलाचारस्तस्यावज्ञां करोति सः॥
दण्डः स्वकीयदर्पस्य मुखे मूर्खस्य विद्यते। ३
किन्तु ज्ञानवतां रक्षां स्वकीयौ कुरुतोऽधरौ॥

४ गवामभावतो गोष्ठं तिष्ठत्येव परिष्कृतं।
धनं किन्तु बलादेव बलीवर्द्दस्य वर्द्धते॥
५ साक्षी विश्वासयोग्यो यः स मृषा भाषते नहि।
किन्तु प्रतारकः साक्षी मृषावाक्यानि भाषते॥
६ प्रज्ञां मृगयमाणोऽपि नैव प्राप्नोति निन्दकः।
किन्तु यो बुद्धिमांस्तस्य सुलभं ज्ञानमस्ति हि॥
७ अपगच्छ मनुष्यस्य निर्ब्बोधस्य समीपतः।
यं नरं ज्ञानहीनोष्ठं जानीषे तं परित्यज॥
८ विचक्षणस्य का प्रज्ञा स्वमार्गे सावधानता।
मूढता का च मूढानां तेषामात्मप्रवञ्चना॥
९ निर्ब्बोधा मनुजाः पाप उपहासं प्रकुर्व्वते।
किन्तु धार्म्मिकलोकानां मध्ये तिष्ठत्यनुग्रहः॥
१० मनस्तापस्य तीव्रत्वं चित्तमेवावगच्छति।
न च व्याप्रियते तस्य हर्षे कश्चित् परो नरः॥
११ दुश्चरित्रमनुष्याणां सदनं विप्रनंक्ष्यति।
उटजं सरलानान्तु तेजोयुक्तं भविष्यति॥
१२ केचिन्मार्गा नृणां साक्षात् सरलाः प्रतिभान्ति हि।
भागस्तु पश्चिमस्तेषां जायते निधनायनं॥
१३ कदाचिद्धास्यमध्ये ऽपि चित्तं लोकस्य खिद्यते।
शोक एव च हर्षस्य शेषभागः प्रजायते॥
१४ विपथासक्तचित्तो यः स्वीयगत्या स तृप्यति।
किन्तु यः सज्जनस्तस्योत्पद्यते तृप्तिरात्मतः॥
१५ सर्व्ववाक्येषु विश्वासं मन्दबुद्धिः करोति हि।
किन्तु स्वपादविक्षेपं समाधत्ते विचक्षणः॥
१६ विज्ञो लोको भयं प्राप्य व्यसनादपगच्छति।
किन्तु मूर्खो ऽतिविश्वासम् अत्याचारं करोति च॥
१७ य आशुक्रोधशीलः स्यात् स एवाज्ञानकर्म्मकृत्।
कुसङ्कल्पप्रियश्चापि मनुष्यः सर्व्वगर्हितः॥
१८ आगतं मन्दबुद्धीनां धनं निर्ब्बोधता भवेत्।
किन्तु विचक्षणानां हि ज्ञानं मस्तकभूषणं॥
१९ नमन्ति सच्चरित्राणां समक्षं दुर्ज्जनाः किल।

धर्म्महीनमनुष्याश्च धार्म्मिकस्यैव गोपुरे ॥
यो मनुष्यो दरिद्रः स स्वमित्रेणापि गर्ह्यते। २०
किन्तु धनाढ्यलोकस्य बहवः सन्ति बन्धवः ॥
स्वमित्रं योऽवजानाति पापमेव करोति सः। २१
दुर्गतेषु दयालुर्यो धन्य एव स मानवः ॥
ये कुर्व्वन्ति कुसङ्कल्पान् किं न भ्राम्यन्ति ते नराः। २२
सत्सङ्कल्पप्रिया ये ते दयां सत्यञ्च भुञ्जते ॥
सर्व्वश्रमान्मनुष्यस्य वृद्धिरुत्पद्यते किल। २३
ओष्ठयो र्वावदूकत्वाद् दैन्यमेव प्रजायते ॥
ज्ञानिनां मुकुटं वित्तं मूर्खाणां मूर्खताज्ञता ॥ २४
यः साक्षी सत्यवादी स प्राणानां परिरक्षकः। २५
यस्तु प्रतारणाकारी मृषावाचः स भाषते ॥
भयं यत् परमेशात् तद् विश्वासस्य दृढं स्थलं। २६
यावन्तस्तस्य सन्तानाः स तेषामाश्रयो भवेत् ॥
भीति र्या परमेशात् सा जीवनामृतनिर्झरा। २७
उन्माथेभ्यः कृतान्तस्य तया रक्षा प्रसिध्यति ॥
प्रजानां बहुसंख्यत्वात् प्रभावं प्राप्नुयान्नृपः। २८
किन्त्वभावान्मनुष्याणां राज्ञ उत्पद्यते क्षयः॥
धीरक्रोधी महाबुद्धिराशुक्रोध्यज्ञताध्वजः ॥ २९
जीवदायकमङ्गेभ्यः सुशान्तं हृदयं भवेत्। ३०
किन्त्वीर्ष्या कीकसानां हि गलितत्वस्य कारणं ॥
दीनपीडकलोकेन स्रष्टा तस्य विनिन्द्यते। ३१
किन्तु सम्मन्यते यस्तं दरिद्रान् सोऽनुकम्पते ॥
स्वदौर्ज्जन्येन पापात्मा ताड्यमानोऽपसार्य्यते। ३२
प्रत्याशां म्रियमाणोऽपि कुरुते धार्म्मिको नरः ॥
शान्ता विज्ञमनुष्यस्य चित्ते प्रज्ञावतिष्ठते। ३३
किन्तु मूर्खस्य चित्ते सा भवत्यात्मप्रकाशिका ॥
धर्म्मेणोन्नम्यते राष्ट्रं पापन्तु नीवृतोऽयशः॥ ३४
भूपस्यानुग्रहो भृत्यं प्रवीणं प्रति वर्त्तते। ३५
किन्त्वकीर्त्तिकरं दासं प्रति क्रोधं करोति सः ॥

१५ पञ्चदशोऽध्यायः ।

१ मृदूक्तिः शमयेत् कोपं कटूक्तिः क्रोधवर्द्धिका ॥
२ विज्ञानां रसना ज्ञानं समलङ्कृत्य निर्द्दिशेत् ।
मूर्खाणां किन्तु यद् वक्त्रं तद् बालिश्यमुदीरयेत् ॥
३ सर्व्वस्थानेषु वर्त्तेते परमेशस्य लोचने ।
उत्तमानधमांश्चापि ते मनुष्यान् प्रपश्यतः ॥
४ जिह्वा हितैषिणी वृक्षो जीवामृतफलप्रदः ।
वक्रत्वं किन्तु जिह्वाया मनोभङ्गस्य कारणं ॥
५ मूर्खः स्वकीयतातस्य सूपदेशं विगर्हते ।
भर्त्सनं मन्यते येन स एव बुद्धिमान् नरः ॥
६ तिष्ठन्ति बहुवित्तानि धार्म्मिकस्य निकेतने ।
किन्तु पापिमनुष्यस्य क्लेशयुक्तो धनागमः ॥
७ उप्यन्ते ज्ञानवीजानि ज्ञानिनामधरैर्न्नृणां ।
निर्ब्बोधानान्तु लोकानां यच्चित्तं तन्न सुस्थिरं ॥
८ गर्ह्यते परमेशेन बलिदानमधर्म्मिणां ।
तस्य तुष्टिकरा किन्तु प्रार्थना सरलात्मनां ॥
९ नरस्याधर्म्मिणः पन्थाः परमेशेन गर्ह्यते ।
धर्म्मं ये त्वनुगच्छन्ति तेषु प्रेम करोति सः ॥
१० सत्पथत्यागिलोकस्य तीव्रशास्ति र्भविष्यति ।
विरक्तो भर्त्सनायां यः स मनुष्यो मरिष्यति ॥
११ पश्य पातालसंहारौ प्रत्यक्षौ परमेशितुः ।
किमु मानवसूनूनां सर्व्वान्तःकरणान्यपि ॥
१२ निन्दको भर्त्स्यते येन तस्मिन् नैव प्रतुष्यति ।
तस्माद् विज्ञमनुष्याणां समीपं नहि गच्छति ॥
१३ हृदयेन प्रफुल्लेन प्रसन्नीक्रियते मुखं ।
व्यथया किन्तु चित्तस्य प्राप्नोत्यात्मावसन्नतां ॥
१४ मेधावतो मनुष्यस्य ज्ञानान्वेषि भवेन्मनः ।
चरन्त्यज्ञानताक्षेत्रे निर्ब्बोधानां मुखानि च ॥
१५ दुःखदं दुःखिलोकस्य जायते सकलं दिनं ।
किन्तु प्रफुल्लचित्तस्य जीवनं नित्य उत्सवः ॥

वरं स्वल्पमपि द्रव्यम् ईश्वरश्रद्धया सह। १६
न च कोषो धनैः पूर्णः शान्तिहीनतया सह॥
वरं कुभोजनं शाकैः प्रणये सहभोजिनि। १७
न च पुष्टस्य गो मांसै र्विद्वेषे सहवर्त्तिनि॥
आसक्तो यो नरः क्रोधे स विरोधे प्रवर्त्तकः। १८
किन्तु कोपे सुधीरो यो विवादं शमयेत् स हि॥
अलसस्य गति र्घोरा यथा कण्टकवारणी। १९
पदवी सरलाणान्तु सरला राजमार्गवत्॥
आत्मजो ज्ञानसंयुक्तस्तातस्यानन्ददायकः। २०
किन्तु निर्ब्बोधलोकेन निजमातावमन्यते॥
बुद्धिहीनमनुष्यस्य मूर्खत्वं हर्षकारणं। २१
किन्तु नरो विशेषज्ञ ऋजुमार्गेण गच्छति॥
मन्त्रणाया अभावेन भेदं गच्छति कल्पना। २२
मन्त्रिणां किन्तु बाहुल्यात् सुदृढा सावतिष्ठते॥
स्वमुखस्योत्तरैरेव प्रमोदं लभते नरः। २३
उक्ता समुचिते काले भारती कीदृगुत्तमा॥
ऊर्द्धं याति सुधीरस्य निमित्तं जीवनायनं। २४
तेनाधःस्थितपातालात् जायते स पराङ्मुखः॥
सदर्पाणां नृणां गेहं परेशेन निपात्यते। २५
विधवायास्तु सीमानं सुस्थिरं विदधाति सः॥
गर्ह्यन्ते परमेशेन दुष्टतायाः कुकल्पनाः। २६
मनोरम्याणि वाक्यानि स शुद्धानि च मन्यते॥
स्वकीयपरिवारान् हि क्लिश्नाति लोभिमानुषः। २७
यस्तु गर्हत उत्कोचं स एवाप्नोति जीवनं॥
चिन्तयत्युत्तरं देयं धर्म्मिलोकस्य मानसं। २८
किन्तु दुरात्मनां वक्त्राद् दुर्व्वाक्यानि स्रवन्ति हि॥
सुदूरे पापिलोकेभ्यः परमेशोऽवतिष्ठते। २९
किन्तु संश्रूयते तेन प्रार्थना धर्म्मिणां नृणां॥
नेत्रयो र्यत् प्रसन्नत्वं तेन चित्तं प्रहृष्यते। ३०
कीकसानि च पुष्यन्ति श्रुतया शुभवार्त्तया॥
श्रूयते येन कर्णेन भर्त्सनं जीवनप्रदं। ३१

विज्ञानामेव लोकानां मध्ये स सन्निवत्स्यति ॥
३२ शास्ति निराकृता येन स्वप्राणान् सोऽवमन्यते।
भर्त्सना श्रूयते येन बुद्धिलाभं करोति सः ॥
३३ भीति र्या परमेशात् सा प्रज्ञाया उपदेशिका।
जायते नम्रता लोके गौरवस्याग्रगामिनी ॥

---

१६ षोडशोऽध्यायः।

१ मर्त्यस्य चित्तसङ्कल्पाः परेशाद् रसनोत्तरं ॥
२ मनुष्यस्य निजाध्वानः सर्व्वे शुद्धाः स्वदृष्टितः।
परमेश्वर एवास्ति मानसानां परीक्षकः ॥
३ स्वीयकार्य्यस्य भारं त्वं परमेशे समर्पय।
ततस्त्वदीयसङ्कल्पाः प्रगमिष्यन्ति सिद्धतां ॥
४ कृतं यत् परमेशेन स्वाभिप्रेताय तत् कृतं।
दुष्टस्तेन दुरात्मापि दुर्द्दशादिनदृष्टये ॥
५ यः कश्चिद् दर्पिचित्तस्तं गर्हते परमेश्वरः।
पुरुषानुक्रमं यावत् स दण्डान्नहि मोच्यते ॥
६ करुणासत्यताभ्यां हि क्षमा दोषस्य जायते।
परमेशाच्च या भीतिः सा पापत्यागकारिका ॥
७ यस्य लोकस्य मार्गेषु परमेशः प्रतुष्यति।
प्रति तं शान्तवैरान् स कुरुते तद्रिपूनपि ॥
८ वरं धर्म्मेण संयुक्तं स्वल्पमेव भवेद् वसु।
न चान्यायेन संयुक्तः प्रचुरोऽपि धनागमः ॥
९ निजमार्गो मनुष्यस्य मनसा परिचिन्त्यते।
परन्तु परमेशेन गतिस्तस्य निरूप्यते ॥
१० दैववाणी नरेन्द्रस्याधरयोरवतिष्ठतां।
विचारे वदनं तस्य वक्रतां न समाचरेत् ॥
११ न्याय्यौ मानतुलादण्डौ परेशेन निरूपितौ।
प्रस्तराः सम्पुटस्थाश्च सर्व्वे तेनैव निर्म्मिताः ॥
१२ गर्हणीयो महीपालैः पापाचारो हि सर्व्वथा।
धर्म्मेणैव यतो हेतो र्भवेत् सिंहासनं स्थिरं ॥

रोचेते क्षितिपालेभ्य ओष्ठौ धर्म्मसमन्वितौ। १३
मनुजो न्याय्यवादी च नरेन्द्रस्य प्रियो भवेत्॥
सदृशो यमदूतेन भवेत् क्रोधो महीभुजः। १४
ज्ञानिना तु मनुष्येण शान्तिस्तस्य विधीयते॥
राज्ञो मुखप्रसन्नत्वात् प्रजानां जीवनं भवेत्। १५
ग्रीष्मकालिकमेघेन तदीयानुग्रहः समः॥
प्रज्ञालाभो भवेत् कीदृग् उत्तमो हेमलाभतः। १६
बुद्धिलाभस्तथा कीदृग् उत्कृष्टो रूप्यलाभतः॥
ऋजूनां राजमार्गः को दुराचारादपक्रमः। १७
स्वगतौ सावधानो यः स्वीयप्राणान् स रक्षति॥
याति नाशात् पुरो दर्पः पतनाच्चोद्धतं मनः॥ १८
वरं नम्रमनस्कस्य विनतैः सह वर्त्तनं। १९
न चाहङ्कारिभिः सार्द्धं लोप्त्राणां भागनिर्णयः॥
कर्त्तव्ये पाटवं यस्य लप्स्यते तेन मङ्गलं। २०
अद्ध्याच्च परेशं यो स एव धन्य मानवः॥
सुधीरं मानसं यस्य स नरः ख्यायते बुधः। २१
ओष्ठयो र्मधुरत्वञ्च पाण्डित्यं परिवर्द्धयेत्॥
प्रवीणस्य प्रवीणत्वम् अमृतोत्ससमं भवेत्। २२
किन्तु शासनमज्ञानाम् अज्ञत्वं नात्र संशयः॥
ज्ञानिलोकस्य चित्तेन वदनं क्रियते पटु। २३
ओष्ठयोश्च स्थितं तस्य पाण्डित्यं परिवर्द्धते॥
मनोहराणि वाक्यानि मधुवासोपमानि हि। २४
सुस्वादूनि रसज्ञाने ह्यस्थ्नां रोगहराणि च॥
कश्चित् पन्था मनुष्यस्य दृष्टौ भाति समञ्जसः। २५
तथापि जायते तस्य पर्य्यन्तं नरकायनं॥
श्रमिणो या बुभुक्षा सा तत्सहाया कृतश्रमा। २६
यस्मात् तस्य निजस्तुण्डस्ताडकः कार्य्यशासकः॥
सचेष्टोऽस्त्यपकाराय पापी गर्त्तं खनन्निव। २७
तदीयाधरयुग्मे च वह्नि र्ज्वलति दाहकः॥
यो नरो वक्रभावः स विवादोत्पादको भवेत्। २८
परिवादी च यो लोकः स सुहृद्भेदको भवेत्॥

२९ मित्रं प्रलभ्य दुर्वृत्तो गमयत्यशुभायनं॥
३० स निमीलितनेत्रः सन् चिन्तयित्वा कुकल्पनां।
वक्रीकृत्याधरौ पश्चात् साधयत्यधमां क्रियां॥
३१ स्रक् श्रीदा मूर्द्धजाः शुक्लाः प्राप्तव्या धर्म्मवर्त्मनि॥
३२ क्रोधे यो मानवो धीरो वीरतो ऽपि स उत्तमः।
यस्य स्वचित्तसंयन्ता स श्रेष्ठः पुरजेतृतः॥
३३ वस्त्रगर्भे मनुष्येण गुटिका विनिपात्यते।
केवलः परमेशस्तु तन्निरूपणकारकः॥

---

१७ सप्तदशोऽध्यायः।

१ वरं शुष्को भवेद् ग्रास एकः शान्तिसहायकः।
न च वाक्कलहैः सार्द्धं मांसपूर्णं निकेतनं॥
२ पुत्रं लज्जाकरं भृत्यो दक्षो वशीकरिष्यति।
लप्स्यते चाधिकारांशं स एव भ्रातृभिः सह॥
३ रूप्यं परीक्षते मूषा हसन्ती कनकं तथा।
किन्तु मानवचित्तानां परमेशः परीक्षकः॥
४ ईरितं धर्म्महीनौष्ठैः शृणोति दुर्जनो वचः।
स्वमनो दुष्टजिह्वायां धीयते ऽनृतवादिना॥
५ दुर्गतो हस्यते येन तत्स्रष्टा तेन निन्द्यते।
परस्यापदि यो हृष्टः स दण्डान्न विमुच्यते॥
६ वृद्धस्य मुकुटं पौत्रा बालानां भूषणं पिता॥
७ पाण्डित्यसूचकं वाक्यं मूर्खवक्त्रे न युज्यते।
किमु माहात्म्ययुक्तस्य वदने ऽनृतभाषणं॥
८ उत्कोचदायिनो दृष्टावुत्कोचो मोहिरत्नवत्।
तद् रत्नं यत्र वर्त्तेत साफल्यं तत्र जायते॥
९ आवृणोत्यपराधं यः प्रेमार्थं स विचेष्टते।
यस्तु वाचं श्रुतां वक्ति सुहृद्भेदं करोति सः॥
१० नरं विचक्षणं यादृग् एकाविशति भर्त्सना।
प्रहाराणां शतं मूर्खं नैवाविशति तादृशं॥
११ केवलं शासनत्यागं समन्विच्छति दुर्ज्जनः।

तस्मात् सुनिष्ठुरो दूतस्तद्विरुद्धं प्रहेष्यते ॥
भल्लस्य हृतवत्सस्य साक्षात्कारो भवेद् वरं। १२
मूर्खताविष्टमूर्खस्य साक्षात्कारो वरं नहि ॥
उपकारं हि सम्प्राप्य यो ऽपकारं समाचरेत्। १३
न कदाचन तद्गेहाद् अपकारः सरिष्यति ॥
विवादस्य य आरम्भः स जलाधारभेदवत्। १४
अतश्चित्तविकारस्य पूर्व्वं द्वन्द्वं परित्यज ॥
दुष्टं यो वक्ति निर्दोषं धार्म्मिकं यश्च दोषिणं। १५
घृणीयावेव मन्येते परमेशेन तावुभौ ॥
अमुष्य मूर्खलोकस्य हस्ते पण्यं किमर्थकं। १६
तत् किं प्रज्ञाक्रयार्थं स्यात् चिच्छक्तिस्तस्य नास्ति हि ॥
प्रेमाणं सर्व्वकालेषु बन्धु र्बन्धौ करोति हि। १७
विपत्तावुपकारार्थं जायते च सहोदरः ॥
यो नरो बुद्धिहीनः स स्वकरेण स्पृशेत् करं। १८
स्वमित्रस्य समक्षञ्च परस्य लग्नको भवेत् ॥
अपराधप्रियान्नान्यः कोऽपि स्यात् कलहप्रियः। १९
स्वद्वारं यः करोत्युच्चं स विनाशाय चेष्टते ॥
वक्रचित्तमनुष्येण मङ्गलं प्राप्यते नहि। २०
यश्च कुटिलजिह्वः स विपत्तौ निपतिष्यति ॥
सुतं यो जनयेन्मूर्खं स्वक्लेशस्तेन साध्यते। २१
पुत्त्रस्याज्ञस्य यस्तातः सोऽपि नैवाभिनन्दति ॥
सुपथ्यं हृदयं हृष्टं रोगघ्नं भेषजं यथा। २२
मनसः क्षुण्णता किन्तु कीकसान्यपि शोषयेत् ॥
वस्त्रगर्भत उत्कोचं वहिष्करोति दुर्ज्जनः। २३
मार्गान् न्यायविचारस्य वक्रीकर्त्तुं समुद्यतः ॥
बुद्धियुक्तस्य लोकस्य प्रज्ञा सम्मुखवर्त्तिनी। २४
लोचने किन्तु मूर्खस्य धरणीप्रान्तगामिनी ॥
मूर्खः पुत्त्रः स्वतातस्य क्लेशो मातुश्च कण्टकः ॥ २५
धार्म्मिकस्यार्थदण्डेन दण्डनं न समञ्जसं। २६
किमु शिष्टमनुष्याणां प्रहारो न्यायहेतुकः ॥
वाग्धनाल्पव्ययी यः स्यात् स एव ज्ञानवान् नरः। २७

यो मनुष्यश्च धीरात्मा स एव बुद्धिमान् नरः॥
१८ यावत् समाचरेन्मौनं तावन् मूर्खो ऽपि पण्डितः।
कुरुते यश्च वाग्रोधं बुद्धियुक्तः स मन्यते॥

---

१८ अष्टादशोऽध्यायः।

१ यो मनुष्यः पृथक् तिष्ठेत् स्वाभीष्टं सो ऽनुगच्छति।
सर्व्वप्रकारकौशल्ये तीक्ष्णकर्म्मा च जायते॥
२ नैव बालिशलोकाय रोचते सुविवेचना।
किन्तु स्वीयमतेरेव व्यञ्जने स प्रतुष्यति॥
३ यत्र दुर्ज्जन आयाति तत्रायात्यवमानिता।
अपकृष्टतया सार्द्धं निन्दिता चोपतिष्ठति॥
४ नरवक्त्रे स्थिता वाचो गम्भीरतोयराशिवत्।
प्रज्ञायास्तु य उत्सः स स्यन्दिना स्रोतसा समः॥
५ विचारे धर्म्मिलोकस्य यया पराजयो भवेत्।
उचिता नहि सा क्वापि पापिनः पक्षपातता॥
६ अधरद्वयमज्ञस्य विवादेषु प्रवर्त्तते।
प्रहारांश्च समाह्वातुं मुखं तस्य महास्वनं॥
७ ज्ञानहीनमनुष्यस्य निजवक्त्रं विनाशकं।
तथा तस्य स्वकीयोष्ठावुन्माथौ प्राणहारिणौ॥
८ कर्णेजपस्य वाक्यानि मन्ये सुखादुभक्ष्यवत्।
तान्यन्तःकरणस्यैव प्रविशन्त्युपरोधनं॥
९ शिथिलो निजकार्य्ये यः सोदरः सोऽर्थनाशिनः॥
१० नाम यत् परमेशस्य सुदृढं दुर्गमेव तत्।
धार्म्मिकस्तत्र धावित्वा समवाप्नोति रक्षणं॥
११ ऐश्वर्य्यं धनिलोकस्य सुदृढं नगरं भवेत्।
प्रोच्चप्राचीरवत् तस्य मतये प्रतिभाति तत्॥
१२ विनाशात् प्राक् मनुष्यस्य गर्व्वितं जायते मनः।
नम्रता विद्यते किन्तु सम्मानस्याग्रगामिनी॥
१३ येनाग्रे वाक्यमश्रुत्वा दीयते सहसोत्तरं।
तस्य तन्मूर्खताचिह्नं कलङ्कश्च विगण्यते॥

नरस्य नरयोग्येन मनसा धार्य्यते व्यथा। १४
चूर्णं किन्तु मनः केन विषोढुं शक्यते कथं॥
नरस्य सुधियश्चित्तं ज्ञानलाभं करोति हि। १५
विज्ञलोकस्य कर्णश्च कुरुते ज्ञानमार्गणं॥
सुविस्तीर्णं मनुष्यस्य मार्गं करोत्युपायनं। १६
समक्षं मुख्यलोकानां करोति तमुपस्थितं॥
विवादे प्रथमो वादी प्रतिभाति हि धार्म्मिकः। १७
पश्चात् प्रत्यर्थिनागत्य क्रियते तत्परीक्षणं॥
विनिवृत्तिं विवादानां गुटिकापाततो भवेत्। १८
मध्ये बलवतां नृणां निश्चयस्तेन जायते॥
दुर्जयः कुपितो भ्राता सुदृढान्नगरादपि। १९
सोदराणां विवादश्च दुर्गस्यार्गलसन्निभः॥
स्ववक्त्रस्य फलेनैव नरकोष्ठः प्रपूर्य्यते। २०
स्वाधराभ्यां यदुत्पन्नं तेन तृप्तिं स गच्छति॥
जीवनं मरणञ्चापि जिह्वाधीने हि तिष्ठतः। २१
तस्यां ये केचिदासक्तास्ते तस्या भुञ्जते फलं॥
भार्य्यां यो नर आप्नोति प्राप्नोति क्षेममेव सः। २२
परमेश्वरतस्चैव प्रसादस्तेन लभ्यते॥
दरिद्रो विनयं वक्ति प्रविवक्ति धनी कटु॥ २३
बहवो बान्धवो यस्य स नरः स्यादुपद्रुतः। २४
भ्रातृतो ऽप्यनुरक्तो यस्तादृक् सखी तु विद्यते॥

---

१९ ऊनविंशोऽध्यायः।

वरं सारल्यवान् दीनो न मूर्खः कुटिलाधरः॥ १
नैव ज्ञानं विना भद्रा भवति व्यग्रता क्वचित्। २
पदाभ्यां द्रुतगामी यः स नरः पातकी भवेत्॥
स्वीयमौर्ख्यान्मनुष्यस्य विषमं जायते ऽयनं। ३
तत्पश्चात् परमेशाय तस्य क्रुध्यति मानसं॥
संयुनक्ति बहून् बन्धून् मनुष्येण समं वसु। ४
नरो यस्तु दरिद्रः स मित्रतो ऽपि वियुज्यते॥

५ नैव साक्षी मृषावादी निर्दोषो गणयिष्यते।
नरश्चान्ततभाषी यः स न स्थास्यत्यदण्डितः॥
६ अभिप्रसादयन्त्येव नरेन्द्रं बहवो नराः।
सुवदान्यमनुष्यस्य बान्धवाः सर्व्वमानवाः॥
७ दुर्गतन्तु नरं सर्व्वे गर्हन्ते तस्य सोदराः।
यान्ति तस्मात् सुदूरञ्च सकलास्तस्य बन्धवः।
सो ऽनुगच्छति तान् वाक्यैः किन्त्वेको ऽपि न विद्यते॥
८ कुरुते ज्ञानलाभं यः स स्वप्राणेषु प्रीयते।
यश्च रक्षति बुद्धिं स क्षेमं प्राप्स्यति तत्फलं॥
९ नैव साक्षी मृषावादी निर्दोषो गणयिष्यते।
नरश्चान्ततभाषी यः स विनाशं गमिष्यति॥
१० न सौख्यं युज्यते मूर्खे किमु दासे नृपेन्द्रता॥
११ मनुष्यस्य प्रवीणत्वं मन्दक्रोधं करोति तं।
अपराधे क्षमा श्रेष्ठं जायते तस्य भूषणं॥
१२ राज्ञः कोपो मृगेन्द्रस्य गर्जनेन समो भवेत्।
किन्तु प्रसन्नता तस्य तुल्या खवारिणा तृणे॥
१३ मूर्खः पुत्रः स्वतातस्य जायते दुःखकारकः।
अश्रान्तविन्दुपातस्य सदृशः कलहः स्त्रियाः॥
१४ गृहा अर्थाश्च लभ्यन्ते जनकेभ्यः क्रमागताः।
प्रवीणा किन्तु या भार्य्या सा प्राप्या परेश्वरात्॥
१५ आलस्यं घोरनिद्रायां निमज्जयति मानवं।
यः प्राणी शिथिलोद्योगः स क्षुधार्त्तो भविष्यति॥
१६ आज्ञां रक्षति यो मर्त्त्यो निजप्राणान् स रक्षति।
स्वमार्गान् यो ऽवजानाति स नरो मारयिष्यते॥
१७ दरिद्रे यो दयाशीलः परेशे स ऋणप्रदः।
अवश्यं परमेशेन तत्प्राप्यं परिशोत्स्यते॥
१८ यावत् तिष्ठति प्रत्याशा तावत् शाधि त्वमात्मजं।
तन्तु मारयितुं मैव स्वं प्रवर्त्तय मानसं॥
१९ तीव्रक्रोधस्वभावो यो दण्डं स प्रतिलप्स्यते।
उद्धारं तस्य किं कुर्य्या भूयो भूयः करिष्यसि॥
२० मन्त्रणां शृणु कर्णाभ्याम् उपदेशं गृहाण च।

परिणामे ततः प्रज्ञा सम्यक्काशिष्यते तव ॥
सङ्कल्पा बहवश्चित्ते मनुष्यस्योदयन्ति हि । २१
किन्तु या परमेशस्य सैव स्थास्यति मन्त्रणा ॥
नरस्य भक्तता शोभा श्रेष्ठश्चान्टतिनो ऽधनः ॥ २२
भयं यत् परमेशात् तत् फलं फलति जीवनं । २३
टप्तस्तेन नरः सुस्थो नैवाक्राम्यति तं विपत् ॥
हस्तं भोजनपात्रस्य मध्ये गूढ्वालसो नरः । २४
मुखे पुनः समानेतुम् उद्यमं कुरुते नहि ॥
निन्दकं ताडयेस्तेन मन्दधी र्बुद्धिमाप्स्यति । २५
भर्त्सये र्बुद्धिमन्तञ्च स ज्ञानं लप्स्यते ततः ॥
पितृवित्तापहारी च मातृविद्रावकश्च यः । २६
पुत्त्रो लज्जाकरः स स्यात् पित्रोश्चापयशस्करः ॥
भ्रमणं ज्ञानवाक्येभ्यः शिक्षया जायते यया । २७
शिक्षायाः श्रवणात् तस्या निवर्त्तस्व ममात्मज ॥
साक्षिणा दुश्चरित्रेण विचारः परिहस्यते । २८
दुर्जनस्य च यद् वक्त्रं ग्रसते तदधर्म्मतां ॥
निन्दकानां निमित्तं हि दण्डाः सन्ति निरूपिताः । २९
प्रहारा मूर्खपृष्ठस्य निमित्तञ्च व्यवस्थिताः ॥

---

२० विंशतितमोऽध्यायः ।

मदोऽवहासकार्य्यस्ति मदिराक्रोशकारिणी । १
ताभ्यां चलति यः कश्चित् न स विज्ञः कथञ्चन ॥
राज्ञो भयङ्करत्वं यत् सिंहगर्जोपमं हि तत् । २
यस्तस्योत्पादयेत् कोपं स प्राणान्तकपापकृत् ॥
विवादाद् या निवृत्तिः सा पुरुषस्य यशस्करा । ३
एकैकः किन्तु निर्ब्बोधः प्रचण्डत्वं प्रगच्छति ॥
शीताद् भीतो ऽलसो नैव करोति क्षेत्रकर्षणं । ४
शस्यकाले तु भिक्षित्वा तेन किञ्चिन्न लप्स्यते ॥
चित्ते गुप्ता मनुष्यस्य मन्त्रणागाधतोयवत् । ५
तान्तु तोलयितुं शक्तो मनुष्यः सुविवेचकः ॥

६ द्योतयन्ति स्वसौजन्यं भूयिष्ठा मानवाः किल।
नरो विश्वासयोग्यस्तु सम्प्राप्तुं केन शक्यते॥
७ धार्म्मिकः स्वीयसारल्ये स्थिरपादः प्रगच्छति।
तत्पश्चादपि सन्तानास्तस्य धन्या भवन्ति हि॥
८ महीपालः समासीनः सद्विचारार्थकासने।
सकलं स्वीयनेत्राभ्याम् अधर्म्मं विकिरेत् स्वयं॥
९ को वदेत् पूतचित्तो ऽस्मि स्वाघं शोधितवानहं॥
१० उन्माने द्विविधाश्मानो द्विविधा भाजनानि च।
सर्व्वाण्येतानि गर्ह्यन्ते परेशेन न संशयः॥
११ शुद्धः सरलकर्म्मा च कीदृग् वा स भवेदिति।
कार्य्येभ्यो बालकस्यापि सुज्ञेयो जायते गुणः॥
१२ समर्थौ श्रवणे कर्णौ क्षेमे नेत्रे च दर्शने।
एतयोरुभयोः स्रष्टा परमेशो न चेतरः॥
१३ त्वं न प्रीयस्व निद्रायां न चेद् दीनो भविष्यसि।
स्वीयलोचन उन्मील तदा भक्ष्येण तर्प्स्यसि॥
१४ अपद्रव्यमपद्रव्यम् इति क्रेता प्रभाषते।
पश्चात् स्थानान्तरं गच्छन् स्वं धन्यं वक्ति तत्क्रयात्॥
१५ विद्यते जातरूपञ्च मुक्तानाञ्च महाधनं।
अमूल्यं भूषणन्तु स्यात् ज्ञानवाद्यधरद्वयं॥
१६ प्रतिभूर्यः परस्य स्यात् अपहार्य्यं तदम्बरं।
लग्नकस्तु विदेशिन्याः सर्व्वस्वमेव दण्ड्यतां॥
१७ अन्नं प्रवञ्चनायुक्तं नरेण स्वादु मन्यते।
पश्चात् किन्तु मुखं तस्य शर्कराभिः प्रपूर्य्यते॥
१८ स्थिरा मन्त्रणया चिन्तास्तस्माद् युध्यस्व मन्त्रतः॥
१९ परीवादाय यो भ्राम्येत् मन्त्रभेदं करोति सः।
तस्मादनावृतोष्ठेन सह मा कुरु मित्रतां॥
२० स्वपिता स्वीयमाता वा येन पुत्त्रेण शप्यते।
घोरे निर्व्वास्यति ध्वान्ते तस्य दीपो न संशयः॥
२१ आदौ यत् सहसा लब्धं शेषे तन्न हितं धनं॥
२२ अनिष्टस्य प्रतीकारं करिष्यामीति मा गद।
परमेशं प्रतीक्षस्व स त्वामुपकरिष्यति॥

अश्मनो द्विविधोन्माने गर्हते परमेश्वरः। २३
तथा प्रवञ्चनायुक्तं तुलादण्डं स गर्हते॥
नरस्य पादविक्षेपाः परेशेन निरूपिताः। २४
स्वगतिस्तु मनुष्यस्य बोधगम्या भवेत् कथं॥
द्रव्याण्यपि पवित्राणि सहसा वागुदीरणं। २५
व्रतानाञ्च परं चिन्ता नरस्योन्माथवद् भवेत्॥
यो राजा ज्ञानवांस्तेन विकीर्य्यन्ते हि दुर्ज्जनाः। २६
तेषामुपरि चक्रञ्च मर्द्दकं परिवर्त्त्यते॥
मनुष्यस्य य आत्मा स पारमेश्वरदीपकः। २७
स चित्तस्यापि सर्व्वाणि गुप्तस्थानानि दीपयेत्॥
सौजन्यं सत्यता चैते राजानं परिरक्षतः। २८
सौजन्येनैव सुस्थास्नु तस्य सिंहासनं भवेत्॥
स्वबलं भूषणं यूनां वृद्धानां पलितं यशः॥ २९
चिह्नानि क्षतजातानि पावकानि दुरात्मनां। ३०
तथा सन्ति कशाघाता अन्तर्भावस्य भेषजं॥

---

२१ एकविंशतितमोऽध्यायः।

राज्ञश्चित्तं परेशस्य हस्ते तोयप्रवाहवत्। १
यत्र कुत्रापि तस्येच्छा तत्र तेन प्रवर्त्त्यते॥
नृणां सर्व्वपथो भद्रः प्रतिभाति स्वदृष्टये। २
परमेशस्तु चित्तानाम् अद्वितीयः परीक्षकः॥
यज्ञतोऽपि परेशाय रोचते न्यायधर्म्मकृत्॥ ३
दृष्टे दर्पो हृदो गर्व्वः पापिनां श्रीश्च पापकृत्॥ ४
श्रमशीलस्य सङ्कल्पाः केवलं धनवर्द्धकाः। ५
यस्तु साहसिकस्तेन केवलं दैन्यमाप्यते॥
जिह्वयानृतवादिन्या सम्प्राप्ता या धनाढ्यता। ६
सा मृत्युन्वेषिभि र्दृष्टा मृगतृष्णा सुभङ्गुरा॥
दुर्जनान् निजदौरात्म्यं विनाशं गमयिष्यति। ७
धर्म्ममाचरितुं यस्माद् इच्छा तेषां न जायते॥
वक्रमार्गो मनुष्यो यो विकृतं तस्य मानसं। ८

किन्तु निर्म्मलभावो यः सरलः स स्वकर्म्मणि ॥
९ गृहपृष्ठस्य कोणेऽपि नरस्यावस्थिति र्वरं ।
न च गेहे जनाकीर्णे कलहिन्या स्त्रिया सह ॥
१० दुश्चरित्रमनुष्यस्य वासनानिष्टकामिनी ।
नैवानुगृह्यते तस्य दृष्ट्या बन्धुजनो निजः ॥
११ निन्दके दण्डिते प्रज्ञां समवाप्स्यति मन्दधीः ।
शिक्षादानाच्च विज्ञेन ज्ञानलाभः करिष्यते ॥
१२ आलोचयति सज्ज्ञानं धर्म्मी पापात्मनो गृहं ।
निपातयति नाशाय दुर्जनान् परमेश्वरः ॥
१३ दरिद्रस्यार्त्तरावे यः संरुणद्धि निजश्रुतिं ।
कृते तेनापि चीत्कारे नोत्तरं कोऽपि दास्यति ॥
१४ गुप्तदानेन कोपाग्नि र्निर्व्वाणत्वं प्रगच्छति ।
उत्कोचाद् वस्त्रगर्भे च निहिताच्चण्डतानलः ॥
१५ धर्म्माचारे महानन्दो धर्म्मिलोकेन मन्यते ।
अधर्म्माचारिणां किन्तु त्रासस्तस्मात् प्रजायते ॥
१६ ज्ञानमार्गं परित्यज्य परिभ्राम्यति यो नरः ।
शेषे प्रेतसभां प्राप्य विश्रमिष्यति तत्र सः ॥
१७ यो नरः प्रीयते हर्षे स भविष्यत्यकिञ्चनः ।
मदे तैले च यस्तुष्टः स वित्तं लप्स्यते नहि ॥
१८ धार्म्मिकस्य मनुष्यस्य मुक्ते मूल्यं भवेत् शठः ।
नृणां सरलचित्तानां प्रतिहस्तः प्रवञ्चकः ॥
१९ वरं वासो मनुष्यस्य मरुस्थानेऽप्यनालये ।
न च वाक्कलहासक्ता क्लेशदाच सधर्म्मिणी ॥
२० तैलाद्यनुत्तमं वस्तु तिष्ठति ज्ञानिनो गृहे ।
किन्तु मूढमनुष्येण तन्निगीर्य्यापचीयते ॥
२१ यो नरो यत्नतो धर्म्मं सौजन्यञ्चानुगच्छति ।
जीवनं तेन धर्म्मश्च कीर्त्तिश्च प्रतिलप्स्यते ॥
२२ वीराणां पुरमुल्लङ्घ्य ज्ञानवान् प्रविशेन्नरः ।
तेषां विश्वासभूमिञ्च गाढं दुर्गं निपातयेत् ॥
२३ वक्त्रं जिह्वाञ्च यो रक्षेत् प्राणान् क्लेशात् स रक्षति ॥
२४ अभिमानी नरः स्फीतस्तस्य नाम च निन्दकः ।

अभिमानातिशय्यश्च स समाचरितुं पटुः॥
अलसो यो मनुष्यस्तं स्वलोभो मारयिष्यति। २५
यतो हेतोः करौ तस्य श्रमं कर्त्तुमनिच्छुकौ॥
नराः केचिद् दिनं कृत्स्नं लिप्सन्ते तीव्रलिप्सया। २६
धार्म्मिको मानवः किन्तु विश्राणयत्यकातरः॥
घृण्यो दुरात्मनां यज्ञः किमु दौर्जन्यतः कृतः॥ २७
अनृतं वक्ति यः साक्षी स विनाशं गमिष्यति। २८
नरः श्रवणशीलस्तु सर्व्वदा व्याहरिष्यति॥
दुर्जनेन स्वकीयास्ये निर्भयत्वं प्रकाश्यते। २९
किन्तु यः सरलस्तेन स्वगतिः क्रियते स्थिरा॥
प्रत्यक्षं परमेशस्य या भवेज्जयसाधिनी। ३०
न प्रज्ञा विद्यते तादृक् न बुद्धि र्न च मन्त्रणा॥
सुसज्जीक्रियते वाजी सङ्ग्रामस्य दिनं प्रति। ३१
केवलः परमेशस्तु जयस्यास्ति निरूपकः॥

---

२२ द्वाविंशतितमोऽध्यायः।

वाञ्छनीयास्ति सुख्यातिरैश्वर्य्यात् प्रचुरादपि। १
दुर्व्वर्णाच्च सुवर्णाच्च श्रेष्ठं रत्नमनुग्रहः॥
धनहीना धनाढ्याश्च समायन्ति मिथो नराः। २
अद्वितीयस्तु सर्व्वेषां सृष्टिकर्त्ता परेश्वरः॥
मेधावी विपदं दृष्ट्वा गुप्तमाश्रयते स्थलं। ३
मन्दधीस्तु प्रगत्याग्रं समवाप्नोति दण्डनं॥
नम्रत्वं यन्मनुष्यस्य भयं यच्च परेश्वरात्। ४
श्री र्यशो जीवनञ्चैव तयोः सन्ति फलानि हि॥
कण्टकाः सन्ति पाशाश्च वक्रभावस्य वर्त्मनि। ५
नरः स्वप्राणरक्षार्थी ततो दूरेऽवतिष्ठतां॥
बाल एव त्वया मार्गे गन्तव्ये सुविनीयतां। ६
तथा कृते स वृद्धोऽपि न तस्माद्विचलिष्यति॥
यो नरो धनसम्पन्नः स दीनानां प्रभु र्भवेत्। ७
ऋणं गृह्णाति यस्तद्वद् ऋणदातुः स किङ्करः॥

८ अपत्यधर्म्मबीजं यः क्लेशशस्यं स कृन्तति ।
कोपोत्पादकदोषाच्च तस्य दण्ड उपस्थितः ॥
९ यस्य प्रीतिमती दृष्टिराशीस्तस्मै प्रदीयते ।
यस्माद् भागं निजान्नस्य दरिद्राय ददाति सः ॥
१० निन्दकं त्वं बहिष्कुर्य्या विवादस्तर्हि यास्यति ।
कलहश्चापमानश्च निवृत्तिं प्राप्स्यतस्तदा ॥
११ चित्तस्य शुचितायां यः प्रेमाणं कुरुते नरः ।
लावण्यादोष्ठयोस्तस्य बन्धुत्वमेति भूपतिः ॥
१२ नयने परमेशस्य कुर्व्वाते ज्ञानरक्षणं ।
वञ्चकस्य तु वाचः स विपरीताः करोति हि ॥
१३ अलसो मानवो ब्रूते केशरी विद्यते बहिः ।
तेन विदारयिष्ये ऽहं राजमार्गस्य मध्यतः ॥
१४ मुखं यत् परदाराणां तत् सुगम्भीरखातवत् ।
पतेत् तत्र परेशस्य क्रोधपात्रं न चेतरः ॥
१५ हृदये बालकस्यापि बद्धमूलास्ति मूर्खता ।
किन्तु शासनदण्डेन सा दूरीक्रियते ततः ॥
१६ स्वीयसम्पत्तिवृद्ध्यर्थं यो दरिद्रस्य पीडकः ।
धनिने वा भवेद् दाता दैन्यमेव स लप्स्यते ॥
१७ स्वकर्णौ प्रणिधाय त्वं वचांसि ज्ञानिनां शृणु ।
आदिष्टे च मया ज्ञाने सुनिविष्टमना भव ॥
१८ मनोरम्या भवेद् यस्मात् रक्षा तेषां तवान्तरे ।
त्वदीयाधरयोस्तेषां सकलानाञ्च संस्थितिः ॥
१९ केवलं परमेशे ते विश्वासो यत् स्थिरो भवेत् ।
तदर्थं तुभ्यमेवाद्य सुशिक्षा दीयते मया ॥
२० ज्ञाने सुमन्त्रणायाञ्च या उत्कृष्टफलप्रदाः ।
तादृशा एव वाचः किं त्वत्कृते न लिखाम्यहं ॥
२१ प्रेषकेभ्यो यथा सत्यं शक्त्या दातुमुत्तरं ।
तथा त्वां सत्यवाक्यानां ज्ञापयंस्तत्त्वनिश्चयं ॥
२२ दीनो ऽसाविति सञ्चिन्त्य द्रव्यं दीनस्य मा हर ।
मा विचारसभायां वा विमृदान विषादिनं ॥
२३ यतो विवादनिर्णेता तेषामस्ति परेश्वरः ।

नरांस्तेषु कुलाचारान् स प्राणान् दण्डयिष्यति ॥
क्रोधनेन मनुष्येण सह मा कुरु मित्रतां। २४
रोषशीलेन सार्द्धञ्च मा कुरुष्व गमागमौ ॥
नो चेत् तस्य पथो ऽभ्यस्य प्राणान् पाशे ऽर्पयिष्यसि ॥ २५
हस्तैः स्पृशन्ति ये हस्तान् अधमर्णीयलग्नकाः। २६
तेषां मध्यत एकस्त्वं मैव भूयाः कदाचन ॥
उचितं परिशोधाय द्रव्यं चेन्न भवेत् तव। २७
शय्या ते ऽधःस्थिता तर्हि त्वत्तो हारिष्यते कुतः ॥
मान्यथा कुरु प्राचीनां सीमां त्वत्पितृभिः कृतां ॥ २८
अविलम्बी स्वकार्य्येषु नरः किं दृश्यते त्वया। २९
राज्ञां स्थास्यति साक्षात् स न क्षुद्राणां नृणां पुरः ॥

---

२३ त्रयोविंशतितमोऽध्यायः।

भूभुजा सह भोक्तुं त्वम् उपविष्टो भवे यदि। १
त्वत्समक्षं किमस्तीति तर्हि सम्यग् विचारय ॥
नो चेदाहारलुब्धस्त्वं कण्ठे दास्यसि कर्त्तरीं ॥ २
माकाङ्क्षीस्तस्य सुग्रासान् तत्तु भक्ष्यं प्रवञ्चकं ॥ ३
ऐश्वर्य्यार्थं न चेष्टस्व विरम स्वीयबुद्धितः ॥ ४
धने चक्षुषी दृष्टिं किं तदन्तर्धास्यते द्रुतं। ५
यस्मादादाय पक्षौ श्रीरुत्पतेद् गृध्रवद् दिवं ॥
कुदृष्टि र्यो मनुष्यस्त्वं तस्यान्नं मैव भक्षय। ६
ग्रासान् वा तस्य सुस्वादून् मा समीहस्व खादितुं ॥
यतस्तस्य मतेस्तर्को यादृशः सो ऽपि तादृशः। ७
पिव भुंक्ष्वेति स ब्रूते न तु त्वां प्रति तन्मनः ॥
त्वया सङ्गिलितो ग्रासः पुनरप्युद्गमिष्यते। ८
स्वकीयप्रीतिवाचाश्च भोत्स्यते ऽपव्ययस्त्वया ॥
मूढस्य श्रोत्रशष्कुल्यां त्वं मा भाषस्व किञ्चन। ९
यतस्त्वदीयवाक्यानां युक्ततां सो ऽवमंस्यते ॥
प्राक्तनां भूमिसीमानं मा कुरुष्व त्वमन्यथा। १०
क्षेत्राणि तातहीनानां कथञ्चिन्न समाविश ॥

११ यस्मान्निस्तारकस्तेषाम् अस्ति शक्तिसमन्वितः ।
तेषां तस्मिन् विवादे च स त्वया विवदिष्यते ॥
१२ शिक्षायां विनय स्वान्तं ज्ञानवाक्येषु च श्रुतिं ॥
१३ मोपसंक्रियतां शास्तिरुचिता बालकात् त्वया ।
दण्डेन चेत् तमाहन्या न मरिष्यति तर्हि सः ॥
१४ दण्डेनाहत्य तस्याङ्गं नरकात् त्रास्यसे मनः ॥
१५ हे मत्पुत्त्र सुबोधं चेत् तवान्तःकरणं भवेत् ।
ममान्तःकरणेनापि हर्षस्तर्हि गमिष्यते ॥
१६ मत्प्राणाश्चोल्लसिष्यन्ति सत्योद्यत्वात् त्वदोष्ठयोः ॥
१७ तवान्तःकरणं मैव पापकर्म्मभ्य ईर्ष्यतु ।
किन्तु सन्तिष्ठतां नित्यं साध्वसे परमेश्वरात् ॥
१८ यद्धेतोः परकालो ऽस्ति नैवाशा छेत्स्यते तव ॥
१९ त्वमाकर्णय मत्पुत्त्र ज्ञानलाभं कुरुष्व च ।
निजान्तःकरणं मार्गे सरलं गन्तुमादिश ॥
२० ये मनुष्या मदोन्मत्ता मांसाहारेण चाद्मराः ।
तेषां समाजमध्ये त्वं मा वर्त्तस्व कदाचन ॥
२१ मदोन्मत्ताद्मरा यस्माद् आप्नुवन्ति दरिद्रतां ।
निद्रालुत्वं मनुष्यांश्च कर्पटैः परिवेष्टयेत् ॥
२२ शृणु त्वं स्वपितु र्वाचः स यस्माज्जनकस्तव ।
मैव वार्द्धक्यसम्प्राप्ताम् अवजानीहि मातरं ॥
२३ त्वया सङ्क्रीयतां सत्यं मैव विक्रीयतां क्वचित् ।
प्रज्ञा शिक्षा च बुद्धिश्च त्वया सङ्क्रीयतां तथा ॥
२४ धार्म्मिकस्य मनुष्यस्य पितोल्लासं प्रगच्छति ।
ज्ञानिनो जनकेनापि हर्षः पुत्त्रादवाप्यते ॥
२५ जनकस्तव माता च त्वत्तो हर्षमवाप्नुतां ।
त्वदीयप्रसवित्री च महोल्लासं प्रगच्छतु ॥
२६ हे मत्पुत्त्र त्वया मह्यं निजचित्तं प्रदीयतां ।
मामकीनाश्च पन्थानो रोचन्तां तव दृष्टये ॥
२७ यतो वेश्या गभीरेण खातेनैव समा भवेत् ।
तथा सङ्कटकूपस्य सदृशी व्यभिचारिणी ॥
२८ यथा दस्युस्तथा सापि हिंसिष्यन्ती प्रतीक्षते ।

वर्द्धन्ते च तया सम्यक् नरलोके प्रवञ्चकाः॥
आ इति क्रन्दनं कस्य केन हा हेत्युदीर्य्यते। १९
विवादो जायते कस्य कस्य मनोवसन्नता।
कस्य निष्कारणाघाताः कस्य लोचनरक्तिमा॥
मद्यपाने चिरस्थानां सुरास्वादानुगामिनां॥ २०
त्वं मा द्राक्षारसं पश्य रुचिरं लोहितायितं। २१
कंसे विराजमानञ्च सर्पन्तञ्च यथासुखं॥
स दंक्ष्यत्यहिवच्छेषे फणिवच्च हनिष्यति॥ २२
त्वन्नेत्रे द्रक्ष्यतो वेश्या मति र्भ्रष्टञ्च वक्ष्यति॥ २३
अकूपारस्य मध्ये यो नरो निद्रां निषेवते। २४
शयानो गुणवृक्षाग्रे तत्समस्त्वं भविष्यसि॥
ताडितोऽपि न तप्येऽहं नावबुध्ये च दण्डितः। २५
कदाहं जागरिष्यामि मृगयिष्ये मदं पुनः॥

---

२४ चतुर्विंशतितमोऽध्यायः।

मा दुरात्मभ्य ईर्ष्य त्वं सङ्गं तेषां न वाञ्छ वा॥ १
यतो हेतो र्मनस्तेषां सञ्चिन्तयत्युपद्रवं। २
तेषामोष्ठौ च हिंसायाः कथा ईरयतः सदा॥
प्रज्ञया सृज्यते सद्म बुद्ध्या च क्रियते स्थिरं॥ ३
ज्ञानात् कोष्ठाः प्रपूर्य्यन्ते चार्घैः सर्व्वधनैः प्रियैः॥ ४
यो ज्ञानी स बलिष्ठोऽस्ति यः सुधीः स पराक्रमी॥ ५
त्वत्कृते सफलं युद्धं त्वं करिष्यसि चिन्तया। ६
बाहुल्येन च मन्त्रीणां जयश्रीस्तव सेत्स्यति॥
अज्ञानस्य कृते प्रज्ञा प्रोच्चत्वाद् अतिदुर्गमा। ७
सभास्थाने मुखं तस्य रुद्धं तिष्ठति सर्व्वदा॥
हिंसा सञ्चिन्त्यते येन ख्यास्यते स छलेश्वरः॥ ८
मौर्ख्यस्य कल्पना पापं निन्दको गर्हितो नृणां॥ ९
सङ्कटे चेद् विषीदेस्त्वं क्षीणं तर्हि बलं तव॥ १०
ये वधं प्रति कृष्यन्ते तान् नरांस्त्वं समुद्धर। ११
ये चलन्ति च हत्यायै त्वमुपेक्षस्व मैव तान्॥

१२ अस्माभिस्तत् तु न ज्ञातमिति चेद् गद्यते त्वया।
मनःपरीक्षकेणैव तर्हि तत् किं न भोत्स्यते॥
त्वत्प्राणानाञ्च रक्षित्रा तत् किं ज्ञायिष्यते नहि।
मनुष्याय क्रियायाश्च किं न दायिष्यते फलं॥
१३ मत्पुत्र मधु भुंक्ष्व त्वं यस्मादुत्तममेव तत्।
मंस्यते पुष्पनिर्य्यासः सुरसस्तव तालुना॥
१४ प्रज्ञां तथैव बुध्यस्व सुरसां मनसः कृते।
तां चेदुपार्ज्जयेस्तर्हि परत्राप्स्यसि तत्फलं।
प्रत्याशा तावकीना च नैव व्यर्था भविष्यति॥
१५ भवनं धार्म्मिकस्य त्वं मा जिहिंसिष दुर्जन।
तस्य वा शयनस्थानं त्वया नैव विनाश्यतां॥
१६ पतित्वा सप्तकृत्वो ऽपि समुत्तिष्ठति धार्म्मिकः।
दौर्गत्ये तु दुरात्मानः स्खलित्वैव पतन्ति हि॥
१७ वैरिणः पतने जाते हर्षो मा क्रियतां त्वया।
तवान्तःकरणं तस्य स्खलने च न नन्दतु॥
१८ नो चेद् दृष्ट्वा परेशस्तद् असन्तुष्टो भविष्यति।
वैरितश्च निजक्रोधं पुन र्निवर्त्तयिष्यति॥
१९ मा क्रुध्य पापकारिभ्यो मा दुर्वृत्तेभ्य ईर्ष्य वा॥
२० सुखं पारत्रिकं यस्मात् पापिनो न भविष्यति।
दुर्वृत्तानां प्रदीपश्च निर्व्वाणत्वं गमिष्यति॥
२१ परमेशान्नरेन्द्राच्च त्वं बिभीहि मदात्मज।
नृणां चञ्चलचित्तानां सङ्गो न क्रियतां त्वया॥
२२ विपत्कालो यतस्तेषाम् अकस्मात् सम्भविष्यति।
दण्डस्ताभ्यां प्रणेतव्यो विज्ञातुं केन शक्यते॥
२३ एतान्यपि ज्ञानिनां वाक्यानि॥
विचारे पक्षपातित्वं युज्यते न कथञ्चन॥
२४ निर्द्दोषस्त्वमिदं वाक्यं यो वदेद्दोषिणं नरं।
लोकास्तं परिशप्स्यन्ति गर्हिष्यन्ते च तं प्रजाः॥
२५ किन्तु ये भर्त्सयन्ते तं सुखं तेषां भविष्यति।
हितो वर्त्तिष्यते तेषु चाशीर्व्वादो न संशयः॥
२६ यो दद्यादुत्तरं युक्तं तस्यौष्ठश्चुम्ब्यते जनैः॥

वह्निः कुरु स्वकार्य्यं त्वं क्षेत्रे सर्व्वं समापय। २७
तत्पश्चाद् गेहनिर्म्माणे शक्ष्यसि त्वं प्रवर्त्तितुं॥
स्वमित्रस्य विरुद्धं त्वं साक्षी मा भूरकारणात्। २८
त्वया स्वीयाधराभ्यां किं कर्त्तव्या स्यात् प्रतारणा॥
यथा मां प्रति सोऽकार्षीत् तथा कर्त्तास्मि तं प्रति। २९
स्वकृतस्य फलं कर्त्रे प्रदास्यामीति मा वद॥
क्षेत्रमुपेत्य कुण्ठस्य द्राक्षोद्यानञ्च दुर्म्मतेः। ३०
मयादर्श्यखिलं स्थानं कण्टकारण्यसन्निभं। ३१
आच्छन्ना वृश्चिकै र्भूमि र्भग्ना प्रस्तरवारणी॥
तद्विलोक्य तु तत्रैव प्रण्यधायि मया मनः। ३२
तन्निरीक्ष्योपदेशोऽयं प्रत्यलम्भि तदा मया॥
अल्पनिद्राल्पतन्द्रा स्यात् स्वप्ने स्वल्पकरश्लिषा॥ ३३
तया त्वदीयदारिद्र्यम् उपस्थास्यति दस्युवत्। ३४
तव निष्किञ्चनत्वञ्च समायास्यति चर्म्मिवत्॥

---

२५ पञ्चविंशतितमोऽध्यायः।

१ राजगणे कथनं ८ कलहकथनं नानाविधकथनञ्च।

एतान्यपि सुलेमनो हितोपदेशवाक्यानि। यिहूदीयराजस्य हिष्कि- १
यस्य भृत्यैस्त्वेतानि सञ्जगृहिरे।

विषयस्य तिरोधानम् ईश्वरस्य यशस्करं। २
विषयस्यानुसन्धानं किन्तु राज्ञां यशस्करं॥
उच्चत्वं नभसो यद्वत् नीचत्वञ्च भुवो यथा। ३
बोधातीतं भवेत् तद्वत् नृपाणामपि मानसं॥
दुर्व्वर्णस्य मलं सर्व्वं तन्मध्यादपसारय। ४
भाजनं शिल्पिनो योग्यं तदानीं निःसरिष्यति॥
दुर्जनञ्च नरेन्द्रस्य सम्मुखादपसारय। ५
धर्म्मात् सिंहासनं तस्य स्थिरं तर्हि भविष्यति॥
भूपालस्य समक्षं त्वं माभिमानं समाचर। ६
मा कुलीनजनानां वा पदे संस्थीयतां त्वया॥

७ यस्मात् उच्चमिदं स्थानम् गृहीत्वाज्ञा हिता तव।
न हितं दर्शनप्राप्तेः पश्चाद्राज्ञापकर्षणं॥

८ मा भवेस्त्वं त्वरायुक्तो विषम्बादे प्रवर्त्तितुं।
किं करिष्यसि तच्छेषे लज्जितः प्रतिवादिना॥

९ विवादः स्वीयमित्रेण सार्द्धं निष्पाद्यतां त्वया।
परस्य गोपनीयन्तु त्वया नैव प्रकाश्यतां॥

१० न चेत् तच्छ्रूयते येन तेन त्वं त्रपयिष्यसे।
त्वदीया सापकीर्त्तिश्च निवृत्तिं न गमिष्यति॥

११ रूप्यनिर्म्मितपात्रेषु स्थितैः स्वर्णफलैः समं।
प्राप्नोति चारुतां वाक्यं कालसन्धावुदाहृतं॥

१२ सुवर्णकुण्डलेनैव काञ्चनाभरणेन वा।
तुल्य आज्ञाकरे श्रोत्रे ज्ञानवान् भर्त्सनाकरः॥

१३ तापहन्त्री हिमानीवत् दिवसे ग्रीष्मकालिके।
विश्वास्यः प्रेरके दूतः प्रभोराप्याययत्यसून्॥

१४ येभ्यो न जायते वृष्टिस्तुल्यास्ते मेघवायुभिः।
भवेन्नरो मृषादानाद् आत्मश्लाघाप्रकाशकः॥

१५ क्षान्त्यानुनीयते राजा स्निग्धा जिह्वास्थिभञ्जिका॥

१६ मधु चेत् प्राप्नुयास्तर्हि प्रयोगादेव भुङ्क्ष्व तत्।
नो चेत् तत्र घृणां प्राप्य त्वं वमिष्यसि तत् पुनः॥

१७ स्वीयमित्रस्य गेहात् त्वं स्वपादावुपसंहर।
न चेत् त्वयि घृणां प्राप्य स वैरी ते भविष्यति॥

१८ विरुद्धं स्वीयमित्रस्य मृषा साक्ष्यं ददाति यः।
डुघणेनासिना वा स तीक्ष्णवाणेन वा समः॥

१९ तुल्यो दन्तेन भग्नेन पादेन स्खलितेन वा।
विपत्काले मनुष्यस्य विश्वासो वञ्चके नरे॥

२० वस्त्रत्यागो भवेद् यादृग् दिवसे शीतकालिके।
यवक्षारेण संयोगो यादृगम्लरसस्य वा।
तादृङ्मनसि दुःखार्त्ते गीतानां गायको भवेत्॥

२१ तव द्वेषी यदा क्षुध्येद् अन्नं भोजय तं तदा।
यदा तृषातुरो वा स्यात् तोयं पायय तं तदा॥

२२ इत्थं त्वं मस्तके तस्य तप्ताङ्गारान् विचेष्यसि।

उचितञ्च फलं तुभ्यं परमेशः प्रदास्यति॥
दृष्टिरुत्पाद्यते यद्वद् उत्तरीयेण वायुना। २३
तद्वद् गुप्तिप्रिया जिह्वा दृक्पातैः कोपसूचकैः॥
गृहपृष्ठस्य कोणे ऽपि नरस्यावस्थिति र्वरं। २४
न च गेहे जनाकीर्णे कलहिन्या स्त्रिया सह॥
अवसन्नेषु प्राणेषु यादृशं शीतलं जलं। २५
तादृशा शुभवार्त्तापि दूरदेशात् समागता॥
चञ्चलो दुश्चरित्रस्य साक्षाद् यो धार्म्मिको नरः। २६
तुल्यः स आविलोत्सेन प्रहिणा मलिनेन वा॥
मधुनो ऽप्यधिको भोगो न हितो जायते यथा। २७
गौरवस्यानुसन्धानं गुरु भारो भवेत् तथा॥
यादृशं नगरं भग्नं प्राचीरेण विवर्जितं। २८
आत्मसंयमहीनो ऽपि मनुष्यस्तादृशो भवेत्॥

---

२६ षड्विंशोऽध्यायः।

१ मूर्खेषु कथा १२ अलसेषु कथा १७ कलहकृत्सु कथा च।

ग्रीष्मकाले हिमं यद्वद् वृष्टि र्वा शस्यकर्त्तने। १
बुद्धिहीने नरे तद्वद् गौरवं नहि युज्यते॥
खविसर्पी पतन्नीव चटको वोत्पतन्निव। २
निर्निमित्तो भवेच्छापः स कदापि न सेत्स्यति॥
यथाश्वस्य कशा योग्या खलीनं गर्दभस्य च। ३
लगुडो मूर्खपृष्ठानां तथा योग्यो न संशयः॥
मा मूर्खायोत्तरं देहि तन्मूर्खत्वानुसारतः। ४
दद्याश्चेत् तर्हि किं जाने तस्य तुल्यो भविष्यसि॥
त्वं मूर्खायोत्तरं देहि तन्मूर्खत्वानुसारतः। ५
न चेत् स्वकीयदृष्ट्या स ज्ञानयुक्तो भविष्यति॥
बालिशेन मनुष्येण सन्देशं प्रहिणोति यः। ६
सच्छिनत्ति स्वपादौ स हानिजीवी च जायते॥
श्लथं जङ्घाद्वयं पङ्गोः श्लोको मूर्खमुखे तथा॥ ७
शर्कराराशिमध्यस्थो मणीनां सम्पुटो यथा। ८

तथा मन्ये नरे मूर्खे सम्मानस्य समर्पणं ॥
९ हस्ते मत्तमनुष्यस्य कण्टकं शोभते यथा ।
वक्त्रे मूर्खमनुष्यस्य श्लोकश्च शोभते तथा ॥
१० सर्व्वेषां सृष्टिकर्त्ता यः स महान् नात्र संशयः ।
मूर्खेभ्यः फलदाता स पापिभ्यश्च फलप्रदः ॥
११ यद्वत् स्वकीयवान्ताय श्वा पुनः परिवर्त्तते ।
तद्वन्मूर्खः स्वबालिश्यं भूयो भूयो ऽनुतिष्ठति ॥
१२ स्वदृष्ट्या ज्ञानवान् को ऽपि नरः किं दृश्यते त्वया ।
बालिशे या भवेदाशा सापि तस्मिन् न जायते ॥
१३ अलसो मानवो ब्रूते केशरी विद्यते बहिः ।
मध्यतो राजमार्गाणां वनराजो ऽवतिष्ठते ॥
१४ यथा हंसाख्ययन्त्रेण कवाटं परिवर्त्तते ।
तथैव स्वीयशय्यायाम् अलसः परिवर्त्तते ॥
१५ हस्तं भोजनपात्रस्य मध्ये गूढालसो नरः ।
मुखे पुनः समानेतुं मन्यते ऽतिश्रमावहं ॥
१६ सप्तभ्यो योग्यभाषिभ्यः स्वीयदृष्ट्यालसः सुधीः ॥
१७ धृतकुक्कुरकर्णेन मनुष्येण समो भवेत् ।
पथिको गतिकाले ऽपि परविवादचर्च्चकः ॥
१८ मृत्युतुल्यान् शराङ्गारान् क्षिपेद् यो वातुलो नरः ।
१९ तुल्यस्तेन मनुष्यः स यः प्रतार्य्य स्वबान्धवं ।
कृतकौतुक एवाहम् इति वाचं प्रभाषते ॥
२० वह्निर् गच्छति निर्व्वाणम् इन्धनानामभावतः ।
कर्णेजपस्य चाभावाद् विवादः शाम्यति स्वयं ॥
२१ तप्तचुल्ल्यां यथाङ्गारा यथाग्नाविन्धनानि वा ।
विरोधी मानवस्तद्वद् विवादे तापवर्द्धकः ॥
२२ कर्णेजपस्य वाक्यानि मन्ये सुस्वादुभक्ष्यवत् ।
तान्यन्तःकरणस्यैव प्रविशन्त्युपरोधनं ॥
२३ मण्डिता रौप्यपत्रेण यादृशी मृत्कपालिका ।
तादृशं द्वेषिचित्तस्य प्रियवाद्यधरद्वयं ॥
२४ विश्वास्याराातिरोष्ठाभ्यां स्वान्ते धारयति छलं ॥
२५ चाटुवादिनि तस्मिंस्त्वं मा विश्वस्याः कथञ्चन ।

सप्त दृष्टाणि वस्तूनि सन्ति तस्यान्तरे यतः ॥
अधुना तस्य विद्वेषः कापट्येन समावृतः। २६
सभायां किन्तु दौर्जन्यं तस्य प्रादुर्भविष्यति ॥
खन्यते येन गर्त्तः स स्वयं तत्र पतिष्यति। २७
पाषाणो लोठ्यते येन व्याघूर्णिष्यति तं प्रति ॥
यांस्तुच्छोद नरान् द्वेष्टि तान् जिह्वान्टतवादिनी। २८
यच्च मिष्टवदं वक्त्रं तन्निपाताय चेष्टते ॥

---

२७ सप्तविंशोऽध्यायः।

१ आत्मश्लाघाक्रोधयोः कथनं ५ सत्यप्रेम्नः कथनं ११ विश्वाभावस्य कथनं २२ गृहकर्म्मणः कथनञ्च।

श्वस्तनेन दिनेन त्वं मा श्लाघस्व कथञ्चन। १
यत एकदिनस्यापि फलं न ज्ञायते त्वया ॥
त्वत्प्रशंसां करोत्वन्यो न करोतु मुखं तव। २
स्तौतु त्वामपरः कश्चिद् अधरौ तव न स्तुतां ॥
गुरुरेवास्ति पाषाणो भारयुक्तञ्च सैकतं। ३
किन्तु भारवती ताभ्यां निर्ब्बोधस्य विडम्बना ॥
निष्ठुरो भवति क्रोधो रोषश्च प्रलयोपमः। ४
स्थातुं तु जारशङ्कायाः सम्मुखे को भवेत् क्षमः ॥
प्रच्छन्नप्रीतितो मन्ये श्रेयसी व्यक्तभर्त्सना ॥ ५
योग्या विश्वास्यभावस्य प्रहारा बन्धुना कृताः। ६
अतिरिक्तं ततः किन्तु चुम्बनं परिपन्थिनः ॥
सुतृप्तो यो नरस्तेन मधुवासोऽपि गर्ह्यते ।] ७
किन्तु तिक्तमपि द्रव्यं क्षुधार्त्तः स्वादु मन्यते ॥
स्वकीयनीडतो दूरे भ्राम्यन् यादृग् विहङ्गमः। ८
स्वकीयस्थानतो दूरे भ्राम्यन् तादृग् भवेन्नरः ॥
तैलं सुगन्धिधूपश्च यथा तोषयतो मनः। ९
तथा मित्रस्य मिष्टत्वं ज्ञेयमात्मीयमन्त्रणात् ॥
स्वबन्धुं स्वपितुश्चापि बन्धुं त्वं न परित्यज। १०
दिवसे निजदुःखस्य स्वभ्रातु र्व्रज मा गृहं।

अदूरस्थं यतो मित्रं दूरस्थभ्रातृतो वरं ॥
११ हे मत्पुत्र भव ज्ञानी हृदयं मम हर्षय।
तेन मन्निन्दकायाहं शक्ष्यामि दातुमुत्तरं ॥
१२ मेधावी विपदं दृष्ट्वा गुप्तमाश्रयते स्थलं।
मन्दधीस्तु प्रगत्याग्रं समवाप्नोति दण्डनं ॥
१३ प्रतिभूर्यः परस्य स्यात् अपहार्य्यं तदम्बरं।
लम्पकस्तु विदेशिन्याः सर्व्वस्वमेव दण्ड्यतां ॥
१४ प्रत्यूषे बन्धवे प्रोच्चैराशिषं प्रददाति यः।
आशीर्व्वादः स तस्यैव शापवद् गणयिष्यते ॥
१५ अश्रान्तो बिन्दुपातो यो दुर्द्दिने ऽतीव वर्षिणि।
योषिद् विवादिनी तेन समाना नात्र संशयः ॥
१६ सा च प्रच्छाद्यते येन तेन प्रच्छाद्यते ऽनिलः।
घृतं दक्षिणहस्तेन तैलं वात्मप्रकाशकं ॥
१७ लोहमुत्तेजयेल्लोहं सुहृदस्याननं नरः ॥
१८ य उडुम्बरवृक्षस्य रक्षी भुङ्क्ते स तत्फलं।
स्वकीयप्रभुभक्तो यः स च प्राप्नोति गौरवं ॥
१९ तोयमध्ये यथा भाति मुखस्य सदृशं मुखं।
मनोमध्ये तथा भाति नरस्य सदृशो नरः ॥
२० अतृप्तौ प्रेतलोकश्च नरकश्च स्मृतौ यथा।
अतृप्ते तिष्ठतस्तद्वन्मनुष्यस्यापि लोचने ॥
२१ रूप्यं परीक्षते मूषा हसन्ती हेम वा यथा।
नरः स्वस्तावकस्यैव वक्त्रं तद्वत् परीक्षतां ॥
२२ चूर्णितं मुषलेनापि धान्यैः सार्द्धमुदूखले।
स्वकीयमूर्खता मूर्खं न जहाति कथञ्चन ॥
२३ सम्यक् स्वीयाजमेषाणाम् अवस्था बुध्यतां त्वया।
स्वकीयपशुयूथेषु मानसञ्च निधीयतां ॥
२४ यस्मादर्थश्चिरं कालं यावन्नैवावतिष्ठते।
किरीटः किं भवेत् स्थास्नुरापौरुषपरम्परं ॥
२५ पक्वघासे गते लोपं बालशष्पं प्रकाशते।
पर्व्वतीयतृणानाञ्च सङ्ग्रहः क्रियते नरैः ॥
२६ तुभ्यं वस्त्रप्रदानार्थं जायन्ते मेषशावकाः।

भवति छागयूथस्य मूल्यं चेत्रक्रयार्थकं ॥
छागीनां दुग्धतो भक्ष्यं प्रचुरं जायते तव। २०
भक्ष्यं त्वत्परिवाराणां दासीनाञ्चोपजीविका ॥

---

२८ अष्टविंशोऽध्यायः।

धर्म्माधर्म्मयो र्नानोपदेशकथनं।

पलायन्ते न केनापि द्राव्यमाणा अधार्म्मिकाः। १
धार्म्मिकाः किन्तु तिष्ठन्ति निर्भया युवसिंहवत् ॥
प्रजानां दोषतो राज्यं जायते बहुशासकं। २
जनै र्दक्षैस्तु विज्ञैश्च दीर्घा तस्य स्थिति र्भवेत् ॥
स्वयं सम्पत्तिहीनो यो नरो दुर्गतपीडकः। ३
स धारासार आप्लावी सर्व्वभक्ष्यविनाशकः ॥
दुश्चरित्रं प्रशंसन्ति व्यवस्थात्यागिनो जनाः। ४
प्रतिकुर्व्वन्ति तं किन्तु व्यवस्थापालका नराः ॥
दुराचारा जना न्यायं न बुध्यन्ते कथञ्चन। ५
सर्व्वन्तु शक्यते बोद्धुं परेशान्वेषिभि र्नरैः ॥
वरं सारल्यवान् दीनो न च वक्रगति र्धनी ॥ ६
व्यवस्था पाल्यते येन स एव ज्ञानवान् सुतः। ७
यस्त्वपव्ययिनां मित्रं स स्वतातं कलङ्कयेत् ॥
कुसीदेनातिवृद्ध्या च यो निजं वर्द्धयेद्धनं। ८
दीनानुग्राहकस्यैव कृते तत् सञ्चिनोति सः ॥
शास्त्रसंश्रवणाद् येन स्वीयश्रोत्रं निवर्त्त्यते। ९
प्रार्थनापि कृता तेन गर्हणीया न संशयः ॥
कुपथं यो नयेत् साधून् स्वखाते स पतिष्यति। १०
नराः किन्तु सदात्मानो भोक्ष्यन्ते परमं धनं ॥
यो मनुष्यो धनाढ्यः स ज्ञानवान् स्वीयदृष्टितः। ११
मेधावी दुर्गतः किन्तु मर्म्म तस्यावगच्छति ॥
धार्म्मिकाणां प्रफुल्लत्वाद् उत्सवो जायते महान्। १२
पापिनामुन्नतौ किन्तु भवन्त्यन्तर्हिताः प्रजाः ॥
स्वदोषा येन गुह्यन्ते स न प्राप्स्यति मङ्गलं। १३

तांस्तु स्वीकृत्य यो जह्यात् स कारुण्यमवाप्स्यति ॥
१४ सर्व्वदा भयशीलो यः स एव धन्यमानवः ।
करोति यो घनं चित्तं स दौर्गत्ये पतिष्यति ॥
१५ यादृशः केशरी गर्ज्जन् भल्लुको वा क्षुधातुरः ।
प्रजानां धनहीनानां दुष्टः शास्तापि तादृशः ॥
१६ बुद्धिहीनो नरेन्द्रो यः स प्रजापीडने पटुः ।
लोभं विगर्हते यस्तु सुदीर्घायुः स जायते ॥
१७ नरहत्यापराधेन सभारो यो भवेन्नरः ।
स द्रोण्यत्ववटं यावत् तं धर्त्तुं मा यतस्यत ॥
१८ यो गच्छेदृजुमार्गेण स रक्षां समवाप्स्यति ।
वक्रगाम्युत्पथे यस्तु सोऽकस्मान्निपतिष्यति ॥
१९ स्वभूमिः कृष्यते येन बहुभक्ष्यं स लप्स्यते ।
कुण्ठानान्त्वनुगामी यः स दौर्गत्येन तर्प्स्यति ॥
२० विश्वास्यो यो मनुष्यः स आशिषः पूर्य्यते फलैः ।
यस्तु धनार्ज्जने तूर्णः स नास्ति दोषवर्ज्जितः ॥
२१ न भवेत् पक्षपातित्वम् उपयुक्तं कथञ्चन ।
पापं कुर्य्यान्नरस्तेन पूपखण्डस्य लोभतः ॥
२२ तूर्णमैश्वर्य्यलाभाय क्रूरदृक् चेष्टते नरः ।
तन्नूपैष्यति दौर्गत्यं तेनेदं ज्ञायते नहि ॥
२३ नराणां भर्त्सकः पश्चात् प्रियः प्रियंवदादपि ॥
२४ यः स्वपित्रो र्धनं हृत्वा दोषो नास्तीति भाषते ।
स पुत्रो नाशकर्त्तॄणां तुल्यकृत्ति र्न संशयः ॥
२५ गर्व्वितो यो मनुष्यः स विवादोत्पादको भवेत् ।
परेशे यस्य विश्वासः स एवाप्यायते जनः ॥
२६ स्वचित्ते यस्य विश्वासः स निर्ब्बोधो न संशयः ।
प्रज्ञया गम्यते यस्तु तस्य रक्षा भविष्यति ॥
२७ यो ददाति दरिद्राय न भवेत् तस्य दुर्गतिः ।
यो निमीलति नेत्रे च शापास्तस्मिन् मिलन्ति हि ॥
२८ पापिनामुन्नतिं दृष्ट्वा भवन्त्यन्तर्हिताः प्रजाः ।
जाते तेषां विनाशे तु वर्द्धन्ते धार्म्मिका नराः ॥

---

२९ ऊनत्रिंशोऽध्यायः।

भर्त्सितो बहुशो ऽपि ग्रीवां स्तब्धीकरोति यः। १
स समुच्छेत्स्यते ऽकस्मात् प्रतीकारेण वर्ज्जितः॥
धार्म्मिकेष्वेधमानेषु प्रजा गच्छन्ति हृष्टतां। २
प्रभुत्वे दुर्जनानान्तु कुर्व्वन्त्यार्त्तस्वरं जनाः॥
प्रज्ञायां प्रेमकारी यः स्वतातस्तेन हर्ष्यते। ३
वेश्यानान्त्वनुगामी यः सम्पत्तिस्तेन नाश्यते॥
भूपतिः सुविचारेण सुस्थिरयति नीवृतं। ४
उपहारप्रियो यस्तु स तस्योत्पाटको भवेत्॥
स्वमित्रं प्रति चाटूक्तिं यो मनुष्यः समाचरेत्। ५
पादौ पातयितुं तस्य जालकं विस्तृणोति सः॥
दुर्जनस्यापराधो यः स उन्माथसमन्वितः। ६
धार्म्मिकस्तु मनुष्यो यः स प्रगायति हर्षतः॥
विवादं दीनलोकानाम् अवगच्छति धार्म्मिकः। ७
मनुष्यः किन्तु दुर्वृत्तस्तादृग्ज्ञाने पटु र्नहि॥
निन्दका ये मनुष्यास्ते पुरदाहं प्रकुर्व्वते। ८
विज्ञाः किन्तु मनुष्या ये तैः कोपाग्निः प्रशम्यते॥
सार्द्धं दुरात्मना विज्ञो विवादं कुरुते यदा। ९
न क्रुद्धा न हसित्वा वा शान्तिस्तेनाप्यते तदा॥
रक्तपातिमनुष्या ये नरं साधुं द्विषन्ति ते। १०
तस्य तु प्राणरक्षायै चेष्टन्ते सरला जनाः॥
मूर्खेणान्तरिको भाव आद्यन्तः समुदीर्य्यते। ११
नरो ज्ञानविशिष्टस्तु स्वान्तरे संरुणद्धि तं॥
अन्तग्राहिणः शास्तुः सर्व्वे भृत्या असज्जनाः॥ १२
उपद्रावी दरिद्रश्च मनुष्यौ मिलितौ भुवि। १३
उभयो र्लोचनेभ्यस्तु दीप्तिदाता परेश्वरः॥
धनहीनप्रजानां यो राजा सत्यविचारकृत्। १४
सुदीर्घं समयं यावत् तस्य सिंहासनं स्थिरं॥
यष्टिका भर्त्सना चेमे भवतो ज्ञानदायिके। १५
यस्तु निर्यन्त्रणो बालो मात्रे लज्जां ददाति सः॥

१६ दुर्जनेष्वेधमानेषु दुष्टतापि समेधते ।
धार्म्मिकैस्तु नरैस्तेषां निपातो दृश्यते किल ॥
१७ स्वपुत्रं शाधि तस्मात् स तुभ्यं दास्यति शान्ततां ।
मनसस्तावकीनस्य नन्दनञ्च भविष्यति ॥
१८ येषां नास्तीश्वरादेशो जनास्ते व्यभिचारिणः ।
यस्तु शास्त्रवदाचारं कुरुते धन्य एव सः ॥
१९ दासस्य दमनं नैव वाङ्मात्रेण प्रसिध्यति ।
यस्माद् बुद्धापि वाक्यं स न योग्यं प्रतिभाषते ॥
२० किमदर्शि त्वया कश्चित् कथने सत्वरो जनः ।
निर्ब्बोधे या भवेदाशा सापि तस्मिन्न जायते ॥
२१ दासो लालित आबाल्यात् परस्तात् पुत्रकायते ॥
२२ प्रचण्डो यो मनुष्यः स विवादोत्पादको भवेत् ।
यो नरश्चाशुकोपी स्यात् भवेत् स बहुपापकृत् ॥
२३ स्वकीयेनाभिमानेन स्वस्थानाद् भ्रंश्यते नरः ।
यो मनुष्यस्तु नम्रात्मा स एवाप्नोति गौरवं ॥
२४ चौरैः सहांशभागी यो निजप्राणान् स गर्हते ।
शपथं तेन संश्रुत्य दोषो यस्मान्न सूच्यते ॥
२५ मनुष्याद् यः परित्रास उन्माथावह एव सः ।
परेशं श्रद्दधानस्तु नरो रक्षामवाप्स्यति ॥
२६ बहुभिः प्रार्थ्यते लोकैर्नरेशास्तुरनुग्रहः ।
मनुष्यस्य विचारस्तु परमेश्वरमूलकः ॥
२७ धार्म्मिकाणां मनुष्याणां पापकर्म्मा घृणास्पदं ।
ऋजुगामी नरः किन्तु दुर्जनानां घृणास्पदं ॥

---

३० त्रिंशत्तमोऽध्यायः ।

१ आगूरस्य धर्म्मकथनं ७ तस्य प्रार्थनं १० नानोपदेशश्च ।

१ याकेः पुत्रो य आगूरस्तेनेमा वाच ऊचिरे ।
इदमैश्वरिकादेशात् पुरुषेणोदितं वचः ।
ईथीयेलं प्रति प्रोक्तम् ईथीयेलोकलौ प्रति ॥
२ नूनं नरादहं मूर्खो नास्ति धी र्मे मनुष्यवत् ॥

मया विद्या न चाभ्यस्ता धर्म्मज्ञानं न बुध्यते ॥ ३
कः स्वर्लोकं समारुह्य पुनस्तस्मादवातरत्। ४
मुष्टिना को ऽग्रहीद्वायुं को ऽभान्त्सीद् वाससाम्बुधिं।
मेदिन्याः सर्व्वसीमानां केनाकारि निरूपणं।
तदीयनामधेयं किं तत्पुत्त्रस्य च नाम किं।
एतच्चेत् परिजानासि मह्यं तर्हि निवेदय ॥
एकैकं परमेशस्य वाक्यमस्ति सुनिर्म्मलं। ५
तस्मिन् येषाञ्च विश्वासः स तेषां फलकोपमः ॥
त्वं तदीयोक्तिभिः सार्द्धं नान्यत् किञ्चन योजय। ६
न चेत् त्वं भर्त्सितस्तेन मृषावादी भविष्यसि ॥
अहं दानद्वयं त्वत्तः प्रार्थये हे परेश्वर। ७
त्वं मत्प्राणवियोगात् प्राक् मत्तस्तन्नोपसंहर ॥
अलीकत्वं मृषोक्तिञ्च दूरं मत्तो ऽपसारय। ८
न दैन्यं न धनं दत्त्वा मां योग्यान्नेन भोजय ॥
न चेत् तृप्तो ऽन्तं प्रोच्य भाषिष्ये कः परेश्वरः। ९
दैन्याच्चौर्य्येण वा नाम विलेप्स्यामीश्वरस्य मे ॥
नैव तत्स्वामिनः साक्षाद् दासः पर्य्युद्यतां त्वया। १०
न चेत् त्वं शप्स्यसे तेन सदोषश्च भविष्यसि ॥
कुवंशः शपते तातं मातु र्नाशयते शुभं ॥ ११
कुवंशः स्वमतो शुद्धः स त्वधौतमलः स्थितः ॥ १२
कुवंशो ऽत्युच्चदृष्टिश्च प्रांशुनेत्रच्छदान्वितः ॥ १३
कुवंशः खड्गवद् दन्तैः कर्त्तरीवच्च खादनैः। १४
उच्छेत्तुं क्षितितो निःस्वान् मर्त्त्याद् दीनांश्च चेष्टते ॥
रक्तपायाः सुते द्वे स्तो देहिदेहीतिनामिके। १५
त्रीणि वस्तून्यतृप्तानि चतुर्थञ्चापि तैः समं।
शान्तकामो ऽहमेतत् तै र्गदितुं नहि शक्यते ॥
अतृप्तौ प्रेतलोकश्च बन्ध्यागर्भश्च सर्व्वदा। १६
जलै र्न तृप्यते भूमिरनलश्च न वक्त्यलं ॥
येनोपहस्यते तातो मातुश्चाज्ञावमन्यते। १७
प्रान्तराश्रितकाकैस्तच्चक्षुरुन्मूलयिष्यते।
उपग्रसिष्यते वा तद् शावकै र्गृध्रपक्षिणां ॥

१८ वस्तुत्रयं ममागम्यं चतुर्थञ्च न बुध्यते ॥
१९ उत्क्रोशस्य गति र्व्योम्नि भुजगस्य गति र्नगौ ।
पोतस्य गतिरम्भोधौ पुंसश्च युवतौ गतिः ॥
२० भार्य्याया व्यभिचारिण्यास्तादृगेव गति र्भवेत् ।
सा भुंक्त्वा परिमृज्यास्यं वक्त्यघं न कृतं मया ॥
२१ भारेण त्रीणि वस्तूनि सकम्पां कुर्व्वते धरां ।
चत्वारीमानि सोढुञ्च न शक्यन्ते तया किल ॥
२२ दासेयः प्राप्तराजत्वो भक्तैस्तृप्तश्च बालिशः ।
२३ अप्रिया पतिवत्नी स्त्री दासी च स्वामिनीजया ॥
२४ चत्वारीमानि वस्तूनि क्षोदिष्ठान्यत्र भूतले ।
तथापीमानि विज्ञानि लब्धज्ञानानि सन्ति च ॥
२५ जातिः पिपीलिकानां या दुर्व्वला सा न संशयः ।
शस्यच्छेदनकाले तु ताः कुर्व्वन्त्यन्नसञ्चयं ॥
२६ शाफनाख्यशशानाञ्च जातिः शक्तिमती नहि ।
तथापि स्वीयवेश्मानि तैः स्थाप्यन्ते दृढाद्रिषु ॥
२७ शलभानां समाजस्य राजा को ऽपि न विद्यते ।
रचिताः किन्तु सर्व्वे ते सेनावत् कुर्व्वते गमं ॥
२८ स्वहस्तालम्बिनी लूता राजधामापि सेवते ॥
२९ पदार्थास्त्रय एवैते सन्ति सुन्दरगामिनः ।
सदृशस्तैश्चतुर्थो ऽपि पदन्यासेन शोभनः ॥
३० बलीयान् प्राणिनां सिंहः सर्व्वेभ्यो ऽप्यपराङ्मुखः ॥
३१ सुकटिस्तुरगश्छागः प्रजाभिश्च वृतो नृपः ॥
३२ दर्पाद् भ्रान्तः कुचिन्तां चेत् कुर्य्या रुन्धि मुखं तदा ॥
३३ अतिव्यग्रतया दुग्धाद् यद्वदुत्पद्यते दधि ।
अतिव्यग्रतया घ्राणाद् रक्तञ्चोत्पद्यते यथा ।
अतिव्यग्रतया कोपाद् वैरमुत्पद्यते तथा ॥

---

३१ एकत्रिंशोऽध्यायः ।

१ लिमूयेलराजस्य मातुरुपदेशकथनं ९ उत्तमस्त्रीवर्णनञ्च ।

१ लिमूयेलाख्यभूपालं प्रतीमा वाच ऊचिरे ।

इमा ऐश्वरिकादेशात् तस्य मातादिदेश तं॥
किं त्वां वच्यामि मत्पुत्र मदीयोदरसम्भव। २
अहं त्वां किं वदिष्यामि मद्व्रतानां फलोदय॥
स्त्रीयशक्तिस्त्वया नैव कामिनीभ्यः प्रदीयतां। ३
नैव राजनिहन्त्रीषु स्वतेजो वा समर्प्यतां॥
न भूपेषु न भूपेषु पानं मद्यस्य युज्यते। ४
लिमूयेल सुराढ्यता नरेन्द्रेषु न युज्यते।
यतो राजा सुरां पीत्वा व्यवस्थां विस्मरिष्यति। ५
दुर्भाग्यानां विचारञ्च विपरीतं करिष्यति॥
दत्त मद्यमधन्याय दत्त दुर्मनसे सुरां॥ ६
स मनुष्यस्तदा पीत्वा स्वदैन्यं विस्मरिष्यति। ७
न पुनश्च निजक्लेशस्तेनानुचिन्तयिष्यते॥
वितृणु स्त्रीयवक्त्रं त्वं स्तब्धवाचां नृणां कृते। ८
सकलानामनाथानां विवादस्यैव सिद्धये॥
वितृणु स्त्रीयवक्त्रं त्वं विचारे न्यायसिद्धये। ९
दुःखिनां दुर्गतानाञ्च विवादं सुविनिश्चिनु॥
सम्प्राप्तुं शक्यते केन गुणिनी सद्धर्म्मिणी। १०
प्रवालेभ्यो ऽपि मूल्येन सा त्वतीवातिरिच्यते॥
तद्भर्त्तुर्हृदयं तस्यां विश्वासं कुरुते दृढं। ११
लाभाभावस्तया तस्य न कदाचन जायते॥
केवलं मङ्गलं तस्य न च किञ्चिदमङ्गलं। १२
क्रियते जीवनं यावद् एकैकस्मिन् दिने तया॥
मेषलोमामतस्याश्च सा करोति गवेषणं। १३
करयोः परितोषाय विधत्ते च परिश्रमं॥
वणिजाञ्च दृहतोति मन्ये सा सदृशी भवेत्। १४
स्वभक्ष्याणि तया यस्माद् आनीयन्ते सुदूरतः॥
रजन्यां न व्यतीतायाम् उत्थाय स्वप्नतश्च सा। १५
स्वजनेभ्यो ददात्यन्नं दासीभ्यः कार्य्यमाह्निकं॥
पर्य्यालोच्य च केदारं तल्लाभः साध्यते तया। १६
स्त्रीयपाण्योः फलं दत्त्वा द्राक्षोद्यानञ्च रोप्यते॥
सा बलेनैव बध्नाति कटिं मेखलया यया। १७

कुरुते स्वीयबाहू च महाशक्तिसमन्वितौ ॥
१८ स्वव्यापारस्य सुस्वादु मन्यते हि फलं तया ।
नैव निर्व्वाणतां रात्रौ तस्या दीपः प्रगच्छति ॥
१९ तर्कुं प्रति स्वहस्तौ सा विस्तृणोति हि यत्नतः ।
परिगृह्णाति पञ्जीञ्च स्वीयपाणिद्वयेन सा ॥
२० दुर्गतायापि दानार्थं तया हस्तः प्रसार्य्यते ।
दरिद्रस्योपकारार्थं स्वकरश्च प्रगृह्यते ॥
२१ कृते स्वपरिवाराणां नीहारान्न बिभेति सा ।
सर्व्वे परिजनास्तस्या नीशारान् दधते यतः ॥
२२ निर्म्मीयन्ते तया स्वार्थं निचोला अतिसुन्दराः ।
दुकूलं शोणवर्णञ्च वस्त्रं परिदधाति सा ॥
२३ पतिस्तस्याः सुविख्यातः पुरद्वारस्थसंसदि ।
देशीयमुख्यलोकानां सभायामुपवेशनात् ॥
२४ सा च कुर्पासकं कृत्वा विधत्ते तस्य विक्रयं ।
मेखलाञ्च विनिर्म्माय वणिजे सा प्रयच्छति ॥
२५ सा नारी बलतेजोभ्यां वस्त्रवत् परिवेष्ट्यते ।
अनागतञ्च कालं सा स्मेरवक्त्रा प्रतीक्षते ॥
२६ केवलं ज्ञानभावेन स्ववक्त्रं विवृणोति सा ।
सौजन्यस्य विधिस्तस्या रसनाञ्चाधितिष्ठति ॥
२७ सा स्वीयपरिवाराणाम् आचारेषु सचेतना ।
नैवालस्येन संयुक्तम् अन्नं भुंक्ते कथञ्चन ॥
२८ पुत्रास्तस्याः समुत्थाय धन्यां तां प्रवदन्ति हि ।
तद्वदुत्थाय तद्भर्त्ता तामित्थं सुप्रशंसति ॥
२९ बह्वीभिरेव कन्याभि र्गुणवत्त्वं प्रकाशितं ।
सकलाभ्यस्तु ताभ्योऽपि त्वमतीवातिरिच्यसे ॥
३० चारुता केवलं माया सौन्दर्य्यञ्चाप्यवास्तवं ।
परमेशात् तु या भीता सा नारी स्तुतिमर्हति ॥
३१ यूयं तत्करयो र्योग्यं फलं तस्यै प्रयच्छत ।
पुरद्वारेषु तस्याश्च सर्व्वकर्म्म प्रशंसत ॥

उपदेशकः ।

---

१ प्रथमोऽध्यायः ।

१ आभाषः ४ सर्व्ववस्तूनामसारत्वं १२ सर्व्वकर्म्मणां निष्फलत्वं ।

१ दायूदात्मजस्य यिरूशालमस्थराजस्योपदेशकस्येमानि वाक्यानि ।

२ अलीकानामलीकाग्रमिति वक्त्युपदेशकः ।
अलीकानामलीकाग्रम् अलीकं सकलं भवेत् ॥
३ सूर्य्यस्याधो मनुष्येण क्रियते यः परिश्रमः ।
कृत्स्नात् परिश्रमात् तस्मात् को लाभस्तस्य जायते ॥
४ युगमेवातियात्येकं समायात्यपरं युगं ।
सर्व्वन्तु समयं यावत् स्थिरा सन्तिष्ठते धरा ॥
५ असौ सूर्य्यस्तथोदेति पुनरस्तं प्रयाति च ।
स्वस्थानं त्वरितं गत्वा तत्रोदेति पुनश्च सः ।
६ दक्षिणाञ्च दिशं याति प्रत्यायात्युत्तरं पुनः ।
इत्थं प्रगच्छति भ्राम्यन् स्वपर्य्यायैः सदागतिः ॥
७ सर्व्वा नद्यो ऽर्णवं यान्ति सो ऽर्णवस्तु न पूर्य्यते ।
यत् स्थानं निम्नगा यान्ति तद्धि यान्ति पुनः पुनः ॥
८ सर्व्वाः श्रमावहा वाचस्तास्त वक्तुं नरो ऽक्षमः ।
अतृप्तं दर्शने नेत्रम् अपूर्णा श्रवणे श्रुतिः ॥
९ भूतं यद् भवितव्यं तत् कृतं यत् तत् करिष्यते ।
अत्र भानोरधः किञ्चिन्नूतनं नहि जायते ॥
१० पश्य नूतनमस्त्येतदिति यस्मिन् निगद्यते ।
पुरैवासीत् तदस्मत्प्राग् अतीतेषु युगेषु हि ॥
११ यदभूत् पूर्व्वकालेषु तस्याद्य नास्त्यनुस्मृतिः ।
अद्य यद् भावि तस्यापि पश्चान्न भविता स्मृतिः ॥
१२ उपदेशक एवाहं निवसन् यिरूशालमे ।
इस्रायेलीयलोकानां समकार्षं नरेन्द्रतां ॥
१३ नभसो ऽधस्तु यत् किञ्चित् क्रियते तत् परीक्षितुं ।
ज्ञानेन चानुसन्धातुं स्वमनो ऽहं न्यवेशयं ॥

निमित्तं नरपुत्त्राणां विषमो ऽयं परिश्रमः।
तेभ्यः श्रान्तिप्रदानार्थम् ईश्वरेण निरूपितः॥
१४ अदर्शं सर्व्वकर्म्माहं क्रियमाणं रवेरधः।
पश्य सर्व्वमलीकं हि मनसश्च विडम्बनं॥
१५ यद् वक्रं तदृजूकर्त्तुं नैव केनापि शक्यते।
तथैवाविद्यमानं यद् अङ्कितुं तन्न शक्यते॥
१६ स्वकीयमनसा मध्ये मयागद्यत वागियं।
मत्पूर्व्वं पश्य ये ऽध्यक्षा अभवन् यिरूशालमे।
तेभ्यः सर्व्वेभ्य एवाहं महाप्रज्ञासमन्वितः।
बहुज्ञानेन बुद्ध्या च दीपितं मम मानसं॥
१७ प्रज्ञां बोद्धुं मनो धत्त्वा मोहं मौर्ख्यञ्च वेदितुं।
मयाज्ञायीदमप्यस्ति मानसस्य विडम्बनं॥
१८ यतो ज्ञानस्य बाहुल्यं व्यथाबाहुल्यसंयुतं।
विद्या च वर्द्धते यस्य तस्य खेदो ऽपि वर्द्धते॥

---

२ द्वितीयोऽध्यायः।

१ सांसारिकसुखस्य निष्फलत्वं १२ आयुषो ऽसारत्वं।

१ मदीचित्ये सुखेन त्वाम् एहि त्वं भुंक्ष्व मङ्गलं।
इत्यवादि मया स्वान्तम् अलीकन्तु तदप्यभूत्॥
२ हासं प्रति मया प्रोक्तं हतबुद्धिरसाविति।
हृष्टताञ्च प्रति प्रोक्तं किं कर्त्तुं शक्यते ऽमुया॥
३ नभसो ऽधो नृसन्तानाः स्वल्पघस्रमितायुषि।
किं कृत्वा प्राप्नुयुः क्षेमं यावन्न निश्चिनोमि तत्।
तावन्मनो नयन् प्रज्ञां मद्ये योत्स्याम्यहं तनुं।
मूढताञ्चावलम्बिष्ये मनसैतदचिन्तयं॥
४ अतो महान्ति कार्य्याणि कर्त्तुमारब्धवानहं।
५ उद्यानानि तथा स्वार्थम् अकुर्व्वं काननानि च।
भूरुहान् फलिनस्तत्र नानाविधानरोपयं॥
६ वृक्षोत्पादककान्तारं सेक्तुं सरांसि चाखनं॥
७ दासानक्रीणि दासीश्च गृहजाश्च ममाभवन्।

यिरूशालमि मत्पूर्व्वं यावन्तश्चावसन् नराः।
तेभ्यः सर्व्वेभ्य एवासं गोमेषैर्धनवानहं॥
समचैषमहं रौप्यं जातरूपञ्च भूरिशः। ८
राज्ञां नानास्थलानाञ्चासामान्यानि वसून्यपि॥
गायकान् गायिकाश्चापि मन्निमित्तं न्ययोजयं।
सुखहेतून् नृपुत्राणां पत्नीमुपस्त्रियो ऽपि च॥
यिरूशालमि मत्पूर्व्वं यावन्तो न्यवसन् जनाः। ९
तेभ्यः सर्व्वेभ्य एवासं महान् बुद्ध्या च संयुतः।
मामकीना च या प्रज्ञा मयि सापि व्यतिष्ठत॥
स्वाक्षिभ्यां याचितं किञ्चिन्मया नैवोपसंहृतं। १०
स्वमनः सुखभोगाच्च कस्माच्चिन्न निवारितं।
यतो मम श्रमात् कृत्स्नाद् यत् सुखं मनसो ऽभवत्।
मम लभ्यं तदेवासीत् स्वीयकृत्स्नपरिश्रमात्॥
आलोच्य त्वखिलं कर्म्म स्वहस्ताभ्यां कृतं मया। ११
कृतञ्च साधनेच्छातः स्वीयसर्व्वपरिश्रमं।
बुद्धमवास्तवं सर्व्वं मनसश्च विडम्बनं।
अत्र दिवाकरस्याधः को ऽपि लाभो न विद्यते॥
प्रज्ञां मोहञ्च मौर्ख्यञ्च प्रावर्त्ते ऽहं निरीक्षितुं। १२
राज्ञः पश्चाद् य आयाति स जनः किं करिष्यति।
कृतं यत् पूर्व्वकालेषु स तदेव करिष्यति॥
किन्त्वन्धकारतो यादृक् दीप्तेरुत्कृष्टता भवेत्। १३
ज्ञानस्योत्कृष्टता मौर्ख्यात् तादृशी वीक्षिता मया॥
मूर्द्ध्नि स्तो ज्ञानिनो नेत्रे ध्वान्ते भ्राम्यति बालिशः। १४
गतिरेका तु सर्व्वेषामित्यपि ज्ञातवानहं॥
तदा चित्ते मया प्रोक्तं दशा मूर्खस्य या भवेत्। १५
ममापि भविता सैव महाज्ञान्यभवं कुतः।
पश्यैतदप्यलीकं स्यादिति चित्ते मयोदितं॥
मूर्खतो नास्ति विज्ञस्य चिरस्थायिन्यनुस्मृतिः। १६
यस्माद् आगामिकालेषु सर्व्वं सुविस्मरिष्यते।
हाहा विज्ञस्य मृत्युश्च मूर्खस्यैव भविष्यति॥
समजायत तत्पश्चात् जीवने ऽपि घृणा मम। १७

अपरञ्च मां कर्म्म क्रियमाणं रवेरधः।
सर्व्वमेव यतो ऽलीकं मनसश्च विडम्बनं॥
१८ अरज्ये ऽहं श्रमे कृत्स्ने सूर्य्यस्याधो मया कृते।
सर्व्वं यतो ऽर्पयिष्यामि नरे भाविनि मत्परं॥
१९ स तु विज्ञो ऽल्पबुद्धि र्वा भवितेति न निश्चितं।
सूर्य्यस्याधो मया किन्तु कृतो यत्र परिश्रमः।
ज्ञानं यत्र प्रयुक्तञ्च तेषां मामककर्म्मणां।
स्वामित्वं लप्स्यते तेन पश्यैतदप्यवास्तवं॥
२० सूर्य्यस्याधो ऽहमश्राम्यं सकलै र्यैः परिश्रमैः।
तत्रान्तःकरणस्याशां प्रावर्त्ते प्रोज्झितुं तदा॥
२१ बुद्ध्या ज्ञानेन सिद्ध्या च नरः कृत्वा परिश्रमं।
प्राप्तफलं करोत्यन्यं तत्राकृतपरिश्रमं।
पश्यैतदप्यलीकं हि व्यसनञ्च सुदुःसहं॥
२२ यतो दिवाकरस्याधो यत्र श्राम्यति मानवः।
तस्मात् कृत्स्नाच्छ्रमात् तस्य मनस्तापाच्च किं फलं॥
२३ तस्य सर्व्वदिनं कष्टं चेष्टनञ्च व्यथाकरं।
मनो रात्रौ न निद्राति पश्यैतदप्यवास्तवं॥
२४ मङ्गलं भोजनात् पानात् स्वकीये च परिश्रमे।
मनःसन्तर्पणादन्यत् मनुष्यस्य न विद्यते।
ईश्वरस्य कराच्चैतत् प्राप्यमितीक्षितं मया॥
२५ आहारैः सौख्यभोगैश्च कस्तु मत्तो ऽतिरिच्यते॥
२६ पश्य परेश्वरो यस्मिन् मनुष्ये परितुष्यति।
तस्मै बुद्धिञ्च विद्याञ्च हृष्टताञ्च ददाति सः॥
पापिने यच्छति क्लेशं सञ्चेतव्यं ततो धनं।
राशीकृत्य च दातव्यं तेनेशस्य प्रिये नरे॥
पश्यैतदप्यलीकं हि मनसश्च विडम्बनं॥

---

३ तृतीयोऽध्यायः।

१ कालस्य प्रभेदादायुषो ऽसारत्वं १६ ईश्वरस्य विचारो मनुष्यस्यासारत्वञ्च।

१ यत् किञ्चिज्जायते तस्य स्वीयकालो ऽपि विद्यते।

व्योम्नो ऽधः सर्व्वकार्य्यस्य स्वकीयसमयो ऽस्ति च॥
समयो जननस्यास्ति समयो मरणस्य च। २
समयो रोपणस्यास्ति कालो रोपितकर्त्तने॥
समयश्च बधस्यास्ति कालश्चिकित्सनस्य च। ३
समयो भञ्जनस्यास्ति समयो ग्रथनस्य च॥
समयः क्रन्दनस्यास्ति समयो हसनस्य च। ४
समयः शोचनस्यास्ति समयो नर्त्तनस्य च॥
समयो ग्रावविक्षेपे समयो ग्रावसञ्चये। ५
काल आलिङ्गनस्यास्ति कालश्च श्लेषवर्ज्जने॥
समयो ऽन्वेषणस्यास्ति समयो ऽपचयस्य च। ६
समयो रक्षणस्यास्ति समयः क्षेपणस्य च॥
समयो दारणस्यास्ति समयः सीवनस्य च। ७
समयो मौनभावस्य समयो भाषणस्य च॥
समयः प्रणयस्यास्ति समयो गर्हणस्य च। ८
समयः समरस्यास्ति कालः सन्धेश्च विद्यते॥
कः स्वपरिश्रमाल्लाभो जायते कर्म्मकारिणः॥ ९
ईश्वरेण नृसन्तानान आयासयितुमाशयात्। १०
यो निरूप्यत आयासः स समालोचितो मया॥
निर्म्मितं सकलं तेन स्वीयकाले मनोहरं। ११
विश्वमेव तथा तेन नराणां निहितं हृदि॥
तस्मादेव परेशेन क्रियमाणाखिला क्रिया।
साद्यन्तमनुसन्धातुं मनुष्येण न शक्यते॥
आनन्दाज्जीवनं यावत् सदाचाराच्च नेतरं। १२
मङ्गलं विद्यते तेषामिति जानामि निश्चितं॥
कस्यचिद् भोजनं पानं सर्व्वस्मिंश्च परिश्रमे। १३
सुखास्वादनमीशस्य दानमेव न संशयः॥
जाने ऽहन्त्वीश्वरो यद्यत् कुरुते तत् सनातनं। १४
तस्य वृद्धि र्न कर्त्तव्या न च कर्त्तव्यमूननं।
नरा ईशाद् बिभीयु र्यत् तदर्थं तत् करोति सः॥
यदस्ति तत् पुरैवासीद् भावि यत् तत् पुराभवत्। १५
यत् कालेन विध्वस्तं तद् उपस्थापयतीश्वरः॥

१६ सूर्य्यस्याधः पुनर्व्वारं मया कृत्वावलोकनं।
स्थानं दृष्टं विचारस्य तत्राधर्म्मस्त्वविद्यत।
धर्म्मस्थानञ्च सन्दृष्टं तत्राधर्म्मस्त्वविद्यत॥
१७ तदानीं मनसो मध्ये वागियं गदिता मया।
धार्म्मिकाधार्म्मिकावेव विचारयिष्यतीश्वरः॥
एकैकस्याश्च चिन्ताया एकैकस्य च कर्म्मणः।
स्वकीयसमयस्तस्य सन्निधौ समवाप्स्यते॥
१८ नृसन्तानान् समुद्दिश्य मया प्रोक्तमिदं तदा।
एतया दशया तेषाम् ईश्वरस्तान् परीक्षते।
स्वयं यत् पशुतुल्यास्ते तच्च तैः परिदृश्यते॥
१९ नृसन्तानस्य यद् भाग्यं तद्धि भाग्यं पशोरपि।
एकमेव तयो भाग्यं म्रियेते तावुभौ समं।
सर्व्वेषाम् एकधा प्राणा नरः श्रेयान् पशो नहि॥
२० यस्माद् यत् किञ्चनैवास्ति सकलं तदवास्तवं।
यद् यदेवास्ति सर्व्वं तत् स्थानमेकं प्रगच्छति।
सर्व्वमेव रजोजातं सर्व्वं याति रजः पुनः॥
२१ आत्मानं नरपुत्राणां को जानात्यूर्द्धगामिनं।
को वात्मानं पशो र्वेत्ति च्छित्वा अधोऽवरोहिणं॥
२२ मया दृष्टं मनुष्यस्य स्वीयकर्म्मणि हर्षणात्।
नेतरं विद्यते क्षेमं तस्य लभ्यं तदेव हि॥
स्वतः पश्चात्तु यद् भावि तद् द्रष्टुं यत्र शक्ष्यति।
केन तत् स्थानमानीय स उपस्थापयिष्यते॥

---

४ चतुर्थोऽध्यायः।

उपद्रव ईर्ष्यालस्यं लोभ एकाकिता मूर्खत्वञ्चैतेरायुषो ऽसारत्वं।

१ परावर्त्य मनः पश्चात् क्रियमाणं रवेरधः।
नानारूपमभिद्रोहं विचार्य्येदं मयेक्षितं।
क्रन्दतां पीडितानां हि सान्त्वको नहि विद्यते।
पीडके दृढहस्ते ऽपि सान्त्वको नहि विद्यते॥
२ ततो ये ऽद्यापि जीवन्ति तेभ्यो जीवद्भ्य एव तान्।

प्रमीतान् अवदं धन्यान् त्यक्तं यै र्जीवनं पुरा ॥
उभयोस्तु तयो र्धन्यः सो ऽद्याप्यप्राप्तजीवनः। ३
येन नादर्श्यसत्कर्म्म क्रियमाणं रवेरधः ॥
सर्व्वपरिश्रमः पश्चात् सर्व्वञ्च कार्य्यसाधनं। ४
बन्धो र्बन्धुं प्रतीर्ष्यया मूलमित्यीक्षितं मया।
नामैतदप्यलीकं हि मनसश्च विडम्बनं ॥
मूर्खः कुर्व्वन् करश्लेषं स्वीयमांसानि खादति॥ ५
वरं विश्रामसंयुक्तं करपुटस्य पूरणं। ६
न च श्रममनोदुःखैः सार्द्धं मुष्ट्योः प्रपूरणं ॥
पुनर्व्वारं मया दृष्टा सूर्य्यस्याधो व्यलीकता॥ ७
एकाकी वर्त्तते कश्चिद् द्वितीयेन विवर्ज्जितः। ८
पुत्रो न विद्यते तस्य सोदरो ऽपि न विद्यते।
श्रमस्तस्य त्वनन्तो ऽस्ति धनै र्दृष्टि र्न तृप्यति ॥
इत्थं श्राम्यन्नहं क्षेमात् स्वमनो वारयामि यत्।
निमित्तं कस्य कुर्व्वे तद् इति तेन न गद्यते।
नामैतदप्यलीकं हि व्यसनञ्च व्यथाकरं॥
एकाकी यो नरस्तस्मात् श्रेय एव नरद्वयं। ९
यतः श्रमस्य मध्ये ऽपि सुफलं विद्यते तयोः॥
तयोः पतितयोरेकम् अन्य उत्थापयिष्यति। १०
एकाकी वर्त्तते यस्तु पतनं तस्य बाधकं।
तमुत्थापयितुं यस्मान्नापरः को ऽपि विद्यते ॥
यद्येकत्र शयाते द्वौ तर्ह्युष्णत्वमवाप्नुतः। ११
यस्त्वेकाकी कथं वै स शक्नोति प्राप्तुमुष्णतां ॥
एकाक्याक्रम्यते येन स द्वाभ्यां प्रतिबाध्यते। १२
त्रिगुणीकृतसूत्रञ्च न तूर्णं छिन्नतां व्रजेत्॥
वरं दीनः सुधी र्बालो न च राजा जरातुरः। १३
मौर्ख्याद् येन पुनः शिक्षा ग्रहीतुं नहि शक्यते ॥
बालो यद्यपि राज्यार्थं कारागाराद् विनिर्गतः। १४
राजत्वसमये तस्य जन्म प्राप्तश्च निर्धनः ॥
तथापि भास्करस्याधो ये कुर्व्वन्ति गमागमौ। १५
जीविनस्ते द्वितीयस्य तस्य यूनो ऽनुगामिनः।

यो वृद्धस्य पदं प्राप्त इदमालोकितं मया॥
१६ जनश्रेण्या अनन्ताया अग्रतः स प्रगच्छति।
न हर्षिष्यन्ति तस्मिंस्तु मनुष्या भाविकालिकाः।
नामैतदप्यलीकं हि मनसश्च विडम्बनं॥

५ पञ्चमोऽध्यायः।

१ धर्म्मे मनुष्यस्य दोषः ८ पराक्रमस्यासारत्वं १० धनस्यासारत्वं १८ सारस्य निर्णयश्च।

१ त्वमीशस्य गृहं यास्यन् स्वपादौ रक्ष यत्नतः।
मूर्खाणां यज्ञतः श्रेष्ठः श्रवणार्थं तवागमः।
पापाचारे यतस्तेषां चेतना नहि जायते॥
२ ईश्वरस्य समक्षञ्च त्वमुच्चारयितुं वचः।
नैव सत्वरय स्वास्यं व्यग्रचित्तश्च मा भव॥
ईश्वरो वर्त्तते स्वर्गे पृथिव्यां त्वन्तु वर्त्तसे।
भवन्तु कारणात् तस्मात् स्वल्पा एव तवोक्तयः॥
३ यथायासबहुत्वेन युज्यते स्वप्नदर्शनं।
तथा वाक्यबहुत्वेन रवो मूर्खस्य युज्यते॥
४ व्रतपूर्व्वकमीशाय त्वया यद्यत् प्रतिश्रुतं।
तत्परिशोधनं कर्त्तुं विलम्बो मावलम्ब्यतां॥
यस्मान्मूर्खेषु लोकेषु प्रसादो नहि वर्त्तते।
त्वया यद्धि प्रतिज्ञातं क्रियतां तस्य शोधनं॥
५ वरं व्रतमकृत्वापि न प्रतिश्रवणं त्वया।
न च कृत्वा व्रतं पश्चात् स्वकीयव्रतलोपनं॥
६ कृतपापं वपुः कर्त्तुं मानुजानीहि वक्त्रकं।
भ्रान्तिरासीदिदं वाक्यं स्वर्गदूते च मा वद॥
ईश्वरं स्वीयवाक्येन किमर्थं कोपयिष्यसि।
तव हस्तकृतं कर्म्म कोपात् तस्य विनंक्ष्यति॥
७ स्वप्नदर्शनबाहुल्यं यथालीकत्वसंयुतं।
तथैव वाक्यबाहुल्यं भेतव्यन्त्वीश्वरात् त्वया॥
८ पीडनं धनहीनानां रोधञ्च न्यायधर्म्मयोः।
देशे निरीक्षसे चेत् त्वं तर्हि मा विस्मितो भव॥
यस्मात् प्रोच्चतरो ऽध्यक्षः सुप्रोच्चस्यापि विद्यते।

पुनः प्रोच्चतमः कश्चिद् विद्यते चोभयोस्तयोः॥
भूम्युत्पन्नस्य यो लाभः सकलेषु स वर्त्तते। ९
सम्भवत्युपकारस्य भूपालस्यापि भूमितः॥
रौप्ये यः प्रीयते तृप्तिं स न प्राप्नोति रौप्यतः। १०
न वा वित्तप्रियो वृद्धिं मन्ये तच्चाप्यवास्तवं॥
वर्द्धमाने धने संख्या वर्द्धते ग्रासकारिणां। ११
चक्षुर्भ्यां दर्शनादन्यत् किं धनस्वामिनां फलं॥
स्वल्पभुग् बहुभुग् वा स्यात् सुखं शेते कृषीवलः। १२
तृप्त्या किन्तु धनाढ्यस्य निद्रानुज्ञायते नहि॥
सूर्य्यस्याधो मया दुःखम् इदं दृष्टं व्यथाकरं। १३
स्वामिना स्वीयसम्पत्ति र्निजानिष्टाय रक्ष्यते॥
व्यसनेन कठोरेण सम्पत्तिः सा विनश्यति। १४
आत्मजं जनयित्वा च रिक्तहस्तः स तिष्ठति॥
जठरान्निजमातुश्च स यथैव विनिर्गतः। १५
परावर्त्तिष्यते तद्वत् नग्नो यातुं यथागतः।
न श्रमेणार्जितं किञ्चित् हस्तेनादाय यास्यति॥
महाव्यथाकरं दुःखम् एतदप्यस्ति निश्चितं। १६
सर्व्वथा यद्वदायातस्तद्वदेव स यास्यति॥
किं फलं लप्स्यमानः स कुरुते वायवे श्रमं॥
यावज्जीवनमाहारं कुतो ध्वान्ते करोति सः। १७
सहते चापि भूयिष्ठा बाधापीडाविडम्बनाः॥
इदं पश्य मया बुद्धं मनुष्याय रवेरधः। १८
स्वल्पघस्रप्रमाणं यद् आयुरीशेन दीयते।
तद् यावत् श्राम्यता तेन स्वीयसर्व्वपरिश्रमात्।
भोजनञ्चैव पानञ्च परिभोगः सुखस्य च।
एतत् क्षेमं सुदृश्यञ्च तस्य भाग्यमिदं यतः॥
दत्त्वा नराय कस्मैचिद् धनसम्पत्तिमीश्वरः। १९
तां भोक्तुं स्वांशमादातुं हर्षितुञ्च निजश्रमे।
क्षमतामपि चेद् यच्छेद् दानं तदीश्वरस्य तत्॥
नैदातीवानुचिन्त्यन्ते घस्रास्तेन निजायुषः। २०
यस्माच्चित्तस्य हर्षेण प्रतिवक्ति तमीश्वरः॥

६ षष्ठोऽध्यायः।

१ अभुक्तधनस्य निष्फलत्वं ७ सुखभोगस्यासारत्वं १० जीवनस्यासारत्वञ्च।

१ दुःखमेकं मयादर्शि विद्यमानं रवेरधः।
भूयो भूयो मनुष्येषु घटते तदमङ्गलं॥
२ ईश्वरो दत्तवान् यस्मै धनसम्पत्तिसम्भ्रमान्।
अपूर्णा च मनोवाञ्छा यस्यैकापि न शिष्यते।
भोगस्य क्षमता तस्मै चेदीशेन न दीयते।
उदासीनो नरः किन्तु जायते फलभोगकृत्।
मन्ये तर्हि व्यलीकं तद् व्यसनञ्च व्यथाकरं॥
३ जनयित्वा शतं पुत्त्रान् जीवित्वा बहुवत्सरान्।
यो नरो यापयत्यत्र दिवसान् बहुसंख्यकान्।
सुखभोगेन चेत् तृप्तिं मनस्तस्य न गच्छति।
कुणपस्तस्य भूमौ च यथार्हं न निखन्यते।
तर्हि वच्मि नरात् तस्माद् गर्भस्रावो ऽतिरिच्यते॥
४ यतः सो ऽलीक आयाति सान्धकारो ऽपयाति च।
तदीयनामधेयञ्च तिमिरेण निगुह्यते॥
५ नैव तेन रवि र्दृष्टो न वा ज्ञानमुपार्जितं।
अत एव नरात् तस्मात् शान्तिस्तस्याधिकाभवत्।
६ सञ्जीवन्नपि वर्षाणां द्विसहस्रं नरो धनी।
मङ्गलं नहि भुङ्क्ते चेत् श्रेष्ठता तर्हि तस्य का।
शेषे किं सकलैः स्थानमेकमेव न गम्यते॥
७ सर्व्वश्रमो मनुष्यस्य स्वीयवक्त्रनिमित्तकः॥
आहारस्य तु या वाञ्छा सा कदापि न पूर्य्यते॥
८ अतो मूर्खान्नरो ज्ञानी किं प्राप्नोत्यधिकं शुभं।
किं वा दीनः सजीवानां साक्षादाचरणे पटुः॥
९ भ्रमणादभिलाषस्य श्रेष्ठं चाक्षुषदर्शनं।
नामैतदप्यलीकं हि मनसश्च विडम्बनं॥
१० अधुना वर्त्तमानस्य नामधेयं पुरा स्मृतं।
सकलै र्ज्ञायते यत् स नर इत्यभिधीयते।
स्वतः शक्तिमता सार्द्धं विवादाय स न क्षमः॥

बहवो विषयाः सन्ति व्यलीकत्वप्रवर्द्धकाः। ११
अतस्तेभ्यो मनुष्येण किं फलं प्रतिलभ्यते॥
नृणां जीवनकाले किं हितं को निश्चिनोति तत्। १२
अलीकं यन्नरस्यायुः स्वल्पघस्रमितन्तु तत्।
याप्यते च मनुष्येण यथा छाया तथैव तत्।
यत्तु भानोरधः पश्चाद् भावि तत् कस्तमादिशेत्॥

---

७ सप्तमोऽध्यायः।

१ दुःखातिशोकसहिष्णुताज्ञानानाम् असारतायाः प्रतीकारः १० ज्ञानस्य दुर्लभत्वं।

नरस्य या सुकीर्त्तिः सा श्रेष्ठा सुगन्धितैलतः। १
तद्वन्मृत्युदिनं तस्य श्रेष्ठं जन्मदिनादपि॥
भोज्यशालाप्रवेशाच्च श्रेष्ठः शोकालयागमः। २
यस्मात् सर्व्वनराणां स परिणामो भविष्यति।
तत्र चित्तनिवेशश्च सजीवेष्वपि युज्यते॥
नृणां हास्यविनोदाच्च श्रेयस्यस्ति विषस्रता। ३
मुखस्य म्लानता यस्माच्चित्तस्यारोग्यकारिणी॥
शोकवेश्मनि विज्ञानां नराणां वर्त्तते मनः। ४
निर्ब्बोधानां मनः किन्तु हर्षवेश्मनि वर्त्तते॥
मनुष्याणानभिज्ञानां गानस्य श्रवणादपि। ५
श्रेयः प्रज्ञाविशिष्टस्य भर्त्सनाश्रवणं भवेत्॥
पाकस्थाल्या अधो यस्मात् कण्टकानां स्वनो यथा। ६
तथा हासो ऽस्ति मूर्खाणां नामैतदप्यवास्तवं॥
दौरात्म्येन नरो विज्ञो हतबुद्धि र्विधीयते। ७
उत्कोचेन विकारश्च हृदयस्य प्रसिध्यति॥
कार्य्यस्यारम्भतः श्रेयान् परिणामो न संशयः। ८
श्रेयान् धीरस्वभावश्च दर्पयुक्तस्वभावतः॥
मनोमध्ये परिक्रोद्धुं मैव त्वं सत्वरो भव। ९
यस्मादज्ञानिनामेव क्रोडे क्रोधोऽवतिष्ठते॥
श्रेष्ठ आधुनिकात् कालात् पूर्व्वकालो ऽभवत् कुतः। १०
इति मा पृच्छ यस्मात् स प्रश्नो न ज्ञानमूलकः॥

११ प्रज्ञा पैटकसम्पत्तेः सममूल्यं हितं भवेत्।
परन्तूत्पद्यते तस्मात् सुफलं सूर्य्यदर्शिनां॥
१२ शरणं हि यथा ज्ञानं वैभवं शरणं तथा।
गुणो ज्ञानस्य किन्त्वेष प्रज्ञा प्राज्ञाय जीवदा॥
१३ ईश्वरस्य क्रियां पश्य तेन यत् कुटिलीकृतं।
तत् पुनः सरलीकर्त्तुं केन मर्त्त्येन शक्यते॥
१४ सुखकाले सुखं भुंक्ष्व दुःखकाले च चिन्तय।
सृष्टौ तावीश्वरेणोभावनुरूपौ परस्परं।
पश्चाद् यद् भावि तत् तस्मान्नरो निर्णेतुमक्षमः॥
१५ मया त्वालोचितं सर्व्वं स्वकीयालीकजीवने।
मनुष्या धार्म्मिकाः केऽपि विनश्यन्ति स्वधर्म्मतः।
पापिनः केऽपि पापाच्च जायन्ते दीर्घजीविनः॥
१६ मा भवेरतिधर्म्मी त्वं मैवातिज्ञानमाचरेः।
स्वयं स्वीयविनाशं त्वं किमर्थं साधयिष्यसि॥
१७ मा भवेरतिदुर्वृत्तो मैव मूर्खत्वमाचरेः।
किमर्थं त्यक्ष्यसि प्राणान् असम्पूर्णे निजायुषि॥
१८ एकस्यालम्बनं भद्रम् अशैथिल्यं द्वितीयके।
यत ईश्वरभक्ता ये सर्व्वस्मान्निस्तरन्ति ते॥
१९ नगरं ये ऽधितिष्ठन्ति दश विक्रमिणो नराः।
ज्ञानी ज्ञानेन तेभ्यो ऽपि शक्तियुक्तो विधीयते॥
२० अपराधमकृत्वा यः केवलं धर्म्ममाचरेत्।
तादृशो धार्म्मिकः कश्चिन्नरः क्षित्यां न विद्यते॥
२१ मा सर्व्वासूच्यमानासु वाक्षु ते धीयतां मनः।
न चेत् श्रोष्यसि दासस्य रवं त्वां परिशप्यतः॥
२२ बहुशो यत् त्वयाप्यन्ये शप्तास्तद् वेत्ति ते मनः॥
२३ सर्व्वमेतद् विवेकेन सुपरीक्षितवानहं।
प्रज्ञां लब्धुमचेष्टे च सा तु मत्तो दवीयसी॥
२४ दूरं यत् सुगभीरञ्च तत् प्राप्तुं केन शक्यते॥
२५ प्रज्ञाविवेचने बोद्धुं सुनिर्णेतुञ्च चर्चया।
दोषं मौर्ख्यस्य निःस्वेतुमुन्मादस्य च मूर्खतां।
मया स्वीयमनः पश्चात् पुनर्व्वारं प्रवर्त्तितं॥

तदाज्ञापि मयेदं यत् सा स्त्रीरूग्रा क्षतान्ततः। २६
हृद् यस्या वागुराजालं पञ्चशाखौ च शृङ्खले॥
साक्षादीशस्य यः साधुस्तस्या हस्तात् स रक्ष्यते।
किन्तु यः पातकाचारी स नरो भन्त्स्यते तया॥
विवेकन्त्वनुसन्धातुम् एकमेकं प्रपश्यता। २७
इदं पश्य मया बुद्धमिति वक्त्युपदेशकः॥
यन्न प्राप्तं मयाद्यापि तदन्विच्छति मे मनः। २८
एकं मध्ये सहस्रस्य पुरुषं प्राप्तवानहं।
मध्ये तेषान्तु सर्व्वेषां नैकां नारीमवाप्तवान्॥
केवलमेतदेवात्र मया पश्य निरूपितं। २९
ईश्वरेण नराः सृष्टा ऋजुभावसमन्विताः।
अन्विष्टाः किन्तु तैरेव बहुधा परिकल्पनाः॥

---

८ अष्टमोऽध्यायः।

१ राज्ञामादरस्य कर्त्तव्यत्वं ६ योग्यकाले कर्म्मणः कर्त्तव्यत्वं ११ धर्म्महीनानां धनाद् धर्म्मिणां दैन्यस्य श्रेष्ठता १६ ईश्वरीयकर्म्मणामसन्धानीयत्वञ्च।

क आस्ते ज्ञानिनस्तुल्यः को वाक्यस्यार्थबोधकः। १
प्रज्ञयैव मनुष्यस्य प्रसन्नास्यो विधीयते।
तदीयवदनस्यापि काठिन्यं परिवर्त्त्यते॥
अहं वच्मि त्वया राज्ञ आदेशः परिपाल्यतां। २
ईश्वरीयस्य दिव्यस्य गुरुताया अपेक्षया॥
सहसा तत्सकाशात् त्वं प्रस्थानं न कुरुष्व च। ३
कुप्रयुक्तिञ्च मातिष्ठ स यदिच्छेत् करोति तत्॥
यस्मादवनिपालस्य वचनं सपराक्रमं। ४
किं करोषीति तं वक्तुं समर्थः को नरो भवेत्॥
आज्ञाग्राही जनो नैव जायते कुप्रयुक्तिवित्। ५
समयं किन्तु नीतिञ्च जानीते ज्ञानिनो मनः॥
समयः पश्य नीतिश्च सर्व्वकार्य्यस्य विद्यते। ६
न चेन्नरस्य दौर्गत्यं दुःसहं नात्र संशयः॥
यस्मात् किं भवितव्यं तत् तेन विज्ञायते नहि। ७

कथं वा भवितव्यं तत् कस्तं ज्ञापयितुं क्षमः॥
८ नास्ति स्वामी नरो ऽसूनामसून् संरक्षितुं क्षमः।
तथा मृत्युदिने तस्य प्रभुत्वं नहि विद्यते।
तस्माद् युद्धाद् विमोक्षश्च कस्यचिन्नहि जायते।
दुर्जनश्च स्वदौर्जन्यं न कथञ्चन रक्षति॥
९ सर्व्वमेतन्मया दृष्टं क्रियमाणे रवेरधः।
सर्व्वस्मिन्नेव कार्य्ये च मया चित्तं निवेशितं।
प्रभुत्वं कुरुते जातु स्वानिष्टाय नरे नरः॥
१० अपरं दुर्जनानाञ्च दृष्टान्त्येष्टिक्रिया मया।
धर्म्मधाम्नो ऽपि निष्क्रान्ताः के ऽपि तत्र समागमन्।
व्यस्मर्य्यन्त पुरे किन्तु सुकृतो ऽलीकमेव तत्॥
११ दुष्क्रियां प्रति दण्डाज्ञा यन्न सिध्यति सत्वरं।
तस्मात् स्वान्तं नृपुत्त्राणां दुष्क्रियायै व्यवस्थितं॥
१२ दुष्क्रियाणां शतं कृत्वा किं जीवेत् पापकृच्चिरं।
अस्त्वहं किन्तु जानामि ये नरा बिभ्यतीश्वरात्।
समक्षं तस्य सन्त्रस्तास्तेषां क्षेमं भविष्यति॥
१३ दुश्चरित्रमनुष्यस्य क्षेमं नैव भविष्यति।
छायातुल्यश्च तस्यायु र्नैव प्राप्स्यति दीर्घतां।
यस्मादीशस्य साक्षात् स न प्रगच्छति साध्वसं॥
१४ व्यलीकञ्चापरं किञ्चिद् दृश्यते भूमिमण्डले।
प्राप्यते धर्म्मिभिः कैश्चिद् योग्या पापात्मनां दशा।
पुनः पापात्मभिः कैश्चिद् योग्या धर्म्मवतां दशा।
एतदपि व्यलीकं स्यादियमेव मति र्मम॥
१५ तदाहमस्तुवं हर्षं यस्मान्नास्ति रवेरधः।
नरस्य भोजनात् पानाद् हर्षणाच्चापरं शुभं॥
सूर्य्यस्याधश्च तस्मै यद् आयुरीशेन दीयते।
तस्य श्रमेण पूर्णस्य तदेवास्ति स्थिरं फलं॥
१६ पश्चात् प्रज्ञामवाप्तुञ्च क्रियमाणमिह क्षितौ।
सर्व्वायासञ्च सन्द्रष्टुं मया चित्तं न्यवेश्यत।
स्वप्नार्थं यद् दिवारात्रं नरो नेत्रे न मीलति॥
१७ ईशस्य सर्व्वकार्य्यन्तु विचार्य्येदं मयेक्षितं।

अत्र दिवाकरस्याधो यद्यत् कार्य्यं विधीयते।
सकलं तन्मनुष्येण विज्ञातुं नहि शक्यते॥
तद् बोद्धुञ्च यतित्वापि नरस्तन्नावगच्छति।
ज्ञातुं कृतमति र्ज्ञानी तन्न शक्नोति वेदितुं॥

---

९ नवमोऽध्यायः।

१ मनुष्यस्य निधनवशत्वं ११ ईश्वरीयकर्म्मणः श्रेष्ठत्वं १२ पराक्रमात् ज्ञानस्य श्रेष्ठत्वं।

अतश्चित्तं निवेश्याहं सर्व्वमेतदमार्गयं। १
धार्म्मिका ज्ञानवन्तश्च नराः स्वकर्म्मभिः सह।
करयोरीश्वरस्यैव सन्तिष्ठन्ते समर्पिताः।
न स्नेहं वेत्ति न द्वेषं नरः सर्व्वं पुरः स्थितं॥
अविशेषेण सर्व्वेषां सर्व्वरूपा दशा भवेत्। २
दशैका साध्वसाध्वो र्हि भद्रशुद्धकलङ्किनां।
यज्ञकारिमनुष्यस्य यज्ञत्यागिनरस्य च।
यादृशी च दशा साधोस्तादृशी पापिनो दशा।
यादृशी शपमानस्य दिव्याद् भीतस्य तादृशी॥
सर्व्वेषां यद्दशैकास्ति तदेवात्र रवेरधः। ३
क्रियमाणस्य सर्व्वस्य कर्म्मणः कुत्सितं फलं॥
सन्ति पूर्णान्यधर्म्मेण न्टपुत्त्राणां मनांसि च।
यावज्जीवञ्च मूर्खत्वं तेषां चित्तेषु विद्यते।
तत्पश्चात् प्रेतलोकञ्च ते प्रगच्छन्ति सत्वरं॥
सजीवैः सह यो युक्तः प्रत्याशा तस्य विद्यते। ४
प्रमीतात् पशुराजात् तु जीवन् श्वापि विशिष्यते॥
मरणं भविताऽस्माकमिति जानन्ति जीविनः। ५
गतप्राणा नराः किन्तु नैव जानन्ति किञ्चन।
लाभो न शिष्यते तेषां लुप्ता यस्मादनुस्मृतिः॥
प्रणयो द्वेष ईर्ष्या च तेषां नाशं ययुः पुरा। ६
सूर्य्यस्याधश्च यत् किञ्चित् क्रियते तत्र कश्चन।
अंशस्तेषां पुनर्व्वारं न कदाचिद् भविष्यति॥
याहि त्वं हृष्टभावेन स्वीयभक्ष्यं प्रभुंक्ष्व च। ७

प्रफुल्लेन च चित्तेन स्वीयद्राक्षारसं पिव।
यस्मात् त्वदीयकार्य्येषु सन्तुष्टो ऽभवदीश्वरः॥
८ तव वस्त्राणि शोभन्तां शुक्लवर्णानि सर्व्वदा।
तावत्तवोत्तमाङ्गाच्च तैलं मैवोपसंहर॥
९ तुभ्यं भानोरधो यच्चालीकमायुः प्रदीयते।
तत्र यावन्ति जायन्ते व्यलीकानि दिनानि ते।
तानि यावत् सुखं भुंच्व प्रियया भार्य्यया सह॥
जीवनात् तव यैस्त्वं श्राम्यस्यत्र रवेरधः।
लभ्यं तेभ्यः श्रमेभ्यो ऽपि तव भाग्यमिदं यतः॥
१० तव हस्तेन यत् साध्यं साध्य त्वं स्वबलेन तत्।
यन्न कार्य्यं न सङ्कल्पो न बुद्धि र्न च विज्ञता।
विद्यते तत्र पाताले यत् प्रति त्वं प्रगच्छसि॥
११ पुनर्व्वारं मया दृष्टमिदमत्र रवेरधः।
न शीघ्रगामिनां द्रावे न वीराणां रणे जयः।
न च ज्ञानवतामन्नं न च बुद्धिमतां धनं।
न बुधानां जनप्रीति र्निश्चितांशो ऽस्ति सर्व्वदा।
समयो दैवयोगश्च यस्मात् सर्व्वानुपैति तान्॥
१२ अधिकन्तु मनुष्यो ऽपि स्वकालं नावगच्छति।
ध्रियमाणा यथा मीना जालेनानिष्टकारिणा।
यथा वा पाशबन्धेन ध्रियमाणा विहङ्गमाः॥
तैः समा नरसन्तानाः पाशबद्धा भवन्ति हि।
अनिष्टकारके काले हठात् तान् प्रत्युपस्थिते॥
१३ एकदैतादृशी प्रज्ञा मयादर्शि रवेरधः।
प्रत्यभात् सुमहन्ती च सा प्रज्ञा मम दृष्टये॥
१४ आसीदेकं पुरं क्षुद्रं स्वल्पे तत्रावसन्नराः।
तदाक्रम्य महान् राजा वेष्टयामास सर्व्वतः।
तद्विरुद्धञ्च दुर्गाणि सुमहान्ति विनिर्म्ममे॥
१५ तत्रासीद् दुर्गतः कश्चित् प्रज्ञया संयुतो नरः।
स्वीयप्रज्ञाप्रभावेन नगरं तद् ररक्ष सः।
दुर्गतः स नरः किन्तु जनै र्नैवानुचिन्तितः॥
१६ तदाहं प्रोक्तवानेतत् प्रज्ञा श्रेष्ठा बलादपि।

दुर्गतस्य तु या प्रज्ञा सा जनैरवमन्यते।
तदीयेषु च वाक्येषु मनस्तै र्न निधीयते॥
श्रूयन्ते शान्तियुक्तानि वाक्यानि ज्ञानिनां यथा। १७
न तथा मूर्खराजस्य श्रूयते प्रोच्चघोषणं॥
युद्धास्त्रेभ्यो ऽपि सर्व्वेभ्यो ज्ञानं मङ्गलदायकं। १८
एकः पापी नरः किन्तु बहुमङ्गलनाशकः॥

---

१० दशमोऽध्यायः।

१ ज्ञानाज्ञाने अभ्युपदेशकथनं १६ नृपानधि कथनञ्च।

मक्षिकाकुणपैः स्वल्पैस्तैलं गन्धोपजीविनां। १
उत्पादयति दुर्गन्धं फेनयुक्तञ्च जायते।
तथैव ज्ञानसम्मानौ जयति स्वल्पमूर्खता॥
ज्ञानिनो दक्षिणस्था धीः सव्यस्था त्वबुधस्य सा॥ २
प्रगच्छन्नपि मार्गेण मूर्खः सन्त्यज्यते धिया। ३
अहमज्ञान इत्येव सकलान् सम्प्रवक्ति सः॥
शास्ता क्रुध्यति चेत् तुभ्यं स्वस्थानं तर्हि मा त्यज। ४
महतामपि पापानां शान्ति र्यस्मात् प्रतिक्रिया॥
एको दोषो मया दृष्टः क्रियमाणो रवेरधः। ५
भूपालस्य सकाशात् स समुत्पन्नो मतिभ्रमः॥
जाल्मेष्वारोप्यते मौर्ख्यम् अतिप्रोच्चपदेष्वपि। ६
स्थानेषु किन्तु निम्नेषु निषीदन्ति धनेश्वराः॥
जाल्मेष्वेषु समारूढान् किङ्करान् दृष्टवानहं। ७
जातु किङ्करवद् भूमौ पादाभ्यां गच्छतः प्रभून्॥
खातं खनति यः कश्चित् स तन्मध्ये पतिष्यति। ८
वारणी भिद्यते येन भुजङ्गेन स दंक्ष्यते॥
यो ऽपकर्षति पाषाणान् स तैरभ्याहनिष्यते। ९
यश्च कृन्तति काष्ठानि परिबाधिष्यते स तैः॥
अतीक्ष्णो सति लौहास्त्रे धारां यो नहि निश्यति। १०
द्विगुणैव प्रयोक्तव्या शक्तिस्तेन भविष्यति।
कर्त्तव्ये सिद्धिलाभस्तु ज्ञानादेव प्रजायते॥

११ निःसारे पठिते मन्त्रे विदश्चत्युरगो यदि।
वावदूकनरस्तर्हि कथं स्यादुपकारकः॥
१२ निर्गता ज्ञानिनो वक्त्राद् उक्तयः प्रीतिसम्भवाः।
स्वाधरौ किन्तु मूर्खस्य मनुष्यस्य विनाशकौ॥
१३ निर्गतानां मुखात् तस्य वाचां मौर्ख्यमुपक्रमः।
परिणामस्तदीयोक्तेरुन्मादः सर्व्वनाशकः॥
१४ निर्ब्बोधो यो मनुष्यः स बहुवाक्यानि भाषते।
यत्तु भावि मनुष्येण ज्ञातुं तन्नहि शक्यते।
तत्पश्चाद् भवितव्यं यत् कस्तं तज्ज्ञापयिष्यति॥
१५ स्वश्रमेण नरो मूर्खः क्लान्तिमेव प्रगच्छति।
पुरगामी यतः पन्थास्तेन नैवावगम्यते॥
१६ अधन्या त्वं तदा हे भूस्तव राजा यदा शिशुः।
यदा च तावकाध्यक्षाः प्रत्यूषे भोज्यकारिणः॥
१७ धन्या त्वन्तु तदा हे भू राजा ते कुलजो यदा।
अध्यक्षा उपयुक्ते च समये भोज्यकारिणः।
बलवृद्धेरभीष्टातो न च मद्यस्य चेष्टया॥
१८ गृहस्वामिन आलस्याद् वेश्मस्थूणा विशीर्य्यते।
शैथिल्यात् करयो र्गेहे सलिलानि क्षरन्ति च॥
१९ हास्यार्थं रच्यते भोज्यं मद्यञ्चानन्दयत्यसून्।
प्रयोगे किन्तु सर्व्वस्मिन्नर्था एवोपयोगिनः॥
२० राजानं मनसापि त्वं शप नैव कथञ्चन।
शयनागारगर्ब्भेऽपि धनिनं शप नैव वा॥
यस्माद् विहङ्गमेनैव रवः सञ्चारयिष्यते।
प्राणिना पक्षयुक्तेन सन्देशो वा हरिष्यते॥

---

११ एकादशोऽध्यायः।

१ सावधानत्वदातृत्वयोरुपदेशः ७ यौवनकालस्यासारत्वं।

१ अम्भसामुपरि स्वीयं भोज्यमुत्सृज्यतां त्वया।
गतेषु बहुघस्रेषु लप्स्यते तत् त्वया पुनः॥

अंशस्त्वया च सप्तभ्यः किंवाष्टभ्यो ऽपि दीयतां। २
यस्मात् का का विपत् पृथ्व्यां भविता त्वं न वेत्सि तां॥
यदाभ्राः पूर्णतां यान्ति तदा वर्षन्त्यपो भुवि। ३
निपतन् दक्षिणायाञ्च वोत्तरायां दिशि द्रुमः।
यस्मिन्निपतति स्थाने तस्मिन्नेवावतिष्ठते॥
यः समालोकते वायुं वीजं वपति नैव सः। ४
यश्च निरीक्षते मेघान् स शस्यं नहि कृन्तति॥
त्वया यद्वत् समीरस्य गति र्नैवावगम्यते। ५
जठरे च सगर्भाया अस्थ्नां वृद्धि र्न बुध्यते।
सर्व्वस्रष्टुस्तथेशस्य क्रिया न ज्ञायते त्वया॥
प्रात र्वप स्ववीजं त्वं सायं हस्तौ न संहर। ६
यस्मादेतत् तदन्यद् वा कतरं सुफलिष्यति।
उभयो र्गुणा एको वा भवितेति न वेत्सि हि॥
रुचिरा दीप्तिरक्ष्णोश्च हितं भास्करदर्शनं॥ ७
यो नरो बहुवर्षाणि जीवन् हृष्यति सर्व्वदा। ८
तेनापि क्रियतां चिन्ता दिवसानां तमस्विनां।
यस्मात् तानि बहून्येव भावि सर्व्वन्त्ववास्तवं॥
हे युवन् स्वीयतारुण्ये त्वमानन्दं समाचर। ९
हृष्टं भवतु चित्तं ते यौवनस्य दिनेषु च।
आचर स्वमनोवाञ्छां कामनां वा स्वनेत्रयोः॥
किन्तु त्वां तस्य सर्व्वस्य विचाराय यदीश्वरः।
राजद्वारं समानेता तत् सम्यक् चिन्त्यतां त्वया॥
चित्तान्निराकुरूद्वेगं क्लेशं वारय देहतः। १०
अरुणोदयवद् यस्मात् तरुणत्वमवास्तवं॥

---

१२ द्वादशोऽध्यायः।

१ वार्द्धक्यदुःखात् पूर्व्वमीश्वरसेवनस्यावश्यकत्वं ८ ईश्वराद् भीतेः सारत्वं।

स्वीययौवनकाले त्वं स्वस्रष्टारं विचिन्तय। १
मा प्रतीक्षस्व घस्राणां कुत्सितानाम् उपागमं।

मा प्रतीक्षस्व वा तेषां वत्सराणाम् उपस्थितिं।
यानधि वक्ष्यसीदं त्वं न रोचन्त इमे मम॥
२ मा प्रतीक्षस्व तं कालं यस्मिन् यास्यन्ति कृष्णतां।
दिवाकरस्य दीप्तिश्च क्षपानाथ उडूनि च।
वृष्टावपि व्यतीतायाम् आयास्यन्ति घनाः पुनः॥
३ कम्पिष्येते दिने तस्मिन् भवनस्य च रक्षिणौ।
पुरुषौ बलवन्तौ च परिभुग्नौ भविष्यतः।
पेषिकाश्चाल्पतां गत्वा विरमिष्यन्ति कर्म्मतः।
गवाक्षाभ्यां प्रदर्शिन्यौ चान्धतां प्रगमिष्यतः॥
४ कपाटौ पथि रोत्स्येते क्षेष्यते पेषणध्वनिः।
विहगस्य रवादेव निद्राभङ्गो भविष्यति।
गीतेश्च सकलाः कन्या गमिष्यन्त्यवसन्नतां॥
५ उच्चस्थानादपि त्रासस्तदानीं सञ्जनिष्यते।
उपस्थास्यन्ति मार्गे च बहवो भयहेतवः।
वादामाख्यतरोश्चापि पुष्पं चारु न मंस्यते।
शलभश्च स्वभारेण भारग्रस्तो भविष्यति।
आहारीयरसज्ञानं विकारञ्च गमिष्यति॥
यस्मान्नरेण गन्तव्यं चिरकालार्थकं गृहं।
पर्य्यटिष्यन्ति मार्गे च शोकयुक्ता विलापिनः॥
६ कृते त्वया विलम्बे च छेत्स्यते रौप्यशृङ्खलं।
जातरूपीयपात्रञ्च प्रगमिष्यति भग्नतां।
उपान्ते च जलोत्सस्य कलसः शतखण्डतां।
प्रधिपार्श्वस्थचक्रञ्च विदीर्णत्वम् अवाप्स्यति॥
७ प्रत्यायास्यति धूलिश्च स्वीयोत्पत्तिस्थलं मृदं।
प्रत्यायास्यति किन्त्वात्मा स्वीयस्रष्टारमीश्वरं॥
८ अलीकानामलीकाग्र्यमिति वक्त्युपदेशकः।
यद्यदेवास्ति तत् सर्व्वम् अलीकं नात्र संशयः॥
९ परन्तु ज्ञानवान् यस्मात् स आसीदुपदेशकः।
तस्मात् सोऽशिक्षयल्लोकान् पर्य्यालोच्य परीक्ष्य च।
बह्वीररचयद् वाचो हितज्ञानप्रदायिकाः॥
१० चारुवाक्यानि सम्प्राप्तुम् अन्वैषीदुपदेशकः।

सारल्याल्लिखिता अत्र विश्वास्याः सन्ति चोक्तयः॥
अङ्कुशैः सदृशाः सन्ति वाचो ज्ञानवतां नृणां। ११
कीलकैः सुदृढं बद्धैः सभाध्यक्षाश्च सन्निभाः।
एकेनैव च ते सर्व्वे ददिरे पालरक्षिणा॥
हे मत्पुत्र परन्तु त्वं कुरुष्वात्र विवेचनां। १२
सीमा न विद्यते कोऽपि बहुपुस्तकलेखने।
विद्याभ्यासस्य चाधिक्यं शरीरार्थं श्रमावहं॥
सारवाक्यं समग्रं यत् तत् त्वस्माभि र्निशम्यतां। १३
परमेशाद् बिभीहि त्वम् आज्ञास्तस्य च पालय।
इदं यस्मान्मनुष्यस्य सर्व्वार्थानाम् उपार्ज्जनं॥
विचारस्थानमीशेन सकलानेष्यते क्रिया। १४
निगूढं सकलञ्चापि यथा भद्रं तथाधमं॥

सुलेमना लिखितं परमगीतं।

१ प्रथमोऽध्यायः।

ख्रीष्टं प्रति समितेः प्रेमादि।

१ सुलेमनः परमगीतं॥

२ आननेन स्वकीयेन भवान् मां परिचुम्बतु।
भवदीयो यतः प्रेमा सुरसो गोस्तनीरसात्॥
३ त्वदीयोत्तमतैलानां सौरभस्यैव कारणात्।
अवतारिततैलेन तव नाम यतः समं।
तस्मादेव त्वयि प्रेमा कन्याभिः संविधीयते॥
४ आकर्ष मां त्वमस्माभिरनुधाविष्यसे तदा।
स्वकीयान्तःपुरं नीत्वा नृपेणाहं प्रवेशिता।
उल्लासमेव हर्षञ्च करिष्यामो वयं त्वयि।
संस्तोष्यामस्तव प्रेम चाधिकं गोस्तनीरसात्।
इमाः सरलभावेन त्वयि प्रेम प्रकुर्व्वते॥
५ हे कन्या यिरूशालमीयाः कृष्णाहं किञ्च सुन्दरी।
केदारीयं यथा दूष्यम् उल्लोचा वा सुलेमनः॥
६ अहं यत् कृष्णवर्णास्मि लङ्घिता च विवस्वता।
तत्कृते मैव युष्माभिः कुदृष्टिः क्रियतां मयि॥
मां प्रति क्रोधमालम्ब्य मदीयमातृसूनुभिः।
अहं नियोजयाञ्चक्रे गोस्तनीक्षेत्ररक्षिणी।
मम यद् गोस्तनीक्षेत्रं मया तत्तु न रक्षितं॥
७ हे मदीयहृदः कान्त कुत्र चारयसि व्रजं।
विश्रामयसि मध्याह्ने कुत्र वा तदुदाहर।
तावकीनसहायानां यूथानामेव मध्यतः।
कुतोऽहं पर्य्यटिष्यामि पारक्येव तिरस्कृता॥
८ हे सुसुन्दरि नारीणां यदि त्वं नहि वेत्सि तत्।
मेषाणां पदचिह्नानि तर्हि त्वं समनुव्रज।

चारय स्वाजवत्सांश्च रक्षिणां शिविरान्तिके ॥
हे मत्कान्ते फिरौणीयरथे या तुरगी मम । ९
उपमां तव कुर्व्वेऽहं तुरग्यैव तया सह ॥
शोभां मुक्तावलिभ्यां हि तव गण्डौ प्रगच्छतः । १०
त्वदीयो गलदेशश्च रत्नहारेण राजते ॥
वयं काञ्चनरज्जूश्च निर्म्मास्यामः कृते तव । ११
स्थाने स्थाने सुदृश्यै हि चित्रिता रौप्यवर्त्तुलैः ॥
यावद्राजोपविष्टो ऽस्ति भोज्यगेहीयमण्डले । १२
तावन्मम जटामांसी यच्छति स्वीयसौरभं ॥
गन्धरसीयवृक्षस्य गुच्छतुल्यः प्रियो मम । १३
मामकस्तनयो र्मध्ये यापयिष्यति यामिनीं ॥
ऐङ्गिदीगोस्तनीक्षेत्रं येषां प्ररोहणस्थलं । १४
तेषां कोफरपुष्पाणां गुच्छतुल्यः प्रियो मम ॥
हे प्रिये मम पश्य त्वं सुन्दरी त्वं हि सुन्दरी । १५
कपोतसदृशञ्चास्ति तावकं लोचनद्वयं ॥
हे मम प्रिय पश्य त्वं सुन्दरो ऽतिमनोहरः । १६
आवयोश्च हरिद्वर्णं शोभते शयनस्थलं ॥
आवयो र्गेहकाष्ठानि भवन्त्येरसपादपाः । १७
देवदारूणि जायन्ते चावयोः पटलं तथा ॥

---

२ द्वितीयोऽध्यायः ।

ख्रीष्टस्य समितेश्च मिथः प्रेमालापः ।

जवाहं शारणीयास्मि पद्मं वा निम्नभूमिजं ॥ १
मध्यतः कण्टकानां हि यथा पद्मं विशोभते । २
मध्यतस्तरुणीनाञ्च तथा मे शोभते प्रिया ॥
मध्य आरण्यवृक्षाणां नागरङ्गो द्रुमो यथा । ३
मध्यतस्तरुणानाञ्च तथा मे राजते प्रियः ॥
परमानन्दिताहञ्च तच्छायायामुपाविशं ।
सुस्वादु चाभवत् तस्य फलं मामकतालुनि ॥
भोज्यपानीयगेहस्याभ्यन्तरं नीतवान् स मां । ४

प्रेमरूपो ध्वजस्तस्य प्लवते च ममोपरि ॥
५ द्राक्षाफलीयपूपै मां यूयं कुरुत सुस्थिरां।
नागरङ्गफलैरेव कुरुध्वञ्च सचेतनां।
यहं हृत्क्षयरोगेण यस्माद् रोगातुराभवं ॥
६ मदीयमस्तकस्याधस्तस्य वामकरः स्थितः।
तस्य दक्षिणहस्तश्च मे परिष्वजते तनुं ॥
७ हे कन्या यिरूशालमीया मृगीभिः शापयामि वः।
अरण्यचारिणीभि र्वा कुरङ्गीभिरिदं वचः।
स्वयं यावत् समुत्थातुं नैवाकाङ्क्षति मे प्रिया।
सा मा प्रबोध्यतां तावत् मा समुत्थाप्यताञ्च सा ॥
८ रवो ऽसौ मत्प्रियस्यैव स आगच्छति पश्य तं।
प्लवमानो महीध्रेषु प्लुत्यन् पर्व्वतेषु च ॥
९ प्रियो मे मृगसङ्काश एण्या वत्सेन वा समः।
अस्मत्कुड्यस्य पश्चात् स दण्डवत् पश्य तिष्ठति।
आलोकते गवाक्षैश्च जालकैश्च निरीक्षते ॥
१० अभिभाष्य प्रियो मे स मान्त्विदं वाक्यमब्रवीत्।
हे प्रिये त्वं समुत्तिष्ठ समागच्छ च सुन्दरि ॥
११ पश्यातीतो ऽस्ति हेमन्तः सुदूरं शिशिरो गतः ॥
१२ भूमौ पुष्पाणि दृश्यन्ते गानकाल उपस्थितः।
अस्मद्देशे कपोतस्य कलशब्दो निशम्यते ॥
१३ फलान्युडुम्बरस्यापि सुरसानि भवन्ति हि।
विस्तृण्वन्ति सुगन्धञ्च सपुष्पा गोस्तनीलताः।
एहि प्रिये समुत्थाय समागच्छ च सुन्दरि ॥
१४ हे मदीयकपोति त्वं शैलानां गर्भमाश्रिता।
अद्रीणां वा रहःस्थानं मां स्वरूपं प्रदर्शय।
तावकीनरवस्यापि श्रवणं त्वं प्रयच्छ मे।
यस्मात् तव रवो मिष्टस्त्वद्रूपञ्च मनोहरं ॥
१५ अस्मत्क्षतिकरान् यूयं शृगालान् धर्त्तुमर्हथ।
क्षुद्रास्ते वञ्चकाः किन्तु द्राक्षावल्लीविनाशकाः।
सपुष्पाः सन्ति चास्माकं सर्व्वा द्राक्षालताः किल ॥
१६ प्रियो मम ममैवास्ति तदीयैवाहमस्मि च।

पद्मानामेव मध्ये स स्वीयं चारयति व्रजं॥
यावन्न वासरो भाति न च छाया पलायते। १७
तावदेव कुरुष्व त्वं प्रति मां पुनरागमं॥
हरिणस्येव सादृश्यं भवता समवाप्यतां।
छिद्रयुक्ताद्रिशृङ्गस्थकुरङ्गशावकस्य वा॥

---

३ तृतीयोऽध्यायः।

समिते दुःखं स्वीष्टे च स्नाघनं।

स्वशय्यायां मया रात्रौ हृत्कान्तो मे गवेषितः। १
कृतं गवेषणं किन्तु स मया नह्यलभ्यत॥
अहमुत्थाय मार्गेषु पुर्य्याः शृङ्गाटकेषु च। २
पर्य्यटन्ती करिष्यामि हृत्कान्तस्य गवेषणं।
कृतं गवेषणं किन्तु स मया नह्यलभ्यत॥
नगरे पर्य्यटन्तस्तु रक्षिणो मामवाप्नुवन्। ३
किं दृष्टो मम हृत्कान्तो युष्माभिः पुररक्षिणः॥
तान् विहाय प्रगत्याल्पं हृत्कान्तो ऽधिगतो मया। ४
मया स च धृतो यावत् मां मातुर्न नयेद् गृहं।
मज्जनन्याश्च शुद्धान्तं तावद् विसृज्यते नहि॥
हे कन्या यिरूशाल्मीया मृगीभिः शापयामि वः। ५
अरण्यचारिणीभि र्वा कुरङ्गीभिरिदं वचः।
स्वयं यावत् समुत्थातुं नैवाकाङ्क्षति मे प्रिया।
सा मा प्रबोध्यतां तावत् मा समुत्थाप्यताञ्च सा॥
कासौ धन्वत आयाति धूमस्तम्भगणोपमा। ६
धूपेन वासिता सम्यग् रसगन्धस्य कुन्दुरोः।
अन्येषां सकलानाञ्च द्रव्याणां गन्धजीविनः॥
शिविकासौ सुलेमानः पश्य तस्याश्चतुर्द्दिशि। ७
स्थिताः षष्टि र्महावीरा इस्रायेलीयवंशजाः॥
खड्गं धरन्ति ते सर्व्वे समरार्थं सुशिक्षिताः। ८
ऊरौ बद्धाश्च सर्व्वेषां निस्त्रिंशा नैशसंशयात्॥
स्वकृते शिविकामेकां सुलेमान् पृथिवीपतिः। ९

लिवानोनीयकाष्ठेन यत्नतो निरमापयत्॥
१० स्तम्भांश्चकार रूप्यीयान् आलम्बं स्वर्णनिर्म्मितं।
उपवेशार्थकं स्थानं धूम्रलोहितवस्त्रकं।
तदीयमध्यभागस्तु पुष्पालङ्कृतवस्त्रवत्।
यिरूशालमीयकन्यानां प्रेमभावेन संस्तृतः॥
११ कन्याः सीयोनवासिन्यो यूयं निष्क्रम्य गेहतः।
निरीक्षध्वं सुलेमानं नृपं किरीटधारिणं।
वैवाहिकदिने तस्य चित्तहर्षकवासरे।
तस्य माता किरीटेन तेन तं पर्य्यभूषयत्॥

---

४ चतुर्थोऽध्यायः।

समितिं प्रति ख्रीष्टस्य प्रेम।

१ पश्य त्वं सुन्दरी कान्ते त्वं पश्यातीव सुन्दरी।
शिरःप्रच्छादनीपश्चात् नेत्रे कपोतयोः समे।
गिलियद्भूधरालम्ब्याजकवत् तव कैशिकं॥
२ दन्तास्ते छिन्नलोमानां मेषीणां निवहोपमाः।
क्षालनादुद्व्रजन्तीनां सापत्यानां यमार्भकैः।
यासां मध्यत एकापि निःसन्ताना न विद्यते॥
३ शोणसूत्रवदोष्ठौ ते वक्त्रञ्चातिमनोरमं।
शिरःप्रच्छादनीपश्चात् गण्डौ दाडिमखण्डवत्॥
४ दायूदीयोच्चप्रासादो यो ऽस्त्रागाराय निर्म्मितः।
यत्र विद्यन्त उद्बद्धाः सहस्रं फलका नृणां।
वीराणामेव चर्म्माणि त्वत्कण्ठस्तेन सन्निभः॥
५ चरतो यौ च पद्मेषु यमजौ मृगशावकौ।
सदृशं हि तयोरेव तावकीनस्तनद्वयं॥
६ यावन्न वासरो भाति न च छाया पलायते।
आश्रयिष्याम्यहं तावद् गन्धरसीयपर्व्वतं।
कुन्दुरुवासितञ्चापि गमिष्यामि शिलोच्चयं॥
७ प्रिये त्वं सर्व्वथा चार्व्वी त्वयि दोषो न विद्यते॥
८ हे कन्ये त्वं समागच्छ लिवानोनान्मया सह।

लिवानोनान्मया सार्द्धं त्वं समागन्तुमर्हसि।
अमानाख्यगिरेः शृङ्गं सिनीर्हर्म्मोणयोरपि॥
शिखरावधि तिष्ठन्ती किं वा केशरिणां गुहाः।
व्याघ्रसेवितशैलान् वा त्वं निरीक्षितुमर्हसि॥
हे मद्भगिनि हे कन्ये त्वमहार्षीर्म्मनो मम। ९
एकेन तव नेत्रेण व्यपाहार्षीर्म्मनो मम।
त्वदीयकण्ठभूषाया एकेन शृङ्खलेन वा॥
हे मद्भगिनि कन्ये त्वत्प्रेम कीदृङ्मनोहरं। १०
कीदृक् ते सुरसं प्रेम श्रेष्ठं द्राक्षारसादपि।
गन्धद्रव्याच्च सर्व्वस्मात् तव तैलं ससौरभं॥
हे कन्ये पुष्पनिर्य्यासः क्षरत्योष्ठद्वयात् तव। ११
विद्येते मधुदुग्धे च त्वदीयरसनातले।
गन्धस्त्वदीयवस्त्राणां लिवानोनीयगन्धवत्॥
हे मद्भगिनि कन्ये त्वं संरुद्धोपवनोपमा। १२
संरुद्धोत्सस्य तुल्या त्वं प्रस्रवे मुद्राङ्कितस्य वा॥
रोपिताश्च तवोद्याने दाडिमाः सुफलप्रदाः। १३
कोफराख्यानि पुष्पाणि जटामांसीद्रुमैः सह॥
जटिला कुङ्कुमं चोचं सुगन्धिवल्कलस्तरुः। १४
धूपोत्पादकवृक्षाश्च तथा गन्धरसागुरू।
गन्धद्रव्याणि मुख्यानि सकलान्येव सन्ति हि॥
उद्याने स्थित उत्सो यः स चामृतपयःप्रस्रविः। १५
लिवानोनीयतोयानां स्रोतसा वा समो भवेत्॥
जागृह्युत्तरवायो त्वं एहि त्वं दक्षिणानिल। १६
वहतो मामकोद्याने विस्रवेत् तस्य सौरभं॥
आगमञ्च निजोद्याने प्रकरोतु मम प्रियः।
सुस्वादून्युपभुङ्क्ताञ्च तदीयानि फलानि सः॥
हे मद्भगिनि कन्ये ऽहं निजोद्यानं समागतः। १७
निजवोलादिसामोदद्रव्याणि प्रचिनोमि हि।
मधुवासेन सार्द्धञ्च चूषामि स्वीयमाक्षिकं।
दुग्धेन सहितं स्वीयं पिवामि द्राक्षिकं रसं॥
बन्धवो यूयमश्नुध्वं पीत्वा तृप्यत हे प्रियाः॥

५ पञ्चमोऽध्यायः।

ख्रीष्टस्य समितेश्च मिथो व्यवहरणं तयोः सौन्दर्य्यञ्च।

१ निद्रितास्मयहं किन्तु मनो ऽतिष्ठत् सुजागरं॥
२ अश्रौषन्त्वाघ्नतो द्वारं स्वप्रियस्य रवं तदा।
हे स्वस मम हे कान्ते हे कपोत्यनघे मम।
मत्कृते मोचय द्वारं तोयेनार्द्रं शिरो मम।
मूर्द्धजा मम पूर्णाश्च रजनीजलविन्दुभिः॥
३ वसनं त्यक्तवत्यस्मि वसिष्ये तत् कथं पुनः।
पादौ क्षालितवत्यस्मि कथं लेप्स्यामि तौ पुनः॥
४ मम प्रियो गवाक्षेण तदा प्रासारयत् करं।
अभवत् करुणार्द्रञ्च तमुद्दिश्य ममान्तरं॥
५ प्रियं प्रवेशयिष्यन्ती चोदतिष्ठमहं ततः।
कराभ्यामङ्गुलीभ्याञ्च मम गन्धरसो ऽक्षरत्।
अर्गलस्यापि कर्णेषु ततो गन्धरसो ऽस्रवत्॥
६ स्वप्रियस्य निमित्तञ्च द्वारं मोचितवत्यहं।
मामकीनप्रियः किन्तु प्रस्थायापगतस्तदा।
तदीयालापकाले ऽहं गतासं हतबुद्धितां।
पश्चाद् अन्वेषणं कृत्वा सम्प्राप्तः स मया नहि।
उच्चैस्तञ्च समाहूय न लब्धं किञ्चनोत्तरं॥
७ नगरं पर्य्यटन्तस्तु रक्षिणो मामवाप्नुवन्।
ते नरास्ताडयित्वा माम् अकुर्व्वन् क्षतसङ्कुलां।
प्रावृतं मम शीर्षाच्च हृतं प्राचीररक्षिभिः॥
८ हे कन्या यिरूशालमीया इदं वः शापयाम्यहं।
मम प्रियतमं यूयं यदि कुत्राप्यवाप्नुथ।
किं तं वक्ष्यथ तर्ह्येतद् यत् प्रेम्ना पीडितास्म्यहं॥
९ तव प्रियतमो ऽन्यस्मात् प्रियात् केन विशिष्यते।
त्वं हे सुन्दरि नारीणाम् अस्मांस्तद् वक्तुमर्हसि।
तव प्रियतमो ऽन्यस्मात् प्रियात् केन विशिष्यते।
ईदृशं शपथं यत् त्वम् अस्मान् शापितवत्यसि॥
१० गौराङ्गो ऽरुणवर्णश्च सो ऽस्ति प्रियतमो मम।

अयुतस्यापि मध्ये च प्रमुखः प्रतिभाति सः॥
निर्म्मलेन हिरण्येन समानं तस्य मस्तकं। ११
विटपस्य समं केश्यं श्यामलं द्रोणकाकवत्॥
नेत्रे कपोतयोस्तुल्ये स्थितयोः सरितस्तटे। १२
स्नातयो र्धेनुकादुग्धे सुभिन्नस्थलवासिनोः॥
तद्गण्डौ जटिलाश्रेण्यौ किं वा गन्धिलताग्टहे। १३
अधरौ तस्य पद्मे द्वे द्रववोलविसर्जके॥
करौ स्वर्णनलौ तस्य खचितौ हरिताश्मभिः। १४
तत्कुक्षिः शिल्पकर्म्मकं गजदन्तेन निर्म्मितं।
मणिभि र्नीलकान्तैश्च भूरिशः परिशोभितं॥
द्वावूरू तस्य च स्तम्भौ श्वेतप्रस्तरनिर्म्मितौ। १५
स्वर्णमयेषु पादेषु बद्धमूलौ सुनिश्चलं।
लिवानोनोपमं रूपं श्रेष्ठमेरसवृक्षवत्॥
मुखं तस्य सुमिष्टञ्च साकल्यं हर्षदायि च। १६
हे कन्या यिरूशाल्मीयाः स प्रियो मे स मे सखा॥

---

६ षष्ठोऽध्यायः।

समितेः सौन्दर्य्यवर्णनं।

हे सुसुन्दरि नारीणां गतः कुत्र प्रियस्तव। १
कां दिशं सम्मुखां कृत्वा प्रस्थितः स प्रियस्तव।
त्वया सार्द्धं करिष्यामो वयं तस्य गवेषणं॥
उद्यानेषु विहारार्थं पद्मानां सञ्चयाय च। २
मम प्रियो निजोद्यानं जटामांस्यावली र्गतः॥
अहं स्वीयप्रियस्यास्मि ममैवास्ति च मे प्रियः। ३
मध्यतः पद्मपुष्पाणां विहारं प्रकरोति सः॥
हे मामकीनकान्ते त्वं तिर्षावत् सुमनोहरा। ४
यिरूशालमवच्चार्व्वी ध्वजिनीव भयङ्करी॥
वारय स्वाक्षिणी मत्तो ताभ्यां यतो ऽहमुद्विजे। ५
गिलियद्भूधरालम्ब्याजकवत् तव कैशिकं॥

६ मेषीणां निवहेनैव सदृशा दशनास्तव ।
छालनादुद्व्रजन्तीनां सापत्यानां यमार्भकैः ।
यासां मध्यत एकापि निःसन्ताना न विद्यते ॥
७ शिरःप्रच्छादनीपश्चात् गण्डौ दाडिमखण्डवत् ॥
८ सन्ति षष्टि र्महिष्यश्च सन्त्यशीतिरुपस्त्रियः ।
युवतीनामनूढानां सङ्ख्या नैव च गण्यते ॥
९ एका किन्तु कपोती मे सा च शुद्धमति र्मम ।
स्वमातु र्दुहितैका सा स्वजनन्याश्च नन्दनी ।
लब्धे च दर्शने तस्याः कन्या धन्यां वदन्ति तां ।
महिष्य उपपत्न्यश्च तत्प्रशंसाञ्च कुर्व्वते ॥
१० प्रभातयरुणवत् कासौ सुन्दरी चन्द्रमा इव ।
विवस्वानिव शुद्धा च ध्वजिनीव भयङ्करी ॥
११ प्रफुल्लास्ति न वा द्राक्षा सपुष्पा दाडिमा न वा ।
तद् द्रष्टुं निम्नभूमेश्च तृणभूषां निरीक्षितुं ।
गममक्षोडवृक्षाणाम् उद्याने कृतवत्यहं ॥
१२ यावच्चान्यमनस्कासं तावत् स्वीयातिवाञ्छया ।
अहमम्मीनदीबीयरथानां वेगमाप्नवं ॥
१३ प्रत्येहि हे शुलम्मीये परावर्त्तस्व नः प्रति ।
परावर्त्तस्व यस्मात् त्वाम् आलोकिष्यामहे वयं ॥
तामालोक्य शुलम्मीयां किं प्रतीक्षध्वमीक्षितुं ।
यात्रां स्वर्गीयदूतानां सदृशीं महनायिमः ॥

---

७ सप्तमोऽध्यायः ।

समितेः सौन्दर्य्यं स्त्रीयं प्रति प्रेम च ।

१ राजकुमारि पादौ ते शोभेते किमुपानहोः ।
भूषणं कटिदेशस्ते कराभ्यां शिल्पिनः कृतं ॥
२ त्वन्नाभि र्वर्त्तुलः कंसः सुधया न विवर्जितः ।
त्वत्कुक्षिः शस्यगुच्छश्च पद्मप्राचीरवेष्टितः ॥
३ तावकीनस्तनावेण्या यमशावकयोः समौ ॥

गजदन्तमयः स्तम्भो गलदेशस्त्वदीयकः। ४
विद्येते यौ च हिश्बोने वाचब्बीमीयगोपुरे।
जलाधारौ तयोस्तुल्ये भवतस्तव लोचने।
स्थितं यच्च लिबानोने दम्मेषकस्य सम्मुखं।
तेनोच्चेन गृहेणैव सदृशी तव नासिका॥
अद्रिणा कर्म्मिलाख्येन तुल्यं शीर्षं तवोपरि। ५
तव मूर्द्धजपाशाश्च वार्त्ताकीवर्णसूत्रवत्।
महीपालश्च तैः पाशै र्धृतस्तिष्ठति वन्दिवत्॥
आः प्रिये स्वीयकान्त्या त्वं किं रम्या किं मनोहरा॥ ६
तव खर्ज्जूरवन्मूर्त्तौ फलगुच्छाविव स्तनौ॥ ७
अहं खर्ज्जूरमारुह्य तच्छाखा धर्त्तुमर्थये। ८
तव स्तनद्वयञ्चास्तु द्राक्षाफलीयगुच्छवत्।
गन्धस्त्वन्नासिकायाश्च नागरङ्गफलोपमः॥
तव तालु भवेत् तुल्यम् उत्तमेन मदेन च। ९
स्वीयप्रियस्य तुष्ट्यर्थं यथाभीष्टं प्रसर्पता।
आलापाय शयानानाम् ओष्ठविमोचकेन च॥
अहं स्वीयप्रियस्यास्मि मयि तस्यास्ति लालसा॥ १०
हे मत्प्रिय समागच्छ यावः संवसथं प्रति। ११
तत्र ग्रामेषु चावाभ्यां रजनी यापयिष्यते॥
प्रत्यूषे च समुत्थाय द्राक्षाक्षेत्रं व्रजिष्यते। १२
प्रफुल्लास्ति न वा द्राक्षा कुसुमं प्रस्फुटं न वा।
सपुष्पा दाडिमाः सन्ति न वेत्यालोकयिष्यते।
तत्रैवाहं निजप्रेम त्वां भोजयितुमुद्यता॥
दूदाफलानि यच्छन्ति स्वगन्धं प्रीतिवर्द्धकं। १३
आवयोश्च गृहद्वारे सुस्वादूनि फलानि हि।
नानाविधानि विद्यन्ते पुराणानि नवानि च।
निहितानि मया तानि त्वदर्थं हे मम प्रिय॥

८ अष्टमोऽध्यायः।

खीष्टं प्रति समितेः प्रेम प्रार्थना च।

१ कुतस्त्वं नासि मद्भ्राता मन्मातृस्तन्यपायितः।
पथि त्वां तर्हि सम्प्राप्य मया त्वच्चुम्बने कृते।
अवज्ञा मां समुद्दिश्य नाकारिष्यत मानवैः॥
२ अहमेव भविष्यामि तव मार्गप्रदर्शिका।
मातुर्गेहं मया नीतस्त्वञ्च मां शिक्षयिष्यसि।
पाययिष्याम्यहं त्वाञ्च मदमार्द्रकमिश्रितं।
स्वीयदाडिमवृक्षस्य फलेभ्यस्तोद्धृतं रसं॥
३ मदीयमस्तकस्याधस्तस्य सव्यः करः स्थितः।
तस्य दक्षिणहस्तश्च स्वजते मामकीं तनुं॥
४ हे कन्या यिरूशालमीयाः शपथं कारयामि वः।
स्वयं यावत् समुत्थातुं नैवाकाङ्क्षति मे प्रिया।
सा मा प्रबोध्यतां तावत् मा समुत्थाप्यताञ्च सा॥
५ कासौ धन्वत आयात्यालम्बमाना निजप्रियं।
अधस्तान्नागरङ्गस्य मया त्वं हि प्रबोधितः।
त्वां तत्राजीजनन्माता तत्र प्रासोष्ट ते प्रसूः॥
६ मुद्रावद् धर मां चित्ते मुद्रावद् धर मां भुजे।
बलीयान् मृत्युवत् प्रेमा कालवच्चोग्र उज्ज्वलः।
तस्याङ्गारास्तदङ्गारा उच्छिखा अतिमानुषं॥
७ प्रेमवह्निमयां राशिं न निर्व्वापयितुं क्षमः।
नैव घोरस्रवन्तीनां वेलयाप्लाव्यते स वा।
प्रेम क्रेतुं स्वगेहस्थं सर्व्वस्वं चेत् त्यजेन्नरः।
अवज्ञा केवलं तर्हि सकलैः प्रकरिष्यते॥
८ विद्यते ऽल्पवयस्कैका स्वसावाजातस्तनावयोः।
तस्या अस्मद्भगिन्यास्तु सम्बन्धदिवसो यदा।
आयास्यति कृते तस्याः किं करिष्यावहे तदा॥
९ सा चेद् भित्तिस्तदा तस्यां रौप्यदुर्गं निचीयतां।
सा चेद् द्वारं कपाटेन रुध्यतामेरसेन तत्॥
१० अहं भित्तिस्वरूपास्मि दुर्गवच्च मम स्तनौ।

तस्मात् तदीयदृष्ट्याहं जातानुग्रहभाजनं॥
द्राक्षाक्षेत्रं सुलेमानो बालहामोन्यविद्यत। ११
करेषु रक्षिणां तच्च द्राक्षाक्षेत्रं समर्पितं।
मुद्रासाहस्रमेकैकस्तत्फलार्थमदत्त च॥
मामकं गोस्तनीक्षेत्रं विद्यते मम सम्मुखे। १२
मुद्राणां यत्तु साहस्रं हे सुलेमान् तवैव तत्।
एतद्द्वयञ्च मुद्राणां भवेत् तत्फलरक्षिणां॥
श्रूयते त्वद्रवो मित्रै र्हे उद्याननिवासिनि। १३
ममापि श्रवणं तस्य त्वमनुज्ञातुमर्हसि॥
हे मत्प्रिय पलायस्व गन्धद्रव्यैः सुवासिते। १४
गिरावेण्या भवेस्तुल्यो हरिणीशावकेन वा॥

Bible. O.T. Sanskrit. 1843.

THE

HOLY BIBLE

IN THE

SANSCRIT LANGUAGE.

VOL. IV.

CONTAINING THE PROPHETICAL BOOKS.

TRANSLATED OUT OF THE ORIGINAL TONGUES

BY THE

CALCUTTA BAPTIST MISSIONARIES,

WITH NATIVE ASSISTANTS.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS, CIRCULAR ROAD.

1872.

Library of the Theological Seminary,
PRINCETON, N. J.
Presented by Rev. P. S. Wynkoop; 1882
Division BS315
Section S22
Shelf .... Number 1848
v. 4

इब्रीयभाषाता व्याहृतः

धर्मग्रन्थः।

तस्य चतुर्थं खण्डं

यद्वा

यिशायियादीनां भविष्यद्वादिनां

ग्रन्थसङ्ग्रहः।

कलिकातानगरे

ग्रन्थोऽयं मुद्राङ्कितोऽभूत्।

शकाब्दाः १७९४ ई १८७२।

PRINCETON
REC. AUG 1882
THEOLOGICAL
SEMINARY.

सूचीपत्रं।

अशुद्धशोधनं ।

पृष्ठे ।	पङ्क्तौ ।	अङ्के ।	अशुद्धं ।	शुद्धं ।
७६	१३	१८	उपमास्यधर्मीश्वरं	उपमास्यध्व ईश्वरं
१०६	७	१	कूपदर्शिता	कूपदर्शितो
—	२२	५	धम्मा	धर्म्मो
११०	१७	१	विधत्तवान्	नरोऽकरोत्
१७७	१७	२२	सम्मच्छति	सम्मयच्छति
३३३	३०	३०	भमे	भूमे
३७२	१	३५	इमे	इमाः
३७६	१३	२१	म त्कृतं	मत्कृतं
४४६	१७	२	च्चेममादत्स	च्चेममादत्स्व

कतिपयस्थानेष्वक्षराणां क्षुद्रभागा भग्नाः स्थानभ्रष्टा वा जाताः, विद्वान् पाठकस्तादृशान् दोषान् संशोधयितुमर्हति ।

PROPERTY OF PRINCETON
REC. AUG 1882
THEOLOGICAL SEMINARY.

यिशायियस्य भविष्यद्वचनानि।

---

१ प्रथमोऽध्यायः।

१ यिहूदीयानां पापेषु यिशायियस्य विलपनं ५ पापिनां दण्डः १० मिथ्याधर्म्मस्य भञ्जनं १६ पापात् परावर्त्तितुं विनयनं २१ लोकानां पापकथनं २४ साधोर्हितभोगस्यासाधोरहितभोगस्य च कथनञ्च।

१ उषियो योथम आहसो हिष्कियश्चैतेषां यिहूदीयनृपाणां राजत्व-
कालं यिहूदादेशं यिरूशालमाख्यनगरञ्चाधि यान्यामोससुतेन यिशा-
यियेन लेभिरे तानि दर्शनानीमानि।

२ अत्रावधीयतां हे द्यौ हे भूः संश्रूयतां त्वया।
स्वयं परेश्वरो यस्माद् वाक्यमेतत् प्रभाषते॥
अपुष्यन्त मया पुत्रा अवर्ध्यन्त च यत्नतः।
ते तु मद्वैपरीत्येन जाताः स्वामिविरोधिनः॥
३ गौरपि स्वामिनं वेत्ति तृणपात्रं प्रभोः खरः।
इस्रायेलीयवंशस्य तादृग् ज्ञानं न विद्यते।
मामकीनप्रजानाञ्च नास्ति तादृग् विवेचना॥
४ हा हा पापमते जाते जनते दोषभारिणि।
दुष्कृतकर्म्मणां वंश सूनवः कुलकज्जलाः।
सन्त्यक्तः परमेशो यैरवज्ञातश्च यैर्मदात्।
इस्रायेलः पवित्रो राट् पुनस्तस्मात् पराङ्मुखैः॥
५ क्वाहन्तव्याः पुन र्यूयं कृतद्रोहा मुहुर्मुहुः।
व्यथितं मस्तकं कृत्स्नं निखिलं हृदयं क्लमि॥
६ किञ्चिन्न विद्यते स्वस्थम् आपादतलमस्तकात्।
सर्व्वं क्षतैः प्रहाराङ्कै र्नवाघातैश्च जर्ज्जरं।
अपीडितैरबद्धैश्च तैलेनाप्यमृदूकृतैः॥
७ युष्माकं देश उच्छिन्नः पुर्य्यो दग्धाश्च वह्निना।
प्रत्यक्षैः परदेशीयै र्युष्मद्भूमिश्च भुज्यते।
सा च जाता समुच्छिन्ना ध्वंसितेव विदेशिभिः॥
८ सीयोन् कन्यावशिष्टास्ति द्राक्षाक्षेत्रे यथोटजं।

तुम्ब्युद्याने कुटीरो वा रुद्धं वा नगरं यथा॥
अस्माकं वै निमित्तं चेद् उद्वृत्तं लघु किञ्चन। ९
न पर्य्यशेषयिष्यत् स सैन्याध्यक्षः परेश्वरः।
सदृशा अभविष्याम सिदोमेन तदा वयं।
अमोरायाः समानत्वम् अवाप्स्याम न संशयः॥
हे सिदोमीयशास्तारः शृणुतोक्तिं परेशितुः। १०
गृह्णीतेशस्य नः शास्त्रं हे अमोरीयमानवाः॥
अलं यज्ञबहुत्वेन ब्रूते ऽदः परमेश्वरः। ११
मेषाहुत्या त्वहं पूर्णः बलेः पीनस्य मेदसा।
गोमेषाणामजानां वा नाहं तुष्यामि शोणितैः।
मम साक्षादुपस्थातुं कृते युष्माभिरागमे। १२
पादैर्मत्प्राङ्गणानां को मर्द्दनं वोऽभियाचते॥
नैवानर्थकनैवेद्यं दातुं भूयो व्यवस्यत। १३
मन्ये घृणास्पदं धूपं दर्शं विश्रामवासरं।
घोषणाञ्च समाजस्य न सहे पापपर्व्वणी॥
मनो मे द्वेष्टि युष्माकम् अमावस्यामहोत्सवान्। १४
मम ते भारवज्जाता वोढुं श्रान्तो भवाम्यहं॥
कृताञ्जलिषु युष्मासु मीलयिष्यामि लोचने। १५
बहु प्रार्थयमानेषु नैव संश्रोस्यते मया।
युष्मदीयकरा यस्मात् पूरिताः सन्ति शोणितैः॥
स्वान् प्रक्षाल्य शुचीभूय मद्दृष्टेः स्वीयकर्म्मणां। १६
दूरीकुरुत दुष्टत्वं निवर्त्तध्वं कुकर्म्मतः॥
सत्कर्म्माण्येव शिक्षध्वं चेष्टध्वं न्यायसेवने। १७
संशोधयत चान्यायं पितृहीनश्च बालकः।
युष्माभीरक्ष्यतां द्रोहाद् विधवा चानुगृह्यतां॥
परेशो ब्रूत आयात मिथो ऽस्माभि र्विचार्य्यतां। १८
सिन्दूरवर्णतुल्यानि यानि पापानि सन्ति वः॥
तान्यपि शुक्लवर्णानि भविष्यन्ति तुषारवत्।
शोणा लाक्षेव ये दोषास्ते भविष्यन्ति लोमवत्॥
यूयं चेदत्र सन्तुष्टा भवथादेशपालिनः। १९
द्रव्यै र्देशोद्भवैस्तर्हि परमैः परितप्स्यथ॥

२० यदि यूयन्त्वसन्तुष्टा भवथ प्रतिरोधिनः ।
निश्चितं सकलात्तर्हि खड्गभुक्ता भविष्यथ ।
यतः परेश्वरस्यास्याद् वाक्यमेतद्विनिर्गतं ॥
२१ हा सती नगरी यासीत् सा जाता गणिका कथं ।
तस्यां न्यायेन पूर्णायां स्वयं धर्म्मो ऽवसत् पुरा ।
अधुना किन्तु तन्मध्ये वसन्ति नरघातकाः ॥
२२ तव रूप्यं मलं जातं मदिरा जलदूषिता ॥
२३ शास्तारस्तव दुर्द्दान्तास्तस्कराणाञ्च सङ्गिनः ।
उपहारप्रियाः सर्व्वे तथोत्कोचानुधाविनः ॥
पितृहीनस्य बालस्य विचारं ते न कुर्व्वते ।
विधवाया विवादश्च नैव तानुपतिष्ठति ॥
२४ ततो हेतोरिदं वाक्यं प्रभुर्ब्रूते परेश्वरः ।
वाहिनीनामधीशः स इस्रायेले बलप्रदः ॥
आः स्वारीणां विनाशेन लप्स्ये ऽहं दुःखमोचनं ।
उचितं स्वीयवैरिभ्यः फलं दायिष्यते मया ॥
२५ त्वयि हस्तार्पणं कृत्वा सम्यक् मार्ज्यामि ते मलं ।
सर्व्वं परिहरिष्यामि युष्मदीयं कुसीसकं ॥
२६ पूर्व्वं विचारकैस्तुल्यान् ते दास्यामि विचारकान् ।
प्रथमै मन्त्रिभिस्तुल्यान् ते दास्यामि च मन्त्रिणः ॥
पश्चाद् धर्म्मपुरीत्येव तव नाम भविष्यति ।
त्वं सती नगरीत्येव नामधेयञ्च लप्स्यसे ॥
२७ विचारादेव सीयोनः परित्राणं प्रसेत्स्यति ।
तस्याः शोधितचित्तानां नृणां त्राणञ्च धर्म्मतः ॥
२८ द्रोहिणां युगपद् ध्वंसः पापिनाञ्च भविष्यति ।
लोपं यास्यन्ति सर्व्वे च परेशत्यागिनो नराः ॥
२९ एलद्रुमेभ्य इष्टेभ्यो यूयं लज्जामवाप्स्यथ ।
आरामेभ्यः प्रियेभ्यश्च विवर्णत्वं गमिष्यथ ॥
३० यस्माद् गलितपत्रस्य कस्यचिदेलशाखिनः ।
आरामस्याम्बुहीनस्य वा समाना भविष्यथ ॥
३१ शणवद् भविता श्रीमान् तस्याचारः स्फुलिङ्गवत् ।
युगपज्ज्वलितारौ तौ कोऽपि न शमयिष्यति ॥

२ द्वितीयोऽध्यायः।

१ ख्रीष्टीयराज्यस्य कथनं ६ परमेश्वरत्यागस्य दोषनिर्णयः १० तदीयमहिमकारणात् तस्माद् भेतुं विनयश्च।

आमोसस्तुतेन यिशायियेन यिहूदादेशं यिरूशालमनगरञ्चाधि १
दर्शनमिदं लेभे।

पाश्चात्येषु दिनेष्वेषा घटना सम्भविष्यति। २
मन्दिरं परमेशस्य यस्मिन् तिष्ठति पर्व्वते।
सर्व्वेषां भूधराणां स मस्तके स्थापयिष्यते।
सकलेभ्यो गिरिभ्यश्च प्रोन्नतः स भविष्यति।
सर्व्वजातीयलोकाश्च प्रसरिष्यन्ति तं प्रति॥
बहुदेशीयलोकैश्च प्रस्थायेत्थं गदिष्यते। ३
एत सर्व्वे वयं यामः परमेशस्य पर्व्वतं।
याकूबीयेश्वरस्यैव प्रगच्छामो निकेतनं।
स्वमार्गान् शिक्षितास्तेन चरिष्यामस्तदध्वसु॥
सीयोनाद् यत उत्पद्य शास्त्रं विस्तारयिष्यते।
यिरूशालमतस्यैव पारमेश्वरभारती॥
नानाजातीयलोकानां माध्यस्थं स करिष्यति। ४
बहुदेशीयलोकानां शासनञ्च विधास्यति॥
ताडयित्वा ततः सर्व्वे निजासीन् कूटकानि हि।
खशक्तीश्च लविचाणि घटयिष्यन्ति मानवाः॥
न पुन र्जातिरेकान्यां प्रत्यसिं चालयिष्यति।
अभ्यासो रणविद्यायास्तै र्न कारिष्यते पुनः॥
कुरुध्वमागमं यूयं हे याकूबीयवंशजाः। ५
वयं दीप्त्यां परेशस्य करवाम गमागमौ॥
त्वया स्वीयप्रजास्त्यक्तास्ते याकूबीयवंशजाः। ६
यतो मोहेन सम्पूर्णाः पूर्व्वदेशोद्भवेन ते।
अभवन् गणकास्तुल्याः पिलेष्टीयनरैश्च ते।
जनैरितरवंशीयैः सार्द्धं मैत्रञ्च कुर्व्वते॥
परिपूर्णा ऽभवत् तेषां देशो दुर्वर्णहेमभिः। ७
तदीयद्रव्यराशीनां सीमा का ऽपि न विद्यते।

वाजिपूर्णाभवन्नीदृत् सन्ति चासंख्यका रथाः ॥
८ सम्पूर्णश्चाभवत् तेषां देशो देवैरनीश्वरैः।
स्वीयहस्तकृतं कर्म्म चैकैकेन प्रणम्यते।
स्वकीयाङ्गुलिभि र्यच्च कल्पितं तत् प्रणम्यते ॥
९ प्राप्नोति भुग्नतां मर्त्त्यो नीचताञ्च नरोत्तमः।
अपराधं ततस्तेषां नैव त्वं क्षन्तुमर्हसि ॥
१० शैलं प्रविश हे पापिन् धूल्यां वान्तर्हितो भव।
परमेशस्य भीमत्वात् तच्छ्रियश्च प्रतापतः ॥
११ नराणाम् उच्चदृष्टिश्च समवाप्स्यति नीचतां।
मनुष्याणाञ्च गर्व्वो ऽपि खर्व्वत्वं प्रगमिष्यति।
उन्नंस्यति दिने तस्मिन् केवलः परमेश्वरः ॥
१२ उदेष्यति परेशस्य दिनं तद् वाहिनीपतेः।
उपर्य्युपरि सर्व्वस्य सुतुङ्गस्योच्चवस्तुनः।
उपर्य्युपरि सर्व्वस्य प्रोन्नतायस्य वस्तुनः।
तानि वस्तूनि सर्व्वाणि समवाप्स्यन्ति निम्नतां ॥
१३ उपर्य्युपरि सर्व्वेषाम् उदग्राणां स्वदैर्घ्यतः।
प्रांशूनाञ्चैरसाख्यानां लिवानोनस्थशाखिनां।
सर्व्वेषां वाशनीयानां चाल्लोनाख्यपलाशिनां ॥
१४ उपर्य्युपरि सर्व्वेषाम् उन्नतानां महीभृतां।
उपर्य्युपरि सर्व्वेषाम् उदग्राणां महाश्मनां ॥
१५ उपर्य्युपरि सर्व्वस्य प्रांशोरुच्चगृहस्य च।
उपर्य्युपरि सर्व्वस्य प्राचीरस्य दृढस्य च ॥
१६ उपर्य्युपरि पोतानां तार्शीशार्णवगामिनां।
उपर्य्युपरि सर्व्वेषां चारूणां शिल्पकर्म्मणां ॥
१७ चित्तानामुन्नति र्नॄणां समवाप्स्यति नीचतां ॥
मनुष्याणाञ्च गर्व्वोऽपि खर्व्वत्वं प्रगमिष्यति।
उन्नंस्यति दिने तस्मिन् केवलः परमेश्वरः॥
१८ असाराणाञ्च देवानां साकल्यं विप्रनङ्क्ष्यति ॥
१९ शैलगुहाः प्रवेक्ष्यन्ते नरै र्भौमबिलानि च।
पर्य्युद्वेजयितुं क्षौणीं समुत्थानं प्रकुर्व्वतः।
परमेशस्य भीमत्वात् तच्छ्रियश्च प्रतापतः ॥

मनुष्यैः स्वनिमित्तञ्च पूजायै ये विनिर्म्मिताः । २०
असाराः सकला देवा रौप्याः स्वर्णमयाश्च ते ।
समाक्षेप्स्यन्त आखूनां जतुकानाञ्च सम्मुखं ॥
शैलगर्त्तान् प्रवेक्ष्यद्भि गिरीणां विवराणि च । २१
पर्य्युद्वेजयितुं क्षौणीं समुत्थानं प्रकुर्व्वतः ।
परमेशस्य भीमत्वात् तच्छ्रियश्च प्रतापतः ॥
निवर्त्तध्वं नराद् यूयं नासया प्राणधारिणः । २२
यस्मादेतादृशो मर्त्त्यः किम्मूल्यो गणयिष्यते ॥

---

३ तृतीयोऽध्यायः ।

१ पापे लोकानां दुःखं १२ प्रधानजनैरुपद्रवः १३ स्त्रीणामहङ्कारस्य दण्डश्च ।

पश्य प्रभुः परेशो यो वाहिनीनामधीश्वरः । १
स यिरूशालमो मध्याद् यिहूदाविषयस्य च ।
आलम्बञ्चावलम्बञ्च स्वयं दूरीकरिष्यति ।
अन्नावलम्बनं सर्व्वं सर्व्वञ्चाम्भोऽवलम्बनं ॥
वीरं सैन्यं नियन्तारम् आचार्य्यं गणकं गुरुं । २
गुल्मपतिं महल्लोकं मन्त्रिणं दक्षशिल्पिनं । ३
मन्त्रपाठे विदग्धञ्च नरं स दवयिष्यति ॥
करिष्यामि शिशूनेव शास्तॄंस्तेषां नृणामहं । ४
आधिपत्यं ततस्तेषाम् अनुष्ठास्यन्ति बालकाः ॥
जना द्रोहं करिष्यन्ति मित्रे मित्रं नरे नरः । ५
वृद्धं बाधिष्यते बालो नरसिंहं नराधमः ॥
कश्चित् स्वभ्रातरं धृत्वा स्वीयपैत्रकुलोद्भवं । ६
गदिष्यत्यस्ति वस्त्रं ते त्वमस्माच्छासको भव ।
विषयो नष्टकल्पोऽयं तव हस्तगतो भवेत् ॥
तदा वक्ष्यति शप्त्वा स न भविष्याम्यहं भिषक् । ७
नास्त्यन्नं नास्ति वस्त्रं वा मामकीननिकेतने ।
नैव देशाधिपत्येऽहं नियोक्तव्यः कथञ्चन ॥
सकम्पास्ति यिरूशालम् यिहूदाः पतनोन्मुखः । ८
परेशस्य विरुद्धानां तेषां जिह्वाः कृतानि च ।

यस्मान्महौजसी तस्य प्रतिकुर्व्वन्ति लोचने ॥
९ साक्ष्यं यच्छति तेषाञ्च प्रतिकूलं मुखाकृतिः।
सिदोमिव स्वपापञ्च नाच्छाद्य ज्ञापयन्ति ते।
आः प्राणान् धिक् त्वणां तेषां स्वीयानिष्टविधायिनां ॥
१० क्षेमं भविष्यतीत्येव यूयं वदत धार्म्मिकान्।
यस्मात् ते परिभोक्ष्यन्ते स्वकीयकर्म्मणां फलं ॥
११ दुर्जनं धिक् अधन्यः स हस्ताभ्यां तस्य यत् कृतं।
प्रतिक्रिया यथायोग्या तस्य यस्मात् प्रसेत्स्यति ॥
१२ पीड्यन्ते मत्प्रजा बालैः पाल्यन्ते स्त्रीभिरेव च।
हे प्रजा नायका वो ये ते सन्त्युत्पथदर्शकाः।
नाशयुक्तञ्च कुर्व्वन्ति युष्मदीयगतेः क्रमं ॥
१३ परमेशो विवादार्थं समुत्थानं करिष्यति।
जनानाञ्च विचारार्थं स भविष्यत्युपस्थितः ॥
१४ प्रजानाञ्च तदीयानाम् अध्यक्षा अग्रणाश्च ये।
विवादे तै र्नरैः सार्द्धं प्रवृत्तः स गदिष्यति।
मामकं गोस्तनीक्षेत्रं युष्माभिरेव नाशितं।
दीनेभ्यो ऽपहृतं वित्तं युष्मद्गेहेषु विद्यते ॥
१५ किमर्थं मत्प्रजाः पिंष्ठ दीनस्यास्यञ्च घर्षथ।
इत्याह वाहिनीस्वामी प्रभुरेव परेश्वरः ॥
१६ परमेशः पुन र्ब्रूते सियोनोद्भवयोषितः।
गर्व्वन्ति दीर्घकण्ठाश्च चरन्त्यटनलोचनाः।
क्राम्यन्ति लघुगत्या च पादयोः शिञ्जितेन च ॥
१७ मुण्डयिष्यत्यतः शीर्षं सियोनीयस्त्रियां प्रभुः।
नग्नयिष्यति तासाञ्च गुह्यदेशं परेश्वरः ॥
१८ प्रभुस्तस्मिन् दिने सर्व्वम् अलङ्कारं हरिष्यति।
नूपुरान् वालपाशांश्च चन्द्राकारललाटिकाः ॥
१९ कर्णिका वलयांश्चापि शिरःप्रच्छादनीस्तथा।
२० किरीटान् पदसूत्राणि कटिदेशस्थमेखलाः ॥
सौरभाधारपात्राणि मन्त्रसम्बलिता लिपीः।
२१ अङ्गुलीवेष्टनान्येव नासिकाभूषणानि च ॥
२२ पार्श्ववस्त्राणि प्रावारान् अन्तरीयाणि सम्पुटान्।

दर्पणानि तथा चोलान् उष्णीषान् प्रावृतानि च ॥ २३
परन्तु सौरभस्थाने दुर्गन्धः सम्भविष्यति। २४
मेखलायाः स्थले रज्जु र्धम्मिल्लस्य च मुण्डता।
वृहत्परिच्छदस्थाने शाणजं कटिबन्धनं।
सौन्दर्य्यस्य स्थले चापि कलङ्कः सम्भविष्यति॥
पतिष्यन्त्यसिना वीरास्तव तेजो रणेन च॥ २५
पुर्य्या द्वाराणि शोकेन श्रावयिष्यन्ति रोदनं। २६
वर्ज्जिता च प्रभावेन सा भूमावुपवेक्ष्यति॥

---

४ चतुर्थोऽध्यायः।

विपत्काले खीष्टस्य राज्याश्रयस्थानकथनं।

तदैकं पुरुषं धृत्वा सप्त वक्ष्यन्ति योषितः। १
वयं भोक्ष्यामहे स्वान्नं धरिष्यामो निजाम्बरं।
त्वं स्वनाम्नैव विख्याप्य निन्दातो ऽस्मान् समुद्धर॥
तदानीं प्राप्तरक्षाणाम् इस्रायेलो नृणां कृते। २
पल्लवः परमेशस्य श्रीः शोभा च भविष्यति।
फलोदयश्च देशस्य तेजो रूपञ्च दास्यति॥
रक्षितो यश्च सीयोने शेषो वा यिरूशालमे। ३
जीवनार्थं हि यः कश्चिल्लिखितो यिरूशालमे।
पवित्र इति नाम्नैव स विख्यातो भविष्यति॥
विचारकात्मना किन्तु दाहकेनात्मना च प्राक्। ४
सियोनोद्भवयोषाणां मलं धाविष्यति प्रभुः।
यिरूशालममध्याच्च तदीयासृक् प्रमार्क्ष्यति॥
सियोनाद्रेश्च यत् स्थानं स्थलं यच्च सभार्थकं। ५
दिवा मेघश्च धूमश्च रात्रौ दीप्तानलप्रभा।
तत् सर्व्वस्योपरिष्टाद्धि परेशेन तनिष्यते।
युज्यते छादनं यस्मात् सर्व्वस्मिन्नेव तेजसि॥
उटजं तद् दिवा छायां दास्यति ग्रीष्मवारिणीं। ६
दुर्द्दिने वृष्टिकाले च शरणस्थानमाश्रयं॥

५ पञ्चमोऽध्यायः।

१ परमेश्वरस्य द्राक्षाक्षेत्रकथनं ८ लोभस्य दण्डः ११ सुखभोगिनां दण्डः १८ दुष्टलोकानां दण्डः २० उपद्रावित्लोकानां दण्डः २५ एतेषां दण्डयतां वर्णनं।

१ स्वमित्रमधि गानं मे संश्रोतुं यूयमर्हथ।
द्राक्षाक्षेत्रीयगीतं हि बन्धो र्गायिष्यते मया।
मद्बन्धो र्गोस्तनीक्षेत्रम् आसीत् पीने महीधरे॥
२ प्राचीरं तत्र दत्त्वा स वहिष्कृत्य च प्रस्तरान्।
श्रेष्ठानरुरुहद् वृक्षान् मध्ये वेश्म च निर्म्ममे।
कुण्डमप्यखनीत् तत्र रससङ्ग्रहणार्थकं।
प्रत्यैच्छिष्ट च स द्राक्षास्तत् त्वम्लातानजीजनत्॥
३ हे पौरा यिरुशालमीया हे यिहूदीयमानवाः।
यूयं कुरुत मत्क्षेत्रं माञ्चाधि धर्म्मनिर्णयं॥
४ यदकार्षं तदन्यत् किं मत्क्षेत्रार्थं करिष्यते।
द्राक्षाः प्रतीक्षमाणाय तत् त्वम्लातानदात् कुतः॥
५ मत्क्षेत्रे यत् करिष्यामि युष्मांस्तत् प्रवदाम्यहं।
वारणीं दवयिष्यामि पशुभिस्तच्चरिष्यते।
प्राचीरं तस्य भङ्क्ष्यामि पादै र्मर्द्दिष्यते च तत्॥
६ करिष्यामि च शून्यं तद् अच्छन्नमपरिष्कृतं।
कण्टकान् गोक्षुरांश्चैव तत् समुत्पादयिष्यति।
मेघांश्चाज्ञाप्य तत्राहं नानुज्ञास्यामि वर्षणं॥
७ यस्मात् परेश्वरस्यैव वाहिनीनामधीशितुः।
इस्रायेलीयवंशो ऽयं गोस्तनीक्षेत्रमस्ति हि।
यिहूदीयमनुष्याश्च तस्यैव प्रमदावनं॥
स प्रत्यैच्छिष्ट साधुत्वम् उदपादि तु मारणं।
प्रत्यैच्छिष्ट च धर्म्मं स उदपादि तु रोदनं॥
८ स्थानस्याभावतो यावन्नैका वत्स्यथ मेदिनि।
तावद् गृहे गृहं युंक्थ स्थलं सञ्जयथ स्थले।
ये यूयं हन्त युष्माकं सन्तापः सम्भविष्यति॥
९ मदीयकर्णयो र्ब्रूते परेशो वाहिनीपतिः।
अवश्यं बहुवेश्मानि विशालान्युत्तमानि च।

उत्सन्नानि भविष्यन्ति वर्जितानि निवासिभिः॥
दशगोचर्म्ममाने च द्राक्षाक्षेत्रे ऽपि केवलं। १०
सेरकैकप्रमाणो हि द्राक्षारसो जनिष्यते।
दशसेरकमानाच्च वीजात् शस्यस्य सेरकः॥
नरान् धिक् प्रग उन्निद्रान् सुराया अनुधाविनः। ११
सायं विलम्बमानांश्च मदेनोद्दीप्तचेतसः॥
वीणानेवलयो र्वाद्यं ध्वनिर्वंशीमृदङ्गयोः। १२
मदिरा च नृणां तेषां महाभोज्येषु युज्यते॥
क्रिया किन्तु परेशस्य तैः पर्य्यालोच्यते नहि।
नैव हस्तकृतं तस्य कर्म्म तैः समवेक्ष्यते॥
तस्मान्निर्वासयिष्यन्ते ज्ञानाभावेन मत्प्रजाः। १३
क्षेष्यन्ते क्षुधयाध्यक्षाः शोक्ष्यन्ति च तृषा जनाः॥
तस्माच्च प्रेतलोको ऽपि जातो ऽतीवोदरम्भरिः। १४
परिमाणमतिक्रम्य व्याददाति निजाननं॥
तत्रैवावतरिष्यन्ति श्री र्जनौघश्च नीवृतः।
तस्याः कोलाहलश्चापि तथा तच्छ्लाघिनो नराः॥
प्राप्स्यति भुग्नतां मर्त्त्यो नीचताञ्च नरोत्तमः। १५
उच्चानामुच्चदृष्टिश्च समवाप्स्यति नीचतां॥
उन्नंस्यति विचारेण परेशो वाहिनीपतिः। १६
पवित्रो मंस्यते धर्म्मात् स पवित्रो महाबलः॥
मेषवत्साश्चरिष्यन्ति देशं चारणभूमिवत्। १७
खिलक्षेत्राणि पीनानां भोक्ष्यन्ते च प्रवासिनः॥
धिक् मायारज्जुहस्तांस्तान् य आकर्षन्ति पातकं। १८
पापमाहर्त्तुमुद्युक्ताः शकटीयगुणैरिव॥
ते वदन्ति त्वरित्वा स करोतु स्वक्रियां द्रुतं। १९
तदानीं दर्शनं तस्या अस्माभिः परिलप्स्यते॥
इस्रायेलीयराजस्य पवित्रस्य च मन्त्रणा।
उपस्थाय व्रजेत् सिद्धिं ज्ञास्यामस्तां तदा वयं॥
तान् नरान् धिक् असद् ये सत् पुनः सत् प्रवदन्त्यसत्। २०
तमो जानन्ति चालोकम् आलोकञ्च पुनस्तमः।
तिक्तं जानन्ति मिष्टञ्च मिष्टं तिक्तरसं पुनः॥

२१ नरान् धिक् क्षमतौ प्रज्ञान् स्रष्टौ च मनस्विनः॥
२२ वीरान् धिक् मदिरापाने विक्रमान् मद्यमिश्रणे॥
२३ उत्कोचं प्राप्य यै दोषी निर्दोषीक्रियते नरः।
मनुष्याद् धार्म्मिकात् किन्तु स्वीयधर्म्मा वियुज्यते॥
२४ अतो हेतो यथा नालं चर्व्यते वह्निजिह्वया।
शिखायाः स्पर्शनादेव संचीयन्ते तृणानि वा।
तथैवैतस्य वंशस्य मूलं क्लेदं गमिष्यति।
रजोवच्चोड्डयिष्यन्ते तत्पुष्पाणि विहायसि॥
यस्मात् तै र्गर्हितं शास्त्रं वाहिनीस्वामिनः प्रभोः।
इस्रायेलः पवित्रस्य राज्ञो वाक् च निराकृता॥
२५ स्वप्रजाभ्यस्ततः क्रुद्धः प्रजज्वाल परेश्वरः।
करं विस्तार्य्य तांश्चाहन् तेनाकम्पन्त पर्व्वताः।
न्यपतंश्च शवास्तासां मार्गेष्ववकरा इव॥
न तु शाम्यत्यनेनापि क्रोधस्तस्य कथञ्चन।
करस्तस्यास्ति विस्तीर्ण इदानीमपि पूर्व्ववत्॥
२६ दूरदेशिन आनेतुं तेन संस्थापितो ध्वजः।
तांश्चानेतुं मह्मीप्रान्तात् तारशब्द उदीर्य्यते।
पश्य ते लघुपादाश्च समायान्त्यतिसत्वरं॥
२७ नैको ऽपि दृश्यते क्लान्तो नैको ऽपि स्खलनोन्मुखः।
न याति स रिपुस्तन्द्रां न निद्रां वा निषेवते।
न वा विमोच्यते तेन कटिदेशस्य बन्धनं।
तदीयोपानहोः सूत्रं न च प्राप्नोति शीर्णतां॥
२८ सुतीक्ष्णाः सन्ति तद्बाणा आयतानि धनूंषि च
अश्वानाञ्च खुरा वज्रा चक्राणि चक्रवातवत्॥
२९ सिंह्या इव रवस्तस्य युवकेशरिणो यथा।
तथा हल्लोचनादं स गर्ज्जन् लोकं धरिष्यति।
अपनेष्यति दूरञ्च रक्षकेण विवर्ज्जितं॥
३० सामुद्रगर्ज्जनेनेव गर्ज्जिष्यति च तं प्रति।
स तु वीक्षिष्यते भूमिं तिमिरेणावृता हि सा।
ऊर्द्ध्वं त्रासतडिन्मध्ये द्यौश्चान्धकारयिष्यते॥

---

६ षष्ठोऽध्यायः।

१ यिशायियस्य दर्शनं ६ कठिनलोकान् प्रति तस्य प्रेषणं ११ अवशिष्टलोकानां रक्षणं।

यस्मिन् वर्षे महीपाल उषियो मृत्युमाप्तवान्। १
तस्मिन् वर्षे मयालम्भि प्रभोरीशस्य दर्शनं॥
आसीदासीन उत्तुङ्गे प्रोच्चसिंहासने हि सः।
तदीयराजवस्त्रान्तैः परिपूर्णञ्च मन्दिरं॥
तस्योर्द्धे च सिराफाख्या अवातिष्ठन्त सेवकाः। २
षट्पक्षास्तु त एकैको द्वाभ्यामाहणुयान्मुखं।
द्वाभ्यामाच्छादयेत् पादौ द्वाभ्यां कुर्य्यात् खसर्पणं॥
तदानीमुच्चशब्देन प्रावोचंस्ते परस्परं। ३
पुण्यः पुण्यः पुनः पुण्यः परेशो वाहिनीपतिः।
परिपूर्णास्ति तस्यैव महिम्ना कृत्स्नमेदिनी॥
शिलामूलान्यकम्पन्त घोषणस्योच्चशब्दतः। ४
मन्दिरस्यान्तरञ्चापि तदा धूमैरपूर्य्यत॥
मयोक्तं हा हतो ऽस्म्यद्य यदशुच्यधरेण च। ५
अशुच्यधरलोकानां मध्ये च वसता मया।
प्रत्यक्षो वीक्षितो राजा परेशो वाहिनीपतिः॥
सन्दंशेन तदाङ्गारम् उष्णमादाय वेदितः। ६
एकः सिराफ उड्डीय मत्समीपं समागमत्॥
ममास्यं स्पर्शयित्वा च मामिमां वाचमब्रवीत्। ७
पश्य संस्पृष्टमेतेन तावकीनाधरद्वयं।
तस्मात्क्षुप्तो ऽपराधस्ते तव पापञ्च शोत्स्यति॥
अपरं कं प्रहेष्यामि कश्च यास्यति नः कृते। ८
प्रभोरेतादृशी वाणी समश्रावि मया तदा।
प्रत्युक्तञ्चाहमत्रास्मि भवान् मां प्रहिणोत्विति॥
ततो मां सो ऽब्रवीदेतद् गत्वा ब्रूहि जनानिमान्। ९
सम्यक् संश्रुत्य युष्माभि र्बोधो नैवाभिगम्यतां।
सम्यग् दृष्ट्वा च युष्माभि र्ज्ञानं नैवाभिलभ्यतां॥
त्वमेतेषां मनुष्याणां मनः स्थूलं विधत्स्व हि। १०
वधिरीकुरु कर्णौ च लिप्त्वा रुन्धि च लोचने॥

न चेदालोक्य नेत्राभ्यां कर्णाभ्यां विनिशम्य च।
बुद्ध्वा च मनसा पापे त्यक्ते तैः स्वास्थ्यमाप्स्यते॥
११ हे प्रभो कति कालं तदिति पृष्टस्तदा मया।
सो ऽब्रवीच्छून्यतां यावद् अभावेन निवासिनां।
नगराणि न यास्यन्ति नराभावाद् गृहाणि च।
यावद् भूमिरपि ध्वंसाद् उच्छिन्ना न भविष्यति॥
१२ दवितेषु परेशेन नरेषु घोरशून्यता।
यावन्न दृश्यते देशे तावदित्थं भविष्यति॥
१३ शिष्यते दशमांशो ऽत्र सो ऽपि ध्वंसिष्यते पुनः।
एलाह्लोनाख्यसालानां छिन्नानान्तु यथा ध्रुवः।
पूतो वंशो नृणां तेषां स्थास्यति ध्रुववत् तथा॥

---

७ सप्तमो ऽध्यायः।

१ आहसं प्रति यिशायियस्य सान्त्वनकथनं १० आहसं प्रति आश्चर्य्यचिह्नप्रकाशनं १७ अशूरीयलोकै र्भाविदण्डप्रकाशनञ्च।

१ यदोषियस्य पौत्रेण योथमस्य तु सूनुना।
आहसेन यिहूदीये देशे राज्यं व्यधीयत॥
तदानीमेव रित्सीन आरामीयमहीपतिः।
पेकहश्च रिमाल्यीय इस्रायेलीयपार्थिवः।
इमौ युद्धं करिष्यन्तौ यिरूशालममागतौ।
एरं तत्तु पराजेतुं नैव ताभ्यामशक्यत॥
२ तत इफ्रयिमारूढ आरामो ऽस्तीति वाग् यदा।
दायूदीयकुलोत्पन्नं नृपमश्रावयन् जनाः।
तदा तस्य प्रजानाञ्च चित्तान्याशानि वेपथुं।
समीरणेन संक्षुब्धा आरण्यपादपा इव॥
३ यिशायियं तदानीन्तु प्रावोचत् परमेश्वरः।
त्वं स्वसन्तानमादाय शारयाशूबनामकं।
ऊर्द्ध्वतडागगामिन्याः प्रणाल्या अन्तमाव्रज।
रजकक्षेत्रपार्श्वस्थे मार्गे चाहसमालय॥
४ इमां वाचञ्च तं ब्रूहि सयत्नः शान्तिमाचर।

मा बिभीहि त्वदीयञ्च चित्तं मा विक्लवं भवेत्॥
करिष्येते किमेतौ द्वौ सधूमेन्धनपुच्छकौ।
रित्सीनारामयोः कोपो रोषो रिमाल्यजस्य वा॥
आरामेणेफ्रयीमेण रिमाल्यस्य सुतेन च। ५
कृता त्वत्प्रातिकूल्येन यस्मादेषा कुमन्त्रणा॥
यिहूदादेशमाक्रम्य प्रबाधिष्यामहे वयं। ६
अस्माकञ्च कृते तस्य करिष्यामो विदारणं।
नियोक्ष्यामश्च तद्राज्ये टाबेलस्यात्मसम्भवं॥
प्रभुः परेश्वरस्तस्माद् इमां वाचं प्रभाषते। ७
नैव प्राप्स्यति दार्ढ्यं सा न वा सेत्स्यति मन्त्रणा॥
आरामस्यैव मूर्द्धास्ति नाम्ना दम्मेषका पुरी। ८
मूर्द्धा दम्मेषकायाश्च रित्सीनो ऽस्ति च पूर्व्ववत्॥
वर्षाणां पञ्चषष्टीनां मध्ये भङ्गमवाप्य च।
जातित्वादिफ्रयीमीया जाति र्भंशिष्यते किल॥
इफ्रयीमस्य मूर्द्धास्ति शोमिरोणाभिधा पुरी। ९
शोमिरोणस्य मूर्द्धा च रिमाल्यस्यात्मसम्भवः॥
न विश्वसिथ चेद् यूयं स्थैर्य्यं तर्हि न प्राप्स्यथ॥
आहसन्तु पुनर्व्वारम् अब्रवीत् परमेश्वरः। १०
चिह्नं किञ्चन याचस्व स्वप्रभुं परमेश्वरं। ११
नीचे किं वोन्नते स्थाने दृश्यं याचस्व लक्षणं॥
आहसेन तदा प्रोक्तं तन्न याचिष्यते मया। १२
परीक्षा परमेशस्य नैव कारिष्यते मया॥
ततो ऽवादि परेशेन बुध्यध्वं दायुदान्वयाः। १३
युष्माभिः किं मनुष्याणां खेदनं मन्यते लघु।
क्रियते च ततो हेतोरीश्वरस्यापि खेदनं॥
तस्माद् दास्यति युष्मभ्यं चिह्नमेकं प्रभुः स्वयं। १४
कुमारीं गर्भिणीं पश्य सा पुत्रं प्रसविष्यते।
इम्मानुयेल इत्येव तस्य नाम करिष्यति॥
यावद् वरयितुं साधु निराकर्त्तुमसाधु च। १५
स न ज्ञास्यति तावत् स दधि क्षौद्रञ्च भोक्ष्यते॥
किञ्च वरयितुं साधु निराकर्त्तुमसाधु च। १६

यस्मिन् काले हि बालेन ज्ञानप्राप्तेन शक्ष्यते।
तस्मात् प्रागेव याभ्यां त्वं भीत उद्विजसे ऽधुना।
तयो भूपालयो र्देशः परित्यक्तो भविष्यति॥
१७ यस्मिन् दिने यिहूदातं इफ्रयीमो ऽभवत् पृथक्।
तदारभ्याद्यपर्य्यन्तं यादृक् कालस्तु नाभवत्।
त्वां प्रजांस्तव गोत्रञ्च पैतृकं प्रापयिष्यति।
परेशस्तादृशं कालम् अश्शूराधिपमानयन्॥
१८ दिने तस्मिन् परेशश्च तारशब्दमुदीरयन्
समाक्रास्यति मिस्त्रीयनदीप्रान्तस्थमक्षिकाः।
तथैवाश्शूरदेशस्थान् भ्रमरान् सकलानपि॥
१९ ते च सर्व्वे समागत्य करिष्यन्ति निजाश्रयं।
उपत्यकासु शुष्कासु पर्व्वतानां दरीषु च।
सर्व्वस्मिन् कण्टकस्तम्बे स्थले गोचारणे तथा॥
२० तस्मिन् दिने फरान्नद्याः पारादेव प्रभुः क्षुरं।
परकीयं गृहीत्वार्थैरश्शूरीयमहीपतिं।
उत्तमाङ्गस्य तेनैव प्रकरिष्यति मुण्डनं।
प्रच्छेत्ता पादलोमानि श्मश्रु चापि हरिष्यति॥
२१ तस्मिन् काले च यः कश्चिद् एकां तरुणधेनुकां।
सहितां मेषयुग्मेन रक्षित्वा पालयिष्यति॥
२२ दुग्धबाहुल्यलाभात् स दधिभोगेन पोक्ष्यति।
देशे शेषे जनै र्यस्माद् दधि क्षौद्रञ्च भोक्ष्यते॥
२३ मुद्रासाहस्रमूल्यञ्च लतासाहस्रसंयुतं।
अधुना गोस्तनीक्षेत्रं यत्र कुत्रापि विद्यते।
तत् स्थानं कण्टकै र्व्याप्तं गोक्षुरैश्च भविष्यति॥
२४ शरानादाय चापञ्च तज्जनैरभियास्यते।
निखिलो व्याप्स्यते यस्माद् देशः कण्टकगोक्षुरैः॥
२५ खन्यन्ते च खनित्रै र्ये सकला उपपर्व्वताः।
नाभियास्यति तान् को ऽपि घोरान् कण्टकगोक्षुरैः।
गावस्तत्र चरिष्यन्ति मर्द्दिष्यन्त्यवयश्च तान्॥

---

८ अष्टमोऽध्यायः।

१ अश्शूरीयलोकैरिस्रायेलो भविष्यद्दण्डः ५ यिहूदाया भविष्यद्दण्डः ९ दण्डस्यानिवार्य्यत्वं ११ साधुन्टणां सान्त्वनायाः कथा १९ देवार्च्चिनां दुःखं।

अपरं परमेशो मामिमां वाचमभाषत। १
त्वया फलकमादाय महान्तं लेखनार्थकं।
महेर्शाललहाश्वासम् अर्थात् सत्वरलुण्ठनं।
इदं लौकिकलेखन्या वाक्यं तत्र विलिख्यतां॥
अत्र याजक ऊरीयः सिखरीयश्च कीर्त्तितः। २
पुत्त्रो यिवेरिखीयस्य विश्वास्यौ द्वाविमौ जनौ।
सत्यस्यैव प्रमाणार्थं साक्षिणौ मे निरूपितौ॥
मया चोपगता भार्य्या सगर्भा सुषुवे सुतं। ३
तदानीं परमेशो मामिमां वाचमभाषत।
महेर्शाललहाश्वास इति नाम धरत्वयं॥
यस्मादयं पित र्मातरिति स्पष्टं प्रभाषितुं। ४
यस्मिन् शिक्षिष्यते काले तस्मात् प्रागेव निश्चितं।
दम्मेशकस्य वित्तानि शोमिरोणस्य च श्रियं।
अश्शूरीयनृपस्याग्रे दूरं वक्ष्यन्ति मानवाः॥
परेशः पुनरालप्य मामिमां वाचमुक्तवान्॥ ५
मन्दगामिशिलोहस्य जलं त्यक्त्वा जना इमे। ६
यद् रिमाल्यीयरित्सीने महानन्दं प्रकुर्व्वते॥
पश्य प्रभुरहं तस्मात् समानेष्यामि तान् प्रति। ७
फरान्नद्याः पयोराशिं सुविस्तीर्णं महाबलं।
अश्शूरीयमहीपालं तस्य कृत्स्नञ्च गौरवं॥
स सर्व्वाणि स्वखातानि तोयैः सम्पूरयिष्यति।
उच्चत्वाच्च स्वकूलानि सर्व्वाण्यतिक्रमिष्यति॥
यिहूदादेशमभ्येत्य स्रवन् स प्लावयिष्यति। ८
गलदेशं मनुष्याणां परिस्प्रक्ष्यति चोर्म्मिभिः।
तदीयपक्षविस्तारो विस्तारं पूरयिष्यति।
नोह्नतः का तु सा मीह्नत् इम्मानूयेल सा तव॥
यूयं हे जातयो हिंस्र भमत्वञ्च प्रगच्छत। ९

सर्व्वे शृणुत हे यूयं दूरदेशनिवासिनः ।
स्वकटीः परिबध्नीत भग्नत्वञ्च प्रगच्छत ।
स्वकटीः परिबध्नीत भग्नत्वञ्च प्रगच्छत ॥
१० कुरुध्वं मन्त्रणाञ्चापि सा भविष्यति निष्फला ।
वाक्यं किञ्चन भाषध्वं तत् स्थिरं न भविष्यति ।
यस्मादिम्मानूयेलो ऽस्ति सङ्गी नः स्वयमीश्वरः ॥
११ बाहो र्बलं प्रकाश्येदं मामवोचत् परेश्वरः ।
एतद्देशीयलोकानां पथि मे वारयन् गमं ॥
१२ यद् राजद्रोह इत्येतै र्मनुष्यैरभिधीयते ।
तद् राजद्रोह इत्युक्ता युष्माभि र्नाभिधीयतां ।
एतषां भीषणाद् भीतिस्त्रासो वा प्राप्यतां नहि ॥
१३ सेनाध्यक्षः परेशस्तु युष्माभिः परिपूज्यतां ।
स भवेद् वो भयस्थानं स युष्मत्त्रासभाजनं ॥
१४ पुण्यभूमिः स एवास्ति स त्विस्रायेलवंशयोः ।
कृते व्याघातकः शैलो ग्रावा च स्खलनार्थकः ।
उन्माथश्चापि पाशश्च यिरूशालमवासिनां ॥
१५ स्खलित्वा बहवस्तत्र भविष्यन्ति निपातिताः ।
प्रगमिष्यन्ति भङ्गं वा बन्धनं वापि पाशिताः ॥
१६ मम शिष्येषु साक्ष्यं त्वं बधानाज्ञाञ्च मुद्रय ॥
१७ याकूवीयान्वयाद् यस्तु छादयत्याननं निजं ।
तं परेश्वरमाकाङ्क्षन् प्रतीक्षामाचराम्यहं ॥
१८ पश्य मां बालकांश्चैतान् परेशेनार्पितान् मयि ।
इस्रायेलि च चिह्नार्थं चित्रार्थञ्च निरूपितान् ।
सेनाध्यक्षपरेशेन सियोनाद्रिनिवासिना ॥
१९ भौता मायाविनश्चैव कूजका जपकारिणः ।
युष्माभिरनुपृच्छ्यन्तामिति किं कोऽपि वो वदेत् ॥
प्रष्टव्यस्तु प्रजाभिः कः किं स्वकीयेश्वरो नहि ।
प्रमीता जीवतां भाग्यं किं प्रष्टव्याः कथञ्चन ॥
२० शास्त्रं साक्ष्यञ्च प्रष्टव्ये इति वाग् यै र्न गद्यते ।
किम्भूताः सन्ति ते लोकास्ते ऽरुणोदयवर्ज्जिताः ॥
२१ पर्य्यटिष्यन्ति देशं ते क्लेशापन्नाः क्षुधातुराः ।

क्षुधातश्च कुपित्वा ते शपमानाः स्वभूपतिं।
स्वकीयमीश्वरञ्चापि भविष्यन्त्यूर्द्ध्वदृष्टयः॥
वीक्षिष्यन्ते भुवञ्चापि क्लेशो ध्वान्तञ्च भास्यति। २२
तमः सङ्कटयुक्तञ्च तत्तमस्तु विनेष्यते॥

---

९ नवमोऽध्यायः।

१ विपत्काले ख्रीष्टस्य जन्मना कर्म्मभिश्च मानवानां सुखस्य वर्णनं ८ इस्रायेलो भविष्यदण्डः १३ तेषां व्याजत्वदौरात्म्ययोः फले दण्डश्च।

यत्रासीत् सङ्कटस्तत्र तिमिरं न भविष्यति। १
प्रागवज्ञायुता तेन सिवूलूनस्य या नीवृत्।
नप्तालेरपि या नीवृत् पश्चात् सा मानयिष्यते।
भूमिः समुद्रतीरस्था यर्द्दनस्तरणस्थलं।
मनुष्यैरन्यजातीयैः क्लिष्टं गालीलमण्डलं॥
अभ्राम्यन् ये जना ध्वान्ते ते पश्यन्ति महाद्युतिं। २
मृत्युच्छायावृते देशे ये निवासमकुर्व्वत।
उपरिष्टान्मनुष्याणां तेषां ज्योतिरुदेति च॥
त्वया सा वर्द्ध्यते जाति र्महानन्दैश्च योज्यते। ३
त्वत्साक्षात् ते च हृष्यन्ति शस्यकर्त्तनहर्षवत्।
लोप्त्राणां भागकाले वा प्रोल्लसन्तो नरा इव॥
यस्माद् धुरयुगं तस्य लगुडं स्कन्धघातिनं। ४
दण्डं तत्ताडकस्यापि स्वयं त्वं भग्नवानसि।
मिदियानीयलोकानां पराजयदिने यथा॥
तुमुलार्थं सुसज्जस्य कृत्स्ना सज्जास्त्रधारिणः। ५
शोणिते लोठितञ्चापि तस्य सर्व्वपरिच्छदः।
उभौ निरूपितौ दाहे ऊताशनस्य भक्ष्यवत्॥
अजन्यस्मत्कृते बालः पुत्रो ऽस्मभ्यमदायि च। ६
अधिराज्यञ्च तस्यैव स्कन्धे सम्प्रतितिष्ठते॥
तस्य नामानि चाश्चर्य्यो मन्त्री विक्रान्त ईश्वरः।
तातः शाश्वतकालस्य शान्तिराजश्च सन्ति हि॥
अनन्ते चाधिराज्यस्य वृद्धिशान्ती भविष्यतः। ७

दायूदीयासनासीन तस्मिन् राज्यं प्रकुर्व्वति ॥
अद्यारभ्य ध्रुवं कालं यावद् राज्यस्य सुस्थितिः।
स्थिरता च विचारेण धर्म्मेण चैधयिष्यते।
सेनाध्यक्षपरेशस्यानुरागात् तत् प्रसेत्स्यति ॥
८ प्रहिता प्रभुना चैका याकूवं प्रति भारती।
इस्रायेलीयलोकानां मध्यस्थानमवातरत् ॥
९ विदुस्तां ते जनाः सर्व्वे दर्पिणः स्फीतचेतसः।
इफ्रयीमीयलोकाश्च शोमिरोणनिवासिनः ॥
१० ते वदन्तीष्टकाः पेतु र्निचेष्यामो महाश्मनः।
अच्छेद्युडुम्बरं काष्ठं निमास्यामह एरसं ॥
११ रित्सीनस्य विपक्षांस्तु जनेभ्यस्तेभ्य उन्नतान्।
तेषां द्वेष्टॄन् सयत्नांश्च कुरुते परमेश्वरः ॥
पूर्व्वदिक्स्था अरामीयाः पश्चिमस्थाः पिलेष्टिनः।
इस्रायेलं ग्रसन्ते च सिंहा व्यात्तमुखा इव ॥
१२ न तु शाम्यत्यनेनापि क्रोधस्तस्य कथञ्चन।
करस्तस्यास्ति विस्तीर्ण इदानीमपि पूर्व्ववत् ॥
१३ न परावर्त्यते चित्तं जनैः स्वताडकं प्रति।
सेनाध्यक्षपरेशस्यान्वेषणं ते न कुर्व्वते ॥
१४ उत्तमाङ्गानि पुच्छांश्च तृणराजान् तृणानि च।
इस्रायेलत एकस्मिन् दिन उच्छेत्स्यति प्रभुः ॥
१५ वृद्धा मान्याश्च ये लोका उत्तमाङ्गानि सन्ति ते।
अन्टतादेशकारी यो भाविवादी स पुच्छवत् ॥
१६ एतद्देशीयलोकानां भ्रामकाः पथदर्शकाः।
ते यान् नयन्ति पश्चात् ते नश्यन्ति निपातिताः ॥
१७ तरुणेषु ततस्तेषां प्रभु र्नैव प्रहृष्यति।
नैव बालाननाथान् स विधवा वानुकम्पते ॥
यस्मात् कपटिनः सर्व्वे दुराचाराश्च सन्ति ते।
सकलानाञ्च वक्त्राणि कुर्व्वन्ति धर्म्मनिन्दनं ॥
न तु शाम्यत्यनेनापि क्रोधस्तस्य कथञ्चन।
करस्तस्यास्ति विस्तीर्ण इदानीमपि पूर्व्ववत् ॥
१८ अग्निवद् ग्रासकं पापम् अत्ति कण्टकगोक्षुरान्।

ज्वलितञ्च वनं घोरं धूमस्तम्भे विलीयते॥
सेनाध्यक्षपरेशस्य कोपान्नीलायते धरा। १९
मनुष्या इन्धनानीव वह्नेर्भक्ष्यं भवन्ति च।
न करोति दयां कोऽपि स्वीयभ्रातरि कञ्चन॥
दक्षिणे दंदशूकानां तेषां संवर्द्धते क्षुधा। २०
सव्ये च कुर्व्वतां ग्रासं तेषां तृप्तिर्न जायते।
एकैकः स्वीयबाह्वोश्च मांसं भक्षयति स्वयं॥
इफ्रयीमो मिनःशिश्च पर्य्यश्नीतः परस्परं। २१
पुनराक्राम्यतस्तौ च यिहूदामेकयोगतः॥
न तु शाम्यत्यनेनापि क्रोधस्तस्य कथञ्चन।
करस्तस्यास्ति विस्तीर्ण इदानीमपि पूर्व्ववत्॥

---

१० दशमोऽध्यायः।

१ अन्यायकारिणां दण्डनं ५ अभिमान्यशूरीयनरपतेरागमनकथनं १२ तस्य विनाशः २० इस्रायेलोऽवशिष्टानां लोकानां रक्षणं २४ अशूरराजस्य सैन्यानामागमन-वर्णनं ६२ तस्य विनाशकथनञ्च।

आ व्यवस्थापकान् धिक् तान् अधर्म्मं स्थापयन्ति ये। १
राजाज्ञालेखकान् धिक् तान् क्लेशदाज्ञा लिखन्ति ये॥
दीनान् निवारयिष्यन्तः सुविचारस्य मार्गतः। २
मत्प्रजानां दरिद्राणां हरिष्यन्तोऽधिकारितां॥
विधवानां स्त्रियां वित्तं लुठिष्यन्तश्च लोप्त्रवत्।
अनाथानां हरिष्यन्तः सर्व्वस्वं तस्करा इव॥
आ दिने फलदानस्य यूयं किं प्रकरिष्यथ। ३
परिध्वंसस्य काले वा सुदूरादागमिष्यतः॥
साहाय्यार्थं तदानीञ्च प्रधाविष्यथ कं प्रति।
कुत्र स्थाने च रक्षार्थं स्वप्रतापं निधास्यथ॥
नितान्तं बद्धलोकानामधस्तात् सोऽवनंस्यति। ४
हतानाञ्च मनुष्याणामधस्तान्निपतिष्यति॥
न तु शाम्यत्यनेनापि क्रोधस्तस्य कथञ्चन।
करस्तस्यास्ति विस्तीर्ण इदानीमपि पूर्व्ववत्॥

५ आ अशूरीयराजो ऽसौ दण्डो मत्कोपसाधकः।
लगुडस्तत्करस्थश्च मत्संरम्भविधायकः॥
६ मया कपटिनीं जातिं प्रति स प्रेषयिष्यते।
मदीयामर्षपात्राणां विरुद्धश्च नियोक्ष्यते॥
कर्त्तव्यं लुण्ठनं तेन हर्त्तव्यानि धनानि च।
मर्द्दितव्या मनुष्याश्च मार्गस्थः कर्द्दमो यथा॥
७ न तु तस्यानुमानो ऽयं न तस्येदं मनोगतं।
मतिं नाशयितुं तस्य बह्वी र्जातीश्च कर्त्तितुं॥
८ यस्मात् स वक्तयमात्या मे किं न सर्व्वे नरेश्वराः
९ यद्वत् कर्कमिशं तद्वत् कल्णी किं न जिता मया।
यथार्पदं हमातं किं न तथैव वशीकृतं।
दम्मा दम्मेशकस्येव शोमिरोणस्य नास्ति किं॥
१० शोमिरोणस्य मूर्त्तिभ्यो मूर्त्तिभ्यो यिरूशालमः।
अतिमात्रं व्यशिष्यन्त येषां तच्चित्रमूर्त्तयः।
राष्ट्राण्यसारदेवानां तान्यहार्षीत् करो मम॥
११ शोमिरोणं मया यद्वत् जितं देवैः समाकुलं।
तथा किं न यिरूशालम् जेष्यते विग्रहैः सह॥
१२ कर्त्तव्यं प्रभुना यत्तु कर्म्म सीयोनपर्व्वते।
यिरूशालमि पुर्य्याञ्च सकलं तत् प्रसेत्स्यति॥
अशूरीयमहीशस्य चित्तगर्व्वस्य यत् फलं।
ऊर्द्धदृष्टेश्च यत् तेजो मया तन्निग्रहीष्यते॥
१३ यस्मात् स भाषते कर्म्म मम बाहो र्बलेन च।
मज्ज्ञानेन च संसिद्धं तीक्ष्णबुद्धिरहं यतः॥
देशानां सारयाम्यन्तान् कोषांस्तेषां हरामि च।
तन्निवासिमनुष्यांश्च वीरवत् पातयामि च॥
१४ अधरं स्वीयहस्तेन जातीनां वसु नीडवत्।
त्यक्ताण्डानीव हृत्वाञ्च समग्रक्तं वसुन्धरां।
को ऽपि नालोडयत् पत्त्रं कूजन् वा व्याददान्मुखं॥
१५ काष्ठच्छेत्तु र्विरुद्धं किं कुठारो गर्व्वितो भवेत्।
किं वेत्ति करपत्त्रं वा स्वं श्रेष्ठं करपत्त्रिणः॥
यैः समुत्थाप्यते दण्डस्तान् स किं चालयिष्यति।

काष्ठाच्छ्रेष्ठं नरं वा किं यष्टिरुत्थापयिष्यति॥
सेनाधीशः प्रभु र्यस्तु तेनैव प्रभुना ततः। १६
मध्ये तदीयपीनानां क्षशता प्रेषयिष्यते।
अग्निज्वालेव च ज्वाला तच्छ्रियो ऽधो ज्वलिष्यति॥
इस्रायेलस्य यो दीपः स भविष्यति वह्निवत्। १७
पवित्रस्तस्य राजा यः शिखावत् स भविष्यति॥
तेन प्रज्वलनं गत्वा चैकस्मिन् दिवसे तदा।
सर्व्व एव ग्रसिष्यन्ते तस्य कण्टकगोक्षुराः॥
तद्वोहिरण्यस्य सैन्योद्यानस्य च प्रभा। १८
आप्राणमांसपर्य्यन्तं वह्निना ध्वंसयिष्यते।
तेन स क्षयरोगीव क्षयग्रस्तो भविष्यति॥
तदरण्ये ऽवशिष्टाश्च स्थास्यन्ति स्वल्पशाखिनः। १९
तेषाञ्च लेखितुं सङ्ख्या बालकेनापि शक्ष्यते॥
इस्रायेल्यवशिष्टा ये त्राता याकूववंशजाः। २०
नावलम्बिष्यते तै र्हि पुनः स्वताडकस्तदा।
इस्रायेलः पवित्रस्तु राजा यः परमेश्वरः।
सत्यत्वाश्रितचेतोभिरवलम्बिष्यते स तैः॥
प्रत्यावर्त्तिष्यते शेषः शेषो याकूब एव सः। २१
ईश्वरं प्रति विक्रान्तं प्रत्यावर्त्तिष्यते पुनः॥
हे इस्रायेल् जनास्ते ये सामुद्रसिकतोपमाः। २२
अवश्यं शेषभागो हि तेषां प्रत्यागमिष्यति।
प्रलयो निश्चितः सर्व्वं धर्म्मेण प्लावयिष्यति॥
प्रलयं निश्चितं यस्मात् स सेनाधीश्वरः प्रभुः। २३
कृत्स्नाया अवने र्मध्ये तदा सम्पादयिष्यति॥
तस्माद् ब्रूत इदं वाक्यं स सेनाधीश्वरः प्रभुः। २४
हे मदीयजनाः सर्व्वे सीयोनाद्रिनिवासिनः।
मा भीता भवताशूरात् स यष्ट्या वो हनिष्यति।
मिस्रीया इव दण्डञ्च वः प्रत्युत्थापयिष्यति॥
स्वल्पकाले गते किन्तु मम कोपः शमिष्यति। २५
मम क्रोधस्य तस्यैव नाशमुत्पादयिष्यति॥
सेनाध्यक्षः परेशस्च प्रापयिष्यति तं कशां। २६

ओरेवाद्दौ मिदीयानं यथा घोरप्रमापणं ॥
स्वीयदण्डञ्च विस्तार्य्य समुद्रस्योपरि प्रभुः।
मिसर्द्देशे यथा पूर्व्वं तथैवोत्थापयिष्यति ॥
२७ तस्मिन् दिने तव स्कन्धात् तस्य भारः पतिष्यति।
त्वद्ग्रीवातो युगं तस्य तदानीञ्च सरिष्यति।
अभिषेकप्रभावेन भङ्गं यास्यति तद् युगं ॥
२८ शत्रवो ऽयपुरं प्राप्य मिग्रोणं प्रति जग्मिरे।
मिग्मसे तैः स्वसामग्री रक्षणार्थं समर्पिता ॥
२९ दुर्गमार्गं त्वरित्वा तै र्गेवायां याप्यते निशा।
रामा विकम्पते तस्माद् गिबियच्छौला पलायते ॥
३० हे गल्लीमाभिधे कन्ये विक्रोशोञ्चस्वरेण हि।
शृणोतु लायिशा रावम् अनाथोता च दुःखिनी ॥
३१ परिभ्राम्यति मन्मेना गेबीमीया द्रवन्ति च ॥
३२ अद्यैव स रिपु र्नोब उपस्थास्यति निश्चितं।
सियोनाख्यकुमार्य्याश्च निवासो यो धराधरः।
तं यिरूशालमः शैलं प्रत्युद्बाहु र्भविष्यति ॥
३३ पश्य किन्तु परेशः स प्रभु र्वाहिन्यधीश्वरः।
लोकारण्यस्यशाखानां भीमं करोति कर्त्तनं ॥
द्रुमाणाञ्च सुदीर्घाणाम् उच्छेदो जायते ततः।
निपात्यन्ते च तेनैव प्रांशवो ऽपि पलाशिनः ॥
३४ उच्छिद्यन्ते च लोहेन काननस्य लता अपि।
पात्यते च बलिष्ठेन लिबानोनोपमं वनं।

---

११ एकादशोऽध्यायः।

१ ख्रीष्टीयराजत्वस्य निर्णयः ६ तदीयं फलं १० अन्यलोकानां जयनं यिहूदीयानां रक्षणञ्च।

१ अवाद् यिशयवंशस्य शाखिकैका जनिष्यते।
तन्मूलेभ्यः सतेजस्कः पल्लवः प्रभविष्यति ॥
२ तस्मिन् परेश्वरस्यात्मा चाधिष्ठानं करिष्यति।
स आत्मा प्राज्ञताबुद्धी मन्त्रणावीर्य्ययोस्तथा।

ज्ञानस्येश्वरभक्तेश्च भवत्येकक आकरः॥
पारमेश्वरभक्त्यां स तीक्ष्णघ्राणो भविष्यति। ३
नैव लोचनयो दृष्ट्या विचारं स करिष्यति।
नैव वा कर्णयोः श्रुत्या स विधास्यति शासनं॥
स करिष्यति धर्म्मेण दीनानां धर्म्मनिश्चयं। ४
देशसंवासिनम्राणां याथार्थ्येन च पालनं॥
स्वीयवक्त्रस्यदण्डेन स भूमिं ताडयिष्यति।
मारयिष्यति दुष्टञ्च स्वोष्ठनिर्गतवायुना॥
धर्म्मस्तत्कटिदेशस्य बन्धनं हि भविष्यति। ५
तथा श्रोणिस्थलं तस्य सत्यता वेष्टयिष्यति॥
मेषवत्सेन सार्द्धञ्च वृको वासं करिष्यति। ६
शिशुच्छागेन सार्द्धञ्च चित्रव्याघ्रः शयिष्यते॥
स्थास्यन्त्येकत्र वत्सश्च सिंहो मेषश्च मांसलः।
सुक्षुद्रो बालकस्तेषां नायकश्च भविष्यति॥
धेनुका भल्लुकी चापि प्रणयेन चरिष्यतः। ७
एकत्रैव शयिष्यन्ते शावका उभयोस्तयोः।
मृगराजस्तदा गोवत् पलालाशी भविष्यति॥
चक्रिणो विवरे क्रीडां करिष्यते स्तनन्धयः। ८
स्वकरं फणिनो गर्त्ते त्यक्तस्तन्यो निधास्यते॥
कश्चन कस्यचिद्धिंसां कस्यचिद् वा विनाशनं। ९
कृत्स्ने मम पवित्राद्रौ कथञ्चिन्न करिष्यति॥
यस्मादापो यथा कृत्स्नं छादयन्ति महार्णवं।
तथा पारेश्वरं ज्ञानं पूरयिष्यति मेदिनीं॥
यिशयस्य च यो वृक्षो जातीनां तिष्ठति ध्वजः। १०
तमेवानुसरिष्यन्ति तत्काले सर्व्वदेशिनः।
तद्विश्रामस्थलं तस्माद् भविष्यत्यतिशोभनं॥
अश्शूरान्मिसराच्चापि पथ्रोषात् कूशदेशतः। ११
एलमाच्छिनियाराच्च सामुद्रद्वीपमण्डलात्।
हमाताच्चावशिष्टा या भविष्यन्ति निजप्रजाः।
प्रभुस्तासां हि शेषांशं निष्क्रेतुं तद्दिने पुनः।
द्वितीयं वारमेव स्वं करं विस्तारयिष्यति॥

१२ निमित्तं सर्व्वजातीनां ध्वजञ्चोत्थापयिष्यति।
इस्रायेलो विकीर्णानां मनुष्याणां स सञ्चयं।
चतसृभ्यो धरायाश्च दिग्भ्य एव करिष्यति।
यिहूदायाश्च विच्छिन्नान् मानवान् संग्रहीष्यति॥
१३ तदेफ्रायिम ईर्ष्यापि तिरोधानं गमिष्यति।
यिहूदातो दुरात्मा च समुच्छिन्नो भविष्यति॥
यिहूदां प्रति चेफ्रायिम् ईर्ष्यां नैवाचरिष्यति।
इफ्रायिमि च दौरात्म्यं यिहूदा न करिष्यति॥
१४ श्येनवत् तौ पिलेष्टीयान् पाश्चात्यानाक्रमिष्यतः।
पूर्व्वदिक्स्थजनानां वित्तं मिलित्वा च हरिष्यतः॥
करिष्यत इदोमे च मोयावे च करार्पणं।
ग्रहीष्यन्ति तयोश्चाज्ञामम्मोनीयकुलोद्भवाः॥
१५ अब्धिखातञ्च मिस्रीयं परमेशो ऽभिशप्स्यते।
चालयिष्यति हस्तञ्च फरातेे चण्डवायुना।
तं नदञ्च प्रहारेण सप्तखातं विधास्यति।
सपादुकमनुष्याणां सुतार्य्यञ्च करिष्यति॥
१६ ततस्तदीयलोकानामश्शूराद् यो ऽवशेक्ष्यते।
शेषभागस्य तस्यैव कृते पन्था भविष्यति।
इस्रायेलो मिसर्देशाद् यात्राकाले यथाभवत्॥

---

१२ द्वादशोऽध्यायः।

रक्षार्थं परमेश्वरस्य प्रशंसनं।

१ दिने तस्मिन्निदं वाक्यमुदाहारिष्यते त्वया।
परेश त्वामहं स्तौमि त्वमासीः कुपितो मयि।
निवृत्तः किन्तु कोपस्ते त्वयैवाहञ्च सान्त्वितः॥
२ ईशः पश्य मम त्राता निर्भयो विश्वसिम्यहं।
परमेशो बलं गानं त्राणञ्चाप्यभवन्मम॥
३ त्राणोत्सादपि युष्माभि र्हृष्टैरुद्धृतं जलं॥
४ तस्मिन् दिने च युष्माभिरिदं वाक्यं गदिष्यते।
यूयं परेश्वरं स्तुध्वं तन्नाम्ना कुरुतार्थनं।

सर्व्वजातीयलोकांश्च तस्य ज्ञापयत क्रियाः।
उन्नतं तस्य नामेति तान् स्मारयितुमुद्यताः॥
परेशं स्तुत गानेन प्रांशुकर्म्मा यतो ऽस्ति सः। ५
कृत्स्नायामवनावेतत् ज्ञाप्यन्तां सकला जनाः॥
हर्षनादेन गाय त्वं हे सियोननिवासिनि। ६
इस्रायेलः पवित्रो राट् तव मध्ये यतो महान्॥

---

१३ त्रयोदशोऽध्यायः।

१ अधिवाविलं भविष्यद्दण्डस्य निर्णयः ६ लोकानां दुःखं १७ वाविलस्य सर्व्वविनाशश्च।

लब्धदर्शनेनामोससुतेन यिशायियेन प्रकाशितं वाविलस्य १
भाग्यं।
वृक्षैरभूषिते शैले यूयं स्थापयत ध्वजं। २
गोपुराणि पुरोगानां प्रविशेयुरमी यथा।
तथोच्चैस्तान् समाहूय स्वकरैः कुरुतेङ्गितं॥
मन्निरूपितयोद्धृभ्य आदेशं दत्तवानहं। ३
क्रोधं मे सफलं कर्त्तुं प्रफुल्लानभिमानतः।
मामकानेव तान् वीरान् स्वयमाहूतवानहं॥
पर्व्वतेषु मनुष्याणां बहूनां श्रूयते रवः। ४
महत्या जनतायाश्च तत्र दृश्यत आकृतिः॥
जातिसङ्घस्य राष्ट्राणां सो ऽस्ति कोलाहलध्वनिः।
सेनाध्यक्षः परेशो हि योद्धुं सेनां परीक्षते॥
ध्वंसितुं वसुधां कृत्स्नां दूरदेशान्नभो ऽन्ततः। ५
स्वकोपास्त्राणि सङ्गृह्य समायाति परेश्वरः॥
यूयं विलपतासन्नं परेशस्य दिनं यतः। ६
सर्व्वशक्तिमता तच्च प्रेष्यते सर्व्वनाशकं॥
सकलानां करौ तस्मात् शैथिल्यं प्रगमिष्यतः। ७
सर्व्वमर्त्त्यस्य चित्तञ्च साध्वसेन गलिष्यति॥
भविष्यन्ति भयार्त्तास्ते व्यथाग्रस्ताः सयातनाः। ८
चालयिष्यन्ति चाङ्गानि यथा प्रसवकारिणी॥
परिद्रक्ष्यन्ति चान्योऽन्यं विस्मयोत्फुल्ललोचनाः।

भविष्यन्त्यग्निजिह्वेव ते सर्व्वे लोहिताननाः ॥
९ वीक्षध्वं परमेशस्य दिनमायातुमुद्यतं।
निर्द्दयं कोपसंयुक्तं दीपितं क्रोधवह्निना ॥
कृत्स्ना वसुन्धरा तेन नितान्तं ध्वंसयिष्यते।
उच्छेत्स्यन्ते च तन्मध्यात् पापिनस्तन्निवासिनः ॥
१० मृगशीर्षादिनामानि नक्षत्राणि विहायसि।
नैव प्रकाशयिष्यन्ति स्वकीयोज्ज्वलतां तदा ॥
सूर्य्यस्योदयकाले ऽपि सान्धकारो भविष्यति।
चन्द्रमाश्च निजज्योत्स्नां तदा नैव प्रदास्यति ॥
११ तदा प्रवर्त्तयिष्येऽहं मर्त्त्ये पापस्य दण्डनं।
प्रापयिष्यामि दुर्वृत्तान् दोषाणामुचितं फलं ॥
दर्पयुक्तमनुष्याणां शमयिष्यामि धृष्टतां।
द्रोहिणामभिमानञ्च नमयिष्याम्यहं तदा ॥
१२ मनुष्यञ्च करिष्यामि बहुमूल्यं सुवर्णतः।
नरमेव च दुष्प्राप्यम् ओफीरीयहिरण्यतः ॥
१३ सेनाध्यक्षपरेशस्य महाकोपे प्रकाशिते।
तदीयक्रोधवह्नेश्च दिवसे समुपस्थिते।
कम्पयिष्याम्यहं व्योम भूः स्वस्थानाच्चलिष्यति ॥
१४ मनुष्यांश्च स्वजातीयान् एकैको ऽनुगमिष्यति।
स्वकीयदेशमेकैकः सम्पलायिष्यते नरः।
द्राविता हरिणी यद्वत् मेषो वा रक्षिवर्ज्जितः ॥
१५ यः कश्चिल्लप्स्यते शेषः सो ऽसिविद्धो भविष्यति।
यो विलम्बिष्यते तत्र स खड्गेन पतिष्यति ॥
१६ प्रत्यक्षं शत्रुभिस्तेषां क्षेप्स्यन्ते शिशवो भुवि।
गेहाल्लुण्ठिष्यते वित्तं हरिष्यन्ते स्त्रियो बलात् ॥
१७ पश्य तेषां विरुद्धञ्च मादीयान् चोदयाम्यहं।
ते रौप्यं नहि मन्यन्ते नैव तुष्यन्ति काञ्चने ॥
१८ तरुणाः पातयिष्यन्ति नृणां तेषां शरासनैः।
नैव कारिष्यते तैश्च कृपा गर्भफलं प्रति।
नेत्रे भविष्यतस्तेषां बालकेष्वपि निर्द्दये ॥
१९ राष्ट्राणां मुकुटं वाविल् कस्दीयानां शिरोमणिः।

ध्वंसिष्यते परेशेन सिदोमामरयोः समा॥
न पुनस्तत्र वत्स्यन्ति नराः के ऽपि कदाचन। २०
नाश्रयिष्यति तत् कश्चिद् आपौरुषपरम्परं॥
नैव तत्रारवीयो ऽपि स्वदूष्यं स्थापयिष्यति।
मेषान् न शाययिष्यन्ति तत्र वा मेषरक्षिणः॥
तत्र किन्तु शयिष्यन्ते जन्तवो मरुवासिनः। २१
वेश्मानि पूरयिष्यन्ते प्राणिभिः परिदेवकैः॥
आश्रयिष्यन्ति तत् स्थानं शावका उष्ट्रपक्षिणां।
दीर्घलोमै र्वनच्छागैस्तत्र नृत्यं करिष्यते॥
अट्टालिकास्वनाथासु मिथो गास्यन्ति जम्बुकाः। २२
सुखभोगिमनुष्याणां प्रासादेषु च पन्नगाः।
कालस्तस्याः समीपस्थो न विलम्बिष्यते दिनं॥

---

१४ चतुर्द्दशोऽध्यायः।

१ इस्रायेलं प्रति परमेश्वरस्य दया ३ वाविलं प्रति इस्रायेलः स्लाघाकथनं २४ अशूरीयान् प्रति भविष्यद्दण्डः २९ पिलेष्टीयानां भविष्यद्दण्डश्च।

अनुकम्पिष्यते नूनं याकूबं परमेश्वरः। १
इस्रायेलीयवंशं स पुनश्चानुग्रहीष्यति॥
तान् जनान् स्वीयदेशञ्च नीत्वा विश्रामयिष्यति।
तांश्चालम्ब्य विदेशीयाः सङ्क्ष्यन्ते याकुबान्वये॥
लोका हस्तैश्च सन्धृत्य तान् नेष्यन्ति निजस्थलं। २
इस्रायेलीयवंशस्य परमेशस्य नीवृति।
तान् स्वदासान् स्वदासीश्च कृत्वा प्रयोक्ष्यते स्ववत्।
येषां वन्द्य आसंस्तान् रोधयिष्यन्ति वन्दिवत्।
प्रभुत्वञ्च करिष्यन्ति स्वकीयताडकेषु ते॥
यस्मिन् दिने परेशस्त्वां क्लेशादुद्वेगतो ऽपि च। ३
कष्टदायकदास्याच्च तीव्राद् विश्रामयिष्यति॥
तदा वक्ष्यसि दृष्टान्तं वाविलीयनृपं प्रति। ४
कीदृक् शाम्यति स क्लेष्टा सा च स्वर्णमयी पुरी॥
अभाङ्क्षीत् पापिनां यष्टिं राज्ञां दण्डं परेश्वरः॥ ५

६ जनानाहन्नसौ क्रुद्ध आघातेनाविसर्ज्जिना ।
जातीरशाच्च कोपान्धो द्रोहेणानियतेन सः ॥
७ विश्राममन्वधुना शान्ता सेवते कृत्स्नमेदिनी ।
ततः सर्व्वत्र सर्व्वं हि हर्षाद् गातुं प्रवर्त्तते ॥
८ त्वामुद्दिश्य प्रहृष्यन्ति देवदारूणि सर्व्वशः ।
एरसाभिधसालाश्च लिवानोनगिरौ स्थिताः ॥
यावत् त्वं पतितः शेषे तावदस्मान् निकर्त्तितुं ।
छेत्ता नैव समायाति वागियं तैश्च गद्यते ॥
९ अधःस्थः परलोको ऽपि त्वत्प्रवेशप्रतीक्षया ।
सकम्पस्त्वां प्रति प्रेतान् उन्निद्रान् विदधाति हि ॥
सकलानग्रगानेव नरलोकनिवासिनां ।
सर्व्वजातीयभूपालान् उत्थापयति चासनात् ॥
१० आलपन्तश्च सर्व्वे त्वां प्रभाषन्त इदं वचः ।
क्षीणो वयमिव त्वं किम् अस्माभिश्चाभवः समः ॥
११ तव श्री र्यन्त्रवाद्यञ्च परलोके ऽवतारितं ।
कीटाः शय्या तवाधःस्था कृमयश्छादनं तव ॥
१२ कीदृक् त्वं नभसो भ्रष्टो हे ज्योतिररुणात्मज ।
पतितो ऽसि भुवि छिन्नो हे जातीनां निपातक ॥
१३ त्वयावादि पुरा त्वेतत् समारोक्ष्याम्यहं दिवं ।
करिष्ये स्वासनं प्रोच्चम् ऐशतारागणादपि ।
उत्तराया दिशः प्रान्ते निवत्स्यामि सभागिरौ ॥
१४ भविष्याम्येशितुस्तुल्यो मेघोच्छ्रयसमाश्रितः ॥
१५ पातालमेव कुण्डस्य तलं त्वन्ववरोक्ष्यसि ॥
१६ त्वां दृष्ट्वा यत्नतो वीक्ष्य सर्व्वै र्विचारयिष्यते ।
किमसौ स नरो येन पुरा क्षौणिरकम्प्यत ।
येन च सर्व्वराष्ट्राणां विक्षोभः संव्यधीयत ॥
१७ येनारण्यीकृता पृथ्वी तत्पुर्य्यश्च निपातिताः ।
येन वन्दिमनुष्याश्च न विसृष्टा गृहं प्रति ॥
१८ अन्यदेशीयलोकानां यावन्तो भूभृतो मृताः ।
सत्कृतः शयते तेषाम् एकैकः स्वीयवेश्मनि ॥
१९ शवागाराद् वहिस्त्वन्तु क्षिप्तो गर्हितवृक्षवत् ।

हतानामभवो वस्त्रं विद्धानामसिना नृणां।
खाताश्मस्ववतीर्णानां पादमर्द्दितदेहकः॥
शवागारस्य तैः सार्द्धम् अंशी त्वं न भविष्यसि। २०
नाशयित्वा स्वदेशं यत् त्वया स्वीयप्रजा हताः।
न स्मर्त्तव्यः पुन र्वंशो दुर्वृत्तानां कदाचन॥
तत्सन्तानबधो भूयात् पितॄणां दोषकारणात्। २१
न चेदवाप्य वृद्धिं ते वशीकृत्य च मेदिनीं।
कृत्स्नं सम्पूरयिष्यन्ति नगरै र्भूमिमण्डलं॥
भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः। २२
तद्विपक्षो ऽहमुत्थाय नाम शेषञ्च वाबिलः।
कुलं वंशञ्च लोप्स्यामीत्युक्तिः सेनापतेः प्रभोः॥
अहं तां शल्लकीराष्ट्रं विधास्यामि सरोमयं। २३
तस्या विध्वंसमार्ज्जन्या करिष्यामि च मार्ज्जनं।
भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः॥
स प्रभुः पृतनाध्यक्षः शप्त्वैतदपि भाषते। २४
कल्पितं यन्मया तद्धि भवितव्यं न संशयः।
मया यन्मन्त्रितं तच्च समवाप्स्यति सिद्धतां॥
भंक्त्वाशूरं स्वदेशे ऽहं मर्द्दिष्यामि निजाद्रिषु। २५
मत्प्रजाभ्यो युगं तस्य तदैवावसरिष्यति।
तासाञ्च स्कन्धतस्तस्य धुस्तदा निपतिष्यति॥
धरां कृत्स्नामधीयं हि मन्त्रणा मन्त्रिता मया। २६
एष एव च हस्तो मे विस्तीर्णः सर्व्वजातिषु॥
सेनाध्यक्षपरेशस्य मन्त्रणां को निवारयेत्। २७
विस्तीर्णं तेन हस्तञ्च कः पुनः परिवर्त्तयेत्॥

यस्मिन् वर्षे आहसो राजा ममार तस्मिन्निदं भाग्यसूचकं वचनं प्रचकाशे। २८

त्वदाघातकदण्डस्य भङ्गो यदभवत् ततः। २९
त्वं हे देश पिलेष्टीय मा कुरुष्व महोत्सवं॥
मूलतः सर्पवंशस्य फणी यस्माज्जनिष्यते।
स्वविसर्पिविषास्यश्च फलं तस्य भविष्यति॥

२० दीनपुत्त्राश्चरिष्यन्ति शयिष्यन्ते ऽधनाः सुखं।
क्षुधया मारयिष्यामि मूलकं तावकन्त्वहं।
अवशिष्टस्तवांशो यः स तयैव हनिष्यते॥
२१ क्रन्द त्वं हे पुरद्वार परिदेवस्व हे पुरि।
हे पिलेष्टीय देश त्वं सर्व्वथा यास्यसि क्षयं॥
उत्तराया दिशो यस्माद् धूम आयात्यनीकवत्।
तदीयश्रेणिभुक्तानां को ऽपि नास्ति पृथग्जनः॥
२२ भिन्नदेशीयदूतेभ्यः किं नु दातव्यमुत्तरं।
परमेशः सियोनस्य भित्तिमूलमतिष्ठिपत्।
तस्मादेव प्रजास्तस्य दुर्गता आश्रयन्ति तत्॥

---

१५ पञ्चदशोऽध्यायः।

अशूरीयस्य भूपतेरागमनात् मोयाबो भविष्यद्दुर्दशा।

मोयाबदेशस्य भाग्यं।

१ निशायामारमोयाबं विनष्टं ध्वंसयिष्यते।
निशायां कीरमोयाबं विनष्टं ध्वंसयिष्यते॥
२ आरोहन्तश्च यास्यन्ति तज्जना देवमन्दिरं।
दीबोनञ्च गमिष्यन्ति तुङ्गस्थानेषु रोदितुं॥
निबो च मेदिबायाञ्च मोयाबो विलपिष्यति।
सर्व्वेषां मुण्डितो मुण्डः सर्व्वेषां श्मश्रु कर्त्तितं॥
३ शाणवस्त्राः करिष्यन्ति ते मार्गेषु गमागमौ।
गृहपृष्ठे च हट्टे च सर्व्वेषां श्रोष्यते रुतं।
क्रन्दनञ्च मनुष्याणां मन्दिरादवरोहतां॥
४ हिस्बोनमिलियाली च चीत्कारं प्रकरिष्यतः।
दूरस्थं यहसं यावत् तयोः संश्रोष्यते रवः॥
आर्त्तनादं करिष्यन्ति मोयाबस्यास्त्रधारिणः।
निजप्राणेषु तस्यापि भारबोधो भविष्यति॥
५ मोयाबमधि मच्चित्तं कुरुते परिदेवनं।
त्रिहायणीव याख्यन्ति सोयारं तत्पलायिताः॥
आरोहन्तो विलापेन लूहीतस्यायनं गिरिं।

नाशात् पथि रुदन्तश्च होरोणायिमगामिनि ॥
निम्रीमस्य जलप्राया भूमिरूषो भविष्यति । ६
शुष्कघासस्तृणैस्यक्तो वर्ज्जितो हरिताङ्कुरैः ॥
निजोपार्ज्जितवित्तानां शेषं सर्व्वस्वमेव च । ७
स्रवन्त्या आरवाख्यायाः पारं वक्ष्यन्ति ते ततः ॥
मोयावस्य च सीमानं चीत्कारः परियास्यति । ८
इग्लायिमपुरं यावत् श्रोष्यते तस्य रोदनं ।
बेरेलीमपुरं यावत् श्रोष्यते तस्य रोदनं ॥
शोणितैः पूरयिष्यन्ते दीमोनस्थजलाशयाः । ९
पुनः पुन मया दुःखं दीमोने वर्त्तयिष्यते ॥
रक्षितेषु मोयावस्य मनुष्येषु च केशरी ।
पश्चात्स्तस्य देशस्यावशिष्टेषु नरेषु च ॥

---

१६ षोडशोऽध्यायः ।

१ साहाय्यार्थिनो मोयावस्य प्रार्थना ६ तदीयाहङ्कारहेतोस्तस्य दण्डनं ।

मरो मध्येन सेलातः सीयोनस्य गिरिं प्रति । १
युष्माभिः क्षितिपालाय करो मेषः प्रहीयतां ॥
अर्णानोत्तरणस्थाने मोयावीयाः स्त्रियस्तदा । २
स्थास्यन्ति शून्यनीडत्वात् भ्राम्यन्ती पक्षिणी यथा ॥
विधद्धं मन्त्रणां यूयं प्रयुंग्ध्वञ्च सुशीलतां । ३
मध्याह्ने च निजच्छायां कुरुध्वं क्षणदोपमां ।
नरान् प्रच्छादयोद्वासान् मा सूचय पलायितान् ॥
मोयावो ऽहं ममोद्वासाः प्रवसन्तु त्वया सह । ४
भव त्वं संश्रयस्तेषां हिंसकस्य समक्षतः ॥
पीडकः पश्य लुप्तो ऽस्ति हिंसा शेषञ्च गच्छति ।
पादाघातिनराः सर्व्वे उच्छिद्यन्ते च देशतः ॥
भविष्यति हितैषित्वात् तव सिंहासनं स्थिरं । ५
दायूदः शिविरे यश्च तत्रासीनो भविष्यति ।
शास्ता न्यायानुसारी स सत्वरो दण्डनायकः ॥
मोयावस्य वयं दर्पमश्रौष्मातीव दर्पिणः । ६

गर्व्वं तस्याभिमानञ्च कोपञ्चालीकदम्भिनः॥
७ मोयावमधि मोयावः परिदेविष्यते ततः।
साकल्यमेव यत् तस्य परिदेविष्यते हि तत्॥
कीरहरेशतस्यापि द्राक्षाजान् पिष्टकानधि।
मनुष्या विलपिष्यन्ति सर्व्वथा विपदाहताः॥
८ हिश्बोनस्य भविष्यन्ति क्षेत्राणि हततेजसः।
सिब्मायां गोस्तनीवल्ली नरेन्द्रै र्हतपल्लवा॥
व्याप्य यासेरपर्य्यन्तं मरोः सीमां प्रविश्य च।
विस्तीर्णा विटपास्तस्या व्यत्यक्राम्यन् पुरार्णवं॥
९ यासेरीयविलापेन सिब्मायां गोस्तनीलतां।
विलपिष्याम्यहं तस्मात् हे हिश्बोन् इलियालि च।
मदीयनेत्रतोयेन निषेक्ष्ये च युवामहं॥
फलानां सञ्चये यस्मात् शस्यानामपि कर्त्तने।
शिलावृष्टिवदुत्क्रोशो युष्मन्मध्ये पतिष्यति॥
१० उद्यानेभ्यस्तदानन्द आमोदश्चापयास्यतः।
न गानं गोस्तनीक्षेत्रे न नादो वा भविष्यति॥
न मर्द्दिष्यन्ति कुण्डेषु रसार्थं कृषकाः फलं।
हर्षनादो मया तेषां यतः संवारयिष्यते॥
११ तस्मान्मोयावमुद्दिश्य नाडी मे वल्लकी यथा।
कीरहेरसमुद्दिश्य मम हृच्च ध्वनिष्यति॥
१२ उच्चस्थानन्तु मोयावो यदा गन्तुं क्लमिष्यति।
तदा स प्रार्थनां कर्त्तुं देवागारं प्रवेक्ष्यति।
किन्तु सा तस्य चेष्टापि सफला न भविष्यति॥

---

१३ पूर्व्वमूचे परेशेन मोयावमधि वागसौ॥
१४ अधुना परमेशस्तु वाणीमेतां प्रभाषते।
भृत्यस्य वत्सरैस्तुल्ये व्यतीते वत्सरत्रये।
मोयावस्य यदैश्वर्य्यं तन्निन्दार्हं भविष्यति॥
इदानीं सुमहत् तस्य लोकारण्यञ्च भाति यत्।
तस्य शेषो लघुः स्वल्पो निस्तेजाश्च भविष्यति॥

---

१७ सप्तदशोऽध्यायः।

१ अरामं शोमिरोणञ्च प्रति भविष्यद्वाक्यं ६ अवशिष्टलोकानां देवार्चापरित्यजनं १२ इस्रायेलः शत्रूणां दुःखञ्च।

दम्मेशकस्य भाग्यं।

दम्मेशकं पुरं पश्य पुरत्वाद् भ्रंशयिष्यते। १
पतितानां गृहाणाञ्च शिलाराशि र्भविष्यति॥
अरोयेरीयपुर्य्यश्च मनुष्यैः परिवर्ज्जिताः। २
मेषशाला भविष्यन्ति मेषाः शयिष्यन्त्यविघ्नकाः॥
इफ्रायिमीयनीवृच्च दुर्गहीनो भविष्यति। ३
दम्मेशकादरामस्य शेषश्च राज्यवर्ज्जितः॥
इस्रायेलान्वयस्येव तयोः श्रीश्च भविष्यति।
सेनाध्यक्षः परेशो यः स इदं भाषते वचः॥
याकूबस्यापि यत् तेजस्तत् तदा यास्यति क्षयं। ४
तदीयमांसलत्वं यत् तच्च कार्श्यं भविष्यति॥
शस्यक्षेत्रे यथा छेत्त्रा नालानां छेदनं भवेत्। ५
यथा च बाहुना तस्य मञ्जरीणां निकर्त्तनं।
रिफायीमाख्यकेदार्य्यं कणिशानाञ्च सञ्चयः॥
स्वल्पः शेषस्तु तत्रापि समवाप्स्यति रक्षणं। ६
जितवृक्षो फलानीव फलानां पातनात् परं॥
दृश्यन्ते शिखरस्याग्रे द्वे वा त्रीणि फलानि वा।
फलिनस्तस्य शाखासु सन्ति चत्वारि पञ्च वा।
इस्रायेलः प्रभु र्वाक्यमेतद् वक्ति परेश्वरः॥
अनुद्रक्ष्यन्ति यत्नेन स्वस्रष्टारं तदा नराः। ७
इस्रायेलः पवित्रो यो राट् तं प्रत्यूर्द्धदृष्टयः॥
स्वकरै र्निर्म्मिता वेदी र्नानुद्रक्ष्यन्ति ते तदा। ८
नैव वालोकयिष्यन्ति वस्तु स्वाङ्गुलिभिः कृतं।
नैवाशेराख्यदेव्या वा न वा सूर्य्यस्य विग्रहान्॥
वृक्षस्याग्रे ऽवशिष्टं यत् छिन्ने वा घोरकानने। ९
भविष्यन्ति समास्तेन दृढाः पुर्य्यस्तदा तव॥
इस्रायेलीयवंशानाम् अग्रे त्यक्तास्तु शत्रुभिः।

तासु तवाखिलो देशः समुच्छिन्नो भविष्यति॥
१० ईश्वरं नानुसंस्मृत्य त्वया स्वत्राणकारकं।
नानुचिन्त्य च तं शैलं तुभ्यं शक्तिप्रदायकं।
रोप्यन्ते पल्लवा रम्याः परदेशोद्भवा लताः॥
११ रोपणीयदिनस्यान्ते वारणी च प्रदास्यते।
प्रातःकाले लतायाश्च पुष्पमुत्पादयिष्यते॥
तदुत्पन्नफलं किन्तु सुदूरं प्रोड्डयिष्यते।
दिवसे कष्टसंयुक्ते निरुपायव्यथाकरे॥
१२ आ बहूनां मनुष्याणां सङ्घस्य श्रूयते ध्वनिः।
गर्ज्जनं क्रियते तैश्च तोयानां गर्ज्जनं यथा।
जनानां श्रूयते नादो नदतामब्धिनादवत्॥
१३ जनता कुरुते नादं महासागरनादवत्।
ईशेन भर्त्सिता दूरं सम्पलायिष्यते तु सा॥
यथा च गन्धवाहेन बुषं शैलोपरि स्थितं।
चक्रवातेन वा चक्रं तथा विद्रावयिष्यते॥
१४ सन्ध्यायां पश्य लोकानाम् उपस्थास्यति साध्वसं।
शत्रुः किन्तु प्रभातात् प्राक् नास्तित्वं समवाप्स्यति॥
अयमेवाधिकारः स्याद् अस्मद्वित्तापहारिणां।
लभ्यांशश्चायमेव स्याद् अस्मत्सम्पत्तिलोठिनां॥

---

१८ अष्टादशोऽध्यायः।

परमेश्वरीयशत्रूणां विनाशो राज्यवृद्धिश्च।

१ भोः कूशस्रोतसां पारे स्थिते भूः पक्षमर्मरे।
दूतप्रेषिणि येनेन नडनौभि र्जलोपरि॥
२ हे दूतास्त्वरिता यात लम्बाङ्गान् मुण्डितान् नरान्।
जातिश्चोत्पत्तिकालाद्धि सदा त्रासकरीं प्रति॥
महाशक्तिविशिष्टा सा पादाभ्यां शत्रुमर्द्दिका।
तस्या देशश्च बक्रोभि र्निम्नगाभि र्विभज्यते॥
३ हे जगद्वासिनः सर्व्वे हे भूलोकनिवासिनः।
पर्व्वतेषु पताकायां स्थापितायां प्रपश्यत।

तूरीध्वनौ च सञ्जात आकर्णयत यत्नतः॥
यस्मान्मां भारतीमेतामुक्तवान् परमेश्वरः। ४
विश्रामं सेवमानोऽहं निरीक्षिष्ये निजालये॥
तृणानामुपरिष्टाद्धि यथा निर्म्मल आतपः।
फलपाचकरौद्रे वा मेघः शिशिरो यथा॥
परिणामात् पुरा किन्तु कुसुमे पूर्णतां गते। ५
फले पुष्पत उत्पन्ने पक्वताञ्च प्रगच्छति॥
स लवित्रेण शाखानां प्रकरिष्यति कर्त्तनं।
पल्लवांश्च समुच्छिद्य दवयिष्यति निश्चितं॥
निमित्तं हिंस्रकाणाञ्च पक्षिणां गिरिवासिनां। ६
निमित्तं वन्यजन्तूनां त्यक्ष्यन्ते ते च सर्व्वशः॥
ग्रीष्मं तेष्ववतिष्ठन्तो यापयिष्यन्ति पक्षिणः।
यापयिष्यन्ति हेमन्तं सर्व्वे चारण्यजन्तवः॥
तस्मिन् काले मनुष्यास्ते लम्बाङ्गा मुण्डितत्वचः। ७
जातिरुत्पत्तिकालाद्धि सदा त्रासकरी स्मृता॥
महाशक्तिविशिष्टा च पादाभ्यां शत्रुमर्द्दिका।
यस्या देशश्च बह्वीभि र्निम्नगाभि र्विभज्यते॥
सेनाध्यक्षपरेशस्य नाम यत्रावतिष्ठति।
गिरौ तस्मिन् सियोनाख्य उपस्थाप्यातियत्नतः।
सैनाध्यक्षपरेशाय वितरिष्यन्त्युपायनं॥

१९ ऊनविंशोऽध्यायः।

१ मिसरीयदुःखस्य कथनं ११ राज्ञां मूर्खत्वकथनं १८-समाजस्य भविष्यद्वाक्यकथनञ्च।

मिसरदेशस्य भाग्यं।

परेशो द्रुतमेघेन मिसरं प्रश्य यास्यति। १
तस्य साक्षाच्च मिस्रीया देवा यास्यन्ति वेपथुं।
मिसरस्यान्तरे स्वीयं हृदयञ्च गलिष्यति॥
व्यूहयिष्यामि मिस्रीयान् मिस्रीयाणां विरुद्धतः। २
ततो भ्रात्रा सह भ्राता बन्धुना सह बान्धवः।
पुर्य्या सार्द्धं पुरी राज्यं राज्येन सह योत्स्यते॥

३ प्राणाश्च परिशोक्ष्यन्ति मिसरस्यान्तरे तदा ।
तदीयमन्त्रणा चापि मया विलोपयिष्यते ॥
ततस्ते ऽनुगमिष्यन्ति व्यलीकान् देवविग्रहान् ।
अस्पष्टवादिलोकांश्च भौतान् मायाविनो ऽपि च ॥
४ मिसरन्त्वर्पयिष्यामि कठोरस्वामिनः करे ।
शासनं तस्य राजा च पराक्रान्तो विधास्यति ।
वाक्यमेतत् प्रभु र्ब्रूते सेनाध्यक्षः परेश्वरः ॥
५ समुद्रे क्षेष्यते तोयं नदी शोक्ष्यति निर्ज्जला ॥
६ भविष्यन्ति च तत्रत्याः सरितः पूतिगन्धिकाः ।
ह्रासं यास्यन्ति शोषञ्च मिसर्देशस्य निम्नगाः ।
तस्मान्नाड्या च तृण्या च परिम्लाने भविष्यतः ॥
७ गोप्रचारो जलासन्नः संस्थितो यो नदीतटे ।
तथा वीजाक्तता भूमि र्या नदीमातृका स्मृता ।
तत्साकल्यं हि शुष्कत्वात् धूलीभूय विलेष्यते ॥
८ तस्मात् सुदीर्घनिश्वासं प्रकरिष्यन्ति धीवराः ।
शोचिष्यन्ते नराः सर्व्वे नद्यां वडिशपातिनः ।
ग्लास्यन्ति च नराः सर्व्वे तोये जालवितानकाः ॥
९ सुमार्ज्जिततसीसूत्रै र्वस्त्रं निर्म्मिमते च ये ।
ऊयते च दुकूलं यैस्ते भविष्यन्ति लज्जिताः ॥
१० ये नरास्तम्भतुल्यास्ते भविष्यन्ति विमर्द्दिताः ।
अवसन्नमनस्काश्च सर्व्वे वेतनजीविनः ॥
११ मूढा एव भविष्यन्ति नायकाः सोयने स्थिताः ।
फिरौणो मन्त्रिणो विज्ञाः सर्व्वे निर्ब्बोधमन्त्रणाः ॥
अस्म्यहं विदुषां वंशो वृद्धराजकुलोद्भवः ।
इति वाचं कथं यूयं फिरौणं निगदिष्यथ ॥
१२ कुत्र ते तव विद्वांसो ऽधुना त्वां ज्ञापयन्तु ते ।
सेनाध्यक्षपरेशेन मिसरं प्रति या कृता ।
मन्त्रणा सावगन्तुं तैः शक्यते तत् प्रकाश्यतां ॥
१३ बालिशा एव सञ्जाता नायकाः सोयने स्थिताः ।
मोफस्य नायकाः सर्व्वे चाभवन् भ्रममोहिताः ।
मिसरञ्च कुलाध्यक्षाः कुर्व्वन्त्युन्मार्गगामिनं ॥

तत्र पर्य्यासभावश्च परमेशेन मिश्रितः। १४
मिसरः कृत्स्नकार्य्ये च क्रियते तैः परिभ्रमी।
नरो यद्वन्मदोन्मत्तः स्वीयवान्ते परिभ्रमी॥
न शीर्षेण न पुच्छेन न तालेन नलेन वा। १५
साध्यं किञ्चन कार्य्यं हि मिसरस्य भविष्यति॥
तस्मिन् काले च मिस्रीया भविष्यन्त्यबलोपमाः। १६
तांस्ताडयितुमुद्वाहोः सेनाध्यक्षपरेशितुः।
हस्तचालनतो भीतान् कम्पस्तानाक्रमिष्यति॥
मिस्रीये यिहूदादेशो मंस्यते च भयङ्करः। १७
केनाप्युच्चारिते तस्य नाम्नि श्रोता त्रसिष्यति॥
सेनाध्यक्षपरेशेन प्रति तान् या निरूपिता।
आशङ्काकारणं तेषां मन्त्रणा सा भविष्यति॥
किनानीयोक्तिवादीनि सेनाध्यक्षपरेशितुः। १८
नाम्ना शपथकारीणि पञ्चसंख्यपुराणि तु।
तस्मिन् काले भविष्यन्ति तत्र मीसरनीवृति।
ध्वंसनगरमेकस्य नामधेयं भविष्यति॥
तस्मिन् काले परेशस्य कृते मीसरनीवृति। १९
मध्यभागे हि यज्ञार्थं वेदिरेका भविष्यति॥
तथा तस्यैव देशस्य सीमायाः पार्श्वतः स्थितः।
एको भविष्यति स्तम्भः परेशस्मरणार्थकः॥
सेनाध्यक्षपरेशस्य चिह्नवत् साक्षिवच्च तत्। २०
तत्र मिसरदेशेऽपि मर्त्त्यानाश्वासयिष्यति॥
परमेश्वरमुद्दिश्य पीडकानां नृणां भयात्।
कृतायां प्रार्थनायां तैः स त्रातारं प्रहेष्यति।
तं सम्प्रेष्य च विक्रान्तं रक्षां तेषां विधास्यति॥
मिस्रीयेभ्यः परेशेन दत्ते परिचये तदा। २१
परिज्ञास्यन्ति मिस्रीया मनुष्याः परमेश्वरं॥
नैवेद्यै र्बलिदानैश्च ते करिष्यन्त्युपासनं।
परेशाय प्रतिज्ञाय भविष्यन्ति यतव्रताः॥
मिस्रीयान् परमेशश्चाहत्य स्वस्थान् करिष्यति। २२
परमेश्वरमुद्दिश्य परावर्त्तितमानसैः।

कृतां तैः प्रार्थनां शृण्वन् स तान् स्वस्थान् करिष्यति॥
२३ मिसरादसुरं गन्तुं तदा वर्त्मनि निर्म्मिते।
असुरो मिसरं गत्वा मिसरश्चासुरं तथा।
एकत्र परमेशस्य सेवामुभौ करिष्यतः॥
२४ मिसरोऽसुर इस्रायेल् जातित्रयमिदं तदा।
नराश्रितावने मध्य आशीःपात्रं भविष्यति॥
२५ सेनाध्यक्षपरेशेन तस्मै प्रददताशिषं।
वक्ष्यते भव धन्यस्त्वं हे प्रजे मम मीसर।
त्वमप्यसुर मत्सृष्ट त्वमिस्रायेल् च मद्धन॥

---

२० विंशतितमोऽध्यायः।

मिसरस्य भाविदण्डः।

१ अश्दोदे तर्त्तनस्यागमनवत्सरे ऽर्थतः सर्गोणाख्येनासूरीयराजेन
प्रेषितः स तर्त्तनो यदाश्दोदस्य विरुद्धं युद्धं विधाय तद् वशीचकार,
२ तदा परमेश्वर आमोससुतेन यिशायियेन वाक्यमेतदुच्चारयामास, एहि
स्वकटिदेशाच्छाणवस्त्रं मुञ्च स्वपादाभ्यां पादुके वियुङ्क्ष्व च। ततः स तदेव
३ कृत्वा परिच्छदहीनः शून्यपादश्च गमागमौ कृतवान्। अपरं परमे-
श्वर उवाच।

मम दासो यिशायीयो नग्नपादो ऽपरिच्छदः।
इदं वर्षत्रयं यावत् कूशमीसरदेशयोः।
अद्भुतलक्षणं भूत्वा यथाकार्षीद् गमागमौ॥
४ तथैव वन्दिमिस्रीयान् कूशीयांश्च रणे धृतान्।
असूरीयो महीपालश्चालयिष्यति यूथवत्॥
आबालस्थविरान् सर्व्वान् नग्नपादान् दिगम्बरान्।
अनाच्छन्नकटिप्रोथान् मिसरस्य कलङ्किनः॥
५ निजाशाभाजनं कूशं श्लाघापात्रञ्च मीसरं।
दृष्ट्वा यास्यन्ति नैराश्यं विवर्णत्वञ्च मानवाः॥
६ तस्मिन् काले वदिष्यन्ति चैतद्देशनिवासिनः।
असूरीयस्य भूपस्य हस्ताद् रक्षार्थिभिः पुरा।

अस्माभिरुपकारार्थं याशाभूमिः समाश्रिता।
इयं पश्य दशा तस्या रक्षा नस्तु कथं भवेत्॥

---

२१ एकविंशोऽध्यायः।

१ वाबिलो भाविदण्डः ११ दूमादेशस्य भाग्यं १२ आरवदेशस्य भाग्यञ्च।

समुद्रासन्नमरो भाग्यं।

दक्षिणोत्पन्नझञ्झावत् महावेगसमन्वितं। १
मरुस्थानात् किमायाति पश्य देशाद् भयङ्करात्॥
दर्शनं सुकठोरं तदिति वार्त्ता मया श्रुता। २
आचरन्ति शठाः शाठ्यं विनाशञ्च विनाशकाः॥
पुरीमाक्राम हे एलम् हे मादीयावरुन्धि तां।
कृत्स्नं निवारयिष्यामि वन्दीनां परिदेवनं॥
एतेन कटिदेशो मे ताप्यते वेदनातुरः। ३
प्रसवव्यथया तुल्या माञ्चोपाक्रामति व्यथा।
तेनाहं श्रवणहीनो ऽहम् उद्वेगाद् दृष्टिवर्ज्जितः॥
मम विक्लवचित्तस्य रोमाञ्चात् त्रासितस्य च। ४
उत्सवीयैव या सन्ध्या सा तेनाकारि भीषणा॥
आसने रचितं भोज्यं रक्षां कुर्व्वन्ति रक्षकाः। ५
भोजनं पश्य पानञ्च सर्व्वैरेर् विधीयते।
समुत्तिष्ठत सेनान्यः फलकान्यभिषिञ्चत॥
यस्मान्मां भारतीमेनां प्रतिभाषितवान् प्रभुः। ६
त्वया संस्थाप्यतां रक्षी यत् पश्येत् तद् ब्रवीतु सः॥
सादिनो यदि पश्येत् स हयारूढनरद्वयं। ७
खरारूढान् मयारूढान् यत्नात् तर्हि शृणोतु सः॥
अपरं सोऽवदद्रक्षी प्रोच्चशब्देन सिंहवत्। ८
हे प्रभो नित्यमेवाहमत्रास्मि संस्थितो दिवा।
रक्षास्थाने ममैतस्मिन्नवतिष्ठे च रात्रिषु॥
पश्य सादिन आयान्ति हयारूढनरद्वयं। ९
पतिता पतिता वाविलिति तेनोदितं पुनः।
भग्नाश्च शत्रुणा तस्याः सकला देवमूर्त्तयः॥

१० हे ममोदूखलाहतव्यपूतधान्यसमाः प्रजाः।
इस्रायेलः प्रभोरेव सेनाध्यक्षपरेशितुः।
वक्त्रेणोक्तं यदश्रौषं तद् युष्मान् निगदाम्यहं॥

११ दूमादेशस्य भाग्यं।
सेयीराद्उच्चशब्देन कश्चित् पृच्छति मामिदं।
रक्षिन् कः प्रहरो रात्रे रक्षिन् कः प्रहरो निशः॥
१२ रक्षी ब्रूते दिनारम्भ आयात्यायाति च क्षपा।
यदि जिज्ञासवो यूयं जिज्ञासध्वं पुनः पुनः।
स्वस्थानं गच्छतेदानीं पश्चादायात मां प्रति॥

१३ आरवदेशस्य भाग्यं।
सार्थवाहा दिदानीया यूयमारवनीवृति।
आश्रयिष्यथ कान्तारं रजनीयापनार्थिनः॥
१४ तेमानिवासिनो लोकाः साक्षात् कर्त्तुं तृषातुरान्।
तोयं वक्ष्यन्ति पूपैश्च ग्रहीष्यन्ति पलायितान्॥
१५ ज्ञात्वा पलायमानांस्तान् निस्त्रिंशपङ्क्तिसम्मुखात्।
निष्कोषस्य कृपाणस्य कोदण्डस्यायतस्य च।
समरक्लेशभारस्य सम्मुखाच्च प्रधावतः॥
१६ प्रभु र्मामुक्तवानेतद् भृतकस्येव वत्सरे।
व्यतीते पश्य केदारो लुप्ततेजा भविष्यति॥
१७ केदारोद्भववीराणां यानि सन्ति धनूंषि च।
तेषामपि तदा शेषः स्वल्पसंख्यो भविष्यति।
इस्रायेलः प्रभु र्यस्मादेतद् वक्ति परेश्वरः॥

२२ द्वाविंशोऽध्यायः।

१ यिरूशालमो भाविदुःखं १५ शिव्नस्य पदभ्रंशः २० इलियाकीमस्योन्नतिश्च।

दर्शनोपत्यकाया भाग्यं।

१ किं जातं तव यत् कृत्स्ना गृहपृष्ठानि गच्छसि॥
२ कोलाहलेन पूर्णा त्वं नगरी च महास्वना।

हर्षाविष्टा पुरी चासी र्हन्यन्ते तव ये नराः ।
नैव विद्धा कृपाणैस्ते न वा सन्ति रणे मृताः ॥
पलायन्ते पुरोगास्ते बध्यन्ते चापवर्ज्जिताः । ३
यावन्तस्तव मध्ये च म्रियन्ते सर्व्व एव ते ।
नरा एकत्र बध्यन्ते दूरं पलायिता अपि ॥
अतो वच्मि निवर्त्तध्वं तीव्रं क्रन्दिष्यते मया । ४
स्वजाते राजकन्याया विनाशः समजायत ।
तस्मान्मे सान्त्वनां कर्त्तुं मा विधद्धं परिश्रमं ॥
नादस्य पदपातस्य विप्लवस्य च वासरः । ५
दर्शनोपत्यकामध्ये यस्मात् समुपतिष्ठति ॥
सेनाध्यक्षपरेशेन प्रभुना स निरूपितः ।
प्राचीरस्य निपातस्य चाह्विशब्दो धरेषु च ॥
एलमो धृततूणो ऽस्ति रथिपादातसादिभिः । ६
अनाच्छादितचर्म्मा च कीरः पश्चोपतिष्ठति ॥
रथपूर्णास्च दृश्यन्ते तव श्रेष्ठा उपत्यकाः । ७
पुरद्वारसमीपे च हयारूढा व्यवस्थिताः ॥
नेत्रवस्त्रे यिहूदास्य ततो दूरीकृते सति । ८
त्वं यत्नाद् वनगेहाख्यामस्त्रशालां निरीक्षसे ॥
यूयं दायूदपुर्य्यास्च बहुछिद्राण्यपश्यत । ९
निम्नस्थिततडागस्य समगृह्णीत वारि च ॥
यिरूशालमि चाकार्ष्ट गणनां सर्व्ववेश्मनां । १०
प्राचीरं सुदृढीकर्त्तुं वासस्थानान्यभाङ्क्त च ॥
पुरातनतडागस्य तोयानां सञ्चयाय च । ११
मध्ये भित्तिद्वयो र्यूयमखनिष्ट जलाशयं ॥
यस्त्वेतत् सृष्टवानीशः स युष्माभि र्न लक्षितः ।
यस्तत् कल्पितवान् दूरात् स युष्माभि र्न वीक्षितः ॥
प्रभुना परमेशेन सेनाध्यक्षेण मानवाः । १२
आहूयन्त दिने तस्मिन् शोकाय रोदनाय च ।
मुण्डनाय च मुण्डस्य शाणसंवेष्टनाय च ॥
पश्य तथाप्युपातिष्ठत् महानन्दो महोत्सवः । १३
गोहत्या मेषहत्या च मद्यपानामिषादने ।

कर्त्तव्यं भोजनं पानं श्वो ऽस्माभिस्त्यच्यते तनुः ॥
१४ ततो ऽश्रिश्रवदेतन्मां सेनाध्यक्षः परेश्वरः।
युष्माकं मरणं यावद् दोषो ऽयं नापमार्क्ष्यते।
इति वाक्यं प्रभु र्ब्रूते सेनाध्यक्षः परेश्वरः ॥
१५ सेनाध्यक्षपरेशेन प्रभुनैतदवादि च।
शिबाख्यो ऽसौ गृहाध्यक्षो मन्त्री गत्वा त्वयोच्यतां ॥
१६ अत्र तावकमास्ते किं तव को वात्र विद्यते।
यत् त्वं स्वार्थं शवागारम् अत्र तक्षितवानसि ॥
हे अतीवोन्नते स्थाने स्वशवागारतक्षक।
स्वार्थं सुदृढशैले च वासस्थाननिरूपक ॥
१७ हे बलिन् परमेशस्त्वां भूमौ सम्पातयिष्यति।
स्वयमेव च सम्यक् त्वां सङ्कोचिष्यति वस्त्रवत् ॥
१८ गोलीकरिष्यति त्वाञ्च घूर्णयन् सूत्रकोषवत्।
सुविस्तारितभूमौ च क्षेप्स्यति वर्त्तुलं यथा ॥
त्वं मरिष्यसि तत्रैव नीतः श्रीसूचकै रथैः।
स्वकीयस्वामिगेहस्य कलङ्कश्च भविष्यसि ॥
१९ मया पदच्युतश्च त्वं स्थानभ्रष्टो भविष्यसि ॥
२० समाह्वास्यामि तस्मिंश्च दिवसे मम सेवकं।
इलियाकीमनामानं हिल्कियस्य शरीरजं॥
२१ त्वद्वस्त्रेण समाच्छाद्य दत्त्वा त्वच्छृङ्खलं कटौ।
तस्य हस्ते ऽर्पयिष्यामि तावकीनपराक्रमं ॥
ततः स एव लोकानां यिरूशालमवासिनां।
यिहूदावंशजानाञ्च तातरूपो भविष्यति ॥
२२ स्कन्धे तस्यार्पयिष्यामि दायूद्वंशीयकुञ्चिकां।
उद्घाटने कृते तेन को ऽपि रोद्धुं न शक्ष्यति।
रोधने च कृते तेन को ऽपि नोद्घाटयिष्यति ॥
२३ नागदन्तमिवाहं तं निधास्ये च दृढे स्थले।
ततः स पितृगोत्रस्य भविता गौरवाश्रयः ॥
२४ नरैस्तत्पितृगोत्रस्य निखिलञ्चैव गौरवं।
पुत्रपौत्रादिवंशस्य सर्व्वञ्च क्षुद्रभाजनं।
आकुतूघटपर्य्यन्तं तत्रैवोल्लम्बयिष्यते ॥

पुनरेतद् वचो ब्रूते सेनाध्यक्षः परेश्वरः। २५
तदा दृढे स्थले बद्धो नागदन्तः सरिष्यति॥
पतितस्य ततस्तस्य छेदनं सम्भविष्यति।
यश्च तत्रार्पितो भारः सो ऽप्युच्छेदं गमिष्यति।
स्वयं यस्मादिदं वाक्यं भाषते परमेश्वरः॥

---

२३ त्रयोविंशो ऽध्यायः।

१ कस्द्वीयमानुषैः सोरस्य भविष्यद्विनाशः १५ पुनरुन्नतिश्च।
सोरस्य भाग्यं।

कुरुतार्त्तरवं यूयं पोतास्तर्शीशगामिनः। १
यस्मात् सोरपुरी लुप्ता निर्गृहा द्वारवर्ज्जिता।
एतत् कित्तीमदेशीयैर्नाविकान् प्रति कथ्यते॥
मौनीभवत भो यूयम् उपद्वीपनिवासिनः। २
सीदोनीयबणिग्भिस्त्वं पूर्णासीरब्धिगामिभिः॥
प्रारोहत् त्वत्कृते वीजं शिहोरीयं महोदधौ। ३
नीलनदीतटे छिन्नं शस्यञ्चासीद् धनं तव।
त्वञ्चासीः सर्व्वजातीनां पण्यस्थानं निषेवितं॥
लज्जिता भव हे सीदोन् सागरेणेरितादवात्। ४
सागरस्य कलत्रेण यस्माद् वागियमुच्यते॥
न गर्भवेदना प्राप्ता न कृतः प्रसवो मया।
न कृतं वा कुमाराणां कुमारीणाञ्च पालनं॥
पुरा मीसरदेशस्य वार्त्तायाः श्रवणे यथा। ५
तथा सोरस्य वार्त्तायाम् अवाप्स्यन्ति व्यथां नराः॥
महासागरपारस्थं तर्शीशाभिधनीवृतं। ६
रुदन्तो यात हे यूयम् उपद्वीपनिवासिनः॥
प्राक्कालात् स्थापितेयं किं युष्माकं ह्लादिनी पुरी। ७
प्रवासार्थं सुदूरं सा स्वपद्भ्यामपनीयते॥
यस्याः सांयात्रिका भूपा बणिजो लोकविश्रुताः। ८
राजकिरीटदात्री च यासौ सोराभिधा पुरी।

कस्तस्याः प्रातिकूल्येन कृतवान् मन्त्रणामिमां ॥
९ कृत्स्नं सौन्दर्य्यजं गर्व्वम् अशुचीकर्त्तुमिच्छता ।
भूलोकविश्रुतान् सर्व्वान् तुच्छीकर्त्तुञ्च वाञ्छता ।
सेनाध्यक्षपरेशेन मन्त्रणा सा निरूपिता ॥
१० हे तर्शीशाभिधे कन्ये त्वं मिस्रीयनदी यथा ।
तथा देशमतिक्राम राजशृङ्खलवर्ज्जितं ॥
११ समुद्रस्योपरि स्वीयं हस्तं विस्तृतवान् प्रभुः ।
सकलानि च राज्यानि सकम्पानि करोति सः ॥
बणिक्पुरीमधीमाञ्च प्रादादाज्ञां परेश्वरः ।
नरैस्तदीयदुर्गाणां सर्व्वनाशो विधीयतां ॥
१२ सो ऽवादीत् न पुन यूयम् उल्लासं प्रकरिष्यथ ।
भ्रष्टे कन्ये सिदोनाख्ये त्वमुत्थाय जलाध्वना ।
कित्तीमं याहि तत्रापि विश्रामं लप्स्यसे नहि ॥
१३ कस्दीयनीवृतं पश्य नासीज्जातिरसौ पुरा ।
स देशः किन्त्वशूरीयैरर्पितो ऽरण्यवासिषु ॥
उच्चयन्त्राणि निर्म्माय तै र्नरैस्तत्र संस्थितैः ।
सा पुरी क्षुब्धप्रासादा शिलाराशिः करिष्यते ॥
१४ कुरुतार्त्तस्वरं यूयं पोतास्तर्शीशगामिनः ।
यस्मादवाप्स्यति ध्वंसं युष्माकं दृढ आश्रयः ॥
१५ तदानीं राज्ञ एकस्य राजत्ववत्सरानिव ।
वत्सरान् सप्ततिं यावत् सोरी भ्रंशिष्यति स्मृतेः ॥
शप्तते वत्सराणान्तु शेषे वाराङ्गना यथा ।
तथा सोरपुरी गीतं गातुमुपक्रमिष्यति ॥
१६ वीणां धृत्वा पुरे भ्राम्य हे वेश्ये स्मरणाच्युते ।
यत् स्मर्य्येथास्तदर्थञ्च सुवाद्यै गाय निर्भरं ॥
१७ वर्षाणां सप्ततेरन्ते परेशेनाभिवीक्षिता ।
सोरपुरी स्वलाभाय परावर्त्तिष्यते पुनः ॥
सार्द्धञ्च सकलै राज्यैः पृथिवीमण्डले स्थितैः ।
वेश्यावद् व्यवहारं सा तदानीमाचरिष्यति ॥
१८ परेशस्य कृते पूतो लाभ उपार्ज्जितस्तया ।
तदा सञ्चेष्यते नैव न वा राशीकरिष्यते ॥

स लाभः परमेशस्य सम्मुखे वसतां नृणां।
प्राप्यस्तेभ्यो भृशं भक्ष्यं दृढं वस्त्रञ्च दास्यति॥

---

२४ चतुर्विंशोऽध्यायः।

१ इस्रायेलो भविष्यद्दण्डः १२ अवशिष्टलोकानां सुखं शत्रूणां विनाशश्च।

पश्य परेश्वरो देशं शून्यीकुर्व्वन् प्रबाधते। १
अधोमुखञ्च कृत्वा तं विधूनोति निवासिनः॥
यथा प्रजा तथा यष्टा यथा दासस्तथा प्रभुः। २
यथा दासी तथाध्यक्षा यथा क्रेता तथा वणिक्।
ऋणग्राही यथा तद्वद् ऋणदाता भविष्यति।
अधमर्णो यथा तद्वद् उत्तमर्णो भविष्यति॥
सम्यक् शून्यीकृतो देशो हृतद्रव्यो भविष्यति। ३
वाणीमेतां स्वयं यस्माद् भाषते परमेश्वरः॥
शोचन्ती शुष्यति क्षौणी जीर्य्यन्ती शुष्यति क्षितिः। ४
धरावासिप्रजानाञ्च श्रेष्ठांशो याति जीर्णतां॥
निवासिनां पदाघाताद् देशो गच्छत्यमेध्यतां। ५
व्यवस्था लङ्घिता यस्माद् विपर्य्यस्तो विधिश्च तैः।
कृतं सदातनस्यापि भञ्जनं नियमस्य तैः॥
शापग्रस्तस्ततो देशो दोषाक्रान्ता निवासिनः। ६
देशवासिनरा दग्धाः शिष्यन्ते स्वल्पमानवाः॥
रसः शोचति गोस्तन्या द्राक्षाया जीर्य्यते लता। ७
चित्तहर्षप्रिया लोकाः सुदीर्घं स्तनयन्ति च॥
शान्तस्तालो मृदङ्गानां निवृत्तो हर्षिणां रवः। ८
वीणाया वाद्यघोषो ऽपि कुत्रापि श्रूयते नहि॥
गीतवाद्येन लोकाश्च मद्यपानं न कुर्व्वते। ९
मदिरा तत्पिवद्भिश्च तिक्तस्वादैव मन्यते॥
नगरं भग्नतां प्राप्य शून्यस्थानमजायत। १०
सर्व्वगृहाणि रुद्धानि प्रवेष्टुं को ऽपि न क्षमः॥
पथि द्राक्षारसाभावात् श्रूयते परिदेवनं। ११

सर्व्वानन्दस्तमोभूतो हर्षो देशाद् वहिष्कृतः॥
१२ नगरे शिष्यते ध्वंसो द्वारं छिन्नं निपात्यते॥
१३ फलेषु जितवृक्षस्य पातितेषु यथा भवेत्।
कृते द्राक्षाफलानां वा सञ्चये शेषसङ्ग्रहः।
जातीनां मध्यतस्तद्वद् देशे शेषो भविष्यति॥
१४ ते च शेषा नरा उच्चैः करिष्यन्त्युत्सवध्वनिं।
परमेशस्य माहात्म्यात् ते गास्यन्ति समुद्रतः॥
१५ तस्मादरुणदिक्स्थैश्च स्तूयतां परमेश्वरः।
इस्रायेलीयवंशस्य यः प्रभुः परमेश्वरः।
तस्य संस्तूयतां नाम सामुद्रद्वीपवासिभिः॥
१६ धार्म्मिका मनुजा धन्या इतिवाक्यसमन्वितं।
गीतस्य शृणुमो गानं पृथिव्याः प्रान्ततो वयं॥
किन्त्वहं वच्मि हा क्षीणः क्षीणो ऽहं हा हतो ऽस्म्यहं।
आचरन्ति शठाः शाठ्यं शाठ्यमेवाचरन्ति ते॥
१७ विद्यन्ते युष्मदर्थञ्च हे नरा देशवासिनः।
त्रासो गर्त्तश्च पाशश्च त्रय एते निरूपिताः॥
१८ यः पलायिष्यते त्रासात् स गर्त्ते निपतिष्यति।
य उत्थास्यति गर्त्ताच्च स पाशेन धरिष्यते॥
ऊर्द्ध्वे द्वाराणि मेघानां यास्यन्त्युद्घाटनं यतः।
धरामूलानि यास्यन्ति तदानीं परिकम्पनं॥
१९ भिद्यते भिद्यते क्षौणी दीर्य्यते दीर्य्यते धरा।
उत्कटेनैव कम्पेन कम्पते पश्य मेदिनी॥
२० मत्तवच्चलति क्षौणी दोलायते च दोलवत्।
स्वीयपातकभारात् सा पतत्युत्थातुमक्षमा॥
२१ प्रोच्चस्थानीयसेनायै प्रोच्चस्थाने यथा फलं।
नरलोकस्थराजभ्यो नरलोके तथा फलं।
उचितं परमेशेन तदानीं वितरिष्यते॥
२२ कूपे वन्दिवदेकत्र रुद्धाः स्थास्यन्ति ते ऽर्गलैः।
दीर्घकालात् परं तेषां विचारश्च भविष्यति॥
२३ तदा लज्जिष्यते चन्द्रो भास्करश्च त्रपिष्यते।
यस्मादद्रौ सियोनाख्ये यिरूशालमपत्तने।

प्रकरिष्यति राजत्वं सेनाध्यक्षः परेश्वरः।
तत्प्राचीनन्दणां साक्षात् प्रतापश्च विभास्यति॥

२५ पञ्चविंशोऽध्यायः।

१ जयात् परमेश्वरस्य प्रशंसनं ६ खीष्टस्य राज्यस्थापनं ९ तदीयमानवानां सुखञ्च।

हे परेश त्वमीशो मे करिष्यामि तव स्तवं। १
नाम ते कीर्त्तयिष्यामि स्वाश्चर्य्यकर्म्मकारिणः।
प्राचीना मन्त्रणा यास्ते सत्याः सन्ति दृढाश्च ताः॥
त्वमकार्षीः पुरीं राशिं दुर्गञ्च खण्डसञ्चयं। २
परदेशीयराजानां पुरीं पुरीत्वविच्युतां।
न भविष्यति निर्म्माणं पुनस्तस्याः कदाचन॥
तस्माद् बलवती जातिस्त्वत्सम्मानं करिष्यति। ३
नगरं भेष्यति त्वत्तो विदेशीयदुरात्मनां॥
दुर्व्वलस्य नरस्य त्वमभवः शरणं यतः। ४
दरिद्रस्य मनुष्यस्य शरणं त्वं हि सङ्कटे॥
आश्रयस्थानमाप्लावे छायायाः स्थानमातपे।
प्राचीराक्रामकाप्लावैस्तुल्ये वायौ दुरात्मनां॥
पराणां दम्यते शब्दस्त्वया ग्रीष्मो मरौ यथा। ५
क्रूराणां क्षीयते गानं ग्रीष्मोऽभ्रच्छायया यथा॥
निमित्तं सर्व्वजातीनाम् एतस्मिन् धरणीधरे। ६
सेनाध्यक्षपरेशेन भोज्यमासादयिष्यते॥
तद् भोज्यं पिशितैः स्वादु सत्प्रद्राक्षारसेन च।
पिशितैः सारसंयुक्तै र्द्राक्षारसैश्च निर्म्मलैः॥
येन प्रच्छदवस्त्रेण छाद्यन्ते सर्व्वजातयः। ७
यया तिरस्करिण्या च छाद्यन्ते सर्व्वदेशिनः।
स महीधर एतस्मिन् तावुभौ संहरिष्यति॥
स च मृत्युं जयग्रस्तं सर्व्वथा संहरिष्यति। ८
प्रभुः परेश्वरश्चास्रु सर्व्ववक्त्रात् प्रमार्क्ष्यति॥
स्वप्रजानामवज्ञाञ्च कृत्स्नोर्व्वीतोऽपनेष्यति।
यतो हेतोरिमां वाणीं स्वयं वक्ति परेश्वरः॥

९ तदा लोका वदिष्यन्ति पश्यासावस्मदीश्वरः।
असौ प्रतीक्षितोऽस्माभिरसौ नस्तारयिष्यति॥
परमेश्वर एवासावस्माभि र्यः प्रतीक्षितः।
सानन्दा उल्लसिष्यामस्त्राणे तेन कृते वयं॥
१० परमेशस्य हस्तो ऽस्मिन् पर्व्वते विश्रमिष्यति।
मोयावः किन्तु तेनैव मर्द्दिष्यते निजस्थले।
पलालो मर्द्यते यद्वत् सारपङ्के पदाहतः॥
११ तरणार्थं यथा स्नायी स्वबाहू वितनोति च।
तद्वदेव स्वबाहू स तन्मध्ये वितनिष्यति।
हस्तच्छलेन साकन्तु गर्व्वस्तस्य दमिष्यते॥
१२ उच्चप्राचीररूपं ते दुर्गं निपातयिष्यते।
नीचं भूस्पृग्रजःस्पृक् च परेशेन करिष्यते॥

---

२६ षड्विंशोऽध्यायः।

१ मनुष्यहेतोः परमेश्वरस्य प्रशंसनं १६ परमेश्वरे स्वप्रजानाम् आश्रयप्राप्तिश्च।

१ तदैतद् गास्यते गीतं यिहूदादेशवासिभिः।
एकं नगरमस्माकं विद्यते सुमहाबलं।
प्राचीरपरिखावच्च त्राणं स्थापयतीश्वरः॥
२ पुरद्वाराणि मोच्यन्तां युष्माभि र्द्वाररक्षिणः।
सत्यतापालिका तर्हि धर्म्मजातिः प्रवेक्ष्यति॥
३ त्वदालम्बिमनस्कं त्वं रक्षन् सुस्थं विधास्यसि।
यतो हेतो र्मनुष्यः स त्वामेव श्रद्दधाति हि॥
४ यूयमनन्तकालार्थं श्रद्धत्त परमेश्वरं।
प्रभौ परेश्वरे यस्मात् प्राप्यते शाश्वताश्रयः॥
५ यतः सो ऽनमयत् प्रोच्चां नगरीमूर्द्ध्ववासिनां।
भूमौ तां पातयित्वा च रजोलीनां करिष्यति॥
६ चरणै र्धनहीनानां पादपातैश्च दुःखिनां।
नृणां पादाहता सम्यक् नगरी सा भविष्यति॥
७ सरलो युज्यते पन्था मनुष्ये धर्म्मसेवके।
हे न्यायिन् धर्म्मिनो मार्गं त्वं समानं करिष्यसि॥

त्वद्विचारपथे ऽस्माभिस्त्वं परेश प्रतीक्षितः । ८
मनोवाञ्छितमस्माकं नाम ते स्मरणञ्च ते ॥
क्षणदायां मनोवाञ्छा त्वां प्रत्युत्पद्यते मम । ९
प्रात र्ममान्तरात्मा च कुरुते ऽन्वेषणं तव ॥
त्वदीयशासने यस्मात् सति मह्यां प्रकाशिते ।
धर्म्मशिक्षामवाप्स्यन्ति नरा भुवनवासिनः ॥
शिक्षामनुगृहीतो ऽपि नैव गृह्णाति दुर्ज्जनः । १०
प्रकृताचारदेशे ऽपि दुराचारं करोति सः ।
परमेशस्य माहात्म्यं वीक्षितुञ्च न वाञ्छति ॥
परेश त्वत्करः प्रोच्चस्तै र्नरै र्वीक्ष्यते नहि । ११
वीक्षणं किन्तु तैस्तस्य कर्त्तव्यं नात्र संशयः ॥
स्वप्रजासु तवोद्योगात् ते भविष्यन्ति लज्जिताः ।
त्वद्वैरिग्रासको वह्निः संहरिष्यति तानपि ॥
अस्मदर्थं परेश त्वं शान्तिं निरूपयिष्यसि । १२
अस्माकं सर्व्वकार्य्याणि साध्यन्ते ऽस्मत्कृते त्वया ॥
अन्ये ऽस्मानशिषन् नाथा अस्मत्प्रभो परेश्वर । १३
केवलं त्वत्प्रसादाच्चास्माभिस्त्वन्नाम कीर्त्त्यते ॥
न जीविष्यन्ति ते प्रेता नैवोत्थास्यन्ति ते मृताः । १४
त्वया विचार्य्य ते लुप्ताः स्मृतिस्तेषाञ्च नाशिता ॥
वर्द्धितं स्वप्रजावृन्दं स्वप्रतापः प्रकाशितः । १५
सर्व्वदिक्षु च देशस्य सीमा विस्तारिता त्वया ॥
त्वज्जना अभ्यगच्छंस्त्वां सङ्कटे हे परेश्वर । १६
अकुर्व्वन् प्रार्थनां नीचैस्तव दण्डेन शासिताः ॥
यथा गर्भवती नारी सूतिकाले समागते । १७
व्यथिता व्याकुलीभूय काकूतिं कुरुते भृशं ।
दशास्माकं तथैवासीत् त्वत्प्रत्यक्षं परेश्वर ॥
सगर्भै र्व्याकुलीभूयास्माभि र्वायुरसावि हि । १८
न सिद्धं नीवृतस्त्राणं जन्म वा भूमिवासिनां ॥
जीविष्यन्ति तव प्रेता उत्थास्यन्ति शवा मम । १९
हे रजःशायिनो यूयं जागृत्वा कुरुतोत्सवं ।
यस्मात् तावकनीहारः प्रातर्नीहारसन्निभः ।

नीरता च प्रमीतेभ्यो जन्म दायिष्यते पुनः॥
२० मत्प्रजे स्वगृहस्यान्त याहि द्वारं बधान च।
कोपस्य यावदत्येति क्षणं तावत् तिरोभव॥
२१ यतः पश्य विनिर्गत्य स्वस्थानात् परमेश्वरः।
फलं पृथ्वीनिवासिभ्यो ऽपराधस्य प्रदास्यति॥
प्रकाशयिष्यति क्षौणी शोणितं भुवि पातितं।
न च तत्र हतान् लोकान् पुनराच्छादयिष्यति॥

---

२७ सप्तविंशोऽध्यायः।

१ परमेश्वरस्य द्राक्षाक्षेत्ररक्षणगीतं ७ तस्य शास्तेरभिप्रायः १२ तदीयराज्यस्य वृद्धिः।

१ लिव्याथनाभिधानाय सर्पाय द्रुतगामिने।
लिव्याथनाभिधानाय सर्पाय वक्रगामिने।
स्वकीयदृढखड्गेन वृहता प्रबलेन च।
परमेशो दिने तस्मिन् प्रदास्यत्युचितं फलं।
समुद्रवासिनागस्य त्यक्तप्राणं विधास्यति॥
२ तस्मिन् काले पुरीमेतां गोस्तनीक्षेत्रसन्निभां।
मत्वा यूयमिमां वाचं तामुद्दिश्य प्रगायत॥
३ तद्रक्षी परमेशो ऽहं तां सिञ्चामि प्रतिक्षणं।
यच्च को ऽपि न तां हिंसेत् तद् रक्षामि दिवानिशं॥
४ न क्रुध्यामि पुनस्तस्यै कश्चिच्चेत् समराय च।
कण्टकान् गोक्षुरांश्चापि मद्विरुद्धं समाक्षिपेत्।
तर्ह्यहं तान् समाक्रम्य ज्वलयिष्यामि सङ्घशः॥
५ मामेव शरणं गत्वा स शत्रुस्त्ववलम्बतां।
सन्धिं कुर्य्यान्मया सार्द्धं सन्धिं कुर्य्यान्मया सह॥
६ याकूबो भाविकालेषु बद्धमूलो भविष्यति।
विशोभिष्यत इस्रायेल् तदानीं पुष्पपल्लवैः।
कृत्स्नं भूमण्डलञ्चैव फलैरापूरयिष्यति॥
७ स्वकीयताडको यद्वत् तद्वत् किं सो ऽपि ताडितः।
नराः स्वेन हता यद्वत् तद्वद् वा सो ऽपि किं हतः॥
८ मितशास्त्या विरुद्ध्यैव स तया विवदिष्यते।

दिने पूर्व्वीयवायोस्तां चण्डवातेन नेष्यति ॥
एतेनैवापराधश्च याकूबस्य प्रमार्क्ष्यते । ९
तदीयदोषलोपेन फलञ्चैतस्य सेत्स्यति ॥
वेदीनां सर्व्वपाषाणे चूर्णकर्करखण्डवत् ।
तेन निपातिते देव्या आशेरायाश्च मूर्त्तयः ।
सूर्य्यदेवस्य च स्तम्भा उत्थास्यन्ति पुन र्नहि ॥
सुदृढं नगरं किन्तु ध्वंसस्थानं भविष्यति । १०
वासस्थानं परित्यक्तं वनवन्नरवर्ज्जितं ॥
वत्सास्तत्र चरिष्यन्ति विश्रमिष्यन्ति तत्र च ।
भक्षणेन च तत्रत्यान् संहरिष्यन्ति पल्लवान् ॥
तच्छाखाः शुष्कतां प्राप्य प्रभंक्ष्यन्ते च मानवैः । ११
व्रजित्वा तत्र योषिद्भिः कारिष्यन्ते च भस्मसात् ॥
बुद्धिहीना यतः सन्ति मनुष्यास्तन्निवासिनः ।
तस्मात् स्रष्टापि यस्तेषां स तान् नैवानुकम्पते ।
निर्म्मातापि कृपां तेषु न करोति कथञ्चन ॥
तदानीं परमेशेन आफरातप्रवाहतः । १२
मिस्रीयनिम्नगां यावद् यत्नात् सञ्चेष्यते फलं ।
इस्रायेल् संग्रहीष्यध्वे यूयमेकैकशस्तदा ॥
बृहत्तूरीध्वनिस्तस्मिन् काले च श्रावयिष्यते । १३
तं श्रुत्वाशूरदेशे ये नष्टकल्पा नराः स्थिताः ।
मिसर्नीवृति यावन्तो विकीर्णाः प्रवसन्ति च ॥
सकलास्ते समागत्य यिरूशालमपत्तनं ।
पवित्रे पर्व्वते तस्य प्रणंस्यन्ति परेश्वरं ॥

---

२८ अष्टाविंशोऽध्यायः ।

१ इस्रायेलो भविष्यद्दण्डः ५ लोकानां भ्रान्तिः १४ सत्यभित्तेः स्थापनं मृषाभित्ते
र्विनाशनं २३ विवेकं विनयश्च ।

धिक् त्वां हे इफ्रयीमस्य मत्तानां दर्पभूषण । १
मदोन्मत्तमनुष्याणाम् उर्व्वरोपत्यकोपरि ।
तस्य रम्यकिरीटे च स्थापित म्लानपुष्पक ॥

२ प्रभुनानेष्यते पश्य वीर एको महाबलः।
वृष्टि र्यथा शिलायुक्ता झञ्झा वा सर्व्वनाशिनी।
विपुलाम्बुजतोयानि भूप्लावकानि वा यथा।
स वीरः स्वीयहस्तेन भूमौ तत् पातयिष्यति॥
३ अदो यदिफ्रयीमस्य मत्तानां दर्पभूषणं।
पादद्वयेन तत् तस्य तदानीं मर्द्दयिष्यते॥
४ मदोन्मत्तमनुष्याणाम् उर्व्वरोपत्यकोपरि।
तस्य रम्यकिरीटे यत् स्थापितं म्लानपुष्पकं॥
तदुडुम्बरवृक्षस्य फलेन मंस्यते समं।
फलसङ्ग्रहकालात् प्राक् पक्वं वीक्ष्य नरेण यत्।
यावत् करतले भाति तावत् तूर्णं निगीर्य्यते॥
५ भविष्यति तदानीञ्च सेनाध्यक्षः परेश्वरः।
स्वप्रजासमुदायस्य मध्ये शेषन्टणां कृते।
शोभादायी किरीटश्च मुकुटश्चातिसुन्दरं॥
६ विचारायोपविष्टस्य चात्मा विचारशिक्षकः।
बलञ्च द्वारपर्य्यन्तं सङ्ग्रामप्रतिघातिनां॥
७ भ्राम्यन्तीमे ऽपि मद्येन सुरया सञ्चलन्ति च।
याजकभाविवक्तारो भ्राम्यन्ति सुरया जिताः॥
सर्व्वे मद्ये निमज्जन्ति सुरया सञ्चलन्ति च।
भ्राम्यन्ति दर्शनाख्याने विचारे प्रस्खलन्ति च॥
८ भोज्यासनानि सर्व्वाणि वान्तेनैव मलेन च।
परिपूर्णानि दृश्यन्ते किञ्चित् स्थानं न शिष्यते॥
९ स कं शिक्षयति ज्ञानं कं वा बोधयति श्रुतं।
किं दुग्धाद्विरतान् बालान् किं वा त्यक्तस्तनान् शिशून्॥
१० यतो विधि र्विधेः पश्चाद् विधिः पश्चात् पुन र्विधिः।
सूत्रात् परं पुनः सूत्रं सूत्रं सूत्रात् परं पुनः।
एकस्मिंश्च स्थले स्वल्पं स्वल्पमन्यस्थले पुनः॥
११ स्खलद्वागधराभ्यां स वैदेश्योक्तया च जिह्वया।
एतैरेव नरैः सार्द्धं संलापं प्रकरिष्यति॥
१२ विश्रामस्थानमत्रास्ति विश्रामयत सश्रमान्।
एतत् क्लान्तिहरं स्थानमिति तेनोदितं पुरा।

किन्तु तद् वचनं श्रोतुं तेषामिच्छाभवन्नहि ॥
परमेशस्य यद् वाक्यं तच्च तेषां नृणां कृते। १३
जातं विधि र्विधेः पश्चात् विधेः पश्चात् पुन र्विधिः ॥
सूत्रात् परं पुनः सूत्रं सूत्रं सूत्रात् परं पुनः।
एकस्मिंश्च स्थले स्वल्पं स्वल्पमन्यस्थले पुनः ॥
तस्माद् गमनकाले ते स्खलिष्यन्ति पराङ्मुखाः।
भग्नाङ्गाः पाशबद्धाश्च धरिष्यन्ते न संशयः ॥
अत एव परेशस्य वाक्यं शृणुत निन्दकाः। १४
नृणां शास्तार एतेषां यिरूशालमवासिनां ॥
यूयं ब्रूथ कृतो ऽस्माभि र्नियमो मृत्युना सह। १५
परलोकेन सार्द्धञ्च समयो ऽस्ति निरूपितः ॥
न स्प्रक्ष्यति प्रपत्यास्मान् उत्पातः प्रलयोपमः।
मृषोक्तावाश्रयप्राप्ताः प्रच्छन्नास्थानृते वयं ॥
प्रभुः परेश्वरस्तस्माद् भाषते भारतीमिमां। १६
स्थापयिष्यामि पाषाणं सीयोने भित्तिमूलवत् ॥
परीक्षितः स पाषाणः कोणार्थञ्च समञ्जसः।
महार्घो भित्तिमूलार्थं यथायोग्यं दृढीकृतः।
तत्र यः श्रद्धधानः स न भविष्यति चञ्चलः ॥
प्रयोक्ष्ये सूत्रवन्न्यायं तत्र धर्म्मञ्च लम्बवत्। १७
स मृषोक्त्याश्रयः किन्तु शिलावृष्ट्यापनेष्यते।
तच्च प्रच्छादनस्थानं तोयैराप्लावयिष्यते ॥
मृत्युना सह युष्माकं नियमो लोपमाप्स्यति। १८
परलोकेन सार्द्धं वः समयः स्थास्यते नहि ॥
प्रलयोपम उत्पातो यदा च प्रपतिष्यति।
मर्द्दिष्यध्वे तदा यूयं तेन भूमौ प्रलोठिताः ॥
वारं वारं प्रपत्यैव स युष्मानपनेष्यति। १९
प्रातः प्रात र्दिवा रात्रौ यतः स प्रपतिष्यति।
त्रासेनैव च वार्त्तेषा बोधगम्या भविष्यति ॥
शयनं विस्तृताङ्गेन कृत्वा खट्वोपरोत्स्यति। २०
गात्रसंवेष्टनं क्षुद्रः कम्बलो वारयिष्यति ॥
उत्थास्यति परेशश्च पिरासीमगिरौ यथा। २१

कोपिष्यति पुन र्यद्वद् गिबियोनाख्यकन्दरे॥
स्वकार्य्यं तेन कर्त्तव्यं तत्तु कार्य्यं विलक्षणं।
स्वव्यापारश्च कर्त्तव्यः स व्यापारस्त्वसम्भवः॥
२२ इदानीमत्र युष्माभि र्नैव निन्दा विधीयतां।
न चेद् दृढीकरिष्यन्ते युष्माकं यन्त्रणानि हि॥
सेनाध्यक्षपरेशेन कृत्स्नामेवावनिं प्रति।
निरूपितस्य नाशस्य वाक्यं यस्मान्मया श्रुतं॥
२३ सम्यगाकर्ण्य युष्माभिः श्रूयतां मम भारती।
मनो निधाय युष्माभि र्मम वाक्यं निशम्यतां॥
२४ हालिको वपनार्थी किं वहति प्रत्यहं हलं।
मृत्तिकां दारयन् नित्यं कोटीशेन भिनत्ति वा॥
२५ तेन भूमिं समीकृत्य कीर्य्यन्ते किं तिला नहि।
रोप्यन्ते जीरकास्तेन गोधूमः पङ्क्तिषूप्यते।
स्वस्थले शितशूकश्च छिन्नशूकश्च सीमनि॥
२६ स यथोचितमादिष्टः शिक्षां प्राप्तो निजेश्वरात्॥
२७ तिलेषु स्थूलकाष्ठेन मर्द्दनं युज्यते नहि।
नैव वा शाकटं चक्रं घूर्णते जीरकोपरि।
तिला यष्ट्यैव ताड्यन्ते तथा दण्डेन जीरकाः॥
२८ पूपार्थं चूर्ण्यते शस्यं सर्व्वदा तु न मृद्यते।
चक्रं तस्योपरिष्टाच्च शाकटं चालयन्नपि।
न चूर्णयति तच्छस्यं स्वकीयाश्वैः कृषीबलः॥
२९ विधिरप्ययमुत्पन्नः सेनाध्यक्षपरेश्वरात्।
अद्भुता मन्त्रणा तस्य कौशलञ्च महत्तमं॥

---

२९ ऊनत्रिंशोऽध्यायः।

१ यिरूशालमो भविष्यद्दण्डः ९ लोकानामज्ञानत्वं १५ लोकानां दुष्टत्वं, २८ साधुलोकानां सुखं।

१ अरीयेल अरीयेल सन्तापस्ते भविष्यति।
दायूदा शिविरं यत्र स्थापितं त्वं हि तत् पुरं।
वर्षा वर्षेषु युज्यन्तां पर्व्वचक्रञ्च घूर्णतां॥

अहं क्लेक्ष्याम्यरीयेलं खेदं खेदोऽनुयास्यति। २
स्थास्यसि त्वन्वरीयेलस्वूह्लिरीशस्य पूर्ववत्॥
वेष्टिष्ये शिविरेण त्वां प्रबाधिष्ये च योद्धृभिः। ३
अवरोधकयन्त्राणि स्थापयिष्यामि च त्वयि॥
नम्रीभूय तदा त्वञ्च कथयिष्यसि भूमितः। ४
रजसो मध्यतो नीचं वचस्योत्पत्स्यते तव॥
समुत्थास्यति भूमध्यात् प्रेतस्येव तव स्वरः।
रजसो मध्यतो वाणी तव पक्षिशिशोरिव॥
भविष्यति तवारीणां समूहः सूक्ष्मरेणुवत्। ५
दुरात्मनां समूहश्च व्यतिगच्छत्तुषोपमः।
अकस्मादेव सद्यश्च घटनेयं प्रसेत्स्यति॥
सेनाध्यक्षपरेशेनोचितं दायिष्यते फलं। ६
वज्रनिर्घोषभूकम्पैश्चक्रवातप्रभञ्जनैः।
सर्व्वग्रासिकया चापि जिह्वया जातवेदसः॥
अरीयेलेन सार्द्धञ्च युध्यन्ते ये विदेशिनः। ७
तत् पुरं तस्य दुर्गञ्च प्रबाधन्ते च सेनया।
ते भविष्यन्ति रात्रीयस्वप्नदर्शनसन्निभाः॥
यः क्षुधातुर आत्मानं स्वप्नेऽश्नन्तं समीक्षते। ८
प्रबुद्धस्यान्तरं तस्य व्ययते नीरसं यथा॥
यो वा तृषार्त्त आत्मानं स्वप्ने पिवन्तमीक्षते।
प्रबुद्धस्यान्तरं तस्य यथा खेदेन शुष्यति॥
सीयोनगिरिणा सार्द्धं युध्यन्ते ये विदेशिनः।
तेषां कृत्स्नसमूहस्य दशा तादृग् भविष्यति॥
विलम्ब्य विस्मयं यात विलस्य गच्छतान्धतां। ९
मत्ता यूयं न मद्येन चञ्चलास्च न हालया॥
निद्राजनकमात्मानम् अवतार्य्य परेश्वरः। १०
युष्माकं सर्व्वनेत्राणि तदानीं मीलयिष्यति।
भाविवक्तृंश्च मूर्द्धो वो दर्शकांश्च स घोक्ष्यति॥
युष्मद्दृष्ट्या तदा सर्व्वं शास्त्रं तद्वद् भविष्यति। ११
मुद्राङ्कितस्य पत्रस्य कस्यचिद्वचनं यथा॥
तस्मिन्नभ्यस्तपाठाय पठेत्युक्त्वा समर्पिते।

स ब्रूते नैव शक्नोमि मुद्राङ्कितमिदं यतः ॥
१२ किन्त्वनभ्यस्तपाठाय पठेत्युक्त्वा समर्प्यते ।
पत्रे सो ऽपि प्रतिब्रूते पठितुं नहि वेद्म्यहं ॥
१३ प्रभु र्वक्ति जना एत आयान्त्यास्यै मदन्तिकं ।
अधरैरेव सम्मानम् आचरन्ति च मां प्रति ॥
किन्त्वन्तःकरणं तेषां दूरं मत्तो ऽवतिष्ठते ।
मद्भक्तिश्च मनुष्याणाम् उपदेशो ऽनुशिक्षितः ॥
१४ तस्मात् पश्य जनानेतान् प्रत्याचारमहं पुनः ।
अत्याश्चर्य्यं करिष्यामि सर्व्वेषां विस्मयास्पदं ।
ज्ञानिनां नंक्ष्यति ज्ञानं धीमतां लोप्स्यते च धीः ॥
१५ परेशाद् गाढबुद्धीन् धिक् मन्त्रणाच्छादनार्थिनः ।
अन्धकारे स्वकर्म्माणि कृत्वा यैरिदमुच्यते ।
को ऽस्मान् शक्नोति सन्द्रष्टुं को ऽस्मान् शक्नोति वेदितुं ॥
१६ आः कीदृग् वो विलोमत्वं कुलालः किं मृदा समः ।
कर्म्म कर्त्तरि किं ब्रूयात् नासौ मां कृतवानिति ।
स्रष्टरि वस्तु वा सृष्टं नास्यसौ बुद्धिमानिति ॥
१७ अतीवाल्पक्षणे ऽतीते लिवानोन् परिवर्त्तितः ।
किं न मंस्यत उद्यानम् उद्यानञ्चाटवीसमं ॥
१८ धर्म्मशास्त्रस्य वाक्यानि श्रोष्यन्ते वधिरैस्तदा ।
वीक्षिष्यन्ते ऽन्धनेत्राणि विना ध्वान्तं विना तमः ॥
१९ वर्धयिष्यन्ति चानन्दं नम्रशीलाः परेश्वरे ।
इस्रायेलः पवित्रे च राज्ञि तोष्यन्ति दुर्गताः ॥
२० यस्मान्नंक्ष्यति दुर्वृत्तो लोपं यास्यति निन्दकः ।
उच्छेत्स्यन्ते च सर्व्वे ते ये पापार्थं सचेतनाः ॥
२१ एकस्य वचसो दोषान्नरं कुर्व्वन्ति दोषिणं ।
पुरद्वारे ऽनुयुञ्जानम् उन्माथे पातयन्ति च ।
धार्म्मिकञ्च वहिष्कृत्य प्रकुर्व्वन्ति दिगम्बरं ॥
२२ इब्राहीमस्य निष्क्रेता ख्यातो यः परमेश्वरः ।
स इदं वचनं ब्रूते याकूबीयान्वयं प्रति ॥
नैव लज्जिष्यते याकूब् पुनर्व्वारमितः परं ।
न पुनश्चाननं तस्य विवर्णत्वमवाप्स्यति ॥

मत्कराभ्यां कृतं कर्म्म सन्ति तद्वंशजा यतः । २३
मन्नाम मन्यमानांस्तान् स द्रक्ष्यति निजान्तरे ॥
याकूबस्य पवित्रो राट् पवित्रो मंस्यते हि तैः ।
इस्रायेलो य ईशः स मंस्यते तै र्भयङ्करः ॥
भ्रान्तात्मभि र्मनुष्यैश्च तदा बुद्धिरवाप्स्यते । २४
ये विलपन्त्यसन्तोषात् तैश्च शिक्षा ग्रहीष्यते ॥

---

३० त्रिंशत्तमोऽध्यायः ।

१ उपकारार्थं मिसरगमनात् लोकानां भविष्यद्दण्डः ८ ईश्वरीयकथाया अवज्ञानस्य फलं १८ ईश्वरीयानुग्रहस्य वर्णनं २७ अशूरीयराजस्य विनाशश्च ।

पुत्रान् धिक् सत्पथभ्रष्टान् इति ब्रूते परेश्वरः । १
ममादेशं परित्यज्य ते प्रकुर्व्वन्ति मन्त्रणां ।
अन्विष्यन्ति सहायांश्च ममात्मानं विहाय ते ।
पातकस्योपरीत्थञ्च ते सञ्चिन्वन्ति पातकं ॥
फिरौणस्य बलादेव बलप्राप्तेः प्रतीक्षया । २
छायायां मिसरीयायां शरणस्य च वाञ्छया ।
मामपृष्ट्वा मिसर्देशं प्रति यात्राश्च कुर्व्वते ॥
फिरौणस्य बलात् किन्तु लज्जा तैः समवाप्स्यते । ३
छायायां मिसरीयायां शरणाच्च विवर्णता ॥
तेषां नायकवर्गे च सोयने समुपस्थिते । ४
तेषां प्रेषितदूतेषु हानेषमागतेषु च ॥
जातेरनुपकारित्वात् सर्व्वेषां ह्री र्जनिष्यते । ५
यतः सा नैव साहाय्यं नोपकारं करोति वा ।
किन्तु सा केवलं लज्जाम् अवज्ञाञ्च प्रयच्छति ॥

दक्षिणगामिपशूनां भार्य्यं ।

सिंहो यत्रास्ति सिंही च फणी खसर्प्पहिस्तथा । ६
मध्यतो नीतस्तस्य क्लेशकष्टप्रदायिनः ।
निबद्धं खरपृष्ठेषु धनमुष्ट्रककुत्सु च ।
अनुपकारिणीं जातिं प्रत्येतै र्नीयते नरैः ॥
व्यलीकाः सन्ति मिस्रीया निष्फला उपकारिणः । ७

वच्मि तान् नाम कृत्वाहम् उपवेशाभिमानिनः ॥
८ त्वन्तु गत्वा कथामेतां लोकानामेव सम्मुखे।
फलके लिख सम्यग् वा मुद्रितां कुरु पुस्तके।
तिष्ठेद् भाविदिनं यावत् नित्यसाक्षी भवेच्च सा ॥
९ यतो ऽबाध्यो ऽस्त्ययं वंशः पुत्रास्ते ऽनृतवादिनः।
सन्तानाः परमेशस्य शास्त्रं श्रोतुमनिच्छवः ॥
१० मा पश्यत दर्शनानीति ते वदन्ति प्रदर्शकान्।
ऐश्वरज्ञांश्च भाषन्ते मा ब्रूध्वं सरलं वचः।
ब्रूध्वं स्निग्धवचांस्यस्मान् वीक्षध्वं मोहदर्शनं ॥
११ युष्माभिस्त्यज्यतां पन्था ऋजुवर्त्म विहीयतां।
इस्रायेलः पवित्रो राट् अस्मत्तस्त्वापसार्य्यतां ॥
१२ इस्रायेलः पवित्रो राट् तस्मादेतत् प्रभाषते।
मम वाक्यं निराकृत्य दौरात्म्ये ऽनार्जवे च यत्।
यूयं कुरुथ विश्वासं तत्र प्राप्तावलम्बनाः ॥
१३ तस्माद् युष्मत्कृते दोष एष तद्वद् भविष्यति।
उच्चभित्ते र्यथा छिद्रं प्रलम्बं पतनोद्यतं।
सद्यो निमेषमात्रेण तस्या भङ्गो भविष्यति ॥
१४ भविष्यति च भग्ना सा कुलालस्य घटो यथा।
यं विलोक्य नरा भग्नं चूर्णयन्ति कृपां विना ॥
चुल्लीतो वह्निमुद्धर्त्तुं खातादादातुमम्बु वा।
मध्ये तदीयखण्डानां शकलं शिष्यते नहि ॥
१५ इस्रायेलः पवित्रो राट् प्रभुः परेश्वरो ऽब्रवीत्।
परिवर्त्तेन शान्त्या च यूयं रक्षामवाप्स्यथ।
धैर्य्याद् विश्वासदार्ढ्याच्च शक्तिमन्तो भविष्यथ।
एतस्यां मन्त्रणायान्तु यूयं न पर्य्यतुष्यत ॥
१६ अब्रूध्वञ्च हयारूढाः पलायिष्यामहे वयं।
तस्मात् पलायनं यूयम् अवश्यं प्रकरिष्यथ ॥
वयं यात्रां करिष्यामो जविभि र्वाहनैरिति।
ततो हेतो र्भविष्यन्ति जविनो वो ऽनुधावकाः ॥
१७ एकस्यैव तिरस्कारात् सहस्रेण पलायनं।
पञ्चानाञ्च तिरस्कारात् सकलै र्वः करिष्यते ॥

यूयं ततोऽवशेक्ष्यध्वे गिरिशृङ्गे ध्वजो यथा।
पताका वा यथा काचित् पर्व्वतस्योपरि स्थिता॥
युष्माननुग्रहीतुन्तु परमेशः प्रतीक्षते। १८
स चोत्तिष्ठति युष्मासु करुणां कर्त्तुमुद्यतः॥
न्यायकारीश्वरो यस्मात् ख्यायते परमेश्वरः।
यावन्तस्तमपेक्षन्ते धन्यास्ते सन्ति मानवाः॥
सीयोनीयप्रजे त्वञ्च यिरूशालमि वत्स्यसि। १९
त्वदीयरोदनं नैव चिरस्थायि भविष्यति॥
श्रुते त्वयार्त्तरावे स त्वयि स्नेहं करिष्यति।
तं निशम्यैव तुभ्यं स उत्तरं वितरिष्यति॥
अन्नं क्लेशे जलं द्रोहे युष्मभ्यं दास्यति प्रभुः। २०
न स्थास्यन्ति पुनर्व्वारं प्रच्छन्नास्तव शिक्षकाः।
त्वदीयलोचने किन्तु शिक्षकान् द्रक्ष्यतस्तव॥
गन्तव्ये दक्षिणे पार्श्वे त्वया वा दक्षिणेतरे। २१
अपश्चात् तव कर्णाभ्यामिदं संश्रोष्यते वचः।
अयं प्रकृतमार्गोऽत्र युष्माभि र्गम्यतामिति॥
यूयं स्वप्रतिमानाञ्च छादनं रौप्यनिर्म्मितं। २२
स्वर्णकोषञ्च मूर्त्तीनाम् अपवित्रीकरिष्यथ।
दूरीभवेति वाचा च मलवद् विकरीष्यथ॥
स वृष्टिं तव बीजाय भूम्युप्ताय प्रदास्यति। २३
तुभ्यं क्षेत्रजमन्नञ्च सुस्थूलं रससंयुतं।
चरिष्यन्ति च विस्तीर्णे स्थाने त्वत्पशवस्तदा॥
मृत्तिकां तव कर्षन्ति ये बलीबर्द्दगर्द्दभाः। २४
ते मिश्रं भक्ष्यमत्स्यन्ति चालनीसूर्पशोधितं॥
पतिष्यन्ति च दुर्गाणि महावधदिने यदा। २५
तदाद्रीणामुदग्राणाम् उन्नतानाञ्च भूभृतां।
उपरिष्टात् जलाकीर्णा नद्यः स्रोष्यन्ति वेगतः॥
उष्णांशोः प्रभया तुल्या शीतांशो र्भविता प्रभा। २६
भविता च प्रभोष्णांशोस्तदा सप्तगुणाधिका।
प्रभया सप्तघस्राणाम् एकत्रीकृतया समा॥
भन्त्स्यते परमेशेन स्वप्रजानां क्षतं तदा।

स्वीयप्रहारजञ्चापि व्रणं स्वस्थं करिष्यति॥
२७ दूरात् पश्य समायाति महानामा परेश्वरः।
दीप्यते तस्य कोपाग्निं धूममालां समुत्क्षिपन्।
रोषपूर्णौ च तस्योष्ठौ जिह्वा ग्रासकवह्निवत्॥
२८ स्रवते तस्य वायुश्च कण्ठस्पर्शिप्रवाहवत्।
यस्मात् संहारचालन्या स जातीश्चालयिष्यति।
श्वास्ये भ्रान्तिखलीनञ्च लोकानां स प्रदास्यति॥
२९ युष्माकं भविता गानं पर्व्वारम्भनिशीव च।
परेशस्य गिरिं गन्तुम् इस्रायेलोऽचलं प्रति।
वंशीवादिनरैः सार्द्धं यो मनुष्यः प्रगच्छति।
तस्येवान्तरिको हर्षो युष्माकं सम्भविष्यति॥
३० अतिप्रचण्डरोषेण ग्रासकानलजिह्वया।
उदवर्षेण वृष्ट्या च शिलायाः पतनेन च॥
परमेशः स्वनादस्य भीमत्वं श्रावयिष्यति।
स्वबाहोरवतारञ्च मनुष्यान् दर्शयिष्यति॥
३१ अशूरः प्राप्स्यति ध्वंसं परमेशस्य नादतः।
स च स्वकीयदण्डेन तं शत्रुं ताडयिष्यति॥
३२ परमेशेन तस्मिंश्च यो दण्डो वर्त्तयिष्यते।
तस्य दैवस्वरूपस्य दण्डस्य सर्व्वचालने।
वीणामृदङ्गवाद्यस्य सम्प्रयोगो भविष्यति।
वैरिणा तेन सार्द्धं स योत्स्यते रणसङ्कुले॥
३३ तोफताख्यश्मशानं यत् तत्प्राक्कालान्निरूपितं।
राज्ञः कृते सुसज्जं तत् सुविस्तीर्णमधोगतं॥
बहुकाष्ठा च तत्रत्या चिता दीपिष्यतेतरां।
निश्वासेन परेशस्य गन्धकस्रोतसा यथा॥

---

३१ एकत्रिंशोऽध्यायः।

१ मिसरि प्रत्याशाकरणात् लोकान् प्रति भर्त्सनं ६ ईश्वरं प्रति परावर्त्तितुं विनय-कथनम् अशूरीयाणां विनाशकथनञ्च।

१ धिक् तान् ये मिसरं देशं यान्ति साहाय्यवाञ्छया।
स्वीयरक्षार्थमश्वांश्च ये कुर्व्वन्त्यवलम्बनं॥

तेषां रथेषु विश्वासो यतस्ते बहुसंख्यकाः।
तेषां सादिषु विश्वासो यतस्ते बलवत्तमाः॥
इस्रायेलः पवित्रो राट् तैस्तु नैवावलोक्यते।
नैव वा परमेशस्य क्रियते तैः गवेषणं॥
ज्ञानवान् किन्तु सो ऽप्यस्ति स चानेष्यत्यमङ्गलं। २
नैव स स्वीयवाक्यानि निष्फलानि विहास्यति॥
दुर्वृत्तानाञ्च सन्तानान् सहायांश्च कुकर्म्मणां।
स विपक्षवदुत्थाय निश्चितं प्रतिरोत्स्यति॥
मनुष्याः सन्ति मिस्रीया ईश्वरा नहि सन्ति ते। ३
मांसमेव हयास्तेषाम् आत्मानो नहि सन्ति ते॥
हते तस्मात् परेशेन स्वहस्तस्य प्रसारणे।
स्खलिष्यत्युपकारी चोपकृतश्च पतिष्यति।
समवाप्स्यन्ति संहारम् एकदा सकलाश्च ते॥
मामुद्दिश्य कथामेताम् अब्रवीत् परमेश्वरः। ४
मृगेन्द्रो युवसिंहो वा गर्ज्जन् मेषे धृते यथा॥
स्वविरुद्धं समाहूतां दृष्ट्वा रक्षकसंहतिं।
न शब्दाच्छङ्कते तेषां कलहाच्च न सीदति॥
सेनाध्यक्षपरेशेन तथा सीयोनपर्व्वतं।
भूधरञ्चाधि तत्रत्यम् अवतीर्य्य प्रयोत्स्यते॥
स्वनीडं पक्षिणी यद्वत् डयमाना समन्ततः। ५
यिरूशालम्पुरीं तद्वत् सेनाध्यक्षः परेश्वरः।
परिवेष्टिष्यते सम्यग् वेष्टित्वा चोद्धरिष्यति।
उपस्थाय च कारुण्यात् तस्या रक्षां करिष्यति॥
इस्रायेलीयसन्ताना यमत्याक्षुः पराङ्मुखाः। ६
सुदूरं प्रगता यूयं पुनरायात तं प्रति॥
तदा युष्माकमेकैकः पापार्थं स्वकरैः कृताः। ७
स्वर्णरौप्यमयी मूर्त्ती र्गर्हित्वा दवयिष्यति॥
नरादन्यस्य खड्गेन तदाशूरः पतिष्यति। ८
मनुष्यादितरस्यासिस्तञ्च व्यापादयिष्यति॥
निस्त्रिंशाच्च जनास्तस्य करिष्यन्ति पलायनं।
भविष्यन्त्युत्तमास्तस्य योद्धारः करदायिनः॥

९ त्रासात् स परमेशस्य गिरेरग्रं गमिष्यति ।
तस्याध्यक्षा ध्वजं दृष्ट्वा भविष्यन्ति भयाकुलाः ॥
अग्निर्यस्यास्ति सीयोने चुल्ली च यिरूशालमे ।
परमेशेन तेनैव भारतीयं निगद्यते ॥

---

३२ द्वात्रिंशोऽध्यायः ।

१ ख्रीष्टीयराजत्वस्य मङ्गलकथनं ९ देशस्याधःपतनं पुनरुन्नतिश्च ।

१ धर्म्मार्थं पश्य राजत्वं महीपालः करिष्यति ।
न्यायार्थञ्च करिष्यन्ति शास्तारो देशशासनं ॥
२ नर एकश्च वात्यायाः काले सङ्गोपनस्थलं ।
धारासारस्य काले चाश्रयस्थानं भविष्यति ॥
प्रस्रवन्ति मरुस्थाने जलस्रोतांसि वा यथा ।
वृहच्छैलस्य वा छाया प्राप्ता निःस्नेहनीवृति ॥
३ दर्शकानाञ्च नेत्राणि प्राप्स्यन्ति क्षीणतां नहि ।
परिश्रोष्यति सूक्ष्मञ्च श्रोतॄणां श्रवणेन्द्रियं ॥
४ ज्ञानाय प्रतिभोत्स्यन्ते चञ्चलानां मनांस्यपि ।
स्खलद्वाक्यस्य जिह्वा च स्पष्टं वक्तुं त्वरिष्यते ॥
५ न च मूढो महात्मेति नाम्ना विख्यास्यते पुनः ।
न स्तोष्यन्ति वदान्यो ऽयमित्युक्त्वा कृपणं नराः ॥
६ मूढतां भाषते मूढश्चित्तं तस्यास्ति पापकृत् ।
अधर्म्मं कर्त्तुमिच्छुः स द्रोहं वक्तुं परेश्वरे ।
क्षुधार्त्तं क्षुधया हन्तुं पेयं हर्त्तुं तृषातुरात् ॥
७ कृपणस्याशया हिंस्राः स च मन्त्रयते छलं ।
दीनो यावद् वदेन्न्यायं तावद् दुःखितमानवान् ।
कृपणः स्वमृषावाक्यै र्विनाशयितुमिच्छति ॥
८ महात्मा किन्तु माहात्म्याज्जातां मन्त्रयते क्रियां ।
माहात्म्योत्पन्न आचारे स च पर्य्यवतिष्ठते ॥
९ हे निश्चिन्तास्त्रियो यूयं शृणुतोत्थाय मद्वचः ।
हे कन्या निर्भया यूयं मम गृह्णीत भारतीं ॥
१० गते वर्षाधिके काले यूयं भेष्यथ निर्भयाः ।

फलानां सञ्चयो यस्मात् तदा लोपमवाप्स्यति।
शस्यसंग्रहकालश्च पुन र्नैव भविष्यति॥
यूयं त्रस्यत निश्चिन्ता यूयं विभीत निर्भयाः। ११
वस्त्रं त्यजत नग्नाश्च कटौ बध्नीत कर्पटं॥
स्तनान् रम्यश्च केदारं फलिद्राक्षाश्च शोचत॥ १२
मद्देशीयन्नृणां भूमौ प्ररोक्ष्यन्ति हि कण्टकाः। १३
गोक्षुरा हर्षयुक्तायाः पुर्य्याः क्रीडागृहेषु च॥
प्रासादो भविता शून्य आकीर्णा त्यक्ष्यते पुरी। १४
सदुर्गमोफलं नित्यं गुहाद्वारं भविष्यति।
खराणां प्रमदस्थानं व्रजानां चरणस्थलं॥
शेषे किन्तूर्द्धतोऽस्मासु स्वयमात्मा निषेक्ष्यते। १५
तदानीञ्च मरुस्थानम् उद्यानं सम्भविष्यति।
उद्यानञ्चाटवीतुल्यं मनुष्यै र्गणयिष्यते॥
मरौ निवत्स्यति न्याय उद्याने चेशभक्तता॥ १६
ईश्वरभक्ततायाश्च कार्य्यं शान्ति र्भविष्यति। १७
फलं भक्तेश्च विश्रामो निर्भयत्वञ्च शाश्वतं॥
शान्तियुक्ते निवासे हि निर्भयेषु च वेश्मसु। १८
निःशङ्केष्वाश्रमेष्वेव निवत्स्यन्ति मम प्रजाः॥
अटव्यास्तु निपाताय शिलावृष्टि र्भविष्यति। १९
नतावस्थामवाप्नुञ्च नतीकारिष्यते पुरी॥
सर्व्वस्यां साम्बुभूमौ ये युष्माभि र्बीजमुप्यते। २०
प्रेष्य गोखरयोः पादान् यूयं धन्या भविष्यथ॥

---

३३ त्रयस्त्रिंशोऽध्यायः।

१ शत्रूणां भविष्यद्दण्डः १२ साधुलोकानां कल्याणञ्च।

धिक् त्वाम् अहृतवित्तो यो कुरुषे वित्तहारणं। १
परै र्न वञ्चितो यश्च कुरुषे परवञ्चनं॥
सिद्धवित्तापहारस्य वित्तं हारिष्यते तव।
समाप्तवञ्चनं त्वाञ्च वञ्चयिष्यन्ति मानवाः॥
परेशानुग्रहाणास्मान् त्वमस्माभिः प्रतीक्षितः। २

प्रतिप्रभातमस्माकं बाहुवत् त्वं भव स्वयं।
विपत्काले त्वमस्माकं परित्राता भव स्वयं॥
३ समारोहस्य शब्दाद्धि पलायन्ते विदेशिनः।
तवोत्थितिं समालोक्य विकीर्य्यन्ते ऽन्यजातयः॥
४ द्रव्याणि संहरिष्यन्ते युष्माकं शलभैरिव।
नरैस्तान्याक्रमिष्यन्ते घस्मरैः शूककीटवत्॥
५ ऊर्द्ध्वस्थाननिवासी तु परमेश्वर उन्नतः।
स एव न्यायधर्म्माभ्यां सीयोनं पूरयिष्यति॥
६ स च तावककालस्य स्थैर्य्यहेतु र्भविष्यति।
परित्राणनिधिश्चापि बुद्धे र्ज्ञानस्य चाकरः।
परमेशस्य या भक्ति र्धनशाला हि सा तव॥
७ तेषां वीरै र्वहिः पश्य हाहाकार उदीर्य्यते।
तीव्रं सन्ध्यर्थिभि र्दूतैः क्रन्दनञ्च विधीयते॥
८ शून्यानि सन्ति वर्त्मानि पथिका विरमन्ति च।
सन्धिलङ्घी पुरी र्निन्दन् तृणाय मन्यते नरं॥
९ जीर्य्यन् शुष्यति देशश्च लिवानोन् लज्जते क्षयात्।
शारोणं मरुणा तुल्यं स्थाने बाशनकर्म्मिले॥
१० उत्थास्याम्यधुनैवाहमिति ब्रूते परेश्वरः।
अधुना शिर उत्थाप्य भविष्यामि समुन्नतः॥
११ धृतगर्भास्तृणै र्यूयं नालानेव प्रसोष्यथ।
युष्मान् स्वकीयनिश्वासो वह्निवच्च प्रधक्ष्यति॥
१२ जातयश्च भविष्यन्ति कर्करापाकसन्निभाः।
छिन्नकण्टकसङ्काशा ज्वलिष्यन्त्यनलेन वा॥
१३ यन्मयाकारि तच्छ्रोतुं दूरस्था यूयमर्हथ।
यूयञ्च हे समीपस्था बुध्यध्वं मत्पराक्रमं॥
१४ पापास्त्रस्यन्ति सीयोने कम्पो गृह्णाति पामरान्।
संहारकानले वस्तुं को ऽस्मत्तुल्यः क्षमो भवेत्।
वस्तुं वानन्तदाहेषु को ऽस्मत्तुल्यः क्षमो भवेत्॥
१५ यो नरः कुरुते धर्म्मं सारल्येन च भाषते।
जनपीडनजं लाभं ग्रहीतुञ्च विगर्हते॥
अपसारयति क्षिप्रम् उत्कोचस्पर्शनात् करं।

हत्याया मन्त्रणां श्रृण्वन् स्वीयकर्णौ रुणद्धि च ।
अनिच्छुः कुक्रियां द्रष्टुं स्वनेत्रे च निमीलति ॥
वत्स्यत्यूर्द्ध्वं मनुष्यः स शैलदुर्गे कृताश्रयः । १६
अन्नदानं कृतं तस्मै तोयदानञ्च नैत्यिकं ॥
द्रक्ष्यतस्तव नेत्रे च स्वसौन्दर्य्यान्वितं नृपं । १७
ताभ्याञ्चालोकयिष्यन्ते नीवृतो दूरवर्त्तिनः ॥
पूर्वत्रासस्य चिन्ताञ्च तव चित्तं करिष्यति । १८
लिपिकर्त्ताधुना कुत्र कुत्र वा करमापकः ।
दुर्गाणां गणनाकारी लेखकः कुत्र वा गतः ॥
अस्पष्टोच्चारणाद् येषां वचः श्रोतुं न शक्यते । १९
येषां स्खलितजिह्वानां कथा बोद्धुं न शक्यते ।
त्वं तान् निर्विनयान् लोकान् नैव वीक्षिष्यसे तदा ॥
समालोकय सीयोनम् अस्माकं पर्व्वणां पुरीं । २०
द्रक्ष्यसि स्वीयनेत्राभ्यां त्वं यिरूशालमं तदा ।
शङ्काहीनमिवावासं निश्चलं पटवेश्म वा ॥
न समुत्पाटयिष्यन्ते कीलास्तस्य कदाचन ।
नैवापसारयिष्यन्ते सकलास्तस्य रज्जवः ॥
अस्मदर्थं प्रतापी तु स्वयं तत्र परेश्वरः । २१
नदीनां भविता स्थानं विस्तीर्णस्रोतसां स्थलं ॥
चालिता बहुदण्डैस्तु नौका तत्र न यास्यति ।
प्रताप्यर्णवयानं वा तत् स्थानं न तरीष्यति ॥
परेशः प्राड्विवाको नः परेशो विधिदायकः । २२
परेशश्चास्ति राजा नः स चास्मान् तारयिष्यति ॥
हे शत्रो शिथिलीभूताः पश्य त्वदीयरज्जवः । २३
न धरन्ति स्थिरं कूपं नौवस्त्रं वा सुविस्तृतं ॥
ततो विभक्ष्यते लोकै र्लुण्ठितं त्वन्महाधनं ।
अपहारिष्यते वित्तं तव पङ्गुनरैरपि ॥
अहं रोगीति वाक्यञ्च तन्निवासी न वक्ष्यति । २४
पापमुक्ता यतः सन्ति मानवास्तन्निवासिनः ॥

---

३४ चतुस्त्रिंशोऽध्यायः।

वैरिणां भाविदण्डः।

१ हे विदेशिनरा यूयं संश्रोतुमुपतिष्ठत।
हे नराः सर्व्वजातीया युष्माभिरवधीयतां॥
मही सपूरकैः सार्द्धं वाक्यमेतत् शृणोतु हि।
जगता जगदुत्पन्नैः सकलैश्च निशम्यतां॥
२ यतः क्रोधः परेशस्य वर्त्तते सर्व्वदेशिषु।
तेषां निखिलवाहिन्यां तस्य रोषश्च वर्त्तते।
वर्ज्जनीयांश्च तान् कृत्वा स वधायार्पयिष्यति॥
३ स्खलित्वा निपतिष्यन्ति तेषामस्त्राहता जनाः।
मृतानां कुणपेभ्यश्च दुर्गन्धो निर्गमिष्यति।
द्रवीभूता भविष्यन्ति तेषां रक्तेन भूधराः॥
४ विलयं यास्यति व्योम्नः कृत्स्ना नक्षत्रवाहिनी।
कुञ्चितो भविताकाशो वर्त्तुलीकृतलेख्यवत्॥
द्राक्षातः शीर्णपत्राणि शुष्कं वोडुम्बरात् फलं।
यथा तद्वत् खतः कृत्स्ना पतिष्यत्युडुवाहिनी॥
५ मम यश्चन्द्रहासः स स्वर्गे तीक्ष्णीकृतो ऽभवत्।
वर्ज्जनीयानकार्षं यान् मनुष्येष्वेव तेषु सः।
इदोमाभिधदेशे च विचाराय पतिष्यति॥
६ परमेशस्य निस्त्रिंशः परिपूर्णो ऽस्ति शोणितैः।
पूर्णः स मेषवत्सानां छागानाञ्चापि शोणितैः।
मेदसा च सुपीनः स मेषाणामन्त्रमेदसा॥
परेशस्य कृते यज्ञो वस्रायां सम्भविष्यति।
बलीनां बहुसङ्ख्यानां हत्या चेदोमनीवृति॥
७ तैः सार्द्धं निपतिष्यन्ति खड्गा गावो वृषैः सह।
तेषाञ्च शोणितै र्भूमिः परिषिक्ता भविष्यति।
रेणुश्च मेदसा तेषां समवाप्स्यति पीनतां॥
८ प्रतीकारदिनं तद्धि परेशस्य भविष्यति।
सीयोनीयविवादे स फलदानस्य वत्सरः॥
९ तत्रत्यस्रोतसामापो भविष्यन्ति शिलाजतु।
तस्य देशस्य धूलिश्च गन्धकाश्मा भविष्यति।

भविष्यति च तत्रत्या भूमि र्ज्वलच्छिलाजतु॥
न दिवा न क्षपायां वा सा निर्व्वाणमवाप्स्यति। १०
यावदनन्तकालञ्च धूमस्तस्या उदेष्यति॥
शुष्कः स्थास्यति देशः स आपौरुषपरम्परं।
न कदाचन कश्चित् तं पान्थो वातिक्रमिष्यति॥
टिट्टिभशल्यसस्तस्य भविष्यन्त्यधिकारिणः। ११
पेचकै र्द्रोणकाकैश्च तत्र वासः करिष्यते॥
वितनिष्यति तत्रैव शून्यतां मानरज्जुवत्।
प्रयोक्ष्यते च संक्षोभं लम्बवत् परमेश्वरः॥
कुलीनाः कुत्र नैको ऽपि राज्यादानाय विद्यते। १२
अध्यक्षास्तस्य यावन्तः सकला नास्तितां गताः॥
कण्टकानां वनं तस्य प्रासादेषूद्भविष्यति। १३
गोक्षुराः पीतपर्ण्यश्च प्ररोक्ष्यन्त्युच्चभित्तिषु॥
स देशः पन्नगानाञ्च वासस्थानं भविष्यति।
विहारञ्च करिष्यन्ति सुखं तत्रोष्ट्रपक्षिणः॥
मरुस्थजन्तुभिः सार्द्धं मिलिष्यन्ति च जम्बुकाः। १४
प्राणिनो दीर्घलोमान आह्वास्यन्ति परस्परं॥
आश्रयं केवलं तत्र लप्स्यते च निशाचरः।
विश्रामसेवनार्थञ्च तत्रैव प्राप्स्यति स्थलं॥
फणिनी च विलं प्राप्य तत्राण्डानि प्रसोष्यते। १५
शिशूंश्च तत उत्पाद्य स्वच्छायायां भरिष्यति।
सभां तत्र करिष्यन्ति गृध्रा एव ससङ्गिनः॥
ग्रन्थं दृष्ट्वा परेशस्य युष्माभिः पठ्यतामिदं। १६
अभावो मध्य एतेषां नैकस्यापि भविष्यति।
एतेषां मध्य एकैकः स्वसखायमवाप्स्यति॥
आदेशो ऽयं परेशस्य मुखतो निर्गतो यतः।
तस्यैवात्मा स्वयं तेषां सङ्ग्रहञ्च करिष्यति॥
तेनैव गुटिकापातः कृते तेषामकारि हि। १७
तेनैव रज्जुहस्तेन दायभागो व्यधायि च॥
नित्यं ते तस्य देशस्य भविष्यन्त्यधिकारिणः।
निवत्स्यन्ति च तन्मध्य आपौरुषपरम्परं॥

३५ पञ्चत्रिंशोऽध्यायः ।

खीष्टीयराजत्वस्योत्तमत्वं सुखञ्च ।

१ प्रान्तरं शुष्कभूमिश्च महानन्दमवाप्स्यतः ।
उल्लसिष्यति धन्वा च प्रफुल्लः पद्मिनी यथा ॥
२ लप्स्यते स प्रफल्लत्वम् उल्लासाच्च प्रगास्यति ।
लिवानोनगिरेस्तेजस्तस्मै दायिष्यते यतः ।
कर्म्मिल्शारणयोः शोभा तस्मिन् समर्पयिष्यते ॥
परमेशस्य तेजश्च तत्रत्यै र्द्रक्ष्यते नरैः ।
अस्मदीयेश्वरस्यैव शोभा वीक्षिष्यते च तैः ॥
३ शिथिलौ यौ करौ यूयं तौ दृढीकर्त्तुमर्हथ ।
स्खलिते जानुनी चापि सबलीकर्त्तुमर्हथ ॥
४ ब्रूत चोन्मनसो लोकान् वीरयध्वं स्त निर्भयाः ।
प्रतिभाति समीपस्थः स्वयं युष्माकमीश्वरः ॥
समायाति प्रतीकार उचितं फलमीश्वरात् ।
स स्वयं समुपस्थाय युष्मान् निस्तारयिष्यति ॥
५ नेत्राण्यन्धमनुष्याणां यास्यन्त्युन्मीलनं तदा ।
वधिराणां नृणां कर्णा भविष्यन्ति निरर्गलाः ॥
६ मृगवत् स्रोष्यते खञ्जो जिह्वा मूकस्य गास्यति ।
स्रोष्यन्ति प्रान्तरे चापः सरितश्च मरुस्थले ॥
७ मृगतृट् भविता वापी धन्वा चोत्समयस्तदा ।
नागानां वसतिस्थाने शयनार्थं निषेविते ।
धमनादितृणाकीर्णो गोप्रचारो भविष्यति ॥
८ भविता तत्र वर्त्मैकं ख्यास्यते पूतवर्त्म तत् ।
न यास्यत्यशुचिस्तेन शुचीनां तद् भविष्यति ।
यः पान्थो मन्दधीः सोऽपि नैव भ्रान्तो भविष्यति ॥
९ तत्र न स्थास्यते सिंहो हिंस्रजन्तु र्न यास्यति ।
नैको ऽपि प्राप्स्यते तत्र परिक्रीता हि यात्रिकाः ॥
१० नराः प्रत्यागमिष्यन्ति परमेशेन मोचिताः ।
गीत्या यास्यन्ति सीयोनं तेऽक्षयानन्दमौलयः ।
प्राप्स्यतः सुखहर्षौ तान् क्लेशार्त्ती चापयास्यतः ॥

३६ षट्त्रिंशोऽध्यायः।

१ यिरूशालमं प्रति सन्हेरीबस्याक्रमणं ११ रब्शाके र्निन्दाकथनं हिष्कियं प्रति तत्प्रकाशनञ्च।

हिष्कियराजस्य चतुर्दशे वत्सरेऽश्शूरीयः सन्हेरीबो राजा यिहू- १
दायाः प्राचीरवेष्टितानां सर्व्वनगराणां विरुद्धम् आगत्य तानि वशी-
चकार। अनन्तरम् अश्शूरीयो राजा बहुभिः सैन्यसामन्तैः सार्द्धं २
रब्शाकिं लाखीश्नगराद् यिरूशालमे हिष्कियस्य नृपस्य समीपं
प्रेषयामास; स चोर्द्धस्थितायाः पुष्करिण्याः प्रणाल्यां रजकक्षेत्रस्य
मार्गे ऽवस्थितवान्। ततो हिल्कियस्य पुत्र इलियाकीमनामा राज- ३
गृहाध्यक्षः शिब्नो लेखक आसाफस्य पुत्रो योयाहनामा पुरावृत्त-
रचकश्च तं साक्षात् कर्त्तुं वहि र्जग्मुः। ततो रब्शाकिस्तान् जगाद, ४
यूयं हिष्कियम् इमां कथां भाषध्वम्, अश्शूरीयो भूपति र्महाराजः
कथयति, त्वं यं विश्वासं करोषि स कीदृशो विश्वासः? अहं ब्रवीमि ५
संग्रामाय या मन्त्रणा यच्च बलं तत् शब्दमात्रं। अधुना त्वं कस्मिन्
विश्वस्य मदीयाधीनतां त्यक्तवान् असि? पश्य त्वं तस्यां भग्ननलरूपायां ६
यष्ट्याम् अर्थात् मिसरि विश्वसिषि; किन्तु यः कश्चित् ताम् आलम्बते
तस्य हस्तस्तया विद्धः क्षतयुक्तश्च भवति, स्वीयशरणागतान् सर्व्वान्
प्रति मिस्रीयः फिरौन् राजा तादृशः। त्वं यदि मां वदसि वयं स्वप्रभौ ७
परमेश्वरे विश्वसिमस्तर्हि स किमसौ नहि यस्य प्रांशुस्थानानि वेदीश्च
दूरयित्वा हिष्कियो यिहूदीयान् यिरूशालमनिवासिनश्च मनुष्यान्
भाषितवान् यूयं केवलम् एतस्या वेद्याः सम्मुखे भजध्वं? इदानीं त्वं ८
मम प्रभुनाश्शूरीयराजेन सह पणं कुरु; त्वं यद्यारोहिलोकान् प्राप्तुं
शक्नुयास्तर्हि द्वे सहस्रे हयानहं तुभ्यं दास्यामि। तस्मिन् असाध्ये सति ९
मम प्रभोरतिक्षुद्राणां भृत्यानां मध्य एकं सेनापतिमपि कथं जेष्यसि?
किन्तु त्वं रथानां हयानाञ्च कृते मिसरि विश्वसिषि। परमेश्वरीयाज्ञां १०
विना देशमिमम् उच्छेत्तुं किमहम् इदानीमागमं? त्वं तं देशं गत्वा
विनाशयेति परमेश्वरेणैवाहम् आज्ञापितः।

तत इलियाकीमः शिब्नो योयाहश्च रब्शाकये कथयामासुः, प्रार्थ- ११
यामहे वयम्, अरामीयभाषया निजदासान् सम्भाषतां यतो वयं तां
बुध्यामहे, प्राचीरोपरि स्थितानां लोकानां कर्णगोचरेऽस्मान् यिहूदि-
भाषया न सम्भाषतां। रब्शाकिस्तान् प्रत्युवाच, मम प्रभुः किम् एत- १२

द्वाक्यकथनार्थं केवलं तव स्वामिनं त्वाञ्च प्रति मां प्रेषितवान्? अमी ये
लोका युष्माभिः साद्धं स्वां स्वां विष्ठां भोक्तुं स्वं स्वं मूत्रं पातुञ्च प्राचीरो-
१३ पविष्टाः सन्ति तेषां सर्व्वेषामपि सन्निधिं किमहं न प्रेरितः? तदन-
न्तरं रब्शाकिरुत्तिष्ठन् उच्चकै र्यिहूदिभाषया वदितुम् आरब्धवान्,
स जगाद, यूयं महाराजस्यार्थाद् अशूरीयस्य नृपतेः कथां शृणुत।
१४ राजा कथितवान्, हिष्कियो युष्मान् न प्रवञ्चयतु, यतो मम कराद्
१५ युष्मान् रक्षितुं स न शक्नोति। तथा परमेश्वरो ऽस्मान् अवश्यम्
उद्धरिष्यति, नगरमिदं कदापि नाश्शूरीयस्य राज्ञो हस्ते समर्पयिष्यत
१६ इति कथयित्वा हिष्कियो युष्मान् परमेश्वरे न विश्वासयतु। हिष्कियस्य
कथां मा शृणुत, यतो ऽश्शूरीयो राजा कथितवान्, यूयं मया सन्धाय
मदन्तिकमायात, युष्माकम् एकैको जनश्च स्वानि स्वानि द्राक्षाफलान्यु-
१७ डुम्बरफलानि च भक्षतु स्वस्वपुष्करिण्या जलञ्च पिबतु। पश्चादहम्
आगत्य युष्मद्देशवत् शस्यं द्राक्षारसो भक्ष्यं द्राक्षाक्षेत्रञ्चैतै र्युक्तं कमपि
१८ देशं युष्मान् नेष्यामि। परमेश्वरो ऽस्मान् उद्धरिष्यतीति वाक्येन हिष्कियो
युष्मान् न वञ्चयतु। अन्यदेशीयानां देवा अश्शूरीयस्य नृपते र्हस्तात्
१९ किं स्वं स्वं देशम् अरक्षन्? हमातार्पदीया देवाः कुत्र? सिफर्व्वयिम-
देशीया देवाः कुत्र? देवाः किं मदीयहस्तात् शोमिरोणम् अरक्षन्?
२० यद्येतेषां देशानां देवानां मध्ये को ऽपि मम हस्तात् स्वदेशं रक्षितुं
नाशक्नोत् तर्हि यिहोवा मम हस्तात् किं यिरूशालमं मोचयिष्यति?
किन्तु लोका निरुत्तराः सन्तो ऽतिष्ठन् एकस्या अपि वाचः प्रत्युत्तरं
२१ नोक्तवन्तः, यतस्तमुत्तरं मा ब्रूतेति ते राज्ञा प्रागाज्ञापिताः। अनन्तरं
२२ हिल्कियस्य पुत्र इलियाकीमो राजगृहाधिपतिः शिब्नो लेखक आसा-
फस्य पुत्रो योयाह इतिहासरचयिता च स्ववस्त्राणि छित्त्वा हिष्कियस्य
समीपम् आगत्य रब्शाके र्वाक्यानि तं ज्ञापयामासुः।

---

३७ सप्तत्रिंशोऽध्यायः।

१ यिशायियं प्रति हिष्कियस्य लोकप्रेरणं ८ हिष्कियं प्रति यिशायियस्य प्रत्युत्तरं १४ मन्दिरे हिष्कियस्य प्रार्थनं २१ सन्हेरीबम् अधि यिशायियस्य भविष्यद्वाक्यं ३५ सन्हेरीबस्य तदीयसैन्यानाञ्च विनाशनञ्च।

१ राजा हिष्कियस्तानि वाक्यानि श्रुत्वा निजवस्त्राणि छित्त्वा शाण-
२ वसनं परिधाय च परमेश्वरस्य मन्दिरं जगाम। अपरं परिहितशाण-

वसनान् राजगृहाधिपम् इलियाकीमं शिबूनं लेखकं प्राचीनयाजकांश्चा-
मोषसुतस्य भविष्यद्वक्तु यिशायियस्य समीपं प्रेषयामास। ततस्ते तं २
जगदुः, हिष्किया ऽकथयत्, अद्यतनं दिनं क्लेशभर्त्सनापमानानां दिनं,
यतो बालकप्रसवस्य समय उपस्थितः किन्तु प्रसवाय शक्ति र्नास्ति। रब्- ४
शाकेः प्रभुरश्शूरीयो नृपतिरमरस्येश्वरस्य निन्दार्थं यं रब्शाकिं प्रेषित-
वान् तस्य वाक्यानि तव प्रभुना परमेश्वरेण श्रूयन्तां, तव प्रभुः परमेश-
स्तानि श्रुत्वा समुचितं फलं तस्मै ददातु; अतएव त्वम् अवशिष्टलोकानां
मङ्गलं प्रार्थयस्व। इत्थं हिष्कियस्य नृपस्य दासगणे यिशायियस्य ५
समीपमुपस्थिते सति यिशायियस्तान् अवदत्, युष्माकं स्वामिनं वदत, ६
परमेश्वरो ऽकथयत्, त्वं यानि वचांस्यश्रौषी र्यैरश्शूरीयस्य राज्ञो दासा
माम् अनिन्दन् तेभ्यो मा भैषीः। पश्य मया तन्मध्यम् एक आत्मा ७
प्रवेशयिष्यते, स काञ्चित् वार्त्तां श्रुत्वा स्वं देशं परावृत्य यास्यति ततो
ऽहं तं स्वदेशे खड्गेन नाशयिष्यामि।

ततः परम् अश्शूरीयो राजा लाखीशनगराद् प्रस्थितवान् इति वार्त्तां ८
निशम्य रब्शाकिः परावृत्य लिब्नानगरम् अवरुन्धता तेन राज्ञा सार्द्धं
मिलितवान्। तदानीं कूशदेशीयो राजा तिर्हकस्त्वया सह संग्रामयि- ९
तुम् आगच्छति वार्त्तामेतां स श्रुतवान्, ततः स हिष्कियस्य समीपं
दूतान् प्रहित्य कथितवान्, यूयं यिहूदीयं हिष्कियं नृपं वदत, यिरूशा- १०
लमम् अशूरीयराजस्य करे न समर्पयिष्यत इति वाचा तव विश्वासभूमि-
रीश्वरस्त्वां न वञ्चयतु। पश्य सर्व्वदेशानां विनाशायाशूरीयराजै र्यद्यद् ११
अकारि तत् त्वं श्रुतवान् अतस्त्वं कथम् उद्धरिष्यसे? मम पूर्व्वपुरुषै र्वि- १२
नाशितानां गोषणहारणरेत्सफदेशीयानां तिलसरनिवास्एदनवंशीया-
नाञ्च देवाः किं तानुदधरन्? हमातस्य राजा कुत्र? अर्पदस्य राजा १३
च कुत्र? सिफर्व्वयिमनगरस्य हेनाया अव्वायाश्च राजानो वा क्क?

ततो हिष्कियो दूतानां हस्तात् तत् पत्रं गृहीत्वा पपाठ; पश्चात् १४
परमेश्वरस्य मन्दिरं गत्वा परमेश्वरस्य सम्मुखे तद् विस्तारयामास।
तदा हिष्कियः परमेश्वराय प्रार्थनामेतां न्यवेदयत्, हे किरूवयो मध्य- १५
वासिन् इस्रायेल ईश्वर सेनाध्यक्ष यिहोवाः केवलस्त्वमेव पृथिव्याः १६
सर्व्वराज्यानामीश्वरः, स्वर्गः पृथिवी च त्वया सृष्टजाते। हे परमेश्वर १७
कर्णौ निधाय शृणु, हे परमेश्वर स्वचक्षुषी उन्मील्यावलोकय। अमरे- १८
श्वरस्य निन्दार्थं सन्हेरीबेन या याः कथाः प्रहितास्ताः शृणु। हे १९

परमेश्वर, सत्यम् अशूरीया राजानः सर्व्वजातीयान् तेषां देशांश्च व्यना-
शयन् तेषां देवांश्चाग्नौ न्यक्षिपन् यतस्ते नेश्वराः किन्तु मानुषाणां हस्त-
कृतानि काष्ठमयानि प्रस्तरमयाणि च वस्तूनि, तस्मात् ते तान् नाशित-
२० वन्तः। हे अस्माकं प्रभो परमेश्वर साम्प्रतं त्वं तस्य हस्ताद् अस्मान्
उद्धर, तेन हे यिहोवास्त्वमेवाद्वितीय ईश्वरो ऽसीति पृथिव्याः सर्व्व-
राष्ट्रीया जना ज्ञास्यन्ति।

२१ ततः परम् आमोषस्य पुत्रो यिशायियो हिष्कियं प्रति कथामेतां
प्रेषयामास; इस्रायेलः प्रभुः परमेश्वर इमां कथां कथयति, त्वम्
अशूरीयं सन्हेरीबं नृपतिमधि मह्यं यन् न्यवेदयस्तन्मयाश्रावि।
२२ तमधि परमेश्वरः कथामेतां कथयति।

सीयोनाख्या कुमारी त्वां विहसन्त्यवमन्यते।
तव पश्चाद् यिरूशालम् कन्या धूनोति मस्तकं॥
२३ कस्य त्वं निन्दनं कस्य तर्ज्जनं वा विधत्तवान्।
कमुद्दिश्योच्चशब्दस्त्वम् उच्चदृष्टिश्च संस्थितः।
इस्रायेलः पवित्रो राट् अवज्ञातो ऽभवत् त्वया॥
२४ प्रभुमेव स्वदासैस्त्वं निन्दन्नेतदभाषथाः।
स्वरथानां समूहेन गिरीणामुच्छ्रितां शिखां।
लिबानोनस्य दुर्गम्यं स्थलञ्चारूढवानहं॥
प्रांशूंस्तस्यैरसान् छेत्तुं देवदारुवराणि च।
अग्रमुच्चतमं तस्य रम्योद्यानञ्च यास्यहं॥
२५ खनन् पिबामि तोयानि किञ्च पादतलैर्मम।
गच्छन्ति सकला नद्यो मिस्रीयाः शुष्कतामिति॥
२६ किं नाश्रावि त्वया त्वेतत् मयेदं प्राक् निरूपितं।
प्राचीनेष्वेव कालेषु कल्पनेयं मया कृता॥
अधुना साध्यते सा च त्वं जीर्णोपलराशिवत्।
पुरीणां दृढदुर्गाणां ध्वंसनार्थं नियोजितः॥
२७ श्लथहस्तास्ततस्तासां जनास्त्रासत्रपान्विताः।
याताः क्षेत्रस्थघासेन हरिच्छष्पेण वा समाः।
तृणै र्वा गृहपृष्ठस्थै र्बालशस्यवनेन वा॥
२८ जाने ऽहन्तूपवेशं ते जाने निष्क्रमणं तव।
तव प्रवेशनं जाने कोपोद्रेकञ्च मां प्रति॥

यतस्त्वं क्रुद्धवान् मह्यं त्वद्गर्व्वश्च श्रुतो मया। २९
लोहग्रन्थिं मया तस्मात् त्वन्नासायां प्रदास्यते॥
त्वदीयाधरयोश्चापि खलीनश्चार्पयिष्यते।
येन पथा त्वमायातः पुनस्तेनापनेष्यसे॥
हे हिष्किय त्वदर्थन्तु चिह्नमेतद् भविष्यति। ३०
यच्छस्यं स्वयमुत्पन्नम् अस्मिन् वर्षे तदत्स्यते।
मनुष्यैस्तत उत्पन्नं शस्यञ्चागामिवत्सरे॥
तृतीये वत्सरे तूप्त्वा युष्माभिः शस्यकर्त्तनं।
द्राक्षाक्षेत्राणि कृत्वा च फलभोगः करिष्यते॥
यिहूदा अवशिष्टो यो वंशो वृद्धिमवाप्य सः। ३१
भविता बद्धमूलो ऽध उपरिष्टात् फलप्रदः॥
यिरूशालमतः शेष एक उत्पत्स्यते यतः। ३२
रक्षाप्राप्तजनानाञ्च श्रेणी सीयोनपर्व्वतात्।
सेनाध्यक्षपरेशस्यानुरागात् तत् प्रसेत्स्यति॥
अशूरीयन्टपश्चाधि ब्रूते तस्मात् परेश्वरः। ३३
नैव प्रवेक्ष्यते तेन नगरीयं कथञ्चन॥
वाणो न क्षेप्स्यते तत्र चर्म्म न दर्शयिष्यते।
नैव तस्या विरुद्धं वा तेन स्तूपः करिष्यते॥
येन पथा स आयातस्तेनैवापगमिष्यति। ३४
पुरीं नावेक्ष्यतीमां स इति ब्रूते परेश्वरः॥
अस्याः पुर्य्याश्च रक्षायै वेष्टयिष्यामि तामहं। ३५
मदर्थं स्वीयदासस्य दायूदश्चानुरोधतः॥

अनन्तरं परमेश्वरस्य दूतो ऽशूरीयाणां शिविरं गत्वा तेषां पञ्चा- ३६
शीतिसहस्राधिकलक्षं लोकान् व्यनाशयत्; ततो ऽवशिष्टा लोकाः
प्रत्यूष उत्थाय तान् सकलान् मृतानपश्यन्। अत एवाशूरीयो राजा ३७
सन्हेरीबः प्रस्थाय निनिवीनगरं प्रत्यागत्य न्यवसत्। पश्चात् स निष्रोक- ३८
नाम्न इष्टदेवस्य मन्दिरे पूजयति तदानीम् अद्रम्मेलकशरेत्सरनामकौ
तदीयपुत्रौ खड्गाभ्यां तं नाशयित्वारारटदेशं प्रति पलायेतां; तत एष-
र्हद्दोननामा तस्यान्यः पुत्रस्तस्य पदे राजा बभूव।

---

३८ अष्टत्रिंशोऽध्यायः।

१ मृत्यो र्वार्त्तायां श्रुतायां सत्यां प्रार्थनया हिष्कियस्यायुषो वर्द्धनं तस्मै चिह्नदानञ्च
९ तन्निमित्तं गीतेन हिष्कियस्य धन्यवदनञ्च।

१ तदानीं हिष्कियस्य मारके व्याधौ जात आमोषस्य पुत्रो यिशायियो
भविष्यद्वक्ता तमुपागत्य कथयामास, परमेश्वरः कथयति, त्वं स्वपरि-
२ वारायादेशं विधत्स्व, यतस्त्वं मरिष्यसि न जीविष्यसि। ततो हिष्कियो
३ भित्तेः सम्मुखीभूय परमेश्वरं प्रति संप्रार्थ्य कथयामास, हे परमेश्वर,
विनयेऽहं सत्यतया सरलान्तःकरणेन च त्वत्समक्षं यादृशमहमाचरं,
तव दृष्टौ च यादृशं सत्कर्म्माकरवं, तत् स्मर। ततो हिष्कियोऽतीव
क्रन्दितुमारेभे।

४ तदा परमेश्वरस्य वाक्यमिदं यिशायियमुपतस्थौ, त्वं गत्वा हिष्कियं
५ वद, तव पूर्व्वपुरुषस्य दायूदः प्रभुः परमेश्वर इति कथयति, मया
तव प्रार्थनमश्रावि तव नेत्राम्बु चादर्शि, पश्याहं तवायुः पञ्चदश-
६ वत्सरान् वर्द्धयिष्यामि। किञ्चाशूरीयराजस्य हस्तात् त्वाम् एतन्नगरञ्च
७ रक्षिष्यामि नगरस्यैतस्य फलकस्वरूपश्च भविष्यामि। परमेश्वरेण
स्वोक्तमेतद्वचनं सफलं कारिष्यते तस्यैतच्चिह्नं परमेश्वरात् त्वं प्राप्स्यसि।
८ पश्य सूर्य्यातपे स्थित आहसस्य कालबोधकयन्त्रे छाया यानंशान्
अवातरत्, तेषां मध्ये दशांशान् यावत् तां पुनः परावर्त्तयिष्यामि।
अनन्तरं सूर्य्यकिरणः कालबोधकयन्त्रे यान् अंशान् अवतीर्ण आसीत्,
तेषां मध्ये दशांशान् पुनः परावृत्ते।

९ व्याधितस्य यिहूदीयराजस्य हिष्कियस्य व्याधेः स्वास्थ्यप्राप्तौ लिपिरियं।

१० मयोक्तमुच्चतां प्राप्ते मामकीनायुषोऽयने।
प्रेतलोकस्य यद् द्वारं प्रवेष्टव्यं मया हि तत्।
उद्वृत्तं वत्सराणां मे मत्तश्चापहरिष्यते॥
११ मयोक्तं जीवतां भूमौ न द्रक्ष्यामि परेश्वरं।
जगन्निवासिभिः सार्द्धं न वीक्षिष्ये पुन र्नरान्॥
१२ समुत्पाटितकीलञ्च मामकीननिवेशनं।
मत्तोऽपसार्य्यते दूरं मेषरक्षकदूष्यवत्॥
सदृशस्तन्तुवायेन निजायुः सञ्छिनद्म्यहं।
यथा दशासु वस्त्रञ्च स कर्त्तिष्यति मां तथा।
अहोरात्रस्य मध्ये च सः ममान्तं विधास्यति॥

मत्वाहं सिंहतुल्यं तम् उषां यावदचिन्तयं। १३
मदीयास्थीनि सर्व्वाणि स प्रभंक्ष्यति सिंहवत्।
अहोरात्रस्य मध्ये च स ममान्तं विधास्यति॥
सारसो लोहपृष्ठो वा यथा कूजाम्यहं तथा। १४
कपोतस्य यथा तद्वद् ईरयामि कलध्वनिं॥
नेत्रे निस्तेजसी जाते ऊर्द्धदृष्टेः सदा मम।
हे परेश्वर पीड्ये ऽहं मम त्वं प्रतिभू र्भव॥
किं वदेयं प्रतिश्रुत्य तेन कार्य्यमकारि मे। १५
मनस्तापात्तु नम्रो ऽहं चरिष्याम्यखिलाः समाः॥
एतादृशप्रसादेन नरा जीवन्ति हे प्रभो। १६
सर्व्वथा केवलं तेन मदीयात्मा च जीवति।
बलं दास्यसि मह्यं त्वं त्वञ्च दास्यसि जीवनं॥
शान्तये पश्य तीव्रः स मनस्तापो ऽभवन्मम। १७
त्वया प्रीत्वा मम प्राणा उद्धृता नाशगर्त्ततः।
सकला अपराधा मे पृष्ठतश्च कृतास्त्वया॥
न स्तुयात् परलोकस्त्वां मृत्युस्त्वाञ्च न कीर्त्तयेत्। १८
त्वत्सत्यं न प्रतीक्षेरन् जना गर्त्तावरोहिणः॥
जीवता जीवतैव त्वं स्तूयसे ऽद्य मया यथा। १९
जनकाः स्वीयसन्तानान् त्वत्सत्यं ज्ञापयन्ति च॥
परमेशो मम त्राता यावज्जीवं ततो ऽन्वहं। २०
वीणया मम गीतानि गास्यामस्तस्य मन्दिरे॥

यिशायियो जगाद, जनाश्चूर्णितोडुम्बरफलपिण्डमादाय तस्य स्फोट- २१
कोपरि म्रदून्तु, तेन स जीविष्यति।

हिष्कियश्च पप्रच्छ, परमेश्वरस्य मन्दिरमहं यद् गमिष्यामि तस्य २२
किं चिह्नम्?

---

३९ ऊनचत्वारिंशोऽध्यायः।

१ हिष्कियस्याभिमानः २ तस्य देशस्य भाविदण्डश्च।

तस्मिन् काले वलदनस्य पुत्रो मिरोदकवलदननामा बाबिलीयो १
राजा हिष्कियस्य पीडायाः स्वास्थ्यप्राप्तेश्च वार्त्तां श्रुत्वा दूतैस्तस्य समीपं
पत्राण्युपायनञ्च प्रेषयामास। ततो हिष्कियस्तेषु हर्षित्वा निजभाण्डागा- २

राणि रजतसुवर्णानि सुगन्धिद्रव्याणि बहुमूल्यतैलानि निजास्त्रागाराणि
स्वकोषेषु स्थितानि सकलवस्तूनि च दर्शयामास। हिष्कियेन तेभ्यो यन्न
दर्शितं तादृशं किमपि वस्तु तस्य निवेशने कृत्स्ने राष्ट्रे च नासीत्।
३ अनन्तरं भविष्यद्वादी यिशायियो नरपतिं हिष्कियम् उपागत्य
पप्रच्छ, ते मनुजाः किमगदन्? ते च कस्मात् स्थानात् तव समीपम्
आगच्छन्? ततो हिष्कियो गदितवान्, एते दूरदेशाद् बाबिलान्मम
समीपम् आगच्छन्। स पप्रच्छ, एते तव निवेशने किं किम् अपश्यन्?
४ हिष्कियो जगाद, मम निवेशने यद्यद् आस्ते तत् सर्व्वं ते दृष्टवन्तः।
अहं तेभ्यो यन्न दर्शितवान् तादृशं किमपि द्रव्यं मम कोषमध्ये न
५ विद्यते। अनन्तरं यिशायियो हिष्कियम् अब्रवीत्, त्वं सेनाध्यक्षस्य
६ परमेश्वरस्य वचो निशामय। पश्य तव पूर्व्वपुरुषादिभिरद्य यावत्
सञ्चितं यद्यत् तव निवेशने विद्यते तत् सर्व्वं यस्मिन् काले बाबिलनगरं
नेष्यते तादृशः समय उपस्थास्यति तस्य किञ्चिदप्यवशिष्टं न स्थास्यति
७ परमेश्वर इति वचनं ब्रवीति। अपरं तवौरससन्तानानां मध्यात्
कतिपया नीता बाबिलीयराजस्य निवेशने छिन्नपुंस्त्वाः सन्तः स्थास्यन्ति।
८ ततो हिष्कियो यिशायियं जगाद, त्वं परमेश्वरस्य यद् वचो भाषितवान्
तद् उत्तमं। अपरं गदितवान्, मम राजत्वसमये मङ्गलं सत्यता च
भविष्यति।

---

४० चत्वारिंशोऽध्यायः।

१ शुभवार्त्तायाः कथा ९ तस्याः प्रकाशनं १२ परमेश्वरस्य अतुल्यत्वं १८ देवानाम्
असारत्वं २७ परमेश्वरीयलोकानाम् उपकारश्च।

१ सान्त्वयन्तां परिसान्त्वयन्तां युष्माभि र्मामकप्रजाः।
भाषते भारतीमेतां युष्माकमीश्वरः स्वयं॥
२ यिरूशालममालप्य ब्रूत प्रीतिवचांसि च।
उच्चै र्वदत ताश्चेदं समाप्तः समरस्तव॥
अभवो दोषमुक्ता त्वं त्वञ्च स्वपापकर्म्मणां।
द्विगुणं लप्स्यसे क्षेमं परमेशस्य हस्ततः॥
३ मरौ घोषयतः प्रोच्चैरस्त्ययं कस्यचिद् रवः।
युष्माभिः परमेशस्य सुगमीक्रियतां द्दतिः।

राजमार्गो ऽस्मदीशस्य सरलीक्रियतां मरौ॥
उन्नतानि विधीयन्तां सर्व्वनिम्नस्थलानि च। ४
गिरयो भूधराश्चापि सर्व्वे निम्नीभवन्तु हि॥
उच्चावचञ्च यत् स्थानं तत् प्राप्नोतु समानतां।
यच्च स्थानं दुरारोहं जायतां तत् समस्थलं॥
प्रतापः परमेशस्य तदा प्रादुर्भविष्यति। ५
सकलैरेककाले च नरैरालोकयिष्यते।
यतो वक्त्रात् परेशस्य वाक्यमेतद् विनिर्गतं॥
घोषयेति रवेणोक्ते सः पृष्टो घोषयाणि किं। ६
सर्व्वः प्राणी तृणं सर्व्वा तस्य श्रीः क्षेत्रपुष्पवत्॥
तृणं गच्छति शुष्कत्वं पुष्पञ्चाप्नोति जीर्णतां। ७
संस्पृष्टं परमेशस्य मुखनिर्गतवायुना।
अतः सत्यं जनसङ्घातस्तृणतुल्यो न संशयः॥
तृणं गच्छति शुष्कत्वं पुष्पञ्चाप्नोति जीर्णतां। ८
अस्मदीशस्य वाक्यन्त्वनन्तकालेषु निश्चलं॥
प्रांशुमद्रिं समारोह हे शुभाख्यायिके सियोन्। ९
घोषयोच्चै यिरूशालम् शुभवार्त्ताप्रचारिके॥
उच्चैःस्वरं कुरुष्व त्वं मा बिभीहि कथञ्चन।
यिहूदायाः पुरो ब्रूहि पश्य युष्माकमीश्वरः॥
ईश्वरः पश्य युष्माकं समायाति बलान्वितः। १०
प्रभुत्वञ्चापि तस्यैव बाहुः सम्पादयिष्यति॥
पश्य तस्य भृतिश्चापि सहिता तेन वर्त्तते।
तथा श्रमफलं तस्य विद्यते तस्य सम्मुखे॥
मेषपालकवत् तेन स्वव्रजश्चारयिष्यते। ११
शावकांश्च स संगृह्य वक्ष्यति स्वीयवक्षसि।
स्तन्यदात्रीश्च मेषीः स सदयं गमयिष्यति॥
स्वकीयकरकोषेण सर्व्वतोयानि को ममे। १२
वितस्त्या वान्तरीक्षस्य परिमाणं चकार कः॥
धूलिं वसुन्धराया वा तुलायां सञ्चिकाय कः।
तौलदण्डेन वाद्रीणां गुरुतां निर्णिणाय कः।
पर्व्वतानां तुलायष्ट्या भारं वा निश्चिकाय कः॥

१३ आत्मानं परमेशस्य व्यवस्थापितवांश्च कः।
मन्त्री वा तस्य भूत्वा कः शिक्षां तस्मै प्रदत्तवान्॥
१४ मन्त्रणां तेन पृष्टो वा कस्तं बोधितवान् हितं।
सुविचाराय वा तस्य को ऽभवत् पथदर्शकः।
कस्तमशिक्षयज्ज्ञानं बुद्धे र्वा मार्गमादिशत्॥
१५ मनुष्याः सर्व्वदेशीयाः कलसालम्बिबिन्दुवत्।
तुलायां यद्वद् रजो लग्नं तुल्यास्तेनैव भान्ति च।
द्वीपानामपि साकल्यम् अणुवत् स समुत्क्षिपेत्॥
१६ इन्धनार्थं लिवानोनः पर्य्याप्तो जायते नहि।
तत्रत्यं पशुसाकल्यं होमाय प्रचुरं नहि॥
१७ तस्मात्तात् सर्व्वदेशीया मनुष्या भान्त्यवस्तुवत्।
असारत्वादसत्त्वाच्च न्यूनांस्तान् मन्यते च सः॥
१८ केन सार्द्धमतो यूयम् उपमास्यध्वमीश्वरं।
प्रतिरूपञ्च किं तस्य तुल्यं निरूपयिष्यथ॥
१९ शिल्पिना निर्म्मितां मूर्त्तिं हेम्नाद्दृणोति हेमलः।
करोति स्वर्णकारश्च तत्कृते रौप्यशृङ्खलान्॥
२० उपहारन्तु दातुं यो नहि शक्नोति दुर्गतः।
अजरस्यैव काष्ठस्य रोचयित्वा स खण्डकं।
निर्म्मातुं निश्चलां मूर्त्तिं वृणीते दक्षशिल्पिनं॥
२१ ज्ञानं किं नास्ति युष्माकं श्रोत्रं वा किं न विद्यते।
आदिकालाच्च युष्मभ्यं वार्त्ता किं न निवेदिता।
पृथिवीमूलनिर्म्माणान्न युष्माभिरबोधि किं॥
२२ मेदिनीमण्डलस्योर्द्ध आसीनो ऽस्त्येक ईश्वरः।
तन्निवासिनरास्तेन गण्यन्ते च पतङ्गवत्॥
उल्लोचञ्च यथा तद्वद् गगनं विततान सः।
तच्च विस्तारयामास निवासार्थकदूष्यवत्॥
२३ देशाधिपतयस्तेन क्रियन्ते सत्त्ववर्ज्जिताः।
पृथिव्याः शासकास्तेन विधीयन्ते व्यलीकवत्॥
२४ अरोपिता इवानुप्ता भूमावबद्धमूलकाः।
वायुना तस्य संस्पृष्टा शुष्कतामाप्नुवन्ति ते।
हृताश्च चक्रवातेन विकीर्य्यन्ते तुषा इव॥

उपमा मम युष्माभिः केन सार्द्धं विधास्यते । २५
कस्याहं सदृशो वा स्यामिति ब्रूते स धर्म्मवान् ॥
ऊर्द्ध्वं दृष्ट्वा परीक्षध्वम् अमूस्ताराः ससर्ज कः । २६
तासां सम्पूर्णसङ्ख्यानां व्यूहनं विदधाति सः ॥
नामान्युच्चार्य्य सर्व्वासाम् आह्वानं स करोति च ।
स बलाढ्यो महाशौर्य्यो नैकाप्यस्यनुपस्थिता ॥
दृष्टितः परमेशस्य प्रच्छन्नास्ति गति मम । २७
मम धर्म्मो मदीशस्य ज्ञानातीतश्च विद्यते ॥
कुत एतादृशं वाक्यं हे याकूब् गद्यते त्वया ।
हे इस्रायेल् किमर्थं त्वं वदस्येतादृशं वचः ॥
किं नालम्भि त्वया ज्ञानं किं नाश्रावि त्वया पुरा । २८
अनादिरीश्वरः क्षौण्याः सीम्नां स्रष्टा परेश्वरः ।
न क्लान्तिं याति न श्रान्तिं सो ऽगाधज्ञानसागरः ॥
क्लान्ताय बलदाता स निःशक्तेः शक्तिवर्द्धकः ॥ २९
क्लान्तिं यान्ति युवानो ऽपि परिश्रान्ता भवन्ति च । ३०
चरणौ तरुणानाञ्च स्खलनं जातु गच्छतः ॥
लप्स्यन्ते नवशक्तिन्तु परमेशप्रतीक्षिणः । ३१
ऊर्द्ध्वं समुत्पतिष्यन्ति पक्षैस्ते गरुडा इव ।
ते ड्डोष्यन्ति विना क्लान्तिं व्रजिष्यन्ति विना श्रमं ॥

---

४१ एकचत्वारिंशोऽध्यायः ।

१ स्वलोकान् प्रति ईश्वरस्य निवेदनं ५ प्रतिमाया असारत्वं ८ ईश्वरस्य लोकानां भयनिषेधः १७ तेषां सुखं २१ स्वममधि भविष्यद्वाक्यञ्च ।

हे द्वीपवासिनो यूयं मौनीभवत मां प्रति । १
सर्व्वजातीयलोकै र्हि नवशक्तिसमन्वितैः ।
उपस्थाय स्ववक्तव्यम् एककाले निगद्यतां ।
क्रियताञ्च मिथो ऽस्माभि र्विचाराय समागमः ॥
केन सूर्य्योदयस्थानाद् असावुत्पादितो नरः । २
स्वयं धर्म्मस्तमाहूय करिष्यत्यनुगामिनं ।
नानाजातीश्च तत्साक्षात् पराचीना विधास्यति ॥

राज्ञामुपरि राजत्वं तस्मिन्नेव समर्पयन्।
तत्खड्गस्य समच्छन्तान् धूलितुल्यान् करिष्यति।
तदीयधनुषस्याग्रे प्रविकीर्णतृणोपमान्॥
३ स्वपदाभ्यां यथा येन स कदापि गतो नहि।
स शत्रूननुधावंस्तं कुशलेनोत्तरिष्यति॥
४ इदन्त्वास्थाय को ऽकार्षीत् भाविकालान् पुराह्वयन्।
य आदिरन्तिमानाञ्च सङ्गी सो ऽहं परेश्वरः॥
५ भयं प्राप्स्यन्ति तद् दृष्ट्वा नरा द्वीपनिवासिनः।
भविष्यन्ति च वित्रस्ता धरणीप्रान्तसंस्थिताः।
उपस्थाय करिष्यन्ति सकलाश्च समागमं॥
६ उपकुर्व्वन्त एको ऽन्यं ते वक्ष्यन्ति स्थिरो भव॥
७ तक्षकः स्वर्णकारञ्च सम्यगाश्वासयिष्यति।
अयोघनेन सुश्लक्ष्णां प्रतिमाञ्च करोति यः।
सूर्म्मिताडयितारं स तथैवाश्वासयिष्यति॥
इदमुत्तममित्येव सन्धानञ्चाधि वक्ष्यति।
मूर्त्तिञ्च निश्चलां कर्त्तुं कीलैं र्दृढीकरिष्यति॥
८ हे मत्सेवक इस्रायेल् याकूब् मयाभिरोचित।
हे मत्प्रियसुतो बन्धोरिब्राहीमस्य सन्तते॥
९ पृथ्व्याः सीम्नि गृहीत्वाहम् आह्वयं त्वां धरान्ततः।
भारतीमवदञ्चेमां त्वं ममैवासि सेवकः।
मयैव रोचितो यस्त्वं त्वं मया त्यक्ष्यसे नहि॥
१० त्वया न क्रियतां शङ्का तव सङ्गी यतो ऽस्म्यहं।
दिशो मालोकयोद्वेगात् यतो ऽहं तावकेश्वरः॥
अहं स्वधर्म्महस्तेन त्वां विधाय महाबलं।
यत्नेनोपकरिष्यामि धारयिष्यामि च स्थिरं॥
११ तुभ्यं क्रुध्यन्ति यावन्तस्ते भविष्यन्ति लज्जिताः।
त्वया ये विवदन्ते च ते नंक्ष्यन्ति नास्तितां॥
१२ त्वयान्विष्यापि नोद्देशो लप्स्यते त्वद्विरोधिनां।
सत्त्वहीना भविष्यन्त्यलीकाश्च त्वद्युयुत्सवः॥
१३ त्वत्प्रभुः परमेशो ऽहं धारयामि करं तव।
मा भैषीस्त्वत्सहायो ऽहमस्मीति त्वां ब्रवीमि च॥

हे याकूबाख्य कीट त्वं मा बिभीहि कथञ्चन। १४
त्वया मा क्रियतां चास इस्रायेल् स्वल्पसंख्यक॥
त्वत्सहायो ऽहमस्मीति भाषते परमेश्वरः।
इस्रायेलः पवित्रो राट् परित्राता स्वयं तव॥
सुतीक्ष्णं बहुधाराभि र्नवीनं शस्यमर्द्दकं। १५
काष्ठयन्त्रमिव त्वञ्च पश्य संस्थापितो मया॥
शस्यवन्मर्द्दयित्वा त्वं भूधरांश्चूर्णयिष्यसि।
उपपर्व्वतसङ्घञ्च त्वं विधास्यसि नालवत्॥
कुर्व्वति त्वयि निष्पावं वायुस्तानपनेष्यति। १६
चक्रवातश्च सङ्गृह्य सम्यक् तान् विकरिष्यति॥
परमेशे तदा त्वन्तु हर्षाक्रान्तो भविष्यसि।
इस्रायेलः पवित्रे च राज्ञि श्लाघां करिष्यसि॥
तोयं मृगयमाणा ये नाप्नुवन्ति कथञ्चन। १७
जनास्ते दुर्गता दीनास्तृष्णया शुष्कजिह्वकाः॥
यो ऽहं परेश्वरः सो ऽहं दास्यामि तेभ्य उत्तरं।
इस्रायेलो ऽहमीशो ऽस्मि नैव त्यक्ष्यामि तानहं॥
नदीः प्रस्रावयिष्यामि शुष्कशैलाग्रभागतः। १८
मध्यादुपत्यकानाञ्च जनयिष्यामि निर्झरान्।
वनं वार्यो करिष्यामि मरुस्थानं जलाकरं॥
मेन्धिकामेरसं शिट्टां जितवृक्षञ्च प्रान्तरे। १९
दारुतीधरताश्शूरान् रोपयिष्याम्यहं मरौ॥
तदालोक्य नरै र्ज्ञात्वा चिन्तयित्वैव भोत्स्यते। २०
एतत् कर्म्म स्वहस्तेन कृतवान् परमेश्वरः।
इस्रायेलः पवित्रो राट् स्वयं तत् सृष्टवानिति॥
समायात विवादार्थमिति ब्रूते परेश्वरः। २१
हेतून् दर्शयताखण्डान् याकूब्राजस्य वागियं॥
दर्शयत स्ववक्तव्यं वदतास्मांश्च भावि किं। २२
पुरा युष्माभिरूचे यत् तदस्मभ्यं निवेद्यतां॥
वयं तत्र मनो धत्त्वा तस्य भोत्स्यामहे फलं।
भावि वा यदितः पश्चात् तदस्मान् वदताधुना॥
भाविकालेषु यद् भावि यूयं तद् वक्तुमर्हथ। २३

ततो यदीश्वरा यूयं तत् सम्भोत्स्यामहे वयं ॥
यूयमिष्टमनिष्टं वा किञ्चिद् विधातुमर्हथ।
वयं तदद्भुतं दृष्ट्वा प्राप्स्यामस्तत्क्षणाद् भयं ॥
२४ पश्यासारतमा यूयं युष्मत्कार्य्यमवस्तु च।
यः कश्चिद् रोचयेद् युष्मान् स घृणार्हो भवेज्जनः॥
२५ नरस्त्वेकः समायाति मयोत्पादित उत्तरात्।
पूर्व्वस्यां दिशि मन्नाम्नि प्रार्थनां स करिष्यति ॥
कुम्भकारश्च मृद्नाति स्वपदाभ्यां यथा मृदं।
स तथैव नरश्रेष्ठान् आक्रमिष्यति पङ्कवत् ॥
२६ एतत् केन पुरा प्रोक्तं तद् वयं ज्ञातुमिच्छवः।
केन निश्चितमग्रे वा वक्ष्यामः साधु साध्विति ॥
नैव कश्चिदवोचत् तत् नैव कश्चिदशिश्रवत्।
युष्माकं काञ्चनोक्तीश्च न शृणोत्यपि कश्चन ॥
२७ प्रथमो ऽहं हि सीयोनं ब्रवीमि पश्य पश्य तान्।
यिरूशालमि सद्वार्त्तां दूतेनाख्यापयामि च ॥
२८ परिपश्याम्यहं किन्तु परः को ऽपि न विद्यते।
एतेषां मध्य एको ऽपि मन्त्री नास्ति हि तादृशः।
यो मया मन्त्रणां पृष्टः प्रभुयाद्दातुमुत्तरं ॥
२९ अलीकाः पश्य ते सर्व्वे कार्य्यं तेषामवस्तु च।
असारा वायुवत् तेषां धातुनिर्म्मितविग्रहाः ॥

---

४२ द्विचत्वारिंशोऽध्यायः।

१ अभिषिक्तोद्धर्त्तुस्तस्य कर्म्म च भविष्यद्वाक्यं ५ तत्प्रति परमेश्वरस्य नियमः १० ईश्वरं धन्यं वक्तुं विनयकथनं १३ सुसंवादस्य सफलता १७ प्रतिमानाम् असारता १८ खीष्टस्य कथा २२ यिहूदिलोकानाम् अविश्वास्यता दण्डश्च।

१ सेवको मम पश्यासौ धार्य्यमाणो मया स्वयं।
रोचितं मम पात्रं स मन्मनस्तुष्टिकारकं ॥
मया तस्योपरिष्टाच्च स्वात्माधिष्ठापितो ऽभवत्।
राजनीतिं स जातीनां मध्ये प्रचारयिष्यति ॥
२ नैव कोलाहलस्तेन नोच्चशब्दः करिष्यते।

न च राजपथे तेन स्वरवः श्रावयिष्यते ॥
प्रच्छुसो ऽपि नलस्तेन नैव खण्डीकरिष्यते । २
निस्तेजा वर्त्तिका तेन न च निर्वापयिष्यते ।
राजनीतिं स सत्येन युक्तां प्रचारयिष्यति ॥
धरण्यां राजनीतिं स यावन्न स्थापयिष्यति । ४
तावत् स नहि निस्तेजा न च्छुसो वा भविष्यति ।
सम्प्रतीच्छिष्यते तस्य शास्त्रं द्वीपनिवासिभिः ॥
यो नभोमण्डलं सृष्ट्वा विततीकृतवान् पुरा । ५
तथैवास्तीर्णवानेताम् उद्भिद्भि र्भूषितां धरां ॥
तन्निवासिजनेभ्यश्च प्राणवायुं प्रदत्तवान् ।
तत्र विहारकारिभ्यो यश्चात्मानं वितीर्णवान् ।
प्रभुना परमेशेन तेनेदं गद्यते वचः ॥
समाह्वयामि धर्म्मेण त्वामहं परमेश्वरः । ६
त्वत्करं धारयित्वा च करिष्ये तव रक्षणं ॥
स्वप्रजानां कृते त्वाञ्च नियोक्ष्ये नियमाश्रयं ।
अन्यजातीयलोकानां कृते चालोकदायकं ॥
नेत्राण्यन्धनराणाञ्च त्वं मुक्तानि करिष्यसि । ७
रुद्धस्थानाच्च बद्धानां निर्गमं त्वं विधास्यसि ।
कारागेहाच्च लोकानाम् अन्धकारनिवासिनां ॥
अहमेव परेशो ऽस्मि नामधेयमिदं मम । ८
नैवाहं वितरिष्यामि परस्मै स्वीयगौरवं ।
नैवाहं प्रतिमाभ्यो वा प्रदास्यामि निजस्तवं ॥
पश्य पूर्व्वोक्तवाक्यानि सफलत्वमवाप्नुवन् । ९
इदानीं घटनाः किन्तु नवीना ज्ञापयाम्यहं ।
तासां प्ररोहणात् पूर्व्वं युष्मांस्ताः श्रावयामि च ॥
परमेश्वरमुद्दिश्य गीतं गायत नूतनं । १०
पृथिव्याः प्रान्ततो यूयं तस्य श्रावयत स्तवं ॥
हे वार्धिगामिनः सर्व्वे सार्द्धं सागरपूरकैः ।
हे द्वीपाः प्राणिभिः सार्द्धं युष्मन्मध्ये निवासिभिः ॥
हर्षनादं करोतूच्चैररण्यं स्वपुरैः सह । ११
ग्रामाश्च शिविराकाराः केदरीयै र्निषेविताः ॥

जयध्वनिञ्च कुर्व्वन्तु जनाः शैलनिवासिनः।
सर्व्वे ते घोषयन्तूच्चैः पर्व्वताग्रेषु संस्थिताः॥
१२ प्रकाशयन्तु सम्यक् च परमेशस्य गौरवं।
द्वीपानामेव सर्व्वत्र तत्स्तवं ज्ञापयन्तु च॥
१३ परमेशो यथा वीरस्तथा यात्रां करिष्यति।
जिगीषाञ्च यथा योद्धा तथैवोत्तेजयिष्यति॥
करिष्यति महानादम् अत्युच्चै र्घोषयिष्यति।
दमनेन स्वशत्रूणां यशोवांश्च भविष्यति॥
१४ दीर्घकालादहं मौनी स्वं संयच्छामि नीरवः।
इदानीं प्रसवन्तीव करिष्यामि महारवं।
उच्छ्वसिष्यामि फूत्कारं विधास्यामि च यत्नतः॥
१५ पर्व्वतान् ध्वंसयिस्यामि सहितानुपपर्व्वतैः।
शोभां तेषां हरिद्वर्णां शोषयिष्यामि सर्व्वशः॥
पुलिनानि करिष्यामि परिवर्त्त्य तरङ्गिणीः।
तथा सर्व्वान् जलाधारान् प्रापयिष्यामि शुष्कतां॥
१६ अन्धा यं नहि जानन्ति पथा नेष्यामि तेन तान्।
यांश्च ते न विदु र्मार्गान् गमयिष्यामि तेषु तान्॥
करिष्याम्यग्रतस्तेषाम् अन्धकारञ्च दीपकं।
स्थानानि वक्रगामीनि विधास्ये सरलानि च।
वाक्यान्येतानि सेत्स्यन्ति त्यक्ष्यन्ते च मया नहि॥
१७ तक्षिताः प्रतिमाः किन्तु ये नराः शरणं गताः।
सिक्तमूर्त्तींश्च भाषन्ते यूयमेवास्मदीश्वराः।
ते हि पराङ्मुखा जाता भविष्यन्ति त्रपान्विताः॥
१८ हे नरा बधिरा यूयम् आकर्णयितुमर्हथ।
हे अन्धा दृष्टये यूयं भवतोन्मीलितेक्षणाः॥
१९ सेवको मम नान्धश्चेत् अन्धः कस्तर्हि विद्यते।
यथा मत्प्रेष्यदूतश्च कस्तथा बधिरो भवेत्॥
को हि तथा भवेदन्धः श्रद्धानो जनो यथा।
सेवकः परमेशस्य यथा को ऽन्धो भवेत् तथा॥
२० पश्यन् बहूनि वस्तूनि तत्र धत्ते मनो न सः।
स निरर्गलकर्णो ऽपि श्रवणं न करोति च॥

परमेशस्तु सन्तुष्टस्तदीयधर्म्मकारणात्। २१
सम्मंस्यते व्यवस्थां स सम्मान्याञ्च करिष्यति॥
हृतद्रव्यस्त्वयं वंशो मूषितश्च भविष्यति। २२
युवानः सकला बद्धाः कारागेहेषु चावृताः॥
हृतविता भविष्यन्ति रक्षकेण च वर्जिताः।
हृतं तेषां धनं दत्त को ऽपीत्यं नहि वक्ष्यति॥
युष्माकं मध्यतो वाक्यमेतत् कः श्रोतुमुद्यतः। २३
स तद् गृह्णातु कर्णाभ्यां भाविकाले हि भोत्स्यते॥
कस्य निरूपणाद् याकूब् अभवद्धृतवैभवः। २४
केन समर्पितश्चाभूत् इस्रायेल् वित्तहारिषु।
किं न परेश्वरेणैव यस्यापराधिनो वयं॥
गन्तुं तदीयमार्गेषु तेषामिच्छाभवन्नहि।
नैव तदीयशास्त्रे च ते न्यधीयत मानसं॥
ततस्तेषु स्वकोपाग्निं युद्धतापञ्च सो ऽक्षिपत्। २५
समन्ताद् दह्यमानास्ते नैव ज्ञानमवाप्नुवन्।
ज्वलन्तश्च मनोयोगं नैवाकुर्व्वन् कथञ्चन॥

---

४३ त्रिचत्वारिंशोऽध्यायः।

१ स्वीयलोकेष्वनुग्रहणं ईश्वरस्य १० तस्मिन् लोकानां साक्षित्वं १४ बाबिलो ऽधःपतनं १६ ईश्वरीयलोकानां रक्षाकथनं २२ तान् प्रतीश्वरस्य भर्त्सनञ्च।

स्रष्टा यस्तव हे याकुब् इस्रायेलश्च देहकृत्। १
तेनैव परमेशेन वागियं गद्यते ऽधुना॥
मा बिभीहि यतो ऽहं त्वां परिमोचितवान् स्वयं।
मन्नाम्नाह्वतवांश्च त्वाम् अभवस्त्वं ममैव च॥
अपां मध्येन गच्छंस्त्वं मामवाप्स्यसि सङ्गिनं। २
तरङ्गिणीस्तरंश्च त्वं ताभि र्नाप्लावयिष्यसे॥
व्रजंश्चानलमध्ये ऽपि तेन त्वं धक्ष्यसे नहि।
नैव संस्प्रक्ष्यसे वह्नेः शिखया वा कथञ्चन॥
यतः परेश्वरो यो ऽहं सो ऽहमस्मीश्वरस्तव। ३
इस्रायेलः पवित्रो राट् अहं तावकमोचकः॥

त्वन्मोचनस्य मूल्याय मिसरो दीयते मया ।
कूशः सिवा इति ख्यातं देशद्वयं कृते तव ॥
४ मद्दृष्टौ बहुमूल्यस्त्वं मान्यो मत्प्रेमभाजनं ।
तस्मात् त्वत्परिवर्त्तेन प्रदास्यामि नरानहं ।
त्वत्प्राणविनिमयार्थञ्च परदेशीयमानवान् ॥
५ त्वया मा प्राप्यतां त्रासस्तव सङ्गी यतो ऽस्म्यहं ।
प्रत्यानेष्यामि पूर्व्वस्या दिशो ऽहं तव सन्ततिं ।
तथा त्वां सङ्ग्रहीष्यामि पश्चिमाया दिशो ऽप्यहं ॥
६ तान् देहीति वचश्चाहं गदिष्याम्युत्तरां दिशं ।
त्वञ्च तान् मोपरुन्धीति दिशं वक्ष्यामि दक्षिणां ।
दूराद् वहत मत्पुत्त्रान् मत्पुत्रीश्च धरान्ततः ॥
७ मम नाम्नैव यः कश्चिद् विख्यातो नयताच्च तं ।
स्वप्रतापप्रकाशार्थं सृष्टवानहमेव तं ।
निर्म्माता तस्य कर्त्ता चाहमेवास्मि न चापरः ॥
८ सा सनेत्रापि या जातिरन्धा साप्स्यति मोचनं ।
सकर्णा बधिरा लोका भविष्यन्त्युद्धृतास्तया ॥
९ सर्व्वजातय आयान्तु मिलन्त्वेकत्र च प्रजाः ।
तासां मध्य इमां वार्त्तां कः प्रकाशयितुं क्षमः ।
पूर्व्वमुक्ताः स्ववाणी वा के ऽस्मान् श्रावयितुं क्षमाः ॥
आयान्तु साक्षिणस्तेषां जयं प्राप्स्यन्ति ते तदा ।
यथार्थमिति लोकैश्च साक्ष्यं श्रुत्वा वदिष्यते ॥
१० साक्षिणो मम यूयन्त्विति ब्रूते परमेश्वरः ।
अपरो मम साक्षी च रोचितः सेवको मम ॥
अतो ऽभिज्ञाय युष्माभि र्विश्वासः क्रियतां मयि ।
एतच्च बुध्यतां सम्यग् यदहं सत्य ईश्वरः ।
नेश्वरो ऽसर्जि मत्पूर्व्वं न चोदेष्यति मत्परं ॥
११ अहमेवाहमेवास्म्यद्वितीयः परमेश्वरः ।
त्राणकर्त्ता च मद्भिन्नो नापरः को ऽपि विद्यते ॥
१२ पूर्व्वं दत्त्वा मया वार्त्तां परित्राणं विधीयते ।
श्राव्यते सा मयैकेन नान्यो युष्मासु विद्यते ॥
अहं यदीश्वरो ऽस्म्यत्र यूयं मामकसाक्षिणः ।

भाषते भारतीमेतां स्वयमेव परेश्वरः॥
अहमादिदिनात् सो ऽस्मि मत्करात् को ऽपि नोद्धरेत्। १३
मया यत् क्रियते कार्य्यं कस्तद् वारयितुं क्षमः॥
इस्रायेलः पवित्रो राट् युष्मन्निस्तारकश्च यः। १४
परमेशेन तेनैव वाक्यमेतन्निगद्यते॥
युष्मदर्थमहं लोकान् प्रेषयिष्यामि बाबिलं।
पातयिष्यामि सर्व्वाणि तत्रत्यान्यर्गलानि च।
मनुष्यांश्चापि कस्दीयान् पोतेषूल्लासकारिणः॥
यो ऽहं परेश्वरः सो ऽहं युष्माकं पुण्यभाजनं। १५
इस्रायेलस्य निर्म्माता युष्माकञ्च महीपतिः॥
इत्थं ब्रूते परेशः स मार्गो येनार्णवे कृतः। १६
सुघोरे तोयराशौ च येन पन्था विनिर्म्मितः॥
येनानीता रथा अश्वाः सेना महाबलानि च। १७
शेरते निम्नशय्यायां नैवोत्थास्यन्ति कर्ह्हिचित्।
स्थास्यन्ति च सदा शान्ता निर्व्वाणा वर्त्तिका यथा॥
इदानीं नैव युष्माभिः स्मर्त्तव्याः प्राक्तनाः क्रियाः। १८
नानुचिन्तयितव्यो वा पुनः कालः पुरातनः॥
पश्य नवीनमेवाहं किञ्चिद् विधातुमुद्यतः। १९
उत्पत्स्यते ऽधुना तच्च युष्माभिश्चावभोत्स्यते॥
मरुस्थानस्य मध्ये हि मार्गः कारिष्यते मया।
शुष्कभूमेश्च मध्येन स्रावयिष्याम्यहं नदीः॥
स्तोष्ये ऽहं प्राणिभि र्वन्यै र्व्यालैः सहोष्ट्रपक्षिभिः। २०
रोचितानां प्रजानां मे पानीयार्थमहं यतः।
मरौ तोयं स्थले शुष्के सरितश्च प्रदत्तवान्॥
मयैव ते जनाः सृष्टास्ते शंसिष्यन्ति मत्स्तवं॥ २१
प्रार्थना तु त्वया याकूब् मामुद्दिश्य कृता नहि। २२
हे इस्रायेल् त्वया चाहम् अमन्ये क्लान्तिदायकः॥
नैवादायि त्वया मह्यं होमार्थं मेषशावकः। २३
त्वदीयबलिदानैश्च त्वं नाकार्षी र्ममादरं॥
नाहं नैवेद्यलोभाद्वा दासवत् त्वामपीडयं।
धूपप्राप्तिनिमित्तं त्वां नाहश्चाकारयं श्रमं॥

२४ अर्थदानेन चोचं त्वं मदर्थं क्रीतवान् नहि।
मेदसा स्वबलीनाञ्च त्वं मां तर्पितवान् नहि॥
स्वपापैः किन्तु मामेव दासवत् समपीडयः।
स्वकीयैरपराधैश्च मामेवाकारयः श्रमं॥
२५ स्वनामार्थं तवाधर्म्मं लोपयामि त्वहं स्वयं।
नैवानुचिन्तयिष्यामि तव पापक्रियाः पुनः॥
२६ स्मारय त्वं मां विवदिष्यावहे मिथः।
निवेदय स्ववक्तव्यं निर्दोषस्त्वं भवे यथा॥
२७ तावकीनादितातो यः स हि पापं समाचरत्।
तावकीनोपदेष्टारश्चासन् मद्विधिलङ्घिनः॥
२८ पवित्रास्ते ततो ऽध्यक्षा अपवित्रीकृता मया।
वर्ज्जनायार्पितो याकूब् इस्रायेल् निन्दनाय च॥

---

४४ चतुश्चत्वारिंशोऽध्यायः।

१ समाजं प्रतीश्वरस्य प्रतिज्ञा ६ प्रतिमानाम असारता ९ प्रतिमानिर्म्मातृणामज्ञानता २१ ईश्वरस्य धन्यवादं कर्त्तुं विनयकथनञ्च।

१ हे मत्सेवक याकूब् त्वम् इदानीं श्रवणं कुरु।
शृणु त्वं मम वक्तव्यम् इस्रायेल् मम रोचित॥
२ त्वदीयसृष्टिकर्त्ता यो निर्म्माता च परेश्वरः।
गर्भात् तवोपकारी च स इदं भाषते वचः॥
हे मत्सेवक याकूब् त्वं मा बिभीहि कथञ्चन।
त्वञ्च मैवाप्नुहि त्रासं यिशुरुन् मम रोचित॥
३ मरुभूम्यां यतो तोयं मयावतारयिष्यते।
सरितः स्रावयिष्यन्ते मया शुष्कस्थलेषु च॥
तव वंशे निजात्मानम् अवसेक्ष्याम्यहं यतः।
मामकीनाशिषञ्चापि तव कौमारसन्ततौ॥
४ तृणानां मध्यतस्तेषाम् उत्पत्तिः सम्भविष्यति।
यथाऽडवाख्यवृक्षाणां सलिलस्रोतसस्तटात्॥
५ परेशस्याहमस्मीति तेषामेको वदिष्यति।
याकूबो नामधेयञ्च तेषामेको ग्रहीष्यति॥
परेशस्येति लेखित्वा हस्तमन्यो ऽङ्कयिष्यति।

परमेशस्य नाम्ने च मुखपत्रं करिष्यति॥
इत्थं परेश्वरो ब्रूत इस्रायेलो महीपतिः। ६
इत्थं ब्रूते तदुद्धर्त्ता सेनाध्यक्षः परेश्वरः।
अहमादिरहञ्चान्तो नास्ति मद्भिन्न ईश्वरः॥
यथा प्राचीनलोकानां सृष्टिकालान्मया कृतं। ७
अनागतं तथाहूय केनोक्तं बोधयेत् स मां।
चिराद् भाव्यचिराद् वा यत् स्वार्थं तत् स जनो वदेत्॥
युष्माभि र्नैव भेतव्यम् आशङ्का प्राप्यतां नहि। ८
मया किं पूर्व्वकालान्न श्रावयित्वा निजं वचः।
वार्त्ता प्रादायि युष्मभ्यं यूयं मदीयसाक्षिणः॥
ईश्वरः को ऽपि मद्भिन्नः किं वा कुत्रापि विद्यते।
अन्यः को ऽप्यचलो नास्ति नैको ऽपि ज्ञायते मया॥
सकला देवमूर्त्तीनां निर्म्मातारो निरर्थकाः। ९
तेषां हर्षदवस्तूनि नितान्तं निष्फलानि हि॥
तेषां ये साक्षिणस्ते ऽपि नहि पश्यन्ति किञ्चन।
न वा किञ्चन जानन्ति तेभ्यो लज्जाप्रदायिनः॥
देवतां निर्म्मिमीते कः मूर्त्तिं वा सिक्तधातुना। १०
तेन यत् क्रियते कार्य्यं निष्फलं तद् भविष्यति॥
सहायास्तस्य ये सर्व्वे ते भविष्यन्ति लज्जिताः। ११
स्वयं ते शिल्पिनश्चापि प्रतिभास्यन्ति मर्त्यवत्॥
एकस्थाने समागत्य ते च स्थास्यन्ति दारुवत्।
उद्विग्ना एकसङ्घे च ते भविष्यन्ति लज्जिताः॥
लोहकारः कुठारार्थी तप्ताङ्गारे कृतश्रमः। १२
मुद्गरै र्निर्म्मिमीते तद् यतते बलिबाहुना।
क्षुधातो याति दौर्ब्बल्यम् तोयाभोगाच्च मूर्च्छति॥
तनित्वा तक्षकः सूत्रं लिखित्वाङ्कान् शलाकया। १३
मूर्त्तिं तक्षति तीक्ष्णास्त्रै र्मिमीते कर्कटेन च॥
नराकारानुसारेण पुरुषव्याघ्ररूपिणीं।
गृहमध्ये निवासार्थं स यत्नेन करोति तां॥
एरसाख्यानि दारूणि कर्त्तितव्यानि तेन हि। १४
न चेद् गृह्णाति तिर्षाख्यं वालोनाख्यं महीरुहं।

कश्चिद्वा रोचयत्यन्यं सुगाढं वन्यपादपं ॥
स्वयं वा रोपयत्येकम् ओरणाख्यं पलाशिनं ।
मेघतोयेन तस्यैव वर्द्धनञ्च प्रतीक्षते ॥
१५ तत्काष्ठञ्च मनुष्येण ज्वलनार्थं प्रयुज्यते ।
तस्य किञ्चिद् गृहीत्वा स तापमासेवते स्वयं ।
ज्वलयित्वापरं किञ्चित् पूपपाकं करोति च ॥
निर्म्मिमीते तथा देवं प्रणामेन च सेवते ।
तच्छित्वा विग्रहं तञ्च प्रणिपत्य समर्चति ॥
१६ खण्डमेकं स तापार्थी वह्नौ भस्मीकरोति हि ।
मांसाशने प्रयुङ्क्ते ऽन्यं मांसं भृष्ट्वा च तृप्यति ॥
सेवमानः पुनस्तापं वाक्यमेतद् ब्रवीति च ।
धन्यो ऽहं सम्यगुष्णो ऽस्मि प्राप्तः पावकदर्शनं ॥
१७ उच्छिष्टांशेन देवं स कृत्वा स्वपूज्यविग्रहं ।
भजते प्रणिपातेन सेवते प्रार्थनेन च ।
इत्थं वक्ति च मां त्राहि यतस्त्वं मम देवता ॥
१८ ज्ञानं नास्ति नृणां तेषां बुद्धिस्तेषां न विद्यते ।
नेत्राणामुपलिप्तत्वान्न द्रष्टुं शक्नुवन्ति ते ।
चित्तानाञ्चोपलिप्तत्वान्न बोद्धुं शक्नुवन्ति वा ॥
१९ नास्ति तेषां मनोयोगो न ज्ञानं न विवेचना ।
तस्मान्नैव वदन्तीत्थं दग्धमर्द्धं मयानले ॥
तदङ्गारेषु तप्तेषु पूपपाकः कृतस्तथा ।
आमिषं तत्र भृष्ट्वा च कृतं मांसस्य भोजनं ॥
अधुनोच्छिष्टमंशं किं करिष्ये पूज्यविग्रहं ।
एनमिन्धनखण्डं किं पूजयिष्यामि वा नतः ॥
२० स भस्माशी स्वचित्तस्य भ्रान्त्या सन्मार्गतश्च्युतः ।
नैव स्वात्मानमुद्धर्त्तुं नरः शक्नोति तादृशः ।
मत्करो ऽनृतधारी किं नास्त्येतत् स न वक्ष्यति ॥
२१ त्वमेतत् स्मर हे याकूब् इस्रायेल् त्वञ्च तत् स्मर ।
यतस्त्वं मम दासो ऽसि त्वं मयैव विनिर्म्मितः ।
इस्रायेल् मम दासस्त्वं मया न विस्मरिष्यसे ॥
२२ तावकाधर्म्मराशिं हि लोपितो मेघवन्मया ।

तव पापसमूहश्च निर्धूतो वारिदो यथा।
मां प्रत्येहि परावर्त्य यतस्त्वां मुक्तवानहं॥
हर्षात् त्वं गाय हे स्वर्ग परेशेन क्रिया कृता। २३
उच्चै र्नदत यूयञ्च हे मह्या निम्नभूमयः।
उच्चै र्गायत हे शैला अटव्यश्च द्रुमाकुलाः॥
याकूबो मोचनं यस्मात् कृतवान् परमेश्वरः।
इस्रायेलस्य सम्बन्धे महाशोभान्वितोऽभवत्॥
तावको मुक्तिदाता यस्त्वन्निर्म्माता च गर्भतः। २४
परमेशेन तेनैव वाक्यमेतन्निगद्यते॥
परमेश्वर एवाहं सकलं सृष्टवानहं।
ततवान् दिवमेकाकी निःसङ्गी स्तृतवान् भुवं॥
भनज्ज्यन्तचिह्नानि मन्त्रान् व्यर्थीकरोमि च। २५
बुधान् व्याहन्म्यहं तेषां ज्ञानं मौर्ख्यं करोमि च॥
स्वसेवकस्य वाक्यन्तु सुस्थिरं विदधाम्यहं। २६
मन्त्रणां स्वीयदूतानां फलयुक्तां करोमि च॥
यिरूशालममध्येतद् वच्मि सावत्स्यते जनैः।
यिहूदीयपुरीश्चाधि निर्म्मास्यन्त इमाः पुनः।
एतान्युत्सन्नवेश्मानि स्थापयिष्याम्यहं पुनः॥
शुष्का भव विधास्यामि निर्जलांस्त्वज्जलाकरान्। २७
वाक्यमेतदगाधञ्च वारिराशिं ब्रवीम्यहं॥
खसञ्चाधि ब्रवीमीदम् असौ मज्जनपालकः। २८
सकलञ्च ममाभीष्टं फलयुक्तं करिष्यति॥
यिरूशालममेवाधि वच्यते तेन वागियं।
पुरी निर्म्मीयतामेषा मन्दिरं स्थाप्यतां पुनः॥

---

४५ पञ्चचत्वारिंशोऽध्यायः।

१ निजलोकानां रक्षार्थं बाबिलस्य विनाशार्थं खसस्योत्थापनं ८ खसस्य रक्षणं तस्य कर्म्मणः सफलीकरणं २० देवतानां निष्फलत्वञ्च।

परमेश इदं ब्रूते मया खसोऽभिषेचितः। १
धृत्वा तस्य करं लोकान् पातयिष्यामि तत्पुरः।
नृपाणाञ्च विधास्यामि शिथिलं कटिबन्धनं॥

तस्याग्रे विवरिष्यामि द्वारशाखाद्वयान्यहं।
न च केनापि शक्ष्यन्ते संरोद्धुं गोपुराण्यपि॥
२ तवाग्रे ऽहं गमिष्यामि करिष्याम्यसमं समं।
ताम्रद्वाराणि भंक्ष्यामि सञ्छेत्स्याम्यायसार्गलं॥
३ वितरिष्यामि तुभ्यञ्चाहं कोषांस्तमसावृतान्।
धनराशींश्च दास्यामि प्रच्छन्नान् निभृते स्थले॥
तदानीं ज्ञास्यसीदं त्वं यदहं परमेश्वरः।
अस्मि त्वन्नामनिर्णेता तथैवास्रायेल ईश्वरः॥
४ सेवको मम यो याकूब् य इस्रायेल् मम प्रियः।
तस्य निमित्तमेवाहं समाख्याम्यद्य नाम ते।
त्वं मां नैवाभिजानासि मया किन्त्वभिवाद्यसे॥
५ अद्वितीयः परेशो ऽहं नास्ति मद्भिन्न ईश्वरः।
मां न जानन् मयैव त्वं श्रिया संवेष्टयिष्यसे॥
६ सूर्य्योदयास्तयो मध्ये ज्ञास्यते सकलैरिदं।
अहं यदद्वितीयो ऽस्मि परेशो ऽहं न चापरः॥
७ अहं दीप्तेश्च निर्म्माता स्रष्टाहं तिमिरस्य च।
मङ्गलस्य विधाताहं सृष्टिकर्त्ता च दुर्गतेः।
एतानि सकलान्येव विदधे ऽहं परेश्वरः॥
८ ऊर्द्धात् त्वं वर्ष हे व्योम धर्म्मं निषिञ्च हे वियत्।
प्रविश्य बिन्दवो भूमिं कुर्व्वन्तु त्राणशस्यदां।
प्ररोहत्वपि याथार्थ्यं तत्स्रष्टाहं परेश्वरः॥
९ तं नरं धिक् स्वनिर्म्मात्रा सार्द्धं द्वन्द्वं करोति यः।
मृज्जकपालिकानां हि मध्ये सो ऽपि कपालिका॥
किं करोषीति वाक्यं किं कुलालं मृत्तिका वदेत्।
हस्त एतस्य नास्तीति त्वां वा त्वत्कर्म्म किं वदेत्॥
१० त्वं किं जनयसीत्येवं जनकं वक्ति यो जनः।
किं प्रसूयस एतद्वा नारीं यो वक्ति तञ्च धिक्॥
११ इस्रायेलः पवित्रो राट् निर्म्माता च परेश्वरः।
ब्रूते पृच्छत मां यूयं मत्पुत्रानधि भावि किं।
मद्धस्तकृतकर्म्माधि मह्यमाज्ञां प्रदत्त च॥
१२ अहं निर्म्मितवान् पृथ्वीं नरं तत्र च सृष्टवान्।

स्वीयहस्तद्वयेनाहं ततवांश्च विहायसं।
कृत्स्नायास्तस्य वाहिन्याः सेनाध्यक्षो ऽहमस्मि च॥
अमुं वीरञ्च धर्म्मेण समुत्पादितवानहं। १३
तस्य सर्व्वाणि वर्त्मानि करिष्यामि समानि च॥
निर्म्मास्यति पुनर्व्वारं मामकीनपुरीमसौ।
मोचयिष्यति दास्याच्च मम दूरीकृताः प्रजाः॥
तदर्थन्तु न मूल्यं स नोत्कोचं वा ग्रहीष्यति।
भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः॥
इत्थं परेश्वरो ब्रूते मिस्रीयाणामुपार्ज्जितं। १४
कूशीयानाञ्च वाणिज्यं सिवायीयाश्च मानवाः।
सुदीर्घास्त्वामुपेष्यन्ति भविष्यन्ति तवैव च॥
ते त्वत्पश्चाद् व्रजिष्यन्ति प्रसरन्तः सशृङ्खलाः।
त्वां प्रणम्य च तैरेतद् वाक्यं निवेदयिष्यते।
त्वयीशो ऽस्ति न चान्यत्र नास्ति को ऽप्यन्य ईश्वरः॥
आः सत्यमीश्वरो ऽसि त्वं सम्यगात्मनिगूहकः। १५
त्वमिस्रायेल ईशश्च परित्राणस्य साधकः॥
शिल्पिनो देवमूर्त्तीनां सर्व्वे यास्यन्ति खिन्नतां। १६
लज्जां प्राप्यैकसङ्गे च प्रस्थास्यन्ति त्रपान्विताः॥
इस्रायेल् परमेशात्तु नित्यं त्राणमवाप्स्यति। १७
यूयमनन्तकालेषु लज्जिता न भविष्यथ।
न कदाचन वा यूयं विवर्णत्वमवाप्स्यथ॥
नभसः सृष्टिकर्त्ता य ईश्वरो निर्म्ममे धरां। १८
तामुत्पाद्य स्थिरीकृत्य निर्जनां विदधे नहि।
निर्म्ममे किन्तु वासार्थं वक्तीदं स परेश्वरः।
अहमेव परेशो ऽस्मि मदन्यो विद्यते नहि॥
नाहं भाषितवान् गुप्तं न स्थाने ध्वान्तसेविते। १९
नावोचं याकुबो वंशं मृषान्विष्यत मामिति।
धर्म्मवादी परेशो ऽहं यथार्थं ज्ञापयामि च॥
हे विनाशत उत्तीर्णा अन्यजातीयमानवाः। २०
मिलित्वा यूयमायात सकलाश्चोपतिष्ठत॥
नैव किञ्चन जानन्ति प्रतिमाकाष्ठवाहकाः।

अनुपकारिदेवञ्च प्रति प्रार्थनकारिणः॥
११ आज्ञाप्यानीत तान् यूयं मन्त्रयन्ताञ्च ते मिथः।
इदं को ऽश्रावयत् पूर्व्वं को वादी तदजिज्ञपत्॥
किं न स्वयं परेशो ऽहं नास्ति मद्भिन्न ईश्वरः।
धर्म्मीशस्त्राणकश्चाहं मदन्यो विद्यते नहि॥
२२ हे भुवः प्रान्तभागेषु संस्थिताः सकला नराः।
मामुद्दिश्य निरीक्षध्वं परित्राणञ्च प्राप्नुत।
अहमेव यतो ऽस्मीशो द्वितीयो नहि विद्यते॥
२३ गृहीत्वा स्वीयनामाहं शपथं कृतवानिमं।
मद्वक्त्रान्निरगात् सत्यं तद् वाक्यं लोप्स्यते नहि॥
ममैवाग्रे भुवि न्यस्तं सर्व्वजानु भविष्यति।
शपथं सर्व्वजिह्वा च मन्नाम्नोच्चारयिष्यति॥
२४ केवलं परमेशे स्तो मम पुण्यबले इति।
तस्मै क्रुद्धा नराः सर्व्वे तमभ्येष्यन्ति लज्जिताः॥
२५ इस्रायेलीयवंशीयैः सकलैः परमेश्वरात्।
पुण्यं सम्प्राप्य तस्यैव श्लाघा कारिष्यते मुदा॥

---

४६ षट्चत्वारिंशोऽध्यायः।

१ बाबिलस्थतत्प्रतिमानाञ्च विनाशः ३ ईश्वरीयलोकानां रक्षा ५ प्रतिमानाम् असारता ८ विवेकं विनयकथनं १२ परित्राणकथनञ्च।

१ पश्य नतो ऽस्ति बेल् देवो पश्य भग्नो निबुस्तथा।
जन्तुष्वेव धुरीणेषु प्रतिमा अर्पितास्तयोः।
दुर्भाराः सन्ति तद्भारा अर्पिताः श्रान्तवाहने॥
२ तावुभौ तु नतौ भग्नौ धुरं रक्षितुमक्षमौ।
वन्दिवत् परदेशञ्च तावुभौ व्रजतः स्वयं॥
३ यूयं शृणुत मद्वाक्यं हे याकूबः कुलोद्भवाः।
इस्रायेलीयवंशस्यावशिष्टाः सकला नराः।
यूयमाजननीगर्भान्मयि भारवदर्पिता।
आमातृजठरत्यागाद् अहं युष्मान् वहामि च॥
४ यो ऽस्मि वार्द्धक्यपर्य्यन्तं सो ऽहं स्थास्यामि सर्व्वदा।
पलितं यावदेवाहं युष्मान् वक्ष्यामि भारवत्॥

अहं तत् कृतवान् पूर्व्वं युष्मान् वक्ष्याम्यहं पुनः।
धुरवच्च ग्रहीष्यामि रक्षिष्यामि च निश्चितं॥
केन तुल्याकृतिं मत्त्वा यूयं मामुपमास्यथ। ५
केन मत्प्रतिरूपेण समानं माञ्च वक्ष्यथ॥
अपव्ययिनरैः स्वर्णं पुटकेभ्यो वहिष्कृतं। ६
रजतञ्च तुलायष्ट्या यत्नतः परिमीयते॥
शिल्पिने च भृतिं दत्त्वा तेन निर्म्माप्य देवतां।
तां प्रणमन्ति तस्याश्च सर्व्वे कुर्व्वन्त्युपासनां॥
स्वस्कन्धेष्वर्पयित्वैव भारवच्च वहन्ति तां। ७
स्वस्थले स्थापिता तैश्च निश्चला सावतिष्ठते॥
यस्तु क्रन्दति तत्साक्षात् तस्मै न दत्त उत्तरं।
व्यसनात् तस्य रक्षां वा न करोति कथञ्चन॥
स्मरन्तो यूयमेतद्धि जायध्वं पुरुषोत्तमाः। ८
निधद्धं स्वमनांस्यत्र हे आज्ञालङ्घिनो नराः॥
स्मरत पूर्व्वकार्य्याणि प्राक्कालेषु कृतानि मे। ९
अहमेव विधातास्मि द्वितीयो नहि विद्यते।
ईश्वरश्चाहमेवास्मि नास्ति कश्चन मादृशः॥
अन्तकाले भविष्यद् यत् आदौ तज्ज्ञापयाम्यहं। १०
अकृतञ्च यदद्यापि तदग्रे प्रवदामि च॥
मयेदं गद्यते वाक्यं स्थायिनी मम मन्त्रणा।
यत् किञ्चिच्च ममाभीष्टं मया तत् साधयिष्यते॥
पूर्व्वस्या दिश उत्क्रोशमहमाह्वातुमुद्यतः। ११
दूरदेशत एवाहमानेष्यामि स्वमन्त्रिणं॥
मयेदं गद्यते वाक्यं सफलञ्च करिष्यते।
यं सङ्कल्पमहं कुर्व्वे स मया साधयिष्यते॥
हे गाढचेतसः सर्व्वे हे धर्म्माद् दूरवर्त्तिनः। १२
मया यद् गद्यते वाक्यं यूयं तच्छ्रोतुमर्हथ॥
स्वीयधर्म्मो मयानायि स दूरे नहि तिष्ठति। १३
मत्कर्त्तव्यं परित्राणं विलम्बं न करिष्यति।
त्राणं दास्यामि सीयोन इस्रायेले मम प्रभां॥

४७ सप्तचत्वारिंशोऽध्यायः।

१ बाबिलो भाविदण्डः ४ तस्य नानाविधपापञ्च।

१ हे बाबिलाख्यकन्ये त्वं नता धूलौ निषीद हि।
हे कस्दीयकुमारि त्वं भूमौ सीद निरासना।
तन्वी सुखप्रिया चेति त्वं नैवाख्यास्यसे पुनः॥
२ घरट्टद्वयमादाय गोधूमं तेन चूर्णय।
हर प्रावरणं स्वास्यात् पादवस्त्रञ्च मोचय।
जङ्घे चानावृते कृत्वा पदाभ्यां सरितस्तर॥
३ उच्छादिताञ्च लज्जा ते गुह्यदेशश्च दृश्यतां।
अहं शोधं ग्रहीष्यामि को ऽपि मां नहि रोत्स्यति॥
४ अस्माकं यः परित्राता सेनाध्यक्षः परेश्वरः।
इति नाम्ना स विख्यात इस्रायेलः पवित्रराट्॥
५ हे कस्दीयकुमारि त्वं मूका सीद तमो विश।
त्वं राष्ट्राणामधिष्ठात्रीति नैवाख्यास्यसे पुनः॥
६ स्वजनेभ्यो मया क्रुद्धा स्वीयभूमिं प्रदुष्य च।
अर्पितास्तव हस्ते ते त्वन्तु तान् प्रति निर्दया।
वृद्धानपि गरिष्ठेन स्वयुगेनाभ्यपीडयः॥
७ अहं शाश्वतकालार्थं राज्ञीति त्वमभाषथाः।
नात्राकार्षीर्मनोयोगम् उदर्कं नान्वचिन्तयः॥
८ इदानीं हे सुखासक्ते त्वमेतद् वचनं शृणु।
त्वं निश्चिन्तं सुखासीना मनसेत्थं प्रभाषसे॥
अद्वितीयाहमेवास्मि न निषत्स्याम्यभर्तृका।
आनपत्यजशोकञ्च न ज्ञास्यामि कदाचन॥
९ वैधव्यमानपत्यञ्च द्विविधं व्यसनन्त्विदं।
एकस्मिन्नेव घस्रे त्वाम् अकस्मादाक्रमिष्यति॥
त्वामेव भूरिमन्त्रज्ञां मोहने चातितत्परां।
आक्रमिष्यति पूर्णेन तेजसा तद् विपद्द्वयं॥
१० निश्चिन्ता त्वं स्वदौरात्म्ये वक्षि मां को ऽपि नेक्षते।
स्वज्ञानेन स्वबुद्ध्या च त्वं जातोत्पथगामिनी।
अद्वितीयाहमस्मीति मनोमध्ये च भाषसे॥

त्वान्तूपेष्यति दौर्गत्यं तत्प्रभातमसम्भवं। ११
आक्रमिष्यति चापत् त्वां त्वं तां व्याहन्तुमक्षमा।
सहसाज्ञातसारेण विनाशस्त्वामुपेष्यति॥
आबाल्यकालतो यत्र त्वं श्रमं कृतवत्यसि। १२
स्वीयमोहनविद्यां तां भूरिमन्त्रांश्च धारय॥
किं जाने त्वं तथा कृत्वा स्वोपकारं करिष्यसि।
विपदः प्रतिरोधो वा तव शक्यो भविष्यति॥
स्वभूरिमन्त्रणाभिस्त्वं परिश्रान्ताभवो यतः। १३
ततस्त्वामुपकुर्व्वन्तूपतिष्ठन्तो यथाविधि।
व्योमदेशविभक्तारस्ते नक्षत्रनिरीक्षकाः।
अमावस्यासु ये तुभ्यं दर्शयन्ति गतेः क्रमं॥
पश्य ते नालवद् भूता अग्निना भस्मसात् कृताः। १४
स्वप्राणानपि ते सर्व्वे दाहादुद्धर्त्तुमक्षमाः॥
तेष्वङ्गारेषु तापस्य सेवनं न करिष्यति।
न वा तस्या द्युतेरग्र उपवेक्ष्यति कश्चन॥
इदं तेषां नृणां भाग्यं यांस्त्वं श्राम्यसि सेवितुं। १५
यैः सार्द्धञ्च बणिग्भावं करोष्याबाल्यकालतः॥
विभ्रमिष्यन्ति ते सर्व्व एकैकः स्वीयसम्मुखं।
तेषां को ऽपि तवोद्धारे प्रवृत्तो न भविष्यति॥

---

४८ अष्टचत्वारिंशोऽध्यायः।

१ निजलोकान् प्रति परमेश्वरस्य भर्त्सनं १२ विनयकथनं १७ खेदकथनं २० भाविरक्षाकथनञ्च।

युष्माभिः श्रूयतामेतत् हे याकूबीयवंशजाः। १
इस्रायेलीयनामानो यिहूदाप्रस्रवोद्भवाः॥
परमेशस्य नाम्नैव यूयं शपथकारिणः।
इस्रायेलश्च युष्माभिरनुकीर्त्त्यत ईश्वरः।
न तु सत्येन भावेन न वा धर्म्मानुरागतः॥
यूयं धर्म्मपुरस्यैव पौरा इत्यनुकीर्त्तिताः। २

नामधेयञ्च यस्यास्ति सेनाध्यक्षः परेश्वरः।
इस्रायेलस्तमीशञ्च प्रतिभाष्य समाश्रिताः॥
३ प्राक्काले फलिता वाचो व्यक्ताप्यन्तादितो मया।
निर्य्ययुस्ता मम्मैवास्यान्नरेभ्यः प्रतिश्रुतवतः।
तूर्णञ्च कुर्व्वता कार्य्यं मया ताः सफलीकृताः॥
४ त्वं कठोरमनस्को ऽसि मन्या लोहमयी तव।
ताम्रमयो ललाटस्ते इत्यजानमहं यतः॥
५ तस्मात् त्वां ज्ञापयन्नादौ प्रत्यश्रौषमनागतं।
न शक्नोषि ततो वक्तुं कृतं मद्विग्रहेण तत्।
तद्धिता मम सिक्ता वा प्रतिमा तत् समादिशत्॥
६ यदश्रावि त्वया सर्व्वं सफलं तन्निरीक्ष्यतां।
किं न यूयञ्च हे देवाः प्रतिश्रोष्यथ किञ्चन॥
त्वान्तु याः श्रावयिष्यामि भाविवाच इतः परं।
नवीनास्ताः सुगुप्ताश्च तव ज्ञानाद् वहिःस्थिताः॥
७ नासंस्ताः कल्पिता आदौ न्यरूप्यन्ताधुनैव ताः।
दिनादद्यतनात् पूर्व्वं तास्त्वया संश्रुता नहि।
न शक्नोषि ततो वक्तुं ताः पश्यावगता मया॥
८ नाश्रौषीस्त्वं न वाज्ञासीरमुक्तश्रोत्र आदितः।
यतो ऽहं ज्ञातवानेतत् त्वमतीव प्रवञ्चकः।
अपकारीति नाम्ना च ख्यायसे जठरावधि॥
९ मया किन्तु स्वनामार्थं सहिष्णुताचरिष्यते।
स्वस्तवार्थं क्षमां कृत्वा त्वं नैवोच्छेत्स्यसे मया॥
१० द्रावितस्त्वं मया पश्य न तु रूप्यस्य सङ्गिवत्।
मूषायां दुःखरूपायां मया त्वञ्चानुरोचितः॥
११ स्वनामार्थं स्वनामार्थं कार्य्यं कारिष्यते मया।
यतस्तस्य महानिन्दा कथं सह्या भवेन्मम
नैवाहं वितरिष्यामि परस्मै स्वीयगौरवं॥
१२ मद्वाक्यं शृणु हे याकूब् इस्रायेल् मम कीर्त्तित।
अहं तद् अहमेवादिरहमन्तो भवामि च॥
१३ मामकीनकरः पृथ्व्या भित्तिमूलमतिष्ठिपत्।
दक्षिणो मम हस्तश्च प्रथतानीद्विहायसं।

तौ श्रुत्वैव ममाह्वानम् उभौ मामुपतिष्ठतः॥
सर्व्वैं र्युष्माभिरेकत्र समागत्य निशम्यतां। १४
देवानां मध्यतो वार्त्तां वीरस्यैतस्य को ऽवदत्॥
परेशः प्रीयते तस्मिन् मानसं तस्य बाबिलि।
कस्दीयेषु स्वशौर्य्यञ्च सफलं स करिष्यति॥
अहमेवाहमेवैतज्ज्ञापयित्वाह्वयामि तं। १५
स मयैव समानीतः कृतकार्य्यो भविष्यति॥
मामुपस्थाय युष्माभिरत्रावधीयतां मनः। १६
आदितो गोपने क्वापि नहि भाषितवानहं॥
आफलोत्पत्तिकालाद्धि तामधिष्ठितवानहं।
अद्य मां स्वात्मना सार्द्धं प्रैषीत् प्रभुः परेश्वरः॥
इस्रायेलः पवित्रो राट् मुक्तिदाता च यस्तव। १७
परमेशेन तेनैव वाक्यमेतन्निगद्यते॥
त्वत्प्रभुः परमेशो ऽहं हितशिक्षां ददामि ते।
यो मार्गस्तव गन्तव्यस्तस्मिंस्त्वां गमयामि च॥
ममाज्ञासु मनोयोगो यद्यकारिष्यत त्वया। १८
अभविष्यत् तरङ्गिण्या तुल्या शान्तिस्तदा तव।
अभविष्यच्च धर्म्मस्ते सागरस्योर्म्मिभिः समः॥
त्वद्वंशः सिकतातुल्यस्त्वत्प्रजा शर्करोपमा। १९
अनुच्छिन्नमलुप्तञ्चास्थास्यत् त्वदीयनाम च॥
निर्यात बाबिलो यूयं कस्दीयेभ्यः प्रधावत। २०
हर्षनादेन भाषध्वं वार्त्तामुच्चैः प्रदत्त च॥
तां महीप्रान्तपर्य्यन्तं व्याप्तां कर्त्तुञ्च जल्पत।
परमेशो निजं दासं याकूबं मुक्तवानिति॥
न भविष्यति तेषाञ्च तृष्णा शुष्कस्थलेष्वपि। २१
शैलात् तेषां कृते तोयं नायकः स्रावयिष्यति।
दलिते तेन पाषाणे वेगात् स्यन्दिष्यते जलं॥
नास्ति दुरात्मनां शान्तिरिति ब्रूते परेश्वरः॥ २२

---

४९ ऊनपञ्चाशत्तमोऽध्यायः।

१ यिहूदीयैः खीष्टावज्ञानं ७ अन्यदेशीयानां ग्राह्यत्वं १२ समाजे परमेश्वरस्य स्नेहः २२ तस्य सुखं २४ शत्रूणां विनाशश्च।

१ हे द्वीपेषु स्थिताः सर्व्वे यूयं संश्रोतुमर्हथ।
हे जना दूरदेशस्था युष्माभिरवधीयतां॥
आगर्भकोषवासान्मां परमेशः समाह्वयत्।
स चामातृदरादेव मम नामान्वकीर्त्तयत्॥
२ मम वक्त्रमकार्षीच्च तीक्ष्णनिस्त्रिंशसन्निभं।
माञ्च स्वकीयहस्तस्य छायायां पर्य्यजूगुपत्।
मृष्टाग्रवाणवत् कृत्वा स्वतूणीरे च मां न्यधात्॥
३ माञ्चाह मम दासस्त्वम् इस्रायेल् मद्यशस्करः॥
४ मया किन्तु न्यगादीदं वृथाहं कृतवान् श्रमं।
मुधालीकफलार्थञ्च स्वीयं क्षयितवान् बलं॥
परमेशस्य हस्ते तु मम धर्म्मः समर्पितः।
विद्यते च मदीशस्य करे मत्कर्म्मणः फलं॥
५ यः स्वीयसेवकं कर्त्तुं जरायौ निरमात्त मां।
इदानीं परमेशः स स्वयं मामभ्यभाषत॥
तस्येच्छा यन्मया याकूब् प्रत्यानीयेत तं प्रति।
इस्रायेलस्तु तादृक्षः सङ्गृहो नहि सिध्यति॥
तथापि परमेशस्य समक्षं सत्कृतोऽस्म्यहं।
अस्ति मद्बलदाता च मामकीनेश्वरः स्वयं॥
६ स चाह क्षुद्रमेतद् यत् त्वं भूत्वा मम सेवकः।
केवलमस्य याकूबो वंशानुन्नमयेः पुनः॥
इस्रायेलो न्वयां मध्ये त्राणपात्राणि सन्ति ये।
मां प्रति केवलं तान् वा यत् प्रत्यावर्त्तयेः पुनः॥
पृथिवीप्रान्तपर्य्यन्तं त्वं त्राता मन्निरूपितः।
यद् भवेस्तत्कृते ऽकार्षं त्वां जातीनां प्रभाकरं॥
७ यो मनुष्यैरवज्ञातो देशीयैश्चावगर्हितः।
पार्थिवानाञ्च दासो ऽस्ति तं समुद्दिश्य भाषते।
इस्रायेलः पवित्रो राट् मोचकस्य परेश्वरः॥

दृष्ट्वोत्थास्यन्ति राजानस्त्वां प्रणंस्यन्ति चाधिपाः।
सम्मन्य परमेशं तं यस्य विश्वास्यता स्थिरा।
इस्रायेलः पवित्रं तं प्रभुं यस्त्वामरूरुचत्॥
भाषते भारतीमेनां स्वयमेव परेश्वरः। ८
अनुग्रहस्य काले ऽहं श्रुतवान् प्रार्थनां तव।
परित्राणस्य घस्रे च साहाय्यं कृतवांस्तव॥
त्वां रक्षंश्च करिष्यामि लोकानां नियमाकरं।
इत्थं त्वयोन्नतिप्राप्तां विधास्यामि वसुन्धरां।
स्वामिभ्यो भाजयिष्यामि भागांस्तस्या निरालयान्॥
काराबद्धान् गदिष्यामि यूयं निर्गन्तुमर्हथ। ९
प्रादुर्भवत यूयञ्चेति नरांस्तिमिरावृतान्।
ते मार्गेषु चरिष्यन्ति विहरिष्यन्ति चाद्रिषु॥
न क्षुधा न च तृष्णा तान् मनुष्यान् पीडयिष्यति। १०
नैव मरीचिका वा तान् न सूर्य्यो वाहनिष्यति॥
यतो ऽनुकम्पकस्तेषां स्वयं तान् गमयिष्यति।
तोयप्रवाहकोत्सानां समीपं तांश्च नेष्यति॥
अहं स्वीयगिरीन् सर्व्वान् करिष्यामि महापथं। ११
मत्कृता राजमार्गाश्च भविष्यन्ति समुच्छृताः॥
पश्य समागमिष्यन्ति दूरदेशान्नरा इमे। १२
उत्तरात् पश्चिमाच्चामी अमी सीनीमदेशतः॥
त्वं गानं कुरु हे स्वर्ग त्वञ्चाह्लादस्व हे धरे। १३
उच्चेनानन्दनादेन पर्व्वता आस्वनन्तु च॥
स्वयं परेश्वरो यस्मात् स्वप्रजाः सान्त्वयिष्यति।
निजदुर्गतलोकेषु करुणाञ्चाचरिष्यति॥
वक्ति किन्तु सियोनेतत् त्यक्तवान् मां परेश्वरः। १४
मन्ये विस्मृतवानस्ति मामकीनप्रभुश्च मां॥
स्तन्यपायिशिशुं नारी किं विस्मृत्य कथञ्चन। १५
स्वकीयगर्भजाद्बालात् करुणामुपसंहरेत्॥
तादृग् विस्मरणं नार्य्या जातु यद्यपि कुर्व्वते।
तथापि त्वं मया नैव कथञ्चिद्विस्मरिष्यसे॥
मद्धस्ततलयोः पश्य तवाकारो मयाङ्कितः। १६

सर्व्वदा तव प्राचीरं मत्प्रत्यक्षञ्च विद्यते ॥
१७ त्वत्समीपमुपस्थातुं त्वरन्ते नन्दनास्तव।
त्वन्मध्यान्निर्गमिष्यन्ति भञ्जका ध्वंसकाश्च ते ॥
१८ त्वं चतुर्द्दिश उद्दिश्य दृक्पातं कुरु पश्य च।
मिलित्वा सकला एते समायान्ति तवान्तिकं ॥
परमेश इदं ब्रूते नित्यजीवी भवामि चेत्।
तर्हि त्वं भूषणानीव सर्व्वांस्तान् परिधास्यसे।
संवेष्टयिष्यसे तैश्च कन्या मेखलया यथा ॥
१९ नष्टाः शून्याश्च पुर्य्यस्ते देशश्च ध्वंसितस्तव।
सङ्कुला किन्त्वितः पश्चाद् भविष्यस्यालयार्थिभिः।
प्रस्थास्यन्ति सुदूरञ्च तावकग्रासकारिणः ॥
२० तव सन्तानहीनायाः पुत्रास्त्वत्कर्णगोचरे।
भूयो भूयो गदिष्यन्ति स्थानं सङ्कुचितं मम।
यथाहं शक्नुयां वस्तुं देहि मह्यं तथा स्थलं ॥
२१ स्वचित्ते वक्ष्यसि त्वञ्च को ममैतानजीजनत्।
अपुत्रासमहं बन्ध्या दूरं नीता प्रवासिता ॥
तदा कः सकलानेतान् सन्तानान् समवर्धयत्।
एकाकिन्यवशिष्टासं कुत्र त्वासन्निमे तदा ॥
२२ प्रभुना परमेशेन वाक्यमेतन्निगद्यते।
पश्य जातीः समाक्रातुं करमुत्थापयाम्यहं।
विदेशिनाञ्च प्रत्यक्षं स्थापयामि निजध्वजं ॥
स्ववक्षःसु वहन्तस्त आनेष्यन्ति सुतांस्तव।
स्वस्कन्धांश्च समारोप्यानेष्यन्ति दुहितॄंस्तव ॥
२३ राजानश्च भविष्यन्ति त्वद्दासाः शिशुपालकाः।
तेषां श्रेष्ठा महिष्यश्च त्वद्दास्यः स्तन्यदायिकाः ॥
भूमाववनतास्याश्च त्वां प्रणंस्यन्ति ते तदा।
त्वदीयपादयो र्लग्ना धूली तैश्चावलेक्ष्यते ॥
तेन प्रतीक्षिणो यस्य न भविष्यन्ति लज्जिताः।
स परेशो ऽहमस्मीति त्वया ज्ञायिष्यते तदा ॥
२४ यद् द्रव्यं समरे लब्धं वीरात् तत् किं हरिष्यते।
न्याय्यजेतुश्च वन्दी वा किं पुन र्मोचयिष्यते ॥

तथापि परमेशेन वाक्यमेतन्निगद्यते। २५
सत्यं वीरस्य या वन्दी सा पुन र्मोचयिष्यते।
युद्धे लब्धञ्च यद् द्रव्यं तद् दुर्वृत्ताद्धरिष्यते॥
त्वया ये विवदन्ते च विवदिष्ये ऽहमेव तैः।
करिष्याम्युपकारञ्च त्वत्पुत्राणामहं स्वयं॥
खादिष्यन्ति ममादेशात् स्वमांसं पीडकास्तव। २६
ते च द्राक्षारसेनेव मदिष्यन्ति स्वशोणितैः॥
तेन स्वयं परेशो ऽहं परित्राता तवास्मि यत्।
याकूबो बलदाताहं तव यश्चास्मि मोचकः।
एतत् सम्यगभिज्ञातुं शक्यते सर्व्वप्राणिभिः॥

---

५० पञ्चाशत्तमोऽध्यायः।

१ अविश्वासकारणात् खीष्टेन यिहूदीयानां त्यजनं ४ खीष्टस्य कथनं १० ईश्वरे विश्वसितुं विनयकथनञ्च।

इदानीं भारतीमेतां भाषते परमेश्वरः। १
मातु र्वस्त्यागपत्रं क्व येन तां त्यक्तवानहं।
युष्मान् मदुत्तमर्णानां कस्मै विक्रीतवानहं॥
युष्माकं स्वापराधानां हेतुतो विक्रयः कृतः।
त्यक्ता माता च युष्माकं युष्मत्पातककारणात्॥
मय्यायाते कुतो हेतो र्नैको जनो ऽप्यविद्यत। २
कुतः कृते मयाह्वान उत्तरं को ऽपि नाददात्॥
ह्रस्वः किं मम हस्तो ऽभूदसमर्थश्च मोचने।
किं जातो बलहीनो ऽहमसमर्थश्च रक्षणे॥
पश्य सन्तर्ज्जनेनैव सागरं शोषयाम्यहं।
तथा स्रोतस्विनीश्चापि विदधामि मरुस्थलं॥
जलाभावाच्च दुर्गन्धास्तासां मीना भवन्ति हि।
पिपासाकारणात् तेषां प्राणनाशश्च जायते॥
शोकसूचककालिम्ना गगनं वेष्टयाम्यहं। ३
मलिनं शाणवस्त्रञ्च कुर्व्वे तस्य परिच्छदं॥
प्रभुः परेश्वरो मह्यं शिक्षां विद्यार्थिनो ऽददात्। ४

उपकर्त्तुं जनान् श्रान्तान् वाक्यैः शक्नोम्यहं ततः ॥
यच्च संशृणुयां शिक्षाम् अहं विद्यार्थिनो यथा ।
तदर्थं तेन कर्णो मे प्रतिप्रातः प्रबोध्यते ॥
५ ममोद्घाटितवान् कर्णं स प्रभुः परमेश्वरः ।
न विरोध्यभवच्चाहं न च पश्चादपासरं ॥
६ प्रहारिभ्योऽर्पयं पृष्ठं गण्डौ च श्मश्रुहारिषु ।
निष्ठीवाद्यवमानाच्च नैव प्राच्छादयं मुखं ॥
७ प्रभुना परमेशेन साहाय्यं क्रियते मम ।
तस्माच्च कारणान्नैव लज्जायुक्तो भवाम्यहं ॥
तस्माच्च कारणात् स्वास्यं कुर्व्वे ऽग्निप्रस्तरोपमं ।
लज्जितो न भविष्यामीति चाभिज्ञायते मया ॥
८ मदीयपुण्यनिर्णेता नेदिष्ठः पश्य विद्यते ।
मया सार्द्धं विवादी कः स्यास्यावः सम्मुखे मिथः ।
विचारे मद्विपक्षः कः स हि मामुपतिष्ठतु ॥
९ प्रभुः परेश्वरः पश्य सहायो ऽस्ति मम स्वयं ।
अतो मां दोषिणं कर्त्तुं समर्थः को जनो भवेत् ॥
सर्व्वे ते वस्त्रवत् पश्य समवाप्स्यन्ति जीर्णतां ।
सकलाश्च भविष्यन्ति वासोवत् कीटभक्षिताः ॥
१० परमेश्वरतो भीतस्तद्दासस्य रवाश्रवः ।
अन्धकारस्य मध्येन यो व्रजेद् दीप्तिवर्ज्जितः ।
तादृशः को ऽपि युष्माकं मध्ये किं विद्यते जनः ॥
परमेशस्य नामैव शरणं स प्रगच्छतु ।
स स्वकीयेश्वरञ्चैव विश्वासेनावलम्बतां ॥
११ इदं वच्मि तु सर्व्वांस्तान् अनलं ज्वलयन्ति ये ।
स्वान् कटिबन्धनेनैवाङ्गारेण वेष्टयन्ति च ।
यूयं प्रविशत स्वाग्निमाङ्गारञ्च स्वदीपितं ॥
मामकीनकराद् यूयमिदं भाग्यमवाप्स्यथ ।
यन्त्रणायाः स्थले यूयं शयनं प्रकरिष्यथ ॥

---

५१ एकपञ्चाशत्तमोऽध्यायः।

१ इब्राहीमो दृष्टान्तः ४ मनो निधातुं लोकानामाज्ञानं ७ परित्राणकथनं ९ आश्वासकथनं १२ सान्त्वनाकथनं १७ विलापकथनं २१ रक्षणकथनञ्च।

आकर्णयत मद्वाक्यं यूयं धर्म्मानुधाविनः। १
सयत्नं परमेशस्य पर्य्यन्वेषणकारिणः॥
यन्मध्याद् यूयमुत्कृत्तास्तं शैलं परिपश्यत।
यत्कूपदरिता यूयम् उत्खातास्ताञ्च पश्यत॥
युष्माकं तात इब्राहीम् युष्माभिः समवेक्ष्यतां। २
जननी या च युष्माकं सारा साप्यवलोक्यतां॥
अहमेकाकिनं दृष्ट्वा तं समाहूतवान् पुरा।
दत्तवांश्चाशिषं तस्मै स्वयं तं वर्द्धयामि च॥
सीयोनं सान्त्वयन्नेतद् भाषते परमेश्वरः। ३
तदीयोच्छिन्नधामानि सकलानि च सान्त्वयन्॥
तदीयारण्यमेतेन स करोत्येदनोपमं।
तत्रत्यञ्च मरुस्थानम् ऐश्वरोद्यानसन्निभं॥
यस्मादवस्थितिं तत्र हर्षानन्दौ करिष्यतः।
स्तवो गानध्वनिश्चापि श्रोष्येते तत्र भूरिशः॥
मम वाक्ये मनोयोगं कुरुध्वं हे मम प्रजाः। ४
आकर्णयत मद्वाणीं हे मत्सम्बन्धिनो नराः॥
यस्मान्मत्तः समुत्पद्य शास्त्रं व्याप्स्यति मेदिनीं।
स्वीयनीतिञ्च जातीनां स्थापयिष्यामि दीपवत्॥
आसन्नो मम धर्म्मा ऽस्ति त्राणञ्चाभ्युदितं मम। ५
जातीनां शासनञ्चापि मद्बाहुभ्यां प्रसेत्स्यति।
आकाङ्क्षिष्यन्ति मां द्वीपा उद्वीक्ष्यन्ति च मद्भुजौ॥
ऊर्द्ध्वे व्योम निरीक्षध्वं नीचे भूमिञ्च पश्यत। ६
क्षेष्यते धूमवद् व्योम भू र्जरिष्यति वस्त्रवत्।
तथावच्च मरिष्यन्ति सकलास्तन्निवासिनः॥
यावदनन्तकालन्तु स्थिरं त्राणं मया कृतं।
मन्निरूपितधर्म्मश्च निर्व्विकारो भविष्यति॥
आकर्णयत मद्वाक्यं हे धर्म्मज्ञानिनो नराः। ७

हे लोकाः स्वीयचित्तेषु मदीयशास्त्रधारिणः॥
मर्त्यानां निन्दनाद् यूयं नैव साध्वसमाप्नुत।
नैव क्षुभ्यत वा तेषां तिरस्कारात् कथञ्चन॥
८ यतस्तान् वसनानीव कीटः सम्भक्षयिष्यति।
यतश्च मेषलोमेव कृमिस्तान् पर्य्यशिष्यति॥
यावदनन्तकालन्तु धर्म्मो मे स्थास्यति स्थिरः।
मत्कृतञ्च परित्राणम् आपौरुषपरम्परं॥
९ हे परेशस्य बाहो त्वं प्रजागृहि प्रजागृहि।
स्वकीयभूषणेनेव बलेनालङ्कृतो भव।
प्रजागृहि यथापूर्व्वं काले चाद्यन्तणां यथा॥
किं न त्वमेव बाहुः स येन राहव् प्रहारितः।
येन स स्थूलनागश्च क्षतजर्जरितोऽभवत्॥
१० किं न त्वमेव बाहुः स सागरो येन शोषितः।
महार्णवस्य तोयानि येन विद्रावितानि च॥
मोचितानां मनुष्याणाम् अर्णवोत्तरणाय च।
येनागाधसमुद्रस्य तले राजपथः कृतः॥
११ नराः प्रत्यागमिष्यन्ति परमेशेन मोचिताः।
गीत्यायास्यन्ति सीयोनं तेऽक्षयानन्दमौलयः।
प्राप्स्यतः सुखहर्षौ तान् क्लेशार्त्ती चापयास्यतः॥
१२ अहमेवाहमेवास्मि युष्मदीयप्रबोधकः।
कुतस्त्वं शङ्कसे मर्त्यात् स त्ववश्यं मरिष्यति।
कुतो वा नरसन्तानात् स तृणेन निमास्यते॥
१३ व्योम्नो विस्तारकर्त्ता यः पृथिव्याः स्थापकश्च यः।
त्वत्स्रष्टारं परेशं तं कुतो विस्मृतवानसि॥
ध्वंसनायोद्यतस्येव पीडकस्य च कोपतः।
कुतस्ते जायते त्रासः प्रतिघस्रं निरन्तरं।
पीडकस्य स कोपस्त्विदानीं कुत्र प्रकाशते॥
१४ काराबद्धो नरः कुब्जस्त्वरते मुक्तिप्राप्तये।
न मरिष्यति कूपे स नान्नाभावाद् विषत्स्यति॥
१५ अहञ्च स्वयमेवास्मि त्वत्प्रभुः परमेश्वरः।
मया प्रचोदिते सिन्धौ तस्य गर्ज्जन्ति वीचयः।

परेशो वाहिनीनाथ इति नाम ममास्ति च॥
मया स्वकीयवाचश्च तव वक्त्रे समर्पिताः। १६
त्वञ्च मदीयहस्तस्य छायायां छाद्यसे मया॥
वितनिष्यस्यतो व्योम स्थापयिष्यसि च क्षितिं।
त्वं मदीयप्रजासीति सीयोनञ्च गदिष्यसि॥
हे यिरूशालमुत्तिष्ठ प्रजागृहि प्रजागृहि। १७
परेशस्य करालब्धे कंसे त्वं क्रोधमापिबः।
कम्पोत्पादककंसस्थं समलं मद्यमापिबः॥
पुत्राणां त्वत्प्रसूतानां नैकस्यचालने क्षमः। १८
त्वत्संवर्द्धितसूनूनां नैकस्यकरधारणे॥
दुःखद्वयमुपैति त्वां त्वत्कृते कस्तु शोचति। १९
नाशभङ्गक्षुधाखड्गैः क्लिष्टा त्वं केन सान्त्व्यसे॥
त्वत्पुत्रा मूर्च्छिताः सन्ति सर्व्वशृङ्गाटकेषु च। २०
पतित्वा शेरते भूमौ जालबद्धा मृगा इव॥
पूर्णानि परमेशस्य क्रोधपात्राणि सन्ति ते।
पूर्णानि तावकेशस्य भर्त्सनाभाजनानि च॥
हे दुःखार्त्ते विना मद्यं मत्ते स्त्रि त्वमिदं शृणु॥ २१
भाषते भारतीमेतां त्वत्प्रभुः परमेश्वरः। २२
स्वप्रजानां निमित्तञ्चोत्तरवादीश्वरस्तव॥
कम्पोत्पादककंसं तं गृह्णामि त्वत्करादहं।
मद्यं मत्कोपकंसस्थं न पातव्यं त्वया पुनः॥
अर्पयिष्यामि तं कंसं त्वत्क्लेशदृणां करेष्वहं। २३
भुग्ना भवोत्तरिष्याम इति ते भाषिते यतः।
त्वया वर्त्मेव पान्थानां स्ववपु र्भूमिसात् कृतं॥

---

५२ द्विपञ्चाशत्तमोऽध्यायः।

१ समाजस्याह्वानं ३ रक्षायाः कथनं ७ सुसंवादप्रचारणकथनं ९ तेन सुखं ११ परित्राणं १३ ख्रीष्टमधि भाविवाक्यञ्च।

जागृहि जागृहि स्वोर्ज्जः परिधत्स्व च हे सियोन्। १
हे पुण्यपुरि यिरूशालम् धर स्वचारुभूषणं।

अच्छिन्नत्वगपूतस्त्वां पुन र्नैव प्रवेक्ष्यति ॥
२ धूलिं त्यज यिरूशालम् उत्थायोपविशासने।
वन्दिकुमारि सीयोंस्त्वं गलात् पाशान् विमोचय ॥
३ स्वयं परेश्वरो यस्माद् भाषते भारतीमिमां।
यथाकारि विनामूल्यं युष्माकं विक्रयः पुरा।
परिक्रयो विना रौप्यं पुनः कारिष्यते तथा ॥
४ प्रभुना परमेशेन यत एतन्निगद्यते।
प्रवस्तुं मिसरं देशम् आदौ जग्मु र्मम प्रजाः।
शेषकाले त्वशूरीयैः कृतस्तासामुपद्रवः ॥
५ मम किन्त्वत्र किं लभ्यम् इति ब्रूते परेश्वरः।
यतो देशान्तरं नीता विनामूल्यं मम प्रजाः ॥
क्रोशन्ति शासकास्तासामिति ब्रूते परेश्वरः।
ममापि निन्द्यते नाम प्रतिघस्रं निरन्तरं ॥
६ मम लोकास्ततो हेतोरभिज्ञास्यन्ति नाम मे।
मां पश्येति मयैवोचे तच्च ज्ञास्यन्ति ते तदा ॥
७ किं रम्यं भाति दूतस्य चरणद्वयमद्रिषु।
येन विज्ञाप्यते सन्धिः शुभवार्त्ता च दीयते।
परित्राणस्य संवादो नरेभ्यश्च निवेद्यते।
त्वदीशः कुरुते राज्यमिति येनोच्यते सियोन् ॥
८ अयं त्वद्रक्षिणां नाद उच्चनादं प्रकुर्व्वतां।
प्रगास्यन्त्येकयोगे ते यतस्तैः परमेश्वरः।
सीयोनं पुनरागच्छन् प्रत्यक्षो लक्षयिष्यते ॥
९ हे यिरूशालमाख्याया नगर्य्या निर्जनालयाः।
कुरुतोच्चध्वनिं यूयम् एकयोगे च गायत ॥
स्वयं परेश्वरो यस्मात् स्वप्रजाः सान्त्वयिष्यति।
स यिरूशालमस्यापि मुक्तिदाता भविष्यति ॥
१० सर्व्वदेशीयलोकानां प्रत्यक्षं परमेश्वरः।
स्वीयपवित्रबाहुञ्च कार्य्यायोच्छादयिष्यति ॥
तदानीं यत् परित्राणं कृतवानस्मदीश्वरः।
तत् परिद्रक्ष्यते सर्व्वैः पृथिवीप्रान्तवासिभिः ॥
११ यात यात वहि र्यात न किञ्चित् स्पृशताशुचि।

हे नराः परमेशस्य सामग्रीभारवाहिनः।
तस्या मध्यादहि यात कुरुध्वञ्चात्मनः शुचीन्॥
निष्क्रमः किन्तु युष्माकं न भविष्यति सत्वरः। १२
न पलायनयुक्ता वा युष्मद्यात्रा भविष्यति॥
यतो युष्माकमग्रे ऽग्रे परमेशः क्रमिष्यति।
इस्रायेलो य ईशः स युष्मत्पार्ष्णिर्भविष्यति॥
मदीयसेवकः पश्य ज्ञानाचारं करिष्यति। १३
तस्मात् स उन्नतो मान्यो ऽतीवोच्चश्च भविष्यति॥
नराद् विकृतवक्त्रं तं विरूपं मर्त्त्यपुत्रतः। १४
दृष्ट्वा तं प्रत्यनेकेषां चमत्कारो ऽभवद्यथा॥
तथैवानेकजातीयान् मनुष्यान् सो ऽभिषेक्ष्यति। १५
रुद्धवक्त्रा भविष्यन्ति भूपाला अपि तं प्रति॥
तेभ्यो यत् कथितं नासीत् तत् तै र्वीक्षिष्यते यतः।
यस्य तै र्न श्रुता वार्त्ता तच्च तैरनुभोत्स्यते॥

---

५३ त्रिपञ्चाशत्तमोऽध्यायः।

खीष्टस्य नानादुःखानि तद्दुःखानां फलञ्च।

अस्मच्छ्रावितवार्त्तायां विश्वासं को विधत्तवान्। १
परमेशस्य बाहु र्वा कं प्रत्यभूत् प्रकाशितः॥
प्रारोहत् तस्य साक्षात् स यथा सुकोमलो ऽङ्कुरः। २
उत्पन्नं शुष्कभूमौ वा यथा पादपमूलकं॥
न श्रीस्तस्य न शोभासीत् अस्मदीक्षणकर्षिका।
नैवासीत् तस्य सौन्दर्य्यम् अस्मत्प्रीतिप्रवर्त्तकं॥
सो ऽवज्ञातो नृणामन्त्यो व्यथाभाजनमार्त्तिवित्। ३
मुखाच्छादीव चास्मत्तस्तुच्छो ऽस्माभिरनादृतः॥
सत्यमस्माकमेवार्त्तीः स गृहीत्वावहत् स्वयं। ४
अस्मदीयव्यथाभारं स चाधार्षीत् स्वभारवत्॥
निगृहीतो मनुष्यः स ईश्वरेण विताडितः।
अभिसन्तापितश्चेति बोधो ऽस्माकमजायत॥
अस्मदीयकुकृत्यानां कृते स जर्ज्जरीकृतः। ५

अस्मदीयापराधानां कृते पिष्टो ऽभवच्च सः ॥
६ अस्मत्क्षेमप्रदा शास्तिस्तस्य मूर्धन्यवर्त्तत ।
कषाघातैश्च तद्भुक्तैरस्मत्स्वास्थ्यं प्रसिध्यति ॥
मेषा इव वयं सर्व्वे आस्म भ्रमणकारिणः ।
स्वकीयमार्गमेकैकः सम्मुखीकृत्य चाव्रजत् ।
अस्मत्सर्व्वैनसाक्रान्तं तन्त्वकार्षीत् परेश्वरः ॥
७ दण्डभोगे च कर्त्तव्ये क्लेशस्तेनाङ्गीकृतः ।
स स्वकीयमुखञ्चापि तत्र व्याहृतवान् नहि ॥
नीयमानो वधस्थानं क्षुद्रमेषशिशुर्यथा ।
लोमच्छेत्तुः समक्षं वा नीरवा मेषिका यथा ।
तादृगेव निजं वक्त्रं सो ऽपि व्याहृतवान् नहि ॥
८ उपद्रवाविचाराभ्यां स वधं प्रत्यकृष्यत ।
तात्कालिकमनुष्याणां वर्णने को भवेत् क्षमः ॥
जीवतां नीवृतो मध्यात् स उच्छिन्नो ऽभवद् यतः ।
कारणं मम लोकानां पापं निग्रहमर्हतां ॥
९ दुर्ज्जनैः सह तस्यासीत् शववासो निरूपितः ।
धनिनः किन्तु सङ्गी स मृत्योः पश्चादजायत ॥
तदीयाचरणं यस्माद् आसीद् दौरात्म्यवर्ज्जितं ।
नैवाविद्यत वा तस्य वक्त्रे काचित् प्रवञ्चना ॥
१० तं पेष्टुं निग्रहीतुञ्च परमेशस्त्वरोचयत् ।
प्रायश्चित्ते ऽपराधानां तस्य प्राणैरनुष्ठिते ।
वीक्षिष्यते स्ववंशं स दीर्घायुश्च भविष्यति ।
परमेशस्य चाभीष्टं तत्करेण प्रसेत्स्यति ॥
११ स्वीयप्राणपणाज्जातं फलं दृष्ट्वा स तर्प्स्यति ।
आत्मज्ञानप्रदानेन पुण्यप्राप्तान् करिष्यति ।
बहूनेव मनुष्यान् स पुण्यवान् सेवको मम ।
अपराधांश्च तेषां स वक्ष्यति स्वीयभारवत् ॥
१२ अतो ऽहं तं करिष्यामि महतां सहभागिनं ।
स पराक्रमिभिः सार्द्धं लोप्त्रस्यांशी भविष्यति ॥
कारणं मृत्युपर्य्यन्तं तेन प्राणव्ययः कृतः ।
दुष्क्रियाकारिणां मध्य एकः स गणितो ऽभवत् ॥

बहूनां पापभारञ्च तोलयित्वावहत् स्वयं।
पामराणां निमित्तञ्च कुरुते साध्यसाधनं॥

---

५४ चतुःपञ्चाशत्तमोऽध्यायः।

१ अन्यदेशीयजनैः समाजस्य वर्द्धनं ११ तस्य सौन्दर्य्यं सुखानि च।

हे बन्ध्ये प्रसवाज्ञाते त्वमानन्दध्वनिं कुरु। १
गर्भव्यथानभिज्ञाते उच्चै र्गाय मुदा नद॥
सधवाया अपत्येभ्यो निर्नाथाया यतस्तव।
सन्त्यनेकान्यपत्यानीति ब्रूते परमेश्वरः॥
स्थानं स्वकीयदूष्यस्य विशालीक्रियतां त्वया। २
शिविरस्य च वर्ध्यन्तां सर्व्वा यवनिकास्त्वया॥
मा भवेद् व्ययशङ्का ते सकला दूष्यरज्जवः।
त्वया दीर्घा विधीयन्तां दृढास्तत्कीलकास्तथा॥
यतः प्राप्स्यसि वृद्धिं त्वं वामदक्षिणपार्श्वयोः। ३
त्वत्सन्ताना हरिष्यन्ति चाधिकारं विदेशिनां।
वसतिञ्च करिष्यन्ति नरशून्यपुरेषु ते॥
मा बिभीहि यतो हेतो र्न भविष्यसि लज्जिता। ४
मा विषीद यतो हेतो र्न भविष्यसि वञ्चिता॥
स्वीययौवनकालस्य लज्जां त्वं विस्मरिष्यसि।
वैधव्यस्यापमानञ्च नैवानुचिन्तयिष्यसि॥
यतो यस्तावकस्रष्टा स एवास्ति पतिस्तव। ५
नामधेयञ्च तस्यास्ति सेनाध्यक्षः परेश्वरः॥
इस्रायेलः पवित्रो राट् स्वयं त्वन्मोचको ऽस्ति च।
कृत्स्नभूमण्डलस्येश इत्येव ख्यायते च सः॥
नारीमिव परित्यक्तां मनस्तापसमन्वितां। ६
यौवनात् पतिवर्त्नीं वा भार्य्यामिव निराकृतां।
आह्वयत् परमेशस्त्वामिति ब्रूते परेश्वरः॥
स्वल्पस्थायिनिमेषार्थं त्वं पर्य्यत्यज्यथा मया। ७
महाकरुणया किन्तु त्वं मयानुग्रहीष्यसे॥
क्रोधावेशात् क्षणैकार्थं त्वत्तः प्राच्छादयं मुखं। ८

नित्यस्थायिप्रसादेनानुकम्पे त्वान्त्वहं पुनः ।
भाषते भारतीमेतां मोचकस्ते परेश्वरः ॥
९ मत्साक्षादस्य दृष्टान्तं नोहीयतोयविप्लवः ।
धरा नोहीयतोयैस्तैः पुन र्नाप्लावयिष्यते ।
नरेभ्यः शपथेनैतत् प्रत्यश्रौषमहं यथा ॥
तथैव शपथं कृत्वा तुभ्यं प्रतिश्रुतोऽस्म्यहं ।
न क्रोत्स्यामि पुनस्तुभ्यं न त्वां चोप्स्यामि वा पुनः ॥
१० विचलन्त्यचला जातु प्रक्षुभ्यन्ति च पर्व्वताः ।
मदीयानुग्रहः किन्तु त्वत्तो न विचलिष्यति ॥
न वा क्षेमप्रतिज्ञा मे प्रक्षोभिष्यति कर्हिचित् ।
वक्तीदं परमेशः स यस्त्वां समनुकम्पते ॥
११ हे दीने वात्यया क्षुब्धे सान्त्वनापरिवर्ज्जिते ।
पश्याहं प्रणिधास्यामि सिन्दूरे प्रस्तरांस्तव ।
नीलमणींश्च दास्यामि त्वदीयभित्तिमूलवत् ॥
१२ निर्म्मास्ये पद्मरागैश्च प्रासादशिखराणि ते ।
त्वद्द्वाराणि करिष्यामि मणीन् मरीचिमालिनः ।
तव कृत्स्नाञ्च सीमानं रमणीयोपलावलिं ॥
१३ त्वत्सन्ताना भविष्यन्ति सर्व्वे परेशशिक्षिताः ।
परमा च ततः शान्तिस्त्वत्सुतानां भविष्यति ॥
१४ धर्म्मेणैव तदानीञ्च त्वं भविष्यसि सुस्थिरा ।
दौरात्म्याददतिदूरा च न भेतव्यं त्वया यतः ।
त्रासाद् दूरा यतस्तस्य त्वमगम्या भविस्यसि ॥
१५ पश्यारयः समेष्यन्ति मान्तु नाप्स्यन्ति सङ्गिनं ।
समेताः सकलास्ते च पतिष्यन्ति कृते तव ॥
१६ अङ्गारानलमुद्दीप्य तत्र स्वकीयकर्म्मणे ।
यः शिल्पी निर्म्मिमीतेऽस्त्रं सृष्टवानहमेव तं ।
तथा विनाशकञ्चापि ध्वंसार्थं सृष्टवानहं ॥
१७ निर्म्मितं त्वद्विरुद्धन्तु किञ्चनास्त्रं न सेत्स्यति ।
विचारे त्वद्विपक्षा च जिह्वा दोषीभविष्यति ॥
परमेशस्य दासानाम् अधिकारोऽयमस्ति हि ।
पुण्यञ्चेदं मया दत्तम् इति ब्रूते परेश्वरः ॥

५५ पञ्चपञ्चाशत्तमोऽध्यायः।

१ प्रत्यावर्त्तनाय पापिनामाह्वानं ६ ईश्वरमन्वेष्टुम् आह्वानं १० तेन धर्म्मेण यत् सुखं तस्य वर्णनञ्च।

भो भो तृषातुराः सर्व्वे समायात जलान्तिकं। १
रौप्यहीनाः समायात भक्ष्यं क्रीत्वा च खादत।
मद्यं क्रीणीत दुग्धञ्च विना रौप्यं विना पणं॥
अभक्ष्यस्य कृते यूयं कुतो रौप्यं प्रयच्छथ। २
अतृप्तिकारिवस्त्वर्थं कुरुध्वे च कुतः श्रमं॥
मनो निधाय मद्वाक्यं यूयं संश्रोतुमर्हथ।
उत्तमान्येव भक्ष्याणि तदानीं भक्षयिष्यथ।
युष्मत्प्राणाश्च तर्प्स्यन्ति मांससारस्य भोगतः॥
यूयं समाहिता भूत्वा समायात मदन्तिकं। ३
आकर्णयत तेनैव सञ्जीविष्यति वो मनः॥
नियमञ्च मया कृत्वा युष्माभिः सह शाश्वतं।
अवश्यम्भावि दायूदः कल्याणं साधयिष्यते॥
पश्याहं बहुलोकानां साक्षिणं तं नियुक्तवान्। ४
कृतवांस्तञ्च जातीनां नायकं विधिदायकं॥
यां जातिं त्वं न जानासि सा समाहूास्यते त्वया। ५
या च त्वां नहि जानाति सा द्रोष्यति त्वदन्तिकं॥
हेतुरस्य परेशो ऽस्ति तावकीनेश्वरः स्वयं।
इस्रायेलः पवित्रो राट् यतस्त्वं तेन शोभितः॥
प्राप्तिकाले ऽनतिक्रान्ते मृगयध्वं परेश्वरं। ६
तस्य नैकट्यकाले च तमाह्वयत यत्नतः॥
स्वमार्गं दुर्जनस्त्यक्त्वा दुरात्मा स्वीयकल्पनाः। ७
परेशं प्रत्युपायातु सो ऽनुकम्पिष्यते च तं।
प्रत्यायात्वस्मदीशञ्च भूरिशः स क्षमिष्यते॥
युष्माकं कल्पना यस्मात् न सन्ति कल्पना मम। ८
मन्मार्गाश्च न वो मार्गा इति ब्रूते परेश्वरः॥
भूमितः किन्तु यत्युच्चं भात्यदो व्योममण्डलं। ९
मार्गा मे सन्ति युष्माकं मार्गेभ्यस्तति प्रांशवः।

युष्माकं कल्पनाभ्यश्च तत्युच्चा मम कल्पनाः॥
१० वृष्टिवारि हिमं वापि पतित्वा व्योमतो यथा।
नैव गच्छति तद् व्योम पुनर्व्वारं कदाचन॥
आर्द्रीकृत्योर्व्वरान्तूर्व्वीं करोत्यङ्कुरभूषितां।
वापकाय च वीजानि भोक्त्रे भक्ष्यञ्च यच्छति॥
११ मद्वक्त्रान्निर्गतं वाक्यं तादृगेव भविष्यति।
निष्फलं तत् पुनर्व्वारं नागमिष्यति मां प्रति॥
तत् किन्तु मामकाभीष्टम् अवश्यं साधयिष्यति।
यत्कृते प्रेरितं तच्च कृतार्थञ्च भविष्यति॥
१२ प्रस्थास्यथ मुदा यूयं शान्तिं प्राप्याग्रगामिनीं।
युष्मदग्रे प्रगास्यन्ति शैलाः सहोपपर्व्वतैः।
करतालं करिष्यन्ति क्षेत्रस्थाः सकला द्रुमाः॥
१३ कण्टकिनस्तरोः स्थाने देवदारु प्ररोक्ष्यति।
गोक्षुरस्य स्थले चापि मेन्धीवृक्षो जनिष्यते॥
एतच्च परमेशस्य कृते ख्यातिप्रवर्द्धकं।
अलोप्यं नित्यसंस्थायि लक्षणञ्च भविष्यति॥

---

५६ षट्पञ्चाशत्तमोऽध्यायः।

१ धर्म्मकर्म्म कर्त्तुं विनयः तस्य फलं ९ अन्धरक्षकाणां भर्त्सनञ्च।

१ भाषते भारतीमेतां स्वयमेव परेश्वरः।
यूयमाचरत न्यायं कुरुध्वं धर्म्मसेवनं॥
मया निरूपितं त्राणं यस्मादागन्तुमुद्यतं।
मद्धर्म्मस्य प्रकाशश्च न विलम्बिष्यते चिरं॥
२ धन्यं वच्मि मनुष्यं तं कार्य्यमेतत् करोति यः।
धन्यं तं नरसन्तानं यस्तत्रासज्यते दृढं॥
यो विश्रामदिनं रक्षन् न लङ्घयति कर्हिचित्।
रक्षन् स्वीयकरं काञ्चिन्न करोति च दुष्क्रियां॥
३ परमेशः स्वलोकेभ्यो मां पृथक् कृतवानिति।
नोच्यतां परवंशेन परमेशावलम्बिना।
पश्याहं शुष्कवृक्षोऽस्मीति षण्डेनापि नोच्यतां॥

स्वयं यत इदं वाक्यं भाषते परमेश्वरः। ४
मम विश्रामवारान् ये यत्नाद् रक्षन्ति यत्नतः।
ममाभीष्टे च तुष्यन्ति रक्षन्तो नियमं मम॥
पुत्रपुत्रीगणाच्छ्रेष्ठम् अधिकारञ्च नाम च। ५
तेभ्यो दास्यामि मद्धाम्नि मत्प्राचीरस्य चान्तरे।
अलोप्यमेव नामाहं तेभ्यो दास्यामि शाश्वतं॥
परमेश्वर आसक्ता ये विदेशिकुलोद्भवाः। ६
सेवनं तस्य कुर्व्वन्ति परमेशस्य नाम्नि च।
प्रेमाणमनुतिष्ठन्ति दासास्तस्य भवन्ति च॥
ये च विश्रामवारस्य लङ्घने साध्वसान्विताः।
तं पालयन्ति यत्नेन रक्षन्तो नियमं मम॥
प्रापयिष्यामि तान् सर्व्वान् पवित्रं मम पर्व्वतं। ७
करिष्यामि च तान् हृष्टान् मदीयप्रार्थनागृहे॥
प्रियं भास्यति मद्वेद्यां तेषां होमादियाजनं।
ख्यास्यते सर्व्वजातीनां प्रार्थनाधाम मद्गृहं॥
इस्रायेलो विकीर्णानां नृणां सङ्ग्रहकारिणा। ८
प्रभुना परमेशेन वाक्यमेतन्निगद्यते।
अधिकान् सङ्ग्रहीष्यामि तस्यैकत्रीकृतान् प्रति॥
सर्व्वे यूयं समायात हे केदारस्थजन्तवः। ९
भक्षणार्थं समायात हे सर्व्वे वन्यजीविनः॥
पालकास्तस्य सर्व्वेऽन्धा नहि जानन्ति किञ्चन। १०
भान्ति ते सकलाः श्वानो मूका भषितुमक्षमाः।
स्वप्नदृशः शयानाश्च निद्रावस्थाभिलाषिणः॥
बह्वाशिनस्तु ते श्वानस्तैश्च तृप्ति र्न बुध्यते। ११
पालकाः सकलास्ते च न जानन्ति विवेचनां।
स्वमार्गाभिमुखा लोभाद् एकैकश्चेष्टते पृथक्॥
एको ब्रूते समायात मद्यमानेष्यते मया। १२
तत् पीबन्तो वयं सर्व्वे भविष्यामो मदोद्धताः॥
अद्य यथा तथा श्वोऽपि पुनर्व्वारं भविष्यति।
सुमहान् वर्णनातीत उत्सवः स भविष्यति॥

५७ सप्तपञ्चाशत्तमोऽध्यायः ।

१ धार्म्मिकाणां लोकानां मङ्गलं ३ यिहूदीयानां दुष्टता १५ नम्रलोकानां रक्षणञ्च ।

१ गच्छन्ति धार्म्मिका लोपं न चिन्तयति को ऽपि तत् ।
पुण्यवन्तो ऽपनीयन्ते को ऽपीदन्तु न बुध्यते ।
यद् भाव्यमङ्गलस्याग्रे धर्म्मशीलो ऽपनीयते ॥
२ शान्तिं यान्ति स्वशय्यासु विश्रान्ता ऋजुगामिनः ॥
३ उपतिष्ठत यूयन्तु गणिकायाः स्त्रियः सुताः ।
पारदारिकतातेन वेश्यायां जनिताः प्रजाः ॥
४ विरुद्धं कस्य युष्माभिः परिहासो विधीयते ।
विरुद्धं कस्य जिह्वा च व्यादितास्यैः प्रसार्य्यते ।
किं न पापात्मजा यूयम् अनृतस्य च सूनवः ॥
५ अधस्तात् सकलानां हि हरिद्वर्णपलाशिनां ।
यूयं कामेन दह्यध्वे देवानामनुरागतः ॥
व्यापादयथ यूयञ्च बालकान् निम्नभूमिषु ।
विदीर्णपर्व्वतस्थानां कन्दराणां तलेषु वा ॥
६ दरीस्थाः स्निग्धपाषाणास्त्वदीयांशा भवन्ति हि ।
ते ते सन्त्यधिकाराश्च तव हे खलसन्तते ॥
तेभ्यस्त्वं पेयनैवेद्यं भक्ष्यञ्चापि प्रयच्छसि ।
तव तादृश आचारे तोष्टुं शक्नोम्यहं कथं ॥
७ उच्चे प्रांशुगिरेः शृङ्गे शय्या विस्तारिता त्वया ।
बलिं तत्र प्रदातुं त्वं तत्रारूढवती गिरिं ॥
८ पश्चाच्छिलाकपाटाभ्यां स्वीयमस्थापयः स्मरं ।
मदन्यस्य च भोगार्थं त्वमत्याक्षी निजाम्बरं ॥
स्वीयशय्याञ्च विस्तार्य्य त्वं समारूढवत्यसि ।
तेभ्यः प्राप्यां भृतिञ्चाधि नियमो निश्चितस्त्वया ।
९ सम्भोगे प्रीयसे तेषां तत्स्थानञ्च न्यरूपयः ॥
तैलाक्ताभ्यगमो भूपं प्राचुर्य्येणाधिवासिता ।
स्वदूतान् प्रैषयो दूरं नरकञ्चाप्यवातरः ॥
१० श्रान्तापि दीर्घमार्गात्तु भग्नाशास्मीति नावदः ।
नाडीमबुध्यथाः पाणावक्लान्ता चाभवस्ततः ॥

कस्मात् सन्त्रस्य भीता त्वं मृषावाक्यानि भाषसे। ११
नानुचिन्तयसि त्वं मां न निधत्से मनो मयि।
किं न चिरादहं मौनी नास्ति मत्तो भयं तव॥
अहन्तु ज्ञापयिष्यामि त्वद्धर्म्मस्य गुणागुणं। १२
त्वत्कृतानि च कर्म्माणि त्वं तै र्नोपकरिष्यसे॥
कुर्व्वन्तीमार्त्तरावं त्वां रक्षेत् त्वद्देवसंहतिः। १३
वायु र्नेष्यति सर्व्वांस्तान् श्वासश्चोपहरिष्यति॥
मान्तु यः श्रद्धानः स देशस्यांशी भविष्यति।
पवित्रे मम शैले च सो ऽधिकारमवाप्स्यति॥
खन्यतां खन्यतां भूमिः समाना क्रियतां दृतिः। १४
मज्जातीयन्दणां मार्गात् सर्व्वविघ्नो ऽपनीयतां।
ईदृशीं भारतीं कश्चित् तदानीञ्च गदिष्यति॥
नित्यता वसति यस्य पवित्र इति नाम च। १५
उच्चः सर्व्वोपरिस्थः स वाक्यमेतत् प्रभाषते॥
ऊर्द्धस्थाने पवित्रे च निलये निवसाम्यहं।
मनुष्यस्यापि चूर्णस्य नम्रात्मनश्च सन्निधौ॥
यतो ऽहं नम्रशीलानां सञ्जीवयितुमात्मनः।
सञ्चूर्णानाञ्च चित्तानि पुन र्जीवयितुं यते॥
न नित्यं विवदिष्ये ऽहं न वा क्रोत्स्यामि सर्व्वदा। १६
आत्मा प्राणाश्च मत्सृष्टा मूर्च्छेयु र्मत्पुरः कुतः॥
लोभादिदोषतस्तस्मै क्रुद्धा कुप्यामि संवृतः। १७
स्वचित्तस्येष्टमार्गेण स तु याति पराङ्मुखः॥
गतिं पश्याम्यहं तस्य विधास्ये तस्य सुस्थतां। १८
तं नयन् सान्त्वयिष्यामि रूह तच्छोकिभिः पुनः।
शान्तिः स्यान्निकटस्थानां शान्तिः स्याद्दूरवर्त्तिनां। १९
एतान्युत्पादयिष्यामि वाक्फलान्योष्ठयोरहं।
तञ्च स्वस्थं करिष्यामीति ब्रूते परमेश्वरः॥
दुर्जनास्तु समुद्रस्य तुल्याः क्षुब्धोर्म्मिमालिनः। २०
शान्ततां समवाप्तुं स न शक्नोति कथञ्चन।
उद्गिरिष्येते तरङ्गैश्च तस्य जम्बालकर्द्दमौ॥
नास्ति दुरात्मनां शान्तिरिति ब्रूते मदीश्वरः॥ २१

५८ अष्टपञ्चाशत्तमोऽध्यायः ।

१ यिहूदिलोकानां कापट्यस्य भर्त्सनम् उपवासस्य निर्णयः ८ धर्म्मकर्म्मणः फलं १३ विश्रामवारपालनस्य फलं ।

१ घोषय व्यक्तवक्त्रेण माकार्षीः शब्दसंयमं ।
तूरीध्वनिवदुच्चञ्च स्वीयकण्ठध्वनिं कुरु ॥
मत्प्रजानामधर्म्मञ्च तासां साक्षात् प्रकाशय ।
याकूबीयकुलायापि तस्य पापानि दर्शय ॥
२ मामन्विच्छन्ति ते नित्यं ज्ञातुं तुष्यन्ति मत्पथान् ।
धर्म्माचारा यथा जातिरत्यक्तेश्वरशासना ।
ते मां पृच्छन्ति धर्म्माज्ञास्तुष्यन्तीशस्य सङ्गमे ॥
३ उपवासं यदा कुर्म्मस्तदा त्वं तन्न पश्यसि ।
तापयामो यदा प्राणांस्तदा त्वं तन्न मन्यसे ।
एतस्य कारणं किं स्यादिति वाचं वदन्ति ते ॥
स्वोपवासदिने यूयम् अनुगच्छथ कौतुकं ।
अभिद्रोहं कुरुध्वे च स्वीयकर्म्मकरान् प्रति ॥
४ कलहं कर्त्तुमाकांक्ष्य विवादञ्च परस्परं ।
पापमुष्ट्या प्रहर्त्तुञ्च युष्माभिः समुपोष्यते ॥
युष्माकं प्रार्थनाशब्द ऊर्द्धगामी भवेद् यथा ।
उपवासो दिने तस्मिंस्तादृशः क्रियते नहि ॥
५ प्रियो ममोपवासो यः स किमेतादृशो भवेत् ।
नर एकं दिनं यावत् प्राणान् यत् परितापयेत् ।
नलवन्नमयन् शीर्षं शयानः शाणभस्मनोः ।
एषः किमुपवासः स्याद् ग्राह्यमीशस्य वा दिनं ॥
६ प्रियो ममोपवासो यः स किमेतादृशो नहि ।
छेदनं द्रोहपाशानां मोचनं युगकीलयोः ॥
मोचयित्वा च युष्माभिस्ताडितानां विसर्ज्जनं ।
सर्व्वदास्ययुगस्यापि भञ्जनं शतखण्डशः ॥
७ किं नैतद् यन्निजान्नस्य कुर्य्याः क्षुधार्त्तसंशिनं ।
दरिद्रांश्च जनान् भ्रान्तान् स्वगृहं यत् समानयेः ।
वीक्ष्य नग्नमनुष्यञ्च वाससा परिवेष्टयेः ॥
स्वजातीयमनुष्याच्च साहाय्यं नोपसंहरेः ॥

अरुणोदयवत् तर्हि तव तेज उदेष्यति । ८
तदा शीघ्रं तव स्वास्थ्यं विकसिष्यति पुष्पवत् ॥
तदा तावकपुण्यञ्च भविष्यत्यग्रगामि ते ।
त्वदीयेशस्य तेजश्च तव पार्ष्णिर्भविष्यति ॥
तदा प्रार्थयमानं त्वां परेशो ऽनुग्रहीष्यति । ९
कृते त्वयार्त्तनादे च सो ऽत्रास्मीति वदिष्यति ॥
तव किन्तूचितं यत् त्वं स्वमध्याद् दवयेर्युगं ।
निन्दकाङ्गुलिनिर्द्देशम् अधर्म्मस्य च भाषणं ॥
स्वीयचित्ते क्षुधार्त्ताय यदि त्वं वितरेः स्थलं । १०
प्राणान् दुःखिमनुष्यस्य यदि त्वं परितर्पयेः ॥
तदानीं तावकालोकस्तमिस्रे ऽप्युज्ज्वलिष्यति ।
मध्याह्नस्य समानञ्च तव ध्वान्तं भविष्यति ॥
नित्यं परेश्वरस्तुभ्यं पन्थानं दर्शयिष्यति । ११
तर्पयिष्यति प्राणांस्ते शुष्केष्वपि स्थलेषु सः ।
अस्थीनि तावकीनानि सम्यक् चाप्याययिष्यति ॥
उद्यानस्य सुसिक्तस्य सदृशस्त्वं भविष्यसि ।
यस्य न वञ्चयन्त्यापस्तस्य जलाकरस्य वा ॥
चिराद् भग्नानि धामानि निर्म्मास्यन्ति तव प्रजाः । १२
अतिप्राचीनप्रासादान् त्वं पुनः स्थापयिष्यसि ॥
भङ्गपूरक इत्येव तव नाम भविष्यति ।
वसत्यर्थं पुराणानां पथां शोधक इत्यपि ॥
निजपादौ निवर्त्त्य त्वं विश्रामवारलङ्घनात् । १३
निजाभीष्टं न कुर्य्याश्चेत् पवित्रे दिवसे मम ॥
यदि विश्रामवारञ्च कीर्त्तयेः सुखदायिनं ।
पवित्रं परमेशस्य दिनं वदेः सगौरवं ॥
गमनं स्वीयमार्गेण स्वसुखस्यानुधावनं ।
जल्पनञ्च परित्यज्य मन्येथा यदि तद्दिनं ॥
तुभ्यं सुखप्रदं तर्हि लप्स्यसे परमेश्वरं । १४
उच्चस्थानेषु मह्यास्त्वां वाहयिष्याम्यहं रथैः ॥
त्वां त्वत्तातस्य याकूबो भोजयिष्याम्यहं भुवं ।
यतो मुखं परेशस्य वाक्यमेतत् प्रभाषते ॥

५९ ऊनषष्टितमोऽध्यायः।

१ पापस्य कथनं तस्य फलं १६ केवलेनेश्वरेण पापाद् रक्षणञ्च।

१ न ह्रस्वो ऽभूत् परेशस्य हस्तो न त्रातुमक्षमः।
नाभूद् वा विकलं तस्य श्रोत्रं न श्रोतुमक्षमं॥
२ युष्मद्दोषा वियुञ्जन्ति युष्मान् युष्माकमीश्वरात्।
न शृणोति स पापै र्वो युष्मत्तो विमुखीकृतः॥
३ लिप्तौ रक्तेन हस्तौ वो युष्मदङ्गुलयो ऽङ्हसा।
युष्मदोष्ठौ मृषावाचौ युष्मज्जिह्वाघभाषिणी॥
४ धर्म्मप्रचारको नास्ति नास्ति न्याय्यविचारकः।
मायां सर्व्वे ऽवलम्बन्ते प्रभाषन्ते च दुष्टतां।
दौरात्म्येन सगर्भास्ते प्रसवन्ति प्रतारणां॥
५ स्फोटयन्त्युरगाण्डानि लूताजालं वयन्ति च।
तेषामण्डानि यो ऽश्नाति प्राणत्यागं करोति सः।
यच्चाण्डं स्फोट्यते तस्य मध्यादुत्पद्यते फणी॥
६ तेषामूतानि जालानि नोपयुक्तानि वाससे।
न स्वाङ्गं वेष्टयिष्यन्ति ते स्वनिर्म्मितवस्तुभिः॥
तेषां कर्म्माणि सर्व्वाणि पापकर्म्माणि सन्ति हि।
दौरात्म्यस्य क्रिया तेषां हस्तयोरवतिष्ठते॥
७ सत्वरं चरणौ तेषाम् अपकाराय धावतः।
शुचेश्च रक्तपाताय भवतो द्रुतगामिनौ॥
सकलाः कल्पनास्तेषां सन्ति पातककल्पनाः।
क्लेशो नाशश्च विद्येते तेषां सकलवर्त्मसु॥
८ न विदुः शान्तिमार्गं ते नास्ति तेषां गतौ नयः।
सन्ति तेषाञ्च वर्त्मानि वक्रीकृतानि तैः स्वयं।
तत्र गच्छति यः कश्चित् स शान्तिं नावगच्छति॥
९ एतस्मात् कारणान्न्यायो ऽस्मत्तो दूरे ऽवतिष्ठते।
अस्माकं सन्निधौ धर्म्म उपस्थातुमपारकः॥
दीप्तिं प्रतीक्षमाणेष्वस्मासु ध्वान्तं विदृश्यते।
प्रभां प्रतीक्ष्य चास्माभि र्भ्रम्यते हि तमिस्रके॥
अन्धा यथा वयं कुड्यं परीस्पृशामहे तथा।

परीसृप्स्यामहे हस्तै र्नेत्रहीना नरा इव ॥
प्रस्खलामश्च मध्याह्ने सन्ध्यायाः समये यथा। १०
स्थानेष्वालोकहीनेषु प्रमीता वा नरा यथा ॥
भल्लूकाश्च यथा तद्वद् गर्ज्जामः सकला वयं। ११
कपोता इव कुर्म्मश्च शोकजन्यं कलध्वनिं ॥
सम्प्रतीक्षामहे धर्म्मं स तु नैवोपतिष्ठति।
सम्प्रतीक्षामहे त्राणं तत् तु दूरे वितिष्ठते ॥
तव साक्षाद् यतो ऽस्माकम् अपराधाः सुभूरयः। १२
साक्ष्यमस्मद्विरुद्धञ्चास्माकं पापैश्च दीयते ॥
अपराधा यतो ऽस्माकं सन्त्यस्मज्ज्ञानगोचरे।
अवबुध्यामहे सम्यक् स्वीयाधर्म्मक्रिया वयं ॥
परेशस्यापराध्यन्ति सर्व्वे मिथ्या वदन्ति च। १३
सकलाश्च निवर्त्तन्ते अस्मदीशात् पराङ्मुखाः।
दौरात्म्यं सत्यमार्गाच्च भ्रमणं कथयन्ति ते।
चित्तेनान्टतवाचश्च सन्धृत्य चिन्तयन्ति ते ॥
एष्ठतः क्रियते न्यायो धर्म्मो दूरे ऽवतिष्ठते। १४
विचारस्य स्थले यस्मात् स्खलन्ती भाति सत्यता।
सम्प्रवेष्टुञ्च तत् स्थानं न शक्नोति यथार्थता ॥
सत्यता दुर्लभा जाता पापत्यागी च मुष्यते। १५
तद् विलोक्य नयाभावं नामर्षीत् परमेश्वरः ॥
पुरुषः को ऽपि नास्तीति स यदा प्रसमैक्षत। १६
मध्यस्थस्य तदाभावाद् अभवत् स चमत्कृतः।
बाहुरत्राम्त तस्यैव स्वधर्म्मस्तमधारयत् ॥
गृहीत्वा वर्म्मवद् धर्म्मं परित्राणं शिरस्त्रवत्। १७
स प्रतीकारवस्त्राण्यकार्षीत् स्वीयपरिच्छदं।
प्रावारमिव योद्धुश्च जिगीषां पर्य्यधत्त सः ॥
यस्य यादृक् क्रिया तस्मै तादृक् फलं स दास्यति। १८
कोपाग्निं स्वीयशत्रुभ्यः स्वारिभ्यश्चोचितं फलं।
द्वीपवर्गनिवासिभ्यः स दास्यत्युचितं फलं ॥
वित्रसिष्यन्ति पाश्चात्याः परमेशस्य नामतः। १९
सूर्य्योदयप्रदेशस्था भेष्यन्ति तत्प्रतापतः ॥

यस्त्र स्रोतस्वतीतुल्यः परिपन्थ्याक्रमिष्यति।
तं प्रत्यात्मा परेशस्य ध्वजमुत्थापयिष्यति॥
२० सायोने मुक्तिदातैकस्तदानीमागमिष्यति।
याकूबो ये जनाः सर्व्वे परावृत्ता अधर्म्मतः।
तेभ्यो दास्यति मुक्तिं स इति ब्रूते परेश्वरः॥
२१ पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः।
नियमस्तैर्जनैः सार्द्धं मयाकारि स ईदृशः॥
त्वामधिष्ठित आत्मा मे मद्वाचस्त्वन्मुखेऽर्पिताः।
न भ्रंशिष्यन्ति वक्त्रात् ते न त्वद्वंशस्य वक्त्रतः।
न तद्वंशस्य वा वक्त्राद् अद्यावधि कदाचन।
भाषते भारतीमेतां स्वयमेव परेश्वरः॥

---

६० षष्टितमोऽध्यायः।

१ अन्यदेशीयैर्मण्डल्या वृद्धिः ८ स्वल्पकालदुःखभोगानन्तरं तस्याः सुखं।

१ त्वमुत्तिष्ठ प्रभासस्व समायाति तव प्रभा।
प्रतापश्च परेशस्य त्वामभ्युदेतुमुद्यतः॥
२ अन्धकारो यतः पश्य प्रच्छादयति मेदिनीं।
मनुष्याः परदेशीयाश्छाद्यन्ते तिमिरेण च॥
अभ्युदेष्यति किन्तु त्वां स्वयमेव परेश्वरः।
सम्प्रकाशिष्यते तस्य प्रतापस्त्वामधिष्ठितः॥
३ त्वद्दीप्त्या परदेशीयाः करिष्यन्ति गमागमौ।
राजानश्च व्रजिष्यन्ति त्वत्प्रभोदयतेजसा॥
४ उन्मील्य निजनेत्रे त्वं निरीक्षस्व चतुर्द्दिशः।
एकत्रीभूय सर्व्वे ते समायान्ति त्वदन्तिकं।
दूरादायान्ति पुत्रास्ते पुत्र्यश्च धारिताः कटौ॥
५ तदानीं तत् समालोक्य त्वं प्रफुल्ला भविष्यसि।
तवान्तःकरणं कम्पं विकाशञ्च गमिष्यति॥
यतः सामुद्रिकैश्वर्य्यं त्वां प्रत्यावर्त्तयिष्यते।
अन्यजातीयलोकानां तेजस्त्वाञ्चाश्रयिष्यति॥
६ बाहुल्येन क्रमेलानां त्वं भविष्यस्यभिप्लुता।

मिदियनैफयोरेव करभै र्हुतगामिभिः ॥
शिवाख्यदेशतः सर्व्वे उपस्थास्यन्ति मानवाः।
आनेष्यन्ति च ते स्वर्णं तेन साईञ्च कुन्दुरं।
सानन्दं परमेशस्य कीर्त्तयिष्यन्ति च स्तवान्॥
सकलाः सङ्ग्रहीष्यन्ते केदरस्था अजास्त्वयि। ७
निवायोतीयमेषैश्च सेवा कारिष्यते तव॥
ते मयानुग्रहीष्यन्ते मम वेद्यां समुत्थिताः।
मम शोभानिवासश्च मया संशोभयिष्यते॥
मेघानां डीयमानानां समाः के प्रतिभान्त्यमी। ८
पततां वा कपोतानां स्वविटङ्कगृहं प्रति॥
यतो मां सम्प्रतीक्षन्ते नरा द्वीपनिवासिनः। ९
अग्रगाः सन्ति तेषाञ्च पोतास्तार्शीशगामिनः।
स्वर्णरौप्यैः समं दूराद् आनेष्यन्तस्तवात्मजान्॥
त्वत्प्रभोः परमेशस्य कृते तत् ख्यातिवर्द्धकं।
इस्रायेलः पवित्रो राट् त्वां संशोभितवानिति।
तस्मै प्रमाणदश्चापि तदवश्यं भविष्यति॥
निर्म्मास्यन्ति च प्राचीरं तव भिन्नकुलोद्भवाः। १०
भविष्यन्ति च राजानस्तेषां त्वत्परिचारकाः॥
यतोऽहं निजकोपेन त्वां प्रहारितवान् यथा।
तथा निजप्रसादेन करिष्यामि कृपां त्वयि॥
अवस्थास्यन्ति मुक्तानि तव द्वाराणि सर्व्वदा। ११
न दिवा न निशायां वा रोत्स्यन्ते तानि कर्हिचित्।
ऐश्वर्य्यं भिन्नजातीनाम् आनेतव्यं तवान्तिकं।
तासाञ्च ससमारोहा आनेतव्या नरेश्वराः॥
या त्वां न सेवते जाति र्नीवृद् वा सा विनंक्ष्यति। १२
भिन्नजातीयलोकाश्च धक्ष्यन्ते शापवह्निना॥
देवदारूणि तीधारास्तास्सूराश्च महीरुहाः। १३
सर्व्वमेव लिवानोनस्तेजस्त्वामागमिष्यति॥
मदीयधर्म्मधाम्नश्च स्थानं शोभिष्यते ततः।
मदीयपादयोः स्थानं मान्यं कारिष्यते मया।
नतास्त्वत्पीडकानां त्वामुपस्थास्यन्ति चात्मजाः। १४

सर्व्वे स्वीयशिरोभिश्च स्पृष्ट्वा त्वत्पादयोस्तलं ।
तुभ्यं नमस्करिष्यन्ति तव गर्हणकारिणः ॥
त्वञ्च तैः परमेशस्य पुरीति ख्यास्यसे तदा ।
इस्रायेलः पवित्रस्य राज्ञः सीयोनमित्यपि ॥
१५ व्यक्ता त्वं गर्हिता चासीः को ऽपि त्वयाव्रजन्नहि ।
त्वां किन्त्वहं करिष्यामि नित्यगौरवभाजनं ।
पुत्रपौत्रादिवंशानां परमानन्दकारणं ॥
१६ भिन्नजातीयलोकानां दुग्धं चूषिष्यते त्वया ।
भूपालानां स्तनाभ्याञ्च त्वया पायिष्यते पयः ॥
त्वञ्च ज्ञास्यसि यत् त्राता तवास्म्यहं परेश्वरः ।
याकूबे बलदाताहं यश्चास्मि तव मोचकः ॥
१७ सुवर्णमारकूटस्य स्थान आनेष्यते मया ।
लोहस्य परिवर्त्तेन रौप्यमानेष्यते मया ।
आरकूटञ्च काष्ठानाम् आयसञ्चाश्मनां स्थले ॥
अहं शान्तिस्वरूपांश्च विधास्ये तव पालकान् ।
त्वयि धर्म्मस्वरूपांश्च नियोक्ष्याम्यनुशासकान् ॥
१८ तव देशे प्रमाथस्य वार्त्ता न श्रोष्यते पुनः ।
न ध्वंसस्य न भङ्गस्य वार्त्ता वा तव सीमनि ॥
त्वत्प्राचीरस्य नाम त्वं परित्राणं करिष्यसि ।
नाम स्वगोपुराणाञ्च प्रशंसेति विधास्यसि ॥
१९ न भविष्यत्यसौ सूर्य्यो दीप्तिदाता दिवा तव ।
न ज्योत्स्नार्थमसौ चन्द्रस्त्वां पुन र्द्योतयिष्यति ॥
स्वयं परेश्वरः किन्तु दीपः सनातनस्तव ।
स्वयञ्च तावकीनेशस्तव शोभा भविष्यति ॥
२० नैव त्वदीयसूर्य्यः स पुनरस्तं गमिष्यति ।
नैव त्वदीयचन्द्रो वा क्षीणतेजा भविष्यति ॥
तव सनातनो दीपः परमेशो भविष्यति ।
समाप्तानि भविष्यन्ति तव शोकदिनानि च ॥
२१ धार्म्मिकाश्च भविष्यन्ति सकलास्तावकप्रजाः ।
अधिकारञ्च देशस्य ता भोक्ष्यन्ते निरन्तरं ॥
रोपिता मामकोद्याने पल्लवाः प्रतिभान्ति ते ।

मत्करांभ्यां कृतं कर्म्म मत्प्रतापप्रकाशकं॥
यः चोदिष्ठः स वर्द्धित्वा सहस्री सम्भविष्यति। ११
कनिष्ठश्च पराक्रान्ता जातिरेका भविष्यति।
तूर्णं तत् साधयिष्यामि स्वकालेऽहं परेश्वरः॥

६१ एकषष्टितमोऽध्यायः।

१ खीष्टस्य कर्म्मणो वर्णनं ४ तस्य फलं १० धार्म्मिकाणां सुखञ्च।

प्रभोः परेश्वरस्यात्मा स्वयं मामधितिष्ठति। १
नम्रशीलमनुष्येषु शुभवार्त्ताप्रचारणे।
यतो ममाभिषेकं स कृतवान् परमेश्वरः॥
स मां प्रेषितवान् एनाम् आज्ञां मह्यञ्च दत्तवान्।
यन्नृणां भग्नचित्तानां सम्बध्नीयां क्षतान्यहं॥
घोषयेयञ्च यन्मुक्तिं दूरदेशप्रवासिनां। २
कारावद्धनराणाञ्च काराद्वारस्य मोचनं॥
घोषयेयं परेशस्य प्रसादावहवत्सरं।
अस्मदीयेश्वरस्यापि प्रतीकारदिनं तथा।
सान्त्वयेयञ्च यत् सर्व्वान् नरान् शोकार्त्तमानसान्॥
सीयोनि ये च शोकार्त्तास्तान् कुर्य्यामुपशोभितान्। ३
वितरेयञ्च यत् तेभ्यो भूषणं भस्मनः स्थले।
शोकस्य परिवर्त्तेन तैलम् आनन्दसूचकं।
विषण्णस्यात्मनः स्थाने स्तवरूपं परिच्छदं॥
तेषां नाम च यत् कुर्य्यां धर्म्मरूपद्रुमा इति।
परमेशस्य चोद्यानं तत्प्रतापप्रकाशकं॥
निर्म्मास्यन्ति पुनर्व्वारं चिरध्वस्तगृहाणि ते। ४
उत्सन्नानि च धामानि स्थापयिष्यन्ति पूर्व्ववत्॥
ते नवीनीकरिष्यन्ते पतितानि पुराण्यपि।
यान्युच्छिन्नानि विद्यन्ते पितापितामहावधि॥
तिष्ठन्तश्चारयिष्यन्ति युष्मन्मेषान् विदेशिनः ५
शस्यक्षेत्रेषु युष्माकं गोस्तनीवाटिकासु च।
भविष्यन्त्यन्यवंशीया जना युष्मत्कृषीबलाः॥

६ ख्यास्यध्वे च तदा यूयं परमेशस्य याजकाः ।
अस्मदीशस्य दासेया इति नाम च प्राप्स्यथ ॥
ऐश्वर्य्यमन्यजातीनां युष्माभिः परिभोक्ष्यते ।
तासां विनिमयाद् यूयं तासां प्राप्स्यथ गौरवं ॥
७ यूयं प्राप्स्यथ लज्जायाः स्थाने द्विगुणमङ्गलं ।
नराः पूर्व्वमवज्ञाता हर्षिष्यन्ति निजश्रिया ॥
यतः स्वकीयदेशे तै द्विगुणांशो ऽधिभोक्ष्यते ।
आनन्दश्च नृणां तेषां नित्यस्थायी भविष्यति ॥
८ यतो न्यायविचारे ऽहं सम्प्रीये परमेश्वरः ।
द्रोहाद् धनापहारश्च गर्हितो मन्यते मया ॥
दास्यामि मत्प्रजाभ्यो ऽहं यथार्थं पारितोषिकं ।
नियमञ्च करिष्यामि ताभिः सार्द्धं सदा स्थिरं ॥
९ तासां वंशो ऽन्यजातीनां मध्ये ज्ञातो भविष्यति ।
नानादेशीयलोकानां मध्ये तेषाञ्च सन्ततिः ॥
तान् नरान् वीक्ष्य सर्व्वैश्च निश्चित्येदं गदिष्यते ।
असावेवास्ति वंशः स आशिःप्राप्तः परेश्वरात् ॥
१० करिष्याम्यहमानन्दं परमं परमेश्वरे ।
समवाप्स्यति चोल्लासं मदीयात्मा मदीश्वरे ॥
यतः स त्राणवस्त्राणि स्वयं मां पर्य्यधापयत् ।
स्वयं पर्य्यवेष्टन्मां धर्म्मपरिच्छदेन च ॥
वरं विवाहयोग्येन वेषेण भूषितं यथा ।
अलङ्कारसमूहेन कन्यां वा शोभितां यथा ॥
११ यतो निजाङ्कुरान् भूमिः स्वत उत्पादयेत् यथा ।
किंवा रोपितवीजानि यथोद्यानं प्ररोहयेत् ॥
प्रभुना परमेशेन साक्षात् सर्व्वविदेशिनां ।
धर्म्मनिष्ठा प्रशंसा च तथा प्ररोहयिष्यते ॥

---

६२ द्विषष्टितमोऽध्यायः ।

१ समाजं प्रति भविष्यद्वक्तुः प्रार्थनं २ तद्रक्षकाणां योग्यकर्म्मणो वर्णनञ्च ।

१ अनुरोधेन सीयोनो नाहं स्थास्यामि नीरवः ।

नाहं मौनी भविष्यामि निमित्तं यिरूशालमः॥
यतो धर्म्मोदयं तस्या आकाङ्क्षामि द्युतेः समं।
परित्राणोदयञ्चापि तस्या उज्ज्वलदीपवत्॥
तदानीमन्यदेशीयै र्धर्म्मो वीक्षिष्यते तव। २
सकलैश्च महीपालै र्द्रक्ष्यते तव गौरवं॥
सवक्त्रेण परेशो यत् स्वयमुच्चारयिष्यति।
तादृशं नूतनं नाम लप्स्यते च तदा त्वया॥
परेशस्य करे चारु मुकुटं त्वं भविष्यसि। ३
त्वदीयेशस्य हस्ते च किरीटो राज्यसूचकः॥
नैव त्वाञ्च परित्यक्तां वदिष्यन्ति नराः पुनः। ४
न पुनस्तव भूमिं वा ते गदिष्यन्ति निर्जनां॥
ख्यास्यसे त्वन्तु हिफ्सीवार्थतो मत्तुष्टिभाजनं।
ख्यास्यते तव भूमिश्च वियूलार्थाद् विवाहिता॥
यतस्त्वं परमेशस्य तुष्टिपात्रं भविष्यसि।
तावकीना च या भूमिः सधवा सा भविष्यति॥
त्वामुद्वक्ष्यन्ति पुत्रास्ते कुमारीं तरुणो यथा। ५
यादृशेन च कन्यायां वरो हर्षेण हृष्यति।
तादृशेन त्वदीयेशः परिहर्षिष्यति त्वयि॥
त्वत्प्राचीरे यिरूशालम् नियुक्ता रक्षका मया। ६
न दिवा ते न रात्रौ वा मौनीभवन्ति कर्हिचित्॥
बोधकराः परेशस्य यूयं मैव प्रशाम्यत॥
स च यावत् स्थिरीकृत्य न कुर्य्याद् यिरूशालमं। ७
मेदिन्यां संस्तुतां तावत् तस्मै मा दत्त विश्रमं॥
स्वीयदक्षिणहस्तेन प्रबलेन च बाहुना। ८
प्रत्यश्रौषीत् शपित्वेदं स्वयमेव परेश्वरः॥
त्वद्द्वेषिभ्यो न दास्यामि त्वच्छस्यं भक्ष्यवत् पुनः।
न वा त्वच्छ्रमजं मद्यं पास्यन्त्यपरवंशजाः॥
तच्छस्यं यै र्नरैश्छिन्नं तैरेव भक्षयिष्यते। ९
तत्कृते परमेशस्य प्रशंसा च करिष्यते॥
यै र्नरैः सङ्गृहीतानि द्राक्षाफलानि चाभवन्।
ते पास्यन्ति रसं तेषां पवित्रेष्वङ्गनेषु मे॥

१० यूयं गोपुरमध्येन प्रगच्छत प्रगच्छत।
प्रजानां गमनार्थञ्च निर्व्विघ्नं कुरुतायनं॥
विनिर्म्मात विनिर्म्मात मार्गं प्रस्तरवर्जितं।
लोकानां शिरसामूर्द्ध उत्थापयत च ध्वजं॥
११ परेशः श्रावयत्येतद् वचो भूप्रान्तवासिनः।
यूयं कन्यां सियोनाख्यां वार्त्तां ज्ञापयतेदृशीं॥
असौ पश्य समायाति त्वत्परित्राणकारकः।
पश्य तस्य भृतिश्चापि सहिता तेन वर्त्तते।
तथा श्रमफलं तस्य विद्यते तस्य सम्मुखे॥
१२ पुण्यवंशः परेशस्य परिक्रीतनरा इति।
नामधेयं मनुष्यैश्च त्वज्जनेभ्यः प्रदास्यते।
अन्विष्टा ख्यास्यसे च त्वम् असन्त्यक्ता पुरीति च॥

---

६३ त्रिषष्टितमोऽध्यायः।

१ प्रभोरस्य जयवर्णनं ७ समाजं प्रति दया १५ तस्मिन् स्वीयलोकानां शरणागतत्वञ्च।

१ को ऽसावागच्छतीदोमाद् वस्त्रातो रञ्जिताम्बरः।
परिच्छदेन तेजस्वी महाशक्त्या च सत्वरः।
आयामि धर्म्मवक्ताहं परित्राणे च सक्षमः॥
२ कुतस्त्वद्वसनं रक्तं कुतो वा त्वत्परिच्छदः।
भाति वस्त्रं मनुष्यस्य द्राक्षामर्द्दनकारिणः॥
३ द्राक्षाकूपे ऽहमेकाकी द्राक्षाफलान्यमर्द्दयं।
लोकानां मध्य एको ऽपि मत्सहायो ऽभवन्नहि॥
तदाकार्षमहं तेषां स्वीयक्रोधेन मर्द्दनं।
स्वीयप्रचण्डकोपेन पादाभ्यां तान् व्यचूर्णयं॥
ततो मामकवस्त्रेषु तेषां प्रोदपतद्रसः।
कलङ्कितमकार्षञ्चाहं कृत्स्नं स्वपरिच्छदं॥
४ दिवसः प्रतिकारस्य मयानुचिन्तितो यतः।
मत्परिक्रीतलोकानां वर्षश्चाभूदुपस्थितः॥
५ मध्यवलोकमाने तु को ऽपि नोपकरोद् यदा।

आश्चर्य्यं मन्यमाने च धारकः को ऽपि नाभवत्।
तदा मद्बाङ्गरत्रास्त मत्कोपो मामधारयत्॥
क्रोधाविष्टः स्वपादाभ्यां तान् जनांश्च व्यमर्द्दयं। ६
स्वकीयकोपमद्यञ्च भूरिशस्तानपाययं।
भूतलस्योपरिष्टाच्च तेषां प्रास्रावयं रसं॥
अस्मानुद्दिश्य यत् सर्व्वं कृतवान् परमेश्वरः। ७
इस्रायेलीयवंशे च यामकार्षीन्महाकृपां॥
अहं तद्योग्यरूपेण परेशस्य हितक्रियाः।
परेशस्य गुणानाञ्च स्तवं स्मारयितुं यते।
स्वकृपां भूरिप्रीतिञ्च तानुद्दिश्य स आचरत्॥
आह च मज्जना एते सन्ताना अप्रवञ्चकाः। ८
स परित्राणकर्त्ता च तेषां ततो ऽभवत् स्वयं॥
तेषां सकलदुःखं स निजदुःखममन्यत। ९
तस्य श्रीमुखरूपश्च दूतो ऽत्रास्त च तान् स्वयं॥
स्वीयप्रीत्यनुकम्पाभ्यां पर्य्यक्रैषीत् स्वयञ्च तान्।
तानुत्तोल्य च प्राक्काले भारवत् सर्व्वदावहत्॥
द्रोहं कृत्वा तु तैस्तस्य पवित्रात्मनि बाधिते। १०
सो ऽपावृत्तो ऽभवद् द्वेषी स्वयञ्चायुद्ध तैः सह॥
प्राक्कालं मूससञ्चापि स्मृत्वाऽस्तत्प्रजास्तदा। ११
येनोद्धृताः समुद्रात् ते मेषरक्षी च कुत्र सः।
तच्चित्ते स्वपवित्रात्मा येन न्यधायि कुत्र सः॥
मूससो दक्षहस्तेन स तान् अचालयज्जनान्। १२
महाप्रतापयुक्तेन स्वकीयबाहुना यथा॥
अनन्तकालसंस्थायि तस्य नाम च यद् भवेत्।
तदर्थं सम्मुखे तेषां व्यभिदत् सागरं द्विधा॥
स्थानैरतीव गम्भीरैः स तदा तानजीगमत्। १३
यथाश्वः प्रान्तरे धावन् तथा ते ऽप्यस्खलन्नहि॥
गावो यथावरोहन्तो निम्नभूमिं प्रयान्ति वा। १४
आत्मना परमेशस्य ते शान्ता ह्यभवंस्तथा।
इत्थं स्वीयप्रजा नीत्वा त्वं स्वनाम व्यशोभयः॥
त्वं स्वर्गात् कुरु दृक्पातं तस्मात् स्ववसतिस्थलात्। १५

शोभायुक्तात् पवित्राच्च कुरुष्वाधो ऽवलोकनं॥
कुत्र गतस्तवोद्योगः कुत्र वा त्वत्पराक्रमः।
अस्मत्तस्त्वदनुक्रोशस्त्वत्स्नेहश्चोपसंहृतः॥
१६ पितास्माकं त्वमेवासीन्नाहीमस्मान् न वेत्ति हि।
इस्रायेलपि नैवास्मान् विजानाति स्ववंशवत्॥
हे परेश त्वमेवासि पितास्माकं न चेतरः।
अस्माकं मुक्तिदातेति प्राक्कालादस्ति नाम ते॥
१७ कुतस्त्वं भ्रमयेरस्मान् स्वमार्गेभ्यः परेश्वर।
गाढचित्तांश्च कृत्वास्मान् स्वभयाद् भ्रंशयेः कुतः॥
अनुरोधात् स्वदासानां त्वं प्रत्यागमनं कुरु।
तवाधिकाररूपाणां वंशानामनुरोधतः॥
१८ पवित्रास्त्वज्जना आसन् स्वल्पकालं प्रतापिनः।
मर्द्दयन्त्यरयो ऽस्माकं पादाभ्यां धर्म्मधाम ते॥
१९ वयं तवैव प्राक्कालात् ते त्वया नहि पालिताः।
न कदाचन वा तेषु तव नामान्वकीर्त्त्यत॥

---

६४ चतुःषष्टितमो ऽध्यायः।

समाजस्य प्रार्थनं विलापकथनञ्च।

१ अहं काङ्क्षामि यद् व्योम त्वं भित्त्वावतरेः स्वयं।
पर्व्वतास्तव साक्षाच्च विस्रवेयु र्द्रवीकृताः॥
२ तृणदाही यथा वह्निः किंवाम्बूत्सेचकानलः।
तथा त्वन्नामधेयं यत् प्रकाशेत तवारिषु।
अन्यदेशीयलोकाश्च प्रकम्पेरंस्त्वदग्रतः॥
३ त्वयि भीमक्रियाः कर्त्तुम् अस्माभि र्न प्रतीक्षिताः।
अवरूढे द्रवीभूताः शैलास्त्वत्सम्मुखे ऽक्षरन्॥
४ हे ईश वर्जयित्वा त्वां नाश्राव्यनादिकालतः।
नोपालम्भि च कर्णेन न प्रादर्शि च चक्षुषा।
तत् सर्व्वं यत् स्वभक्तस्य कृते त्वं साधयिष्यसि॥
५ मिलसे तेन सार्द्धं त्वं यो हृष्टो धर्म्ममाचरेत्।
तव मार्गेषु ये च त्वाम् अनुस्मरन्ति तैः सह॥

पश्य क्रोधमकार्षीस्त्वं वयं पापमकार्ष्म च।
चिरादेषा दशास्माकं त्राणं लिप्सामहे ततः॥
अशुचिना मनुष्येण समानाः सकला वयं। ६
अस्माकं पुण्यपुञ्जश्च कर्पटो मलदूषितः॥
सञ्जातास्च वयं जीर्णाः पत्राणीव पलाशिनः।
वायुनेव स्वपापेन वयञ्चापकृियामहे॥
त्वन्नाम्ना प्रार्थनाकारी जनः को ऽपि न विद्यते। ७
त्वाञ्चावलम्बितुं को ऽपि जनः प्रोत्सहते नहि॥
स्वकीयाननमस्मत्तो यतः प्रच्छाद्यते त्वया।
अस्मान् पापस्य तापेन त्वं विलीनीकरोषि च॥
अस्माकन्तु त्वमेवासि पिता हे परमेश्वर। ८
मृद् वयं कुम्भकारस्त्वं वयं त्वत्करनिर्म्मिताः॥
मा भवास्मभ्यमत्यन्तं क्रुद्धो हे परमेश्वर। ९
अस्माकमपराधञ्च मानुस्मर निरन्तरं।
सदयः कुरु दृक्पातं वयं सर्व्वे तव प्रजाः॥
पवित्रास्तव याः पुर्य्यस्ताः सञ्जाता वनोपमाः। १०
अरण्यमभवत् सीयोन् यिरूशालम् मरुस्थलं॥
यत्र त्वामप्रशंसंश्च पूर्व्वमस्मत्पितामहाः। ११
धर्म्मधाम तदस्माकं रम्यं निर्दग्धमग्निना।
अस्माकं प्रियवस्तूनि सर्व्वाणि ध्वंसितानि च॥
त्वं किं क्षमिष्यसे शान्त इदं हे परमेश्वर। १२
मौनीभूय स्वयं वास्मान् अत्यन्तं व्यथयिष्यसि॥

---

६५ पञ्चषष्टितमोऽध्यायः।

१ अन्यदेशीयानां ग्राह्यत्वं यिहूदीयानामग्राह्यत्वं ८ अवशिष्टलोकानां रक्षणं ११ दुष्टलोकानां शास्तिः १९ धार्म्मिकाणां सुखञ्च।

ये मनुष्यै र्न दृष्टो ऽहं ते मया प्रतिभाषिताः। १
ये र्जनै र्नाहमन्विष्टस्ते ममोद्देशमाप्नुवन्॥
मम नाम्ना च विख्याता या जातिरभवन्नहि।
तामहं प्रोक्तवानेतत् पश्य मां पश्य मामिति॥

२ कृत्स्नं किन्तु दिनं यावत् करौ विस्तारितौ मया।
प्रजापुञ्जं प्रति भ्रान्तम् एतानेव नरान् प्रति।
ये पथा यान्त्यभद्रेण स्वसङ्कल्पानुगामिनः॥
३ नित्यमेव मनुष्यास्ते साक्षात् प्रकोपयन्ति मां।
उद्यानेषु यजन्ते ते धूपायन्तीष्टकासु च॥
४ ते वसन्ति श्मशानेषु रात्रौ सन्ति गुहासु च।
शूकरमांसमश्नन्ति घृण्यसूपञ्च बिभ्रति॥
५ ते वदन्त पृथक् तिष्ठ पवित्रोऽस्मि न मां स्पृश।
मन्नासायामिमे धूमो वह्नि र्वा नित्यमुज्ज्वलः॥
६ तत् पश्यालेखि मत्साक्षान्नाहं स्थास्यामि नीरवः।
फलं किन्तु प्रदास्यामि तेषां दास्यामि वक्षसि॥
७ धूपमद्रिषु प्रज्वाल्य मां शैलेषु विनिन्द्य च।
यद्यदेवापराद्धं तै र्यच्च तेषां पितामहैः॥
फलं तस्य प्रदास्यामि कर्म्म तेषां पुरातनं।
परिमाय फलं तस्य तेषां दास्यामि वक्षसि॥
८ पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः।
द्राक्षामध्ये रसे दृष्टे द्राक्षां मैव विनाशय।
यतः सा शुभयुक्तेति मनुष्यैरुच्यते यथा॥
तथाहं स्वीयदासानां करिष्याम्यनुरोधतः।
नैवाहं साधयिष्यामि साकल्यस्य विलोपनं॥
९ याकूबो मध्यतो वंशो मया चोत्पादयिष्यते।
यिहूदा मध्यतश्चैको मद्गिरीणामधीश्वरः॥
मद्भूमिञ्चाधिभोक्ष्यन्ते लोका ममाभिरोचिताः।
तत्र गत्वा करिष्यन्ति वसतिं मम सेवकाः॥
१० शारोणं मेषयूथानां सुखस्थानं भविष्यति।
आखोराख्या समा भूमिः शयनीयस्थलं गवां।
निमित्तं मम लोकानां मदन्वेषणकारिणां॥
११ इदं गदामि युष्मांस्तु परेशत्यागिनो जनाः।
युष्माभिरेव विस्मृत्य पवित्रं मम पर्व्वतं॥
कृते गादाख्यदेवस्यायोज्यते भोजनासनं।
मिनिदेवस्य कंसश्च पानीयेन प्रपूर्य्यते॥

दातव्यानसये युष्मान् गणयिष्याम्यहं ततः। १२
सर्व्वे यूयञ्च हत्यायै नतशीर्षा भविष्यथ॥
यतः कृते मयाह्वाने नादत्तं यूयमुत्तरं।
गदिते च मया वाक्ये यूयं न श्रोतुमैच्छत॥
मद्दृष्टौ कुत्सितं यद्यत् तत् तद् यूयमकार्ष्ट च।
यत्राहञ्च न तुष्यामि तद् युष्माभिररोच्यत॥
एतस्मात् कारणादेतत् प्रभु र्वक्ति परेश्वरः। १३
मम दासा अशिष्यन्ति यूयन्तु प्राप्स्यथ क्षुधां॥
मम दासाश्च पास्यन्ति यूयं तृष्णामवाप्स्यथ।
हर्षिष्यन्ति च मद्दासा यूयं लज्जामवाप्स्यथ॥
पश्य प्रफुल्लचित्तत्वाद् गास्यन्ति सेवका मम। १४
यूयं किन्तु मनस्तापाद् आर्त्तनादं करिष्यथ।
उच्चैरुत्साहभङ्गाच्च विलापं प्रकरिष्यथ॥
मम रोचितलोकेषु युष्माभि र्मरणात् परं। १५
शापोदाहारवत् त्यक्तं स्वीयनामार्पयिष्यते॥
प्रभुः परेश्वरो यस्मात् स्वयं युष्मान् हनिष्यति।
नामधेयं स्वदासानाम् अन्यच्चैकं करिष्यति॥
पृथिव्यां तेन यः कश्चित् प्रार्थयिष्यत आशिषं। १६
सत्येश्वरस्य नाम्ना स प्रार्थयिष्यत आशिषं॥
पृथिव्यां यो मनुष्यश्च शपथं प्रकरिष्यति।
सत्येश्वरस्य नाम्नैव शपथं स करिष्यति॥
प्राक्तनव्यसनानाञ्च स्थास्यति स्मरणं नहि।
यतः प्रच्छादयिष्यन्ते मया तानि स्वदृष्टितः॥
नवद्यां नवभूमिञ्च पश्य स्रक्ष्याम्यहं तदा। १७
प्राक्कालः स्मरणाल्लुप्तो नैवानुचिन्तयिष्यते॥
मया यत् स्रक्ष्यते यूयं सर्व्वे तस्मिन् प्रहृष्यत। १८
यावदनन्तकालञ्च तत्रानन्दं प्रगच्छत॥
यतः स्रक्ष्याम्यहं पश्यानन्ददां यिरूशालमं।
तन्निवासिप्रजापुञ्जं करिष्यामि च हर्षदं॥
आनन्दं समवाप्स्यामि परमं यिरूशालमि। १९
मामकीनप्रजापुञ्जे मम हर्षो जनिष्यते।

क्रन्दनमार्त्तनादो वा तत्र न श्रोष्यते पुनः ॥
१० नैवापनेष्यते तस्मात् स्थानात् को ऽपि मृतः शिशुः ।
नासम्पूर्णवयस्को वा को ऽपि वृद्धो ऽपनेष्यते ॥
शतवर्षवयस्कस्तु बालस्तत्र मरिष्यति ।
शतवर्षवयस्कश्च पापी शप्तो भविष्यति ॥
११ ये निर्म्मास्यन्ति वेश्मानि सन्निवत्स्यन्ति तत्र ते ।
ये चोद्यानं करिष्यन्ति भोक्ष्यन्ते तत्फलानि ते ॥
१२ कृते तै र्गृहनिर्म्माणे नापरस्तत्र वत्स्यति ।
द्राक्षोद्याने कृते तैश्च नान्यः फलानि भोक्ष्यते ॥
दीर्घायुषो भविष्यन्ति पादपा इव मज्जनाः ।
निजहस्तकृतं वस्तु नरै र्ममाभिरोचितैः ।
जीर्णताप्राप्तिपर्य्यन्तं नित्यमेव प्रयोक्ष्यते ॥
१३ न वृथा ते श्रमिष्यन्ति न प्रसोष्यन्ति चापदे ।
यतः स्वकीयसन्तानैः पुत्त्रपौत्त्रादिभिः सह ।
ते भविष्यन्ति वंशः स आशिःप्राप्तः परेश्वरात् ॥
१४ तेभ्यश्च प्रार्थनात् पूर्व्वं प्रदास्याम्यहमुत्तरं ।
उपश्रोष्याम्यहं तेषाम् असमाप्तवचांस्यपि ॥
१५ वृको मेषस्य वत्सश्च तदैकत्र चरिष्यतः ।
तदा गौरिव सिंहो ऽपि पलालाशी भविष्यति ।
विषाननस्य भक्ष्यञ्च तदा धूलि र्भविष्यति ॥
कृत्स्ने मम पवित्राद्रौ न हिंसां न विनाशनं ।
कस्यचित् ते करिष्यन्तीति ब्रूते परमेश्वरः ॥

---

६६ षट्षष्टितमोऽध्यायः ।

१ परमेश्वरीयानुग्रहकथनं ३ कपटिनः प्रति तिरस्करणं ५ नम्रलोकानां सान्त्वनं ७ समाजस्य वृद्धिः सुखञ्च १५ दुष्टलोकानां विनाशनञ्च ।

१ भाषते भारतीमेनां स्वयमेव परमेश्वरः ।
मम सिंहासनं स्वर्गो मम पादासनञ्च भूः ॥
युष्माभि र्मत्कृते कुत्र विनिर्म्मायिष्यते गृहं ।
मद्विश्रामार्थकं स्थानं कुत्र वा समवाप्स्यते ॥

मामकीनेन हस्तेन सर्व्वमेतदसर्जि हि। २
इत्थञ्च सर्व्वमुत्पेदे वक्तीदं परमेश्वरः॥
नम्रशीलस्तु चूर्णात्मा सकम्पो वचनान्मम।
यो मनुष्यस्तमुद्दिश्य करिष्याम्यवलोकनं॥
वृष उत्सृज्यते येन मनुष्यस्तेन हन्यते। ३
मेषश्च हूयते येन शुनः कण्ठं भनक्ति सः॥
कश्चिद् ददाति नैवेद्यं दूषितं शौकरासृजा।
कश्चिद् दहति धूपञ्च मृषादेवञ्च वन्दते॥
तेषां स्वाभीष्टमार्गास्तु यथा तैरभिरोचिताः।
घृण्येषु स्वेष्टदेवेषु मनस्तेषाञ्च तुष्यति॥
आशाभङ्गस्तथा तेषां मयाभिरोचयिष्यते। ४
यत् सन्त्रासकरं तेषां प्रापयिष्यामि तच्च तान्॥
यतः कृते मयाह्वान उत्तरं को ऽपि नाददात्।
भाषमाणे मया ते च श्रोतुमासन्ननिच्छवः॥
कुत्सितं यत्तु मद्दृष्टौ ते तदेव समाचरन्।
यच्च चाहं न तुष्यामि ते तदेवाभ्यरोचयन्॥
हे नराः परमेशस्य वाक्यात् कम्पसमन्विताः। ५
एतत् तस्य वचो यूयम् आकर्णयितुमर्हथ॥
युष्माकं भ्रातरो युष्मान् मदीयनामकारणात्।
द्विषन्तो दवयन्तश्च मान्यमाहुः परेश्वरं॥
युष्माकमेव हर्षार्थं स प्रदास्यति दर्शनं।
तेषां किन्तु मनुष्याणां महालज्जा भविष्यति॥
नगरात् क्षोभजो नादो नादश्चोदेति मन्दिरात्। ६
परमेशस्य नादः स स्वारिभ्यः फलदायिनः॥
प्रसवार्त्तिमप्राप्तायाः सीयोनः प्रसवो ऽभवत्। ७
अबुद्धा गर्भसन्तापम् अभवत् सा च पुत्त्रिणी॥
केनैतादृशमश्रावि केनेदृशमदर्शि वा। ८
जनपूर्णः प्रदेशः किम् एकदिने प्रसूयते॥
किं वा कृत्स्नः प्रजापुञ्ज एकजन्मनि जायते।
गतगर्भव्यथा पश्य स्वपुत्त्रान् प्रासवत् सियोन्॥
किं मया योनिमुद्घाट्य जन्म न साधयिष्यते। ९

भाषते भारतीमेनां स्वयमेव परेश्वरः॥
आनीय प्रसवावस्थां गर्भः किं रोत्स्यते मया।
भाषते भारतीमेनां तावकीनेश्वरः स्वयं॥
१० यिरूशालमि ये सर्व्वे प्रीयन्ते वच्मि तान् नरान्।
आनन्दत तया सार्द्धं गानं कुरुत तामधि॥
तस्याः कृते च यावन्तः सन्ति शोकपरिप्लुताः।
तान् ब्रवीमि तया सार्द्धं यूयमतीव हृष्यत॥
११ यतस्तत्सान्त्वनस्तन्यं पीत्वा तृप्तिमवाप्स्यथ।
पयो निष्पीड्य तस्याश्च शोभापूर्णस्तनद्वयात्।
युष्माभिः सुखभोगो हि परमः परिलप्स्यते॥
१२ यतो हेतोरिमां वाणीं भाषते परमेश्वरः।
तां प्रति वर्त्तयिष्यामि शान्तिं स्रोतस्वतीमिव।
विदेशिनां प्रतापञ्च धारावाहिनदीमिव॥
स्तन्यं पास्यथ यूयञ्च वक्ष्यध्वे च कटिस्थले।
जङ्घयोरुपरि प्रीत्या लालिताश्च भविष्यथ॥
१३ सान्त्वयिष्याम्यहं युष्मान् पुरुषं जननी यथा।
यिरूशालमि युष्माकं सान्त्वना च प्रसेत्स्यति॥
१४ तां समालोक्य यूयञ्च हृष्टचित्ता भविष्यथ।
अस्थीनि वः सतेजांसि भविष्यन्ति च शष्पवत्॥
परमेशस्य हस्तश्च स्वदासानां सहायवत्।
ज्ञास्यते तस्य कोपश्च स्वशत्रूणां विपक्षवत्॥
१५ आयास्यति यतः पश्य परेशो वह्निना वृतः।
रथास्तस्य भविष्यन्ति समानाश्चक्रवायुना॥
निजकोपं स तापेन कृतकार्य्यं करिष्यति।
सफलं स्वतिरस्कारम् उज्ज्वलक्रोधवह्निना॥
१६ विचारमनलेनैव परमेशः करिष्यति।
सर्व्वैश्च प्राणिभिः सार्द्धम् असिना विवदिष्यते।
बहवश्च भविष्यन्ति परेशस्य हता नराः॥
१७ पूतीभूय शुचीभूयोपवनान्याश्रयन्ति ये।
मध्यवर्त्तिन एकस्य पश्चात् पश्चाद् व्रजन्ति च॥
शौकरमांसभोक्तारो घृण्यकीटेन्दुराशिनः।

युगपत् ते विनंक्ष्यन्ति वक्तीदं परमेश्वरः ॥
अहमेव क्रियास्तेषां सङ्कल्पांश्च प्रदृष्टवान्। १८
सर्व्वदेशीयलोकानां सर्व्वभाषाप्रभाषिणां ॥
सङ्ग्रहायोपयुक्तश्च समयः समुपस्थितः।
ते मनुष्यैः समागत्य महिमा द्रक्ष्यते मम ॥
तेषां मध्ये ततो ऽहञ्च स्थापयिष्यामि लक्षणं। १९
तेषाञ्च रक्षितान् कांश्चित् प्रेषयिष्यामि दूतवत् ॥
तार्शिशं प्रति पूलञ्च लूदीयांश्च धनुर्धरान्।
तूबलं यवनञ्चापि लोकान् विदेशिनः प्रति ॥
द्वीपान् प्रति सुदूरांश्च येषां निवासिभि र्नरैः।
नैवाश्रावि मम ख्याति र्नादर्शि महिमा मम।
महिमा मम तैस्तत्र विदेशे कीर्त्तयिष्यते ॥
सर्व्वविदेशिनां मध्याद् युष्माकं भ्रातरस्तदा। २०
अश्वै रथैः शिरस्काभिरश्वतरैः क्रमेलकैः।
पुनरानाययिष्यन्ते पवित्रं मम पर्व्वतं।
यिरूशालम्पुरीञ्चापि परेशायोपहारवत् ॥
इस्रायेलीयसन्तानैः परमेशस्य मन्दिरं।
शुचिपात्रेषु नैवेद्यं यथैवानीयते तथा।
भाषते भारतीमेनां स्वयमेव परेश्वरः ॥
नियोक्तुं याजकत्वे ऽहं लेवीयानां पदे ऽपि च। २१
तेषां कांश्चिद् ग्रहीष्यामीति ब्रूते परमेश्वरः ॥
मत्सृष्ट्या नवीना द्यु र्नवीना भूश्च यादृशं। २२
मत्साक्षात् स्थास्यतो नित्यं वक्तीदं परमेश्वरः।
वंशो नाम च युष्माकं तादृशं स्थास्यतः सदा ॥
तदानीं प्रतिमासञ्च प्रतिविश्रामवासरं। २३
आयास्यन्त्यर्च्चनां कर्त्तुं मत्साक्षात् सर्व्वप्राणिनः।
भाषते भारतीमेनां स्वयमेव परेश्वरः ॥
ते च द्रक्ष्यन्ति निर्गत्य नृणां मद्द्रोहिणां शवान्। २४
कृमि र्यतो ऽमरस्तेषाम् अशाम्यो ऽग्नि र्भविष्यति।
सर्व्वेषां प्राणिनां ते च भविष्यन्ति घृणास्पदं ॥

यिरिमियस्य भविष्यद्वचनानि।

१ प्रथमोऽध्यायः।

१ यिरिमियस्य कालनिरूपणं ४ भविष्यद्वक्तृत्वपदे तस्य नियोगः ११ वादामतरोः पाकस्थाल्याश्च दृष्टान्ते परमेश्वरेण तस्याश्वासनञ्च।

१ विन्यामीनदेशस्थानायोत्पुरवासिनां याजकानां मध्यवर्त्तिनो हि-
२ ल्कियसुतस्य यिरिमियस्य वाक्यानि। आमोनस्य सुतो योशियो यदा
यिहूदादेशस्य राजासीत् तदानीमर्थतस्तदीयराजत्वस्य त्रयोदशे वत्सरे
३ परमेश्वरस्य वाणी तं यिरिमियं प्रति प्रादुरभूत्। तदारभ्य यिहूदीय-
भूपते र्योशियसुतस्य यिहोयाकीमस्य राजत्वकाले यिहूदीयभूपते र्यो-
शियसुतस्य सिदिकियस्यैकादशवर्षपरिमिते राजत्वकाले च पञ्चममासे
यिरूशालमो निर्जनीकरणं यावत् प्रादुरभूत्।

४ परमेश्वरस्येयं वाणी मां प्रति प्रादुरभूत्।

५ जठरे तव सृष्टेः प्राक् त्वां परिज्ञातवानहं।
उदरान्निर्गतेः प्राक् च त्वं पवित्रीकृतो मया।
भाविवादी नियुक्तश्च समक्षं परदेशिनां॥

६ ततो मयोक्तं हा प्रभो परमेश्वर, मम वाक्पटुता नास्ति यस्माद् बालो
७ ऽहं। तदा परमेश्वरो मामवादीत् बालोऽहमिति मा ब्रूहि परन्तु
यत्र कुत्रचित् मया प्रहेष्यसे तत्रैव गमिष्यसि यत्किञ्चिच्च मयाज्ञापयि-
८ ष्यसे तदेव वदिष्यसि। तेभ्यो मा बिभीहि यस्मात् त्वां रक्षितुमहं तव
९ सङ्गीति ब्रूते परमेश्वरः। ततः परमेश्वरेण हस्तं प्रसार्य्य मम मुखं स्पृष्टं
१० मां प्रतीदञ्च गदितं पश्याहं तव मुखे मद्वाक्यानि समर्पितवान्। पश्या-
हमुन्मूलनोत्पाटनविनाशनध्वंसननिर्म्माणरोपणार्थमद्य जातिषु राष्ट्रेषु
च त्वामधिकृतवान्।

११ ततः परं परमेश्वरस्येयं वाणी मां प्रति प्रादुरभूत् हे यिरिमिय,
त्वया किं दृश्यते? ततो मयोक्तं शीघ्रपुष्पितस्य (वादामाख्यस्य) तरोः
१२ शाखां पश्यामि। तदानीं परमेश्वरोऽवादीत् यथातथं त्वया दृष्टं
१३ यतोऽहं स्ववाक्यं सफलीकर्त्तुं शीघ्रकर्म्मा भविष्यामि। पुनश्च परमे-

श्वरस्येदं वाक्यं मां प्रति प्रादुरभूत् त्वया किं दृश्यते ? मयोक्तम् उत्तर-
मुखी वाष्पोत्थादिका स्थाली दृश्यते। परमेश्वरो मामिदमप्यगादीत् १४
उत्तरस्माद् एतद्देशनिवासिनां सर्व्वेषाममङ्गलमुत्पत्स्यते। यस्मात् पश्या- १५
हमुत्तरदिक्स्थराष्ट्रवासिनीः सर्व्वजातीराह्वास्यामीति ब्रूते परमेश्वरः,
तैरागत्य यिरूशालमो गोपुराणां प्रवेशस्थानेषु तद्वेष्टकप्राचीरपृष्ठस्य
विविधस्थानेषु यिहूदादेशस्य सर्व्वपुराणां मुख्यस्थानेषु च स्वं स्वं सिंहा-
सनं स्थापयिष्यते। एते जना यन्मां विहायेतरदेवानां कृते धूपदाहं १६
स्वकरनिर्म्मितवस्तूनां भजनञ्च कृतवन्तस्तस्मात् तेषां कृत्स्नदुराचारे
मदीयविचाराज्ञामहं तान् वदिष्यामि। परन्तु त्वं बद्धकटिस्तिष्ठन् १७
मया यद्यदाज्ञापयिष्यसे तत् सर्व्वं तान् ब्रूहि तेभ्यो मा त्रस्य त्रस्यंश्चेत्
तेषां समक्षं मया त्रासयेथाः। पश्याहमद्य कृत्स्नदेशे त्वामधिकृत्य १८
यिहूदादेशस्य राज्ञां मुख्यनराणां याजकानां ग्राम्यजनानाञ्च समक्षं
सुदृढनगरं लौहस्तम्भम् आरकूटमयप्राचीरञ्च कृतवान्। ते त्वया सह १९
योत्स्यन्ति न तु तव प्रभविष्यन्ति यतस्त्वां रक्षितुमहं तव सहायो
ऽस्मीति ब्रूते परमेश्वरः।

---

२ द्वितीयोऽध्यायः।

१ यिरूशालमं प्रति परमेश्वरस्यानुग्रहः ४ परमेश्वरं प्रति तन्निवासिजनानां देवार्च्च-
नादयो ऽपराधाः १४ परमेश्वरेण तेषां भर्त्सना च।

परमेश्वरस्येयं वाणी मां प्रति प्रादुरभूत्। त्वं गत्वा यिरूशालमः १,२
कर्णयोरिदं घोषय। परमेश्वरो ब्रूते यथा,

तव स्वल्पवयस्कायाः प्रणयं संस्मराम्यहं।
नवोढायाश्च ते प्रीतिं मत्पश्चात् प्रान्तरेण च।
तवानुव्रजनं भूम्या या कष्टुं नहि शक्यते॥
इस्रायेल् परमेशस्य पवित्रं स्वं तदाभवत्। २
तदीयायस्य मध्ये च स आसीदग्रिमं फलं॥
ये जनास्तं ग्रसन्ते ते सर्व्वे भवन्ति दोषिणः।
आक्रमिष्यत्यनिष्टं तान् इति ब्रूते परेश्वरः॥
श्रूयतां परमेशस्य वाग् याकूबो ऽन्वय त्वया। ४
श्रूयतां सर्व्वगोष्ठीभिरिस्रायेलो ऽन्वयस्य सा॥

५ परमेशो ब्रवीत्येतत् कमन्यायं निरूप्य मे ।
मम सन्निधितो दूरं गतं युष्मत्पितामहैः ।
अलीकस्याश्रितो धर्म्मो लब्धा चालीकता ततः ॥
६ न तैः पृष्टमिदं कुत्र विद्यते परमेश्वरः ।
येनानीता मिसर्देशात् तारिताश्च मरु वयं ॥
घोरां गर्त्तमयीं भूमिं भूमिं शुष्कां तमस्विनीं ।
पान्थैरसेवितां भूमिं तथानध्युषितां नरैः ॥
७ देशमुद्यानतुल्यन्तु युष्मान् आनीतवानहं ।
यूयं यथोपभुञ्जीध्वं तस्य फलादि मङ्गलं ॥
मम देशस्तु युष्माभिः प्रविष्टैरशुचीकृतः ।
मामकोनाधिकारो ऽयं गर्हणीयो व्यधायि च ॥
८ परमेशो ऽस्ति कुत्रेति याजकैरुच्यते नहि ।
नैव मामभिजानन्ति शास्त्रहस्ता नरा अपि ।
मत्प्रजापालकाः सन्ति मयि विश्वासघातिनः ॥
बालदेवस्य नाम्ना च भाषन्ते भाववादिनः ।
अनुपकारिवस्तूनां सङ्घाता अनुगामिनः ॥
९ परेशो वक्ष्यहं तस्माद् युष्माभि र्विवदे पुनः ।
विवदिष्ये च युष्माकं सूनूनां सूनुभिः सह ॥
१० कित्तीमाख्यान्तरोपाणि यूयं गत्वा परीक्ष्य च ।
दूतान् वा केदरं देशं प्रेष्य सूक्ष्मं निरूप्य च ।
ईदृशं तत्र सम्भूतं कर्म्म न वेति पश्यत ॥
११ कापि किं निममे जातिः स्वीयदेवाननीश्वरान् ।
मत्प्रजास्तु स्वसहायेन न्यमयन्त निजश्रियं ॥
१२ हे द्यौस्त्वं विस्मयस्यात्र घोरं रोमाञ्चिता भव ।
याहि च स्तम्भनं गाढमिति ब्रूते परेश्वरः ॥
१३ मत्प्रजाभि र्यतो हेतोरपराधद्वयं कृतं ।
अमृतानामपामुत्सं मामत्याक्षु र्मम प्रजाः ॥
स्वार्थञ्च खनितुं कूपान् ता अकार्षुरुपक्रमं ।
छिद्रसमन्वितान् कूपान् अशक्तान् जलधारणे ॥
१४ क्रीतदासः किमिस्रायेल् स किं चेटो गृहोद्भवः ।
स यत् समभवल्लोप्त्रं किं भवेत् तस्य कारणं ॥

अभिगर्ज्जन्ति तं सिंहाः स्वनादमीरयन्ति च। १५
विक्षतस्तस्य देशस्तै र्ध्वंसस्थानमजायत।
पुराणि तस्य दग्धानि नरशून्यानि चाभवन्॥
मोफि तफनहेषे च वासकारिजना अपि। १६
आ मुण्डात् तव सर्व्वस्वं चरन्त्यतीव लोभिनः॥
यदा त्वामनयन्मार्गे त्वत्प्रभुः परमेश्वरः। १७
तदानीं तं परित्यज्य साधितेयं गतिस्त्वया॥
किं कर्त्तव्यं त्वयेदानीं मिसर्देशस्य वर्त्मनि। १८
शिहोरस्य जलं पातुं किं त्वदीयमनोरथः॥
अश्शूर्देशस्य मार्गे वा किं कर्त्तव्यं भवेत् त्वया।
फरातारव्यमहानद्या जलं पातुं किमिच्छसि॥
त्वान्तु स्वकीयदौर्ज्जन्यं प्राप्तदण्डां करिष्यति। १९
भ्रमणं तव सन्मार्गात् त्वां विधास्यति लज्जितां।
त्वया मत्तो न सन्त्रस्य स्वप्रभुः परमेश्वरः।
त्यक्तस्तत् कुत्सितं तिक्तम् इति जानीहि पश्य च।
वाक्यमेतत् प्रभु र्ब्रूते सैन्याध्यक्षः परेश्वरः॥
अतीव प्राक्तने काले भङ्क्त्वा स्वीययुगं त्वया। २०
बन्धनानि च संछिद्य नाहं दासीति भाषितं॥
तत उच्चगिरेरग्रे हरिद्वृक्षस्य वा तले।
सर्व्वत्रैव शयाना त्वं वेश्यावृत्तिं निषेवसे॥
सत्यबीजत उत्पन्ना उत्तमा गोस्तनीलताः। २१
सर्व्वत्र रोपिता यस्मिन् तत् क्षेत्रं त्वं कृता मया॥
हा हा त्वं मम दुःखाय कीदृशं विकृताभवः।
आकीर्णा गोस्तनीवल्ल्या इतरायाः कुपल्लवैः॥
यवक्षारेण कुर्य्याश्चेत् त्वं निजाङ्गस्य मार्ज्जनं। २२
क्षार्थं तत्र प्रयुञ्जीथा बाहुल्येन च सर्जिकां॥
तथापि त्वदघं स्थाता मम साक्षात् कलङ्कवत्।
प्रभुना परमेशेन वाक्यमेतन्निगद्यते॥
नाहं भ्रष्टा न वा देवान् बालाख्याननुयाम्यहं। २३
कथमेतादृशं वाक्यं गदितुं शक्यते त्वया॥
स्वचरित्रं निरीक्षस्व निम्नभूमौ त्वया कृतं।

तावकीनक्रियायाश्च सुपर्य्यालोचनं कुरु ॥
त्वमुष्ट्री लघुपादेव वक्रगत्यवलम्बिनी।
२४ तुल्या वा वन्यगर्द्दभ्या याभ्यस्ता भ्रमणे मरौ ॥
यया च स्वाभिलाषस्य वेगाद् वायु र्निपीयते।
मैथुनाय सचेष्टा सा नियन्तुं केन शक्यते ॥
तान्वन्विच्छति यः कश्चित् क्लामथं स न गच्छतु।
ऋतुकाले गते तस्याः स तामासादयिष्यति ॥
२५ स्वपादौ रक्ष नग्नत्वात् स्वीयकण्ठञ्च शोषतः।
इत्युक्ता भाषसे त्वं मां मोघाशा तदसम्भवं।
परपुंसु मम प्रीतिरनुयास्यामि तानहं ॥
२६ धृतः सन् यादृशीं लज्जां समवाप्नोति तस्करः।
प्राप्स्यन्ति तादृशीं लज्जाम् इस्रायेलीयवंशजाः ॥
ते च तेषाञ्च राजानस्तेषां मुख्यनरा अपि।
तेषाञ्च याजकास्तेषां नराश्च भाविवादिनः ॥
२७ भाषन्ते काष्ठखण्डं ते त्वमेवासि पिता मम।
त्वमस्मत्प्रसविचीति शिला तैश्चाभिधीयते
यतो मां स्वीयपृष्ठं ते दर्शयन्ति न चाननं।
विपत्काले तु वक्ष्यन्ति समुत्तिष्ठाभिरक्ष नः ॥
२८ ईश्वरास्तव ते कुत्र स्वार्थं ये निर्म्मितास्त्वया।
उत्तिष्ठन्तां त एव त्वां विपत्काले ऽभिरक्षितुं।
यिहूदास्तव यावत्यः पुर्य्यस्तावन्त ईश्वराः ॥
२९ यूयं केन निमित्तेन विवदध्वे मया सह।
सर्व्वे मत्त्यागिनो यूयमिति ब्रूते परेश्वरः ॥
३० युष्मत्पुत्त्रान् वृथाताडं न तैः शास्तिरगृह्यत।
घातिसिंह इवाग्रासीत् खड्गो वो भाविवादिनः ॥
३१ हे कुवंशाः परेशस्य वाग् युष्माभिरवेक्ष्यतां।
इस्रायेलं समुद्दिश्याहं किमासं मरुस्थलं।
किमासं तस्य सम्बन्धे देशो वा तमसावृतः ॥
मत्प्रजाभिः कुतो हेतोरुच्यते प्रभवो वयं।
इतः पश्चाद् वयञ्च त्वां नोपस्थास्यामहे पुनः ॥
३२ कन्या किं विस्मरेद् भूषां नवोढा वा स्वमेखलाः।

मत्प्रजानां स्मृतिभ्रष्टो ऽस्मि त्वसङ्ख्यदिनान्यहं॥
त्वया कामानुवर्त्तिन्या कीदृक् सद्दर्त्म निर्म्मितं। ३३
तत् कृत्वा तु विपज्ज्ञो ऽपि त्वत्प्राप्ते वर्त्म दर्शितं॥
त्वद्वस्त्रस्य दशास्वासीद् दीननिर्दोषिणामसृक्। ३४
न मयोत्खन्य दृष्टं तत् सर्व्वस्थानेष्वविद्यत॥
त्वयेदं गद्यते वाक्यं दोषहीना यतो ऽस्म्यहं। ३५
परावर्त्तिष्यते मत्तस्तस्य कोपो न संशयः॥
नैवाकारि मया पापमिति त्वं भाषसे यतः।
पश्य तत्कारणादेव विवदिष्ये त्वया सह॥
परिवर्त्तयितुं मार्गं त्वं कुतो ऽसीदृगुत्सुका। ३६
लज्जां यथाश्सुराद्प्राप्ता मिसरो ऽपि तथाप्स्यसि॥
मूर्द्ध्नि शोकात् करौ दत्त्वा त्वं ततो ऽपि निरेष्यसि। ३७
यतो विश्वासभूम्यस्ते परेशेन निराकृताः।
नैव तासां सहायत्वात् त्वं सिद्धार्था भविष्यसि॥

---

३ तृतीयोऽध्यायः।

१ यिहूदाया वेश्यावद् आचरणं ६ इस्रायेलश्च तद्रूपाचरणं ११ तदीयजनाम् प्रतीश्वरस्य निवेदनं प्रतिज्ञा च २१ तेषाम् अनुतापो दोषस्वीकरणञ्च।

परेशेनोच्यते पश्य पत्नी पत्या निराकृता। १
त्यक्ता तत्सङ्गमन्यस्य भर्त्तुर्भार्य्या भवेद् यदि॥
तर्हि किं स पतिस्तस्यै परावर्त्तिष्यते पुनः।
तथा तेन कृते देशः किं नामेध्यो भविष्यति॥
सार्द्धं जारैरनेकैस्तु वेश्यावृत्तिः कृता त्वया।
तथाप्येहि पुनर्मह्यमिति ब्रूते परेश्वरः॥
पर्व्वतान् प्रति दृक्पातं कृत्वा त्वं प्रविलोकय। २
मैथुनं यत्र नाकार्षीस्तत् स्थानं कुत्र विद्यते॥
त्वं तान् प्रतैक्षथा मार्गं मरौ दस्युर्यथारविः।
स्ववेश्यात्वादिपापेन त्वया देशः कलङ्कितः॥
संहृतास्तत्त आसारा वर्षकालश्च नाभवत्। ३
त्वन्तु वेश्याललाटत्वान्नाकरो लज्जने मतिं॥

४ अद्यारभ्याङ्गयन्ती मां किं न जल्पसि मत्पितः।
मम यौवनकालस्य त्वमासी र्हृदयेश्वरः॥
५ भवान् किं चिरमन्युः स्यात् किं वा कुप्येन्निरन्तरं।
पश्येत्थं भाषमाणापि दुर्वृत्तासि यथाबलं॥
६ अनन्तरं योशियस्य राजत्वकाले परमेश्वरो मामवादीत्,
किं त्वयोन्मार्गगामिन्या इस्रायेलः क्रियेच्छिता।
भ्राम्यन्त्युच्चगिरेरग्रं हरिद्वृक्षस्य वा तलं।
सा प्राप्नोद् यत्र तत्रैव वेश्यावृत्तिं समाचरत्॥
७ मया चोक्तमियं सर्व्वम् एतत् कृत्वापि मां प्रति।
पर्य्यावर्त्तिष्यते पश्चात् सा तु नैवागमत् पुनः।
छाद्मिकी भगिनी तस्या यिहूदा तद् व्यलोकयत्॥
८ गर्हितोन्मार्गगामिन्या इस्रायेलो रतार्थिनां।
सन्त्यक्ता सा मया तस्यै त्यागपत्रमदायि च॥
तथापि छाद्मिकी तस्या यिहूदानामिका स्वसा।
न सन्त्रस्य तथा गत्वा वेश्याभूत् पश्यतो मम॥
९ स्ववेश्यात्वस्य चाख्यात्या देशमप्यकलङ्कयत्।
प्रस्तरैः काष्ठखण्डैश्च सहाकार्षीद् रतिक्रियां॥
१० तथापि छाद्मिकी तस्या यिहूदा नामिका स्वसा।
नैवाखण्डेन चित्तेन किन्तु मिथ्योक्तिभावतः।
मां प्रत्यागात् पुनर्व्वारमिति ब्रूते परेश्वरः॥
११ अपरं परमेश्वरो मां जगाद, छाद्मिक्या यिहूदात उन्मार्गगामिनी-
१२ स्रायेल् आत्मधार्म्मिकतां सप्रमाणामकार्षीत्। त्वं गत्वोत्तरदिशं प्रत्य-
तानि वाक्यानि घोषय, यथा,
उन्मार्गगामिनीस्रायेल् त्वं प्रत्यायातुमर्हसि।
भाषते भारतीमेतां स्वयमेव परेश्वरः॥
अप्रसन्नं मुखं युष्मान् दर्शयिष्याम्यहं नहि।
यस्मात् प्रसादशीलो ऽहमिति ब्रूते परेश्वरः।
नैवाहं शाश्वतं कालं यावत् क्रोधं करोमि हि॥
१३ त्वं स्वकीयापराधं तम् अनुजानीहि केवलं।
स्वप्रभौ परमेशे यद् भूत्वा विश्वासघातिनी।
सर्व्वहरित्तरो र्मूले परेषु व्यस्तृणो र्गतिं।

मद्वाक्यं वधिरा यूयमिति ब्रूते परेश्वरः॥
हे मत्यागिसुता यूयं पुनरायातुमर्हथ। १४
इति परेश्वरो ब्रूते नाथो युष्माकमस्म्यहं॥
नगरादेकमादाय वंशतो वा जनद्वयं।
इत्थमेव करिष्यामि युष्मान् सीयोन्युपस्थितान्॥
प्रदास्यामि च युष्मभ्यं पालकान् मदभीप्सितान्। १५
त युष्मान् पालयिष्यन्ति ज्ञानेन पाटवेन च॥
इत्थं देशे यदैधित्वा बहुवंशा भविष्यथ। १६
तदा नियममञ्जूषा परेशस्येति वाग् जनैः।
नैव गदिष्यते भूय इति ब्रूते परेश्वरः॥
नैवारोक्ष्यति चित्तं सा न वा स्मारिष्यते पुनः।
नानुकाङ्क्षिष्यते वा सा न वा निर्म्मास्यते पुनः॥
तस्मिन् काले यिरूशालम् नगरीयञ्च मानवैः। १७
आसनं परमेशस्य नाम्नैतेनाभिधास्यते॥
मनुष्याः सर्व्वजातीया गत्वा तां यिरूशालमं।
तत्र परेशितु र्नाम्ने करिष्यन्ति समागमं।
न पुनः स्वकुचित्तस्य चाचरिष्यन्त्यबाध्यतां॥
इस्रायेलीयवंशेन सङ्गिना परिवारितः। १८
तस्मिन् काले यिहूदीयो वंशो यात्रां करिष्यति॥
उत्तरस्थितदेशाच्च वः पितृभ्यो ऽधिकारवत्।
मया दत्तमिदं देशं तावेकत्रागमिष्यतः॥
मयोक्तं सन्ततिश्रेण्यां कथं त्वां स्थापयाम्यहं। १९
कथं तुभ्यं प्रदास्यामि देशमेनं मनोहरं।
न्जाते र्देशरत्नानां श्रेष्ठरत्नस्य भोगितां॥
पुनरुक्तं मया त्वं मां हे तातेत्यभिधास्यसि।
मदनुव्रजनान्नैव परावर्त्तिष्यसे पुनः॥
परमेशस्तु वक्तीदं यथा पत्यसती पतो। २०
मय्यभक्तास्तथा यूयम् इस्रायेलीयवंशजाः॥
गिरीणामुच्चपृष्ठेषु कर्णौ र्वाण्युपलभ्यते। २१
इस्रायेलीयवंशानां प्रार्थनावद्रोदनं॥
यतो ऽजायन्त ते सर्व्वे वक्रमार्गावलम्बिनः।

स्वप्रभोः परमेशस्य विस्मृतिं ते जना गताः॥
२१ प्रत्यागच्छत हे यूयं पुत्रा उन्मार्गगामिनः।
युष्मदुन्मार्गगामित्वं प्रतिकारिष्यते मया॥
अत्र विद्यामहे पश्य तुभ्यं प्रत्यागता वयं।
यतो हेतोस्त्वमेवासि नः प्रभुः परमेश्वरः॥
२३ नूनं वृथा गिरिभ्याशा समूहे वा ककुद्मतां।
इस्रायेलो भवेत् त्राणं नः प्रभौ परमेश्वरे॥
२४ अस्मद्यौवनमारभ्य नः पितृणामुपार्जितं।
श्रमजं सकलं वित्तं तेषां मेषान् गवां व्रजान्।
पुत्रांस्तेषाञ्च पुत्रीश्च तल्लज्जास्यदमग्रसत्॥
२५ लज्जा शयनमस्माकम् अस्मदाच्छादनं त्रपा।
आबाल्यादद्य पर्य्यन्तं नः प्रभोः परमेशितुः।
प्रतिकूलै र्यतो ऽस्माभि र्नस्तातैश्चापराध्यते।
अस्मत्प्रभोः परेशस्य न चानुश्रूयते स्वरः॥

---

४ चतुर्थोऽध्यायः।

१ ईश्वरस्य प्रतिज्ञा ३ यिहूदां प्रति तस्य विनयवाक्यं भविष्यद्दुःखस्य प्रकाशः १० यिरिमियस्य कथा ११ यिहूदायाः शत्रूणां वर्णनं १९ तत्कारणाद् यिरिमियस्य दुःखं २२ लोकानामज्ञानता २३ यिरिमियस्य दर्शनं २७ लोकानां दुःखानि च।

१ हे इस्रायेल् परेशेन वाक्यमेतन्निगद्यते।
प्रत्यावर्त्तितुमिच्छेश्चेत् प्रत्यावर्त्तस्व मां प्रति॥
मदीयदृष्टितो दूरं गर्हणीयक्रियास्तव।
त्वया यद्यपसार्य्यन्ते न भ्रमिष्यस्यनाश्रयः॥
२ अमरः परमेशो ऽस्तीत्युदित्वा सत्यभावतः।
न्यायतो धर्म्मतश्च त्वं यदा दिव्यं करिष्यसि॥
तदानीं समभिज्ञाय तमेवाशिष आकरं।
तस्य श्लाघां करिष्यन्ति सर्व्वजातीयमानवाः॥
३ यिहूदीयमनुष्यांस्तु यिरूशालमनामकं।
नगरञ्च ब्रवीतीमां भारतीं परमेश्वरः।

अहृष्टा कृष्यतां वो भूः कण्टकेषूप्यतां नहि॥
परमेश्वरमुद्दिश्य स्वत्वक्छेदं विधाय च। ४
हे मनुष्या यिहूदीया हे यिरूशालमाश्रयाः।
युष्माभिः स्वीयचित्तानां यत्नात् चर्म्मापसार्य्यतां॥
न चेद् अग्निवदुत्पत्य क्रोधे प्रज्वलिते मम।
दोषाद् वः कर्म्मणां को ऽपि तं न निर्वापयिष्यति॥
यिहूदादेश आख्यात भाषध्वं यिरूशालमि। ५
तूरीवाद्येन युष्माभि र्देशे प्रचार्य्यतां वचः॥
यथाशक्त्युच्चशब्देन वाक्यं विज्ञाप्यतामिदं।
समायात प्रवेक्ष्यामो दुर्गाण्याश्रयवद् वयं॥
सियोनं प्रति याचार्थं यूयं तोलयत ध्वजं। ६
यतध्वमाश्रयं प्राप्तुं मा विलम्बध्वमध्वनि॥
यतो हेतोरनिष्टञ्च विनाशञ्च महाद्भुतं।
उद्यतो ऽस्मि समानेतुमहमुत्तरदेशतः॥
उत्थितो गह्वनात् सिंहो जातीनां यो विनाशकः। ७
स प्रयाणं समारभ्य स्वस्थानाद्बहिरागतः॥
इच्छेयं तस्य यत् तेन तव देशे विनाशिते।
नगर्य्यस्ते समुच्छिन्ना अभावाद् वासकारिणां॥
युष्माभिः शाणवस्त्रेण बद्धा स्वीयकटीस्ततः। ८
क्रियतां शोक उच्चैश्च विलापः संविधीयतां।
यदस्मत्तः परेशस्य कोपाग्नि र्न निवर्त्तते॥
हृदयं भूमिपालस्य पतीनां हृदयानि च। ९
तस्मिन् दिने ऽवसत्स्यन्तीति ब्रूते परमेश्वरः॥
याजकाश्च भविष्यन्ति तदानीं विस्मयाकुलाः।
भविष्यद्वादिनश्चापि स्तम्भिष्यन्ते चमत्कृताः॥

तदानीं मयावादि, १०

हा प्रभो परमेश त्वं नूनमेतान् जनान् प्रति।
यिरूशालम्पुरीञ्चेमां प्रति कृत्वा प्रवञ्चनां॥
युष्माकं भविता शान्तिरिति वाक्यमभाषथाः।
प्राणवियोगपर्य्यन्तं खड्गाघातस्तु जायते॥

तस्मिन् काल इदं वाक्यम् एतद्देशनिवासिनः। ११

जनान् प्रति यिरूशालम्पुरञ्च प्रति वक्ष्यते ॥
मरुस्थाद्रिभ्य आयाति मत्प्रजानां पुरीं प्रति ।
उष्णो वायु र्न शस्यानां निष्पावाय न शुद्धये ॥
१२ एतस्माद् बलवान् वायुः समायाति ममाज्ञया ।
अहमेव विचाराज्ञा अधुना निगदामि तान् ॥
१३ स पश्याभ्र इवोदेति तद्रथा घूर्णवायुवत् ।
उत्क्रोशेभ्यो महावेगाः सन्ति तस्य तुरङ्गमाः ।
हा हा हता वयं यस्माद् विनाशो न उपस्थितः ॥
१४ त्राणार्थं हे यिरूशालम् त्वं प्रमार्ज मलं हृदः ।
कतिकालमसच्चिन्तास्त्वं स्वान्ते वासयिष्यसि ॥
१५ ध्वनिः संश्रूयते दानाद् वार्त्तावाहस्य कस्यचित् ।
विघोषयत्यनिष्टञ्च कश्चिद् इफ्रायिमाद्रितः ॥
१६ अन्यजातिषु युष्माभिः समाचारो निवेद्यतां ।
यिरूशालममध्येतत् सुस्पष्टञ्च प्रचार्य्यतां ॥
दूरदेशात् समायान्ति जना दुर्गावरोधिनः ।
सिंहनादं करिष्यन्तो यिहूदायाः पुराण्यधि ॥
१७ ताञ्च संवेष्टयिष्यन्ति ते यथा क्षेत्ररक्षिणः ।
अद्रुहत् सा यतो मह्यमिति ब्रूते परेश्वरः ॥
१८ तवाचारात् क्रियाभ्यश्च त्वया लब्धमिदं फलं ।
तव दुर्गतिरस्तीयं तीव्रा हृच्छेदिनी च सा ॥
१९ हा नाडी मम हा नाडी हृत्पिण्डं व्यथते मम ।
मम विक्लवति स्वान्तं मया मौनं न सह्यते ॥
हे मदात्मन् यतो हेतोस्त्वं तूर्य्याः श्रुतवान् ध्वनिं ।
रणस्य सिंहनादञ्च त्वमुपालब्धवानसि ॥
२० उच्छेदात् परमुच्छेदो भूयो भूयो विघोष्यते ।
कृत्स्नदेशो यतो हेतोः सर्व्वनाशं प्रगच्छति ॥
विनाशं सहसा यान्ति मम वस्त्रगृहाणि हि ।
यान्ति निमेषमात्रेण नाशं यवनिका मम ॥
२१ कतिकालं मया केतुः सन्द्रष्टव्यो भविष्यति ।
श्रोतव्यं कतिकालञ्च तूरीवाद्यं भविष्यति ॥
२२ मत्प्रजा नूनमज्ञाना नाभिजानन्ति मामपि ।

बालकाः सन्ति मूढास्ते विवेकेन विवर्जिताः।
ज्ञानिनस्ते कदाचार सदाचार त्वकोविदाः॥
निरीक्षिता मया भूमिः शून्या घोरा च दृश्यते। २३
निरीक्षितं मया व्योम तस्याप्यन्तर्हिता प्रभा॥
निरीक्षिता मया शैलाः सकम्पाः प्रतिभान्ति ते। २४
भूधराणाञ्च सर्व्वेषां जायते भूरिवेपथुः॥
सुनिरीक्ष्य मया दृष्टं नरः को ऽपि न वर्त्तते। २५
आकाशस्थविहङ्गाश्च सर्व्वे दूरं पलायिताः॥
सुनिरीक्ष्य मया दृष्टम् उद्यानान्यभवन् मरुः। २६
देशस्थाः सकलाः पुर्य्यो भग्नताञ्च समाप्नुवन्।
समक्षं परमेशस्य तत्कोपस्य प्रतापतः॥
तथापि परमेशेन वाक्यमेतन्निगद्यते। २७
कृत्स्नो ध्वंसिष्यते देशो न त्वन्तं नेष्यते मया॥
शोकिन्यस्ति ततो भूमिरूर्द्धे कृष्णाम्बरं नभः। २८
अहमुक्ता यतः कल्पे न खिद्ये नापयामि वा॥
हयारोहिमनुष्याणां धनुष्मताञ्च शब्दतः। २९
नगरीवासिनः सर्व्वे विधास्यन्ते पलायनं॥
विपिनं ते प्रवेक्ष्यन्त्याश्रयिष्यन्ति च भूधरान्।
त्यक्ष्यते नगरी कृत्स्ना को ऽपि तत्र न शेक्ष्यते॥
भविष्यसि त्वमुच्छिन्ना किं करिष्यसि हे पुरि। ३०
शोणवासोभिराच्छन्ना भूषिता स्वर्णभूषणैः।
अञ्जनेन विदीर्णाक्षी हया कान्त्यै यतिष्यसे।
कामुकैस्त्वां निराकृत्य वधस्ते चिन्तयिष्यते॥
संशृणोम्यहमुत्क्रोशं प्रसविन्याः स्त्रिया इव। ३१
याहगादिप्रसूताया रावस्तादृक् स मन्यते॥
युवती या सियोनाख्या सार्त्तनादं करोति तं।
त्यजन्ती दीर्घनिश्वासं स्वकरौ विस्तृणोति सा।
हा हतास्मि मम प्राणा अवसीदन्ति घातिभिः॥

५ पञ्चमोऽध्यायः।

१ पापकारणात् शास्ते र्भविष्यद्वाक्यं १० तस्याः शास्ते र्विशेषवर्णनं २० लोकानां पापस्य विशेषवर्णनं ३० मिथ्याभविष्यद्वादिनां कथनञ्च।

१ यूयं पर्य्यटनं कृत्वा मार्गेषु यिरूशालमः।
वीक्ष्य तत्सन्निवेशेषु जिज्ञासध्वं सुयत्नतः।
युष्माभिः शक्यते तत्र प्राप्तुं न वेति सज्जनः॥
धर्म्मकृत् सत्यसन्धश्च तत्र चेद् वर्त्तते नरः।
अहं तर्हि करिष्यामि क्षमां तां नगरीं प्रति॥
२ परमेशो ऽमरो ऽस्तीति वाक्यमुक्तापि तै र्जनैः।
केवलं वितथोक्त्यर्थं शपथः स विधीयते॥
३ हे परेश्वर दृष्टिस्ते किं सत्यं नानुवर्त्तते।
ते मनुष्यास्त्वया तुन्ना व्यथितास्त्वभवन्नहि।
ते त्वया नाशमानीता निराकार्षुस्तु शासनं॥
स्वाननानि कठोराणि कृत्वा शिलोच्चयादपि।
ते प्रत्यावर्त्तितुं तुभ्यं प्राकाशयन्ननिच्छुतां॥
४ मया चोक्तम् इमे नूनं दरिद्रा मन्दबुद्धयः।
न जानन्ति प्रभो र्मार्गं धर्म्मं स्वीयेश्वरस्य वा॥
५ महतामन्तिकं गच्छन्नालपिष्यामि तानहं।
ते जानन्ति प्रभो र्मार्गं धर्म्मं स्वीयेश्वरस्य च।
नूनं तै र्युगपद् भग्नं युगं छिन्नञ्च बन्धनं॥
६ अतो हेतो र्वनादेत्य केशरी तान् हनिष्यति।
वृकः सायन्तनस्तेषां विनाशञ्च करिष्यति॥
रक्षी तन्नगराणाञ्च चित्रव्याघ्रो भविष्यति।
यः कश्चिद्बहिरायाति स विदीर्णो भविष्यति॥
अपराधा यतस्तेषां सञ्जाता बहुसङ्ख्यकाः।
तेषाञ्चोन्मार्गगामित्वम् अवाप्नोत् प्रभविष्णुतां॥
७ इत्थं सति क्षमां कर्त्तुं त्वय्यहं शक्नुयां कथं।
पश्य त्वदीयसन्तानाः सर्व्वे मां परितत्यजुः।
शपथो ऽनीश्वराणाञ्च नाम्ना तैः संविधीयते॥
मया सन्तोषिताः सम्यक् ते भूत्वा व्यभिचारिणः।

गत्वा कुर्व्वन्ति वेश्याया जनाकीर्णं निवेशनं॥
तुरङ्गा इव पुष्टाङ्गास्ते प्रत्यूषे महोद्यमाः। ८
उच्चैर्ह्रेषन्त एकैकः स्वमित्रस्य स्त्रियं प्रति॥
परेशो ब्रूत एतेषां किं न दास्याम्यहं फलं। ९
दण्डेनैतादृशो जातेः किं न तर्प्स्यति मे मनः॥
तस्याः प्राकारमारुह्य युष्माभिः क्रियतां क्षयः। १०
न तु युष्माभिरुद्यानं तस्या अन्तमवाप्यतां॥
युष्माभिरपसार्य्यन्तां लतास्तस्याः सुविस्तृताः।
यतो हेतोः परेशस्य सन्ति ते तन्तवो नहि॥
इस्रायेलीयवंशेन यिहूदीयान्वयेन च। ११
मयि सम्यक् कृतो ऽकारीति ब्रूते परमेश्वरः॥
परमेशमपह्नाय ते सञ्जल्पन्ति नास्ति सः। १२
नास्माभिः प्राप्स्यते ऽनिष्टं न द्रक्ष्येते असिक्षुधे॥
वाता इव भविष्यन्ति भविष्यद्वादिनो नराः। १३
तेषु दैववचो नास्ति तेष्वेवैतत् फलिष्यति॥
तस्मादित्थं ब्रवीतीशः सेनाध्यक्षः परेश्वरः। १४
एतै र्वाक्यमवादीदं ततो हेतो र्विलोक्यतां॥
त्वद्वक्त्रे मम वाक्यानि विधास्यामि हुताशनं।
जनानेतांश्च काष्ठानि स वह्निस्तान् समत्स्यति॥
इस्रायेल्वंश पश्य त्वं वक्त्येतत् परमेश्वरः। १५
जातिं युष्मद्विपक्षैका दूरादानेष्यते मया॥
सा हि जाति र्बलिष्ठास्ति सा जातिश्च पुरातना।
तद्भाषां त्वं न जानासि तद्वाक्यं त्वं न बुध्यसे॥
तुल्यास्तस्याः शराधाराः शवाधारै रनावृतैः। १६
यावन्तश्च जनास्तस्याः सर्व्वे वीरा हि सन्ति ते॥
सा जातिस्तव शस्यञ्च त्वत्पूपांश्च ग्रसिष्यते। १७
सा जातिस्तव पुत्रांश्च त्वत्पुत्रीश्च ग्रसिष्यते॥
व्रजान् सा तव मेषाणां गवांश्चापि ग्रसिष्यते।
द्राक्षोडुम्बरवृक्षांस्ते सा च जाति र्ग्रसिष्यते॥
प्राचीरवेष्टितत्वाच यास्त्वद्विश्वासभूमयः।
तव ता नगरीश्चापि सासिना नाशयिष्यति॥

१८ युष्मांस्त्वन्तं न नेष्यामि नैव तेषु दिनेष्वपि ।
भाषते भारतीमेतां स्वयमेव परेश्वरः ॥
१९ सर्व्वमेतत् कुतो ऽस्मासु प्रभु र्नः परमेश्वरः ।
करोतीति जनैरेतैः पृष्टस्त्वं तान् वदिष्यसि ॥
स्वदेशे मां यथा त्यक्त्वा सेवध्वे परदेवताः ।
तथा यूयं विदेशस्थाः सेविष्यध्वे विदेशजान् ॥
२० युष्माभि र्ज्ञाप्यतामेतद् याकूबीयान्वयं प्रति ।
यिहूदादेशमध्ये ऽपि वाक्यमेतच्च घोष्यतां ॥
२१ शृणुतैतज्जना मूढा विवेकेन विवर्जिताः ।
नेत्रयोस्तिष्ठतोरन्धा वधिराः कर्णयोः सतोः ॥
२२ परमेश्वर आहैतत् किं मत्तो ऽपि न भेष्यथ ।
मत्साक्षादपि युष्माकं त्रासः किं न जनिष्यते ॥
नित्यस्थायिविधानेन सिकताः कृतवानहं ।
महार्णवस्य सीमानम् अशक्यां तेन लङ्घितुं ॥
चेष्टा दोधूयमानानाम् ऊर्म्मीणामत्र निष्फला ।
तरङ्गास्तस्य गर्ज्जन्तु सा तै र्नातिक्रमिष्यते ॥
२३ धर्म्मत्यागि प्रतीपञ्च वंशस्यैतस्य मानसं ।
धर्म्ममार्गं परित्यज्य ते हि मत्तः प्रतस्थिरे ॥
२४ स्वचित्ते तैश्च नावादि भेष्यामः परमेश्वरात् ।
स एवास्तीश्वरो ऽस्माकम् अस्मभ्यं वृष्टिदायकः ॥
स्वीयकाले ऽग्रिमां वृष्टिम् उत्तराञ्च स यच्छति ।
शस्यकालिकसप्ताहान् प्रतिज्ञावच्च रक्षति ॥
२५ युष्माकमपराधैस्त्वभवत् तत् सर्व्वमन्यथा ।
युष्मत्पापक्रियाभिश्च युष्मत्तो मङ्गलं हृतं ॥
२६ विद्यन्ते मत्प्रजानां हि मध्ये दुर्वृत्तमानवाः ।
निरीक्षन्ते नताङ्गास्ते धूर्त्ताः शाकुनिका इव ।
कूटयन्त्रञ्च संस्थाप्य तत्र बध्नन्ति मानवान् ॥
२७ गेहास्तेषां छलैः पूर्णा वीतंसः पक्षिभि र्यथा ।
ततो हेतो र्महाभागा धनिनश्च भवन्ति ते ॥
२८ पीनाङ्गास्ते विराजन्ते कुवचः स्रावयन्ति च ।
न निर्णयन्ति ते न्यायं नानाथस्य शिशोरपि ।

श्रीयुक्तैस्तै र्दरिद्राणां विचारो न विधीयते॥
परेशो ब्रूत एतेषां किं न दास्याम्यहं फलं। २९
दण्डेनैतादृशो जातेः किं न तप्स्यति मे मनः॥
आचारो दृश्यते देशे नाशी रोमाञ्चकारकः॥ ३०
प्रवदन्त्यनृतं वाक्यं भविष्यद्वादिनो नराः। ३१
याजकाश्च नयात् तेषां कुर्व्वन्ते देशशासनं॥
एतादृश्याम् अवस्थायां सन्तुष्यन्ति च मत्प्रजाः।
तस्यास्तु परिणामे किं युष्माभिः प्रकरिष्यते॥

---

६ षष्ठोऽध्यायः।

१ लोकानां नानापापप्रकाशनं १६ पापात् प्रत्यावर्त्तनाय विनयः, अप्रत्यावर्त्तनाद् दुःखस्य भविष्यद्वाक्यं २७ यिरिमियं प्रतीश्वरस्य कथनञ्च।

हे बिन्यामीनवंशीया मध्यतो यिरूशालमः। १
पलायध्वं तिकोये च तूर्य्याः श्रावयत ध्वनिं॥
वैथक्केरम ऊर्द्धे च प्रत्यक्षीकुरुत ध्वजं।
दुरवस्था महापच्च समुदेत्युत्तराद् यतः॥
इयं कन्या सियोनाख्या सुन्दरी सुखभोगिनी। २
अवसन्नां तु तामेव कर्त्तुमस्म्यहमुद्यतः॥
सव्रजा व्रजपाला हि समायास्यन्ति तां प्रति। ३
दूष्याणि स्थापयिष्यन्ति समन्ताच्च तदन्तिकं।
एकैकश्च निजस्थानं चारयन् नाशयिष्यति॥
यूयं तस्या विरोधेन युद्धमेवानुतिष्ठत। ४
समुत्तिष्ठत मध्याह्ने युद्धयात्रा विधीयतां॥
अशुभं न्विदमस्माकं यद् दिनान्तमुपस्थितं।
यच्च प्रादोषिकं दैर्घ्यं छायया समवाप्यते॥
समुत्तिष्ठत यामिन्यां युद्धयात्रा विधीयतां। ५
तस्या अट्टालिकानाञ्चास्माभिः संसाध्यतां क्षयः॥
यतो हेतो र्जगादैतत् सेनाध्यक्षः परेश्वरः। ६
युष्माभिः शाखिनश्छित्वा विरुद्धं यिरूशालमः।
मृत्तिकायाश्चयः प्राच्यः सयत्नं सम्प्रयुज्यतां॥

यतो निरूपितो यस्या दण्डः सैवास्ति सा पुरी ।
यस्मादभ्यन्तरं तस्याः कृत्स्नं निष्ठुरतामयं ॥
७ यथा स्वकीयतोयानि प्रह्निः स्रावयति स्वयं ।
तथा स्वकीयपापानि सापि स्रावयति स्वयं ॥
श्रूयते मध्यतस्तस्या दौरात्म्यद्रोहयो रवः ।
कष्टं क्षतञ्च जायेते मत्समक्षं निरन्तरं ॥
८ श्रूयतां हे यिरूशालम् सुशिक्षा गृह्यतां त्वया ।
न चेन्मन्मनसस्त्वत्तो विभेदः सम्भविष्यति ।
त्वाञ्चोत्सन्नां करिष्यामि भूमिं निवासिवर्ज्जितां ॥
९ भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः ।
शेषं द्राक्षालताया हि फलं सञ्चीयते यथा ।
इस्रायेलीयवंशस्य शेषः सञ्चेष्यते तथा ॥
हे शत्रो निजहस्तं त्वं भूयो भूयः प्रसारय ।
यथा द्राक्षाफलच्छेत्ता तद्ग्राहिभाजनं प्रति ॥
१० कमालप्य मयादेशे कृते श्रोष्यन्ति मानवाः ।
अच्छिन्नचर्म्मकर्णास्ते श्रोतुं तैः शक्यते नहि ॥
पश्याभूत् परमेशस्य वाक्यं तेषां त्रपास्पदं ।
तत्र तेषाञ्च सन्तोषो न कथञ्चन जायते ॥
११ परमेशस्य कोपेन परिपूर्णो ऽभवन्त्वहं ।
नैव शक्नोम्यहं स्वान्ते तं सन्धारयितुं पुनः ॥
मार्गे क्रीडत्सु बालेषु कुमाराणां सभासु च ।
एकस्मिन्नेव काले तं पातयिष्याम्यहं ततः ॥
भार्य्यया सहितो भर्त्ता तदानीञ्च धरिष्यते ।
जीर्णावस्थामवाप्तेन सार्द्धं वृद्धो धरिष्यते ॥
१२ क्षेत्राणि सभार्य्याणि युगपत् सदनानि च ।
तेषां सङ्क्रामयिष्यन्ते मयान्येष्वधिकारिषु ॥
यतो ऽहं प्रातिकूल्येन ह्येतद्देशनिवासिनां ।
हस्तं प्रसारयिष्यामीति ब्रूते परमेश्वरः ॥
१३ यस्मात् क्षुद्रा महान्तश्च सर्व्वे लोभात् तृषातुराः ।
आचरन्ति छलं सर्व्वे भविष्यद्वादियाजकाः ॥
१४ मत्प्रजारूपकन्यायाः शमयन्ति क्षतं वहिः ।

तथा शान्त्यामजातायां शान्तिः शान्ति वदन्ति ते॥
ते ऽकार्षु र्घृण्यमाचारं किं लज्जामगमंस्ततः। १५
न कथञ्चिदलज्जन्त ते ब्रीडायामकोविदाः॥
अतो निपतितव्यं ये निपतिष्यन्ति तैः सह।
यस्मिन् काले मया तेभ्यो योग्यं दापयिष्यते फलं।
तदामी ते स्खलिष्यन्तीति ब्रूते परमेश्वरः॥
यूयं वर्त्मसु संस्थाय पश्यन्तः परिपृच्छत। १६
कुत्र ते प्राक्तना मार्गाः कुत्र पन्थाः स उत्तमः॥
ज्ञात्वा गच्छत तत्रैव चित्तशान्तिं तदाप्स्यथ।
परेशेनेत्थमुक्ते तै र्न यास्याम इतीरितं॥
मयाधिकृत्य युष्मासु नियुक्ता उपदर्शकाः। १७
तेषां तूरीध्वनिं यूयं शृणुतेत्युदिते मया।
नैव स श्रोष्यते ऽस्माभिरिति तैः प्रतिभाषितं॥
अतो हे परजातीया यूयं संश्रोतुमर्हथ। १८
हे सभास्थजनास्तेषाम् अवस्थामवगच्छत॥
हे धरे शृणु पश्याहम् एतद्देशीयमानवान्। १९
अनिष्टं प्रापयिष्यामि योग्यं तेषां मतेः फलं॥
यस्मान्मामकवाक्येषु कर्णपातो न तैः कृतः।
मम या च व्यवस्था तै र्यस्मात् सापि निराकृता॥
शिवादेशात् समानीते धूपे किं मे प्रयोजनं। २०
आनीते दूरदेशाद् वा श्रेष्ठे सौगन्धिके नले॥
होमक्रियासु युष्माकं मम प्रीति र्न वर्त्तते।
मह्यं वो बलिदानानि न रोचन्ते कथञ्चन॥
अतो हेतोरिदं वाक्यं भाषते परमेश्वरः। २१
अहं पश्य नियोक्ष्यामि जनेष्वेतेषु बाधकान्॥
युगपच्च स्खलिष्यन्ति तत्र ताताः सनन्दनाः।
एककाले विनंक्ष्यन्ति समित्रा देशवासिनः॥
अधुना भारतीमेतां भाषते परमेश्वरः। २२
निरीक्षध्वं समायान्ति जना उत्तरदेशतः।
धरण्याः प्रान्तभागेभ्यो महाजातिरुदीर्य्यते॥
ते धरन्ति धनुःशल्ये निष्ठुरा निर्द्दयाश्च ते। २३

स्वरेण च गर्ज्जन्ति ते महासागरो यथा॥
वहन्ते च हयारूढाः सङ्ग्रामार्थं त्वया सह।
हे सियोनाख्यकन्ये ते व्यूढास्तिष्ठन्ति वीरवत्॥
२४ वार्त्ता तेषां श्रुतास्माभिरवशा नः करास्ततः।
वयञ्च शङ्कयाक्रान्ता व्यथया सूतिका यथा॥
२५ केदारं को ऽपि मा गच्छेत् को ऽपि मार्गेण मा व्रजेत्।
खड्गपाणि र्यतः शत्रुस्त्रासश्चास्ति समन्ततः॥
२६ हे मज्जातेः कुमारि त्वं कटौ बधान शाणजं।
भस्मे लुठ च शोकार्त्ताऽद्वितीयात्मजशोकवत्॥
स्वनिमित्तं सुतीव्रञ्च विलापं त्वं समाचर।
यतो विनाशकार्य्यस्मान् अकस्मादाक्रमिष्यति॥
२७ त्वं नियुक्तो मया दुर्गे मत्प्रजानां परीक्षकः।
येन ज्ञात्वा परीक्ष्येत तासामाचरणं त्वया॥
२८ उन्मार्गगामिनां मध्ये ऽधमा उन्मार्गगामिनः।
सन्ति ते मानवाः सर्व्वे परीवादे च तत्पराः।
आरकूटश्च लोहश्च ते सर्व्वे सन्ति दूषिताः॥
२९ भस्त्रायां दह्यमानायां सीसे नष्टे च वह्निना।
शिल्पिनो गालनं व्यर्थं कलङ्का निःसृता नहि॥
३० तेषां निराकृतं रूप्यमिति नाम भविष्यति।
परेशेन यतो हेतोरभवंस्ते निराकृताः॥

---

७ सप्तमोऽध्यायः।

१ नानापापानां कारणाद् अनुतापाय लोकानाम् ईश्वरेणाज्ञानं १६ अनुतापे न कृते तेषां दुःखघटननिर्णयः २१ तेषां बलिदानादीनामीश्वरस्याग्राह्यता ३० तोफते तेषां पापस्य शास्तेश्च कथनञ्च।

१ परमेश्वराद् यिरिमियं प्रति यद् वाक्यं प्रादुरभूत् तदिदं। त्वं पर-
२ मेश्वरीयमन्दिरस्य द्वारे तिष्ठंस्तत्र वाणीमिमां घोषय, यथा, हे परमेश्वराराधनाय द्वारैरेतैः प्रवेशकारिणः सर्व्वे यिहूदीयजनाः, यूयं
३ परमेश्वरस्य वाक्यं शृणुत। इस्रायेल ईश्वरः सेनाध्यक्षः परमेश्वर

इत्थं ब्रूते, यूयं प्रत्येकं निजाचारं निजक्रियाश्च भद्रीकुरुध्वं तेनाहं
युष्मान् स्थाने ऽस्मिन् वासयिष्यामि। परमेश्वरस्य मन्दिरं परमेश्वरस्य ४
मन्दिरं परमेश्वरस्य मन्दिरमिमानीति मृषावाक्येषु मा विश्वसित।
परन्तु यदि यूयं निजाचारं निजक्रियाश्च भद्रीकुरुथ यदि मिथो न्याय- ५
माचरथ प्रवासिनमनाथं विधवाञ्च न पीडयथ यद्यत्र स्थाने निर्द्दोषस्य ६
शोणितपातं न कुरुथ निजानिष्टायेतरदेवांश्च नानुचरथ तर्ह्यहम् अत्र ७
स्थाने युष्मत्पूर्व्वपुरुषेभ्यो मया दत्ते देशे युष्मान् अनन्तकालार्थं वासयि-
ष्यामि। पश्यत यूयमनुपकारिषु मृषावाक्येषु विश्वसिथ। चौर्य्यं नर- ८
हत्यां परदारगमनम् अनृतशपनं बालाख्यदेवाय धूपदाहम् अपरिचि- ९
तानामितरदेवानामनुचरणञ्चैतानि समाचरन्तो यूममागत्य मम नाम्ना १०
विख्याते मन्दिरे ऽस्मिन् मम साक्षात् तिष्ठन्तः किं वदिष्यथ निस्तीर्णा
वयम् अतस्तानि सर्व्वाणि गर्हणीयकार्य्याण्यस्माभिः क्रियन्तामिति? मम ११
नाम्ना विख्यात एष प्रासादो युष्माकं दृष्ट्या किं दस्यूनां गह्वरो ऽभूत्?
पश्यताहमपि विलोकयामीति परमेश्वरो भाषते। आः प्राग् यत्राहं १२
निजनामधेयमवासयं शिलौ स्थितं मम तत् स्थानं गच्छत ममेस्रायेलीय-
प्रजानां दुष्टत्वहेतुना तत् प्रति मया यदकारि तन्निरीक्षध्वञ्च। अतो १३
ऽधुना परमेश्वरो ब्रवीति यूयमेताः क्रिया अकार्ष्ट मयि सयत्नं भाषमाणे
नाश्रौष्ट मयि युष्मानाह्वयति यूयमुत्तरं नादत्त। अतः शिलुं प्रति १४
यादृशमाचारं कृतवानहं तादृशमेवाचारं युष्माकं विश्वासस्थलं मम नाम्ना
विख्यातम् एतन्मन्दिरं प्रति युष्मभ्यं युष्मत्पूर्व्वपुरुषेभ्यश्च मया दत्तम्
एतत् स्थानञ्च प्रति करिष्यामि। यथा चाहं युष्माकं भ्रातॄन् अर्थतः १५
कृत्स्नम् इफ्रयिमीयवंशं निराकृतवान् तथा युष्मान् मम दृष्टितो निरा-
करिष्यामि।

त्वञ्चैतेषां जनानां कृते प्रार्थनां मा कुरु तेषां कृते निवेदनं याञ्चाञ्च १६
मा प्रयुंक्ष्व माञ्च प्रसादयितुं मा प्रवर्त्तस्व यतो ऽहं तव वाक्यं न
ग्रहीष्यामि। यिहूदाया नगरेषु यिरूशालमो मार्गेषु च ते यद् १७
आचरन्ति तत् किं त्वं न पश्यसि? बालका इन्धनानि सञ्चिन्वन्तस्ताता १८
वह्निं ज्वालयन्तो योषितः शक्तुं मृद्नत्यो नभसो मह्यिष्यै पिष्टकान् संस्क-
र्त्तुम् इतरदेवेभ्यः पानीयनैवेद्यान्युत्स्रष्टुम् इत्थं मां बाधितुञ्च यतन्ते।
परमेश्वरो ब्रूते ते किं मां बाधन्ते? किं वा विवर्णमुखा भवितुम् आत्म- १९
बाधनं कुर्व्वते? अतः प्रभुः परमेश्वरो ब्रवीति पश्यत मम क्रोधो मम २०

रोषश्चैतत्स्थानस्योपरि मनुष्यपशूनामुपरि क्षेत्रस्थतरूणां भूम्युत्पन्न-
फलानाञ्चोपरि वर्षिष्यति स क्रोधानलो ज्वलिष्यत्यनिर्व्वाणश्च भविष्यति।
२१ इस्रायेल ईश्वरो यः सेनाध्यक्षः परमेश्वरः स इदं ब्रूते, यूयं स्वीय-
२२ बलिभिः सह होमीयबलीनपि संयुज्य मांसादनं कुरुत। यतो ऽहं
यदा युष्माकं पूर्व्वपुरुषान् मिसरदेशाद् वहिष्कृत्यानयं तदा न होमी-
२३ यबलीनधि न वान्यबलीनधि तान् आदिशं। परन्त्विदमेव वाक्यं तान्
आज्ञापयं यूयं मम रवे मनो निधद्ध्वं तेनाहं युष्माकम् ईश्वरो भवि-
ष्यामि यूयञ्च मम प्रजा भविष्यथ, यूयं मदाज्ञापितेन कृत्स्नमार्गेण च
२४ व्रजत तेन मङ्गलमवाप्स्यथ। ते तु न श्रुत्वा कर्णपातञ्च न कृत्वा स्वीय-
दुष्टचित्तजाड्यजां मन्त्रणाम् आचरन् अभिमुखाश्च न भूत्वा पराङ्मुखा
२५ अभवन्। मिसरदेशतो युष्मत्पूर्व्वपुरुषाणां निर्गमनदिनमारभ्याद्य याव-
दहं प्रत्यहं सयत्नं मम सकलदासान् भविष्यद्वादिनो युष्मान् प्रति
२६ प्रेषयामि। जनास्तु न श्रुत्वा कर्णपातञ्च न कृत्वा स्वग्रीवां कठोरीकृत्य
२७ स्वीयपूर्व्वपुरुषेभ्यो ऽपि दुष्टतरा अभवन्। त्वं चेत् तेभ्यः सर्व्वाणीमानि
वचांसि वदेस्तर्हि ते न श्रोष्यन्ति, यदि च तान् आह्वयेस्तर्हि ते तुभ्यम्
२८ उत्तरं न दास्यन्ति। अतस्त्वं तान् ब्रूहि,

स्वप्रभोः परमेशस्य यया न श्रूयते रवः।
न च गृह्यत आदेश इयं सा जातिरस्ति हि।
सत्यतापि विनष्टाभूत् तेषां वक्त्राच्च संहृता॥
२९ कर्त्तित्वा स्वीयकेशं त्वं स्वतो भूमौ निपात्य च।
विलापं कुरु शैलेषु यस्मात् स्वकोपभाजनं।
इमं वंशं निराकृत्य त्यक्तवान् परमेश्वरः॥

३० परमेश्वरो ब्रूते यिहूदावंशीयजनै र्मम साक्षात् कुत्सिताचारो ऽकारि
मम नाम्ना विख्यातं मन्दिरम् अमेध्यीकर्त्तुं यतित्वा तैस्तन्मध्ये स्वीयगर्ह-
३१ णीयप्रतिमाः स्थापिताः, हिन्नोमसुतस्योपत्यकायाञ्च तोफताख्यं भृगुस्थानं
निर्म्मितं मया यच्च नाज्ञापितं मनसापि नोपलब्धं तत् कार्य्यम् अर्थतो
३२ ऽग्निना स्वपुत्त्रपुत्त्रीणां दाहं कर्त्तुं प्रवृत्तिस्तैः कृता। अतः परमेश्वरो ब्रूते
पश्यतायान्ति दिनानि येषु तोफतं हिन्नोमसुतस्योपत्यका वा नाम न
पुनः प्रयोक्ष्यते परन्तु हत्योपत्यकेति तस्य स्थानस्य नाम भविष्यति
३३ स्थानाभावाच्च जनास्तोफते मृतदेहान् निखनिष्यन्ति। एतेषां जनानां
कुणपानि च खेचरपक्षिणां भूचरपशूनाञ्च भक्ष्याणि भविष्यन्ति कोऽपि

तान् न त्रासयिष्यति। अहञ्च यिहूदाया नगरेभ्यो यिरूशालमश्च ३४
मार्गेभ्य आमोदहर्षयो र्ध्वनिं वरकन्ययो र्ध्वनिञ्च विरतं करिष्यामि
यतः कृत्स्नो देशो नरशून्यो भविष्यति।

---

८ अष्टमोऽध्यायः।

१ मृतानां जीवताञ्च दुर्दशा ४ काठिन्यहेतो र्लोकान् प्रति भर्त्सनं १४ तेषां दुःखविषयकं कथनं १८ तेषां दुःखहेतो र्यिरिमियस्य विलपनञ्च।

परमेश्वरो ब्रूते तस्मिन् काले यिहूदादेशीयराजानामस्थीनि तत्रत्या- १
धिपतीनाम् अस्थीनि याजकानामस्थीनि भाविवादिनामस्थीनि यिरू-
शालम्निवासिनामस्थीनि च जनैः शवाधारेभ्यो वहिष्कृत्य सूर्य्यस्य २
चन्द्रस्य कृत्स्नगगनस्थसेनायाश्च समक्षम् अर्थतस्ते येऽप्रीयन्त यांश्चा-
सेवन्त यांश्चान्वचरन्नन्वैच्छन् प्राणमंश्च तेषां समक्षं विस्तारयिष्यन्ते।
तानि पुन र्न सङ्ग्रहीष्यन्ते न वा निखनिष्यन्ते किन्तु भूपृष्ठस्थसार-
स्वरूपाणि स्थास्यन्ति। सेनाध्यक्षः परमेश्वरो ब्रूत एतस्या दुर्वृत्ताया ३
गोष्ठ्या अवशिष्टा जना यत्र यत्र मया निराकृतास्तत्र सर्व्वस्थाने ये
अवशेक्ष्यन्ते ते शेषजनाः सर्व्वे मृत्युं जीवनाद् वाञ्छनीयं मंस्यन्ते।

त्वन्तु तान् वद, परमेश्वर इत्थमुवाच, ४

पतितानां पुनर्व्वारम् उत्थानं किमसम्भवं।
अपक्रान्तैरशक्यं वा किं प्रत्यागमनं भवेत्॥
यिरूशालमीयलोकानां य एतेषामपक्रमः। ५
नित्यस्थायी कुतो हेतोः स्यात् स तेषामपक्रमः।
ते छले दृढमासक्ताः प्रत्यागन्तुमनिच्छवः॥
सावहितो ऽहमश्रौषं न यथार्थं वदन्ति ते। ६
हा मया किमकारीति यो वदेत् तादृशो जनः।
पश्चात्तापी स्वदौर्जन्याद् एक एव न विद्यते॥
स्वीयधावनमार्गेषु सर्व्वेषां निहितं मनः।
युद्धाकाङ्क्षी रणक्षेत्रे प्रधावंस्तुरगो यथा॥
खेचरो यो वकः सो ऽपि कालान् वेत्ति निरूपितान्। ७
कलध्वनि र्वलाका च भरद्वाजश्च पक्षिणः।
समयं परिरक्षन्ति स्वप्रत्यागमनोचितं।

राजनीतिं परेशस्य न तु जानन्ति मन्त्रजाः॥
८ कथं शक्येत युष्माभि र्गदितुं ज्ञानिनो वयं।
अस्मास्वेव परेशस्य शास्त्रञ्चास्ति समर्पितं॥
नूनं पश्यत शास्त्रिणां या लेखन्यनृतप्रिया।
तया विकृत्य तच्छास्त्रम् अनृतोक्तिमयीकृतं॥
९ ज्ञानिनः प्राप्नुवन् लज्जां ते सन्त्रस्ताभवन् धृताः।
परमेशस्य यद् वाक्यं पश्य तत् तै र्निराकृतं।
अतस्तेषां न्टणां ज्ञानं किम्भूतं विद्यते पुनः॥
१० ततो हेतोः परेभ्यो ऽहं तेषां दास्यामि योषितः।
अर्पयिष्यामि तेषाञ्च क्षेत्राण्यन्याधिकारिषु॥
यस्मात् क्षुद्रा महान्तश्च सर्व्वे लोभात् तृषातुराः।
अनृताचारिणः सर्व्वे भविष्यद्वादियाजकाः॥
११ मन्त्रजारूपकन्यायाः शमयन्ति क्षतं बहिः।
तथा शान्त्यामजातायां शान्तिः शान्ति र्वदन्ति ते॥
१२ ते ऽकार्षु र्घृण्यमाचारं किं लज्जामगमंस्ततः।
न कथञ्चिदलज्जन्त ते व्रीडायामकोविदाः॥
अतो निपतितव्यं यै र्निपतिष्यन्ति तैः सह।
यस्मिन् काले मया तेभ्यो योग्यं दायिष्यते फलं।
तदानीं ते स्खलिष्यन्तीति ब्रूते परमेश्वरः॥
१३ अहं तान् संहरिष्यामीति ब्रवीति परेश्वरः।
द्राक्षावल्ल्यां नहि द्राक्षा नोडुम्बराण्युडुम्बरे।
अवस्थास्यन्ति पत्रैश्च जीर्णता प्रगमिष्यते।
अहञ्चाधिकरिष्यामि तेष्वाक्रमणकारिणः॥
१४ कुतो हेतोः समासीना अवतिष्ठामहे वयं।
समागच्छत दुर्गाणि प्रविश्य स्याम नीरवाः॥
अस्मत्प्रभुः परेशो ऽस्मान् नीरवीकृतवान् यतः।
विषयुक्तञ्च पानीयम् अस्मभ्यं स प्रदत्तवान्।
अभवाम वयं यस्मात् परेशस्यापराधिनः॥
१५ सम्प्रतीक्षामहे शान्तिं न त्वागच्छति मङ्गलं।
प्रतीक्षामह आरोग्यं त्रासः पश्योपतिष्ठति॥
१६ दानो वैरितुरङ्गाणां श्रूयते नासिकारवः।

क्रोधातो हयसिंहानां कृत्स्ना भूमि विंकम्पते ॥
तैरुपस्थाय देशस्य सर्वैस्तत्पूरकैः सह ।
नगरी च ग्रसिष्यन्ते तन्निवासिजनैः सह ॥
परमेश इदं ब्रूते पश्यताहीन् फणाधरान्। १७
समर्था यान् वशीकर्त्तुं मन्त्रः कोऽपि न विद्यते।
युष्मन्मध्ये प्रहेष्यामि ते वो दंक्ष्यन्ति निर्द्दयं॥
मनस्तापप्रतीकारी विनोदः को भवेन्मम । १८
मम स्वान्तमसुस्थत्वाद् धुरावद् गुरु मन्यते ॥
दूरवर्त्तिमनुष्याणां देशतो विनिशम्यते । १९
मज्जातिरूपकन्याया रुदत्याः परिदेवनं ॥
किं सियोननगर्य्यां न वर्त्तते परमेश्वरः ।
किं तस्याः स महाराजस्तस्या मध्ये न विद्यते ॥
ते मां विरञ्जयामासुः स्वीयतक्षितविग्रहैः ।
असारैश्चेतरैर्देवैः किमर्थं तैरिदं कृतं ॥
शस्यकालो व्यतिक्रान्तो व्यतीतः फलसंग्रहः । २०
अस्माकन्तु परित्राणम् अधुनापि न साधितं ॥
मज्जातिरूपकन्याया भङ्गाद् भङ्गो ऽभवन्मम । २१
अस्म्यहं मलिनः शोकाद् आक्रान्तः साध्वसेन च ॥
गिलियादि किमप्राप्यः स रोगघ्नतरो रसः । २२
किं वा चिकित्सकः कोऽपि तत्र स्थाने न विद्यते ॥
मज्जातिरूपकन्याया आघातानां प्रतिक्रिया ।
यन्न प्रवर्त्तते तस्य किं भवेत् तर्हि कारणं॥

---

९ नवमोऽध्यायः।

१ यिहूदीयानां दोषप्रकाशनं १० दोषस्य भाविनो शास्तिः १२ शास्तेः कारणम् अनाज्ञाग्राहित्वं १७ विनाशतः खेदस्यावश्यकत्वं २३ परमेश्वरस्य श्लाघा २५ अन्यदेशीयानां शास्तिकथनञ्च।

हा शिरो मम चेदब्धि र्लोचने चेज्जलाकरौ। १
मज्जातिरूपकन्याया आहतानां नृणां कृते।
अश्रुपातमहं तर्हि करिष्यामि दिवानिशं॥

१ हा मरौ चेत् कुटीरो मे स्यात् पान्थानां कुटीरवत्।
विहाय स्वजनांस्तर्हि तेषां त्यक्ष्यामि सङ्गमं।
ते पारदारिकाः सर्व्वे खलानाञ्च सभा यतः॥
२ जिह्वाधनुषि वाणं ते योजयन्त्यनृतं वचः।
देशे सत्यस्य पक्षे तु पुरुषत्वं न कुर्व्वते॥
पापात् परं पुनः पापम् अनुष्ठातुं प्रयान्ति च।
मां तु ते नाभिजानन्तीति ब्रूते परमेश्वरः॥
४ भवेद् युष्माकमेकैकः सावधानः स्वमित्रतः।
भ्रातॄणामपि कस्मिंश्चिद् विश्वासं मा समाचरेत्॥
भ्रातॄणां यत एकैको विप्रलम्भपरायणः।
मित्राणां तद्वदेकैकं परीवादे ऽनुरज्यते॥
५ छलयन्ति मिथः सर्व्वे सत्यं तैरुच्यते नहि।
कृताभ्यासा मृषोक्तौ तैर्जिह्वा पक्वाश्च ते छले॥
६ त्वद्वासः शठतामध्ये ते जनाः शाठ्यहेतुतः।
नेच्छन्ति मामभिज्ञातुम् इति ब्रूते परेश्वरः॥
७ अत एतद्वचो वक्ति सेनाध्यक्षः परेश्वरः।
अहं विलाययिष्यामि परीक्षिष्ये च तान् जनान्।
मत्प्रजारूपकन्यायाः साक्षादन्यत् करोमि किं॥
८ मारकवाणवत् तेषां जिह्वा शाठ्यं प्रभाषते।
यो मित्रं प्रति वक्त्रेण व्याहरत्यनुकूलतां।
स तस्याक्रमणायैव स्वान्ते चिन्तयति छलं॥
९ परेशो वक्त्यहं तेभ्यः किं न दास्यामि तत्फलं।
दण्डेनैतादृशो जातेः किं न तर्प्स्यति मे मनः॥
१० क्रन्दनं प्रकरिष्यामि रोदनञ्च गिरीनधि।
गोचारणभुवञ्चाधि लपिष्यामि स्थितां वने॥
तद्दाहो भविता यस्मात् तत्र न द्रक्ष्यते ऽध्वगः।
गोमेषादिव्रजानाञ्च रवो न श्रोष्यते पुनः॥
आकाशस्था गरुत्मन्तः पशवश्च वनेचराः।
सर्व्वे स्थानान्तरं गत्वा भविष्यन्त्यनुपस्थिताः॥
११ शिलाराशिमयीञ्चाहं करिष्ये यिरुशालमं।
जन्तूनां दीर्घरावाणां वसतिः सा भविष्यति॥

उत्सन्नानि करिष्यामि यिहूदायाः पुराणि च।
नरस्तत्र निवासी च कोऽपि नैवावशेक्ष्यते॥
को नरस्तादृशं ज्ञानी येन बुध्येत वागियं। ११
येन वा सा निवेद्येत परेशस्य मुखाच्छ्रुता॥
कुतो हेतोरयं देशो नष्टो दग्धश्च वह्निना।
भविता मरुसङ्काशः पथिकैः परिवर्ज्जितः॥
अत्र परेश्वरो ब्रूते तस्यैतदेव कारणं। १२
साक्षात् तेषां मया दत्ता व्यवस्था तै र्यदुज्झिता।
अश्रुत्वा मम वाक्यं तैः सा समाचरिता नहि॥
स्वकीयचित्तजाड्यस्य निर्द्दिष्टानाञ्च जन्मदैः। १४
वालाख्येतरदेवानां कृतं तैरनुवर्त्तनं॥
अतो हेतोरिदं ब्रूते सेनाध्यक्षः परेश्वरः। १५
इस्रायेलः प्रभु र्यो ऽस्ति पश्यैतद्देशवासिनां।
किरातितिक्तमन्नार्थम् अहं प्रदातुमुद्यतः।
विषयुक्तञ्च पानीयं पाययिष्यामि तानहं॥
ते च तेषाञ्च ताता यान् न विदुः परदेशिनः। १६
तेषां विदेशिनां मध्ये विकरिष्यामि तानहं॥
मया तेषां विनाशस्य यावन्न साधयिष्यते।
अनुधावकवत् तेषाम् असिस्तावत् प्रहेष्यते॥
भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः। १७
यूयमालोचनां कृत्वा नारी र्विलापजीविनीः।
समाह्वयत ताभिश्च स्थानमेतत् प्रविश्यतां॥
तस्मिन् कर्म्मणि या विज्ञा दूतान् सम्प्रेष्य ताः प्रति।
ता आनयत ताभिश्च स्थानमेतत् प्रविश्यतां॥
सत्वरञ्च कृते ऽस्माकं विलापः क्रियतां तथा। १८
यथा तेन भवेद्दृष्टिरस्माकं वारिवाहिनी।
अस्मन्नेत्रच्छदेभ्यश्च कीलालस्य सरित् स्रवेत्॥
नूनं रावो विलापस्य सियोनो विनिशम्यते। १९
कथं नष्टा वयं जाता अतीव व्रीडिता वयं।
देशो ऽस्माभि र्विहातव्यो वासा नो भूमिसात्कृताः॥
हे नार्य्यः परमेशस्य युष्माभिः श्रूयतां वचः। २०

तदास्यान्निर्गता वाणी युष्मत्कर्णैश्च गृह्यतां ॥
अनुशिक्षयितुं कन्या विलापं यूयमर्हथ ।
एकैका स्वसखीं गानं शिक्षयेच्छोकसूचकं ॥
२१ अस्मद्वातायनैः कृत्वा मृत्युणारोहणं यतः ।
अस्माकं राजहर्म्याणां गर्भागारं प्रवेक्ष्यते ।
उच्छेत्स्यन्ते पथो बाला युवानश्च निकर्षणात् ॥
२२ त्वं भाषस्व परेशेन वाक्यमेतदुदीर्य्यते ।
पतिष्यन्ति शवा नृणां क्षेत्रे यद्वदवस्कराः ।
यथैका शस्यमुष्टि र्वा छेत्तुः पश्चादसञ्चिता ॥
२३ पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः ।
मा करोतु स्वविद्यायाः श्लाघां विद्यान्वितो नरः ॥
मा करोतु स्वशौर्य्यस्य श्लाघां शौर्य्यान्वितो नरः ।
मा करोतु स्ववित्तस्य श्लाघां वित्तान्वितो नरः ॥
२४ श्लाघमानस्तु यः कश्चित् श्लाघामस्य करोतु सः ।
यद् विवेचनयुक्तो ऽस्ति यच्च मामेव वेत्ति सः ॥
परेशो ऽहं यतः पृथ्व्यां करुणान्यायधर्म्मकृत् ।
अत्रैवाहं प्रतुष्यामीति ब्रूते परमेश्वरः ॥
२५ परमेशो ब्रवीतीदं पश्यागच्छन्ति वासराः ।
येषु कर्त्तितचर्म्मभ्यः सहाकर्त्तितचर्म्मभिः ।
सकलेभ्यः प्रदास्यामि क्रियाणामुचितं फलं ॥
२६ मिसरे च यिहूदे च इदोमे ऽम्मोनजातये ।
मोयाबे छिन्नगुम्फानां मरुस्थानां व्रजाय च ॥
अच्छिन्नचर्म्मलिङ्गा हि सर्व्वे सन्तीतरान्वयाः ।
अच्छिन्नचर्म्मचित्तास्त्विस्रायेलो ऽखिलवंशजाः ॥

---

१० दशमोऽध्यायः ।

१ परमेश्वरेण सह प्रतिमायास्तुलनाकरणं १७ भाविवादिनो विनयवाक्यं १९ मेषपालकानां शास्तिकथनं २३ यिरिमियस्य प्रार्थना च।

१ इस्रायेल्वंश युष्मभ्यं कथितं परमेशितुः ।
यदेतद् वचनं यूयं तदुपश्रोतुमर्हथ ॥

परमेशो ब्रवीतीदं युष्माभि र्मा कथञ्चन। २
शिक्ष्यतामितरासां हि जातीनामनुगामिता॥
नभसो लक्षणेभ्यश्च यूयं त्रासं न गच्छत।
सन्त्रस्यन्ति यतस्तेभ्य इतरा एव जातयः॥
अलीका विधयः सन्ति परदेशनिवासिनां। ३
काष्ठं छिन्नं वने त्वष्टुः कराभ्यां वासिसंस्कृतं॥
मनुष्यः स्वर्णरूप्याभ्यां विदधाति सुशोभितं। ४
बद्धं मुद्गरकीलैश्च जायते तदजङ्गमं॥
तालवत् स्तम्भरूपैस्तै र्देवै र्नोदीर्य्यते वचः। ५
सर्व्वथा ते च वोढव्याः पदयाते यतो ऽक्षमाः॥
तेभ्यो मा भवत त्रस्ता अहितं नाचरन्ति ते।
हितमाचरितुं वा तै र्न कथञ्चन शक्यते॥
क्वापि त्वदुपमः कश्चिन्नास्ति हे परमेश्वर। ६
महांस्त्वं तव नामापि महदस्ति पराक्रमात्॥
हे सर्व्वदेशिनां राजन् कस्त्वत्तो न प्रभेष्यति। ७
त्वं भयस्योचितं पात्रं यस्मादितरदेशिनां।
ज्ञानिवृन्दे च राज्ये च नास्ति त्वदुपमः क्वचित्॥
पशुतुल्याः प्रमूढाश्च सङ्घशः प्रतिभान्ति ते। ८
अलीकस्यैव सा शिक्षा काष्ठमात्रा च देवता॥
तर्शीशाद् रौप्यपत्राण्यानाय्य काञ्चनमूफसः। ९
निर्म्मिताः स्वर्णकारेण हस्ताभ्यां द्रावकस्य च।
नीलं ते परिधीयन्ते धूमलं वा परिच्छदं।
देवास्ते शिल्पिभि र्दक्षै रचिताः सन्ति सर्व्वशः॥
यिहोवास्त्वीश्वरः सत्यः स्वयञ्जीवित ईश्वरः। १०
राजा चानन्तकालस्य स एवास्ति न चेतरः॥
तत्क्रोधस्य प्रचण्डत्वात् कम्पते विश्वधारिणी।
सोढुं तस्य च कोपाग्निम् अक्षमाः सर्व्वजातयः॥
यूयं तान् ब्रूत ये देवै द्यावाभूमी न निर्म्मिते। ११
भूमावस्या दिवश्चाधो विनंक्ष्यन्ति त ईश्वराः॥
स ससर्ज्ज स्वशक्त्या क्ष्मां स्वधिया विदधे जगत्। १२
स च विस्तारयामास स्वप्रवीणतया दिवं॥

१३ ईरिते स्वरवे तेन व्योम्नि सञ्चीयते जलं।
उत्पाद्यन्ते च मेदिन्याः प्रान्तात् तेनोच्चवारिदाः॥
तेन वृष्टिप्रदानाय मेघवह्नि र्विधीयते।
निःसार्य्य निजकोषेभ्यस्तेन चानीयते मरुत्॥
१४ पशुतुल्या जनाः सर्व्वे ज्ञानहीनाश्च सन्ति ते।
लज्जन्ते विग्रहात् सर्व्वे धातुद्रावकशिल्पिनः॥
व्याजा एव यतः सन्ति विग्रहास्तै र्विनिर्म्मिताः।
श्वासस्याभ्यन्तरे तेषां न कथञ्चन विद्यते॥
१५ अलीका एव ते सन्ति निर्म्मिताश्च प्रमादतः।
यदा दायिष्यते योग्यं फलं नंक्ष्यन्ति ते तदा॥
१६ याकूबस्य तु यो दायः स न तादृश ईश्वरः।
कृत्स्नसृष्टेः स निर्म्मातेस्रायेल् तस्य निजं धनं।
नामधेयञ्च तस्यास्ति सेनाध्यक्षः परेश्वरः।

---

१७ देशतः संगृहाण त्वं स्वभाण्डान् रुद्धवासिनि॥
१८ यतो हेतोरिमां वाचं भाषते परमेश्वरः।
पश्याहमेकहत्वैव यथा गोफणया शिलां।
प्रक्षेप्स्यामि तथा दूरम् एतद्देशनिवासिनः।
ते यथा चावगच्छेयु र्व्यथयिष्यामि तांस्तथा॥
१९ हा हतास्मि प्रभग्नाहम् आघातो मे व्यथाकरः।
मयागादि व्यथैवेयं विषोढव्या मया हि सा॥
२० नष्टं दूष्यं मम छिन्नाः सकलास्तस्य रज्जवः।
आत्मजाः प्रस्थिता मत्तो न विद्यन्ते च कुत्रचित्॥
मम कोऽपि जनो नास्ति यो दूष्यं स्थापयेत् पुनः।
यो वा यवनिकास्तस्य मत्कृते योजयेत् पुनः॥
२१ पालकाः पशुतां प्राप्य नान्विच्छन्ति परेश्वरं।
हीनश्रीणां ततस्तेषां विकीर्णाः सकला व्रजाः॥
२२ वार्त्तायाः श्रूयते शब्दः पश्य सा चोपतिष्ठति।
समायात्युत्तरस्माद्धि देशात् कोलाहलो महान्॥
परिणामश्च तस्यायं यिहूदायाः पुराणि यत्।
भवेयु र्नरशून्यानि हरवैराश्रितानि च॥

हे परेश्वर जाने ऽहं मर्त्यो न स्वगतेः प्रभुः। २३
कर्त्तुं स्वपादविन्यासं स्थिरं गन्ता नरो ऽक्षमः॥
विचारेणैव शास्तिं मे कुरु हे परमेश्वर। २४
मा स्वकोपेन मां शाधि किं जाने मां क्षयिष्यसि॥
ये त्वां नैवाभिजानन्तीतरजातीयमानुषाः। २५
प्रार्थनां तव नाम्ना च ये वंशा नहि कुर्व्वते।
त्वं तेषामेव शीर्षेषु स्वक्रोधमवतारय॥
यतस्तै र्भक्षितो याकूब् अत्त्वा निःशेषितः स तैः।
वासस्थानञ्च यत् तस्य तत् तैरेव विनाशितं॥

---

११ एकादशोऽध्यायः।

१ परमेश्वरस्य नियमकथनं ९ तन्नियमलङ्घनाद् यिहूदायास्तिरस्करणं भाविशास्तिश्च १८ यिरिमियस्य विरुद्धम् अनाथोतीयलोकानां कुमन्त्रणा तन्निमित्तञ्च तेषां भाविशास्तिः।

ततः परं परमेश्वरेणोदिता वागियं यिरिमियं प्रत्युपतस्थौ, यथा, १
यूयमस्य नियमस्य वाक्यानि श्रुत्वा यिहूदादेशस्थजनान् यिरूशालम्- २
निवासिनश्च गदत। त्वं तान् वद, इस्रायेलः प्रभुः परमेश्वर इत्थं ३
ब्रवीति, शप्तो भूयात् स नरो यो नियमस्यैतस्य वाक्यानि न गृह्णाति
यानि लौहचुल्लितो मिसरो मया निर्यापणस्य दिने युष्मत्पूर्व्वपुरुषा ४
आज्ञापिताः, यथा, यूयं मम रवे मनो निधाय यथाहं युष्मान् आ-
दिशामि तथैव मम वचांस्याचरत, तेन यूयं मम प्रजा भविष्यथ,
अहञ्च युष्माकम् ईश्वरो भविष्यामि। इत्थं मया युष्मत्पूर्व्वपुरुषेभ्यो दुग्ध- ५
मधुप्रवाहिण एतस्य देशस्यैव दानं प्रतिश्रुण्वता यः शपथो ऽकारि
स रक्षिष्यते। तदा मयोक्तं हे परमेश्वर तथास्तु।

अनन्तरं परमेश्वरो मामवादीत्, त्वं यिहूदादेशस्य नगरेषु यिरू- ६
शालमो मार्गेषु चैतानि वचांसि घोषय, यथा, यूयमस्य नियमस्य वाक्येषु
मनो निधाय तान्याचरत। यतो मिसर्देशात् युष्मत्पूर्व्वपुरुषाणाम् ७
आनयनदिनमारभ्याद्यपर्य्यन्तमहं युष्मत्पूर्व्वपुरुषान् अतन्द्रितम् उपादिशं
यूयं मम रवे मनांसि निदद्ध्वमिति। तैस्तु न मनो निधाय न कर्णपातं ८
कृत्वा स्वपापिष्ठचित्तानां जाड्यं समाचरितम्, अतस्तेषामाचरणाय

मयाज्ञापितो यो ऽयं नियमस्तै र्न समाचरितस्तत्सम्पर्कीयाणां सर्व्ववाक्यानां फलं ते मया प्रापयितव्याः।
९ अनन्तरं परमेश्वरो मामवादीत्, यिहूदादेशस्थजनानां यिरूशालम्-
१० निवासिनाञ्च मध्ये राजद्रोहः सम्प्राप्तः। मद्वाक्ये मनो निधातुमनिच्छूनां स्वीयपूर्व्वपुरुषाणां दुष्क्रियाः प्रति प्रत्यावृत्य ते सेवनार्थमितरदेवानाम् अनुगामिनो ऽभवन्। तेषां पूर्व्वपुरुषैः सार्द्धं कृतो मम नियम इस्रा-
११ येल्वंशेन यिहूदावंशेन च लङ्घितः। अतः परमेश्वरो ब्रवीति पश्याहं तांस्तादृशीं विपदं प्रापयिष्यामि या तैस्तरितुं न शक्ष्यिष्यते, ते मामुद्दिश्योच्चध्वनिं करिष्यन्ति किन्त्वहं तत्र कर्णपातं न करिष्यामि।
१२ तदानीं यिहूदीयपुरीणां जना यिरूशालमो निवासिनश्च यानुद्दिश्य धूपदाहं कुर्व्वते तान् देवान् उपस्थास्यन्ते ते तु विपत्काले न कथञ्चन
१३ तेषां परित्राणं करिष्यन्ति। यतो हे यिहूदे तव यावत्यः पुर्य्यस्तावत्यो देवताः सन्ति यिरूशालमि च यावन्तो मार्गाः सन्ति तावत्यो लज्जास्पदोद्देश्या वेद्यो ऽर्थतो वालाख्यदेवाय धूपदाहार्थिका वेद्यो युष्माभिः
१४ स्थापिताः। अतस्त्वमेतेषां जनानां कृते मा प्रार्थयस्व, तेषां कृते विलापं प्रार्थनां वा मोदीरय यतस्तेषु स्वविपत्काले मामुद्दिश्योच्चनादं कुर्व्वत्सु नाहं मनो निधास्ये।

१५ प्रासादे मम किं कुर्य्यात् पुन र्मत्प्रीतिभाजनं।
तन्महापातकं कर्त्तुं यतन्ते मुख्यमानवाः।
दूरीकर्त्तुं पवित्रञ्च मांसं त्वदीयसम्मुखात्।
कुत्सिताचारकाले त्वं भवस्युल्लासकारिणी॥

१६ त्वं हरिज्जीतवृक्षो ऽसि सुन्दरः फलशोभया।
इत्येव नामधेयं ते कृतवान् परमेश्वरः॥
सार्द्धं महाजनौघस्य नादेन तत्र पादपे।
वह्निस्तु ज्वलितस्तेन तस्य शाखाश्च खण्डिताः॥

१७ यस्त्वां रोपितवान् पूर्व्वं सेनाध्यक्षः परेश्वरः।
तेनैवानिष्टवाक्यं तत् त्वद्विरुद्धमुदीर्य्यते॥
इस्रायेलीयवंशेन यिहूदीयान्वयेन च।
धूपं वालाख्यदेवाय प्रज्वाल्य मम मन्यवे।
स्वेच्छातो ऽकारि यत् पापं तदेवैतस्य कारणं॥

१८ ज्ञापितो भवताहं तज्जाने हे परमेश्वर।

क्रियास्तेषां जनानाञ्च मह्यं त्वयैव दर्शिताः॥
मेषवत्सो यथा दान्तो नीयमानो बधस्थलं। १९
तथैवासमहं तेषां न जानंश्चिन्तितं मयि॥
वृक्षो नाशयितव्यो ऽसावस्माभिः सहितः फलैः।
आयात जीवतां देशात् समुत्कृन्ताम तं वयं।
मनुष्यैस्तस्य नामापि पुन र्न स्मर्य्यतामिति॥
सेनाध्यक्ष परेश त्वम् असि न्यायविचारकृत्। २०
त्वं नरस्यान्तरात्मानं हृदयञ्च परीक्षसे॥
अहञ्चालोकयिष्यामि तेभ्यो दत्तं त्वया फलं।
यतोऽहं स्वविवादस्य भारमर्पितवांस्त्वयि॥

त्वं परमेश्वरस्य नाम्ना भविष्यद्वाक्यकथनाद् विरम, न चेदस्माभि २१
र्हनिष्यस इति वाक्यं त्वत्प्राणनाशाय सचेष्टै र्यैरनाथोतीयनरैस्त्वां प्रत्य-
वादि तेषां वैपरीत्येन परमेश्वर इत्थं भाषते।

अतो हेतोरिदं ब्रूते सेनाध्यक्षः परेश्वरः। २२
पश्य तेभ्यो नरेभ्योऽहं प्रदास्याम्युचितं फलं॥
तेषां मध्ये युवानो ये ते मरिष्यन्ति खड्गतः।
तेषां पुत्राश्च पुत्र्यश्च मरिष्यन्ति क्षुधाहताः॥
शेषवंशो नृणां तेषां कश्चिन्न सम्भविष्यति। २३
वत्सरे फलदानस्य ते ऽनाथोतीयमानवाः।
यतः सम्प्रापयिष्यन्ते मयानिष्टं यथोचितं॥

---

१२ द्वादशोऽध्यायः।

१ ईश्वरं प्रति यिरिमियस्य काकूक्तिः ५ तं प्रति तस्य भ्रातॄणां कापट्यं ७ यिहूदीयानां भाग्योत्पाटनं १५ परावृत्तमनःसु दया च।

हे परेश्वर धर्म्मी त्वं विवादेऽपि कृते मया। १
तथापि त्वां विचाराज्ञा अधि प्रष्टुमुपक्रमे॥
दुश्चरित्रमनुष्याणां या गतिः सा शुभा कुतः।
कुतस्तिष्ठन्ति चाक्षुब्धाः कपटाचारिणो नराः॥
त्वद्रोपिताः समूलास्ते प्रवर्धन्ते फलप्रदाः। २
अदूरस्त्वं मुखात् तेषां सुदूरस्त्वसि चित्ततः॥

३ हे परेश्वर मामेव त्वं परिज्ञातवानसि।
त्वया दृष्ट्वा च मच्चित्तं त्वदासक्तं परीक्षितं॥
त्वं मेषानिव हन्तव्यान् धृत्वापाकर्ष तान् जनान्।
निमित्तं बधघस्रस्य धृत्वा तांश्च नियोजय॥
४ मलिना शोकता भूमिः कतिकालं भविष्यति।
सर्व्वक्षेत्रस्थघासश्च शोषितः प्रतिभास्यति॥
पशुपक्षिगणा उच्छिन्ना दौर्जन्याद् देशवासिनां।
गदतां सो ऽस्मनो द्रष्टुम् अन्तिमां नो दशामिति॥
५ सार्द्धं पदातिभि र्धावंस्तैश्चेत् त्वं क्लान्तिमाप्नुयाः।
कथं स्पर्धिष्यसे तर्हि धावनेन हयैः सह॥
अत्र निष्कण्टके देशे त्वं कथञ्चिदशङ्कितः।
यर्द्दनद्यास्त्वलङ्कारे कान्तारे किं करिष्यसि॥
६ त्वं स्वभ्रातृगणेनापि स्वपैतृकान्वयेन च।
वञ्चसे मुक्तकण्ठैस्तैस्त्वत्पश्चादीर्य्यते ध्वनिः।
मा विश्वसिहि तेषु त्वं प्रीतिवाचो गदत्स्वपि॥
७ निजगेहं मया त्यक्तं निजसम्पत्तिरुज्झिता।
प्राणप्रियतमं पात्रं शत्रुहस्ते समर्पितं॥
८ मत्पक्षे मम सम्पत्ति र्वन्यसिंहीसमाभवत्।
सा गर्ज्जतीव मां दृष्ट्वा तास्माहं गर्हये ततः॥
९ सम्पत्ति र्मे मदर्थं किं चित्राङ्गः शकुनि र्भवेत्।
तद्विरुद्धं समन्तात् किं शकुनीनां सभा भवेत्॥
युष्माभि र्वन्यजन्तूनां सर्व्वेषामेव सङ्ग्रहः।
क्रियतां भोजनार्थञ्चानीयन्तां ते प्रयत्नतः॥
१० द्राक्षाक्षेत्रं ममानेकै र्ध्वंसितं पशुरक्षकैः।
मम या कृष्टभूमिस्तैः साप्यभूत् पादमर्द्दिता।
मन्मनोहारिभूमिस्तैः शून्याकारि यथा मरुः॥
११ तैश्च शून्यीकृतास्ते सा शून्या शोचति मां प्रति।
कृत्स्नः शून्योकृतो देशः को ऽपि तत्र न यत्नवान्॥
प्रान्तरस्थगिरीन् सर्व्वान् समारोहन्ति नाशकाः।
आदेशात् परमेशस्य यतः सर्व्वं चरत्यसिः॥
१२ आप्रान्तात् प्रान्तपर्य्यन्तम् एतन्नोद्वति कुत्रचित्।

कस्यचित् प्राणिनः काचित् शान्ति र्न सम्भविष्यति॥
गोधूमञ्च जना उप्त्वा सङ्ग्रहीष्यन्ति कण्टकान्। १३
परिश्रान्तैश्च तैः कश्चिदुपकारो न लप्स्यते॥
क्षेत्रोत्पन्नफलेभ्यश्च ते भविष्यन्ति लज्जिताः।
पारमेश्वरकोपस्य ज्वलनं तस्य कारणं॥

परमेश्वर इदं ब्रूते, ममेस्रायेलीयप्रजाभ्यो ऽहमधिकारार्थं यां भूमिं १४
दत्तवान् तत्स्पर्शकारिणः स्वीयदुष्टप्रतिवेशिनः सर्व्वानध्यहं भाषे,
पश्चाहं तेषां भूमितस्तान् उत्पाटयिष्यामि तेषां मध्याच्च यिहूदावंशमु-
त्पाटयिष्यामि। तेषामुत्पाटनात् परमहं तान् पुनरनुकम्प्य प्रत्येकं स्वी- १५
याधिकृतभूमिं स्वीयदेशञ्च प्रत्यावर्त्तयिष्यामि। ते च यथा वालदेवस्य १६
नाम्ना शपनं मम प्रजा अशिक्षयन्, तथा मम नाम्ना परमेश्वरो
जीवतीति शपनाय यदि मम प्रजानां नीतिं शिक्षेरन्, तर्हि मत्प्रजानां
मध्ये ते दृढोन्नतिमवाप्स्यन्ति। परन्तु चेन्मनांसि न निदधीरंस्तर्ह्यहं १७
तां जातिं सर्व्वश उत्पाट्य विनाशयिष्यामीति ब्रूते परमेश्वरः।

---

१३ त्रयोदशोऽध्यायः।

१ कटिबन्धनस्य दृष्टान्तः १२ द्राक्षारसपूर्णपात्राणां दृष्टान्तात् पापहेतो र्भाविदुःखस्य कथनं १५ विनीतिकथनं २२ सकलदुःखस्य कारणं पापमिति दर्शनञ्च।

परमेश्वरो मामिदं वचनम् अवादीत् त्वं गत्वा स्वार्थमातसं कटि- १
बन्धनं क्रीत्वा कटौ धारय जलं मा प्रवेशय। ततः परमेश्वरस्य वाक्या- २
न्मया कटिबन्धनं क्रीतं कटौ धारितञ्च। पश्चाद् द्वितीयवारं परमेश्वरस्य ३
वाक्यमिदं मां प्रति प्रादुरभूत्, स्वक्रीतेन तेन कटिबन्धनेन बद्धकटिस्त्वमु- ४
त्थाय फरातनदस्य तीरं गत्वा तत्र शैलस्य विदीर्णस्थाने तत् प्रच्छादय।
अतो ऽहं यथा परमेश्वरेणादिष्टस्तथा गत्वा फराततीरे तत् प्राच्छदं। ५
अतः परं बहुदिनेषु गतेषु परमेश्वरो मामवादीत् त्वम् उत्थाय फरातं ६
गत्वा ममादेशात् तत्र प्रच्छादितं तत् कटिबन्धनं गृहाण। अतो ऽहं ७
फरातं गत्वा यत्र स्थाने तत् कटिबन्धनं प्रच्छादितवान् तत्र खनित्वा
तदुदग्रहिषं। तत्तु कटिबन्धनं पश्य शीर्णं सर्व्वशो निरुपयोगञ्चासीत्। ८
तदानीं परमेश्वरस्येदं वाक्यं मां प्रति प्रादुरभूत्, परमेश्वरो ब्रूते, इत्य- ९

१० मेव यिहूदाया दर्पो यिरूशालमस्य महादर्पो मया विकारिष्यते। इमे
ये दुष्टजना मम वाक्यानि ग्रहीतुमनिच्छां प्रकाश्य स्वीयचित्तानां जाद्य-
माचरन्त इतरदेवान् सेवितुमाराधयितुञ्च तेषामनुगामिनो जातास्ते
११ सर्व्वेऽपि निरुपयोगेनानेन कटिबन्धनेन तुल्या भविष्यन्ति। यतः कटि-
बन्धनं यथा नरस्य कटौ समासज्यते तथैवाहं कृत्स्नमिस्रायेलीयवंशं
कृत्स्नं यिहूदावंशञ्च मयि समासंज्य ता मदीयप्रजाः ख्यातिस्तुतिशोभा-
स्वरूपाः कर्त्तुमैच्छमिति भाषते परमेश्वरः। तै र्जनैस्तु मम वाक्यं न
गृहीतं।

१२ त्वं तान् एतद् वचनमपि वद, इस्रायेलः प्रभुः परमेश्वर इदं ब्रूते,
एकैकया कुत्वा द्राक्षारसपूर्णया भवितव्यं। अत्र ते तुभ्यं कथयिष्यन्ति,
एकैका कुतू यद् द्राक्षारसेन पूर्णा भविष्यति तत् किं वयं न जानीम
१३ इति। त्वन्तु तान् वद, परमेश्वर इदं कथयति,

पश्याहं मानवान् सर्व्वान् एतद्देशनिवासिनः।
दायूदंशजभूपांश्चासीनांस्तस्य नृपासने॥
याजकान् भाविवक्तृंश्च यिरूशालमवासिनः।
जनान् सर्व्वांश्च मादेन पूरयिष्यामि निश्चितं॥
१४ प्रसभं पातयिष्याम्येकं तेषामपरं प्रति।
तातान् सुतांश्च सङ्कीर्णानिति ब्रूते परेश्वरः॥
नाहं तान् अनुकम्पिष्ये न करिष्याम्यनुग्रहं।
नैव तेषां विनाशान्मां करुणा वारयिष्यति॥
१५ यूयं शुश्रूषवो भूत्वा कर्णं गृह्णीत मद्वचः।
दर्पोद्धताश्च मा भूत वक्ता यस्मात् परेश्वरः॥
१६ स्वप्रभोः परमेशस्य यथाहं कुरुतादरं।
न चेत् तेनाचिरादेव ध्वान्तमुत्पादयिष्यते।
स्खलिष्यन्ति च युष्माकं चरणास्तामसाद्रिषु॥
युष्मदाकाङ्क्षिता दीप्तिस्तेनैव विकृता सती।
मृत्युच्छाया सुघोरं वा तमिस्रं सम्भविष्यति॥
१७ मद्वचस्तु ग्रहीतुं चेद् युष्माकं न भवेन्मतिः।
प्रच्छन्ने दर्पतः स्थाने मच्चित्तं तर्हि तप्स्यते॥
तोयपूर्णाच्च मन्नेत्राद् धाराश्रुः प्रहरिष्यति।
परेशस्य व्रजो यस्माद् दास्यं नीतो भविष्यति॥

राजानं ब्रूहि राज्ञीञ्च युवां निम्ने निषीदतं । १८
शोभादायि किरीटं वां मूर्द्धतः पतितं यतः ॥
रुद्धा दाक्षिणिकाः पुर्य्यो नोद्घाट्यन्ते च केनचित् । १९
दासीभूता यिहूदास्ति दासीभूताखिला हि सा ॥
उन्मील्य स्वीयनेत्रे त्वं पश्यायान्त्युत्तराद् द्विषः । २०
कुत्रास्ति त्वयि दत्तः स चारुमेषव्रजस्तव ॥
सखिवत् त्वत्प्रभुत्वे ये विनीता अभवंस्त्वया । २१
तैश्चेत् त्वां शासयेदीशस्तर्हि त्वं किं वदिष्यसि ।
तदा किं प्रसवन्तीव व्यथया न ग्रसिष्यसे ॥
इमा मां यदुपातिष्ठन् विपदो हेतुरस्य कः । २२
इत्थं त्वं हृदि चेत् पृच्छेः शृणु तर्हि तदुत्तरं ॥
अपराधबहुत्वात् ते वस्त्रान्तो विवृतोऽभवत् ।
सृष्टे त्वत्पादमूले च दुष्टाचारन्दशां करैः ॥
किं कूशीयमनुष्येण स्वत्वचः परिवर्त्तनं । २३
शार्दूलेन स्वरेखाणां नियमो वापि सम्भवेत् ॥
यदि तत् सम्भवेत् तर्हि चिराभ्यस्तकुकर्म्मभिः ।
युष्माभिरपि धर्म्मस्यानुष्ठानं सम्भविष्यति ॥
अतोऽहं विकरीष्यामि चतुर्दिक्षु जनानिमान् । २४
मरौ वातस्य वेगेनापोह्यमानान् नडानिव ॥
त्वद्भाग्यमेतदेवास्ति मत्तो लभ्यो धनस्य च । २५
अयमेव त्वदीयांश इति ब्रूते परेश्वरः ।
मां विस्मृत्य त्वया यस्माद् असत्ये प्रत्ययः कृतः ॥
अतस्तावकवस्त्रान्तं विवरिष्याम्यहं तथा । २६
यथाच्छन्नमुखायास्ते लज्जा दृश्या भविष्यति ॥
जारैः सार्द्धं तव क्रीडां ह्रेषितं कामसूचकं । २७
प्रान्तरस्थेषु शैलेषु व्यभिचारेण कुक्रियां ।
सर्व्वमेव तवाचारं घृणार्हं दृष्टवानहं ॥
धिक् धिक् त्वां हे यिरूशालम् नाभवस्त्वं परिष्कृता ।
कियत्कालम् इतः पश्चात् त्वं शुचि र्न भविष्यसि ॥

१४ चतुर्द्दशोऽध्यायः।

१ आकालस्य भविष्यत्कथनं ७ यिरिमियस्य प्रार्थना १० परमेश्वरेण तदीयप्रार्थनाया निराकरणं १३ मिथ्याभविष्यद्वादिनां दोषः १७ यिरिमियस्य निवेदनञ्च।

१ शुष्ककालानधि यिरिमियं प्रति परमेश्वरस्य यद् वाक्यं प्रादुरभूत् तदिदं यथा,

२ यिहूदा कुरुते शोकं स्थानानि गोपुराणि च।
तस्या अङ्गारवर्णानि व्यवसीदन्ति भूमिसात्।
यिरूशालम्नगर्य्याश्च समुद्गच्छति रोदनं॥
३ तोयार्थं नायकास्तेषां प्रेषयन्ति स्वकिङ्करान्।
ते तु कूपानुपस्थाय नाप्नुवन्त्यम्बु किञ्चन॥
शून्यभाजनहस्ताश्च प्रत्यायान्ति यथागतं।
लज्जापन्ना विवर्णास्या वस्त्रैश्छादितमस्तकाः॥
४ देशे वृष्टेरभावेन भूमेः शङ्कां निरीक्ष्य च।
लज्जापन्नाः स्वशीर्षाणि छादयन्ति कृषीबलाः॥
५ क्षेत्रस्था या मृगी सापि प्रसूतैव स्वशावकं।
प्रजहाति पुनर्व्वारं यवसानामभावतः॥
६ आरण्यगर्द्दभास्तद्वत् तिष्ठन्तो निर्द्रुमाद्रिषु।
वायुं पिवन्ति मुक्तास्याः पवनाशनसन्निभाः।
तेषां नेत्राणि सीदन्ति घासो यस्मान्न विद्यते॥
७ साक्ष्यं यद्यपराधा नो दद्युरस्मद्विरुद्धतः।
स्वनामोद्दिश्य कार्य्यं त्वं कुरु हे परमेश्वर॥
भूयो भूयो यतोऽकुर्म्म विपथे गमनं वयं।
अतस्त्वद्वैपरीत्येन सञ्जाता अपराधिनः॥
८ त्वम् इस्रायेल आशाभू र्विपत्काले च मुक्तिदः।
अत्र देशे कुतो हेतोस्त्वं विदेशीव वर्त्तसे।
यामिनीयापनेच्छाद् वा त्यक्तमार्गो यथाध्वगः॥
९ किमर्थं वर्त्तसे च त्वं नरः स्तब्धमना इव।
अक्षमस्य परित्राणे युद्धवीरस्य वा समः॥
अस्माकं मध्यवर्त्ती तु त्वमेवासि परेश्वर।
तव नाम्ना वयं ख्याता अतोऽस्मान् मैव सन्त्यज॥

जनानेतानधि ब्रूते वाक्यमेतत् परेश्वरः। १०
ते स्वपादान् असंयम्य प्रीयन्ते भ्रमणे सदा॥
अहृत्वा परमेशो ऽपि तान् जनान् प्रत्यनुग्रहं।
अधुनैव तमेतेषाम् अपराधं स्मरिष्यति।
योग्यं पापक्रियायाश्च फलं तेभ्यः प्रदास्यति॥
अवादीत् परमेशो मां त्वयैतान् मानवानधि। ११
अर्थाद्धितार्थमेतेषां प्रार्थना क्रियतां नहि॥
नैवोपवसतां तेषाम् अहं श्रोष्यामि रोदनं।
यच्छतो बलिनैवेद्ये न ग्रहीष्यामि तानहं। १२
असिदुर्भिक्षमारीभि र्नाशयिष्याम्यहन्तु तान्॥
तदानीं प्रत्यभाषे ऽहं हा प्रभो परमेश्वर। १३
दृश्यतां भाविवक्तारो गदन्त्येतानिदं वचः॥
नैव द्रक्ष्यथ निस्त्रिंशं युष्मान् नोपैष्यति क्षुधा।
युष्मभ्यं क्षेममेवात्र सत्यं दायिष्यते मया॥
तदानीं परमेशो मां प्रत्यवादीदिदं वचः। १४
मम नाम्ना मृषावाक्यं भाषन्ते भाविवादिनः॥
नैव प्रेषितवानेतान् न वाज्ञापितवानहं।
न कदाचन वाक्यं वा तेभ्यः कथितवानहं॥
असत्यदर्शनं मन्त्रम् अलीकं स्वमतेश्छलं।
एतान्यैशवचांसीव युष्मभ्यं कथयन्ति ते॥
अतो ये भाविवक्तारो मया न प्रहिता अपि। १५
मम नाम्नैव भाषन्ते परेशो वक्ति तानधि॥
तैरुक्तं नात्र देशे ऽसिः क्षुधा वा सम्भविष्यति।
त एवासिक्षुधाभ्यान्तु नंक्ष्यन्ति भाविवादिनः॥
यान् जनांश्च समुद्दिश्य दैववाक्यं वदन्ति ते। १६
क्षेप्स्यन्ते ऽसिक्षुधाभ्यां ते मार्गेषु यिरूशालमः॥
तान् जायापुत्रपुत्रीश्च न कश्चिन्निखनिष्यति।
तेषां स्वदुष्टता तेषु मयावतारयिष्यते॥
तानुद्दिश्य त्वया तस्माद् वाक्यमेतदुदीर्य्यतां। १७
स्रवतामस्रु मन्नेत्रे दिवारात्रम् अनारतं॥
मज्जातेरात्मजा कन्या महाभङ्गं गता यतः।

अयं तस्या य आघातः स चातीव व्यथाकरः॥
१८ यदि क्षेत्रं प्रगच्छेयं नरान् वीक्षे ऽसिना हतान्।
पुरीं चेत् प्रविशेयश्च वीक्षे क्षुत्क्षाममानवान्॥
भविष्यद्वक्तृवर्गो ऽपि याजकानां गणस्तथा।
गन्तव्यं स्थानमज्ञात्वा परिभ्राम्यन्ति नीवृति॥
१९ हा यिहूदां नितान्तं किं त्वं निराकृतवानसि।
सियोन् वा सर्व्वथाभूत् किं गर्हितं मनसा तव।
कुतस्त्वयाहतानां न आरोग्यं जायते नहि॥
आकाङ्क्षामो वयं शान्तिं कल्याणं तु न दृश्यते।
आरोग्यकालमीप्सामः सन्त्रासस्तूपतिष्ठति॥
२० स्वदोषं पैत्रिकं पापं जानीमो हे परेश्वर।
त्वद्विरुद्धं कृतो ऽस्माभिरपराधो न संशयः॥
२१ स्वीयनाम्नो ऽनुरोधात् त्वम् अस्मान् न त्यक्तुमर्हसि।
श्रीमत् सिंहासनं यत् ते निस्तेजो मा कुरुष्व तत्।
नियमं ते सहास्माभिः कृतं मा भंग्धि तं स्मर॥
२२ अलीका अन्यजातीनां देवाः किं वृष्टिदायिनः।
अन्तरीक्षं स्वयं वा किम् आसारान् सम्प्रच्छति॥
किं त्वमेव न तत्कर्त्ता हे परेश्वर नः प्रभो।
त्वामाकाङ्क्षाम एतेषां त्वं यतो ऽसि विधायकः॥

---

१५ पञ्चदशोऽध्यायः।

१ यिहूदिलोकानां दण्डविषयकं भविष्यद्वाक्यं १० स्वमधि यिरिमियस्य विलापः ११ शत्रून् प्रति भर्त्सनमीश्वरस्य १५ ईश्वरस्य सन्निधौ यिरिमियस्य निवेदनं १९ यिहूदिलोकानधि चेश्वरस्य प्रतिज्ञा।

१ अपरं परमेशो माम् एतद्वचनमब्रवीत्।
यदि मूसाः शिमूयेल् च तिष्ठेतां मम सम्मुखे।
तथाप्येतेषु लोकेषु न वर्त्तेत मतिर्मम।
दृष्टितो मे विसृज्यन्तां त्वया ते ऽपसरन्तु च॥
२ अपगच्छेम किं स्थानम् इति ते यदि पृच्छ्यसे।
तर्हि तान् प्रतिभाषस्व वक्तीत्थं परमेश्वरः॥

मृत्योः पात्रं व्रजेन्मृत्युम् असेः पात्रमसिं व्रजेत्।
क्षुधां गच्छेत् क्षुधापात्रं दास्यं दास्यस्य भाजनं॥
पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः। ३
चतस्रो ऽधिकरिष्यामि जातीस्तेषु जनेष्वहं।
कृपाणं प्राणनाशाय कर्षणाय च कुक्कुरान्।
खगान् भूचरजन्तूंश्च ग्रासायोत्पाटनाय च॥
कृते हिष्किययपुत्रस्य मिनशे यिहूदापतेः। ४
यिरूशालमि तेनैवाचरितानाञ्च कर्म्मणां।
तान् मह्याः सर्व्वराज्येष्वर्पयिष्यामि विधूनने॥
आः कस्त्वां हे यिरूशालम् अनुकम्पिष्यते पुनः। ५
शोकार्त्तस्त्वन्निमित्तं वा को विलापं करिष्यति।
मङ्गलं तव प्रष्टुं वा कस्त्वाम् अभ्यागमिष्यति॥
परेशो वक्ति मां त्यक्त्वा त्वं गतासि पराङ्मुखा। ६
अतस्त्वद्वैपरीत्येनाहं विसार्य्य निजं करं।
त्वाम् उच्छिन्नां करिष्यामि क्षन्तुं क्लान्तो ऽभवं यतः॥
शूर्पैः प्रस्फोटयिष्यामि देशस्थगोपरेषु तान्। ७
निरपत्याः करिष्यामि नाशयिष्यामि मत्प्रजाः।
यतस्ताः स्वकुमार्गेभ्यो नाकुर्व्वन् प्रतिवर्त्तनं॥
सामुद्रसिकताभ्यो ऽप्यनेकास्तद्विधवास्ततः। ८
तेषाञ्च वैपरीत्येन तेषां मातृपुरीं मया।
मध्याह्ने नाशयन् वीरः समानायिष्यते युवा।
अकस्माच्च करिष्यामि तां तापत्रासविह्वलां॥
सप्तानां प्रसवित्री सा म्लाना प्राणान् प्रहास्यति। ९
अनतीते दिने तस्या भास्करो ऽस्तं गमिष्यति।
लज्जापन्ना च तस्मात् सा विवर्णा च भविष्यति॥
तेषां शेषजनांश्चाहं शत्रूणामेव सम्मुखे।
खड्गे समर्पयिष्यामीति ब्रूते परमेश्वरः॥
हा मातु र्मम हा मां धिक् यन्मां प्रजातवत्यसि। १०
वाग्वितण्डास्पदं कृत्स्नलोकस्य द्वन्द्वभाजनं॥
न कस्याप्युत्तमर्णो ऽहं नाधमर्णो ऽपि वाभवं।
तथा सत्यपि शप्ये तैः सकलैरेव मानवैः॥

११ परेश्रो वक्ति किं त्वं न चेमार्थं मोच्यसे मया।
आगते दुर्द्दशाकाले समये सङ्कटस्य च।
त्वां प्रसादयितुं शत्रुः किं नानायिष्यते मया॥

१२ लोह उत्तरजो लोहस्ताम्रं वा किं प्रभज्यते॥
१३ विभवं तव कोषांश्च वितरिष्यामि लोप्त्रवत्।
निर्मूल्यं पापबाहुल्यात् तव त्वत्कृत्स्नसीमनि॥
१४ तांस्त्वदज्ञातदेशञ्चापनेष्याम्यरिभिस्तव।
यतो मे प्राज्वलत् कोपाद् वह्नि र्युष्मान् स धक्ष्यति॥

१५ सर्व्वज्ञोऽसि परेश त्वं स्मर मां पश्य मे दशां।
फलं मद्बाधकेभ्यश्च योग्यं दत्त्वाभिरक्ष मां॥
त्वं स्वकोपस्य मान्द्येन न मां संहर्त्तुमर्हसि।
त्वदर्थं यदहं निन्दां सहे तज्ज्ञायतां त्वया॥
१६ तव वाक्यानि सम्प्राप्य भक्षितान्यन्नवन्मया।
आनन्दश्चित्तहर्षश्चाभवन्मे तव वाक्यतः॥
अभवत् कीर्त्तितं यस्मात् तव नाम ममोपरि।
हे परेश जगत्कर्त्ता वाहिनीनामधीश्वर॥
१७ नाहमुपाविशं कर्त्तुं हर्षं निन्दकसंसदि।
गत्वा तु त्वत्करात् त्रासमहमेकाक्युपाविशं।
यतस्त्वं कृतवान् पूर्णं मां स्वरोषस्य भाजनं॥
१८ किमर्थं मद्व्यथा नित्या कुतो ऽशाम्यं मम क्षतं।
चिकित्सा च कुतस्तेन ग्रहीतुं शक्यते नहि।
मत्कृते वञ्चकं स्रोतः किमभूरम्बु चाध्रुवं॥

१९ परमेशस्ततो ब्रूते त्वं परावर्त्तसे यदि।
प्रत्यानीतो मया तर्हि स्थास्यसि त्वं मदन्तिके॥
रत्नं यद्युद्धरेस्तुच्छात् तर्ह्यास्यं मे भविष्यसि।
ते हि त्वां प्रति वर्त्तन्तां त्वं मा वर्त्तस्व तान् प्रति॥
२० जनसाक्षाद् विधास्ये त्वां प्राचीरं दृढ़मायसं।
ते त्वया सह योत्स्यन्ते त्वन्तु जायिष्यसे नहि॥
यतस्त्वां जयिनं कर्त्तुं विधातुं तारणञ्च ते।
तव सङ्गेहमस्मीति भाषते परमेश्वरः॥

दुर्जनानां करेभ्यस्त्वं समुद्धारिष्यसे मया। ११
अहं त्वां मोचयिष्यामि हस्तेभ्यः क्रूरकर्म्मणां॥

---

१६ षोडशोऽध्यायः।

१ विवाहादे दृष्टान्तकथया यिहूदिलोकान् प्रति विनाशस्य भविष्यद्वाक्यं १० पूर्व्वपुरुषेभ्योऽपि तेषां पापबाहुल्यभवनं १४ मिसर्देशात् मुक्तितोऽपि तेषां भाविमहामुक्तेर्महत्त्वं १९ देवपूजानिमित्तं तेभ्यः शास्तिदानञ्च।

अपरं परमेश्वरस्यैतद्वाक्यं मां प्रति प्रादुरभूत्। १
मैव त्वम् उद्वहे भार्य्याम् अत्र स्थाने कथञ्चन। २
पुत्रा दुहितरो वापि स्थाने ऽस्मिन् मा भवन्तु ते॥
यस्मात् स्थाने ऽत्र जायन्ते ये बाला याश्च बालिकाः। ३
अत्र देशे च यास्तेषां मातरः प्रसवन्ति तान्।
जनयन्ति च ये तातास्तानध्याह परेश्वरः॥
ते रोगै र्विविधैः क्षीणाः समुत्स्रक्ष्यन्ति जीवनं। ४
न शोचिष्यति तान् कोऽपि भूमौ वा निखनिष्यति॥
स्थास्यन्ति पतितास्ते हि भूमेरुपरि सारवत्।
असिना क्षुधया वापि मरिष्यन्ति च केचन॥
भूविहारिपशूनाञ्च खेचराणाञ्च पक्षिणां।
भक्ष्या एव भविष्यन्ति कायास्तेषां गतासवः॥
यस्मात् परेश आहैतत् मा चीत्कारगृहं विश। ५
शोकं कर्त्तुञ्च मा गच्छ मा वा विलप तैः सह॥
यस्माज्जनेभ्य एतेभ्यो हरिष्यामि निजाशिषं।
प्रसादं करुणाञ्चेति भाषते परमेश्वरः॥
इमे क्षुद्रा महान्तश्च मरिष्यन्त्यत्र नीवृति। ६
न त्वन्त्येष्टिक्रियां तेषां जनः कोऽपि करिष्यति॥
न शोचिष्यति तान् कश्चित् न क्षताङ्गो भविष्यति।
न वा तेषां कृते कश्चित् स्वशिरो मुण्डयिष्यति॥
न मृतानां कृते कोऽपि तान् सान्त्वयितुमिच्छया। ७
पूपं शोके यथायोग्यं भङ्क्त्वा तेभ्यः प्रदास्यति॥
पितरं मातरं वापि यो ऽनुशोचति कोऽपि तं।

सान्त्वनासूचके पात्रे पेयं न पाययिष्यति ॥
८ यत्रोपविश्य तैः सार्द्धं कुर्य्यास्त्वं पानभोजने।
तादृशं पानगेहं त्वं नैव प्रवेष्टुमर्हसि ॥
९ यतो हेतोरिदं ब्रूते सेनाध्यक्षः परेश्वरः।
इस्रायेलः प्रभुः पश्य युष्माकमेव सम्मुखे।
युष्माकमेव काले चाहमुच्छेत्स्याम्यतः स्थलात्।
हर्षप्रीततयोः शब्दं शब्दञ्च वरकन्ययोः ॥
१० उक्तेष्वेतेषु वाक्येषु जातिमेतां प्रति त्वया।
यदि ते त्वां वदन्तीदं कुतो हेतोः प्रभाषते।
अस्मानधि महानिष्टम् ईदृशं परमेश्वरः ॥
अस्माकमपराधः कः केन वा पापकर्म्मणा।
अस्मत्प्रभोः परेशस्य साक्षात् पातकिनो वयं ॥
११ त्वं तान् वक्ष्यसि तर्हीदं परमेशस्य वागियं।
ताता वो मां परित्यज्यान्यान् देवान् अनुगत्य च।
सेवका अभवंस्तेषाम् आर्चयंश्च प्रणम्य तान्।
तैस्त्यक्तो ऽहं व्यवस्था च मम तै र्नहि रक्षिता ॥
१२ यूयन्तु स्वीयतातेभ्यः कुत्सिताचारकारिणः।
पश्यत मे रवं श्रोतुं सर्व्वे यूयमनिच्छवः।
तस्मात् स्वदुष्टचित्तानां जडतामनुगच्छथ ॥
१३ प्रक्षेप्स्यामि ततो युष्मान् अस्य देशस्य मध्यतः।
दूरदेशं न युष्माभि र्न युष्मज्जनकै र्गतं ॥
यूयं तत्रेतरान् देवान् सेविष्यध्वे दिवानिशं।
अनुकम्पान्तु युष्मासु वर्त्तयिष्याम्यहं नहि ॥
१४ अत्र परेश्वरो ब्रूते काल आयाति तादृशः।
इस्रायेलीयवंशान् यो मिसर्देशात् समानयत्।
परमेशः स साक्षीति न पुन र्वक्ष्यते यदा ॥
१५ इस्रायेलीयवंशांस्तु य उदीचीनदेशतः।
तांश्च विकीर्णवान् यत्र तस्माद् देशसमूहतः।
आनयत् परमेशः स साक्षीति वक्ष्यते तदा ॥
तेषां पितामहेभ्यश्च प्रदत्तायां मया पुरा।
स्वीयभूमौ पुनर्व्वारं स्थापयिष्यामि तानहं ॥

समानेष्यामि पश्चाद्दं धीवरान् बहुसङ्ख्यकान्।
ते जनांस्तान् धरिष्यन्तीत्थं ब्रूते परमेश्वरः॥
समानेष्यामि च व्याधान् बहुसङ्ख्यांस्ततः परं। १६
सर्व्वाद्रौ सर्व्वशैले च सर्व्वच्छिद्रे च पार्व्वते।
यत्नान्मृगयमाणास्ते तान् धरिष्यन्ति मानवान्॥
मम नेत्रे यतस्तेषां वर्त्तते सर्व्ववर्त्मसु। १७
मम प्रत्यक्षतस्ते च न विद्यन्ते तिरोहिताः।
न प्रच्छन्नो ऽस्ति तेषां वापराधो दृष्टितो मम॥
आदौ तेभ्यो ऽपराधस्याघस्य च द्विगुणं फलं। १८
प्रदास्यामि यतस्तेषां गर्हितप्रतिमाचयैः।
अर्पितैः कुणपै र्देशो मम तैरशुचीकृतः।
ममाधिकारभूस्तैश्च पूरिता खृणास्पदैः॥
प्रभो त्वं मे बलं दुर्गं सङ्कटे च गति र्मम। १९
पृथिव्याः प्रान्तभागेभ्यः सर्व्वजातीयमानवाः।
त्वामेवाभ्यागमिष्यन्ति भाषमाणा इदं वचः॥
अस्माकं जन्मदातॄणां य आसीत् पैतृको विधिः।
व्याज एव स वाष्पश्च सर्व्वथानुपकारकः॥
स्वार्थं किं निर्म्मिमीतेशान् मनुष्यस्ते त्वनीश्वराः॥ २०
अतः पश्चावकाशे ऽस्मिन् ज्ञापयिष्यामि तानहं। २१
ज्ञापयिष्यामि मद्धस्तं मत्प्रभुत्वञ्च तान् जनान्।
ते च ज्ञास्यन्ति यत् ख्यातिरस्ति मे परमेश्वरः॥

---

१७ सप्तदशोऽध्यायः।

१ पापकारणाद् यिहूदाया दूरदेशगमनस्य भविष्यद्वाक्यं ५ मनुष्याश्रितेश्वराश्रितजनयो र्दृष्टान्तः ९ ईश्वरं विश्वासयितुं कपटिमानवस्यासमर्थता १२ केवलम् ईश्वरेण परित्राणं १५ निन्दाया निमित्तं यिरिमियस्य विलापः १९ लोकान् प्रति विश्रामवारपालनस्य कथां कथयितुं यिरिमियस्य प्रेरणञ्च।

लिखितं लौहलेखन्या हीरकाग्रविशिष्टया। १
पापमस्ति यिहूदायाः कल्पितं शिल्पकर्म्मणा।
तच्चां हृदयपत्रेषु तेषां वेदिशिखासु च॥

२ संस्मर्य्यन्ते ततस्तेषां सन्तानैः स्वीयवेदयः।
आशेराभिधदेवीनां सर्व्वे च स्वीयविग्रहाः।
हरिद्वर्णेषु चैत्येषु प्रोच्चशैलेषु च स्थिताः॥
३ हे क्षेत्रस्थित मे शैल मया तावकगौरवं।
त्वत्कोषाणाञ्च साकल्यं लोप्त्रवद् वितरिष्यते।
सपापा उच्चदेशास्ते कृत्स्नायां तव सीमनि॥
४ स्वाधिकारान्मया दत्तात् त्वं स्वदोषै र्वियोक्ष्यसे।
देशे चाविदिते ऽरीणां दासीकारिष्यसे मया॥
युष्माभि र्ज्वालितो यस्माद् अभूत् कोपानलो मम।
यावच्चानन्तकालं स स्थास्यते चण्डदाहवान्॥
५ परमेश इदं ब्रूते शप्तो भूयात् स मानवः।
यो मर्त्यं शरणं गच्छेत् मांसं मन्येत बाहुवत्।
यस्यान्तःकरणञ्चापि निवर्त्तेत परेश्वरात्॥
६ स मनुष्यो मरुस्थस्य तरो र्निस्तेजसः समः।
शुभस्यागमनं तेन न समालोकयिष्यते॥
स च स्थानेषु शुष्केषु प्रान्तरस्थेषु वत्स्यति।
भूमौ क्षारविशिष्टायां यत्र केनापि नोष्यते॥
७ आशीर्युक्तो नरस्तु स्यात् परेशं शरणं गतः।
यस्य विश्वासभूमिश्च जायते परमेश्वरः॥
८ स मनुष्यो जलासन्ने रोपितस्य तरोः समः।
सुखं विस्तृतमूलस्य तोयप्रवाहपार्श्वतः॥
निदाघागमनाच्चास्य हरिद्वर्णच्छदस्य च।
येनानावृष्टिवर्षे ऽपि म्लानता नहि गम्यते।
स्वफलोत्पादने यश्च चाञ्चल्यं न समाचरेत्॥
९ वञ्चकं सर्व्वतश्चित्तं विकारप्राप्तमेव च।
अतएव परिज्ञातुं तच्चित्तं केन शक्यते॥
१० चित्तज्ञो मर्म्मनिर्णेताहमेवास्मि परेश्वरः।
मनुष्याय यथाचारं फलं दास्यामि कर्म्मणां॥
११ सञ्चिनोत्यप्रसूयापि शावकांस्तित्तिरो यथा।
अधर्म्मेण तथा लोभी विभवं प्रतिपद्यते॥
तेनाप्यर्द्धवयः प्राप्य तत् त्यक्तव्यं भविष्यति।

स खीयान्तिमगत्या च मूढवत् प्रतिभास्यति ॥
सिंहासनं महैाजस्कम् उन्नतो ऽनादिकालतः। १२
अस्माकम् अद्वितीयस्य पुण्यभूमिवदाश्रयः ॥
इस्रायेल आशा च त्वमेवासि परेश्वर। १३
लज्जापन्ना भविष्यन्ति सर्व्वे त्वत्त्यागिनो जनाः ॥
धूलैा लिखितनामानः सर्व्वे मत्तो ऽपसारिणः।
यस्मात् तैरमृताम्बूत्सस्त्यक्ते परमेश्वरः ॥
हे प्रभो देहि मे स्वास्थ्यं स्वास्थ्यं यास्याम्यहं तदा। १४
कुरु त्वञ्च मम त्राणं त्राणं तर्ह्याप्स्यते मया।
यतो हेतोस्त्वमेवासि प्रशंसायाः स्थलं मम ॥
पश्य मां प्रति भाषन्ते ते मनुष्या इदं वचः। १५
परमेशस्य वाक् कुत्र सा सिद्धार्था भवत्विति ॥
नातितिचारहन्त्वासं गोपवत् ते ऽनुवर्त्तने। १६
न वाकाङ्क्षं विपद्युक्तं दिनं तज्ज्ञायते त्वया।
निःसृतं यन्मदोष्ठाभ्यां प्रत्यक्षं तदभूत् तव ॥
मा भवेस्त्रासहेतु र्मे त्वं गति र्मम दुर्गतैा ॥ १७
बाधका मम लज्जन्तां न तु लज्जा भवेन्मम। १८
ते भवन्तु च सन्त्रस्ता मम त्रासो न जायतां ॥
त्वं तेषां वैपरीत्येन दुर्गते र्दिनमानय।
द्विगुणेनैव भङ्गेन तान् प्रभग्नान् विधेहि च ॥

परमेश्वरो माम् एतद् वाक्यम् अवादीत्, यिहूदाया राजानो येन १९
प्रविशन्ति निर्गच्छन्ति च त्वं जानपदप्रजानां तद् द्वारं यिरूशालमः
सकलानि द्वाराणि च गत्वावतिष्ठमानस्तानुद्दिश्येदं व्याहर, हे यिहू- २०
दाया राजानः, हे कृत्स्न यिहूदावंश, हे यिरूशालमो निवासिनः सर्व्वे,
द्वारैरेतैः प्रविशथ ये यूयं युष्माभिः परमेश्वरस्य वाक्यं निशम्यतां।
परमेश्वरो ब्रवीति यूयं स्वस्वप्राणेषु सावधाना भवत विश्रामवारे २१
कमपि भारं मा वहत यिरूशालमो द्वारै र्वा मा समानयत। विश्राम- २२
वारे च यूयं स्वस्वगृहेभ्यो भारान् मा वहिष्कुरुत कमपि व्यापारं वा
मा कुरुत परन्त्वहं युष्माकं पूर्व्वपुरुषान् यथादिष्टवान् तथा विश्राम-
वारं पवित्रं मन्यध्वं। ते तु श्रोतुमादेशं ग्रहीतुञ्चानिच्छन्तो ऽश्रुत्वा २३
कर्णावनिधाय च स्वग्रीवाः कठोराः अकार्षुः। परमेश्वरो ब्रवीति, यदि २४

यूयं ममादेशं सम्यग् आकर्ण्य विश्रामवारे नगरस्यैतस्य द्वारै र्भारान्
न समानयथ विश्रामवारं पवित्रं मन्यमानाश्च तस्मिन् दिने कमपि
२५ व्यापारं न कुरुथ, तर्हि दायूदीयसिंहासनासीना राजानो नायकाश्च
रथारूढा अश्वारूढा वा सन्तो नगरस्यैतस्य द्वारैः प्रवेक्ष्यन्ति त एव
तेषां (सङ्गिनो) नायकाश्च यिहूदाया जनाश्च यिरूशालमो निवा-
२६ सिनश्च प्रवेक्ष्यन्ति नगरमेतच्च शाश्वतं वसतिस्थानं भविष्यति। यिहू-
दाया नगरेभ्यो यिरूशालमश्चतुर्दिक्स्थग्रामेभ्यो विन्यामीनदेशात् सम-
भूमितः पर्व्वतात् दाक्षिणात्यदेशाच्च हव्यबलिनैवेद्यधूपान् आनयन्तः
परमेश्वरस्य मन्दिरे प्रशंसासूचकोपहारानानयन्तो वा जना आग-
२७ मिष्यन्ति। परन्तु यदि यूयं ममादेशम् अनाकर्ण्य विश्रामवारं पवित्रं
न मन्यध्वे विश्रामवारे भारान् वहन्तो यिरूशालमो द्वारैः प्रविशथ च
तर्हि मया तस्या द्वारेषु वह्नि ज्वालयिष्यते स यिरूशालमो हर्म्याणि
ग्रसिष्यते न च निर्व्वाणं गमिष्यति।

---

१८ अष्टादशोऽध्यायः।

१ कुलालचक्रस्य दृष्टान्तः ११ यिहूदीयानां कर्म्मणां फलं १८ बाधकानां विषये यिरिमियस्य वाक्यञ्च।

१ परमेश्वरादियं वाणी यिरिमियं प्रति प्रादुरभूत्, त्वमुत्थाय कुम्भ-
२ कारस्य गृहं गन्तुमवरोह तत्राहं त्वां मम वाक्यानि श्रावयिष्यामि।
३ अतो मयावरुह्य कुम्भकारस्य गृहं प्राप्य स कुलालचक्रेण कर्म्म करो-
४ तीति दृष्टं। यश्च घटस्तेन निरमीयत स नष्टा कुलालस्य हस्ते मृत्पि-
ण्डाकारम् अवाप्नोत्, ततः स तेन पुनरपरं घटं निरमिमीत। कुला-
५ लस्य दृष्टौ यथायोग्यो घटस्तेन निरमीयत। तदानीं परमेश्वरस्येदं
६ वाक्यं मां प्रति प्रादुरभूत्। हे इस्रायेल्वंश, परमेश्वरो ब्रवीति, अस्य
कुम्भकारस्य वृत्तिमिव युष्मासु वृत्तिं वर्त्तितुं किं ममाधिकारो नास्ति?
७ हे इस्रायेल्वंश, कुलालहस्तगतो मृत्पिण्ड इव यूयं मद्धस्तगताः। एक-
दाहं जाते राज्यस्य वा प्रातिकूल्येनोन्मूलनस्य निपातनस्य विनाशनस्य
८ च वाक्यं व्याहरामि। सा तु जाति र्यस्याः प्रातिकूल्येनाहं तदुक्तवान्
यदि स्वदौर्जन्यात् प्रत्यावर्त्तते तर्ह्यहं तां यदनिष्टं प्रापयितुं चिन्तित-

वांस्तदधि ममानुतापो जायते। अन्यदाहं जाते राज्यस्य वानुकूल्येन ९
निर्म्माणस्य रोपणस्य च वाक्यं व्याहरामि। सा तु जाति र्यदि मम १०
दृष्टौ दौर्जन्यमाचरति तर्ह्यहं तां येन शुभान्वितां कर्त्तुं चिन्तितवां-
स्तच्छुभमधि ममानुतापो जायते।

इदानीं त्वं यिहूदाया जनान् यिरूशालमो निवासिनश्चेदं वाक्यं वद, ११
परमेश्वर इदं ब्रवीति,

पश्य वः प्रातिकूल्येन मयानिष्टं प्रचिन्त्यते।
युष्माकं वैपरीत्येन सङ्कल्पश्चोपकल्प्यते॥
अत एकैकशो यूयं प्रत्यायात कुमार्गतः।
भवत स्वीयमार्गेषु स्वक्रियासु च सज्जनाः॥
अत्र ते प्रतिभाषन्ते मोघाशा तदसम्भवं। १२
स्वमनःकल्पना एवानुवर्त्तिष्यामहे वयं।
एकैकः स्वकुचित्तस्य जडताम् आचरिष्यति॥
अतो हेतोरिदं वाक्यं भाषते परमेश्वरः। १३
ईदृगश्रावि केनेति पृच्छतेतरजातिषु।
इस्रायेलाख्यकन्याया आचारोऽतीव गर्हितः॥
लिबानोनो हिमं किं तं शैलं दिग्दर्शिनं त्यजेत्। १४
किं दूरात् स्निग्धवेगास्ता आपः शोष्यन्ति कर्हिचित्॥
मत्प्रजा मान्तु विस्मृत्य धूपं दहन्त्यवस्तवे। १५
स्खलितास्ताः स्वमार्गेषु शाश्वतेष्वेव वर्त्मसु।
प्रगच्छन्त्यध्वभिः क्षुद्रैः पथिभिश्चासमीकृतैः॥
कुर्व्वन्तीत्थं स्वदेशं ताः शून्यं नित्यघृणास्पदं। १६
यो व्रजेत् तत्र स क्षुब्ध्वा मूर्द्धानं चालयिष्यति॥
पूर्व्वीयवायुनेवाहं विकरिष्यामि तान् द्विषा। १७
पृष्ठं तान् दर्शयिष्यामि न चास्यं दुर्गते र्दिने॥
तदानीं ते जना आहु यूयमायातुमर्हथ। १८
अस्माभिश्चिन्त्यतामस्मिन् यिरिमीये कुमन्त्रणा॥
याजके धर्म्मशास्त्रस्य मन्त्रणाया मनीषिणि।
भाविवक्तरि वाक्यस्य विरहो नहि युज्यते॥
अस्माभी रसनादण्डैः स मनुष्यो विताड्यतां।
कस्मिंश्चित् तस्य वाक्ये च श्रोत्रं मैव निधीयतां॥

१९ अवधानं कुरुष्व त्वं मयि हे परमेश्वर।
मया ये विवदन्ते च तेषां शब्दं निशामय॥
२० अपकारेण किं न्याय्यम् उपकारस्य शोधनं।
यस्मान्मत्प्राणनाशाय तेऽन्धकूपमखानिषुः॥
तव कोपानलं तेभ्यः प्रत्यावर्त्तयितुन्त्वहं।
शुभं तेषां ब्रुवाणस्त्वाम् उपातिष्ठमिति स्मर॥
२१ अतस्तेषामपत्यानि त्वं दुर्भिक्षे समर्पय।
अग्रेषु चन्द्रहासानां तान् जनांश्च निपातय॥
निरपत्या अनाथाश्च तेषां भवन्तु योषितः।
नराः कालेन हन्यन्तां युवानश्चासिना रणे॥
२२ आनीतायां त्वया सद्यः सेनायां तान् प्रबाधितुं।
रोदनं श्रूयतां तीव्रं तेषां गेहेभ्य उद्गतं॥
मां धर्त्तुं ते जना यस्माद् अन्धकूपमखानिषुः।
तथा मे चरणौ बद्धुं त उन्माथान् अयूयुजन्॥
२३ मद्विपक्षाखिला तेषां मन्त्रणा मम मृत्यवे।
तत् परेश भवान् वेत्ति तेषां मा क्षमतामघं।
भवत्साक्षाच्च तत् तेषां पातकं मा प्रमार्ज्यतां॥
ते जनाः स्खलनं प्राप्ता निपतन्तु त्वदग्रतः।
त्वं स्वीयक्रोधकाले च तेभ्यो देह्युचितं फलं॥

---

१९ ऊनविंशोऽध्यायः।

१ भग्नमृत्पात्रस्य विनाशेन पापकारणाद् यिरूशालमो विनाशस्य सूचनं १४ तोफते तद्वचःप्रचारणात् परं परमेश्वरीयमन्दिरेऽपि तद्घोषणं।

१ अपरं परमेश्वरेणेदं वाक्यमवादि त्वं गत्वा कुम्भकारनिर्म्मितं कलस-
मेकं क्रीत्वा मुख्यप्रजानां मुख्ययाजकानाञ्च कतिपयजनान् सङ्गिनः कृत्वा
२ घटनिर्म्माणशालाद्वारसमीपस्थां हिन्नोमसुतस्य निम्नभूमिं प्रगत्य मया
३ वक्ष्यमाणानि वचांसि तत्र घोषय। त्वं वद, हे यिहूदाया राजानः,
हे यिरूशालम्निवासिनः, परमेश्वरस्य वाक्यं युष्माभिः श्रूयतां।

वक्तीस्रायेल ईशः स सेनाध्यक्षः परेश्वरः।
पश्यानेष्याम्यहं स्थानमेतत् तादृगमङ्गलं।

येन सर्व्वस्य तच्छ्रोतुः शिञ्जीत श्रवणेन्द्रियं॥
जनैरेतैरहं त्यक्तः स्थानमेतच्च दूषितं। ४
यान् न ते नाग्रजास्तेषां न यिहूदा न्टपा विदुः।
अत्र ते परदेवास्तै धूपदाहेन पूजिताः।
शोणितै र्दोषहीनानां स्थानमेतच्च पूरितं॥
मयानाज्ञापितं नोक्तं नोपलब्धञ्च चेतसा। ५
दाहं स्वपुत्त्रपुत्त्रीणां वाले हव्यमिवाग्निना।
कर्त्तुं ते र्निरमीयन्त वाले र्भगुस्थलानि च॥
तस्मात् परेश्वरो ब्रूते कालः पश्चागमिष्यति। ६
यस्मिन् न तोफतं भूयो न हिन्नोमात्मजस्य वा।
निम्नभूमिमिदं स्थानं कीर्त्तयिष्यन्ति मानवाः।
हत्याभूमिरिति त्वस्य नामधेयं भविष्यति॥
अत्र स्थाने यिहूदाया यिरूशालम्पुरस्य च। ७
मन्त्रणा कलसो यद्वत् शून्यीकारिष्यते मया॥
असिना वैरिणां साक्षात् जिघांसूनाञ्च प्राणिभिः।
तान् निपात्य शवांस्तेषां खेचराणां गरुत्मतां।
भूचराणां पशूनाञ्चाहं प्रदास्यामि भक्ष्यवत्॥
हीनां हास्यास्पदञ्चैव विधास्यामि पुरीमिमां। ८
यो व्रजेत् तत्र स क्षुब्धा तत्क्षतेभ्यो रसिष्यति॥
मांसं स्वपुत्त्रपुत्त्रीणां प्राशयिष्यामि तानहं। ९
तेषामेकः परस्यैव पललं भक्षयिष्यति॥
प्राबल्यादवरोधस्य व्याकुलत्वस्य तस्य च।
येन क्लेक्ष्यत्यरीणां तान् जिघांसूनाञ्च वाहिनी॥

ततः परं त्वया स्वसङ्गिपुरुषाणां प्रत्यक्षं तं कलसं भङ्क्ता तान् प्रतीदं १०
वाक्यं गदिष्यते, ११

भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः।
निर्म्मितः कुम्भकारस्य यथायं खण्ड्यते घटः॥
यः केनापि पुनर्व्वारं सन्धातुं नहि शक्यते।
इमां जातिं पुरीञ्चेमां खण्डयिष्याम्यहं तथा॥
प्रेतान् निखनितुं भूमौ स्थानाभावाच्च मानवाः।
मृतानां कुणपानत्र निखनिष्यन्ति तोफते॥

१२ परमेश इदं ब्रूते मया स्थानमिदं प्रति ।
तन्निवासिजनांश्चाधि तादृगेवाचरिष्यते ।
येनेयं प्रतिपाद्येत नगरी तोफतोपमा ॥
१३ यिरूशालमीयवेश्मानि यिहूदायाश्च भूभृतां ।
राजहर्म्याण्यमेध्यानि तोफताख्यस्थलं यथा ।
तद्वदेव भविष्यन्ति यतस्ते सर्व्ववेश्मनां ।
पृष्ठेष्वाकाशवाहिन्यै धूपदाहमकुर्व्वत ।
पेयांश्चेतरदेवेभ्य उपहारानुपाहरन् ॥
१४ अनन्तरं यिरिमियो यत्र स्थाने भविष्यद्वाक्यकथनार्थं परमेश्वरेण
प्रेषितोऽभूत् तस्मात् तोफतात् प्रत्यागत्य परमेश्वरीयमन्दिरस्य प्राङ्गणे
१५ तिष्ठन् सर्व्वजनान् जगाद, इस्रायेल ईश्वरः सेनाध्यक्षः परमेश्वर इदं
ब्रूते, पश्य मया नगर्य्या एतस्या वैपरीत्येन यदनिष्टमवादि, तत्सर्व्वं तां
तदधीनानि सर्व्वनगराणि च प्रापयिष्यामि, यतस्तदीयजना मम वा-
क्यानि श्रोतुम् अनिच्छवः स्वस्वग्रीवां कठोरीकृतवन्तः ॥

---

२० विंशतितमोऽध्यायः ।

१ यिरिमियस्य प्रहारः कारागारे बन्धनञ्च तत्कारणात् पशूहरस्य विपरीतं भवि-
ष्यद्वाक्यं ७ दुःखप्रतारणयो र्विषये यिरिमियस्य विलापः १४ महादुःखाद् उद्धार-
कारणाद् ईश्वरस्य प्रशंसा च ।

१ तदानीम् इम्मेरसुतः पश्हूर इति नाम्ना यो याजकः परमेश्वरीय-
मन्दिरेऽधिकृतोऽध्यक्ष आसीत् स यिरिमियस्य कथनकाले तानि भवि-
२ ष्यद्वचनान्यश्रौषीत् । स च पश्हूरस्तं भाविवक्तारं यिरिमियं ताडयित्वा
प्रोच्चतरेऽर्थतः परमेश्वरीयमन्दिरसमीपस्थे बिन्यामीनीयगोपुरे या
३ कारासीत् तत्र तं प्रवेश्य न्यरौत्सीत् । परेऽहनि पश्हूरेण कारातो
बहिरानीतः सन् यिरिमियस्तम् अवादीत् परमेश्वरस्तुभ्यं पश्हूर इति
(वर्द्धक इति) नाम न दत्त्वा मागोर-मिःसावीव् इति (समन्तात् त्रास-
४ हेतुरिति) नाम दत्तवान् । यतः परमेश्वर इदं वाक्यं ब्रूते,
पश्याहं त्वां विधास्यामि सर्व्वेषां त्रासहेतुकं ।
तव त्वद्बान्धवानाञ्च चक्षुर्भ्यां पश्यति त्वयि ।
ते पतिष्यन्ति शत्रूणाम् असिभि र्विनिपातिताः ॥

निखिलं यिहूदावंशं बाबिलीयमहीपतेः।
करे ऽहञ्चार्पयिष्यामि स तानादाय दासवत्।
बाबिलं नगरं नीत्वा कृपाणेन हनिष्यति॥
अस्याः पुर्य्या धनं कृत्स्नं सर्व्वञ्चोपार्ज्जितं फलं। ५
सर्व्वरत्नानि तस्याश्च वितरिष्याम्यहं तदा॥
यिहूदीयनरेन्द्राणां कोषेषु यच्च सञ्चितं।
अर्पयिष्यामि तत्सर्व्वं तेषां विद्वेषिणां करे।
ते च तल्लोप्त्रवद्धृत्वादाय नेष्यन्ति बाबिलं॥
त्वया पश्हूर सर्व्वैश्च त्वद्गृहस्य निवासिभिः। ६
दासीभूयापगन्तव्यं त्वं गमिष्यसि बाबिलं।
त्वं मरिष्यसि तत्रैव तत्र त्वं निखनिष्यसे॥
त्वं मृषाभाविवाक्यानि येषां साक्षादभाषथाः।
प्राप्स्यन्ति तां दशां तेऽपि सकलाः सुहृदस्तव॥
अनुनीयान्वनीयेऽहं त्वया हे परमेश्वर। ७
त्वं दृढं चोदयित्वा मां कृतवान् मे पराजयं।
अपहस्ये दिनं कृत्स्नं सर्वे ह्याक्षारयन्ति मां॥
यति वारं प्रभाषेऽहं तति वारं प्ररोदिमि। ८
दौरात्म्यमपकर्म्मेति चीत्कारमीरयामि च॥
मदर्थं परमेशस्य वाक्यं कृत्स्नदिनं यतः।
कारणं परिहासस्य परुषोक्तेश्च जायते॥
न पुनस्तं स्मरिष्यामि न कदाचन वा पुनः। ९
भाषिष्ये तस्य नाम्नेति वाक् तस्मादीरिता मया॥
तदानीं मम चित्ते तु तापो वह्नेरिवाभवत्।
ज्वलितस्य मदीयास्थ्नाम् अन्तरे संवृतस्य च।
तापं सोढुमचेष्टे तं कृतकार्य्यस्तु नाभवं॥
यस्माद् बहुमनुष्याणां परीवादं शृणोम्यहं। १०
त्रासहेतुं चतुर्दिक्षु युष्माभिः सूच्यतामिति।
सूचयिष्यत एतस्य दोषो ऽस्माभिरपीति च॥
जना मत्सन्धिताः सर्व्वे स्खलनं लक्षयन्ति मे।
अनुनीतः कथञ्चित् सो ऽस्माभि र्निर्जीयतां नरः।
योग्यं दत्त्वा फलं तस्मै वैरं निर्यात्यतामिति॥

११ मया सार्द्धं परेशस्तु वर्त्तते भीमवीरवत्।
ततो हेतोः स्खलिष्यन्त्यसिद्धार्था मद्विधीषवः॥
स्वचिन्तां निष्फलां दृष्ट्वा लज्जिष्यन्ते च ते भृशं।
नित्यं स्थास्यति सा लज्जा विस्मृतिं नैव यास्यति॥
१२ सेनाध्यक्ष परेश त्वं धार्म्मिकस्य परीक्षकः।
त्वं मर्म्मस्थानदर्शी च त्वञ्च चित्तनिरीक्षकः॥
तेषां वैरप्रतीकारं वीक्षिष्येऽहं त्वया कृतं।
यतः स्वीयविवादस्य भारस्त्वय्यर्पितो मया॥
१३ परमेश्वरमुद्दिश्य यूयं गीतं प्रगायत।
प्रशंसा परमेशस्य युष्माभिः परिकीर्त्त्यतां।
दुष्टानां मुष्टितस्तेन प्राणा दीनस्य रक्षिताः॥
१४ भूयात् स वासरः शप्तो यस्मिन् जन्म ममाभवत्।
दिनं तच्च निराशीष्कं यस्मिन् मां प्रासवत् प्रसूः॥
१५ जातस्ते पुत्त्रसन्तान इमां वार्त्तां प्रदाय च।
येन मे हर्षितस्तातः शप्तो भूयात् स मानवः॥
१६ अनुतापं विनोच्छिन्नाः परमेशेन याः पुरा।
तासामेव पुरीणां स पुरुषः सदृशो भवेत्।
स प्रातः शृणुयात् क्रुष्टं मध्याह्ने च भयध्वनिं॥
१७ यतस्तेनोदरस्थस्य मम प्राणा न नाशिताः।
मज्जनन्या जरायु र्न शवाधारः कृतो मम।
न वा गर्भाशयस्तस्या नित्यगर्भभृतः कृतः॥
१८ व्यसनश्रमभोगाय क्रियायुर्यापनाय च।
उदरान्मम निर्गत्यां किमासीद् वा प्रयोजनं॥

---

२१ एकविंशोऽध्यायः।

१ यिरिमियं प्रति सिद्दिकियस्य दूतप्रेरणं २ नगरावरोधोद्भवदुःखविषये यिरिमियस्य भविष्यद्वाक्यं ८ कल्दीयलोकानां हस्तेषु पौराणां समर्पणं ११ राजवंशान् प्रति यिरिमियस्यानुयोगश्च।

१ बाबीलीयराजो निबूखद्नित्सरोऽस्माभिः सह युध्यते, अतस्त्वम् अस्मत्कृते परमेश्वरं प्रसादयस्व, परमेश्वरश्चेत् कथञ्चनास्मान् प्रति स्वीयसर्व्वा-

स्वर्य्यक्रियानुयायिनम् आचारं कुर्य्यात् तर्ह्यसत्तस्तेनापगन्तव्यमिति वाचं १
गदितुं यदा मल्कियसुतः पश्हूरो मासेयसुतः सिफनियो याजकश्च
राज्ञा सिदिकियेन यिरिमियान्तिकं प्रहितौ तदा परमेश्वरादियं वाणी
यिरिमियं प्रति प्रादुरभूत्। यिरिमियस्तावब्रवीत्, युवां सिदिकियं २
वदतं,

इस्रायेलो य ईशः स इदं ब्रूते परेश्वरः। ४
ये युष्मान् अवरुन्धन्ति प्राचीरस्य बहिः स्थिताः॥
तैः कल्दीयजनैः सार्द्धं बाबिलीयन्टपेण च।
योद्धुं यान्यायुधास्त्राणि यूयं धरत पाणिभिः॥
तान्येव विपरीतानि कर्त्तुं मां पश्यतोद्यतं।
अस्याः पुर्य्याश्च मध्येऽहं संग्रहीष्यामि तान् जनान्॥
अहमेव करिष्यामि युष्माभिः सह विग्रहं। ५
सुविस्तीर्णेन हस्तेन बलिष्ठेन च बाहुना।
कोपेन रोषभावेन प्रचण्डेन च मन्युना॥
हनिष्यन्ते मयैतस्याः पुर्य्याः सर्व्वनिवासिनः। ६
मनुष्याः पशवश्चापि मार्य्या मंच्यन्ति तीव्रया॥
परमेशः पुन र्ब्रूते प्रदास्यामि ततः परं। ७
यिहूदाः सिदिकीयाख्यं न्टपं तस्य च सेवकान्।
तत्प्रजा मार्य्यसिच्छुद्भिः पुरेऽस्मिन्नवशेषितान्।
सर्व्वांश्चैव जनान् हस्ते बाबिलीयमहीपतेः।
निबूखद्नित्सराख्यस्य द्विषां तेषां करेषु च।
तेषां प्राणविनाशाय सचेष्टानां करेषु च॥
स हनिष्यति खड्गैस्तान् नानुकम्पिष्यते च तान्।
न विधास्यति कारुण्यं न कृपां वा करिष्यति॥
वद त्वञ्च प्रजा एता ब्रवीतीदं परेश्वरः। ८
युष्माकं चक्षुषोरग्रे पश्यत स्थापयाम्यहं।
जीवनस्य च पन्थानं पन्थानं मरणस्य च॥
नगर्य्या मध्य एतस्या यः करिष्यत्यवस्थितिं। ९
मारीखड्गक्षुधाभि र्हि मृत्युस्तस्य भविष्यति॥
बहि र्गत्वा तु कल्दीयान् युष्मदीयावरोधिनः।
यो जनः शरणं गच्छेत् स रक्षिष्यति जीवनं।

लोष्ट्रवच्च निजप्राणान् स जनः प्रतिलप्स्यते॥
१० यस्मात् परेश्वरो ब्रूत एतस्मिन् नगरे मया।
न भूत्यै किन्तु दुर्गत्यै स्वीयदृष्टि र्निवेशिता॥
बाबिलीयमहीपस्य हस्ते तच्चार्पयिष्यते।
तेन भूमिभृता तच्च वह्निदग्धं करिष्यते॥
११ यिहूदाराजगोष्ठ्यापि श्रूयतां वाक् परेशितुः॥
१२ परमेश इदं ब्रूते हे दायूदीयगोत्रजाः।
न्यायप्रणयनं यूयं संविधद्ध्वमतन्द्रितं।
पीडकस्य कराभ्याञ्च हृतस्वं परिरक्षत॥
न चेद् वः कर्म्मदुष्टत्वात् प्रपत्याग्निशिखा यथा।
युष्मान् धक्ष्यति कोपो मे यः केनापि न शम्यते॥
१३ परमेशः पुन र्ब्रूते हे निम्नस्थलवासिनि।
हे शैल समभूदर्शिन् पश्य त्वामभियाम्यहं॥
भाषध्वे यूयमस्मान् कः शक्नोत्याक्रमितुं जनः।
वासस्थानानि वास्माकम् अपरः कः प्रवेक्ष्यति॥
१४ परेशो वक्ति दास्यामि योग्यं वः कर्म्मणां फलं।
एतस्मिन् नगरारण्ये ज्वालयिष्यामि चानलं।
सोऽस्याः पुर्य्याश्चतुर्दिक्स्थं सर्व्वमेव ग्रसिष्यते॥

---

२२ द्वाविंशोऽध्यायः।

१ भर्त्सनमङ्गलप्रतिज्ञाभिरनुतापाय जनान् प्रति विनयः १० शल्लूमस्य भाविदण्डः १३ यिहोयाकीमस्य भाविदण्डः २० कनियस्य भाविदण्डश्च॥

१ परमेश्वर इदं वाक्यमब्रवीत् त्वं यिहूदाराजस्य राजपुरीं गत्वा तत्र
२ वाचमिमां भाषस्व। त्वं वद, हे दायूदीयसिंहासनासीन यिहूदाराज,
परमेश्वरस्य वाणी त्वया श्रूयतां। त्वया तव भृत्यैस्तव प्रजाभिश्च द्वारै-
३ रेतैः प्रविशद्भिः सर्व्वजनैरेवावधीयतां। परमेश्वर इत्थमाह,

न्यायो धर्म्मश्च युष्माभि र्विचारेण विधीयतां।
पीडकस्य कराभ्याञ्च हृतस्वो रक्ष्यतां जनः॥
विदेशीयेषु निर्नाथबालेषु विधवासु च।
युष्माभि र्निर्दयाचारो द्रोहो वा क्रियतां नहि।

दोषहीनस्य रक्तं वा स्थानेऽस्मिन् स्राव्यतां नहि॥
यूयं चेत् कुरुथाचारम् एतदाज्ञानुयायिनं। ४
दायूदो वंशजास्तर्हि नृपास्तदासनाश्रिताः।
रथारूढा हयारूढा भृत्यप्रजागणै र्वृताः।
एतद्राजगृहद्वारैः करिष्यन्ति गमागमौ॥
यदि त्वेतेषु वाक्येषु युष्माभि र्नावधीयते। ५
स्वनाम्ना शपथं कुर्व्वं ब्रवीतीदं परेश्वरः।
तदानीं राजधानीयम् उत्सन्नत्वं गमिष्यति॥
यिहूदाराजवेश्माधि ब्रवीतीदं परेश्वरः। ६
गिलियद् त्वं लिबानोनः कूटो वा प्रतिभासि मे॥
किन्तु प्रान्तरतुल्यं त्वां विधास्येऽहं न संशयः।
समानं नगरै र्वा तै र्यत्र केनापि नोष्यते॥
पुरुषान् सहितानस्त्रैः संस्करिष्यामि नाशकान्। ७
अहं त्वद्वैपरीत्येन प्रोच्छेत्स्यन्त्युत्तमानि ते।
त्वदीयैरसदारूणि विनिक्षेप्स्यन्ति चानले॥
अस्याः पुर्य्या उपान्तेन क्राम्यन्तो बहवो जनाः। ८
वक्ष्यन्तीतरजातीया एतां महापुरीं प्रति।
कुत ईदृशमाचारं परेशः कृतवानिति॥
तदा तेभ्योऽपरैस्तस्य कारणं कथयिष्यते। ९
स्वप्रभोः परमेशस्य नियमो ऽत्याजि तै र्जनैः।
प्रणम्येतरदेवानां सेवाकारि च तैरिति॥
मा मृतं प्रति युष्माभीरुद्यतां मा स शुच्यतां। १०
गतो यस्तु कृते तस्य क्रियतां तीव्ररोदनं।
यस्माज्जन्मस्थलं द्रष्टुं स न प्रत्यागमिष्यति॥

यतो यिहूदाराजस्य योशियस्य पुत्त्रो यः शल्लूम् स्वतातस्य योशि- ११
यस्य स्थाने राजत्वं प्राप्यैतस्मात् स्थानान्निरक्रमीत् तमधि परमेश्वर
इत्यमाह, स इदं स्थानं न प्रत्यागमिष्यति। परन्तु स यत् स्थानं १२
दासवन्नीतस्तत्रैव मरिष्यति देशमिमं स पुन र्न द्रक्ष्यति।

हा हा यस्त्वमधर्म्मेण निर्निमीषे स्वमन्दिरं। १३
अन्यायेनैव तत्पृष्ठे स्वकोष्ठानि करोषि च॥
विनामूल्यं स्वजातीयं जनं कारयसि श्रमं।

उचितं वेतनं तस्मै न ददासि कथञ्चन ॥
१४ यस्त्वं ब्रवीषि निर्मास्ये सुविशालं निकेतनं।
वायुसेवनयोग्यानि तस्य पृष्ठे गृहाणि च ॥
वातायनद्वयञ्चापि यस्त्वं तच्छितवानसि।
यस्त्वमेरसकाष्ठस्य पत्रै र्मण्डितवान् गृहं।
सिन्दूरलेपनं कृत्वा तच्च चित्रितवानसि ॥
१५ एरस्काष्ठे जिगीषातो राज्यं किं स्थास्यते तव।
तव यो जनकः किं सोऽशनं पानञ्च नाकरोत्।
न्यायं धर्म्मञ्च सोऽकार्षीत् तदा चासीच्छुभान्वितः ॥
१६ विचारं दुःखिदीनानां कुर्व्वन्नासीच्छुभान्वितः।
एतत् किं मदभिज्ञानं नास्तीत्याह परेश्वरः ॥
१७ किन्तु त्वद्दृष्टिचित्ताभ्यां न किञ्चिल्लक्ष्यतेऽपरं।
केवलं निजलाभस्ते निर्द्दोषरक्तपातनं।
पीडनाद्यपकारैश्च स्वाभिलाषस्य पूरणं ॥
१८ अतो हेतो र्यिहूदाया राजानं योशियसुतं यिहोयाकीममधि परमेश्वर
इत्थं भाषते।
हा भ्रात र्हा स्वसः प्रोच्य स न शोचिष्यते जनैः।
हा प्रभो हा महाश्रीमन्नित्थं तै र्न लपिष्यते ॥
१९ किन्तु तस्य खरस्येव प्रेतकृत्यं भविष्यति।
स यिरूशालमो द्वारात् कृष्टः प्रक्षेप्स्यते बहिः ॥
२० त्वं लिबानोनमारुह्य तीव्रं कुरुष्व रोदनं।
बाशनं देशमाश्रित्य प्रोच्चरावमुदीरय।
क्रन्दाबारीमि यस्मात् ते सकलाः कामिनो हताः ॥
२१ शान्तिकाले मयाभ्युक्ता न श्रोष्यामीत्यभाषथाः।
तवाबाल्यादियं रीति र्यद्रवं न शृणोषि मे ॥
२२ वायुना भक्षयिष्यन्ते रक्षकाः सकलास्तव।
दासत्वञ्चापयास्यन्ति सकलास्तव कामिनः ॥
तस्मिन्नेव च काले त्वं प्रतिभास्यसि लज्जिता।
स्वीयकृत्स्नकदाचाराद् विवर्णा च भविष्यसि ॥
२३ कृतवासा लिबानोनि कृतनीडोच्चशाखिषु।
व्याः कीदृक् करुणापात्रं तदानीं त्वं भविष्यसि।

महावेदनयाक्रान्ता प्रसवव्यथया यथा ॥
परमेश इदं ब्रूतेऽहं स्वामरतया शपे। २४
यिहूदाया असौ राजा यिहोयाकीम आत्मजः ॥
कनियो दक्षहस्ते मे मुद्रावत् सज्यते यदि।
तर्हि तस्मादपि स्थानात् स व्यपाकृष्यते मया ॥
त्वत्प्राणान्तचिकीर्षूणां हस्ते त्वञ्चार्पयिष्यसे। २५
येभ्यस्ते जायते त्रासस्तेषामेव नृणां करे ॥
बाबिलीयमहीपस्य निबूखद्नित्सरस्य च।
कल्दीयाख्यजनानाञ्च हस्ते मयार्पयिष्यसे ॥
त्वञ्च त्वया सपुत्री च तव माता युवामुभौ। २६
प्रक्षेप्स्येथे मयैतस्माद् देशाद् देशान्तरं प्रति।
नाभवद् यत्र वां जन्म तत्रैवासून् प्रहास्यथः ॥
तत्र प्रवासिनो यञ्च प्रत्यागन्तुं स्वचेतसा। २७
आकाङ्क्षन्ति स्वदेशस्तै र्न प्रत्यायास्यते पुनः ॥
कनियाख्यो नरोऽयं किं गर्हितं भग्नभाजनं। २८
स वा किं तादृशं पात्रं यत् कस्मैचिन्न रोचते ॥
कुतो हेतोः सवंशः स बलात्कारेण तोलितः।
प्रक्षिप्तः परदेशे च तेषामविदिते पुरा ॥
हे भू भू भूः परेशस्य वाक्यं त्वं श्रोतुमर्हसि ॥ २९
परमेश इदं ब्रूते लिखतायं नरोऽप्रजः। ३०
भविता हीनभाग्यस्च यावज्जीवमसाविति ॥
यतस्तद्वंशजः कोऽपि न भविष्यति भाग्यवान्।
दायूदीयासनासीनो यिहूदाराज्यभाक् पुनः ॥

---

२३ त्रयोविंशोऽध्यायः।

१ पालकानां विरुद्धं भविष्यद्वचनं ५ प्रजानां पालकं ख्रीष्टमधि भविष्यद्वचनं ९ असत्यभविष्यद्वादिनां विरुद्धं भविष्यद्वचनं ३३ तथ्यभविष्यद्वादिगणनिन्दकस्य विरुद्धं भविष्यद्वचनञ्च।

परमेश इदं ब्रूते धिक् धिक् तान् मेषपालकान्। १
ये मत्क्षेत्रे स्थितान् मेषान् छिन्दन्ति विकिरन्ति च ॥

२ अतस्त व्रजपाला ये पालयन्ति मम प्रजाः।
तानधीदमहं वच्मीस्रायेलः प्रभुरीश्वरः॥
मामकीनाविहन्दस्याद्वत्ता तत्त्वावधारणं।
स युष्माभि र्विकीर्णश्च निरस्तश्चाभवद् यतः॥
ततो वः कर्म्मणां दोषे प्रणिधाय मनो मया।
तत्फलं प्रापयिष्यध्व इत्थं ब्रूते परेश्वरः॥
३ मम मेषा मया यत्र निरस्ता अभवन् पुरा।
तेभ्यः सकलदेशेभ्यस्तच्छेषः सङ्ग्रहीष्यते॥
ते स्वीयचारणस्थानं समानीता मया पुनः।
प्रजावन्तो भविष्यन्ति वर्द्धिष्यन्ते च सङ्ख्यया॥
४ मयोत्पाद्य नियुक्तास्तांश्चारयिष्यन्ति पालकाः।
ते पुन र्न प्रभेष्यन्ति न वा प्राप्स्यन्ति साध्वसं।
न भविष्यन्त्यनुद्दिष्टा इत्यमाह परेश्वरः॥
५ कालः पश्य स आयातीत्थं ब्रूते परमेश्वरः।
यस्मिन्नुत्पादयिष्यामि दायूदे धर्म्मपल्लवं॥
राजा भूत्वा स राजत्वं कुर्व्वन् श्रीमान् भविष्यति।
देशे न्याय्यविचारं स धर्म्मञ्च संविधास्यते॥
६ तस्य राजत्वकाले च यिहूदास्त्राणमाप्स्यति।
इस्रायेलपि निःशङ्कं तदा वासं करिष्यति॥
येन नाम्ना च विख्यातः स महात्मा भविष्यति।
वक्ष्यते नामधेयं तद् 'अस्मद्धर्म्मः परेश्वरः'॥
७ तस्मात् परेश्वरो ब्रूत आयाति काल ईदृशः।
इस्रायेलीयवंशान् यो मिसर्देशात् समानयत्।
परमेशः स साक्षीति यदा न वक्ष्यते पुनः॥
८ इस्रायेलीयजातेस्तु वंशा उत्तरदेशतः।
मया यत्र विकीर्णाश्चाभूवंस्तत्सर्व्वदेशतः॥
येनोद्धृत्य समानीता निवसन्ति स्वभूमिषु।
परमेशः स साक्षीति तदानीं वक्ष्यते जनैः॥
९ भविष्यद्वक्तृनधि।
ममान्तःकरणं भग्नं मम सर्व्वास्थि कम्पते।
तुल्यो मत्तजनस्यास्मि सुराक्रान्तनरस्य वा।

सकाशात् परमेशस्य तत्पुण्योक्तेश्च शङ्कितः॥
यतः पूर्णोऽस्ति देशोऽयं मनुष्यैः पारदारिकैः। १०
अभिशापसकाशाद्धि शोकार्त्ता प्रतिभाति भूः॥
पशूनां चारणस्थानं सर्व्वं शुष्कञ्च प्रान्तरे।
सपापं धावनं तेषाम् असाधुश्चास्ति विक्रमः॥
याजको भाविवक्ता च निर्धर्म्माचारिणावुभौ। ११
प्रभु र्ब्रूते मया प्राप्यधर्म्मस्तेषां स्वधाम्न्यपि॥
अतो यद्वद् भवेद् ध्वान्ते स्खलनोत्पादकं स्थलं। १२
तेषां यद् वर्त्म गन्तव्यं तद् भविष्यति तत्समं।
तेषां तत्र निरस्तानां पतनं सम्भविष्यति॥
यस्मादकुशलं तेषां फलदानस्य वत्सरं।
ते मया प्रापयिष्यन्त इत्थं ब्रूते परेश्वरः॥
पुरा ये शोमिरोण्यासन् भविष्यद्वाक्यवादिनः। १३
तान् निरीक्ष्य मया तेषु बालिश्यमवधारितं॥
ते वाल्देवस्य नाम्नैव भाविवाक्यान्युदैरयन्।
अनयंश्च प्रजावृन्दं ममेस्रायेलमुत्पथं॥
यिरूशालमि ये सन्ति भविष्यद्वाक्यवादिनः। १४
तान् वीक्ष्य तेषु पश्यामि रोमाञ्चजनिकां क्रियां॥
गच्छन्ति परदारांस्ते निःसत्यमाचरन्ति च।
ते हस्तान् दुश्चरित्राणां सबलीकुर्व्वते तथा।
यथा ते न निवर्त्तेरन् स्वदौर्जन्यात् कथञ्चन॥
तत्साकल्ये ततो जातं मम साक्षात् सिदोमिव।
अमोरीयजनानाञ्च तुल्याः पौरजना इमे॥
भाविवक्तॄनधि ब्रूते तस्मात् सेनाधिपः प्रभुः। १५
पश्य किराततिक्तेन भोजयिष्यामि तानहं।
पाययिष्यामि तांश्चाहं पानीयं विषदूषितं॥
यिरूशालमि ये सन्ति भविष्यद्वाक्यवादिनः।
व्यभिचारो यतस्तेभ्यः प्रगतः कृत्स्नभूतलं॥
भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः। १६
व्याहरन्तीशवाक्यानि युष्मान् ये भाविवादिनः।
तेषां वाक्येषु युष्माभि र्मनो मा प्रणिधीयतां॥

यतः कुर्व्वन्ति ते युष्मान् अलीकाश्रयसंस्थितान्।
जल्पन्तः स्वहृदां स्वप्नं न त्वादेशात् परेशितुः॥
१७ यूयं सम्प्राप्स्यथ क्षेमम् इत्यमाह परेश्वरः।
वदन्ति स्पष्टमेतत् ते मां निराकुर्व्वतो जनान्॥
ये जनाः स्वीयचित्तानां जडतामाचरन्ति च।
तांस्ते वदन्ति दौर्गत्यं युष्मान् नैवाक्रमिष्यति॥
१८ किन्तु कः स्थितवांस्तेषां परमेशस्य संसदि।
को वा तं दृष्टवांस्तत्र तस्य च श्रुतवान् वचः।
कर्णौ निधाय वा केन गृहीता उक्तयो मम॥
१९ झञ्झावातः परेशस्यात्युग्रः पश्य प्रवर्त्तते।
सा झञ्झा घूर्णते मूर्द्ध्नि दुष्टानाञ्च स्फुटिष्यति॥
२० स्वमनस्कल्पना यावन्न कुर्य्यान्न च साधयेत्।
तावत् क्रोधः परेशस्य न निवर्त्तिष्यते पुनः।
भाविकालेऽत्र युष्माकं स्पष्टबोधो जनिष्यते॥
२१ अधावन् भाविवक्तार एते न प्रेषिता मया।
अभाषन्तैशवाक्यञ्च मया नालपिता अपि॥
२२ मम मन्त्रिसभायान्तूपास्थास्यंस्ते जना यदि।
तर्हि मामकवाक्यान्यश्रावयिष्यन् मम प्रजाः।
प्रत्यानेष्यन् कुमार्गाच्च ताः क्रियाणाञ्च दौष्ठवात्॥
२३ पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः।
अदूरस्य किमीशोऽहं स्यां दूरस्य त्वनीश्वरः॥
२४ कश्चित् किं निभृते स्थाने भवेत् तादृक् तिरोहितः।
यथाहं तं न पश्येयम् इत्यमाह परेश्वरः।
किं न स्वर्गं भुवञ्चाहं व्याप्नोमीति प्रभो र्वचः॥
२५ स्वप्नं सन्दृष्टवानस्मि स्वप्नं सन्दृष्टवानहं।
इत्थं मृषैशवाक्यानि मम नाम्ना वदन्ति ये।
भविष्यद्वादिनां तेषां पर्य्यश्रौषमहं वचः॥
२६ कतिकालमिदं स्थायि मृषैशोक्ती र्ब्रुवन्ति ये।
स्वमनस्कल्पितं व्याजं जल्पन्तो भाविवादिनः।
किमन्तःकरणे तेषाम् अयमास्ते मनोरथः॥
२७ वाल्देवार्थे यथा तेषां तातै र्मन्नाम विस्मृतं।

स्वस्वप्नानां कथामेते कथयन्तः परस्परं।
तत्स्वप्नार्थे प्रजाभि र्मे तथा मन्नाम विस्मृतं।
कुर्य्युरेनमभिप्रायं किं स्वान्ते कल्पयन्ति ते॥
स्वप्नो यस्यास्ति स स्वप्नं भाविवादी प्रभाषतां। २८
मम वाक्यन्तु यस्यास्ति स मद्वाक्यं वदेदृतं।
कः शस्यबुसयोः सङ्ग इत्यमाह परेश्वरः॥
किं न वह्निसमा मे वाग् इत्यमाह परेश्वरः। २९
किं न सा मुद्गरेणैव तुल्या शैलविभेदिना॥
परमेशस्ततो ब्रूते पश्य ये भाविवादिनः। ३०
मिथो मुष्णन्ति मद्वाक्यं निग्रहिष्यामि तानहं॥
पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः। ३१
पश्याहं प्रतिकूलोऽस्मि तेषाञ्च भाविवादिनां।
प्रयुज्य स्वीयजिह्वा यैरित्यमाहेति गद्यते॥
पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः। ३२
पश्याहं प्रतिकूलोऽस्मि तेषाञ्च भाविवादिनां॥
ये पश्यन्ति मृषा स्वप्नान् जनेभ्यः कथयन्ति च।
स्वालीकोक्तिप्रपञ्चैस्ते भ्रान्ताः कुर्व्वन्ति मत्प्रजाः॥
न तान् प्रेषितवानस्मि न वाज्ञापितवानहं।
ते जनान् नोपकुर्व्वन्तीमानित्याह परेश्वरः॥
प्रजया भाविवक्त्रा वा केनचिद् याजकेन वा। ३३
परमेशस्य को भार एतत् त्वं यदि पृच्छ्यसे॥
तर्हि तान् प्रति भाषस्व को भारस्तन्निशम्यतां।
अहं युष्मान् विहास्यामीत्थं ब्रूते परमेश्वरः॥
भारः परेश्वरस्येति वाग् येन भाविवादिना। ३४
येन वा याजकेनापि यया वा प्रजयोच्यते।
दण्डं तस्मै प्रदास्यामि तस्य वंशाय चोचितं॥
प्रभुः किमुत्तरं प्रादात् किमवादीत् परेश्वरः। ३५
इत्थं मित्राय भ्रात्रे वा व एकैकेन कथ्यतां॥
भारः परेश्वरस्येति वाक्यं मोच्चार्य्यतां पुनः। ३६
न चेद् यद् यस्य वाक्यं स तस्य भारो भविष्यति॥
यस्मादस्माकमीशो यः सेनाध्यक्षः परेश्वरः।

तस्य जीविन ईशस्योक्तीनां यूयं विकारिणः॥
३७ प्रभुः किमुत्तरं प्रादात् किमवादीत् परेश्वरः।
इत्थं युष्माकमेकैको भविष्यद्वादिनं वदेत्॥
३८ भारः परेश्वरस्येति यूयं ब्रूथ पुन र्यदि।
तर्हि तत्कारणादित्थं भाषते परमेश्वरः॥
भारः परेश्वरस्येति युष्माभि र्नोच्यतामिति।
प्रेषयित्वा मया दूतान् यूयमाज्ञापिता अपि।
भारः परेश्वरस्येत्यभाषध्वं वचनं यतः॥
३९ ततो हेतोरहं पश्य युष्मानुत्तोल्य भारवत्।
सहितानया पुर्य्या पितृभ्यो वः प्रदत्तया।
युष्मान् निपातयिष्यामि सुदूरं मम दृष्टितः॥
४० आक्रान्तांश्च विधास्यामि युष्मान् शाश्वतनिन्दया।
कलङ्केन च नित्येन विस्मृतिं यो न यास्यति॥

---

२४ चतुर्विंशोऽध्यायः।

१ उत्तमाधमोडुम्बरफलानां दृष्टान्तः ४ ये लोका बाबिलतो यिहूदां परावृत्यागमिष्यन्ति तेषामुत्तमोडुम्बरफलरूपत्वं ८ सिदिकियप्रभृतयो येऽवशिष्टलोका देशान्तरे विकीर्णा भविष्यन्ति तेषामधमोडुम्बरफलरूपत्वञ्च।

१ बाबिलीयराजेन निबूखद्नित्सरेण यिहूदीयराजे यिहोयाकीमसुते
यिहोयाखीने यिहूदायाः प्रमुख्यजनेषु सूत्रधरेषु लोहकारेषु च दासवद्
यिरूशालमो बहिष्कृत्य बाबिलं नीतेषु परमेश्वरो मह्यं दर्शनं दत्तवान्
ततोऽहं परमेश्वरीयमन्दिरस्य सम्मुखे निवेदिते उडुम्बरफलपूर्णे द्वे भाजने
२ दृष्टवान्। तयोरेकस्य पात्रस्योडुम्बरफलानि प्रथमपक्वोडुम्बरफलानीवा-
तीवोत्कृष्टानि द्वितीयस्य तु पात्रस्य फलान्यतीवापकृष्टान्यपकर्षादखाद्या-
३ न्येव चासन्। ततः परं परमेश्वरो मामवादीत्, हे यिरिमिय, त्वया किं
दृश्यते? मया चोक्तम् उडुम्बरफलानि दृश्यन्ते, तत्र चोत्कृष्टफलान्यतीवो-
त्कृष्टानि अपकृष्टानि तु फलान्यतीवापकृष्टान्यपकर्षादखाद्यानि च सन्ति।
४ तदानीं परमेश्वरस्येदं वाक्यं मां प्रति प्रादुरभूत्,
५ इस्रायेलो य ईशः स इत्थं ब्रूते परेश्वरः।
उडुम्बरफलानीवोत्तमानीमानि तान् जनान्।

यिहूदीयान् निरीक्षिष्ये तेषां क्षेमाय ये मया ।
प्रहिता दासवत् स्थानाद् अस्मात् कल्दीयनीवृतं ॥
क्षेमायैव मया तेषु दृष्टि र्निवेशयिष्यते । ६
पुनर्व्वारमिमं देशं समानेष्यामि तानहं ॥
अहत्वोन्मूलनं तेषां करिष्यामि च वर्द्धनं ।
नैव तान् पातयित्वा च रोपयिष्यामि निश्चलं ॥
परमेशोऽहमस्मीति मदभिज्ञानभाजनं । ७
चित्तं तेभ्यश्च दास्यामि ते भविष्यन्ति मे प्रजाः ॥
तथा तेषां मनुष्याणां भविष्याम्यहमीश्वरः ।
यस्मात् स्वकृत्स्नचित्तैस्ते प्रत्यायास्यन्ति मां प्रति ॥
उडुम्बरफलानीवात्यपकृष्टानि तानि तु । ८
अपकर्षादखाद्यानि (ब्रवीतीदं परेश्वरः) ।
अहं तं सिदिखीयाख्यं यिहूदाया महीपतिं ।
तस्य मुख्यमनुष्यांश्च यिरूशालम्निवासिनां ।
शेषांश्च मानवान् सर्व्वान् ये शिष्यन्तेऽत्र नीवृति ।
वसन्तो वा मिसर्देशे तानुत्स्रक्ष्यामि सर्व्वथा ॥
तानहं सर्व्वराष्ट्रेषु वेपनायाशुभाय च । ९
यत्र वा निरसिष्यामि तत्रोत्स्रक्ष्यामि सर्व्वतः ।
निन्दायै वाच्यतायै च सीत्काराय शपाय च ॥
तेषु तेषाञ्च तातेषु मया या भूमिरर्पिता । १०
तस्या मध्यत उच्छेदस्तेषां यावन्न सेत्स्यति ।
तावत् खड्गक्षुधामारीः प्रहास्यामि च तान् प्रति ॥

---

२५ पञ्चविंशोऽध्यायः ।

१ लोकानां दोषानधि यिरिमियस्य भविष्यद्वाक्यं ८ तत्कारणात् सप्ततिवत्सरान् यावत् तेषां भाविदण्डः १२ तेषां शत्रूणां बाबिलीयलोकानां भाविदण्डः १५ बहुदेशीयलोकेभ्यः पानार्थं क्रोधरूपकंसप्रदानं तद्विषये यिरिमियस्य भविष्यद्वाक्यं ३४ मेषपालकानां भाविविनाशश्च ।

यिहूदाया राज्ञो योशियसुतस्य यिहोयाकीमो राजत्वस्य चतुर्थे १
वत्सरेऽर्थतो बाबिलीयराजस्य निबूखद्नित्सरस्य प्रथमवत्सरे कृत्स्नं

१ यिहूदीयप्रजागणमधि यिरिमियं प्रति वाक्यमिदं प्रादुरभूत्। स च
भविष्यद्वक्ता यिरिमियः कृत्स्नं यिहूदीयप्रजागणमधि यिरूशालम्निवा-
२ सिनः सर्व्वजनांश्चाधि तद् व्याहर्षीत्। तद्यथा, यिहूदीयराजस्यामोन-
सुतस्य योशियस्य राजत्वस्य त्रयोदशं वत्सरमारभ्याद्य यावत् त्रयो-
विंशतिवत्सरानेव परमेश्वरस्य वाक्यं मां प्रति प्रादुर्भवति मया चात-
४ न्द्रिणा भाषित्वा युष्मभ्यं कथ्यते युष्माभिस्तु तत्रावधानं न क्रियते। परमे-
श्वरेणातन्द्रिणा युष्मान् प्रति स्वसेवकेषु सकलभविष्यद्वक्तृषु प्रहितेषु यु-
५ ष्माभिरवधानं न क्रियते श्रवणाय श्रोत्रञ्च न निवेश्यते। तेनोक्तं यथा,

प्रत्यावर्त्तितुमेकैको यूयं स्वीयकुमार्गतः।
स्वक्रियाणाञ्च दुष्टत्वात् प्रत्यावर्त्तितुमर्हथ ॥
तेन शाश्वतभोगार्थं यां भूमिं परमेश्वरः।
युष्मभ्यं वः पितृभ्यश्च दत्तवांस्तत्र वत्स्यथ ॥
६ यूयञ्चेतरदेवानां सेवायै भजनाय च।
मानुगच्छत तान् मा वा क्रियाभिः स्वीयहस्तयोः।
मां क्रोधयत तेनाहं न करिष्यामि वः क्षतिं ॥
७ यूयन्तु मद्वचोऽश्रुत्वा (वक्तीदं परमेश्वरः)।
क्रुद्धं स्वक्षतयेऽकार्ष्ट मां क्रियाभिः स्वहस्तयोः ॥
८ अतो हेतोरिदं ब्रूते सेनाध्यक्षः परेश्वरः।
मम वाक्येषु युष्माभि र्नावधानं कृतं यतः ॥
९ पश्य तस्मादहं दूतैर्वंशान् उत्तरवासिनः।
सकलान् सङ्ग्रहीष्यामि मामकीनञ्च सेवकं।
बाबिलीयमहीपालं निबूखद्नित्सरं तथा ॥
आनेष्यामि च तानस्य देशस्य तन्निवासिनां।
तच्चतुर्दिक्स्थवंशानां सर्व्वेषाञ्च विरुद्धतः ॥
ध्वंसे तान् विनियोक्ष्यामि विधास्ये विस्मयस्य च।
धिक्कारस्य च लक्ष्यं तान् नित्योच्छेदस्य च स्थलं ॥
१० आमोदहर्षयोः शब्दं शब्दञ्च वरकन्ययोः।
पेषणीजातशब्दञ्च प्रदीपस्य प्रभां तथा।
समुच्छेत्स्याम्यहं तेषां जनानां मध्यतस्तदा ॥
११ भविता कृत्स्नदेशोऽयं ध्वंसविस्मययोः स्थलं।
सप्ततिवत्सरान् यावद् अत्रत्याः सर्व्वजातयः।

बाबिलीयनरेन्द्रस्य सम्भविष्यन्ति किङ्कराः॥
तेषु सप्ततिवर्षेषु सम्पूर्णत्वं गतेष्वहं। १२
बाबिलीयनरेन्द्राय तत्रत्यायै च जातये।
कल्दीयानाञ्च देशाय तेषां दुष्कर्म्मणः फलं।
प्रदास्यामि यथायोग्यम् इयं ब्रूते परेश्वरः।
तं देशञ्च विधास्यामि नित्यस्थायिमरुस्थलं॥
अहं तत्प्रातिकूल्येन यानि वाक्यानि चोक्तवान्। १३
सर्व्वेष्वितरवंशेषु यिर्मियेण प्रभाष्य च।
यावन्ति भाविवाक्यानि लिखितान्यत्र पुस्तके॥
प्रापयिष्यामि तं देशं तानि सर्व्ववचांस्यहं॥
यस्माद् विक्रमिणो वंशा महान्तश्च महीभृतः। १४
दासत्वं कारयिष्यन्ति तद्देशीयजनानपि॥
इत्थं तेषां यथाचारो यथा कर्म्म च हस्तयोः।
तथा निर्यातयिष्यामि तेभ्यो दत्त्वोचितं फलं॥

यत इस्रायेलः प्रभुः परमेश्वरो मामिदं वाक्यमवादीत् त्वं रोषरूप- १५
मद्यपूर्णम् इमं कंसं मम करादादाय याः प्रत्यहं त्वां प्रहिणोमि ताः सर्व्वा
जातीस्तत्र पायय। तेन ते पीत्वा तेषां मध्यं मया प्रहितस्यासेः सका- १६
शाद् विचलिष्यन्त्युन्मदिष्यन्ति च। अतोऽहं परमेश्वरस्य करात् तं कंस- १७
मादाय स याः प्रति मां प्राहिणोत् ताः सर्व्वा जातीरपाययं। अर्थतो १८
यिरूशालमं यिहूदायाः सर्व्वनगराणि च तस्या राज्ञः प्रमुख्यनरांश्चापा-
ययं, ध्वंसाय विस्मयाय सीत्काराय शापास्पदाय च यथाद्य दृश्यते तथा
तेषां संस्थापनं येन भवेत्। अपरञ्च मिस्रीयराजं फिरौणं तस्य भृत्यान् १९
प्रमुख्यनरान् सर्व्वप्रजाश्च, सर्व्वान् सङ्करजातीयजनान् सर्व्वान् ऊषदे- २०
शस्य राज्ञः सर्व्वान् पिलेष्टीयदेशस्य राज्ञोऽर्थतोऽस्किलोनम् अस्साम् २१
इक्रोणम् अश्दोदस्य शेषञ्च, इदोमं मोयावम् अम्मोनवंशांश्च, सर्व्वान् २२
सोरस्य राज्ञः सर्व्वान् सीदोनस्य राज्ञः सागरपारस्थद्वीपस्य च राज्ञः,
दिदानं तेमां बूषं छिन्नश्मश्रूकोणान् सर्व्वजनांश्च, सर्व्वान् आरव- २३
देशस्य राज्ञो मरुनिवासिसङ्करजातीयानां सर्व्वान् राज्ञश्च, सर्व्वान् २४
सिम्रिदेशस्य राज्ञः सर्व्वान् एलमदेशस्य राज्ञः सर्व्वान् मादीयदेशस्य
राज्ञश्च, निकटवर्त्तिनो दूरवर्त्तिनो वा निर्विशेषान् सर्व्वान् उत्तर- २५
देशानां राज्ञश्च भूमण्डले स्थितानि पृथिव्याः सर्व्वराज्यानि चापाययं,

२६ शेशकराजश्च तेषां पश्चात् पास्यति। त्वञ्च तान् वद, इस्रायेल ईश्वरः सेनानाम् अधिपतिः परमेश्वरः इदं ब्रवीति,

२७ यूयं पिवत मत्ताश्च भूत्वा वमत कुत्सितं।
युष्मन्मध्यं मया यश्च कृपाणः प्रेषयिष्यते।
पतित्वा तत्पुरो यूयं नैवोत्तिष्ठत कर्हिचित्॥

२८ ते च यदि पानाय तव हस्तात् तं कंसं ग्रहीतुम् अनिच्छां प्रकाशयरेस्तर्हि त्वं तान् वद,

२९ सेनाध्यक्षः प्रभुर्ब्रूते यूयं पास्यथ निश्चितं॥
यस्मात् पश्यत मे नाम यस्या उपरि कीर्त्तितं।
तस्याः पुर्य्या मयारब्ध प्रथमं क्रियते क्षतिः।
किं स्यातादण्डिता यूयं नादण्डिता भविष्यथ॥
पश्चाहं प्रातिकूल्येन सर्व्वेषां भूनिवासिनां।
आक्रास्याम्यसिमित्याह सेनाध्यक्षः परेश्वरः॥

३० त्वञ्च तानुद्दिश्य सर्व्वाण्येतानि भविष्यद्वाक्यानि भाषमाणो तान् वद,
करिष्यत्युन्नतस्थाने गर्जनं परमेश्वरः।
स्वीयपुण्यनिवासाच्च स्वनादं श्रावयिष्यति।
तिष्ठन् स्वालयपार्श्वे स चेरयिष्यति गर्जनं॥
याद्दशं कुर्व्वते नादं द्राक्षामर्द्दनकारिणः।
स पृथ्वीवासिनः सर्व्वान् ताद्दशं श्रावयिष्यति॥

३१ पृथिवीप्रान्तपर्य्यन्तं महाशब्दो व्यशिष्यते।
विवादो जातिभिः सार्द्धं प्रभोर्यस्माद् भविष्यति॥
विचारं सकलानाञ्च प्राणिनां स विधास्यति।
स दास्यत्यसये दुष्टान् इत्थं ब्रूते परेश्वरः॥

३२ भाषते भारतीमेनां सेनाध्यक्षः परेश्वरः।
वीक्षध्वं जातितो जातिं विपत्तिः प्रगमिष्यति।
महावात्या च मेदिन्याः प्रान्तेभ्यः प्रपतिष्यति॥

३३ भूमण्डलस्य चाप्रान्तात् प्रान्तं यावद्धि तद्दिने।
शयिष्यन्ते परेशेन घातिता नरविग्रहाः॥
अशोचिता अनादत्ता अप्राप्तोत्तरसत्क्रियाः।
भूमिपृष्ठे विकीर्णाश्च ते भविष्यन्ति सारवत्॥

३४ हे मेषपालका यूयं हाहाकारं विधत्त हि।

लुठन्तः क्रन्दत प्रोच्चैर्यूयं मेषाग्रगामिनः॥
बधार्थं दिनसङ्ख्या वो यस्मात् सम्पूर्णतां गता।
विकीर्णाः पतितव्यञ्च युष्माभी रम्यपात्रवत्॥
हीनाश्रया भविष्यन्ति तदानीं मेषपालकाः। ३५
हीनप्रधावनोपाया मेषाणाम् अग्रगामिनः॥
श्रोष्यते मेषपालानां क्रन्दनस्य रवस्तदा। ३६
श्रोष्यते चार्त्तनादोऽपि प्रोच्चो मेषाग्रगामिनां।
तेषां मेषप्रचारस्य परमेशेन नाशनात्॥
शान्तिवासा विनङ्क्ष्यन्ति प्रभोः कोपानलेन च॥ ३७
स निजं त्यक्ष्यति स्थानं केशरी गह्वरं यथा। ३८
यतस्तेषां नृणां देशः समुच्छिन्नो भविष्यति।
नाशकस्यानलोत्तापात् तत्कोपाग्नेश्च दीपनात्॥

---

२६ षड्विंशोऽध्यायः।

१ यिरूशालममधि यिरिमियस्य भविष्यद्वाक्यं ७ तत्कारणाद् याजकैर्धृतस्य तस्योत्तरदानं १६ अधिपतिभिर्मीखायस्योरीयस्य चोदाहरणकथनं यिरिमियस्य रक्षणञ्च।

यिहूदादेशीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वारम्भ- १
काले परमेश्वरस्येदं वाक्यं प्रादुरभूत्, यथा, परमेश्वरो ब्रूते, भजनार्थं
परमेश्वरीयमन्दिरम् आगतान् यिहूदायाः सर्व्वनगरवासिनो यानि २
वाक्यानि ममादेशात् त्वया वक्तव्यानि त्वं परमेश्वरीयमन्दिरस्य प्राङ्गणे
तिष्ठन् तानि सर्व्वाणि वाक्यानि तान् वद तत्रैकमपि वाक्यं मा ह्रासय।
स्यात् ते तत्रावधाय निजकुमार्गात् प्रत्यावर्त्तिष्यन्ते तथा सति तेषां ३
क्रियादोषाद् यदमङ्गलं तान् प्रापयितुमचिन्तयं ततः क्षान्तो भविष्यामि।
अतस्त्वं तान वद, परमेश्वर इत्थं ब्रूते, युष्मत्सम्मुखे मया या व्यवस्था ४
स्थापिता तदादिष्टमाचरितुं, विशेषतो मयातन्द्रिणा युष्मान् प्रति प्रहि- ५
तानां मद्दासानां येषां भविष्यद्वादिनां वाक्येषु यूयमवधानं न कुरुथ
तेषां वाक्येष्ववधातुं यदि युष्माभिर्मनो न निवेश्यते, तर्ह्यहमिदं मन्दिरं ६
शीलोहस्य तुल्यम् इदञ्च नगरं भूमण्डलवासिनीनां सर्व्वजातीनां शापा-
स्पदं करिष्यामि।

७ यिरिमियो यदा परमेश्वरस्य मन्दिरे वाक्यान्येतान्यवदत् तदा
८ याजका भाविवक्तारः सर्व्वे जनाश्च तान्यश्रौषुः। अतः परमेश्वरस्यादे-
शात् सर्व्वान् जनान् प्रति यद्यद् वक्तव्यं यिरिमियेण तत्कथने समापिते
ते याजका भाविवक्तारः सर्व्वे जनाश्च तं धृत्वा कथितवन्तस्त्वमवश्यं
९ हन्तव्योऽसि। मन्दिरमिदं शीलोहस्य तुल्यं भविष्यति नगरञ्चेदमुच्छिन्नं
निवासिहीनञ्च भविष्यतीति भाविवाक्यं त्वं परमेश्वरस्य नाम्ना कुतः
कथितवान्? इत्युक्ता सर्व्वे जनाः परमेश्वरस्य मन्दिरे यिरिमियस्य प्रा-
१० तिकूल्येन जनतामकार्षुः। तां कथां श्रुत्वा यिहूदादेशस्याधिपतयो राज-
प्रासादात् परमेश्वरस्य मन्दिरं गत्वा नूतनस्य परमेश्वरीयद्वारस्य प्रवेश-
११ स्थान उपविविशुः। तदानीं याजका भाविवक्तारश्च तान् अधिपतीन्
सर्व्वजनांश्च जगदुः, अस्य नरस्य प्राणदण्डार्थको विचारः कर्त्तव्यः, यतो-
ऽयम् एतस्य नगरस्य प्रतिकूलं भाविवाक्यं कथितवान् तद् यूयं स्वकर्णैः
१२ श्रुतवन्तः। तदानीं यिरिमियस्तान् सर्व्वान् अधिपतीन् सर्व्वजनांश्चा-
वादीत्, यूयं यानि वाक्यानि श्रुतवन्तस्तानि सर्व्वाण्येतन्मन्दिरस्यैतन्नग-
१३ रस्य च प्रातिकूल्येन भाविवाण्या प्रचारयितुं परमेश्वरेणाहं प्रेषितः।
अतोऽधुना यूयं स्वमार्गान् स्वक्रियाश्च शोधयत युष्मत्प्रभोः परमेश्वरस्य
रवे चावधानं कुरुध्वं तेन परमेश्वरो युष्मद्वैपरीत्येन यद् अमङ्गलवाक्यं
१४ कथितवांस्ततः क्षान्तो भविष्यति। अहन्तु पश्यत युष्माकं हस्तगतः,
१५ युष्मभ्यं यद्यद् भद्रं यथार्थञ्च प्रतिभाति मामधि तदेव कुरुध्वं। केवल-
मिदं युष्माभिर्ज्ञातव्यं, यूयं चेन्मां हन्यात तर्हि युष्मास्वस्मिन् नगरे तन्नि-
वासिषु च निर्दोषरक्तपातापराधम् अर्पयिष्यथ, यतो युष्मत्कर्णगोचरे
सर्व्वाण्येतानि वाक्यानि गदितुमहं परमेश्वरेण युष्मान् प्रति प्रहित
इति सत्यं।

१६ ततोऽधिपतयः सर्व्वे जनाश्च याजकान् भाविवक्तॄंश्च जगदुः, अस्य
नरस्य प्राणदण्डार्थको विचारो न कर्त्तव्यः, यतोऽस्मत्प्रभोः परमेश्वरस्य
१७ नाम्ना सोऽस्मान् प्रति भाषितवान्। अधिकन्तु देशस्य प्राचीनानां
१८ कतिपयपुरुषा उत्थाय प्रजानां कृत्स्नां जनतां जगदुः, यिहूदादेशीय-
राजस्य हिष्कियस्य काले मोरेष्टीयो मीखायो भाविवाणीं भाषमाणो
यिहूदायाः सर्व्वजनान् अवादीत्, यथा,

भाषते भारतीमेनां सेनाध्यक्षः परेश्वरः।
यथा क्षेत्रं तथा सीयोन् हलकृष्टं भविष्यति।

नगरी च यिरूशालम् भविष्यत्यस्मराश्रयः।
मन्दिरस्य गिरिश्चापि भविष्यत्युच्चकाननं॥

यिहूदाया राजा हिष्किय: तत्स्वयिहूदावंशो वा किं तम् अवधीत्? स १९
(राजा) किं न परमेश्वराद् अभैषीत् परमेश्वरञ्च प्रासीषदत्? तस्मात्
परमेश्वरस्तेषां विरुद्धं यद् अमङ्गलम् उक्तवान् ततः क्षान्तोऽभवत्। वयन्तु
स्वप्राणानां महाविपदावहां क्रियां कुर्म्महे।

अधिकन्तु परमेश्वरस्य नाम्ना भाविवाक्यवाद्यन्य एको नर आसीत् २०
किर्यत्-यियारीमीयश्मियाहसुत ऊरिय इति तस्य नाम। यिरिमि-
यस्य सर्व्ववाक्यानीव स एतन्नगरमेतद्देशञ्चाधि भाविवाक्यान्यकथयत्।
राज्ञा यिहोयाकीमेन तस्य सर्व्ववीरैः सर्व्वैश्चाधिपतिभिस्तस्योरियस्य २१
वाक्येषु श्रुतेषु राजा तं हन्तुं चेष्टितवान्। तन्निशम्य स ऊरियो भीत्वा २२
पलाय्य मिसरं जगाम। ततो राजा यिहोयाकीमः कतिपयजनान्
मिसरं प्रेषितवान् अर्थतोऽक्बोरसुतम् इल्नाथनं तस्य सङ्गिनश्च जनान्
मिसरं प्रहितवान्। ते चोरियं मिसरदेशाद् वहिष्कृत्य राज्ञो यिहो- २३
याकीमस्य समीपम् आनिन्युः। स च तमसिना घातयामास तस्य
शवञ्चेतरजनानां श्मशाने निक्षेपयामास। परन्तु यिरिमियो यथा २४
बधार्थं लोकानां करेषु समर्पितो न भवेत् तदर्थं शाफनस्य पुत्रोऽही-
कामस्तस्य सहायो बभूव।

---

२७ सप्तविंशोऽध्यायः।

१ युगानां दृष्टान्तेन नानादेशीयराजानां दासत्वसूचनं तदङ्गीकरणाय च यिरि-
मियस्य परामर्शः १२ सिदिकियराजं प्रति परामर्शः १६ याजकान् प्रति तद्व-
द्भविष्यद्वाक्यं १९ मन्दिरस्यावशिष्टानि धातुपात्राणि बाबिलम् अपनेतव्यानीति
भाविवाक्यञ्च।

यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वारम्भकाले १
परमेश्वरस्येदं वाक्यं यिरिमियं प्रति प्रादुरभूत्। परमेश्वरो मामि- २
त्यमब्रवीत्। त्वं योक्त्राणि युगानि च निर्म्माय स्वग्रीवायां धत्स्व। ये च ३
राजदूता यिरूशालमं यिहूदीयराजस्य सिदिक्रियस्य समीपम् आ-
गतास्तैर्दूतैरिदोमीयराजस्य मोयाबीयराजस्याम्मोनवंशीयराजस्य सो-
रीयराजस्य सीदोनीयराजस्य च सन्निधिं तानि प्रेषय। तान् दूतांश्च ४
स्वस्वामिभ्यो निवेदनीयामिमां कथामादिश, यथा, इस्रायेलः प्रभुः

५ सेनाध्यक्षः परमेश्वरो ब्रूते, यूयं स्वस्वामिन इत्थं वदत। अहमेव स्वीय-
महाशक्त्या स्वप्रसारितबाहुना च पृथिवीं मनुष्यान् भूतलस्थपशूंश्च सृ-
६ ष्टवान् यस्य भद्रं मन्ये तस्मै दत्तवान्। अधुना त्वहं सर्व्वान् इमान् देशान्
स्वदासस्य बाबिलीयराजस्य निबूखद्नित्सरस्य करे समर्पितवान् तस्यैव-
७ नार्थं वन्यपशूनपि तस्मै दत्तवान्। अतस्तदीयदेशस्यापि कालो यावन्नो-
पस्थास्यते तावत्सर्व्वा जातयस्तं तस्य पुत्त्रं पौत्त्रञ्च सेविष्यन्ते, पश्चाद्
बहुसङ्ख्यकजातयो महान्तो राजानश्च तेन दास्यकर्म्म कारयिष्यन्ति।
८ या तु जातिर्यच्च राज्यं तं बाबिलीयराजं निबूखद्नित्सरं न सेविष्यते
तस्य च बाबिलीयराजस्य युगं स्वग्रीवां न प्रवेशयिष्यति तस्या जाते-
स्तत्करेण संहारपर्य्यन्तमहम् असिदुर्भिक्षमारीभिस्तस्यै समुचितं फलं
९ प्रदास्यामीति परमेश्वरो ब्रूते। अतो यूयं बाबिलीयराजस्य दासा न
भविष्यथेति वाक्यं ये वदन्ति युष्माकं तेषां भाविवादिनां मन्त्रवेत्तॄणां
स्वप्नदर्शिनां गणकानां दैवज्ञानाञ्च वाक्येषु युष्माभिर्मावधीयतां यतो
१० यूयं स्वदेशाद् दूरीकृता मया प्रवासिताश्च येन नश्येत तादृगनृतं
११ भाविवाक्यं ते युष्मान् गदन्ति। या तु जातिर्बाबिलीयराजस्य युगं स्व-
ग्रीवां प्रवेश्य तं सेविष्यते, सा मया निजभूम्यां सविश्रामं संस्थापिता
तां कृक्ष्यति तत्र निवत्स्यति चेति परमेश्वरो ब्रूते।

१२ अपरमहं तानि सर्व्ववाक्यानीव यिहूदीयराजं सिदिकियमिदं
गदितवान्, यथा, यूयं बाबिलीयराजस्य युगं स्वग्रीवाः प्रवेश्य तं तस्य
१३ जनांश्च सेवध्वं तेन जीविष्यथ। या जातिर्बाबिलीयराजं न सेविष्यते
तामधि परमेश्वरेणोदितवाक्यानुसाराद् यूयम् अर्थतस्त्वं तव प्रजाश्च
१४ कुतोऽसिदुर्भिक्षमारीभिर्म्रियेध्वं? यूयं बाबिलीयराजस्य दासा न भविष्य-
थेति वाक्यं ये युष्मान् वदन्ति तेषां भाविवक्तॄणां वाक्येषु युष्माभिर्नाव-
१५ धीयतां यतस्तैरनृतं भाविवाक्यम् उच्यते। यतः परमेश्वरो ब्रूते नाहं
तान् प्रहितवान्, अमी ये भाविवादिनो युष्मभ्यं भाविवाक्यं कथयन्ति ते
यूयञ्च येन मया प्रवासिता विनश्येत तादृगनृतभाविवाक्यं मम नाम्ना
तैरुच्यते।

१६ अपरमहं याजकान् एतद्देशीयसर्व्वजनांश्चेदमवादिषं, परमेश्वरो
ब्रूते, पश्यत परमेश्वरीयमन्दिरस्य पात्राण्यधुना शीघ्रं बाबिलः पुनरा-
नायिष्यन्त इति भाविवाक्यं ये वदन्ति तेषां युष्मदीयभाविवक्तॄणां वाक्येषु
१७ युष्माभिर्मावधीयतां यतस्ते युष्मान् अनृतभाविवाक्यं वदन्ति। यूयं तेषां

वाक्येषु मावधद्धं बाबिलीयराजं सेवध्वं तेन जीविष्यथ, नगरमिदं
कुतोऽवसन्नं भवेत्? परन्तु यदि ते भाविवादिनः स्यु र्यदि च पर- १८
मेश्वरस्य वाक्यं तेषां सन्निधौ वर्त्तेत तर्हि परमेश्वरस्य मन्दिरे यिहूदीय-
राजस्य प्रासादे यिरूशालमि चावशिष्टानि पात्राण्यपि यथा बाबिलं
न नीयेरन् तदर्थमेव ते सेनाध्यक्षं परमेश्वरं प्रसादयन्तु।
यतो बाबिलीयराजो निबूखद्नित्सरो यदा यिहूदीयराजं यिहोया- १९
कीमसुतं यिहोयाखीनं यिहूदाया यिरूशालमस्य मुख्यनरैः सहितं
यिरूशालमः प्रवास्य बाबिलमनयत् तदा यानि पात्राणि नापहृतवान्
तान्यर्थतः स्तम्भद्वयं सागरपात्रं पीठानि नगरेऽस्मिन्नवशिष्टान्यपराणि २०
च सर्व्वपात्राण्यधि सेनाध्यक्षः परमेश्वर इत्थं ब्रूते। परमेश्वरस्य २१
मन्दिरे यिहूदीयराजस्य प्रासादे यिरूशालमि चावशिष्टानि पात्राण्यधी-
स्रायेलः प्रभुः सेनाध्यक्षः परमेश्वर इत्थं भाषते, तानि बाबिलमपनायि-
ष्यन्ते यस्मिन् दिने चाहं तेषु विचारकदृष्टिपातं करिष्यामि तत्पर्य्यन्तं २२
तत्र स्थास्यन्त इति परमेश्वरो वदति, तदानीं चाहं तान्यानाय्य स्थाने-
ऽस्मिन् पुनः स्थापयिष्यामि।

२८ अष्टाविंशोऽध्यायः।

१ हनानियस्य मिथ्याभविष्यद्वाक्यं ५ तदधि यिरिमियस्य वाक्यं १० हनानियेन यिरिमियस्य काष्ठमययुगभञ्जनं १२ लौहयुगमधि यिरिमियस्य वचनं १५ हनानियस्य मरणमधि यिरिमियस्य भविष्यद्वाक्यं।

तस्मिन् वत्सरेऽर्थतो यिहूदीयराजस्य सिदिकियस्य राजत्वारम्भ- १
कालस्य चतुर्थवत्सरस्य पञ्चममासे अस्सुरसुतो हनानिय इति नामवि-
शिष्टो गिबियोन्निवासी भाविवक्ता परमेश्वरस्य मन्दिरे याजकानां
सर्व्वजनानाञ्च साक्षान्मामब्रवीत्, यथा, इस्रायेलः प्रभुः सेनाध्यक्षः २
परमेश्वर इत्थं भाषते बाबिलीयराजस्य युगं मयाभञ्जि। बाबिलीय- ३
राजो निबूखद्नित्सरः परमेश्वरीयमन्दिरस्य यानि पात्राण्यस्मात् स्थानाद्
अपहृत्य बाबिलं नीतवान् तानि सर्व्वाण्यहं वत्सरद्वयात् परं स्थानमेतत्
पुनरानाययिष्यामि। यो यिहूदीयराजो यिहोयाकीमसुतो यिहोया- ४
खीनोऽन्ये च ये प्रवासिता यिहूदीयजना बाबिलं गतास्तान् सर्व्वानहं
स्थानमेतत् पुनरानेष्यामीति परमेश्वरो ब्रूते यतो बाबिलीयराजस्य
युगं मया भङ्क्ष्यते।

५ अपरं भविष्यद्वक्ता यिरिमियः सदाप्रभो र्मन्दिरे तिष्ठतां याज-
कानां सर्व्वजनानाञ्च साक्षात् तं भाविवादिनं हनानियमवादीत्।
६ फलतो यिरिमियो भविष्यद्वक्ताब्रवीत् तथास्तु सदाप्रभुस्तथा करोतु,
सदाप्रभो र्मन्दिरस्य पात्राणि प्रवासिताः सर्व्वे जनाश्च बाबिलः स्थान-
मेतत् पुनरानायिष्यन्त इति यानि भाविवाक्यानि त्वयोक्तानि सदाप्रभु-
७ स्तव तानि वाक्यानि सफलानि करोतु। परन्तु तव कर्णगोचरे सर्व्व-
८ जनानाञ्च गोचरे मया यद् वक्ष्यते मम तद्वाक्यमिदं त्वं श्रोतुमर्हसि। मम
पूर्व्वं तव पूर्व्वञ्च ये पुराकालिका भाविवक्तार आसन् ते बहून् देशानधि
महान्ति राज्यानि चाधि युद्धामङ्गलमारीसूचकानि भाविवाक्यान्य-
९ वादिषुः। यो भाविवादी क्षेमसूचकं भाविवाक्यं भाषते तस्य भावि-
वादिनो वाणी यदा सिद्धिं गच्छति तदा स यथातथ्यं सदाप्रभुना प्रेषि-
तो भाविवादीति परिचीयते।

१० ततः परं स भाविवादी हनानियो भाविवादिनो यिरिमियस्य ग्री-
११ वातो युगं हृत्वा बभञ्ज। सर्व्वजनानाञ्च साक्षात् स हनानियो जगाद
सदाप्रभु र्ब्रूते, वत्सरद्वयात् परमहम् इत्थमेकं बाबिलीयराजस्य निबू-
खद्नित्सरस्य युगं सर्व्वजातीनां ग्रीवात आदाय भङ्क्ष्यामि। ततो भवि-
ष्यद्वक्ता यिरिमियः स्वमार्गं जगाम।

१२ भाविवक्तु र्यिरिमियस्य ग्रीवातो भाविवादिना हनानियेनापहृतस्य
युगस्य भञ्जनात् परं सदाप्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुरभूत्।
१३ त्वं गत्वा हनानियं वद सदाप्रभुरित्थं भाषते त्वया काष्ठयुगानि भङ्क्त्वा
१४ तेषां परिवर्त्तेन लौहयुगानि निर्म्मितानि। यत इस्रायेल ईश्वरः सेनानां
सदाप्रभुरित्थं ब्रूते बाबिलीयराजस्य निबूखद्नित्सरस्य दासत्वायाहम्
एतासां सर्व्वजातीनां ग्रीवासु लौहयुगं स्थापितवान् स च ताभिः
सेवितव्यः, अधिकन्त्वहं वन्यपशूनपि तस्मै दत्तवान्।

१५ अपरं भविष्यद्वक्ता यिरिमियस्तं भविष्यद्वक्तारं हनानियं जगाद, हे
हनानिय शृणु सदाप्रभुस्त्वां न प्रहितवान् त्वन्त्वनृतवाक्ये जनान् एतान्
१६ विश्वासितवान्। ततो हेतोः सदाप्रभुरित्थं भाषते पश्चाहं त्वां भूतलाद्
अपसारयिष्यामि त्वमेतस्मिन्नेव वत्सरे मरिष्यसि यतस्त्वं सदाप्रभु-
१७ त्यागाय भाषितवान्। अपरं तस्य वत्सरस्य सप्तममासे स भाविवक्ता
हनानियो ममार।

२९ एकोनत्रिंशोऽध्यायः।

१ प्रवासितजनान् प्रति यिरिमियस्य पत्रप्रेषणं ४ बाबिलि वासाय विनयः ८ मिथ्याभविष्यद्वक्तॄणां वाक्येऽवधानमकर्त्तव्यमित्युपदेशः १० सप्ततिवत्सरेभ्यः परं मुक्तिप्राप्तेर्भविष्यद्वाक्यं १५ अवशिष्टलोकानां पापकारणाद् विनाशस्य भविष्यद्वाक्यं २१ मिथ्याभविष्यद्वादिद्वयस्य विनाशस्य भविष्यद्वाक्यं २४ यिरिमियस्य विरुद्धं शिमयियस्य पत्रं २९ यिरिमियेण शिमयियस्य सर्व्वनाशसूचकं भाविवाक्यं।

राज्ञि यिहोयाखीने महिष्यां नपुंसकेषु यिहूदाया यिरूशालमश्च १
मुख्यनरेषु सूत्रधरेषु लोहकारेषु च यिरूशालमः प्रस्थितेषु भविष्यद्वक्ता २
यिरिमियो यत् पत्रं लिखित्वा यिहूदीयराजेन सिदिकियेन बाबिलं
बाबिलीयराजस्य निबूखद्नित्सरस्य समीपं प्रेषितयोर्दूतयोरर्थतः शा-
फनसुतस्येलियासाहस्य हिल्कियसुतस्य गिमरियस्य च करैस्तेषां प्रवा- २
सितानां जनानाम् अवशिष्टान् प्राचीननरान् याजकान् भाविवक्तॄन्
निबूखद्नित्सरेण यिरूशालमो बाबिलं प्रवासितान् सर्व्वजनांश्च प्रति
यिरूशालमः प्रेषयामास तस्य पत्रस्य कथेयं यथा,

"इस्रायेल ईश्वरः सेनानां सदाप्रभुरित्थमाह ये सर्व्वे जना मया ४
यिरूशालमो बाबिलं प्रवासितास्तानिदमादिशामि, यूयं गृहाणि ५
निर्म्माय तत्र वसत, उद्यानानि च कृत्वा तेषां फलानि भुंग्ध्वं, योषितो ६
गृहीत्वा पुत्रान् पुत्रीश्च जनयत स्वपुत्रान् योषितो ग्राहयत स्वपुत्रीश्च
पतिभ्यो दत्त ताश्च पुत्रान् दुहितॄश्च प्रसवन्तु यूयञ्च तत्र न न्यूनीभूय
वर्धध्वं। यत्र च मया प्रवासिता आध्वे तस्य नगरस्य मङ्गलाय यतध्वं ७
तस्य कृते सदाप्रभवे प्रार्थनां कुरुध्वञ्च यतस्तस्य मङ्गलेन युष्माकं
मङ्गलं भविष्यति।

"यत इस्रायेल ईश्वरः सेनानां सदाप्रभुरिदं भाषते युष्मन्मध्यवर्त्तिनो ८
भाविवक्तारो युष्माकं मन्त्रज्ञाश्च युष्मान् मा प्रतारयन्तु यानि च
स्वप्नानि तैर्दर्शयथ युष्माकं तेषु स्वप्नेषु मनांसि न निधद्ध्वं। यतस्ते मिथ्या ९
मम नाम्ना युष्मान् भाविवाक्यानि वदन्ति नाहं तान् प्रहितवानिति
सदाप्रभु र्वदति।

"यतः सदाप्रभुरित्थं ब्रूते बाबिलमधि सप्ततिवत्सरेषु पूर्णेषु सत्स्वहं १०
युष्माकं तत्त्वावधारणं करिष्यामि स्थानमेतद् युष्माकं पुनरानयनाय
मम मङ्गलसूचकवाक्यं युष्मत्कृते साधयिष्यामि च। यतोऽहं युष्मा- ११
नधि यान् सङ्कल्पान् कल्पयामि तान् जान इति सदाप्रभु र्ब्रूते, ते

सङ्कल्पा मङ्गलावहा न त्वमङ्गलावहाः, अर्थतो युष्मभ्यं भाविशुभदशाम्
११ आशासिद्धिञ्च दास्यामि। यूयञ्च मां ह्वास्यध्वे मत्समक्षमुपस्थाय च
१२ प्रार्थनां करिष्यथ मया च युष्मद्वाक्ये मनो निधायिष्यते। यूयं माम्
अन्वेषिष्यथ मां प्राप्स्यथ च यतः सर्व्वान्तःकरणैर्मां गवेषयिष्यथ।
१४ अहञ्च युष्माभिः प्राप्य इति सदाप्रभु र्वदति, युष्माकं दास्यदशां परि-
वर्त्तयिष्यामि यासां जातीनां मध्ये येषु स्थानेषु च यूयं मयापसारिता-
स्तेभ्यः सर्व्वेभ्यो युष्मान् संग्रहीष्यामीति सदाप्रभु र्वदति यस्मात् स्थानाच्च
यूयं मया प्रवासितास्तत् स्थानमहं युष्मान् प्रत्यानेष्यामि।
१५ "यूयन्तु वदथ सदाप्रभु र्बाबिल्यस्मत्कृते भविष्यद्वक्तॄन् उत्पादितवान्।
१६ किन्तु यो राजा दायूदः सिंहासन उपविष्ट आस्ते ये च जना
नगरेऽस्मिन् वसन्त्यर्थतो युष्माकं ये भ्रातरो युष्माभिः सह प्रवासं न
१७ गतास्तान् सर्व्वानधि सदाप्रभुरित्थमाह। सेनानां सदाप्रभु र्वदति
पश्यताहं तेषां मध्यम् असिं क्षुधां मारीञ्च प्रेषयिष्यामि यानि च
कुरसत्वाद् अखाद्यानि तेषां दुष्टोडुम्बरफलानां तुल्यांस्तान् करिष्यामि।
१८ तांश्चासिक्षुन्मारीभिरनुधाविष्यामि मेदिन्याः सर्व्वराज्यानां कम्पादा-
हरणानि यासां मध्ये च ते मयापसारितास्तासां सर्व्वजातीनां शापवि-
१९ स्मयसीत्कारनिन्दापात्राणि करिष्यामि। यतो हेतोस्ते मम वाक्येष्वव-
धानं नाकार्षुरिति सदाप्रभु र्भाषते मम दासा भविष्यद्वक्तारो मया-
तन्द्रिणा तान् प्रति प्रहिताः किन्तु यूयं तेषां वाक्येष्ववधानं नाकार्ष्टेति
२० सदाप्रभु र्वदति। परन्तु हे यिरूशालमो बाबिलं मया प्रहिताः सर्व्वे
प्रवासिता जना यूयमेव सदाप्रभो र्वाक्येऽवधातुमर्हथ।
२१ "कोलायसुत आहाब् मासेयसुतः सिदिकियश्चेतिनामानौ यौ नरौ
मिथ्या मम नाम्ना युष्मान् भाविवाक्यानि वदतः, तावधीस्रायेल ईश्वरः
सेनानां सदाप्रभुरित्थमाह। पश्यताहं बाबिलीयराजस्य निबूखद्नि-
त्सरस्य करे तौ समर्पयिष्यामि स च युष्मत्प्रत्यक्षं तौ घातयिष्यति।
२२ बाबिलि च प्रवासितैः सर्व्वैर्यिहूदीयलोकैस्तयोर्दृष्टान्तः शापमन्त्रोऽय-
मुद्भावयिष्यते यथा सदाप्रभुस्त्वां बाबिलीयराजेनाग्निना भर्ज्जितौ सि-
२३ दिकियाहाबाविव करोत्विति। यतो हेतोस्ताविस्रायेलि धर्म्मावज्ञां
स्वप्रतिवासिनां भार्य्याभिः सह व्यभिचारञ्च कृतवन्तौ मत्तश्चाज्ञां न
प्राप्य मृषा मम नाम्ना भाविवाक्यानि कथितवन्तौ, तदहमेव जाने तस्य
साक्षी चास्मीति सदाप्रभु र्ब्रूते।"

अधिकन्तु त्वं निहिलामीयशिमयियं वद, इस्रायेल ईश्वरः सेनानां २४
सदाप्रभुरित्थं भाषते, त्वं यिरूशालम्निवासिनः सर्व्वान् जनान् प्रति २५
मासेयसुतं सिफनियं याजकं प्रति सर्व्वान् याजकांश्च प्रति स्वनाम्ना
पत्राणि लिखित्वावादीर्यथा, "यः कश्चिद् उन्मत्तीभूय भाविवाक्यं वावद्येत २६
तद्दमनाय सदाप्रभो र्मन्दिरस्याध्यक्षा यथा भवेयुस्त्वञ्च यथा तं जनं
काष्ठयन्त्रे हडिषु चार्पयेस्तदर्थं यिहोयादायाजकस्य विनिमयेन सदा-
प्रभुस्त्वां याजकत्वपदे नियुक्तवान्। अतोऽनाथोतीयो यो यिरिमियो २७
युष्मन्मध्ये भाविवक्तेव वर्त्तते स त्वया कुतो न तर्ज्जितः? स तु बाबिलम् २८
अस्मान् प्रति पत्रं प्रेषयित्वा गदितवान्, दीर्घकालो भविष्यति यूयं
गृहाणि निर्म्माय तत्र वसत, उद्यानानि च कृत्वा तेषां फलानि
भुंग्ध्वमिति।"

याजकः सिफनियस्तत् पत्रं भाविवक्तुर्यिरिमियस्य कर्णगोचरे पठि- २९
तवान्। अतः सदाप्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुरभूत्। त्वं तान् ३०
सर्व्वान् प्रवासितजनान् प्रत्येतानि वचांसि प्रेषय, यथा, सदाप्रभु- ३१
र्निहिलामीयं शिमयियमधीत्यमाह, मया न प्रहितः स शिमयियो
युष्मान् भाविवाक्यानि गदितवान् अन्तवाक्ये च युष्मान् विश्वासितवान्,
तस्मात् सदाप्रभुरित्थं भाषते पश्यताहं तस्य निहिलामीयशिमयियस्य ३२
तदीयवंशस्य च तत्त्वमवधारयिष्यामि,एतज्जातीयजनानां मध्ये वासकारी
तस्य कश्चिन्नरो न भविष्यति; सदाप्रभु र्ब्रूते मम प्रजानां यन्मङ्गलमहं
करिष्यामि स तन्न वीक्षिष्यते, यतः स सदाप्रभुत्यागाय कथितवान्।

३० त्रिंशत्तमोऽध्यायः।

१ यिहूदीयलोकानां मुक्तेर्भविष्यद्वाक्यं ४ दुःखात् परतः सुखस्य कथनं १० याकूबं प्रति शान्तेः कथनं १८ याकूबीयवंशस्योन्नतेः कथनं २२ पापिलोकानां दण्डस्य कथनञ्च।

सदाप्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुरभूत्। इस्रायेल ईश्वरः १
सदाप्रभु र्ब्रूते यानि वाक्यान्यहं त्वां गदितवान् त्वं तानि सर्व्वाणि ग्रन्थे २
लिख, यस्मात् सदाप्रभुराह पश्य येषु दिनेष्वहं स्वप्रजानाम् अर्थत ३
इस्रायेलो यिहूदायाश्च दास्यदशां परिवर्त्तयिष्यामि तानि दिनान्याग-
मिष्यन्तीति सदाप्रभु र्वदति, तदानीं यो देशो मया तेषां पूर्व्वपुरुषेभ्यो

दत्तस्तमेव देशमहं तान् जनान् पुनरानाययिष्यामि, ते च तस्याधिकारं भोक्ष्यन्ते।

४ इस्रायेलं यिहूदाञ्चाधि सदाप्रभुरेतानि वाक्यानि गदितवान्। यथा,

५ सदाप्रभुरिदं ब्रूते शङ्कायाः शृणुमो ध्वनिं।
सान्त्वनापरिहीनस्य परित्रासस्य स ध्वनिः॥
६ यूयं दृष्ट्वा विलोकध्वं पुरुषः प्रसुवीत किं।
प्रसवन्ती यथा नारी पुरुषाः सकलास्तथा।
कृतहस्तार्पणाः श्रोण्यौ संदृश्यन्ते मया कुतः।
विषादात् सर्व्ववक्त्रञ्च पाण्डुवर्णं गतं कुतः॥
७ हा हा महानसौ घस्रो नास्ति तेन समं दिनं।
याकूबः कष्टकालोऽसौ स तु रक्षिष्यते ततः॥
८ भाषते भारतीमेतां वाहिनीनां सदाप्रभुः।
मया तस्य युगं भङ्क्त्वा त्वद्ग्रीवातोऽपनेष्यते।
छेत्स्यन्ते तावकीनानि बन्धनानि च तद्दिने।
न पुनः कारयिष्यन्ते परैर्दास्यं तव प्रजाः॥
९ सदाप्रभुं निजेशन्तु दायूदञ्च स्वभूपतिं।
कृते तेषां मयोत्पाद्यं सेविष्यन्ते जनास्तव॥
१० सदाप्रभुरिदं ब्रूते हे याकूब् मम किङ्कर।
त्वं माभैषीर्निराशस्त्वं हे इस्रायेल् भवेर्नहि॥
यतः पश्याहमेव त्वां तारयिष्यामि दूरतः।
त्वद्वंशांश्चोद्धरिष्यामि तेषां प्रवासदेशतः॥
प्रत्यावर्त्तिष्यते याकूब् विश्रामञ्चोपभोक्ष्यते।
वसन्तं तञ्च निःशङ्कं कोऽपि नोद्वेजयिष्यति॥
११ त्वत्त्राणायाहमेवास्मि त्वत्सङ्गीति प्रभोर्वचः।
त्वं यासां परजातीनां मध्ये व्यकीर्य्यथा मया।
सकलानां मया तासां सर्व्वनाशो विधास्यते।
तवैव सर्व्वनाशस्तु नहि कारिष्यते मया॥
शास्तिर्विचारसिद्धैव तुभ्यं दायिष्यते मया।
सर्व्वथा शास्तिहीनन्तु त्वां न शक्नोमि रक्षितुं॥
१२ सत्यमेव ब्रवीत्येतद् वचनं शाश्वतप्रभुः।
दुश्चिकित्स्यस्तवाघातो गलितञ्च क्षतं तव॥

प्रतिकाराय ते कोऽपि पक्षवादी न विद्यते। १३
चिकित्सोपायवत् किञ्चित् भेषजं ते न विद्यते॥
अस्मृता कामिभिः सर्व्वैस्त्वं नैवान्विष्यसे पुनः। १४
त्वां यतोऽरिकृतेनेवाघातेनाहतवानहं।
तुभ्यञ्च दत्तवान् शास्तिं दयाहीनो नरो यथा।
यतस्ते बहवो दोषाः पापानि प्रबलानि च॥
स्वाघातेन कुतो रुद्या दुश्चिकित्स्यक्षतेन वा। १५
यतस्ते बहवो दोषाः पापानि प्रबलानि च।
ततो हेतोर्मयाकारि त्वां प्रत्याचार ईदृशः॥
तथापि ग्रासयिष्यन्ते सकलास्त्वद्ग्रसिष्णवः। १६
दास्यस्थानञ्च यास्यन्ति क्लेशारः सकलास्तव।
हृतवित्ता भविष्यन्ति तव वित्तापहारिणः।
ये त्वां लुण्ठन्ति तान् सर्व्वान् करिष्यामि च लुण्ठितान्॥
प्रभु र्ब्रूते तवाघातेऽहं प्रयोक्ष्यामि बन्धनं। १७
प्राप्तक्षतेभ्यश्च त्वां करिष्याम्यहं पुनः॥
यतस्त्वामधि तैरुक्तम् एषाभूदपसारिता।
या सीयोन् इयमेतस्याः कोऽप्यन्वेषी न विद्यते॥
सदाप्रभु र्ब्रवीतीत्थं याकूबः पटमण्डपाः। १८
यद् गताः पश्य तद् दास्यं विपरीतं करोम्यहं।
करुणार्द्रो भविष्यामि तस्य वासस्थलेषु च॥
पुनर्निजाप्लराशौ च विनिर्म्मायिष्यते पुरी।
राजपुर्य्यां मनुष्याश्च निवत्स्यन्ति यथोचितं॥
उद्गमिष्यति तन्मध्यात् स्तवः शब्दश्च नन्दतां। १९
अहं तान् वर्द्धयिष्यामि नैव यास्यन्ति ते क्षयं।
पूजितांस्तान् करिष्यामि ते न प्राप्स्यन्ति लाघवं॥
तत्सन्ताना यथा पूर्व्वं भविष्यन्ति पुनस्तथा। २०
तत्समाजश्च मत्साक्षात् प्राप्तस्थैर्य्यो भविष्यति।
सर्व्वांस्तत्पीडकांश्चाहं शासिष्यामि यथोचितं॥
यश्च तस्याग्रगामी स तद्वंशीयो भविष्यति। २१
तस्य शासनकर्त्ता च तस्य मध्याद् उदेष्यति॥
मन्निदिष्टं करिष्ये तं समुपस्थास्यते स मां।

स्वचित्तं मामुपस्थातुं को न्वस्ते।दिति वाक् प्रभोः॥
२२ मामकीनप्रजा यूयम् इत्यमेव भविष्यथ।
अहञ्चापि भविष्यामि तदा युष्माकमीश्वरः॥
२३ सदाप्रभोरतीवोग्रो झञ्झावातः प्रवर्त्तते।
सा झञ्झा घूर्णते मूर्द्ध्नि दुष्टानाञ्च स्फुटिष्यति॥
२४ स्वमनस्कल्पना यावन्न कुर्य्यान्न च साधयेत्।
सदाप्रभोः स कोपाग्निस्तावन्न विरमिष्यति॥
भाविकालेऽत्र युष्माकं मनोयोगो जनिष्यते॥

---

३१ एकत्रिंशोऽध्यायः।

१ इस्रायेलो मुक्तेर्भविष्यद्वाक्यं १० तस्य प्रचारणं १५ विलपन्तीं राहेलं प्रति प्रबोधकथनं १८ इफ्रयिमो विलापकथनं २१ इस्रायेलः पुनरागमनं २७ परमेश्वरस्य प्रतिज्ञा ३१ समाजेन समं तस्य भाविनियमः ३५ समाजस्य स्थिरता ३८ तस्य वृद्धिश्च।

१ सदाप्रभु र्ब्रवीतीदं काले तस्मिन्नुपस्थिते।
इस्रायेलीयवंशानां सर्व्वेषामहमीश्वरः।
भविष्यामि तथा तेऽपि भविष्यन्ति मम प्रजाः॥
२ सदाप्रभु र्ब्रवीतीदम् असेः साक्षात् पलायिता।
जातिरेषा मरुस्थाने जाता प्रसादभाजनं।
इस्रायेलं सुविश्रान्तं कर्त्तुं प्रगच्छतो मम॥
३ दूरतो दर्शनं मह्यं दत्त्वा प्राह सदाप्रभुः।
प्रेम्ना सदातनेनैव त्वयि सम्प्रीतवानहं।
ततो हेतोः करोमि त्वां प्रसादाच्चिररक्षितां॥
४ इस्रायेलः कुमारि त्वां विनिर्म्मास्याम्यहं पुनः।
निर्म्मिता स्थास्यसे तर्हि स्वमृदङ्गैश्च भूषिता।
आनन्दकारिणां श्रेण्यां पुनर्निर्विक्रमिष्यसि॥
५ शमरीयाद्रिषु द्राक्षाः पुनस्त्वं रोपयिष्यसि।
ये च ता रोपयिष्यन्ति ते ता भोक्ष्यन्ति रोपकाः॥
६ आयाति तद्दिनं यस्मिन् इफ्रयिम्पर्व्वते स्थिताः।
रक्षका घोषयिष्यन्ति समुत्तिष्ठत हे जनाः।
याम सीयोनमस्माकमीशं सदाप्रभुं प्रति॥

यतो हेतोरिदं वाक्यं भाषते स सदाप्रभुः। ७
याकूबमधि युष्माभिर्हर्षनादो विधीयतां।
प्रोच्चैः कुरुत जातीनां शिरोवर्त्तिनि नन्दनं॥
एवं श्रावयत स्तुध्वं कुरुध्वं प्रार्थनामिमां।
भो प्रभो त्वत्प्रजा रक्षेस्रायेलः शेषमुद्धर॥
पश्यतानाययिष्याम्यहं तानुत्तरदेशतः। ८
मेदिन्याः प्रान्तभागेभ्यः सङ्ग्रहीष्यामि तानहं॥
अन्धैः खञ्जैः सगर्भाभिः सूतीभिश्च समन्वितः।
जनसङ्घो महांस्तेषाम् अत्र प्रत्यागमिष्यति॥
आयास्यन्ति रुदन्तस्ते तान् नेष्यामि कृताञ्जलीन्। ९
समीपञ्च जलौघानाम् ऋजुमार्गेण तानहं।
गमयिष्यामि तेषाञ्च स्खलनं न भविष्यति॥
इस्रायेलः पिता यस्मात् सम्भविष्याम्यहं स्वयं।
तद्वद्भविष्यतीफ्रायिम् अग्रजस्तनयो मम॥

हे भिन्नजातयो यूयं शृणुताज्ञां सदाप्रभोः। १०
विज्ञापयत तां वार्त्तां द्वीपेषु दूरवर्त्तिषु॥
इत्थं ब्रूत च यः पूर्व्वम् इस्रायेलं विकीर्णवान्।
स तं सङ्गृह्य रक्षीव स्वव्रजं पालयिष्यति॥
याकूबो मोचनं यस्मात् कृतवान् शाश्वतप्रभुः। ११
यस्ततो बलवांस्तस्य करादुद्धृतवांश्च तं॥
ते समागत्य सीयोनः शृङ्गे गायन्ति हर्षतः॥ १२
गोधूममदिरातैलमेषगोशावकाधिकं।
सदाप्रभोः प्रसादञ्च तेऽनुधावन्ति वीचिवत्॥
सुसिक्तोद्यानसङ्काशं मनस्तेषाञ्च जायते॥
न भविष्यन्ति ते म्लानाः पुनर्व्वारं कदाचन।
आनन्दिष्यति तत्काले कुमारी नृत्यकारिणी। १३
आनन्दिष्यन्ति चैकत्र तरुणास्थविरा जनाः॥
शोकस्य परिवर्त्तेन दास्यामि तेभ्य उत्सवं।
सान्त्वयन् खेदतो हर्षं प्रापयिष्यामि तानहं॥
प्राणान् आप्याययिष्यामि याजकानाञ्च मेदसा। १४
मत्प्रजा मत्प्रसादे च तर्प्स्यन्तीति प्रभोर्वचः॥

१५ सदाप्रभुरिदं ब्रूते रामायां श्रूयते रवः।
रवो विलापगानस्य गाढशोकस्य रोदनं॥
स्वसुतान् अनुशोचन्ती राहेल् करोति रोदनं।
सा सुतेषु न गृह्णाति सान्त्वं यस्मान्न सन्ति ते॥
१६ तामुद्दिश्य त्विदं वाक्यं भाषते परमेश्वरः।
रोदनात् स्वरवं वाष्पात् स्वनेत्रे च निवर्त्तय॥
त्वच्छ्रमस्य फलं यस्माद् भवितेति प्रभो र्वचः।
अरातेर्देशतस्ते च प्रत्यायास्यन्ति निश्चितं॥
१७ तव भाविगतिश्चाधि प्रत्याशास्तीति वाक् प्रभोः।
सीमानञ्च स्वदेशस्य प्रत्यायास्यन्ति नन्दनाः॥
१८ इफ्रयीमो मयाश्रावि सविलापमिदं वचः।
त्वयाऽहं शासितः शिष्टीकृतोऽनभ्यस्तगौरिव॥
परिवर्त्तय मां तर्हि स्थास्यामि परिवर्त्तितः।
मामकीनेश्वरो यस्मात् त्वमेवासि सदाप्रभो॥
१९ अनुतापं यतोऽकार्षं स्वपरावर्त्तनात् परं।
शिक्षालाभात् परं तद्वद् अकार्षम् ऊरुताडनं॥
अभवं लज्जितश्चाहम् अगमञ्च विवर्णतां।
यतो यौवनकालस्य निन्दाभारमहं वहे॥
२० इफ्रयिम् मम दृष्टौ किं दयितस्तनयो भवेत्।
किं मह्यं प्रतिभायाद् वा हर्षदायी स नन्दनः॥
यतो यावन्मया तस्य विरुद्धं गद्यते वचः।
तावदेव मया तस्य स्मरणं क्रियते पुनः॥
अतो हेतो र्मम स्वान्तम् आर्द्रं भवति तं प्रति।
प्रीये च वत्सलस्तस्मिन्निति ब्रूते सदाप्रभुः॥
२१ त्वं स्तूपान् स्थापय स्वार्थं स्तम्भान् स्वार्थं विधेहि च।
मनसा लक्षयाध्वानं पन्थानं चरितं त्वया॥
इस्रायेलः कुमारि त्वं प्रत्यावर्त्तितुमर्हसि।
तवैतानि पुराण्येव प्रत्यावर्त्तितुमर्हसि॥
२२ धर्म्मत्यागिनि कन्ये त्वं कतिकालं भ्रमिष्यसि।
नूतनं स्रष्टा प्रभुर्देशे नारी वेष्टिष्यते नरं॥
२३ इस्रायेलः प्रभु र्ब्रूते वाहिनीनां सदाप्रभुः।

मया यिहूदिलोकानां दासत्वे परिवर्त्तित।
स्वपुरेषु स्वदेशे च वक्ष्यते तैरिदं पुनः।
भो धर्म्मस्य समावास पुण्यधाम्नश्च पर्व्वत।
सदाप्रभु र्विदध्यात् त्वाम् आशीर्व्वादसमन्वितं॥
वत्स्यत्यत्र यिहूदाश्च सहितः सर्व्वनागरैः। २४
जनैः कर्षणनिष्ठै र्वा भ्राम्यद्भि र्वा व्रजैः सह॥
यत आप्याययिष्यामि प्राणान् तृषातुरानहं। २५
प्राणांश्च क्षुधया म्लानान् तर्पयिष्यामि कृत्स्नशः॥
एतेन भग्ननिद्रोऽहं लोचने उदमीलयं। २६
स्वीयनिद्राममन्ये च मह्यं सुखप्रदायिनीं॥
सदाप्रभु र्ब्रवीतीदं पश्यायान्ति दिनानि हि। २७
येष्विस्रायेलवंशस्य यिहूदीयान्वयस्य च।
क्षेत्रयोरहं करिष्यामि तत्कृते वीजरोपणं।
नृणां वीजं पशूनाञ्च वीजं वप्स्याम्यहं तदा॥
पूर्व्वमुन्मूलनायैव तेषामुत्पाटनाय च। २८
प्रध्वंसाय विनाशाय हिंसाय च यथाभवं।
तानधि जागरूकोऽहं निर्म्माणरोपणेच्छया।
जागरूकस्तथा तेषु भविष्यामीति वाक् प्रभोः॥
जनकैरम्लमद्दीनां भोगाज्जीर्णरदाः सुताः। २९
एतद्वाक्यं पुनर्व्वारं तत्काले न गदिष्यते॥
स्वीयापराधहेतोस्त्वेकैको जनो मरिष्यति। ३०
जन एवाम्लमद्याशी जीर्णदन्तो भविष्यति॥
सदाप्रभुरिदं ब्रूत पश्यागच्छन्ति वासराः। ३१
येष्विस्रायेलवंशेन यिहूदीयान्वयेन च।
सहित नियमो नूत्नो मया संस्थापयिष्यते॥
मिसर्देशात् पितृंस्तेषां वहिरानेतुमिच्छया। ३२
पाणिग्रहणकालेऽहं यमकार्षं हि तैः सह।
नैव तेन समानोऽयं नियमोऽपि भविष्यति॥
यस्माल्लङ्घितवन्तस्ते नियमं तं मया कृतं।
अहं तु प्राभवं तेषामिति ब्रूते सदाप्रभुः॥
किन्त्विस्रायेलवंशेन साकं तत्कालतः परं। ३३

नियमं स्थापयिष्याम्येवम्भूतमिति वाक् प्रभोः॥
स्वव्यवस्थान्तरे तेषां प्रणिधायिष्यते मया।
तेषां हृदयपत्रेषु मया लेखिष्यते च सा।
भविष्यामीश्वरस्तेषां ते भविष्यन्ति मत्प्रजाः॥
३४ सदाप्रभुं विजानीहीति वाक्यं प्रतिवेशिनं।
नैव ते शिक्षयिष्यन्ति न वा स्वभ्रातरं पुनः॥
आक्षोधिष्ठगरिष्ठास्ते सर्व्व एव जना यतः।
मदभिज्ञा भविष्यन्ति वाक्यमेतत् सदाप्रभोः॥
यतो हेतो मया तेषाम् अपराधः क्षमिष्यते।
न पुनश्च स्मरिष्यन्ते तेषां पापानि वा मया॥

३५ सदाप्रभुरिदं ब्रूते यः सूर्य्यं दीपकं दिवा।
विधींश्च चन्द्रताराणां निशि द्युत्यै प्रदत्तवान्।
येन महार्णवे स्पृष्टे प्रगर्ज्जन्ति तदूर्म्मयः।
ब्रूते स वाहिनीनाथ सदाप्रभुरिति श्रुतः॥
३६ मत्साक्षाद् विधयस्ते चेन्निवर्त्तेरन् कदाचन।
तर्हीस्रायेलवंशोऽपि मत्साक्षान्नित्यजातिवत्।
स्थितितो भविता भ्रष्ट इति ब्रूते सदाप्रभुः॥
३७ पुनर्व्वारमिमां वाचं भाषते स सदाप्रभुः।
उपरिष्टाद् यदि व्योम परिमीयेत केनचित्।
अधस्ताद् अनुसन्धानं भूमूलानां क्रियेत वा।
कृत्स्नेस्रायेलवंशस्यापि निराकरणं मया।
तर्हि तेषां क्रियादोषात् सम्भवेदिति वाक् प्रभोः॥

३८ सदाप्रभुः पुन र्ब्रूते पश्यागच्छन्ति वासराः।
सदाप्रभोः कृते येषु हननेलस्य दुर्गतः।
कोणस्थद्वारपर्य्यन्तं विनिर्म्मायिष्यते पुरी॥
३९ मानरज्जुस्तदग्रञ्च गारेबाख्येन भूभृता।
किञ्चित् प्रगत्य गोयाथं प्रत्यावर्त्तिष्यते पुनः॥
४० पूर्व्वदिक्स्थहयद्वारकोणपर्य्यन्तमेव च।
भस्मस्थानं शवानाञ्च स्थानं या कृत्स्ननिम्नभूः।
सा क्षेत्राणि च सर्व्वाण्याकिद्रोणाख्यप्रवाहतः।

पुण्यस्थलं भविष्यन्ति कृते सदाप्रभाऽऽस्पदा।
आनुकूल्यम् अनाश्यञ्चाकालान्तात् तद् भविष्यति॥

---

३२ द्वात्रिंशोऽध्यायः।

१ यिरिमियस्य कारागारे स्थितेः कारणं ६ यिरिमियेण हनमेलस्य क्षेत्रक्रयकरणं १२ बारूकस्य हस्ते क्रयपत्रस्य समर्पणं १६ यिरिमियस्य प्रार्थनं २६ यिहूदीयानां निर्व्वासनमधि भविष्यद्वाक्यं ३६ स्वदेशे पुनरागमनस्य भविष्यद्वाक्यञ्च।

यिहूदीयराजस्य सिदिकियस्य राजत्वस्य दशमवत्सरे सदाप्रभोः १
(पश्चाद् वक्ष्यमाणं) वाक्यं यिरिमियं प्रति प्रादुर्बभूव। उक्तो वत्सरो
निबूखद्नित्सरस्य राजत्वस्याष्टादशवत्सर आसीत्। तदानीञ्च तस्य २
बाबिलीयराजस्य बलानि यिरूशालमम् अवारुन्धन्। स भविष्यद्वक्ता
यिरिमियस्तु यिहूदीयराजप्रासादस्थकारागृहस्य प्राङ्गणे रुद्ध आसीत्।
यतो यिहूदीयराजः सिदिकियस्तं तत्र रुद्धवान् इदञ्च कथितवान्, ३
कुतस्त्वम् एतादृशीं भाविवाणीं वदसि यथा, सदाप्रभुरित्थमाह,
पश्याहं नगरमिदं बाबिलीयराजस्य करे समर्पयिष्यामि स च तद्
धरिष्यति, यिहूदीयराजः सिदिकियश्च कल्दीयानां हस्तान्नैवोद्धारिष्यते ४
किन्त्ववश्यं बाबिलीयराजस्य करे समर्पयिष्यते तत्सम्मुखीभूय च स्वमुखेन
तमालपिष्यति स्वनेत्राभ्यां तस्य नेत्रे द्रक्ष्यति च, सिदिकियश्च तेन ५
बाबिलम् अपनायिष्यते यावच्चाहं तस्य तत्त्वावधारणं न करिष्यामि
तावत् तत्र स्थास्यतीति सदाप्रभु र्ब्रवीति यूयञ्च कल्दीयैः सह यं सङ्ग्रामं
कुरुथ तत्र न कृतार्था भविष्यथेति।

यिरिमियो जगाद, सदाप्रभोरेतद् वाक्यं मां प्रति प्रादुरभूत्। ६
पश्य त्वत्पितृव्यस्य शल्लुमस्य सुतो हनमेलस्त्वत्समीपम् आगत्य वदिष्यति, ७
अनाथोते मम यत् क्षेत्रमस्ति तत् त्वं क्रेतुमर्हसि यतस्तत्क्रयार्थको
मोचनाधिकारस्त्वय्येव वर्त्तते। ततः सदाप्रभो र्वाक्यानुसारतो मम पि- ८
तृव्यसुतः स हनमेलः कारागृहस्य प्राङ्गणे मत्समीपमागत्यावादीत्,
बिन्यामीनदेशस्थानाथोते मम यत् क्षेत्रम् अस्ति त्वं तत् क्रीणीष्व यत-
स्तस्य स्वत्वाधिकारो मोचनाधिकारश्च त्वय्येव वर्त्तते, अतस्त्वं स्वार्थं तत्
क्रेतुमर्हसि। तदा तत् सदाप्रभो र्वाक्यमिति मयोपालम्भि। अतोऽहं ९
स्वपितृव्यसुतस्य हनमेलस्य समीपाद् अनाथोति स्थितं तत् क्षेत्रं क्रीतवान्

तस्य कृते च रूप्यमर्थतः सप्तदशशेकलपरिमितं रूप्यं तोलितवान्।
१० पत्रे च स्वाक्षरं कृत्वा मुद्राङ्कं कृतवान् साक्षिणश्च प्रयोज्य तत् रूप्यं
११ तुलया तोलितवान्। अपरं तत् क्रयपत्रम् अर्थतो विधिव्यवस्थानुरूपेण
मुद्राङ्कितम् एकं मुक्तञ्चापरं पत्रं गृहीतवान्।
१२ अपरमहं स्वपितृव्यसुतस्य हनमेलस्य साक्षात् तत्क्रयपत्रे कृत-
स्वाक्षराणां साक्षिणाञ्च साक्षात् काराप्राङ्गणे उपविष्टानां सकल-
यिहूदीयानाञ्च साक्षात् तत्क्रयपत्रं महसेयपौत्राय नेरियपुत्राय
१३ बारूकाय दत्तवान् तेषां साक्षाच्च तं बारूकमित्थं समादिशं। इस्रायेल
१४ ईश्वरो वाहिनीनां सदाप्रभुरित्थमाह, यथा, त्वं पत्रद्वयमेतदर्थतो
मुद्राङ्कितमेतत् क्रयपत्रं मुक्तमेतत् पत्रञ्चादाय बहुदिनानि यावद् अव-
१५ स्थितये मृत्पात्रे निधेहि। यत इस्रायेल ईश्वरो वाहिनीनां सदाप्रभु-
रित्थमाह, अत्र देशे गृहाणि क्षेत्राणि द्राक्षोद्यानानि च पुनर्व्वारं
क्रायिष्यन्ते।

१६ नेरियसुताय बारूकाय तत्क्रयपत्रस्य प्रदानात् परं मया सदाप्रभु-
१७ मुद्दिश्येयं प्रार्थनाकारि। भो प्रभो सदाप्रभो, पश्य त्वमेव स्वीयमहा-
बलेन स्वीयप्रसारितबाहुना च द्यावाभूमी सृष्टवान् तवासाध्यं किमपि
१८ नास्ति। त्वं सहस्रेषु प्रसादाचारी पूर्व्वपुरुषैश्च यदपराद्धं पश्चात् तेषां
सन्तानेभ्यस्तत्फलदातासि महान् शौर्य्यवांश्चेश्वरो वाहिनीनां सदा-
१९ प्रभुरिति तव नाम। त्वं मन्त्रणेन महान् क्रियाभिश्च परमः, एकैक-
नराय तदाचारस्य शोधनार्थं तत्कर्म्मणां फलदानार्थञ्च मनुष्यसन्तानानां
२० सर्व्वमार्गाणामुपरि तव नेत्रे उन्मीलिते। त्वम् अद्यपर्य्यन्तं स्थायीनि
चिह्नान्यद्भुतलक्षणानि च मिसर्देशे इस्रायेलि मनुष्यगणे च स्थापयित्वाद्य-
२१ पर्य्यन्तं स्थायि महानाम स्वार्थं निष्पादितवान्। त्वञ्च चिह्नैरद्भुतक्रियाभि
र्बलिहस्तेन प्रसारितबाहुना महाभयानकत्वेन च मिसर्देशात् स्वप्रजाम्
२२ इस्रायेलीयजातिमुद्धृत्य नीतवान्। यस्य च देशस्य दानं तेषां पूर्व्व-
पुरुषेभ्यस्त्वया शप्त्वा प्रत्यश्रावि तं दुग्धमधुप्रवाहिनमिमं देशं त्वं तेभ्यो
२३ दत्तवान्। स च तैः प्रविश्य वशीकृतः, परन्तु तव रवे तैरवधानं न कृतं
तव व्यवस्था न समाचरिता यद्यत् तवादेशात् तैः कर्त्तव्यं तत्तन्न कृतं
२४ तस्मात् त्वं सर्व्वैतेनामङ्गलेन तान् उपाक्रमयसि। पश्य नगरावस्कन्दा-
र्थकाः सेतवस्तदव्यवधाना अभवन् असिक्षुन्मारीप्राबल्याच्च नगरं तद्वि-
रुद्धं युध्यमानानां कल्दीयलोकानां हस्तगतप्रायमस्ति, त्वं यद् गदितवान्

तदेव जायते त्वञ्च तद् वीक्षसे। तथापि भो प्रभो सदाप्रभो, त्वं मां २५
वदसि, त्वं रूप्येण तत् क्षेत्रं क्रीणीष्व साक्षिणश्च प्रयुङ्क्ष्वेति, नगरन्तु
कल्दीयानां हस्तगतप्रायमस्ति।

तदानीं सदाप्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुरभूत, पश्याहं २६
सर्व्वप्राणिनामीश्वरः सदाप्रभुः किमपि किं ममासाध्यं भवेत्? तस्मात् २८
सदाप्रभुरित्थमाह, पश्याहं कल्दीयानां करे बाबिलीयराजस्य निबू-
खद्नित्सरस्य च करे नगरमेतत् समर्पयिष्यामि स च तद् धरिष्यति।
ये च कल्दीयजना एतन्नगरस्य विरुद्धं युध्यन्ते ते तत् प्रविश्य नगरे २९
ऽस्मिन् वह्निं दास्यन्ति, तन्निवासिनश्च मम क्रोधोत्पादनाय येषां गृहाणां
पृष्ठेषु वालमुद्दिश्य धूपम् उदहजन् इतरदेवांश्चोद्दिश्य पेयनैवेद्यान्युद-
सिञ्चन् तानि गृहाणि नगरञ्च ते दाहयिष्यन्ति। यत इस्रायेलीयवंशा ३०
यिहूदीयवंशाश्च आबाल्यान्मम दृष्टौ यत् कुत्सितं केवलं तदाचारिणो
ऽभवन्, फलत इस्रायेलीयवंशाः स्वहस्तकृतक्रियाभिः केवलं मम
कोपम् उत्पादयन्ति। यतो नगरमेतन्निर्म्माणदिनाद् अद्यपर्य्यन्तं मम ३१
कोपस्य रोषस्य च पात्रमभवत्, अतो मत्प्रत्यक्षतस्तद् अपसारयितव्यं।
एतस्य कारणम् इस्रायेलीयवंशानां यिहूदीयवंशानाञ्च सर्व्वदुष्कृतम् ३२
अर्थतो मम क्रोधोत्पादनाय ते तेषां राजानो मुख्यनरा याजका भावि-
वादिनो यिहूदीयजना यिरूशालम्निवासिनश्च यद् दुष्कृतमकार्षुस्तदेव।
ते मदभिमुखा न भूत्वा मत्तः पराङ्मुखा अभवन्। तेषां शिक्षाप्र- ३३
दानेऽतन्द्रिणो मम शिक्षायां तैरुपदेशग्रहणायावधानं नाकारि। यस्य ३४
च मन्दिरस्योपरि मम नाम कीर्त्तितं तदशुचीकरणाय तेषां घृणविग्रहा-
स्तन्मध्ये स्थापिताः। यिहूदीयजनांश्च पापिनः कर्त्तुम् अर्थतो मोलकाय ३५
स्वपुत्राणां स्वपुत्रीणाञ्च दाहनमिति या घृणक्रिया मया नाज्ञापिता
मम चित्तञ्च न प्रविष्टा तां कारयितुं ते वालमुद्दिश्य हिन्नोमसुतस्योपत्य-
कायां भृगुस्थानानि निर्म्मितानि।

अतो नगरमेतदसिक्षुन्मारीप्राबल्याद् बाबिलीयराजस्य करे सम- ३६
र्पितप्रायमिति वाक्यं यन्नगरमधि युष्माभिरुच्यते तदधीदानीम् इस्रायेल
ईश्वरः सदाप्रभुरित्थमाह। पश्याहं स्वक्रोधेन स्वकोपेन स्वमहारोषेण च ३७
तदीयजनान् यत्र विकीर्णवान् तेभ्यः सर्व्वदेशेभ्यस्तान् सङ्ग्रहीष्यामि
स्थानमेतच्च पुनरानेष्यामि तांश्च निष्कण्टकं वासयिष्यामि। ते मम प्रजा ३८
भविष्यन्त्यहञ्च तेषाम् ईश्वरो भविष्यामि। तेषां मङ्गलाय तेषाञ्च भावि- ३९

सन्तानानां मङ्गलाय यथा ते निरन्तरं मत्तो बिभीयुस्तदर्थमहं तेभ्य एकं
४० चित्तम् एकं मार्गञ्च दास्यामि। तेषां मङ्गलकरणाय तेषामनुगमनादहं
न निवर्त्तिष्य इतिसूचकं शाश्वतनियमं तैः सह स्थापयिष्यामि ते च
४१ यथा मत्तो नापसरेयुस्तदर्थं तेषां चित्तेषु मद्भक्तिं निधास्यामि। तेषां
मङ्गलकरणाय च तेष्वानन्दिष्यामि सत्यभावेन च स्वीयकृत्स्नान्तःकरणेन
४२ कृत्स्नमनसा च देशेऽस्मिन् तान् रोपयिष्यामि। यतः सदाप्रभुराह,
यथाहं जनानेतान् कृत्स्नमिदम् अमङ्गलं प्रापितवान् तथैव तेभ्यो मत्प्र-
४३ तिश्रुतं कृत्स्नं मङ्गलं तान् प्रापयिष्यामि। यूयञ्चेमं यं देशम् उत्सन्नं नर-
पशुवर्ज्जितं कल्दीयानां करे समर्पितञ्च वदथ तस्मिन्नेव क्षेत्रक्रयः
४४ सम्भविष्यति। फलतो बिन्यामीनदेशे यिरूशालमः परितो यिहूदाया
नगरेषु पर्व्वतीयनगरेषु समभूमिस्थनगरेषु दाक्षिणात्यनगरेषु च जना
रूप्येण क्षेत्राणि क्रेष्यन्ति क्रयपत्रे च स्वाक्षरं कृत्वा मुद्राङ्कं साक्षिणश्च
प्रयोक्ष्यन्ते, यतोऽहं तेषां दासत्वं परिवर्त्तयिष्यामीति सदाप्रभुराह।

---

३३ त्रयस्त्रिंशोऽध्यायः।

१ बन्दित्वान्मोचनायेश्वरस्य प्रतिज्ञा १० तया मुक्त्यानन्दस्य भविष्यद्वचनं १४ पल्लवस्वरूपख्रीष्टमधि भविष्यद्वचनं १९ तदीयराज्यस्य स्थितिमधि भविष्यद्वचनं २३ तस्य वंशस्य स्थिरता च।

१ ततः परं सदाप्रभोर्वाक्यं द्वितीयवारं यिरिमियं प्रति प्रादुरभूत्
तदानीमपि स काराप्राङ्गणे रुद्ध आसीत्।

२ भाषते भारतीमेनाम् एतत्कर्त्ता सदाप्रभुः।
एतत्संस्थापनायैवैतद्विधायी सदाप्रभुः।
स सदाप्रभुरित्येव नामधेयेन कीर्त्तितः॥
३ त्वं माम् आह्वय तेनाहं दास्यामि तुभ्यमुत्तरं।
त्वज्ज्ञानातीतगूढार्थांस्त्वां वक्ष्यामि महत्तमान्।
४ इस्रायेलो य ईशः स ब्रवीतीदं सदाप्रभुः।
सेतूनां कारणादेव धृतासीनाञ्च कारणात्।
पुरस्यैतस्य गेहानि यिहूदायाश्च भूभृतां।
सर्व्ववेश्मानि भग्नानि तान्यधीदं ब्रवीम्यहं॥
५ ये कल्दीयजनैः सार्द्धं युद्धं कर्त्तुमुपस्थिताः।

जनानां सर्व्वदौर्जन्याद् एतत्पूर्य्या पराङ्मुखः।
अहं स्वकोपरोषाभ्यां यान् निपातितवान् नरान्।
गेहानि कुणपैस्तेषां ते पूरयितुमागताः॥
पश्य क्षतानि बद्धाहं तस्यै दास्यामि सुस्थतां। ६
आरोग्यं तज्जनानाञ्च कृत्वा कल्याणसत्ययोः।
प्राचुर्य्यं सम्मुखे तेषां स्थापयिष्याम्यनावृतं॥
यिहूदायाश्च दासत्वम् इस्रायेलश्च दासतां। ७
परिवर्त्त्य करिष्यामि पूर्व्ववत् तान् प्रतिष्ठितान्॥
यद्यन्ममापराद्धं तैः शुद्धांस्तत्सर्व्वदोषतः। ८
तान् करिष्यामि तेषाञ्च क्षमिष्ये सर्व्वपातकं।
मम यत्तैरपाराधि मद्विद्रोहादकारि च॥
पृथिव्याः सर्व्वजातीनां साक्षात् स्तुत्यं विभूषकं। ९
मम हर्षप्रदं नाम नगरीयं भविष्यति॥
यतोऽहं यत् करिष्यामि क्षेममेतान् जनान् प्रति।
तस्य श्रोष्यन्ति वार्त्तां ता एतेषाञ्च मया कृतात्।
सकलक्षेमकल्याणाद् भीत्वा यास्यन्ति वेपनं॥
सदाप्रभुरिदं ब्रूते स्थानमेतन्निरालयं। १०
निर्जनं पशुहीनञ्चेति युष्माभि र्निगद्यते॥
नष्टेषु जनहीनेषु निवासिवर्जितेषु च।
पशुहीनेषु चैतेषु यिहूदायाः पुरेषु तु।
यिरूशालमश्च मार्गेषु पुनः संश्रोष्यते ध्वनिः॥
हर्षध्वनिः प्रमोदस्य ध्वनि र्वरस्य च ध्वनिः। ११
कन्यायाश्च ध्वनि र्नृणां ध्वनि र्व्याहरतामिदं।
यथा संस्तुत यूयं हि वाहिनीनां सदाप्रभुं।
यस्मात् सदाप्रभुः साधुः करुणा तस्य शाश्वती॥
ध्वनिः सदाप्रभो र्गेहे स्तवेनोत्सृजतां बलिं।
यतो देशस्य दासत्वं परिवर्त्त्य मया दशा।
आद्या दायिष्यते तस्मै ब्रवीतीदं सदाप्रभुः॥
भाषते भारतीमेनां वाहिनीनां सदाप्रभुः। १२
अस्मिन्निरालये स्थाने निर्जने पशुवर्जिते।
पुरेष्वस्य च सर्व्वेषु स्थान् विश्रामयतां व्रजान्।

वसति मेषपालानां पुनर्व्वारं भविष्यति ॥
१३ भूयो गिरिपुरेष्वेव समभूमेः परेषु च।
पुरेषु दाक्षिणात्येषु बिन्यामीनीयनीवृति।
यिरूशालमश्चतुर्दिक्षु यिहूदायाः पुरेषु च।
मेषा गणयतः पार्श्वे व्रजिष्यन्तीति वाक् प्रभोः ॥
१४ सदाप्रभुरिदं ब्रूत इस्रायेलन्वयं प्रति।
यिहूदीयान्वयञ्चाधि प्रोक्ता या शुभवाञ्छया।
येषु तां साधयिष्यामि ते पश्यायान्ति वासराः ॥
१५ दिनेषु तेषु तस्मिंश्च समये धर्म्मपल्लवं।
एकं प्ररोहयिष्याम्यहं दायूदोऽनुरोधतः।
देशे न्यायविचारं स धर्म्मञ्च साधयिष्यति ॥
१६ यिहूदा समये तस्मिन् परित्राणमवाप्स्यति।
निर्व्विघ्नञ्च यिरूशालम् वसतिं प्रकरिष्यति।
ख्यास्यतेऽनेन नाम्ना च "अस्मद्धर्म्मः सदाप्रभुः" ॥
१७ यस्मात् सदाप्रभु र्ब्रूत इस्रायेलो नृपासने।
आसीनः पुरुषो नैव दायूदः संहरिष्यते ॥
१८ पुरुषः सर्व्वकाले च होमार्थबलिमुत्सृजन्।
नैवेद्यं ज्वलयन् यज्ञं कुर्व्वंश्च मम सम्मुखे।
लेवीययाजकेभ्यो हि नैवोपसंहरिष्यते ॥
१९ अपरं सदाप्रभोरेतद् वाक्यं यिरिमियं प्रति प्रादुरभूत्।
२० सदाप्रभुरिदं ब्रूते दिनस्य नियमो मम।
नियमो मम रात्रेश्च युष्माभि र्यदि लुप्यते।
दिवसस्तेन रात्रिश्च स्वकाले नानुजायते ॥
२१ तर्हि मद्दासदायूदा सह यो नियमो मम।
सोऽपि विलोप्स्यते तस्य कश्चिद् वंशोद्भवो नरः।
तत्सिंहासन आसीनो राजत्वं न करिष्यति ॥
मदुपासकलेवीययाजकैश्च समं मया।
कृतो यो नियमः सोऽपि तदानीं विप्रलोप्स्यते ॥
२२ व्योम्नो बलं यथागण्यम् अमेयश्चाब्धिसैकतं।
तथैव स्वीयदासस्य दायूदोऽप्यन्वयो मया।
मदुपासकलेवीयश्रेणी च वर्द्धयिष्यते ॥

अपरं सदाप्रभोरेतद् वाक्यं यिरिमियं प्रति प्रादुर्बभूव। यौ द्वौ २३
वंशौ सदाप्रभुना वरितौ तौ तेन पुन र्निराकृताविति वदन्तो जना इमे २४
अस्माकं मम प्रजानां जातित्वं लुप्तमिवावमन्यन्ते, त्वयेदं किं नादर्शि?
सदाप्रभुस्त्वित्थमाह, २५

मया चेत् स्थापितो न स्यान्नियमो दिनरात्रयोः।
मया चेत् स्थापिता न स्युर् विधयो व्योममर्त्त्ययोः॥
याकूबः स्वीयदासस्य दायूदश्चान्वयं तदा। २६
निराकृत्य मयेब्राहीमिस्हाक्याकूब्कुलस्य हि।
राजत्वाय नरस्तस्य वंशान्नैव ग्रहीष्यते॥
तेषां दास्यं निवर्त्त्याहं भविष्ये तेषु वत्सलः॥

---

३४ चतुस्त्रिंशोऽध्यायः।

१ सिदिकियस्य प्रवासमधि भविष्यद्वाक्यं ८ अधिपै र्दासदासीनां मोचनात् परं पुनर्दासत्वपदे नियोगः १२ तत्कारणाच्च दूरदेशे तेषां भाविदासत्वस्य भविष्यद्वचः।

बाबिलीयराजो निबूखद्नित्सरस्तस्य कृत्स्नबलं तत्कर्तृत्वाधीनभूमेः सर्व्व- १
राज्यानि सर्व्वजातयश्च यदा यिरूशालमा तदीयसर्व्वनगरैश्च सहा-
युध्यन्त तदा सदाप्रभोरेतद् वाक्यं यिरिमियं प्रति प्रादुर्बभूव, यथा,
इस्रायेल ईश्वरः सदाप्रभुरित्थमाह, त्वं गत्वा यिहूदीयराजं सिदि- २
कियमालप तञ्च वद सदाप्रभुरित्थं ब्रूते पश्चाहं नगरमिदं बाबिलीय-
राजस्य करे समर्पयिष्यामि स च तदग्निना दाहयिष्यति। त्वञ्च तस्य ३
करान्नैव रक्षिष्यसे यतस्त्वं धारिष्यसे तस्य हस्ते च समर्पयिष्यसे
स्वनेत्राभ्याञ्च तस्य बाबिलीयराजस्य नेत्रे विलोकिष्यसे सम्मुखीभूय च
स्वमुखेन तमालपिष्यसि बाबिलञ्च गमिष्यसि। परन्तु भो यिहूदीय- ४
राज सिदिकिय त्वं सदाप्रभो र्वाक्यं शृणु त्वामधि सदाप्रभुरित्थमाह
त्वमसिना न मरिष्यसि। त्वं निरुद्वेगं मरिष्यसि तव पूर्व्वपुरुषान् ५
अर्थतस्त्वत्पूर्व्वं ये पुरातना राजान आसन् तानुद्दिश्य जनै र्यादृशो धूप-
दाहोऽकारि तादृशो धूपदाहस्त्वामप्युद्दिश्य कारिष्यते हा प्रभो हाहेति
विलापश्च विधायिष्यते यतो वाक्यमिदं मया गद्यत इति सदाप्रभुराह।
ततो भाविवादी यिरिमियस्तानि सर्व्ववाक्यानि यिरूशालमि यिहू- ६
दीयराजं सिदिकियं बभाषे। तदानीं बाबिलीयराजस्य बलानि ७

यिरूशालमा सार्द्धं यिहूदायाश्चावशिष्टैः सर्व्वनगरैः सार्द्धम् अर्थतो लाखीशेनासेकया च सार्द्धमयुध्यन्त यतो यिहूदाया दृढनगराणां मध्ये ते नगरे अवशिष्टे आस्तां।
८ मोचनस्य घोषणा भविष्यतीति नियमस्य यिरूशालमि स्थितैः सर्व्व-
जनैः सह राज्ञा सिदिकियेन निर्द्धारणात् परं सदाप्रभो र्वाक्यं
९ यिरिमियं प्रति प्रादुर्बभूव। फलत एकैको जनः स्वम् इब्रीयदासं स्वाम्
इब्रीयदासीञ्च मोचयित्वा विस्रक्ष्यति तेषां कोऽपि जनः स्वभ्रातरं
१० यिहूदीयजनं दास्यकर्म्म न कारयिष्यतीति नियमो बभूव। सर्व्वे मुख्य-
नरा यावन्तश्च जनाः स्वदासदासीनां मोचनार्थकं दास्यकर्म्मणि पुन
र्न नियोजनार्थकञ्च तं समयम् अङ्गीकृतवन्तस्ते सर्व्वे तत्रावधानं चक्रु-
११ रर्थतस्तत्रावधाय दासान् मोचयामासुः। तत्पश्चात्तु ते परावृत्य तान्
मोचितान् विसृष्टांश्च दासान् दासीश्च पुनरानाय्य दासान् दासी र्वा
कृत्वा वशीचक्रिरे।
१२ ततः सदाप्रभोः सम्मुखाद् यिरिमियं प्रति सदाप्रभोरिदं वाक्यं प्रादु-
१३ र्बभूव यथा, इस्रायेल ईश्वरः सदाप्रभुरित्थमाह, यस्मिन् कालेऽहं
दास्यगेहान्मिसरदेशाद् युष्मत्पूर्व्वपुरुषान् आनयं तस्मिन् काले तैः
१४ सह नियममेनं कृतवान् यथा, तव भ्राता य इब्रीयो जनस्त्वयि विक्री-
यते स सप्तवर्षाणां परिणामे युष्माकमेकैकजनेन विस्रष्टव्यः स षड्वर्षाणि
यावत् तव दास्यकर्म्म करोतु तत्पश्चात् त्वं तं मोचयित्वा स्वतो विस्र-
क्ष्यसीति। परन्तु युष्मत्पूर्व्वपुरुषै र्मम वाक्येऽवधानं कर्णपातो वा
१५ नाकारि। यूयन्त्वद्य परावृत्य मद्दृष्टौ यद् यथार्थं तदकार्ष्टार्थतः स्व-
भ्रातॄणां मोचनस्य घोषणामकार्ष्ट यस्योपरि च मम नाम कीर्त्त्यते
१६ तत्र मदीयमन्दिरे मत्साक्षान्नियममकार्ष्ट। पुनश्च परावृत्य मम नामा-
पवित्रीकृत्य युष्माकमेकैको जनः स्वातन्त्र्यलाभाय मोचितं विसृष्टञ्च
१७ स्वदासं स्वदासीञ्च पुनरानाय्य दासं दासीं वा कृत्वा वशीकृतवान्। ततो
हेतोः सदाप्रभुरित्थमाह स्वभ्रातुः स्वप्रतिवेशिनश्च मोचनस्य घोषणाय
युष्माभि र्ममाज्ञायाम् अवधानं नाकारि, तस्मात् सदाप्रभुराह पश्य-
ताहं युष्मद्विरुद्धम् असिमारीच्छधानां मोचनं घोषयिष्यामि, युष्मांश्च
१८ पृथिव्याः सर्व्वराष्ट्रेषु वेपनास्पदं विधास्यामि। ये च नरा मम नियमं
लङ्घितवन्तोऽर्थतो वृषवत्सं द्विखण्डीकृत्य तत्खण्डयो र्मध्येन क्राम्यन्तो
१९ मम साक्षाद् यं समयम् अकार्षुस्तत्प्रतिज्ञां न साधितवन्तस्तान् अर्थतो

यिहूदाया मुख्यनरान् यिरूशालमस्य मुख्यनरान् नपुंसकान् याजकान्
दृषवत्सस्य खण्डयो र्मध्येनातिक्रान्तान् सर्व्वान् देशीयनरांश्च तद्वैरिणां २०
तत्प्राणनाशार्थिनाञ्च करेषु समर्पयिष्यामि तेषां कुणपानि चाकाशीय-
पक्षिणां भूचरजन्तूनाञ्च खाद्यानि भविष्यन्ति। यिहूदीयराजं सिदि- २१
कियं तस्य मुख्यनरांश्च तद्वैरिणां तत्प्राणनाशार्थिनाञ्च करेषु विशेषतो
युष्मत्तोऽपक्रान्तानां बाबिलीयराजस्य योद्धृणां करेषु समर्पयिष्यामि।
सदाप्रभु र्ब्रूते पश्चादहम् आज्ञां कृत्वा तान् पुनर्व्वारमेतन्नगरस्य विरुद्धम् २२
आनाययिष्यामि, ते च तद्विरुद्धं युद्धं कृत्वा तद् धरिष्यन्ति वह्निना
दाहयिष्यन्ति च यिहूदायाश्च नगराणि मया निवासिवर्ज्जितान्युत्सन्न-
स्थानानि कारिष्यन्ते।

---

३५ पञ्चत्रिंशोऽध्यायः।

१ रेखबीयैः स्वपूर्व्वपुरुषाणाम् आज्ञापालनं १२ यिहूदाया ईश्वराज्ञालङ्घनं १८ पूर्व्वपुरुषाणाम् आज्ञापालनहेतो रेखबीयान् प्रतीश्वरस्याशीर्व्वचनञ्च।

यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वकाले सदा- १
प्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुर्बभूव, यथा, त्वं रेखबीयजनानां २
समीपं गत्वा तानालप सदाप्रभो र्मन्दिरं नीत्वा कोष्ठमेकं प्रवेश्य तान्
द्राक्षारसं पायय च। ततोऽहं हबत्सिनियस्य पौत्रं यिर्मियाहस्य पुत्रं ३
यासनियं तस्य भ्रातॄन् सर्व्वपुत्रांश्च सर्व्वानेव रेखबीयजनानादाय सदा- ४
प्रभो र्मन्दिरं नीत्वा द्वारपालस्य शल्लूमसुतस्य मासेयस्य कोष्ठस्योर्द्ध्वे
मुख्यनराणां कोष्ठस्य पार्श्वे च स्थितम् ईश्वरीयनरस्य यिग्दलियसुतस्य
हाननस्य पुत्राणां कोष्ठं प्रावीविशं। तेषां रेखबवंशीयजनानां समक्षं ५
द्राक्षारसेन पूर्णानि भाण्डानि कंसांश्च स्थापयित्वा तानवादिषं यूयं
द्राक्षारसं पिबत। ते तु जगदुः, वयं द्राक्षारसं न पास्यामो यतो- ६
ऽस्मत्पूर्व्वपुरुषो रेखबस्य सुतो योनादबोऽस्मान् इत्थम् आदिष्टवान्
यथा, यूयं युष्माकं वंशाश्च कालान्तं यावद् द्राक्षारसं न पास्यथ।
गेहानि च न निर्म्मास्यथ वीजवपनं द्राक्षाक्षेत्राणि वा न करिष्यथ ७
युष्माकं तानि मव सन्तु। किन्तु यूयं यावज्जीवनं पटवेश्मसु वत्स्यथ तथा
सति यस्यां भूमौ प्रवसथ तत्र दीर्घकालं स्थास्यथ। अतो वयं स्वपूर्व्व- ८
पुरुषस्य रेखबसुतस्य योनादबस्य वाक्येऽवधायास्माभिरस्मद्भार्य्यापुत्र-

९ दुष्टिरभिश्च यावज्जीवनं द्राक्षारसो न पेयो वासाय च गृहाणि न
निर्म्मितव्यानि द्राक्षोद्यानं क्षेत्रं वीजवपनं वास्माभिरकर्त्तव्यमिति यद्यत्
१० तेनादिष्टास्तदेवाचरितवन्तः। वयं पटवेश्मसूषितवन्तो यद्यच्चास्माकं
११ पूर्व्वपुरुषेण योनादबेनादिष्टास्तत्तावधायाचरितवन्तः। अपरं यदा बाबि-
लीयराजो निबूखद्निसरो देशमिमम् आक्राम्यत् तदा वयं कथितवन्तः,
आगच्छत कल्दीयबलानां सम्मुखाद् अरामीयबलानां सम्मुखाच्च वयं
यिरूशालमं प्रविशामस्ततो हेतोरस्माभि र्यिरूशालमि वसतिरकारि।
१२ ततः सदाप्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुर्बभूव यथा, इस्रायेल
१३ ईश्वरो वाहिनीनां सदाप्रभुरित्यमाह, त्वं गत्वा यिहूदाया जनान्
यिरूशालमो निवासिनश्च वद, सदाप्रभु र्ब्रूते मम वाक्येऽवधानाय यूयं
१४ किं शिक्षां न ग्रहीष्यथ? द्राक्षारसपानमकर्त्तव्यमित्यादीनि यानि वा-
क्यानि रेखबसुतो योनादबः स्वसन्तानानादिष्टवांस्तानि दृढान्यभवन्,
अद्यापि तै र्द्राक्षारसो न पीयते यतः स्वपूर्व्वपुरुषस्यादेशस्तैः पाल्यते,
अहन्त्वतन्द्री सन् युष्मान् यद्यद् गदितवान् मम तद्वाक्ये युष्माभिरवधानं
१५ नाकारि। अहम् अतन्द्री सन् स्वदासान् सर्व्वभाविवादिनोऽपि युष्मद-
न्तिकं प्रहित्य कथितवान् सर्व्वे यूयं स्वकुमार्गात् परावर्त्तध्वं सदाचारञ्च
कुरुध्वम् इतरदेवानां सेवनाय तान् मानुगच्छत तथा कृते यो देशो
मया युष्मभ्यं युष्मत्पूर्व्वपुरुषेभ्यश्च प्रादायि तत्र निवत्स्यथ, यूयन्तु कर्णपातं
१६ मम वाक्येऽवधानं वा नाकार्ष्ट। यतो हेतो रेखबसुतस्य योनादबस्य
वंशाः स्वपूर्व्वपुरुषस्य दत्तम् आदेशं पालितवन्तो जनास्त्वेते मम वाक्यं न
१७ गृहीतवन्तस्ततो हेतोरिस्रायेल ईश्वरो वाहिनीनामीश्वरः सदाप्रभु-
रित्यमाह पश्य यिहूदाया यिरूशालम्निवासिनाञ्च सर्व्वेषां विरुद्धं यस्य
कथामहं कथितवान् तत् सर्व्वममङ्गलं तान् प्रापयिष्यामि, यतस्तान्
प्रति भाषमाणस्य मम वाक्यं तै र्न गृहीतं मयि तान् आह्वयति च तैः
किमप्युत्तरं नादायि।
१८ अपरं यिरिमियस्तान् रेखबवंशीयजनान् जगाद, इस्रायेल ईश्वरो
वाहिनीनां सदाप्रभुरित्यमाह यतो हेतो यूयं स्वपूर्व्वपुरुषस्य योना-
दबस्याज्ञां गृहीतवन्तस्तस्य च सर्व्वमादेशं पालितवन्तस्तेन यद्यद् आ-
१९ दिष्टास्तत् सर्व्वमाचरितवन्तश्च ततो हेतोरिस्रायेल ईश्वरो वाहिनीनां
सदाप्रभुरित्यमाह सर्व्वकाले मत्समक्षं दण्डायमानो नरो रेखबसुताद्
योनादबान्नैवोपसंहारिष्यते।

३६ षट्त्रिंशोऽध्यायः ।

१ ईश्वरस्याज्ञातो यिरिमियेण पुस्तकलेखनं ४ तत्पठनाय बारूकं प्रति यिरिमियस्याज्ञा ९ जनानां सन्निधौ बारूकेण पुस्तकपठनं ११ मीखायेन बारूकस्य कथाया अधिपाश्यर्ण प्रकाशनं २० अधिपैस्तद्वाचि राजानं ज्ञापितायां तत्पुस्तकानयनाय राज्ञा यिहूदेः प्रेषणं तत्पाठं निशम्य पुस्तकदाहनं २७ अपरपुस्तकलेखनायादिष्टेन यिरिमियेण राज्ञो भाविदण्डप्रचारः ३२ बारूकेण द्वितीयपुस्तकलेखनञ्च ।

यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वस्य चतुर्थ- १
वत्सरे सदाप्रभोरेतद् वाक्यं यिरिमियं प्रति प्रादुर्बभूव यथा, त्वं लिपि- २
योग्यं पुस्तकं गृहाण त्वां प्रत्यादौ मम कथनकालादर्थत आयोशिय-
राजत्वाद् अद्य यावद् इस्रायेलमधि यिहूदामधि सर्व्वा इतरजातीश्चाधि
यानि वाक्यान्यहं तुभ्यं कथितवान् तानि सर्व्वाणि तत्र लिख। स्याद् ३
यिहूदावंशीयानां सर्व्वं यदमङ्गलं कर्त्तुं सङ्कल्पयामि तन्निशम्य त एकैकशः
स्वकुमार्गात् परावर्त्तिष्यन्ते तथा सत्यहं तेषाम् अपराधं पापञ्च क्षमिष्ये।
ततो यिरिमियो नेरियसुतं बारूकम् आह्वाययामास बारूकश्च ४
यिरिमियं प्रति सदाप्रभुना कथितानि सर्व्ववाक्यानि तद्वक्त्राच्छ्रुत्वा
तस्मिन् लिपियोग्ये पुस्तके लिलेख। अपरं यिरिमियो बारूकम् इदम् ५
आदिदेश यथा, अहं रुद्धोऽस्मि सदाप्रभो मन्दिरं गन्तुं न शक्नोमि।
त्वन्तु तत्र गत्वा मम वक्त्राच्छ्रुतानि यानि वाक्यान्यत्र पुस्तके लिखित- ६
वान् सदाप्रभोस्तानि वाक्यान्युपवासदिने सदाप्रभो मन्दिर उच्चैःस्वरेण
जनानां कर्णगोचरे पठ स्वपुरेभ्य आगतानां सर्व्वयिहूदीयजनानाञ्च
कर्णगोचरेऽपि तानि पठ। स्यात् सदाप्रभोः साक्षात् तैः साध्यसाधना ७
निवेदयिष्यते ते चैकैकशः स्वकुमार्गात् परावर्त्तिष्यन्ते यतः सदाप्रभु-
रेतस्या जाते र्वैपरीत्येन यस्य कथां कथितवान् स कोपो रोषश्च महान्।
ततस्तस्मिन् पुस्तके लिखितानां सदाप्रभो र्वाक्यानां सदाप्रभो र्मन्दिरे ८
पाठमधि नेरियसुतो बारूको भाविवादिना यिरिमियेण यद्यद् आ-
दिष्टस्तच्चकार।
अपरं यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वस्य ९
पञ्चमवत्सरस्य नवममासे यिरूशालमि स्थिताः सर्व्वे जना यिहूदाया
नगरेभ्यो यिरूशालमम् आगताः सर्व्वे जनाश्च सदाप्रभोः समक्षम्
उपवासं घोषयामासुः। तदानीं बारूकः सदाप्रभो र्मन्दिरं गत्वा सदा- १०
प्रभो र्मन्दिरस्य नूतनद्वारस्य प्रवेशस्थान उच्चतरप्राङ्गणस्थे शाफनसुतस्य

गिमरियस्य लेखकस्य कोष्ठे सर्व्वजनानां कर्णगोचरे तस्मिन् पुस्तके लिखितानि यिरिमियस्य वाक्यानि पपाठ।

११ तदानीं शाफनस्य पौत्रो गिमरियस्य पुत्रो मीखायस्तत्पुस्तकपठनात्
१२ सदाप्रभोस्तानि सर्व्ववाक्यानि श्रुत्वा राजप्रासादं लेखकस्य कोष्ठं
जगाम। तत्र सर्व्वेऽधिपा अर्थतो लेखक इलीशामाः शिमयियस्य सुतो
दिलायोऽक्बोरस्य सुत इल्नाथनः शाफनस्य सुतो गिमरियो हननि-
१३ यस्य सुतः सिदिकियश्चेत्यादयः सर्व्वेऽधिपा उपविष्टा आसन्। ततो
जनानां कर्णगोचरे बारूकेण पुस्तकपठनकाले मीखायो यानि वाक्यानि
१४ श्रुतवान् तानि सर्व्वाणि तान् जगाद। ततोऽधिपाः सर्व्वे कूशेः प्रपौत्रं
शेलिमियस्य पौत्रं निथनियस्य पुत्रं यिहूदिं बारूकस्य समीपं प्रहित्य तं
जगदुः जनानां कर्णगोचरे यत् पुस्तकं त्वयापाठि तद् हस्तेनादायागच्छ।
ततो नेरियस्य पुत्रो बारूकस्तत् पुस्तकं हस्तेनादाय तेषाम् अन्तिकम्
१५ उपतस्थौ। ते च तं जगदुः, त्वमुपविश्यास्मत्कर्णगोचरे तत् पठ। तदा
१६ बारूकस्तेषां कर्णगोचरे पपाठ। ततस्तानि सर्व्ववाक्यानि श्रुण्वन्तस्ते
परस्परं सभयदृष्टिं चक्रिरे बारूकञ्च जगदुः, वयमेतानि सर्व्ववाक्या-
१७ न्यवश्यं राजानं ज्ञापयिष्यामः। अपरं ते बारूकं पप्रच्छुः, त्वं कथमेतानि
१८ सर्व्ववाक्यानि तस्य वक्त्राल्लिखितवान् तदस्मान् वदितुमर्हसि। बारूक-
स्तान् जगाद स स्ववक्त्रेण सर्व्वाण्येतानि वाक्यानि मत्समक्षम् उच्चा-
१९ रितवान् अहञ्च मस्या तानि पुस्तके लिखितवान्। ततस्तेऽध्यक्षा बा-
रूकमूचुः, त्वं यिरिमियश्च गत्वात्मानं गुहायां कुत्र स्थस्तत् कोऽपि न
जानातु।

२० अपरं ते तत् पुस्तकम् इलीशामानाम्नो लेखकस्य कोष्ठे निधाय प्राङ्गणे
राज्ञः समीपं गत्वा तानि सर्व्वाणि वाक्यानि राज्ञः कर्णगोचरे जगदुः।
२१ ततो राजा तत्पुस्तकानयनार्थं यिहूदिं प्रेषयामास स च यिहूदि-
रिलीशामानाम्नो लेखकस्य कोष्ठात् तदानीय राज्ञः कर्णगोचरे राज्ञः
२२ समक्षं तिष्ठतां सर्व्वेषाम् अधिपानां कर्णगोचरे च पपाठ। तदानीं
नवममासि राजा हैमन्तिकगेहे उपविष्ट आसीत् तत्समक्षं हसन्ती
२३ चाज्वलत्। अपरं यिहूदिना त्रिषु चतुर्षु वा पत्रेषु पठितेषु स लेखकस्य
छुरिकया तानि कर्त्तित्वा हसन्तीस्थवह्निमध्येऽक्षिपत्। इत्थं समस्तमेव
२४ तत् पुस्तकं हसन्तीस्थवह्निना भस्मीचक्रे। तानि सर्व्वाणि वाक्यानि
श्रुत्वापि तेन राज्ञा तस्य सर्व्वै र्भृत्यैश्च त्रासो वस्त्रविदारणं वा

नाकारि। पुस्तकं मा दह्यतामितील्नाथनेन दिलायेन गिमरियेण २५
च प्रार्थितोऽपि सन् राजा तेषां प्रार्थनां न जग्राह। अपरं राजा २६
लेखकस्य बारूकस्य भाविवादिनो यिरिमियस्य चानयनार्थं राजपुत्त्रं
यिरह्मेलम् अखोयेलसुतं सिरायम् अब्देलसुतं शेलिमियञ्च प्राहिणोत्।
सदाप्रभुस्तु तौ गूढवान्।

राज्ञा तस्य पुस्तकस्य दाहनात् तत्र यिरिमियस्य वक्त्राद् बारूकेण २७
लिखितानां वाक्यानाञ्च दाहनात् परं यिरिमियं प्रति सदाप्रभोरेतद्
वाक्यं प्रादुर्बभूव, यथा, त्वं पुनर्व्वारमपरमेकं पुस्तकं गृहाण यिहूदीय- २८
राजेन यिहोयाकीमेन दग्धे तस्मिन् प्रथमे पुस्तके यानि वाक्यान्यासन्
तानि पुरातनवाक्यानि च तत्र लिख। यिहूदीयराजं तं यिहोयाकीम- २९
मधि चेदं वद, सदाप्रभुरित्थं ब्रूते बाबिलीयराज आगमिष्यति देशमिमं
विनाशयिष्यति मनुष्यपशुहीनं करिष्यति चेदृशीं कथां त्वमत्र पुस्तके
किमर्थं लिखितवानिति ब्रुत्वा तत् पुस्तकं त्वया दाहितं। ततो हेतोः ३०
सदाप्रभुस्तं यिहूदीयराजं यिहोयाकीममधीत्थं भाषते दायूदः सिंहासन
आसीनस्तस्य कोऽपि जनो न भविष्यति तस्य कुणपञ्च दिवा रौद्रे
यामिन्याञ्च हिमे निक्षिप्तं पतिष्यति। अहञ्च तस्मै तस्य वंशाय भृत्ये- ३१
भ्यश्च तेषाम् अपराधस्य फलं दास्यामि, यस्यामङ्गलस्य कथायां मया
गदितायां ते यिरूशालमो निवासिनश्च यिहूदाया जनाश्चावधानं न
कृतवन्तस्तत् सर्व्वम् अमङ्गलं तान् प्रापयिष्यामि च।

ततो यिरिमियेणान्यत् पुस्तकमादाय नेरियसुताय बारूकाय लेखका- ३२
यादायि यिहूदीयराजेन यिहोयाकीमेन भस्मीकृते पुस्तके च यानि
वाक्यान्यासन् तानि सर्व्वाणि स यिरिमियस्य वक्त्रात् तत्र पुस्तके लिलेख
तत्सदृशान्यपराण्यपि बहूनि वाक्यानि च तत्र तेन लिलिखिरे।

---

३७ सप्तत्रिंशोऽध्यायः।

१ कल्दीयेषु यिरूशालमोऽपगतेषु ईश्वराय प्रार्थनार्थं यिरिमिये सिदिकियस्य निवेदनं ६ कल्दीया यिरूशालमं परावृत्य तद् धरिष्यन्तीति यिरिमियस्य भविष्यद्वचः ११ तत्कारणाद् यिरिमियस्य कारायां बन्धनं १६ नृपेण साकं यिरिमियस्य सम्भाषणं निवेदनञ्च।

यिहोयाकीमसुतस्य यिहोयाखीनस्य विनिमये योशियसुतः सिदि- १
कियो राजा बभूव, यतो बाबिलीयराजो निबूखद्रित्सरस्तं यिहूदादेशस्य

१ राजत्वे नियुक्तवान्। स तु तस्य भृत्या देशीयजनाश्च भाविवादिना
२ यिरिमियेणोक्तेषु सदाप्रभो र्वाक्येष्ववधानं न चक्रिरे। अपरं सिदि-
कियो राजा शेलिमियसुतं यिहूखलं मासेयसुतं सिफनियं याजकञ्च
भविष्यद्वक्तु र्यिरिमियस्यान्तिकं प्रहित्य जगाद त्वम् अस्मत्कृतेऽस्मदीश्वरं
४ सदाप्रभुं प्रसादयितुम् अर्हषि। तदानीं यिरिमियः कारागृहे रुद्धो
५ नासीत् स जनानां मध्ये गमागमावकरोत्। फिरौणो बलानि च मि-
सरदेशान्निर्गतान्यासन् तेषां वार्त्ताञ्च निशम्य यिरूशालमवरोधकारिणः
कल्दीयजना यिरूशालमोऽपगता आसन्।

६ ततो भाविवादिनं यिरिमियं प्रति सदाप्रभोरिदं वाक्यं प्रादुर्ब-
७ भूव। इस्रायेल ईश्वरः सदाप्रभुरित्थं ब्रूते यूयं मां प्रष्टुं येन यिहूदी-
यराजेन प्रहितास्तमिदं वदत, पश्यत युष्मत्साहाय्याय फिरौणो यानि
८ बलानि निष्क्रान्तानि तानि स्वदेशं मिसरं पुन र्गमिष्यन्ति। कल्दी-
याश्च प्रत्यावृत्य नगरस्यैतस्य विरुद्धं योत्स्यन्ते तच्च धृत्वा वह्निसात्
९ करिष्यन्ति। सदाप्रभुरित्थं ब्रूते कल्दीयाः सर्व्वथास्मत्तोऽपगमिष्यन्तीति
१० वदन्त आत्मवञ्चनं मा कुरुध्वं यतस्ते नैवापगमिष्यन्ति। परन्तु युष्माभिः
सह युध्यमानानां कल्दीयानां कृत्स्नबलेषु युष्माभि र्हतेषु सत्सु यदि
तेषाम् असिविद्धा नराः शिष्येरंस्तर्हि त एकैकशः स्वपटवेश्मसूत्थाय
नगरमेतद् वह्निसात् करिष्यन्ति।

११ फिरौणो बलानां कारणात् कल्दीयानां बलेषु यिरूशालमः सम्मु-
१२ खात् प्रस्थितेषु यिरिमियो बिन्यामीनदेशं गन्तुं जनानां मध्ये तस्मात्
१३ स्थानाद् अंशमादातुञ्चेच्छन् यिरूशालमो निरगच्छत्। बिन्यामीनीय-
गोपुरे तु तस्मिन्नुपस्थिते हननियस्य पौत्त्रः शेलिमियस्य पुत्त्रो यिरिय
इतिनामा यो रक्षिवर्गाधिकारी तत्राविद्यत, स तं जगाद त्वं कल्-
दीयान् आश्रयितुमुद्यत इत्युक्त्वा च तं भाविवादिनं यिरिमियं दधार।
१४ यिरिमियो बभाषे तदसत्यं नाहं कल्दीयान् आश्रयितुमुद्यतोऽस्मि।
स तु तस्य वाक्यं न जग्राह। यिरियेण धृतो यिरिमियश्चाधिपानां सम-
१५ क्षं नीतः। ते चाधिपा यिरिमियाय क्रुद्धा तं ताडयामासुः काराया-
श्चार्थतो लेखकस्य योनाथनस्य गृहे च तं निरुरुधुः, यतस्ते तदेव का-
रागृहं कृतवन्तः।

१६ तत् कूपगृहं सङ्कुचितगुहावलिञ्च प्रविष्टेन यिरिमियेण दीर्घकालं
१७ तत्रावस्थितेः परं राजा सिदिकियो जनान् प्रहित्य तम् आनाययामास।

अपरं राजा स्वप्रासादे रहसि तं पप्रच्छ सदाप्रभोः किमपि वाक्यं किं
विद्यते? यिरिमिय आह विद्यते त्वं बाबिलीयराजस्य हस्ते समर्पयि-
ष्यसे। ततः परं यिरिमियः सिदिकियं राजानं जगाद, तव त्वदीय- १८
दासानाम् एतज्जनानाञ्च मया किम् अपराद्धं यत्कृते यूयं मां कारागृहे
निहितवन्तः? बाबिलीयराजो युष्मद्विरुद्धम् एतद्देशस्य च विरुद्धं नैवा- १९
गमिष्यतीति भाविवार्त्तां ये युष्मान् उक्तवन्तस्ते युष्मदीयभाविवादिनः
कुत्र विद्यन्ते? अधुना भो मत्प्रभो राजन् भवान् शृणोतु भवतः समक्षं २०
ममेयं प्रार्थना निवेद्यतां भवान् मां लेखकस्य योनाथनस्य गृहे पुन र्न
निदधातु तत्र मम मृत्यु र्वा न भवतु। ततो राज्ञः सिदिकियस्यादेशाद् २१
यिरिमियः कारायाः प्राङ्गणेऽरक्ष्यत यावच्च नगरे पूपा निःशेषा नाभवं-
स्तावत् प्रतिदिनं तस्मै पूपकाराणाम् आपणाद् एकैकः पूपोऽदीयत।
इत्थं यिरिमियः कारायाः प्राङ्गणेऽवतस्थे।

---

३८ अष्टत्रिंशोऽध्यायः।

१ मल्कियस्य कारायां यिरिमियस्य समर्पणं ७ एबद्-मेलकेन तन्मुक्तिः १४ राज्ञा सार्द्धं सम्भाषणं २४ राजाज्ञया तत्सम्भाषणस्य गोपनञ्च।

अपरं मत्तनसुतः शिफटियः पश्हूरसुतो गिदलियः शेलिमियसुतो १
यिहूखलो मल्कियसुतः पश्हूरश्च सर्व्वजनान् प्रति कथ्यमानानि यिरि-
मियस्यैतानि वाक्यानि शुश्रुवु र्यथा, सदाप्रभुरित्थमाह यो जनो नग- २
रमध्ये स्थास्यति स खड्गक्षुधामारीभि र्मरिष्यति यस्तु कल्दीयान् प्रति
निर्गमिष्यति स जीविष्यति तस्य प्राणाश्च लोप्त्रवत् तस्य भविष्यन्ति
स च जीविष्यति। सदाप्रभुरित्थमाह नगरमिदम् अवश्यं बाबिलीय- ३
राजस्य बलानां करेषु समर्पयिष्यते तैश्च धारिष्यते। अतस्तेऽधिपा ४
राजानम् ऊचुः, नरस्यैतस्य प्राणदण्डो भवतु यतो हेतोरेतादृशवाक्या-
नि भाषमाणः सोऽत्र नगरेऽवशिष्टानां योद्धॄणां हस्तान् सर्व्वजनानाञ्च
हस्तान् शिथिलीकरोति यतो नरोऽयं न जनानां क्षेमाय किन्त्वमङ्ग-
लाय चेष्टते। ततो राजा सिदिकियस्तान् जगाद, पश्यत स युष्माकं ५
हस्तगतोऽस्ति यतो राजा युष्माकं किमपि न प्रभवति। तदा ते यिरि- ६
मियं धृत्वा कारायाः प्राङ्गणे स्थिते राजपुत्रस्य मल्कियस्य कूपे निचि-
क्षिपुः। ते रज्जुभि र्यिरिमियं तत्रावरोहयामासुः। कूपे तु तोयं नासीत्
पङ्क एवासीत् यिरिमियश्च तत्र पङ्केऽमज्जत्।

७ ततः परं यिरिमियः कूपे न्यधायीति वार्त्ता राजपूर्य्यां स्थितेन
कूशीय एबद्-मेलक इतिनाम्ना नपुंसकेनाश्रावि तदानीं राजा वि-
८ न्यामीनीयगोपुरे उपविष्ट आसीत्। अत एबद्-मेलको राजप्रा-
९ सादान्निर्गत्य राजानं जगाद, यथा, भो मत्प्रभो राजन् अमी
नरा भाविवादिनं यिरिमियं प्रति यत् कृतवन्तस्तत् सर्व्वं कर्म्म दुष्टं स
तैः कूपे निःक्षिप्तः। स तु स्वस्थाने क्षुधातो मरणोद्यत आसीत् यतो
१० नगरे भक्ष्यं नावशिष्यते। ततो राजा तं कूशीयम् एबद्-मेलकम्
आदिदेश यथा, त्वम् अतः स्थानात् त्रिंशन्नरान् आदाय भाविवक्तु
११ र्यिरिमियस्य मरणात् पूर्व्वं तं कूपाद् उद्धर। ततः एबद्-मेलकस्तान्
नरान् आदाय राजप्रासादं गत्वा धनागारस्याधो निविश्य जीर्ण-
वस्त्राणि जीर्णपटखण्डांश्च गृहीत्वा रज्जुभिः कूपे यिरिमियस्य समक्षम्
१२ अवतारयामास। स च कूशीय एबद्-मेलको यिरिमियं जगाद त्वम्
एतानि जीर्णवस्त्राण्येतांश्च पटखण्डान् स्वभुजकोटरयो रज्जूनाम् अधो
१३ धत्स्व। यिरिमियेण तथा कृते ते रज्जुभि र्यिरिमियम् उत्कर्षन्तः
कूपाद् उद्दध्रुः। ततः परं यिरिमियः कारायाः प्राङ्गणेऽवतस्थे।
१४ अपरं राजा सिदिकियो दूतं प्रहित्य भाविवादिनं यिरिमियं सदा-
प्रभो र्मन्दिरस्य तृतीयं प्रवेशस्थानं स्वान्तिकम् आनाययामास। तत्र च
राजा यिरिमियं जगाद, अहं त्वाम् एकां कथां प्रक्ष्यामि त्वं मत्तः कि-
१५ मप्यपह्नोतुं नार्हसि। ततो यिरिमियः सिदिकियं जगाद, यद्यहं त्वां
ज्ञापयामि तर्हि त्वं मां किं न हनिष्यसि? यदि च तुभ्यं मन्त्रं ददामि
१६ तर्हि त्वं मम वाक्ये मनो नावधास्यसे। तदा राजा सिदिकियो रहसि
यिरिमियाय दिव्येन प्रतिशुश्राव यथा, अस्मत्प्राणानां स्रष्टा सदा-
प्रभु र्यदि जीवति तर्ह्यहं त्वां न हनिष्यामि न च त्वत्प्राणनाशार्थिनाम्
१७ अमीषां नराणां करेषु त्वां समर्पयिष्यामि। ततो यिरिमियः सिदि-
कियं जगाद, इस्रायेल ईश्वरो वाहिनीनाम् ईश्वरः सदाप्रभुरित्यमाह,
यदि त्वं बाबिलीयराजस्य मुख्यनराणाम् अन्तिकं निर्गच्छसि तर्हि तव
प्राणा जीविष्यन्ति नगरीयञ्च वह्निना न धक्ष्यते त्वञ्च सपरिवारो जी-
१८ विष्यसि। यदि तु त्वं बाबिलीयराजस्य मुख्यनराणाम् अन्तिकं न नि-
र्गच्छसि तर्हि नगरीयं कल्दीयानां करेषु समर्पयिष्यते ते र्वह्निसात्
१९ कारिष्यते च त्वमपि तेषां करेभ्यो न रक्षिष्यसे। पुनश्च राजा सिदि-
कियो यिरिमियं जगाद, ये यिहूदीयजनाः कल्दीयान् आश्रितवन्त-

स्तेभ्योऽहम् उद्विजे तेषां करेषु चेत् समर्प्येय तर्हि ते माम् आत्तारयि-
ष्यन्ति। यिरिमियो जगाद, त्वं न समर्पयिष्यसे। अहं त्वां यद् व्याह- २०
रामि तत्र सदाप्रभो र्वाक्ये त्वमवधातुम् अर्हषि तथा कृते तव मङ्गलं
सम्भविष्यति त्वत्प्राणाश्च जीविष्यन्ति। यदि तु त्वं निर्गन्तुम् असम्मतो २१
भवसि तर्हि सदाप्रभुनाहं यद् वचो ज्ञापितस्तत् शृणु। पश्य यिहूदी- २२
यराजप्रासादेऽवशिष्टाः सर्व्वा योषितो बहि र्बाबिलीयराजस्य मुख्य-
नराणां समीपं नायिष्यन्ते वाक्यमिदञ्च वक्ष्यन्ति,

तव ये बन्धवस्ते त्वां प्रलोभ्य प्राभवंस्तव।
पङ्के त्वच्चरणौ मग्नौ तेऽपक्रान्ताः पराङ्मुखाः॥

सकला एव तव भार्य्या तव सन्तानाश्च बहिः कल्दीयानां समीपं २३
नायिष्यन्ते त्वमपि तेषां करेभ्यो न रक्षिष्यसे किन्तु बाबिलीयराजस्य हस्तेन धारिष्यसे नगरमिदञ्च वह्निसात् कारयिष्यसि।

ततः परं सिदिकियो यिरिमियं जगाद, कोऽप्येताः कथा न जानातु २४
तेन त्वं न मरिष्यसि। त्वया सार्द्धमहं सम्भाषितवानिति श्रुत्वा यद्य- २५
धिपास्त्वाम् उपागत्य वदेयुः, राजा तुभ्यं किं कथितवांस्तदस्मान् ज्ञा-
पय किमप्यस्मत्तोऽपह्नोतुं नार्हषि तेनास्माभि र्न घानिष्यसे, अतो राजा
त्वां किं गदितवानिति, तर्हि त्वं तान् वद योनाथनस्य गृहेऽहं यत्पुन र्न २६
नीयेय तत्र न म्रियेय च तदर्थं मम प्रार्थनां राज्ञः समक्षं निवेदितवान्।
ततः परमधिपा यिरिमियम् उपागत्य पप्रच्छुः स तु राज्ञ आदेशात् २७
तानि सर्व्वाणि वाक्यानीवोत्तरं तेभ्यो ददौ, अतः सा वार्त्ता नाश्रावि
तस्मात् ते तत्सम्भाषणान्निवृत्ताः। अपरं यिरूशालमो धरणदिनं यावद् २८
यिरिमियः कारायाः प्राङ्गणेऽवतस्थे। यदा च यिरूशालम् अध्रियत तदा स तत्रासीत्।

---

३९ ऊनचत्वारिंशोऽध्यायः।

१ यिरूशालमः पराजयः ४ सिदिकियस्य नेत्रान्धता बाबिलं तस्य नयनं ८ पुरद्वारो लोकानां नयनं ११ यिरिमियमधि निबूखद्नित्सरस्याज्ञा १५ एबद्-मेलकमधि परमेश्वरस्य प्रतिज्ञा च।

यिहूदीयराजस्य सिदिकियस्य राजत्वस्य नवमवत्सरस्य दशममासे १
बाबिलीयमहीपति र्निबूखद्नित्सरस्तस्य निखिलसैन्यानि च यिरूशा-
लमो विरुद्धं समेत्य तद् अवरुरुधुः। अपरं सिदिकियस्य राजत्वस्यैका- २

३ दशवत्सरस्य चतुर्थमासस्य नवमदिने नगरं भग्नतां जगाम। ततो बाबि-
लीयराजस्य सर्व्वे मुख्यनरा अर्थतो नेर्गल-शरेत्सरः सम्गर-निबु नपुं-
सकानाम् अध्यक्षः सरसिखीमो गणकानाम् अध्यक्षो नेर्गल-शरेत्सरो
बाबिलीयराजस्यावशिष्टाश्च सर्व्वे मुख्यनरा प्रविश्य मध्यमे पुरद्वार
उपविविशुः।
४ तांस्तु निरीक्ष्य यिहूदीयराजः सिदिकियः सर्व्वे योद्धारश्च निशायां
पलाय्य राजोद्यानस्य मार्गेण द्वयोर्भित्त्यो र्द्वारेण नगरान्निष्क्रम्य प्रा-
५ न्तरगामिनं पन्थानं जग्मुः। परन्तु कल्दीयानां बलानि तेषां पश्चाद्
धावित्वा यिरीहोः प्रान्तरे तान् प्राप्तुत्तश्च धृत्वा हमातदेशस्थरिब्लां बा-
बिलीयराजस्य निबूखद्नित्सरस्यान्तिकं निन्युः स च तस्य विचारनिष्पत्तिं
६ चकार। ततो बाबिलीयराजो रिब्लायां सिदिकियस्य समक्षं तस्य
७ तनयान् घातयामास। स बाबिलीयराजो यिहूदायाः सर्व्वकुलीना-
नपि घातयामास सिदिकियस्य लोचने चोत्पाट्य बाबिलम् अपनयनार्थं
पित्तलीयनिगडैस्तं बन्धयामास।
८ कल्दीयाश्च राजप्रासादं जनपदानां वासस्थानञ्च वह्निना दाहया-
९ मासु र्यिरूशालमः कृत्स्नप्राचीरञ्च भूमिसाचक्रुः। शेषजनाश्चार्थतो
नगरेऽवशिष्टा ये च तमाश्रितवन्तस्ते पलायिता जना ये चापरे-
ऽवशिष्यन्त ते सर्व्वे एव शेषजना रक्षकसेनाध्यक्षेण निबूषरदनेन
१० बाबिलं प्रवासयाञ्चक्रिरे। परन्तु येषां किञ्चन नासीत् तादृशाः
कतिपया दुर्गतजनास्तेन रक्षकसेनाध्यक्षेण निबूषरदनेन यिहूदादेशे
शेषयाञ्चक्रिरे तस्मिन् दिने च तेभ्यो द्राक्षोद्यानानि क्षेत्राणि च
ददिरे।
११ अपरं यिरिमियमधि बाबिलीयराजो निबूखद्नित्सरो रक्षकसेना-
१२ ध्यक्षं निबूषरदनम् इदम् आदिदेश, त्वं तं गृहाण तस्मिंश्च स्वदृष्टिं
निधत्स्व तस्य किमप्यहितं मा कुरु, परन्तु स त्वां यद् वदिष्यति तदेव तं
१३ प्रत्याचर। ततो रक्षकसेनाध्यक्षो निबूषरदनो नपुंसकाध्यक्षो निबूषस्-
बनो गणकाध्यक्षो नेर्गल-शरेत्सरो बाबिलीयराजस्य सर्व्वे मुख्यनराश्च
१४ जनान् प्रेषयामासुः। प्रहित्य च कारायाः प्राङ्गणाद् यिरिमियम् उद्धृत्य
गृहं नयनार्थं शाफनपौत्त्रस्याहीकामपुत्त्रस्य गिदलियस्यान्तिकम् उप-
स्थापयामासुस्ततः स जनानां मध्येऽवसत्।
१५ कारायाः प्राङ्गणे यिरिमियस्यावस्थितिकाले सदाप्रभोरिदं वाक्यं

यिरिमियं प्रति प्रादुर्बभूव, त्वं गत्वा कूशीयम् एबद-मेलकं वद, इस्रा- १६
येल ईश्वरो वाहिनीनां सदाप्रभुराह, पश्याहममङ्गलाय न च मङ्ग-
लाय नगरेऽस्मिन् मम वाक्यानि सफलीकरिष्यामि तस्मिन् दिने तानि
त्वत्समक्षं सिद्धिं यास्यन्ति। त्वान्तु तस्मिन् दिने रक्षिष्यामीति सदा- १७
प्रभुराह, येषां भयात् त्वम् उद्विजसे तेषां नराणां करेषु नैव समर्प-
यिष्यसे। अवश्यमहं त्वाम् उद्धरिष्यामि त्वम् असिना न पतिष्यसि तव १८
प्राणाश्च लोप्त्रवत् तव भविष्यन्ति यतस्त्वं मामेव शरणं गत इति सदा-
प्रभुराह।

---

४० चत्वारिंशोऽध्यायः।

१ यिरिमियस्य मुक्तिः गिदलियमुपगमनं ७ विकीर्णयिहूदीनां गिदलियसमीपगमनं
१३ नियनियस्तुतस्येश्मायेलस्य कुमन्त्रणाया योहाननेन प्रकाशस्तत्र गिदलियस्या-
विश्वासश्च।

रक्षकसेनाधिपेन निबूषरदनेन रामातो यिरिमियस्य विसर्जनात् १
परं सदाप्रभो यद् वाक्यं यिरिमियं प्रति प्रादुरभूत् तद्वृत्तान्तोऽयं।
यदा स तमासादयत् तदा यिरूशालमो यिहूदादेशस्य च ये सर्व्वे
धृतजनाः प्रवासार्थं बाबिलम् अपानीयन्त तेषां मध्ये स निगडबद्ध
आसीत्। स रक्षकसेनापति र्यिरिमियं गृहीत्वा जगाद, तवेश्वरः २
सदाप्रभुरिदं स्थानमध्येतस्यामङ्गलस्य वाक्यं कथितवान्। सदाप्रभु र्यथा ३
गदितवान् तथैव तद् वर्त्तयामास साधयामास च। यतो युष्माभिः
सदाप्रभो र्विरुद्धं पापं कृत्वा तस्य वाक्येऽवधानं न कृतं ततो युष्माक-
मियं दशाभवत्। अधुना पश्याहम् अद्य त्वत्करस्थनिगडेभ्यस्त्वां मोचि- ४
तवान्, मया सार्द्धं बाबिलगमनं यदि तुभ्यं रोचते तर्ह्येहि, अहं त्वयि
दृक्पातं करिष्ये, यदि तु मया सार्द्धं बाबिलगमनं तुभ्यं न रोचते
तर्हि निवर्त्तस्व। पश्य कृत्स्नो देशस्त्वत्सम्मुखे स्थितः, यत् स्थानं
गमनाय तव भद्रम् उचितञ्च प्रतिभाति तदेव स्थानं याहि। तञ्च तदा- ५
नीमपि न प्रत्यावर्त्तमानं स पुन र्जगाद, शाफनस्य पौत्रोऽहीका-
मस्य पुत्रो यो गिदलियो बाबिलीयराजेन यिहूदादेशस्य नगरे-
ष्वधिकृतस्तत्समीपं वा याहि जनानां मध्ये च निवस यत् किञ्चन
स्थानं वा गमनाय तवोचितं प्रतिभाति तत् स्थानं याहि। अपरं स
रक्षकसेनाध्यक्षस्तस्मै पाथेयम् उपहारञ्च दत्त्वा तं विससर्ज। ततो ६

यिरिमियो मिष्पाम् अहीकामसुतस्य गिदलियस्यान्तिकं गत्वा तस्य
सङ्गे देशेऽवशिष्टानां जनानां मध्येऽवसत्।

७ अपरं बाबिलीयराजो ऽहीकामसुतं गिदलियं देशेऽधिकृतवान् ये
च जना बाबिलि प्रवासार्थं नापनीतास्तेषां मध्यात् तेन सार्द्धम् अव-
स्थित्यर्थं पुरुषान् योषितो बालकांश्च देशस्थान् कतिपयदुर्गतजनांश्च
८ नियुक्तवान् इति वार्त्ता क्षेत्रस्थैः सेनाध्यक्षैस्तेषां नरैश्चाश्रावि। तदानीं
ते ऽर्थतो निथनियसुत इस्मायेलः कारेहस्य सुतौ योहाननो योनाथनश्च
तन्हूमतसुतः सिरायो निटोफातीयस्यैफेः सुता माखातीयसुतो यिष-
नियश्चेमे स्वनरैः सहिता मिष्पां गिदलियस्य समीपम् उपतस्थुः।
९ ततः शाफनस्य पौत्रोऽहीकामस्य पुत्रो गिदलियः शपथेन तान् तेषां
नरांश्च जगाद कल्दीयानां सेवनान्मा बिभीत यूयमत्र देशे वसन्तो
१० बाबिलीयराजं सेवध्वं तेन युष्माकं मङ्गलं भविष्यति। पश्यताहम् अ-
स्मत्समीपम् आगच्छतः कल्दीयान् परिचरितुं मिष्पायां वत्स्यामि।
यूयन्तु द्राक्षारसं फलानि तैलञ्च संगृह्य पात्रेषु निधाय युष्मद्धृतनग-
११ रेषु बसत। बाबिलीयराजेन यिहूदायाः कतिपयशेषजना रक्षिताः शा-
फनपौत्रो ऽहीकामपुत्रो गिदलियस्तेष्वधिकृतश्चेति वार्त्ता यदा मोयाबे
ऽम्मोनवंशस्य मध्य इदोमे ऽन्यान्यदेशेषु च प्रवासिभिः सर्व्वै र्यिहूदीयैर-
१२ श्रावि, तदा तेऽपि सर्व्वे यिहूदीया येषु स्थानेषु विकीर्णा आसंस्तेभ्यः
प्रत्यागत्य यिहूदादेशस्थमिष्पां गिदलियस्य समीपम् उपस्थायातीव प्रा-
चुर्य्येण द्राक्षारसं फलानि च सञ्जगृहुः।

१३ अपरं कारेहस्य पुत्रो योहाननः सर्व्वे च क्षेत्रस्थसेनाध्यक्षा मिष्पां
१४ गिदलियस्य समक्षम् आगत्य तं जगदुः, निथनियसुत इस्मायेलस्त्वत्प्रा-
णाघातायाम्मोनवंशस्य राज्ञा बालीषेण प्रहितस्तत् त्वया किं ज्ञा-
१५ यते? अहीकामसुतो गिदलियस्तु तेषां वाक्यमसत्यं मेने। परन्तु का-
रेहस्य पुत्रो योहाननो मिष्पायां गिदलियं रहसि जगाद, भवतोऽनु-
मत्याहं गत्वा तं निथनियसुतम् इस्मायेलं हनिष्यामि कोऽपि तन्न
ज्ञास्यति भवान् कुतस्तेन हन्येत भवत्समीपं समागताः सर्व्वे यिहू-
१६ दीयाः किमर्थं विकीर्य्येरन् यिहूदायाः शेषजनाश्च कुतो नश्येयुः? अही-
कामसुतो गिदलियस्तु तं कारेहसुतं योहाननं जगाद, तत् कर्म्म मा
कार्षीरिस्मायेलमधि त्वं यद् वदसि तन्न सत्यं।

४१ एकचत्वारिंशोऽध्यायः।

१ इस्मायेलेन गिदलियादिजनानां वधः शेषजनान् आदायाम्मोनीयानां समीपं यातुं यात्रा ११ कारेहसुतेन योहाननेन तस्य कराद् अवशिष्टान् जनान् उद्धृत्य कल्दीयेभ्यो भयात् मिसरदेशं यातुम् उपक्रमश्च।

अपरं सप्तममासे राजामात्यानां मध्ये गणित इलीशामापौत्त्रो नि- १
थनियपुत्त्रः स राजवंशोद्भव इस्मायेलस्तेन सार्द्धं दशनराश्च मिस्पां गि-
दलियस्य समीपम् आजग्मुस्तत्र मिस्पायाञ्चैकत्राहारं चक्रिरे। अनन्तरं २
निथनियसुत इस्मायेलस्तत्सङ्गिनो दशजनाश्चोत्थाय शाफनस्य पौत्त्रम्
अहीकामस्य पुत्त्रं गिदलियम् असिना जघ्नुः। इत्थं यो नरो बाबिली-
यराजेन देशेऽधिकृतस्तं स (इस्मायेलो) मारयामास। यावन्तश्च यिहू- ३
दीया मिस्पायां तेन गिदलियेन सार्द्धम् आसन् ये च कल्दीययोद्धार-
स्तत्राविद्यन्त तान् स इस्मायेलो जघान। गिदलियस्य हननात् परं द्वि- ४
तीयदिने यदा कोऽपि तन्नाजानात्, तदा शिखिमात् शीलोतः शमरो- ५
णाच्च छिन्नश्मश्रवो विदीर्णवस्त्रा अस्त्राहताङ्गाश्चाशीतिनरा आजग्मुः
सदाप्रभो र्मन्दिरं नयनार्थं तेषां करेषु भक्ष्यनैवेद्यं धूपश्चास्तां। तदा ६
निथनियस्य पुत्त्र इस्मायेलस्तान् प्रत्युद्गन्तुं मिस्पातो निश्चक्राम गमन-
काले च नित्यं रुरोद तेषां समीपमुपस्थाय च तान् जगाद यूयम् अ-
हीकामपुत्त्रस्य गिदलियस्य समीपम् आगच्छत। तेषु तु नगरं प्रविश्य ७
तन्मध्यस्थान उपस्थितेषु निथनियसुत इस्मायेलस्तदीयसङ्गिनश्च तान्
मारयामासुः कूपमध्यं निचिक्षिपुश्च। तेषां मध्ये तु दशजना अविद्यन्त, ८
त इस्मायेलमूचुः, अस्मान् मा जहि यतः क्षेत्रेऽस्माकं गूढानि गोधूम-
यवतैलमधुधनानि विद्यन्ते ततः स निवृत्य तेषां भ्रातॄणां मध्ये तान् न
मारयामास। गिदलियस्याधीनान् तान् नरान् हत्वा तेषां शवान् इ- ९
स्मायेलो यस्य कूपस्य मध्यं निचिक्षेप स इस्रायेलीयराजस्य बाशाः भ-
याद् आसाराजेन कृतः कूप आसीत्, निथनियसुत इस्मायेलस्तमेव
हतानां देहैः पूरयामास। अपरम् इस्मायेलो मिस्पायां विद्यमानान्
सर्व्वान् शेषजनान् दासत्वायापनिनाय, अर्थतो या राजदुहितरो मि- १०
स्पायाम् अवशिष्टा अपरे च यावन्तो जना रक्षकसेनाध्यक्षेण निबूषर-
दनेनाहीकामसुतस्य गिदलियस्याधीनत्वे नियुक्ता आसन् तान् सर्व्वान्
निथनियसुत इस्मायेलो दासत्वार्थम् अपनीयाम्मोनवंशीयानां सन्निधिं
गन्तुं प्रतस्थे।

११ निथनियसुतेनेश्मायेलेन हतस्य सर्व्वदुष्कर्म्मणो वार्त्तायां कारेह-
१२ सुतेन योहाननेन तत्सङ्गिभिः सर्व्वैः सेनाध्यक्षैश्च श्रुतायां ते सर्व्व-
नरान् आदाय निथनियसुतेनेश्मायेलेन सार्द्धं योधनार्थं निष्क्रम्य
१३ गिबियोनस्थस्य बृहज्जलाशयस्य समीपं तम् आसादयामासुः। ततो
ये सर्व्वे जना इश्मायेलेन सार्द्धम् आसन् ते कारेहसुतं योहाननं तत्स-
१४ ङ्गिनश्च सर्व्वान् सेनाध्यक्षान् दृष्ट्वा हर्षं गताः। इश्मायेलेन मिष्पातो
दासत्वार्थम् अपनीताश्च ते सर्व्वे जना वक्रमार्गेण परावृत्य कारेहसुतस्य
१५ योहाननस्यान्तिकम् आजग्मुः। निथनियसुत इश्मायेलस्त्वष्टभि र्नरैः
सहितः योहाननस्य सम्मुखात् पलाय्याम्मोनवंशीयानां देशं जगाम।
१६ इत्थम् अहीकामसुतस्य गिदलियस्य वधात् परं मिष्पातो ऽपगतस्य
निथनियसुतस्येश्मायेलस्य कराद् अवशिष्टजनान् उद्धृत्य कारेहसुतो
योहाननस्तत्सङ्गिनः सर्व्वे सेनाध्यक्षाश्च तान् अर्थतो गिबियोनात्
१७ पुनरानीतान् योद्धृन् नरान् योषितो बालकान् नपुंसकांश्चादाय
वैत्लेहमपार्श्वस्थं किम्हमस्य पथिकाश्रमं गत्वा कल्दीयानां सम्मुखात्
१८ मिसरदेशं प्रवेष्टुं जिगमिषवस्तत्रावतस्थिरे। यतो बाबिलीयराजेन
देशेऽधिकृतस्याहीकामसुतस्य गिदलियस्य निथनियसुतेनेश्मायेलेन हन-
नात् ते कल्दीयेभ्यो बिभ्युः।

---

४२ द्वाचत्वारिंशोऽध्यायः।

१ ईश्वरे प्रार्थयितुं यिरिमियं प्रति योहाननस्य निवेदनम् ईश्वराज्ञयाचरितुम् अङ्गीकारः ७ यिहूदादेशेऽवस्थिति मंङ्गलावहेत्युत्तरं १३ मिसरदेशयाने नाशो भावीतीश्वरोत्तरं १९ कापथ्यात् तान् प्रति यिरिमियस्य तिरस्क्रिया च।

१ ततः परं कारेहसुतो योहाननो होशयियसुतो यिषनियः सर्व्वे
२ सेनाध्यक्षाः क्षुद्रमहान्तश्च सर्व्वे जना उपागम्य भाववादिनं यिरिमि-
यमूचुः, अस्माकं निवेदनं त्वदन्तिकं ग्राह्यं भवतु, त्वमस्मत्कृतेऽर्थतः सर्व्वे-
षाम् एतेषां शेषजनानां कृते निजेश्वरं सदाप्रभुम् उद्दिश्य प्रार्थनां कुरु,
यतो वयं बहव आस्म परन्त्वधुनाल्पेऽवशिष्टास्तत् त्वया प्रत्यक्षं दृश्यते।
३ अतस्तवेश्वरः सदाप्रभुरस्मान् गन्तव्यं मार्गं कर्त्तव्यं कर्म्म च ज्ञापयतु।
४ तदा भाववादी यिरिमियस्तान् जगाद पश्यत युष्मद्वाक्यादहं युष्मदीश्वरं
सदाप्रभुम् उद्दिश्य प्रार्थनां करिष्यामि तदुत्तररूपञ्च यद्यद् वचः स मां

गदिष्यति तद् युष्मान् ज्ञापयिष्यामि, युष्मत्तः किमपि वाक्यं नापह्नोष्ये।
ततस्ते यिरिमियम् ऊचुः, अद्य सदाप्रभुरस्माकं सत्यो विश्वस्तश्च साक्षी ५
भवतु। तवेश्वरः सदाप्रभु र्यद्यद् वाक्यं त्वयास्मत्समीपं प्रहेष्यति तद-
नुयायि कर्म्म वयम् अवश्यं करिष्यामः। भद्रं भवेदभद्रं वा भवेत्, ६
यस्यान्तिकं वयं त्वां प्रेषयामस्तस्य त्वदीयेश्वरस्य सदाप्रभो र्वाक्ये वयम्
अवधानं करिष्यामस्तथा कृतेऽस्मदीश्वरस्य सदाप्रभो र्वाक्येऽवधाना-
दस्माकं मङ्गलं सम्भविष्यति।

अपरं दशदिनेष्वतीतेषु सदाप्रभो र्वाक्यं यिरिमियस्य समीपम् उ- ७
पतस्थौ। तदा स कारेहसुतं योहाननं तत्सङ्गिनः सर्व्वान् सेनापतीन् ८
क्षुद्रमहतः सर्व्वजनांश्चाकाययामास। तांश्च जगाद, युष्माकं साध्य- ९
साधनं निवेदयितुं यस्यान्तिकमहं युष्माभिः प्रहित इस्रायेल ईश्वरः
स सदाप्रभुरित्थं ब्रूते, यदि यूयं पुनर्व्वारम् एतस्मिन् देशे वसतिं कुरुथ १०
तर्ह्यहं युष्मान् नैव संहृत्य वर्द्धयिष्यामि नैव चोत्पाट्य रोपयिष्यामि
यतो युष्माकं यद् अमङ्गलं मया कृतं तत्र ममानुतापो जातः। यूयं बा- ११
बिलीयराजान्मा बिभीत, यूयं तस्माद् भीताः, सदाप्रभुस्तु ब्रूते तस्मान्मा
बिभीत, यतो युष्माकं परित्राणाय तस्य कराद् उद्धरणाय चाहमेव
युष्माकं सहायोऽस्मि। अहं युष्मान् अनुकम्पाभाजनानि करिष्यामि १२
ततो हेतोः स युष्मान् अनुकम्पिष्यते युष्मद्देशञ्च पुनः प्रापयिष्यति।

वयम् अत्र देशे न वत्स्याम इत्युक्ता यदि यूयं स्वीयेश्वरस्य सदाप्रभो १३
र्वाक्येऽवधानं कर्त्तुम् अनिच्छवो वदथ, तन्न करिष्यामः, वयं मिसर- १४
देशं प्रवेक्ष्यामस्तत्रास्माकं युद्धदर्शनं तूर्य्यश्रवणम् अन्नाभावात् क्षुधा वा
न सम्भविष्यति वयं तत्रैव निवत्स्याम इति, तर्हि हे यिहूदायाः १५
शेषजना यूयं सदाप्रभो र्वाक्यं शृणुत, इस्रायेल ईश्वरो वाहिनीनां
सदाप्रभुरित्थमाह, यूयं चेन्मिसरदेशं प्रवेष्टुम् उन्मुखीभूय प्रवासार्थं
तं प्रविशेत, तर्हि यस्माद् बिभीथ सोऽसिस्तत्र मिसरदेशे युष्मान् प्रा- १६
प्स्यति यस्याश्च त्रस्यथ सा क्षुधा मिसरे युष्मास्वासञ्जिष्यते तत्र च युष्माकं
मृत्यु र्भविष्यति। यावन्तश्च नराः प्रवासार्थं मिसरं प्रवेष्टुम् उन्मुखास्ते १७
तत्रैवासिक्षुन्मारीभि र्मरिष्यन्ति, तेषु च मया यद् अमङ्गलं वर्त्तयिष्यते
तत्कारणात् तेषां रक्षितः पलायितो वा कोऽपि नावशेक्ष्यते। यत १८
इस्रायेल ईश्वरो वाहिनीनां सदाप्रभुरित्थमाह, यिरूशालम्निवासिषु
यथा मम कोपो रोषश्चावतारितस्तथैव मिसरं प्रविष्टेषु युष्मासु मम

रोषोऽवतारयिष्यते, यूयञ्च शापोच्छेदाभिसम्पातलज्जास्पदानि भविष्यथ
स्थानमिदञ्च पुन र्न द्रक्ष्यथ।
१९ हे यिहूदायाः शेषजनाः, युष्मानधि सदाप्रभुराह, यूयं मिसरदेशं
२० मा प्रविशतेत्यहमद्य युष्मान् दृष्टान्त्यादिशामि तन्निश्चितं जानीत। यतो
यूयं स्वप्राणानां हानये चञ्चला भवथ, फलतस्त्वम् अस्मत्कृतेऽस्मदीश्वरं
सदाप्रभुम् उद्दिश्य प्रार्थनां कुरु, यद्यचास्माकम् ईश्वरः सदाप्रभु र्वदि-
ष्यति तद् अस्मान् ज्ञापय, वयं तथैव करिष्याम इत्युक्त्वा यूयं मां युष्मदी-
२१ येश्वरस्य सदाप्रभोः समीपं प्रहितवन्तः। अद्य तु मयि युष्मान् ज्ञापि-
तवति यूयं स्वीयेश्वरस्य सदाप्रभो र्वाचि मया प्रेरितायाञ्चैकस्यामप्या-
२२ ज्ञायाम् अवधानं न कुरुथ। अतोऽधुना निश्चितं जानीत यूयं प्रवासार्थं
यत् स्थानं प्रवेष्टुं प्रवृत्तमनसस्तत्रासिदुर्भिक्षमारीभि र्मरिष्यथ।

---

४३ त्रिचत्वारिंशोऽध्यायः।

१ योहाननेन यिरिमियस्य वाक्यमनमन्य तस्य शेषयिहूदीयानाञ्च मिसरमपनयनं
८ बाबिलो राज्ञा मिसरदेशः पराजायिष्यते इति यिरिमियस्य भविष्यद्वाक्यञ्च।

१ जनान् प्रति तेषाम् ईश्वरस्य सदाप्रभो र्वाक्यानाम् अर्थतस्तेषाम्
ईश्वरः सदाप्रभु र्यिरिमियेण तान् प्रत्येतानि यानि प्रहितवान् तेषां
२ सर्व्वेषां वाक्यानां कथने यिरिमियेण समापिते होशयियसुतोऽसरियः
कारेहसुतो योहाननोऽपरे च दुःसाहसिनः सर्व्वे नरा यिरियिममूचुः,
त्वं मृषावाक्यं भाषसे प्रवासार्थं मिसरदेशो युष्माभि र्न प्रवेष्टव्य इति
३ वाक्यम् अस्मदीश्वरः सदाप्रभुस्त्वया न प्रहितवान्, परन्त्वस्माकं हत्यार्थं
बाबिलं दासवद् अपनयनार्थञ्च कल्दीयानां करेष्वस्मान् समर्पयितुम्
४ इच्छु र्नेरियसुतो बारूकस्त्वां प्रलोभितवानिति। अतो यिहूदादेशे-
ऽवस्थितये सदाप्रभो र्वाक्यं कारेहसुतेन योहाननेन सर्व्वसेनाध्यक्षैः सर्व्व-
५ जनैश्च न जगृहे। परन्तु सर्व्वेषां परजातीयानां मध्ये विकीर्णा ये यिहू-
दीयाः शेषजना यिहूदादेशे प्रवासार्थं तेषां मध्यात् प्रत्यागता आसन्
६ कारेहसुतो योहाननः सर्व्वे सेनाध्यक्षाश्च तान् सर्व्वान् शेषजनान्
अर्थतो नरान् योषितो बालकान् राजपुत्रीः शाफनपौत्रस्याहीकाम-
पुत्रस्य गिदलियस्य सङ्गे रक्षकसेनाध्यक्षेण निबूषरदनेन निहितान्
७ सर्व्वप्राणिनो भाववादिनं यिरिमियं नेरियसुतं बारूकञ्चादाय सदाप्रभो
र्वाक्येऽनवधानात् मिसरदेशं प्रविविशुस्तफनहेषञ्च प्रापुः।

तत्र तफनहेषे सदाप्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुरभूत्, त्वं ८
करेण कतिपयान् वृहत्प्रस्तरान् आदाय तफनहेषस्थराजप्रासादस्य ९
प्रवेशस्थान इष्टकाचितिसन्निधाने लेपनीयचूर्णमध्ये यिहूदीयनराणां
साक्षान्निगूह, तांश्च वद, इस्रायेल ईश्वरो वाहिनीनां सदाप्रभुरित्थमाह, १०

पश्यतानाययिष्याम्यहं दूतैः स्वीयसेवकं।
बाबिलीयमहीपालं निबूखद्रित्सराभिधं॥
एतेषां मन्निगूढानाम् उपरिष्टान्महाश्मनां।
मया सिंहासनं तस्य राज्ञः संस्थापयिष्यते।
एतेषामुपरिष्टात् स स्ववितानं तनिष्यति॥
आगत्य मिसरं देशं स तदा दण्डयिष्यति। ११
स मृत्यो र्भाजनं मृत्यै खड्गे खड्गस्य भाजनं।
प्रवासे च प्रवासस्य पात्रं समर्पयिष्यति॥
मिस्रीयदेवगेहेषु वह्निं प्रज्वलयाम्यहं। १२
तेन स तानि सन्दाह्य देवान् प्रवासयिष्यति॥
विवर्त्तयति यद्वच्च स्ववस्त्रं मेषपालकः।
स इमं मिसरं देशं तद्वद् विवर्त्तयिष्यति।
तन्मध्याच्च पुनर्व्वारं कुशलं निष्क्रमिष्यति॥ १३
स्तम्भान् मिसरदेशस्थसूर्य्यपूर्य्याः स भङ्क्ष्यति।
मिस्रीयदेवगेहानि वह्निसाच्च करिष्यति॥

---

४४ चतुश्चत्वारिंशोऽध्यायः।

१ देवपूजाकृते यिहूदाया विनाशस्य भावोक्तिः ११ मिसरदेशे प्रवासिनो जनानधि भावोक्तिः १५ यिहूदीयानां मनःकाठिन्यं २० तस्माद् यिरिमियेण तेषां तिरस्करणं २४ सर्व्वान् प्रति पुनस्तिरस्करणं २९ मिसरदेशस्य राज्ञो रिपुकरे समर्पणसूचका भावोक्तिश्च।

मिग्दोल-तफनहेष-मोफ-पथ्रोष-देशनिवासिनो ये सर्व्वे यिहूदीय- १
जना मिसरदेशे न्यवसन् तानधीदं वाक्यं यिरिमियं प्रति प्रादुरभूत्,
यथा, इस्रायेल ईश्वरो वाहिनीनां सदाप्रभुरित्थं भाषते, यिरूशालमि २
यिहूदादेशस्य सर्व्वनगरेषु च यत् कृत्स्नम् अमङ्गलं मया वर्त्तितं तद्
यूयं दृष्टवन्तः, पश्यत तान्यद्योच्छिन्नानि विद्यन्ते कोऽपि तत्र न निव-
सति। तत्कारणं मत्क्रोधनार्थं तेषां कृतं कदाचरणं, फलतस्ते यूयं ३

युष्मत्पितामहाश्च यान् न ज्ञातवन्तस्तेषाम् इतरदेवानां सेवनाय ता-
४ नुद्दिश्य धूपदाहनाय च ते गताः। मया चातन्द्रिणा स्वीयदासान् स-
र्व्वान् भाववादिनो युष्मदन्तिकं प्रहित्यावादि, यूयं मया गर्हितम् एतद्
५ घृण्यं कर्म्म मा कुरुतेति। ते त्वितरदेवानुद्दिश्य धूपदाहनादिकदाचा-
६ रान्निवर्त्तनाय न शुश्रुवुः कर्णपातञ्च न चक्रिरे। तस्मान्मम रोषः कोप-
श्चावतारितो यिहूदाया नगरेषु यिरूशालमश्च मार्गेषु प्रज्वलितश्च तत-
७ स्तान्युच्छिन्नानि ध्वंसितानि चाभवन् अद्यापि च सन्ति। अतोऽधुनेस्रा-
येल ईश्वरो वाहिनीनाम् ईश्वरः सदाप्रभुरित्यमाह, युष्माकं कोऽपि शेषो
यथा न रक्ष्येत तथैव यिहूदाया मध्यान्नरनारीबालकस्तन्यपायिशि-
शून् छेदयितुं कुतो यूयं स्वप्राणानां विरुद्धम् एतां महतीं दुष्क्रियां
८ कुरुथ? कुतः स्वहस्तानां क्रियाभि र्मां कोपयथ, प्रवासार्थञ्च यत्रागताः
स्थ तस्मिन् मिसरदेशे किमर्थम् इतरदेवान् उद्दिश्य धूपं दाहयथ?
अनेन युष्माकम् उच्छेदः सम्भविष्यति यूयञ्च पृथिव्याः सर्व्वजातीनां शाप-
९ निन्दास्पदानि भविष्यथ। यिहूदादेशे यिरूशालमो मार्गेषु च या अ-
क्रियन्त ता युष्मत्पितॄणां दुष्क्रिया यिहूदीयराजानाञ्च दुष्क्रियास्त-
दीययोषिताञ्च दुष्क्रिया युष्माकञ्च दुष्क्रिया युष्मद्भार्य्याणाञ्च दुष्क्रिया
१० यूयं किं विस्मृतवन्तः? इमेऽद्यापि न चूर्णा न वा भीताः, युष्मत्समक्षं
युष्मदीयपूर्व्वपुरुषाणाञ्च समक्षं मया या स्थापिता मम तां व्यवस्थां
तान् विधींश्च नैवाचरन्ति।
११ अतो हेतोरिस्रायेल ईश्वरो वाहिनीनां सदाप्रभुरित्यमाह, पश्यता-
हम् अमङ्गलाय कृत्स्नयिहूदाया उच्छेदाय च युष्मासु स्थिरदृष्टिं करि-
१२ ष्यामि। यिहूदायाश्च ये शेषजनाः प्रवासार्थं मिसरदेशं प्रवेष्टुम् उन्मुखा
अभवंस्तानहम् आदास्ये ते निःशेषं विनंक्ष्यन्ति सर्व्वे च तत्र मिसरदेशे
पतिष्यन्ति क्षुद्रा महान्तश्च खड्गक्षुधाभ्यां निःशेषं विनंक्ष्यन्ति खड्गक्षुधाभ्यां
१३ मरिष्यन्ति शापोच्छेदाभिसम्पातलज्जास्पदानि भविष्यन्ति च। यथा
चाहं यिरूशालमनिवासिनाम् उचितदण्डं कृतवान् तथैवासिक्षुन्मा-
१४ रीभि र्मिसरदेशनिवासिनाम् उचितदण्डं विधास्यामि। मिसरदेशे
प्रवासार्थं तत्प्रविष्टानां यिहूदायाः शेषजनानां पलायितो रक्षितो
वा कोऽपि न भविष्यति, यत्र यिहूदादेशे वासार्थं पुनर्गन्तुं ते मनांसि
प्रवर्त्तयन्ति तत्र कतिपयपलायितजनेभ्योऽपरे कोऽपि न परावर्त्तिष्यन्ते।
१५ ततोऽस्माकं योषित इतरदेवानुद्दिश्य धूपदाहं कुर्व्वन्तीत्यभिज्ञाः

सर्व्वे पुरुषास्तत्र दण्डायमानाः सर्व्वा योषितश्च महत्येव सभा मिसर-
पथ्रोष-देशनिवासिनः सर्व्वे जनाश्च यिरिमियम् ऊचु र्यथा, त्वं सदा- १६
प्रभो र्नाम्नास्मान् यद् वाक्यं गदितवान् तव तस्मिन् वाक्ये वयम् अव-
धानं न करिष्यामहे। परन्त्वस्माकं वक्त्राद् यद्यन्निःसृतं तत्तद्वाक्यानु- १७
यायि कर्म्मावश्यं करिष्यामोऽर्थतो व्योमराज्ञीम् उद्दिश्य धूपदाहं पेयनैवे-
द्यदानञ्च करिष्यामः, यतो यिहूदादेशस्य नगरेषु यिरूशालमो मार्गेषु
चास्माभिरस्मदीयपितृभीराजभि र्मुख्यनरैश्च तदेवाक्रियत तदा पूर्णैस्तृ-
प्तानाम् अस्माकं मङ्गलमासीत् दृष्टिपथे किमप्यमङ्गलं नाविद्यत। यस्मिन् १८
काले तु वयं तां व्योमराज्ञीम् उद्दिश्य धूपदाहनात् पेयनैवद्यदानाच्च
निवृत्तास्तमारभ्यास्माकं सर्व्वस्याभावो जातो वयञ्चासिक्षुधाभ्यां क्षीया-
महे। परन्तु वयं चेद् व्योमराज्ञीम उद्दिश्य धूपदाहं पेयनैवेद्यञ्च कृत- १९
वत्यस्तर्हि किम् अस्मत्पतीनां साहाय्यं विना तामुद्दिश्यास्माभिः पूपान्
निर्म्माय तस्याः प्रतिमाः कल्पितास्तस्यै पेयनैवेद्यानि च दत्तानि ?

ये पुरुषा या योषितः सर्व्वे च ये जना यिरिमियाय तदुत्तरं दत्तव- २०
न्तस्तान् सर्व्वान् जनान् स जगाद, यिहूदाया नगरेषु यिरूशालमो मा- २१
र्गेषु च यद् धूपदाहनं युष्माभि र्युष्मत्पितृभि र्युष्माकं राजभि र्युष्माकं
मुख्यनरै र्देशवासिजनैश्च कृतं तदेव सदाप्रभुः किं न स्मृतवान्? तदेव
च किं न तस्य चित्त उदितं? युष्माकं क्रियाणां दुष्टता युष्मदनुष्ठितो २२
गर्हणीयाचारश्च सदाप्रभुना सोढुं नाशक्यत तस्माद् अद्य यथास्ति तथा
युष्माकं देश उच्छिन्नो विनष्टः शप्तो निवासिवर्ज्जितश्च जातः। यूयं धूप- २३
दाहं कृतवन्तः सदाप्रभोः प्रातिकूल्येन पापं कृतवन्तः सदाप्रभो र्वाच्यव-
धानं न कृतवन्तस्तस्य व्यवस्थां विधीन् प्रमाणवाक्यानि च नाचरितवन्त-
स्तत्कारणादेव यथाद्यास्ति तथा विपत्तिरियं युष्मान् आक्रान्तवती।

अनन्तरं यिरिमियः सर्व्वान् जनान् सर्व्वा योषितश्च जगाद, भो २४
मिसरदेशस्था यिहूदीयजनाः सर्व्वे यूयं सदाप्रभो र्वाक्यं शृणुत। इस्रा- २५
येल ईश्वरो वाहिनीनां सदाप्रभुरित्थमाह, यथा, हे नरा नार्य्यश्च, व्योम-
राज्ञीम् उद्दिश्य धूपदाहे पेयनैवेद्यदाने चास्माभि र्यानि व्रतानि प्रतिश्रु-
तानि तान्येव साधयिष्यन्त इति युष्मद्वक्त्रैरुच्यते युष्मत्करैश्चानुष्ठीयते। यूयं
स्वव्रतानि स्थिरीकरिष्यथ स्वव्रतानि च साधयिष्यथेति निश्चितं। अतो २६
भो मिसरदेशवासिनो यिहूदीयजनाः सर्व्वे यूयं सदाप्रभो र्वाक्यं शृणुत,
सदाप्रभुराह स्वीयमहानाम्नाहं शपे कृत्स्नमिसरदेशे कुत्रापि कोऽपि

यिहूदीयनरः प्रभुः सदाप्रभु र्जीवतीति शप्तुं स्ववक्त्रेण मम नाम पुनर्नै-
२७ वोच्चारयिष्यति। पश्याहममङ्गलाय न च मङ्गलाय तेषु जागरूको भवि-
ष्यामि यावन्तश्च यिहूदीयजना मिसरदेशे सन्ति ते सर्व्वे निःशेषं यावद्
२८ असिक्षुधाभ्यां विनंक्ष्यन्ति। असितो रक्षिताः स्वल्पे जना मिसरदेशाद्
यिहूदादेशं प्रत्यागमिष्यन्ति। ततो मम तेषाञ्च मध्ये कस्य वाक्यं स्थिरीभ-
विष्यति तन्मिसरदेशे प्रवासार्थं तत्प्रविष्टै र्यिहूदायाः सर्व्वैः शेषजनै
र्ज्ञायिष्यते।

२९ युष्मानधि ममामङ्गलावहानि वाक्यानि स्थिरीभविष्यन्तीति यथा
यूयं जानीयात तदर्थमहम् अत्र स्थाने युष्माकं दण्डं विधास्याम्येतस्य
३० युष्मन्निमित्तकं चिह्नमेतद् भविष्यतीति सदाप्रभुराह। पश्यत यिहू-
दीयराजः सिदिकियो यद्वन्मया तद्द्वेषिणस्तत्प्राणनाशार्थिनश्च बाबि-
लीयराजस्य निबूखद्रित्सरस्य करे समर्पितस्तद्वन्मिस्रीयराजः फि-
रौन्-हफ्रा मया तद्द्वेषिणां करेषु तत्प्राणनाशार्थिनाञ्च करेषु समर्प-
यिष्यते, इति सदाप्रभुराह।

---

४५ पञ्चचत्वारिंशोऽध्यायः।

बारूकस्य भयात् तं प्रति यिरिमियस्योपदेशनं सान्त्वनञ्च।

१ यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वस्य चतुर्थवत्सरे
यदा नेरियस्य पुत्रो बारूको यिरिमियस्य वक्त्राद् एतानि सर्व्वाणि
वाक्यानि श्रुतवन् पुस्तकेऽलिखत् तदा भाववादी यिरिमियस्तं यद् वा-
२ क्यम् अवादीत् तदिदं, यथा, हे बारूक, त्वामधीशायेल ईश्वरः सदा-
प्रभुरित्थमाह,

३ त्वयोक्तं हा व्यथायां मे खेदं युङ्क्ते सदाप्रभुः।
दीर्घोच्छ्वासादहं श्रान्तो नैव प्राप्नोमि निर्वृतिं॥
४ अतस्त्वं तमिदं ब्रूहि वदतीत्थं सदाप्रभुः।
मया यन्निर्म्मितं पश्य तन्मयोत्पाटयिष्यते।
मया यद् रोपितं तच्च मयैवोन्मूलयिष्यते।
अर्थतः कृत्स्नदेशोऽयं मया विध्वंसयिष्यते॥
५ स्वकृते त्वञ्च माहात्म्यं किं काङ्क्षे मैव काङ्क्ष तत्।
पश्याहं वर्त्तयिष्यामि सर्व्वप्राणिष्वमङ्गलं॥

वाक्यं सदाप्रभोरेतत् त्वन्तु यत्रैव यास्यसि।
तत्र सर्व्वत्र दास्यामि त्वत्प्राणान् तव लोप्त्रवत्॥

---

४६ षट्चत्वारिंशोऽध्यायः।

१ फरातनदीतीरे राज्ञः फिरौणः सेनायाः पराजयस्य भविष्यद्वाक्यं १३ निबूखद्नित्सरेण मिसरदेशस्य पराजयस्य भविष्यद्वाक्यं २७ याकूबवंशं प्रतीश्वरस्य सान्त्वनावाक्यञ्च।

परजातीरधि भाववादिनं यिरिमियं प्रति प्रादुर्भूतं सदाप्रभो र्वाक्यं। १
मिसरदेशस्य भाग्यं। २
यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वस्य चतुर्थवत्सरे
फरातनदीतीरस्थकर्कमीश उपस्थिता मिस्रीयराजस्य फिरौन-निखो र्या
वाहिनी बाबिलीयराजेन निबूखद्नित्सरेण पराजिग्ये तामधि।

फलकं चर्म्म चादद्धं युद्धार्थञ्चोपतिष्ठत। ३
रथे र्योजयताश्वांश्च हयारूढाः प्रगच्छत। ४
तिष्ठध्वं सशिरस्त्राणा म्रष्टशूलाः सुवर्म्मिताः॥
किमर्थं ते मया दृष्टाः शङ्कमानाः पराङ्मुखाः। ५
वीरास्तेषाञ्च सम्पिष्टाः प्रद्रवन्त्याश्रयार्थिनः।
स्वदृष्टिञ्चैकक्षणोऽपि न प्रत्यावर्त्तयन्ति ते।
ध्याशङ्कास्ति चतुर्दिक्षु ब्रवीतीदं सदाप्रभुः॥
द्रुतगाम्याश्रयं प्राप्तुं रक्षां वीरो न शक्ष्यति। ६
स्वलित्वा ते पतिष्यन्त्युदीच्यां फ्रातसरित्तटे॥
नीलाख्यनदसङ्काशो योऽयमायाति को नु सः। ७
उत्क्षिप्यन्ते हि तस्यापः स्रोतसामनुरूपतः॥
मिसरोऽयं समायाति नीलाख्यातनदोपमः। ८
उत्क्षिप्यन्ते च तोयानि स्रोतसामनुरूपतः॥
स ब्रूतेऽहं प्रयास्यामि छादयिष्यामि भूतलं।
पुरीं विनाशयिष्यामि तन्निवासिजनैः सह॥
हे हया यूयमायात हे रथा धावतोन्मदाः। ९
प्रगच्छन्तु महावीराः कूशपूटीयचर्म्मिणः।
धनुर्विस्फारयन्तश्च लूदीयाश्चापधारिणः॥

१०　दिवसोऽयं प्रभोरेव वाहिनीनां सदाप्रभोः।
दिवसो दण्डदानाय वैरिणां वैरशुद्धये॥
तप्स्यति ग्रसमानोऽसि भूरिरक्तञ्च पास्यति।
यतो हेतोः प्रभोरेव वाहिनीनां सदाप्रभोः।
उदीच्यां फ्रात्सरित्तीरे तदा यज्ञो भविष्यति॥
११　अनूढे मिसराख्याते कन्ये गिलियदं व्रज।
रोगघ्नं तरुनिर्य्यासं तद्देशीयं गृहाण च॥
बह्वौषधप्रयोगस्ते विफलस्तु भविष्यति।
नैव यास्यति वा सिद्धिं त्वदीयव्रणरोपणं॥
१२　तावकीनापमानस्य वार्त्तां श्रोष्यन्ति जातयः
तावकीनार्त्तरावश्च पूरयिष्यति मेदिनीं॥
वीरोपरि यतो वीरः स्खलनं प्रगमिष्यति।
उभयोरेककाले च पतनं सम्भविष्यति॥

१३　मिसरदेशस्य पराजयार्थं बाबिलीयराजस्य निबूखद्रित्सरस्यागमनमधि सदाप्रभुर्भाववादिनं यिरिमियं प्रति यद् वाक्यं जगाद तस्य वृत्तान्तोऽयं।

१४　आख्यातेदं मिसर्देशे मिग्दोले च विघोषत।
मोफे तफन्हेषे च वार्त्तामेतां विघोषत॥
इत्थं ब्रूत च तिष्ठ त्वम् आत्मानं सज्जितं कुरु।
कृपाणस्त्वच्चतुर्द्दिक्षु सकलं ग्रसते यतः॥
१५　विच्छिन्नोऽभूत् कुतो हेतो वीरवृषगणस्तव।
स न तस्थौ यतो हेतोस्तमभ्याहन् सदाप्रभुः॥
१६　बहवः स्खालितास्तेन पतत्येकोऽपरोपरि।
ते वदन्ति समुत्तिष्ठ घातिखड्गस्य सम्मुखात्।
स्वजनान् जन्मदेशञ्च गमिष्यामो वयं पुनः॥
१७　ते तत्रेदञ्च घोषन्ति मिस्रीयन्टपतिः फिरौन्।
शब्दमात्रो यतस्तेन समयो व्यतिचक्रमे॥
१८　सेनाध्यक्षपरेशाख्यो राजेदं भाषते वचः।
यदि जीवाम्यहं तर्हि स विजेतागमिष्यति।
ताबोरिव गिरिश्रेष्ठः कर्म्मिलो वार्णवान्तिकः॥
१९　मिसर्वासिनि कन्ये त्वं दास्यार्थं सम्भृतिं कुरु।

नष्टं दग्धं यतो मोफं निर्ज्जनञ्च भविष्यति॥
प्रतिभाति मिसर्नीवृद् गोवत्सेव सुरूपिणी। १०
उदीचीतः समायाति समायाति विदारकः॥
तन्मध्ये ये च वर्त्तन्ते तस्या वेतनजीविनः। ११
योद्धारस्तेऽपि गोवत्सा गोगोष्ठे पोषिता इव॥
तेऽपि पराङ्मुखीभूय न स्थित्वैकत्र दुद्रुवुः।
नाशदिनं फलप्राप्तेः कालस्तान् यत आक्रमीत्॥
भुजङ्गेनेव शब्दस्य तया शब्द उदीर्य्यते। १२
यतो हेतोः समायान्त्यरयः सैन्यसमन्विताः।
आक्राम्यन्ति कुठारैश्च तां ते वृक्षच्छिदो यथा॥
कर्त्तिष्यन्ति वनं तस्या ब्रवीतीदं सदाप्रभुः। १३
अभेद्यं भात्यरण्यं तत् शलभेभ्यस्तु शत्रवः।
बहवः सन्ति तेषाञ्च सङ्ख्या ज्ञातुं न शक्यते॥
कुमारी मिसराख्याता लज्जापन्ना भविष्यति। १४
उत्तरीयमनुष्याणां हस्ते सा चार्पयिष्यते॥
इस्रायेलो य ईशः स वाहिनीनां सदाप्रभुः। १५
ब्रूते पश्चाद्दमासोने देवाय नोनिवासिने।
फिरौणे मिसरे तस्या देवराजगणाय च।
फिरौणे तच्छ्रितेभ्यश्च प्रदास्याम्युचितं फलं॥
अहं तान् अर्पयिष्यामि प्राणनाशार्थिनां करे। १६
निबूखद्नित्सरस्यैव बाबिलीयमहीपतेः।
तद्भृत्यानाञ्च हस्तेषु ततः पश्चात् मिसर् पुनः।
आवत्स्यते यथा पूर्व्वम् इत्यमाह सदाप्रभुः॥
त्वञ्च मा साध्वसं गच्छ हे याकूब् मम किङ्कर। १७
इस्रायेल् त्वञ्च नैराश्यं मैव याहि कथञ्चन॥
यतः पश्चादहमेव त्वां तारयिष्यामि दूरतः।
त्वद्वंशांश्चोद्धरिष्यामि तेषां प्रवासदेशतः॥
प्रत्यावर्त्तिष्यते याकूब् विश्राममुपभोक्ष्यते।
वसन्तं तञ्च निःशङ्कं कोऽपि नोद्वेजयिष्यति॥
मैव त्वं साध्वसं गच्छ हे याकूब् मम किङ्कर। १८
सदाप्रभुरिदं वक्ति तव सङ्गी यतोऽस्म्यहं॥

त्वं यासां परजातीनां मध्ये व्यकीर्य्यथा मया।
सकलानां मया तासां सर्व्वनाशो विधास्यते।
तवैव सर्व्वनाशस्तु नहि कारिष्यते मया॥
शास्ति विचारसिद्धैव तुभ्यं दायिष्यते मया।
सर्व्वथा शास्तिहीनन्तु त्वां न शक्नोमि रक्षितुं॥

४७ सप्तचत्वारिंशोऽध्यायः।

पिलेष्टीयानां नाशस्य भविष्यद्वचनं।

१ फिरौणा घःसायाः पराजयस्य पूर्व्वं पिलेष्टीयानधि सदाप्रभो र्यद्
वाक्यं भाववादिनं यिरिमियं प्रति प्रादुरभूत् तद्वृत्तान्तोऽयं।
२ सदाप्रभुरिदं ब्रूते पश्यायान्त्याप उत्तरात्।
ता भूत्वा स्रोत आप्लाव्याप्लावयिष्यन्ति नीवृतं।
तदापूरकवस्तूनि सपौराणि पुराणि च॥
क्रन्दनञ्च करिष्यन्ति तदा तत्रत्यमानवाः।
उच्चैश्च विलपिष्यन्ति सर्व्वे देशनिवासिनः॥
३ तद्वीराणां खुराघातैः समुत्पादितगर्जनात्।
तद्रथानाञ्च निर्घोषात् तच्चक्राणाञ्च शब्दतः।
ताताः श्लथकरीभूता न द्रक्ष्यन्ति निजात्मजान्॥
४ यतः सर्व्वपिलेष्टीयजनानां सूदनाय हि।
सोरसीदोनयोः पुर्य्योस्तयोः शेषोपकारिणां।
सकलानाञ्च नाशाय दिनं तदागमिष्यति॥
यतो हेतोः पिलेष्टीयान् उच्छेत्स्यति सदाप्रभुः।
कप्तोर्द्वीपस्य कृत्स्नञ्च शेषं विनाशयिष्यति॥
५ घःसा यास्यति मुण्डत्वम् अस्किलोनञ्च लुप्ततां।
शेषस्तत्समभूमेश्च दशां प्राप्स्यति तादृशीं।
कतिकालं त्वमात्मानं कुरुषे क्षतविक्षतां॥
६ कतिकालम् अशान्तस्त्वं स्थास्यस्यसे सदाप्रभोः।
उपाश्रय निजं कोषं प्रशाम्य नीरवो भव॥
७ आः कथं स भवेच्छान्त आदिक्षत् तं सदाप्रभुः।
अस्किलोनेऽब्धिवङ्के चाजिज्ञपत् तत्र वर्त्तितुं॥

४८ अष्टचत्वारिंशोऽध्यायः।

गर्व्वनिर्भयत्वात्मश्लाघानाम् ईश्वरीयलोकनिन्दायाश्च हेतो र्मोयाबस्य दण्डस्य भविष्यद्वाक्यं शेषे तस्य मुक्ते र्भविष्यद्वचनञ्च।

मोयाबस्य भाग्यं। १

इस्रायेलीश्वरो ब्रूते वाहिनीनां सदाप्रभुः।
हाहाकारो निबो र्यीग्यो यस्मादुच्छेत्स्यते निबुः॥
धारिष्यते विपक्षैश्च लज्जितं किरियाथयिम्।
भविष्यत्यस्थिरं चासात् लज्जापन्नञ्च मिष्गबं॥
इतःपश्चान्मोयाबस्य प्रशंसा न भविष्यति। २
हिष्बोने तस्य हिंसायै युक्तिः कारिष्यते जनैः।
आयात कर्त्तयिष्यामस्तं जातीनां गणाद् वयं॥
हे मद्मेन त्वमेवापि सम्भविष्यसि नीरवं।
तव पश्चात् कृपाणश्च गमनं प्रकरिष्यति॥
होरोणायिमतः शब्दो रोदनस्य निशम्यते। ३
सर्व्वनाशो महाभङ्ग एवास्माकमभूदिति॥
मोयाबो भग्न एवेति शिशूनां श्रूयते रवः॥ ४
लूहीतगामिनः पान्था येनारोहन्ति वर्त्मना। ५
तत्रारोहति तैः सार्द्धं क्रन्दनं क्रन्दनात् परं॥
येन पथावरोहन्ति होरोणायिमगामिनः।
तत्र भङ्गप्रणादानां क्लेष्टृणां श्रूयते रवः॥
यूयं पलायनं कृत्वा स्वप्राणान् परिरक्षत। ६
भवत प्रान्तरस्थस्य तेजोहीनतरोः समाः॥
त्वं स्वकर्म्मसु विश्वासं स्वीयकोषेषु चाकरोः। ७
तस्माद् धारिष्यसे त्वञ्च किमोशश्च प्रवासितः।
सार्द्धं स्वयाजकाध्यक्षै र्देशतो निर्गमिष्यति॥
उपस्थास्यति सर्व्वाणि नगराणि विनाशकः। ८
पुरं रक्षिष्यते नैकं निम्नभूमि र्विनङ्क्ष्यति।
समभूः प्राप्स्यति ध्वंसम् इत्थमाह सदाप्रभुः॥
पतत्रं दत्त मोयाबे स पतन् प्रपतिष्यति। ९
तत्पुराणि विनङ्क्ष्यन्ति कोऽपि तत्र न वत्स्यति॥

१० स शप्तो यः सशैथिल्यं कुर्य्यात् कार्य्यं सदाप्रभोः ।
स शप्तो निजखड्गं यो रक्तपातान्निवारयेत् ॥
११ मोयाबः स्वस्य आबाल्यात् स्वकल्कोपरि सुस्थिरः ।
अच्छिन्नः पात्रतः पात्रे न च दास्यदशां गतः ।
तत्स्वादोऽद्यापि तन्निष्ठस्तद्गन्धो विकृतो नहि ॥
१२ तस्मात् सदाप्रभु र्ब्रूते पश्यागच्छन्ति वासराः ।
येष्वहं प्रेषयिष्यामि भाण्डव्यापारिमानवान् ।
ते न्युब्जीकृत्य तद्भाण्डान् रिक्ता भङ्क्ष्यन्ति तत्कुतूः ॥
१३ यथा लज्जित इस्रायेल्वंशो बैथेल आश्रयात् ।
किमोशादेव मोयाबस्तथा लज्जामवाप्स्यति ॥
१४ वयं वीरा बलिष्ठाश्च युद्धायेति वदेत किं ।
१५ मोयाब् नङ्क्ष्यति धूमश्च तत्पुरीणाम् उदेष्यति ॥
उत्कृष्टांशश्च तद्यूनाम् आघातायावरोक्ष्यति ।
वाहिनीनां प्रभु र्यस्य नाम राजा स वक्ति तत् ॥
१६ मोयाबस्य समुच्छेदः समुपागन्तुमुद्यतः ।
अतितूर्णञ्च तं तस्य दौर्गत्यमनुधावति ॥
१७ हे जनास्तच्चतुर्दिक्स्थाः सर्व्वे तं परिशोचत ।
सर्व्वे तन्नामवेत्तारो ब्रूत यूयमिदं वचः ।
कथं भग्नो बली दण्डो राजयष्टिश्च शोभना ॥
१८ हे दीबोनाभिधे कन्ये सुखं निवासकारिणि ।
अवरोह निजैश्वर्य्यात् मरुस्थाने निषीद च ॥
आक्रमिष्यति यस्मात् त्वां मोयाबस्य विनाशकः ।
दृढस्थानानि सर्व्वाणि तव स ध्वंसयिष्यति ॥
१९ तिष्ठन्ती पथि वीक्षस्व हे अरोयेरवासिनि ।
पलायिनं द्रवन्तीञ्च किमभूदिति पृच्छ च ॥
२० लज्जापन्नोऽस्ति मोयाबः स भग्नाशोऽभवद् यतः ।
आवयतार्त्तनादञ्च कुरुध्वञ्चोच्चरोदनं ।
वदतार्णोनतीरे च मोयाबो ध्वंसितोऽभवत् ॥
२१ विचारसाधको दण्डः समभूमिम् उपाक्रमीत् ।
होलोनं यहसञ्चापि मेफातनामिकां पुरीं ॥
२२ दिबोनञ्च निबुञ्चापि बैतदिबलथायिमं ।

क्रिरियाथयिमं बैत-गामूलं बैत-मायुनं ॥ २३
क्रिरियोतञ्च बस्राञ्च मोयाबस्य पुराणि सः। २४
दूरवर्त्तीनि सर्व्वाणि निकटस्थानि चाक्रमीत् ॥
शृङ्गं छिन्नं भुजो भग्नो मोयाबस्येति वाक् प्रभोः ॥ २५
मत्तं कुरुत तं यस्मात् सोऽतिदृप्तः प्रभुं प्रति। २६
मोयाबोऽपि स्ववान्ते हि लुठन् हास्यो भविष्यति ॥
इस्रायेलं पुरा त्वं किं नोपहास्यममन्यथाः। २७
स किं चौर्य्यकृतां मध्ये धृतो यत् त्वं स्वभाषणे।
सर्व्वदैव तमुद्दिश्याकुरुथा मूर्द्धचालनं ॥
त्यजत स्वपुरी यूयं हे मोयाबनिवासिनः। २८
दरीमुखस्य पारे च कृतनीडकपोतवत्।
भूत्वा यूयं कुरुध्वं हि शैलं स्ववसतिस्थलं ॥
मोयाबस्य वयं दर्पम् अश्रौष्मातीव दर्पिणः। २९
गर्व्वं तस्याभिमानञ्च धर्षं चित्तोन्नतिं तथा ॥
प्रभु र्ब्रवीत्यहं जाने निर्म्मूलां तस्य चण्डतां। ३०
गर्व्वोक्तीस्तस्य कार्य्ये च तासां स्थैर्य्यविहीनतां ॥
मोयाबमध्यहं तस्मात् करिष्ये परिदेवनं। ३१
मोयाबस्यैव साकल्ये करिष्यामि च रोदनं।
कीर्हेरशवासिष्वार्त्तरावस्योद्गमिष्यति ॥
यासेरीयविलापेन सिब्‌माया गोस्तनीलते। ३२
त्वामहं विलपिष्यामि तेरुस्त्वत्तन्तवोऽर्णवं।
ह्यायासेरार्णवाद् व्याप्ता किन्तु त्वत्फलसङ्ग्रहं।
त्वद्द्राक्षाचयनञ्चापि ध्वंसकारक आक्रमीत् ॥
आनन्दो हृत उद्यानाद् हर्षो मोयाबदेशतः। ३३
द्राक्षाकुण्डे रसस्यापि स्रवणं वारितं मया ॥
द्राक्षाणां हर्षनादेन न भविष्यति मर्द्दनं।
यो भविष्यति नादः स न स नादो भविष्यति ॥
हिश्‌बोनस्य च चीत्काराद् रावः कारिष्यते जनैः। ३४
स इलीयालिपर्य्यन्तं यहसञ्च व्रजिष्यते ॥
पुनः सोयरमारभ्य होरोणैमं स यास्यति।
धेनुकायास्त्रिहायण्या उच्चहम्भारवो यथा।

यत ऊषो भविष्यन्ति निस्रीमस्थसरांस्यपि ॥
३५ उच्चस्थानं प्रगच्छन्तं देवेभ्यो धूपदाहकं।
मनुष्यं संहरिष्यामि मोयाबादिति वाक् प्रभोः।
३६ तस्माद् ध्वनति वंशीव मोयाबे हृदयं मम।
हृन्मे ध्वनति वंशीव कीरहेरश्वासिषु।
तैरुपार्जितवित्तानां शेषो नष्टोऽभवद् यतः ॥
३७ सर्व्वेषां मुण्डितो मुण्डः सर्व्वेषां श्मश्रु कर्त्तितं।
सर्व्वेषां सक्षतौ हस्तौ बद्धशाणाम्बरा कटिः ॥
३८ गृहपृष्ठेषु सर्व्वेषु हट्टेषु सकलेषु च।
मोयाबस्यैव साकल्यं दृश्यते शोकपूरितं ॥
यतोऽहमेव मोयाबं भग्नवान् भाजनं यथा।
यस्मिन्न जायते प्रीतिरिति ब्रूते सदाप्रभुः ॥
३९ आशा तस्य कथं भग्ना तस्माद् रुदन्ति तज्जनाः।
कथं पराङ्मुखीभूतो मोयाबो लज्जते ततः ॥
तच्चतुर्द्दिक्स्थलोकानां सर्व्वेषां हसनास्पदं।
आशाभङ्गास्पदञ्चापि मोयाबः समजायत ॥
४० यस्मात् सदाप्रभु र्वक्ति पक्षीत्क्रोशवदापतन्।
मोयाबोपरि जेता स पक्षौ विस्तारयिष्यति ॥
४१ पुरं धारिष्यते सर्व्वं दुर्गं हारिष्यते तथा।
गर्भव्यथातुरायाश्च योषितश्चेतसा समं।
मोयाबस्यापि वीराणां तदा चेतो भविष्यति ॥
४२ उच्छेत्स्यते च मोयाबो जातिवर्गस्य मध्यतः।
सदाप्रभो र्विरोधेन सोऽभिमान्यभवद् यतः ॥
४३ नियुक्ताः सन्ति युष्मासु हे मोयाबनिवासिनः।
त्रासो गर्त्तश्च पाशश्चेति ब्रवीति सदाप्रभुः ॥
४४ यः पलायिष्यते त्रासात् स गर्त्ते निपतिष्यति।
य उत्थास्यति गर्त्ताच्च स पाशेन धरिष्यते ॥
अमुष्मिन्नेव मोयाबे फलदानस्य वत्सरं।
यतोऽहं वर्त्तयिष्यामीत्थं ब्रवीति सदाप्रभुः ॥
४५ हिष्बोनस्याश्रयिष्यन्ते छायां क्लान्ताः पलायिनः।
वह्निस्तूद्गत्य हिष्बोनात् शिखा सीहोनमध्यतः।

मायाबस्यैव गरुडस्य सर्व्वलोम ग्रसिष्यते।
विरोधकारिवंशस्य मस्तकाग्रञ्च धक्ष्यति॥
सन्तापस्तव मोयाब किमोशस्यानशन् प्रजाः। ४६
तव पुत्त्रा गता दास्यं तव पुत्त्र्यश्च दासतां॥
किन्तु पाश्चात्यकालेऽहं मोयाबस्यापि दासतां। ४७
पुनर्निवर्त्तयिष्यामीति ब्रवीति सदाप्रभुः॥

इति मोयाबस्य विचारवृत्तान्तः समाप्तः।

---

४९ ऊनपञ्चाशत्तमोऽध्यायः।

१ अम्मोनवंशीयानधि भविष्यद्वाक्यं ७ इदोममधि वाक्यं २३ दम्मेशकमधि वाक्यं २८ केदरहात्सोरावधि वाक्यं ३४ एलममधि भविष्यद्वाक्यञ्च।

अम्मोनवंशीयानां भाग्यं। १

सदाप्रभुरिदं ब्रूत इस्रायेल् किम् अपुत्त्रकः।
तस्योत्तराधिकारी वा कोऽपि किं नहि विद्यते॥
कुतो मल्कमदेवेन गाददेशोऽधिभुज्यते।
तत्पुरेषु किमर्थं वा तस्य प्रजाभिरुष्यते॥
तस्मात् सदाप्रभु र्वक्ति पश्यागच्छन्ति वासराः। २
येष्वम्मोनीयवंशानाम् अहं रब्बाभिधां पुरीं।
समरस्यैव नादेन करिष्याम्यभिनादितां॥
सा पुरी च समुच्छेदाद् अस्मराशि र्भविष्यति।
तत्कन्यारूपपुर्य्यश्च धक्ष्यन्ते वह्निना तदा॥
इस्रायेलोऽधिकारस्य हृतो यैरध्यभुज्यत।
स तेषां भोक्ष्यते द्रव्यमित्यमाह सदाप्रभुः॥
रोदनं कुरु हिश्बोन यदयं नष्टं यतोऽभवत्। ३
यूयं क्रन्दत रब्बायाः कन्याः शाणाम्बराः कटौ॥
कुरुध्वं स्तन आघातं गोष्ठेषु परिधावत।
यतो याज्यधिपैः सार्द्धं दास्यं यास्यति मल्कमः॥
श्लाघसे निम्नभूमिः किं निम्नभूस्ते विलीयते। ४
हे उन्मार्गप्रिये कन्ये को मामुपाक्रमिष्यति।

इत्थमुक्त्वा स्वकोषेषु विश्वासः क्रियते त्वया ॥
५ भाषते तु प्रभुस्त्वां स वाहिनीनां सदाप्रभुः ।
पश्चाहं त्वां करिष्यामि त्रासाक्रान्तां चतुर्द्दिशः ॥
यूयञ्च विकरीष्यध्व एकैकः स्वीयसम्मुखं ।
जनान् पलायमानांश्च कोऽपि न संग्रहीष्यति ॥
६ इतः पश्चादहं किन्त्वम्मोनवंशस्य दासतां ।
पुनर्निवर्त्तयिष्यामीत्थं ब्रवीति सदाप्रभुः ॥

७ इदोमस्य भाग्यं ।

भाषते भारतीमेनां वाहिनीनां सदाप्रभुः ।
तैमने किमपि ज्ञानं शेषं किं विद्यते नहि ।
किं नष्टो धीमतां मन्त्रो ज्ञानं किं विलयं गतं ॥
८ दिदानवासिनो यूयं कुरुध्वं प्रपलायनं ।
परिहृत्य कुरुध्वञ्च वसतिं निम्नभूमिषु ॥
एषौवंशं स्वविध्वंसं प्रापयिष्याम्यहं यतः ।
तस्मै फलप्रदानस्यानेष्यामि समयं मम ॥
९ द्राक्षासञ्चयिनो लोकाश्चेदायास्यंस्त्वदन्तिकं ।
तर्हि तैः फलशेषः किं नैवात्यक्ष्यत कश्चन ॥
क्षणदायां यदि स्तेनैरकारिष्यत वाक्रमः ।
तर्हि प्रयोगमात्रा तैः किं नाकारिष्यत क्षतिः ॥
१० एषावन्तु करिष्याम्यहं निष्पत्रतरूपमं ।
सकलान् विवरिष्यामि तस्य गूढनिधीनपि ॥
प्रच्छादयितुमात्मानं न कथञ्चित् स शक्ष्यति ।
वंशो ध्वंसिष्यते तस्य नङ्क्ष्यन्ति तत्सहोदराः ।
तत्परिवासिनश्चापि नैवावस्थास्यते च सः ॥
११ निजबालान् त्यजानाथान् जीवयिष्यामि तानहं ।
तव या विधवा नार्य्यो मयि ता विश्वसन्तु च ॥
१२ यतो हेतोरिदं वाक्यं व्याजहार सदाप्रभुः ।
पश्यैतद्भाजने येषां पानं नासीद् यथोचितं ।
ते पपुस्त्वन्तु निर्द्दोषः कथञ्चित् किं भविष्यसि ।
न भविष्यसि निर्द्दोषस्त्वमवश्यं हि पास्यसि ॥
१२ यस्मात् सदाप्रभु र्ब्रूते स्वनाम्ना शप्तवानहं ।

चासनिन्दामरस्थानं शस्तं वत्सा भविष्यति।
नित्यं स्थास्यन्ति जीर्णानि तस्याः सर्व्वपुराणि च॥
अश्राव्येका मया वार्त्ता सदाप्रभोः समीपतः। १४
जातीनां मध्य आज्ञेयं दूतेन प्रहिताभवत्॥
मिलित्वा सकला यूयं तद्विरुद्धं प्रगच्छत।
समुत्तिष्ठत सर्व्वे हि सङ्ग्रामं कर्त्तुमुद्यताः॥
छोदिष्ठां पश्य जातीनां मध्ये त्वां कृतवानहं। १५
मनुष्याणां समाजे त्वम् अवज्ञाता भविष्यसि॥
त्वं स्वीयभीषणत्वेन चित्तोन्नत्या च मोहिता। १६
वसन्ती शैलभेदेषु भूधराग्रावलम्बिनी॥
उच्चस्थाने यथोत्क्रोशः कृतनीडासि यद्यपि।
तथापि त्वं ततः स्थानान्मयावतारयिष्यसे।
भाषते भारतीमेनां स्वयमेव सदाप्रभुः॥
शून्यं भविष्यतीदोमं यः कश्चित् तत्र यास्यति। १७
स तद्दण्डेषु सीत्कारम् ईरयिष्यति विस्मितः॥
सदाप्रभुरिदं ब्रूते सिदोमामरयोरिव। १८
तदासन्नपुरीणाञ्चैव तद्ध्वंसो भविष्यति॥
तत्र स्थाने नरो वासं न करिष्यति कश्चन।
नैव मानवसन्तानस्तं देशं वाश्रयिष्यते॥
यर्द्दनाभरणारण्याद् उद्गच्छन् केशरी यथा। १९
जेता पश्य तथा वासम् अचलं तं गमिष्यति॥
निमिषेण तदग्राच्च द्रावयिष्याम्यहं जनान्।
मया यश्च मनोनीतः स तत्राधिकरिष्यते॥
यतः को मम तुल्योऽस्ति वादी को वाह्वयेत मां।
मम साक्षादवस्थातुं शक्तः को वास्ति पालकः॥
इदोममधि निर्णीता मन्त्रणैव सदाप्रभोः। २०
तैमनावासिनश्चाधि कल्पितास्तस्य कल्पनाः।
निशाम्यन्तां ततो हेतो युष्माभिः सुसमाहितैः॥
अवश्यं परिकर्ष्यन्ति तान् कनिष्ठा अजा अपि।
अवश्यं वसतिस्तेषां तेषु स्तब्धा भविष्यति॥
तेषां पातस्य शब्दाच्च धरा यास्यति वेपथुं। २१

तेषां सूफार्णवं यावच्छ्रोष्यते रोदनखरः॥
२२ पश्येोत्क्रोश इवोत्पत्य डयनं स करिष्यति।
वस्त्रायाश्चोपरि स्वीयौ पक्षौ विस्तारयिष्यति॥
गर्भव्यथातुरायाश्च योषितश्चेतसा समं।
इदोमस्यापि वीराणां तदा चेतो भविष्यति॥
२३ दम्मेशकस्य भाग्यं।
हमातस्यार्पदस्यापि कातरत्वं प्रतीयते।
निशम्याशुभवार्त्तां तौ गतवन्तौ विलीनतां।
उत्पन्नः सागरे क्षोभः शमितुञ्चाक्षि सोऽक्षमः॥
२४ दम्मेशकपुरी क्लान्ता प्रद्रोतुं परिवर्त्तते।
कम्पग्रस्ता सवन्तीवाक्रान्ता क्लेशार्त्तिभिश्च सा॥
२५ कथं त्यक्ता पुरी श्लाघ्या नगरी मम हर्षदा॥
२६ तस्मात् तस्याः पतिष्यन्ति तरुणाः पुरवीथिषु।
योद्धारः सकलास्तस्याः स्तम्भिष्यन्ते च तद्दिने।
भाषते भारतीमेनां वाहिनीनां सदाप्रभुः॥
२७ दम्मेशकस्य प्राचीरे मयाग्निं र्ज्वालयिष्यते।
वेन्हदादस्य हर्म्याणि सोऽनलश्च ग्रसिष्यति॥
२८ बाबिलीयराजेन निबूखद्नित्सरेण पराजितानां केदारादीनां हात्सो-
रीयराज्यानां भाग्यं। सदाप्रभुरित्थमाह,
उत्थाय केदरं यात प्राच्यानुच्छिन्त मानवान्॥
२९ तेषामपक्रियन्तां हि दूष्यैः सार्द्धं पशूव्रजाः।
तेषां यवनिकादीनि भाजनानि क्रमेलकाः।
सकलान्येव नीयन्तां विपक्षैरात्मवृद्धये।
समन्ताद् विद्यते त्रास इति तान् प्रति घोष्यतां॥
३० प्रभुराह पलायध्वं हे हात्सोरनिवासिनः।
दूरं इत्वातिनिम्नञ्च स्थानमावसताश्रिताः॥
यतो युष्मासु बाबीलो निबूखद्नित्सरो नृपः।
मन्त्रणां कृतवानेकां कल्पितवांश्च कल्पनां॥
३१ यूयमुत्थाय तां जातिम् उपाक्रामत सुस्थिरां।
निवसन्तीं सुनिश्चिन्तं कपाटार्गलवर्जितां।
पृथगेव कृतावासामिति ब्रूते सदाप्रभुः॥

मद्दाङ्गा लोठयिष्यन्ते तेषामित्येव वाक् प्रभोः। २१
तेषां गोमेषवृन्दञ्च लोप्तमेव भविष्यति॥
लूनश्मश्रून् चतुर्द्दिक्षु विकरीष्यामि तान् जनान्।
तेषाञ्च सर्व्वपार्श्वेभ्यः समानेष्याम्यमङ्गलं॥
हात्सोरं व्यालवासञ्च नित्यं मरु र्भविष्यति। ३३
तत्र स्थाने नरो वासं न करिष्यति कश्चन।
नैव मानवसन्तानस्तं देशं वाश्रयिष्यते॥

यिहूदीयराजस्य सिदिकियस्य राजत्वारम्भकाल एलाममधि सदाप्र- ३४
भो र्यद् वाक्यं भाववादिनं यिरिमियं प्रति प्रादुरभूत् तद्वृत्तान्तोऽयं यथा,

भाषते भारतीमेनां वाहिनीनां सदाप्रभुः। ३५
पश्य भङ्क्ष्याम्यहं चापम् एलामस्योर्ज्जकारणं॥
एलामस्य विरुद्धञ्च व्योम्नः प्रान्तचतुष्टयात्। ३६
वायूंश्चतुर आनाय्य तैः सर्व्वैरेव वायुभिः।
तान् जनान् विकरीष्यामि तेनैलामाद् वहिष्कृतैः।
नरैरनाश्रिता जाति र्नैका कुत्राप्यवाप्स्यते॥
एलामीयान् करिष्यामि सम्मुखात् स्वीयवैरिणां। ३७
प्राणनाशार्थिनाञ्चापि सम्मुखात् साध्वसातुरान्॥
अधिकं वर्त्तयिष्यामि जनेषु तेष्वमङ्गलं।
अर्थतो मम कोपाग्निमिति ब्रूते सदाप्रभुः॥
यावत्तेषाञ्च निःशेषो नाशो न क्रियते मया।
तावदेव कृपाणो हि तेषां पश्चात् प्रहेष्यते॥
स्थापयिष्यत एलामे निजसिंहासनं मया। ३८
उच्छेत्स्यन्ते ततो राजाधिपाश्चेति प्रभो र्वचः॥
किन्तु पाश्चात्यकालेऽहम् एलामस्यापि दासतां। ३९
पुन र्निवर्त्तयिष्यामीति ब्रवीति सदाप्रभुः॥

---

५० पञ्चाशत्तमोऽध्यायः।

बाबिलनगरस्य दण्डस्य इस्रायल्लीयलोकानाम् उद्धारस्य च भविष्यद्वाक्यं।

बाबिलं कल्दीयानां देशञ्चाधि सदाप्रभु र्भाववादिना यिरिमियेण १
यद् वाक्यं कथितवान् तद्वृत्तान्तोऽयं।

२ जातीनां मध्य एतद्धि यूयमाख्यातुमर्हथ।
घोषत ध्वजमुत्तोल्य मैवापह्नुत्य घोषत॥
ब्रूध्वं बाबिल् धृता क्रीता बेलस्त्रस्तो मिरोदकः।
लज्जिता विग्रहास्तस्यास्त्रस्ता गर्हितमूर्त्तयः॥
३ उदीचीतो यतस्तस्या विपक्षा जातिरुत्थिता।
सा च जनपदं तस्या मरुस्थानं करिष्यति॥
तन्मध्ये वासकारी च नैव स्थास्यति कश्चन।
पलाय्यापगमिष्यन्ति मनुष्याः पशुभिः सह॥
४ तेषु दिनेषु तस्मिंश्च काल (एतत् प्रभो र्वचः)।
इस्रायेलीयवंशीया यिहूदीयाश्च तैः सह।
एकत्रैवागमिष्यन्ति क्रन्दन्तश्च पदे पदे।
करिष्यन्ते ऽनुसन्धानं स्वेश्वरस्य सदाप्रभोः॥
५ जिज्ञासिष्यन्ति सीयोनं सम्मुखीकृत्य तत्पथं।
समायात भविष्यामः समासक्ताः सदाप्रभौ।
नियमेनैव नित्येन यो विस्मर्त्तुं न शक्यते॥
६ मामकीनप्रजा आसन् मेषा विनष्टुमुद्यताः।
पालकै र्भ्रमिताः स्वीयैस्ते प्राभ्राम्यन्त चाद्रिषु।
भ्रमन्तो गिरितश्चाद्रिं व्यस्मरन् स्वशयस्थलं॥
७ तान् आसाद्यैव सर्व्वै र्हि भक्ष्यवत् समभक्षयन्।
पीडकाश्चाब्रुवंस्तेषां न भवामोऽत्र दोषिणः॥
यतोऽपराद्धवन्तस्ते धर्म्माश्रयसदाप्रभोः।
स्वपूर्व्वपुरुषाणाञ्चाशास्थानस्य सदाप्रभोः॥
८ बाबिलो मध्यतो यूयं कुरुध्वं प्रपलायनं।
कल्दीयानाञ्च देशस्य मध्यात् कुरुत निर्गमं।
जायध्वञ्च यथा छागा मेषपालाग्रगामिनः॥
९ यस्मात् पश्य मया देशाद् उदीच्याद् बाबिलं प्रति।
सङ्घो विकटजातीनां प्रबोध्यानाययिष्यते॥
तद्विरुद्धं कृते ताभि र्व्यूहे धारिष्यते च सा।
दक्षवीरोपमस्तासां वाणो न रिक्त एष्यति॥
१० कल्दीयानां तदा जातिरवश्यं लोठयिष्यते।
तस्याः सर्व्वेऽपहर्त्तारस्तर्प्स्यन्तीति प्रभो र्वचः॥

ममाधिकारहर्त्तारो यूयं हृष्टा अनन्दत। ११
अनर्त्तिष्ट यथा धेनुः शस्यमर्द्दनकारिणी।
अकुरुध्वं प्रणादञ्च ह्रेषमाणा हया इव॥
अतिक्षीतास्ति वो माता जननी वस्त्रपान्विता। १२
अन्त्या सा पश्य जातीनाम् ऊषी धन्वा मरुस्थलं॥
क्रोधात् सदाप्रभोः सा च वसति न भविष्यति। १३
तस्याः साकल्यमूच्छिन्नं स्थानमेव भविष्यति॥
बाबिलः सन्निधानेन यः कश्चित् प्रगमिष्यति।
स तद्दण्डेषु सीत्कारम् ईरयिष्यति विस्मितः॥
बाबिलः परितो व्यूहं कुरुध्वं हे धनुर्धराः। १४
वाणांस्त्यजत तस्याञ्च मोद्विज्यध्वं शरव्यये।
यस्मात् सदाप्रभोरेव विरुद्धं सापराधिनी॥
कुरुध्वं तद्विरुद्धञ्च जयनादं समन्ततः। १५
सा कृताञ्जलिरुन्मूला तत्प्राचीरं निपातितं॥
एतत् सदाप्रभोरेव वैरनिर्य्यातनं यतः।
तस्माद् वैरफलं तस्यै प्रदातुं यूयमर्हथ।
यद्वत् कृतवती सा च तद्वत् कुरुत तां प्रति॥
उच्छिन्त बाबिलो मध्यान्मनुष्यं वीजवापकं। १६
शस्यकर्त्तनकाले वा हस्ते लवित्रधारिणं॥
साक्षात् प्रपीडकस्यासेः प्रतियान्तु निजं जनं।
स्वदेशञ्च पलायन्तां प्रत्येकं सकला नराः॥
मेषा विच्छिन्न इस्रायेल् मृगेन्द्रास्तं व्यदुद्रवन्। १७
आदावाशूरराजस्तम् अबभक्षत् स्वभक्ष्यवत्॥
अन्तेऽसौ बाबिलीयस्तु निबूखद्रित्सराभिधः।
महीपालस्तदस्थीनि सकलान्यप्यचर्वयत्॥
इस्रायेलीश्वरस्त्वाह वाहिनीनां सदाप्रभुः। १८
ततो हेतो मया पश्य पुराशूरीयभूभृते।
यथादायि फलं युक्तं तथा बाबिलभूभुजे।
तद्वच्चाय च देशाय युक्तं दायिष्यते फलं॥
इस्रायेलं निजावासं प्रत्यानेष्याम्यहं पुनः। १९
कर्म्मिलं वाशनञ्चापि स पुन र्विचरिष्यति।

इफ्रयिम्-गिलियादद्रौ स प्राणांस्तर्पयिष्यति ॥
१० तेषु दिनेषु तस्मिंश्च काले (प्रभोरिदं वचः)।
इस्रायेलोऽपराधो यो सोऽन्विष्टोऽपि न लप्स्यते ॥
यिहूदायाश्च पापानां गन्धोऽन्विष्टोऽपि नाप्स्यते।
यतो यं शेषयिष्यामि क्षमिष्ये तस्य पातकं ॥
११ दिगुणद्रोहिदेशं तं तस्मिन् दण्डस्य भाजने।
कृतवासान् मनुष्यांश्च त्वम् आक्रमितुमर्हसि ॥
ध्वंसयोच्छिन्धि पश्चाच्च तेषामिति प्रभो र्वचः।
त्वामादेक्ष्याम्यहं यद्यत् तत्तत् त्वं कर्त्तुमर्हसि ॥
२२ रणस्य श्रूयते नादो देशे महच्च भञ्जनं।
२३ कथं छिन्नः कथं भग्नः कृत्स्नमर्त्तस्य मुद्गरः।
कथं जाता मरुस्थानं सा बाबिल् जातिमण्डले ॥
२४ हे बाबिल् धरणार्थं ते जालं विस्तारितं मया।
तेनैव त्वम् अधारिष्ठा न तु तत् समबुध्यथाः।
निर्णीता त्वं गृहीता च यतोऽक्रुध्यः सदाप्रभोः ॥
२५ प्रभुः स्वकोषमुद्घाट्य स्वकोपास्त्राण्युपानयत्।
कल्दीयानां यतो देशे कर्त्तव्यः समुपस्थितः।
व्यवहारः प्रभोस्तस्य वाहिनीनां सदाप्रभोः ॥
२६ तस्या विरुद्धमायात मेदिन्याः प्रान्तभागतः।
उद्घाटयत तत्कोषान् तामाचिनुत राशिवत् ॥
ताञ्च सर्व्वश उच्छिन्त तस्याः शेषं न रक्षत ॥
२७ हत तस्या वृषान् सर्व्वान् वधायावतरन्तु ते।
हा हा तेषां दिनं प्राप्तैः कालश्चायमुपस्थितः ॥
२८ धावतां बाबिलो देशाद् रवो रक्षार्थिनामसौ।
ज्ञापयिष्यति सीयोनम् ईशस्य नः सदाप्रभोः।
वैरनिर्य्यातनं तस्य मन्दिरार्थां प्रतिक्रियां ॥
२९ बाबिलं प्रति युष्माभि र्ह्वयन्तां शरजीविनः।
ह्वयन्तां सकला एव धनुर्विस्फारका जनाः।
अवरुन्ध समन्तात्तां शेषः कोऽपि न रक्ष्यतां ॥
तस्या यादृक् क्रिया तादृक् फलं तस्यै प्रदत्त च।
सर्व्वथा सा यथाकार्षीत् तद्वत् कुरुत तां प्रति ॥

यतो गर्व्वोद्धतासीत् सा वैपरीत्यात् सदाप्रभोः।
इस्रायेलः पवित्रस्य राज्ञस्व वैपरीत्यतः॥
तस्मात् तस्याः पतिष्यन्ति तरुणाः पथवीथिषु। ३०
योद्धारः सकलास्तस्याः स्तम्भिष्यन्ते च तद्दिने।
भाषते भारतीमेनां स्वयमेव सदाप्रभुः॥
पश्य त्वत्प्रतिकूलोऽहं हे दृष्टत्वस्वरूपक। ३१
वाक्यमेतत् प्रभोरेव वाहिनीनां सदाप्रभोः।
दिनं ते यत आयातं कालस्वच्छास्तये मया॥
स दृष्टत्वस्वरूपश्च स्खलित्वा निपतिष्यति। ३२
तस्योत्थापनकारी च न भविष्यति कश्चन॥
अग्निं प्रज्वलयिष्यामि तस्य सर्व्वपुरेष्वहं।
तत्समन्तात् स्थितं सर्व्वं भक्षयिष्यति चानलः॥
भाषते भारतीमेनां वाहिनीनां सदाप्रभुः। ३३
इस्रायेलीयवंशीया यिहूदास्च कुलोद्भवाः।
अविशेषेण पीड्यन्ते नीतास्तै यैश्च दासतां।
सकलैस्तैः प्ररुध्यन्ते तान् विस्रष्टुमनिच्छुभिः॥
तेषान्त्वस्ति बली त्राता वाहिनीप्रभुनामकः। ३४
तेषां पक्षे विवादं सोऽवश्यं निर्व्वाहयिष्यति।
पृथिव्यै शान्तिदानाय कम्पयन् बाबिलाश्रितान्॥
हे खड्गाक्राम कल्दीयान् इत्यमाह सदाप्रभुः। ३५
बाबिल्वासिन आक्रामाधिपांस्तस्याश्च धीमतः॥
हे खड्गाक्राम वाचालान् बुद्धिहीना भवन्तु ते। ३६
हे खड्गाक्राम तद्वीरान् भग्नाशाश्च भवन्तु ते॥
हे खड्गाक्राम तत्सैन् तस्याः सारथिकान् रथान्। ३७
तत्रत्यं कृत्स्नसङ्घञ्च ते भवन्त्वबलोपमाः।
हे खड्गाक्राम तत्कोषान् लोठिता हि भवन्तु ते॥
हे ताप त्वम् अपस्तस्या जहि शुष्का भवन्तु ताः। ३८
यतो देशः स मूर्त्तीनाम् उन्मत्तास्ते च भीषणैः॥
अतो जाङ्गलमार्जारा वत्स्यन्ति क्रोष्टुभिः सह। ३९
देशे तस्मिंस्तदानीञ्च निवत्स्यन्त्युष्ट्रपक्षिणः॥
नराणां वसतिस्तत्र न कदाचिद् भविष्यति।

पुरुषानुक्रमं यावत् कोऽपि तत्र न वत्स्यति ॥
४० सदाप्रभुरिदं ब्रूते सिदोमामरयोः पुरा।
तदासन्नपुरीणाञ्च यं ध्वंसमीश्वरोऽकरोत्।
तस्याः पुर्य्या अपि ध्वंसस्तत्समानो भविष्यति ॥
तत्र स्थाने नरो वासं न करिष्यति कश्चन।
नैव मानवसन्तानस्तत् स्थानं वाश्रयिष्यते ॥
४१ उत्तरस्या दिशः पश्य जातिरेकागमिष्यति।
मह्या निम्नतभागेभ्यो वंश एको विशङ्कटः।
बहवश्च महीपाला उत्थास्यन्ति प्रबोधिताः ॥
४२ धन्विनः शक्तिहस्तास्ते क्रूराः कारुण्यवर्ज्जिताः।
सामुद्रनादनादास्ते हयारूढा द्रवन्ति च।
बाबिल् कन्ये त्वदासन्ने व्यूहितास्ते च योद्धृवत् ॥
४३ तेषां वार्त्तां समश्रौषीद् बाबिलीयमहीपतिः।
तस्माच्च सर्व्वथा तस्य जडीभूतं करद्वयं।
क्लेशेनाभूत् स आक्रान्तः प्रसवन्तीव चार्त्तिभिः ॥
४४ यर्द्दनाभरणारण्याद् उद्गच्छन् केशरी यथा।
जेता पश्य तथावासम् अचलं प्रगमिष्यति ॥
निमिषेण तदग्राच्च द्रावयिष्याम्यहं जनान्।
मया यश्च मनोनीतः स तत्राधिकरिष्यते ॥
यतः को मम तुल्योऽस्ति वादी को वाह्वयेत मां।
मम साक्षादवस्थातुं शक्तो को वास्ति पालकः ॥
४५ बाबिलं प्रति निर्णीता मन्त्रणैव सदाप्रभोः।
कल्दीयानां भुवश्चाधि कल्पितास्तस्य कल्पनाः।
निशाम्यन्तां ततो हेतो युष्माभिः सुसमाहितैः ॥
अवश्यं परिकर्ष्यन्ति तान् कनिष्ठा अजा अपि।
अवश्यं वसतिस्तेषां तेषु स्तब्धा भविष्यति ॥
४६ सत्यं बाबिल् अधारीति श्रुत्वा कम्पिष्यते धरा।
सर्व्वत्रैवार्त्तनादश्च श्रोष्यते जातिमण्डले ॥

---

५१ एकपञ्चाशोऽध्यायः।

१ बाबिलपुरीयदण्डस्य भाविवचः ५९ यिरिमियेण बाबिलि प्रहितायास्तद्वार्त्तायाः पाठात् परं तत्र शिलां बद्धा फरान्नद्यां मज्जनस्य दृष्टान्तकथा च।

इत्थं सदाप्रभु र्ब्रूते बाबिलः प्रातिकूल्यतः। १
मद्विद्विषाञ्च हृद्देशे वासिनां प्रातिकूल्यतः।
पश्य संहारको वायुरुत्पादयिष्यते मया॥
बाबिलञ्च प्रहेष्यामि परान् शूर्पप्रयोजकान्। २
शूर्पैस्तां शोधयित्वा तै र्देशः शून्यीकरिष्यते॥
यस्माद् विपद्दिने तस्याः सर्व्वदिग्भ्यः समागताः।
जनास्तद्वैपरीत्येन ते भविष्यन्त्युपस्थिताः॥
धन्वी विस्फारयेच्चापं चापविस्फारकं प्रति। ३
वर्म्मणा चाभिसन्नद्धम् ऊर्द्धशीर्षं नरं प्रति।
तद्यूनो मानुकम्पध्वं कृत्स्नमुच्छिन्त तद्बलं॥
तत्र कल्दीयदेशे च निपतन्तु हता जनाः। ४
निपतन्त्वस्त्रविद्धाश्च नरास्तत्पुरवीथिषु॥
यस्मान्नैव समत्याक्षीद् इस्रायेलम् अनाथवत्। ५
न यिहूदां तयोरीशो वाहिनीनां सदाप्रभुः॥
एतेषां परिपूर्णस्तु देशोऽभूत् पापकर्म्मभिः।
इस्रायेलः पवित्रस्याधीश्वरस्यापराध्यतां॥
बाबिलो मध्यतो यूयं कुरुध्वं प्रपलायनं। ६
स्वप्राणान् रक्षतैकैकस्तस्या दोषे न नश्यत॥
यस्मात् सदाप्रभोरेष समयो वैरशुद्धये।
प्रतिदास्यति तस्यै स कर्म्मणाम् उचितं फलं॥
आसीत् सदाप्रभो र्हस्ते बाबिल् काञ्चनभाजनं। ७
कृत्स्नभूमण्डलस्यैव मद्योन्मत्तत्वसाधकं।
तन्मद्यं जातिभिः पीतं तेनोन्माद्यन्ति जातयः॥
अकस्मात् पतिता बाबिल् भग्नताञ्च गता ततः। ८
रुत तामधि तस्याश्च क्षते प्रयुङ्ध्वमौषधं।
किंश्चित् तस्याः प्रतीकारस्तदानीं सम्भविष्यति॥
बाबिलः प्रतिकाराय यत्नोऽस्माभिरनुष्ठितः। ९
तस्यास्तु प्रतिकारस्य सिद्धि र्नैवाभवत् ततः॥

आयात तां वयं त्यक्त्वैकैको यामो निजां भुवं।
नभःस्पर्शी यतस्तस्या दण्ड उच्चश्च मेघवत्॥
१० अस्माकं कृतवान् व्यक्तं धार्म्मिकत्वं सदाप्रभुः।
आयाताख्याम सीयोन्यस्मदीशस्य प्रभोः क्रियां॥
११ शरान् मार्ज्जत चर्म्माणि नह्यध्वं सकला द्रुतं।
प्रभु र्मादीयराजानाम् उत्साहं समतेजयत्॥
यतो बाबिलि चिन्तां स कुरुते तद्विनष्टये।
वैरशुद्धिः प्रभोः सा हि मन्दिरार्था प्रतिक्रिया॥
१२ बाबिल्प्राचीरमाक्रान्तुं यूयमुच्छ्रयत ध्वजं।
कुरुध्वं सुदृढं रोधं संस्थापयत रक्षिणः॥
सैनिकान् विनियुंग्ध्वञ्च प्रच्छन्नान् निभृते स्थले।
यत् सदाप्रभुना प्रोक्तं बाबिल्वासिजनानधि।
तस्य कल्पनकारी स तस्य सोऽप्यस्ति साधकः॥
१३ अध्यावात्सी र्महापस्त्वं महाकोषाधिकारिणी।
तवान्तस्तु समायाति परा काष्ठार्ज्जनस्य च॥
१४ स्वप्राणैः शप्तवान् एतद् वाहिनीनां सदाप्रभुः।
अवश्यं पूरयिष्यामि नरैस्त्वां शलभैरिव।
जयनादो विरुद्धं ते तैरेवोदीरयिष्यते॥
१५ स ससर्ज्ज स्वशक्त्या द्यां स्वधिया विदधे जगत्।
स च विस्तारयामास स्वप्रवीणतया दिवं॥
१६ ईरिते स्वरवे तेन व्योम्नि सञ्चीयते जलं।
उत्थाप्यन्ते च मेदिन्याः प्रान्तात् तेनोच्चवारिदाः॥
तेन वृष्टिप्रदानाय मेघवह्नि र्विधीयते।
निःसार्य्य निजकोषेभ्यस्तेन चानीयते मरुत्॥
१७ पशुतुल्या जनाः सर्व्वे ज्ञानहीनाश्च सन्ति ते।
लज्जन्ते विग्रहात् सर्व्वे धातुद्रावकशिल्पिनः॥
व्याजा एव यतः सन्ति विग्रहास्तै र्विनिर्म्मिताः।
श्वासस्याभ्यन्तरे तेषां न कथञ्चन विद्यते॥
१८ अलीका एव ते सन्ति निर्म्मिताश्च प्रमादतः।
यदा दायिष्यते योग्यं फलं नंक्ष्यन्ति ते तदा॥
१९ याकूबस्य तु यो दायः स न तादृश ईश्वरः।

कृत्स्नसृष्टेः स निर्म्माता स्वाधिकारस्य वैभवं।
नामधेयञ्च तस्यास्ति वाहिनीनां सदाप्रभुः॥
मम मुद्गर आसीस्त्वं मम युद्धास्त्रसंहतिः। २०
त्वयैवाखण्डयं जातीस्त्वया राज्यान्यनाशयं॥
त्वयैवाखण्डयञ्चाहम् अश्वमारोहिणा सह। २१
त्वयैवाखण्डयञ्चाहं स्यन्दनं रथिना सह॥
त्वयैवाखण्डयञ्चाहं भर्त्तारं भार्य्यया सह। २२
त्वयैवाखण्डयञ्चाहं स्थविरं शिशुना सह।
त्वयैवाखण्डयञ्चाहं तरुणं बालया सह॥
त्वयैवाखण्डयञ्चाहं पालकं तस्य च व्रजं। २३
त्वयैवाखण्डयञ्चाहं क्षेत्राजीवं सगोयुगं।
त्वयैवाखण्डयञ्चाहं देशाध्यक्षान् सशासकान्॥
युष्मत्साक्षात्तु सीयोने यः कल्दीयजनैः कृतः। २४
तस्य कृतस्वापकारस्य फलं दास्यामि बाबिले॥
कल्दीयदेशवासिभ्यः सर्व्वेभ्यश्च यथोचितं।
भाषते भारतीमेनां स्वयमेव सदाप्रभुः॥
पश्य त्वत्प्रातिकूल्योऽस्म्यहं हे ध्वंसकपर्व्वत। २५
एतत् सदाप्रभो र्वाक्यं कृत्स्नभू र्ध्वंसिता त्वया॥
त्वान्तु हस्तं प्रसार्य्याहं घूर्णयिष्यामि शैलतः।
त्वामहञ्च विधास्यामि भूधरं वह्निसात्कृतं॥
न त्वत्तो गृहकोणाय ग्रावा ग्राहीष्यते जनैः। २६
न त्वत्तो गृहमूलायाश्मा वादायिष्यते नरैः।
नित्यं स्थास्यसि तूच्छिन्नो ब्रवीतीदं सदाप्रभुः॥
ध्वज उच्छ्रीयतां देशे तूर्य्यं जातिषु वाद्यतां। २७
तस्या हि वैपरीत्येन संस्क्रियन्ताञ्च जातयः॥
अराराट्मिन्निरस्कास इतिनामानि यानि च।
राज्यानि तानि हूयन्तां संग्रामार्थं तया सह॥
तद्विरुद्धञ्च युष्माभिः सेनाध्यक्षो नियोज्यतां।
आनीयन्ताञ्च युद्धाश्वाः सूकिनः शलभा इव॥
तस्या हि वैपरीत्येन संस्क्रियन्ताञ्च जातयः। २८
मादीया एव राजानः सपुरोगाः सशासकाः।

तेषाञ्च शासनाधीनाः सकला विषया अपि ॥
२९ कम्पते भूमिरेतेन वेदनार्त्ता च जायते।
यतो बाबिलमुद्दिश्य सङ्कल्पः सिध्यति प्रभोः।
स बाबिलदेशमुच्छिन्नं वासिहीनं विधास्यति ॥
३० निवृत्ता बाबिलो वीरा युद्धाद् दुर्गेषु चासते।
नष्टोऽभूद् विक्रमस्तेषां ते जाता अबलोपमाः।
निवासा दाहितास्तस्याः खण्डितान्यर्गलानि च ॥
३१ धावको धावकादग्रे दूताद् दूतश्च धावति।
वदिष्यन् बाबिलो भूपं त्वत्पुरी सर्व्वशो हृता ॥
३२ सकलानि गृहीतानि नद्यास्तार्य्यस्थलानि च।
नलारण्यानि दग्धानि योद्धारो विकला इति ॥
३३ इस्रायेलो य ईशः स वाहिनीनां सदाप्रभुः।
भाषते भारतीम् एतां कन्येयं बाबिलाभिधा।
शस्यमर्द्दनकालीनखलतुल्या बभूव हि।
अचिराच्छस्यलावस्य समयस्तामुपैष्यति ॥
३४ मां खादन् बाबिलो राजा निबूखद्नित्सरोऽलुपत्।
शून्यपात्रमिव न्यस्य मामगालीत् तिमि यथा।
मत्सुखाद्यैः स्वतुण्डञ्चापूपुरन्मान्वदुद्रवत् ॥
३५ मत्पीडामांसयो र्योग्यो दण्डो बाबिलि वर्त्ततां।
ईदृशीं भाषतां वाचं कन्या सीयोनवासिनी ॥
वर्त्ततां मम रक्तस्य दण्डः कल्दीयवासिषु।
यिरूशालम्पुरी चैतद् वचनं वक्तुमर्हति ॥
३६ ततो हेतोरिमां वाचं व्याजहार सदाप्रभुः।
पश्य निर्व्वाहयिष्यामि त्वद्विवादम् अहं स्वयं।
अहमेव करिष्यामि वैरनिर्य्यातनं तव ॥
तस्यास्तोयनिधिञ्चाहं विधास्यामि मरुस्थलं।
तस्या वारिप्रवाहञ्च करिष्यामि विशोषितं ॥
३७ राशीनामेव सङ्घातस्तदा बाबिल् भविष्यति।
क्रोष्टूनां वास उच्छिन्नः शीत्कारार्थो निरालयः ॥
३८ एककाले विनर्द्दन्ते ते हि केशरिणो यथा।
सकलाश्च विगर्ज्जन्ति सिंहीनां शावका इव ॥

सम्प्रीतिस्तु मया तेषां तप्तानां रचयिष्यते। ३९
तत उल्लासिनो भूत्वा ते सुप्ता नित्यनिद्रया।
न पुन र्जागरिष्यन्ति ब्रवीतीदं सदाप्रभुः॥
मयावतारयिष्यन्ते वधार्थं मेषवत्सवत्। ४०
ते मनुष्यास्तदा छागैः सहिता एडका इव॥
कथं वन्दीकृता शेशक् हृता कृत्स्नभुवः प्रभा। ४१
कथं जाता समुच्छिन्ना सा बाबिल् जातिमण्डले॥
अब्धि र्बाबिलमारुह्यत् सा तदूर्म्मिचयावृता। ४२
तस्याः पुर्य्यः समुच्छिन्ना देशः शुष्कं मरुस्थलं॥ ४३
तत्र देशे नरो वासं न करिष्यति कश्चन।
न वा मानवसन्तानस्तन्मध्येन व्रजिष्यति॥
बाबिल्येव प्रदास्यामि बेल्देवायोचितं फलं। ४४
तस्य चोद्गारयिष्यामि कवलं मुखतः पुनः॥
न पुनस्तत्समीपस्थ जातीनां वक्ष्यते सरित्।
भूमिसात्कृतमेवास्ति प्राचीरमपि बाबिलः॥
हे मदीयप्रजा यूयं तस्या मध्यात् प्रगच्छत। ४५
स्वप्राणान् रक्षतैकैकः कोपज्वालात् सदाप्रभोः॥
देशे या श्रूयते वार्त्ता ततो मा यात साध्वसं। ४६
ततश्चित्तञ्च युष्माकं द्रवीभूतं न जायतां॥
वार्त्तिकायाति वर्षेऽस्मिन् वार्त्तान्या परवत्सरे।
दौरात्म्यं विद्यते देशे शास्त्रा शास्ता च बाध्यते॥
अतो हेतोरवेक्षध्व ते समायान्ति वासराः। ४७
येष्वहं बाबिलो मूर्त्तीः शासिष्यामि यथोचितं॥
देशस्तस्यास्तदा कृत्स्नो लज्जापन्नो भविष्यति।
सकलाश्च पतिष्यन्ति तस्या मध्ये हता जनाः॥
स्वर्गमर्त्त्यौ तयो र्मध्ये स्थितं साकल्यमेव च। ४८
बाबिलं तां समुद्दिश्य प्रोच्चै र्गास्यन्ति हर्षतः॥
उदीचीतो यतस्तस्या वैपरीत्येन नाशकाः।
मानवा आगमिष्यन्ति ब्रवीतीदं सदाप्रभुः॥
बाबिला पातिता यद्वद् इस्रायेलो हता जनाः। ४९
तद्वद् बाबिलि कृत्स्नोर्व्याः पतिष्यन्ति हता जनाः॥

५० हे जना असितस्त्राता अग्रं यातविलम्बिनः।
यूयं सदाप्रभुं दूराद् अनुसंस्मर्त्तुमर्हथ।
युष्माकं हृदयाकाशे यिरूशालम् उदेतु च॥
५१ लज्जापन्ना वयं यस्मात् कथामश्रौष्म निन्दकां।
व्रीडया च समाच्छन्नं विद्यतेऽस्माकमाननं॥
यतो हेतो र्विदेशीयै र्देष्टभि र्नः सदाप्रभोः।
मन्दिरान्तराः सर्व्वा लङ्घिताः पुण्यभूमयः॥
५२ तस्मात् सदाप्रभु र्ब्रूते पश्यागच्छन्ति वासराः।
येषु तद्विग्रहेभ्योऽहं प्रदास्याम्युचितं फलं।
तस्या देशे च सर्व्वत्र स्तनिष्यन्त्याहता जनाः॥
५३ बाबिल् किं गगनारूढा दुर्गोच्चत्वाद् दुराक्रमा।
मत्तस्तु ध्वंसकास्तस्या आयास्यन्तीति वाक् प्रभोः॥
५४ श्रूयते विपदार्त्तानां रावो बाबिल उद्गतः।
महाभङ्गस्य शब्दश्चोदेति कल्दीयदेशतः॥
५५ यतो बाबिलमुच्छिन्नां विदधाति सदाप्रभुः।
तस्या मध्याच्च तेनैव महाघोषः प्रशम्यते॥
प्रध्वनन्त्यूर्म्मयस्तेषां महतीनाम् अपामिव।
तेषाञ्च सिंहनादस्य प्रोच्च उद्गच्छति स्वनः॥
५६ आयातो ध्वंसकस्तस्या आयातो बाबिलं प्रति।
वीरा वन्दीकृतास्तस्यास्तेषां चापाश्च खण्डिताः॥
कर्म्मशोधी यतो हेतोरीश्वरोऽस्ति सदाप्रभुः।
यस्य यच्च फलं योग्यं तस्मै तत् प्रददाति सः॥
५७ पतीन् विद्वज्जनान् तस्याः प्रभून् शास्तॄन् सयोधिनः।
अहं मत्तान् करिष्यामि ते सुप्ता नित्यनिद्रया।
न पुन र्जागरिष्यन्तीति राजा व्याजहार सः।
यस्येदं विद्यते नाम वाहिनीनां सदाप्रभुः॥
५८ पुनश्चेदं वचो ब्रूते वाहिनीनां सदाप्रभुः।
प्राचीरं बाबिलः प्रस्थं हृतसज्जं पतिष्यति।
तस्या द्वाराणि चोच्चानि धक्ष्यन्ते हव्यवर्त्मना॥
इत्यश्चावस्तुमात्रायानुष्ठितो जातिभिः श्रमः।
साधितश्चाग्निमात्राय प्रजावृन्दैः क्लमातुरैः॥

यिहूदीयराजस्य सिदिकियस्य राजत्वस्य चतुर्थवत्सरे यदा महसेयस्य ५९
पौत्रो नेरियस्य पुत्रः सिराय इतिनामा सेनानिवेशाध्यक्षस्तेन राज्ञा
सह बाबिलमगच्छत् तदा भाववादी यिरिमियस्तं यद् वाक्यम् आदि-
क्षत् तस्य वृत्तान्तोऽयं। यत् सर्व्वम् अमङ्गलं बाबिलमाक्रमिष्यति तद्दा- ६०
क्यान्यर्थतो बाबिलो विरुद्धानि यान्येतानि वाक्यानि लिलिखिरे तानि
सर्व्वाणि यिरिमिय एकस्मिन् पत्रेऽलेखीत्। ततः परं यिरिमियस्तं ६१
सिरायमवादीत्, यदा त्वं बाबिलमुपस्थितो भविष्यसि, तदा सर्व्वाण्ये-
तानि वाक्यान्यालोक्य पठिष्यसि, इत्यञ्च भाषिष्यसे, हे सदाप्रभो, ६२
अत्र यथा न मनुष्यस्य न पशो र्वा वसति र्भवेत् केवलम् अनन्तकालं
यावत् सर्व्वम् उच्छिन्नं तिष्ठेत् तथैवैतस्य स्थानस्योत्कर्त्तनाय वाक्यं त्वया-
गादीति। अपरम् एतत्पत्रस्य पठने समाप्ते त्वं तेन सह प्रस्तरमेकं बद्धा ६३
तत् फरातनद्या मध्यं निक्षेप्स्यसि, वाक्यमिदञ्च गदिष्यसि, ६४

मङ्क्ष्यतीत्थमियं बाबिल् नैवोत्थास्यति सा पुनः।
मया सा प्रापितानिष्टं तज्जनाश्चावसन्नतां॥

इति यिरिमियस्य वाक्यानि समाप्तानि।

---

५२ द्विपञ्चाशोऽध्यायः।

१ सिदिकियेन बाबिलीयनृपस्याज्ञालङ्घनं ४ यिरूशालमो रोधनं पराजयो दाहनं लोकानां बाबिलं नयनं २८ वन्दिलोकानां संख्या ३१ यिहोयाखीनस्योन्नतिश्च।

सिदिकिय एकविंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुं प्रारभ्यैका- १
दशवत्सरान् यावद् यिरूशालमे राजत्वं चकार। लिब्नानिवासिनो
यिरिमियस्य हमूटल्नाम्नी दुहिता तस्य प्रसूरासीत्। स यिहोयाकीमस्य २
निखिलकर्म्मानुसारात् सदाप्रभोः साक्षात् कुत्सिताचारं चकार। यतो ३
यिरूशालमनगरं यिहूदावंशञ्च प्रति सदाप्रभोः क्रोधात् तौ यत् तस्य
सम्मुखाद् दूरीभवेताम् एतदर्थम् एतादृशी दशा जघटे। अपरं सि-
दिकियो बाबिलीयराजस्याधीनत्वम् अनङ्गीकृतवान्।

अनन्तरं तस्य राजत्वस्य नवमवत्सरे दशममासस्य दशमे दिने बाबि- ४
लीयमहीपति र्निबूखद्नित्सरस्तस्य निखिलसैन्यानि च यिरूशालमस्य
विरुद्धं समेत्य शिविरं स्थापयाञ्चक्रिरे तस्य चतुर्द्दिक्षु दुर्गाणि निर्म्म-
मिरे च। सिदिकियस्यैकादशं राजत्ववत्सरं यावत् नगरं रुध्यमानं ५

६ तस्थौ। ततश्चतुर्थमासस्य नवमे दिने नगरे महादुर्भिक्षं बभूव जन-
पदस्य मनुजानां निमित्तं भक्ष्यं किमपि नासीत्।
७ अनन्तरं नगरे भग्नत्वं गते सर्व्वे योद्धारः पलायनं विधाय निशायां
नगरमध्यतो निष्क्रम्य राजोद्यानस्य समीपस्थयो र्द्वयो र्भित्त्यो र्द्वारस्य
मार्गेण प्रान्तरगामिनं पन्थानं जग्मुः किन्तु कल्दीयाश्चतुर्दिक्षु नगरम्
८ अवेष्टन्त। परन्तु कल्दीयानां बलानि राज्ञः पश्चाद् धावित्वा यिरीहोः
प्रान्तरे सिदिकियं प्रापुस्ततस्तस्य निखिलसैन्यानि तस्य सन्निधितो व्यकी-
९ र्य्यन्त। ततस्ते राजानं धृत्वा हमातदेशस्थरिब्लां बाबिलीयराजस्यान्तिकं
१० निन्युः स च तस्य विचारनिष्पत्तिं चकार। अपरं बाबिलीयराजः सि-
दिकियस्य समक्षं तस्य तनयान् घातयामास यिहूदायाः सर्व्वकुलीनानपि
११ रिब्लायां घातयामास। सिदिकियस्य लोचने चोत्पाट्य पित्तलीयनिगडैस्तं
बन्धयामास। बाबिलीयराजश्च तं बाबिलं नीत्वा मरणदिनपर्य्यन्तं शास-
नागारे निरुरोध।
१२ अपरञ्च पञ्चममासस्य दशमदिने बाबिलीयमहीपते र्निबूखद्नित्सर-
स्योनविंशे राजत्ववत्सरे बाबिलीयराजस्य प्रत्यक्षमधिष्ठितो रक्षकसे-
१३ नानाम् अध्यक्षो निबूषरदनो यिरूशालममागत्य सदाप्रभो र्मन्दिरं
राजसदनं यिरूशालमस्य निखिलगृहाणि च दाहयामास विशेषतो
१४ वृहदट्टालिकाः सर्व्वा वह्निना दाहयामास। अपरं तस्य रक्षकसेनाप-
तेरनुगामिन्यः कल्दीयसेना यिरूशालमस्य चतुर्दिक्षु प्राचीरम् अभञ्जन्।
१५ ततः परं कतिपया निःस्वजना नगरेऽवशिष्टाः शेषजना बाबिलीयनर-
पतेः पक्षं गताः पलातका अवशिष्टा जनपदाश्च रक्षकसेनाध्यक्षेण निबू-
१६ षरदनेन प्रवासयाञ्चक्रिरे। केवलं द्राक्षाक्षेत्रसेचनाय भूमिखननाय च
कतिपया दुर्गतजना रक्षकसेनाधिपतिना निबूषरदनेन शेषयाञ्चक्रिरे।
१७ अपरं कल्दीयैः सदाप्रभो र्मन्दिरे स्थितौ पित्तलमयौ स्तम्भौ पीठानि
सदाप्रभो र्मन्दिरे स्थितं पित्तलमयं सागरपात्रञ्च खण्डं खण्डं विधाय
१८ तेषां कृत्स्नपित्तलं बाबिलं निन्ये। अपरम् स्थाल्यो दर्व्यो वर्त्तिकाकर्त्तिन्यः
कुण्डानि चमसाश्चेत्यादीनि यावन्ति सेवार्थकानि पित्तलमयभाजना-
१९ न्यासन् तानि सर्व्वाणि तैरपहृतानि। भाण्डवह्निपात्रकुण्डस्थालीदी-
पाधारचमसनिषेकार्थपात्राणां मध्ये स्वर्णपात्राणां सुवर्णानि रूप्यपा-
२० त्राणां रूप्याणि च रक्षकसेनापतिना हृतानि। सदाप्रभो र्मन्दिरस्य कृते
राजा सुलेमान् यत् स्तम्भद्वयं सागरपात्रमेकञ्च पीठस्थरूपाश्च पित्तलमया

या द्वादश गा निर्म्मितवान् तेषां सर्व्वेषां पात्राणां पित्तलान्यपरिमेयाण्या-
सन्। तयोः स्तम्भयोरेकस्योच्चत्वम् अष्टादशहस्तपरिमितं, द्वादशहस्तप- २१
रिमितं सूत्रञ्च तमवेष्टत, तदीयधातोः स्थूलता चतुरङ्गुलिपरिमिता, स
त्वन्तःशून्य आसीत्। तदुपरि च पित्तलीयमूर्द्धा आसीत्, एकस्य मूर्द्ध उ- २२
च्चता पञ्चहस्तपरिमिता। तत्र मूर्द्ध्नि जालाकृतिः परितश्च दाडिम्बफला-
न्यासन्। तत्साकल्यं पित्तलमयं। द्वितीयस्य स्तम्भस्यापि तत्समाना नि-
र्म्मिति र्दाडिम्बफलानि चासन्। दिशां सम्मुखानि षण्णवतिदाडिम्बफला- २३
न्यविद्यन्त, साकल्यतस्तत्र जालाकृतौ परितः शतदाडिम्बफलान्यासन्।

अनन्तरं रक्षकसेनापतिः प्रधानयाजकं सिरायं द्वितीयं याजकं २४
सिफनियं त्रीन् द्वारपालांश्च दधार। अपरं नगरमध्याद् स योद्धृणाम् २५
अध्यक्षमेकं राजपुरुषं नगरे लब्धान् राजसभासदः सप्तजनान् जनपदी-
यसेनानाम् अध्यक्षं सेनागणयितारं लेखकमेकं नगरे लब्धान् जनपदी-
यषष्टिजनांश्च दधार। रक्षकसेनापति र्निबूषरदनस्तान् धृत्वा रिब्लां २६
बाबिलीयनरपतेः सन्निधिं निनाय। अनन्तरं बाबिलीयो नरेश्वरो २७
हमातदेशस्थायां रिब्लायां तान् ताडयित्वा मारयामास। इत्थं यिहूदा-
वंशीयलोका निजदेशाद् दूरे प्रवासयाञ्चक्रिरे।

निबूखद्नित्सरेण प्रवासार्थम् अपनीतानां जनानां संख्येयं। सप्तम- २८
वत्सरे यिहूदीयानां त्रयोविंशत्यधिकानि त्रीणि सहस्राणि। निबूख- २९
द्नित्सरस्याष्टादशे वत्सरे यिरूशालम्निवासिनां द्वात्रिंशदधिकान्यष्टश-
तानि। निबूखद्नित्सरस्य त्रयोविंशे वत्सरे च रक्षकसेनाधिपति र्निबूष- ३०
रदनो यिहूदीयानां पञ्चचत्वारिंशदधिकानि सप्तशतानि जनान् प्रवासा-
र्थम् अपनिनाय। जनानां साकल्यं षट्शताधिकानि चतुःसहस्राणि।

अपरं यिहूदावंशीयनृपस्य यिहोयाखीनस्य प्रवासस्य सप्तत्रिंशवत्स- ३१
रस्य द्वादशमासस्य पञ्चविंशे दिवसेऽर्थतो बाबिलीयनृप इविल्मिरो-
दको यस्मिन् राजत्वं कर्त्तुम् आरेभे तस्मिन् वत्सरे स यिहूदीयराजस्य
यिहोयाखीनस्य मूर्द्धानम् उन्नम्य तं कारागेहतो मोचयामास। अपरं ३२
तं प्रति प्रीत्यालापं चकार यावन्तो भूपतयश्च तेन समं बाबिल्यासन्
तेषां सर्व्वेषाम् आसनेभ्यस्तस्मै श्रेष्ठम् आसनं ददौ, तदीयानि कारावस- ३३
नानि परिवर्त्तयामास च, ततः स यावज्जीवनं तेन समं भोजनपानेऽकु-
रुत। अपरं तस्य कृते आमरणदिनाद् नित्यवृत्तौ बाबिलो राज्ञा निरू- ३४
पितायां तस्य यावज्जीवनं प्रतिदिनं नित्यजीवनोपायस्तस्मै व्यश्राण्यत।

यिरिमियस्य विलापसंहिता।

१ प्रथमोऽध्यायः।

१ पापहेतो र्यिरूशालमो दुर्द्दशा १२ तस्या विलापकथा १८ ईश्वरस्य न्यायतास्वीकारश्च।

१ कथमेका समासीना नगरी प्रचुरप्रजा।
जातीनां या गरिष्ठासीत् सा जाता विधवोपमा।
देशानां या महिष्यासीत् सा जाता करदायिनी॥
२ उग्रं क्रन्दति सा नक्तं तद्गण्डौ चाश्रुणाप्लुतौ।
सर्व्वेषां कामिनां तस्या नैकोऽप्यस्ति प्रियंवदः।
तां प्रलभ्य च मित्राणि तस्या विद्वेषिणोऽभवन्॥
३ क्लेशात् प्रचुरदास्याच्च यिहूदाभूत् प्रवासिता।
जातीनां मध्य आसीना सा न प्राप्नोति विश्रमं।
तत्पश्चाद्धावकाः सर्व्वे तां प्रापुः सङ्कटे स्थले॥
४ मार्गाः शोचन्ति सीयोनो वर्ज्जिताः पर्व्वगामिभिः।
तस्या द्वाराणि शून्यानि याजका निश्वसन्ति च।
कन्यास्तस्या विषीदन्ति विक्लवास्ति च सा स्वयं॥
५ श्रेष्ठ्यं तत्पीडकाः प्रापुस्तस्याश्च द्वेषिणः श्रियं।
यतस्तत्पापबाहुल्यात् तां चिक्लेश सदाप्रभुः।
प्रवासं शिशवस्तस्याः पीडकस्याग्रतो गताः॥
६ सीयोनाख्यकुमार्य्या हि विगता निखिला प्रभा।
कुलीना अभवंस्तस्यास्तृणहीना मृगा इव।
ते स्वानुधावकस्याग्रे विप्रगच्छन्ति निर्बलाः॥
७ यिरूशालम् स्वदुःखस्यापनोदस्य च वासरे।
सकलं पूर्व्वकालस्य काम्यवस्तु समस्मरत्॥
पीडकानां करैस्तस्या न्यपतंस्तु प्रजा यदा।
उपकारी जनस्तस्यास्तदा नैकोऽप्यविद्यत।
द्विषस्तां तादृशीं दृष्ट्वा तस्या उत्सादनेऽहसन्॥
८ कृतपापा यिरूशालम् जाता साशोचिनी ततः।

पूजकै र्गह्यते सर्व्वैस्तस्याः सन्दृश्य नग्नतां।
निश्वसन्ती स्वयं सापि व्यपयाति पराङ्मुखी॥
अञ्चलेऽस्ति रजस्तस्या नास्मरत् सा फलोदयं। ९
अत्याश्चर्य्यं न्यपप्तत् सा न सान्त्वयति कोऽपि तां।
हे प्रभो पश्य मद्दुःखं यतो द्वेषी विकत्थते॥
काम्यवस्तुषु सर्व्वेषु तस्या द्वेष्यार्पयत् करं। १०
त्वत्समाजप्रवेशाद् ये वारिता आज्ञया तव।
विष्टं स्वपुण्यगेहं तै र्विजातीयै र्ददर्श सा॥
विश्वसन्ति जनास्तस्याः सर्व्वे भक्ष्यानुकाङ्क्षिणः। ११
खाद्यार्थं प्राणरक्षायै काम्यवस्तूनि ते ददुः।
हे प्रभो पश्य वीक्षस्व हीनीभूता यतोऽस्म्यहं॥
हे अध्वगामिनो यूयं सकलाः किं निरुत्सुकाः। १२
यूयमालोच्य वीक्षध्वं मयि यद्दुःखमर्पितं।
तेन मामकदुःखेन समानं दुःखमस्ति किं।
स्वकोपोद्दीपनस्याह्नि यतो मां क्लिष्टवान् प्रभुः॥
ऊर्द्धात् सम्प्रेष्य वह्निं स ममास्थीन्युदशोषयत्। १३
बद्धा जालेन मत्पादौ माम् अनैषीत् पराङ्मुखीं।
निर्जनां मामकार्षीच्च विषण्णां कृत्स्नवासरं॥
रचयित्वापराधान्मे तत्करेण युगं कृतं। १४
संश्लिष्टैस्तैः स मद्ग्रीवां बद्धाह्रासीद् बलं मम।
यस्य रोधो मयाशक्यस्तत्करे मामदात् प्रभुः॥
मम मध्ये स्थितान् सर्व्वान् वीरान् निराकरोत् प्रभुः। १५
मम यूनाञ्च भङ्गायाघोषयन्मद्द्विषां सभां।
द्राक्षाकुण्डे यिहूदाख्यां कुमारीमपिषत् प्रभुः॥
क्रन्देऽहं तत्र मच्चक्षु र्मच्चक्षुः स्रावयत्यपः। १६
दूर आश्वासको मत्तो प्राणसञ्जीवको मम।
मत्पुत्रा अभवन् नष्टा विद्वेषी प्राभवद् यतः॥
सीयोन् कृताञ्जलि र्भाति न सान्त्वयति कोऽपि तां। १७
याकूबं परितो रोद्धुं तच्छत्रूनादिशत् प्रभुः।
तेषां साक्षाद् यिरूशालम् प्रतिभाति कलङ्किता॥
स तु नित्यप्रभु र्न्याय्यस्तद्विद्रोहिण्यहं यतः। १८

हे वंशाः सकला यूयं श्रुत्वा पश्यत मद्व्यथां।
युवत्यो मे युवानश्च प्रवासायापनिन्यिरे॥
१९ कामिनो मे मयाहूता विप्रालम्भिषि तैस्त्वहं।
याजका मे पुरोगाश्च पुरीमध्येऽव्यजन्नसून्।
खाद्यं स्वप्राणरक्षार्थं वृथैवान्वेषयन्त ते॥
२० भो प्रभो पश्य दीनाहं ममान्त्रं परितप्यते।
अन्तर्व्यकारि मच्चित्तं यस्माद् द्रोहो मया कृतः।
वहिः खड्गः प्रजा हन्ति मृत्युस्तु स्वयमन्तरे॥
२१ जनाः शृण्वन्ति रावं मे न सान्त्वयति कोऽपि मां।
द्वेषिणो मम यावन्तः सर्व्वेऽश्रौषु र्ममापदं।
त्वञ्च तां कृतवांस्तस्माद् आनन्दं ते प्रकुर्व्वते।
दिनं त्वानेष्यसि ख्यातं ते भविष्यन्ति मत्समाः॥
२२ कृत्स्ना तेषाञ्च दुर्वृत्तिस्त्वत्प्रत्यक्षीभविष्यति।
सर्व्वेषां मदधर्म्माणां हेतो र्मां प्रति यादृशं।
कर्म्माकार्षीस्त्व तादृक् त्वं तान् प्रत्यपि करिष्यसि।
यतो भूरि र्ममोच्छ्वासो मम चित्तञ्च सामयं॥

---

२ द्वितीयोऽध्यायः।

१ यिरूशालमो दुःखाद् यिरिमियस्य विलापकथनं २० ईश्वरस्य सन्निधौ तस्य दुःखप्रकाशश्च।

१ कथं प्राच्छादयत् कन्यां सीयोनं कोपतः प्रभुः।
इस्रायेलः प्रभां स्वर्गाद् भूतले स न्यपातयत्।
स निजं पादपीठञ्च नास्मरत् क्रोधवासरे॥
२ प्रभु र्जग्रास याकूबः सर्व्ववासान् कृपां विना।
स यिहूदाकुमार्य्याश्च दुर्गाणि क्रोधतोऽभिदत्।
भूमिसात्कृत्य राज्यञ्च तत्पतींश्च व्यदूषयत्॥
३ इस्रायेलोऽखिलं शृङ्गं सोऽच्छिदद् रोषतापतः।
दक्षिणं वैरिणः साक्षात् स्वं प्रत्यावर्त्तयत् करं।
दाहयामास याकूबं सर्व्वाग्निज्वलदग्निवत्॥
४ चापं द्वेषीव विस्फार्य्य स्थिरीकृत्यारिवत् करं।

स नेत्रानन्दकान् सर्व्वान् मनुष्यान् अभ्यदूषयत्।
रोषं सीयोनकुमार्य्याश्च दूष्येऽपातयदग्निवत्॥
प्रभु र्वैरिसमो भूत इस्रायेलम् उपाग्रसत्। ५
सर्व्वं तस्याग्रसद् हर्म्म्यं तस्य दुर्गाण्यनाशयत्।
व्यथां शोकञ्च कन्याया यिहूदाया अवर्धयत्॥
उद्यानस्येव तस्याश्च प्रावृतिं स व्यलोपयत्। ६
निजमेवोत्सवस्थानं स च व्यध्वंसयत् स्वयं।
पर्व्वविश्रामवारान् सोऽकार्षीत् सीयोनि चास्मृतान्।
क्रोधावेशेन राजानं याजकञ्च निराकरोत्॥
स्ववेदिं प्रभुरत्याक्षीत् स्वपुण्यौको न्यगर्हयत्। ७
तद्धर्म्म्याणाञ्च प्राचीरं शत्रुहस्ते समार्पयत्।
यद्वत् पर्व्वदिने तद्वत् प्रागदंस्ते प्रभो र्गृहे॥
सालान् सीयोनकन्याया निर्भेत्तुं कल्पना प्रभोः। ८
सोऽतानीत् सूत्रमुच्छेदाद् हस्तं नैव न्यवर्त्तयत्।
शोचिते खातप्राचीरे तेनैकत्रावसीदतः॥
भूमिमध्ये निमग्नान्यभवंस्तद्गोपुराणि च। ९
अर्गलान्यपि तस्याः स नाशयित्वा व्यखण्डयत्।
राजा तस्याः पुरोगाश्च परदेशप्रवासिनः।
शास्त्रं न विद्यते तत्र तस्या ये भाववादिनः।
ते सदाप्रभुना दत्तं दर्शनं नाप्नुवन्ति च॥
स्तब्धाः सीयोनकन्यायाः प्राचीना आसते भुवि। १०
धूलिस्तै र्निहिता मूर्द्धि बद्धा शाणैन तैः कटिः।
यिरूशालमीयकन्याश्चाभूतलान्नतमस्तकाः॥
क्षीयेते मेऽश्रुभि र्नेत्रे ममान्त्रं परितप्यते। ११
शून्यीभूतं यकृद् भूमौ मत्प्रजायाः प्रभञ्जनात्।
पुरीवीथिषु मूर्च्छातः शिशोः स्तनन्धयस्य च॥
गोधूमाः कुत्र मद्यञ्चेति स्वमातॄ र्वदन्ति ते। १२
वदन्तः पुरमार्गेषु मूर्च्छां यान्त्याहता इव।
मातृक्रोडे निजप्राणान् युगपद् विसृजन्ति वा॥
भो कुमारि यिरूशालम् किं मयोपमा शमिष्यसि। १३
उपमा वा त्वदर्थं का मया प्रयोजयिष्यते॥

हे सीयोन्दुहितः कन्ये केन त्वामुपमाय वा।
तव शोकापहारस्य सिद्धिः कारिष्यते मया॥
तव भङ्गो यतो हेतो र्महासागरवन्महान्।
चिकित्सां तव कर्त्तुं वा को जनः सक्षमो भवेत्॥
१४ व्यर्थं वदन्त्यसारञ्च स्वप्नं त्वां भाववादिनः।
त्वद्दास्यप्रतिकाराय न विव्रण्वन्त्यघं तव।
व्यर्था भ्रान्त्यावहाश्च त्वां भावोक्ती र्ज्ञापयन्ति ते॥
१५ त्वामुद्दिश्याध्वगाः सर्व्वे ददते हस्ततालिकं।
यिरूशालमकुमार्य्याश्च शीशशब्दं प्रकुर्व्वते।
चालयन्तः शिरश्चाऽऽहुः किमियं सा पुरी भवेत्।
ख्याता या पूर्णसौन्दर्य्या कृत्स्नचित्याश्च नन्दना॥
१६ त्वामधि व्यात्तवक्त्राश्च सर्व्वे सन्त्यरयस्तव।
शीशशब्दं प्रकुर्व्वाणा घर्षन्तश्च रदान् रदैः।
ते वदन्ति न्यगालिष्म यच्चास्माभिः प्रतीक्षितं।
अद्य तद्दिनमायातं प्राप्यस्माभिरदर्शि च॥
१७ यत् कर्त्तुं चिन्तयामास तदकार्षीत् सदाप्रभुः।
निजञ्चासीषधद् वाक्यं निर्दिष्टं पूर्व्वकालतः॥
निर्द्दयो निरभैत्सीत् त्वां शत्रुञ्चाहर्षयत् त्वयि।
त्वत्क्लेष्टॄणां विषाणञ्च प्रापयत् स समुच्छ्रयं॥
१८ प्रभुमुद्दिश्य लोकानां चित्तमुच्चैः प्ररोदिति।
हे सीयोनाख्यकन्यायाः प्राचीर त्वम् अहर्निशं।
स्रोतोवत् स्रावयाश्रूणि विरतिं तत्र मा कुरु।
मानुजानीहि विश्रान्त्यै स्वनेत्रस्य कनीनिकां॥
१९ उत्तिष्ठ क्रन्द यामिन्यां प्रहराणाम् उपक्रमे।
स्वान्तमुत्सृज वारीव स्वप्रभो र्दृष्टिगोचरे।
स्वशिशूनाञ्च प्राणांस्त्वं प्रार्थयस्व कृताञ्जलिः।
सर्व्वासां वीथिनामग्रे मूर्च्छितानां बूभुक्षया॥
२० हे प्रभो पश्य वीक्षस्व कं प्रतीदं त्वया कृतं।
किं स्वगर्भफलं नार्य्योऽश्नीयुः स्वलालितान् शिशून्।
किं याजी भाववादी च घात्यौ पुण्यालये प्रभोः॥
२१ बालो वृद्धश्च मार्गेषु शयाते भूमिसात्कृतौ।

युवत्यो मे युवानश्च न्यपतन्नसिना हताः।
स्वक्रोधस्य दिने यस्माद् अवधीस्त्वं कृपां विना॥
त्रासाः पर्व्वदिनायेवाहूता मत्परितस्त्वया। २२
प्रभोः कोपदिने शेषो रक्षितः कोऽपि नाभवत्।
लालयित्वाववर्धं यान् उच्छिन्नास्ते ममारिणा॥

---

३ तृतीयोऽध्यायः।

१ नानादुःखाद् विलापः २१ दुःखसहनायोपदेशकथनं ३७ ईश्वरीयन्यायस्वीकार उद्धारार्थं प्रार्थनं रिपुविनाशकथनञ्च।

नरोऽहं दृष्टदौर्गत्यस्तदीयामर्षदण्डनात्। १
मां नयन्नन्धकारं स न चालोकमवापयत्। २
मयि कृत्स्नदिनं तस्य विपक्षो वर्त्तते करः॥ ३
जरिते चर्म्ममांसे मे भग्नान्यस्थीनि तेन च। ४
समन्तात् तेन रुद्धोऽहं विषाधिभ्याञ्च वेष्टितः। ५
वासितश्च तमःस्थाने चिरप्रेतजना इव॥ ६
मां रुरोध स प्रावृत्या न शक्तो मम निर्गमः। ७
निगडैर्माम् अभान्त्सीत् स सभारैस्ताम्रनिर्म्मितैः।
क्रन्दतोऽपि मम प्रोच्चैः प्रार्थनां संरुणद्धि सः। ८
तक्षितप्रस्तराणाञ्च प्रावृत्या मेऽरुधत् पथः। ९
सकलान् मम मार्गांश्च सोऽकार्षीद् वक्रगामिनः॥
मत्कृते गूढभल्लः स सिंहो वा रहसि स्थितः। १०
मन्मार्गानन्यथा कृत्वा मां भित्त्वा स व्यनाशयत्। ११
स्वकोदण्डं स विस्फार्य्य मां शरव्यमिव व्यधात्॥ १२
स्वतूणीरसुतै र्वाणैरव्यात्सीन्मम मर्म्म च। १३
सर्व्वेषां बान्धवानां मे जातोऽहं हास्यभाजनं। १४
कृत्स्नमेव दिनं यावत् तेषां गानस्य चास्पदं।
स माञ्चाभूभुजत् तिक्तम् अपीप्यच्चेन्द्रवारुणीं॥ १५
शर्कराचूर्णदन्तं मां सोऽकार्षीत् भस्मशायिनं। १६
क्षेमात् त्वं मन्मनोऽपास्थस्तेनाहं व्यस्मरं सुखं। १७
मयोचे विगताशा मे प्रतीक्षा च सदाप्रभौ॥ १८

१९ स्मर मे दुर्गतिभ्रंशाविन्द्रवारुणिकाविषे ।
२० तानि स्मरति मच्चित्तं मदन्तश्चावसीदति ॥
२१ मनसेदं लवेच्योऽहं तेनाशा जायते मम ॥
२२ प्रभोरेव कृपाधिक्यान्न निःशेषोकृता वयं ।
यस्मान्नैव क्षयं प्राप्तोऽद्यापि तत्करुणानिधिः ॥
२३ प्रातः प्रात र्नवीना सा प्रचुरा तव सत्यता ।
२४ प्रभु र्मामकदायांश इति ब्रूते मनो मम ।
ततो हेतो र्मया तस्मिन् आशा समर्पयिष्यते ॥
२५ प्रभुं ये सम्प्रतीक्षन्ते स तेभ्यो मङ्गलप्रदः ।
यत् तं मृगयते चित्तं तस्य क्षेमकरोऽस्ति सः ॥
२६ प्रतीक्षा सशमा क्षेमा प्रभुतस्त्राणकाङ्क्षिणे ।
२७ युगस्य वहनं बाल्ये पुरुषाय फलप्रदं ॥
२८ एकाक्यास्तां स निःशब्दो यतस्तेनार्पितो धुरः ।
२९ स्पृशत्वास्येन धूलिं स आशा किं स्यादिति ब्रुवन् ।
३० गण्डं दद्यात् प्रहर्त्रे स निन्दया च प्रपूर्य्यतां ॥
३१ यस्मान्न नित्यकालार्थं सम्परित्यजति प्रभुः ।
३२ शोकयित्वापि कारुण्यं कृपाधिक्यात् करोति सः ।
३३ न कामात् स नृसन्तानान् क्लिश्नात्यार्त्तीकरोति वा ॥
३४ पृथिव्या वन्दयः सर्व्वे मृद्यन्ते चरणै र्यदा ।
३५ सर्व्वश्रेष्ठस्य साक्षाद्वा नरस्यार्थो विकार्य्यते ।
३६ पीड्यतेऽर्थी विचारे वा न प्रसन्नस्तदा प्रभुः ॥
३७ प्रभोराज्ञां विना केनोदीरिता वाक् प्रसिध्यति ।
३८ सर्व्वश्रेष्ठस्य वक्त्राद्वा किं नोदेति शुभाशुभं ।
३९ कुतो जीवं जनो निन्देत् निजपापं स निन्दतु ॥
४० स्वमार्गान् वीक्ष्य निर्णीय प्रत्यायाम प्रभुं प्रति ।
४१ स्वर्गेशं प्रति चित्तानि प्रोन्नयाम करैः सह ।
४२ पापद्रोहै र्वयं लिप्तास्तत्र त्वं नाकरोः क्षमां ॥
४३ कोपाच्छन्नस्त्वनुद्रुत्यावधीरस्मान् कृपां विना ।
४४ आत्मानञ्चावृणो र्मेघैरभेद्यैः प्रार्थनांशुना ।
४५ जातीनां मध्य उच्छिष्टान् अस्मांस्त्वं वर्जितान् व्यधाः ॥
४६ तिष्ठन्त्यस्मद्द्विषः सर्व्वे व्यात्तास्या अस्मदन्तिके ।

कम्पस्त्रासो विनाशश्च भङ्गश्चास्मासु वर्त्तिताः। ४७
मज्जाते दुंहितु भंङ्गात् मदृष्टि र्निम्नगाभवत्॥ ४८
मन्नेत्रं स्यन्दतेऽश्रान्तं विरतिस्तत्र नास्ति हि। ४९
स्वर्गात् सदाप्रभो दृष्ट्यै दृक्पातं तत् प्रतीक्ष्यते। ५०
मत्पुर्य्याः सर्व्वकन्यासूपहन्त्यक्षि मनो मम॥ ५१
यै र्विनाकारणं द्विष्येऽनुधाव्ये तैः खगो यथा। ५२
मत्प्राणांस्तेऽरुन्धन् कूपे मदूर्द्ध्वे च शिलां न्यधुः। ५३
शीर्षं मेऽप्लावयंश्चाप उच्छिन्नोऽस्मीति चागदं॥ ५४
तस्माद् गभीरकूपात्त्वहं त्वन्नामाक्र्यं प्रभो। ५५
मम रावस्त्वयाश्रावि मदीयोच्छ्वासरोदनात्। ५६
इदानीमपि कर्णौ त्वं नोपसंहर्त्तुमर्हसि॥
यस्मिंस्त्वामाक्रयं तस्मिन् दिने त्वं निकटोऽभवः। ५७
माभैषीरिति वाक्यञ्च तदा मां प्रत्यभाषथाः॥
प्रभो त्वं मम प्राणानां विवादान् निरवाहयः। ५८
मदीयजीवनस्यापि मुक्तिदाताभवः स्वयं॥
त्वमन्यायं मया भुक्तं दृष्टवान् हे सदाप्रभो। ५९
मामकीनविचारञ्च त्वं विनिर्णेतुमर्हसि॥
त्वं तेषां दृष्टवान् हिंसां सर्व्वचिन्ताश्च मामधि॥ ६०
प्रभो त्वं श्रुतवांस्तेषां निन्दां चिन्ताश्च मामधि। ६१
वाचो मद्वैरिणां तेषां नित्यचेष्टाश्च मामधि। ६२
पश्योपवेशनोत्थानं तेषां गीयेऽहमेव तैः॥ ६३
प्रभो देहि फलं तेभ्यो हस्तानां कर्म्मणः समं। ६४
देहि चित्तस्य जाड्यञ्च त्वच्छापस्तेषु वर्त्ततां। ६५
तान् कोपेनानुधावंश्चोच्छिन्धि प्रभो दिवस्तलात्॥ ६६

४ चतुर्थोऽध्यायः।

१ सीयोनः क्षते विलापकथनं १२ स्वेषां पापाङ्गीकारः २१ इदोमीयजनानां दण्डस्य भविष्यद्वाक्यं।

कथं हीनप्रभं स्वर्णं विकृतं शुद्धकाञ्चनं। १
पुण्यरत्नानि सर्व्वस्मिन् विक्षिप्तानि चतुष्पथे॥

२ हेमतुल्या महामूल्याः सीयोनो नन्दनाः कथं।
मृद्भाण्डा इव गण्यन्ते कुलालकरनिर्म्मिताः॥
३ क्रोष्ट्रोऽपि स्तनमुच्छाद्य पाययन्ति स्वशावकान्।
युवती मत्प्रजा क्रूरा प्रान्तरस्थोष्ट्रपक्षिवत्॥
४ तृष्णया दुग्धपोष्यस्य जिह्वा तालुनि सज्यते।
याचन्ते शिशवः पूपं नास्ति पूपविभागकृत्॥
५ विशिष्टान्नस्य भोक्तारो व्यवसीदन्ति वीथिषु।
आबाल्याद् राजवेशा येऽवस्करं संश्रयन्ति ते॥
६ यत् सिदोमं क्षणाद् ध्वस्तमनाक्रान्तं नृणां करैः।
तस्य पापान्महत् पापं मत्प्रजादुहिताकरोत्॥
७ अभिषिक्ता जनास्तस्या हिमादासन् सुनिर्म्मलाः।
दुग्धाच्छुभ्राः प्रबालेभ्यो रक्ताङ्गा नीलरूपिणः॥
८ तान् मसीतोऽपि कृष्णास्यान् न जानन्ति जनाः पथि।
तेषां चर्म्मास्थिसंसक्तं शुष्कीभूतञ्च काष्ठवत्॥
९ ये जनाः क्षुधया विद्धाः क्षेमास्तेभ्योऽसिना हताः।
क्षुद्विद्धास्तेऽवसीदन्ति वर्जिताः क्षेत्रजैः फलैः॥
१० स्वहस्तैः सदया नार्य्यो निजापत्यानि पेचिरे।
तासां भक्ष्याणि तान्यासन् मत्प्रजादारिकापदि॥
११ प्रभुः स्वक्रोधमापूर्य्य रोषवह्निमवीवृषत्।
सीयोन्यज्वालयच्चाग्निं दग्धास्तेन तदालयाः॥
१२ यिरूशालम्पुरद्वारं श्लेष्टृद्विड्भिः प्रवेक्ष्यते।
न प्रत्यैच्छन्त तद् भूपा न भूमण्डलवासिनः॥
१३ सिद्धं तद् भाववक्तॄणां पापैर्दोषैश्च याजिनां।
साधूनां रक्तपातं ये मध्ये तस्या अकुर्व्वत॥
१४ अन्धा मार्गेषु तेऽभ्राम्यन् शोणितेन कलङ्किताः।
तस्मादस्पृश्यवस्त्रास्ते सञ्जाताः सर्व्वमानवैः॥
१५ याह्यमेध्येति ते प्रोक्ता याहि याहि न मां स्पृशेः।
द्रुतांस्तान् भ्राम्यतोऽभ्यूचे जातिभिस्ते गताश्रयाः॥
१६ प्रभो र्दृष्टि र्व्यभैत्सीत् तान् स तान् नैक्षिष्यते पुनः।
याजका नाभिपूज्यन्ते वृद्धै र्न प्राप्यते कृपा॥
१७ क्षीयतेऽद्यापि नेत्रे नो व्यर्थसाहाय्यकाङ्क्षया।

अरह्वां जातिमुद्दिश्य रद्धिस्थानेषु जागमः॥
क्रमान् रुन्धन्ति तेऽस्माकं गमनादस्मदध्वसु। १८
अन्तो नो निकटः पूर्णम् आयुरन्त उपागतः॥
शून्यस्योत्क्रोशतोऽप्यासन् जविनो नोऽनुधावकाः। १९
अस्मान् धर्त्तुं गिरौ चण्डाः प्रान्तरे च रहःस्थिताः॥
अस्माकं नासिकावायु र्योऽभिषिक्तः सदाप्रभोः। २०
जीविष्यामो वयं तस्य छायायां जातिमध्यतः।
इत्यवोचाम तेषान्तु छन्नगर्त्तेष्वधारि सः॥
हर्षोल्लासाद् इदोमाख्ये कन्ये ऊषदेशवासिनि। २१
ईदृशं पानपात्रन्तु पश्चात् त्वामप्युपैष्यति।
तेन त्वं मत्ततां गत्वात्मानं नग्नीकरिष्यसि॥
हे सीयोनाभिधे कन्ये संशुद्धं तव दुष्कृतं। २२
तव दास्यदशा तेन न विधायिष्यते पुनः॥
हे इदोमाभिधे कन्ये भोक्तव्यं तव दुष्कृतं।
स च तावकपापान्यनावृतानि करिष्यति॥

---

५ पञ्चमोऽध्यायः।

यिरिमियस्य प्रार्थना पापाङ्गीकारो विलापकथनञ्च।

अस्माकं या दशा जाता स्मर तां हे सदाप्रभो। १
दृक्पातं कुरु निन्दाञ्चास्मद्भुक्तामवधारय॥
अस्माकं योऽधिकारोऽयं स परेषु समर्पितः। २
वेश्मानीमानि चास्माकम् अर्पितानि विदेशिषु॥
अनाथा हि वयं जाता जन्मदाता न विद्यते। ३
अस्माकं मातरश्चापि वर्त्तन्ते विधवा इव॥
रूप्यं प्रदाय चास्माभिरस्माकं पीयते जलं। ४
आनीयन्ते भरण्यार्थम् अस्मदीयेन्धनानि च॥
अस्मद्ग्रीवासु पाशञ्च क्षिप्त्वा द्राव्यामहेऽरिभिः। ५
क्लान्ता जाता वयं कञ्चिद् विश्रामं न समाप्नुमः॥
पूपैरुदरपूर्त्ति र्नो भविष्यतीत्यपेक्षया। ६
मिस्रीयेभ्यः करं दद्म आशूरीयजनाय च॥

७ अस्माकं पितरः पापं कृतवन्तो न सन्ति च।
तैः कृतानान्तु दोषाणाम् अस्माभि र्भार उह्यते॥
८ अस्मान् दासगणः शास्ति नास्त्युद्धर्त्ता च तत्करात्॥
९ प्रान्तरे वर्त्तमानस्य कृपाणस्यैव सम्मुखात्।
खभक्ष्यानयनेनापि कुर्म्मः प्राणपणं वयं॥
१० क्षुधोत्तापेन चुल्लीव जाताः कृष्णत्वचो वयं॥
११ महिलानां बलात्कारः सीयोनि क्रियतेऽरिभिः।
अनूढानां कुमारीणां यिहूदीयपुरेषु च॥
१२ निजहस्तैः कुलीनांश्च नरान् उल्लम्बयन्ति ते।
प्रत्यक्षः क्रियते तैश्च प्राचीनानाम् अनादरः॥
१३ पेषणार्थकपाषाणा उह्यन्ते तरुणै र्जनैः।
आक्रान्ताः काष्ठभारेण प्रस्खलन्ति च बालकाः॥
१४ निवृत्ता गोपुराद् वृद्धा युवानश्च स्ववाद्यतः।
१५ निवृत्तोऽस्मद्धृदां हर्षो नृत्यं जातञ्च रोदनं॥
१६ किरीटो नष्टुग्रतः शीर्षाद् अस्मान् धिक् कृतपातकान्।
१७ पापान्नो व्याधितं चित्तं पापात् क्षीणे च लोचने॥
१८ सीयोनाद्रौ समुच्छिन्ने शृगाला विचरन्ति हि॥
१९ नित्यं सिंहासनासीनः स्थास्यसि त्वं सदाप्रभो।
पुरुषानुक्रमं यावत् स्थिरं भद्रासनं तव॥
२० किमर्थं शाश्वतं कालं त्वमस्मान् विस्मरिष्यसि।
किमर्थं चिरकालञ्च यावदस्मान् प्रहास्यसि॥
२१ खं प्रत्यावर्त्तयास्मांस्त्वम् आवर्त्तिष्यामहे प्रभो।
पूर्व्वकालमिवास्मभ्यं कालं देहि च नूतनं॥
२२ त्वं यतोऽस्मान् निराकार्षीरुग्रश्चास्मभ्यमक्रुधः॥

यिहिष्केलस्य भविष्यद्वचनानि।

---

१ प्रथमोऽध्यायः।

१ यिहिष्कलस्य भयिष्यद्वाक्यकालनिर्णयः ४ चतुःप्राणिनां दर्शनं १५ चतुश्चक्र-
दर्शनं २६ ईश्वरीयप्रतापदर्शनं।

त्रिंशवत्सरस्य चतुर्थमासस्य पञ्चमदिने किबारनदीतीरे प्रवासितानां १
जनानां मध्ये ममावस्थितिकाले स्वर्गद्वारम् उद्घाटितम् अभवत् मया
चेश्वरीयदर्शनान्यदर्शिषत। स राज्ञो यिहोयाखीनस्य प्रवासस्य पञ्च- २
मो वत्सर आसीत्। उक्तमासस्य पञ्चमदिने कल्दीयानां देशे किबार- ३
नदीतीरे सदाप्रभो र्वाक्यं बूषिसुतं यिहिष्केलं याजकं प्रति प्रादुरभूत्
सदाप्रभोश्च करस्तत्र तस्मिन्नर्पितोऽभूत्।

मया दृक्पातं कृत्वेदम् अदर्शि, उदीचीत आगच्छन्ती प्रचण्डवात्या ४
महामेघो जाज्वल्यमानो वह्निस्तत्परिधिस्तेजोमयस्तन्मध्यस्थलाच्च वह्नि-
मध्यस्थतैजसधातोः प्रभायास्तुल्या प्रभा प्रोद्भूता। तन्मध्याच्च चतुर्णां ५
प्राणिनां रूपं प्रतिभाति, तेषामाकृतिरियं, ते मनुष्यरूपिणः। तेषामेकै- ६
कस्य चत्वार्य्यास्यानि चत्वारः पक्षाश्चासन्। तेषां पादा ऋजवः पादत- ७
लानि च गोवत्सस्य पादतलानां सदृशानि पादाश्च परिष्कृततामस्य
तेजसेव प्रभाविशिष्टा आसन्। तेषां पक्षाणाम् अधस्ताच्चतुर्षु पार्श्वेषु ८
मानवहस्ता आसन् तेषां चतुर्णामेकैकस्यास्यानि पक्षाश्चासन्। तेषां ९
पक्षाः परस्परं संयुक्ताः, गमनकाले ते न परिवृत्यैकैकः सम्मुखदिशम्
अगच्छन्। तेषामास्यानां रूपमिदं, (पूर्व्वदिशि) मनुष्यस्यास्यं दक्षिणदिशि १०
सिंहस्यास्यं चतुर्णामासीत् सव्यदिशि चतुर्णां गोरास्यं (शेषदिशि च)
चतुर्णामोत्क्रोशस्यास्यमासीत्। ऊर्द्धे तेषाम् आस्यानि पक्षाश्च पृथक् ११
पृथक् आसन् तेषान्त्वेकस्य द्वौ पक्षावन्यस्य (द्वाभ्यां पक्षाभ्यां) संयुक्तौ
द्वाभ्याञ्च शरीरम् आच्छाद्यत। तेषामेकैकः सम्मुखम् अगच्छत् यां दिशं १२
गन्तुम् आत्मनोऽभिमतं तामेव दिशं तेऽगच्छन् गमनकाले च न पर्य्य- १३
वर्त्तन्त। तादृशरूपाणां तेषां प्राणिनामाभा प्रज्वलिताङ्गाराणां सदृशी,
दीपानामिवाभा तेषां प्राणिनां मध्ये गमागममावकरोत् तस्याश्चेस्तेजो-
ऽविद्यत वह्नितश्च विद्युद् उदपद्यत। यथा चाग्निवृष्टेराभा तथा ते १४
प्राणिन इतस्ततश्चाधावन्।

१५ मयि तान् प्राणिनो निरीक्षमाणे भूमौ तेषां प्राणिनां पार्श्वे चतुर्म्मु-
१६ खम् एकं चक्रं प्रादुर्बभूव। चक्राणां वैदूर्य्यमणेरिवाभा निर्म्मितिश्चासीत्
चतुर्णाञ्चैकं रूपम् आसीत् चक्रमध्यवर्त्तिचक्रस्येव तेषाम् आकृति र्निर्म्मि-
१७ तिश्चासीत्। गमनकाले तानि स्वदिक्चतुष्टयेनागच्छन् गमने न पर्य्य-
१८ वर्त्तन्त। तेषां नेमय उच्चा भीषणाश्च ते चत्वारो नेमयश्च सर्व्वत्र चक्षुर्भिः
१९ परिपूर्णा आसन्। प्राणिनां गमनकाले तानि चक्राणि तेषां पार्श्वेणाग-
२० च्छन्, भूमितश्च प्राणिनाम् उत्थानकाले चक्राण्युदतिष्ठन्। यां दिशं
गन्तुम् आत्मनोऽभिमतं तामेव दिशं तान्यगच्छन् किमपि स्थानं गन्तुम्
आत्मनोऽभिमते जाते तेषां पार्श्वे तानि चक्राण्युदतिष्ठन् यतः प्राणिनाम्
२१ आत्मा चक्रेष्वविद्यत। तेषु गच्छत्सु तान्यगच्छन् तेषु तिष्ठत्सु च तान्यति-
ष्ठन् भूमितस्तेषूत्तिष्ठत्सु तेषां पार्श्वे चक्राण्युदतिष्ठन् यतः प्राणिन आत्मा
चक्रेष्वविद्यत।
२२ तस्य प्राणिनो मूर्द्ध्नामूर्द्ध्वे चेदं रूपम् आसीत् भीषणकरकावद् आभा-
२३ विशिष्टमेकं वितानम् ऊर्द्ध्वे तेषां मूर्द्ध्नामुपरि विततमासीत्। तस्य वि-
तानस्याधस्तेषां पक्षा ऋजवः परस्परम् अभिमुखाश्चासन्। एकपार्श्वे
शरीराच्छादकमेकं पक्षयुगम् अन्यपार्श्वे च शरीराच्छादकं द्वितीयं
२४ पक्षयुगम् एकैकस्यासीत्। तेषां पक्षाणां ध्वनि र्मयाश्रावि स भूरितोयानां
ध्वनिरिव तेषाञ्च गमनकाले सर्व्वशक्तिमतो ध्वनिरिव, स सेनानि-
वेशस्य ध्वनिरिव तुमुलध्वनिः, तेषु तु तिष्ठत्सु तेषां पक्षाः श्लथा अभ-
२५ वन्। तेषां मूर्द्ध्नामूर्द्ध्वे स्थितस्य वितानस्योपरि ध्वनिरुदपद्यत, तेषु तु
तिष्ठत्सु तेषां पक्षाः श्लथा अभवन्।
२६ तेषां मूर्द्ध्नामूर्द्ध्वे स्थितस्य वितानस्योपरि नीलमणेरिव तेजोविशिष्ट-
स्यैकस्य सिंहासनस्याकृतिरासीत्। तस्याः सिंहासनाकृतेरुपरि तदूर्द्ध्वे
२७ स्थितस्यैकस्य मानवरूपस्य सदृशाकृतिरासीत्। तदीयकटेराकृतित-
स्तदूर्द्ध्वे च मया तैजसधातोरिव प्रभादर्शि, अनलस्य रूपं परितस्तस्या
वेष्टनम् आसीत्, तदीयकटेराकृतितस्तदधश्चानलस्य रूपं परितश्च द्युति-
२८ रदर्शि। वृष्टिदिने मेघे यच्चाप उत्पद्यते तदीयरूपस्य सदृशं परितस्तस्या
द्युतेरूपम् आसीत् तत् सदाप्रभोः प्रतापस्याकृते रूपं। तद् दृष्ट्वाहं
न्युब्जीभूयापतं।

२ द्वितीयोऽध्यायः।

१ यिहिष्केलस्य नियोगः ६ तस्योपदेशनं ९ तस्मै पुस्तकप्रदानञ्च।

अनन्तरं मया भाषमाणस्य कस्यचिद् रवोऽश्रावि, स मां जगाद, १
भो नरसन्तान स्वचरणयोस्तिष्ठ, अहं त्वया सह संलपिष्यामि। तस्मिन् २
माम् आलपत्यात्मा मामाविश्य चरणयोरस्थापयत्, ततोऽहं तस्य मामा-
लपतो वाक्यम् अश्रौषं। स मां जगाद, ३

नृसन्तान प्रहेष्यामि त्वामिस्रायेल्सुतान् प्रति।
द्रोहिणस्तान् विजातीयान् ये मयि द्रोहमाचरन्॥
मम हि प्रातिकूल्येन ते तेषाञ्च पितामहाः।
चिरादद्यैव पर्य्यन्तं भक्तित्यागं प्रकुर्व्वते॥
सन्तानांस्तान् कठोरास्यान् जडान्तःकरणान् प्रति। ४
त्वामहं प्रेषयिष्यामि (भो मनुष्यशरीरज)।
त्वं तान् वक्ष्यसि प्राहेत्थं प्रभुरेव सदाप्रभुः॥
आश्रवाः स्युरयत्ना वा द्रोहिवंशो हि सन्ति ते। ५
ज्ञास्यन्त्युपस्थितं तेषाम् अन्तरे भाववादिनं॥
त्वञ्च भो नरसन्तान तेभ्यो मा गच्छ साध्वसं। ६
तेषां सकलवाक्येभ्यो नैव त्वं भेतुमर्हसि॥
कुलयः कण्टका वा चेत् सन्ति ते सङ्गिनस्तव।
वृश्चिकानां समीपे च विद्यते वसतिस्तव॥
तेषां वाक्यात् तु मा भैषीस्तेषां साक्षाच्च मा त्रस।
यस्माद् विद्रोहिवंशस्ते सन्ति नास्त्यत्र संशयः॥
आश्रवाः स्युरयत्ना वा (द्रोहिणः सन्ति ते यतः)। ७
त्वन्तु मामकवाक्यानि तान् श्रावयितुमर्हसि॥
त्वञ्च भो नरसन्तान वक्तव्यं मे वचः शृणु। ८
द्रोहिवंश इवासौ च द्रोही त्वमपि मा भव।
यच्च दास्याम्यहं तुभ्यं मुखं व्यादाय तद् गिल॥

ततो मया दृक्पातं कृत्वा प्रसारितहस्तोऽदर्शि तन्मध्ये दीर्घगोला- ९
कारं पुस्तकमेकमासीत्। स च मम साक्षात् तद् व्यवृणोत् तस्याग्रपृष्ठदे- १०
शयो र्लिपिरासीत् सा च लिपि र्विलापशोकसन्तापसूचका।

३ तृतीयोऽध्यायः।

१ यिहिष्केलेन पुस्तकभोजनं ४ तं प्रति परमेश्वरस्योपदेशः १२ आत्मना शून्यमार्गेण तस्य नयनं १५ वन्दीनां मध्यं गत्वा ईश्वरस्योपदेशप्राप्तिः २२ ईश्वरेण तदीयमुखस्य बन्धनं मोचनञ्च।

१ अपरं स मामवादीत् भो नरसन्तान, त्वया यत् प्राप्यते तद् भक्षय,
२ इदं पुस्तकमेव भक्षय गत्वा चेस्रायेल्वंशम् आलप। ततो मया मुखे
३ व्यादत्ते स मां तत् पुस्तकम् अबूभुजत्, माञ्चावादीत्, भो नरसन्तान,
मद्दत्तं पुस्तकमिदं स्वजठरेण भक्षय निजान्त्राणि च तेन पूरय। ततो
मया तस्मिन् भक्षिते मम मुखे तन्मधुवन्मधुरमभूत्।
४ ततः स मां जगाद भो नरसन्तान, त्वम् इस्रायेल्वंशानां समीपं गत्वा
५ मम वाक्यानि तान् वद। यतस्त्वं न गम्भीरौष्ठानाम् अस्फुटजिह्वानां वा
६ जनानां समीपं किन्त्विस्रायेल्वंशस्यैव समीपं प्रेष्यसे। गम्भीरौष्ठानाम्
अस्फुटजिह्वानां त्वद्बोधागम्यभाषिणां वा भूरिजनानां समीपमहं त्वां
न प्रहिणोमि, यदि तेषां समीपं त्वां प्राहेष्यं तर्हि ते तव वाक्यमश्रो-
७ ष्यन्। इस्रायेल्वंशास्तु तव वाक्यं श्रोतुं नैषिष्यन्ति, ते ममापि वाक्यं
श्रोतुं नेच्छन्ति, यत इस्रायेल्वंशाः सर्व्वे कठिनललाटा जडचित्ताश्च
८ सन्ति। पश्याहं तवास्यं तेषाम् आस्यादपि कठिनं तव ललाटञ्च तेषां
९ ललाटादपि कठिनं कृतवान्। अहं तव ललाटं वज्रकण्टकमिव शैलात्
कठिनं कृतवान्। ते द्रोहिवंशाः सन्ति त्वन्तु तेभ्यो मा बिभीहि तेषां
१० साक्षाच्च मा त्रस। पुनश्च स मां जगाद, भो नरसन्तान, यानि वा-
क्यान्यहं त्वां वदिष्यामि त्वं मम तानि सर्व्वाणि वाक्यानि स्वान्तःकरणेन
११ गृहाण स्वकर्णाभ्याञ्च शृणु। तव स्वजातीयानां प्रवासितजनानाञ्च
समीपं गत्वा तान् वद, सदाप्रभुः प्रभुरित्थमाहेति ते च शृणुयुरवधी-
रयेयु र्वा।
१२ अपरमहम् आत्मनोत्थापितः स्वपश्चात् महाघोषयुक्तमिमं शब्दम-
१३ श्रौषं स्वस्थानात् सदाप्रभोः प्रतापो धन्य इति। तेषां प्राणिनाञ्च परस्परं
संसक्तानां पक्षाणां शब्दस्तेषां पार्श्ववर्त्तिचक्राणाञ्च शब्दो महाघोषस्य च
१४ शब्दोऽश्रावि। आत्मना चोत्थापितो नीतश्चाहं मनस्तापेन विक्लवोऽगच्छं
सदाप्रभोश्च हस्तो मयि सप्रभावम् अर्पित आसीत्।
१५ अनन्तरमहं किबारनद्यास्तीरे वसतां तेलाबीबे प्रवासिनां जनानां

समीपमुपस्थायोपाविशं ते च यत्रासीना आसन् तत्राहं सप्ताहं यावत्
स्तब्धस्तेषां मध्य आसीन आसं। सप्तदिनेषु लर्तितेषु मां प्रति सदाप्रभो- १६
रिदं वाक्यं प्रादुरभूत्,

नरसन्तान नियुञ्जे त्वाम् इस्रायेल्वंशरक्षकं। १७
ममास्यात् त्वं वचः श्रुत्वा तान् मत्तो बोधयिष्यसि॥
त्वया मर्त्तव्यमित्युक्ते मया दुष्टजनं प्रति। १८
त्वया चेत् स न बोध्येत तस्य प्राणांश्च रक्षितुं।
दुष्टं दुष्टत्वमार्गस्य त्यागाय त्वं न बोधयेः॥
तर्हि स्वीयापराधेन दुर्जनः स मरिष्यति।
तस्य रक्तस्य शोधन्त्वहमादास्ये करात् तव॥
बोधितस्तु त्वया चेन्न त्यजेत् दुष्टः स्वदुष्टतां। १९
स्वीयदुष्टत्वमार्गाच्च न निवर्त्तेत स स्वयं॥
तर्हि स्वीयापराधेन तस्य मृत्यु र्भविष्यति।
त्वन्तु स्वकीयप्राणानाम् उद्धारं साधयिष्यसि॥
धार्म्मिकश्च स्वधर्म्माच्चेन्निवृत्याधर्म्ममाचरेत्। २०
तस्माच्चात् तर्हि दास्यामि विघ्नं स च मरिष्यति॥
बोधितश्चेत् त्वया न स्यात् स्वाघात् तर्हि मरिष्यति।
स च यं कृतवान् धर्म्मं स नैवानुस्मरिष्यते।
तस्य रक्तस्य शोधन्त्वहमादास्ये करात् तव॥
धार्म्मिकश्च यथा पापं न कुर्य्याद् बोधितस्तथा। २१
त्वया स धार्म्मिकः पापं यदि नैव समाचरेत्॥
तर्हि स बोधितस्तस्मात् स हि जीविष्यति स्वयं।
त्वञ्च स्वकीयप्राणानाम् उद्धारं साधयिष्यसि॥

अपरं सदाप्रभोर्हस्तस्तत्र मय्यर्पितोऽभूत् स च मामवादीत् उत्तिष्ठ २२
निम्नभूमिञ्च प्रगच्छ, तत्राहं त्वाम् आलपिष्यामि। ततोऽहमुत्थाय निम्न- २३
भूमिं प्रगतः, यादृशञ्च प्रतापमहं पुरा किबारनद्यास्तीरे दृष्टवांस्तादृशः
सदाप्रभोः प्रतापस्तत्र दण्डायमान आसीत्, अहञ्च न्युब्जीभूय पतितः।
अपरम् आत्मा मामाविश्य चरणयोरस्थापयत् माञ्चाब्रवीत् त्वं स्वगृहं २४
प्रविश्य तत्र रुद्धस्तिष्ठ। भो नरसन्तान, पश्य ते त्वयि रज्जूरर्पयित्वा २५
ताभिस्त्वां भन्त्स्यन्ति त्वञ्च तेषां मध्यं न प्रगमिष्यसि। अहञ्च तव जिह्वां २६
तालुन्यासक्तां करिष्यामि तेन त्वं मूको भविष्यसि तानुद्दिश्यानुयोगी

२७ नरो भवितुं न शक्ष्यसि, यतस्ते द्रोही वंशः। अहन्तु यदा त्वाम् आ-
लपिष्यामि तदा तव मुखम् उद्घाटयिष्यामि त्वञ्च तान् गदिष्यसि
सदाप्रभुः प्रभुरित्थमाहेति, ततो य आश्रवः स श्रोष्यति यश्चायत्नः सो-
ऽवधीरयिष्यति यतस्ते द्रोही वंशः।

---

४ चतुर्थोऽध्यायः।

१ यिरूशालमो रोधदृष्टान्तः ४ पापदण्डभोगस्य दृष्टान्तः ९ दुर्भिक्षकालीनदुःखस्य दृष्टान्तश्च।

१ त्वञ्च भो नरसन्तान, इष्टकामेकां गृहीत्वा स्वसमक्षं निधेहि
२ तत्र च पुर्य्या अर्थतो यिरूशालमः प्रतिरूपं लिख। तस्याश्चावरोधं
विधेहि तत्प्रतिकूलम् उच्चगृहं निर्म्मिमीष्व सेतुं निचिनु तद्विपक्षान्
३ सेनानिवेशान् रचय तत्परितश्च युद्धयन्त्राणि स्थापय। त्वञ्च लौहखे-
दनीमेकामादाय लौहप्राचीरमिव तव पुर्य्याश्चान्तराले निधेहि तस्यां
स्थिरदृष्टिं कुरुष्व ताञ्चेत्थमवरुद्धमानामवरुन्धि, तद् इस्रायेल्वंशस्य
निमित्तं चिह्नं भविष्यति।
४ त्वञ्च सव्यपार्श्वे शयानस्तत्रेस्रायेल्वंशस्यापराधमर्पय, यावन्ति दिनानि
५ त्वं तस्मिन् शयिष्यसे तावन्ति दिनानि तेषाम् अपराधं वक्ष्यसि। मया
तु तेषाम् अपराधस्य वत्सरसंख्या त्वत्कृते दिनसंख्याकारि, सा दिनानां
नवत्यधिकानि त्रीणि शतानि, एतावत्कालं त्वम् इस्रायेल्वंशस्यापराधं
६ वक्ष्यसि। तेषु दिनेषु समापितेषु त्वम् अन्यतरेऽर्थतो दक्षिणे पार्श्वे शयानो
यिहूदावंशस्यापराधं चत्वारिंशद् दिनानि वक्ष्यसि, एकैकस्य वत्स-
७ रस्य परिवर्त्तं मया त्वदर्थम् एकैकं दिनं व्यधायि। त्वमनावृतबाहुः
सन् यिरूशालमोऽवरोधं प्रति स्थिरदृष्टिं करिष्यसे तस्या विरुद्धां
८ भाववोक्तिं व्याहरिष्यसि च। पश्याहं त्वयि रज्जूरर्पयिष्यामि तेन त्वद-
वरोधदिनानि यावत् त्वया न समापयिष्यन्ते तावत् त्वया पार्श्वपरिव-
र्त्तनम् अशक्यं भविष्यति।
९ त्वञ्च स्वार्थं गोधूमयवमाषमसूरकङ्गुकोद्रवान् आदायैकस्मिन् पात्रे
निधेहि यतिदिनानि च स्वपार्श्वे शयिष्यसे ततिसङ्ख्यकान् पूपांस्तैः
पचस्व, दिनानां नवत्यधिकानि त्रीणि शतानि यावत् ते त्वया खाद्याः।
१० यच्च खाद्यं भक्षयिष्यसि तत् परिमाय प्रतिदिनं विंशतिशेकलपरिमितं

कृत्वा भक्षयिष्यसि निरूपितेषु समयेषु तत् भक्षयिष्यसि। जलमपि ११
परिमाय हिनपात्रस्य षष्ठांशपरिमितं कृत्वा पास्यसि, निरूपितेषु
समयेषु च तत् पास्यसि। यवपूपाकारं कृत्वा खखाद्यं भक्षयिष्यसि १२
तेषां साक्षात् मानवकरीषेण तत् पक्ष्यसे। पुनश्च सदाप्रभुराह, इस्रा- १३
येल्वंशीयजना यासां मध्ये मया विकीर्य्यन्ते तासां परजातीनां मध्ये
तथैवामेध्यं स्वीयखाद्यं भक्षयिष्यन्ति। तदा मयोक्तम् अहो भो प्रभो १४
सदाप्रभो, पश्य मम प्राणा नैवामेध्यीभूताः, आबाल्याद् अद्यपर्य्यन्तं स्वयं
मृतं विदीर्णं वा किमपि मया न भक्षितं गर्हणीयमांसञ्च मम मुखं न
प्रविष्टं। ततः स माम् अब्रवीत् पश्य मानवकरीषस्य परिवर्त्तनाहं तुभ्यं १५
गोकरीषं ददामि त्वं तेनैव खखाद्यं पक्ष्यसे। अपरं स मां जगाद, १६
भो नरसन्तान, पश्याहं यिरूशालमि भक्ष्ययष्टिं खण्डयिष्यामि तेन ते
परिमाणेन मनस्तापेन च पूपान् भक्षयिष्यन्ति परिमाणेन स्तब्धत्वेन च
जलं पास्यन्ति। अन्नजलयोरभावस्ते भोक्तव्यः परस्परं स्तब्धता निजा- १७
पराधात् क्षयश्च गन्तव्यः।

---

५ पञ्चमोऽध्यायः।

१ केशानां दृष्टान्तः ५ पापकृते यिरूशालमो भाविदण्डस्य वाक्य १२ केशदृष्टान्तस्य तात्पर्य्यञ्च।

त्वञ्च भो नरसन्तान, निशितं खड्गम् अर्थतो नापितस्य क्षुरमेकम् आ- १
दाय खमुण्डं खश्मश्रु च मुण्डय तुलायष्टिञ्च गृहीत्वा केशान् विभज।
तेषामेकं तृतीयांशम् अवरोधकालेऽवसीदति पुर्य्या मध्ये वह्निना दाहय, २
तदन्यं तृतीयांशञ्चादाय तस्याश्चतुर्दिक्ष्वसिना जहि, शेषञ्च तृतीयांशं ३
वायुं प्रति विकिर, तेषां पश्चाच्चाहम् असिं निष्कोषं करिष्यामि। त्वन्तु
तस्मात् स्वल्पान् केशान् उद्धृत्य स्ववस्त्राञ्चले बधान। पुनश्च तेषां कति- ४
पयान् गृहीत्वा वह्निमध्ये निक्षिप्य वह्निसात् कुरु, तन्मध्याद् वह्निरुद्गत्य
कृत्स्नम् इस्रायेल्वंशम् आक्रमिष्यति।

प्रभु र्नित्यप्रभुः प्राह यिरूशालम्पुरीदृशी। ५
जातीनामेव मध्ये सा मया संस्थापिताभवत्।
तथा तस्याश्चतुर्दिक्षु देशाः संस्थापिता मया॥
जातिभ्योऽपि चतुर्दिक्स्थदेशेभ्योऽपि च चञ्चला। ६

सा मत्सूत्रविधानानि दुष्कृत्या पर्य्यवर्त्तयत्॥
यतो मामकसूत्राणि प्रत्याख्यातानि तज्जनैः।
मामकीनविधानानि न समाचरितानि तैः॥
७ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
स्वचतुर्द्दिक्स्थजातिभ्यो यूयं भूयिष्ठपातकाः॥
न विधीन् मेऽन्ववर्त्तध्वं न सूत्राण्यन्वतिष्ठत।
स्वचतुर्द्दिक्स्थजातीनां सूत्राणि नान्वकार्ष्ट च॥
८ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
पश्य त्वामहमेवाप्यधुनाक्रमितुमुद्यतः।
जातीनाञ्चाग्रतो दण्डं विधास्ये तव मध्यतः॥
९ यादृशीमितिपूर्व्वञ्च नैवाहं कृतवान् क्रियां।
न पश्चाच्च करिष्यामि तां विधास्ये क्रियां त्वयि।
सर्व्वेषां गर्हणीयानां कर्म्मणां तव कारणात्॥
१० त्वन्मध्ये स्वीयसन्तानान् पितरौ भक्षयिष्यतः।
सन्ताना भक्षयिष्यन्ति स्वकीयौ पितरौ तथा॥
त्वामुद्दिश्य विचारस्य विधास्येऽहञ्च साधनं।
विकरीष्यामि सर्व्वञ्च त्वच्छेषं सर्व्ववायुभिः॥
११ अतोऽहं यदि जीवामि (प्रभु र्वक्ता सदाप्रभुः)।
त्वं स्वैः कुविग्रहैः सर्व्वैः सर्व्वै र्घृण्यैश्च कर्म्मभिः।
धाम मेऽदूषयः पुण्यं ततोऽहं विमुखस्त्वयि।
नार्द्रनेत्रो भविष्यामि न करिष्यामि वा कृपां॥
१२ एकस्तव तृतीयांशो महामार्य्या मरिष्यति।
तव मध्ये क्षुधातो वा निःशेषं प्राप्स्यति क्षयं॥
असिनान्यस्तृतीयांशस्त्वत्समन्तात् पतिष्यति।
तृतीयांशं त्वहं सर्व्वं विकरीष्यामि वायुभिः।
तस्य पश्चाच्च निष्कोषं चालयिष्याम्यसिं निजं॥
१३ इत्थं सेत्स्यति मत्कोप इत्थमेव च तेष्वहं।
स्वमन्युं शमयिष्यामि भविष्यामि च तर्पितः॥
सदाप्रभुरहं वच्मीदं स्वमानानुरागतः।
एतत् तेषु मम क्रोधे सिद्धे ज्ञायिष्यते हि तैः॥
१४ त्वच्चतुर्द्दिक्स्थजातीनां मध्ये ध्वस्तां विनिन्दितां।

त्वां करिष्यामि सर्व्वेषाम् अध्वगानां समक्षतः ॥
त्वच्चतुर्द्दिक्स्थजातीनां निन्दाधर्षणभाजनं । १५
शिक्षाविस्मयहेतुश्च त्वं तदानीं भविष्यसि ॥
यतोऽहं कोपमन्युभ्यां तिरस्कारैश्च मन्युजैः ।
विचारं ते करिष्यामीदं ब्रूवेऽहं सदाप्रभुः ॥
तेषु त्यक्ष्यामि महाबाणान् क्रूरान् नाशाय निर्म्मितान् । १६
क्षुधारूपान् असिष्यामि युष्मन्नाशाय तान् शरान् ॥
अर्पयिष्यामि युष्मासु धुरवद् दुर्व्वहां क्षुधां ।
प्रभङ्क्ष्यामि च युष्माकं सर्व्वम् अन्नावलम्बनं ॥
युष्मदाक्रमणार्थञ्च क्षुधां जन्तूंश्च हिंसकान् । १७
प्रहेष्यामि ततो यूयं तैरपुत्त्रा भविष्यथ ॥
तव मध्ये महामारी रक्तञ्च विचरिष्यतः ।
कृपाणञ्च करिष्यामि त्वद्विपक्षमुपस्थितं ।
वचनं प्रोक्तवानेतद् अहमेव सदाप्रभुः ॥

---

६ षष्ठोऽध्यायः ।

१ देवार्च्चाकृते इस्रायेलो दण्डः ८ शेषजनानां भाविदशाया भाविवाक्यं ११ दण्डस्य कृते शोकाय प्रचोदनञ्च ।

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, १
त्वम् इस्रायेलः पर्व्वतेषु स्थिरदृष्टिं विधाय तानुद्दिश्य भावोक्तिं व्याहर, २
इदञ्च वद, भो इस्रायेलः पर्व्वता यूयं प्रभोः सदाप्रभो र्वाक्यं शृणुत । ३
प्रभुः सदाप्रभुः पर्व्वतान् उपपर्व्वतान् निम्नभूमीरुपत्यकाश्चाधीत्थं भाषते,

पश्यतानाययिष्यामि खड्गं वः प्रातिकूल्यतः ।
युष्माकं ध्वंसयिष्यामि सर्व्वाण्युच्चस्थलानि च ॥
वेदयो वो विनङ्क्ष्यन्ति भङ्क्ष्यन्ते सूर्य्यविग्रहाः । ४
युष्माकं गर्हणीयानां प्रतिमानाञ्च सम्मुखे ।
निहतान् पातयिष्यामि युष्माकं मानवानहं ॥
तेषां विगर्हणीयानां मूर्त्तीनामेव सम्मुखे । ५
इस्रायेलः सुतानाञ्च निधास्यामि शवानहं ।
विकरीष्यामि चास्थीनि वेदीनां वः समन्ततः ॥

६ युष्माकं सर्व्ववासेषु ध्वंसिष्यन्ते पुराणि च।
विलुप्तानि भविष्यन्ति सर्व्वाण्युच्चस्थलानि च॥
ध्वंसो लोपश्च प्राप्तव्यौ युष्माकं वेदिभि र्यतः।
प्राप्तव्यौ भङ्गनिर्भेदौ युष्माकं घृण्यमूर्त्तिभिः॥
प्राप्तव्यश्च समुच्छेदो युष्माकं सूर्य्यविग्रहैः।
निःशेषत्वञ्च प्राप्तव्यं युष्मन्निर्म्मितवस्तुभिः॥
७ निहताश्च पतिष्यन्ति युष्माकं मध्यतो जनाः।
अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं॥
८ रक्षिष्यामि त्वहं शेषं युष्माकं कोऽपि मानवाः।
अवस्थास्यन्ति जातीनां मध्ये खड्गात् पलायिताः।
नानादेशेषु युष्मांश्च विकरीष्याम्यहं तदा॥
९ तत्र प्रवासितास्ते च मनुष्या वः पलायिताः।
मां तत्रानुस्मरिष्यन्ति जातीनां मध्य एव ते॥
चित्तं भङ्ख्याम्यहं तेषां मत्त्यागि व्यभिचारि च।
प्रतिमा अनुधावन्तीं दृष्टिञ्च व्यभिचारिणीं॥
सर्व्वाभि र्गर्हणीयाभिः स्वक्रियाभिः कृतानि च।
स्वदुष्कर्म्माणि तैः स्मृत्वा बीभत्सः स्वेषु भोत्स्यते॥
१० अभिज्ञायिष्यते चेदं यत् सदाप्रभुरस्म्यहं।
अनिष्टं वो विधास्यामीति च नैवोक्तवान् वृथा॥
११ भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
हस्तमाजहि हस्तेन भुवं पादेन चाजहि॥
इस्रायेलीयवंशस्य सकला घृण्यकुक्रियाः।
स्मृत्वा वद च हाहेति यतस्तासां हि कारणात्।
असिदुर्भिक्षमारिभिस्तेषां पतनं सम्भविष्यति॥
१२ यो जनो दूरवर्त्ती स महामार्य्या मरिष्यति।
यश्च समीपवर्त्ती स कृपाणेन पतिष्यति॥
शेषो यो रक्षितो वा यः क्षुधया स मरिष्यति।
इत्थं सिद्धीकरिष्यामि मन्युं तेषु जनेष्वहं॥
१३ अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं।
तदा यस्माद् भविष्यन्ति जनास्तेषां समाहताः।
मध्ये स्वघृण्यमूर्त्तीनां वेदीनाञ्च समन्ततः॥

सर्व्वस्मिन् प्रोन्नताद्रौ च गिरीणां शिखरेषु च।
हरिद्वृक्षस्य चाधस्तात् सुपर्णलातरोस्तले।
यत्र स्वघृण्यमूर्त्तिभ्यः सर्व्वाभ्यो बलिसौरभं।
तै र्दत्तं तत्र सर्व्वत्र शयिष्यन्ते हता जनाः॥
हस्तं प्रसारयिष्याम्यहं निजं तान् जनान् प्रति। १४
तेषां सर्व्वेषु वासेषु दिब्लाथाया मरुस्थलात्।
देशञ्चाहं विधास्यामि ध्वस्तम् उच्छिन्नमेव च।
अभिज्ञास्यन्ति मामेव तदानीं ते सदाप्रभुं॥

---

७ सप्तमोऽध्यायः।

१ इस्रायेलो नाशस्य भाविवाक्यं १६ शेषलोकानां दुःखं दुर्दशा च।

अपरं सदाप्रभोरेतद् वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, १
प्रभुः सदाप्रभुरिस्रायेल्देशमधीत्थं भाषते, २
अन्त आयात्यसावन्तो नीहतो दिक्चतुष्टयं।
अधुना त्वामुपैत्यन्तः कोपं प्रास्याम्यहं त्वयि॥ ३
विचारं ते करिष्यामि त्वदाचारानुरूपतः।
तव घृण्यक्रियाः सर्व्वा वर्त्तयिष्यामि च त्वयि॥
नार्द्रनेत्रो भविष्यामि न वा कारुणिकस्त्वयि। ४
भारवत्तु तवाचारम् अर्पयिष्याम्यहं त्वयि॥
तव घृण्यानि कर्म्माणि प्रवेक्ष्यन्ति तवान्तरं।
अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं॥
पुनश्च व्याजहारेमां वाणीं प्रभुः सदाप्रभुः। ५
हा दुःखं केवलं दुःखं पश्यतायातुमुद्यतं।
आयात्यन्तोऽन्त आयाति जाग्रत् त्वय्येति पश्य सः। ६
वर्त्तते त्वयि प्रत्यूषो भो देशे वासकृज्जन। ७
काल आयाति नेदिष्ठं दिनं कोलाहलान्वितं।
पर्व्वतोद्गतनादेन हर्षयुक्तेन वर्ज्जितं॥
स्वरोषं पातयिष्याम्यधुना तूर्णं तवोपरि। ८
त्वयि स्वकीयकोपञ्च प्रापयिष्यामि सिद्धतां॥
त्वद्विचारं करिष्यामि त्वदाचारानुरूपतः।

कर्म्म ते सकलं घृणं वर्त्तयिष्यामि च त्वयि ॥
९ नार्द्रनेत्रो भविष्यामि न करिष्यामि वा कृपां।
त्वदाचारोचितं भारम् अर्पयिष्याम्यहं त्वयि ॥
तव घृण्यानि कर्म्माणि प्रवेक्ष्यन्ति तवान्तरं।
अभिज्ञास्यथ यूयञ्च ताडकं मां सदाप्रभुं ॥
१० दिनं पश्यागतं पश्य प्रत्यूषोऽयमुदेति च।
पुष्पितो जायते दण्डः स्फुटो धर्षः प्रभाति च ॥
११ वर्द्धमानश्च दौरात्म्यं दण्डः पापस्य जायते।
न तेषां शिष्यते किञ्चिन्न तेषां निवहस्य वा।
न तेषां वार्यदण्याया जातास्ते हीनकान्तयः ॥
१२ काल एव समायाति नेदिष्ठञ्चाभवद्दिनं।
मा प्रहृष्टो भवेत् क्रेता विक्रेता नैव शोचतु।
कृतस्ते तस्या यतो वृन्दे क्रोधो वर्त्तितुमुद्यतः ॥
१३ प्राणेषु क्रीटविक्रेत्रो र्जीवनेऽवस्थितेष्वपि।
विक्रेता स्वीयविक्रीतं वस्तु नायास्यति पुनः।
कृतस्ते तस्या यतो वृन्दे दर्शनं वर्त्तनोद्यतं ॥
स नायास्यति भूयस्तत् तयोः कोऽपि स्वजीवनं।
स्वापराधे ह्यवस्थाय दृढीकर्त्तुं न शक्ष्यति ॥
१४ तूर्य्यं वादयत प्रोच्चैः सर्व्वं कुरुत सज्जितं।
युद्धे गमनकारी तु न भविष्यति कश्चन।
कृतस्ते तस्या यतो वृन्दे मत्क्रोधो वर्त्तनोद्यतः ॥
१५ कृपाणो वहिरन्तस्तु मारी तिष्ठति सक्षुधा।
यो जनो विद्यते क्षेत्रे स कृपाणान्मरिष्यति।
पुर्य्यां यस्त्वस्ति मार्य्या स क्षुधया वा ग्रसिष्यते ॥
१६ तेषां मध्ये च ये केऽपि रक्षिष्यन्ते पलायिताः।
ते गिरीन् आश्रयिष्यन्ति दरीवासिकपोतवत्।
सकला एव कूजन्त एकैकः स्वापराधतः ॥
१७ शिथिलत्वम् अवाप्नोति सकलानां करद्वयं।
जलवत् प्रविलीयेते सकलानाञ्च जानुनी ॥
१८ कटिं शाणेन बध्नन्ति ते छाद्यन्ते च शङ्कया।
लज्जा सर्व्वानने भाति सर्व्वमुण्डे च मुण्डता ॥

मार्गेषु क्षिप्यते रूप्यं स्वर्णं तैर्मन्यते मलं। १९
सदाप्रभोश्च क्रोधस्य दिने तान् परिरक्षितुं।
रूप्यं तेषां सुवर्णं वा समर्थं न भविष्यति॥
न प्राणास्तेन तप्स्यन्ति नोदरं पूरयिष्यते।
अपराधावहं विघ्नं तत् तेषामभवद्यतः॥
स्वेषां शोभाप्रदां भूषां ते दर्पाय व्यकुर्व्वत। २०
तया स्वघृणमूर्त्तीश्च कुदेवानामकल्पयन्।
ततो हेतोरहं तेषां दूषिकां विदधामि तां॥
पराणामेव हस्तेषु लोप्त्रवचार्पयामि तां। २१
लुण्टिता सा जनै र्म्लेच्छैः पापिष्ठै र्दूषयिष्यते॥
एतेभ्यश्च मनुष्येभ्यश्छादयिष्येऽहमाननं। २२
निगूढञ्चापि मे स्थानं ततोऽमेध्यीभविष्यति।
जनैः साहसिकैस्तच्च प्रविष्टै र्दूषयिष्यते॥
शृङ्खलं निर्म्मिमीष्व त्वं रक्तपातादिपातकैः। २३
पूर्णा यस्मादभूद्देशः पुरी क्रोहेण पूरिता॥
आनेष्यामि विजातीयान् जनान् दुष्टतमानहं। २४
स्वाधिकारं करिष्यन्ते तेषां वेश्मानि ते जनाः॥
दर्पं निवर्त्तयिष्याम्यहं जनानां बलीयसां।
विपक्षा उपभोक्ष्यन्ते तेषां पुण्यस्थलानि च॥
ध्वंस आयाति शान्तिस्तु तैरन्विष्टापि नाप्स्यते। २५
नाशो नाशात् परं भावी वार्त्ता वार्त्तानुवर्त्तते॥ २६
भाववक्तुः समीपं ते याचिष्यन्ते च दर्शनं।
विगतं यजकाच्छास्त्रं प्राचीनेभ्यश्च मन्त्रणं॥
राजा करिष्यते शोकं पतिः क्षोभं वसिष्यते। २७
हस्ता जनपदानाञ्च भविष्यन्ति सवेपनाः॥
यादृक् तेषां नयस्तादृग् आचरिष्यामि तान् प्रति।
तेषां निजविचारैश्च करिष्यामि विचारणं।
अभिज्ञास्यन्ति माञ्चैव तदानीं ते सदाप्रभुं॥

---

८ अष्टमोऽध्यायः।

१ यिरूशालमि यिहिष्केलस्येश्वरीयदर्शनं ५ विग्रहस्य दर्शनं ७ विग्रहस्य गेहदर्शनं १२ तम्मूषपूजिकानां योषितां दर्शनं १५ सूर्य्यार्चकानां दर्शनं १७ देवार्चाकृतः परमेश्वरस्य कोपश्च।

१ अपरं षष्ठवत्सरस्य षष्ठमासस्य पञ्चमदिनेऽहं स्वगृहे उपविष्ट आसं
यिहूदायाः प्राचीनजनाश्च मत्समक्षम् आसीना आसन् इत्यवसरे प्रभोः
२ सदाप्रभो र्हस्तस्तत्र मय्यर्पितोऽभूत्। तदा मया दृक्पातं कृत्वा वह्नि-
रूपिणी मूर्त्तिरेकादर्शि तत्कट्याकृतिस्तदधोदेशश्च वह्निः, कटितस्त-
३ दूर्द्ध्वदेशश्च ज्योतिष आभायास्तैजसधातोः प्रभाया वा सदृशः। स
हस्ताकृतिं प्रसार्य्य मूर्द्धः शिखायां मां दधार तत आत्मा द्यावापृ-
थिव्यो र्मध्यमार्गेण मां नयन् ऐश्वरदर्शनै र्यिरूशालम्युत्तरमुखस्याभ्य-
न्तरद्वारस्य प्रवेशस्थान उपस्थापयामास, तद् ईर्ष्योत्पादिकायाः ईर्ष्या-
४ प्रतिमायाः स्थानम् आसीत्। निम्नभूम्यां यादृश्याकृति र्मयादर्शि तादृश
इस्रायेल ईश्वरस्य प्रतापस्तत्र आसीत्।
५ अपरं स मां जगाद भो नरसन्तान, त्वमुत्तरदिशं प्रति दृक्पातं
कुरुष्व। ततो मयोत्तरदिशं प्रति दृक्पातं कृत्वा वेद्या द्वारस्योत्तरस्मिन्
६ ईर्ष्याप्रतिमा तत्र प्रवेशस्थाने ददृशे। स मां जगाद भो नरसन्तान,
अमी यत् कुर्व्वन्ति तत् किं पश्यसि? निजपुण्यगेहतो मां दवयितुम्
इस्रायेलः कुलम् अत्र या महाघृण्यक्रियाः करोति ताः किं पश्यसि?
पुनस्ततोऽप्यधिकमहती घृण्यक्रिया द्रक्ष्यसि।
७ ततः परं स मां प्राङ्गणद्वारसमीपं निनाय तत्र मया दृक्पातं कृत्वा
८ कुड्ये छिद्रमेकमदर्शि। स मां जगाद भो नरसन्तान, कुड्यं भिन्धि।
९ ततो मया कुड्ये भिन्ने द्वारमेकमदर्शि। स मां जगाद, प्रविश, जना
१० अमी या गर्हणीया दुष्क्रियाः कुर्व्वन्ति ता निरीक्षस्व। ततो मया प्रविश्य
दृक्पातं कृत्वा कुड्यस्य चतुर्द्दिक्षु चित्रितान्यमेध्यानां सरीसृपादीनां
यावतीयजन्तूनाम् इस्रायेल्कुलस्य सर्व्वासां घृण्यदेवमूर्त्तीनाञ्च प्रतिरू-
११ पाणि ददृशिरे। तासामग्रत इस्रायेल्कुलस्य प्राचीनानां सप्ततिजनास्ति-
ष्ठन्ति, तेषां मध्ये च शाफनस्य सुतो यासनीयो दण्डायमानोऽस्ति, तेषाम्
१२ एकैकस्य करे धूपपात्रं विद्यते, धूपमेघस्य सौरभञ्चोद्गच्छति। स मां
जगाद, भो नरसन्तान, इस्रायेल्कुलस्यामी प्राचीनजना अन्धकारे प्रत्यकं

स्वप्रतिमागारे यत् कुर्व्वन्ति तत् किं त्वया दृश्यते? यतस्ते वदन्ति, सदा-
प्रभुरस्मान् नैव पश्यति, सदाप्रभु र्देशं त्यक्तवानिति।
अपरं स मां जगाद, पुनश्च त्वं तैः क्रियमाणा महाघृणार्हाः क्रिया १३
द्रक्ष्यसि। ततः स मां सदाप्रभो र्मन्दिरस्योत्तरदिक्स्थद्वारस्य प्रवेशस्थानं १४
निनाय, मया चादर्शि तत्र समासीना योषितस्तम्मूषदेवं विलपन्ति।
अपरं स मां जगाद, भो नरसन्तान, त्वं किमिदं पश्यसि? पुनश्च १५
त्वम् एतस्मादपि महाघृणार्हाः क्रिया द्रक्ष्यसि। ततः स मां सदाप्रभो १६
र्मन्दिरस्याभ्यन्तरप्राङ्गणं निनाय, तत्रालिन्दवेद्यो र्मध्यस्थाने सदाप्रभोः
प्रासादस्य द्वारे प्रायशः पञ्चविंशतिनरा आसन्, तेषां पृष्ठदेशाः सदा-
प्रभो र्मन्दिरं प्रति मुखानि च पूर्व्वदिशं प्रत्यवर्त्तन्त, ते च पूर्व्वमुखाः सूर्य्यं
प्राणमन्।
ततः स मां जगाद, भो नरसन्तान, त्वं किमेतत् पश्यसि? अत्र क्रि- १७
यमाणाः स्वघृण्यक्रियाः किं यिहूदाकुलेन तुच्छा मन्यन्ते यत् ते दौरात्म्येन
देशं पूरयन्ति माञ्च पुनः पुनः क्रोधयन्ति प्रसारितपल्लवैश्च (पश्य)
स्वनासिकाः स्पृशन्ति। अतोऽहमपि कोपाचारं करिष्यामि, नैवार्द्रनेत्रो १८
भविष्यामि करुणां वा न करिष्यामि, तेषु प्रोच्चशब्देन मत्कर्णगोचरे
क्रोशत्स्वपि मयावधानं न विधायिष्यते।

---

९ नवमोऽध्यायः।

१ कतिपयानां शेषजनानां रक्षा ५ तदन्येषाञ्च पापेन विनाशः।

अपरं स मम कर्णगोचरे प्रोच्चशब्देन कथयामास, हे नगरस्य प्रह- १
रयः, प्रत्येकं निजं विनाशकास्त्रं करेणादाय समीपम् आगच्छत। तत २
उत्तरदिशि स्थितस्योर्द्धद्वारस्य वर्त्मना षट् नरा आजग्मुस्तेषाम् एकैकस्य
हस्ते निजं भञ्जकास्त्रमविद्यत,तेषां मध्ये चैकस्य जनस्य शुक्लवासांसि कटौ
च लेखकस्य मस्याधार आसन्, ते चागत्य पित्तलमयवेद्याः पार्श्वे तस्थुः।
इस्रायेल ईश्वरस्य प्रतापश्च यस्मिन् किरूब आरूढ आसीत् तस्मान्म- ३
न्दिरस्य शिलां प्रत्युज्जगाम तं शुक्लाम्बरं कटौ मस्याधारधारिणं नरम्
आजुहाव च। सदाप्रभुश्च तं जगाद, त्वं नगरमध्येनार्थतो यिरूशालमो ४
मध्यस्थानेन प्रगच्छ, तन्मध्ये क्रियमाणानां घृण्यक्रियाणां हेतो र्ये जना
उच्छ्वसन्ति विलपन्ति च तेषां ललाटेष्वङ्कं लिख च।

५ तदितरांश्च नरान् स मम कर्णगोचरे जगाद, यूयं पुरीमध्येनामुम्
६ अनुगच्छन्तो हत्यां विधद्धं कृपां मा कुरुत मा वार्द्रनेत्रा भवत। वृद्धतरु-
णतरुणीशिशुयोषितः संहारायैव हत, परन्त्वङ्कविशिष्टस्य कस्यचिज्ज-
नस्य समीपं मैवोपतिष्ठत मम पुण्यधाम्न्येवारभध्वं। ततस्ते मन्दिर-
७ स्याग्रतः स्थितेषु वृद्धजनेष्वारम्भं चक्रिरे। अपरं स तान् जगाद, यूयम्
अन्तर्मन्दिरम् अमेध्यीकुरुत प्राङ्गणानि च कुणपैः पूरयत, ततः परं
८ निर्गच्छत। ततस्ते निर्गत्य नगरमध्ये हत्यां चक्रुः। तै र्हत्यां कुर्व्वद्भि-
स्वाहं शेषितः। तदाहं न्युब्जीभूय क्रोशन्नवादिषं, हा प्रभो सदाप्रभो,
भवान् यिरूशालम उपरि स्वकोपम् अवतारयन् किम् इस्रायेलः
९ कृत्स्नं शेषं ध्वंसयिष्यति? ततः स मां जगाद, इस्रायेल्कुलस्य यिहूदा-
याश्चापराधोऽतीव महान्, देशः शोणितैः परिपूर्णः पुरी च विकारेण
परिपूर्णा, यतस्ते वदन्ति, सदाप्रभुर्देशं त्यक्तवान् सदाप्रभु र्न पश्यतीति।
१० अहमप्यार्द्रनेत्रो न भविष्यामि कृपां वा न करिष्यामि, परन्तु तेषां
११ मूर्द्धसु तेषाम् आचारं वर्त्तयिष्यामि। तदानीं कटौ मस्याधारधारी स
शुक्लाम्बरो नरः सन्देशम् आनयन् जगाद, भवताहं यद् आज्ञापित-
स्तदेव कृतवान्।

---

१० दशमोऽध्यायः।

१ पुरे चिप्तानाम् अङ्गाराणां दर्शनं ८ किरूबाणां दर्शनञ्च।

१ ततः परं मया दृक्पाते कृते किरूबाणां मूर्द्ध्न उपरि स्थिते विताने
नीलमणेः सदृशं किञ्चिददर्शि, सिंहासनरूप्याकृतिरेव तेषाम् उपरि-
२ ष्टाददर्शि। स च तं शुक्लाम्बरम् आलप्य जगाद त्वं चक्रस्यान्तरालैः
किरूबस्याधःस्थानं प्रविश्य किरूबाणाम् अन्तरालेभ्यः प्रज्वलिताङ्गारान्
आदाय स्वमुष्टी पूरयित्वा नगरस्योपरि विकिर। ततः स मम दृष्टि-
३ गोचरे प्रविष्टः। ते किरूबास्तस्य नरस्य प्रवेशकाले मन्दिरस्य दक्षिणे
४ दण्डायमाना आसन्, परन्त्वन्तःप्राङ्गणं मेघेन पूरितम् आसीत्। अपरं
सदाप्रभोः प्रतापः किरूबस्योर्द्धत उद्गत्य मन्दिरस्य शिलायाम् अधि-
तस्थौ, ततो मन्दिरं मेघेनापूर्य्यत प्राङ्गणञ्च सदाप्रभोः प्रतापस्य तेजसा
५ पूरितमभवत्। वहिःस्थप्राङ्गणेऽपि किरूबाणां पक्षशब्दः सर्व्वशक्तिमत
६ ईश्वरस्य कथनशब्द इवाश्रूयत। त्वं चक्रस्यान्तरालेभ्यः किरूबाणामेवा-

न्तरालेभ्यो वह्निं गृहाणेत्याज्ञायां तस्मै शुक्लाम्बरनराय प्रदत्तायां यदा स
प्रविश्य चक्रस्य पार्श्वेऽतिष्ठत्, तदा किरूब एकः किरूबाणाम् अन्तरा- ७
लेभ्यः स्वहस्तं प्रसार्य्य किरूबाणाम् अन्तरालेषु स्थितं वह्निम् आदाय
तस्य शुक्लाम्बरनरस्य मुष्टिद्वयेऽर्पयामास स च तमादाय निश्चक्राम।
तेषां किरूबाणां पक्षाणाम् अधो मानवहस्ताकृतिरविद्यत। मया ८
च दृक्पातं कृत्वादर्शि, एकैकस्य किरूबस्य पार्श्व एकैकं चक्रम् इत्थं तेषां ९
किरूबाणां पार्श्वेषु चत्वारि चक्राण्यविद्यन्त, तेषां चक्राणाम् आभा वैदूर्य्य-
मणेः प्रभायाः सदृशी। तेषां चतुर्णामाकारश्चैकरूप आसीत् स चक्रान्त- १०
र्वर्त्तिचक्ररूपः। गमनकाले ते स्वपार्श्वचतुष्टयानुसारेणागच्छन् गमने न ११
पर्य्यवर्त्तन्त। तेषाम् एकतमस्य शिरसः सम्मुखं स्थानमेवागच्छन् गमने न
पर्य्यवर्त्तन्त। तदीयमांसपृष्ठहस्तपक्षाणां चक्राणाञ्च साकल्यं चक्षुभिः १२
पूर्णमासीत् चतुर्णाञ्च स्वस्वचक्राण्यासन्। मम कर्णगोचरे तानि चक्राणि १३
चक्रवात इतिनाम्ना सम्बोधितानि। एकैकस्य प्राणिनश्चत्वारि वदना- १४
न्यासन्, प्रथमं किरूबस्य वदनं, द्वितीयं नरस्य वदनं, तृतीयं सिंहस्य
वदनं, चतुर्थञ्चोत्क्रोशस्य वदनं। अपरं ते किरूबा ऊर्द्धम् उद्गताः। १५
किबारनद्यास्तीरे यः प्राणी मयादर्शि प्राण्ययं स एव। किरूबाणां गम- १६
नकाले चक्राणि तेषां पार्श्वेनागच्छन्, भूमित उद्गमनाय किरूबैः स्वप-
क्षेषूत्थाप्यमानेषु चक्राण्यपि तेषां पार्श्वान्न पर्य्यवर्त्तन्त। तेषु तिष्ठत्सु तान्य- १७
तिष्ठन्, तेषूद्गच्छत्सु तानि तैः सार्द्धम् उदगच्छन्, यतस्तस्य प्राणिन
आत्मा तेष्वविद्यत।
अपरं सदाप्रभोः प्रतापो मन्दिरस्य शिलाया ऊर्द्धतोऽपगत्य किरू- १८
बाणामुपरि संस्थितः। ततः किरूबाः स्वपक्षान् उत्थाप्य मम दृष्टिगो- १९
चरे प्रगमनकाले भूतलाद् उद्गताश्चक्राणि च तेषां सम्मुखम् उद्गतानि,
तत्साकल्यञ्च सदाप्रभो र्मन्दिरस्य पूर्व्वद्वारे संस्थितं। उपरिष्टाद् इस्रा-
येल ईश्वरस्य प्रतापस्तेषु संस्थितः। अयम् इस्रायेल ईश्वरस्य वाहनस्व- २०
रूपः स प्राणी यः किबारनद्यास्तीरे मया दृष्टः। ते च किरूबा इति
मयाभिज्ञातं। एकैकस्य चत्वारि वदनान्येकैकस्य चत्वारः पक्षाश्चासन्, २१
पक्षाणाञ्चाधो मानवहस्तस्याकृतिरविद्यत। तेषामास्यानाञ्च रूपमधीदं
वक्तव्यं किबारनद्यास्तीरे यान्यास्यानि मया दृष्टानि, इमानि तत्समा- २२
नाकाराणि तान्येव चासन्, एकैकः प्राणी निजास्यस्य सम्मुखदिशम्
अगच्छत्॥

११ एकादशोऽध्यायः।

१ अधिपानां प्रगल्भकथनं ५ तेषां दण्डकथनं १३ यिहिष्केलस्य विलपनं १७ परमेश्वरस्य प्रतिज्ञा २२ किरूबाणां गमनं वन्दिलोकानां समीपं यिहिष्केलस्य पुनर्गमनञ्च।

१ अनन्तरमात्मा मामुत्थाप्य सदाप्रभो मन्दिरस्य पूर्व्वदिगभिमुखं पू-
र्व्वद्वारं निनाय। तत्र द्वारप्रवेशस्थाने पञ्चविंशतिनरा आसन् तेषां
मध्येऽसुरस्य पुत्त्रो यासनियो बिनायस्य पुत्त्रः पिलटियश्चेतौ जनाध्यक्षौ
२ मया दृष्टौ। स च मां जगाद, भो नरसन्तान, पुर्य्यामस्याम् अधर्म्म-
३ सङ्कल्पकाः कुमन्त्रणाकारिणश्च नरा इमे। ते वदन्ति, गृहनिर्म्माणम्
४ अनासन्नं, पुरीयं खेदनी वयञ्च तत्रत्यं मांसमिति। अतस्त्वं तानधि
भाववोक्तिं व्याहर, भो नरसन्तान, भाववोक्तिं व्याहर।

५ तदानीं सदाप्रभोरात्मा मामाविश्य जगाद, सदाप्रभुरित्थमाह,
प्रोक्तं तदेव युष्माभि र्भो इस्रायेल्कुलोद्भवाः।
उद्भूतं वो हृदाकाशे सकलं ज्ञायते मया॥
६ भूरयोऽत्र पुरीमध्ये सन्ति युष्मद्धता जनाः।
यूयं नगरवर्त्मानि शवपूर्णान्यकार्ष्ट च॥
७ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
युष्मद्धता मनुष्या ये पुरीमध्ये निपातिताः।
सन्ति मांसस्वरूपास्ते खेदनी च पुरी स्वयं।
तस्यास्तु मध्यतो यूयं भंशिष्यथ वहिष्कृताः॥
८ सम्भीता असितो यूयम् असिं युष्मास्वहं ततः।
वर्त्तयिष्यामि वक्तीदं प्रभुरेव सदाप्रभुः॥
९ युष्मांस्तस्या वहिष्कृत्य निधास्ये परपाणिषु।
करिष्यामि च युष्मासु विचारफलसाधनं॥
१० निपतिष्यथ यूयञ्च तदानीमसिना हताः।
विचारं वः करिष्यामीस्रायेल्देशस्य सीमनि।
अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं॥
११ युष्मदर्थम् पुरीयञ्च खेदनी न भविष्यति।
तन्मध्ये च स्थितं मांसं यूयं नैव भविष्यथ।
विचारं वः करिष्यामीस्रायेल्देशस्य सीमनि॥

अभिज्ञास्यथ यूयञ्च तदा मां तं सदाप्रभुं। १२
विधयो यस्य युष्माभि र्न समाचरिताः पुरा॥
यस्य विचारनिर्देशा युष्माभिश्च न पालिताः।
स्वचतुर्द्दिक्स्थजातीनां विचाराज्ञानुगामिभिः॥

मयि त्वित्थं भाववोक्तिं कथयति विनायस्य सुतः पिलटियो ममार। १३
तदाहं न्युब्जीभूय प्रोच्चरवेणोतक्रुश्यावोचं, हा प्रभो सदाप्रभो, त्वं किम्
इस्रायेलः शेषं निःशेषयिष्यसि? तदा सदाप्रभोरिदं वाक्यं मां प्रति १४
प्रादुरभूत्, भो नरसन्तान, तव भ्रातरस्तव प्रज्ञातभ्रातरः के? इस्रायेलः १५
कृत्स्नं कुलं, तत्साकल्यमेव। यिरूशालम्निवासिनस्तान् गदितवन्तः,
यूयं सदाप्रभोः सान्निध्याद् दूरीभवत, देशोऽधिकारवदस्मभ्यमेव दत्तः।
अतो हेतो र्वद, प्रभुः सदाप्रभुरित्थमाह यद्यप्यहं तान् परजातीनां मध्यं १६
नीत्वा दूरीकृतवान् यद्यपि च नानादेशेषु तान् विकीर्णवान् तथापि ते
यं यं देशं गतास्तत्राहं कियत्कालं यावत् तेषां पुण्यधाम भविष्यामि।

अतस्त्वं वद, प्रभुः सदाप्रभुरित्थमाह, १७
सङ्ग्रहीष्याम्यहं युष्मान् जातीनां मध्यतः पुनः।
यूयं यत्र विकीर्णाः स्थ नानादेशप्रवासिनः॥
सञ्चेष्यामि पुन र्युष्मांस्तेभ्यो देशेभ्य एव च।
पुन र्दास्यामि युष्मभ्यम् इस्रायेलञ्च नीवृतं॥
तां प्रविश्य जना भूमिं तन्मध्यात् सर्व्वविग्रहान्। १८
सर्व्वांस्तस्याः कलङ्कांश्च दवयिष्यन्ति यत्नतः॥
तेभ्योऽन्तःकरणञ्चैकं सम्प्रादस्याम्यहं तदा। १९
आत्मानञ्चान्तरे तेषां स्थापयिष्यामि नूतनं॥
दवयिष्यामि तेषाञ्च देहाच्चित्तं शिलामयं।
वितरिष्यामि तेभ्यश्च चित्तं मांसमयं तदा॥
ततो मद्विधिमार्गेण प्रगमिष्यन्ति ते जनाः। २०
मत्सूत्राणि च रक्षन्तः पालयिष्यन्ति कर्म्मभिः॥
मत्प्रजास्ते भविष्यन्त्यहं तेषां भवितेश्वरः। २१
स्वीयघृणार्हदेवानां वशे घृण्यक्रियासु च।
येषान्त्वासज्यते चित्तं तेषां तत्कर्म्मणः फलं।
मूर्द्ध्नहं वर्त्तयिष्यामीत्याह नित्यप्रभुः प्रभुः॥

अपरं स्वपार्श्वस्थचक्रैः स्वोपरिस्थितेनेस्रायेल ईश्वरस्य प्रतापेन च २२

२३ सहिताः किरूबाः स्वपक्षान् उत्थापयामासुः, सदाप्रभोः प्रतापश्च पुर्य्या
२४ मध्यस्थानस्योर्द्धत उद्गत्य पुर्य्याः पूर्व्वदिक्स्थपर्व्वतस्य शृङ्गे तस्थौ। अप-
रम् ईश्वरीयात्मनः प्रभावेनात्मा दर्शनयोगे माम् उत्थाप्य कल्दीयदेशं
प्रवासितजनानाम् अन्तिकं निनाय, यच्च दर्शनमहं दृष्टवान् तन्म-
२५ त्तोऽपजगाम। अपरं सदाप्रभु र्याः कथा मां प्रदर्शितवांस्तस्य ताः
सर्व्वकथा अहं तान् प्रवासितजनान् अवादिषं।

---

१२ द्वादशोऽध्यायः।

१ यिहिष्कलस्य यात्राया दृष्टान्तः ८ यात्रायास्तात्पर्य्यं सिदिकियस्य बन्दिताया-पगमनं १७ यिहिष्केलस्य सकम्पं भोजनपानाभ्यां यिहूदीयानां दुःखस्य दृष्टान्तः २१ दृष्टान्तकथाकृते यिहूदीयानां भर्त्सनं २६ भाविवाचः शीघ्रसफलत्वञ्च।

१ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्। भो नरसन्तान, त्वं
२ विद्रोहिकुलस्य मध्ये वर्त्तसे, दर्शनार्थं तेषां चक्षूंषि विद्यन्ते, ते तु न
पश्यन्ति; श्रवणार्थं तेषां कर्णाश्च विद्यन्ते तथापि ते न शृण्वन्ति
३ यतस्ते विद्रोहिकुलाः। त्वञ्च, भो नरसन्तान, स्वार्थं प्रवाससामग्रीं वि-
धाय दिवा तेषां साक्षात् प्रवासं याहि, तेषां साक्षात् प्रवासार्थं स्वस्था-
४ नात् स्थानान्तरं प्रगच्छ, किंस्वित् ते यद् विद्रोहिकुलास्तद् द्रक्ष्यन्ति। त्वं
दिवा तेषां साक्षात् प्रवासार्थकसामग्रीमिव स्वसामग्रीं वहिष्कुरुष्व
५ स्वयञ्च प्रवासाय निर्गमनेनेव सन्ध्यायां तेषां साक्षान्निर्गच्छ। तेषां सा-
६ क्षात् कुड्ये छिद्रं कृत्वा तेनैव तां वहिष्कुरुष्व। तेषां साक्षात् स्कन्धे भारं
वहन्नन्धकारे वहिष्कुरुष्व स्ववदनञ्चाच्छाद्य भूमौ दृक्पातं मा कुरुष्व, यत
७ इस्रायेलः कुलस्य कृतेऽहं त्वाम् अद्भुतलक्षणमिव नियुक्तवान्। ततोऽहं
यथादिष्टस्तथैवाकार्षं, दिवा प्रवासार्थकसामग्रीमिव स्वसामग्रीं वहिर-
कार्षं, सन्ध्यायाञ्च हस्तेन कुड्ये स्वार्थं छिद्रम् अकार्षं,अन्धकारे तद्वहिष्क-
८ रणकाले च तेषां साक्षात् स्कन्धे भारम् अवाक्षं। अपरं प्रातःकाले सदा-
९ प्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वं किं करोषीति
१० किम् इस्रायेलः कुलस्य ते विद्रोहिकुला जनास्त्वां न पृष्टवन्तः? अत-
स्तान् वद, प्रभुः सदाप्रभुरित्थमाह, यिरूशालमि नरपतिरेव ते च
११ यस्य मध्यवर्त्तिनस्तत् कृत्स्नम् इस्रायेलकुलमेव धुरोऽयं। त्वं वद, युष्मद-
र्थम् अहम् अद्भुतलक्षणं। मया यादृशमकारि तान् प्रति तादृशं कारि-

ष्यते, ते प्रवासं वन्दिदशाञ्च यास्यन्ति। तेषां मध्यवर्त्ती नरपतिरन्धकारे १२
स्कन्धे भारं वहन् निष्क्रमिष्यति, वहिष्करणार्थकद्वाराय जनैः प्राचीर
छिद्रं विधायिष्यते, स यथा स्वयं स्वचक्षुर्भ्यां भूमिं न पश्येत् तदर्थं निजव-
दनम् आच्छादयिष्यति। मया च तस्योपरि स्वजाले विस्तारिते स मत्स- १३
क्ष्णाहेण धारिष्यते मया च बाबिलं कल्दीयभूमिं नायिष्यते, स तु तां न
द्रक्ष्यति तत्रैव च मरिष्यति। तस्य चतुर्द्दिक्स्थान् सर्व्वजनान् सहायान् १४
सैन्यनिवहांश्चाहं सर्व्ववायुभि विकरीष्यामि तेषां पश्चान्निष्कोषमसिं
चालयिष्यामि च। मया परजातीयानां मध्ये तेषां विक्षेपणेन देशानां १५
मध्ये विकिरणेन च ते मां सदाप्रभुम् अभिज्ञास्यन्ति। अहन्तु तेषां १६
स्वल्पजनान् असिदुर्भिक्षमारीभ्योऽवशेषयिष्यामि ते येषां मध्यं गतास्तेषां
परजातीयानां समक्षं स्वघृण्यक्रियाणां सर्व्वासां वृत्तान्तं ज्ञापयिष्यन्ति,
अहं सदाप्रभुरस्म्येतच्च ते ज्ञास्यन्ति।

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, १७
त्वं कम्पमानः स्वखाद्यं भक्षय, उद्विज्यमानो व्यथमानश्च स्वतोयं पिव १८
च। देशस्य जनांश्च वद, प्रभुः सदाप्रभुरिस्रायेलो भूमिमधि यिरूशाल- १९
म्निवासिनो वदति ते व्यथमानाः स्वखाद्यं भक्षयिष्यन्ति स्तब्धाश्च स्वतो-
यानि पास्यन्ति तेन स्वनिवासिनां दौरात्म्यात् स्वपूरकद्रव्यै र्हीनो देशः
स्तब्धो भविष्यति। वसतिनगराणि च निर्जनानि भविष्यन्ति देशश्चो- २०
त्सन्नो भविष्यति, अहं सदाप्रभुरस्मीदञ्च युष्माभि र्ज्ञायिष्यते।

पुनश्च सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, २१
कालो दीर्घो भविष्यति सर्व्वं दर्शनञ्च नङ्क्ष्यतीत्ययम् इस्रायेलो भूमौ २२
युष्माकं कः प्रवादः? अतस्त्वं तान् वद, प्रभुः सदाप्रभुराह, स प्रवादो २३
मया विरतः कारिष्यते, स इस्रायेलि पुन र्न प्रयोजयिष्यते, परन्तु त्वं
तान् वद, कालः सर्व्वदर्शनस्य वाक्यञ्चोपतिष्ठते। यतः किमप्यनर्थकद- २४
र्शनं चाटुमन्त्रपठनं वेस्रायेलः कुले पुन र्न सम्भविष्यति। परन्तु सदा- २५
प्रभुरहमेव कथां व्याहरिष्यामि याञ्च कथां व्याहरिष्यामि सा सिद्धिम्
अवाप्स्यति विलम्बः पुन र्न सम्भविष्यति। किन्तु भो विद्रोहिकुलाः,
युष्माकमेव जीवनकाले कथां व्याहरिष्यामि साधयिष्यामि चेति प्रभुः
सदाप्रभुराह।

पुनश्च सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, पश्य, २६
इस्रायेलः कुलभुक्ता जना वदन्ति. यद् दर्शनमसौ पश्यति तद् बहुदि- २७

२८ नानां दर्शनम्, असौ सुदूरकालानधि भावोक्तिं व्याहरतीति। अतस्त्वं
तान् वद, प्रभुः सदाप्रभुरित्थमाह, मम केषाञ्चन वाक्यानां विलम्बः पुन
र्न सम्भविष्यति, यद्यद् वाक्यं मया गदिष्यते तत्तत् सिद्धिमवाप्स्यतीति
प्रभुः सदाप्रभुराह।

---

१३ त्रयोदशोऽध्यायः।

१ मृषाभाववादिनां भर्त्सनं १० आर्द्रलेपस्य दृष्टान्तः १७ भाववादिनीनाम् उपधान-दृष्टान्तश्च।

१ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वं
२ भावोक्तिप्रचारकान् इस्रायेलो भाववादिनोऽधि भावोक्तिं व्याहर, तान्
३ आत्ममनोनीतभाववादिनश्च वद, यूयं सदाप्रभो र्वाक्यं शृणुत। प्रभुः
सदाप्रभुरित्थमाह धिक् तान् मूढान् भाववादिनो ये निजात्मानम् अ-
४ नुसरन्त्यलीकञ्च पश्यन्ति। हे इस्रायेल्, तव भाववादिनो निर्जनस्था-
५ नानां शृगालैस्तुल्याः। यूयं प्राचीरच्छिद्रेषु नैवोत्थितवन्तः, इस्रायेलः
कुलस्य कृते वा सदाप्रभो र्दिवसे युद्धायावस्थानार्थं प्राकारं नैव निर्म्मि-
६ तवन्तः। ते जना अलीकदर्शनम् अनृतमन्त्रञ्च पश्यन्ति। सदाप्रभुना
न प्रहिता अपि सदाप्रभुराहेति वदन्ति वाक्यस्य सिद्धिं प्रतीक्षन्ते च।
७ किं न यूयम् अलीकदर्शनानि पश्यथानृतमन्त्रांश्च व्याहरथ? मयि न
८ कथितवत्यपि सदाप्रभुराहेति किं न वदथ? अतो हेतोः प्रभुः सदाप्र-
भुरित्थमाह, यूयम् अलीकं वदथानृतञ्च पश्यथ, ततोऽहं युष्मान् आक्र-
९ मिष्यामीति प्रभुः सदाप्रभुराह। मम हस्तश्च तान् अलीकदर्शिनोऽनृत-
मन्त्रव्यवहारिणश्च भाववादिन आक्रमिष्यति ते मम प्रजानां संसदि
न स्थास्यन्ति, इस्रायेल्कुलस्य नामावल्यां न लेखिष्यन्त इस्रायेलो भूमिञ्च
न प्रवेक्ष्यन्ति, तेनाहं प्रभुः सदाप्रभुरस्मीति यूयं ज्ञास्यथ।
१० शान्त्यां न सत्यामपि शान्तिरस्तीति वदन्तो यतस्ते मम प्रजा भ्रम-
यन्ति यतश्च ताभिः कुड्ये निर्म्मिते पश्य कुलेपेन तद् उपलिम्पन्ति,
११ ततो हेतोस्त्वं तान् पतनोद्यतकुलेपेन लेप्यकृतो वद, आप्लाविवृष्टिराया-
१२ ति, यूयञ्च भो करकाः पतत, झञ्झावातश्च प्रपततु। पश्यत सा भित्तिः
१३ पतिष्यति, जनाश्च युष्मान् प्रक्ष्यन्ति, युष्माभिः कृतं लेपनं कुत्रेति। अतः
प्रभुः सदाप्रभुरित्थमाह, पश्याहं रोषेण झञ्झावातस्य प्रपतनं विधा-

ष्यामि, मम क्रोधाच्चाश्मविवृष्टि र्मम कोपाच्च संहारकः वरकापातो भवि-
ष्यति। यूयं यां भित्तिं कुलेपेनोपलिप्तवन्तस्तामहं निर्भेत्स्यामि भूमि- १४
साच्च करिष्यामि, तस्या मूलस्थानावृतं भविष्यति, तस्यां पतितायाञ्च यूयं
तन्मध्ये विनङ्क्ष्यथ ततोऽहं सदाप्रभुरस्मीति ज्ञास्यथ। इत्थं तस्यां भित्त्यां १५
कुलेपेन तस्या लेप्यकृत्सु चाहं स्वरोषं सफलं करिष्यामि युष्मांश्च वदि-
ष्यामि, गता सा भित्ति र्गताश्च तल्लेप्यकृतः। अर्थतो गता इस्रायेलस्ते १६
भाववादिनो ये यिरूशालमे भावोक्तिं कथयन्ति भ्रान्त्यां न सत्यामपि
शान्तिरस्तीति दर्शनं पश्यन्ति च, प्रभुः सदाप्रभु रिदं ब्रूते।

भो नरसन्तान, त्वज्जनानां या योषितः स्वमनोनीतभावोक्तिं व्याह- १७
रन्ति त्वं ताः प्रति स्थिरदृष्टिं कृत्वा भावोक्तिं व्याहर। त्वं वद, प्रभुः १८
सदाप्रभुरित्थमाह, ता योषितो धिक् याः प्राणानां मृगयार्थं सर्व्वकक्षा-
णां कृत उपधानानि सीव्यन्ति यावतीयपरिमाणस्य मस्तकाच्छादकवा-
सांसि च संस्कुर्व्वन्ति। मत्प्रजानां प्राणानां मृगयां कुर्व्वाणा यूयं किं
स्वप्राणान् जीवयिष्यथ? तदर्थं किं कतिपयमुष्टिप्रमाणयवानां कतिपय- १९
पूपखण्डानां वा लोभान्मत्प्रजानां समक्षं माम् अमेध्यीकुर्व्वाणा अनृत-
वाक्येऽवधानकारिणी र्मम प्रजा अनृतवाक्यानि गदन्त्यो येषां मरणम-
नुचितं तान् प्राणान् मारयितुं येषाञ्च जीवनमनुचितं तान् प्राणान्
जीवयितुं चेष्टध्वे? ततो हेतोः प्रभुः सदाप्रभुरित्थमाह, पश्यत यूयं २०
यैः प्राणानां मृगयां कुरुध्वे, युष्माकं तान्युपधानान्यहम् आक्रमिष्यामि
ते च प्रोड्डयिष्यन्ते, युष्माकं बाहुभ्यश्च तान्याच्छेत्स्यामि, युष्मद्धृतान् तान्
प्राणांश्च मोचयिष्यामि ते च प्रोड्डयिष्यन्ते। युष्माकमाच्छादनार्थकवा- २१
सांसि च छेत्स्यामि, मम प्रजाश्च युष्मत्करेभ्य उद्धरिष्यामि, ता मृग-
याधृता इव पुन र्युष्मत्करगता न भविष्यन्ति, अहञ्च सदाप्रभुरस्मीति
यूयं ज्ञास्यथ। धार्म्मिको यो जनो मया नोद्वेजितो यूयं मृषावाक्येन २२
तम् उद्वेजयथ, दुर्जनश्च यथा जीवनलाभार्थं स्वकुमार्गं न त्यजेत् तथा
यूयं तं सबलहस्तं कुरुथ। ततो हेतो र्यूयं पुनरलीकदर्शनानि न द्रक्ष्यथ २३
मन्त्रांश्च न व्याहरिष्यथ, युष्मत्करेभ्योऽहं स्वप्रजा उद्धरिष्यामि तनाह-
मेव सदाप्रभुरस्मीति यूयं ज्ञास्यथ।

१४ चतुर्दशोऽध्यायः।

१ प्राचीनलोकानां कापट्यप्रकाशनं ६ इस्रायेल्वंशान् प्रति भीतिदर्शनं १२ ईश्वरीय-शास्तेरनिवार्य्यता २२ कतिपयजनानां दण्डाद्वशेषणस्य भविष्यद्वाक्यञ्च।

१ अपरम् इस्रायेलः प्राचीननराणां कतिपयजना मत्समीपम् आगत्य
२ मदग्रत उपविविशुः। तदा सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्,
३ भो नरसन्तान, इमे नराः स्वीयघृण्यदेवान् स्वान्तःकरणारूढीकृतवन्तो निजापराधजनकविघ्नानि स्वमुखानाम् अग्रतः स्थापितवन्तश्च, एतैरहं
४ किं परिप्रष्टव्यः? अतस्त्वं तान् आलप्य वद, प्रभुः सदाप्रभुरित्थमाह, इस्रायेल्कुलस्य यो नरः स्वीयघृण्यदेवान् स्वान्तःकरणारूढीकृत्य निजा-पराधजनकविघ्नं स्वमुखस्याग्रतः स्थापयित्वा च भाववादिनः समीपम् आयाति, सदाप्रभुरहमेव तस्य तद्विषये ऽर्थतस्तस्य घृण्यदेवानां
५ बाहुल्यात् तस्य प्रतिवादी भविष्यामि। इत्थम् अहम् इस्रायेलः कुलं तदीयान्तःकरणपाशेन धरिष्यामि, यतस्ते सर्व्वे स्वीयघृण्यदेवानां कृते मत्तः पराङ्मुखा जाताः।
६ अतस्त्वम् इस्रायेलः कुलं वद, प्रभुः सदाप्रभुरित्थमाह, यूयं प्रत्यायात, स्वीयघृण्यदेवेभ्यः पराङ्मुखा भवत, स्वीयगर्हणीयक्रियाभ्यश्च स्वमुखानि
७ परावर्त्तयत। यत इस्रायेल्कुलोद्भव इस्रायेलो मध्ये प्रवासी वा यो जनो मदनुगमनान्निवृत्य स्वघृण्यदेवान् अन्तःकरणारूढीकृत्य स्वीया-पराधजनकविघ्नं स्वमुखस्याग्रतः स्थापयित्वा च मां परिप्रष्टुं भाववादिनः समीपम् आयाति, सदाप्रभुरहमेव स्वयन्तो तस्य प्रतिवादी भविष्यामि,
८ तं जनं प्रति स्थिरदृष्टिं कृत्वा चाभिज्ञानमिव प्रवादास्पदमिव च तं निःशेषयिष्यामि, मत्प्रजानां मध्यात् तम् उच्छेत्स्यामि च, तेनाहं सदा-
९ प्रभुरस्मीति यूयं ज्ञास्यथ। भाववादी च मुग्धीभूय यदि वाक्यं व्याह-रेत्, तर्हि सदाप्रभुरहं तं भाववादिनं मोहयिष्यामि तस्य विरुद्धं स्वकरं
१० प्रसार्य्य च स्वप्रजानाम् इस्रायेल्जनानां मध्यात् तम् उच्छेत्स्यामि। तावु-भौ निजापराधस्य दण्डं भोक्ष्येते, प्रष्टु र्यादृशो दण्डो भाववादिनस्तादृशो
११ दण्डो भविष्यति। तथा कृते इस्रायेल्कुलीयजना न पुन र्मत्तः पराङ्मु-खीभूय विभ्रमिष्यन्ति स्वीयाधर्म्मक्रियाभिश्च न पुनरशुचीभविष्यन्ति, परन्तु ते मम प्रजा भविष्यन्त्यहञ्च तेषाम् ईश्वरो भविष्यामीति प्रभुः सदाप्रभुराह।

अनन्तरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, १२
भो नृसन्तान यो देशः पापेनापकरोति मे। १३
अहं तत्प्रातिकूल्येन निजहस्तं प्रसार्य्य चेत्।
भक्ष्यावलम्बनं भिन्द्यां प्रापयेयञ्च तं क्षुधां।
उच्छिन्द्यां तस्य मध्याच्च मनुष्यान् पशुभिः सह॥
तदा त्रयो नरा नोहो दानीयेल् आयुबश्च चेत्। १४
मध्यतस्तस्य देशस्य भवेयुः समुपस्थिताः॥
स्वप्राणानेव ते तर्हि रक्षिष्यन्ति स्वधर्म्मतः।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
मया देशस्य सर्व्वत्रानीतैः हिंस्रकजन्तुभिः। १५
यदि क्रियेत सोऽनाथो जन्तूनाञ्च भयाद् यदि।
मरु र्जायेत देशः स पथिकैरपि वर्जितः॥
प्रभु र्नित्यप्रभुः प्राह सत्यश्चेन्मम जीवनं। १६
तस्य मध्ये स्थितास्तर्हि पूर्व्वोक्तास्ते त्रयो नराः।
स्वपुत्त्रान् स्वीयपुत्त्री र्वा नैव शक्ष्यन्ति रक्षितुं।
केवलं ते तरिष्यन्ते देशो ध्वंसं गमिष्यति॥
तद्देशस्य विरुद्धं वा खड्गमानीय चेदहं। १७
देशमध्येन खड्गस्यानुजानीयां गतागतं।
तन्मध्याच्च समुच्छिन्द्यां मनुष्यान् पशुभिः सह॥
तस्य मध्ये तदानीञ्च विद्येरंस्ते त्रयो नराः। १८
(प्रभु र्नित्यप्रभुः प्राह) सत्यश्चेन्मम जीवनं॥
ते स्वपुत्त्रान् स्वपुत्त्री र्वा नैव शक्ष्यन्ति रक्षितुं।
रक्षणं केवलं तेषां त्रयाणां सम्भविष्यति॥
तं देशं प्रति मारीं वा प्रेरयेयमहं यदि। १९
रोषं शोणितरूपं मे यदि तत्रावतार्य्य च।
मनुष्यान् पशुभिः सार्द्धम् उच्छिन्द्यां तस्य मध्यतः॥
तत्र स्युश्च तदा नोहो दानीयेल् आयुबश्च चेत्। २०
(प्रभु र्नित्यप्रभुः प्राह) सत्यश्चेन्मम जीवनं।
ते स्वपुत्त्रं स्वपुत्त्रीं वा नैव शक्ष्यन्ति रक्षितुं।
निजप्राणान् स्वधर्म्मेण ते रक्षिष्यन्ति केवलं॥
तथापीदं वचो ब्रूते प्रभुरेव सदाप्रभुः। २१

यिरूशालममावेष्टुं ध्वंसिदण्डचतुष्टयं।
ममार्थात् खड्गदुर्भिक्षहिंस्रश्वापदमारकं।
प्रेष्य यद्यपि तन्मध्याद् उच्छिन्द्यां सपशून् नरान्॥
२१ पश्य तथापि तन्मध्ये शेक्ष्यन्ते रक्षिता जनाः।
ते च निर्गमयिष्यन्ते पुत्त्रदुहितृभिः सह॥
ते च पश्चागमिष्यन्ति निष्क्रान्ता युष्मदन्तिकं।
यूयं तेषां तदाचारं क्रियाश्चालक्षयिष्यथ॥
यिरूशालम् मया यच्च प्रापिताभूदमङ्गलं।
यत् सर्व्वं प्रापिताभूत् सा लप्स्यध्वे तत्र सान्त्वनं॥
२२ ते जना एव युष्माकं जनयिष्यन्ति सान्त्वनं।
यस्मात् तेषां यदाचारं क्रियाश्चालक्षयिष्यथ।
तदा यद्यन्मयाकारि तस्यां तन्न निरर्थकं।
एतज्ज्ञास्यथ वक्तीदं प्रभुरेव सदाप्रभुः॥

---

१५ पञ्चदशोऽध्यायः।

१ द्राक्षालताकाष्ठस्य दृष्टान्तः ६ तस्य तात्पर्य्यञ्च।

१ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान,
२ अन्यकाष्ठसमूहाद् द्राक्षालतायाः काष्ठं कथमुत्कृष्टं? वनतरूणां मध्य-
३ वर्त्तिन्यास्तस्या लतायाः क उत्कर्षः? कार्य्योपयोगि किमपि निर्म्मातुं जनैः
किं तस्मात् काष्ठं गृह्यते? तत्र पात्राणामुल्लम्बनार्थको नागदन्तो वा किं
४ तस्माद् गृह्यते? पश्य तद् भक्ष्यवद् वह्नये दीयते। वह्निना तु तस्या-
ग्रद्वयं भक्षयित्वा मध्यदेशे क्षणोकृते तत् किं कस्यचित् कार्य्यस्य योग्यं
५ भविष्यति? पश्य तद् यदाविकलमासीत् तदा कार्य्ये न प्रायुज्यत, पुनर-
ग्निना भक्षितं क्षणोकृतञ्च तत् किं कार्य्ये प्रयोक्ष्यते?
६ ततो हेतोः प्रभुः सदाप्रभुरित्थमाह, वनकाष्ठानां मध्ये यथा द्रा-
क्षालतायाः काष्ठं मया भक्ष्यवद् अग्नये दत्तं तथा यिरूशालमो निवा-
७ सिनो मया दायिष्यन्ते। अहञ्च तेषु स्थिरदृष्टिं करिष्यामि, अग्नितो
निर्गतांस्तेऽग्निना भक्षयिष्यन्ते। मया तेषु स्थिरदृष्टौ क्रियमाणायामहं
८ सदाप्रभुरस्मीति यूयं ज्ञास्यथ। अहञ्च देशं ध्वंसयिष्यामि यतस्तैरौचि-
त्यलङ्घनं कृतमिति प्रभुः सदाप्रभुराह।

१६ षोडशोऽध्यायः ।

१ प्रान्तरे क्षिप्तसद्योजातकन्यया समं यिरूशालम उपमानं ६ तां कन्यां भृत्वा उद्वहति यः पुमान् तेन समं परमेश्वरस्योपमानं १५ तत्कन्याया अर्थाद् यिरूशालमो व्यभिचारस्य वर्णनं ३५ तद्व्यभिचारात् तस्या भाविदण्डस्य कथनं ४४ तस्या भगिनीद्वयेनार्थात् सिदोमशोमिरोणाभ्यां सह तस्या उपमानं ६० शेषे दयालाभस्य कथनञ्च।

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, यि- १
रूशालमं तस्या विविधगर्हणीयतां ज्ञापय । त्वं वद, प्रभुः सदाप्रभु र्यि- २
रूशालममिदं ब्रूते, तवोत्पत्ति र्जन्म च किनानीयदेशात्, तव जनक
इमोरीयजनस्तव माता च हित्तीया । तव जन्मनश्च वृत्तान्तोऽयं । तव ४
जन्मदिने तव नाभिच्छेदनं संस्कारार्थं वा तोये स्नपनं लवणेन वा म्रक्षणं
वस्त्रेण वा वेष्टनं नाकारि । एतेषां किमपि कार्य्यं कर्त्तुं त्वयि दयामाच- ५
रितुं वा कस्यापि लोचनं त्वयि स्नेहदृष्टिं नाकार्षीत् । त्वत्प्राणानां गर्हणी-
यत्वात् त्वं जन्मदिन एव क्षेत्रपृष्ठे निक्षिप्ताभूः ।

तदाहं त्वत्समीपेनातिक्रामन् त्वां सहजशोणिते दूष्यमाणाम् अदर्शं ६
सहजशोणितशय्यां त्वाञ्चावादिषं जीवेति सहजशोणितशय्यामेव त्वां जी-
वेत्यवादिषं । क्षेत्रस्योद्भिदमिव त्वां वर्द्धिष्णुमकार्षं तेन त्वं वृद्धा महत्यभवः ७
परमकान्तिप्राप्तोत्तुङ्गस्तनी दीर्घकेशी चाभवः, त्वन्तु विवस्त्रा नग्ना चासीः ।
ततो मया त्वत्समीपेनातिक्रामता त्वामालोक्य तव कालः प्रेमकाल इत्य- ८
दर्शि, ततोऽहं तवोपरि स्ववस्त्रं विस्तार्य्य तव नग्नतामाच्छादितवान्
शपथेन च त्वां विश्वास्य त्वया सह समयं कृतवानिति प्रभुः सदाप्रभु-
राह, इत्थं त्वं ममैवाभूः । अहञ्च त्वां तोये स्नापयित्वाङ्गाद् रुधिरं प्रक्षा- ९
ल्य तव तैलाभ्यङ्गं कृतवान् । त्वाञ्च शिल्पितपरिच्छदेन तहश्चर्म्मपादुका- १०
भ्यां सूक्ष्मवस्त्रनिर्म्मितकटिबन्धनेन कौशेयप्रावारेण च परिधापितवान् ।
त्वाञ्चालङ्कारै र्भूषितवान् तव करद्वये कङ्कणद्वयं कण्ठे हारं नासिका- ११
यां नासाभरणं कर्णयुगले कुण्डले शिरसि च शोभाजनकं किरीटं दत्त- १२
वान् । इत्थं त्वं स्वर्णरूप्याभ्यां भूषिता सूक्ष्मवस्त्रकौशेयशिल्पितवासः- १३
परिहिता चाभवः, सूक्ष्मगोधूमचूर्णमधुतैलं तव भक्ष्यमासीत्, त्वञ्चातीव
परमसुन्दरी राज्ञीत्वस्य योग्या चाभवः । तव सौन्दर्य्याच्च तव कीर्त्ति १४
र्जातीनां मध्ये व्यानशे, यतस्त्वय्यर्पितया मद्दत्तशोभया तत् सिद्धमासी-
दिति प्रभुः सदाप्रभुराह ।

१५ त्वञ्च स्वसौन्दर्य्येणाश्वासिता स्वकीर्त्त्या व्यभिचारिणी चाभवः स्वव्य-
भिचारञ्च तोयवत् प्रायुङ्क्थाः, त्वत्समीपेन यः कश्चिद् अगच्छत् तस्यैव
१६ तद्भोगोऽभवत्। त्वञ्च तव कतिपयवासांसि गृहीत्वा स्वार्थं कलङ्कितयव-
निकाभूषितान्यूच्चस्थलानि रचयित्वा तत्र व्यभिचारमकरोः, तानि त्व-
१७ द्रचनायानि तच्च कर्म्माकर्त्तव्यं। अपरं त्वं मया दत्ताया मदीयस्वर्ण-
रूप्यनिर्म्मितायास्तव भूषाया अभरणानि गृहीत्वा तैः पुंविग्रहान् नि-
१८ र्म्माय तैः सह व्यभिचारम् अकरोः। तव शिल्पितवस्त्राणि चादाय
१९ तान् अवेष्टयो मम तैलं मम धूपञ्च तेषां साक्षाद् अस्थापयः। यच्च भ-
क्ष्यमहं तुभ्यं दत्तवान् मम तद् भक्ष्यम् अर्थतो ये गोधूमचूर्णतैलमधुभि-
रहं त्वामभोजयं तानि त्वं सौरभघ्राणाय तेषां समक्षमस्थापयः,
२० ईदृशं कर्म्माक्रियतेति प्रभुः सदाप्रभुराह। मत्कृते प्रसूतास्तव पुत्त्र-
पुत्त्रीश्च गृहीत्वा त्वं तेषां भक्षणार्थं बलिवत् तेभ्यः प्राददाः। तव व्यभि-
२१ चारं किं क्षुद्रमसन्यथाः? तस्मात् किं मम सन्तानान् हत्वा तान् उद्दि-
२२ श्याग्निमध्येन गमयित्वा तेभ्योऽददाः? तव कुत्सितानां घृणक्रियाणां व्यभि-
चारस्य च मध्ये तव तं बाल्यकालं व्यस्मरो यस्मिंस्त्वं नग्नानावृतलज्जा
२३ निजशोणिते पादमर्दिता चासीः। सन्तापः सन्ताप एव त्वयि वर्त्ति-
२४ ष्यत इति प्रभुः सदाप्रभुराह, यतस्तव सर्व्वदुष्टतायाः परं त्वं स्वार्थं वे-
२५ श्यालयं निरमिमीथाः, एकैकस्मिंश्चत्वरे प्रोच्चस्थलं निरमिमीथाः। एकै-
कस्मिन् मार्गाग्रे तव प्रोच्चस्थलं निरमिमीथाः स्वसौन्दर्य्यं गर्हणीयम् अ-
करोरेकैकस्य पथिकस्य कृते स्वचरणौ व्यस्तृणुथाः स्वव्यभिचारञ्चावर्धयः।
२६ त्वं स्वसमीपवासिभिः स्थूलमांसै र्मिस्रीयसन्तानैः सह व्यभिचारमकरो
२७ र्मम क्रोधोत्पादनाय स्वव्यभिचारम् अवर्धयश्च। ततः पश्य मया त्व-
द्विरुद्धं हस्तं प्रसार्य्य तव वृत्ति र्न्यूनीकृता त्वञ्च तव द्वेषिणीनां तव क-
२८ दाचाराल्लज्जापन्नानां पिलेष्टीयपुत्त्रीणां स्वेच्छायां समर्पिता। पुनस्त्व-
मतृप्तिबोधाद् अश्शूरीयसन्तानैः सार्द्धं व्यभिचारम् अकरोस्तैः सह व्य-
२९ भिचारं कृत्वापि तृप्तिं नागच्छः। पुनस्त्वं बाणिज्यस्थानं कल्दीयदेश-
३० मुद्दिश्य स्वव्यभिचारम् अवर्धयस्तेनापि तृप्तिं नागच्छः। प्रभुः सदाप्र-
भुराह कथं विकृतं तव चित्तं येन त्वम् अमर्य्यादायाः पुंश्चल्याः स्त्रिया
३१ योग्यम् एतत् सर्व्वं कर्म्माकरोः, एकैकस्मिन् मार्गाग्रे स्ववेश्यालयं नि-
रमिमीथा एकैकस्मिंश्चत्वरे निजप्रोच्चस्थलम् अस्थापयः पणस्यावज्ञानेन
३२ वेश्याया असदृशी चाभवः। हा सतीत्वभ्रष्टे पत्नि, त्वं पत्युः परिवर्त्तेन

परान् गृह्लीषे। सर्व्ववेश्याभ्यो जनैः पणो दीयते, त्वन्तु तव सर्व्वेभ्यः प्रे- ३३
मकारिभ्यः पणं ददासि निजव्यभिचारवशाच तेभ्यश्चतुर्द्दिग्भ्यस्त्वत्समी-
पमागमनार्थं पुरस्कारं वितरसि। इत्थं तव व्यभिचारेण स्त्रीणां विप- ३४
रीतं त्वयि जातं ताभिश्च त्वामानुकृत्य वेश्यावृत्ति र्न क्रियते, त्वया पणो-
ऽदायि तुभ्यन्तु नादायीत्यनेन विपरीतं जातं।

अतो भो वेश्ये, सदाप्रभो र्वाक्यं शृणु। प्रभुः सदाप्रभुरित्थमाह, व्य- ३५
भिचारेण तव प्रेमकारिषु तव गर्हणीयेषु सर्व्वघृणास्पदेषु च त्वया नि- ३६
जधनस्यापव्ययोऽकारि निजलज्जा च व्यवारि तेभ्यः स्वसन्तानानां शोणि-
तमदायि च, ततो हेतोः पश्य त्वं यानुद्दिश्यात्मानं पणितवती तव तान् ३७
सर्व्वान् प्रेमकारिणः सर्व्वांश्च तव प्रियान् द्विष्टांश्च जनान् अहं सङ्ग्रही-
ष्यामि, तव विरुद्धमेव सर्व्वदिग्भ्यस्तान् सङ्गृह्य तेषां समक्षं तव लज्जां
विवरिष्यामि, ते तव कृत्स्नां लज्जां द्रक्ष्यन्ति। अहञ्च व्यभिचारिणीनां ३८
शोणितपातिनीनाञ्च स्त्रीणां योग्येन विचारेण तव विचारं निष्पादयि-
ष्यामि त्वाञ्च रोषेर्ष्ययोः शोणितस्वरूपां विधास्यामि। तेषां करेषु च त्वां ३९
समर्पयिष्यामि, ते च तव वेश्यालयं ध्वंसयिष्यन्ति तव प्रोच्चस्थलान्युत्-
पाटयिष्यन्ति त्वां विवस्त्रां करिष्यन्ति तव भूषाया अभरणानि हरिष्य-
न्ति त्वाञ्च नग्नां दिगम्बरीञ्च विहास्यन्ति। त्वद्विरुद्धं समितिञ्चानाय- ४०
यिष्यन्ति प्रस्तराघातेन त्वां मारयिष्यन्ति खड्गैः परिव्यत्स्यन्ति च। तव ४१
गृहाणि वह्निना दाहयिष्यन्ति बहुस्त्रीणां समक्षं त्वयि विचारं नि-
ष्पादयिष्यन्ति च। इत्थं त्वं वेश्यावृत्तितो मया निवर्त्तयिष्यसे पणमपि ४२
पुन र्न दास्यसि। अहञ्च त्वयि स्वरोषं क्षान्तं करिष्यामि मनेर्ष्या च
त्वत्तो निवर्त्तिष्यतेऽहञ्च शान्तिं यास्यामि पुन र्न क्रोत्स्यामि च। यत- ४३
स्त्वं स्वशैशवकालं न स्मृत्वा सर्व्वैरेतैः कर्म्मभि र्ममामर्षमुत्पादितवती ततो
हेतोः पश्याहमपि तवाचारस्य फलं तव मस्तके वर्त्तयिष्यामीति प्रभुः
सदाप्रभुराह, तव सर्व्वेभ्यो गर्हणीयकर्म्मभ्यः परं नाहं कुकर्म्मणा लिप्तो
भविष्यामि।

पश्य यः कश्चित् प्रवादान् प्रयुङ्क्ते स त्वामधीमं प्रवादं वदिष्यति, माता ४४
यादृशी तस्या दुहिता तादृशी। त्वं निजमातु र्दुहिता सा स्वपतिं ४५
स्वसन्तानांश्च निराकृतवती। त्वञ्च स्वभगिन्यो र्भगिनी ते स्वपतिसन्तानान्
निराकृतवत्यौ। युष्माकं माता हित्तीया पिता चेमोरीयः। तव वृह- ४६
ती भगिनी तवोत्तरदिशि निवासिनी सदुहितृगणा शोमिरोन्, तव

क्षुद्रा भगिनी च तव दक्षिणदिशि निवासिनी सदुहितृगणा सिदोम्।
४७ त्वञ्च तयो र्मार्गैस्तयो र्गर्हणीयाचारानुसारेण चरित्वाल्पकालात् परं
क्षान्ताभवस्तन्न, परन्तु तव सर्व्वाचरणेन ताभ्यामधिकापकर्षमसाधयः।
४८ प्रभुः सदाप्रभुराह यद्यहं जीवामि तर्हि सदुहितृगणा तव भगिनी सि-
४९ दोम् सदुहितृगणायास्तव क्रियया तुल्यां क्रियां न कृतवती। पश्य तव
भगिन्याः सिदोमोऽपराधोऽयमासीत्, दर्पो भक्ष्याद्यता निश्चिन्ततायुक्ता
शान्तिस्तस्यास्तदीयदुहितॄणाञ्चासीत् तास्तु दुःखिदरिद्राणां करान्
५० सबलान् नाकुर्व्वन्। ता गर्व्विता मत्समक्षं गर्हणीयाचारम् अकुर्व्वन्,
५१ ततोऽहं तद् दृष्ट्वा ता दवयितवान्। शोमिरोनपि तव पापानाम् अर्द्धेन
समं पापं न कृतवती त्वं ताभ्यां बहुतरा गर्हणीयक्रिया अकरोः स्वकृ-
ताभिः सर्व्वाभि र्गर्हणीयक्रियाभिस्त्वं स्वभगिन्यौ निर्द्दोषतां प्रतिपादित-
५२ वती। त्वं स्वभगिन्यो र्यां लज्जाम् अवधारितवती तामेव निजलज्जां त्वम-
पि भुङ्क्ष्व। तव यैः पापैस्त्वं तयो र्गर्हणीया जाता तैरेव ते त्वत्तो नि-
र्द्दोषे प्रतिपन्ने। अतस्त्वं स्वभगिन्यौ निर्द्दोषीकृतवती तस्मात् त्वमपि त्रपस्व
५३ निजलज्जाञ्च भुङ्क्ष्व। अहञ्च तयोरर्थतः सदुहितृगणायाः सिदोमः
सदुहितृगणायाः शोमिरोणश्च निर्व्वासं तयो र्मध्ये च तव प्रवासानां
५४ प्रवासं प्रत्यावर्त्तयिष्यामि। तेन त्वं स्वलज्जां भोक्ष्यसे तयोराश्वासाय
५५ च यत् सर्व्वं कृतवती तस्माल्लज्जिष्यसे। तव भगिनी सिदोम् तदीयदु-
हितरश्च स्वीयपूर्व्वदशायां प्रत्यावर्त्तिष्यन्ते शोमिरोनपि तदीयदुहितरश्च
स्वीयपूर्व्वदशायां प्रत्यावर्त्तिष्यन्ते त्वं त्वदीयदुहितरश्च यूयमपि स्वपूर्व्वद-
५६ शायां प्रत्यावर्त्तिष्यध्वे। तव भगिनी सिदोम् तव गर्व्वकाल उपदेशसूत्र-
५७ वत् तव जिह्वाग्रे नाविद्यत। तदा च तव दुष्टता न विवृतासीत् पश्चात्
त्वरामीयकन्याभिः सर्व्वाभिश्च तत्समीपवासिनीभिः पिलेष्टीयकन्याभि
५८ र्निन्दनकाले समन्तात् तवावमननकाले च [विवृताभवत्]। तव कुक-
५९ र्म्मणो गर्हणीयक्रियायाश्च फलं त्वया भोक्तव्यमिति सदाप्रभुराह। यतः
प्रभुः सदाप्रभुरित्थं ब्रूते, त्वया नियमस्य व्यर्थीकरणाय शपथमवज्ञाय
६० यादृगाचारः कृतस्तादृशमाचारमहं त्वां प्रति करोमि। परन्त्वहं तव
यौवनकाले त्वया सह यं नियमं कृतवान् तं स्मरिष्यामि त्वत्कृतेऽनन्तका-
लीननियमं स्थिरीकरिष्यामि च।

६१ त्वञ्च निजाचारं स्मरन्ती लज्जिष्यसे स्वतो महत्तराः क्षुद्रतराश्च स्वभ-
६२ गिनी र्ग्रहीष्यसि च। तास्तव नियमस्यांशिन्यो न सन्ति किन्त्वहं ता

दुहितृरिव तुभ्यं दास्यामि। अहञ्च त्वया सह स्वनियमं स्थिरीकरिष्यामि
त्वञ्च मां सदाप्रभुमभिज्ञास्यसि। त्वं यत् सर्व्वं कृतवती तदहं क्षमिष्ये ६३
तेन त्वं स्मृत्वा त्रपिष्यसे लज्जातश्च वक्त्रं पुनरुद्घाटयितुं न प्रोत्सहिष्यस
इति प्रभुः सदाप्रभुराह।

---

१७ सप्तदशोऽध्यायः।

१ एकस्या द्राक्षालताया उत्क्रोशद्वयस्य च दृष्टान्तः ११ तस्य दृष्टान्तस्य तात्पर्य्य २२ ख्रीष्टरूपतरुरोपणस्य दृष्टान्तश्च।

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वम् १
इस्रायेलः कुलमधि गूढवाक्यं व्याहर दृष्टान्तकथाञ्च कथय। त्वं वद, २
प्रभुः सदाप्रभुराह, बृहत्पक्षो दीर्घपर्णश्चित्रवर्णतनुरुहैः पूर्ण एको म-
हान् उत्क्रोशपक्षी लिबानोनमागत्यैरसतरोरग्रभागमादायार्थतस्तदी- ४
यपल्लवानाम् उच्चतमपल्लवमुत्कृत्य बाणिज्यदेशं नीत्वा बणिजां नगरे
स्थापयामास। देशस्य वीजमेकञ्च गृहीत्वा वीजयोग्ये क्षेत्रे निदधे, महा- ५
तोयानां पार्श्वं नीत्वा वेतसमिव रोपयामास च। ततस्तत् प्ररुह्य वितता ६
ह्रस्वकाण्डा द्राक्षालता बभूव, तस्याः पल्लवास्तस्य पक्षिणोऽभिमुखा मूला-
नि च तस्याधःस्थितानि भविष्यन्तीत्यभिप्रेतं, सा च द्राक्षालता भूत्वा शा-
खावती पर्णमयी च बभूव। परन्तु बृहत्पक्षो भूरितनुरुहोऽपर एको ७
महान् उत्क्रोशपक्ष्यासीत्, ततः पश्य सा द्राक्षालता सेचनमाकाङ्क्ष्य
निजोद्यानसीताभ्यस्तमेवोद्दिश्य स्वमूलानि व्यस्तृणोत् स्वपल्लवांश्च व्यत-
नोत्। सा तूत्तमक्षेत्रे बहुतोयानां पार्श्वे रोपितासीत् तत्र पल्लविता ८
फलवती सत्तमा द्राक्षालता भवितुमशक्नोत्। त्वं ब्रूहि प्रभुः सदाप्रभु- ९
राह तत् किं सेत्स्यति? प्रथमपक्षिणा तस्या मूलान्युत्पाट्य फलेषु कर्त्ति-
तेषु सा किं न शोक्ष्यति? तस्या नवीनपल्लवाः सर्व्वे शोक्ष्यन्ति सा च
महाबाहुना बहुजनै र्वापि स्वमूलेभ्यः पुनरुन्नमयितुं न शक्ष्यते। पश्य सा १०
रोपिता सती किं सेत्स्यति? पूर्व्ववायुना स्पृष्टैव सा किं न शोक्ष्यति?
यत्र सा प्ररूढ़ा तासु सीतासु शोक्ष्यति।

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, त्वं तद् विद्रोहिकुलं ११
वद, यूयं किम् एतस्य तात्पर्य्यं न जानीथ? पून र्वद, पश्यत, बाबिलीयरा- १२
जो यिरूशालमम् आगत्य तदीयराजं तदीयाध्यक्षांश्चादाय बाबिलं स्व-
सन्निधिं नीतवान्। राजवंशीयमेकं जनञ्च गृहीत्वा तेन सह समयं १३

१४ विधाय शपथं कारयामास देशस्य बलवतो जनांश्चापनिनाय। राज्यं
क्षुद्रं भविष्यति, नैव दर्पं करिष्यति, मम समयं रक्षिष्यति, स्थिरं भवि-
१५ ष्यति चेति तस्याभिप्रेतमासीत्। स तु जनस्तमभिद्रुह्य हयान् बहुसै-
न्यञ्च याचितुं मिसरदेशं स्वदूतान् प्रेरयामास। इदं येनाकारि स किं
कृतार्थो भूत्वा रक्षिष्यते? समयं व्यर्थीकृत्य स किं रक्षामवाप्स्यति?
१६ प्रभुः सदाप्रभुराह, यद्यहं जीवामि, तर्हि स येन राजत्वे नियुक्तो यस्य
शपथमवज्ञातवान् समयञ्च व्यर्थीकृतवान्, तस्यैव राज्ञो वासस्थाने
१७ तस्यैव समीपे च बाबिलि स मरिष्यति। बहुप्राणानाम् उच्छेदाय मृत्त-
यसेतुनिचय उच्चगृहनिर्म्माणे च कृतेऽपि समरे फिरौन् महाबलेनापि
१८ बहुजननिवहेनापि च तस्योपकारं न करिष्यति। स समयं व्यर्थी-
कर्त्तुं शपथम् अवज्ञातवान्, पश्य हस्तं दत्त्वापि सर्व्वमेतत् कृतवान्, स
१९ नैव रक्षाम् अवाप्स्यति। अतो हेतोः प्रभुः सदाप्रभुराह, यद्यहं जीवा-
मि तर्हि यो मदीयशपथस्तेनावज्ञातो यश्च मदीयसमयस्तेन व्यर्थीकृत-
२० स्तावहं तस्य शिरसि वर्त्तयिष्यामि। तस्योपरि मम जालं विस्तारयि-
ष्यामि च, तेन स मम पाशे धारिष्यते, अहञ्च तं बाबिलं गमयिष्यामि
स च मद्विपरीत्येन यद् औचित्यलङ्घनं कृतवान् तद्विषये तत्रैव तेन सार्द्धं
२१ विवदिष्ये। तस्य यावतीयसैन्यानां पलायिताः सर्व्वे जना असिना प-
तिष्यन्ति, तदवशिष्टाश्च सर्व्ववायुभि र्विकरीष्यन्ते, ततः सदाप्रभुरहमे-
वैतद् उक्तवानिति यूयं ज्ञास्यथ।

२२ प्रभुः सदाप्रभुरित्थमाह,

मया प्रांश्वेरसस्याग्रं गृहीतं रोपयिष्यते।
शीर्षात् तत्पल्लवानाञ्चैकं हरिष्यामि कोमलं।
उदग्रेऽद्रावतीवोच्चे रोपयिष्यामि च स्वयं॥
२३ इस्रायेलः शिखायाञ्च रोपयिष्यामि तं गिरौ।
भूषितः स ततः पत्रैः फलवांश्च भविष्यति।
वर्द्धित्वैरसवृक्षश्च विशालः सम्भविष्यति॥
तस्याधः सर्व्वजातीया निवत्स्यन्ति च पक्षिणः।
छायायां तस्य शाखानां समवाप्स्यन्ति चाश्रयं॥
२४ नित्यप्रभुरहं प्रांशुं तरुं क्षुद्रीकरोमि यत्।
क्षुद्रकाण्डस्तु यो वृक्षस्तं यदुच्चीकरोम्यहं॥
रसपूर्णश्च यो वृक्षस्तं यत् संशोषयाम्यहं।

शुष्को यस्तु तरुस्तं यद् विदधामि सपल्लवं॥
क्षेत्रस्थास्तरवः सर्व्व परिज्ञास्यन्ति तत् तदा।
अहं सदाप्रभु र्वच्मि साधयिष्याम्यहञ्च तत्॥

---

१८ अष्टादशोऽध्यायः।

१ अम्लद्राक्षाफलदृष्टान्तः ५ धार्म्मिकतातेन सार्द्धम् ईश्वरस्य व्यवहारः १० धार्म्मिकतातस्य दुष्टसुतेन सममीश्वरस्य व्यवहारः १४ पापिष्ठपितु र्धार्म्मिकसुतेन सममीश्वरस्य व्यवहारः १९ अनुतापिपापिना धर्म्मत्यागिधार्म्मिकेण च सममीश्वरस्य व्यवहारः २५ परमेश्वरस्य न्यायकरणं मनःपरावर्त्तनाय लोकाह्वानञ्च।

अपरं सदाप्रभोरेतद् वाक्यं मां प्रति प्रादुर्बभूव, युष्माकं किमभूत्? १,२
जनकैरम्लमृद्वीनां भोगाज्जीर्णरदाः सुताः।
प्रवादोऽयं इस्रायेल्देशे युष्माभि र्व्याक्रियते। प्रभुः सदाप्रभुराह, ३
यद्यहं जीवामि तर्ह्येतस्य प्रवादस्य व्यवहारो युष्माभिरिस्रायेलो मध्ये
पुन र्न कर्त्तव्यः। पश्यत सर्व्वे प्राणा ममैव सन्ति। यथा पितुः प्राणास्तथा ४
पुत्त्रस्य प्राणा ममैव सन्ति। यः प्राणी पापं कुर्य्यात् स एव मरिष्यति।

यो नरो धार्म्मिको भवति, न्यायं धर्म्मञ्चाचरति, पर्व्वतेष्वाहारं न ५
करोति, इस्रायेल्कुलस्य गर्हणीयदेवप्रतिमा उद्दिश्य दृक्पातं न करो- ६
ति स्वसमीपवासिनो भार्य्यां न दूषयति, अशुचिं योषितं नोपगच्छति,
कमपि न पीडयति ऋणार्थं न्यस्तम् आधिं प्रतियच्छति कस्यापि द्रव्यं ७
नापहरति स्वभक्ष्यं बुभुक्षवे ददाति नग्नं वस्त्रेणाच्छादयति, कुसीदायार्थं ८
न ददाति, वृद्धिं न गृह्लाति स्वहस्तमन्यायान्निवर्त्तयति, वादिप्रतिवादि-
नो र्मध्ये यथार्थं विचारं करोति, मम विधीन् पालयति सत्यमाचरितुं ९
मम विचारसूत्राणि रक्षति च स एव धार्म्मिकः, सोऽवश्यं जीविष्यतीति प्रभुः सदाप्रभुराह।

तस्य य आत्मज आततायी रक्तपातको वा भवति परं प्रति पूर्व्वोक्तं १०
कमप्यपराधं करोति पूर्व्वोक्तं वा कमपि सदाचारं न करोति परन्तु पर्व्व- ११
तेष्वप्याहारं करोति स्वसमीपवासिनो भार्य्यां दूषयति, दुःखिनं दरि- १२
द्रञ्च पीडयति परस्य द्रव्यमपहरति, न्यस्तम् आधिं न प्रतियच्छति गर्ह-
णीयदेवप्रतिमासु दृक्पातं कुरुते घृणार्हक्रिया आचरति कुसीदायार्थं १३
ददाति वृद्धिं गृह्लीते च स किं जीविष्यति? स नैव जीविष्यति स

सर्व्वा एता घृणार्हक्रियाः कृतवान्, सोऽवश्यं मरिष्यति, तस्य रक्तपा-
तापराधस्तस्यैव मूर्ध्नि वर्त्तिष्यते।
१४ पुनस्तस्य य आत्मजः स्वजनकेन कृतं सर्व्वपापं दृष्ट्वा बिभेति तदनुरूप-
१५ माचारं न करोति, पर्व्वतेष्वाहारं न करोति, इस्रायेल्कुलस्य गर्हणीयदे-
१६ वप्रतिमासु दृक्पातं न कुरुते स्वसमीपवासिनो भार्य्यां न दूषयति, कमपि
न पीडयति न्यस्तम् आधिम् आत्मसान्न कुरुते परद्रव्यं नापहरति स्व-
१७ भक्ष्यं बुभुक्षवे ददाति नग्नञ्च वस्त्रेणाच्छादयति, दीनपीडनात् स्वहस्तं नि-
वर्त्तयति कुसीदं वृद्धिं वा न गृह्णाति मम विचारसूत्राण्याचरति मम वि-
धीन् पालयति च, स निजपितुरपराधान्न मरिष्यति सोऽवश्यं जीविष्य-
१८ ति। तस्य पिता दौरात्म्यम् आचरितवान् भ्रातुर्द्रव्यम् अपहृतवान् स्व-
जातीयजनानां मध्ये चासत्क्रियाः कृतवान्, ततो हेतोः पश्य निजापरा-
धात् स मृतः।
१९ तथापि यूयं वदथ, पुत्रः किमर्थं पितुरपराधान्न मृत इति। स पुत्रो
न्यायं धर्म्मञ्चाचरितवान् मम सर्व्वान् विधीन् रक्षितवान् आचरितवां-
२० श्च सोऽवश्यं जीविष्यति। यः प्राणी पापं करोति स एव मरिष्यति। पि-
तुरपराधः पुत्रेण न भोक्ष्यते, पुत्रस्यापराधो वा पित्रा न भोक्ष्यते। धा-
र्म्मिकस्य या धार्म्मिकता सा तस्मिन्नेव वर्त्तिष्यते, दुष्टस्य च या दुष्टता सा
२१ तस्मिन्नेव वर्त्तिष्यते। दुष्टो जनोऽपि चेत् स्वकृतेभ्यः सर्व्वपापेभ्यः प्रत्यावृत्य
मम सर्व्वविधीन् पालयेत्, न्यायं धर्म्मञ्चाचरेत् तर्ह्यवश्यं जीविष्यति नैव
२२ मरिष्यति। तेन कृतानि सर्व्वाण्यधर्म्मकर्म्माणि न स्मारिष्यन्ते स स्वकृत-
२३ धार्म्मिकतया जीविष्यति। प्रभुः सदाप्रभुराह, दुष्टजनस्य मरणे किं कथ-
ञ्चिदहं प्रीये? किं न तस्य स्वमार्गात् प्रत्यावर्त्तने जीवने चैव प्रीये?
२४ परन्तु धार्म्मिको जनो यदि स्वधर्म्मतः प्रत्यावृत्यान्यायकारी भूत्वा दुर्जन-
कृतानां घृणार्हक्रियाणाम् अनुरूपमाचारं कुर्य्यात् तर्हि स किं जीवि-
ष्यति? तेन कृताः सर्व्वा धर्म्मक्रिया न स्मारिष्यन्ते, स यद् औचित्य-
लङ्घनं यानि च पापानि कृतवान् तेषामेव हेतुना मरिष्यति।
२५ यूयन्तु वदथ, प्रभो र्मार्गो न समान इति। भो इस्रायेलः कुल, यूयं
२६ शृणुत, मम मार्गः किमसमानः? युष्माकं वा मार्गः किमसमान? धा-
र्म्मिको जनः स्वधर्म्मतः परावृत्यान्यायकारी भूत्वा च तत्र चेन्म्रियेत तर्हि
२७ स्वकृतान्यायस्य हेतुनैव स म्रियते। दुष्टश्च जनः स्वकृतदुष्टतातः
परावृत्य चेन्न्यायं धर्म्मञ्चाचरेत् तर्हि स निजप्राणान् जीवयिष्यति।

स समालोच्य स्वकृतेभ्यः सर्व्वेभ्योऽधर्म्मकर्म्मभ्यः प्रत्यावृत्तः, तस्मात् २८
जीविष्यति नैव मरिष्यति। तथापीस्रायेलः कुलेन गद्यते प्रभो र्मार्गो २९
न समान इति। भो इस्रायेल्कुल, मम मार्गः किमसमानः? युष्माकं वा
मार्गः किम् असमानः? अतो हेतोः प्रभुः सदाप्रभुराह, भो इस्रायेल: ३०
कुल, अहमेकैकस्य जनस्याचारानुसाराद् युष्माकं विचारं विधास्ये, अतः
प्रत्यावर्त्तध्वं, निजसर्व्वाधर्म्मात् प्रत्यावर्त्तध्वं तथा कृते युष्माकम् अपराध-
जनकं विघ्नं न सम्भविष्यति। यूयं येनाधर्म्मिणो जाता युष्माकं तं सर्व्वम् ३१
अधर्म्मं स्वतो दूरम् अपास्यत नूतनमन्तःकरणं नूतनमात्मानञ्च स्वार्थं
सम्पादयत। भो इस्रायेलः कुल, किमर्थं यूयं म्रियेध्वं? यतः प्रभुः सदा- ३२
प्रभुराह, म्रियमाणस्य मरणेऽहं न प्रीये, तस्माद् यूयं प्रत्यावर्त्तध्वं तेन
जीविष्यथ।

---

१९ ऊनविंशोऽध्यायः।

१ सिंहीधरणदृष्टान्त इस्रायेलोऽधिपानां विलापः १० द्राक्षालताया दृष्टान्तश्च।

अथ त्वम् इस्रायेलोऽध्यक्षान् उद्दिश्य विलापगीतं व्याहर। त्वं वद, १

माता का तव सिंही सा सिंहीनां मध्यशायिनी। २
सा मध्ये युवसिंहानां निजापत्यान्यवर्धयत्॥
एकस्तद्वर्धितः शावो युवसिंहोऽभवद् यदा। ३
पशुदारणमभ्यास्यत् नरांश्चाभक्षयत् तदा॥
तद्वार्त्तां जातिभिः श्रुत्वा गर्त्ते तेषामधारि सः। ४
वलयै र्यन्त्रितस्तैश्च निन्ये मिसरनीवृतं॥
प्रतिपाल्य तु सा स्वाशां यदा नष्टां समैक्षत। ५
तदान्यं शावमादाय युवसिंहं न्ययोजयत्॥
सिंहीनां मध्यचारी स युवसिंहोऽभवद् यदा। ६
पशुदारणमभ्यास्यत् नरांश्चाभक्षयत् तदा॥
उपायत् विधवास्तेषां नगराणि व्यनाशयत्। ७
स्वहुङ्कारस्य शब्देन ससर्व्वाह्वाच्छिणोद्भुवं॥
नानादेशात् तमाक्रम्य चतुर्द्दिक्स्थितजातिभिः। ८
जाले तस्योपरि क्षिप्ते गर्त्ते तेषामधारि सः॥
अपरं वलयै र्बद्धो वीतंसे निहितश्च तैः। ९
अपनिन्ये विदेशं स बाबिल्राजस्य सन्निधिं॥

इस्रायलो गिरीणाञ्च नैव कुत्रापि तद्रवः।
श्रूयतामिति तैरुक्ता स दुर्गाणि प्रवेशितः॥
१० त्वन्माता तव कल्याण आसीद् द्राक्षालता यथा।
रोपिता वारिणः पार्श्वे बारिबाहुल्यतश्च सा।
फलयुक्ताभवत् तत्र शाखाभिश्च विभूषिता॥
११ सुदृढा विटपास्तस्या अभवन् राजयष्टयः।
उच्चत्वाद् दीर्घता तस्या मेघस्पर्शिन्यजायत।
उच्चत्वे पल्लवानाञ्च बाहुल्ये सा व्यराजत॥
१२ कोपेनोत्पाटिता सा तु भूतले च निपातिता।
सकलञ्च फलं तस्याः शोषितं पूर्व्ववायुना।
विटपाश्च दृढाश्छिन्नाः शुष्का अनलभक्षिताः॥
१३ मरौ सा रोपितेदानीं शुष्के तृष्णातुरे स्थले॥
१४ तच्छाखाकाण्डतो वह्निः निर्गत्यात्ति च तत्फलं।
नास्त्येको विटपस्तस्याम् आदेयो राजयष्टये॥
विलापस्यैव गीतं तद् विलापाय च सिध्यति॥

---

२० विंशोऽध्यायः।

१ इस्रायेलः प्राचीनजनैः परमेश्वरस्याप्रष्टव्यता ४ मिसरि तेषामाज्ञालङ्घनं १० प्रान्तर आज्ञालङ्घनं २७ किनानदेश आज्ञालङ्घनं ३२ पुनरपि स्वदेशे तेषां संग्रहणञ्च।

१ अपरं सप्तमवर्षस्य पञ्चममासस्य दशमदिने इस्रायेलः प्राचीनवर्गस्य
२ केचिन्नराः सदाप्रभुं प्रष्टुम् आगत्य मत्समक्षम् उपविविशुः। ततः सदा-
३ प्रभो र्वाक्यं मां प्रति प्रादुर्बभूव, यथा, भो नरसन्तान, त्वम् इस्राये-
लस्तान् प्राचीननरान् आलप तांश्च वद, प्रभुः सदाप्रभुरित्थम् आह यूयं
किं मां प्रष्टुमागताः? यद्यहं जीवामि तर्हि युष्माभि र्न प्रष्टव्योऽहम् इति
४ प्रभुः सदाप्रभुराह। त्वं किं तेषां विचारं करिष्यसि? भो नरसन्तान,
किं विचारं करिष्यसि? तर्हि तेषां पूर्व्वपुरुषाणां गर्हणीयक्रियास्तान्
५ ज्ञापय। तांश्च वद, प्रभुः सदाप्रभुरित्थमाह,

इस्रायेलं पुरा यस्मिन् दिवसेऽहं वरीतवान्।
याकोबस्य च वंशाय शपथम् उच्छ्रितवान् करं।

मिसर्देशे च मज्ज्ञानं स्वयं तेभ्यः प्रदत्तवान्॥
योऽहं सदाप्रभुः सोऽहम् अस्मि युष्माकमीश्वरः।
एतत् तेभ्यः प्रतिश्रोतुं शपथंश्चोच्छ्रितवान् करं॥
प्रत्यश्रौष दिने तस्मिंस्तेभ्य उच्छ्रितपाणिना। ६
अहं युष्मान् मिसर्देशाद् युष्मदर्थे गवेषितं।
आनेष्याम्यपरं देशं दुग्धमधुप्रवाहिनं।
देशानां सकलानाञ्च मध्ये रत्नं मनोहरं॥
तांश्चावोचं स्वनेत्राणाम् इष्टमूर्त्तीरपास्यत। ७
मात्मानं कुरुताशुद्धं मिसरो घृण्यविग्रहैः।
योऽहं नित्यप्रभुः सोऽहम् अस्मि युष्माकमीश्वरः॥
ते तु मद्द्रोहिणो जाताः श्रोतुं नैच्छन् वचो मम। ८
नैव तैः स्वीयनेत्राणाम् अपास्यन्तेष्टमूर्त्तयः।
नैव वा ते व्यहीयन्त मिसरो देवविग्रहाः॥
तदावोचं मम क्रोधं मिसर्देशस्य मध्यतः।
तेष्वहं साधयिष्यामि स्वरोषं तेषु वर्षयन्॥
आचारेण तु मन्नाम्नोऽपेक्षामकरवं तदा। ९
न चेत् ते मज्जना यासां जातीनां मध्यवर्त्तिनः।
मिसर्देशस्य मध्याच्च तान् समुद्धर्त्तुमिच्छया।
यासां साक्षादहं तेभ्यो मम ज्ञानं प्रदत्तवान्।
तासां साक्षादशुद्धं तद् अभविष्यन्न संशयः॥
तानुद्धृत्य मिसर्देशात् प्रान्तरं नीतवांस्ततः॥ १०
मनुष्यः पालनं कुर्व्वन् येषां जीवति हेतुना। ११
मम तानि विधानानि तत्र तेभ्यश्च दत्तवान्।
विचारस्य च सूत्राणि तानि ज्ञापितवांस्तदा॥
योऽहं नित्यप्रभुः सोऽहं यत् तेषामस्मि पावकः। १२
एतज्ज्ञानप्रदानाय मम तेषाञ्च मध्यतः।
चिह्नानीव च तेभ्योऽदां मम विश्रामवासरान्॥
किन्तु मद्द्रोहि सञ्जातम् इस्रायेलः कुलं मरौ। १३
मनुष्यः पालनं कुर्व्वन् तेषां जीवति हेतुना।
तान् विधीन मम नारक्षत् मत्सूत्राणि निराकरोत्।
मम विश्रामवारांश्च सातिशयमदूषयत्॥

अतोऽवोचमहं तेषां संहाराय मरुस्थले।
स्वीयक्रोधानलं तेषां वर्षयिष्यामि मूर्द्धसु॥
१४ आचारेण तु मन्नाम्नोऽपेक्षामकरवं तदा।
न चेत् ते हि मया यासां जातीनाम् अग्र उद्धृताः।
तासां साक्षाद् अशुद्धं तद् अभविष्यन्न संशयः॥
१५ पुनरुच्छ्रितहस्तेन मरौ तानध्यवादिषं।
यं देशं दत्तवांस्तेभ्यो दुग्धमध्वप्रवाहिनं।
देशानां सकलानाञ्च मध्ये रत्नं मनोहरं।
नैव प्रवेशयिष्यामि तं देशं तान् जनानहं॥
१६ मम विचारसूत्राणाम् अवज्ञा तै र्यतः कृता।
मामकोनविधानानि न तैराचरितानि च॥
अपवित्रीकृतास्तैश्च मम विश्रामवासराः।
किन्त्वन्तःकरणं तेषां स्वमूर्त्तीरनुगच्छति॥
१७ आर्द्रदृष्टिस्त्वहं तेषु भूत्वा तान् न व्यनाशयं।
न संहारमकार्षं वा तेषां तत्र मरुस्थले॥
१८ सन्तानांस्तु पुनस्तेषां मरावेतदवादिषं।
स्वतातानां विधानानि यूयं मैवानुतिष्ठत॥
तेषां विचारसूत्राणि यूयं मा परिरक्षत।
मात्मानं कुरुताशुद्धं तेषां वा देवविग्रहैः॥
१९ योऽहं नित्यप्रभुः सोऽहम् अस्मि युष्माकमीश्वरः।
मम यानि विधानानि तान्याचरितुमर्हथ॥
यूयं ममैव सूत्राणि रक्षन्तश्चानुतिष्ठत।
२० मम विश्रामवारांश्च पवित्रीकर्त्तुमर्हथ॥
योऽहं नित्यप्रभुः सोऽहमस्मि युष्माकमीश्वरः।
एतज्ज्ञानाय चिह्नान्यस्माकं मध्ये भवन्तु ते॥
२१ तेषां तु तेऽपि सन्ताना मम विद्रोहिणोऽभवन्।
मनुष्यः पालनं कुर्व्वन् येषां जीवति हेतुना।
मम तानि विधानानि तेऽपि नैव समाचरन्॥
मम तानि च सूत्राणि नानुष्ठातुमपालयन्।
अपवित्रानकुर्व्वंश्च मम विश्रामवासरान्॥
ततोऽवोचं मम क्रोधं प्रान्तरस्यास्य मध्यतः।

तेष्वहं साधयिष्यामि स्वरोषं तेषु वर्षयन्॥
स्वत्वं रुद्धा तु मन्नाम्नोऽपेक्षयाकरवं क्रियां। २२
न चेत् ते हि मया यासां जातीनामग्र उद्धृताः।
तासां साक्षादशुद्धं तद् अभविष्यन्न संशयः॥
पुनरुच्छ्रितहस्तेन मरौ तानध्यवादिषं। २३
जातीनामेव मध्येऽहं विकरीष्यामि तान् जनान्।
सकलेष्वेव देशेषु विक्षेप्स्यामि च धूलिवत्॥
यस्मान्मामकसूत्राणि न समाचरितानि तैः। २४
मामकीनविधानानां तैः निराकरणं कृतं॥
अपवित्रीकृतास्तैश्च मम विश्रामवासराः।
स्वीयपैतृकमूर्त्तीश्च तेऽन्वगच्छन् स्वलोचनैः॥
नैव मङ्गलयुक्ता येऽदां तेभ्यस्तादृशान् विधीन्। २५
मनुष्या यै नं जीवन्ति तादृक्सूत्राणि चाददां॥
मया तेषां विनाशार्थं यदहञ्च सदाप्रभुः। २६
तेभ्यस्तज्ज्ञानदानार्थमहं तेषामुपायनैः।
सर्व्वप्रथमजातानां भस्मना तानदूषयं॥

अतो भो नरसन्तान, त्वम् इस्रायेलः कुलम् आलप, तांश्च वद, प्रभुः २७
सदाप्रभुरित्थमाह, युष्माकं पूर्व्वपुरुषा एतेनापि माम् अधिक्षिप्तवन्तो
यत् ते मां प्रत्यौचित्यम् अलङ्घयन्। यस्य देशस्य दानमहम् उच्छ्रितहस्तेन २८
तेभ्यः प्रतिश्रुतवान् तं देशं तान् आनैषं, ते तु सर्व्वम् उच्चगिरिं सर्व्वं
पर्णमयतरुञ्च निरीक्ष्य तत्र स्वयज्ञान्यकुर्व्वन् तत्र च क्रोधजनकान्
स्वीयोपहारान् न्यवेदयन् तत्र च स्वीयाघ्राणार्थकसुगन्धानस्थापयन् तत्र
च स्वपानीयनैवेद्यानि न्यसिञ्चन्। ततोऽहं तान् अपृच्छं यूयं यत्र गच्छथ २९
तद् उच्चस्थलं किं? तस्माद् अद्यापि तस्योच्चस्थलमिति नाम विद्यते।

अतो हेतोस्त्वम् इस्रायेलः कुलं वद, प्रभुः सदाप्रभुरित्थमाह, यूयं ३०
किं स्वपूर्व्वपुरुषाणां मार्गेणात्माशौचं विधद्ध्वे तेषां घृण्यमूर्त्तीनाम् अनु-
गमनेन च किं व्यभिचारिणो भवथ? स्वीयोपहारान् आनयन्तः स्वीय- ३१
सन्तानान् अग्निना गमयन्तश्च यूयं स्वीयदेवविग्रहैः सर्व्वैरद्य यावद् आ-
त्माशौचं सम्पादयथ, अतो भो इस्रायेलः कुल, युष्माभिः किमहं प्रष्टव्यः?
प्रभुः सदाप्रभुराह, यद्यहं जीवामि तर्हि नाहं युष्माभिः प्रष्टव्यः। युष्माकं ३२
हृदयाकाशे च यदुदेति तद् अर्थतः काष्ठानां प्रस्तराणाञ्चोपासनायै वयं

परजातीयानां विदेशिगोष्ठीनां तुल्या भविष्याम इति यद् वचो यूयं व-
दथ, तन्नैव सेत्स्यति।
३३ प्रभुः सदाप्रभुराह, यद्यहं जीवामि तर्हि बलवता हस्तेन प्रसा-
रितेन बाहुना विस्तावितेन रोषेण चाहं युष्माकम् उपरि राजत्वं
३४ करिष्यामि। युष्मांश्च जनसमूहानां मध्याद् वहिष्करिष्यामि, येषु
च यूयं विकीर्णा वर्त्तध्वे तेषां देशानां मध्याद् बलवता हस्तेन प्रसारि-
३५ तेन बाहुना विस्तावितेन रोषेण च युष्मान् सङ्ग्रहीष्यामि। जनसमू-
हानां प्रान्तरञ्च युष्मान् नीत्वा तत्र प्रत्यक्षीभूय युष्माभिः सह विवदिष्ये।
३६ यथाहं मिसर्देशस्य प्रान्तरे युष्मत्पूर्व्वपुरुषैः सह विवदितवान् तथैव यु-
३७ ष्माभिः सह विवदिष्य इति प्रभुः सदाप्रभुराह। युष्मांश्च यष्टेरधो गम
३८ यिष्यामि नियमस्य यन्त्रणाः प्रवेशयिष्यामि च। मद्विद्रोहिणो मदपरा-
धिनश्च जनान् युष्मत्तः पृथक् करिष्यामि, ते स्वप्रवासदेशान्मया वहि-
ष्कारिष्यन्ते किन्त्विस्रायेलो देशं न प्रवेक्ष्यन्ति, तेनाहं सदाप्रभुरस्मीति
यूयं ज्ञास्यथ।
३९ भो इस्रायेलः कुल, प्रभुः सदाप्रभु र्युष्मान् इदं वदति, यूयं यात
प्रत्येकं स्वदेवमूर्त्तीराराधयत, परन्तु पश्चात् किं न यूयं मम रवे-
ऽवधानं करिष्यथ? तदा स्वीयोपहारैः स्वीयदेवविग्रहैश्च मम पवित्रं
४० नाम न पुनरपवित्रीकरिष्यथ। यतः प्रभुः सदाप्रभुराह, मम पवित्रे
पर्व्वत इस्रायेलः शिखास्वरूपे पर्व्वते कृत्स्नमिस्रायेलः कुलम् अर्थतो
देशे स्थितं तत्साकल्यं मामाराधयिष्यति, तत्राहं तान् अनुग्रहीष्यामि
तत्र च युष्मदीयपवित्रवस्तूनां मध्ये युष्माकम् उत्तोलनीयद्रव्याणि नैवे-
४१ द्यानां प्रथमजातफलानि च लिप्सिष्ये। सौरभाघ्राणेनैवाहं युष्मान् अ-
नुग्रहीष्यामि जनसमूहानां मध्याद् उद्धरिष्यामि येषु देशेषु च यूयं
विकीर्णास्तेभ्यो युष्मान् संग्रहीष्यामि परजातीयानां समक्षं युष्मासु
४२ पवित्रीभविष्यामि च। युष्माकं पूर्व्वपुरुषेभ्यो यस्य देशस्य दानमहमु-
च्छ्रितकरेण प्रतिज्ञातवान् तं देशम् अर्थत इस्रायेलो भूमिं युष्मान् प्रवे-
४३ शयिष्यामि, एतेन यूयं मां सदाप्रभुम् अभिज्ञास्यथ। यैश्च यूयम् आत्मा-
शौचं कृतवन्तो युष्माकं तमाचारं तानि सर्व्वाणि कर्म्माणि च तत्र स्म-
४४ रिष्यथ युष्मत्कृताभिः सर्व्वदुष्क्रियाभि र्युष्माकं बीभत्सा जनिष्यते च। हे
इस्रायेलः कुल, अहञ्च युष्माकं कदाचारस्य युष्माकं भ्रष्टक्रियाणां वानुरूपं
व्यवहारं न कृत्वा मम नाम्न एवापेक्षया युष्माभिः सार्द्धं व्यवहारं

करिष्याम्यनेन यूयं मां सदाप्रभुम् अभिज्ञास्यथ, इयं प्रभोः सदाप्रभोरुक्तिः।

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, त्वं ४५
दक्षिणदिशोऽभिमुखो भव, ग्रीष्मदेशे वाक्यानि वर्षयावाचीनक्षेत्रस्थं का- ४६
ननमुद्दिश्य भावोक्तिं व्याहर। तद् अवाचीनकाननं वद च, त्वं सदाप्रभो ४७
र्वाक्यं शृणु। प्रभुः सदाप्रभुरित्थमाह,

पश्याहं तव मध्येऽग्निम् उद्दीपयितुमुद्यतः।
स त्वन्मध्ये तरूनार्द्रान् सकलान् भक्षयिष्यति॥
स तरून् परिशुष्कांश्च सकलान् भक्षयिष्यति।
उच्छिखा सा शिखा नैव निर्वाणं समवाप्स्यति।
आदक्षिणोत्तरस्माच्च सर्व्वास्यं धक्ष्यते तया॥
योऽहं नित्यप्रभुः सोऽहं वह्निं ज्वालितवान् स्वयं। ४८
तत् सर्व्वो द्रक्ष्यति प्राणी स निर्वाणं न यास्यति॥

तदा मयोक्तं, हा प्रभो सदाप्रभो, पश्य ते मां वदन्ति, असौ किं नो- ४९
पमावचनानि व्याहरतीति।

---

२१ एकविंशोऽध्यायः।

१ यिरूशालममधि यिहिष्केलस्य विलापः ८ तीक्ष्णशाणितखड्गस्य कथनं १८ यिरूशालमो विरुद्धं तदसिप्रेषणं २५ राज्ञो विरुद्धं भाविवाक्यं २८ अम्मोनलोकानां विरुद्धं तदसिप्रेषणञ्च॥

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, त्वं १
यिरूशालममुद्दिश्य स्थिरदृष्टिं कुरुष्व, तस्याः पुण्यस्थानेषु च वर्षय, इ- २
स्रायेलो भूमिमुद्दिश्य भावोक्तिं व्याहर। त्वमिस्रायेलो भूमिं वद, सदा- ३
प्रभुरित्थमाह,

पश्य त्वाम् आक्रमिष्यामि स्वविकोषीकृतासिना।
जनं साधुञ्च दुष्टञ्चोच्छेत्स्यामि तव मध्यतः॥
यस्मात् साधुञ्च दुष्टञ्चोच्छेत्स्यामि तव मध्यतः। ४
तस्मादेव मदीयासिः स्वकोषान्निर्गमिष्यति।
आक्रमिष्यति सर्व्वांश्च जनान् आदक्षिणोत्तरात्॥
अहं नित्यप्रभुः स्वासिं विकोषीकृतवान् स्वयं। ५
तत् सर्व्वो ज्ञास्यति प्राणी स नावर्त्तिष्यते पुनः॥

६ त्वञ्च भो नरसन्तान, निष्ठन कटिभङ्गाय मनस्तापाय च तेषां समक्षं
७ निष्टन। कुतो निष्टनसीति तैः पृष्टो वद च, वार्त्तायाः कारणात्, यतः
सायाति, ततः सर्व्वं हृदयं गलितं सर्व्वं करद्वयञ्च शिथिलं सर्व्व आत्मा
निस्तेजा भवति सर्व्वं जानुद्वयं जलवद् विलीयत च। पश्य सायाति
सिद्धिञ्चाप्नोतीति प्रभुः सदाप्रभुराह।
८ पुनश्च सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान,
९ भावोक्तिं व्याहर, सदाप्रभुरित्थमाहेति वद च। त्वं ब्रूहि,

असिरेकोऽसिरकोऽसौ निशातो मार्जितश्च सः॥
१० हननाय निशातः स द्योतनाय च मार्ज्जितः।
अत्रास्माभिः किमामोदं कृत्वेदं वा गदिष्यते।
मम पुत्रस्य दण्डेन सर्व्वकाष्ठं निराकृतं॥
११ स करेणैव धर्त्तव्यो मार्जनायार्पितस्ततः।
घातकस्य करे देयः शातोऽसि मार्जितश्च सः॥
१२ क्रन्द त्वं नरसन्तान हाहाकारमुदीरय।
स यतो मत्प्रजा हन्तीस्रायेलः सर्व्वनायकान्॥
मत्प्रजाभिः समं तेऽपि पातिता असिसम्मुखं।
ततो हेतोः कराघातः स्वकटौ क्रियतां त्वया॥
१३ परीक्षासिद्ध एवासिस्तस्माचेत् तस्य सम्मुखे।
निराकारी स दण्डोऽपि न सिध्येत् तत् किमद्भुतं।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
१४ त्वञ्च भो नरसन्तान भाववाक्यमुदीरय।
तलतालं कुरुष्व त्वं त्रिगुणः स भवत्वसिः॥
वध्यानां घातकोऽसिः स वध्यस्यैव गुरोरसिः।
स एवासि मनुष्याणां परितः परिवर्त्तते॥
१५ यथा चित्तं विलीयेत विघ्नानि स्यु र्बहूनि च।
तथा सर्व्वपुरद्वारे हन्तासिः स्थापितो मया।
हा सृष्टो द्योतनार्थं स आकृष्टो हननाय च॥
१६ भव दक्षिण एकाग्रः सव्यां लक्षय वा दिशं।
यत्र धारा नियुक्ता ते तत्र वर्त्तितुमर्हसि॥
१७ तलतालं करिष्येऽहम् अमर्षं शमयन् निजं।
वचनं व्याहरामीदम् अहं नित्यप्रभुः स्वयं॥

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, १८
त्वं बाबिलीयराजस्यासेरागमनार्थं द्वौ मार्गौ रचय तावुभावेकस्माद् १९
देशान्निर्गच्छतां। त्वञ्च करस्याकृतिं तक्ष, नगरगामिमार्गस्य मूर्द्धि तां
तक्ष। अम्मोनवंशीयानां रब्बापुर्य्यां यिहूदादेशे चार्थतो दृढे यिरूशा- २०
लम्यसेरागमनार्थं मार्गौ रचय। यतो बाबिलीयराजो मार्गस्य सङ्गम- २१
स्थाने मार्गद्वयस्य मूर्द्धि मन्त्रपाठार्थम् अवस्थितः। स शरान् सञ्चालि-
तवान् ठक्कुरान् पृष्टवान् यकृतं निरीक्षितवांश्चास्ति। मन्त्रेण दक्षिण- २२
दिक् निर्द्दिश्यते, यिरूशालम, तत्र प्राचीरभेदकयन्त्राणि स्थाप्यन्तां
हत्यायै वक्त्रं व्यात्तीक्रियतां सिंहनादायोच्चरव उदीर्य्यतां पुरद्वाराणां
विरुद्धं भेदकयन्त्राणि स्थाप्यन्तां मृण्मयसेतु र्निचीयताम् अवरोधार्थको-
च्चगृहं निर्म्मीयतामिति। स तु मन्त्रपाठस्तैरलीको मन्यते यतस्ते शप- २३
थानां शपथान् लब्धवन्तः, ईश्वरस्तु तान् धरिष्यन्नपराधं स्मारयिष्यति।
तस्मात् प्रभुः सदाप्रभुरित्थमाह, २४

कृतत्वे युष्माकमाचारे पापप्रदर्शनाय हि।
स्वीयाधर्म्मप्रकाशेन स्मारयन्तः स्वदुष्कृतं।
यूयं यस्मात् स्मृतास्तस्माद् हस्तग्रस्ता भविष्यथ॥
त्वञ्च हन्तव्य दुष्टात्मन् इस्रायेलो नराधिप। २५
अन्तकाघस्य काले हि समायास्यति ते दिनं॥
प्रभु र्नित्यप्रभु र्ब्रूत उष्णीषोऽप्यपसार्य्यतां। २६
क्रियतां मुकुटञ्चापि यच्च यद् तन्न तद् भवेत्।
यद् ह्रस्व तद् भवेदुच्चम् उच्चं ह्रस्वीभवेत् तथा॥
विपर्य्यासं विपर्य्यासं विपर्य्यासं करोम्यहं। २७
विचारस्याधिकारी यः स यावन्नागमिष्यति।
तावत् किञ्चन न स्थायि तस्मै दास्यामि तं तदा॥

त्वञ्च भो नरसन्तान, भावोक्तिं व्याहर वद च, अम्मानवंशीयानधि २८
तेषाम् अवमानवाक्यानि चाधि प्रभुः सदाप्रभुरित्थमाह, त्वं ब्रूहि,

असिरेकोऽसिरेकोऽसौ हननाय विकोषितः।
निःशेषग्रसनार्थं स द्योतनाय च मार्ज्जितः॥
अलीकं दर्शनं यावत् त्वदर्थं क्रियते जनैः। २९
अनृतो मन्त्रपाठश्च त्वत्कृते तै र्विधीयते॥
तावत् कालेऽन्तकाघस्य दिनं येषामुपागतं।

हतानां पापिनां तेषां कण्ठेषु त्वां स योच्यति ॥
१० पुनः स्थापय तं कोषे यस्मात् सृष्टिस्थले तव।
त्वदीयोत्पत्तिदेशेऽहं विधास्ये शासनं तव ॥
२१ स्वकोपं वर्षयिष्यामि तदानीञ्च तवोपरि।
फूत्कारञ्च करिष्यामि त्वयि स्वक्रोधवह्निना ॥
नृणाम् अग्निस्वरूपाणां विनाशस्यैव शिल्पिनां।
करमध्ये तदानीं त्वाम् अर्पयिष्यामि निश्चितं ॥
३२ अनलस्यैव वस्तु त्वं भक्षणीयं भविष्यसि।
तव रक्तञ्च भूमध्ये तिरोधानं गमिष्यति।
नानुस्मारिष्यसे त्वञ्चेत्यहं वच्मि सदाप्रभुः ॥

२२ द्वाविंशोऽध्यायः।

१ यिरूशालमः पापनिर्णयः १३ दण्डनिर्णयः १७ तन्मालिन्यपरिष्कारणकथन २३ भाववादियाजकराजप्रजानां दोषनिर्णयश्च।

१ अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, त्वं
२ किं विचारं करिष्यसि ? तस्या रक्तपातिपुर्य्या विचारं किं करिष्यसि ?
३ तर्हि तस्याः सर्व्वा गर्हणीयक्रियास्तां ज्ञापय। ताञ्च वद, प्रभुः सदाप्रभुरित्यमाह,

स्वकालानयनाय त्वं स्वमध्ये रक्तपातिनी।
अशौचाय निजार्थञ्च मूर्त्तीनां शिल्पिनी पुरी ॥
४ स्वीयपातितरक्तेन त्वं सञ्जातापराधिनी।
अशुचिस्त्वञ्च जातासि स्वीयनिर्म्मितमूर्त्तिभिः ॥
स्वदिनान्तस्त्वयानीतस्त्वं वयोऽन्त उपस्थिता।
जातिभिस्त्वामवज्ञेयाम् अहं तस्मान्नियुक्तवान्।
विद्रूपस्यास्पदञ्चैव सर्व्वदेशनिवासिनां ॥
५ ये देशास्त्वत्समीपस्थास्त्वत्तो वा दूरवर्त्तिनः।
त्वद्विद्रूपं करिष्यन्ति मनुष्यास्तन्निवासिनः।
त्वमशुच्यभिधानासि विघ्नवैश्च महाधना ॥
६ पश्य शोणितपाताय स्वीयशक्त्यनुसारिणः।
वर्त्तन्ते तव मध्ये हीस्रायेलो नायकाः जनाः ॥

मातापित्रोरवज्ञानं त्वन्मध्ये क्रियते जनैः। ७
विदेशीयेषु दौरात्म्यं तव मध्ये विधीयते।
पीड्यन्तेऽनाथबालाश्च विधवाश्च स्त्रियस्त्वयि॥
अवज्ञेयानि मन्यन्ते पुण्यवस्तूनि मे त्वया। ८
अपवित्रीक्रियन्ते च मम विश्रामवासराः॥
रक्तपाताय वर्त्तन्ते त्वन्मध्ये परिवादिनः। ९
पर्व्वतोपरि चाहारं त्वन्मध्ये कुर्व्वते जनाः।
तव मध्ये कुकर्म्माणि मनुष्या आचरन्ति च॥
विमात्रा सह दुष्कर्म्म त्वन्मध्ये केऽपि कुर्व्वते। १०
त्वन्मध्ये चोपगच्छन्त्यशुचिं पुष्पवतीं स्त्रियं॥
मित्रपत्न्या समं कश्चित् घृणकर्म्म करोति च। ११
दुष्कृतेनापरः कश्चिन्निजां दूषयति स्नुषां।
स्वपितु र्वात्मजां यामीं कोऽप्याधर्षयति त्वयि॥
रक्तपातार्थमुत्कोचस्त्वन्मध्ये गृह्यते जनैः। १२
कुसीदस्यापि वृद्धेश्च ग्रहणं क्रियते त्वया॥
मित्रं मुष्णासि दुर्वृत्त्या माञ्च विस्मृतवत्यसि।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
लाभे त्वया कृते पश्य करतालं करोम्यहं। १३
पातिते च त्वया रक्ते विद्यमाने तवान्तरे॥
अहं यावत् त्वया सार्द्धं विदधामि विचारणं। १४
तावत् किं ते स्थिरं चित्तं दृढं वा ते करद्वयं।
अहं नित्यप्रभु र्वच्मि साधयिष्याम्यहं तथा॥
जातीनामेव मध्ये त्वां विकरीष्याम्यहं स्वयं। १५
सकलेषु च देशेषु त्वां विक्षेप्स्यामि धूलिवत्।
तवाशौचञ्च निःशेषं हरिष्यामि त्वदग्रतः॥
जातीनाञ्च समक्षं त्वं सञ्जातास्यात्मदूषिता। १६
अहं नित्यप्रभुस्त्वस्मि तद् विज्ञायिष्यते त्वया॥

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभुत्, यथा, भो नरसन्तान, १७
इस्रायेलः कुलं मम दृष्टौ धातुभस्म जातं। तत्साकल्यं मूषाया मध्ये १८
ताम्रत्रपुलोहसीसकं जातं ते रौप्यभस्मनि परिणताः। अतः प्रभुः सदा- १९
प्रभुरित्यमाह, सर्व्वे यूयं धातुभस्मनि परिणतास्तस्मात् पश्यताहं युष्मान्

२० सङ्गृह्य यिरूशालमो मध्ये निधास्यामि। विद्रावाय फूत्कारार्थं मूषाया
मध्ये निहितं रूप्यताम्रलोहसीसकत्रपूणां सङ्ग्रहमिवाहं स्वकोपेन
२१ स्वरोषेण च युष्मान् सङ्ग्रहीष्यामि निधाय विलापयिष्यामि च। युष्मान्
सञ्चित्य स्वीयकोपाग्निना युष्मासु फूत्कारं कृत्वा तस्या मध्ये विलापयि-
२२ ष्यामि च। मूषाया मध्ये यथा रूप्यं विलाप्यते तथा यूयं तस्या मध्ये
विलापयिष्यध्वे, इत्थञ्च यदाहं युष्मासु स्वरोषं वर्षयिष्यामि तदाहं
यत् सदाप्रभुरस्मि तद् यूयम् अभिज्ञास्यथ।
२३ पुनश्च सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान,
२४ त्वं तां वद,

त्वं क्रोधस्य दिने भूमि र्धौत्या वृष्ट्या च वर्ज्जिता।
२५ द्रोहिणः सन्ति तन्मध्ये तस्या भावप्रचारकाः॥
सिंहो गर्जनकारी च मृगं यद्वद् विदारयेत्।
तद्वत् प्राणान् ग्रसन्ते तेऽर्थं मणींश्च हरन्ति च।
तन्मध्ये विधवानाञ्च संख्यां संवर्धयन्ति ते॥
२६ क्रियते याजकैस्तस्या मम शास्त्रस्य लङ्घनं।
अपवित्रीक्रियन्ते तै र्मम पुण्यस्थलानि च॥
तैः पवित्रापवित्राणां प्रभेदोऽपि न मन्यते।
न शौचाशौचयो र्मध्ये ज्ञाप्यते च विवेचनं॥
मम विश्रामवारेभ्यस्तैः स्वदृष्टि र्निवर्त्यते।
इत्थमभ्यन्तरे तेषाम् अपवित्रीकृतोऽस्म्यहं॥
२७ लाभार्थं रक्तपातेन प्राणविध्वंसनेन च।
तन्मध्यवर्त्तिनोऽध्यक्षा वृकैस्तुल्या जनाशनैः॥
२८ कुलेपेनोपलिम्पन्ति तांस्तस्या भाववादिनः।
दृष्ट्वालीकं कृते तेषां मिथ्यामन्त्रान् पठन्ति च॥
मयि नित्यप्रभौ किञ्चिद् वचनं नोक्तवत्यपि।
प्रभु र्नित्यप्रभुः प्राहेति वाक्यं ते वदन्ति च॥
२९ दौरात्म्यं दस्युवृत्तिञ्च कुर्व्वते प्राकृतप्रजाः।
दुःखिनश्च दरिद्रांश्च मनुष्यान् पीडयन्ति ते।
विदेशीयेषु दौरात्म्यम् अन्यायेनाचरन्ति च॥
३० भग्ने र्नाशनिवाराय प्राकारं निर्म्मिमीत यः।
छिद्रमध्ये कृते तस्या उत्तिष्ठेच्च मदग्रतः।

तेषां मध्येऽहमन्विष्य नाप्नवांस्तादृशं नरं॥
निजक्रोधमहं तस्मात् तेषु वर्षितुमुद्यतः। ३१
तान् निःशेषीकरिष्यामि स्वीयकोपानलेन च॥
आचारस्य फलं तेषां प्रदास्यामि च मूर्धसु।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥

---

२३ त्रयोविंशोऽध्यायः।

१ अहलाया व्यभिचारकर्म्म ११ अहलीवाया व्यभिचारकर्म्म २१ प्रेमकारिभिरहलीबायाः क्लेशः ३६ उभयो र्भर्त्सना ४५ उभयो र्दण्डश्च।

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, १
एकस्या मातुस्तनुजे द्वे स्त्रियावास्तां। ते मिसरि व्यभिचारम् अकुर्व्वातां २
स्वतारुण्यकाले व्यभिचारम् अकुर्व्वातां, तत्र जनास्तयोस्तनान् अपीडयं-
स्तयोः कौमार्य्यकुचांश्च समकोचन्। तयो र्ज्येष्ठाया नामधेयमहला ४
(निजावासा), तत्स्वसुश्च नामधेयमहलीबा (मदावाससम्बलिता)।
अपरं ते ममाभूतां पुत्त्रान् पुत्त्रीश्च प्रासवतां। तयो र्नामनीमे, शोमि-
रोनहला, यिरूशालम् चाहलीबा।
अहला मदधीना सत्यपि व्यभिचारं कृत्वा स्वप्रेमकारिषु नेदिष्ठेष्वश्शू- ५
रीयेष्वनुरक्ताभवत्। ते नीलाम्बरा देशाधिपा नायकाः सर्व्वे कान्त्योत्कृष्टा ६
हयारूढा योद्धारः। सा तेभ्यः स्वव्यभिचारं न्यवेदयत्, अश्शूरीयसन्ता- ७
नानां मध्ये ते सर्व्व उत्कृष्टाः। सा येष्वनुरक्ताभवत् तैस्तेषां सर्व्वेषां सर्व्व-
देवविग्रहैश्च दूषिताभवत्। मिसरदेश आरब्धं स्वव्यभिचारमपि सा ८
नात्याक्षीत् यतस्तस्यास्तारुण्यकाले ते जनास्ताम् उपगतवन्तस्तस्याः कौ-
मार्य्यकुचौ कोचितवन्तस्तस्यां स्वव्यभिचारं निषिक्तवन्तश्च। ततो हेतोः ९
सा स्वप्रेमकारिणाम् अर्थतो येष्वश्शूरीयसन्तानेषु सानुरक्ताभवत् तेषां
करेषु मया समर्पिता। ते तस्या लज्जाम् अनावृतां कृत्वा, तस्याः १०
पुत्त्रान् पुत्त्रीश्चापानैषुस्ताञ्चासिनाबधिषुः, ततः सा स्त्रीणां वाच्याभवत्,
इत्थं तस्या विचारनिर्णयोऽकारि।
तस्या भगिन्यहलीबा तद् दृष्ट्वा तस्याः कामजन्यानुरागतोऽप्यधिकम् ११
अनुरागं स्वस्य व्यभिचारादप्यधिकव्यभिचारञ्च कृत्वाधिकभ्रष्टाभूत्।
साश्शूरीयसन्तानेष्वनुरक्ताभवत्। ते देशाधिपा नायका नेदिष्ठा अनु- १२

१३ यमपरिच्छदान्विता हयारूढयोद्धारः सर्व्वे कान्त्योत्कृष्टाः । ततः सा
१४ दूषिताभूत् तयोरुभयोरेका गतिरिति मयादर्शि । पुनश्च सा स्वव्यभि-
१५ चारम् अवर्धयत् । सा कुड्ये लिखितान् पुरुषान् अर्थतः कटिबन्धनै
र्बद्धकटीनां लम्बमानै रञ्जितशिरस्त्रै र्बद्धमस्तकानां कल्दीयनराणां
सिन्दूरेण लिखिताः प्रतिमूर्त्तीरदर्शत्, तेषां सर्व्वेषां रथिनामिवाकृतिः,
कल्दीयदेशो येषां जन्मभूमिस्तादृशानां बाबिलीयसन्तानानामिव रूप-
१६ ञ्चासीत् । सा च तस्मात् स्वदृष्टिपथारूढदर्शनात् तेष्वनुरक्ता भूत्वा
१७ कल्दीयदेशे तेषां सन्निधिं दूतान् प्राहिणोत् । ततस्ते बाबिलीयसन्ता-
नाः कामजन्यशयनार्थं तस्याः समीपं प्रविश्य स्वव्यभिचारेण ताम्
१८ अदूषयन्, तैस्तु दूषितायास्तस्यास्तेषु बीभत्सो जातः । इत्थं तया स्वव्य-
भिचारे प्रकाशिते स्वलज्जायाम् अनावृतीकृतायाञ्च यथा तस्या भगिन्यां
१९ तथा तस्यामपि मम बीभत्सो जातः । पुनश्च सा स्वव्यभिचारं बर्धयन्ती
२० मिसरदेशे व्यभिचारेण यापितं स्वतारुण्यकालम् अस्मारीत्, येषाञ्च
गर्द्दभाणामिव मांसम् अश्वानामिव रेतःपातश्चास्ति तेषु तत्रत्येषु जारे-
ष्वनुरक्ताभूत् ।
२१ इत्थं तव तारुण्यस्तनयो र्हेतुना यदा मिश्रीयजनैस्तव कुचौ सम-
२२ कुच्येतां तस्य स्वीयतारुण्यकालस्य कुकर्म्म त्वं लक्षितवती । अतो हेतो
र्भो अहलीबे, तव येषु प्रेमकारिषु तव बीभत्सो जातस्तानहं त्वत्प्राति-
२३ कूल्येन जागरयित्वा चतुर्द्दिग्भ्यस्त्वद्विरुद्धम् आनेष्यामि । बाबिलीय-
सन्ताना अधिपतयः श्रीलाः कुलीनाः सर्व्वे कल्दीयास्तेषां सङ्गिनो-
ऽश्वरीयसन्तानाश्च आगमिष्यन्ति, ते सर्व्वे कान्त्योत्कृष्टा देशाधिपा ना-
२४ यका रथिनः प्रसिद्धाः सर्व्वे च हयारूढाः । आयुधरथचक्रै र्जाति-
समाजेन च ते त्वद्विरुद्धम् आयास्यन्ति फलकचर्म्मशिरस्त्राणि त्वद्विरुद्धं
परितो रचयिष्यन्ति च, ततोऽहं तेषु विचारं समर्पयिष्यामि ते च
२५ स्वशासनानुरूपेण तव विचारं विधास्यन्ति । अहञ्च त्वयि निजेर्ष्यां
प्रयोक्ष्ये ततस्ते त्वां प्रति कोपाचारं करिष्यन्ति तव नासिकां कर्णद्वयञ्च
छेत्स्यन्ति तव शेषश्चासिना पतिष्यति । ते तव पुत्त्रान् पुत्त्रीश्चापनेष्यन्ति
२६ तव शेषश्च वह्निना भक्षयिष्यते । ते त्वां विवस्त्रां करिष्यन्ति तव शोभा-
२७ र्थकाभरणानि हरिष्यन्ति च । इत्थमहं तव कुकर्म्म मिसरदेश आ-
रब्धं व्यभिचारञ्च त्वत्तो निवर्त्तयिष्यामि त्वं तान् जनान् उद्दिश्य पुन-
२८ र्दृष्टिपातं न करिष्यसि मिस्रीयनरांश्च पुन र्न स्मरिष्यसि । यतः प्रभुः

सदाप्रभुरित्थमाह, पश्य त्वं यान् गर्हसे येषु च तव बीभत्सो जातस्तेषां
करेषु मया समर्पयिष्यसे। ते च त्वां प्रति घृणामाचरिष्यन्ति तवोपा- २९
र्ज्जितं धनं हरिष्यन्ति त्वाञ्च विवस्त्रां नग्नाञ्च विहास्यन्ति तेन तव
व्यभिचारस्य लज्जा तव कुकर्म्म तव वेश्यावृत्तिश्च साकल्यम् अनावृतं
भविष्यति। त्वं परजातीयान् अनुगच्छन्ती व्यभिचारम् अकरोस्तेषां ३०
विग्रहैरात्मदूषिताभवश्च, तस्मादेव कारणात् त्वां प्रति सर्व्वमेतत् कारि-
ष्यते। त्वं निजस्वसुः पथा गच्छसि तस्मादहं तस्याः पानपात्रं तव हस्ते ३१
दास्यामि। प्रभुः सदाप्रभुरित्थमाह, त्वं निजस्वसु र्गम्भीरे विशाले च ३२
पानपात्रे पास्यसि। तत् तवोपहासविद्रूपजनकं भविष्यति, तत् पानी-
यधारणाय विशालं। त्वं मत्ततया श्रान्त्या च पूरयिष्यसे तव स्वसुः ३३
शोमिरोणस्तत् पात्रं विस्मयविनाशयोः पात्रं। त्वं तस्मिन् पास्यसि ३४
चूषिष्यसि च तदीयखण्डानि चर्वयिष्यसि स्वकुचौ विदारयिष्यसि च,
यतोऽहमिदमुक्तवानिति प्रभुः सदाप्रभुराह। अतो हेतोः प्रभुः सदाप्रभु- ३५
राह, त्वं मां विस्मृतवती पृष्ठतः कृतवती च, तस्मात् त्वमपि स्वकुकर्म्मणः
स्वव्यभिचारस्य च दण्डं भुङ्क्ष्व।

पुनश्च सदाप्रभु र्मां जगाद, भो नरसन्तान, त्वम् अहलाया अहली- ३६
बायाश्च विचारं किं करिष्यसि? तर्हि तयो र्घृणीयक्रियास्ते ज्ञापय।
यतस्ते व्यभिचारं कृतवत्यौ तयोः करेषु शोणितं विद्यते ते स्वदेवविग्रहैः ३७
सह व्यभिचारं कृतवत्यौ मदर्थञ्च यान् सन्तानान् प्रासाविष्टां तान्
भक्ष्यवत् तेषां कृते वह्निसात् कृतवत्यौ। पुनरेतदपि मत्प्रातिकूल्येन कृत- ३८
वत्यौ ते तस्मिन् काले मम पुण्यस्थानम् अमेध्यम् अकार्ष्टां मम विश्राम-
वारान् अपवित्रान् अकार्ष्टां। यस्मिन् दिने ते स्वीयविग्रहाणां कृते ३९
स्वसन्तानान् अहतां तस्मिन् दिने मम पुण्यस्थानम् अपवित्रीकर्त्तुं प्रावि-
शतां पश्य मम गृहस्य मध्य ईदृशं कर्म्म ते कृतवत्यौ। अपिच ते दूरादा- ४०
गतानां नराणां समीपं दूतान् प्राहिणुतां। दूतेषु प्रहितेषु च यदा
तेषाम् आगमनम् अबुध्यथास्तदा त्वं तेषामपेक्षया स्नानं नेत्रयोरञ्जन-
लेपनं भूषापरिधानञ्चाकुरुथाः, शुभ्रशय्यायामुपविश्य तदग्रे भोजनमञ्चम् ४१
अरचयस्तत्र च मम धूपं तैलञ्चास्थापयः। तत्र निश्चिन्तजनसमूहस्य ४२
शब्दोऽभवत्, जननिवहस्य नराणां समीपं प्रान्तरात् सुरापा आनी-
यन्त, ते च तयो र्वेश्ययो र्हस्तेषु कङ्कणानि शिरसोः शोभार्थकमुकुटे च
न्यदधुः। ततस्तां व्यभिचारेण शीर्णां स्त्रियमधि मयोक्तम् इदानीमपि ४३

४४ साक्षाद् वेश्यावृत्तिरियं व्यभिचारं करोति। अपरं जनो यद्वद् वेश्या-
याः स्त्रियः समीपं प्रविशति तद्वत् तस्याः समीपं प्राविशत् तद्वदेव च
ते तयोः कुकर्म्मपरायणयोरहलाहलीबयोः समीपं प्राविशन्।
४५ परन्तु व्यभिचारिणीनां विचारेण रक्तपातिनीनां विचारेण च
धार्म्मिका नरा एव तयो र्विचारं करिष्यन्ति, यतस्ते व्यभिचारिण्यौ
४६ तयो र्हस्तेषु रक्तं विद्यते च। यतः प्रभुः सदाप्रभुरित्यमाह, अहं तयो
र्विरुद्धं समाजम् आनेष्यामि ते च विक्षेपास्पदे लोप्त्रे च करिष्यामि।
४७ तस्य समाजस्य जनाश्च प्रस्तराघातेन ते मारयिष्यन्ति निजासिभिश्च ते
व्यालेखिष्यन्ति, तयोः पुत्त्रान् पुत्त्रीश्च मारयिष्यन्ति तयो र्गृहाणि वह्नि-
४८ सात् करिष्यन्ति च। अहञ्च देशात् कुकर्म्म निवर्त्तयिष्यामि, सर्व्वा
योषितश्च शिक्षां गृहीत्वा युष्मत्कुकर्म्मानुरूपमाचारं न करिष्यन्ति।
४९ जना युष्मत्कुकर्म्मणो दण्डं युष्माभ्यां दास्यन्ति, युवाञ्च स्वविग्रहाणां पा-
पानि भोक्ष्येथे, अहञ्च यत् प्रभुः सदाप्रभुरस्मि तत् ज्ञास्यथः।

---

२४ चतुर्विंशोऽध्यायः।

१ पाकस्थाल्या दृष्टान्तकथनं ६ यिरूशालमो विनाशरूपं तस्य तात्पर्य्यं १५ यिहिष्किलस्य जायाया मरणं १९ लोकानां दुःखरूपं तत्तात्पर्य्यञ्च।

१ अपरं नवमवत्सरस्य दशममासस्य दशमदिने सदाप्रभो र्वाक्यं मां
२ प्रति प्रादुरभूत्, यथा, भो नरसन्तान, त्वं स्वार्थम् अद्यतनस्यार्थत एत-
स्यैव दिनस्य नाम लिख, एतस्मिन्नेव दिने बाबिलीयराजो यिरूशालमि
३ हस्तार्पणम् अकार्षीत्। त्वञ्चैतद् विद्रोहिकुलमुद्दिश्य दृष्टान्तं प्रयुज्य
व्याहर, जनांश्च वद, प्रभुः सदाप्रभुरित्यमाह, स्थालीं संस्थापय सं-
४ स्थाप्य तन्मध्ये जलं देहि च। तदीयमांसखण्डान् अर्थात् ऊरुस्कन्धादीन्
५ उत्तमान् खण्डान् सर्व्वान् सङ्गृह्य ताञ्चोत्कृष्टैरस्थिभिः पूरय। मेषव्र-
जस्योत्कृष्टतमं मेषं गृहाण तस्या अधःस्थाद् अस्थ्नां कृते काष्ठचितिमेकां
निधेहि, तत् सर्व्वञ्च क्वाथ्यतां तन्मध्यवर्त्तीन्यस्थीन्यपि पच्यन्तां।
६ ततो हेतोः प्रभुः सदाप्रभुरित्यमाह,

हा पुरी रक्तपूर्णा त्वं स्थाली समलगर्भिणी।
यतस्तस्या मलं नैव तस्या मध्याद् विनिर्गतं॥
तान् खण्डान् एकमेकञ्च कृत्वोद्धरत सर्व्वशः।

गुटिकापातनं यस्मात् तामुद्दिश्य न साधितं॥
तस्या मध्ये यतो हेतोस्तस्या रक्तम् अविद्यत। ७
आसीत् शुष्कस्य शैलस्य पृष्ठे तत् स्थापितं तया।
तच्छाद्येत यया धूल्या न निषिक्तं तथा भुवि॥
अत उत्पाद्यतां क्रोधः प्रतिकारश्च साध्यतां। ८
शुष्कशैलस्य पृष्ठेऽहं तस्याः सेच्यामि शोणितं।
न च प्रच्छादनं तस्य कर्त्तुं केनापि शक्यते॥
अतो वाक्यमिदं ब्रूते प्रभुरेव सदाप्रभुः। ९
हा पुरी रक्तपूर्णा त्वं सन्तापस्ते भविष्यति।
काष्ठराशिं मयाप्येकः समाचायिष्यते महान्॥
बहुकाष्ठानि सञ्चित्य सम्यक् प्रज्वलयानलं। १०
मांसं पाचय साद्यन्तं सिद्धान्नं गलितं कुरु।
भस्मरूपाणि तन्मध्ये जायन्तां कीकसान्यपि॥
तप्ताङ्गारोपरि स्थालीं शून्यामेव निधेहि च। ११
तेन तस्याः सुतप्तायास्ताम्रं भस्म भविष्यति॥
तस्या मध्ये निजाशौचं द्रवभावञ्च यास्यति।
सकलञ्च मलं तस्या निःशेषत्वम् अवाप्स्यति॥
व्यर्थकारि तयायासस्तस्या यत् प्रचुरं मलं। १२
तन्मध्यात् तन्न निर्यातं तन्मलं वह्निसाद् भवेत्॥
तवाशौचे कुकर्म्मास्ति त्वां शुचीकृतवानहं। १३
त्वन्तु नैव शूचीभूता तस्माद् यावदहं त्वयि॥
न रोषं शमयिष्यामि तावदेव कदाचन।
निजाशौचात् पुनर्व्वारं शुचिस्त्वं न भविष्यसि॥
अहं तित्यप्रभु र्वच्मि तच्च यास्यति सिद्धतां। १४
अहं तत् साधयिष्यामि न भविष्याम्युपेक्षकः।
नार्द्रनेत्रो भविष्यामि नानुतप्स्ये च वा पुनः॥
तव यादृश आचारो यादृशाश्च क्रियास्तव।
तादृशस्त्वद्विचारस्य निर्णयः सम्भविष्यति।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥

अनन्तरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान १५
पश्याहम् आघातेन तव नेत्रयोः प्रीतिभाजनं त्वत्तो हरिष्यामि, त्वन्तु १६

१७ मा शोच मा रुदिहि मा वाश्रूणि पातय। सभौनं निष्टन गतप्राणायां
विलापं मा कुरुष्व शिरसि शिरोभूषां बधान चरणद्वये पादुके च
१८ धत्स्व स्वश्मश्रु वस्त्रेण माच्छादय जनप्रेषितपूपांश्च मा भक्षय। ततोऽहं
प्रातःकाले जनान् आलापिषं, सन्ध्यायान्तु मम भार्य्या ममार, पुनः प्रातः-
काले सत्यहं यथादिष्टस्तथैवाकार्षं।
१९ अपरं जना माम् अवादिषुः, सर्व्वमेतद् अस्मदर्थं तादृशं किं यत्
२० त्वमेतत् करोषि? तत् किमस्मान् न ज्ञापयिष्यसि? ततोऽहं तान्
२१ अवादिषं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, त्वमिस्रायेलः कुलं
वद, प्रभुः सदाप्रभुरित्थमाह, पश्यत मम यत् पुण्यस्थानं युष्माकं बल-
दायिनी श्री युष्मन्नेत्राणां प्रीतिभाजनं युष्मत्प्राणानाञ्चाकाङ्क्षितं पात्रं
तदहम् अपवित्रं करिष्यामि, युष्माभिस्त्यक्ता युष्माकं पुत्रा पुत्र्यश्चासिना
२२ पतिष्यन्ति। अहञ्च यथा कृतवान् यूयमपि तथा करिष्यथ, स्वश्मश्रूणि
२३ वस्त्रैर्नाच्छादयिष्यथ जनप्रेषितपूपान् न भक्षयिष्यथ, शिरःसु शिरोभूषां
चरणेषु च पादुका धास्यध्वे शोकं रोदनं वा न करिष्यध्वे, परन्तु
२४ निजापराधैः क्षेष्यध्वे मिथो दीर्घं निश्वसिष्यथ च। इत्थं यिहिष्केलो
युष्मदर्थम् अद्भुतलक्षणं भवति। स यथा कृतवान् यूयं सर्व्वथा तथैव
करिष्यथ। एतद् यदा सेत्स्यति तदाहं यत् प्रभुः सदाप्रभुरस्मि तद्
२५ यूयमभिज्ञास्यथ। भो नरसन्तान, पश्य यस्मिन् दिनेऽहं तेषां बलं तेषां
शोभाप्रदमामोदं तेषां दृष्टेः प्रीतिभाजनं तेषां प्राणानाम् आकाङ्क्षितं
२६ पात्रं तेषां पुत्रान् पुत्रीश्च तेभ्योऽपहरिष्यामि, तस्मिन् दिने कश्चित्
पलायितो जनस्त्वत्समीपमागत्य तव कर्णगोचरे तत् श्रावयिष्यति।
२७ तस्मिन् दिने तस्य पलायितजनस्य समक्षं तव वक्त्रम् उद्घाटितं भवि-
ष्यति, त्वञ्च भाषिष्यसे पुन र्मूको न भविष्यसि, त्वञ्च तेषां कृतेऽद्भुतलक्षणं
भविष्यसि, तेनाहं यत् सदाप्रभुरस्मि तत् तै र्ज्ञायिष्यते।

---

२५ पञ्चविंशोऽध्यायः।

१ यिहूदिलोकानां हिंसनाद् अम्मोनीयानां दण्डस्य भाविवाक्यं ८ मोयावस्य दण्डः
१२ इदोमो दण्डः १५ पिलेष्टीयानां दण्डश्च।

१ अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान,

त्वम् अम्मोनसन्तानेषु स्थिरदृष्टिं कृत्वा तेषां विरुद्धं भावोक्तिं व्याहर। २
त्वं तान् अम्मोनसन्तानान् वद, यूयं प्रभोः सदाप्रभो र्वाक्यं शृणुत। ३
प्रभुः सदाप्रभुरित्थमाह,

अपवित्रीकृतं दृष्ट्वा मम पुण्यस्थलं प्रति।
प्राप्तनाशाञ्च सन्दृश्येस्रायेलीयभुवं प्रति।
दास्यावस्थागतान् दृष्ट्वा यिहूदीयकुलं प्रति।
साधु साध्विति दुर्व्वाक्यं त्वया यस्मादुदीरितं॥
तस्मात् पूर्व्वीयजातिभ्योऽहं त्वां दास्यामि दायवत्। ४
त्वन्मध्ये स्वनिवेशांश्च रचयिष्यन्ति ते जनाः॥
स्वकीयवस्त्रवेश्मानि स्थापयिष्यन्ति ते त्वयि।
ते त्वत्फलान्यशिष्यन्ति ते पास्यन्ति पयस्तव॥
उष्ट्रशालां करिष्यामि तदा रब्बां पुरीमहं। ५
अम्मोनीयप्रदेशञ्च मेषाणां शयनस्थलं।
अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं॥
यतो हेतोरिदं ब्रूते प्रभुरेव सदाप्रभुः। ६
इस्रायेल्भूमिमुद्दिश्य तलतालः पदध्वनिः।
अवज्ञानाच सम्पूर्णात् प्राणै र्हर्षः कृतस्त्वया॥
पश्य तस्मान्निजं हस्तं प्रसार्य्य त्वद्विरोधतः। ७
जातिभ्यः सकलाभ्योऽहं त्वां प्रदास्यामि लोप्त्रवत्॥
जातिश्रेण्याश्च मध्यात् त्वां संविधास्यामि कर्त्तितं।
त्वामुच्छेत्स्यामि देशेभ्यः करिष्यामि च सादितं।
मां सदाप्रभुमेतेन त्वञ्चाभिज्ञास्यसि स्वयं॥
प्रभु र्नित्यप्रभु र्ब्रूते यादृश्यः सर्व्वजातयः। ८
पश्य तादृशमेवाभूत् यिहूदा अप्यदः कुलं।
इत्थं मोयाबसेयीरावुक्तवन्तावुभौ यतः॥
ततोऽहं पश्य मोयाबः स्कन्धमुद्घाट्य तत्पुरीः। ९
आदेशान्तात् पुरीस्तस्य वेत् यिशीमोतनामिकां।
भूभूषां बाल्मियोनञ्च किरियाथयिमामपि।
द्वारीकृत्य विधास्यामि मार्गं पूर्व्वीयदेशिनां। १०
यथाम्मोनञ्च दास्यामि मोयाबं दायवत् तथा।
अम्मोन् जात्यावलीमध्ये नैव स्मारिष्यते पुनः॥

११ मोयाबस्य करिष्याम्यहं विचारं यथोचितं।
मां सदाप्रभुमेतेन तावभिज्ञास्यतः स्वयं॥
१२ पुनरेतद् वचो ब्रूते प्रभुरेव सदाप्रभुः।
वैरनिर्य्यातनेनेदोम् यिहूदाकुलमाचरत्।
वैरनिर्य्यातनात् तेषु दण्डार्हश्चाभवद् यतः॥
१३ ततो हेतोरिदं ब्रूते प्रभुरेव सदाप्रभुः।
इदोमः प्रातिकूल्येनाहं प्रसार्य्य निजं करं।
समुच्छेत्स्यामि तन्मध्यान्मनुष्यान् पशुभिः सह॥
ध्वंसितं तं विधास्यामि देशम् आतैमनादहं।
दिदानेऽपि पतिष्यन्ति तज्जना असिना हताः॥
१४ यद् इदोमि च कर्त्तव्यं वैरनिर्य्यातनं मम।
इस्रायेलः प्रजाया मे हस्ते तन्निहितं मया॥
यादृशश्च मम क्रोधो मम कोपश्च यादृशः।
इदोमं प्रति कार्य्यं ते साधयिष्यन्ति तादृशं॥
तेन ज्ञायिष्यते तैश्च वैरनिर्य्यातनं मम।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
१५ पुनरेतद् वचो ब्रूते प्रभुरेव सदाप्रभुः।
वैरनिर्य्यातनात् कर्म्म पिलेष्टीयजनैः कृतं॥
चिरशात्रवभावाच्च निःशेषं कर्त्तुमिच्छुभिः।
तैः सम्पूर्णादवज्ञानाद् वैरनिर्य्यातनं कृतं॥
१६ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
पश्य विस्तारयिष्यामि पिलेष्टीयेषु मत्करं॥
क्रिरेथीयजनानाञ्च विधास्यामि निकर्त्तनं।
शेषं सामुद्रवङ्कस्य करिष्यामि च नाशितं॥
१७ भर्त्सनैः कोपजातैश्च महतीः साधयन् क्रियाः।
तेषां मध्ये करिष्यामि वैरनिर्य्यातनं स्वयं॥
इत्थं सिद्धीकृते तेषु वैरनिर्य्यातने मम।
यत् सदाप्रभुरेवाहम् एतज्ज्ञास्यन्ति ते जनाः॥

२६ षड्विंशोऽध्यायः।

१ सोरस्य दण्डः ७ तद्विरुद्धं निबूखद्नित्सरराजस्य रणयात्रा १५ तत्पतनाद् अन्यदेशिनां विस्मयशोकौ च।

अपरम् एकादशवर्षे मासस्य प्रथमदिने सदाप्रभो र्वाक्यं मां प्रति १
प्रादुरभूत्, यथा, भो नरसन्तान, सोरपुरी यिरूशालममधि वदति, २
साधु, जातीनां कपाटद्वयं भग्नं, तासाम् आगमो मयि वर्त्तितः, तस्याम्
उच्छिन्नायाम् अहं पूर्णा भविष्यामि। अतो हेतोः प्रभुः सदाप्रभुरित्यमाह, ३
पश्य त्वामेव भो सोराध्याक्रमिष्याम्यहं स्वयं।
समुद्रेण निजोर्म्मीणाम् उत्क्षेपः क्रियते यथा।
बहुजाती र्विरुद्धं ते समुत्क्षेप्स्याम्यहं तथा॥
ते मनुष्यैश्च सोरस्य प्राचीरं ध्वंसयिष्यते। ४
तैश्च निपातयिष्यन्ते तदीयोच्चगृहाण्यपि॥
तस्याः पृथ्व्याश्च या धूलिः साप्यामार्ज्जिष्यते मया।
शुष्कं पाषाणमेवाहं करिष्यामि च तां पुरीं॥
जालविस्तारणस्थानं साब्धिमध्ये भविष्यति। ५
यतोऽहं तद् ब्रवीमीति प्रभुराह सदाप्रभुः।
सा पुरी सर्व्वजातीनां लोप्त्रमेव भविष्यति॥
क्षेत्रस्थास्तद्दुहितृश्च पतिष्यन्त्यसिना हताः। ६
यत् सदाप्रभुरेवाहं तच्च ज्ञास्यन्ति ते जनाः॥
यतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। ७
पश्यानीयोत्तराशातो निबूखद्नित्सराभिधं।
बाबिलीयमहीपालं राजराजं हयैर्वृतं।
रथैराश्विकसैन्यैश्च पदातीनाञ्च भूरिणा।
समाजेन वृतं सोरेऽहं करिष्याम्युपस्थितं॥
क्षेत्रस्थास्त्वद्दुहितॄः स कृपाणेन हनिष्यति। ८
त्वद्विरुद्धञ्च युद्धार्थम् उच्चं निर्म्मास्यते गृहं॥
त्वद्विरुद्धं सेतुं स समाचेष्यति मृण्मयं।
त्वद्विरुद्धञ्च चर्म्माणि परितः स्थापयिष्यति॥
दुर्गभेदि खयन्त्रञ्च त्वत्प्राचीरे प्रयोक्ष्यते। ९
त्वदीयोच्छ्रितगेहानि खासिभिश्च प्रभङ्क्ष्यति॥

१० भग्नदुर्गप्रवेशीव स त्वद्द्वारैः प्रवेक्ष्यति।
बाहुल्याच्च तदश्वानां धूलिस्त्वां छादयिष्यति।
सादिचक्ररथोद्घोषात् प्राचीरं ते चलिष्यति॥
११ स निजाश्वखुरैः सर्व्वांस्त्वन्मार्गान् मर्द्दयिष्यति।
तावकीनप्रजाश्चापि कृपाणेन हनिष्यति।
त्वद्बलच्छापकाः स्तम्भा निपतिष्यन्ति भूतले॥
१२ ते लुण्ठिष्यन्ति वित्तं ते मोषिष्यन्ति च ते वसु।
प्राचीरं तव भेत्स्यन्ति रम्यान् भङ्क्ष्यन्ति चालयान्।
त्वच्छिलाकाष्ठधूलीश्च निक्षेप्स्यन्ति पयोनिधौ॥
१३ निवृत्तस्तव गीतानां शब्दः कारिष्यते मया।
वीणानां तव वाद्यञ्च नैव श्राविष्यते पुनः॥
१४ शुष्कं पाषाणमेवाहं त्वां करिष्यामि च स्वयं।
त्वं भविष्यसि च स्थानं जालविस्तारणार्थकं।
न पुनस्तव निर्म्माणं सम्भविष्यति कर्ह्हिचित्॥
यस्मान्नित्यप्रभु र्योऽहं सोऽहमेवेदमुक्तवान्।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
१५ सोरमुद्दिश्य वक्तीत्थं प्रभुरेव सदाप्रभुः।
त्वन्निपातस्य शब्देन विद्धानां निस्वनेन च।
त्वन्मध्ये हन्यमानानां नराणां हननेन च।
द्वीपानामपि सर्व्वेषां कम्पः किं न भविष्यति॥
१६ समुद्रस्याधिपाः सर्व्वे स्वासनेभ्योऽवरुह्य च।
स्वप्रावारान् परित्यज्य चित्रवेशान् विमुच्य च॥
सन्त्रासान् परिधास्यन्त उपवेक्ष्यन्ति भूतले।
अनुक्षणं त्रसिष्यन्ति स्तम्भं यास्यन्ति च त्वयि॥
१७ कृत्वा विलापगानञ्च वक्ष्यन्तीदं वचस्त्वयि।
कथं नाशमवाप्ता त्वं सागरोत्पत्तिवासिनि॥
कीर्त्तितासीः पुरी सिन्धौ प्रबला पौरिकैः सह।
अर्पितं यैः स्वभीमत्वं तव सर्व्वनिवासिषु॥
१८ त्रस्यन्ति त्वधुना द्वीपाः पतनस्य दिने तव।
विह्वलाः सन्ति चाब्धिस्था द्वीपाः शेषगतौ तव॥
१९ यतो हेतोरिदं ब्रूते प्रभुरेव सदाप्रभुः।

पुरीं त्वामहमुच्छिन्नां वासिहीनाः पुरीरिव।
यस्मिन् काले करिष्यामि त्वय्युत्थिते महार्णवे।
यदा त्वं सलिलानाञ्च राशिनाच्छादयिष्यसे॥
तदा गर्त्तेऽवरूढैस्तैः प्राक्कालीनजनैः सह। २०
तवावस्थितयेऽहं त्वां करिष्याम्यवरोहिणीं॥
सङ्गे गर्त्तेऽवरूढानां चिरोच्छिन्नस्थलेषु च।
त्वामधोभुवनस्यैव करिष्यामि निवासिनीं॥
यतस्त्वं वसतिस्थानं पुन र्नैव भविष्यसि।
किन्त्वहं जीवतां देशे विधास्यामि प्रमोदयं।
भयदां त्वां करिष्यामि त्वं निःसत्त्वा भविष्यसि। २१
अन्विष्टानन्तकालेऽपि नाविष्कारिष्यसे पुनः।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥

---

२७ सप्तविंशोऽध्यायः।

१ सोरस्यैश्वर्य्यं २६ तस्य महापतनञ्च।

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, १
त्वं सोरमधि विलापगानं प्रणय। त्वं सोरं वद, २

हा हा महासमुद्रस्य प्रवेशेषु निवासिनि।
बहुद्वीपेषु जातीनां व्यवसायविधायिनि।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
भो सोर त्वं ब्रवीषीदम् अहं परमसुन्दरी॥
तव भूमिः समुद्रस्य मध्यस्थाने हि विद्यते। ४
निर्म्मातारस्तवाकार्षुः सौन्दर्य्यं परमं तव॥
सिनीरात् सरलान् नीत्वा कृतास्तैः फलकास्तव। ५
एरसञ्च लिबानोनान्नीत्वा त्वत्कूपकः कृतः॥
बाशनोऽस्लोनकाष्ठैश्च कृताः क्षेपण्यस्तव। ६
कित्तीयद्वीपजाते च देवदारुणि संस्थितैः।
दन्तिदन्तैरकार्षुस्ते पोतवाहासनं तव॥
पताकावत् प्रयोगार्थं वायुवस्त्रञ्च यत् तव। ७
तदानीतं मिसर्देशात् कार्पासं शिल्पिनाङ्कितं।

इलीशाद्वीपजं वस्त्रं नीलं धूम्रञ्च ते छदः ॥
८ अभवन् पोतवाहास्ते सीदोनार्वदवासिनः ।
विद्वांसस्तव हे सोर कर्णधारास्तवान्तरे ॥
९ गिबल्देशस्य ये वृद्धा मनुष्या ये च कोविदाः ।
त्वन्मध्ये तेऽप्यविद्यन्त त्वच्छिद्रप्रतिकारिणः ॥
सर्व्वाः सामुद्रनावश्च सहिताः स्वनियामकैः ।
भाण्डविनिमयार्थिन्य उपातिष्ठंस्तवान्तरे ॥
१० पारस्लूदपूटीया योद्धारस्त्वद्बले स्थिताः ।
ते स्वचर्म्मशिरस्त्राणां कुर्व्वन्त्युद्बन्धनं त्वयि ।
यत् तवादरणीयत्वं तच्च तैः साधितं जनैः ॥
११ अर्वदीयजनादीनि सैनिकानि बलानि ते ।
अविद्यन्त चतुर्दिक्षु प्राचीरे संस्थितानि हि ॥
युद्धवीरा अविद्यन्त त्वदीयोच्चगृहेषु च ।
त्वत्प्राचीरे चतुर्दिक्ष्वबध्नन् स्वफलकानि त ।
तै र्जनैरेव सम्पन्ना त्वत्सौन्दर्य्यस्य पूर्णता ॥
१२ सर्व्वद्रव्यस्य बाहुल्यात् तर्शीशासीत् वणिक् तव ।
रूप्यायस्त्रपुसीसैश्च ते त्वत्पण्यमशोधयन् ॥
१३ यवन् तूबल् च मेशक् चेमेऽभवन् वणिजस्तव ।
ते दासैस्ताम्रपात्रैश्चाकुर्व्वन् विनिमयं त्वयि ॥
१४ जनास्तोगर्म्मवंशीया हययुद्धाश्ववेसरान् ।
आनीय तव पण्यानां शोधनं तैरकुर्व्वत ॥
१५ दिदानस्यापि सन्ताना अभवन् वणिजस्तव ।
त्वत्पंक्ते च बहुद्वीपा अभवन् व्यवसायिनः ।
मूल्यार्थं दन्तिदन्तांस्ते तिन्दुकञ्चार्पयंस्त्वयि ॥
१६ तव निर्म्मितवस्तूनां बाहुल्याद् व्यवसायिनः ।
अरामीयजनास्तुभ्यं पद्मरागान् पटानि च ।
धूम्रवर्णानि चित्राणि कार्पासानि च विद्रुमान् ।
पीतरत्नानि चानीय तव पण्यमशोधयन् ॥
१७ त्वद्वणिग् यिहूदावंश इस्रायेल्देश एव च ।
ते मिन्नीतीयगोधूमान् पक्वान्नं मधु तैलकं ।
औषधीयञ्च निर्य्यासं निमयार्थमुपानयन् ॥

सर्व्ववित्तस्य बाहुल्यात् त्वद्द्रव्याणाञ्च सञ्चयात्। १८
दम्मेषक् त्वद्वणिग् भूत्वा हिल्बोनो गोस्तनीरसं।
मेषलोम सुशुभ्रञ्च तव मध्यमुपानयत्॥
जना वदान्यवानीयाः पण्यानां तव मूल्यवत्। १९
ऊषलात् संस्कृतं लोहं तव मध्यमुपानयन्।
काश्या गन्धत्वचश्चासंस्त्वद्भाण्डनिमये सृताः॥
रथास्तरणवस्त्राणां वणिगासीद् दिदांस्तव॥ २०
आरब्केदाररराजाश्च त्वत्पच्चा वणिजोऽभवन्। २१
मेषवत्सैडकाजानां तै र्व्यापारोऽभवत् तव॥
शिवाया रयमायाश्च वणिजो वणिजस्तव। २२
उत्कृष्टान् सर्व्वगन्धांस्ते महार्घान् सकलान् मणीन्।
सुवर्णञ्च समानीय तव पण्यान्यशोधयन्॥
हारणं कान्निरेदंश्च शिवाया वणिजो जनाः। २३
अस्सूरः किल्मदश्चाप्यासंस्तव व्यवसायिनः॥
पूर्णभूषणवासांसि प्रावारान् नीलवर्णकान्। २४
चित्रितान् सूचिकार्य्येण दिव्यसूत्रधनानि च।
एरस्काष्ठीयभाण्डेषु परिबद्धानि रज्जुभिः।
नीत्वा त्वद्विक्रयस्थानं तेऽभवन् वणिजस्तव॥
तर्शीशीयमहानावो भाण्डविनिमये तव। २५
आसन् सार्थस्वरूपास्ते त्वं पूर्णा चाभवस्ततः।
मध्यस्थाने समुद्राणां महैश्वर्य्यं तवाभवत्॥
विशालानाम् अपां मध्यं नीता त्वं स्वनियामकैः। २६
अब्धीनां हृदये तु त्वं भग्ना पूर्व्वीयवायुना॥
तद्वित्तं तव पण्यानि भाण्डविनिमयस्तव। २७
नाविकाः कर्णधाराश्च त्वच्छिद्रप्रतिकारिणः।
त्वद्भाण्डप्रतिदातारः सर्व्वे त्वन्मध्यवर्त्तिनः।
योद्धारस्तव कृत्स्नश्च त्वन्मध्येऽवस्थितो जनः।
अब्धीनां हृदये पेतुः पतनस्य दिने तव॥
अतस्त्वत्कर्णधाराणां क्रन्दनस्योच्चशब्दतः। २८
कम्पग्रस्ता भविष्यन्ति ग्रामा जानपदा अपि॥
स्वनौभ्यश्चावरोक्ष्यन्ति सकला दण्डवाहकाः। २९

नाविकाः कर्णधाराश्च सर्व्वे सागरगामिनः।
स्थलमेव समाश्रित्यावस्थास्यन्ते हि ते तदा॥
१० त्वामध्युच्चै रविष्यन्ति क्रन्दिष्यन्ति च तापतः।
धूलिं मूर्धसु धास्यन्ते लुठिष्यन्ति च भस्मनि॥
११ त्वयि मुण्डितमुण्डास्ते शाणबद्धकटिस्थलाः।
त्वामुद्दिश्य मनस्तापाद् रोदिष्यन्त्युग्रशोचनाः॥
१२ ते च गीतं प्रणेष्यन्ति त्वयि स्वपरिदेवने।
त्वामुद्दिश्य करिष्यन्ति शोकगानमिदं यथा।
सोरपूर्य्या समः कोऽस्ति ध्वस्तया मध्यसागरं॥
१३ समुद्रात् तव पण्यानि निरगच्छन् यदा पुरा।
तस्मिन् काले महासङ्घा जातीस्त्वं पर्य्यतर्पयः॥
त्वद्दसोः प्रचुरत्वेन भाण्डविनिमयेन च।
पृथिवीस्थनरेन्द्रांस्त्वम् अकरोश्च महाधनान्॥
१४ यदा त्वं सागरभ्रष्टा भूमग्ना चातले जले।
तदानीम् एककाले हि भाण्डविनिमयस्तव।
तव कृत्स्नः समाजश्च तव मध्ये निपेततुः॥
१५ त्वयि स्तब्धा बभूवुश्च सर्व्वे द्वीपनिवासिनः।
तेषां राजान उद्वेगात् कम्पन्ते चावशाननाः॥
१६ कुर्व्वते त्वयि सीत्कारं जातीनां व्यवसायिनः।
भयदा त्वमभूर्नित्यं निःसत्त्वा च भविष्यसि॥

---

२८ अष्टाविंशोऽध्यायः।

१ अहङ्कारकृते सोरराजस्य ऐश्वरिकदण्डस्य भविष्यद्वाक्यं ११ तमधि विलापः २० सीदोनो दण्डाय भाविवाक्यं २४ इस्रायेल्लोकानां स्वदेशाय प्रत्यागमनञ्च।

१ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वं
२ सोरस्य नृपतिं वद, प्रभुः सदाप्रभुरित्थमाह,

यस्मादुद्धतचित्तस्त्वम् उक्तवान् ईश्वरोऽस्म्यहं।
ईश्वरीयासनासीनो वार्धीनां हृदयस्थले॥
परन्तु त्वं मनुष्योऽसि नैव चासि त्वमीश्वरः।
तुल्यमीशस्य चित्तेन निजचित्तं तु मन्यसे॥

दानीयेलादपि ज्ञानी पश्य त्वं प्रतिभासि हि। ३
न गूढं विद्यते किञ्चित् त्वत्साक्षात् तिमिरावृतं॥
स्वज्ञानेन स्वबुद्ध्या च त्वं सार्थं सृष्टवान् श्रियं। ४
स्वकोषेषु सुवर्णञ्च दुर्व्वर्णञ्च प्रदत्तवान्॥
ज्ञानोत्कर्षेण वाणिज्यान्निजश्री र्वर्धिता त्वया। ५
इत्थमेवोद्धतीभूतं तव चित्तं श्रिया तव॥
ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। ६
तुल्यमीशस्य चित्तेन स्वचित्तं मन्यसे यतः॥
ततस्त्वत्प्रातिकूल्येन पश्यानेष्याम्यहं परान्। ७
जातीनां मध्यतोऽत्यन्तं भीमविक्रान्तमानवान्॥
तव ज्ञानस्य भूषाया विरुद्धं ते निजान् असीन्।
उद्धरिष्यन्ति कोषेभ्यस्तव लोप्स्यन्ति च द्युतिं॥
ते च त्वां संविधास्यन्ति क्षयस्थानेऽवरोहिणं। ८
हतानां मृत्युनाब्धीनां हृदये त्वं मरिष्यसि॥
ईश्वरोऽस्मीति हन्तॄणां समक्षं किं वदिष्यसि। ९
स्वहन्तॄणां करेषु त्वं नर एव न चेश्वरः॥
त्वमच्छिन्नत्वचां मृत्या परहस्ते मरिष्यसि। १०
यतोऽहं तद् ब्रवीमीति प्रभुराह सदाप्रभुः॥

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वं ११
सोरस्य राजानमधि विलापगीतं प्रणय, तच्च वद, प्रभुः सदाप्रभुरि- १२
त्थमाह,

त्वं युक्तत्वस्य मुद्राङ्को ज्ञानपूर्णोऽतुलद्युतिः॥
ईश्वरस्य निजोद्यान एदनि त्वमवर्त्तथाः। १३
महार्घा मणयः सर्व्वे आसंश्चाच्छादनं तव॥
शोणरत्नञ्च पीताश्मा हीरं वैदूर्य्यप्रस्तरः।
गोमेदः सूर्य्यकान्तञ्च नीलकान्तोऽरुणोपलः॥
मरकतः सुवर्णञ्च तदानीञ्च तवान्तरे।
तव मृदङ्गवाद्यञ्चासीत् स्त्रीणाञ्चावलिस्तव।
त्वं यस्मिन् दिवसे सृष्टस्तद्दिने ते नियोजिते॥
अभिषेकाधिकारी त्वम् आसीराच्छादकः किरूब्। १४
नियुक्तञ्च मयेशस्यावर्त्तथाः पुण्यपर्व्वते।

अग्निमयाश्मनां मध्येऽकुरुथाश्च गमागमौ ॥
१५ त्वञ्च याथार्थिकाचार आसीः सृष्टिदिनात् परं।
अन्यायः परिणामे तु दृष्ट आविष्कृतस्त्वयि ॥
१६ त्वद्वाणिज्यस्य बाहुल्यात् दौरात्म्येन तवान्तरं।
परिपूर्णमभूत् तस्मात् त्वञ्च पापेन दूषितः ॥
ईश्वरीयगिरिभ्रष्टं त्वामकार्षमहं तदा।
भो आच्छादि किरूब् लुप्तं मध्यादग्निमयाश्मनां ॥
१७ तव कान्त्योद्धतं चित्तं ज्ञानं द्युत्या समं हतं।
भूपतीनां समक्षञ्च त्वां निक्षेप्स्याम्यहं भुवि।
विधास्यामि जनानां त्वां चक्षुषोः कौतुकास्पदं ॥
१८ बाहुल्यात् स्वापराधानां स्ववाणिज्योद्भवेन च।
अन्यायेनापवित्राण्यकार्षीः पुण्यस्थलानि ते ॥
तस्मान्निर्गमितस्त्वत्तो मयाग्निस्त्वाम् अभक्षयत्।
त्वां भस्मीकृतवांश्चाहं त्वद्द्रष्टॄणां पुरो भुवि ॥
१९ जातिषु त्वदभिज्ञा ये सर्व्वे क्षुभ्यन्ति ते त्वयि।
भयदस्त्वमभूर्नित्यं निःसत्त्वश्च भविष्यसि ॥
२० अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान,
२१ त्वं सीदोनं प्रति स्थिरदृष्टिं कृत्वा तस्या वैपरीत्येन भावोक्तिं व्याहर।
२२ त्वं वद, प्रभुः सदाप्रभुरित्थमाह,
भो सीदोन् अहमेव त्वां पश्चाक्रमितुमुद्यतः।
तव मध्ये भविष्यामि प्रतापेन समन्वितः ॥
तस्या मध्ये विचाराणां साधने च मया कृते।
मया स्वीयपवित्रत्वे तन्मध्ये च प्रकाशिते।
यत् सदाप्रभुरेवाहं तद् विज्ञायिष्यते जनैः ॥
२३ मारीं तत्र प्रहेष्यामि तन्मार्गेषु च शोणितं।
तद्विरुद्धं चतुर्दिक्षु वर्त्तमानेन चासिना।
तस्या मध्ये पतिष्यन्ति मनुष्याः क्षतविक्षताः।
यत् सदाप्रभुरेवाहं तज्ज्ञास्यन्ति नरास्तदा ॥
२४ इस्रायेलः कुलस्यापि शङ्कुर्दाहसमन्वितः।
कण्टको वा व्यथाकारी तस्य वेष्टनकारिणां।
अवज्ञाकारिणां मध्यात् पुनर्नैवोद्भविष्यति ॥

यत् सदाप्रभुरेवाहं तच्च ज्ञास्यन्ति ते तदा ॥
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः। २५
इस्रायेल्कुलजा यासां मध्ये विकीर्णतां गताः।
जातीनां मध्यतस्तासां सङ्ग्रहीष्यामि तान् यदा ॥
परजातीयलोकानां साक्षात् स्वीयपवित्रतां।
तदा व्यक्तीकरिष्यामि स्वदासाय च याकुबे।
मया दत्ते निजे देशे निवत्स्यन्ति च ते पुनः॥
निर्भयं तत्र वत्स्यन्ति निर्म्मास्यन्ते गृहाणि च। २६
उद्यानानि करिष्यन्ति निवत्स्यन्ति च निर्भयं॥
चतुर्द्दिक्षु स्थितास्तेषां येऽवमाननकारिणः।
तेषां मध्ये विचारस्याहं विधास्यामि साधनं।
तेन ज्ञास्यन्ति मां ते च निजमीशं सदाप्रभुं॥

---

२९ ऊनत्रिंशोऽध्यायः।

१ फिरौणो नृपस्याहङ्कारकापद्यकथनं ८ तदीयदेशस्य भाव्युच्छिन्नत्वं १३ चत्वारिंशद् वर्षेभ्यः परं तस्य पुनःस्थापनं १७ मिसर्द्देशीयराज्यं निवूखद्नित्सरस्य वेतनस्वरूपं २१ इस्रायेलः पराक्रमवृद्धिश्च।

दशमवर्षस्य दशममासस्य द्वादशदिने सदाप्रभोरिदं वाक्यं मां प्रति १
प्रादुरभूत्, भो नरसन्तान, त्वं मिस्रीयराजं फिरौणं प्रति स्थिरदृष्टिं २
कुरु तस्य विपरीतं कृत्स्नमिसरस्य विपरीतञ्च भाविक्तिं व्याहर। त्वं ३
भाषमाणो वद, प्रभुः सदाप्रभुरित्थमाह,

हा फिरौन् मिसरो राजन् त्वां पश्याभिद्रवाम्यहं।
त्वं स्वीयस्रोतसां मध्ये शयानः स महोरगः।
त्वयोक्तं मम मत्स्रोतो मह्यं तत् सृष्टवानहं॥
अङ्कुशान्तु प्रवेश्याहं तावकीनहनुद्वयं। ४
कृत्वा त्वत्स्रोतसां मत्स्यान् लग्नांस्त्वच्छल्कलेषु च॥
ऊर्द्ध्वं त्वामुद्धरिष्यामि स्रोतसां तव मध्यतः।
सर्व्वांस्त्वच्छल्कलासक्तान् मत्स्यांश्च स्रोतसां तव॥
सर्व्वांस्त्वत्स्रोतसां मत्स्यान् त्वाञ्च त्यक्ष्याम्यहं मरौ। ५
त्वं पतिष्यसि भूपृष्ठे न गृहीतो न सञ्चितः॥
पशुभ्यो भूमिचारिभ्यो व्योम्नः पक्षिगणाय च।

भक्ष्यद्रव्यस्वरूपस्त्वं सम्प्रदायिष्यसे मया॥
६ मिसर्व्वासिजनाः सर्व्वे मां ज्ञास्यन्ति सदाप्रभुं।
नलयष्ट्योऽभवन् यस्माद् इस्रायेलः कुलाय ते॥
७ त्वं त्वरौ तै धृतः स्कन्धं तेषां कृत्स्नं स्फुटोऽभिदः।
कृत्स्नां त्वत्संश्रितानाञ्च कटिं भग्ना व्यचालयः॥
८ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
असिमानाययिष्यामि पश्य त्वत्प्रातिकूल्यतः।
मनुष्यांश्च पशूंश्चाहं तवोच्छेत्स्यामि मध्यतः॥
९ मिसर्देशस्ततो ध्वस्त उच्छिन्नश्च भविष्यति।
यत् सदाप्रभुरेवाहं तच्च ज्ञास्यन्ति तज्जनाः।
यतोऽवोचो मम स्रोतोऽहञ्च तत्सृष्टवानिति॥
१० अतः पश्याक्रमिष्यामि त्वां त्वत्स्रोतांसि च स्वयं।
आमिग्दोलसिवेनीभ्यां कूशसीमावधिं तदा।
मिसर्देशं करिष्यामि खड्गोच्छिन्नं मरुस्थलं॥
११ नरपादस्य सञ्चारस्तत्र नैव भविष्यति।
पशुपादस्य सञ्चारो न भविष्यति तत्र वा।
चत्वारिंशत् समा यावत् कोऽपि तत्र न वत्स्यति॥
१२ देशानां ध्वंसितानाञ्च मध्ये ध्वंसितमेव तं।
मिसर्देशं विधास्यामि चत्वारिंशच्च वत्सरान्।
समुच्छिन्नपुराणां हि मध्ये तस्य पुराण्यपि।
ध्वंसस्थानं भविष्यन्त्यहं मिस्रीयांश्च जातिषु।
विकरीष्यामि देशेषु विक्षेप्स्यामि च धूलिवत्॥
१३ यतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
चत्वारिंशत्समान्ते ते विकीर्णा यत्र मिस्रिणः।
१४ जातीनां मध्यतस्तासां संग्रहीष्यामि तानहं।
मिस्रीयाणामहं दास्यं तदानीं परिवर्त्त्य च।
पथ्रोषाख्यं निजोत्पत्ते र्देशं नेष्यामि तान् पुनः।
तत्र ते च भविष्यन्ति राज्यं नीचदशान्वितं॥
१५ तद् राज्यञ्चान्यराज्येभ्यो नीचमेव भविष्यति।
जातीनामुपरि श्रैष्ठ्यं न पुनश्चाचरिष्यति।
तान् करिष्याम्यहं न्यूनान् जातीनां शासनेऽक्षमान्॥

इस्रायेलः कुलस्यापि न भविष्यति तत् पुनः। १६
शरणं शरणेच्छूनां दुष्कृतिस्मरणावहं।
अभिज्ञास्यन्ति ते माञ्च प्रभुमेव सदाप्रभुं॥

अपरं सप्तविंशवर्षस्य प्रथममासस्य प्रथमदिने सदाप्रभोरिदं वाक्यं १७
मां प्रति प्रादुरभूत्, भो नरसन्तान, बाबिलीयराजो निबूखद्निस्सरः १८
स्वसैन्यं सोरे महापरिश्रमं कारितवान्, सर्व्वमुण्डः केशहीनः सर्व्व-
स्कन्धश्च निस्त्वग्भूतः, परन्तु सोरस्य विरुद्धं तेन यत् कार्य्यम् अनुष्ठितं,
तस्य किमपि वेतनं सोरतो नालम्भि। अतो हेतोः प्रभुः सदाप्रभुरि- १९
त्यमाह, पश्याहं बाबिलीयराजाय निबूखद्निस्सराय मिसरदेशं दास्या-
मि, स तस्यैश्वर्य्यम् अपनेष्यति, तस्य लोप्त्रं हरिष्यति, तस्य लुण्ठित-
द्रव्याणि चोल्लुण्ठयिष्यति, तच्च तस्य सेनाया वेतनं भविष्यति। स यत्कृते २०
परिश्रमं कृतवान् तद्वेतनस्वरूपमहं तस्मै मिसरदेशं दास्यामि यतस्ते
मत्कृते कार्य्यमनुष्ठितवन्तः, इयं प्रभोः सदाप्रभोरुक्तिः।

तस्मिन् दिनेऽहम् इस्रायेलः कुलस्य कृते शृङ्गमेकं प्ररोहयिष्यामि, २१
तुभ्यञ्च तेषां मध्ये मुखस्योद्घाटनं दास्यामि, ततोऽहं यत् सदाप्रभुस्तत्
ते ज्ञास्यन्ति।

---

३० त्रिंशोऽध्यायः।

१ मिसरस्तस्य सहायानाञ्चोच्छिन्नताया भाविवाक्यं २० मिसरः सैन्यसामन्तनाशार्थं बाबिलो न्टपस्य सैन्यवृद्धेर्भाविवाक्यञ्च।

पुनश्च सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, १
त्वं भावोक्तिं प्रचारयन् वद, २

भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
हाहाकारं प्रकुर्व्वन्तो ब्रूत हा कीदृशं दिनं॥
आसन्नं दिनमासन्नो दिवसः स सदाप्रभोः। ३
समेघं तद् दिनं कालो जातीनां स भविष्यति॥
व्याप्स्यति मीसरं खड्गः कूशस्वार्त्त्या लुठिष्यति। ४
यतो हेतोर्मिसर्देशे पतिष्यन्ति हता जनाः।
रिक्थं हारिष्यते तस्य ध्वंसिष्यन्ते गृहाणि च॥
कूशः पूटश्च लूदश्च सकलाश्चानुवर्त्तिनः। ५
कूबश्च मित्रदेशीयसन्तानाः सकला अपि।

एककाले हि तैः सार्द्धं पतिष्यन्त्यसिना हताः ॥
६ पुनर्व्वारमिदं वाक्यं व्याजहार सदाप्रभुः ।
मिसरः स्तम्भरूपाश्च निपतिष्यन्ति मानवाः ।
तत्पराक्रमजन्यश्च गर्व्वो कृशो भविष्यति ॥
आमिग्दोलसिवेनीभ्यां निपतिष्यन्ति तज्जनाः ।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः ॥
७ स्थास्यन्ति ध्वस्तदेशानां मध्ये ध्वस्ताश्च ते जनाः ।
उच्छिन्नानां पुराणाञ्च मध्ये तेषां पुराणि च ॥
८ यत् सदाप्रभुरेवाहं तद् विज्ञायिष्यते च तैः ।
मिसर्देशे मया यस्माद् अग्निः प्रज्वलयिष्यते ।
प्रभग्नाश्च भविष्यन्ति सर्व्वे तत्सहकारिणः ॥
९ नौभि र्दूतास्च मत्साक्षात् निर्गमिष्यन्ति तद्दिने ।
निर्भयं कूशदेशं ते करिष्यन्ति भयातुरं ॥
तदा तत्र मनुष्याणां यातना सम्भविष्यति ।
मिसरो दिवसे यद्वत् यस्मात् तद् भात्युपस्थितं ॥
१० पुनर्वाक्यमिदं प्राह प्रभुरेव सदाप्रभुः ।
तुमुलं मिसरस्याहं बाबिलीयमहीपतेः ।
निबूखद्नित्सरस्यैव शमयिष्यामि पाणिना ॥
११ देशनाशाय नीतः स तेन सार्द्धञ्च तज्जनाः
जातीनां भीमविक्रान्ता मिसरः प्रातिकूल्यतः ।
विकोषासिकरा देशं पूरयिष्यन्ति तं शवैः ॥
१२ स्रोतांस्यहं करिष्यामि तदानीं शोषितं स्थलं ।
देशं विक्रीय दुष्टानां निधास्यामि करेषु च ॥
देशं तत्पूरकञ्चापि सकलं शत्रुपाणिभिः ।
ध्वंसयिष्यामि वच्मीदम् अहमेव सदाप्रभुः ॥
१३ पुनर्व्वारमिदं प्राह प्रभुरेव सदाप्रभुः ।
प्रतिमा नाशयिष्यामि मोफे लोप्स्यामि विग्रहान् ॥
मिसर्देशोद्भवो राजा पुनर्नैव भविष्यति ।
मिसरञ्च करिष्याम्यहं स्थानं भीरुताकुलं ॥
१४ पथ्रोषं ध्वंसयिष्यामि वह्निं क्षेप्स्यामि सोयने ।
नोपुर्य्याञ्च करिष्याम्यहं विचारस्य साधनं ॥

रोषं सेच्यामि सीने च मिसरो बलवर्द्धके। १५
उच्छेत्स्यामि च नोपुर्य्यां जनान् कोलाहलप्रियान्॥
निक्षेप्स्यामि मिसर्य्यग्निं सीनश्चार्त्त्या लुठिष्यति। १६
नोः समाप्स्यति भिन्नत्वं नोफं शत्रुजयं दिवा॥
ओनः पीवेषतश्चापि यूनोऽसिः पातयिष्यति। १७
ते च पूर्य्यौ तदा दूरं वन्दित्वाय गमिष्यतः॥
दिवसश्च तफन्हेषे सान्धकारो भविष्यति। १८
यतोऽहं तत्र भंच्यामि मिसरः सकलं युगं।
तस्या विक्रमगर्व्वश्च तस्या मध्ये शमिष्यति॥
सा स्वयं घनमेघेन तदा प्रच्छादयिष्यते।
तस्या दुहितरश्चापि प्रगमिष्यन्ति वन्दयः॥
विचारस्य च हिष्पत्तिं करिष्यामि मिसर्य्यहं। १९
यत् सदाप्रभुरेवाहं तच्च ज्ञास्यन्ति ते तदा॥

पुनरेकादशवत्सरस्य प्रथममासस्य सप्तमदिने सदाप्रभोरिदं वाक्यं २०
मां प्रति प्रादुरभूत्, भो नरसन्तान, अहं मिस्रीयराजस्य फिरौणो २१
बाहुं भग्नवान्, पश्य भङ्गप्रतीकाराय बन्धनार्थकानुवेष्टितप्रयोगाय
खड्गधारणयोग्यशक्तिप्रदानाय वा तस्याबन्धनं न सम्भवति। अतो हेतोः २२
प्रभुः सदाप्रभुरित्यमाह,

अहं पश्चाक्रमिष्यामि फिरौणं मिसरो नृपं।
तस्य बाहू च भंच्यामि स्वस्थं भग्नञ्च खण्डशः।
असिञ्च च्यावयिष्यामि तस्य हस्तस्य मध्यतः॥
मिस्रीयान् विकरीष्यामि जातीनां मध्य एव च। २३
तांश्च देशसमूहस्य मध्ये क्षेप्स्यामि धूलिवत्॥
बाबिल्राजस्य बाहू तु करिष्यामि महाबलौ। २४
मामकीनञ्च निस्त्रिंशम् अर्पयिष्यामि तत्करे॥
फिरौणो बाहुयुग्मञ्चाहं प्रभंच्यामि सर्व्वशः।
स च क्रन्दिष्यति क्रन्दन् तत्साक्षाद्धन्यमानवत्॥
बाबिल्राजस्य बाहू च करिष्यामि महाबलौ। २५
फिरौणो बाहुयुग्मन्त्ववशत्वान्निपतिष्यति॥
यत् सदाप्रभुरेवाहं तद् विज्ञास्यन्ति ते तदा।
यतो बाबिलराजस्य हस्ते दास्याम्यसिं मम।

स मिसर्द्देशमुद्दिश्य तच्च विस्तारयिष्यति॥
१६ मिस्रीयान् विकरीष्यामि जातीनां मध्य एव च।
तांश्च देशसमूहस्य मध्ये चेप्स्यामि धूलिवत्।
यत् सदाप्रभुरेवाहं तज्ज्ञास्यन्ति जनास्तदा॥

---

३१ एकत्रिंशोऽध्यायः।

१ फिरौणे ज्ञानप्रदानार्थम् अशूररूपस्यैरसतरो दृष्टान्तः १० अहङ्कारात् तस्य छेदनं पातनञ्च १८ फिरौणः शेषदशा च।

१ एकादशवर्षस्य तृतीयमासस्य प्रथमदिने सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्,
२ भो मनुष्यस्य सन्तान त्वं मिस्रीयमहीपतिं।
फिरौणं वद लोकांश्च तस्य कोलाहलप्रियान्।
स्वमहत्त्वेन कस्य त्वं सदृशः प्रतिभासि मे॥
३ पश्याशूरो लिबानोन आसीद् एरसपादपः।
चारुशाखो घनच्छाय उच्चैर्द्धोऽभ्रभिच्छिखः॥
४ तोयैः संवर्धिताकारो वार्धिना च प्रतिष्ठितः।
स्वीयस्रोतोभिरुद्यानं परितः परिगच्छता।
क्षेत्रस्थान् प्रति वृक्षांश्च स्वप्रणालीः प्रहिन्वता॥
५ क्षेत्रस्य सर्व्ववृक्षेभ्यः स उच्चाग्रोऽभवत् ततः।
अवर्धन्त लतास्तस्य शाखाः प्रापुश्च दीर्घतां।
यस्माद् भूरिजलान्यासंस्तत्र तद्वर्धनस्थले॥
६ तल्लतासु विहङ्गाश्च सर्व्वे नीडानकुर्व्वत।
तच्छाखानामधः सर्व्वे प्रासवन् वन्यजीविनः।
छायायां तस्य सर्व्वाश्च महत्यो जातयोऽवसन्॥
७ चारुरासीत् स उच्चत्वात् पल्लवानाञ्च दैर्घ्यतः।
तन्मूलं भूरितोयस्य पार्श्वे यस्मादविद्यत॥
८ एरसैरीश्वरोद्याने स न निस्तेजसीकृतः।
नैवासन् देवदारूणि तस्य तुल्यानि पल्लवैः।
न वासंस्तस्य शाखाभिः समा अर्म्मोणशाखिनः।
नासीत् कोऽप्यैश्वरोद्याने वृक्षो रूपेण तत्समः॥

तं हि पल्लवप्राचुर्य्यात् सुन्दरं कृतवानहं। ९
तस्मै त्वैर्ष्यन् द्रुमाः सर्व्वे ऐश्वरोद्यान एदनि॥
ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। १०
यतोऽसावुच्चदैर्घ्योऽभूत् मेघमध्येऽर्पयन् शिखां।
निजोच्चत्वेन यस्माच्च तच्चित्तं जातमुद्धतं॥
जातीनामेव देवस्य हस्ते दास्यामि तं ततः। ११
उचितं व्यवहारं स तेन सार्द्धं करिष्यति।
इत्थं तदीयदुष्टत्वात् तं निराकृतवानहं॥
जातीनां भीमविक्रान्तास्तं कर्त्तित्वा जङ्गः पराः। १२
शैलेषु तल्लताः पेतुः सर्व्वासूपत्यकासु च॥
भूमिच्छिद्रेषु सर्व्वेषु तच्छाखा भग्नतां ययुः।
तच्छायातो गताः पृथ्व्यास्तं जङ्गः सर्व्वजातयः॥
सर्व्वे वसन्ति तत्स्कन्धे पतिते खेचरद्विजाः। १३
तच्छाखास्वोपतिष्ठन्ति सर्व्वे क्षेत्रस्थजीविनः॥
उच्चदैर्घ्यास्ततो मा स्युः सर्व्वे तोयान्तिका द्रुमाः। १४
मा समुत्थापयेयुर्वा मेघमध्ये निजाः शिखाः।
मात्मनिष्ठा भवेयुर्वोच्चत्वात् सर्व्वेऽम्बुपायिनः॥
यतोऽधोभुवने देयाः सर्व्वे ते सन्ति मृत्यवे।
मध्यतो मर्त्यवंशानां गर्त्तमध्येऽवरोहिणां॥
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः। १५
मया तस्य च पातालम् अवरोहणवासरे।
शोक आज्ञापितो वार्धिस्तत्कृते छादितो मया॥
नद्यो निवर्त्तितास्तस्य संरुद्धा जलराशयः।
कृष्णीकृतस्तदर्थञ्च लिबानोन् भूधरो मया।
क्षेत्रस्थाः सर्व्ववृक्षाश्च तत्कृते जीर्णतां गताः॥
गर्त्तेऽवरोहिभिः सार्द्धं पातालमवतार्य्य तं। १६
जातयस्तन्निपातस्य शब्दादुद्वेजिता मया॥
तत्राधोभुवने सर्व्वे सान्त्विता एदनो द्रुमाः।
लिबानोनस्य चोत्कृष्टाः श्रेष्ठाः सर्व्वेऽम्बुपायिनः॥
पातालं तेऽप्यधो याता तत्सहासिहतान् प्रति। १७
जातीनां मध्य आसीनांस्तच्छायायां सुहृज्जनान्॥

१८ एदनस्थितवृक्षाणां मध्ये कस्य त्वमीदृशं।
प्रतापेन महत्त्वेन वा तुल्यः प्रतिपादितः॥
एदनस्थद्रुमैः सार्द्धं त्वमधो गमयिष्यसे।
गत्वाधोभुवनं तत्र मध्ये छिन्नत्वचां नृणां।
कृपाणेन हतानाञ्च सङ्गी भूत्वा शयिष्यसे॥
ईदृशोऽस्ति फिरौन् कृत्स्नस्तज्जनश्च महारवः।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः॥

---

३२ द्वात्रिंशोऽध्यायः।

१ मिसरः पतनात् विलपनं ११ बाबिलो राज्ञा मिसरो नाशस्य भाविवाक्यं १७ पाताले तस्यावरोहणञ्च।

१ अपरं द्वादशवर्षस्य द्वादशमासस्य प्रथमदिने सदाप्रभोरिदं वाक्यं मां
२ प्रति प्रादुरभूत्, भो नरसन्तान, त्वं मिस्रीयराजं फिरौणमधि विलाप-
गीतं प्रणीय तञ्च वद,

जातीनां युवसिंहेन तुल्यं त्वां जगदु र्जनाः।
त्वन्तु वार्धिस्थनक्रस्य कस्यचित् सदृशोऽभवः॥
स्वीयस्रोतःसु चोत्पत्य स्वकीयचरणैरपः।
अकरोः पङ्कसंयुक्ताः पादैश्चाक्षोभयो नदीः॥
३ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
महाजातिसमाजेऽहं स्वीयजालं तवोपरि।
विस्तारयिष्यामि तैश्च त्वं मत्पाशेनोद्धरिष्यसे॥
४ स्थले त्वं त्यक्ष्यसे क्षेत्रपृष्ठे च क्षेप्स्यसे मया।
खेचरान् पक्षिणः सर्व्वान् वासयिष्यामि च त्वयि।
त्वन्मांसैस्तर्पयिष्यामि भूचरान् सर्व्वजीविनः॥
५ पर्व्वतेषु निधास्यामि त्वदीयपिशितान्यहं।
त्वच्छवेन च दीर्घेण पूरयिष्याम्युपत्यकाः॥
६ त्वद्रसं भुवि सेक्ष्याम्यागिरिभ्यस्तव रक्तजं।
खातानि पूरयिष्यन्ते त्वत्तः प्रहरितै र्जलैः॥
७ त्वन्निर्व्वापणकालेऽहं छादयिष्यामि चाम्बरं।
कृष्णवर्णीकरिष्यामि तस्य सर्व्वाश्च तारकाः।

सूर्य्यं मेघैः पिधास्यामि चन्द्रो ज्योत्स्नां न दास्यति ॥
यानि ज्योतींषि दीप्राणि विद्यन्ते व्योममण्डले। ८
तानि कृष्णीकरिष्यामि सकलानि कृते तव ॥
त्वद्देशस्यान्धकारेण विधास्यामि समावृतं।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः ॥
युष्मदज्ञातदेशेषु जातीनां मध्यतो यदा। ९
मया तावकभङ्गस्य वार्त्ता चानाययिष्यते।
तदा प्रचुरजातीनां चित्तं सन्तापयिष्यते ॥
त्वदर्थञ्च महाजातीः करिष्यामि चमत्कृताः। १०
राजानश्च भविष्यन्ति तासां रोमाञ्चितास्त्वयि।
यस्मात् प्रत्यक्षतस्तेषां चालयिष्याम्यसिं मम ॥
स्वीयप्राणेषु चैकैकस्तेषां कम्पमनुक्षणं।
समवाप्स्यति तस्मिन् हि पतनस्य दिने तव ॥
यतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। ११
बाबिलीयनरेन्द्रस्य खड्गस्त्वामाक्रमिष्यति ॥
पातयिष्यामि वीराणाम् असिभिस्तुमुलं तव। १२
जातीनां भीमविक्रान्ताः स्मृतास्ते सकला नराः ॥
मिसर्देशस्य गर्व्वञ्च ते करिष्यन्ति नाशितं।
तुमुलं तस्य कृत्स्नञ्च निःशेषत्वमवाप्स्यति ॥
महातोयतटात् सर्व्वान् नाशयिष्यामि ते पशून्। १३
न पुन र्नरपादस्तत् करिष्यत्याविलं जलं।
नाविलं वा करिष्यन्ति तत् पशूनां खुराः पुनः ॥
तदानीं शमयिष्यामि तत्रत्यानि जलान्यहं। १४
तत्रत्याश्च करिष्यामि सरितस्तैलवाहिनीः।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः ॥
यदाहन्तु करिष्यामि मिसर्देशं मरुस्थलं। १५
ध्वंसयिष्यामि भूमिञ्च द्रव्यैस्तत्पूरकैः सह ॥
निहनिष्यामि सर्व्वांश्च तस्या मध्ये निवासिनः।
यत् सदाप्रभुरेवाहं तद् विज्ञास्यन्ति ते तदा ॥
विलापार्थमिदं गीतम् इदं गायिष्यते जनैः। १६
नानाजातीयकन्याभिरिदं गायिष्यते किल ॥

मिसरं तुमुलञ्चाधि तस्य गास्यन्ति ता इदं।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः॥
१७ अपरं द्वादशवर्षे मासस्य पञ्चदशदिने सदाप्रभोरिदं वाक्यं मां प्रति
१८ प्रादुरभूत्, भो नरसन्तान, त्वं मिसरः कोलाहलप्रियं जनवृन्दमुद्दिश्य
विलप तञ्चार्यतस्तां जातिं पराक्रान्तजातीनां कन्या इवाधोभुवनं गर्त्त-
ऽवरोहिणां समीपम् अवतारय।
१९ कस्मान्मनोरमोऽसि त्वं त्वं कुरुष्वावरोहणं।
तत्राच्छिन्नत्वचां सङ्गे जनानां शायितो भव॥
२० मध्ये खड्गहतानां हि निपतिष्यन्ति तज्जनाः।
असि दत्तोऽस्ति जातिं तां तज्जनौघञ्च कर्षत॥
२१ संलपन्ति तमुद्दिश्य पातालस्यैव मध्यतः।
वीराणां सकला देवाः सार्द्धं तत्सहकारिभिः।
अधोऽच्छिन्नत्वचो गत्वा शेरते तेऽसिना हताः॥
२२ तत्राशूरः समस्तश्च समाजस्तस्य विद्यते।
शवागाराणि तेषाञ्च सन्ति तस्य समन्ततः।
हताः सन्ति हि ते सर्व्वे कृपाणेन निपातिताः॥
२३ गर्त्तस्याभ्यन्तरे तस्य शवागाराणि चक्रिरे।
शवागारञ्च तस्यैव तत्समाजेन वेष्ट्यते॥
ते जनाश्च हताः सर्व्वे कृपाणेन निपातिताः।
पूर्व्वं तै र्जीवतां देशे व्यापिता तु स्वभीमता॥
२४ तत्रैलमः समस्तश्च जनौघस्तस्य विद्यते।
शवागारञ्च यत् तस्य सन्ति ते तत्समन्ततः॥
ते जनाश्च हताः सर्व्वे कृपाणेन निपातिताः।
अधोऽच्छिन्नत्वचो यातास्तदधोभुवनं प्रति॥
पूर्व्वं ते र्जीवतां देशे व्यापिता निजभीमता।
भुञ्जते तु निजां लज्जां सङ्गे गर्त्तेऽवरोहिणां॥
२५ मध्ये हतमनुष्याणां शय्या तस्मै निरूपिता।
सजनौघाय तेषाञ्च शवागारैः स वेष्टितः॥
सर्व्वेऽच्छिन्नत्वचस्ते हि कृपाणेन हता जनाः।
यतस्तै र्जीवतां देशे व्यापिता स्वीयभीमता॥
स्वलज्जां भुञ्जते तस्मात् सङ्गे गर्त्तेऽवरोहिणां।

मध्ये हतजनानां हि स्थानं तस्य निरूपितं ॥
तत्र मेशक्-तुबल् कृत्स्नस्तज्जनौघस्य विद्यते। २६
श्मवागाराणि तेषाञ्च सन्ति तस्य समन्ततः ॥
तेऽप्यच्छिन्नत्वचः सर्व्वे कृपाणेनैव घातिताः।
यतस्तै र्जीवतां देशे व्यापिता निजभीमता ॥
किन्त्वच्छिन्नत्वचां मध्ये ये वीराः पतिताः पुरा। २७
अवरूढाश्च पातालं स्वयुद्धास्त्रसमन्विताः ॥
येषां स्वीयकृपाणाश्च निहिताः शिरसामधः।
न तै र्वीरैः सहैतेऽपि शयनं कुर्व्वते जनाः ॥
तेषां स्वीयापराधस्तु तेषामस्थीन्युपाश्रयत्।
वीराणां भीषणा आसन् जीवतां भुवि ते यतः ॥
मध्येऽच्छिन्नत्वचां तद्वत् खण्डितस्त्वं भविष्यसि। २८
कृपाणेन हतैः सार्द्धं मनुष्यैश्च शयिष्यसे ॥
तत्रेदोम् तस्य राजानः सर्व्वेऽध्यक्षाश्च सन्ति हि। २९
स्ववीरत्वेऽपि खड्गेन हतानां सङ्गिनः कृताः।
मध्येऽच्छिन्नत्वचां गर्त्तेऽवरूढैः सह शेरते ॥
तत्रोदीच्या नृपाः सर्व्वे सीदोनीयाश्च सन्ति हि। ३०
स्ववीरत्वजभीमत्वेऽवरूढा लज्जयान्विताः।
तेऽप्यच्छिन्नत्वचस्तत्र शेरतेऽसिहतैः सह।
स्वलज्जामुपभुञ्जानाः सार्द्धं गर्त्तेऽवरोहिभिः ॥
दृष्ट्वैतान् फिरौन् स्वीयजनौघे चाश्वसिष्यति। ३१
स फिरौन् तस्य सेनाश्च सकला असिना हताः।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः ॥
यतोऽहं जीवतां देशे व्यापयं तस्य भीमतां। ३२
ततोऽच्छिन्नत्वचां मध्ये कृपाणेन हतैः सह।
शायितः स फिरौन् कृत्स्नस्तज्जनौघश्च विद्यते।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः ॥

---

३३ त्रयस्त्रिंशोऽध्यायः।

१ रक्षकस्य दृष्टान्तकथनं ७ तस्य तात्पर्य्यं १० ईश्वरस्य न्याय्यव्यवस्थाप्रकाशः २१ दुष्टत्वात् लोकानां देशाधिकाराप्राप्तिः ३० खलानां दण्डस्य कथनञ्च।

१ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वं
२ स्वीयजातेः सन्तानानालप तांश्च वद,
देशं खड्गे मयानीते तस्य देशस्य मानवाः।
स्वमध्याच्चेद् गृहीत्वैकं नरं कुर्य्युः स्वरक्षिणं॥
३ स कृपाणञ्च चेत् पश्येत् देशमागन्तुमुद्यतं।
श्रावयित्वा च तूर्य्यञ्चेत् स जनान् प्रतिबोधयेत्॥
४ तूर्य्यशब्दन्तु चेत् श्रुत्वा श्रोता न ज्ञानमाप्नुयात्।
आयातेन च खड्गेन स जनः संक्रियेत चेत्।
तर्हि तच्छोणितस्रावस्तस्य मूर्द्ध्नि फलिष्यति॥
५ तूर्य्यशब्दं निशम्यापि नाभवत् स प्रबोधितः।
तद्रक्तस्रावजो दोषस्तस्मिन्नेव फलिष्यति।
तस्य प्रबोधितस्यैवाभविष्यत् प्राणरक्षणं॥
६ दृष्ट्वासन्नमसिं चेत्तु रक्षी तूर्य्यं न वादयेत्।
तर्ह्यलब्धप्रबोधानां जनानामेव मध्यतः।
कमपि प्राणिनं चेत् स खड्ग आगत्य संहरेत्॥
तर्हि स्वीयापराधेन स प्राणी संहरिष्यते।
रक्षिणस्तु करात् तस्य दापयिष्यामि शोणितं॥
७ त्वान्तु भो नरसन्तानाहमिस्रायेल्कुलाय हि।
रक्षिणं दत्तवांस्तस्मात् वाक्ये मत्तः श्रुते त्वया।
मम नाम्ना त्वया तेषां कर्त्तव्यं प्रतिबोधनं॥
८ त्वं मरिष्यसि दुष्टेति मयोक्ते दुर्जनं प्रति।
त्वं दुष्टं स्वपथत्यागे चेत् प्रबोधाय नालपेः॥
तर्हि स्वीयापराधेन दुर्जनः स मरिष्यति।
तव हस्तात्त्वहं तस्य दापयिष्यामि शोणितं॥
९ त्वया दुष्टः स्वमार्गे तु तत्त्यागाय प्रबोधितः।
न त्यजेन्निजमार्गं चेत् स्वाघात् तर्हि मरिष्यति।
त्वन्तु स्वकीयप्राणानां साधयिष्यसि रक्षणं॥

त्वञ्च भो नरसन्तान तदिस्रायेल्कुलं वद। १०
स्वाधर्म्मैः स्वीयपापैश्चाक्रान्ताः क्षीयामहे वयं।
जीविष्यामः कथञ्चेति सत्यं युष्माभिरुच्यते॥
ब्रूहि तान् यदि जीवामि प्रभुराह सदाप्रभुः। ११
दुष्टस्य मरणे प्रीति र्मम काचिन्न जायते।
स्वमार्गात्तु निवृत्तस्य प्रीये दुष्टस्य जीवने॥
निवर्त्तध्वं निवर्त्तध्वं भो दुष्टाः स्वीयमार्गतः।
म्रियेध्वं हि कुतो यूयं भो इस्रायेल्कुलप्रजाः॥

त्वञ्च भो नरसन्तान, स्वीयजातेः सन्तानान् वद, धार्म्मिकस्य या धा- १२
र्म्मिकता सा तस्याधर्म्माचारदिने तं न रक्षिष्यति, दुष्टस्य च या दुष्टता
तया स स्वीयदुष्टतात्यागदिने न स्खलिष्यति। धार्म्मिकश्च पापाचारदिने
तया [धार्म्मिकतया] जीवितुं न शक्ष्यति। असौ जीविष्यतीति धार्म्मिक- १३
जनमधि मयोक्ते यदि स निजधार्म्मिकतायां विश्वस्यान्यायमाचरेत्, तर्हि
तस्य सर्व्वाणि धर्म्मकर्म्माणि नानुस्मारिष्यन्ते स यम् अन्यायं कृतवांस्तेनैव
मरिष्यति। पुनश्च त्वं मरिष्यसीति मयोक्तो दुष्टजनो यदि स्वपापान्निवृत्य १४
न्यायं धार्म्मिकत्वञ्चाचरेत्, स दुष्टो यद्याधिं प्रतिदद्याद् हृतद्रव्यं शोधयेत् १५
अन्यायमकृत्वा च जीवनावहान् विधीन् आचरेत्, तर्हि सोऽवश्यं जी-
विष्यति नैव मरिष्यति। सर्व्वं यत् पापं तेनाकारि तत् तस्य प्रातिकूल्येन १६
न स्मारिष्यते; स न्यायं धार्म्मिकत्वञ्चाचरितवान्, अवश्यं जीविष्यति।
एतस्मिंस्तव जातेः सन्ताना वदन्ति, प्रभो र्मार्गो न समानः, परन्तु तेषा- १७
मेव मार्गो न समानः। धार्म्मिकः स्वधार्म्मिकत्वान्निवृत्य यमन्यायं करो- १८
ति तेनैव मरिष्यति। दुष्टजनश्च स्वदुष्टत्वान्निवृत्य यं न्यायं यच्च धार्म्मि- १९
कत्वमाचरति, ताभ्यामेव स जीविष्यति। यूयन्तु वदथ, प्रभो र्मार्गो न २०
समान इति। भो इस्रायेलः कुल, अहं युष्माकमेकैकस्याचारानुयायिनं
विचारं करिष्यामि।

अस्मदीयप्रवासस्य द्वादशवर्षस्य दशममासस्य पञ्चमदिने यिरूशा- २१
लमः पलायितः कश्चिज्जनो मदन्तिकमागत्य जगाद, पुरी निपाति-
तेति। तस्य पलायितस्यागमनात् पूर्व्वं सन्ध्यायां सदाप्रभो र्हस्तो मय्य- २२
र्पितोऽभूत् प्रातःकाले च तस्यागमनस्यापेक्षया स मम वक्त्रमुद्घाटया-
मास, ततो मम वक्त्रमुद्घाटितं तस्थौ, अहञ्च न पुन र्मूकीभूतः। अपरं २३
सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, इस्रायेलो भूमौ २४

तेषूच्छिन्नस्थानेषु निवसन्तो जना वदन्ति, इब्राहीम एक आसीत् तथा-
पि देशस्याधिकारी बभूव, वयन्त्वनेके स्मः, अस्मभ्यमेव देशोऽधिकार-
२५ इव दत्तः। अतो हेतोस्त्वं तान् वद, प्रभुः सदाप्रभुरित्थमाह, यूयं
सरक्तं मांसम् अश्नीथ, स्वीयदेवविग्रहेषु दृक्पातं कुरुथ, शोणितं
२६ स्रावयथ च, यूयं किं देशस्याधिकारिणो भविष्यथ? यूयं निजखड्गेषु
समालम्बध्वे गर्हणीयाचारं कुरुध्वे प्रत्येकश्च स्वसमीपवेशिनां भार्य्यां
२७ दूषयथ, यूयं किं देशस्याधिकारिणो भविष्यथ? त्वं तान् वद, प्रभुः
सदाप्रभुरित्थमाह, यद्यहं जीवामि, तर्हि सत्यं ब्रवीमि, तत्रोच्छिन्न-
स्थानेषु निवासिनो जनाः खड्गाघातेन पतिष्यन्ति, क्षेत्रेऽवस्थितान्
जनांस्त्वाहं वन्यपशुभ्यो भक्ष्यवद् दत्तवान्, दुर्गेषु गुहासु चावस्थिता
२८ जना मार्य्यां मरिष्यन्ति च। अहञ्च देशं ध्वस्तं ध्वंसस्थानञ्च कृतवान्
तद्बलजन्यं गर्व्वञ्च शमितवान्; इस्रायेलः पर्व्वताश्च ध्वस्ताः पथिकहीनाश्च
२९ भविष्यन्ति। तैः कृतानां सर्व्वासां गर्हणीयक्रियाणां हेतुना देशे मया
ध्वंसिते ध्वंसस्थानीकृते चाहं यत् सदाप्रभुरस्मि तत् ते ज्ञास्यन्ति।
३० परन्तु भो नरसन्तान, तव जातेः सन्तानाः कुड्यानां निकटे गृह-
प्रवेशस्थानेषु च तिष्ठन्तस्त्वामधि संलपन्ति, प्रत्येकश्च परस्परं वदन्ति,
३१ आगच्छत, सदाप्रभुतो यद् वाक्यं निर्गतं तच्छृणुत। अतो जनानामाग-
मनेनेव ते त्वत्समीपम् आगमिष्यन्ति, मम प्रजाइव त्वत्साक्षाद् उपवि-
श्यास्तव वाक्यानि श्रोष्यन्ति च, न तु तानि पालयिष्यन्ति, यतस्तेषां मुखे
यद्यद् मधुरं तत्तदेव ते कुर्व्वते, तेषां चित्तञ्च तेषां लभ्यमेवानुगच्छति।
३२ अपरं पश्य तेषां कृते त्वं मधुरगायकस्यास्वरो निपुणवाद्यकरो
३३ भवसि, ते तव वाक्यानि श्रोष्यन्ति, न तु तानि पालयिष्यन्ति। वाक्य-
सिद्धिस्तु पश्चागच्छति, तेषां मध्ये भाववाद्येक आसीदिति तस्याम्
आगतायां ते ज्ञायिष्यते च।

---

३४ चतुस्त्रिंशोऽध्यायः।

१ मेषरक्षकाणां भर्त्सनं ७ ईश्वरेण तेषां दण्डनं ११ ईश्वरेण स्वव्रजस्य रक्षणं १७ तस्य विचारणं २० ख्रीष्टेन व्रजरक्षणमधि भाविवाक्यञ्च।

१ पुनश्च सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान,
२ त्वम् इस्रायेलः पालकानधि भावोक्तिं व्याहर, भावोक्तिं व्याहर, तान्
पालकांश्च वद, प्रभुः सदाप्रभुरित्थमाह,

इस्रायेल्पालका हा हा सञ्जाता आत्मपालकाः।
पालकैः किं न कर्त्तव्यं पशूनामेव पालनं॥
युष्माभि र्भक्ष्यते मेदो लोमतः क्रियतेऽम्बरं। ३
हन्यते च पशुः पीनो व्रजः किन्तु न पाल्यते॥
न व्यधीयत युष्माभिः क्षीणस्य बलवर्धनं। ४
न चिकित्सा सरोगस्य न भग्नाङ्गस्य बन्धनं॥
नापास्तस्य पुनः प्राप्ति र्न भ्रान्तस्य गवेषणं।
प्रासनन्तु कृतं तेषां बलेनोपद्रवेण च॥
पालकस्यैव चाभावात् मेषा गत्वा विकीर्णतां। ५
सर्व्वेषां वन्यजन्तूनां भक्ष्यं भूत्वा व्यद्रुवन्॥
मामकीनास्ततो मेषा भ्राम्यन्ति सकलाद्रिषु। ६
सकलानामुदग्राणां भूधराणां शिखासु च॥
मम मेषाश्च वर्त्तन्ते विकीर्णाः कृत्स्नभूतले।
नान्वेष्टा नानुगामी वा मनुष्यः कोऽपि विद्यते॥
अतो भो पालका यूयं शृणुतोक्तिं सदाप्रभोः॥ ७
यदि जीवामि (वक्तीदं प्रभुरेव सदाप्रभुः)। ८
तर्हि पालकहीनत्वाद् व्रजो मे लुण्ठितो यतः।
मेषा मे चाभवन् खाद्यं सर्व्वेषां वन्यजीविनां॥
पालका मम यस्माच्च नैवान्वैषन् व्रजं मम।
पालका आत्मपालास्तु मेषान् नापालयन् मम॥
ततो भो पालका यूयं शृणुतोक्तिं सदाप्रभोः। ९
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
पालकांस्तानहं पश्य समाक्रमितुमुद्यतः। १०
मम मेषानहं तेषां याचिष्यामि च हस्ततः॥
तान् जनांश्च करिष्यामि निवृत्तान् व्रजपालनात्।
न पुनः पालयिष्यन्ति ते जना आत्मपालकाः॥
निजमेषानहं तेषाम् उद्धरिष्यामि चास्यतः।
भक्ष्यद्रव्याणि तेषाञ्च न भविष्यन्ति ते पुनः॥
यतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। ११
पश्य मामकमेषाणाम् अनुष्ठातुं गवेषणं।
तेषां तत्त्वावधानञ्च स्वयमेवाहमुद्यतः॥

१२ स्वमेषाणां विकीर्णानां मध्ये स्थितिदिने यथा ।
कुर्य्यात् तत्त्वानुसन्धानं स्वीययूथस्य पालकः ॥
करिष्याम्यनुसन्धानं स्वमेषाणामहं तथा ।
यत्र सर्व्वत्र विच्छिन्ना दुर्द्दिने तमसावृते ।
ते वर्त्तन्ते च तत्स्थानाद् उद्धरिष्यामि तानहं ॥
१३ जातिभ्यो बहिरानीय देशेभ्यश्च समुह्य तान् ।
स्वभूमिं प्रापयिष्यामीस्रायेलः पर्व्वतेषु च ।
निम्नस्थानेषु देशस्य सर्व्ववासस्थलेषु च ।
अहमेव तदा तेषां प्रकरिष्यामि पालनं ॥
१४ प्रचारस्थान उत्कृष्टे चारयिष्यामि तानहं ।
इस्रायेलोऽग्रभूध्रेषु तेषां स्थास्यति चाश्रयः ॥
ते तत्रैव शयिष्यन्ते तस्मिन्नुत्तम आश्रये ।
इस्रायेलोऽद्रिषु स्थाने चरिष्यन्ति च पीवरे ॥
१५ मामकीनान् हि तान् मेषांश्चारयिष्याम्यहं स्वयं ।
तांश्चाहं शाययिष्यामीयं प्रभो वाक् सदाप्रभोः ॥
१६ अन्वेषिष्याम्यहं भ्रान्तं प्रत्यानेष्याम्यपोहितं ।
अङ्गं भन्त्स्यामि भग्नस्य बलं दास्यामि रोगिणे ॥
पीनं शक्तञ्च लोप्स्यामि मेषान् न्यायेन पालयन् ॥
१७ भो मेषा मम युष्मांस्तु प्रभु र्वक्ति सदाप्रभुः ।
पश्यताहं करिष्यामि विचारं मेषमध्यतः ।
करिष्याम्येडकानाञ्च छागानाञ्च विचारणं ॥
१८ प्रचारे चरथोत्कृष्टे मन्यध्वे तद् यतो लघु ।
ततः किं युष्मदुच्छिष्टं तृणं मर्द्दयथाङ्घ्रिभिः ।
निर्म्मलं सलिलं पीत्वोच्छिष्टं पादैश्च मन्थथ ॥
१९ युष्मत्पादैश्च यत् पिष्टं मम मेषाश्चरन्ति तत् ।
युष्माकं चरणै र्यच्च मथितं तत् पिबन्ति ते ॥
२० अतस्तानधि वक्तीदं प्रभुरेव सदाप्रभुः ।
पश्याहं मेषयो र्मध्ये पीवरस्य कृशस्य च ।
स्वयं विचारनिष्पत्तिम् अस्म्यनुष्ठातुमुद्यतः ॥
२१ पार्श्वैः स्कन्धैश्च सम्पीड्य शृङ्गैश्चाहत्य दुर्ब्बलाः ।
सर्व्वमेषी यतो यूयं व्यकारिष्ट बहिष्कृताः ।

ततोऽहं स्वीयमेषाणां संविधास्यामि तारणं। १२
न पुनस्तापहर्त्तव्यास्ते भविष्यन्ति लोप्त्रवत्।
मेषाणां मध्यतस्ताहं करिष्यामि विचारणं॥
अहमुत्पादयिष्यामि तेषामेकञ्च पालकं। १३
नियुक्तं पालने तेषां दायूदं सेवकं मम॥
स तान् पास्यति तेषाञ्च पालकः स भविष्यति॥
भविष्यामीश्वरस्तेषां स्वयञ्चाहं सदाप्रभुः। १४
दायूदाख्यश्च दासो मे तेषां मध्ये स्थितः पतिः।
उक्तवान् भारतीमेताम् अहमेव सदाप्रभुः॥
नियमञ्च कृते तेषां विधास्यामि शुभङ्करं। १५
श्वापदांश्च करिष्याम्युपरतान् देशमध्यतः।
मरौ वत्स्यन्ति ते सुस्था निद्रास्यन्ति वनेषु च॥
तान् मदद्रेः समन्तञ्च करिष्याम्याशिषान्वितान्। १६
व्योम्नोऽवतारयिष्याम्यासारान् स्वसमयेषु च।
आसारास्ते भविष्यन्ति सर्व्वे आशिःप्रवाहिणः॥
तदा क्षेत्रे स्थिता वृक्षः स्वफलानि प्रदास्यति। १७
पृथिवी च यथायोग्यं शस्यमुत्पादयिष्यति॥
स्वीयभूमौ मनुष्यास्ते निवत्स्यन्ति च निर्भयं।
यत् सदाप्रभुरेवाहं तद् विज्ञायिष्यते च तैः॥
यतस्तेषां युगस्याहं खण्डयिष्यामि कीलकान्।
स्वदास्यकारकाणां तांश्चोद्धरिष्यामि हस्ततः॥
लोप्त्रञ्च परजातीनां न भविष्यन्ति ते पुनः। १८
न वा तान् भक्षयिष्यन्ति श्वापदा देशचारिणः।
निर्भयं ते च वत्स्यन्ति कोऽपि नोद्वेजयिष्यति॥
तेषाञ्चोत्पादयिष्यामि यशस्यं फलिनं द्रुमं। १९
न भविष्यन्ति ते देशे क्षुधया संहृताः पुनः।
न पुनः परजातीनां वा वहिष्यन्ति वाच्यतां॥
योऽहं सदाप्रभुः सोऽहं तेषां सङ्गी यदीश्वरः। २०
इस्रायेलः कुलं ते च यत् प्रजाः सन्ति मामकाः।
तत् ते ज्ञास्यन्ति वक्तीदं प्रभुरेव सदाप्रभुः॥
मम मेषास्ततो यूयं मेषाः सम्पालिता मया। २१

मनुष्या एव यूयं स्याहन्तु युष्माकमीश्वरः।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥

---

३५ पञ्चत्रिंशोऽध्यायः।

इदोमेलं प्रति जातक्रोधहेतोरिदोमीयानां दण्डस्य भविष्यद्वाक्यं।

१ पुनश्च सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान,
२ त्वं सेयीरपर्व्वतं प्रति स्थिरदृष्टिं कृत्वा तत्प्रतिकूलां भावोक्तिं व्याहर,
३ तञ्च वद, प्रभुः सदाप्रभुरित्थमाह,

अहं पश्चात्क्रमिष्यामि त्वां भो सेयीरपर्व्वत।
निजं प्रसारयिष्यामि हस्तं त्वत्प्रातिकूल्यतः।
ध्वस्तं ध्वंसस्थलञ्च त्वां संविधास्यामि च स्वयं॥

४ उच्छिन्नानि करिष्यामि तव सर्व्वपुराणि हि।
ध्वस्ता भविष्यसि त्वं मां ज्ञास्यसे च सदाप्रभुं॥

५ त्वदन्तर्विद्यते यस्माच्छत्रुभावश्चिरन्तनः।
निक्षिप्ता असिहस्ते चेस्रायेलो वंशजास्त्वया।
विपत्तिसमये तेषां काले चान्तकदुष्कृतेः॥

६ अतोऽहं यदि जीवामि (प्रभु र्वक्ति सदाप्रभुः)।
त्वां करिष्याम्यहं रक्तं रक्तं त्वाञ्चानुधाविता।
त्वं न गर्हितवान् रक्तं रक्तं त्वाञ्चानुधाविता॥

७ सेयीराद्रिं करिष्यामि ध्वस्तं ध्वंसस्य च स्थलं।
उच्छेत्स्यामि च तन्मध्याद् यातायातकृतो जनान्॥

८ तद्रीन् पूरयिष्यामि हतैस्तस्य जनैरहं।
मनुष्यास्तव भूभ्रेषु त्वदीयोपत्यकासु च।
निम्नभूषु च सर्व्वासु पतिष्यन्त्यसिना हताः॥

९ अहं त्वां प्रकरिष्यामि चिरध्वंसस्थलीमयं।
पुरीणां तव मध्ये च नरः कोऽपि न वत्स्यति।
अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं॥

१० यस्माज्जातिद्वये तस्मिन् तस्मिन् देशद्वयेऽपि च।
त्वयोक्तं ते मया लभ्ये वयं भोक्ष्यामहे च ते।
अविद्यत तदानीन्तु तत्र स्थाने सदाप्रभुः॥

अतोऽहं यदि जीवामि (प्रभुराह सदाप्रभुः)। ११
तर्हि त्वं यद्वदाचारं कृतवांस्तेषु शात्रवात्॥
तव कोपेर्ष्ययो र्योग्यां करिष्यामि क्रियां तथा।
विचारं तव कृत्वेत्थं दास्ये तेष्वात्मबोधनं॥
योऽहं सदाप्रभुः सोऽहं व्यङ्गोक्तीः सकलास्तव। १२
श्रुतवानिदमेव त्वं तदा ज्ञास्यसि निश्चितं॥
त्वमिदं प्रोक्तवान् वाक्यम् इस्रायेलो गिरीनधि।
ध्वंसस्थानमदोऽस्मभ्यं ग्रसनार्थं समर्पितं॥
मद्विरुद्धं मुखै र्यूयं कृतवन्तः सगौरवं। १३
मद्विरुद्धं बह्वक्तीश्चोक्तवन्तस्तच्छ्रुतं मया॥
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः। १४
हृष्टायां कृत्स्नमेदिन्यां विधास्यामि तव क्षयं॥
इस्रायेलः कुलस्य त्वं देशे ध्वंसाद् यथाहृषः। १५
त्वामुद्दिश्य तथैवाहं विधास्यामि प्रहर्षणं॥
सेयीराद्रिरिदोमश्च कृत्स्नो ध्वस्तौ भविष्यतः।
यत् सदाप्रभुरेवाहं तच्च ज्ञास्यन्ति ते जनाः॥

---

३६ षट्त्रिंशोऽध्यायः।

१ इस्रायेल्देशस्य सान्त्वनं ८ परमेश्वरस्याशीर्वादप्रतिज्ञा १६ पापाद् इस्रायेलो दण्डः २१ विनामूल्येन तस्य रक्षा २५ ख्रीष्टराज्यस्य शुभभविष्यद्वाक्यञ्च।

त्वञ्च, भो नरसन्तान, इस्रायेलः पर्व्वतान् उद्दिश्य भावोक्तिं व्याहर, १
तांश्च वद, भो इस्रायेलः पर्व्वताः, सदाप्रभो र्वाक्यं शृणुत, प्रभुः सदा- २
प्रभुरित्थमाह, यतः शत्रु र्युष्माकं विरुद्धमुक्तवान्, हिहि, तानि चिर-
न्तनान्युच्चस्थलान्यस्माकम् अधिकारविषया अभवन्, तस्मात् त्वं भा- ३
वोक्तिं व्याहरन्निदं वद, प्रभुः सदाप्रभुरित्थमाह, यतो हेतो र्यूयं
चतुर्दिक्षु ध्वंस्यमाना अभिगर्ज्यमानाश्च जातीनां शेषस्याधिकारविषया
जनानाम् ओष्ठगता जिह्वाग्रस्था वाच्यताया विषयाश्चाभवत, ततो ४
हेतोरेव, भो इस्रायेलः पर्व्वताः, यूयं प्रभोः सदाप्रभो र्वाक्यं श्रोतुमर्हथ,
प्रभुः सदाप्रभुस्तान् पर्व्वतान् उपपर्व्वतांश्च ता निम्नभूमीरुपत्यकाश्च
तान्युच्छिन्नध्वंसस्थलानि परित्यक्तपुराणि चेत्यमाह, युष्मत्साकल्यं चतु-

५ हिंक्स्थजातीनां शेषस्य लोप्त्रं विद्रूपास्पदञ्चाभवत्, ततो हेतोः प्रभुः
सदाप्रभुरित्थमाह, जातीनां ये शेषा यश्च कृत्स्न इदोमः सम्पूर्णचित्त-
हर्षेणान्तरिकावज्ञानेन च मम देशं लोप्त्रार्थं शून्यीकर्त्तुमिच्छन्तः स्वी-
याधिकारविषयं कृतवन्तस्तेषां प्रतिकूलमहं निजेर्ष्यानलेन वाक्यं व्याह-
६ रामि। अतस्त्वम् इस्रायेलो भूमिमधि भाववोक्तिं व्याहरन् तान् पर्व्व-
तान् उपपर्व्वतांश्च ता निम्नभूमीरुपत्यकाश्च वद, प्रभुः सदाप्रभुरित्थमाह,
पश्यत, यूयं परजातीनाम् अवज्ञां सोढवन्तस्तस्मादहं निजेर्ष्यया निज-
७ रोषेण च वाक्यं व्याहर्त्तुमुद्यतोऽस्मि। अतो हेतोः प्रभुः सदाप्रभुराह,
अहं स्वहस्तमुत्तोल्य शपे,

ये सर्व्वे परजातीया विद्यन्ते वः समन्ततः।
स्वीयावज्ञां सहिष्यन्ते ते जना एव भारवत्॥
८ परन्तु सकला यूयम् इस्रायेलीयपर्व्वताः।
स्वीयशाखाः प्रयच्छन्तः स्वफलानि प्रदास्यथ।
इस्रायेले प्रजाभ्यो मे तासाञ्चासन्न आगमः॥
९ यतो हेतोरहं पश्य युष्मत्पक्षो भवामि हि।
युष्मान् प्रति निजां दृष्टिं वर्त्तयिष्याम्यहं पुनः।
कृषिकर्म्म च युष्मासु रोपणञ्च भविष्यति॥
१० करिष्यामि च युष्मासु मनुष्यान् बहुसङ्ख्यकान्।
इस्रायेलः कुलं कृत्स्नं सर्व्वथा बहुसङ्ख्यकं॥
नगरेषु तदानीञ्चावस्थास्यन्ते निवासिनः।
समवाप्स्यन्ति निर्म्माणं ध्वंसितानि स्थलानि च॥
११ नरान् पशूंश्च युष्मासूत्पादयिष्याम्यहं बहून्।
तत्र ते वर्धमानाश्च भविष्यन्ति बहुप्रजाः॥
युष्मान् निवासिभिः पूर्णान् करिष्यामि च पूर्व्ववत्।
युष्मदादिदशातोऽपि विधास्यामि च मङ्गलं।
यत् सदाप्रभुरेवाहं यूयं ज्ञास्यथ तत् तदा॥
१२ विधास्यामि च युष्मासु मनुष्याणां गमागमौ।
इस्रायेलः कुलस्यैव भोक्ष्यन्ते त्वां जना मम॥
त्वमधिकारदेशश्च तदा तेषां भविष्यसि।
तांश्च नैव पुनर्व्वारं निरपत्यान् करिष्यसि॥
१३ भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।

ते वदन्ति नराश्नी त्वं स्वजाते र्निरपत्यक्वत्॥
अतस्त्वं न पुनर्व्वारं मनुष्यान् भक्षयिष्यसि। १४
न पुन र्निजजातिं वा निरपत्यां करिष्यसि।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
न पुनः श्रावयिष्यामि त्वां जातीनां तिरस्क्रियां। १५
वंशानामपि धिक्कारं नैव त्वं भोच्यसे पुनः॥
न पुनः स्वीयजातिं वा निरपत्यां करिष्यसि।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, १६
इस्रायेल्कुलस्य जना यदा स्वभूमौ न्यवसन् तदा स्वीयाचारेण स्वगर्ह- १७
णीयक्रियाभिश्च तामशुचिम् अकुर्व्वन् मम साक्षात् तेषामाचारो रज-
स्वलात्वस्याशौचेन तुल्य आसीत्। अतो देशे तैः स्रावितस्य शोणितस्य १८
स्वगर्हणीयविग्रहै र्देशाशौचोत्पादनस्य च हेतुनाहं तेषामुपरि निज-
रोषम् अवतारितवान्। तांश्च जातीनां मध्ये विकीर्णवान् देशेषु च १९
विच्छिन्नवान् तेषां यादृश आचारो यादृश्यश्च क्रियास्तादृशं विचारं
कृतवान्। ते च यासां मध्यं गतास्तासां जातीनां मध्यं गत्वैव मम २०
पवित्रं नामापवित्रं कृतवन्तः, यतस्तानुद्दिश्य जनैरुक्तं, अमी सदाप्रभोः
प्रजास्तस्यैव देशान्निष्क्रान्ताश्च। तथापीस्रायेल्कुलस्य जना यत्र गतास्तत्र २१
जातीनां मध्ये तैरपवित्रीकृतस्य मदीयपवित्रनाम्नो हेतुनाहं दयार्द्रो
जातः। अतस्त्वम् इस्रायेलः कुलं वद, प्रभुः सदाप्रभुरित्थमाह, २२

भो इस्रायेल्कुलाहं न कुर्व्वे युष्मत्कृते क्रियां।
यत्र गत्वा तु युष्माभि र्जातीनां तत्र मध्यतः।
अपवित्रीकृतस्यैव पुण्यनाम्नः कृते मम॥
यासां मध्ये तु युष्माभिरपवित्रीकृतं हि तत्। २३
जातीनां मध्यतस्तासामपवित्रीकृतं मम।
महानाम करिष्यामि पवित्रं पुनरप्यहं॥
तासां साक्षाच्च युष्मासु मत्पुण्यत्वप्रकाशनात्।
यत् सदाप्रभुरेवाहं तत् ता ज्ञास्यन्ति जातयः।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
जातीनां मध्यतो युष्मान् उद्धरिष्याम्यहं पुनः। २४
युष्मांश्च संग्रहीष्यामि देशानां मध्यतस्तदा।

युष्मद्देशे करिष्यामि युष्मांश्चोपस्थितान् पुनः॥
२५ युष्मान् सेक्ष्यामि शुचद्भिः शुचयश्च भविष्यथ।
अशौचादेव सर्व्वस्माद् युष्माकञ्च कुविग्रहात्।
सर्व्वस्मात् प्रकरिष्यामि युष्मान् सम्यक् शुचीनहं॥
२६ नूतनञ्च प्रदास्यामि युष्मभ्यं हृदयं तदा।
नूतनं स्थापयिष्यामि चात्मानं युष्मदन्तरे॥
हृदयं दवयिष्यामि युष्मद्देहाच्छिलामयं।
मांसमयञ्च दास्यामि युष्मभ्यं हृदयं तदा॥
२७ स्थापयिष्यामि चात्मानं मामकं युष्मदन्तरे।
करिष्यामि तथा चाहं यथा कुर्य्यात मे विधीन्।
मत्सूत्राणि च रक्षेत कर्म्मणा पालयेत च॥
२८ पितृभ्यो वो मया दत्ते देशे यूयञ्च वत्स्यथ।
मामकीनप्रजा यूयं तदानीञ्च भविष्यथ।
स्वयञ्चाहं भविष्यामि तदा युष्माकमीश्वरः॥
२९ सर्व्वाशौचाच्च युष्माकं संविधास्यामि तारणं।
गोधूमांश्च समाहूय करिष्यामि सुपुष्कलान्।
न च युष्मासु दुर्भिक्षम् अर्पयिष्यामि भारवत्॥
३० वृक्षाणां वर्धयिष्यामि क्षेत्राणाञ्च फलान्यहं।
न भोक्ष्यध्वे च दुर्भिक्षाज्जातीनां धिक्क्रियां पुनः॥
३१ स्वकुमार्गान् अभद्रांश्च क्रिया यूयं स्मरिष्यथ।
स्वपापैर्घृण्यदोषैश्च गर्हिष्यध्वे स्वदृष्टितः॥
३२ न युष्माकं कृते कार्य्यं कुर्व्वे तज्ज्ञातुमर्हथ।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
इस्रायेल्कुल लज्जस्व निजाचाराद् विषीद च॥
३३ भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
सर्व्वेभ्यो वोऽपराधेभ्यो यदा युष्मान् पुनाम्यहं।
तदानीं पूरयिष्यामि नगराणि निवासिभिः।
निर्म्मितानि भविष्यन्ति समुच्छिन्नस्थलानि च॥
३४ यो देशः सर्व्वपान्थानां साक्षाद् ध्वंसस्थलं कृतः।
तस्मिंश्च ध्वंसिते देशे कृषिकर्म्म प्रसेत्स्यति॥
३५ ते वक्ष्यन्त्येदनुद्यानतुल्याभूद् ध्वस्तभूरियं।

उच्छिन्ना ध्वंसिताः पुर्य्यः पुरा चोन्मूलिता इमे।
पश्येदानीं दृढीभूताः पूर्णाः सन्ति निवासिभिः॥
ये जनाः परजातीयाः शेच्यन्ते वः समन्ततः। ३६
ते विज्ञायिष्यते चेदम् अहमेव सदाप्रभुः।
उन्मूलितस्य निर्म्माता ध्वंसस्थाने च रोपकः।
योऽहं सदाप्रभुः सोऽहं वच्म्युक्तं साधयामि च॥
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः। ३७
अहं तेषां क्रते कार्य्यं साधयेयमिदं यथा।
इस्रायेलः कुलेनेदं प्रयाचिष्ये तथा पुनः।
नरमेषधनानीव वर्द्धयिष्यामि तानहं॥
पूतमेषव्रजेनेव पर्व्वसु यिरूशालमः। ३८
व्रजेनेव भविष्यन्ति परिपूर्णा नरव्रजैः।
ध्वस्ताः पुर्य्यो जना माञ्चाभिज्ञास्यन्ति सदाप्रभुं॥

---

३७ सप्तत्रिंशोऽध्यायः।

१ शुष्कास्थ्नां दृष्टान्तः ११ इस्रायेलो नैराश्यहरणं १५ यिहूदेस्रायेलो र्मेलनं २० ख्रीष्टस्य राज्यमधि चेमप्रतिज्ञा च।

सदाप्रभो र्हस्तो मय्यर्पितोऽभूत् सदाप्रभोरात्मना च मां वहि र्नीत्वा १
समस्थल्या मध्य निदधाय साचास्थिभिः पूर्णासीत्। स च मां सर्व्वदिक्षु २
तेषां सान्निध्येन गमयामास, तानि च पश्यातीव बहूनि समस्थल्याः
पृष्ठेऽविद्यन्त, पश्यातीव शुष्काणि चासन्। अपरं स मां जगाद, भो ३
नरसन्तान, इमान्यस्थीनि किं जीविष्यन्ति? तदा मयोक्तं भो प्रभो
सदाप्रभो, भवांस्तज्जानीते। ततः स मां जगाद, त्वमिमान्यस्थीन्यधि ४
भावोक्तिं व्याहर तानि च वद, भो शुष्काण्यस्थीनि, सदाप्रभो र्वाक्यं
शृणुत, प्रभुः सदाप्रभुरिमान्यस्थीन्युद्दिश्येत्थमाह, पश्याहं युष्मन्मध्यमा- ५
त्मानं प्रवेशयिष्यामि तेन यूयं जीविष्यथ। अहञ्च युष्मासु शिरा यो- ६
जयिष्यामि मांसमुत्पादयिष्यामि युष्माकमुपरि च त्वचं तनिष्यामि,
युष्मन्मध्य आत्मानं निधास्यामि च तेन यूयं जीविष्यथ, अहञ्च यत्
सदाप्रभुस्तदभिज्ञास्यथ। अतोऽहं यथादिष्टस्तथा भावोक्तिं व्याहृत- ७
वान्। मम भावोक्तिव्याहरणकाले शब्दो जातस्ततः पश्योद्वेगोऽभूत्

८ तान्यस्थीनि च परस्परम् अमिलन्। अपरं मया निरीक्ष्य तेषु शिरा
दृष्टा मांसञ्चोदपादि तेषामुपरि च त्वगतानि, परन्तु तेषामन्तर आत्मा
९ नासीत्। अपरं स मां जगाद, त्वमात्मानमुद्दिश्य भावोक्तिं व्याहर,
भो नरसन्तान, भावोक्तिं व्याहर आत्मानमुद्दिश्येदं वद च, प्रभुः सदा-
प्रभुरित्थमाह, भो आत्मन्, चतुर्भ्यो वायुभ्य आगत्य तेषां हतानां
१० जनानां मध्यं धम, तेन ते जीविष्यन्ति। ततोऽहं यथादिष्टस्तथा भा-
वोक्तिं व्याहृतवान्, तदात्मा तान् प्रविष्टस्ते च जीवनं प्रापुरतीव महती
वाहिनी भूत्वा स्वचरणैस्तस्थुश्च।
११ अपरं स मां जगाद, भो नरसन्तान, अस्थीनीमानि कृत्स्नम् इस्रा-
१२ येलः कुलं। पश्य ते वदन्ति, अस्माकमस्थीनि शुष्कीभूतान्यस्माकम् आ-
श्वासश्च नष्टः, उच्छिन्ना एव वयं। अतस्त्वं भावोक्तिं व्याहर, तांश्च वद,
प्रभुः सदाप्रभुरित्थमाह, पश्यताहं युष्माकं शवागाराण्युद्घाटयिष्यामि,
भो मत्प्रजाः, युष्मच्छवागारेभ्यश्च युष्मान् उत्थापयिष्यामि युष्मान् इस्रा-
१३ येल्देशं नेष्यामि च। मया युष्मच्छवागाराणाम् उद्घाटनाद्, भो मत्प्रजाः,
युष्मच्छवागारेभ्यो युष्माकमुत्थापनाच्चाहं यत् सदाप्रभुरस्मि तद् यूयं
१४ ज्ञास्यथ। अहञ्च युष्मन्मध्ये मदीयात्मानं निधास्यामि युष्मद्देशे च
युष्मान् अवस्थापयिष्यामि, तेन योऽहं सदाप्रभुः सोऽहं वच्म्युक्तं साध-
यामि च तद् यूयं ज्ञास्यथेति सदाप्रभुराह।
१५ पुनश्च सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान,
१६ त्वं काष्ठखण्डमेकमादाय तत्र लिख, यिहूदास्तत्सखीनाम् इस्रायेलः
सन्तानानाञ्चेति। पुनश्च काष्ठखण्डमेकमादाय तत्र लिख, यूषफस्य,
१७ इफ्रयिमस्तत्सख्युः कृत्स्नस्येस्रायेल्कुलस्य चायं काष्ठखण्ड इति। अपरं
१८ स्वार्थं तौ मिथः संयोज्यैकं काष्ठं कुरु, तव करे च तावेकीभवतां। यदा
च तव जातेः सन्तानास्त्वां प्रक्ष्यन्ति, अत्र तव किं तात्पर्यं तत् किमस्मान्
१९ न ज्ञापयिष्यसि? तदा त्वं तान् वद, प्रभुः सदाप्रभुरित्थमाह, पश्यत,
इफ्रयिमो हस्ते यूषफस्य यः काष्ठखण्डो विद्यते तं तत्सखीन् इस्रायेलो
वंशांश्चाहमादास्यामि तांश्च तस्मिन् योजयित्वा यिहूदाः काष्ठखण्डेन
सह संयोजयिष्यामि तांश्चैकं काष्ठखण्डं करिष्यामि च मम हस्ते ते
चैकीभविष्यन्ति।
२० तयोश्च ययोः काष्ठखण्डयोस्त्वं लेखिष्यसि तौ तेषां साक्षात् तव हस्ते
२१ तिष्ठतां। त्वञ्च तान् वद, प्रभुः सदाप्रभुरित्थमाह, पश्येस्रायेलः सन्ताना

यासां मध्ये यातायातं कुर्व्वते तासां जातीनां मध्यादहं तान् आदाय
चतुर्द्दिग्भ्यः सङ्गृह्य तेषां देशं नेष्यामि तत्र देश इस्रायेलः पर्व्वतेषु २१
तान् एकां जातिं करिष्यामि एकश्च राजा तेषां सर्व्वेषां राजा भवि-
ष्यति; ते न पुनर्द्वे जाती भविष्यन्ति न वा पुनर्द्वे राज्ये भूत्वा विभ-
क्ष्यन्ते। न च स्वप्रतिमाभि र्घृण्यविग्रहै र्वा सर्व्वेण स्वीयाधर्म्मेण वा २२
पुनरशुचीभविष्यन्ति, ते च यत्र पापं कृतवन्तस्तेषां तस्मात् सर्व्ववास-
स्थानादहं तान् तारयिष्यामि शुचीकरिष्यामि च, तेन ते मम प्रजा
भविष्यन्त्यहञ्च तेषामीश्वरो भविष्यामि। मम दासो दायूद् च तेषां २४
राजा भविष्यति, तेषां सर्व्वेषाञ्चैकः पालको भविष्यति, ते च मम शास-
नान्याचरिष्यन्ति मम विधीन् रक्षिष्यन्ति कर्म्मणा च पालयिष्यन्ति। मम २५
दासाय याकूबे मया दत्ते यस्मिन् देशे युष्माकं पूर्व्वपुरुषा न्यवसंस्तस्मिन्
देशे ते जना वत्स्यन्ति, ते च तेषां पुत्राः पौत्राश्चानन्तकालं तत्र वत्स्य-
न्ति मम दासो दायूद् चानन्तकालं तेषाम् अधिपति र्भविष्यति। अहञ्च २६
तेषां कृते शान्ते र्नियमं स्थापयिष्यामि, स तेषाम् अनन्तकालीनो नियमो
भविष्यति। अहञ्च तान् स्थापयिष्यामि वर्धयिष्यामि च, अनन्तकाला-
र्थञ्च मदीयधर्म्मधाम तेषां मध्ये स्थापयिष्यामि। ममावासश्च तेषामुप- २७
रिष्टाद् अवस्थास्यते, अहञ्च तेषामीश्वरो भविष्यामि ते च मम प्रजा
भविष्यन्ति। अहं सदाप्रभुर्यदिस्रायेलः पवित्रकारी तत् तेषां मध्ये २८
मदीयधर्म्मधाम्नोऽनन्तकालीनावस्थितितः परजातीयै र्ज्ञायिष्यते।

---

३८ अष्टत्रिंशोऽध्यायः।

१ गोगस्य सैन्यसामन्तकथनं ८ इस्रायेलदेशाक्रमणकथनं १४ तस्य भाविदण्डस्य वचनञ्च।

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, त्वं १
रोषस्य मेशकस्य तूबालस्य चाधिपतिं मागोगदेशीयं गोगं प्रति स्थिर- २
दृष्टिं विधाय तस्य प्रतिकूलां भावोक्तिं व्याहर। त्वञ्च वद, प्रभुः सदा- ३
प्रभुरित्थमाह।

रोष-मेषक-तूबालजातीनां जननायकः।
यस्त्वं गोगोऽहमेव त्वां पश्चाक्रमितुमुद्यतः॥
त्वां परिवर्त्तयिष्याम्यङ्कुशं दत्त्वा हनौ तव। ४

त्वाञ्च निर्गमयिष्यामि तव सर्व्वबलानि च।
अश्वान् योद्धन् हयारूढान् सर्व्वान् सिद्धपरिच्छदान्।
फलकचर्म्मधारिणाम् असिपाणिं महासभां॥
५ पारसकूशपूतीया जनास्तेषां हि सङ्गिनः।
फलकैस्ते शिरस्त्रैश्च सन्ति सर्व्वे सुसज्जिताः॥
६ गोमर् सर्व्वे च तत्सङ्घा उत्तरान्तनिवासि च।
तोगर्म्मीयकुलं सर्व्वैः स्वीयसङ्घैः समन्वितं।
त्वया सार्द्धं भविष्यन्ति जातयो बहुसङ्ख्यकाः॥
७ सुसज्जीभव सर्व्वञ्च सुसज्जीकुरु यत्नतः।
त्वं सर्व्वे त्वत्समाजाश्च समायातास्त्वदन्तिकं।
त्वं तेषां सकलानाञ्च रक्षणेऽधिकृतो भव॥
८ अतीते दीर्घकाले हि निर्णयस्ते करिष्यते।
वर्षाणां परिणामे त्वम् इमं देशं प्रवेक्ष्यसि॥
असितः पुनरानीतं महाजातिभ्य उद्धृतं।
इस्रायेलो गिरीनेतानुच्छिन्नान् चिरकालतः॥
तज्जना वहिरानीता जातीनां मध्यतः पुनः।
सकला हि निवत्स्यन्ति तदानीमकुतोभयाः॥
९ त्वञ्चोदेष्यसि झञ्झावद् आगमञ्च करिष्यसि।
देशाच्छादनकारी वा मेघवत् प्रतिभास्यसि।
त्वं सर्व्वे तव सङ्घाश्च सहिता भूरिजातिभिः॥
१० भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
दिन तस्मिन्नुदेष्यन्ति तवान्तःकरणे कथाः।
अनिष्टस्य च सङ्कल्पं त्वं तदा कल्पयिष्यसि॥
११ त्वं वक्ष्यस्याक्रमिष्यामि देशं तं ग्रामपूरितं।
जनान् प्राप्स्यामि तान् शान्तान् सर्व्वान् निर्भयसेविनः।
वसतोऽहतप्राचीरानर्गलद्वारवर्जितान्॥
१२ त्वं धनं लुण्ठितं लोप्त्रं सङ्ग्रहीतुञ्च चेष्टसे।
चिरोच्छिन्नेषु वासेषु जातिमध्यत उद्धृते।
लब्धपश्वादिवित्ते च धरणीनाभिवासिनि।
कर्त्तुं जनसमाजे त्वं यतसे च करार्पणं॥
१३ शिवा दिदांश्च तर्शीशो बणिजः सर्व्व एव च।

तस्य बालमृगेन्द्रास्त्वां वदिष्यन्ति कथामिमां ॥
त्वं किं लुण्ठितुमायाता लाेप्त्रार्थं कृतमेलकः।
स्वर्णरूप्याणि संहर्त्तुं ग्रहीतुं पशुवैभवं।
गरिष्ठान्येव लाेप्त्राणि लुण्ठितं त्वं किमागतः ॥

अतो हेतोः, भो नरसन्तान, त्वं भावोक्तिं व्याहर, गोगञ्च वद, १४
प्रभुः सदाप्रभुरित्थमाह, तस्मिन् दिने यदा मम प्रजावृन्द इस्रायेल्
निर्भयं वत्स्यति तदा किं न त्वं तज्ज्ञास्यसि? तदा त्वं स्वस्थानाद् उत्तर- १५
दिशः प्रान्ताद् आयास्यसि, भूरिजातयश्च सर्व्वा हयानारुह्य महा-
समाजो महासेना च भूत्वा त्वया सार्द्धम् आयास्यन्ति। त्वञ्च मम १६
प्रजावृन्दस्येस्रायेलो विरुद्धं प्रगच्छन् मेघ इव देशमाच्छादयितुमुद्यतो
भविष्यसि; कालपरिणामे त्वमुद्भविष्यसि; भो गोग, परजातीय-
जनानां साक्षान्मया त्वयि स्वपवित्रतायाः प्रतिपादनात् ते यथा
मां जानीयुस्तदर्थमहं त्वां मम देशं प्रवेशयिष्यामि। प्रभुः सदाप्रभु- १७
रित्थमाह, अहं युष्मत्प्रतिकूलं तमानेष्यामीति वाक्यमहं प्राक्काले
यमुद्दिश्य निजदासैरिस्रायेलीयभाववादिभिस्तत्काले बहुवत्सरान् या-
वद् भावोक्तिं व्याहरद्भिः कथितवान् किं न त्वमेव स जनोऽसि?
अतो यस्मिन् दिने गोग इस्रायेल्देशमागमिष्यति तस्मिन् दिने मम १८
नासिकायां कोपानल उद्भविष्यतीति प्रभोः सदाप्रभोरुक्तिः। अहञ्च १९
निजेर्ष्यया निजामर्षानलेन च वदामि,

भविष्यति महाकम्प इस्रायेल्भुवि तद्दिने ॥
कम्पिष्यन्ते च मत्साक्षान्मत्स्याः सागरवासिनः। २०
पक्षिणो गगनस्थाश्च जीविनो वनचारिणः ॥
भूमौ ये च विसर्पन्ति सकलास्ते सरीसृपाः।
भूतले वर्त्तमानाश्च सकला एव मानवाः ॥
भूध्रा उत्पाटयिष्यन्ते पतिष्यन्ति शिलोच्चयाः।
प्राचीराणि च सर्व्वाणि निपतिष्यन्ति भूतले ॥
कृपाणं तद्विरुद्धञ्चाह्वास्यामि स्वगिरिष्वहं। २१
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
जनस्यासिश्च तद्भ्रातुः प्रतिकूलो भविष्यति ॥
विवदिष्ये समं तेन मार्य्याहं शोणितेन च। २२
तस्य तदीयसङ्घानां सङ्गिजातिगणस्य च।

उपरिष्टादहं वृष्टिं वर्षयिष्यामि सिन्धुवत्।
करकासारमग्निञ्च गन्धकेन समन्वितं॥
२३ प्रत्यक्षं भूरिजातीनां स्वमहत्त्वपवित्रते।
प्रतिपाद्य प्रदास्येऽहं ताभ्यः परिचयं तदा।
यत् सदाप्रभुरेवाहं ताभि र्ज्ञायिष्यते च तत्॥

---

३९ ऊनचत्वारिंशोऽध्यायः।

१ गोगस्य भाविदण्डस्य कथनं ८ इस्रायेलो जयः ११ गोगस्य श्मशाननिर्णयः १७ पक्षिभिः शवभोजनं २५ इस्रायेलः स्वदेशे मिलनस्य भाविवाक्यञ्च।

१ त्वञ्च भो नरसन्तान, गोगस्य प्रतिकूलां भावोक्तिं व्याहरन् वद, प्रभुः सदाप्रभुरित्यमाह,

रोष-मेशक-तूबालजातीनां जननायकः।
यस्त्वं गोगोऽहमेव त्वां पश्याक्रमितुमुद्यतः॥
२ त्वां परिवर्त्तयिष्यामि त्वाञ्च नेष्याम्यहं वहिः।
उत्तरप्रान्ततस्च त्वां करिष्यामि समुद्गतं।
इस्रायेलो गिरीनेव त्वाञ्च नेष्याम्यहं तदा॥
३ कोदण्डं च्यावयिष्याम्याहत्य त्वद्वामहस्ततः।
तव दक्षिणहस्ताच्च पातयिष्यामि ते शरान्॥
४ इस्रायेलो गिरिष्वेव निपातः सम्भविष्यति।
तव त्वत्सर्व्वसङ्घानां सङ्गिजातिगणस्य च॥
सर्व्वजातीयपक्षिभ्यो विष्किरेभ्यो वनस्य च।
सर्व्वस्मै श्वापदायाहं त्वां प्रदास्यामि भक्ष्यवत्॥
५ त्वं पतिष्यसि भूपृष्ठे यतोऽहं प्रोक्तवानिदं।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
६ अग्निं मागोगमध्ये च ये द्वीपेषु वसन्ति च।
निश्चिन्ता मानवास्तेषां मध्ये क्षेप्स्याम्यहं तदा।
यत् सदाप्रभुरेवाहं तद् विज्ञास्यन्ति ते जनाः॥
७ मम प्रजा य इस्रायेल् अहं तस्यैव मध्यतः।
परिज्ञातं करिष्यामि पवित्रं मम नाम च।
नापवित्रीकरिष्यामि पवित्रं नाम मे पुनः॥

इस्रायेलि पवित्रस्य यत् सदाप्रभुरस्म्यहं।
मनुष्याः परजातीया अभिज्ञास्यन्ति तत् तदा॥
एतत् पश्य समायाति पश्य सिद्धिमवाप्स्यति। ८
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
मया यच्च प्रतिज्ञातम् एतदेवास्ति तद् दिनं॥

इस्रायेलो नगराणां निवासिनो जनाश्च तदा निर्गमिष्यन्ति वर्म्म- ९
चर्म्मफलकधनुःशरयष्टिशूलैश्चाग्निं दाहञ्च विधास्यन्ति, सप्तवर्षांश्च
तैरेवाग्निं ज्वालयिष्यन्ति। ते न क्षेत्रादिन्धनान्यादास्यन्ते न वा वन्य- १०
तरून् कर्त्तिष्यन्ति परन्तु तया युद्धसज्जयाग्निं ज्वालयिष्यन्ति, यैश्च
मूषिता अभवंस्तान् मोषिष्यन्ति ये च तेषां सम्पत्तिमपहृतवन्तस्तेषां
सम्पत्तिमपहरिष्यन्तीति प्रभोः सदाप्रभोरुक्तिः।

तस्मिन् दिनेऽहम् इस्रायेलि गोगाय शवनिखननस्थानं प्रदास्यामि ११
समुद्रपारस्था पान्थानामुपत्यका तत् स्थानं, तच्च पान्थान् बद्धमुखान्
करिष्यति; तत्र गोगस्य कृत्स्नस्य च तदीयजनयूथस्य शवा जनै र्निखा-
निष्यन्ते तत्स्थानस्य नाम च गे-हामोन-गोगोऽर्थतो गोगीयजनयूथ-
स्योपत्यकेत्यभिधायिष्यते। इस्रायेल्कुलञ्च देशशौचार्थं तेषां शव- १२
निखनने सप्तमासान् यापयिष्यति। देशस्य सर्व्वे जनाश्च शवान् १३
निखनिष्यन्ति, यस्मिन् दिनेऽहं स्वप्रतापं प्रतिपादयिष्यामि तस्मिन् दिने
च तत् कर्म्म तेषां यशस्करं भविष्यतीति प्रभोः सदाप्रभोरुक्तिः। तैश्च १४
नित्यनियुक्तपुरुषाः पृथक् कारिष्यन्ते, ते देशं पर्य्यटिष्यन्ति पर्य्यटन-
कारिणां सङ्गिनो वा भूत्वा भूपृष्ठेऽवशिष्टान् शवान् देशशौचार्थं
निखनिष्यन्ति, सप्तमासान्तेऽप्यनुसन्धानं विधास्यन्ति। तेषां देशपर्य्यटन- १५
कारिणां केनचित् पर्य्यटनकाले मानवास्थिनि सन्दृष्टे तत्पार्श्वे चिह्नं
स्थापयिष्यते, ततः परं निखननकारिणस्तद् गे-हामोन-गोगं नीत्वा निख-
निष्यन्ति। पुर्य्या एकस्या अपि हामोनेति नाम भविष्यति; इत्थं १६
देशस्तैः शुचीकारिष्यते।

त्वाञ्च, भो नरसन्तान, प्रभुः सदाप्रभुरित्थमाह, त्वं सर्व्वजातीय- १७
पक्षिणः सर्व्वान् वन्यजीविनश्च वद,

मिलित्वा यूयमायात समायात चतुर्द्दिशः।
मम यज्ञमुपायातेस्रायेलो भूधरावलौ।
महायज्ञं विधास्यामि युष्मदर्थमहं यतः।

तत्राश्निष्यथ मांसञ्च शोणितञ्च प्रपास्यथ॥
१८ वीराणामेव मांसञ्च तत्र यूयमशिष्यथ।
मेदिन्यधिपतीनाञ्च रुधिरं तत्र पास्यथ॥
सर्व्वे वाशनदेशीयाः पशवः पीवरीकृताः।
एडका वर्करास्छागा वृषा वा प्रतिभान्ति ते॥
१९ तत्र मामकयज्ञे च युष्मदर्थं मया कृते।
यूयं सन्तृप्तिपर्य्यन्तं मेदः सम्भक्षयिष्यथ।
उन्मादप्राप्तिपर्य्यन्तं रुधिरञ्च प्रपास्यथ॥
२० मम भोजनमञ्चे च तप्स्यथ परिवेषितैः।
वाजिभी रथिभि र्वीरैः सर्व्वरूपैश्च योद्धृभिः।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
२१ जातिष्वहं करिष्यामि प्रतिपन्नं स्वगौरवं।
विचारं म कृतं तेषु हस्तक्षेपञ्च मत्कृतं।
सकलाः परजातीयास्तदा द्रक्ष्यन्ति मानवाः॥
२२ तद्दिने तस्य पश्चाच्चेस्रायेलीयकुलस्य च।
जना ज्ञास्यन्ति मामेव स्वकीयेशं सदाप्रभुं॥
२३ इस्रायेलः कुलं यच्च स्वापराधात् प्रवासितं।
मनुष्याः परजातीया अभिज्ञास्यन्ति तत् तदा॥
अकार्षुस्तज्जना यस्मान्मां प्रत्यौचित्यलङ्घनं।
मामकीनाननं तेभ्योऽहं समाच्छादयं ततः॥
तेषां द्वेषिमनुष्याणां हस्ते तांश्च समार्पयं।
ततस्ते सकला एव न्यपतन्नसिना हताः॥
२४ अशौचं यादृशं तेषाम् असाधुत्वञ्च यादृशं।
व्यवहारमकार्षञ्च ते जनैः सह तादृशं।
मामकीनाननं तेभ्योऽहं समाच्छादयं ततः॥
२५ अतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
प्रत्यानेष्यामि याकूबोऽधुना वन्दिजनानहं॥
करुणाञ्च विधास्यामि कृत्स्नेस्रायेल्कुलं प्रति।
कृते मत्पुण्यनाम्नश्च भविष्यामि प्रयत्नवान्॥
२६ भोक्ष्यन्ते स्वापराधञ्च सर्व्वञ्चौचित्यलङ्घनं।
येन लङ्घितवन्तस्ते स्वौचित्यं मद्विरुद्धतः॥

यतः स्वकीयदेशे ते निवत्स्यन्त्यकुतोभयं।
तानुद्वेजयितुं कोऽपि तदानीं न भविष्यति॥
ज्ञातीनां मध्यतोऽहं तान् आनेष्यामि स्वयं पुनः। २७
अरातीनाञ्च देशेभ्यः सङ्ग्रहीष्यामि तानहं॥
परजातीयलोकानां भूयिष्ठानाञ्च सम्मुखे।
प्रतिपन्नां करिष्यामि तेषु स्वीयपवित्रतां॥
ते ज्ञास्यन्ति च मामेव स्वकीयेशं सदाप्रभुं। २८
यतोऽग्रे परजातीनां मध्ये निर्वास्य तानहं।
तेषां देशे समानीय सङ्ग्रहीष्यामि तान् पुनः।
न तेषां शेषयिष्यामि विदेशे तत्र कञ्चन॥
न च प्रच्छादयिष्यामि पुनस्तेभ्यो निजाननं। २९
इस्रायेलः कुले यस्मात् स्वात्मानं सिक्तवानहं।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥

---

४० चत्वारिंशोऽध्यायः।

१ पवित्रस्थानदर्शनं ६ पूर्व्वद्वारकथनं १७ वहिःप्राङ्गणकथनं २० उत्तरीयद्वारकथनं २४ दक्षिणद्वारकथनं २८ अन्तःप्राङ्गणस्य दक्षिणद्वारकथनं ३५ उत्तरद्वारकथनं ३८ यज्ञसज्जानां कथनं ४४ कोष्ठकथनं ४८ अलिन्दकथनञ्च।

अस्माकं निर्व्वासस्य पञ्चविंशे वर्षे वत्सरस्याद्यमासस्य दशमदिनेऽर्थतो १
नगरनिपातनात् परं चतुर्दशवत्सरस्योक्तदिने सदाप्रभो र्हस्तो मय्यर्पि-
तोऽभूत् स च मां तत् स्थानमनैषीत्। स माम् ईश्वरीयदर्शनैरिस्रा- २
येल्देशं नीत्वातीवोच्चे पर्व्वते निहितवान् तस्योपरि च दक्षिणदिशि
नगरस्येव निर्म्मितिः प्रत्यभात्। स च मां तत् स्थानमनैषीत्, तत्र तैज- ३
सस्येवाभाविशिष्ट एको नर आसीत्, तस्य हस्ते कार्पासनिर्म्मिता
रज्जुः परिमाणार्थको नलश्चाविद्येतां स च गोपुरेऽतिष्ठत्। स पुरुषो ४
माम् अवादीत्, भो नरसन्तान, अहं त्वां यद्यत् प्रदर्शयिष्यामि तत्
सर्व्वं त्वं चक्षुर्भ्यां निरीक्षस्व कर्णाभ्यां शृणु तत्र मनो निधत्स्व च, यतस्त्वां
यथा तत् प्रदर्शयेयं तदर्थ त्वमत्रानीतः। त्वया यद्यद् दर्शिष्यते तत्
सर्व्वम् इस्रायेल्कुलाय निवेद्यतां। अपरं मयादर्शि, गृहस्य वहिः परि- ५
तस्तद्वेष्टकम् एकं प्राचीरमासीत्, तस्य नरस्य करस्थितो माननलः
षड्हस्तपरिमितस्तेषामेकैको हस्तश्च मुष्ट्यधिकहस्तमान आसीत्, स

च तस्या निर्म्मित्या विशालतामेकं नलं तस्या उच्चताञ्चैकं नलममासीत् ।
६ अपरं स पूर्व्वाभिमुखं गोपुरमागत्य तस्य सोपानैरारुह्य गोपुरस्य
शिलाम् अमासीत्, तस्या विशालता नलैकपरिमिता, प्रथमशिलाया
७ एव विशालता नलैकपरिमिता। प्रतीहारवासायाश्च दीर्घता नलैकमाना
विशालता च नलैकमाना ; वासानाञ्चान्तरालं पञ्चहस्तपरिमितं, अभ्य-
न्तरे गोपुराग्रस्थितस्यालिन्दस्य पार्श्वे गोपुरस्य शिला नलैकपरिमिता-
८ सीत् । अपरं स गोपुरस्यालिन्दम् अन्तरेकं नलममासीत् । पुनः स
९ गोपुरस्यालिन्दम् अष्टहस्तान् तस्योपस्तम्भांश्च हस्तद्वयममासीत् स गो-
१० पुरस्यालिन्दोऽन्तः स्थितः । पूर्व्वाभिमुखगोपुरस्य प्रतीहारवासा एक-
स्मिन् पार्श्वे तिस्रोऽपरस्मिन् पार्श्वे च तिस्र आसन्, तिसृणामेकं परि-
११ माणमासीत् उपस्तम्भानाञ्चोभयोः पार्श्वयोरेकं परिमाणमासीत् । अपरं
स गोपुरप्रवेशस्थानस्य विशालतां दशहस्तान् अमासीत्, गोपु-
१२ रस्य दीर्घता तु त्रयोदशहस्तपरिमिता । प्रतीहारवासानामग्रे प्रान्त
आसीत् स एकहस्तपरिमितोऽपरस्मिन् पार्श्वेऽप्येकहस्तपरिमितः प्रान्त
आसीत्; वासा च षड्हस्तपरिमितापरस्मिन् पार्श्वेऽपि षड्हस्तपरि-
१३ मिता वासासीत् । स चैकवासापृष्ठादन्यवासापृष्ठपर्य्यन्तं परस्परम-
भिमुखाभ्यां तयो द्वाराभ्यां गोपुरस्य विशालतां पञ्चविंशतिहस्तान्
१४ अमासीत् । उपस्तम्भांश्च षष्टिहस्तान् अन्वमास्त, प्राङ्गणञ्च तेषामुप-
१५ स्तम्भानां सन्निकृष्टमासीत् तस्य तु परितो गोपुरमासीत् । प्रवेशार्थक-
गोपुरस्याग्रदेशाद् अभ्यन्तरगोपुरस्याग्रदेशपर्य्यन्तं पञ्चाशद्धस्तपरिमितं
१६ स्थानमासीत् । गोपुरस्याभ्यन्तरे वासानां तदीयोपस्तम्भानाञ्च परितो
जालबद्धानि वातायनान्यविद्यन्त । तद्वत् तासां मण्डपेष्वभ्यन्तरे परितो
वातायनानि, उपस्तम्भेषु खर्ज्जूराकृतयश्चाविद्यन्त ।
१७ अपरं स मां वहिःप्राङ्गणमनैषीत्, तत्र पश्य कोष्ठानि शिलास्तर-
णञ्चाविद्यन्त, तत् प्राङ्गणस्य परितो निर्म्मितमासीत् तत्र शिलास्तरण-
१८ पार्श्वे त्रिंशत् कोष्ठान्यासन् । तच्च शिलास्तरणं गोपुराणां पक्षयो-
१९ र्गोपुराणां दैर्घ्यानुगाम्यासीत्, तन्निम्नतरं शिलास्तरणं । अपरं स
गोपुरस्य निम्नतराद् अग्रदेशाद् अभ्यन्तरप्राङ्गणस्याग्रदेशपर्य्यन्तं वहिः
पूर्व्वदिशमुत्तरदिशञ्च शतहस्तपरिमितां विशालताममासीत् ।
२० अपरं स वहिः प्राङ्गणस्योत्तराभिमुखगोपुरस्य दीर्घतां विशालता-
२१ ञ्चामासीत् । तस्यैकस्मिन् पार्श्वे तिस्रोऽपरस्मिन् पार्श्वे च तिस्रो वासा

उपस्तम्भा मण्डपाश्चासन्। एतस्य गोपुरस्य परिमाणं प्रथमगोपुरस्य
परिमाणेन तुल्यं, तस्य दीर्घता पञ्चाशद्धस्तपरिमिता विशालता च
पञ्चविंशतिहस्तपरिमितासीत्। पूर्व्वाभिमुखगोपुरपरिमाणवदेतस्यापि २२
वातायनानि मण्डपा खर्ज्जूराकृतयश्चासन्, जनाः सप्तसोपानैस्तत्रा-
रोहन्, तस्य मण्डपाश्च तेषां सम्मुखेऽविद्यन्त। उत्तरगोपुरस्य पूर्व्वगो- २३
पुरस्य च सम्मुखेऽन्तःप्राङ्गणगामि गोपुरमेकमासीत्। स एकगोपुरादपर-
गोपुरपर्य्यन्तं शतहस्तान् अमासीत्।

अपरं स मां दक्षिणदिशं गमयामास, तत्र च पश्य दक्षिणाभिमुखं २४
गोपुरमासीत्। स च तस्योपस्तम्भान् मण्डपांश्च पूर्व्वोक्तपरिमाण-
तुल्यानमासीत्। परितः पूर्व्वोक्तवातायनानां सदृशानि वातायनानि २५
तस्य तदीयमण्डपानाञ्चाविद्यन्त, तस्य दीर्घता पञ्चाशद्धस्तमाना वि-
शालता च पञ्चविंशतिहस्तमानासीत्। सप्तसोपानानि तस्यारोहणी, २६
तेषां सम्मुखे च तस्य मण्डपा आसन्, तदीयोपस्तम्भेष्वेकस्मिन् पार्श्वे
एकापरस्मिन् पार्श्वे चैकेत्थं द्वे खर्ज्जूराकृती तस्यास्तां। दक्षिणदिश्यन्तः- २७
प्राङ्गणस्यापि गोपुरमेकमासीत्। स च दक्षिणदिश एकस्माद् गोपु-
रादपरगोपुरपर्य्यन्तं शतहस्तानमासीत्।

अपरं स मां दक्षिणगोपुरेणान्तःप्राङ्गणं प्रवेशयामास, स च पूर्व्वोक्त- २८
परिमाणानुरूपं तद् गोपुरममासीत्। तस्य वासा उपस्तम्भा मण्डपाश्च २९
पूर्व्वोक्तपरिमाणानुरूपा आसन्, परितश्च तस्य तदीयमण्डपानाञ्च वा-
तायनान्यासन्, तस्य दीर्घता पञ्चाशद्धस्तमाना विशालता च पञ्चविंश-
तिहस्तमानासीत्। परितश्च तस्य मण्डपा आसन्। तेषां दीर्घता पञ्च- ३०
विंशतिहस्ता विशालता च पञ्चहस्ताः। तस्य मण्डपा वहिःप्राङ्गणस्य ३१
पार्श्वे चाविद्यन्त, तस्योपस्तम्भेषु च खर्ज्जूराकृतय आसन्, अष्टसोपा-
नानि तस्यारोहणी।

अपरं स माम् अन्तःप्राङ्गणे दक्षिणदिशं नीत्वा पूर्व्वोक्तपरिमाणानुरूपं ३२
गोपुरम् अमासीत्। तस्य वासा उपस्तम्भा मण्डपाश्च पूर्व्वोक्तपरिमाणानु- ३३
रूपा आसन्, परितश्च तस्य तदीयमण्डपानाञ्च वातायनान्यासन्, तस्य
दीर्घता पञ्चाशद्धस्तमाना विशालता च पञ्चविंशतिहस्तमानासीत्। तस्य ३४
मण्डपा वहिःप्राङ्गणस्य पार्श्वे आसन्। तदीयोपस्तम्भेष्वेकस्मिन् पार्श्वे
एकापरस्मिन् पार्श्वे चैकेत्थं द्वे खर्ज्जूराकृती आस्तां, अष्टसोपानानि
च तस्यारोहणी।

३५ अपरं स माम् उत्तरदिक्स्थं गोपुरं नीत्वा पूर्व्वोक्तपरिमाणानुरूपं
३६ तदमासीत्। तस्यापि वासा उपस्तम्भा मण्डपाः परितश्च वातायना-
न्यासन्। तस्य दीर्घता पञ्चाशद्धस्तमाना, विशालता च पञ्चविंशति-
३७ हस्तमानासीत्। तस्योपस्तम्भा वहिःप्राङ्गणस्य पार्श्वेऽविद्यन्त, उपस्त-
म्भानाञ्चैकस्मिन् पार्श्वेऽपरस्मिन् पार्श्वे च खर्ज्जूराकृतय आसन्, अष्ट-
सोपानानि च तस्यारोहणी।
३८ परन्तूपस्तम्भानां समीपं गोपुराणां सद्वारम् एकमेकं कोष्ठमासीत्
३९ तत्र होमबलेः प्रक्षालनम् अक्रियत। गोपुरस्यालिन्दे चैकस्मिन् पार्श्वे द्वा-
वपरस्मिन् पार्श्वे च द्वौ मञ्चावास्तां तत्र होमबलिः पापार्थकबलि र्दो-
४० षार्थकबलिश्च न्यहन्यन्त। पुनश्च [गोपुरस्य] पक्षे वहिरर्थतो गोपुरप्रवे-
शस्थानस्यारोहण्या उत्तरपार्श्वे द्वौ मञ्चावास्तां, पुनर्गोपुरस्यालिन्दस्य
४१ पार्श्वे स्थिते द्वितीये पक्षे द्वौ मञ्चावास्तां। इत्थं गोपुरपक्षस्यैकस्मिन्
पार्श्वे चत्वारोऽपरस्मिन् पार्श्वे च चत्वारः साकल्येनाष्टौ मञ्चा आसन्
४२ तत्र बलयो न्यहन्यन्त। आरोहण्याश्च चत्वारो मञ्चा आसन् ते तक्षित-
पाषाणनिर्म्मिताः, तेषां दीर्घता सार्द्धैकहस्तमाना विशालता सार्द्धैक-
हस्तमाना, उच्चता च हस्तैकमानासीत्, तत्र होमार्थकादिबलीनां
४३ निहननोपयोग्यस्त्राणि निहितान्यानि। परितश्च मुष्ट्येकमानानि नाग-
दन्तयुग्मानि गृहकुड्ये प्रवेशितान्यासन्, मञ्चेषु च निवेदितमांसं
न्यधीयत।
४४ अन्तःप्राङ्गणेऽन्तःस्थगोपुरस्य वहि र्गायकानां कोष्ठान्यासन् तान्युत्तर-
गोपुरस्य पक्षे स्थितानि दक्षिणाभिमुखानि चासन्, पुनः पूर्व्वगोपुरस्य
४५ पक्ष उत्तराभिमुखमेकं कोष्ठमासीत्। अपरं स मां जगाद, ये याजका
गृहस्य रक्षणीयं रक्षन्ति, दक्षिणाभिमुखमिदं कोष्ठं तेषां भवि-
४६ ष्यति। ये च याजका यज्ञवेद्या रक्षणीयं रक्षन्ति, उत्तराभिमुखमिदं
कोष्ठं तेषां भविष्यति। लेविसन्तानानां मध्ये ये सदाप्रभोः परिचर्य्यायै
४७ तन्निकटवर्त्तिनो भवन्ति ते सादोकसन्तानास्ते जनाः। अपरं स प्राङ्गण-
ममासीत्, तच्चतुरस्रं, तस्य दीर्घता शतहस्तमाना विशालता च शत-
हस्तमानासीत्, स गृहस्याग्रे स्थितां यज्ञवेदिमप्यमासीत्।
४८ अपरं स मां गृहस्यालिन्दं नीत्वा तस्यालिन्दस्योपस्तम्भमेकस्मिन्
पार्श्वे पञ्चहस्तान् अपरस्मिन् पार्श्वे च पञ्चहस्तान् गोपुरस्य विशालताञ्चै-
कस्मिन् पार्श्वे त्रीन् हस्तान् अपरस्मिन् पार्श्वे च त्रीन् हस्तानमासीत्।

अलिन्दस्य दीर्घता विंशतिहस्तमाना विशालता चैकादशहस्तमाना- ४९
सीत्। यैः सोपानै र्जनास्तत्रारोहन्ति तेषां समीपं तदीयोपस्तम्भा
आसन् उपस्तम्भानां समीपञ्चैकस्मिन् पार्श्वे एकोऽपरस्मिन् पार्श्वे चैक
इत्थं द्वौ स्तम्भावास्तां।

---

४१ एकचत्वारिंशोऽध्यायः।

मन्दिरस्य परिमाणभागकोष्ठालङ्कारादीनां कथनं।

अपरं स मां प्रासादस्यान्तिकं नीत्वा तदीयोपस्तम्भावमासीत् द्वयस्य १
विशालतायां तयो र्विशालता एकस्मिन् पार्श्वे षड्हस्तमानापरस्मिन्
पार्श्वे च षड्हस्तमानासीत्। प्रवेशस्थानस्य विशालता दशहस्तमाना, २
प्रवेशस्थानस्य पक्षयोरेक एकस्मिन् पार्श्वे पञ्चहस्तमान एकश्चापरस्मिन्
पार्श्वे पञ्चहस्तमान आसीत्। अपरं स तस्य दीर्घतां चत्वारिंशद्धस्तान्
विशालताञ्च विंशतिहस्तानमासीत्। ततः परं सोऽभ्यन्तरं प्रविश्य ३
प्रवेशस्थानस्योपस्तम्भं द्वौ हस्तौ प्रवेशस्थानञ्च षड्हस्तान् प्रवेशस्थानस्य
विशालताञ्च सप्तहस्तानमासीत्। अपरं स तस्य दीर्घतां विंशतिहस्तान् ४
प्रासादस्याग्रदेशे च तस्य विशालतां विंशतिहस्तानमासीत् माञ्चावादीत्
एतद् अतिपवित्रं स्थानं।

अपरं स गृहस्य कुड्यं षड्हस्तानमासीत्, गृहस्य सर्व्वदिक्षु च ५
पार्श्वस्थनिलयस्य विशालता समन्ताच्चतुर्हस्तमानासीत्। निलयानामेको ६
निलयोऽन्यस्योपरीत्थं तिस्रः श्रेण्य एकैकस्याञ्च त्रिंशन्निलया आसन्
तेषाञ्च निलयानामभ्यन्तरे गृहस्य पार्श्वे तेषामालम्बनार्थकमेकं कुड्य-
मासीत् तदेव ते प्राविशन् न तु गृहकुड्यालम्बिता आसन्। उच्चतानु- ७
क्रमाच्च निलयानां स्थानम् उत्तरोत्तरं विशालतरं [गृहस्य] वेष्टकञ्चा-
भवत्, यतस्तत् समन्ताद् उच्चाग्रपर्य्यन्तं गृहस्य वेष्टनमासीत् तस्माद्
उच्चतानुक्रमेण गृहपार्श्वे तदुत्तरोत्तरं विशालतरमभवत्। इत्थं निम्न-
तमश्रेणीतो मध्यश्रेण्योच्चतमश्रेणीपर्य्यन्तं आरोहोऽभवत्। मया च ८
गृहस्य परित एको मञ्चोऽदर्शि, निलयास्तस्योपरि स्थापिताः, स च
योगस्थानपर्य्यन्तं सम्पूर्णनलैकमानोऽर्थतः षड्हस्तमान आसीत्। तस्य ९
पार्श्वनिलयस्य यद् वहिःकुड्यं तत् पञ्चहस्तमानं, यच्च स्थानं [शून्यम्]
अशिष्यत तद् अभ्यन्तरे निलयानामेवाभ्यन्तरमासीत्। [निलयानां] १०

कोष्ठानाञ्च मध्ये चतुर्दिक्षु गृहस्य परितो विंशतिहस्तमाना विशा-
११ लतासीत्। पार्श्वस्थनिलयस्य प्रवेशस्थानं शून्यस्थानस्यान्तेऽविद्यत, एकं
प्रवेशस्थानमुत्तरदिशि, तदन्यत् प्रवेशस्थानञ्च दक्षिणदिश्यासीत्, परि-
तश्च शून्यस्थानस्य विशालता पञ्चहस्तमानासीत्।
१२ पश्चिमदिशि च व्यवच्छिन्नस्थलस्याग्रदेशे या निर्म्मितिरविद्यत तस्या
विशालता सप्ततिहस्तमाना परितश्च निर्म्मितिकुड्यस्य विशालता पञ्च-
१३ हस्तमाना दीर्घता च नवतिहस्तमानासीत्। पुनः स गृहस्य दीर्घताम-
मासीत् सा शतहस्तमाना, व्यवच्छिन्नस्थलं निर्म्मितिस्तदीयकुड्यानि
१४ चैतेषामपि दीर्घता शतहस्तमानासीत्। गृहस्य व्यवच्छिन्नस्थलस्य च
योऽग्रदेशस्तस्य विशालता पूर्व्वदिशि शतहस्तमानासीत्।
१५ इत्थं स व्यवच्छिन्नस्थलस्याग्रदेशे स्थिताया निर्म्मित्याः पश्चात् तस्या
दीर्घताम् उभयोः पार्श्वयोश्च तदीयवरण्डान् शतहस्तान् अन्तःप्रासादं
१६ प्राङ्गणस्यालिन्दांश्चामासीत्। परितस्त्रयाणां शिला जालबद्धवातायनानि
वरण्डाश्चासन्, शिलानान्तु सम्मुखे परितः काष्ठमयपत्राण्यासन्।
१७ [सर्व्वाण्येतानि] आवातायनाद् देशश्च बद्धवातायनानि प्रवेशस्थानस्यो-
र्द्धदेशो ऽन्तर्गृहं वहिर्दिक् कृत्स्नकुड्यञ्च समन्तादन्त र्वहि र्वा यद्यदासीत्
तत्साकल्यस्य प्रत्येकं निजपरिमाणं निरूपितमभवत्।
१८ किरूबाणां खर्ज्जूराणाञ्च शिल्पकर्म्माविद्यत, द्वयोः किरूबयो र्मध्ये
१९ खर्ज्जूरवृक्ष एक आसीत्, एकस्य च किरूबस्य द्वे मुखे आस्तां। एक-
पार्श्वस्थखर्ज्जूरं प्रति मानवमुखं, अपरपार्श्वस्थखर्ज्जूरं प्रति च सिंहमुख-
२० मासीत्, परितः कृत्स्नगृहमध्ये शिल्पकर्म्मेदमासीत्। समन्ताद् आभूमितः
प्रवेशस्थानस्योपरिभागपर्य्यन्तं किरूबा खर्ज्जूराश्च शिल्पिता आसन्,
२१ प्रासादस्य कुड्यमेतत्। प्रासादस्य द्वारदारूणि चतुरस्राण्यासन् पवित्र-
स्थानस्याग्रदेशस्याकृतिरप्येतस्या आकृतेः सदृश्यासीत्।
२२ वेदिः काष्ठनिर्म्मिता, तस्या उच्चता हस्तत्रयमाना, दीर्घता हस्त-
द्वयमाना, तस्याः कोणाः पादः पार्श्वाश्च काष्ठमयाः। अपरं स मां
२३ जगाद, अयं सदाप्रभोः सम्मुखवर्त्ती भोज्यमञ्चः। प्रासादस्य पवित्रस्था-
२४ नस्य च द्वे द्वारे आस्तां। एकैकद्वारस्य च द्वे शाखे आस्तां तयोश्चैकस्याः
शाखायाः परिवर्त्तमानौ द्वौ कपाटावपरस्याश्च शाखायाः परिवर्त्तमानौ
२५ द्वौ कपाटावास्तां। तेषु प्रासादीयकपाटेषु च शिल्पकर्म्मासीत्, अर्थतः
कुड्येषु यादृशास्तेष्वपि तादृशाः किरूबखर्ज्जूराः शिल्पिता आसन्,

वहिस्थालिन्दस्याग्रदेशे काष्ठमयी तिरस्करिण्यासीत्। अलिन्दस्य पत्तयो २६
गृहपार्श्वस्थनिलयेषु तिरस्करिणीषु च जालबद्धानि वातायनानि तदु-
भयपार्श्वयोश्च खर्ज्जूराकृतयोऽविद्यन्त।

४२ द्विचत्वारिंशोऽध्यायः।

१ याजकानां कोष्ठानां कथनं १३ तत्कर्म्मकथनं १५ वहिःप्राङ्गणस्य परिमाण-कथनञ्च।

अपरं स माम् उत्तरदिशं वहिःप्राङ्गणं गमयित्वोत्तरदिशि व्यव- १
च्छिन्नस्थलस्य सम्मुखे निर्म्मितायाश्च सम्मुखे स्थितां कोष्ठश्रेणीमानैषीत्।
ममाग्रे तस्या दीर्घता शतहस्तमाना तद्वारमुत्तरदिशि तस्या विशालता २
च पञ्चाशद्धस्तमानासीत्। अन्तःप्राङ्गणे विंशतिहस्तमानं यत् स्थानं ३
वहिःप्राङ्गणे च यच्छिलास्तरणमासीत् तयोः सम्मुखे सासीत् वरण्ड-
स्थानुरूपो वरण्ड इत्थमावलित्रयमासीत्। कोष्ठानाम् अग्रे च मार्ग ४
आसीत् तस्य विशालता दशहस्तमाना, शतैकहस्तमानो मार्गश्चाभ्यन्त-
रमगच्छत्, तेषां प्रवेशस्थानानि चोत्तरदिश्यासन्। उपरिस्थकोष्ठानि ५
सङ्कीर्णान्यासन् यस्मान्निर्म्मित्या अधःस्थितेभ्यो मध्यस्थितेभ्यश्च कोष्ठेभ्य
एतेषां स्थानं वरण्डै न्यूनमक्रियत। यतस्तेषां तिस्रः श्रेण्य आसन् प्रा- ६
ङ्गणानान्तु स्तम्भा इव तेषां स्तम्भा नाविद्यन्त तस्माद् अधःस्थितेभ्यो
मध्यस्थितेभ्यश्चैतेषां भूमिः सङ्कुचितासीत्। वहिस्तु कोष्ठानामनु- ७
वर्त्तिनी वहिःप्राङ्गणस्य पार्श्वे कोष्ठानामग्रदेशे प्रावृतिरेकासीत्, तस्या
दीर्घता पञ्चाशद्धस्तमाना। यतो वहिःप्राङ्गणस्य [पार्श्वे] कोष्ठानां दी- ८
र्घता पञ्चाशद्धस्तमाना, परन्तु पश्य प्रासादस्याग्रे सा शतहस्तमाना-
सीत्। वहिःप्राङ्गणात् तत्रागच्छतो जनस्य कृते प्रवेशस्थानमेतेषां ९
कोष्ठानां अधः पूर्व्वदिश्यविद्यत। प्राङ्गणस्य प्रावृत्याः प्रशस्तपार्श्वे पूर्व्व- १०
दिशि व्यवच्छिन्नस्थलस्याग्रे निर्म्मित्याश्चाग्रे कोष्ठान्यासन्। तेषामग्रे ११
च वर्त्माविद्यत। दैर्घ्येण विशालतया निर्गमनस्थानै र्विधानै र्द्वारैश्चो-
त्तरदिक्स्थकोष्ठानामिव तेषाम् आकार आसीत्। दक्षिणदिक्स्थ- १२
कोष्ठानां प्रवेशस्थानानीव प्रवेशस्थानं मार्गस्य मुखेऽविद्यत। स च
मार्गः यथायोग्यप्रावृत्या अग्र आगच्छतः पूर्व्वदिशि स्थितः।

अपरं स मां जगाद, व्यवच्छिन्नस्थलस्याग्रे यान्युत्तरदिक्स्थको १३
ष्ठानि दक्षिणदिक्स्थकोष्ठानि च तानि पवित्रकोष्ठानि सन्ति; ये

याजकाः सदाप्रभोः समीपम् उपतिष्ठन्ति ते तत्रैवातिपवित्राणि द्रव्या-
णि भक्षयिष्यन्ति तत्र चातिपवित्रद्रव्याण्यर्थतो नैवेद्यानि पापार्थक-
१४ बलीन् दोषार्थकबलींश्च निधास्यन्ति, यतस्तत् स्थानं पवित्रं। याजकाः
प्रवेशात् परं पवित्रस्थानाद् वहिःप्राङ्गणं न निर्गमिष्यन्ति, ते यानि
वासांसि परिधाय परिचरन्ति तानि तत्र निधास्यन्ति यतस्तानि
पवित्राणि। तेऽन्यवासांसि परिधाय प्रजानां विषयम् उपस्थास्यन्ति।
१५ अभ्यन्तरगृहस्य परिमाणानाम् अवधारणे समापिते स मां पूर्व्वा-
भिमुखगोपुरस्य मार्गं प्रति वहि र्नीत्वा तत्र परितः सर्व्वम् अमात्त।
१६ स माननलेन पूर्व्वपार्श्वममात्त, माननलेन स साकल्यतः पञ्चशतनल-
१७ मानः। स उत्तरपार्श्वममात्त, माननलेन स साकल्यतः पञ्चशतनल-
१८ मानः। स दक्षिणपार्श्वममात्त, माननलेन स पञ्चशतनलमानः। स
१९ पश्चिमपार्श्व प्रति परावृत्य तं नलमानेन पञ्चशतनलमानममात्त। स
२० गृहस्य चतुरः पार्श्वान् अमात्त; तस्य परितः प्राचीरमेकमासीत्, तस्य
दैर्घ्यं पञ्चशतनलमानं विशालता च पञ्चशतनलमाना। पवित्रापवित्रयो
र्विच्छेदनार्थं तदासीत्।

---

४३ त्रिचत्वारिंशोऽध्यायः।

१ मन्दिरे ईश्वरस्य प्रतापदर्शनं ७ इस्रायेलः पापानां वर्णनं १० अनुतापाय मन्दिरसम्बन्धीयव्यवस्थापालनाय च जनगणं प्रत्युपदेशः १३ यज्ञवेद्याः परिमाणकथनं १८ तदीयव्यवस्थाकथनञ्च।

१ अपरं स मां गोपुरस्य समीपम् अर्थतः पूर्व्वदिगभिमुखस्य गोपुरस्य
२ समीपम् अनैषीत्। तत्र पश्य, इस्रायेल ईश्वरस्य प्रतापः पूर्व्वदिश आ-
गच्छत्। तस्य रवो भूरितोयानां रवेण तुल्यः, पृथिवी च तदीयप्रतापेन
३ देदीप्यमानाभवत्। पुरा य आकारो मया दृष्टोऽर्थतो नगरस्य
विनाशायागमनकाले मया य आकारो दृष्टस्तत्सदृशोऽयमाकारः;
किबारनदीतीरे च मया य आकारो दृष्टस्तत्सदृशोऽयमाकारः। ततो-
४ ऽहम् अधोमुखः पतितः। सदाप्रभोः प्रतापश्च पूर्व्वदिगभिमुखगोपुरेण
५ मन्दिरसमीपम् आगच्छत्। अपरं वायु र्मामुत्थाप्याभ्यन्तरप्राङ्गणमनैषीत्,
६ ततः पश्य, मन्दिरं सदाप्रभोः प्रतापेन पूर्णमासीत्। अपरं मन्दिरात्
मामालपतः कस्यचिद् रवो मयाश्रावि मम पार्श्वे च नर एकोऽतिष्ठत्।
७ स च मां जगाद, भो नरसन्तान, इदं मम सिंहासनस्य स्थानं,

इदञ्च मम चरणतलयोः स्थानं, अत्रैवेस्रायेलः सन्तानानां मध्येऽहम्
अनन्तकालं निवत्स्यामि; इस्रायेलः कुलम् अर्थतस्ते तेषां राजानश्च
स्वव्यभिचारेण स्वनृपाणां शवैश्चार्थतः स्वीयोच्चस्थलीभि र्मम पवित्रं नाम
न पुनरपवित्रं करिष्यन्ति। ते मच्छिलाया अव्यवहितस्थाने स्वीयशिलां ८
मम द्वारस्तम्भस्य पार्श्वे च स्वीयद्वारस्तम्भं संस्थाप्य मम तेषाञ्च मध्ये
कुड्यमेवान्तरालं विधाय स्वकृताभि र्घृण्यक्रियाभि र्मम पवित्रं नामा-
शुचीकृतवन्तस्ततोऽहं स्वक्रोधानलेन तान् ग्रासितवान्। इदानीं ते ९
स्वव्यभिचारं स्वनृपाणां शवांश्च मत्तो दवयिष्यन्ति, अहञ्चानन्तकालं तेषां
मध्ये निवत्स्यामि।

भो नरसन्तान, त्वम् इस्रायेलः कुलम् एतस्य मन्दिरस्य कथां ज्ञा- १०
पय तेन ते निजापराधेभ्यो विषण्णा भविष्यन्ति तस्य युक्तरचनां मा-
स्यन्ते च। ते यद्यत् कृतवन्तस्ततो यदि विषण्णा भवन्ति, तर्हि त्वं ११
मन्दिरस्याकारं युक्तरचनां निर्गमनप्रवेशस्थानानि तस्य सर्व्वाकारान्
सर्व्वविधीन् सर्व्वाकारान् सर्व्वव्यवस्थाश्च तान् ज्ञापय, तेषां समक्षं
लिख च, ते तस्य सर्व्वाकारं सर्व्वविधींश्च रक्षिष्यन्ति समाचरिष्यन्ति
च। मन्दिरस्य व्यवस्थेयं। पर्व्वतस्य शिखरे परितस्तस्य कृत्स्ना परिसी- १२
मातिपवित्रा। पश्येयं मन्दिरस्य व्यवस्था।

अङ्गुलिचतुष्टयाधिकहस्तमानै र्हस्तै र्यज्ञवेद्याः परिमाणानीमानि। १३
तस्या मूलं हस्तैकमानं तस्य विशालता च हस्तैकमाना, परितश्च तत्प्रान्ते
स्थिता सीमा वितस्त्येकमाना, इदं यज्ञवेद्यास्तलं। भूमिस्थमूलात् अधः- १४
स्थसोपानपर्य्यन्तं हस्तद्वयं, तस्य विशालता च हस्तैकमाना, पुनस्तस्मात्
क्षुद्रसोपानात् वृहत्सोपानपर्य्यन्तं हस्तचतुष्टयं, तस्य विशालता च
हस्तैकमाना। पुण्यमृत्तिकाचयश्च हस्तचतुष्टयमानः, पुण्यचुल्लीतश्च १५
तदूर्द्ध्वं च चत्वारि शृङ्गाणि भविष्यन्ति। पुण्यचुल्ली च दैर्घ्येण द्वादश- १६
हस्तमाना, विशालतया च द्वादशहस्तमाना, चतुष्पार्श्वे चतुरस्रा। सो- १७
पानञ्च दैर्घ्येण चतुर्द्दशहस्तमानं विशालतया च चतुर्द्दशहस्तमानं
चतुरस्रं, तत्परितः स्थिता सीमा चार्द्धहस्तमाना, तस्य मूलञ्च परितो
हस्तैकमानं तदीयारोहणञ्च पूर्व्वदिशि भविष्यति।

अपरं स मां जगाद, भो नरसन्तान, प्रभुः सदाप्रभुरित्थमाह, १८
यज्ञवेद्यां होमबलिदानाय शोणितप्रोक्षणाय च यस्मिन् दिने सा नि-
र्म्मायिष्यते, तस्मिन् दिन इमे तस्या विधयः। प्रभुः सदाप्रभुराह, १९

मम परिचर्य्यां कर्त्तुं ये माम् उपतिष्ठन्ति तेभ्यः सादोकवंशोद्भवेभ्यो
१० लेवीययाजकेभ्यस्त्वं पापार्थकबलिमेकं गोवत्सं प्रदास्यसि। तदीयशोणितस्य
किञ्चिदादाय च तस्याश्चतुर्षु शृङ्गेषु सोपानस्य चतुर्षु प्रान्तेषु परितः
सीमनि च दत्त्वा तां मुक्तपापां करिष्यसि तस्याः प्रायश्चित्तं करिष्यसि
२१ च। अपरं तं पापबलिरूपं वृषमादाय मन्दिरस्य निर्द्दिष्टस्थाने धर्म्म-
२२ धाम्नो वहि र्भस्मसात् करिष्यसि। अपरं द्वितीयदिने त्वं पापबलिरूपं
निर्द्दोषमेकं छागम् उत्स्रक्ष्यसि याजकाश्च यथा वृषेण कृतवन्तस्तथा
२३ वेदिं मुक्तपापां करिष्यन्ति। त्वया च पापार्थकबलिदाने सम्पन्ने त्वं
२४ निर्द्दोषमेकं गोवत्सं निर्द्दोषमेकं मेषञ्चोपस्थापयिष्यसि। त्वं सदाप्रभोः
सम्मुखं तावुपस्थापयिष्यसि, याजकाश्च तयोरुपरि लवणं निक्षेप्स्यन्ति
२५ सदाप्रभोः कृते होमबलिदानाय तावुत्स्रक्ष्यन्ति च। सप्ताहं यावत् प्रति-
दिनं त्वं पापार्थकबलिरूपमेकं छागमुत्स्रक्ष्यसि, ते च निर्द्दोषं गोवत्समेकं
२६ निर्द्दोषं मेषमेकञ्चोत्स्रक्ष्यन्ति। सप्ताहं यावत् ते वेद्याः प्रायश्चित्तं करि-
२७ ष्यन्ति ताञ्च शुचीकरिष्यन्ति तस्या हस्तपूरणञ्च विधास्यन्ति। तेषु दि-
नेषु समाप्तेष्वष्टमदिने तत्पश्चाच्च याजकास्तस्यां वेद्यां युष्माकं होमार्थ-
कानि मङ्गलार्थकानि च बलिदानान्यनुष्ठास्यन्ति, तेनाहं युष्माननुग्रही-
ष्यामीति प्रभुः सदाप्रभुराह।

---

४४ चतुश्चत्वारिंशोऽध्यायः।

१ पूर्व्वगोपुरे देशाध्यक्षस्याधिकारिताकथनं ४ ईश्वरेण याजकानां भर्त्सनं ९ ईश्वरस्य परिचर्य्यातः प्रतिमापूजालिप्तानां याजकानां निवारणं तस्याञ्च सादोकवंशीययाजकानां नियोगः १७ याजकानां व्यवस्थाकथनञ्च।

१ अपरं स धर्म्मधाम्नः पूर्व्वदिगभिमुखं वहिर्गोपुरं प्रति मां परिवर्त्त-
२ यामास तत्तु बद्धम् आसीत्। अपरं सदाप्रभु र्मामवादीत्, गोपुरमिदं
बद्धं स्थास्यति, इदं नोद्घाटयिष्यते। एतेन कोऽपि न प्रवेक्ष्यति; यतो
हेतोरिस्रायेल ईश्वरः सदाप्रभुरेतेन प्रविष्टवांस्तत एतद् बद्धं स्थास्यति।
३ केवलमध्यक्षोऽध्यक्षत्वात् सदाप्रभोः समक्षम् आहारकरणार्थम् अत्रो-
पवेक्ष्यति, स गोपुरस्यालिन्दस्य मार्गेण प्रवेक्ष्यति तन्मार्गेण निर्गमि-
ष्यति च।
४ अपरं स उत्तरदिक्स्थगोपुरस्य मार्गेण मां मन्दिरस्य सम्मुखमा-

नैषीत् तत्राहं दृक्पातं कृत्वा सदाप्रभो र्मन्दिरं सदाप्रभोः प्रतापेन
परिपूर्णं दृष्ट्वाधोमुखः पतितः। सदाप्रभुश्च मामवादीत्, भो नर- ५
सन्तान, सदाप्रभो र्मन्दिरस्य सर्व्वविधीनधि तदीयसर्व्वव्यवस्थाश्चाध्यहं
त्वां यद्यत् कथयिष्यामि त्वं तत्र मनो निधत्स्व स्वचक्षुर्भ्यां तन्निरी-
क्षस्व स्वकर्णाभ्यां तद् गृहाण च, धर्म्मधाम्नः सर्व्वनिर्गमनस्थाने र्मन्दिर-
प्रवेशे मनो निधत्स्व च। त्वं तद् विद्रोहिदलम् इस्रायेलः कुलमित्थं ६
वद च, प्रभुः सदाप्रभुरित्थमाह, भो इस्रायेलः कुल, अलं युष्माकं
सर्व्वघृणक्रियाभिः। ताभि र्यूयम् अच्छिन्नत्वग्हृदयान् अच्छिन्नत्वङ्मां- ७
सांश्च विदेशीयजनान् मम धर्म्मधाम्न्यवस्थापयितुं मम तन्मन्दिरमप-
वित्रीकर्त्तुञ्चाभ्यन्तरमानीतवन्तः। यूयञ्च यदा मम भक्ष्यं मेदो रक्तञ्चान-
यत तदा युष्मदीयघृणक्रियापरिशिष्टवत् तेऽपि मम नियमं व्यर्थीकृत-
वन्तः। यूयञ्च मम पवित्रस्थानानां रक्षणीयं न रक्षित्वा स्वेच्छातस्तान् ८
मम धर्म्मधाम्नि रक्षणीयस्य रक्षिणः कृत्वा नियुक्तवन्तः।

प्रभुः सदाप्रभुरित्थमाह, इस्रायेलः सन्तानानां मध्ये यावन्तो विजा- ९
तीयजना विद्यन्ते तेषां मध्येऽच्छिन्नत्वग्हृदयोऽच्छिन्नत्वङ्मांसश्च कोऽपि
विजातीयजनो मम धर्म्मधाम न प्रवेक्ष्यति। परन्तु स्वदेवप्रतिमानाम् १०
अनुगमनाय मत्समीपतो भ्रान्तस्येस्रायेलो भ्रमणकाले ये लेवीयजना मत्स-
मीपतो दूरं गतास्तेऽपि निजापराधं वक्ष्यन्ते। ते मम धर्म्मधाम्नि परि- ११
चारका भूत्वा मन्दिरस्य गोपुरेषु द्वारिणो मन्दिरस्य परिचारकाश्च
भविष्यन्ति, ते प्रजानां कृते होमार्थकादीन् बलीन् निहनिष्यन्ति तासां
परिचर्य्याय तासां समक्षं स्थास्यन्ति च। यतस्ते तासां देवविग्रहाणां १२
समक्षं प्रजाः परिचरितवन्त इस्रायेल्कुलस्यापराधजनकविघ्नस्वरूपा
जाताश्च, ततो हेतोरहं तेषां प्रतिकूलं स्वहस्तमुत्तोल्य शप्तवानिति प्रभुः
सदाप्रभुराह, ते स्वापराधं वक्ष्यन्ते। मम याजनाय ते मां नोपस्थास्यन्ति १३
मम सर्व्वाणि पवित्रद्रव्याणि विशेषतो ममातिपवित्रद्रव्याणि नोप-
स्थास्यन्ति च। ते स्वीयावमानं स्वकृता घृणक्रियाश्च वक्ष्यन्ते। अहं १४
तान् गृहस्य समस्तदास्यकर्म्मणि तत्र कर्त्तव्ये सर्व्वकार्य्ये च तदीयरक्ष-
णीयरक्षकान् करिष्यामि। इस्रायेलः सन्तानानां मत्तोऽपभ्रमणे तु १५
सादोकस्य सन्ताना ये लेवीययाजका मम धर्म्मधाम्नो रक्षणीयं रक्षित-
वन्तस्त एव मत्परिचर्य्यायै माम् उपस्थास्यन्ति मामुद्दिश्य मेदःशोणिते
चोत्स्रष्टुं मत्समक्षं स्थास्यन्तीति प्रभुः सदाप्रभुराह। ते मम धर्म्मधाम १६

प्रवेक्ष्यन्ति ते च मत्परिचर्य्यार्थे मम भोजनमञ्चमुपस्थास्यन्ति मम रक्ष-
णीयं रक्षिष्यन्ति च।
१७ अन्तःप्राङ्गणस्य गोपुरेषु प्रवेशकाले ते क्षौमवासांसि परिधास्यन्ते,
अन्तःप्राङ्गणस्य गोपुरेषु तदभ्यन्तरे च परिचर्य्याकरणकाले मेषलोम
१८ तेषु मा विद्यतां। तेषां शिरःसु क्षुमोद्भवानि शिरोभूषणानि कटौ च
क्षुमोद्भवानि जङ्घावरणानि विद्यन्तां, ते सस्वेदा बद्धकटयो मा भव-
१९ न्तु। यानि परिधाय ते परिचर्य्यां कृतवन्तस्तानि वासांसि ते वहिः-
प्राङ्गणस्थजनगणस्य समीपे वहिःप्राङ्गणे निर्गमनकाले धर्म्मधाम्नः को-
ष्ठेषु त्यक्तापराणि वस्त्राणि परिदधतां, स्ववासोभि र्जनगणं मा पवि-
२० त्रीकुर्व्वन्तु। ते मुण्डितमुण्डा दीर्घजटा वा मा भवन्तु, ते स्वमस्तकानां
२१ केशान् कर्त्तयन्तु। अन्तःप्राङ्गणप्रवेशकाले तेषां याजकानां कोऽपि
२२ जनो द्राक्षारसं मा पिवतु। ते विधवां स्वामित्यक्तां वा स्त्रियं नोद्व-
हन्तु किन्त्विस्रायेल्कुलोद्भवाम् अनूढकन्यां मृतयाजकस्य विधवां वोद्व-
२३ हन्तु। ते च मम प्रजाः पवित्रापवित्रयोः प्रभेदं शिक्षयन्तु शुच्यशुच्योः
२४ प्रभेदञ्च ज्ञापयन्तु। विवादे च त एव विचारायोपस्थाय मम शास-
नैस्तद्विचारं निष्पादयन्तु मम सर्व्वपर्व्वसु मम व्यवस्था मम विधींश्च
२५ पालयन्तु मम विश्रामदिनानि च पवित्रीकुर्व्वन्तु। अशौचाय नरशवस्य
समीपं मा गच्छन्तु, केवलं पितरि मातरि वा पुत्रे कन्यायां वा भ्रात-
२६ र्य्यनूढभगिन्यां वा तेषामशुचितानुज्ञेया। याजके शुचीभूते तस्य कृते-
२७ ऽपराणि सप्तदिनानि गण्यन्तां। स च यस्मिन् दिने धर्म्मधाम्नि
परिचर्य्याकरणार्थं धर्म्मधामार्थतोऽन्तःप्राङ्गणं प्रवेक्ष्यति, तस्मिन् दिने
२८ स्वपापार्थं बलिदानं करिष्यतीति प्रभोः सदाप्रभोरुक्तिः। तेषां रिक्थस्य
चायं नियमो भविष्यति, अहमेव तेषां रिक्थं; यूयञ्चेस्रायेलो मध्ये
२९ तेभ्योऽधिकारं न दास्यथ, अहमेव तेषामधिकारः। भक्ष्यनैवेद्यानि पापा-
र्थकबलयो दोषार्थकबलयश्च तैरेव भक्षयिष्यन्ते, इस्रायेलो मध्ये यच्च
३० वर्ज्जितं तत् सर्व्वं तेषां भविष्यति। यावतीयासुपक्वद्रव्याणाम् एकैकस्या-
ग्रिमांशा युष्माकं यावतीयोपहाराणां मध्य एकैकोपहारस्य साकल्यञ्च
याजकानां भविष्यति, यूयञ्च स्वशक्तूनामग्रिमांशं याजकाय दास्यथ,
३१ तथा कृते स्वगेहेष्वाशीर्व्वादं निधास्यध्वे। पक्षी स्यात् पशु र्वा स्यात् स्वयं-
मृतं विदीर्णं वा किमपि याजकै र्न भक्षयिष्यते।

४५ पञ्चचत्वारिंशोऽध्यायः।

१ पवित्रभूम्युपहारस्य विधिः ९ देशाध्यचं प्रजागणञ्च प्रति व्यवस्थाज्ञापनञ्च।

गुटिकापातेन रिक्थनिरूपणाय देशस्य विभागकाले यूयं सदाप्र- १
भवे भूम्युपहारमेकं निवेदयिष्यथ, स देशस्य पवित्रांशः; तस्य दैर्घ्यं
पञ्चविंशतिसहस्रनलमानं विशालता च दशसहस्रनलमाना भवि-
ष्यति, स च परितः स्वीयकृत्स्नपरिसीम्नो मध्ये पवित्रो भविष्यति।
तन्मध्ये दैर्घ्येण पञ्चशतनलमाना विशालतया च पञ्चशतनलमाना चतु- २
रस्रा भूमि र्धर्म्मधामार्थका भविष्यति, पुनस्तत्परितः पञ्चाशद्धस्तमानः
परिसरो भविष्यति। पुनस्तस्य परिमितांशस्य मध्ये त्वं दैर्घ्येण पञ्च- ३
विंशतिसहस्रनलमानां विशालतया च दशसहस्रनलमानां भूमिं मा-
स्यसे, तस्या मध्ये धर्म्मधामातिपवित्रस्थानं भविष्यति। देशस्यायं ४
पवित्रांशः सदाप्रभोः परिचर्य्यार्थम् उपतिष्ठतां धर्म्मधाम्नः परिचार-
काणां याजकानां भविष्यति, स तेषां कृते गृहनिर्म्माणार्थकस्थानं
धर्म्मधाम्नश्च कृते पवित्रं स्थानं भविष्यति। पुनश्च दैर्घ्येण पञ्चविंशति- ५
सहस्रनलमाना विशालतया च दशसहस्रनलमाना भूमि र्मन्दिरस्य
परिचारकाणां लेवीयानां कृते वसतिगोपुरार्थको भूम्यधिकारो भवि-
ष्यति। परन्तु नगरस्य भूम्यधिकारार्थं यूयं विशालतया पञ्चसहस्र- ६
नलमानां दैर्घ्येण च पञ्चविंशतिसहस्रनलमानां पवित्रोपहारस्य पार्श्वे
स्थितां भूमिं दास्यथ; सा कृत्स्नस्येस्रायेल्कुलस्य भविष्यति। पुन र्यूयं ७
पवित्रोपहारनगरीयभूम्यधिकारयोरुभयपार्श्वयोः पवित्रोपहारस्याग्रे
नगरीयभूम्यधिकारस्याग्रे चार्थतः पश्चिमप्रान्तस्य पश्चिमे पूर्व्वप्रान्तस्य
पूर्व्वे च दैर्घ्येण पूर्व्वसीमतः पश्चिमसीमपर्य्यन्तम् अंशानामेकांशेन
समानां भूमिमध्यक्षाय दास्यथ। सा तस्य भूमिरिस्रायेलो मध्ये च तस्य ८
भूम्यधिकारो भविष्यति, ततो मन्नियुक्ता अध्यक्षाः पुन र्मम प्रजागणं न
पीडयिष्यन्ति, किन्तु स्ववंशगणानुसारेणेस्रायेलः कुलाय देशं प्रदास्यन्ति।
प्रभुः सदाप्रभुरित्थमाह। भो इस्रायेलोऽध्यक्षाः, अलं पापेन, यूयं ९
दौरात्म्यमुपद्रवञ्च स्वतो दवयत, न्यायविचारं धार्म्मिकताञ्चाचरत, मत्प्र-
जागणस्याधिकारभ्रष्टीकरणाद् विरमध्वमिति प्रभुः सदाप्रभुराह।
न्याय्यस्तुलायष्टि र्न्याय्यम् एफामानं न्याय्यं वातमानञ्च युष्माकं भवन्तु। १०
एफाबातयोरेकं परिमाणं भवतु; बातं होमरस्य दशमांश एफा ११

चापि होमरस्य दशमांशो भवतु, तयोः परिमाणं होमरानुरूपं भवतु।
१२ शेकलञ्च विंशतिगेरापरिमितं भवतु, विंशतिशेकलैः पञ्चविंशतिशेकलैः
पञ्चदशशेकलैश्च युष्माकं मानिरेका भवतु।
१३ युष्माभिरादेय उपहारोऽयं। गोधूमानां होमराद् एफायाः षष्ठांशः,
१४ यवानाञ्च होमराद् एफायाः षष्ठांशः। तैलस्य च विधि र्बातसम्प-
र्कीयः, तैलस्यैककोराद् बातस्य दशमांशः, तत् कोरं दशबातमानं
१५ होमरेण तुल्यञ्च, यतो दशबातै र्होमरं भवति। इस्रायेलो जलसिक्त-
भूमिमध्ये चरतो मेषादिपालाच्च द्विशतमेषाणामेको मेषः। जनानां
कृते प्रायश्चित्तकरणार्थं तद् भक्ष्यनैवेद्यस्य होमबलिदानस्य मङ्गलार्थ-
१६ कबलिदानानाञ्च कृते भविष्यतीति प्रभुः सदाप्रभुराह। देशस्य सर्व्व-
१७ प्रजा इस्रायेलोऽध्यक्षाय दातव्यस्यास्योपहारस्याधीना भविष्यन्ति। पर्व्व-
खमावस्यासु विश्रामवारेष्विस्रायेल्कुलस्य सर्व्वोत्सवेषु च होमबलीनां
भक्ष्यपेयनैवेद्यानाञ्चोत्सर्ज्जनम् अध्यक्षस्य कार्य्यं भविष्यति; इस्रायेल्-
कुलस्य कृते प्रायश्चित्तकरणार्थं स एव पापार्थकबलिदानं नैवेद्योत्सर्जनं
होमबलिदानं मङ्गलार्थकबलिदानानि चानुष्ठास्यति।
१८ प्रभुः सदाप्रभुरित्थमाह, आदिममासस्य प्रथमदिने त्वं निर्द्दोषमेकं
१९ गोवत्समादाय धर्म्मधाम मुक्तपापं करिष्यसि। याजकश्च पापार्थकबलेः
शोणितस्य कियदंशमादाय मन्दिरस्य द्वारस्तम्भेषु वेद्याः सोपानस्य
२० चतुर्षु प्रान्तेष्वन्तःप्राङ्गणस्य गोपुरस्तम्भेषु च दास्यति। प्रमत्तजनस्य
बुद्धिहीनस्य च कारणात् त्वं मासस्य सप्तमदिनेऽपि तथैव करिष्य-
२१ सीत्थं यूयं मन्दिरस्य कृते प्रायश्चित्तं करिष्यथ। आदिममासस्य चतु-
र्द्दशदिवसे युष्माकं निस्तारपर्व्व भविष्यति, तत् सप्तदिनानाम् उत्सवः,
२२ तदा किण्वशून्याः पूपा भक्षयिष्यन्ते। तस्मिन् दिने चाध्यक्ष आत्मकृते
कृत्स्नस्य देशीयप्रजागणस्य कृते च पापार्थकबलिं वृषमेकम् उत्स्रक्ष्यति।
२३ तस्योत्सवस्य सप्ताहे स सप्तदिनानां मध्ये प्रत्यहं निर्द्दोषान् सप्तवृषान्
सप्तमेषांश्च दत्त्वा सदाप्रभुमुद्दिश्य होमार्थकबलिदानं करिष्यति प्रत्य-
२४ हञ्च छागमेकं दत्त्वा पापार्थकबलिदानं करिष्यति। भक्ष्यनैवेद्यार्थञ्च
वृषस्य कृत एफापरिमितं मेषस्य कृतेऽप्येफापरिमितं गोधूमचूर्णं पुन-
२५ रेफायाः कृते हिनैकपरिमितं तैलं प्रदास्यति। सप्तममासस्य पञ्चदश-
दिने पर्व्वणि स सप्ताहं यावत् तद्वदेव पापार्थकं होमार्थकञ्च बलिदानं
नैवेद्यतैलयोरुत्सर्जनञ्च करिष्यति।

४६ षट्चत्वारिंशोऽध्यायः।

१ अध्यक्षेण प्रजागणेन च कर्त्तव्यस्य बलिदानस्य विधिः ८ मन्दिरे गमागमस्य बलिदानस्य च विधिः १६ अध्यक्षकुमाराणाम् अधिकारः १९ पाकशालानां कथा च।

प्रभुः सदाप्रभुरित्थमाह, अन्तःप्राङ्गणस्य पूर्व्वाभिमुखं गोपुरं कार्य्या- १
र्थकेषु षड्दिनेषु रुद्धं स्थास्यति, परन्तु विश्रामदिन उद्घाटयिष्यते,
अमावस्यादिनेऽप्युद्घाटयिष्यते। अध्यक्षश्च वहिःस्थानाद् गोपुरीया- २
लिन्दस्य मार्गेण प्रविश्य गोपुरस्य पार्श्वस्तम्भानां सन्निधौ स्थास्यति,
याजकाश्च तस्य होमार्थकबलिं मङ्गलार्थकबलींश्चोत्सक्ष्यन्ति, ततः परं
स गोपुरस्य शिलायां प्रणिपातं कृत्वा निष्क्रमिष्यति। परन्तु गोपुरं ३
सन्ध्यां यावद् अरुद्धं स्थास्यति। जनपदस्य प्रजागणश्च विश्रामवारेष्व-
मावस्यासु च तस्य गोपुरस्य प्रवेशस्थाने सदाप्रभोः समक्षं प्रणिपातं
करिष्यति।

सदाप्रभुमुद्दिश्याध्यक्षेण कर्त्तव्यं होमबलिदानमिदं, विश्रामवारे ४
निर्द्दोषाः षण्मेषशावका निर्द्दोषश्चैको मेषः। भक्ष्यनैवेद्यञ्च मेषस्य कृते ५
एफापरिमितं, मेषशावकानाञ्च कृते नैवेद्यं तदीयहस्तस्य दानं, एफायाः
कृते च हिनैकमानं तैलं। अमावस्यादिने च निर्द्दोष एको गोवत्सः ६
षण्मेषशावका एको मेषश्च, इमेऽपि निर्द्दोषा भविष्यन्ति। भक्ष्यनैवेद्या- ७
र्थञ्च स गोवत्सस्य कृत एफां मेषस्य कृतेऽप्येफामेकां मेषशावकानां कृते
च स्वसम्पत्त्यनुयायि नैवेद्यं, एफायाः कृते हिनैकमानं तैलञ्च प्रदास्यति।

परन्त्वध्यक्षो यदायास्यति, तदा गोपुरीयालिन्दस्य मार्गेण प्रवे- ८
क्ष्यति तन्मार्गेण निष्क्रमिष्यति च। जनपदस्य प्रजागणश्च पर्व्वसु यदा ९
सदाप्रभोः सम्मुखमायास्यति, तदा प्रणिपातार्थं यो जन उत्तर-
गोपुरस्य मार्गेण प्रविष्टः स दक्षिणगोपुरस्य मार्गेण निष्क्रमिष्यति,
यश्च दक्षिणगोपुरस्य मार्गेण प्रविष्टः स उत्तरगोपुरस्य मार्गेण निष्क्र-
मिष्यति, यो जनो यस्य गोपुरस्य मार्गेण प्रविष्टः स न पुनस्तेनागमि-
ष्यति, किन्तु स्वसम्मुखमार्गेण निष्क्रमिष्यति। अध्यक्षश्च तेषां मध्यवर्त्ती १०
भूत्वा तेषां प्रवेशकाले प्रवेक्ष्यति तेषां निष्क्रमणकाले निष्क्रमिष्यति च।

उत्सवेषु पर्व्वसु च भक्ष्यनैवेद्यं गोवत्सस्य कृत एफा मेषस्य कृत एफा ११
मेषशावकानां कृते च तदीयहस्तस्य दानम्, एफायाः कृते च हिनैक-
मानं तैलं भविष्यति। यदा चाध्यक्षः सदाप्रभुमुद्दिश्य स्वेच्छाकृतदानाय १२

स्वेच्छातो होमबलिं मङ्गलार्थकबलीन् वोत्स्रक्ष्यति, तदा तस्य कृते
पूर्व्वाभिमुखं गोपुरमुद्घाटयिष्यते, स च यथा विश्रामवारे कुरुते तथा
स्वीयहोमार्थकबलिं स्वीयमङ्गलार्थकबलींश्चोत्स्रक्ष्यति तत्पश्चान्निष्क्रमि-
ष्यति च, तस्य निष्क्रमणात् परं गोपुरं भन्त्स्यते च।
१३ त्वञ्च प्रत्यहं सदाप्रभुमुद्दिश्य होमबलिदानार्थकमेकवर्षीयं निर्दोषं
१४ मेषशावकमेकम् उत्स्रक्ष्यसि, प्रतिप्रातस्तमुत्स्रक्ष्यसि। तत्सम्बन्धीय-
भक्ष्यनैवेद्यार्थञ्च प्रतिप्रातरैफायाः षष्ठांशमानं गोधूमचूर्णं तदार्द्री-
करणार्थं हिनस्य तृतीयांशं तैलञ्च सदाप्रभुमुद्दिश्येदं भक्ष्यनैवेद्यमुत्स्र-
१५ क्ष्यसि, इमे विधयोऽनन्तकालपर्य्यन्तं नित्यस्थायिनः। अतो यूयम्
नित्यबलिदानार्थं प्रतिप्रातस्तं मेषशावकं तद् भक्ष्यनैवेद्यं तत् तैल-
ञ्चोत्स्रक्ष्यथ।
१६ प्रभुः सदाप्रभुरित्थमाह, अध्यक्षो यदा स्वपुत्राणां कस्मैचिद् भूदानं
प्रदास्यति, तदा तत् तस्य पैतृकरिक्थं, तत् तस्य सन्तानानां भवि-
१७ ष्यति, पैतृकरिक्थत्वेन तत् तेषाम् अधिकारो भविष्यति। यदा तु
स स्वदासानां कस्मैचित् स्वरिक्थाद् भूदानं प्रदास्यति, तदा मुक्ति-
वत्सरं यावत् तत् तस्य भविष्यति, पश्चात् पुनरध्यक्षं प्रति वर्त्तिष्यते,
१८ तस्य रिक्थं केवलं तदीयसन्तानानां भविष्यति। अध्यक्षश्चोपद्रवे-
णाधिकारापहरणाय प्रजागणस्य रिक्थात् किञ्चिदपि नादास्यते, स
निजाधिकारादेव स्वसन्तानान् प्राप्तरिक्थान् करिष्यति, मम प्रजा-
गणेन प्रत्येकं निजाधिकारतो विच्छिन्नेन न भवितव्यं।
१९ अपरं स मां गोपुरस्य स्कन्धे स्थितेन प्रवेशमार्गेण याजकानां कृते
पवित्राणाम् उत्तराभिमुखकोष्ठानां समीपम् अनैषीत् तत्र पश्य पश्चिम-
२० दिक्स्थे गृहगर्भे स्थानमेकमासीत्। ततः स माम् अब्रवीत् स्थाने-
ऽस्मिन् याजका दोषार्थकानां पापार्थकानाञ्च बलीनां मांसं जलसिद्धं
करिष्यन्ति भक्ष्यनैवेद्यानि पक्ष्यन्ति च, न चेत् ते वहिःप्राङ्गणं तेषु
२१ नीतेषु जनगणस्य पावनं सम्भविष्यति। अपरं स मां वहिःप्राङ्गणं
नीत्वा प्राङ्गणस्य चतुर्णां कोणानां समीपं गमयामास, पश्य तत्र प्राङ्ग-
२२ णस्यैकैकस्मिन् कोण एकैकं प्राङ्गणमासीत्। प्राङ्गणस्य चतुर्षु कोणेषु
सुदृढप्राङ्गणान्यविद्यन्त, तेषां दीर्घता चत्वारिंशद्धस्तमाना विशालता
२३ त्रिंशद्धस्तमाना चतुर्णां कोणस्थानामेकं परिमाणमासीत्। तेषां
चतुर्णां मध्ये च परितः प्रस्तरमयराज्यः परितस्तासां राजीनाम् अधो

निर्म्मितानि पाकस्थानानि चाविद्यन्त। ततः स मां जगाद, इमानि २४
पाचकानां गृहाणि, मन्दिरस्य परिचारका अत्र प्रजागणस्य कृते
बलिमांसं पक्ष्यन्ति।

---

४७ सप्तचत्वारिंशोऽध्यायः।

१ पवित्रजलस्य कथा ६ तस्य गुणवर्णनं १३ देशस्य सीमा २२ गुटिकापातेन तद्विभागस्य कथा च।

अपरं स मां प्रत्यावर्त्त्य मन्दिरस्य प्रवेशस्थानम् अनैषीत्, तत्र च १
पश्य मन्दिरस्य शिलाया नीचेन तोयानि पूर्व्वदिशं प्रवहन्ति, यतो
मन्दिरं पूर्व्वाभिमुखं; नीचेन मन्दिरस्य दक्षिणस्कन्धाद् यज्ञवेद्या
दक्षिणतस्तानि तोयानि प्रवहन्ति। पुनः स माम् उत्तरदिक्स्थगो- २
पुरस्य मार्गेण निर्गमयामास, माञ्च बहिर्मार्गेण पूर्व्वाभिमुखस्य बहिः-
स्थगोपुरस्य समीपं प्रत्यावर्त्तयामास, तत्र पश्य दक्षिणस्कन्धतस्तोयानि
प्रास्रवन्। स नरो यदा पूर्व्वदिशं प्रागच्छत् तदा तस्य हस्ते मानसू- ३
त्रमविद्यत, स तेन सहस्रहस्तान् मित्वा मां तोयमध्येन गमयामास,
तत् तोयं गुल्फस्पर्शि। अपरं स पुनः सहस्रं मित्वा मां तोयेन गम- ४
यामास, तत् तोयं जानुस्पर्शि। पुनश्च स सहस्रं मित्वा मां गम-
यामास, तत् तोयं कटिस्पर्शि। पुनस्तेन सहस्रे परिमिते समागम्यं ५
स्रोतोऽविद्यत, यतस्तत्तोयानि गभीराण्यासन्, तानि सन्तरणीयानि
तोयानि, पदव्रजेन तत् स्रोतस्तरितुं नाशक्यत।

अपरं स मां जगाद, भो नरसन्तान, त्वं किमेतद् दृष्टवान्? ६
अपरं स मां तस्य स्रोतसः कूलेन गमयन् परावर्त्तयामास। तत्र ७
परावृत्य मया स्रोतस उभयोः कूलयोरतीव बहवः पादपा दृष्टाः।
तदा स मां जगाद, तोयानीमानि पूर्व्वदिक्स्थं मण्डलं प्रगच्छन्ति जङ्गल- ८
भूमिञ्चावतरन्ति सागरञ्च प्रविशन्ति, एतैः सागरं प्रवेशितैस्तस्य जलानां
दोषप्रतीकारः साध्यते। इदं स्रोतोद्वयञ्च यत् किञ्चन स्थानं प्राप्स्यति, ९
तत्र विचरन्तः सजीवप्राणिनः सर्व्वे उज्जीविष्यन्ति तत्रातीव प्रचुरा
मत्स्या भविष्यन्ति च, यस्माद् एतैस्तोयैस्तत्र गतैस्तत्र दोषप्रतीकारो
भविष्यति, स्रोत इदं यत् किञ्चन स्थानं प्राप्स्यति तत्र सर्व्वम् उज्जीवि-
ष्यति। तत्र जलतटे धीवराश्च स्थास्यन्ति, ऐनगदीत ऐनेग्लयिमपर्य्यन्तं १०

जालानि वितानिष्यन्ते च, स्वजात्यनुरूपास्तदीयमत्स्या महासमुद्रस्य
११ मत्स्या इवातीव प्रचुरा भविष्यन्ति। तस्य कच्छस्थलानां सैकतस्थलानाञ्च
१२ दोषप्रतीकारो न कारिष्यते, तानि लवणोत्पादनार्थं त्यक्तानि। एतस्य
स्रोतस उभयकूलयोस्तु सर्व्वविधा भक्ष्यफलदायिनः पादपाः प्ररोक्ष्यन्ति,
तेषां पत्राणि न म्लास्यन्ति, फलानि च न निःशेषाणि भविष्यन्ति,
प्रतिमासं तानि पक्ष्यन्ते, यतस्तत्सेचकतोयानि धर्म्मधामतो निर्गच्छन्ति;
तेषां फलानि खाद्यानि पत्राणि च रोगघ्नानि भविष्यन्ति।
१३ प्रभुः सदाप्रभुरित्थमाह, इयं सा परिसीमा यदनुसारेण यूयम्
इस्रायेलो द्वादशवंशानां कृते देशरिक्थस्य विभागं विधास्यध्वे, यूषफ्
१४ अंशद्वयस्याधिकारी। यूयं प्रत्येकं देशरिक्थस्य समानांशिनो भवि-
ष्यथ, यतोऽहं युष्माकं पूर्व्वपुरुषेभ्यस्तं दातुं शपथेन प्रतिज्ञातवान्,
१५ तस्माद् देशोऽयं पैतृकरिक्थवद् युष्माकं भविष्यति। अतो देशस्य
सीमेयं; उत्तरप्रान्ते आमहासमुद्राद् हित्लोनस्य मार्गेण सिदा-
१६ दस्य दिशि, हमातं वेरोता दम्मेशकहमातयोः सीम्नो मध्यवर्त्ति सिब्र-
१७ यिमं हौरणस्य सीम्नि स्थितं हात्सेरं हत्तीकोनं। आसमुद्रात् सीमा
हत्सरैनोनेन दम्मेशकस्य सीम्ना यास्यति, उत्तरदिशि च हमातम्
१८ उत्तरसीमा भविष्यति। इदमुत्तरप्रान्तं। पूर्व्वप्रान्ते तु हौरणदम्मेशकयो
र्मध्येन गिलियदस्येस्रायेल्देशस्य च मध्येन यर्द्दनेन यूयम् आसीम्नः
१९ पूर्व्वीयसागरपर्य्यन्तं मास्यध्वे; इदं पूर्व्वप्रान्तं। दक्षिणदिशि च
दक्षिणप्रान्तमातामरात् कादेशस्थानि मिरीवाख्यतोयानि यावद् ततश्च
महासमुद्रपर्य्यन्तं स्रोतो भविष्यति। इदं दक्षिणदिशि दक्षिणप्रान्तं।
२० पश्चिमप्रान्तश्चासीम्नो हमातप्रवेशस्य सम्मुखस्थानं यावन्महासमुद्रं;
२१ इदं पश्चिमप्रान्तं। इस्रायेलो वंशानां मध्ये यूयमेतस्य देशस्य विभागं
२२ विधास्यध्वे। युष्माकं कृते युष्मन्मध्ये प्रवासिनो ये परवंशीया युष्मन्मध्ये
सन्तानान् जनितवन्तस्तेषाञ्च कृते यूयं गुटिकापातेन पैतृकरिक्थस्येव
तस्य विभागं विधास्यध्वे। ते प्रवासिनो युष्माभिरिस्रायेलः सन्तानानां
मध्ये स्वदेशोद्भवजनैस्तुल्या ज्ञायिष्यन्ते युष्माभिः सार्द्धमिस्रायेलो वंशानां
२३ मध्ये गुटिकापातेन रिक्थाधिकारं लप्स्यन्ते च। यस्य वंशस्य मध्ये यः
प्रवासी प्रवसति तस्यैव मध्ये यूयं तस्मै रिक्थाधिकारं प्रदास्यथेति
प्रभोः सदाप्रभोरुक्तिः।

४८ अष्टचत्वारिंशोऽध्यायः।

१ इस्रायेलः सप्तवंशानाम् अंशाः ८ पवित्रभूम्युपहारस्य कथनं १५ नगरस्य तदीय-परिसरस्य च कथनं २१ अध्यक्षस्य भूम्याः कथनं २३ अपरपञ्चवंशानाम् अंशाः ३० नगरस्य परिमाणगोपुराणां कथनञ्च।

अथ वंशानां नामानीमानि। उत्तरप्रान्ताद् हित्लोनस्य मार्गस्य १
पार्श्वेन हमातप्रवेशस्य समीपेन हत्सरैनोनपर्य्यन्तं दम्मेशकस्य सीम्नि
तत्रैवोत्तरदिशि हमातस्य पार्श्वे आपूर्व्वप्रान्तात् पश्चिमप्रान्तपर्य्यन्तं
तत्रत्यो वंशोऽर्थतो दान एकमंशं लप्स्यते। दानस्य सीम्नः पार्श्वे चा- २
पूर्व्वपश्चिमप्रान्ताभ्याम् आशेर एकं लप्स्यते। आशेरस्य सीम्नः पार्श्वे ३
चापूर्व्वपश्चिमप्रान्ताभ्यां नप्तालिरेकं लप्स्यते। नप्तालेः सीम्नः पार्श्वे ४
चापूर्व्वपश्चिमप्रान्ताभ्यां मिनशिरेकं लप्स्यते। मिनशेः सीम्नः पार्श्वे चा- ५
पूर्व्वपश्चिमप्रान्ताभ्यामिफ्रयिम एकं लप्स्यते। इफ्रयिमस्य सीम्नः पार्श्वे ६
चापूर्व्वपश्चिमप्रान्ताभ्यां रूबेण एकं लप्स्यते। रूबेणस्य सीम्नः पार्श्वे ७
चापूर्व्वपश्चिमप्रान्ताभ्यां यिहूदा एकं लप्स्यते।

यिहूदाः सीम्नः पार्श्वे चापूर्व्वपश्चिमप्रान्ताभ्यां युष्माभि र्दातव्यो भू- ८
म्युपहारः स्थास्यति। स विशालतया पञ्चविंशतिसहस्रनलमानो
दैर्घ्येण चापूर्व्वपश्चिमप्रान्ताभ्यामंशानामेकेन तुल्यो भविष्यति, तस्य
मध्यस्थले च धर्म्मधाम स्थास्यति। यूयं यमुपहारं सदाप्रभवे प्रदास्यथ ९
तस्य दैर्घ्यं पञ्चविंशतिसहस्रनलमानं विशालता च दशसहस्रनलमाना
भविष्यति। स पवित्र उपहारो याजकानां भविष्यति। तस्योत्तर- १०
पार्श्वः पञ्चविंशतिसहस्रनलमानः, पश्चिमदिशि विशालता दशसहस्र-
नलमाना, पूर्व्वदिशि विशालता दशसहस्रनलमाना, दक्षिणदिशि च
दैर्घ्यं पञ्चविंशतिसहस्रनलमानं भविष्यति, तस्य मध्यस्थाने च सदा-
प्रभो र्धर्म्मधाम स्थास्यति। इस्रायेलः सन्तानानां भ्रमणकाले लेवीय- ११
जना यथा भ्रान्ता अभवन् तथा भ्रान्ता न भूत्वा ये रक्षणीयं रक्षित-
वन्तस्तेषां याजकानामर्थतः सादोकस्य सन्तानगणस्य मध्ये पवित्रीकृतानां
जनानां स भविष्यति। लेवीयानां सीम्नः पार्श्वे उपहारोद्धृतः स उप- १२
हारस्तेषां महापवित्रोऽंशो भविष्यति। लेवीयाश्च याजकानां सीम्नो- १३
ऽनुरूपमंशं लप्स्यन्ते, तस्य दैर्घ्यं पञ्चविंशतिसहस्रनलमानं विशालता च

दशसहस्रनलमाना; सर्व्वत्र दैर्घ्यं पञ्चविंशतिसहस्रनलमानं विशालता
१४ च दशसहस्रनलमाना भविष्यति। ते तस्य किञ्चिदपि न विक्रेष्यन्ति
न निमास्यन्ते वा, देशस्य सोऽग्रिमांशः परहस्तगतो न भविष्यति,
यतः स सदाप्रभोः कृते पवित्रः।
१५ तस्य पञ्चविंशतिसहस्रनलमानस्य पार्श्वस्याग्रे विशालतायाः पञ्च-
सहस्रनलमानो योऽंशोऽवशिष्टः स न पवित्रः स नगरस्य कृते नि-
वासार्थकः परिसरार्थकश्च भविष्यति, तस्य मध्यस्थले च नगरं स्था-
१६ स्यति। तस्य परिमाणानीमानि; उत्तरप्रान्तं सार्द्धचतुःसहस्रनलमानं,
दक्षिणप्रान्तं सार्द्धचतुःसहस्रनलमानं, पूर्व्वप्रान्तं सार्द्धचतुःसहस्र-
१७ नलमानं, पश्चिमप्रान्तञ्च सार्द्धचतुःसहस्रनलमानं। नगरस्य परि-
सरश्चोत्तरदिशि पञ्चाशदधिकशतद्वयनलमानो दक्षिणदिशि पञ्चाशद-
धिकशतद्वयनलमानः पूर्व्वदिशि पञ्चाशदधिकशतद्वयनलमानः पश्चिम-
१८ दिशि च पञ्चाशदधिकशतद्वयनलमानो भविष्यति। पवित्रोपहारस्य
पार्श्वे वर्त्तते दैर्घ्यमध्ये पूर्व्वदिशि दशसहस्रनलमाना या भूमिः पश्चि-
मदिशि च दशसहस्रनलमाना या भूमिरवशिष्टा सा पवित्रोपहारस्य
पार्श्वस्था, तदुत्पन्नद्रव्याणि च नगरवासिनां कार्य्यकारिणां भक्ष्याणि
१९ भविष्यन्ति। नगरवासिकार्य्यकारिणां विधिरयं, इस्रायेलः सर्व्ववंशानां
२० केचन जनास्तत्र कार्य्यं करिष्यन्ति। तस्योपहारस्य साकल्यं दैर्घ्येण
पञ्चविंशतिसहस्रनलमानं विशालतया च पञ्चविंशतिसहस्रनलमानं,
यूयं चतुरस्रं कृत्वा तं पवित्रमुपहारं निवेदयिष्यथ; अत्र नगरस्या-
धिकारः परिगृहीतः।
२१ परन्तु पवित्रस्य भूम्युपहारस्य नगराधिकारस्य चोभयोः पार्श्वयोर-
वशिष्टा भूमिरध्यक्षस्य भविष्यति, उपहारस्य पञ्चविंशतिसहस्रनल-
मानविशालताया अग्रे पूर्व्वसीमपर्य्यन्ता पश्चिमदिशि च पञ्चविंशति-
सहस्रनलमानविशालताया अग्रे पश्चिमसीमपर्य्यन्ता वंशीयांशानां
पार्श्वस्थिता भूमिरेवाध्यक्षस्य भविष्यति, तस्या मध्यस्थले च पवित्रो-
२२ पहारो मन्दिरसम्बन्धीयं धर्म्मधाम च स्थास्यतः। इत्थम् आलेवीया-
नामधिकारान्नगराधिकारपर्य्यन्ता सा भूमिरध्यक्षस्याधिकारस्य मध्ये
स्थास्यति तां विहाय या भूमि र्यिहूदाः सीम्नो बिन्यामीनस्य सीम्नश्च
मध्ये विद्यते साध्यक्षस्य भविष्यति।
२३ शेषवंशा इमे। आपूर्व्वपश्चिमप्रान्ताभ्यां बिन्यामीन एकमंशं लप्स्यते।

बिन्यामीनस्य सीम्नः पार्श्वे चापूर्व्वपश्चिमप्रान्ताभ्यां शिमियोन एकं २४
लप्स्यते। शिमियोनस्य सीम्नः पार्श्वे चापूर्व्वपश्चिमप्रान्ताभ्याम् इषाखर २५
एकं लप्स्यते। इषाखरस्य सीम्नः पार्श्वे चापूर्व्वपश्चिमप्रान्ताभ्यां शिबूलून २६
एकं लप्स्यते। सिबूलूनस्य सीम्नः पार्श्वे चापूर्व्वपश्चिमप्रान्ताभ्यां गाद एकं २७
लप्स्यते। गादस्य सीम्नः पार्श्वे च दक्षिणप्रान्तस्य दिशि सीमा तामरतः २८
कादेशस्थेन मिरीबातीयेन सरिता च महासमुद्रं यास्यति। यूयं २९
रिक्थाधिकारकारणाद् इस्रायेलो वंशानां मध्ये यं देशं गुटिकापातेन
विभक्ष्यथ सोऽयम्, इमे च वंशीयांशाः, इयं प्रभोः सदाप्रभोरुक्तिः।

नगरस्य निर्गमनस्थानानि चेमानि। उत्तरप्रान्तं सार्द्धचतुःसहस्र- ३०
नलमानं। नगरस्य गोपुराणि चेस्रायेलो वंशानां नाम्नामनुरूपाणि ३१
भविष्यन्ति। उत्तरदिशि त्रीणि गोपुराणि स्थास्यन्ति, रूबेणस्यैकं
गोपुरं, यिहूदा एकं गोपुरं, लेवेरेकं गोपुरञ्च। पूर्व्वप्रान्तञ्च सार्द्ध- ३२
चतुःसहस्रनलमानं, तत्र च त्रीणि गोपुराणि स्थास्यन्ति। यूषफस्यैकं
गोपुरं, बिन्यामीनस्यैकं गोपुरं, दानस्यैकं गोपुरञ्च। दक्षिणप्रान्तञ्च ३३
सार्द्धचतुःसहस्रनलमानं, तत्र च त्रीणि गोपुराणि स्थास्यन्ति, शिमि-
योनस्यैकं गोपुरं, इषाखरस्यैकं गोपुरं, सिबूलूनस्यैकं गोपुरञ्च।
पश्चिमप्रान्तं सार्द्धचतुःसहस्रनलमानं, तत्र च त्रीणि गोपुराणि ३४
स्थास्यन्ति, गादस्यैकं गोपुरं, आशेरस्यैकं गोपुरं, नप्तालेरेकं गोपुरञ्च।
परिधिरष्टादशसहस्रनलमानः, नगरस्य नाम चेतः परं सदाप्रभु- ३५
स्तत्रावस्थित इति भविष्यति।

दानीयेलस्य भविष्यद्वाक्यानि।

१ प्रथमोऽध्यायः।

१ यिहोयाकीमस्य पराजयकथनं २ दानीयेलस्य तदीयबन्धुत्रयस्य च कथा ८ तेषां जितेन्द्रियता १७ विद्यायां व्युत्पत्तिश्च।

१ यिहूदीयराजस्य यिहोयाकीमस्य राजत्वस्य तृतीये वत्सरे बाबि-
२ लीयराजो निबूखद्नित्सरो यिरूशालमं प्रगत्य तन्नगरमवरुरोध, प्रभुश्च
यिहूदीयराजं यिहोयाकीमम् ईश्वरीयमन्दिरस्य बहुपात्राणि च तस्य
करे समर्पयामास, स च तानि शिनियरदेशं निजेश्वरस्य मन्दिरं
निनाय, स तान्येव पात्राणि निजेश्वरस्य कोषागारे निदधे।
३ परन्तु राजा स्वनपुंसकाध्यक्षम् अष्पिनसं कथितवान्, इस्रायेलः
४ सन्तानानां राजवंशीयानां प्रधानजनानाञ्च मध्ये ये सर्व्वथा निर्द्दोषाः
सुरूपाः सर्व्वविद्यायां निपुणाः ज्ञानवन्तो मनस्विनो राजप्रासादे परि-
चरितुं कल्दीयानां ग्रन्थान् भाषाञ्च शिक्षितुञ्च शक्तिविशिष्टास्तादृशाः
५ कतिपयतरुणा आनीयन्तां। राजा च तेषां कृते राजप्रतिभागस्य स्व-
पानीयद्राक्षारसस्य च प्रात्यहिकमंशं निरूप्य वत्सरत्रयं तेषां पालनं
६ तदन्ते राज्ञः साक्षाद् उपस्थापनञ्चाज्ञापयामास। तेषां मध्ये दानीयेलो
हनानियो मीशायेलोऽसरियश्चेते यिहूदावंशोत्पन्ना जना अविद्यन्त।
७ स नपुंसकाध्यक्षस्तु तेषामपरनामानि विदधाय, स दानीयेलस्य नाम
बेल्टशत्सर इति, हनानियस्य नाम शद्रक इति, मीशायेलस्य नाम
मैशक इति, असरियस्य नाम चावेद्निगुरिति चकार।
८ अनन्तरं राज्ञः प्रतिभागेन तत्पानीयद्राक्षारसेन चाहमात्मानं
नाशुचीकरिष्यामीति मनस्यमवलम्ब्य दानीयेलो यथात्मानं नाशुची-
९ कुर्य्यात् तदर्थं तं नपुंसकाध्यक्षमनुज्ञां ययाचे। ईश्वरश्च तस्य नपुं-
१० सकाध्यक्षस्य समक्षं दानीयेले दयां करुणाञ्च वर्त्तयामास। अतः स नपुं-
सकाध्यक्षो दानीयेलमब्रवीत्, मत्प्रभो राज्ञोऽहं बिभेमि, युष्माकं भक्ष्य-
पेयद्रव्याणि तेनैव निरूपितानि, स किमर्थं युष्मद्वयस्येभ्यस्तरुणेभ्यो
युष्माकं मुखानि मलिनानि पश्येत्? यूयञ्च किमर्थं राज्ञः समक्षं मम शिरः

संशयारूढं कुर्य्यात? ततो नपुंसकाध्यक्षो दानीयेलहनानियमीशायेला- ११
सरियेषु यं सूदाध्यक्षम् अधिकृतवान् दानीयेलस्तं जगाद, भवान् १२
दशदिनानि यावद् भवत इमान् दासान् परीक्षितुमर्हति, उद्भिज्ज-
भक्ष्याण्यस्मभ्यं दीयन्तां वयं तानि भक्षयिष्यामहे, जलं दीयताञ्च वयं
तत् पास्यामः। भवतः समक्षञ्चास्माकं रूपं सन्दृश्यतां, ये च तरुणा १३
राज्ञः प्रतिभागं भक्षयन्ते तेषामपि रूपं सन्दृश्यतां, ततो भवान् यद्
द्रक्ष्यति तदनुरूपमाचारं भवत इमान् दासान् प्रति विधास्यते। ततः १४
स तेषां तद् वाक्यं गृहीत्वा दशदिनानि यावत् तान् परीक्षाञ्चक्रे,
तेषु दशदिनेषु गतेषु च राजप्रतिभागभोगिभ्यः सर्व्वतरुणेभ्यस्त एव १५
सुरूपा मांसलाश्च प्रतिबभुः। ततः परं स सूदाध्यक्षस्तेषां प्रतिभागं १६
तेषां पानीयद्राक्षारसञ्चापाहाय तेभ्य उद्भिज्जभक्ष्याण्यददात्।

परन्त्वीश्वर एतेभ्यश्चतुर्भ्यस्तरुणेभ्यो बुद्धिं सर्व्वग्रन्थविद्यासु नैपुण्यञ्च १७
प्रददौ, दानीयेलश्च सर्व्वदर्शनेषु स्वप्नेषु च पारदर्शी बभूव। अपरं १८
तेषामानयनाय यः कालो राज्ञा निरूपितस्तस्मिन्नतीते सति नपुंसका-
ध्यक्षस्तान् निबूखद्नित्सरस्य सम्मुखमानिनाय। राजा च तैः सह १९
संललाप, ततस्तेभ्यो दानीयेलहनानियमीशायेलासरियेभ्य उत्कृष्टः
कोऽपि नाविद्यत, अतस्ते राजानं परिचरितुमारेभिरे। राजा च २०
तान् बुद्ध्यपेक्षाया विज्ञताया यां काञ्चन कथाम् अपृच्छत्, तस्यां निज-
कृत्स्नराज्ये विद्यमानेभ्यः सर्व्वेभ्यो मन्त्रवेत्तृभ्यो गणकेभ्यश्च तानेव दशगुणो-
त्कृष्टान् अविन्दत्। दानीयेलश्च राज्ञः खसस्य प्रथमवर्षं यावत् २१
तादृशोऽवतस्थे।

---

२ द्वितीयोऽध्यायः।

१ निबूखद्नित्सरस्य स्वप्नकथनं १४ राज्ञः समीपे दानीयेलस्य निवेदनं १९ ईश्व-
रस्य सन्निधौ धन्यवदनं २४ दानीयेलेन स्वप्नप्रकाशनं २६ तस्य तात्पर्य्यप्रकाशनं
४६ राज्ञा तस्मिन् सम्मानदानयोरर्पणञ्च।

अपरं निबूखद्नित्सरस्य राजत्वस्य द्वितीयवत्सरे स गुरुतरं स्वप्नं १
ददर्श, तेन तस्यात्मोद्विविजे निद्रा च ततोऽपजगाम। अपरं राजानं २
तस्य स्वप्नं ज्ञापयितुं मन्त्रवेत्तारो गणका मायाविनः कल्दीयाश्चाहूयन्ता-
मिति राजादिदेश, ततस्त आगत्य राज्ञः सम्मुखं तस्थिरे। अपरं राजा ३
तान् जगाद, मया स्वप्नोऽदर्शि तत्स्वप्नजिज्ञासो ममात्मोद्विग्नो जातः।

४ तदा ते कल्दीयजना अरामीयभाषया राजानमूचुः, महाराजोऽन-
न्तजीवी भूयात्, भवान् स्वदासेभ्यस्तं स्वप्नं कथयतु, तथा कृते वयं
५ तस्य तात्पर्य्यं वदिष्यामः। राजा प्रत्युत्तरं कृत्वा तान् कल्दीयान् जगाद,
ममेदं वाक्यं विज्ञापितं, यदि यूयं तं स्वप्नं तत्तात्पर्य्यञ्च मां न ज्ञापयेत,
तर्हि यूयं खण्डशः कारिष्यध्वे, युष्माकं गृहाणि च मलराशीकृतानि
६ भविष्यन्ति। यदि तु तं स्वप्नं तस्य तात्पर्य्यञ्च मां ज्ञापयेत तर्हि मत्तो
दानानि वरान् उत्कृष्टसम्मानञ्च लप्स्यध्वे, अतएव तं स्वप्नं तत्तात्पर्य्यञ्च
७ मां ज्ञापयत। ते तु द्वितीयमुत्तरं कृत्वा जगदुः, महाराजः स्वदासेभ्यस्तं
८ स्वप्नं कथयतु, तथा कृते वयं तत्तात्पर्य्यं वदिष्यामः। राजा प्रत्युत्तरं
कृत्वाब्रवीत्, अहं निश्चितं जाने यूयं कालविलम्बार्थिनः, यतो मम तद्
९ वाक्यं विज्ञापितमिति यूयं जानीथ। यदि यूयं मां तं स्वप्नं न ज्ञापयेत
तर्ह्येयमेव युष्मद्दण्डाज्ञा भविष्यति, यतः कालपरिवर्त्तस्यापेक्षया मत्स-
मक्षम् अनृतमनिष्टञ्च व्याहर्त्तुं यूयं कल्पितवन्तः, अतो मां स्वप्नं ज्ञाप-
१० यत, तेन तस्य तात्पर्य्यं मह्यं कथयिष्यथेत्यहं ज्ञास्यामि। ते कल्दीया
राज्ञः समक्षमुत्तरं कृत्वा जगदुः, राज्ञो वाक्यं कथयितुं येन शक्यते ता-
दृशः कोऽपि मनुष्यो भूमण्डले न विद्यते, यतो हेतो महान् पराक्रमी
च कोऽपि भूपतिः कमपि मन्त्रवेत्तारं गणकं कल्दीयं वेदृशं वाक्यं न
११ पृष्टवान्। राजा यां कथां पृच्छति सा दुरूहा; राज्ञः समक्षं तां
ज्ञापयितुं नापरेण केनापि शक्यं, केवलं देवैरेव शक्यं, ते तु मांसमय-
१२ देहवासिभिः सहवासं न कुर्व्वते। तेन हेतुना राजा क्रुद्धातीव रोषा-
१३ न्वितो भूत्वा बाबिल्स्थितानां सर्व्वज्ञानिनां वधमादिदेश। ततः साज्ञा
निर्गता ज्ञानिनां हत्या च प्रारब्धा, जनाश्च हत्यार्थं दानीयेलं तत्स-
खींश्चान्वगयन्त।

१४ तदानीं दानीयेलो बाबिल्स्थितानां ज्ञानिनां वधाय निष्क्रान्तं राज्ञो
१५ रक्षकसेनाध्यक्षम् अरियोकं युक्त्या विवेकेन च प्रत्यवादीत्। स उत्तरं
कृत्वा तं पराक्रमिणं राजपुरुषम् अरियोकं जगाद, राजाज्ञापितस्य तस्य
तीक्ष्णस्य विधानस्य किं कारणं? तदानीम् अरियोको दानीयेलं तद्-
१६ वृत्तान्तं ज्ञापयामास। अपरं दानीयेलो गत्वा, अवकाशो राज्ञे स्वप्नार्थ-
१७ निवेदनस्यानुज्ञा च मह्यं दीयतामिति राजानं प्रार्थयाञ्चक्रे। ततः
परं दानीयेलः स्वगृहं गत्वा स्वसखीन् हनानियमीशायेलासरियांस्तां
१८ कथां ज्ञापयामास। तस्योद्देश्यमिदं, बाबिल्स्थितैरन्यै र्ज्ञानिभिः सह

दानीयेलस्तस्य सखायश्च यथा न विनश्येयुस्तदर्थं ते तां निगूढकथामधि स्वर्गेश्वरं करुणां प्रार्थयिष्यन्त इति।

तदानीं सा निगूढकथा रात्रीयदर्शनेन दानीयेलस्य समक्षं प्रका- १९
शिता। ततो दानीयेलः स्वर्गेश्वरं धन्यमवादीत्। दानीयेलो वक्तुमारभ्य २०
जगाद, युगानाम् आद्यन्तं यावद् ईश्वरस्य नाम धन्यं भूयात्, यतो हेतो
र्ज्ञानं सामर्थ्यञ्च तस्यैव स्तः। स एव कालान् समयांश्च परिवर्त्तयति, २१
स राज्ञश्च्यावयति राज्ञः स्थापयति च, स ज्ञानिभ्यो ज्ञानं मनस्विभ्यश्च
बुद्धिं ददाति। गभीरं प्रच्छन्नं वा यदस्ति स तत् प्रकाशयति। तिमिरे २२
यद् विद्यते स तज्जानीते, द्युतिश्च तस्मिन्नेव वसति। भो मत्पितृगणा- २३
मीश्वर, भवन्तमहं प्रशंसामि स्तवीमि च, यतो भवान् मह्यं ज्ञानं सा-
मर्थ्यञ्च प्रदत्तवान्, राज्ञः कथामस्मान् ज्ञापयन्नस्मत्प्रार्थितं माम् इदानीं
ज्ञापितवांश्च।

ततो हेतो दानीयेलो बाबिल्स्थितज्ञानिनां व्यापादने राज्ञा नियुक्तस्य २४
तस्यारियोकस्य सन्निधिं प्रविवेश। स गत्वा तं जगाद, बाबिल्स्थिता
ज्ञानिनो भवता मा हन्यन्तां। भवान् मां राजसमक्षं नयतु, तर्ह्यहं
राज्ञे स्वप्नार्थं कथयिष्यामि। तदानीम् अरियोको दानीयेलं सत्वरं राज- २५
समक्षं नीत्वा राजानं जगाद, यिहूदात आनीतानां निर्व्वासितजनानां
मध्य एको नरो मयासादितः, स राजानं स्वप्नार्थं ज्ञापयिष्यति। ततो २६
राजोत्तरं कृत्वा बेल्टिशत्सराभिधं दानीयेलं जगाद, त्वं किं मया
दृष्टं स्वप्नं तत्तात्पर्य्यञ्च मां ज्ञापयितुं शक्नोषि? दानियेलो राज्ञः २७
समक्षं प्रत्यवादीत्, राजा यां निगूढां कथां पृच्छति तां कोऽपि ज्ञानि-
नो गणका मन्त्रवेत्तारो दैवज्ञा वा राजानं गदितुं न शक्नुवन्ति। परन्तु २८
निगूढप्रकाशक एक ईश्वरः स्वर्गे विद्यते, स एवोत्तरकाले यद् भवि-
तव्यं तद् राजानं निबूखद्नित्सरं ज्ञापयामास। भवतः स्वप्नः स्वशय्यायां
[शयानस्य] मानसिकदर्शनानि चेमानि। भो महाराज, इतः परं किं २९
भवितव्यमिति चिन्ता भवच्छय्यायां [शयानस्य] भवतोऽन्तर उत्पेदिरे,
स च निगूढप्रकाशको भवन्तं तद् भवितव्यं ज्ञापितवान्। परन्तु सर्व्वेभ्यो ३०
जीवितेभ्यो मय्यधिकं ज्ञानं विद्यत इति कारणात् सा निगूढा कथा
मां प्रति प्रकाशिताभूत् तन्न [मन्यतां,] किन्तु सा निगूढा कथा राज्ञे
निवेदयितव्या भवच्चित्तस्य चिन्ताश्च भवता ज्ञातव्या इति कारणात्।

भो महाराज, निरीक्षमाणेन भवता महती प्रतिमैकादर्शि, सा ३१

प्रकाण्डोत्कृष्टप्रभायुक्ता च सती भवत्समक्षम् अतिष्ठत्, तद्दर्शनं भयङ्करं।
३२ तस्याः प्रतिमाया मूर्द्धोत्तमस्वर्णमयो वक्षो बाहुद्वयञ्च रौप्ये, उदरकटी
३३ पित्तलमयौ, जङ्घे लौहमये, पादयोश्चैकांशो लौहमयोऽपरांशश्च मृण्मयः।
३४ भवति निरीक्ष्यमाणे सति शेषे विना हस्तं खनितः प्रस्तर एकस्तस्याः
३५ प्रतिमाया लौहमृण्मयौ पादावाहत्य चूर्णयामास। तदानीं तानि लौह-
मृत्पित्तलरूप्यसुवर्णानि युगपच्चूर्णितानि ग्रीष्मच्छेदनकालीनखलस्थतुष-
समानि भूत्वा वायुनापनिन्यिरे, तेषां किमपि स्थानं नाविद्यत, यस्तु
प्रस्तरस्तां प्रतिमामाहतवान् स महापर्व्वतो भूत्वा कृत्स्नं भूमण्डलं पूर-
३६ यामास। अयं स स्वप्नः, एतस्यार्थोऽपि महाराजस्य समक्षमस्माभिः
कथयितव्यः।
३७ भो महाराज, भवान् राज्ञां राजा, यतः स्वर्गीश्वरो राज्यमैश्वर्य्यं
३८ पराक्रमं प्रतापञ्च भवते प्रदत्तवान्, यत्र कुत्रापि च नरसन्ताना भूचर-
जीविनः खेचरपक्षिणश्च वसन्ति तत्र स तान् भवतो हस्ते समर्प्य
भवन्तं तेषां सर्व्वेषामधिपतिं कृतवान्। भवानेव स सुवर्णमयो मूर्द्धा।
३९ भवतः परं भवतो नीचमन्यदेकं राज्यं, तत्पश्चाच्च तृतीयमेकं पित्तलमयं
४० राज्यमुत्पत्स्यते, तत् कृत्स्नभूमण्डलस्याधिपत्यं विधास्यते। लौहवद्दृढं चतु-
र्थमेकं राज्यञ्च भविष्यति। यतो हेतो र्लौहः सर्व्वं चूर्णयति भिनत्ति
च ततो हेतो र्भञ्जकलौहवत् तत् तानि सर्व्वाणि चूर्णयिष्यति निभङ्क्ष्य-
४१ ति च। पादयोरङ्गुलीनाञ्चैकांशः कुलालीयमृण्मयोऽन्यांशस्तु लौहमय
इति यद् भवता दृष्टं तस्य तात्पर्य्यमिदं, तद् द्विधाभूतं राज्यं भवि-
४२ ष्यति, लौहस्य दृढतागुणं तस्मिन् स्थास्यति। यतः पङ्कमृदा संयुक्तो
लौहो भवतादर्शि, परन्तु तत्पादाङ्गुलीनामेकांशो लौहमयोऽपरांशो
मृण्मय आसीत्, [तदनुसारेण] तस्य राज्यस्यैकांशो दृढोऽपरांशश्च
४३ भङ्गुरो भविष्यति। भवता च पङ्कमृदा संयुक्तो लौहोऽदर्शि, [तदनुसा-
रेण] ते जना नरवीजेन मिथः संयोजयिष्यन्ते न तु परस्परं संलग्नाः
४४ स्थास्यन्ति, पश्यतु लौहोऽपि मृदा सह संयुक्तो न तिष्ठति। तेषां राज्ञां
काले तु स्वर्गीश्वरो राज्यमेकं स्थापयिष्यति, तद् अनन्तकालं यावद्
अविनाश्यं, तदीयराजत्वञ्चापरस्यां जात्यां न समर्पयिष्यते, तच्च तानि
सर्व्वाणि राज्यानि चूर्णयिष्यति संहरिष्यति च, तत् त्वनन्तकालं
४५ यावद् अवस्थास्यते। यतो विना हस्तं पर्व्वतात् खनित एकः प्रस्तरस्तानि
लौहपित्तलमृत्तिकारूप्यसुवर्णानि खण्डशः कृतवानिति भवतादर्शि।

इतः परं यद् भवितव्यं तन्महान् ईश्वरो महाराजं ज्ञापितवान्।
परन्तु स स्वप्नो निश्चितस्तस्य तात्पर्य्यञ्च विश्वास्यं।
तदानीं राजा निबूखद्नित्सरोऽधोमुखः पतित्वा दानीयेलमर्चयामास ४६
तमुद्दिश्य भक्ष्यनैवेद्यानां धूपदाहस्य चोत्सर्गमादिदेश च। राजा दानी- ४७
येलं प्रति वक्तुमारभ्य जगाद, सत्यं युष्माकम् ईश्वर ईश्वराणाम् ईश्वरो
राज्ञां प्रभु र्निगूढप्रकाशकश्च, यतो हेतोरियं निगूढा कथा त्वया
प्रकाशयितुमशक्यत। ततः परं राजा दानीयेलं महल्लोकं कृत्वा तस्मै ४८
बहूनि महान्ति च दानानि ददौ तञ्च कृत्स्नस्य बाबिलाख्यमण्डल-
स्याधिपत्ये नियुयुजे बाबिल्स्थितानां सर्व्वेषां ज्ञानिनां प्रमुख्यमध्यक्षं
चकार च। परन्तु दानीयेलो राजानं प्रार्थयाञ्चक्रे, ततः स शद्रकं ४९
मैशकम् अबेद्निगुञ्च बाबिल्मण्डलस्य राजकार्य्ये नियुयुजे, दानीयेलस्तु
राजद्वारेऽवर्त्तत।

---

३ तृतीयोऽध्यायः।

१ निबूखद्नित्सरेण स्वर्णमूर्त्तिस्थापनं ८ शद्रकमैशकाबेद्निगुभिस्तदनर्चनात् तेषामभियोगः १७ तेषां भर्त्सनं १९ वह्निकुण्डे तेषां निक्षेपणं २४ तेषां रक्षणं २८ नृपतेराश्चर्य्यज्ञानमाज्ञा च।

राजा निबूखद्नित्सरः स्वर्णमयीमेकां प्रतिमां निर्मापयामास। तस्या १
उच्चता षष्टिहस्तमाना विशालता च षड्हस्तमानासीत्, अपरं स
बाबिल्मण्डले स्थितायां दूराभिधायां समस्थल्यां तां स्थापयामास।
राजा निबूखद्नित्सरः क्षितिपालान् अधिपतीन् शासकान् मुख्यविचा- २
रकर्तॄन् कोषाध्यक्षान् व्यवस्थावेत्तॄन् विचारकान् सर्व्वान् मण्डलाध्य-
क्षांश्च सङ्ग्रहीतुं दूतैस्तानादिदेश, राज्ञा निबूखद्नित्सरेण स्थापितायाः
प्रतिमायाः प्राणप्रतिष्ठायै युष्माभिरागम्यतां। तदानीं ते क्षितिपाला ३
अधिपतयः शासका मुख्यविचारकर्त्तारः कोषाध्यक्षा व्यवस्थावेत्तारो
विचारकाः सर्व्वे मण्डलाध्यक्षाश्च राज्ञा निबूखद्नित्सरेण स्थापितायाः
प्रतिमायाः प्राणप्रतिष्ठायै समागत्य निबूखद्नित्सरेण स्थापितायास्तस्याः
प्रतिमाया अग्रे तस्थिरे। ततः परं घोषक उच्चरवेण घोषयामास, भो ४
प्रजाः, भो जातयः, भो विविधभाषिणः, युष्मान् प्रतीयमाज्ञा विधी-
यते। यस्मिन् काले यूयं शृङ्गवेणुवीणाचतुस्तन्त्रीपरिवादिनीमृदङ्गादीनां ५

विविधवाद्ययन्त्राणां ध्वनिं श्रोष्यथ, तस्मिन्नेव काले न्युब्जीभूय राज्ञा
निबूखद्नित्सरेण स्थापितायाः स्वर्णप्रतिमायाः समक्षं प्रणिपतिष्यथ।
६ यस्तु न न्युब्जीभूय प्रणिपतिष्यति, स तत्क्षणं प्रज्वलितस्याग्निकुण्डस्य
७ मध्ये निक्षेप्स्यते। अतो हेतो र्यस्मिन् काले सर्व्वप्रजास्तेषां शृङ्गवेणुवी-
णाचतुस्तन्त्रीपरिवादिनीमृदङ्गादीनां विविधवाद्ययन्त्राणां ध्वनिम् अ-
श्रौषुस्तस्मिन् काले सर्व्वप्रजा जातयो विविधभाषिणश्च न्युब्जीभूय राज्ञा
निबूखद्नित्सरेण स्थापितायाः स्वर्णप्रतिमायाः समक्षं प्रणपतन्।
८ अतस्तस्मिन् काले केचित् कल्दीया नरा उपस्थाय यिहूदीयानां
९ परीवादं चक्रुः। ते कथामारभ्य राजानं निबूखद्नित्सरमूचुः, महाराजो
१० नित्यजीवी भूयात्। भो महाराज, यः कश्चिन्नरः शृङ्गवेणुवीणाचतु-
स्तन्त्रीपरिवादिनीमृदङ्गादीनां वाद्ययन्त्राणां ध्वनिं श्रोष्यति स न्युब्जी-
११ भूयैतस्याः स्वर्णप्रतिमायाः समक्षं प्रणिपततु, यस्तु न न्युब्जीभूय प्रणि-
पतिष्यति, स प्रज्वलितस्याग्निकुण्डस्य मध्ये निक्षिप्यतामिति भवताज्ञा-
१२ पितं। परन्तु बाबिल्मण्डलस्य राजकार्य्ये भवता नियुक्ताः शद्रको मैश-
कोऽबेद्निगुश्चेतिनामानः केचिद् यिहूदीयनरा विद्यन्ते। भो महारा-
ज, ते नरा भवन्तं नाद्रियन्ते, भवतो देवान् नार्चयन्ति, भवता स्थापि-
तायाः स्वर्णप्रतिमायाः समक्षं न प्रणिपतन्ति च।
१३ इदं निशम्य निबूखद्नित्सरः क्रुद्धो रोषवशात् शद्रकस्य मैशकस्याबे-
१४ द्निगोश्चानयनमादिदेश। तदा तेषु नरेषु राज्ञः समक्षमानीतेषु निबू-
खद्नित्सरो वक्तुमारभ्य तान् जगाद, भो शद्रक मैशकाबेद्निगो, इदं किं
युष्माभिरभिप्रेतं? यूयं किं मम देवान् नार्चयथ मत्स्थापितायाः स्वर्ण-
१५ प्रतिमायाश्च समक्षं न प्रणिपतथ? अधुना शृङ्गवेणुवीणाचतुस्तन्त्री-
परिवादिनीमृदङ्गादीनां विविधवाद्ययन्त्राणां ध्वनिं श्रुत्वैव यदि यूय-
मुद्यताः सन्तो न्युब्जीभूय मन्निर्म्मितायाः प्रतिमायाः समक्षं प्रणिपतथ,
[तर्हि रक्षामवाप्स्यथ]; यदि तु न प्रणिपतेत, तर्हि तत्क्षणं प्रज्वलि-
तस्याग्निकुण्डस्य मध्ये निक्षेप्स्यध्वे, मम हस्ताच्च यो युष्मानुद्धरिष्यति स
१६ ईश्वरः कुत्र विद्यते? तदा शद्रको मैशकोऽबेद्निगुश्चोत्तरं कृत्वा राजा-
नमूचुः, भो निबूखद्नित्सर, अत्र भवन्तं किञ्चन प्रतिवदितुमस्माकं
१७ निष्प्रयोजनं। वयं यमर्चयामः सोऽस्माकमीश्वरश्चेत् प्रज्वलितस्याग्नि-
कुण्डस्य मध्यादस्मानुद्धर्त्तुं शक्नुयात् तर्हि सोऽस्मान् महाराजस्य करा-
१८ दप्युद्धरिष्यति। यद्यपि तन्न भवेत्, तथापि, भो महाराज, भवतेदं

ज्ञायतां, वयं भवतो देवान् नैवार्चयिष्यामो भवत्स्थापितायाः स्वर्णप्रति-
मायाः समक्षञ्च नैव प्रणिपतिष्यामः।

तदानीं निबूखद्नित्सरो रोषपूर्णस्तस्य वदनञ्च शद्रकं मैशकम् अबे- १९
द्निगञ्च प्रति विकटाकारमभूत्। स च प्रत्युत्तरं कृत्वा वह्निकुण्डस्य यद्
दीपनमुचितं ततः सप्तगुणेऽधिकं दीपनमादिदेश। स्वसेनाया मध्ये २०
वीरत्वविशिष्टान् कतिपयान् पुरुषांश्चाज्ञापयामास, यूयं प्रज्वलित-
वह्निकुण्डमध्ये निक्षेपणार्थं शद्रकं मैशकम् अबेद्निगञ्च बध्नीत। तदानीम् २१
अन्तर्वस्त्राङ्गत्राणप्रावारादिपरिच्छदान्वितास्ते नरा बद्धाः प्रज्वलितस्या-
ग्निकुण्डस्य मध्ये निक्षिप्ताश्च। अतो हेतो राजाज्ञाया दृढत्वाद् वह्नि- २२
कुण्डस्यात्यन्तिकोत्तापाच्च शद्रको मैशकोऽबेद्निगुश्च यैः पुरुषैरुन्नीतास्ता-
नेवाग्निशिखा जघान। परन्तु शद्रको मैशकोऽबेद्निगुश्चेमे त्रयो नरा २३
बद्धाः सन्तः प्रज्वलितस्य वह्निकुण्डस्य मध्ये निपेतुः।

ततः परं राजा निबूखद्नित्सरस्त्रसित्वा सत्वरमुत्तस्थौ कथामारभ्य २४
स्वमन्त्रिणः पप्रच्छ च, अस्माभिः किं न त्रयो नरा बद्धाः सन्तो वह्नि-
मध्ये निक्षिप्ताः? त उत्तरं कृत्वा राजानमूचुः, महाराज, तत् सत्यं।
तेन प्रत्युत्तरं कृत्वावादि, पश्यताहं बन्धनहीनान् चतुरो नरान् वह्निमध्ये २५
पर्य्यटतो वीक्षे, तेषु कापि क्षति र्न विद्यते, ईश्वरपुत्रस्येव चतुर्थस्याकृतिः
प्रतिभाति च।

अनन्तरं निबूखद्नित्सरस्तस्य प्रज्वलितस्याग्निकुण्डस्य द्वारमुपस्थाय २६
जगाद, भो परात्परस्येश्वरस्य दासाः शद्रकमैशकावेद्निगवः, निर्गम्या-
यात। ततः शद्रको मैशकोऽवेद्निगुश्च वह्निमध्यान्निश्चक्रमुः। अपरं २७
क्षितिपाला अधिपतयः शासका राजमन्त्रिणश्च समागत्य तान् नरान्
परीक्ष्य ददृशुः, वह्निना तेषां गात्राणि न पराभूतानि, शिरसां केशो
न दग्धः, अन्तर्वस्त्राणि न विकृतानि, वह्नेर्गन्धोऽपि तेषु न व्याप्तः।

अपरं निबूखद्नित्सरो वक्तुमारभ्य जगाद, एतेषां शद्रकमैशकाबे- २८
द्निगूनाम् ईश्वरो धन्यो भूयात्, यतः स स्वदूतं प्रहित्य तान् स्वदा-
सान् उद्धार, ये निजेश्वराद् अन्यं कमपीश्वरम् अर्चयितुं प्रणिप-
तितुञ्चानिच्छातस्तमेव श्रद्धाय राजाज्ञां लङ्घितवन्तः स्वशरीराणि च
न्यस्तवन्तः। मया चेयमाज्ञा विधीयते, प्रजाजातिविविधभाषिणां २९
मध्ये यः कश्चित् शद्रकमैशकाबेद्निगूनामीश्वरस्य प्रतिकूलां कथां गदति,
स खण्डशः कर्त्तिष्यते तस्य गृहञ्च मलराशौ परिणतं भविष्यति, यतो

१० हेतोरीदृशमुद्धारं कर्त्तुं समर्थोऽपर ईश्वरो नास्ति। अनन्तरं राजा
शद्रकं मैशकमबेद्निगुञ्च बाबिल्मण्डले कुशलान्वितान् विदधौ।

---

४ चतुर्थोऽध्यायः।

१ निबूखद्निस्सरस्यादेशः ४ तस्य कथनं ९ तस्य स्वप्नवर्णनं १९ दानीयेलेन स्वप्नार्थ-ज्ञापनं २८ स्वप्नार्थस्य सफलत्वञ्च।

१ राजा निबूखद्नित्सरः कृत्स्नभूमण्डलनिवासिनः सर्व्वप्रजा जातिवि-
२ विधभाषिण इदं ज्ञापयति। युष्माकं महती शान्ति र्भूयात्। परात्पर
ईश्वरो मयि यान्यभिज्ञानान्याश्चर्य्यकर्म्माणि च विदधे, तेषां विज्ञापनं
३ ममाभिमतं। तस्याभिज्ञानानि कीदृङ्महान्ति! तस्याश्चर्य्यकर्म्माणि च
कीदृक् प्रभावयुक्तानि! तस्य राजत्वम् अनन्तकालीनराजत्वं, तस्याधि-
पत्यञ्च पुरुषपरम्परां यावत् स्थास्नु।
४ अहं निबूखद्नित्सर आत्मगृहे प्रशान्त आत्मप्रासादे सतेजास्वासं।
५ तदा स्वप्न एको मयादर्शि, तेनाहं त्रासितः शयनकाले सञ्जाता मम
६ विविधचिन्ता मानसिकदर्शनानि च माम् उद्वेजयाञ्चक्रुः। अतो मह्यं
तत्स्वप्नार्थस्य निवेदनाय बाबिल्स्थितानां सर्व्वेषां ज्ञानिनां मत्समक्षम्
७ आनयनस्याज्ञा मया ददे। तदा ते मन्त्रवेत्तारो गणकाः कल्दीया
दैवज्ञाश्च मत्समीपमाजग्मुः, परन्तु तेषां समक्षं मया स्वप्ने कथिते ते
८ मां तस्यार्थं न ज्ञापयामासुः। अवशेषे तु मद्देवस्य नामतो बेल्टिशत्सर
इतिनामविशिष्टस्य यस्य नरस्यान्तरे पवित्रदेवानामात्मा विद्यते स
९ दानीयेलो मत्समक्षमाजगामाहञ्च तं स्वप्नं तस्मै न्यवेदयं, यथा, भो
मन्त्रवेत्तॄणां प्रमुख्य बेल्टिशत्सर, पवित्राणां देवानामात्मा त्वयि विद्यते,
काचन निगूढा कथा तव क्लेशकरा न भवति तदहं जाने; मया लब्धानि
१० स्वप्नदर्शनानि तदर्थञ्च मां वद। शयानस्य मम मानसिकदर्शनानीमानि;
मया निरीक्षमाणेन महीतलस्य मध्यस्थले स्थित एको महीरुहोऽदर्शि
११ तस्योच्चता प्रकाण्डा। स महीरुहो महान् दृढो दैर्घ्येण गगनस्पर्शी,
१२ आकृत्स्नभूमण्डलप्रान्ताद् दृश्यश्च बभूव। तस्य पत्रभूषा रुचिरा फलानि
प्रचुराणि, तदाश्रितानां सर्व्वेषां भक्ष्यमविद्यत, तदधस्ताद् वन्यजीवि-
नश्छायामसेवन्त, तच्छाखासु खेचरपक्षिणो न्यवसन्, सर्व्वप्राणिभिश्च
१३ तस्मादाहारोऽलम्भि। अनन्तरं शयानेन मया स्वमानसिकदर्शनक्रमतो

निरीक्षमाणेन स्वर्गादवरोहन्नेको जागरूकोऽथच पवित्रो व्यक्तिरदर्शि।
स प्रोच्चरवमुदीरयन् व्याजहार, यूयं तं महीरुहम् उच्छिन्त, तस्य १४
शाखाः छिन्तत, तस्य पत्राण्यवभङ्क्त, तस्य फलानि विकिरत, तन्नीचतो
जीविनस्तच्छाखाभ्यश्च पक्षिणः पलायन्तां। तथापि भूमौ लौहताम्र- १५
मये बन्धने बद्धं तस्य समूलं काण्डं क्षेत्रस्य तृणे विजहीत, स चाकाशीय-
शिशिरेण सिच्यतां, जीविभिः सह भूम्युत्पन्नौषधी र्भजताञ्च। तस्य हृदयं १६
मानवहृदयादन्यद् भूत्वा परिवर्त्तयिष्यते, पशो र्हृदयं तस्मै दायिष्यते,
इत्थं तस्योपरि सप्तकालाः परिवर्त्तिष्यन्ते। इयं वार्त्ता जागरूकाणां १७
शासनमूलका, अयं विषयश्च पवित्राणाम् उक्तिमूलकः। एतस्याभि-
प्रायोऽयं, मर्त्यानां राज्ये स परात्पर आधिपत्यं कुरुते, स तद् यस्मै
दातुमिच्छति तस्मै ददाति, मनुष्याणां नीचतमं तत्राधिकरोति चेति
जीविते र्ज्ञायतां। राजा निबूखद्नित्सरो योऽहं मयायं स्वप्नोऽदर्शि, १८
त्वञ्च, भो बेल्टिशत्सर, तस्यार्थं मां वद, यतो हेतो र्मम राज्ये यावन्तो
ज्ञानिनो विद्यन्ते ते मां तस्यार्थं ज्ञापयितुं न शक्नुवन्ति, त्वन्तु समर्थोऽसि,
यतः पवित्राणां देवानामात्मा त्वयि विद्यते।

तदानीं बेल्टिशत्सरनामा स दानीयेलो दण्डैकं यावत् क्षुब्धस्तस्थौ १९
स्वचिन्ताभि र्विह्वलीबभूव च। ततो राजा जगाद, भो बेल्टिशत्सर,
तेन स्वप्नेन तदर्थेन च विह्वलो मा भूः। बेल्टिशत्सर उत्तरं कृत्वा
जगाद, भो मत्प्रभो, स स्वप्नो भवच्छत्रुषु तदर्थश्च भवद्विपक्षेषु वर्त्ततां।
भवता दृष्टो यो महीरुहो महान् दृढो दैर्घ्येण गगनस्पर्शी कृत्स्नभूमण्डले २०
दृश्यो रुचिरपत्रः प्रचुरफलश्चाभवत्, यदाश्रितानां सर्व्वेषां भक्ष्यमवि- २१
द्यत, यस्य तले वनजीविन आश्रयन्त, यस्य शाखासु च खेचरपक्षिणो
न्यवसन्, स महीरुहो भवानेव, भो महाराज; भवान् महान् परा- २२
क्रान्तश्च जातः, भवतो महत्त्वं विशालं गगनस्पर्शि च, भवत आधि-
पत्यञ्च भूमण्डलप्रान्तपर्य्यन्तं व्याप्तं। महाराजेन च स्वर्गादवरोहन्नेको २३
जागरूकोऽथच पवित्रो व्यक्तिरदर्शि तेनेत्थमवादि च, यूयं तं महीरुह-
मुच्छिन्त नाशयत च, परन्तु भूमौ लौहताम्रमये बन्धने बद्धं तस्य समूलं
काण्डं क्षेत्रस्य तृणे विजहीत, स आकाशीयशिशिरेण सिच्यतां वन-
जीविनां समानांशी भवतु चेत्थं तस्योपरि सप्तकालाः परिवर्त्तन्तामिति,
भो महाराज, एतस्यार्थोऽयं, अत्र च परात्परस्येदं शासनं। भो मत्- २४
प्रभो महाराज, भवति तद् वर्त्तिष्यते। भवान् मनुष्याणां सङ्गादपास्तो २५

वनजीविनां सहवासी भविष्यति गोभ्य इव भवते तृणभक्ष्यं दायिष्यते
व्योम्नः शिशिरेण भवतः सेचनं जनैरनुज्ञायिष्यते च; इत्थं मर्त्त्यानां
राज्ये स परात्पर आधिपत्यं कुरुते स च तद् यस्मै दातुमिच्छति तस्मै
ददातीति यावद् भवता न ज्ञायिष्यते तावत् सप्तकाला भवत उपरि
२६ परिवर्त्तिष्यन्ते। परन्तु तस्य महीरुहस्य समूलः काण्डो विहातव्य एत-
स्यायमर्थः, स्वर्गस्यैवाधिपत्यमस्तीति भवता ज्ञाते सत्येव भवतो राजत्वं
२७ भवतः कृते पुनः प्रभविष्यति। अतो भो महाराज, मम मन्त्रणा भवते
रोचतां, भवतः शान्ते र्दीर्घस्थायित्वं यथा भवेत्, तदर्थं भवान् धार्म्मि-
कतया स्वपापानि दुःखिषु कृपया स्वापराधांश्चोन्मुञ्चतां।
२८ सर्व्वमेतद् राज्ञि निबूखद्नित्सरे सफलीबभूव। द्वादशमासेभ्यः परं
३० स बाबिल्स्थितस्य राजप्रासादस्य पृष्ठे गतायातमकुरुत। तदानीं राजा
वक्तुमारभ्य जगाद, स्वपराक्रमस्य सामर्थ्येन स्वादरणीयतायाः शोभायै
चाहं यां राजपुरीं कृत्वा निर्म्मितवान् इयं किं सा महती बाबिल्
३१ नास्ति? राज्ञो जिह्वाग्र एतस्मिन् वाक्ये विद्यमाने स्वर्गादेका वाणी
निपपात, यथा, भो राजन् निबूखद्नित्सर, त्वां प्रतीदमुच्यते, राजत्वं
३२ त्वत्तोऽपगतं। त्वं मनुष्याणां सङ्घादपास्तो वनजीविनां सहवासी भवि-
ष्यसि गोभ्य इव तुभ्यं तृणभक्ष्यं दायिष्यते; मर्त्त्यानां राज्ये परात्पर
आधिपत्यं कुरुते स च तद् यस्मै दातुमिच्छति तस्मै ददातीति यावत्
३३ त्वं न ज्ञास्यसि तावत् तवोपरि सप्तकालाः परिवर्त्तिष्यन्ते च। तस्मि-
न्नेव निमिषे तद् वाक्यं निबूखद्नित्सरे सिद्धिं प्राप, स च मनुष्याणां
सङ्घादपास्तो गोवत् तृणान्यभक्षयत, तस्य शरीरमाकाशीयशिशिरेणा-
सिच्यत च। ततः शेषे गरुत्मतामिव तस्य शिरोरुहाः पक्षिणामिव
तस्य नखाश्च दीर्घा बभूवुः।
३४ तेषां दिनानामन्ते त्वहं निबूखद्नित्सरः स्वर्गं प्रत्युच्चदृष्टिमकार्षं, ततो
मम ज्ञानं मां प्रति परावृत्ते, अहञ्च तं परात्परं धन्यमवादिषं तम्
अनन्तजीविनमस्ताविषमादृषि च, तस्याधिपत्यमनन्तस्थाय्याधिपत्यं, तस्य
३५ राजत्वञ्च पुरुषपरम्परां यावत् स्थिरं। पृथिवीनिवासिनः सर्व्वे चाव-
स्तुवद् गण्यन्ते द्युवाहिन्यां भूवासिषु च स स्वेच्छानुरूपमाचारं कुरुते
तस्य करमाहत्य किं करोषीति तं यो वदेत् तादृशः कोऽपि न विद्यते।
३६ तस्मिन् काले मम ज्ञानं मां प्रति परावर्त्तिष्ट, मम राजत्वस्य शोभायै
ममादरो मम प्रतापश्च मां प्रति परावर्त्तिषातां, मम मन्त्रिणो मम

कुलीनाश्च मामन्वैषिषुः पुनः स्वराजत्वे ऽधिकृतस्य ममोत्कृष्टं महत्त्वमव-
र्धिष्ट। इदानीमहं निबूखद्नित्सरः स्वर्गराजस्य स्तवं प्रतिष्ठां समाद- ३७
रञ्च करोमि, यतस्तस्य सर्व्वं कर्म्म सत्यं तस्य मार्गाश्च न्याय्याः, यतश्च
स दर्पाचारिणो नामयितुं समर्थोऽस्तीति।

---

५ पञ्चमोऽध्यायः।

१ बेलशत्सरस्य भोज्यं ५ कुड्येऽङ्गुल्या लेखनं तत्पठनार्थं राज्ञा गणकानामाह्वानं
१० तेषामसामर्थ्याद् दानीयेलस्याह्वानं १२ दानीयेलं प्रति राज्ञः कथनं
१७ राजानं प्रति दानीयेलस्य तिरस्करणं लेखनार्थस्य ज्ञापनञ्च।

एकदा राजा बेलशत्सरः स्वीयसहस्रकुलीनानां कृते महासम्भोजनं १
कृत्वा तेषां सहस्रनराणां समक्षं द्राक्षारसमपिबत्। द्राक्षारसास्वाद- २
नकाले बेलशत्सरोऽब्रवीत्, मम पित्रा निबूखद्नित्सरेण यानि सुवर्ण-
दुर्वर्णमयानि पात्राणि यिरूशालमस्थप्रासादाद् अपहृतानि तान्यानी-
यन्तां, राजा तस्य कुलीननरास्तस्य भार्य्या उपपत्न्यश्च तेषु पास्यन्ति।
तदानीं यिरूशालमस्थप्रासादादर्थत ईश्वरीयमन्दिरादपहृतेषु तेषु सुव- ३
र्णपात्रेष्वानीतेषु राजा तस्य कुलीनास्तस्य भार्य्या उपपत्न्यश्च तेषु पातुं
प्रावर्त्तिषत। ते द्राक्षारसं पिबन्तः स्वर्णरूप्यताम्रलोहकाष्ठप्रस्तरम- ४
यान् देवान् अस्तुवन्।

तस्मिन् निमिषे नरहस्तस्याङ्गुल्यः प्रगत्य दीपवृक्षस्य सम्मुखे राज- ५
प्रासादस्य कुड्यस्य चूर्णलेपेऽलिखन्, राजा च तं लिखन्तं हस्ताग्रम्
अदर्शत्। तदानीं राज्ञो वर्णो व्यकारि तदीयचिन्ताश्च तं जिह्लीचक्रुः, ६
तस्य कटिग्रन्थिः शिथिलीबभूव, तस्य जानू च परस्परमाजघ्नतुः। राजो- ७
च्चैःस्वरेण व्याजहार, गणकाः कल्दीया दैवज्ञाश्चानीयन्तां। अपरं
राजा वक्तुमारभ्य बाबिल्स्थितान् ज्ञानिनो जगाद, यः कश्चिन्मनुष्य इमां
रचनां पठित्वा मह्यं तस्या अर्थं निवेदयिष्यति स कृष्णलोहितवर्णपरि-
च्छदेन कण्ठदेशे च स्वर्णहारेण भूषयिष्यते राज्यस्य तृतीयोऽधिपति
र्भविष्यति च। तदानीं राज्ञः सर्व्वे ज्ञानिनो नरा आजग्मुस्तां तु ८
रचनां पठितुं राजानं वा तदर्थं ज्ञापयितुं न शेकुः। अतो राजा ९
बेलशत्सरोऽतीव विह्लीबभूव तस्य वर्णश्च विचक्रे तस्य कुलीननराश्चो-
द्विविजिरे। अनन्तरं राज्ञस्तदीयकुलीनानाञ्च वचनाद् राज्ञी भोजन- १०

शालामाजगाम। सा राज्ञी वक्तुमारभ्य व्याजहार, महाराजो नि-
त्यजीवी भूयात्, त्वं स्वचिन्ताभि र्मा विकलोभव तव वर्णाश्च मा विक्रि-
११ यतां। पवित्रदेवानामात्मा यस्यान्तरे वसति तादृश एको नरस्तव
राज्ये विद्यते, तव पितुः काले च बुद्धिः कौशलम् ईश्वरीयज्ञानतुल्यं
ज्ञानञ्च तस्मिन् प्रापि, तव पिता निबूखद्निस्सरः, भो राजन्, तवैव
पिता तं मन्त्रवेत्तॄणां गणकानां कल्दीयानां दैवज्ञानाञ्चाध्यक्षं कृत्वा नि-
१२ युक्तवान्। यतो हेतोरुत्कृष्ट आत्मा ज्ञानं स्वप्नार्थज्ञापकं प्रहेलिकाबोधकं
ग्रन्थिहरं कौशलञ्च तस्मिन् दानीयेले प्रापि यस्मै बेल्टिशत्सर इति
नाम राज्ञा दत्तं। अतः स दानीयेल आहूयतां स एतस्यार्थं ज्ञाप-
यिष्यति।
१३ अनन्तरं दानीयेले राज्ञः समक्षमानीते राजा वक्तुमारभ्य दानीयेलं
पप्रच्छ, मम पिता महाराजो यिहूदीयान् यान् निर्व्वासितजनान् यि-
१४ हूदादेशाद् आनीतवान् त्वं किं तेषां मध्ये गणितो दानीयेलः? देवानाम्
आत्मा त्वयि विद्यते बुद्धिः कौशलम् उत्कृष्टं ज्ञानञ्च त्वयि प्रापीति
१५ त्वामधि मया श्रुतं। अधुनैतस्या रचनायाः पाठाय मह्यं तदर्थनिवे-
दनाय च ज्ञानिनो गणका मत्समीपमानिन्यिरे ते तु तस्याः कथाया अर्थं
१६ ज्ञापयितुं न शक्नुवन्ति। त्वन्त्वर्थकथने ग्रन्थिहरणे च समर्थोऽसीति
त्वामधि मयाश्रावि; अतस्त्वं चेदिमां रचनां पठितुं माञ्च तदर्थं ज्ञा-
पयितुं शक्नुयास्तर्हि कृष्णलोहितवर्णपरिच्छदेन कण्ठे च स्वर्णहारेण
भूषयिष्यसे राज्यस्य तृतीयोऽधिपति र्भविष्यसि च।
१७ तदानीं दानीयेल उत्तरं कृत्वा राज्ञः समक्षं जगाद, भवत उपहारा
भवतस्तिष्ठन्तु भवान् स्वपारितोषिकाण्यपरस्मै कस्मैचिद् ददातु, तथा-
प्यहं महाराजस्य कृत इमां रचनां पठिष्यामि भवन्तं तदर्थं ज्ञापयि-
१८ ष्यामि च। भो महाराज, परात्पर ईश्वरो भवतः पित्रे निबूखद्नित्स-
१९ राय राज्यं महत्त्वम् ऐश्वर्य्यम् आदरणीयत्वञ्च दत्तवान्। स तस्मै यन्म-
हत्त्वं दत्तवान् तस्मात् सर्व्वप्रजाः सर्व्वजातयः सर्व्वभाषिणश्चाकम्पन्त
तत्साक्षाद् अबिभयुश्च। स यं हन्तुमैच्छत् तमहन्, यञ्च जीवयितुमैच्छत्
तमजीवयत् यम् उच्चीकर्त्तुमैच्छत् तमुच्चमकरोत्, यञ्च नीचं कर्त्तुमैच्छत्
२० तं नीचमकरोत्। यदा तु तस्य हृदयमुद्धतमभूत् तस्यात्मा च दुःसा-
हसाय जडतामयात् तदा स स्वराजसिंहासनान्निपातितो निजैश्वर्य्याद्
२१ भ्रष्टश्च बभूव। स च नरसन्तानानां सङ्घादपास्तः, तस्य हृदयञ्च पशु-

हृदयेन समं बभूव, स वनगर्द्दभैः सङ्गेऽवसत् गोभ्य इव तस्मै तृणभ-
क्ष्यमदीयत, व्योम्नः शिशिरेण तस्य शरीरमसिच्यत च, परन्तु मर्त्त्यराज्ये
परात्पर ईश्वर आधिपत्यं कुरुते, यमिच्छति तमेव तत्राधिकरोति चेति
शेषे तेनाज्ञायि। तस्यैव तु पुत्त्रो बेलशत्सरो भवान् सर्व्वमेतज्ज्ञात्वापि २२
स्वहृदयं न नम्रीकृतवान्। परन्तु स्वर्गनाथस्योपर्य्यात्मानमुच्चीकृतवान्, २३
तस्यैव मन्दिरस्य पात्रेषु भवतः समक्षमानीतेषु भवान् भवतः कुलीन-
नरा भवतः पत्न्य उपपत्न्यश्च तेषु द्राक्षारसम् अपिबन्, भवांश्च
दृष्टिहीनान् श्रवणहीनान् ज्ञानहीनांश्च दुर्व्वर्णसुवर्णपित्तललोहकाष्ठ-
प्रस्तरमयान् देवान् अस्तवीत्, भवतः श्वासस्तु यस्य हस्तगतो भवतः
सर्व्वगतिश्च यस्याधीना तमीश्वरं भवान् नैवाद्रियत। तदा तत्समीपतः २४
प्रहितेनैतेन हस्ताग्रेण रचनेयं लिलिखे। लिखिता सा रचनेयं, यथा, २५
मिने, मिने, तिकेल्, ऊपारसीन्, [अस्यार्थः, गणितं, गणितं, तुलया
परिमितं, खण्डशः कृतञ्चेति]। कथायाश्च तात्पर्य्यमेतत्, गणितं, २६
ईश्वरेण भवतो राजत्वं गणितं निःशेषितञ्च। परिमितं, भवान् तुला- २७
यष्ट्या परिमितो लघीयान् निर्णीतश्च। खण्डशः कृतं, भवतो राज्यं २८
खण्डशः कृतं मादीयेभ्यः पारसीयेभ्यश्च प्रदायिष्यते।

तदानीं बेलशत्सरस्याज्ञातो दानीयेलः कृष्णलोहितपरिच्छदं परि- २९
धापयाञ्चक्रे तस्य कण्ठदेशे स्वर्णहारो ददे च, स राज्यस्य तृतीयोऽ-
धिपति र्भविष्यतीदं घोषयाञ्चक्रे च। तस्यामेव रजन्यां कल्दीयानां ३०
राजा बेल्शत्सरो निजघ्ने। अपरं मादीयो दारा राजत्वं लेभे, स च ३१
न्यूनाधिकं द्विषष्टिवर्षवयस्क आसीत्।

---

६ षष्ठोऽध्यायः।

१ दारराजेन शासनपदे दानीयेलस्य नियोजनं ४ तद्विरुद्धमध्यक्षाणां कुमन्त्रणं १० तेषां परीवादात् सिंहखाते दानीयेलस्य निक्षेपणं १८ तस्य रक्षायां राज्ञ आनन्दः २४ तत्परीवादकानां विनाशः २५ सर्व्वप्रजाः प्रति भूपतेराज्ञापत्रञ्च।

दारा विमृश्य राज्यस्य सर्व्वत्रावस्थानार्थं विंशत्यधिकशतं क्षिति- १
पालान् राज्येऽधिचकार। ते क्षितिपालाश्च राज्ञः क्षतिनिवारणार्थम् २
आयव्ययगणनां येषु समर्पयेयुस्तादृशांस्त्रीन् अध्यक्षांस्तेष्वधिचकार, दा-
नीयेलश्च तेषामेको जन आसीत्। तदा दानीयेलस्तेभ्योऽध्यक्षेभ्यः क्षि- ३

तिपालेभ्यश्च व्यशिष्यत, यस्माद् उत्कृष्ट आत्मा तस्मिन्नविद्यत, अतो
राजा कृत्स्ने राज्ये तमधिकर्त्तुं मतिमकुरुत।
४ अतस्तेऽध्यक्षाः क्षितिपालाश्च दानीयेलस्य प्रातिकूल्याद् राजकर्म्मणि
कमपि दोषं प्राप्तुमयतन्त, किन्तु कमपि दोषं किमप्यपकर्म्म वा प्राप्तुं
नाशक्नुवन्, यतः स विश्वास्य आसीत् तस्मिंश्च कोऽपि दोषः किमप्य-
५ पकर्म्म वा न प्राप्यत। अतस्ते नरा जगदुः, एतस्य दानीयेलस्यापरः
कोऽपि दोषोऽस्माभि र्न प्राप्स्यते, केवलं तदीयेश्वरस्य व्यवस्थायां तस्य
६ प्रतिकूलः कश्चन दोषः प्राप्तुं शक्यते। अतस्तेऽध्यक्षाः क्षितिपालाश्च सर्व्वे
राजानं समभिद्रुत्य जगदुः, महाराजो दारा नित्यजीवी भूयात्।
७ राज्यस्य सर्व्वेऽध्यक्षा अधिपतयः क्षितिपाला मन्त्रिणः शासकाश्च मन्त्र-
णामेकां चक्रिरे, फलतस्त्रिंशद्दिनानि यावद् यः कश्चिद् भवतो
महाराजादन्यं कमपि देवं मनुष्यं वा किमपि प्रार्थयिष्यते, स सिंहानां
खाते निक्षेप्स्यत इति विधिर्महाराजेन विधीयतां प्रतिषेधश्च निरूप्यतां।
८ अतो भो महाराज, भवान् तं प्रतिषेधं विदधातु, मादीयानां पारसी-
यानाञ्चालोप्यव्यवस्थाया नियमेन यत् पत्रमन्यथा कर्त्तुं न शक्यते ता-
९ दृशं राजपत्रं रचयतु च। अतो हेतो र्दाराराजस्तत् पत्रं तं प्रतिषेधञ्च
रचयामास।
१० अपरं तत् पत्रं रचयाञ्चक्र इति ज्ञात्वा दानीयेलः स्वगृहं जगाम।
तत्पृष्ठस्थिते कोष्ठे यिरूशालमो दिश्युद्घाटितानि वातायनान्यासन्। स
च प्रतिदिनं त्रिकृत्वो निजेश्वरस्य समक्षं जानुनी पातयित्वा विनतिं
११ प्रशंसाञ्चाकुरुत, यतो हेतोः स पूर्व्वमपि तदेव कृतवान्। तदा ते नराः
समभिद्रुत्य निजेश्वरस्य समक्षं प्रार्थयमानं प्रसादयन्तञ्च दानीयेलमा-
१२ सादयामासुः। तदा ते गत्वा राज्ञः सम्मुखं राजकीयप्रतिषेधमधि जगदुः,
भो महाराज, त्रिंशद्दिनानि यावद् यो जनो भवतोऽन्यं कमपि
देवं मनुष्यं वा किञ्चन प्रार्थयिष्यते स सिंहानां खाते निक्षेप्स्यत इति
प्रतिषेधः किं भवता न रचितः? राजोत्तरं कृत्वा व्याजहार, मादी-
यानां पारसीयानाञ्चालोप्यव्यवस्थाया नियमेन सा कथा स्थिरीकृता।
१३ ततस्ते प्रत्युत्तरं कृत्वा राज्ञः समक्षं जगदुः, भो महाराज, यिहूदादे-
शान्निर्व्वासितजनानां मध्ये गणितः स दानीयेलो भवति भवद्रचिते
१४ प्रतिषेधे वा मनो न निधत्ते, स दिने वारत्रयं स्वप्रार्थनां कुरुते। एतद्
वाक्यं श्रुत्वा राजातीव विषण्णमना बभूव दानीयेलस्य रक्षार्थं यत्नं वि-

दधे च, सूर्य्यास्तगमनपर्य्यन्तमेव स तस्योद्धाराय प्रयेते। तदानीन्तु ते १५
जना राजानं समभिद्रुत्य जगदुः, यः कश्चन प्रतिषेधो विधि र्वा राज्ञा
स्थिरीकृतस्तदन्यथा करणमविधेयमिति मादीयानां पारसीयानाञ्च
व्यवस्थास्तीति महाराजेन ज्ञायतां। अनन्तरं राज्ञ आज्ञातो दानी- १६
येल आनीतः सिंहानां खाते निक्षिप्तश्च। परन्तु राजा वक्तुमारभ्य दा-
नीयेलं जगाद, त्वं यस्य सेवां निरन्तरं करोषि स त्वदीयेश्वरस्त्वां रक्ष-
तु। अपरं प्रस्तर एक आनीतः खातमुखे स्थापितश्च, दानीयेलञ्चाधि १७
यथा किञ्चिदप्यन्यथा न क्रियेत तदर्थं राजा निजमुद्रया स्वीयकुलीन-
नराणां मुद्रया च तं प्रस्तरमङ्कयामास।

ततः परं राजा स्वप्रासादं गत्वानाहारेण रात्रिं यापयामास स्वस- १८
मीपमुपभोग्यस्य कस्यचिद् वस्तुन आनयनं नानुजज्ञे तस्य निद्रा च
तस्मादपजगाम। प्रत्यूषे तु राजारुणोदय उत्थाय सत्वरं सिंहखात- १९
समीपं चक्राम। खातस्यान्तिकमागत्यैव शोकसूचकेनोच्चस्वरेण दानी- २०
येलं सम्बोधयामास च। राजा वक्तुमारभ्य दानीयेलमुद्दिश्य व्याज-
हार, भो जीवत ईश्वरस्य दास दानीयेल, त्वं यस्य सेवां निरन्तरं
करोषि स त्वदीयेश्वरः किं सिंहेभ्यस्त्वां रक्षितुं समर्थ आसीत्? तदानीं २१
दानीयेलो राजानमित्थमाललाप, महाराजो नित्यजीवी भूयात्। मये- २२
श्वरेण स्वदूतं प्रहित्य सिंहानां मुखानि बद्धानि ततस्ते मां न हिंसि-
तवन्तः, यतो हेतोस्तस्य साक्षान्मयि शुद्धता प्रापि, भो महाराज,
भवतोऽपि समक्षं काचन दुष्क्रिया मया नाकारि। ततो राजा स्वा- २३
न्तरेऽतीव जहर्ष खाताद् दानीयेलस्योद्धारमादिदेश च। तदा दा-
नीयेलः खातादुद्धृतः, तस्मिंश्च कापि हिंसा न दृष्टा, यतः स निजेश्वरं
श्रद्धितवान्।

अनन्तरं राज्ञ आदेशाद् दानीयेलस्य परीवादकास्ते नराः स्वस- २४
न्तानैः स्वभार्य्याभिश्च सार्द्धमानीताः सिंहखाते निक्षिप्ताश्च। तैस्तु खा-
तस्य भूमौ न प्राप्तायां सिंहास्तान् आत्मसात् कृत्वा तेषां सर्व्वास्थीनि
चूर्णयामासुः।

ततः परं राजा दाराः कृत्स्नभूमण्डलवासिनीः सर्व्वप्रजाः सर्व्वजातीः २५
सर्व्वभाषिजनांश्च प्रति पत्रेणेदं लेखयामास, युष्माकं महाकुशलं भूयात्।
मत्प्रत्यक्षत आज्ञेयं विज्ञाप्यते, मम राज्यस्य सर्व्वमण्डले दानीयेलस्येश्व- २६
रात् सर्व्वे कम्पन्तां बिभ्यतु च, यतो हेतोः स जीवदीश्वरोऽनन्तस्थायी

२७ च तस्य राजत्वम् अविनाश्यं तस्याधिपत्यञ्च युगान्तपर्य्यन्तं। स रक्षिता
स उद्धर्त्ता स स्वर्गमह्योरभिज्ञानानाम् अद्भुतकर्म्मणाञ्चानुष्ठाता, यतः
स दानीयेलं सिंहानां करेभ्यो रक्षितवान्।
२८ अनन्तरं स दानीयेलो दारा राजत्वकाले पारसीयकोरसस्य राजत्व-
काले च कुशलान्वितोऽवतस्थे।

---

७ सप्तमोऽध्यायः।

१ चतुर्णां जन्तूनां दर्शनं ९ ईश्वरीयराजत्वस्य विवरणं १५ दर्शनस्य तात्पर्य्यञ्च।

१ बाबिलीयराजस्य बेलशत्सरस्य प्रथमे वत्सरे शय्यायां [शयानो]
दानीयेलः स्वप्नं मानसिकदर्शनानि च ददर्श। अनन्तरं स तं स्वप्नं लि-
२ लेख कथानां सारं कथयामास च। दानीयेलो वक्तुम् आरभ्य कथयामास
मम रात्रिकालीयदर्शने निरीक्षमाणेन मयादर्शि, व्योम्नश्चत्वारो वाय-
३ वो महासागरमाचक्रमुः। सागराच्च विशालाश्चत्वारो जीविन उत्तस्थुः,
४ तेषामेकोऽन्यस्माद्भिन्नः। प्रथमः सिंहस्य सदृश उत्क्रोशपक्षीव पक्षवि-
शिष्टश्च, मयि निरीक्षमाणे तु शेषे तस्य पक्षावुत्पाटितौ स च भूमित
उत्थापितो नर इव स्वचरणयोः स्थापितश्च मानवचित्तञ्च तस्मै दत्तं।
५ अनन्तरं पश्य द्वितीयोऽन्यो जीव्यविद्यत स भल्लूकोपमः स एकपार्श्वेनो-
दतिष्ठत् तस्य मुखे च दन्तानां मध्ये त्रीणि पार्श्वकास्थीन्यविद्यन्त, तस्मै
६ चेयमाज्ञादायि, उत्तिष्ठ प्रचुरमांसं भक्षयस्व। ततः परं निरीक्ष-
माणेन मयापर एको जीवी दृष्टः, स द्वीपिनः सदृशः, तस्य पृष्ठदेशे
च पक्षिणश्चत्वारः पक्षा अविद्यन्त, तस्य चत्वारि शिरांस्यासन्, आधि-
७ पत्यञ्च तस्मै दत्तं। ततः परं मया रात्रिकालीयदर्शने निरीक्षमा-
णेन चतुर्थ एको जीवी दृष्टः, स भयङ्करो बलवान् अतीव विक्रा-
न्तश्च, तस्य विशाला लौहदन्ता आसन् स चाग्रसदचूर्णयच्चोच्छिष्टं
पदाभ्याममर्द्दाच्च, पूर्व्वेभ्यः सर्व्वजीविभ्यः स भिन्नस्तस्य दशशृङ्गाणि
८ चासन्। तेषु शृङ्गेषु मया मनो निधायादर्शि, तेषां मध्ये क्षुद्रमन्यदेकं
शृङ्गमुत्पेदे तस्य समक्षम् आद्यानां त्रीणि शृङ्गाण्युत्पाटयाञ्चक्रिरे, अपि
च तस्मिन् शृङ्गे मानवनेत्रसदृशे नेत्रे दर्पवाक्यवादि वक्त्रञ्चाविद्यन्त।
९ अनन्तरं मयि निरीक्षमाणे शेषे कतिपयान्युच्चासनानि संस्थापया-
ञ्चक्रिरे बहुवयस्क एको वृद्धश्चोपविवेश तस्य परिच्छदस्तुषारवच्छुक्लो

मूर्ध्नः केशाश्च विमलानां मेषलोम्नां सदृशाः सिंहासनं वह्निशिखामयं
तच्चक्राण्युज्ज्वलाग्निमयानि। अग्निप्रवाह एको वहंस्तदग्रतो निर्ग- १०
च्छति, सहस्राणां सहस्राणि तं परिचरन्ति, अयुतानाम् अयुतानि
तत्समक्षं तिष्ठन्ति च। विचारसभोपविवेश पुस्तकानि च विवव्रे।
मया निरीक्षमाणेन शेषे त्वदर्शि तत् शृङ्गं यानि व्याहरत् तेषां ११
सर्व्वेषां दर्पवाक्यानां रवात् स जीवी व्यापादितस्तस्य शरीरञ्च निहतं
वह्निचितायां समर्पितञ्च। तदन्येषामपि जीविनामाधिपत्यं प्राणश्यत्, १२
यतः कालं दण्डञ्च यावत् तेभ्य आयुषो दैर्घ्यं दत्तमासीत्। रात्रिकाली- १३
यदर्शने मया निरीक्षमाणेनादर्शि व्योम्नो मेघैः सह मनुष्यपुत्त्रोपमः
कश्चिद् आगच्छंस्तस्य बहुवयस्कस्य वृद्धस्य सन्निधिं प्राप तस्य सम्मुख-
मानिन्ये च। तस्मै चाधिपत्यं प्रतापो राजत्वञ्च ददिरे सर्व्वप्रजाः सर्व्व- १४
जातयः सर्व्वभाषिणश्च तमसेवन्त, तस्याधिपत्यमनन्तकालीयमलोप्य-
माधिपत्यं तस्य राजत्वञ्चाविनाश्यं।

दानीयेलो योऽहं मम देहस्थित आत्मा विषादं गतः स्वमानसिक- १५
दर्शनैश्चाहं विक्लवो जातः। अतोऽहं तत्र तिष्ठतां मध्य एकं तत्साक- १६
ल्यस्य तत्त्वज्ञापनं प्रार्थयितुं तस्य समीपमगमं, स च तासां कथानाम्
अर्थं ज्ञापयन् मां जगाद, विशालास्ते चतुःसङ्ख्यका जीविनश्चत्वारो १७
राजानः, ते भूमण्डलाद् उत्पत्स्यन्ते। परात्परस्य पवित्रजनास्तु राजत्वं १८
लप्स्यन्ते युगानुक्रमेण युगानुक्रमस्यानन्तकालं यावद् राजत्वं भोक्ष्यन्ते
च। तदानीमहं तस्य चतुर्थस्य जीविनस्तत्त्वम् अपृच्छं, यतः स तेभ्यः १९
सर्व्वेभ्यो भिन्नोऽतीव भयङ्करो लौहदन्तः पित्तलनखश्चासीत् सोऽग्रस-
दचूर्णयदुच्छिष्टं पदाभ्यामम्रद्नाच्च। तन्मूर्ध्नि स्थितानां दशशृङ्गाणां तत्त्वं २०
पश्चादुत्पन्नस्य च यस्याग्रे त्रीणि शृङ्गाणि न्यपतंस्तस्य नेत्रयुक्तस्य दर्पवा-
दिवक्त्रविशिष्टस्य स्वसखिभ्यो बृहदाकारस्य च शृङ्गस्य तत्त्वमपृच्छं।
यतो मयि निरीक्षमाणे तच्छृङ्गं पवित्रजनैः सार्द्धमयुध्यत तेषां प्राभ- २१
वच्च, शेषे तु तेन बहुवयस्केन वृद्धेनागत्य परात्परस्य पवित्रजनानां कृते २२
विचारनिष्पत्ति र्व्यधायि तेषां पवित्रजनानां राजत्वभोगस्य समय
उपतस्थौ च। स मामित्थं जगाद, स चतुर्थो जीवी भूमण्डलस्थं चतुर्थं २३
राज्यं भविष्यति। सर्व्वराज्येभ्यस्तद् भिन्नं, तत् कृत्स्नां मेदिनीं ग्रसि-
ष्यति मर्द्दिष्यति चूर्णयिष्यति च। तानि दशशृङ्गाणि च तस्माद् राज्या- २४
दुत्पन्ना दशराजानो भविष्यन्ति, तेभ्यस्तु परमन्य एक उत्पत्स्यते, स

२५ पूर्व्वेभ्यो भिन्नो भविष्यति त्रीन् राज्ञो ऽवनतान् करिष्यति च। स च
परात्परस्य प्रतियोगित्वेन कथा व्याहरिष्यति परात्परस्य पवित्र-
जनान् पीडयिष्यति कालान् व्यवस्थाश्चान्यथा कर्त्तुं चिन्तयिष्यति च,
ते च कालैकं कालद्वयम् अर्द्धकालञ्च यावत् तस्य करे समर्पयिष्यन्ते।
२६ विचारसभा तूपवेक्ष्यति तदानीमन्तं यावद् ध्वंसाय विनाशाय च तस्या-
२७ धिपत्यम् अपहारिष्यते। राजत्वमाधिपत्यमाकाशमण्डलस्याधःस्थितानां
सर्व्वराज्यानां पराक्रमश्च परात्परस्य पवित्रप्रजाभ्यः प्रदायिष्यन्ते, तस्यैव
राजत्वम् अनन्तकालस्थायिराजत्वं, सर्व्वे चाधिपतयस्तमेव सेविष्यन्ते
२८ तस्याज्ञाग्राहिणो भविष्यन्ति च। इति कथा समाप्ता। दानीयेलस्त्वहं
स्वचिन्ताभिरतीव विह्वलीभूतो मम वर्णश्च विकृतः कथान्त्वहं हृद-
येऽरक्षं।

---

८ अष्टमोऽध्यायः।

१ मेषच्छागयोर्दर्शनं १३ बलिदाननिवृत्तेः समयनिरूपणं १५ गाब्रायेलेन दानीयेलस्य दर्शनतात्पर्य्यद्योतनञ्च।

१ राज्ञो बेल्शत्सरस्य राजत्वस्य तृतीये वत्सरे मह्यं दानीयेलाय दर्श-
२ नमेकमदायि, आदौ मह्यं यद् दत्तं तदुत्तरमिदं। दर्शनकाले निरी-
क्षमाणेन मयादर्शि, एलमाख्यप्रदेशस्थायां शूशनाभिधराजपुर्य्यामस्मि,
३ पुनश्च दर्शने निरीक्षमाणोऽहम् ऊलयनदस्य कूलेऽस्मीति। तदानीं नेत्रे
उत्तोल्य मयादर्शि नदस्य समक्षं शृङ्गद्वयविशिष्टो मेष एकस्तिष्ठति,
तस्य शृङ्गे उच्चे, तयोर्मध्ये त्वेकम् अन्यस्मादुच्चतरं, तच्चोच्चतरं पश्चा-
४ दुत्पन्नं। मयादर्शि, स मेषः पश्चिमदिशमुत्तरदिशं दक्षिणदिशञ्चाहन्
तदग्रे कोऽपि जीवी स्थातुं नाशक्नोत्, तस्य करादुद्धारकारी वा कोऽपि
५ नाविद्यत, स यथाकामं कर्म्माकरोत्, महांश्चाभवत्। अनेनालोचनां
कुर्व्वता मयादर्शि, पश्चिमदिशः कृत्स्नभूतलं तरन्नेकश्छाग आयाति,
भूमिन्तु न स्पृशति, तस्य छागस्य नेत्रयोर्मध्ये सुप्रत्यक्षमेकं शृङ्गं वि-
६ द्यते। स च नदतटे तिष्ठतस्तस्य मद्दृष्टस्य शृङ्गद्वयविशिष्टमेषस्य
७ समीपमाजगाम स्वबलस्य तेजसा तमभिदधाव च। मयादर्शि, स
मेषस्य पार्श्वं प्राप्य तत्प्रातिकूल्येन प्रचण्डीभूय तं मेषमाहत्य तस्य शृङ्ग-
द्वयं बभञ्ज, तस्य समक्षमवस्थानाय मेषस्य शक्त्यभावात् तं भूमौ नि-

पात्य ममर्द्द च, तस्य हस्तान्मेषस्योद्धारकारी च कोऽपि नाविद्यत। ततः ८
परं स छागोऽतीव महान् बभूव, परन्तु बलिष्ठीभूतस्य तस्य तद्
दृहच्छृङ्गमभाजि तत्परिवर्त्ते च व्योम्नस्तस्य दिक्षु सुप्रत्यक्षाणि चत्वारि
शृङ्गाण्युत्पेदिरे। पुनस्तेषामेकस्मात् क्षुद्रमूलमेकं शृङ्गमुत्पेदे, तद् दक्षि- ९
णदिशं पूर्व्वदिशं देशरत्नञ्च प्रत्यतीव ववृधे। तच्च स्वर्गीयवाहिनीं १०
यावद् वृद्धिं गत्वा तस्या वाहिन्याः कियदंशं कतिपयानि नक्षत्राणि च
भूतले निपात्य ममर्द्द। वाहिनीपतिं यावद् वृद्धिं गत्वा च नित्यनै- ११
वेद्यं तस्मादपजह्रे, तदा तस्य धर्म्मधाम्नः स्थानं निपातयाञ्चक्रे।
अधर्म्मकारणाच्च नित्यनैवेद्येन सहैका वाहिनी [तस्मिन्] समर्पयि- १२
ष्यते, तच्च भूमौ सत्यं निपातयिष्यति, कार्य्यं करिष्यति कुशलान्वितं
भविष्यति च।

अनन्तरं मम कर्णगोचरे पवित्र एको जनोऽभाषत, अपर एकः १३
पवित्रो जनश्च तं भाषमाणं जगाद, नित्यनैवेद्यं ध्वंसकाधर्म्मं मर्द्दनाय
धर्म्मस्य वाहिन्याश्च समर्पणञ्चाधि तेन दर्शनेन कियान् कालो निर्द्दि-
श्यते? ततः स मां जगाद, शतत्रयाधिकद्विसहस्रान् सन्ध्याप्रातःकालान् १४
यावत्, तत्पश्चाद् धर्म्मः पुनः संस्थापयिष्यते।

अहं दानीयेलो यदा तद् दर्शनमपश्यं तदा बुद्धिं प्रार्थये, ततः १५
पश्य नराकारोपमः कश्चिन्मम सम्मुखेऽतिष्ठत्, अहञ्चोलयनदस्य १६
मध्यतो मानवगिरमश्रौषं, सा प्रोच्चैरवादीत्, भो गाब्रीयेल, अमुं
तद्दर्शनं बोधय। ततोऽहं यत्रातिष्ठं स तत्स्थानस्य समीपमाजगाम। १७
तस्यागमनेऽहमुद्विग्नोऽधोमुखः पतितश्च। अपरं स मां जगाद, भो
नरसन्तान, मनो निधत्स्व, यतस्तद्दर्शनम् अन्तकालोद्देश्यं। तस्मिंस्तु १८
मया सह संलपत्यहं मूर्च्छितोऽधोमुखो भूमौ पतितश्च। ततः स मां
स्पृष्ट्वा मत्स्थाने स्थापयामास, माञ्च जगाद, पश्य, क्रोधस्योत्तरकाले १९
यद् भवितव्यं तदहं त्वां ज्ञापयिष्यामि, यतो निरूपितान्तकालोद्देश्यं
तत्। शृङ्गद्वययुक्तो यो मेषस्त्वया दृष्टः स मादीयपारसीयराजगण- २०
स्वरूपः। लोमशः स छागश्च यवनराजः, तस्य नेत्रयो र्मध्ये स्थितं तद् २१
दृहच्छृङ्गं प्रथमो राजा। तस्मिन् भग्ने तत्परिवर्त्त उत्पन्नं शृङ्गचतुष्टयं २२
राज्यचतुष्टयं, तत् तस्य जातितो न तु तस्य बलेनोत्पत्स्यते। तेषां रा- २३
जत्वस्यान्तिमकालेऽधर्म्मिषु पूर्णपरिमाणं गतेषु विकटवदनः कूटप्र-
श्नज्ञ एको राजोत्पत्स्यते। तस्य बलं विक्रान्तं भविष्यति, न तु स्वीयबलेन। २४

सोऽद्भुतध्वंसं करिष्यति कृतार्थीभूय साधयिष्यति च, स विक्रान्तान्
२५ पवित्रजनानां जातिञ्च ध्वंसयिष्यति। कौशलहेतुना च तस्य हस्ते
प्रतारणा सेत्स्यति, स च दर्पितचित्तो भूत्वा निश्चिन्तान् बहून् ध्वंस-
यिष्यति, अधिपतीनामधिपतेः प्रतिकूलमुत्थास्यति च, विनाहस्तन्त
२६ भङ्क्ष्यते। सन्ध्याप्रातःकालानां यद् दर्शनमर्थतो यद् वाक्यमवादि
२७ तत् सत्यं। त्वन्तु तद् दर्शनं परिगोपय, यतस्तद् दीर्घकालोद्देश्यं।
अहन्तु दानीयेलो गतप्रायो भूत्वा कतिपयान् दिवसान् व्याधितो-
ऽतिष्ठं, ततः परम् उत्थाय राजकर्म्माकरवं, तस्मिन् दर्शने त्वचुभ्ये तच्च
केनापि नाबुध्यत।

---

९ नवमोऽध्यायः।

१ दानीयेलस्योपवसनं नम्रभावेन प्रार्थनं २० तं प्रति प्रकाशितं भाविवचनञ्च।

१ मादीयवंशोद्भवस्याहश्वेरस्य पुत्रो यो दाराः कल्दीयानां राज्ये-
२ ऽधिकृतोऽभूत् तस्य प्रथमवत्सरेऽर्थतस्तस्य राजत्वस्य प्रथमवत्सरेऽहं
दानीयेलो ग्रन्थेषु निर्द्दिष्टायां तस्यां वत्सरसङ्ख्यायां मनो न्यदधि,
यामधि भाववादिनं यिरिमियं प्रति सदाप्रभोरिदं वाक्यं प्रादुर्बभूव,
यथा, यिरूशालमस्य ध्वंसे सप्ततिवत्सराः पूरयिष्यन्त इति।
३ अपरमहमुपवासं शाणपरिधानं भस्मलेपनञ्च कृत्वा प्रार्थनां प्रसा-
४ दनञ्च चिकीर्षन् प्रभुमीश्वरमुद्दिश्य दृक्पातम् अकार्षं, निजेश्वरं सदा-
प्रभुमुद्दिश्य प्रार्थयमानो मनोभावमङ्गीकृत्य चावादिषं, भो प्रभो, त्वं
महान् भयङ्कर ईश्वरः, ये त्वयि प्रीयन्ते तवाज्ञा रक्षन्ति च तेषां कृते
५ त्वं नियमस्य दयायाश्च रक्षाकारी। वयं पापम् अपराधम् अधर्म्मं
६ विद्रोहञ्चाचरितवन्तस्तवाज्ञाभ्यस्तव शासनेभ्यश्चापगतवन्तः। अस्माकं
राज्ञोऽध्यक्षान् कुलपतीन् जनपदस्थाः सर्व्वप्रजाश्च प्रति तव नाम्ना
येऽभाषन्त वयं तेषां त्वदीयदासानां भाववादिनां वाक्येष्ववधानं न
७ कृतवन्तः। भो प्रभो, धर्म्मस्त्वयि युज्यते, मुखस्य लज्जाजन्यन्तु यन्मा-
लिन्यमद्य दृश्यते तदेवास्मासु युज्यतेऽर्थतस्त्वद्विपक्षमौचित्यलङ्घनात् त्वं
यान् सर्व्वदेशेष्वपास्तवान्, निकटवर्त्तिषु दूरवर्त्तिषु वा तेषु यिहू-
दीयनरेषु यिरूशालमनिवासिषु सर्व्वेष्विस्रायेलीयजनेषु च तद् युज्यते।
८ भो प्रभो, अस्मास्वस्माकं राजस्वध्यक्षेषु कुलपतिषु च मुखस्य मालिन्यं

युज्यते यतो वयं त्वद्विरुद्धं पापं कृतवन्तः। अस्मदीश्वरे प्रभौ प्रचुर- ९
करुणा प्रचुरक्षमा च युज्यते, यतो वयं तद्विद्रोहमाचरितवन्तः, स च १०
स्वदासै र्भाववादिभि र्यां निजव्यवस्थाम् अस्माकं समक्षं निहितवान्
वयं तन्मार्गेण गमनायास्मदीश्वरस्य सदाप्रभो र्वाक्येऽवधानं न कृतवन्तः।
कृत्स्न इस्रायेल् तव व्यवस्थां लङ्घितवान् तव वाक्येऽवधातुमनिच्छया ११
विपथगामी जातश्च, तस्मादीश्वरदासस्य मूसा व्यवस्थायां यो लिखितो
विद्यते, सोऽभिसम्पातः स शापश्चास्मास्ववतारयाञ्चक्रे, यतो वयं तस्ये-
श्वरस्य विरुद्धं पापं कृतवन्तः। स चास्मानध्यस्माकं शासनं येऽकुर्व्वं- १२
स्तानस्मद्विचारकर्तॄनधि च प्रोक्तानि निजवाक्यानि स्थिरीकृतवान्
अर्थतोऽस्मासु महदमङ्गलं वर्त्तितवान्, वस्तुतो यिरूशालमि यादृश-
ममङ्गलं सिद्धं तादृशं कृत्स्ननभोमण्डलस्याधो न कृतं। मूसा व्यवस्थायां १३
यथा लिखितं विद्यते तथैवैतन्महदमङ्गलमस्मासु वृत्ते, तथापि वयं
निजापराधेभ्यः परावर्त्तनाय भवतः सत्ये बुद्धिलाभाय चास्मदीश्वरं
सदाप्रभुं न प्रसादयाञ्चकृम। ततो हेतोः सदाप्रभुरमङ्गलाय जाग्रन्न- १४
स्मासु तद् वर्त्तयामास, यतोऽस्माकमीश्वरः सदाप्रभुः स्वकृतेषु सर्व्व-
कर्म्मसु धर्म्मवान्, वयन्तु तस्य रवेऽवधानं न कृतवन्तः। इदानीं भो १५
अस्मदीश्वर प्रभो, त्वमेव बलवता हस्तेन स्वप्रजावृन्दं मिसरदेशाद्
वहिरानीतवान् अद्यापि या दृश्यते स्वार्थं तां कीर्त्तिं साधितवांश्च।
वयं पापं कृतवन्तः, वयमधर्म्ममाचरितवन्तः, भो प्रभो, तव सर्व्व- १६
धर्म्माचारानुसारेण तव पुण्यगिरितो तव यिरूशालमनगराद् तव
क्रोधो रोषश्च निवर्त्ततां, यस्मादस्माकं पापैरस्मत्पितृणामपरा-
धैश्च यिरूशालम् तव प्रजावृन्दश्चास्मच्चतुर्द्दिक्स्थानां सर्व्वेषां निन्दा-
स्पदीभूतौ। भो अस्माकमीश्वर, इदानीं स्वदासस्य प्रार्थनायां विनय- १७
वाक्ये च मनो निधत्स्व, तव ध्वंसिते धर्म्मधाम्नि प्रसन्नवदनो भव, प्रभोः
कृते तद् याचे। भो मदीश्वर, कर्णपातं कृत्वा शृणु, नेत्रयुगलमुन्मी- १८
ल्यास्माकं ध्वंसितस्थानानि तव नाम्ना विख्यातं नगरञ्च निरीक्षस्व,
यतस्त्वत्समक्षमस्मद्विनयवाक्यानि निवेदयन्तो वयं नैवात्मधर्म्माचरण-
निष्ठाः, किन्तु त्वदीयप्रचुरकरुणानिष्ठाः। भो प्रभो, शृणु, भो प्रभो, १९
क्षमस्व, भो प्रभो, कर्णपातं कृत्वा कर्म्म कुरुष्व, मा विलम्बस्व, भो
मदीश्वर, आत्मकृते तत् कुरुष्व, यतस्तव नगरं तव प्रजागणश्च तवैव
नाम्ना विख्यातौ।

१० मयि भाषमाणे, प्रार्थयमाने, निजपापं निजजातेरिस्रायेलः पाप-
ञ्चाङ्गीकुर्व्वाणे, निजेश्वरस्य पुण्यपर्व्वतमधि निजेश्वरस्य सदाप्रभोः समक्षं
२१ निजविनयवाक्यं निवेदयति च मम प्रार्थनावाक्ये न समाप्ते, यः पुरुषः
पूर्व्वं दर्शने क्लान्तेन मया दृष्टः स गाब्रीयेलः सन्ध्याकालीननैवेद्यस्य
२२ समये मत्समीपमुपस्थाय मां बोधयन्नाललाप। स जगाद, भो दानी-
२३ येल, अधुनाहं त्वां ज्ञानपारदर्शिनं कर्त्तुं प्रगतः। तव विनयवाक्यस्या-
रम्भे वाक्यमेकं प्रकाशितं त्वां तज्ज्ञापयितुमहमागतः, यतस्त्वं प्रीतिपात्रं।
अतस्तस्मिन् वाक्येऽवधानं कुरुष्व, दर्शने मनो निधत्स्व च।
२४ अधर्म्मस्य रोधाय पापानां मुद्राङ्कनायापराधस्य पावनायानन्तका-
लस्थायिनो धर्म्मस्यानयनाय दर्शनस्य भाववाण्योश्च मुद्राङ्कनाय महाप-
वित्रावासस्याभिषेकाय च तव जातिमधि तव पुण्यनगरमधि च सप्त-
२५ तिसप्ताहा व्यवचिच्छिदिरे। त्वमेतज्ज्ञातुं बोद्धुञ्चार्हसि, यिरूशालमः
पुनःस्थापनस्य निर्म्माणस्य चाज्ञाप्रकाशनाद् अभिषिक्तमध्यक्षं यावत्
सप्तसप्ताहा द्विषष्टिसप्ताहाश्च भविष्यन्ति। चत्वरं परिखा च काल-
२६ सङ्कटे पुनः स्थापयिष्येते निर्म्मायिष्येते च। तेभ्यो द्विषष्टिसप्ताहेभ्यः
परं सोऽभिषिक्त उच्छेत्स्यते स चाकिञ्चन भविष्यति। नगरं धर्म्मधाम
चागामिनो राज्ञः प्रजाभि र्विनाशयिष्येते, प्लावनेन तदन्तो भविष्यति
२७ च, युद्धस्यान्तं यावत् प्रचुरध्वंसो निरूपितः। एकञ्च सप्ताहं यावत् स
बहुभिः सह नियमं दृढीकरिष्यति, तस्य सप्ताहस्यार्द्धकाले स यज्ञ-
नैवेद्ययो र्निवृत्तिं विधास्यति, घृण्यवस्तूनां चूडायां ध्वंसकारी स्था-
स्यति, इत्थञ्च शेषे निरूपितोच्छिन्नतायाः सिद्धि र्धारेव ध्वंसकस्योपरि
वर्षिष्यति।

---

१० दशमोऽध्यायः।

१ दानीयेलस्योपवसनं दर्शनप्राप्तिश्च १० दर्शनात् तस्य भयं १५ दूतेन तस्मै बलदानञ्च।

१ पारसीयराजस्य खसस्य प्रथमे वत्सरे बेल्टिशत्सराभिधं दानीयेलं
प्रति वाक्यमेकं प्रकाशयाञ्चक्रे, तद् वाक्यं सत्यं महायाससूचकञ्च, स
च तद् वाक्यं बुबुधे तस्य दर्शनस्य बोधं लेभे च।
२ तस्मिन् कालेऽहं दानीयेलस्त्रीन् सप्ताहानशोचं। ते त्रयः सप्ताहा

यावदसमाप्ता आसंस्तावदहं सुस्वादु भक्ष्यं नाभक्षये, मांसं द्राक्षारसो ३
वा मम मुखं न प्राविशत्, सुगन्धितैलमर्द्दनञ्च मया नाक्रियत। अपरं ४
प्रथममासस्य चतुर्व्विंशे दिवसे यदाहं महानदस्य हिद्देकलस्य तट
आसं, तदा नेत्रे उन्मील्य नरमेकमदर्शं, स शुक्लपरिच्छदान्वित ऊफसीय- ५
स्वर्णबन्धनेन बद्धकटिश्चासीत्। वैदूर्य्यमणेरिव तस्य गात्रीयवर्णः, आस्यं ६
तडित्प्रभोपमं, नेत्रे प्रज्वलितोल्कोपमे, बाहू चरणदेशौ च तप्तताम्र-
स्याभायाः सदृशास्तदीयवाक्यस्य रवश्च लोकारण्यस्य रवेण तुल्यः।
एकोऽहं दानीयेलस्तद् दर्शनम् अदर्शं,मम सङ्गिनो नरास्तन्नादर्शंस्तथापि ७
महात्रासाक्रान्ता अभवन्, आत्मानमन्तर्धातुं पलायन्त च। अत एको- ८
ऽहमवशिष्टो भूत्वा तन्महादर्शनमदर्शं, मयि च किञ्चन बलं नाशिष्यत,
मम तेजश्च क्षये पर्य्यवासीयत, मया किमपि बलं नारक्ष्यत। तदाहं ९
तदीयवाक्यानां शब्दमश्रौषं, तदीयवाक्यानां शब्दं श्रुत्वैवाहं क्षुब्धीभू-
याधोमुखोऽपप्तम् आस्येन भूमिमस्पृक्षञ्च।

तदानीं हस्त एको मां स्पृष्ट्वा जानुनोः करतलयोश्च स्खलितस्थितिं वि- १०
दधाय। स च मां जगाद, भो प्रीतिभाजन दानीयेल, यानि वाक्यान्यहं ११
त्वां वदिष्यामि तत्र त्वं मनो निधातुमर्हसि। त्वं स्वस्थान उत्तिष्ठ यतो-
ऽहमिदानीं त्वां प्रति प्रहितः। तस्मिन् मामिदं वचो वदत्यहं वेपमान
उदतिष्ठं। ततः स मां जगाद, दानीयेल, मा भैषीः, बुद्धिलाभाय स्वी- १२
येश्वरस्य समक्षम् आत्मप्राणानां नम्रीकरणाय च यस्मिन् दिने त्वं प्रथमं
मनःस्थमकार्षीरातद्दिनात् तव वाक्यानि शुश्रुविरे तव तेषां वाक्यानां
गुणेन चाहमागन्तुं प्रावर्त्ते। परन्त्वेकविंशतिदिनानि यावत् पार- १३
सीयराज्यस्याध्यक्षो मत्प्रातिकूल्येनातिष्ठत्, ततः परं मुख्यानामध्यक्षाणां
मध्ये मीखायेलनामाध्यक्षो मम साहाय्यायागमत् तस्मात् तत्र पारसी-
यराजानां पार्श्वे मया श्रैष्ठ्यमलम्भि। परन्तूत्तरकाले तव जाते या गति १४
र्भविष्यति तामहं त्वां बोधयितुमागतोऽस्मि, यतोऽधुनापि दर्शनं दीर्घ-
कालमपेक्षते।

यावत् स मया सह संलपन्निमानि व्याक्यानि व्याहरत्, तावदहं १५
भूमिं प्रत्यास्यमवनम्य मूकोऽभवं। अनन्तरं पश्य, मनुष्यसन्तानाकारोपमः १६
कश्चिन्ममौष्ठावस्पृक्षत्। ततोऽहं मुखमुद्घाट्य भाषमाणो मत्समक्षं ति-
ष्ठन्तं जनमवादिषं, भो मम प्रभो, दर्शनेनैतेन ममान्तर्मर्म्म व्यकारि
मया किमपि बलं रक्षितुमशक्यं। अतो मम प्रभुना भवता सह सं- १७

लपितुं भवत एतेन दासेन कथं शक्येत? अधुनैव मयि किमपि बलं न
१८ विद्यते श्वासोऽपि मयि न शिष्यते। ततो मानवाकारोपमः कश्चित्
१९ पुन र्मां स्पृष्ट्वा सबलीचकार। माञ्च जगाद, भो प्रीतिभाजन नर, तव
शान्ति र्भूयात्, त्वं बलवान् भव, बलवान् भव। ततस्तस्मिन् मया सह
२० संलपत्यहं बलं लब्ध्वावादिषं, भो मम प्रभो, भाषतां, यतो भवान् मां
सबलीकृतवान्। ततः स मां जगाद, किमर्थमहं त्वत्समीपमागतोऽस्मि
तत् किं जानासि? अधुनैवाहं पारसदेशस्याध्यक्षेण सह योद्धुं पुन
२१ र्गच्छामि, मयि निष्क्राम्यति तु यवनस्याध्यक्ष आगमिष्यति। तथापि
सत्यग्रन्थे लिखितं यद् विद्यते तदहं त्वां ज्ञापयिष्यामि, अमुयोः प्रति-
कूलं मत्साहाय्यकारी तु युष्मदीयाध्यक्षान्मीखायेलादन्यः कश्चिन्न विद्यते।

---

११ एकादशोऽध्यायः।

१ यवनराजेन पारसराजस्य पराजयः ५ दक्षिणोत्तरीयदेशयो र्भूपानां मिथः सन्धि-
विग्रहाणां कथा २९ विपक्षैराक्रमणं पीडनञ्च।

१ मादीयराजस्य दाराः प्रथमवत्सरेऽहमपि तस्मै बलं पराक्रमञ्च दातुं
२ स्थितवान्। अधुना त्वहं त्वां सत्यं ज्ञापयिष्यामि।

पश्य, इतः परं पारसदेशस्यापरे त्रयो राजान उत्थास्यन्ति, चतुर्थश्च
सर्व्वेभ्यो महाधनं लब्ध्वा धनी भविष्यति, यदा तु स्वधनेन विक्रान्तो
३ भविष्यति, तदा यवनराज्येन सह योद्धुं सर्व्वान् प्रचोदयिष्यति। तत्र
वीरत्वविशिष्ट एको राजोत्थास्यति महाप्रभावेन प्रभुत्वं विधास्यति
४ स्वाभिरुचिताचारं करिष्यति च। स तु यदा स्थितिं प्राप्स्यति तदा
तस्य राज्यं भग्नीभूय नभोमण्डलस्य चतुर्णां वायूनां दिक्षु विभेत्स्यते,
तच्च न तस्य सन्तते र्न वा तदीयप्रभुत्वतुल्यप्रभुत्वविशिष्टं भविष्यति,
किन्तु तस्य राज्यं खण्डीभूयैतदन्येषां भविष्यति।

५ अनन्तरं दाक्षिणात्यस्य राजा बलवान् भविष्यति, पुनस्तस्याध्यक्षाणां
मध्य एकस्तस्मादपि बलवान् भविष्यति प्रभुत्वं करिष्यति च, तस्य
६ प्रभुत्वं महाप्रभुत्वं भविष्यति। कतिपयानां वत्सराणामन्ते तौ मिथः
सहायतां विधास्यतः, सन्धिसाधनाय च दाक्षिणात्यराजस्य दुहितोत्त-
रराजस्य गृहमागमिष्यति, भुजस्य बलन्तु न रक्षिष्यति, सभुजोऽपि
स न स्थास्यति, कालक्रमे च सा रमण्यपि तस्या आनेतारो जनको बल-

दाता च समर्पयिष्यन्ते। तथापि तस्या मूलानामेकोऽङ्कुरस्तस्य पदे ७
प्ररोक्ष्यति सैन्यबलमवाप्स्यत्युत्तरस्या राज्ञो दुर्गं प्रवेक्ष्यति जनैः सह
व्यापारं करिष्यति पराक्रमं प्रयोक्ष्यति च। तेषां धातुमयप्रतिमाभिः ८
सह रमणीयैः रूप्यस्वर्णमयैः पात्रैश्च सह तेषां देवानपि स वन्दित्वाय
मिसरमपनेष्यति, स एव च कतिपयान् वत्सरान् यावद् उत्तरस्या
राज्ञः समक्षोऽवस्थास्यते। स दाक्षिणात्यराजस्य राज्यं प्रवेक्ष्यति, ९
किन्तु पुन र्निजदेशं गमिष्यति। तस्य पुत्रास्तु ससज्जीभूय बहुसैन्य- १०
बलरूपं जननिवहं सङ्ग्रहीष्यन्ति स आक्रामन्नागत्य स्रोतस्वतीव वहन्ना-
प्लावयिष्यति प्रत्यागमिष्यति च, ते च तदीयदुर्गपर्य्यन्तं विरोधं करि-
ष्यन्ति। ततो दाक्षिणात्यस्य राजातीव रुष्टः प्रगत्य तेनोत्तरस्या राज्ञा ११
सह युद्धं करिष्यति, सोऽपि महान्तं जननिवहं संस्थापयिष्यति, स नि-
वहस्त्वमुष्य करे समर्पयिष्यते। तस्मिन् निवह उत्तिष्ठति स उन्नतचित्तो १२
भूत्वायुतानि निपातयिष्यति न तु पराक्रमी भविष्यति। अपिचोत्त- १३
रस्या राजा परावृत्य पूर्व्वस्मादपि महत्तरं जननिवहं संस्थापयिष्यति,
तस्मात् कतिपयवत्सरपरिमितात् कालात् परं महासैन्यबलं प्रचुरसा-
मग्रीश्चादायाक्रमन्नागमिष्यति। तस्मिन् काले बहवो दाक्षिणात्यराजस्य १४
प्रातिकूल्येनोत्थास्यन्ति, तव जातेरप्यत्याचारिणो नरा दर्शनं स्थिरीक-
र्त्तुमुत्थास्यन्ति ते तु स्खलिष्यन्ति। अनन्तरमुत्तरस्या राजागत्य सेतुं १५
समाचेष्यति दुर्गैर्दृढीकृतं नगरं पराजेष्यति च, तदा दाक्षिणात्यस्य
बाहू न स्थास्यतः, तस्य वृतसेनाश्च स्थातुमसमर्था भविष्यन्ति। अतस्तस्य १६
विपक्षं य आगतः स यथाकाममाचरिष्यति तस्य समक्षं स्थातुं कोऽपि
न शक्ष्यति, स च ध्वंसहस्तो देशरत्ने पदार्पणं करिष्यति। अपरं स १७
सन्धेः सङ्कल्पं कृत्वा स्वराज्यस्य कृत्स्नबलेनागन्तुं प्रवर्त्तिष्यते तच्च साधयि-
ष्यति; स तस्मै नारीणां दुहितरं दास्यति, तत् तु तस्या नाशाय, सा
न स्थास्यति, न वा तस्योपकारिणी भविष्यति। ततः परं स द्वीपानां १८
विरुद्धं प्रगमिष्यति बहून् हस्तगतान् करिष्यति च, एकेन मुख्यजनेन तु
स आत्मधिक्कारतो निवर्त्तयिष्यते, तत्कृतस्य धिक्कारस्य प्रतिफलं तस्मै
प्रदातुं न शक्ष्यति। अपरं स निजदेशस्य दुर्गाणि प्रत्यागमिष्यति, १९
स्खलित्वा तु पतिष्यत्यनुद्देश्यो भविष्यति च। अपरं राज्यश्रीस्वरूपे २०
प्रदेशे प्रजापीडकप्रेरणकारी जन एकस्तस्य पद उत्थास्यति, कतिपयेषु
दिनेषु त्वतीतेषु स भङ्क्ष्यते, न क्रोधेन न युद्धेन वा।

२१ तस्य पदे त्ववमन्यः कश्चिज्जन उत्थास्यति, राजश्रीस्तस्मै न प्रदा-
२२ यिष्यते, स निश्चिन्तकाल उपस्थाय चाटुभीराजत्वं लप्स्यते। तस्याग्र
आप्लावनकारीणि बलान्याप्लावयिष्यन्ते भङ्क्ष्यन्ते च सहायोऽध्यक्षोऽपि
२३ [पतिष्यति]। तेन सह साहाय्यकरणकालादेव स प्रवञ्चनामाचरिष्यति
२४ प्रगत्य स्वल्पजनै र्बलवान् भविष्यति च। निश्चिन्तकाले स देशस्योत्तम-
स्थानानि प्रविश्य तस्य पितरः पितामहाश्च यन्न कृतवन्तस्तदेव करि-
ष्यति, स तेषां लोप्त्राणि भूषितद्रव्याणि वस्तूनि च विकरीष्यति, दृढ-
२५ दुर्गाणां विरुद्धं सङ्कल्पान् करिष्यति च, इत्थं कियत्कालोऽत्येष्यति। ततः
परं स महासेनया सह दाक्षिणात्यराजस्य प्रातिकूल्येन निजबलं निज-
चित्तञ्च प्रचोदयिष्यति, दाक्षिणात्यराजोऽप्यतीव महत्या बलवत्या च
सेनया सहितो युद्धार्थं ससज्जो भविष्यति स्थातुन्तु न शक्ष्यति, यतो जना-
२६ स्तस्य विरुद्धं सङ्कल्पान् कल्पयिष्यन्ति। तस्य प्रतिभागभोगिन एव तं
निपातयिष्यन्ति तस्य सेना चाप्लावयिष्यति तथापि बहवो हताः पति-
२७ ष्यन्ति। हिंसार्थिचित्तौ तौ द्वौ राजानावेकस्मिन् भोजनमञ्च उपवि-
श्यान्तं वदिष्यतः, तत्तु न सेत्स्यति यस्मात् तदानीमप्यन्तो निरूपितं
२८ समयमपेक्षिष्यते। अपरं स प्रचुरवस्तून्यादाय स्वदेशं प्रत्यागमिष्यति,
तस्य हृद्गतञ्च पुण्यनियमस्य प्रतिकूलं भविष्यति, स च कृतकार्य्यो भवि-
ष्यति स्वदेशं प्रत्यागमिष्यति च।

२९ निरूपिते काले स प्रत्यावृत्य दाक्षिणात्यं प्रवेक्ष्यति, पूर्व्वकालस्तु यादृश
३० आसीत् उत्तरकालो न तादृशो भविष्यति। परन्तु तस्य विरुद्धं
कित्तीयपोता आगमिष्यन्ति, ततः स विषण्णीभूय परावर्त्तिष्यते पुण्य-
नियमस्य प्रातिकूल्येन रोषं विधाय कृतकार्य्यो भविष्यति प्रत्यावृत्य
३१ पुण्यनियमत्यागिषु मनो निधास्यते च। तस्यादेशाच्च बलान्युत्थाय
धर्म्मधामयुक्तं दुर्गमपवित्रीकरिष्यन्ति नित्यबलिदानस्य निवृत्तिं विधाय
३२ ध्वंसकं घृण्यवस्तु स्थापयिष्यन्ति च। नियममध्यधर्म्माचारिणो जनांश्च
स चाटुभि र्वैधर्म्मिणः करिष्यति, निजेश्वराभिज्ञा जनास्तु बलवन्तः
३३ कृतकार्य्याश्च भविष्यन्ति। प्रजानां मध्ये ये च प्रवीणास्ते बहून्
बोधयिष्यन्ति, कतिपयानि दिनानि त्वसिवह्निवन्दित्वलुण्ठनैः स्खलि-
३४ ष्यन्ति। स्खलनकाले तु स्वल्पसाहाय्येन प्राप्तप्रतीकारा भविष्यन्ति,
३५ तदा बहवश्चाटुभिस्तेष्वासक्ता भविष्यन्ति। अन्तकालं यावत् तेषां
मध्ये विलायनार्थं शुचीकरणार्थं शुक्लीकरणार्थञ्च तेषां प्रवीणानामपि

केचन स्खलिष्यन्ति, यतस्तदानीमप्यन्तो निरूपितं कालमपेक्षिष्यते।
स च राजा यथाकाममाचरिष्यत्यात्मानमुच्चीकृत्य यावतीयदेवादप्या- ३६
त्मानं महान्तं मंस्यते, ईश्वराणामीश्वरस्य वैपरीत्येनाद्भुतकथा व्याहरि-
ष्यति च क्रोधस्य सिद्धिं यावत् कृतार्थो भविष्यति च, यतो यन्निरूपितं
तत् सेत्स्यति। स स्वपैतृकदेवेषु मनो न निधास्यते, स न नारीणां ३७
कान्त्यां न कस्मिन्नपि देवे मनो निधास्यते स सर्व्वस्मादेवात्मानं महान्तं
मंस्यते। परन्तु देवपदे स दुर्गाणां देवमर्चयिष्यति, स्वपूर्व्वपुरुषैरविदितं ३८
तं देवं स स्वर्णरूप्यमणिरत्नैरर्चयिष्यति। तस्य विजातीयदेवस्य साहा- ३९
य्येन स सुरक्षितेषु दुर्गेषु कृतकार्य्यो भविष्यति, यस्तमङ्गीकरिष्यति तं
स महासमादरान्वितं करिष्यति, तादृशान् जनान् बहूनामधिपतीन्
करिष्यति पुरस्कारवद् भूमिं वितरिष्यति च। अन्तस्य काले तु दक्षि- ४०
णात्यराजस्तेन सह सङ्घटनं करिष्यति, उत्तरस्या राजा च रथैरश्वा-
रोहिभि र्बहुपोतैश्च तस्य विपक्षमभिद्रुत्य देशान् प्रविश्याप्लावयिष्यति
तटानुल्लङ्घयिष्यति च। स च देशरत्नं प्रवेक्ष्यति, तदा बहवः स्खलिष्यन्ति, ४१
परन्त्विदोमो मोयाबोऽम्मोनसन्तानानां श्रेष्ठांशश्च तस्य हस्ततो रक्षिष्य-
न्ते। स च देशान् प्रति स्वहस्तं प्रसारयिष्यति, मिसरदेशश्च रक्षां ४२
नावाप्स्यति। स मिसरस्य स्वर्णरूप्यकोषाणां यावतीयरत्नानाञ्च प्रभु ४३
र्भविष्यति, लूबीयाः कूशीयाश्च जनास्तस्यानुचरा भविष्यन्ति। अपरं ४४
पूर्व्वोत्तरदिग्भ्यामागतै र्जनरवैरुद्वेजितः स बहून् ध्वंसयितुं वर्ज्जयितुञ्च
महाकोपेन प्रयास्यति। सागरयो र्मध्ये तु धर्म्मगिरिरत्नस्याभिमुखं ४५
राजपुरीतुल्यं स्वीयपट्टगृहं स्थापयित्वा स निजान्तमभिगमिष्यति को-
ऽपि तस्योपकारी न भविष्यति।

---

१२ द्वादशोऽध्यायः।

१ मीखायेलेन विपद् इस्रायेलस्योद्धारः ५ दानीयेलं प्रत्यन्तकालस्य विज्ञापनञ्च।

तस्मिन् काले तव जातेः सन्तानानामधिष्ठाता महान् अध्यक्षो मीखा १
येल उत्थास्यति तदानीञ्चाजात्युद्भवात् तत्कालपर्य्यन्तं कदाचन यादृशो
नासीत् तादृशः सङ्कटकालो भविष्यति, तस्मिन् काले च तव जातिर्यतः
पुस्तके लिखितो यः कश्चिन्निर्णायिष्यते स रक्षिष्यते। धूलिमयमृत्तिका- २

यां निद्राणानां मध्ये च बहवो जागरिष्यन्ति, केचनानन्तजीवनाय,
३ केचन तु धिक्कारेभ्योऽनन्तनिराकरणाय च । प्रवीणजनाश्च वितानस्य
द्युतिरिव, बहूनां धार्म्मिकीकारिणश्च तारा इव युगानुक्रमस्यानन्तकालं
४ यावद् द्योतिष्यन्ते । त्वन्तु, भो दानीयेल, अन्तस्य कालं यावदिमानि
वाक्यानि सङ्गोपय पुस्तकञ्च मुद्राङ्कितं कुरु । बहवस्तदधिगमिष्यन्ति
ज्ञानञ्च वर्धिष्यते ।
५ अनन्तरं मया दानीयेलेन निरीक्षमाणेनादर्शि नद्या एतस्मिन् तटे
६ एकोऽपरस्मिंस्तटे चैक इत्यमन्यौ द्वौ नरौ तिष्ठतः । अपरं कश्चि-
न्नद्यास्तोयानामुपरि स्थितं तं शुक्लवस्त्रान्वितं नरं पप्रच्छ, अद्भुतानाम्
७ अन्तः कियत्कालपरिमितः? ततो नद्यास्तोयानामुपरि स्थितस्य तस्य
शुक्लवस्त्रान्वितस्य नरस्य वाक्यं मयाश्रावि, नभोमण्डलं प्रति दक्षिणं
सव्यञ्चोभौ करावुत्थाप्य सोऽनन्तजीविनो नाम्ना शेपे, कालमेकं कालद्वय-
मर्द्धकालञ्च यावत्; पवित्रजातेः करस्य भञ्जने समाप्ते सति सर्व्वमेतत्
८ समाप्तं भविष्यति । एतच्छ्रुत्वाहं बोद्धुं नाशक्नवं, अतोऽवादिषं भो मम
९ प्रभो, एतस्य कः शेष? ततः स जगाद, भो दानीयेल, त्वं गच्छ, यस्मा-
दिमानि वाक्यान्यन्तस्य कालं यावत् सङ्गोपितानि मुद्राङ्कितानि च ।
१० बहवश्च परिष्कृताः शुक्लीभूता विलायिताश्च भविष्यन्ति दुष्टजनास्तु
दुष्टतामाचरिष्यन्ति । केऽपि दुष्टजना न भोत्स्यन्ते, प्रवीणास्तु भोत्स्यन्ते ।
११ परन्तु नित्यबलिदानदवनस्य ध्वंसकघृण्यवस्तुस्थापनस्य च कालात् परं
१२ दशोनत्रयोदशशतानि दिनानि भविष्यन्ति । यो जनः प्रतीक्षमाणः
१३ पञ्चत्रिंशदधिकत्रयोदशशतानि दिनान्यवाप्स्यते स धन्यः । त्वन्त्वन्तम-
भिगच्छ तेन त्वं विश्रमिष्यसि दिनानामन्ते च निजाधिकाराय्यो-
त्थास्यसि ।

होशेयस्य भविष्यद्वाक्यानि।

१ प्रथमोऽध्यायः।

१ इस्रायेलः पारमार्थिकव्यभिचारः २ होशेयस्य विवाहो यिष्रियेलाख्यपुत्त्रस्योत्पादनं ६ लोरुहामाया उत्पादनं ८ लोयम्मेरुत्पादनं १० यिहूदा इस्रायेलयोरुद्धारस्य भविष्यद्वाक्यञ्च।

उषिययोथमाहसयिहिष्कियाभिधानां यिहूदीयराजानां काले यो- १
याशपुत्त्रो यिरबियाम इतिनाम्नाख्यातस्येस्रायेलीयराजस्य काले च
सदाप्रभो र्यद् वाक्यं बेरेः पुत्त्रं होशेयं प्रति प्रादुरभूत् तद्वृत्तान्तोऽयं।
होशेयेन सदाप्रभो र्वाक्यस्यारम्भोऽयं। सदाप्रभु र्होशेयं जगाद, त्वं २
गत्वात्मनः कृते व्यभिचारेण कलङ्कितामेकां भार्य्यां व्यभिचारकलङ्कितान्
सन्तानांश्च गृहाण, यतो जातिरियं सदाप्रभोरनुगमनान्निवृत्य व्यभिचारं
करोति।
ततः स गत्वा दिब्लयिमस्य दुहितरं गोमराम् उदुवाह सा च गर्भिणी ३
भूत्वा तस्य कृते पुत्त्रमेकं सुषुवे। अपरं सदाप्रभुस्तं जगाद, त्वं तस्य ४
यिष्रियेल् [ईश्वरीयविकिरणम्] इति नाम कुरु, यतोऽल्पकालात् परमहं
यिष्रियेलि कृतस्य रक्तपातस्य प्रतिफलं येहूकुलाय दास्यामीस्रायेल्कुलस्य ५
राज्यं निःशेषयिष्यामि च। तस्मिन् दिने यिष्रियेलः समभूमाविस्रा-
येलो धनु र्भङ्क्ष्यामि च।
अपरं सा पुन र्गर्भवती भूत्वा कन्यां सुषुवे। ततः स तं जगाद, त्वं
तस्या लोरुहामा [अननुकम्पिता] इति नाम कुरु, यतोऽहं तान् अर्थत
इस्रायेल्कुलं न पुनरनुकम्पिष्ये, किन्तु हीनानेव करिष्यामि। यिहूदा- ७
कुलन्त्वनुकम्पिष्ये तेषामीश्वरेण सदाप्रभुना तान् निस्तारयिष्यामि च, न
तु धनुरसियुद्धहयसादिभिस्तान् निस्तारयिष्यामि।
अपरं सा लोरुहामां स्तन्यपानं त्याजयित्वा गर्भिणी भूत्वा पुत्त्रं सुषुवे। ८
ततः स जगाद, त्वं तस्य लोयम्मिः [न मत्प्रजा] इति नाम कुरु, यतो ९
यूयं न मम प्रजाः, अहञ्च न युष्माकं भविष्यामि।
तथापीस्रायेलः सन्तानानां सङ्ख्या मानातीतानां गणनातीतानाञ्च १०

सामुद्रिकसिकतानां समाना भविष्यति; यूयं न मम प्रजा इति यत्र
स्थाने तेऽभ्यधीयन्त, तत्र स्थाने जीवत ईश्वरस्य सन्ताना अभिधायि-
११ ष्यन्ते। यिहूदाः सन्ताना इस्रायेलः सन्तानाश्चैकत्र समेष्यन्त्येकमध्यक्षञ्च
स्वेष्वधिकरिष्यन्ति देशादागमिष्यन्ति च, यिष्रियेलः [ईश्वरीयवपनस्य]
दिनं यतो महद् भविष्यति।

---

२ द्वितीयोऽध्यायः।

१ लोकानां पारमार्थिकव्यभिचारः ६ तस्मात् परमेश्वरेण तेषां दण्डः १४ तेषां क्षेमाय परमेश्वरस्य प्रतिज्ञा च।

१ स्वभ्रातॄन् मत्प्रजा ब्रूत स्वसॄश्चानुकम्पिताः॥
२ विवदध्वं स्वमात्रा च विवदध्वं तया सह।
यतः सा नास्ति मद्भार्य्या तस्या भर्त्ता च नास्म्यहं॥
स्वीयवेश्याक्रियाः सा च दूरीकुर्य्यात् स्वदृष्टितः।
स्वीयजारपरिष्वङ्गं स्वस्तनाभ्यां जहातु च॥
३ न चेन्नग्नां करिष्यामि विवस्त्रीकृत्य तामहं।
यादृक् जन्मदिने चासीत् स्थापयिष्यामि तादृशीं॥
प्रान्तरस्येव तस्याश्च विधास्यामि दशामहं।
मरुतुल्याञ्च तां कृत्वा मारयिष्यामि तृष्णया॥
४ नाहं तस्या अपत्यान्यनुकम्पिष्य इतः परं।
अपत्यानि यतस्तानि प्राभवन् व्यभिचारतः॥
५ तेषां माता यतो ह्येतो वेश्यावृत्तिं समाचरत्।
कर्म्म लज्जाकरं तेषामकार्षीद् गर्भधारिणी॥
साब्रवीदनुयास्यामि मम तान् प्रेमकारिणः।
ममान्नं मम तोयञ्च ममोर्णां मम च क्षुमां।
मत्तैलं मम पेयञ्च मह्यं विश्राणयन्ति ये॥
६ पश्य तस्मादहं तस्या वर्त्म रोत्स्यामि कण्टकैः।
प्रावृतिञ्च निचेष्यामि सा स्वमार्गान् न लप्स्यते॥
७ स्वजाराननुधावन्ती सा नैवासादयिष्यति।
कुर्व्वाणान्वेषणं तेषामुद्देशं न समाप्स्यति॥
तदानीं वक्ष्यतीत्थं सा प्रगमिष्याम्यहं पुनः।

आदौ यो मम भर्त्तासीत् प्रत्यायास्यामि तं प्रति ।
यादृगासीत् तदा क्षेमं तादृक् नास्त्यधुना मम ॥
तान् गोधूमांस्तु तन्मद्यं तत् तैलं दत्तवानहं । ८
अहं वर्धितवांस्तस्या रजतं कनकञ्च तत् ।
येन तै र्निर्म्ममे वाल एतन्न ज्ञायते तया ॥
अतो हेतोः स्वकालेऽहं गोधूमान् मम तान् पुनः । ९
ऋतौ तन्मम मद्यञ्च प्रत्यादास्ये पुनः स्वयं ॥
नग्नताच्छादनार्थञ्च तस्यै यां दत्तवान् पुरा ।
उद्धरिष्यामि तामूर्णां मम ताञ्च क्षुमां पुनः ॥
अधुना च स्त्रियस्तस्या भ्रष्टताजन्यमूढतां । १०
तत्प्रेमकारिणां साक्षात् प्रकरिष्याम्यनावृतां ।
मामकीनकरात् ताञ्च कोऽपि नैवोद्धरिष्यति ॥
निवृत्तञ्च करिष्यामि सर्व्वं तस्याः प्रमोदनं । ११
उत्सवं नवचन्द्रञ्च विश्रामस्य दिनानि च ।
सर्व्वं निवर्त्तयिष्यामि तस्या वार्षिकपर्व्व च ॥
जारै र्मह्यमिमे दत्ता मम सन्तीति यानधि । १२
तयोक्तं सकलांस्तस्यास्तान् द्राक्षोडुम्बरद्रुमान् ।
अहं विध्वंसयिष्यामि विधास्यामि च काननं ।
ततस्ते भक्षयिष्यन्ते पशुभि र्वनचारिभिः ॥
बालदेवान् समुद्दिश्य सा च धूपमदाहयत् । १३
स्वावतंसाद्यलङ्कारैश्चात्मानं पर्य्यभूषयत् ।
स्वजारानन्वगच्छच्च मान्तु सा व्यस्मरत् तदा ॥
वालानां तस्य कालस्य तस्यै दास्याम्यहं फलं ।
भाषते भारतीमेतां स्वयमेव सदाप्रभुः ॥
अतः पश्य प्रलोभ्याहं तां नेष्यामि मरुस्थलं । १४
चित्तप्रबोधकालापं करिष्ये च तया सह ॥
द्राक्षाक्षेत्राणि तस्याश्च तस्यै दास्यामि तत्स्थलात् । १५
आखोरं निम्नभूमिञ्च दास्याम्याशाप्रवेशनं ।
पुन र्गास्यति सा तत्र यथागायत् स्वयौवने ।
मिसर्देशस्य मध्याच्चागमनस्य दिने यथा ॥
मम कान्तेति मां त्वञ्च तदा सम्बाधयिष्यसि । १६

न पुन र्मम बालेत्युक्ता मां सम्बोधयिष्यसि।
भाषते भारतीमेतां स्वयमेव सदाप्रभुः॥
१७ बालानां नामधेयानि दवयिष्यामि तन्मुखात्।
सर्व्वे ते न पुनर्व्वारं स्मारिष्यन्ते स्वनामभिः॥
१८ क्षेत्रस्थैः पशुभिः सार्द्धं पक्षिभिः खेचरैः सह।
भूतले विहरद्भिश्च सार्द्धं सर्व्वसरीसृपैः।
नियमं स्थापयिष्यामि मत्प्रजानां कृते तदा॥
धनुः खड्गञ्च युद्धञ्च भंक्ता लोप्स्यामि देशतः।
मत्प्रजाः शयनं तत्र कारयिष्यामि निर्भयं॥
१९ वाचा त्वां वरयिष्ये चानन्तकालाय मत्कृते।
धर्म्मन्यायदयास्नेहैस्त्वां वरिष्ये हि मत्कृते॥
२० सत्येनैव वरिष्ये त्वां ज्ञास्यसे च सदाप्रभुं॥
२१ सदाप्रभुरिदं ब्रूते प्रदास्याम्युत्तरं तदा।
दिवेऽहं ह्युत्तरं दास्ये द्यौ र्दास्यत्युत्तरं भुवे॥
२२ शस्यमाध्वीकतैलेभ्य उत्तरं भूश्च दास्यति।
उत्तरं यिष्रियेलाय पुन र्दास्यन्ति तानि च॥
२३ अहमेव पृथिव्यां तां वापयिष्यामि मत्कृते।
अहं ताञ्चानुकम्पिष्ये लोरुहामेतिनामिकां॥
लोयम्मिञ्च वदिष्यामि त्वमेवासि मम प्रजा।
माञ्च सम्बोधयन् सोऽपि भो मदीश्वर वक्ष्यति॥

---

३ तृतीयोऽध्यायः।

दृष्टान्तेनेस्रायेलो दुर्द्दशाया भाविसुखस्य च ज्ञापनं।

१ अपरं सदाप्रभु र्मां जगाद, त्वं पुनर्व्वारं याहि, सुहृदः प्रियायाम्
अथच व्यभिचारिण्यां योषिति प्रेम कुरुष्व, यतस्तथैव सदाप्रभुरिस्रायेलः
सन्तानेषु प्रेम कुरुते, ते त्वितरदेवान् अवलम्बन्ते द्राक्षाफलानां पूपेषु
२ प्रीयन्ते च। अतोऽहं पञ्चदशरौप्यमुद्राभिः पञ्चदशैफामानै र्यवैश्च मदर्थं
३ तां क्रीतवान्। ताञ्चोक्तवान्, त्वं बहुदिनानि मदर्थमुपविश्यावस्थास्यसे,
व्यभिचारं न करिष्यसि पुरुषभोग्या न भविष्यसि च, त्वामुद्दिश्याह-
४ मपि तथैवावस्थास्ये। यत इस्रायेलः सन्ताना बहुदिनान्युपविश्यावस्था-

स्यन्ते, तेषां न राजा नाध्यक्षो न बलिदानं न देवप्रतिमा नैफोदं न
ठक्कुरा वा भविष्यन्ति। ततः परमिस्रायेलः सन्तानाः प्रत्यावृत्य निजे- ५
श्वरं सदाप्रभुं निजराजं दायूदञ्चान्वेषिष्यन्ति, अन्तिमकाले सदाप्रभुं
तस्य मङ्गलभावञ्च सकम्पा आश्रयिष्यन्ते च।

---

४ चतुर्थोऽध्यायः।

१ पापकारणात् प्रजानां याजकानाञ्च दण्डः ११ सुरार्चनकारणात् लोकानां भर्त्सनं १५ इस्रायेलो दृष्टान्तेन यिहूदा भर्त्सनञ्च।

इस्रायेलीयसन्तानाः शृणुतोक्तिं सदाप्रभोः। १
देशनिवासिभिः सार्द्धं विवादोऽस्ति सदाप्रभोः।
देशे सत्यं दयेशस्य ज्ञानं वा नैव विद्यते॥
शपनं वितथालापो वधश्चौर्य्यं कुमैथुनं। २
आप्लावयन्ति सर्व्वं हि रक्तं रक्तेन स्पृश्यते॥
शोकार्त्तोऽस्ति ततो देशो म्लानास्तस्य निवासिनः। ३
क्षेत्रस्थाः पशवश्चापि पक्षिणश्च विहङ्गमाः।
संहारञ्च गमिष्यन्ति मत्स्या अप्यर्णवे स्थिताः॥
मात्र विवदतां कोऽपि मा परं वा विनिन्दतु। ४
याजकै र्विवदन्ते ये तव जाति र्हि तैः समा॥
अतो हेतो र्दिवाकाले स्खलनं ते भविष्यति। ५
यामिन्याञ्च त्वया सार्द्धं भाववादी स्खलिष्यति।
जनन्यास्तव संहारः संविधायिष्यते मया॥
प्रजानां मम संहारो ज्ञानाभावेन जायते। ६
त्वं निराकृतवान् ज्ञानं मया त्वञ्च निराकृतः।
मम याजनकर्म्म त्वं पुनर्नैव करिष्यसि॥
स्वेश्वरस्य व्यवस्थां त्वं यथा विस्मृतवानसि।
त्वत्सन्तानानहञ्चापि विस्मरिष्यामि तादृशं॥
यथा वृद्धिमगच्छंस्ते तथापाराध्नुवन् मम। ७
श्रियं तेषां विकार्य्याहं विधास्याम्यवमाननं॥
प्रजानां मम पापानि तेषां सन्त्युपजीविका। ८
ते तासामपराधेषु लुब्धप्राणा भवन्ति च॥

९ प्रजाया या दशा सैव याजकस्य भविष्यति।
प्रदास्यामि लहं तस्मै तदाचारोचितं फलं।
तस्य कर्म्माणि तस्यैव वर्त्तयिष्यामि मस्तके॥
१० त आहारं करिष्यन्ति तृप्तिस्तैस्तु न लप्स्यते।
व्यभिचारं करिष्यन्ति वृद्धिस्तैस्तु न लप्स्यते।
यस्मान्नित्यप्रभुं मन्तुं निवृत्तास्तेऽभवन् जनाः॥
११ व्यभिचारसुरामद्यै र्हृदयं व्यपनीयते॥
१२ स्वीयकाष्ठं हि पृच्छन्ति प्रष्टुकामा मम प्रजाः।
तासाञ्चोत्तरदातारो जायन्ते निजयष्टयः॥
आत्मना व्यभिचारस्य भ्रान्तास्ता अभवन् यतः।
स्वेश्वरस्यानधीनाश्च व्यभिचारं समाचरन्॥
१३ बलिदानं प्रकुर्व्वन्ति गिरिशृङ्गेषु ते जनाः।
उपपर्व्वतपृष्ठेषु ते धूपं दाहयन्ति च॥
अल्लोनो लिब्निरेला चेतिनामानश्च पादपाः।
यत्र सन्त्युत्तमच्छाया तत्र वृक्षतलं गताः॥
युष्मद्दुहितृभिस्तस्माद् व्यभिचारः करिष्यते।
युष्माकं पुत्त्रवध्वश्च भविष्यन्त्यभिसारिकाः॥
१४ व्यभिचारं करिष्यन्ति युष्मद्दुहितरो यदा।
युष्माकञ्च यदा वध्वो भविष्यन्त्यभिसारिकाः।
तासां दण्डस्तदानीन्तु न विधायिष्यते मया॥
जनका अपि गच्छन्ति पुंश्चलीभिः समं पृथक्।
बलिदानञ्च कुर्व्वन्ति वेश्याभिः सह ते यतः।
हीनबुद्धिरियं जातिरवश्यं पातयिष्यते॥
१५ भो इस्रायेल् यदिस्यात् त्वं व्यभिचारं समाचरेः।
तथापि तादृशं दोषी यिहूदा मैव जायतां॥
यूयं मा गिल्गलं यात माश्रयध्वं वैथावनं।
शपथार्थञ्च मा ब्रूत जीवदस्ति सदाप्रभुः॥
१६ इस्रायेल् स्वैरगामी हि गौ र्यथा स्वैरगामिनी।
अतो यद्वत् पृथुस्थाने चरन्तं मेषशावकं।
चारयिष्यति तांस्तद्वदचिरेण सदाप्रभुः॥
१७ प्रतिमाभिः समासक्त इफ्रयिम् वर्ज्यतां त्वया॥

सुरायां विक्षतायां ते व्यभिचारो विधीयते । १८
स्वावज्ञायै जनाध्यक्षा देहि देहीति वाक्प्रियाः ॥
पवनः स्वीयपक्षाभ्यां तां जातिञ्च निबद्धवान् । १९
लज्जापन्ना भविष्यन्ति स्वीययज्ञैश्च ते जनाः ।

५ पञ्चमोऽध्यायः ।

याजकानां प्रजानाम् अधिपतीनाञ्च भाविदण्डज्ञापनं ।

याजकाः शृणुतोक्तिं मे इस्रायेल्कुल संशृणु । १
भो भूपालकुल त्वञ्चाकर्णयितुमर्हसि ॥
यतो हेतो विंचारोऽयं युष्मदर्थं विधीयते ।
उन्माया इव मिस्पायां यतो यूयमतिष्ठत ।
ताबोरे विस्तृतं जालमिव यूयमभूत च ॥
नरहत्यां गभीराञ्चाकुर्व्वन्नुन्मार्गगामिनः । २
भविष्यामि त्वहं तेषां सर्व्वेषां दमने पटुः ॥
अहमिफ्रयिमं जाने नेस्रायेल् मत्त आवृतः । ३
इफ्रयिम् व्यभिचारी त्वम् इस्रायेल् अशुचीकृतः ॥
स्वेश्वरस्य समीपं ते कुर्य्युः प्रत्यागमं यया । ४
स्वक्रियाभिस्तथा तेषामनुज्ञा न विधीयते ॥
व्यभिचारस्य किन्त्वात्मा तेषां मध्येऽवतिष्ठते ।
तस्मात् सदाप्रभुञ्चापि नाभिजानन्ति ते नराः ॥
इस्रायेलो यशोदाता साक्षात् साक्ष्यं ददाति हि । ५
इस्रायेल् इफ्रयिम् चोभौ स्वापराधैः स्खलिष्यतः ।
यिहूदा अपि तत्काले तयोः सार्द्धं स्खलिष्यति ॥
स्वगोमेषान् गृहीत्वा तेऽन्वेषणाय सदाप्रभोः । ६
गमिष्यन्ति तदुद्देशस्तैस्तु नैव समाप्स्यते ।
यतः स दृष्टितस्तेषां तिरोभूतो भविष्यति ॥
ते सदाप्रभुमुद्दिश्य जाता विश्वासघातकाः । ७
परजातिषु सन्तानान् यस्मात्ते समजीजनन् ।
अधुना चन्द्रह्रासस्तान् साधिकारान् ग्रसिष्यते ॥
गिब्यायां वाद्यतां तौर्य्यं रामायां भेरिरेव च । ८

उच्चै र्वैथावने ब्रूत बिन्यामींस्त्वमभिद्रुतः ॥
९ भर्त्सनस्य दिने ध्वंसं इफ्रयिम् प्रगमिष्यति ।
इस्रायेलीयवंशेषु सत्यं विज्ञापयाम्यहं ॥
१० यिहूदीयाधिपा जातास्तुल्याः सीमापसारकैः ।
तेषामुपरि मत्कोपं ततः सेच्यामि तोयवत् ॥
११ पीडनं मर्द्दनञ्चापि विचारे भुङ्क्त इफ्रयिम् ।
यस्माज्जघन्यमादेशं स कामादनुगच्छति ॥
१२ कीटतुल्यस्ततो हेतोरहमिफ्रयिमः कृते ।
यिहूदीयकुलस्यापि कृतेऽहं संक्षयोपमः ॥
१३ इफ्रयिम् स्वामयं दृष्ट्वा यिहूदाश्च निजक्षतं ।
अश्शूरीयमहीपालम् उपाशिश्रियतेफ्रयिम् ।
तं प्रतीकारिराजञ्च प्रत्यसौ प्राहिणोज्जनान् ॥
किन्तु युष्माकमारोग्यं कर्त्तुं तेन न शक्यते ।
असमर्थः स युष्मत्तः क्षतानां वा निवारणे ॥
१४ सिंहतुल्यो यतो हेतोरहमिफ्रयिमं प्रति ।
यिहूदाकुलमुद्दिश्याहं यथा युवकेशरी ॥
स्वयमेव विदार्य्याहं गमिष्यामि यथागतं ।
अहञ्चापहरिष्यामि कोऽपि नैवोद्धरिष्यति ॥
१५ यावद् बुद्धा स्वदोषं तै र्मुखं नान्विष्यते मम ।
अहं तावत् परावृत्य गमिष्यामि निजस्थलं ।
शङ्कटस्यैव काले मां तेऽन्वेषिष्यन्ति यत्नतः ॥

---

६ षष्ठोऽध्यायः ।

१ अनुतापाय विनयः ४ जनानां पापनिर्णयश्च ।

१ एत प्रत्यागमिष्यामो वयं नित्यप्रभुं प्रति ।
स विदारितवान् अस्मान् स च स्वस्थीकरिष्यति ।
स एवाहतवान् अस्मान् भन्त्स्यत्यस्मत्क्षतानि सः ॥
२ दिनद्वये गते सोऽस्मान् पुनः सञ्जीवयिष्यति ।
तृतीये दिवसे तेन पुनरुत्थापिता वयं ।
जीवनं यापयिष्यामस्तस्य लोचनगोचरे ॥

ज्ञात्वा नित्यप्रभुं ज्ञातुं भविष्यामोऽनुधाविनः। ३
अरुणोदयवत् तस्य निर्गमोऽस्ति निरूपितः॥
अस्माकं मङ्गलार्थं स आगमिष्यति वृष्टिवत्।
अन्तिमा वा यथा वृष्टि र्भूमिसिञ्चनकारिणी॥
इफ्रयिम् त्वां समुद्दिश्य किं नु कारिष्यते मया। ४
यिहूदास्त्वां समुद्दिश्य किं नु कारिष्यते मया॥
युवयोः साधुता यस्मात् प्रातःकालीनमेघवत्।
प्रत्यूषे च खवारीव सत्वरं सापगच्छति॥
भाववादिजनैस्तस्मात् तान् सन्तच्छितवानहं॥ ५
स्वमुखस्य च वाक्यैस्तान् जनान् निहतवानहं।
दण्डाज्ञास्तव तुल्याश्च विद्युतोत्पद्यमानया॥
साधुता रोचते मह्यं बलिदानं न रोचते। ६
मह्यं होत्रीययज्ञेभ्य ऐशज्ञानञ्च रोचते॥
नियमन्तु जना एतेऽलङ्घयन्नादमो यथा। ७
मामुद्दिश्य च ते तत्राभवन् विश्वासघातकाः॥
अधर्म्माचारिणां पूर्ह्हि गिलियद् रुधिराङ्किता॥ ८
दस्यूनां संहति र्यद्वन्नरं धर्त्तुं प्रतीक्षते। ९
तद्वत् याजकसङ्घोऽपि शिखिमः पथि हन्ति तं।
भ्रष्टाचारं यतो हेतोस्ते कुर्व्वन्त्यतिकुत्सितं॥
विकटा प्राप्यते दृष्टिरिस्रायेलः कुले मया। १०
इफ्रयिम् व्यभिचाराच्च इस्रायेल् च कलङ्कितः॥
भो यिहूदास्त्वदर्थञ्च निर्णीतं शस्यकर्त्तनं। ११
प्रजानां मम दासत्वे मया सम्परिवर्त्तिते॥

---

७ सप्तमोऽध्यायः।

१ पापहेतो र्जनानां भर्त्सनं ११ कापट्यायेश्वरीयक्रोधस्य ज्ञापनञ्च।

इस्रायेलं पुनः स्वस्थं कर्त्तुं मय्युद्यते सति। १
पापमिफ्रयिमो भाति शोमिरोणश्च दुष्टता॥
अन्यताचारिणस्ते हि गाहते तस्करो गृहं।
दस्यूनां संहति र्मार्गे दस्युवृत्तिं करोति च॥

२ कृत्स्नं तेषान्तु दुष्टत्वं स्मरणे निहितं मम।
निजान्तःकरणेष्वेतन्नैव तैरनुचिन्त्यते॥
अधुना ते तु तिष्ठन्ति परिवीताः स्वकर्म्मभिः।
तानि सर्व्वाणि विद्यन्ते मम लोचनगोचरे॥
३ हृष्टं कुर्व्वन्ति राजानं स्वदुष्टत्वेन ते जनाः।
जनाध्यक्षांश्च कुर्व्वन्ति हृष्टान् स्वीयमृषोक्तिभिः॥
४ ते पारदारिकाः सर्व्वे पूपकारेण चेन्धने।
चुल्ल्यां प्रज्वलिते यद्वद् वह्निस्तद्वज्ज्वलन्ति ते॥
सिक्तं गोधूमचूर्णं हि यत्नतस्तेन मर्द्दितं।
यावन्न स्फायते तावन्निवृत्तः सोऽनुवीजनात्॥
५ अस्मद्राजोत्सवेऽध्यक्षा मद्यात् सन्ति ज्वरातुराः।
सोऽप्यत्याचारिभिः सार्द्धं प्रगृह्णीते करद्वयं॥
६ कलनार्थं स्वचित्तानि चुल्लीवन्नचितानि तैः।
यदिस्यात् कृत्स्नयामिन्यां स्वप्यात् तेषां स पूपकृत्।
तथापि ज्वलति प्रातश्चुल्ली वह्निरिवोच्छिखः॥
७ सर्व्वे चुल्लीव तप्तास्ते ग्रसन्ते निजशासकान्।
राजानः सकलास्तेषां घोरते पतनं गताः।
मां प्रति प्रार्थनाकारी तेषां कोऽपि न विद्यते॥
८ मिश्रितं जातिभिः सार्द्धं करोत्यात्मानमिफ्रयिम्।
अपरावर्त्तितः पाके यः पूपः स इवेफ्रयिम्॥
९ बलं तस्य परै भुक्तं तत्तु तेन न बुध्यते।
शिरः श्वेताङ्कितं तस्य तत्तु तेन न बुध्यते॥
१० इस्रायेलो यशोदाता साक्षात् साक्ष्यं ददाति हि।
न तु ते पुनरायान्ति स्वेश्वरं तं सदाप्रभुं।
एवम्भूतेऽपि ते तस्य न कुर्व्वन्ति गवेषणं॥
११ इफ्रयिम् हीनधीरस्ति मन्दबुद्धिकपोतवत्।
प्रार्थते मिसरो वा तैरश्शूरो वाभिगम्यते॥
१२ तेषु गच्छत्सु जालन्तु मया विस्तारयिष्यते।
ते चावतारयिष्यन्ते मयाकाशात् खगा इव।
शासिष्यन्ते मया ते च स्वसमाजे यथा श्रुतं॥
१३ सन्तापो भविता तेषां यान्ति मत्तः पलाय्य ते।

विनाशो भविता तेषां मम भक्तिं त्यजन्ति ते।
मुक्तिकर्त्तास्म्यहं तेषां तैस्तु मय्युच्यतेऽनृतं॥
न स्वान्तःकरणैः सार्द्धं मामुद्दिश्य रुदन्ति ते। १४
केवलं स्वीयशय्यासु हाहाकारं प्रकुर्व्वते।
शस्यार्थं मदिरार्थञ्च सङ्गत्वा मां त्यजन्ति ते॥
शिक्षयित्वा मया तेषां बाहवः सबलीकृताः। १५
मद्विरुद्धन्त्वनिष्टस्य सङ्कल्पान् रचयन्ति ते॥
कुर्व्वते ते परावृत्तिं न तु तं परमं प्रति। १६
यादृशं वञ्चनाकारि धनुस्ते सन्ति तादृशाः॥
जिह्वानां रोषतस्तेषां पतिष्यन्त्यसिनाधिपाः।
तेषां विद्रूपमूलं तत् मिसर्देशे भविष्यति।

---

८ अष्टमोऽध्यायः।

अधर्म्मकारणात् प्रतिमापूजनकारणाच्चेस्रायेलीयजनानां भाविदण्डस्य ज्ञापनं।

. भेरीं वादय वक्त्रेण शत्रु र्नित्यप्रभो र्गृहं। १
आक्रमिष्यति सुक्षिप्रम् उत्क्रोशः प्रपतन्निव॥
यस्माल्लङ्घितवन्तो हि नियमं मम ते जनाः।
मामकीनव्यवस्थायां जातास्ते हीनभक्तयः॥
मामुद्दिश्य रुदन्तस्ते वदिष्यन्ति मदीश्वर। २
भवन्तमभिजानीम इस्रायेलो जना वयं॥
उत्तमं यत् तदिस्रायेल् अवज्ञाय निरस्तवान्। ३
तस्यानुधावनं तस्मात् शत्रुस्तस्य करिष्यति॥
राजानः सन्नियुक्तास्तै र्न तु सम्मतिता मम। ४
अध्यक्षाश्च नियुक्तास्तै र्न तु तज्ज्ञातवानहं॥
स्वीयरूप्यसुवर्णाभ्यां विग्रहास्तैश्च निर्म्मिताः।
एतस्य परिणामस्तूच्छेदस्तेषां भविष्यति॥
शोमिरोन् तव गोवत्सः कृतवांस्त्वां निराकृतं। ५
मम कोपानलस्तेषु मनुष्येषूज्ज्वलोऽभवत्।
अहो निर्द्दोषता तेषां कतिकालं न सेत्स्यति॥
स त्विस्रायेल उत्पन्नस्तद्गुणः कर्म्म स नेश्वरः। ६

शोमिरोणः स गोवत्सः खण्डशो निपतिष्यति ॥
७ वायुमेवोप्तवन्तस्ते वात्यां प्राप्स्यन्ति शस्यवत्।
काण्डहीनन्तु शस्यं तत् चूर्णहीनस्तदङ्कुरः।
फलं जायेत चेत् तर्हि परैस्तन्निगरीष्यते॥
८ इस्रायेल् अवगीर्णोऽभूत् यच्च पात्रं न रोचते।
तत्तुल्याः परजातीनां मध्ये तिष्ठन्ति तेऽधुना॥
९ गता यस्मादश्शूरं ते निःसङ्गा वन्यगर्द्दभाः।
प्रेमकारिजनान् लब्धुम् इफ्रयिम् दत्तवान् पणं॥
१० जातिभ्यस्तैः पणो दत्तः सङ्ग्रहीष्याम्यधुना तु ताः।
भाराद् राजाधिराजस्य यास्यन्ति न्यूनताञ्च ते॥
११ पापार्थमिफ्रयिम् बह्वी र्वेदी र्निर्म्मितवान् यतः।
तस्मात् पापस्वरूपास्ता वेद्योऽजायन्त तत्कृते॥
१२ स्वव्यवस्था कृते तस्य बहुशो लिखिता मया।
विजातीयकथातुल्यं तत् सर्व्वं तेन गण्यते॥
१३ मह्यं दत्तान् बलीन् मत्वा मांसमेवोत्सृजन्ति ते।
तच्च खादन्ति तान् नैवानुगृह्णीते सदाप्रभुः॥
अपराधन्तु तेषां तं स इदानीं स्मरिष्यति।
पापानां तैः कृतानाञ्च फलं तेभ्यः प्रदास्यति।
पुनर्व्वारं मिसर्द्देशन्ते गन्तव्यो भविष्यति॥
१४ स्वस्रष्टारं हि विस्मृत्येस्रायेल् हर्म्याणि निर्म्ममे।
यिहूदाश्च पुरी र्बह्वीः कृतवान् दुर्गवद्दृढाः॥
अनलन्तु प्रहेष्यामि तस्य सर्व्वपुरीष्वहं।
तत्रत्यानि च हर्म्याणि सोऽनलो भक्षयिष्यते॥

---

९ नवमोऽध्यायः।

देवार्च्चनादिपापकारणाद् दुर्द्दशाज्ञापनं।

१ जातिवर्ग इवेस्रायेल् त्वमुल्लासाय मा हृषः।
यस्मात् त्वं व्यभिचाराय स्वेश्वरं व्यक्तवत्यसि।
सर्व्वशस्यखलेषु त्वं प्रीयसे पारितोषिके॥
२ न खलं तैलकुण्डं वा जातिमेतां भरिष्यति।

द्राक्षायाश्च रसस्तस्याः प्रत्याशां वञ्चयिष्यति ॥
नैव नित्यप्रभो र्देशे सन्निवत्स्यन्ति तज्जनाः। ३
इफ्रयिम् तु पुनर्व्वारं मिसर्देशं गमिष्यति।
अशूरे चाशुचि द्रव्यं तेषां भक्ष्यं भविष्यति ॥
न सदाप्रभवे तैश्चोत्सृक्ष्यते गोस्तनीरसः। ४
न ते तस्य प्रियास्तेषां बलयः शोचनान्नवत्।
तदन्नं भक्ष्यते येन सोऽशुचि र्जायते जनः ॥
यदन्नं विद्यते तेषां तत् तेषां प्राणरक्षकं।
तस्मान्नित्यप्रभो र्गेहे नोपयुक्तस्तदागमः ॥
किं करिष्यथ पर्व्वाहे उत्सवे वा सदाप्रभोः ॥ ५
पश्य तेऽपगता ध्वस्ता मिसरस्तान् प्रचेष्यति। ६
निखनिष्यति तान् मोफं तेषां यच्च मनोहरं।
रूप्यं वृश्चिकपत्री तद् आत्मसात् प्रकरिष्यति।
तेषां पट्टगृहाणाञ्च मध्ये स्थास्यन्ति कण्टकाः ॥
तत्त्वावधारणस्यैव दिवसा उपतस्थिरे ॥ ७
अन्यायप्रतिकारस्य दिवसा उपतस्थिरे।
तच्चाभिज्ञास्यतीस्रायेल् भाववादी हि बालिशः।
आत्मिको नर उन्मत्तः किमेतस्य तु कारणं।
तव पापस्य बाहुल्यं हिंसायाश्च प्रभूतता ॥
वर्त्तते मामकेशस्य सङ्गे चार इवेफ्रयिम्। ८
पाशै र्व्याधस्य रुध्यन्ते पन्थानो भाववादिनः।
हिंसाभावस्तदीशस्य मन्दिरे तं प्रतीक्षते ॥
गभीरं भ्रष्टभावास्ते गिबियाया दिने यथा।
अपराधन्तु तेषां स ईश्वरोऽनुस्मरिष्यति। ९
स तेषां सर्व्वपापानां प्रतीकारं विधास्यति ॥
मयासादित इस्रायेल् मरौ द्राक्षाफलं यथा। १०
यथोडुम्बरवृक्षस्य प्रत्यग्रे सति तेजसि।
आशुपक्वं फलं भात्यदर्शं युष्मत्पितॄंस्तथा ॥
बालपियोरदेवन्तु तेऽभिजग्मुस्ततः परं।
तल्लज्जास्पदमुद्दिश्यात्मानं ते चक्रिरे पृथक्।
गर्हणीया बभूवुश्च स्वप्रीते र्विषया इव ॥

११ यासीदिफ्रयिमः श्रीः सा पक्षिणीवोड्डयिष्यते।
विरेमुः प्रसवो भ्रूणो जरायोश्च सगर्भता॥
१२ यदिस्यात् ते स्वसन्तानान् वर्द्धयेयुः कथञ्चन।
तथापि हीनसन्तानांस्तान् करिष्याम्यहं पुनः॥
तानि तेषामपत्यानि न भविष्यन्ति मानवाः।
तेषामप्यापदायाति मयि तेभ्योऽपगच्छति॥
१३ सोरस्याभिमुखे भाति सुखं रोपित इफ्रयिम्।
स्वसन्तानांस्तु हन्त्रे स वहिरानेष्यतीफ्रयिम्॥
१४ देहि नित्यप्रभो तेभ्यस्त्वन्तु किं दातुमर्हसि।
गर्भस्राव्युदरं तेभ्यस्तनौ देहि च शोषितौ॥
१५ गिल्गले दुष्टता तेषां सम्पूर्णैव प्रकाशते।
तत्राहं तान् विगर्हे स्म कर्म्मणां वीक्ष्य दुष्टतां॥
स्वगेहात् तान् निरस्याहं नैव मंस्ये प्रियान् पुनः।
सर्व्वे तेषां जनाध्यक्षाः सन्ति मत्तः पराङ्मुखाः॥
१६ आहता इफ्रयीमीयाः शुष्कमूलाश्च निष्फलाः।
बालांश्चेज्जनयेयुस्ते हनिष्यामि प्रियान् शिशून्।
१७ मामकोनेश्वरस्तांश्च मनुष्यान् निग्रहीष्यति।
यतस्तै र्वचने तस्य स्वमनो न निधीयते।
ते मध्ये परजातीनाम् अटिष्यन्त इतस्ततः॥

---

१० दशमोऽध्यायः।

देवार्चनादिपापकारणाद् इस्रायेलीयानां भर्त्सनं।

१ इस्रायेल् पर्णिनी द्राक्षा फलं तस्याश्च युज्यते।
फलबाहुल्यवद् बह्वी र्वेदीः स्वार्थं करोति सः।
देशोत्कर्षवदुत्कृष्टा मूर्त्ती र्निर्म्मिमते च ते॥
२ मर्म्मभेदी तु तेषां स दोषिणश्चाधुनैव ते।
वेदीश्छेत्स्यति तेषां स मूर्त्तीश्च ध्वंसयिष्यति॥
३ ते वक्ष्यन्त्यधुनास्माकं राजा कोऽपि न विद्यते।
न सदाप्रभुतोऽभैष्म राजा नः किं करिष्यति॥
४ ते वदन्ति कथाः शापैः समयं कुर्व्वतेऽन्ततः।

तस्मादुत्पत्स्यते दण्डः क्षेत्राल्यां धुस्तुरो यथा॥
वैथावनस्थगोवत्से भीताः शोमिरोणवासिनः। ५
यतस्तत्कारणाच्छोकं प्रकरिष्यन्ति तत्प्रजाः॥
पूर्व्वं तस्मिन् कृतोल्लासा ये च तस्य पुरोहिताः।
ते शोचिष्यन्ति तत्तेजः स यतस्तद्विवर्जितः॥
देशो नायिष्यतेऽसूरं स राज्ञे प्रतिकारिणे। ६
इफ्रयिम् लप्स्यते लज्जां स्वमन्त्राद्व्रीष्यतीस्रयेल्॥
शोमिरोणो नृपो नष्टस्तृणं यद्वज्जलोपरि॥ ७
इस्रायेलस्य पापं या उच्चस्थल्यो विथावनः। ८
ताश्छेत्स्यन्ते प्ररोक्ष्यन्ति तद्वेद्यां कण्टकाङ्कुराः॥
अस्मांश्छादयतेत्यद्रींस्तदा वक्ष्यन्ति तज्जनाः।
ते गिरींश्च वदिष्यन्ति पततास्मच्छिरःस्विति॥
आ गिब्याया दिनेभ्यस्त्वमिस्रायेलसि पातकी। ९
तज्जनास्तस्थिरे तत्र गिब्यायां न दधार तान्।
दुर्जनत्वस्य वंशानां प्रातिकूल्यात् कृतं रणं॥
तांस्तु शासितुकामोऽहं तेषां बाधाय जातयः। १०
सङ्गमिष्यन्ति बद्धानां स्वापराधद्वये मया॥
इफ्रयिम् शिक्षिता धेनुः प्रीयते शस्यमर्द्दने। ११
ग्रीवायान्तु सुरूपायां तस्या धास्याम्यहं युगं॥
योक्ष्यामीफ्रयिमं याने यिहूदाः क्रक्ष्यति क्षितिं।
याकूबः सक्तते लोष्टान् मर्द्दयिष्यति खण्डशः॥
धर्म्ममुद्दिश्य वीजस्य वपनं कर्त्तुमर्हथ। १२
साधुत्वस्योपयुक्तञ्च शस्यं कर्त्तितुमाप्स्यथ।
यूयं भूमिं हलास्पृष्टां सक्तते कर्ष्टुमर्हथ॥
उपयुक्तो ह्ययं कालोऽन्वेषणाय सदाप्रभोः।
स उपस्थाय युष्मभ्यं धर्म्मवृष्टिं प्रदास्यति॥
युष्माभि र्दुष्टतामुप्त्वान्यायशस्यं हि कृत्यते। १३
अन्टतस्य फलञ्चैव युष्माभिः परिभुज्यते।
त्वं स्वमार्गं स्ववीरांश्च बहूनाश्रितवान् यतः॥
उद्भविष्यति निर्घोषस्तस्मात् त्वज्जनमध्यतः। १४
सर्व्वेषां तव दुर्गाणां नाशस्तद्वद् भविष्यति।

यद्वद् युद्धदिने शल्मन् बैथार्बेलं व्यनाशयत्।
तदानीं शिशुभिः सार्द्धं मातरः खण्डशः कृताः॥
१५ बैथेल् युष्मन्महादोषात् तत्समान् वः करिष्यति।
प्रात र्नंक्ष्यति निःशेषम् इस्रायेलो महीपतिः॥

११ एकादशोऽध्यायः।

१ ईश्वरानुग्रहकृत इस्रायेलीयानाम् अकृतज्ञता दण्डनीयता च ८ तान् प्रति ईश्वरस्य दयाज्ञापनञ्च।

१ तारुण्यकाल इस्रायेल् आसीत् मत्प्रेमभाजनं।
मिसर्देशत एवाहं स्वीयपुत्रं समाह्वयं॥
२ परन्त्वाहूयमानास्ते दूरं यान्ति स्म दृष्टितः।
बलिं यच्छन्ति बालेभ्यो मूर्त्तिभ्यो धूपसौरभं॥
३ इफ्रायिममहञ्चैव पादचारमशिक्षयं।
तस्य बाहूद्वयं धृत्वाहं तत्त्वागमयं स्वयं।
तेषान्त्वारोग्यदाताहं तन्न जानन्ति ते जनाः॥
४ अहं मानवपाशैस्तान् आकर्षं प्रेमरज्जुभिः।
हनूतो युगहर्त्तेवाहञ्च तेषां कृतेऽभवं।
भक्ष्यद्रव्याणि तेषाञ्च सम्मुखं पर्य्यवेषयं॥
५ यदिस्यान्मिसरं देशं स न प्रत्यागमिष्यति।
तथाप्यश्शूरराजोऽसौ तस्य राजा भविष्यति।
परावर्त्तयितुं चित्तं यतस्ते सन्त्यसम्मताः॥
६ खड्गवात्येव निस्त्रिंशस्तत्पुरेषु भ्रमिष्यति।
संहरिष्यति तच्छाखा ग्रसंस्तेषां कुमन्त्रणात्॥
७ मत्तोऽपक्रमणाच्चैवावलम्बन्ते मम प्रजाः।
आरोहणार्थमाहूत उन्नतिं कोऽपि नेच्छति॥
८ इफ्रायिम् त्वां कथं जह्यां त्वां वा प्रोज्झेयमिस्रयेल्।
त्वामद्मायाः समानं वा विधातुं शक्नुयां कथं॥
सिबोयीमः समानं वा त्वां कर्त्तुं शक्नुयां कथं।
मदन्तर्घूर्णते चित्तं युगपत् तप्यते मनः॥
९ सफलां न करिष्यामि स्वीयकोपस्य चण्डतां।

न प्रवृत्तो भविष्यामीफ्रयिमो वा विनाशने॥
यस्मादीश्वर एवाहं न मनुष्योऽहमस्मि हि।
त्वदन्तःस्थः पवित्रोऽहं नागमिष्यामि वैरिवत्॥
ते च नित्यप्रभोरेव भविष्यन्त्यनुगामिनः। १०
सिंहगर्ज्जनतुल्यञ्च गर्ज्जनं स करिष्यति।
गर्ज्जिते तेन सन्ताना उड्डमिष्यन्ति सागरात्॥
यथा पक्षी मिसर्देशाद् उड्डमिष्यन्ति ते तथा। ११
कपोतो वा यथा तद्वद् अश्शूर्देशस्य मध्यतः।
तान् स्वधामसु धास्यामीति ब्रवीति सदाप्रभुः॥
इफ्रयिम् अयथार्थै हिं वाक्यैः परिवृणोति मां। १२
इस्रायेलः कुलञ्चापि छलैः परिवृणोति मां॥
अद्यापीशस्य सङ्गी सन् विश्वासार्हस्य तस्य च।
पवित्रस्य समीपस्था यिहूदा भ्रमणप्रियः॥

---

१२ द्वादशोऽध्यायः।

१ इफ्रयिमं यिहूदां याकूबञ्च प्रति तर्ज्जनं ७ इफ्रयिमः पापानां निर्णयो दण्डश्च।

इफ्रयिम् पवनाशी हि पूर्ब्ववातानुधावकः। १
स मृषोक्तिं विनाशञ्च वर्द्धयत्यखिलं दिनं॥
अश्शूरीयजनैः सार्द्धं समयं विदधाति सः।
मिस्रीयेभ्यो जनेभ्यश्च तैलं तेनोपनीयते॥
यिहूदा सह तस्माच्च विवादोऽस्ति सदाप्रभोः। २
याकूबस्य यथाचारः कर्त्तव्यं शासनं तथा।
स तत्कर्म्मानुरूपञ्च फलं तस्मै प्रदास्यति॥
स्वभ्रातुः पादमूलं स जरायौ धृतवान् पुरा। ३
स्वीयशक्तिप्रयोगेण प्रबभूवेश्वरस्य च॥
प्रभूय स्वर्गदूतस्य स बभूव जयी तदा। ४
रुदंस्तस्य समीपञ्च प्रार्थनां व्याजहार सः।
वैथेले तेन स प्रापि तत्रास्मानाललाप च॥
ईश्वरो वाहिनीनान्तु स एवास्ति सदाप्रभुः। ५
स सदाप्रभुरित्येव नाम्ना स्मारिष्यते सदा॥

६ परावर्त्तस्व तस्मात् त्वं तावकीनेश्वरं प्रति।
दयां रक्ष विचारञ्च प्रतीक्ष्य स्वेश्वरं सदा॥
७ बणिक् सोऽस्ति किनानीयो हस्ते कूटतुलां धरन्।
दौरात्म्यस्य ह्यनुष्ठानं सम्यक् तस्मै च रोचते॥
८ अत इफ्रयिमाहेत्थं जातस्तावदहं धनी।
आत्मनस्च कृते वित्तं समासादितवानहं॥
ममोपार्जितसर्व्वस्वे नैव कश्चन तादृशः।
आविष्कारिष्यते दोषो येन जायेत पातकं॥
९ आमिसर्देशतोऽहन्तु त्वदीशोऽस्मि सदाप्रभुः।
शिविरे वासयामि त्वाम् अद्य पर्व्वदिनेष्विव॥
१० भाववादिन आभाषे भूयो यच्छामि दर्शनं।
भाववादिगणेनाहमुपमा व्याहरामि च॥
११ गिल्यदे किमधर्म्मोऽस्ति सर्व्वेऽलीका हि सर्व्वशः।
वृषाणां बलिदानेन यज्ञं कुर्व्वन्ति गिल्गले।
वेद्यश्च प्रचुरास्तेषां क्षेत्रालिष्वश्मराशिवत्॥
१२ याकूबोऽरामदेशं हि गन्तुं चक्रे पलायनं।
भार्य्यार्थं दास्यवृत्तिञ्चेस्रायेल् स्वीकृतवांस्तदा।
स चाभूत् सहधर्म्मिण्या लाभार्थं पशुरक्षकः॥
१३ इस्रायेलं मिसर्देशाद् आनैषीद् भाववादिना।
सदाप्रभुः पुनस्तञ्च सोऽरक्षीद् भाववादिना॥
१४ इफ्रयिम् तु तमत्युग्रं कोपयामास कर्म्मभिः।
तस्य रक्तापराधं स मस्तके तस्य धास्यति।
धिक्कारस्य फलं तस्मै प्रभुस्तस्य प्रदास्यति॥

---

१३ त्रयोदशोऽध्यायः।

१ मूर्त्त्यर्च्चनाकारणाद् ईश्वरेणेफ्रयिमो भाविदण्डः ९ ईश्वरस्य प्रतिज्ञा १५ दण्डज्ञापनञ्च।

१ पूर्व्वमिफ्रयिमो वाक्याद् उदविज्यन्त मानवाः।
इस्रायेलि तदानीं स आसीदुच्चपदान्वितः।
बालदेवेन पश्चात्तु दोषीभूय ममार सः॥

इदानीमपि ते पापमाचरन्त्युत्तरोत्तरं। २
स्वविलायितरूप्येण प्रतिमा रचयन्ति ते।
स्वबुद्ध्या कल्पिता मूर्त्तीः सर्व्वशः शिल्पिनिर्म्मिताः॥
ता एवोद्दिश्य ते वाक्यमीदृशं व्याहरन्ति च।
यजमाना नराः सर्व्वे गोवत्सांश्चुम्बयन्त्विति॥
भविष्यन्ति तु तस्मात् ते प्रातःकालीनमेघवत्। ३
यस्तिरोधीयते क्षिप्रं समास्तच्छिशिरेण वा॥
किं वा शस्यतुषैस्तुल्याः खलतो वायुचालितैः।
सदृशा वापि धूमस्य गवाक्षेण प्रगच्छतः॥
आमिसर्देशतोऽहन्तु त्वदीशोऽस्मि सदाप्रभुः। ४
न ज्ञातव्योऽपरः कश्चिन्मां विहायेश्वरस्त्वया।
यतो मत्तोऽपरः कश्चित् त्राणकर्त्ता न विद्यते॥
प्रान्तरे त्वामवैक्षेऽहं तृष्णाया वसतिस्थले॥ ५
स्वप्रचारे यथा मेषास्तृप्तिं ते लेभिरे तथा। ६
तृप्त्वा तूद्धतचित्तास्ते जाता मां व्यस्मरंस्ततः॥
अहं तस्माद् भविष्यामि तान् समुद्दिश्य सिंहवत्। ७
मार्गे द्वीपी यथा तद्वत् करिष्यामि प्रतीक्षणं॥
भल्लूकी हृतवत्सेव मिलिष्यामि च तैः सह। ८
तेषां हृदयपद्मञ्च दारयिष्यामि खण्डशः॥
तत्र केशरिणीवाहं भक्षयिष्यामि तान् जनान्।
तांश्च विदारयिष्यन्ति पशवः क्षेत्रचारिणः॥
भो इस्रायेल् क्षिणोति त्वाम् अप्रीतिः स्वगतो मयि॥ ९
यस्त्वां सर्व्वपुरे रक्षेत् कुत्र सोऽस्ति नृपस्तव। १०
कुत्र विचारकर्त्तारस्तानुद्दिश्य त्वमुक्तवान्।
राजानमधिपांश्च त्वमस्मभ्यं दातुमर्हसि॥
क्रुद्धोऽयच्छं नृपं तुभ्यं कुपित्वा चाहरं पुनः॥ ११
इफ्रैमः पुटितो दोषः पापं कोषे च सञ्चितं॥ १२
तस्य सूतिव्यथायाति स शिशुर्ज्ञानवर्ज्जितः। १३
सोऽपत्यानां यतो द्वारे स्वकाले नोपतिष्ठति॥
तान् जनान् उद्धरिष्यामि पातालस्य करादहं। १४
भविष्यामि स्वयं तेषां मुक्तिकर्त्ता च मृत्युतः॥

क्व मारी तव भो मृत्यो क्व पाताल तव क्षयः ।
मम दृष्ट्यास्तिरोभूतः पश्चात्तापो भविष्यति ॥
१५ भ्रातृवर्गस्य मध्येऽसौ विद्यते फलवत्तमः ।
वायुस्त्वायाति पूर्व्वीयो वायुरेव सदाप्रभोः ।
मरुस्थानात् समायाति तेनोत्सस्तस्य शोष्यति ॥
तस्य तोयप्रवाहश्च जलहीनो भविष्यति ।
रम्याणां सर्व्वपात्राणां स कोषं लुण्ठयिष्यति ॥
१६ शोमिरोन् लप्स्यते दण्डम् ईश्वराय यतोऽद्रुहत् ।
असिना ते पतिष्यन्ति भंक्ष्यन्ते खण्डशः सुताः ।
स्त्रियो विदारयिष्यन्ते गर्भवत्यः कृपां विना ॥

१४ चतुर्दशोऽध्यायः ।

१ मनःपरावर्त्तनाय विनतिकथनं ४ ईश्वरीयाशीर्व्वादस्य प्रतिज्ञाकथनञ्च ।

१ इस्रायेल् अभिगच्छ त्वं पुनः स्वेशं सदाप्रभुं ।
यस्मात् स्वीयापराधेन सञ्जातं स्खलनं तव ॥
२ स्वसङ्गे वाच आदाय प्रतियात सदाप्रभुं ।
तञ्च ब्रूतापराधं त्वं सकलं हर्त्तुमर्हसि ।
क्षेममादत्स्व दास्यामस्तुभ्यञ्चौष्ठवृषान् वयं ॥
३ अस्माकं हि परित्राणमस्सूरो न करिष्यति ।
न तुरङ्गान् समारुह्य करिष्यामो गमागमौ ॥
न पुनः स्वकृतं वस्त्वभिधास्यामोऽस्मदीश्वरं ।
करुणा पितृहीनेन यस्मात् त्वय्येव लभ्यते ॥
४ तेषामपक्रमव्याधिः प्रतीकारिष्यते मया ।
तेष्वहं छन्दतः प्रेष्ये शान्तक्रोधो हि तेष्वहं ॥
५ इस्रायेलं समुद्दिश्य भविष्यामि खवारिवत् ।
पद्मिनी च यथा तद्वत् स्फुटितः स भविष्यति ।
लिबानोनं यथा तद्वत् स्वमूलानि च भन्त्स्यति ॥
६ तच्छाखाः प्रसरिष्यन्ति शोभा जीततरोरिव ।
लिबानोनगिरेस्येव गन्धस्तस्य भविष्यतः ॥
७ तच्छायायां सुखासीनाः प्रत्यायास्यन्ति मानवाः ।

गोधूमान् जीवयिष्यन्ति द्राक्षावल्लीव वर्धिताः ।
ते भविष्यन्ति तत्ख्याति लिबानोनीयमद्यवत् ॥
इफ्रयिम् विग्रहैः सार्द्धं कः सम्बन्धः पुन र्मम । ८
प्रार्थनामनुगृह्णाम्यवेक्षिष्ये तमहं स्वयं ॥
हरित्पर्णेन तुल्योऽहं भविता देवदारुणा ।
मत्त उत्पद्यमानं हि फलमासाद्यते तव ॥
को ज्ञानी नर एतत् स सर्व्वमर्हति बोधितुं । ९
को नरो बुद्धिमानेतत् सर्व्वं स ज्ञातुमर्हति ॥
यस्मान्नित्यप्रभो र्मार्गाः सरला नात्र संशयः ।
धार्म्मिकास्तत्र गच्छन्ति दुष्टास्तत्र स्खलन्ति च ॥

योयेलस्य भविष्यद्वाक्यानि ।

१ प्रथमोऽध्यायः ।

१ दुःखायेला भाविदण्डज्ञापनं ८ विलापार्थम् आह्वानं १२ विलापार्थमुपवासदिनं निरूपयितुं विनतिश्च ।

पिथूयेलस्य पुत्त्रं योयेलं प्रति सदाप्रभो र्यद् वाक्यं प्रादुरभूत् १
तद्वृत्तान्तोऽयं ।

भो प्राचीनजना यूयमेतत् संश्रोतुमर्हथ । २
भो देशवासिनः सर्व्वे कुरुताकर्णनं मयि ॥
युष्माकं दिवसेष्वेतत् सम्भूतं किं कदाचन ।
किं कदाचन युष्माकं पितॄणां दिवसेषु वा ॥
स्वीयपुत्त्रेषु युष्माभिः क्रियतां तस्य वर्णना । ३
युष्मत्पुत्त्रैः स्वपुत्त्रेषूत्तरवंशे च तत्सुतैः ॥
स्रूकानां हि यदुच्छिष्टं शलभास्तदखादिषुः । ४
शलभानां यदुच्छिष्टं पतङ्गास्तदखादिषुः ।
पतङ्गानां यदुच्छिष्टं घुर्घुर्य्यस्तदखादिषुः ॥
यूयं जागृत भो मत्ताः कुरुध्वञ्चोच्चरोदनं । ५

हाहाकारं कुरुध्वञ्च भो सर्व्वे मद्यपायिनः।
नवद्राक्षारसो यस्मात् संहृतो युष्मदास्यतः॥
६ जातिरेका यतो ह्येतो मम देशं समाक्रमीत्।
विक्रान्ता गणनातीता तद्दन्ताः सिंहदन्तवत्।
केशरिण्या रदानाञ्च समानाः सन्ति तद्रदाः॥
७ साध्वंसन्मम द्राक्षां ममालावीदुडुम्बरं।
सर्व्वशो निस्त्वचं कृत्वा तञ्च भूमौ न्यपातयत्।
श्वेतवर्णा हि सञ्जाताः सकलास्तस्य पल्लवाः॥
८ सौकुमार्य्यस्य कान्तस्य शोकाच्छागेन वेष्टिता।
युवतीव त्वमप्युच्चैः परिदेवनमीरय॥
९ भक्ष्यपानीयनैवेद्ये हृते नित्यप्रभो र्गृहात्।
याजकाः परिशोचन्ति सेवमानाः सदाप्रभुं॥
१० नष्टं क्षेत्रं सशोका भू र्गोधूमा अनशन् यतः।
नवद्राक्षारसः शुष्कस्तैलञ्च म्लानतां गतं॥
११ भो कृषाणा विलज्जध्वं रुदितोद्यानरक्षकाः।
गोधूमान् हि यवांश्चाधि क्षेत्रे शस्यं यतोऽनशत्॥
१२ द्राक्षावल्ली च शुष्काभूत् परिम्लान उडुम्बरः।
खर्ज्जूरो दाडिमश्चापि नागरङ्गतरुस्तथा।
क्षेत्रस्याः सकला एव शुष्कीभूता महीरुहाः।
शुष्कीभूतो यतो हर्षो नृसन्तानसमाजतः॥
१३ याजकाः स्वकटिं बद्धा विलापं कर्त्तुमर्हथ।
हाहाकारं कुरुध्वञ्च भो वेद्याः परिचारकाः॥
सकला यूयमायात भो मदीशस्य सेवकाः।
शाणवस्त्रैश्च युष्माभि र्याप्यतां कृत्स्नयामिनी।
भक्ष्यपानीयनैवेद्ये युष्मदीशगृहाद्धृते॥
१४ आज्ञां धर्म्मोपवासस्य दत्त पर्व्वं विघोषत।
युष्मदीशस्य गेहे च वृद्धादीन् देशवासिनः।
सर्व्वान् सङ्गृह्य शोकार्त्ता रुत नित्यप्रभुं प्रति॥
१५ हाहा किं दिनमासन्नो यस्मान्नित्यप्रभोरहः।
सर्व्वशक्तिमतः पार्श्वादेति स प्रलयो यथा॥
१६ किं न व्युच्छिद्यते भक्ष्यमस्माकं दृष्टिगोचरात्।

आमोदोऽपि विलासश्चास्माकमीशस्य गेहतः॥
वीजानि स्वीयलोष्टानामधस्ताद् गलितानि हि। १७
कोषागाराणि नष्टानि कुसूला भूमिसात्कृताः।
यतः क्षेत्रस्थगोधूमाः सकलाः शुष्कतां गताः॥
क्रन्दन्ति पशवस्तीव्रं रोरूयन्ते च गोव्रजाः। १८
यतो हेतोः कृते तेषां गोप्रचारो न विद्यते।
तैः सार्द्धं दुर्द्दशापन्ना जाता मेषव्रजा अपि॥
उच्चकैः प्रार्थयिष्येऽहं त्वामुद्दिश्य सदाप्रभो। १९
यस्मात् प्रग्रस्तवानग्निः प्रचारान् प्रान्तरे स्थितान्।
शिखा दग्धवती सर्व्वान् क्षेत्रस्थांश्च महीरुहान्॥
रुवन्ति त्वां समुद्दिश्य मृगाः क्षेत्रचरा अपि। २०
यस्मात् तोयप्रवाहिन्यः सरितः शुष्कतां गताः।
यस्माच्च ग्रस्तवानग्निः प्रचारान् प्रान्तरे स्थितान्॥

---

२ द्वितीयोऽध्यायः।

१ भयङ्करदण्डनिर्णयः १२ अनुतापाय विनतिः १५ उपवासनिर्णयः १८ आशीर्व्वाद-प्रतिज्ञानं २१ भाविक्षेमकथनञ्च।

उच्चैस्तार्य्यध्वनिं यूयं सीयोने कर्त्तुमर्हथ। १
उच्चनादं कुरुध्वञ्च पवित्रे पर्व्वते मम॥
सकला एव कम्पन्तां मनुष्या देशवासिनः।
दिनं नित्यप्रभो र्यस्मादेति नेदिष्ठमेव तत्॥
सोऽहः कृष्णस्तमस्वी च मेघनीलाभ्रयोरहः। २
यथा पर्व्वतचूड़ासु विस्तीर्य्यतारुणोदयः।
जातिरेका तथोदेति महती बलत्तमा॥
आयुगात् तादृशी कापि न बभूव कदाचन।
तत्पश्चात् पुरुषश्रेण्या वत्सरेषु च तादृशी।
जातिरन्या पुनर्व्वारं न कदापि भविष्यति॥
तस्या अग्रे ग्रसत्यग्निस्तत्पश्चात् तपते शिखा। ३
एदनोद्यानवत् तस्या अग्रे देशो विराजते।
तस्याः पश्चात्तु विध्वस्ता मरुभूमि र्विजायते।
ततः पलायनेनापि कोऽपि रक्षां न लप्स्यते॥

४ अश्वतुल्याकृतिस्तेषां ते धाविष्यन्ति सादिवत्॥
५ गिरिमूर्ध्नः प्लविष्यन्ते महाघोषा रथा इव।
तृणाश्यग्निशिखावद्वा स्फुटनध्वनिसंयुताः।
तुल्या विक्रान्तया जात्या युद्धार्थं श्रेणिबद्धया॥
६ तेषामग्रे मनुष्याणां यन्त्रणा सम्भविष्यति।
सकलानि च वक्त्राणि संहरिष्यन्ति चारुतां॥
७ सकलास्ते भविष्यन्ति शूरवद् द्रुतगामिनः।
ते स्कन्दिष्यन्ति प्राचीरं युद्धाभिज्ञा नरा इव॥
गमनं ते विधास्यन्ते प्रत्येकं निजवर्त्मना।
परमार्गप्रवेशञ्च न करिष्यन्ति ते मिथः॥
८ नैको बाधिष्यतेऽन्यं वा स्वमार्गेण तु यास्यति।
ते शूलाग्रे पतित्वापि स्थास्यन्त्यच्छिन्नपंक्तयः॥
९ ते पुरं पर्य्यटिष्यन्ति तेऽभिद्रोष्यन्ति कुड्यकं।
वेश्मान्यारुह्य वेक्ष्यन्ति गवाक्षैस्तस्करा इव॥
१० तेषामग्रे सकम्पा भूस्सचलं व्योममण्डलं।
चन्द्रादित्यौ तमस्विन्यौ तारकाश्च हृतप्रभाः॥
११ रवञ्चेरयति स्वीयं स्वसैन्याग्रे सदाप्रभुः।
शिविरं सुमहत् तस्य तदाज्ञासाधको बली॥
यतो हेतो र्महानेव दिवसोऽस्ति सदाप्रभोः।
स चातीव भयार्होऽस्ति स सोढुं केन शक्यते॥
१२ किन्त्विदानीमपि ब्रूते युष्मानेतत् सदाप्रभुः।
उपवासं प्रकुर्व्वन्तो रोदनं शोकमेव च।
सर्व्वान्तःकरणै र्यूयं प्रत्यागच्छत मां प्रति॥
१३ स्वचित्तान्येव विच्छिन्त न तु स्वीयपरिच्छदान्।
प्रत्यायात च युष्माकमीशं नित्यप्रभुं प्रति॥
यतो हेतोः कृपालुः स स्नेही क्रोधे विलम्बितः।
स महाकरुणश्चास्ति विपत्त्या चानुतप्यते॥
१४ किं जाने स परावृत्य पश्चात्तापं करिष्यते।
आशिषञ्चार्थतोऽस्माकमीश्वरस्य सदाप्रभोः।
भक्ष्यपानीयनैवेद्ये स्वपश्चाच्छेषयिष्यति॥
१५ उच्चैस्तौर्य्यध्वनिं यूयं सीयोने कर्त्तुमर्हथ।

आज्ञां धर्म्मोपवासस्य दत्त पर्व्व विशेषत। १६
सङ्गृह्णीत प्रजा आज्ञां विधद्धं धर्म्मसंसदः॥
प्राचीनान् कुरुतैकत्र सङ्गृह्णीत च बालकान्।
स्तन्यपोष्यान् शिशूंश्चापि स्वीयभोगगृहाद् वरः।
विनिष्क्राम्येन्नवोढा च स्वीयगुप्तस्थलाद् वधूः॥
यूयं भो याजकाः सर्व्वे सेवमानाः सदाप्रभुं। १७
मध्येऽलिन्दस्य वेद्याश्च रुदन्तो वक्तुमर्हथ॥
अनुकम्पां विधत्स्व त्वं स्वप्रजासु सदाप्रभो।
त्वं स्वकीयाधिकारञ्च मा धिक्कारास्पदं कुरु॥
तेषामुपरि कर्त्तृत्वं माप्नुयुः परजातयः।
अमीषामीश्वरः कुत्रेदं ब्रूयु र्जातयः कुतः।
नित्यप्रभुः स्वदेशस्य पक्षे स्पर्धिष्यते तदा। १८
स्वप्रजानां निमित्तं स करुणाञ्च करिष्यते॥
स्वप्रजा वक्ष्यतीदञ्चोत्तरं ह्यत्वा सदाप्रभुः। १९
गोधूममद्यतैलान्यहं प्रहेष्यामि वः कृते॥
पश्य तैरेव यूयञ्च परितृप्ता भविष्यथ।
न धिक्कारास्पदं युष्मान् पुन र्धास्यामि जातिषु॥
युष्मत्तो दवयिष्यामि शत्रुमुत्तरवासिनं। २०
ताडयन् प्रेरयिष्यामि तञ्च ध्वस्तमरुस्थलं।
तन्मुखं पूर्व्वपायोधिं पृष्ठं पश्चिमसागरं॥
तस्योद्यास्यति दुर्गन्धः पूतिस्तस्योद्गमिष्यति।
यतो हेतो र्महादर्पी स्वक्रियाभि र्बभूव सः॥
अतो भो देश मा भैषीरुल्लासं कुरु हृष्य च। २१
यतो हेतो र्महानस्ति स्वक्रियाभिः सदाप्रभुः॥
मा कुरुध्वं भयं यूयं भो मृगाः क्षेत्रचारिणः। २२
हरिद्वर्णा यतो भान्ति प्रचाराः प्रान्तरस्थिताः॥
यतो हेतोश्च यच्छन्ति स्वफलानि महीरुहाः।
पश्यतोडुम्बरद्राक्षे स्वीयतेजः प्रयच्छतः॥
यूयं सीयोनसन्ताना उल्लासं कर्त्तुमर्हथ। २३
कुरुध्वं तत आह्लादं युष्मदीशे सदाप्रभौ॥
यस्माद् धार्म्मिकताय स युष्मभ्यं दत्तवान् गुरुं।

आसारान् युष्मदर्थञ्च व्योमतः प्रेषयिष्यति ।
उत्तरामेव वृष्टिञ्च वर्षारम्भे तथादिमां ॥
२४ परिपूर्णानि शस्येन भविष्यन्ति खलानि च ।
द्राक्षारसश्च तैलञ्च कुण्डेभ्यः प्रस्रविष्यतः ॥
२५ प्रहिता वो विरुद्धञ्च या महावाहिनी मया ।
शलभास्ते पतङ्गाश्च घुर्घुर्य्यः शूककीटकाः ।
सर्व्वं सम्भक्ष्य यान् वर्षान् अकार्षु र्लाभवर्ज्जितान् ।
युष्मदर्थं करिष्यामहं तेषां क्षतिपूरणं ॥
२६ यूयं कुर्व्वन्त आहारं खाद्यद्रव्येण तर्प्स्यथ ।
स्तोष्यध्वे नामधेयञ्च युष्मदीशसदाप्रभोः ॥
युष्मानुद्दिश्य यस्मात् स आश्चर्य्याः कृतवान् क्रियाः ।
लज्जाञ्चानन्तकालेऽपि न प्राप्स्यन्ति मम प्रजाः ॥
२७ इस्रायलस्य मध्येऽहमस्मीति ज्ञानमाप्स्यथ ।
नित्यप्रभुरहञ्चेशो युष्माकं नास्ति चापरः ।
लज्जाञ्चानन्तकालेऽपि न प्राप्स्यन्ति मम प्रजाः ॥
२८ ततः पश्चादियञ्चैव फलोत्पत्ति र्भविष्यति ।
वर्षिष्यामि निजात्मानं सर्व्वमर्त्यस्य मूर्धनि ।
युष्माकं पुत्त्रपुत्त्रीभि र्भाविोक्तिः कथयिष्यते ॥
स्वप्नान्यालोकयिष्यन्ते युष्माकं स्थविरा जनाः ।
भविष्यन्ति च युष्माकं युवानो लब्धदर्शनाः ॥
२९ दासानामपि शीर्षेषु दासीनामपि मूर्धसु ।
वर्षिष्यामि निजात्मानमहं तेषु दिनेषु च ॥
३० गगने च पृथिव्याञ्च लक्षणान्यद्भुतान्यहं ।
विधास्ये रुधिरं वह्निं धूमस्तम्भांश्च भीषणान् ॥
३१ विकृतोऽग्रे रवि र्ध्वान्तं चन्द्रो रक्तं भविष्यति ।
तदायास्यति भीमं तन्महन्नित्यप्रभो र्दिनं ॥
३२ इदं भवन्तु यः कश्चिन्नामाहूय सदाप्रभोः ।
प्रार्थनां कुरुते तस्य निस्तारः सम्भविष्यति ॥
यस्मान्नित्यप्रभु र्यद्वद् उक्तवांस्तद्वदेव हि ।
सीयोनाद्रौ यिरूशालमे निस्तारः सम्भविष्यति ।
मध्ये शेषनराणाञ्च यानाह्वाता सदाप्रभुः ॥

३ तृतीयोऽध्यायः।

१ ईश्वरीयप्रजानां विपक्षजनानां भाविदण्डः ९ तेन दण्डेनेश्वरीयगुणप्रकाशनं १८ स्वप्रजाः प्रतीश्वरस्य भाव्याशीर्व्वादश्च।

पश्य तेषु दिनेष्वेव तस्मिन् समय एव च। १
यिहूदायिरूशालेमो र्वन्दित्वं परिवर्त्तयन्॥
सकलान् परजातीयान् सङ्ग्रहीष्याम्यहं जनान्। २
तान् यिहोशाफटाख्यातामवरोह्य समस्थलीं॥
स्वप्रजाः स्वाधिकारश्चेस्रायेलीयजनानधि।
तत्र स्थाने करिष्याम्यहं विचारञ्च तैः सह॥
यस्माद् विकीर्णवन्तस्ते परजातिषु मत्प्रजाः।
विभागं मम देशस्य कृतवन्तश्च ते मिथः॥
तेऽकार्षु र्गुटिकापातं मामकीनप्रजा अधि। ३
वेश्याभोगस्य मूल्यार्थं तैरदायि च बालकः।
बालां विक्रीय मद्यार्थं मद्यपानमकारि च॥
मत्सम्बन्धे तु के यूयं सोरसीदोनवासिनः। ४
पिलेष्टीयाख्यदेशस्य सर्व्वचक्रस्थिताः जनाः॥
मद्विरुद्धं कुरुध्वे किम् अपकारस्य शोधनं।
अपकारन्तु कुर्य्यात यदि मत्प्रातिकूल्यतः॥
युष्मत्कृतापकारस्य तर्ह्याकस्मिकशोधनं।
कृत्वाहं वर्त्तयिष्यामि युष्मन्मूर्धसु सत्वरं॥
युष्माभि र्मम रूप्यञ्च सुवर्णञ्च हृतं यतः। ५
स्वप्रासादेषु नीतानि मद्रत्नान्युत्तमानि च॥
यिहूदायाश्च सन्तानान् प्रजाश्च यिरूशालमः। ६
सुदूरीकर्त्तुमिच्छन्तस्तेषां देशस्य सीमतः।
यूयं यवनवंशेषु तेषां प्राकार्ष्ट विक्रयं॥
विक्रीता एव युष्माभि र्यत्र कुत्रापि सन्ति ते। ७
तान् प्रबोधयितुं तस्मात् स्थानादस्म्यहमुद्यतः।
युष्मन्मूर्ध्नर्पयिष्याम्यहञ्च वः कर्म्मणः फलं॥
युष्माकं सकलान् पुत्रान् युष्माकं दुहितॄरपि। ८
विक्रेष्यामि यिहूदायाः सन्तानानां करेष्वहं॥
शिवायीयमनुष्येषु दूरदेशनिवासिषु।

ते विक्रेष्यन्ति तान् यस्माद् इदमाह सदाप्रभुः॥
९ कुरुध्वं यूयमेतस्य घोषणं परजातिषु।
युष्माभि र्धर्म्मयुद्धस्य क्रियतां हि निरूपणं॥
वीरा एव प्रबोध्यन्तां सर्व्वे युद्धपरायणाः।
पुरुषा उपतिष्ठन्तु प्रविशन्तु रणस्थलं॥
१० स्वफालान् कुरुतासीन् हि स्वदात्राणि च तोमरान्।
अहं वीर इदं वाक्यं भाषतां दुर्ब्बलो नरः॥
११ भो जनाः परजातीयाः सर्व्वे यूयं त्वरान्विताः।
चतुर्द्दिग्भ्यः समायात भवतैकत्र सञ्चिताः।
अवरोहय तत्रैव त्वं स्ववीरान् सदाप्रभो॥
१२ सकला हि प्रबोध्यन्तां परजातीयमानवाः।
ते यिहोशाफटाख्यातामारोहन्तु समस्थलीं॥
यतो हेतोश्चतुर्द्दिक्स्थान् परजातीयमानवान्।
सकलान् शासितुं तत्र करिष्याम्युपवेशनं॥
१३ प्रयुंग्ध्वं स्वलवित्राणि शस्यं पक्वं यतोऽभवत्।
कुण्डेऽवतरितुं यात फलैः पूर्णं यतोऽस्ति तत्॥
द्राक्षाकुण्डानि पूर्णत्वात् स्वरसं प्रस्रवन्ति च।
यतस्तेषां मनुष्याणां महत्येवास्ति दुष्टता॥
१४ जनौघानि जनौघानि दण्डाज्ञायाः समस्थले।
दिनं नित्यप्रभोरेति दण्डाज्ञायाः समस्थले॥
१५ सूर्य्याचन्द्रमसौ कृष्णौ ताराः संहृततेजसः॥
१६ प्रकरिष्यति सीयोनाद् गर्ज्जनञ्च सदाप्रभुः।
स यिरूशालमो मध्यात् स्वरवं श्रावयिष्यति।
गगनं पृथिवी चापि तस्मात् कम्पं गमिष्यतः॥
भविता स्वप्रजानान्त्वाश्रयो नित्यप्रभुः स्वयं।
इस्रायेल्वंशजानाञ्च शरण्यं स भविष्यति॥
१७ यूयं नित्यप्रभुं माञ्च ज्ञास्यध्वे युष्मदीश्वरं।
निवसन्तञ्च सीयोने पवित्रे मम पर्व्वते॥
तदानीञ्च यिरूशालम् पुण्यस्थानं भविष्यति।
तन्मध्येन पुनर्व्वारं न यास्यन्ति विदेशिनः॥
१८ वर्षिष्यन्ति दिने तस्मिन् नवीनं मद्यमद्रयः।

दुग्धप्रवाहिनश्चापि भविष्यन्त्युपपर्व्वताः ।
यिहूदायाः प्रणाल्यश्च सकलाः सलिलावहाः ॥
तदा नित्यप्रभो र्गेहाद् उत्स एकः प्रयास्यति ।
शिट्टीमोपत्यका तेन जलसिक्ता भविष्यति ॥
मिसर्द्देशस्तदानीन्तु ध्वंसस्थानं भविष्यति । १९
इदोमोऽपि तदा ध्वस्तं मरुस्थानं भविष्यति ॥
कारणं तस्य दौरात्म्यं यिहूदां प्रति तैः कृतं ।
निर्द्दोषाणामसृक्पातः स्वदेशे तैः कृतो यतः ॥
यिहूदानन्तकालं तु स्थिरवासा भविष्यति । २०
पुरुषाणाञ्च पर्य्याये यिरूशालम् सदा स्थिरा ॥
मया न पावितं यच्च रक्तं तत् पावयिष्यते । २१
नित्यप्रभुश्च सीयोने स्वनिवासं विधास्यते ॥

आमोसस्य भविष्यद्वाक्यानि ।

---

१ प्रथमोऽध्यायः ।

अरामीयपिलेष्टीयसोरीयेदोमीयाम्मोनीयजनानां दण्डस्य भाविवाक्यं ।

तिकोयीयगोपालानां मध्ये वर्त्तमानस्यामोसस्य वाक्यानि। यिहूदीय- १
राजस्योषियस्य काल इस्रायेलीयराजस्य योयाशसुतस्य यारबियामस्य
च काले भूकम्पाद् वत्सरद्वयं पूर्व्वमिस्रायेलमधि तेन यद्यद् दृष्टं तद्वृत्ता- २
न्तोऽयं । स उवाच,

प्रकरिष्यति सीयोनाद् गर्ज्जनं हि सदाप्रभुः ।
स यिरूशालमो मध्यात् स्वरवं श्रावयिष्यति ॥
प्रचाराः पशुपालानां यास्यन्ति म्लानतां ततः ।
कर्म्मिलस्याग्रभागश्च तस्माच्छुष्को भविष्यति ॥

-३ इत्थं नित्यप्रभु र्ब्रूते कृतं दम्मेशकेन यत् ।
अपराधत्रयं वा स्याद् वापराधचतुष्टयं ।
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा ॥
शस्यमर्द्दकयन्त्राणां लौहानामध एव तैः ।
मनुष्या गिलियादस्था मर्द्दिताः शस्यवद् यतः ॥
४ तस्मादग्निं प्रहेष्यामि हसायेलो निकेतनं ।
बिन्-हदादस्य हर्म्याणि सोऽनलः सङ्ग्रसिष्यति ॥
५ अहं दम्मेशकस्यापि विधास्येऽर्गलभञ्जनं ।
आबनोपत्यकायाश्च व्युच्छेत्स्यामि निवासिनं ।
एदनाख्यकुलाच्चैव राजदण्डाधिकारिणं ॥
अरामस्य प्रजाः कीरं प्रयास्यन्ति प्रवासिताः ।
वचनं प्रोक्तवानेतत् स्वयमेव सदाप्रभुः ।
६ इत्थं नित्यप्रभु र्ब्रूते यद्यत् कृतवती घसा ।
अपराधत्रयं वा स्याद् वापराधचतुष्टयं ।
तद्धेतो र्न करिष्यामि तस्याः शासनमन्यथा ॥
इदोमस्य करे दत्त्वा जनान् रोधयितुं यतः ।
ते सर्व्वानेव निर्व्वास्य नीतवन्तः स्वदेशतः ॥
७ तस्मादग्निं घसाया हि प्राचीरं प्रहिणोम्यहं ।
तस्याः सर्व्वाणि हर्म्याणि सोऽनलः सङ्ग्रसिष्यति ॥
८ अश्दोदो मध्यतस्त्वाहम् उच्छेत्स्यामि निवासिनं ।
अस्किलोनस्य मध्याच्च राजदण्डाधिकारिणं ।
इक्रोणस्य विरुद्धञ्च करिष्ये हस्तचालनं ॥
पिलेष्टीयमनुष्याणां शेषांशश्च विनंक्ष्यति ।
वचनं प्रोक्तवानेतत् प्रभुरेव सदाप्रभुः ॥
९ इत्थं नित्यप्रभु र्ब्रूते कृतं सोरपुरेण यत् ।
अपराधत्रयं वा स्याद् वापराधचतुष्टयं ।
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा ॥
यतः सर्व्वान् हि निर्व्वास्यार्पितवन्त इदोमि ते ।
भ्रातॄणां नियमं नैव स्मृतवन्तश्च तान् प्रति ॥
१० तस्मादग्निं हि सोरस्य प्राचीरं प्रहिणोम्यहं ।
तस्य सर्व्वाणि हर्म्याणि सोऽनलः सङ्ग्रसिष्यति ।

इत्थं नित्यप्रभु र्ब्रूते यदिदोमो जनैः कृतं। ११
अपराधत्रयं वा स्याद् वापराधचतुष्टयं।
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा॥
भ्रातरं खड्गहस्तः सोऽन्वधावत् संहरन् कृपां।
अकरोत् तस्य कोपस्य नित्यमेव विदारणं।
स स्वक्रोधस्य चण्डत्वम् अरक्षच्च निरन्तरं॥
तैमानमनलं तस्मादहं निक्षेप्तुमुद्यतः। १२
बस्रायाः सर्व्वहर्म्याणि सोऽनलः सङ्ग्रसिष्यति॥
इत्थं नित्यप्रभु र्ब्रूते यदम्मोनसुतैः कृतं। १३
अपराधत्रयं वा स्याद् वापराधचतुष्टयं।
तद्धेतो र्न करिष्यामि तेषां शासनमन्यथा॥
यतस्ते स्वीयसीमानं विस्तीर्णां कर्त्तुमिच्छवः।
गिल्यदे गर्भिनारीणाम् उदराणि व्यदारयन्॥
ज्वलयिष्यामि रब्बायाः प्राचीरेऽग्निमहं ततः। १४
युद्धाहस्य महानादे वात्याहस्य जवानिले।
तस्याः सर्व्वाणि हर्म्याणि सोऽनलः सङ्ग्रसिष्यति॥
एककाले प्रवासार्थं तेषां राजा च यास्यति। १५
तस्यामात्याश्च यास्यन्ति ब्रवीतीदं सदाप्रभुः॥

---

२ द्वितीयोऽध्यायः।

१ मोयाबो यिहूदा इस्रायेलश्च लोकानां विरुद्धं दण्डस्य भाविवाक्यं ९ तेषामकृतज्ञताकारणात् तान् प्रतीश्वरस्य तर्ज्जनञ्च।

इत्थं नित्यप्रभु र्ब्रूते मोयाबेनापि यत् कृतं। १
अपराधत्रयं वा स्याद् वापराधचतुष्टयं॥
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा।
सोऽस्थीनीदोमराजस्य दग्ध्वा चूर्णं यतोऽकरोत्॥
वह्निं तत्कारणादेव मोयाबं प्रहिणोम्यहं। २
किरियोतस्य हर्म्याणि सोऽनलः सङ्ग्रसिष्यति।
मोयाब् नङ्क्ष्यति चोत्क्रोशे निनादे तौर्य्यवादिते॥
अहं विचारकर्त्तारं तस्योच्छेत्स्यामि मध्यतः। ३

तद्देशस्य कुलीनाश्च यावन्तः सन्ति तानपि ।
तेन सार्द्धं हनिष्यामि ब्रवीतीदं सदाप्रभुः ॥
४ इत्थं नित्यप्रभु र्ब्रूते यद् यिहूदा जनैः कृतं ।
अपराधत्रयं वा स्याद् वापराधचतुष्टयं ।
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा ॥
सदाप्रभो र्व्यवस्था तै र्यतो हेतो र्निराकृता ।
तस्य ये विधयस्ते च तै र्मनुष्यै र्न रक्षिताः ॥
तेषां पितामहा यासामभवन्ननुगामिनः ।
स्वीयमिथ्योक्तिभिस्ताभिस्ते जाताः सत्पथच्युताः ॥
५ वह्निं तत्कारणादेव यिहूदां प्रहिणोम्यहं ।
स यिरूशालमस्थानि हर्म्याणि प्रग्रसिष्यति ॥
६ इत्थं नित्यप्रभु र्ब्रूत इस्रायेलेन यत् कृतं ।
अपराधत्रयं वा स्याद् वापराधचतुष्टयं ।
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा ॥
रूप्यार्थं तै र्यतो हेतो र्विक्रीतो धार्म्मिको नरः ।
पादुकायुग्मशोधार्थं विक्रीतो दुर्गतो जनः ॥
७ क्षीणानां मूर्ध्नि म्रद्रेणुं वीक्षितुं ते तृषातुराः ।
म्रदुशीलनराणां ते मार्गं कुर्व्वन्ति पातुकं ॥
एकवेश्यासमीपञ्च पिता पुत्त्रश्च गच्छतः ।
पवित्रं मम नामेत्थं तैः कामात् क्रियतेऽशुचि ॥
८ सर्व्ववेद्याश्च पार्श्वे ते शेरते बन्धकाम्बरे ।
ते स्वदेवालये मद्यं दण्डितानां पिबन्ति च ॥
९ तेषां साक्षात् त्विमोरीयो जन उच्छिन्दे मया ।
एरसाख्यद्रुमस्येव तस्यासीत् दीर्घकायता ॥
अल्लोनाख्यतरस्येव स आसीद् बलवत्तमः ।
मया तूर्द्ध्वे फलं तस्य नीचे मूलञ्च नाशितं ॥
१० इमोरीयस्य देशञ्च युष्मभ्यं दातुमिच्छया ।
अहमेव मिसर्द्देशाद् युष्मानानीतवान् पुरा ।
चत्वारिंशच्च वर्षाणि मरुमध्येन नीतवान् ॥
११ पुत्त्रान् कांश्चन युष्माकं कृतवान् भाववादिनः ।
यूनः कांश्चन युष्माकं व्रतिनः कृतवानहं ॥

इस्रायेलो जना ब्रूत किं न सत्यमिदं वचः ।
पृच्छतीमां कथां युष्मान् स्वयमेव सदाप्रभुः ॥
युष्माभि र्मन्दिरान्ते तु पायिता व्रतिनो नराः । १२
मा व्याहरत भावोक्तिमित्युक्ता भाववादिनः ॥
शकटी छिन्नशस्येन पूर्णा यद्वद्विनाम्यते । १३
पश्यतानामयिष्याम्यहं युष्माकं तलं तथा ॥
द्रुतगामिनरस्यापि संहारिष्यत आश्रयः । १४
बलवान् स्वीयशक्तिञ्च दृढीकर्त्तुं न शक्ष्यति ।
निजप्राणांश्च वीरोऽपि रक्षितुं नैव शक्ष्यति ॥
न वा धनुर्धरः स्थातुं द्रुतगामी न रक्षितुं । १५
नोद्धर्त्तुं वा निजप्राणान् अश्वारूढोऽपि शक्ष्यति ॥
वीराणां दृढचित्तश्च यो जनः स दिगम्बरः । १६
प्रद्रोष्यति दिने तस्मिन् इत्यमाह सदाप्रभुः ॥

---

३ तृतीयोऽध्यायः ।

१ इस्रायेलो दण्डस्यानिवार्य्यता ९ तस्य दण्डस्य वर्णनं तत्कारणकथनञ्च ।

इस्रायेलः सुता एतद् युष्माभिः श्रूयतां वचः । १
युष्मानेव समुद्दिश्य प्रोक्तवांस्तत् सदाप्रभुः ।
मिसर्देशान्मयानीतां कृत्स्नगोष्ठीमधि ब्रुवे ॥
पृथिव्याः सर्व्वगोष्ठीनां मध्ये युष्मान् हि केवलं । २
अहमज्ञासिषं तस्माद् युष्मद्दुष्कर्म्मणामपि ।
सर्व्वेषां शोधमादास्येऽहं युष्मत्तो न संशयः ॥
असत्वा मन्त्रणां किं द्वौ नरावेकत्र गच्छतः ॥ ३
वनचारी मृगेन्द्रः किं मृगमप्राप्य गर्जति । ४
किमधृत्वा पशुं वासात् केशरीरयति ध्वनिं ॥
पक्षी भूमिस्थकूटे किं विनापाशं पतिष्यति । ५
कूटः किञ्चिदधृत्वा किं भूमितः स्फुरति स्वतः ॥
पुर्य्यां तौर्य्यध्वनौ जाते किं न बिभ्यति मानवाः । ६
पुरे किं जायतेऽनिष्टं न सदाप्रभुना कृतं ॥
प्रभु र्नित्यप्रभु र्यस्मात् स्वदासान् भाववादिनः । ७

मन्त्रमज्ञापयित्वा स्वं किञ्चिन्नैव करिष्यति ॥
८ गर्ज्जने मृगराजेन कृते को न प्रभेष्यति।
आज्ञां प्रोक्तवति स्वीयां प्रभौ नित्यप्रभौ तथा।
भाववाणीप्रचारे कः प्रवृत्तो न भविष्यति ॥
९ अश्‌दोदस्थितहर्म्म्याण्येतच्छ्रावयितुमर्हथ।
मिसर्देशस्थहर्म्म्याणि श्रावयन्तो निजध्वनिं।
तान् जनान् ब्रूत शोमिणः समागच्छत पर्व्वतान् ॥
वीक्षध्वं जायते तस्या मध्ये दारुणविप्लवः।
विद्यन्तेऽभ्यन्तरे तस्या मानवा अभिपीडिताः ॥
१० ऋज्वाचारं न जानन्ति त इत्याह सदाप्रभुः।
कुर्व्वते तु स्वहर्म्म्येषु दौरात्म्यध्वंससञ्चयं ॥
११ ततो हेतोरिदं वाक्यं प्रभुर्ब्रूते सदाप्रभुः।
शत्रुरायाति देशं स परितो वेष्टयिष्यति ॥
त्वच्छिरोभूषकं तेजः स त्वत्तस्त्रावयिष्यति।
तव सर्व्वाणि हर्म्म्याणि स्थास्यन्त्युल्लुण्ठितानि च ॥
१२ इत्थं नित्यप्रभुर्ब्रूते यथा केशरिणो मुखात्।
द्वौ पादौ कर्णपालिं वा मेषरक्षक उद्धरेत् ॥
तथा पर्य्यङ्ककोणेषु खट्वायाश्चित्रशिल्पिते।
वस्त्रे वा ये सुखासीनाः शोमिरोणनिवासिनः।
तैरिस्रायेलसन्तानैः कृच्छ्रेणोद्धार आप्स्यते ॥
१३ यूयं शृणुत याकूबः कुले साक्ष्यं प्रदत्त च।
वाहिनीनां य ईशः स प्रभुर्वक्ति सदाप्रभुः ॥
१४ इस्रायेलोऽपराधानां फलं दास्याम्यहं यदा।
बैथेलो यज्ञवेदीनां फलं दास्यामि तद्दिने।
वेद्याश्चूडाः समुच्छिन्नाः पतिष्यन्ति च भूतले ॥
१५ शीतकालिकगेहञ्च ग्रीष्मकालिकवेश्म च।
कर्त्तिष्याम्यहमेकत्र दन्तिदन्तमयानि च।
गृहाणि ध्वंसयिष्यन्ते भवनानि बहूनि च।
अन्तर्धानमवाप्स्यन्तीति ब्रवीति सदाप्रभुः ॥

४ चतुर्थोऽध्यायः।

१ उपद्रवकारणादिस्रायेलं प्रति तर्जनं ४ देवार्चाकारणात् तर्जनं ६ मनःकाठिन्यात् तर्जनञ्च।

हे शुनेदं वचो यूयं भो बाशानीयधेनवः। १
संस्थिताः शोमिरोणाद्रौ दीनानामभिपीडकाः॥
दरिद्रांश्चूर्णयन्त्यश्च ब्रुवाणाः स्वपतिं यथा।
वयं पानं करिष्यामस्त्वं पानीयं समानय॥
स्वपवित्रतया शप्त्वा प्रभु र्ब्रूते सदाप्रभुः। २
दिवसाः पश्यतायान्ति युष्माकं हि विपत्तये॥
युष्मान् आकर्षिणीभिश्च हरिष्यन्ति जनास्तदा।
अवशिष्टांश्च युष्माकं वडिशै र्मत्स्यवेधकैः॥
तदा निर्यास्यथैकैका कुड्यच्छिद्रैः स्वसम्मुखं। ३
निक्षेप्स्यध्वे च हार्म्मोणं ब्रवीतीदं सदाप्रभुः॥
यूयं बैथेलमागत्यापराधाननुतिष्ठत। ४
गिल्गले स्वापराधानां कुरुध्वं परिवर्धनं॥
प्रातः प्रातश्च युष्माभि र्बलिदानं विधीयतां।
स्वदशांशाश्च दीयन्तामेकैकस्मिन् दिनत्रये॥
किण्वयुक्तञ्च नैवेद्यं प्रशंसार्थं प्रदाप्यतां। ५
स्वेच्छादत्तोपहाराणां क्रियताञ्च विघोषणं॥
श्राव्यतां तच्च युष्माभि र्युष्मभ्यं तद्धि रोचते।
इस्रायेलीयसन्ताना इत्थं ब्रूते सदाप्रभुः॥
अहमेवापि युष्मभ्यं दत्तवानुपहारवत्। ६
युष्मत्पुरेषु सर्व्वेषु रदनानां विशुद्धतां॥
युष्मत्स्थानेषु सर्व्वेषु भक्ष्यद्रव्यविहीनतां।
न मां प्रत्यागता यूयं ब्रवीतीदं सदाप्रभुः॥
शस्यानां पचनात् पूर्व्वं शेषमासत्रयोचितं। ७
अहं संहृतवानेव युष्मत्तो वृष्टिसेचनं॥
पुरेऽवर्षयमेकस्मिन् न त्वन्यस्मिन्नवर्षयं।
एकञ्चासिच्यत क्षेत्रम् असिक्तन्त्वशुषत् परं॥
नगरद्वयतोऽगच्छन् नगरत्रयतोऽपि वा। ८
पुरमेकं चलद्गत्या तोयपानार्थिनो जनाः॥

तृप्तिं तत्र तु न प्रापुरित्थमेव कृते मया।
न मां प्रत्यागता यूयं ब्रवीतीदं सदाप्रभुः॥
९ शस्यानां शोषकार्श्याभ्यां युष्मानाहतवानहं।
बह्वद्यानानि युष्माकं द्राक्षावल्ल्य उडुम्बराः।
जितवृक्षाश्च युष्माकं सूककीटैश्चिं भक्षिताः।
न मां प्रत्यागता यूयं ब्रवीतीदं सदाप्रभुः॥
१० मिसर्देशोचितां मारीं युष्मन्मध्यं विसृष्टवान्।
यूनो युष्माकमश्वांश्च लुण्ठितानसिनाहनं॥
शिविराणाञ्च वः पूत्या नासिका वोऽभ्यपूरयं।
न मां प्रत्यागता यूयं ब्रवीतीदं सदाप्रभुः॥
११ सिदोमामोरयो र्ध्वंस ईश्वरेण कृतो यथा।
युष्मन्मध्येऽपि केषाञ्चित् तद्वद् ध्वंसो मया कृतः॥
तेनाभवत तुल्यास्थानलादुद्धृतयोल्कया।
न मां प्रत्यागता यूयं ब्रवीतीत्थं सदाप्रभुः॥
१२ ईदृशं त्वां प्रतीस्रायेल् करिष्यामि पुनस्ततः।
यतोऽहं त्वां प्रतीस्रायेल् ईदृशं कर्त्तुमुद्यतः।
ससज्जीभव तस्मात् त्वं प्रत्युद्गन्तुं निजेश्वरं॥
१३ पश्चाद्रीणां स निर्म्माता स स्रष्टा पवनस्य च।
मानवस्य च या चिन्ता स तस्मै तत्प्रकाशकः॥
अरुणोदयकालं स सान्धकारं करोति च।
पृथ्व्या उच्चस्थलीभिः स कुरुते च गमागमौ।
तस्य नामास्ति सेनानामीश्वरः स सदाप्रभुः॥

---

५ पञ्चमोऽध्यायः।

१ इस्रायेलः कृते विलापः ४ मनःपरावर्त्तनाय विनयवाक्यं २१ काल्पनिकसेवनम् ईश्वरस्य न ग्राह्यमिति कथनञ्च।

१ शृणुतेदं वचो यूयं तद् युष्मानध्युदीर्य्यते।
विलापस्यैव गानं तद् भो इस्रायेलकुल त्वयि॥
२ पतितास्तीस्रयेल्कन्या नैवोत्थास्यति सा पुनः।
पातितां निजभूमौ तां कोऽपि नोत्थापयिष्यति॥

यतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। ३
सहस्रं निर्गतं यस्याः शतशेषास्ति सा पुरी॥
निर्गतञ्च शतं यस्या दशशेषास्ति सा पुरी।
इस्रायेलः कुलस्यैव कृते खल्वेऽवशेषिताः॥
इस्रायेलः कुलं यस्माद् इदं वक्ति सदाप्रभुः। ४
ममैवान्वेषणं कृत्वा यूयं जीवितुमर्हथ॥
नैवान्विच्छत बैथेलं नैव गच्छत गिल्गलं। ५
बेर्शेवामुपस्थातुं यूयं नैव प्रयात वा।
निर्व्वासो गिल्गले लभ्यो बैथेले च विडम्बना॥
नित्यप्रभुं समन्विष्य यूयं जीवितुमर्हथ। ६
नचेदग्निवदाविष्टे यूषफस्य कुले मया।
तं दाहं कोऽपि बैथेले नैव निर्वापयिष्यति॥
युष्माभि र्विकृतो न्याय इन्द्रवारुणिकाभवत्। ७
धर्म्मश्चाधोमुखः शेते युष्माभि र्भूमिसात्कृतः॥
मामन्विच्छत कर्त्ताहं कृत्तिकामृगशीर्षयोः। ८
प्रभातञ्च विकृत्याहं मृत्युच्छायां करोमि हि॥
दिवसञ्च विकृत्याहं करोमि ध्वान्तयामिनीं।
तोयधेस्तोयमाहूय भूतलं प्लावयामि च।
योऽहमेतादृशस्तस्य मम नाम सदाप्रभुः॥
बलिष्ठस्योपरि ध्वंसं दचवन्निक्षिपाम्यहं। ९
दुर्गस्योपरि स ध्वंसस्तदानीमधितिष्ठति॥
पुरद्वारे द्विषन्तीमे नरं दोषप्रकाशकं। १०
गर्हणीयञ्च मन्यन्ते मनुष्यं तथ्यवादिनं॥
युष्माभि र्मर्द्यते दीनः शस्यदानञ्च याच्यते। ११
ततः पाषाणवेश्मानि कृत्वा तत्र न वत्स्यथ।
द्राक्षाक्षेत्राणि रम्याणि कृत्वा मद्यं न पास्यथ॥
यतो हेतोरहं जानेऽपराधा वोऽतिभूरयः। १२
युष्माकं पापकर्म्माणि सन्त्यतिप्रबलानि च॥
धार्म्मिकोत्पीडका यूयम् उत्कोचग्राहिणो जनाः।
पुरद्वारे दरिद्राणां विचारस्य विकारिणः॥
मौनमालम्बते तस्मात् कालेऽस्मिन् बुद्धिमान् नरः। १३

यतो हेतोरयं कालः कालोऽस्ति व्यसनान्वितः ॥
१४ मान्वेषिष्ट दुराचारं साधुतामनुगच्छत।
जीवनं तर्हि लप्स्यध्वे यथा यूयञ्च जल्पथ।
तथा तर्ह्येव सेनानामीश्वरो यः सदाप्रभुः।
स्वयमेव स युष्माकं सहवर्त्ती भविष्यति ॥
१५ गर्हयित्वा दुराचारं जायध्वं साधुताप्रियाः।
सुविचारं पुरद्वारे प्रतिष्ठापयत ध्रुवं ॥
किंश्चित् तर्ह्येव सेनानामीश्वरो यः सदाप्रभुः।
यूषफस्यावशिष्टांशं सोऽनुकम्पिष्यते पुनः ॥
१६ ततो हेतो र्हि सेनानामीश्वरो यः सदाप्रभुः।
स प्रभुर्वक्ति सर्व्वस्मिंश्चत्वरे परिदेवनं।
हाहाकारश्च सर्व्वस्यां रथ्यायामीरयिष्यते ॥
शोचनार्थं कृषाणश्च समाह्वास्यन्ति मानवाः।
विलापे च नियोक्ष्यन्ते विलापाभ्यस्तगायकान् ॥
१७ द्राक्षाक्षेत्रेऽपि सर्व्वस्मिन् विलापः सम्भविष्यति।
यतोऽहं तव मध्येन यातेत्याह सदाप्रभुः ॥
१८ हाहा नित्यप्रभोरह्न आकाङ्क्षाकारिणो नराः।
तस्मिन्नित्यप्रभोरह्नि युष्माकं किं प्रयोजनं।
अन्धकारमयः सोऽहो नैव दीप्तिमयोऽस्ति सः ॥
१९ सिंहात् पलायमानो यो भल्लेनाक्रम्यते नरः।
स्वीयगेहं प्रविष्टश्च कुड्ये कुर्व्वन् करार्पणं।
दश्यते तत्र सर्पेण स युष्माकं निदर्शनं ॥
२० नित्यप्रभोरहः किं न तामसो दीप्तिवर्जितः।
किं न घोरान्धकारः स सर्व्वथैव च निष्प्रभः ॥
२१ युष्माकमुत्सवान् गर्हे निरस्यामि च तानहं।
युष्माकं पर्व्वणां गन्धं न घ्रास्यामि पुनस्ततः ॥
२२ युष्माभि र्मह्यमुत्सृष्टान् बलीन् होमार्थकानपि।
नैवेद्यानि च युष्माकं न ग्रहीष्यामि तुष्टितः।
नेक्षिष्ये पुष्टगोवत्सान् युष्माकं मङ्गलार्थकान् ॥
२३ अपसारय मत्तस्त्वं गीतानां तव निस्वनं।
तव नेबलयन्त्राणां वाद्यं न श्रूयतां मया ॥

वहतां सुविचारस्तु वीचिभूषिततोयवत्। २४
वहतां धार्म्मिकत्वञ्च नित्यस्रोतस्वती यथा॥
चत्वारिंशत् समा यावत् किं मह्यं प्रान्तरे बलीन्। २५
किं नैवेद्यानि वादत्त यूयं भो इस्रयेल्कुल॥
युष्मद्राजस्य शालान्तु मूर्त्तीनां वश्च मस्वकं। २६
युष्मन्निर्म्मितदेवानां ताराञ्चावहत प्रियां॥
तस्माद्दम्मेशकः पारमहं युष्मान् प्रवासयन्। २७
नेष्यामीत्याह सेनानामीशो नाम सदाप्रभुः॥

६ षष्ठोऽध्यायः।

१ इस्रायेलीयानां सुखभोगः ८ भाविदण्डस्य कथनञ्च।

हा निश्चिन्ताः सियोनस्थाः शमरोयाद्रिसंश्रिताः। १
जातीनामग्रिमांशस्य नामलब्धा महोदयाः।
इस्रायेलः कुलं युष्मान् शरणायाभिगच्छति॥
कल्निं गत्वा निरीक्षध्वं स्थानात् तस्मात् प्रगत्य च। २
पुरीं यात महारब्बाम् अथवा निम्नदेशिनां।
पिलेष्टीयमनुष्याणां गाताख्यं नगरं प्रति॥
अस्माद् राज्यद्वयात् तानि नगराण्युत्तमानि किं।
युष्माकं भूमितो वा किं तेषां भूमि र्महत्तरा॥
अनिष्टस्य दिनं दूरं युष्माभिश्च विहन्यते। ३
स्थाप्यते स्वसमीपन्तु दौरात्म्यस्य नृपासनं॥
दन्तिदन्तमयास्वेव निद्रा खट्वासु सेव्यते। ४
दीर्घाङ्गैश्च स्वशय्यासु शयनं क्रियते सुखं॥
पुष्टमेषान् व्रजान्नीत्वा वत्सान् वा गोष्ठमध्यतः।
युष्माभिः क्रियते नित्यं तेषां मांसस्य भोजनं॥
नेबलाभिधयन्त्रैश्च क्रियते वाद्यनिस्वनः। ५
स्वार्थं सङ्गीतसामग्री दायूदेव च रच्यते॥
भाजनेषु पवित्रेषु द्राक्षामद्यञ्च पीयते। ६
तैलानामग्रिमांशैश्च क्रियते गात्रलेपनं।
यूषफस्य विभङ्गात्तु मनस्तापो न लभ्यते॥
तस्मान्निर्वासनं येषां मनुष्याणां भविष्यति। ७

निर्व्वासेऽपि भविष्यन्तीमे तेषामग्रगामिनः।
दीर्घाङ्गञ्च शयानानां हर्षनादो विरंस्यति॥
८ आत्मना शपथं चक्रे प्रभुरेव सदाप्रभुः।
उक्तिरेषास्ति सेनानामीश्वरस्य सदाप्रभोः।
याकूबो देष्म्यहं गर्व्वं गर्हे हर्म्याणि तस्य च।
पुरीं तत्पूरकञ्चाहमर्पयिष्यामि शत्रुषु॥
९ तदानीं गृह एकस्मिन् मानवा दशसङ्ख्यकाः।
यदिस्युरवशिष्येरन् मरिष्यन्ति तथापि ते॥
१० प्रेतहारः पितृव्यो यो यश्च तच्छवदाहकः।
अस्थीनि गेहतो हर्त्तुं तत्रोपस्थितयोस्तयोः॥
गृहगर्भेऽवशिष्टं स बन्धुः सम्बोधयन्नरं।
अन्यः कोऽपि त्वया सार्द्धं किमस्तीति गदिष्यति॥
कोऽपि नास्तीति तेनोक्तः पुनर्वक्ष्यति मा लपेः।
न व्याहर्त्तव्यमस्माभि र्भीमं नाम सदाप्रभोः॥
११ यस्मात् पश्य प्रदत्तायाम् अनुमत्यां सदाप्रभोः।
जनै र्भग्नं वृहद् वेश्म खण्डराशि र्भविष्यति।
सम्भविष्यति च क्षुद्रं गृहं शकलसञ्चयः॥
१२ किं धावन्ति हयाः शैले गोभिः कर्षन्ति वा नराः।
किमर्थं तर्हि युष्माभिर्धर्म्मो विक्रियते विषे।
इन्द्रवारुणिकायाञ्च याथार्थ्यस्योत्तमं फलं॥
१३ अवस्तुन्येव हृष्यद्भिरिदं युष्माभिरुच्यते।
स्वबलेन किमस्माभिः शृङ्गयुग्मं न लप्स्यते॥
१४ वाणीयन्त्वस्ति सेनानाम् ईश्वरस्य सदाप्रभोः।
इस्रायेल्कुल पश्य त्वं युष्माकं प्रातिकूल्यतः।
जातिमुत्पादयाम्येकां सा युष्मान् पीडयिष्यति।
आहमातप्रवेशाद्धि नदीं यावन्मरौ स्थितां॥

७ सप्तमोऽध्यायः।

१ शूककीटदर्शनकथनं ४ अग्नेः कथनं ७ प्रलम्बसीसस्य कथनं १० अमत्सियेनामोसस्यापवादः १४ आमोसस्योत्तरं १६ अमत्सियस्य दण्डश्च।

१ प्रभुः सदाप्रभु र्मामिदं दर्शयामास, पश्य पाश्चात्यतृणानां प्ररोहण-

कालस्यारम्भे स शलभान् निर्म्ममे, राजस्तृणच्छेदनात् परं तानि पाश्चात्य-
तृणान्युत्पेदिरे। अपरं भूमेरोषधिषु शलभै र्भक्षितासु मयोक्तं, भो प्रभो २
सदाप्रभो, भवान् पापं क्षमितुमर्हति, याकूबः कथमवस्थास्यते? यस्मात्
स क्षुद्रः। तदा सदाप्रभुस्तद्विषयेऽनुतेपे। सदाप्रभु र्जगाद, तन्न भ- ३
विष्यति।

प्रभुः सदाप्रभु र्मामिदं दर्शयामास, पश्य शासनार्थं प्रभुना सदा- ४
प्रभुनाहूतोऽग्नि र्महासागरं ग्रसित्वा प्रभो र्भूम्यधिकारं ग्रसितुं प्राव-
र्त्तत। तदा मयोक्तं, भो प्रभो सदाप्रभो, भवान् निवर्त्तितुमर्हति। ५
याकूबः कथमवस्थास्यते? यतः स क्षुद्रः। तदा सदाप्रभुस्तद्विषयेऽनु- ६
तेपे। प्रभुः सदाप्रभु र्जगाद, तदपि न भविष्यति।

स मामिदं दर्शयामास, पश्य प्रभुः प्रलम्बसीसवद्भुप्राचीरस्योपर्य्य- ७
तिष्ठत्, तस्य हस्ते च प्रलम्बसीसमासीत्। अपरं सदाप्रभु र्मां पप्रच्छ, ८
भो आमोस, त्वया किं दृश्यते? मयोक्तं, प्रलम्बसीसं दृश्यते। तदा
प्रभु र्मां जगाद, पश्याहं स्वप्रजागणस्येस्रायेलो मध्ये प्रलम्बसीसं प्रयोक्तु-
मुद्यतोऽस्मि, न पुनस्तं क्षमित्वा यास्यामि। अत इस्हाकस्योच्चस्थलानि ९
संहारिष्यन्ते, इस्रायेलो धर्म्मधामानि च ध्वंसयिष्यन्ते, अहञ्चासिहस्तो
यारबियामस्य कुलं प्रतिरोत्स्यामि।

अनन्तरं बैथेलस्थो याजकोऽमत्सिय इस्रायेलीयराजं यारबियामं १०
प्रतीमां कथां प्रेरयामास, आमोस इस्रायेलकुलस्य मध्ये भवतः प्रति-
कूलां कुमन्त्रणां कृतवान्। देशोऽयं तस्य सर्व्ववाक्यानि सोढुं न शक्नोति।
यस्मादामोस इदमुक्तवान्, यारबियामोऽसिना मरिष्यति, इस्रायेल् च ११
स्वभूमितो निर्व्वासितोऽपनायिष्यते।

ततः परम् अमत्सिय आमोसं जगाद, भो दर्शक, त्वं पलाय्य यिहू- १२
दादेशं प्रगच्छ, तत्र खाद्यं भक्षयस्व, तत्र भावोक्तीः प्रचारय च। परन्तु १३
त्वया न पुन र्बैथेले भावोक्तिः प्रचारयितव्या, यतस्तद् राज्ञो धर्म्मधाम,
तच्च राजपुरी।

तदानीमामोस उत्तरं विधायामत्सियं जगाद, नाहं भाववादी, न १४
वा भाववादिनः सुतः, किन्त्वहं गोपालः कदुडुम्बरफलाहारकश्चासं।
तदानीं सदाप्रभु र्व्रजानुगामिनं मां जग्राह, सदाप्रभुश्च मां जगाद, १५
याहि, मम प्रजागणस्येस्रायेलः समीपं भाववाणीं प्रचारय। अतोऽधुना १६
त्वं सदाप्रभो र्वाक्यं शृणु, त्वं वदसि, इस्रायेलः प्रतिकूलां भावोक्तिं मा

१७ प्रचारय, इस्हाककुलस्योपरि वागम्बु मा वर्षय। एतस्मात् कारणात्
सदाप्रभुराह,

तव भार्य्या पुरीमध्ये वेश्यावृत्तिं करिष्यते।
तव पुत्राश्च पुत्र्यश्च पतिष्यन्त्यसिना हताः।
तव भूम्यधिकारश्च मानरज्ज्वांशयिष्यते॥
त्वमेवाशुचिदेशस्य मध्ये प्राणान् प्रहास्यसि।
इस्रायेल् निजभूमेश्च दूरं निर्व्वासयिष्यते॥

---

८ अष्टमोऽध्यायः।

१ पक्वफलपूर्णपात्रस्य दर्शनं तत्तात्पर्य्यज्ञापनञ्च ४ उपद्रवादिस्रायेलस्तर्जनं ११ ईश्वरीयवाक्याभावरूपस्य दुर्भिक्षस्य भविष्यद्वचनञ्च।

१ प्रभुः सदाप्रभु र्मामिदं दर्शयामास, पश्य, पक्वफलैः पूर्णः करण्डोऽवि-
२ द्यत। अनन्तरं स मां पप्रच्छ, भो आमोस, त्वया किं दृश्यते? मयोक्तं,
पक्वफलपूर्णः करण्डो दृश्यते। तदा सदाप्रभु र्मां जगाद, मम प्रजागण-
३ स्येस्रायेलः परिणाम उपस्थितः, नाहं पुनस्तं क्षमित्वा यास्यामि। तस्मिन्
दिने प्रासादीयगीतानि हाहाकारा भविष्यन्तीति प्रभोः सदाप्रभो-
रुक्तिः। शवानां बाहुल्यं भविष्यति, स यावतीयस्थाने तान् निपातयि-
ष्यति; मा लपेः।

४ शृणुतेदं नराः सर्व्वे दीनानां गिलनार्थिनः।
देशीयशान्तभावानां विनाशं कर्त्तुमत्सुकाः॥
५ ब्रुवाणा नवचन्द्रस्य व्यत्येष्यत्युत्सवः कदा।
तस्मिन् याते करिष्यामः शस्यानां विक्रयं वयं॥
कदा विश्रामवारो वा समतीतो भविष्यति।
तस्मिन् याते हि गोधूमान् आनेष्यामः स्वकोषतः॥
शस्यमानं लघिष्ठञ्च रूप्यमानं पुनर्गुरु।
कृत्वा व्याजतुलायष्ट्या प्रलब्धुं वयमिच्छवः॥
६ दीनान् रूप्येण क्रेष्यामः निःस्वं पादुकयोः कृते।
गोधूमानामसाराणां करिष्यामश्च विक्रयं॥
७ याकूबस्य यशोदाता शप्त्वा ब्रूते सदाप्रभुः।
नाहं सर्व्वक्रियास्तेषां विस्मरिष्यामि कर्हिचित्॥

किं न कम्पिष्यते भूमिः सर्व्वस्यैतस्य कारणात्। ८
किं न शोकं करिष्यन्ते सकलास्तन्निवासिनः॥
तस्याः कृत्स्नञ्च पृष्ठं किं न वन्येवोच्चलिष्यति।
क्षुब्धं भास्यति निम्नञ्च मिस्रीया तटिनी यथा॥
प्रभु र्नित्यप्रभु र्ब्रूते दिने तस्मिन्नुपस्थिते। ९
कारयिष्याम्यहं सूर्य्यं मध्याह्नेऽस्तावलम्बनं।
आनेष्याम्यन्धकारञ्च पृथ्व्यां दीप्तिमये दिने॥
विहत्याहं करिष्यामि युष्मत्पर्व्वाणि शोचनं। १०
युष्मद्गीतं करिष्यामि सकलं परिदेवनं॥
कटिदेशे च दास्यामि सर्व्वेषां शाणबन्धनं।
सर्व्वेषां मुण्डतायुक्तं करिष्यामि च मस्तकं॥
तद्दिनञ्च विधास्याम्यद्वितीयात्मजशोकवत्।
तदीयोत्तरकालञ्च तीव्रदुःखदिनोपमं॥
प्रभु र्नित्यप्रभु र्ब्रूते पश्चायास्यन्ति वासराः। ११
येषु मत्प्रेरिता देशे बुभुक्षा सम्भविष्यति॥
नैवास्यन्नबुभुक्षा सा न वा तोयार्थिनस्तृषा।
सा तु नित्यप्रभो र्वाचः श्रोतुमाकाङ्क्षिणां स्पृहा॥
सागरात् सागरं यावच्चलन्तो मानवास्तदा। १२
उत्तरस्मादटन्तश्च नराः सूर्य्योदयं प्रति।
नित्यप्रभो र्वचोऽन्विष्य न समाप्स्यन्ति कुत्रचित्॥
सुकुमार्य्यो युवानश्च च्छेष्यन्ते तृष्णया तदा॥ १३
ईशो जीवति ते भो दान् बेर्श्बे ते सुरोऽमरः। १४
इत्युक्त्वा शोमिरोणस्य शपन्ते कलुषेण ये।
ते मनुष्याः पतिष्यन्ति नैवोत्थास्यन्ति ते पुनः॥

---

९ नवमोऽध्यायः।

१ इस्रायेलो भाविदण्डस्य, ११ भाविमङ्गलस्य च कथनं।

दर्शनं दत्तवान् मह्यं वेद्याः पार्श्वे स्थितः प्रभुः। १
तेनोक्तं जहि मूर्धानं कम्पन्तां सकलाः शिलाः॥
जनौघस्य च मुण्डेषु तद्भो खण्डशः कुरु।

तेषामप्यवशिष्टांशं हनिष्याम्यसिना ततः ॥
तेषां मध्ये पलायी यो न पलायिष्यते हि सः।
तेषां मध्येऽवशिष्टो यः स नोद्धारमवाप्स्यति ॥
२ सन्धिं यद्यपि कर्त्तित्वा पातालं प्रविशन्ति ते।
तर्हि तस्मादपि स्थानात् मत्करस्तान् ग्रहीष्यति ॥
यदिस्याद् गगनारूढा भवेयुस्ते च मानवाः।
तानवरोहयिष्यामि पुनस्तस्मात् स्थलादहं ॥
३ कर्म्मिलाद्रेस्च चूडायां कुर्य्युस्तेदात्मगोपनं।
अहं तत्रापि हृत्वा तान् आनेष्यामि ततो वहिः ॥
ते समुद्रतले चेत् स्युः प्रच्छन्ना मम दृष्टितः।
तस्मिन् स्थानेऽपि तान् सर्पो दच्यत्याज्ञापितो मया ॥
४ यदि वन्दित्वदेशं ते गच्छेयुः शत्रुसम्मुखं।
तान् हनिष्यति तत्रैव खड्ग आज्ञापितो मया।
न क्षेमार्थमनिष्टार्थं निरीक्षिष्ये च तान् सदा ॥
५ अहमेव प्रभुः सोऽस्मि वाहिनीनां सदाप्रभुः।
पृथिवी येन संस्पृष्टा द्रवभावं प्रगच्छति।
तीव्रशोकञ्च कुर्व्वन्ति सर्व्वे तस्या निवासिनः ॥
कृत्स्नमेव च तत्पृष्ठं याति वन्यावदुच्चतां।
जायते च पुनर्निम्नं मिस्रीया तटिनी यथा ॥
६ स स्वाट्टान् निर्म्ममे व्योम्नि पृथ्यां संस्थाप्य तोरणं।
स समुद्रस्य तोयानि समाहूय च तैर्जलैः।
आप्लावयति भूलोकं नाम तस्य सदाप्रभुः ॥
७ इस्रायेलीयसन्ताना इयमुक्तिः सदाप्रभोः।
किं न कूशीयसन्तानैस्तुल्या यूयं मदन्तिकं ॥
इस्रायेलं मिसर्देशात् कप्तोराच्च पिलेष्टिनः।
तथा कीरादरामीयान् किं नैवानीतवानहं ॥
८ प्रभो नित्यप्रभो र्दृष्टिः पापराज्येऽत्र वर्त्तते।
पश्चाहं भूतलादेव तत् समुच्छेत्तुमुद्यतः ॥
तथा सत्यपि नैवाहं याकूबस्य कुलं तदा।
समुच्छेत्स्यामि निःशेषमित्थं ब्रूते सदाप्रभुः ॥
९ किन्तु पश्य मयाज्ञाप्य चालन्यां तण्डुला इव।

परजातिषु सर्व्वास्विवायेलस्य कुलं मया।
चालयिष्यत एकन्त्वस्थि भूमौ न पतिष्यति॥
पतिष्यन्त्यसिना सर्व्वे मत्प्रजान्तःस्थपापिनः। १०
ब्रुवाणा न समापास्मान् नाक्रमिष्यति वा विपत्॥
तस्मिन् काले तु दायूदः कुटीरं पतनोन्मुखं। ११
अहमुत्थापयिष्यामि तस्य छिद्राणि पूरयन्॥
तत्खण्डान् स्थापयिष्यामि प्राक्काले तच्च यादृशं।
प्रत्यभात् तादृशं कर्त्तुं निर्म्मास्ये तदहं पुनः॥
अत्रेदं मदभिप्रेतं इदोमः शेषमानवाः। १२
यासाञ्चोपरि मन्नाम ख्यातं ताः परजातयः।
सकला येन जायेरंस्तेषां वश्या प्रजा इव।
य एतत्साधकस्तस्य वाक्यमेतत् सदाप्रभोः॥
पुन र्नित्यप्रभु र्ब्रूते कालः पश्चागमिष्यति। १३
यदा हलवहः क्षेत्रे शस्यच्छेत्तारमाप्स्यति।
द्राक्षामर्द्दनकारी च बीजवापकमाप्स्यति॥
द्राक्षारसं नवीनञ्च वर्षयिष्यन्ति पर्व्वताः।
द्रवीभूता भविष्यन्ति सकलाश्चोपपर्व्वताः॥
मम प्रजा य इस्रायेल् तस्य वन्दिदशामहं। १४
सम्परिवर्त्तयिष्यामि तदानीं तैश्च मानवैः।
नष्टपुराणि निर्म्माय तत्र वासः करिष्यते॥
द्राक्षाक्षेत्राणि कृत्वा च तेषां पायिष्यते रसः।
उद्यानान्यपि कृत्वा तैस्तत्फलं भक्षयिष्यते॥
तदानीं स्वीयभूमौ च रोपयिष्यामि तानहं। १५
मया तेभ्यः प्रदत्तायाः स्वभूमे र्मध्यतः पुनः।
केनाप्युत्पाटनं तेषां न भविष्यति कर्हिचित्।
उक्तवान् भारतीमेताम् ईश्वरस्ते सदाप्रभुः॥

ओबदियस्य भविष्यद्वाक्यानि।

१ अहङ्कारकारणात् १० याकूबं प्रत्युपद्रवकारणाच्च इदोमो भाविविनाशस्य कथनं
१७ याकूबो भाविविजयस्य कथनञ्च।

१ ओबदियस्य दर्शनं। प्रभुः सदाप्रभुरिदोममधीत्थं जगाद।
वार्त्तैकास्माभिरश्रावि समादेशात् सदाप्रभोः।
समीपं परजातीनां दूतश्च प्रेषितोऽभवत्।
आयात तेन योद्धुञ्चोत्तिष्ठामः सकला वयं॥
२ क्षोदिष्ठं पश्य जातीनां मध्ये त्वां कृतवानहं।
यत्परैनास्यवज्ञाया भाजनं त्वं भविष्यसि॥
३ चित्तगर्व्वेण मुग्धस्त्वं शैलदुर्गेषु वासकृत्।
ऊर्द्धवासं समाहृत्य स्वचित्ते गद्यते त्वया।
कोऽवतार्य्य स्थलादस्माद् भूमौ मां पातयिष्यति॥
४ यद्यप्युत्क्रोशपक्षीव त्वमत्युच्चेऽवतिष्ठसे।
यद्यपि ज्योतिषां मध्ये स्वनीडो निर्म्मितस्त्वया॥
तथापि त्वं ततः स्थानान्मयावतारयिष्यसे।
भाषते भारतीमेतां स्वयमेव सदाप्रभुः॥
५ स्तेनाश्चेत्त्वामुपायास्यन् किंवा रात्रीयदस्यवः।
तर्हि प्रयोगमात्रं तैश्चौर्य्यं किं नाकरिष्यत।
हाहा तव विनाशस्तु जातः कीदृग् भयङ्करः॥
द्राक्षासञ्चयिनश्चेद् वा समायास्यंस्त्वदन्तिकं।
तर्हि तैः फलशेषः किं नैवात्यक्ष्यत कश्चन॥
६ कीदृशन्त्वनुसन्धानमेषावीयन्दगां कृतं।
तेषां गूढानि वित्तानि शत्रुभिर्याचितानि हि॥
७ देशान्तं प्रेषयन्ति त्वां सर्व्वे त्वत्सहकारिणः।
वञ्चयन्तो जयन्ति त्वां सर्व्वे त्वत्कृतसन्धयः॥
त्वत्प्रदत्तान्नभोक्तारो जालं तन्वन्त्यधस्तव।
इदोमस्यान्तरे तस्माद् बुद्धिः कापि न शिष्यते॥
८ इत्थं नित्यप्रभु र्ब्रूते दिने तस्मिन्नुपस्थिते।
किं नाहं नाशयिष्यामीदोमाज्ज्ञानवतो नरान्।

एषावः पर्व्वतात् किं न संहरिष्यामि विज्ञतां॥
निराशास्च भविष्यन्ति प्रवीरास्तव तैमन। ९
एषावोऽद्रित उच्छेद्यो हत्यया मानवो यतः॥
भ्रातरं प्रति याकूबं दौरात्म्याचरणात्तव। १०
भविता त्वं त्रपाच्छन्नः समुच्छिन्नस्च शाश्वतं॥
यदा त्वं सम्मुखं तस्यातिष्ठस्त्वं दिवसं स्मर। ११
तद्दिने तस्य सम्पत्तिरपनीता विदेशिभिः॥
विजातीयनरास्तस्य गोपुराणि प्रविश्य च।
यिरूशालम्पुरीमधि चकार्षुर्गुटिकापातं।
तेषामेकेन तुल्यस्च त्वमपि प्रतिभासि मे॥
स्वभ्रातुस्तु दिने तस्य दुर्गते दिवसे त्वया। १२
दृष्टिपातो न कर्त्तव्यो यिहूदावंशजानधि।
विनाशदिवसे तेषामामोदो न विधीयतां।
तस्य सङ्कटकाले च दर्पोक्तिर्न प्रयुज्यतां॥
मत्प्रजानां विपत्काले तत्पुरं न प्रविश्यतां। १३
विपत्कालेऽशुभं तासां न त्वयाप्यवलोक्यतां।
विपत्काले धने तासां मा कुरुष्व करार्पणं॥
तासां पलायिनश्छेत्तुं त्वं मा तिष्ठेस्चतुष्पथे। १४
सङ्कटस्य दिने शेषान् नरान् मार्पय वैरिणि॥
सर्व्वासां परजातीनां प्रतिकूलः सदाप्रभोः। १५
दिवसो यत आसन्न आचरं त्वञ्च यादृशं।
कृतवांस्तादृगाचारस्त्वामुद्दिश्य करिष्यते।
तावकीनापकारस्च मूर्ध्नि वर्त्तिष्यते तव॥
पीतवन्तो यतो यूयं मम पूतगिरौ यथा। १६
सकलैः परजातीयैः पातव्यं सर्व्वदा तथा।
ते पिबन्तो गिलन्तस्च सम्भविष्यन्त्यभूतवत्॥
स्थास्यन्ते प्राप्तनिस्तारा सियोनाद्रौ तु मानवाः। १७
पर्व्वतः स तदानीञ्च पूतस्थानं भविष्यति।
स्वीयभूम्यधिकारांस्च याकूबो लप्स्यते कुलं॥
याकूबस्य कुलं वह्नि र्यूषफस्च कुलं शिखा। १८
एषावस्च कुलं शुष्को नालराशि र्भविष्यति॥

तौ च ज्वलिष्यतस्तत्र तान् नालांश्च ग्रसिष्यतः ।
एषावः कुलजातस्य प्राप्तनिस्तारमानवः ।
नावशेष्यत एकोऽपीयमेवोक्तिः सदाप्रभोः ॥
१९ लप्स्यते गिरिरेषावो दाक्षिणात्यनिवासिभिः ।
पिलेष्टीयप्रदेशश्च समभूमिनिवासिभिः ॥
इफ्रयिमस्य भूमिश्च शोमिरोणस्य च स्थलं ।
विलप्स्येते यिहूदीयै र्विन्यामीनेन गिल्यदं ॥
२० इस्रायेलीयवंशस्य निर्वासादागता च सा ।
सेना सारिफतं यावत् किनानीयान् प्रजेष्यति ॥
यिरूशालमतो नीता ये तु निर्वासिता जनाः ।
सिफार्दे सन्ति जेष्यन्ति दाक्षिणात्यपुराणि ते ॥
२१ आरोक्ष्यन्ति सियोनाद्रिं नरा निस्तारकारिणः ।
एषावः पर्व्वतश्रेण्या विचारं कर्त्तुमुद्यताः ।
तदा नित्यप्रभोरेव राजत्वञ्च भविष्यति ॥

योनाहोपाख्यानं ।

---

१ प्रथमोऽध्यायः ।

१ नीनवीं योनाहस्य प्रेषणं तर्शीशे तस्य पलायनं ४ झञ्झाया उपस्थितिः १० समुद्रे तस्य निक्षेपः १७ मत्स्येन तस्य ग्रसनञ्च ।

१ एकदामित्तयसुतं योनाहं प्रति सदाप्रभोर्वाक्यं प्रादुरभूत्, यथा,
२ त्वमुत्थाय महानगरीं नीनवीं गच्छ तस्याः प्रतिकूलां घोषणां कुरु च,
३ यतस्तस्या दुष्टता मम सम्मुखमुपातिष्ठत्। तदा योनाहः सदाप्रभो
र्दृष्टितः पलायितुमुत्थितो याफुं गतश्च, तत्र तर्शीशगामिनं पोतमासाद्या-
तारं दत्त्वा सदाप्रभो र्दृष्टितस्तज्जनैः सार्द्धं तर्शीशं गन्तुं तं प्रविवेश च ।
४ अनन्तरं सदाप्रभुना महावायुः समुद्रं प्रहितः समुद्रे च महती झञ्झो-
५ त्पन्ना तया पोतभङ्गशङ्काभूत्। तदा पोतवाहा भीत्वा प्रत्येकं स्वं स्वं
देवमुद्दिश्याक्रन्दन्, पोतस्थद्रव्याणि च समुद्रे निक्षिपन्तस्तं लघुं कर्त्तु-
६ मयतन्त, योनाहस्तु पोतगर्भमवरुह्य शयित्वा सुषुप्त आसीत्। तदा

नाविकाध्यक्षस्तस्यान्तिकं गत्वा जगाद, भो सुषुप्त, त्वं किं कुरुषे?
उत्तिष्ठ निजेश्वरमाहूय प्रार्थनां कुरुष्व, किंस्विदीश्वरोऽस्मत्पक्षे चिन्तां
करिष्यति, तथा सति वयं न नंक्ष्यामः। अनन्तरं ते परस्परं जगदुः, ७
आयात, कस्य कारणादियं विपद् अस्मानुपागता तन्निर्णयार्थमस्माभि
र्गुटिकापातः क्रियतां। अपरं गुटिकापाते कृते गुटिकया योनाहो
निर्द्दिष्टः। अतस्ते तं जगदुः कस्य कारणादियं विपदस्मानुपागता तद- ८
स्मान् ज्ञापय। का तव व्यवसा? कुतः स्थानात् त्वमागतः? तव को
देशः? का वा तव जातिः? ततः स तान् जगाद, इब्रीयोऽहं, समुद्रस्य ९
स्थलस्य च यो निर्म्माता तस्य स्वर्गेश्वरस्य सदाप्रभोरहं भयकारी।

एतेन ते नरा अतीव त्रासयुक्ता भूत्वा तं जगदुः, किमर्थं त्वमेतत् कृत- १०
वान्? वस्तुतः स सदाप्रभो र्दृष्टितः पलायते तत् तेऽवगता आसन्, यतः
स तांस्तज्ज्ञापितवान्। अस्मत्पीडनात् समुद्रो यथा विरमेत् तदर्थं त्वां ११
प्रत्यस्माभिः किं कर्त्तव्यं? यतः समुद्र उत्तरोत्तरं संरब्धो जायते। ततः १२
स तान् जगाद, यूयं मां धृत्वा समुद्रे निक्षिपत, तेन समुद्रो युष्मत्पीड-
नाद् विरमिष्यति, यतोऽहं जाने, ममैव कारणादियं झञ्झा युष्मान्
आक्रमीत्। तथापि ते नराः पोतं स्थले परावर्त्तयितुं तरङ्गभेदनाया- १३
चेष्टन्त न तु शेकुः, यतस्तेषां प्रातिकूल्येन समुद्र उत्तरोत्तरं संरब्धोऽजा-
यत। अतस्ते सदाप्रभुमाहूयेत्थं प्रार्थयाञ्चक्रिरे, भो सदाप्रभो, नरस्यै- १४
तस्य प्राणानां कृतेऽस्माकं विनाशो मा भवतु, निर्द्दोषरक्तपातापराधम-
स्मासु मार्पय वा, यस्माद् भो सदाप्रभो, तुभ्यं यदरोचत त्वं तदेव
कृतवान्। अपरं योनाहस्तै र्धृतः समुद्रे निक्षिप्तश्च, तदा समुद्रः स्वसंर- १५
म्भाद् विरतः। ततस्ते नराः सदाप्रभुतोऽतीव भीत्वा सदाप्रभवे बलीन् १६
ददु र्व्रतसङ्कल्पांश्च चक्रिरे।

परन्तु सदाप्रभुना प्रकाण्ड एको मत्स्यो योनाहस्य गिलने नियुक्तः, १७
तस्य मत्स्यस्योदरे योनाहो दिनत्रयं रात्रित्रयञ्च यापयामास।

---

२ द्वितीयोऽध्यायः।

१ योनाहस्य प्रार्थना १० तस्योद्धारश्च।

तस्य मत्स्यस्योदरेऽवस्थितिकाले योनाहो निजेश्वरं सदाप्रभुमुद्दिश्य १
प्रार्थयाञ्चक्रे। स उवाच, २

नित्यप्रभुं समुद्दिश्य मम सङ्कटमध्यतः।
कृतवानहमाक्रान्तं स मह्यञ्चोत्तरं ददौ॥
आर्त्तनादो मयाकारि पातालस्यैव गर्भतः।
स्वकर्णाभ्यां गृहीतश्च मामकीनरवस्त्वया॥
३ निक्षिप्तोऽहं त्वयागाधेऽपां हृदि स्रोतसावृतः।
सकलैस्तव कल्लोलैस्तरङ्गैश्चासमाप्लुतः॥
४ मयावादि निरस्तोऽहम् अभवं तव दृष्टितः।
त्वत्प्रासादं पवित्रन्तूद्दिश्य द्रक्ष्याम्यहं पुनः॥
५ प्राणस्पर्शिजलैरुद्धोऽगाधाद्भिः परिवेष्टितः।
अभवं बद्धशीर्षश्च तन्तुभिः सागरोद्भवैः॥
६ अहं पर्व्वतमूलानां स्थानं गत्वावरूढवान्।
धरित्र्यर्गलबद्धाभूत् सदाकालं ममोपरि॥
तथा सत्यपि मत्प्राणान् क्षयस्थानस्य मध्यतः।
पुनरुद्धृतवांस्त्वं हि भो मदीश सदाप्रभो॥
७ मत्प्राणेष्ववसीदत्सु स्मृतो नित्यप्रभु मया।
याच्ञा मे त्वामुपातिष्ठत् पवित्रे तव मन्दिरे॥
८ असाराणां व्यलीकानां वस्तूनां सेवकास्तु ये।
स्वदयालाभमार्गन्ते सन्त्यजन्ति नराः स्वयं॥
९ अहन्तु त्वां समुद्दिश्य स्तवस्य ध्वनिना समं।
बलिदानं करिष्यामि यत् प्रतिश्रुतवानहं।
तच्छोधञ्च करिष्यामि त्राणं दानं सदाप्रभोः॥
१० अनन्तरं सदाप्रभुना तस्मै मत्स्यायाज्ञायां प्रदत्तायां स योनाहं स्थल उज्जगार।

---

३ तृतीयोऽध्यायः।

१ पुनश्च नीनवीं प्रेषितस्य योनाहस्य तत्र प्रचारणं ५ पापात् तन्निवासिनामनुतापः १० तेषां रक्षणञ्च।

१ अपरं द्वितीयवारं योनाहं प्रति सदाप्रभो र्वाक्यं प्रादुरभूत्, यथा,
२ त्वमुत्थाय महानगरीं नीनवीं गच्छ, मया च यां घोषणां वक्ष्यसे, तां तत्र
३ घोषय। ततः सदाप्रभो र्वाक्याद् योनाह उत्थाय नीनवीं गतः। सा तु

नीनवीश्वरस्य दृष्ट्यां महती नगरी दिनत्रयमानस्य गमनस्य योग्या
चासीत्। अतो योनाहो नगरं प्रवेष्टुमारभ्यैकदिनमानं गमनं कुर्व्वन्नि- ४
दमघोषयत्, यथा, अद्यारभ्य चत्वारिंशद्दिनेष्वतीतेषु नीनवीयमुत्पाट-
यिष्यते।

तदा नीनवीयजना ईश्वरे प्रत्ययं कृत्वोपवासं घोषयामासु र्महान्तः ५
क्षुद्राश्च सर्व्वे शाणवसनं परिदधिरे च। तस्यां कथायाञ्च नीनवीयरा- ६
जस्यान्तिकमुपस्थितायां स निजसिंहासनादुत्थाय गात्रतो राजवस्त्रं
त्यक्त्वा शाणवसनं परिदधे, भस्मनि निषसाद च, नीनव्यां घोषणया ७
राज्ञस्तदीयामात्यानामादेशादिमां कथां ज्ञापयामास च, यथा, मनुष्याः
पशवश्च गावो मेषाश्च किमपि मास्वादयन्तु, मा चरन्तु, जलं मा पिबन्तु
वा। मनुष्याः पशवश्च शाणवस्त्राणि परिदधतामीश्वरमुद्दिश्योच्चैराह्वानं ८
कुर्व्वताञ्च, मनुष्याश्च प्रत्येकं स्वकुमार्गात् स्वहस्तस्थितदौरात्म्याच्च परा-
वर्त्तन्तां। को जानीत ईश्वरः पुनरनुतप्य स्वप्रचण्डक्रोधान्निवर्त्तिष्यते, ९
तथा सति वयं न नंक्ष्यामः।

तत ईश्वरस्तेषां तां क्रियामर्थतः स्वकुमार्गात् तेषां परावर्त्तनं ददर्श, १०
तस्मात तेषामनिष्टसाधनस्य यां कथामीश्वरो गदितवान्, स तामध्यनु-
तप्य तदनिष्टं न साधयामास।

---

४ चतुर्थोऽध्यायः।

१ ईश्वरस्य दयायां योनाहस्य क्रोधः ५ एरण्डस्य दृष्टान्तेन तं प्रतीश्वरस्य तर्जनञ्च।

एतेन योनाहोऽतीव विषण्णो बभूव चुक्रोध च। अतः स सदाप्रभु- १
मुद्दिश्य प्रार्थनां कृत्वा जगाद, भो सदाप्रभो, स्वदेशेऽवस्थितिकालेऽपि २
ममेयं कथा किं नासीत्, तस्मादेवाहं त्वरां कृत्वा तर्शीशं गन्तुमयते,
यतोऽहं ज्ञातवान्, त्वं कृपामयः स्नेहशीलश्चेश्वरः क्रोधे धीरो दयायां
महान् ह्यनिष्टमध्यनुतापकारी चासि। अतो भो सदाप्रभो, त्वमिदानीं ३
मम प्राणान् मत्तो हर्त्तुमर्हसि, यतो मम जीवनान्मरणं श्रेयः। तदा ४
सदाप्रभु र्जगाद, तव क्रोधनं किं भद्रं?

योनाहो नगरान्निर्गत्य नगरस्य पूर्व्वदिश्यवर्त्तत, तत्रैव स स्वकृते ५
कुटीरं निर्म्माय नगरस्य का गति र्भवति तद्दर्शनप्रतीक्षया तत्र छाया-
यामुपविश्यावातिष्ठत। तदा सदाप्रभुरीश्वर एरण्डमेकं नियुयुजे, ६

स्वविषादाद् योनाहस्योद्धारार्थं स तदीयमस्तकस्योपरि छायाप्रदानाय
७ योनाहादप्यूर्द्धीभूय ववृधे, तस्मिन्नेरण्डे योनाहोऽतीवाहृष्यत्। किन्तु
परदिनेऽरुणोदयकाल ईश्वरेण कीट एको निरूपितः स तमेरण्डं
८ ददंश, तेन स शुष्कीभूतः। अपरं सूर्य्योदयकाल ईश्वर उष्णं पूर्व्वीय-
वायुं नियुयुजे, ततो योनाहस्य मस्तके रौद्रेणाहते सोऽवासीदद् ईश्वरं
प्राणत्यागं याचित्वा चाव्रादीत्, मम जीवनान्मरणं श्रेयः।
९ अनन्तरमीश्वरो योनाहं जगाद, तमेरण्डमधि तव क्रोधनं किं भद्रं?
१० सोऽवादीत्, मृत्युपर्य्यन्तं मम क्रोधनं भद्रं। तदा सदाप्रभु र्जगाद,
त्वं तमेरण्डमनुकम्पसे, तस्य कृते तु त्वया परिश्रमो नाकारि न त्वया वा
११ स वर्द्धितः। एकस्यां रजन्यां स उत्पन्न एकस्यां रजन्यां नष्टश्च। तर्ह्यहं
किं न तां महानगरीं नीनवीमनुकम्पेय, यस्यां दक्षिणवामहस्तयोः
प्रभेदं ज्ञातुमसमर्था विंशतिसहस्राधिकलक्षं मानवप्राणिनो बहवः
पशवश्च विद्यन्ते?

मीखायस्य भविष्यद्वाक्यानि।

---

१ प्रथमोऽध्यायः।

१ देवार्च्चाकारणाद् यिहूदाया विरुद्धम् ईश्वरस्य क्रोधकथनं १० शोचनाय विनयश्च।

१ योथम आहसो हिष्कियश्चेतिनामकानां यिहूदादेशीयराजाना-
मधिकारकाले मोरेष्टीयं मीखायं प्रति सदाप्रभो र्यद् वाक्यं प्रादुरभूत्,
शोमिरोणं यिरूशालमञ्चाधि यानि दर्शनानि तेन लेभिरे, तद्वृत्ता-
न्तोऽयं।

२ भो सर्व्वा जातयो यूयं श्रवणं कर्त्तुमर्हथ।
त्वयावधीयतामत्र क्षौणि त्वत्पूरकेण च॥
युष्माकं प्रतिकूलश्च प्रभुः साक्षी सदाप्रभुः।
स्वयमेव प्रभु र्भूयात् पवित्रान्निजमन्दिरात्॥
३ यतः पश्य निजस्थानाद् विनिर्गत्य सदाप्रभुः।
अवतीर्य्य च मेदिन्या उच्चस्थानैः क्रमिष्यति॥
४ द्रवीभूता अधस्तस्य भविष्यन्ति च पर्व्वताः।
विदीर्णाश्च भविष्यन्ति तदधस्तादुपत्यकाः।

अग्नेः साक्षाद् यथा सिक्थं प्रपाते सिक्तमम्बु वा ॥
उत्पन्नं सर्व्वमेतत्तु याकूबस्यापराधतः । ५
इस्रायेलीयवंशस्य पापानाञ्च समूहतः ॥
याकूबस्यापराधः कः किमन्यः शोमिरोणतः ।
उच्चस्थानं यिहूदाः किं किमन्यद् यिरूशालमात् ॥
शोमिरोणमहं तस्मात् क्षेत्रस्थं प्रस्तरोत्करं । ६
उद्यानञ्च करिष्यामि द्राक्षाणां रोपणार्थकं ॥
सर्व्वानुपत्यकायाञ्च निक्षेप्स्यामि तदश्मनः ।
सर्व्वं तद्भित्तिमूलञ्चाहं करिष्याम्यनावृतं ॥
सकलाः खण्डयिष्यन्ते तस्य तक्षितविग्रहाः । ७
अनलेन च धक्ष्यन्ते सकलास्तस्य दक्षिणाः ।
कृत्स्नं तत्प्रतिमावृन्दं करिष्यामि च जङ्गलं ॥
वेश्याभोगस्य मूल्येन सञ्जग्राह स तद् यतः ।
वेश्याभोगस्य मूल्याय तद्विकारिष्यते पुनः ॥
विलपामि ततो हेतो र्हाहाकारं करोमि च । ८
मूषितो वस्त्रहीनश्च यातायातं करोम्यहं ॥
इरयामि विलापञ्च शृगालानां गणो यथा ।
यादृशश्चोष्ट्रपक्षिण्यः शोकं कुर्व्वे च तादृशं ॥
आघाताः शोमिरोणस्य सन्ति साङ्घातिका यतः । ९
यिहूदादेशपर्य्यन्तं व्याप्तञ्चामङ्गलं यतः ।
तन्मज्जातेः पुरद्वारं यिरूशालममस्पृशत् ॥
मा ज्ञापयत गाते तत् मा श्रावयत रोदनं । १०
बैत-लाफ्राभिधग्रामे धूलिं विकिर मस्तके ॥
नग्नत्वाल्लज्जितान्यत्र गच्छ शाफीरवासिनि । ११
निर्गमं कुरुते नैव साननस्य निवासिनी ।
बैथेत्सेलस्य शोकेन यूयमाश्रयवञ्चिताः ॥
क्षमाकाङ्क्षातुरा जाता यस्मान्मारोतवासिनी । १२
यतो नित्यप्रभोः पार्श्वात् प्रेरितं यदमङ्गलं ।
तद् यिरूशालमो द्वारं यावद् दृश्यत आगतं ॥
तुरङ्गो युज्यतां याने त्वया लाखीशवासिनि । १३
हते सीयोनकन्यायास्त्वं पापायाग्रगामिनी ।

इस्रायेलोऽपराधाश्चाभवन्नाविष्कृतास्त्वयि ॥
१४ अतो मोरेष्ठगाताय त्वं प्रदास्यसि सम्बलं।
इस्रायेलीयराजानां कृतेऽच्चीबपुरस्य च।
गृहाणामावली माया कुनदीवद् भविष्यति ॥
१५ नेष्यामि स्वामिनं तुभ्यं पुनर्मारेशवासिनि।
यास्यन्त्यदुल्लमं यावद् इस्रायेलो यशस्विनः ॥
१६ कृत स्वनन्दनानां त्वं स्वमुण्डं विकचं कुरु।
मुण्डस्य केशहीनत्वं प्रशस्तं कुरु गृध्रवत्।
यतो निर्व्वासितास्त्वत्तो दूरीभूताश्च सन्ति ते ॥

---

२ द्वितीयोऽध्यायः।

१ उपद्रवकारणात् लोकान् प्रति तर्जनं ४ अन्यायकारणाद् भाविदण्डकथनं १२ ईश्वरीयप्रतिज्ञा च।

१ स्वशय्यासु शयाना ये कल्पयन्ति व्यलीकतां।
रचयन्ति च दुर्वृत्तिं तेषां तापो भविष्यति ॥
प्रभातायां रजन्यां ते तस्याः कुर्व्वन्ति साधनं।
यस्मात् स्वीयकरस्तेषां नराणामीश्वरो मतः ॥
२ लुब्धा मुष्णन्ति ते क्षेत्रं भवनानि हरन्ति च।
पुरुषं तद्गृहञ्चापि दौर्जन्येन जयन्ति ते।
सह भूम्यधिकारेण नरस्तैरभिभूयते ॥
३ ततो हेतोरिदं वाक्यं व्याजहार सदाप्रभुः।
पश्यानिष्टस्य सङ्कल्पं कुर्व्वे गोष्ठीमिमामधि ॥
स्वग्रीवाणां ततो यूयमुद्धारं न करिष्यथ।
न वाटिष्यथ साटोपं यतो दुष्काल एव सः ॥
४ तस्मिन् काले च युष्मासु प्रवादैकः प्रयोक्ष्यते।
शोकसूचकमेकञ्च गीतं गायिष्यते नरैः ॥
ते वदिष्यन्ति निर्वृत्तं सर्व्वशो ध्वंसिता वयं।
मज्ज्ञातेः पैतृका भूमिस्तेन हस्तान्तरीकृता ॥
स कथं मम हस्तात् तां कृतवानपवर्त्तिनीं।

धर्म्मत्यागिनरेभ्यश्चास्माकं क्षेत्रं विभक्तवान् ॥
नास्ति कोऽपि ततो हेतोः समज्यायां सदाप्रभोः । ५
त्वत्कृते गुटिकापातात् मानरज्जुवितानकः ॥
मा श्रावयत भावोक्तिमित्युक्तिं श्रावयन्त्यमी । ६
अत्र त्वश्राविते वाक्ये धिक्कारो न सरिष्यति ॥
याकूबकुलमित्येवनामधारिणि मण्डलि । ७
किं न सहनशीलात्मा प्रतिपन्नः सदाप्रभुः ॥
कर्म्माणीमानि तस्यैव कर्म्मवत् प्रतिभान्ति किं ।
मद्वाचः सरलाचारे किं न मङ्गलसाधकाः ॥
पूर्व्वेद्यु र्मम जातिस्तु वैरिणीव समुत्थिता । ८
यथा ये निर्भयं यान्ति पान्था युद्धात् पराङ्मुखाः ।
स्कन्धस्यावरणं तेषां वस्त्रात् कृष्ट्वा हरन्त्यमी ॥
मज्जातीयाबलास्तैश्च च्याव्यन्ते रम्यगेहतः । ९
तासाञ्चानाथबालेभ्यो यां भूषां दत्तवानहं ।
तामपि नित्यकालार्थं गात्रात् तेषां हरन्ति ते ॥
उत्थाय यात नास्तीदं विश्रामस्य स्थलं यतः । १०
नाशकृद् घोरनाशेव कलुषं तस्य कारणं ॥
नरो वातानुगामी को मृषोक्त्या च प्रवञ्चकः । ११
स वदेत् श्रावयिष्यामि त्वत्कृते मद्यवारुणी ।
स जाते र्भवितैतस्याः प्रियोक्तिश्रावकस्तदा ॥
नेष्याम्येकत्र नेष्यामि साकल्यं तव याकुब । १२
संरक्षन् संग्रहीष्यामीस्रायेलः शेषमानवान् ॥
स्थापयिष्यामि चैकत्र मेषान् वस्रास्थितानिव ।
स्वप्रचारे यथा पालं महाघोषं नरौघतः ॥
एकस्तु भेदकस्तेषामग्रगामी भविष्यति । १३
भित्त्वा यास्यन्ति ते द्वारं निष्क्रमिष्यन्ति तेन च ॥
स्वीयनराधिपस्तेषामग्रे च प्रगमिष्यति ।
स्वयं नित्यप्रभुस्तेषां पुरोगामी भविष्यति ॥

---

३ तृतीयोऽध्यायः।

१ अध्यक्षाणां क्रूरता ५ भाववादिनां मृषावाक्यम् ६ उभयो र्निर्भयता च।

१ पुनश्च मयावादि, यथा,

बुध्यध्वं याकुबः श्रेष्ठा इस्रायेल्कुलशासकाः।
विचारस्य परिज्ञानं किं युष्मासु न युज्यते॥
२ भद्रविद्वेषिणो यूयम् अभद्रस्यानुरागिणः।
चर्म्मापहारका नृणाम् अस्थ्नां मांसापहारकाः॥
३ युष्माभि र्मत्प्रजानाञ्च क्रियते मांसभक्षणं।
चर्म्म गात्रत उन्मोच्य सर्व्वास्थीनि विभिद्य च।
तत् खण्डीकृत्य युष्माभिः पाकस्थाल्यामिवार्प्यते।
प्रतिभाति च मांसं तत् कटाहस्यान्तरे स्थितं॥
४ जना एते पुनर्व्वारं समुद्दिश्य सदाप्रभुं।
क्रन्दिष्यन्ति स तेभ्यस्तूत्तरं नैव प्रदास्यति॥
तस्मिन् काले च तेभ्यः स स्वमुखं छादयिष्यति।
उचितं तत् फलं तेषां दुष्क्रियाणां भविष्यति॥
५ ये मत्प्रजागणं भ्रान्तं कुर्व्वते भाववादिनः।
दन्तैश्चर्व्वणकाले च शान्तिमाख्यापयन्ति ये॥
किन्तु तेषां मुखे येन भक्ष्यद्रव्यं न दीयते।
तं नरं प्रति कुर्व्वन्ति धर्म्मयुद्धस्य घोषणं।
तान् भाववादिनोऽध्येतद् वाक्यं ब्रूते सदाप्रभुः॥
६ युष्मदर्थं ततो हेतोरात्रि र्दर्शनवर्ज्जिता।
मन्त्रेणाभेदनीयञ्च तिमिरं सम्भविष्यति॥
भाववादिगणस्योर्द्ध्वे सूर्य्यश्चास्तं गमिष्यति।
तेषामूर्द्ध्वे दिनञ्चापि कृष्णवर्णं भविष्यति॥
७ दर्शकाश्च त्रपिष्यन्ते लज्जिष्यन्ते च मन्त्रिकाः।
स्वश्मश्रूणि च ते सर्व्वे छादयिष्यन्ति वाससा।
यस्मादीश्वरतः किञ्चिदुत्तरं तै र्न लप्स्यते॥
८ याकूबस्यापराधांस्त्विस्रायेलः पातकानि च।
निर्द्देष्टुं बलपूर्णोऽहं प्राप्यात्मानं सदाप्रभोः।
पूर्णश्चास्मि विचारेण विक्रमेण च वीरवत्॥

भो याकूबकुलश्रेष्ठा इस्रायेल्कुलशासकाः। ९
सर्व्वे यूयमिदं वाक्यमाकर्णयितुमर्हथ।
विचारद्वेषिणो यूयं सर्व्वसारल्यकुञ्चकाः॥
रक्तै र्निर्म्मीयते सीयोन् अन्यायेन यिरूशलम्। १०
उत्कोचार्थं तदध्यक्षा विचारं निर्णयन्ति हि॥ ११
वेतनार्थञ्च तत्रत्याः शिक्षां यच्छन्ति याजकाः।
रूप्यार्थं मन्त्रपाठञ्च कुर्व्वते भाववादिनः॥
पुनर्नित्यप्रभुञ्चापि तैरालम्ब्येदमुच्यते।
स्वयं नित्यप्रभुः किं न विद्यतेऽस्माकमन्तरे।
ततो हेतोः किमप्यस्मान् अनिष्टं नाक्रमिष्यति॥
अतो युष्मत्कृते सीयोन् क्षेत्रवत् क्रक्ष्यते हलैः। १२
नगरी च यिरूशालम् भविष्यत्यश्मराशयः।
मन्दिरस्य गिरिश्चापि भविष्यत्युच्चकाननं॥

---

४ चतुर्थोऽध्यायः।

१ ख्रीष्टस्य राज्यमधि भविष्यद्वाक्यं ६ स्वप्रजाः प्रतीश्वरस्य दया ११ रिपून् प्रति दण्डश्च।

पाश्चात्येषु दिनेष्वेषा घटना सम्भविष्यति। १
गृहं नित्यप्रभोरेतद् यस्मिंस्तिष्ठति पर्व्वते।
सर्व्वेषां भूधराणां स मस्तके स्थापयिष्यते॥
गिरिभ्यः सकलेभ्यश्च प्रोन्नतः स भविष्यति।
नानाजातीयलोकाश्च प्रसरिष्यन्ति तं प्रति॥
परजातिसमूहश्च प्रस्थायेत्थं गदिष्यति। २
एत नित्यप्रभोः सर्व्वे आरोक्ष्यामो गिरिं वयं।
याकूबीयेश्वरस्यैव प्रगच्छामो निकेतनं।
स्वमार्गान् शिक्षितास्तेन चरिष्यामस्तदध्वसु॥
सीयोनाद् यत उत्पद्य शास्त्रं विस्तारयिष्यते।
यिरूशालमतो वाक्यं निर्यातां च सदाप्रभोः॥
बहुसंख्यकजातीनां माध्यस्थं स करिष्यति। ३
तर्जयिष्यति जातीश्च दूरस्था बलवत्तमाः॥

ताडयित्वा करिष्यन्ति निजासीन् कूटकानि ताः।
खण्डीश्च लवित्राणि घटयिष्यन्ति मानवाः ॥
न पुनर्जातिरेकान्यां प्रत्यसिं चालयिष्यति ।
अभ्यासो रणविद्यायास्तै र्न कारिष्यते पुनः ॥
४ स्वीयद्राक्षालतायास्तु तले स्वोडुम्बरस्य वा ।
उपवेक्ष्यन्ति सर्व्वे हि कोऽपि नोद्वेजयिष्यति ।
इत्यमाह यतो वक्तं वाहिनीनां सदाप्रभोः ॥
५ प्रत्येकं निजदेवस्य नाम्ना गच्छन्ति जातयः ।
अनन्तकालपर्य्यन्तमस्माकमीश्वरोऽस्ति यः ।
तस्य नित्यप्रभो र्नाम्ना चरिष्यामो वयं ततः ॥
६ इयं नित्यप्रभोरुक्ति र्दिने तस्मिन्नुपस्थिते ।
सङ्ग्रहीष्याम्यहं खञ्जां गता या च विकीर्णतां ।
मया या निगृहीता च तां सञ्चेष्याम्यहं पुनः ॥
७ तां खञ्जाञ्च करिष्याम्यवशिष्टांशपदान्वितां ।
दूरीभूतां करिष्याम्यहं जातिं बलवत्तमां ॥
अधुनानन्तकालञ्च सीयोनाभिधपर्व्वते ।
स्वयं नित्यप्रभुस्तेषां नृणां राजा भविष्यति ॥
८ भो व्रजस्योच्चदुर्ग त्वं सियोनो दुहितु र्गिरे ।
प्रभुत्वं प्रथमं राज्यं दुहितु र्यिरूशालमः ।
त्वामुपस्थास्यते त्वाञ्च पुनर्व्वारं प्रवेक्ष्यति ॥
९ किमर्थमुच्चनादोऽयमिदानीमीर्य्यते त्वया ।
त्वन्मध्ये किं न राजास्ति त्वन्मन्त्री किं ननाश वा ।
ततो हेतोः किमग्रासीत् त्वां स्रवन्तीमिव व्यथा ॥
१० सियोन्कन्ये स्रवन्तीव व्यथमाना स्फुटीभव ।
निष्क्रान्ता पुरतो यस्मात् शीघ्रं क्षेत्रे प्रवत्स्यसि ॥
त्वं याता बाबिलं यावत् तत्रोद्धारन्तु लप्स्यसे ।
मोचयिष्यति तत्र त्वां शत्रुहस्तात् सदाप्रभुः ॥
११ इदानीं त्वद्विरुद्धन्तु समेता बहुजातयः ।
भाषन्ते च कथामेताम् अपवित्रीभवत्वियं ।
अस्मन्नेत्राणि तृप्यन्तु सीयोनो दर्शनेन च ॥
१२ नित्यप्रभोस्तु सङ्कल्पान् नैव जानन्ति ते नराः ।

तस्य या मन्त्रणा सापि तैर्मनुष्यैर्न बुध्यते।
सङ्ग्राह स तान् यस्माच्छस्यभारान् खले यथा॥
सीयोन्वत्से त्वमुत्तिष्ठ कुरु तच्छस्यमर्द्दनं। १२
तव शृङ्गयुगं यस्मात् लोहतुल्यं करोम्यहं॥
पित्तलेन समानांश्च विदधामि खुरांस्तव।
त्वया च चूर्णयिष्यन्ते बहुसङ्ख्यकजातयः॥
अहं वर्जितवांस्तासां लाभं नित्यप्रभोः कृते।
सर्व्वां तासाञ्च सम्पत्तिं कृत्स्नपृथ्व्याः प्रभोः कृते॥

---

५ पञ्चमोऽध्यायः।

१ खीष्टस्य जन्मनो भविष्यद्वाक्यं ५ तज्जयस्य भाविवाक्यं १० याकूबो वंशस्य शुचीकरणं।

सैनादलप्रिये कन्ये इदानीन्तु दलं कुरु। १
अस्माकं प्रातिकूल्येनावरोधं कुर्व्वतेऽरयः।
इस्रायेलस्य शास्तारं दण्डेनाघ्नन्ति ते हनौ॥
त्वन्तु बैत्लेहमिफ्राथे स्वल्पुद्दलेन यद्यपि। २
यिहूदायाः सहस्राणां मध्ये गण्या न मन्यसे॥
तथापि त्वत्त उद्भूता स नरो मन्निरूपितः।
इस्रायेलस्य मध्ये यो जनशास्ता भविष्यति।
प्राक्कालादुद्गमास्तस्य वस्तुतोऽनादिकालतः॥
अतः प्रसवकारिण्या यावन्न प्रसवो भवेत्। ३
त्यक्ष्यन्ते तेन तावत् ते पश्चात् प्रत्यागमिष्यति।
शेषभ्रातृगणस्तस्येस्रायेलीयान्वयैर्वृतः॥
स च नित्यप्रभो र्नाम्ना स्वेश्वरस्य सदाप्रभोः। ४
नाम्नः श्रिया समुत्थाय स्वप्रजाः पालयिष्यति॥
सुखं वत्स्यन्ति ता यस्मात् काले तस्मिन्नुपस्थिते।
मेदिनीप्रान्तपर्य्यन्तं सुमहान् स भविष्यति॥
स स्वयं भविता सन्धिरस्मद्देशं प्रविश्य च। ५
अशूरो यदि कुर्व्वीतास्मद्धर्म्येषु पदार्पणं॥
तर्हि संस्थापयिष्यन्तेऽस्माभिस्तत्प्रातिकूल्यतः।
नराः सप्त प्रजापाला अष्टौ वा पुरुषर्भाः॥

६ अशूरस्य च राज्यं तैरसिना पालयिष्यते।
निम्रोदस्यापि राज्यञ्चासीनैस्तद्द्वारपुरेषु तैः॥
अस्मद्देशप्रविष्टश्चेदस्मत्सीम्नि पदार्पणं।
कुर्व्वीताशूर उद्धारोऽस्माकमेतेन सेत्स्यति॥
७ मनुष्यञ्चानपेक्ष्यैव नृसुतानप्रतीक्ष्य च।
खवारि यादृशं भाति नित्यप्रभुत आगतं।
तृणस्योपरि वा यद्वद्वरोहन्ति शीकराः॥
बहुसंख्यकजातीनां मध्यस्थान उपस्थितः।
याकूबस्यावशिष्टांशस्तादृशः प्रतिभास्यति॥
८ मध्ये वन्यपशूनां यो मृगराज उपस्थितः।
मेषव्रजसमूहस्य मध्ये वा युवकेशरी।
गच्छन् मृद्नाति जन्तुञ्च छिनत्त्युद्धारकं विना॥
याकूबस्यावशिष्टांशस्तेन तुल्यो भविष्यति।
स्थितोऽन्यदेशिनां मध्ये वेष्टितो बहुजातिभिः॥
९ उच्चस्त्वद्वैरिणामूर्द्धे तव हस्तो भविष्यति।
उच्छिन्नाश्च भविष्यन्ति सकलास्तव शत्रवः॥
१० पुन र्नित्यप्रभु र्ब्रूते दिने तस्मिन्नुपस्थिते।
समुच्छेत्स्याम्यहं सर्व्वांस्त्वदश्वांस्तव मध्यतः।
त्वद्रथानाञ्च सर्व्वेषां करिष्यामि विनाशनं॥
११ त्वद्देशस्य पुरीश्चापि समुच्छेत्स्याम्यहं तदा।
सर्व्वाण्युत्पाटयिष्यामि त्वद्दुर्गाणि दृढानि च॥
१२ समुच्छेत्स्यामि सर्व्वञ्च मायावित्वं करात् तव।
गणकास्तव वा कोऽपि न स्थास्यन्ति ततः परं॥
१३ तव तक्षितमूर्त्तीश्च स्तम्भाकारांश्च विग्रहान्।
समुच्छेत्स्याम्यहं सर्व्वांस्तदानीं तव मध्यतः।
त्वं स्वहस्तकृतं वस्तु पुनर्नैव प्रणंस्यसि॥
१४ निर्भेत्स्यन्त मया त्वत्त आशेरामूर्त्तयस्तव।
त्वदीयनगराणाञ्च ध्वंसः कारिष्यते मया॥
१५ याभिर्नाग्राहि मद्वाक्यं परजातीश्च ताः प्रति।
करिष्ये कोपचण्डत्वाद् वैरनिर्य्यातनं तदा॥

६ षष्ठोऽध्यायः ।

अकृतज्ञताज्ञानतान्यायदेवार्च्चाकारणात् सह लोकैरीश्वरस्य विवदनं ।

इदं नित्यप्रभो र्वाक्यं यूयं संश्रोतुमर्हथ । १
पर्व्वतैः सार्द्धमुत्तिष्ठ विवादं प्रकुरुष्व च ।
त्वद्वाण्यामवधानञ्च क्रियतामुपपर्व्वतैः ॥
नित्यप्रभो र्विवादं तं यूयं शृणुत पर्व्वताः । २
श्रूयतां स च युष्माभिरचला धरणीधराः ॥
स्वप्रजाभिः समं यस्माद् विवादोऽस्ति सदाप्रभोः ।
इस्रायेलेन सार्द्धं स विसंवादं करोति च ॥
मया किमपराद्धं ते भो मदीयप्रजागण । ३
किं कृत्वा त्वं मया खिन्नो मह्यं देहि तदुत्तरं ॥
मया त्वं यत आनीतो मिसर्देशस्य मध्यतः । ४
तस्माद्दासगृहादेव तव मुक्तिः कृता मया ।
मूसाहारोणमिर्यामास्त्वदग्रे प्रहिता मया ॥
भो मदीयप्रजावर्ग मोयाबीयो नराधिपः । ५
बालाको यामकार्षीत् तां मन्त्रणां त्वमनुस्मर ॥
बियोरस्य सुतो बिल्यम् प्रादात् तस्मै यदुत्तरं ।
शित्तीमाद् गिल्गलं यावद् यच्चाभूत् तदपि स्मर ॥
विविधं ज्ञास्यसे तर्हि धर्म्मकर्म्म सदाप्रभोः ॥
किं वस्त्वादाय गच्छामि प्रत्युद्गन्तुं सदाप्रभुं । ६
किं वस्त्वादाय सर्व्वोच्चं प्रणंस्यामि तमीश्वरं ॥
किं होमीयबलीन् दत्त्वा गोवत्सान् वैकहायनान् ।
तमुद्दिश्य समादाय स प्रत्युद्यास्यते मया ॥
किं मेषाणां संहस्रेषु प्रेष्यते स सदाप्रभुः । ७
तैलप्रवाहिनीनां वा नदीनामयुतेष्वपि ॥
कृते स्वीयापराधस्य किमहं ज्येष्ठमात्मजं ।
कृते मानसपापस्य तनो र्दास्यामि वा फलं ॥
यद् भद्रं भो मनुष्य त्वां स विज्ञापितवान् हि तत् । ८
अनुष्ठानं विचारस्य दयायामनुरञ्जनं ।
त्वदीयेशेन सार्द्धञ्च विनीतं गमनं तव ।

एतेभ्योऽधिकमन्यत् किं याचते त्वां सदाप्रभुः॥
९ रवो नित्यप्रभोरेष नगरं प्रत्युदीरितः।
भवतो नामतो भीतिः कुशलं नात्र संशयः।
यूयं दण्डञ्च मन्यध्वं तन्नियोक्तुश्च शासनं॥
१० किं दुष्टस्य गृहे कोषा दुष्टत्वेन समार्चिताः।
विद्यन्त शस्यमानं वा च्चयरोगि शपोचितं॥
११ चिन्तेयं क्रियतां तेन दुष्टतायास्तुला मम।
सम्पुटे कूटपाषाणाः सन्त्यतः किमहं शुचिः॥
१२ दौरात्म्येनैव पूर्णास्तु तत्रत्या धनिनो नराः।
तन्निवासिमनुष्याश्च सन्ति मिथ्योक्तिवादिनः।
न्टणां तेषाञ्च या जिह्वा सा मुखान्तःस्थजिह्मता॥
१३ अत्युग्राणि मयैवापि कारिष्यन्ते च्चतानि ते।
त्वद्धंसं विदधानेन पापानां तव कारणात्॥
१४ त्वं करिष्यस आहारं न तु तृप्तिमवाप्स्यसि।
उदरस्यैव शून्यत्वं पूर्व्ववत् स्थास्यते त्वयि॥
द्रव्यं स्थानान्तरीकृत्य त्वमुद्धर्त्तुं न शच्यसि।
उद्धृतञ्च त्वया द्रव्यं मया खड्गेऽर्पयिष्यते॥
१५ त्वञ्च वप्स्यसि वीजानि न तु शस्यं लविष्यसि।
जीतफलं म्टदित्वापि तैलेनाङ्गं न लेप्स्यसे।
पुनर्द्राक्षा म्टदित्वापि रसं तासां न पास्यसि॥
१६ अम्रेरेव विधानानाम् आहाबीयकुलस्य च।
सर्व्वेषां कर्म्मणां रक्षाम् इयं वः कुरुते पुरी।
तेषाञ्च मन्त्रणारूपे मार्गे यूयं प्रगच्छथ॥
ततो हेतोरहं ताञ्च करिष्यामि मरुस्थलीं।
सील्कारस्य च पात्राणि मानवांस्तन्निवासिनः।
मत्प्रजानाञ्च धिक्कारं यूयं वच्यथ भारवत्॥

---

७ सप्तमोऽध्यायः।

१ जनानां दुष्टतामधि मण्डल्या विलापः ५ न मानुषे किन्त्वीश्वरे मण्डल्या आश्रयः ८ शत्रोः पराजयः ११ मण्डलीं प्रति प्रबोधकथनञ्च।

१ हा हतोऽस्मि यतो हेतोः फलानां शेषसंग्रहः।

त्वक्षद्राक्षाफलानां वा कर्त्तनं मे निदर्शनं॥
द्राक्षायां गुच्छ एकोऽपि भक्षणार्थं न विद्यते।
मत्प्राणै र्वाञ्छितं नैकं वास्तुपक्वफलं तरौ॥
उच्छिन्नो देशतः साधु र्लोकतः सरला गतः। २
रक्तपाताय सर्व्वे ते प्रतीक्षन्ते रहःस्थले।
भ्रातरं धर्त्तुमेकैको जालमादाय धावति॥
तेऽर्पयन्ति करौ पापे सम्यक् तत्साधनार्थिनः। ३
राजा याचति लोभाचाज्ञां ददाति विचारकः॥
महल्लोको निजेच्छातो नाशायोक्तिञ्च भाषते।
स्वोर्गुणत्रयेणेव तैरित्थं साध्यते छलः॥
यस्य सर्व्वोत्तमस्तेषां स नरः कण्टकोपमः। ४
योऽन्येभ्यः सरलात्मा स वारणीतः सकण्टकः॥
दिनं त्वत्प्रेक्षकाणां तु तव दण्डस्य चैष्यति।
तस्मिन् काले न्टणां तेषां व्याकुलत्वं भविष्यति॥
मा विश्वसित मित्रेऽपि मा श्रद्धध्वं सखीनपि। ५
तव वक्षसि या शेते तत्कर्णाद् रुन्धि चाननं॥
स्वपुत्त्रेण यतो हेतोरवज्ञायिष्यते पिता। ६
मातरं दुहिता श्वश्रूं परिबाधिष्यते बधूः।
परिवारा गृहस्थस्य भविष्यन्ति च वैरिणः॥
करिष्येऽहन्तु दृक्पातं समुद्दिश्य सदाप्रभुं। ७
सधैर्य्या च प्रतीक्षिष्ये मम त्रातारमीश्वरं।
ईश्वरो मम मद्वाक्ये कर्णपातं करिष्यते॥
माकार्षीस्तत आनन्दं भो मद्वैरिणि मामधि। ८
यतो हेतोः पतित्वापि समुत्थास्याम्यहं पुनः।
तिमिरे चोपविष्टाया मम ज्योतिः सदाप्रभुः॥
सहे नित्यप्रभोः क्रोधं कृतपापा तदन्तिकं। ९
शेषे तु मद्विवादे स पक्षवादी भविष्यति॥
मद्विचारस्य निष्पत्तिं स तदानीं करिष्यति।
तेनैवालोकमानीतात्मानं द्रक्ष्यामि धार्म्मिकां॥
तद्दृष्टा लज्जयाच्छन्ना भविता मम वैरिणी। १०
अहमुक्ता तया कुत्र त्वदीशोऽस्ति सदाप्रभुः॥

तामेवोद्दिश्य दृक्पातं मम नेत्रे करिष्यतः।
भविता मर्द्दनीया सा रथ्यानां कर्द्दमो यथा॥
११ वारणीस्तव निर्म्मातुं समायाति शुभं दिनं।
मत्कर्त्तृत्वं दिने तस्मिन् दूरं विस्तारयिष्यते॥
१२ मनुष्याश्च दिने तस्मिन्नायास्यन्ति त्वदन्तिकं।
अशूरान्मिसरीयेभ्यः पुरेभ्यश्च समागताः॥
मिसर्देशमहानद्यो मध्यस्थानादुपस्थिताः।
एकैकस्मात् समुद्राच्चैकैकस्मात् पर्व्वतादपि॥
१३ स्वीयनिवासिनां दोषात् चौणी तु ध्वंसयिष्यते।
क्रियाणां तैः कृतानाञ्च फलं तत् सम्भविष्यति॥
१४ पालय स्वप्रजा यष्ट्या स्वाधिकारगतं व्रजं।
कर्म्मिलान्तर्गतारण्ये पृथग्भूता वसन्तु ते।
प्राक्काल इव बाशाने गिल्यदे च चरन्तु ते॥
१५ निर्गच्छन्तं मिसर्देशात् त्वां यथादर्शयं पुरा।
तथैवाश्चर्य्यकर्म्माणि दर्शयिष्यामि मद्व्रजं॥
१६ लज्जिष्यन्ते स्वकर्त्तृत्वे कृत्स्ने तद् वीक्ष्य जातयः।
मुखं हस्तैश्च रोत्स्यन्ति वधिरीभूतकर्णिनः॥
१७ लेच्यन्ते सर्पवद् धूलिं भूमौ यद्वत् सरीसृपाः।
सकम्पाः स्वीयदुर्गेभ्यः करिष्यन्ति च निर्गमं॥
सोद्वेगाश्चाभियास्यन्त्यस्माकमीशं सदाप्रभुं।
तदानीं तव साक्षाच्च भविष्यन्ति भयातुराः॥
१८ क ईशस्तव तुल्यः स्यादपराधविमोचकः।
स्वाधिकारस्य शेषांशं प्रत्यधर्म्मस्य च क्षमी।
करुणाप्रियभावाच्च स्वक्रोधे न चिरोद्यमः॥
१९ अस्मानपि पुनर्व्वारमनुकम्पिष्यते भवान्।
अस्माकमपराधांश्च पादाभ्यां मर्द्दयिष्यते।
अस्माकं सर्व्वपापान्यगाधे क्षेप्स्यति सागरे॥
२० याकूबं प्रति सत्यं त्वमिब्राहीमे दयां कुरु।
त्वमाप्राक्कालतोऽस्माकं पितृभ्यः शपथेन यत्।
प्रत्यश्रौषीः फलं तस्येदं तेभ्यो दातुमर्हसि॥

नहूमस्य भविष्यद्वाक्यानि ।

---

१ प्रथमोऽध्यायः ।

१ सदाप्रभो र्महिम्नो वर्णनं ९ स्वप्रजासु दया शत्रुषु निग्रहश्च ।

नीनव्यां भारोक्तिः । इल्कोशीयनहूमस्य दर्शनसम्बलितो ग्रन्थः । १

ईर्ष्यालुः प्रतिकर्त्ता चेश्वरो ज्ञातः सदाप्रभुः । २
प्रतिकर्त्तास्ति कोपेन भयार्हश्च सदाप्रभुः ॥
स्वविपक्षान् समुद्दिश्य प्रतिकर्त्ता सदाप्रभुः ।
स्वशत्रूंश्च समुद्दिश्य चिरकोपान्वितोऽस्ति सः ॥
धीरः सदाप्रभुः क्रोधे सुमहान् विक्रमेण च । ३
अपराधं न कथञ्चित् सोऽनुजानात्यदण्डितं ॥
वात्या सदाप्रभो र्वर्त्म झञ्झायाश्चास्ति तत्पथः ।
मेघमाला तदीयस्य पादयुग्मस्य पांशवः ॥
सागरं भर्त्सयित्वैव परिशुष्कं करोति सः । ४
सरितः सकलास्तेन विधीयन्ते च निर्जलाः ॥
बाशनः कर्म्मिलाद्रिश्च म्लानतां परिगच्छतः ।
लिबानोनस्य पुष्पाणां तेजो म्लानञ्च जायते ॥
वेपन्त गिरयस्तस्माद् विगलन्त्युपपर्व्वताः । ५
पृथ्वी स्फुरति तत्साक्षात् वासिभिश्च समं जगत् ॥
तस्य कोपस्य साक्षात् कः संस्थातुं सक्षमो भवेत् । ६
तस्य क्रोधानलोत्तापादुत्थातुं कश्च शक्नुयात् ॥
अग्निवृष्टि र्यथा तद्वद् रोषस्तस्यावतार्य्यते ।
तदग्रे च विभिद्यन्ते पाषाणा अपि खण्डशः ॥
नित्यप्रभुः सुशीलोऽस्ति सङ्कटाहे स आश्रयः । ७
ये च तं शरणं यान्ति सोऽभिजानाति तान् जनान् ॥
स उच्छ्लज्जलौघेनास्याः स्थलं संहरिष्यति । ८
तमसा निजशत्रूंश्च दूरं प्रद्रावयिष्यति ॥
यूयं नित्यप्रभुं जेतुं सङ्कल्पं कं करिष्यथ । ९

निःशेषमेव संहारं साधयिष्यति स स्वयं।
नैव द्विकृत्व उत्पत्तिः सङ्कटस्य भविष्यति॥
१० कण्टका इव संश्लिष्टाः सुरया च मदान्विताः।
ग्रासिष्यध्वे यतो यूयं निःशेषं शुष्कनालवत्॥
११ नित्यप्रभो विरुद्धं यः कुसङ्कल्पस्य कल्पकः।
पापाधमस्य मन्त्री स उत्पन्नस्तव मध्यतः॥
१२ इत्थं नित्यप्रभु र्ब्रूते सम्पूर्णाः सन्ति यद्यपि।
बहवोऽपि मनुष्यास्ते तथापीदृग्दशान्विताः।
ते समुत्पाटयिष्यन्ते तदात्येष्यति दुर्द्दशा।
त्वां योऽहं क्लिष्टवान् सोऽहं न क्लेक्ष्यामि ततः पुनः॥
१३ तव स्कन्धेऽर्पितं तस्य युगं भङ्क्ष्याम्यहं ततः।
याभि र्बद्धोऽसि ता रज्जूश्छित्त्वा क्षेप्स्यामि च स्वयं॥
१४ तस्य शत्रो र्विरुद्धन्त्वादिदेशेदं सदाप्रभुः।
तव नाम्नोऽङ्कुरः कश्चिन्न पुनारोपयिष्यत।
विग्रहान् सिक्तमूर्त्तीश्च तवोच्छेत्स्यामि मन्दिरात्।
विधास्ये त्वच्छवागारम् अधमस्त्वं यतोऽभवः॥
१५ यो ददाति शुभां वार्त्तां सन्धे र्विश्रावयन् कथां।
पश्य पादद्वयं तस्य भाति पर्व्वतमूर्द्धसु॥
भो यिहूदे स्वपर्व्वाणि त्वमनुष्ठातुमर्हसि।
स्वप्रतिश्रुतवस्तूनि सर्व्वाण्युत्स्रष्टुमर्हसि॥
न पुनस्तव मध्येन याता पापाधमो यतः।
निःशेषं तस्य साकल्यं समुच्छिन्नं यतोऽभवत्॥

---

२ द्वितीयोऽध्यायः।

नीनवीजयिनां वर्णना।

१ त्वत्साक्षात् संस्थितो भङ्क्ता त्वं दुर्गं रक्ष यत्नतः।
समालोकय पन्थानं कटिदेशं दृढीकुरु।
स्वशक्तिं सबलीकर्त्तुमत्यन्तं प्रयतस्व च॥
२ याकूबस्य श्रियं यस्माद् इस्रायेलः श्रियं तथा।
तेजोयुक्तां पुनर्व्वारं विदधाति सदाप्रभुः॥

सम्यक् शून्यीकृता यस्मात् शून्यकारिनरैरुभौ ।
तयोर्द्राक्षालतायाश्च नाश्रिताः सर्व्वपल्लवाः ॥
वीराणां तस्य चर्म्माणि सन्ति रक्तीकृतानि हि । ३
वस्त्रैः सिन्दूरवर्णैश्च भान्ति विक्रमिणो नराः ॥
तस्यायोजनघण्टे च तद्रथा अयसोज्ज्वलाः ।
शक्तयश्च विचाल्यन्ते देवदारुविनिर्म्मिताः ॥
उन्मत्ता इव रथ्यासु तद्रथा विद्रवन्ति च । ४
प्रशस्तान् पुरमार्गांस्ते प्लवन्ते च महाजवाः ।
उल्कातुल्या प्रभा तेषां वज्राणामिव च त्वरा ॥
राज्ञाहूताः स्वशूरास्तु प्रस्खलन्ति स्वपङ्क्तिषु । ५
प्राचीरं सम्मुखीकृत्य शत्रुभि र्द्रुतगामिभिः ।
तदाक्रमणचेष्टातश्छादः स्थाप्यत ऊर्द्धतः ॥
गोपुराणि नदीतीरे स्थितान्युद्घाटितानि तैः । ६
प्रासादो राजकीयस्य विलीनत्वं प्रगच्छति ॥
हुत्सबेत्यभिधा राज्ञी हृतवस्त्रापनीयते । ७
तस्या दास्यश्च काकूक्तिमीरयन्ति कपोतवत् ।
कुर्व्वते च कराघातं स्वीयवक्षःस्थलेषु ताः ॥
जलपूर्णसरस्तुल्यादितोऽविद्यत नीनवी । ८
इदानीन्तु नरास्तस्याः कुर्व्वते प्रपलायनं ।
तिष्ठत तिष्ठतेत्युक्ते कोऽपि पश्चान्न पश्यति ॥
रूप्यं हरत हेमापि हरतेतीर्य्यते रवः । ९
कोऽप्यन्तो नास्ति कोषाणां रम्यरत्नचयस्य वा ॥
शून्या शून्योकृता साभूत् सर्व्वथा चावमर्द्दिता । १०
गलितं हृदयं तस्य जानुयुग्मञ्च चञ्चलं ।
सर्व्वश्रोणी च सङ्क्षुब्धा सर्व्वास्यं कालिमाकुलं ॥
सिंहानां वसतिः कुत्र युवकेशरिणां व्रजः । ११
विहारं तत्र सिंहश्च सिंही तस्याश्च शावकः ।
अकुर्व्वन् कोऽपि नासीच्च तत्र त्रासप्रदर्शकः ॥
स्वपुत्त्राणां प्रयोगाय मृगान् सिंहो व्यदारयत् । १२
रुद्धश्वासान् स्वभार्य्याणां कृतयथं वा न्यपातयत् ।
स्वगुहा भक्ष्यमांसैश्च गेहांश्चापूरयन्मृगैः ॥

१३ त्वां प्रत्युपैमि वक्तीदं वाहिनीनां सदाप्रभुः।
धूमसाच्च करिष्यामि तव सर्व्वरथानहं।
असिना ग्रासयिष्यन्ते सकलास्तव शावकाः॥
तव लुण्ठितवस्तून्यहमुच्छेत्स्यामि भूतलात्।
दूतानां तव शब्दश्च नैव श्राविष्यते पुनः॥

३ तृतीयोऽध्यायः।

नीनव्या विनाशस्य भविष्यद्वाक्यं।

१ हाहाकारं प्रत्योत्वेषा रक्तपातप्रिया पुरी।
अन्ततोऽनृतपहाराभ्यां तत्साकल्यं समाकुलं।
परद्रव्यापहारश्च तन्मध्यान्न निवर्त्तते॥
२ कशाघातस्य शब्दोऽयं चक्रघोषस्य च ध्वनिः।
धावनञ्च तुरङ्गाणां स्यन्दनानाञ्च वल्गितं॥
३ अश्वारोहिण आक्रान्तिः कृपाणस्य हणप्रभा।
दीर्घशूलस्य विद्युच्च हतानाञ्च महाचयः॥
शवानाञ्च महाराशिः कुणपानामसङ्ख्यता।
शेषाः स्खलन्ति पौराणां कुणपेषु च मानवाः॥
४ हेतुरेतस्य वेश्याया वेश्यावृत्तेरनेकता।
सम्यक् कान्तिविशिष्टा सा मायाविल्वे विशारदा॥
स्ववेश्यावृत्तिदाच्येण जातीनामपि विक्रयं।
मायाविल्वाच्च गोष्ठीनां विक्रयं समपादयत्॥
५ त्वां प्रत्युपैमि वक्तीदं वाहिनीनां सदाप्रभुः।
त्वदस्त्रान्तं विहृत्याहं पिधास्यामि तवाननं॥
नग्नतां तव जातिभ्यो दर्शयिष्याम्यहं तदा।
राष्ट्राणाञ्च मनुष्येभ्यस्तावकीनावमाननां॥
६ विरूपां त्वां करिष्याम्याक्षिप्य घृणमलं त्वयि।
त्वाञ्च संस्थापयिष्यामि सर्व्वेषां दृष्टिगोचरे॥
७ यस्त्वां द्रक्ष्यति स त्वत्तः प्रपलाय्य वदिष्यति।
ध्वंसिता नीनवी तस्याः कृते को विलपिष्यति।
कुत्र वासादयिष्यामि सान्त्वनाकारिणस्तव॥

त्वं किं नोयामनाच्छ्रेष्ठा सासीना सरितां तटे। ८
अद्भिरासीच्च संवीता तत्प्राकारश्च सागरः।
निर्म्मितश्च समुद्रेण तत्प्राचीरमविद्यत॥
अपारञ्च बलं तस्या कूशमिस्रीयमानवाः। ९
आसंस्तस्याः सहायाश्च पूटलूबीयवंशजाः॥
निर्व्वासं प्रस्थिता सापि दासीभूता च वन्दिवत्। १०
निक्षिप्ताः सर्व्वरथ्यायाः कोणे तच्छिशवो हताः।
गुटिका पातिता सर्व्वांस्तस्या मान्यनरानधि।
महल्लोकाश्च तत्रत्याः सर्व्वे शृङ्खलयन्त्रिताः॥
त्वञ्चापि मत्ततां गत्वात्मानं संगोपयिष्यसि। ११
त्वमपि द्वेषिणो भीत्वाश्रयं प्राप्तुं यतिष्यसे॥
तव दुर्गाणि सर्व्वाणि साग्रुपक्वफला द्रुमाः। १२
चालितानां फलं तेषां भोक्तुरास्ये पतिष्यति॥
त्वन्मध्ये त्वत्प्रजाः पश्य वर्त्तन्ते योषितो यथा। १३
त्वद्देशीयपुराणाञ्च द्वाराणि द्वेषिणां कृते।
जातान्युद्घाटितान्येवाग्निदग्धान्यर्गलानि च॥
अवरोधनकालाय जलमुत्तोल्यतां त्वया। १४
स्वीयदुर्गाणि सर्व्वाणि क्रियन्तां सुदृढानि च।
पङ्कं प्रविश्य पादाभ्यां कर्द्दमं सम्मृदान च।
इष्टकापचनस्थानम् दृढीकर्त्तुं यतस्व च॥
तत्राशिष्यति वह्निस्त्वां खड्गस्त्वाञ्च लविष्यति। १५
पतङ्गैरिव ताभ्यां त्वं तदानीं ग्रासयिष्यसे॥
त्वं किं पतङ्गयूथस्य समानो जनसङ्ख्यया।
त्वं किं शलभवाहिन्यास्तुल्यो मानवसङ्ख्यया॥
नभसस्तारकाभ्योऽपि बहवो बणिजस्तव। १६
सर्व्वं पतङ्गयूथस्तु पतन् हृत्वोड्डयिष्यते॥
तुल्याः शलभयूथेन तव वीराः किरीटिनः। १७
तव सेनापतिश्रेष्ठा असङ्ख्येयाः पतङ्गवत्॥
पतङ्गा इव शीतस्य दिने ते प्रावराश्रिताः।
सूर्य्योदये पलायन्ते ज्ञानातीतस्थलं गताः॥
भो असूरमहीपाल सुषुप्तास्तव पालकाः। १८

नरा आदरणीयास्ते सेवन्ते विश्रमं भुवि ॥
पर्व्वतेषु विकीर्णाश्च पर्य्यटन्ति जनास्तव ।
तेषां सङ्ग्रहकारी च नरः कोऽपि न विद्यते ॥
१९ त्वङ्क्षतोऽनुपशाम्योऽस्ति तवाघातो व्यथाकरः ।
तव वार्त्तां नराः श्रुत्वा करतालं प्रकुर्व्वते ।
तव हिंसा यतः कस्योपरि नित्यं न चालिता ॥

हबक्कूकस्य भविष्यद्वाक्यानि ।

१ प्रथमोऽध्यायः ।

१ मानवसमाजस्य पापानां निर्णयः ५ तेषां दण्डः १२ दुर्जनेन दण्डदानस्य कथनञ्च ।

१ हबक्कूको भाववादी यद्दृष्टवांस्तस्य भारोक्तिरियं ।
२ आर्त्तनादमहं कुर्व्वे स तु न श्रूयते त्वया ।
त्वामुद्दिश्य च दौरात्म्यात् क्रन्दे त्वन्तु न रक्षसि ।
ईदृशो नियमः स्थाता कतिकालं सदाप्रभो ॥
३ दर्शयन् मामधर्म्मं त्वमायासं वीक्षसे कुतः ।
विनाशोपद्रवौ चापि कुतो मत्सम्मुखं स्थितौ ।
विरोधो जायते भूयो विसंवाद उदेति च ॥
४ व्यवस्थापि ततः स्तब्धा विचारोऽतथ्यसम्भवः ।
यतो हेतो नरै दुष्टै र्धार्म्मिकः परिवेष्टितः ।
तस्माद् विचारनिष्पत्ति र्वक्रीभूतोपजायते ॥
५ परजाती र्निरीक्षध्वं कुरुध्वञ्चावलोकनं ।
महाश्चर्य्यञ्च जानीत जायध्वञ्च चमत्कृताः ॥
युष्मत्काले यतः कार्य्यमेकं कारिष्यते मया ।
तस्मिन् विज्ञापिते यूयं विश्वासं न करिष्यथ ॥
६ यतोऽहं पश्य कल्दीयानुत्थापयितुमुद्यतः ।
जातिमुग्रां त्वरायुक्तां पृथ्व्याः पृथुत्वचारिणीं ।
परकीयनिवासानामधिकारापहारिणीं ॥
७ घोरा भीमा च सा जातिस्तस्या न्यायविचारणं ।

उन्नतिसाधनं तस्या उभयञ्चात्मसम्भवं ॥
तदश्वाश्चित्रकेभ्योऽपि सन्त्यतिद्रुतगामिनः । ८
सायन्तनवृकेभ्योऽप्युग्रस्वभावा भवन्ति च ॥
प्लवन्ते तद्धयारूढा आगच्छन्तश्च दूरतः ।
डयन्ते ते हयारूढा भक्ष्यार्थ्युत्क्रोशवद् द्रुताः ॥
दौरात्म्यसाधनायैव तत्साकल्यमुपस्थितं । ९
अग्रं याम इदं तेषामौत्सुक्यं दृष्टिसूचितं ।
गृह्णन्ति सिकतावत् ते बहुलां वन्दिसंहतिं ॥
राज्ञो निन्दति सा जाति र्हसति क्षितिपानधि । १०
हसन्ती सर्व्वदुर्गञ्च जयत्याचित्य मृत्तिकां ॥
पश्च सा वायुवद् वाति प्रगच्छन्ती तु दुष्यति । ११
निजशक्तिरियं यस्मात् स्वेश्वरो मन्यते तया ॥
किं न प्राक्कालतोऽसि त्वमीश्वरो मे सदाप्रभुः । १२
पावनो मम किं न त्वं न मरिष्यामहे वयं ॥
सा त्वयैव विचारार्थं नियुक्ता भो सदाप्रभो ।
सा दोषस्य प्रमाणाय स्थापिता भो धर त्वया ॥
शुचिलोचन एव त्वं दुर्वृत्तिं द्रष्टुमक्षमः । १३
आयासे चिरदृष्टिश्च त्वया कर्त्तुं न शक्यते ॥
विश्वासघातकेषु त्वं चिरदृष्टिं कुतोऽकरोः ।
दुर्जनाद् धार्म्मिकः श्रेष्ठस्तेन तु ग्रस्यते यदा ।
कुतस्त्वं मौनमालम्ब्य तदानीमवतिष्ठसे ॥
एतेनाब्धिस्थमत्स्यानां नरं तुल्यं करोषि हि । १४
तुल्यमराजकाणां वा कीटानां विदधासि तं ॥
जलतः सर्व्वमत्कृष्य वडिशेन स दुर्जनः । १५
सङ्गृह्णाति निजानाये स्वजाले सञ्चिनोति च ।
ततो हेतोः स आनन्दादुल्लासं प्रकरोति च ॥
ततो हेतो र्निजानायं बलिदानेन सेवते । १६
निजजालं समुद्दिश्य धूपदाहं करोति च ।
यतस्ताभ्यां स तैलांशी तद्भक्ष्यञ्च घृतप्लुतं ॥
एवम्भूते किमानायं शून्यीकुर्य्यात् स सर्व्वदा । १७
नित्यं जाती र्निहन्तुं वा प्रवर्त्तेत कृपां विना ॥

२ द्वितीयोऽध्यायः।

१ भाविघटनादर्शनाय बिश्वासेन प्रतीक्षणस्यावश्यकता ५ दिग्विजयेच्छाकारणात् कल्दीयानां दण्डनं ९ लोभकारणात् तेषां दण्डनं १२ निष्ठुरताकारणात् तेषां दण्डनं १५ मत्तताकारणात् तेषां दण्डनं १८ सुरार्च्चाकारणाद् दण्डनञ्च।

१ तिष्ठन् मत्प्रहरिस्थाने दुर्गस्योपर्य्यवस्थितः।
मयि किं वक्ष्यते तेन मत्खेदोक्तेः किमुत्तरं।
मया कर्त्तव्यमेतच्च प्रतीक्षिष्ये दिदृक्षया॥
२ तदा दत्त्वोत्तरं मह्यं जगादेदं सदाप्रभुः।
दर्शनं लिख सुस्पष्टं फलकेषु च तत् कुरु।
धावतापि मनुष्येण पठितुं तच्च शक्यतां॥
३ अधुनाप्युचितं कालं दर्शनं तत् प्रतीक्षते।
परिणामाभिकाङ्क्षेव न तु मिथ्योक्तिभाषि तत्॥
यदिस्यात् तद् विलम्बेत तर्ह्यपेक्षस्व तत्कृते।
यतः सेत्स्यत्यवश्यं तत् न च स्थास्यत्यनागतं॥
४ पश्य गर्व्वितमेवास्यान्तरे न सरलं मनः।
जीवनस्याधिकारी तु स्वविश्वासेन धार्म्मिकः॥
५ अपरं नात्र सन्देहो मदो विश्वासघातकः।
वीर आत्माभिमान्यस्ति स्वगृहं स न सेवते॥
लोभो विस्तारितस्तेनाकारि पातालवत् पृथुः।
स्वयञ्चाटप्यभावः स साक्षात् कालान्तको यथा॥
सर्व्वजातीश्च सङ्गृह्य प्रकरोति स आत्मसात्
सर्व्वदेशिन एकत्र कृत्वा वश्यान् करोति च॥
६ तैः सर्व्वैस्तद्विरुद्धं किं वादो नोद्भावयिष्यते।
किं न सूत्रमयं काव्यं गूढोक्तीनाञ्च सङ्ग्रहं॥
यथा धिक् परिक्त्येन धनसंवर्द्धकं नरं।
कतिकालं स तत् कुर्य्यात् धिक् तं बन्धकभारिणं॥
७ किं नोत्थास्यन्त्यकस्माद्धि त्वदुत्पीडकमानवाः।
प्रबुद्धाश्च भविष्यन्ति तव क्लेशकरा नराः।
तदानीं स्वयमेव त्वं तेषां लोप्त्रं भविष्यसि॥
८ त्वया मूषितसर्व्वस्वाः सञ्जाता बहुजातयः।

जातीनां कृत्स्नशेषस्तु हृतस्वं त्वां करिष्यति ॥
हेतुरस्य मनुष्याणां कृतं शोणितसेचनं ।
पीडनञ्च भुवः पुर्य्याः सर्व्वेषाञ्च निवासिनां ॥
धिक् नरं तं कुलाभस्य स्वकुलाय प्रदायिनं । ९
क्लेशहस्ताच्च रक्षार्थमुच्चे नीडविधायिनं ॥
फलं त्वन्मन्त्रणायास्तु स्वकुलस्यावमानना । १०
संहाराद् बहुजातीनां त्वं स्वप्राणेषु पातकी ॥
प्रस्तरः कुड्यमध्यस्थो रोदनं कुरुते यतः । ११
काष्ठमध्यस्थकीलेन दीयते च तदुत्तरं ॥
धिक् नरं नररक्तेन पुरनिर्म्माणकारिणं । १२
धिगन्यायविधानेन नगरस्थापकं नरं ॥
पश्य किं न चकारेदं वाहिनीनां सदाप्रभुः । १३
फलतो वह्निमात्रायानुष्ठितो जातिभिः श्रमः ।
भक्तस्यावस्तुमात्राय जनवृन्दैः क्लमातुरैः ॥
यस्मादापो यथा कृत्स्नं छादयन्ति महार्णवं । १४
तथा नित्यप्रभोर्द्युत्या ज्ञानं क्ष्मां पूरयिष्यति ॥
धिक् त्वां यः पाययन् बन्धून् भाण्डं भृत्वा स्वमन्युना । १५
नग्नतां वीक्षितुं तेषां मदोन्मत्तान् करोषि तान् ॥
अहत्वा गौरवेण त्वं परितृप्तोऽस्यवज्ञया । १६
त्वयापि क्रियतां पानं स्वलज्जा च प्रदर्श्यतां ॥
भाण्डो नित्यप्रभो र्हस्ते स्थितस्त्वामप्युपैष्यति ।
तव सर्व्वप्रतापे च वान्तद्रव्यं पतिष्यति ॥
अत्याचारो लिबानोने कृतस्त्वां छादयिष्यति । १७
तेन वित्रासितानाञ्च पशूनामपि मारणं ॥
अस्य हेतु र्मनुष्याणां कृतं शोणितसेचनं ।
पीडनञ्च भुवः पुर्य्याः सर्व्वेषाञ्च निवासिनां ॥
उपकारः कदाचित् को लब्धस्तक्षितविग्रहात् । १८
किमर्थं तस्य निर्म्माता कृतवांस्तस्य तक्षणं ॥
कं चकारोपकारं वा धातुमूर्त्ति र्म्मृषागुरुः ।
कुतः स्वरचिते द्रव्ये रचकस्तस्य विश्वसेत् ।
कस्माच्चातः प्रतिच्छाया मूका वा निर्म्मिमीत सः ॥

१९ धिक् नरं काष्ठमुद्दिश्य प्रबुध्यस्वेति यो वदेत्।
जडाश्मानं समुद्दिश्य जागृहीति च यो गदेत्॥
किं गुरुः स भवेत् पश्य रूप्यस्वर्णैः स संवृतः।
श्वासवायोश्च लेशोऽपि तस्य मध्ये न विद्यते॥
२० स्वप्रासादे पवित्रे तु विद्यमानः सदाप्रभुः।
तस्य साक्षाज्जगत् कृत्स्नं तूष्णीम्भूयावतिष्ठतां॥

३ तृतीयोऽध्यायः।

१ ईश्वरस्य पूर्ववत् स्वप्रजास्वनुग्रहः १८ तस्मिंश्च भाववादिनो विश्वसनं।

१ हबक्कूकस्य भाववादिनः प्रार्थना। स्वरो व्याकुलतासूचकः।
२ तव वार्त्तामहं श्रुत्वा भयार्त्तोऽस्मि सदाप्रभो।
स्वकार्य्यं वर्षपर्य्याये जीवय त्वं सदाप्रभो।
ज्ञापय वर्षपर्य्याये कोपकाले कृपां स्मर॥
३ ईश्व आयाति तैमानात् पावनः पारणाद्रितः। सेला।
व्योम तत्प्रभयाच्छन्नं पूर्णा तच्छंसया धरा॥
४ राजते दीप्तिवत्तेजस्तत्करावंशुमालिनौ।
प्रच्छन्नो विद्यते तत्र स्थाने तस्य पराक्रमः॥
५ मारी गच्छति तस्याग्रे तं ज्वरश्चानुवर्त्तते।
६ स तिष्ठन् मेदिनीं माति पश्यन् जातीर्धुनाति च॥
भिद्यन्ते प्राक्तनाः शैलाः सीदन्त्यादिमभूधराः।
आदिकाले यथा तद्वत् कुरुते स गमागमौ॥
७ क्लेशाक्रान्तानि कूशस्य निरीक्षे शिविराण्यहं।
मिदियानाख्यदेशस्योद्विज्यन्ते पटमण्डपाः॥
८ नदीनां विपरीतं किं प्राज्वलद् भो सदाप्रभो।
नदीनां विपरीतं किममर्षः प्राज्वलत् तव।
समुद्रस्य विरुद्धं वा त्वत्कोपः किमवर्त्तत॥
तन्निमित्तं निजाश्वेष्वारूढस्त्वं किं प्रगच्छसि।
स्वरथेषु समासीनो जयरूपेषु भासि च॥
९ विवृतस्तव चापोऽस्ति वाग्दण्डा निश्चिताः शपैः। सेला।
त्वया स्रोतस्वतीसङ्घं खण्डं भूमि र्विदार्य्यते॥

भूध्रास्त्वां वीक्ष्य यात्यन्ते धारासारो विमुच्यते । १०
स्वरवच्चेरयत्यब्धिरूर्द्धमञ्जलिमुन्नयन् ॥
सूर्य्यचन्द्रौ निजावासं प्रविष्टौ तत्र तिष्ठतः । ११
पततां तव तीराणामालोकात् साध्वसान्वितौ ।
संत्रस्तौ तव शूलस्य विद्युत्तुल्यप्रकाशतः ॥
त्वं क्रुद्धा चरसि क्षौणीं जातो मर्द्दासि मन्युना । १२
निर्गतः स्वप्रजास्त्रातुं स्वाभिषिक्तञ्च रक्षितुं ॥
दुर्जनस्य गृहाच्छीर्षं भित्त्वा त्वञ्च क्षिपस्यधः । १३
वेश्मनः कण्ठपर्य्यन्तं कुड्यं कुर्व्वन्ननावृतं ॥ सेला ॥
मां विध्वातुञ्च झञ्झेवागतास्तस्य जनाः पुरा । १४
रहो दीनं ग्रसिष्यन्त इवोल्लासमकुर्व्वतः ।
तेषां मूर्द्धस्तु तस्यैव दण्डैस्त्वं व्यद्धमुद्यतः ॥
त्वमब्धिं चरसि स्वाश्वैर्बृहज्जलानामपां चयं ॥ १५
अहं तच्छ्रुतवांस्तस्मादुदरं कम्पते मम । १६
अधरौ मम तच्छब्दात् संघट्टेते पुनः पुनः ।
क्षयोऽविशन्ममास्थीनि स्वाधस्तादहमुद्विजे ॥
यतो यावत् स्वजातीयान् नाक्रमिष्यति नाशकः ।
सङ्कटस्य दिनं तावत् प्रतीक्षिष्ये निरुद्यमः ॥
हा उडुम्बरवृक्षोऽपि न भविष्यति पुष्पितः । १७
द्राक्षाणाञ्च फलोत्पत्तिः कापि नैव भविष्यति ॥
जितवृक्षस्य तेजोऽपि निष्प्रभावं भविष्यति ।
भक्ष्यद्रव्यं न किञ्चिद् वा क्षेत्रैरुत्पादयिष्यते ॥
मेषशालास्थमेषाणामुच्छेदः सम्भविष्यति ।
गावो नैवावशेक्ष्यन्ते गोशालासु च केचन ॥
तञ्ज्ञात्वाप्यहमुल्लासं करिष्यामि सदाप्रभौ । १८
आह्लादञ्च करिष्यामि मम त्राणाकरेश्वरे ॥
मम शक्तिस्वरूपोऽस्ति प्रभुरेव सदाप्रभुः । १९
हरिणीपादतुल्यं स विधत्ते चरणौ मम ।
मदीयोच्चस्थले मांञ्च स स्वयं गमयिष्यति ॥
मदीयवीणावाद्यनियन्त्रे दातव्यं ।

सफनियस्य भविष्यद्वाक्यानि ।

१ प्रथमोऽध्यायः ।

नानापापकारणाद् यिहूदादेशस्य विरुद्धम् भाविदण्डस्य ज्ञापनं ।

१ हिष्कियस्य पौत्रोऽमरियस्य पुत्रो यो गिदलियस्तस्य पुत्रं सफनियं
प्रति यिहूदाराजस्यामोनसुतस्य योशियस्य राजत्वकाले सदाप्रभोरिदं
वाक्यं प्रादुरभूत् ।

२ संहारं यत्नतः कुर्व्वन् सकलं भूमिपृष्ठतः ।
संहर्त्तुमुद्यतोऽस्मीति व्याजहार सदाप्रभुः ॥
३ मानवान् संहरिष्यामि तैः सार्द्धञ्च पशूनपि ।
संहरिष्यामि शून्यस्थान् खगान् मीनांश्च सिन्धुजान् ॥
नरान् विघ्नस्वरूपांश्च दुष्टताचारिभिः समं ।
नरं छेत्स्यामि भूपृष्ठादिति ब्रूते सदाप्रभुः ॥
४ यिहूदा उपरिष्टाच्च यिरूशालमवासिनां ।
सर्व्वेषामुपरिष्टाच्चाहं प्रसार्य्य करं निजं ।
उच्छेत्स्यामि स्थलादस्मादुच्छिष्टं बालदेवतः ।
आख्यां पुरोहितानाञ्च तैः सार्द्धं याजकानपि ॥
५ मानवान् गृहपृष्ठेषु व्योमसैन्याभिपूजकान् ।
सर्व्वान् नित्यप्रभो र्नाम्ना नाम्ना स्वेष्टनृपस्य च ।
उभयो र्नामधेयाभ्यां शपमानानुपासकान् ॥
६ नरान् नित्यप्रभोः पश्चाद् गमनादपसारिणः ।
शाश्वतप्रभुमन्वेष्टुं ध्यातुञ्चासम्मतान् नरान् ॥
७ प्रभो र्नित्यप्रभोः साक्षात् सकलाः सन्तु नीरवाः ।
यत आसन्नमेवास्ति तस्य नित्यप्रभो र्दिनं ॥
यज्ञस्यायोजनं यस्मात् कृतवान् स सदाप्रभुः ।
आत्मनिमन्त्रितानाञ्च पावनं तेन साधितं ॥
८ तच्च नित्यप्रभो र्यज्ञं यस्मिन् काले भविष्यति ।
तदा देशाधिपानाञ्च राजपुत्त्रगणस्य च ।

विजातीयेन वेश्येन वेष्टितस्य नरस्य च।
सर्व्वस्याहं करिष्यामि सूक्ष्मं तत्त्वावधारणं॥
शिलाश्च स्रवमानो यः कश्चित् स्वीयप्रभो गृहं। ९
दौरात्म्यच्छलयोर्लाभैः पूर्णं कर्त्तुं प्रयत्नवान्।
दिने तस्मिन् करिष्यामि तस्य तत्त्वावधारणं॥
नित्यप्रभुः पुन ब्रूते दिने तस्मिन्नुदेष्यति। १०
मत्स्यद्वाराद् विलापोक्तिः पुरप्रान्ताच्च रोदनं।
उपपर्व्वतराजीतो महाभङ्गस्य च ध्वनिः॥
हाहाकारं कुरुध्वञ्च यूयं हट्टनिवासिनः। ११
किनानीयबणिज्जातिः हत्वा संहारिता यतः।
उच्छिन्नाश्च नराः सर्व्वे रौप्यभारेण भारिणः॥
अधिकन्तु दिने तस्मिन् प्रदीपान् ज्वालयन्नहं। १२
करिष्याम्यनुसन्धानं सुसूक्ष्मं यिरूशालमः॥
तदा चाक्षुब्धकल्कस्योपरि निर्वृतिसेविनां।
मानवानां करिष्यामि सूक्ष्मं तत्त्वावधारणं॥
न हितं नाहितं वापि विदधाति सदाप्रभुः।
इदं वाक्यं मनुष्यास्ते भाषन्ते हृदयान्तरे॥
नराणान्तु धनं तेषां परलोप्त्रं भविष्यति। १३
ध्वंसितानि भविष्यन्ति तेषां सर्व्वगृहाणि च॥
कृते तै गृहनिर्म्माणे न निवत्स्यन्ति तत्र ते।
द्राक्षाक्षेत्राणि कृत्वापि तै र्न पायिष्यते रसः॥
सुप्रत्यासन्नमेवास्ति दिनं नित्यप्रभो र्महत्। १४
तत् प्रत्यासन्नमेवास्ति तच्चातीव त्वरान्वितं॥
असौ नित्यप्रभोस्तस्य दिनस्य श्रूयते रवः।
युद्धवीरेण चीत्कारस्तत्र तीव्र उदीर्य्यते॥
सोऽहः कोपाह एवास्ति कष्टसङ्कोचयोरहः। १५
ध्वंसविध्वंसयोश्चाहस्तिमिरध्वान्तयोरहः।
मेघानां दिनमेवास्ति नीलाभ्राणाञ्च तद् दिनं॥
दृढानां नगराणाञ्च तल्पानाञ्च नभःस्पृशां। १६
वैपरीत्येन तौर्य्यस्योच्चनादस्य च तद् दिनं॥
नृणां कष्टं विधास्ये च ते क्रमिष्यन्ति चान्धवत्। १७

नित्यप्रभो विरुद्धं तैः पापाचारः कृतो यतः।
धूलिवत् क्षेप्स्यते रक्तं तेषां मांसञ्च किट्टवत्॥
१८ नित्यप्रभोश्च कोपाह्नि तेषामुद्धारसाधने।
समर्थं न सितं तेषां न स्वर्णं वा भविष्यति।
कृत्स्ना ग्रासिष्यते क्षौणी तस्येर्ष्यायाश्च वह्निना॥
यतो निःशेषसंहारं सर्व्वेषां भूनिवासिनां।
विह्वलत्वेन संयुक्तं विनाशं स करिष्यति॥

२ द्वितीयोऽध्यायः।

१ विविधपापकारणाद् अनुतापाय निवेदनं ४ पिलेष्टीयानां दण्डनं ८ मोयाबस्य दण्डनं १२ कूशीयाशूरीयाणां दण्डनञ्च।

१ जनानां सङ्घं कृत्वा त्वं समायातुमर्हसि।
जाते क्रतुमनभ्यस्ते विलम्बश्चात्र मा कुरु॥
२ दण्डाज्ञा साध्यते यस्मात् तुषवत् त्वरते दिनं।
नित्यप्रभोश्च कोपाग्निस्तापो युष्मानुपैष्यति।
नित्यप्रभोश्च कोपाह्नो युष्मानभ्याक्रमिष्यति॥
३ भो देशवासिनो नम्रा अन्वेषध्वं सदाप्रभुं।
निजाचारेण युष्माभिः पालितं तस्य शासनं॥
अन्वेषध्वं पुन र्धर्म्ममन्वेषध्वञ्च नम्रतां।
किंस्वित् प्रगोपयिष्यध्वे संरम्भाह्नि सदाप्रभोः॥
४ घसा स्थास्यति सन्त्यक्ता विध्वंसस्थानमस्किलान्।
दिवापासिष्यतेऽस्दोदम् इक्रोणं कृष्यते हलैः॥
५ धिग् युष्मानब्धितीरस्थप्रदेशस्य निवासिनः।
धिक् करेतीयजाते त्वां भो पिलेष्टीयभूः किनान्॥
युष्माकं प्रतिकूलं हि वाक्यमस्ति सदाप्रभोः।
त्वां विनाश्य करिष्याम्यहं निवासिविवर्जितां॥
६ अब्धितीरस्थदेशश्च गोप्रचारो भविष्यति।
पूर्णो गोरक्षिणां खातै र्मेषाणाञ्च व्रजाजिरैः॥
७ यिहूदाकुलशेषस्य स प्रदेशो भविष्यति।
तत्रैव स्वीयमेषाणां चारयिष्यन्ति ते व्रजान्।

सन्ध्यायां शाययिष्यन्त्यखिलेनास्य गृहेषु च ॥
यतस्तेषु कृपादृष्टिमीशस्तेषां सदाप्रभुः।
कृत्वा वन्दिदशां तेषां परावृत्तां करिष्यति ॥
मोयाबोऽश्रौषमाक्षेपम् अम्मोनो दुर्वचांसि च। ८
आच्छिन्ना मत्प्रजास्ताभ्यां तासां देशश्च धर्षितः ॥
इस्रायेलो य ईशः स वाहिनीनां सदाप्रभुः। ९
ततो हेतोरिदं ब्रूते जीवेयं चेदहं स्वयं।
तद्ध्रुवश्यं सिदोमस्य तुल्यो मोयाब् भविष्यति।
सम्भविष्यन्त्यमोरायास्तुल्याश्चाम्मोनवंशजाः ॥
देशः कण्टकराष्ट्रश्च लवणस्य खनिस्थलं।
अनन्तकालमुत्सन्नं स्थानञ्चैव भविष्यति ॥
प्रजानां मम शेषांशस्तेषां वित्तं हरिष्यति।
तेषां रिक्थञ्च लप्स्यन्ते मज्जातेः शेषमानवाः ॥
अयं तेषां स्वदर्पस्य परिवर्त्तो भविष्यति। १०
यतो हेतो मनुष्यास्ते वाहिनीनां सदाप्रभोः।
प्रजानां प्रातिकूल्येनाकार्षुर्निन्दनधर्षणे ॥
तेषान्तु प्रातिकूल्येनातीव भीमः सदाप्रभुः। ११
पृथिव्याः सर्व्वदेवानां स क्षयं साधयिष्यति ॥
तदानीं परजातीनां सर्व्वद्वीपनिवासिनां।
स्वीयस्थानत एकैकस्तस्मै प्रणिपतिष्यति ॥
युष्माकञ्चापि कूशीया हन्तव्या मेऽसिना जनाः ॥ १२
उत्तरस्या विरुद्धञ्च स्वीयहस्तं प्रसार्य्य सः। १३
अशूरीयस्य राज्यस्य विनाशं कर्त्तुमर्हति।
नीनवीञ्च विधत्तां स ध्वस्तां शुष्कां मरूपमां ॥
यूथास्तत्र शयिष्यन्ते सङ्घशः सर्व्वजीविनः। १४
रात्रौ तत्स्तम्भशीर्षेषु स्थास्यतः कङ्कशल्यकौ।
गानकारिखगानाञ्च गवाक्षे श्रोष्यते रवः।
शिलायां स्थास्यते ध्वंस एरस्काष्ठस्य पातनात् ॥
इयं सा नगरी पूर्व्वं यासीदुल्लासकारिणी। १५
निर्भयं सा सुखासीना मनसेदमभाषत।
अहमेवास्मि मद्भिन्नापरा कापि न विद्यते ॥

कथं सा ध्वंसिता जाता पशूनां शयनस्थलं।
तत्सान्निध्येन यः कश्चिद् गमनं प्रकरिष्यति।
सीत्कारमीरयित्वा स स्वहस्तं चालयिष्यति॥

३ तृतीयोऽध्यायः।

१ यिरूशालमं प्रति तिरस्करणं ८ इस्रायेलो मुक्तेरपेक्षाकथनं १४ ईश्वरकृतपरित्राणे आनन्दनस्य कथनञ्च।

१ धिक् तां विद्रोहिणीं भ्रष्टामुपघातप्रियां पुरीं।
२ न तया श्रुतमाज्ञानं न गृहीतञ्च शासनं॥
न वा नित्यप्रभौ सत्यो विश्वासोऽनुष्ठितस्तया।
स्वेश्वरस्य समीपं वा गमनं न कृतं तया॥
३ तन्मध्यस्था जनाध्यक्षाः सिंहा गर्जनकारिणः।
तस्या विचारकर्त्तारः सन्ति सायन्तना वृकाः।
तैः प्रातःकालपर्य्यन्तं नैकमस्थ्यवशेष्यते॥
४ तस्याश्च भाववक्तार आत्मश्लाघिप्रतारकाः।
तस्या ये याजकास्ते च पवित्रद्रव्यदूषकाः।
व्यवस्थाञ्च समुद्दिश्यात्याचारं ते प्रकुर्व्वते॥
५ धर्म्मवानेव तस्यास्तु मध्यवर्त्ती सदाप्रभुः।
नान्यायः क्रियते तेन प्रातः प्रातः स्वशासनं।
दीप्त्यां संस्थाप्यते तेन नैककृत्वोऽनुपस्थितं।
लज्जितुन्तु न शक्नोत्यन्यायाचारप्रियो जनः॥
६ मया जातय उच्छिन्नास्तासां तल्पा विनाशिताः।
रथ्या विध्वंसितास्तासां कोऽपि तत्र न गच्छति।
पुर्य्यो भग्ना नरैस्त्यक्ता वर्जिताश्च निवासिभिः॥
७ मयोक्तं केवलं मत्तो भीत्वा गृह्णात्वियं विधिं।
तर्हि तद्वसतिस्थानं नैवोच्छिन्नं भविष्यति।
मयास्या वैपरीत्येन नान्यत् किञ्चिन्निरूपितं॥
निश्चितन्तु जनास्तस्या यतमाना अतन्द्रितं।
स्वीयकर्म्मसु सर्व्वेषु नष्टाचारमकुर्व्वत॥
८ अतो मां सम्प्रतीक्षध्वं ब्रवीतीदं सदाप्रभुः।
लुण्टनार्थं ममोत्थानदिनं यावत् प्रतीक्षिणः

इदं मच्छासनं यस्मात् करिष्ये जातिसम्वयं।
राज्यानि सङ्कुचीष्याम्यखिलं क्रोधानलस्य च।
चक्षुतां क्षीयमन्युस्व तेषां सेच्यामि मूर्धसु।
मदीर्ष्यावह्निना हत्वा क्षोणी ग्रासिष्यते यतः॥
तदानीं स्मुचिमोष्ठन्तु वर्त्तयिष्यामि जातिषु। ९
सर्व्वा नित्यप्रभो नाम्ना ताः करिष्यन्ति चार्थनां।
एकस्कन्धेन तस्यैव सेवनं कर्त्तुमुत्सुकाः॥
कूशदेशीयसिन्धूनां पाराचोपासकान् मम। १०
ता आनेष्यन्ति मज्जातिं विकीर्णाश्चोपहारवत्॥
याभि मद्वैपरीत्येन त्वं सञ्जातापराधिनी। ११
क्रियाणां कारणात् तासां त्वं न लज्जिष्यसे तदा॥
उच्छेत्स्यामि यतस्त्वत्तोऽहं दर्पोल्लसितांस्तदा।
न दर्श्यंय पुनर्व्वारं यूयं पूतगिरौ मम॥
त्वन्मध्य शेषयिष्याम्यहं जातिं दुःखिनीं कृशां। १२
सा तु नित्यप्रभो नाम्नि विश्वासं प्रकरिष्यति॥
इस्रायलः स शेषांशो नैवान्यायं करिष्यति। १३
नानृतं ते वदिष्यन्ति नैव तेषां मुखेषु वा।
आविष्कारिष्यते काचिद् रसना वञ्चनप्रिया॥
चरतस्तान् शयानान् वा कोऽपि न त्रासयिष्यति॥
आनन्दात् क्रियतां गानं भो सियोन्दुहितस्त्वया। १४
भा इस्रायेल् त्वया चापि हर्षनाद उदीर्य्यतां।
भो यिरूशालमः कन्ये हृष्य प्रोल्लस कामतः॥
अपसारितवानेव त्वद्दण्डाज्ञाः सदाप्रभुः। १५
यदश्चावस्करं तद्दत् त्वच्छत्रुं सोऽपसृतवान्॥
विद्यते तव मध्ये चेस्रायेल्राजः सदाप्रभुः।
अनिष्टस्य पुनर्व्वारं नैव दर्शिष्यते त्वया॥
यिरूशालम् दिने तस्मिन् मा भैषीरिति वच्यते। १६
शैथिल्यं मा प्रगच्छेदा भो सियोन् त्वत्करद्वयं॥
त्वन्मध्ये विद्यते वीर ईश्वरस्ते सदाप्रभुः। १७
साधयिष्यति स त्राणं त्वय्यानन्दं करिष्यते।
स्वप्रेम्ना सोऽधुना मैानी त्वयि हृष्टा तु गास्यति॥

१८ जनान् पर्व्वसु शोकार्त्तान् सङ्ग्रहीष्याम्यहं पुनः।
ते जनास्त्वत्सजातीया धिक्कारेण तु भारिणः॥
१९ पश्य त्वत्पीडकान् सर्व्वान् निग्रहीष्याम्यहं तदा।
तां खञ्जाञ्चोद्धरिष्यामि तां सञ्चेष्यामि विद्रुतां॥
तज्जना येषु देशेषु लज्जापन्नाः पुरावसन्।
तत्राहं तान् करिष्यामि स्तुतिपात्रं यशस्करं॥
२० युष्मान् नेष्यामि तत्काले सञ्चेष्यामि च योगतः।
युष्मद्दास्यदशां यस्मात् साक्षाद्वः परिवर्त्तयन्।
पृथिव्याः सर्व्वजातीनां यशस्वि स्तुतिभाजनं।
युष्मानेव विधास्येऽहमिति ब्रूते सदाप्रभुः॥

हगयस्य भविष्यद्वाक्यानि।

---

१ प्रथमोऽध्यायः।

१ मन्दिरनिर्म्माणे निरुत्साहिजनानां तिरस्करणं ७ मन्दिरनिर्म्माणाय प्रवर्त्तनं १२ ईश्वरीयसाहाय्यस्य प्रतिज्ञा च।

१ दारायाजस्य द्वितीयवत्सरस्य षष्ठमासस्य प्रथमदिने यिहूदाया देशा-
ध्यक्षं शल्टीयेलसुतं सिरुब्बाबिलं प्रति महायाजकं यिहोषादकसुतं
येशूयञ्च प्रति सदाप्रभोरिदं वाक्यं भाववादिना हगयेन प्रादुरभूत्,
२ वाहिनीनां सदाप्रभुरित्थं भाषते, यथा, इमे जना वदन्ति सदाप्रभो
३ र्गेहस्य कालोऽर्थतस्तन्निर्म्माणस्य समयोऽनुपस्थितः। अतो हगयेन भाव-
४ वादिना सदाप्रभोरिदं वाक्यं प्रादुरभूत्, यथा, काष्ठफलकाच्छन्नकुड्य-
विशिष्टेषु स्वगृहेषु युष्माकं निवासनोपयुक्तः कालः किमुपस्थितः? इदं
५ गृहन्तूत्सन्नं तिष्ठति। अतएव वाहिनीनां सदाप्रभुरित्थं भाषते,
युष्माकं या गतिस्तस्यां मनोयोगो विधीयतां॥
६ उप्ता बह्वेव युष्माभिः स्वल्पमानीयते गृहं।
खादित्वा नाप्यते तृप्तिः पीत्वा न प्राप्यते सुखं॥
वसनं परिधायापि शीतं नैव निवार्य्यते।
भृतिं स्वीकृत्य सच्छिद्रे पुटके धीयते भृतिः॥

वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभुः। ७
युष्माकं या गतिस्तस्यां मनोयोगो विधीयतां॥
गिरिमारुह्य काष्ठान्यानीय निर्म्मीयतां गृहं। ८
तदानीं मम सन्तोषस्तस्मिन् वर्त्तिष्यते गृहे।
श्रीमांश्चाहं भविष्यामीति ब्रवीति सदाप्रभुः॥
बहु यूयमपैक्षध्वं तत्तु स्वल्पमजायत। ९
युष्माभि र्गृहमानीतं तद् विध्मातं मया पुनः॥
कारणं किमिति ब्रूते वाहिनीनां सदाप्रभुः।
कारणं मम धामेदम् उत्सन्नं तद् वितिष्ठते।
किन्तु युष्माकमेकैकस्त्वरितः स्वगृहं प्रति॥
युष्माकमूर्द्ध आकाशस्तस्माद् वाष्पं न्यरोधयत्। १०
धात्मोत्पाद्यानि शस्यानि भूतलञ्च न्यरोधयत्॥
अनावृष्टि र्मयाहूता भूतले पर्व्वतेषु च। ११
गोधूमे नवमद्ये च तैले सर्व्वफले भुवः।
मर्त्त्येषु पशुवृन्दे च सर्व्वहस्तक्रियासु च॥

तदा शल्टीयेलस्य पुत्त्रः सिरुब्बाबिलो यिहोषादकसुतो येशूयो १२
महायाजकश्च प्रजानां कृत्स्नोऽवशिष्टांशश्च स्वेश्वरस्य रवेऽवधाय हग-
यस्य भाववादिनो वाक्यानामनुवर्त्तिनो बभूवुः, यतस्तेषाम् ईश्वरः
सदाप्रभुस्तं प्रेरितवान् प्रजाश्च सदाप्रभुतोऽबिभयुः। ततः सदाप्रभो १३
र्दूतो हगयः सदाप्रभो र्दौत्यमनुष्ठाय जनान् जगाद, अहमेव युष्माभिः
सार्द्धमस्मीति सदाप्रभो र्वचनं। अपरं सदाप्रभु र्यिहूदाया देशाध्यक्षस्य १४
शल्टीयेलसुतस्य सिरुब्बाबिलस्यात्मानं यिहोषादकसुतस्य येशूयस्य महा-
याजकस्यात्मानञ्च प्रजानां कृत्स्नस्यावशिष्टांशस्यात्मानञ्चोत्तेजयामास, १५
ततस्ते दारायाजस्य द्वितीयवत्सरस्य षष्ठमासस्य चतुर्व्विंशे दिवस आ-
गत्य स्वेश्वरस्य वाहिनीगणाधिपस्य सदाप्रभो र्गृहे कर्म्म कर्त्तुमारेभिरे।

---

२ द्वितीयोऽध्यायः।

१ प्रथममन्दिराद् द्वितीयमन्दिरस्योत्कर्षस्य कृते तन्निर्म्माणे प्रजानां प्रवर्त्तनं १० पाप-
कारणात् तेषां कर्म्मण्यप्रवृत्तिः २० सिरुब्बाबिलं प्रतीश्वरस्य प्रतिज्ञा च।

अपरं सप्तममासस्यैकविंशे दिने हगयेन भाववादिना सदाप्रभोरिदं १
वाक्यं प्रादुरभूत्, यथा, त्वं यिहूदाया देशाध्यक्षं शल्टीयेलसुतं सिरुब्बा- २

बिलं यिहोषादकसुतं येशूयं महायाजकं प्रजानामवशिष्टांश्चैतद् वक्तु-
२ मर्हसि, यथा, यः प्रथमप्रतापयुक्तमेतद् गृहं दृष्टवांस्तादृशः को युष्माकं
४ मध्येऽवशिष्टोऽस्ति? इदानीन्तु यूयं कीदृशं तत् पश्यथ? युष्माकं दृष्ट्यां
तत् किं नावस्तुवद् भाति? तथापि, भो सिरुब्बाबिल, त्वमिदानीं
बलवान् भवेति सदाप्रभुराह; त्वञ्च भो यिहोषादकसुत येशूय महा-
याजक, बलवान् भव; यूयञ्च, भो देशस्थाः सर्व्वजनाः, बलवन्तो भवतेति
सदाप्रभुराह, कर्म्म कुरुत च, यतो युष्माभिः सार्द्धमहमस्मीति वाहि-
५ नीनां सदाप्रभुराह। मिसराद् युष्माकं निर्गमनकाले मयैतदेव वाक्यं
युष्मभ्यं प्रतिश्रुतं, ममात्मा च युष्मन्मध्येऽवतिष्ठते; यूयं माभैष्ट।

६ यतो हेतोरिदं ब्रूते वाहिनीनां सदाप्रभुः।
एकक्रत्व इतः पश्चात् स्वल्पकालेऽतिवाहिते।
कम्पयिष्याम्यहं व्योम धरामब्धिं स्थलं पुनः॥
७ सकला एव जातीश्च कम्पयिष्याम्यहं तदा।
अभीष्टः सर्व्वजातीनां कौस्तुभश्चागमिष्यति।
प्रतापेन मयेदञ्च गृहं सम्पूरयिष्यते।
वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभुः॥
८ सर्व्वरूप्यं ममैवास्ति सर्व्वस्वर्णं ममैव च।
वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभुः॥
९ अस्य गेहस्य पूर्व्वस्मात् प्रतापाच्च महत्तरः।
एतस्यान्तिमकालीनः प्रतापः सम्भविष्यति।
वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभुः॥
एतस्मिन्नेव च स्थाने शान्तिं दास्यिष्यते मया।
वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभुः॥

१० अपरं दारायावस्य द्वितीयवत्सरस्य नवममासस्य चतुर्व्विंशे दिने
११ हगयेन भाववादिना सदाप्रभोरिदं वाक्यं प्रादुरभूत्, यथा, वाहिनीनां
१२ सदाप्रभुरित्यमाह, त्वं याजकानिमां शास्त्रीयशिक्षां पृच्छ, पश्य, यो जनः
स्ववस्त्राञ्चले पवित्रमांसं वहति स यदि तेनाञ्चलेन पूपं सिद्धान्नं द्राक्षा-
रसं तैलमपरं किञ्चन भक्ष्यद्रव्यं वा स्पृशेत् तर्हि तत् किं पवित्रं भवति?
१३ अत्र याजकाः प्रत्यवदन् तन्नैव पवित्रं भवति। हगयः पुनः पप्रच्छ,
शवकारणादशुचिः कोऽपि जनो यदि तेषां सर्व्वेषां मध्ये किमपि द्रव्यं
स्पृशेत्, तर्हि तत् किमशुचि भवति? अत्र याजकाः प्रतिजगदुः,

अशुचि भवति। तदानीं हगय उत्तरं कृत्वा जगाद, मत्सम्मुखमियं १४
जातिस्तादृशी वंशोऽयञ्च तादृश इति सदाप्रभुराह, तेषां हस्तकृतं
सर्व्वकर्म्मापि तत्र तैरुत्सृष्टं सर्व्वनैवेद्यञ्च तादृशं, तत् सर्व्वमशुचि।
अतोऽधुना यूयमद्यारभ्येतः पूर्व्वकालमध्यर्थतः सदाप्रभोः प्रासादे प्रस्तराणां १५
मिथः संयोगो यदा नाकारि तं कालमधि मनोनिवेशं कुरुध्वं। तस्मिन् १६
कृत्स्ने काले यदा कोऽपि विंशतिपरिमाणानामाशातः शस्यराशेः समीप-
मागच्छत् तदा केवलं दशपरिमाणान्यविद्यन्त, यदा च पञ्चाशत्कुण्डान्
पूरयितुं द्राक्षारसाधारस्य समीपमागच्छत् तदा केवलं विंशतिभाण्डा
अविद्यन्त। अहं शस्यानां शुष्कत्वेन म्लानत्वेन च करकासारेण च युष्मा- १७
नाहनं, युष्माकं हस्तकृतं सर्व्वकर्म्माण्याहनं, तथापि यूयं मां नान्ववर्त्तध्व-
मिति सदाप्रभुराह। यूयमद्यारभ्येतः पूर्व्वमतीतकालमधि मनोयोगं १८
कुरुध्वं, नवममासस्य चतुर्व्विंशदिनमारभ्य यूयं सदाप्रभोः प्रासादमूल-
स्थापनदिनस्योत्तरकालमधि मनोयोगं कुरुध्वं। कुशूले शस्यं किमशि- १९
ष्यत? द्राक्षोडुम्बरजितवृक्षाणां मध्ये नैकोऽपि फलमुदपादयत्। पर-
न्त्वद्यारभ्याहमाशीर्व्वादं करिष्यामि।

अपरं मासस्य तस्मिंश्चतुर्व्विंशे दिने सदाप्रभो र्वाक्यं हगयं प्रति २०
द्वितीयवारं प्रादुरभूत्, यथा, त्वं यिहूदाया देशाध्यक्षं सिरुब्बाबिलमिमां २१
कथां वद,

गगनं पृथिवीञ्चाप्यहं कम्पयितुमुद्यतः॥
तदा न्युब्जीकरिष्यामि राज्यसिंहासनान्यहं। २२
परजातीयराज्यानामुच्छेत्स्यामि पराक्रमं॥
रथान् न्युब्जीकरिष्यामि तदारूढांश्च मानवान्।
भूतले निपतिष्यन्ति हयाश्वारोहिभिः सह।
मिथो व्यापादितैरेव सङ्कुले खड्गचालने॥
वाक्यन्तु व्याहरत्येतद् वाहिनीनां सदाप्रभुः। २३
भो मद्दास सिरुब्बाबिल् शल्टीयेलस्य नन्दन।
त्वां तदाहं ग्रहीष्यामीति ब्रवीति सदाप्रभुः॥
मुद्रावच्च विधास्ये त्वां यतस्त्वं वरितो मया।
वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभुः॥

सखरियस्य भविष्यद्वाक्यानि।

१ प्रथमोऽध्यायः।

१ पापकारणादनुशोचनाय भाववादिनो विनयवाक्यं ७ हयानां दर्शनं १४ यिरूशालमनिवासिनः प्रतीश्वरस्य सान्त्वनादायिनो प्रतिज्ञा १८ शृङ्गचतुष्टयस्य कर्म्मकारचतुष्टयस्य च दर्शनं।

१ दारारजस्य द्वितीयवत्सरस्याष्टममास इद्दोः पौत्त्रं बेरिखियस्य पुत्त्रं
२ सखरियं प्रति सदाप्रभोरिदं वाक्यं प्रादुरभूत्, यथा, सदाप्रभु र्युष्माकं
३ पूर्व्वपुरुषेभ्योऽतीव चुक्रोध। अतस्त्वं जनान् वद, वाहिनीनां सदाप्रभु
र्ब्रवीति, मां प्रति परिवर्त्तध्वमिति वाहिनीनां सदाप्रभोराज्ञा, तथा
कृतेऽहं युष्मान् प्रति परिवर्त्तिष्य इति वाहिनीनां सदाप्रभुराह।
४ स्वपूर्व्वपुरुषाणां सदृशा मा भवत, यतो यूयं स्वकुमार्गेभ्यः स्वदुष्क्रियाभ्यश्च
परावर्त्तितुमर्हथेति वाहिनीनां सदाप्रभुराहेति भाषमाणाः पूर्व्वकालीनभाववादिनो यदा तानाह्वयंस्तदा ते श्रवणं मय्यवधानं वा नाकुर्व्व-
५ न्निति सदाप्रभुराह। युष्माकं पूर्व्वपुरुषाः कुत्र विद्यन्ते? भाववादिनो
६ वा किमनन्तजीविनः? परन्त्वहं मम दासांस्तान् भाववादिनो यान्याज्ञापितवान् मम तानि वाक्यानि विधानानि च किं युष्माकं पूर्व्वपुरुषान्
नाक्रमिषुः? तदा ते प्रत्यावृत्यावादिषुः, अस्मदाचारानुरूपम् अस्मत्क्रियानुरूपञ्च यं व्यवहारमस्मान् प्रति कर्त्तुं वाहिनीनां सदाप्रभुः
स्थिरीकृतवांस्तादृशमेव व्यवहारमस्मान् प्रति स कृतवान्।
७ दारारजस्य द्वितीयवत्सरस्य शवाटाख्यस्यैकादशमासस्य चतुर्व्विंशे
दिन इद्दोः पौत्त्रं बेरिखियस्य पुत्त्रं सखरियं भाववादिनं प्रति सदाप्रभो
८ र्वाक्यं प्रादुरभूत्, तद्वृत्तान्तोऽयं। यामिन्यां मया दर्शनमलम्भि, पश्य
लोहिताश्वारूढ एकः पुरुषश्छायावृते स्थाने हदसगुल्मानां मध्येऽति-
९ ष्ठत्, तत्पश्चाच्च लोहिताः पाण्डराः श्वेताश्चाश्वा अविद्यन्त। तदा
मयोक्तं भो मत्प्रभो, इमे किमर्थाः? ततो मया सह संलपन् दूतो
१० मां जगाद, इमे किमर्थास्तदहं त्वां दर्शयिष्यामि। अपरं हदस-
गुल्मानां मध्ये तिष्ठन् स पुरुष उत्तरं कृत्वा जगाद, इमे पृथिव्यां पर्य्यट-
११ नार्थं सदाप्रभुना प्रेरिताः। पुनश्च त उत्तरं कृत्वा हदसगुल्मानां मध्य

तिष्ठन्तं सदाप्रभो र्दूतं जगदुः, वयं पृथिव्यां पर्य्यटनं कृतवन्तः, पश्य
कृत्वा पृथिवी सुस्थिरा निष्कण्टका चास्ते। तदानीं सदाप्रभो र्दूतः १२
प्रत्युत्तरं कृत्वा जगाद, भो वाहिनीनां सदाप्रभो, कति कालं त्वं यिरू-
शालमं यिहूदाया नगराणि च नानुकम्प्यावतिष्ठसे? सप्ततिवर्षान् यावत्
त्वया क्रोधः कृतः। तदा सदाप्रभुरुत्तरं कृत्वा मया सह संलपन्तं दूतं १३
शुभवाक्यानि सान्त्वनवाक्यानि च जगाद।

मया सह संलपन् स दूतश्च मां जगाद, त्वं घोषणां कुर्व्वन् वद, १४
वाहिनीनां सदाप्रभुरित्थं भाषते, यिरूशालमं सियोनञ्चाध्यहं महत्या
स्पर्द्धया स्पर्द्धे। परन्तु निष्कण्टकाभ्यः परजातिभ्योऽहं महता क्रोधेन १५
क्रुध्यामि, यतो मया यत्किञ्चित् क्रुध्यवति ता अमङ्गलार्थं साहाय्यम-
कार्षुः। अतो हेतोः सदाप्रभुरित्थं भाषते, अहं पुनर्व्वारं स्नेहेन यिरू- १६
शालमस्याभिमुखोऽभवं, तन्मध्ये मम गृहं निर्म्मायिष्यत इति वाहिनीनां
सदाप्रभुराह, यिरूशालमस्योपरि मानरज्जु र्वितानिष्यते च। पुनश्च १७
घोषणां कुर्व्वन् वद, वाहिनीनां सदाप्रभुरित्थमाह, मम नगराणि पुनः
क्षेमपरिप्लुतानि भविष्यन्ति सदाप्रभुश्च सियोनं पुनर्व्वारं सान्त्वयिष्यति
यिरूशालमञ्च पुनर्व्वारं वरयिष्यते।

अपरमहं दृष्टिं तोलयित्वा निरीक्षमाणश्चत्वारि शृङ्गाण्यदर्शं। तदा १८
मया सह संलपन्तं दूतमप्राक्षं, इमानि किमर्थानि? तदा स मां १९
जगाद, यानि शृङ्गाणि यिहूदामिस्रायेलं यिरूशालमञ्च विचकरि-
मानि तान्येव। अनन्तरं सदाप्रभु र्मां चतुरो लोहकारान् दर्शयामास। २०
तदाहमवादिषं, इमे किं कर्त्तुमागताः? स च मां जगाद, शृङ्गैर- २१
मीभि र्यिहूदा विकीर्णा, विकीर्णत्वाच्च कोऽपि शिरो न तोलयति, अत
इमे तानि त्रासयितुमागताः, यिहूदां विकरीतुं या जातयस्तस्या
देशस्य विरुद्धं शृङ्गाण्यतोलयन्, तासां शृङ्गाण्येतै र्निपातयितव्यानि।

---

२ द्वितीयोऽध्यायः।

१ यिरूशालमस्य परिमाणकथनं ६ सियोनस्योद्धारकथनं १० तस्य भाविगौरव-कथनञ्च।

अपरमहं दृष्टिं तोलयित्वा निरीक्षमाणो मानरज्जुहस्तं पुरुषमेकम- १
दर्शं। तदाहमवादिषं, त्वं कुत्र गच्छसि? स च मां जगाद, यिरूशा- २
लमं मातुं, तस्या विशालत्वं कियत् दैर्घ्यञ्च कियत् तन्निरूपयितुञ्चाहं

३ गच्छामि। अपरं पश्य मया सह यो दूतः समलपत् स निरगमत्,
४ तस्य प्रत्युद्गमनार्थञ्चापर एको दूतो निरक्रामीत्। स तं जगाद, त्वं तूर्णं
गत्वामुं युवानं वद, यिरूशालमो मध्यवर्त्तिनां नराणां पशूनाञ्च बाहु-
५ ल्यकारणात् सा जनपदोपमा निवत्स्यति, सदाप्रभुश्च भाषते, अहमेव
तस्याः परितो वह्निमयं प्राचीरं तस्या मध्ये च प्रतापस्वरूपो भूत्वाव-
स्थास्ये।

६ त्वरध्वं त्वरध्वमुत्तरदेशात् पलायध्वञ्चेति सदाप्रभुराह, यत आका-
७ शीयवायुचतुष्टयमिव यूयं मया विस्तारयितव्या इति सदाप्रभुराह। भो
८ बाबिलकन्यायाः सहवासिनि सियोन्, आत्मरक्षां कुरुष्व। यतो वाहि-
नीनां सदाप्रभु र्मामिदं वक्तुमादिष्टवान् प्रतापान्वेषणायाहं युष्मल्लुण्टन-
कारिजातीः प्रति तेन प्रहितः, यतो युष्मान् यः स्पृशति स तस्यैव नयन-
९ तारकां स्पृशति। यतः पश्याहं तेषामुपरि स्वहस्तं चालयिष्यामि,
ततस्ते स्वदासानां (युष्माकं) लोप्त्रं भविष्यन्ति, वाहिनीनां सदाप्रभुनाहं
प्रेरित इति यूयं ज्ञास्यथ च।

१० सानन्दं क्रियतां गानं भो सियोन्दुहितस्त्वया।
यतः पश्चाहमागत्य निवत्स्यामि तवान्तरे।
वचनं व्याहरत्येतत् स्वयमेव सदाप्रभुः॥
११ बहुजातय आसक्ता भविष्यन्ति सदाप्रभौ।
दिने तस्मिन् भविष्यन्ति ताश्च सर्व्वा मम प्रजाः।
तव मध्ये निवासस्तु तदा कारिष्यते मया॥
त्वां प्रति प्रेरितश्चाहं वाहिनीनां सदाप्रभोः।
इति ज्ञानं तदानीञ्च निश्चितं प्राप्स्यते त्वया॥
१२ स्वरिक्थांशं यिहूदाञ्च पूतभूमौ सदाप्रभुः।
लप्स्यते यिरूशालम् च पुनस्तेन वरीष्यते॥
१३ सर्व्वप्राणी भवेन्मौनी साक्षात् तस्य सदाप्रभोः।
स्वीयपूतनिवासात् स यत आगन्तुमुत्थितः॥

३ तृतीयोऽध्यायः।

१ येशूयस्य दृष्टान्तेन सियोनमधि मङ्गलकथनं ८ पल्लवस्वरूपं ख्रीष्टमधि भविष्य-
द्वाक्यञ्च।

१ अपरं स मह्यं येशूयं महायाजकं दर्शयामास, स सदाप्रभो र्दूतस्य

सम्मुखमतिष्ठत्, तस्य दक्षिणपार्श्वे च शयतानस्तस्य प्रतिपक्षतां कर्त्तुम-
तिष्ठत्। अपरं सदाप्रभुः शयतानं जगाद, भो शयतान, सदाप्रभुस्त्वां २
भर्त्सयतु, यिरूशालमं यो वरयामास स सदाप्रभुस्त्वां भर्त्सयतु, असौ
किमग्नित उद्धृतं दग्धाग्रं काष्ठं नहि? येशूयस्तु मलिनवस्त्रै र्वेष्टितः सन् ३
दूतस्य सम्मुखमतिष्ठत्। अतः स आज्ञां विधाय स्वसमक्षं तिष्ठतो ४
जनान् जगाद, अमुष्य गात्रात् तानि मलिनानि वासांस्यपसारयत। तञ्च
जगाद, पश्याहं तवापराधं त्वत्तो दूरीकृतवान्, त्वाञ्चोत्सववस्त्राणि
परिधापितवान्। तदाहमवादिषं, तस्य मस्तके शुचिरुष्णीषस्तै र्दीयतां। ५
ततस्तैस्तस्य शिरसि शुचिरुष्णीषोऽदायि। इत्थं ते तं वासांसि पर्य्यधाप-
यन् सदाप्रभो र्दूतश्चातिष्ठत्। ततः परं सदाप्रभो र्दूतो येशूयं साक्ष्य- ६
स्वरूपमिदं वाक्यं जगाद, यथा, वाहिनीनां सदाप्रभुरित्थं भाषते, त्वं ७
यदि मम मार्गैश्चरसि मम रक्षणीयं रक्षसि च, तर्हि त्वमेव मम
गृहस्य विचारकर्त्ता मम प्राङ्गणानां रक्षी च भविष्यसि, अहञ्च तुभ्यमत्र
तिष्ठतां जनानां मध्येन गमागमयोरधिकारं दास्यामि।

भो येशूय महायाजक, श्रूयतां, त्वया श्रूयतां त्वत्सम्मुखमुपविष्टैस्तव ८
सखिभिश्च, यतस्तेऽप्यद्भुतलक्षणस्वरूपा नराः, वस्तुतः पश्याहं स्वदासं
पल्लवमानेष्यामि। यतः पश्य, येशूयस्य सम्मुखं यः प्रस्तरो मया स्थापित- ९
स्तस्मिन्नेकस्मिन् प्रस्तरे सप्त चक्षूंषि वर्त्तिष्यन्ते। पश्याहं तस्य मुद्रारूप-
संस्कारं तक्षिष्यामीति वाहिनीनां सदाप्रभुराह, एकस्मिन् दिन एतद्दे-
शस्यापराधं दवयिष्यामि च। वाहिनीनां सदाप्रभुराह, तस्मिन् दिने १०
युष्माकमेकोऽन्यं द्राक्षालतायास्तल उडुम्बरवृक्षस्य तले वा निमन्त्र-
यिष्यति।

---

४ चतुर्थोऽध्यायः।

१ स्वर्णमयदीपवृक्षस्य दृष्टान्तेन सिरुब्बाविलस्य कर्म्मसिद्धिकथनं ११ द्वयो र्जितवृक्षयो-
स्तात्पर्य्यकथनञ्च।

अनन्तरं मया सह संलपन् स दूतो निद्रातः प्रबोध्यमानं नरमिव १
मां प्रबोध्य जगाद, त्वया किं दृश्यते? तदाहं प्रत्यवादिषं, मया निरी- २
क्षमाणेन दीपवृक्ष एको दृश्यते, तत्साकल्यं स्वर्णमयं तस्य शिरस
ऊर्द्ध्वे तैलाधार आस्ते, तस्य सप्त प्रदीपास्तस्योपरि विद्यन्ते, तदीय-
शिरसि स्थितानां तेषां प्रदीपानां कृते सप्त नाला विद्यन्ते च। तत्सान्निध्ये ३

च द्वौ जितवृक्षौ विद्येते, तयोरेकस्तैलाधारस्य दक्षिणपार्श्वेऽपरश्च
४ वामपार्श्वे स्थितः। पुनश्चाहं मया सह संलपन्तं तं दूतमप्राक्षं, भो मत्प्रभो,
५ इमानि किमर्थानि? ततो मया सहसंलपन् स दूत उत्तरं कृत्वा मामवा-
दीत्, इमानि किमर्थानि तत् किं त्वया न ज्ञायते? मयोक्तं, मत्प्रभो, तन्न
६ ज्ञायते। तदा स उत्तरं कृत्वा मां जगाद, इदं सिरुब्बाबिलं प्रति सदा-
प्रभो र्वचनं, यथा, न पराक्रमेण न बलेन वा, किन्तु ममात्मना सेत्स्य-
७ तीति वाहिनीनां सदाप्रभुराह। भो महापर्व्वत, सिरुब्बाबिलस्य
समक्षं त्वं कः? त्वं समभूमि र्भविष्यसि, अत्र प्रीतिः प्रीतिरेव भूयादिति
८ महानादे श्रूयमाणे च स शिरःस्वरूपं प्रस्तरं वहिरानेष्यति। अपरं
९ सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, यथा, सिरुब्बाबिलस्य
हस्तावस्य गृहस्य मूलं स्थापितवन्तौ, तस्य हस्तौ च तत् समापयिष्यतः,
वाहिनीनां सदाप्रभु र्मां युष्मान् प्रति प्रहितवानिति त्वया ज्ञायिष्यते
१० च। वस्तुतः क्षुद्रविषयाणां दिनं कोऽवमन्येत? अमी सप्त त्वर्थतः
सदाप्रभोश्चक्षूंषि सानन्दं सिरुब्बाबिलस्य हस्ते प्रलम्बसीसं पश्यन्ति;
तानि कृत्स्नां पृथिवीं पर्य्यटन्ति।

११ अपरमहं भाषमाणस्तमप्राक्षं; दीपवृक्षस्य दक्षिणे वामे च स्थितावमू
१२ जितवृक्षौ किमर्थौ? पुनर्व्वारमहं भाषमाणस्तमप्राक्षं, स्वर्णप्रणाली-
द्वयान्तिकावमू यौ फलभारिणौ जितवृक्षपल्लवौ स्वतः स्वर्णोपमं तैलं
१३ निःस्रावयतस्तौ किमर्थौ? तदा स मां जगाद, अमू किमर्थौ तत् किं न
१४ जानासि? मयोक्तं, भो मत्प्रभो, न जानामि। तदा स जगाद, अमू
कृत्स्नभूमण्डलस्य प्रभोः सम्मुखं तिष्ठन्तौ तैलसुतौ।

---

५ पञ्चमोऽध्यायः।

१ उड्डीयमानपत्रस्य दृष्टान्तेन तस्करमिथ्याशपथकारिणाम् अभिशापः ५ ऐफापात्रमध्य उपविष्टनार्य्या दृष्टान्तेनेस्रायेलस्य दण्डकथनञ्च।

१ पुनर्व्वारं मया दृष्टिं तोलयित्वा निरीक्षमाणेनोड्डीयमानं नालवत्
२ सङ्कोचितं पत्रमदर्शि। तदा स मां जगाद, त्वया किं दृश्यते? मयोक्तं
उड्डीयमानं पत्रमेकं दृश्यते, तस्य दैर्घ्यं विंशतिहस्तमानं प्रस्थता च
३ दशहस्तमाना। तदा स मां जगाद, असौ कृत्स्नभूमण्डलव्याप्यभिशापः,
फलतो यः कश्चिच्चौर्य्यं करोति स एकपृष्ठस्थविधानाद् विमर्हिंष्यते,

यस्यालीकं शपते सोऽपरपृष्ठस्थविधानाद् विमर्द्दिष्यते। सोऽभिशापो ४
मया वहिरानीत इति वाहिनीनां सदाप्रभुराह, स च तस्करस्य गृहं
मम नाम्ना मिथ्या शपमानस्य नरस्य गृहञ्च प्रवेक्ष्यति तत्रावस्थाय तद्
गृहं तस्य काष्ठानि प्रस्तरांश्च निःशेषं संहरिष्यति च।

अपरं मया सह संलपन् स दूतो वहिरागत्य मां जगाद, त्वं दृष्टिं ५
तोलयित्वा निरीक्षस्व, स्थानेऽमुष्मिन् किं निर्गच्छति? तदाहमवदं, अदः ६
किं? ततः स प्रत्यवादीत्, अदो निर्गमने प्रवृत्तम् ऐफापात्रं। स पुन
र्जगाद, अदः कृत्स्नभूमण्डले तेषां रूपं। तदानीं पश्य, मणपरिमाणः सीस- ७
पिण्ड उत्थापितः, तदधस्तस्य पात्रस्य मध्य उपविष्टा योषिदेका प्रत्य-
भात्। तदा स जगाद, असौ दुष्टता। ततः परं स तां पुनर्व्वारमैफा- ८
पात्रस्य मध्ये निक्षिप्य तस्य मुखे तं सीसकपिण्डं निदधौ। पुनश्च मया ९
दृष्टिं तोलयित्वा निरीक्षमाणेन प्रगच्छन्त्यौ द्वे स्त्रियौ दृष्टे, तयोः पक्षेषु
वायुरविद्यत, लक्ष्मणायाः पक्षयुगलमिव तयोरेकैकस्याः पक्षयुगलमा-
सीत्। ते च तद् ऐफापात्रमुत्थाप्य व्योम्नः पृथिव्याश्च मध्यपथेनावहतां।
तदाहं मया सह संलपन्तं तं दूतमवदं, अमू तद् ऐफापात्रं कुत्र १०
नयतः? स च मां जगाद, शिनियरदेशेऽमुष्याः कृते गृहं निर्म्मातव्यं, ११
तत्र सा निधायिष्यते तच्च स्वोपष्टम्भे स्थापयिष्यते।

---

६ षष्ठोऽध्यायः।

१ चतुर्णां रथानां दर्शनं ९ मुकुटस्य दृष्टान्तेन पल्लवस्वरूपस्य ख्रीष्टस्य राजत्व-याजकत्वयोः कथनञ्च।

अपरं मया पुनर्व्वारं दृष्टिं तोलयित्वा निरीक्षमाणेन चत्वारो रथा १
ददृशिरे, ते द्वयोः पर्व्वतयोरन्तरालान्निरगच्छन्, तौ पर्व्वतौ च पित्तल-
मयौ। प्रथमे रथे शोणितवर्णा अश्वाः, द्वितीये रथे कृष्णवर्णा अश्वाः, २
तृतीये रथे श्वेतवर्णा अश्वाः, चतुर्थे रथे विन्दुविचित्रा बलवन्तश्चाश्वा ३
योजिता आसन्। तदाहं भाषमाणो मया सह संलपन्तं तं दूतमप्राक्षं, ४
भो मत्प्रभो, इमे किमर्थाः? स दूतश्चोत्तरं कृत्वा मां जगाद, इम ५
आकाशमण्डलस्य चत्वारो वायवः, कृत्स्नपृथिव्याः प्रभोः परिचरणात्
प्रगच्छन्ति। कृष्णवर्णा अश्वा यत्र युक्तास्तद्रथारूढा उत्तरदेशं प्रगन्तु- ६
मुद्यताः, श्वेतवर्णा अश्वाश्च तेषां पश्चात् प्रगच्छन्ति, विन्दुविचित्राश्च
दक्षिणदेशं प्रगच्छन्ति। अपरं बलवन्तोऽश्वाः प्रगत्य पृथिव्यां पर्य्यटन- ७

स्यानुमतिमयाचन्त, तदा स जगाद, यात, पृथिवीं पर्य्यटत, ततस्ते
८ पृथिवीं पर्य्यटन्। अनन्तरं स उच्चशब्दं कृत्वा मामालपन् जगाद,
उत्तरदेशं ये प्रगच्छन्ति तैरुत्तरदेशे ममात्मा निधायिष्यते।
९ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, यथा, त्वं निर्व्वासित-
१० जनानामर्थतो हिल्दयस्य टोबियस्य यिदायस्य च हस्तेभ्यः [स्वर्णं रूप्यञ्च]
गृहाण, बाबिलादागतास्ते नरा यत्र [विद्यन्ते] त्वमद्यैव तत्र सफनिय-
११ सुतस्य योशियस्य गृहं प्रविश्य स्वर्णं रूप्यञ्च गृहीत्वा द्विधातुमयं मुकुटं
निर्म्मिमीष्व, यिहोषादकसुतस्य येशूयस्य महायाजकस्य शिरसि तन्नि-
१२ धेहि च। तञ्च वद, यथा, वाहिनीनां सदाप्रभुरित्थं ब्रूते, यथा, पश्य
पल्लवनामा पुरुषः स्वस्थलात् प्ररोक्ष्यति सदाप्रभोः प्रासादं निर्म्मास्यते
१३ च। स एव सदाप्रभोः प्रासादं निर्म्मास्यते, स एव श्रियं धारयिष्यते च,
स्वसिंहासन आसीनो राजत्वं करिष्यते च, स्वसिंहासने याजको भवि-
१४ ष्यति च, तयो र्मध्ये शान्ते र्मन्त्रणा स्थास्यते च। हिल्दयस्य टोबियस्य
यिदायस्य च कृते सफनियसुतस्यानुग्राहकतायाः कृते च तद् द्विविधं
१५ मुकुटं स्मरणोपायवत् सदाप्रभोः प्रासादे स्थास्यत। अधिकन्तु दूर-
वर्त्तिनो नरा आगत्य सदाप्रभोः प्रासादनिर्म्माणे साहाय्यं करिष्यन्ति,
अतो वाहिनीनां सदाप्रभु र्मां युष्मान् प्रति प्रहितवानिति यूयं
ज्ञास्यथ। यदि स्वेश्वरस्य सदाप्रभो र्वाक्येऽवधानं कुरुथ तर्हि तत्
सम्भविष्यति।

---

७ सप्तमोऽध्यायः।

१ उपवासविषयकः प्रश्नस्तदुत्तरञ्च ८ पापकारणाद् वन्दित्वस्य कथनञ्च।

१ दारायावस्य चतुर्थवत्सरस्य किस्लेवाख्यस्य नवममासस्य चतुर्थे दिने
२ सदाप्रभो र्वाक्यं सखरियं प्रति प्रादुरभूत्। फलतो बैतलेहमस्थजनाः
शरेत्सरं रेगम्मेलकं तस्य नरांश्च सदाप्रभो र्वदनं प्रसादयितुं प्रहा
३ तैरेव वाहिनीनां सदाप्रभो र्गृहे नियुक्तान् याजकान् भाववादिन-
श्चाप्राक्षु र्यथा, एतावद्वत्सरानहं यथा करोमि तथा किमितः
४ परमपि पृथग्भूय रोदिष्यामि? अनन्तरं वाहिनीनां सदाप्रभोरिदं
५ वाक्यं मां प्रति प्रादुरभूत्, यथा, त्वं सर्व्वान् देशीयनरान् याजकांश्च
वद, सप्ततिवत्सरान् यावत् पञ्चमे सप्तमे च मासे यदा यूयमुपवासं

विलापञ्चाकुरुत तदा किं मम कृत उपवासमकुरुत? यदा च भोजनं ६
पानं वा कुरुथ तदा किं न यूयमेवाश्नीथ यूयमेव पिवथ च? यदा ७
यिरूशालम् निवासिपूर्णा शान्तियुक्ता स्वोपनगरै र्वेष्टिता चासीत्,
दक्षिणप्रदेशः समभूमिप्रदेशश्च निवासिपूर्णावास्तान्च, तदा सदाप्रभुः
पूर्व्वकालीनै र्भाववादिभि र्यानि घोषितवांस्तानि वाक्यानि किं न
स्मरथ?

अनन्तरं सदाप्रभोरिदं वाक्यं सखरियं प्रति प्रादुरभूत्, वाहिनीनां ८
सदाप्रभुरित्थं भाषितवान्, यथा, यूयं न्यायविचारं कुरुत, मिथो ९
दयाकरुणे अनुतिष्ठत च, विधवामनाथबालकं प्रवासिनं दुःखिजनञ्च १०
मा पीडयत, स्वहृदयेषु च परस्परं हिंसायाः सङ्कल्पं मा कुरुत।
परन्तु तेऽवधातुमसम्मताः स्वस्कन्धान् अपासारयन् श्रवणमस्वीकृत्य ११
स्वकर्णानि भारीण्यकुर्व्वत च, स्वहृदयानि च हीरोपमान्यकुर्व्वत, १२
यस्माद् वाहिनीनां सदाप्रभु र्निजात्मना पूर्व्वकालीनभाववादिगणद्वारा
यां व्यवस्थां यानि वाक्यानि च प्राहिणोत् तच्छ्रवणे ते न सम्मता आसन्,
तत्कारणाद् वाहिनीनां सदाप्रभुतो महाकोपस्तेष्ववर्त्तत। ततो वाहि- १३
नीनां सदाप्रभु र्जगाद, यद्वन्मयाह्वाने क्रियमाणे तै र्नाश्रावि, तथा
तैराह्वाने क्रियमाणे मया न श्राविष्यते। ते या जाती र्न जानन्ति १४
तासां मध्येऽहं झञ्झयेव तान् विक्षेप्स्यामि, तेषु प्रस्थितेषु च देशः
पान्थहीनं निवासिवर्ज्जितञ्च ध्वंसस्थानं भविष्यति, इत्थं तैरयं रम्यो
देश उत्सन्नीकृतः।

---

८ अष्टमोऽध्यायः।

१ यिरूशालमस्य पुनर्निर्म्माणं ९ ईश्वरस्य मन्दिरनिर्म्माणेन जनानां मङ्गललाभ-
कथनं १६ कर्त्तव्याचारकथनं १८ मङ्गलप्रतिज्ञा च।

पुनर्व्वारं वाहिनीनां सदाप्रभो र्वाक्यं प्रादुरभूत्, यथा, वाहिनीनां १
सदाप्रभु र्ब्रूते, सियोनः कृतेऽहं महत्या स्पर्द्धया स्पर्द्धे, तस्याः कृते २
महत्या चण्डतयैव स्पर्द्धे। सदाप्रभुरित्थं ब्रूते, अहं पुनर्व्वारं सियोनं
प्रति वर्त्तिष्ये यिरूशालमो मध्ये निवत्स्यामि च। यिरूशालम् सत्य- ३
पुरीति नाम्ना, वाहिनीनां सदाप्रभोः पर्व्वतश्च पवित्रः पर्व्वत इति
नाम्ना ख्यायिष्यते। वाहिनीनां सदाप्रभुरित्थमाह, महावार्द्धक्याद् ४
यष्टिहस्ता वृद्धाः पुरुषा वृद्धाः स्त्रियश्च पुनर्व्वारं यिरूशालमश्चत्वरेषू-

५ पवेक्ष्यन्ति। चत्वरे क्रीडद्भि र्बालकै र्बालिकाभिश्च नगरस्य चत्वराणि
६ पुनर्व्वारं पूरयिष्यन्ते। वाहिनीनां सदाप्रभुराह, तस्मिन् कालेऽस्या
जातेरवशिष्टांशस्य दृष्ट्यामिदमद्भुतं प्रतिभास्यतीति कारणात् किं ममापि
७ दृष्ट्यामद्भुतं प्रतिभास्यतीति वाहिनीनां सदाप्रभुराह। वाहिनीनां
सदाप्रभुरित्थं ब्रूते, पश्य, सूर्य्योदयदिक्स्थदेशात् सूर्य्यास्तदिक्स्थदेशा-
८ च्चाहं स्वप्रजा निस्तारयितुमुद्यतोऽस्मि। अहं ता आनीय यिरूशालमस्य
मध्ये निवासयिष्यामि, ताश्च मम प्रजा भविष्यन्ति, अहञ्च तासामीश्वरो
भविष्यामि, सत्येन धार्म्मिकत्वेन चेदं सेत्स्यति।

९ वाहिनीनां सदाप्रभुरित्थं भाषते, एतस्मिन् काले भाववादिनां मुखा-
देतानि वाक्यानि शृणुथ ये यूयं, युष्माकं हस्ता बलवन्तो भवन्तु, यतो
वाहिनीनां सदाप्रभो र्गृहस्य भित्तिमूलस्थापनकालेऽस्मिन् प्रासादो
१० निर्म्मातव्यः। वस्तुत एतस्मात् कालात् प्राक् न मनुष्यस्य वेतनं न पशो
र्वेतनं वा समभवत्, वहिरभ्यन्तरं वा यातायातकारिणाञ्च क्लेशदातृतः
कापि शान्ति र्नाभवत्, सर्व्वे मानवाश्च मया प्रचोदिताः परस्परम्
११ अबाधन्त। इदानीन्त्वेतज्जातेः शेषांशं प्रति मम भावः प्राक्कालीनभावस्य
१२ सदृशो नास्तीति वाहिनीनां सदाप्रभुराह। यतः कृषिः शान्तियुक्ता,
द्राक्षालता फलवती, भूमिः शस्योत्पादिका, गगनञ्च शिशिरदायी
भविष्यति, अहञ्चैतज्जातेः शेषांशं सर्व्वेषामेतेषाम् अधिकारिणं करि-
१३ ष्यामि। परन्तु भो यिहूदाः कुल, भो इस्रायेलः कुल, यूयं यद्वत्
परजातीनां मध्ये शापास्पदान्यास्त, तद्वन्मया युष्माकं परित्राणे कृते
यूयमाशीर्व्वादपात्राणि भविष्यथ; मा बिभीत, युष्माकं हस्ता बलवन्तो
१४ भवन्तु। यतो वाहिनीनां सदाप्रभुरित्थं ब्रूते, यद्वद् युष्माकं पूर्व्वपुरुषैः
कोपितोऽहं युष्माकममङ्गलस्य सङ्कल्पमकरवं तच्च नान्वतप्ये चेति वाहि-
१५ नीनां सदाप्रभुराह, तद्वत् कालेऽस्मिन्नहं प्रत्यावृत्य यिरूशालमो यिहूदा-
कुलस्य च मङ्गलसाधनस्य सङ्कल्पं करोमि, यूयं मा बिभीत।

१६ युष्माभि र्यद्यत् कर्त्तव्यं तद्वृत्तान्तोऽयं, परस्परं सत्यं वदत, स्वपुरद्वारेषु
१७ सत्यं शान्तिदायकविचारञ्च निश्चिनुत। स्वहृदयेषु परस्परममङ्गलस्य
सङ्कल्पं मा कुरुत, अन्तशपथे मा प्रीयध्वञ्च, यतः सर्व्वमेतन्मम गर्हित-
मिति सदाप्रभुराह।

१८ अनन्तरं मां प्रति वाहिनीनां सदाप्रभो र्वाक्यं प्रादुरभूत्, यथा,
१९ वाहिनीनां सदाप्रभुरित्थं ब्रूते, चतुर्थमासस्योपवासः पञ्चममासस्योप॰

वासः सप्तममासस्योपवासो दशममासस्योपवासश्च यिहूदाः कुलस्य कृत
आमोद आनन्दः शुभपर्व्वाणि च भविष्यन्ति, परन्तु यूयं सत्ये शान्त्याञ्च
प्रीयध्वं। वाहिनीनां सदाप्रभुरित्थं ब्रूते, पुनर्व्वारं जातयो बहूनां २०
नगराणां निवासिनश्चागमिष्यन्ति, एकस्य नगरस्य निवासिनोऽन्यन्नगरं २१
गत्वा वदिष्यन्ति, यथा, आयात वयं सदाप्रभो र्मुखं प्रसादयितुं वाहि-
नीनां सदाप्रभुमन्वेषितुञ्च यामः, अहमपि यास्यामीति। बहवो जना २२
बलवत्यो जातयश्च यिरूशालमि वाहिनीनां सदाप्रभुमन्वेषितुं सदाप्रभो-
र्मुखं प्रसादयितुञ्चागमिष्यन्ति। वाहिनीनां सदाप्रभुरित्थं ब्रूते, तस्मिन् २३
काले विविधभाषावादिनीनां सर्व्वजातीनां दशपुरुषा एकं यिहूदीय-
पुरुषं धरिष्यन्ति, ते तस्य वस्त्राञ्चलमेव धृत्वा वदिष्यन्ति, वयं युष्माकं
सहगामिनो भविष्यामः, यतो युष्माभिः सार्द्धमीश्वरोऽस्तीति वयं
श्रुतवन्तः।

---

९ नवमोऽध्यायः।

१ समाजस्य रक्षणं ९ खीष्टस्यागमनमपेक्षितुम् आनन्दितुञ्च विनयकथनं १२ जय-रक्षयोः प्रतिज्ञा च।

भावोक्तिः। सदाप्रभो र्वाक्यं। १
हद्रकं देशमध्युक्तमेतद् दम्मेशकाश्रितं।
यतो नित्यप्रभोरस्ति हजातेरवलोकनं।
इस्रायेलस्य सर्व्वेषां वंशानामवलोकनं॥
तस्य सीम्नः समीपस्थं हमातञ्च तदाश्रयः। २
सोरश्चापि सिदोनञ्च तयो र्ज्ञानं यतो महत्॥
स्वनिमित्तञ्च सोरेण दृढं दुर्गं विनिर्म्मितं। ३
धूलिवत् सञ्चितं रूप्यं स्वर्णं वर्त्मस्थपङ्कवत्॥
तां पुरीन्त्वात्मसात् कर्त्तुमुद्यतोऽस्ति प्रभुः स्वयं। ४
स तत्प्राकारमाहत्य सागरे पातयिष्यति।
नगरी सा तदानीञ्च वह्निभुक्ता भविष्यति॥
तद् विलोक्याष्किलोनञ्च साध्वसं प्रगमिष्यति। ५
असा वेपिष्यतेऽत्यन्तम् इक्रोणञ्च त्रसिष्यति॥
यतस्तस्य य आश्वासः स लज्जाजनकोऽभवत्।
असातो नृप उच्छिन्नोऽष्किलोनं वासवर्जितं॥

६ अस्‌दोदं जारजानाञ्च वासस्थानं भविष्यति।
पिलेष्टीयमनुष्याणां श्लाघा चोच्छेत्स्यते मया॥
७ तज्जनस्यास्यतश्चाहं दवयिष्यामि शोणितं।
गर्हणीयप्रसादञ्च दन्तानां तस्य मध्यतः॥
अस्मदीशस्य पक्षे तु स जनोऽप्यवशेक्ष्यत।
यिहूदाकुलमध्ये सोऽध्यक्षवच्च भविष्यति।
यिबूषीयो यथा तद्वद् इक्रोणीयो भविष्यति॥
८ सेनां शत्रुञ्च गच्छन्तमागच्छन्तञ्च बाधितुं।
शिविरं स्थापयिष्यामि स्वकुलस्य कृतेऽधुना॥
मत्प्रजान्तिकमागन्तुं पुनः क्रूरो न शक्ष्यति।
इदानीं वीक्षणं यस्मात् स्वनेत्राभ्यां करोम्यहं॥
९ भो सियोनदुहितोऽत्यन्तमुल्लासः क्रियतां त्वया।
भो यिरूशालमः कन्ये हर्षनादमुदीरय॥
पश्य यस्तव राजा स समायाति कृते तव।
स धर्म्मी त्राणयुक्तश्च नम्रो गर्द्दभवाहनः।
आरूढो गर्द्दभीजाते प्राप्तयौवनरासभे॥
१० उच्छेत्स्यामि रथांश्चाहम् इफ्रयीमस्य मध्यतः।
उच्छेत्स्यामि च युद्धाश्वान् मध्यतो यिरूशालमः।
उच्छेत्स्यामि रणेष्वासं जातीः सन्धिं स वक्ष्यति॥
सागरात् सागरं यावद् राज्यं तस्य भविष्यति।
आनदाच्च फरातारव्यात् महीप्रान्तान् प्रयास्यति॥
११ त्वाञ्च वच्मि पवित्रा त्वं नियमस्थापकासृजा।
त्वद्बन्दी र्मोचयिष्यामि वारिवर्जितकूपतः॥
१२ प्रत्यायात दृढं दुर्गं भो आशायुक्तबन्दयः।
दास्यामि द्विगुणं तुभ्यमद्यैव ज्ञापयामि तत्॥
१३ यिहूदाश्चापवत् स्वार्थं मया विस्फारितो यतः।
शरवच्च मयेफ्रायिम् योजितस्तच्छरासने॥
भो सियोन् तव पुत्रांश्च चादयिष्याम्यहं स्वयं।
यवनस्यैव पुत्राणां तैः कर्त्तव्यं विरोधनं।
वीरखड्गस्य तुल्यैव त्वञ्च कारिष्यसे मया॥
१४ दर्शनं युष्मदूर्द्धे च दास्यते शाश्वतप्रभुः।

तस्य वाणस्वरूपस्य मेघाग्निः प्रपतिष्यति ॥
आवयिष्यति तौर्य्यञ्च स्वयं नित्यप्रभुः प्रभुः।
दाक्षिणात्यस्य झञ्झाभि र्गमनञ्च करिष्यते ॥
गोपायिष्यति तान् योद्धृन् वाहिनीनां सदाप्रभुः। १५
ते च ग्रासं करिष्यन्ति क्षेपणीतश्च पातितान्।
प्रस्तरान् मर्द्दयिष्यन्ति पानं कारिष्यते च तैः ॥
मद्यपानाद् यथा तद्वच्छब्दः कारिष्यते च तैः।
पूतभाजनवत् पूर्णैरथवा वेदिकोणवत् ॥
तेषां करिष्यति त्राणं दिने तस्मिन् सदाप्रभुः। १६
यथा मेषव्रजं तद्वत् स्वजनांस्तारयिष्यति।
द्योतन्ते तस्य भूमौ ते किरीटे मणयो यथा ॥
यतः कीदृक् शुभं तेषु कीदृक् कान्तिश्च युज्यते। १७
शस्यं यूनो नवं मद्यं युवती र्वर्द्धयिष्यति ॥

---

१० दशमोऽध्यायः।

प्रतिमार्च्चनार्थकदण्डभोगात् परं व्रजस्य रक्षा मङ्गलञ्च।

यूयमुत्तरवर्षायां याचताम्बु सदाप्रभुं। १
विद्युतां सृष्टिकर्त्ता स धारासारं प्रदास्यति।
एकैकस्मै च युष्माकं क्षेत्रे शाकं प्रदास्यति ॥
यस्मान्निरर्थकं वाक्यं कथितं गृह्यठक्कुरैः। २
मन्त्राभिज्ञै र्मनुष्यैश्च प्राप्तं निःसत्यदर्शनं ॥
स्वप्नान्यलीकवादीनि तेषां सान्त्वञ्च वाष्पवत्।
तस्मात् ते व्रजवद् भ्रान्ता रक्ष्यभावाच्च खेदिताः ॥
रक्षिणां प्रातिकूल्येन क्रोधः प्रज्वलितो मम। ३
छागानाञ्च विधास्येऽहम् अनुसन्धाय शासनं ॥
यिहूदाकुलरूपस्य स्वीयमेषव्रजस्य हि।
अनुसन्धास्यते तत्त्वं वाहिनीनां सदाप्रभुः।
स्वतेजस्विरणाश्वेन तुल्यांस्तांश्च करिष्यति ॥
तस्मादुत्पत्स्यते कोणस्तन्मध्यान्नागदन्तकः। ४
तन्मध्याद् युद्धचापश्च तन्मध्यात् सर्व्वशासकः ॥
समरे वीरतुल्याश्च ते भविष्यन्ति मानवाः। ५

रथ्यास्विव रणक्षेत्रे पादैः कर्द्दममर्द्दकाः ॥
ते योत्स्यन्ते यतस्तेषां सहायोऽस्ति सदाप्रभुः।
अश्वारूढास्तु योद्धारो भविष्यन्ति त्रपान्विताः ॥
६ विक्रान्तांश्च करिष्यामि यिहूदाकुलजान् नरान्।
यूषफीयकुलस्यापि भविष्यामि जयप्रदः ॥
पुनस्तान् वासयिष्यामि दयिष्ये तानहं यतः।
मदद्विष्टै नरैस्तुल्या भविष्यन्ति च ते तदा ॥
यस्मादस्मीश्वरस्तेषामहमेव सदाप्रभुः।
कृतायां प्रार्थनायाञ्च दास्ये तेभ्यस्तदुत्तरं ॥
७ वीरतुल्या भविष्यन्तीफ्रयिमीयजनास्ततः।
मद्येनेव प्रफुल्लञ्च तेषां चित्तं भविष्यति ॥
तेषां पुत्राश्च तद् दृष्ट्वा भविष्यन्ति प्रहर्षिताः।
समवाप्स्यति चोल्लासं तेषां चित्तं सदाप्रभौ ॥
८ तानाहूयौष्ठशब्देन सङ्ग्रहीष्याम्यहं स्वयं।
अहमेव यतस्तेषां साधयिष्यामि मोचनं।
यथा वर्द्धिष्णवश्चासन् वर्द्धिष्यन्ते तथा पुनः ॥
९ वीजवद् विकरीष्यामि परजातिषु तानहं।
दूरवर्त्तिषु देशेष्वनुस्मरिष्यन्ति माञ्च ते।
जीवन्तश्च ससन्तानाः प्रत्यायास्यन्ति ते तदा ॥
१० तदानीञ्च मिसर्देशात् प्रत्यानेष्यामि तानहं।
सङ्ग्रहञ्च करिष्यामि तेषामाश्शूरदेशतः ॥
गिल्यद्देशञ्च नेष्यामि लिबानोनञ्च तानहं।
तेषां सङ्ख्यानुरूपन्तु स्थानं नासादयिष्यते ॥
११ स तरिष्यति कष्टाब्धिमूर्म्मींश्चाब्धौ हनिष्यति।
सिन्धोः सर्व्वं गभीरञ्च स्थानं शुष्कं भविष्यति ॥
अश्शूरस्य महत्त्वञ्च क्षीकारिष्यते तदा।
मिसरस्य च यो दण्डः स तदापसरिष्यति ॥
१२ तान् नरांश्च करिष्याम्यहं विक्रान्तान् सदाप्रभौ।
तस्य नाम्ना गतायातं करिष्यन्ति च ते तदा।
वचनं व्याजहारेदं स्वयमेव सदाप्रभुः ॥

११ एकादशोऽध्यायः।

१ यिरूशालमस्य विनाशस्य भविष्यद्वाक्यं ४ वध्यमेषाणां कथनं १० तोत्रभञ्जनेन नियमभङ्गप्रदर्शनं १५ अज्ञानिनो रक्षकस्य कर्म्मफलयोः कथनञ्च।

भो लिबानोन, स्वकपाटानुद्घाटय, वह्निश्च तवैरसतरूणां दाहं १
करोतु। भो देवदारु, हाहाकारमुदीरय, यत एरसतरुः पतितः, २
श्रीयुक्ताः सर्व्वे नष्टाः। भो बाशनदेशीया अलोनतरवः, हाहाकारमुदी-
रयत, यतो दुर्गमं वनं भूमिसात्कृतं। पशुपालानां हाहाकारस्य रवः ३
श्रूयते, यतस्तेषां गोप्रचारो ध्वंसितः, युवसिंहानां हुङ्कारस्य रवः श्रूयते,
यतो यर्द्दनस्य भूषणमरण्यं ध्वंसितं।

ममेश्वरः सदाप्रभु र्मामवादीत् त्वमिमं वध्यमेषव्रजं पालय; यतस्तेषां ४
क्रेतारस्तान् घ्नन्ति न तु दण्डनीया गण्यन्ते, तेषां विक्रेतारश्च वदन्ति, ५
धन्यः सदाप्रभुरहं तावद् धनवान् भवामि, तेषां रक्षकाश्च तान् प्रति
ममतां न कुर्व्वते। वस्तुतोऽहं भूमण्डलनिवासिनः प्रति पुन र्ममतां न ६
करिष्यामीति सदाप्रभुराह। परन्तु पश्याहमेकैकं नरं तस्य प्रतिवेशिनो
हस्तगतं तस्य राज्ञश्च हस्तगतं करिष्यामि, तैश्च भूमण्डले चूर्णीकृतेऽप्यहं
तेषां हस्ताज्जनान् नोद्धरिष्यामि। अनन्तरमहं तं वध्यमेषव्रजं सुतरां ७
व्रजस्य दुःखिनो मेषानपि पालयितुं प्रवृत्तः, स्वकृते च द्वौ यष्टी गृहीत्वा
तयोरेकस्य कान्तिरित्यपरस्य च बन्धनकलाप इति नामाकार्षं। इत्थमहं
तं व्रजमपालयं। एकस्मिन् मासे रक्षकत्रयस्य संहारमकार्षञ्च। अनन्तर- ८
महं तेषु विरक्तोऽभवं तेषामपि भावो मय्यसन्तुष्टोऽभूत्। अतोऽहं तान- ९
वादिषं अहं युष्मान् न पालयिष्यामि, यन्म्रियमाणं तन्म्रियतां, यच्च
संक्षियमाणं तत् संक्षियतां, अवशिष्टानाञ्चैकैकमन्यस्य मांसं भक्षयतां।

अपरमहं मम कान्तिनामकं यष्टिमादाय सर्व्वजातिभिः सह कृतस्य १०
मदीयनियमस्य भङ्गाय तं खण्डशोऽकार्षं। अतस्तस्मिन् दिने स भग्नस्तेन ११
तत् सदाप्रभो र्वचनमिति मय्यवधानकारिभि र्व्रजस्य दुःखिमेषै र्बुबुधे।
अनन्तरमहं सर्व्वान् अवादिषं, यदि युष्मभ्यं रोचते तर्हि मम वेतनं दत्त, १२
यदि वा न रोचते तर्हि निवर्त्तध्वं। अतस्ते मम वेतनं त्रिंशद्रौप्यमुद्रा-
मानं कृत्वा तुलया ममिरे। अनन्तरं सदाप्रभु र्मां जगाद, त्वं कुम्भकार- १३
सम्मुखं तन्निक्षिप, महार्घमेतन्मूल्यं यत्तै र्मम मूल्यनिरूपकै र्निरूपितं।
अतोऽहं तत् त्रिंशन्मुद्रामानं रूप्यमादाय सदाप्रभो र्गृहे कुम्भकारसम्मुखं

१४ न्यक्षिपं। अनन्तरं यिहूदेस्रायेलयोरैकत्वस्य व्यर्थीकरणाय बन्धनकला-
पाभिधं मम द्वितीयं यष्टिमभाङ्क्षं।
१५ अपरं सदाप्रभु र्मां जगाद, पुनश्च त्वमज्ञानिन एकस्य रक्षकस्य साम-
१६ ग्रीमादत्स्व। यतः पश्याहं मेदिन्यामेकं रक्षकमुत्पादयिष्यामि, स
नष्टकल्पानां मेषाणां तत्त्वावधानं न करिष्यति, विकीर्णान् नान्वेषिष्यते,
भग्नाङ्गान् न चिकित्सिष्यते, अवतिष्ठमानस्य मेषस्य भरणपोषणं न करि-
ष्यति, पीनस्य तु मांसं भक्षयिष्यते, सर्व्वेषां खुरान् विदारयिष्यति च।
१७ सोऽज्ञानी मेषत्यागी रक्षकः सन्तापपात्रं; भो खड्ग, तस्य बाहौ दक्षिणे
चक्षुषि च प्रपत; तस्य बाहुः सर्व्वथा परिशोक्ष्यति, तस्य दक्षिणं चक्षुश्च
सर्व्वथा हतदृष्टि भविष्यति।

---

१२ द्वादशोऽध्यायः।

१ यिरूशालमस्य कम्पजनकपात्रस्वरूपत्वं ३ गुरुपाषाणस्वरूपत्वञ्च ६ यिहूदाया जयकथनं
१० यिरूशालमस्य पश्चात्तापकथनञ्च।

१ इस्रायेलमधि भारोक्तिस्वरूपं सदाप्रभो र्वाक्यं। नभोमण्डलवितानकः
पृथिवीसंस्थापको नरस्यान्तरे नरस्यात्मनः स्रष्टा च सदाप्रभुराह,
२ पश्याहं यिरूशालमं चतुर्द्दिक्स्थानां सर्व्वजातीनां विभ्रमजनकं शरावं
कृत्वा नियोजयामि; यिरूशालमस्यावरोधकाले यिहूदायामप्येतत् सफलं
भविष्यति।
३ तस्मिन् काले चाहं यिरूशालमं सर्व्वजातीनां कृते धुरार्थकं प्रस्तरं
करिष्यामि; ये सर्व्वे जनास्तं तोलयन्ति ते स्वाङ्गानि विदारयिष्यन्ति;
परन्तु मेदिन्याः सर्व्वजातयस्तस्याः पुर्य्या वैपरीत्येन समायास्यन्ति।
४ सदाप्रभुराह, तस्मिन् कालेऽहं सर्व्वानश्वान् भीरुताहतान् तदारूढां-
स्चोन्मादाहतान् करिष्यामि, यिहूदाकुलस्य पक्ष उन्मीलितनेत्रो भूत्वा
५ जातीनां सर्व्वानश्वान् अन्धताहतान् करिष्यामि। यिहूदाया जनाध्य-
क्षाश्च मनोमध्ये गदिष्यन्ति, यिरूशालमनिवासिनः स्वेश्वरस्य वाहिनी-
गणाधिपस्य सदाप्रभोः साहाय्येनास्मद्बलस्वरूपाः।
६ तस्मिन् कालेऽहं काष्ठानां मध्ये स्थितां वह्निपूर्णां हसन्तीमिव शस्य-
गुच्छानां मध्ये स्थितां ज्वलदुल्कामिव वा यिहूदाया जनाध्यक्षान् स्थाप-
यिष्यामि, ते दक्षिणे वामे च चतुर्द्दिक्स्थाः सर्व्वा जाती र्ग्रसिष्यन्ति,
७ ततः परमपि यिरूशालमं निजस्थले यिरूशालम एव निवत्स्यति। सदा-

प्रभुश्च प्रथमे यिहूदायाः पटगृहाणि तारयिष्यति, न चेद् दायूदकुलस्य
श्री र्यिरूशालमनिवासिनां श्रीश्च यिहूदाया विरुद्धमभिमानं करिष्यत।
तस्मिन् दिने सदाप्रभु र्यिरूशालमनिवासिनां परितो रक्षां विधास्यते, ८
तेषां मध्ये च यस्तस्मिन् दिने स्खलनशीलः स दायूदेन तुल्यो भविष्यति,
दायूदस्य कुलमीश्वरेण तुल्यं तेषामग्रगामिना सदाप्रभो दूतेन तुल्यं वा
भविष्यति। अहञ्च तस्मिन् काले यिरूशालमस्याक्रमणार्थमागताः सर्व्वाः ९
परजातीरुच्छेत्तुं यतिष्ये।

अहञ्च दायूदकुलस्योपरि यिरूशालमनिवासिनाञ्चोपर्य्यनुग्रहस्वरूपं १०
प्रार्थनास्वरूपञ्चात्मानं स्रावयिष्यामि, ते च यं मां विद्धवन्तस्तमुद्दिश्य
दृक्पातं करिष्यन्ते, एकमात्रपुत्रशोकजन्यविलापेनेव तमधि विलपि-
ष्यन्ति च, यथा च प्रथमजातस्य मरणात्, तथा मनस्तापमवाप्स्यन्ति।
तस्मिन् दिने मगिद्दुनामिकोपत्यकायां हदद्रिम्मोणीयविलापस्य सदृशो ११
महाविलापो यिरूशालमे भविष्यति। देशीयजनानामेकैका गोष्ठी १२
पृथक् पृथग् विलपिष्यति, दायूदकुलस्य गोष्ठी पृथक् तदीययोषितश्च
पृथक्, नाथनकुलस्य गोष्ठी पृथक् तदीययोषितश्च पृथक्; लेविकुलस्य १३
गोष्ठी पृथक् तदीययोषितश्च पृथक्, शिमियिकुलस्य गोष्ठी पृथक् तदी-
ययोषितश्च पृथक्; अवशिष्टानां सर्व्वगोष्ठीनां मध्य एकैका गोष्ठी पृथक् १४
तदीययोषितश्च पृथक्।

१३ त्रयोदशोऽध्यायः।

१ पापमोचनं देवार्च्चनाद्यधर्म्मस्य मार्जनं ७ ख्रीष्टस्य मरणस्य यिहूदीयानाञ्च भावि-
दशायाः कथनञ्च।

तस्मिन् दिने दायूदकुलस्य यिरूशालमनिवासिनाञ्च कृते पापा- १
शौचयो र्हरणायोत्स एक उद्घाटयिष्यते। वाहिनीनां सदाप्रभुराह, २
तस्मिन् दिनेऽहं विग्रहाणां नामानि देशाद् उच्छेत्स्यामि, ते पुन र्न
स्मारिष्यन्ते, भाववादिनरान् अशुचिताया आत्मानञ्चापि देशादपसार-
यिष्यामि। यदि कश्चित् तदानीमपि भावोक्तिं व्याहरति, तर्हि तस्य ३
जन्मदातारौ मातापितरौ तं वदिष्यन्ति, त्वया न जीवितव्यं यतस्त्वं
सदाप्रभो र्नाम्ना मृषोक्तिं व्याहृतवान्, तस्य भावोक्तिकथनात् तस्य
जन्मदातारौ मातापितरौ तं व्यत्स्यन्ति च। तस्मिन् काले भाववादिनः ४
प्रत्येकं भावोक्तियुक्तात् स्वदर्शनात् त्रपिष्यन्ते, मृषाकथनाय लोमशं

५ प्रावारं पुन र्न परिधास्यन्ते च। एकैकस्तु वदिष्यति, नाहं भाववादी,
६ कृषीबलोऽहं, बाल्यकाल एवामुकेन विक्रीतः। परन्तु तव करयो र्मध्य-
देशस्था आघाता अमी किमर्था इति केनचित् पृष्टः स वदिष्यति,
स्वबन्धूनां गृहेऽहमित्थमाहत इति।
७ भो खड्ग, मम मेषरक्षकस्य गात्रे मम सजातीयस्यैव गात्रे प्रपतेति
वाहिनीनां सदाप्रभुराह; मेषरक्षकं जहि, तेन मेषा विकीर्णा भवि-
८ ष्यन्ति, तदाहं क्षुद्रान् प्रति स्वहस्तं वर्त्तयिष्यामि। परन्तु सदाप्रभु-
राह, देशस्य सर्व्वत्र नराणामंशद्वयमुच्छेत्स्यते प्राणांस्त्यक्ष्यति च, तृती-
९ यांश एव तन्मध्येऽवशेक्ष्यते। तञ्च तृतीयांशमहं वह्निं प्रवेश्य रूप्यविला-
येनेव विलाययिष्यामि स्वर्णपरीक्षणेनेव तेषां परीक्षणं करिष्यामि च;
स तृतीयांशो मम नाम्ना प्रार्थनां करिष्यत्यहञ्च तदुत्तरं प्रदास्यामि;
असौ मम प्रजावृन्द इत्यहं वदिष्यामि, स च वदिष्यति, सदाप्रभु
र्ममेश्वर इति।

---

१४ चतुर्द्दशोऽध्यायः।

१ यिरूशालमस्य कष्टं रक्षणञ्च १२ तच्छत्रूणां दण्डनं १६ सर्व्वजातीनां मुक्तः कथनं
२० तया सर्व्वेषां पवित्रतालाभस्य।

१ पश्य, यदा त्वन्मध्यस्थिता तव सम्पत्ति र्लोप्त्रं भूत्वा विभक्ष्यते, तादृशं
२ दिनं सदाप्रभोरनुज्ञयागच्छति। सर्व्वा जातयश्च मया युद्धार्थं यिरू-
शालमस्यान्तिकं सङ्ग्राहिष्यन्ते, ताभि र्नगरं धारिष्यते च, गृहाणुल्लुण्ट-
यिष्यन्ते स्त्रियश्च प्रधर्षयिष्यन्त, पौराणामर्द्धांशश्च निर्व्वासार्थं निष्क्रमि-
३ ष्यति, प्रजानामवशिष्टांशस्तु नगरान्नोच्छेत्स्यते। अनन्तरं सदाप्रभु
र्निष्क्रम्य स्वीययुद्धदिनस्वरूपे तस्मिन् समरदिवसे ताभि र्जातिभिः सह
४ योत्स्यते। तस्मिन् दिवसे च पूर्व्वदिशि यिरूशालमस्याभिमुखे जीत-
वृक्षाणां गिरौ तस्य चरणाववस्थास्येते स च जीतवृक्षाणां गिरि
र्मध्यस्थान आपूर्व्वपश्चिमदिग्भ्यां विदीर्णोऽतीव महत्युपत्यका भविष्यति,
गिरेरेकोऽर्द्धांश उत्तरदिशमपरोऽर्द्धांशश्च दक्षिणदिशं सरिष्यतः।
५ यूयञ्च मम गिर्य्योरुपत्यकायां पलायिष्यध्वे, यतो गिर्य्योः सोपत्यकात्सेल-
पर्य्यन्ता भविष्यति; यिहूदीयराजस्योषियस्याधिकारकाले भूकम्पस्य
भयाद् यूयं यथा पलायितास्तथैव पलायिष्यध्वे, तदा ममेश्वरः सदा-
६ प्रभुरागमिष्यति, पवित्राश्च सर्व्वे त्वत्सहिता भविष्यन्ति। तस्मिन् दिने

च दीप्तेरभावो भविष्यति ज्योतींषि विलायिष्यन्ते। स दिवसोऽनुपमो ७
भविष्यति, स सदाप्रभोः परिचितः, स न दिवसा न रात्रि र्वा भवि-
ष्यति सायन्तनकाले तु दीप्ति र्जनिष्यते। परन्तु तस्मिन् दिने यिरू- ८
शालमादमृता आपो निःसरिष्यन्ति, तासामेकोऽर्द्धांशः पूर्व्वीयसमुद्र-
मपरोऽर्द्धांशश्च पश्चिमसमुद्रं यास्यतः, ग्रीष्मकाले शीतकाले च ता अव-
स्थास्यन्ते। सदाप्रभुश्च कृत्स्नदेशस्याधिकारी राजा भविष्यति; तस्मिन् ९
काले सदाप्रभुरेकस्तस्य नाम चैकं भविष्यति। गेवातो यिरूशालमस्य १०
दक्षिणे स्थितं रिम्मोणं यावत् कृत्स्नो देश आकारान्तरीभूय जङ्गलभूमेः
सदृशो भविष्यति। यिरूशालमञ्चोच्चीभूय निजस्थानेऽर्थतो विन्या-
मीनीयगोपुरात् प्रथमगोपुरस्य स्थानं यावत् कोणस्थगोपुरं यावत्
हननेलस्योच्चगृहाच्च राज्ञो द्राक्षापेषणार्थककुण्डान् यावन्निवत्स्यति।
नरास्तत्र निवत्स्यन्ति, वर्ज्जनसूचकः शापोऽपि पुन र्न भविष्यति, यिरू- ११
शालमञ्च निर्भयं निवत्स्यति।

परन्तु याः सर्व्वा जातयो यिरूशालमस्य विरुद्धं युद्धयात्रां करि- १२
ष्यन्ति, तत्सम्बन्धीयजनं सदाप्रभु र्येनाघातेनाहनिष्यति तद्वृत्तान्तोऽयं,
चरणाभ्यां तिष्ठतस्तस्य मांसं विगलिष्यति, कोटरयोस्तस्य चक्षुषी विग-
लिष्यतः, मुखे तस्य जिह्वा च विगलिष्यति। तस्मिन् दिने च तेषां मध्ये १२
सदाप्रभुनोत्पादिता महाव्याकुलता सम्भविष्यति, ते च प्रत्येकमन्यस्य
हस्तं धरिष्यन्ति, परन्त्वेकस्य हस्तोऽपरस्य हस्तस्य वैपरीत्येनोत्थापयि-
ष्यते। तदा यिहूदा अपि यिरूशालमे योत्स्यते, चतुर्द्दिक्स्थानां १४
सर्व्वासां परजातीनां रूप्यस्वर्णवस्त्रादिवस्तूनां महाराशिः सञ्चायिष्यते
च। तेषु शिविरेषु विद्यमानानामश्ववेसरोष्ट्रगर्द्दभादीनां पशूनामपि १५
तस्याघातस्य तुल्य आघातः सम्भविष्यति।

परन्तु यिरूशालमस्य विरुद्धमागतानां सर्व्वासां परजातीनां कृत्स्नो- १६
ऽवशिष्टांशः प्रतिवत्सरं राज्ञो वाहिनीगणाधिपस्य सदाप्रभोः समक्षं
प्रणिपतितुं कुटीरपर्व्व पालयितुञ्चोपस्थास्यते। भूमण्डलस्थगोष्ठीनां मध्ये १७
तु ये जना राज्ञो वाहिनीगणाधिपस्य सदाप्रभोः समक्षं प्रणिपतितुं
नोपस्थास्यन्ते, तेषामुपरि वृष्टि र्न पतिष्यति। मिस्रीयाणां गोष्ठी यदि १८
नोपतिष्ठते, तर्ह्यनागमनात् तेषामप्युपरि वृष्टि र्न पतिष्यति; ये पर-
जातीयजनाः कुटीरपर्व्वपालनार्थं नोपस्थास्यन्ते, सदाप्रभुस्तान् येनाह-
निष्यति, स एवाघातोऽमूषामप्युपरि वर्त्तिष्यते। एतदेव मिस्रीयाणां १९

पापफलं, कुटीरपर्व्वपालनार्थमनुपस्थितानां सर्व्वेषां परजातीयजनानाञ्च पापफलं भविष्यति।

२० तस्मिन् दिने सदाप्रभोः कृते पवित्रमिति लिपिरश्वानां घण्टिकासु विद्यमाना भविष्यति, सदाप्रभो र्गृहे स्थिताः स्थाल्यश्च यज्ञवेद्याः सम्मुख-
२१ स्थानां प्रोक्षणार्थकपात्राणां समाना भविष्यन्ति। यिरूशालमे यिहूदादेशे वा स्थिताः सर्व्वस्थाल्यश्च वाहिनीगणाधिपस्य सदाप्रभोः कृते पवित्रा भविष्यन्ति, यजमानाः सर्व्वे जनाश्चागत्य तासां मध्ये स्थालीरादाय तास्वेव पक्ष्यन्ति। तस्मिन् दिने च वाहिनीगणाधिपस्य सदाप्रभो र्गृहे किनानीयः कश्चिन्नरः पूर्व्ववन्नावस्थास्यते।

मालाखे र्भविष्यद्वाक्यानि।

---

१ प्रथमोऽध्यायः।

१ इस्रायेलीयलोकानाम् अक्तृतज्ञतामधि तर्ज्जनं ६ याजकानाम् अधर्म्मस्य कथनञ्च।

१ भाविोक्तिः। मालाखिना ज्ञापितं सदाप्रभो र्वाक्यं।

२ अहं युष्मासु प्रीतवानिति सदाप्रभुराह, यूयन्तु वदथ, केनास्मासु प्रीतवानसि? सदाप्रभुराह, एषावः किं याकूबस्य भ्राता नासीत्?
३ परन्त्वहं याकूबे प्रीतवान्। एषावन्त्वहं गर्हितवान् तस्य पर्व्वतांश्च
४ ध्वंसस्थानं, तस्याधिकारभूमिञ्च नागानां वसतिं कृतवान्। चूर्णा वयं, परन्तु प्रत्यावृत्योत्सन्नस्थानानि पुन र्निर्म्मास्यामहे इति चेदिदोमो ब्रूयात्, तर्हि वाहिनीनां सदाप्रभु र्वदति ते निर्म्मास्यन्तेऽहन्तूत्पाटयिष्यामि, ते च दुष्टताया देशः सदाप्रभो र्नित्यकोपपात्रस्वरूपा जाति-
५ श्चेति नाम्ना विख्यास्यन्ते। स्वीयनेत्रैस्तद् दृष्ट्वा यूयमपि वदिष्यथ, इस्रायेलः सीम्नः पारेऽपि सदाप्रभु र्महान्।

६ पुत्त्रः पितरं, दासश्च स्वप्रभुं सम्मानयति, अहन्तु चेत् पिता भवेयं, तर्हि मम सम्मानं कुत्र? प्रभु र्वा चेद् भवेयं, तर्हि मम भीतिः कुत्रेति

वाहिनीनां सदाप्रभु र्याजकान् गदति। भो याजकाः, मम नाम युष्मा-
भिरवज्ञायते। अत्र यूयं वदथ, तव नामास्माभिः कथमवज्ञातं? यूयं ७
मम यज्ञवेद्यामशुचि भक्ष्यमुत्सृजथ, तथापि वदथ, त्वमस्माभिः कथम-
शुचीकृतः? सदाप्रभो र्भोजनमञ्चोऽवज्ञेय इति कथनेन तदकारि।
युष्माभि र्बलिदानार्थमन्धस्य पशोरानयनं कुत्सितं न मन्यते, खञ्जस्य ८
रोगिणो वा पशोरानयनमपि कुत्सितं न मन्यते। त्वमेकदा स्वदेशस्या-
धिपतेः समीपं तादृशं पशुमानय, स किं त्वां रोचयिष्यति त्वामनुग्रही-
ष्यति वेति वाहिनीनां सदाप्रभुराह। अत इदानीमकदेश्वरस्य मुखं ९
प्रसादयन्तोऽस्मत्कृतेऽनुकम्पां याचध्वं। युष्माकमेव हस्तैरेतदकारि, पुन
र्युष्मत्कारणात् स किमनुग्रहं करिष्यतीति वाहिनीनां सदाप्रभुराह।
अहो युष्माकमेव मध्ये कोऽपि कपाटौ बध्नातु, तथा कृते मम वेदी १०
युष्माभिः पुन र्वृथा न दीपयिष्यते। युष्मासु मम कापि प्रीति र्नास्तीति
वाहिनीनां सदाप्रभुराह, युष्मत्करेभ्यश्चाहं नैवेद्यं न रोचयिष्यामि। यत ११
आसूर्य्योदयात्तस्यानाभ्यां परजातीनां मध्ये मम नाम महत्, सर्व्वस्थाने
च मम नाम्नः कृते धूपवद् दग्धं दानमानीयते, तच्च शुचि नैवेद्यं। वस्तुतः
परजातीनां मध्ये मम नाम महदिति वाहिनीनां सदाप्रभुराह, यूयन्तु १२
तदपवित्रीकुरुथ, यतो वदथ, सदाप्रभो र्भोजनमञ्चोऽशुचिस्तदीयलभ्य-
श्चावज्ञेयं भक्ष्यं। पुन र्वदथ, पश्य कीदृशी विडम्बना, यूयञ्च फूत्कारेण १३
तदवमन्यध्वे, चोरितं बलिं खञ्जं रोगिणं वानयथ चेत्थमेव नैवेद्यमुत्सृजथ,
युष्मत्करेभ्योऽहं किं तद् रोचयिष्यामीति सदाप्रभुराह। यस्तु प्रता- १४
रको व्रजमध्ये पुम्पशौ विद्यमाने सङ्कल्पं कृत्वा प्रभुमुद्दिश्य नष्टकल्पं स्त्री-
पशुमुत्सृजति, स शापग्रस्तः, यतो महान् राजाहमिति वाहिनीनां
सदाप्रभुराह, मम नाम च परजातीनां मध्ये भयावहं।

---

२ द्वितीयोऽध्यायः।

१ याजकानाम् अविश्वस्तता १० देवार्च्चातो जनानां तिरस्कारः १२ व्यभिचार-
दोरात्म्याभ्यां तेषां तिरस्कारः।

अत इदानीं, भो याजकाः, युष्मान् प्रत्ययमादेशो भवति, वाहिनीनां १
सदाप्रभुराह, यदि न शृणुत मम नाम्नः प्रतापं स्वीकर्त्तुञ्च मनोयोगं न २
कुरुथ, तर्ह्यहं युष्माकं विरुद्धम् अभिशापं प्रहेष्यामि युष्माकमाशीर्व्वा-

दांश्चाभिशप्स्यामि, वस्तुतो युष्माभि र्मनोयोगो न क्रियते तस्मादहं तान्
२ अभिशप्तवान्। पश्यताहं युष्माकं कृते वीजं भर्त्सयिष्यामि, युष्माकं वद-
नेषु पुरीषं युष्मत्पर्व्वणां पुरीषमेव विकरीष्यामि च, यूयमपि तद्राशि-
४ मपनायिष्यध्वे। ततोऽयमादेशो लेविना सार्द्धं कृतो मम नियमो भवि-
ष्यतीत्यभिप्रायात् स युष्मान् प्रति मया प्रहित इति यूयं ज्ञास्यथेति
५ वाहिनीनां सदाप्रभुराह। तेन सार्द्धं जीवनशान्त्योः प्रतिज्ञास्वरूपो
मम नियम आसीत्, अहञ्च तस्मै जीवनशान्ती प्राददां; स मद्भीतेः
प्रतिज्ञास्वरूप आसीत् लेविश्च मत्तोऽबिभेत्, मम नाम्नः समक्षमनमत
६ च। सत्यस्वरूपा व्यवस्था तस्य मुखेऽवातिष्ठत, तस्यौष्ठयोरन्यायो नावि-
द्यत; स शान्तिसारल्याभ्यां मत्सहगाम्यासीत्, बहूंश्चापराधात् परााव-
७ र्त्तयत्। वस्तुतो याजकस्यौष्ठौ ज्ञानं रक्षतस्तस्य मुखे च जना व्यवस्थाम-
८ न्वेषन्त इति युक्तं, यतः स वाहिनीनां सदाप्रभो र्दूतः। यूयन्तु सन्मार्गाद्
अपक्रान्ताः, व्यवस्थाव्यवहारे बहून् स्खालितवन्तः, लेवे र्नियमं नाशि-
९ तवन्त इति वाहिनीनां सदाप्रभुराह। अहमपि युष्मान् कृत्स्नस्य प्रजा-
वृन्दस्य समक्षम् अवज्ञेयान् नीचांश्च कृतवान्, यतो युष्माभि र्मम पन्थानो
न रक्ष्यन्ते व्यवस्थाव्यवहारे च मुखापेक्षा क्रियते।

१० सर्व्वेषामस्माकं किमेक एव पिता नास्ति? एक एवेश्वरः किमस्मान्
न सृष्टवान्? कुतो वयं प्रत्येकं स्वभ्रातरं प्रति विश्वासघातकतामनुति-
११ ष्ठामः? एतेनास्माकं पैतृको नियमोऽपवित्रीक्रियते। यिहूदा विश्वा-
सघातकतामनुतिष्ठति, इस्रायेलस्य मध्ये यिरूशालमे च गर्हणीय
आचारः क्रियते च, यतो यिहूदाः सदाप्रभोः प्रीतिभाजनं धर्म्मधामा-
१२ पवित्रं करोति विजातीयदेवस्य कन्यामुद्वहति च। तादृशीं क्रियां यः
करोति, तस्य नरस्य जागरूकं जनं तदुत्तरदातारं वाहिनीनां सदा-
प्रभवे नैवेद्योत्सर्ज्जकं जनञ्च याकूबस्य पटगृहाणां मध्याद् उच्छिनत्तु।

१३ द्वितीयञ्चेदमपकर्म्म युष्माभिः क्रियते, नेत्रजलेन रोदनेन कातरोक्त्या
च वाहिनीनां सदाप्रभो र्वेदी प्रच्छाद्यते, तेन स नैवेद्ये दृक्पातं न कुरुते,
१४ युष्मत्करेभ्यश्चाभिरुचितं किञ्चिन्न गृह्णाति। अत्र यूयं वदथ किमस्य
कारणं? कारणमेतत्, तव त्वदीययौवनकालीनभार्य्यायाश्च मध्ये सदा-
प्रभुः साक्ष्यस्ति, तां प्रति त्वया विश्वासघातकता कृता, सा तु तव
१५ सङ्गिनी तव सहधर्म्मिणी चास्ति। य आत्मनः शेषांशस्याधिकारी
तादृश एको नरः किं न तत् कृतवान्? वाढं, स एको नरः किमकरोत्?

स ईश्वरीयवंशमन्वैषत। अतो यूयं स्वात्मनः कृते सावधाना भवत, तव
यौवनकालीनभार्य्यां प्रति विश्वासघातकतां माकार्षीः। यतोऽहं १६
भार्य्यात्यागं गर्हे इतीस्रायलस्येश्वरः सदाप्रभुराह, भार्य्यात्यागिनो वस्त्रं
दौरात्म्येन परिच्छन्नमिति वाहिनीनां सदाप्रभुराह, अतो यूयं स्वात्मनः
कृते सावधाना भवत विश्वासघातकताञ्च माकार्ष्ट।
यूयं स्ववाक्यैः सदाप्रभुं खेदयथ, परन्तु वदथ, केन खेदयामः? यः १७
कश्चिद् दुष्टतामाचरति, स सदाप्रभो दृष्ट्यां भद्रः, तादृशाश्च नरास्तस्मै
रोचन्ते, न चेन्न्यायविचारस्येश्वरः कुत्रेति कथनेन तं खेदयथ।

---

३ तृतीयोऽध्यायः।

१ ख्रीष्टस्यागमनकथनं ७ जनानां दुष्टताकथनं १३ तेषामविश्वासकथनं १६ ईश्वराद् भयकारिणां मङ्गलकथनञ्च।

पश्यताहं स्वीयदूतं प्रहेतुमुद्यतोऽस्मि, स मदग्रे पन्थानं संस्करिष्यति, १
यस्य युष्माभिरन्विष्यमाणः प्रभु र्युष्माभिरभिरुचितस्य नियमस्य दूतः
सोऽकस्मात् स्वप्रासाद उपस्थास्यते, पश्यत स आयातीति वाहिनीनां
सदाप्रभुराह। तस्यागमनदिनन्तु सोढुं केन शक्यं? तस्य दर्शनदाने वा २
कोऽवस्थास्यते? यतः स विलायकस्वर्णकारस्याग्नि रजकानां क्षारोदकस्य
वा सदृशः। स च रूप्यं विलाययन् शुचीकुर्व्वंस्तत्रैवोपविश्य स्वर्णमिव ३
रूप्यमिव वा लेवेः सन्तानान् शुचीकुर्व्वन् निर्म्मलीकरिष्यति, ततस्ते
सदाप्रभोः परिचारका धार्म्मिकतया नैवेद्योत्सर्ज्जकाश्च भविष्यन्ति।
यद्वच्च प्राक्तनदिनेषु पूर्व्ववत्सरेषु च, तद्वत् तदा यिहूदायिरूशलमयो ४
र्नैवेद्यं सदाप्रभवे रोचिष्यते। अहञ्च विचाराय युष्मत्समीपमाग- ५
मिष्यामि, मायाविनां व्यभिचारिणां मृषाशपथकारिणां, वेतनजीविनि
विधवायामनाथबालके च दौरात्म्यकारिणां प्रवासिपीडकानाञ्च, मद्भी-
तिवर्ज्जितानां जनानां प्रातिकूल्येनाहं सत्वरः साक्षी भविष्यामि चेति
वाहिनीनां सदाप्रभुराह। यतः सदाप्रभुरहं निर्विकारः, याकूबस्य ६
सन्तानाश्च यूयम् अनश्वराः।
स्वपूर्व्वपुरुषाणां कालतो यूयं मम विधिभ्योऽपक्रम्य तान् न रक्षथ। ७
मां प्रति पर्य्यावर्त्तध्वं, तथा कृतेऽहं युष्मान् प्रति पर्य्यावर्त्तिष्ये। अत्र यूयं
वदथ, केन पर्य्यावर्त्तिष्यामहे? ईश्वरः किं मनुष्येण प्रतारयितव्यः? ८

यूयन्तु मां प्रतारयथ। अत्र यूयं वदथ, केन त्वां प्रतारयामः? दशमांशे-
९ नोपहारेण च। यूयं शापेनाभिशप्ताः, वस्तुतो मे कृत्स्ने जाते, यूयं मां
१० प्रतारयथ। कृत्स्नो दशमांशो युष्माभिः कोषागारमानीयतां मम गृहे
च भक्ष्यद्रव्यं विद्यतां, एतेनैव मां परीक्षध्वमिति वाहिनीनां सदाप्रभु-
राह। अवश्यमहं युष्मत्कृते गगनस्य वातायनान्युद्घाटयिष्यामि, युष्मत्कृते-
११ ऽपरिमेयामाशिषं विमोच्यामि च। युष्मत्कृते ग्रासकारिणं तर्जयिष्यामि
च, तेन स युष्मत्क्षतये भूमेः फलानि न नाशयिष्यति, क्षेत्रे च युष्माकं
१२ द्राक्षालता न निष्फला भविष्यतीति वाहिनीनां सदाप्रभुराह। सर्व्वास्व
परजातयो युष्मान् धन्यान् वदिष्यन्ति, यतो यूयमेवाभिरुचितस्य देश-
स्याधिकारिणो भविष्यथेति वाहिनीनां सदाप्रभुराह।
१३ मम प्रातिकूल्येन युष्माकं वाक्यान्युग्राण्यभवन्निति सदाप्रभुराह। अत्र
१४ यूयं पृच्छथ, तव प्रातिकूल्येन वयं किं कथयामः? यूयं वदथ, ईश्वरस्या-
राधनालीका, तस्य रक्षणीयरक्षणाद् वाहिनीगणाधिपस्य सदाप्रभोः
१५ समक्षं मलिनाकारेण गमनाच्चास्माकं को लाभो जातः? अतोऽधुना वयं
दर्पिणो नरान् धन्यान् वदामः, दुष्कर्म्मकारिण एव प्रतिष्ठां प्राप्तवन्त
ईश्वरञ्च परीक्ष्य निस्तारमपि लब्धवन्तः।
१६ तदानीं सदाप्रभुतो भयकारिणो नरा मिथः समलपन् सदाप्रभुश्चा-
वधायाशृणोत्, सदाप्रभुतो भयकारिणां तस्य नामानुचिन्तताञ्च नराणां
१७ कृते तस्य सम्मुखं स्मरणार्थकमेकं पुस्तकमलेखि च। ते ममैव सन्तीति
सदाप्रभुराह, मया यद्दिनं रच्यते, तस्मिंस्ते मम निजस्वं भविष्यन्ति,
यथा च पिता स्वसेवाकारिणि पुत्त्रे स्नेहवान्, तथैवाहं तेषु स्नेहवान्
१८ भविष्यामि। तदा यूयं परिवृत्य धार्म्मिकदुष्टयो र्मध्ये प्रभेदं, ईश्वर-
सेवाकारिणस्तत्सेवात्यागिनश्च मध्ये च प्रभेदं द्रक्ष्यथ।

---

४ चतुर्थोऽध्यायः।

१ दुष्टानां दुर्दशा धार्म्मिकाणां मङ्गलं ४ व्यवस्थायामवधानाय निवेदनं ५ एलिय-
स्यार्थाद् योहनस्यागमनकथनञ्च।

१ वस्तुतः पश्यत, चुल्लीवत् प्रज्वलितः स दिवस आयाति, तदानीं
दर्पिणो दुष्कर्म्मकारिणश्च सर्व्वे नराः पलालस्वरूपा भविष्यन्ति, स
आगामी दिवसस्तान् भस्मीकरिष्यति चेति वाहिनीनां सदाप्रभुराह,

स तेषां न मूलं न पल्लवं वा शेषयिष्यति। परन्तु भो मन्नामतो भय- २
कारिणः, धार्म्मिकतारूपः सूर्य्या युष्मानभ्युदेष्यति, तत्किरणाण्यारोग्या-
वहानि। यूयञ्च निर्गत्य पुष्टा गोवत्सा इव नर्त्तिष्यथ, दुष्टांश्च मर्द्दिष्यथ, ३
यतो मया यद् दिनं रच्यते, तस्मिंस्ते युष्मत्पदतलस्थं भस्म भविष्य-
न्तीति वाहिनीनां सदाप्रभुराह।

यूयं मद्दासस्य मूससो व्यवस्थां स्मरत, अहमेव होरेबे कृत्स्नस्येस्राये- ४
लस्य कृते तं विधिशासनसङ्ग्रहरूपां तां व्यवस्थामाज्ञापितवान्।

पश्यत, सदाप्रभो मंहतो भयङ्करस्य च दिनस्यागमनस्याग्रेऽहं युष्मान् ५
प्रत्येलियं भाववादिनं प्रहेष्यामि। स सन्तानान् प्रति पितॄणां हृदयं, ६
पितॄन् प्रति च सन्तानानां हृदयं पर्य्यावर्त्तयिष्यति, नचेदहमागमन-
काले कृत्स्नं देशं वर्ज्जनसूचकेन शापेनाहनिष्यामि।

Bible
Sansk
C

Bible. Sanskrit

THE

NEW TESTAMENT

OF OUR

LORD AND SAVIOUR

JESUS CHRIST;

IN SANSCRIT.

TRANSLATED FROM THE GREEK

By the Calcutta Baptist Missionaries, with Native Assistants.

CALCUTTA

PUBLISHED BY THE CALCUTTA AUXILIARY BIBLE SOCIETY,
23, CHOWINGHEE ROAD.

1886.

Third Edition.

CALCUTTA:
PRINTED BY J. W. THOMAS, BAPTIST MISSION PRESS.
1886.

धर्म्मपुस्तकस्य शेषांशः ।

अर्थतः

प्रभुना यीशुख्रीष्टेन

निरूपितस्य

नूतनधर्म्मनियमस्य

ग्रन्थसङ्ग्रहः ।

इंलण्डीयवङ्गदेशीयपण्डितै र्यूनानीयभाषातो व्याकृतः

धर्म्मसमाजसाहाय्येन मुद्राक्षराङ्कितस्य ।

कलिकातानगरे

१८०८ शाके । इं सन १८८६ ।

निर्घण्टपत्रं।

मथिलिखितः सुसंवादः।

१ प्रथमोऽध्यायः।

१ ख्रीष्टस्य जन्मपत्रम् १८ जन्मकथनञ्च।

१ अथ यीशोः ख्रीष्टस्य जन्मपत्रम्। स तु दायूदस्य सन्तानः।
२ दायूदोऽब्राहामस्य सन्तानः। अब्राहाम इस्हाकं जनयामास।
इस्हाको याकोबं जनयामास। याकोबो यिहूदां तस्य भ्रातॄंश्च
३ जनयामास। थामरो गर्भे यिहूदाः पेरसं सेरहञ्च जनयामास।
४ पेरसो हिष्रोणं जनयामास। हिष्रोणोऽरामं जनयामास। अरा-
मोऽम्मीनादबं जनयामास। अम्मीनादबो नहशोनं जनयामास।
५ नहशोनः सल्मोनं जनयामास। सल्मोनो राहबो गर्भे बोयसं
जनयामास। बोयसो रूतो गर्भ ओबेदं जनयामास। ओबेदो
६ यिशयं जनयामास। यिशयो राजानं दायूदं जनयामास। राजा
दायूदो मृतस्योरियस्य जायाया गर्भे शलोमानं जनयामास।
७ शलोमा रहबियामं जनयामास। रहबियामोऽबियं जनयामास।
८ अबिय आसां जनयामास। आसा यिहोशाफटं जनयामास।
यिहोशाफटो योरामं जनयामास। योराम उषियं जनयामास।
९ उषियो योथमं जनयामास। योथम आहसं जनयामास। आहसो
१० हिष्कियं जनयामास। हिष्कियो मनःशिं जनयामास। मनःशिरा-
११ मोनं जनयामास। आमोनो योशियं जनयामास। योशियो

यिकनियं तस्य भ्रातृंश्च जनयामास। तदा बाबिलीयप्रवासोऽभूत्।
बाबिलीयप्रवासात् परं यिकनियः शल्टीयेलं जनयामास। शल्टीयेलः १२
सरुब्बाबिलं जनयामास। सरुब्बाबिलोऽबीहूदं जनयामास। १३
अबीहूद इलियाकीमं जनयामास। इलियाकीम आसोरं जनया-
मास। आसोरः सादोकं जनयामास। सादोक आखीमं जनयामास। १४
आखीम इलीहूदं जनयामास। इलीहूद इलियासरं जनयामास। १५
इलियासरो मत्तनं जनयामास। मत्तनो याकोबं जनयामास।
याकोबस्य मरियमः पतिं योषेफं जनयामास। तस्या एव गर्भे १६
खीष्टोऽर्थतोऽभिषिक्त इत्यभिधो यीशु र्जज्ञे।

इत्यमब्राहामाद् दायूदं यावत् साकल्येन चतुर्द्दशपुरुषाः, १७
दायूदात् पुन र्बाबिलीयप्रवासं यावच्चतुर्द्दशपुरुषाः, बाबिलीयप्रवा-
सात् पुनः खीष्टं यावच्चतुर्द्दशपुरुषाश्च।

यीशोः खीष्टस्य तु जन्मेत्थमभूत्। तस्य मातरि मरियमि १८
योषेफाय वाग्दत्तायां सत्यां तयोः सङ्गमात् प्राक् सा पवित्रेणात्मना
गर्भवतीत्याविष्कृतं। तस्याः पति र्योषेफस्तु धार्म्मिकोऽथच तां १९
साधारणनिन्दाभाजनं कर्त्तुमनिच्छन् तां गुप्तं परित्यक्तुमकल्पयत्।
तस्मै त्वेतच्चिन्तयते प्रभो र्दूतः स्वप्ने दर्शनं दत्त्वावादीत्, भो २०
दायूदस्य सुत योषेफ स्वभार्य्याया मरियमः परिग्रहणान्माऽभैषीः,
यतस्तस्या गर्भफलं पवित्रादात्मनः सम्भूतम्। सा हि पुत्रं प्रसविष्यते २१
त्वञ्च तस्य नाम यीशुरर्थतस्त्रातेति करिष्यसि, यतः स एव स्वप्र-
जास्तासां पापेभ्यस्तारयिष्यति। सर्व्वमेतत्तु तथा बभूव यथा २२
भाववादिना व्याहृतं प्रभोरिदं वाक्यं सिद्धिं गच्छेत्, यथा,

कुमारीं गर्भिणीं पश्य सा पुत्रं प्रसविष्यते। २३
इम्मानूयेल इत्येव तस्य नाम भविष्यति॥

२४ नाम्नोऽस्य तात्पर्य्यम् अस्मत्सङ्गीश्वर इति । अनन्तरं निद्रोत्थितो
योषेफो यथादिष्टं दूतेन तथैवाकार्षीत्, फलतः स्वभार्य्यां पर्य्य-
२५ ग्रहीत्, सा परं यावत् प्रथमसुतं न सुषुवे तावत् स तां न
प्राजानात् । तस्य नाम च यीशुरित्यकार्षीत् ॥ १ ॥

---

२ द्वितीयोऽध्यायः ।

१ नक्षत्रदर्शनात् ज्योतिर्विदां यिरूशालमागमनं १३ यूषफा यीशुमरियमो र्मिस
रानयनं १६ वैत्लेहमें नगरे हेरोद्राजस्य शिशूनां हननं १९ इस्रायेल्देशं
प्रति ख्रीष्टस्य पुनरागमनं नासरत्नगरे निवसनञ्च ।

१ राज्ञो हेरोदस्य काले यिहूदियादेशस्ये बैतलेहमे यीशो
र्जन्मनः परं, पश्य, प्राच्यदेशात् केचिज्ज्योतिर्विदो यिरूशालेममागत्य
२ जगदुः, कुत्र स यिहूदीयानां नवजातो राजा? यस्मादुदयदिशि
३ तस्य नक्षत्रं दृष्टवन्तो वयं तं प्रणिपतितुमागताः । श्रुते त्वस्मिन्
राज्ञा हेरोदस्य तेन च सह कृत्स्नस्य यिरूशालेमस्योद्वेगः सञ्जातः ।
४ ततः स सर्व्वान् मुख्ययाजकान् प्रजानां शास्त्राध्यापकांश्चैकत्र कृत्वा
५ पप्रच्छ ख्रीष्टेन कुत्र जन्म ग्रहीतव्यं? ते तं जगदुः, यिहूदिया-
देशस्ये बैतलेहमे, यतो भाववादिनेत्थं लिखितमास्ते यथा,

६ यिहूदीयप्रदेशस्य त्वन्तु भो बैतलेहम ।
यिहूदानायकश्रेण्यां न चोदिष्टं कथञ्चन ॥
त्वत्त एव यतो हेतोः स उदेष्यति नायकः ।
मत्प्रजावृन्दमिस्रायेल् येन सम्पालयिष्यते ॥

७ अनन्तरं हेरोदस्तान् ज्योतिर्विदो गुप्तमाहूय तन्नक्षत्रं कति
८ कालं प्रकाशितमिति पृष्ट्वा सूक्ष्ममवगत्य तान् बैतलेहमं प्राहिणो-
दिदमब्रवीच्च, यूय गत्वा सूक्ष्मं तस्य शिशोः तथ्यानुसन्धानं कुरुत,

प्राप्ते तद्देशे मां ज्ञापयत, तेनाहमपि गत्वा तं प्रणिपतिष्यामि।
राज्ञो वाक्यं श्रुत्वा तै र्गमने कृते, पश्य, पूर्व्वदिशि यन्नक्षत्रं तै ९
र्दृष्टं तत् तेषामग्रतोऽगच्छत् शिशुश्च स यत्राविद्यत तत् स्थानं
प्राप्य तदूर्द्ध्वमवतस्थे। नक्षत्रं तद् दृष्ट्वा तेऽतीव महतानन्देन १०
प्रफुल्लिताः। अनन्तरं प्रविश्य तै र्गृहं मात्रा मरियमा सह ११
शिशुराविश्चक्रे। ततस्ते प्रणिपत्य तस्य भजनं चक्रुः स्वधनकोषा-
नुन्मोच्य तस्मै स्वर्णकुन्दुरुगन्धरसान् दर्शनीयान्युपजहुश्च। ततः परं १२
ते हेरोदं प्रति मा प्रत्यावर्त्तध्वमित्यादेशं स्वप्नेनेश्वराल्लब्ध्वान्य
मार्गेण स्वदेशं प्रतस्थिरे।

प्रस्थितेषु तेषु, पश्य, प्रभो र्दूतः स्वप्ने योषेफाय दर्शनं दत्त्वा १३
जगाद, उत्तिष्ठ शिशुं तन्मातरञ्च गृहीत्वा मिसरं पलायस्व च,
यावच्चाहं तुभ्यं नान्यत् कथयामि तावत् तत्रावतिष्ठस्व, यतो
हेरोदः शिशो र्हत्यार्थे तं मृगयितुमुद्यतः। अतः स रात्रावुत्थाय १४
शिशुं तन्मातरञ्च गृहीत्वा मिसरं प्रतस्थे हेरोदस्य मृत्युं यावत् १५
तत्रावतस्थे च। इत्थं भाववादिनोक्ता प्रभोरियं कथा संसिद्धा
यथा,

मिसर्देशत एवाहं स्वीयपुत्रं समाह्वयम्।

तदा ज्योतिर्विद्भिरहं प्रवञ्चित इति दृष्ट्वा हेरोदो भृशं १६
चुकोप, ज्योतिर्विदां वचनाच्च सूक्ष्मं निर्णीतकालानुरूपं वर्षद्वय-
वयस्कास्तन्न्यूनवयस्काश्च यावन्तः पुंशिशवो बैतलेहमे तत्सत्त्नपरि-
सीमनि चाविद्यन्त जनान् प्रहित्य स तान् सर्व्वान् घातयामास।
तदा भाववादिना यिरमियाहेणोक्तमिदं वचनं सिद्धिं गतं यथा, १७

रामायां श्रूयते रावः शोकजं परिदेवनं। १८
रोदनं बहुरूपस्य हाहाकारस्य च ध्वनिः॥

स्वसुतान् अनुशोचन्ती राहेल् करोति रोदनं।
सान्त्वनां सा न गृह्णाति यतो हेतो र्न सन्ति ते॥

१९ अनन्तरं पश्य मृते हेरोदे प्रभो र्दूतो मिसरे योषेफाय
२० स्वप्ने दर्शनं दत्त्वा जगाद, उत्तिष्ठ शिशुं तन्मातरञ्च गृहीत्वेस्रायेे-
२१ लदेशं गच्छ च, यस्माच्छिशोः प्राणनाशार्थिनो मृतवन्तः। ततः स
२२ उत्थाय शिशुं तन्मातरञ्च गृहीत्वेस्रायेलदेशं प्रविवेश। किन्त्वार्खि-
लायः स्वपितुर्हेरोदस्य पदं प्राप्य यिहूदियाया राजास्तीति
निशम्य स तत्र गन्तुं शङ्कितः। ततः परं स्वप्न ईश्वरीयादेशं लब्ध्वा
२३ स गालीलीयजनपदं प्रतस्थे, तत्रागत्य च नासरताभिधे नगरे
वसतिं चक्रे। इत्थं स नासरीयोऽभिधायिष्यत इति भाववादि-
भिरुक्ता कथा सिद्धिं गता॥ २॥

---

३ तृतीयोऽध्यायः।

१ योहनो विवरणं ७ तस्य स्नापनप्रचारः १२ खीष्टस्य स्नापनञ्च।

१ तस्मिन् काले स्नापको योहन उपतिष्ठते। स यिहूदियाया
२ मरौ घोषणां कुर्व्वन्नवदत्, मनांसि परावर्त्तयत यतः स्वर्गराज्यं
३ समीपमागतं। वास्तवं स हि भाववादिना यिशायाहेन निर्द्दिष्टो
नरो यथा,

मरौ घोषयतः प्रोच्चैरस्त्ययं कस्यचिद् रवः।
प्रभोः संस्कुरुताध्वानं विधद्ध्वं तत्पथी ऋजू:।

४ तस्य तु योहनस्योष्ट्रलोमनिर्म्मितं वसनं कटौ बद्धा चर्म्मनिर्म्मिता
पटुका चासीत्; पतङ्गा वन्यमधु च तस्य खाद्यान्यासन्।
५ तदानीं यिरूशालेमस्य कृत्स्नयिहूदियादेशस्य यर्द्दनान्तिकस्य

कृत्स्नजनपदस्य च मानवास्तत्समीपं गत्वा स्वपापानि स्वीकुर्व्वाणा ६
यर्द्दने तेनास्नाप्यन्त। अनन्तरं तदीयस्नानार्थिनः फरीशिनां ७
सद्दूकिनाञ्च बहवो नरा आगच्छन्तीति दृष्ट्वा स तान् जगाद, भो
सर्पवंशाः, यूयं भाविक्रोधात् पलायितुं केनादिष्टाः? अतो मनः- ८
परावर्त्तनस्य योग्यानि फलानि फलत। अस्माकं पिताब्राहामो ९
विद्यत इति वाक्यप्रयोगं वा स्वान्तरे मैव कल्पयत। यतोऽहं
युष्मान् ब्रवीमि, एतेभ्यः प्रस्तरेभ्योऽब्राहामस्य कृते सन्तानानुत्पा-
दयितुमीश्वरः शक्तिमान्। परन्त्वधुनैव पादपानां मूलेषु कुठारो १०
लगन्नास्ते, अतो यः कश्चित् पादपः सत्फलं न फलति, स उच्छिद्यते
वह्नौ निक्षिप्यते च। युष्मान् अहं मनःपरावर्त्तनाय तोये स्नापयामि; ११
मत्पश्चात्तु य आगच्छति स मत्तो बलवान् तस्योपानहौ वोढुमहं
न योग्यः, स युष्मान् पवित्र आत्मनि वह्नौ च स्नापयिष्यति।
तस्य हस्ते च सूर्पां विद्यते, स स्वीयखलं सम्यक् संशोधयिष्यति १२
निजगोधूमान् कुशूले सङ्ग्रहीष्यति च तुषांस्त्वनिर्व्वाणवह्निना
दाहयिष्यति।

तदा योहनेनाहं स्नापयितव्य इति मत्वा यीशु गालीलतो १३
यर्द्दने तत्समीपमाजगाम। योहनस्तु तं वारयन्नब्रवीत्, भवता १४
मम स्नापनं प्रयोजनीयं, भवांस्तु मदन्तिकमागच्छति? ततो १५
यीशुस्तं प्रत्यवादीत्, अधुनानुमन्यस्व यस्मादित्थं सर्व्वधर्म्मसाधन-
मावयो र्युज्यते। तदा स तमनुमन्यते। स्नापितस्तु यीशुस्तूर्णं १६
तोयादुत्थितः। पश्य तदा तस्य कृते स्वर्ग उद्घाटित ईश्वरस्यात्मा
च कपोत इवावरोहन् तमाश्रयंश्च तेन दृष्टः स्वर्गतः सञ्जाता चैका १७
वाणी बभाषे, मम प्रियः पुत्रोऽयम् अस्मिन्नेवाहं प्रीतः॥ ३॥

४ चतुर्थोऽध्यायः।

१ दियावलेन ख्रीष्टस्य परीक्षणं १२ तस्य कफर्नाहूमे वसनं १७ तस्य सुसंवाद-
प्रचारणं १८ पितर्-आन्द्रिय-याकोब्-योहन् एतेषामाह्वानं २३ ख्रीष्टेन रोगिणां
रोगमोचनञ्च।

१ तदानीं यीशु र्दियावलेन परीक्षासहनार्थमात्मना मरुं नीतः।
२ तत्र स चत्वारिंशद्दिनानि चत्वारिंशद्रात्रीश्चोपोषितः, ततः परं
३ क्षुधितः। तदा परीक्षकस्तमुपागत्य जगाद, भवांश्चेदीश्वरस्य पुत्रस्तर्हीमे
४ प्रस्तरा यथा पूपा भवेयुस्तथाज्ञापयतु। स तु प्रतिजगाद, लिखि-
तमास्ते, न केवलेन पूपेन मनुष्यो जीविष्यति, किन्त्वीश्वरस्य
५ मुखान्निर्गच्छता येन केनचिद् वचनेन। तदा दियावलस्तं पुण्यनगरं
६ नीत्वा धर्म्मधाम्नः शिखरे स्थापयित्वा जगाद, भवांश्चेदीश्वरस्य
पुत्रस्तर्ह्यधस्तात् प्रपततु यतो लिखितमास्ते,

त्वत्कृते निजदूतेभ्यः स आदेशं प्रदास्यति।
यत्नाद्धन्याः पदं शैले तत् त्वां वक्ष्यन्ति ते करैः॥

७ यीशुस्तं जगाद, इदमपि लिखितमास्ते, त्वं स्वेश्वरस्य प्रभोः
८ परीक्षां माऽकार्षीः। पुनश्च दियावलस्तमतीवोच्चं गिरिं नीत्वा
९ जगतो निखिलराज्यानि तेषां प्रतापञ्च दर्शयन्नवादीत्, त्वं चेत्
प्रणिपत्य मम भजनां कुर्य्यास्तर्ह्येतानि सर्व्वाणि तुभ्यं दास्यामि।
१० तदा यीशुस्तं जगाद, अपसर शैतान, यतो लिखितमास्ते, निजे-
श्वरस्य प्रभो र्भजना त्वया कर्त्तव्या, एकश्च स एव त्वयाराध-
११ यितव्यः। तदा दियावलस्तमत्याक्षीत्, पश्च चापरं स्वर्गदूता
उपागत्य तं परिचरितुं प्रावर्त्तन्त।

१२ ततः परं योहनः कारायां समर्पित इति निशम्य यीशु
१३ र्गालीलं प्रतस्थे नासरतं त्यक्त्वा च सबूलूनस्य नप्तालेश्च सीमनि

सागरतीरस्थे कफरनाहूम उपस्थाय वसतिं चक्रे। इत्थं भाववा- १४
दिना यिशायाहेन कथितमिदं वाक्यं सिद्धिं गतं यथा,

सबूलूनस्य यो देशो नप्तालेरपि या क्षितिः। १५
पद्धतिः सागरासन्ना यर्द्दनस्योत्तरे स्थिता॥
सेविते परजातीयैस्तस्मिन् गालीलमण्डले।
अन्धकारे समासीनै र्जनै र्दृष्टा महाद्युतिः॥ १६
मृत्युच्छायावृते देश उपविष्टाश्च ये पुरा।
ज्योतिस्तेषां मनुष्याणामुदितं दृष्टिगोचरे॥

ततः परं यीशु र्घोषणां कर्त्तुमारभ्येदमब्रवीत्, मनांसि १७
परावर्त्तयत, यतः स्वर्गराज्यं सन्निकटमागतं। अपरं यीशु १८
र्गालीलीयसागरस्य तटे विहरन् द्वौ भ्रातरावर्थतः पितराभिधं
शिमोनं तस्य सहोदरमान्द्रियञ्च सागरे जालं क्षिपन्तौ ददर्श,
यतस्तौ धीवरावास्तां। स तौ जगाद, मम पश्चादागच्छतम् १९
अहञ्च युवां मनुष्यधारिणौ धीवरौ विधास्यामि। ततस्तौ तूर्णं २०
जालानि विहाय तमन्वगच्छतां। तस्मात् स्थानात् प्रगत्य सोऽपरौ २१
द्वौ भ्रातरावर्थतः सिबदियस्य पुत्रं याकोबं तदीयसहोदरं योहनञ्च
स्वजनकेन सिबदियेन सह नौकायां स्वजालानां जीर्णोद्धारे
नियुक्तौ दृष्ट्वा तावाजुहाव। तौ च तत्क्षणमेव नौकां स्वपितरञ्च २२
विहाय तमन्वगच्छतां।

अनन्तरं यीशुः कृत्स्नं गालीलं परिभ्राम्यन् तत्रत्यानां समाज- २३
गृहेषु शिक्षामददात् राज्यस्य सुसंवादञ्चाघोषयत् जनानां याव-
तीयरोगं यावतीयदौर्ब्बल्यञ्चोपाशमयत्। एवं तस्य ख्यातिः कृत्स्ने २४
सुरियादेशे व्यानशे, अस्वस्था विविधे रोगै र्व्यसनैश्च क्लिष्टा
भूताविष्टा अपस्मारिणः पक्षाघातिनश्च सर्व्वे मनुष्यैस्तस्यान्तिक-

२५ मानीतास्तेन स्वस्थीकृताश्च। अपरं गालील-दिकापलि-यिरू-
शालेम-यिहूदियाप्रदेशेभ्यो यर्द्दनपाराच्च महान्तो मानवनिवहा
तमन्वगच्छन्॥ ४॥

---

५ पञ्चमोऽध्यायः।

१ खीष्टोपदेशारम्भः ३ धन्यजनानां निर्णयः १३ खीष्टशिष्याणां लवणदीप्तिस्वरूपत्व-कथनं १७ व्यवस्थासाधनाय खीष्टावतारः २१ बधक्रोधयोर्निषेधः २७ पारदारिकत्वप्रतिषेधः ३३ शपथनिषेधः ३८ हिंसाप्रतिषेधः ४३ रिपुभिः सार्द्धं प्रीतिव्यवस्था च।

१　तान् मानवनिवहान् दृष्ट्वा स गिरिमारुरोह। तत्र तस्मिन्नुपविष्टे
२ शिष्यास्तस्य समीपमागमन्। तदा स वक्तमुद्घाट्य तेभ्यः शिक्षां दातुं
प्रवृत्तोऽब्रवीत्——
३　दीनात्मानो धन्याः, यतः स्वर्गराज्यं तेषामेव। शोकार्त्ता
५ धन्याः, यतस्ते सान्त्वयिष्यन्ते। मृदुशीला धन्याः, यतस्ते दायांशवत्
६ क्षितिं लप्स्यन्ते। धार्म्मिकतां बुभुक्षवः पिपासवश्च धन्याः, यतस्ते
८ परितर्प्स्यन्ति। कृपावन्तो धन्याः, यतस्ते कृपामवाप्स्यन्ति। शुचिहृदो
९ धन्याः, यतस्त ईश्वरं द्रक्ष्यन्ति। सन्धिकारिणो धन्याः, यतस्त
१० ईश्वरस्य पुत्रा इत्यभिधायिष्यन्ते। धर्म्महेतुनोपद्रुता धन्याः, यतः
११ स्वर्गराज्यं तेषामेव। धन्या यूयं यदा मनुष्या मदर्थं युष्मान्
निन्दन्त्युपद्रवन्ति च युष्मद्विरुद्धं मृषा सर्व्वविधां कुकथां व्याहरन्ति
१२ च। आनन्दतोल्लसत च, यतः सञ्चितं स्वर्गे युष्माकं प्रभूतं पारि-
तोषिकं। वास्तवं युष्माकं पूर्व्वं ये भाववादिन आसन्, तांस्ते
तथैवोपाद्रवन्।
१३　यूयं पृथिव्या लवणं। लवणं तु यदि विस्वादं जायते तर्हि
केनोपायेन तत् स्वादयुक्तं कारिष्यते? ततः परं तत् कस्मिंश्चित्

कार्य्यं न युज्यते, केवलं बहि र्निक्षेपणे मानवपदै र्मर्द्दने च युज्यते।
यूयं जगतो दीपः। पर्व्वतोपरि स्थितं नगरं प्रच्छन्नमवस्थातुं न १४
शक्नोति। मनुष्याश्च दीपिकां प्रज्वाल्य न द्रोणस्याधस्ताद् अपि १५
तु दीपाधारस्योपरि स्थापयन्ति सा च गृहेऽवस्थितानां सर्व्वेषां
राजते। तथैव युष्माकं दीप्ति र्मनुष्याणां समक्षं विराजतां, तथा १६
कृते युष्माकं सत्क्रिया दृष्ट्वा ते युष्माकं स्वर्गस्थं पितरं स्तोष्यन्ति।

व्यवस्थाया भाववादिनां वा मोचनायाहमागत इति मानुमि- १७
मीध्वं। न मोचनाय, प्रत्युत पूरणायाहमागतः, यतोऽहं युष्मान् १८
सत्यं ब्रवीमि, यावद् व्योममेदिन्योरत्ययो न भविष्यति तावद्
व्यवस्थाया एका मात्रैको विन्दु र्वा नैवात्येष्यति सर्व्वमेव हि
सेत्स्यति। अतो यः कश्चिदेतासां क्षोदिष्ठानामाज्ञानामेकां मुञ्चति १९
मनुष्यांश्च तदनुरूपं शिक्षयति, स स्वर्गराज्ये क्षोदिष्ठोऽभिधायिष्यते।
यस्तु ता आचरति शिक्षयति च स स्वर्गराज्ये महानभिधायिष्यते। २०
यतोऽहं युष्मान् ब्रवीमि, युष्माकं धार्म्मिकता यदि शास्त्राध्याप-
कानां फरीशिनाञ्च धार्म्मिकतातोऽधिकं प्रभूता न स्यात्, तर्हि
यूयं स्वर्गराज्यं नैव प्रवेक्ष्यथ।

त्वं नरहत्यां माऽकार्षीः, यस्तु नरहत्यां करोति स धर्म्माधि- २१
करणे शासनीयो भविष्यतीति प्राचीनेभ्यः कथितमासीत् युष्माभि-
स्तच्छ्रुतम्। अहन्तु युष्मान् ब्रवीमि, यः कश्चिदकारणं स्वभ्रात्रे २२
क्रुध्यति स धर्म्माधिकरणे शासनीयो भविष्यति। यश्च स्वभ्रातरं
निर्ब्बोधस्त्वमिति वदति स सभायां शासनीयो भविष्यति। यश्च
वदति मूढस्त्वमिति, सोऽग्निमये नरके शासनीयो भविष्यति।
अतस्त्वया स्वकीयोपहारे यज्ञवेदिमानीते तव भ्रातु र्मनसि २३
त्वद्विरुद्धा कथा विद्यत इति तत्र चेत् स्मरसि, तर्हि तत्र स्वकीयो- २४

पहारं यज्ञवेद्याः सम्मुखे विहाय याहि, प्रथमं स्वभ्रात्रा सम्मिलितो
२५ भव, ततः परमागत्य स्वकीयोपहारं निवेदय। स्वप्रतिपक्षेण सह
यावन्मार्गे वर्त्तसे, तावत् तूर्णं तस्यानुकूलो भव, नो चेत् प्रतिपक्षेण
विचारयितु र्हस्ते समर्पितस्त्वं विचारयित्रा पदातिकस्य हस्ते समर्पितः
२६ कारायां निक्षेप्स्यसे। त्वामहं सत्यं वदामि, शेषोऽपि कपर्दको
यावत् त्वया न शोधितस्तावत् तत्स्थानान्न निर्गमिष्यते।

२७ त्वं व्यभिचारं माऽकार्षीरिति प्राचीनेभ्यः कथितमासीत्, युष्मा-
२८ भिस्तच्छ्रुतम्। अहन्तु युष्मान् ब्रवीमि यः कश्चित् कामुकभावेन
योषितं प्रति दृक्पातं करोति, स तावता स्वहृदये तया सह
२९ व्यभिचारं कृतवान्। यदि तु तव दक्षिणं नेत्रं तव स्खलनकारणं
भवेत्, तर्हि तदुत्पाट्य दूरं निक्षिप। यतस्तवैकस्याङ्गस्य नाशः,
३० न तु कृत्स्नशरीरस्य नरके निपातस्तद्धि तव हितं। यदि वा तव
दक्षिणो हस्तस्तव स्खलनकारणं भवेत्, तर्हि तं छित्वा दूरं निक्षिप।
यतस्तवैकस्याङ्गस्य नाशः, न तु कृत्स्नशरीरस्य नरके निपातस्तद्धि
तव हितम्।

३१ पुनश्च कथितमासीत्, यः कश्चित् स्वभार्य्यां त्यजति, स तस्यै
३२ त्यागपत्रं ददातु। अहन्तु युष्मान् वदामि, यः कश्चिद् व्यभिचार-
दोषादन्येन हेतुना स्वभार्य्यां त्यजति, स तां व्यभिचारं कारयति।
यश्च त्यक्तां योषितमुद्वहति स व्यभिचारं करोति।

३३ पुनस्त्वं मृषा शपथं माऽकार्षीः, स्वशपथफलन्तु प्रभवे दास्यसीति
३४ प्राचीनेभ्यः कथितं, युष्माभिस्तच्छ्रुतम्। अहन्तु युष्मान् ब्रवीमि,
यूयं सर्व्वथा मा शपध्वं; न स्वर्गेण, यतः स ईश्वरस्य सिंहासनं;
३५ न मेदिन्या, यतः सा तस्य पादपीठं, न यिरूशालेमेन, यतस्तन्महतो
३६ राज्ञो नगरं। निजशिरसा वा मा शपस्व, यतः शिरोरुह एकोऽपि

श्वितीकर्त्तुम् असितीकर्त्तुं वा त्वया न शक्यते। युष्माकन्तु संलपने ३७
यत् तथा तत् तथैव यन्न तन्नैव भवतु; यदेतदधिकं तत् पापा-
त्मतो जातम्।

चक्षुषो विनिमये चक्षु र्दन्तस्य विनिमये च दन्त इति कथि- ३८
तमासीत् युष्माभिस्तच्छ्रुतम्। अहन्तु युष्मान् ब्रवीमि, दुर्जनस्य ३९
प्रतिरोधो न कर्त्तव्यः, अपितु यः कश्चित् तव दक्षिणकपोले
चपेटाघातं करोति, तं प्रत्यन्यतरं कपोलमपि व्याघोटय। यस्य ४०
धर्म्माधिकरणे त्वया विवदमानस्तवाङ्गाच्छादकं जिहीर्षति, तस्य
कृते प्रावारमपि त्यज। यस्त्वां विनावेतनं क्रोशमेकं गमनाय त्वां ४१
हरति, गच्छ तेन क्रोशद्वयं। यस्त्वत्तो याचते तस्मै देहि। यस्य ४२
त्वत्त ऋणमभिवाञ्छति तं प्रति विमुखो मा भव।

त्वं स्वनिकटस्थं प्रति प्रेम, स्वशत्रुं प्रति तु द्वेषं करिष्यसीति ४३
कथितमासीत् युष्माभिस्तच्छ्रुतम्। अहन्तु युष्मान् ब्रवीमि, यूयं ४४
स्वशत्रून् प्रति प्रेम कुरुत, ये युष्मान् शपन्ति तानाशिषं वदत, ये
युष्मान् द्विषन्ति तेषां हितमाचरत, ये युष्मान् अपवदन्त्युपद्रवन्ति
च तेषां कृते प्रार्थनां कुरुत। तथा कृते युष्माकं यः स्वर्गस्थः ४५
पिता दुर्जनानां सुजनानाञ्चोपरि स्वसूर्य्यमुदाययति धार्म्मिकाणाम-
धार्म्मिकाणाञ्चोपरि तोयं वर्षयति च, तस्य पुत्रा भविष्यथ। यतो ४६
यदि केवलं युष्मत्प्रेमकारिणः प्रति प्रेम कुरुथ तर्हि किं पारि-
तोषिकं लप्स्यध्वे? शुल्कादायिनोऽपि किं न तदेव कुर्व्वन्ति?
केवलं स्वभ्रातॄन् वा यद्यभिवदथ, तर्हि विशिष्टं किं कुरुथ? ४७
शुल्कादायिनोऽपि किं न तदेव कुर्व्वन्ति? अतो युष्माकं स्वर्गस्थः ४८
पिता यथा सिद्धोऽस्ति, यूयं तथैव सिद्धा भवत॥ ५॥

६ षष्ठोऽध्यायः ।

१ धर्म्मकर्म्मणः कथनं २ दानकरणव्यवस्थापनं ५ प्रार्थनव्यवस्थापनं १६ उपवास-व्यवस्थापनं १९ धनसञ्चयोपदेशनं २४ धर्म्मचेष्टाया आवश्यकत्वञ्च ।

१ यूयं स्वधर्म्मानुष्ठाने सावधाना भवत, जनावलोकनार्थाय तन्मा-
नवानां समक्षं माऽकार्ष्ट । अन्यथा युष्माकं स्वर्गस्थपितृतो लभ्यं
२ किमपि पारितोषिकं युष्माकं न भविष्यति । अतस्त्वं यदा भिक्षां
ददासि तदा मनुष्येभ्यः प्रशंसालिप्सुकामेन समाजगृहेषु रथ्यासु च
कपटिनो यथा कुर्व्वन्ति तथा आत्मनोऽग्रे तूर्य्यध्वनिं मा कुरु ।
३ अहं युष्मान् सत्यं वदामि ते स्वपारितोषिकं लब्धवन्तः । त्वयि तु
भिक्षां ददति तव दक्षिणहस्तेन यत् क्रियते तत् तव वामहस्तेन मा
४ ज्ञायतां । तथानुष्ठिते तव भिक्षादानं निभृतं भविष्यति, तव
निभृतदर्शी पिता तु तत्फलं तुभ्यं प्रकाशं दास्यति ।

५ यदा पुनः प्रार्थनां करोषि, तदा कपटिनां सदृशो मा
भव, यतस्ते मनुष्याणां गोचरीभवितुकामाः समाजगृहेषु चत्वरा-
स्रेषु च तिष्ठन्तः प्रार्थयितुमनुरक्ताः । युष्मानहं सत्यं ब्रवीमि, ते
६ स्वपारितोषिकं लब्धवन्तः । त्वन्तु यदा प्रार्थयसे तदा स्वान्त-
रागारं प्रविश्य द्वारञ्च रुद्ध्वा निभृतम् उपस्थितं तव पितरमुद्दिश्य
प्रार्थनां कुरु, निभृतदर्शी तव पिता तु तत्फलं तुभ्यं प्रकाशं
दास्यति ।

७ प्रार्थनकाले च यूयं परजातीयजनवद् वृथा पुनरुक्तिं मा
कुरुत, ते हि स्ववाक्यबाहुल्यादुत्तरलाभः सम्भविष्यतीति मन्यन्ते,
८ तद् यूयं तेषां सदृशा मा भवत । युष्माकं हि यद्यदेव प्रयोजनं
९ तत्तद् युष्माभि र्याचनात् प्राग् युष्मत्पित्रा ज्ञायते । अतो
यूयमित्थं प्रार्थयध्वं, भो अस्माकं स्वर्गस्थ पितः, तव नाम पवित्रं

पूज्यतां। तव राज्यमायातु। यथा स्वर्गे तथा मेदिन्यामपि १०
तवेच्छा सिध्यतु। श्वस्तनं भक्ष्यमद्यास्मभ्यं देहि। वयञ्च यथास्मद्- १२
पराधिनां क्षमामहे, तथा त्वमस्माकमपराधान् क्षमस्व। अस्मांश्च १३
परीक्षां मा नय, अपि तु दुरात्मत उद्धर। यतो राज्यं पराक्रमः
प्रतापश्च युगे युगे तवैव। आमेन्। वास्तवं हि यूयं चेन्मनुष्या- १४
णामपराधान् क्षमध्वे, तर्हि युष्माकं स्वर्गस्थः पिता युष्माकमपि
क्षमिष्यते। यदि तु मनुष्याणामपराधान् न क्षमध्वे, तर्हि युष्माकं १५
पिता युष्माकमप्यपराधान् न क्षमिष्यते।

यदा चोपवासं कुरुथ, तदा कपटिन इव विषण्णवदना मा १६
भवत, यतस्ते मनुष्याणाम् उपवासिनः प्रत्यक्षीभवितुकामाः स्वव-
दनानि मलिनीकुर्व्वते। युष्मानहं सत्यं वदामि ते स्वपारितोषिकं
लब्धवन्तः। त्वन्तूपवासकाले स्वशिरसि तैलं सिञ्च स्ववदनं प्रक्षालय १७
च। तथा कृते न मनुष्याणाम् अपि तु निभृतमास्थितस्य तव १८
पितुः त्वमुपोषितः प्रत्यक्षीभविष्यसि। निभृतदर्शी तव पिता च
तत्फलं तुभ्यं प्रकाश्य दास्यति।

यूयमात्मकृतेऽत्र मेदिन्यां धनानि मा सञ्चिनुत, यस्मादत्र १९
कीटकलङ्कौ क्षयं नयतः, चौराश्च कुड्यं छित्वा मुष्णन्ति। स्वर्गे २०
त्वात्मकृते धनानि सञ्चिनुत, तत्र कीटः कलङ्को वा क्षयं न नयति,
चौराश्च नापि कुड्यं छिन्दन्ति न वा मुष्णन्ति। यतो युष्माकं २१
यत्र वित्तं तत्र युष्माकं चित्तमपि स्थास्यति। नयनं देहस्य दीपकं, २२
अतस्तव नयनं चेत् सरलं तर्हि तव कृत्स्नो देहो दीप्तिमयो
भविष्यति। तव नयनं तु चेद् दुष्टं तर्हि तव कृत्स्नो देहस्तिमिरमयो २३
भविष्यति। अतस्त्वान्तर्ज्योतिश्चेत् तिमिरं भवेत्, तर्हि तत् तिमिरं
कियन्महत्। द्वयोः स्वामिनो दास्यं कर्त्तुं केनापि न शक्यं, यतः २४

स एकतरं द्विषन्नन्यतरस्मिन् प्रेष्यते, न चेदेकतरस्मिन्नासज्जमानो-
ऽन्यतरमवमंस्यते । ईश्वरस्य धनस्य चोभयो र्दास्यं कर्त्तुं युष्माभि
र्न शक्यते ।
२५ अतोऽहं युष्मान् ब्रवीमि, किं भक्षिष्यामः किं वा पास्याम इति
विचिन्त्य स्वप्राणानधि, किं वसिष्यामह इति विचिन्त्य स्वदेहमधि
वा माकुलीभवत । किं हि प्राणा न भक्ष्याच्छ्रेष्ठाः? वसनाद् वा
२६ नापि देहः श्रेष्ठः? विहायसो विहङ्गमान् निरीक्षध्वं, ते नोप्यते
नापि छत्यते न चापि कुशूलेषु सञ्चीयते, युष्माकं स्वर्गस्थः पिता
२७ च तान् पुष्णाति । किं यूयं तेभ्यो नाधिकं विशिष्यध्वे? चिन्तयित्वा
२८ वा युष्माकं केन स्ववयो हस्तमेकं वर्द्धयितुं शक्यते? कस्माद् वा
वस्त्राण्यधि चिन्ताकुलीभवथ? शूशनाख्यानि क्षेत्रपुष्पाणि पर्य्या-
२९ लोचयत, कथं तानि वर्द्धन्ते? न तानि श्रमं कुर्व्वते नापि सूत्राणि
तन्वन्ति । युष्मान् त्वहं ब्रवीमि, शलोमापि स्वकृत्स्नप्रतापे तेषामे-
३० कमिव न पर्य्यधीयत । यदि त्वद्य वर्त्तमानं श्वश्चुल्ल्यां निक्षेप्तव्यं
क्षेत्रस्थं तृणमीदृशमीश्वरः परिधापयति, तर्हि भो स्तोकविश्वासिनः,
३१ स किं युष्मान् नाधिकप्रचुरं परिधापयिष्यति? अतः किं भक्षिष्यामः
किं वा पास्यामः किं वापि वसिष्यामह इति विचिन्त्य माकुलीभवत,
३२ यतः परजातीयजना हि सर्व्वाण्येतान्यनुसन्दधते । वास्तवं यदिमानि
सर्व्वाणि युष्माकमावश्यकानि तद् युष्माकं स्वर्गस्थः पिता जानीते ।
३३ प्रथमतस्त्वीश्वरस्य राज्यं धार्म्मिकताञ्चान्विच्छत, तथा कृते सर्व्वाणी-
३४ मान्यपि युष्मभ्यं प्रदायिष्यन्ते । अतः श्वःकृते चिन्ताकुला मा भवत,
यतः श्वस्तनं दिनमात्मनो विषयं चिन्तयिष्यति । दिनस्य निजकष्टं
तस्य कृते पर्य्याप्तं ॥ ६ ॥

७ सप्तमोऽध्यायः।

१ दोषीकरणप्रतिषेधः ७ प्रार्थनाकरणोपदेशः १२ संकीर्णद्वारेण प्रवेशोपदेशः १५ मृषाभविष्यद्वादिभ्यः सावधानत्वोपदेशः २१ ईश्वरेष्टकर्म्मकरणावश्यकत्वं २४ ज्ञान्यज्ञानिनां दृष्टान्तः २८ खीष्टोपदेशस्य समाप्तिश्च।

मा विचारं कुरुत, तेनैव युष्माकं विचारो न कारिष्यते। १
यतो यूयं यद्विचारेण परस्य दोषान् निर्णयथ, तद्विचारेणैव युष्माकं २
दोषा निर्णायिष्यन्ते। येन परिमाणेन च मिमीध्वे, तेनैव युष्मद- ३
र्थमपि मायिष्यते। कुतश्च त्वं स्वभ्रातुश्चक्षुःस्थं तृणकणं निरीक्षसे, ४
तव चक्षुःस्थन्तु गेहकाष्ठं नावधारयसि? तव चक्षुषः तृणकणस्य
मयोद्धरणमनुमन्यस्वेति वा स्वभ्रातरं कथं गदिष्यसि? तव चक्षुषि
तु गेहकाष्ठमवतिष्ठते। कपटिन् प्रथमं स्वचक्षुषस्तद् गेहकाष्ठमुद्धर, ५
ततः स्वभ्रातुश्चक्षुषः तृणकणस्योद्धरणार्थं स्पष्टं द्रक्ष्यसि। युष्माकं ६
पवित्रं द्रव्यं सारमेयेभ्यो मा दत्त। मापि स्वमुक्ताः शूकरेभ्यो
निक्षिपत, यतस्तेन ते चरणैस्ता मर्द्दिष्यन्ति परावृत्य च युष्मान्
विदारयिष्यन्ति।

याचध्वं, तेन युष्मभ्यं दायिष्यते। अन्विच्छत, तेनासादयिष्यथ। ७
द्वारमाहत तेन युष्मभ्यम् उद्घाटयिष्यते। यतो यः कश्चिद् याचते ८
स लभते, यश्चान्विच्छति स आसादयति, यश्च द्वारमाहन्ति तदर्थ-
मुद्घाट्यते। युष्मत्सु तादृशः को वा मानवो विद्यते यः स्वपुत्रेण ९
पूपं याचितस्तस्मै प्रस्तरं दास्यति, मीनं वा याचितः सर्पं दास्यति? १०
तद् दुर्जना अपि यूयं चेत् स्वसन्तानेभ्यो हितदानानि वितरितुं ११
जानीथ, तर्हि किमधिकं युष्माकं स्वर्गस्थः पिता स्वयाचकेभ्यो
हितानि वितरिष्यति। तत् सर्व्वस्मिन् विषये युष्मान् प्रति मनुष्यै १२
र्यादृशमाचरितुं यूयमभिवाञ्छथ, यूयमपि तान् प्रति तादृशमेवा-
चरत। यद् एतदेव व्यवस्थाया भाववादिग्रन्थस्य च तत्त्वं।

१३ प्रविशत सङ्कीर्णेनैव गोपुरेण, यतो येन विनाशं नीयते विशालं
१४ तद् गोपुरं स मार्गः पृथुतरश्च, तेनैव च बहवः प्रविशन्ति । जीवनं
हि येन नीयते सङ्कीर्णं तद् गोपुरं मार्गश्च स सङ्कुचितः, स च यैः
प्राप्यते तेऽल्पाः ।

१५ यूयं कूटभाववादिभ्यः सावधाना भवत, ते मेषवेशा युष्मत्स-
१६ मीपमागच्छन्ति, अन्तरे तु ते ग्रसिष्णवो वृकाः । तत्फलैरेव यूयं
तान् निश्चेष्यथ । कण्टकेभ्यः किं द्राक्षा गोक्षुरकेभ्यो वोडुम्बरफलानि
१७ सञ्चीयन्ते? एवमेव सर्व्वः सुवृक्षः सुफलान्युत्पादयति, कुवृक्षस्तु
१८ कुफलान्येवोत्पादयति । सुवृक्षः कुफलान्युत्पादयितुं न शक्नोति,
१९ कुवृक्षश्च सुफलान्युत्पादयितुं न शक्नोति । येन सुफलं नोत्पाद्यते,
२० तादृशः सर्व्वो वृक्ष उच्छिद्यते वह्नौ प्रक्षिप्यते च । अतो यूयं तेषां
फलैरेव तान् निश्चेष्यथ ।

२१ ये मां प्रभो प्रभो इत्यभिभाषन्ते न ते सर्व्वे स्वर्गराज्यं
प्रवेक्ष्यन्ति, यस्तु मम स्वर्गस्थपितुरभीष्टमाचरति स एव प्रवेक्ष्यति ।
२२ अमुष्मिन् दिने बहवो मां वक्ष्यन्ति, प्रभो प्रभो, न किं भवतो
नाम्नास्माभि र्भावोक्ति र्घोषिता? नापि किं भवतो नाम्नास्माभि
र्भूता निःसारिताः? न चापि किं भवतो नाम्नास्माभि र्बह्वः
२३ प्रभावसिद्धाः क्रियाः साधिताः? तान् तु तदाहं स्पष्टं वदिष्यामि,
युष्मानहं न कदाचित् ज्ञातवान, अधर्म्माचारिणो यूयं मत्तो-
ऽपसरत ।

२४ अतो यः कश्चिन्ममैतानि वाक्यानि निशम्याचरति तमहं तेन
२५ बुद्धिमता नरेणोपमास्ये येन पाषाणोपरि स्वगेहं निरमायि, परं
वृष्ट्या पतित्वा प्रवाहैरागत्य वायुभिः प्रोह्य तद् गेहमाक्रान्तं, न तु
२६ पपात, यतस्तस्य भित्तिमूलं पाषाणे स्थापितमासीत् । यः कश्चित्

तु ममैतानि वाक्यानि निशम्य नाचरति स तेन मूढेन नरेण
सदृशः प्रतिपत्स्यते, येन सिकतोपरि स्वगेहं निरमायि। यत् परं २७
वृष्टौ पतितायां प्रवाह आगते पवने वाते च तेषु तद्गेहं लग्नेषु तत् पपात, तत्पतनं महद् अभवत्।
तत् पपात, अभूच्च तत्पतनं घोरतरम्।

अनन्तरं यीशुनैतेषु वाक्येषु समापितेषु जननिवहास्तस्य २८
शिक्षामाश्चर्य्यां मेनिरे, यतः स चमतापन्न इव, न तु शास्त्राध्यापका २९
इव तान् अशिक्षयत्॥ ७॥

---

८ अष्टमोऽध्यायः।

१ कुष्ठिनो निरामयत्वं ५ शतसेनापते र्दासस्य निरामयत्वं १४ पितरस्य श्वश्वा
निरामयत्वं १६ बहुनराणां निरामयत्वं १८ ख्रीष्टस्य पश्चाद्गामित्वस्य व्यवस्थापनं
२३ झञ्झानिवारणं २८ भूतत्याजनञ्च।

पर्व्वताद् यीशोरवरोहणात् परं महान्तो जननिवहास्तमनु- १
जग्मुः। पश्य चापरं नर एकः कुष्ठी आगत्य तस्य समक्षं प्रणिपत्य २
जगाद, प्रभो भवान् यदीच्छति तर्हि मां शुचीकर्त्तुं शक्नोति।
ततो यीशु र्हस्तं प्रसार्य्य तं स्पृष्ट्वा जगाद, इच्छामि, शुचि ३
र्भव। अनेनैव तस्य कुष्ठं शुचित्वं गतं। यीशुस्तं जगाद, ४
सावधानः, कमपि मा ज्ञापय, अपितु याहि याजकमात्मानं
दर्शय, मोशिनादिष्टमुपहारञ्च तेभ्यः साक्ष्यदानार्थमुत्सृज।

अनन्तरं यीशौ कफरनाहूमं प्रविष्टे कश्चिच्छतपतिस्तस्यान्तिक- ५
मागत्य तं प्रसादयन् जगाद, प्रभो, मम किङ्करो गेहेऽवशाङ्गस्तीव्रं ६
पीड्यमानः शेते। ततो यीशुस्तं ब्रवीति, अहमागत्य तं निरामयं ७
करिष्यामि। स शतपतिस्तु प्रत्यब्रवीत्, प्रभो, भवान् यन्मम वेश्म ८
प्रविशेत्, नाहं तावता योग्यः। केवलं वाक्यं व्याहरतु, तेनैव मम

९ किङ्करो निरामयो भविष्यति । यतोऽहमपि परनिघ्नो मनुष्यः,
ममाधीनाश्च सैनिकाः सन्ति । तेषामेको गच्छेति मया कथिते
गच्छति, अपरश्चायाहीति कथिते समायाति, मम दासश्चेदं
१० कुर्व्विति कथिते तत् करोति । इदं श्रुत्वा यीशुराश्चर्य्यं मन्य-
मानोऽनुगामिनोऽब्रवीत्, युष्मानहं सत्यं वदामि, इस्रायेल्लेऽपि
११ मयेदृशो विश्वासो न लब्धितः । युष्मांस्तु वदामि, पूर्व्वपश्चिमदिशो
बहवो मनुष्याः स्वर्गराज्येऽब्राहामेणेस्हाकेन याकोबेन च सह भोज्ये
१२ समासिष्यन्ते, राज्यस्य पुत्रास्तु बहिःस्थान्धकारे निक्षेप्स्यन्ते, तत्र
१३ च रोदनं दन्तै र्दन्तघर्षणञ्च सम्भविष्यतः । अनन्तरं यीशुस्तं शत-
पतिं जगाद, याहि यथा च त्वया विश्वसितं तथैव तव सिध्यतु ।
तस्मिन्नेव च दण्डे तस्य किङ्करो निरामयीभूतः ।

१४ ततः परं यीशुना पितरस्य गेहं प्रविश्य तस्य श्वश्रूः शयाना
१५ ज्वरातुरा च दृष्टा, ततस्तेन तस्या हस्ते स्पृष्टे ज्वरस्तां तत्याज,
सा चोत्थाय तं पर्य्यचरत् ।

१६ सन्ध्यायान्तूपस्थितायां भूताविष्टा बहवो मनुष्यास्तस्य समीप-
मानीताः । स च वाक्येन भूतान् निःसारयामास, अस्वस्थांश्च सर्व्वान्
१७ निरामयान् चकार । इत्थं भावचादिना यिशायाहेन कथितमिदं
वचनं सिद्धिं गतं, यथा,

सत्यमस्माकमेवार्त्तीः स गृहीतावहत् स्वयं ।
अस्मदीयव्यथाभारं स चाधार्षीत् स्वभारवत् ॥

१८ ततः परं यीशुः स्वपरितो जननिवहान् बहून् दृष्ट्वा
१९ स्वशिष्यान् ह्रदं तरितुमाज्ञापयामास । कश्चिच्छास्त्राध्यापकस्तदा
तमागत्य जगाद, गुरो, यत्र कुत्रचिद् भवता गन्तव्यं तत्रा-
२० हमपि भवन्तमनुगमिष्यामि । यीशुस्तं जगाद, सन्ति गर्त्तानि

शृगालानां नीडाश्च विहायसो विहङ्गमानां न स्थानं मनुष्यपु-
त्रस्य तु शिरः शाययितुं। शिष्याणामन्यतमस्तं जगाद, प्रभो, २१
प्रथमं स्वपितुः सत्कारार्थं गमिष्यन्तं मामनुमन्यस्व। यीशुस्तु २२
तं जगाद, मामनुगच्छ, मृतानेव मृतानां स्वकीयानां सत्का-
रायानुजानीहि।

ततस्तस्मिन् नौकामारूढे तस्य शिष्यास्तमनुजग्मुः। पश्य च २३
सागरे सञ्जाततुमुलसङ्क्षोभो नौस्तरङ्गैश्चाच्छाद्यत। स तु निद्राम- २४
सेवत। शिष्याः पुनस्तत्समीपमागत्य तं जागरयित्वा चावदन्, प्रभो, २५
रक्षत्वस्मान्, वयं नश्यामः। स तु तान् जगाद, भो स्तोकवि- २६
श्वासिनः कुतो यूयं भीरवः? उत्थाय च स तदा वातान् समुद्रञ्च
ततर्ज, भूतञ्च विशालं निःक्षोभं। नराश्चाश्चर्य्यं मत्वा जगदुः; २७
कीदृगसौ, यतो वाताः समुद्रश्चास्याज्ञां गृह्णन्ति?

अनन्तरं तस्मिन् सागरस्यापरपारस्थं गादारीयाणां देशमागते २८
नरौ द्वौ भूताविष्टौ शवागारेभ्यो निर्गत्य तत्समक्षमुपस्थितौ,
तयोरतिप्राचण्डान्मार्गेण तेन गन्तु केनापि नाशक्यत। पश्य च २९
तावुत्क्रोशन्तौ जगदतुः, भो ईश्वरस्य सुत यीशो, भवता सहावयोः
कः सम्बन्धः? भवान् किं समयात् प्रागावयो र्यातनां चिकीर्षुर-
त्रागतवान्? तेषान्तु कियद्दूरे बहूनां शूकराणां व्रजोऽचरत्। ३०
अतस्तौ भूतौ तं प्रसादयन्तौ जगदतुः, यद्यावां निःसारयेत् ३१
तर्ह्यावामस्मिन् शूकरव्रज आवेष्टुमनुजानातु। स तौ जगाद, ३२
यातं। ततस्तौ निःसृत्य प्रविविशतुस्तं शूकरव्रजं, पश्य च तदा
स कृत्स्नः शूकरव्रजो वेगेन धावन् पतित्वा शैलाग्रतस्तोये पञ्चत्वं
जगाम। ये च तमचारयंस्ते पलाय्य नगरं गत्वा निखिलवृत्तान्तं ३३
भूताविष्टयोस्तयोः कथाञ्च निवेदयामासुः। पश्य च नगरस्य सर्व्वे ३४

यीशुं साक्षादुपस्थातुं निर्गत्य तं दृष्ट्वा तेषां स्वसीमभ्यस्तस्य स्थाना-
न्तरगमनं प्रार्थयाञ्चक्रिरे ॥ ८ ॥

---

९ नवमोऽध्यायः ।

१ पक्षाघातिनः स्वास्थ्यं पापमर्षणं ९ मथ्याह्वानं १० तस्य गेहे भोजनं १४ उपवासाकरणार्थकथनं १८ प्रदररोगिण्याः स्वास्थ्यकथनं २३ अध्यक्षस्य मृतकन्यायै जीवनदानं २७ द्वाभ्यामन्धाभ्यां नेत्रदानं ३२ भूतग्रस्तमूकस्य स्वास्थ्यकथनं ३५ दरिद्रान् प्रति खीष्टस्य दयनञ्च ।

१ अनन्तरं स नौकामारुह्य ह्रदं तरित्वा च स्वनगरमाज-
२ गाम । पश्य च तदा खट्वायां शयानो नर एकोऽवशाङ्गस्तत्समीप-
मानीयत । यीशुस्तु तेषां विश्वासं दृष्ट्वा तमवशाङ्गं जगाद,
३ आश्वसिहि, वत्स, तव पापानि मोचितानि । पश्य च तदा शास्त्रा-
४ ध्यापकानां केचित् स्वान्तर्जगदुः, असावीश्वरं निन्दति । यीशुस्तु
तेषां मनोगतान्यवलोक्य जगाद, कुतो युष्माभिः स्वहृदयेषु कुचि-
५ न्ताश्चिन्त्यन्ते? ब्रूत, तव पापानि मोचितानीति वा त्वमुत्थाय
६ परिव्रजेत्येतयोः कथनयोः कतरम् अनायासं? पृथिव्यान्तु पापानि
मोचयितुं मनुष्यपुत्रस्य सामर्थ्यमस्तीति यथा युष्माभि र्ज्ञायते,
तदर्थं—तमवशाङ्गमभिभाष्य स उवाच—त्वमुत्थाय स्वखट्वामादाय
७ स्वगेहं याहि । स तूत्थाय स्वगेहं जगाम । तद् विलोक्य जननि-
८ वहा भयं गत्वा तुष्टुवुरीश्वरं मनुष्येभ्यस्तादृशसामर्थ्यं दत्तवन्तम् ।
९ अनन्तरं यीशुस्तस्मात् स्थानात् प्रगत्य शुल्कादायस्थाने मथि-
रित्यभिधं नरं दृष्ट्वा जगाद, मामनुगच्छ, स चोत्थाय तमन्व-
१० गच्छत्, ततः पश्य गेहमध्ये भोजनार्थमासीने तस्मिन् शुल्कादा-
यिनो बहवः पापिनश्चागत्य यीशुना तदीयशिष्यैश्च सार्द्धम् उप-

विविशुः। तद्दृष्ट्वा फरीशिनस्तस्य शिष्यान् जगदुः, किमर्थं भुङ्क्ते ११
गुरु र्युष्माकं शुल्कादायिभिः पापिभिश्च सार्द्धम्? तच्छ्रुत्वा १२
यीशुस्तु तान् जगाद, चिकित्सको न बलवताम् अपि त्वस्वस्थाना-
मावश्यकः। यूयन्तु गत्वा शिक्षध्वं वचनस्यैतस्य तात्पर्य्यम्, १३

दयामेवाभिवाञ्छामि न तु यज्ञक्रियामहं।

यतो न धार्म्मिकान्, अपि तु मनःपरावर्त्तनाय पापिन आह्वातुमहमागतः।

योहनस्य शिष्यास्तदा तस्य समीपमागत्य जगदुः, कथं वा १४
फरीशिनो वयञ्च भूयोभूय उपवसामः, भवतः शिष्या वा कथं
नोपवसन्ति? यीशुस्तान् जगाद, वरो यावद् वरसखैः सार्द्धं १५
वर्त्तते, तावत् किं तैः शोचितुं शक्यते? दिनानि तावदुपस्थास्यन्ते
यदा वरस्तेभ्योऽपहारिष्यते तदैव च त उपवत्स्यन्ति। जीर्णवसनेन १६
न कोऽप्यनाहतवस्त्रस्य खण्डं सिव्यति, यतस्तादृशपूरणेन जीर्णवसनात्
कियदपह्रियते, महत्तरं तेन च कुच्छिद्रं सञ्जायते। नापि नवो १७
द्राक्षारसो जीर्णकुतूषु निधीयते, यतस्तथाकृते कुत्वो विदीर्य्यन्ते,
तेन द्राक्षारसश्च विस्रवति, कुत्वोऽपि नश्यन्ति। प्रत्युत नवो द्राक्षा-
रसो नवकुतूष्वेव निधीयते, तेन चोभयोरक्षा सम्भवति।

स यावत् तानिमानि वाक्यान्यवदत्, पश्य तावदागत्य कश्चिद्- १८
ध्यक्षस्तत्समक्षं प्रणिपतन् जगाद, मम दुहितेदानीमेव मृतवती,
तथापि भवान् आगत्य तस्यां हस्तमर्पयतु, तेन सा जीविष्यति।
ततो यीशुस्तस्य शिष्याश्चोत्थाय तमनुजग्मुः। पश्य चानन्तरं द्वादश- १९
वर्षान् यावद् रक्तस्रावातुरा काचिन्नारी पश्चाद्दिशुपागत्य तदीय- २०
वस्त्रप्रलम्बकं पस्पर्श, यतः सा स्वान्तरवदत्, केवलं चेत् तस्य वस्त्रं २१
स्पृशेयं, तर्हि तरिष्यामि। यीशुस्तु परावृत्य दृष्ट्वा च तां जगाद, २२

आश्वसिहि, वत्से, तव विश्वासस्त्वां तारितवान्। ततार च सा
नारी तस्मिन्नेव दण्डे।
२३ अनन्तरं यीशुस्तस्याध्यक्षस्य गेहमागत्य वंशीवादकान् शब्दाय-
२४ मानं महान्तं जननिवहञ्च दृष्ट्वा जगाद, अपगच्छत, यतो बालि-
२५ कासौ न मृता, सा निद्राणा। ते तु तमपजहसुः। वहिष्कृते तु
जननिवहे तेनान्तः प्रविश्य तस्या हस्तो धृतः, बालिका चोत्तस्थे।
२६ अनेन तस्य ख्यातिः कृत्स्नं तं प्रदेशं व्यानशे।
२७ तस्मात् प्रगच्छति यीशौ द्वावन्धौ तमनुव्रजन्तौ प्रोच्चरवेणाव-
२८ दतां, भो दायूदस्य पुत्र भवानावामनुकम्पतां। गेहं प्रविष्टे च तस्मिं-
स्तावन्धौ तत्समीपमाजग्मतुः। यीशुस्तदा तौ जगाद, एतत्
कर्त्तुं मया शक्यत इति विश्वासो युवयोः किमस्ति? तावूचतुः,
२९ अस्ति, प्रभो। स तदा तयो र्नेत्राणि स्पृष्ट्वा कथयामास,
३० विश्वासानुरूपं वां सिध्यतु। अभवंश्चोद्घाटितानि तावत् तयो
र्नेत्राणि। यीशुस्ततस्तौ प्रत्यन्यथावृत्तिं गत्वा जगाद, यतेथां,
३१ कोऽप्येतन्मा जानातु। तौ तु निर्गत्य कृत्स्ने प्रदेशे तस्मिन् तत्ख्यातिं
कीर्त्तयामासतुः।
३२ पश्य च तयो र्निर्गमनकाले नर एको मूको भूताविष्टस्तत्स-
३३ मीपमानीतः। ततो निःसारिते च भूते मूकः सोऽभाषत। अनेन
जननिवहा आश्चर्य्यं मत्वा जगदुः, इस्रायेले नेदृशं कदापि
३४ प्रतिभातं। फरीशिनस्त्वूचुः, निःसारयत्यसौ भूतान् भूतराजस्य
साहाय्येन।
३५ ततः परं यीशु र्नगराणि सर्व्वाणि ग्रामांश्च सर्व्वान् परिभ्राम्यन्
तेषां समाजगेहेषूपादिशत् राज्यस्य सुसंवादञ्चाघोषयत् प्रत्यकरोच्च
३६ तथा प्रजावृन्देषु निखिलरोगं निखिलामयञ्च। निरीक्ष्य च स

जननिवहान् तेषु सकरुणो बभूव, यतस्ते व्याकुला अवसन्नाश्चासन्
मेषा इव रक्षकविहीनाः। स तदा स्वशिष्यानवादीत्, प्रचुरं ३७
तावच्छस्यं कर्त्तनीयं कार्य्यकारिणस्त्वल्पे, तत् तदेव प्रार्थयध्वं ३८
शस्यक्षेत्रस्य स्वामिनं यत् स स्वक्षेत्रे कार्य्यकारिणः प्रहिणुयात्॥ ९॥

---

१० दशमोऽध्यायः।

१ द्वादशशिष्याणां प्रेषणं १६ तेषां दुःखज्ञापनं २४ ख्रीष्टोपदेशफलं ४० शिष्यान् प्रत्युपकारफलञ्च।

अनन्तरं स शिष्यान् द्वादश निजान् स्वसमीपमाहूय ददौ तेभ्यः १
सामर्थ्यं निःसारणायात्मनाम् अशुचीनां प्रतीकाराय च सर्व्वरोगस्य
सर्व्वामयस्य च। तेषां द्वादशशिष्याणां नामानीमानि, पित्राभिधः २
शिमोनः प्रथमस्तस्य भ्रातान्द्रियश्च, सिबदियस्य पुत्रो याकोबस्तस्य
भ्राता योहनश्च, फिलिपो बर्थलमयश्च, थोमाः शुल्कादायी च ३
मथिः, आल्फेयस्य पुत्रो याकोबो थद्देयाभिधश्च लिब्बेयः, कानानी ४
शिमोन ईष्कारियोतीयश्च यिहूदाः, असौ शत्रुषु तस्य समर्पयिता।

इमान् द्वादश यीशुः प्रेषयामास, प्रेषणकाले तु स तान् ५
जगाद, परजातीयानां पन्थानं मा गच्छत, शमरीयाणां वा नगरं
मा प्रविशत, वरमिस्रायेलकुलस्य हारितान् मेषाननुगच्छत। गच्छ- ६
न्तश्चेदं घोषयत, स्वर्गराज्यं सन्निकटं जातमिति। अस्वस्थान् ७
निरामयान् कुरुत, कुष्ठिनः शुचीकुरुत, मृतानुत्थापयत, भूतान् ८
निःसारयत। लब्धवन्तो यूयं मूल्यं विनैव, प्रदत्त मूल्यं विना।
मोपार्जयतु कोऽपि युष्माकं स्वकटिबन्धे स्वर्णं वा रूप्यं वा ताम्रं ९
वा गमनस्य कृते चेलसम्पुटकं वाङ्गरक्षके द्वे वस्त्रे वा पादुके वा १०
यष्टिं, यतः कार्य्यकारी स्ववृत्तिमर्हति। प्रविश्य तु यदा किञ्चन ११

नगरं कञ्चन ग्रामं वा, अनुसन्दद्ध्वं तदा नरस्तत्र को योग्यः,
१२ यावच्च न प्रस्थास्यध्वे तावत् तत्रैवावतिष्ठध्वं। गेहं प्रविशन्तस्च
१३ तस्मै मङ्गलं वदत। गेहं तद् यदि योग्यं स्यात् युष्मदुक्ता
शान्तिस्तर्हि तदाश्रयतु, यदि त्वयोग्यं पुन र्युष्मदुक्ता शान्तिस्तर्हि
१४ युष्मासु परावर्त्ततां। कश्चिच्च यदि युष्मान् न गृह्लाति युष्माकं
वाक्यानि च न शृणोति, तर्हि यूयं तस्माद् गेहान्नगराद् वा
१५ निर्गच्छन्तः स्वचरणेभ्यो धूलिमवधूनुत। युष्मानहं सत्यं ब्रवीमि,
भविष्यति विचारदिने सद्मतरा सदोमघोमरयो र्देशस्य दशा
नगरस्य तस्य दशातः।
१६ पश्यत, प्रहीयध्वे मया यूयं मेषा इव वृकाणां मध्ये, तद्भवत
१७ यूयं भुजङ्गा इव सतर्काः कपोता इव चामायिकाः। भवत तु
सावधाना मनुष्येभ्यः, यतस्ते युष्मान् विचारसभासु समर्पयिष्यन्ति
१८ स्वसमाजगृहेषु च कशाभिः प्रहरिष्यन्ति। नायिष्यध्वेऽपि च यूयं
समक्षं देशाधिपानां राज्ञाञ्च, साक्ष्यन्तु सम्भविष्यत्यनेन तेषां
१९ परजातीनाञ्च कृते। यदा तु समर्पयिष्यध्वे, कथं किं वा तदा
वक्तव्यं तच्चिन्तया माकुलीभवत। यतो यद् वक्तव्यं तत् तस्मिन्नेव
२० दण्डे युष्मभ्यं दायिष्यते। यतो न यूयं वक्तारः, वक्ता तु युष्मद-
२१ न्तर्भाषमाणो युष्मत्पितुरात्मा। भ्राता पुन र्भ्रातरं जनकस्च सुतं
मृत्यवे समर्पयिष्यति, सन्तानास्च पित्रोः प्रातिकूल्येनोत्थाय तौ
२२ घातयिष्यन्ति। मम नाम्नो हेतुना च यूयं सर्व्वै र्द्वैक्ष्यध्वे। यस्त्वन्तं
२३ यावत् स्थिरः स्थास्यति स एव त्रायिष्यते। यदा त्वेकस्मिन्
नगरे जना युष्मानुपद्रवन्ति, तदान्यन्नगरं गन्तुं पलायध्वं। यतो
युष्मानहं सत्यं ब्रवीमि, इस्रायेलस्य नगरेषु युष्माकं कार्य्यसमाप्तेः
२४ प्राक् मनुष्यपुत्र आगमिष्यति। न श्रेयान् शिष्यो गुरुतो न च

दासः स्वामितः। स्वगुरुणा समानत्वं शिष्यस्य कृते पर्य्याप्तं, दासस्य २५
कृते च स्वामिना समानत्वं। गेहपति र्यदि तै बैल्सबूब इत्यभि-
हितस्तर्हि तद्गृह्याः किं वाधिकं नाभिधायिष्यन्ते? यूयन्तु तेभ्यो २६
मा बिभीत, यतो नास्ति किमपि तादृशं तिरोहितं यन्नाविर्हितं
भविष्यति, नापि तादृशं निगूढं यन्न ज्ञायिष्यते। यूयं मया २७
तिमिरे यदुच्यध्वे तद् दीप्तौ वदत, कर्णे च कथितं यच्छृणुथ तद्
गृहोपरिष्टाद् घोषयत। ये च देहं घ्नन्ति, नात्मानन्तु हन्तुं २८
शक्नुवन्ति, तेभ्यो मा बिभीत, तस्मादेव वरं बिभीत यस्त्वात्मानञ्च
देहञ्च नरके नाशयितुं शक्नोति। चटकौ द्वौ किं नैकेन ताम्र- २९
खण्डेन विक्रीयेते? युष्माकं पितुरनुमतिं विना तु तेषाम् एकोऽपि
भूमौ न पतिष्यति। सन्ति च गणिताः सर्व्वेऽपि युष्मच्छिरसां ३०
कचाः। अतो मा बिभीत। बहुभ्यश्चटकेभ्यो यूयं विशिष्यध्वे। ३१
तद् यः कश्चिन्मनुष्याणां समक्षं मामङ्गीकुरुते, तमहमपि मम ३२
स्वर्गस्थस्य पितुः समक्षमङ्गीकरिष्ये। यस्तु मनुष्याणां समक्षं मां ३३
प्रत्याख्याति, तमहमपि मम स्वर्गस्थस्य पितुः समक्षं प्रत्याख्यास्यामि।

मानुमिमीध्वं यदहं पृथिव्यामैक्यमवतारयितुमागत इति। ३४
नैक्यम् अपि त्वसिम् अवतारयितुमागतोऽस्मि। यतो मनुष्यं पितु ३५
र्विरुद्धं दुहितरं मातु र्विरुद्धं पुत्रवधूं श्वश्र्वा विरुद्धं भेदयितुमह-
मागतः, स्वगृह्याश्च मनुष्यस्य शत्रवो भविष्यन्ति। यः पितरि ३६
मातरि वा मत्तोऽधिकं प्रेम कुरुते स मम न योग्यः। यः सुते ३७
सुतायां वा मत्तोऽधिकं प्रेम कुरुते स च मम न योग्यः। यश्च ३८
स्वक्रुशमादाय मां नानुव्रजति, स मम न योग्यः। यः स्वप्राणा- ३९
नासादयति स तान् हारयिष्यते, यश्च मत्कृते स्वप्राणान् हारयते
स तानासादयिष्यति।

४० यो युष्मान् गृह्लाति स मामेव गृह्लाति, माञ्च यो गृह्लाति
४१ स मत्प्रेषयितारमेव गृह्लाति । यो भाववादिप्रत्ययाद् भाववादिनं
गृह्लाति स भाववादिनः पारितोषिकं लप्स्यते । यश्च धार्म्मिक-
प्रत्ययाद् धार्म्मिकं गृह्लाति स धार्म्मिकस्य पारितोषिकं लप्स्यते ।
४२ शिष्यप्रत्ययाद् यश्चैतेषां क्षुद्राणामेकतमं चषकमेकं शीतलसलिलं
पाययति, युष्मानहं सत्यं ब्रवीमि स कथञ्चन स्वपारितोषिकेण
नोपवञ्चिष्यते ॥ १० ॥

११ एकादशोऽध्यायः ।

१ सुसंवादं प्रचारयितुं खीष्टस्य यात्रा २ खीष्टं प्रति योहनस्य शिष्यप्रेरणं ७ योहनं प्रति खीष्टस्य साक्षित्वं १९ योहनं खीष्टञ्चाधि जनानां वितर्कः २० कोरासिनादिपुराणि प्रति खीष्टस्य विलपनं २५ तातपरमेश्वरं प्रति खीष्टस्य धन्यवदनं २८ भाराक्रान्तजनाह्वानञ्च ।

१ समापिते स्वीयद्वादशशिष्येभ्य आदेशप्रदाने यीशु र्जनानां
नगरेषु शिक्षादानार्थं घोषणार्थञ्च तस्मात् स्थानात् प्रतस्थे ।
२ कारायां योहनस्तु खीष्टस्य क्रियाणां संवादं श्रुत्वा स्वशिष्याणां
३ द्वौ प्रहित्य तं पप्रच्छ, येनागन्तव्यं स किं भवान्, वान्यः कश्चिद-
४ स्माभिः प्रतीक्षितव्यः ? ततो यीशुस्तौ प्रतिजगाद, युवाभ्यां
५ यद्यच्छ्रूयते दृश्यते च गत्वा तद् योहनाय निवेद्यतां । अन्धा
दृष्टिं लभन्ते, खञ्जाः परिव्रजन्ति, कुष्ठिनः शुचीभूयन्ते, वधिराः
६ शृण्वन्ति, मृता उत्थाप्यन्ते, दरिद्राश्च सुसंवादं श्राव्यन्ते, यश्च
मयि न स्खलति स धन्यः ।

७ तयोस्त्वपगच्छतो यीशु र्जननिवहेभ्यो योहनमधीदं कथ-
यितुमारेभे, किं निरीक्षितुं यूयं मरुं निर्गतवन्तः ? किं वायुना
८ चाल्यमानं नलं ? किमथवा द्रष्टुं यूयं निर्गतवन्तः ? किं सूक्ष्मवेश-
परिहितं मनुष्यं ? पश्यत सूक्ष्मवेशा मनुष्या राजभवनेषु विद्यन्ते ।

किमथवा द्रष्टुं यूयं निर्गतवन्तः? किं भाववादिनं? तथैव, युष्मां- ९
स्त्वहं ब्रवीमि, भाववादितोऽपि श्रेष्ठतरं नरं। यतोऽसौ स १०
यमधीदं लिखितमास्ते,

पश्य त्वद्वदनस्याग्रे स्वदूतं प्रहिणोम्यहं।
गन्तव्यं तव मार्गं स तवाग्रे संस्करिष्यति॥

युष्मानहं सत्यं ब्रवीमि, नारीप्रसूतेषु स्नापकाद् योहनान्महान् कोऽपि ११
नोत्पन्नः। स्वर्गराज्ये तु यः क्षोदीयान् स तस्मादपि महत्तरः।
परन्तु स्नापकस्य योहनस्य दिनान्यारभ्याद्य यावत् स्वर्गराज्यं १२
बलादाक्रम्यते बलवन्तश्च तद्धरन्ते। यतो भाववादिनो व्यवस्था १३
च योहनपर्य्यन्ताः, यूयञ्च चेदेतद् ग्रहीतुं सम्मतास्तर्हि जानीत, १४
येनागन्तव्यं स एलियोऽसौ। शृणोतु यस्य श्रोतुं श्रोत्रे स्तः। १५

तदेतत्कालीया मया कैरुपमेयाः? ते हट्टेषूपविष्टैस्तैर्बा- १६
लकैः सदृशाः, ये स्ववयस्यान् आह्वयन्तो वदन्ति, युष्मत्कृते वयं १७
वंशीरवादयाम यूयन्तु नानृत्यत, युष्मत्कृते वयं व्यलपाम यूयन्तु
स्ववक्षांसि नाताडयत। योहनो हि न भोजनं न पानं वा सेव- १८
मान आगतः, जनैस्तूच्यते स भूताविष्टः। मनुष्यपुत्रो भोजनं १९
पानञ्च सेवमान आगतः, जनैस्तूच्यते पश्यासौ भोक्ता मद्यपश्च
मनुष्यः, शुल्कादायिनां पापिनाञ्च बन्धुः। प्रज्ञा तु स्वसन्तानाना-
माचारतो निर्दोषीकृता।

तदानीं येषु नगरेषु कर्म्माणि भूयिष्ठानि प्रभावसिद्धानि तेन २०
कृतानि, तेषां निवासिभि र्मनांसि न परावर्त्तितानीति हेतोः स
तानि भर्त्सयितुमारभ्य जगाद, हा कोरासिन, हा बैत्सैदे, युवां २१
सन्तापार्हे, यतो युवयो र्मध्ये कृतानि यानि प्रभावसिद्धानि कर्म्माणि,
तानि चेत् सोरे सीदोने चाकारिष्यन्त, प्रागेव तन्निवासिनस्तर्हि

२२ शाणं परिधाय भस्मन्युपविश्य च मनांसि परावर्त्तयिष्यन्। अहन्तु
वां ब्रवीमि, विचारदिने युवयो र्दशातः सोरस्य सीदोनस्य च
२३ दशा सह्यतरा भविष्यति। लञ्च हा स्वर्गं यावदुन्नमिते कफर्ना-
हूमपुरि, पातालं यावदवरोहयिष्यसे, यतस्त्वयि कृतानि प्रभाव-
सिद्धानि यानि कर्म्माणि, तानि चेत् सदोमेऽकारिष्यन्त, तर्ह्यद्य
२४ यावत् तदस्थास्यत्। युष्मांस्त्वहं ब्रवीमि, विचारदिने सदोमदेशस्य
दशा तव दशातः सह्यतरा भविष्यति।
२५ तस्मिन् काले यीशुरनुबभाषे, भो स्वर्गमर्त्त्ययोः स्वामिन्
पितः, त्वामहं साधु वदामि, यतस्त्वया विज्ञेभ्यस्तीक्ष्णबुद्धिभ्यश्चै-
२६ तानि निगुह्य शिशूनामाविष्कृतानि। अतः किं पितः, यदित्थं
२७ तव दृष्टौ यत् प्रीतिकरं तदेव सिद्धं। मम पित्रा मयि सर्व्वमेव
समर्पितं; पितरं विनापरः कोऽपि पुत्रं न विजानाति, पुत्रञ्च
विनापरः कोऽपि पितरं न विजानाति, यस्मै च तं प्रकाशयितुं
पुत्राय रोचते सोऽपि तं विजानाति।
२८ भो परिश्रान्ता भाराक्रान्ताश्च सर्व्वे, मम समीपमायात,
२९ तेनाहं युष्मान् विश्रमयिष्यामि। मम युगं स्वेषूपरि धारयत मत्तः
शिक्षाञ्च गृह्लीत, यतो मृदुशीलो नम्रहृदयश्चाहं। तथानुष्ठिते
३० यूयं स्वमनसां कृते विश्राममवाप्स्यथ। यतः सुसह्यं मम युगं
लघुश्च मम भारः॥ ११॥

---

१२ द्वादशोऽध्यायः।

१ विश्रामवारमधि ख्रीष्टोपदेशः ९ शुष्कहस्तस्य स्वास्थ्यं १४ ख्रीष्टं प्रति फरीशिनां कुमन्त्रणा तमधि भविष्यद्वाक्यसिद्धिः २२ भूतग्रस्तान्धमूकानां स्वास्थ्यं ३१ कथाकथनोद्देशः ३८ योनाहस्य दक्षिणदेशीयराज्ञ्याश्च वाक्येन चिह्नं चेष्टमानान् प्रति भर्त्सनं ४२ अशुच्यात्मग्रस्तानां विवरणं ४६ मातृसहजानध्युपदेशनञ्च।

यीशुस्तदा विश्रामवारे शस्यक्षेत्रेणाव्रजत्, तस्य शिष्यास्त्वक्षुध्यन् १
शस्यमञ्जरी र्भङ्क्ता च भोजने प्रावर्त्तन्त। तद् दृष्ट्वा फरीशिनस्तमूचुः, २
पश्यतु, विश्रामवारे यदविधेयं भवतः शिष्यैस्तत् क्रियते। स तु ३
तान् जगाद, न किं पठितं भो दायूदस्तस्य सङ्गिनश्च यदाक्षुध्यन्
तदा स किमकार्षीत्? स हीश्वरस्य गेहं प्रविश्य तानेव दर्शनीय- ४
पूपान् अभुङ्क्त यान् भोक्तुं याजकैः केवलै र्विधेयमासीत्, न तु
तेन न तत्सङ्गिभि र्वा। नापि किं व्यवस्थायां पठितं भो यद् ५
धर्म्मधाम्नि याजका विश्रामवारञ्च लङ्घयन्ति निर्द्दोषास्तु सन्ति?
युष्मांस्त्वहं ब्रवीमि, धर्म्मधाम्नोऽपि महत्तरेण केनाप्यत्रोपस्थितं। ६
परन्तु

दयामेवाभिवाञ्छामि न तु यज्ञक्रियामहम्। ७

एतस्य तत्त्वं यदि यूयमज्ञास्यत, न निर्द्दोषान् दोषिणस्तदा-
करिष्यत। प्रभु र्हि मनुष्यपुत्रो विश्रामवारस्यापि। ८

अनन्तरं स स्थानात् तस्मात् प्रगत्य तेषां समाजगृहं प्रविवेश। ९
पश्य च तदासीदुपस्थितो नर एकः शुष्कहस्तः। ते च तस्मिन्न- १०
भियोगमारोपयितुकामास्तं पप्रच्छुः, किमामयस्य प्रतीकारो विधेयो
विश्रामवारे? स तु तान् जगाद, अस्ति वः कोऽप्येकस्य मेषस्य ११
स्वामी? तस्य मेषश्चेद् विश्रामवारे गर्त्ते पतति, स तर्हि किं तं
धृत्वा नोद्धरिष्यति? मेषात्तु मनुष्यः किं न सुदूरं विशिष्यते? १२
अतो विधेया सत्क्रिया विश्रामवारे। स तदा नरं तं जगाद, तव १३
हस्तं प्रसारय। हस्तश्च तेन प्रसारितः स्वस्थीभूतश्च सोऽन्यतर इव।

अनन्तरं फरीशिनो निर्गत्य मिथो मन्त्रयाञ्चक्रिरे कथं स १४
विनाशयितव्यः। यीशुस्तु तज्ज्ञात्वा स्थानं तत् तत्याज, महान्तो १५
जननिवहाश्च तमन्वव्रजन्, स च सर्व्वान् निरामयांश्चकार, तान् १६

निर्भर्त्सयंश्च जगाद, मां साधारणगोचरं माऽकार्ष्ट। इत्थं भाव-
१७ वादिना यिशायाहेन कथितमिदं वाक्यं सिद्धं, यथा,

१८ सेवको मम पश्यासौ वरयित्वा मया धृतः।
मामकप्रेमपात्रं स मन्मनस्तुष्टिकारकं॥
१९ मया तस्योपरिष्टाच्च स्वात्माधिष्ठापयिष्यते।
विचारस्य च संवादं जातिभ्यः स प्रदास्यति॥
नैव कोलाहलस्तेन नोच्चशब्दः करिष्यते।
राजमार्गेषु वा कोऽपि नैव श्रोष्यति तद्रवं॥
२० प्रक्षुण्णोऽपि नलस्तेन नैव खण्डीकरिष्यते।
निस्तेजा वर्त्तिका तेन न च निर्व्वापयिष्यते॥
२१ इत्थं शेषे जयप्राप्तं विचारं सोऽभिनेष्यति।
करिष्यन्ति च तस्यैव नाम्न्याशां परजातयः॥

२२ तदानीमन्धो मूकश्चैको भूताविष्टो मनुष्यस्तस्य समीपमानिन्ये,
स च तं स्वस्थं चकार, तेनान्धो मूकश्च स वाक्शक्तिं दृष्टिञ्च
२३ लेभे। ततः सर्व्वे जननिवहा आश्चर्य्यं मत्वाब्रुवन्, किमसौ दायू-
२४ दस्य पुत्रः? फरीशिनस्तु तच्छ्रुत्वा जगदुः, निःसारयत्यसौ भूतान्
केवलं भूतराजस्य बेलसबूबस्य साहाय्येन नान्येन केनाप्युपायेन।
२५ यीशुस्तु तेषां चिन्ता विज्ञाय तान् जगाद, उत्सीदति सकलं
तद् राज्यं यद् भिन्नं स्वविरुद्धं, नाप्यवस्थास्यते सकलं तन्नगरं कुलं
२६ वा यद् भिन्नं स्वविरुद्धं। शैतानश्चेत् शैतानं निःसारयति स
तर्हि स्वविरुद्धं भिन्नः सञ्जातः, तेन तस्य राज्यं वा कथमवस्था-
२७ स्यते? तदहं यदि बेलसबूबबलेन भूतान् निःसारयामि, युष्माकं
पुत्रास्तर्हि केन तान् निःसारयन्ति? अतस्ते युष्माकं विचारयितारो
२८ भविष्यन्ति। यदि त्वीश्वरस्यात्मनाहं भूतान् निःसारयामि, तर्ही-

श्वरस्य राज्यं युष्मत्समीपमुपस्थितं। अथवा तस्य बलिष्ठस्य गेहं २९
प्रविश्य तस्य द्रव्याणि लोठयितुं मनुष्येण कथं शक्यते? बलिष्ठं
तम् अग्रे न बद्धा तत् कर्त्तुं तेन न शक्यं बद्धा तु तस्य गेहस्थं
धनं तेन लोठयिष्यते। यो न मम सहायः स मम विरोधी, ३०
यश्च मया सार्द्धं न सञ्चिनोति स विकिरति।

तद् युष्मानहं ब्रवीमि, क्षमिष्यते तु मनुष्याणां सर्व्वपापं सर्व्व- ३१
निन्दा च आत्मनस्तु निन्दा मनुष्याणां न क्षमिष्यते। यस्तु मनुष्य- ३२
पुत्रस्य प्रतिकूलं वाक्यं व्याहरति तस्य क्षमिष्यते; यस्तु पवित्र-
स्यात्मनः प्रतिकूलं वाक्यं व्याहरति तस्य नास्मिन् युगे न भविष्यति
युगे वा क्षमिष्यते। युष्माभिः सुवृक्षे कल्पिते सुफलान्यपि तस्य ३३
कल्पयितव्यानि, कुवृक्षे च कल्पिते कुफलान्यपि तस्य कल्पयितव्यानि
यतो फलेनाभिज्ञायते वृक्षः। भो कालसर्पान्वयाः, यूयं दुष्टाः, ३४
युष्माभिः सद्वाक्यानि व्याहर्त्तुं कथं शक्यते? यतो हृदयस्याति-
पूर्णमेव वक्त्रं व्याहरति। सुजनो हृदयात् सञ्चितसुधनात् सुवा- ३५
क्यानि निःसारयति, कुजनश्च कुधनात् कुवाक्यानि निःसारयति।
युष्मांस्त्वहं ब्रवीमि, वचनस्यानर्थकस्यैकैकस्य मनुष्यैः कथितस्योत्तरं ३६
विचारदिने दातव्यं। यतस्त्वं स्ववाक्येभ्यो निर्द्दोषः स्ववाक्येभ्य एव ३७
दोषी वा कारिष्यसे।

तदानीं शास्त्राध्यापकानां फरीशिनाञ्च केचित्तं प्रत्यवदन्, भो ३८
गुरो, भवतो दूरेऽभिज्ञानं द्रष्टुमिच्छामः। स तु तान् प्रतिजगाद, ३९
दुष्टो व्यभिचारी च वंशोऽभिज्ञानमनुसन्धत्ते, तस्मै तु भाववादिनो
योनाहस्याभिज्ञानादन्यदभिज्ञानं न दायिष्यते। यतो योनाहो ४०
यथा दिनत्रयं रात्रित्रयञ्च यावत् तिमेरुदरेऽवस्थितवान्, तथा
मनुष्यपुत्रो दिनत्रयं रात्रित्रयञ्च यावत् पृथिव्या उदरेऽवस्थास्यते।

४१ नीनवीयनरा विचारे वंशेनैतेन सार्द्धमुत्थास्यन्ति तं दोषीकरिष्यन्ति च, यतो योनाहस्य घोषणे ते मनांसि परावर्त्तितानि, पश्य त्वत्र
४२ योनाहान्महत्तरेण केनाप्युपस्थितं । दक्षिणदिशो राज्ञी विचारे वंशेनैतेन सार्द्धमुत्थापयिष्यते तं दोषीकरिष्यति च, यतः सा शलोमनो विज्ञानोक्तीः श्रोतुं पृथिव्याः प्रान्तेभ्य आगतवती, पश्य त्वत्र शलोमनो महत्तरेण केनाप्युपस्थितं ।

४३ अपरं मनुजान्निर्यातोऽपवित्रभूतो निर्जलस्थानेषु भ्रमन् ...

४३ अपात्मा परन्त्वशुचिर्मनुष्यान्निर्यानात् परं निरुदकानि स्था-
४४ नानि पर्य्यटन् विश्रामं मृगयते न तु तं प्राप्नोति । स तदा वदति निर्गतोऽहं मामकाद् गेहाद् यस्मात् तत् पुनर्गच्छामि ।
४५ तत्रोपस्थाय तु स तत् शून्यं मार्जितं शोभितञ्च पश्यति । गत्वा च स तदापरान् स्वतो दुष्टतरान् सप्तात्मनः स्वसङ्गिनः करोति, सर्व्वे च ते तत्र प्रविश्य निवसन्ति । अनेन मनुष्यस्य तस्यान्तिमदशादिदशातो निकृष्टा भवति । दुष्टस्य वंशस्यैतस्यापि तादृशी दशा सम्भविष्यति ।

४६ स यावत् जननिवहेभ्योऽकथयत्, पश्य तावत् तस्य माता
४७ भ्रातरश्च वहिस्तिष्ठन्तस्तेन संलपितुमैच्छन् । कश्चिच्च तं जगाद, पश्यतु, भवतो माता भ्रातरश्च भवता संलपितुमिच्छन्तो वहि-
४८ स्तिष्ठन्ति । स तु तं संवाददातारं प्रतिजगाद, का मम माता ? के
४९ वा मम भ्रातरः ? स्वशिष्यानुद्दिश्य हस्तं प्रसार्य्य च स जगाद,
५० पश्यामी मम माता मम भ्रातरश्च । यतो यः कश्चिन्मम स्वर्गस्थस्य पितुरिच्छां पालयति, स एव मम भ्राता भगिनी माता च ॥ १२ ॥

१३ त्रयोदशोऽध्यायः।

१ बीजवपनदृष्टान्तः १० शिष्यैः साकं संलापः १८ शिष्याणां दृष्टान्तार्थज्ञापनं २४ श्यामाकदृष्टान्तः ३१ सर्षपदृष्टान्तः ३३ किण्वदृष्टान्तः ३४ ख्रीष्टमधि भविष्यद्वचनसिद्धिः ३६ उक्तदृष्टान्तस्य व्याख्या ४४ निकुतधनदृष्टान्तः ४५ मुक्तादृष्टान्तः ४७ आनायनिक्षेपदृष्टान्तः ५१ शिष्यान् प्रति कथनं ५७ स्वकीयलोकैः ख्रीष्टस्य न सम्मानञ्च।

तस्मिन्नेव दिने यीशु र्गेहान्निर्गत्य समुद्रतीर उपविवेश। १
समीपागतेषु तु महत्सु जननिवहेषु स नौकामारुह्य तत्रोपविवेश, २
कृत्स्नो जननिवहस्तु समतले तीरेऽतिष्ठत्। स तदा दृष्टान्तकथा- ३
भिर्बहुश आलपंस्तानब्रवीत्, पश्य वप्ता बीजानि वप्तुं निर्जगाम;
वपनकाले तु पथपार्श्वे कतिपयबीजानि पतितानि विहङ्गमैस्वागत्य ४
तानि खादितानि। पतितानि चापराणि कतिपयानि स्थलेषु ५
पाषाणमयेषु, तत्र नाविद्यत मृत्तिका प्रचुरं तेषां कृते, मृत्तिकाया
गभीरत्वस्याभावात् तान्याशु प्ररूढाणि, सूर्य्ये तूच्चसंस्थे दग्धानि ६
मूलाभावाच्च शोषितानि। पतितान्यपराणि तु कण्टकेषु सम्पीडि- ७
तानि च कण्टकै र्वृद्धा। अपराणि तूत्तममृत्तिकायां पतित्वा फलं ८
फलितवन्ति, कानिचिच्छतगुणं, कानिचित् षष्टिगुणं, कानिचिद्
वा त्रिंशद्गुणं। शृणोतु यस्य श्रोतुं श्रोत्रे स्तः। ९

अनन्तरं शिष्याः समीपमागत्य तं पप्रच्छुः, कुतो भवान् १०
दृष्टान्तकथाभिरमूनालपति? स तान् प्रतिजगाद, युष्मभ्यं स्वर्ग- ११
राज्यस्य निगूढानां विषयाणां ज्ञानमदायि, अमुभ्यस्तु नादायि।
यतो यस्यास्ति, तस्मै दायिष्यते, तेन तस्योपचायिष्यते। यस्य १२
तु नास्ति तस्य यदस्ति तदपि तस्माद्धारिष्यते। अतोऽहं दृष्टान्त- १३
कथाभिरमूनालपामि, यतस्ते पश्यन्तोऽपि न पश्यन्ति शृण्वन्तोऽपि
च न शृण्वन्ति न वा बुध्यन्ते। तेषु च यिशायाहस्येयं भाववाणी १४
सिध्यति, यथा,

श्रोत्रैः संश्रुत्य युष्माभि र्बोधो नैवोपलप्स्यते।
सम्यग् दृष्ट्वा च युष्माभि र्नैव दर्शनमाप्स्यते॥
१५ जातेरस्या यतो हेतो र्हृदयं स्थूलतां गतं।
मन्दमेव स्वकर्णैश्च वाचं शृण्वन्ति तज्जनाः॥
विनिमीलितवन्तश्च स्वनेत्राणि नरा अमी।
सर्व्वै ते लोचनै र्द्रष्टुं कर्णैः श्रोतुमनिच्छवः॥
यस्मात् ते हृदयै र्बुद्ध्वा परावर्त्त्य मनांसि च।
मत्तो रोगप्रतीकारं प्रग्रहीतुमसम्मताः॥

१६ युष्माकन्तु नेत्राणि धन्यानि यतस्तानि पश्यन्ति, कर्णाश्च धन्या
१७ यतस्ते शृण्वन्ति। वस्तुतोऽहं युष्मान् सत्यं ब्रवीमि, बहवो भाव-
वादिनो धार्म्मिकाश्च द्रष्टुं वाञ्छितवन्तो युष्माभि र्यद्यद्दृश्यते,
श्रोतुञ्च युष्माभि र्यद्यच्छ्रूयते, न तु तानि दृष्टवन्तो न वा
श्रुतवन्तः।

१८ तद् युष्माभिः श्रूयतां तस्य वप्तु र्दृष्टान्तकथा। यदा कश्चिद्
१९ राज्यस्य वाक्यं शृण्वन् न बुध्यते दुष्टात्मा तदागत्य तस्य हृदये
२० यदुप्तं तदपहरति। मनुष्यः स एव लब्धवीजः पथपार्श्वे। स्थलेषु
पाषाणमयेषु लब्धवीजः स एव यो वाक्यं शृणोति तूर्णञ्च सानन्दं
२१ गृह्लाति, स त्वन्तरे निर्म्मूलोऽतः क्षणस्थिरः, तत् तत्क्षणं स्खलति
२२ पुन र्जाते क्लेशे वाक्यकृत उपद्रवे वा। कण्टकेषु लब्धवीजः स एव
यो वाक्यं शृणोति परन्त्वेतस्य युगस्य भावनया धनस्य मायया च
२३ वाक्यं तत् सम्पीड्यते निष्फलञ्च जायते। उत्तममृत्तिकायां लब्ध-
वीजस्तु स एव यो वाक्यं शृणोति बुध्यते च। स च फलवान्
भवति, कोऽपि शतगुणं, कोऽपि षष्टिगुणं, कोऽपि वा त्रिंशद्गुणं
फलमुत्पादयति।

अनन्तरं स तेभ्योऽन्यां दृष्टान्तकथां कथयामास, स्वर्गराज्यं २४
तेनैव मनुष्येणोपमेयं यः स्वक्षेत्रे सुवीजमुवाप। निद्राणेषु तु २५
जनेषु तस्य शत्रुरागत्य गोधूमानां मध्ये श्यामाकवीजान्युप्त्वा
प्रस्थितः। ततस्तृणानि यदा प्ररुह्य फलवन्त्यभवन् तदा श्यामाका २६
अपि प्रत्यक्षा अभवन्। दासास्तदा गृहस्वामिनः समीपमागत्य २७
जगदुः, प्रभो, अपि क्षेत्रे भवान् किं सुवीजानि नोप्तवान्? तदस्य २८
श्यामाकाः, कथमेतत्? स तान् जगाद, केनचिच्छत्रुणा मनुष्येणेदं
कृतं। दासास्तं पुन र्जगदुः, अभिमन्यते भवता यद् वयं गत्वा
तान् सङ्गृह्णीयामः? स त्वब्रवीत्, मैवं यतः श्यामाकान् सङ्गृह्णन्तस्तैः २९
सह गोधूमानुन्मूलयिष्यथेति बिभेमि। शस्यच्छेदनं यावदुभयोरेकत्र ३०
वृद्धिं सहध्वं। शस्यच्छेदनकालेऽहं तच्छेत्तॄनिदमाज्ञापयिष्यामि,
श्यामाकान् प्रथमं सङ्गृह्य दाहनार्थं कूर्च्चं बध्नीत, गोधूमांस्तु मम
कुशूले निधत्तेति।

स तेभ्योऽपरां दृष्टान्तकथां कथयामास, स्वर्गराज्यं सर्षपवीजेन ३१
तेन सदृशं यदादाय कश्चिन्मनुष्यः स्वक्षेत्र उवाप। क्षुद्रतमं तत् ३२
सर्व्ववीजेषु, वृद्धा पुनः शाकेभ्यो बृहद् भवति वृक्षो जायते च,
ततो विहायसो विहङ्गमा आगत्य तस्य शाखासु निवसन्तीति।

स तानपरां दृष्टान्तकथां जगाद, स्वर्गराज्यं किण्वेन तेन ३३
सदृशं यत् कयाचिद् योषिताादाय गोधूमचूर्णानां द्रोणत्रयप-
रिमितानां मध्ये निह्नुतं येन च परिणामे सञ्जातं तत्साकल्यं
किण्वभावितं।

सर्व्वमेतद् यीशु र्दृष्टान्तकथाभि र्जननिवहान् जगाद, दृष्टान्तं ३४
विना च स तेभ्यः किञ्चिन्नाकथयत्। इत्थं भाववादिन इयमुक्तिः ३५
सिद्धिं गता, यथा,

अहं दृष्टान्तवाक्यै र्हि व्यादास्यामि निजं मुखं।
आजगत्सृष्टितो गूढा व्याहरिष्याम्यहं कथाः।

३६ तदानीं यीशु र्जननिवहान् विसृज्य गृहमाजगाम, तस्य
शिष्याश्च तत्समीपमागत्य जगदुः, भवानस्मान् क्षेत्रस्थानां श्यामा-
३७ कानां दृष्टान्तकथां बोधयितुमर्हति। स ततस्तान् प्रत्यब्रवीत्,
३८ सुबीजानां वप्ता मनुष्यपुत्रः, क्षेत्रञ्च जगत्, सुबीजानि च राज्यस्य
सन्तानाः। श्यामाकास्तु दुष्टात्मनः सन्तानाः, तद्वप्ता च शत्रु
३९ र्दियाबलः। शस्यच्छेदनकालश्च युगान्तः, छेत्तारश्च स्वर्गदूताः।
४० अतो यथा श्यामाकाः सङ्गृह्यन्ते वह्नौ च निर्दह्यन्ते, तथैव
४१ युगान्ते सम्भविष्यति, मनुष्यपुत्रः स्वदूतान् प्रहेष्यति, ते च तस्य
४२ राज्यस्य मध्यात् सर्व्वाणि विघ्नान्यधर्म्माचारिणश्च सङ्गृह्य वह्निमय-
चुल्ल्यां निक्षेप्स्यन्ति, तत्र रोदनं दन्तैर्दन्तघर्षणञ्च सम्भविष्यतः।
४३ धार्म्मिकास्तदा स्वपितूराज्ये सूर्य्यवद् विराजिष्यन्ते। शृणोतु यस्य
श्रोतुं श्रोत्रे स्तः।

४४ पुनः स्वर्गराज्यं क्षेत्रे निखतेन तेन धनेन सदृशं यदासाद्य
कश्चिन्मनुष्यो निखत्य निजानन्दवशाद् गत्वा सर्व्वस्वं विक्रीय क्षेत्रं
तत् क्रीणीते।

४५ पुनः स्वर्गराज्यं मुक्ताः समीचीनाः अनुसन्दधानेन बणिजा
४६ तेन सदृशं, येन महार्घ्यैका मुक्तासादिता, प्रस्थाय च सर्व्वस्वं
विक्रीय सा क्रीता।

४७ पुनः स्वर्गराज्यं समुद्रे निक्षिप्तेन सर्व्वविधान् तोयचरान् सङ्गृह्य-
४८ तानायेन सदृशं। पूर्णे च सति तस्मिन्नानायिभिस्तं तीरमानीय
तत्रोपविश्य सुमीनाः पात्रेषु सङ्गृहीताः कुत्सिताश्च वहि र्निक्षिप्ताः।
४९ युगान्ते तादृशं सम्भविष्यति, स्वर्गीयदूता आगत्य धार्म्मिकाणां

मध्यतो दुष्टान् पृथक्कृत्य वह्निमयचुल्ल्यां निक्षेप्स्यन्ति, तत्र रोदनं ५०
दन्तैर्दन्तघर्षणञ्च सम्भविष्यतः।

यीशुस्तान् पप्रच्छ, बुद्धं किं युष्माभिरेतत् सर्व्वं? ते तं जगदुः, ५१
बुद्धं, प्रभो। तदा स तानब्रवीत्, अतो यः कश्चिच्छास्त्राध्यापकः ५२
स्वर्गराज्यस्य कृते शिक्षितः स स्वभाण्डागाराद् द्रव्याणि पुराणानि
नवीनानि चाहरता गृहस्वामिना सदृशः।

समाप्यैता दृष्टान्तकथा यीशुः स्थानात् तस्मात् प्रतस्थे। ततः ५३
स स्वदेशमागत्य तत्रत्यजनानां समाजगृहे तेभ्यः शिक्षां दातुं ५४
प्रावर्त्तत, तेन च त आश्चर्य्यं गत्वावदन्, कुतोऽसावीदृशज्ञानम्
ईदृशप्रभाववैभवञ्च लब्धवान्? नायमस्मदीयतक्ष्णः पुत्रः? नामुष्य ५५
मातु र्नाम मरियमिति? भ्रातृणाञ्च नामानि याकोब् योषिः
शिमोनो यिहूदाश्चेति? नामुष्य भगिन्योऽपि सर्व्वा विद्यन्तेऽत्रा- ५६
स्मन्मध्ये? तत् कुतोऽमुनालम्भि सर्व्वमेतत्? इत्थं ते तस्मिन् ५७
स्खलिताः। यीशुस्तु तान् जगाद, नान्यत्र कुत्रापि भाववादिनो-
ऽसम्माननं, केवलं तस्य स्वदेशे स्वकुले च। तेषामविश्वासवशाच्च ५८
तेन तत्र प्रभावसिद्धानि कर्म्माणि बहूनि न चक्रिरे॥ १३॥

---

१४ चतुर्द्दशोऽध्यायः।

१ स्नापकस्य योहनस्य बधः १३ पञ्चपूपद्वयमीनैः पञ्चसहस्राणां पुंसां भोजनं २२ सागरोपरि ख्रीष्टस्य पद्भ्यां गमनं ३४ भूरिलोकानां निरामयत्वञ्च।

तस्मिन् काले चतुर्थांशाधिपति र्हेरोदो यीशोः ख्यातिं श्रुत्वा १
स्वदासान् जगाद, असौ स्नापको योहनः, मृतानां मध्यादुत्थितः २
सः। अतो हि प्रभाववैभवं तस्मिन् स्वकार्य्यं कुरुते। तद्यथा ३
हेरोदः स्वभ्रातुः फिलिपस्य भार्य्याया हेरोदियाभिधायाः कृते
योहनं धृत्वा बद्धा च कारायां निहितवान्। यतो योहनस्तमवदत्, ४

५ न विधेयं भवता तस्याः पतित्वं । तं हन्तुकामस्तु स जननिवहाद्-
६ बिभेत्, यतः सर्व्वे तं भाववादिनममन्यन्त । हेरोदस्य जन्मदिनोत्सवे
७ तु हेरोदियाया दुहिता सभामध्ये नृत्यन्ती हेरोदायारोचत । स
च सशपथं प्रत्यज्ञासीत्, किमपि यत् त्वं याचिष्यसे तदेवाहं तुभ्यं
८ दास्यामि । तदा सा स्वमात्रा प्रवर्त्तिता जगाद, स्नापकस्य
९ योहनस्य शिरः स्थाले निधायात्र मह्यं ददातु । अनेन राजाशोचीत्
१० शपथानां कृते सहभोजिनश्चापेक्ष्य तु तस्य दानमादिदेश प्रेष्यञ्च
११ प्रहित्य कारायां योहनस्य शिरश्छेदयामास । स्थाले निहितमा-
नीतञ्च तस्य शिरो दत्तञ्च तद् बालायै, उपहृतञ्च तया स्वमातुः
१२ समीपम् । ततः परं शिष्यास्तस्यागत्य शवमादाय शवागारे निदधुः,
यीशोः समीपमागत्य च तस्मै संवादं निवेदयामासुः ।

१३ तदाकर्ण्य यीशुस्तस्मात् स्थानात् प्रस्थाय नौकया निर्जनं स्थानं
किञ्चन निभृतं जगाम, जननिवहास्तु तच्छ्रुत्वा नगरेभ्यो निर्गत्य
१४ स्थलमार्गेण तमनुवव्रजुः । यीशुस्तदा वहिरागत्य महान्तं जननिवहं
१५ दृष्ट्वानुचकम्पे चकार च निरामयान् तेषां मध्ये रोगिणः । सन्ध्या-
यान्तूपस्थितायां तस्य शिष्यास्तत्समीपमागत्य जगदुः, स्थानमेत-
न्निर्जनम् आगतञ्च दिनावसानं, तद् विसृज्यन्तां भवता जननिवहा
१६ यथामी ग्रामान् गत्वा खाद्यानि स्वार्थं क्रीणीयुः । यीशुस्तु तान्
जगाद, तेषामपगमनमनावश्यकं, यूयं वितरत तेभ्यो भक्ष्याणि ।
१७ ते तमब्रुवन्, पूपान् पञ्च मीनौ च द्वौ विहायास्माकमत्र किमपि
१८ नास्ति । स तान् जगाद, तानेवात्र मदन्तिकमानयत । ततः स
१९ जननिवहानां शष्पोपर्य्युपवेशनमादिदेश, तान् पूपान् पञ्च मीनौ
च द्वौ चादाय स्वर्गं प्रत्यूर्द्धदृष्टिं कृत्वाशीर्व्वाचनं चकार, ततः
२० पूपान् भङ्क्त्वा शिष्येभ्यो ददौ, ते च जननिवहेभ्यो ददुः । भुक्त्वा च

सर्व्वे तत्पुः। भग्नानामंशानां शेषेण च ते द्वादशडल्लकान् पूरयि-
त्वादन्दुः। योषितो बालकांश्च विहाय भोक्तारस्ते प्रायेण पुरुषाः २१
पञ्चसहस्राण्यासन्।

अनन्तरं यीशुः शिष्यांस्तत्क्षणं नौकामारोढ्य तावदात्मनः २२
प्राक् पारं गन्तुं साग्रहमादिदेश, स यावत् जननिवहं विसृजति।
जननिवहं विसृज्य स निभृतं प्रार्थनार्थं गिरिमारुरोह च। तत् २३
सन्ध्यायाः परं स तत्रासीदेकाकी, तदा तु मध्यसमुद्रं नौरूर्म्मि- २४
भिराहन्यत, यतो वायुरासीत् प्रतिकूलः। यामे तु यामिन्याश्चतुर्थे २५
यीशुस्तेषां समीपं गन्तुकामः समुद्रोपर्य्यव्रजत्, शिष्यास्तु तं समु- २६
द्रोपरि व्रजन्तं दृष्ट्वोद्विजन्त त्रासाच्चुक्रुशुश्चोक्ता प्रतिच्छायासा-
विति। यीशुस्तु तत्क्षणं तानालप्याब्रवीत्, आश्वसित, अहमेषः, २७
मा भैष्ट। पितरस्तदा तमन्वब्रवीत्, प्रभो भवानेव चेत्, तर्हि २८
तोयोपरि भवतोऽन्तिकं मम गमनमनुमन्यतां। स जगाद, एहि। २९
ततः पितरो नौकातोऽवरुह्य यीशोः समीपगमनार्थं तोयोपर्य्यव्रजत्।
वायुन्तु बलवन्तं दृष्ट्वाबिभेत्, निमज्जितुमारभ्य च चुक्रोश, प्रभो ३०
मां तारयतु। यीशुस्तत्क्षणं हस्तं प्रसार्य्य तं दधार जगाद च, भो ३१
स्तोकविश्वासिन्, किमर्थं समशेथाः? ततस्तयो र्नौकामारूढयो ३२
र्वायुः शशाम नौकास्थजनास्त्वागत्य प्रणिपत्य च तं जगदुः, सत्यं ३३
भवान् ईश्वरस्य पुत्रः।

तरित्वेत्थं ते प्रदेशे गिनेषरताख्य उपतस्थिरे। स्थानस्य तस्य ३४
नराश्च तमभिज्ञाय कृत्स्नं जनपदं जनान् प्रहित्यास्वस्थान् मनुष्यान् ३५
सर्व्वांस्तस्य समीपमानाययामासुः प्रार्थयाञ्चक्रिरे च ते तेषां कृते ३६
तदीयवस्त्रप्रलम्बकस्य स्पर्शनानुमतिमेव, तेरुश्च तावन्तो यावन्तः
स्पर्शनं चक्रुः॥ १४॥

१५ पञ्चदशोऽध्यायः।

१ शास्त्राध्यापकान् फरीशिनश्च प्रति भर्त्सनं १० मनुजानाममेध्यत्वहेतुनिर्णयः २१ कस्याश्चन कनानीययोषितः कन्यायाः स्वास्थ्यं २९ बहुलोकानां स्वास्थ्यं ३२ सप्तपूपाल्पमीनेन चतुःसहस्रपुंसां भोजनम्।

१ तदा यिरूशालेमत आगताः शास्त्राध्यापकाः फरीशिनश्च
२ यीशोरन्तिकमुपस्थाय जगदुः, भवतः शिष्याः कथं प्राचीनानां पर-
म्परागतां शिक्षां लङ्घयन्ति? यतस्ते भोजनकाले हस्तान् न प्रक्षा-
३ लयन्ति। स तु तान् प्रतिजगाद, यूयमपि कथं युष्माकं पर-
४ म्परागतशिक्षायामनुरागवशाद् ईश्वरस्याज्ञां लङ्घयथ? यत ईश्वर
इदमाज्ञापयामास, त्वं स्वपितरं स्वमातरञ्च सम्मन्यस्वेति, अपि च,
५ यः स्वपितरं मातरं वा शपेत स बध्यो भविष्यतीति। यूयन्तु
वदथ, यः स्वपित्रे स्वमात्रे वा कथयति मत्तो यद्दानेन तवोप-
६ कारः समभविष्यत् तदीश्वरायोपहृतमित्यादि; स्वपितरं स्वमातरं
वेत्थं स न कथञ्चन सम्मंस्यते। स्वशिक्षायां परम्परागतायामनु-
७ रागाद् इत्थं युष्माभिरीश्वरस्याज्ञा व्यर्थीकृता। भो कपटिनः,
युष्मानधि यिशायाहः समीचीनामिमां भाववाक्यं कथितवान्,
यथा,

८ मनुष्याः सकला एत आयान्त्यास्यै मदन्तिकं।
अधरैरेव सम्मानम् आचरन्ति च मां प्रति।
किन्त्वन्तःकरणं तेषां मत्तो दूरमवस्थितं॥
९ अलीकार्यन्त्विमे सर्व्वे मम कुर्व्वन्ति सेवनं।
धर्म्मशिक्षाच्छलेनैव शिक्षयन्तो नृणां विधीन्॥

१० अनन्तरं स जननिवहं स्वसमीपमाहूय जगाद, श्रुत्वा युष्माभि
११ र्बुध्यतां। यन्मुखं प्रविशति न तन्मनुष्यमशुचीकरोति। यत्तु

मुखान्निःसरति तदेव मनुष्यंमशुचीकरोति। तस्य शिष्यास्तदो- १२
पागत्य जगदुः, अपि ज्ञायते भवता यद् वाक्यं तच्छ्रुत्वा फरी-
शिनः स्खलिता इति? स तु प्रतिजगाद, उन्मूलयिष्यते यः १३
कश्चिद् वृक्षो मम पित्रा न रोपितः। यूयममून् परित्यजत, १४
तेऽन्धानामन्धाः पथप्रदर्शकाः। अन्धश्चेदन्धं नयेत्, तर्ह्युभौ गर्त्ते
पतिष्यतः। पित्रस्तु तं प्रतिजगाद, भवानस्मानुपमां तां बोधयितु- १५
मर्हति। यीशुस्तदाब्रवीत्, यूयं किमधुनाप्यबोधाः? युष्माभिरधु- १६
नापि किं न बुध्यते यद् यत् किञ्चन मुखं प्रविशति तदुदरमा- १७
श्रयति शौचकूपे च निरस्यते, यत्तु मुखान्निःसरति, तद्धृदया- १८
न्निरेति, तदेव च मनुष्यमशुचीकरोति। यतो हृदयात् कुतर्का १९
नरहत्या परदारगमनं व्यभिचारश्चौर्य्यक्रिया मृषासाक्ष्यं धर्म्मनिन्दा
च बहुशो निःसरन्ति। एतान्येव मनुष्यमशुचीकुर्व्वन्ति, नाशुचीक- २०
रोति पुन र्मनुष्यमप्रक्षालितै र्हस्तैराहारकरणम्।

स्थानात् तस्मात् प्रस्थाय यीशु र्जगाम प्रदेशं सोरसीदोनयोः। २१
पश्य च कनानीया काचिन्नारी तत्परिसीमतो निर्गत्य तमुद्दिश्य २२
क्रोशन्ती जगाद, प्रभो दायूदस्य सन्तान, मामनुकम्पतां। दुहिता
मम भूतावेशवशाद् अतीव क्लिश्यते। स तु तां प्रत्यवादीन्नैकमपि २३
वाक्यम्। शिष्याः पुनस्तस्यान्तिकमुपस्थाय प्रार्थयमाना अब्रुवन्,
विसृजत्वमूम्, यतः सास्माकं पश्चात् क्रोशति। स तदा प्रतिजगाद, २४
प्रहितोऽहं केवलमिस्रायेलकुलस्य हारितान् मेषान् प्रति नापरं
प्रति। सा तु तमुपागम्य प्रणिपपात जगाद च, प्रभो, ममोप- २५
करोतु। स प्रत्यवादीत्, न भद्रं भक्ष्यं बालकानां हृत्वा शुनाम- २६
भिमुखं तत् प्रक्षेप्तुं। सानेन जगाद, सत्यं प्रभो, यत् श्वानः २७
स्वामिनां भोज्यमञ्चाद् भ्रंशतीर्भक्ष्यफेलीः खादन्ति। यीशुस्तदा २८

तां प्रत्यवादीत्, भो नारि, महांस्तव विश्वासः, सम्भवतु तथा तव
यथाभीष्टं । निरामयाभूच्च तस्या दुहिता तस्मादेव दण्डात् ।
२९ स्थानात् तस्मात् प्रस्थाय यीशु गालीलीयसमुद्रस्य तटमा-
३० गत्य पर्व्वतमारुह्य तत्रोपविवेश । महान्तो जननिवहाश्च खञ्जान्
अन्धान् मूकान् हीनाङ्गान् अपरांश्च बहून् सार्द्धमानीय यीशो-
३१ श्चरणसमीपे निचिक्षिपुः, स च तान् निरामयांश्चकार । इत्थं
मूकान् भाषमाणान्, हीनाङ्गान् स्वस्थान्, खञ्जान् पर्य्यटतो-
ऽन्धांश्च प्राप्तदृष्टीन् निरीक्ष्य जननिवहा विस्मयं गत्वेस्रायेलस्येश्वरं
तुष्टुवुः ।
३२ अनन्तरं यीशुः शिष्यान् स्वसमीपमाहूय जगाद, मनुष्येष्वेतेषु
कारुण्यं ममोत्पद्यते, यतस्ते आदिनत्रयान्मम सन्निधाववतिष्ठन्ते
भक्ष्यन्तु तेषां किमपि नास्ति । मार्गे ते मूर्च्छां यास्यन्तीति
३३ भयादहं तान् अकृताहारान् विस्रष्टुं नेच्छामि । तदा शिष्यास्त-
मूचुः, कुतोऽस्माभि र्लभ्याः स्थानेऽत्र निर्जने तावन्तः पूपा यैर्जन-
३४ निवहमीदृग्महान्तं तर्पयिष्यामः? यीशुस्तान् पप्रच्छ, पूपाः कति
३५ युष्माकं विद्यन्ते? ते जगदुः सप्त स्वल्पे मत्स्याश्च क्षुद्राः । ततः स
३६ जननिवहान् भुव्युपवेशनमाज्ञापयामास, तांश्च सप्तपूपान् मत्स्यां-
श्चादाय धन्यवादवाचनपूर्व्वकं भङ्क्त्वा स्वशिष्येभ्योऽददात्, ते च
३७ मनुष्येभ्योऽददन् । ततः सर्व्वे भुक्त्वा तृप्तवन्तो भग्नांशानां शेषेण च
३८ सप्तपेटकान् पूरयित्वाददिरे । योषितो बालकांश्च विहाय भोक्ता-
रस्ते पुरुषाश्चतुःसहस्राण्यासन् ।
३९ अनन्तरं स जननिवहान् विसृज्य नौकामारुह्य मग्दलायाः
सीमानमागमत् ॥ १५ ॥

१६ षोडशोऽध्यायः।

१ फरीशिनाम् अभिज्ञानचेष्टनं ५ शिक्षाकिण्वमधि सावधानतोपदेशः १३ अधिख्रीष्टं जनानामनुमितिः पित्राङ्गीकारः २१ ख्रीष्टापमृतिप्रकाशनं पितरम्प्रति तिरस्करणञ्च २४ स्वपश्चाद्गामिनामुपदेशनञ्च।

तदा फरीशिनः सदूकिनश्च तस्यान्तिकमागत्य तं परीक्षमाणा १
गगनात् अभिज्ञानस्य कस्यचित् प्रदर्शनं ययाचिरे। स तु तान् प्रति- २
जगाद, सन्ध्यायामुपस्थितायां यूयं वदथ, सुदिनं, यतो भात्याकाशो
रक्तवर्णः। प्रातश्च वदथ, वात्याद्य, यतो भात्याकाशो मलिनो रक्त- ३
वर्णश्च। भो कपटिनः, यूयम् आकाशस्य रूपं निर्णेतुं जानीथ, न
शक्नुथ किं कालानामभिज्ञानानि निर्णेतुं? दुष्टो व्यभिचारी च ४
वंशोऽभिज्ञानमनुसन्धत्ते, तस्मै तु भाववादिनो योनाहस्याभिज्ञाना-
दन्यदभिज्ञानं न दायिष्यते। अनन्तरं स तान् विहाय प्रतस्थे।

ततः परं शिष्याः पारमागत्य पूपानादातुं विस्मृताः। यीशुस्तु ५
तानब्रवीत्, यूयमालोच्य फरीशिनां सदूकिनाञ्च किण्वतः सावधाना ६
भवत। अनेन ते मिथो विचारयन्तो जगदुः, अस्माभि र्यत् पूपा ७
नादत्ता इति। यीशुस्तु तज्ज्ञात्वा तानब्रवीत्, भो स्तोकविश्वा- ८
सिनः, युष्माभिः पूपा नादत्ता इत्येवं कथं मिथो विचारयथ?
अधुनापि किं न बुध्यते? अपि न स्मरथ किं पञ्चसहस्रेषु तान् ९
पञ्चपूपान् लब्धडल्लकसङ्ख्याञ्च, चतुःसहस्रेषु च तान् सप्तपूपान् १०
लब्धपेटकसङ्ख्याञ्च? युष्माभिः कथं न बुध्यते यत् फरीशिनां ११
सदूकिनाञ्च किण्वतो युष्माभिः सावधानै र्भवितव्यमित्येतदधि मया
कथितं न पूपानधीति? तदा तैस्तस्योक्तेस्तात्पर्य्यमित्येवमबोधि १२
यदस्माभिः फरीशिनां सदूकिनाञ्च शिक्षातः सावधानै र्भवितव्यं न
तु पूपस्य किण्वत इति।

१३ 　ततः परं यीशुः कैसरिया-फिलिप्याः सन्निकटं प्रदेशमागत्य
स्वशिष्यानपृच्छत्, मनुष्यपुत्रो योऽहं, सोऽहं क इत्यधि किं वदन्ति
१४ मानवाः? ते प्रत्यूचुः, केचिद् वदन्ति, भवान् स्नापको योहनः,
अपरे वदन्ति, भवान् एलियः, अन्ये च वदन्ति, भवान्
१५ यिरमियाहोऽथवा भाववादिनामन्यतमः कश्चिदिति। स तान्
१६ जगाद, कोऽहमित्यधि यूयमेव वा किं वदथ? शिमोनः पितरस्तदा
प्रतिजगाद, भवान् सोऽभिषिक्तः पुरुषो जीवनमयस्येश्वरस्य पुत्रः।
१७ यीशुः प्रतिवदन् तं जगाद, भो योनाःपुत्र शिमोन, धन्यस्त्वं
यतो न रक्तमांसाभ्यां तुभ्यमिदं व्यक्तीकृतम्, अपि तु मम स्वर्गस्थेन
१८ पित्रैव। अहञ्च त्वां ब्रवीमि, त्वं पितरः (पाषाणः), पाषाणस्यैतस्यो-
परि चाहं मम मण्डलीं प्रतिष्ठापयिष्यामि, पातालस्य गोपुराणि
१९ च न तस्याः प्रभविष्यन्ति। तुभ्यञ्चाहं स्वर्गराज्यस्य कुञ्चिकां दास्यामि,
किमपि यत् त्वं मेदिन्यां भन्त्स्यसि स्वर्गे तद् बद्धं स्थास्यति,
२० यदपि च त्वं मेदिन्यां मोक्ष्यसि स्वर्गे तन्मुक्तं स्थास्यति। स
तांस्तदादिदेश, कस्मैचिदपि युष्माभि र्न कथयितव्यं यदहं सोऽभि-
षिक्तः पुरुष इति।

२१ 　ततो यावद् यीशुः स्वशिष्येभ्यो दर्शयितुमारेभे यदहं यिरू-
शालेमं गत्वा प्राचीनै र्मुख्ययाजकैः शास्त्राध्यापकैश्च प्रचुरं क्लेशं
भोक्ष्ये घानिष्ये च तृतीये दिने तु पुनरुत्थास्यामीत्युपयुक्तं।
२२ पितरोऽनेन तं निभृतं नीत्वा भर्त्सयितुमारभ्याब्रवीत्, ईश्वरो
भवन्तमनुकम्पतां, प्रभो, दशा सा भवतः कदापि न भविष्यति।
२३ स तु परावृत्य पितरं जगाद, मत्तोऽपसर, शैतान, त्वं मम स्खल-
नहेतुः, यतस्त्वया मानवं चिन्त्यते नेश्वरीयम्।

२४ 　यीशुस्तदा स्वशिष्यान् जगाद, कश्चिचेन्मामनुगन्तुमिच्छति, स

तर्ह्यात्मानं प्रत्याख्यातु, स्वक्रुशमाददातु मामनुव्रजतु च। यतो २५
यः कश्चित् स्वप्राणान् रिरक्षिषति स तान् हारयिष्यति, यस्तु
मदर्थं स्वप्राणान् हारयति स तान् लप्स्यते। यतो मनुष्यः कृत्स्नं २६
जगत् लब्ध्वा यदि स्वप्राणं वंञ्चयते, तर्हि तस्य हितं वा किं
भवति? स्वप्राणानां कं वा निष्क्रयं मनुष्यो दास्यति? यतः २७
स्वीयदूतैः सह मनुष्यपुत्रः स्वपितुः प्रतापेनागमिष्यति, तदा च स
प्रत्येकं तदाचारानुरूपं फलं दास्यति। युष्मानहं सत्यं वदामि, २८
विद्यन्तेऽत्र तिष्ठतां मध्ये केऽपि जना ये मनुष्यपुत्रं स्वराज्यान्वित-
मागच्छन्तं न दृष्ट्वा मृत्यु नास्वादयितव्यः॥ १६॥

---

१७ सप्तदशोऽध्यायः।

१ ख्रीष्टस्यान्यमूर्त्तिधारणं ९ एलियमधि कथनं १४ अपस्मारिणः स्वास्थ्यं २२ स्वमृत्युं प्रकाशनं २४ करं दातुं चित्रकरणं।

ततः परं दिनेषु षट्स्वतीतेषु यीशुः पितरं याकोबं तस्य १
सहोदरं योहनञ्च सार्द्धं नीत्वा निभृतं गिरिमुच्चं कञ्चिदारुरोह,
रूपान्तरीबभूव च तत्र तेषां समक्षं, तस्यास्यं तदा सूर्य्यवद् २
व्यराजत वसनानि च तस्य दीप्तिवत् सितान्यभवन्। पश्चापि च ३
मोशिरेलियश्च तैः संलपन्तौ तेभ्यो दर्शनमददतुः। पितरस्तदा ४
यीशुं प्रत्यब्रवीत्, प्रभो, भद्रमस्माकमत्रावस्थानं। भवांश्चेदभिमन्यते,
तर्ह्यस्माभिरत्रोटजानि त्रीणि निर्म्मायिष्यन्ते एकं भवदर्थम् एकं
मोशयर्थम् एकमेलियार्थम्। पश्य च तस्मिन्नित्थं ब्रुवाणे दीप्र एको ५
मेघस्तेषामुपरि छायां ददौ, पश्चापि च मेघस्य तस्य मध्याद्
वाणीयमुदभूत्, अयं मम प्रियः पुत्रः, अस्मिन्नहं प्रीतः, अस्य वचांसि
युष्माभिः श्रूयन्तामिति। एतच्छ्रुत्वा शिष्या अधोमुखाः पतित्वातीव ६

७ बिभ्युः। तदा यीशुरुपागत्य तानब्रवीत्, उत्तिष्ठत, मा भैष्ट। ततस्ते
८ लोचनान्युन्मील्य केवलं यीशुं विहाय नापरं कमपि ददृशुः।
९ ततः परं तेषु पर्व्वतादवरोहत्सु यीशुस्तानिदमादिदेश, मनुष्य-
पुत्रो यावन्मृतानां मध्यान्नोत्तिष्ठति, तावद् दर्शनमिदं यूयं
१० कस्मैचिन्मा कथयतेति। तदा तस्य शिष्यास्तमपृच्छन्, प्रथमम्
११ एलियेनागन्तव्यमिति शास्त्राध्यापकैः कथमुच्यते? यीशुस्तु तान्
प्रतिजगाद, एलियः प्रथममागत्य सर्व्वं प्रतिसंस्करिष्यतीति सत्यं,
१२ युष्मांस्त्वहं ब्रवीमि, इतिपूर्व्वमेलिय आगतवान्, मनुष्यास्तु तं नाभि-
ज्ञाय तं प्रति तत्तत् कृतवन्तो यद्यदैच्छंस्ते। तादृशं मनुष्यपुत्रेणापि
१३ तेभ्यो दुःखभोगो लप्स्यते। शिष्यैस्तदाबोधि यत् सोऽस्मान्
स्नापकस्य योहनस्य कथामुक्तवानिति।
१४ ततस्तेषु जननिवहस्यान्तिकमागतेषु नरः कश्चित् तत्समीप-
१५ मुपस्थाय तं सजानुपातं जगाद, प्रभो, मम पुत्रमनुकम्पतां यतः
स चन्द्राहतोऽतीव क्लिश्यते च। स हि भूयो वह्नौ भूयश्च तोये
१६ पतति। स च मया भवतः शिष्याणां समीपमानीतः, ते तु तं
१७ स्वस्थं कर्त्तुं नाशक्नुवन्। यीशुरनेन प्रत्यवादीत्, रे अविश्वासिन्
उन्मार्गगामिंश्च वंश, कियन्तं वा कालं स्थातव्यं मया युष्माभिः
सार्द्धम्? कियन्तं वा कालं सोढव्या यूयं मया? बालकं तं
१८ मदन्तिकमत्रानयत। ततो यीशुस्तं भर्त्सयामास भूतश्च स तस्मा-
१९ न्निःससार, तद्दण्डाच्च तस्माद् यावद् बालकः स स्वस्थोऽभूत्। ततः
परं शिष्या निभृतं यीशोः समीपमागत्य तं पप्रच्छुः, किमतः
२० कारणं यदस्माभिः स भूतो निःसारयितुं नाशक्यत? यीशुस्तान्
प्रतिजगाद, युष्माकमविश्वासस्तत्र हेतुः। यतोऽहं युष्मान् सत्यं
ब्रवीमि, सति विश्वासे युष्माकं सर्षपबीजमिते यूयं चेदमुं पर्व्वतं

वदथ, त्वमतोऽपसरन्नदो याहीति, तर्हि सोऽपसरन् यास्यति
किमपि च न भविष्यति युष्माभिरशक्यं। परन्त्वेतज्जातीयो भूतो २१
न निःसार्य्यते प्रार्थनोपवासाभ्यामन्येन केनाप्युपायेन।

ततः परं गालीले तेषां परिभ्रमणकाले यीशुस्तान् अब्रवीत्, २२
मनुष्यपुत्रो मनुष्याणां हस्तेषु समर्पयिष्यते ते च तं हनिष्यन्ति २३
तृतीये दिने स पुनरुत्थास्यति च। अनेन तेऽतीव शोकाकुला बभूवुः।

तेषु तु कफरनाहूमम् आगतेष्वर्द्धशेकलमानानां मुद्राणामादा- २४
यिनः पितरस्य समीपमुपस्थाय जगदुः, न ददाति किं युष्माकं
गुरुणा करो मन्दिरार्थकोऽर्द्धशेकलमानः? सोऽब्रवीत्, ददाति।
गृहं प्रविष्टे तु तस्मिन् यीशुस्तस्य कथनमप्रतीक्ष्य जगाद, भो २५
पितर, त्वया किमनुमीयते? मेदिन्या राजानः केभ्यः शुल्कं करं
वा गृह्लन्ति? किं स्वपुत्रेभ्योऽथवान्येभ्यः? पितरस्तं जगाद, अन्येभ्यः। २६
यीशुस्तमब्रवीत्, तर्हि ते पुत्राः सुतरां निष्कराः सन्ति। किन्त्वमी २७
यदस्माभि र्न स्वाल्यरेन्, तत् त्वं समुद्रतटं गत्वा वडिशं क्षिप,
प्रथमस्य यो मीन उदेष्यति, तं धर, तस्य मुखमुद्घाट्य च त्वं
शेकलमानां मुद्रामेकां द्रक्ष्यसि, तामेवादाय मम तव च
कृतेऽमीभ्यो देहि॥ १७॥

---

१८ अष्टादशोऽध्यायः।

मचत्वनिर्विघ्नत्वयोर्विवरणं १५ दोषिभ्रातरं प्रत्याचरणं २१ क्षमाकरणसंख्यानिर्णयः २३ क्षमाकरणदृष्टान्तः।

तस्मिन् दण्डे शिष्या यीशोरन्तिकमागत्य तं पप्रच्छुः, स्वर्गराज्ये १
कस्तावन्महत्तरः? यीशुस्तदा क्षुद्रं बालकमेकं स्वसमीपमाहूय २
तेषां मध्ये स्थापयित्वा तान् जगाद, युष्मानहं सत्यं ब्रवीमि, यूयं

३ यदि न परावर्त्तध्वे न च बालका इव भवथ, स्वर्गराज्यं तर्हि
४ कथञ्चन न प्रवेच्यथ। अतः यः कश्चिदात्मानं बालकमिममिव
५ नम्रीकरोति, स एव स्वर्गराज्ये महत्तरः। यश्च मम नाम्नेदृशमेकं
६ बालकं गृह्णाति, स मां गृह्णाति। यस्तु मयि विश्वसतामेषां
क्षुद्राणामेकं स्खालयति, तत्कण्ठे बृहत्पेषणीबन्धनं गभीरसमुद्रे
७ च तस्य निमज्जनं श्रेयः। स्खलनहेतुभ्यो जगतः सन्तापो भवि-
ष्यति। स्खलनहेतवो ह्यवश्यम्भाविनः। येन तु स्खलनहेतुरायाति
८ मनुष्यस्य तस्य सन्तापो भविष्यति। यदि तु तव हस्तश्चरणो वा
तव स्खलनहेतु र्भवेत् तर्हि तं छित्त्वा दूरं निक्षिप; तव हस्त-
द्वयसम्पन्नस्य चरणद्वयसम्पन्नस्य वानन्ते वह्नौ निपातात् श्रेयांस्तव
९ खञ्जस्य हीनाङ्गस्य वा जीवने प्रवेशः। तव चक्षु र्वा यदि तव
स्खलनहेतुकं भवेत् तर्हि तदुत्पाट्य दूरं निक्षिप; तव नेत्रद्वय-
सम्पन्नस्य वह्निमये नरके निपातात् श्रेयांस्तवैकनेत्रस्य जीवने
१० प्रवेशः। सावधानास्तिष्ठत, क्षुद्राणामेषाम् एकमपि मावमन्यध्वं।
यतो युष्मानहं ब्रवीमि, स्वर्गे तेषां दूता निरन्तरं मम स्वर्गस्थस्य
११ पितुरास्यं निरीक्षन्ते। वास्तवं हि हारितस्य त्राणार्थं मनुष्यपुत्र
१२ आगतवान्। युष्माभिः किमनुमीयते? मनुष्यस्य कस्यचित् सत्सु
शतमेषेषु यदि तेषामेको भ्रान्तो भवेत् तर्हि स किमन्यान्
एकोनशतं मेषांस्त्यक्त्वा गिरिमयाणि स्थानानि च गत्वा हारितं
१३ तं मेषं न मृगयते? अहञ्च युष्मान् सत्यं ब्रवीमि, यदि स कृता-
र्थस्तमासादयति, तर्ह्यभ्रान्तेषु तेष्वेकोनशतमेषेषु यस्तस्यानन्दोऽस्ति
१४ तस्मादपि महत्तरस्तस्मिन्नेवानन्दो जनिष्यते। इत्थमेव क्षुद्राणा-
मेषामेकस्यापि विनाशो मम स्वर्गस्थस्य पितु र्दृष्ट्यामवाञ्छितः।
१५ त्वां प्रति तु तव भ्राता पापे कृते त्वं याहि तं भर्त्सय च

केवलं त्वयि तस्मिंश्च वर्त्तमानयोः । स चेत् तव वाक्यं गृह्लीयात्
तर्हि त्वया स्वभ्रातोपार्जितः । यदि तु न गृह्लीयात् तर्ह्यात्मना १६
सार्द्धमपरमेकमपरौ वा द्वौ गृहाण, तथानुष्ठिते द्वयोस्त्रिसृणां
वा साक्षिणां मुखेन सर्व्वकथा संस्थास्यते । स चेत् तेषां वाक्यं १७
न गृह्लीयात् तर्हि मण्डलीं ज्ञापय । यदि स मण्डलीवाक्यमपि
न गृह्लीयात् तर्हि तव सकाशं स परजातीयेन शुल्कादायिना
च समानो भवतु । युष्मानहं सत्यं वदामि, किमपि यद् यूयं १८
मेदिन्यां भन्त्स्यथ स्वर्गे तद् बद्धं स्थास्यति । यदपि च यूयं
मेदिन्यां मोक्ष्यथ स्वर्गे तन्मुक्तं स्थास्यति । पुनरपि युष्मान् ब्रवीमि, १९
याचयितव्यं कञ्चिद् वरमधि यदि युष्मन्मध्ये नरौ द्वावेकमतौ
भवेतां तर्हि मम स्वर्गस्थात् पितुः स वरस्ताभ्यां लप्स्यते । वास्तवं २०
हि यत्र कुत्रापि जनौ द्वौ त्रयो वा जना मन्नामोद्दिश्य समा-
गतास्तेषां मध्येऽहं तत्र विद्ये ।

तदा पित्रस्तस्यान्तिकमागत्य जगाद, प्रभो, कतिकृत्वो मम २१
भ्राता मत्प्रतिकूलं पापे कृते तस्याहं क्षमिष्ये? किं यावत् सप्त-
कृत्वः? यीशुस्तं प्रत्यब्रवीत्, सप्तकृत्वो यावदिति त्वां न वदामि, २२
अपि तु सप्ततिकृत्वः सप्तकृत्वो यावदिति । अनेन स्वर्गराज्यं स्वदासैः २३
सह जिगणयिषुणा नराधिपमनुष्येणोपमेयं । तस्मिन् गणयितुम् २४
आरब्धवत्ययुतमुद्रागोणीनामृण्येको दासस्तत्समीपमानीतः । तस्य तु २५
परिशोधोपायाभावात् प्रभुस्तस्य तदीयभार्य्यासन्तानानां तत्सर्व्वस्वस्य
च विक्रयं तन्मूल्येन चर्णशोधमाज्ञापयामास । ततः स दासः प्रणि- २६
पत्य पूजयित्वा च जगाद, प्रभो, सहतां मे, तेन तुभ्यं सर्व्वं
प्रत्यर्पयिष्यामि । प्रभुस्तदा दासं तमनुकम्प्य विससर्ज चक्षमे च २७
तस्य तदृणं । दासः स तु निर्गतः सहदासानां मध्ये यस्तस्य शतं २८

मुद्रापादान् अधारयत् तमासाद्य धृत्वा च तस्य कण्ठदेशं पीडयन्
२९ जगाद, प्रत्यर्पय मम यद्यद् धारयसि । सहदासः स तदा तस्य
चरणयो र्निपत्य सविनयमुवाच, सहतां मे, तेन तुभ्यं सर्व्वं प्रत्यर्प-
३० यिष्यामि । स तथमतोऽभूत्, गत्वा च तदृणशोधं यावत् कारायां
३१ निचिक्षेप । तदाचारं दृष्ट्वा सहदासास्तस्यातीव शुशुचु र्गत्वा च
३२ स्वप्रभवे सर्व्ववृत्तान्तं निवेदयामासुः । तस्य प्रभुस्तदा तं स्वसमीप-
माहूय जगाद, रे दुष्ट दास तव सविनयां प्रार्थनां गृहीत्वाहं तव
३३ तत् सर्व्वमृणं क्षमितवान् । कृपा यथा मया त्वयि कृता तव
३४ सहदासेऽपि किं न तथा कृपा त्वयापि कर्त्तव्यासीत् ? अनन्तरं
तस्य प्रभुः क्रुद्धा तेन यदधार्य्यत, तत्सर्व्वस्य परिशोधं यावत् यन्त्र-
३५ णादायिषु तं समर्पयामास । यूयञ्च प्रत्येकं यदि हृदयेन स्वभ्रा-
तुरपराधान् न क्षमध्वे, तर्हि मम स्वर्गस्थः पितापि युष्मान् प्रति
तथैव करिष्यति ॥ १८ ॥

---

१९ ऊनविंशोऽध्यायः ।

१ रोगिणां स्वास्थ्यं ३ विवाहकथनं १३ शिशूनां रक्षणं १६ युवलोकोपदेशः
२३ धनिनां स्वर्गदुःसाध्यत्वं २७ स्वीयशिष्याणां पारितोषिकञ्च ।

१ वाक्यान्येतानि समाप्य यीशु र्गालीलात् प्रस्थाय यर्द्दनस्य
२ पारे स्थितं यिहूदियायाः सीमानमागमत् । महान्तो जननिवहाश्च
तमन्वव्रजन् स च तत्र तान् निरामयान् चकार ।

३ अनन्तरं फिरूशिनस्तस्यान्तिकमागत्य परीक्षमाणास्तं पप्रच्छुः,
४ विधेयः किं मनुष्येण भार्य्यात्यागो येन केनचिद्धेतुना ? स तु
तान् प्रत्यब्रवीत्, युष्माभिः किमेतन्न पठितं भो यदादौ निर्म्माता
५ नरं नारीञ्च तौ निर्म्मितवान् कथितवांश्च, एतद्धेतो र्मनुष्यः पितरं

मातरञ्च परित्यज्य स्वजायायामासंक्ष्यते तावुभौ चैकाङ्गीभविष्यत
इति? अनेन तौ पुन र्न द्वौ स्तः, तावेकाङ्गीभूतौ। अतो यद् ६
ईश्वरेण संयोजितं, तन्मनुष्येण मा वियोज्यतां। ते तं पप्रच्छुः, ७
तर्हि त्यागपत्रदानपूर्व्वकं तस्यास्त्यागो मोशिना कथमादिष्टः? स ८
तान् जगाद, युष्माकं हृत्काठिन्यमुद्दिश्य युष्मदीयभार्य्याणां त्यागो
मोशिनान्वज्ञायि न त्वादितो भूतमित्थम्। अहन्तु युष्मान् वदामि ९
व्यभिचारादन्यहेतुना यः कश्चित् स्वभार्य्यां त्यक्त्वापरामुद्वहति, स
व्यभिचारं करोति, यश्च स्वामित्यक्तां स्त्रियमुद्वहति स व्यभिचारं
करोति। तस्य शिष्यास्तमूचुः, भार्य्यया सह यदि नरस्येदृशः सम्ब- १०
न्धस्तर्ह्युद्वाहो न हितावहः। स तु तान् जगाद, वचनमेतन्न सर्व्वै ११
र्ग्रह्यते, तैरेव केवलं ग्रह्यते सामर्थ्यं येभ्योऽदायि। फलतो १२
विद्यन्ते च क्लीवा आमातृजठरात् तथाविधा जाताः, नरकृतक्लीबा-
वाश्च विद्यन्ते, स्वर्गराज्यार्थम् आत्मकृतक्लीवाश्च विद्यन्ते। ग्रहीतु
यो ग्रहणे समर्थः।

शिशवः केचित् तदानीं तस्यान्तिकमानिन्यिरे यत् तेन तेषु १३
हस्तावर्पयित्वा प्रार्थना क्रियेत। शिष्यास्तु तान् अभर्त्सयन्। यीशुः १४
पुनरवादीत्, मत्समीपमागमिष्यतः शिशून् अनुमन्यध्वं मा वारयत
यतः स्वर्गराज्यम् ईदृशानामेव। स तदा तेषु हस्तावर्पयित्वा १५
प्रतस्थे।

पश्य चानन्तरं नरः कश्चिन्निकटमागत्य तं पप्रच्छ, भो सद्गुरो, १६
सत् किं कर्त्तव्यं मयानन्तजीवनलाभार्थम्? स तु तमब्रवीत्, १७
किमर्थं मां सतः कथां पृच्छसि? सन्नेक एव। यदि तु जीवनं
प्रवेष्टुमिच्छसि तर्ह्याज्ञाः पालय। स ब्रूते, का आज्ञाः? यीशुरने- १८
नाब्रवीत्, नरहत्यां मा कुरु, व्यभिचारं मा कुरु, चौर्य्यं मा कुरु,

१९ मृषासाक्ष्यं मा देहि, स्वपितरं स्वमातरञ्च सम्मन्यस्व । अपि च
२० स्वनिकटस्थे प्रत्यात्मवत् प्रेम कुर्व्विति । युवा स तं जगाद, पालितं
२१ मया सर्व्वमेतदाबाल्यात्, अधुना मम किमसम्पूर्णम्? यीशुस्तं
जगाद, यदि सिद्धो भवितुमिच्छसि, तर्हि गत्वा सर्व्वं तव
यद्यदस्ति देहि विक्रीय दरिद्रेभ्यः । तथा कृते स्वर्गे तव धनं
२२ स्थास्यति । ततः परमागत्य मामनुव्रज । वचनमेतच्छ्रुत्वा युवा स
शोचन्नापजगाम, यतस्तस्य वस्तूनि प्रचुराण्यासन् ।

२३ यीशुस्तदा स्वशिष्यानुवाच, युष्मानहं सत्यं ब्रवीमि, दुष्करो
२४ हि धनवतः स्वर्गराज्यप्रवेशः । पुनश्च युष्मान् ब्रवीमि, धनवतः
२५ स्वर्गराज्यप्रवेशात् सूचीछिद्रेणोष्ट्रगमनं सुसाध्यं । एतच्छ्रुत्वा शिष्या-
२६ श्चमत्कारमतीव गत्वा जगदुः, कस्तर्हि तरितुं शक्नोति ? यीशुस्तदा
तान् समालोक्याब्रवीत्, तन्मनुष्याणामसाध्यम्, ईश्वरस्य तु सर्व्वं
साध्यम् ।

२७ पितरस्तदानीं तं प्रत्यब्रवीत्, पश्यतु वयं सर्व्वं त्यक्त्वा भवन्तम्
२८ अनुव्रजितवन्तः, किमस्माभि र्लप्स्यते ? यीशुस्तान् जगाद, युष्मानहं
सत्यं ब्रवीमि, पुनर्जन्मनि यदा मनुष्यपुत्रः स्वप्रतापसिंहासन उपविष्टो
भविष्यति, तदा मामनुव्रजितवन्तो यूयमपि द्वादशसिंहासनेषूपविष्टा
२९ इस्रायेलस्य द्वादशवंशानां विचारं करिष्यथ । अपरं यः कश्चिन्मम
नाम्नः कृते गृहाणि वा भ्रातॄन् वा भगिनी र्वा पितरं वा मातरं
वा जायां वा सन्तानान् वा भूम्यधिकारान् वा त्यक्तवान् स
तच्छतगुणं लप्स्यते, दायांशरूपमनन्तजीवनञ्च प्राप्स्यति ।

३० अपि तु प्रथमा बहवोऽन्त्या भविष्यन्ति, अन्त्याश्च बहवः
प्रथमा भविष्यन्ति ॥ १९ ॥

२० विंशोऽध्यायः।

१ कृषकाणां दृष्टान्तः १७ खीष्टस्य स्वमरणदुःखस्य प्रकाशनं २० शिष्यद्वयाय प्रत्युत्तरं दत्त्वा नम्रत्वोपदेशः २९ अन्धद्वयाय नेत्रदानं।

यतः स्वर्गराज्यं गृहस्थामिना तेन सदृशं, यः प्रत्यूष एव १
स्वद्राक्षाक्षेत्रे कृषकान् वेतनजीविनो नियोक्तुमिच्छन् निर्जगाम।
कृषकांश्च प्राप्य तैः सह दैनिकभृतिं मुद्रापादं निरूप्य तान् २
स्वद्राक्षाक्षेत्रं प्राहिणोत्। ततः परं प्रायशः प्रहरे प्रथमेऽतीते स ३
पुन र्निर्गत्यापरान् कतिपयान् निष्कर्म्मकान् हट्टे तिष्ठतो दृष्ट्वा
तानपि जगाद, यूयमपि मम द्राक्षाक्षेत्रं गच्छत, यच्च न्याय्यं ४
तदहं युष्मभ्यं दास्यामि, तेन च ते जग्मुः। द्वितीयस्य तृतीयस्य ५
च पुनः प्रहरस्यान्ते निर्गत्य स तथैव चकार। चतुर्थप्रहरस्य पुन- ६
स्तृतीयांशेऽवशिष्टे निर्गत्य सोऽन्यान् निष्कर्म्मकं तिष्ठतः कतिपयान्
दृष्ट्वा पप्रच्छ, किमर्थं यूयमत्र कृत्स्नं दिनं निष्कर्म्मकास्तिष्ठथ? ते ७
तमब्रुवन्, कर्म्मणि केनापि वयं न नियुक्ताः। स तानब्रवीत्, यूय-
मपि मम द्राक्षाक्षेत्रं गच्छत, तेन यन्न्याय्यं तल्लप्स्यध्वे। सन्ध्याया- ८
न्तूपस्थितायां द्राक्षाक्षेत्रस्य स्वामी विषयाध्यक्षं निजं जगाद, त्वं
कृषकानाहूयान्त्येभ्यो दातुमारभ्य प्रथमान् यावत् तेभ्यो भृतिं
देहि। अनेन ये सन्ध्यायाः सार्द्धदण्डद्वयं प्रागागतवन्त उपस्थाय ९
ते प्रत्येकं मुद्रापादं लेभिरे। अनन्तरं प्रथमा उपस्थायास्माभि- १०
रधिकं लप्स्यत इत्यमन्यन्त। तेषामप्येकैको मुद्रापादमेव लेभे। ११
लब्ध्वा तु ते गृहस्वामिनमपवदन्तो जगदुः, अन्त्या अमी कर्म्म १२
कृतवन्तो मुहूर्त्तमेकमेव, वयन्तु दिनस्य भारमुत्तापञ्च सोढवन्तः,
भवान् पुनरमूनस्माभिस्तुल्यान् कृतवान्। स ततः प्रतिवदन् तेषा- १३
मेकं जगाद, मित्र, नाहं तवापराध्नोमि, मया सह त्वया किं

१४ न्हति मुद्रापादमाना न निरूपिता? गृहीत्वापगम्यतां त्वया
१५ यल्लभ्यं। रोचये त्वहमन्त्यायैतस्मै दातुं तुभ्यमिव। न किं विधेयं
मया स्वं मम निजस्वमधि यदहं कर्त्तुमिच्छामि? अथवा किं तव
१६ नेत्रं दुष्यति यदहं परहितैषीति? इत्थमेवान्त्याः प्रथमा भविष्यन्ति
प्रथमाश्चान्त्याः। यत आहूता बहवोऽल्पे तु वरिताः।

१७ ततः परं यीशुरूर्द्ध्वगममार्गेण यिरूशालेमं गच्छन् पथि द्वादश-
१८ शिष्यान् निभृतं नीत्वा तेभ्यः कथयामास, पश्यत वयं यिरूशालेमं
गच्छामः, मनुष्यपुत्रश्च मुख्ययाजकेषु शास्त्राध्यापकेषु च समर्प-
१९ यिष्यते। ते च विचारेण तस्य प्राणदण्डाज्ञां कृत्वा पारव्याय
कशाघाताय क्रुशारोपणाय च तं परजातीयेषु समर्पयिष्यन्ति,
तृतीये दिने तु स पुनरुत्थास्यति।

२० सिवदियस्य पुत्रयो र्जननी तदा स्वसुताभ्यां सह तस्यान्तिक-
२१ मागत्य प्रणिपत्य वरं ययाचे। स तां जगाद, किं वाञ्छसि?
सा तमब्रवीत्, भवतो राज्ये यथा ममैतयोः पुत्रयोरेको भवतो
२२ दक्षिणेऽन्यतरश्च भवतो वामे समुपविशेत् तथैवादिशतु। यीशुस्तु
प्रत्यब्रवीत्, युवां यद् याचेथे तन्न जानीथः। येन पान-
पात्रेणाहं पास्यामि तेन किं युवां पातुं शक्नुथः? येन च
स्नानेनाहं स्नास्ये, तेन स्नातुं किं युवाभ्यां शक्यं? तौ तमूचतुः,
२३ शक्यं। तदा स तावब्रवीत्, मम पानपात्रेण युवां पास्यथः,
येनाहं स्नास्ये तेन स्नानेन स्नास्येथे च, परन्तु मम दक्षिणे
वामे वोपवेशनाधिकारस्य दानं मया न विधेयं, स तु
केवलेभ्यस्तेभ्यो दातव्यो येषां कृते मम पित्रा स निरूपितः।
२४ अन्यैतदन्ये दश शिष्यास्तयोः सहोदरयो रौच्यमापन्नाः। यीशुस्तु
२५ तान् स्वसमीपमाहूयोवाच, यूयं जानीथ, परजातीयानां शास्ता-

रस्तेषामुपरि तीक्ष्णप्रभुत्वं कुर्वते, महान्तश्च तेषां तीक्ष्णकर्तृत्वं
कुर्वते। न भव्यन्तु तादृशं युष्माकं मध्ये। प्रत्युत युष्मन्मध्ये यो २६
महान् भवितुमिच्छति स युष्माकं परिचारको भविष्यति। यश्च २७
युष्मन्मध्ये प्रथमो भवितुमिच्छति, स युष्माकं दासो भविष्यति।
यतस्तथैवागतो मनुष्यपुत्रो न परिचर्य्यां भोक्तुम् अपि तु परिचरितुं २८
दातुञ्च स्वप्राणान् निष्क्रयमूल्यं बहूनां विनिमयेन।

अनन्तरं तेषु यिरीहतो निर्गच्छत्सु महान् जननिवहस्तमन्व- २९
व्रजत्। पश्य च पथपार्श्व उपविष्टौ द्वावन्धौ यीशो र्गमनस्य कथां ३०
श्रुत्वा क्रोशन्ताववदतां, भो प्रभो दायूदस्य पुत्र, आवामनुकम्पतां।
जननिवहस्तावनेन तर्जयन्नब्रवीत्, तूष्णीम्भवतं। तौ त्वधिकतरं ३१
क्रोशन्तावदतां, भो प्रभो दायूदस्य पुत्र, आवामनुकम्पतां।
यीशुस्तदा तिष्ठंस्तावाहूय पप्रच्छ, किं वाञ्छथः? युवयो र्मया किं ३२
कर्त्तव्यं? तौ तमूचतुः, प्रभो, आवयो र्नेत्राणि यदुन्मील्येरन् तद् ३३
वाञ्छावः। तदा यीशुः कृपां कृत्वा तयो र्नेत्राणि पस्पर्श, ३४
तत्क्षणञ्च तौ दृक्शक्तिं लब्ध्वा तम् अन्वव्रजताम्॥ २०॥

---

२१ एकविंशोऽध्यायः।

१ गर्द्दभीमारुह्य यीशो र्यिरूशालेमप्रयानं १२ मन्दिराद् बणिजां दूरीकरणं १८ निष्फलोडुम्बरस्य शपनं २३ मुख्ययाजकानां निरुत्तरीकरणं २८ द्वयोः सुतयो-र्दृष्टान्तकथनं ३३ गृहस्थक्षेत्रकृषकानां दृष्टान्तश्च।

अनन्तरं तेषु यिरूशालेमस्य समीपमागत्य जैतुनाख्यगिरौ स्थितं १
बैतफगीनामकं ग्राममुपस्थितेषु यीशुः शिष्यौ द्वौ प्रेषयन्निदमा-
दिदेश, युष्मत्सम्मुखस्थमसुं ग्रामं गच्छतं, तत्र तत्क्षणमेवैकां बद्धां २
सवत्सां गर्द्दभीमासादयिष्यथः, तां मुक्त्वाभौ मदन्तिकमानयतं।

३ यदि तु कश्चिद् युवां किमपि वदेत्, तर्हि ब्रूतम्, आभ्यां प्रभोः
४ प्रयोजनमस्ति। तेन स तत्क्षणं तौ विस्रक्ष्यति। सर्व्वस्यैतस्य
फलमिदं, यद् भाववादिनोक्तेयं कथा सफलाभूत्, यथा,
५ यूयं ब्रूत कथामेतां सियोनदुहितरं प्रति।
पश्य यस्तव राजासौ समायाति कृते तव।
विनीतो गर्द्दभारूढो रासभीशिशुवाहनः॥
६ अनन्तरं शिष्यौ तौ गत्वा यीशुना यथादिष्टं तथैव कृत्वा तां
७ गर्द्दभीं तस्याः पोतञ्चानिन्यतुः स्ववस्त्राणि च तयो र्निदधाते स
८ च तदुपर्य्युपविवेश। जननिवहस्याधिकांशो मार्गे स्ववसनानि विस्ता-
रयामास, अन्ये च पादपानां शाखाश्छित्त्वा पथि व्यस्तारयन्,
९ अग्रपश्चाद्गामिनश्च बहव उच्चैःस्वरेणाब्रुवन् जय दायूदस्य पुत्र, प्रभो
र्नाम्ना य आयाति स धन्यो भूयात, ऊर्द्ध्वलोके जयध्वनि र्भवतु।
१० तस्मिंस्तु यिरूशालेमं प्रविष्टे नगरस्य जनाः सर्व्वे वेपमाना अपृच्छन्,
११ कोऽसौ? जननिवहास्त्ववदन्, नासरतनिवासी गालीलीयो भाववादी
यीशुरसौ।
१२ अनन्तरं यीशुरीश्वरीयं धर्म्मधाम प्रविश्य धर्म्मधाम्नि क्रयविक्रय-
कारिणः सर्व्वान् वहिश्चकार, वणिजां मुद्रासनानि कपोतविक्रेतॄ-
१३ णामासनानि च न्युब्जयामास, जगाद च तान्, लिखितमास्ते,
प्रार्थनागृहमित्येव नाम्ना मे ख्यास्यते गृहं।
१४ तत्तु युष्माभिरकारि दस्यूनां गह्वरः। अनन्तरमन्धाः खञ्जाश्च धर्म्म-
धाम्नि तस्यान्तिकम् आगमन् स च तान् निरामयांश्चकार।
१५ मुख्ययाजकाः शास्त्राध्यापकाश्च लालोक्याद्भुतकर्म्माणि तेन क्रिय-
माणानि बालकांश्च धर्म्मधाम्नि जय दायूदस्य पुत्रेति वाचम्
१६ उदीरयतः क्रुध्यन्तस्तमूचुः, शृणोषि किं त्वयामी यद् गदन्ति?

यीशुस्तु तान् प्रत्यवादीत्, शृणुत इति। यूयं किं कदापि नैतत्
पठितवन्तो यथा,

शिशूनां स्तनपानाञ्च वक्त्रात् त्वं व्यदधाः स्तवम्।

अनन्तरं स तांस्त्यक्त्वा गत्वा च नगरस्य वहिःस्थं बैथनियाग्रामं १७
रजनीं तत्र यापयामास।

प्रभाते तु नगरं गच्छन् सोऽक्षुध्यत्, तत् पथपार्श्वे उडुम्बर- १८
वृक्षं दृष्ट्वा स तत्समीपं जगाम, तस्मिंस्तु पत्रेभ्योऽन्यत् किमपि १९
नादृक्षत्, सोऽतस्तं जगाद, इतः परं कदापि त्वत्तः फलं नोत्प-
द्यतां। अनेनोडुम्बरवृक्षः स सद्यः शुष्को जातः। तद् दृष्ट्वा २०
शिष्या आश्चर्य्यं मत्वाऽब्रुवन्, वृक्षोऽसौ कियच्छीघ्रं शुष्कीभूतः।
यीशुस्तान् प्रतिजगाद, अहं युष्मान् सत्यं ब्रवीमि, यूयं यदि २१
विश्वासमवलम्ब्य न संशेध्वे, तर्हि न केवलम् उडुम्बरवृक्षमधि
युष्माभिरीदृशं कर्म्म कारिष्यते, परन्तु त्वमुत्पत्य समुद्रे निपतेत्यमुं
गिरिं प्रति युष्माभिरुक्तेऽपि तत् सेत्स्यति। लप्स्यध्वे च सर्व्वं प्रार्थ- २२
नया विश्वसन्तो यद्यद् याचिष्यध्वे।

अनन्तरं धर्म्मधाम प्रविश्य स यदोपदेशमददात्, मुख्ययाजका २३
जनानां प्राचीनाश्च तदा तस्यान्तिकमागत्य पप्रच्छुः, केनाधिकारेण
करोषि त्वं कर्म्माण्येतानि? को वा तुभ्यं तमधिकारं दत्तवान्?
यीशुस्तु तान् प्रत्यब्रवीत्, युष्मानहमपि कथामेकां पृच्छामि, २४
मह्यं चेत् तदुत्तरं दत्थ, तर्हि केनाधिकारेण सर्व्वमेतत् करोमि,
तदहमपि युष्मान् वदिष्यामि। कुतो योहनस्य स्नापनमुत्पन्नम्? २५
अपि स्वर्गादुत मनुष्येभ्यः? ते तदा परस्परं विचारयन्तोऽवदन् तत्
स्वर्गात्पन्नमित्युक्ते सोऽस्मान् प्रक्ष्यति, यूयं तर्हि तस्मिन् किमर्थं न
विश्वसितवन्तः? तत्त मनुष्येभ्य उत्पन्नमित्युक्ते जननिवहाद् भेतव्यं, २६

२७ यतः सर्व्वे योहनं भाववादिनं मन्यन्ते। तत् ते यीशुं प्रत्यवदन्,
न जानीमः। सोऽप्यनेन तानवादीत्, नाहमपि युष्मान् ज्ञाप-
यामि करोम्यहं सर्व्वमेतत् केनाधिकारेणेति।
२८ यूयं परं किं मन्यध्वे? कस्यचिन्नरस्य पुत्रौ द्वावास्तां। स
तयोरेकस्यान्तिकं गत्वा तं जगाद, वत्स, याहि, कुरु चाद्य कर्म्म मम
२९ द्राक्षाक्षेत्रे। स प्रत्यब्रवीत्, नेच्छामि, पश्चात्तु सोऽनुतप्य जगाम।
३० नरः सोऽन्यतरस्यान्तिकं गत्वा तथैव जगाद। स तं प्रत्यब्रवीत्,
३१ यथाज्ञापयतु प्रभो, न तु जगाम। तयो र्द्वयोः कः पितुरभि-
मतमाचरितवान्? ते तं वदन्ति, प्रथमः। यीशुस्तदा तान्
जगाद, युष्मानहं सत्यं ब्रवीमि, शुल्कादायिनो वेश्याश्चेश्वरराज्यं
३२ प्रवेष्टुं युष्माकमग्रगामिनो भवन्ति, यतो योहनो धर्म्ममार्गेण
युष्मदन्तिकमागतवान् यूयं पुनस्तस्मिन् न विश्वसितवन्तः, शुल्का-
दायिनस्तु वेश्याश्च विश्वासं तस्मिन् चक्रिरे। तद्दृष्ट्वा पश्चादपि
यूयं नान्वतप्यध्वं तस्मिन् विश्वसितुं।
३३ शृणुतापरामेकां दृष्टान्तकथां। गृहस्वामी कश्चिद् द्राक्षालता
रोपयन् द्राक्षोद्यानं कृत्वा वृत्या परिवार्य्य तन्मध्ये द्राक्षामर्द्दना-
र्थककुण्डं खनित्वाट्टालं निर्म्माय च कृषकेषु करदायिषु समर्प्य
३४ देशान्तरं जगाम। ततः परम् आसन्न फलकाले निजफलांशमा-
३५ दातुं कृषकाणां समीपं स स्वदासान् प्राहिणोत्। कृषकास्तु तस्य
दासान् धृत्वा तेषामेकं ताडयामासुरन्यं मारयामासुरपरञ्च प्रस्त-
३६ रैरभ्याजघ्नुः। पुनः स प्रथमेभ्यस्तेभ्योऽधिकान् अन्यान् दासान्
३७ प्राहिणोत्, ते तिमान् प्रत्यपि तादृशमाचारं चक्रुः। अतो मत्पुत्रं
प्रति ते त्रपिता भविष्यन्तीति बुद्ध्वा स पश्चात् तेषां समीपं
३८ स्वपुत्रं प्राहिणोत्। तन्तु दृष्ट्वा कृषकास्ते परस्परमब्रुवन्, दायद-

रोऽसौ, तदागच्छत, वयममुं हनिष्यामस्तस्य दायांशञ्चात्मसात्
करिष्यामः। एवमुक्त्वा ते तं धृत्वा द्राक्षोद्यानाद् वहिर्निक्षिप्य ३९
जघ्नुः। अतो द्राक्षोद्यानस्य स्वामी यदायास्यति, स तदा कृषका- ४०
स्तान् प्रति किं करिष्यति? ते तं वदन्ति, स तान् दुर्जनान् ४१
दुरन्तं विनाशयिष्यति, समर्पयिष्यति च स्वद्राक्षोद्यानं तेष्वेव कृषकेषु
ये तस्मै यथाकालं फलानि दास्यन्ति। यीशुस्तदा तानवादीत्, ४२
युष्माभिः कदापि किं शास्त्रे न पठितं, यथा,

गृहनिर्मातृभि र्लोकै र्यः पाषाणो निराकृतः।
स एव गृहकोणस्थः प्रमुख्यः प्रस्तरोऽभवत्।
परमेशस्य कर्म्मेदम् अस्मद्दृष्टौ तदद्भुतम्॥

अतोऽहं युष्मान् ब्रवीमि, ईश्वरस्य राज्यं युष्मत्तोऽपहारिष्यते, ४३
दायिष्यते च तदन्यस्यै जात्यै या तदुपयुक्तैः फलैः फलवती भविष्यति।
प्रस्तरेऽस्मिन् यस्तु पतिष्यति स खण्डशो भङ्क्ष्यते भविष्यति, प्रस्तरश्चायं ४४
यस्मिन् पतिष्यति तं सञ्चूर्णयिष्यति। तास्तस्य दृष्टान्तकथाः ४५
श्रुत्वा मुख्ययाजकैः फरीशिभिश्चावोधि यदयमस्मानधि कथयतीति।
तं पुन र्धर्त्तुं यतमानास्ते जननिवहेभ्यो बिभ्युः, यतस्ते तं भाववा- ४६
दिनममन्यन्त॥ २१॥

---

२२ द्वाविंशोऽध्यायः।

१ राजपुत्रस्य विवाहदृष्टान्तः १५ राजकरदानोपदेशः २३ श्मशानोत्थानोपदेशः
३४ प्रधानाज्ञानिर्णयः ४१ अधिख्रीष्टं फरीशिनां निरुत्तरत्वं।

तदुत्तरं यीशुरिदं पुनस्तेभ्यो दृष्टान्तैः कथयामास, स्वर्गराज्यं १
राज्ञा तेन सदृशं यः स्वपुत्रस्योद्वाहोत्सवं चकार, नरांश्च निम- २
न्त्रितान् उद्वाहोत्सवायाक्षातुं स्वदासान् प्राहिणोत्। ते त्वागन्तु- ३

४ मभवन्न सम्मताः। स पुन र्दासानपरान् प्रेषयन्निदमादिदेश, यूयं
नरांस्तान् निमन्त्रितान् वदत, पश्यत, पूर्व्वाह्णिकं भोज्यं मम
सज्जीकृतं, पशवश्च पुष्टा गवादयो मारिताः, सर्व्वमेव प्रस्तुतं।
५ यूयमुद्वाहोत्सवमायातुमर्हथ। ते लवहेलयन्तः स्वक्षेत्रमेकः स्वबा-
६ णिज्यं वापरो जगाम, शेषाश्च दूतांस्तस्य धृत्वा न्यक्कारपूर्व्वकं जघ्नुः।
७ तच्छ्रुत्वा राजा स प्रकुप्य स्वबलानि प्रहित्य घातकांस्तान् नाशया-
८ मास नगरञ्च तेषां दाहयामास। ततः स स्वदासान् व्याजहार,
९ उद्वाहः सज्जीकृतो निमन्त्रितास्ते पुनरयोग्या आसन्। यूयम-
तस्तावत उद्वाहोत्सवायाक्कयत राजमार्गाणां संयोगस्थानानि गत्वा
१० यावतो यूयं द्रक्ष्यथ। ततो दासास्ते राजमार्गान् गत्वा दुर्जनान्
सुजनांश्च यावत आसादयन् तावतः समानिन्युः। तेनोद्वाहगृहं
११ जनैः समासीनैः पूर्णमभूत्। राजा तदा भोज्योपविष्टान् मनुष्यान्
१२ निरीक्षितुं प्रविश्योद्वाहवसनहीनं जनमेकं तत्र दृष्ट्वा पप्रच्छ मित्र
उद्वाहवसनविहीनस्त्वं कथमेतत् स्थानं प्रविष्टः? अनेन स निर्वाक्
१३ जातः। राजा तदा परिचारकान् जगाद, यूयमस्य चरणौ हस्तौ
च बद्धीत धृत्वा चैनं बहिःस्थे तिमिरे निक्षिपत तत्र रोदनं दन्तै
१४ र्दन्तघर्षणञ्च भविष्यतः। वास्तवं ह्याहूता बहवः स्वल्पे तु वरिताः।
१५ फरीशिभि र्गत्वा तदा मन्त्रयाञ्चक्रे कथं स वाक्पाशेन निबध्यत
१६ इति। ततस्ते स्वशिष्यान् हेरोदीयैः सहितान् तस्यान्तिकं प्रेषया-
मासुः। त ऊचुः, भो गुरो, वयं जानीमो यद् भवान् सत्यवान्
सत्येनेश्वरस्य पन्थानं शिक्षयति च, कस्मादपि न बिभेति, यतो
१७ भवान् मनुष्याणां मुखापेक्षां न करोति, अतो भवानस्मान् वक्तु-
मर्हति किं मन्यते भवान् कैसराय करदानं विधेयं न वेति।
१८ यीशुस्तु तेषां दुष्टतां ज्ञात्वा जगाद, किमर्थं मां परीक्षध्वे कपटिनः?

करदानस्य मुद्रामेकां मां दर्शयत। तैस्त्वेकस्मिन्नानीते दीनारे स १९
तान् जगाद, कस्येयं मूर्त्तिरिदं लेखनञ्च? ते तं वदन्ति, कैसरस्य। २०
तदा स तानब्रवीत्, दत्त तर्हि कैसराय यद्यत् कैसरस्य, दत्त २१
चेश्वराय यद्यदीश्वरस्य। श्रुत्वैतत्त आश्चर्य्यं मेनिरे तं विहाय च २२
प्रतस्थिरे।

दिने तस्मिन् पुनरुत्थानमनङ्गीकुर्व्वाणाः सद्दूकिनस्तस्यान्तिक- २३
मागत्य तमूचुः, भो गुरो, मोशिनादिष्टं यो निःसन्तानो म्रियते, २४
तस्य भ्राता तद्भार्य्यामुदुह्य स्वभ्रात्रे वंशमुत्पादयिष्यतीति। अस्माकं २५
मध्ये तु सप्त भ्रातर आसन्, प्रथमो विवाहं कृत्वा ममार,
निःसन्तानत्वाच्च स्वभार्य्यां भ्रातुः कृते तत्याज। ततः परं द्वितीयस्य २६
तृतीयस्य चैवं सप्तानामेव तादृशी गति र्बभूव। सर्व्वेषां पश्चाद् २७
योषित् सापि ममार। अतः पुनरुत्थाने सा तेषां सप्तानां कस्य २८
भार्य्या भविष्यति? यतस्ते सर्व्व एव तामुदूढवन्तः। यीशुस्तदा २९
तान् प्रत्यवादीत्, यूयं शास्त्राणीश्वरस्य शक्तिञ्च न जानीथ हेतोरतो
भ्राम्यथ। यतः पुनरुत्थाने मनुष्या नोद्वहन्ति नोदुह्यन्ते वा, ३०
प्रत्युतेश्वरस्य दूता इव स्वर्गे वर्त्तन्ते। न पठितं भो मृतानां ३१
पुनरुत्थानमधि युष्मभ्यमीश्वरेण कथितमिदं वाक्यं, यथा, अब्राहा- ३२
मस्येश्वर इस्हाकस्य चेश्वरो याकोबस्य चेश्वरोऽहमिति। ईश्वरो न
मृतानाम्, अपि तु जीवताम् ईश्वरोऽस्ति। श्रुत्वेदं जननिवहास्तस्य ३३
शिक्षां चमत्कारं मेनिरे।

फरीशिनस्तु सद्दूकिनां तेन निरुत्तरीभवनम् अवगत्यैकत्र समा- ३४
जग्मुः, तेषां मध्ये चैको व्यवस्थावेत्ता परीक्षमाणस्तं पप्रच्छ, भो ३५
गुरो, व्यवस्थायाः काज्ञा महती? यीशुस्तमब्रवीत्, त्वं कृत्स्नान्तः- ३६
करणेन कृत्स्नप्राणैः कृत्स्नचित्तेन च स्वेश्वरे प्रभौ प्रेम कुर्व्वितीयं ३७

३८ प्रथमा महती चाज्ञा। द्वितीया चास्याः सदृशी, यथा त्वम्
३९ स्वनिकटस्थे आत्मवत् प्रेम कुर्व्विति। आज्ञयोर्द्वयोरेतयोः कृत्स्ना
४० व्यवस्था भाववादिनश्च समालम्बन्ते।
४१ ततः समेतेषु फरीशिषु यीशुस्तान् पप्रच्छ, ख्रीष्टमधि
४२ युष्माभिः किं मन्यते? कस्य पुत्रः सः? ते तं वदन्ति दायूदस्येति।
४३ स तान् ब्रवीति, आत्मन आवेशाद् दायूदेन कथं स तर्हि प्रभुरि-
त्यभिधीयते? यथा,
४४ मम प्रभुमिदं वाक्यं बभाषे परमेश्वरः।
त्वच्छत्रून् पादपीठं ते यावन्नहि करोम्यहं।
अवतिष्ठस्व तावत् त्वम् आसीनो मम दक्षिणे॥
४५ तद् यदि स दायूदेन प्रभुरित्यभिधीयते, कथं तर्हि स तस्य पुत्रो
४६ भवेत्? एतस्योत्तरे केनापि वाक्यमेकं वक्तुं नाशक्यत, नाभवच्च
तद्दिनादारभ्य साहसं कस्यापि तं किमपि प्रष्टुं॥ २२॥

---

२३ त्रयोविंशोऽध्यायः।

१ फरीशिनां शास्त्राध्यापकानाञ्च कथामाननाचारत्यजनयोरुपदेशः १२ तेषां सन्तापप्रकाशनं ३४ यिरूशालेमस्य विनाशे भविष्यद्वाक्यम्।

१ यीशुस्तदा जननिवहेभ्यः स्वशिष्येभ्यश्च कथयामास, शास्त्रा-
२ ध्यापकाः फरीशिनश्च मोशेरासनोपविष्टाः, अतः पालयतानुतिष्ठत
३ च यद्यद् युष्मांस्ते पालनीयं वदन्ति। मा पुनः कुरुत तेषां
४ क्रियानुरूपं, यतस्ते वदन्ति न त्वनुतिष्ठन्ति। वस्तुतस्ते भारान्
गुरून् दुर्वहांश्च बद्ध्वा स्कन्धेषु मनुष्याणामर्पयन्ति स्वयं तांस्त्वङ्गु-
५ ल्यापि चालयितुं नाङ्गीकुर्वते। स्वकर्म्माणि सर्व्वाणि ते लोकदर्श-
नायैव कुर्व्वन्ति, कुर्व्वन्ति च पृथून् स्वपट्टबन्धान् सुदीर्घाणि च

स्ववसनानां प्रलम्बकानि। आकाङ्क्षन्ति च ते भोज्येषु श्रेष्ठस्थानानि ६
समाजगृहेषु श्रेष्ठासनानि हट्टेष्वभिवन्दनानि मनुष्यैश्च भो रब्बिन् ७
भो रब्बिन्नित्यभिभाषणम्। यूयन्तु रब्बिन्निति माभिभाष्यध्वं, यतो ८
युष्माकं गुरुरेक एव ख्रीष्टः, यूयं सर्व्वे मिथो भ्रातरः। कमपि च ९
मेदिन्यां भो पितरिति माभिभाषध्वं यतः पिता युष्माकमेक एव
स स्वर्गवासी। मनुष्यैराचार्य्या इति माभिभाष्यध्वं, यतो युष्माक- १०
माचार्य्य एक एव ख्रीष्टः। युष्माकं मध्ये यस्य महत्तमः स युष्माकं ११
परिचारको भविष्यति। यस्त्वात्मानम् उच्चीकरिष्यति स नीचीका- १२
रिष्यते, यश्चात्मानं नीचीकरिष्यति स उच्चीकारिष्यते।

अरे कपटिनः शास्त्राध्यापकाः फरीशिनश्च, यूयं सन्तापभाज- १३
नानि, यतो यूयं मनुष्येभ्यः स्वर्गराज्यस्य द्वारं रुन्ध, यूयं पुन र्न
प्रविशथ, प्रविशतस्तु प्रवेशान्निवारयथ। अरे कपटिनः शास्त्राध्या- १४
पकाः फरीशिनश्च यूयं सन्तापभाजनानि, यतो यूयं विधवानां
गृहाणि ग्रसथ छलाच्च सुदीर्घं प्रार्थयध्वे। तस्माल्लप्स्यध्वे विचारे गुरुतरं
दण्डं। अरे कपटिनः शास्त्राध्यापकाः फरीशिनश्च, यूयं सन्ताप- १५
भाजनानि, यतो यूयं सागरं स्थलञ्च परिभ्राम्यथ कर्त्तुं मनुष्यमेकं
यिहूदिमतावलम्बिनम्, कुरुथ च तं नारकिणं युष्मत्तो द्विगुणं
यस्तदवलम्बी भवति। अरे अन्धाः पथप्रदर्शका यूयं सन्तापभाज- १६
नानि, यूयं हि वदथ, यो मन्दिरेण शपते नानुष्ठेयं तेन किमपि,
यस्तु सुवर्णेन मन्दिरस्थेन शपते स ऋणी। अरे मूढा अन्धाश्च, १७
महत् कतरं, सुवर्णम् अथवा सुवर्णस्य पावकं मन्दिरं? वदथ च, १८
यो यज्ञवेद्या शपते नानुष्ठेयं तेन किमपि, यस्तूपहारेण तदुपरि-
स्थेन शपते स ऋणी। अरे मूढा अन्धाश्च, महत् कतरं, उप- १९
हारोऽथवोपहारस्य पाविका यज्ञवेदी? यो हि यज्ञवेद्या शपते, २०

२१ शपते स तया सर्व्वेण च तेन तदुपरि यद्यदास्ते। यश्च मन्दिरेण
२२ शपते, शपते हि स तेन तन्निवासिना च। यश्च स्वर्गेण शपते,
२३ शपते च स ईश्वरस्य सिंहासनेन तदासीनेन च। अरे कपटिनः
शास्त्राध्यापकाः फरीशिनश्च, यूयं सन्तापभाजनानि, यतो यूयं
पोदिनायाः सितच्छत्राया जीरकस्य च दशमांशान् उपहरथ, परि-
त्यक्तवन्तस्त्वेतान् व्यवस्थाया गरीयसोऽंशान् विचारो दया विश्वा-
२४ सश्च। आसन्निमे युष्माभिरनुष्ठातव्या अमी च न त्यक्तव्याः। अरे
अन्धाः पथप्रदर्शका यूयं पानीयं परिस्रावयन्तो मशकमपसारयथ
२५ महाङ्गन्तु निगिलथ। अरे कपटिनः शास्त्राध्यापकाः फरीशिनश्च,
यूयं सन्तापभाजनानि, यतो युष्माभिः पानपात्रस्य स्थालस्य च
वहिर्द्दिशः शुचीक्रियते, अन्तस्तु ते परस्वापहारेणाजितेन्द्रियत्वेन
२६ च परिपूर्णे स्तः। अरे अन्ध फरीशिन्, प्रथमं पानपात्रस्य स्थालस्य
चान्तर्द्दिशं शुचीकुरु, तथा कृते वहिर्द्दिशोऽपि तयोः शुचि भविष्यति।
२७ अरे कपटिनः शास्त्राध्यापकाः फरीशिनश्च, यूयं सन्तापभाजनानि,
यतो यूयं सुधाधवलितैः शवागारैः सदृशा यानि वहिश्चारूणि
प्रतिभान्ति, सन्त्यन्तस्तु शवानाम् अस्थिभिः सर्व्वविधैरपद्रव्यैश्च
२८ परिपूर्णानि। तानीव यूयमपि वहि र्मनुष्येभ्यो धार्म्मिकाः प्रति-
२९ भाथ, अन्तस्तु कापट्येनाधर्म्मेण च पूर्णाः स्थ। अरे कपटिनः
शास्त्राध्यापकाः फरीशिनश्च, यूयं सन्तापभाजनानि, यतो यूयं
भाववादिनां शवागाराणि निर्म्मिमीध्वे धार्म्मिकाणाञ्च, समाधिस्था-
३० नान्युपशोभयथ, वदथ च, वयं चेत् स्वपूर्व्वपुरुषाणां कालेऽवे-
ष्यामहि, नाभविष्याम वयं तर्हि तैः सहभागिनो भाववादिनां
३१ शोणितपातने। एवमेव यूयं यद् भाववादिघातकानां पुत्राः स्थ
३२ युष्मानधि तस्य साक्ष्यं यूयमेव दत्थ। यूयमपि स्वपूर्व्वपुरुषाणां

परिमाणं पूरयत। अरे सर्पाः कालसर्पाणामात्मजाः, विचारे कथं ३३
यूयं नरकदण्डान्निस्तरीतुं शक्ष्यथ?

तत् पश्यत यूष्मदन्तिकमहं भाववादिनो विज्ञवरान् शास्त्रा- ३४
ध्यापकांश्च प्रेषयितुमुद्यतोऽस्मि। तेषां मध्यात् केचिद् युष्माभि-
र्घानिष्यन्ते क्रुशमारोपयिष्यन्ते च, केचिच्च तेषां युष्माभिः स्वस-
माजगृहेषु कशाभिराहनिष्यन्ते केचिच्च नगरान्नगरं प्रद्रावयिष्यन्ते।
इत्थं धार्म्मिकस्य हेबलस्य शोणितमारभ्य मन्दिरवेद्योरन्तराले युष्म- ३५
द्धतस्य बेरिखियसुतस्य सखरियस्य शोणितं यावद् धार्म्मिकशोणितं
भूतले यावदेव सिक्तमभूत्, युष्मासु तत्साकल्येन वर्त्तितव्यं। युष्मा- ३६
नहं सत्यं ब्रवीमि, जनेष्वधुनातनेषु तत् सर्व्वं वर्त्तिष्यते। हा यिरू- ३७
शालेम, हा यिरूशालेम, हा भाववादिनां हन्त्रि नराणां त्वत्समीपं
प्रहितानां प्रस्तराघातिनि पुरि, पक्षयोरधः स्वशावकान् सङ्गृह्णन्ती
कुक्कुटीवाहं कतिकृत्वस्तव शावकान् सङ्ग्रहीतुं वाञ्छितवान्, यूयन्तु
न सम्मताः। पश्यत युष्माकं भवनं युष्मत्कृत उत्सन्नं विहीयते। ३८
यतोऽहं युष्मान् ब्रवीमि, यावद् यूयं न वक्ष्यथ, धन्यः स यः प्रभो ३९
र्नाम्नायातीति, इतः परं तावन्मां न पुन र्द्रक्ष्यथ॥२३॥

---

२४ चतुर्विंशोऽध्यायः।

१ मन्दिरविनाशस्य भविष्यद्वाक्यं ३ विनाशकालस्य घटना ९ शिष्याणां दुःखं लोकानां पलायनं २३ भाक्तख्रीष्टानामुपस्थितिः २९ यिहूदीयदेशस्य दुर्दशा ३२ उडुम्बरवृक्षस्य दृष्टान्तः ३६ प्रलयकालसदृशी दुर्दशा ४२ सचेतनत्वोपदेशः ४५ विश्वास्याविश्वास्यदासयो र्दृष्टान्तः।

अनन्तरं यीशु र्यदा निष्क्रम्य धर्म्मधामतोऽपागच्छत्, तस्य १
शिष्यास्तदा तं धर्म्मधाम्नो निर्म्माणप्रकारान् दर्शयितुं समीपम्
आगमन्। यीशुस्तु तान् जगाद, न दृश्यन्ते किं युष्माभिरेतानि २

सर्व्वाणि? युष्मानहं सत्यं ब्रवीमि, अत्र प्रस्तरोपरि प्रस्तर एकोऽ-
प्यनिपातयितव्यो न विहायिष्यते।
३ अनन्तरं शिष्यास्तस्य जैतुनगिरावुपविष्टस्य समीपं गुप्तमागत्य
जगदुः, वक्तुमर्हत्यस्मान् भवान्, कदा तत् सम्भविष्यति किं वाभि-
४ ज्ञानं भवतश्चोपस्थित्या युगान्तस्य चेति। यीशुस्तदा तान् प्रत्य-
५ वादीत्, सावधानास्तिष्ठत, युष्मान् कोऽपि मा प्रतारयतु, यतो
बहवो मन्नामध्वजिन आगत्य वदिष्यन्त्यहं ख्रीष्ट इति प्रतारयि-
६ ष्यन्ति च बहून्। कथाश्च यूयं युद्धानां युद्धस्य किंवदन्तीश्च
श्रोष्यथ। सावधानास्तिष्ठत, मैवोद्विजध्वं, यतः सर्व्वैरेतैन भवि-
७ तव्यं, परिणामस्तु नापि तदा। वस्तुतो जाति र्जाते र्विरुद्धं,
राज्यञ्च राज्यस्य विरुद्धमुत्थास्यति, भविष्यन्ति च स्थाने स्थाने
८ दुर्भिक्षमारीभूकम्पाः। उपक्रमः पुनर्यातनानां सर्व्वमेतत्।
९ मानवास्तदा क्लेशभोगाय युष्मान् समर्पयिष्यन्ति युष्मान्
मारयिष्यन्ति च, द्वेक्ष्यध्वे च यूयं सर्व्वजातिभि र्मन्नामकृते।
१० तदानीं पुन र्बहवः स्खलिष्यन्ति, एकोऽन्यं समर्पयिष्यति विद्वेक्ष्यति
११ च। कूटभाववादिनो बहवश्चोत्थास्यन्ति बहून् प्रतारयिष्यन्ति च।
१२ अनुष्णं भविष्यति च बहुतराणां प्रेमाधर्म्मप्राचुर्य्यात्। यस्त्वन्तं यावत्
१३ स्थिरः स्थास्यति स तरिष्यति। सुसंवादश्च राज्यस्यायं घोषयिष्यते
१४ कृत्स्ने भूमण्डले साक्ष्यार्थं सर्व्वजातीनां कृते। तदानीं पुनरुपस्था-
स्यते परिणामः।
१५ अतो यूयं यदा भाववादिना दानीयेलेन कथितं ध्वंसकारि
१६ घृणवस्तु स्थाने पवित्रे संस्थितं द्रक्ष्यथ—पाठको बुध्यतां—तदा ते
१७ पलाय्य गिरीन् आश्रयन्तां ये यिहूदियायां विद्यन्ते, नावरोहतु
१८ च स स्वगेहात् किमप्यादातुं यो गृहपृष्ठे विद्यते, स च न स्वा-

सांस्थादातुं प्रत्यावर्त्ततां यः चेत्रे विद्यते। भविष्यन्ति च दिनेषु १९
तेषु गर्भिण्यः स्तन्यदायिन्यश्च सन्तापभाजनानि। तथा च प्रार्थयध्वं २०
युष्माकं पलायनं यथा शीतकाले विश्रामवारे वा न भवेत्।
यतस्तदा महाक्लेशो यादृशः सम्भविष्यति, आजगदारम्भाद् अद्य २१
यावत् तादृशो न सम्भूतो नापि कदा सम्भविष्यति। दिनानि २२
तानि च चेन्न न्यूनयकारिष्यन्त मर्त्यः कोऽपि तर्हि नातरिष्यत्।
न्यूनीकारिष्यन्ते तु दिनानि तानि वरितजनानां कृते।

तदा च मा विश्वसित यूयमुक्ता अपि केनचित् पश्य खीष्टो- २३
ऽत्र वामुत्र विद्यत इति। यतः कूटखीष्टाः कूटभाववादिनश्चोत्था- २४
स्यन्ति, प्रदर्शयिष्यन्ति च ते महाभिज्ञानान्यद्भुतलक्षणानि च तादृ-
शानि यैः साध्ये सति ते वरितानपि मनुष्यान् पथभ्रष्टान् करिष्यन्ति।
पश्यत युष्मानहं पूर्व्वमेवोक्तवान्। तत् पश्य स मरौ विद्यत इति २५
कथिते जनै युष्मभ्यं यूयं मा निर्गच्छत, पश्य वा सोऽन्तःपुरे २६
विद्यत इति कथिते मा विश्वसित। यतो मनुष्यपुत्रस्यागमनं २७
तथैव भविष्यति क्षणप्रभा यथा पूर्व्वदिश उदेत्य पश्चिमदिशं यावत्
प्रकाशते। यत्र हि कुणपं गृध्राश्च तत्र समागमिष्यन्ति। २८

तेषान्तु दिनानां क्लेशाद् अव्यवहितपरं सूर्य्यः सान्धकारो २९
भविष्यति, चन्द्रश्च स्वज्योत्स्नां न प्रदास्यति, नक्षत्राणि च नभसः
पतिष्यन्ति गगनस्थ बलानि च विचलिष्यन्ति। तदा व्योम्नि मनुष्य- ३०
पुत्रस्याभिज्ञानं प्रकाशिष्यते। तदा गोष्ठ्यश्च सर्व्वा देशस्थाः शोकेन
स्ववक्षांस्याहनिष्यन्ति, निरीक्षिष्यन्ते च पराक्रमेण महाप्रतापेन च
परीतमाकाशीयमेघरथेनागच्छन्तं मनुष्यपुत्रम्। स च तूर्य्यध्वनिना ३१
महानिनादेन सहितान् स्वदूतान् प्रहेष्यति, ते च गगनस्यैकप्रान्तमार-
भ्यापरप्रान्तं यावच्चतुर्भ्यो वायुभ्यो मनुष्यांस्तस्य वरितान् समानेष्यन्ति।

३२ उडुम्बरवृक्षाद् दृष्टान्तं शिक्षितुमर्हथ। स्पष्टं यदा तस्य शाखा
जायते कोमला पत्राणि च विकाशन्ते, जानीथ यूयम् आसन्नस्तदा
३३ ग्रीष्मकाल इति। तथैव यदा यूयं सर्व्वमेतद् द्रक्ष्यथ, ज्ञास्यथ
३४ तदा स समीपस्थो द्वार उपस्थितश्चेति। युष्मानहं सत्यं ब्रवीमि,
यावत् सर्व्वमेतन्न सम्भवति, तावन्न व्यत्येष्यन्ति मानवा एतत्का-
३५ लिकाः। द्यावापृथिव्यावत्येष्यतः, मम वाक्यानि तु नैवात्येष्यन्ति।
३६ दिनस्य तस्य तु दण्डस्य च तस्य तत्त्वं कोऽपि न जानाति,
स्वर्गीयदूता अपि न जानन्ति, जानाति तन्मम पिता केवलः।
३७ वास्तवं हि नोहस्य काले यादृशमासीत् मनुष्यपुत्रस्यागमनेऽपि
३८ तादृशं भविष्यति। फलतो महावन्यायाः प्राक्तनेषु दिवसेषु पोते
नोहस्य प्रवेशदिनं यावद् आसन्निविष्टा यथा मानवा भोजने पाने
३९ च विवहने विवाहने च नाजानंश्च तावद् वन्ययोपस्थाय यावत्
सर्व्वे न समह्रियन्त, तादृशमेव भविष्यति मनुष्यपुत्रस्यागमने।
४० नरयो र्द्वयोस्तदा क्षेत्रे तिष्ठतोरेकतरो ग्राहिष्यतेऽन्यतरः परित्य-
४१ क्ष्यते। योषितो र्द्वयोः पेषणीनियुक्तयोरेकतरा ग्राहिष्यतेऽन्यतरा
परित्यक्ष्यते।
४२ अतो यूयं जागृत, यतो यूयं न जानीथ दण्डे कस्मिन् युष्माकं
४३ प्रभुरायातीति। जानीत परन्त्विदं यद् यदि गृहस्वाम्यज्ञास्यद्
आयाति चौरः कस्मिन् याम इति, स तर्ह्यजागरिष्यत् कुड्यभेदञ्च
४४ स्वगेहस्य नासहिष्यत। तद् यूयमपि ससज्जास्तिष्ठत, यत आयास्यति
मनुष्यपुत्रस्तस्मिन्नेव दण्डे दण्डो यो युष्माभिर्नानुभूयते।
४५ को नु खलु स विश्वस्तो बुद्धिमांश्च दासो यो यथासमये
४६ भृत्येभ्यो भक्ष्यवितरणाय स्वामिना स्वभृत्येष्वधिकृतः? धन्यः स
४७ दासः स्वामी यमागमनकाले तथैवाचरन्तमासादयिष्यति। अहं

युष्मान् सत्यं ब्रवीमि स तं कृत्स्ने सर्व्वस्वेऽधिकरिष्यति। मम स्वामी ४८
त्वागन्तुं विलम्बत इति मनसि ध्यात्वा दासः स दुष्टो यदि सह- ४९
दासान् ताडयितुं प्रमत्तैश्च सह भोक्तुं पातुञ्च प्रवर्त्तते स तर्हि ५०
दिने यस्मिन् नापेक्षते दण्डञ्च यं स न जानाति तदैव दासस्य
स्वामी तस्योपस्थाय तं द्विधाकरिष्यति भागञ्च तस्य कपटिभिः ५१
सार्द्धं निरूपयिष्यति। तत्र रोदनं दन्तै र्दन्तघर्षणञ्च सम्भवि-
ष्यतः ॥२४॥

---

२५ पञ्चविंशोऽध्यायः।

१ दशकन्यानां दृष्टान्तकथनं १४ दूरदेशगामिन उत्तमर्णस्य तदीयदासानाञ्च कथनं ३१ विचारदिनविवरणञ्च।

स्वर्गराज्यं तदा भविष्यति सदृशं दशकन्याभि र्याः स्वप्रदीपान् १
आदाय वरं प्रत्युद्गन्तुं निरिताः। तासां मध्यादासन् पञ्च बुद्धिमत्यः २
पञ्च च बुद्धिहीनाः। यास्तु बुद्धिहीनास्ताः स्वप्रदीपान् आदाय ३
स्वसार्द्धं तैलं नाददिरे। बुद्धिमत्यश्च पुनः पात्रेषु तैलं निधाय ४
स्वप्रदीपैः सहाददिरे। विलम्बमाने तु वरे निद्रालुतां गत्वा सर्व्वा ५
एव प्रसुषुपुः। अर्द्धरात्रे त्वयम् उच्चध्वनि र्बभूव, पश्यतायाति वरो ६
यूयं तत्प्रत्युद्गमनाय निर्गच्छत। कन्यास्तास्तदा सर्व्वा उत्थाय ७
स्वप्रदीपान् संचक्रुः। बुद्धिहीनास्तदा बुद्धिमती र्जगदुः, दत्तास्मभ्यं ८
किञ्चिद् युष्मदीयतैलाद् यतो निर्वायन्त्यस्माकं प्रदीपाः। बुद्धिम- ९
त्योऽनेन प्रतिजगदुः, नैवं कर्त्तव्यम्। न पर्य्याप्तं भविष्यति तदस्मा-
कञ्च युष्माकञ्च कृते। क्रीणीत वरं यूयं विक्रेतॄणां समीपं गत्वा
स्वार्थं। तास्तु क्रयार्थं यावदपगच्छन्ति वरस्तावदुपतस्थे, याः सज्जी- १०
कृतास्तास्तेन सह विवाहोत्सवीयगृहं प्रविविशु र्द्वारञ्च रुरुधे।
ततः परम् अन्यास्ताः कन्या आगत्य जगदुः, प्रभो प्रभो, मोचयतु ११

१२ द्वारमस्मत्कृते। स तु प्रतिबभाषे, युष्मानहं सत्यं ब्रवीमि नाहं
१३ जाने युष्मान्। अतो यूयं जागृत, यतो यूयं दिवसं तं दण्डञ्च
तं न जानीथ, आयाति यदा मनुष्यपुत्रः।
१४ फलतः स नरेण तेन सदृशः, यो विदेशगमनार्थं यात्राकाले
१५ निजदासान् आहूय स्वसम्पत्तिं तेषु समार्पयत्। स एकस्मै गोणीः
पञ्च मुद्रापूर्णा अपरस्मै गोण्यौ द्वे, अन्यस्मै गोणीमेकामित्थं यस्य
१६ यथा सामर्थ्यं तस्मै तदनुरूपमर्थं ददौ ततश्च तूर्णं प्रतस्थे। ततो
लब्धा येन मुद्रागोण्यः पञ्च स ताभि र्वाणिज्यं कुर्व्वन्नपराः पञ्च
१७ गोणीरुपार्जयामास। लब्धे येन गोण्यौ द्वे स तथैवापरं गोणीद्वय-
१८ मुपार्जयामास। लब्धा तु येनैका गत्वा स भूमिं खनित्वा स्वप्रभो
१९ र्मुद्रास्तत्र न्यगूहत्। काले दीर्घेऽतीते दासानां तेषां प्रभुरागत्य
२० तैः सह गणयति। लब्धा येन गोण्यः पञ्च स तदोपस्थायापराश्च
गोणीः पञ्चानीय व्याजहार, प्रभो समर्पिता भवता मयि गोण्यः
२१ पञ्च। पश्यतु ताभिर्मयापरा गोण्यः पञ्चोपार्जिताः। तस्य स्वामी
तं जगाद, साधु भद्र विश्वस्त दास, आसीस्त्वं स्वल्पेषु विश्वस्तः,
बहुषु मयाधिकारिष्यसे, गत्वाभ्यन्तरं भव भागी स्वप्रभोरानन्दस्य।
२२ अनन्तरं लब्धे येन गोण्यौ द्वे सोऽप्युपस्थाय व्याजहार, प्रभो
समर्पिते भवता मयि गोण्यौ द्वे, पश्यतु ताभ्यां मयापरं गोणी-
२३ द्वयमुपार्जितं। तस्य स्वामी तं जगाद, साधु भद्र विश्वस्त दास,
आसीस्त्वं स्वल्पेषु विश्वस्तः, बहुषु मयाधिकारिष्यसे। गत्वाभ्यन्तरं
२४ भव भागी स्वप्रभोरानन्दस्य। ततः परं लब्धा येन गोण्येका,
सोऽप्युपस्थाय व्याजहार, प्रभो भवान् नरः कठोरः, नोप्तवान् यत्र
वीजानि कृन्तति तत्र शस्यं, न यत्र विकीर्णवान् सञ्चिनोति तत्र,
२५ अतोऽहं भीतो गत्वा भूमौ गोणीं भवतो गूढवान्, पश्यतु यद्

भवतस्तद् गृह्णातु। तस्य स्वामी तु प्रतिगदन् तमब्रवीत् रे दुष्ट २६
मन्द दास, त्वयेदं भो न्वज्ञायि यन्मया नोप्तानि यत्र वीजानि
छिद्यते तत्र शस्यं, न यत्र विकीर्णं सञ्चीयते तत्रेति? तथा सति २७
आसंख्यया मदीयमुद्रा वणिक्ष्वर्पयितव्याः, तथा कृतेऽहमेवोपस्थाय
निजस्वं मम सवृद्धि आदायिष्यं। अतो यूयं गोणीं तामस्माद् २८
अपहृत्य दशगोणीनाम् अधिकारिणे दत्त। यतो यस्य कस्यचिद् २९
आस्ते तस्मै दायिष्यते तस्य च प्राचुर्य्यं भविष्यति, यस्य तु नास्ते
तस्य यदस्ति तदपि तस्माद् अपहारिष्यते। दासं परन्त्विमम् ३०
अनुपयोगिनं तिमिरे वहिःस्थे निक्षिपत, तत्र रोदनं दन्तै र्दन्त-
घर्षणञ्च सम्भविष्यतः।

यदा तु स्वप्रतापान्वितो मनुष्यपुत्रः सहितः सर्व्वै र्दूतैः पवित्रै- ३१
रागमिष्यति, स तदा स्वप्रतापसिंहासन उपवेक्ष्यति जातयश्च सर्व्वा- ३२
स्तस्य समक्षम् एकत्रीकारिष्यन्ते। यथा च पालरक्षकः पृथक् करोति
मेषेभ्यश्छागान्, स तथा विभज्य मनुष्यांस्तान् पृथक् करिष्यति, ३३
स्थापयिष्यति च मेषान् स्वदक्षिणे छागान् स्ववामे। ततः परं राजा ३४
वदिष्यति स्वदक्षिणे स्थितान्, भो मत्पितुराशीर्वादभाजनान्यायात,
दायत्वद् भुङ्क्त राज्यमुपकल्पितं युष्मदर्थमाजगत्स्थापनात्। यतो ३५
मयि क्षुत्क्षामे यूयं मह्यं भक्ष्यम् अदत्त, तृषातुरे माम् अपाययत,
अतिथौ माम् अन्वगृह्णीत, विवस्त्रे मां वासांसि पर्य्यधापयत, ३६
अस्वस्थे मां पर्य्यपश्यत, कारानिहिते माम् अभ्यागच्छत। धार्म्मिकास्ते ३७
तदा तं प्रतिभाषिष्यन्ते, प्रभो दृष्टो वा कदा भवान् अस्माभिः
क्षुत्क्षामो भक्ष्येण तर्पितश्च? दृष्टो वा कदा तृषातुरः पायितश्च?
दृष्टो वा कदा भवान् अतिथिरस्माभिरनुगृहीतश्च? दृष्टो वा कदा ३८
विवस्त्रो वासांसि परिधापितश्च? लक्षितो वा कदा भवान् अस्वस्थः ३९

४० कारानिहितो वास्माभिः परिदृष्टश्च? राजा तांस्तदा प्रतिवदिष्यति,
युष्मानहं सत्यं ब्रवीमि, भ्रातृणां ममैतेषां क्षोदिष्ठानाम् एकं प्रति
४१ युष्माभि र्यावद् अकारि तावन्मां प्रत्यकारि। ततः परं स वामे
स्थितानपीत्थम् आलपिष्यति, रे शप्ता यूयं मत्तो दूरमपगच्छता-
नन्तम् अग्निम् उपकल्पितं दियाबलस्य तदीयदूतानाञ्च कृते।
४२ यतो मयि क्षुत्क्षामे यूयं मह्यं भक्ष्यं नादत्त, तृषातुरे मां नापा-
४३ ययत, अतिथौ मां नान्वगृह्णीत, विवस्त्रे मां वासो न पर्य्यधापयत,
४४ अस्वस्थे कारानिहिते वा मां न पर्य्यपश्यत। तेऽपि तदोत्तरं कृत्वा
तं गदिष्यन्ति, प्रभो, कदा वा भवन्तं क्षुत्क्षामं वा तृषातुरं वातिथिं
वा विवस्त्रं वास्वस्थं वा कारानिहितं वा दृष्ट्वास्माभि र्भवतः परि-
४५ चर्य्या न कृता? स तांस्तदा प्रतिभाषिष्यते, युष्मानहं सत्यं
ब्रवीमि, युष्माभिः क्षोदिष्ठानामेतेषाम् एकं प्रति यावन्नाकारि
४६ तावन्मामेव प्रति नाकारि। ततोऽपगमिष्यन्तीमे दण्डं भजितुमनन्तं
धार्म्मिकास्त्वनन्तं जीवनम्॥ २५॥

---

२६ षड्विंशोऽध्यायः।

१ ख्रीष्टस्य विरुद्धं मुख्ययाजकशास्त्राध्यापकानां कुमन्त्रणं ६ योषया ख्रीष्टाभिषिक्तत्वं १४ यिहूदाविश्वासघातित्वं १७ निस्तारपर्व्वीयभोज्यं २६ प्रभो र्भोज्यनिरूपणं ३१ पितरस्य ख्रीष्टानङ्गीकरणभविष्यद्गीः ३६ गेतशिमानीत्यभिधे स्थाने ख्रीष्टकष्टं ४७ तत्परकरार्पणं ५७ महायाजकसमक्षं तन्नयनं ५९ तद्विचारत्वं ६९ पितरानङ्गीकरणञ्च।

१ समाप्य वाक्यानि सर्व्वाण्येतानि यीशुः स्वशिष्यान् जगाद,
२ जानीथ यूयं यदुपस्थास्यते निस्तारपर्व्व दिनद्वयात् परं, मनुष्य-
३ पुत्रस्तदा क्रुशारोपणाय समर्पयिष्यते। काले तस्मिन् मुख्ययाजकाः
शास्त्राध्यापकाः प्रजानां प्राचीनाश्च महायाजकस्य कायाफाभिधस्य

हर्म्ये समाजग्मुः सम्मन्त्रयामासिरे च यथा यीशुं छलेन धृत्वा ४
हन्युः। ते त्ववदंश्च मैव पर्व्वणि, चेत् तथा भविष्यति कलहो ५
जनानां मध्ये।

वैथनियायान्तु यीशौ शिमोनस्य कुष्ठिनो गेहे विद्यमाने ६
योषिदेका श्वेतोपलभाजनेन महार्घं सुगन्धितैलमानीय तस्यान्तिकं ७
गत्वा स्रावयामास तच्छिरसि तस्य भोजनायासीनस्य। एवं दृष्ट्वा ८
शिष्यास्तस्यासन्तुष्टा भूत्वा अगदन्, कथमयमपव्ययः? तैलेऽस्मिन् ९
विक्रीते मूल्यं महल्लब्धं दरिद्रेभ्यो दातुञ्चाशक्ष्यत। यीशुस्तु १०
तज्ज्ञात्वा तान् बभाषे, कुरुथ कथं दुःखिनीं योषामिमां?
कृतवतीयन्तु मयि कर्म्म सत्। यतो दरिद्राः सततं युष्मत्सङ्गिनो- ११
ऽहन्तु न सततं युष्मत्सङ्गी। देहे मम तैलमिदं निषिच्येयं तावत् १२
कृतवती कर्म्म मम समाध्युपयोगि। युष्मानहं सत्यं ब्रवीमि कृत्स्नस्य १३
जगतो यत्र कुत्रचिद् घोषयिष्यते सुसंवादोऽयं, तत्र सर्व्वत्र कथ-
यिष्यते कर्म्मैतत् कृतमनया स्मरणार्थमस्याः।

तदा द्वादशशिष्याणाम् एक ईष्करियोतीयो यिहूदा इत्य- १४
भिधो मुख्ययाजकानां समीपं गत्वा जगाद, अहं यत् तं युष्मासु १५
समर्पयेयं तद् यूयं मह्यं किं दातुं सम्मताः? ततस्ते त्रिंशद्
रौप्यमुद्रास्तोलयामासुस्तस्य कृते। तदाप्रभृत्यगवेषयत् स तत्सम- १६
र्पणस्य समयम्।

अनन्तरं निष्किण्वपूपानां प्रथमे दिने यीशोः समीपम् उपस्थाय १७
शिष्यास्तं जगदुः, भवत इच्छातः कुत्रास्माभिरुपकल्पयितव्यं भोजनं
निस्तारपार्व्वणं? स बभाषे, यूयं नगरममुकस्य समीपं गत्वा तं १८
ब्रूत, गुरु र्वक्ति, आसन्नो मम कालस्तव गृहेऽहं स्वशिष्यैः सह
निस्तारपर्व्व सम्पालयिष्यामि। अतो यीशुना यथादिष्टं शिष्यास्तथैव १९

२० कुर्व्वन्तो भोजनं निस्तारपार्व्वणमुपकल्पयामासुः। सन्ध्यायान्तु
२१ जातायां यीशु र्द्वादशशिष्यैः सह भोजनार्थम् उपविवेश। तेषु च
भक्षमाणेषु स बभाषे, अहं युष्मान् सत्यं ब्रवीमि, युष्माकम् एको
२२ मां समर्पयिष्यति। अनेन तेऽतीव शोचन्तः प्रत्येकं तं प्रष्टुम्
२३ आरेभिरे, प्रभो स किमहं? स तु प्रतिबभाषे मया सार्द्धं यः
२४ सूपपात्रे पाणिमज्जयत् स एव मां समर्पयिष्यति। मनुष्यपुत्रमधि
यथा लिखितमास्ते स तथैव प्रयाति, नरेण येन तु मनुष्यपुत्रः
समर्प्यते स सन्तापपात्रं। तस्य नरस्य जन्म चेन्नाभविष्यत् तर्हि
२५ तेनैव तस्य क्षेमम् अभविष्यत्। तस्य समर्पयिता यिहूदास्तदा
प्रदिजगाद, भो रब्बिन् स किमहं? स बभाषे, त्वं व्याहार्षीः।
२६ 　अतस्तेषां भोजनकाले यीशुः पूपमादायाशीर्वादं कृत्वा तं
भङ्क्ता शिष्येभ्यो ददौ बभाषे च, गृह्णीत भुंग्ध्वम्, एतन्मम शरीरं।
२७ ततः स पानपात्रमादाय धन्यवादं कृत्वा तेभ्यस्तद् ददौ बभाषे
२८ च, पिबतानेन सर्व्वे, यत एतन्मम शोणितं पापमोचनाय बहूनां
२९ कृते विस्राव्यमाणं नूतननियमस्य शोणितं। युष्मांस्त्वहं ब्रवीमि,
गोस्तनीलतोत्पन्नोऽयं रसो दिने यस्मिन् मम पितृराज्ये नवीनो
मया युष्माभिः सह पायिष्यते अद्यारभ्य तद्दिनं यावत् स मया
३० नैव पायिष्यते। ततस्ते स्तोत्रं गीत्वा जैतूनपर्व्वतं जग्मुः।
३१ 　यीशुस्तांस्तदा जगाद, रात्र्यामस्यां सर्व्वे यूयं मयि स्खलिष्यथ,
यतो लिखितम् आस्ते, "अहं व्रजरक्षकमाहनिष्यामि, व्रजस्य
३२ मेषाश्च विकीर्णा भविष्यन्ति।" परन्तु मदुत्थानात् परम् अहं
३३ युष्मदग्रे गालीलं यास्यामि। पितरस्तं प्रतिजगाद, सर्व्वेऽपि चेद्
३४ भवति स्खलेयुस्तथाप्यहं कदाचन न स्खलिष्यामि। यीशुस्तं जगाद,
त्वामहं सत्यं ब्रवीमि, रात्र्यामस्यां कुक्कुटस्य रवात् प्राक् त्वं मां

त्रिकृत्वः प्रत्याख्यास्यसि। पितरस्तं ब्रवीति, यद्यपि भवता सार्द्धं ३५
मम मरणम् अवश्यं स्यात्, तथाप्यहं भवन्तं नैव प्रत्याख्यास्यामि।
एवमेव शिष्याः सर्व्वेऽप्यभाषन्त ।

यीशुस्तदा तैः सह गेतशिमानीत्यभिधं स्थानमुपस्थाय शिष्यान् ३६
जगाद यूयमत्रोपविशत, यावदहममुत्र गत्वा प्रार्थनां कुर्व्वे।
अनन्तरं स पितरं सिबदियस्य पुत्रौ च सङ्गिनः कृत्वा शोचितुं ३७
विषत्तुञ्चारेभे तांश्च जगाद, प्राणा मम मृत्यवे शोकापन्नाः, ३८
यूयमत्रावतिष्ठमाना मया सह जागृत। ततः स किञ्चिद् अग्रं ३९
गत्वाधोमुखो निपत्य प्रार्थयमानोऽब्रवीत्, भो मम पितः, यदि
शक्यं स्यात् तर्हीदं पानीयपात्रं मत्तोऽपसरतु, तथापि न मया,
अपि तु त्वया यथा वाञ्छ्यते तथैव भवतु। अनन्तरं स तेषां ४०
शिष्याणां समीपमागत्य तान् निद्राणान् दृष्ट्वा पितरं जगाद,
एवमेव यूयं घटिकाम् एकां मया सार्द्धं जागर्त्तुं नाशक्नुत? जागृत ४१
प्रार्थयध्वञ्च नो चेत् परीक्षां निवेक्ष्यध्वे, यत आत्मोद्यतः शरीरन्तु
दुर्ब्बलम्। द्वितीयवारं पुन र्गत्वा स प्रार्थयाञ्चक्रे भो मम पितः, ४२
पानीयपात्रमिदं यावन्मया न पीयते तावद् यदि मत्तोऽपसरितुं
न शक्नुयात्, तवेच्छा तर्हि सिध्यतु। सोऽनन्तरमागत्य पुनस्तान् ४३
निद्राणान् ददर्श, यतस्तेषां नेत्राण्यवशान्यासन्। ततः स तांस्त्यक्त्वा ४४
पुनरपगत्य तृतीयवारं वाक्यं तदेव व्याहरन् प्रार्थयाञ्चक्रे। ततः ४५
परं स्वशिष्याणां समीपमागत्य तान् जगाद, एवमेव यूयं निद्राणा
विश्रामं सेवध्वे किम्? पश्यतोपस्थितः स दण्डो मनुष्यपुत्रश्च
पापिनां करेषु समर्प्यते। उत्तिष्ठत वयं गच्छामः। पश्यत मम ४६
समर्पयिता समीपमागतः।

पश्य स यावदित्थं भाषत आगमत् तावद् द्वादशानाम् एकोऽर्थतो ४७

यिहूदास्तेन सार्द्धञ्च मुख्ययाजकानां जनप्राचीनानाञ्च सकाशाद्
४८ असियष्टिधारी महान् जननिवहः । तस्य समर्पयिता तेभ्यः सङ्केतं
दत्तवान्, यथा, अहं यं चुम्बिष्यामि स एव सोऽस्ति यूयं तमेव
४९ धरतेति । अतः स तत्क्षणं यीशोरन्तिकमुपस्थाय, रब्बिन् प्रणाम
५० इत्युक्ता तं चुचुम्ब । यीशुस्तु तमब्रवीत्, मित्र किमर्थमुपतिष्ठसे ?
५१ जनास्ते तदोपागत्य यीशौ हस्तार्पणं कृत्वा तं दध्रुः । पश्य नरस्तदा
यीशोः सङ्गिनामेको हस्तं प्रसार्य्य कोषान्निजासिं निष्कृष्य महा-
५२ याजकस्य दासमाहत्य तस्य कर्णमेकं परिचिच्छेद । यीशुस्तदा
तमब्रवीत्, तवासिं पुनः स्वस्थाने निधेहि, यतोऽसिमाहिणः सर्व्वे-
५३ ऽसिना विनङ्क्ष्यन्ति । इदानीमेवाहं स्वपितरं याचितुं शक्नोमि, स
च मह्यं द्वादशभ्यो वाहिनीभ्योऽप्यधिकान् स्वर्गदूतान् वितरिष्यतीदं
५४ त्वया किम् असम्भवं मन्यते ? परन्त्वेतेनैव भवितव्यमिति शास्त्री-
योक्तयः कथं सेत्स्यन्ति ?

५५ दण्डे तस्मिन् यीशुर्जननिवहान् जगाद, दस्युमिव मां
धर्त्तुमसीन् यष्टींश्चादाय किं यूयं वहिरागताः ? अहन्तु प्रत्यहं
धर्म्मधाम्नि युष्मत्सकाशमासीनोऽशिक्षयं यूयं तदा न मां धृतवन्तः ।
५६ सम्भूनन्तु सर्व्वमेतद् यथा भाववादिनां शास्त्रीयोक्तयः सिद्धिं
गच्छेयुः ।

५७ शिष्यास्तदा सर्व्वे तं त्यक्त्वा पलायाञ्चक्रिरे । ये तु यीशुं
धृतवन्तस्तैः स महायाजकस्य कायाफाः समीपं निन्ये । तत्र शास्त्रा-
५८ ध्यापकाः प्राचीनाश्च समागमन् । पितरस्तु दूरान्महायाजकस्य हर्म्यं
यावत् तमन्वव्रजत, परिणामं दिदृक्षुश्च तत्र प्रविश्य पदातिभिः
५९ सहोपविवेश । तदा मुख्ययाजकाः प्राचीनाः कृत्स्ना सभा च यीशुं
हन्तुकामास्तस्य प्रतिकूलं मृषासाक्ष्यम् अन्वेषयन्त न तु लेभिरे,

बङ्खषु मृषासाक्षिषूपागतेष्वपि न लेभिरे। पश्चात्तु द्वौ मृषासा- ६०
क्षिणावुपस्थायोचतुः, असौ व्याहृतवान् अहम् ईश्वरस्य मन्दिरं ६१
भङ्क्ता दिनत्रये निर्म्मातुं शक्नोमीति। महायाजकोऽनेनोत्थाय तम- ६२
ब्रवीत्, किमपि त्वं किं न प्रतिभाषसे? इमौ तव प्रतिकूलं किं
साक्ष्यं दत्तः? यीशुस्तु मौनम् अवलम्ब्यातिष्ठत्। अनन्तरं महा- ६३
याजकस्तं प्रतिबभाषे, अहं त्वां जीवनमयेनेश्वरेण शपयामि,
त्वमीश्वरस्य पुत्रः ख्रीष्टो न वेत्यस्मान् वद। यीशुस्तं जगाद, त्वं ६४
व्याहार्षीः। अधिकन्तु युष्मानहं ब्रवीमि, इतः प्रभृति यूयं मनु-
ष्यपुत्रं प्रभावस्य दक्षिण आसीनम् आकाशीयमेघरथेनागच्छन्तञ्च
वीक्षिष्यध्वे। महायाजकस्तदा स्ववासांसि विदीर्य्य बभाषे, स ईश्वर- ६५
निन्दां चकार, साक्षिणामधिकानां किं प्रयोजनम्? पश्यताधुना-
श्रावि युष्माभिरीश्वरनिन्दा। युष्माभिः किं मन्यते? ते प्रत्यवदन्, ६६
स प्राणदण्डमर्हति। ते तदा तस्यास्ये न्यष्ठीवन् मुष्टिभिश्च तमा- ६७
घ्नन्। केचित्तु तं प्राहरन्नवदंश्च, ख्रीष्ट भावोक्त्यास्मान् वद कस्त्वां ६८
ताडितवान्?

पित्रस्तु वहिः प्राङ्गण आसीनोऽतिष्ठत्। दासी तदैका तस्या- ६९
न्तिकमागत्याब्रवीत् त्वमपि गालीलीयस्य यीशोः संग्यासीः। स तु ७०
सर्व्वेषां समक्षम् अनङ्गीकुर्व्वन् जगाद, न बुध्यते मया त्वया किं
गद्यते। तस्मिंश्च पुन र्गोपुरं गते काचिदन्या तं दृष्ट्वा जनांस्तत्र ७१
विद्यमानानवदत्, अयमपि नासरतीयस्य यीशोः संग्यासीत्। स ७२
ततः शप्त्वा पुनरनङ्गीकुर्व्वन् जगाद मनुष्यं तं न जानामीति। क्षणात् ७३
परं नरास्तत्र स्थिता उपागत्य पित्रमब्रुवन्, नूनं त्वमपि तेषाम्
एकतमोऽसि यतस्तव भाषा त्वां व्यञ्जयति। स तदाभिशप्तुं दिव्यञ्च ७४
कर्त्तुमारभ्याब्रवीत्, मनुष्यं तं न जानामीति। सद्यस्तु कुक्कुटो रुराव।

७५ अनन्तरं कुक्कुटरावात् प्राक् त्वं मां त्रिरपह्नोष्यसे, यदेतद्वाक्यं
यत् स यीशुनोक्तस्तत् स्मृत्वा पितरो बहि र्गत्वा तीव्रं रुरोद ॥ २६ ॥

---

२७ सप्तविंशोऽध्यायः ।

१ पीलातस्य करे ख्रीष्टार्पणं ७ यिहूदा अनुतापमरणे ११ पीलातस्य समक्षं ख्रीष्ट-साक्ष्यमौने १५ तद्देशीया रीतिः १९ पीलातस्याचरणं २७ हन्तुं ख्रीष्टनयनं ३२ तस्य क्रुशारोहणं ३९ निन्दोक्तिः ४५ क्रुश आर्त्तरवः ५० प्राणत्यागाद्भुतलक्षणे ५५ योषितामुपस्थितिः ५७ ख्रीष्टसमाधिः ६२ रक्षिभिः समाधिरक्षणञ्च ।

१ ततः परं जाते पुनः प्रातःकाले मुख्ययाजका जनानां प्राची-
२ नाश्च सर्व्वे यीशो र्विरुद्धं तस्य बधार्थं मन्त्रणां चक्रुर्बद्ध्वा च तम-
पनीय देशाधिपतौ पन्तीये पीलाते समर्पयामासुः ।
३ कृता यीशो र्दण्डाज्ञेति दृष्ट्वा तस्य समर्पयिता यिहूदास्तदा-
नुतप्य तास्त्रिंशद् रौप्यमुद्रा मुख्ययाजकेषु प्राचीनेषु च प्रत्यर्पयन्
४ बभाषे, शोणितं निरपराधं समर्प्य पापं मयाकारीति । ते त्वब्रुवन्,
५ किमनेनास्माकं? त्वयैवालोच्यतां । स तदा रौप्यमुद्रास्ता मन्दिरे
६ निक्षिप्य प्रतस्थे गत्वा चात्मानं प्रतिलम्ब्य ममार । ततो मुख्यया-
जकास्ता मुद्रा आदाय जगदुः, भाण्डागारे स्थापनमेतासामविधेयं
७ यतः शोणितस्य मूल्यमेतत् । अतस्ते मन्त्रणां कृत्वा ताभि र्विदेशिनां
८ मृतानां समाधिस्थानं कुम्भकारस्य क्षेत्रम् अक्रीणुः । तद्धेतुना क्षेत्रस्य
९ तस्याद्यापि प्रबलं शोणितक्षेत्रमिति नाम सम्भूतम् । इत्थं भाव-
वादिना यिरमियाहेण व्याहृतमिदं वाक्यं सिद्धिं गतं, यथा,
"इस्रायेलः सुतानाम् आदेशाद् यस्य मूल्यं निरूपितं, तस्य मूल्यवतो
१० मूल्यं त्रिंशन्मुद्रामाणं रूप्यं तैरादाय मदाप्रभु र्मां यथादिशत् तथा
कुम्भकारस्य क्षेत्रेऽर्पितमिति" ।

अनन्तरं यीशुः देशाधिपतेः समक्षम् अतिष्ठत्। स तु देशाधि- ११
पतिस्तं पप्रच्छ त्वं किं यिहूदीयानां राजा? यीशुस्तमवादीत्,
भवान् व्याहरति। मुख्ययाजकैस्तु प्राचीनैश्च क्रियमाणे तस्याभियोगे १२
स किमपि न प्रत्यभाषत। तदा पीलातस्तं ब्रवीति, न किं शृणोषि १३
तव विरुद्धममी साक्ष्यवचांसि कति कदन्ति? स तु तस्मै नैकस्यापि १४
वचनस्योत्तरम् अदात्। अनेन देशाधिपतिरतीवाश्चर्य्यं मेने।

रीतिरियञ्चासीत् यद् देशाधिपतिः प्रतिवर्षं पर्व्वणि तस्मिन् १५
जनानां कृते तैरभीप्सितम् नरमेकं कारागुप्तं मोचयतीति। प्रसिद्धो १६
नर एकस्तेषां तदा बारब्बा इतिनामकः कारागुप्त आसीत्। तेष्वतः १७
समागतेषु पीलातस्तान् अपृच्छत्, यूयं मत्तः कतरस्य मोचनं
वाञ्छथ? बारब्बाः किंवा ख्रीष्ट इति विख्यातस्य यीशोः? यतो १८
देशाधिपतिनाज्ञायत स यन्मात्सर्य्यात् तैः समर्पितः।

अनन्तरं यदा स विचारासन उपविष्ट आसीत् तस्य पत्नी १९
तदा प्रेष्यं प्रहित्य तं जगाद, धर्म्मवता तेन सह व्यापारः कोऽपि
भवतो मा भवतु यतस्तस्य कृतेऽद्य स्वप्नदर्शने सम्भूता मम यातना
बहुतरा। यथा तु जननिवहो बारब्बां याचेत यीशुञ्च नाशयेत् २०
मुख्ययाजकाः प्राचीनाश्च तांस्तथा प्रावर्त्तयन्। देशाधिपतिस्ततस्तान् २१
पप्रच्छ युष्मदिच्छातस्तयो र्द्वयोः कतरो मया मोचयितव्यः? ते
जगदुः, बारब्बाः। पीलातस्तान् अब्रवीत्, ख्रीष्टाभिधं तर्हि तं २२
यीशुं प्रति मया किं कर्त्तव्यम्? सर्व्वे तमब्रुवन् स क्रुशमारोप्य-
ताम्। देशाधिपति र्बभाषे, कथमेतत्? किमपराद्धं तेन? अनेन २३
तेऽधिकं क्रोशन्तोऽवदन्, स क्रुशमारोप्यताम्। तदा यत्नो मम २४
विफलः प्रत्युताधिकः कलहो जायत इति दृष्ट्वा पीलातस्तोयमादाय
जननिवहस्य समक्षं हस्तौ प्रक्षाल्य बभाषे, धर्म्मवतोऽस्य शोणितपा-

२५ ततो निर्द्दोषोऽहं युष्माभिरालोच्यतामिति। कृत्स्नः प्रजानिवहस्तु
तं प्रतिबभाषे, तस्य शोणितम् अस्माकम् अस्मत्सन्तानानाञ्च शिरःसु
२६ वर्त्ततां। तेषां कृते स तदा वारब्बां मोचयामास यीशुन्तु कशाभिः
प्रहार्य्य क्रुशारोपणार्थं समर्पयामास।
२७ देशाधिपतेः सैनिकनरा यीशुं तदा राजहर्म्यस्याभ्यन्तरं नीत्वा
२८ सैन्यदलं कृत्स्नं तस्य परितः समागमयामासुः। वस्त्राणि तस्य च
२९ मोचयित्वा तं लोहितवर्णं प्रावारं परिधापयामासुः कण्टकैश्च स्रजं
निर्म्माय तस्य शिरसि निदधुस्तस्य दक्षिणहस्तोपरि च नलं सम-
र्पयामासुरनन्तरं तस्य समक्षं जानुपातं कुर्व्वन्त उपहासेन तमवदन्,
३० यिहूदीयानां राजन् प्रणामः। पुनश्च तस्मिन् निष्ठीव्य तं नलमादाय
३१ तस्य शिरोऽताडयन्। इत्थं तम् उपहस्य तं प्रावारं मोचयित्वा
तस्य स्ववासांसि परिधाप्य च क्रुशम् आरोपयितुं तम् अपनिन्युः।
३२ निर्गच्छन्तस्तु ते शिमोननामकं कुरीणीयं नरमेकमासादयामासु
३३ र्दध्रुश्च तं, क्रुशं तस्य वोढुं वेतनं विना। अनन्तरं गल्गथार्थतः
कपालस्थलमित्यभिधं स्थानमुपस्थाय पानीयार्थं ते तस्मै पित्त-
३४ मिश्रितम् अम्लरसं ददुः। स तु तमास्वाद्य पातुं नाङ्गीचक्रे।
३५ अनन्तरं ते तं क्रुशमारोप्य गुटिकापातेन तस्य वासांसि मिथो
विभेजिरे। इत्थं भाववादिनोक्तेयं कथा सिद्धिं गता, यथा,

मामकीनानि वस्त्राणि स्वमध्ये विभजन्ति ते।
मत्परिच्छदलिप्सातो गुटिकां पातयन्ति च॥

३६ अनन्तरं ते तत्रोपविश्य तम् अरक्षन्। तस्य शिरसोर्द्ध्वे ते
३७ बबन्धुरिदं तस्याभियोगलेख्यं यथा, यिहूदिनां राजा यीशुरयम्।
३८ तदा च दस्यू द्वौ तेन सार्द्धं क्रुशे आरोप्येताम्, एकतरस्तस्य दक्षिणे
वामे चान्यतरः।

अनन्तरं ये मनुष्या मार्गेण तेनाव्रजंस्ते शिरांसि चालयन्तस्त- ३९
मित्यमनिन्दन्, यथा, मन्दिरभञ्जक दिनत्रये च तन्निर्मातरात्मानं ४०
तारय। त्वञ्चेदीश्वरस्य पुत्रोऽसि तर्हि क्रुशादवरोह। शास्त्राध्यापकैः ४१
प्राचीनैश्च सार्द्धम् ईदृशमेव तमुपहसन्तो मुख्ययाजका अपि
तमवदन्, सोऽपरान् अतारयत्, आत्मानं तारयितुं न शक्नोति। ४२
स चेद् इस्रायेलस्य राजास्ति तर्हीदानीं क्रुशाद् अवरोहतु, तया
कृते वयं तस्मिन् विश्वसिष्यामः। स ईश्वरे विश्वासं कृतवान्, ईश्वरस्तेत् ४३
तम् अभिरोचयति तर्हि तमुद्धरतु, यतः स कथितवान् ईश्वरस्य
पुत्रोऽहं। तेन सार्द्धं क्रुशारोपितौ दस्यू तावपि तथैव तमपवदताम्। ४४

आमध्याह्नात्तु तृतीयप्रहरं यावत् कृत्स्ने भूतलेऽन्धकारोऽभूत्। ४५
तृतीये प्रहरे च यीशुरुच्चैराह्वयन् बभाषे, एली, एली, लामा ४६
शवक्तानीति, अस्यार्थोऽयं,

हे मदीश मदीश त्वं मां परित्यक्तवान् कुतः।

तच्छ्रुत्वा तत्र स्थितानां नराः केचिदवदन् असावेलियमाह्वयति। ४७
तत्क्षणञ्च तेषामेको द्रुत्वा स्पञ्जमादायाम्लरसेन पूरयित्वा नलाग्रे ४८
बद्ध्वा तम् अपीयत्। अपरे त्ववदन्, निवर्त्तस्व, अमुं तारयितुम् ४९
एलिय आगच्छति न वेत्यस्माभि र्दृश्यताम्।

ततः परं यीशुः पुनरुच्चैरुत्क्रुश्य प्राणांस्तत्याज। पश्य च तदा ५०
मन्दिरस्य तिरस्करिण्यूर्द्ध्वादधो यावद् विदद्रे भूस्वकम्पे शैला ५१
विचिच्छिदिरे श्मशानागाराण्युद्घाटयामासिरे निद्राणानाञ्च पवित्राणां ५२
कुणपानि बहून्युत्थापयाञ्चक्रिरे तस्योत्थापनात् परञ्च निर्गत्य ते ५३
पुण्यनगरं प्रविश्यानेकेषां प्रत्यक्षीबभूवुः। तांस्तु भूकम्पादीन् व्यापा- ५४
रान् दृष्ट्वा शतपति र्यीशो रक्षणे नियुक्तास्तस्य सङ्गिनश्चातीव
भीत्वावदन्, सत्यम् आसीदसावीश्वरस्य पुत्रः।

५५ अपि च गालीलतो यीशुम् अनुगतास्तत्परिचर्य्यायाञ्च नियुक्ता
५६ बह्व्यो योषितो दूरादवलोकमानास्तत्राविद्यन्त। तासां मध्ये मग्द-
लीनी मरियम्, याकोबयोश्योश्च माता मरियम् सिबदियसुतयो
र्माता चासन्।

५७ सन्ध्यायान्तु जातायाम् अरिमाथियानिवासी योषेफनामक
५८ एको धनी नर आगमत्। सोऽपि यीशोः शिष्यः। स पीलातस्य
समीपं गत्वा यीशो र्देहं ययाचे। आदिष्टे तदा पीलातेन देहस्य
५९ दाने योषेफो देहमादाय शुचिना क्षौमवस्त्रेण वेष्टयामास
६० तच्चिते शैलरन्ध्रे च स्वार्थं स यच्छवागारं निर्म्मितवांस्तस्मिन्
नूतने शवागारे निदधे महाश्मानञ्च लोठयित्वा शवागारस्य मुखे
६१ दत्त्वा प्रतस्थे। तत्र तु मग्दलीनी मरियम् अन्यतरा च मरियम्
शवागारस्य सम्मुखम् उपविश्यावातिष्ठेताम्।

६२ परदिने त्वर्थतः सज्जनदिनात् परं यद्दिनं तस्मिन् मुख्ययाजकाः
६३ फरीशिनश्च पीलातस्य समक्षं समेत्य जगदुः प्रभो स प्रवञ्चको
जीवत्काल उक्तवान् दिनत्रयात् परम् उत्थास्यामीत्यस्माभिः स्मर्यते।
६४ अतस्तृतीयं दिवसं यावत् तच्छवागारस्य रक्षणं भवतादिश्यताम्।
नोचेत् शिष्यास्तस्य नक्तमागत्य तं हृत्वा जनेभ्यः कथयिष्यन्ति स
मृतानां मध्यादुत्थापित इति। एवं सत्यादिभ्रान्तितोऽन्तिमा
६५ भ्रान्तिरनिष्टतरा भविष्यति। पीलातस्तान् जगाद, प्रहरिवर्गो
६६ युष्माकमास्ते, गत्वा तत् स्थानं यथाज्ञानं गोपयत। ते तदा
गत्वा तमश्मानं मुद्रयाङ्कयित्वा प्रहरिवर्गेणापि शवागारम् अगो-
पयन्॥२७॥

२८ अष्टाविंशोऽध्यायः।

१ ख्रीष्टोत्थानं ११ रक्षिभ्यः फरीशिनामुत्कोचदानं १६ ख्रीष्टस्य शिष्यैर्दर्शनम् आदेशश्च।

विश्रामवारे व्यतीते सप्ताहस्य प्रथमदिवसस्य प्रातःकाले मग्द- १
लीनी मरियम् सा चान्यतरा मरियम् तच्छवागारं द्रष्टुमागच्छताम्।
पश्य च तदा महान् भूकम्पोऽभूत्, यतः प्रभोरेको दूतः स्वर्गाद् २
अवरुह्य समीपमागत्य प्रस्तरं तं द्वाराल्लोठयित्वा तदुपर्य्युपविवेश।
तस्य तु विद्युदिवाभा तुषारवच्छुक्लश्च परिच्छद आस्तां तस्य भयाच्च ३
रक्षकाः समुद्विग्ना मृतकल्पाश्च बभूवुः। स दूतस्ते योषिते प्राह, ४
युवां मा भैष्टं यतोऽहं जाने युवां क्रुशारोपितं यीशुम् अन्विष्यथः। ५
स लत्र न विद्यते यतः स यथोक्तवांस्तथैवोत्थापितः। आयातं यत्र ६
प्रभुरशेत स्थानं तन्निरीक्षेथां गत्वा च सत्वरं तस्य शिष्यान् वदतं स ७
मृतानां मध्यादुत्थापितः पश्यत च स युष्मदग्रतो गालीलं याति,
तत्रैव तं द्रक्ष्यथ। पश्यतमहं युवाभ्यां कथितवान्। ततस्ते सभयं ८
महानन्देन च सत्वरं श्मशानागारात् प्रस्थाय तस्य शिष्येभ्यः संवादं
दातुम् अद्रवताम्। पश्य च शिष्येभ्यस्तयोः संवादं दातुं गच्छत्यो- ९
र्यीशुस्ते साक्षात्कृत्याब्रवीत्, युवयो र्मङ्गलं भूयात्। ते चोपागत्य
तस्य चरणौ धृत्वा भजनाम् अकार्ष्टाम्। तदा यीशुस्ते अवादीत्, १०
मा भैष्टं गत्वा तु मम भ्रातॄन् ममैनमादेशं ज्ञापयतं यत् ते
गालीलं गन्तव्यं, तत्रैव ते मां द्रक्ष्यन्तीति।

यावत् ते गच्छतः पश्य तावद् रक्षकवर्गस्य केचिन्नरा नगर- ११
मुपस्थाय यद्यद् वृत्तं तत् सर्व्वं मुख्ययाजकेभ्यो निवेदयामासुः।
ते तु प्राचीनैः सह समेत्य मन्त्रणाञ्च कृत्वा सैनिकनरेभ्यो यथेष्टा १२
रौप्यमुद्रा ददु र्बभाषिरे च यूयं वदत, शिष्यास्तस्य रात्रावागत्य १३

१४ निद्रितेष्वस्मासु तम् अचूचुरन्निति । यदि च देशाधिपतेः समक्षम्
अस्य श्रवणं भवेत्, वयं तर्हि तम् अनुनेष्यामो युष्मांश्च निःशङ्कान्
१५ करिष्यामः । ततस्ते ता मुद्रा गृहीत्वा यथा शिक्षितास्तथैव चक्रुः ।
सा च कथा यिहूदिनां मध्ये व्याप्याद्याप्यवतिष्ठते ।

१६ एकादश शिष्यास्तु गालीलं गत्वा यीशुना निर्द्दिष्टे गिरावुप-
१७ तस्थिरे । तत्र दृष्ट्वा तस्य भजनां चक्रुः । केचित्तु समशेरत । तदा
१८ यीशुः समीपमागत्य तैः संलपन् बभाषे, स्वर्गमेदिन्योर्निखिलं
१९ सामर्थ्यं मह्यम् अदायि । अतो यूयं गत्वा यावतो जातीः शिष्यान्
कुर्व्वन्तः पितुः पुत्रस्य च पवित्रस्यात्मनश्च नामोद्दिश्य तान्
२० स्नापयत, शिक्षयत च तांस्तत्सर्व्वस्य रक्षणं युष्मानहं यद्यदादिष्टवान्॥
अधिकन्तु पश्यत, युगान्तं यावत् सर्व्वदिनान्यहं युष्माभिः सार्द्ध-
मासे ॥२८॥

मार्कलिखितः सुसंवादः ।

१ प्रथमोऽध्यायः ।

१ स्नापकस्य योहनस्य वृत्तान्तः ९ खीष्टस्य स्नपनं १२ तस्य परीक्षा १४ तस्य सुसंवाद-प्रचारः १६ शिमोनस्य आन्द्रियादीनाञ्चाह्वानं २१ भूतग्रस्ताद् भूतवहिष्करणं २९ पित्रस्य श्वश्र्वा आरोग्यकरणं ३२ बहूनां लोकानामारोग्यकरणं निर्ज्जन-प्रार्थनं ४० कुष्ठिन आरोग्यकरणञ्च ।

ईश्वरपुत्रस्य यीशोः खीष्टस्य सुसंवादारम्भः । भाववादिनां ग्रन्थे १
लिखितम् आस्ते, २

पश्य त्वद्गमनस्याग्रे स्वदूतं प्रहिणोम्यहं ।
तवाग्रे तव पन्थानं स हि सज्जीकरिष्यति ॥
मरौ घोषयतः प्रोच्चैरस्त्ययं कस्यचिद् रवः । ३
प्रभोः संस्कुरुताध्वानं विधद्धं तत्पथो ऋजूः ॥

तथैव योहनः प्रान्तर उपस्थायास्नापयत् पापमोचनाय च मनः- ४
परावर्त्तनार्थकम् स्नपनम् अघोषयत् । अपि च यिहूदियाया ५
निखिलो जनपदो यिरूशालेमनिवासिनश्च तदन्तिकम् अपागच्छन्
सर्व्वे च स्वपापानि स्वीकुर्व्वाणास्तेन यर्द्दननद्याम् अस्नाप्यन्त ।
स तु योहन उष्ट्रलोमजपरिधानश्चर्म्मपट्टकया बद्धकटिश्चासीत् पत- ६
ङ्गान् वन्यमधु चाभक्षयत् । घोषणकाले तु सोऽवदत्, मत्तो बल- ७
वत्तरो नरो मत्पश्चाद् आयाति, नत्वा तदीयोपानहो बन्धन्यौ
मोक्तुमप्यहं न योग्यः । अहं तावद् युष्मान् तोये स्नापितवान्, ८
स तु युष्मान् पवित्र आत्मनि स्नापयिष्यति ।

९ तेष्वेव दिनेषु यीशु र्गालीलप्रदेशस्य नासरतग्रामाद् आगत्य योहनेन
१० यर्द्दनि स्नापयाञ्चक्रे सद्यस्स तोयान्निर्गच्छन्नेव स गगनं भिद्यमानम्
११ आत्मानञ्च कपोतमिव स्वोपर्य्यवतरमाणम् अदृशत्, स्वर्गाच्चेयं
वाणी समभूत् त्वं मम प्रियः पुत्रो यस्मिन्नहं प्रीत इति ।
१२ तत्क्षणञ्चात्मा तं मरुमपनिनाय तत्र मरौ तिष्ठंश्च स चत्वारिं-
१३ शद् दिनानि शैतानेन पर्य्यैक्ष्यत सत्त्वैः सार्द्धञ्चावत्तत स्वर्गदूताश्च
तं पर्य्यचरन् ।
१४ समर्पिते तु योहने यीशु र्गालीलमागत्येश्वरराज्यस्य सुसंवादं
१५ घोषयन्नब्रवीत्, सम्पूर्णः कालः समुपस्थितञ्चेश्वरस्य राज्यं । यूयं
मनांसि परावर्त्तयत सुसंवादे च विश्वसित ।
१६ ततः परं गालीलीयसमुद्रस्य तटे विहरन् स शिमोनं तस्य
भ्रातरम् आन्द्रियञ्च समुद्रे जालं क्षिपन्तौ ददर्श यतस्तौ धीवरा-
१७ वास्ताम् । यीशुस्तावब्रवीत् मम पश्चाद् आयातम् अहञ्च युवां
१८ मानवधारिणौ धीवरौ विधास्यामि । तदा तौ सपदि स्वजालानि
१९ त्यक्त्वा तम् अन्वव्रजन् । ततश्च स्तोकम् अग्रं गत्वा स सिबदियस्य पुत्रं
याकोबं तत्सहोदरं योहनञ्च ददर्श, जालानां जीर्णोद्धारं कुर्व्वाणौ
२० तावपि नौकायामास्ताम् । तदा सपदि तेनाहूतौ तौ स्वपितरं
सिबदियं वेतनजीविभिः सार्द्धं नौकायां त्यक्त्वा तमनुजग्मतुः ।
२१ ततः परं ते कफरनाहूमं प्रविष्टाः । सद्यश्च विश्रामवारे स
२२ समाजगृहं प्रविश्याशिक्षयत् । जनाश्च तस्य शिक्षायां चमत्कारम्
अमन्यन्त । यतः स सामर्थ्यविशिष्ट इवाशिक्षयत् न तु शास्त्राध्यापका
२३ इव । तेषां समाजे चाशुच्यात्माविष्ट एको नरोऽविद्यत स उत्क्रो-
२४ शन् जगाद, भो नासरतीय यीशो, अस्माकं भवतश्च किं ? भवान्
किमस्मान् नाशयितुमागतः ? भवान् कस्तदहं जानामि, ईश्वरस्य

पवित्रो नरो भवानिति। यीशुस्तु तं निर्भर्त्सयन् बभाषे मौनीभव, २५
अस्माच्च निःसर। तदा सोऽशुचिरात्मा नरस्य तस्याङ्गान् सङ्कोच्य २६
प्रोच्चरवेण क्रोशंस्तस्मान्निःसृतः। अनेन सर्व्वे चमत्कारं मत्वा मिथ २७
आलोचमाना अवदन्, किमिदं? का नूतनेयं शिक्षा? असौ तावत्
सामर्थ्येनाशुचीनात्मनोऽप्याज्ञापयति ते चामुष्याज्ञावर्त्तिनो भवन्ति।
अनन्तरं तस्य ख्यातिः सत्वरं गालीलस्य कृत्स्नं परिसरं व्यानशे। २८

ततः परं समाजगृहान्निर्गत्य स सत्वरं याकोबेन योहनेन २९
च सार्द्धं शिमोनस्यान्द्रियस्य च गेहं प्रविवेश। शिमोनस्य श्वश्रू तु ३०
ज्वरातुराशेत। ते च तस्मै सत्वरं तस्या अवस्थाम् अकथयन्। तदा ३१
स उपस्थाय तस्या हस्तं धृत्वा ताम् उत्थापयामास। सद्यश्च
ज्वरस्तां तत्याज सा च तान् पर्य्यचरत्।

सन्ध्यायान्तु जातायां यदा सूर्य्योऽस्तमगमत् तदास्वस्था भूता- ३२
विष्टाश्च सर्व्वे तस्यान्तिकम् आनीताः कृत्स्नं नगरञ्च द्वारि समेत्या- ३३
तिष्ठत्। स च नानाविधव्याधिभिरस्वस्थान् बहून् मानवान् स्वस्थी- ३४
चकार भूतांश्च बहून् निःसारयामास, भूतांस्तु भाषितुं नानुजज्ञे
यतस्ते तम् अभ्यजानन्।

प्रातस्त्वतीव प्रत्यूषं स उत्थाय निष्क्रान्तो निर्जनं स्थानमप- ३५
गत्य प्रार्थयत। शिमोनस्तु स्वसङ्गिभिः सार्द्धं तम् अनुदुद्राव। ३६
तमासाद्य च तेऽब्रुवन्, सर्व्वे भवन्तम् अन्विष्यन्ति। स तु तान् ३७
बभाषे, आयात, वयं समीपस्थान् ग्रामान् गच्छामः, तत्रापि मया ३८
घोषणं कर्त्तव्यं, यतस्तदर्थमहं निर्गतोऽस्मि। ततः परं स कृत्स्ने ३९
गालीले जनानां समाजगृहेष्वघोषयत् भूतांश्च निरसारयत्।

एकः कुष्ठी तु तस्यान्तिकमागत्य प्रसादयन् जानू पातयंश्च ४०
तम् अब्रवीत्, भवांश्चेदिच्छति तर्हि मां शुचीकर्त्तुं शक्नोति। तदा ४१

यीशुः करुणाविष्टो हस्तं प्रसार्य्य तं पस्पर्श बभाषे च, इच्छामि
४२ शुचीभव। एवमुक्ते तेन सपदि कुष्ठं ततोऽपससार स च शुची-
४३ भूतः। स तु तस्मिन्नधैर्य्यं गत्वा तत्क्षणं विसृज्य तं जगाद,
४४ सावधानो भव कमपि किमपि मा वद, अपि तु गत्वा याज-
कायात्मानं दर्शय तेषाञ्च साक्ष्यार्थं स्वशुचित्वलाभनिमित्तं मोशिना
४५ यद्यदादिष्टं तदुपहर। स तु निर्गत्य बहुशो घोषयितुं तां कथां
विज्ञापयितुञ्च प्रावर्त्तत, तस्मात् पुनः प्रकाशं नगरं प्रवेष्टुं तेन
नाशक्यत, अपि तु स बहि र्निर्जनेषु स्थानेष्ववर्त्तत सर्व्वतश्च जना-
स्तत्समीपमागच्छन्॥ १॥

---

२ द्वितीयोऽध्याय।

१ बहुलोकानां ख्रीष्टसमीपागमनं ३ अवशाङ्गिन आरोग्यकरणं पापमार्जनञ्च १३ मथिनाम्न आह्वानं पापिभिः सह भोजनञ्च १८ योहनस्य शिष्याणां फरीशिनाञ्चोपवासे निरुत्तरताकरणं २३ विश्रामवासरे मञ्जरी भंक्त्वा तद्भोजनं स्वशिष्याणां निर्दोषकरणञ्च।

१ कतिपयदिनेभ्यः परं स पुनः कफरनाहूमं प्रविष्टः स च गृहे
२ विद्यत इति जनैः संश्रुतम्, तत्क्षणञ्च बहवः समागतास्ततो
द्वारसमीपेऽपि स्थानं नाशिष्यत। स च तेभ्यो वाचमकथयत्।
३ तदा केचिन्नराश्चतुर्भिरुह्यमानम् एकमवशाङ्गं नयन्तस्तम् अभ्यगच्छन्
४ जनौघहेतोस्तु तदन्तिकम् उपस्थातुमशक्यत्वात् स यत्रासीत् तत्र
गृहपृष्ठं भित्त्वोत्खन्य च सोऽवशाङ्गो यत्राशेत तं पर्य्यङ्कम् अवा-
५ रोहयन्। तदा यीशुस्तेषां विश्वासं दृष्ट्वा तमवशाङ्गं जगाद, वत्स
६ तव पापानां क्षमा जातेति। तत्र तु केचिच्छास्त्राध्यापका आसीना
७ आसन्, ते स्वचित्तेष्वित्यम् अतर्कयन्, किमर्थमसावीदृशं भाषते?
स ईश्वरं निन्दति। एकस्माद् ईश्वरादन्यः कः पापानि क्षमितुं

शक्नोतीति? ते तु स्वान्तर ईदृशं तर्कयन्तीति यीशुस्तत्क्षणम् ८
आत्मन्यभिज्ञाय तान् अब्रवीत्, किमर्थं यूयं स्वचित्तेष्विमानि
तर्कयथ? अवशाङ्गमिमं कतरं वक्तुं सुकरं, तव पापानां क्षमा ९
जातेत्यथवा त्वमुत्थाय स्वपर्य्यङ्कं वहन् विहरेति? मेदिन्यान्तु १०
पापानि क्षमितुं मनुष्यपुत्रस्य सामर्थ्यमस्तीति येन यूयं जानीयात,
तदर्थं (स तमवशाङ्गमाह) त्वामहम् आदिशामि, उत्तिष्ठ, स्वप- ११
र्य्यङ्कमादाय वहन् स्वगृहं गच्छ। स च सपद्युत्थाय पर्य्यङ्कमादाय १२
वहन् सर्व्वेषां समक्षं निश्क्रान्तः। अनेन सर्व्वे चमत्कारं मत्वेश्वरं
प्रशंसन्तोऽवदन्, ईदृशं किमप्यस्माभिः कदापि नादर्शि।

ततः परं स पुनः समुद्रतटमपजगाम। कृत्स्नो जननिवहश्च १३
तत्समीपमागच्छत् स च तान् अशिक्षयत्। गच्छंश्च शुल्कादायस्थान १४
उपविष्टम् आल्फेयस्य पुत्रं मथिं दृष्ट्वा जगाद, मामनुव्रजेति।
ततः स उत्थाय तमनुजगाम। ततः परं तस्य गृहे तस्मिन् भोज- १५
नार्थमुपविशति बहवः शुल्कादायिनः पापिनश्चापि यीशुना
तच्छिष्यैश्च सार्द्धम् उपाविशन्, यतस्ते बहुसङ्ख्या आसन् तश्चान्व-
व्रजन्। तन्तु शुल्कादायिभिः पापिभिश्च सार्द्धं भक्षयन्तं दृष्ट्वा १६
शास्त्राध्यापकाः फरीशिनश्च तस्य शिष्यान् जगदुः, स किमर्थं
शुल्कादायिभिः पापिभिश्च सह भक्षयति पिबति चेति? तच्छ्रुत्वा १७
यीशुस्तान् अब्रवीत्, न बलवताम् अपि तु स्वस्थानां चिकित्सकेन
प्रयोजनम्। न धार्म्मिकान् अपि तु पापिनो मनःपरावर्त्तनाया-
ह्वातुम् अहम् आगतोऽस्मि।

तदा तु योहनस्य शिष्याः फरीशिनश्चोपावसन्, अतस्त आगत्य १८
तम् अपृच्छन्, योहनस्य फरीशिनाञ्च शिष्या उपवसन्ति, भवतः
शिष्यास्तु नोपवसन्त्येतस्य कारणं किं? यीशुस्तु तान् जगाद, कन्याया १९

वरो यावत् सखिभिः सह वर्त्तते तावत् ते किमुपवस्तुं शक्नुवन्ति ?
यावत्कालं वरस्तैः सह विद्यते तावत्कालं त उपवस्तुं न शक्नुवन्ति ।
२० आयास्यन्ति तु दिनानि यदा वरस्तेषां सान्निध्याद् अपहारिष्यते,
२१ तेष्वेव दिनेषु त उपवत्स्यन्ति । जीर्णे वाससि कोऽप्यनाहतवस्त्रस्य
खण्डं न सीव्यति, अन्यथा नूतनेन तेन पूरणोपायेन जीर्णस्य
२२ कियद्भागोऽपकृष्यते निकृष्टतरश्च भेदो जायते। अपि च कोऽपि
जीर्णासु कुतूषु नवीनं द्राक्षारसं न निधत्ते, अन्यथा नवीनो
द्राक्षारसः कुतू र्विदारयति, तेन द्राक्षारसश्च विस्रवति कुतवश्च
नश्यन्ति । अपितु नूतनासु कुतूषु नवीनो द्राक्षारसो निधितव्यः ।
२३ एकदा स विश्रामवारे शस्यक्षेत्रेणाव्रजत् तस्य शिष्याश्च गच्छ-
२४ न्तो मञ्जरी र्भङ्क्तुमारेभिरे। तदा फरीशिनस्तमवदन्, पश्यतु,
२५ विश्रामवारे यन्न विधेयं भवतः शिष्यास्तदेव कथं कुर्व्वन्ति ? स तु
तानब्रवीत्, अभावाद् दायूदस्य तत्सङ्गिनाञ्च क्षुधायां जातायां
२६ तेन यदकारि तत् किं युष्माभिः कदापि नापाठि ? महायाजक-
स्याबियाथरस्य काले स ईश्वरस्य गृहं प्रविष्टो ये च दर्शनीयपूपा
याजकेभ्योऽन्ये र्न भोक्तव्यास्तानेव सोऽभक्षयत् स्वसङ्गिभ्योऽप्यदात् ।
२७ पुनः स तान् बभाषे, मानवस्य कृते विश्रामवारः सम्भूतो न तु
२८ विश्रामवारस्य कृते मनुष्यः । अतो मनुष्यपुत्रो विश्रामवारस्यापि
प्रभुरस्ति ॥ २ ॥

---

३ तृतीयोऽध्यायः ।

१ शोषितहस्तलोकस्य तदन्येषाञ्चारोग्यकरणं १३ द्वादशशिष्याणां मनोनीतकरण
२० शास्त्राध्यापकानां निरुत्तरकरण ३१ कुटुम्बनिर्णयश्च ।

१ ततः परं स पुनः समाजगृहं प्रविवेश । तत्र च शोषितहस्तः

कश्चिन्नर आसीत्, अतः स विश्रामवारे तं स्वस्थं करिष्यति न २
वेति ज्ञातुं ते तं निरैक्षन्त, यतस्ते तमभियोक्तुम् ऐच्छन्। स तु ३
तं शोषितहस्तं मानवं जगाद, मध्यस्थान उत्तिष्ठ, तांश्चाब्रवीत्, ४
विश्रामदिने किं विधेयं? हितक्रिया किंवाहितक्रिया? प्राणरक्षा
किंवा प्राणनाशः? अनेन ते मौनमवलम्बिरे। स तु सक्रोधं ५
तान् समवलोक्य तेषां चित्तजडतायां शोचंस्तं नरं जगाद, स्वहस्तं
प्रसारय। ततस्तेन प्रसारितः स हस्तः पुनरन्यतर इव स्वस्थः प्रतिपेदे।
तदा फरीशिनो निर्गत्य तूर्णं हेरोदीयैः सह तद्विनाशोपायाकाङ्क्षया ६
तस्य विरुद्धं मन्त्रयाञ्चक्रिरे।

यीशुस्तु स्वशिष्यैः सार्द्धं समुद्रतटं जगाम। गालीलाच्च महान् ७
जननिवहस्तमन्वगच्छत्। यिहूदियातो यिरूशालेमाद् इदोमाद् ८
यर्द्दनपारस्थदेशाच्चागता मानवाः सोरसीदोनयोश्चतुर्द्दिग्भ्यो महान्
जननिवहश्च तेन यद्यत् क्रियते तच्छ्रुत्वा तदन्तिकमाजग्मुः। तदा ९
जननिवहस्य कारणाद् अर्थतः स यत्तै र्न पीड्येत तदर्थं स्वशि-
ष्यान् जगाद, एका नौका मदर्थं सज्जीकृता तिष्ठत्विति। यतः स १०
बहून् निरामयान् अकार्षीत्, ततो व्याध्यापन्नाः सर्व्वे स्प्रष्टुं यत-
मानास्तम् आकुलयन्। अशुचय आत्मानश्च यदा तम् अपश्यंस्तदा ११
प्रणिपत्य क्रोशन्तोऽवदन्, भवान् ईश्वरस्य पुत्रः। ते तु यत्तं न १२
व्यक्तीकुर्य्युस्तदर्थं स तान् भूयोऽभर्त्सयत्।

ततः परं स गिरिमारुह्य स्वकीयेच्छातः कांश्चन नरान् १३
स्वान्तिकम् आजुहाव ते च तत्समीपं जग्मुः। ये च तेन सह वर्त्तेरन् १४
घोषणार्थञ्च तेन प्रेष्येरन् व्याधीनां प्रतीकाराय च भूतानां निःसा- १५
रणाय च सामर्थ्यविशिष्टा भवेयुस्तादृशान् द्वादशनरान् स नियुयुजे। १६
[तेषां मध्ये गणिताय] शिमोनाय च पित्र इति नाम ददौ,

१७ सिबदियस्य पुत्राय याकोबाय तस्य याकोबस्य भ्रात्रे योहनाय च
स बनेरगश् इति नाम ददौ, एतस्यार्थौ मेघनादसुताविति।
१८ [शेषाणां नामानि] आन्द्रियः, फिलिपः, बर्थलमयः, मथिः,
थोमाः, आल्फेयसुतो याकोबः, थद्दियः, कानानिः शिमोनः,
१९ ईष्करियोतीयो यिहूदाश्च। एष एव तस्य समर्पयिताभूत्।
२० अपरं ते गृहं प्रविविशुः। पुनश्च महान् जननिवहः समागमत्,
२१ ततस्त आहारमपि कर्त्तुं नाशक्नुवन्। तच्छ्रुत्वा तु तस्य बन्धुजनास्तं
२२ धर्त्तुं निर्जग्मुः, यतस्तेऽवदन् स हृतबुद्धिरभूत्। यिरूशालेमाद्
आगताः शास्त्राध्यापकाश्चाऊः, स बेल्सबूलेनाविष्टः, भूतानामधि-
२३ पतेः साहाय्येन स भूतान् निःसारयतीति। तदा स तान् समी-
पम् आहूयोपमाभि र्जगाद, शैतानः कथं शैतानं निःसारयितुं
२४ शक्नुयात्? किञ्चन राज्यं यद्यात्मविरुद्धं विभज्यते तर्हि तद् राज्यं
२५ स्थातुं न शक्नोति, किञ्चन कुलञ्च यद्यात्मविरुद्धं विभज्यते तर्हि
२६ तत् कुलं स्थातुं न शक्नोति। शैतानश्च यद्यात्मविरुद्धमुत्थाय विभक्तो
२७ जातस्तर्हि स स्थातुं न शक्नोति प्रत्युतान्तं प्राप्नोति। तस्य बलवतो
गृहं प्रविश्यैव तस्य सज्जाम् अपहर्त्तुं केनापि न शक्यं। प्रथमतः
स बलवांस्तेन बध्यतां, तथानुष्ठिते तद्गृहस्य द्रव्याणि तेनापहारि-
२८ ष्यन्ते। युष्मानहं सत्यं ब्रवीमि, मनुष्यसन्तानानां सर्व्वाणि पापानि
२९ तै र्व्याहृतानि सर्व्वाणि धर्म्मनिन्दावचांसि च मार्जयिष्यन्ते, यस्तु
पवित्रस्यात्मनो विरुद्धं निन्दां व्याहरति सोऽनन्ते कालेऽपि क्षमां
३० नावाप्स्यति, अपि तु विचारेऽनन्तं दण्डमर्हति। यतस्तेऽवदन्,
असावशुचिनात्मनाविष्टः।
३१ इतिमध्ये तस्य भ्रातरो माता चागत्य वहिस्तिष्ठन्तः प्रेष्यं
३२ प्रहित्य तम् आजुहुवुः। तस्य परितस्तु जनौघ आसीन आसीत्।

अतस्ते तं जगदुः, पश्यतु भवतो माता भ्रातरश्च वहिस्तिष्ठन्ति
भवन्तमन्विच्छन्ति च। स तु तान् प्रतिबभाषे, मम माता का? ३३
मम भ्रातरश्च के? तदा स स्वपरित उपविष्टान् जनान् समवलोक्य ३४
बभाषे, पश्यत, मम माता मम भ्रातरश्चेमे। यतो यः कश्चिद् ३५
ईश्वरस्येच्छाम् आचरति स एव मम भ्राता किंवा मम भगिनी
किंवा मम माता॥ ३॥

---

४ चतुर्थोऽध्यायः।

१ वीजवापकस्य दृष्टान्तः १० तस्य तात्पर्य्यं २१ प्रदीपस्य दृष्टान्तः २४ सावधानभवनादेशः २६ वीजवर्द्धनस्य दृष्टान्तः ३० सर्षपस्य दृष्टान्तः ३३ अन्यास्च दृष्टान्तकथाः ३५ तर्जनेन समुद्रस्य निस्तरङ्गकरणं।

पुनः स समुद्रतटे शिक्षयितुम् आरेभे, तदा तु महति जनौघे १
तत्समीपं समागते स नौकां प्रविश्य समुद्र उपाविशत् कृत्स्नो
जनौघश्च समुद्रतटस्थे स्थलेऽविद्यत। स च तेभ्यो दृष्टान्तकथाभिः २
प्रचुरशिक्षाम् अददात्, विशेषतः स्वशिक्षायां तान् अब्रवीत्, शूयतां, ३
पश्य वप्ता वीजानि वप्तुं निर्गतः। तस्य वपनकाले तु कतिपयानि ४
वीजानि पथपार्श्वेऽपतन् तत आकाशस्था विहङ्गमा आगत्य तान्यभक्षयन्। अपराणि तु पाषाणमये स्थलेऽपतन् यत्र तत्कृते ५
प्रभूतमृत्तिका नासीत्। मृत्तिकाया अगभीरत्वात् तानि क्षिप्रं ६
प्रारोहन् उदिते तु सूर्य्येऽदह्यन्त मूलहीनत्वाच्चाशोष्यन्त। अपराणि ७
च कण्टकानां मध्येऽपतन् तैः कण्टकैश्च वृद्धावपीडितानि फलं
नाफलन्। अपराणि तूत्तमायां भूम्यां पतित्वा प्ररोहि वर्धिष्णु ८
च फलम् अफलन्, कानिचित् त्रिंशद्गुणं, कानिचित् षष्टिगुणं,
कानिचिच्छतगुणञ्च। स च तान् जगाद, शृणोतु यस्य श्रोतुं ९
श्रोत्रे स्तः।

१०   यदा तु स निर्जने स्थान आसीत्, तदा द्वादशभिः सह तस्य
११ सङ्गिनस्तं तस्य दृष्टान्तस्य तात्पर्य्यं पप्रच्छुः। स च तानब्रवीत्, ईश्वर-
राज्यस्य गूढविषयस्य ज्ञानं युष्मभ्यं दत्तं वहिःस्थानान्त्वमीनां कृते
१२ सर्व्वं तथोपमारूपं जायते यथा ते पश्यन्तो द्रक्ष्यन्ति न त्वनुभवि-
ष्यन्ति शृण्वन्तश्च श्रोष्यन्ति न तु भोत्स्यन्ते, अन्यथा परावृत्तानां
१३ तेषां पापक्षमा सम्भविष्यति। पुनः स तानाह, किं न जानीथ
१४ दृष्टान्तकथामिमां कथञ्च सर्व्वा दृष्टान्तकथा युष्माभि र्ज्ञातव्याः ? स
१५ वप्ता वाक्यं वपति। पथपार्श्वस्थास्च ते यत्र वाक्यमुप्यते श्रुते तु
१६ तस्मिन् शैतान आगत्य तेषां हृदयेषूप्तं वाक्यम् अपहरति। पुनः
पाषाणमये स्थले लब्धवीजास्ते ये वाक्यं श्रुत्वैव तत्क्षणं सानन्दं
१७ गृह्णन्ति तेषां त्वन्तर्मूलं नास्ति ततश्च तेऽल्पकालस्थायिनो भवन्ति
ततः परं वाक्यहेतुना क्लेश उपद्रवे वोत्पन्ने ते सद्यः स्खलन्ति।
१८ कण्टकानाञ्च मध्ये लब्धवीजास्ते ये वाक्यं शृण्वन्ति ततः परं
१९ संसारसम्बन्धीयाश्चिन्ता धनस्य माया चान्यविषयाणामभिलाषाश्च
२० प्रविश्य वाक्यमवपीडयन्ति ततस्तन्निष्फलं जायते। उत्तमायान्तु
भूम्यां लब्धवीजास्ते ये वाक्यं शृण्वन्ति गृह्णन्ति फलं फलन्ति च,
केचित् त्रिंशद्गुणं, केचित् षष्टिगुणं, केचिच्च शतगुणं।

२१   अपि च स तान् जगाद दीपो यद् द्रोणस्याधः किंवा खट्वाया
अधः स्थाप्येत तदर्थं किमायाति ? स यद् दीपाधारोपरि निधी-
२२ येत किं न तदर्थम् आयाति ? वास्तवं नास्ति किमपि गूढं यन्न
प्रत्यक्षं भविष्यति। तच्च येन सप्रकाशं स्थानं गच्छेत् तदर्थमेव
२३ प्रच्छन्नीभूतं। शृणोतु यस्य श्रोतुं श्रोत्रे स्तः।

२४   पुनः स तान् जगाद, युष्माभिः किं श्रूयते तद् आलोच्यतां।
येन परिमाणेन यूयं मिमीध्वे तेनैव युष्मदर्थं मायिष्यते, शृण्वद्भ्यश्च

युष्मभ्यम् अधिकं दायिष्यते। यतो यस्यास्ति तस्मै दायिष्यते यस्य २५
तु नास्ति तस्य यदस्ति तदपि तस्माद् अपहारिष्यते।

पुनः स बभाषे, ईश्वरराज्यं तथा यथा कश्चिन्नरो भूमौ वीजानि २६
वपति ततः प्रभृति यावत् स प्रतिरात्रं प्रतिदिनञ्च निद्रात्युत्तिष्ठति २७
च तावत् तदलक्षितरूपं वीजानि प्ररोहन्ति वर्धन्ते च, यतो भूमिः २८
स्वयमेव फलन्ती प्रथमं तृणं ततः परं मञ्जरीं पश्चाच्च मञ्जर्य्यां
सिद्धं शस्यम् उत्पादयति। परिणते तु फले स तूर्णं लवित्रं प्रयुंक्ते २९
यतः शस्यकर्त्तनकाल उपस्थितः।

पुनः स बभाषे, वयम् ईश्वरराज्यं केन सदृशं वदिष्यामः? ३०
कयोपमया वा तद् उपमास्यामहे? तत् सर्षपवीजेन सदृशं, यतो ३१
भूमौ वपनकाले तत् सर्व्ववीजेभ्यः क्षुद्रतरम्, उप्तन्तु प्ररुह्य सर्व्व- ३२
शाकेभ्यो महत्तरं जायते महतीः शाखाश्च प्रसारयति, तस्य छाया-
याञ्चाकाशीयपक्षिणो निवस्तुं शक्नुवन्ति।

ईदृशैरेव बहुभि र्दृष्टान्तैः स तेषां श्रवणशक्त्यनुरूपं तेभ्यो ३३
वाचमकथयत् दृष्टान्तन्तु विना तेभ्यः किमपि नाकथयत्। निर्ज- ३४
नन्तु स्वशिष्येभ्यः सर्व्वं व्याख्यत्।

तस्मिन् दिने सन्ध्यायां जातायां स तान् जगाद, पारं गम्यतां। ३५
अतस्ते जनौघं त्यक्त्वा तथाभूतं तं नौकायाम् अग्रहिषुः। तत्सह ३६
लपराः काश्चिन्नौका आसन्। तदा महावात्या जाता तरङ्गाश्च ३७
नावमाहनन् अनेन सा तोयेनापूर्य्यत। स तु नावः पश्चाद्भाग ३८
उपविश्योपधानमालम्ब्यानिद्रात्। अतस्ते तं प्राबोधयन् व्याहरंश्च
भो गुरो वयं नश्यामोऽत्र भवान् किं निश्चिन्तः? तदा स जागरितो ३९
वायुं तर्जयामास समुद्रञ्च जगाद मौनं कुरु तूष्णीम्भव। अनेन
वायुः शशाम सम्पूर्णं निर्वातो बभूव च। स च तान् जगाद, ४०

४१ किमर्थमीदृशं भीरवः स्थ? यूयं विश्वासहीनाः कथमेतत्? तदा
ते महाभयग्रस्ता मिथो जगदुः, को न्वयं यद् वायुः समुद्रश्चा-
प्यस्याज्ञा गृह्णीतः॥ ४ ॥

---

५ पञ्चमोऽध्यायः।

१ अनेकभूतग्रस्तारोग्यकरणं २१ समाजाध्यक्षकन्यारोग्यकरणार्थंगमनं २५ प्रदर-रोग्यारोग्यकरणं ३५ समाजाध्यक्षकन्यायै जीवनदानञ्च।

१ ततः परं ते समुद्रपारस्थं गादारीयाणां देशं प्रापुः। नौकातश्च
२ निर्गते तस्मिन् तत्क्षणं शवागारेभ्य आगतः कश्चिद् अशुचिभूताविष्टो
३ नरस्तस्य समक्षमुपतस्थे। स शवागारेषु कृतनिवास आसीत् कश्चिच्च
४ तं शृङ्खलैरपि बद्धुं नाशक्नोत् यतः बहुकृत्वो निगडैः शृङ्खलैश्च
बद्धेन तेन शृङ्खलानि विदीर्णानि निगडानि च चूर्णितानि तं
५ शमयितुं शक्तिमान् कोऽपि नासीत्। स दिने च रात्रौ च निरन्तरं
गिरिषु शवागारेषु वा तिष्ठन्नक्रोशत् प्रस्तरैश्चात्मानम् अकृन्तत्।
६ दूरात्तु यीशुं दृष्ट्वा सोऽभिधाव्य तस्य भजनं चकार महारवेण च
७ क्रोशन् व्याजहार भो परात्परस्येश्वरस्य पुत्र यीशो भवता सह मम
८ कः सम्बन्धः? ईश्वरेण भवन्तं शापयामि मां मा यातयतु। यतो
९ यीशुस्तमवदत् रे अशुचे आत्मन् मनुष्यादस्मान्निःसर। स च तं
पप्रच्छ तव नाम किं? स प्रत्युवाच वाहिनीति मम नाम यतो
१० वयं बहवः। भवानस्मानेतद्देशाद् वहि र्मा प्रेषयत्वित्युक्त्वा च स तं
११ भृशं प्रसादयामास। तत्र गिरिनितम्बे तु महान् शूकरव्रजोऽचरत्।
१२ अतस्ते सर्व्वे भूताः प्रार्थयमानास्तमवदन्, अमून् शूकरान् प्रत्यस्मान्
१३ विसृजतु, वयं तान् शूकरान् प्रविशाम। ततो यीशुना तूर्णम्
अनुज्ञातास्तेऽशुचय आत्मानो निःसृत्य तान् शूकरान् प्रविविशुस्तेन

स कृत्स्नो व्रजः सवेगं धावन् शैलाग्रात् समुद्रे निपपात। ते शूकराः
प्रायेण द्वे सहस्रे आसन्, सर्व्वे च समुद्रे पञ्चत्वं गताः। शूकर- १४
रक्षकास्तु पलाय्य नगरे पल्लीषु च संवादं व्याज्ञापयामासुः। ततो
यद् वृत्तं तद् द्रष्टुं मनुष्या वहिराजग्मुः। यीशोः समीपमुपस्थाय १५
च वाहिन्याविष्टः स भूतग्रस्तो नर उपविष्टो वस्त्रान्वितः सुबुद्धिश्चेति
पश्यन्तस्ते बिभ्युः। ये च दृष्टवन्तस्ते तेभ्यस्तस्य भूताविष्टस्य वृत्तान्तं १६
शूकराणाञ्च कथां निवेदयामासुः। ततस्ते यीशुं स्वसीमातोऽप- १७
सरणं याचितुमारेभिरे। तस्मिंस्तु नावं प्रविशति स भूताविष्टस्तं १८
सविनयं ययाचे, अहं यद् भवता सार्द्धं तिष्ठेयं तदनुमन्यतामिति।
यीशुस्तु नानुमन्य तं जगाद, स्वगृहं स्वजनसमीपं याहि, प्रभुस्त्वा- १९
मनुकम्प्य त्वदर्थं यत् कृतवांस्तत् सर्व्वं तेभ्यो निवेदय च। ततः स २०
गत्वा तं प्रति यीशुना यदकारि तत् सर्व्वं दिकापल्यां घोषयितुमारेभे,
तेन मानवाः सर्व्वे आश्चर्य्यममन्यन्त।

ततः परं यीशौ नावा ह्रदं तरित्वा पुनः पारम् आगते २१
महान् जनौघस्तत्समीपे समाययौ स तु समुद्रतट आसीत्। पश्य २२
च समाजाध्यक्षाणां मध्ये याईरनामा नर एक आगच्छत् तञ्च
दृष्ट्वा तस्य चरणयोः प्रणिपपात तञ्च भृशम् अनुनयन्नवदत्, मम २३
क्षुद्रा दुहिता मृतकल्पा। भवान् आगत्य तस्यां हस्तावर्पयितुम्
अर्हति, तेन सा तरित्वा जीविष्यति। ततः स तेन सह जगाम, २४
महान् जननिवहस्च तम् अनुव्रजन्नपीडयत्।

तदा त्वाद्वादशवर्षेभ्यः प्रदररोगेण शीर्णा या काचिद् योषिद् २५
बहुभिश्चिकित्सकै र्भृशं क्लिष्टा सर्व्वस्वं व्ययित्वापि कमप्युपशमं न लब्धवती २६
प्रत्युताधिकमस्वस्था जाता सा यीशोः कथां श्रुत्वा जनौघस्य मध्येन २७
प्रच्छन्नं पश्चाद् उपस्थाय तस्य वसनं पस्पर्श यतः सावदत् तस्य २८

२९ वासांसि स्पृष्ट्वाहं तरिष्यामि। सद्यस्तु तस्याः शोणितोत्सः शुष्कीभूतः
३० सा च यद् व्याधिमुक्ताभूत् तत् स्वदेहेऽनुबभूव। यीशुस्तु सपदि
स्वतः प्रभावस्य निर्गमनं ज्ञात्वा जननिवहस्य मध्ये परावृत्य पप्रच्छ,
३१ को मम वसनं स्पृष्टवान्? तस्य शिष्यास्तम् अवादिषुः, जनौघेन
भवान् पीड्यते तत् पश्यति, तथापि पृच्छति, को मां स्पृष्टवानिति।
३२ तत्तु ययाकारि तां दिदृक्षुः स पर्य्यपश्यत्। तदा सभया सकम्पा
३३ च सा योषिद् आत्मनि यद् वृत्तं तज्ज्ञात्वोपस्थाय तत्सम्मुखं
३४ प्रणिपत्य सर्व्वं यथातथ्यं निवेदयामास। स तु तां जगाद, वत्से
तव विश्वासस्त्वां तारयामास, कुशलं याहि स्वव्याधितो मुक्ता
तिष्ठ च।

३५ यावत् स एतद् भाषते तावत् तस्य समाजाध्यक्षस्य गृहात्
केचिन्नरा आगत्यावदन्, भवतो दुहिता ममार, किमर्थं गुरुम्
३६ अधिकं क्लिश्नीयात्? यीशुस्तु ताम् उच्यमानां कथां सपद्युपश्रुत्य
३७ तं समाजाध्यक्षं जगाद, मा भैषीः केवलं विश्वसिहि। स च पितरं
याकोबं याकोबस्य सहोदरञ्च योहनमपहायापरं कमपि स्वानुव्र-
३८ जनाय नानुमेने। ततः परं समाजाध्यक्षस्य गृहमागत्य भृशं रुदतां
३९ क्रोशताञ्च कोलाहलं दृष्ट्वा स प्रविश्य तान् जगाद, किमर्थं
कोलाहलं कुरुथ रुदिथ च? न मृता सा बाला सा निद्राणा।
४० ततस्ते तम् उपजहसुः। स तु तान् सर्व्वान् वहिः कृत्वा स्वसार्द्धं
बालिकायाः पितरं मातरञ्च स्वसङ्गिनश्च नयन् बालिकायाः
४१ शयनागारं प्रविवेश। तस्या बालिकाया हस्तञ्च गृहीत्वा तां जगाद,
तालिथा-कूमीति। भाषान्तर एतस्यार्थोऽयं, बालिके, उत्तिष्ठेति
४२ ममाज्ञा। सा च बालिका सपद्युत्थाय विहर्त्तुं प्रावर्त्तत, यतः
सा द्वादशवर्षवयस्कासीत्। तदा मानवा महाचमत्कारं मेनिरे।

स तु तान् दृढमादिशत्, एतत् केनापि न ज्ञातव्यम्। अपि च ४३
स तस्यै भक्ष्यदानम् आज्ञापयामास॥ ५॥

---

६ षष्ठोऽध्यायः।

१ ख्रीष्टस्यावज्ञानं ७ शिष्येभ्यः शक्तिदानं १४ योहनस्नापकस्य बधः ३० ख्रीष्टस्य विजनगमनम् ३५ पञ्चपूपद्विमत्स्यैः पञ्चसहस्रलोकभोजनम् ४५ सिन्धौ पद्भ्यां गमनं ५३ बहुलोकारोग्यकरणञ्च।

ततः परं स तस्मात् स्थानान्निर्गत्य स्वदेशमागमत् तस्य शिष्याश्च १
तम् अन्वगच्छन्। उपस्थिते तु विश्रामवारे स समाजगृहे शिक्ष- २
यितुम् आरेभे बहवश्च श्रोतार आश्चर्य्यं मन्यमाना अवदन्,
कुतोऽमुना सर्व्वमेतदलम्भि? अमुष्मै दत्तञ्चेदं किं ज्ञानं? अमुष्य
कराभ्यामीदृशानि प्रभावस्य कर्म्माणि कथं साध्यन्ते? अमौ किं ३
नास्मदीयतक्षा मरियमः सुतो याकोबस्य योषे यिहूदाः शिमो-
नस्य च भ्राता? अमुष्य भगिन्योऽपि किं नात्रास्मन्निकटे वर्त्तन्ते?
इत्थं ते तस्मिन् स्खलिताः। यीशुस्तु तान् अब्रवीत्, नान्यत्र ४
कुत्रापि भाववाद्यसम्मानितः केवलं स्वदेशे स्वकुले स्वगृहे च।
अतः स तत्र प्रभावसिद्धं किमपि कर्म्म कर्त्तुं नाशक्नोत् केवलं ५
स्वल्पान् अस्वस्थान् नरान् हस्तार्पणेन निरामयान् अकार्षीत्।
तेषाम् अविश्वासे चातीवाश्चर्य्यं मेने। ततः परं स परितः स्थितेषु ६
ग्रामेषु पर्य्यटन्नशिक्षयत्।

अपि च स पूर्व्वोक्तान् द्वादश शिष्यान् स्वसमीपम् आहूय द्वौ ७
द्वौ कृत्वा प्रेषयितुम् आरेभे, तेभ्यश्चाशुचीनाम् आत्मनां कर्त्तृत्वम्
अदात्। तांश्चेदमादिदेश, यात्रार्थं केवलं यष्टिमादायान्यत् किमपि ८
मादद्ध्वं, भिक्षाधारं, पूपं, पटुकायां वा मुद्रा मादद्ध्वं, अपि तु ९
काष्ठोपानहौ बध्नीत, द्वे लङ्गाच्छादने मा परिधद्ध्वं। स तान् १०

इदमपि जगाद, यत्र कुत्रचिद् गृहं प्रविश्य, स्थानान्तरगमनं
११ यावत् तत्रावतिष्ठध्वं। ये च सर्व्वे मानवा युष्मान् नानुगृह्णन्ति
युष्मद्वाक्यानि च न शृण्वन्ति, तेषां स्थानान्निर्गत्य तेषां विरुद्धं
साक्ष्यार्थं स्वचरणाधःस्थितां मृत्तिकामप्यवधुनुत। युष्मानहं सत्यं
ब्रवीमि, विचारदिने सदोमस्य घमोराया वा दशा तस्य नगरस्य
१२ दशातः सह्यतरा भविष्यति। अतस्ते निर्गत्य मनःपरावर्त्तनस्य
१३ कर्त्तव्यताम् अघोषयन्, बहून् भूतांश्च निरसारयन् अस्वस्थांश्च
बहून् तैलेनाभिषिच्य निरामयान् अकुर्व्वन्।
१४ तदा तस्य नाम्नि प्रसिद्धतां गते राजा हेरोदस्तस्य ख्यातिं
श्रुत्वाब्रवीत्, स्नापको योहनो मृतानां मध्याद् उत्थितस्ततो
१५ हेतोः प्रभावास्तस्मिन् स्वकार्य्यं साधयन्ति। अन्ये लवदन् स
एलियः। अपरे चावदन् स भाववादी किंवा भाववादिनाम् एकेन
१६ सदृशः। हेरोदस्तु श्रुत्वा जगाद, यस्य योहनस्य शिरो मया छिन्नं
स एवासौ। स मृतानां मध्यादुत्थितः।
१७ वास्तवं हेरोद एव स्वभ्रातुः फिलिपस्य भार्य्यां यां हेरोदि-
यामुदूढवांस्तस्याः कारणात् प्रेष्यान् प्रहित्य योहनं धृत्वा कारायां
१८ बद्धवान्। यतो योहनो हेरोदमगदत्, भ्रातृभार्य्यायाः स्वामित्वं
१९ त्वया न विधेयमिति। हेरोदिया च तस्मै पर्य्यकुप्यत् तञ्च हन्तुम्
२० ऐच्छत् न लशक्नोत्। यतो हेरोदो योहनं धार्म्मिकं पवित्रञ्च नरं
ज्ञात्वा तस्मादबिभेत् तञ्चारक्षत् तस्यादेशं श्रुत्वा च बहूनि कर्म्माण्य-
२१ करोत् प्रीतश्च तस्य वाक्यान्याकर्णयत्। अपरम् उपस्थिते शुभदिने
यदा हेरोदः स्वीयजन्मोत्सवे स्वीयमहल्लोकानां सहस्रपतीनां
२२ गालीलीयप्रथमानाञ्च निमित्तं रात्रिभोज्यम् अकरोत्, तदा तस्या
हेरोदियाया दुहितरि सभां प्रविश्य नृत्येन हेरोदस्य तत्रोपवि-

ष्टानां तत्सङ्गिनाञ्च प्रीतिमुत्पादितवत्यां राजा तां बालिकामब्रवीद्
यद् वाञ्छसि तन्मां याचस्व तदेव तुभ्यं दास्यामि। अपि च स २३
शप्त्वा तां जगाद, यद् वाञ्छसि तत् तुभ्यं दास्यामि, अर्द्धराज्य-
पर्य्यन्तं तद् दास्यामि। तदा सा निर्गत्य स्वजननीम् अप्राक्षीत्, किं २४
याचिष्ये? सा जगाद, स्नापकस्य योहनस्य मस्तकमिति। ततः २५
सा क्षिप्रं सोत्साहं प्रविश्य राज्ञोऽन्तिकं गत्वायाचिष्ट यथा भवान्
सपदि मह्यं स्थाले स्नापकस्य योहनस्य मस्तकं ददात्वियं मम
वाञ्छा। अनेन राजा शोकार्त्तो जातोऽपि शपथानां सङ्गिनाञ्च २६
भयात् तां प्रत्याख्यातुं नैच्छत्। अतो राजा तूर्णं प्रतिहारिणं २७
प्रहित्य तस्य शिरस आनयनमादिदेश। स च गत्वा कारायां तस्य २८
शिरश्छित्त्वा स्थाले निधायानीय बालिकायै ददौ बालिका च
स्वमात्रे तद् ददौ। सर्व्वमेतच्छ्रुत्वा तस्य शिष्या आगत्य तस्य २९
देहम् आदाय शवागारे निदधुः।

ततः परं प्रेरिता यीशोः समक्षं समाजग्मुः, यच्च कृतवन्तः ३०
शिक्षितवन्तश्च तत् सर्व्वं तस्मै निवेदयामासुः। स च तान् जगाद, ३१
यूयमेव गुप्तं निर्जनं स्थानमागत्य किञ्चिद् विश्राम्यत। यत आगच्छ-
तामपगच्छताञ्च महती सङ्ख्यासीत्, आहारायाप्यवकाशस्तेषां नाभवत्। ३२
अतस्ते गुप्तं नावमारुह्य निर्जनं स्थानं जग्मुः। जननिवहास्तु गच्छत- ३३
स्तान् अपश्यन् बहवश्चाभ्यजानन्, अतः सर्व्वनगरेभ्यो मानवाः स्थलमा-
र्गेण तत्र धावन्तस्तान् अतिचक्रमुस्तस्य समीपं समाजग्मुश्च। यीशुस्तु ३४
बहिरेत्य महान्तं जननिवहं दृष्ट्वा तान् अनुचकम्पे, यतस्ते हीनर-
क्षकै र्मेषैः सदृशा आसन्। स च तेभ्यः प्रभूतां शिक्षां दातुमारेभे।

इत्थं दिनस्य महाभागेऽतीते शिष्या उपागत्य तमूचुः, निर्ज- ३५
नमिदं स्थानं गतञ्च बहुतरं दिनं। भवान् अमून् विसृजतु यथा ३६

ते परितः स्थिताः पल्ली ग्रामांश्च गत्वा स्वार्थं पूपान् क्रीणीयु
३७ र्यतस्तेषां खाद्यं नास्ति। स तु तान् प्रतिबभाषे, यूयमेव तेभ्य
आहारं दत्त। अनेन ते तम् अब्रुवन्, वयं किं गत्वा द्विशतमुद्रापादैः
३८ पूपान् क्रीत्वामीभ्य आहारं दास्यामः? स तु तान् पप्रच्छ,
युष्मदन्तिकं कति पूपा विद्यन्ते? गत्वा पश्यत। ते तदवगत्याब्रुवन्,
३९ पञ्च पूपा द्वौ मत्स्यौ च। ततः स तान् हरिति तृणे पङ्क्तिभिः
४० सर्व्वेषाम् उपवेशनमादिदेश। तदा त आहारार्थं शतं शतं पञ्चाशत्
४१ पञ्चाशच्च नराश्चतुरस्रपङ्क्तिभिरुपविष्टाः स च तान् पञ्च पूपान् द्वौ
मत्स्यौ चादाय स्वर्गं प्रत्युच्चदृष्टि र्भूत्वाशिषमवादीत्, पूपांश्च भङ्क्त्वा
४२ तेभ्यः परिवेषणार्थं स्वशिष्येभ्योऽददात् तौ द्वौ मत्स्यावपि सर्व्वेषां
४३ कृते विभेजे। इत्थं सर्व्वे भुक्त्वा तृप्ताः। भग्नांशान् सङ्गृह्य च द्वादश-
४४ डल्लकान् पूरयामासुः, मत्स्ययोरपि भग्नांशान् आददिरे। ते पूप-
भोक्तारः प्रायः पञ्चसहस्रपुरुषा आसन्।

४५ ततः परं स सपदि सोत्साहं स्वशिष्यान् नावं प्रवेष्टुं यावच्च
४६ स जनौघं विसृजति तावद् अग्रतो बैत्सैदामुद्दिश्य गन्तुमादिदेश।
४७ अनन्तरं स जनान् अनुज्ञाय प्रार्थयितुं गिरिमारुरोह। सन्ध्या-
यान्तूपस्थितायां नौका मध्यसागरं स चैकाकी स्थल आसीत्।
४८ नौकावाहने च ते क्लिश्यन्ते यतो वायुस्तेषां सम्मुख इति तेनादर्शि।
प्रायो यामिन्याश्चतुर्थे यामे तु स समुद्रोपरि व्रजंस्तेषां समीपमा-
४९ गमत् तानतिक्रमितुञ्च प्रावर्त्तत। ते च समुद्रोपरि व्रजन्तं तं
५० दृष्ट्वापच्छायां मत्वा चुक्रुशुः, यतः सर्व्व एव तं पश्यन्त उद्वि-
विजिरे। स तु तूर्णं तानालपन्नब्रवीत्, आश्वसित, सोऽहं, मा
५१ भैष्ट। ततः परं स नौकामारुह्य तेषां समीपम् उपतस्थे वायुश्च
५२ शशाम। अनेन ते मनःस्वतिमात्रं विस्मिता आश्चर्य्यं मेनिरे,

यतः पूपानां दृष्ट्वा तै र्न बुद्धं, तेषां हृदयन्तु जडीभूतमासीत्।
तरित्वा ते गिनेषरताख्यं जनपदम् उपस्थाय नावं कूले बबन्धुः। ५३
नावस्तु निर्गतेषु तेषु मानवाः सपदि तमभिज्ञाय धावन्तो निक- ५४
टस्थं कृत्स्नं प्रदेशं गत्वा पर्य्यङ्कैरस्वस्थान् वहन्तो यत्र कुत्रापि ५५
तस्योपस्थितेः संवादम् अशृण्वंस्तत्तत् स्थानं निन्युः। तस्मिंश्च ५६
ग्रामान् नगराणि वा पल्ली र्वा प्रविशति मानवा अस्वस्थान् हट्ट-
स्थानेषु निधाय तैस्तदीयवस्त्रग्रन्थिकस्पर्शनमेव तमयाचन्त, याव-
न्तस्त्वास्पृशंस्ते सर्व्वे तेरुः॥ ६ ॥

---

७ सप्तमोऽध्यायः।

१ अप्रक्षालितहस्तैर्भोजनकथा १४ मनुष्याशुचिकरणकारणनिर्णयः २४ सुरफैनिकीयस्त्रियाः कन्यारोग्यकरणं ३१ बधिरकद्वदनारोग्यकरणञ्च।

एकदा फरीशिनः शास्त्राध्यापकानाञ्च केचिन्नरा यिरूशालेमत १
आगत्य तस्यान्तिकं समाजग्मुस्तस्य कतिपयांश्च शिष्यान् अपवित्रै- २
रर्थतोऽप्रक्षालितै र्हस्तैराहरतो दृष्ट्वा निनिन्दुः। यतः फरीशिनो ३
यिहूदीयाश्च सर्व्वे प्राचीनानां परम्परागतां शिक्षां रक्षन्तीतिहेतोः
सयत्नं हस्तान् अप्रक्षाल्य न भक्षयन्ति। हट्टाच्चागता न स्नात्वा न ४
भक्षयन्ति। अन्या अपि बह्वो रीत्यस्तैः शिक्षिता रक्ष्यन्ते, यथा
पानपात्राणां भाण्डानां तैजसभाजनानां शय्यानाञ्च स्नपनम्।
अतः फरीशिनः शास्त्राध्यापकाश्च तमपृच्छन्, तव शिष्याः किमर्थं ५
प्राचीनानां परम्परागतां शिक्षाम् अनाचरन्तोऽप्रक्षालितै र्हस्तैः
खाद्यमाहरन्ति? स तु तान् प्रतिजगाद, कपटिनो युष्मानधि ६
यिशायाहः समीचीनां भाववाक्तिं व्याहृतवान्, यथा लिखितमास्ते,

अधरैरेव कुर्व्वन्ति मत्सम्मानं जना इमे।
किन्त्वन्तःकरणं तेषां मत्तो दूरमवस्थितं॥

७ अलीकार्थन्त्विमे सर्व्वे मम कुर्व्वन्ति सेवनं।
धर्म्मशिक्षाछलेनैव शिक्षयन्तो नृणां विधीन्॥

८ यतो यूयमीश्वरस्याज्ञां विहाय मानवानां परम्परागतां शिक्षां
रक्षन्तो भाण्डानां पानपात्राणाञ्च क्षपनं तत्सदृशा अन्याश्च
९ बह्वः क्रियाः कुरुथ। स पुनस्तान् जगाद, युष्माकं परम्परागतां
१० शिक्षां रक्षितुकामा यूयं वाढम् ईश्वरस्याज्ञां व्यर्थीकुरुथ। यतो
मोशिः कथयामास, त्वं निजपितरं मातरञ्च सम्मन्यस्वेति, अपि च
११ यो निजपितरं मातरं वा शपेत स वध्यो भविष्यतीति। यूयन्तु
वदथ, मत्तो यद्दानेन तवोपकारः समभविष्यत् तत् कर्वाणमर्थत
ईश्वरायोपहृतमित्थं पित्रे मात्रे वा यो मनुष्यः कथयतीति।
१२ यूयञ्च तत्पश्चात् तं पितु र्मातु र्वा कमप्युपकारं कर्त्तुं नानुजा-
१३ नीथ। अनेन स्वपरम्परागतशिक्षयेश्वरस्य वाक्यं व्यर्थीकुरुथ। ईदृशी
र्बह्वः क्रियाश्च कुरुथ।

१४ अनन्तरं स जननिवहं पुनः स्वसमीपमाहूय बभाषे, सर्व्वै
१५ र्युष्माभिः श्रुत्वा बुध्यतां। वाह्यान्मनुष्यस्यान्तरं प्रविश्य यत् तम्
अपवित्रीकर्त्तुं शक्नोति तादृशं किमपि नास्ति। प्रत्युत यद्यत्
१६ तस्मान्निःसरति तत्तदेव मनुष्यम् अपवित्रीकरोति। शृणोतु यस्य
श्रोतुं श्रोत्रे स्तः।

१७ तस्मिंस्तु जननिवहं त्यक्त्वा गृहं प्रविष्टे शिष्यास्तं तस्या उपमाया
१८ अर्थं पप्रच्छुः। ततः स तान् जगाद, किं यूयमप्येवं निर्बोधाः?
यत् किञ्चन वाह्यान्मनुष्यं प्रविशति तत् तम् अपवित्रीकर्त्तुं न
१९ शक्नोत्येतत् किं न बुध्यध्वे? तत् तावन्न तस्य हृदयं प्रविशत्यपि
२० तूदरमेव प्रविश्य सर्व्वभुक्तस्य शूचीकारकं शौचकूपं निर्यात। स
पुन र्जगाद, मनुष्याद् यन्निःसरति तदेव मनुष्यम् अपवित्रीकरोति।

यतोऽन्तरान्मनुष्याणां हृदयादेव कुचिन्ता निःसरन्ति यथा व्यभि- २१
चारा वेश्यागमनानि नरहत्याश्चौर्य्याणि लोभा अपकाराश्छलः २२
स्वैरिता कुदृष्टि र्धर्म्मनिन्दाभिमानो मूढता। सर्व्वाण्येतान्यशुभा- २३
न्यन्तरान्निःसरन्ति मनुष्यम् अपवित्रीकुर्व्वन्ति च।

तस्मात् स्थानादुत्थाय स सोरसीदोनयोः सीमानं गत्वा २४
किमपि गेहं प्रविवेश, तत्र केनापि न ज्ञातव्यमित्यवाञ्छत् न
लशक्नोद्गुप्तः स्थातुम्। यतो यस्याः क्षुद्रा दुहिताशुच्यात्मा- २५
विष्टासीत् तादृशी काचित् स्त्री तच्छ्रुत्वागत्य तस्य चरणयोः
प्रणिपपात। सा योषित् सुरफैनीकीयजातीया यूनानीयासीत्।
स यथा तस्या दुहितुस्तं भूतं निःसारयेत् तदेव तयायाच्यत। २६
यीशुस्तु ताम् अब्रवीत्, प्रथमं बालकांस्तृप्तुमनुमन्यस्व, यतो २७
बालकानां खाद्यं हृत्वा सारमेयेभ्यो दानं न भद्रं। अनेन सा तं २८
प्रतिजगाद, सत्यं प्रभो, यतो भोज्यमञ्चस्याधो बालकानां फेल्याः
सारमेयै र्भक्ष्यन्ते। ततः स तां जगाद, अस्य वाक्यस्य हेतुतो २९
याहि, तव दुहितुः स भूतो निर्गतः। सा च स्वगृहं गत्वा तं भूतं ३०
निर्गतं स्वदुहितरञ्च पर्य्यङ्के शयानां ददर्श।

पुनः सोरसीदोनयोः सीमतः प्रस्थाय स दिकापलेः सीम्नां ३१
मध्येन गालीलीयसमुद्रस्यान्तिकमाजगाम। तत्र मानवाः स्खलित- ३२
वाचमेकं बधिरं तत्समीपमानीय स यत् तस्मिन् हस्तावर्पयेत्
तदयाचन्त। ततः स तं जननिवहान्निर्ज्जनं स्थानमपनीय तस्य ३३
कर्णयोः स्वाङ्गुली र्निधाय निष्ठीवंस्तस्य जिह्वां पस्पर्श स्वर्गं प्रत्युच्च- ३४
दृष्टिं कृत्वा च निश्वस्य तं जगाद, इप्फाथाह, अस्यार्थो मुच्यस्वेति।
सपदि च तस्य कर्णावुद्घाटयाञ्चक्राते जिह्वाबन्धनञ्च मुमुचे स ३५
स्पष्टवाग् बभूव च। यीशुस्त तानादिदेश, यूयं कमप्येतन्मा वदत। ३६

३७ स तु यावदधिकं तानादिशत् तावदधिकं तेऽघोषयन्, अतिमात्रं
चमत्कृताश्चावदन्, स सर्व्वमेव सम्यक् चकार, वधिरांश्च श्रवणे
मूकांश्च कथने समर्थीकृतवान् ॥ ७ ॥

---

८ अष्टमोऽध्यायः ।

१ सप्तपूपकियन्मत्स्यैश्चतुःसहस्रपुरुषभोजनं १० गगणीयचिह्नदर्शयितुम् अनङ्गीकारः १४ शिक्षारूपकिण्वकथा २२ अन्धाय नेत्रदानं २७ ख्रीष्टनिर्णयः ३१ ख्रीष्टस्य स्वमृत्युभोगीयभविष्यद्वाक्यं ३४ अनुगामिलोकान् प्रत्युपदेशः ३९ भविष्यद्वाक्यञ्च ।

१ तेषु दिनेष्वेकदातीव महति जनारण्ये सति तेषाञ्च खाद्याभावे
२ जाते यीशुः शिष्यान् स्वसमीपमाहूय जगाद, अनुकम्पेऽहममून्
मानवान्, यतस्त्रीण्येव दिनानि ते मत्समीपम् अवस्थिताः खाद्यञ्च
३ किमपि तेषां नास्ति । अनशनास्तु ते चेन्मया स्वगेहेषु निसृज्यन्ते
४ तर्हि पथ्यवसत्स्यन्ति, यतस्तेषां केचित् सुदूरादागताः । तस्य
शिष्यास्तं प्रतिजगदुः, अत्र निर्जने स्थाने कः कस्मात् पूपान्
५ लब्धामून् तर्पयितुं शक्नुयात्? स तान् पप्रच्छ, युष्माकं कति पूपाः
६ सन्ति? तेऽब्रुवन्, सप्तैव । ततः स जननिवहं भूमावुपवेष्टुमादिदेश,
तान् सप्त पूपांश्चादाय भङ्क्त्वा च परिवेषणार्थं स्वशिष्येभ्योऽददात्,
७ ते च जनौघाय पर्य्यवेषयन् । स्वल्पाः क्षुद्रा मत्स्या अपि तेषामा-
सन्, स आशिषं वदित्वा तेषामपि परिवेषणमाज्ञापयामास ।
८ इत्थं ते बुभुजिरे तट्टपुश्च, अवशिष्टस्य भग्नांशैः पूर्णान् सप्त
९ पेटकांश्चाददिरे । ते भोक्तारः प्रायश्चतुःसहस्राण्यासन् । अनन्तरं
स तान् विससर्ज ।

१० तत्क्षणञ्च स स्वशिष्यैः सह नावं प्रविश्य दाल्मानूथेतिनामके
११ प्रदेश उपतस्थे । फरीशिनस्तु वहिरागत्य तेन सह वादानुवादौ
कर्त्तुमारेभिरे परीक्षमाणाश्च तं गगनात् किमप्यभिज्ञानं ययाचिरे ।

स त्वात्मना निश्वस्य जगाद, एतत्कालस्य मानवाः किमर्थमभिज्ञानं १२
याचन्ते? युष्मानहं सत्यं ब्रवीमि, वंशायास्मै किमप्यभिज्ञानं न दायि-
ष्यते। इत्युक्त्वा स तांस्त्यक्त्वा पुन र्नावं प्रविश्यापरपारं प्रतस्थे। १३

तैस्तु विस्मृत्य पूपा नानीता नावि च तैः साकं केवलमेकः १४
पूप आसीत्। स च तानादिशत्, सतर्का भवत, फरीशिनां १५
किण्वतो हेरोदस्य च किण्वतः सावहिता भवत। अनेन ते मिथो १६
विचारयन्तोऽवदन्, अस्माकं पूपा न सन्ति तदेतत् कथयति।
यीशुस्तु ज्ञात्वा तान् जगाद, युष्माकं पूपा न सन्तीति किं १७
विचारयथ? इदानीमपि किं न जानीथ न वा बुध्यध्वे? अधुनापि १८
किं जडहृदो यूयं? सनेत्राः किं न पश्यथ? सकर्णाः किं न
शृणुथ नापि स्मरथ? पञ्चसहस्रेभ्यहं यदा पञ्च पूपान् अभाञ्ज्ं १९
तदा भग्नांशैः पूर्णाः कति डल्लका युष्माभिरादत्ताः? ते तं वदन्ति,
द्वादशेति। चतुःसहस्रेषु च यदा सप्त पूपानभाञ्ज्ं, तदा भग्नांशैः २०
पूर्णाः कति पेटका आदत्ताः? तेऽवदन्, सप्तेति। ततः स तान् २१
बभाषे, युष्माभि र्न बुध्यते कथमेतत्?

बैत्सैदायान्तूपस्थिते तस्मिन् मानवा अन्धमेकमानीय प्रसादय- २२
न्तस्तं तस्य स्पर्शनं ययाचिरे। ततः स तस्यान्धस्य हस्तं धृत्वा तं २३
ग्रामाद् वहि र्निनाय तन्नेत्रयो र्निष्ठीव्य च तस्मिन् करावर्पयित्वा
तं पप्रच्छ त्वया किमपि दृश्यते किं? अनेन स दृक्पातं कृत्वा- २४
ब्रवीत्, मनुष्यान् निरीक्षे यतः पादपानिव तान् विहरतः पश्यामि।
तदा स पुनस्तन्नेत्रयोः करावर्पयित्वा तं दृक्पातं कारयामास। २५
अनेन तस्यान्धत्वप्रतीकारे जाते स सर्व्वान् सुस्पष्टमपश्यत्। स तु २६
तं गेहाय विसृज्य जगाद, ग्राममपि मा प्रविश ग्रामस्थं वा कमपि
मा ज्ञापय।

२७ ततः परं यीशुस्तच्छिष्याश्च कैसरियाफिलिप्या ग्रामान् जग्मुः ।
पथि च स शिष्यान् पप्रच्छ, मानवा मां कं ज्ञात्वा वदन्तीति ।
२८ ते प्रत्यूचुः, स्नापकं योहनम्, अपरे एलियम् अपरे च
२९ भाववादिनामेकतममिति । स पुनस्तान् बभाषे, यूयन्तु मां कं
ज्ञात्वा वदथ? अनेन पितरस्तं प्रत्युवाच, भवान् ख्रीष्ट इति । ततः
३० स तांस्तर्जयन्नब्रवीत्, मम कथां कमपि मा वदत ।
३१ अनन्तरं स तानिदं शिक्षयितुमारेभे यथा, मनुष्यपुत्रस्यावश्यं
यत् स बहुदुःखं भुञ्जीत प्राचीनै मुख्ययाजकैः शास्त्राध्यापकैश्च
३२ निराक्रियेत घात्येत च त्रिभ्यो दिनेभ्यस्तु परं पुनरुत्तिष्ठेत् । स च
वाक्यमेतत् स्पष्टमभाषत । तदा पितरस्तं निर्जनमादाय तर्जयितु-
३३ मारेभे । स तु परावृत्य स्वशिष्यान् दृष्ट्वा च पितरं तर्जयन्
जगाद, मत्तोऽपसर शैतान, यतो नैवेश्वरस्यापि तु मनुष्याणामेव
विषयास्त्वया चिन्त्यन्ते ।
३४ ततः परं स स्वशिष्यैः सह जननिवहमपि स्वसमीपमाहूय
तान् जगाद, यः कश्चिन्माम् अनुगन्तुमिच्छति स आत्मानं प्रत्या-
३५ ख्यातु स्वक्रुशमादाय च मामनुव्रजतु । यतो यः स्वप्राणान्
रिरक्षिषति स तान् हारयिष्यति । यस्तु मदर्थं सुसंवादार्थञ्च
३६ स्वप्राणान् हारयति स तान् रक्षिष्यति । यतो मनुष्यः कृत्स्नं
जगल्लब्ध्वा यदि स्वप्राणैर्वञ्च्यते तर्हि तस्य हितं वा किं भवति?
३७ स्वप्राणानां वा कं निष्क्रयं मनुष्यो दास्यति? यतो यः कश्चिद्
व्यभिचारिषु पापिष्ठेषु चैतत्कालिकमानवेषु मत्तो मदीयवाक्येभ्य-
३८ श्चापत्रपते, पवित्रै दूतैर्वृतो मनुष्यपुत्रो यदा स्वपितुः प्रतापे-
नागमिष्यति तदा सोऽपि तस्मादपत्रपिष्यते ।
३९ अपि च स तान् जगाद, युष्मानहं सत्यं ब्रवीमि, अत्र ये

तिष्ठन्ति तेषां मध्ये केचिद् यावदीश्वरराज्यं प्रभावेनागतं न द्रक्ष्यन्ति तावन्मृत्योरास्वादं न लप्स्यन्ते ॥ ८ ॥

---

९ नवमोऽध्यायः।

१ ख्रीष्टस्यान्यमूर्त्तिधारणम् एलियनिर्णयश्च १४ एकमूकबधिरभूतग्रस्तस्य स्वास्थ्यकरणं ३० स्वमृत्योः श्मशानोत्थानस्य च कथा ३३ श्रेष्ठत्वनिर्णयः ३८ ख्रीष्टस्य नानोपदेशश्च।

षड्भ्यो दिनेभ्यः परं यीशुः पित्रं याकोबं योहनञ्च गृहीत्वा १
विजनं केवलं तानेव प्रोच्चमेकं गिरिम् आरोहयामास तेषां २
समक्षं रूपान्तरीबभूव च। तस्य परिच्छदश्चोज्ज्वलो हिमवदतीव ३
शुभ्रश्चाभूत्, तादृक् शुभ्रीकर्त्तुं पृथिवीस्थेन रजकेण न शक्यं।
अपि च मोशिरेलियश्च तेभ्यो दर्शनं ददतुः। तौ यीशुना सह ४
समलपतां। तदा पित्रो यीशुं सम्बोध्यावादीत् रब्बिन् भद्रमस्मा- ५
कमत्रावस्थानम् अतोऽस्माभिस्त्रीण्युटजानि निर्म्मीयन्तां भवतः कृत
एकं मोशेः कृत एकम् एलियस्य कृते चैकं। वास्तवं किं वक्तव्यं ६
तत् तेन नाज्ञायत यतस्ते त्रासापन्ना आसन्। ततः परं तेषामु- ७
परि छायाकरो मेघः सञ्जातस्तस्मान्मेघाद् वाणीयमुद्भूत् अयं
मम प्रियः पुत्रोऽस्य वचांसि युष्माभिः श्रूयन्तामिति। अकस्मात्तु ८
परितो दृक्पातं कुर्व्वन्तस्ते पुन र्नापरं कमपि ददृशुः केवलं तैः
सहितं यीशुं।

गिरितस्त्ववरोहत्सु तेषु यीशुस्तानिदमादिदेश, मनुष्यपुत्रो ९
यावन्मृतानां मध्यान्नोत्तिष्ठति तावद् यूयं यद्यद् दृष्टवन्तस्तत्
कमपि मा ज्ञापयत। अतस्ते तद् वचनं स्वार्थम् अरक्षन् अपि तु १०
मृतानां मध्यादुत्थानं किं भवेदेतदधि मिथो व्यचारयन्। ततस्ते ११
यीशुं पप्रच्छुः प्रथमम् एलियेनागन्तव्यमिति शास्त्राध्यापकैः कथ-

१२ मुच्यते? स तान् प्रतिजगाद, सत्यं प्रथमम् एलिय आगत्य सर्व्वं
पुनः संस्करिष्यति। मनुष्यपुत्रमप्यधि कथमिदं लिखितमास्ते यत्
१३ तेन बहुदुःखं सोढव्यं नगण्यता च गन्तव्या? युष्मांस्त्वहं सत्यं
ब्रवीमि, एलियोऽप्यागतवान् तमधि च यल्लिखितमास्ते तदनुरूपं
ते तं प्रति तत्तत् कृतवन्तो यद्यदैच्छंस्ते।
१४ ततः परं यदा स शिष्याणामन्तिकमागमत् तदा महान्तं
जननिवहं तेषां परितः संस्थितं शास्त्राध्यापकांश्च तैं विवदमानान्
१५ ददर्श। तत्क्षणन्तु स कृत्स्नो जननिवहस्तं दृष्ट्वा चमत्कारं मेने
१६ मनुष्याश्च समाद्रवन्तस्तमभ्यनन्दन्। स तु शास्त्राध्यापकान् पप्रच्छ,
१७ एतैः किं विवदध्वे?। तदा जननिवहमध्यान्नर एकः प्रतिबभाषे,
१८ गुरो, भवत्समीपमहं स्वपुत्रमानीतवान् स मूकेनात्मनाविष्टः। स
चात्मा यत्र तमाक्राम्यति तत्र तं कर्षति स च फेनमुद्गमयति
दन्तैश्च दन्तान् घर्षति यष्टिवत् कठिनो जायते च। भवतः शिष्या
१९ यत् तं निःसारयेयुस्तदर्थमहं तेभ्यो न्यवेदयं ते तु नाशक्नुवन्। स तदा
तान् प्रतिभाषमाणो जगाद, रे विश्वासहीन वंश युष्मत्समीपं मया
कियत्कालमवस्थातव्यम्? कियत्कालं यूयं मया सोढव्याः? स
२० मदन्तिकमानीयताम्। ततस्तस्मिंस्तदन्तिकमानीते तं दृष्ट्वैव स
आत्मा तं बालं कर्षन् क्षोभयामास स च भूमौ निपत्य फेनमुद्ग-
२१ मयन्नलुठत्। तदा स तत्पितरं पप्रच्छ, कियत्कालमेतत् तस्य
२२ सम्भूतम्? स जगाद, आबाल्यात्। स च बहुकृत्वस्तं नाशयितुकामो
वह्नौ तोये च निक्षिप्तवान्। भवता तु यदि किमपि शक्यं तर्ह्य-
२३ स्माननुकम्प्योपकरोतु। यीशुस्तु तमब्रवीत् यदि शक्यमिति कथं
२४ वदसि? सर्व्वमेव शक्यं विश्वसता। ततस्तस्य बालकस्य पिता
तत्क्षणमुच्चैःस्वरेण साश्रुनेत्रो जगाद विश्वसिमि प्रभो भवान्

ममाविश्वासमुपकरोतु। तदा यीशु र्जननिवहं समाद्रवन्तं दृष्ट्वा २५
तमशुचिमात्मानं तर्जयन् बभाषे, रे मूक वधिर आत्मन् त्वाम-
हमाज्ञापयामि, अस्मान्निःसर मैव पुनरिममाविश। तदा स २६
क्रोशित्वा भृषं तं कर्षित्वा च निःससार। स बालस्तु मृतकल्पो
बभूव तेन बहवोऽवादिषुः स मृतः। यीशुस्तु तस्य हस्तं धृत्वा २७
तमुत्थापयामास ततः स उत्तस्थौ। ततः परं तस्मिन् गृहं प्रविष्टे २८
तस्य शिष्या निर्जनं तं पप्रच्छुः, कथं वयं तमात्मानं निःसारयितुं
नाशक्नुम? स तान् जगाद, जातेरस्या निःसारणं नान्येन केनाप्यु- २९
पायेन सिध्यति, केवलं प्रार्थनोपवासाभ्याम्।

स्थानात् तस्मात् प्रस्थाय ते गालीलदेशेन प्रागच्छन्, तत्तु ३०
केनापि ज्ञायेत तत् स नैच्छत्, यतः स स्वशिष्यान् शिक्षयन्नक- ३१
थयत्, मनुष्यपुत्रो मनुष्याणां हस्तेषु समर्पयिष्यते ते घानिष्यते
च, हतस्तु स तृतीये दिने पुनरुत्थास्यति। ते तु तद् वचनं ३२
नाबुध्यन्त तं प्रष्टुमबिभयुश्च।

ततः परं ते कफरनाहूमम् आजग्मुः। गृहं प्रविष्टस्य स तान् ३३
पप्रच्छ पथि किमधि मिथो वादानुवादावकुरुत? ते तु मौनिनो ३४
बभूवु र्यतः को महत्तम एतदधि ते पथि मिथो वादानुवादौ
कृतवन्तः। स चोपविश्य द्वादश शिष्यानाहूय जगाद, यदि कश्चित् ३५
प्रथमो भवितुं वाञ्छति तर्हि स सर्व्वेषामन्त्यः सर्व्वेषां परिचार-
कश्च भवतु। अपि च स बालकमेकमादाय तेषां मध्ये स्थापयामास ३६
तं क्रोडे गृहीत्वा च तान् अब्रवीत् यः कश्चिदीदृशमेकं बालकं ३७
मम नाम्ना गृह्णाति स मां गृह्णाति, माञ्च यो गृह्णाति स न
माम् अपि तु मत्प्रेरकमेव गृह्णाति।

तदा योहनस्तं प्रतिबभाषे, गुरो, भवतो नाम्ना यो भूतान् ३८

निःसारयत्यस्मांस्तु नानुगच्छति तादृशो नरः कश्चिदस्माभि र्दृष्टः,
३९ स त्वस्मान् नानुगच्छतीतिहेतो र्वयं तं न्यवारयाम। यीशुस्तु जगाद
मैव तं निवारयत, यतो नास्ति कोऽपि तादृशो यो मन्नाम्ना
४० प्रभावसिद्धं कर्म्म कृत्वा सहसा मां निन्दितुं शक्नुयात्। यतो
योऽस्माकं विपक्षो नास्ति सोऽस्माकं स्वपक्षः।
४१ यूयं ख्रीष्टस्येति हेतो र्मम नाम्ना यः कश्चिद् युष्मान् चषक-
मेकं तोयं पाययति, युष्मान् सत्यं ब्रवीमि, स कथञ्चन स्वपारि-
४२ तोषिकेण नापवञ्चिष्यते। यः कश्चित्तु मयि विश्वसतामेतेषां क्षुद्रा-
णामेकं स्खालयति तत्कण्ठे वृहत्पेषणीबन्धनं समुद्रे च तस्य
४३ निपातनं श्रेयः। तव हस्तश्च चेत् तव स्खलनहेतु र्भवेत् तर्हि तं
छिन्धि। त्वदर्थमिदं श्रेयो यत् त्वं हीनाङ्गो जीवनं प्रविशेः, न त्विदं
४४ यद् द्विहस्तो नरकमनिर्व्वाणञ्च वह्निं गच्छे र्यत्र निवासिनां कीटो
४५ न म्रियते वह्निश्च न निर्वायति। तव चरणो वा चेत् तव स्खल-
नहेतु र्भवेत् तर्हि तं छिन्धि। त्वदर्थमिदं श्रेयो यत् त्वं खञ्जो
जीवनं प्रविशेः, न त्विदं यद् द्विचरणो नरके वह्नौ चानिर्व्वाणे
४६ निक्षिप्येथा यत्र निवासिनां कीटो न म्रियते वह्निश्च न निर्वायति।
४७ तव नेत्रं वा चेत् तव स्खलनहेतु र्भवेत् तर्हि तदुत्पाटय। त्वदर्थ-
मिदं श्रेयो यत् त्वमेकनेत्र ईश्वरराज्यं प्रविशेः, न त्विदं यद्
४८ द्विनेत्रो वह्निमये नरके निक्षिप्येथा यत्र निवासिनां कीटो न
४९ म्रियते वह्निश्च न निर्वायति। वास्तवमेकैको नरो वह्निरूपेण
लवणेन मिश्रयिष्यते, एकैको यज्ञीयोपहारश्च लवणेन मिश्रयिष्यते।
५० लवणं भद्रं। लवणन्तु यदि लवणत्वहीनं जायते तर्हि केनोपायेन
तत् स्वादयुक्तं करिष्यथ? स्वान्तरे लवणं रक्षत मिथ ऐक्यमा-
चरत च॥ ९॥

१० दशमोऽध्यायः।

१ स्त्रीत्यागकथा १३ शिशूनां ग्राह्यत्वं १७ धनियुवलोकायोपदेशः २८ शिष्याणां सत्कारनिर्णयः ३२ ख्रीष्टमृत्योर्भविष्यद्वाक्यं ३५ याकोबयोहनयोः प्रार्थनस्याग्राह्यत्वं ४६ अन्धाय चक्षुर्दानञ्च।

तस्मात् स्थानात् प्रस्थाय स यिह्रदियाया यर्द्दनपारस्थप्रदेशस्य १
च सीमायामुपतस्थे पुनश्च जननिवहास्तदन्तिकं समाजग्मुः। स च
स्वरीत्यनुसारेण पुनस्तानशिक्षयत्।

तदा फिरूशिन उपागत्य परीक्षमाणास्तं पप्रच्छुः, भार्य्यात्यागः २
किं भर्त्तु र्विधेयः? स तान् प्रतिबभाषे, मोशिर्युष्मान् किमादिष्ट- ३
वान्? तेऽवदन् त्यागपत्रं लिखित्वा तां विस्रष्टुं मोशिरनुजज्ञे। ४
तदा यीशुस्तान् प्रत्यवादीत्, युष्माकं हृत्काठिन्यमवेत्य मोशि ५
र्युष्मदर्थमिममादेशं लिखितवान्। सृष्टेरादौ त्वीश्वरो नरं नारीञ्च ६
तौ निर्म्मितवान्। "एतद्धेतो र्मनुष्यः पितरं मातरञ्च परित्यज्य ७
स्वजायायामासंक्ष्यते तावुभौ चैकाङ्गीभविष्यतः।" अनेन तौ पुन ८
र्न द्वौ स्तः, तावेकाङ्गीभूतौ। अतो यदीश्वरेण संयोजितं तन्मनु- ९
ष्येण मा वियोज्यतां। ततः परं गृहे शिष्याः पुनस्तं तां कथां १०
पप्रच्छुः। तदा स तान् जगाद, यः कश्चित् स्वभार्य्यां त्यक्त्वापरामु- ११
द्वहति स तस्या विरुद्धं व्यभिचारं करोति, या च जाया स्वपतिं १२
त्यक्त्वान्येनोद्धह्यते सा व्यभिचारं करोति।

ततः परं शिशवः केचित् तस्यान्तिकमानीयन्त यत् स तान् १३
स्पृशेत्। शिष्यास्तु तदानेतॄन् अभर्त्सयन्। तद् दृष्ट्वा यीशुः क्रुद्धो १४
तान् जगाद, मत्समीपमागमिष्यतः शिशून् अनुमन्यध्वं मा वारयत
यतः स्वर्गराज्यमीदृशानामेव। युष्मानहं सत्यं ब्रवीमि यः कश्चिन् १५
शिशुरिव स्वर्गराज्यं गृह्लाति स न कथञ्चन तत् प्रवेक्ष्यति। ततः १६

परं स तान् शिशून् क्रोडे गृहीत्वा तेषु हस्तावर्पयित्वा चाशिषं
बभाषे ।

१७ तस्मिंस्तु गृहाद् बहिः पन्थानं गते कश्चिद् द्रुतगमनेनागत्य
जानुनी पातयित्वा च तं पप्रच्छ, भो सद्गुरो अनन्तजीवनस्याधि-
१८ कारी यद् भवेयं तदर्थं मया किं कर्त्तव्यं? यीशुस्तं जगाद, कथं
मां सन्तं वदसि? सदेक एवेश्वरो नापरः कोऽपि। त्वमाज्ञा
१९ जानासि, व्यभिचारं मा कुरु, नरहत्यां मा कुरु, चौर्य्यं मा कुरु,
मृषासाक्ष्यं मा देहि, वञ्चनां मा कुरु, स्वपितरं स्वमातरञ्च
२० सम्मन्यस्वेति। स तं प्रत्युवाच, गुरो पालितं मया सर्व्वमेतदाबा-
२१ ल्यात्। तदा यीशुस्तं समालोक्य तस्मिन् स्नेहमनुभूय च तं
जगाद, त्वं गुणैकहीनोऽसि, गत्वा सर्व्वं तव यद्यदस्ति तद् विक्रीय
दरिद्रेभ्यो देहि, तथा कृते स्वर्गे तव धनं स्थास्यति, तत परमेहि
२२ क्रुशमादाय मामनुगच्छ। वचनेऽस्मिन् विषादं गत्वा स शोचन्
प्रतस्थे यतस्तस्य वहूनि प्रचुराण्यासन्।

२३ तदा यीशुः परितो दृक्पातं कृत्वा स्वशिष्यान् अब्रवीत्,
२४ वसूनां स्वामिनः कियतायासेनेश्वरराज्यं प्रवेक्ष्यन्ति? तस्यैतेषु
वाक्येषु शिष्याश्चमत्कारं मेनिरे। पुनश्च यीशुः प्रतिभाषमाणस्तान्
२५ जगाद, वत्साः, वित्तेषु विश्वसतामीश्वरराज्यप्रवेशः कियदायासयुक्तः!
२६ धनवत ईश्वरराज्यप्रवेशात् सूचीच्छिद्रेणोष्ट्रगमनं सुसाध्यं। अनेन
तेऽत्यन्तमाश्चर्य्यं मन्यमाना मिथोऽवदन्, कस्तर्हि त्ररितुं शक्नुयात्?
२७ यीशुस्तदा समालोक्य तानब्रवीत्, तदसाध्यं मनुष्याणां न त्वीश्व-
रस्य। सर्व्वं हि साध्यमीश्वरस्य।

२८ तदा पितरस्तमिदं वक्तुं प्रावर्त्तत, पश्यतु वयं सर्व्वं त्यक्त्वा भव-
२९ न्तमनुव्रजितवन्तः। यीशुः प्रतिबभाषे, युष्मानहं सत्यं ब्रवीमि,

मदर्थं सुसंवादार्थञ्च गृहं भ्रातृन् वा भगिनी वा पितरं वा मातरं
वा भार्य्यां वा सन्तानान् वा क्षेत्राणि वा त्यक्ता य इदानीमस्मिन् ३०
युग उपद्रवैः सार्द्धं शतगुणं गृहाणि भ्रातृन् भगिनी मातृन्
सन्तानान् क्षेत्राणि च भावियुगेऽनन्तं जीवनञ्च न लप्स्यते तादृशः
कोऽपि नास्ति। बहवः प्रथमास्त्वन्त्या भविष्यन्त्यन्त्याश्च प्रथमाः। ३१

तदा ते यिरूशालेमं गच्छन्तः वर्त्मन्यासन् यीशुस्तेषामग्रेऽव्रजत् ३२
ते च विस्मिता आसन् तमनुगच्छन्तोऽबिभयुश्च। ततः स पुनस्तान्
द्वादश शिष्यान् स्वसमीपं गृहीत्वा स्वं प्रति यद्यत् सम्भविष्यति तत्
तेभ्यः कथयितुमारेभे, यथा, पश्यत वयं यिरूशालेमं गच्छामो ३३
मनुष्यपुत्रश्च मुख्ययाजकेषु शास्त्राध्यापकेषु च समर्पयिष्यते। ते च
विचारेण तस्य प्राणदण्डमादेक्ष्यन्ति परजातीयानां करेषु तं
समर्पयिष्यन्ति च, ते पुनस्तमुपहसिष्यन्ति, कशाभिः प्रहरिष्यन्ति, ३४
तद्वपुषि निष्ठीविष्यन्ति, तं घातयिष्यन्ति च। तृतीये दिवसे तु स
पुनरुत्थास्यति।

तदा सिबदियसुतौ याकोबयोहनौ तस्यान्तिकमागत्य जगदतुः, ३५
गुरो आवां यद् याचिष्यावहे भवान् अस्मदर्थं तत् करोत्वेतद्
वाञ्छावः। स तौ पप्रच्छ युष्मदर्थं मया कर्त्तव्यं किं वाञ्छथः? ३६
तौ तं जगदतुः, भवतः प्रताप आवयोरेकतरो भवतो दक्षिणे- ३७
ऽन्यतरो भवतो वामे समुपविशत्विमं वरमावाभ्यां दातुमर्हति।
यीशुस्तु तौ प्रत्यवादीत्, युवां यद् याचेथे तन्न जानीथः। येन ३८
पानपात्रेणाहं पास्यामि तेन किं युवां पातुं शक्नुथः? येन च
स्नापनेनाहं स्नास्ये तेन स्नातुं किं युवाभ्यां शक्यं? तौ तमूचतुः,
शक्यं। यीशुस्तावब्रवीत्, येनाहं पास्यामि तेन पानपात्रेण युवां ३९
पास्यथः, येनाहं स्नास्ये तेन स्नापनेन स्नास्येथे च, परन्तु मम

४० दक्षिणे वामे वोपवेशनाधिकारस्य दानं मया न विधेयं, स येषां
४१ कृते निरूपितस्तेभ्य एव दातव्यः। अथैतदन्ये दश शिष्या याकोबे
४२ योहने च रोष्यमापन्नाः। यीशुस्तु तान् स्वसमीपमाहूयोवाच,
यूयं जानीथ, ये परजातीयानां शास्तारः प्रतिभान्ति ते तेषा-
मुपरि तीक्ष्णप्रभुत्वं कुर्वते, महान्तश्च तेषां तीक्ष्णकर्तृत्वं कुर्वते।
४३ न भव्यन्तु तादृशं युष्माकं मध्ये। प्रत्युत युष्मन्मध्ये यो महान्
४४ भवितुमिच्छति स युष्माकं परिचारको भविष्यति, यश्च युष्मन्मध्ये
४५ प्रथमो भवितुमिच्छति स सर्व्वेषां दासो भविष्यति। यतो
मनुष्यपुत्रोऽप्यागतो न परिचर्य्यां भोक्तुम् अपि तु परिचरितुं
दातुञ्च स्वप्राणान् निष्क्रयमूल्यं बहूनां विनिमयेन।

४६ अनन्तरं ते यिरीहूमागताः। ततः परं तस्य तच्छिष्याणां
महतो जननिवहस्य च यिरीहूतो निर्गमनकाले तीमयस्य पुत्रो
वरतीमय इति नामकोऽन्धो भिक्षमाणः पथपार्श्व उपविष्ट आसीत्।
४७ नासरतीयो यीशुरुपस्थित इति श्रुत्वा स क्रोशन् गदितुमारेभे,
४८ भो दायूदस्य पुत्र यीशो मामनुकम्प्यताम्। अनेन बहवस्तं भर्त्स-
यन्तो मौनावलम्बनमादिदिशुः। स तु बहुगुणैरधिकमक्रोशत्।
४९ भो दायूदस्य पुत्र मामनुकम्प्यताम्। यीशुस्तदा तिष्ठंस्तस्यानयन-
माज्ञापयामास। अतस्ते तमन्धमाहूयन्तोऽब्रुवन्, आश्वसिहि,
५० उत्तिष्ठ, स त्वामाह्वयति। तदा स स्ववसनं त्यक्त्वोत्पत्य यीशो-
५१ रन्तिकमागतः। यीशुस्तं सम्बोध्यावादीत्, त्वदर्थं मया कर्त्तव्यं
किं वाञ्छसि? सोऽन्धस्तं जगाद, भो रब्बोणि, दृष्टिशक्तिं लिप्से।
५२ ततो यीशुस्तमुवाच, याहि तव विश्वासस्त्वां तारयामास। स च
तत्क्षणं दृष्टिशक्तिं लेभे मार्गे यीशोरनुगामी बभूव च॥१०॥

११ एकादशोऽध्यायः।

१ ख्रीष्टस्य यिरूशालेमपुरयानं १२ उडुम्बरतरौ शापः १५ मन्दिराद् बणिजां वहिष्कृतिः २० प्रत्ययस्य प्राबल्यकथनं २८ मुख्ययाजकादीनां निरुत्तरताकरणञ्च।

अनन्तरं तेषु यिरूशालेमस्य समीपमागत्य जैतुनाख्यगिरौ १
स्थितयो र्वैत्फगी वैथनिया चेत्यभिधग्रामयोरुपस्थितेषु यीशुः
शिष्यौ द्वौ प्रेषयन्निदमादिदेश, युवामुम्मुखस्थमसुं ग्रामं गच्छतं तत्र २
प्रविश्यैव बद्धमेकं गर्द्दभशावकमाप्स्यथो यत्पृष्ठं मनुष्यः कोऽपि
नारूढवान्, तमेव मुक्त्वानयतं। यदि च कोऽपि युवां पृच्छेत्, ३
किमर्थमिदं कुरुथ इति, तर्हि वदतम्, अनेन प्रभोः प्रयोजनमास्ते
इति, ततः स तत्क्षणं तमत्र विस्रक्ष्यति। तदा तौ गत्वा वहिः ४
चुद्ररथ्यायाः पार्श्वे गृहद्वारे बद्धं तं गर्द्दभशावकमासाद्य मोक्तुं
प्रावर्त्तेतां। तत्र तिष्ठन्तः केचिन्नरास्तु तावपदन्, किमर्थं तं शावकं ५
मुञ्चथः? तदा यीशु र्यथादिष्टवांस्तथैव ताभ्यां कथिते तौ तैर- ६
नुज्ञातौ। शावकं तच्च यीशोः समीपमानिन्यतुस्तत्पृष्ठे च स्ववासांसि ७
निदधाते। ततः स तमारुरोह। बहवश्च मार्गे स्ववसनानि विस्ता- ८
रयामासुरन्ये च पादपानां पल्लवांश्छित्त्वा पथि व्यस्तारयन् अग्रप- ९
श्चाद्गामिनो नराश्चोच्चरवेणाब्रुवन्, जय, प्रभो र्नाम्ना य आयाति १०
स धन्यो भूयात्, प्रभो र्नाम्नास्मत्पितु र्दायूदस्य यद् राज्यमायाति
तद् धन्यं भूयात्, ऊर्द्धलोके जयध्वनि र्भवतु। अनन्तरं यीशु ११
र्यिरूशालेमं धर्म्मधाम च प्रविष्टः, परितः सर्व्वं निरीक्ष्य च दिना-
वसानहेतो र्द्वादशशिष्यैः सार्द्धं वैथनियां प्रतस्थे।

परप्रातःकाले तेषु वैथनियातः प्रस्थितेषु सोऽक्षुध्यत् दूराच्च १२
सपत्रमेकम् उडुम्बरवृक्षं निरीक्ष्य तत्र किमपि फलं लप्स्यते न वेति १३

१४ द्रष्टुं तदन्तिकं जगाम। समीपमुपस्थाय तु पत्रेभ्योऽन्यत् किमपि
नासादयामास। यतस्तदोडुम्बरफलानां समयो नासीत्। अतो
यीशुस्तं सम्बोध्यावादीत्, इतः परं कदापि कोऽपि त्वदुत्पन्नं फलं
१५ न भक्षयतु। तस्य शिष्यास्च तद् वचनमश्रौषुः। ततः परं ते यिरू-
१६ शालेम उपतस्थिरे, यीशुस्च धर्म्मधाम प्रविश्य तत्र धर्म्मधाम्नि क्रय-
विक्रयकारिणो वहिष्कर्त्तुमारेभे, वणिजां मुद्रासनानि कपोतवि-
१७ क्रेतृणामासनानि च न्युब्जयामास धर्म्मधाम्नो मध्येन च कस्यापि
पात्रवहनं नानुमेने, शिक्षयंस्च तान् जगाद, किं न लिखितमास्ते,

ख्यास्यते सर्व्वजातीनां प्रार्थनाधाम मद्गृहम्।

१८ तत्तु युष्माभिरकारि दस्यूनां गह्वरः। तच्छ्रुत्वा शास्त्राध्यापका
१९ मुख्ययाजकास्च तं हन्तुमयतन्त। वास्तवं ते तस्मादबिभयु र्यतः
कृत्स्नो जननिवहस्तस्य शिक्षायां चमत्कारममन्यत।

२० सन्ध्यायान्तु जातायां स नगरान्निर्जगाम। प्रातःकाले च
मार्गेण गच्छन्तस्ते तमुडुम्बरवृक्षं समूलं शुष्कीभूतं ददृशुः।
२१ तदा पितरः स्मरंस्तं जगाद, रब्बिन् पश्यतु भवताभिशप्तः पादपो-
२२ ऽसौ शुष्कीभूतः। यीशुः प्रतिभाषमाणस्तानब्रवीत्, ईश्वरे विश्वासं
२३ कृत्वावतिष्ठध्वम्। युष्मानहं सत्यं ब्रवीमि, त्वमुत्पत्य समुद्रे निप-
तेति गिरिमिममुक्त्वा यः कश्चिन्मनसा न संशयानः स्वोक्ता कथा
२४ सिध्यतीति विश्वमिति स यत् कथितवान् तदवाप्स्यति। ततो
युष्मानहं वदामि, यूयं प्रार्थयमाना यद्यद् याचध्वे तल्लब्धवन्त
२५ इति विश्वसित तर्हि तदवाप्स्यथ। यदा च प्रार्थयमाणास्तिष्ठथ तदा
क्षमध्वं, यदि मनसि कस्यचिद् विरुद्धा कथा विद्यते। तथा कृते
२६ युष्माकं स्वर्गस्थः पितापि युष्माकं दोषान् क्षमिष्यते। यूयन्तु यदि
न क्षमध्वे, तर्हि युष्माकं पितापि युष्माकं दोषान् न क्षमिष्यते।

ततस्ते पुन र्यिरूशालेमं प्रविष्टाः। स च यदा धर्म्मधाम्नि २७
व्यहरत्, तदा मुख्ययाजकाः शास्त्राध्यापकाः प्राचीनाश्च तमभ्येत्य २८
पप्रच्छुः, केनाधिकारेण करोषि त्वं कर्म्माण्येतानि? को वा त्वयै-
तानि कारयितुं तमधिकारं तुभ्यं दत्तवान्? यीशुस्तु तान् प्रत्य- २९
ब्रवीत्, युष्मानहमपि कथामेकां पृच्छामि, मह्यं चेत् तदुत्तरं दत्थ,
तर्हि केनाधिकारेण सर्व्वमेतत् करोमि तदहमपि युष्मान् वदि-
ष्यामि। योहनस्य स्नापनं किं स्वर्गादुत्पन्नमुत मनुष्येभ्यः वा? एत- ३०
स्योत्तरं मह्यं दत्त। ते तदा परस्परं विचारयन्तोऽवदन्, तत् ३१
स्वर्गोत्पन्नमित्युक्ते सोऽस्मान् प्रच्छ्यति, यूयं तर्हि तस्मिन् किमर्थं न
विश्वसितवन्तः? तत्तु मनुष्येभ्य उत्पन्नमिति कथं वदेम? वास्तवं ३२
ते जनेभ्यो बिभ्युः, यतो योहनः प्रकृतो भाववाद्यासीदिति सर्व्वै-
रन्वभूयत। तत्ते यीशुं प्रत्यवदन्, न जानीमः। यीशुस्तदा तान् ३३
प्रतिबभाषे, नाहमपि युष्मान् ज्ञापयामि, करोम्यहं सर्व्वमेतत्
केनाधिकारेणेति ॥११॥

---

१२ द्वादशोऽध्यायः।

१ द्राक्षाक्षेत्रस्य दृष्टान्तः १३ करदाने फरीशिनां निरुत्तरताकरणं १८ श्मशानोत्थाने सदूकिनां निरुत्तरताकरणं २८ प्रधानाज्ञाया निर्णयः ३५ शास्त्राध्यापकानां निरुत्तरताकरणं ३८ तेषां दोषप्रकटनं ४१ विधवाया दातृत्वञ्च।

तदा स उपमाभिस्तेभ्यः कथयितुमारेभे, नरः कश्चिद् द्राक्षा- १
लता रोपयन् द्राक्षोद्यानं कृत्वा वृत्या परिवार्य्य तन्मध्ये द्राक्षा-
मर्द्दनार्थककुण्डं खनित्वाट्टालं निर्म्माय च कृषकेषु करदायिषु तत्
समर्प्य देशान्तरं जगाम। ततः परं फलकाले कृषकेभ्यो द्राक्षो- २
द्यानस्य फलानामंशमादातुं स कृषकाणां समीपं दासमेकं प्राहि-

३ णोत्। ते तु तं धृत्वा ताडयामासुरिक्तहस्तं विससृजुश्च। ततः स
४ पुनस्तेषां समीपमन्यमेकं दासं प्रेषयामास। ते प्रस्तरक्षेपणेन
५ तस्यापि मूर्द्धानमाजघ्नुर्न्यक्कृत्य विससृजुश्च। ततः परमन्यस्मिन्
प्रहिते तेन ते तं घातयामासुः। अपरांश्चानेकान् अहिंसिषुः,
६ कांश्चित् प्रहारेण कांश्चिद् वा वधेन। तदैक एव तस्य प्रियः
पुत्रोऽवशिष्टः। अतो मत्पुत्रं प्रति ते त्रपिता भविष्यन्तीति बुद्ध्वा
७ शेषे स तमपि तेषां समीपं प्राहिणोत्। ते कृषकास्तु परस्पर-
मब्रुवन्, दायहरोऽसौ, तदागच्छत वयममुं हनिष्यामस्तेन दायां-
८ शोऽस्माकं भविष्यति। अनेन ते तं धृत्वा जघ्नु र्द्राक्षोद्यानाद् वहि
र्निचिक्षिपुश्च। अतस्तस्योद्यानस्य स्वामी किं करिष्यति? स आगत्य
९ तान् कृषकान् विनाशयिष्यति, द्राक्षोद्यानञ्चान्येषु समर्पयिष्यति।
१० युष्माभिः कदापि किं शास्त्रोक्तिरियं न पठिता, यथा,

गृहनिर्म्मातृभि र्लोकै र्यः पाषाणो निराकृतः।
स एव गृहकोणस्थः प्रमुख्यः प्रस्तरोऽभवत्।
११ परमेशस्य कर्म्मेदम् अस्मद्दृष्टौ तदद्भुतम्॥

१२ ते तदा तं धर्त्तुमयतन्त जननिवहात्तु बिभ्युः। यतस्तैरबोधि
यत् स तानधि तां दृष्टान्तकथामवदत्। तं त्यक्त्वा तु ते प्रस्थिताः।
१३ ततः परं वाक्पाशेन तं निबद्धुमिच्छन्तस्ते कांश्चित् फरीशिनो
१४ हेरोदीयांश्च तस्यान्तिकं प्रेषयामासुः। त उपागत्य तमूचुः, भो
गुरो वयं जानीमो यद् भवान् सत्यवान् कस्मादपि न बिभेति
यतो भवान् मनुष्याणां मुखापेक्षां न करोत्यपि तु सत्येनेश्वरस्य
१५ पन्थानं शिक्षयति। कैसराय करदानं विधेयं न वेति? दास्यामो-
ऽथवा न दास्यामः किं? स तु तेषां कापट्यं बुद्ध्वा तान् जगाद,
१६ कथं मां परीक्षध्वे? मुद्रापादमेकमानयताहं तं निरीक्षिष्ये।

तस्मिंस्तैरानीते स तान् पप्रच्छ कस्येयं मूर्त्तिरिदं लेखनञ्च? ते तं
वदन्ति कैसरस्य। तदा यीशुस्तान् प्रतिबभाषे, दत्त कैसराय १७
यद्यत् कैसरस्य, दत्त चेश्वराय यद्यदीश्वरस्य। अनेन ते तस्मिन्ना-
श्चर्य्यं मेनिरे।

तदा पुनरुत्थानमनङ्गीकुर्व्वाणाः सदूकिनस्तस्यान्तिकमागत्य तं १८
पप्रच्छुः, गुरो, मोशिरस्मदर्थमिममादेशं लिखितवान्, यस्य भ्राता १९
भार्य्यां विहाय निःसन्तानो म्रियेत, स तां भ्रातृभार्य्यामुद्वह्य
स्वभ्रात्रे वंशमुत्पादयत्विति। आसंस्तु सप्त भ्रातरः। प्रथमः योषि- २०
तमुद्वह्य निःसन्तानो ममार। द्वितीयस्तदा तामुदुवाह, सोऽपि २१
निःसन्तानो ममार। तृतीयस्य तादृश्येव गति र्बभूव। इत्थं ते सप्त २२
तामुदूढ्व निःसन्ताना ममुश्च। सर्व्वेषां पश्चात् सा योषिदपि ममार।
अतः पुनरुत्थान उत्थितानां तेषां कस्य भार्य्या सा भविष्यति? २३
यतस्ते सप्तैव तामुदूढवन्तः। यीशुस्तदा तान् प्रत्यवादीत्, यूयं किं २४
न हेतोरतो भ्राम्यथ यच्छास्त्राणीश्वरस्य शक्तिञ्च न जानीथ?
यतः पुनरुत्थानात् परं ते नोद्वहन्ति नोदुह्यन्ते वापि तु स्वर्गनि- २५
वासिनो दूता इव वर्त्तन्ते। मृतानधि, ते यदुत्तिष्ठन्त्येतदधि किं २६
न पठितं युष्माभि र्मोशे र्ग्रन्थे स्तम्बवृत्तान्ते तं प्रति कथितमीश्व-
रस्येदं वाक्यं, यथा, अब्राहामस्येश्वर इस्हाकस्य चेश्वरो याकोबस्य
चेश्वरोऽहमिति। ईश्वरो न मृतानाम् अपि तु जीवतामीश्वरो- २७
ऽस्ति, अतो यूयं बाढं भ्राम्यथ।

शास्त्राध्यापक एकस्तेषां तं विवादं श्रुत्वा, स तेभ्य उत्तमं २८
प्रत्युत्तरं दत्तवानिति बुद्ध्वा चोपागत्य तं पप्रच्छ, सर्व्वप्रथमाज्ञा
का? यीशुस्तं प्रत्यवादीत् सर्व्वाज्ञानामियं प्रथमा, भो इस्रायेल, २९
शृणु, अस्माकमीश्वरः प्रभुरेकः प्रभुरेव। त्वञ्च सर्व्वान्तःकरणेन, ३०

सर्व्वप्राणैः, सर्व्वचित्तेन, सर्व्वशक्त्या च स्वेश्वरे प्रभौ प्रेम कुर्व्वितीयं
३१ प्रथमाज्ञा। द्वितीया चास्याः सदृशी, यथा, त्वं स्वनिकटस्थे आत्म-
३२ वत् प्रेम कुर्व्विति। एतयो र्महत्तरापराज्ञा नास्ति। स शास्त्राध्या-
पकस्तदा तं जगाद, वाढं, गुरो, सत्यमुक्तं भवता, यत ईश्वर
३३ एक एव तदन्यो नास्ति, सर्व्वान्तःकरणेन सर्व्वबुद्ध्या सर्व्वप्राणैः
सर्व्वशक्त्या च तस्मिन् प्रेमाचरणं निकटस्थे आत्मवत् प्रेमाचरणञ्च
३४ सर्व्वहव्येभ्यः सर्व्वयज्ञेभ्यश्चाधिकम्। स च सविवेचनमुत्तरं कृतवानिति
दृष्ट्वा यीशुस्तमुवाच, ईश्वरराज्यात् त्वं न दूरवर्त्तीति। ततः परं
नाभवदन्यस्य कस्यापि साहसं तं किमपि प्रष्टुं।

३५ ततः परं यीशुः प्रतिभाषमाणो धर्म्मधाम्नि शिक्षयन्नब्रवीत्,
३६ शास्त्राध्यापकाः कथं वदन्ति ख्रीष्टो दायूदस्य पुत्र इति। स्वयं
दायूदस्तु पवित्रस्यात्मन आदेशादिदं कथितवान्,

मम प्रभुमिदं वाक्यं बभाषे परमेश्वरः।
त्वच्छत्रून् पादपीठं ते यावन्नहि करोम्यहं।
अवतिष्ठस्व तावत् त्वम् आसीनो मम दक्षिणे॥

३७ अनेन स्वयं दायूदस्तं प्रभुं वदति, कथं तर्हि स तस्य पुत्रो भवेत्?।
तदा समागतो महाजननिवहः सानन्दं तस्य वाक्यान्याकर्णयत्।

३८ स्वशिक्षायाञ्च स तान् जगाद, यूयं शास्त्राध्यापकेभ्यः साव-
धाना भवत, आकाङ्क्षन्ति ते महापरिच्छदै र्विहारं हट्टेष्वभिन-
३९ न्दनानि समाजगृहेषु श्रेष्ठासनानि भोज्येषु च श्रेष्ठस्थानानि। ते
४० विधवानां गृहाणि ग्रसन्ति छलाच्च सुदीर्घं प्रार्थयन्ते। विचारे ते
घोरतरं दण्डं लप्स्यन्ते।

४१ तदा यीशु र्धनागारस्य सम्मुखमुपविश्य तत्र धनागारे जनैः
कथं मुद्रा निक्षिप्यन्ते तन्निरैक्षत। बहवो धनिनस्तु बहुमुद्रा

न्यक्षिपन्। विधवा तु काचिद् दरिद्रागत्य चोधिष्ठमुद्राद्वयं न्यक्षि- ४२
पत् तत् ताम्रमुद्रापादेन समं। यीशुस्तदा स्वशिष्यान् अन्तिकमा- ४३
हूयावादीत्, युष्मानहं सत्यं ब्रवीमि, यावन्तोऽत्र धनागारे मुद्रा
निक्षिप्तवन्तस्तावतां मध्येऽधिकतमं विधवासौ दरिद्रा निक्षिप्तवती।
यतः सर्व्वे प्रयोजनातिरिक्तं किञ्चिन्निक्षिप्तवन्तः, सा तु प्रयोजनी- ४४
यस्याभावेऽपि सर्व्वस्वं निक्षिप्तवती जीविकां कृत्स्नामेव॥ १२ ॥

---

१३ त्रयोदशोऽध्यायः।

१ मन्दिरविनाशशिष्यदुःखयो र्भविष्यद्वाक्यम् १४ यिहूदीयानां दुःखकथनम २१ कूटभाववादिकथनम् २४ यिहूदीयानां राज्यविनाशकथनम् २८ उडुम्बरतरु-दृष्टान्तः सावधानत्वस्यावश्यकत्वञ्च।

स यदा धर्म्मधामतो निरगच्छत् तदा तच्छिष्याणामेकस्तं १
जगाद, गुरो पश्यतु, कीदृशाः प्रस्तराः कीदृशानि हर्म्याणि च।
यीशुस्तदा तं प्रतिजगाद, त्वमेतानि महान्ति हर्म्याणि किं २
पश्यसि? अत्र प्रस्तरोपरि प्रस्तर एकोऽप्यनिपातयितव्यो न
विहायिष्यते।

ततः परं यदा स जैतुनपर्व्वते धर्म्मधाम्नः सम्मुखमासीन ३
आसीत्, तदा पितरो याकोबो योहन आन्द्रियश्च निर्जनं तस्मै
निवेदयामासुः, वक्तुमर्हत्यस्मान् भवान्, कदा सर्व्वं तत् सम्भवि- ४
ष्यति? किं वाभिज्ञानं यदा सर्व्वं तत् सिद्धिमवाप्स्यति? तदा यीशुः ५
प्रतिभाषमाणस्तेभ्यः कथयितुमारेभे, सावधानास्तिष्ठत, युष्मान्
कोऽपि मा प्रतारयतु, यतो बहवो ममानामध्वजिन आगत्य वदि- ६
ष्यन्त्यहं स इति प्रतारयिष्यन्ति च बहून्। कथासु युद्धानां युद्धस्य ७
किंवदन्तीषु श्रुतासु मैवोद्विजध्वं, यत एतेन भवितव्यं, परिणामस्तु
नापि तदा। वस्तुतो जाति र्जाते र्विरुद्धं राज्यञ्च राज्यस्य विरुद्ध- ८

सुत्थास्यति। भविष्यन्ति च स्थाने स्थाने भूकम्पाः। पुनः पुन
र्दुर्भिक्षमुपप्लवश्चापि सम्भविष्यतः । उपक्रमो यातनानां सर्व्व-
मेतत् ।

९ यूयन्तु स्वेषु सतर्का भवत, यतो मानवा युष्मान् विचारसभासु
समर्पयिष्यन्ति यूयञ्च समाजेषु प्रहारिष्यध्वे मदर्थञ्च देशाध्यक्षाणां
१० राज्ञाञ्च समक्षं स्थापयिष्यध्वे तेभ्यः साक्ष्यदानार्थम्। प्रथमञ्च
११ सर्व्वजातिषु सुसंवादो घोषयितव्यः। मानवास्तु यदा युष्मान्
समर्पयिष्यन्तो नेष्यन्ति तदा किं वक्तव्यमिति मालोचयत मा
चिन्ताकुला भवत वा। तस्मिन् दण्डे तु युष्मभ्यं यद् दायिष्यते
तदेव कथयत, यतो न यूयं वक्तारः, वक्ता तु पवित्र आत्मा ।
१२ भ्राता पुन र्भ्रातरं जनकश्च सुतं मृत्यवे समर्पयिष्यति, सन्ता-
नाश्च पित्रोः प्रातिकूल्येनोत्थाय तौ घातयिष्यन्ति। मम नाम्नो
१३ हेतुना च यूयं सर्व्वै र्द्वेक्ष्यध्वे। यस्त्वन्तं यावत् स्थिरः स्थास्यति स
एव तरिष्यति ।

१४ अतो यूयं यदा भाववादिना दानीयेलेन कथितं ध्वंसकारि
घृण्यवस्त्वनुपयुक्ते स्थाने संस्थितं द्रक्ष्यथ—पाठको बुध्यतां—तदा
ते पलाय्य गिरीनाश्रयन्तां ये यिहूदियायां विद्यन्ते, यश्च गृहपृष्ठे
१५ विद्यते स गृहं मावरोहतु स्वगृहात् किमप्यादातुं वा तत्र मा
१६ प्रविशतु। यश्च क्षेत्रे विद्यते स स्ववस्त्रमादातुं मा प्रत्यावर्त्ततां।
१७ भविष्यन्ति च दिनेषु तेषु गर्भधारिण्यः स्तन्यदायिन्यश्च सन्तापभा-
१८ जनानि। तथा च प्रार्थयध्वं युष्माकं पलायनं यथा शीतकाले न
१९ भवेत्। यतस्तेषु दिनेषु क्लेशो यादृशः सम्भविष्यति न सम्भूतस्ता-
दृश ईश्वरकृतसृष्टेरारम्भाद् अद्य यावत्, नापि सम्भविष्यति पुनः ।
२० दिनानि तानि च प्रभुना चेन्न न्यूनयकारिष्यन्त मर्त्त्यः कोऽपि तर्हि

नातरिष्यत्। स तु यान् वरितवान् तेषां वरितजनानां कृते
तानि दिनानि न्यूनीचकार।

तदा च मा विश्वसित यूयमुक्ता अपि केनचित् पश्य ख्रीष्टोऽत्र २१
वामुत्र विद्यते। यतो कूटख्रीष्टाः कूटभाववादिनश्चोत्थास्यन्ति २२
प्रदर्शयिष्यन्ति च तेऽभिज्ञानान्यद्भुतलक्षणानि च तादृशानि यैः
साध्ये सति ते वरितानपि मनुष्यान् पथभ्रष्टान् करिष्यन्ति। यूयन्तु २३
सावधानास्तिष्ठत। पश्यत युष्मानहं सर्व्वं पूर्व्वमेवोक्तवान्।

तेषु दिनेषु तस्मान् क्लेशात् परं सूर्य्यः सान्धकारो भविष्यति, २४
चन्द्रश्च स्वज्योत्स्नां न प्रदास्यति, नक्षत्राणि च नभसः पतिष्यन्ति २५
गगनस्थबलानि च विचलिष्यन्ति। मानवाश्च निरीक्षिष्यन्ते महाप- २६
राक्रमप्रतापाभ्यां परीतं मेघरथेनागच्छन्तं मनुष्यपुत्रम्। तदा च स २७
स्वदूतान् प्रहित्य मेदिनीप्रान्तमारभ्य गगनप्रान्तं यावच्चतुर्भ्यो
वायुभ्यो मनुष्यान् स्ववरितान् सङ्ग्रहीष्यति।

उडुम्बरवृक्षाद् दृष्टान्तं शिक्षितुमर्हथ। स्पष्टं यदा तस्य शाखा २८
जायते कोमला पत्राणि च प्रकाशन्ते जानीथ यूयमासन्नस्तदा
ग्रीष्मकाल इति। तथैव यूयं यदा द्रक्षथ यत् सर्व्वमेतत् सम्भवति २९
ज्ञास्यथ तदा स समीपस्थो द्वार उपस्थितश्चेति। युष्मानहं सत्यं ३०
ब्रवीमि, यावत् सर्व्वमेतन्न सम्भवति तावन्न व्यत्येष्यन्ति मानवा
एतत्कालिकाः। द्यावापृथिव्यावत्येष्यतः, मम वाक्यानि तु नैवा- ३१
त्येष्यन्ति।

दिनस्य तस्य तु दण्डस्य च तस्य तत्त्वं केनापि न ज्ञायते, ३२
नापि स्वर्गस्थदूतै र्नापि पुत्रेण, केवलः पिता तज्जानाति। यूयं ३३
सावधानास्तिष्ठत, जागृत प्रार्थयध्वञ्च यतो न जानीथ समयः
कदोपतिष्ठते। युष्मत्प्रभु र्देशान्तरगतेन नरेण सदृशो यः स्वगृहं ३४

त्यक्त्वा स्वदासेषु विषयमेकैकस्मिंश्च स्वं स्वं कर्म्म समर्पितवान् प्रति-
३५ हारिणञ्च जागरणमादिष्टवान्। अतो जाग्रत यतो यूयं न जानीथ
गृहस्वामी कदायाति, सायम् अर्द्धरात्रे वा कुक्कुटरावकाले वा
३६ प्रात र्वा। अकस्मादागत्य स यथा युष्मान् सुप्तान् नासादयेत् तत्
३७ चिन्तयत। युष्मांस्तु यद् ब्रवीमि तत् सर्व्वानेव ब्रवीमि, जाग्र-
तेति॥ १३॥

१४ चतुर्द्दशोऽध्यायः।

१ ख्रीष्टविरुद्धा कुमन्त्रणा ३ स्त्रिया सुगन्धितैलेन तदभिषेको यिहूदाविश्वासघातित्वम १२ निस्तारपर्व्वणि भाज्यासादनाय शिष्यप्रेषणम् १७ तैः सह भोजनम् २२ रात्रिभोज्यनिरूपणम् २७ पित्रस्यानङ्गीकारे भविष्यद्वाक्यम् ३२ उद्याने ख्रीष्टस्य चित्ताभितापः ४३ ख्रीष्टस्य परैराक्रमणम् ५२ तस्य विचारो दण्डाज्ञा च ६६ पित्रेणानङ्गीकरणञ्च।

१ दिनद्वयात् परं निस्तारपर्व्वणा निष्किण्वपूपानां समयेन
चोपस्थातव्यमितिकाले मुख्ययाजकाः शास्त्राध्यापकाश्चायतन्त यथा
२ तं छलेन धृत्वा हन्युः। ते त्ववदन्, नैव पर्व्वणि, चेत् तथा भविष्यति
कलहो जनानां मध्ये।
३ बैथनियायान्तु तस्मिन् विद्यमाने शिमोनस्य कुष्ठिनो गेहे
भोजनायासीने च योषिदेका श्वेतोपलभाजनेन बहुमूल्यं प्रकृतं
जटामांसीरसयुक्तं सुगन्धितैलमानीय श्वेतोपलभाजनं तद् भित्त्वा
४ तस्य शिरसि तैलं स्रावयामास। तत्रोपस्थितास्तु केचिद् अन्तरे
५ रोच्यापन्ना जगदुः, किमर्थं तैलस्यायमपव्ययः सम्भूतः? तस्मिन्
विक्रीते त्रिशतमुद्रापादेभ्योऽधिकं मूल्यं लब्धुं दरिद्रेभ्यो दातु-
६ ञ्चाशक्यत। एवं ते तस्यामधैर्य्यमकुर्व्वन्। यीशुस्तूवाच, इमां
त्यजत, कुत्य कथं दुःखितामिमाम्? कृतवतीयं मयि कर्म्म सत्।

यतो दरिद्राः सततं युष्मत्सङ्गिनः, यदा चेच्छथ तदैव तानुपकर्त्तुं ७
शक्नुथ, अहन्तु न सततं युष्मत्सङ्गी। यत् साध्यमनया तदकारि। ८
समयात् प्रागियं मम देहं सुगन्धितैलाक्तं कृतवती मत्श्मशानार्थम्।
युष्मानहं सत्यं ब्रवीमि, कृत्स्नस्य जगतो यत्र कुत्रचिद् घोषयिष्यते ९
सुसंवादोऽयं तत्र कुत्रचित् कथयिष्यते कर्म्माण्येतत् कृतमनया
स्मरणार्थमस्याः।

ततो द्वादशानां मध्ये गणित ईष्करियोतीयो यिहूदा मुख्य- १०
याजकानां समीपं जगाम तेष्वेव तं समर्पयितुकामः। तच्छ्रुत्वा ते ११
हर्षं गत्वा तस्मै रूप्यं दातुम् अङ्गीचक्रिरे स च सुसमये तं समर्प-
यितुम् अयतत।

अनन्तरं निष्किण्वपूपानां प्रथमे दिनेऽर्थतो निस्तारपर्व्वीयमे- १२
षशावकहत्यादिने शिष्यास्तं जगदुः, भवत इच्छातः कुत्रास्माभि
र्गत्वोपकल्पयितव्यं भवदर्थं भोज्यं निस्तारपार्व्वणम्? तदा स शिष्यौ १३
द्वौ प्रेषयन् जगाद, नगरं यातं तत्र मनुष्य एको जलपूर्णं कुम्भं
वहन् युष्मत्सम्मुखवर्त्ती भविष्यति, तमेवानुगच्छतं स च यत्र प्रवेक्ष्यति
तत्र गृहस्वामिनं ब्रूतं, गुरु र्वक्ति कुत्र सातिथिशाला यत्र शिष्यैः १४
सार्द्धं मया भोज्यं निस्तारपार्व्वणं सम्पालयितव्यमिति। स च वां १५
भूमित ऊर्द्धस्थामासनादिसज्जया सज्जितां वृहतीमेकां शालां
दर्शयिष्यति तत्रैवास्मदर्थमुपकल्पयतम्। अतः शिष्यौ तौ प्रस्थाय १६
नगरमागत्य तेन यदुक्तं तदनुरूपं स्थानं प्राप्य निस्तारपर्व्वीयभो-
ज्यमुपकल्पयामासतुः।

सन्ध्यायान्तु जातायां स द्वादशभिः सार्द्धमाजगाम। तेषु १७
तूपविश्य भक्षमाणेषु यीशुर्बभाषे, युष्मानहं सत्यं ब्रवीमि, युष्माकमेको
मां समर्पयिष्यति यो मत्सहभोजी। अनेन ते शोचितुमारभ्य प्रत्येकं १८

१९ तं पप्रच्छुः, स किमहं? स किमहं? स तु प्रतिभाषमाणस्तानाह,
२० द्वादशानामेको यो मया सार्द्धं सूपपात्रे हस्तं मज्जयति, स एव ।
२१ मनुष्यपुत्रमधि यथा लिखितमास्ते स तथैव प्रयाति । नरेण येन
तु मनुष्यपुत्रः समर्प्यते स सन्तापपात्रं । तस्य नरस्य जन्म चेन्नाभ-
विष्यत् तर्हि तेनैव तस्य क्षेमम् अभविष्यत् ।

२२ अतस्तेषां भोजनकाले यीशुः पूपमादायाशीर्व्वादं कृत्वा तं
भङ्क्त्वा तेभ्यो ददौ बभाषे च, गृह्णीत भुंग्ध्वम्, एतन्मम शरीरं ।
२३ ततः परं स पानपात्रमादाय धन्यवादं कृत्वा तेभ्यो ददौ सर्व्वे च
२४ तेन पपुः । स च तानाह, एतन्मम शोणितं बहूनां कृते विस्रा-
२५ व्यमाणं नूतननियमस्यैव शोणितं । युष्मानहं सत्यं ब्रवीमि, गोस्त-
नीलतोत्पन्नोऽयं रसो दिने यस्मिन् ईश्वरस्य राज्ये नवीनो मया
२६ पायिष्यते तद्दिनं यावत् स मया पुन र्न पायिष्यते । ततस्ते स्तोत्रं
गीत्वा जैतुनपर्व्वतं जग्मुः ।

२७ यीशुस्तांस्तदा जगाद, रात्रावस्यां सर्व्वे यूयं मयि स्खलिष्यथ,
यतो लिखितमास्ते, "अहं व्रजरक्षकमाहनिष्यामि मेषाश्च विकीर्णा
२८ भविष्यन्ति ।" परन्तु मत्मोत्थानात् परमहं युष्मदग्रे गालीलं यास्यामि ।
२९ पित्रस्तु तं जगाद, सर्व्वेऽपि चेत् स्खलेयुस्तथाप्यहं न स्खलिष्यामि ।
३० यीशुस्तदा तमाह, त्वामहं सत्यं ब्रवीमि, अद्यैव रात्रावस्यां
३१ कुक्कुटस्य द्वितीयरवात् प्राक् त्वं मां त्रिकृत्वः प्रत्याख्यास्यसि । स
तु दृढतरमवोचत्, यद्यपि भवता सार्द्धं मम मरणम् अवश्यं
स्यात्, तथाप्यहं भवन्तं नैव प्रत्याख्यास्यामि । एवमेव सर्व्वेऽप्य-
भाषन्त ।

३२ ततः परमुपस्थितेषु तेषु गेतशिमानीत्यभिधे स्थाने स स्वशि-
३३ ष्यान् जगाद, यूयमत्रोपविशत यावदहं प्रार्थनां कुर्व्वे । अनन्तरं

स पित्रं याकोबं योहनञ्च सङ्गिनः कृत्वा चोद्गुं विषत्तुञ्चारेभे
तांश्च जगाद, प्राणा मम मृत्यवे शोकापन्नाः, यूयमत्रावतिष्ठमाना ३४
जागृत। ततः स किञ्चिदग्रं गत्वा भूमौ निपत्येदं प्रार्थयाञ्चक्रे, ३५
साध्ये सति यथा सा घटिका तस्मादपगच्छेत्। स चाब्रवीत्, ३६
आब्बा तात, सर्व्वं साध्यं भवता, पानीयपात्रमिदं मत्तोऽपसारयतु।
तथापि न मया, अपि तु त्वया यद् वाञ्छ्यते तदेव भवतु। ३७
अनन्तरं स आगत्य तान् निद्राणान् दृष्ट्वा पित्रं जगाद, शिमोन ३८
निद्रासि किम्? घटिकामेकां जागर्त्तुं किं नाशक्नोः? यूयं जागृत ३९
प्रार्थयध्वञ्च नो चेत् परीक्षां निवेक्ष्यध्वे, यत आत्मोद्यतः शरीरन्तु
दुर्ब्बलम्। द्वितीयवारं गत्वा स वाक्यं तदेव व्याहरन् प्रार्थयाञ्चक्रे। ४०
प्रत्यावृत्य तु तान् पुन र्निद्राणान् ददर्श, यतस्तेषां नेत्राण्यवशान्या-
सन् तस्मै च किमुत्तरं दातव्यं तत् ते नाबुध्यत। तृतीयवारं ४१
पुनरागत्य स तान् जगाद, एवमेव यूयं निद्राणा विश्रामं सेवध्वे
किम्? अलमनेन। उपस्थितः स दण्डः। पश्यत मनुष्यपुत्रः पापिनां
करेषु समर्प्यते। उत्तिष्ठत। वयं गच्छामः। पश्यत मम समर्पयिता ४२
समीपमागतः।

तथैव तस्मिन् भाषमाणे द्वादशानां मध्ये गणितो यिहूदा ४३
उपतस्थे, तेन सार्द्धञ्च मुख्ययाजकानां शास्त्राध्यापकानां प्राचीना-
नाञ्च सकाशाद् असियष्टिधारी महान् जननिवहः। स समर्पयिता ४४
तेभ्यः सङ्केतं दत्तवान्, यथा, अहं यं चुम्बिष्यामि स एव सोऽस्ति,
यूयं तमेव धृत्वा यत्नेन रक्षन्तोऽपनयत। अतः स आगत्य तूर्णं ४५
तदन्तिकमुपस्थाय रब्बिन्नित्युक्त्वा तं चुचुम्ब। तदा ते तस्मिन् ४६
हस्तार्पणं कृत्वा तं दध्रुः। नराणान्तु तत्र तिष्ठतामेकः कोषादसिं ४७
निष्कृष्य महायाजकस्य दासमाहत्य तस्य कर्णं परिचिच्छेद। यीशुस्तु ४८

प्रतिभाषमाणस्तान् जगाद, दस्युमिव मां धर्त्तुम् असीन् यष्टींश्चा-
४९ दाय किं यूयं वहिरागताः? अहन्तु प्रत्यहं धर्म्मधाम्नि शिक्षयन्
युष्मत्सकाशमासं, यूयं तदा न मां धृतवन्तः। परन्तु शास्त्रीयो-
५० क्तिभिः सिद्धिर्गन्तव्या। तदा सर्व्वे तं त्यक्त्वा पलायाञ्चक्रिरे।
५१ युवा कश्चित् तु नग्नकाये सूक्ष्मं वस्त्रं परिधाय तमन्वगच्छत्।
५२ युवभिर्ध्रियमाणस्तु स तत् सूक्ष्मं वस्त्रं विहाय नग्नः पलायाञ्चक्रे।
५३ यीशुस्तु महायाजकस्यान्तिकमानीतः। तदर्थञ्च सर्व्वे मुख्य-
५४ याजकाः प्राचीनाः शास्त्राध्यापकाश्च समाजग्मुः। पितरस्तु दूरान्म-
हायाजकीयहर्म्यस्याभ्यन्तरं यावत् तमनुगत्य पदातिभिः सार्द्धमुप-
५५ विश्याग्नितापमसेवत। मुख्ययाजकाः कृत्स्ना महासभा च यीशुं
५६ हन्तुकामास्तस्य प्रतिकूलं साक्ष्यमन्वेगयन्त, न तु लेभिरे। बहव-
स्तद्विरुद्धं मृषासाक्ष्यमकथयन्, तेषां साक्ष्याणि तु समानानि
५७ नाभवन्। तदा केचिदुत्थाय तस्य विरुद्धं मृषासाक्ष्यं कथयन्तो-
५८ ऽवदन् अस्य मुखादस्माभि र्वाक्यमिदमश्रावि यथा, हस्तकृतमिदं
५९ मन्दिरं भङ्क्वाहं दिनत्रयेऽपरमेकमहस्तकृतं निर्म्मास्ये। इत्थमपि
६० तेषां साक्ष्यं समानं नाभवत्। अनेन महायाजको मध्यस्थान
उत्थाय यीशुं पप्रच्छ किमपि त्वं किं न प्रतिभाषसे? इमे तव
६१ प्रतिकूलं किं साक्ष्यं ददति? स तु मौनमवलम्ब्यातिष्ठत्, किमपि
न प्रत्यवदत्। महायाजकः पुनस्तं पृच्छन्नवादीत्, त्वं किं परमध-
६२ न्यस्य पुत्रः ख्रीष्टः? यीशुस्तदा जगाद, सोऽहमस्मि। यूयञ्च
मनुष्यपुत्रं प्रभावस्य दक्षिण आसीनम् आकाशीयमेघरथेनागच्छन्तञ्च
६३ वीक्षिष्यध्वे। महायाजकस्तदा स्ववासांसि विदीर्य्य बभाषे, साक्षि-
६४ णामधिकानां किं प्रयोजनम्? अश्रावि युष्माभिरीश्वरनिन्दा।
युष्माभिः किं मन्यते? तदा सर्व्वे तं प्राणदण्डार्हमुक्त्वा दोषिणं

चक्रुः। ततः केचित् तद्वपुषि निष्ठीवितुं तस्यास्यमाच्छाद्य मुष्टि- ६५
भिराहन्तुम् इदं वक्तुञ्चारेभिरे, भाविोक्तिं व्याहरेति। अनन्तरं
पदातिनः प्रहारैस्तं जघ्नुः।

पितरस्तु यदाधः प्राङ्गणेऽविद्यत, तदा महायाजकस्यैका दास्या- ६६
गत्य तापसेवने निविष्टं पितरं दृष्ट्वा सुनिरीक्ष्य च बभाषे त्वमपि ६७
नासरतीययीशोः सङ्गासीः। अनेन सोऽनङ्गीकुर्व्वन् जगाद, न ६८
ज्ञायते न बुध्यते वा मया त्वया किं गद्यते। ततः स बहिः-
प्राङ्गणं जगाम तदैव कुक्कुटो रुराव च। तत्रत्या दासी च तं ६९
दृष्ट्वा पुनः समीपे संस्थितान् जनान् वक्तुमारेभे, असौ तेषामेकः।
स तु पुनर्व्वारमनङ्गीचकार। क्षणात् परं समीपे संस्थिता जनाः ७०
पुनर्व्वारं पितरमूचुः, सत्यं त्वं तेषामेकतमः, त्वं हि गालीलीयोऽसि
तव भाषापि तादृशी प्रतिभाति। तदा सोऽनिष्टं प्रार्थयितुं ७१
शपथञ्चारभ्य व्याजहार, न जानेऽहं तं नरं यो युष्माभिरभिधीयते।
तदा द्वितीयवारं कुक्कुटो रुराव। अनन्तरं कुक्कुटस्य द्वितीयरवात् ७२
प्राक् त्वं मां त्रिरपलप्स्यसे इति वाक्यं यत् स यीशुनोक्तस्तत्
स्मृत्वा पितरश्चिन्ताकुलो भूत्वा क्रन्दितुं प्रवृत्तः॥ १४॥

---

१५ पञ्चदशोऽध्यायः।

१ ख्रीष्टस्य पीलातसमीपानयनम् ६ पीलाते समर्पणम् १६ ख्रीष्टस्योपहासः २१ तस्य क्रुशे वेधनम् २९ तस्य निर्भर्त्सनम् ३३ तस्यार्त्तरावः ३७ तस्य प्राणत्यागः ४० तन्मरणात् परं योषितामुपस्थितिः ४२ तस्य शवागारे स्थापनञ्च।

जाते पुनः प्रातःकाले प्राचीनैः शास्त्राध्यापकैश्च सार्द्धं मुख्य- १
याजकाः कृत्स्ना महासभा च तूर्णं मन्त्रणां चक्रु र्बद्ध्वा च यीशु-
मपनीय पीलाते समर्पयामासुः। पीलातस्तदा तं पप्रच्छ, त्वं किं २
यिहूदीयानां राजा? स तं प्रत्यवादीत्, भवान् व्याहरति। मुख्य- ३

४ याजकाश्च बहुशस्तस्याभियोगमकुर्व्वन्। पीलातस्तदा पुनस्तं पप्रच्छ,
त्वं किं किमपि न प्रतिभाषसे? पश्य तव विरुद्धममी साक्ष्यवचांसि
५ कति वदन्ति। यीशुस्तु ततः प्रभृति किमपि न प्रत्यभाषत,
पीलातश्च तेनाश्चर्य्यं मेने ।

६ तस्मिन् पर्व्वणि तु प्रतिवर्षं स तेषां कृते तै र्याचितं नरमेकं
कारागुप्तममोचयत्। तदा च यैरुपप्लवकारिभिरुपप्लवे नरहत्या-
७ कारि तैः सार्द्धं बारब्बा इतिनामको नर एकः कारावद्ध आसीत्।
८ अतः स तान् प्रति नित्यं यादृशमकरोत् जननिवह उच्चैःस्वरेण
९ क्रोशंस्तादृशमनुग्रहं याचितुमारेभे। पीलातस्तदा तान् प्रत्यवादीत्,
१० युष्मदर्थमहं यद् यिहूदीयानां राजानं मोचयेयं तत् किं वाञ्छथ?
११ यतस्तेनाज्ञायत स यन्मात्सर्य्यान्मुख्ययाजकैः समर्पितः। यथा तु
१२ वरं बारब्बास्तेन मोच्येत तदर्थं मुख्ययाजका जननिवहं प्राचोद-
१३ यन्। पीलातस्तदा प्रतिभाषमाणः पुनस्तानब्रवीत्, यूयं यं यिहू-
दीयानां राजानं वदथ तं प्रति तर्हि मया कर्त्तव्यं किमिच्छथ?
१४ ते पुनः क्रोशन्त ऊचुः, स क्रुशमारोप्यतां भवता। पीलातस्तान्
जगाद, किं नु तेनापराद्धम्? ते त्वधिकं क्रोशन्तोऽवदन् स क्रुश-
१५ मारोप्यतां भवता। पीलातस्तदा जननिवहस्य प्रीतिजनकं कर्म्म
कर्त्तुमभिरोच्य तेषामिच्छातो बारब्बां मोचयामास, यीशुन्तु
कशाभिः प्रहार्य्य क्रुशारोपणार्थं तेषु समर्पयामास ।

१६ सैनिकनरास्तदा तं हर्म्यस्यार्थतो राजभवनस्याभ्यन्तरं नीत्वा
१७ सैन्यदलं कृत्स्नमेकत्राहूय च कृष्णलोहितं वस्त्रं परिधापयामासुः
कण्टकैश्च स्रजं निर्म्माय तस्य शिरसि निदधुस्तमित्थमभिवादयि-
१८ तुञ्चारेभिरे, यिहूदीयानां राजन् प्रणामः। नलेन तस्य शिरस्या-
१९ ताडयन् तस्य वपुषि न्यष्ठीवन् जानुपातं कुर्व्वन्तश्च तं प्राणमन्,

इत्थं तमुपहस्य तत् कृष्णलोहितवर्णं वस्त्रं मोचयित्वा तस्य स्ववा- २०
सांसि परिधाप्य च क्रुशमारोपयितुं तं बहि र्निन्युः।

तेन मार्गेण तदा सिकन्दर-रूफयोः पिता शिमोननामा नर २१
एकः कुरीणीयो ग्रामत आगच्छत्, तमेव ते दध्नुः क्रुशं तस्य
वोढुं वेतनं विना। इत्थञ्च तं गल्गथानामकं स्थलं निन्युः। २२
नाम्नोऽस्यार्थः कपालस्थलमिति। तत्र ते पानीयार्थं तस्मै गन्धर- २३
समिश्रितं द्राक्षारसं दातुमुपचक्रमिरे स तु तं न जग्राह। अनन्तरं २४
ते तं क्रुशम् आरोप्य तस्य वासांसि मिथो विभजमानाः केन किं
लभ्यं तज्ज्ञातुं गुटिकापातमकार्षुः। प्रथमे प्रहरे स तैः क्रुशमारो- २५
पयाञ्चक्रे। तस्येदमभियोगपत्रञ्च लिखितमासीत्, यिहूदीयानां २६
राजेति। तेन सार्द्धञ्च तै र्दस्यू द्वौ क्रुशे आरोप्येताम्, एकतरस्तस्य २७
दक्षिणे वामे चान्यतरः। इत्थं शास्त्रीयोक्तिरियं सिद्धिं गता,

दुष्क्रियाकारिणां मध्य एकः स गणितोऽभवत्। २८

अनन्तरं ये मनुष्या मार्गेण तेनाव्रजंस्ते शिरांसि चालयन्तस्त- २९
मित्थमनिन्दन्, यथा, हा मन्दिरभञ्जक दिनत्रये च तन्निर्म्मात-
रात्मानं तारय क्रुशादवरोह च। शास्त्राध्यापकैः सार्द्धं मुख्यया- ३०
जका अपीदृशमेव मिथो रहस्यं कुर्व्वन्तोऽवदन्, सोऽपरानतारयत्, ३१
आत्मानं तारयितुं न शक्नोति। इस्रायेलस्य राजा ख्रीष्ट इदानीं ३२
क्रुशादवरोहतु, तथा कृते वयं दृष्ट्वा विश्वसिष्यामः। तेन सार्द्धं
क्रुशारोपितौ तौ द्वौ नरावपि तमपावदताम्।

आमध्याह्नात्तु तृतीयप्रहरं यावत् कृत्स्ने भूतलेऽन्धकारोऽभूत्। ३३
तृतीये प्रहरे च यीशुरुच्चैरवदत्, एलोही, एलोही, ३४
लाम्मा शवक्तानीति, अस्यार्थोऽयम्,

हे मदीश मदीश त्वं मां परित्यक्तवान् कुतः।

३५ तच्छ्रुत्वा तत्र स्थितानां नराः केचिदवदन्, पश्यासावेलियमाह्व-
३६ यति। एकस्त् द्रुत्वा स्पञ्जमम्लरसेन पूरयित्वा नलाग्रे बद्ध्वा च
तमपीप्यत् प्राह च, निवर्त्तध्वम्, अमुमवरोहयितुम् एलिय आग-
च्छति न वेत्यस्माभि र्दृश्यताम्।

३७ ततः परं यीशुरुच्चरवमुदीर्य्य प्राणांस्तत्याज। तदा मन्दिरस्य
३८ तिरस्करिण्यग्रतोऽधो यावद् विदीर्णा द्विखण्डा बभूव। स चेदमु-
३९ त्क्रोशन् प्राणांस्तत्याजेति दृष्ट्वा तत्सम्मुखं संस्थितः शतपतिरवादीत्,
सत्यं नरोऽयमीश्वरस्य पुत्र आसीत्।

४० अपि च योषितः काश्चिद् दूरादवलोकमानास्तत्राविद्यन्त।
४१ तासां मध्ये मग्दलीनी मरियम् कनिष्ठयाकोबस्य योसेश्च माता
मरियम् शालोमी चासन्, स यदा गालील आसीत् तदाप्येतास्त-
मनुगतवत्यः परिचरितवत्यश्च। तेन सार्द्धं यिरूशालेममागता
बह्वोऽपरा अप्युपस्थिता आसन्।

४२ तदा सन्ध्या सम्भूता। तद्दिनञ्च सज्जीकरणदिनमर्थतो विश्रा-
४३ मवारस्य पूर्व्वदिनम्, अतोऽरिमाथियानिवासी योषेफ इति नामको
यः सुशीलो मन्त्रीश्वरराज्यं प्रत्यैक्षत स उपस्थाय पुरुषत्वमवलम्ब्य
४४ पीलातस्य गृहं प्रविवेश तञ्च यीशो र्देहं ययाचे। तस्याशुमरणे
पीलात आश्चर्य्यं मत्वा तं शतपतिमाहूय पप्रच्छ स दीर्घकालं
४५ मृतो न वेति। शतपते र्मुखात् ज्ञातव्यमवगत्य स विनामूल्येन
४६ योषेफाय देहं ददौ। स च सूक्ष्मं वस्त्रं क्रीत्वा तमवरोह्य तेन
वस्त्रेण वेष्टयामास शैलमध्ये तक्षिते शवागारे निदधे च, प्रस्तरमेकं
४७ लोठयित्वा च तच्छवागारमुखं रुरोध। स तु कुत्र निधीयते
तन्मग्दलीनी मरियम् योसे र्माता चान्यतरा मरियम् ददृ-
शतुः॥ १५॥

१६ षोडशोऽध्यायः।

१ स्वर्गीयदूतेन ख्रीष्टोत्थानप्रकाशः ९ मग्दलीन्यै मरियमे शिष्यद्वयाय च दर्शनदानं १४ एकादशशिष्येभ्यो दर्शनदानम् आदेशश्च १९ स्वर्गारोहणञ्च।

व्यतीते तु विश्रामदिने मग्दलीनी मरियम् याकोबस्य माता १
मरियम् शालोमी च सुगन्धिद्रव्याणि चिक्रियुर्यतस्ता गत्वा तं
संलेपयितुमैच्छन्। ततः सप्ताहस्य प्रथमदिवसस्य प्रत्यूषे ताः सूर्य्यो- २
दयात् परं श्मशानस्थानान्तिकमागच्छन्त्यो मिथोऽवदन्, श्मशानस्य
द्वारात् कोऽस्मदर्थं तं प्रस्तरं लोठयिष्यतीति। तत ऊर्द्धदृष्टिं कृत्वा ३
ताभिः स प्रस्तरो द्वाराल्लोठितो लक्षितो यतः सोऽतीव महाना-
सीत्। अनन्तरं ताः श्मशानं प्रविश्य सितप्रावारपरिहितमेकं ४
युवानं दक्षिणपार्श्व उपविष्टं दृष्ट्वा चमच्चक्रुः। स तु ता जगाद, ५
मा भैष्ट। यूयं क्रुशारोपितं नासरतीयं यीशुम् अन्विष्यथ। ६
पुनरुत्थितः स नात्र विद्यते। पश्यतेदं तत् स्थानं यत्र स शायितः। ७
प्रत्युत यूयं गत्वा तस्य शिष्यान् पितरञ्च ब्रूत, स युष्मदग्रतो गालीलं
याति, यूयं तेन यथोक्तास्तदनुरूपं तत्र तं द्रक्ष्यथेति। ततस्ता ८
निर्गत्य सत्वरं श्मशानात् पलायाञ्चक्रिरे, कम्पविस्मयाभ्यामाक्रा-
न्तास्तु कमपि किमपि नावदन् यतस्ता अबिभयुः।

सप्ताहस्य प्रथमे दिवसे प्रत्यूषे पुनरुत्थितो यीशुः प्रथमं ९
मग्दलीन्यै मरियमे दर्शनं ददौ यस्याः स सप्त भूतान् निःसारि-
तवान्। सा च गत्वा शोचद्भ्यो रुदद्भ्यश्च तस्य सङ्गिभ्यः संवादं १०
ददौ। स तु जीवति तयादर्शि चेति श्रुत्वा ते न व्यश्वसिषुः। ११
ततः परं स रूपान्तरमादाय तेषां द्वयोः पदव्रजेन ग्रामं गच्छतोः १२
प्रत्यक्षीबभूव। तौ च गत्वान्येभ्यः संवादं ददतुः। तयो र्वाक्येष्वपि १३
ते न व्यश्वसिषुः।

१४ शेष एकादशसु भोजनायोपविष्टेषु स तेषामेव प्रत्यक्षीबभूव,
ये च तं पुनरुत्थितं दृष्टवन्तस्तेषां वाक्येषु तै विश्वासो नाकारीति
हेतोः स तेषाम् अविश्वासं मनःकाठिन्यञ्च निनिन्द ।
१५ अपि च स तान् जगाद, यूयं कृत्स्नं जगद् गत्वा कृत्स्नसृष्टे
१६ ज्ञानार्थं सुसंवादं घोषयत । यो विश्वस्य स्नापयिष्यते स तार-
१७ यिष्यते, यस्तु न विश्वसिष्यति स विचारे दण्डपात्रं भविष्यति। ये
च विश्वसिष्यन्ति, अभिज्ञानानीमानिताननुवर्त्तिष्यन्ते। मम
नाम्ना ते भूतान् निःसारयिष्यन्ति। नूतना भाषा वदिष्यन्ति।
१८ सर्पान् उपादास्यन्ते। पीतमपि तैः प्राणान्तकं पानीयं तान् नैव
हिंसिष्यति। कृते तैः पीडितेषु हस्तार्पणे त आरोग्यं लप्स्यन्ते।
१९ तैः संलपनात् परं प्रभुः स्वर्गमारोहित ईश्वरस्य दक्षिण
२० उपविष्टश्च। ते तु प्रस्थाय सर्व्वत्र सुसंवादमघोषयन् प्रभुस्तु सहक-
र्म्माभूत्, अनुवर्त्तमानैरभिज्ञानैश्च वाक्यं सप्रमाणमकरोत्॥ १६॥

लूकलिखितः सुसंवादः।

१ प्रथमोऽध्यायः।

१ आभाषः ५ इलीशाबेताया गर्भधारणकथनं २६ मरियमो गर्भधारणकथनं ३९ तयोर्द्वयोः साक्षात्करणं ४६ मरियमो गीतं ५७ योहनस्य जन्मकथनं ६७ तत्पितुः सखरियस्य भविष्यद्वाक्यं ८० योहनस्य वृद्धिश्च।

आदितो ये साक्षिणो वाक्यस्य सेवकाश्चासंस्तैरस्मासु यथा १
समर्पितं तथैवास्मन्मध्ये दृढप्रत्ययेन गृहीतानाम् इतिवृत्तानां कथा- २
प्रबन्धं रचयितुम् अनेक उपचक्रमिरे। अत एव, भो महामहिम ३
थियफिल, सूक्ष्मानुसन्धानेनारम्भात् सर्व्वमनुगतोऽहमपि भवदर्थं-
मानुपूर्व्वेण लेखितुं मतिमकार्षं, तेन भवान् याः कथाः शिक्षित- ४
स्तासाम् अमोघतामनुभविष्यति।

यिहूदियाया राज्ञो हेरोदस्य कालेऽबियस्य श्रेण्यां नियुक्तः ५
सखरियनामा याजक आसीत्। तस्य भार्य्या हारोणवंशोद्भवा,
नाम तस्या इलीशाबेता। उभौ तावीश्वरस्य समक्षं धार्म्मिका- ६
वास्ताम् अनिन्दनीयौ च प्रभोः सर्व्वा आज्ञा विधींश्च समाचरताम्।
सन्तानस्तु तयो र्नासीत्, यत इलीशाबेता बन्ध्या तावुभौ च ७
वयोवृद्धौ जातौ। एकदा तु यदा स याजकत्वस्य नियमात् ८
स्वश्रेण्याः पर्य्यायहेतोरीश्वरस्य समक्षं याजकत्वम् अन्वतिष्ठत्, तदा ९
गुटिकापातकृतनिरूपणात् स धूपदाहं कर्त्तुं प्रभो र्मन्दिरं प्रविष्ट- १०
वान्। धूपदाहकाले च कृत्स्नो जननिवहो बहिः प्रार्थयत। तदा ११
धूपवेद्या दक्षिणे तिष्ठन् प्रभोरेको दूतस्तस्मै दर्शनं ददौ। तं दृष्ट्वा १२

१३ सखरिय उद्विज्य भयाक्रान्तोऽभूत्। स दूतस्तु तं जगाद, मा
भैषीः सखरिय, यतस्तव प्रार्थनाश्रावि, तव भार्य्यैलीशाबेता च
त्वदर्थं पुत्रं प्रसोष्यते, त्वञ्च तस्य नाम योहन इति करिष्यसि।
१४ तव हर्ष उल्लासश्च जनिष्यते बहवश्च तस्य जन्मन्यानन्दिष्यन्ति।
१५ यतः स प्रभोः समक्षं महान् भविष्यति, द्राक्षारसं मद्यं वा न
१६ पास्यति, आमातृगर्भादेव पवित्रेणात्मना पूरयिष्यत इस्रायेलस्य
सन्तानानाम् अनेकांस्तेषामीश्वरं प्रभुं प्रति प्रत्यावर्त्तयिष्यति च।
१७ तस्याग्रतश्च स एलियस्यात्मना प्रभावेन च व्रजन् सन्तानान् प्रति
पितृणां हृदयानि प्रत्यावर्त्तयिष्यत्याज्ञात्यागिनश्च धार्म्मिकाणां
१८ मते प्रवर्त्य प्रभोः कृते सज्जितं प्रजावृन्दमुपकल्पयिष्यति। सख-
रियस्तदा तं दूतमब्रवीत्, कथमेतज्ज्ञास्यामि? अहं हि स्थविरो
१९ मम भार्य्यापि वयोवृद्धा। दूतस्तं प्रतिबभाषे, ईश्वरस्य समक्षं
स्थातुं नियुक्तो गाब्रीयेलोऽहं त्वामालपितुमिमं मङ्गलसंवादं तुभ्यं
२० दातुञ्च प्रहितः। पश्य च यस्मिन् दिन एतत् सेत्स्यति तद्दिनं
यावत् त्वं मौनी भाषितुमसमर्थश्च स्थास्यसि। यतो मम वचःसु
२१ त्वया प्रत्ययो नाकारि, स्वसमये तु तानि सेत्स्यन्ति। एतावत्कालं
प्रजाजनः सखरियं प्रत्यैक्षत मन्दिरे तस्य विलम्बने व्यस्मयच्च।
२२ बहिरागतस्तु स तैः संलपितुं नाशक्नोत्, मन्दिरे तेन दर्शनं
लब्धमिति तैरबोधि च। स तु तेषां ज्ञानार्थमिङ्गितान्यकरोन्मू-
२३ कोऽवातिष्ठत च। तदीयोपासनानुष्ठानस्य काले सम्पूर्णे स स्वगृहं
२४ प्रत्याजगाम। तस्मात् कालात् परं तस्य भार्य्यैलीशाबेता गर्भवती
२५ बभूव पञ्च मासान् प्रच्छन्ना तस्थौ च, यतः सावदत्, प्रभु र्यस्मिन्
काले जनेषु ममापयशो हर्त्तुं दृक्पातं कृतवान्, तस्मिन् काले
मां प्रतीत्थमाचरितवान्।

षष्ठे मासे पुन र्गाब्रीयेलो दूतो गालीलस्थं नासरताख्यं २६
नगरं दायूदकुलोद्भवाय योषेफाभिधाय पुरुषाय वाग्दत्तामेकां २७
कुमारीं प्रतीश्वरेण प्रहितः। तस्याः कुमार्य्या नाम मरियमिति।
दूतो गृहं प्रविश्य तां जगाद, मङ्गलं ते भूयात्, अनुगृहीते, २८
प्रभुस्तव सहायः, नारीषु त्वं धन्या। एवं दृष्ट्वा सा तस्य कथाया- २९
मुद्विग्ना समालोचयत् कीदृशोऽयं मङ्गलवाद इति। दूतस्तदा ३०
तामवादीत्, मा भैषी र्मरियम्, यतस्त्वमीश्वरस्यानुग्रहपात्री, पश्य ३१
च त्वं गर्भिणी भूत्वा पुत्रं प्रसोष्यसे तस्य नाम यीशुरिति
करिष्यसि च। स महान् भविष्यति परात्परस्य पुत्र इत्यभिधायिष्यते ३२
च, ईश्वरः प्रभुस्तस्मै तत्पितु र्दायूदस्य सिंहासनं दास्यति च, स ३३
च सर्व्वयुगानि यावद् याकोबकुलस्य राजा स्थास्यति तद्राज्यस्यान्तः
कदापि न भविष्यति च।

मरियम् तदा दूतमवादीत् कथमेतत् सम्भविष्यति? पुरुषं ३४
हि न जानेऽहं। दूतस्तां प्रतिबभाषे, पवित्र आत्मा त्वामधिष्ठास्यति ३५
परात्परस्य प्रभावस्तवोपरि छायां दास्यति च। एतत्कारणादेव
तव तत् पवित्रं गर्भफलमीश्वरस्य पुत्र इत्यभिधायिष्यते। पश्य च ३६
तव ज्ञातिरिलीशाबेतापि वार्द्धक्ये गर्भिणी जाता, सर्व्वै र्वन्ध्येत्य-
भिहितायास्त्र तस्याः षष्ठो मासोऽयं यत ईश्वरस्यासाध्यं वाक्यं ३७
किमपि नास्ति। मरियम् तदाब्रवीत् पश्याहं प्रभो र्दासी। यथोक्तं ३८
भवता तथैव मम गति र्भूयात्। अनन्तरं दूतस्तस्याः समीपात्
प्रतस्थे।

तस्मिन् काले मरियम् उत्थाय सत्वरं पर्व्वतमयप्रदेशस्थं ३९
यूदानगरं जगाम सखरियस्य गृहं प्रविश्य चेलीशाबेतां मङ्गलवा- ४०
देनाभिबभाषे। इलीशाबेता च यदा मरियमो मङ्गलवादमश्रौषीत् ४१

४२ तदैव तस्या जठरे शिशु र्ननर्त्त। इलीशाबेता च पवित्रेणात्मना
पूर्णोच्चरवेणेमां वाचमुदीरयामास, धन्या त्वं नारीषु धन्यश्च तव
४३ गर्भफलं। कथन्तु जातं ममेदं सौभाग्यं यन्मत्प्रभो र्जननी
४४ मदन्तिकमागता? पश्य त्वदीयमङ्गलवादस्य रवे मम कर्णे
४५ प्रविष्टवत्येव ननर्त्त शिशुरुल्लासान्ममोदरे। धन्यैव त्वं विश्वासकारिणि
यत् प्रभोरादेशात् त्वं यद्यदुक्ता तत्सिद्धि र्भविष्यति। तदा मरियम्
बभाषे,

४६ कीर्त्तयन्ति मम प्राणा महिमानं सदाप्रभोः।
४७ ममात्मा च प्रहृष्टोऽभूद् ईश्वरे तारके मम॥
४८ स्वदास्या दीनतायां स दृक्पातं कृतवान् यतः।
पश्चाद्यारभ्य वक्ष्यन्ति धन्यां मां सार्व्वकालिकाः॥
४९ मदर्थं गुरुकर्माणि कृतवान् सर्व्वशक्तिमान्।
नामधेयञ्च यत् तस्य तत् पवित्रं स्मृतं किल॥
५० तस्माद् भीता मनुष्या ये तेषामेव कृते स्थिरा।
पुत्रपौत्रादिभि र्भोग्या करुणा तस्य वर्त्तते॥
५१ कर्म्म विक्रमसिद्धं स कृतवान् स्वीयबाहुना।
उद्धतांश्चित्तसङ्कल्पै र्मनुष्यान् स विकीर्णवान्॥
५२ स कर्तृत्वविशिष्टांश्च कृतवान् आसनच्युतान्।
ये च नीचा मनुष्यांस्तान् चकारोच्चपदान्वितान्॥
५३ क्षुधितान् पूरयामास स द्रव्यैरुत्तमैः पुनः।
धनिनस्तु मनुष्यान् स रिक्तहस्तान् विसृष्टवान्॥
५४ इस्रायेलं स्वदासञ्चोपाकार्षीत् स महायवत्।
दयां स्मर्त्तुं यथा प्रोक्तास्तेनास्मत्पूर्व्वपूरुषाः।
५५ अब्राहामे फलिष्यन्तीं तद्वंशे च युगक्रमात्॥

अनन्तरं मरियम् प्रायेण मासत्रयं तस्याः सन्निधाववस्थाय स्वगृहं ५६
प्रतिजगाम।

इलीशाबेतायास्तु प्रसवकाले सम्पूर्णे सति सा पुत्रं प्रासोष्ट। ५७
तदा तां प्रति प्रभुना महती दयाकारीति श्रुत्वा तस्याः समीप- ५८
वासिनो ज्ञातिजनाश्च तया सार्द्धमानन्दुः। अष्टमे दिने च ते ५९
शिशोस्त्वक्छेदनार्थमागत्य पितु र्नामेव तस्यापि सखरिय इति
नाम कर्त्तुं प्रावर्त्तन्त। तस्य जननी तु प्रतिजगाद, नैवम्, अस्य ६०
नाम योहन इत्यभिधायिष्यते। अनेन ते तामूचुः, एतन्नाम्ना ६१
ख्यातस्तव ज्ञातिजनेषु कोऽपि नास्ति। ततस्त इङ्गितैस्तस्य पितरं ६२
पप्रच्छुः, भवदिच्छातोऽस्य किं नाम कर्त्तव्यम्? ततः स फलकमेकं ६३
याचित्वा लिलेख, अस्य नाम योहन इति। अनेन सर्व्वे विस्मयं
मेनिरे। तत्क्षणमेव तस्य वक्त्रं जिह्वा च मोचिते, स च भाषमाण ६४
ईश्वरस्य धन्यवादं कर्त्तुं प्रवृत्तः। तयोः समीपवासिनश्च सर्व्वे ६५
भयाक्रान्ताः। यिहूदियायाः पर्व्वतमयप्रदेशस्य च सर्व्वत्रैतासां ६६
सर्व्वकथानां प्रसङ्गो व्यानशे, यावन्तश्च ता अश्रौषंस्ते हृदयेषु ता
निधायावदन्, किं नु भवितव्यं शिशुनामुनेति। प्रभो र्हस्तश्च
तस्य सहाय आसीत्।

तस्य पिता सखरियस्च पवित्रेणात्मना पूर्णो भाववाक्यमिदं ६७
व्याजहार,

धन्यः स्यादीस्रयेलीयजनानामीश्वरः प्रभुः। ६८
अवेक्ष्य स्वप्रजानां स मोचनं कृतवान् यतः॥
शृङ्गञ्चोत्पादयामासास्मदर्थं त्राणसाधकं। ६९
उद्भूतं स्वीयदासस्य दायूदस्यैव वंशतः।
यथा प्राहादिकालीनैः पवित्रै र्भाववादिभिः॥ ७०

परित्राणार्थमस्माकं परिपन्थिसमूहतः।
७१ उद्धाराय च सर्व्वेषाम् अस्मद्विद्वेषिणां करात्॥
७२ करुणां कर्त्तुकामोऽस्ति सोऽस्मदीयपितॄन् प्रति।
नियमं स्मर्त्तुकामश्च पवित्रं स्वकृतं पुरा।
७३ अस्मत्पित्रेऽब्रहामाय शप्था दत्तश्च तं वरं॥
७४ निर्भया येन शच्यामः शत्रुहस्तेभ्य उद्धृताः।
७५ साधुत्वधार्म्मिकत्वाभ्यां तत्साक्षात् तं समर्चितुं।
सकलान् दिवसान् यावदस्माकं परमायुषः॥
७६ शिशो परात्परस्य त्वं भाववाद्यभिधास्यसे।
प्रभो र्मार्गान् हि संस्कर्त्तुं तदग्रे त्वं व्रजिष्यसि॥
७७ प्रजाभ्यस्तस्य दातव्यं ज्ञानं त्राणस्य च त्वया।
पापानां मार्जने तासां कारुण्येनास्मदीशितुः॥
७८ तत्स्नेहादूर्द्ध्वलोकीयास्मान् ऊषा प्रत्यवैक्षत।
७९ ध्वान्ते मृत्युतमिस्रे चासीनान् द्योतयितुं नरान्।
अस्मत्पादान् यथा कुर्य्यात्क्षान्तिमार्गावलम्बिनः॥

८० अथ स शिशुरवर्द्धतात्मना च बलवान् अजायत। इस्रायेलाय तु तत्प्रदर्शनस्य दिनं यावदनुपस्थितं तावत् स निर्जनस्थानेष्ववर्त्तत॥ १॥

---

२ द्वितीयोऽध्यायः।

१ योषेफस्य बैत्लेहमपुरयानं ख्रीष्टजन्म ८ स्वर्गीयदूतै र्मेषपालानां समीपे तज्जन्माख्यानं १५ मेषपालकैरन्येभ्यस्तस्य व्यक्तीकरणं २१ ख्रीष्टस्य त्वक्छेदनं २२ मरियमः शुचिता २५ शिमियोनस्य कथा ३६ हान्नाचरित्रं ४० ख्रीष्टस्य बर्द्धनं ४१ बाल्ये वयसि पण्डितैः सह ख्रीष्टस्य प्रश्नोत्तरे च।

तस्मिन् काले श्रीगस्तकैसरस्य सकाशादिदं शासनं प्रचचार, १
यत् साम्राज्यस्य सर्व्वजनैः स्वनाम्नां लेख्यारोपणं कर्त्तव्यं। नाम्नां २
तल्लेख्यारोपणं सुरियाप्रदेशाधिपतेः कुरीणीयस्याधिकारकालस्य
प्रथममासीत्। अतो नामानि लेख्यमारोपयितुं सर्व्वजनः प्रत्येकं ३
स्वनगरं जगाम। योषेफोऽपि गालीलस्थान्नासरताख्यनगराद् ४
यिहूदियादेशस्थं बैतलेहमाभिधं दायूदस्य नगरं जगाम, यतः स
दायूदस्य कुले गोष्ठ्याञ्च जातः। स आत्मने वाग्दत्तया स्वजायया ५
मरियमा सार्द्धं नाम्नो लेख्यारोपणार्थं जगाम। सा तु गर्भिण्या-
सीत्। तयोस्त्र तत्र वर्त्तमानयोस्तस्याः प्रसूतिकाल उपतस्थे। ६
अतः सा निजं प्रथमजातं पुत्रं प्रासोष्ट, वस्त्रखण्डे र्वेष्टयित्वा च ७
पशुशालास्थगवादन्यां तं शाययामास, यतः प्रवासगृहे तेषां कृते
स्थानं नासीत्।

तस्मिन् प्रदेशे वर्त्तमानाः केचिन्मेषरक्षकाः प्रान्तरे रात्रिं ८
यापयन्तः पर्य्यायक्रमेण यामिन्यां स्वव्रजम् अरक्षन्। पश्य च ९
प्रभोरेको दूतस्तेषामन्तिकम् उपतस्थे प्रभोः प्रतापश्च तेषां परितो
विरेजे। अनेन ते महाभयेनाक्रान्ताः। स दूतस्तु तान् जगाद, १०
मा भैष्ट। पश्यताहं युष्मभ्यं महानन्दस्य सुसंवादं ददामि, स
आनन्दः कृत्स्नेन प्रजाजनेन भोग्यः। यतो युष्मदर्थमद्य दायूदस्य ११
नगरे परित्राताजनि, स हि ख्रीष्टः प्रभुः। इदञ्च युष्मदर्थं १२
तदभिज्ञानं, वस्त्रखण्डे र्वेष्टितः शिशु र्गवादन्यां शयानो युष्माभि-
रासादयिष्यत इति। अकस्माच्च बहुतरा स्वर्गीयसेना तस्य दूतस्य १३
सङ्गिनी भूत्वेश्वरस्य स्तवं गायन्ती व्याजहार,

ईश्वरायोर्द्ध्वलोकेषु भूयान्माहात्म्यकीर्त्तनं। १४
शान्ति र्भूयात् पृथिव्याञ्च प्रीतिपात्राणि मानवाः॥

१५ तेषु दूतेषु तेभ्यः स्वर्गं प्रस्थितेषु मेषरक्षकास्ते मनुष्याः
परस्परमूचुः, गम्यतामस्माभि र्वैतलेहमम्, अवलोक्यताञ्च तदितिवृत्तं
१६ यत् प्रभुरस्मान् ज्ञापयामास। अतस्ते सत्वरं गत्वा मरियमं
१७ योषेफञ्च गवादन्यां शयानं शिशुञ्चासादयामासुः। दृष्ट्वा च
१८ ज्ञापयामासुस्तं शिशुमधि तां कथां यां ते प्रोक्ताः, श्रोतारश्च
१९ सर्व्वे मेषरक्षकैः कथितेषु वचःस्वाश्चर्य्यं मेनिरे। मरियमपि चित्ते
२० विचारयन्ती तानि सर्व्वाणि वचांस्यरक्षत्। ते मेषरक्षकास्तु यथो-
क्तास्तथैव यद्यच्छ्रुतवन्तो दृष्टवन्तश्च, तन्निमित्तमीश्वरं महयन्तस्तु-
वन्तश्च प्रत्याजग्मुः।

२१ अष्टमे दिने तूपस्थिते शिशोस्त्वक्छेदकाले तस्य नाम यीशु-
रित्यकारि। गर्भावस्थात् प्रागेव तस्य तन्नाम दूतेनोदाहृतम्।
२२ मोशे र्व्यवस्थानुसारेण च तस्याः शुचीभवनकाल उपस्थिते
तौ प्रभोः समक्षं शिशुमुपस्थापयितुं यिरूशालेमं निन्यतुः, यतः
२३ प्रभो र्व्यवस्थायामित्थं लिखितमास्ते, गर्भाशयोद्घाटकः सर्व्वपुंस-
२४ न्तानः प्रभोः कृते पवित्रोऽभिधायिष्यते। पुनश्च प्रभो र्व्यवस्थायां
यत् कथितमास्ते तदनुसारेण यज्ञीयोपहारार्थं कपोतयुग्मं पारा-
वतशावकद्वयं वा तयो र्दातव्यमासीत्।

२५ पश्य च यिरूशालेमे शिमियोननामको नर एकोऽविद्यत, स
धार्म्मिकः श्रद्धाशील इस्रायेलस्य सान्त्वनां प्रतीक्षमाणः पवित्रे-
२६ णात्मनाधिष्ठितश्चासीत्। पवित्रेणात्मना तस्मै चेदं प्रत्यश्रावि यत्
प्रभोरभिषिक्तं नररत्नं (ख्रीष्टं) न दृष्ट्वा स मृत्युं नास्वादिष्यति।
२७ पवित्रस्यात्मन आवेशात् स धर्म्मधाम आगतवान्। यदा च शिशो
र्यीशोः पितरौ व्यवस्थानिरूपितरीतिमाचरितुं तमभ्यन्तरमानयतां,
२८ तदा सोऽपि तं क्रोडेऽग्रहीत्, ईश्वरस्य धन्यवादं कुर्व्वंश्चावादीत्,

इदानीं भवता स्वीयः किङ्करोऽयं विसृज्यते। २९
भो मत्स्वामिन् सकल्याणं भवद्वाक्यानुसारतः॥
मन्नेत्राभ्यां यतोऽदर्शि त्राणोपायस्त्वया कृतः। ३०
समक्षं सर्व्वजातीनां भवतैवोपकल्पितः॥
दीपः स परजातीनां तासां प्रद्योतनार्थकः। ३१
त्वज्जनस्तु य इस्रायेल् तस्य भास्कर एव सः॥ ३२

शिशुमधि यद्यद् अकथ्यत तत्र योषेफस्तस्य माता चाश्चर्य्यम- ३३
मन्येतां। शिमियोनश्च ताभ्यामाशिषं ददौ तस्य मातरं मरियमं ३४
जगाद च, पश्येस्रायेलस्य मध्ये बहूनां पतनोत्थानयो र्हेतु
र्विसंवादान्वितमभिज्ञानञ्च भवितुमयं नियुक्तः। तव निजप्राणा ३५
अप्यसिना व्यत्स्यन्ते। इत्थं बहुहृदयेभ्य उद्गतैस्तर्कैः प्रकटीभवि-
तव्यमिति।

तदानीमाशेरवंशोद्भवा पनूयेलसुता हान्नेतिनामिका भाववा- ३६
दिन्यासीत्, सातीव वयोवृद्धा, कौमार्य्यात् परं सप्तवत्सरान् भर्त्रा
सार्द्धमुषित्वा प्रायेण चतुरशीतिवर्षीया विधवा जाता। सा धर्म्म- ३७
धामतो न निरगच्छत् नक्तं दिवा चोपवासप्रार्थनाभिरुपासनाम-
कुरुत। सापि तस्मिन् दण्ड उपस्थाय प्रभो र्माहात्म्यं स्वीकुर्व्वाणा ३८
यिरूशालेमे ये मोचनं प्रत्यैक्षन्त तेभ्यः सर्व्वेभ्यस्तस्य कथाम-
कथयत्।

प्रभो र्व्यवस्थयादिष्टानि सर्व्वकर्म्माणि सम्पाद्य तौ स्वनगरं ३९
गालीलस्थं नासरतं प्रतिजग्मतुः। स शिशुश्चावर्धतात्मना बलवान् ४०
ज्ञानपूर्णश्चाभवत्, ईश्वरस्यानुग्रहेणाधिष्ठितश्चासीत्।

अथ तस्य पितरौ प्रतिवर्षं निस्तारपर्व्वणि यिरूशालेमम- ४१
गच्छताम्। अतस्तस्मिन् द्वादशवर्षवयस्के सति पार्व्वणरीत्यनुसारेण ४२

४३ तौ यिरूशालेमं गत्वा पार्व्वणदिनानि यापयित्वा च यदा प्रत्या-
वर्त्तेतां तदा बालको यीशु यिरूशालेमेऽतिष्ठत्। योषेफस्तु तस्य
४४ माता च तन्नाजानीताम्, अपि तु स क्वचित् सहयात्रिकाणां
मध्येऽस्तीत्यनुमाय तौ दिनैकगम्यं मार्गं जग्मतुः, ततः परं ज्ञाति-
४५ जनेषु बन्धुषु च तम् अमृगयेताम्। अनासाद्य तु तमन्विष्यन्तौ
४६ यिरूशालेमं प्रत्याजग्मतुः। दिनत्रयात् परञ्च धर्म्मधाम्नि तमासा-
दयामासतुः। स गुरूणां मध्य आसीनस्तेषां वचांस्यशृणोत् तांश्च
४७ प्रश्नानपृच्छत्। यावन्तश्च तस्य वाक्यान्यशृण्वन् ते सर्व्वे तस्य
४८ बुद्ध्यां प्रत्युत्तरेषु चाश्चर्य्यममन्यन्त। तं दृष्ट्वा तौ विस्मयापन्नौ।
तस्य माता च तं जगाद, वत्स, आवां प्रति त्वयेदं किमकारि?
४९ पश्य तव पिताहञ्च शोचन्तौ त्वाम् अन्वैष्याव। स तु ताववादीत्
किमर्थं मामन्वैष्यतम्? किं नाजानीतं यन्मत्पितु र्विषयेष्ववस्थानं
५० मयि युज्यते? इदं यद् वचनं स तावववादीत्, तत् ताभ्यां
५१ नाबोधि। ततः परं स ताभ्यां सार्द्धं यात्रां कृत्वा नासरतमाज-
गाम तयो र्वशवर्त्ती तस्थौ च। तस्य माता चैताः सर्व्वकथाश्चि-
५२ त्तेऽरक्षत्। यीशुस्तु ज्ञाने वयसीश्वरस्य मनुष्याणाञ्चानुग्रहे च
वर्धिष्णुरासीत् ॥ २ ॥

---

३ तृतीयोऽध्यायः ।

१ योहनस्य प्रचारः स्नापनञ्च १५ ख्रीष्टार्थे तस्य साक्ष्यदानं १९ योहनस्य कारावन्धनं २१ ख्रीष्टस्य स्नानं २३ ख्रीष्टस्य वंशश्रेणी च।

१ अथ तिबिरियकैसरस्य राजत्वस्य पञ्चदशे वत्सरे यदा
पन्तीयः पीलातो यिहूदियायाः शास्ता, चतुर्थांशाधिपतीनां मध्ये
च हेरोदो गालीलस्य, तदीयभ्राता फिलिपो यितूरिया-त्राखो-

नीत्याख्ययोः प्रदेशयो र्लुषाणियस्त्राबिलीन्या राजान आसन्, यदा
च हाननः कायाफाश्च महायाजकावास्तां, तदा मरुभूमावीश्वरस्य २
वाक्यं सखरियसुतं योहनं प्रति प्रादुरभूत्। ततः स यर्द्दनसमी- ३
पस्थस्य जनपदस्य सर्व्वत्रोपस्थाय पापमोचनार्थं मनःप्रत्यावर्त्तनसू-
चकम् स्नापनमघोषयत्, भाववादिनो यिशायाहस्योक्तीनां ग्रन्थे यथा ४
लिखितमास्ते,

मरौ घोषयतः प्रोच्चैरस्यायं कस्यचिद्रवः।
प्रभोः संस्कुरुताध्वानं विधद्धं तत्पृती ऋजू॥
सर्व्वाण्यापूरयिष्यन्ते निम्नस्थानानि यत्नतः।
कारिष्यन्ते पुन र्निम्नाः सर्व्वे भूधरपर्व्वताः॥ ५
सरलानि भविष्यन्ति कुटिलानि स्थलान्यपि।
यानि वर्त्मानि रुक्षाणि तान्याप्स्यन्ति समानतां।
द्रक्ष्यते सर्व्वमर्त्यैश्च त्राणमीश्वरसाधितं॥ ६

ततो ये जननिवहास्तेन स्नापनार्थं वहिरगच्छंस्तान् सोऽवदत्, ७
अरे सर्पवंशाः, यूयं भाविक्रोधात् पलायितुं केनादिष्टाः? अतो ८
मनःप्रत्यावर्त्तनस्य योग्यानि फलानि फलत। अस्माकं पिताब्राहामो
विद्यत इति वाक्यं वान्तरे प्रयोक्तुं मा प्रवर्त्तध्वं, यतोऽहं युष्मान्
ब्रवीमि, एतेभ्यः प्रस्तरेभ्योऽब्राहामस्य कृते सन्तानानुत्पादयितुम्
ईश्वरः शक्तिमान्। परन्त्वधुनैव पादपानां मूलेषु कुठारो लगन्नास्ते, ९
अतो यः कश्चित् पादपः सत्फलं न फलति स उच्छिद्यते वह्नौ
निक्षिप्यते च।

जननिवहास्तदा तं पप्रच्छुः, तर्हि किं कर्त्तव्यमस्माभिः? स १०
प्रतिभाषमाणस्तान् जगाद, यस्याङ्गरक्षके द्वे वस्त्रे स्तः स वस्त्रही- ११
नायैकतरं ददातु। खाद्यद्रव्याणि वा यस्य विद्यन्ते स तथैव

१२ करोतु। स्नापनार्थमागताः केचित्करादायिनोऽपि तं जगदुः,
१३ गुरो किं कर्त्तव्यमस्माभिः? स तान् जगाद, युष्मदर्थं यदादिष्टं
१४ ततोऽधिकं मादारयत। केचिद् योद्धारोऽपि तं पप्रच्छुरस्माभि
र्वा किं कर्त्तव्यं? स तान् जगाद, कमपि मा पीडयत, मृषादोषं
वा कस्मिन्नपि मारोपयत, स्वभृतौ सन्तुष्य तिष्ठत च।

१५ प्रजाजनस्तु प्रतीक्षत सर्व्वे च योहनमधि मनःस्वित्यम् अतर्क-
१६ यन्, असौ किं ख्रीष्टः स्यादिति? अतो योहनः प्रतिभाषमाणः
सर्व्वान् जगाद, अहं युष्मांस्तोये स्नापयामि, मत्पश्चात्तु मत्तो
बलवत्तरो नर आगच्छति, तदीयोपानहो र्बन्धन्यौ मोक्तुमप्यहं न
योग्यः। स युष्मान् पवित्र आत्मनि वह्नौ च स्नापयिष्यति।
१७ तस्य हस्ते सूर्पो विद्यते, स च स्वीयखलं सम्यक् संशोधयिष्यति,
निजगोधूमान् कुसूले सङ्ग्रहीष्यति च, तुषांस्त्वनिर्व्वाणवह्निना
१८ दाहयिष्यतीति। एतदन्येन प्रचुरेणोपदेशेनापि स प्रजाजनं सुसंवा-
दमज्ञापयत्।

१९ ततः परं हेरोदः फिलिपनामकस्य स्वभ्रातु र्भार्य्यां हेरोदि-
यामधि स्वकृतान्यपराणि सर्व्वाणि दुष्कर्म्माण्यधि च योहनेन
२० भर्त्सितः। अतः स तं दोषराशिमनेनापि वर्धयामास यद् योहनं
कारायां रुरोध।

२१ यदा तु कृत्स्नः प्रजाजनोऽस्नाप्यत, तदा यीशावपि स्नापिते
२२ प्रार्थयमाने च स्वर्ग उद्घाटितः पवित्र आत्मा च दैहिक आकारे
कपोत इव तस्योपर्य्यावततार, स्वर्गाच्चेयं वाणी समभूत्, मम
प्रियः पुत्रस्त्वं त्वय्यहं प्रीतः।

२३ स्वकार्य्यमारभमाणो यीशुः प्रायेण त्रिंशद्वर्षवयस्क आसीत्।
२४ लौकिकज्ञाने स योषेफस्य सुतः, स पुनरेलेः सुतः, स मत्ततस्य

सुतः, स लेवेः सुतः, स मल्केः सुतः, स यान्नस्य सुतः, स
योषेफस्य सुतः, स मत्तथियस्य सुतः, स आमोषस्य सुतः, स २५
नहूमस्य सुतः, स इष्लेः सुतः, स नगेः सुतः, स माटस्य सुतः, २६
स मत्तथियस्य सुतः, स शिमियेः सुतः, स योषेफस्य सुतः, स
यूदाः सुतः, स योहानाः सुतः, स रीषाः सुतः, स सरुब्बाबि- २७
लस्य सुतः, स शल्टीयेलस्य सुतः, स नेरेः सुतः, स मल्केः सुतः, २८
स आद्देः सुतः, स कोषमस्य सुतः, स इल्मोदमस्य सुतः, स
एरेः सुतः, स योषेः सुतः, स इलीयेषरस्य सुतः, स योरीमस्य २९
सुतः, स मत्ततस्य सुतः, स लेवेः सुतः, स शिमियोनस्य सुतः, स ३०
यूदाः सुतः, स योषेफस्य सुतः, स योननस्य सुतः, स इलिया- ३१
कीमस्य सुतः, स मिलेयाः सुतः, स मैननस्य सुतः, स मत्तत्तस्य
सुतः, स नाथनस्य सुतः, स दायूदस्य सुतः, स यिशयस्य सुतः, ३२
स ओबेदस्य सुतः, स बोयसस्य सुतः, स सल्मोनस्य सुतः, स
नहशोनस्य सुतः, स आम्मीनादबस्य सुतः, सोऽरामस्य सुतः, स ३३
हिम्रोणस्य सुतः, स पेरसस्य सुतः, स यिहूदाः सुतः, स याकोबस्य ३४
सुतः, स इस्हाकस्य सुतः, सोऽब्राहामस्य सुतः, स तेरहस्य सुतः,
स नाहोरस्य सुतः, स सरूगस्य सुतः, स रियोः सुतः, स पेलगस्य ३५
सुतः, स एबरस्य सुतः, स शेलहस्य सुतः, स कैननस्य सुतः, ३६
सोऽर्फक्षदस्य सुतः, स शेमस्य सुतः, स नोहस्य सुतः, स लेमकस्य ३७
सुतः, स मथूशेलहस्य सुतः, स हनोकस्य सुतः, स येरदस्य सुतः,
स महललेलस्य सुतः, स कैननस्य सुतः, स इनोशस्य सुतः, स ३८
शेथस्य सुतः, स आदमस्य सुतः, स ईश्वरस्य सुतः ॥३॥

---

४ चतुर्थोऽध्यायः ।

१ शैतानद्वारा ख्रीष्टस्य परीक्षा १४ तेन प्रचारारम्भणं १६ अशुचिभूतत्याजनं ३८ पितृस्य श्वश्रूआरोग्यकरणं ४० नानाविधरोग्यारोग्यकरणञ्च ।

१ अथ यीशुः पवित्रेणात्मना पूर्णो यर्द्दनतः प्रत्यावृत्त आत्मना
२ च मरुं नीतश्चत्वारिंशद्दिनानि दियावलेन परीक्षितश्च । तेषु दिनेषु
३ स निरशनस्तस्थौ । तेषु त्वतीतेषु स चुक्षोद । ततो दियावलस्त-
माह, भवांश्चेदीश्वरस्य पुत्रस्तर्हि प्रस्तरोऽसौ यथा पूपो भवेत्
४ तथाज्ञापयतु । यीशुस्तं प्रतिजगाद, लिखितमास्ते, न केवलेन
५ पूपेन मनुष्यो जीविष्यत्यपि त्वीश्वरस्य येन केनचिद् वचनेन । ततः
परं दियावलस्तमुच्चमेकं गिरिशिखरं नीत्वा निमिषैकमध्ये भूम-
६ ण्डलस्य निखिलराज्यानि दर्शयन्नवादीत्, कृत्स्नमिदं कर्त्तृत्वमेतेषां
प्रतापञ्चाहं तुभ्यं दास्यामि, यतस्तत् सर्व्वं मयि समर्पितं, यस्मै च
७ तद् दातुमिच्छामि तस्मै तद् ददामि, अतस्त्वं चेन्मम समक्षं
८ प्रणिपतेस्तर्हि तत् सर्व्वं तवैव भविष्यति । यीशुस्तं प्रतिबभाषे
मत्तोऽपसर शैतान, यतो लिखितमास्ते, निजेश्वरस्य प्रभो र्भजना
९ त्वया कर्त्तव्या, एकश्च स एव त्वयाराधयितव्यः । पुनश्च स तं
यिरूशालेमं नीत्वा धर्म्मधाम्नः शिखरे स्थापयित्वा च जगाद,
१० भवांश्चेदीश्वरस्य पुत्रस्तर्ह्यस्मात् स्थानाद् अधस्तात् प्रपततु, यतो
लिखितमास्ते,

त्वदर्थं निजदूतान् स तवादेक्ष्यति रक्षणं ।
११ यन्नाहन्याः पदं शैले तत् त्वां वक्ष्यन्ति ते करैः ॥
१२ यीशुस्तं प्रतिजगाद, उक्तमास्ते, त्वं स्वेश्वरस्य प्रभोः परीक्षां
१३ माकार्षीः । इत्थं कृत्स्नां परीक्षां समाप्य दियावल उपयुक्तं समयं
यावत् तस्मात् प्रतस्थे ।

यीशुरात्मनः प्रभावेन गालीलं प्रत्यावृत्तस्तस्य ख्यातिश्च तं १४
कृत्स्नं प्रदेशं व्यानशे। स च तेषां समाजगृहेषूपादिशत् सर्व्वैश्च १५
प्राशस्यत।

इत्थं पुरा यत्र स पोषितस्तन्नासरतनगरमाजगाम, स्वरीत्यनु- १६
सारेण च विश्रामदिने समाजगृहं प्रविश्य पाठार्थमुत्तस्थौ। तदा १७
भाववादिनो यिशायाहस्य ग्रन्थे तस्मै दत्ते स ग्रन्थं विस्तार्य्य तत्
स्थानमवाप यत्र लिखितमासीत्,

आस्ते मयि प्रभोरात्मा यतो मां सोऽभिषिक्तवान्। १८
ज्ञापयेयं सुसंवादं दरिद्रान् मानवान् यथा॥
तेनाहं प्रहितः कर्त्तुं भग्नचित्तान् निरामयान्।
वन्दीनां घोषितुं मुक्तिं दृक्शक्तिञ्च विचक्षुषां॥
अप्यनुज्ञाय विस्रष्टुं मनुष्यान् परिपीडितान्।
प्रभो र्घोषयितुञ्चापि प्रसादावहवत्सरं॥ १९

ततः परं स तं ग्रन्थं बद्ध्वा भृत्ये प्रत्यर्प्यासन उपविवेश। समा- २०
जस्थाः सर्व्वे चैकदृष्ट्या तं निरीक्ष्य तस्थुः। तदा स तानिदं वक्तु- २१
मारेभे, शास्त्रीयवचनमिदमद्य युष्मत्कर्णगोचरे पूर्णतां गतं। सर्व्वे २२
च तस्य पक्षे साक्ष्यमदुस्तन्मुखान्निःसरत्सु प्रीतिजनकेषु वचःस्वाश्च-
र्य्यममन्यन्त च। ते पुनरवदन्, किं न योषेफस्य पुत्रोऽसौ? ततः २३
स तान् जगाद, यूयमवश्यं मामिमं प्रवादं वक्ष्यथ, चिकित्सक,
आत्मचिकित्सां कुरु, कफरनाहूमि सिद्धानां येषां कर्म्मणां किंव-
दन्त्यस्माभिरश्रावि, तादृशान्यत्र स्वदेशेऽपि कुर्विति। स पुन र्जगाद, २४
कोऽपि भाववादी स्वदेशे नानुगृह्यते। युष्मानहं सत्यं ब्रवीमि, २५
एलियस्य काले यदा त्रीन् वत्सरान् षण्मासांश्च यावदाकाशो
रुद्धोऽतिष्ठत् कृत्स्ने देशे महादुर्भिक्षञ्चाभूत् इस्रायेले तदा बह्वो

२६ विधवा अविद्यन्त, एलियस्तु तासां कामपि प्रति न प्रहितः, केवलं
सीदोनदेशस्थं सारिफन्नगरं काञ्चिद्विधवां योषितं प्रति प्रहितः।
२७ तथा भाववादिन इलीशायस्य काल इस्रायेले बहवः कुष्ठिनो-
ऽविद्यन्त, तेषान्तु कोऽपि न शुचीकृतः, केवलः सुरीयो नामानः
२८ शुचीकृत इति। इदं श्रुत्वा समाजस्थाः सर्व्वे रोषेण पूर्णा उत्थाय
२९ तं नगराद् वहिश्चक्रुः। यत्र पर्व्वते च तेषां नगरं निर्म्मितमासीत्
३० तदग्रभागं नीत्वा तं निपातयितुमैच्छन्। स तु तेषां मध्येन व्रजन्
प्रतस्थे।

३१ अनन्तरं स कफरनाहूमाख्यं गालीलस्थं नगरमवततार।
३२ विश्रामवारे च यदा जनानशिक्षयत् तदा ते तस्य शिक्षायामा-
३३ श्चर्य्यम् अमन्यन्त, यतस्तस्य वाक्यं सामर्थ्यविशिष्टमासीत्। तत्र
समाजे चाशुचिभूतस्यात्मनाधिष्ठित एको नरोऽविद्यत, स उच्चैः-
३४ स्वरेणोत्क्रोशन् जगाद, निवर्त्ततां, भो नासरतीय यीशो, अस्माकं
भवतश्च किं? भवान् किमस्मान् नाशयितुमागतः? भवान् कस्तदहं
३५ जानामि, ईश्वरस्य पवित्रो नरो भवानिति। यीशुस्तु तं निर्भर्त्स-
यन् बभाषे, मौनी भव, अस्माच्च निःसर। ततः स भूतस्तं मध्य-
स्थाने निक्षिप्य किमपि न हिंसित्वा तस्मान्निःसृतः, सर्व्वे च
विस्मयेनापन्नाः परस्परं संलपन्तश्चावादिषुः, वाक्यमिदं कीदृशं?
३६ यतोऽसौ सामर्थ्येन प्रभावेन चाशुचीनात्मनोऽप्याज्ञापयति ते च
३७ निःसरन्ति। अनन्तरं तदीयकिंवदन्ती परितःस्थस्य जनपदस्य
सर्व्वत्र व्यानशे।

३८ अनन्तरं स उत्थाय समाजात् शिमोनस्य गृहं प्रविवेश।
शिमोनस्य श्वश्रूस्तदा प्रबलेन ज्वरेणापीड्यत, ते च तस्या उपका-
३९ रार्थं तं प्रसादयामासुः। ततः स तस्या ऊर्द्ध्वे तिष्ठन् ज्वरं

तर्जयामास, ज्वरश्च तां तत्याज, सा च तत्क्षणमुत्थाय तान्
पर्य्यचरत्।

ततः परमस्तं गच्छति सूर्य्ये विविधव्याधिग्रस्ता अस्वस्था जना ४०
येषामासंस्ते सर्व्वे तान् तस्यान्तिकमानिन्युः। स च तेषामेकैकस्मिन्
हस्तावर्पयंस्तान् निरामयांश्चकार। बहुभ्यश्च भूता निःसरन्त उच्चैः- ४१
स्वरेणावदन्, भवानीश्वरस्य पुत्रः ख्रीष्टः। ततः स तान् भर्त्सयन्
भाषितुं नान्वमन्यत, यतः स ख्रीष्ट इति तेऽजानन्। जाते पुनः ४२
प्रातःकाले स निर्गत्य किञ्चन निर्जनं स्थानं ययौ, जननिवहास्तु
तं मृगयाञ्चक्रिरे तस्यान्तिकमागत्य च तेषां सन्निधितस्तस्य प्रस्थानं
निवारयितुं तमधरन्। स तु तानब्रवीत्, अन्येष्वपि नगरेष्वीश्वर- ४३
राज्यस्य सुसंवादो मया घोषयितव्यः, यतस्तदर्थमहं प्रहितः। ततः ४४
परं स गालीलस्य समाजगृहेष्वघोषयत्॥ ४॥

---

५ पञ्चमोऽध्यायः।

१ अनेकमत्स्यधरणं १२ कुष्ठिनः परिष्करणं १७ पक्षाघातिनः स्वास्थ्यकरणं पाप-
मर्षणं २७ लेविनाम्न आह्वानम् तद्गेहे भोजनं ३३ अनुपवासकारणनिर्णयश्च।

एकदेश्वरस्य वाक्यं श्रोतुं जननिवहस्तमाकुलयत् स च गिनेष- १
रताख्यह्रदस्य तीरेऽतिष्ठत्। तदा स ह्रदकूलेऽवस्थिते द्वे नावौ २
ददर्श, ताभ्यां निर्गता धीवरा जालानि प्राक्षालयन्। अतस्तयो ३
र्या शिमोनस्यासीत् स तां प्रविश्य शिमोनमब्रवीत् त्वं स्थलात्
किञ्चिद् दूरं तां वाहयितुमर्हसीति। अनन्तरं स नाव्युपविश्य
जननिवहान् अशिक्षयत्। यदा च कथनाद्विरराम तदा शिमोनं ४
जगाद, गभीरं स्थानं यावन्नावं वाहय, तत्रैव मत्स्यधरणार्थं
युष्माभि र्जालानि निक्षिप्यन्तां। शिमोनस्तं प्रत्यब्रवीत्, नाथ, ५

कृत्स्नां यामिनीं परिश्रमं कृत्वास्माभिः किमपि न धृतं, भवत
६ आज्ञायात्वहं जालं निक्षेप्स्यामि। तदनुरूपं कृत्वा च तै र्महान्
७ मत्स्यनिवहो निबद्धः। ततो विशीर्य्यमाणे तेषां जाले त उपका
रायागमनार्थम् अन्यतरस्यां नावि स्थितान् स्वसङ्गिन आजुहुवु-
८ स्तेषु चागतेषूभे नावौ मग्नकल्पे कुर्व्वन्तः पूरयामासुः। तद्
विलोक्य पित्रो यीशो र्जानुनोः प्रणिपत्य व्याजहार, मत्तोऽपसरतु
९ प्रभो, यतः पापिष्ठो नरोऽहमिति। यतस्तैः सन्धृतान्मत्स्ययूथात् स
१० तत्सङ्गिनश्च सर्व्वे विस्मयाक्रान्ताः, शिमोनस्य सहभागिनोः सिब-
दियसुतयो र्याकोब-योहनयोरपि सैव दशा सम्भूता। यीशुस्तु
११ शिमोनमब्रवीत्, मा भैषीरद्यारभ्य त्वं नरधारी भविष्यसि। अन-
न्तरं नावौ स्थलं नीत्वा ते सर्व्वं विहाय तमनुजग्मुः।

१२ अथ स यदा कस्मिंश्चिन्नगर आसीत्, तदा कुष्ठपूर्णो नर
एक उपतस्थे। यीशुं दृष्ट्वा सोऽधोमुखं पतित्वा तं प्रसादयन्
जगाद, प्रभो, भवान् यदीच्छति तर्हि मां शुचीकर्त्तुं शक्नोति।
१३ ततः स हस्तं प्रसार्य्य तं स्पृष्ट्वा जगाद, इच्छामि, शुचि र्भव।
१४ तत्क्षणञ्च कुष्ठं तस्मादपससार। यीशुस्तु तमाज्ञापयामास, कम-
प्येतन्मा वद। अपि तु गत्वा याजकमात्मानं दर्शय, तव शुचि-
त्वलाभनिमित्तञ्च मोशिना यथादिष्टं तथैव तेभ्यः साक्ष्यदानार्थ-
१५ मुपहारं देहि। तथापि तदीयकिंवदन्त्यधिकं देशं व्याप्नोत्,
महान्तो जननिवहाश्च तस्य वाक्यानि श्रोतुं तेन व्याधिमुक्तिं
१६ लब्धुञ्च समागच्छन्। स तु गुप्तं गत्वा निर्जनेषु स्थानेष्ववर्त्तत
प्रार्थयत च।

१७ अथ कस्मिंश्चिद् दिवसे यदा सोऽशिक्षयत् तदा गालीलस्य
सर्व्वग्रामेभ्यो यिहूदियादेशाद् यिरूशालेमाच्चागताः फरीशिनो

व्यवस्थावेत्तारश्च समासीना आसन् तेन व्याधिप्रतीकाराय च प्रभोः
प्रभावः सतेजा आसीत्। पश्य च केचिन्नराः खट्वायां शयानमे- १८
कमवशाङ्गं मनुष्यमभ्यन्तरं नेतुं तस्य समक्षं स्थापयितुञ्चायतन्त।
जनताकारणात्तु तदानयनार्थं मार्गमप्राप्य ते गृहपृष्ठमारुह्य फल- १९
काकाराः कतिपया इष्टका अपसार्य्य तेन छिद्रेण तं सखट्वं
गृहमध्ये यीशोः सम्मुखमवरोहयामासुः। स च तेषां विश्वासं २०
दृष्ट्वा तं जगाद, भो मानव, तव पापानि मोचितानि। तदा ते
शास्त्राध्यापकाः फरीशिनश्च मिथ इत्थं तर्कयितुमारेभिरे, कोऽसौ २१
य ईश्वरनिन्दककथा व्याहरति? एकस्मादीश्वरादन्यः कः पापानि
क्षमितुं शक्नोति? यीशुस्तु तेषां तर्कान् विज्ञाय प्रतिभाषमाण- २२
स्तानब्रवीत्, युष्माभि र्मनःसु किं तर्क्यते? ब्रूत, तव पापानि २३
मोचितानीति वा त्वमुत्थाय परिव्रजेत्येतयोः कथनयोः कतरम्
अनायासं? पृथिव्यान्तु पापानि मोचयितुं मनुष्यपुत्रस्य सामर्थ्य- २४
मस्तीति यथा युष्माभि र्ज्ञायेत, तदर्थं—तमवशाङ्गम् अभिभाष्य
स उवाच—त्वामहमाज्ञापयामि, उत्थाय स्वखट्वामादाय स्वगेहं
याहि। स तु तत्क्षणं सर्व्वेषां समक्षमुत्थाय स्वशय्यामादाय चेश्वरं २५
स्तुवन् स्वगृहं जगाम। ततः सर्व्वे विस्मयापन्ना ईश्वरमस्तुवन् २६
भयपूर्णाश्चावदन्, अद्भुतानीतिवृत्तान्यद्यास्माभि र्दृष्टानि।

ततः परं स बहि र्गत्वा शुल्कादायस्थान उपविष्टं लेविनामकं २७
शुल्कादायिनं निरीक्ष्य जगाद, मामनुगच्छ। स च सर्व्वं त्यक्त्वो- २८
त्थाय तमनुजगाम। स लेविश्च तस्य कृते निजगृहे महाभोज्यं २९
चकार, तत्र भोक्तुमुपविष्टा बहवः शुल्कादायिनस्तेषां सङ्गिनो-
ऽन्यजनाश्चाविद्यन्त। अतस्तेषां शास्त्राध्यापकाः फरीशिनश्च तस्य ३०
शिष्यान् सम्बोध्य सामर्षमवादिषुः, किमर्थं भुंग्ध्वे शुल्कादायिभिः

३१ पापिभिश्च सार्द्धम्? यीशुस्तु प्रतिभाषमाणस्तान् जगाद, चिकि-
३२ त्सको न स्वस्थानाम् अपि त्वस्वस्थानाम् आवश्यकः। न धार्म्मिकान्,
अपि तु मनःपरावर्त्तनाय पापिन आह्वातुमहमागतः।
३३ ते पुनस्तमूचुः, किमर्थं योहनस्य शिष्या भूय उपवसन्ति प्रार्थ-
यन्ते च फरीशिनां शिष्या अपि तथैव कुर्व्वन्ति, तव शिष्यास्त्वश्नन्ति
३४ पिबन्ति च? तदा स तानब्रवीत्, वरो यावद् वरसखैः सार्द्धं
३५ वर्त्तते तावत् किं तान् उपवासयितुं शक्नुथ? दिनानि तावदुप-
स्थास्यन्ते यदा वरस्तेभ्योऽपहारिष्यते, तेष्वेव दिनेषु त उपवत्स्यन्ति।
३६ स तानिमाम् उपमाकथामपि जगाद, जीर्णवसने न कोऽपि
नूतनवसनस्य खण्डं सीव्यति, यतस्तथा कृते तन्नूतनमपि तेन
३७ छिद्यते पुरातने च न युज्यते नूतनादुद्धृतः स खण्डः। नापि
नवो द्राक्षारसः केनापि जीर्णकुतूषु निधीयते; यतस्तथा कृते
नवो द्राक्षारसः कुतू विदारयति तेन स च विस्रोष्यति कुत्वश्च
३८ नंक्ष्यन्ति। प्रत्युत नवद्राक्षारसो नवकुतूषु निधातव्यस्तेनोभयो रक्षा
३९ सम्भवति। पुरातनं पीत्वा तु कोऽपि सहसा नवं नाभिवाञ्छति,
यतः स ब्रूते, पुरातनः सुस्वादुतरः॥ ५॥

---

६ षष्ठोऽध्यायः।

१ विश्रामवारार्थे फरीशिनां निरुत्तरकरणं ६ शुष्कहस्तस्यारोग्यकरणं १२ शिष्याणां मनोनीतत्वकरणं १७ रोगिणामारोग्यकरणं २० शिष्याणामुपदेशः २७ शत्रुषु प्रेमकरणं ३७ उपदेशः ३९ परस्य दोषित्वकरणनिषेधः ४६ गृहनिर्म्माणदृष्टान्तकथा च।

१ द्वितीय आद्यविश्रामवारे तु शस्यक्षेत्रेण तस्मिन् व्रजति तस्य
२ शिष्या मञ्जरी र्भंक्त्वा पाणिभि र्मर्द्दन्तोऽभुञ्जत। फरीशिनः केचित्
तदा तानवदन्, विश्रामदिने यन्न विधेयं तत् कर्म्म कथं कुरुथ?

ततो यीशुः प्रतिभाषमाणस्तान् जगाद, न किं पठितं भो ३
दायूदस्तस्य सङ्गिनश्च यदाक्षुध्यंस्तदा स किमकार्षीत्? स हीश्वरस्य ४
गेहं प्रविश्य तानेव दर्शनीयपूपान् आदायाभुङ्क्त स्वसङ्गिभ्यश्च प्रादात्,
यान् भोक्तुं याजकैः केवलै विंधेयम्। पुनः स तान् जगाद, प्रभु ५
र्हि मनुष्यपुत्रो विश्रामवारस्यापि।

अन्यस्मिन्नपि विश्रामवारे स तेषां समाजं प्रविश्य यदोपादि- ६
शत् तदासीत् तत्र नर एको यस्य दक्षिणो हस्तः शुष्कः। स तु ७
विश्रामवारे रोगप्रतीकारं करोति न वेति जिज्ञासवः शास्त्रा-
ध्यापकाः फरीशिनश्च तदभियोगस्य सूत्रं गवेषयन्तस्तमवैक्षन्त। स ८
तु तेषां तर्कान् ज्ञात्वा तं शुष्कहस्तं मनुष्यं जगाद, उत्थाय
मध्यस्थाने तिष्ठ। ततः स उत्थायातिष्ठत्। यीशुस्तदा तान् ९
जगाद, युष्मानहं पृच्छामि, विश्रामवारे किं विधेयं, हिताचरण-
मथवा हिंसाचरणम्? प्राणरक्षाथवा प्राणनाशः? अनन्तरं स १०
परितस्तान् सर्व्वान् निरीक्ष्य तं नरं जगाद, तव हस्तं प्रसारय।
ततस्तेन तथा कृते स करोऽन्यतर इव स्वस्थो जातः। ते तु तमः- ११
पूर्णा बभूवु र्यीशुं प्रति किं कर्त्तव्यं तदधि समभाषन्त च।

तेषु दिनेषु यीशुरेकदा प्रार्थयितुं पर्व्वतं गत्वेश्वरमुद्दिश्य १२
प्रार्थयमानः कृत्स्नां रात्रिमयापयत्। दिवसे तूपस्थिते स स्वशि- १३
ष्यानाहूय तेषां मध्ये पश्चान्निर्दिष्टान् द्वादश नरान् वरयामास
तेषाञ्च प्रेरितवर्ग इत्यभिधानं चकार। ते शिमोनो यस्तेन पित्र १४
इत्यभिहितस्तस्य भ्रातान्द्रियश्च याकोबो योहनश्च फिलिपो
बर्थलमयश्च मथिस्थोमाश्च, आल्फेयसुतो याकोब उद्योगीत्यभिधः १५
शिमोनश्च, याकोबस्य (भ्राता) यिहूदा स चेष्करियोतीयो यिहूदा १६
यः पश्चात् समर्पयिता बभूव।

१७ ततः परं स तैः सार्द्धमवरुह्य कस्मिंश्चित् समस्थले तस्थौ।
उपतस्थिरे च तत्र तच्छिष्यवृन्दं कृत्स्नयिहूदियातो यिरूशालेमात्
सोरसीदोनयोः समुद्रतीरस्थप्रदेशाच्चागतो महान् जननिवहश्च।
१८ इमे तस्य वाक्यं श्रोतुं रोगमुक्तिं प्राप्तुञ्च तस्यान्तिकमागतवन्तः,
१९ भूताविष्टाश्चाशुच्यात्मभ्यो मुक्तिम् अलभन्त, कृत्स्नो जननिवहश्च
तं स्प्रष्टुमयतत, यतः प्रभावस्तस्मान्निर्गच्छन् सर्व्वेषामारोग्यमसा-
धयत्।
२० अनन्तरं स स्वशिष्यानुद्दिश्योर्द्धदृष्टिं भूत्वा व्याजहार, धन्या
२१ दीना यूयं, यत ईश्वरराज्यं युष्माकमेव। धन्या अधुना क्षुधार्त्ता
यूयं, यतः परितर्प्स्यथ। धन्या अधुना रुदन्तो यूयं, यतो हसि-
२२ ष्यथ। धन्या यूयं यदा जना मनुष्यपुत्रस्य हेतो र्युष्मान् द्विषन्ति,
यदा युष्मान् पृथक् कुर्व्वन्ति न्यक्कुर्वन्ति अधममिव युष्मन्नाम
२३ निराकुर्व्वन्ति च। तस्मिन् दिन आनन्दत नृत्यत च। यतः
पश्यत सञ्चितं स्वर्गे युष्माकं प्रचुरं पारितोषिकं। वास्तवं तेषां
२४ पूर्व्वपुरुषा भाववादिनः प्रति तथैवाचरितवन्तः। प्रत्युत धनिनो
२५ यूयं सन्तापपात्राणि, यतो यूयं स्वसान्त्वनां लब्धवन्तः। परितृप्ता
२६ यूयं सन्तापपात्राणि यतः क्षोत्स्यथ। अधुना हसन्तो यूयं सन्ता-
पपात्राणि, यतः शोचिष्यथ रोदिष्यथ च। यूयं सन्तापपात्राणि
यदा मनुष्याः सर्व्वे युष्माकं सुख्यातिं कुर्व्वन्ति। वास्तवं तेषां
पूर्व्वपुरुषाः कूटभाववादिनः प्रति तथैवाचरितवन्तः।
२७ परन्तु भो श्रोतारः, युष्मानहं ब्रवीमि, स्वशत्रून् प्रति प्रेम
२८ कुरुत, ये युष्मान् द्विषन्ति तेषां हितं कुरुथ, ये युष्मान् शपन्ति
तेभ्य आशिषं दत्त, ये युष्मान् अपवदन्ति तेषां हितं प्रार्थयध्वं।
२९ यस्त्वैकतरस्मिन् कपोले कराघातं करोति तं प्रत्यन्यतरं कपोल-

मपि व्याघोटय । यश्च तव प्रावारं हरति, तवाङ्गाच्छादकमपि
हर्त्तुं तं मा वारय । यः कश्चित् त्वां याचते तस्मै देहि । यश्च ३०
तव द्रव्याणि हरति तं तत्प्रतिदानं मा याचस्व । अपि युष्मान् ३१
प्रति मनुष्याणां यादृशमाचारं यूयमभिवाञ्छथ, यूयमपि तान्
प्रति तादृशमाचरत । यदि तु युष्मत्प्रेमकारिणः प्रति प्रेम कुरुथ, ३२
कस्तर्हि युष्माकं साधुवादः ? यतः पापिनोऽपि स्वप्रेमकारिणः प्रति
प्रेम कुर्व्वन्ति । यदि च स्वहितकारिणः प्रति हिताचारं कुरुथ, ३३
कस्तर्हि युष्माकं साधुवादः ? यतः पापिनोऽपि तदेव कुर्व्वन्ति ।
येभ्यः प्रत्यादानस्याशा युष्माकमस्ति तेषु चेदृणं समर्पयथ, कस्तर्हि ३४
युष्माकं साधुवादः ? यतः समानप्रत्यादानार्थं पापिनोऽपि पापि-
ष्वृणं समर्पयन्ति । प्रत्युत यूयं स्वशत्रून् प्रति प्रेम कुरुत प्रत्यादानस्य ३५
प्रत्याशाभावेऽपि हिताचारमृणदानञ्च कुरुत । तथा कृते युष्माकं
प्रचुरं पारितोषिकं भविष्यति यूयञ्च परात्परस्य पुत्रा भविष्यथ ।
स ह्यकृतज्ञान् दुर्जनांश्च प्रति सुशीलः । अतो युष्माकं पिता यथा ३६
कृपावान्, यूयमपि तथैव कृपावन्तो भवत ।

विचारं वा मा कुरुत, तेन युष्माकं विचारो न कारिष्यते । ३७
परं मा दोषीकुरुत, तेन यूयं न दोषीकारिष्यध्वे । क्षमध्वं तेन
क्षमां लप्स्यध्वे । दत्त, तेन युष्मभ्यं दायिष्यते, उत्तमं निपीडितं ३८
सञ्चालितम् अतिपूर्णं परिमाणपात्रं युष्मत्क्रोडे दायिष्यते । येन
परिमाणेन यूयं मिमीध्वे तेनैव युष्मदर्थं पुन र्मायिष्यते ।

अथ स तेभ्य उपमां कथयामास, अन्धः किमन्धं नेतुं शक्नोति ? ३९
किं न तावुभौ गर्त्ते पतिष्यतः ? नास्ति शिष्यो गुरुतः श्रेष्ठः । ४०
परिपक्वस्तु यः कश्चित् स स्वगुरुणा तुल्यः । त्वञ्च कुतः स्वभ्रातुश्चक्षुःस्थं ४१
शूककणं निरीक्षसे, तव चक्षुःस्थन्तु गेहकाष्ठं नावधारयसि ? तव ४२

चक्षुःस्थं गेहकाष्ठमदृष्ट्वा त्वं कथं वा स्वभ्रातरं गदितुं शक्नोषि,
भ्रातस्तव चक्षुःस्थतृणकणस्य मयोद्धरणमनुमन्यस्वेति। कपटिन्,
प्रथमं स्वचक्षुषस्तद् गेहकाष्ठमुद्धर, ततः स्वभ्रातुश्चक्षुषः तृणकण-
४३ स्योद्धरणार्थं स्पष्टं द्रक्ष्यसि। नास्ति हि सुवृक्षः कुफलोत्पादकः,
नास्ति वा कुवृक्षः सुफलोत्पादकः, यत एकैको वृक्षः स्वफलेना-
४४ भिज्ञायते। नैव कण्टकेभ्य उडुम्बरफलानि सञ्चीयन्ते नैव स्तम्बाद्
४५ वा द्राक्षाफलानि सङ्गृह्यन्ते। सुजनो सुधनपूर्णाद्धृदयात् सुद्रव्यं
निःसारयति, कुजनश्च कुधनपूर्णाद्धृदयात् कुद्रव्यं निःसारयति,
यतो हृदयस्यातिपूरणमेव वक्त्रं व्याहरति।

४६ किमर्थं वा यूयं मां प्रभो प्रभो इत्यभिभाषध्वे न तु मद्वा-
४७ क्यानुरूपमाचरणं कुरुथ? यः कश्चिन्मदन्तिकमागत्य मम वाक्यानि
४८ शृणोति समाचरति च स केन सदृशस्तदहं युष्मान् ज्ञापयिष्यामि।
स गृहनिर्म्माणे नियुक्तेन नरेण सदृशो यो गभीरं खनित्वा पाषाणे
गृहमूलं स्थापयामास। ततः परं वन्यायामुपस्थितायां स्रोतस्तद्
गृहमाजघान विचालयितुन्तु नाशक्नोत्, यतस्तत् पाषाणोपरि
४९ संस्थापितं। यस्तु श्रुत्वा न समाचरति स तेन नरेण सदृशो येन
भित्तिमूलं विना गृहं मृत्तिकोपरि निर्म्मितं। स्रोतसाहन्यमानं
तत् सहसा पपात, तस्य गृहस्य भङ्गो घोरतरो बभूव च॥ ६॥

७ सप्तमोऽध्यायः।

१ शतसेनापते र्दासस्याशाचादारोग्यकरणं ११ विधवाया मृतपुत्रस्य जीवनं
१८ योहनाय ख्रीष्टवार्त्ता २४ योहने ख्रीष्टसाक्ष्यं ३६ दुष्टनार्य्याः पापमार्जनञ्च।

१ जनानां कर्णगोचरे सर्व्वाणि तानि वाक्यानि समाप्य स
२ कफरनाहूमं प्रविवेश। कस्यचिच्छतपते र्व्याधिग्रस्तो दासस्तदा

मृतकल्प आसीत्, स स्वामिनो बहुमतः। अतः स यीशोः संवादं ३
श्रुत्वा यिहूदीयानां प्राचीनान् तस्यान्तिकं प्रहित्य तं याचयामास
स यथागत्य तस्य दासं तारयेत्। ते च यीशोः समीपमुपस्थाय ४
सयत्नं प्रसादयन्तस्तमूचुः, भवान् यदित्थं तमुपकुर्य्यात् स तस्य ५
योग्यपात्रं, यतोऽस्मज्जातिं प्रति स प्रेम करोति, स एव चास्माकं ६
समाजगृहं निर्म्मापितवान्। अतो यीशुस्तैः सार्द्धमव्रजत्। तद्गृहा-
दनतिदूरन्नूपस्थिते तस्मिन् स शतपतिः कतिपयान् बन्धून् तदन्तिकं
प्रहित्य तमब्रवीत्, प्रभो, मा श्राम्यतु, नाहमर्हामि यद् भवान्
मम वेश्म प्रविशेत्। ततो हेतोरेवाहं स्वयं भवत्समीपं गन्तुमा- ७
त्मानमयोग्यममन्ये। प्रत्युत भवान् वाक्यं व्याहरतु तेनैव मम किङ्करो
निरामयो भविष्यति। यतोऽहमपि चमताया वशीभूतो मनुष्यः, ८
ममाधीनाश्च सैनिकाः सन्ति। तेषामेको गच्छेति मया कथिते
गच्छति, अपरस्मायाहीति कथिते समायाति, मम दासश्चेदं
कुर्व्विति कथिते तत् करोति। इदं श्रुत्वा यीशुस्तस्मिन्नाश्चर्य्यं ९
मन्यमानो मुखं प्रत्यावर्त्त्यानुगामिनं जननिवहं जगाद, युष्मानहं
ब्रवीमि, इस्रायेलेऽपि मयेदृगदृढो विश्वासो न लक्षितः। तदनन्तरं १०
ते प्रहिता जनास्तद् गृहं परावृत्य तं रोगिणं दासं स्वस्थं ददृशुः।

परदिवसे स नायिनाख्यमेकं नगरमगच्छत् तेन सार्द्धञ्च तस्य ११
बहवः शिष्या महान् जननिवहश्चाव्रजन्। पश्य च नगरद्वारसमीप- १२
मुपस्थिते तस्मिन् कश्चिन्मृतः समाध्यर्थं वहिरुह्यते, स निजमातुरे-
कजातः सापि विधवा। नगरस्य महान् जननिवहश्च तया सार्द्धमासीत्।
तां दृष्ट्वा प्रभुरनुकम्प्य जगाद, मा रोदीः। ततः परं स समीप- १३
मागत्य शवयानं पस्पर्श। वाहकेषु तदा तिष्ठत्सु स जगाद, भो १४
युवन्नुत्तिष्ठेति त्वामादिशामि। अनेन स मृत ऊर्द्धो भूत्वोपविवेश १५

१६ भाषितुमारेभे च। ततः परं स तं तन्मातरि समर्पयामास। सर्व्वे
च भयाक्रान्ता ईश्वरं तुष्टुवुरूचुश्च, उत्पन्नोऽस्मन्मध्ये महान् भाववा-
१७ दीश्वरः स्वप्रजा अवेक्षितवानिति च। तमधि सा किंवदन्ती च
कृत्स्नां यिहूदियां परितःस्थं कृत्स्नं जनपदञ्च व्यानशे।
१८ योहनस्य शिष्यास्तस्मै तदेताः सर्व्वकथा निवेदयामासुः। ततो
१९ योहनः स्वशिष्याणां द्वौ समीपमाहूय यीशुं प्रति प्रहित्य पप्रच्छ,
येनागन्तव्यं स किं भवान्, वान्यः कश्चिदस्माभिः प्रतीक्षितव्यः?
२० अतस्तौ नरौ तस्यान्तिकमागत्य जगदतुः, स्नापको योहन
आवां भवत्समीपं प्रहित्य पृच्छति, येनागन्तव्यं स किं भवान्, वान्यः
२१ कश्चिदस्माभिः प्रतीक्षितव्य इति। तस्मिन् दण्डे तु स बहून् व्याधितो
यातनातो दुष्टात्मभ्यश्च मोचितवान् बहुभ्योऽन्धेभ्यो दृक्शक्तिं
२२ दत्तवांश्च। अतो यीशुः प्रतिभाषमाणस्तौ जगाद, युवाभ्यां यद्यद्दृष्टं
श्रुतञ्च गत्वा तद् योहनाय निवेद्यतां। अन्धा दृष्टिं लभन्ते, खञ्जाः
परिचरन्ति, कुष्ठिनः शुचीभूयन्ते, बधिराः शृण्वन्ति, मृता उत्था-
२३ प्यन्ते, दरिद्राश्च सुसंवादं ज्ञाप्यन्ते, यश्च मयि न स्खलति स धन्यः।
२४ योहनस्य दूतयोरपगतयो र्यीशु र्जननिवहेभ्यो योहनमधीदं
कथयितुमारेभे, किं निरीक्षितुं यूयं मरुं निर्गतवन्तः? किं वायुना
२५ चाल्यमानं नलं? किमथवा द्रष्टुं यूयं निर्गतवन्तः? किं सूक्ष्मवे-
शपरिहितं मनुष्यं? पश्यत ये शुभ्रं परिच्छदं सुखभोगञ्च सेवन्ते
२६ ते राजभवनेषु विद्यन्ते। किमथवा द्रष्टुं यूयं निर्गतवन्तः? किं
भाववादिनं? तथैव, युष्मांस्त्वहं ब्रवीमि, भाववादिनोऽपि श्रेष्ठतरं
२७ नरम्। असौ स यमधीदं लिखितमास्ते,

पश्य त्वद्वदनस्याग्रे स्वदूतं प्रहिणोम्यहं।
गन्तव्यं तत्र मार्गं स त्वदग्रे संस्करिष्यति॥

यतो युष्मानहं ब्रवीति, नारीप्रसूतेषु स्नापकाद् योहनान्महान् २८
भाववादी नास्ति। ईश्वरराज्ये तु यः चोदीयान् स तस्मादपि
महत्तरः। कृत्स्नं हि जनवृन्दं शुल्कादायिनश्च श्रुत्वा योहनस्य २९
स्नानेन स्नापिता ईश्वरं धार्म्मिकं मत्वा प्रतिपेदिरे, फरीशिनस्तु ३०
शास्त्राध्यापकाश्च तेन स्नानमस्वीकृत्येश्वरस्य मन्त्रणामात्मोद्देशे
व्यर्थीचक्रिरे। तदेतत्कालीया मनुष्या मया कैरुपमेयाः? ते हट्ट ३१
उपविष्टैस्तैर्बालकैः सदृशा येषामेकेऽन्यानाह्वयन्तो वदन्ति, युष्मत्कृते ३२
वयं वंशीरवादयाम यूयन्तु नानृत्यत, युष्मत्कृते वयं व्यलपाम
यूयन्तु नारुदित। योहनो हि न पूपभोजनं न द्राक्षारसपानं ३३
वा सेवमान आगतः, युष्माभिस्तूच्यते, स भूताविष्टः। मनुष्य- ३४
पुत्रो भोजनं पानञ्च सेवमान आगतः, युष्माभिस्तूच्यते, पश्यासौ
भोक्ता मद्यपश्च मनुष्यः, शुल्कादायिनां पापिनाञ्च बन्धुः। प्रज्ञा ३५
तु स्वसर्व्वसन्तानानां स्वभावेन निर्द्दोषीकृता।

अथ कश्चित् फरीशी स्वेन सह भोजनार्थं तं निमन्त्रयामास, ३६
ततः स तस्य फरीशिनो गृहं प्रविश्य भोजनार्थमुपविवेश। पश्य च ३७
तन्नगरनिवासिनी काचित् पापिष्ठा योषित् तस्य फरीशिनो गृहे
भोजनार्थं तदुपवेशनस्य संवादं श्रुत्वा सुगन्धितैलपूर्णं श्वेतोपलपा-
त्रमादाय पश्चात तच्चरणयोः सन्निधौ तिष्ठन्ती रुदती च नेत्राम्बुना ३८
तस्य चरणौ निषेक्तुमारेभे, पुनः स्वशिरसः कचै र्मार्ष्ट्वा तौ चरणा-
वचुम्बत् तैलेनामर्द्दयच्च। तद्दृष्ट्वा तन्निमन्त्रयिता फरीशी स्वान्तरे- ३९
ऽवादीत्, असौ चेद् भाववाद्यभविष्यत्, तर्ह्यज्ञास्यत् का कीदृशी च
सा योषिद् या तं स्पृशति, यतः सा पापिष्ठा। ततो यीशुः ४०
प्रतिभाषमाणस्तमुवाच, शिमोन, तुभ्यं कथयितव्यं मम किञ्चिदास्ते।
स उवाच, गुरो, कथयतु। एकस्योत्तमर्णस्य द्वावधमर्णावास्तां, ४१

४२ तयोरेकः पञ्चशतान्यन्यतरश्च पञ्चाशन् मुद्रापादानधारयत्। तयोस्तु
प्रतिदानस्योपायाभावात् स उभयोश्चक्षमे। तद् वद, कतरस्तं
४३ प्रत्यधिकं प्रेम करिष्यति? शिमोनः प्रत्युवाच, मन्ये यस्याधिकमृणं
चक्षमे। स तमब्रवीत्, यथार्थो विचारोऽकारि त्वया। ततः परं
४४ स तां योषितं प्रति मुखं प्रत्यावर्त्य जगाद, योषितममूं किं
पश्यसि? मयि तव गृहं प्रविष्टे त्वं मत्पादप्रक्षालनार्थं तोयं नादाः,
असौ तु स्वनेत्राम्बुना मम पादौ निषिक्तवती स्वशिरसः कचै
४५ र्मार्ज्जितवती च। त्वं मां नाचुम्बीरसौ त्वत्र मत्प्रवेशकालमारभ्य
४६ मम पादौ चुम्बितुं न निवृत्ता। त्वं तैलेन मम शिरो नाममर्द्दः,
४७ असौ तु सुगन्धितैलेन मम पादौ मर्द्दितवती। अतो हेतोस्त्वां
ब्रवीमि, अमुष्याः पापानि यानि बहूनि तेषां क्षमाकारि, यतः
(पश्य) सा बहुप्रेम चकार। यस्य तु स्तोकं क्षम्यते स स्तोकं प्रेम
४८ करोति। ततः परं स तां जगाद, तव पापानां क्षमाकारि।
४९ तदा सहभोजिनः स्वेषु वक्तुमारेभिरे, कोऽसौ यः पापक्षमामपि
५० करोति? स तु तां योषितं जगाद, तव विश्वासस्त्वां तारयामास,
क्षेमेण याहि॥ ७॥

---

८ अष्टमोऽध्यायः।

१ नगरेषु ग्रामेषु च खीष्टस्य गमनं ४ वीजवपनस्य दृष्टान्तकथा ९ तस्य तात्पर्य्यं १६ प्रदीपदृष्टान्तः १९ कुटुम्बलक्षणं २२ वायोस्तम्भनं २६ भूतानां त्याजनं ४० खीष्टस्य ग्राह्यत्वं ४१ प्रदररोगिण आरोग्यकरणं ४९ अधिपतेर्मृतकन्यायै जीवनदानञ्च।

१ तदनन्तरं स देशं परिभ्राम्यन् नगरेषु ग्रामेषु चेश्वरस्य राज्य-
२ मघोषयत् तत्सुसंवादञ्च जनानज्ञापयत्। आसंस्तु तेन सार्द्धं पूर्व्वोक्ता
द्वादश नरा दुष्टात्मभ्यो व्याधिभ्यश्च तेन मुक्ताः काश्चिद् योषितो-

ऽर्थतो यस्याः सप्त भूता निःसृताः सा मग्दलीन्यभिधा मरियम्
हेरोदस्य विषयाध्यक्षस्य कूषाः पत्नी योहाना शोशन्ना बहवश्चान्याः, २
इमाः स्ववसुभिस्तं पर्य्यचरन्।

अथ महति जननिवहे समागच्छति मनुष्येषु च नगरेभ्यस्त- ४
स्यान्तिकं व्रजत्सु स दृष्टान्तकथयेदं व्याजहार, वप्ता स्ववीजानि वप्तुं ५
निर्जगाम, वपनकाले तु पथपार्श्वे कतिपयानि पतितानि, तत-
स्तानि पादतलै र्दलितानि खेचरपक्षिभिः खादितानि च। पति- ६
तानि चापराणि पाषाणे, तानि प्ररुह्य रसाभावाच्छोषितानि। पति- ७
तान्यपराणि तु कण्टकानां मध्ये तान्येकत्र वर्द्धमानैः कण्टकैः सम्पीडि-
तानि। अपराणि तूत्तममृत्तिकायां पतित्वा प्ररुह्य शतगुणं फलं ८
फेलुः। इदमुक्त्वा स उच्चै र्व्याजहार, शृणोतु यस्य श्रोतुं श्रोत्रे स्तः।

ततः परं तस्य शिष्यास्तं पप्रच्छुः, अस्या दृष्टान्तकथायास्तात्पर्य्यं ९
किं स्यात्? स तान् जगाद, युष्मभ्यम् ईश्वरराज्यस्य निगूढानां १०
विषयाणां ज्ञानमदायि, अपरेभ्यस्तु दृष्टान्तच्छलेन (शिक्षा दीयते),
ते यथा दृष्ट्वापि न पश्येयुः श्रुत्वापि च न बुध्येरन्। सा दृष्टान्त- ११
कथा त्वेवम्भूता। वीजमीश्वरस्य वाक्यं। पथपार्श्वस्थास्ते ये शृण्वन्ति १२
ततः परं यथा ते विश्वस्य परित्राणं न प्राप्नुयुस्तदर्थं दियावल
आगत्य तेषां हृदयतो वाक्यमपहरति। पाषाणोपरिस्थाश्च ते ये १३
श्रवणकाले सहसा सानन्दं वाक्यं गृह्णन्ति, ते तु मूलहीनाः
स्वल्पकालं विश्वसन्ति परीक्षाकाले चापक्राम्यन्ति। कण्टकेषु पति- १४
तानि वीजानि च ते ये श्रुत्वा चिन्ताभि र्वसुभि र्जीवनसम्बन्धीय-
सुखभोगेन च भाराक्रान्तास्सन्तो निपीड्यन्ते पक्वफलहीनास्तिष्ठन्ति
च। उत्तममृत्तिकायां पतितानि वीजानि च ते ये भद्रेण साधुना १५
च हृदयेन वाक्यं श्रुत्वा रक्षन्ति स्थैर्य्येण फलं फलन्ति च।

१६ दीपिकां प्रज्वाल्य मनुष्यस्तां न पात्रेणाच्छादयति नापि
खट्वाया अधो निदधाति, अपि तु दीपाधारस्योपरि स्थापयति यथा
१७ प्रविशन्तः सर्व्वे दीप्तिं पश्येयुः। यतो नास्ति किमपि तादृशं
तिरोहितं यन्नाविर्हितं भविष्यति, नापि तादृशं निगूढं यन्न
१८ ज्ञायिष्यते प्रकाशताञ्च यास्यति। अतो युष्माभिः कथं श्रूयते
तदालोच्यतां। यतो यस्यास्ति तस्मै दायिष्यते, यस्य तु नास्ति स
यत् स्वं मन्यते तदपि तस्मादपहारिष्यते।

१९ अथ तस्य माता भ्रातरश्च तत्समीपमागमन्, जनताहेतोस्तु
२० तेन सह मिलितुं नाशक्नुवन्। ततः केचित् तस्मै निवेदयामासुः,
२१ भवतो माता भ्रातरश्च भवन्तं द्रष्टुमिच्छन्तो बहिस्तिष्ठन्ति। स तु
तान् प्रतिजगाद, मम माता भ्रातरश्च ते य ईश्वरस्य वाक्यं शृण्वन्ति
समाचरन्ति च।

२२ कस्मिंश्चिद् दिने स स्वशिष्यैः सह नावमारुह्य तान् जगाद,
२३ ह्रदस्य पारं गम्यतां। ततस्ते नावं मुक्त्वा प्रस्थिताः। गमनकाले तु
सोऽनिद्रात्। तदा झञ्झा ह्रदमाचक्राम नावि तोयेन पूर्य्यमाणायां
२४ तेषां प्राणसंशयो बभूव च। ततस्ते समीपं गत्वा तं जागरयित्वा
जगदुः नाथ नश्यामो वयं। तदा स उत्थाय वायुं तोयभङ्गञ्च
२५ तर्जयामास तौ च निवृत्तौ शान्तिश्च सञ्जाता। तांस्तु सोऽब्रवीत्,
युष्माकं विश्वासः क्व? अनेन ते भीता विस्मिताश्च परस्परमाहुः, को
न्वसौ यत् स वायून् अपश्चाप्याज्ञापयति तैश्च तस्यादेशो गृह्यते?

२६ ततः परं नावा वहमानास्ते गालीलस्य सम्मुखस्थं गादारीयाणां
२७ देशं प्रापुः। तत्र स्थलमवतीर्णे तस्मिन् नगरस्य कश्चिन्मनुष्यस्तस्य
सम्मुखमुपतस्थे, य आबहुवत्सरेभ्यो भूतैराविष्टः। स न वस्त्रं पर्य्यधत्त,
२८ नापि गृहेऽवसत, अपि तु शवागारेषु। यीशुं दृष्ट्वैव स प्रणिपत्य

क्रोशित्वा प्रोच्चै र्व्याजहार, भो परात्परस्येश्वरस्य पुत्र यीशो भवता
सह मम कः सम्बन्धः ? नार्हति भवान् मां यातयितुं। यतः स २९
तमशुचिमात्मानं तस्मान्मनुष्यान्निर्गन्तुमादिशत्। यत आदीर्घकालात्
स तेनाक्रान्तः, यदा च शृङ्खलैर्निगडैश्च बद्धोऽरक्ष्यत तदा बन्धनानि
विदारयन् भूतेन निर्जनानि स्थानान्यपानीयत। यीशुस्तं पप्रच्छ, ३०
तव किं नाम? स व्याजहार वाहिनीति, यतः स बहुभूतैराविष्टः।
ते सानुनयं तमूचुः, अस्मान् अगाधस्थानं गन्तुं मैवाज्ञापयतु। तत्र ३१
तु बहुसङ्ख्यकशूकरव्रजो गिरावचरत्। अतस्ते यीशुं ययाचिरे,
अमून् शूकरान् प्रवेष्टुमस्माननुजानातु। ततः स तान् अनुजज्ञौ। ३२
ते भूतास्तदा तस्मान्मनुष्यान्निःसृत्य तान् शूकरान् प्रविविशुस्ततः ३३
कृत्स्नो व्रजो धावन् पतित्वा शैलाग्रतो ह्रदे पञ्चत्वं जगाम। ये च ३४
तमचारयंस्ते तदितिवृत्तं दृष्ट्वा पलाय्य नगरे ग्रामेषु च तज्ज्ञाप-
यामासुः। यद् वृत्तं जनास्तदा तद् द्रष्टुं वहिराजग्मुः, यीशोः ३५
समीपमुपस्थाय च ददृशुः, भूतास्ते यस्मान्निर्गताः स मनुष्यो
वस्त्रान्वितः सुबुद्धिश्च यीशोश्चरणयोरुपविष्टोऽस्तीति, ततस्ते बिभ्युः।
भूताविष्टः स नरश्च कथं तारितस्तत् साक्षिभिस्तेभ्यो निवेदयाञ्चक्रे। ३६
ततो गादारीयप्रदेशनिवासिनां कृत्स्नो जनौघो महात्रासापन्नत्वात् ३७
तमाह, भवानस्मत्सन्निधितोऽपगन्तुमर्हति। ततः स नावमारुह्य
प्रत्यावर्त्तत। ते भूतास्तु यस्मान्निःसृताः स मनुष्यस्तं प्रार्थयाञ्चक्रे, ३८
भवत्समीपमवस्थातुं मामनुमन्यतां। यीशुस्तु तं विसृज्याब्रवीत्, त्वं
स्वगृहं प्रत्यावर्त्तस्व, त्वदर्थमीश्वरो यद्यत् कृतवांस्तत्कथां कथय च।
स तदा प्रस्थाय तदर्थं यीशु र्यद्यत् कृतवान्, नगरस्य सर्व्वत्र ३९
तत्कथामघोषयत्।

प्रत्यावृत्ते तु यीशौ जननिवहस्तमनुजग्राह, यतः सर्व्वे तं प्रत्यैक्षन्त। ४०

४१ पश्च च यायीर इत्यभिध एको नर उपतस्थे, स समाजाध्यक्ष
आसीत्। स यीशोश्चरणयोः प्रणिपत्य स्वगृहप्रवेशार्थं तं प्रसाद-
४२ यामास, यतः प्रायेण द्वादशवर्षीया तस्यैकजाता या दुहिता सा
४३ मरणोद्यतासीत्। गमनकाले तु जनता तमपीडयत्। अनन्तरं
द्वादशवर्षान् यावद् रक्तस्रावातुरा काचिन्नारी या चिकित्सकैः
सेवनार्थं सर्व्वस्वं व्ययितवती, तथापि कस्मादप्यारोग्यं लब्धुं नाश-
४४ क्नोत्, सा पश्चादागत्य तदीयवस्त्रस्य प्रलम्बकं पस्पर्श, तत्च-
४५ णञ्च तस्या रक्तस्रावो विरराम। यीशुस्तदा पप्रच्छ, को मां
स्पृष्टवान्? अनङ्गीकुर्व्वत्सु तु सर्व्वेषु पितरस्तत्सङ्गिनश्चाऊः, नाथ,
भवान् जनतया परिवार्य्यते पीड्यते च, पुनः पृच्छति, को मां
४६ स्पृष्टवानिति। यीशुरुवाच, कश्चिन्मां पस्पर्श, यतः प्रभावो मत्तो
४७ निःसृत इत्यज्ञायि मया। ततः सा योषित् प्रच्छन्ना स्थातुं न
शक्नोतीति बुद्ध्वा वेपमानोपाजगाम, तस्यान्तिकं प्रणिपत्य च
तत्स्पर्शनस्य कारणं सद्य आरोग्यलाभस्य कथाञ्च सर्व्वजनानां
४८ समक्षं निवेदयामास। स तदा तामब्रवीत्, आश्वसिहि, वत्से, तव
विश्वासस्त्वां तारयामास, क्षेमेण याहि।

४९ इदं भाषमाणे तस्मिन् समाजाध्यक्षस्य गृहात् कश्चिदागत्य
५० तमाह, भवतो दुहिता ममार, गुरुं मा क्लिश्नातु। यीशुस्तच्छ्रुत्वा
प्रतिभाषमाणस्तं जगाद, मा भैषीः, केवलं विश्वसिहि, तेन सा
५१ तरिष्यते। ततः परं स तद् भवनमागत्य नान्यं कमपि प्रवेष्टुमनु-
जज्ञौ, केवलं पितरं याकोबं योहनञ्च बालाया मातापितरौ च।
५२ जनाः सर्व्वे रुरुदुस्तस्याः कृते वक्षांस्यताडयंश्च। स तानाह, मा
५३ रुदित, न मृता सापि तु निद्राणा। सा तु मृतवतीति ज्ञात्वा
५४ ते तमुपाहसन्। स तदा तान् सर्व्वान् वहिष्कृत्य तस्या हस्तं धृत्वा

प्रोच्चै र्व्याजहार, बालिके उत्तिष्ठेति। तस्याः प्राणास्तदा प्रत्या- ५५
जग्मुः, सा च तत्क्षणमुत्तस्थौ। ततः परं यीशुस्तस्यै भक्ष्यदा- ५६
नमादिदेश, तस्या जनकौ च विस्मयापन्नौ। स तु तावाज्ञापया-
मास, इदं यद् वृत्तं युवां तत् कमपि ज्ञापयितुं नार्हथः॥ ८॥

---

९ नवमोऽध्यायः।

१ शिष्याणां प्रेषणं ७ ख्रीष्टं द्रष्टुं हेरोदस्येच्छा १० पञ्चपूपैर्मत्स्याभ्याञ्च पञ्चसहस्र-पुंभोजनं १८ ख्रीष्टस्य निर्णयः २२ ख्रीष्टस्योपदेशः २८ तेन मूर्त्त्यन्तरधारणं ३७ भूतग्रस्तबालकस्य स्वस्थता ४६ नम्रताया उपदेशः ४९ सर्व्वेष्वनुग्रहस्यावश्यकत्वं ५१ शोमिरोणीयैः ख्रीष्टस्याग्राह्यता ५७ चञ्चललोकान् प्रति ख्रीष्टस्योपदेशकथा च।

अथ स शिष्यान् द्वादश निजानेकत्राहूय तेभ्यः सर्व्वभूतानां १
(दमनार्थं) प्रभावं कर्त्तृत्वञ्च रोगप्रतीकारस्य सामर्थ्यञ्च ददौ,
तांश्चेश्वरस्य राज्यं घोषयितुमस्वस्थान् निरामयान् कर्त्तुञ्च प्रेषया- २
मास। तान् जगाद च, गमनार्थं यष्टिं चेलसम्पुटकं वा पूपं वा रूप्यं ३
वा किमपि माददध्वं, युष्माकञ्च कस्याप्यङ्गरक्षे द्वे मास्तां। यद् गृहं ४
प्रविशथ च तत्र तिष्ठत, तस्माच्च प्रतिष्ठध्वं। यस्य नगरस्य जनास्तु ५
युष्मान् न गृह्णन्ति, तस्मान्नगरान्निर्गच्छन्तः स्वचरणेभ्यो धूलिमप्य-
वधूनुत तेषां विरुद्धं साक्ष्यार्थम्। ततस्ते प्रस्थाय ग्रामं ग्रामं पर्य्य- ६
टन्तः सर्व्वत्र सुसंवादमघोषयन् व्याधिप्रतीकारमकुर्व्वंश्च।

तेन तु यद्यदक्रियत तत्कथां चतुर्थांशपति र्हेरोदः शुश्रावा- ७
स्थिरो बभूव च, यतः कैश्चिदूचे, योहनो मृतेभ्य उत्थापित इति,
अपरैः कैश्चित्, एलियो दर्शनं ददाविति, अपरैः पुनः, प्राचीनानां ८
भाववादिनामेक उत्तस्थाविति। हेरोदस्तदाब्रवीत्, योहनस्य शिर- ९
श्छेदनं कृतं मया, कः पुनरसौ यमधीदृशीः कथाः शृणोमि? स
च तं द्रष्टुमयतत।

१० ततः परं प्रेरिताः प्रत्यावृत्य यद्यत् तैः कृतं तस्मै तन्निवेद-
यामासुः। स तदा तान् सङ्गिनः कृत्वा गुप्तं बैत्सैदाख्यनगरसमी-
११ पस्थं किञ्चन निर्जनं स्थानं जगाम। जननिवहास्तु तदनुभूय
तमनुजग्मुः, स च तान् गृहीत्वेश्वरस्य राज्यमधि तैः संललाप
१२ रोगप्रतीकारार्थिनश्च निरामयांश्चकार। दिनावसाने त्वागच्छति ते
द्वादश शिष्या उपागत्य तमूचुः, विसृज्यन्तां भवता जननिवहा
यथामी परितःस्थाः पल्ली ग्रामांश्च गत्वा रात्रिं यापयेयुः खाद्या-
१३ न्याप्नुयुश्च, वयं ह्यत्र निर्जने स्थाने विद्यामहे। स तानब्रवीत्,
यूयमेव तेभ्यो भक्ष्याणि दत्त। तेऽवादिषुः, पूपान् पञ्च मीनौ च
द्वावपहायास्माकं किमपि नास्ति, तदेतेषां सर्व्वजनानां कृते
१४ खाद्यानि क्रेतुमस्माभि र्गन्तव्यं किं? यतः प्रायेण पुरुषाः पञ्चस-
हस्राण्यासन्। स तदा स्वशिष्यान् जगाद, यूयं पञ्चाशतं पञ्चाशतं
१५ जनानेकत्र कृत्वा सर्व्वान् पङ्क्तिभिरुपवेशयत। ते तदेव कृत्वा
१६ सर्व्वान् उपवेशयामासुः। स तदा तान् पूपान् पञ्च मीनौ च
द्वावादाय स्वर्गं प्रत्युच्चदृष्टिं कृत्वा तेभ्य आशिषं ददौ, भङ्क्त्वा च
१७ जनानां कृते परिवेषणार्थं स्वशिष्येभ्यस्तानददात्। भुक्त्वा च सर्व्वे
तृप्ताः। भग्नानामंशानां शेषेण पूर्णा द्वादश डल्लकाश्च जनैराददिरे।
१८ एकदा स यदा निभृतं प्रार्थयत तदा तस्य शिष्यास्तेन
१९ सार्द्धमासन्। स च तान् पप्रच्छ, जना मां कं वदन्ति? ते
प्रत्यूचुः, स्नापकं योहनमिति। केचित्तु वदन्ति, भवान् एलिय
इति। अन्ये पुनः, प्राचीनानां भाववादिनामेक उत्तस्थाविति।
२० स तदा तान् पप्रच्छ, यूयं तु मां कं वदथ? पित्रः प्रतिभाष-
२१ माणोऽब्रवीत्, ईश्वरस्य ख्रीष्टं। ततः स तांस्तर्जयन् जगाद, यूयमिदं
२२ कमपि मा ज्ञापयत। स पुनरब्रवीत्, मनुष्यपुत्रस्यावश्यम्भावि यत्

स बहुदुःखं भोक्ष्यते प्राचीनै मुख्ययाजकैः शास्त्राध्यापकैश्च निरा-
कारिष्यते घातयिष्यते च, तृतीये दिवसे तु पुनरुत्थापयिष्यते।

स पुनः सर्व्वानुवाच, कश्चिचेन्मामनुगन्तुमिच्छति स तर्ह्यात्मानं २३
प्रत्याख्यातु प्रत्यहं स्वक्रुशमादाय मामनुव्रजतु च। यतो यः २४
कश्चित् स्वप्राणान् रिरक्षिषति स तान् हारयिष्यति, यस्तु मदर्थं
स्वप्राणान् हारयति स एव तान् रक्षिष्यति, यतो मनुष्यः कृत्स्नं २५
जगल्लब्ध्वा यद्यात्मानं हारयति वात्महानिं कुरुते, तर्हि तस्य हितं
वा किं भवति? यतो यः कश्चिन्मत्तो मदीयवाक्येभ्यश्चापत्रपते, २६
मनुष्यपुत्रो यदा स्वप्रतापेन स्वपितुः पवित्रदूतानाञ्च प्रतापेन
चागमिष्यति तदा सोऽपि तस्मादपत्रपिष्यते। युष्मांस्त्वहं सत्यं २७
ब्रवीमि, अत्र ये तिष्ठन्ति तेषां केचिद् यावदीश्वरस्य राज्यं न
द्रक्ष्यन्ति तावन्मृत्योरास्वादं न लप्स्यन्ते।

एताभ्यः कथाभ्यः परं व्यतीतेषु प्रायेणाष्टसु दिनेषु स पितरं २८
याकोबं योहनञ्च सङ्गिनः कृत्वा प्रार्थयितुं पर्व्वतमारुरोह। प्रार्थ- २९
यमाने च तस्मिंस्तदीयवदनस्याकृतिरन्यरूपा परिच्छदश्च सित
उज्ज्वलश्च बभूव। पश्य च द्वौ नरौ तेन समलपतां, तौ मोशि- ३०
एलियश्च। इमौ सप्रतापं दर्शनं दत्त्वा यिरूशालेमे साधयितव्यां ३१
तस्य शेषगतिमकथयतां। पितरस्तत्सङ्गिनौ च निद्राभारेणाक्रान्ता ३२
आसन्। तथापि कथञ्चिज्जागरित्वा तस्य प्रतापं तेन सार्द्धं तिष्ठन्तौ
तौ नरौ च ददृशुः। तयोस्तु तस्मात् प्रस्थानकाले पितरो यीशुं ३३
जगाद, नाथ भद्रमस्माकमत्रावस्थानम्, अतोऽस्माभिरुटजानि त्रीणि
निर्म्मीयन्ताम्, एकं भवदर्थम्, एकं मोशयर्थम्, एकमेलियार्थम्।
स तु यदभाषत तन्नाबुध्यत। तस्मिंस्त्वित्थं ब्रुवाणे मेघ एक आगत्य ३४
तेषामुपरि छायां ददौ। तस्मिन मेघे तयोः प्रवेशकाले ते बिभ्युः। ३५

मेघस्य मध्याच्च वाणीयमुद्भूत्, अयं मम प्रियः पुत्रः, अस्य वचांसि
३६ युष्माभिः श्रूयन्तामिति। सम्भूतायामेवास्यां वाण्यां यीशुरेकाक्य-
विद्यत। ते च मौनमवलम्बिरे यच्च दृष्टवन्तस्तदधि तेषु दिनेषु
कमपि किमपि न जगदुः।

३७ परदिने तेषु गिरितोऽवरूढेषु महान् जननिवहस्तत्सम्मुखमुप-
३८ तस्थे। पश्य च जनताया नर एक उच्चैःस्वरेणोवाच, गुरो, मम
पुत्रं प्रति भवान् दृक्पातं कर्त्तुमर्हति, यतः स ममैकजातः।
३९ पश्यतु च कश्चिदात्मा तं धरति सहसा चोत्क्रोशयति फेनमुद्गम-
यंस्तदीयाङ्गानि कर्षति तच्च चूर्णयन्निव कष्टेन तस्मादपसरति।
४० भवतः शिष्यास्च मया तस्य निःसारणं याचिताः, ते तु नाशक्नुवन्।
४१ यीशुस्तदा प्रतिभाषमाणोऽब्रवीत्, रे अविश्वासिन्नुन्मार्गगामिंश्च
वंश, कियन्तं कालं स्थातव्यं मया युष्माभिः सार्द्धं यूयञ्च सोढव्या
४२ मया? तव पुत्रमत्रानय। स तु यदागच्छत्, तदा स भूतस्तमा-
क्रम्याकर्षत्। यीशुस्तदा तमशुचिमात्मानं भर्त्सयामास बालकञ्च
४३ स्वस्थं कृत्वा तस्य पितरि समर्पयामास। तदीश्वरस्य माहात्म्यतः
सर्व्वे विस्मयापन्नाः।

४४ यीशुना कृतेषु सर्व्वकर्म्मसु यदा सर्व्वे आश्चर्य्यममन्यन्त, तदा
स स्वशिष्यानब्रवीत्, सर्व्वा इमाः कथा युष्मत्कर्णे गृह्यन्तां, यतो
४५ मनुष्यपुत्रो मनुष्याणां हस्तेषु समर्पयिष्यत इति। तद् वाक्यन्तु ते
न बुबुधे यथा च ते नोनुभूयेत तथा तेभ्यः प्रच्छन्नमासीत्। तद्
वाक्यमधि तं किमपि प्रष्टुं तेऽबिभयुश्च।

४६ अथ तर्क एषस्तान् प्रविवेश, तेषां कः श्रेष्ठ इति। यीशुस्तु
४७ तेषां हृद्गतं तर्कं दृष्ट्वा बालकमेकं गृहीत्वा स्वपार्श्वे स्थापयित्वा च
तान् उवाच, यः कश्चिन्मम नाम्नेमं बालकं गृह्णाति स मां गृह्णाति,

माञ्च यो गृह्लाति स मत्प्रेषयितारं गृह्लाति। यतो युष्मासु यः ४८
सर्व्वेषां चोधिष्ठः स महान् भविष्यति।

ततो योहनः प्रतिभाषमाणोऽब्रवीत्, नाथ, भवतो नाम्ना यो ४९
भूतान् निःसारयति तादृशः कश्चिदस्माभि र्लक्षितः, स त्वस्माभिः
सार्द्धं नानुगच्छति तन्निमित्तं सोऽस्माभि र्निवारितः। यीशुस्तमु- ५०
वाच, तं मा निवारयत, यस्माद् यो न युष्मद्विपक्षः स युष्मत्-
स्वपक्षः।

अथ स यदा स्वर्गमारोहयितव्यस्तस्मिन् काले पूर्य्यमाणे स ५१
स्थिरचेता यिरूशालेमं गन्तुमुन्मुखो बभूव। ततः स स्वस्याग्रतो ५२
दूतान् प्राहिणोत्। ते च प्रस्थाय तदर्थं प्रयोज्यद्रव्याणि सज्जीक-
र्त्तुमिच्छन्तः शमरीयाणां कञ्चिद् ग्रामं प्रविविशुः। स तु यिरूशा- ५३
लेमं गन्तुमुन्मुखस्ततो हेतो र्जनास्तं न जगृहुः। तद् दृष्ट्वा याको- ५४
बो योहनश्चेतिनामानौ तस्य शिष्यौ पप्रच्छतुः, प्रभो, एलियेनापि
यथाकारि तथैवावां किं वह्निमादेच्यावो यत् स्वर्गादवरुह्य तान्
संहरेत्? इदं किं भवतोऽभिरुचितम्? स तु मुखं प्रत्यावर्त्त्य तौ ५५
भर्त्सयन् जगाद, युवां कीदृशस्यात्मनस्तन्न जानीथः। मनुष्यपुत्रो ५६
हि न मनुष्याणां प्राणान् नाशयितुमागतोऽपि तु तारयितुम्।
ततस्तेऽपरं ग्रामं जग्मुः।

अथ तेषां गमनकाले कश्चित् पथि तं जगाद, प्रभो यत्र ५७
कुत्रचिद् भवता गन्तव्यं तत्राहमपि भवन्तमनुगमिष्यामि। यीशु- ५८
स्तं जगाद, सन्ति गर्त्तानि शृगालानां नीडाश्च विहायसो विहङ्ग-
मानां, न स्थानं मनुष्यपुत्रस्य तु शिरः शाययितुं। अपरमेकं नरं ५९
सोऽब्रवीत् मामनुगच्छ। स तु प्रतिजगाद, प्रभो, प्रथमं गत्वा ६०
स्वपितुः सत्कारं कर्त्तुं मामनुमन्यताम्। यीशुस्तु तं जगाद,

मृतानेव मृतानां स्वकीयानां सत्कारायानुजानीहि, त्वन्तु गत्वेश्व-
६१ रराज्यस्य संवादं प्रचारय। अपरः कश्चिदुवाच, प्रभो, अहं भवन्त-
मनुयास्यामि, प्रथमन्तु मदीयगृहे ये विद्यन्ते तानाप्रष्टुं मामनु-
६२ जानातु। यीशुस्तु तमब्रवीत्, लाङ्गले हस्तमर्पयित्वा येन पश्चाद्दिशि
दृक्पातः क्रियते तादृशः कोऽपीश्वरराज्यार्थमुपयोगी नास्ति॥ ९ ॥

---

१० दशमोऽध्यायः ।

१ सप्ततिशिष्याणां निरूपणं प्रेरणञ्च १२ कोरासिनादिनगराणां सन्तापो भविष्यत्कथा च १७ सप्ततिशिष्यैः सह कथनं २३ शिष्येभ्य आशीर्दानं २५ ख्रीष्टेन व्यवस्थापकायोपदेशः ३८ मार्थामरियमो गृहे ख्रीष्टस्यातिथित्वञ्च ।

१　ततः परं प्रभुरन्यान् सप्ततिजनानपि निरूपयामास, स स्वयं
यद्यन्नगरं स्थानं वा गमिष्यति तत्र स्वस्याग्रतस्तान् द्वौ द्वौ प्रेष-
२ यामास। तान् जगाद च, प्रचुरं तावच्छस्यं कर्त्तनीयं कार्य्यकारि-
णस्त्वल्पे, तत् तदेव प्रार्थयध्वं शस्यक्षेत्रस्य स्वामिनं यत् स स्वक्षेत्रे
३ कार्य्यकारिणः प्रेरयेत्। यात, पश्यत वृकाणां मध्ये शिशुमेषानिव
४ युष्मान् प्रहिणोमि। मुद्राधारं चेलसम्पुटकं वोपानहौ वा मा वहत,
५ पथि च कमपि मङ्गलवादं मा वदत। यदा च किञ्चन गृहं प्रवि-
६ शथ तदा प्रथमं वदत, गृहस्यास्य शान्ति र्भूयात्। ततो यदि
तत्र शान्तेः पात्रं विद्यते तर्हि युष्मदुक्ता शान्तिस्तं नरमाश्रयिष्यति
७ नो चेत् पुन र्युष्मासु वर्त्तिष्यते। यूयं तस्मिन् गृहे चावतिष्ठध्वं
भुंध्वं पिबत च यद्यत् तत्रत्येभ्यो लप्स्यध्वे। यतः कार्य्यकारी स्ववे-
८ तनमर्हति। गृहाद् गृहं मा गच्छत। किञ्चन नगरं प्रविष्टा यूयं
यदि जनै र्गृह्यध्वे, तर्हि युष्मदर्थं यद्यत् परिवेषयिष्यते तद् भुंध्वं,
९ तत्रत्यान् अस्वस्थान् निरामयान् कुरुत, जनांश्च वदत, ईश्वरस्य राज्यं

युष्मत्समीपमुपस्थितं। किञ्च नगरं प्रविष्टास्तु यदि जने न गृह्यध्वे, १०
तर्हि वहिस्तदीयचत्वराणि गत्वा वदत, युष्मदीयनगरस्य या धूलि- ११
रस्मासु लग्ना तामपि युष्मदर्थमवधूनुमः। तथापि युष्माभिरिदं
ज्ञायतां यदीश्वरस्य राज्यं युष्मत्समीपमुपस्थितम्। युष्मांस्त्वहं ब्रवी- १२
मि, दिनेऽमुष्मिन् सदोमस्य दशा तस्य नगरस्य दशातः सह्यतरा
भविष्यति।

हा कोराशिन, हा बैत्सैदे, युवां सन्तापार्हे, यतो युवयो १३
र्मध्ये कृतानि यानि प्रभावसिद्धानि कर्म्माणि, तानि चेत् सोरे
सीदोने चाकारिष्यन्त, प्रागेव तन्निवासिनस्तर्हि शाणं परिधाय
भस्मन्युपविश्य च मनांसि परावर्त्तयिष्यन्। अपि तु विचारे युवयो १४
र्दशातः सोरस्य सीदोनस्य च दशा सह्यतरा भविष्यति। त्वञ्च हा १५
स्वर्गं यावदुन्नमिते कफरनाहूमपुरि, पातालं यावदवरोहयिष्यसे।

यो युष्माकं वाक्यानि गृह्लाति स मम वाक्यानि गृह्लाति।
यश्च युष्मान् निराकरोति स मां निराकरोति। यश्च मां निरा- १६
करोति स मत्प्रेरकं निराकरोति।

ततः परं सप्ततिस्ते सानन्दं प्रत्यागत्य जगदुः, प्रभो भवतो १७
नाम्ना भूता अप्यस्माकं वशीभवन्ति। स तु तानवादीत्, अहं १८
विद्युतमिव शैतानं स्वर्गात् पतन्तमवलोकयं। पश्यत युष्मभ्यमहमिदं १९
सामर्थ्यं दत्तवान्, तद् यूयं सर्पान् वृश्चिकांश्च रिपोः कृत्स्नं बलञ्च
चरणै र्मर्द्दिष्यथ। किमप्येव युष्मान् न हिंसिष्यति। अपि तु नैवे- २०
तस्मिन्नानन्दत यदात्मानो युष्माकं वशीभवन्ति, प्रत्युतैतस्मिन्
यद्युष्मन्नामानि स्वर्गे लिखितानि विद्यन्ते।

तस्मिन् दण्डे यीशुरात्मन्युल्लासमनुभूय बभाषे, भो स्वर्गमर्त्त्ययोः २१
स्वामिन् पितः, त्वामहं साधुं वदामि यतस्त्वया विज्ञेभ्यस्तीक्ष्णबुद्धि-

भ्यश्चेमानि निगुह्य शिशूनामाविष्कृतानि। अतः किं पितः, यदित्थं
२२ तव दृष्टौ यत् प्रीतिकरं तदेव सिद्धं। ततः परं स शिष्यान् प्रति
परावृत्योवाच, मम पित्रा मयि सर्व्वमेव समर्पितं, अपि च पुत्रः
कस्तत् पितरं विनापरः कोऽपि न जानाति, पिता वा कस्तत् पुत्रं
विनापरः कोऽपि न जानाति, यस्मै च तत् प्रकाशयितुं पुत्राय
रोचते सोऽपि तज्जानाति।

२३ ततः परं स स्वशिष्यान् प्रति प्रत्यावृत्य विजनेऽवादीत्, धन्यानि
२४ तानि नेत्राणि यानि पश्यन्ति यद्यद् यूयं पश्यथ। वस्तुतोऽहं युष्मान्
ब्रवीमि, बहवो भाववादिनो राजानश्च द्रष्टुं वाञ्छितवन्तो युष्माभि
र्यद्यद्दृश्यते श्रोतुञ्च युष्माभि र्यद्यच्छ्रूयते, न तु तानि दृष्टवन्तो न
वा श्रुतवन्तः।

२५ पश्य च, व्यवस्थावेत्ता कश्चिदुत्थाय तं परीक्षमाणोऽब्रवीत्, गुरो,
२६ किं कृत्वा मयानन्तजीवनस्याधिकारो लप्स्यते? स तं जगाद, व्यव-
२७ स्थायां किं लिखितमास्ते? कीदृक् पठसि? स प्रतिबभाषे, त्वं कृत्स्ना-
न्तःकरणेन कृत्स्नप्राणैः कृत्स्नशक्त्या कृत्स्नचित्तेन च स्वेश्वरं प्रभुं प्रति,
२८ स्ववच्च स्वनिकटस्थं प्रति प्रेम कुर्व्विति। स तमाह, यथार्थं प्रत्युक्तं त्वया,
२९ तदेवाचर तर्हि जीविष्यसि। स त्वात्मानं निर्द्दोषीकर्त्तुमिच्छन् यीशु-
३० मब्रवीत्, वाढं, मम निकटस्थः कः? यीशुस्तदा प्रतिभाषमाणः
कथयामास, कश्चिन्मनुष्यो यिरूशालेमाद् यिरीहमवारोहन् दस्युभि-
रासादितः, ते तं विवस्त्रीकृत्यास्त्रैराजघ्नु र्मृतप्रायञ्च त्यक्त्वा प्रतस्थिरे।
३१ सङ्गत्या याजकः कश्चित् तेन मार्गेणावारोहत्, स तं दृष्ट्वापरपार्श्वेना-
३२ पजगाम। तथैव लेवीयः कश्चित् तस्मिंस्थान उपस्थायोपागत्य दृष्ट्वा
३३ चापरपार्श्वेनापजगाम। तदन्तिकमुपस्थितः शमरीयः कश्चित् पथि-
३४ कस्तु तं दृष्ट्वानुचकम्पे, समीपं गत्वा च तैलं द्राक्षारसञ्च निषिच्य

तत्क्षतानि बबन्ध, निजवाहनमारोह्य च तं पान्थशालां निनाया-
शुश्रूषत च। परदिने च निर्गत्य मुद्रापादद्वयं गृहीत्वा पान्थशा- ३५
लाध्यक्षाय ददौ तत्राह, शुश्रूषस्वामुं, यदि चाधिकं व्ययेस्तर्ह्यहं
प्रत्यागमनकाले तुभ्यं तत् प्रतिदास्यामीति। अत्र त्वं किं मन्यसे? ३६
त्रयाणां तेषां को दस्युभिरासादितस्य तस्य निकटस्थो जातः?
सोऽब्रवीत् यस्तं प्रति दयां चकार स एव। ततो यीशुस्तमुवाच, ३७
याहि त्वमपि तथैवाचर।

अथ तेषां गमनकाले स कञ्चिद् ग्रामं प्रविवेश। मार्था ३८
नाम्नी योषिच्च स्वगृहे तस्यातिथ्यं चकार। तस्या मरियमभिधा ३९
भगिन्यासीत्, सा यीशोश्चरणयोरुपविश्य तस्य वाक्यमाकर्णयत्।
मार्था तु बहुविधपरिचर्य्यायां व्याकुलाभूत्, उपागत्य चावोचत्, ४०
प्रभो, भवानत्र किमुदासीनो यन्मद्भगिनी मां त्यक्त्वैकस्यां मयि
परिचर्य्यां समर्पितवती? तदादिशतु तां यथा सा मम साहाय्यं
कुर्य्यात्। यीशुस्तु प्रतिभाषमाणस्तामाह, मार्थे, मार्थे, बह्वन्यधि ४१
चिन्तयसि व्यग्रा भवसि च, एकमेव तु प्रयोज्यं। मरियम् हि ४२
तमुत्तममंशं वरितवती यस्तस्या नैवापहारिष्यते ॥ १०॥

---

११ एकादशोऽध्यायः।

१ प्रार्थनार्थे ख्रीष्टस्योपदेशः १४ मूकभूतत्याजनं २४ अशुचिभूतस्य दृष्टान्तः २७ धन्यलोकानां निर्णयः २९ लोकानामन्तिके ख्रीष्टस्य प्रचारः ३३ प्रदीपस्य दृष्टान्तकथा ३७ फरीशिनः प्रति तस्य कथा ४५ व्यवस्थावेत्तॄन् प्रति तस्य कथा च।

अथ कस्मिंश्चित् स्थानेऽवस्थितिकाले स प्रार्थयत, यदा च १
विरराम तदा तच्छिष्याणामेकस्तमाह, प्रभो, शिक्षयत्वस्मान् प्रार्थ-
यितुं योहनोऽपि यथा स्वशिष्यान् शिक्षितवान्। ततः स तानवा- २
दीत्, यदा प्रार्थयध्वे तदा वदत, अस्माकं स्वर्गस्य पितः, तव

नाम पवित्रं पूज्यतां। तव राज्यमायातु। यथा स्वर्गे तथा मेदिन्या-
३ मपि तवेच्छा सिध्यतु। अस्माकं श्वस्तनं भक्ष्यं प्रत्यहमस्मभ्यं देहि।
४ अस्माकं पापानि क्षमस्व च, यतो वयमप्यस्मदपराधिनामेकैकस्य
क्षमामहे। अस्मांश्च परीक्षां मा नय, अपि तु दुरात्मन उद्धर।
५ पुनश्च स तानवादीत्, युष्माकं यस्य बन्धुरास्ते स यद्यर्द्धरात्रे
६ तदन्तिकं गत्वा तं वदति, मित्र, पूपत्रयं मह्यमृणं देहि, यतो
मम बन्धुः पथिक एको मद्गृहमागतस्तं परिवेषयितुं मम किमपि
७ नास्ति, गृहाभ्यन्तरस्थः स प्रतिभाषमाणस्तर्हि किं वदिष्यति,
मां मा क्लिशान, रुद्धं हि सम्प्रति द्वारं, मम बालकाश्च मया
८ सार्द्धं शयने विद्यन्ते, तुभ्यं दानार्थमुत्थातुं न शक्नोमीति। युष्मानहं
ब्रवीमि, स मित्रमितिहेतोरुत्थाय तस्मै दातुमसम्मतः सन्नपि स
तदीयाग्रहकारणादेवोत्थाय तस्मै यति पूपाः प्रयोज्यास्तति दास्यति।
९ अहमपि युष्मान् ब्रवीमि, याचध्वं तेन युष्मभ्यं दायिष्यते, अन्वि-
ष्यत तेनासादयिष्यथ। द्वारमाहत तेन युष्मभ्यमुद्घाटयिष्यते।
१० यतो यः कश्चिद् याचते स लभते, यश्चान्विष्यति स आसादयति,
११ यश्च द्वारमाहन्ति तदर्थमुद्घाट्यते। युष्माकं कः पिता स्वपुत्रेण
पूपं याचितस्तस्मै प्रस्तरं दास्यति? मीनं वा याचितः स किं
१२ मीनस्य परिवर्त्तेन तस्मै सर्पं दास्यति? अण्डं वा याचितः किं
१३ तस्मै वृश्चिकं दास्यति? तद् दुर्जना अपि यूयं चेत् स्वसन्तानेभ्यो
हितदानानि वितरितुं जानीथ, तर्हि किमधिकं स स्वर्गस्थः पिता
स्वयाचकेभ्यः पवित्रमात्मानं वितरिष्यति।
१४ अथैकदा स भूतं निरसारयत्, स भूतश्च मूकः। निःसृते
१५ च भूते स मूकोऽभाषत, ततो जननिवहा आश्चर्यं मेनिरे। तेषां
केचित् लवदन्, निःसारयत्यसौ भूतान् भूतराजस्य बेल्सबूबस्य

माहात्म्येन। अपरे च परीक्षमाणास्तं गगनादभिज्ञानस्य प्रदर्शनं १६
ययाचिरे। स तु तेषां चिन्ता विज्ञाय तान् जगाद, उत्सीदति १७
सकलं तद् राज्यं यद् भिन्नं स्वविरुद्धं, कुलस्योपरि कुलं पतति
च। शैतानोऽपि चेत् स्वविरुद्धं भिन्नो जातस्तस्य राज्यं तर्हि १८
कथमवस्थास्यते? यूयं हि वदथ यदहं बेल्सबूबस्य नाम्ना भूतान्
निःसारयामि। तदहं यदि बेल्सबूबबलेन भूतान् निःसारयामि, १६
युष्माकं पुत्रास्तर्हि केन निःसारयन्ति? अतस्ते युष्माकं विचारयि-
तारो भविष्यन्ति। यदि त्वीश्वरस्याङ्गुल्याहं भूतान् निःसारयामि, २०
तर्हीश्वरस्य राज्यं नूनं युष्मत्समीपमुपस्थितं। स बलिष्ठो यावद् २१
रणसज्जान्वितः स्वप्रासादं रक्षति तावत् तस्य वस्तूनि निरुपद्रवाणि
तिष्ठन्ति। तस्माद् बलवत्तरो नरस्तूपागत्य यदा तं पराजेष्यति, २२
तदा तस्य विश्वासभूमिं सर्व्वाङ्गरक्षिकां रणसज्जामपहरिष्यति
तदीयलोप्त्राणि विभक्ष्यति च। यो न मम सहायः स मम २३
विरोधी, यश्च मया सार्द्धं न सञ्चिनोति स विकिरति।

अशुचिरात्मा मनुष्यान्निर्यानात् परं निरुदकानि स्थानानि २४
पर्य्यटन् विश्रामं मृगयते। तन्नप्राप्य स वदति, निर्गतोऽहं माम-
काद् गेहाद् यस्मात् तत् पुनर्गच्छामि। तत्रोपस्थाय तु स तन्मा- २५
र्जितं शोभितञ्च पश्यति। गत्वा च स तदापरान् स्वतो दुष्टतरान् २६
सप्तात्मनः स्वसङ्गिनः करोति, सर्व्वे ते च तत्र प्रविश्य निवसन्ति।
अनेन मनुष्यस्य तस्यान्तिमदशादिदशातो निकृष्टा भवति।

स यदैतान्यकथयत् तदा जनतामध्यात् कापि योषिदुच्चरवेण २७
तमाह, धन्यः स जठरो यो भवन्तं धारितवान् धन्यञ्च तत् स्तन-
द्वयं यद् भवता दोहितं। स तूवाच, भवतु, धन्यास्तु ते यैरीश्वरस्य २८
वाक्यं श्रूयते रक्ष्यते च।

२९ समागच्छत्सु तु जननिवहेषु स वक्तुमारेभे, वंशोऽयं दुष्टः,
सोऽभिज्ञानमनुसन्धत्ते, तस्मै तु भाववादिनो योनाहस्याभिज्ञाना-
३० दन्यदभिज्ञानं न दायिष्यते। यतो योनाहो यथा नीनवीयानां
निमित्तमभिज्ञानमभूत्, तथा मनुष्यपुत्रोऽप्यस्य वंशस्य निमित्तम-
३१ भिज्ञानं भविष्यति। दक्षिणदिशो राज्ञी विचारेऽस्य वंशस्य नरैः
सार्द्धमुत्थापयिष्यते तान् दोषीकरिष्यति च, यतः सा शलोमनो
विज्ञानोक्तीः श्रोतुं पृथिव्याः प्रान्तेभ्य आगतवती, पश्य त्वत्र शलोमनो
३२ महत्तरेण केनाप्युपस्थितं। नीनवीयनरा विचारे वंशेनैतेन सार्द्ध-
मुत्थास्यन्ति तं दोषीकरिष्यन्ति च, यतो योनाहस्य घोषणे ते मनांसि
परावर्त्तितानि, पश्य त्वत्र योनाहान्महत्तरेण केनाप्युपस्थितं।

३३ मनुष्यो दीपिकां प्रज्वाल्य न गृहाधःस्थायां गुप्तां द्रोणस्या-
धस्ताद् वा, अपि तु दीपाधारस्योपरि स्थापयति, प्रवेशिनो यथा
३४ दीप्तिं पश्येयुः। देहस्य दीपिका चक्षुः। अतस्तव चक्षुषि सरले सति
तव कृत्स्नो देहो दीप्तिमयोऽस्ति, तस्मिंस्तु दुष्टे जाते तव देहोऽपि
३५ तिमिरमयो भवति। ततो हेतोस्तथावलोकय तवान्तर्ज्योति र्यथा
३६ न तिमिरमयं भवेत्। तद् यदि तव कृत्स्नो देहो दीप्तिमयो
भवेत्, तस्य कोऽप्यंशस्तिमिरमयो न भवेत्, तर्हि तत्सर्व्वाङ्गं
दीप्तिमयं भविष्यति, स्वप्रभया त्वां द्योतयन्ती दीपिकेव।

३७ स यदाभाषत तदा फरीशी कश्चित् तं निमन्त्रयामास यथा
स पूर्व्वाह्णिकाहारार्थं तद्गृहमागच्छेत्। ततः स प्रविश्य भोजनार्थ-
३८ मुपविवेश। तद् दृष्ट्वा स फरीशी विस्मयं जगाम यतो भोजनात्
३९ प्राक् स नास्नाप्यत। प्रभुस्तु तमवादीत्, इदानीं फरीशिनो
यूयं पानपात्रस्य स्थालस्य च वहिर्देशं शुचीकुरुथ, युष्मदन्तर्देशस्तु
४० परस्वापहारेण दुष्टतया च परिपूर्णोऽस्ति। भो निर्ब्बोधाः, वहि-

दैंशो येन रचितस्तेन किं नान्तर्देशोऽपि रचितः? अपि तु यद्यद- ४१
न्तःस्थं तद् भिक्षां दत्त, पश्यत च युष्मदर्थं सर्व्वमेव शुचीभूतं।
फरीशिनो यूयं सन्तापभाजनानि, यतो यूयं पोदिनायाः पीगना- ४२
ख्यटणस्य सर्व्वशाकानाञ्च दशमांशानुपहरथ, परिहरथ तु विचार-
मीश्वरस्य प्रेम च। इयमेतदासीद् युष्माभिरनुष्ठातव्यम् अमी च न
त्यक्तव्याः। फरीशिनो यूयं सन्तापभाजनानि, यतः समाजगृहेषु ४३
श्रेष्ठासनानि हट्टेषु चाभिवन्दनान्याकाङ्क्षथ। अरे कपटिनः शास्त्रा- ४४
ध्यापकाः फरीशिनश्च, यूयं सन्तापभाजनानि, यतो यूयं प्रच्छन्नैः
शवागारैः सदृशा येषामुपरि मनुष्या अज्ञात्वा विहरन्ति।

तदा व्यवस्थावेत्तॄणां कश्चित् प्रतिभाषमाणस्तमवादीत्, गुरो, ४५
वचांसीमानि व्याहरंस्त्वमस्मानपि न्यक्करोषि। स तूवाच, रे ४६
व्यवस्थावेत्तारः, यूयमपि सन्तापभाजनानि, यतो यूयं दुर्व्वहैर्भारै
र्मनुष्यान् भारिणः कुरुथ, स्वयं त्वेकाङ्गुल्यापि तान् भारान् न
स्पृशथ। यूयं सन्तापभाजनानि, यतो यूयं भाववादिनां शवागा-
राणि निर्म्मिमीध्वे, युष्माकं पूर्व्वपुरुषास्तु तान् हतवन्तः। सुतरां ४७
युष्मत्पूर्व्वपुरुषाणां कर्म्माणि सप्रमाणानि कुरुथ तेष्वनुमोदध्वे च। ४८
ते हि तान् हतवन्तो यूयञ्च तेषां शवागाराणि निर्म्मिमीध्वे।
अतो हेतोरीश्वरस्य प्रज्ञापि व्याजहार, तेषामन्तिकमहं भाव- ४९
वादिनः प्रेरितांश्च प्रहेष्यामि, तेषां मध्यात् केचित् तै र्घानि-
ष्यन्ते प्रद्रावयिष्यन्ते च, इत्थमाजगत्संस्थापनाद् विस्रावितं सर्व्वेषां
भाववादिनां यच्छोणितं, हेबलस्य शोणितमारभ्य निकेतनवेद्यो- ५०
रन्तराले नष्टस्य सखरियस्य शोणितं यावत् तत्सर्व्वस्य शोधो ५१
जनेभ्योऽधुनातनेभ्य आहारयिष्यते। युष्मानहं निश्चितं ब्रवीमि,
जनेभ्योऽधुनातनेभ्यस्तच्छोध आहारयिष्यते। रे व्यवस्थावेत्तारः, ५२

यूयं सन्तापभाजनानि, यतो यूयं ज्ञानस्य कुञ्जिकामपहृतवन्तः।
यूयमपि न प्रविष्टाः प्रविशन्तोऽपि युष्माभि र्निवारिताः।
५३ तेनैतान्युच्यमानाः शास्त्राध्यापकाः फरीशिनश्च गाढं व्यग्रीभूय
५४ तद्विरुद्धं मन्त्रयमाणा अभियोगसूत्रलिप्सया तन्मुखनिःसृतं किमपि
धर्त्तुं यतमानाश्च तं बहुप्रश्नानामाकस्मिकं प्रत्युत्तरं याचितुमा-
रेभिरे॥ ११ ॥

---

१२ द्वादशोऽध्यायः ।

१ ख्रीष्टेन शिष्याणामुपदेशः १३ धनिलोकानां दृष्टान्तकथा २२ चिन्तननिषेधः ३५ कर्म्मशीलत्वोपदेशः ४१ प्रभुदासयोर्दृष्टान्तः ४९ ख्रीष्टोपदेशस्य फलनिर्णयः ५४ कपटिनां तर्जनं ५९ तेषामुपदेशश्च ।

१ इतोमध्ये जननिवहा अयुतशः समागत्य परस्परं पादैर्मर्द्द-
यितुं प्रावर्त्तन्त । तदा स स्वशिष्यान् वक्तुमारेभे, यूयं प्रथमतः
स्वरक्षार्थं फरीशिनां किण्वतः सावधानास्तिष्ठत। तद्धि काषट्यं ।
२ नास्ति तु किमपि तादृशं तिरोहितं यन्नाविर्हितं भविष्यति,
३ नापि तादृशं निगूढं यन्न ज्ञायिष्यते । अतो यूयं तिमिरे यद्य-
दुक्तवन्तस्तद् दीप्तौ श्राविष्यते, अन्तरागारेषु च कर्णकुहरे यद्यद्
४ व्याहृतवन्तस्तद् गृहपृष्ठेषु घोषयिष्यते। मदीयबन्धून् युष्मांस्त्वहं
ब्रवीमि, मा भैष्ट तेभ्यो ये देहं घ्नन्ति तदुत्तरन्त्वधिकं किमपि
५ कर्त्तुं न शक्नुवन्ति। कस्मात्तु भेतव्यं तदहं युष्मान् बोधयिष्यामि।
बिभीत तस्माद् यो हत्वा तदुत्तरं नरके निक्षेप्तुं सामर्थ्यविशिष्टः।
६ युष्मानहं निश्चितं वदामि, तस्मादेव बिभीत। चटकाः पञ्च किं
न ताम्रखण्डद्वयेन विक्रीयन्ते? ईश्वरस्य समक्षन्तु तेषां नैकोऽप्यस्मृतः।
७ सन्ति च गणिताः सर्व्वेऽपि युष्मच्छिरसां कचाः। अतो मा बिभीत,
८ यूयं बहुभ्यश्चटकेभ्यो विशिष्यध्वे। युष्मांस्त्वहं ब्रवीमि, यः कश्चिन्म-

नुष्याणां समक्षं मामङ्गीकुरुते, तं मनुष्यपुत्रोऽपीश्वरस्य दूतानां
समक्षमङ्गीकरिष्यते। यस्तु मनुष्याणां समक्षं मां प्रत्याख्याति, स ९
ईश्वरस्य दूतानां समक्षं प्रत्याख्यायिष्यते। यः कश्चिच्च मनुष्यपुत्रस्य १०
प्रतिकूलं वाक्यं व्याहरति तस्य क्षमिष्यते, यस्तु पवित्रमात्मानं परि-
निन्दति तस्य नैव क्षमिष्यते। यदा तु जनैः समाजानां शास्तॄणां ११
कर्त्तृणाञ्च समक्षं नायिष्यध्वे, कथं किं वा तदा प्रतिवदिष्यथ कथ-
यिष्यथ वा, तच्चिन्तया माकुलीभवत। यतो यद् वक्तव्यं तत् १२
तस्मिन्नेव दण्डे पवित्र आत्मा युष्मान् शिक्षयिष्यति।

अथ जनताया मध्यात् कश्चित् तं जगाद, गुरो, मम भ्रातरं १३
तथादिशतु यथा स मया सार्द्धं रिक्थं विभजेत्। स तु तमब्रवीत्, १४
हे मनुष्य, युवयोः प्राड्विवाकं विभक्तारं वा मां कोऽधिकृतवान्?
ततः स जनानवादीत्, सतर्का भवत सावधानाश्च सर्व्वस्माद्धनलो- १५
भात्, यतो धनाढ्यस्य जीवनं न तद्वित्तनिष्ठं। स तेभ्यो दृष्टान्त- १६
कथामपि कथयामास, यथा, मनुष्यस्य कस्यचिद् धनिनो भूमिः
प्रचुरशस्यादीनि द्रव्याण्युदपीपदत्। तदा स मनसा व्यतर्कयत् किं १७
करवाणि? यतो मम भूम्युत्पन्नद्रव्याणि सञ्चेतुं मम स्थानं नास्ति।
स पुनरब्रवीत्, इदं करिष्यामि, मम कुशूलान् भङ्क्त्वा महत्तरान् १८
निर्म्माय तत्रैव मम सर्व्वाणि भूम्युत्पन्नद्रव्याणि वित्तानि च सञ्चे-
ष्यामि, मत्प्राणांश्च वदिष्यामि, भो प्राणाः, सन्ति वः प्रचुरवित्तानि १९
बहुवर्षार्थं सञ्चितानि। विश्रामः क्रियतां भुज्यतां पीयताम् आमोदः
सेव्यतां। ईश्वरस्तु तमाह, रे निर्ब्बोध, रात्रावस्यां त्वं प्राणानां २०
प्रत्यर्पणमाज्ञापयिष्यसे। कस्य तर्हि भविष्यति सर्व्वं तद् यत् सञ्चीकृतं
त्वया? ईदृश्येव गतिस्तस्य य आत्मार्थं धनसञ्चयकारी न त्वीश्व- २१
रार्थं धनवान्।

२२ स्वशिष्यांस्तु स जगाद, ततो हेतोरहं युष्मान् ब्रवीमि, किं
भक्षिष्याम इति विचिन्त्य स्वप्राणानधि, किं वसिष्यामह इति
२३ विचिन्त्य स्वदेहमधि वा माकुलीभवत। भक्ष्यात् प्राणा हि श्रेष्ठा
२४ वसनाच्च देहः श्रेष्ठः। वायसानालोचयत, ते नोप्यते नापि कृत्यते,
भाण्डागारं कुशूलो वा तेषां नास्ति, तथापीश्वरस्तान् पुष्णाति।
२५ विहङ्गमेभ्यो यूयं कतिगुणमधिकं विशिष्यध्वे? चिन्तयित्वा वा
२६ युष्माकं केन स्ववयो हस्तमेकं वर्द्धयितुं शक्यते? तद् यदि लघिष्ठ-
मपि युष्माकमशक्यं, कथं तर्ह्यन्यान्यधि चिन्ताकुला भवथ? सूश-
२७ नाख्यानि क्षेत्रपुष्पाणि पर्य्यालोचयत, कथं तानि वर्द्धन्ते? न तानि
श्रमं कुर्व्वते नापि सूत्राणि तन्वन्ति। युष्मांस्त्वहं ब्रवीमि, शलोमापि
२८ स्वकृत्स्नप्रतापे तेषामेकमिव न पर्य्यधीयत। यदि लद्य क्षेत्रे वर्त्त-
मानं श्वस्तुल्लयां निक्षेप्तव्यं तृणमीदृशमीश्वरः परिधापयति, तर्हि भो
२९ स्तोकविश्वासिनः स कतिगुणमधिकं युष्मान् परिधापयिष्यति। अतो
यूयं किं भक्षिष्यथ किं पास्यथ वा तन्मानुसन्धद्ध्वं संशयारूढा वा
३० मा भवत। जगतिस्थाः परजातीयजना हि सर्व्वाण्येतान्यनुसन्द-
धते। युष्मत्पिता तु जानीते यदिमानि सर्व्वाणि युष्माकमावश्य-
३१ कानि। ईश्वरस्य राज्यमेवान्विष्यत, तथा कृते सर्व्वाणीमान्यपि
३२ युष्मभ्यं प्रदायिष्यन्ते। मा भैषीः क्षुद्र मेषव्रज, यतो युष्मभ्यं राज्यं
दातुं युष्मत्पिता रोचितवान्। युष्माकं यद्यदास्ते तद् विक्रीय
३३ भिक्षां दत्त। सज्जीकुरुत स्वार्थमजरान् मुद्राधारान् अक्षयं धनं
स्वर्गे सञ्चितं, यत्र न चौर उपसर्पति न कीटो वा क्षिणोति।
३४ यतो युष्माकं यत्र वित्तं तत्र युष्माकं चित्तमपि स्थास्यति।
३५ युष्माकं कटयो बद्धा दीपिकाश्चोज्ज्वलास्तिष्ठन्तु, यूयञ्च भवत
३६ सदृशास्ते जनै ये विवाहोत्सवात् स्वप्रभोः प्रस्थानकालमाकाङ्क्षन्त-

स्तथा तं प्रतीक्षावतिष्ठन्ते, यथा तस्मिन्नायाते द्वारं ताडयति च
तत्क्षणं तदर्थं द्वारमुद्घाटयेयुः। धन्यास्ते दासाः प्रभुरागत्य यान् ३७
जाग्रत आसादयिष्यति। युष्मानहं सत्यं ब्रवीमि स कटिं बद्धा तान्
भोजनायोपवेशयिष्यत्योपागत्य च परिचरिष्यति। स द्वितीये यामे ३८
तृतीये यामे वागत्य यानेवम्भूतान् आसादयिष्यति, त एव दासा
धन्याः। जानीत परन्त्विदं यद् यदि गृहस्वाम्यज्ञास्यद् आयाति ३९
चौरः कस्मिन् दण्ड इति, स तर्ह्यजागरिष्यत् कुड्यभेदञ्च स्वगेहस्य
नासहिष्यत। तद् यूयमपि ससज्जास्तिष्ठत, यत आयाति मनुष्य- ४०
पुत्रस्तस्मिन्नेव दण्डे दण्डो यो युष्माभि र्नानुभूयते।

पित्रस्तदा तं पप्रच्छ, प्रभो, दृष्टान्तोऽयं भवतास्मभ्यं कथ्यते ४१
किंवा सर्व्वेभ्य एव? प्रभुरब्रवीत्, को नु खलु स विश्वस्तो बुद्धिमांश्च ४२
धनाध्यक्षो यो यथासमये निरूपितभक्ष्यवितरणाय स्वामिना
स्वभृत्येष्वधिक्रियते? धन्यः स दासः स्वामी यमागमनकाले तथै- ४३
वाचरन्तमासादयिष्यति। अहं युष्मान् सत्यं ब्रवीमि, स तं कृत्स्ने ४४
सर्व्वस्वेऽधिकरिष्यति। मम स्वामी त्वागन्तुं विलम्बत इति मनसि ४५
ध्यात्वा दासः स यदि दासान् दासीश्च ताडयितुं, भोक्तुं पातुं
प्रमत्तो भवितुञ्च प्रवर्त्तते, स तर्हि दिने यस्मिन् नापेक्षते दण्डञ्च ४६
यं स न जानाति, तदैव दासस्य स्वामी तस्योपस्थाय तं द्विधा-
करिष्यति भागञ्च तस्याविश्वासिभिः सार्द्धं निरूपयिष्यति। यो ४७
दासस्तु स्वामिनोऽभीष्टं विज्ञाय न ससज्जोऽभूत् न वा तदभीष्टा-
नुरूपमाचरितवान् स प्रभूतं प्रहारिष्यते। यस्तु न विज्ञाय प्रहार- ४८
योग्यमाचारं कृतवान् स स्तोकं प्रहारिष्यते। अपि च यस्मै कस्मैचिद्
बहु दत्तं बहु तत्सन्निधावनुसन्धायिष्यते, यस्मिंश्च बहु समर्पितं,
जनैः सोऽधिकतरं याचिष्यते।

४९ मेदिन्यामग्निं निक्षेप्तुमहमागतः, स चेदधुना प्रज्वलितस्तर्ह्यपरं
५० किं वाञ्छामि? स्नानेन केनचित्तु मया स्नातव्यं, तच्च यावद्-
५१ सिद्धं तावत् कीदृक् सङ्कोच्चे! युष्माभिः किमनुमीयते यदहं
पृथिव्यामैक्यं निधातुमागतः? युष्मानहं ब्रवीमि, न तथापि
५२ तु विभेदमेव। यतोऽद्यप्रभृत्येकस्मिन् गृहे पञ्च जना विभिन्ना
५३ भविष्यन्ति, त्रयो द्वयो र्द्वौ च त्रयाणां विरुद्धं। विभिन्ना हि
भविष्यन्ति पिता पुत्रस्य, पुत्रः पितु र्विरुद्धं, माता दुहितु र्दुहिता
मातु र्विरुद्धं, श्वश्रूः पुत्रबध्वाः पुत्रबधूः श्वश्र्वाश्च विरुद्धम्।
५४ अपि च स जननिवहान् जगाद, पश्चिमदिशि उद्गच्छन्तं मेघं
५५ दृष्ट्वैव यूयं वदथ, वृष्टिरायातीति, तथैव जायते च। दक्षिणवायु
र्वातीति निरूप्य च वदथ, ग्रीष्मो भविष्यतीति, तच्च जायते।
५६ रे कपटिनः, यूयं भूतलस्याकाशस्य च रूपं निर्णेतुं जानीथ, कथं
५७ तर्हि कालमिमं न निर्णयथ? कथञ्च स्वयमेव यथार्थं विचारं न
५८ कुरुथ? शास्तुः समीपं गच्छंस्त्वं यावत् स्वप्रतिपक्षेण सार्द्धं व्रजसि,
तावत् पथि तस्मादुद्धारं साधयितुं यतस्व, नोचेत् स त्वां बलेन
प्राड्विवाकस्यान्तिकं नेष्यति, प्राड्विवाकश्च त्वां पदातौ समर्पयिष्यति,
५९ पदातिश्च त्वां कारायां क्षेप्स्यति। त्वामहं ब्रवीमि, शेषोऽपि कपर्द्दको
यावत् त्वया न शोधितस्तावत् तत्स्थानान्न निर्गमिष्यते॥१२॥

---

१३ त्रयोदशोऽध्यायः।

१ पापस्य दण्डं त्याजयितुम् अनुतापावश्यकत्वं ६ निष्फलोडुम्बरवृक्षदृष्टान्तः १० कुब्जस्त्रिया आरोग्यकरणं १६ सर्षपकिण्वयोर्दृष्टान्तः २२ उपदेशकथा ३१ यिरूशालेमस्थलोकानामपि तर्जनञ्च।

१ तस्मिन् काले केचिदुपस्थाय तस्मै तेषां गालीलीयानां संवादं

ददु र्येषां निजशोणितं यज्ञीयेन सार्द्धं पीलातेन मिश्रितं। यीशु- २
स्तदा प्रतिभाषमाणस्तान् अब्रवीत्, यूयं किं मन्यध्वे यत् तेन
दुर्भगत्वेन ते गालीलीयाः सर्व्वेभ्यो गालीलीयेभ्योऽधिकपापिनः
प्रतिपन्नाः? युष्मानहं ब्रवीमि, न तथा। प्रत्युत यदि न प्रत्यावर्त्तध्वे ३
सर्व्वे तर्हि तथैव विनंक्ष्यथ। अथवा शीलोहस्थेनोच्चगृहेण पतता ४
ये हतास्तेऽष्टादशजना यिरूशालेमनिवासिभ्यः सर्व्वमनुष्येभ्योऽपरा-
धिनः प्रतिपन्ना इति किं मन्यध्वे? युष्मानहं ब्रवीमि, न तथा, ५
प्रत्युत यदि न प्रत्यावर्त्तध्वे, सर्व्वे तर्हि तथैव विनंक्ष्यथ।

अनन्तरं स दृष्टान्तकथामिमां कथयामास, कस्यचित् स्वद्राक्षा- ६
क्षेत्रे रोपित उडुम्बरवृक्ष आसीत्, स चागत्य तस्मिन् फलमन्वैष्यत्,
न तु प्राप। ततः स द्राक्षाक्षेत्ररक्षकं जगाद, पश्य त्रीन् वर्षानह- ७
मागत्यास्मिन्नुडुम्बरवृक्षे फलमन्वेष्यामि न तु प्राप्नोमि, त्वमेनमु-
च्छिन्धि, किमर्थमयं भूमिमपि विकारयति? स तु तं प्रत्यब्रवीत्, ८
प्रभो, वर्षमेनमपीमं स्थातुमनुजानातु, अहं तावत् तत्परितः
खनिष्याम्यालवालं स्थापयिष्यामि च, किंस्वित् स फलं फलिष्यति, ९
नोचेत् ततः परं स भवताच्छेत्स्यते।

अथ स विश्रामवारे कस्मिंश्चित् समाजगृह उपादिशत्। पश्य १०
च तत्राष्टादशवर्षान् यावद् दौर्बल्यजनकात्मनाविष्टा काचिद् योषि- ११
दासीत्। सा कुब्जा सम्पूर्णरूपमृजू र्भवितुं नाशक्नोत्। यीशुस्तां १२
दृष्ट्वाजुहाव जगाद च, नारि, तव दौर्बल्यात् त्वं मुक्ता। इत्युक्त्वा १३
स तस्यां हस्तावर्पयामास। ततः सा तत्क्षणमृजूर्बभूवेश्वरं तुष्टुवे च। १४
समाजाध्यक्षस्तु विश्रामवारे यीशुनारोग्यसाधने क्रुद्धा जननिवहं
जगाद, परिश्रमो येषु विधेयस्तादृशानि षट् दिनानि सन्ति,
आरोग्यलाभाय तेष्वेवागच्छत, न तु विश्रामवारे। ततः प्रभुः १५

प्रतिभाषमाणस्तमाह, रे कपटिनः, किं न युष्माकमेकैको विश्राम-
वारे स्वगां स्वगर्द्दभं वा गवादनीतो मुक्ता तोयं पाययितुं नयति?
१६ इयन्त्वब्राहामस्य या तनयाष्टादशवर्षान् यावत् शैतानेन बद्धा,
१७ एतस्या विश्रामवारे बन्धनादस्मान्मोचनं किं न विधेयम्? तस्मि-
न्नेतत् कथितवति तद्विपक्षाः सर्व्वे लज्जापन्नाः, कृत्स्नो जननिवहस्तु
तेन साधितेषु यशस्विषु कर्म्मस्वाननन्द ।
१८ अथ स बभाषे, ईश्वरस्य राज्यं केन सदृशं? केन वा तदुप-
१९ मास्ये? तत् सर्षपबीजेन तेन सदृशं यदादाय कश्चिन्मनुष्यः स्वोद्यान
उवाप । तच्च वृद्धा महातरु र्बभूव, विहायसो विहङ्गमाश्च तस्य
२० शाखासु न्यवसन्। पुनरपि स जगाद, ईश्वरस्य राज्यं केनोपमास्ये?
२१ तत् किण्वेन तेन सदृशं यत् कयाचिद् योषितादाय गोधूमचूर्णानां
द्रोणत्रयपरिमितानां मध्ये निह्नुतं येन च परिणामे सञ्जातं
तत्साकल्यं किण्वभावितं ।
२२ अथ स नगरान्नगरं ग्रामाच्च ग्रामं गत्वोपादिशन् यिरूशालेम-
२३ मुद्दिश्य यात्रामकरोत्। एकदा कश्चित् तम् अप्राक्षीत्, प्रभो,
२४ त्राणपात्राणि किमल्पानि? स तं जगाद, सङ्कीर्णेन गोपुरेण प्रवेष्टुं
प्राणपणेन चेष्टध्वं, यतोऽहं युष्मान् ब्रवीमि, बहवः प्रवेष्टुं यतिष्यन्ते,
२५ न तु शक्ष्यन्ति । गृहस्वामिनोत्थाय द्वारे बद्धे वहिस्तिष्ठन्तो यूयं
द्वारमाहन्तुमारभ्य यदा वक्ष्यथ, प्रभो प्रभो, अस्मदर्थं द्वारं मुञ्च-
त्विति, तेन त्विदं प्रतिवक्ष्यध्वे, कुत्रत्या यूयं तन्न जानामीति,
२६ तदा यूयमिदं वक्तु प्रवर्त्तिष्यध्वे, भवतः समक्षं वयं भोजनपाने
२७ कृतवन्तोऽस्मदीयचत्वरेषु च भवानुपदिष्टवानिति। स तु व्याहरिष्यति,
युष्मानहं ब्रवीमि, कुत्रत्या यूयं तन्न जानामि, मत्तोऽपसृत्य तिष्ठत
२८ रे अधर्म्माचारिणः सर्व्वे इति । तत्र रोदनं दन्तैर्दन्तघर्षणञ्च

भविष्यते युष्माकं वीक्षमाणानाम् अब्राहामम् इस्हाकं याकोबञ्च
भाववादिनश्च सर्व्वान् ईश्वरस्य राज्ये (सुखासीनान्), युष्मांस्तु वहि-
र्निक्षिप्तान्। अपरञ्च पूर्व्वपश्चिमोत्तरदक्षिणदिग्भ्यो जना आग- २९
त्येश्वरस्य राज्ये भोजनायोपवेक्ष्यन्ति। पश्यत चान्त्यैः कैश्चित् प्रथमै ३०
र्भवितव्यम् प्रथमैश्च कैश्चिदन्त्यैः।

तस्मिन् दिने फरीशिनः केचित् तदन्तिकमागत्य तमब्रुवन्, ३१
प्रस्थाय दूरं याहि, यतो हेरोदस्त्वां जिघांसति। स तु तान् ३२
जगाद, यूयं गत्वा तं भूरिमायं वदत, पश्याहमद्य श्वश्च भूतान्
निःसारयाम्यारोग्यदानानि साधयामि च, तृतीये दिने च सिद्ध-
कर्म्मा भविष्यामि। प्रत्युताद्य श्वश्च परश्वश्च मया यात्रा कर्त्तव्या। ३३
यतो यिरूशालेमाद् वहि र्भाववादिनो विनाशो न सम्भवति। हा ३४
यिरूशालेम, हा यिरूशालेम, हा भाववादिनां हन्त्रि नराणाञ्च
त्वत्समीपं प्रहितानां प्रस्तराघातिनि पुरि, पक्षयोरधः स्वशावकान्
सङ्गृह्णन्ती कुक्कुटीवाहं कतिकृत्वस्तव शावकान् सङ्ग्रहीतुं वाञ्छितवान्,
यूयन्तु न सम्मताः। पश्यत युष्माकं भवनं युष्मत्कृत उत्सन्नं विही- ३५
यते। युष्मांश्चाहं सत्यं ब्रवीमि, धन्यः स यः प्रभो र्नाम्नायातीति
यदा यूयं वक्ष्यत, स कालो यावदनुपस्थितस्तावन्मां पुन र्न द्रक्ष्यथ॥
॥१३॥

---

१४ चतुर्द्दशोऽध्यायः।

१ उदकोदरिणः स्वास्थ्याकरणं ७ नम्रत्वोपदेशः १२ निमन्त्रणविधिः १५ महा-भोज्यदृष्टान्तः २५ नानोपदेशकथा च।

अथ कस्मिंश्चिद् विश्रामवारे तेन भोजनार्थं कस्यचिन्मुख्य- १
फरीशिनो गृहं प्रविष्टे ते तमवेक्ष्यातिष्ठन्। पश्य च नर एक २
उदकोदरी तस्य सम्मुखमविद्यत। यीशुस्तदा प्रतिभाषमाणो व्यव- ३

स्यावेत्तॄन् फरीशिनश्चाह, विश्रामवारे रोगप्रतीकारः किं विधेयः?
४ अनेन ते मौनीभूताः। स तु तं नरं स्पृशन् निरामयं कृत्वा
५ विससर्ज, ततः परं प्रतिभाषमाणस्तानवादीत्, युष्माकं मध्ये कः
कूपे पतितं स्वगर्द्दभं स्वगां वा तत्क्षणं विश्रामवारे नोद्धरति?
६ अस्य वचनस्य प्रत्युत्तरं कर्त्तुं ते नाशक्यन।

७ ततः परं स निमन्त्रितेभ्यो जनेभ्यो दृष्टान्तकथामकथयत्,
८ यतस्ते कथं श्रेष्ठस्थानानि वरयन्ति तत् तेनालक्ष्यत। स तानुवाच,
केनचिद् विवाहोत्सवार्थं तव निमन्त्रणे कृते मैव श्रेष्ठस्थान उपविश,
९ किंश्चित् त्वत्तो बहुमतः कश्चित् तेन निमन्त्रितः, तथा सति तव
तस्य च निमन्त्रयितोपागम्य त्वां वक्ष्यति, अमुष्मै स्थानं देहीति,
१० त्वञ्च तदा लज्जितोऽन्यस्थानमाश्रयितुं प्रवर्त्तिष्यसे। प्रत्युत कृते
तव निमन्त्रणे गत्वान्त्यस्थान उपविश, यथा त्वन्निमन्त्रयितागमन-
काले त्वां वदेत् बन्धो त्वमुच्चतरं स्थानं गन्तुमर्हसि। तदा हि
११ सहभोजिनां समक्षं तव गौरवं जनिष्यते। यतो यः कश्चिदात्मा-
नमुच्चीकरोति स नीचीकारिष्यते, यश्चात्मानं नीचीकरोति स
उच्चीकारिष्यते।

१२ अथ यस्तं निमन्त्रितवान्, तस्मै स कथयामास, त्वं यदा
पूर्व्वाह्णिकमपराह्णिकं वा भोज्यं करोषि, तदा स्वबन्धून् स्वभ्रातॄन्
वा स्वकुटुम्बिनो वा स्वसमीपवासिनो धनिनो वा मा निमन्त्रय,
किंश्चित् तैरपि तव निमन्त्रणे कृते तव प्रतिदानं भविष्यति।
१३ प्रत्युत यदा महाभोज्यं करोषि, तदा दरिद्रान्, हीनाङ्गान्,
१४ खञ्जान्, अन्धान् निमन्त्रय, तर्हि धन्यो भविष्यसि, यतस्तुभ्यं
प्रतिदानस्योपायस्तेषां नास्ति, धार्म्मिकाणां पुनरुत्थाने तु तुभ्यं
प्रतिदानं विधायिष्यते।

कथा एताः श्रुत्वा सहभोजिनामेकस्तमब्रवीत्, धन्यः स य ईश्वरस्य १५
राज्ये भक्ष्यभागी भविष्यति। स तु तमुवाच, कश्चिन्मनुष्योऽप- १६
राह्णिकं महाभोज्यं चक्रे बहून् निमन्त्रयामास च। भोज्यस्य दण्डे १७
च स्वदासं प्रहित्य तानवादीत्, आयात, यतः सर्व्वमेवेदानीं
सज्जीभूतं। ते सर्व्वे लेकमत्यानुज्ञां याचितुं प्रवृत्तिरे। प्रथम- १८
स्तमुवाच, क्षेत्रं क्रीतं मया तद्दर्शनार्थमवश्यं बहिर्गन्तव्यं। त्वां प्रार्थये,
मामनुज्ञातं मन्यस्व। द्वितीय आह, गोयुग्मानि पञ्च क्रीतानि १९
मया, तानि परीक्षितुं गच्छामि, त्वां प्रार्थये, मामनुज्ञातं मन्यस्व।
अपर एको जगाद, दारा उदूढा मया, ततो गन्तुं न शक्यते। २०
ततः परं स दास उपस्थाय स्वप्रभवे तत् सर्व्वं निवेदयामास। २१
गृहस्वामी तदा क्रुद्धा स्वदासमाह, सत्वरं नगरस्य चत्वराणि रथ्याश्च
गत्वा दरिद्रान्, हीनाङ्गान्, खञ्जान्, अन्धांश्चात्र समानय। ततः २२
परं तेन दासेनोक्तं, प्रभो, भवता यथादिष्टं तथैवाकारि, स्थान-
न्त्विदानीमपि शिष्यते। प्रभुस्तदा दासमाह, त्वं वहीराजमार्गान् २३
तरुतलानि च गत्वा तथाग्रहं विधाय जनान् समानय यथा मम
गृहं परिपूर्य्येत। यतोऽहं युष्मान् ब्रवीमि, नराणां तेषां निम- २४
न्त्रितानां कोऽपि मम भोज्यं नास्वादिष्यति।

अथ महत्सु जननिवहेषु तेन सार्द्धं व्रजत्सु स प्रत्यावृत्य तान् २५
जगाद, यो मदन्तिकमायाति स यदि स्वपितरं स्वमातरञ्च प्रति २६
भार्य्यां सन्तानान् भ्रातॄन् भगिनीश्च प्रत्यपि च स्वप्राणान् प्रति न
विरज्यते तर्हि मम शिष्यो भवितुं न शक्नोति। यः कश्चिच्च स्वक्रुशं २७
वहन् मां नानुगच्छति स मम शिष्यो भवितुं न शक्नोति। यत २८
उच्चगृहं निर्म्मातुमिच्छु र्युष्माकं को न प्रथममुपविश्य व्ययं गणयन्
कार्य्यसिद्धेरुपायस्तस्यास्ति न वेति विचारयति? नोचेत् स्थापिते २९

गृहमूले यदि समाप्तिस्तस्याशक्या जायते, तर्हि ये तद् द्रक्ष्यन्ति
३० ते सर्व्वे तमुपहसितुं प्रवृत्ता वदिष्यन्ति, नरोऽसौ गृहनिर्म्माणमा-
३१ रेभे समापयितुन्तु न शशाकेति । अथवापरेण राज्ञा सार्द्धं
सम्पातार्थं युद्धयात्रां चिकीर्षुः को राजा न प्रथममुपविश्य मन्त्र-
यते, विंशतिसहस्रै र्वृतो यो मद्विरुद्धमायाति, तं किं दशसहस्रै
३२ र्वृतोऽहं प्रतिरोद्धुं शक्ष्यामीति । यद्यशक्यं प्रतिभाति, तर्हि याव-
दन्यतरो दूरे स्थितस्तावत् स दौत्यं प्रहित्य सन्धेः सम्भवं प्रार्थयिष्यते ।
३३ तथैव युष्माकं यः कश्चित् सर्व्वस्वाय जलाञ्जलिं न ददाति स मम
३४ शिष्यो भवितुं न शक्नोति । लवणं हि भद्रं, लवणन्तु यदि विस्वादं
३५ जायते, तर्हि तत् केनोपायेन स्वादुयुक्तं कारिष्यते? ततःप्रभृति
तन्न मृत्तिकायां नालवालराशौ वा युज्यते, वहिरेव निक्षिप्यते ।
शृणोतु यस्य श्रोतुं श्रोत्रे स्तः ॥ १४ ॥

---

१५ पञ्चदशोऽध्यायः ।

१ हारितमेषहारितरूप्ययो र्दृष्टान्तः ११ अपव्ययिपुत्रस्य दृष्टान्तश्च ।

१ अथ शुल्कादायिषु पापिषु च सर्व्वेषु तस्य वाक्यानि श्रोतुं
२ तदन्तिकमागच्छत्सु फरीशिनः शास्त्राध्यापकाश्चासन्तुष्यावदन्, पापि-
३ नोऽनुगृह्णात्यसौ तैः सार्द्धमश्नाति च । स तु तेभ्यो दृष्टान्तकथा-
४ मिमां कथयामास, युष्माकं को नरः शतमेषाणां स्वामी? तेषा-
मेकस्मिन् हारिते स किं नैकोनशतं प्रान्तरे परित्यज्य तमेकं हारितं
५ यावन्न प्राप्नोति तावदनुसरति? प्राप्य च स हृष्टस्तं स्कन्धदेशमा-
६ रोपयति गृहमागत्य च बन्धून् समीपवासिनश्चाहूय वदति, मया
७ सार्द्धमानन्दत, यतो मम हारितो मेषो मया पुनर्लब्धः । युष्मानहं
ब्रवीमि, तथैव पापिन्येकस्मिन् मनः परावर्त्तयति स्वर्ग आनन्दो

भविष्यति। न भविष्यति तादृश एकोनशतधार्म्मिकेष्वपि येषां मनःपरावर्त्तनमप्रयोज्यम्।

यस्या दशमुद्रापादाः सन्ति तादृशी वा का योषिद् एकस्मिन् ८
मुद्रापादे हारिते न दीपिकां प्रज्वालयति यावच्च तं न प्राप्नोति
तावद् गृहं परिमार्जन्ती सयत्नं गवेषयति? तस्मिन्नासादिते च ९
सा सखीः प्रतिवेशिनीश्च समाहूय वदति, मया सार्द्धमानन्दत,
यतः स हारितो मुद्रापादो मया पुनर्लब्धः। युष्मानहं ब्रवीमि, १०
तथैवैकस्मिन् पापिनि मनः परावर्त्तयतीश्वरस्य दूतानां समक्षमानन्दः सम्भवति।

स पुनः कथयामास, नरस्य कस्यचिद् द्वौ पुत्रावास्तां। ११
तयोः कनिष्ठः पितरमाह, पितः, देहि मह्यं रिक्थस्य तमंशं यो १२
मया प्राप्तव्यः। ततः स तयोः कृते रिक्थं विबभाज। अनधिक- १३
दिवसेभ्यः परं स कनिष्ठः सर्व्वं सङ्गृह्य दूरदेशं प्रतस्थे तत्र च लाम्पट्येन
जीवनं यापयन् स्ववित्तं प्राकारीत्। व्ययिते तु तेन सर्व्वस्वे १४
तस्मिन् देशे घोरतरं दुर्भिक्षं सञ्जातं, स च कष्टभागी भवितुमारेभे। तदा स गत्वा तत्प्रदेशस्थं कस्मिंश्चित् पौरे ससञ्जे, स च १५
तं शूकरचारणार्थं स्वग्रामान्तीयक्षेत्राणि प्रेषयामास। तत्र स १६
शूकराणां भोज्यै र्वन्यमाषकोषैरुदरं परिपूरयितुमवाञ्छत्, कोऽपि
तु तस्मै नाददात्। ततः परं स चेतनां लब्ध्वा बभाषे, मत्पितुः १७
कति वेतनजीविनः पूपैरतितृप्ता भवन्ति, अहन्त्वत्र क्षुधया नश्यामि।
अहमुत्थाय मत्पितरमभियास्यामि, तञ्च वदिष्यामि, पितः, स्वर्गस्य १८
विरुद्धं भवतः समक्षञ्च पापं कृतं मया, भवतः पुत्र इति नाम १९
मयि पुन र्न युज्यते, भवान् मां स्ववेतनजीविनामेकेन समानं
करोतु। अनन्तरं स उत्थाय स्वपितरमभिजगाम। तन्तु दूरे २०

स्थितमेव पिता लक्षयामासानुकम्प्य च धावित्वा तस्य कण्ठं धृत्वा
२१ चुचुम्ब । पुत्रस्तदा तमवादीत्, पितः, स्वर्गस्य विरुद्धं भवतः सम-
क्षञ्च पापं कृतं मया, भवतः पुत्र इति नाम मयि पुन र्न युज्यते ।
२२ तस्य पिता तु स्वदासानाह, सत्वरं सर्व्वोत्तमं प्रावारं बहिरानीयेमं
परिधापयत, अस्य हस्ते चाङ्गुरीयकं चरणयोश्चोपानहावर्पयत,
२३ अस्मत्पोषितं गोवत्समानीय मारयत च, अस्माभि र्भुज्यतां हर्षः
२४ सेव्यताञ्च, यतो ममायं पुत्रो मृत आसीत् पुनर्जीवितश्चाभूत्,
हारित आसीत् पुनर्लब्धश्चाभूत् । ततस्ते हर्षं सेवितुमारेभिरे ।
२५ तस्य ज्येष्ठः पुत्रस्तु तदा क्षेत्र आसीत् । आगमनकाले स यदा
२६ गृहान्तिकमुपातिष्ठत्, तदा वाद्यनृत्यानां शब्दमश्रौषीत् । ततः स
२७ दासानामेकं समीपमाहूय पप्रच्छ, किमर्थमेतत्? स तमवादीत्,
भवतो भ्रातागतः, भवतः पिता च तं स्वस्थं लब्धवांस्तद्धेतोः पोषितं
२८ गोवत्सं मारयामास । ततः स कुपित्वा प्रवेष्टुमनङ्गीचक्रे । तस्य
२९ पिता तदा बहिरागत्य तं प्रासादयत् । स तु प्रतिभाषमाणः पित-
रमाह, पश्यैतावतो वत्सरानहं त्वां परिचरामि, कदापि तवाज्ञां न
लङ्घामि स्म, मह्यं हि त्वं कदापि मित्रैः सार्द्धं हर्षसेवनार्थं छाग-
३० शावकं नाददाः । यस्तु वेश्याभिः सार्द्धं तव जीविकां ग्रस्तवांस्तव
३१ तस्मिन् पुत्रेऽमुष्मिन्नागतवत्येव तदर्थं पोषितं गोवत्सममारयः । स
तु तमब्रवीत्, वत्स, त्वं सततं मया सार्द्धं वर्त्तसे, मम च यद्यदस्ति
३२ तत् सर्व्वं तव । प्रत्युत हर्षसेवनमाह्लादनञ्चास्मासु युज्येते स्म, यत-
स्तव भ्रातायं मृत आसीत् पुनर्जीवितश्चाभूत्, हारित आसीत्
पुनर्लब्धश्चाभूत् ॥ १५ ॥

१६ षोड़शोऽध्यायः।

१ अपव्ययिगृहकार्य्याधीशदृष्टान्तः १० विश्वास्यत्वस्यावश्यकत्वं १४ फरीशिनः प्रति तर्जनं धनिदरिद्रयो र्दृष्टान्तश्च।

अथ स स्वशिष्येभ्योऽपि कथयामास, नरस्य कस्यचिद् धनिनो १
धनाध्यक्ष आसीत्, स तस्य वित्तानि प्रकिरतीति तत्समीपं पर्य्युदितः।
ततः स तमाहूय जगाद, किमेतद् यच्छ्रूयते मया त्वामधि? त्वं २
स्वधनाध्यक्षत्वस्य गणनां देहि, यत इतःप्रभृति त्वं धनाध्यक्षः
स्थातुं न शक्ष्यसि। स धनाध्यक्षस्तदा स्वान्तरेऽचिन्तयत्, किं ३
करवाणि? यतः मम स्वामी धनाध्यक्षत्वपदं मत्तोऽपहरति। खनितुं
मम बलं नास्ति, भिक्षितुं लज्जे। किं कर्त्तव्यं तन्मया बुद्धं, जना ४
यथाध्यक्षत्वाच्च्यावितं मां स्वगृहेषु गृह्णीयुः। ततः स स्वप्रभोरे- ५
कैकमधमर्णमाहूय प्रथमं पप्रच्छ, त्वं मम स्वामिनः कति धार-
यसि? स जगाद, तैलस्य शतं कुद्वः। ततः स तमादिशत्, तव ६
पत्रमादायोपविश्य च तूर्णं पञ्चाशतं लिख। ततः परं सोऽन्यमेकं ७
पप्रच्छ, त्वञ्च कति धारयसि? सोऽब्रवीत्, गोधूमानां शतं द्रोणान्।
स तमादिशत्, तव पत्रमादायाशीतिं लिख। अनन्तरं स्वामी ८
तमयाथार्थिकं धनाध्यक्षं सुबुद्ध्याचारिणं मत्वा प्रशशंस, यतो दीप्तेः
सन्तानेभ्य एतद्युगस्य सन्तानाः स्वजातिमुद्दिश्य बुद्धिमत्तराः। अह- ९
मपि युष्मान् ब्रवीमि, यूयमयथार्थेन धनेन मित्रलाभं साधयत,
तथा कृते यदा हीनस्वा भविष्यथ, तदा मित्रैरनन्तेष्वावासेषु
ग्राहीष्यध्वे।

यो लघिष्ठे विश्वस्तः स प्रभूतेऽपि विश्वस्तः। यस्तु लघिष्ठे- १०
ऽयाथार्थिकः स प्रभूतेऽप्ययाथार्थिकः। अतो यूयमयथार्थे धने ११
चेदविश्वस्ता जाताः कस्तर्हि विश्वस्य युष्मासु परमार्थं निक्षेप्स्यति?

१२ परकीये च चेन्न विश्वस्ता जाताः कस्तर्हि युष्मदीयं युष्मभ्यं दास्यति?
१३ द्वयोः स्वामिनो र्दास्यं कर्त्तुं केनापि दासेन न शक्यं। यतः स
एकतरं द्विषन्नन्यतरस्मिन् प्रेष्यते, न चेदेकतरस्मिन्नासज्जमानो-
ऽन्यतरमवमंस्यते। ईश्वरस्य धनस्य चोभयो र्दास्यं कर्त्तुं युष्माभि र्न
शक्यते।

१४ धनलोभिनः फरीशिनोऽपि सर्व्वाण्येतान्यश्रृण्वन् तमुपाहसंश्च,
स तु तानवादीत्, यूयमेव मनुष्याणां समक्षं स्वान् धार्म्मिकीकुरुथ,
१५ ईश्वरस्तु युष्माकं चित्तानि जानाति। यतो मनुष्येषु यदुच्चमीश्वरस्य
१६ समक्षं तज्जघन्यं। व्यवस्था भाववादिनश्च योहनपर्य्यन्ताः। तं
कालमारभ्येश्वरराज्यस्य सुसंवादो घोष्यते, नराश्च प्रत्येकं व्यग्रत्वेन
१७ तत् प्रविशन्ति। व्यवस्थाया एकस्य विन्दोरपायाद् द्यावापृथि-
१८ व्योरपायः सुसाध्यः। यः कश्चित् स्वभार्य्यां त्यक्त्वान्यामुद्वहति स
व्यभिचारं करोति, यश्च कश्चित् स्वामित्यक्तां स्त्रियमुद्वहति स
व्यभिचारं करोति।

१९ धनाढ्यः कश्चिन्नर आसीत्, स क्षुष्णलोहितानि सूक्ष्माणि च
२० वसनानि पर्य्यधत्त प्रत्यहञ्च सप्रतापं सुखभोगमसेवत। अपि च
लासाराभिध एको दरिद्र आसीत्, स तस्य गोपुरान्तिकं शयानो
२१ व्रणयुक्तश्च तस्य धनिनो भोज्यमञ्चाद् भ्रंशन्तीभि र्भक्ष्यफेलीभि-
स्तृप्तुमैच्छत्। प्रत्युत श्वानोऽप्यागत्य तस्य व्रणानि पर्य्यलिहन्।
२२ ततः परं स दरिद्रो ममार स्वर्गदूतैश्चोह्यमानोऽब्राहामस्य क्रोडं
२३ निन्ये। स धनवानपि ममार शवागारे निदधे च। पाताले तूर्द्ध्वं
निरीक्ष्य यन्त्रणास्थाने विद्यमानो दूरादब्राहामं तत्क्रोडस्थं लासा-
२४ रञ्च ददर्श। ततः स प्रोच्चैराह, भो पितरब्राहाम, मामनुकम्पतां
लासारञ्च प्रहिणोतु स यथाङ्गुल्या अग्रभागं तोये मज्जयित्वा मम

जिह्वां शीतलीकुर्य्यात्, यतोऽत्राग्निशिखायां यातनां सहे। अब्रा- २५
हामस्त्वब्रवीत्, वत्स, स्मर यत् त्वं स्वजीवने तव सुखमभजः, लासा-
रस्य तथैव दुःखमभजत्। इदानीन्तु तस्यात्र सान्त्वना तव च यातना
जायते। सर्व्वमेतदपहाय त्वस्माकं युष्माकञ्चान्तरालं वृहच्छून्यस्थलं २६
तथा दृढीकृतं, यथास्मात् स्थानाद् युष्मदन्तिकं जिगमिषवस्तरितुं
न शक्नुयुः, नामुष्मात् स्थानादागन्तुकामा वास्मदन्तिकं तरेयुः।
स तदा जगाद, भवन्तं प्रार्थये, पितः, भवांस्तं मत्पितृगृहं प्रहि- २७
णोतु, यतो मम पञ्च भ्रातरः सन्ति, तेऽपि यथेदं यातनास्थानं २८
नागच्छेयुस्तथा स तेभ्यो दृढं साक्ष्यं ददातु। अब्राहामस्तमाह, २९
मोशि भाववादिनश्च तेषां (शिक्षकाः) सन्ति, तेषां वचांसि तैः
श्रूयन्तां। स उवाच, न तथा, पितरब्राहाम। प्रत्युत मृतानां ३०
समीपतो यदि कश्चित् तेषां समीपं गच्छेत्, तर्हि ते मनांसि
परावर्त्तयिष्यन्ति। स तु तमवादीत्, ते यदि मोशे भाववादिनाञ्च ३१
वचांसि न शृण्वन्ति, तर्हि मृतानां मध्यादुत्थितेऽपि कस्मिंश्चिन्न
प्रत्येष्यन्ति॥ १६॥

---

१७ सप्तदशोऽध्यायः।

१ विघ्नस्यानुत्पादनायोपदेशः ७ प्रभुदासयोराचारविधिः ११ दशकुष्ठिनां स्वास्थ्यकरणं २० ईश्वरराज्यस्य कथा २२ ख्रीष्टागमनकथा च।

अथ स स्वशिष्यानब्रवीत्, स्खलनहेतवो यन्न भविष्यन्ति तद- १
सम्भवं, ते तु येनायान्ति स सन्तापपात्रं। तत्कण्ठे वृहत्पेषणी- २
बन्धनं समुद्रे च तस्य निक्षेपणं श्रेयः, न चैतेषां क्षुद्राणामेकस्य
स्खालनं। यूयमात्मार्थं सावधानास्तिष्ठत। तव भ्राता यदि त्वद्वि- ३
रुद्धं पापं करोति, तर्हि तं भर्त्सय, यदि त्वनुतप्यते तर्हि तस्य

४ क्षमस्व । एकस्मिन् दिने सप्तकृत्वस्त्वद्विरुद्धं पापं कृत्वा यदि स
एकस्मिन् दिने सप्तकृत्वस्त्वां प्रति परावृत्य वदति, अनुतप्ये इति,
५ तर्हि तस्य क्षमिष्यसे । प्रेरितास्तदा प्रभुमूचुः, अस्माकं विश्वासं
६ वर्द्धयतु । प्रभुस्तु तान् जगाद, सति विश्वासे युष्माकं सर्षपबीजमिते
यूयं चेदेनमुडुम्बरवृक्षं वदथ, त्वमुन्मूलितो भूत्वा समुद्रे रोपितो
भवेति, तर्हि स युष्माकमाज्ञां ग्रहीष्यति ।
७ युष्माकं कस्यचिद्धलधरः पशुचारको वा दासो यदा क्षेत्राद्
गृहं प्रविशति, तदा स किं तं वदिष्यति, इदानीमेवोपागत्य भोज-
८ नार्थमुपविशेति । स तं किं नेदं वदिष्यति, ममापराह्णिकाहारार्थं
सर्व्वं सज्जीकुरु, यावच्चाहमश्नामि पिबामि च तावद् बद्धकटिः
९ स्थितो मां परिचर, ततः परं त्वमप्यशिष्यसि पास्यसि चेति । स
दास आदिष्टानि कर्म्माणि कृतवानितिहेतोः स किं तं प्रति
१० कृतज्ञतां स्वीकरिष्यति ? मन्येऽहं न तथा । तथैव यूयमपि यद्य-
दादिष्टास्तत्समापनात् परं ब्रूत, अनुपयोगिनो दासा वयं, अस्माभि
र्यद्यद् ऋणशोध इव कर्त्तव्यमासीत् तदेवाकारि ।
११ अथ स यदा यिरूशालेममगच्छत् तदा शमरियागालीलयो
१२ र्मध्येनागच्छत् । प्रविष्टे च तेन कस्मिंश्चिद् ग्रामे कुष्ठिनो दश
१३ नरास्तस्य सम्मुखीबभूवुः, ते दूरे तिष्ठन्तः प्रोच्चैरवदन्, यीशो नाथ,
१४ अस्माननुकम्पतां । तद् दृष्ट्वा स तानब्रवीत्, यूयं गत्वा याजकेभ्यः
१५ स्वान् दर्शयत । ततस्तेषां यात्राकाले ते शुचीभूताः । तेषामेक-
१६ स्तदात्मानं प्राप्तारोग्यं दृष्ट्वोच्चरवेणेश्वरं स्तुवन् प्रत्यावृत्ते तस्य
चरणयोरधोमुखं प्रणिपत्य च तं प्रति कृतज्ञतामङ्गीचकार । स नरः
१७ शमरीयः । यीशुस्तदा प्रतिभाषमाणो जगाद, किं न दश ते
१८ शुचीकृताः ? ते नव तर्हि कुत्र ? ईश्वरं स्तोतुं प्रत्यावृत्ता अस्माद्

विजातीयादन्ये केऽपि किं न लब्धिताः? ततः परं स तमुवाच, १९
उत्थाय याहि, तव विश्वासस्त्वां तारयामास।

अथेश्वरस्य राज्यं कदायातीति फरीशिभिः पृष्टः स प्रतिभाष- २०
माणस्तानवादीत्, नायातीश्वरस्य राज्यं प्रत्यक्षतया सद्दितं, जनाश्च
न वदिष्यन्ति, पश्यात्रेति, पश्यामुत्रेति वा। यतः पश्यत, ईश्वरस्य २१
राज्यं युष्मदन्तःस्थम्।

अथ स स्वशिष्यानुवाच, आयाति स कालो यदा यूयं मनुष्य- २२
पुत्रस्य दिनानामेकं दिदृक्षिष्यथ न तु द्रक्ष्यथ। जनाश्च युष्मान् २३
वदिष्यन्ति, पश्यात्रेति, पश्यामुत्रेति वा। मैत्रापगच्छत, मैवानुधावत
वा। यतः प्रकाशमाना विद्युद् यथाकाशस्याधोदेशमारभ्याकाशस्या- २४
धोदेशं यावद् विराजते, तथैव मनुष्यपुत्रोऽपि स्वदिवसे प्रतिभा-
स्यति। अपि तु प्रथमं तेन बहु दुःखं भोक्तव्यम्, एतत्कालिकै २५
र्मनुष्यैश्च तस्य निराकरणमवश्यम्भावि। अपि च नोहस्य काले यथा २६
सम्भूतं, तथैव मनुष्यपुत्रस्य कालेऽपि सम्भविष्यति। पोते नोहस्य २७
प्रवेशदिनं यावन्मनुष्या आश्नन्नपिबन्नुदवहन्नुदौह्यन्त च, तदा तु
वन्योपस्थाय सर्व्वान् नाशयामास। तथैव लोटस्य कालेऽपि सम्भूतं। २८
मनुष्या आश्नन्नपिबन्नक्रीणन् व्यक्रीणन्नरोपयन् गृहनिर्म्माणमकुर्व्वंश्च।
यस्मिन् दिने तु लोटः सदोमान्निर्ययौ, तस्मिन्नाकाशाद् वर्षन्तौ २९
वह्निगन्धकौ सर्व्वान् नाशयामासतुः। मनुष्यपुत्रो यस्मिन् दिने ३०
प्रकाशिष्यते, तस्मिंस्तथैव भविष्यति। तस्मिन् दिने यो गृहपृष्ठे ३१
विद्यते तस्य द्रव्येषु गृहमध्ये स्थितेषु मावरोहतु स तान्यादातुं।
तथैव यः क्षेत्रे विद्यते स मा परावर्त्ततां। लोटस्य भार्य्यां स्मरत। ३२
यः कश्चित् स्वप्राणान् रक्षितुं यतिष्यते स तान् हारयिष्यति, यश्च ३३
तान् हारयिष्यति स तान् जीवयिष्यति। युष्मानहं ब्रवीमि, तस्यां ३४

रात्रावेकस्यां खट्वायां शयानयो र्द्वयो र्नरयोरेकतरो ग्राहीष्यते-
३५ ऽन्यतरः परित्यच्यते। योषितो र्द्वयोरेकत्र पेषणीनियुक्तयोरेकतरा
३६ ग्राहीष्यतेऽन्यतरा परित्यच्यते। नरयो र्द्वयोः क्षेत्रे स्थितयोरेक-
३७ तरो ग्राहीष्यतेऽन्यतरः परित्यच्यते। तदा ते प्रतिभाषमाणास्तं
पप्रच्छुः, कुत्र, प्रभो? स तानवादीत्, यत्र कुणपं तत्रैव गृध्राः
समागमिष्यन्ति॥ १७॥

---

१८ अष्टादशोऽध्यायः।

१ विधवाया दृष्टान्तः ९ फरीशिनां शुल्कादायिनाञ्च दृष्टान्तः १५ शिशूनां ग्राह्यत्वं १८ कस्यचिद् युवधनवदधिपतेश्चरित्रं ३१ ख्रीष्टमरणस्य भविष्यद्वाक्यं ३५ अन्धभिक्षवे चक्षुर्दानञ्च।

१ अथ सर्व्वदा प्रार्थना कर्त्तव्या, निरुत्साहः परिहर्त्तव्य एतदधि
२ स तेभ्यो दृष्टान्तकथामपि कथयन् बभाषे, कस्मिंश्चिन्नगरे प्राड्वि-
वाक एक आसीत्, स ईश्वरान्नाबिभेत्, मनुष्यमपि नामानयत्।
३ तस्मिन्नेव नगरे विधवा काचिदासीत्, सा तस्य समीपमुपस्थाय
४ तमवदत्, अन्यायं प्रतीकृत्य मत्प्रतिपक्षान्मामुद्धर। अत्र स दीर्घ-
कालमसम्मतोऽतिष्ठत्। ततः परन्तु मनस्यवदत्, यद्यपीश्वरान्न
५ बिभेमि मनुष्यमपि न मानयामि, तथापीयं विधवा मां क्लिश्ना-
तीतिहेतोरन्यायं प्रतीकृत्येमामुद्धरिष्यामि नोचेदियं चरममागत्य
६ मुष्ट्याघातेन मां कलङ्कयिष्यति। प्रभुः पुन र्बभाषे, तेनायाथा-
७ र्थिकेन प्राड्विवाकेन यदुच्यते तद् युष्माभिः श्रूयतां। ईश्वरेण
तर्हि किं नोद्धारिष्यन्तेऽन्यायं प्रतीकृत्य तस्यात्मवरितनरा ये दिवा-
रात्रं तमुद्दिश्य क्रोशन्ति? स किमुदासीनत्वात् तान् प्रति सहन-
८ शीलः? युष्मानहं ब्रवीमि, स सत्वरमन्यायं प्रतीकृत्य तानुद्धरिष्यति।
प्रत्युत मनुष्यपुत्र आगमनकाले किं मेदिन्यां विश्वासमवाप्स्यति?

अथ धार्म्मिका वयमित्यात्मनिष्ठा येऽपरान् तुच्छीकुर्व्वन्ति, ९
तादृशान् कांश्चिन्मनुष्यानुद्दिश्य स दृष्टान्तकथामिमां कथयामास,
नरौ द्वौ प्रार्थयितुं धर्म्मधाम जग्मतुः। तयोरेकतरः फरीशी, अन्य- १०
तरः शुल्कादायी। फरीशी स्थित्वा स्वगतमित्थं प्रार्थयत, भो ईश्वर, ११
त्वां स्तौमि, यतो नास्म्यहं सदृशोऽन्यै र्मनुष्यैः परस्वापहारकैरन्या-
याचारिभि र्व्यभिचारिभिश्च नापि वा सदृशोऽनेन शुल्कादायिना।
प्रतिसप्ताहमहं द्विरुपवसामि मदीयसर्व्वायस्य दशमांशमुपहरामि १२
च। स शुल्कादायी तु दूरे तिष्ठन् स्वर्गं प्रत्यूर्द्ध्वं निरीक्षितुमपि १३
नैच्छत् अपि तु वक्षःस्थलमाहत्य व्याहरत्, भो ईश्वर, प्रसीद मे
पापिनः। युष्मानहं ब्रवीमि, अमुमपहायैषो धार्म्मिकीकृतः स्वगृहमव- १४
ततार। यतो यः कश्चिदात्मानमुच्चीकरोति स नीचीकारिष्यते,
यस्त्वात्मानं नीचीकरोति स उच्चीकारिष्यते।

अथ शिशवोऽपि तस्यान्तिकमानिन्यिरे यत् तेन स्पृश्येरन्। १५
तद् दृष्ट्वा शिष्यास्तानभर्त्सयन्। यीशुस्तु तान् समीपमाहूय बभाषे, १६
मत्समीपमागमिष्यतः शिशूननुमन्यध्वं मा वारयत, यत ईश्वरस्य
राज्यमीदृशानामेव। युष्मानहं सत्यं ब्रवीमि, यः कश्चिन्न शिशुरि- १७
वेश्वरस्य राज्यं गृह्लाति स तत्र नैव प्रवेक्ष्यति।

अथ कश्चिदध्यक्षस्तं पप्रच्छ, भो सद्गुरो, किं कृत्वाहमनन्तजी- १८
वनस्याधिकारी भविष्यामि? यीशुस्तु तमब्रवीत्, किमर्थं मां १९
सन्तं वदसि? सत् कोऽप्यन्यो नास्ति, केवल ईश्वरः। त्वमाज्ञा २०
जानासि, व्यभिचारं मा कुरु, नरहत्यां मा कुरु, चौर्य्यं मा कुरु,
मृषासाक्ष्यं मा देहि, स्वपितरं स्वमातरञ्च सम्मन्यस्व। स जगाद, २१
पालितं मया सर्व्वमेतदाबाल्यात्। तच्छ्रुत्वा यीशुस्तमब्रवीत्, २२
अधुनापि तवासम्पूर्णं किञ्चिदस्ति। सर्व्वं तव यद्यदस्ति देहि विक्रीय

दरिद्रेभ्यः, तथा कृते स्वर्गे तव धनं स्थास्यति, ततः परमागत्य
२३ मामनुव्रज। एतच्छ्रुत्वा स शोकार्त्तो बभूव, यतः सोऽतीव धनवा-
२४ नासीत्। यीशुस्तु तं शोकार्त्तीभूतं दृष्ट्वा बभाषे, वित्तानां
२५ स्वामिनः कीदृगायासेनेश्वरस्य राज्यं प्रवेक्ष्यन्ति। सुसाध्यं हि
२६ धनवत ईश्वरराज्यप्रवेशात् सूचीच्छिद्रेणोष्ट्रगमनं। श्रोतारस्तदा
२७ जगदुः, कस्तर्हि तरितुं शक्नोति? सोऽब्रवीत्, मनुष्याणां यद्यदसाध्यं
२८ तदीश्वरस्य साध्यं। पितरस्तदा व्याजहार, पश्यतु, वयं सर्व्वं त्यक्त्वा
२९ भवन्तमनुव्रजितवन्तः। स तान् जगाद, युष्मानहं सत्यं ब्रवीमि,
ईश्वरराज्यस्य कृते गृहं जनकौ वा भ्रातॄन् वा जायां वा सन्तानान्
३० वा त्यक्त्वा य इहकाले तद्बहुगुणम् आगामियुगे चानन्तं जीवनं
न लप्स्यते तादृशः कोऽपि नास्ति।

३१ अथ स द्वादशशिष्यान् स्वान्तिकमानीयाब्रवीत्, पश्यत वयं
यिरूशालेमं गच्छामः, भाववादिभिश्च मनुष्यपुत्रमधि यद्यल्लिखितं
३२ तत् सर्व्वं सेत्स्यति। यतः स परजातीयेभ्यः समर्पयिष्यत उपहा-
३३ सिष्यते न्यक्कारिष्यतेऽवनिष्ठीविष्यते च, ते च कशाभिराहत्य तं
३४ घातयिष्यन्ति, तृतीये दिने च स पुनरुत्थास्यतीति। तैस्त्वेतासां
कथानां किमपि नाबोधि तद् वचनञ्च तेभ्यस्तिरोहितमासीत्,
यद्यदकथ्यत च तत् ते नाज्ञायि।

३५ अथ तस्मिन् यिरीहोः समीपम् उपस्थिते कश्चिदन्धो भिक्षमाणः
३६ पथपार्श्व उपविष्ट आसीत्। स सन्निध्या गच्छतो जननिवहस्य शब्दं
३७ श्रुत्वा पप्रच्छ; किं भूतमिति। जनास्तमूचुः, नासरतीयो यीशुरनेन
३८ मार्गेण गच्छति। ततः स क्रोशन् जगाद, भो दायूदस्य पुत्र यीशो,
३९ मामनुकम्पतां। अग्रेनाग्रगामिनस्तं तर्जयन्तोऽवादिषुः मौनी भव,
स तु बहुगुणाधिकमुच्चैरवदत्, भो दायूदस्य पुत्र, मामनुकम्पतां।

यीशुस्तदा स्थित्वा स्वसमीपं तस्यानयनमादिदेश। ततः परं ४०
तस्मिन्नुपागते स तं पप्रच्छ, त्वदर्थं मया कर्त्तव्यं किं वाञ्छसि? ४१
स जगाद, प्रभो, दृक्शक्तिं यथा प्राप्नुयां। ततो यीशुस्तमाह, ४२
दृक्शक्तिं गृहाण, तव विश्वासस्त्वां तारयामास। स तत्क्षणं दृक्शक्तिं ४३
लेभे, ईश्वरञ्च प्रशंसंस्तमनुजगाम। कृत्स्नो जननिवहश्च तद् दृष्ट्वे-
श्वरं तुष्टुवे॥ १८॥

१९ ऊनविंशोऽध्यायः।

१ सक्केयनाम्नः शुल्कादायिनश्चरित्रं ११ कस्यचिन्महतो जनस्य तद्दासस्य चाख्यानं १८ ख्रीष्टस्य यिरूशालेमगमनं तत्पुरीयभाविदुःखे ख्रीष्टस्य विलापः ४५ अन्यकथा च।

ततः परं स यिरीहं प्रविश्य तन्मध्येनागच्छत्। पश्य च सक्के- १
यनामा कश्चिन्नरस्तत्रासीत्। स मुख्यः शुल्कादायी धनी चासीत्। २
को यीशुस्तन्निश्चेतुमिच्छन् स तं द्रष्टुम् अयतत जनताकारणात्तु ३
नाशक्नोत्, यतः स ह्रस्वकाय आसीत्। ततः सोऽग्रे धावित्वा ४
तद्दिदृक्षयोडुम्बरवृक्षमारुरोह, यतस्तत्रैव तेन गन्तव्यं। ततः परं ५
यीशुस्तत् स्थानं प्राप्योर्द्धदृष्टिं कृत्वा तं निरीक्ष्य जगाद, सक्केय,
शीघ्रमवतर, यतस्तव गृहे मयाद्य वस्तव्यं। स तदा त्वरयावरुह्य ६
सानन्दं तं जग्राह। तद् दृष्ट्वा सर्व्वेऽसन्तुष्य प्राहुः, स राज्ञियाप- ७
नार्थं पापिष्ठनरस्य गृहं प्रविष्टः। सक्केयस्तु स्थित्वा प्रभुमब्रवीत्, पश्यतु ८
प्रभो, मदीयसर्व्वस्वस्यार्द्धमहं दरिद्रेभ्यो वितरामि, यदि च मृषा-
दोषमारोप्य कस्यचित् किमपि मयापहृतं, तर्हि तच्चतुर्गुणं प्रत्यर्प-
यामि। यीशुस्तदा तमाह, अद्य गृहेऽस्मिन् परित्राणं वृत्तं, यतो- ९
ऽयमप्यब्राहामस्य सन्तानः। मनुष्यपुत्रो हि हारितमन्वेषितुं तार- १०
यितुञ्चागतः।

११ तेष्वेतच्छृण्वत्सु स दृष्टान्तकथामपि कथयामास, यतः स
यिरूशालेमस्य सन्निधावासीत् तैश्चान्वमीयत यदीश्वरस्य राज्यं
१२ सहसा प्रकाशिष्यते। अतः स व्याजहार, नरः कश्चित् कुलीनो
१३ दूरदेशं प्रतस्थे, स स्वार्थं राजत्वं ग्रहीतुं प्रत्यायातुञ्चैच्छत्। स
स्वदासान् दश समाहूय दश स्वर्णमुद्रास्तेषु समर्प्य च तान् जगाद,
१४ ममागमनं यावद् व्यापारं कुरुतेति। तदीयपुरवासिनस्तु तमद्वि-
षुस्तत्पश्चाच्च दौत्यं प्रहित्य निवेदयामासुः, नरोऽसौ यदस्माकं
१५ राजा भवेत् तन्नाभिमतमस्माभिः। स तु यदा राजत्वं लब्ध्वा
पुनरागमत् तदा केन व्यापारं कृत्वा किमुपार्जितं तज्जिज्ञासुः स
१६ तेषां दासानामाह्वानमादिदेश येष्वर्थमर्पितवान्। ततः प्रथम
उपस्थाय जगाद, प्रभो, भवतो मुद्रयापरा दश मुद्रा उपार्जिताः।
१७ स तमाह, साधु, भद्र दास, त्वं चोधिष्ठे विश्वस्त आसीस्ततो
१८ दशानां नगराणामाधिपत्यविशिष्टो भव। अनन्तरं द्वितीय आगत्य
१९ जगाद, प्रभो, भवतो मुद्रया पञ्च मुद्रा उपार्जिताः। स तमप्याह,
२० त्वं पञ्चसु नगरेष्वधिकृतो भव। ततः परमन्य एक आगत्याब्रवीत्,
२१ प्रभो, पश्यत्वियं भवतो मुद्रा। स्वेदहरवस्त्रे निधाय सा मया
रक्षिता भवतो भयात्। यतो भवान् कठोरो नरः, यन्न निहित-
२२ वांस्तदादत्ते, वीजान्यनुप्त्वा च शस्यं छिनत्ति। स तु तमवादीत्,
तव मुखाद् यन्निःसृतं, रे दुष्ट दास, तेनैव तव विचारं करि-
२३ ष्यामि। त्वयेदं भो अज्ञायि यदहं कठरो नरः, न निधाय
द्रव्यमाददे, वीजान्यनुप्त्वा च शस्यं छिनद्मि। कथं तर्हि ममार्थस्त्वया
न वणिजां हस्ते निक्षिप्तः? तथा कृतेऽहमागमनकाले कुसीदेन
२४ सार्द्धं तं प्रत्यपत्स्ये। निकटे तिष्ठतो जनांश्च स उवाच, तां स्वर्ण-
२५ मुद्रामस्मादपहृत्यामुष्मै दत्त यस्य दश मुद्राः सन्ति। ते प्रोचुः,

प्रभो, सन्ति तस्य दश मुद्राः। युष्मानहं ब्रवीमि, यस्य कस्यचिदास्ते २६
तस्मै दायिष्यते, यस्य तु नास्ते तस्य यदस्ति तदपि तस्मादप-
हारिष्यते। किन्त्वानयतात्र मत्समक्षं घातयत च मम तान् शत्रून् २७
ये स्वेषामुपरि मम राजत्वम् अस्वीकृतवन्तः।

सर्व्वमेतत् कथयित्वा स पुरस्ताद् व्रजन् यिरूशालेमं गन्तुं २८
प्रवृत्ते। यदा च स बैनफग्या बैथनियायाश्च निकटे जैतुनाख्यगिरेः २९
पार्श्व उपातिष्ठत, तदा स्वशिष्याणां द्वौ प्रेषयन्नब्रवीत्, सम्मुखस्थममुं ३०
ग्रामं गच्छतं, तत्र प्रविश्यैव तादृशमेकं बद्धं गर्दभवत्समासादयि-
ष्यथो यस्य पृष्ठे मनुष्यः कोऽपि कदापि नोपविष्टवान्, तं मुक्त्वा-
नयतं। यदि तु कश्चिद् वां पृच्छति, कुतो मुञ्चथ इति तर्हि ब्रूतं, ३१
अनेन प्रभोः प्रयोजनमस्तीति। ततस्तौ प्रेरितौ गत्वा तेन यत् ३२
कथितं तदनुरूपं प्रापतुः। तौ तु यदा तं गर्दभवत्समसुञ्चतां तदा ३३
तत्स्वामिन ऊचुः, कुतो गर्दभवत्सं मुञ्चथ? तौ प्राहतुः, अनेन ३४
प्रभोः प्रयोजनमस्ति। ततः परं तौ तं गर्दभवत्सं यीशोः समीपं ३५
निन्यतुस्तत्पृष्ठे च स्ववासांसि क्षिप्त्वा यीशुं तदुपर्य्युपवेशयामासतुः।
तस्य यात्राकाले च जनाः स्ववस्त्राणि मार्गे तस्तरुः। ततः परं ३६
यदा स जैतुनपर्व्वतादवरोहणमार्गस्य सन्निधावुपातिष्ठत, तदा कृत्स्नः ३७
शिष्यनिवहः सानन्दं पूर्व्वदृष्टानां सर्व्वेषां प्रभावसिद्धकर्म्मणां कार-
णादीश्वरस्य स्तवं कीर्त्तयितुमारभ्य बभाषे, धन्यो राजासौ यः प्रभो ३८
र्नाम्नायाति, स्वर्गे शान्तिरूर्द्ध्वलोके च माहात्म्यकीर्त्तनं भूयात्।
जनताया मध्यात् तदा केचित् फरीशिनस्तमवादिषुः, गुरो, स्वशि- ३९
ष्यान् तर्जयतु। स तु प्रतिभाषमाणस्तान् जगाद, युष्मानहं ब्रवीमि, ४०
अमी यदि तूष्णीम्भवन्ति, प्रस्तरास्तर्हि प्रक्रोक्ष्यन्ति।

ततः परं स यदा निकटस्थोऽभूत् तदा पुरीं निरीक्ष्य तामुद्दिश्य ४१

४२ क्रन्दन्नब्रवीत्, यत् तव शान्तिजनकं कथं तन्न त्वयाप्यनुभूतं ? अस्मिन्
त्वदीयदिवस एव कथं नानुभूतं ? तत् त्वधुना तव दृष्टितः प्रच्छन्नं ।
४३ यत उपस्थास्यन्ति त्वां तानि दिनानि येषु तव शत्रवस्त्वत्परितः
४४ प्राकारं रचयित्वा त्वां वेष्टयिष्यन्ति समन्ताद्रोत्स्यन्ति च, त्वां
त्वदन्तःस्थान् तव शिशूंश्च भूमिसात् करिष्यन्ति, त्वन्मध्ये प्रस्तरस्यो-
परि प्रस्तरं नैकमपि शेषयिष्यन्ति च, यतो हेतोस्त्वदीयतत्त्वावलो-
४५ कनस्य समयस्त्वया नानुभूतः । अथ स धर्म्मधाम प्रविश्य तत्र
४६ क्रयविक्रयकारिणो बहिष्कर्त्तुं प्रवृत्ते, तांश्चाब्रवीत्, लिखितमास्ते,

गृहं यन्मामकीनं तद् भविता प्रार्थनागृहं ।

तत्तु युष्माभिरकारि दस्यूनां गह्वरः ।

४७ ततः प्रभृति स प्रत्यहं धर्म्मधामन्युपादिशत् । मुख्ययाजकास्तु
४८ शास्त्राध्यापकाः प्रजानां प्रथमाश्च तं नाशयितुमयतन्त, तथापि किं
कर्त्तव्यं तन्निर्णेतुं नाशक्नुवन्, यतः सर्व्वजनस्तदुपदेशश्रवण आसक्त
आसीत् ॥ १९ ॥

---

२० विंशोऽध्यायः ।

१ प्रधानयाजकाध्यापकानां निरुत्तरकरणं ९ द्राक्षाक्षेत्रस्य दृष्टान्तः १९ राजकरे याजकाध्यापकानां निरुत्तरकरणं २७ श्मशानादुत्थाने सद्दूकिनां निरुत्तरकरणं ४१ खस्मिन् अध्यापकानां निरुत्तरकरणञ्च ।

१ तत्कालस्य कस्मिंश्चिद्दिवसे स यदा धर्म्मधाम्नि जनानशिक्षयत्
सुसंवादमज्ञापयच्च, तदा मुख्ययाजकाः शास्त्राध्यापकाः प्राचीनाश्च
२ तमुपस्थाय जगदुः, अस्मान् वद, केनाधिकारेण करोषि त्वं कर्म्मा-
३ ण्येतानि ? को वा तुभ्यं तमधिकारं दत्तवान्? यीशुस्तु प्रतिभा-
षमाणस्तानवादीत्, युष्मानहमपि कथामेकां पृच्छामि, मह्यं तदुत्तरं
४ दत्त । योहनस्य स्नापनं किं स्वर्गोत्पन्नमासीदुत मनुष्योत्पन्नं ? ते

तदा मिथो विचारयन्तोऽवदन्, तत् स्वर्गोत्पन्नमित्युक्ते सोऽस्मान् ५
प्रक्ष्यति, यूयं तर्हि तस्मिन् किमर्थं न विश्वसितवन्तः? तत्तु मनु- ६
ष्योत्पन्नमित्युक्ते सर्व्वजनोऽस्मान् प्रस्तरैराहत्य मारयिष्यति, यतो
योहनो यद् भाववादी तत् सर्व्वै र्दृढं प्रतीयते। तत् ते प्रत्यवदन् ७
तत् कुत उत्पन्नं तन्न जानीमः। यीशुरनेन तानवादीत्, नाहमपि ८
युष्मान् ज्ञापयामि, करोम्यहं सर्व्वमेतत् केनाधिकारेण।

ततः स जनेभ्यो दृष्टान्तकथामिमां कथयितुं प्रववृते, नरः ९
कश्चिद् द्राक्षालता रोपयन् द्राक्षोद्यानं चकार, कृषकेषु करदायिषु
तत् समर्प्य च दीर्घकालार्थं देशान्तरं जगाम। फलकाले च कृषका १०
यद् द्राक्षोद्यानोत्पन्नफलानामंशं तस्मै दद्युस्तदर्थं स तेषां समीपं
दासमेकं प्राहिणोत्, कृषकास्तु तं प्रहृत्य रिक्तहस्तं विससृजुः। पुनः ११
सोऽपरमेकं दासं प्राहिणोत्, ते तु तमपि प्रहृत्य न्यक्कृत्य च रिक्तहस्तं
विससृजुः। पुनः स तृतीयमेकं प्रेषयामास, ते तु तमप्यस्त्रैराहत्य १२
वहि र्निचिक्षिपुः। उद्यानस्य स्वामी तदा बभाषे, किं करवाणि? १३
मम प्रियं पुत्रं प्रहेष्यामि, किंश्चित् तं दृष्ट्वा त आदरिष्यन्ते।
कृषकास्तु तं दृष्ट्वा परस्परं तर्कयन्तोऽवदन्, असावुत्तराधिकारी, १४
समायात, हन्यतामसावस्माभिस्तेन रिक्थमस्माकं भविष्यति। ततः १५
परं स तै र्द्राक्षोद्यानाद् वहि र्निक्षिप्तो हतश्च। तदोद्यानस्य स्वामी
तान् प्रति किं करिष्यति? स आगत्य तान् कृषकान् संहरिष्यति, १६
द्राक्षोद्यानमन्येषु समर्पयिष्यति च। तच्छ्रुत्वा जना अवदन्, नैवं १७
भवतु। स तु तान् अवलोक्य व्याजहार, किं तर्ह्येतद् यल्लिखितमास्ते,

गृहनिर्म्मातृभिर्लोकै र्यः पाषाणो निराकृतः।
स एव गृहकोणस्थः प्रमुख्यः प्रस्तरोऽभवत्॥

प्रस्तरे तस्मिन् यः कश्चित् पतिष्यति स खण्डशो भग्नो भविष्यति, १८

१९ प्रस्तरस्य स यस्मिन् पतिष्यति तं सञ्चूर्णयिष्यति। मुख्ययाजकाः
शास्त्राध्यापकाश्च तस्मिन्नेव दण्डे तस्मिन् हस्तार्पणं कर्त्तुमयतन्त,
जनेभ्यस्त्वबिभयुः, यतः स तानुद्दिश्यामुं दृष्टान्तं कथितवानिति
तैरबोधि।
२० अथ शास्तु र्हस्ते देशाध्यक्षस्याधिकारे च तं समर्पयितुमिच्छवस्ते
समालोच्य वाक्पाशेन यत् तं धरेयुस्तदर्थं कपटधार्म्मिकवेशान्
२१ कतिपयान् प्रणिधीन् प्रेषयामासुः। ते तं पप्रच्छुः, भो गुरो,
वयं जानीमो यद् भवान् ऋजु भाषते उपदिशति च, मुखापेक्षां
२२ न कुरुतेऽपि तु सत्येनेश्वरस्य मार्गं शिक्षयति। अस्माभिः कैसराय
२३ करदानं विधेयं न वेति? स तु तेषां धूर्त्ततां बुद्ध्वा तान् जगाद,
२४ किमर्थं मां परीक्षध्वे? मुद्रामेकां दीनाराख्यां मां दर्शयत। अत्र
२५ कस्य मूर्त्ति र्लेखनञ्च भातः? ते प्रत्यूचुः, कैसरस्य। तदा स
तानब्रवीत्, दत्त तर्हि कैसराय यद्यत् कैसरस्य, दत्त चेश्वराय
२६ यद्यदीश्वरस्य। ततस्ते जनानां समक्षं वाक्पाशेन तं धर्त्तुं नाश-
क्नुवन्, तस्य प्रत्युत्तरे विस्मिता मौनीबभूवुश्च।
२७ अथ पुनरुत्थानमनङ्गीकुर्व्वाणाः केचित् सदूकिनो निकटमागत्य
२८ तं पप्रच्छुः, भो गुरो, मोशिरस्मदर्थं लिखितवान्, कस्यचित् कृत-
दारो भ्राता यदि निःसन्तानो म्रियते, तर्हि तस्य भ्राता तां
२९ जायामुद्वाह्य स्वभ्रात्रे वंशमुत्पादयिष्यतीति। वाढं, सप्त भ्रातर
३० आसन्। प्रथमश्च विवाहं कृत्वा निःसन्तानो ममार। द्वितीयस्तदा
३१ तस्य जायां लेभे, सोऽपि निःसन्तानो ममार। ततस्तृतीयस्तां
३२ लेभे। इत्थमेव ते सप्त नराः सन्तानानत्यक्त्वा मम्रुः। सर्व्वेषां
३३ पश्चात् सा योषिदपि ममार। अतः पुनरुत्थाने सा तेषां कस्य
३४ भार्य्या भवेत्? यतस्ते सप्त तामुदूढवन्तः। यीशुस्तदा तान्

प्रत्यवादीत्, एतद्युगस्य सन्ताना उद्वहन्त्युद्वाह्यन्ते च, ये त्वमुष्य ३५
युगस्य मृतोत्थानस्य च भागित्वमर्हन्तीति प्रतिपन्नास्ते नोद्वहन्ति
नोद्वाह्यन्ते वा, न शक्यं हि तैः पुन र्मर्त्तुमपि। वास्तवं स्वर्गदूतैस्तु- ३६
ल्यास्त ईश्वरस्य सन्तानाश्च जाताः, यतस्ते पुनरुत्थानस्य सन्तानाः।
मृतास्तु यदुत्थाप्यन्ते तत् स्तम्बवृत्तान्ते मोशिनापि सूचयाञ्चक्रे, ३७
यतस्तेन प्रभुरब्राहामस्येश्वर इस्हाकस्य चेश्वरो याकोबस्य चेश्वर
इत्यभिधीयते। ईश्वरो न मृतानामपि तु जीवतामीश्वरोऽस्ति, ३८
यतस्तस्मै सर्व्वे जीवन्ति। शास्त्राध्यापकानां केचित् तदा प्रत्यूचुः, ३९
भो गुरो, सम्यगुक्तं भवता। ततः प्रभृति पुनस्तं किमपि प्रष्टुं ते ४०
नोत्सेहिरे।

स तु तानवादीत्, जनाः ख्रीष्टं कथं दायूदस्य पुत्रं वदन्ति? ४१
गीतग्रन्थे हि स्वयं दायूद इत्थं व्याहरति, ४२

मम प्रभुमिदं वाक्यं बभाषे परमेश्वरः।
त्वच्छत्रून् पादपीठं ते यावन्न हि करोम्यहं। ४३
अवतिष्ठस्व तावत् त्वमासीनो मम दक्षिणे॥

अतएव स दायूदेन प्रभुरित्यभिधीयते, कथं तर्हि स तस्य पुत्रो ४४
भवेत्?

ततः परं स कृत्स्नस्य प्रजावृन्दस्य कर्णगोचरे स्वशिष्यानाह, यूयं ४५
शास्त्राध्यापकेभ्यः सावधाना भवत, रोचयन्ति ते महापरिच्छदै ४६
र्विहारम्, आकाङ्क्षन्ति च हट्टेष्वभिवन्दनानि समाजगृहेषु श्रेष्ठा-
सनानि भोज्येषु च श्रेष्ठस्थानानि। ते विधवानां गृहाणि ग्रसन्ति, ४७
छलाच्च सुदीर्घं प्रार्थयन्ते। विचारे ते घोरतरं दण्डं लप्स्यन्ते॥ २०॥

२१ एकविंशोऽध्यायः।

१ विधवाया दानकथनं ५ मन्दिरविनाशे भविष्यद्वाक्यं १० शिष्याणां दुःखे भविष्यद्वाक्यं २० लोकानां दुःखे भविष्यद्वाक्यं २९ उडुम्बरवृक्षस्य दृष्टान्त उपदेशश्च ३७ ख्रीष्टस्य यातायातकथा च।

१ अथ स ऊर्द्धदृष्टिं कृत्वा धनागार उपहारान् निक्षिपतो
२ धनिनो ददर्श विधवाञ्चैकां दरिद्रां ददर्श या चोधिष्ठमुद्राद्वयं
३ तत्र न्यक्षेप्सीत्। ततः स उवाच, युष्मानहं सत्यं ब्रवीमि, दरिद्रेयं
४ विधवा सर्व्वेभ्योऽधिकं निक्षिप्तवती, यतः सर्व्वे प्रयोजनातिरिक्तं
किञ्चिदीश्वरोद्देश्योपहारेषु निक्षिप्तवन्तः, इयन्तु प्रयोजनीयस्याभा-
वेऽपि सर्व्वस्वं निक्षिप्तवती, जीविकां कृत्स्नामेव।

५ अथ धर्म्मधाम रुचिरैः प्रस्तरैरुत्सृष्टद्रव्यैश्च शोभितमिति कैश्चित्
६ कथिते स व्याजहार, अत्र युष्माभि र्यद्यद्दृश्यते तन्मध्ये यदा प्रस्त-
रोपरि प्रस्तर एकोऽप्यनिपातयितव्यो न विहायिष्यते, तादृशानि
७ दिनान्यायास्यन्ति। ते तदा तं पप्रच्छुः, गुरो, वाढं, कदा तत्
८ सम्भविष्यति? किं वाभिज्ञानं तत्सम्भवकालस्य? स उवाच, सावधा-
नास्तिष्ठत, मा भ्राम्यत, यतो बहवो मन्नामध्वजिन आगत्य
९ वदिष्यन्त्यहं सः, समयश्च निकटमागत इति। तद्यूयं तान् मानु-
गच्छत। यदा च युद्धानामुपप्लवानाञ्च किंवदन्तीं श्रोष्यथ तदा
मा त्रस्यत, यत एतानि प्रथममवश्यम्भावीनि, न त्वापाततः
परिणामो भविष्यति।

१० स तदा तान् जगाद, जाति र्जाते र्विरुद्धं राज्यञ्च राज्यस्य विरु-
११ द्धमुत्थास्यति, स्थाने स्थाने च महाभूकम्पा दुर्भिक्षाणि मार्य्यश्च
भविष्यन्ति, गगनाच्च महान्ति भीषणान्यभिज्ञानानि च सम्भवि-
१२ ष्यन्ति। सर्व्वस्मादेतस्मात् प्राक् तु मनुष्या युष्मासु हस्तानर्पयिष्यन्ति

समाजगृहेषु कारासु च निधास्यन्ति उपद्रोष्यन्ति च युष्मान् राज्ञां
शास्तॄणाञ्च समक्षं नेतव्यान् मन्नामकारणात्। तत्तु युष्मत्पक्षीयसा- १३
क्ष्येण परिणतं भविष्यति। ततो यूयं मनःस्विदं निश्चिनुत यत् १४
स्वपक्षवादार्थं युष्माभिः प्राक् न चिन्तयितव्यं। यतो युष्माकं सर्व्वेऽपि १५
विपक्षा यस्य प्रतिकूलवादं प्रतिरोधं वा कर्त्तुं न शक्ष्यन्ति, तादृशं
वक्त्रं ज्ञानञ्च मयैव युष्मभ्यं दायिष्येते। यूयन्तु पितृभ्यामपि भ्रातृभि १६
र्ज्ञातिभि र्बन्धुभिश्च समर्पयिष्यध्वे, युष्माकं केचिच्च घानिष्यन्ते। १७
यूयञ्च सर्व्वेषां द्वेषपात्राणि भविष्यथ मन्नामकारणात्। न तु १८
विनंक्ष्यति युष्माकमेकोऽपि शिरोरुहः। स्वधैर्य्येण यूयं स्वप्राणान् १९
अर्जयिष्यथ।

यदा तु यिरूशालेमपुरीं पृतनाभिर्वेष्टितां द्रक्ष्यथ, तदा तस्य २०
उच्छित्ति र्यन्निकटमागता तज्जानीत। तदा यिहूदियानिवासिनः २१
पलाय्य पर्व्वतानाश्रयन्तु मनुष्याश्च पुर्य्या मध्ये वर्त्तमाना निर्गच्छन्तु
ग्रामेषु वर्त्तमानाश्च तां मा प्रविशन्तु। यतो यद्यल्लिखितमास्ते २२
तत्सर्व्वस्य सिद्धये तान्यधर्म्मप्रतीकारस्य दिनानि भविष्यन्ति। भवि- २३
ष्यन्ति च दिनेषु तेषु गर्भिण्यः स्तन्यदायिन्यश्च सन्तापभाजनानि।
यतो मेदिन्यां महादुर्गति र्भविष्यति कोपश्च जातिमिमां प्रति।
जना असिग्रस्ताः पतिष्यन्ति वन्दीकृताः सर्व्वजातिषु (विक्रायिष्यन्ते) २४
च। परजातीनां कालश्च यावदपूर्णः स्थास्यति, तावद् यिरूशालेमं
नित्यं परजातीनां चरणै र्मर्द्दयिष्यते। सूर्य्ये चन्द्रे नक्षत्रेषु चाभि- २५
ज्ञानानि भविष्यन्ति, भूतलेऽपि जातीनां सङ्कोचो व्याकुलानां २६
समुद्रस्य नादचलनयो र्मनुष्येषु च प्राणत्यागिषु भयाद् भूमण्डल-
माक्रमिष्यन्तीनां (विपदां) प्रतीक्षणाच्च, यतो गगनस्य बलानि
विचलिष्यन्ति। तदा च महासामर्थ्यप्रतापाभ्यां सार्द्धं मेघरथेना- २७

२८ गच्छन् मनुष्यपुत्त्रस्ते लक्षयिष्यते । एतत्सम्भवस्यारम्भे तु यूयमूर्द्धी-
भूय शिरांस्युच्चीकुरुत, यतो युष्माकं मुक्तिरासन्ना ।
२९ पुनः स तेभ्यो दृष्टान्तं कथयामास, उडुम्बराः सर्व्वे वृक्षाश्च
३० युष्माभिरालोच्यन्तां, ते स्पष्टं पल्लवानुत्पादयन्तीति दृष्ट्वा स्वयं
३१ जानीथ यूयमासन्नः ग्रीष्मकाल इति । तथैव यूयमपि यद्दैतत्सर्व्वस्य
३२ सम्भवं द्रक्ष्यथ ज्ञास्यथ तदा यदीश्वरस्य राज्यं समीपस्थं । युष्मानहं
सत्यं ब्रवीमि, यावत् सर्व्वमेतन्न सम्भवति तावन्न व्यत्येष्यन्ति मानवा
३३ एतत्कालिकाः । द्यावापृथिव्यावत्येष्यतः, मम वाक्यानि तु नैवा-
३४ त्येष्यन्ति । यूयन्तु स्वार्थं सावधाना भवत, नोचेत् युष्मच्चित्तानि
मद्यभारेण मत्ततया जीविकाजन्यचिन्ताभि र्वा जडीभविष्यन्ति,
३५ तथा सति स दिवसः सहसा युष्मानुपस्थास्यति । यतः कूटपाशवत्
३६ स भूतलस्य सर्व्वत्रासीनानां सर्व्वेषामुपरि वर्त्तिष्यते । अतो यूयं
जाग्रतः स्थित्वा सर्व्वकाले तथा प्रार्थयध्वं यथा विचार इदं निश्ची-
येत यत् सर्व्वाण्येतानि भाविदुःखानि तरितुं मनुष्यपुत्त्रस्य समक्षं
स्थातुञ्च यूयमर्हथ ।
३७ तदा स प्रत्यहं धर्म्मधामन्युपदिशन् दिवसमयापयत्, जैतुना-
३८ ख्यगिरिं निर्गत्य च तत्र रात्रिमयापयत् । प्रत्यूषे च सर्व्वजनो
धर्म्मधाम्नि तस्य वाक्यान्याकर्णयितुं तस्य समीपमागच्छत् ॥ २१ ॥

---

२२ द्वाविंशोऽध्यायः ।

१ ख्रीष्टस्य विरुद्धकुमन्त्रणा ७ निस्तारोत्सवीयभोज्यासादनं १४ प्रभो रात्रिभोज्य-निरूपणं २१ तस्य परकरार्पकस्य कथा २४ नम्रत्वोपदेशः ३१ पितरस्यानङ्गीकारकथनं ३५ शिष्यान् प्रति प्रश्नः ३९ उद्याने ख्रीष्टस्य दुःखं ४७ यिहूदा विश्वासघातित्वं ५४ पितरस्यानङ्गीकारः ६३ ख्रीष्टं प्रत्युपहासः प्रहारश्च ६६ विचारे स्वसाक्ष्यदानञ्च ।

निष्किण्वपूपानां पर्व्व तदासन्नमासीत्, तस्य नामान्तरं पास्खे- १
ति। मुख्ययाजकाः शास्त्राध्यापकाश्च यीशो र्व्यापादनस्योपायमग- २
वेषयन्, यतस्ते जनेभ्यो भीता आसन्।

अथ शैतानो द्वादशानां श्रेण्यां गणितमीष्करियोतीयाभिधं ३
यिहूदाम् आविवेश। स च मुख्ययाजकानां सेनापतीनाञ्च समीपं ४
गत्वा तेषु तत्समर्पणस्योपायमधि तैः संललाप। ततस्ते हर्षं गत्वा ५
तस्मै रूप्यं दातुमङ्गीचक्रुः। सोऽपि सम्मतो बभूव, जनताव्यतिरे- ६
केण तेषु तत्समर्पणार्थमवकाशं प्राप्तुमयतत च।

ततः परं निष्किण्वपूपानां दिनमुपतस्थे यदा निस्तारोत्सवीयो ७
मेषो घातयितव्यः। यीशुस्तदा पितरं योहनञ्चेदमादिशन् प्राहि- ८
णोत्, युवां गत्वास्मदर्थं निस्तारोत्सवीयं भोज्यं सज्जीकुरुतं तद्-
स्माभि र्यथा भुज्येत। तौ तं पप्रच्छतुः, भवदिच्छातः कुत्रावाभ्यां ९
सज्जीकर्त्तव्यं? स ताववादीत्, पश्यतं युवयो र्नगरं प्रविष्टयो र्जल- १०
पूर्णं कलसं वहन् कश्चिन्नरो युष्मत्सम्मुखमुपस्थास्यति, स यद् गृहं
प्रवेक्ष्यति, तदभ्यन्तरं यावद् तमनुगच्छतं, गृहस्वामिनञ्च वदतं, ११
गुरु र्भवन्तं पृच्छति, कुत्र तदतिथिगृहं यत्राहं स्वशिष्यैः सार्द्धं नि-
स्तारोत्सवीयं भोज्यं भोक्ष्ये? स तदा वां भूमित उच्चतरामासनैः १२
सज्जितां वृहतीं शालां दर्शयिष्यति। तत्रैवोपकल्पयतं। ततस्तौ १३
गत्वा तेन यत् कथितं तदनुरूपं दृष्ट्वा निस्तारोत्सवीयं भोज्यं
सज्जीचक्रतुः।

समये तूपस्थिते स भोक्तुमुपविवेश द्वादश प्रेरिताश्च तेन सार्द्ध- १४
मासन्। स तदा तानुवाच, दृढाकाङ्क्षयेदं मया प्रत्याकाङ्क्षितं १५
यन्मम दुःखभोगात् प्राग् युष्माभिः सार्द्धमिदं निस्तारोत्सवीयं भोज्यं
भुञ्जीय। युष्मानहं ब्रवीमि, तद् यावदीश्वरस्य राज्ये सिद्धं न भवि- १६

१७ ष्यति तावन्मया नैव भोच्यते पुनः । ततः परं स पानपात्रं गृहीत्वा
१८ धन्यवादं कृत्वा जगाद, गृह्णीतैतन्मिथो विभजध्वं च । यतो युष्मान्
ब्रवीमि, इतः परं यावदीश्वरस्य राज्यं नोपस्थास्यते तावद् गोस्त-
१९ नीलतोत्पन्नो रसो मया न पायिष्यते । ततः परं स पूपमादाय
धन्यवादं कृत्वा च तं भङ्क्त्वा तेभ्यो ददौ बभाषे च, एतन्मम शरीरं
२० यद् युष्मदर्थं दीयते । मम स्मरणार्थमिदं कुरुत । भोजनात् परञ्च
स तथैव पानपात्रमादाय बभाषे, पानपात्रमेतन्मम शोणितेन
स्थापितो नूतनो नियमः, युष्मदर्थं तद् विस्राव्यते ।
२१ अपि च पश्यत, मत्समर्पयितु र्हस्तो मया सार्द्धं भोजनमञ्चे
२२ वर्त्तते । यथा निरूपितं तथैव मनुष्यपुत्रः प्रयाति, नरेण येन तु
२३ स समर्प्यते स सन्तापपात्रं । ततस्तेषां कस्तत् करिष्यत्येतदधि ते
मिथो विचारयितुमारेभिरे ।
२४ पुनस्तेषां को महान् मान्यः, एतदधि तेषु वादानुवाद उत्पेदे ।
२५ स तु तान् जगाद, परजातीयानां राजानस्तेषामुपरि प्रभुत्वं कुर्वते,
२६ तेषां कर्तृत्वकारिणश्च हितकरा इत्यभिधीयन्ते । यूयन्त्वीदृग्भावा
२७ मा भवत । प्रत्युत युष्मन्मध्ये यो महान् स कनिष्ठ इव भवतु, यश्च
२८ नायकः स परिचारक इव भवतु । कतरो हि महान्, भोज्ये य
आसीनोऽस्त्यथवा यः परिचरति? किं न स य आसीनोऽस्ति?
२९ युष्माकं मध्ये त्वहं परिचारक इव वर्त्ते । मत्परीक्षासु तु यूयं
स्थिरभावेन मया सार्द्धमवस्थितास्ततो यथा मम पिता मह्यं दाय-
३० वद् राज्यं दातुमङ्गीकृतवान्, तथाहं युष्मभ्यं दायवदिममधिकारं
दातुमङ्गीकरोमि, यन्मम राज्ये यूयं मया सार्द्धं मम भोजनमञ्चे
भोक्ष्यध्वे पास्यथ च, सिंहासनेष्वासीना इस्रायेलस्य द्वादशानां
वंशानां विचारं करिष्यथ च ।

ततः परं प्रभु र्बभाषे, शिमोन, शिमोन, पश्य, शैतानस्तित- ३१
उना शस्यमिव चालयिष्यन् युष्मान् लब्धुं ययाचे, अहन्तु त्वदर्थं ३२
तथा प्रार्थितवान् यथा तव विश्वासो न विलुप्येत। त्वमपि स्वसमये
प्रत्यावृत्तस्तव भ्रातॄन् सुस्थिरीकुरु। स तु तमाह, प्रभो, भवता ३३
सार्द्धमहं कारामपि मृत्युमपि च गन्तुमुद्यतोऽस्मि। स तूवाच, ३४
पित्र, त्वामहं ब्रवीमि, त्वं यन्मां जानासि तत् त्रिकृत्वो यावन्नान-
ङ्गीकरिष्यसि तावत् कुक्कुटोऽद्य न रविष्यति।

ततः परं स तानुवाच, यदाहं युष्मान् मुद्राधारं चेलसम्पुटक- ३५
मुपानहौ च विना प्राहिणवं, तदा युष्माकं किं कस्याप्यभावो
जातः? ते प्रत्यूचुः, न जातः। स पुनस्तानवादीत्, अधुना तु यस्य ३६
मुद्राधारोऽस्ति स तं गृह्णातु चेलसम्पुटकञ्च तथा। यस्य तु नास्ति ३७
स स्ववस्त्रं विक्रीणात्वसिञ्च क्रीणातु। यतोऽहं युष्मान् ब्रवीमि,
मामध्येतेनापि सिद्धेन भवितव्यं यल्लिखितमास्ते,

अधर्म्माचारिणां मध्ये सोऽप्येको गणितोऽभवत्॥

यतो मामधि यद्यन्निरूपितं तत्परिणामः सिध्यति। तेऽवा- ३८
दिषुः, प्रभो, पश्यत्वत्र द्वावसी विद्येते। स तानब्रवीत्, तत्
पर्य्याप्तम्।

ततः परं स निर्गत्य स्वरीत्यनुसारेण जैतुनपर्व्वतं ययौ तच्छि- ३९
ष्याश्च तमनुजग्मुः। गन्तव्यं स्थानं प्राप्तश्च स तानवादीत्, यूयं
तथा प्रार्थयध्वं यथा परीक्षां मा प्रविशेत। अनन्तरं स प्रायेण ४०
प्रस्तरक्षेपस्थानमन्तरं कुर्व्वंस्तेभ्यः पृथग् बभूव जानुनी पातयित्वा चेदं ४१
भाषमाणः प्रार्थयाञ्चक्रे, पितः, पानपात्रमिदं मत्तोऽपसारयितुं यदि ४२
तव मति र्भवेत्! तथापि न मम वाञ्छापि तु तवैव वाञ्छा
सिध्यतु। तदा स्वर्गात् तस्मै बलदाता दूत एकस्तस्मै दर्शनं ददौ। ४३

४४ स च प्राणपणेन चेष्टमान एकाग्रतरं प्रार्थयत। तस्य स्वेदश्च बभूव
४५ भूमौ पतद्भिः शोणितबिन्दुभिः सदृशः। ततः परं स प्रार्थनात
उत्थाय शिष्याणां समीपं गत्वा तान् शोकान्निद्राणान् ददर्श बभाषे
४६ च, किमर्थं निद्राथ? उत्थाय तथा प्रार्थयध्वं यथा परीक्षां न
प्रविशेत।

४७ स यदैतदभाषत, पश्य तदा जनतोपतस्थे, तदग्रे च द्वादशानामे-
कोऽर्यतो यिहूदा इत्यभिधो नरोऽव्रजत्, यीशुं चुम्बितुञ्च तद-
४८ न्तिकमाजगाम। यीशुस्तु तमाह, रे यिहूदा, चुम्बनेन किं मनु-
४९ पुत्रं शत्रुषु समर्पयसि? तदा यद् भवितव्यं तत्सङ्गिभिः कैश्चित् तद्
५० दृष्ट्वा स पृष्टः, प्रभो, अस्माभिः किं कृपाणाघातः कर्त्तव्यः? तेषामे-
कस्य महायाजकस्य दासमाहत्य तस्य दक्षिणं कर्णमवचिच्छेद।
५१ यीशुस्तु प्रत्युवाच, एतद् यावन् मामनुजानीत। इत्युक्त्वा स तस्य
५२ कर्णं स्पृष्ट्वा तं निरामयं चकार। अनन्तरं यीशुः स्वसमीपमभ्याग-
तान् मुख्ययाजकान् धर्म्मधामरक्षकान् सेनापतीन् प्राचीनांश्च
जगाद, दस्युं धरिष्यन्त इव यूयं किमसीन् यष्टींश्चादायागताः?
५३ अहन्तु प्रत्यहं धर्म्मधाम्नि युष्माभिः सार्द्धमासं, तदा यूयं मद्विरुद्धं
हस्तान् न प्रासारयत। अपि त्वयं युष्माकं समयोऽन्धकारस्य
चाधिपत्यम्।

५४ ते तु तं धृत्वापनीय महायाजकस्य गृहं प्रवेशयामासुः, पितरश्च
५५ दूरात् तमन्वगच्छत्। तत्र प्राङ्गणस्य मध्ये जनेषु वह्निं प्रज्वाल्यै-
५६ कत्रोपविष्टेषु पितरस्तेषां मध्य उपविवेश। दासी काचित् तदा तमा-
लोकस्य पुरस्तादुपविष्टं निरीक्ष्य तं प्रत्येकदृष्टिं कुर्व्वन्ती व्याहा-
५७ र्षीत्, असावपि तेन सार्द्धमासीदिति। स त्वनङ्गीकुर्व्वन्नब्रवीत्,
५८ नारि, तं न जानामि। क्षणात् परमन्यः कश्चित् तं दृष्ट्वा जगाद,

त्वमपि तेषामेक इति । पितरस्तूवाच, नर, नाहमस्मि । ततः परं ५९
व्यतीतायां प्रायेणैकस्यां घटिकायामपरः कश्चिद् दृढतरं व्याहा-
र्षीत्, नूनमसावपि तेन सार्द्धमासीत्, असौ हि गालीलीय इति।
पितरस्त्ववादीत्, नर, न जाने त्वया यदुच्यते। तस्मिन्नित्थं भाषमाणे ६०
सहसा कुक्कुटो रुराव, प्रभुश्च मुखं परावर्त्त्य पितरं समालोकयामास।
पितरस्तदास्मार्षीत् प्रभोस्तद् वाक्यं यत् स तेनोक्तः, यथा, कुक्कुट- ६१
रावात् प्राक् त्वं त्रिकृत्वो मां प्रत्याख्यास्यसीति। ततः पितरो वहि- ६२
र्गत्वा तीव्रं रुरोद।

अथ यीशो रक्षणे नियुक्ता नरा उपहसितुं प्रवृत्तास्तं प्राहरन् ६३
वस्त्रेण तस्य शिर आच्छाद्य चास्यमताडयन् तमपृच्छंश्च, कस्त्वां ६४
ताडितवान्? भावोक्त्या तद् वद। एतदन्यान्यपि निन्दासूचकवचांसि ६५
बहूनि तं प्रति तैरूचिरे।

जाते पुन र्दिवसे जनानां प्राचीनवर्गो मुख्ययाजकाः शास्त्रा- ६६
ध्यापकाश्च समागत्य स्वीयसभामानाय्य तं जगदुः, त्वं यदि ख्रीष्ट- ६७
स्तर्ह्यस्मान् वद। स तु तानुवाच, मयोक्ता अपि यूयं न विश्वसिष्यथ, ६८
पृष्टाश्चापि मां न प्रतिवदिष्यथ नापि वा मोचयिष्यथ। इतः प्रभृति ६९
मनुष्यपुत्र ईश्वरस्य प्रभावस्य दक्षिण आसीनः स्थास्यति । अनेन ७०
सर्व्वे व्याहार्षुः, त्वं तर्हि किमीश्वरस्य पुत्रः? स तानवादीत्, यूयं
(तथ्यं) व्याहरथ, यतोऽहं सोऽस्मि। तदा ते प्राहुः, साक्ष्येणा- ७१
धिकेनास्माकं किं प्रयोजनं? वयमेव तस्य मुखान्निर्गतं वाक्यं
श्रुतवन्तः॥ २२ ॥

२३ त्रयोविंशोऽध्यायः।

१ पीलातस्य हेरोदस्य च समीपे ख्रीष्टस्य नयनं १३ पीलातस्य विचारो दण्डाज्ञा च २६ विलापिन्यः स्त्रियः प्रति ख्रीष्टस्य कथा ३२ ख्रीष्टस्य क्रुशे वेधनमुपरा-

सस्य २९ क्रुशे विद्धदुष्कर्म्मिणोः कथा च ४४ खीष्टस्य निधनं ५० तस्य श्मशानागारे स्थापनञ्च ।

१ ततः परं तेषां कृत्स्नो निकर उत्थाय तं पीलातस्य समीप-
२ मनैषीत् तस्य विरुद्धञ्च तेऽभियोगं कुर्व्वन्तो भाषितुमारेभिरे,
लब्धोऽयमस्माभि र्यद् राजा खीष्टोऽहमिति व्याहरन्नयं जाति-
मिमामुन्मार्गगामित्वे प्रवर्त्तयति कैसराय करदानं निवारयति च ।
३ पीलातस्तदा तं पप्रच्छ, त्वं किं यिहूदीयानां राजा? स तं प्रति-
४ बभाषे, भवांस्तथ्यं व्याहरति । ततः पीलातो मुख्ययाजकान्
जननिवहांश्च जगाद, नरेऽस्मिन् मया कोऽपि दोषो न लक्ष्यते ।
५ ते तु गाढतरमवदन्, स प्रजा उत्तेजयति, गालील आरभ्यैतत्
६ स्थानं यावद् यिहूदियायाः सर्व्वत्रोपदिशति च । इत्थं गालीलस्य
७ नाम श्रुत्वा पीलातः पप्रच्छ, स नरः किं गालीलीयः? ततः स
हेरोदस्य कर्तृत्वाधीन इत्यवगम्य स तं हेरोदस्य समीपं प्राहिणोत्,
८ यतस्तेषु दिनेषु सोऽपि यिरूशालेमेऽवर्त्तत। यीशुं दृष्ट्वा हेरोदो-
ऽतीव जहर्ष, यत आदीर्घकालात् स तमदिदृक्षत, यतः स तमधि
बह्वीः कथा अशृणोत्, तेन प्रदर्शितं किञ्चनाभिज्ञानं द्रक्ष्यामीत्या-
९ शापि तस्य सञ्जाता। तस्मात् स तं बहुप्रश्नानपृच्छत्। स तु तं
१० किमपि न प्रत्यभाषत । अपि च तत्र स्थिता मुख्ययाजकाः शास्त्रा-
११ ध्यापकाश्चैकाग्रं तस्याभियोगमकुर्व्वन्। हेरोदस्तु स्वसैन्यानां साहा-
य्येन तं परुषीकृत्योपजहास शुभ्रं प्रावारं परिधाप्य च तं पुनः
१२ पीलातस्यान्तिकं प्रेषयामास । तस्मिन् दिने पीलातहेरोदौ परस्परं
प्रणयिनौ बभूवतुः, यतस्तत्पूर्व्वं तौ परस्परं वैरमास्थितौ ।

१३ अथ पीलातो मुख्ययाजकान् नायकान् प्रजाजनञ्च समाहूया-
१४ ब्रवीत्, मनुष्योऽयं प्रजाजनस्य कुप्रवर्त्तक इव युष्माभि र्मदन्तिक-

मानीतः। पश्यत तु यूयमस्मिन् यान् दोषानारोपयथ मया १५
युष्मत्समक्षं विचारं कुर्व्वतास्मिन् नरे तेषां कोऽपि दोषो न लक्षितः,
हेरोदेनापि न लक्षितः, यतोऽहं युष्मान् तस्यान्तिकं प्रेषितवान् ।
पश्यत च नापराद्धमनेन प्राणदण्डहेतुकं किमपि। अतोऽहमिमं १६
शासित्वा मोचयिष्यामि। प्रतिवत्सरन्तु पर्व्वणि तेषां तोषणार्थमेकस्य १७
मोचनं तेनावश्यंकर्त्तव्यमासीत् । अतस्तेषां कृत्स्नजनतोत्क्रोशन्ती १८
जगाद, संहरेमं वाराब्बाञ्चास्मदर्थं मोचय। नरः स नगरे सम्भू- १९
तस्योपप्लवस्य नरहत्यायाश्च कारणात् कारावद्ध आसीत्। पीला-
तस्तदा यीशुं मोचयितुमिच्छंस्तान् पुनरुच्चैः सम्बोधयामास । ते २०
तूच्चै र्जगदुः, क्रुशमारोपयेमं, क्रुशमारोपय। पीलातस्तृतीयवारं २१
तान् बभाषे, किं न्वपराद्धमनेन? न लक्षितोऽस्मिन् मया प्राण- २२
दण्डहेतुकः कोऽपि दोषः। तदिमं शासित्वा मोचयिष्यामि। ते तु २३
महाशब्दैरुग्रतामास्थाय तस्य क्रुशारोपणं ययाचिरे, तेषाञ्च मुख्य-
याजकानाञ्च शब्दाः प्रबभूवुः, पीलातश्च तेषां याच्ञायाः साधनं २४
निश्चिकाय। इत्थमुपप्लवस्य नरहत्यायाश्च कारणात् कारावद्धो २५
यो नरस्तै र्याचितः स तेषां तोषणार्थं तेन मोचितः, यीशुस्तु
तेषामभिलाषे समर्पितः ।

अथ जना यदा तमपानयंस्तदा ग्रामादागच्छन्तं शिमोनाभि- २६
धमेकं कुरीणीयं नरं धृत्वा यीशोः पश्चाद् वहनार्थं तत्स्कन्धे
क्रुशमर्पयामासुः । महान् जननिवहश्च तमन्वगच्छत् तन्मध्ये योषि- २७
तोऽप्यासन्, तास्तदर्थं स्ववक्षांस्यताडयन् व्यलपंश्च । यीशुस्तु मुखं २८
परिवर्त्त्य ता अब्रवीत्, भो यिरूशालेमस्य दुहितरः, मदर्थं मा रुदि-
तापि तु स्वार्थं स्वसन्तानन्दार्थञ्च, यतः पश्यतायान्ति तानि २९
दिनानि यदा जनै र्वक्ष्यते, धन्या बन्ध्याः, धन्या जठरा अप्रसूताः,

३० धन्यानि च स्तनान्यदोह्यितानि । तदा मनुष्या गिरीन् सम्बोध्य
वदिष्यन्ति, अस्मासु निपततेति, शैलांश्च वक्ष्यन्ति, अस्मान् प्रच्छा-
३१ दयतेति । यतः सरसं तरुं प्रति यद्येतत् क्रियते, का तर्हि शुष्कस्य
३२ गति र्भविष्यति ? अपि च तेन सार्द्धमपरौ द्वौ दुष्कर्म्मिणौ व्यापा
दनायापानीयेताम् ।

३३ ततः परं ते कपालमित्यभिधं स्थानं प्राप्य तत्रैव तञ्च तौ
दुष्कर्म्मिणौ च क्रुशान्यारोपयामासुरेकतरं तस्य दक्षिणे, वामे
३४ चान्यतरं । यीशुस्तदोवाच, पितः, क्षमस्व तेषां, यतः किं कुर्व्वन्ति
३५ तन्न जानन्ति । अनन्तरं ते तस्य वासांसि विभजमाना गुटिका-
पातमकार्षुः प्रजाजनाश्च निरीक्षमाणा अतिष्ठन् । तैः सार्द्धं नायका
अपि तं न्यक्कुर्व्वन्तोऽवदन्, असावन्यांस्तारयामास, यद्यसावीश्वरस्य
३६ वरितः ख्रीष्टस्तर्ह्यात्मानं तारयतु । सैनिका अपि तमुपहसन्त
३७ उपागत्याम्लरसमुपाहरन्नवदंश्च, त्वं चेद् यिहूदीयानां राजा तर्ह्या-
३८ त्मानं तारय । तस्योर्द्ध्वे च यूनानीयै रोमीयैरिब्रीयैश्चाक्षरै र्लिखि-
तमिदं लेख्यमासीत्, यिहूदीयानां राजायमिति ।

३९ तेन सार्द्धमुद्बद्धयो र्दुष्कर्म्मिणोरेकतरोऽपि तं निन्दन्नाह, त्वं
४० यदि ख्रीष्टस्तर्ह्यात्मानमावाञ्च तारय । अन्यतरस्तु तं भर्त्सयन्नब्रवीत्,
४१ ईश्वरादपि किं त्वं न बिभेषि तेनैव दण्डेनाक्रान्तः ? आवां हि
तदर्हौ, यत आवाभ्यां यद्यदपराद्धं तदुपयुक्तानि फलानि भुज्यन्ते,
४२ अयन्त्वयुक्तं किमपि न कृतवान् । ततः परं स यीशुं जगाद, प्रभो,
४३ भवान् यदा स्वराजत्वेनायास्यति, तदा मां स्मरतु । यीशुश्च
तमवादीत्, त्वामहं सत्यं ब्रवीमि, अद्य त्वं परमदेशे मम सङ्गी
भविष्यसि ।

४४ तदा प्रायेणोपस्थितायां षष्ठघटिकायां कृत्स्ने भूमण्डलेऽन्धकारः

सञ्जातः, स नवमघटिकां यावदवतस्थे। सूर्य्यस्तदान्धकारमयो बभूव, ४५
मन्दिरस्य तिरस्करिणी च छिन्ना द्विधा बभूव। यीशुश्चोच्चरव- ४६
मुदीरयन् व्याजहार, पितस्तव हस्तयोर्ममात्मानं समर्पयामि।
इदमुक्त्वा स प्राणांस्तत्याज। तदितिवृत्तं दृष्ट्वा शतपतिरीश्वरं स्तुव- ४७
न्नुवाच, सत्यं, नरोऽसौ धार्म्मिक आसीत्। तत्कौतुकदर्शनार्थमेक- ४८
त्रीभूता जननिवहाश्च सर्व्वे तदितिवृत्तं निरीक्ष्य स्ववक्षांसि ताडयन्तः
प्रतिजग्मुः। आसंश्च दूरे तिष्ठन्तस्तत्परिचितजनाः सर्व्वे याश्च ४९
गालीलतस्तेन सार्द्धमनुगतास्तासां काश्चिद् योषितस्तत् सर्व्वं निरी-
क्षमाणाः।

पश्य च यिहूदीयानाम् अरिमाथियानगरान्नर एको योषेफ- ५०
नामोपतस्थे। स मन्त्री किन्तु भद्रो धार्म्मिकश्च नरोऽमीषां मन्त्र- ५१
णाचाराभ्यामसम्पृक्तश्चासीत् स्वयमपीश्वरस्य राज्यं प्रत्यैक्षत च। स ५२
एव पीलातस्यान्तिकं गत्वा तं यीशो र्देहं ययाचे। तमवरोह्य च ५३
सूक्ष्मवाससा वेष्टयामास, यत्र च प्राक् कोऽपि कदापि न शयित-
स्तादृशे तक्षिते शवागारे तं निदधाय। तद्दिनं सज्जनदिनं, विश्रा- ५४
मवारस्यारम्भश्चासन्न आसीत्। गालीलतस्तेन सार्द्धमागता नार्य्यो- ५५
ऽप्यनुगच्छन्त्यस्तच्छवागारमवलोकयामासु र्देहश्च कथं निधीयते
तद् ददृशुः। ततः परं प्रत्यावृत्य सुगन्धीनि द्रव्याणि तैलानि च ५६
सज्जीचक्रुः। तथापि विधानानुसारेण ता विश्रामवारे विश्राम-
मसेवन्त॥ २३॥

---

२४ चतुर्विंशोऽध्यायः।

१ स्वर्गीयदूताभ्यां ख्रीष्टस्य शवागारोत्थानप्रकाशः ९ स्त्रीभिः शिष्येभ्यस्तदुत्थान-वार्त्ताकथनं १२ इम्मायूनगरगामिभ्यां शिष्याभ्यां ख्रीष्टदर्शनं ताभ्यां सह कथनञ्च

१३ यिरूशालेमे परावृत्य सर्व्वेभ्यो वार्त्ताकथनञ्च २९ शिष्यैः ख्रीष्टस्य दर्शनं वेन भोजनमुपदेशश्च ५० स्वर्गारोहणञ्च ।

१ सप्ताहस्य प्रथमे दिने ऽतीव प्रत्यूषे ताः सज्जीकृतानि सुगन्धिद्र-
व्याणि वहन्त्यः श्मशानान्तिकं जग्मुस्ताभिः सार्द्धमन्या अपि काश्चि-
२ न्नार्य्योऽव्रजन्। तदा ताः श्मशानद्वारात् प्रस्तरमपसारितं लक्षया-
३ मासुः, प्रविश्य तु प्रभो र्यीशो र्देहं न ददृशुः। पश्य चात्र
४ चिन्ताकुलासु तासु दीप्तपरिच्छदवेष्टितौ द्वौ पुरुषौ ता उपतस्थतुः।
५ तासु च भीतासु भूमिं प्रति नतमुखीषु च तौ ता ऊचतुः, कथं
६ मृतानां मध्ये तं जीवितं गवेषयथ? सोऽत्र नास्ति, स उत्थापित
७ एव। पुरा गालीले विद्यमानेन तेन यूयं यदुक्तास्तत् स्मरत।
स हि कथितवान्, मनुष्यपुत्रस्येदमवश्यम्भावि, यत् स पापिमनुष्याणां
करेषु समर्पयिष्यते, क्रुशमारोपयिष्यते च तृतीये दिने च पुनरु-
त्थास्यति। तदा तास्तस्योक्तीः सस्मरुः।
९ अनन्तरं ताः श्मशानात् प्रत्यावृत्यैकादशभ्यः प्रेरितेभ्योऽन्येभ्यः
१० सर्व्वेभ्यश्च संवादं ददुः। मग्दलीनी मरियम् योहाना याकोबस्य
माता मरियम् तासां सङ्गिन्योऽन्याश्चेमा एव प्रेरितेभ्यः सर्व्वमेतत्
११ कथयामासुः। तेषां दृष्टौ तु तासां कथा प्रलाप एव प्रत्यभात्
१२ ते च तासु न व्यश्वसन्। पितरस्तूत्थाय श्मशानं प्रति दुद्राव,
प्रह्वश्च केवलं वस्त्रखण्डान् भूमौ विस्तृतान् ददर्श, यच्च वृत्तं तत्र
मनसाश्चर्य्यं मन्यमानोऽपजगाम।
१३ पश्य च तस्मिन् दिवसे तेषां द्वौ नरौ यिरूशालेमात् क्रोश-
१४ चतुष्टयव्यवहितमिम्मायूनामकं ग्राममगच्छतां। तावेतानि सर्व्वा-
१५ णीतिवृत्तान्यधि मिथः समलपतां। तयोरित्थं संलपत्यो र्विचारय-
त्योश्च स्वयं यीशुः समीपमागत्य ताभ्यां सार्द्धं व्रजितुं प्रववृते।

तयो र्नेत्राणि तु तथा रुद्धान्यासन् यथा तौ तमभिज्ञातुं नाश- १६
क्नुतां। स तदा ताववादीत्, कास्ताः कथा व्रजनकाले या मिथो १७
विचारयथो विषण्णौ? तदा क्लियपानामा तयोरेकतरः प्रतिभाषमा- १८
णस्तमवादीत्, एको भवान् प्रवासीत्र यिरूशालेमे वर्त्तमानोऽपि
किं नावगतवांस्तत् सर्व्वं यदेतेषु दिनेषु तत्र वृत्तं? स तौ पप्रच्छ, १९
तत् किं? तौ तमूचतुः, नासरतीयं यीशुमधि यद् वृत्तं तदेव।
स भाववादी नर आसीत्, ईश्वरस्य सर्व्वजनस्य च समक्षं क्रियया
वाचा च शक्तिमान्। स यन्मुख्ययाजकैरस्माकं नायकैश्च प्राणदण्डार्थं २०
समर्पितः क्रुशमारोपितश्चाभूत्। अस्माकन्त्वियमाशासीत्, यत् स २१
एवेस्रायेलस्य भावी मोचयिता। तद् यथास्तु तथास्तु, तस्मादिति-
वृत्तादारभ्याद्य तृतीयं दिनं स गतः। अपि चास्मत्सङ्गिनीभिः २२
काभिश्चिन्नारीभि र्वयं चमत्कारिताः। ताः प्रत्यूषे शवागारं गता- २३
स्तदीयदेहमप्राप्य प्रत्यागताश्च, ता अवदन्, वयं स्वर्गदूतयो र्दर्शनं
प्राप्तास्ताभ्यामुच्यते स जीवतीति। ततोऽस्मत्सङ्गिनां केऽपि शवा- २४
गारं जग्मुः, ते ताभि र्यथा कथितं तदनुरूपमेव सर्व्वं प्रापुस्तन्तु
न ददृशुः। स तदा तावुवाच, रे निर्व्वोधौ भाववादिभि र्यद्य- २५
दुक्तं तत्र विश्वसितुं मन्दधियौ च, कृत्स्नं तद् दुःखं भुक्त्वा ख्रीष्टो २६
यत् स्वप्रतापं प्रविशति, किं न तत् तस्यावश्यङ्कर्त्तव्यमासीत्? ततः २७
परं स मोशितः सर्व्वेभ्यो भाववादिभ्यश्चारभ्य कृत्स्ने शास्त्रे तमधि
यद्यल्लिखितं तद् व्याख्यत्। इत्थं ते यदा तयो र्गन्तव्यस्य स्थानस्य २८
समीपमुपातिष्ठन्त स तदाग्रगमनेच्छाया लक्षणमदर्शयत्। तौ तु २९
साग्रहं प्रसादयन्तौ तमूचतुः, तिष्ठत्वावाभ्यां सार्द्धं, यत सायंसमय
आसन्नो दिनावसानञ्च प्रतिभाति। ततः स ताभ्यां सार्द्धमवस्था-
नार्थं गृहं प्रविवेश। ततः परं ताभ्यां सार्द्धं भोजनायोपविश्य स ३०

पूपं गृहीत्वा धन्यवादमकार्षीत्, तं भङ्क्त्वा च ताभ्याममददात्। अनेन
३१ तयो र्नेत्राणि मुक्तानि तौ च तमभिजज्ञतुः। स तु तयोः समी-
३२ पतोऽन्तर्दधे। तौ तदा परस्परमवादिष्टां, अस्मद्धृदयं किं नाज्व-
लत् तदास्मदन्तरे यदा स पथ्यावाभ्यां समलपदस्मदर्थञ्च शास्त्राणि
व्याख्यत्?

३३ तस्मिन्नेव दण्डे तावुत्थाय यिरूशालेमं प्रतिजग्मतुः समवेतां-
३४ श्चैकादशप्रेरितांस्तेषां सङ्गिनश्च प्रापतुः। तेऽवदन् सत्यं प्रभुरुत्थापितो
३५ दत्तवांश्च शिमोनाय दर्शनमिति। तावपि पथि यद् वृत्तं पूपभ-
ञ्जने च स यथा ताभ्यामभिज्ञातस्तन्निवेदयामासतुः।

३६ इत्थं तेषां कथनकाले स्वयं यीशुस्तेषां मध्ये तस्थौ तांश्च
३७ जगाद, युष्माकं शान्ति र्भूयात्। ततस्ते क्षुब्ध्वा त्रासं गत्वा चान्व-
३८ मिमत कञ्चिदात्मानं पश्याम इति। स तु तानब्रवीत्, कथमुद्विग्नाः
३९ स्थ? किमर्थञ्च युष्माकं हृदयेषु वितर्का उद्भवन्ति? मम हस्तौ
चरणौ च निरीक्ष्य जानीत यत् स्वयमहं सोऽस्मि। स्पृशत मां
समवलोकयत च। नास्त्यात्मा तादृङ्मांसास्थिविशिष्टो यादृशं मां
४० पश्यथ। एतद् भाषमाणः स तेभ्यः स्वहस्तौ स्वचरणौ च दर्शया-
४१ मास। तदापि त्वानन्दात् तेषु न विश्वसत्स्वाश्चर्य्यं मन्यमानेषु च
४२ स तान् पप्रच्छ, युष्माकमत्र किञ्चित् खाद्यं किं विद्यते? तदा ते
४३ तस्मै भृष्टमीनस्य खण्डं मधुकोषस्य खण्डञ्च ददुः, स च तेषां
४४ समक्षं तद् गृहीत्वा बुभुजे। तांश्चोवाच, मोशे र्व्यवस्थायां भाववा-
दिनां ग्रन्थेषु गीतसंहितायाञ्च मामधि यद्यल्लिखितमास्ते सर्व्वाणि
तेन सिद्धेन भवितव्यमिति याः कथाः पुरा युष्माभिः सार्द्धं ममा-
४५ वस्थितिकाले यूयं मयोक्तास्तासां फलमेतत्। तदा स तेषां बुद्धिं
४६ शास्त्रबोधायोद्घाटयामास। तांश्च जगाद, इत्थं लिखितमास्ते

इत्थञ्च ख्रीष्टस्यावश्यङ्कर्त्तव्यमासीत्, यत् तेन दुःखं भोक्तव्यं तृतीये
दिने पुनरुत्थातव्यं, यिरूशालेमादारभ्य च सर्व्वजातिषु तस्य नाम्ना ४७
मनःपरावर्त्तनस्य पापक्षमायाश्च घोषणेन व्याप्तव्यं। यूयञ्च सर्व्वस्यै- ४८
तस्य साक्षिणः। पश्यत च मम पित्रा यत् प्रतिश्रुतं तदहं युष्मा- ४९
कमुपरि प्रेषयिष्यामि। यूयञ्च यावदूर्द्ध्वलोकतः प्रभावेन सज्जिता
न भविष्यथ, तावद् यिरूशालेमपुर्य्यामवतिष्ठध्वम्।

अथ स तान् वैथनियां यावद् बहि र्निनाय, स्वकरावूर्द्ध्वीकृत्य ५०
च तेभ्य आशिषं ददौ। आशीर्दानकाले च तेभ्यः पृथग्भूय स्वर्गमा- ५१
रोहयाञ्चक्रे। ते च तस्य भजनं कृत्वा महानन्देन यिरूशालेमं ५२
प्रतिजग्मुः, सततं धर्म्मधाम्नि वर्त्तमानास्त्वेश्वरमस्तुवन् धन्यम- ५३
वदंश्च ॥ २४ ॥

योहनलिखितः सुसंवादः।

१ प्रथमोऽध्यायः।

१ ख्रीष्टस्येश्वरत्वं ६ ईश्वरेण योहनस्य प्रेरणं १४ ख्रीष्टावतारकथा १९ तस्मिन् योहनस्य साक्ष्यदानं २९ ख्रीष्टस्य प्रामाण्यस्य कथा ३५ शिमोनान्द्रिययोः कथा ४३ नथनेलस्य कथा च।

१ आदौ वाद आसीत्, स च वाद ईश्वराभिमुख आसीत्, स
२ च वाद ईश्वर आसीत्। स आदावीश्वराभिमुख आसीत्। तेन
३ सर्व्वमुद्भूतं, यद्यदुद्भूतं तन्मध्ये च तं विना न किमप्युद्भूतं। तस्मिन्
४ जीवनमासीत्, तज्जीवनञ्च मनुष्याणां ज्योतिरासीत्। तज्ज्योति-
५ श्चान्धकारे राजतेऽन्धकारस्तु तन्न जग्राह।
६ अथेश्वरसकाशात् प्रहितो नर एकः समुद्बभूव, तस्य नाम योहन
७ इति। स साक्ष्यार्थमाजगाम, ज्योतिरधि तेन तथा साक्ष्यं दातव्य-
८ मासीत्, यथा सर्व्वे तेन विश्वासिनो भवेयुः। स ज्योति र्नासीत्,
९ अपि तु ज्योतिषि साक्ष्यदाने नियुक्तः। यत् सर्व्वमनुष्यं द्योतयति
१० तद् यथार्थं ज्योतिरासीज्जगदायातुमुद्यतं। तज्जगत्यासीत्, जगच्च
११ तेन समुद्बभूव, जगत्तु तन्नाजानात्। स ज्योतिःस्वरूपो निजविष-
१२ यमाजगाम, निजस्वास्तु तं न जगृहुः। यावन्तस्तु तं जगृहुस्तेभ्यः
स तत् सामर्थ्यं ददौ येन त ईश्वरस्य सन्ताना भवन्ति यतस्तेऽमुष्य
१३ नाम्नि विश्वसन्ति। न शोणितेभ्यो नापि वा मांसस्याभिलाषान्नापि
वा पुरुषस्याभिलाषात् प्रत्युतेश्वरादेव ते जाताः।
१४ स च वादो मांसरूपी बभूव प्रवासीवास्मन्मध्ये ववृते च, वयञ्च

पितृसकाशादागतस्यैकजातस्य पुत्रस्य प्रतापमिव तस्य प्रतापं निरी-
क्षितवन्तः। परिपूर्णः स प्रसादेन सत्येन च। योहनस्तस्य साक्षी, स १५
प्रोच्चैरुक्तवान्, अयं स एव यमधि मयोक्तं, मम पश्चाद् य आयाति
स मत्तोऽग्रगण्यो जातः, यतः स मत्तः प्रागासीदिति। तस्य पूर्ण- १६
तातश्चालम्भि सर्व्वैरस्माभिः प्रसादात् परं प्रसादः। यतो मोशिद्वारा १७
व्यवस्थादायि, प्रसादसत्ये तु यीशुख्रीष्टद्वारा समुद्भूते। ईश्वरः १८
कदापि केनापि नादर्शि, पितृक्रोडस्थ एकजातः पुत्र एव तं व्याचख्यौ।

अथ योहनस्य साक्ष्यमिदं। यिहूदीयजना यिरूशालेमाद् १९
याजकान् लेवीयांश्च प्रहित्य यदा तमप्रच्छयन्, को भवानिति,
तदा सोऽङ्गीचकार नैवापजुह्नुवे। सोऽङ्गीचकार, नाहं ख्रीष्टः। २०
ते तमप्राक्षुः, तर्हि किं? भवान् किमेलियः? सोऽब्रवीत्, नाहं २१
सः। तर्हि भवान् किं स भाववादी? स प्रत्यवादीत्, नाहं सः।
ततस्ते तमाक्षुः, भवान् कस्तद् वदतु, यतो वयं यैः प्रेरितास्तेभ्यो- २२
ऽस्माभिः प्रत्युत्तरं दातव्यं। आत्मविषये भवान् किं वदति? स
उवाच, भाववादी यिशायाहो यथोक्तवान्, तथैव

अस्म्यहं कस्यचिद् वाणी प्रोच्चै र्घोषयतो मरौ।
भो युष्माभिः प्रभो र्मार्गः समानीक्रियतामिति॥

प्रहितास्ते जनाः फरीशिनां श्रेण्यां गणिताः। ते तदा तमिमां २३
कथामप्राक्षुः, भवान् यदि न ख्रीष्टो नाप्येलियो वा नापि वा स २४
भाववादी, किमर्थं तर्हि स्नापयति? योहनः प्रतिभाषमाणस्तानवा- २५
दीत्, अहं तोयेन स्नापयामि, यूयन्तु यं न जानीथ तादृशो नर २६
एको युष्माकं मध्ये स्थितास्ते। मत्पश्चादागच्छन् स एव ममाग्रगण्यो २७
जातः। नार्हाम्यहं तदीयोपानहो बन्धनं मोक्तुमिति। योहनो
यत्रास्नापयत् तत्र यर्द्दनपारस्थायां बैथनियायामिदं समभूत्। २८

२९ परदिवसे योहनः स्वसमीपमागच्छन्तं यीशुं विलोक्य बभाषे,
३० पश्यायमीश्वरस्य मेषशावको यो जगतः पापभारं हरति । अयं
स यमधि मयोक्तं, मत्पश्चान्नर एक आयाति यो ममाग्रगण्यो
३१ जातः, यतः स मत्तः प्रागासीदिति । अहञ्च तं नाजानां, स तु
यदिस्रायेलस्य प्रत्यक्षीक्रियेत तदर्थमहं तोये स्नापयन्नागत इति ।
३२ अपि च योहनः साक्ष्यं दत्त्वावादीत्, पवित्र आत्मा कपोत इव
३३ स्वर्गादवरोहन् मया लक्षितः, स चामुष्योपर्य्यवतस्थे । अहमपि तं
नाजानां, येन तु तोये स्नापयितुं प्रहितोऽहं तेनैव मह्यं कथितं,
त्वं यस्योपरि पवित्रमात्मानमवरोहन्तमवतिष्ठमानञ्च द्रक्ष्यसि, स
३४ एव पवित्र आत्मनि स्नापयिता । अहञ्च दृष्टवान् साक्ष्यं दत्तवांश्च
यदयमीश्वरस्य पुत्र इति ।

३५ तत्परदिवसे पुन र्योहनस्तिष्ठन्नासीत्, तच्छिष्यौ च द्वौ तेन
३६ सार्द्धमास्तां । स तदा यीशुं विहरन्तं निरीक्ष्य बभाषे, पश्यायमी-
३७ श्वरस्य मेषशावकः । तौ द्वौ शिष्यौ च तस्येदं वचनं श्रुत्वा यीशुम-
३८ नुजग्मतुः । यीशुः प्रत्यावृत्य तावनुगच्छन्तौ विलोक्य भाषते,
किमन्विष्यथः ? तौ तमवदतां, भवान् कुत्र वसति, रब्बिन् ?
३९ भाषान्तरेऽस्यार्थो गुरो । स तौ ब्रवीति, एत्य पश्यतं । ततस्तौ
गत्वा स यत्रावसत् तत् स्थानं ददृशतुस्तद्दिनञ्च तेन सार्द्धमवत-
४० स्थाते । तदा प्रायेण दशमी घटिकासीत् । यौ द्वौ योहनस्य वचनं
श्रुत्वा यीशुमनुगतौ, आन्द्रियनामा शिमोनस्य पितृस्य भ्राता
४१ तयोरेकतर आसीत् । प्रथमः स निजभ्रातरं शिमोनमन्विष्य
प्राप्नोति वदति च, आसादित आवाभ्यां मशीहः । भाषान्तरे-
४२ ऽस्यार्थः ख्रीष्टः (अभिषिक्तः) । इदमुक्त्वा स तं यीशोरन्तिकं
निनाय । यीशुस्तदा तं समालोक्य बभाषे, त्वं योनाः सुतः

शिमोनः, त्वं कैफा इत्यभिधायिष्यसे। भाषान्तरेऽस्यार्थः पितरः
(पाषाणः)।

तत्परदिवसे यीशु र्गालीलं प्रस्थातुमैच्छत्। स च फिलिपमा- ४३
साद्य वदति, मामनुगच्छ। आन्द्रियपितरौ यस्य पौरौ, स फिलि- ४४
पोऽपि तस्य बैतसैदाख्यपुरस्य पौर आसीत्। पुनः फिलिपो ४५
नथनेलमासाद्य वदति, मोशि र्व्यवस्थायां भाववादिनश्च यस्य वर्णनां
लिखितवन्तः सोऽस्माभिः प्राप्तः, स योषेफसुतो नासरतीयो यीशुः।
नथनेलस्तमब्रवीत्, नासरताद् भद्रं किमपि किं समुद्भवितुं शक्नोति? ४६
फिलिपस्तं ब्रवीति, एत्य पश्य। यीशुः स्वान्तिकमागच्छन्तं नथनेलं ४७
निरीक्ष्य तमुद्दिश्य भाषते, पश्यायं सत्येनेस्रायेलीयो नास्यस्मिन्
कपटः। नथनेलस्तं ब्रवीति, कथं मां जानाति भवान्? यीशुः ४८
प्रतिभाषमाणस्तमाह, फिलिपेन तवाह्वानात् प्रागुडुम्बरवृक्षस्याधः
स्थितस्त्वं मया लक्षितः। नथनेलः प्रतिभाषमाणस्तं वदति, रब्बिन्, ४९
भवानीश्वरस्य पुत्रः, भवानिस्रायेलस्य राजा। यीशुः प्रतिभाषमाण- ५०
स्तमाह, उडुम्बरस्याधस्तात् त्वं मया लक्षित इत्यहं त्वामुक्तवांस्तत्कार-
णात् किं विश्वसिषि? अस्मादपि महत्तराणि (लक्षणानि) द्रक्ष्यसि।
अन्यच्च स तं वक्ति, सत्यं सत्यं, युष्मानहं ब्रवीमि, उद्घाटितः स्वर्गो मनु- ५१
ष्यपुत्रस्योर्द्ध्वेन चारोहन्तोऽवतरन्तश्च स्वर्गदूता युष्माभि र्द्रक्ष्यन्ते॥ १॥

---

२ द्वितीयोऽध्यायः।

१ ख्रीष्टस्य प्रथमाश्चर्य्यक्रिया १२ कफर्नाहूमे तेन यानं १३ तेन यिरूशालेमे यानं मन्दिरपरिष्करणञ्च १८ निजनिधनोत्थानयो र्भविष्यद्वाक्यं २२ तस्याश्चर्य्यक्रियाभि र्बहूनां विश्वासश्च।

तृतीये दिने तु गालीलस्यकान्नायां विवाहः समभूत्, यीशो १

२ माता च तत्रासीत्। यीशुस्तच्छिष्याश्चापि तस्मै विवाहाय निम-
३ न्त्रिता आसन्। जाते तदा द्राक्षारसस्य न्यूनत्वे यीशो र्माता
४ तमवादीत्, अमीषां द्राक्षारसो नास्ति। यीशुस्तां वदति, नारि,
मया सह तव किं कार्य्यं? मम समय इदानीमप्यनुपस्थितः।
५ तस्य माता परिचारकान् ब्रवीति, असौ युष्मान् यद्यद् वक्ति तत्
६ कुरुत। तत्र तु यिहूदीयानां शुचित्वसाधनार्थमुचितानि पाषा-
णमयानि षट् महान्ति तोयपात्राण्यासन्, तानि प्रत्येकमाढकद्व-
७ यमाढकत्रयं वाधारयन्। यीशुस्तान् वक्ति, पात्राणीमानि तोयेन
८ पूरयत। ततस्ते तान्याकण्ठं पूरयामासुः। तदा स तान् ब्रवीति,
इदानीं किञ्चिदादाय भोज्याध्यक्षस्यान्तिकं वहत। ततस्ते किञ्चि-
९ दूहुः। स भोज्याध्यक्षो यदा तोयं तद् द्राक्षारसेन परिणतमा-
स्वादयत्, तदा तत् कुत आनीतं तन्नाजानात्, यैस्तु तदुत्तारितं ते
१० परिचारका अजानन्। ततः स भोज्याध्यक्षो वरमाहूयाह, सर्व्वम-
११ नुष्यः प्रथममुत्तमं द्राक्षारसं परिवेषयति, जनबाहुल्येन पीते च
निकृष्टतरं परिवेषयति। त्वन्वेतावत्कालं यावदुत्तमं द्राक्षारसं रक्षि-
तवान्। गालीलस्यकान्नायां यीशुनाभिज्ञानानामयमारम्भोऽकारि
स्वप्रतापश्च प्रत्यक्षीचक्रे। तच्छिष्याश्च तस्मिन् व्यश्वसन्।
१२ ततः परं स तस्य माता भ्रातरश्च तस्य शिष्याश्च कफरनाहू-
ममवतेरुः, तत्र त्वल्पदिनान्यवतस्थिरे।
१३ आसन्ने पुन र्यिहूदीयानां निस्तारपर्व्वणि यीशु र्यिरूशालेम-
१४ मारुरोह। धर्म्मधाम्नि च गोमेषकपोतविक्रेतॄन् मुद्राविनिमय-
१५ कारिणश्चासीनान् दृष्ट्वा स दामभिः कशां रचयित्वा सर्व्वांस्तान्
मेषान् गाश्च धर्म्मधामतो बहिर्द्रावयामास, वणिजाञ्च मुद्राचयान्
१६ विकीर्य्यासनानि न्युब्जीचकार, कपोतविक्रेतॄंश्चोवाच, सर्व्वमेतदतः

स्थानादपसारयत, मम पितु र्गृहं मा कार्ष्ट वाणिज्यगृहमिति।
तच्छिष्यास्त स्मरु र्यल्लिखितमास्ते,

त्वन्निकेतनपक्षीया व्यग्रता मां ग्रसिष्यति। १७

ततो यिहूदीयाः प्रतिभाषमाणास्तमवादिषुः, एतत् त्वया यत् १८
कर्त्तव्यं तस्य किमभिज्ञानमस्मान् दर्शयसि? यीशुः प्रतिभाषमाण- १९
स्तानब्रवीत्, मन्दिरमिदं भङ्क्त, त्रिषु दिनेष्वहं तदुत्थापयिष्यामि।
यिहूदीयास्तदा जगदुः षट्चत्वारिंशद्वत्सरान् यावन्मन्दिरमिदं २०
निर्म्मीयते स्म, त्वं कथं त्रिषु दिनेषु तदुत्थापयिष्यसि? स तु
स्वदेहरूपं मन्दिरमुद्दिश्याकथयत्। अतो मृतानां मध्यतस्तस्योत्था- २१
नात् परं तस्य शिष्याः समस्मर्यत् ते तेनेदमुक्ताः। तदा ते शास्त्रे २२
यीशुना कथिते वचने च व्यश्वसिषुः।

निस्तारपर्व्वणि यदा स यिरूशालेमेऽवर्त्तत, तदा तेन क्रिय- २३
माणान्यभिज्ञानार्थकर्म्माणि विलोक्य बहवस्तस्य नाम्नि व्यश्वसन्।
यीशुस्तु तेष्वात्मसमर्पणं नाकार्षीत्, यतः स सर्व्वानजानात्। २४
मनुष्ये परस्य साक्ष्येण तस्य प्रयोजनं वा नाभवत्, यतो मनुष्य- २५
स्यान्तरे यदविद्यत, तत् स स्वयमजानात्॥ २॥

---

३ तृतीयोऽध्यायः।

१ नीकदीमं प्रति ख्रीष्टस्योपदेशकथा २२ योहनस्य स्नापनं २५ ख्रीष्टे योहनस्य साक्ष्यदानञ्च।

अथ फरीशिनां मध्ये नीकदीमनामा नर आसीत्, स यिहूदी- १
यानामेको नायकः। स रात्रौ यीशोरन्तिकमागत्य तमवादीत्, २
रब्बिन्, वयं जानीमो यद् भवानीश्वरादागतो गुरुः, यतो भवान्
यान्यभिज्ञानार्थकर्म्माणि करोति, तानि कर्त्तुं केनापि न शक्य-

३ मीश्वरस्य सङ्गित्वं विना। यीशुः प्रतिभाषमाणस्तमब्रवीत्, सत्यं
सत्यं, त्वामहं ब्रवीमि, पुनरादितो न जनित्वा मनुष्य ईश्वरस्य
४ राज्यं द्रष्टुं न शक्नोति। नीकदीमस्तं ब्रूते, वार्द्धक्यप्राप्तो मनुष्यः
कथं जनितुं शक्नुयात्? स किं द्वितीयवारं मातु र्जठरं प्रविश्य
५ जनितुं शक्नोति? यीशुः प्रतिबभाषे, सत्यं सत्यं, त्वामहं ब्रवीमि,
तोयात्मभ्यां न जनित्वा मनुष्य ईश्वरस्य राज्यं प्रवेष्टुं न शक्नोति।
६ यन्मांसतो जातं तन्मासं, यदात्मतो जातं तदात्मा। युष्माभिः
७ पुनरादितो जनितव्यमिति मया त्वं यदुक्तस्तत्राश्चर्य्यं मा मन्यस्व।
८ आत्मरूपो वायु र्यत्रेच्छति तत्र वाति, तत्स्वनस्तु त्वया श्रूयते, न
ज्ञायते तु स कुत आयाति कुत्र याति वा। आत्मतो जातः
९ सर्व्वमनुष्यस्तादृग्भूतः। नीकदीमः प्रतिभाषमाणस्तमवादीत्, सर्व्व-
१० मेतत् कथं भवितुं शक्नोति? यीशुः प्रतिभाषमाणस्तमाह, त्वमिस्रा-
११ येलस्य गुरुस्तथाप्येतन्न जानासि? सत्यं सत्यं, त्वामहं ब्रवीमि,
वयं यज्जानीमस्तत् कथयामः, यच्च दृष्टवन्तस्तत्र साक्ष्यं दद्मः,
१२ तथाप्यस्मत्साक्ष्यं युष्माभि र्न गृह्यते। पार्थिवविषयान् कथितवति
मयि यदि यूयं न विश्वसिथ, कथं तर्हि स्वर्गीयविषयान् कथित-
१३ वति मयि विश्वसिष्यथ? नापरः कोऽपि स्वर्गमारुरोह, केवलं
१४ स्वर्गादवरूढः स्वर्गवासी मनुष्यपुत्रः। अपि च यथा मरौ मोशिना
सर्प उच्चीकृतस्तथा मनुष्यपुत्रो यद् उच्चीकारिष्यते तत्तस्यावश्य-
१५ म्भावि, तस्मिन् विश्वासी सर्व्वमनुष्यो यथा न विनश्यानन्तं जीवनं
१६ लप्स्यते। यत ईश्वरो जगतीत्थं प्रेम चकार, यन्निजमेकजातं पुत्रं
ददौ, तस्मिन् विश्वासी सर्व्वमनुष्यो यथा न विनश्यानन्तं जीवनं
१७ लप्स्यते। ईश्वरो हि स्वपुत्रं जगति प्रहितवान् न जगतो विचार-
१८ साधनार्थं, प्रत्युत जगद् यत् तेन त्राणं लभेत तदर्थं। यस्तस्मिन्

विश्वसिति तस्य विचारो न क्रियते। यो न विश्वसिति तस्य
विचारः सम्भूतः, यतः स ईश्वरस्यैकजातपुत्रस्य नाम्नि न विश्वसित-
वान्। विचारस्यायं, यदागतं जगति ज्योतिः, मनुष्यास्तु ज्योति- १९
षस्तिमिरेऽधिकमप्रीयन्त, यतस्तेषां कर्म्माणि दुष्टानि। कदाचार- २०
वान् सर्व्वमनुष्यो हि ज्योति र्द्वेष्टि, तदीयकर्म्मणां दोषस्तेन व्यक्ती-
भविष्यतीति भयाच्च स ज्योतिषो निकटं नायाति। यस्तु २१
सत्यमाचरति तस्य कर्म्माणीश्वरे साधितानीव प्रत्यक्षीभविष्यन्ती-
त्याकाङ्क्षया स ज्योतिषो निकटमायाति।

ततः परं यीशुस्तदीयशिष्याश्च यिहूदियाया जनपदं जग्मुः, २२
स च तत्रैव तैः सार्द्धं वर्त्तमानोऽमज्जयत्। योहनोऽपि शालीं- २३
मान्निकस्थ ऐनोने वर्त्तमानोऽमज्जयत्, यतस्तत्र बह्वाप आसन्
मनुष्याश्चोपस्थाय मज्जिताः। योहनस्तदापि कारायामनिक्षिप्त २४
आसीत्।

अथ शुचित्वसाधनमधि योहनस्य केषाञ्चिच्छिष्याणां कस्यचिद् २५
यिहूदीयनरस्य च मिथो वादानुवादो बभूव। ते तदा योहनस्य २६
समीपमागत्य तमवादिषुः, रब्बिन्, यर्द्दनपारे यो भवता सार्द्ध-
मासीत्, भवता च यस्य स्वपक्षं साक्ष्यमदायि, पश्यतु स मज्ज-
यति, सर्व्वे च तत्समीपमुपतिष्ठन्ते। योहनः प्रतिभाषमाणो २७
जगाद, यस्मै यत् स्वर्गाददायि, तद्भिन्नं किमपि तेन मनुष्येणादातुं
न शक्यते। नाहं ख्रीष्टोऽपि तु तस्याग्रे प्रहितोऽस्मीति मया २८
यदूचे तत्र यूयमेव मम साक्षिणः। यः कन्यां प्राप्तवान् स एव २९
वरः, वरस्य यो बन्धुस्तु सन्निधौ तिष्ठंस्तस्य वाक्यान्याकर्णयति, स
वरस्य वाणीकारणादानन्देन मोदते। नूनं मम स आनन्दः पूर्णो
बभूव। अमुना वर्धितव्यं, मया तु ह्रसितव्यं। य ऊर्द्ध्वत आयाति ३०

३१ स सर्व्वेषामुपरिस्थः। यो भूम्युत्पन्नो भौमः सः, भौमविषयान्
३२ कथयति च। यः स्वर्गादायाति स सर्व्वेषामुपरिस्थः, यच्च दृष्टवान्
श्रुतवांश्च तदधि साक्ष्यं ददाति। तस्य साक्ष्यन्तु केनापि न गृह्यते।
३३ तस्य साक्ष्यं येन गृहीतं, तेनेश्वरः सत्य इति कथा मुद्रयाङ्किता।
३४ यतो य ईश्वरेण प्रहितः स ईश्वरस्योक्ती र्भाषते। ईश्वरो ह्यमि-
३५ त्यात्मानं ददाति। पिता पुत्रे प्रेम करोति, तस्य हस्ते सर्व्वं
३६ समर्पयामास च। यः पुत्रे विश्वसिति तस्यानन्तं जीवनमास्ते, यस्तु
पुत्रं न श्रद्दधाति स जीवनं न द्रक्ष्यति प्रत्युतेश्वरस्य क्रोधस्तस्यो-
पर्य्यवतिष्ठते ॥ ३ ॥

---

४ चतुर्थोऽध्यायः ।

१ शमरीयस्त्रियै ख्रीष्टस्योपदेशकथा २७ नगरे ख्रीष्टं प्रति तस्या वार्त्ताकथनं ३१ शिष्येभ्यः ख्रीष्टस्य कथनं ३९ नगरादागतलोकानां ख्रीष्टे विश्वसनं ४३ गा-लीलप्रदेशं प्रति ख्रीष्टस्य गमनं ४६ कफर्नाहूमे राजसभास्तारपुत्रस्य स्वास्थ्यञ्च।

१ यीशुः स्वयं नास्नापयत्, तस्य शिष्या अस्नापयन्। अतो
२ योहनतो यीशुना बहवः शिष्याः क्रियन्ते स्नाप्यन्ते चेति कथा
३ फरीशिभिरश्राव्येतज्ज्ञात्वा प्रभु र्यिहूदियां परित्यज्य पुन र्गालीलं
४ प्रतस्थे। शमरियादेशेन गमनन्तु तस्यावश्यकर्त्तव्यमासीत्। ततः स
५ शमरियादेशस्थं शुखराभिधं नगरमायाति। पुरा या भूमि
६ र्याकोबेन स्वपुत्राय योषेफाय दत्ता तन्नगरं तत्समीपस्थं। तत्र च
याकोबस्य कूप आसीत्। अत यीशुः पथश्रान्तो भूत्वा तथैव
७ तत्कूपान्तिकमुपविष्टवान्। तदा प्रायेण षष्ठी घटिकासीत्। शमरीया
काचिन्नारी तोयमुद्धर्त्तुमायाति। यीशुस्तां ब्रूते, मह्यं पानीयं
८ देहि। यतस्तस्यः शिष्याः खाद्यक्रयार्थं नगरमपगतवन्तः। ततः सा
९ शमरीया नारी तं ब्रवीति, अहं शमरीया नारी, त्वञ्च यिहूदीयः,

तत् कथं मां पानीयं याचसे? यतः शमरीयैः सह यिहूदीयानां
व्यवहारो नास्ति। यीशुः प्रतिभाषमाणस्तामवादीत्, यदि त्वमी- १०
श्वरस्य दानमज्ञास्यः, मह्यं पानीयं देहीति येनोच्यसे तस्य तत्त्वञ्च
यद्यज्ञास्यस्तर्हि त्वमेव तमयाचिष्यथाः, स च तुभ्यं जीवि तोयम-
दास्यत्। सा योषित् तं वदति, प्रभो, तोयोद्धारणोपायो भवतो ११
नास्ति, प्रहिश्च गम्भीरः, कुतः पुनस्तज्जीवि तोयं लब्धं भवता?
कूपोऽयं येनास्मभ्यं दत्तस्तस्मादस्मत्पितामहाद् याकोबाद् भवान् १२
किं महत्तरः? तेनापि तत्पुत्रैश्च तत्पोषितैः पशुभिश्चैतस्य
तोयमपीयत। यीशुः प्रतिभाषमाणस्तामवादीत्, तोयमेतद् येन १३
केनचित् पीयते स पुनः पिपासिष्यति, मद्दातव्यं तोयन्तु येन १४
पीयते, सोऽनन्तकालं यावन्न पिपासिष्यति, अपि लहं तस्मै यत्
तोयं दास्यामि तत् तस्यान्तरेऽनन्तं जीवनं यावदुत्प्लवमानस्य
तोयस्योत्सो भविष्यति। सा नारी तं ब्रूते, प्रभो, मह्यं तत् तोयं १५
ददातु, अहं यथा न पिपासामि नापि वा तोयोद्धरणार्थमत्रा-
गच्छामि। यीशुस्तां वक्ति, याहि, तव पतिमाहूयात्रागच्छ। सा १६
योषित् प्रतिभाषमाणा तमवादीत्, पति र्मम नास्ति। यीशुस्तां १७
ब्रूते, पति र्मम नास्तीति युक्तं कथितं त्वया, यतः पतयः पञ्च १८
तवासन्, अधुना तु तव योऽस्ति नास्ति स तव पतिः। सत्यमिद-
मुक्तं त्वया। सा नारी तं वदति, प्रभो, निरूपयाम्यहं यद् भवान् १९
भाववादी। अस्मत्पितामहा अस्मिन् गिरावुपासनम् अकुर्व्वन्, २०
यूयन्तु वदथ, उपासनं यत्र कर्त्तव्यं, तत् स्थलं यिरूशालेमेऽस्तीति।
यीशुस्तां ब्रूते, नारि, मयि विश्वसिहि यत् समयः स आयाति, २१
यदा नास्मिन् गिरौ नापि वा यिरूशालेमे पितुरुपासनं युष्माभिः
कारिष्यते। यूयं यन्न जानीथ तस्योपासनं कुरुथ। वयं यज्जानी- २२

२३ मस्तस्योपासनं कुर्म्मः। परित्राणं हि यिहूदीयजातिमूलकं। प्रत्युत
समयः स आयात्यधुना चास्ति यदा प्रकृता उपासका आत्मना
सत्येन च पितुरुपासनं करिष्यन्ति, यतः पिता स्वोपासकांस्तादृशान्
२४ अनुसन्धत्ते। ईश्वर आत्मा, येस्त तस्योपासनं क्रियत आत्मना
२५ सत्येन चोपासनं तैः कर्त्तव्यं। सा स्त्री तं गदति, जानेऽहं मशी-
हेनार्थतः ख्रीष्टाभिधेन पुरुषेणागन्तव्यं, स यदायास्यति तदास्मभ्यं
२६ सर्व्वं निवेदयिष्यति। यीशुस्तां ब्रवीति, त्वया सम्भाषमाणो योऽहं
सोऽहमेव सोऽस्मि।

२७ तदैव तस्य शिष्या उपतस्थिरे, नार्य्या सह तस्य सम्भाषणे
आश्चर्य्यं मेनिरे च, तथापि भवान् किमन्विष्यतीति, अथवास्या
२८ सह भवान् किं सम्भाषत इति केनापि नावादि। ततः सा नारी
२९ स्वकलसं विहाय नगरं गत्वा जनान् वदति, आयात, मया
यद्यदकारि तत् सर्व्वं मह्यं यः कथितवांस्तादृशं मनुष्यं पश्यत च।
३० स किं ख्रीष्टः स्यात्? ततस्ते नगरान्निर्गत्य तस्य समीपमगच्छन्।
३१ तस्मिन्नवसरे शिष्याः सानुनयं तमवादिषुः, रब्बिन्, अश्नातु।
३२ स तु तानब्रवीत्, भोजनार्थं युष्मदविदितं भक्ष्यं ममास्ते। अनेन
३३ शिष्या मिथोऽपृच्छन्, केनापि किं तस्य समीपं भक्ष्यमानायि?
३४ यीशुस्तान् ब्रूते, मम भक्ष्यमिदं यन्मत्प्रेषयितुरभीष्टमाचरामि
३५ तदीयकर्म्म साधयामि च। अधुनापि मासचतुष्टयं शिष्यते, तदा
शस्यकर्त्तनकाल उपस्थास्यत इति किं युष्माभि र्नोच्यते? पश्यताहं
युष्मान् ब्रवीमि, ऊर्द्धदृष्टिं कृत्वा क्षेत्राण्यवलोकयत, शस्यकर्त्तनार्थं
३६ तान्यधुनैव सितानि प्रतिभान्ति। शस्यच्छेत्ता च वेतनं लभतेऽन-
न्तजीवनाय फलानि सञ्चिनोति च, यथा वप्तृच्छेत्तारावेकत्रान-
३७ न्देतां। अत्र हि प्रवादोऽयं सत्यः, वपत्येकः छिनत्त्यन्य इति। यूयं

यत्र न श्रममनुष्ठितवन्तस्तत्र शस्यकर्त्तनार्थं प्रहिता मया। अन्ये ३८
श्रममनुष्ठितवन्तः, यूयञ्च तेषां श्रमस्थानं प्रविष्टाः।

अथ मया यद्यदकारि तत् सर्व्वं स मह्यं कथितवानिति ३९
साक्ष्यदायिन्यास्तस्या नार्य्या वचनात् तन्नगरीया बहवः शमरीयम-
नुष्यास्तस्मिन् व्यश्वसिषुः। ततस्ते शमरीया यदा तत्समीपमुपातिष्ठन्त, ४०
तदा तैः सार्द्धमवस्थानं तं प्रार्थयन्त, स च दिनद्वयं तत्रावतस्थे।
बहुगुणाधिकाश्च तस्य वचनाद् व्यश्वसिषुस्तां नारीमवादिषुश्च, ४१
अधुनापि त्वदीयकथनकारणादेव वयं विश्वसिमस्तन्न, यतः स्वयम- ४२
स्माभिः श्रुतमनुभूतञ्चेदं यत् सत्यमेवायं जगत्त्राता ख्रीष्टः।

दिनद्वये तस्मिन्नतीते स ततः प्रस्थाय गालीलं जगाम। यीशुः ४३
स्वयं हि साक्ष्यमिदं दत्तवान् यत् स्वदेशे भाववादी सम्मानहीनः। ४४
अतो गालील उपस्थितः स गालीलीयैरन्वग्राहि, तत्कारणमिदं ४५
यद् यिरूशालेमे पर्व्वणि तेन यद्यत् कृतं तत् सर्व्वं ते दृष्टवन्तः,
यतस्तेऽपि पर्व्वण्युपस्थितवन्तः। अत एव यीशु र्यत्र तोयं द्राक्षार- ४६
सीकृतवांस्तां गालीलस्थकान्नां पुनराजगाम।

तदा कफरनाहूमे यस्य पुत्रो व्याधितस्तादृशो राजपुरुषः
कश्चिदासीत्। स यिहूदियातो गालीले यीशोरागमनस्य संवादं ४७
श्रुत्वा तस्यान्तिकं जगाम, स च यत् (कफरनाहूमम्) अवरुह्य
तं पुत्रं निरामयं कुर्य्यात् तत् प्रार्थयाञ्चक्रे, यतः स मृतकल्प
आसीत्। ततो यीशुस्तमुवाच, यूयम् अभिज्ञानान्यद्भुतलक्षणानि ४८
चादृष्ट्वा नैव विश्वसिष्यथ। स राजपुरुषस्तं ब्रूते, प्रभो, मद्बालकस्य ४९
मरणात् प्रागवरोहतु। यीशुस्तं ब्रवीति, याहि, तव पुत्रो जीवति। ५०
ततः स नरो यीशुना यदुक्तस्तस्मिन् वाक्ये विश्वस्य यात्रामकुरुत।
तस्य चावरोहणकाल एव तस्य दासास्तत्सम्मुखमुपस्थायेदं निवेद- ५१

५२ यामासुः, भवतः पुत्रो जीवतीति। ततः स तान् पप्रच्छ, कस्मिन्
दण्डे तस्योपशमो जातः? ते तमूचुः, ह्यः सप्तम्यां घटिकायां
ज्वरस्तमत्याक्षीत्। ततः पित्राबोधि तत् तस्यामेव घटिकायां
५३ सम्भूतं यदा स यीशुनोक्तस्तव पुत्रो जीवतीति। ततः स तदीय-
५४ गृह्याश्च सर्व्वे व्यश्वसिषुः। इदं पुन र्द्वितीयमभिज्ञानार्थकर्म्माकारि
यीशुना यिहूदियातो गालीलमागतेन ॥ ४ ॥

५ पञ्चमोऽध्यायः ।

१ अष्टात्रिंशद्वत्सरान् यावद् रोगग्रस्तमनुष्यस्य विश्रामवारे स्वास्थ्यकरणं
१४ ख्रीष्टेन यिहूदीयानां तर्ज्जनं शिक्षणञ्च २१ ख्रीष्टे योहनस्य पितुश्च
धर्म्मशास्त्रस्य च साक्ष्यं।

१ ततः परमुपस्थिते यिहूदीयानामुत्सवे यीशु र्यिरूशालेमं
२ जगाम। यिरूशालेमे मेषद्वाराख्यस्य गोपुरस्य निकटे सर एकमस्ति,
इब्रीयभाषया तस्य नाम बैथेषदेति, तच्च पञ्चभिरलिन्दै र्युक्तं।
३ तेषु शयाना व्याधिता अन्धाः खञ्जाः शुष्काङ्गा वा बहवो मनुष्या-
४ स्तोयस्य कम्पनं प्रत्यैक्षन्त। यतः समये समये स्वर्गदूत एकस्तत्
सरोऽवतरंस्तोयमकम्पयत्। तोयकम्पनात् परञ्च प्रथमो यो मनुष्य-
स्तोयं प्राविशत् स येन केनचिद् व्याधिना व्याधितस्तस्मान्मुक्तो
५ निरामयश्चाभवत्। तत्र चाष्टत्रिंशद्वर्षाणि यावद् व्याधिग्रस्तो नरः
६ कश्चिदविद्यत। यीशुस्तमेव शयानं दृष्ट्वा स आदीर्घकालाद् व्याधि-
७ तस्तज्ज्ञात्वा च पप्रच्छ, त्वं किं निरामयो भवितुं वाञ्छसि? स
रोगी तं प्रत्यवादीत्, प्रभो, नास्ति मम जनो यस्तोयकम्पनकाले
मां सरसि निक्षिपेत्, यावच्चाहमुपागच्छामि, तावदपरः कश्चिन्मत्तः
८ प्रागवतरति। यीशुस्तं ब्रवीति, उत्तिष्ठ, तव खट्टामादाय विहर
९ च। ततः स मनुष्यस्तत्क्षणं निरामयो जातः स्वखट्टामादाय च

विहर्त्तुं प्रवृत्तः। तद् दिनन्तु विश्रामदिनं। ततो यिहूदीयास्त- १०
मारोग्यप्राप्तं नरं जगदुः, अद्य विश्रामदिनं, तव खट्वावहनमवि-
धेयं। स तान् प्रत्यवादीत्, अहं येन स्वस्थीकृतस्तेनैवोक्तः, तव ११
खट्वामादाय विहरेति। ततस्ते तमपृच्छन्, तव खट्वामादाय वि- १२
हरेति त्वं येनोक्तः स मनुष्यः कः? स तु कस्तत् तेनारोग्यप्राप्तेन १३
नाज्ञायि, यतस्तत्र जननिवहस्योपस्थितितो यीशुरपसृतः।

ततः परं यीशु र्धर्म्मधाम्नि तमासाद्यावादीत्, पश्य त्वयारो- १४
ग्यमलम्भि, पुनः पापं मा कुरु, नोचेत् तव घोरतरा दुर्गति
र्भविष्यति। स मनुष्यस्तदा गत्वा यिहूदीयान् ज्ञापयामास, यद् १५
यीशुस्तस्यारोग्यकारी। ततो यिहूदीया यीशुमबाधन्त हन्तुम- १६
यतन्त च, तत्कारणमेतदेव यत् स विश्रामवार एतान्यकरोत्।
यीशुस्तु तान् प्रत्यवादीत्, मम पिताद्य यावत् कर्म्म करोत्यहमपि १७
करोमि। एतत्कारणादेव यिहूदीयास्तं हन्तुमधिकमप्ययतन्त, १८
यतः स न केवलं विश्रामवारमलङ्घयदपि त्वीश्वरं स्वीयपितरमभ्य-
दधात्, इत्यञ्चात्मानमीश्वरेण तुल्यमकुरुत। ततो यीशुः प्रति- १९
भाषमाणस्तानुवाच, सत्यं सत्यं, युष्मानहं ब्रवीमि, पितरं कर्म्म
कुर्व्वन्तं न दृष्ट्वा पुत्रः स्वतः किमपि कर्त्तुं न शक्नोति। स हि
यद्यत् करोति, पुत्रोऽपि तदेव तत् करोति। यतः पिता पुत्रे २०
प्रेम कुरुते, स्वयञ्च यद्यत् करोति पुत्रं तत् सर्व्वं दर्शयति। स च
तमेतेभ्योऽपि महत्तराणि कर्म्माणि दर्शयिष्यति, यूयं यथाश्चर्य्यं
मंस्यध्वे। यतः पिता यादृशं मृतानुत्थापयति सञ्जीवयति च, २१
तादृशं पुत्रोऽपि यान् रोचयति तान् सञ्जीवयति। पिता हि २२
कस्यापि विचारमपि न करोत्यपि तु समस्तं विचारं पुत्रे समर्पया-
मास, सर्व्वे यथा पितरं मानयन्ति तथैव पुत्रं मानयन्त्विति २३

२४ तस्याभिप्रायः। पुत्रो येन न मान्यते, तत्प्रेषयिता पितापि तेन
न मान्यते। सत्यं सत्यं, युष्मानहं ब्रवीमि, यो मम वाक्यं शृणोति
मत्प्रेषयितरि विश्वसिति च, सोऽनन्तजीवनप्राप्तः, स च विचारं
२५ न नेतव्योऽपि तु मृत्युतो जीवनं प्रत्युत्तीर्णः। सत्यं सत्यं, युष्मानहं
ब्रवीमि, समयः स आयात्यधुना चास्ति, यदा मृता ईश्वरपुत्रस्य
२६ गिरं श्रोष्यन्ति, ये च श्रोष्यन्ति ते जीविष्यन्ति। यतः पिता
यादृक् स्वयञ्जीवी तादृक् पुत्रायापि स्वयञ्जीवित्वं दत्तवान्
२७ विचारसाधनस्य सामर्थ्यञ्च तस्मै दत्तवान्, यतः स मनुष्यपुत्रः।
२८ अत्र माश्चर्य्यं मन्यध्वं। यत आयाति स समयो यदा श्मशानस्थाः
२९ सर्व्वे तस्य गिरं श्रोष्यन्ति वहिरायास्यन्ति च, कृतसदाचारा
जीवनार्थपुनरुत्थानाय, कृतदुराचाराश्च विचारार्थपुनरुत्थानाय।
३० स्वतः किमपि कर्त्तुं मया न शक्यते, यच्छृणोमि तदनुरूपं विचारं
करोमि, मम विचारश्च न्याय्यः, यतोऽहं न मदीयाभीष्टमपि तु
मत्प्रेषयितुः पितुरभीष्टमीहे।

३१ यद्यहं स्वार्थे साक्ष्यं ददामि, तर्हि मम साक्ष्यं न सत्यं। अपरो
३२ मयि साक्ष्यं ददाति, अहञ्च जाने यन्मयि दीयमानं तस्य साक्ष्यं
३३ सत्यं। यूयं योहनं प्रति दूतान् प्रहितवन्तः स च सत्यस्य स्वपक्षं
३४ साक्ष्यं दत्तवान्। नाहन्तु मनुष्यात् साक्ष्यं गृह्लामि। यूयं यत्
३५ त्राणमाप्नुयात तदर्थमेतत् कथयामि। स ज्वलन्ती विराजमाना
च दीपिकासीत्, यूयञ्च क्षणं यावत् तस्य दीप्त्यां मोदितुमरोचयत।
३६ योहनस्य साक्ष्यात्तु महत्तरं साक्ष्यं ममास्ते। येषां कार्य्याणां
साधनार्थं तद्भारः पित्रा मयि समर्पितस्तानि मया क्रियमाणानि
३७ कार्य्याण्येव मयीदं साक्ष्यं ददति यदहं पित्रा प्रहितः। मत्प्रेषयिता
पितापि स्वयं मामधि साक्ष्यं दत्तवान्। युष्माभिः कदापि तस्य

वाणी न श्रुता नापि वा तस्य रूपं दृष्टं, नापि वा लब्धं तस्य
वाक्यं युष्मदन्तरवतिष्ठमानं। यतस्तेन यः प्रहितस्तस्मिन् युष्माभि ३८
र्न विश्वस्यते। शास्त्राण्यनुसन्धद्ध्वं यूयं हि तेषु स्वान् अनन्तजीवन- ३९
प्राप्तान् मन्यध्वे, तान्येव च मयि साक्ष्यं ददति। तथापि यूयं ४०
जीवनलाभार्थं मदन्तिकमायातुमसम्मताः। मनुष्येभ्योऽहं सम्मानं न ४१
गृह्णामि, युष्मांस्तु जानामि, यन्न लब्धं युष्माभिरीश्वरस्य प्रेम ४२
युष्मदन्तरवतिष्ठमानं। मत्पितु र्नाम्नागतोऽहं युष्माभि र्न गृह्ये। ४३
अपरः कश्चिच्चेन्निजनाम्नागच्छेत्, स एव तर्हि युष्माभि र्ग्राहीष्यते।
परस्परं सम्मानं गृह्णन्त एकस्मादीश्वराल्लभ्यं सम्मानन्त्वनीहमाना ये ४४
यूयं, कथं विश्वसितुं शक्यते युष्माभिः? मा मन्यध्वं यत् पितुर- ४५
न्तिकमहं युष्माकमभियोक्ता भविष्यामि। अस्ति युष्माकमभियोक्ता
स मोशि र्यां युष्मदीयाशाभूमिः। यतो यदि मोशौ व्यश्वसिष्यत, ४६
तर्हि मयि व्यश्वसिष्यत, स हि मामधि लिखितवान्। तस्य ४७
लेख्येषु तु यदि न विश्वसिथ, कथं तर्हि मम वाक्येषु विश्वसि-
ष्यथ? ॥ ५ ॥

---

६ षष्ठोऽध्यायः।

१ ख्रीष्टस्य सिन्धुपारगमनं ४ पञ्चभिः पूपैर्द्वाभ्यां मत्स्याभ्याञ्च पञ्चसहस्रलोकानां भोजनं १६ तोयोपरि ख्रीष्टस्य पदव्रजनं २२ तदन्तिके बहुलोकागते तेषामुपदेशः ४१ स्वस्याहाररूपकथनं ५२ विवादियिहूदीयान्प्रति प्रत्युत्तरं ६० बहुलोकैस्तस्य त्यागः शिष्याणां स्थिरस्थितिश्च।

ततः परं यीशु र्गालीलस्य तिविरियाख्यह्रदस्य पारं प्रतस्थे। १
महाजननिवहश्च तमन्वगच्छत्, यतो रोगिषु तेन क्रियमाणान्य- २
भिज्ञानार्थकर्म्माणि तैरदृश्यन्त। एकदा यीशु र्गिरिमारुह्य स्वशिष्यैः ३

४ सार्द्धं तत्रोपविष्टवान्। तदा यिहूदीयानां निस्तारोत्सव आसन्न
५ आसीत्। ततो यीशुरूर्द्ध्वंदृष्टिं कृत्वा स्वसमीपमागच्छन्तं महान्तं
जननिवहं निरीक्ष्य फिलिपं पप्रच्छ, एतेषां भोजनार्थं कुत्रास्मा-
६ भिः पूपाः क्रेतव्याः? स तं परीक्षमाण इदमवदत्, यतः स किं
७ कर्त्तुमुद्यत आसीत् तदजानात्। फिलिपस्तं प्रत्यवादीत्, द्विशत-
मुद्रापादमूल्याः पूपा अप्येतेषां निमित्तं तथा पर्य्याप्ता न भवि-
८ ष्यन्ति यथैतेषामेकैकस्तोकं लप्स्यते। तदीयशिष्याणामेकोऽर्थतः
९ पित्रस्य भ्रातान्द्रियस्तं ब्रवीति, अस्त्यत्र क्षुद्र एको बालकः, तत्स-
मीपे पञ्च यावपूपा मीनौ च द्वौ क्षुद्रौ विद्यन्ते। एतावतः प्रति
१० तु तत् किं? यीशुस्तदाब्रवीत्, यूयं तान् मानवान् भोजनायोप-
वेशयत। तत्र प्रभूतं शष्पमासीत्। ये च पुरुषा उपविविशुस्ते
११ संख्यया प्रायेण पञ्च सहस्राणि। ततः परं यीशुस्तान् पूपान्
जग्राह, धन्यवादं कृत्वा च शिष्येभ्यो ददौ, पुनश्च शिष्याः समा-
सीनेभ्यो मनुष्येभ्यो ददुः। तथैव तयो र्मीनयोस्तेभ्यो यथेष्टम-
१२ दीयत। तेषु तु तृप्तेषु स स्वशिष्यान् जगाद, अवशिष्टा भग्नांशा
१३ युष्माभिः सञ्चीयन्तां, किमपि मा विनश्यतु। अतस्ते तेषां पञ्चानां
यावपूपानां भोक्तृभिः शेषितान् भग्नांशान् सञ्चित्य तै र्द्वादश
१४ डल्लकान् पूरयामासुः। यीशुना कृतं तदभिज्ञानार्थकर्म्म दृष्ट्वा
मनुष्या अवदन्, सत्यम्, अयं स भाववादी येन जगत्युपस्थातव्य-
१५ मिति। अतस्ते मां राजानं चिकीर्षन्तो मां धर्त्तुमागमिष्यन्तीति
ज्ञात्वा यीशुरेकाकी पुन र्गिरिमाशिश्राय।

१६ तस्य शिष्यास्तु सन्ध्यायामुपस्थितायां समुद्रतीरमवरूढा नावं
१७ प्रविश्य समुद्रपारस्थं कफरनाहूमं गन्तुं प्रवृत्ताश्च। ततः परम्
१८ अन्धकारे जातेऽपि यीशुस्तेषां समीपं नागतवान् समुद्रस्य महा-

वायोराघातेनाक्षोभ्यत। इत्थं वहमानास्ते यदा सार्द्धैकं क्रोशं १९
क्रोशद्वयं वा गतास्तदा यीशुं समुद्रस्योपरि व्रजन्तं नावो निकट-
मुपस्थितञ्च लक्षयामासुरनेन बिभ्युश्च। स तु तानाह, अयमहं, २०
मा भैष्ट। ततस्ते तं नावि ग्रहीतुमरोचयन्, नौश्च तत्क्षणं २१
तेषां गन्तव्ये स्थल उपतस्थे।

तत्परदिने समुद्रपारे जननिवहस्तिष्ठन्नासीत्। तदीयशिष्यैः २२
प्रविष्टात् पोतादन्यः पोतस्तत्र नासीत्, तदीयशिष्याणां प्रवेशकाले
च सा नौ यीशुना न प्रविष्टा केवलं तदीयशिष्यैरेव प्रविष्टेतत्
तै र्जनैरदर्शि। तत्पश्चात्तु तिविरियात आगता अन्या नावस्तत्स्थान- २३
समीपमुपतस्थिरे, यत्र कृते प्रभुना धन्यवादे पूपास्तै र्भुक्ताः।
अतोऽत्र यीशुर्नास्ति तदीयशिष्याश्च न सन्तीति दृष्ट्वा ते जना २४
अपि नौका आरुह्य यीशुमन्विष्यन्तः कफरनाहूममाजग्मुः समुद्र- २५
पारे तं प्राप्य च पप्रच्छुः, रब्बिन्, भवानत्र कदोपस्थितवान्?
यीशुस्तान् प्रतिजगाद, सत्यं सत्यं, युष्मानहं ब्रवीमि, यूयमभि- २६
ज्ञानानि दृष्टवन्तो नैतत्कारणान्मामन्विष्यथ, प्रत्युत तान् पूपान्
भुक्त्वा यत् तृप्तवन्तस्तत्कारणादेव। कार्य्यं मा क्रियतां युष्माभिः २७
क्षीयमाणस्य भक्ष्यस्य लिप्सया, क्रियतान्त्वनन्तजीवनं यावत् स्था-
यिनो भक्ष्यस्य लिप्सया। मनुष्यपुत्रेण तद् युष्मभ्यं दातव्यं। स
हि पित्रेश्वरेण मुद्राङ्कितः। ततस्ते तमवादिषुः, ईश्वरादिष्टानि २८
कार्य्याणि चिकीर्षुभिरस्माभिः किं कर्त्तव्यं? यीशुः प्रतिभाषमाण- २९
स्तानुवाच, ईश्वरादिष्टं कार्य्यमिदं, यत् तेन यः प्रहितो युष्माभि-
स्तस्मिन् विश्वसितव्यं। ततस्ते तमाहुः, त्वं नु किमभिज्ञानार्थकर्म्म ३०
करोषि यद् दृष्ट्वास्माभिस्त्वयि विश्वसितव्यं। त्वं किं समुपार्ज-
यसि? अस्मत्पूर्व्वपुरुषा मरौ मान्नामभुञ्जत, यतो लिखितमास्ते, ३१

३२ स तेभ्यो भोजनार्थं स्वर्गोत्पन्नं खाद्यं ददाविति । ततो यीशुस्तान्
अवादीत्, सत्यं सत्यं, युष्मानहं ब्रवीमि, मोशि र्युष्मभ्यं स्वर्गोत्पन्नं
खाद्यं न दत्तवान्, मम पिता तु युष्मभ्यं प्रकृतं स्वर्गोत्पन्नं खाद्यं
३३ ददाति । यत ईश्वरीयं खाद्यं तदेव यत् स्वर्गादवतरति जगते
३४ जीवनं ददाति च । ततस्ते तमूचुः, प्रभो, सर्व्वदास्मभ्यं तत्
३५ खाद्यं ददातु । यीशुस्तु तानुवाच, अहमेव जीवनदायि खाद्यं ।
मत्समीपं य आगच्छति, स नैव क्षोत्स्यति, मयि यस्य विश्वसिति
३६ स कदापि न तर्षिष्यति । युष्मांस्त्वहमुक्तवान्, यन्मां दृष्ट्वापि न
३७ विश्वसिथ । पित्रा मह्यं यद्यद्दीयते सर्व्वं तन्मत्समीपमायास्यति ।
३८ यस्तु मत्समीपमायाति, स मया नैव बहि र्निक्षेप्स्यते । यतो न
मदीयाभीष्टमपि तु मत्प्रेषयितुरभीष्टं कर्त्तुमहं स्वर्गादवतीर्णः ।
३९ मत्प्रेषयितुः पितुरभीष्टञ्चेदं यन्मह्यं तेन यद्यद् दत्तं तस्य किमपि
४० मया न हारयितव्यमपि त्वन्तिमदिने सर्व्वं मयोत्थापयितव्यं। मत्प्रे-
षयितुरभीष्टञ्चेदं यत् पुत्रं निरीक्ष्य यः कश्चित् तस्मिन् विश्वसिति,
तेनानन्तं जीवनं प्राप्तव्यमन्तिमदिने च स मयोत्थापयितव्यः ।
४१ अथ स्वर्गादवतीर्णं खाद्यमहमिति यीशुना यदुक्तं, तत्कारणाद्
४२ यिहूदीयास्तमधि विवदितुं प्रवृत्ताः । तेऽवदन्, असौ किं न
योषेफस्य पुत्रः स यीशु र्यस्य पितरं मातरञ्च जानीमः? कथं
४३ तर्हि स वदति, स्वर्गादवतीर्णोऽहमिति? यीशुः प्रतिभाषमाण-
४४ स्तानब्रवीत्, मा विवदध्वं मिथः । अपरः कोऽपि मत्समीपमायातुं
न शक्नोति, केवलं स यो मत्प्रेषयित्रा पित्राकृष्यते, स चान्तिम-
४५ दिने मयोत्थापयिष्यते । भाववादिनां ग्रन्थे लिखितमास्ते,

भविष्यन्ति हि ते सर्व्वे ईश्वरेणैव शिक्षिताः ।

अतो यः कश्चित् पितुः सकाशाच्छ्रुत्वा शिक्षितवान्, स मत्समीप-

मायाति। कोऽपि यत् पितरं दृष्टवान्, न तथा, ईश्वरस्य ४६
सकाशाद् योऽस्ति, केवलं स एव पितरं दृष्टवान्। सत्यं सत्यं, ४७
युष्मानहं ब्रवीमि, मयि यो विश्वसिति, तस्यानन्तं जीवनमास्ते। अहं ४८
जीवनदायि खाद्यं। युष्माकं पूर्व्वपुरुषा मरौ मान्नां भुक्तवन्तो ४९
मृतवन्तश्च। इदं स्वर्गादवतीर्णं खाद्यम्, मनुष्येण भोक्तव्यं, भुक्त्वा ५०
च न मर्त्तव्यं। अहं स्वर्गादवतीर्णं जीवनमयं खाद्यं। खाद्यमिदं ५१
येन भुज्यते स शाश्वतं जीविष्यति। यच्च खाद्यमहं दास्यामि
तन्मम मांसं यद्दातव्यं जगतो जीवनार्थं।

ततो यिहूदीया मिथो वाग्युद्धं कुर्व्वन्तोऽवदन्, भोजनार्थ- ५२
मस्मभ्यं स्वमांसं दातुममुना कथं शक्यं? यीशुस्तदा तानवादीत्, ५३
सत्यं सत्यं, युष्मानहं ब्रवीमि, यदि मनुष्यपुत्रस्य मांसं नाश्नीथ
तस्य शोणितं न पिबथ च, तर्हि यूयमन्तरेऽनन्तं जीवनं न
प्राप्तवन्तः। यो मम मांसमश्नाति मम शोणितं पिबति च, ५४
सोऽनन्तजीवनप्राप्त उत्थापयितव्यश्च मयान्तिमदिने। यतो मम ५५
मांसं सत्यं भक्ष्यं मम शोणितञ्च सत्यं पानीयं। यो मम मांस- ५६
मश्नाति मम शोणितं पिबति च, मयि सोऽवतिष्ठते तस्मिन्न-
हञ्चावतिष्ठे। यथा जीवनमयः पिता मां प्रहितवान् पितु र्गुणादहं ५७
जीवामि च, तथा यो मामश्नाति सोऽपि मम गुणाज्जीविष्यति।
इदमेव स्वर्गादवतीर्णं खाद्यं। नास्तीदं तेन मान्नाख्यद्रव्येण सदृशं, ५८
युष्माकं पूर्व्वपुरुषा यद् भुक्तवन्तो मृतवन्तश्च। खाद्यमिदं येन
भुज्यते स शाश्वतं जीविष्यति। कथा एतास्तेन कफरनाहूमे समा- ५९
जगृह उपदिशताकथ्यन्त।

अथ ताः श्रुत्वा तदीयशिष्याणां बहवोऽवादिषुः, कठिनेयमुक्तिः ६०
केन श्रोतुं शक्या? तदीयशिष्यास्तु यदस्मिन् विषये विवदन्ते,

६१ यीशुरन्तरे तज्ज्ञात्वा तानवादीत्, इदं किं युष्मान् स्खालयति ?
६२ तर्हि मनुष्यपुत्रः पुरा यत्रासीत् तत् स्थानमारोहन्तं तं यदा
६३ निरीक्षिष्यध्वे, तदा किमनुमास्यध्वे? आत्मैव जीवनदायी, मांसं
किमपि नोपकरोति। अहं युष्मभ्यं यानि वचांसि कथयामि,
६४ तान्यात्मा जीवनञ्च। सन्ति तु युष्माकं केचिद्, ये न विश्वसन्ति।
यतः के के न विश्वसन्ति को वा तं (शत्रुषु) समर्पयिष्यति तद्
६५ यीशुनादितोऽज्ञायि। स चाब्रवीत्, अतो हेतो र्यूयं मयोक्ताः,
अपरः कोऽपि मत्समीपमायातुं न शक्नोति, केवलं स यस्मै पित्रा
शक्तिरदायीति ।

६६ ततः प्रभृति तच्छिष्याणां बहवः पराङ्मुखीभूयापक्रान्ताः, न
६७ पुनस्तेन सार्द्धमव्रजन्। तदा यीशु र्द्वादश प्रेरितानप्राक्षीत्, यूयमपि
६८ किमपक्रमितुमिच्छथ? शिमोनः पित्रस्तमुवाच, प्रभो, कमाश्रयितु-
६९ मपक्रमिष्यामः? सन्ति भवतोऽनन्तजीवनस्य कथाः। अस्माभिश्च
विश्वसितं ज्ञातञ्च यद् भवान् जीवनमयस्येश्वरस्य पुत्रः ख्रीष्टः।
७० यीशुस्तान् प्रत्युवाच, किं न द्वादश यूयं वरिता मया? तथापि
७१ युष्माकमेको दियावलः। अनेन स शिमोनस्य पुत्रमीष्करियोतीयं
यिहूदामसूचयत्, यतो द्वादशानामेकः सन्नपि स तस्य भावी
समर्पयितासीत्॥ ६ ॥

---

७ सप्तमोऽध्यायः ।

१ ख्रीष्टस्य यिरूशालेमगमनं १४ मन्दिरस्थलोकेभ्य उपदेशः २५ विवादिनः प्रति प्रत्युत्तरं ३२ तस्योपदेशः ३७ तमुद्दिश्य लोकानां विचारः ४५ महायाजकानां फरीशिनाञ्च ख्रीष्टं प्रति विपक्षता ।

१ ततः परं यीशु र्गालीले पर्य्यटत्, यतो यिहूदीयास्तं जिघां-
२ सन्तीति ज्ञात्वा स पुन र्यिहूदियायां पर्य्यटितुं नैच्छत्। यिहूदी-

यानामुटजनिर्म्माणाख्य उत्सवे त्वासन्ने सति तस्य भ्रातरस्तमवदन्, ३
त्वमतः स्थानादुत्थाय यिहूदियां याहि, त्वया यानि क्रियन्ते,
तानि कर्म्माणि तव शिष्यैरप्यालोकयन्तां, यतः स्वयं सप्रकाशो ४
भवितुमीहमानः कोऽपि गुप्तं नाचरति। त्वं यद्येतानि साधयसि,
तर्ह्यात्मानं जगतः प्रत्यक्षं कुर्व्विति। यतस्तदीयभ्रातरोऽपि तस्मिन्न ५
व्यश्वसन्। यीशुस्तदा तानवादीत्, मम समय इदानीमप्यनुपस्थितः, ६
युष्माकं समयस्तु सर्व्वदा प्रस्तुतः। जगद् युष्मान् द्वेष्टुं न शक्नोति, ७
मान्तु द्वेष्टि, यतस्तस्मिन्नयेदं साक्ष्यं दीयते यत् तस्य कर्म्माणि
दुष्टानि। यूयमेवेनमुत्सवं गच्छत। अहमधुनाप्येनमुत्सवं न गच्छामि, ८
यतो मम काल इदानीमप्यसम्पूर्णः। तानिदमुक्त्वा स गालीले- ९
ऽवतस्थे। प्रस्थितेषु तु तदीयभ्रातृषु सोऽपि तमुत्सवं जगाम, न १०
सप्रकाशमपि तु गुप्तमिव। ततो यिहूदीया उत्सवे तं गवेषयन्तो- ११
ऽवदन्, स नरः कुत्र? जननिवहेषु च तमधि बहुतरो विवादः १२
समजायत। केचिदवदन्, स भद्र इति। केचित् पुनरवदन्, न
तथा, प्रत्युत स जननिवहमुन्मार्गगामिनं करोतीति। तथापि १३
यिहूदीयानां भयात् कोऽपि तमधि सप्रकाशं नाकथयत्।
उत्सवस्यार्द्धकाले तु यीशु र्धर्म्मधाम गत्वोपदेष्टुं प्रववृते। १४
अनेन यिहूदीया विस्मयापन्ना अवदन्, असावनधीत्यापि कथं १५
शास्त्रविज्ञातः? यीशुः प्रतिभाषमाणस्तानवादीत्, मदीयोपदेशो १६
न मम, स मत्प्रेषयितुरेव। कश्चिद् यदि तस्याभीष्टमाचरितुं १७
रोचयति, स तर्ह्युपदेशमधि ज्ञास्यति स ईश्वरोत्पन्नोऽथवाहं स्वतो
भाष इति। यः स्वतो भाषते स स्वीयगौरवमीहते, यस्तु स्वप्रेषयितु १८
र्गौरवमीहते, स सत्यस्तस्मिंश्चाधर्म्मो नास्ति। व्यवस्था किं न १९
मोशिना युष्मभ्यं दत्ता? तथापि युष्माकं कोऽपि व्यवस्थां न

२० समाचरति। यूयं किमर्थं मां जिघांसथ? जननिवहः प्रत्यवादीत्,
२१ त्वं भूताविष्टः, कस्त्वां जिघांसति? यीशुः प्रतिभाषमाणस्तानब्रवीत्,
२२ कर्म्मैकमकारि मया, तत्र सर्व्वे यूयमाश्चर्य्यं मन्यध्वे। तत्कारणाद्
(वदामि,) मोशि युष्मभ्यं त्वक्छेदस्य विधिं दत्तवान्, सोऽपि न
मोशित उत्पन्नः प्रत्युत पितृभ्यः; यूयञ्च विश्रामवारे मनुष्यस्य
२३ त्वक्छेदं कुरुथ। मोशे र्व्यवस्था यन्न लंघ्येत, तदर्थं यदि विश्रामवारे
मनुष्येण त्वक्छेदः सोढव्यस्तर्हि विश्रामवारे सर्व्वाङ्गो मनुष्यो मया
२४ स्वस्थीकृतोऽत्र किं मह्यं क्रुध्यथ? चाक्षुषं विचारं मा कुरुत,
न्याय्यमेव विचारं कुरुत।

२५ ततो यिरूशालेमनिवासिनां केचिदवदन्, (नायका) यं हन्तुं
२६ यतन्ते, मनुष्योऽयं किं न स एव? पश्यत च स सप्रकाशं भाषते तैस्
किमपि नोच्यते। अयं ख्रीष्ट एवेति किं नायकैः सत्यमज्ञायि?
२७ अयन्तु कुत उत्पन्नस्तदस्माभिर्विदितं। ख्रीष्टस्तु यदायास्यति तदा
२८ स कुत उत्पन्नस्तत् केनापि न ज्ञायिष्यते। ततो यीशु र्धर्म्म-
धामन्युपदिशन् प्रोच्चैराह, यूयं माञ्च जानीथ कुतश्चाहमुत्पन्नस्त-
दपि जानीथ। अहन्तु न स्वत आगतः प्रत्युत सत्योऽस्ति मत्प्रेष-
२९ यिता, स युष्माभिरविदितः। अहन्तु तं जानामि, यतोऽहं
३० तत्सकाशाद् (आगतो) ऽस्मि, स च मां प्रहितवान्। ततस्ते तं
धर्त्तुमयतन्त, तथापि कोऽपि तस्मिन् हस्तं नार्पयामास, यतस्तदा-
३१ नीमपि तस्य समयोऽनुपस्थित आसीत्। जननिवहस्य बहवो
नराश्च तस्मिन् व्यश्वसिषुरवादिषुश्च, ख्रीष्टो यदायास्यति, तदानेन
यानि कृतानि तेभ्योऽधिकान्यभिज्ञानार्थकर्म्माणि किं स करिष्यति?

३२ अथ जननिवहस्तमधीत्थं यद् व्यवदत तच्छ्रुत्वा फरीशिनो
३३ मुख्ययाजकाश्च तं धर्त्तुं पदातीन् प्रेषयामासुः। अतो यीशुस्तान्

जगाद, इतः परमहं स्तोकं कालं युष्माभिः सार्द्धं स्थास्यामि, ततो
मत्प्रेषयितुः समीपं यास्यामि। यूयं मां गवेषयिष्यथ न लप्स्यथ। ३४
अहञ्च यत्र विद्ये तत्रोपस्थातुं युष्माभिरशक्यं। ततो यिहूदीया ३५
मिथोऽवदन्, अनेन किं स्थानं गन्तव्यं यत् सोऽस्माभिरप्राप्यो
भविष्यति? अयं किं यूनानीयानां मध्ये विकीर्णजनानां समीपं
गत्वा यूनानीयान् शिक्षयिष्यति? कीदृशमिदमनेन कथितं वचनं, ३६
यूयं मां गवेषयिष्यथ न लप्स्यथेत्यपरञ्च यत्राहं विद्ये तत्रोपस्थातुं
युष्माभिरशक्यमिति?

अथोत्सवस्यान्तिमदिवसेऽर्थतो महादिवसे यीशुस्तिष्ठन्नुच्चस्वरेण ३७
बभाषे, यः पिपासुः स मदन्तिकमागत्य पिबतु। मयि यो विश्व- ३८
सिति, शास्त्रीयोक्त्यनुसारेण तस्याभ्यन्तरादमृततोयस्य सरितः प्रस्र-
विष्यन्ति। तस्मिन् विश्वासिभि र्य आत्मा लप्स्यते तमधि तेनेतद- ३९
कथ्यत। पवित्रस्यात्मनो वितरणं तदाप्यसम्भूतमासीत्, यतस्तदापि
यीशुरप्राप्तप्रताप आसीत्। वचनमेतच्छ्रुत्वा जननिवहस्य बहवो ४०
जना अवदन्, सत्यम्, अयं स भाववादी। अन्येऽवदन्, अयं ४१
ख्रीष्टः। अन्ये पुनरवदन्, कथमेतत्? ख्रीष्टेन किं गालीलादा-
गन्तव्यं? शास्त्रे किं नेदं लिखितमास्ते यद् दायूदस्य वंशाद् ४२
दायूदस्य वसतिग्रामाच्च बैतलेहमात् ख्रीष्टेनागन्तव्यं? अतस्तमधि ४३
जननिवहस्य भेदः सञ्जातः। तेषां केचिच्च तं धर्त्तुमैच्छन्, तथापि ४४
कोऽपि तस्मिन् हस्तं नार्पयामास।

ततस्ते पदातयो मुख्ययाजकानां फिरीशिनाञ्च समीपं प्रत्या- ४५
जग्मुस्ते च तानप्राक्षुः, स किमर्थं युष्माभि र्नानीतः? पदातयः ४६
प्रत्यूचुः, स यादृशं भाषते, तादृशं कोऽपि मनुष्य इतिपूर्व्वं कदापि
न भाषितवान्। फिरीशिनस्तदा तान् प्रत्यूचुः, यूयमपि किमुन्मार्गं ४७

४८ नीताः? नायकानां फरीशिनां वा कोऽपि किं तस्मिन् विश्वश्वास?
४९ प्रत्युत व्यवस्थानभिज्ञोऽसौ जननिवहः शप्तः। तदा तेषां मध्ये
५० गणितो यो नीकदीमो रजन्यां तस्यान्तिकमागतवान्, स तान्
५१ ब्रवीति, प्रथमं मनुष्यस्य मुखाद् वाक्यमश्रुत्वा तेन किं क्रियते
५२ तदज्ञात्वा वास्माकं व्यवस्था किं मनुष्यं दोषिणं करोति? ते
प्रतिभाषमाणास्तमूचुः, त्वमपि किं गालीलीयः? अनुसन्धत्स्वालोचय
च यद् गालीलतः कोऽपि भाववादी नोत्पद्यते ॥ ७ ॥

---

८ अष्टमोऽध्यायः।

१ एकस्या व्यभिचारिण्या मोचनं १२ भाण्डागार उपदेशः २१ यिहूदीयैः सार्कं विवदनं ३० अब्राहामे कथनं ४८ स्वनिर्दोषत्वप्रकटनं मन्दिराद्गमनञ्च।

१ ततस्ते प्रत्येकं स्वगृहं जग्मुः, यीशुस्तु जैतुनगिरिं जगाम।
२ प्रत्यूषे तु स पुन र्धर्म्मधामन्युपतस्थे सर्व्वजनस्तु तदन्तिकमागच्छत्,
३ स चोपविश्य तानशिक्षयत्। तदा शास्त्राध्यापकाः फरीशिनश्च
व्यभिचारे धृतां स्त्रियं काञ्चित् तस्य समीपमानयन्ति, मध्यस्थाने
४ स्थापयित्वा च तं वदन्ति, गुरो, योषिदियं व्यभिचारं कुर्व्वन्त्येव
५ धृता। व्यवस्थायाञ्च मोशिरस्मान् प्रस्तराघातेनेदृशीनां प्राणदण्ड-
६ माज्ञापयामास, अतो भवान् किं वदति? तस्य विरुद्धमभियोग-
सूत्रस्य लिप्सया ते परीक्षमाणास्तमेतदूचुः। यीशुस्तु प्रह्वीभूयाङ्गुल्या
७ मृत्तिकायाम् अलिखत्। तेषु तु तं पृष्ट्वावतिष्ठमानेषु, स ऊर्द्ध्वी-
भूय तानवादीत्, युष्माकं यो निष्पापः प्रथमं सोऽस्यां प्रस्तरं
८ निक्षिपतु। इत्युक्त्वा स पुनः प्रह्वीभूय मृत्तिकायामलिखत्। ते
९ तु तच्छ्रुत्वा संवेदेन दोषबोधमनुभूय च प्राचीनेभ्य आरभ्यान्त्यान्
यावदेकैकशः सर्व्वे निरक्रामन्। इत्थमेकाकी यीशु र्मध्यस्थाने

तिष्ठन्ती सा स्त्री चावशिष्येतां। ततो यीशुरूर्द्ध्वीभूय तां स्त्रिय- १०
मृतेऽपरं कमपि न दृष्ट्वा च तां पप्रच्छ, नारि, त्वदभियोगिनस्ते
नराः कुत्र? त्वं किं केनापि न दण्डार्हीकृता? सावादीत्, न ११
केनापि, प्रभो। ततो यीशुस्तामाह, अहमपि त्वां न दण्डार्ही-
करोमि, याहि, पुनः पापं माकार्षीः।

ततो यीशुः पुन र्जनैः संलप्य बभाषे, अहं जगतो ज्योतिः, १२
यो मामनुगच्छति स नैवान्धकारे व्रजिष्यत्यपि तु जीवनरूपमालोकं
प्राप्स्यति। फरीशिनस्तदा तमूचुः, त्वया स्वार्थे साक्ष्यं दीयते, तव १३
साक्ष्यं न सत्यं। यीशुः प्रतिभाषमाणस्तान् जगाद, यद्यप्यहं १४
स्वार्थे साक्ष्यं ददामि, तथापि मम साक्ष्यं सत्यं, यतोऽहं कुत
आगतः क्व वा गच्छामि, तज्जाने। यूयन्तु न जानीथ कुतो-
ऽहमागतः क्व वा गच्छामि। यूयं शरीरानुयायिनं विचारं कुरुथ, १५
अहं कस्यापि विचारं न करोमि। यद्यप्यहं विचारं करोमि, १६
तथापि मम विचारः सत्यः, यतो नास्म्यहमेकाकी, किन्त्वहमस्मि
मत्प्रेषयिता पिता चास्ति। युष्मदीयव्यवस्थायामपि लिखितमस्ति, १७
यद् द्वयोः साक्षिणोः साक्ष्यं सत्यं। अहं स्वार्थे साक्ष्यदातास्मि, १८
मत्प्रेषयिता पिता च मयि साक्ष्यं ददाति। तदा ते तं पप्रच्छुः, १९
कुत्रास्ति तव पिता? यीशुस्तान् प्रतिजगाद, यूयं माञ्च न
जानीथ, मम पितरञ्च न जानीथ। यदि मामज्ञास्यत, तर्हि मम
पितरमप्यज्ञास्यत। एतानि वचांसि धनागारे यीशुनाकथ्यन्त। २०
स तदा धर्म्मधामन्युपादिशत्, तथापि कोऽपि तं न दधार, यत-
स्तदानीमपि तस्य समयोऽनुपस्थित आसीत्।

ततो यीशुः पुनस्तानवादीत्, अहं गच्छामि, यूयञ्च मां २१
गवेषयिष्यथ, स्वपापे मरिष्यथ च। अहं यत् स्थानं गच्छामि

२२ तत्रोपस्थातुं युष्माभिरशक्यं। ततो यिहूदीया अवदन्, स किमा-
त्मघाती भवितुमुद्यतस्तद्धेतोश्च वदति, यत् स्थानमहं गच्छामि
२३ तत्रोपस्थातुं युष्माभिरशक्यमिति? स तदा तानब्रवीत्, यूयमधः-
स्थानीयाः, अहमूर्द्धस्थानीयः। यूयमेतज्जगत्सम्बन्धीयाः, नास्म्यह-
२४ मेतज्जगत्सम्बन्धीयः। ततो युष्मभ्यं कथितवान्, यूयं स्वपापेषु
मरिष्यथ। यतोऽहं सोऽस्मीति चेन्न विश्वसिथ, तर्हि स्वपापेषु
२५ मरिष्यथ। ते तदा तं पप्रच्छुः, कस्त्वं? यीशुस्तानुवाच, आदित-
२६ स्तदेव युष्मभ्यं कथयामि। युष्मानधि मया बहु वक्तव्यं बहु
विचारणञ्च कर्त्तव्यं। मत्प्रेषयिता तु सत्यः, तस्य मुखाच्च मया
२७ यद्यदश्रावि तदेव जगते कथ्यते। स यत् तेषां ज्ञानार्थं पितरम-
२८ सूचयत् तत्तैर्नाबोधि। ततो यीशुस्तानब्रवीत्, मनुष्यपुत्रे युष्मा-
भिरुच्चीकृते ज्ञायिष्यते यदहं सोऽस्मि स्वतश्च किमपि न करोम्यपि
२९ तु पित्रा यथादिष्टस्तथैवैतानि भाषे। मत्प्रेषयिता च मया
सार्द्धमास्ते, स मामेकाकिनं न त्यक्तवान् यतस्तस्मै यद्यद् रोचते
सर्व्वदा तदेव मया क्रियते।

३० स यदैताः कथा अभाषत, तदा बहवस्तस्मिन् व्यश्वसिषुः।
३१ ततो ये यिहूदीयास्तस्मिन् व्यश्वसिषुस्तान् यीशु र्जगाद, यदि मम
३२ वाक्ये स्थिरा भवथ, तर्हि सत्यं यूयं मम शिष्याः स्थ, सत्यञ्च
३३ ज्ञास्यथ, सत्येन स्वाधीनीकारिष्यध्वे च। ते तं प्रत्यूचुः, वयमब्राहा-
मस्य वंशः, कदापि कस्यापि दास्यं नाचरितवन्तः। तत् कथं
३४ त्वयोच्यते, यूयं स्वाधीना भविष्यथेति? यीशुस्तान् प्रत्यवादीत्,
सत्यं सत्यं, युष्मानहं वदामि, यः कश्चित् पापमाचरति स पापस्य
३५ दासः, दासस्तु न शाश्वतं गृहेऽवतिष्ठते, पुत्र एव शाश्वतमवतिष्ठते।
३६ अतश्चेत् पुत्रेण स्वाधीनीक्रियध्वे, तर्हि सत्यरूपेण स्वाधीना

भविष्यथ। अहं जाने यद् यूयमिब्राहीमस्य वंशः, मान्तु जिघांसथ, ३७
यतो मदीयवाक्यं युष्मदन्तरे स्थानं नाप्नोति। मत्पितुः समीपं ३८
मया यद्यदर्शि तदेव कथ्यते, तथा च युष्मत्पितुः समीपं युष्माभि
र्यद्यद्दर्शि तत् क्रियते। ते प्रतिभाषमाणास्तमूचुः, इब्राहीमो- ३९
ऽस्माकं पिता। यीशुस्तान् वदति, यदीब्राहीमस्य सन्ताना अभ-
विष्यत, तर्हीब्राहीमस्य क्रिया अकरिष्यत। इदानीन्तु मां जिघांसथ, ४०
नरं य ईश्वरस्य मुखात् सत्यं श्रुत्वा युष्मभ्यं कथितवान्। इब्राही-
मेणैतन्नाकारि। युष्मत्पितुः क्रिया युष्माभिः क्रियन्ते। ततस्ते तमूचुः, ४१
न व्यभिचारजाता वयम्, अस्माकमेकः पितास्ति स ईश्वरः।
यीशुस्तदा तानुवाच, ईश्वरो यदि युष्माकं पिताभविष्यत्, तर्हि ४२
यूयं मयि प्रेमाकरिष्यत, यतोऽहमीश्वरान्निर्गत्यायातः, नैव हि
स्वत आगतोऽहं, प्रत्युत स एव मां प्रहितवान्। मम भाषा ४३
किमर्थं युष्माभि र्नाभिज्ञायते? कारणमेतद् यद् यूयं मम वाक्यं
श्रोतुं न शक्नुथ। यूयं पितुर्दियावलस्य सम्बन्धीयाः, युष्मत्पितुर- ४४
भिलाषानाचरितुकामाश्च। स आदितो नरघातक आसीत्, सत्ये
च नावस्थितः, यतस्तस्मिन् सत्यं नास्ति। स यदानृतं भाषते तदा
निजस्वं भाषते, यतः सोऽनृतवादी तस्य पिता चास्ति। अहन्तु ४५
सत्यं भाषे, तत्कारणाद् यूयं मयि न विश्वसिथ। मम पापमस्तीति ४६
प्रमाणं युष्माकं को ददाति? यदि तु सत्यं भाषे, किमर्थं तर्हि
यूयं मयि न विश्वसिथ? य ईश्वरसम्बन्धीयः स ईश्वरस्योक्तीः ४७
शृणोति। युष्माभिस्ता न श्रूयन्ते, तत्कारणमेतद् यद् यूयमीश्वर-
सम्बन्धीया न स्थ।

यिहूदीयास्तदा प्रतिभाषमाणास्तमवादिषुः, किं न युक्तमस्माभिः ४८
कथ्यते यत् त्वं शमरीयो भूताविष्टश्चेति। यीशुः प्रतिजगाद, ४९

नास्म्यहं भूताविष्टः, प्रत्युत मम पितरं सम्मानयामि, यूयञ्च
५० मामवमानयथ। नाहं मत्सम्मानान्वेषी, अस्ति लेकस्तदन्वेषी तद्वि-
५१ चारयिता च। सत्यं सत्यं, युष्मानहं ब्रवीमि, यः कश्चिन्मम
५२ वाक्यमनुपालयति, सोऽनन्तकालं यावन्मृत्युं न द्रक्ष्यति। यिहूदी-
यास्तदा तमवदन्, अधुना वयं बुद्धा जानीमो यत् त्वं भूताविष्टः।
अब्राहामो ममार, भाववादिनश्च ममुः, त्वं पुन र्वदसि, यः
कश्चिन्मम वाक्यमनुपालयति, सोऽनन्तकालं यावन्मृत्युं नास्वाद-
५३ यिष्यतीति। अस्मत्पितुरब्राहामात् त्वं किं महत्तरः? स हि ममार,
५४ भाववादिनोऽपि ममुः, त्वमात्मानं कं कुरुषे? यीशुः प्रत्युवाच,
यद्यहं स्वं सम्मानयामि, तर्हि मम सम्मानः किमपि नास्ति, मम
५५ पितैव मत्सम्मानयिता, स युष्माकमीश्वर इति यूयं वदथ, तथापि
स युष्माकमविदितः, अहन्तु तं जानामि। स ममाविदित इति
चेद् वदेयं, तर्हि युष्माभिः सदृशोऽनृतवादी भविष्यामि। अहं तं
५६ जानामि तस्य वाक्यमनुपालयामि च। युष्मत्पिताब्राहामो मद्दि-
५७ नदर्शनस्याशया प्रमुमुदे तद् दृष्ट्वा चाहृष्यत्। ततो यिहूदीयास्त-
मूचुः, इदानीमपि तव पञ्चाशद्वर्षपरिमितं वयो नास्ति, त्वं
५८ किमब्राहामं दृष्टवान्? यीशुस्तानुवाच, सत्यं सत्यं, युष्मानहं
५९ ब्रवीमि, अब्राहामस्य जन्मनः प्राक्कालमारभ्याहमस्मि। तदा ते
तमाहन्तुं प्रस्तरानाददिरे। यीशुस्तु प्रच्छन्नस्तेषां मध्येन व्रजन्
धर्म्मधामतो निःससारेत्थं स्थानान्तरं जगाम च॥ ८॥

---

९ नवमोऽध्यायः।

१ अन्धाय चक्षुर्दानं ८ तस्माल्लोकानामाश्चर्य्यज्ञानं १३ फरीशिनां समीपमन्धस्य नयनं १८ तस्य पित्रोः कथा २४ फरीशिनां कथा ३५ अन्धस्यापगमनं तस्य ख्रीष्टसाक्षात्कारश्च।

गमनकाले स नरमेकं जन्मान्धं लक्षयामास। तस्य शिष्यास्तदा १
तमप्राक्षुः, रब्बिन्, असौ यदन्धोऽजनि, तादृशं पापं केनाकारि? २
अमुना किं वामुष्य पितृभ्यां? यीशुः प्रत्युवाच, (तादृशं) पापं ३
नामुनाकारि, नापि वामुष्य पितृभ्याम्, प्रत्युतामुष्मिन्नीश्वरस्य
क्रियाभिः प्रत्यक्षीभवितव्यम्। यावद् दिवसोऽस्ति तावन्मत्प्रेषयितुः ४
क्रिया मया कर्त्तव्याः। आयाति सा रात्रि र्यदा कार्य्यं कर्त्तुं
केनापि न शक्यते। अहं यावज्जगति वर्त्ते तावज्जगतो ज्योतिरस्मि। ५
इत्थं भाषित्वा स भूमौ निष्ठीव्य तेन ष्ठीवनेन पङ्कं रचयामास, ६
पङ्केन तस्यान्धस्य चक्षुषी लिप्त्वा च तं जगाद, याहि, शीलोहाख्य- ७
सरस्यास्यं प्रक्षालय च। भाषान्तरे नाम्नोऽस्यार्थः प्रहित इति।
स तदा गत्वास्यं प्रक्षाल्य दृष्टिप्राप्तः प्रत्याजगाम।

तत्प्रतिवेशिवृन्दादयो ये मनुष्याः प्राक् तमन्धं ज्ञात्वालक्षयंस्ते ८
तदाप्राक्षुः, अयं किं न स जनो यः (प्रत्यहम्) आसीनोऽभिक्षत?
अपरेऽवदन्, अयं स एव। अपरे चावदन्, अयं तेन सदृशः। ९
स त्ववादीत्, अहं स एव। ततस्ते तमप्राक्षुः, तव लोचने कथं १०
प्रसन्नीभूते? स प्रतिभाषमाणस्तानवादीत्, यीशुनामा नर एकः ११
पङ्कं कृत्वा मम लोचने लिप्त्वा च मामादिदेश, शीलोहसरो
गत्वास्यं प्रक्षालयेति। ततोऽहं गत्वा प्रक्षाल्य च दृष्टिं प्राप्तवान्।
ते तदा तमप्राक्षुः, स कुत्रास्ति? स आह, न जाने। १२

तदा ते तं पूर्व्वान्धं फरीशिनां समीपमनैषुः। यीशुस्तु यस्मिन् १३
दिने पङ्कं कृत्वा तस्य नेत्रे प्रसन्नीकृतवांस्तद् विश्रामदिनं। फरी- १५
शिनस्तदा तं पुनरप्राक्षुः, कथं त्वया दृक्शक्ति र्लब्धा? स तान्
जगाद, तेन मन्नेत्रयोः पङ्केऽर्पितेऽहमास्यं प्रक्षालितवान्, ततश्च
पश्यामि। फरीशिनः केचित् तदा तमूचुः, नास्ति स नर ईश्वरप्रहितः, १६

यतः स विश्रामवारं नानुपालयति। अपरेऽवदन्, पापी मनुष्य ईदृशान्यभिज्ञानार्थकर्म्माणि कर्त्तुं कथं शक्नोति? इत्थं तेषु भेदो
१७ जातः। ततस्ते तमन्धं पुनरप्राक्षुः, स तव नेत्रे प्रसन्नीकृतवानिति हेतोस्त्वं तमधि किं वदसि? स उवाच, स भाववादीति वदामि।
१८ स यदन्ध आसीत् दृक्शक्तिञ्च प्राप्तवान्, यिहूदीयास्तन्न
१९ सत्यममन्यन्त, ततः शेषे तस्य दृष्टिप्राप्तस्य पितरावाहूय तावप्राक्षुः, अयं युवयोः पुत्रो यो युवयोः प्रमाणादन्धोऽजनि, अधुनायं कथं
२० पश्यति? तत्पितरौ प्रतिभाषमाणौ तानूचतुः, अयमस्मत्पुत्रोऽस्त्य-
२१ न्धोऽजनि च तज्जानीवः, कथन्त्वधुना पश्यति, केन वास्य नेत्रे प्रसन्नीकृते तन्न जानीव आवां। वयःप्राप्तोऽयम्, इममेव पृच्छत,
२२ अयं स्वकथां स्वयं कथयिष्यति। तत्पितरौ यिहूदीयानां भया-द्वेवेत्यमभाषेतां, यतो यः कश्चित् तं ख्रीष्टं मत्वा स्वीकरिष्यति स
२३ समाजभ्रष्टो भविष्यतीति यिहूदीयास्तत्पूर्व्वं निश्चितवन्तः। तत्का-रणात् तस्य पितरावूचतुः, अयं वयःप्राप्तः, इममेव पृच्छतेति।
२४ तदा ते द्वितीयवारं तं पूर्व्वान्धमाहूय जगदुः, ईश्वरस्य
२५ महिमानं स्वीकुरु, वयं जानीमो यत् स नरः पापी। स प्रति-भाषमाणोऽब्रवीत्, स पापी न वेत्यहं न जाने, एकमेव जाने,
२६ पूर्व्वान्धोऽहमिदानीं पश्यामि। ते तं पुनरप्राक्षुः, स त्वां प्रति किं
२७ कृतवान्? कथं तव नेत्रे प्रसन्नीकृतवान्? स तान् प्रत्यवादीत्, पुरा मयोक्ता यूयं नाश्रौष्ट, किमर्थं पुनः श्रोतुमिच्छथ? यूयमपि
२८ किं तस्य शिष्या भवितुं वाञ्छथ? तदा ते तं न्यक्कुर्व्वन्तोऽवादिषुः,
२९ त्वं तस्य शिष्यः, वयं मोशेः शिष्याः। मोशिनेश्वरः संललाप तद्
३० वयं जानीमः, असौ तु कुत उत्पन्नस्तन्न जानीमः। स नरः प्रति-भाषमाणस्तान् जगाद, अत्रेतदेवाश्चर्य्यं, यत् स कुत उत्पन्नस्तद्

युष्माभि र्न ज्ञायते। स हि मम नेत्रे प्रसन्नीकृतवान्, वयञ्च जानीमो ३१
यदीश्वरः पापिनां न शृणोति, प्रत्युत यो मनुष्य ईश्वरभक्तस्तदभीष्ट-
माचरति च तस्यैव शृणोति। जन्मान्धस्य नयने केनापि प्रसन्नीकृते ३२
इत्यायुगान्नाश्रावि। असौ चेदीश्वरप्रहितो नाभविष्यत् तर्हि किमपि ३३
कर्त्तुं नाशक्ष्यत्। ते तं प्रत्यवादिषुः, सर्व्वाङ्गः पापाविष्टोऽजनिष्ठा ३४
यस्त्वं त्वं किमस्मान् शिक्षयसि? इत्युक्त्वा ते तं वहिस्कृः।

स तै र्वहिष्कृत इति श्रुत्वा यीशुस्तमनुसृत्य जगाद, त्वं ३५
किमीश्वरस्य पुत्रे विश्वसिषि? स प्रतिबभाषे, स कः, प्रभो? अहं ३६
तस्मिन् विश्वसानि। यीशुस्तमब्रवीत्, स त्वयादर्शि, त्वया यः ३७
संलपति स एव सः। तेनावादि, विश्वसिमि, प्रभो। इत्युक्त्वा स ३८
प्रणिपत्य तमर्चयामास।

यीशुस्तदा बभाषे, ये न पश्यन्ति ते द्रष्टव्यं, ये च पश्यन्ति ३९
तैरन्धीभवितव्यमिति विचारार्थमहं जगदिदमागतः। तच्छ्रुत्वा ये ४०
केचित् फरीशिनस्तेन सार्द्धमवियन्त ते तमवादिषुः, वयमपि
किमन्धाः? यीशुस्तानाह, यद्यन्धा अभविष्यत, तर्हि निष्पापा ४१
अभविष्यत, युष्माभिस्त्विदानीमुच्यते पश्याम इति, ततो युष्माकं
पापमवतिष्ठते॥ ९॥

---

१० दशमोऽध्यायः।

१ ख्रीष्टेन स्वस्य मेषगृहद्वारस्वरूपस्य दर्शनं ६ तस्य तात्पर्य्यं ११ स्वस्य मेषपालक-
स्वरूपस्य दर्शनं १९ ख्रीष्टेन सह यिहूदीयानां विवादः २२ लोकानामुपदेशः
२९ यर्द्दननद्यास्तटगमनञ्च।

सत्यं सत्यं, युष्मानहं ब्रवीमि, यो न द्वारेण मेषवाटं प्रविश्ये- १
तरोपायेनारोहति स चोरो दस्युश्च, यस्तु द्वारेण प्रविशति स २

३ मेषाणां रक्षकः। तस्य निमित्तं दौवारिको द्वारं मुञ्चति, मेषाश्च
तस्य गिरं शृण्वन्ति, स चैकैकस्य नाम्ना निजमेषानाह्वयति बहि
४ र्नयति च। स च यदा निजस्वान् बहिः करोति, तदा तेषामग्रतो
५ व्रजति, मेषाश्च तमनुगच्छन्ति, यतस्ते तस्य गिरं जानन्ति। पर-
कीयन्तु नैवानुगमिष्यन्ति प्रत्युत तत्समीपात् पलायिष्यन्ते, यतस्ते
परकीयाणां गिरं न जानन्ति।

६ उपमेयं यीशुना तेभ्योऽकथ्यत, ते तु तेन यदुच्यते तन्ना-
७ बुध्यन्त। यीशुस्तदा पुनस्तानुवाच, सत्यं सत्यं, युष्मानहं ब्रवीमि,
८ अहमेव मेषवाटद्वारं। यावन्तो मदग्रत आगतास्ते सर्व्वे चोरा
९ दस्यवश्च, मेषास्तु तेषां नाशृण्वन्। अहं द्वारस्वरूपः। मया यः
प्रविशति, स त्राणं लप्स्यते, स च प्रवेक्ष्यति निर्य्यास्यति च प्रचार-
१० माप्स्यति च। चोरो नान्यकार्य्यार्थमायाति, केवलं चौर्य्यहत्या-
विनाशार्थमेव। मेषास्तु यथा जीवनम् अतिपूर्णताञ्च प्राप्नुयुस्तदर्थ-
महमागतः।

११ अहं स भद्रो मेषरक्षकः। भद्रो मेषरक्षको मेषाणां निमित्तं
१२ स्वप्राणांस्त्यजति। यो वैतनिकस्तु न मेषरक्षकः, मेषाश्च यस्य
निजस्वा न सन्ति, स वृकमागच्छन्तं निरीक्ष्य मेषान् विजहाति
१३ पलायते च। ततो वृकस्तान् हरति मेषान् विकिरति च। वैत-
१४ निकः पलायते, यतो हेतोः स वैतनिको मेषेषु निश्चिन्तश्च। अहं
स भद्रो मेषरक्षको मदीयांश्च जानामि मदीयाश्च मां जानन्ति,
१५ यथा पिता मां जानात्यहञ्च पितरं जानामि। मेषाणां निमित्तं
१६ स्वप्राणांस्त्यजामि च। सन्ति ममैतन्मेषवाटस्थेभ्योऽप्यन्ये मेषाः, तेऽपि
मयानेतव्याः, ते च मम गिरं श्रोष्यन्ति, इत्थं मेषव्रज एको
१७ भविष्यति, मेषरक्षकश्चैकः। एतत्कारणान्मत्पिता मयि प्रेम करोति

यतोऽहं मम प्राणांस्तथा त्यजामि यथा तान् पुन र्ग्रहीष्यामि।
नान्यः कोऽपि मत्तस्तानपहरति, स्वयमहंस्तांस्त्यजामि। तांस्त्यक्तुं १८
मम सामर्थ्यमास्ते, पुनस्तान् ग्रहीतुमपि मम सामर्थ्यमास्ते।
आदेशोऽयं मत्पितृतो मयालम्भि।

एतेभ्यो वाक्येभ्यो यिहूदियेषु पुन र्भेदः सञ्जातः। तेषां मध्ये १९
बहवोऽवदन्, स भूताविष्ट उन्मत्तश्च, किमर्थं तस्य कथां शृणुथ? अन्ये- २०
ऽवदन्, न सन्ति भूताविष्टस्योक्तय इमाः। भूतः किमन्धानां २१
नेत्राणि प्रसन्नीकर्त्तुं शक्नोति?

अथ यिरूशालेमे मन्दिरोत्सर्गपर्व्वाभूत्। तदा हेमन्तकाल २२
आसीत्। एकदा धर्म्मधाम्नि शलोमनोऽलिन्दे विहरन् यीशु र्यिहू- २३
दीयै र्वेष्टितः पृष्टश्च, कति कालमस्मत्प्राणान् संशयारूढान् धारयसि? २४
त्वं चेत् ख्रीष्टस्तर्ह्यस्मान् स्पष्टं वद। यीशुस्तान् प्रत्यवादीत्, यूयमुक्ता २५
मया, न तु विश्वसिथ। मत्पितु र्नाम्नाहं याः क्रियाः करोमि ता २६
एव मामधि साक्ष्यं ददति, यूयन्तु न विश्वसिथ। यूयं हि न
मदीयमेषाणां श्रेण्यां गण्याः। (युष्मानहं तदनुरूपमुक्तवान्।)
मम मेषा मम गिरं शृण्वन्ति, अहञ्च तान् जानामि, ते च मामनु- २७
गच्छन्ति तेभ्योऽहमनन्तं जीवनं ददामि। अनन्तकालेऽपि ते नैव २८
विनंक्ष्यन्ति, मम कराच्च कोऽपि तान् नापहरिष्यति। ते मह्यं येन
दत्ताः स मदीयपिता सर्व्वेभ्यो महत्तरः। मत्पितु र्हस्ताच्च तान- २९
पहर्त्तुं कोऽपि न शक्नोति। अहं पिता चैकं स्वः। यिहूदियास्तदा ३०
पुनस्तमाहन्तुं प्रस्तरानाददिरे। यीशुस्तान् प्रत्यवादीत्, मत्पितुः ३१
सकाशादहं युष्मान् बहूनि हितकर्म्माणि दर्शितवान्, तेषां कस्य ३२
कर्म्मणः कारणान्मां प्रस्तरैराहथ? यिहूदीयाः प्रतिभाषमाणास्त- ३३
मवादिषुः, नैव हितकर्म्मणः कारणात् त्वां प्रस्तरैराहन्मः, प्रत्युतेश्वर-

३४ निन्दाकारणात्, यतस्त्वं मनुष्यः सन्नात्मानमीश्वरं कुरुषे। यीशु-
स्तान् प्रतिजगाद, युष्माकं शास्त्रे किं नेदं लिखितमास्ते, मयोक्त-
मीश्वरा यूयमिति ? स यदि तान् ईश्वरान् अभिहितवान् यान्
३५ प्रतीश्वरस्य वाक्यं प्रादुरभूत्, यदि च शास्त्रस्य लोपो न सम्भवति,
३६ तर्हि पिता यं पवित्रीकृत्य जगति प्रहितवान् सोऽहं कथितवान्
ईश्वरस्य पुत्रोऽस्मीति कारणात् किं मां वदथ त्वमीश्वरं निन्दसीति?
३७ यदि मत्पितुः क्रिया न करोमि तर्हि मयि मा विश्वसित,
३८ यदि तु करोमि, मयि च न विश्वसिथ, तर्हि क्रियासु तथा
विश्वसित, यथा ज्ञास्यथ विश्वसिष्यथ च यन्मयि पिता तस्मिंश्चाहं
स्थितः। तदा ते पुनस्तं धर्त्तुमयतन्त, स तु तेषां हस्ततो
निःससार ।
३९ ततः परं यीशुः पुन र्यर्द्दनपारस्थं तत् स्थानं प्रतस्थे यत्र प्रथमं
४० योहनोऽस्नापयत्, तत्रैवावतस्थे च। बहवस्तु तदन्तिकमागच्छन्न-
४१ वदंश्च, योहनः किमप्यभिज्ञानार्थकर्म्म न कृतवान्, इममधि तु
४२ योहनो यद्यदुक्तवांस्तत् सर्व्वं सत्यमासीत्। बहवस्तु तत्र तस्मिन्
व्यश्वसिषुः ॥ १० ॥

---

११ एकादशोऽध्यायः ।

१ लासारस्य पीडितत्वं ७ तन्निकटे खीष्टस्य गमनं १७ तस्य भगिनीभ्यां सार्द्धं खीष्टस्य कथनं तस्योत्थापनञ्च ४७ महायाजकफरीशिनां विपक्षत्वकरणं ५५ निस्तारोत्सवे तं धर्त्तुं चेष्टा च।

१ अथ बैथनियानिवासी लासाराभिधः कश्चिन्नरो व्याधित
आसीत्। बैथनिया मरियमस्तस्या भगिन्या मार्थायाश्च ग्राम
२ आसीत्। मरियम् सा योषिद् या सुगन्धितैलेन प्रभुं समलीलिपत्

स्वकचैश्च तच्चरणौ पर्य्यमार्ज्जीत्। तस्या एव भ्राता लासारो व्याधित
आसीत्। अतस्तस्य भगिन्यौ दूतं प्रहित्य तस्मै निवेदयामासतुः, ३
प्रभो, पश्यतु, भवान् यस्मिन् प्रेम करोति स व्याधितः। यीशुस्तु
तच्छ्रुत्वाब्रवीत्, व्याधिरयं न मृत्यवे प्रत्युतेश्वरस्य महिमार्थः, ४
ईश्वरस्य पुत्रो यथा तेन महीयेत। यीशु र्मार्थायां तस्या भगिन्यां ५
[मरियमि] लासारे च प्रेमाकरोत्। स तु यत्राविद्यत तत्र ६
तद्व्याधिसंवादश्रवणात् परमपि दिनद्वयमवतस्थे।

ततः परन्तु स स्वशिष्यानवादीत्, पुन र्यिहूदिया गम्यतामस्माभिः। ७
शिष्यास्तं वदन्ति, रब्बिन्, दिनेऽमुष्मिन् यिहूदीयाः प्रस्तराघातेन ८
भवन्तं मारयितुमयतन्त, भवांश्च किं पुनस्तत्र गच्छति? यीशुः ९
प्रतिबभाषे, दिवसे किं न द्वादश घटिका भवन्ति? दिवा यः
परिव्रजति स न स्खलति, यतः स जगतोऽस्य ज्योतिः पश्यति, १०
निशायान्तु यः परिव्रजति स स्खलति, यतो ज्योति र्न
तदन्तःस्थं।

एतत्कथनात् परं स तानब्रवीत्, अस्मद्बन्धु र्लासारः स्वपिति, ११
तं जागरयितुन्तु गच्छामि। शिष्यास्तदा तमूचुः, प्रभो, स यदि १२
स्वपिति, तर्हि तरिष्यति। यीशुस्तस्य मृत्युमुद्दिश्य कथितवान्, ते १३
त्वमन्यन्त, स निद्रारूपस्वपनमुद्दिश्य कथयतीति। अतएव यीशु- १४
स्तदा तान् स्पष्टमब्रवीत्, लासारो ममार, यूयञ्च विश्वसिष्यथेति
बुद्ध्वा युष्मदर्थं तत्र मदनुपस्थितत्वादहं हृष्यामि। तद्यथा तथास्तु, १५
तत्समीपं गम्यतां। तदा थोमा अर्थतो दिदुमो [जमकः] सह- १६
शिष्यान् जगाद, अस्माभिरपि गम्यतां, तेन सार्द्धं यथा मरिष्यामः।
इत्थं यीशु र्यदागमत् तदाजानाद्, यदादिनचतुष्टयात् स [लासारः] १७
श्मशानागारे शेते। बैथनिया च यिरूशालेमस्य समीपस्था प्रायेण १८

१९ क्रोशैकदूरासीत्, बहवो यिहूदीयाश्च मार्थामरियमो र्भ्रातृशोक-
सान्त्वनार्थं तयो र्गृहमागतवन्तः।
२० मार्था तदा यीशोरागमनसंवादं श्रुत्वैव तं प्रत्युज्जगाम, मरियम्
२१ तु गृह आसीनावातिष्ठत। मार्था तदा यीशुमवादीत्, प्रभो,
२२ भवान् यद्यत्रास्थास्यत्, तर्हि मम भ्राता नामरिष्यत्; जाने
लघुनापि भवान् ईश्वरं यद्यत् प्रार्थयिष्यते, तदीश्वरेण भवते
२३ दायिष्यते। यीशुस्तां ब्रूते, तव भ्राता पुनरुत्थास्यति। मार्था तं
२४ ब्रूते, अन्तिमदिने पुनरुत्थाने स उत्थास्यतीति जाने। यीशुस्ता-
२५ मुवाच, अहं पुनरुत्थानं जीवनञ्च। मयि यो विश्वसिति स मृत्वापि
२६ जीविष्यति, यः कश्चिच्च जीवति मयि विश्वसिति च, सोऽनन्तकाले-
२७ ऽपि नैव मरिष्यति। अत्र त्वं किं विश्वसिषि? सा तं ब्रवीति,
तथैव, प्रभो। जगति येनागन्तव्यम् ईश्वरस्य पुत्रः स खीष्टो भवा-
२८ नेवेति विश्वासो मयाकारि। इत्युक्त्वा सापजगाम, गुप्तञ्च स्वभगिनीं
मरियममाहूयन्ती तामाह, गुरुरुपस्थितोऽस्ति त्वामाह्वयति च।
२९ सा तच्छ्रुत्वैव सत्वरमुत्थाय तदन्तिकमायाति। यीशुस्तदापि ग्रामं
३० न प्रविष्टवान्, मार्था यत्र तं प्राप्तवती तत्रैवासीत्। ततो मरियमा
३१ सार्द्धं गृहे विद्यमाना ये यिहूदीयास्तामसान्त्वयंस्ते तां सत्वर-
मुत्तिष्ठन्तीं निर्गच्छन्तीञ्च दृष्ट्वा, सा रोदितुं शवागारं यातीत्युक्त्वा
३२ च तामनुजग्मुः। यीशुस्तु यत्रासीत् मरियम् तत्रोपस्थाय तं
दृष्ट्वा च तच्चरणयोः प्रणिपत्योवाच, प्रभो, भवान् यद्यत्रास्थास्यत्,
३३ तर्हि मम भ्राता नामरिष्यत्। तदा यीशुस्तां रुदतीं तया
सार्द्धमागतान् यिहूदीयांश्चापि रुदतो विलोक्यात्मन्यधैर्य्यं गत्वा
३४ संक्षुभ्य च पप्रच्छ, स युष्माभिः कुत्र शायितः? ते तं वदन्ति, प्रभो,
३५ एत्य निरीक्षतां। यीशुरश्रूण्यमुञ्चत्। ततो यिहूदीया अवदन्,

पश्यत, स तस्मिन् कीदृक् प्रेमाकुरुत। तेषां केचित्त्वाऊः, तस्यान्धस्य ३६
नेत्रे प्रसन्नीचकार योऽसौ सोऽसौ किमस्य मृत्युं निवारयितुमपि ३७
समर्थो नासीत्? यीशुस्तदान्तरे पुनरधैर्य्यं गत्वा श्मशानागारसमीप- ३८
मागच्छति। तद् गुहाकारं पाषाणेनापिहितञ्चासीत्। यीशु ३९
र्ब्रवीति, तं पाषाणमपसारयत। तस्य मृतस्य भगिनी मार्था तं
वदति, प्रभो, इदानीं स पूयते, यत आचतुर्भ्यो दिनेभ्यः स मृतः।
यीशुस्तां ब्रवीति, त्वं यदि विश्वसिषि, तर्हीश्वरस्य महिमानं ४०
द्रक्ष्यसीति किं नोक्ता मया? ततः स मृतो यत्राश्येत, तत्र स्थितः ४१
पाषाणस्तैरपसारितः। यीशुश्चोर्द्ध्वदृष्टिं कृत्वा व्याजहार, पितः,
त्वामहं धन्यं वदामि, यतस्त्वं मे श्रुतवान्। त्वं सर्व्वदा मे शृणोषि ४२
तदजानाम् अपि त्वयाहं यत् प्रहितस्तच्चैते विश्वसिष्यन्तीति बुद्ध्वा
परितः स्थितस्य जननिवहस्य कारणादिदं मयोदाहारि। इदमुक्ता ४३
स प्रोच्चैः क्रोशन् व्याजहार, लासार, वहिरागच्छ। तदा स मृतो ४४
वहिरागमत्, स च दीर्घवस्त्रखण्डैर्बद्धचरणहस्तः स्वेदहरवस्त्रेण
वेष्टितमुखश्चासीत्। यीशुस्तान् ब्रवीति, बन्धनानि मुक्त्वेमं गन्तुमनु-
जानीत। तदा मरियमः समीपमागता बहवो यिहूदीया यीशुना ४५
यद्यदकारि तद् दृष्ट्वा तस्मिन् व्यश्वसिषुः, केचित्तु फरीशिनामन्तिकं ४६
गत्वा यीशुना यद्यदकारि तत् तेभ्यो निवेदयामासुः।

ततो मुख्ययाजकाः फरीशिनश्च मन्त्रिसभां समाहूयावादिषुः, ४७
किं करवाम? स नरो बह्वन्यभिज्ञानार्थकर्म्माणि करोति। यदि ४८
तस्य वृत्तिमित्थं सहामहे, तर्हि सर्व्वे तस्मिन् विश्वसिष्यन्ति, रोमी-
याश्चागत्यास्माकं स्थानञ्च प्रजावृन्दञ्च हरिष्यन्ते। तेषां मध्ये गणित- ४९
स्त्वेको नरोऽर्थतो यः कायाफास्तस्य संवत्सरस्य महायाजक आसीत्
स तदा तानुवाच, यूयं किमपि न जानीथ नापीदं तर्कयथ, यत्

५० प्रजावृन्दस्य निमित्तमेकस्य मरणमस्मद्धितकरं, न च कृत्स्नस्य प्रजा-
५१ वृन्दस्य विनाशः। एतत् तेन न स्वतो व्याहारि, प्रत्युत स तस्य
संवत्सरस्य महायाजक आसीत्, तत्कारणात् तेन भावोक्तिरियं
५२ व्याहारि यत् प्रजावृन्दस्य निमित्तं यीशुना मर्त्तव्यं, नापि च
केवलं तस्य प्रजावृन्दस्य निमित्तं, प्रत्युत विकीर्णानाम् ईश्वर-
५३ सन्तानानाम् एकत्र सङ्ग्रहणार्थमपि। तद्दिनमारभ्य ते तस्य वधार्थम्
५४ अमन्त्रयन्त। अतएव यीशु र्न पुनः सप्रकाशं यिहूदीयानां मध्ये
पर्य्यटत्, प्रत्युत तस्मात् स्थानान्मरुसमीपस्थम् इफ्रयिमाख्यं ग्रामं
प्रस्थाय स्वशिष्यैः सार्द्धं तत्रैवावर्त्तत।
५५ तदा यिहूदीयानां निस्तारोत्सव आसन्न आसीत्, बहवो
मनुष्याश्च शुचित्वसाधनार्थं निस्तारोत्सवात् प्राक् जनपदाद् यिरू-
५६ शालेमं जग्मुः। ते तदा यीशुमगवेषयन् धर्म्मधाम्नि स्थित्वा च
मिथोऽवदन्, किं मन्यध्वे, स किमुत्सवे नैवोपस्थास्यत इति।
५७ मुख्ययाजकाः फरीशिनश्च तं धर्त्तुमिच्छन्त आज्ञामपि दत्तवन्तः,
यथा स कुत्र वर्त्तते तत् स्थानं यो वेत्ति स तत् सूचयेदिति॥११॥

---

१२ द्वादशोऽध्यायः।

१ यीशोश्चरणयो र्मरियमा तैलमर्द्दनं ९ लासारं द्रष्टुं बहुलोकानामागमनं १२ ख्रीष्टस्य यिरूशालेमगमनं २० ख्रीष्टसमीपेऽन्यदेशीयानामागमनं २७ ख्रीष्टस्य निजनिधनस्य भविष्यद्वाक्यं ३७ अल्पलोकै र्विश्वसनं ४४ ख्रीष्टस्योपदेशश्च।

१ ततो यीशु र्निस्तारोत्सवात् षट् दिनानि प्राग् बैथनिया-
यामुपतस्थे। यो मृतो लासारस्तेन मृतानां मध्यादुत्थापितः स
२ तत्रासीत्। तत्र च तस्य निमित्तं रात्रिभोज्यमकारि, मार्था तत्र
३ पर्य्यचरत्, लासारश्च तत्सहभोजिनामेक आसीत्। तदा मरियम्

अर्द्धसेटकं बज्रमूल्यं प्रकृतं जटामांसीरसयुक्तं सुगन्धितैलमादाय
यीशोश्चरणौ समलेपयत् स्वकचैश्च तौ चरणौ पर्य्यमार्ज्जीत्, कृत्स्नं
गृहञ्च तस्य तैलस्य सौरभ्येण पर्य्यपूर्य्यत। तदा तच्छिष्याणामे- ४
कोऽर्थतः शिमोनसुतो य ईष्करियोतीयो यिहूदास्तत्समर्पयिता-
भूत्, स ब्रवीति, सुगन्धितैलमिदं किमर्थं न त्रिभिः शतै र्मुद्रापादै ५
र्विक्रीतं दरिद्रेभ्यो दत्तञ्च? न दरिद्राणां हितचिन्तनकारणात् ६
तेनेदमकथ्यत, प्रत्युत स चौरः सम्पुटवाही चासीत् सम्पुटे च यद्यन्न्य-
क्षिप्यत तदहरत् तत्कारणादेव। यीशुस्तदाब्रवीत्, अमूमनुजानीहि, ७
मत्समाधिदिनार्थं तयेदं रक्षितं। दरिद्रा हि सततं युष्मत्सङ्गिनः, ८
अहन्तु न सततं युष्मत्सङ्गी।

अथ यीशुस्तत्रास्तीति ज्ञात्वा यिहूदीयानां महान् जननि- ९
वहस्तत्रोपतस्थे, न केवलं यीशोः कारणात्, प्रत्युत मृतानां मध्यात्
तेनोत्थापितस्य लासारस्यापि दिदृक्षया। मुख्ययाजकास्तु लासा- १०
रस्यापि हत्यार्थं मन्त्रयाञ्चक्रिरे, यतस्तस्य कारणाद् बहवो ११
यिहूदीया गत्वा यीशौ व्यश्वसन्।

अथ परदिने यीशु र्यिरूशालेममायातीति श्रुत्वा पर्व्वार्थ- १२
मागतो महान् जननिवहः खर्ज्जूरपल्लवानादाय यीशोः प्रत्युद्गमनार्थं १३
निर्ययावुच्चैरवदच्च, जय, प्रभो र्नाम्ना य आयाति धन्यः स
इस्रायेलस्य राजा। यीशुस्तु युवगर्द्दभं प्राप्य तत्पृष्ठ उपविवेश, १४
यथा लिखितमास्ते,

मैवानुभूयतां त्रासो भोः सीयोनसुते त्वया। १५
पश्य राजा तवायात्यासीनो गर्द्दभशावके॥

सर्व्वमेतत् तस्य शिष्यैः प्रथमं नाबोधि, यीशोस्तु महिमप्राप्तेः १६
परं ते सस्मरु र्यत् तमधि कथेयं लिखितासीत् तं प्रतीत्यमकारि

१७ चेति। यीशु र्यल्लासारं श्मशानागारान्निर्गमनार्थमाहूतवान् मृतानां
मध्यादुत्थापितवांश्चेति साक्ष्यं तस्य तदानीन्तनसङ्गिनिवहेनादीयत।
१८ एतत्कारणादेवार्थतः स तद् अभिज्ञानार्थकर्म्म कृतवानितिकथा-
१९ श्रवणकरणादेव जननिवहस्तं प्रत्युज्जगाम। फरीशिनस्तदा परस्पर-
माहुः, युष्माकं सर्व्वयत्नो व्यर्थस्तद् विलोकयथ, जगदेव तस्य
पश्चाद् अपगतम्।
२० पर्व्वण्युपासनार्थं ये आगमंस्तेषां मध्ये कतिपया यूनानीया
२१ नरा आसन्। ते तदा गालीलस्थबैतसैदानिवासिनं फिलिपमभिगम्य
२२ प्रार्थयाञ्चक्रिरे, प्रभो, वयं यीशुं दिदृक्षामहे। फिलिप आगत्या-
न्द्रियं तद् वदति। पुनरान्द्रियफिलिपौ यीशवे निवेदयतः।
२३ यीशुस्तु प्रतिभाषमाणस्ताववादीत्, मनुष्यपुत्रस्य महिमप्राप्तेः
२४ समय उपस्थितः। सत्यं सत्यं, युवामहं ब्रवीमि, गोधूमबीजं चेन्न
मृत्तिकायां पतित्वा म्रियते, तर्ह्येकं तिष्ठति, यदि तु म्रियते,
२५ तर्हि बहु फलं फलति। यः स्वप्राणेषु प्रेम कुरुते, स तान्
हारयिष्यति, यस्त्विहलोके तान् प्रति विरज्यते, सोऽनन्तजीवनाय
२६ तान् रक्षिष्यति। कश्चिन्मनुष्यो यदि मां परिचरितुं स्वीकरोति, तर्हि
मामनुगच्छतु, तथा सत्यहं यत्रास्मि मम परिचारकोऽपि तत्रैव
स्थास्यति। यश्च कश्चिन्मां परिचरति, मम पिता तं सम्मानयिष्यति।
२७ अधुना तु मम प्राणा उद्विग्ना जाताः, अत्र किं वदानि?
पितः, दण्डादस्मान्मां तारय। प्रत्युतैतदर्थमहं दण्डमिमं यावदा-
२८ गतवान्। पितः, तव नाम महिमान्वितं कुरु। तदा गगनादियं
वाणी सञ्जाता, तन्मया महिमान्वितमकारि पुनश्च महिमान्वितं
२९ कारिष्यत इति। तत्र स्थितो जननिवहस्तदा श्रुत्वाब्रवीत्, मेघनादो
जात इति। अन्येऽवदन्, कश्चित् स्वर्गदूतोऽनेन सम्भाषतेति।

यीशुस्तु प्रतिभाषमाणोऽब्रवीत्, न मदर्थं, किन्तु युष्मदर्थं वाणीयं ३०
समभूत्। अधुना जगतोऽस्य विचारः साध्यते, अधुना जगतो- ३१
ऽस्याधिपति र्वहि र्निक्षेप्स्यते। अहञ्च चेत् भूतलादुच्चीकृतो ३२
भवामि, तर्हि सर्व्वान् मदन्तिकमाकर्ष्यामि। स कीदृशं मृत्युं ३३
सहिष्यते वचनेनैतेन तदसूचयत्। ततो जननिवह उवाच, व्यवस्था- ३४
पाठेन वयं श्रुतवन्तो यत् ख्रीष्टेन शाश्वतं स्थातव्यं, तद् भवान्
कथं ब्रूते, मनुष्यपुत्र उच्चीकर्त्तव्य इति? स मनुष्यपुत्रः कः?
यीशुस्तदा तानवादीत्, इतः परं ज्योतिः स्तोकं कालं युष्माभिः ३५
सार्द्धं विद्यते। ततो यावज्ज्योतिस्तिष्ठति तावत् परिव्रजत,
नोचेदन्धकारेणावेक्ष्यध्वे। अन्धकारे यः परिव्रजति स कुत्र
गच्छति तन्न जानाति। यावद् युष्माकं ज्योतिरास्ते तावज्ज्योतिषि ३६
तथा विश्वसित यथा ज्योतिषः पुत्रा भविष्यथ। एतानि वचनानि
यीशुस्तेभ्यः कथयामास, ततः परमपगत्य तेभ्यः प्रच्छन्नो बभूव।

यद्यपि स तेषां समक्षमेतावन्त्यभिज्ञानार्थकर्म्माणि कृतवांस्तथापि ३७
ते तस्मिन् न व्यश्वसन्। इत्थं भाववादिनो यिशायाहस्यैतद् वचनं ३८
सिद्धिं गतं,

अस्मत्प्रचारितसंवादे विश्वासं कोऽकरोत् प्रभो।
परमेशस्य बाहुर्वाभूत् कस्मै सम्प्रकाशितः॥

एतत्कारणात् ते विश्वसितुं नाशक्नुवन्, यतो यिशायाहः पुन- ३९
रिदमपि व्याहृतवान्,

तेषां नेत्राणि सोऽन्धानि चित्तं स्थूलं चकार च। ४०
नोचेत् ते लोचनै र्दृष्ट्वा चित्तै र्बुद्धिमवाप्य च।
परावृत्ता भविष्यन्ति मोक्षव्याश्चामयान्मया॥

यिशायाहस्तस्य प्रतापमपश्यत् तत इदं व्याहार्षीत्, तमेवोद्दिश्य स ४१

४२ बभाषे। तथापि नायकानामपि बहवस्तस्मिन् व्यश्वसिषुः, फरीशिनां
कारणात्तु तं न स्वीकृतवन्तः, समाजभ्रष्टा भविष्याम इति
४३ भयात्। यत ईश्वरदत्तगौरवात् ते मानवदत्तं गौरवं प्रेयो-
ऽमन्यन्त ।
४४ अपि तु यीशुरुच्चैःस्वरेण व्याहृतवान्, यो मयि विश्वसिति,
४५ स न मयि विश्वसित्यपि तु मत्प्रेषयितरि। यश्च मां निरीक्षते
४६ स मत्प्रेषयितारं निरीक्षते। अहं ज्योतिःस्वरूपो जगदागतवान्,
४७ यः कश्चिन्मयि विश्वसिति स यथा तिमिरे न स्थास्यति। यश्च
कश्चिन्मम वचांसि श्रुत्वा न विश्वसिति तस्य विचारो मया न
क्रियते, यस्मान्न जगतो विचारं कर्त्तुमागतोऽहं, प्रत्युत जगत्
४८ तारयितुमेव। यो मां निराकरोति मम वचांसि न गृह्णाति
च तस्य विचारयितास्ते। मया कथितं वाक्यमेवान्तिमदिने तस्य
४९ विचारं करिष्यति। यतोऽहं न स्वतः कथितवान्, प्रत्युत मया
किं कथयितव्यं किञ्च भाषितव्यं, तन्निरूपिकाज्ञा मत्प्रेषयित्रा
५० पित्रा मह्यमदायि। तस्याज्ञा च यद् अनन्तजीवनावहा तदहं
जानामि। अतोऽहं यद् भाषे तत् पित्रा यथोक्तस्तथैव भाषे॥१२॥

---

१३ त्रयोदशोऽध्यायः ।

१ ख्रीष्टेन स्वशिष्याणां चरणक्षालनं १२ तस्य तात्पर्य्यं २१ यिहूदा विश्वासघाती भविष्यतीति ज्ञापनं ३१ शिष्येभ्यः ख्रीष्टस्योपदेशः ३६ पितरस्यानङ्गीकारज्ञापनञ्च।

१ अथ निस्तारोत्सवात् प्राग् यीशु र्यदा जगतोऽस्मात् पितु-
रन्तिकमात्मगमनस्य समयमुपस्थितमजानात् तदा जगति स्थितान्
यान् निजस्वान् प्रति प्रेम कृतवांस्तान् प्रत्यन्तं यावत् प्रेमाकुरुत।
२ अपि च शत्रुषु तत्समर्पणस्य वीजे दियावलेन शिमोनसुतस्येष्करि-

योतीयस्य यिहूदा हृदि निक्षिप्ते सति यदा रात्रिभोज्यमभवत्,
तदा सर्व्वं पित्रा मत्करयोः समर्पितमहञ्चेश्वरसकाशादागत ईश्वर- ३
समीपं गन्तुमुद्यतश्चेति ज्ञात्वा यीशु र्भोज्यादुत्तस्थौ स्ववसनानि ४
मोचयित्वा च गात्रमार्ज्जनवस्त्रमादाय तेन स्वकटिं बबन्ध।
ततः परं प्रक्षालनपात्रे तोयं निधाय शिष्याणां चरणान् प्रक्षाल- ५
यितुं स्वकटौ निबद्धेन मार्ज्जनवस्त्रेण मार्ज्जयितुञ्चारेभे। इत्थं ६
स यदा शिमोनपितरस्य समीपमागच्छत् तदा स तमवादीत्,
प्रभो, भवान् किं मम चरणौ प्रक्षालयेत्? यीशुः प्रतिभाष- ७
माणस्तमुवाच, मया यत् क्रियते, त्वया तदिदानीं न ज्ञायते,
इतः परन्तु ज्ञायिष्यते। पितरस्तं ब्रूते, भवान् अनन्तकालेऽपि ८
नैव मच्चरणौ प्रक्षालयिष्यति। यीशुस्तं प्रत्यब्रवीत्, यद्यहं त्वां
न प्रक्षालयामि, तर्हि मया सार्द्धं तवांशित्वं न भवति। शिमोनः ९
पितरस्तं वदति, तर्हि न केवलं मम चरणौ, प्रत्युत करौ शिर-
श्चापि [प्रक्षालयतु]। यीशुस्तं ब्रूते, यः स्नातः केवलं चरणयोः १०
प्रक्षालनं तस्यावश्यकं स हि सर्व्वाङ्गः शुचिः। यूयमपि शुचयः
स्थ, न तु सर्व्वे। यतो यीशुः स्वसमर्पयितारमजानात्, तत्का- ११
रणाज्जगाद, न सर्व्वे यूयं शुचयः।

इत्थं तेषां चरणान् प्रक्षाल्य स स्ववसनान्यादद्दे, पुन र्भोजना- १२
योपविश्य च तानवादीत्, युष्मान् प्रति मया यदकारि तत्
किं जानीथ? युष्माभिरहं गुरुः प्रभुश्चेत्यभिधीये, तच्च भद्रं १३
कथ्यते, यतोऽहं स एवास्मि। अतः प्रभु र्गुरुश्च योऽहं, सोऽहं १४
यदि युष्मच्चरणान् प्रक्षालितवांस्तर्हि परस्परं चरणप्रक्षालनं युष्मा-
भिरपि कर्त्तव्यं। यतोऽहं युष्मान् प्रति यादृशं कृतवान् तादृशं १५
कर्म्म यूयमपि यत् करिष्यथ, तदर्थं युष्मान् दृष्टान्तं दर्शितवान्।

१६ सत्यं सत्यं, युष्मानहं ब्रवीमि, नास्ति दासः स्वप्रभुतो महत्तरो
१७ नापि वा प्रेरितः प्रेषयितु र्महत्तरः। यद्येतत् सर्व्वं जानीथ
१८ तर्हि तदाचरन्तो धन्या भविष्यथ। न सर्व्वान् युष्मानधीदं मया
कथ्यते। अहं यान् वरितवांस्तान् जानामि, अपि त्वनेन शास्त्रीय-
वचनेन सिद्धेन भवितव्यं,

——————यः पूपाशी मया सह।
सोऽपि मत्प्रातिकूल्येन पार्ष्णिक्षेपं चकार ह॥

१९ इदानीमेव सिद्धेः प्राग् यूयमुच्यध्वे मया, सिद्धिकाले यथा
२० विश्वसिष्यथ यदहं सोऽस्मि। सत्यं सत्यं, युष्मानहं ब्रवीमि, यो
मया प्रहितं नरं गृह्णाति स मां गृह्णाति, माञ्च यो गृह्णाति
स मत्प्रेषयितारं गृह्णाति।

२१ इदमुक्त्वा यीशुरात्मन्युदविजत, साक्ष्यञ्च ददत् कथयामास,
सत्यं सत्यं, युष्मानहं ब्रवीमि, युष्माकमेको मां शत्रुषु समर्प-
२२ यिष्यति। ततः स कमधि भाषते तत्र सन्दिहानाः शिष्याः
२३ परस्परमालोकयन्। तदीयशिष्याणामेकस्त्वर्थतो यो यीशोः प्रियः
२४ स तस्य क्रोडमालम्ब्यासीन आसीत्। शिमोनः पित्रः सङ्केतेन
तमेवेदमादिशत्, यत् कमुद्दिश्य यीशु र्भाषते, तत् तेन पृष्ट्वा
२५ वक्तव्यं। ततः स यीशो र्वक्षसि शिरो निपात्य तं वदति, प्रभो,
२६ स कः? यीशुः प्रत्यवादीत्, अहं [सूपे] पूपखण्डं मज्जयित्वा
यस्मै दास्यामि स एव सः। ततः स पूपखण्डं मज्जयित्वा शिमोन-
२७ सुतायेष्करियोतीयाय यिहूदे ददौ। तस्मात् पूपखण्डात् परं
शैतानस्तं प्राविक्षत्। यीशुस्तदा तमाह, त्वं यत् करोषि तत्
२८ सत्वरमेव कुरु। किमुद्दिश्येदं तेनाकथ्यत, तद् भोजनायासीनानां
२९ केनापि नाज्ञायत। स हि यिहूदाः स्वेलसम्पुटवाहक आसीत्,

तस्मात् कैश्चिदन्वमीयत, यीशुस्तमुत्सवार्थमस्मत्प्रयोज्यानि द्रव्याणि
क्रेतुं किंवा दरिद्रेभ्यः किञ्चिद् दातुमाज्ञापयतीति। स तु तं ३०
पूपखण्डं गृहीत्वा सपदि निश्चक्राम। तदा रात्रिरासीत्।

तस्मिन् निष्क्रान्ते यीशुरुवाच, इदानीं मनुष्यपुत्रो महि- ३१
मान्वितोऽभूत्, ईश्वरश्च तस्मिन् महिमान्वितोऽभूत्। तस्मिंश्चे- ३२
दीश्वरो महिमान्वितोऽभूत्, तर्हीश्वरोऽपि स्वस्मिंस्तं महिमान्वितं
करिष्यति, सत्वरमेव करिष्यति। वत्साः, युष्माभिः सार्द्धमहमितः ३३
परं स्तोकं कालं स्थास्यामि। यूयं मां गवेषयिष्यथ, यथा तु
यिहूदीयानहमुक्तवांस्तथाधुना युष्मानपि वच्मि, अहं यत् स्थानं
गच्छामि तत्रोपस्थातुं युष्माभि र्न शक्यं। नवीनामेकामाज्ञां युष्मभ्यं ३४
ददामि, यद् युष्माभिः परस्परं प्रेम कर्त्तव्यं। यथा युष्मान् प्रति मयै-
तदर्थं प्रेमाकारि यद् यूयमपि परस्परं प्रेम करिष्यत। यदि परस्परं ३५
प्रेमाचरथ, तर्ह्यनेन सर्व्वे ज्ञास्यन्ति यद् यूयं मम शिष्या इति।

शिमोनः पितरस्तं ब्रवीति, प्रभो, कुत्र याति भवान्? यीशुस्तं ३६
प्रत्युवाच, यत्र गच्छामि, तत्रेदानीं मामनुगन्तुं न शक्नोषि, पश्चात्
त्वनुगमिष्यसि। पितरस्तं ब्रूते, किमर्थमधुनैव भवन्तमनुयातुं न ३७
शक्नुयां? भवदर्थमहं प्राणांस्त्यक्ष्यामि। यीशुः प्रतिबभाषे, मदर्थं ३८
त्वं किं प्राणांस्त्यक्ष्यसि? सत्यं सत्यं, त्वामहं ब्रवीमि, त्वं यावन्न
त्रिकृत्वो मां निह्नोष्यसे तावत् कुक्कुटो न रविष्यति॥१३॥

---

१४ चतुर्द्दशोऽध्यायः।

१ शिष्याणां सान्त्वनं ८ तस्य पितुरैक्यं १५ सहायं तेषां समीपे प्रेरयितुं प्रतिज्ञा २५ प्रस्थानीया कथा च।

युष्माकं हृदयं मैवोद्विजताम्, ईश्वरे विश्वसित, मय्यपि १

२ विश्वसित। मम पितु र्निकेतने बहवो वासाः सन्ति। नोचेद्
युष्मभ्यमकथयिष्यं। युष्मदर्थं हि स्थानं सज्जीकर्त्तुं गच्छामि।
३ यदि च गत्वा युष्मदर्थं स्थानं सज्जीकरोमि, तर्हि पुनरागत्य
मत्समीपं युष्मान् ग्रहीष्यामि, यत्राहं वर्त्ते तत्र यूयमपि यथा
४ वर्त्तिष्यध्वे। यत् स्थानमहं गच्छामि तद् यूयं जानीथ, पन्थान-
५ मपि जानीथ। थोमास्तं ब्रूते, प्रभो, भवान् किं स्थानं गच्छति,
६ तन्न जानीमः, कथं तर्हि पन्थानं ज्ञातुं शक्नुयाम? यीशुस्तं
वदति, अहमेव पन्थाः सत्यञ्च जीवनञ्च, नान्येनोपायेन मनुष्यः
७ पितुः समीपमायाति, केवलं मया। माञ्चेदज्ञास्यत, तर्हि मत्पि-
तरमप्यज्ञास्यत। अधुनारभ्य च तं जानीथ, तं दृष्टवन्तश्च।
८ फिलिपस्तदा तं ब्रवीति, प्रभो, दर्शयत्वस्मभ्यं पितरम् अस्म-
९ दर्थं तत् पर्य्याप्तं भविष्यति। यीशुस्तमवादीत्, एतावत्कालं
यावदहं युष्माभिः सार्द्धं वर्त्ते, फिलिप, तथापि त्वं मां किं न
जानासि? मां यो दृष्टवान् स पितरं दृष्टवान्। अतः कथं
१० वदसि, दर्शयत्वस्मभ्यं पितरमिति? त्वं किमिदं न विश्वसिषि
यदहं पितरि, पिता च मयि स्थितः? युष्मभ्यमहं यानि वचांसि
कथयामि तानि न स्वतः कथयाम्यपि तु मय्यवस्थितः पितैव
११ कर्म्माणि करोति। मयि विश्वसित यदहं पितरि पिता च मयि
१२ स्थितः। नोचेत् कर्म्मणां कारणाद् विश्वसित। सत्यं सत्यं, युष्मानहं
ब्रवीमि, मयि यो विश्वसिति, मया क्रियमाणानि कर्म्माणि
तेनापि कारिष्यन्ते, तेभ्यो महत्तराणि च कारिष्यन्ते, यतो हेतो-
१३ रहं मत्पितुः समीपं गच्छामि, युष्माभिश्च मम नाम्ना यत् किमपि
प्रार्थयिष्यते तत् करिष्यामि, पुत्रे पिता यथा महिमान्वितो भवि-
१४ ष्यति। यदि मम नाम्ना किञ्चन प्रार्थयध्वे तर्ह्यहं तत् करिष्यामि।

यदि मां प्रति प्रेम कुरुथ, तर्हि ममाज्ञा अनुपालयत, १५
ततोऽहं पितरं याचिष्ये, स च युष्मभ्यमन्यमेकं शान्तिकर्त्तारं १६
दास्यति युष्माभिः सार्द्धं येन शाश्वतं स्थातव्यं, तं सत्यस्वरूपमा- १७
त्मानं दास्यति यो जगता ग्रहीतुं न शक्यते, यतः स तेन न
दृश्यते नापि वा ज्ञायते। युष्माभिस्तु स ज्ञायते, यतः स
युष्मत्समीपमवतिष्ठते युष्मदन्तश्च वर्त्तिष्यते। न परित्यक्ष्यामि १८
युष्मान् अनाथान्, अहं युष्मदन्तिकमागच्छामि। स्तोके काले १९
व्यतीते जगन्मां पुन र्न द्रक्ष्यति, यूयन्तु द्रक्ष्यथ, यतोऽहं जीवामि
[ततश्च] यूयमपि जीविष्यथ। तस्मिन् दिने यूयं ज्ञास्यथ, यदहं २०
मत्पितरि स्थितो यूयञ्च मयि स्थिता अहञ्च युष्मासु स्थितः।
यो ममाज्ञाः प्राप्तवांस्ता अनुपालयति च स एव मयि प्रेमकारी। २१
यश्च मयि प्रेमकारी स मम पितुः प्रेमपात्रं भविष्यति, अहञ्च
तं प्रति प्रेम करिष्यामि स्वं तत्प्रत्यक्षीकरिष्यामि च। ईष्करियो- २२
तीयादन्यो यिहूदास्तदा तं ब्रूते, प्रभो, कथमेतद् यद् भवान् स्वं
जगतः प्रत्यक्षं न कृत्वास्मत्प्रत्यक्षं करिष्यति? यीशुः प्रतिभाष- २३
माणस्तमाह, कश्चिद् यदि मां प्रति प्रेम करोति तर्हि मम
वाक्यमनुपालयिष्यति, मम पिता च तं प्रति प्रेम करिष्यति,
तत आवां तस्य समीपमागमिष्यावस्तेन सह वसतिं करिष्यावश्च।
यो मां प्रति प्रेम न करोति स मम वाक्यानि नानुपालयति। २४
यच्च वाक्यं युष्माभिः श्रूयते, तन्न मम प्रत्युत मत्प्रेषयितुः पितु
र्वाक्यम्।

युष्माभिः सार्द्धं वर्त्तमानोऽहं युष्मभ्यं सर्व्वमेतत् कथितवान्। २५
शान्तिकर्त्ता त्वर्थतो मन्नाम्नि पित्रा प्रेषयितव्यः पवित्र आत्मा २६
युष्मान् सर्व्वं शिक्षयिष्यति, मया युष्मभ्यं यद्यत् कथितं तत् सर्व्वं

२७ स्मारयिष्यति च। अहं युष्मदर्थं दायमिव शान्तिं त्यजामि,
मदीयशान्तिं युष्मभ्यं ददामि। जगद् यथा ददाति नाहं युष्मभ्यं
तथा ददामि। युष्माकं हृदयं मैवोद्विजतां मैव वा भीरु भवतु।
२८ अहं गत्वा युष्मत्समीपमागमिष्यामीति युष्मभ्यं यद्चकथं तद् यूयं
श्रुतवन्तः। यदि मां प्रति प्रेमाकरिष्यत, तर्ह्यहं पितुः समीपं
गच्छामीति यद्चकथं तत्रानन्दिष्यत, यतः पिता मत्तो महत्तरः।
२९ तत्सिद्धिकाले च यद् विश्वसिष्यथ, तदर्थमहमिदानीं सिद्धेः प्राग्
३० युष्मभ्यं कथितवान्। इतः परमहं युष्माभिः सार्द्धं न पुन र्बह्व
सम्भाषिष्ये। यतो जगतोऽस्याधिपतिरागच्छति, मयि च तस्य
३१ किमपि नास्ति। अहन्तु पितरं प्रति प्रेम करोमि पित्रा च
यथादिष्टस्तथाचरामीति जगता ज्ञातव्यम्। उत्तिष्ठत, स्थानाद-
स्मात्स्माभिः प्रस्थीयताम्॥ १४॥

---

१५ पञ्चदशोऽध्यायः।

१ स्वस्य द्राक्षालतास्वरूपत्वदर्शनं शिष्यगणस्य शाखारूपत्वदर्शनं ८ तेषामनेकफल-
फलनावश्यकता १७ तेषां भाविताडनासान्त्वनयोः प्रकटनञ्च।

१ अहं यथार्था द्राक्षालता, मम पिता च कृषकः। मयि स्थिता
२ या काचिच्छाखा फलं न फलति सा तेन छिद्यते। या काचि-
च्छाखा च फलं फलति, सा तेन तथा संस्क्रियते यथाधिकं फलं
३ फलिष्यति। यूयं मया यद् वाक्यमुक्तास्तत्कारणात् परिष्कृता
४ याताः। मयि युष्माभिरवस्थीयतां, युष्मासु च मया। यथा
द्राक्षालतायामनवस्थाय शाखया स्वतः फलं फलितुं न शक्यते,
५ तथा मय्यनवस्थाय युष्माभिरपि न शक्यते। अहं लता, यूयं
तच्छाखाः। यो मय्यवतिष्ठतेऽहञ्च यस्मिन्नवतिष्ठे, स बहूनि

फलानि फलति। यतो मत्तः पृथग् युष्माभिः किमपि कर्त्तुं न
शक्यते। मनुष्यश्चेन्मयि नावतिष्ठते, तर्हि स शाखेव वहि र्निक्षिप्तः ६
शुष्कीभूतश्च, मनुष्यैश्च सञ्चित्याग्नौ निक्षिप्तास्ता ज्वलन्ति।

यूयं यदि मय्यवतिष्ठध्वे मम वचांसि च युष्मास्ववतिष्ठन्ते तर्हि ७
यद्यद् वाञ्छिष्यथ तत् प्रार्थयिष्यध्वे, युष्मदर्थं तत् सेत्स्यति च।
मम पितानेन महिमान्वितोऽभूत्, यद् यूयं बहु फलं फलथ ८
मम शिष्या भविष्यथ च। यथा मयि पित्रा प्रेमाकारि, तथा ९
युष्मासु मया प्रेमाकारि। मम प्रेमन्यवतिष्ठध्वं। यदि ममाज्ञा १०
अनुपालयथ तर्हि मम प्रेमन्यवस्थास्यध्वे, यथाहं मत्पितुराज्ञा
अनुपालितवांस्तत्प्रेमन्यवतिष्ठे च। अहं युष्मभ्यमेतदर्थमिदं कथ- ११
यामि, यन्ममानन्दो युष्मास्ववस्थास्यते युष्माकमानन्दश्च सम्पूर्णो
भविष्यति। ममाज्ञेयं यद् युष्माभिः परस्परं तथा प्रेम कर्त्तव्यं १२
यथा युष्मान् प्रति मया प्रेमाकारि। स्वबन्धूनां निमित्तं प्राण- १३
त्यागान्महत्तरं प्रेम कस्यापि नास्ति। यूयं मया यद्यदादिश्यध्वे १४
तत् सर्व्वं चेदाचरथ तर्हि यूयं मम बन्धवः। नाहं पुन र्युष्मान् १५
दासानित्यभिदधामि, यतः प्रभुना किं क्रियते दासस्तन्न जानाति।
अपि तु युष्मान् बन्धूनित्यभिहितवान्, यतः पितुः सकाशान्मया
यद्यदश्रावि तत् सर्व्वमहं युष्मान् ज्ञापितवान्। न यूयं मां वरित- १६
वन्तः, प्रत्युताहं युष्मान् वरितवांस्तदर्थं नियुक्तवांश्च यद् यूयं गत्वा
फलं फलिष्यथ, युष्मत्फलञ्च स्थास्यति, यथा मम नाम्ना पितरं यत्
किमपि प्रार्थयिष्यध्वे तत् तेन युष्मभ्यं दायिष्यते।

अहं युष्मानेतदर्थमिदमादिशामि, यद् यूयं परस्परं प्रेम १७
करिष्यथ। जगद् यदि युष्मान् द्वेष्टि तर्हीदं जानीत यद् युष्म- १८
दग्रतोऽहं तेन सन्दिष्टः। यदि जगत्सम्बन्धीया अभविष्यत, तर्हि १९

जगन्निजस्वं प्रति प्रेमाकरिष्यत्। यूयन्तु न जगत्सम्बन्धीया अपि
२० तु जगन्मध्यान्मया वरितास्तत्कारणाज्जगद् युष्मान् द्वेष्टि। नास्ति
दासः स्वप्रभुतो महत्तर इति यद् वचो यूयं मयोक्तास्तत् स्मरत।
ते यद्यहमुपद्रुतस्तर्हि यूयमप्युपद्राविष्यध्वे, ते यदि मम वाक्यमनु-
२१ पालितं तर्हि युष्माकमपि वाक्यमनुपालयिष्यते। एतत् सर्व्वन्तु
युष्मान् प्रति मन्नाम्नः कारणात् तैः कारिष्यते, यतस्ते मत्प्रेषयि-
२२ तारं न जानन्ति। यद्यहमनागत्य तेभ्यो नाकथयिष्यं, तर्हि ते
निष्पापा अभविष्यन्। इदानीन्तु स्वपापप्रच्छादकोपायस्तेषां नास्ति।
२३ यो मां द्वेष्टि स मत्पितरमपि द्वेष्टि। यानि कर्म्माण्यन्येन
२४ केनापि न कृतानि, तानि चेदहं तेषां मध्ये नाकरिष्यं, तर्हि ते
निष्पापा अभविष्यन्। इदानीन्तु ते दृष्ट्वापि माञ्च मत्पितरञ्च
२५ द्विष्टवन्तः। किन्त्वित्थमेव तेषां शास्त्रे लिखितेनानेन वचनेन सिद्धेन
२६ भवितव्यं, द्विष्टोऽहं तैरकारणादिति। यः शान्तिकर्त्ता तु पितुः
सकाशाद् युष्मदन्तिकं मया प्रेषयिष्यते, पितुः सकाशान्निर्गच्छन्
स सत्यस्वरूप आत्मा यदागमिष्यति, तदा स एव मामधि साक्ष्यं
२७ प्रदास्यति। यूयमपि साक्षिणः, यत आदितो मत्सङ्गिनः स्थ ॥१५॥

---

१६ षोड़शोऽध्यायः ।

१ ख्रीष्टस्य प्रस्थानं सहायस्यागमनं जगज्जनान् प्रति तत्कर्म्मप्रशंसनं १२ शिष्यान् प्रति तस्य कर्म्म १९ तस्य प्रस्थानकथायाः शिष्याणामबोध्यता २५ तत्कथाया ज्ञापनञ्च ।

१ यूयं यन्न स्खलिष्यथ तदर्थमहं युष्मभ्यं सर्व्वमेतत् कथितवान्।
२ जना युष्मान् समाजच्युतान् करिष्यन्ति। अपि तु समय आयाति
यदा युष्मद्घातक एकैको मंस्यते, ईश्वरायाराधनमुपहरामीति।

ते यद् युष्मान् प्रतीदृशमाचरिष्यन्ति, तत्कारणमिदं यत् ते न ३
पिता नाहं वाभिज्ञातः। यूयं मयेदमुक्ता इति यदुपस्थिते समये ४
स्मरिष्यथ, तदर्थमहं युष्मभ्यमिदं कथितवान्। आदितस्तु युष्मभ्यमिदं
नाकथयं, यतोऽहं युष्माभिः सार्द्धमासं। अधुना तु मत्प्रेषयितुः ५
समीपं गच्छामि, युष्माकञ्च कोऽपि मां न पृच्छति, कुत्र
गच्छसीति। अपि तु युष्मभ्यं मयैतत् कथितमिति कारणाद् ६
युष्माकं हृदयं शोकपूर्णमभूत्। तथापि युष्मानहं सत्यं ब्रवीमि, ७
ममापगमनं युष्माकं हितावहं, यतोऽहं चेन्नापगच्छामि, तर्हि
शान्तिकर्त्ता युष्मत्समीपं नागमिष्यति, यदि त्वपगच्छामि तर्हि
तं युष्मत्समीपं प्रेषयिष्यामि। ततः स आगत्य पापे धार्म्मिकतायां ८
विचारे च दोषस्य प्रमाणं जगते दास्यति। पापस्य प्रमाणमिदं ९
यत् ते मयि न विश्वसन्ति। धार्म्मिकतायाः प्रमाणमिदं यदहं १०
पितुः समीपं गच्छामि युष्माभिश्च न पुन र्द्रक्ष्ये। विचारस्य ११
प्रमाणञ्चेदं यदस्य जगतोऽधिपते र्विचारो निरणायि।

युष्मभ्यं कथयितव्या अन्या बह्वः कथा मम सन्ति, यूयन्त्वि- १२
दानीं ताः सोढुं न शक्नुथ। स सत्यस्वरूप आत्मा तु यदायास्यति १३
तदा पथप्रदर्शक इव युष्मान् कृत्स्नं सत्यं नेष्यति। स हि न स्वतः
कथयिष्यति, प्रत्युत यद्यच्छ्रोष्यति तत् कथयिष्यति, यद्यद् भावि
तद् युष्मान् ज्ञापयिष्यति च। स मां महिमान्वितं करिष्यति, १४
यतो यन्मम तल्लब्ध्वा युष्मान् ज्ञापयिष्यति। पितु र्यद्यदास्ते तत् १५
सर्व्वं मम, ततो हेतो र्मया कथितं, यन्मम स तल्लब्ध्वा युष्मान्
ज्ञापयिष्यति।

स्तोककालेऽतीते यूयं मां न द्रक्ष्यथ, पुनः स्तोककालेऽतीते १६
मां द्रक्ष्यथ, यतोऽहं पितुः समीपं गच्छामि। ततस्तच्छिष्याणां १७

केचित् परस्परमवदन्, किमेतद् यत् तेन व्याह्रियते, स्तोककाले-
ऽतीते यूयं मां न द्रक्ष्यथ, पुनः स्तोककालेऽतीते मां द्रक्ष्यथेति,
१८ अपि च, यतोऽहं पितुः समीपं गच्छामीति। तत्रैव तेऽवदन्,
स्तोककाल इति तेन यदुदाह्रियते तत् किं? तेन किं कथ्यते
१९ तदस्माभि र्न बुध्यते। ततस्ते तं प्रष्टुकामा इति ज्ञात्वा यीशु-
स्तानवादीत्, स्तोककालेऽतीते मां न द्रक्ष्यथ, पुनः स्तोककाले-
ऽतीते मां द्रक्ष्यथेति मया यदुक्तं तदधि किं मिथो विचारयथ?
२० सत्यं सत्यं, युष्मानहं ब्रवीमि, यूयं क्रन्दिष्यथ विलपिष्यथ च,
जगत् त्वानन्दिष्यति। यूयं शोचिष्यथ, किन्तु युष्माकं शोक
२१ आनन्देन परिणतो भविष्यति। प्रसवन्ती नारी शोकार्त्ता भवति,
यतस्तस्या दण्ड उपस्थितः। शिशुं प्रसूता तु सा तं क्लेशं पुन
२२ र्न स्मरति, प्रसवेन मनुष्यो जगत् प्रविष्ट इत्यानन्दात्। यूयमप्य-
धुना शोकार्त्ताः, अहन्तु युष्मान् पुन र्द्रक्ष्यामि, ततो युष्माकं
हृदयमानन्दिष्यति, युष्माकमानन्दश्च केनापि युष्मत्तो नापहर्त्तव्यः।
२३ तस्मिन् दिने च यूयं मां किमपि न प्रक्ष्यथ। सत्यं सत्यं, यूष्मा-
नहं ब्रवीमि, यूयं पितरं यद्यत् प्रार्थयिष्यध्वे मम नाम्ना स
२४ युष्मभ्यं तत् सर्व्वं दास्यति। इतिपूर्व्वं यूयं मम नाम्ना किमपि
न प्रार्थितवन्तः। प्रार्थयध्वं तेन लप्स्यध्वे, युष्माकमानन्दो यथा
सम्पूर्णो भविष्यति।

२५ सर्व्वमेतदहमुपमाभि र्युष्मभ्यमकथयं। आयाति तु समयो
यदा न पुनरुपमाभि र्युष्माभिः सार्द्धं सम्भाषिष्येऽपि तु स्पष्टं
२६ युष्मान् पितुः कथां ज्ञापयिष्यामि। तस्मिन् दिने यूयं मम नाम्ना
प्रार्थयिष्यध्वे। युष्मानध्यहं पितरं याचिष्य इति युष्मान् न वदामि।
२७ पिता हि स्वयं युष्मासु प्रेम कुरुते, यतो यूयं मयि प्रेम कृतवन्तो

विश्वसितवन्तश्च यदहं पितुः सकाशान्निर्गत्यायातः। अहं पितुः २८
सकाशान्निर्गत्य जगदायातः, पुन र्जगत् त्यक्त्वा पितुः समीपं
गच्छामि। तस्य शिष्यास्तं वदन्ति, पश्यत्वधुना भवान् स्पष्टं २९
भाषते, काममप्युपमां न कथयति। भवान् सर्व्वं वेत्ति कस्यापि ३०
प्रश्नं न प्रतीक्षते, तदधुनास्माभिरनुभूतं। अनेन वयं विश्वसिमो
यद् भवान् ईश्वरसकाशान्निर्गत्यायातः। यीशुस्तान् प्रत्यवादीत्, ३१
अधुना किं विश्वसिथ? पश्यतायाति स समय इदानीञ्चागतोऽस्ति ३२
यदा यूयं विकीर्णाः प्रत्येकं निजस्थानं गमिष्यथ मामेकाकिनं
विहास्यथ च। नास्मि त्वेकाकी, यतः पिता मया सार्द्धं वर्त्तते।
सर्व्वमेतदहं युष्मभ्यमकथयं, यथा मयि युष्माकं शान्ति र्भविष्यति। ३३
जगति युष्माकं क्लेशो जायते, किन्त्वाश्वसित, पराजितं मया
जगत्॥ १६॥

---

१७ सप्तदशोऽध्यायः।

१ ख्रीष्टस्य पितरि प्रार्थनं ६ द्वादशशिष्यार्थं प्रार्थना २० सर्व्वशिष्याणामनन्तसुखार्थं प्रार्थना च।

सर्व्वमेतत् कथयित्वा यीशुः स्वर्गं प्रत्यूर्द्ध्वदृष्टिं कृत्वा बभाषे, १
पितः, समय उपस्थितः, तव पुत्रं महिमान्वितं कुरु, पुत्रोऽपि
यथा त्वां महिमान्वितं करिष्यति। त्वं ह्येतदर्थं तस्मै यावतीय- २
मर्त्यानां कर्तृत्वं दत्तवान् यत् तस्मै त्वया यद्यद्दायि तस्मै सर्व्वस्मै
सोऽनन्तं जीवनं दास्यति। अनन्तं जीवनन्त्विदं यत् त एकं ३
सत्यमीश्वरं त्वां त्वत्प्रेरितं यीशुं ख्रीष्टञ्च ज्ञास्यन्ति। पृथिव्यामहं ४
त्वां महिमान्वितं कृतवान् साधितवांश्च तत् कर्म्म यत् त्वं मया
करणार्थं मयि समर्पितवान्। अतोऽधुना, पितः, त्वत्समीपं मां ५

महिमान्वितं कुरु तेन महिम्ना यो जगत उद्भवात् प्राक् त्वत्स-
मीपं ममासीत्।
६ जगतो मध्याद् ये मनुष्यास्त्वया मह्यं दत्तास्तेषां समक्षमहं
तव नाम प्रकाशितवान्। ते तवासन्, त्वञ्च मह्यं तान् दत्तवान्,
७ ते च तव वाक्यं रक्षितवन्तः। इदानीं तैरज्ञायि यत् त्वं मह्यं
८ यद्यद् दत्तवान्, तत् सर्व्वं त्वत्सकाशादुत्पन्नं। यतस्त्वं मह्यं यानि
वाक्यानि दत्तवांस्तानि मया तेभ्यो दत्तानि, तैश्च तानि गृहीत्वा
सत्यमज्ञायि यदहं त्वत्सकाशान्निर्गत्यायातः। ते चात्र व्यश्वसिषु
९ र्यत् त्वं मां प्रहितवान्। तेषां निमित्तमहं याचे। नाहं जगतो
निमित्तं याचे, किन्तु त्वया ये मह्यं दत्तास्तेषां निमित्तं, यतस्ते
१० तव। यद्यन्मम तत् सर्व्वं तव, तथा यद्यत् तव तन्मम। अहञ्च
११ तेषु महिमान्वितो जातः। इतः प्रभृति चाहं न जगति वर्त्ते।
इमे तु जगति वर्त्तन्तेऽहञ्च त्वत्समीपं गच्छामि। पवित्र पितः,
मह्यं दत्ते तव नाम्नि तान् रक्ष, आवामिव ते यथैकं भविष्यन्ति।
१२ यदा तैः सार्द्धं जगत्यासं तदाहं तव नाम्नि तानरक्षं। त्वं मह्यं
यान् दत्तवांस्तानहं रक्षितवान्। तेषां मध्ये कोऽपि न हारितः,
केवलं तद् विनाशभाजनं हारितं, यतः शास्त्रेण सिद्धेन भवि-
१३ तव्यं। अधुना त्वहं तव समीपं गच्छामि, भाषे चेदं जगति, ते
१४ यथा ममानन्दं सम्पूर्णमन्तरे प्राप्य भोक्ष्यन्ते। अहं तेभ्यस्तव वाक्यं
दत्तवान्, जगच्च तान् अद्विषत्, यतोऽहं यथा न जगत्सम्बन्धीय-
१५ स्तथा तेऽपि न जगत्सम्बन्धीयाः। ते त्वया जगतो वहि र्नीयन्तां
नाहमेतद् याचे, प्रत्युत ते त्वया दुरात्मतो रक्ष्यन्तामिति याचे।
१६ अहं यथा जगत्सम्बन्धीयो नास्मि तेऽपि तथा जगत्सम्बन्धीया न
१७ सन्ति। तव सत्येन तान् पवित्रीकुरु, तव वाक्यमेव सत्यस्वरूपं।

त्वं यथा मां जगति प्रहितवांस्तथाहमपि तान् जगति प्रहितवान्। १८
तेषां निमित्तं स्वं पवित्रीकरोमि च, यथा तेऽपि सत्येन पवित्री- १९
कृता भविष्यन्ति।

अहं न केवलमेतेषां निमित्तं याचे, प्रत्युत तेषामपि निमित्तं २०
य एतेषां वाक्येन मयि विश्वसिष्यन्ति, सर्व्वे ते यद् एकीभविष्यन्ति। २१
यथा मयि त्वं, पितः, त्वयि चाहं, तथावयोस्तेऽपि यद् एकीभ-
विष्यन्ति, त्वं मां प्रहितवानत्र जगद् यद् विश्वसिष्यति। त्वया यो २२
महिमा मह्यं दत्तस्तमहं तेभ्यो दत्तवान्, यथावामेकं स्वस्तथा तेऽपि
यदेकीभविष्यन्ति, तेष्वहं मयि च त्वं, ते यत् सिद्धिं प्राप्यैकीभवि- २३
ष्यन्ति, त्वञ्च मां प्रहितवान् यथा च मयि प्रेम कृतवांस्तथा तेष्वपि
प्रेम कृतवानिति जगद् यज्ज्ञास्यति। पितः, ममाभीष्टमिदं, त्वं २४
मह्यं यान् दत्तवान्, यत्राहं वर्त्ते तत्र मया सार्द्धं तेऽपि वर्त्तन्तां,
जगत्स्थापनात् प्राक् च त्वं मयि प्रेम कृतवानिति हेतो र्मह्यं यं
महिमानं दत्तवान्, मम तं महिमानं ते निरीक्षन्तां। धर्म्मय २५
पितः, जगत् त्वां नाजानात्, अहन्तु त्वामजानां, त्वयाहं प्रहित
इतीमेऽप्यजानन्। अहञ्च तांस्तव नाम ज्ञापितवान् पुन र्ज्ञापयि- २६
ष्यामि च, त्वं मयि यत् प्रेम कृतवांस्तद् यथा तेषु स्यात्यहञ्च
यथा तेषु स्यास्यामि॥ १७॥

१८ अष्टादशोऽध्यायः।

१ यीशोः परकरेषु समर्पितत्वं १२ महायाजकान्तिकं तस्य नयनं १५ तस्य पश्चात् पितरयोहनयो र्गमनं १९ तस्य विचारितत्वं २५ तस्मिन् पितरस्यापह्नवः २८ पीलातसमीपं तस्य नयनं ३३ पीलातेन तस्य विचारितत्वञ्च।

सर्व्वमेतत् कथयित्वा यीशुः स्वशिष्यान् सङ्गिनः कृत्वा किद्रो- १

णाख्यस्रोतसः पारं जगाम शिष्यैः सार्द्धं तत्रस्थमेकमुद्यानं प्रविवेश
२ च। तस्य समर्पयिता यिहूदा अपि तत् स्थानमजानात्, यतो
३ यीशुः पुनः पुनः स्वशिष्यैः सह तत्र समवेतः। तदा यिहूदाः
सैन्यगणं मुख्ययाजकेभ्यः फरीशिभ्यश्च पदातींश्च लब्ध्वोल्कादी-
४ पिकास्त्रैः सज्जितस्तत्रोपतिष्ठते। ततो यीशुरात्मानं प्रति यद्
५ भवितव्यं तद् दृष्ट्वा वहिरागत्य तानवादीत्, कं गवेषयथ? ते
प्रत्यूचुः, नासरतीयं यीशुं। यीशुस्तान् ब्रवीति, अहमेव सः।
६ तैः सार्द्धं तस्य समर्पयिता यिहूदा अपि तिष्ठन्नासीत्। अतोऽहं
७ स इति तेन व्याहृते ते पश्चाद्दिशं व्रजित्वा भूमौ निपेतुः। ततः
स तान् पुनरप्राक्षीत्, कमन्विच्छथ? तेऽवादिषुः, नासरतीयं
८ यीशुं। यीशुस्तान् प्रत्यवादीत्, अहं सोऽस्मीति युष्मान् उक्तवान्।
९ अतो मां चेदन्विच्छथ तर्हीतेषां गमनमनुजानीत। एतस्माभि-
प्रायोऽयं यत् तेन कथितमिदं वचनं सिद्धं भवेत्, त्वं मह्यं यान्
१० दत्तवांस्तेषां कोऽपि मया न हारित इति। तदा शिमोनः
पित्रोऽसिना सज्जित आसीत्, अतः स तं कोशान्निष्कृष्य महा-
याजकस्य दासमाहत्य तस्य दक्षिणं कर्णं परिचिच्छेद। दासस्य
११ तस्य नाम मल्क इति। ततो यीशुः पित्रं जगाद, तवासिं कोषे
निधेहि। पिता मह्यं यत् पानपात्रं दत्तवांस्तत्रस्थं पानीयं किं न
पास्यामि?

१२ ततः परं सैन्यगणः सहस्रपति र्यिहूदीयानां पदातयश्च यीशुं
१३ धृत्वा बद्ध्वा च प्रथमं हाननस्य समीपमनैषुः। तत्सरस्य तस्य
१४ महायाजको यः कायाफास्तस्य श्वशुरो हाननः। स कायाफा एव
यिहूदीयान् मन्त्रणारूपामिमां कथामुक्तवान्, प्रजावृन्दस्य निमित्त-
मेकस्य मनुष्यस्य मरणं श्रेय इति।

यीशुस्तु पित्रेण तदन्येनैकेन शिष्येण चान्वगम्यत। स शिष्यो १५
महायाजकस्य परिचित आसीत्, यीशुना सार्द्धं महायाजकस्य
[निकेतनस्य] प्राङ्गणं प्रविवेश च। पित्रस्तु वहि र्गोपुरसमीपं १६
तिष्ठन्नासीत्। ततो महायाजकस्य परिचितः सोऽन्यतरः शिष्यो
वहि र्गत्वा द्वाररक्षिकया दास्या संलप्य पित्रमभ्यन्तरमानैषीत्।
सा द्वाररक्षिका दासी तदा पित्रं जगाद, त्वमपि किं नरस्य १७
तस्य शिष्याणामेकः? सोऽवादीत्, नास्मि। दासेषु पदातिषु १८
च शीतकारणाद् अङ्गारैरग्निं प्रज्वाल्य तिष्ठत्सु तापं सेवमानेषु
च पित्रोऽपि तैः सार्द्धं तिष्ठंस्तापमसेवत।

महायाजकस्तदा यीशुं तस्य शिष्यानुपदेशञ्चाप्राक्षीत्। यीशुस्तं १९
प्रतिजगाद, अहं जगते स्पष्टमकथयं। यिहूदीया यत्र नियतं २०
समागच्छन्ति सर्व्वदा तत्र समाजगृहे धर्म्मधाम्नि चोपादिशं, गुप्तं
किमपि न कथितं मया। भवान् मां कथं पृच्छति? ये श्रुतवन्तस्ते २१
मया किमुक्तास्तानेव तत् पृच्छतु। पश्यतु मया यत् कथितं
तत् ते ज्ञायते। इदं भाषितवति तस्मिन् तत्र तिष्ठन्नेकः पदातिः २२
करेण यीशुमाहत्य जगाद, महायाजकं किमित्थं प्रतिभाषसे?
यीशुस्तं प्रत्यवादीत्, यद्ययुक्तं व्याहृतं मया तर्हि तस्यायुक्तस्य २३
प्रमाणं देहि, युक्तन्तु यदि व्याहृतं तर्हि कथं मां प्रहरसि?

ततो हाननस्तं बद्धं महायाजकस्य कायाफाः समीपं प्राहि- २४
णोत्। तदापि शिमोनः पित्रस्तिष्ठन् तापमसेवत। ततः केचित् २५
तं वदन्ति, त्वमपि किं तस्य शिष्याणामेकः? स निह्नुत्य जगाद,
नास्मि। पित्रो यस्य कर्णं छिन्नवांस्तस्य ज्ञाति र्महायाजकस्यैको २६
दासस्तदाब्रवीत्, उद्याने तेन सार्द्धं तिष्ठंस्त्वं किं न लक्षितो मया?
ततः पित्रः पुन र्निजुह्नुवे तत्क्षणञ्च कुक्कुटो रुराव। २७

१८ ततो यीशुस्तैः कायाफाः सकाशात् राजगृहं नीतः। तदा
प्रत्यूष आसीत्। ते तु राजगृहं न प्रविविशुः, यतस्तेऽशौचं
२९ परिहर्त्तुं निस्तारोत्सवीयं भोज्यं भोक्तुञ्चैच्छन्। ततः पीलातस्तेषां
समीपं वहिरागत्य बभाषे, नरस्यैतस्य विरुद्धं यूयं कमभियोग-
३० मुपस्थापयथ? ते प्रतिभाषमाणास्तमूचुः, अयं यदि दुष्कर्म्मी
३१ नाभविष्यत्, तर्ह्यस्माभि र्भवतो हस्ते न समार्पयिष्यत। ततः
पीलातस्तानब्रवीत्, यूयमेव तं गृहीत्वा युष्मदीयव्यवस्थानुरूपं
तस्य विचारं कुरुत। यिहूदीयास्तदा तमूचुः, कमपि हन्तुमस्माकं
३२ क्षमता नास्तीति। एतस्याभिप्रायोऽयं यत् तेन कीदृशो मृत्यु
र्भोक्तव्यस्तत्सूचकं तस्य वचनं सिद्धं भवेत्।
३३ ततः पीलातो राजगृहं पुनः प्रविश्य यीशुमाहूय जगाद,
३४ त्वं किं यिहूदीयानां राजा? यीशुस्तं प्रत्यवादीत्, भवानेतत्
३५ स्वतो भाषते, किं वान्येन मम कथामुक्तः? पीलातः प्रतिबभाषे,
किं यिहूदीयोऽहं? तवैव जात्या मुख्ययाजकैश्च त्वं मयि
३६ समर्पितः। किमकारि त्वया? यीशुः प्रत्युवाच, नास्ति मम
राज्यम् एतज्जगत्सम्बन्धीयं। मम राज्यं यद्येतज्जगत्सम्बन्धीयम-
भविष्यत् तर्हि यिहूदीयानां हस्ते मत्समर्पणस्य निवारणार्थं मम
भृत्याः [प्राणपणेन] व्यचेष्टिष्यन्त। वास्तवन्तु नास्ति मम राज्य-
३७ मैहिकं। ततः पीलातस्तमब्रवीत्, तर्हि नूनं राजासि त्वं? यीशुः
प्रतिबभाषे, भवांस्तथ्यं ब्रवीति, यतोऽस्म्यहं राजा। एतदर्थ-
मजनिषि, एतदर्थं जगदागमञ्च, यत् सत्यार्थे मया साक्ष्यं
दातव्यं। यः कश्चित् सत्यसम्बन्धीयः स मम वाणीं शृणोति।
३८ पीलातस्तमाह, सत्यं किं? इदमुक्त्वा स पुन र्यिहूदीयानां समीपं
वहि र्गत्वा तान् ब्रवीति, मया तस्मिन् कोऽपि दोषो न लक्ष्यते,

निस्तारोत्सवे तु कारावद्ध एको नरो युष्मदर्थं मया मोच्यते ३९
युष्माकमियं रीतिरस्ति। अतो यिहूदीयानां राजा युष्मदर्थं मया
मोच्यत इदं किं वाञ्छथ? ततः सर्व्वे पुनरुच्चैः स्वरेणावदन्, ४०
मैवायमपि तु बारब्बाः। स बारब्बा दस्युरासीत्॥ १८॥

---

१९ ऊनविंशोऽध्यायः।

१ पीलातेन यीशुं निर्दोषं प्राप्यापि तस्य कशाप्रहारणं मस्तके कण्टकमुकुटस्य च दानं ८ यीशुं मोचयितुं पीलातस्य चेष्टा १३ यिहूदीयानां तुष्ट्यर्थं तं क्रुशे वेधितुम् आज्ञापनं १७ तस्य क्रुशे वेधनं २३ तस्य वस्त्राणां विभागः २५ स्वमातरं प्रति तस्य कथा २८ तस्य मृत्युः ३१ तस्य पार्श्वे शूलाघातः ३८ तस्य श्मशाने स्थापनञ्च।

अतएव तदा पीलातो यीशुं गृहीत्वा कशाभिराजघान। १
सैनिकजनाश्च कण्टकैः स्रजं रचयित्वा तस्य शिरस्यर्पयामासुस्तञ्च २
कृष्णलोहितं वसनं परिधापयामासुस्ततो नमो यिहूदीयानां राज ३
इति वदन्तस्तमताडयन्। पीलातस्तदा पुन र्वहिरागत्य जनान- ४
ब्रवीत्, पश्यताहं तं पुन र्युष्मत्समीपमानयामि, यतस्तस्मिन् कमप्य-
पराधं न लभयामीति युष्माभि र्ज्ञातव्यं। ततस्तया कण्टकस्रजा ५
तेन कृष्णलोहितवर्णेन वसनेन च राजवेशी यीशु र्वहिराजगाम,
पीलातश्च बभाषे, निरीक्ष्यतामयं मनुष्य इति। मुख्ययाजकाः ६
पदातयश्च तदा तं दृष्ट्वा रुरुवुः, क्रुशारोपणं कुरु, क्रुशारोपणं
कुरु। पीलातस्तान् ब्रूते, यूयं तं गृहीत्वा क्रुशमारोपयत, यतो
मया तस्मिन् कोऽप्यपराधो न लभ्यते। यिहूदीयास्तं प्रतिजगदुः, ७
अस्माकं व्यवस्थास्ति, तयास्मदीयव्यवस्थया स मृत्युमर्हति, यतः स
स्वमीश्वरस्य पुत्रं कृतवान्।
ततः पीलातो वचनमिदं श्रुत्वाधिकमभैषीत् पुनश्च राजगृहं ८
प्रविश्य यीशुं ब्रवीति, कुत्रत्यस्त्वं? यीशुस्तु तस्मै किमपि प्रत्युत्तरं ९

१० नादात्। ततः पीलातस्तमवादीत्, मया किं न सम्भाषसे?
किं न जानासि यत् त्वां क्रुशमारोपयितुं ममाधिकारोऽस्ति, त्वां
११ मोचयितुमधिकारोऽप्यस्ति? यीशुः प्रतिबभाषे, ऊर्द्ध्वतो यदि
भवते न प्रादायिष्यत, तर्हि मद्विरुद्धं भवतः कोऽप्यधिकारो
१२ नाभविष्यत्। एतत्कारणात् स महत्तरेण पापेन लिप्तो येनाहं
भवतः करे समर्पितः। तदारभ्य पीलातस्तं मोचयितुमयतत।
यिहूदीयास्तूच्चैरवदन् भवान् यद्येनं मोचयति, तर्हि कैसरस्य
प्रणयी न भवति। यः कश्चित् स्वं राजानं कुरुते, स कैसरं प्रति
विसंवादीति।

१३ ततः पीलातः कथामिमां श्रुत्वा यीशुं बहिरानिनाय, स्वयञ्च
शिलास्तर इत्यभिहिते स्थाने विचारासन उपविवेश। इब्रीयभा-
१४ षया तस्य स्थानस्य नाम गब्बथेति। तद् दिनं निस्तारोत्सवस्य
सज्जनदिनं, घटिका प्रायेण षष्ठी। ततः स यिहूदीयान् ब्रूते,
१५ निरीक्ष्यतां युष्माकं राजा। ते तु रुरुवुः, संहरैनं, संहरैनं क्रुशमा-
रोपय। पीलातस्तान् ब्रूते, युष्माकं राजानं किं क्रुशमारोप-
यिष्यामि? मुख्ययाजकाः प्रतिबभाषिरे, नास्त्यस्माकं राजा
१६ कैसरादन्यः। तदैव स तं क्रुशारोपणार्थं तेषु समर्पयामास। ते च
यीशुं धृत्वापनिन्युः।

१७ ततः स स्वक्रुशं वहन् कपालस्थलमित्यभिधमर्थत इब्रीय-
१८ भाषया गलगथेतिनामकं स्थानं प्रतस्थे। तत्रैव ते तञ्च तेन
सार्द्धमन्यौ द्वौ च क्रुशान्यारोपयामासुः, तौ द्वौ तस्य पार्श्वयो-
१९ र्यीशुञ्च मध्यस्थाने। पीलातश्चापराधविज्ञापकं पत्रं लेखयित्वा
क्रुशेऽर्पयामास। तत्र लिखितमासीत्, यिहूदीयानां राजा नास-
२० रतीयो यीशुरिति। अत एव बहवो यिहूदीयास्तत् पत्रमपठन्,

यतो यीशु र्यत्र क्रुशमारोपितस्तत् स्थानं नगरस्य निकटस्थं, तत्
पत्रञ्चेब्रीयै र्यूनानीयै रोमीयैश्चाक्षरै र्लिखितमासीत्। अत एव २१
यिहूदीयानां मुख्ययाजकाः पीलातमवादिषुः, यिहूदीयानां राजेति
मा लिख्यतां, प्रत्युतेदं लिख्यताम्, अयं कथितवान्, यिहूदीयानां
राजाहमिति। पीलातः प्रतिबभाषे, अहं यल्लिखितवांस्तदेव २२
लिखितवान्।

सैनिकजनास्तु यीशुं क्रुशमारोप्य तस्य वासांसि गृहीत्वैकैकस्य २३
सैनिकस्य निमित्तमेकैकमंशमिति चतुरोऽंशान् कृत्वा बिभेजिरे,
तस्याङ्गाच्छादकमप्याददुश्च। तदङ्गाच्छादकन्तु सीवनरहितम्
ऊर्द्ध्वप्रान्तमारभ्याखिलमूतमासीत्। ततस्ते परस्परमवदन्, नैव २४
छिद्यतामिदं प्रत्युतेदं कस्य भविष्यति गुटिकापातं कृत्वा तन्नि-
श्चीयताम्। अनेन शास्त्रीयमिदं वचः सिद्धं बभूव,

मामकीनानि वस्त्राणि स्वमध्ये विभजन्ति ते।
मम परिच्छदार्थञ्च गुटिकां पातयन्ति हि॥

ते सैनिकजनास्तदेवाकार्षुः।

आसंस्तु यीशोः क्रुशस्य समीपे तिष्ठन्त्यस्तस्य माता, मातु २५
र्भगिनी क्लोपाभार्य्या मरियम्, मग्दलीनी च मरियम्। यीशु- २६
स्तदा स्वमातरं सन्निधौ तिष्ठन्तं स्वप्रियं शिष्यञ्च विलोक्य
स्वमातरमाह, नारि, पश्यायं तव पुत्रः। ततः परं स तं २७
शिष्यमाह, पश्येयं तव माता। तस्मात् दण्डादारभ्य स शिष्यस्तां
निजगृहं नीत्वाग्रहीत्।

ततः परं शास्त्रं यथा सिद्धं भवेत् तथा सर्व्वमिदानीं समाप्त- २८
मिति ज्ञात्वा यीशु र्बभाषे पिपासामि। तत्र लम्लरसेन २९
पूर्णं पात्रमेकमासीत्। ततो जनाः स्पञ्जमेकमम्लरसेन पूर-

३० यिला तुलसीदण्डे बद्धा च तस्य मुखान्तिकमनैषुः। अम्लरसं तं
भुक्का यीशुर्व्याजहार, समाप्तमिति, शिरो नमयन्नात्मानं समर्पया-
मास च।

३१ तद् दिनं सज्जनदिनं तदुत्तरविश्रामवारश्च महादिनं, तत्का-
रणाद् यिहूदीया विश्रामवारे तेषां शवानां क्रुशेष्ववस्थानं
निवारयितुमिच्छन्तः पीलातं तदीयजङ्घानां भञ्जनं तेषाञ्च
३२ स्थानान्तरीकरणं ययाचिरे। अत एव सैनिकजना आगत्य तेन
सार्द्धं क्रुशारोपितयोः प्रथमस्य जङ्घे तदन्यतरस्य जङ्घे च बभञ्जुः,
३३ यीशुमुपस्थाय तु यदा तं स्पष्टं मृतमपश्यंस्तदा ते तस्य जङ्घे न
३४ बभञ्जुरेकस्तु सैनिको दीर्घशूलेन तस्य पार्श्वं विव्याध, ततस्तत्क्षणं
३५ शोणितं तोयञ्च निःसृते। यो दृष्टवान् स साक्ष्यं दत्तवान्, तस्य
साक्ष्यञ्च सत्यं, स च जानाति यत् सत्यं भाषते यूयं यथा विश्व-
३६ सिष्यथ, यतः सर्व्वमिदमेतदर्थं सम्भूतं यदियं शास्त्रीयोक्तिः सिद्धा
३७ भवेत्, तस्यैकं कीकसमपि न भङ्क्तव्यमिति। पुनश्चान्या शास्त्रीयो-
क्तिरियं, ते यं विद्धवन्तस्तमुद्दिश्य दृक्पातं करिष्यन्तीति।

३८ ततः परमरिमाथियानिवासी यो योषेफो यीशोः शिष्य आ-
सीत्, प्रच्छन्नस्तु यिहूदीयानां भयात्, स यीशो र्देहं स्थानान्तरी-
कर्त्तुमिच्छंस्तदर्थं पीलातमनुमतिं ययाचे। पीलातेनानुज्ञातश्च स
३९ आगत्य यीशो र्देहमवरोहयामास। यश्च नीकदीमः प्रथमं रजन्यां
यीशोः समीपमागतवान्, सोऽप्यागत्य प्रायेण पञ्चाशत्सेटकपरि-
४० मितं गन्धरसमिश्रितमगुरु समानैषीत्। तौ तदा यीशो र्देहमा-
दाय यिहूदीयानां समाधिकर्म्मणो रीत्यनुसारेण तैः सुगन्धिद्रव्यैः
४१ सार्द्धं पटैर्वेष्टयामासतुः। यत्र स्थाने च स क्रुशमारोपितस्तत्रोद्यानं,
तस्मिन्नुद्याने च नूतनमेकं शवागारमासीत्, यत्र कोऽपि कदापि

न निहितः। अतस्तदा यिहूदीयानां सज्जनदिनं तच्छवागारञ्च ४२
निकटस्थमेतत्कारणाद् यीशुस्तत्रैव ताभ्यां निहितः॥ १९ ॥

२० विंशोऽध्यायः।

१ यीशोरुत्थानस्य प्रकाशः ११ मग्दलीनीमरियमे तस्य दर्शनदानं १९ शिष्येभ्यो दर्शनदानं २४ थोमै दर्शनदानं ३० सुसंवादलेखकस्याभिप्रायश्च।

सप्ताहस्य प्रथमे दिने तु मग्दलीनी मरियम् प्रत्यूषेऽन्धकारे- १
ऽनतीते तच्छवागारमायाति पाषाणं शवागारमुखादपसारितं लक्ष-
यति च। ततः सा धावन्ती शिमोनस्य पितरस्य समीपं यीशोः २
प्रियस्यान्यतरशिष्यस्य च समीपमायाति तौ वदति च, शवागारात्
प्रभुरपसारितोऽस्मदविदिते स्थाने निहितश्चेति। ततः पितरः सोऽन्य- ३
तरः शिष्यश्च निर्गत्य शवागारमगच्छतां। तौ युगपदधावतां। ४
सोऽन्यतरः शिष्यस्तु पितरात् क्षिप्रतरं प्रधाव्य प्रथमं शवागार उप-
तस्थे, प्रह्वीभूय पटानि लक्षयामास च, न तु प्रविवेश। ततः परं ५
तमनुगच्छन् शिमोनः पितर उपस्थाय प्रविशति भूमौ निहितानि ६
पटानि लक्षयति च, तस्य शिरश्च येनाच्छादितं तत् स्वेदहरवस्त्रमपि ७
लक्षयामास। तत्र पटैः सार्द्धं निहितं प्रत्युत पृथक् स्थानविशेषे
सुरचितमासीत्। तदैव शवागारे प्रथममागतः सोऽन्यतरः शिष्योऽपि ८
प्रावेक्षीत् दृष्ट्वा च व्यश्वसीत्। यतो मृतानां मध्यात् तेनोत्थातव्य- ९
मिति या शास्त्रीयोक्तिः सा तदानीमपि ताभ्यां नाबोधि।

तौ शिष्यौ तदा पुनर्निजस्थानं जग्मतुः। मरियम् तु रुदती १०
शवागारसमीपे बहिरतिष्ठत्। रुदती शवागारं प्रति प्रह्वीभूय सा ११
श्वेतवसनौ द्वौ स्वर्गदूतौ पश्यति, यीशो र्देहो यत्राशेत तौ १२
तत्रोपविष्टौ, एकः शिरसः स्थानेऽन्यतरश्च चरणयोः स्थाने। तौ तां १३
वदतः, नारि, किमर्थं रोदिषि? सा तौ ब्रवीति, मम प्रभुः

१४ स्थानान्तरीकृतः, न जाने कुत्र स निहितः । एतदुक्त्वा सा पश्चाद्दिशि
प्रत्यावृत्य यीशुं तिष्ठन्तं पश्यति, न तु जानाति यत् स यीशुः ।
१५ यीशुस्तां ब्रूते, नारि, किमर्थं रोदिषि? कमन्विष्यसि? सा तम्
उद्यानरक्षकं मत्वा ब्रवीति, महेच्छ, स यदि भवतापवाहितस्तर्हि
कुत्र निहितस्तन्मां वक्तुमर्हति, अहञ्च तं स्थानान्तरीकरिष्यामि ।
१६ यीशुस्तां वदति, भो मरियम् । सा प्रत्यावृत्येब्रीयभाषया तं
१७ वदति, रब्बूणि । अस्यार्थः, भो गुरो । यीशुस्तां ब्रूते, मां मा धर,
यतोऽहमिदानीमपि मत्पितुः समीपं नारूढवान्, प्रत्युत मम
भ्रातॄणां समीपं याहि तान् ब्रूहि च, यो मम पिता युष्माकञ्च
१८ पिता, ममेश्वरो युष्माकञ्चेश्वरस्तस्य समीपमहमारोहामीति । तदा
मग्दलीनी मरियम् गत्वा, प्रभुस्तस्यै दर्शनं दत्तवान् सर्व्वमेतत्
कथितवांश्चेदं शिष्यान् ज्ञापयामास ।

१९ तस्मिन्नेव सप्ताहस्य प्रथमदिने सन्ध्यायां जातायां समवेताः
शिष्या यत्रासन् यिहूदीयानां भयात् तस्य स्थानस्य द्वारेषु रुद्धेषु
यीशुरागत्य मध्यस्थाने स्थित्वा तान् ब्रूते, युष्माकं शान्ति र्भूयात् ।
२० इदमुक्त्वा स तान् स्वहस्तौ स्वपार्श्वञ्च दर्शयामास । ततः प्रभुं निरीक्ष्य
२१ शिष्या आनन्दुः । यीशुस्तदा तान् पुनर्ब्रवीति, युष्माकं शान्ति
र्भूयात् । यथा पिता मां प्रहितवांस्तथाहं युष्मान् प्रहिणोमि ।
२२ इदमुक्त्वा स तानुद्दिश्य दध्मौ तान् जगाद च, पवित्रमात्मानं गृह्णीत,
२३ येषां पापानि मोचयिष्यथ तेषां मोचयिष्यन्ते, येषान्तु न मोच-
यिष्यथ तेषाममुक्तानि स्थास्यन्ति ॥

२४ इत्थं यदा यीशुरागमत्, तदा द्वादशानां मध्ये गणितः थोमा
२५ अर्थतो यमजस्तैः सार्द्धं नासीत् । ततोऽन्ये शिष्यास्तमूचुः, वयं प्रभुं
दृष्टवन्तः । स तु तानवादीत्, तस्य करयो र्लौहकीलचिह्नमदृष्ट्वा

तत्र लौहकीलचिह्ने ममाङ्गुलीमनिधाय च तस्य पार्श्वे मम करम-
निधाय चाहं नैव विश्वसिष्यामीति।

ततोऽष्टदिनेभ्यः परं शिष्याः पुनरभ्यन्तर आसन्, थोमा अपि २६
तैः सार्द्धमासीत्। तदा रुद्धेषु द्वारेषु यीशुरुपस्थाय मध्यस्थाने
तिष्ठन्नवादीत्, युष्माकं शान्ति र्भूयात्। ततः परं स थोमां ब्रवीति, २७
तवाङ्गुलीमत्र नय मम हस्तौ निरीक्षस्व च, तव करञ्च नय मम
पार्श्वे निधेहि च। अविश्वासी च मा भव, प्रत्युत विश्वासी भव।
थोमास्तदा प्रतिभाषमाणस्तमवादीत्, भो मम प्रभो, भो २८
ममेश्वर। यीशुस्तं ब्रूते, त्वं मां दृष्टवांस्थोमाः, तस्माद् व्यश्वसीः, २९
धन्यास्ते ये न दृष्ट्वापि व्यश्वसिषुः।

वास्तवमेतेभ्योऽन्यानि बहून्यभिज्ञानार्थकर्म्माणि स्वशिष्याणां ३०
समक्षं यीशुनाक्रियन्त, तानि त्वस्मिन् ग्रन्थे न लिखितानि।
एतेषां वृत्तान्तस्त्वलेखि, यतो यीशु रीश्वरस्य पुत्रः ख्रीष्टोऽत्र ३१
युष्माभि र्विश्वसितव्यं, विश्वसद्भिश्च तस्य नाम्नि जीवनं प्राप्तव्यम्॥२०॥

---

२१ एकविंशोऽध्यायः।

१ तिविरीयह्रदे अर्थात् गालीलसिन्धौ शिष्येभ्यो दर्शनदानं १५ पित्रेण सह यीशोः कथनं २० योहने तस्य कथा २४ समाप्तेः कथा च।

ततः परं यीशुस्तिविरीयस्य ह्रदस्य तीरे पुनरात्मानं १
शिष्याणां प्रत्यक्षं चकार। स इत्थमेवात्मानं प्रत्यक्षीचकार।
शिमोनः पित्रः, थोमा अर्थतो यमजः, गालीलस्यकान्नानिवासी २
नथनेलः, सिवदियस्य पुत्रौ, शिष्यौ च द्वावन्यावेकत्रासन्। शिमोनः ३
पित्रस्तान् ब्रवीति, अहं मीनान् धर्त्तुं यामि। ते तं वदन्ति
वयमपि त्वया सार्द्धं यामः। ततस्ते तूर्णं वहि र्गत्वा नावमारु-
रुहुस्तस्यां रजन्यान्तु किमपि न दध्रुः। जाते पुनः प्रत्यूषे यीशु- ४

५ स्तटे स्थितवान्। स तु यीशुरिति शिष्यै र्नाज्ञायि। यीशुस्तदा
तान् ब्रवीति, वत्साः, खाद्यं किमपि युष्माकं किमास्ते? ते तं
६ प्रत्यवादिषुः, नास्ति। यीशुस्तदा तान् वदति, नावो दक्षिणपार्श्वे
जालं निक्षिपत, तर्हि लप्स्यध्वे। ततस्ते तन्निचिक्षिपुस्तदा च
७ मीनानां महासङ्घातः पुनस्तदाक्रष्टुं नाशक्नुवन्। ततो यीशोः प्रियः
स शिष्यः पितरमवादीत्, असौ प्रभुः। तदा प्रभुरसाविति श्रुत्वा
पित्र उत्तरीयवसनमादाय कटौ बबन्ध, यतः स विवस्त्र आसीत्।
८ ततः परं समुद्रे निपपात। अन्ये शिष्यास्तु पोतेनागमन्, यतस्ते
स्थलाद् अदूराः केवलं प्रायेण द्विशतहस्तव्यवधाना आसन्। ते च
९ मत्स्यपूर्णं जालमाकर्षन्। स्थलमुत्तीर्य्य तु तैरङ्गारीयोऽग्निस्तस्यो-
१० परिस्थितो भृष्टो मीनः पूपश्च लक्ष्यन्ते। यीशुस्तान् ब्रवीति,
११ अधुना यान् मत्स्यान् अधार्ष्ट तेषां कतिपयानानयत। ततः
शिमोनः पित्र आरुह्य मत्स्यपूर्णं जालं कर्षन् स्थलेऽर्पयामास, तत्र
त्रिपञ्चाशदधिकशतं महान्तो मत्स्या आसन्। एतावत्सु सत्स्वपि
१२ जालं न व्यदीर्य्यत। यीशुस्तदा तानवादीत्, आयात, प्रातराशं
भुंग्ध्वं। शिष्याणाञ्च कोऽपि कस्त्वमिति तं स्वतत्त्वं प्रष्टुं नोत्सेहे,
१३ यतः स प्रभुरिति तेऽजानन्। यीशुस्तदोपस्थाय तं पूपं गृहीत्वा
१४ तेभ्यो वितरति, तं मत्स्यञ्च तथा। इत्थं मृतानां मध्यादुत्था-
पितो यीशुस्तृतीयं वारं स्वशिष्याणां प्रत्यक्षो बभूव।

१५ तेषां प्रातराशभोगात् परं यीशुः शिमोनं पित्रं ब्रवीति,
योनासुत शिमोन, एतेभ्यस्त्वं किं मां प्रत्यधिकं प्रेम करोषि?
स तं वदति, सत्यं प्रभो, भवान् जानाति यदहं भवदनुरक्तः।
१६ स तं ब्रवीति, मम मेषशावकान् चारय। स पुन र्द्वितीयं वारं
तं वदति, योनासुत शिमोन, मयि किं प्रेम करोषि? स तं

वदति, सत्यं प्रभो, भवान् जानाति यदहं भवदनुरक्तः। स तं
ब्रवीति, मम मेषान् पालय। स तृतीयं वारं तं ब्रवीति, १७
योनासुत शिमोन, त्वं किं मदनुरक्तः? पितरस्तृतीयवारं त्वं किं
मदनुरक्त इति तेन पृष्टस्तत्कारणाच्छोकार्त्तो बभूव, तञ्च जगाद,
प्रभो, भवान् सर्व्वविद्, भवान् जानाति यदहं भवदनुरक्तः। यीशुस्तं
ब्रूते, मम मेषान् चारय। सत्यं सत्यं, त्वामहं ब्रवीमि, यदा १८
तरुणतर आसीस्तदा स्वयं स्वकटिमबध्वा यत्र चेच्छस्तत्र व्यहरः।
यदा तु वृद्धो भविष्यसि, तदा स्वहस्तौ प्रसारयिष्यस्यन्यश्च कश्चित्
तव कटिं भन्त्स्यति, त्वदनभीष्टं स्थानं त्वां नेष्यति च। कीदृशेन १९
मृत्युना स ईश्वरं सम्मानयिष्यति तत् सूचयन् यीशुरिदं कथया-
मास। इदं कथयित्वा च स तमवादीत्, मामनुगच्छ।

पितरस्तदा प्रत्यावृत्य यीशोः प्रियं तं शिष्यमनुगच्छन्तं व्यलो- २०
कयत्, यो भोज्ये तस्य वक्षस्यासीनः पृष्टवान्, प्रभो, भवतः
समर्पयिता क इति। तमेव दृष्ट्वा पितरो यीशुं ब्रवीति, प्रभो, २१
किं भवितव्यमनेन? यीशुस्तं वदति यदि ममागमनं यावत् २२
तस्यावस्थानं रोचये, तर्हि तत्र तव किं? त्वं मामनुगच्छ। ततः २३
शिष्येषु कथेयं व्यानशे यत् तेन शिष्येण न मर्त्तव्यं। यीशुस्तु तं
नैवेदं व्याजहार, तेन न मर्त्तव्यमिति, प्रत्युतेदं, यदि ममागमनं
यावत् तस्यावस्थानं रोचये तर्हि तत्र तव किमिति।

स एव शिष्य एताः कथा अधि साक्ष्यं दत्तवान् एताः कथा २४
लिखितवांश्च, तस्य साक्ष्यञ्च सत्यमिति वयं जानीमः। एतेभ्यो- २५
ऽन्यान्यपि बहूनि कर्म्माणि यीशुना कृतानि, सर्व्वाणि तानि यद्ये-
कैकशो लिख्यन्ते, मन्ये तर्हि तेषां लेखितव्यानां ग्रन्थानां धारणार्थं
जगदप्यपर्य्याप्तं भविष्यति॥ २१॥

प्रेरितानां कर्म्मणामाख्यानम्।

१ प्रथमोऽध्यायः।

१ शिष्येभ्यो यीशो र्दर्शनदानम् आज्ञापनं तस्य स्वर्गारोहणञ्च १२ शिष्याणां यिरूशालेमगमनं प्रार्थनायां प्रवर्त्तनं १५ यिहूदाविनिमयेन मत्तथियनियोजनञ्च।

१ भो महामहिमथियफिल, यीशुः र्यद्यत् कर्त्तुमुपदेष्टुञ्च प्रवव्टते
२ तत्सर्व्वस्य कथा मया पूर्व्वप्रबन्धे तद् दिनं यावद् रचिता यस्मिन्
स पवित्रेणात्मना स्ववरितेभ्यः शिष्येभ्य आदेशं दत्त्वोर्द्ध्वलोकमनायि।
३ स्वदुःखभोगात् परं स बहुभिः प्रत्यक्षैः प्रमाणैस्तेषां समक्षमात्मानं
जीवन्तं दर्शितवान्, यतश्चत्वारिंशद्दिनेषु स पुनः पुनस्तेभ्यो दर्शनम्-
४ ददात् ईश्वरराज्यस्य कथाञ्चाकथयत्। ततः स तान् एकत्रीकृत्या-
दिदेश, यूयं यिरूशालेमतो मापगच्छत, प्रत्युत मत्तः श्रुतां पितुः
५ प्रतिज्ञां प्रतीक्षध्वं, यतो योहनस्तोयेनास्नापयत्, यूयन्त्वल्पेषु
६ दिनेष्वतीतेषु पवित्र आत्मनि स्नापयिष्यध्वे। ते तदा समागत्य
तमपृच्छन्, प्रभो, कालेऽस्मिन् भवान् किमिस्रायेलाय राज्यं प्रति-
७ पादयिष्यति? स तु तानवादीत्, पिता यान् कालान् यांश्च
समयान् स्ववशेऽस्थापयत् तान् ज्ञातुं युष्माकमधिकारो
८ नास्ति। पवित्रेणात्मनाविष्टास्तु यूयं प्रभावं लप्स्यध्वे, यिरूशालेमे
कृत्स्नायां यिहूदियायां शमरियायाञ्च मेदिन्याः प्रान्तञ्च यावन्मम
९ साक्षिणो भविष्यथ। तेनेदमुक्तास्ते यावन्निरैक्षन्त तावत् स ऊर्द्ध्व-
१० मनीयत मेघश्चैकस्तेषां लोचनगोचरात् तमपजहार। तस्यापगमन-
काले तेष्वेकाग्रदृष्ट्या गगनं निरीक्षमाणेषु, पश्य, शुक्लपरिच्छदौ

द्वौ पुरुषौ तानुपस्थायावदतां, भो गालीलीयनराः, किमर्थं गगन- ११
मवलोकयन्तस्तिष्ठथ? असौ यो यीशु र्युष्मत्समीपात् स्वर्गं नीतः
स यादृशेन गमनेन स्वर्गं गच्छन् युष्माभिः सन्दृष्टस्तादृशेन प्रत्या-
गमिष्यति।

तदा ते जैतुनाख्यगिरितो यिरूशालेमं प्रत्यावर्त्तिरे। स गिरि १२
र्यिरूशालेमस्य निकटस्थः प्रायेण विश्रामवारीयमार्गैकव्यवधानः।
नगरं प्रविश्य ते गृहस्योपरिस्थप्रकोष्ठं जग्मुः। तद्गृहनिवासिनः पितरो १३
याकोबो योहन आन्द्रियश्च, फिलिपस्थोमाश्च बर्थलमयो मथिश्च,
आल्फेयसुतो याकोब उद्योगी शिमोनश्च याकोबस्य भ्राता
यिहूदाश्चैते सर्व्वे योषिद्भि र्यीशो र्मात्रा मरियमा च तस्य भ्रातृ- १४
भिश्च सार्द्धमेकचित्ताः सन्तः प्रार्थनायां याचनायाञ्चाध्यवसायि-
नोऽवर्त्तन्त।

तेषु दिनेष्वेकदा प्रायेण विंशत्यधिकशतजनेष्वेकत्रीभूतेषु पितरो १५
भ्रातृणां मध्य उत्थाय बभाषे, भ्रातरः, यीशु र्यैरधारि तेषां १६
नायकीभूतं यिहूदामधि पवित्र आत्मा दायूदस्य वक्त्रेण यां शास्त्री-
योक्तिं व्याहृतवांस्तया सिद्धिः प्राप्तव्यासीत्। स ह्यस्माकं मध्ये १७
गणितोऽस्याः परिचर्य्याया अंशित्वं प्राप्तश्चासीत्। सोऽधर्मस्य १८
वेतनेन भूमिखण्डमेकमक्रीणीत् अवाक् पतित्वा तु द्विधा बभूव
निःसृतञ्च तस्य सर्व्वान्त्राणि। तच्च यिरूशालेमनिवासिभिः सर्व्वै- १९
रज्ञायि, तस्मात् तेषां स्वभाषायां तत् क्षेत्रं हकलदामेत्यभिधी-
यते। अस्यार्थः शोणितक्षेत्रमिति। गीतसंहिताख्ये ग्रन्थे हि लि- २०
खितमास्ते।

वाटी तस्य भवेच्छून्या तन्मध्ये कोऽपि मा वसेत्॥
पुनश्च, अध्यक्षपदं तस्य गृह्लीयादपरो नरः॥

२१ अत एव योहनस्य स्नापनमारभ्य प्रभो र्यीशोरस्मत्त ऊर्द्ध्वमपसा-
रणदिनं यावत् सोऽस्माकं दृष्टिगोचरे यदा प्राविशन्निरगच्छच्च,
२२ तस्मिन् कृत्स्ने काले येऽस्माकं सहचरा आसंस्तेषां नराणामेको-
२३ ऽस्माभिः सार्द्धं तदीयपुनरुत्थानस्य साक्षी भवतीत्यावश्यकं । ततस्ते
युष्ट इतिनामानं बार्शबाभिधं योषेफं मत्तथियञ्च द्वावेतौ स्थापया-
२४ मासुः प्रार्थयमानाश्च जगदुः, भो सर्व्वेषां चित्तज्ञ प्रभो, यिहूदाः
स्वस्थानं प्रयाणार्थमिदं यत् परिचारकत्वं प्रेरितत्वञ्च त्यक्त्वा गत-
२५ वांस्तदधिकारलाभाय त्वया द्वयोरेतयो र्यौ वरितस्तं निर्द्दिश ।
२६ ततः परं तावुद्दिश्य गुटिकापाते कृते मत्तथियो गुटिकया निर-
चायि, स चैकादशप्रेरितैः सार्द्धं गणितोऽभूत् ॥ १ ॥

---

२ द्वितीयोऽध्यायः ।

१ पवित्रस्यात्मन आविर्भावः ५ तेन प्रेरितानां नानाभाषाकथनं ततो लोकानाम्
आश्चर्य्यमननं १४ पितरस्योपदेशवाक्यं ३७ तेन वाक्येन बहुलोकानां मनः-
परावृत्तिः ४१ तेषां स्नपनं सदाचरणञ्च ।

१ ततः परमुपस्थिते पञ्चाशत्तमीत्यभिधोत्सवस्य दिने ते सर्व्वे
२ एकचित्तेनैकत्रासन् । तदाकस्माद् गगनाद् वहमानस्य प्रचण्डवा-
तस्येव शब्दः सञ्जातः, ते च यत्रोपविष्टा आसंस्तत् कृत्स्नं गृहं तेन
३ व्याप्तम्, अग्नेरिव विभज्यमाना जिह्वाकाराश्च तेषां प्रत्यक्षीबभूवुः
४ स च वह्निस्तेषामेकैकस्मिन् निषसाद, ते सर्व्वे च पवित्रेणात्मना
पूरयाञ्चक्रिरे, आत्मना च यथोच्चारणमदीयत तथैवान्याभि
भाषाभि र्गदितुमारेभिरे ।

५ तदा गगनस्याधःस्थिताभ्यः सर्व्वजातिभ्य आगताः श्रद्धाशीला
६ यिहूदीयनरा यिरूशालेमे न्यवसन् । अतः सञ्जाते तस्मिन् शब्दे

जनौघः समागत्य व्याकुलीबभूव, यतस्ते प्रत्येकं निजभाषया व्याह-
रतां तेषां कथामशृण्वन् । ततः सर्व्व आश्चर्य्यं मत्वा चमत्कृताः ७
परस्परमूचुः, पश्यतां, वक्तारोऽमी किं न सर्व्वे गालीलीयाः? कथं ८
तर्हि वयं प्रत्येकं स्वजन्मभाषया व्याहरतां तेषां कथां शृणुमः?
पार्थीया मादीया एलमीया जना मिसपतामिया-यिहूदिया- ९
कापदकिया-पन्तदेशानाम् आशिया-फरुगिया-पम्फुलियादेशानां १०
मिसरस्य कुरीणन्तिकलिबुयादेशस्य च निवासिनः प्रवासिरोमी-
याश्च यिहूदीया यिहूदिमतावलम्बिनश्च क्रीतीया आरबीयाश्च ११
वयं सर्व्वेऽस्मद्भाषाभिरीश्वरकृतानि महान्ति कर्म्माणि निवेदयताम्
अमीषां कथाः शृणुमः । इत्थं सर्व्वे विस्मिता बभूवुः सन्दिहानाश्च १२
परस्परमूचुः, अस्य तात्पर्य्यं किं भवेत्? अन्ये तूपहसन्तोऽवदन्, १३
अमी सुस्वादुना द्राक्षारसेण मत्ताः ।

तदा पित्र एकादशभिः सार्द्धमुत्थायोच्चस्वरमुदीरयंस्तानुद्दिश्येत्थं १४
बभाषे, भो भ्रातरो यिरूशालेमनिवासिनश्च सर्व्वे, युष्माभिरेत-
ज्ज्ञायताम् अतो मम वक्तव्यमाकर्णयतां । युष्माभि र्यथानुमीयते १५
तथामी मत्ताः सन्ति तन्न सत्यं, यतोऽधुना दिवसस्य तृतीया
घटिकास्ति । प्रत्युत भाववादिना योयेलेन यदुक्तम् इदं तदेव, १६
यथा ।

इदं भाव्यन्तिमे काल इति व्याहरतीश्वरः । १७
वर्षिष्यामि निजात्मानं सर्व्वमर्त्त्यस्य मूर्धनि ।
युष्माकं पुत्रपुत्रीभि र्भाववाक्तिः कथयिष्यते ॥
भविष्यन्ति च युष्माकं युवानो लब्धदर्शनाः ।
स्वप्नान्यालोकयिष्यन्ते युष्माकं स्थविरा अपि ॥
शेषेष्वपि स्वदासानां स्वदासीनाञ्च मूर्धसु । १८

वर्षिष्यामि निजात्मानमहं तेषु दिनेषु च ॥
१९ गगने लक्षणान्यूर्द्ध्वेऽभिज्ञानान्यप्यधो भुवि ।
रक्तं दास्यामि वह्निञ्च सधूमं वाष्पमेव च ॥
२० विकृतोऽग्रे रविर्ध्वान्तं चन्द्रो रक्तं भविष्यति ।
तदायास्यति भीमं तत् प्रसिद्धञ्च प्रभोर्दिनं ॥
२१ भव्यमेतच्च यः कश्चिन्नरो नामाह्वयन् प्रभोः ।
प्रार्थनां कुरुते तस्य परित्राणं भविष्यति ॥

२२ भो इस्रायेलीयनरा वचांसीमान्याकर्णयत। नासरतीयो यीशुः
प्रभावसिद्धक्रियाभिरद्भुतलक्षणैरभिज्ञानार्थकर्म्मभिश्च युष्मत्समीपमी-
श्वरात् प्रहितो नर इव प्रतिपन्न आसीत्। ईश्वरो हि तेनैव
२३ युष्मन्मध्ये तानि कृतवान् एतद् यूयमपि जानीथ। तमीश्वरस्य
निर्णीतमन्त्रणया भाविज्ञानेन च समर्पितं यूयं धृत्वाधर्म्मिणां हस्तैः
२४ क्रूशविद्धं हतवन्तः। ईश्वरस्तु मृत्यो र्यन्त्रणानि मोचयित्वा तमुत्थाप-
२५ यामास। यतस्तं वशे कर्त्तुं मृत्यु र्नाशक्नोत्। दायूदो हि तमुद्दिश्योवाच,

सततं स्थापयामि स्म निजसाक्षादहं प्रभुं ।
स मद्दक्षिणपार्श्वस्थः स्खलनं मे निवारयन् ॥
२६ तस्माद्धृष्यति मच्चित्तं मम जिह्वा च नन्दति ।
शरीरं मामकञ्चाप्याश्वासितं विश्रमिष्यति ॥
२७ यतस्त्वं मामकप्राणान् पाताले न विहास्यसि ।
स्वीयपुण्यवतो नैव सोढासे क्षयदर्शनं ।
२८ जीवनस्य हि पन्थानं त्वं मां ज्ञापितवानसि ।
पूरयिष्यसि हर्षेण मां त्वदास्यस्य सन्निधौ ॥

२९ हे भ्रातरः, तं पितृकुलपतिं दायूदमधि युष्मभ्यं मुक्तकण्ठन
मयेदं कथयितुं शक्यते यत् स ममार च शवाधारे निदधे च तस्य

श्मशानागारञ्चाद्याप्यस्मदन्तिके विद्यते। स तु भाववाद्यासीदजानाच्च ३०
यच्छरीरसम्बन्धे तस्योरसफलात् खीष्टेनोत्पद्य तदीयसिंहासन
उपवेष्टव्यमितीश्वरः शपथेन तस्मै प्रतिश्रुतवान्। ततः स भवितव्यं ३१
दृष्ट्वा खीष्टस्य पुनरुत्थानमधीदमब्रवीत्, यतस्तस्यैव प्राणाः पाताले
न परित्यक्तास्तस्यैव देहस्य क्षयं न दृष्टवान्। तमेव यीशुमीश्वरः ३२
पुनरुत्थापितवान्, अत्र सर्व्वे वयं साक्षिणः। अत ईश्वरस्य दक्षिण- ३३
हस्तेनोच्चीकृतः स पितृतः प्रतिज्ञायाः फलं पवित्रमात्मानं लब्ध्वाधुना
युष्माभि र्यद् दृश्यते श्रूयते च तदवतारयामास। न हि दायूदः ३४
स्वर्गमारूढवान् स एव त्ववाच,

मम प्रभुमिदं वाक्यं बभाषे परमेश्वरः।
त्वच्छत्रून् पादपीठं ते यावन्नहि करोम्यहं॥ ३५
अवतिष्ठस्व तावत् त्वम् आसीनो मम दक्षिणे॥

अत इस्रायेलस्य कृत्स्नं कुलममोघं जानातु यद् युष्माभिः ३६
क्रुशारोपितं तमेव यीशुमीश्वरः प्रभुमभिषिक्तत्रातारञ्च चकार।

इदं श्रुत्वा ते विदीर्णहृदया भूत्वा पितरमन्यान् प्रेरितांश्च जगदुः, ३७
भो भ्रातरः, किं करवाम? पितरस्तदा तानुवाच, मनांसि परावर्त्त- ३८
यत प्रत्येकञ्च पापानां मोचनार्थं यीशोः खीष्टस्य नाम्नि स्नाप्यध्वं,
तथा कृते पवित्रमात्मानं दानवल्लप्स्यध्वे। यतः सा प्रतिज्ञा युष्मासु ३९
युष्मत्सन्तानेषु चास्मदीश्वरेण प्रभुना समाह्वायिष्यमाणेषु दूरस्थेषु
सर्व्वेष्वपि च वर्त्तते। एतदन्यैरपि बहुभि र्वचोभिः स साक्ष्यं दत्वा- ४०
न्वनयत्, यूयमेतत्कालिकेभ्यः कुटिलेभ्यो मनुष्येभ्यः स्वनिस्तारं
साधयितुमर्हथ। तदा ते सानन्दं तस्य वाक्यं गृहीत्वा स्नापिता ४१
बभूवुः। इत्थं तस्मिन् दिने प्रायेण त्रयाणां सहस्राणां मनुष्या-
णामागमने मण्डली वव्रधे।

४२ 　ते च प्रेरितानां शिक्षायां सहभागितायां पूपभञ्जने प्रार्थनासु
४३ चाध्यवसायेन निविष्टा अतिष्ठन् । यावतीयप्राणिनश्च भयं सञ्जातं
प्रेरितैश्च बह्वन्यद्भुतानि लक्षणान्यभिज्ञानार्थकर्म्माणि चासाध्यन्त ।
४४ विश्वासिनश्च सर्व्वे एकत्रातिष्ठन् सर्व्वेञ्च साधारणं मत्वाधारयन्,
४५ स्थावराणि जङ्गमानि वा वित्तानि च व्यक्रीणन् एकैकस्य प्रयोज-
४६ नानुसारेण सर्व्वेषु व्यभजंश्च । अध्यवसायेन च प्रत्यहमेकचित्ता
धर्म्मधामन्यवर्त्तन्त गृहे गृहे च पूपं भञ्जन्त आह्लादेन हृदयस्य
४७ सारल्येन च भक्ष्यम् अभुञ्जतेश्वरमस्तुवंश्च सर्व्वजनस्यानुग्रहभाजना-
न्यभवंश्च । प्रभुस्तु प्रत्यहं परित्राणपात्रै र्मण्डलीमवर्धयत् ॥ २ ॥

---

३ तृतीयोऽध्यायः ।

१ पित्रेण खञ्जस्य स्वास्थ्यं ११ मनःपरावर्त्तनाय पित्रस्योपदेशकथा च।

१ 　एकदा प्रार्थनायाः समयेऽर्थतस्तृतीये प्रहरे पित्रयोहनौ यदा
२ युगपद् धर्म्मधाम गच्छतस्तदामातृगर्भतः खञ्जो नर एक उह्यमान
आगच्छत् । धर्म्मधामप्रवेशकान् भिक्षां याचिष्यमाणः स प्रत्यहं
३ धर्म्मधाम्नः सुन्दराभिधे द्वारे न्यधीयत। स धर्म्मधाम प्रवेष्टुमुद्यतौ
४ पित्रयोहनौ निरीक्ष्य भिक्षां लिप्सुरयाचत। तदा योहनेन सहितः
५ पित्रोऽनन्यदृष्ट्या तं समालोक्याह, आवां प्रत्यवेक्षस्व । स तदा
६ किमपि लप्स्य इति प्रतीक्ष्य तयो र्निविष्टलोचनोऽतिष्ठत् । ततः
पित्रो जगाद स्वर्णं रूप्यं वा मम नास्ति, यत्त्वस्ति तुभ्यं तद्
ददामि । नासरतीयस्य यीशोः ख्रीष्टस्य नाम्ना समुत्थाय परिव्रज।
७ इत्युक्त्वा स तस्य दक्षिणहस्तं धृत्वा तमुत्थापयामास । तत्क्षणमेव
८ तस्य पादतलौ गुल्फौ च दृढ़ौ बभूवुः, स चोत्प्लवमान उत्तस्थौ
व्रजितुं प्रववृते च व्रजन्नुत्प्लवमानस्त्वीश्वरं स्तुवंस्ताभ्यां सार्द्धं धर्म्मधाम

प्रविवेश च। व्रजन्नीश्वरं स्तुवंश्च स सर्व्वजनेनादर्शि धर्म्मधाम्नः ९
सुन्दरे द्वार उपविष्टो योऽभिक्षत स एवायमित्यभ्यज्ञायि च। १०
तस्मिंश्च यत् सम्भूतं तेन ते चमत्कृता विस्मयापन्नाश्च बभूवुः।
स्वास्थ्यप्राप्ते तस्मिन् खञ्जे तु पित्रयोहनाववलम्ब्य स्थिते सर्व्वजन- ११
श्चमत्कृतो द्रुतगत्या शलोमनोऽलिन्दं तेषामन्तिकमाजगाम।

तद् दृष्ट्वा पित्रो जनानवादीत्, भो इस्रायेलीयनराः, यूयं १२
किमर्थमत्राश्चर्य्यं मन्यध्वे निजशक्त्या निजभक्त्या वावामिमं व्रजने
समर्थं कृतवन्ताविति मत्वा किमर्थमनन्यदृष्ट्यावां निरीक्षध्वे च?
अब्राहामस्येसहाकस्य याकोबस्य च य ईश्वरोऽस्मत्पूर्व्वपुरुषाणामीश्वरः १३
स एव स्वसेवकं तं यीशुं महिमाप्राप्तं कृतवान् यो युष्माभिः
शत्रुहस्ते समर्पितो विचारे तद्विसर्जनकामस्य पीलातस्य समक्षमेव
प्रत्याख्यातश्च। यूयं हि पवित्रं धर्म्मवन्तञ्च तं नरं प्रत्याख्याय १४
मनुष्यघातिनं नरं वरवद् याचितवन्तो जीवनस्यादिकर्त्तारन्तु हत- १५
वन्तः। ईश्वरस्तु मृतानां मध्यात् तमुत्थापितवान् एतस्यावां
साक्षिणौ। तस्य नाम्नि विश्वसनहेतोस्तु युष्माभि र्दृश्यमानम- १६
भिज्ञातञ्च नरमिमं तस्य नाम सबलीकृतवान् तज्जनितो विश्वास-
स्त्वास्मै सर्व्वेषां युष्माकं समक्षमिदं सर्व्वाङ्गव्यापि स्वास्थ्यं दत्तवान्।

अधुना, भो भ्रातरः, जानेऽहं तत् कर्म्म युष्माभि र्युष्मदीया- १७
ध्यक्षैश्चाज्ञानत्वादकारि। ख्रीष्टेन तु दुःखं भोक्तव्यमिति यद्यद् १८
भद्रमीश्वरः स्वीयभाववादिनां सर्व्वेषां मुखैर्विज्ञापितवान् तत्तदित्थं
साधयामास। अतो युष्मत्पापानां मार्जनार्थमनुतप्यध्वं मनांसि १९
परावर्त्तयत च, तथा कृते प्रभोः सकाशात् तापशान्तेः काल
आयास्यति स च युष्मदर्थं पूर्व्वं निरूपितं ख्रीष्टं यीशुं प्रहेष्यति। २०
ईश्वरस्तु युगारम्भात् पवित्राणां स्वीयभाववादिनां सर्व्वेषां मुखैः २१

सर्व्वविषयाणां सुदशायाः प्रतिपादनस्य यं कालमङ्गीकृतवान् तं प्रती-
२२ क्षमाणेन ख्रीष्टेन स्वर्गेऽवस्थातव्यं। मोशि र्ह्यस्मत्पूर्व्वपुरुषान् उक्तवान्
युष्माकमीश्वरः प्रभु र्युष्मदर्थं युष्मद्भ्रातृणां मध्यान्मादृशं भाववादि-
नमुत्पादयिष्यति, स युष्मान् यद्यद् वदिष्यति, तत् सर्व्वमधि तस्य
२३ वाक्यं युष्माभि र्ग्रहीतव्यं। यः कश्चित् प्राणी तु तस्य भाववादिनो
२४ वाक्यं न ग्रहीष्यति स स्वजनमध्याद् उच्छेत्स्यत इति। अपि च
शमूयेलादयो यावन्तो भाववादिनः कालानुक्रमेण भाषितवन्तः सर्व्वे
२५ तेऽपीमं कालमधि भाविवाक्यं कथयामासुः। यूयं हि भाववादिनां
सन्ताना अस्मत्पूर्व्वपुरुषैः सार्द्धमीश्वरेण स्थापितस्य समयस्य चाधि-
कारिणः सन्तानाः। तं स्थापयन् सोऽब्राहाममवादीत्, तव वंशे
२६ मेदिन्याः सर्व्वाणि कुलान्याशिषं लप्स्यन्त इति। प्रथमं युष्मदन्ति-
कमीश्वरः स्वसेवकं यीशुमुत्थाप्यैकैकं स्वस्वपापात् परावर्त्त्य युष्मान्
आशिषो भाजनानि करिष्यन्तं तं प्राहिणोत्॥ ३॥

---

४ चतुर्थोऽध्यायः।

१ पितरस्योपदेशेन महायाजकानां क्रोधः पितरयोहनयोः कारायां स्थापनं
५ पितरे योहने च राजविचारः पितरस्योत्तरं १३ पितरयोहनौ प्रति ख्रीष्ट-
नामप्रचारनिषेधनं २३ तेषां मण्डल्यागमनं प्रार्थनञ्च ३१ प्रार्थनया पवित्रात्म-
प्राप्तिः शिष्याणामैकत्वं धनविभागश्च।

१ 　यदा तौ जनान् प्रतीत्थमभाषेतां, तदा याजका धर्म्मधाम्नः
२ सेनापतिः सिदूकीयाश्च तावुपतस्थुः, यतस्तौ जनानुपादिशतां यीशौ
३ मृतानां मध्यादुत्थानमज्ञापयताञ्चेत्यनेन ते पर्य्यतप्यन्त। अतस्तयो
र्हस्तार्पणं कृत्वा ते परदिनपर्य्यन्तं तौ कारायां निदधुः, यतस्तदा
४ सन्ध्यासीत्। ये तु वाक्यं श्रुतवन्तस्तेषां बहवो विश्वासिनो जाताः,
पुरुषाश्च सङ्ख्यया न्यूनाधिकं पञ्च सहस्राण्यासन्।

परदिनेऽध्यक्षाः प्राचीनाः शास्त्राध्यापका हानननामा महाया- ५
जकः कायाफा योहनः सिकन्दरश्च महायाजकीयकुलजाता अन्ये ६
सर्व्वे नराश्च यिरूशालेमे समाजग्मुः, मध्यस्थाने तौ स्थापयित्वा ७
पप्रच्छुश्च, केनाधिकारेण केन नाम्ना वा युवामिदं कृतवन्तौ?
तदा पवित्रेणात्मना पूर्णः पितरस्तान् जगाद, भो जनाध्यक्षा इस्रा- ८
येलस्य प्राचीनाश्च, अयं केन स्वास्थ्यं प्राप्तवानिति रोगिणोऽस्य ९
मनुष्यस्योपकारमधि यद्यावां पृच्छ्यावहे, तर्हि सर्व्वै र्युष्माभिः १०
सर्व्वैरिस्रायेलीयजनेन चेदं ज्ञायतां, यो युष्माभिः क्रुशमारोपित
ईश्वरेण तु मृतानां मध्यादुत्थापितस्तस्यैव नासरतीयस्य यीशु-
ख्रीष्टस्य नाम्नायं युष्मत्समक्षमरोगी तिष्ठति। स एव स्थपतिभि ११
र्युष्माभिरवज्ञातः स प्रस्तरो यः कोणस्य मुख्यप्रस्तरो जातः। न १२
च विद्यतेऽन्यस्मिन् कस्मिन्नपि परित्राणं, नापि वास्त्यन्यत् किमपि
नाम स्वर्गस्याधो मनुष्येभ्यो दत्तं यद्वारास्माभिः परित्राणं प्राप्तव्यं।

तदा पितरयोहनयो र्निर्भयतां पश्यन्तस्तावक्षतविद्यौ सामान्य- १३
नराविति बुद्ध्वा च ते विस्मिता बभूवुस्तौ यीशोः सङ्गिनावास्ता-
मित्यभ्यजानंश्च। तं स्वस्थीकृतं मनुष्यन्तु ताभ्यां सार्द्धं तिष्ठन्तं १४
पश्यन्तः किमपि प्रतिवदितुं न शेकुः। ततः परं सभातस्तेषां निर्ग- १५
मनमादिश्य ते मिथ इत्थं मन्त्रयितुमारेभिरे, इमौ नरावुद्दिश्या- १६
स्माभिः किं कर्त्तव्यं? यतः प्रसिद्धमेकमभिज्ञानार्थकर्म्म ताभ्यां यद्-
कारि तद् यिरूशालेमनिवासिनां सर्व्वेषां प्रत्यक्षमस्माभिश्च निह्नो-
तुमशक्यं। परन्तु सा कथा प्रजासु यथाधिकं न व्याप्नुयात् तदर्थं १७
वयं तौ तर्जयन्तोऽद्यप्रभृति तेन नाम्ना कमपि किमपि मा भाषे-
थामित्यादेक्ष्यामः। ततः परं ते तावाहूयाज्ञापयामासुः, इतः परं १८
यीशो र्नाम्ना कथञ्चित् किमपि मा व्याहरतं मा शिक्षयतं वेति।

१९ पित्रयोहनौ तु प्रतिगदन्तौ तानवादिष्टाम् ईश्वरस्याज्ञातो युष्मा-
कमाज्ञायामधिकमवधानमीश्वरस्य दृष्टौ न्याय्यं न वेति युष्माभि
२० र्निर्णीयतां । आवाभ्यां हि यद्यद्दृश्यश्रावि च तन्न भाषितुमशक्य-
२१ मिति । तदा ते पुनस्तौ तर्जयित्वा विससृजुः, यतो यत् सम्भूतं तद्धेतोः
सर्व्वे ईश्वरमस्तुवन्, अतो जनभयात् ते तयोः शासनस्योपायं
२२ नालभन्त । तत् स्वास्थ्यप्रदानरूपमभिज्ञानञ्च यस्मिन् नरे प्रदर्शितं
तस्य वयश्चत्वारिंशद्वर्षेभ्योऽप्यधिकमासीत् ।

२३ इत्थं विसृष्टौ तौ स्वीयात्मीयानां समीपमगमतां मुख्ययाजकैः
२४ प्राचीनैश्च यद्यदुक्तौ तत् तेभ्यः कथयामासतुश्च । श्रुत्वा ते चैकचि-
त्तेनेश्वरमुद्दिश्य प्रोच्चैः प्रार्थयमाना अवदन्, भो नाथ, स्वर्गस्य
भूमण्डलस्य समुद्रस्य च तत्र विद्यमानानां सर्व्वेषाञ्च त्वमेव स्रष्टे-
२५ श्वरः, त्वत्सेवकस्य दायूदस्य मुखेन च त्वमिदं भाषितवान्,

किमर्थं भिन्नजातीया लोकाः कुर्व्वन्ति गर्ज्जनं ।
देशवासिप्रजाश्चापि चिन्तयन्ति व्यलीकतां ॥
२६ उत्तिष्ठन्ति महीपालाः समायान्ति च नायकाः ।
परमेशस्य तेनैव चाभिषिक्तस्य शात्रवात् ॥

२७ सत्यं हि, पवित्रस्तव सेवको यो यीशुस्त्वयाभिषिक्तस्तस्य विरुद्धं
२८ नगरेऽस्मिन् हेरोदः पन्तीयः पीलातश्च परजातीयैरिस्रायेलीयवं-
शीयैश्च जनैः सार्द्धं मिलित्वा साधितवन्तौ सर्व्वं तद् भव्यं यत् तव
२९ हस्तेन मन्त्रणया च पुरा निर्णीतमासीत् । इदानीञ्च, भो प्रभो,
तेषां विविधतर्जनमवलोकय स्वदासेभ्यश्च सम्पूर्णनिर्भयत्वेन त्वद्वाक्य-
३० कथनस्य सामर्थ्यं देहि तदर्थञ्च प्रसारय स्वहस्तमारोग्यदानाय तव
पवित्रसेवकस्य यीशो र्नाम्नाभिज्ञानार्थकर्म्मणामद्भुतलक्षणानाञ्च सिद्धये
३१ च । तैरित्थं प्रार्थिते यत्र ते समवेता आसंस्तत् स्थानं चकम्पे,

सर्व्वे ते च पवित्रेणात्मना पूर्णा ईश्वरस्य वाक्यं निर्भयमकथयन्।
कृतविश्वासिनाञ्च निकरस्य चित्तमेकं मनश्चैकमासीत्। नापि ३२
च कोऽपि सर्व्वस्वस्य किमपि निजस्वमवदत् अपि तु सर्व्वमेव तेषां
साधारणमासीत्। प्रेरिताश्च महाप्रभावेण प्रभो र्यीशोः पुन-
रुत्थाने साक्ष्यं प्रादुः। तेषु सर्व्वेषु च महानुग्रहोऽवर्त्तत। ३३
फलतो दुर्गत एकोऽपि तेषु नाविद्यत, यतो यावन्तो भूमि- ३४
खण्डानां गृहाणां वा स्वामिन आसंस्तैस्तानि विक्रीय यदा यद्
व्यक्रीयत तदा तस्य मूल्यमानीय प्रेरितानां चरणेषु न्यधीयत
ततः परम् एकैकस्मै प्रयोजनानुसाराद् व्यतीर्य्यत। तदा यो प्रेरितै ३५
र्बार्णबा अर्थतः प्रबोधपुत्र इत्यभिहितः स कुप्रद्वीपे जातो योषि- ३६
नामा लेवीयः क्षेत्रस्यैकस्य स्वाम्यासीत्, स तद् विक्रीय मूल्य- ३७
मानीय प्रेरितानां चरणेषु निदधौ॥४॥

---

५ पञ्चमोऽध्यायः।

१ धनविभागे कापट्यकरणाद् अननियसाफीरयोर्मरणं १२ प्रेरितानां बह्वाश्चर्य्य-कर्म्मकरणं १७ तेषां कारायां स्थापनं दिव्यदूतैस्तेषां मोचनं महायाजकस्य समीपे पित्रस्योत्तरं ३३ तेनोत्तरेण सभास्थानां कोपिलं गमलीयेल्मन्त्रणया प्रेरितानां प्रहारेण विसर्जनञ्च।

अननियाख्यस्त्वेकः पुरुषः स्वभार्य्यायाः साफीरायाः सम्मत्या १
कञ्चिद् विषयं विक्रीय भार्य्यायामप्यवगतायां मूल्यस्यांशमात्मसात् २
कृत्वा कञ्चिदंशमानीय प्रेरितानां चरणेषु निदधौ। पित्रस्तु तम- ३
वादीत्, अननिय, किमर्थं शैतानस्तव हृदयं पूरयित्वा त्वं यथा ४
पवित्रायात्मनेऽनृतं कथयेस्तद्भूमिखण्डस्य मूल्यस्य चांशमात्मसात्
कुर्य्यास्तथा त्वां प्रवर्त्तयामास? स्थितिकाले स किं न तवातिष्ठत्?

विक्रीते च तन्मूल्यं किं न तवाधीनमासीत्? किमर्थमेतत् कर्म्म
त्वद्धृदयेऽग्राही? न मनुष्येभ्योऽपि त्वीश्वरायानृतं कथितं त्वया।
५ कथा एताः शृण्वन्ननियः पतित्वा प्राणांस्तत्याज, यावन्त-
६ श्चाश्रौषुस्ते सर्व्वे महाभयापन्नाः। युवानस्तूत्थाय तं वस्त्रेण वेष्ट-
यामासु र्वहिर्व्वूढ्वा शवागारे निदधुश्च।

७ तदनन्तरमतीते प्रायेणैकस्मिन् प्रहरे तस्य पत्नी तद् वृत्तम-
८ ज्ञात्वा प्रविवेश। पितरस्तां सम्बोध्य जगाद, मां वद, सा भूमिः
किं युवाभ्यामेतावन्मुद्राभि र्विक्रीता? साब्रवीत्, सत्यम् एतावती-
९ भिरेव। तदा पितरस्तां जगाद, कथमेतद् यद् युवां प्रभोरात्मानं
परीक्षितुमेकमन्त्रणौ जातौ? पश्य तव पति र्यैः शवागारे निहित-
१० स्तेषां पादा द्वारदेश उपस्थितास्त्वामपि वहि र्वक्ष्यन्ति। अनेन
सा तत्क्षणं तस्य चरणयो र्निपत्य प्राणांस्तत्याज। ते युवानश्च
प्रविश्य तां मृतां दृष्ट्वा वहिर्व्वूढ्वा पतिपार्श्वे तां शवागारे
११ निदधुः। ततः कृत्स्ना मण्डली यैश्चेदमश्रावि सर्व्वे ते च महा-
भयेनापन्नाः।

१२ अपि च प्रेरितानां हस्तै र्जनेषु बह्वन्यभिज्ञानार्थकर्म्माण्यद्भुत-
१३ लक्षणानि चासाध्यन्त। सर्व्वे चैकचित्ताः शलोमनोऽलिन्देऽवर्त्तन्त।
अपरेषान्तु कोऽपि मनुष्यस्तेष्वनुषंक्तुं प्रगल्भतां नागमत्। तथापि
१४ जनास्तान् समाद्रियन्त। विश्वासिनां सङ्ख्या तु पुरुषाणां योषिताञ्च
१५ बाहुल्येनोत्तरोत्तरमवर्धत। चत्वरेष्वपि मनुष्यै र्वहिरानीय व्याधिताः
शय्यासु खट्वासु वा शायिता न्यधीयन्त, किंस्विदत्रागच्छतः पितरस्य
१६ छायैव तेषां कमपि स्प्रक्ष्यतीत्याशया। चतुर्द्दिक्स्थनगराणां नर-
निकरश्च व्याधितान् अशुच्यात्मभिः क्लिष्टांश्च मनुष्यान् आनयन्तो
यिरूशालेमं समागच्छन्, सर्व्वे ते चारोग्यमलभन्त।

तदा महायाजकः सर्व्वे तस्य सङ्गिनश्चार्थतः सदूकिमतावल- १७
म्बिनां सङ्घात ईर्ष्यया पूर्णाः प्रेरितेषु हस्तार्पणं कृत्वा तान् १८
साधारणकारायां निदधुः। प्रभो र्दूतस्तु रात्रौ काराया द्वाराणु- १९
द्घाटयामास, तांश्च वहि र्नीत्वा जगाद, यूयं गत्वा धर्म्मधाम्नि २०
तिष्ठन्तो जनेभ्य एतज्जीवनावहानि सर्व्वाणि वाक्यानि कथयत।
श्रुत्वा त आसन्नप्रभाते धर्म्मधाम प्रविश्योपदेष्टुमारेभिरे। इतो- २१
मध्ये महायाजकस्तत्सङ्गिनश्चोपस्थाय सभाम् इस्रायेलीयसन्तानानां
कृत्स्नं प्राचीनवर्गञ्च समाहूय प्रेरितानामानयनार्थं पदातिनः कारा- २२
गृहं प्रेषयामासुः। ते तूपस्थाय तान् कारायां नासादयामासुः।
अतस्ते प्रत्यावृत्य जगदुः सम्पूर्णयत्नेन रुद्धं कारागृहं द्वारदेशेषु २३
तिष्ठन्तो रक्षकाश्चास्माभि र्दृष्टाः, प्रविश्य त्वभ्यन्तरे कोऽपि नासा-
दितः। कथामिमां श्रुत्वा महायाजको धर्म्मधाम्नः सेनाध्यक्षो २४
मुख्ययाजकाश्चेदं केन परिणंस्यतीति तेषु चिन्ताकुला अभवन्। तदा २५
कश्चिदागत्य तेभ्यो निवेदयामास, पश्यत, ये पुरुषा युष्माभिः
कारायां समर्पितास्ते धर्म्मधाम्नि तिष्ठन्तो जनमुपदिशन्ति। तदा २६
सेनाध्यक्षः पदातयश्च गत्वा तानानिनाय, न तु बलेन, जनभयात्
प्रस्तरै र्घानिष्यामह इति शङ्कमानाः। तांश्चानीय सभायां स्थापया- २७
मासुः। महायाजकस्तदा तान् पप्रच्छ, तेन नाम्ना नैवोपदिशतेति २८
यूयं किं न दृढमस्माभिराज्ञापिताः? पश्यत तु, युष्मदुपदेशेन
यूयं यिरूशालेमं पूरयितवन्तः, तस्य नरस्य शोणितमस्मासु वर्त्तयितुं
यतध्वे च। ततः पितरोऽन्ये प्रेरिताश्च प्रतिजगदुः, मनुष्याणा- २९
माज्ञात ईश्वरस्याज्ञाधिकं ग्रहीतव्या। यूयं काष्ठ उद्बध्य यं ३०
व्यापादितवन्तः स यीशुरस्मत्पूर्व्वपुरुषाणामीश्वरेण पुनरुत्थापितः।
ईश्वरः स्वदक्षिणहस्तेन तमेवोच्चीकृत्येस्रायेलाय मनःपरावर्त्तनस्य ३१

३२ पापमोचनस्य च प्रदानार्थमधिपतिं त्रातारञ्च कृतवान्। कथा-
स्वेतासु तस्य साक्षिणो वयं स च पवित्र आत्मा यमीश्वरः स्वीया-
ज्ञाग्राहिभ्यः प्रदत्तवान्।
३३ एतच्छ्रुत्वा ते रुष्टास्तेषां हत्यार्थममन्त्रयन्त। सभायामुपस्थित-
३४ स्लोकः फरीशी नरोऽर्थतो सर्व्वजनेन सम्मानितो गमलीयेल
इत्यभिधो व्यवस्थाध्यापक उत्थाय प्रेरितानां कियत्कालार्थं बहि-
३५ ष्करणमादिश्य सभास्थान् जगाद, भो इस्रायेलीयनराः, यूयं तान्
३६ मनुष्यान् प्रति यत् करिष्यथ तत्र सावधाना भवत। एतेभ्यो
दिनेभ्यः प्राक् थूदा आत्मानं विशिष्टं मत्वोत्तस्थौ न्यूनाधिकं
चत्वारिंशतानि नराश्च तस्मिन्ननुसस्ब्जिरे, स तु जघ्ने तस्याज्ञा-
३७ ग्राहिणश्च सर्व्वे विकीर्णा अवास्तवाश्च बभूवुः। तस्य पश्चात् नाम्नां
लेख्यारोपणकाले गालीलीय यिहूदा उत्थाय बहुजनान् स्वानु-
गमनायोन्मार्गं निनाय। सोऽपि ननाश तद्वाक्यग्राहिणश्च सर्व्वे
३८ विकीर्णा बभूवुः। अतोऽहमिदानीं युष्मान् ब्रवीमि, यूयं तान्
३९ नरांस्त्यक्त्वा मा बाधध्वं। यतो मन्त्रणमिदं कार्य्यमिदं वा चेन्मनुष्य-
मूलकं तर्हि लोपं यास्यति, तत्तु चेदीश्वरमूलकं तर्हि यूयं तस्य
लोपं साधयितुं न शक्ष्यथ। अपि त्वीश्वरेण सार्द्धं युद्धकारिणः
४० प्रतिभास्यथ। तदा ते तस्य वाक्यं जगृहुः प्रेरितांश्च स्वान्तिक-
माहूय प्रहार्य्य च, यीशो र्नाम्ना पुन र्न भाषध्वमित्यादिश्य च
४१ तान् विससृजुः। तदा तस्य नाम्नः कारणाद् वयमवमाननाया
योग्या गणिता इत्यत्रानन्दन्तस्ते सभायाः सम्मुखात् प्रतस्थिरे।
४२ कृत्स्नं दिनञ्चाविरतं धर्म्मधाम्नि गृहे चोपादिशन् यीशुरेव ख्रीष्ट
इति संवादं व्यज्ञापयंश्च ॥५॥

६ षष्ठोऽध्यायः।

१ दरिद्रगणार्थं सप्तसहकारिणां नियोजनं ५ तेषां सप्तानां मध्ये स्तिफानस्य कथा ८ अविश्वासिभिः सह विवादे स्तिफानस्यापवादित्वं।

तेषु दिनेषु वर्धमानायां शिष्याणां सङ्ख्यायाम् इब्रीयभाषिणां १
विरुद्धं यूनानीयभाषिणां मनोदुःखसूचकमिदं वाक्यमश्रावि यत्
प्रात्यहिकोपकारेऽस्माकं विधवा योषित उपेक्ष्यन्त इति। द्वादश- २
प्रेरितास्तदा शिष्यनिकरं स्वसमीपमाहूय जगदुः, वयं यदीश्वरस्य
वाक्यं विहाय भोजनमञ्चान् परिचरामस्तन्न प्रीतिजनकं। अतो भो ३
भ्रातरः, युष्मन्मध्ये पवित्रेणात्मना प्रज्ञया च पूर्णान् सप्त सुख्यातान्
नरान् निरूपयत, तानेव वयं कार्य्येऽस्मिन्नधिकरिष्यामः। वयन्तु ४
प्रार्थनायां वाक्यस्य परिचर्य्यायाञ्चाध्यवसायिनः स्थास्यामः।

कथायामेतस्यां कृत्स्नस्य जननिवहस्य प्रीतिर्जाता, अतस्ते ५
विश्वासेन पवित्रेणात्मना च पूर्णं स्तिफाननामानं नरं, फिलिपं,
प्रखरं, नीकानरं, तीमोनं, पार्म्मिणां, नीकलायाभिधमेकञ्चान्तीय-
खीयं यिहूदिमतावलम्बिनं वरयामासुः प्रेरितानां सम्मुखे स्थाप- ६
यामासुश्च, ते च प्रार्थयित्वा तेषु हस्तानर्पयामासुः। ईश्वरस्य ७
वाक्यञ्चावर्धत, यिरूशालेमे शिष्याणां सङ्ख्याप्यतीवावर्धत। याजका-
नामपि महानिवहो विश्वासेनाज्ञाग्राही बभूव।

अनन्तरं स्तिफानोऽनुग्रहेण प्रभावेन च पूर्णः सन् जनानां ८
मध्येऽद्भुतलक्षणान्यभिज्ञानार्थकर्म्माणि चासाधयत्। तदा लिबर्त्ती- ९
नानां समाज इत्यभिधस्य समाजस्य केचिदंशिनः कुरीणीयानां
सिकन्दरीयाणाञ्च केचिन्नराः किलिकियाप्रदेशिनाम् आशिया-
प्रदेशिनाञ्च समाजस्य केचिदंशिनश्चोत्थाय स्तिफानेन सार्द्धं व्यव- १०
दन्त स तु येन प्राज्ञत्वेन येनात्मना चाभाषत तयोः प्रतिरोधं कर्त्तुं

११ नाशक्नुवन्। तदा तैः प्रवर्त्तिताः केचिन्नरा अवदन् असौ मोशे-
रीश्वरस्य च विरुद्धं निन्दोक्ती व्याहरत् ता वयमाकर्णितवन्तः।
१२ इत्थं प्रजासु प्राचीनेषु शास्त्राध्यापकेषु च तैरुत्तेजितेषु ते तमुप-
१३ स्थाय दधृः सभां निन्युश्च मृषासाक्षिण उपस्थापयामासुश्च। तेऽ-
ब्रुवन् असौ नरोऽस्य पवित्रस्थानस्य व्यवस्थायाश्च विरुद्धं निन्दोक्ती
१४ व्याहर्त्तुं न विरमति। वयं हि तस्येदं वाक्यमश्रौष्म, यथा, नासरतीयो
यीशुरिदं स्थानं ध्वंसयिष्यति मोशिनास्मभ्यं दत्ता रीतीः परि-
१५ वर्त्तयिष्यति चेति। तदा सभायामासीनाः सर्व्वेऽनन्यदृष्ट्या तं समा-
लोकयन्तस्तस्याननं स्वर्गदूतस्याननमिव प्रतिभातीत्यपश्यन्॥ ६॥

---

७ सप्तमोऽध्यायः।

१ महायाजकं प्रति स्तिफानस्योत्तरं ९ पूर्व्वपुरुषाणां वृत्तान्तकथनं १७ मोशा-ख्यानकथनं ३७ शलोमनः समयं यावत् लोकानां कथा ५१ यिहूदीयान् प्रति स्तिफानतर्जनं ५४ प्रस्तराघातेन स्तिफानस्य बधश्च।

१ अनन्तरं महायाजकः पप्रच्छ, कथा एताः किं सत्याः?
२ स्तिफानोऽवादीत्, भो भ्रातरः पितरश्च, शृणुत। अस्माकं पूर्व्व-
पुरुषोऽब्राहामो हारणनगरे निवासनात् प्राग् यदा मिसपतामि-
३ यादेशेऽवर्त्तत, तदा प्रतापस्येश्वरस्तस्मै दर्शनं दत्त्वा तमवादीत्, त्वं
स्वदेशात् स्वज्ञातिजनमध्याच्च निर्गत्य मया प्रदर्शयितव्यं देशं
४ याहि। तदा स कल्दीयानां देशान्निर्गत्य हारणे न्यवास। पुन-
स्तत्पितु मरणात् परं स तं ततोऽपि प्रस्थाप्येदानीं युष्माभिरध्युष्य-
५ माणेऽस्मिन् देशे वासयामास। तत्र तु तस्मै कमपि भूम्यधिकारं
न ददौ पदैकमानामपि भूमिं न ददौ तथा च निजस्वविषयार्थं
तं देशं तस्मै तदीयोत्तरवंशाय च दातुं प्रतिशुश्राव। तदा स

निःसन्तान आसीत्। ईश्वर इत्थमप्यभाषत, यत् तस्य वंशश्चत्वारि- ६
शतानि वर्षान् परदेशप्रवासी भविष्यति तज्जनैर्दासीकृतः पीडयिष्यते
च। ताः प्रजास्तु यस्या जाते दासा भविष्यन्ति, तामहं शासिष्या- ७
मीति प्रभुरुवाच, ततः परं ता निर्गत्य स्थानेऽस्मिन् मामाराधयि-
ष्यन्तीति। स तस्मै त्वक्छेदस्य नियममपि ददौ। तदनुरूपञ्च स ८
इस्हाकं जनयित्वाष्टमे दिने तस्य त्वक्छेदं चकार। पुनरिस्हाको
याकोबं प्रति, याकोबश्चास्माकं द्वादश पितृकुलपतीन् प्रति तदेव
चकार।

ते पितृकुलपतयो योषेफायेर्ष्यन्तो मिसरगामिनरेषु तं ९
विचिक्रियिरे। ईश्वरस्तु तेन सार्द्धमवर्त्तत तद्भुक्तात् सर्व्वस्मात् १०
क्लेशात् तमुद्धारे च, तस्मै मिसरराजस्य फरौणस्य समक्षमनुग्रहं
प्राज्ञताञ्च वितितार च, स च तं मिसरस्य स्वीयकृत्स्नकुलस्य चाधि-
पत्ये नियुयुजे। तदा कृत्स्ने मिसरदेशे कनाने च दुर्भिक्षं महा- ११
क्लेशश्चोपतस्थाते, भक्ष्यद्रव्याणि चास्मत्पूर्व्वपुरुषैरलभ्यान्यभवन्। तदा १२
मिसरे गोधूमा विद्यन्त इति निशम्य याकोबः प्रथममस्मत्पूर्व्व-
पुरुषान् प्राहिणोत्। अनन्तरं द्वितीये गमने योषेफः स्वभ्रातृभिः १३
प्रत्यभिज्ञातः फरौणस्य समक्षञ्च योषेफस्य जातिः प्रकाशिता। तदा १४
योषेफः संवादं प्रहित्य स्वपितरं याकोबं निजान् पञ्चसप्तति-
सङ्ख्यान् सर्व्वज्ञातींश्चानाययामास। अनन्तरं याकोबो मिसरं १५
जगाम, तत्रैव स चास्मत्पूर्व्वपुरुषाश्च प्राणांस्तत्यजुः। तेषां शवाश्च १६
शिखिमं नीताः शिखिमस्यहमोरस्य पुत्रेभ्यो रूप्यमूल्यं दत्त्वा-
ब्राहामेण क्रीते शवागारे निदधिरे।

ईश्वरस्त्वब्राहामाय शपथेन यत् प्रतिश्रुतवान् तस्याङ्गीकार- १७
वाक्यस्य सिद्धिसमयो यदा निकटोऽभवत् तदा मिसरे प्रजा-

१८ वर्धत बहुसङ्ख्या चाभवत्। शेषे योषेफं यो नाजानात् तादृशो
१९ ऽपरो मिसरराज उत्पन्नः। सोऽस्मज्जाते विरुद्धं छलमाश्रित्यास्माकं
पूर्व्वपुरुषानपीडयत् फलतस्तेषां शिशवो यथा न जीवेयुस्तदर्थं
२० तेषां बहिःपरित्यागमादिदेश। तस्मिन् काले मोशिर्जनि, स
ईश्वरस्य दृष्टौ मनोहर आसीत्, मासत्रयं पितृगृहे पर्य्यपाल्यत च।
२१ ततः परं वहिः परित्यक्तं तं फरौणस्य दुहितोद्धार स्वार्थं पुत्रं
२२ नियुज्य परिपालयामास च। ततो मोशि र्मिस्रीयाणां सर्व्वविद्यानं
२३ शिक्षितो वाक्येषु क्रियासु च शक्तिमान् जातश्च। इत्थं चत्वारिंश-
द्वर्षपरिमिते काले तेनातिवाहिते स्वभ्रातृणामिस्रायेलसन्तानानां
२४ तत्त्वावधारणे प्रवृत्तिस्तस्य हृदाकाश उदियाय। ततस्तेषामेकं
प्रत्यन्यायः क्रियत इति दृष्ट्वा स उपकारं कुर्व्वंस्तं मिस्रीयं हत्वा
२५ तस्य पीड्यमानस्य कृतेऽन्यायस्य प्रतीकारं चकार। अत्र सो-
ऽन्वमन्यत, मम भ्रातरो भोत्स्यन्ते यन्मम हस्तेनेश्वरस्तेभ्यस्त्राणं
२६ ददातीति। तत्तु ते नाबोधि। परदिने तेषु मिथो युध्यमानेषु
स तेषां प्रत्यक्षो भूत्वा साग्रहं सन्धये प्रवर्त्तयंस्तानब्रवीत्, भो
२७ नराः, भ्रातरो यूयं, किमर्थं परस्परमपकुरुथ? तदा निकटस्थस्या-
पकारी तं दूरीकुर्व्वन् जगाद, कस्त्वां शासकं प्राड्विवाकञ्च कृत्वा-
२८ स्मास्वधिकृतवान्। त्वं यथा ह्यस्तं मिस्रीयं हतवांस्तथा मामपि
२९ हन्तुं किमिच्छसि? तद् वचः श्रुत्वा मोशिः पलाय्य मिदियनदेश-
३० प्रवासी बभूव तत्र पुत्रद्वयं जनयामासे च। इत्थं चत्वारिंश-
द्वर्षेष्वतीतेषु सीनयगिरे र्मरौ प्रभो र्दूतो गुल्मानलस्य शिखायां
३१ तस्मै दर्शनं ददौ। तस्मिन् दर्शने मोशि र्विस्मितः। यदा तु तत
समालोकयितुं समीपं याति, तदा तं प्रति प्रभोरियं वाणी बभूव,
३२ तव पूर्व्वपुरुषाणामीश्वरोऽहम्, अब्राहामस्येश्वर इस्हाकस्येश्वरो या-

कोवस्य चेश्वरः। तदा मोशिर्व्विपमानः समालोकयितुं प्रगल्भो न
बभूव। प्रभुस्तु तमब्रवीत्। तव चरणयोरुपानहौ मोचय यतस्त्वं ३३
यत्र तिष्ठसि सा पवित्रा भूमिः। मिसरस्थानां मम प्रजानां पीडनं ३४
मया सम्यग् दृष्टं श्रुतञ्च तासामार्त्तरावः। ता उद्धर्त्तुमेवाहम-
वतीर्णः। इदानीञ्च त्वमायाहि, अहं त्वां मिसरं प्रहेष्यामि। तं ३५
यं मोशिं प्रत्याख्याय त उक्तवन्तः, कस्त्वां शासकं प्राड्विवाकञ्च
नियुक्तवांस्तमेवेश्वरः शासकं मोचयितारञ्च कृत्वा गुल्मे तस्मै दर्शन-
दातु र्दूतस्य हस्तेन प्रेषयामास। स एव मिसरदेशे लोहितसमुद्रे ३६
च मरौ च चत्वारिंशद् वत्सरान् अद्भुतलक्षणान्यभिज्ञानार्थकर्म्माणि
च साधयंस्तान् वहि र्निनाय। स एव मोशिरिस्रायेलसन्तानान् ३७
जगाद युष्माकमीश्वरः प्रभु र्युष्मदर्थं युष्मद्भ्रातृणां मध्यान्मादृशं
भाववादिनमुत्पादयिष्यति, तस्य वाक्यं युष्माभि र्ग्रहीतव्यमिति। स ३८
एव मरौ वर्त्तमानायां मण्डल्यां सीनयगिरौ तेन संलपतो दूत-
स्यास्मत्पूर्व्वपुरुषाणाञ्च मध्यस्थो जातोऽस्मभ्यं दातव्यानि जीवना-
वहानि वचांसि लब्धवांश्च। अस्मत्पूर्व्वपुरुषास्तु तस्याज्ञावर्त्तिनो ३९
भवितुमनिच्छन्तस्तं दूरीकृत्य स्वमनःसु मिसरं प्रत्यावृत्त्य हारो- ४०
णमब्रुवन् अस्मदर्थं देवान् निर्म्मिमीष्व येऽस्माकमग्रे यास्यन्ति,
यतो येन मोशिना वयं मिसराद् वहिरानीतास्तस्य का दशा
सम्भूता तन्न जानीम इति। तस्मिन् काले ते गोवत्समूर्त्तिं निर्म्माय ४१
तां मूर्त्तिमुद्दिश्य यज्ञमनुतस्थुः स्वहस्तानां कर्म्मस्वाननन्दुश्च। तत ४२
ईश्वरः पराङ्मुखीभूय गगनीयवाहिन्या आराधनार्थं तांस्तत्याज।
भाववादिनां ग्रन्थे तदधीदं लिखितमास्ते,

चत्वारिंशत् समा यावत् किं मह्यं प्रान्तरे बलीन्।
किं नैवेद्यानि वादत्त यूयं भो इस्रयेल्कुल॥

४३ मोलकस्यापि दूष्यन्तु रिम्फन्देवस्य तारकां ।
युष्माभि र्निर्म्मिताः पूज्या अन्यास्तावद्दताकृतीः ।
ततोऽहं बाबिलः पारं वो नेष्यामि प्रवासयन् ॥

४४ यो मोशिं तेन दृष्टस्यादर्शस्यानुरूपं साच्यदूष्यं निर्म्मातुमादिष्टवां-
४५ स्तस्याज्ञातस्तद् दूष्यं मरावस्मत्पूर्व्वपुरुषाणां मध्येऽविद्यत, यिहो-
शूयस्य सङ्गिनोऽस्मत्पूर्व्वपुरुषाश्च पैतृकविषयमध्ये तल्लब्ध्वा परजा-
तीनामधिकारग्रहणकाले तत्र नीत्वास्मत्पूर्व्वपुरुषाणां सम्मुखादी-
श्वरेण निरस्तानां तासां जातीनां देशे दायूदस्य कालं यावत्
४६ तदरक्षन्। स ईश्वरस्यानुग्रहभाजनं भूत्वा याकोबेश्वरस्य कृत आवा-
४७ सस्याविष्कारं प्रार्थयाञ्चक्रे। शलोमा तु तस्य कृते गृहं निर्म्ममे।
४८ अपि तु परात्परो हस्तनिर्म्मितेषु निवासेषु न वसति, भाववादिना
यथोक्तं,

४९ मम सिंहासनं स्वर्गो मम पादासनञ्च भूः ।
प्रभुराह गृहं कीदृग् विनिर्म्मास्यथ मत्कृते ॥
मद्विश्रामार्थकं स्थानं कुत्र वा लक्षयिष्यते ।
५० मामकीनकरस्येदं साकल्यं किं न सृष्टवान् ॥

५१ भो कठोरग्रीवा हृदयेषु कर्णेषु चाच्छिन्नत्वचश्च जनाः, यूयं सर्व्वदा
पवित्रस्यात्मनः प्रतिकूलाचाराः, युष्माकं पूर्व्वपुरुषा यादृशा आसन्,
५२ यूयमपि तादृशाः। भाववादिनां मध्ये को युष्मत्पूर्व्वपुरुषै र्नोपद्रुतः।
तस्य धर्म्मवतो भाव्यागमनं ये ज्ञापितं तांस्ते जघ्नुः। इदानीञ्च
५३ यूयं तस्य समर्पयितारो घातकाश्च जाताः। स्वर्गदूतानां नियम-
मिव व्यवस्थां लब्ध्वा यूयं तां न रक्षितवन्तः।

५४ एतच्छ्रुत्वा ते रुष्टहृदया जातास्तं प्रति दन्तानघर्षंश्च। स तु
५५ पवित्रेणात्मना पूर्णः सन्ननन्यदृष्ट्या स्वर्गमालोकयन्नीश्वरस्य प्रताप-

मीश्वरस्य दक्षिणे तिष्ठन्तं यीशुञ्च ददर्श जगाद च, पश्य, उद्घाटितं ५६
स्वर्गमीश्वरस्य दक्षिणे तिष्ठन्तं मनुष्यपुत्रञ्च वीक्षे, तदा ते प्रोच्च- ५७
रवेण क्रोशन्तः स्वकर्णान् रुद्धा चैकचित्तेन तमभ्यद्रवन्। नगराद् ५८
वहिष्कृत्य च तं प्रस्तरैराघ्नन्। साक्षिणश्च शौलनाम्नः कस्यचिद्
यूनश्चरणयोः स्ववासांसि निदधुः। यदा ते स्तिफानं प्रस्तरैराघ्नंस्तदा ५९
स प्रार्थयमानोऽवदत्, प्रभो यीशो ममात्मानं गृहाण। जानुनी ६०
पातयित्वा चाब्रवीत्, तेषामिदं पापं मा गणय। इत्युक्त्वा स
निदद्रौ। शौलस्तु तस्य हत्यायां समप्रीयत॥ ७॥

---

८ अष्टमोऽध्यायः।

१ ताडनाभि मण्डलीयलोकेषु विकीर्णेषु फिलिपस्य शमरियनगरगमनं तत्रा-
नेकाश्चर्य्यक्रियाकरणं ९ मायाविशिमोनस्य विश्वसनं १४ मुद्राभिः पवित्रमात्मानं
क्रेतुं चेष्टायां शिमोनापराधः २६ कूशदेशीयनपुंसकस्य वृत्तान्तश्च।

तस्मिन् दिने यिरूशालेमस्थमण्डल्या विरुद्धमुत्कट उपद्रव १
उत्पन्नः। ततः प्रेरितेभ्योऽन्ये सर्व्वे यिहूदियायाः शमरियायाश्च
ग्रामेषु व्यकीर्य्यन्त। तथाच श्रद्धाशालिनः केचिन्नराः स्तिफानस्य २
समाधिक्रियामनुष्ठाय तमधि महाविलापमकार्षुः। शौलस्तु ३
मण्डलीं लुम्पन् गृहाणि प्रविश्य पुरुषान् योषितश्च व्यपकर्षन्
कारायां समर्पयत्।

तदा ये विकीर्णास्ते त्रिविधस्थानानि गच्छन्तः सुसंवादस्य वाक्यं ४
व्यज्ञापयन्। विशेषतः फिलिपः शमरियाया नगरं गत्वा तत्रत्य- ५
मनुष्याणां मध्ये ख्रीष्टस्य कथामघोषयत्। तदा फिलिपो यद्यद्
अकथयत्, जननिवहा एकचित्तास्तच्च मनांसि न्यदधत, यतस्तेन ६
साध्यमानानामभिज्ञानार्थकर्म्मणां वृत्तान्तं तेऽशृण्वन् अथवा तान्य-
पश्यन्। फलतोऽशुच्यात्माविष्टेभ्यो बहुभ्य आत्मान उच्चरवमुदीरयन्तो ७

८ निरगच्छन् अवशाङ्गाः खञ्जाश्च बहवो निरामया अभवन्। अनेन
तस्मिन् नगरे महानन्दः सञ्जातः ।
९ तस्मिन् नगरे पूर्व्वमुपस्थितः शिमोननामा पुरुष एक आसीत्,
स मायाविलवृत्तिमास्थाय महापुरुषोऽहमिति वदन् शमरी-
१० यजातिं विस्मयापन्नामकरोत् । असावीश्वरस्य महती शक्तिरिति
वदन्तः क्षुद्रा महान्तश्च सर्व्वे तस्मिन् मनांसि न्यदधत च ।
११ आदीर्घकालाद् विविधमायाविलेन ते विस्मयापन्नास्ततो हेतो-
१२ स्तस्मिन् मनांसि न्यदधत । यदा त्वीश्वरराज्यस्य यीशुख्रीष्टस्य
नाम्नश्च सुसंवादं विज्ञापयति फिलिपे तेषां विश्वासोऽजायत तदा
१३ पुरुषा योषितश्च स्नापिता अभवन्। स शिमोनोऽपि व्यश्वसीत्,
स्नापितश्च नित्यं फिलिपस्यान्तिकेऽवर्त्तत, अभिज्ञानानां प्रभावसि-
द्धानाञ्च महतां कर्म्मणां साधनं पश्यन् विस्मयापन्नोऽभवच्च ।
१४ अनन्तरं शमरीया ईश्वरस्य वाक्यं गृहीतवन्त इति श्रुत्वा
यिरूशालेमस्थाः प्रेरिताः पितरं योहनञ्च तेषां समीपं प्राहिण्वन्,
१५ तौ च तत्रोपस्थाय यथा ते पवित्रमात्मानं लभेरंस्तेषां निमित्तं
१६ तथा प्रार्थयाञ्चक्राते । यतस्तदा स आत्मा तेषां कस्याप्युपरि न
पतितवान्। ते केवलं प्रभो यीशो र्नाम्ना स्नापिता आसन् ।
१७ अतस्तौ तेषु हस्तार्पणमकुरुतां ते च पवित्रमात्मानमलभन्त ।
१८ अनन्तरं प्रेरितयो र्हस्तार्पणेन पवित्र आत्मा वितीर्य्यत इति
१९ लक्षयित्वा शिमोनस्तयोः समीपं मुद्रा आनीय तावब्रवीत्, मह्य-
मपीदं सामर्थ्यं दत्तं, यन्मया यस्मिन् कस्मिंश्चिद् हस्तार्पणं क्रियते
२० स पवित्रमात्मानं लभेतेति। पितरस्तु तमवादीत्, तव रूप्यं
त्वया सहितं विनाशमाप्नोतु, यतस्त्वमीश्वरस्य दानं मुद्राभिः क्रेतुं
२१ कल्पितवान्। कथायामस्यां कोऽप्यंशः कोऽप्यधिकारो वा तव

नास्ति, यत ईश्वरस्य समक्षं तव हृदयं न सरलं। अतः कुभावा- २२
दस्मान्मनः प्रत्यावर्त्तय, कथञ्चित् तव हृदयस्यैतत्सङ्कल्परूपं पापं
यन्मार्ज्यते तदेवेश्वरं प्रार्थयस्व च, यतोऽहं पश्यामि, त्वं तिक्तता- २३
रूपपित्ते चाधर्म्मरूपबन्धने च पतितः। शिमोनस्तु प्रतिभाष- २४
माणोऽब्रवीत्, युवामेव मदर्थं प्रभुं तथा प्रार्थयेथां यथा युष्म-
त्कथितं किमपि मयि न वर्त्तिष्यते। अनन्तरं तौ साक्ष्यं दत्त्वा २५
प्रभो र्वाक्यं कथयित्वा च यिरूशालेमं प्रतिजग्मतुः, गमनकाले
च शमरीयाणां बहुग्रामेषु सुसंवादं विज्ञापयामासतुः।

प्रभो र्दूतस्तु फिलिपमालप्याब्रवीत्, त्वमुत्थाय दक्षिणां दिश- २६
मुद्दिश्य प्रस्थाय यो मार्गो यिरूशालेमाद् घसां याति तमाल-
म्बस्व, स निर्जनः। ततः स उत्थाय प्रस्थितः। पश्य च, कूशदेशीय २७
एको नपुंसकस्तत्रासीत्, स कूशीयानां कान्दाकीत्यभिधाया महिष्या
अमात्यस्तस्याः कृत्स्ने धनकोषेऽधिकृतश्च। स उपासनार्थं यिरू-
शालेमं गत्वा प्रत्यागमनकाले रथासीनो भाववादिनो यिशा- २८
याहस्य ग्रन्थं पठति। आत्मा फिलिपं जगाद, समीपं गत्वामुष्मिन् २९
रथेऽनुषज्यस्व। फिलिपस्तत्समीपं धावंस्तेन पठ्यमानानि भाववादिनो ३०
यिशायाहस्य वचांसि शृण्वंस्तमाह, भवता यत् पठ्यते तत् किं बुध्यते?
स जगाद, कथं तच्छक्यं मया बोधकहीनेन? अनन्तरं स फिलिपं ३१
जगाद, भवानारुह्य मया सार्द्धमुपविशतु। शास्त्रस्य यत् प्रकरणं ३२
तेनापठ्यत तदिदं

यथा मेषस्तथा सोऽपि वध्यस्थानमनीयत।
लोमच्छेत्तुः समक्षञ्च मूको मेषशिशु र्यथा॥
तादृगेव स्ववक्त्रस्योद्घाटनं न करोति सः।
तस्य दीनदशायाञ्च विचारोऽप्यपहारितः॥ ३३

तात्कालिकमनुष्याणां वर्णने को भवेत् क्षमः।
यतो भूमण्डलात् तस्य जीवनं व्यपह्रार्य्यते॥

३४ स नपुंसकः प्रतिभाषमाणः फिलिपमब्रवीत्, भवान् मां वक्तु-
मर्हति, कथेयं भाववादिना कमुद्दिश्य कथ्यते? स्वमुद्दिश्याथवा
३५ कञ्चिदन्यमुद्दिश्य? तदा फिलिपो वक्त्रमुद्घाट्य तस्माच्छास्त्रीयव-
३६ चनादारभ्य तं यीशोः सुसंवादं ज्ञापयामास। अनन्तरं मार्गेण
गमनकाले तोयस्थानमेकं ताभ्यां प्रापि। तदा नपुंसक आह,
३७ पश्यत्र तोयं। मम स्नापनस्य का बाधा? फिलिपस्तमब्रवीत्,
भवान् यदि सम्पूर्णनान्तःकरणेन विश्वसिति, तर्हि बाधा नास्ति।
३८ स प्रतिबभाषे, यीशुः ख्रीष्ट ईश्वरस्य पुत्र इति विश्वसिमि। तदा-
दिष्टायां तेन रथस्य गमनविरत्यां फिलिपो नपुंसकश्चोभौ तोय-
३९ मवतेरतुः, स च तं स्नापयामास। तोयमध्यात्तु तयोरारूढयोः
फिलिपः प्रभोरात्मनापहृतो नपुंसकेन च पुन र्न दृष्टः। स हि
४० सानन्दं स्वगन्तव्यमार्गेणागमत्। फिलिपस्त्वस्दोद आविष्कृतः।
ततश्चाग्रं गच्छन् सर्व्वेषु नगरेषु सुसंवादं घोषयंश्च स क्रमेण
कैसरियायामुपतस्थे॥ ८॥

---

९ नवमोऽध्यायः।

१ दम्मेशक्नगरे ख्रीष्टीयान् लोकान् ताडयितुं शौलगमनं मार्गमध्ये ख्रीष्टस्य दर्श-
नञ्च १० अननियस्य तस्मै चक्षुर्दानं तस्य स्नापनञ्च १९ शौलेन समाजगृहे
ख्रीष्टस्य सुसंवादप्रचारणं २६ तं प्रति यिहूदीयानां विपक्षता ३१ मण्डल्याः
शान्तिः ३२ पित्रस्यैनियस्वास्थ्यकरणं ३६ पित्रेण दर्कायै जीवनदानञ्च।

१ प्रभोः शिष्याणां भर्त्सनं वधञ्च तदापि शौलस्य प्राणवायुरासीत्,
२ ततो हेतोः स महायाजकस्य समीपं गत्वा दम्मेशकस्थेभ्यः समाजेभ्यो
दर्शयितव्याः पत्रिका ययाचे। तत्र यदि स तन्मार्गावलम्बिनः

कांश्चिन्मनुष्यान् आसादयति, तर्हि पुरुषांस्तांस्ता योषितो वा
शृङ्खलैर्बद्ध्वा यिरूशालेमं नेष्यतीति तस्याभिप्राय आसीत्।
गमनकाले तु यदा स दम्मेशकस्य निकटमुपातिष्ठत, तदा सहसा ३
तस्य परितो गगनात् प्रभा व्यद्योतिष्ट। अनेन स भूमौ पतित्वा ४
मामालपन्तीमिमां वाणीमश्रौषीत्, शौल शौल किमर्थं मामुप-
द्रवसि? सोऽब्रवीत्, को भवान्, प्रभो? प्रभु र्जगाद, त्वं यमुप- ५
द्रवसि स यीशुरहं; दुष्करं तव पदाघातेन कण्टकाग्राणां ताडनं।
स कम्पमानश्चमत्कृतश्च पप्रच्छ, प्रभो, भवान् मया कर्त्तव्यं किं ६
वाञ्छति? प्रभुस्तमाह, उत्थाय नगरं प्रविश, यत् त्वया कर्त्तव्यं
तत् तुभ्यं कथयिष्यते। तत्सङ्गिनः पान्थास्तु मौनिनोऽतिष्ठन्, यतः ७
शब्दं शृण्वन्तोऽपि ते कमपि नापश्यन्। अनन्तरं शौलो भूमित ८
उत्तस्थौ। उन्मीलितयोस्तु तस्य नेत्रयोः स कमपि नापश्यत्, केचि-
न्नरास्तु तस्य हस्तं धृत्वा तं दम्मेशकं निन्युः। तत्र स त्रीणि ९
दिनानि दृष्टिहीनोऽवर्त्तत, भोजनं पानञ्चापि नाकरोत्।

दम्मेशकनिवासिनां शिष्याणां मध्येऽननियाख्य एको नर आसीत्, १०
प्रभु र्दर्शनं दत्त्वा तमब्रवीत्, अननिय। स प्रतिजगाद, पश्यतूप-
स्थितोऽहं प्रभो। प्रभुस्तमाह, उत्थाय सरलाभिधं मार्गं गच्छ, ११
यिहूदा गृहे तार्षीयं शौलमन्विच्छ च। यतः पश्य स प्रार्थयते
दर्शने चेदं दृष्टवान् यदननियाख्यो नरः प्रविश्य तस्मै दृष्टिदानार्थं १२
तस्मिन् हस्तार्पणं करोति। अननियः प्रतिबभाषे, प्रभो, बहूनां १३
मुखात् तं नरमधि मयाश्रावि यिरूशालेमे भवतः पवित्रजनानां
कत्यपकारान् स कृतवान्, अत्रापि मुख्ययाजकैः प्रदत्तस्तस्याधि- १४
कारोऽस्ति तेन स भवन्नाम्ना प्रार्थयमानान् सर्व्वान् बन्धुं समर्थः।
प्रभुस्तु तं जगाद, याहि,यतः परजातीनां राज्ञाञ्चेस्रायेलसन्तानानाञ्च १५

१६ समक्षं मदीयनाम्नो वहनार्थं स मत्कृते वरितं भाजनं। यतो
मदीयनाम्नः कृते कति दुःखानि तेन भोक्तव्यानि तदहं तं
१७ दर्शयिष्यामि। अनन्तरमननियः प्रस्थाय तद् गृहं प्रविवेश तस्मिन्
हस्तावर्पयित्वा च तमाह, भ्रातः शौल, प्रभुर्यतस्त्वागमनकाले
पथि तुभ्यं दर्शनदाता यीशु मां प्राहिणोत्, त्वं यद् दृष्टिशक्तिं
१८ लब्ध्वा पवित्रेणात्मना पूर्णो भविष्यसीति तस्याभिप्रायः। तत्क्षणं
तस्य नेत्राभ्यां मीनशल्कवद् वस्तुषु पतितेषु स तदैव दृष्टिं लेभे
१९ प्रोत्थाय स्नापितोऽभवत् भोजनं गृहीत्वा सबलीबभूव च।
अनन्तरं शौलः कतिपयदिवसान् दम्मेशकस्थैः शिष्यैः सार्द्धम-
२० वर्त्तत, अविलम्बे च सभागृहेषु यीशोरिमां कथामघोषयत् यत्
२१ स एवेश्वरस्य पुत्रः। कथेयं यैरश्रावि ते सर्व्वे चमत्कृता अवदन्,
अयं किं न स मनुष्यो यो यिरूशालेम एतन्नाम्ना प्रार्थयमानान्
नाशितवान् स्थानमिदञ्चैतदर्थमागतवान्, यत् स तान् बद्ध्वा
२२ मुख्ययाजकानां समीपं नेष्यति? शौलस्त्वधिकं शक्तिमान् अभवत्,
असौ ख्रीष्ट इति सिद्धान्तं कुर्व्वंश्च दम्मेशकनिवासिनो यिहूदीयान्
निरुत्तरान् अकरोत्।

२३ बहुदिनेष्वित्थमतिवाहितेषु यिहूदीयास्तं हन्तुममन्त्रयन्त।
२४ तेषान्तु सा कुकल्पना शौलेनाज्ञायि। ते च तं हन्तुमिच्छन्तो
२५ दिवानिशं पुरद्वाराण्यरक्षयन्। तदा शिष्यास्तं गृहीत्वा रात्रौ पिटके
प्रवेश्य प्राचीरस्य छिद्रेण रज्जुभिरवरोहयामासुः।

२६ यिरूशालेम उपस्थाय शौलः शिष्यैस्वनुषक्तो भवितुमुत्सेहे, स
२७ तु यच्छिष्य इति न विश्वस्य सर्व्वे तस्माद् अबिभयुः। तदा बार्णबास्त
मुपकुर्व्वन् प्रेरितानां समीपं निनाय, पथि स कथं प्रभुं दृष्टवान्
प्रभुश्च यत् तेन संलपितवान् दम्मेशके च स यीशो र्नाम्ना

कीदृशीं निर्भयतां प्रदर्शितवांस्तत् सर्व्वं तेभ्यो निवेदयामास च।
अनन्तरं स यिरूशालेमे तैः सह वर्त्तमानोऽगृहप्रवेशं गृहान्निर्गम- २८
नञ्चाकरोत् प्रभो र्यीशो र्नाम्ना निर्भयतां प्रदर्शयंश्च यूनानीभाषा- २९
वादिभिः सार्द्धमालापं मीमांसाञ्चाकरोत्। ते तु तं हन्तुं प्राव-
र्त्तन्त। तदवगत्य भ्रातरस्तं समुद्रतटस्थां कैसरियां नीत्वा तार्षं ३०
प्रेषयामासुः।

तदा यिहूदियायां गालीले शमरियायाञ्च सर्व्वत्र मण्डली ३१
निर्व्विघ्नतां भुञ्जाना प्रत्यष्ठाप्यत प्रभो र्भीतिं पवित्रस्यात्मनः
सान्त्वनमाचरन्ती च सङ्ख्ययावर्धत च।

तदा सर्व्वेषां स्थानानि पर्य्यटन् पित्रो लुद्दानिवासिनां पवित्र- ३२
जनानामन्तिकमप्युपतस्थे। तत्राष्टौ वत्सरान् खट्वायां शयान ऐनिय- ३३
नामावशाङ्ग एको नरस्तेनादर्शि, पित्रस्तमब्रवीत्, ऐनिय, यीशुः ३४
ख्रीष्टस्त्वामरोगं करोति, त्वमुत्थाय स्वार्थं शय्यां विस्तृणु। स
तत्क्षणमुत्तस्थौ लुद्दाशारोणयो र्निवासिनश्च सर्व्वे तं ददृशुः प्रभुं ३५
प्रति मनांसि प्रत्यावर्त्तयामासुश्च।

तदा याफुनगरे टाबिथानाम्न्येका शिष्यासीत्, भाषान्तरेऽस्या ३६
नाम दर्क्का [हरिणी]। सा भिक्षादानादिभिः सत्कर्म्मभिः पूर्णा-
सीत्। तस्मिन् काले तु व्याधिता सती सा ममार धौता ३७
गृहोपरिस्थप्रकोष्ठे शाययाञ्चक्रे च। लुद्दा तु याफो र्निकटस्था, ३८
अतः पित्रस्तत्रास्तीति श्रुत्वा शिष्या द्वौ नरौ तस्यान्तिकं प्रहित्य तं
ययाचिरे, भवानस्मत्स्थानं यावदागन्तुं मा विलम्बतामिति। तदा ३९
पित्र उत्थाय ताभ्यां सार्द्धं जगाम। तस्मिंस्तत्रोपस्थिते जनैस्तं
प्रकोष्ठं नीते च सर्व्वा विधवा योषितस्तस्य परितस्तिष्ठन्त्यो रुद-
त्यश्च स्वाभिः सार्द्धमवस्थितिकाले दर्क्कया रचितान्यङ्गरक्षकादीनि

४० वासांसि प्रादर्शयन्। पितरस्तु सर्व्वान् वहिष्कृत्य जानुनी पातयित्वा
प्रार्थयाञ्चक्रे शवमुद्दिश्य मुखं वर्त्तयित्वा चाब्रवीत्, टाबिथे, उत्तिष्ठ।
४१ तदा सा नेत्रे उन्मीलयामास पितरं दृष्ट्वोत्थायोपविवेश च। स च
तस्यै हस्तं दत्त्वा तामुत्थापयामास। अनन्तरं स पवित्रजनान्
४२ विधवाश्चाहूय तां जीवन्तीं प्रदर्शयामास। तच्च याफो सर्व्वत्र
४३ विदितमभूत् बहवश्च प्रभौ विश्वसिषुः। ततः पितरो दीर्घकालं
याफो शिमोननाम्नः कस्यचिच्चर्म्मकारस्य गृहेऽवातिष्ठत।

---

१० दशमोऽध्यायः।

१ स्वर्गीयदूतेनादिष्टस्य कर्णीलियस्य पितरमाक्रातुं लोकप्रेषणं ९ पितरस्य दैव दर्शनं १७ पितरं प्रति प्रेषितानां लोकानामुपस्थितिः २४ तैः सह पितरस्य गमनं तेन सार्द्धं कर्णीलियस्य सम्भाषणं ३४ पितरस्य प्रत्युत्तरं सुसंवादप्रचारणञ्च ४४ कर्णीलियं तदीयलोकांश्च प्रति पवित्रस्यात्मनोऽवरोहणं तेषां स्नापनञ्च।

१ कैसरियायाम् इतालीयाख्यसैन्यदलान्तर्गतः शतपतिरेक आसीत्,
२ तस्य नाम कर्णीलिय इति। स सपरिवारो भक्त
ईश्वराद् भीतश्चासीत् यिहूदिजातये प्रचुरभिक्षादानान्यकरोत्,
३ ईश्वरमुद्दिश्य सततं प्रार्थयत च। एकदा प्रायेण समाप्ते दिवसस्य
तृतीये प्रहरे स दर्शने स्पष्टमीश्वरस्य दूतमेकं वीक्षाञ्चक्रे यस्तस्य
४ समीपं प्रविश्य तमवादीत्, भो कर्णीलिय। स स्थिरदृष्ट्या
तमवलोक्य भयापन्नः पप्रच्छ, भो प्रभो, किं? स तमब्रवीत्,
तव प्रार्थना भिक्षादानानि च स्मरणोपायवदीश्वरस्य समक्षमुपत-
५ स्थिरे। अत इदानीं त्वं कतिपयनरान् याफों प्रहित्य पितराभिधं
६ शिमोनमानायय। स समुद्रतटस्थचर्म्मकारगृहनिवासिनः शिमोननाम्नः
कस्यचिच्चर्म्मकारस्यातिथिः। त्वया यत् कर्त्तव्यं तत् स त्वां वदिष्यति।

कर्णीलियेन सार्द्धं संलपति तस्मिन् दूते प्रस्थिते स स्वदासानां ७
द्वौ जनौ स्वपरिचारकाणां मध्ये भक्तमेकं सैनिकनरञ्चाहूय सर्व्वं ८
निवेद्य तान् याफों प्रस्थापयामास।

परदिवसे यदा ते मार्गेण गच्छन्तो नगरान्तिकमुपातिष्ठन्त, ९
तदा मध्याह्नकाले पितरः प्रार्थनार्थं गृहपृष्ठमारूढवान्, क्षुत्पीडितो १०
भूत्वा च भोक्तुमैच्छत्। यावत्तु खाद्यमुपाकल्प्यत तावत् स मूर्च्छा-
पन्नो भूत्वा स्वर्गमुद्घाटितं स्वसमीपमवतरमाणं बृहद्वस्त्राकारमेकं १२
भाजनञ्च ददर्श, तच्चतुर्भिः कोणैराबद्धं भूतलमवारोह्यत। तत्र १२
सर्व्वविधा भूचराश्चतुष्पदाः पशवः सरीसृपाश्च खेचरपक्षिणश्चावि-
द्यन्त, एका वाणी च तमाह, पितर, उत्थाय मारय भुंक्ष्व च। १३
पितरस्त्वब्रवीत्, नैव प्रभो, यतोऽखाद्यमशुचि वा किमपि कदापि १४
मया न भुक्तं। पुन र्द्वितीयवारं वाणी तमाह, ईश्वरो यच्छुची- १५
कृतवांस्तत् त्वमखाद्यं मा कुरु। त्रिष्कृत्व इत्थं वृत्ते सति तद् १६
भाजनमकस्मात् पुनः स्वर्गमारोहयाञ्चक्रे।

पितरेण दृष्टं तद् दर्शनं किमर्थकमत्र यावत् स मनसि १७
सन्दिग्ध आसीत्, पश्य तावत् कर्णीलियेन प्रहितास्ते नरा
अनुसन्धानेन शिमोनस्य गृहं निश्चित्य द्वारदेश उपतस्थिरे उच्चै- १८
रपृच्छंश्च, पितराभिधः शिमोनः किमतिथिः सन्नत्र विद्यत इति।
पितरे च तद् दर्शनमनुचिन्तयत्यात्मा तमवादीत्, पश्य कतिपय- १९
नरास्त्वां गवेषयन्ते, तत् त्वमुत्थायावरोह निःसंशयञ्च तैः सार्द्धं २०
याहि, यतोऽहं तान् प्रहितवान्। तदा पितरोऽवरुह्य कर्णीलियेन २१
स्वसमीपं प्रेषितानां नराणां समक्षमुपस्थाय जगाद, युष्माभि
र्योऽन्विष्यते सोऽहं, युष्माकमुपस्थितेः किं कारणं? त ऊचुः, २२
शतपतिः कर्णीलिय इति नामा धार्म्मिक ईश्वराद् भीतः कृत्स्नायां

यिहूदिजात्यां सुख्यातश्च नरः पवित्रेण स्वर्गदूतेन स्वगृहं भवत
२३ आनयनं भवतो मुखे वाक्यश्रवणञ्चाज्ञापयाञ्चक्रे । अनन्तरं स
तानभ्यन्तरमानीयातिथीनिव जग्राह । परदिने पित्र उत्थाय तैः
साद्धं प्रतस्थे, याफुनिवासिनां भ्रातृणां केचिदपि तेन साद्धं जग्मुः ।
२४ तत्परदिने ते कैसरियां प्रविविशुः । कर्णीलियश्च स्वज्ञातीन्
२५ आत्मीयबन्धूंश्च समाहूय तान् प्रतीक्ष्य स्थितः । अनन्तरं पित्रो
यदा गृहं प्राविशत् तदा कर्णीलियस्तमभ्युद्गत्य तच्चरणयोः पतित्वा
२६ भजनं चकार । पित्रस्तु तमुत्थाप्याब्रवीत्, उत्तिष्ठ, अहमपि मनुष्यः ।
२७ तेन संलपंश्च प्रविश्य स बहून् समवेतान् ददर्श, तांश्च जगाद,
२८ अन्यजातीयस्य कस्यचिदनुषङ्गी निकटवर्त्ती वा भवितुं यिहूदि-
नरस्य कथमवैधं तद् युष्माभिरनुभूतं । मान्त्वीश्वर इदमादिष्टवान्,
२९ त्वं कमपि मनुष्यमव्यवहार्य्यमशुचिं वा मा वदेरिति । ततो हेतोश्च
दूतैराहूतः सन् विना प्रतिकूलवादमागमं । अतः पृच्छामि, यूयं
३० किमर्थं मामानायितवन्तः ? तदा कर्णीलिय उवाच, अद्य चत्वारि
दिनानि गतान्यहमिमां घटिकां यावदुपोष्य तृतीयप्रहरस्यान्ते
स्वगृहे प्रार्थनां कृत्वा स्थितः । तदा, पश्य, शुभ्रवासा एकः पुरुषो
३१ मम समक्षं तिष्ठन्नाह, कर्णीलिय, तव प्रार्थनानुगृहीता, तव
३२ भिक्षादानानि चेश्वरस्य समक्षं स्मृतानि । अतस्त्वं याफुं दूतान्
प्रहित्य पित्राभिधं शिमोनमानायय, स समुद्रतीरनिवासिनश्चर्म्म-
कारस्य शिमोनस्य गृहेऽतिथिः । स आगत्य त्वया साद्धं सम्भा-
३३ षिष्यते । तत्क्षणमेवाहं भवन्तं प्रति दूतान् प्राहिणवं । भवा-
नागतवानित्युत्तममकार्षीत् । अत इदानीं सर्व्वे वयमीश्वरस्य
समक्षमुपस्थिताः, भवानीश्वरेण यद्यदादिष्टस्तत् सर्व्वं श्रोतुमि-
च्छामः ।

तदा पित्रो वक्तमुद्वाय्य बभाषे, सत्यं मयानुभूयते यद् ईश्वरो ३४
न पक्षपाती, अपि तु सर्व्वस्यां जात्यां यस्तस्माद् बिभेति धर्म्म- ३५
माचरति च स तस्य ग्राह्यः। स इस्रायेलस्य सन्तानान् प्रति ३६
कथामेकां प्रेषयामास, सा यीशुना ख्रीष्टेन सन्धिसाधनस्य घोषणा।
स एव सर्व्वेषां प्रभुः। योहनेन घोषितात् स्नापनात् परं सा या ३७
वाणी गालोलत आरभ्य कृत्स्नां यिहूदियां व्याप्तवती सा नासर-
तीययीशोः कथा युष्माभिर्विदिता। ईश्वरो हि पवित्रेणात्मना प्रभावेन ३८
च तमभिषिक्तवान्, स देशं पर्य्यटन् जनस्य हितमकरोत् दिया-
बलेनोपनिपीड्यमानानां सर्व्वेषामारोग्यमसाधयच्च, यत ईश्वरस्तेन
सार्द्धमासीत्। वयञ्च यिहूदीयानां जनपदे यिरूशालेमे च तेन ३९
कृतानां सर्व्वकर्म्मणां साक्षिणः। ते तु दण्डकाष्ठ उद्बध्य तं जघ्नुः।
तमेवेश्वरस्तृतीये दिने पुनरुत्थाप्य प्रत्यक्षीभवितुमनुमेने। स न ४०
सर्व्वजनस्य प्रत्यक्षीबभूव, किन्त्वीश्वरेण पूर्व्वं निरूपितानां साक्षिणां ४१
तेषामस्माकं ये मृतानां मध्यात् तस्योत्थानात् परं तेन सार्द्धं
भोजनपाने कृतवन्तः। स चास्मान् जनेष्विदं घोषयितुमिदं साक्ष्यं ४२
दातुञ्चादिदेश, यत् स एव जीवितानां मृतानाञ्चेश्वरनिरूपितो
विचारपतिः। तस्य पक्षे भाववादिनः सर्व्व इदं साक्ष्यं ददति, ४३
यत् तस्मिन् यः कश्चित् विश्वसिति स तस्य नाम्ना पापक्षमां
प्राप्नोतीति।

पित्रे कथा एता भाषमाणे यावन्तो मनुष्या वाक्यमशृण्वन् ४४
पवित्र आत्मा तेषु सर्व्वेषु पपात। तदा पवित्रात्मरूपं दानं ४५
परजातीयेष्वपि वारिवत् पातितं दृष्ट्वा पित्रेण सार्द्धमागता
विश्वासिनश्छिन्नत्वचः सर्व्वे नराश्चमत्कृता बभूवुः, यतस्ते तेषा- ४६
मन्यभाषाकथनम् ईश्वरस्तवनञ्चाशृण्वन्। अनन्तरं पित्रो व्याजहार,

४७ वयमिवैते ये जनाः पवित्रमात्मानं लब्धवन्तः कोऽपि किं तोयं
४८ निवारयन्नेतेषां स्नापनं निषेद्धुं शक्नोति? ततः स प्रभो र्यीशोः
ख्रीष्टस्य नाम्ना तेषां स्नापनमादिदेश। तदा ते कतिपयदिनानि
यावत् तस्यात्रस्थितिं प्रार्थयाञ्चक्रिरे ।

---

११ एकादशोऽध्यायः ।

१ अत्वक्छेदिनः प्रति सुसंवादं प्रचारयितुं पित्रं प्रति त्वक्छेदिनां तर्जनं तान् प्रति तस्योत्तरं १९ आन्तियखियानगरं प्रति बार्णबाः प्रेरणं २५ पौलान्वेषणं बार्णबास्तार्षनगरगमनं २७ दुर्भिक्षकारणाद् बार्णबापौलाभ्यां यिरूशालेमे धनप्रेषणञ्च ।

१ अनन्तरं परजातीया मनुष्या अपीश्वरस्य वाक्यं गृहीतवन्त
२ इति प्रेरिते र्यिहूदियानिवासिभि र्भ्रातृभिश्चाश्रावि। यदा च
पित्रो यिरूशालेममागमत्, तदा छिन्नत्वचो भ्रातरस्तेन सार्द्धं
३ विवदमाना अब्रुवन्, त्वमच्छिन्नत्वचां नराणां गृहं प्रविश्य तैः सार्द्धं
४ भुक्तवानिति। तदा पित्र आरभ्य तेभ्यः क्रमागतं वृत्तान्तं कथ-
५ यन्नवादीत्, याफुनगरे वर्त्तमानोऽहमेकदा प्रार्थनकाले मूर्च्छापन्नो
दर्शनं प्राप्यापश्यं, चतुर्भिः कोणैरवरोह्यमाणं वृहद् वस्त्रमिव
६ भाजनमेकं स्वर्गादवनरति मदन्तिकं यावदायाति च। अनन्यदृष्ट्या
तन्निरीक्षमाणश्च तत्र भूचरान् चतुष्पदपशून् वन्यजीविनः सरी-
७ सृपान् खेचरपक्षिणश्चापश्यं वाणीमेकामश्रौषञ्च, सा मामाह, पित्र,
८ उत्थाय मारय भुंक्ष्व च। तदाहमवादिषं, मैव, प्रभो, यतो-
९ ऽखाद्यमशुचि वा किमपि कदापि मम मुखं न प्रविष्टं। पुनश्च
वाणी मां प्रतिबभाषे, ईश्वरो यच्छुचीकृतवांस्तत् त्वमशुचि मा
१० कुरु। त्रिरित्थं वृत्ते सति तत् सर्व्वं पुनः स्वर्गमाकृष्टं। पश्य च

तदैव कैसरियातो मत्समीपं प्रहितास्त्रयो नरा आगत्य यत्राहम् ११
आसं तद्गृहस्य द्वार उपतस्थिरे। आत्मा च मां निःसंशयं तैः सह १२
गमनमादिदेश। इमे षड् भ्रातरोऽपि मम सार्द्धमगमन्। अनन्तर-
मस्मासु तस्य नरस्य गृहं प्रविष्टेषु सोऽस्मभ्यं कथयामास, मया १३
दूत एकोऽदर्शि, स मद्गृहस्याभ्यन्तरे तिष्ठन् मामाह, त्वं याफुं
नरान् प्रहित्य पितराभिधं शिमोनमानायय, स तुभ्यं कथाः १४
कथयिष्यति, ताभिस्त्वया कृत्स्नेन तव कुलेन च परित्राणं लप्स्यते।
मयि तु भाषितुमारभमाणे पवित्र आत्मा यथादावस्मासु तथा १५
तेष्वपि पपात। तदा प्रभोरेतद् वाक्यं मयास्मारि, योहनस्तोये- १६
ऽस्नापयत्, यूयन्तु पवित्र आत्मनि स्नापयिष्यध्व इति। अतो यदि १७
प्रभौ यीशौ ख्रीष्टे कृतविश्वासेभ्योऽस्मभ्यं तेभ्यश्च समानं दानमीश्व-
रेणादायि तर्हि कः पुनरहं यदीश्वरं वारयितुं शक्नुयां? एतच्छ्रुत्वा १८
ते शान्ता बभूवुरीश्वरं प्रशंसन्तश्च जगदुः, तर्हीश्वरः परजातीयेभ्यो-
ऽपि जीवनावहं मनःपरावर्त्तनं दत्तवानिति।

स्तिफानमधि समुत्पन्नेन क्लेशेन विकीर्णा नराः फैनीकीदेशं कुप्र- १९
द्वीपमान्तियखियानगरञ्च यावत् पर्य्यटन्तः केवलं यिहूदीयानी-
श्वरस्य वाक्यमब्रुवन् न तु कमप्यन्यं। तथापि तेषां मध्ये कुप्रीयाः २०
कुरीणीयाश्च केचिन्नरा यदान्तियखियामागमंस्तदा यूनानीयजनैः
सम्भाषमाणाः प्रभो यीशोः सुसंवादमज्ञापयन्। प्रभो र्हस्तश्च तेषां २१
सहाय आसीत्, बहुसङ्ख्या मनुष्याश्च विश्वस्य प्रभुं प्रति परावर्त्तिरे।
तेषां कथा च यिरूशालेमस्थमण्डल्याः कर्णगोचरमाजगाम। अतो २२
मण्डली बार्णबां प्रहित्यान्तियखियां यावद् गन्तुमादिदेश। स २३
तत्रोपस्थायेश्वरस्यानुग्रहं दृष्ट्वा जहर्ष सर्व्वांश्च हृदयस्य निश्चयेन
प्रभाववस्थानाय समाश्वासयत्, यतः स सुजनो विश्वासेन च २४

पवित्रेणात्मना च पूर्ण आसीत्। तदा बहुमनुष्यैः प्रभोः प्रजावृद्धिः
सञ्जाता।
२५ अनन्तरं बार्णबा पौलमन्वेष्टुं तार्षं जगाम, तमासाद्यान्तिय-
२६ खियामानिनाय च। ततः परं तौ कृत्स्नं संवत्सरं मण्डल्यां
मिलन्तौ बहुजनमशिक्षयताम्, प्रथमञ्चान्तियखियायां शिष्याः
ख्रीष्टीया इति नाम्नाभ्यधीयन्त।
२७ तस्मिन् काले केचिद् भाववादिनो यिरूशालेमाद् आन्तिय-
२८ खियामाजग्मुः। आगाबनामा तेषामेक उत्थायात्मन आवेशात्
सूचयामास यत् कृत्स्ने साम्राज्ये महादुर्भिक्षेण भवितव्यं। कैसरस्य
२९ क्लौदियस्य राजत्वकाले च तत् सम्भूतं। शिष्याश्च प्रत्येकं स्वीय-
सम्पदनुरूपं साहाय्यं यिहूदियानिवासिनां भ्रातॄणां समीपं प्रेषयितुं
३० विनिरचैषिषुः, तत् कुर्व्वन्तश्च बार्णबाशौलयो र्हस्तेष्वर्थं समर्प्य
प्राचीनानां समीपं प्रेषयामासुः।

---

१२ द्वादशोऽध्यायः।

१ हेरोदराजेन पितरस्य कारायां बन्धनं दूतेन तस्य मोचनञ्च १२ मरियमो गृहे पितरस्य गमनं रक्षकान् हन्तुं हेरोदस्याज्ञा च २० अभिमानाद् हेरोदराजस्य विनाश ईश्वरस्य कथायाः सफलता च।

१ तस्मिन् काले राजा हेरोदो मण्डल्याः केषाञ्चिदंशिनां हिंसने
२ हस्तक्षेपं चक्रे। स हि योहनस्य भ्रातरं याकोबमसिना घातयामास,
३ यिहूदीयेभ्यश्च तद्रोचत इति विलोक्य स पितरमपि संग्रहीतुं
४ प्रववृते। तदा किण्वशून्यपूपानां समय आसीत्। स तं सङ्गृह्य
कारायां निधाय रक्षार्थं चतुर्षु योद्धृचतुष्टयेषु समर्पयामास,
यतोऽतीते निस्तारोत्सवे स तं जनस्य समक्षमुपस्थापयिष्यतीति
५ तस्याभिप्राय आसीत्। अतः पितरः कारायामरक्ष्यत, मण्डल्या तु

तस्य कृते ईश्वरमुद्दिश्यैकाग्रा प्रार्थनाक्रियत। अनन्तरं यस्मिन् ६
दिने हेरोदस्तं जनस्य समक्षमुपस्थापयितुमैच्छत् तत्पूर्व्वनिशायां
शृङ्खलद्वयेन बद्धः पितरो द्वयो र्योद्ध्रो र्मध्येऽशेत, रक्षकाश्च द्वार-
देशेऽरक्षन्, पश्य तदा प्रभोरेको दूत उपतस्थौ दीप्तिश्च तस्मिन् ७
प्रकोष्ठे विरराज, स दूतश्च पितरस्य कक्षदेशे ताडयंस्तं जागरयित्वा
जगाद, सत्वरमुत्तिष्ठ। तदा तस्य हस्ताभ्यां शृङ्खलद्वयेऽवगलिते ८
स दूतस्तमाह, कटिं बद्ध्वा पादयोरुपानहावर्पय। स तच्चकार।
अनन्तरं दूतस्तमाह, स्ववस्त्रं परिधाय मामनुगच्छ। ततः स ९
निष्क्रम्य तमनुजगाम। दूतेन तु यदसाध्यत तत् सत्यमिति स
नाजानात् अपि तु दर्शनं पश्यामीत्यन्वमिमीत। अनन्तरं तौ १०
प्रथमस्य द्वितीयस्य च रक्षकवर्गस्य मध्येन प्रगत्य, नगरं येन गम्यते
तस्य लौहद्वारस्यान्तिकमुपतस्थाते। तत् तयोः कृते स्वयं मुमुचे।
तेन निःसृत्यैकस्या रथ्याया अन्तं यावत् प्रगतयोस्तयोः स दूतः
सहसा तस्मात् प्रतस्थे। तदा पितरः सचेतनो भूत्वाब्रवीत्, इदानी- ११
महं निश्चयं जाने, प्रभुः स्वदूतं प्रहित्य हेरोदस्य कराद् यिहूदि-
जातेः सर्व्वाकाङ्क्षातश्च मामुद्धृतवान्।

एतदनुभूय स मार्काभिधस्य योहनस्य मातु र्मरियमो गृहा- १२
न्तिकं जगाम। तत्र बहवो मिलित्वा प्रार्थयन्त। अनन्तरं पितरे १३
बहिर्द्वारस्य कपाटं ताडितवति रोदानामिका दासी श्रवणार्थं
तत्राजगाम। सा च पितरस्य स्वरमभिज्ञायानन्दाद् बहिर्द्वारं न १४
मुक्त्वाभ्यन्तरं धावित्वा व्याजहार, पितरो द्वारदेशे तिष्ठतीति। ते तु १५
तामूचुः, त्वमुन्मत्ता जानासि। सा पुनः पुनरब्रवीत्, सत्यमेव कथयामि।
तदा तेऽवदन्, मन्ये स तस्य दूतः। इतिमध्ये पितरः पुनः पुन १६
र्द्वारमताडयत्। ततस्ते तन्मुमुचुः पितरं दृष्ट्वा चमत्कृता बभूवुश्च।

१७ स तु हस्तचालनेन तेषां मौनावलम्बनार्थं सङ्केतं कृत्वा कथं प्रभुस्तं
कारात उद्धृतवांस्तन्निवेदयामास, जगाद च यूयं याकोबाय
भ्रातृभ्यश्चैतस्य संवादं दत्त। इत्युक्त्वा स निर्गत्य स्थानान्तरं जगाम।
१८ प्रभाते जाते तु पितरः क्व विद्यत इत्यत्र योद्धृणां महाक्षोभः
१९ सञ्जातः। हेरोदस्तु तं गवेषयामास न प्राप्य च रक्षिणां विचारं
कृत्वा प्राणदण्डमाज्ञापयामास। ततः परं यिहूदियातः कैसरियां
गत्वा तत्रावर्त्तत।

२० तदा स सोरसीदोनयो र्निवासिभ्योऽकुप्यत्। ते त्वेकचित्तेन
तमुपतस्थुः राज्ञः शयनागाराध्यक्षं ब्लास्तं प्रसाद्य सन्धिं ययाचिरे
२१ च, यतो राज्ञो देशात् तेषां देशो खाद्यद्रव्याण्यलभत। अनन्तरं
निरूपिते दिवसे राजकीयपरिच्छदवेष्टितो हेरोदो भद्रासन उपविश्य
२२ पौरसमाजे तानुद्दिश्य वक्तृतामकरोत्। समवेताः पौराश्चोच्चैर-
२३ ब्रुवन्। वाणीयमीश्वरस्य, न तु मनुष्यस्येति। सहसा च प्रभो
र्दूतस्तमाजघान, यतः स ईश्वरस्य गौरवं न स्वीकृतवान्। तत
परं स कृमिभक्षितः प्राणांस्तत्याज।

२४ ईश्वरस्य वाक्यन्त्ववर्धत बहुफलदमभवच्च। बार्णबाः शौलश्च
कर्त्तव्यां परिचर्य्यां समाप्य मार्काभिधं योहनं सहचरवद् गृहीत्वा
च यिरूशालेमतः प्रतिजग्मतुः।

---

१३ त्रयोदशोऽध्यायः।

१ अन्यदेशीयान् प्रति बार्णबापौलयोः प्रेषणं ४ सर्गियपौलस्य मायाविबार्यीशोस्य वृत्तान्तः १३ आन्तियखियानगरे पौलस्य खीष्टकथाप्रचारः २९ परित्राणकथा-ग्रहणाय तस्य विनयः ४२ बहुलोकैः कथाग्रहणं ४४ यिहूदीयलोकानां विपरीतलक्ष्य।

१ आन्तियखियायां या मण्डल्यासीत् तस्यां केचिद् भाववादिनो

गुरवश्चाविद्यन्त, ते बार्णबा निग्राभिधः शिमोनः कुरीणीयो लूकियो
राज्यपादाधिपेन हेरोदेन सार्द्धं पोषितो मनहेमः शौलश्च। प्रभु- २
मुद्दिश्य तेषु सेवामनुतिष्ठत्सूपवसत्सु च पवित्र आत्मावादीत्, बार्णबाः
शौलश्च यत् कर्म्म कर्त्तुं मयाहूतौ तदर्थं युष्माभि र्मामुद्दिश्य
पृथक् क्रियेतां। तदा त उपोष्य प्रार्थ्य च तयो र्हस्तान् अर्पयित्वा ३
च तौ विससृजुः।

इत्थं पवित्रेणात्मना प्रेषितौ तौ समुद्रतीरस्थां सिलूकियां ४
जग्मतुः। तस्मात् स्थानाच्चार्णवयानेन कुप्रद्वीपं प्रतस्थाते। साला- ५
म्यामुपस्थाय च यिहूदिनां समाजगृहेष्वीश्वरस्य वाक्यमज्ञापयतां।
भृत्य इव योहनोऽपि तयोः सहचर आसीत्। अनन्तरं ते तस्य ६
द्वीपस्य मध्येन पाफं यावद् गत्वा तत्र बार्यीशुरित्यभिधं यिहूदि-
जातीयमेकं मायाविनमासादयामासुः। स कूटभाववादी देशा- ७
ध्यक्षेण सर्गियपौलेन सार्द्धमवर्त्तत। नरोऽयं बुद्धिमान् आसीत्,
ततो बार्णबां शौलञ्चाहूयेश्वरस्य वाक्यं श्रोतुमयतत। इलुमा ८
मायावी तु तयोः प्रतिरोधमकरोत्। मायावीति तदीयनामधेय-
स्यार्थः। विश्वासाद् देशाध्यक्षस्यापसारणाय सोऽयतत। तदा ९
पौल इति नामान्तरेण विख्यातः शौलः पवित्रेणात्मना पूर्णः
सन्ननन्यदृष्ट्या तं समालोक्याब्रवीत्। हे यावतीयच्छलेन यावतीय- १०
शाठ्येन च परिपूर्णभाजन दियाबलस्यात्मज सर्व्वधर्म्मद्वेषिन्, प्रभोः
सरलानां मार्गाणां विपरीतिकरणात् कतिकालमनिवृत्य स्थास्यसि?
अत इदानीं पश्य, प्रभो र्हस्तेनावपीडितस्त्वमन्धो भविष्यसि, उप- ११
युक्तं समयं यावत् सूर्य्यं न द्रक्ष्यसि। तत्क्षणं धूमेनान्धकारेण
चाक्रान्तः स परिव्रजन् हस्तधारिणोऽन्वैष्यत्। तदा यद् वृत्तं तद् १२
विलोक्य देशाध्यक्षः प्रभोः शिक्षायां चमत्कृतो विश्वासी बभूव।

१३ अनन्तरं पौलस्तत्सङ्गिनौ च पोतेन पाफात् प्रस्थाय पम्फु-
लियादेशस्यपर्गायामुपतस्थिरे, योहनस्तु तौ विहाय यिरूशालेमं
१४ प्रत्याववृते । तौ तु पर्गातो देशस्य मध्येन गत्वा पिषिदिया-
प्रदेशस्यायाम् आन्तियखियामुपतस्थाते विश्रामवारे च समाजगृहं
१५ प्रविश्योपविविशतुः । व्यवस्थाया भाववादिनां ग्रन्थस्य च पठनात्
परं समाजाध्यक्षाः प्रेष्येण ताववादिषुः, भ्रातरौ, जनान् प्रति वक्तव्यं
किमपि प्रबोधवाक्यं युवयो र्यदि विद्यते तर्हि तद् वक्तुमर्हथः ।
१६ तदा पौल उत्थाय हस्तं चालयित्वा बभाषे, भो इस्रायेलीयनराः,
१७ भो ईश्वरभीतिपराः सर्व्वे, शृणुत । अस्या इस्रायेलीयजातेरीश्वरो-
ऽस्माकं पूर्व्वपुरुषान् वरयामास, मिसरदेशे प्रवासिनामस्मज्जातीय-
जनानामुन्नतिं साधयामास च ऊर्द्ध्वेन बाहुना तस्माद् देशात् तान्
१८ बहि र्निनाय च । अनन्तरं प्रायेण चत्वारिंशद्वर्षपरिमितं कालं
१९ मरौ शिशुपालक इव तान् अवहत् । ततः परं कनानदेशे सप्त
२० जातीरुत्पाद्य तासां भूमिं रिक्थमिव तेभ्यो ददौ । तदा प्रायेण
पञ्चाशदधिकचतुःशतानि वत्सरा अतिवाहिता आसन् । अनन्तरं
२१ स तेभ्यो भाववादिनं शमूयेलं यावद् विचारपतीन् ददौ । ततः
परं ते राजानं याचयामासुस्तत ईश्वरस्तेभ्यो बिन्यामीनीयवंशजातं
२२ कीशस्य पुत्रं शौलं चत्वारिंशद् वत्सरान् यावद् ददौ । अनन्तरं स
तं दूरीकृत्य तेषां निमित्तं नृपतिमिव दायूदमुत्पादयामास । तमे-
वाधि स साक्ष्यं दत्त्वा जगाद । लक्षितो मया यिशयस्य पुत्रो
दायूदः, स मदीयहृदयाभिमतो नरः, स मम सर्व्वमभीष्टं साध-
२३ यिष्यति । तस्यैव वंशात् स स्वीयप्रतिज्ञानुसारेणेस्रायेलस्य कृते
२४ त्रातारं यीशुमुत्पादयामास । तस्यागमनात् पूर्व्वन्तु योहनः
कृत्स्नाया इस्रायेलीयजात्या निमित्तं मनःपरावर्त्तनार्थकं स्नापनं

घोषयामास। स योहनो यदा स्वीयधावनमसाधयत् तदावदत्, २५
यूयं मां कं मन्यध्वे? नाहं सोऽस्मि, पश्यत तु, यस्य चरणयो-
रुपानहौ मोचयितुमहं नार्हामि स मत्पश्चादायाति ।

भो भ्रातरः, भो अब्राहामस्य वंशोत्पन्नाः सन्तानाः, भो अन्यो- २६
पस्थिता ईश्वरभीतिपरा मनुष्याश्च, युष्मदन्तिकमेतत्परित्राणकथा
प्रहिता। यतो यिरूशालेमनिवासिनस्तेषां नायकाश्च तं त्रातारं २७
प्रतिविश्रामदिनं पठ्यमाना भाववादिनामुक्तीश्चानभिज्ञाय तस्य
विचारं कुर्व्वन्तस्ताः सिद्धीचक्रुः, प्राणदण्डार्हं कमपि दोषमप्राप्य २८
पीलातं तस्य संहारं ययाचुश्च। तमधि यद्यल्लिखितमासीत् तस्मिन् २९
सर्व्वस्मिन् समाप्ते सति स दण्डकाष्ठादवरोहितः श्मशानागारे स्थापि-
तश्च। ईश्वरस्तु मृतानां मध्यात् तमुत्थापयामास ये च तेन सार्द्धं ३०
गालीलाद् यिरूशालेममागतवन्तस्तेभ्यः स बहुदिनानि दर्शनम- ३१
ददात्, ते पुनः प्रजानां समक्षं तस्य साक्षिणः सन्ति। अस्मत्पूर्व्व- ३२
पुरुषान् प्रति कृतां प्रतिज्ञामध्यावामपि युष्मानिमं सुसंवादं ज्ञाप-
यावः, यदीश्वरस्तेषां सन्तानानस्मानुद्दिश्य तां प्रतिज्ञां सिद्धीचकार, ३३
यतः स यीशुं पुनरुत्थापयामास। एतदधि द्वितीये गीते हि लिखि-
तमास्ते, यथा,

मदीयस्तनयोऽसि त्वम् अद्याहं त्वामजीजनम्॥

तेन च क्षयस्थानं न प्रत्यावर्त्तितव्यमिति निश्चित्येश्वरस्तं मृतानां ३४
मध्यादुत्थापितवानेतदधि स बभाषे,

दायूदेनार्जितं पुण्यं पणं दास्यामि वः स्थिरम्॥

तन्निमित्तं सोऽन्यस्मिन् स्थानेऽपि वदति, यथा, ३५

त्वं स्वपुण्यवतो नैव क्षयं द्रष्टुं प्रदास्यसि॥

ईश्वरस्य मन्त्रणातो दायूदः स्वकालिकमनुष्यान् उपकृत्य ३६

निद्रां जगाम, स्वपूर्व्वपुरुषाणां समीपं सङ्गृहीतः क्षयं ददर्श च।
३७ ईश्वरस्तु यमुत्थापितवान् स क्षयं न ददर्श। अतो, भो भ्रातरः,
३८ युष्माभिरिदं ज्ञायतां यत् तेनैव पापक्षमा भवतीति संवादो
३९ युष्मभ्यं दीयते, मोशे र्व्यवस्थया च येभ्यो दोषेभ्यो निर्द्दोषीभवितुं
युष्माकमशक्यमासीत् तेभ्यः सर्व्वेभ्यो विश्वासी सर्व्वमनुष्यस्तेनैव
४० निर्द्दोषीक्रियते। अतः सावधाना भवत। भाववादिनां ग्रन्थे
लिखितेयमुक्ति र्युष्मासु मा फलतु, यथा,

४१ अवज्ञाकारिणः सर्व्वे कुरुताश्चावलोकनं।
चमत्कारञ्च मन्यध्वम् अन्तर्धानञ्च गच्छत॥
युष्मत्काले यतः कार्य्यमेकं कारिष्यते मया।
तस्मिन् विज्ञापिते यूयं विश्वासं न करिष्यथ॥

४२ अनन्तरं समाजगृहात् तयो र्निर्गमनकाले जना इदं प्रार्थ-
याञ्चक्रिरे, आगामिनि विश्रामवारे ता एव कथा अस्मभ्यं कथ्य-
४३ न्तामिति। विसृष्टे च समाजे यिहूदिनां मध्ये भजनशीलानां
यिहूदिमतावलम्बिनां मध्ये चानेके पौलं बार्णबाञ्चानुजग्मुः। तौ च
तैः सम्भाषमाणावीश्वरस्यानुग्रहेऽवस्थानाय तान् समाश्वासयतां।
४४ तत्परविश्रामवारे नगरस्य प्रायेण सर्व्वजन ईश्वरस्य वाक्यं
४५ श्रोतुं समाजगाम। यिहूदिनस्तु तं जननिवहं दृष्ट्वेर्ष्यया पूर्णाः
सन्तः प्रतिवदमाना निन्दन्तश्च पौलेन यद्यदकथ्यत तत्प्रतिकूलं
४६ व्यवदन्त। तदा पौलो बार्णबाश्च स्पष्टमूचतुः, प्रथमं युष्मभ्य-
मीश्वरस्य वाक्यं कथयितव्यमासीत्। यूयन्तु तन्निरस्यथ स्वान्
अनन्तजीवनस्यायोग्यान् मन्यध्वे च तन्निमित्तं पश्यत, आवां
४७ परजातीयानां समीपं वर्त्तावहे, यतः प्रभुरावामिदम् आज्ञापितवान्,
यथा,

पृथिवीप्रान्तपर्य्यन्तं त्वं यत् त्राणकरो भवेः।
तदर्थं परजातीनां त्वं ज्योति र्मन्निरूपितं॥

तच्छ्रुत्वा परजातीया हृष्टा ईश्वरस्य वाक्यं प्राशंसन्, यावन्त- ४८
स्त्वानन्तजीवनाय निरूपिता आसंस्ते व्यश्वसिषुः। प्रभो र्वाक्यञ्च तं ४९
कृत्स्नं जनपदं व्याप्नोत्। यिहूदिनस्तु भजनशीला विशिष्टास्त्र ५०
महिला नगरस्य प्रमुख्यनरांश्च प्रचोदयन्तः पौलबार्णबयो र्विरुद्ध-
मुपद्रवमुत्पाद्य स्वसीमभ्यस्तौ निःसारयामासुः। तदा तेषां विरुद्धं ५१
स्वचरणेभ्यो धूलिं प्रमृज्य ताविकनियं गत्वोपतस्थाते। शिष्यास्त्वा- ५२
नन्देन पवित्रेणात्मना च पूर्णा बभूवुः।

---

१४ चतुर्द्दशोऽध्यायः।

१ इकनियनगरे बार्णबापौलयोस्ताडनं ८ लुस्त्रानगरे खञ्जमनुष्यस्य स्वास्थ्यं तस्माद् बार्णबापौलौ लोकै र्देवविख्यातौ १९ प्रस्तराघातात् पौलस्य रक्षा बार्णबापौलयो र्नानादेशभ्रमणं मण्डलीलोकानां स्थैर्य्यकरणम् आन्तियखियास्थमण्डलीं प्रति स्वीयकर्म्मणां वार्त्ताप्रेषणञ्च।

इकनिये तावेकत्र यिहूदिनां समाजं प्रविश्येत्थमभाषेतां येन १
यिहूदिनां यूनानीयानाञ्च बहुजनो व्यश्वसीत्। अविश्वासिनो २
यिहूदिनस्तु परजातीयानां मनांसि भ्रातृणां विरुद्धमुत्तेजयन्तो
हिंसायां प्रवर्त्तयामासुः। तौ हि दीर्घकालमवतिष्ठमानौ प्रभुमव- ३
लम्ब्याक्षोभेणोपादिशतां, सोऽपि स्वीयानुग्रहस्य कथां सप्रमाणाम-
करोत् तयो र्हस्तैश्चाभिज्ञानानाम् अद्भुतलक्षणानाञ्च प्रदर्शनम्
असाधयत्। ततो नगरस्य जननिकरो द्वैधीबभूव। एके यिहूदि- ४
नाम् अन्ये तु प्रेरितयोरनुषङ्गिणो बभूवुः। यदा तु नायकानां ५
साहाय्येन तयो र्न्यक्कारं प्रस्तराघातञ्च कर्त्तुं परजातीयानां यिहू-
दिनाञ्च चेष्टा समजायत, तदा तौ तद् बुद्ध्वा पलाय्य लुकायनिया- ६

७ देशस्य लुस्त्रादर्ब्बीनामकं नगरद्वयं तत्परिसरञ्च जग्मतुः सुसंवादं
घोषयन्तौ च तत्रावातिष्ठतां।
८ लुस्त्रायाम् अवशचरण एको नर उपविश्यातिष्ठत्। स आमा-
९ त्जठरात् खञ्जः, कदापि न व्रजितवान्। स पौलेन यदकथ्यत
तदशृणोत्। पौलश्चानन्यदृष्ट्या तं निरीक्ष्य त्राणप्राप्तये तस्य
१० विश्वासोऽस्तीति विलोक्य च प्रोच्चैरुवाच, चरणाभ्यामुत्तिष्ठन् ऋजु
११ र्भवेति। तदा स उत्प्लुत्याव्रजत्। पौलेन यदकारि तद् दृष्ट्वा
जननिवहा लुकायनीयभाषया प्रोच्चैरवदन्, देवा मनुष्यरूपिणो
१२ भूत्वास्मत्समीपमवतीर्णाः। ते च बार्णबां युपितर इत्यभ्यदधुः,
१३ पौलञ्च हर्म्मिरिति, यतः स एव मुख्यो वक्तासीत्। तेषां नगरस्य
सम्मुखं स्थापितस्य युपितरविग्रहस्य याजकश्च वृषान् मालाश्च
१४ द्वारदेशमानीय जनैः सार्द्धं यष्टुमैच्छत्। तच्छ्रुत्वा तु प्रेरितौ
बार्णबापौलौ स्ववासांसि विदार्य्योत्प्लुत्य जनानां मध्यं धावित्वा
१५ प्रोच्चैरवदतां, भो नराः, किमेतत् कुरुथ? आवामपि सुखदुःख-
भोगेन युष्मादृशौ मनुष्यौ, युष्मांश्चेमं सुसंवादं ज्ञापयावः, यदेतेभ्यो
ऽलीकेभ्यो वस्तुभ्यो जीवनमयमीश्वरं प्रति युष्माभिः प्रत्यावर्त्तव्यं।
स एव स्वर्गं पृथिवीं समुद्रञ्च तेषु यद्यद् विद्यते तत् सर्व्वञ्च
१६ रचितवान्। अतीतायां पुरुषपरम्परायां स सर्व्वासां परजातीनां
१७ स्वेष्टमार्गे गमनमसहत। तथापि स्वं साक्ष्यविहीनं नात्यजत्। स हि
मङ्गलकारी सन् युष्मभ्यं गगनाद् वृष्टिं फलोत्पादकान् ऋतूंश्च
१८ प्राददात् भक्ष्यैरामोदेन च युष्मद्धृदयान्यपूरयच्च। एतानि कथया-
मानौ तौ कथङ्कथमपि जनान् स्वार्थं यजनान्निवारयामासतुः।
१९ अनन्तरम् आन्तियखियात इकनियाञ्चोपागताः कियन्तो यिहू-
दिनो जननिवहान् प्रवोध्य पौलं प्रस्तरैराजघ्नु र्मृतं मन्यमाना

नगराद् वहिस्तस्थुश्च। शिष्येषु तु तस्य परितः संस्थितेषु स २०
उत्थाय नगरं प्रविवेश। परदिने च स बार्णबाश्च दर्बीं जग्मतुः।
तस्मिन् नगरे सुसंवादं ज्ञापयित्वा बहुजनान् शिष्यान् कृत्वा च २१
तौ लुस्त्राम् इकनियम् आन्तियखियाञ्च प्रत्यावृत्य जग्मतुः। तत्र २२
तौ शिष्याणां मनांसि सुस्थिराण्यकुरुताम् विश्वासेऽवस्थानायाश्वा-
सयन्ताववदताञ्च यत् क्लेशबाहुल्यरूपेण द्वारेणेश्वरस्य राज्यमस्माभिः
प्रवेष्टव्यमिति। तेषां निमित्तञ्च मण्डलीं प्रति प्राचीनवर्गं नियोज्य २३
सोपवासं प्रार्थनां कृत्वा यस्मिन् प्रभौ ते विश्वसितवन्तस्तस्य हस्ते
तान् समर्पयामासतुः। अनन्तरं पिषिदियाया मध्येन गत्वा तौ २४
पाम्फुलियप्रदेशमुपतस्थाते पर्गायाम् ईश्वरस्य वाक्यं कथयित्वा च २५
समुद्रतटस्थाम् अत्तालियां जग्मतुः। ततश्च पोतेन ताम् आन्तिय- २६
खियानगरीं प्रतस्थाते, यत्र तस्य स्वसम्पन्नकर्म्मणो निमित्तं तौ
प्रथममीश्वरस्यानुग्रहे समर्पितौ जातौ। तत्रोपस्थाय तौ मण्डली- २७
मेकत्रीचक्रतुः, ताभ्यां सार्द्धमीश्वरेण साधितानि सर्व्वकर्म्माणि
परजातीयानां निमित्तञ्च यत् तेन विश्वासरूपं द्वारमुद्घाटितं
तदपि निवेदयामासतुश्च। ततः परं तौ दीर्घं कालं शिष्यैः २८
सार्द्धमवातिष्ठताम्।

---

१५ पञ्चदशोऽध्यायः।

१ त्वक्छेदे विवादः ६ तस्मिन् प्रेरितानां मन्त्रणाविचारौ १२ त्वक्छेदिलोकेषु याकोबस्य विचारः २२ बार्णबापौलयो र्हस्तैः पत्रप्रेषणं ३० आन्तियखियायां तयो र्निवसनं ३६ विवादहेतोरुभयो र्विच्छेदश्च।

तदानीं यिहूदियात आगताः केचिन्नरा भ्रातृनिदमशिक्षयन्, १
यूयं यदि मोशे र्विधितश्छिन्नत्वचो न भवथ तर्हि त्राणं लब्धुं
न शक्नुथ। अत्र तान् प्रति पौलबार्णबयोः प्रभूतद्वन्द्वविवादयो २

जातयोः शिष्यैरिदं निरचायि, यत् तद्विवादनिष्पत्त्यर्थं पौलो
बार्णबाः स्वेषामन्ये केचिन्नराश्च यिरूशालेमं प्रेरितानां प्राचीना-
३ नाञ्च समीपं यास्यन्ति। अतो मण्डल्या प्रस्थापितास्ते फैनीकी-
शमरियादेशयो र्मध्येनागच्छन् परजातीयानां मनःप्रत्यावर्त्तनं निवे-
४ दयन्तः सर्व्वभ्रातृणां महानन्दमजनयंश्च। यिरूशालेम उपस्थि-
ताश्च मण्डल्या प्रेरितैः प्राचीनैश्चानुजगृहिरे स्वैः सार्द्धमीश्वरेण
५ यत् साधितं तद्वृत्तान्तं कथयामासुश्च। फरीशिपक्षस्य तु केचिद्
विश्वासिनो नरा अनूत्थायावादिषुः, तेषां त्वक्छेदः कर्त्तव्यः,
मोशिदत्तव्यवस्थायाः पालनस्याज्ञा तेभ्यो दातव्या चेति।
६ अनन्तरं तस्याः कथाया आलोचनार्थं प्रेरिताः प्राचीनाश्च
७ समाजग्मुः। तदा बहुविवादे जाते पित्र उत्थाय तान् जगाद,
भो भ्रातरः, यूयं जानीथ यत् प्राक्कालेऽस्माकं मध्ये ईश्वरः परजा-
तीयानां मम मुखात् सुसंवादकथायाः श्रवणं विश्वसनञ्च रोचित-
८ वान्। स चित्तज्ञ ईश्वरस्तेषु साक्ष्यमपि दत्तवान्, वस्तुतः सोऽस्म-
९ भ्यमिव तेभ्योऽपि पवित्रमात्मानं वितताार तेषां हृदयानि च
विश्वासेन शुचीकृत्यास्माकं तेषाञ्च मध्ये कमपि प्रभेदं न चकार।
१० अतएवेदानीं किमर्थं यूयमीश्वरं परीक्षमाणास्तेषां शिष्याणां ग्रीवासु
तं युगमर्पयितुं यतध्वे यस्य वहनं नास्मत्पूर्व्वपुरुषै र्नास्माभि र्वा
११ शक्यमासीदिति बुद्ध्वा वयमपि ते मनुष्या इव प्रभो र्यीशोः ख्रीष्ट-
१२ स्यानुग्रहेण परित्राणं प्राप्ता इति विश्वसामः? अनन्तरं सभ्याः
सर्व्वे तूष्णीम्बभूवुः, बार्णबापौलाभ्यामीश्वरः परजातीयेषु यान्यभि-
ज्ञानार्थकर्म्माण्यद्भुतलक्षणानि च साधितवांस्ताभ्यां कथ्यमानं तेषां
१३ वृत्तान्तमश्रौषुश्च। समाप्तायां तयोः कथायां याकोब उत्तरं
१४ कुर्व्वन्नाह, भ्रातरः, मम वाक्यं श्रूयतां। ईश्वरः कथं प्रथमं

स्वनाम्नो निमित्तं परजातीनां मध्ये प्रजापुञ्जं ग्रहीष्यन् तत्त्वावधानं
कृतवान् तद्वृत्तान्तं शिमोनः कथयामास। अपि च भाववादिना- १५
मुक्तयस्तत्सम्मताः, यतो लिखितमास्ते,

इतः पश्चाद्धि दायूदः कुटीरं पतितं भुवि। १६
अहमुत्थापयिष्यामि स्थानान्युत्पाटितानि च।
विनिर्म्मास्ये पुनस्तस्य करिष्यामि च तद्दृजुः॥
अत्रेदं मदभिप्रेतं सकलाः शेषमानवाः। १७
यासाञ्चोपरि मन्नाम ख्यातं ताः परजातयः।
सकला यत् करिष्यन्ति प्रभोरेव गवेषणं।
इयं तस्य प्रभो र्वाणी यस्तत्सर्व्वस्य साधकः॥

ईश्वरस्य सर्व्वाणि कर्म्माण्यनादिकालात् तेनानुभूतानि। अतो १८
मम मतिरियं, परजातीनां मध्ये ये मनुष्या ईश्वरमुद्दिश्य प्रत्या- १९
वर्त्तन्ते तेषामुपरि कोऽप्यन्यो भारो नैवार्प्यताम् आदेशोऽयन्तु
पत्रिकया तेभ्यो दीयतां यद् देवमूर्त्तिभ्यो व्यभिचाराद् रुद्धश्वास- २०
जीविनां मांसात् शोणितभोगाच्चेतेभ्योऽशौचस्य कारणेभ्यस्तैः पृथक्
स्थातव्यं। मोशिदत्तव्यवस्थाया हि घोषका विद्यन्ते, यत आचिर- २१
कालात् सर्व्वनगरेषु प्रतिविश्रामवारं सा पठ्यते।

तदा प्रेरिताः प्राचीनाश्च कृत्स्नमण्डल्या सार्द्धमिदं निरचैषु र्यत् २२
ते स्वेषां मध्ये द्वौ नरौ वरयित्वा पौलबार्णबाभ्यां सार्द्धम् आन्तिय-
खियां प्रहेष्यन्ति। तौ वरितौ नरौ बार्शबाभिधो यिहूदाः
सीलाश्च, भ्रातृषु तावग्रगण्यौ। तयो र्हस्तैश्च ते पत्रिकयेदं २३
निवेदयामासुः, आन्तियखियानगरस्य सुरियाकिलिकियादेशयोश्च
निवासिभ्यः परजातीयभ्रातृभ्यः प्रेरितानां प्राचीनानाञ्च भ्रातृणाञ्च
मङ्गलवादः। श्रुतमस्माभि र्यदस्मत्तो निर्गताः कियन्तो नरा २४

अस्मत्त आदेशमप्राप्य युष्मन्मनांसि चोभयन्तो युष्माभिस्त्वक्छेदः
स्वीकर्त्तव्यो व्यवस्था पालयितव्या चेति कथाभि र्युष्मान् व्याकुली-
२५ कृतवन्तः, अत एकचित्तेन समवेता वयमिदं निरचैष्म, यद् अस्माकं
२६ प्रियौ यौ बार्णबापौलावस्मत्प्रभो र्यीशोः ख्रीष्टस्य नाम्नो निमित्तं
स्वीयप्राणान् पणवन्निचिप्तवन्तौ ताभ्यां सार्द्धमस्मद्वरितान् कति-
२७ पयनरान् युष्मदन्तिकं प्रहेष्यामः। अतो यिहूदां सीलाञ्च प्रहि-
२८ णुमः, तावपि वाचनिकसंवादेन युष्मांस्तदेव ज्ञापयिष्यतः। फलतः
पवित्रेणात्मनास्माभिश्चेदं निरचायि यद् युष्मास्वधिकं कमपि भार-
२९ मनर्पयित्वा केवलमावश्यकमिममादेशं दास्यामो यद् देवमूर्त्तये
दत्तेभ्य उपहारेभ्यः शोणिताद् रुद्धश्वासजीविनां मांसाद् व्यभि-
चाराच्च युष्माभिः पृथक् स्थातव्यं। एतेभ्य आत्मरचां कुर्व्वन्तः
चेममवाप्स्यथ। युष्माकं मङ्गलं भूयादिति।

३० अनन्तरं ते विसृष्टा आन्तियखियां जग्मुः, तत्र शिष्यनिवह-
३१ मेकत्रीकृत्य पत्रिकां समर्पयामासुश्च। तां पठित्वा सर्व्वे आश्वासा-
३२ दानन्दुः। यिहूदाः सीलाश्चापि भाववादिनावास्ताम् अत एव
३३ तावपि प्रचुरवाक्यैस्तान् आश्वासयतां स्थिरानकुरुताञ्च। इत्थं
दीर्घकालं यापयित्वा तौ स्वप्रेरयितृणां समीपं गमनार्थं सकल्याणं
३४ भ्रातृभिर्विसृजाते। सीलास्तु तत्रावस्थातुं रोचयामास। अपि
३५ च पौलो बार्णबाश्चान्तियखियायां निवसन्तावन्यैरनेकैः सार्द्धं प्रभो
र्वाक्यमशिचयन् तत्सुसंवादमज्ञापयंश्च।

३६ अतीते तु कस्मिंश्चित् काले पौलो बार्णबामवादीत्, येषु
नगरेषु प्रभो र्वाक्यं प्रागावाभ्यां विज्ञापितं तत्र पुनर्गत्वा
३७ प्रतिनगरमस्मद्भ्रातृणां तत्त्वानुसन्धानं क्रियतां। तदा बार्णबा मार्का-
३८ भिधं योहनं सङ्गिनं कर्त्तुमैच्छत्, पौलस्त्वमन्यत यत् पाम्फुलिया-

याम् अस्मत्तोऽपक्राम्य य आवाभ्यां साद्धं कर्म्म कर्त्तुं न गतवान्
न युक्तमावाभ्यां तं सङ्गिनं कर्त्तुं। अत्र चण्डत्वे सञ्जाते तौ पृथग् ३९
बभूवतुः। बार्णबास्तु मार्कं सङ्गिनं कृत्वा पोतेन कुप्रं प्रतस्थे।
पौलस्तु सीलां वरयित्वादाय भ्रातृभिरीश्वरस्यानुग्रहे समर्पितः सन् ४०
प्रतस्थे मण्डलीः स्थिरीकुर्व्वंश्च सुरियां किलिकियाञ्च पर्य्यटत्। ४१

---

१६ षोड़शोऽध्यायः।

१ तीमथियस्य त्वक्छेदः ६ फिलिपीनगरं प्रति पौलस्य गमनं १२ लुदियानाम्नयाः स्त्रियाः मनःपरिवर्त्तनं १६ पौलेन गणकभूतग्रस्तकन्यायाः स्वस्थता तत्कारणात् तदधिपतीनां क्रोधः २५ तस्मात् पौलसीलयोः काराबन्धनं कारारक्षकस्य मनःपरिवर्त्तनं स्नापनञ्च ३५ पौलसीलयोः कारातो मोचनञ्च।

ततः परं स दर्ब्बीं लुस्त्रायाञ्चोपतस्थे। पश्य च तत्र तीम- १
थियनामा शिष्य एकोऽविद्यत, स विश्वासिन्या यिहूदिन्या योषितः
पुत्रस्तस्य पिता तु यूनानीय आसीत्। लुस्त्रायाम् इकनिये च २
स्थिता भ्रातरस्तस्य पक्षे साक्ष्यमददुः। अतः पौलः स्वेन साद्धं ३
तस्यैव गमनं रोचयामास, तेषु स्थानेषु विद्यमानानां यिहूदिनां
हेतोस्तमादाय तस्य त्वक्छेदं चकार च, यतस्तस्य पिता यद्
यूनानीयस्तत् ते सर्व्वेऽजानन्।

नगराणि पर्य्यटन्तस्ते प्रेरितै यिरूशालेमस्थैः प्राचीनैश्चाभिम- ४
तानि विधानानि पालनार्थं शिष्येषु समार्पयन्। मण्डल्यश्चानुदिनं ५
विश्वासे दृढा अभवन् सङ्ख्यायामवर्द्धन्त च।

फरुगीयगालातीयदेशस्य मध्येन गत्वा त आशियायामीश्वरी- ६
यवाक्यकथनात् पवित्रेणात्मना निवारिताः सन्तो मुशियायाः ७
सन्निधावुपस्थाय बिथुनियां प्रवेष्टुमुदसहन्त, यीशोरात्मा तु तान्

८ नानुजज्ञे। अनन्तरं ते मुशियामतीत्य समुद्रतटस्थां त्रोयां जग्मुः।
९ तत्र रात्रौ पौलो दर्शनं लेभे। एको माकिदनीयो नरस्तिष्ठन् तं
प्रसादयन्नवदत्, समुद्रं तरित्वा माकिदनियामागत्यास्मानुपकुरु।
१० तेन तस्मिन् दर्शने लब्धे वयं तद्देशीयान् सुसंवादं ज्ञापयितुं
प्रभुनाहूता इति निश्चित्य सत्वरं माकिदनियां प्रस्थातुमयतिष्महि।
११ अतस्त्रोयातः समुद्रयात्रामारभ्य वयमृजुगत्या सामथ्राकीद्वीपं
१२ परदिने च नियापलीं प्राप्य ततः फिलिपीं जगाम। सा माकि-
दनियाविभागस्य प्रथमनगरी रोमीयाणामुपनिवेशश्च। तस्मिन्
१३ नगरे वयं कियन्ति दिनान्ययापयाम। सप्ताहस्य प्रथमे दिने च
वयं नगरस्य वहि र्यत्र नदीतीरे प्रार्थनास्थानमस्तीत्यन्वमन्यामहि
तत् स्थानं गत्वोपविश्य समवेताभ्यो नारीभ्यः कथामकथयाम।
१४ तदेश्वरभजनकारिणी लुदियानाम्न्येका योषिदशृणोत्, सा थुया-
तीरानगरीया धूम्रवस्त्रविक्रेत्री। सा यथा पौलेन कथ्यमानेषु
वाक्येषु मनो निदधीत तथा प्रभुस्तस्या हृदयमुद्घाटयामास।
१५ अनन्तरं तया तस्याः कुटुम्बेन च स्नापिते सति सा सवि-
नयमस्मानवादीत्, भवन्तो यदि मां प्रभौ विश्वासिनीं ज्ञातवन्त-
स्तर्हि मद्गृहमागत्य तत्रावतिष्ठध्वमिति। साग्रहेणास्मान् प्रवर्त्त-
यामास च।

१६ एकदास्मासु तत् प्रार्थनास्थानं गच्छत्सु दैवज्ञात्माविष्टैका दास्य-
स्मत्सम्मुखमागमत् सा भाविवागादित्वेन स्वस्वामिनां प्रचुरमायम-
१७ जनयत्। सा पौलमस्मांश्चानुव्रजन्ती प्रोच्चैरवदत्, नरा इमे परा-
त्परस्येश्वरस्य दासाः, इमेऽस्मान् परित्राणस्य पन्थानं ज्ञापयन्तीति।
१८ बहुदिनानि तयैतदक्रियत। शेषे पौलो व्यथितः सन् परावृत्य
तमात्मानमवादीत्, यीशोः ख्रीष्टस्य नाम्नाहं त्वामादिशामि, अस्या

निःसरेति। तस्मिन्नेव दण्डे स निःससार, तदास्मदायस्याशा १९
निःसृतेति दृष्ट्वा तस्याः स्वामिनः पौलं सीलाञ्च सङ्गृह्य कर्षन्तो
विपणिं शास्तृणां सम्मुखं निन्युः सेनापत्योः समीपं तावुपस्थाप्य च २०
जगदुः, नराविमावस्मन्नगरमतीव व्याकुलीकुरुतः, इमौ यिहूदिनौ
वयं रोमीयाः, या रीती र्ग्रहीतुमनुष्ठातुं वा न विधेयमस्माभिस्ता- २१
दृशी रीतीरिमौ विज्ञापयत इति। जननिवहोऽपि तयो र्विरुद्ध- २२
मुत्तस्थौ। तदा सेनापती तयो र्वासांसि छित्त्वा तयो र्वेत्राघात-
माज्ञापयामासतुः। बह्वाघातैस्तौ प्रहार्य्य च कारारक्षकं तयोः २३
सयत्नं रक्षणमादिश्य तौ कारागारे स्थापयामासतुः। स च तादृश- २४
मादेशं प्राप्य तावन्तरस्थकारायां निधाय काष्ठयन्त्रेण तयोश्च-
रणान् बबन्ध।

अर्द्धरात्रे पौलः सीलाश्च प्रार्थयमानावीश्वरस्य स्तवमगायतां, २५
काराबद्धा जनाश्च तयो र्गानमाकर्णयन्। सहसा तु महान् भूकम्पः २६
सम्बभूव तेन कारागृहस्य भित्तिमूलानि विचालितानि सर्व्वद्वाराणि
युगपदुद्घाटितानि सर्व्वेषां बन्धनानि च मुक्तानि। तदा कारा- २७
रक्षकः भग्ननिद्रः सन् काराया द्वाराणि मुक्तानि दृष्ट्वा कोषादसिं
निष्कृष्यात्मघातं कर्त्तुं प्रावर्त्तत, यतो वन्दिजना वहिः पलायिता
इति तेनान्वमीयत। पौलस्तूच्चस्वरेण तमाह, मैवात्महिंसां २८
कुरुष्व यतो वयं सर्व्वेऽत्र विद्यामहे इति। तदा स दीपिका २९
याचित्वा प्लवमानः प्रविवेश, सकम्पीभूय पौलसीलयोश्चरणेषु
प्रणिपपात च। तौ वहिर्नीत्वा बभाषे च, प्रभू, परित्राणलाभार्थं ३०
मया किं कर्त्तव्यं? ताववदतां, प्रभौ यीशौ ख्रीष्टे विश्वसितां ३१
तथा कृते परित्राणं लप्स्यते त्वया तव गृहेण च। अनन्तरं तौ ३२
तस्मै तस्य गृहे विद्यमानेभ्यः सर्व्वेभ्यश्च प्रभो र्वाक्यं कथयामासतुः,

३३ स च निशायास्तस्मिन् दण्डे तावादाय तयोः क्षतानि प्रक्षालया-
३४ मास, स च सर्व्वे तदीयजनाश्च युगपत् स्नापिता अभवन्। स च
तान् ऊर्द्धं स्वीयवेश्म नीत्वा भक्ष्याणि परिवेषयामास सपरि-
वारमीश्वरे विश्वासी भूत्वा जहर्ष च।
३५ प्रभाते जाते सेनापती वेत्रधरान् प्रहित्य तमूचतुः, तौ नरौ
३६ विसृजेति। अतः कारारक्षकस्तां कथां ज्ञापयन् पौलमवादीत्,
सेनापती युष्मद्विसर्जनस्याज्ञां प्रहितवन्तौ, अत इदानीं युवां निर्गत्य
३७ सकुशलं प्रस्थातुमर्हथः। पौलस्तु तानुवाच, रोमीयौ नरावावां
विचारं विना सर्व्वजनस्य समक्षं ताभ्यां प्रहार्य्य कारायां स्थापितौ,
इदानीं पुन र्गुप्तं ताभ्यां वहिष्क्रियावहे? तन्नैव भूयात्। तावे-
३८ वागत्य नौ वहिर्नयतामिति। अनन्तरं ताः कथा वेत्रधरैः सेना-
पतिभ्यां निवेदिताः। तदा तौ रोमीयाविति श्रुत्वा सेनापती
३९ बिभ्यतुरागत्य च तौ प्रासादयतां वहिर्नीत्वा च नगरात् तयोः
४० प्रस्थानं प्रार्थयाञ्चक्राते। अनन्तरं तौ कारातो निर्गत्य लुदियाया
गृहं प्रविविशतुः, तत्र च भ्रातृन् दृष्ट्वा समाश्वास्य च प्रतस्थाते।

---

१७ सप्तदशोऽध्यायः ।

१ थिषलनीकीनगरे पौलेन ख्रीष्टस्य कथाप्रचारः कतिपयलोकानां विश्वासस्तद-न्येषां विरोधः १० पौलसीलयो र्बिरयानगरगमनं ख्रीष्टस्य कथाप्रचारणात् ताडितत्वं १६ आथीनीनगराय पौलस्य गमनं लोकैः सह विचारः २२ आरेयपागे ख्रीष्टस्य कथाप्रचारणं कियतां लोकानामुपहासः कियतां विश्वसनञ्च।

१ अनन्तरं तावाम्फिपल्यापल्लोनियया च गत्वा थिषलनीक्या-
२ मुपतस्थाते। तत्र यिहूदिनां समाजगृहमासीत्। पौलश्च स्वीया-
भ्यासात् तेषां समाजं प्रविवेश। त्रिषु विश्रामवारेषु च तैः सम्भा-
३ षमाणः शास्त्रप्रयोगेनेदमवर्णयत् प्रत्यपादयच्च यत् क्लेशभागित्वं

मृतानां मध्यात् पुनरुत्थानञ्च ख्रीष्टस्योचितमासीत् मया च यस्य
संवादो युष्मभ्यं कथ्यते स यीशुरेव ख्रीष्ट इति। तदा तेषां ४
केचिन्नरा भजनशीलानां यूनानीयानां महती सङ्घा बह्व्यः प्रमुख्य-
महिलाश्च वाक्यं गृहीत्वा पौलसीलयोः स्वपक्षा बभूवुः। अविश्वासिनो ५
यिहूदिनस्त्वीर्ष्यामास्थाय हट्टसेविनां कांश्चिद् दुर्जनान् गृहीत्वा
जनसंहतिं कृत्वा च नगरं व्याकुलीचक्रुः, यासनस्य गृहमुपस्थाय च
तौ पौरसमाजं नेतुमयतन्त। तावप्राप्य तु यासनं कांश्चिदन्यान् ६
भ्रातॄंश्च कर्षन्तः पौरनायकानां समीपं नीत्वा प्रोच्चैरवदन्, ये
भूमण्डलं विक्षोभितवन्तस्तेऽत्राप्युपस्थिताः, यासनश्च तेषामातिथ्यं ७
कृतवान्। ते सर्व्वे च कैसरस्य विधीनां प्रतिकूलाचारं कुर्व्वन्तो
वदन्ति, यीशुनामा तदन्यो राजास्तीति। कथामिमां श्रावयन्तस्ते ८
जननिवहं पौरनायकांश्च व्याकुलीचक्रुः, ततस्ते यासनाद् अन्येभ्यश्च ९
प्रातिभाव्यमादाय तान् विससृजुः।

अनन्तरं भ्रातरः शीघ्रं निशायामेव पौलं सीलाञ्च बिरयां १०
प्रस्थापयामासुः। तत्रोपस्थाय तौ यिहूदिनां समाजगृहं जग्मतुः।
थिषलनीकीनिवासिभ्य इमे सुशीला आसन्, तस्मात् सम्पूर्णोत्सुकत्वे- ११
नेश्वरवाक्यमगृह्णिषुः, प्रतिदिनञ्च शास्त्राण्यालोचयन्तस्ताः कथा यथार्था
न वेति ज्ञातुमयतन्त। ततस्तेषामनेके यूनानीयानां भद्रयोषितां १२
पुरुषाणाञ्चानल्पाश्च व्यश्वसिषुः। थिषलनीकीया यिहूदिनस्तु बिरया- १३
यामपि पौलेनेश्वरवाक्यस्य घोषणमवगत्यैव तत्राप्युपस्थाय जननिवहं
व्यचालयन् व्याकुलमकुर्व्वंश्च। तदा भ्रातरस्तत्क्षणं पौलं समुद्रेण १४
जिगमिषुमिव प्रस्थापयामासुः, सीलास्तु तीमथियश्च तत्रावातिष्ठेतां।
पौलस्य पथप्रदर्शकास्तु तम् आथीनीं यावन्निन्युः, सीलास्तीमथियश्च १५
यथाशीघ्रं मदन्तिकमागच्छतामित्याज्ञां प्राप्य प्रतस्थिरे च।

१६ आथीन्यां तौ प्रतीक्षमाणः पौलो यदा तन्नगरं देवप्रतिमामय-
१७ मपश्यत् तदा तस्यान्तरात्मोदतेजयत। ततः स समाजगृहे यिहू-
दिभि र्भजनशीलजनैश्च, विपण्याञ्च प्रत्यहं तत्र विद्यमानै र्मनुष्यैः
१८ समभाषत। इपिकूरीयमतस्य स्तोयिकीयमतस्य च कियन्तो दर्शन-
शास्त्रवेत्तारोऽपि तेन सार्द्धं व्यवदन्त। एके चावदन्, वाक्कण्डाहा-
रोऽसौ किं विवक्षुरिति? अन्येऽवदन्, मन्ये स विदेशिदेवानां ज्ञापक
१९ इति, यतः स तान् यीशोः पुनरुत्थितेश्च सुसंवादमकथयत्। शेषे
ते तं गृहीत्वारेयपागाभिधं सभास्थानं नीत्वावादिषुः, भवता
कथ्यमानेयं नवशिक्षा कीदृशी, तत् किमस्माभिरवगम्यं न वेति?
२० भवान् असम्भवकथा अस्मत्कर्णगोचरमानयति, अतस्तासां किं
२१ तात्पर्य्यं तद् वयं ज्ञातुमिच्छाम इति। आथीनीयाः सर्व्वे तत्र
प्रवासिविदेशिनश्च नान्यत् किमपि कर्त्तुं पर्य्यवास्यन्, केवलं सर्व्वतो
नूतनतरं किञ्चित् कथयितुं श्रोतुं वा।

२२ तदा पौल आरेयपागस्य मध्य उत्थाय जगाद, भो आथी-
२३ नीयनराः, युष्मानहं सर्व्वविषयेऽतीव देवभक्तान् लक्षयामि। यतः
पर्य्यटनकाले युष्माकं पूज्यवस्तूनि समालोचयता मया यज्ञवेदिरे-
कादर्शि, तस्यां लिखितमासीत्, अविदिताय देवायेति। अतो
यूयमजानन्तो यस्य भजनं कुरुथ तस्य कथामहं युष्मान् ज्ञाप-
२४ यामि। विश्वस्य तत्र विद्यमानानां सर्व्वेषाञ्च निर्म्माता य ईश्वरः स
एव स्वर्गपृथिव्योः प्रभुः सन् नैव हस्तनिर्म्मितेषु मन्दिरेषु निव-
२५ सति न वा कस्यापि द्रव्यस्याप्राप्तितो मानवहस्तैः सेव्यते, स एव
२६ हि सर्व्वेभ्यो जीवनस्य श्वासस्य सर्व्वस्य च दाता। स चैकस्मा-
च्छोणितान्मनुष्याणां यावतीयजातिमुत्पाद्य कृत्स्ने भूमण्डले वास-
यित्वा च तेषां निवासस्य प्राङ्निरूपितान् कालान् सीमाश्च निर्णी-

तवान्। किमर्थं? ते कथञ्चित् तं मृगयमाणा ज्ञास्यन्ति वेत्याशया यत् २७
तमन्विष्येयुरित्यर्थं। स त्वस्माकं कस्माच्चिद् दूरे न वर्त्तते, यत- २८
स्तस्मिन्नेव वयं जीवामश्चरामः स्मश्च। तथा हि युष्माकं केश्चित्
कविभिरपि कथितं तस्य वयं सजातीया इति। यदि च वयं तस्य २९
सजातीयास्तर्हि नानुमेयमस्माभि र्यद् ऐश्वरप्रकृति र्मनुष्याणां
शिल्पाचिन्तातश्च सुतक्षितेन स्वर्णेन रजतेन प्रस्तरेण वा सदृशी।
अतएवेश्वरोऽज्ञानतस्य कालान् उपेक्ष्य साम्प्रतं सर्व्वत्र सर्व्वमनु- ३०
ष्यान् मनःप्रत्यावर्त्तनमादिशति। यतः स दिनमेकं निरूपितवान्, ३१
यस्मिन् स स्वनिर्णीतेन नरेण धर्म्मतो भूमण्डलस्य विचारं करिष्यति,
मृतानां मध्यात् तस्योत्थापनेन च तमधि सर्व्वेभ्यो विश्वासयोग्यं
प्रमाणं दत्तवानिति।

तदा मृतानां पुनरुत्थानस्य कथां श्रुत्वा केचिदुपजहसुः केचि- ३२
च्चावादिषुः, अन्यस्मिन् काले वयं तव मुखादेतस्य कथां श्रोष्याम
इति। इत्थं पौलस्तेषां मध्यान्निर्जगाम। केचिन्नरास्तु तस्यानुषङ्गिणो ३३
भूत्वा व्यश्वसिषुः, आरेयपागीयो दियनुषियोऽपि तेषां मध्य ३४
आसीत् तथा दामारीनाम्नेका महिला, अन्ये कियन्तश्च ताभ्यां
सार्द्धमासन्।

१८ अष्टादशोऽध्यायः।

१ पौलस्य करिन्थनगरगमनम् ईश्वरकथाप्रचारणं १२ गाल्लियनः समीपेऽपवादि-
तस्यापि तस्य मुक्तिः १८ नानानगराणि गत्वा शिष्याणां स्थैर्य्यकरणं १४
आपल्लोः कथा च।

ततः परं पौल आथीनीतः प्रस्थाय करिन्थं उपतस्थे। तत्र स १
पन्तदेशजातम् आक्किलनामानमेकं यिहूदिनं तत्पत्नीं प्रिस्किल्लाञ्च- २
सादयामास, स आक्किला किञ्चित् पूर्व्वम् इतालियात आगतवान्,

यतः क्लौदियो रोमातः सर्व्वयिहूदिनां प्रस्थानमाज्ञापितवान् ।
३ पौलस्तावभ्यगमत् एकव्यवसायित्वाच्च ताभ्यां सार्द्धं वसन् कर्म्मा-
४ करोत्, यतस्तौ दूष्यनिर्म्माणव्यवसायिनावास्तां । प्रतिविश्रामवारन्तु
स समाजगृहे कथाप्रसङ्गं कुर्व्वन् यिहूदिनो यूनानीयांश्च विश्वासिनः
कर्त्तुमयतत ।

५ माकिदनियातस्तु सीलातीमथिययोरागतयोः पौल ऐश्वर-
वाक्ये निविष्टमनाः सन् यीशुरेव ख्रीष्ट एतस्य दृढं प्रमाणं यिहू-
६ दिभ्योऽददत् । तेषु तु प्रतिरोधं धर्म्मनिन्दाञ्च कुर्व्वत्सु स स्ववस्त्राणि
परिधूय तानवादीत्, युष्मच्छोणितं युष्माकं शिरःसु वर्त्ततां,
७ शुचिरहमद्यारभ्य परजातीयानां समीपं यास्यामि । अनन्तरं स
समाजगृहं त्यक्त्वा युष्टनामकस्य कस्यचिद् ऐश्वरभजनशीलस्य नरस्य
८ गृहं प्रविवेश, तस्य गृहं समाजगृहस्य पार्श्वे स्थितं । समाजाध्यक्षः
क्रीष्पश्च कृत्स्नेन स्वगृहेण सार्द्धं प्रभौ व्यश्वसीत्, करिन्थीयानाञ्च
९ बहवः श्रुत्वा व्यश्वसिषुः स्नापिता बभूवुश्च । प्रभुश्च नैशदर्शनेन
१० पौलमब्रवीत्, मा भैषीरपि तु भाषस्व, मौनी मा भवेः, यतो-
ऽहं त्वया सार्द्धं वर्त्ते, त्वां हिंसितुं कोऽपि त्वां नाक्रमिष्यति, यतो
११ नगरेऽस्मिन् मम बह्वी प्रजा विद्यते । स च वत्सरमेकं षड्मासांश्चा-
वस्थाय तत्रत्यानां मध्य ईश्वरस्य वाक्यमशिक्षयत् ।

१२ गाल्लियनि त्वाखायाप्रदेशस्याधिपत्ये नियुक्ते सति यिहूदिन
एकचित्तेन पौलस्य विरुद्धमुत्थाय विचारासनस्य सम्मुखं नीत्वा-
१३ वदन्, असावीश्वरस्य व्यवस्थाविरुद्धभजनाय मनुष्यान् प्रचोदयति ।
१४ तदा पौले मुखमुद्घाटयितुमुद्यते सति गाल्लिया यिहूदिनोऽब्रवीत्,
भो यिहूदिनः, यद्यपराधोऽथवा दुष्टच्छलः समभविष्यत् तर्हि
१५ यथायुक्तं युष्मान् असहिष्ये । यदि तु केवलं कथां नामानि युष्म-

दीयव्यवस्थामधि वा विवादः स्यात् तर्हि यूयमेव तदालोचनां
कुरुथ, यतस्तादृशानां विचारयिता भवितुमहं न रोचये। इत्य- १६
मुक्त्वा स तान् विचारासनसमीपात् निरास्यत्, तदा यूनानीयः १७
सर्व्वजनः समाजाध्यक्षं सोस्थिनिं सङ्गृह्य विचारासनस्य सम्मुखं ताड़-
यामासुः। गाल्लिया च तत्र किञ्चिदपि न व्यचिन्तयत्।

ततः परमपि पौलो बहुदिनान्यवस्थाय शेषे भ्रातॄन् आमन्त्र्य १८
सुरियादेशगमनार्थं प्रिस्किल्लाक्किलाभ्यां सहितः पोतमारुरोह।
किञ्चिद् व्रतमास्थाय स किंक्रियायां शिरो मण्डितवान्। अनन्तरम् १९
इफिष उपस्थाय स तौ तत्र तत्याज, स्वयञ्च समाजगृहं प्रविश्य
यिहूदिभिः सार्द्धं कथाप्रसङ्गमकार्षीत्। तेषु तु स्वसन्निधौ तस्य २०
दीर्घतरमवस्थानं प्रार्थयमानेषु स तन्नाङ्गीचकार, अपि तु ताना- २१
मन्त्र्यावादीत्, यिरूशालेम आगामिपर्व्वणः पालनं सर्व्वथा मया
कर्त्तव्यं। यदि त्वीश्वराय रोचते, तर्हि पश्चाद् युष्मदन्तिकं प्रत्या-
गमिष्यामि। अनन्तरं स पोतेनेफिषात् प्रतस्थे कैसरियायामुपस्थाय २२
स स्थलेन यिरूशालेमं गत्वा मण्डलीमभिवन्द्यान्तियखियां जगाम।

तत्र कियत्कालं यापयित्वा स प्रस्थाय क्रमशो गालातियादेशं २३
फरुगियाञ्च पर्य्यटन् सर्व्वान् शिष्यान् स्थिरीकर्त्तुं प्रावर्त्तत।

अथ सिकन्दरियानगरे जात आपल्लुनामैको यिहूदीफिष २४
उपतस्थे, स सुवक्ता शास्त्रे शक्तश्चासीत्। स प्रभो मार्गे शिक्षित २५
आत्मन्युत्तप्तश्च सन् प्रभुमधि सूक्ष्ममुपदेशमददात् अपि तु केवलं
योहनस्य स्नापनमजानात्। स नरः समाजगृहे निर्भयेन भाषितु- २६
मारेभे। तस्योपदेशं श्रुत्वाक्किलाः प्रिस्किल्ला च तं स्वान्तिकमानीय
सूक्ष्मतररूपेणेश्वरस्य पन्थानमबोधयतां। ततः परं तस्मिन् सामु- २७
द्रमार्गेणाखायां जिगमिषति भ्रातर आश्वास्य शिष्यैः यदनुगृह्येत

तदर्थं तेषां समीपं पत्रिकां लिलिखुः। तत्रोपस्थाय च सोऽनु-
२८ ग्रहेण प्राप्तविश्वासानाम् अतीवोपकारी बभूव, यतो यीशुरेव
ख्रीष्ट एतत् शास्त्रीयोक्तिभिः सप्रमाणीकुर्व्वन् स उत्साहपूर्व्वकं जन-
समक्षं यिहूदिभिः सार्द्धं विवदमानस्तान् अजयत्।

१९ ऊनविंशोऽध्यायः।

१ पौलद्वारा द्वादशजनेभ्यः पवित्रात्मदानं ८ अनेकलोकानां विश्वसनं पौलेन निवेदनं बहुलोकानां स्वास्थ्यं १३ अपवित्रभूतेन स्किवापुत्राणां क्षतक्षतत्वं मायाविद्यायाः पुस्तकानां दग्धत्वं २१ पौलस्य विरुद्धं दीमीत्रियस्वर्णकारस्य कलहो नगराधिपतिभिस्तस्य निवारणञ्च।

१ करिन्थ आपल्लोरवस्थितिकाले पौलः समुद्राद् दूरतराणां
प्रदेशानां पर्य्यटनं समाप्येफिष उपतस्थे। तत्र कतिपयान् शिष्यान्
२ आसाद्य पप्रच्छ, यूयं विश्वासिनो भूत्वा किं पवित्रमात्मानं लब्ध-
वन्तः? ते तमूचुः, पवित्र आत्मा दत्तोऽस्तीदमपि न श्रुतमस्माभिः।
३ स तान् पुनरवादीत्, तर्हि किमुद्दिश्य स्नापिता अभवत? त
४ ऊचुः, योहनस्य स्नापनमुद्दिश्य। पौलस्त्वाह, योहनो मनःप्रत्या-
वर्त्तनसूचकेन स्नापनेनास्नापयत्, अपि तु जनेभ्योऽकथयत् मत्प-
श्चाद् य आगमिष्यति तस्मिन्नर्थतः ख्रीष्टे यीशौ युष्माभि र्विश्वसित-
५ व्यमिति। तच्छ्रुत्वा ते प्रभो र्यीशोर्नाम्ना स्नापिता बभूवुः। पौलेन
६ तेषु हस्तार्पणे कृते च पवित्र आत्मा तेष्ववततार, ते चान्यभाषा-
७ भिरभाषन्त भाविवाक्यान्यवदंश्च। ते साकल्येन प्रायेण द्वादशनरा
आसन्।

८ ततः परं स भजनभवनं प्रविश्य त्रीन् मासान् यावत् निर्भय-
त्वमास्थायेश्वरस्य राज्यमधि प्रसङ्गमकरोत् विश्वासाय च श्रोतृना-
९ श्वासयत्। केचित्तु कठोरा अनाज्ञावहाश्च भवन्ति जनसमक्षं धर्म्म-

मार्गं निन्दन्ति चेति दृष्ट्वा स तेभ्योऽपक्रम्य शिष्यान् पृथक् कृत्वा
प्रत्यहं तुराणनाम्नः कस्यचिन्नरस्य विद्याशालायां कथाप्रसङ्गमकरोत्।
इत्थं वर्षद्वयमयाप्यत, तस्माद् आशियाप्रदेशनिवासिभि र्यिहूदिभि १०
र्यूनानीयैश्च सर्व्वैः प्रभो र्यीशोः कथाश्रावि। ईश्वरश्च पौलस्य हस्ता- ११
भ्याम् असामान्यानि प्रमावसिद्धकर्म्माण्यसाधयत्, फलतस्तस्य १२
गात्रान्नीतेषु निचोलेषु हस्तमार्जनार्थवस्त्रेषु वा व्याधितानामुपरि
निहितेषु व्याधयस्तेभ्यो निराक्रियन्त, दुष्टा आत्मानश्च तदाविष्टेभ्यो
निरसरन्।

तदा देशपर्य्यटकानां यिहूदिनां भूतापसारिणां केचिद् दुष्टा- १३
त्मभिः क्लिष्टानां मनुष्याणामुपरि प्रभो र्यीशो र्नामव्याहर्त्तुं प्रवृत्या-
वदन्, पौलेन घोष्यमाणस्य यीशो र्नाम्ना शप्त्वा युष्मान् आज्ञापयाम
इति। स्किवानाम्नः कस्यचिद् यिहूदिनो मुख्ययाजकस्य सप्त १४
पुत्रास्तदकुर्व्वन्। एकदा तु दुष्ट आत्मावादीत्, यीशुं जानामि १५
पौलोऽपि मम विदितः, यूयन्तु के? अनन्तरं तेन दुष्टेनात्मना- १६
विष्टो नर उत्प्लुत्य तानाक्रम्य जित्वा च तेषां तथा प्रबभूव, यथा
ते विवस्त्राः क्षताङ्गाश्च तस्माद् गृहाद् बहिः पलायाञ्चक्रिरे। तच्चे- १७
फिषनिवासिभिः सर्व्वै र्यिहूदिभि र्यूनानीयैश्चावागम्यत, ते च
सर्व्वे भयाक्रान्ता अभवन् प्रभो र्यीशो र्नाम चामह्यीयत। ये विश्व- १८
सितवन्तस्तेषामनेके चागत्य स्वव्यापारान् स्वीचक्रिरे ज्ञापयामासुश्च।
ये च कुहकवृत्तय आसंस्तेषामनेके स्वपुस्तकानि समानीय सर्व्वेषां १९
समक्षमधाक्षुः। गणितेषु च तेषां मूल्येषु तानि पञ्चायुतानि रौप्य-
मुद्रा इति तै र्निरणायि। इत्थं सप्रभावं प्रभो र्वाक्यमवर्धत २०
प्राभवच्च।

सम्पन्नेष्वेतेषु कर्म्मसु पौलो मनसीदं निरचैषीत्, माकिद- २१

नियाम् आखायाञ्च पर्य्यटिष्यामि ततश्च यिरूशालेमं गमिष्या-
मीति, पुनश्चाह, तत्र गमनात् परं मया रोमापि द्रष्टव्येति ।
२२ अनन्तरं तस्य परिचर्य्याकारिणां मध्ये तीमथियमिरास्तञ्च द्वावेतौ
माकिदनियां प्रहित्य स स्वयम् आशियायां कियन्तं कालम-
वातिष्ठत ।
२३ तस्मिन् काले तु तं धर्म्मपथमधि महाक्षोभ उत्पेदे । फलतो
२४ दीमीत्रियनामैकः स्वर्णकार आर्त्तिमीदेव्या रौप्यमन्दिराणि रचयन्
२५ शिल्पिनां प्रचुरार्थोपार्ज्जनमजनयत् । स तान् तादृशशिल्पसम्पर्कीय-
कर्म्मकारिणश्चैकत्रीकृत्यावादीत्, महाशयाः, अर्थोपार्ज्जनोपाया-
२६ दस्मादस्माकं सम्पत्तिः सम्भवतीति भवद्भिरनुभूयते । भवद्भिश्चैतद्
दृश्यते श्रूयते च यन्न केवलमिफिषेऽपि तु प्रायेण कृत्स्नायाम्
आशियायां पौलोऽसौ बहुजनं स्वपक्षीकृत्य हस्तनिर्म्मिता देवा
२७ न देवा इत्युपदिशन् मतान्तरावलम्बिनं कृतवान् । अनेन न केवलम्
अस्मदीयवृत्तेरप्ययशोगमनं शङ्कनीयम्, अपि तु महादेव्या आर्त्तिम्या
धर्म्मधाम्नो हेयत्वं कृत्स्नयाशियया मर्त्त्यलोकेन च पूज्यमानायास्तस्या
२८ माहात्म्यभ्रंशोऽपि शङ्कनीयः । एतच्छ्रुत्वा ते रोषपूर्णा उच्चैःस्वरेण
२९ क्रोशन्तोऽवदन्, इफिषीयाणाम् आर्त्तिमी महतीति । कृत्स्ने नगरे
च कलहपूर्णे जाते ते पौलस्य सहचरौ गायारिष्टार्खाविमौ माकि-
३० दनीयौ नरौ सङ्गृह्यैकचित्ता धावन्तो रङ्गभूमिं जग्मुः । पौले तु
३१ पौरसमाजं प्रवेष्टुमिच्छां दर्शयति शिष्यास्तं नानुजज्ञिरे । आशि-
याधिपतीनां ये केचित् तस्य प्रणयिन आसंस्तेऽपि दूतं प्रहित्य
३२ रङ्गभूमौ स्वसमर्पणं तेन यन्न क्रियेत तत् प्रार्थयाञ्चक्रिरे । तत्र लोक
एकमन्ये चान्यत् क्रोशन्तोऽवदन्, यतः पौरमण्डली प्रव्याकुलासीत्,
३३ ते किमर्थं समवेतास्तदप्यधिकांशो जनो नाजानात् । अनन्तरं

जननिवहाद् यिहूदिभि र्निर्द्दिष्टः सिकन्दरः कैश्चिद् वहिरानिन्ये,
स च सिकन्दरो हस्तं चालयित्वा दोषप्रक्षालनार्थं पौरसमाज-
मालपितुमुद्यतोऽभूत्। स तु यिहूदीति विदिते सति, प्रायेण ३४
पञ्च दण्डान् यावत् क्रोशतां सर्व्वेषां मुखादियमेका वाणी निर-
सरत्, इफिषीयाणाम् आर्त्तिमी महतीति। शेषे नगरस्य कार्य्य- ३५
सम्पादको जननिवहं शमयित्वावादीत्, भो इफिषीयनराः, को नु
मनुष्यो नेदं जानाति यदिफिषीयाणां नगरी महादेव्या आर्त्तिम्या
द्युपितरात् पतितायाः मूर्त्त्याश्च मन्दिरमार्जिका? कथेयं प्रति- ३६
वादातीतेति बुद्ध्वा युष्माभिः शान्तभावमवलम्ब्य स्थातव्यम् अवि-
मृश्य किमपि न कर्त्तव्यं। नराविमौ युष्माभिरानीतौ, तौ तु न ३७
पूतवस्त्वपहारकौ न वा युष्मद्देव्या निन्दकौ। केनचित् सार्द्धं ३८
यदि दीमीत्रियस्य तत्सङ्गिनां शिल्पिनाञ्च विवादो भवेत्, तर्हि
व्यवहारार्थं निरूपितानि दिनानि सन्ति राजप्रतिनिधयश्च विद्यन्ते,
ते मिथो वादप्रतिवादौ क्रियेतां, अन्यत् किमपि तु यदि युष्माभि ३९
र्याच्यते, तर्हि व्यवस्थानुमतायां पौरमण्डल्यां तन्निर्णायिष्यते।
वास्तवम् अद्यतनस्य कारणाद् उपप्लवदोषग्रस्तानामिवास्माक- ४०
मभियोगो शङ्कनीयः, यत एतस्य बहुजनसमागमस्य व्याख्यां
कर्त्तुं येन शक्नुयाम तादृशो हेतुवादः कोऽपि न विद्यते। इदं ४१
कथयित्वा स पौरमण्डलीं विससर्ज।

---

२० विंशोऽध्यायः।

१ पौलस्य माकिदनियादेशं गमनं ७ कथाप्रचारसमय उपरिस्थवातायनात् पतितस्योतुखस्य स्वास्थ्यं १३ मिलीतनगरे पौलस्योपस्थितिः १७ इफिषस्थप्राचीनानामुपदेशः स्वस्मिन् तेषु च भविष्यद्वाक्यप्रचारणं ३६ तस्माद् विच्छेदश्च।

तस्य कलहस्य निवृत्तेः परं पौलः शिष्यान् स्वसमीपमाहूय १

२ मङ्गलं वदित्वा च माकिदनियां गन्तुकामः प्रतस्थे। तत्रत्यस्थानानि
३ पर्य्यट्य बहुवाक्यै र्जनानाश्वास्य च स यूनानीयदेश उपतस्थे। तत्र
मासत्रयं यापयित्वा यदा स सामुद्रमार्गेण सुरियां गन्तुमुद्यत
आसीत्, तदा यिहूदिभिस्तस्य विरुद्धायां कुमन्त्रणायां कृतायां
४ स माकिदनियया प्रत्यावर्त्तितुं निरचैषीत्। आशियां यावच्च
तेन सार्द्धमिमेऽगच्छन्, विरयीयः सोपात्रः, थिषलनीकीया-
वारिष्टार्खसिकुन्दौ दर्बीयो गायस्तीमथियश्च, आशियादेशीयौ
५ तुखिकत्रफिमौ च। इमेऽस्माकं पूर्व्वं गत्वा त्रोयायाम् अस्मान्
६ प्रत्यैक्षन्त। वयन्तु किण्वशून्यपूपानां पर्व्वकालात् परं पोतेन
फिलिपीतः प्रस्थाय पञ्चभिर्दिनैस्त्रोयां तेषां समीपमागमाम तत्र
सप्तदिनान्ययापयाम च।

७ अनन्तरं सप्ताहस्य प्रथमे दिने भ्रातृषु पूपभञ्जनार्थं मिलि-
तेषु पौलः परप्रातःकाले प्रस्थातुं निश्चित्य तैः सह कथाप्रसङ्गं
८ कुर्व्वन्नर्धरात्रं यावत् कथयित्नातिष्ठत्। यत्र गृहोपरिस्थे प्रकोष्ठे
९ वयं मिलिता आस्म तत्र बह्व्यो दीपिका आसन्। तदा वातायन
उपविष्ट ऊतुखनामैको युवा प्रबलनिद्रयाक्राम्यत। पौले दीर्घकालं
भाषमाणे स निद्रयाकृष्टस्तृतीयायाः श्रेण्याः प्रकोष्ठाद् भूमौ
१० निपपात मृतोऽपनिन्ये च। पौलस्त्ववरुह्य तस्योपरि पतित्वा तं
समाश्लिष्य चावादीत् मा क्षुभ्यध्वं यतोऽस्य देहे प्राणाः स्थिताः।
११ अनन्तरं स पुनरुपरिस्थं प्रकोष्ठं गत्वा पूपं भङ्क्त्वाहारं कृत्वा प्रभातं
१२ यावत् प्रचुरं सम्भाष्य च तथाविधो निर्जगाम। जनास्तु तं बालं
जीवन्तमानीयासामान्यमाश्वासं लब्धवन्तः।

१३ प्रथमं हि वयं पोतमारुह्यास्सं जिगमिषवस्तत्रैव पौलं गृही-
ष्यन्तः प्रतस्थिमहे, यतः स एव स्थलेन गन्तुकामस्तदाज्ञापितवान्।

आस्सेऽस्माभिः सार्द्धं मिलितं तं गृहीत्वा वयं मितुलीनीं जग्मिम, १४
तस्माच्च प्रस्थाय परदिने खीयस्य सम्मुखमुपतस्थिमहे। अपरेद्युः १५
सामं यावत् समुद्रं तेरिम; त्रोगुल्लिये रात्रिं यापयित्वा च पर-
दिने मिलीतं जग्मिम। यत आशियायां विलम्बः सम्भविष्यतीति १६
शङ्कया पौल इफिषमतिक्रम्य गन्तव्यममन्यत। यतः शक्ये सति
पञ्चाशत्तम्युत्सवस्य दिने यिरूशालेम उपस्थितो भवितुमिच्छातः
सोऽत्वरत।

मिलीतात्तु स इफिषं दूतं प्रहित्य मण्डल्याः प्राचीनान् १७
आह्वाययामास। तेषु तस्यान्तिकमागतेषु स तान् जगाद, आशि- १८
यायां मत्सोपस्थितेः प्रथमं दिनमारभ्य युष्मत्सङ्गेऽहं समस्तकालं
कथमाचरितवांस्तद् युष्माभिरनुभूतं। सम्पूर्णनम्रतयाहं प्रचुरनेत्र- १९
जलेन सहितो यिहूदिनां कुमन्त्रणाभिरुत्पादितानां बहुपरीक्षाणां
मध्ये प्रभो र्दासत्वम् अकरवं। हितजनकं किमपि न प्रच्छाद्य २०
जनसमक्षं गृहे गृहे च युष्मान् सर्व्वं ज्ञापयितुं शिक्षयितुञ्चाक्लान्त
आसम्, ईश्वरमुद्दिश्य मनःप्रत्यावर्त्तनं कर्त्तव्यम् अस्मत्प्रभुं यीशुं २१
ख्रीष्टमुद्दिश्य विश्वासश्च कर्त्तव्य इत्येतस्य साक्ष्यं यिहूदिभ्यो यूना-
नीयेभ्यश्च प्राददाम्। इदानीन्तु पश्यतात्मना बद्धोऽहं यिरूशालेमं २२
गच्छामि; न जाने तत्र मम किं सम्भविष्यति, केवलमिदं जानामि, २३
यदेकैकस्मिन् नगरे पवित्र आत्मा साक्ष्यं दत्त्वा वदति, यद् बन्धनानि
क्लेशाश्च मां प्रतीक्षन्ते। नाहं तु किमप्यनुचिन्तयामि न वा मम २४
प्राणान् मदर्थं महामूल्यान् मन्ये, केवलं सानन्दं मम धावनं
समापयितुम् ऐश्वरानुग्रहप्रकाशके सुसंवादे साक्ष्यप्रदानाय प्रभो
र्यीशो र्लब्धां परिचर्य्यां साधयितुञ्चाकाङ्क्षामि। इदानीञ्च पश्यत २५
जानेऽहं यद् येषां मध्ये ईश्वरस्य राज्यं घोषयन्नहं पर्य्यटितवान्

२६ सर्व्वे ते यूयमितः परं ममास्यं पुन र्न द्रक्ष्यथ। अतो हेतोरद्यैव
युष्मान् साक्षिणः कुर्व्वन् वदामि, सर्व्वेषां शोणितपातदोषादहं
२७ शुचिः, यतो युष्मान् ईश्वरस्य समग्रां मन्त्रणां ज्ञापयितुमहम-
२८ क्लान्त आसं। अतो यूयं स्वेषु पवित्र आत्मा च युष्मान् अध्यक्षान्
कृत्वा यस्य मध्ये स्थापितवांस्तस्मिन् कृत्स्ने व्रजे च मनांसि निध-
२९ द्धम् ईश्वरस्य स्वशोणितेन क्रीतां मण्डलीं रक्षितुं यतध्वं। जानेऽहं
यन्मम प्रस्थानात् परं दुर्जया वृका युष्मन्मध्यं प्रवेक्ष्यन्ति ते व्रजस्य
३० न दयिष्यन्ते। युष्मत्तः केचिन्नरा उत्पद्य कुटिलकथाभिः शिष्यान्
३१ स्वानुगामिनायापकर्षितुं यतिष्यन्ते। अतो जागृत स्मरत च यद्
वर्षत्रयं यावदहं निशायां दिवसे च साश्रुनेत्रो युष्मान् प्रत्येकं
३२ सचेतनान् कुर्व्वन्न व्यरमे। इदानीञ्च भो भ्रातरः, अहमीश्वरे तदी-
यानुग्रहस्य वाक्ये च युष्मान् समर्पयामि, स हि युष्मान् प्रतिष्ठा-
पयितुं पवित्रीकृतानां सर्व्वेषां मध्ये युष्मभ्यं दायांशं दातुञ्च शक्तः।
३३ कस्यचित् स्वर्णाय रूप्याय परिच्छदाय वाहं न लुब्धवान्। यूय-
३४ मेव च जानीथ यन्मम मदीयसङ्गिनाञ्चावश्यकव्ययाथं किङ्करेणे-
३५ वैतेन करद्वयेन परिश्रमोऽकारि। सर्व्वथाहं स्वं युष्माकमादर्शं कृत-
वान्, यत इत्थं परिश्रमं स्वीकृत्यास्माभि र्दुर्व्वला उपकर्त्तव्याः
स्मर्त्तव्यानि च प्रभो र्यीशो र्वाक्यानि स एव हि कथितवान्,
धन्यतरं दानमादानत इति।

३६ एतत् कथयित्वा स जानुनी पातयित्वा सर्व्वैः सार्द्धं प्रार्थ-
३७ याञ्चक्रे। सर्व्वेषाञ्च तीव्रं रोदनं सञ्जातं, ते च पौलस्य कण्ठ-
३८ देशमालिङ्ग्य तमचुम्बन्। विशेषतस्ते तदीयास्यं पुन र्न द्रक्ष्यन्तीति
तेन यदुक्तं तस्मिन् वाक्ये तेऽतीव दुःखार्त्ता बभूवुः। अनन्तरं ते
पोतं यावत् तेन सार्द्धं जग्मुः।

२१ एकविंशोऽध्यायः।

१ पौलस्य यिरूशालेमगमनं ७ मार्गमध्ये सुसंवादप्रचारकस्य फिलिपस्य गेहगमनं १२ आगावद्वारा पौलस्य दुःखे भविष्यद्वाक्यं १७ यिरूशालेमे तदुपस्थितिः आचरणञ्च २७ तस्मिन् लोकानां कलहः ३७ सहस्रसेनापतिना तन्मुक्तिस्तेन सार्द्धं कथोपकथनञ्च।

आयासेन तेभ्यो वियुक्ताः सन्तः पोतेन प्रस्थाय वयमृजुगमनेन १
कोयं परदिने च रोदं, ततश्च पातारां जग्मिम। तत्र फैनीकी- २
देशगामिनं पोतमासाद्य तमारुह्य प्रतस्थिमहे। कुप्रद्वीपे चास्म- ३
द्दृष्टिगोचरीभूते तं सव्यदिशि विहाय सुरियामुद्दिश्य गत्वा सोर
उपतस्थिमहे। यतस्तत्रैव पोताद् भाण्डनिःसारणं कर्त्तव्यमासीत्।
वयञ्च तत्र शिष्याननुसन्धाय सप्तदिनान्यतिष्ठाम। त आत्मन ४
आवेशात् पौलमवदन् यत् तेन यिरूशालेमं न गन्तव्यं। तेषु दिनेषु ५
शेषं यावदस्माभि र्यापितेषु यदा वयं नगरान्निर्गत्य प्रातिष्ठामहि
तदा भार्य्याभि र्बालकैश्च परिवृतास्ते सर्व्वेऽस्माभिः सार्द्धं नगरस्य
वहिःप्रान्तं यावदगच्छन् तत्र समुद्रतटे च सर्व्वे वयं जानूनि
पातयित्वा प्रार्थयामहि। अनन्तरं परस्परमभिवाद्य वयं पोत- ६
मारुहिम ते च प्रत्येकं स्वस्थानं प्रत्यावृत्तिरे।

सोराद् वयं समुद्रयात्रां समाप्य तलिमायावुपतस्थिमहे शिष्या- ७
नभिवाद्य च दिनमेकं तेषां सन्निधाववातिष्ठामहि। अपरेद्युश्च ८
पौलस्तत्सङ्गिनश्च वयं प्रस्थाय कैसरियायामुपतस्थिमहे; सप्तानां
श्रेण्यां गणितस्य सुसंवादघोषकस्य फिलिपस्य गृहं प्रविश्य च
तस्य सन्निधाववातिष्ठामहि। तस्य चतस्रोऽनूढा भाववादिन्यो ९
दुहितर आसन्। अस्मासु तत्र बहुतराणि दिनान्यवतिष्ठमानेषु १०
यिहूदियात आगावनामैको भाववाद्युपतस्थे। सोऽस्मत्समीपमा- ११
गत्य पौलस्य कटिबन्धनं गृहीत्वा स्वहस्तौ स्वचरणौ च बद्ध्वाब्रवीत्,

पवित्र आत्मेदं वक्ति, इदं यस्य कटिबन्धनं, तं नरं यिरूशा-
लेमे यिहूदिन इत्थं बद्ध्वा परजातीयानां हस्तेषु समर्पयिष्य-
१२ न्तीति । तच्छ्रुत्वास्माभिस्तत्रत्यैश्च स सविनयमूचे, भवता यिरू-
१३ शालेमं मा गम्यतामिति । पौलस्तुस्मान् प्रतिबभाषे, क्रन्दन्तो
मम हृदयं सम्पीडयन्तश्च किं कुरुथ ? प्रभो र्यीशो र्नाम्नो निमित्तं
यिरूशालेमे न केवलं बद्धो भवितुमुद्यतोऽहं मर्त्तुमप्युद्यतोऽस्मि ।
१४ इत्थं तस्मिन्नस्माकं याचनायामसम्मते सति वयं निवृत्यावादिष्म,
प्रभोरिच्छा भवत्विति ।

१५ तेभ्यो दिनेभ्यः परं वयं पाथेयद्रव्याण्यादाय यिरूशालेममं
१६ गमाम । कैसरियातोऽपि केचिच्छिष्या अस्माभिः सार्द्धमगमन्
यस्य गृहे चास्माभिरतिथिभि र्भवितव्यं तस्य कुप्रीयम्नासोनेतिनाम्नः
प्राचीनस्य शिष्यस्य गृहमस्माननैषुः ।

१७ यिरूशालेम उपस्थिता वयं भ्रातृभिः सानन्दमनुगृहीताः ।
१८ अपरेद्युः पौलोऽस्मान् सङ्गिनः कृत्वा याकोबस्य गृहं प्रविवेश ।
१९ प्राचीनाश्च सर्व्वे तत्रोपतस्थिरे । स तानभिवाद्य तस्य परिचर्यया
परजातीनां मध्य ईश्वरेण यद् यत् साधितं तत्तत् सविशेषं तेभ्यः
२० कथयामास । ते च श्रुत्वेश्वरमस्तुवन्, पौलञ्चावदन् त्वं पश्यसि,
भ्रातः, कत्ययुतानि यिहूदिनो विश्वासिनो जाताः, ते च सर्व्वे
२१ व्यवस्थायाः पक्ष उद्योगिनः । त्वामधि च ते सयत्नमिदमुक्ता यत्
त्वं परजातिषु वासकारिणः सर्व्वान् यिहूदिनो मोशितोऽपक्रमणं
शिक्षयन् शिशूनां त्वक्छेदोऽकर्त्तव्यो रीतयश्च नाचरितव्या युष्मा-
२२ भिरिति वदसि । अतः किं कर्त्तव्यं ? जननिवहेनावश्यं मिलितव्यं,
२३ यतस्त्वदागमनसंवादस्तैः श्रोष्यते । अतो वयं तुभ्यं यत् कथया-
मस्तत् कर्त्तुमर्हसि । व्रतेन बद्धा अस्माकं चत्वारः पुरुषा विद्यन्ते ।

त्वं तानादाय तैः सार्द्धं स्वं पुनीष्व ते च यथा शिरोमुण्डनं कर्त्तुं २४
शक्नुयुस्तथा तेषां निमित्तमर्थव्ययं कुरु, तथा कृते सर्व्वे ज्ञास्यन्ति
यत् त्वामधि ते यदुक्तास्तदतथ्यमपि तु त्वमपि व्यवस्थापालन-
माचरसीति। कृतविश्वासानां परजातीयानां हि वयं पत्रेणास्माक- २५
मिमां मतिं ज्ञापितवन्तो यदेतेषामन्यत् किमपि तै र्न रक्षणीयं
केवलं देवमूर्त्तीनां प्रसादः शोणितं रुद्धश्वासजीविनां मांसं व्यभि-
चारश्चैतानि तैः परिहर्त्तव्यानि। तदा पौलस्तान् नरानादाय २६
परदिने तैः सार्द्धं स्वं पवित्वा धर्म्मधाम प्रविश्य तेषां निमित्तमे-
कैकश उपहारानयनं यावद् यापयितव्यानां पावनस्य दिनानां
पूर्णां सङ्ख्यां ज्ञापयामास।

तेषु सप्तसु दिनेषु प्रायेण समाप्तेषु आशियादेशीया यिहूदिनो २७
धर्म्मधाम्नि तं दृष्ट्वा प्रायेण कृत्स्नं जननिवहं व्याकुलीचक्रुस्तस्मिन्
हस्तार्पणं कृत्वोच्चैःस्वरेणावादिषुश्च, भो इस्रायेलीयनराः साहाय्यं २८
कुरुत। अयं स मनुष्यो यः सर्व्वत्र सर्व्वेभ्यो ऽस्मदीयजाते र्व्यवस्थायाः
स्थानस्यैतस्य च विरुद्धां शिक्षां ददाति। अपि च स यूनानीय-
नरानपि धर्म्मधाम्नोऽभ्यन्तरमानीयेदं पवित्रं स्थानमपवित्रीकृतवा-
निति। वस्तुतस्तत्पूर्व्वं ते नगरे तस्य सङ्गे इफिषीयं त्रफिमं दृष्ट- २९
वन्तः स पौलेन धर्म्मधाम्नोऽभ्यन्तरं नीत इत्यनुमितवन्तश्च। अन- ३०
न्तरं कृत्स्नं नगरं चुक्षुभे जननिवहाश्च मिलितुं दधावुः। पौलं
सङ्गृह्य कर्षन्तो धर्म्मधाम्नो वहि र्निन्युश्च। तदीयगोपुराणि च
तत्क्षणं बद्धानि। इत्थं तेषु तं हन्तुं यतमानेषु सैन्यदलाध्यक्षस्य ३१
सहस्रपतेः समीपं संवादोऽयमुपतस्थे यत् कृत्स्नं यिरूशालेमं
प्रचुक्षुभमिति। ततः स तूर्णं योद्धॄन् शतपतींश्च सङ्गिनः कृत्वा तेषां ३२
विरुद्धं दधाव। सहस्रपतिं योद्धॄंश्च दृष्ट्वा ते पौलं ताडयितुं

३३ निवृत्ताः । सहस्रपतिस्तदा निकटं गत्वा तं सङ्गृह्य शृङ्खलद्वयेन
३४ तस्य बन्धनमादिदेश । स च कः किं कृतवांश्चेत्यपृच्छत् । तदा
जननिवहस्य मध्य एक एकमन्ये चान्यद् वच उदैरयन् । कोला-
हलात् निश्चितं किमप्यवगन्तुमशक्तः सन् स सन्निवेशं तस्यापनय-
३५ नमादिदेश । यदा तु स सोपान उपातिष्ठत तदा जननिवहस्यो-
३६ ग्रतातो योद्धृभिस्तस्य वहनमावश्यकमभूत् । यतो जननिवहो-
ऽनुव्रजन्नुच्चैःस्वरेणाब्रवीत्, अयं व्यापाद्यतामिति ।
३७ सन्निवेशस्याभ्यन्तरं नायिष्यमाणस्तु पौलः सहस्रपतिं पप्रच्छ,
भवन्तं किञ्चन वक्तुं किमनुज्ञायते? सोऽब्रवीत्, यूनानीयभाषां
३८ किं जानासि? तर्हि नासि त्वं स मिस्रीयनरो यः कियत्कालात्
पूर्व्वं विप्लवं कृत्वा घातकानां चतुःसहस्राणि पुरुषान् जङ्गलभूमिं
३९ नीतवान्? पौलः प्रतिबभाषे, अहं तार्षे जातो यिहूदी, किलि-
कियायास्तस्यैव प्रसिद्धस्य नगरस्य पौरोऽहं, जननिवहमाभाषितु-
४० मिच्छन् भवन्तं तदनुमतिं प्रार्थये । दत्तायाञ्च तेनानुमत्यां पौलः
सोपाने तिष्ठन् जननिवहस्य मौनार्थं हस्तं चालयामास । तदा
महती निःशब्दता सञ्जाता ।

---

२२ द्वाविंशोऽध्यायः ।

१ लोकेभ्यः पौलस्य निवेदनं २२ पौलस्य विरुद्धं लोकानां कथनं कशया तं ताडयितुं सेनापतेरादेशः ३० तस्य प्रहारस्य क्षमा यिहूदीयैः सह तस्य विचारं कर्त्तुम् आज्ञापनञ्च ।

१ अनन्तरं स इब्रीभाषया प्रोच्चैरिदं कथयामास, भो भ्रातरः
२ पितरश्च, मयेदानीं स्वपक्षे यद् वक्तव्यं भवन्तस्तच्छ्रोतुमर्हन्ति । तदा
स इब्रीभाषयास्मानालपतीति श्रुत्वा तेऽधिकतरं मौनभावमातस्थुः ।

स च जगाद, अहं यिहूदी नरः, किलिकियास्थे तार्षे जातोऽपि ३
त्वस्मिन् नगरे गमलीयेलस्य चरणतले पोषितः पैतृकव्यवस्थायाः
सूक्ष्मनियमानुरूपं शिक्षितश्च भूत्वा सर्व्वे यूयमद्य यथा स्थ तथै-
वेश्वरस्य निमित्तमुद्योग्यासं। एतद्धर्म्ममार्गावलम्बिनोऽहं मृत्युं याव- ४
दुपाद्रवं पुरुषान् योषितश्च बद्ध्वा कारासु समार्पयञ्च। अत्र मम ५
साक्षी महायाजकः कृत्स्नः प्राचीनवर्गश्च। तेभ्य एवाहं भ्रातॄन्
प्रति पत्रिका गृहीत्वैकदा दम्मेशकमगच्छं। तत्र येऽविद्यन्त तान्
बद्ध्वा दण्डनार्थं यिरूशालेमं नेष्यामीति मम मनस्थमासीत्।
यदा तु मार्गेण गच्छन् दम्मेशकस्य सन्निधावुपातिष्ठे, तदा ६
मध्याह्नकाले सहसा गगनादवतरमाणा महती दीप्ति र्मत्परितो
व्यद्योतिष्ट। अहञ्च भूमौ पतित्वा मामालपन्तीमिमां वाणीमश्रौषं, ७
शौल शौल किमर्थं मामुपद्रवसीति। तदाहं प्रत्यवदं को भवान्, ८
प्रभो? स मामवादीत्, त्वं यमुपद्रवसि, स नासरतीयो यीशु-
रहमिति। मम सहचरा अपि तां दीप्तिं दृष्टवन्तो भयग्रस्ता ९
जाताश्च, मामालापतो वाणीन्तु ते न श्रुतवन्तः। अहं पुनर- १०
वोचं, किं कर्त्तव्यं मया, प्रभो? स जगाद, उत्थाय दम्मेशकं
याहि, तव कर्त्तव्यं यद्यन्निरूपितं तत् सर्व्वं तत्रैव तुभ्यं कथयिष्यते।
अनन्तरं तस्या दीप्तेः प्रतापतो हीनदृष्टिः सन्नहं स्वसङ्गिभि र्धृत- ११
हस्तो दम्मेशकं प्राविशं। ततः परं तन्निवासिषु सर्व्वेषु यिहूदिषु १२
सुख्यातो व्यवस्थानुरूपं भक्तोऽननियनामैको नरो ममान्तिकमा- १३
गत्य मामुपस्थाय च मामब्रवीत्, भ्रातः शौल, दृष्टिं लभस्व।
तद्दण्डे चाहं तं प्रति दृक्पातमकार्षं। स च मामवादीत्, १४
अस्मत्पूर्व्वपुरुषाणामीश्वरस्तस्येच्छाया ज्ञानार्थं तस्य धर्म्मवतो दर्शन-
लाभार्थं तदीयमुखाद् वाण्याः श्रवणार्थञ्च त्वां नियुक्तवान्। यतस्त्वं १५

यद्यद् दृष्टवान् श्रुतवांश्च तस्मिन् सर्व्वस्मिन् सर्व्वमनुष्याणां समीपं
१६ तस्य साक्षी भविष्यसि। इदानीञ्च किमर्थं विलम्बसे? उत्थाय
१७ तस्य नामाह्लय स्नापनं गृहाण स्वपापानि प्रक्षालय च। ततः
परं यिरूशालेमे प्रत्यावृत्तोऽहं यदा धर्म्मधाम्नि प्रार्थये तदा
१८ मूर्च्छापन्नो भूत्वा तमदर्शं, स मामवादीत्, त्वरामास्थाय शीघ्रं
यिरूशालेमात् प्रतिष्ठस्व, यतो मामधि तव साक्ष्यं ते न ग्रहीष्यते।
१९ अहन्त्ववोचं, प्रभो, ते जानन्ति, यदहं त्वयि विश्वासिनो मनुष्यान्
२० कारायां समार्प्यं समाजगृहेषु प्राहारयञ्च, यदा च तव साक्षिणः
स्तिफानस्य शोणितमसिच्यत तदाहं पार्श्वे तिष्ठंस्तस्य वधमन्वमोदे
२१ तद्वधकारिणां वासांस्यरक्षञ्चेति। स तु मामवादीत्, याहि, यतोऽहं
त्वां दूरं परजातीनां समीपं प्रहेष्यामीति।

२२ एतद्वचो यावत् तस्य कथां श्रुत्वा ते प्रोच्चैरिदमुदैरयन्,
२३ एवंविधोऽसौ पृथिवीतो निराक्रियतां, न युक्तं तस्य जीवनं। तेषु तु
२४ विक्रोशत्सु वस्त्राणि त्यजत्स्वाकाशं प्रति धूलिं क्षिपत्सु च सहस्रपति-
स्तस्य विरुद्धं तेषां कोलाहलस्य कारणमवगन्तुमिच्छन् सन्निवेशस्या-
भ्यन्तरं तस्यापनयनमादिश्य कशाघातेन तस्य परीक्षणमाज्ञापया-
२५ मास। यदा तु स चर्म्मकशानां निमित्तमातन्यत तदा पौलः
पार्श्वे तिष्ठन्तं शतपतिं पप्रच्छ, रोमीयस्याथवानिर्णीतदोषस्य
२६ नरस्य कशाघातः किं विधेयो युष्माकं? तच्छ्रुत्वा स शतपतिर्गत्वा
सहस्रपतिमब्रवीत्, भवान् यत् कर्त्तुमुद्यतस्तत्र सतर्को भवतु, यतः
२७ स मनुष्यो रोमीयः। तदा सहस्रपतिः समीपमागत्य तं जगाद,
ब्रूहि मां, त्वं रोमीयो न वेति? सोऽवादीत्, रोमीयोऽस्मि,
२८ सहस्रपतिः पुनरवोचत्, महता मूल्येनाहं तं पौरत्वाधिकारं
२९ क्रीतवान्। पौलो जगाद, अहं जन्मनैव तं लब्धवान्। ततस्तं

परीक्षितुमुद्यता नरास्तत्क्षणं तस्मादपचक्रमुः। स च रोमीय
इत्यवगत्य सहस्रपति र्यत् तं बद्धवांस्तत्कारणादभैषीत्।

अपरेद्यु र्यिहूदिभिस्तस्य किमभियुज्यते यथातथ्यं तज्ज्ञा- ३०
तुमिच्छन् सहस्रपतिस्तस्य बन्धनानि मोचयामास, मुख्ययाजकानां
कृत्स्नायाः सभायाश्चागमनमादिदेश च। अनन्तरं पौलं नीत्वा तेषां
समक्षं स्थापयामास।

---

२३ त्रयोविंशोऽध्यायः।

१ पौलस्य विचारितत्वं तं चपेटानाहन्तुं महायाजकस्याज्ञापनम् अपवाद-
कानां भेदः १२ तं हन्तुं चत्वारिंशज्जनानां प्रतिज्ञानं १६ तस्य भागिनेयेन
तत्कथायाः सहस्रपतेः समीपे प्रकाशितत्वं तेन पौलस्य मुक्तिः २१ फीलिक्षं
प्रति पौलस्य प्रेषणञ्च।

तदा पौलः स्थिरदृष्ट्या महासभामालोक्य जगाद, भो भ्रातरः, १
सर्व्वथोत्तमेन संवेदेनाहमद्य यावद् ईश्वरभक्तिमाचरितवान्।
अत्र महायाजकोऽननियस्तत्सन्निधौ तिष्ठतो जनांस्तदीयमुखस्य २
ताडनमाज्ञापयामास। तदा पौलस्तमाह, भो सुधाधवलित कुड्य, ३
ईश्वरस्त्वां ताडयिष्यति, व्यवस्थानुसारेण मम विचारं कर्त्तुमुपविष्टो
यस्त्वं स त्वं व्यवस्थां लङ्घयन् मम ताडनमाज्ञापयसि। पार्श्वे तिष्ठन्तो ४
नरा अवदन्, त्वं किमीश्वरस्य महायाजकं धिक्करोषि? पौलोऽवा- ५
दीत्, भ्रातरः स महायाजक इति नाजानं। लिखितं ह्यस्ति,
स्वीयजाते र्मुख्यं मा शपस्वेति। सभास्थानामेकतरांशः सदूकिनाम् ६
अन्यतरश्च फरीशिनामिति ज्ञात्वा पौलः सभायामुच्चैःस्वरेण व्याज-
हार, भ्रातरः, फरीश्यहं फरीशिसुतश्च, मृतानां प्रत्याशां पुनरुत्या-
नञ्चाधि मम विचारो भवतीति। तेनैवं कथिते फरीशिनां सदू- ७

८ किनाञ्च विसंवादः सभाया भेदश्च सञ्जातौ । सदूकिनो हि वदन्ति
पुनरुत्थानं नास्ति स्वर्गीयदूत आत्मापि वा नास्ति । फरीशिन-
९ स्तूभयं स्वीकुर्व्वन्ति । इत्थं महति कोलाहले जाते फरीशिनां
स्वपक्षाः शास्त्राध्यापका उत्थाय वाग्युद्धं कुर्व्वन्तोऽवदन्, अस्य
नरस्य कोऽपि दोषोऽस्माभि र्न दृश्यते, किंश्चित् कोऽप्यात्मा स्वर्गी-
यदूतोऽनेन सम्भाषितवान्, ईश्वरेण सहास्माभिः किं योद्धव्यमिति ।
१० अनन्तरं घोरे विसंवाद उत्पन्ने पौलस्तैः परिकर्षद्भिर्द्विधा कारि-
ष्यत इति शङ्कित्वा सहस्रपतिः सैन्यं तत्र गमनं तेषां मध्यात्
११ तस्य सङ्गृहणं सन्निवेशाभ्यन्तरमपनयञ्चाज्ञापयामास । परनिशायां
प्रभुस्तमुपस्थाय जगाद, आश्वसिहि, पौल, यतो मत्पक्षे त्वया यथा
यिरूशालेमे साक्ष्यमदायि तथा रोमायामपि दातव्यम् ।
१२ पुन र्दिवसे जाते यिहूदिनां केचिदेकमन्त्रणा भूत्वा शपथेनेदं
प्रत्यश्रौषुः, पौलं न हत्वास्माभिः खाद्यं पेयं वा किमपि न
१३ भोक्ष्यते । चत्वारिंशतोऽधिका नराः पणमिमं कृतवन्तः । ते च
१४ मुख्ययाजकानां प्राचीनानाञ्च समीपं गत्वा तानवदन्, घोरशपथेन
स्वान् बद्धास्माभिरिदं प्रत्यश्रावि, यत् पौलं न हत्वास्माभिः कि-
१५ मपि नास्वादिष्यते । अत इदानीं महासभायाः सहिता यूयं
सहस्रपतिमिदं याचध्वं, यत् पौलस्य कथां सूक्ष्मतरमनुसन्धातु-
मिच्छूनां युष्माकं समीपं श्वस्तमुपस्थापयितुं सोऽर्हति, वयञ्च
तस्योपस्थितेः प्राक् तं हन्तुमुद्यताः ।
१६ तस्य कुसङ्कल्पस्य कथा तु पौलस्य भगिनीसुतेनाश्रावि, स
१७ च गत्वा सन्निवेशं प्रविश्य पौलं तां ज्ञापयामास । पौलस्तदा
शतपतीनामेकमाहूय जगाद, भवान् युवानमिमं सहस्रपतेः समीपं
१८ नेतुमर्हति, यतोऽनेन तस्मै किञ्चित् कथयितव्यं । अतः स

तमादाय सहस्रपतेः समीपं नीत्वाब्रवीत्, वन्दिः पौलो माम्
आहूय प्रार्थयत, यद् भवतः समीपं युवानमिममानयामि, यतो
भवतोऽस्य किञ्चित् कथयितव्यं। तदा सहस्रपतिस्तस्य हस्तं धृत्वा १९
निभृतं स्थानं गत्वा तं पप्रच्छ, मह्यं किं कथयितव्यं त्वया ? सोऽ- २०
ब्रवीत्, पौलमधि सूक्ष्मतरमनुसन्धानं कर्त्तव्यमिति छलमास्थाय
यिहूदिभिरिदं निरचायि, यत् श्वस्तेषां सभां पौलस्यानयनं ते
भवन्तं प्रार्थयिष्यन्ते। नार्हति तु भवांस्तेषां याच्ञां ग्रहीतुं। यत- २१
स्तेषां चत्वारिंशतोऽधिका नराः कुसङ्कल्पं साधयितुं यतन्ते, तं न
हत्वा ते खाद्यं पेयं वा किमपि न भोक्ष्यन्त इति प्रतिश्रुत्य शपथं
कृतवन्तश्च, इदानीमेव सज्जिताः सन्तो भवतस्तमङ्गीकारं प्रतीक्षन्ते
च। तदा सहस्रपतिस्तं युवानं विसृजन् आदिदेश, त्वं मामिदं २२
ज्ञापितवांस्तत् कमपि मा वद। अनन्तरं स शतपतीनां द्वौ नरा- २३
वाहूय, युवां कैसरियां यावद् गमनार्थं द्वे शते योद्धॄन् सप्तत्यश्वा-
रोहिणश्च द्वे शतेऽनुचरांश्च यामिन्याः प्रथमयामस्य शेषे सज्जयतं,
तैश्च वाहनान्यप्युपस्थापयितव्यानि, तदारोहितः पौलश्च निर्विघ्नं २४
देशाध्यक्षस्य फीलिक्षस्य समीपं नेतव्य इति। स एतत्कथासम्बलितां २५
पत्रिकामपि लिलेख, महामहिमश्रीयुक्ताय देशाध्यक्षाय फीलिक्षाय २६
क्लौदियलुषियस्य नमस्कारः। यिहूदिभिः सङ्गृहीतं तूर्णं घानिष्य- २७
माणञ्चेमं नरमहं ससैन्य उपस्थाय रोमीयोऽयमित्यवगत्योद्धृतवान्।
तैस्तस्य विरुद्धोऽभियोगो यत् क्रियते तस्य कारणं जिज्ञासुस्साहं २८
तेषां सभां तं नीतवान्। तदा मयाज्ञायि यत् तेषां व्यवस्थायाः २९
कांश्चन प्रश्नानधि तस्य विरुद्धोऽभियोगः क्रियते, मरणार्हः शृङ्ख-
लार्हो वा दोषस्तु तस्मिन्नारोप्यते। अनन्तरं तस्य विरुद्धं यिहू- ३०
दिभिः कुमन्त्रणा कारिष्यत इति संवादं प्राप्याहं तत्क्षणं भवतः

समीपं तं प्राहिणवं तदभियोगिनश्चादिशं यद् भवतः सम्मुखं
तद्विरुद्धं ते कथयितव्यं। भवतः कुशलं भूयात्।

३१ अनन्तरं सैनिकनरा यथादिष्टास्तथा पौलमादाय तस्यां रजन्याम्
३२ आन्तिपात्रीं निन्युः। प्रातस्ते सन्निवेशं प्रत्यावर्त्तमाना हयारूढां-
३३ स्तेन सार्द्धं गमनमनुजज्ञिरे। ते च कैसरियां गत्वा देशाध्यक्षाय
३४ पत्रिकां दत्त्वा पौलमपि तस्य समक्षमुपस्थापयामासुः। तां पठित्वा
देशाध्यक्षः पप्रच्छ, स कस्य प्रदेशस्य नरः। स यत् किलिकियायां
३५ जात इत्यवगत्य च स तमाह, त्वदभियोगिष्वागतेष्वहं तव कथां
सयत्नं श्रोष्यामि। इत्युक्त्वा स हेरोदस्य हर्म्म्ये तस्य रक्षणमा-
दिदेश।

---

२४ चतुर्विंशोऽध्यायः।

१ फीलिक्षस्य समक्षं पौलस्य विचारः, तस्यापवादकानां कथा १० पौलस्योत्तरं २२ तद्विचारस्य विलम्बनं २४ फीलिक्षेण तस्य भार्य्यया च पौलस्य कथोपकथनञ्च।

१ पञ्चदिनेभ्यः परं महायाजकोऽननियः प्राचीनवर्गं तर्त्तुल्लनामानं
कञ्चन वक्तारञ्च सङ्गिनः कृत्वा कैसरियां जगाम, ते च देशाध्य-
२ क्षस्य समीपं पौलस्य विरुद्धमभियोगमावेदयामासुः। तदा
तस्मिन्नाहूते तर्त्तुल्ल इत्यमभियोक्तुमारेभे, भो महामहिम फीलिक्ष,
भवतो यत्नेनास्माकं बहुकुशलं जातं, भवतः परिणामदर्शितया
३ सर्व्वथा सर्व्वत्र चास्या जातेरुन्नतिः साध्यते च, तद् वयं सम्पूर्ण-
४ कृतज्ञतया स्वीकुर्म्मः। कथाधिक्येन तु भवन्तं बाधितुमनिच्छुः
सन्नहं प्रार्थये, भवान् स्वीयक्षान्त्यास्माकं स्वल्पकथा आकर्णयतां।
५ फलतो नरोऽयं मारीस्वरूपो भूमण्डलस्थेषु सर्व्वयिहूदिषु विरोधो-
६ त्पादको नासरतीयस्य वैधर्म्यपक्षस्याग्रणी चेत्यस्माभिरनुभूतं, स

च धर्म्मधाम्नोऽप्यपवित्रीकर्त्तुमुपचक्रमे, ततो वयं तं सङ्गृह्यास्म-
दीयव्यवस्थानुसारेण तस्य विचारं कर्त्तुमुद्यता अभवाम, सहस्रपति ७
र्लुषियस्तूपस्थाय महाबलेनास्मत्करेभ्यस्तमपनीय तदभियोगिनो ८
भवतः समक्षमागमनमादिदेश। अस्माभिस्तस्य यदभियुज्यते, भवान्
परीक्षां कुर्व्वंस्तस्यैव प्रमाणात् तत् सर्व्वमवगन्तुं शक्ष्यतीति। यिहू- ९
दिनोऽपि स्वीकृत्यावदन्, प्रमाणमिदं यथार्थमिति।

अनन्तरं देशाध्यक्ष इङ्गितेन पौलाय कथनस्यानुमतिं दत्तवति १०
स प्रतिबभाषे, भवान् आबहुवत्सरेभ्योऽस्या जातेः शास्तास्तीति
विज्ञायाहं सुमनाः सन् मदर्थं प्रतिभाषे। केवलं द्वादशदिनेभ्यः ११
पूर्व्वमहं यिरूशालेम ईश्वरमुपासिष्यन् तत्र गतवानिदं भवतावगन्तुं
शक्यते। इमे च न धर्म्मधाम्नि न समाजगृहे न नगरे वा मां १२
केनचित् सम्भाषमाणं जनान् सङ्कुलीकुर्व्वन्तं वा दृष्टवन्त इदानीञ्च १३
मयि यान् दोषान् आरोपयन्ति तेषां प्रमाणं दातुं न शक्नुवन्ति।
भवतः समीपन्त्वहमिदं स्वीकरोमि यदिमे यं वैधर्म्यमार्गं वदन्ति १४
तं मार्गमवलम्ब्याहमित्थं पैतृकमीश्वरमाराधयामि, वस्तुतो व्यवस्थायां
भाववादिनां ग्रन्थे च यद्यल्लिखितमस्ति तस्मिन् सर्व्वस्मिन् विश्वसामि, १५
धार्म्मिकाणामधार्म्मिकाणाञ्च पुनरुत्थानं भविष्यतीति यां प्रत्या-
शामिमेऽपि प्रतीक्षन्तेऽहमपीश्वरमुद्दिश्य तां धारयामि च। अत्र १६
चाहमीश्वरं प्रति मनुष्यांश्च प्रति निरन्तरम् अबाधं संवेदं रक्षितुं
यते। बहुवर्षान्ते स्वजातये दानानि नैवेद्यानि च चिकीर्षुरहम् १७
उपातिष्ठं। अत्रावसरेऽहं धर्म्मधाम्नि पावितो न तु जननिवहेन १८
कोलाहलेन वा सहितो दृष्टः, नैवैतैरपि लाशियाप्रदेशीयैः कैश्चिद्
यिहूदिभिः। भवतः समक्षं तैरेवोपस्थायाभियोक्तव्यमासीत्, यदि १९
मया तेषां किमप्यपराद्धं। नोचेदिम एव वदन्तु, महासभायाः २०

समक्षं यदाहमतिष्ठं तदा मम किमपि दुष्कृतं निरणायि न
२१ वेति। मन्ये केवलमिदमेकं वचो यत् तेषां मध्ये तिष्ठता मयो-
दीरितं, यथा, मृतानां पुनरुत्थानमध्यद्य युष्माभि र्मम विचारो
क्रियत इति।

२२ फीलिक्स्तं धर्म्ममार्गमधि सूक्ष्मतरमभिज्ञ आसीत्, अतस्त-
च्छ्रुत्वा स तान् विलम्बमवलम्बयन्नवादीत्, सहस्रपति र्लुषियो
२३ यदायास्यति, तदाहं युष्मत्कथां सम्यगवगमिष्यामीति। शतपतिञ्च
स पौलस्य रक्षणमादिश्याब्रवीत्, स क्लेशरहितस्तिष्ठतु, आत्मीयानां
केनापि तस्य परिचर्य्या तत्समीपं गमनं वा त्वं मानिवारयेरिति।

२४ कतिपयदिनेभ्यः परं फीलिक्षः स्वभार्य्यया यिहूदिन्या द्रुषि-
ल्लया सहित उपस्थाय पौलमाहूय तस्य मुखात् ख्रीष्टे विश्वसनस्य
२५ कथामश्रौषीत्। तदा न्यायपरतायाः परिमितभोगस्य भावि-
विचारस्य च कथायां पौलेन कथ्यमानायां फीलिक्षो भयग्रस्तः
सन् प्रतिबभाषे, इदानीं याहि, उपयुक्तं समयं लब्ध्वाहं त्वामा-
२६ ह्वास्यामि। एतदतिरिक्तं तस्येयमाशापि समजायत, यन्मुक्तिं लिप्सुना
पौलेन तस्मै मुद्रा दायिष्यन्ते। ततो हेतोस्स पुनः पुनस्तमा-
२७ हूय तेन समभाषत। अतिवाहिते तु वर्षद्वये पर्किय: फीष्टः
फीलिक्षस्योत्तराधिकारित्वे नियुयुजे। तदा फीलिक्षो यिहूदिनः
प्रसादयितुमिच्छुः पौलं बद्धं विहाय प्रतस्थे।

---

२५ पञ्चविंशोऽध्यायः।

१ फीलिक्षस्य विनिमयेन फीष्टेऽधिपतौ सति पौलस्य पुनर्विचारः १३ आग्रिपा-
राजस्य सन्निधौ फीष्टद्वारा पौलस्य कथायाः प्रकाशः २३ आग्रिपाफीष्टाभ्यां
पौलस्य पुनर्विचारस्तस्मिन् फीष्टस्य कथा च।

१ अनन्तरं फीष्टः शासनीयप्रदेशमागत्य दिनत्रयात् परं कैस-

रियातो यिरूशालेमं जगाम। तदा महायाजको यिहूदिनां २
मुख्यनराश्च तस्य समीपं पौलस्य विरुद्धमावेदनमकार्षुस्तस्य विपक्षं
वरं प्रार्थयमानाश्चेदं ययाचिरे यत् स तं यिरूशालेममानाययेत्। ३
अनेन ते पथिमध्ये तस्य हत्यार्थं तद्विरुद्धां कुमन्त्रणामचिकिर्षन्।
फीष्टस्तु प्रतिबभाषे, पौलः कैसरियायां बद्धो रक्ष्यते, अहमपि ४
सत्वरं प्रस्थातुमिच्छामि, अतो युष्माकं मध्ये ये शक्तिमन्तस्ते मया ५
सार्द्धं तत्र गच्छन्तु, यदि च तस्य नरस्य कोऽपि दोषो विद्यते, तर्हि
तस्याभियोगं कुर्व्वन्तु। ततः परं स तेषां समीपमष्टाभ्यो दशभ्यो ६
वा दिनेभ्योऽनधिकं कालं यापयित्वा कैसरियां जगाम, परदिने च
विचारासन उपविश्य पौलस्यानयनमादिदेश। तस्मिन्नुपस्थिते ७
यिरूशालेमत आगता यिहूदिनः परितस्तिष्ठन्तः पौले बहून् गुरु-
तरांश्च दोषानारोपयामासुः सप्रमाणी कर्त्तुन्तु न शेकुः। स ८
चात्मपक्षे प्रतिजगाद, न यिहूदिनां व्यवस्थाया विरुद्धं न धर्म्म-
धाम्नो वा विरुद्धं न कैसरस्य वा किमप्यपराद्धं मया। फीष्टस्तु ९
यिहूदिनः प्रसन्नीकर्त्तुमिच्छुः प्रतिभाषमाणः पौलं पप्रच्छ, यिरू-
शालेमे मम समक्षं कथास्वेतासु तव विचारो यद् भवेत् तदर्थं त्वं
किं तत् स्थानं गन्तुमिच्छसि। तदा पौलो जगाद, कैसरस्यैव १०
विचारासनस्य सम्मुखेऽहं तिष्ठामि, अत्र मम विचारेण भवितव्यं।
यिहूदिनां मया किमपि नापराद्धं, तद् भवतापि सम्यग् बुध्यते।
यद्यहमपराधी, यदि वधार्हं किमपि कृतवानस्मि तर्हि मर्त्तुं ११
नानङ्गीकरोमि, एतैस्तु मम यदभियुज्यते तत् सर्व्वं यद्यतथ्यं तर्हि
कोऽप्येतेभ्य उपहारमिव मां प्रदातुं न शक्नोति। कैसरमहं पुन
र्विचारं प्रार्थये। तदा फीष्टो मन्त्रिभिः सार्द्धं सम्मन्त्र्य प्रतिजगाद, १२
कैसरस्त्वया विचारं याचितः, कैसरस्य समीपं त्वं गमिष्यसि।

१३ अनन्तरमतीतेषु कतिपयदिनेष्वाग्रिपा राजा वर्णीकी च
१४ फीष्टमभिवादितुं कैसरियामाजग्मतुः । तयोश्च दीर्घतरं कालं
विलम्बमानयोः फीष्टो राजानं पौलस्य कथां ज्ञापयन्नब्रवीत्,
१५ फीलिक्षेण कारायां परित्यक्तो नर एको विद्यते, मयि च यिरू-
शालेम उपस्थिते यिहूदिनां मुख्ययाजकाः प्राचीनाश्च तमधि
मत्समीपमावेदनं कृत्वा तस्य विरुद्धां दण्डाज्ञां याचितवन्तः ।
१६ अहन्तु तान् प्रत्युक्तवान्, कस्मिंश्चिन्मनुष्ये यदि दोष आरोप्यते,
तर्हि स यावद् दोषवक्तॄन् साक्षात् दृष्ट्वाभियोगस्य खण्डनार्थं
सुयोगं न प्राप्नोति, तावद् विनाशार्थमुपहारस्येव तस्य समर्पणं
१७ रोमीयाणामनुचितमिति । ततः परं तेषु मया सार्द्धमेतत्
स्थानमागतेष्वहं कञ्चन विलम्बं न कृत्वा तत्परदिवसे विचारासन
१८ उपविश्य तस्य नरस्यानयनमादिशं । तं परितिष्ठन्तस्तस्य दोष-
१९ वक्तारस्तदा मदनुमितं कमपिदोषमनारोप्य तस्य विरुद्धं स्वीय-
धर्म्मसम्बन्धीयेषु केषुचिद् विवादेषु प्रवृत्तिरे, विशेषतो यीशुना-
मानमेकं मृतं नरमधि, यस्य विषये पौलोऽवदत् स जीवतीति ।
२० एतेषां विचारे सन्दिग्धः सन्नहं तमप्राक्षं, कथास्वेतासु तव
विचारो यिरूशालेमे यद् भवेत् तदर्थं त्वं किं तत् स्थानं
२१ गन्तुमिच्छसीति । पौलस्तु पुनर्विचारं याचित्वा राजाधिराजेन
मीमांसार्थं कारायां रक्षितो भवितुं प्रार्थयाञ्चक्रे, अतः कैसरस्य
समीपं स यावन्न प्रहायिष्यते तावदहं तस्य रक्षणमादिशं ।
२२ तदाग्रिपाः फीष्टमवादीत्, तस्य नरस्य मुखात् कथां श्रोतुं
ममापि मनीषा सञ्जाता । स प्रत्यवादीत्, श्वस्तस्य कथा भवता
श्रविष्यत ।
२३ अतस्तत्परदिन आग्रिपा वर्णीकी च महासमारोहेण सहोप-

स्थाय सहस्रपतिभि र्नगरस्थ श्रेष्ठनरैश्च मिलित्वा सभामण्डपं
प्रविविशतुः। तदा फीष्टस्यादेशात् पौले समानीते फीष्टो जगाद, २४
भो राजन्नाग्रिपा, भो अस्माभिः सार्द्धमत्रोपस्थिता महेच्छाः,भवन्तो
मनुष्यमिमं निरीक्षितुमर्हन्ति, यमधि यिरूशालेमे ऽत्र च यिहूदिनां
सर्व्वे जना मत्समीपमावेदयित्वा प्रोच्चैः कथितवान्, इतः परमनेन
न जीवितव्यमिति। तेन तु वधार्हं किमपि कर्म नाकारीति मया २५
बुद्धं, तेनाप्यधीश्वरो विचारं याचितस्तस्मादहं तं प्रेषयितुं मतिम-
कार्षं। पत्रेण तु प्रभुं तमधि यज्ज्ञापयिष्यामि तादृशं निश्चितं २६
किमपि मम नास्ति, ततो हेतो र्भवतां समक्षं, विशेषतो भो राज-
न्नाग्रिपा, भवतः समक्षं स मयानीतः, मन्ये विचारे कृते लिखितव्यं
किञ्चिन्मया लप्स्यते। यतः शृङ्खलबद्धस्य मनुष्यस्य प्रेषणकाले २७
तस्मिन्नारोपितानां दोषाणां सूचनान्निवृत्ति र्मम युक्तिविरुद्धा
प्रतिभाति।

---

२६ षड्विंशोऽध्यायः।

१ आग्रिपां प्रति पौलस्योत्तरं २४ फीष्टेन तस्योन्मत्तत्ववदनं तं प्रति पौलस्योत्तरं
फीष्टेन तस्य निरपराधत्ववदनं राज्ञः कैसरस्य समीपं यातुं तस्याज्ञापनञ्च।

अनन्तरमाग्रिपाः पौलं जगाद, स्वपक्षं कथनस्यानुमतिस्तुभ्यं १
दीयते। तदा पौलो हस्तं प्रसार्य्याभियोगखण्डनार्थमकथयत्।
भो राजन्नाग्रिपा यिहूदिभि र्मम यद्यदभियुज्यते तत् सर्व्वमधि, २
भवतः समक्षमद्य मयात्मपक्षं कथयितव्यम्, अनेन स्वं धन्यं मन्ये,
विशेषतो भवान् यिहूदिनामुचितेष्वाचारेषु विवादेषु चाभिज्ञस्तस्मा- ३
नामि। अतः प्रार्थये, भवान् सहिष्णुभावेन मम कथां श्रोतुमर्हति।
आदौ स्वजाते र्मध्ये यिरूशालेमे मम बाल्यकालमारभ्य प्रदर्शित- ४

५ माचारव्यवहारं सर्व्वयिहूदिनो जानन्ति, प्रथमान्मम परिचय-
प्राप्तत्वाच्च यदीच्छन्ति तर्हीदं साक्ष्यं दातुं शक्नुवन्ति यदस्मदीय-
धर्म्ममतस्य सूक्ष्मतमं पक्षमवलम्ब्याहं फरीशी भूत्वा जीवनमयापयन्,
६ अस्मत्पूर्व्वपुरुषान् प्रतीश्वरेण कृतमङ्गीकारमधि चाद्य ममात्र तिष्ठतो
७ विचारः क्रियते। तस्यैवाङ्गीकारस्य फलं प्राप्स्याम इत्याशयास्मदीय-
द्वादशवंशानां साकल्यं दिवानिशमेकाग्रामाराधनां करोति। भो
राजन्नाग्रिपा, तस्या एवाशायाः कारणाद् यिहूदिभि र्ममाभियोगः
८ क्रियते। ईश्वरेण मृतानामुत्थापनं भवत्सु किं विश्वासस्यायोग्यं
९ मन्यते? भवतु, मया हि नासरतीययीशोर्नाम्नो विरुद्धं बहुविधं
१० प्रतिकूलाचरणं कर्त्तव्यमिति निरचायि। अहञ्च यिरूशालेमे तदेव
कृतवान्, मुख्ययाजकेभ्यस्याधिकारं लब्ध्वा पवित्राणां बहून् कारा-
११ गृहेषु बद्धवांस्तेषां हत्याकाले स्वसम्मतिं ज्ञापितवांश्च। सर्व्वेषु
समाजगृहेष्वहं भूयो भूयस्तेषां शासनं कुर्व्वंस्तान् धर्म्मनिन्दाम-
कारयं। तेषु सातिशयमुन्मत्तो भूत्वा च विदेशीयनगराणि यावत्
१२ तानपीड़यम्। इत्थमेकदा मुख्ययाजकेभ्योऽधिकारं प्रतिभूत्वञ्च
१३ लब्ध्वाहं यदा दम्मेशकमगच्छं तदा, भो राजन्, मार्गे मध्याह्न-
काले सूर्य्यस्य तेजसोऽपि प्रखरतरा दीप्तिः स्वर्गादवरुह्य मम
१४ मदीयसहपथिकानाञ्च परितो विराजतीति मयादर्शि, सर्व्वेष्वस्मासु
भूमौ पतितेषु च मामालपन्त्येका वाणी मयाश्रावि, सा वाणी-
ब्रीयभाषया मां सम्बोधयन्त्यब्रवीत्, शौल शौल किमर्थं मां
१५ पीडयसि? कण्टकेषु पादाहननं तव दुःसाध्यमिति, तदाहम-
वादिषं, को भवान्? प्रभो। स व्याजहार, अहं स यीशु
१६ र्यस्त्वया पीड्यते। त्वमुत्तिष्ठ स्वचरणयोरेव तिष्ठ च, यतस्तुभ्य-
मेतदर्थं दर्शनं दत्तवानस्मि, त्वं यद्यद् दृष्टवान् येषु विषयेष्वहं

तुभ्यं दर्शनं दास्यामि च, तत्र त्वां भृत्यं साक्षिणञ्च कृत्वाधिकरि-
ष्यामि। स्वजातीयेभ्यः परजातीयेभ्यश्च मनुष्येभ्यस्त्वेवोद्धर्त्ता सन्नह- १७
मिदानीमेतदर्थं तेषां समीपं त्वां प्रहिणोमि च, यत् त्वयो- १८
द्घाटितेषु तेषां नेत्रेषु ते तिमिराद् दीप्तिं प्रति शैतानस्य कर्तृ-
त्वाच्चेश्वरं प्रति परावृत्य मयि विश्वसनेन पापक्षमां पवित्रीकृतानां
मध्येऽधिकारस्यांशञ्च लप्स्यन्त इति। अतो भो राजन्नाग्रिपा, १९
अहं तस्य स्वर्गीयदर्शनस्याज्ञालङ्घी नाभवम् अपि तु प्रथमं दम्मेशक- २०
निवासिषु ततः परं यिरूशालेमनिवासिषु यिहूदियायाः कृत्स्ने
जनपदे च यावत् परजातीनां मध्ये च मनुष्यानिदमज्ञापयं यत्
तैरनुतापः कर्त्तव्य ईश्वरं प्रति मनांसि परावर्त्तयितव्यान्यनुतापो-
पयुक्तानि कर्म्माणि च कर्त्तव्यानीति। एतत्कारणाद् यिहूदिनो २१
धर्म्मधाम्नि मां सङ्गृह्य व्यापादयितुम् उपचक्रमिरे। ईश्वरात्तु २२
साहाय्यं प्राप्याहमद्य यावत् स्थिरः सन् क्षुद्रेभ्यो महद्भ्यश्च साक्ष्यं
ददामि, नान्यत् किमपि तु व्याहरन् केवलं भाववादिभि र्मोशिना
चोक्ता भाविकथा इमा वदामि, यत् ख्रीष्टः दुःखभोगस्य भाजनं, २३
यत् प्रथमः स ईश्वरस्य प्रजायै परजातिभ्यश्च मृतानां पुनरुत्थानेन
दीप्तेः संवादं दातुं नियुक्त इति।

पौलस्येमं प्रतिवादं श्रुत्वा फीष्टः, प्रोच्चैरवादीत्, उन्मत्तोऽसि २४
पौल, बहुविद्याभ्यासस्त्वाम् उन्मादं नयतीति। स त्वाह, भो महा- २५
महिम फीष्ट, नाहमुन्मत्तोऽपि तु सत्यस्य सुबोधस्य च कथा
व्याहरामि। राजा हि सर्व्वमेतदभिजानाति तमेवोद्दिश्य चाहं २६
निर्भयतरं भाषे। यतो मन्ये, कथानामेतासां मध्ये तस्याविदिता
कापि नास्ति, यतो नैव कोणे वृत्तमेतत्। भो राजन्नाग्रिपा २७
भवान् किं भाववादिषु विश्वसिति? जानेऽहं यद् भवान् विश्वसि-

२८ ति । अनेनाग्रिपाः पौलमाह, स्वल्पायासेन मां ख्रीष्टीयानं भवितुं
२९ प्रवर्त्तयसि । पौलस्तु व्याजहार, ईश्वरमिदं प्रार्थये यत् स्वल्पेन वा
महता वायासेन न केवलो भवान् अपि तु यावन्तोऽद्य मम कथां
शृण्वन्ति ते सर्व्वे भवन्तोऽपि मत्तुल्या भवन्तु शृङ्खलानीमान्य-
पहायेति ।
३० समाप्तायां तस्य कथायां देशाध्यक्षो राजा वर्णीकी च तैः
३१ सार्द्धमासीना नराश्च उत्तस्थुः स्थानान्तरं गत्वा च मिथः सम्भाष-
माणा अवदन् । नरोऽयं वधार्हं बन्धनार्हं वा किमपि न करोति
३२ स्म । आग्रिपाश्च फीष्टमाह, नरोऽयं चेत् कैसरं विचारं न प्रार्थ-
यिष्यत तर्हीतः पूर्व्वमपि मोचनं प्राप्तुमशक्ष्यत् ।

---

२७ सप्तविंशोऽध्यायः ।

१ पौलस्य रोमानगरगमनं ७ समुद्रमार्गे प्रचण्डपवनः २१ पौलस्योपदेशकथा पोतीयलोकानां कर्म्म च २९ पोतभञ्जनम् उपद्वीपतीरे लोकानामुत्तरणञ्च ।

१ यदा तु समुद्रमार्गेणास्माकमितालियादेशमुद्दिश्य यात्रा कर्त्तव्या
प्रत्यभात् तदा पौलोऽन्ये केचिच्छृङ्खलबद्धा मनुष्याश्च राजाधि-
राजीयस्य सैन्यदलस्य यूलियनाम्नि शतपतौ समर्पयाञ्चक्रिरे,
२ वयञ्चाशियादेशस्योपकूलस्य स्थानानि गमिष्यन्तमाद्रामुत्तीयं
पोतमेकमारुह्य प्रतस्थिमहे । माकिदनियास्थथिषलनीकीनिवास्या-
३ रिष्टार्खोऽप्यस्माभिः सार्द्धमासीत् । परदिने सीदोन्युपस्थायास्मासु
विलम्बमानेषु यूलियः पौलं प्रति सौजन्यं प्रदर्शयन् बन्धूनां समीपं
४ तस्य गमनं शुश्रूषासेवनञ्चानुयज्ञे । पुनस्ततः प्रस्थाय वयं वायूनां
५ प्रातिकूल्यात कुप्रद्वीपस्य नैकट्येनागच्छाम । ततः परं किलि-

क्रियापाम्फुलियादेशयोः समीपस्थं समुद्रं तरित्वा लुकियादेशस्थां
मुरामागमाम। तत्र शतपतिरितालियां गन्तुमुद्यतं सिकन्दरिया- ६
नगरीयमेकं पोतमासाद्यास्मांस्तमेवारोहयामास।

अनन्तरं बहुदिवसान् शनैः शनै र्गच्छन्तो महायासेन क्नीदस्य ७
सम्मुखमुपातिष्ठामहि, तत् स्थानं गमनात्तु वायुना निवारिताः सन्तः
साल्मोनीनिकटस्थे क्रीतीद्वीपस्योपकूल उपातिष्ठामहि। अनन्तरं ८
महायासेन तस्याः साल्मोन्याः समीपेनाग्रसरं भूत्वा सुन्दरपोता-
श्रयनामकमेकं स्थानं प्राप्नुम। लासेयापुरी तस्य निकटस्था। इत्थं ९
महाविलम्बे जाते तदा चाश्विनमासीयोपवासकालस्यातीतत्वात्
समुद्रयात्रायां सशङ्कीभूतायां पौलस्तान् प्रवर्त्तयन्नवादीत्, महेच्छाः १०
पश्यामि यत् समुद्रयात्रायां विपत्ति र्महाक्षतिश्च सम्भविष्यति,
न केवलं भारस्य पोतस्य च किन्त्वस्मत्प्राणानामपीति। शतपतिस्तु ११
पौलस्य कथाभ्यः कर्णधारस्य पोतस्वामिनश्च कथास्वधिकं व्यश्वसत्
अपि च स पोताश्रयः शीतकालयापनेऽनुपयोग्यासीत्, ततो हेतोर- १२
धिका नराः तस्मात् स्थानादपि प्रस्थातुं यदि शक्यं भवेत् तर्हि फैनिकं
गत्वा तत्र शीतकालं यापयितुं मतिमकार्षुः, तत् फैनिकं क्रीत्याः
पोताश्रयः, मुखात् तस्य तोयं दक्षिणपश्चिमदिशमुत्तरपश्चिमदिशञ्च
प्रति विस्तीर्णं दृश्यते। अनन्तरं दक्षिणसमीरणे वहमाने ते स्वान् १३
कृतार्थान् मत्वा पोतं मोचयित्वा क्रीत्याः समीपेनागच्छन्। अनधि- १४
ककालात्तु परं तस्यास्तटेनावरोहमाणोरक्लुदोननाम्नी वात्योत्पेदे।
तयाक्रान्तः पोतो वायोरभिमुखः स्थातुं न शशाक, वयञ्च न प्रति- १५
रुध्यावहामहे। ततः परं क्लौदानाम्नः क्षुद्रस्य द्वीपस्य निकटं गत्वा १६
महतायासेन पोतस्य क्षुद्रां नौकां ग्रहीतुमशक्नुम। तान्तु पोत- १७
स्योपरि गृहीत्वा नाविका रज्ज्वादिभिरुपायैः पोतस्याधोभागं

दृढीकर्त्तुमयतन्त। अनन्तरं सूर्त्तिनाम्नि सैकते बाधा सम्भविष्यतीति
१८ भयात् ते पोतस्य कूपकमवरोह्यावहन्त। अनन्तरं वात्ययास्मा-
स्वात्यन्तिकं क्लिश्यमानेषु ते परस्मिन् दिने कतिपयद्रव्याणि समुद्रे
१९ चिक्षिपुस्तृतीये दिने च स्वहस्तैः पोतस्य सज्जां निक्षिक्षिपुः। ततः परं
२० कियन्ति दिनानि यावत् न सूर्य्यस्य नक्षत्राणां वा प्रकाशे जाते
महावात्यायाश्च प्रबलीभूतायां ततः प्रभृत्यस्माकं रक्षायाः समस्ता-
शापहारि।

२१ तदा गुरुतरेऽनाहारत्वे जाते पौलो जनानां मध्ये तिष्ठन्
व्याजहार, महेच्छाः, भवन्तो मम मन्त्रणां गृहीत्वा चेत् क्रीतीतो
न प्रस्थाय विपत्तिक्षतीमे न प्राप्स्यंस्तर्हि तद् युक्तमभविष्यत्।
२२ इदानीन्तु भवन्त आश्वसितुमर्हथ, यतो भवतां कस्यापि प्राणानां
२३ हानि र्न भविष्यति, केवलं पोतस्य। यतोऽहं यस्यास्मि यस्य सेवां
करोमि च, तस्येश्वरस्यैको दूतो गतनिशायां मामुपस्थाय गदित-
२४ वान्, मा भैषीः, पौल, यतः कैसरस्य समक्षं त्वयोपस्थातव्यं। पश्य
२५ च, पोतस्थास्तव सर्व्वे सङ्गिन ईश्वरेण तुभ्यं दत्ताः। अतो महेच्छा
आश्वसन्तु, यतोऽहमीश्वरे विश्वसिमि, यदहं यदुक्तस्तदेव सम्भविष्यति।
२६ अपि त्वस्माभिः कस्मिंश्चिद् द्वीपे पतितव्यमिति।

२७ आद्रियाख्ये समुद्र इतस्ततो वहमानानामस्माकं चतुर्द्दशायां
निशायामुपस्थितायां मध्यरात्रे पोतवाहकैरनुमीयत, यत् किमपि
२८ स्थलं तेषां समीपवर्त्ति भवति। अतस्तोयं परिमाय विंशति व्यामास्तै
र्निर्णीताः। किञ्चिद्दूरं गत्वा च पुनः परिमाय पञ्चदश व्यामा
२९ निर्णीताः। अतः पाषाणमयेषु स्थानेषु पतनभयात् ते पोतस्य
३० पश्चाद्भागाच्चतुरः पोतभुजानवरोह्य दिवसारम्भं प्रार्थयन्त। तदा
पोतवाहेषु पोतात् पलायितुमिच्छातो मङ्गात् पोतभुजप्रसारणं

छलं छला क्षुद्रां नौकां समुद्रेऽवरोहितवत्सु पौलः शतपतिं ३१
योद्धृंश्चावादीत्, इमे चेत् पोते नावतिष्ठन्ते तर्हि यूयं रक्षां प्राप्तुं
न शक्नुथ। योद्धारस्तदा नौकाया रज्जूश्छित्त्वा तस्या निपतनमनु- ३२
जज्ञिरे। दिनारम्भस्य प्रतीक्षाकाले च पौलः सविनयं सर्व्वान् ३३
खाद्यानि भोक्तुमादिशन्नवादीत्, चतुर्द्दशदिनानि प्रतीक्ष्य यूय-
मनाहारं कालं यापयन्तः किमपि न भुक्तवन्तः। अतोऽहं सविनयं ३४
ब्रवीमि, यूयं भक्ष्यं गृह्णीतुमर्हथ, तद्धि युष्माकं रक्षार्थमुपकारि।
यतो युष्माकं कस्यापि शिरसः केशो न पतिष्यति। इदमुक्त्वा स ३५
पूपमादाय सर्व्वेषां समक्षमीश्वरं धन्यं जगाद भङ्क्त्वा च भोक्तुमारेभे। ३६
तदा सर्व्वेषामाश्वासे जाते तेऽपि भक्ष्यमगृह्णीषुः। तस्मिन् पोते ३७
वयं साकल्येन षट्सप्तत्यधिकशतद्वयं प्राणिन आस्म। भक्ष्येण तृप्तिं ३८
प्राप्य ते गोधूमान् समुद्रे निक्षिपन्तः पोतं लघुतरमकार्षुः।

अनन्तरं दिने जाते ते तत् स्थलं नाभ्यजानन् वङ्कन्त्वेकन्तु ३९
समानतटविशिष्टमलक्षयन्। यदि शक्नुमस्तर्हि पोतं प्रेरयन्तस्तं
तटमारोहयाम इति मन्त्रणामकुर्व्वंश्च। अतएव ते पोतभुजां- ४०
श्छित्त्वा समुद्रे पतितुं ददुः, युगपच्च कर्णयो र्बन्धनानि मुक्त्वा
वायोः सम्मुखमग्रभागस्थं वातवसनं विस्तार्य्य तं समानं तटमुद्दिश्य
पोतमचालयन्। द्विसमुद्रं स्थानं तु प्राप्य पोतं सैकतोपर्य्यप्रेरयन्। ४१
मग्नस्तच्च निबद्धो निश्चलोऽतिष्ठत्, पश्चाद्भागस्तूर्म्मीणां प्रभावेण
व्यलीयत। तदा योद्धृणामियं मन्त्रणाजायत, यद् वन्दिनोऽस्माभि ४२
र्हन्तव्याः, नचेत् कोऽपि सन्तरणेन पलायिष्यत इति। शतपतिस्तु ४३
पौलं रक्षितुमिच्छन् तन्मन्त्रणासाधनात् तान् निवर्त्तयन्निदमा-
ज्ञापयामास, ये सन्तरणे सक्षमाः प्रथमं ते जले निपत्य स्थलं
गच्छन्तु, अपरे तु केऽपि काष्ठफलकानि केऽपि वा पोतात् ४४

पतितं किमपि वस्त्ववलम्ब्य यान्तु। इत्थमेव च सर्व्वे रक्षिताः
स्थलं प्रापुः।

---

२८ अष्टाविंशोऽध्यायः।

१ उपद्वीपीयासभ्यलोकेभ्यः पौलस्यानुग्रहप्राप्तिस्तस्य हस्ताद् दंशकसर्पस्य निक्षपणं
७ पौलेन पुब्लियनाम्नोऽधिपतेरन्येषाञ्च स्वास्थ्यं ११ पोतेन तस्य रोमानगर-
गमनं मार्गमध्ये भ्रातृगणस्य साक्षात् करणं १६ रोमानगर उपस्थिति र्यिहू-
दीयलोकेषु पौलस्य निवेदनं सुसंवादप्रचारणञ्च।

१ रक्षाप्राप्तेः परमस्माभिरज्ञायि यत् तस्य द्वीपस्य नाम मिलि-
२ तेति। तत्रत्या असभ्यजाते र्जनाश्चास्मान् प्रत्यसामान्यं सौजन्यं
प्रदर्शयामासुः। फलतो वर्त्तमानाया वृष्टेः शीतस्य च हेतोरिन्ध-
३ नराशिं प्रज्वाल्य सर्व्वानस्मान् अनुजगृहुः। तदा पौले बहून्
लताखण्डान् सङ्गृह्येन्धनराशौ निक्षिप्तवति विषधर एकस्तापान्नि-
४ र्गत्य तस्य हस्तं दष्ट्वावलम्बितोऽतिष्ठत्। ते ऽसभ्यजना यदा तं
जन्तुं तस्य हस्ते लम्बमानमपश्यंस्तदा मिथोऽब्रुवन् सर्व्वथा नर-
हन्तायं मनुष्यो यतः समुद्राद् रक्षितस्यापि तस्य जीवनं प्रतिफल-
५ दात्रा नानुज्ञायते। परन्तु स तं जन्तुमवधूय वह्नौ निक्षिप्य चानिष्टं
६ किमपि न बुभुजे। ते तु प्रतीक्षमाणा अमन्यत यत् स धक्ष्यते
सहसा गतायु र्निपतिष्यति वेति। इत्थं दीर्घकालं प्रतीक्ष्य यदा
तेऽपश्यन् यत् तस्य किमप्यशुभं न सम्भवति तदा मतान्तरं
कृत्वावदन् स देव इति।

७ तस्य स्थानस्य सन्निधौ द्वीपस्य प्रथमनरस्य भूम्यधिकारोऽवि-
द्यत। तस्य नाम पुब्लियः, सोऽस्माननुगृह्य दिनत्रयं यावत् प्रणये-
८ नास्माकमातिथ्यमकार्षीत्। तदा च पुब्लियस्य पिता ज्वरातिसारेण

पीडितः अभ्यागतश्चासीत्। ततः पौलस्तस्यान्तिकमभ्यन्तरं गत्वा
प्रार्थनां हस्तार्पणञ्च कृत्वा तं रोगमुक्तमकार्षीत्। तथा सति ९
तस्मिन् द्वीपेऽपरे ये मनुष्या व्याधिग्रस्ता आसंस्ते सर्व्वेऽप्यागत्या-
रोगीकृताः। ते हि बहुविधेन सम्मानेनास्मान् सम्मानयामासुः १०
प्रस्थानकाले च यद्यत् प्रयोज्यं तदस्मास्वर्पयामासुः।

तस्मिन् द्वीपे सिकन्दरीय एकः पोतः शीतकालमयापयत् तस्य ११
चिह्नमश्विनौ। मासत्रयेऽतीते वयं तमेव पोतमारुह्य प्रस्थिताः। १२
अनन्तरं सुराकूषीं प्राप्य दिनत्रयमवतस्थिमहे। ततश्च वक्रमार्गेण १३
वयं रीगियं प्राप्ताः। पुनरेकस्माद् दिवसात् परं दक्षिणवायौ
सञ्जाते वयं द्वितीये दिने पुतियल्यामुपतस्थिमहे। तत्र भ्रातृना- १४
साद्य वयं तेषां समीपं सप्तदिनान्यवस्थातुमाश्वासिताः। इत्थमेव
रोमायामुपतस्थिमहे। अस्माकं संवादं श्रुत्वा तु तत्रत्या भ्रातरो- १५
ऽस्मत्प्रत्युद्गमनार्थमाप्पियफरं त्रिष्टावर्णीञ्च यावद् आगतवन्तः।
तान् दृष्ट्वा पौल ईश्वरं धन्यं वदित्वाश्वासं लब्धवान्।

रोमायान्तूपस्थितेष्वस्मासु शतपति र्वन्दिजनान् स्कन्धावारा- १६
धिपतौ समर्पयामास। पौलस्तु स्वरक्षकेण पदातिना सार्द्धं स्वतन्त्रं
वस्तुमनुजज्ञे।

दिनत्रयात् परं पौलो यिहूदिनां मुख्यनरान् समाह्वायया- १७
मास। समागतेषु च तेषु तान् अवादीत्, भो भ्रातरः अस्मदीय-
जातेः पैतृकरीतीनां वा विरुद्धं मया किमपि नाकारि, तथाप्यहं
शृङ्खलबद्धो यिरूशालेमे रोमीयाणां हस्ते समर्पितः। ते च विचारं १८
कृत्वा मां विस्रष्टुमैच्छन्, यतः प्राणदण्डार्हः कोऽपि दोषो मयि
नाविद्यत। प्रतिवदमानेषु तु यिहूदिषु कैसरेण विचारस्य प्रार्थनं १९
ममावश्यकमभूत्, नास्ति तु स्वजाते र्विरुद्धं मया कर्त्तव्यः कोऽप्य-

२० भियोगः। अतस्तमेव विवादमधि युष्मान् द्रष्टुमालपितुञ्चेच्छन्नहं
युष्मान् आहूतवान्, यत इस्रायेलस्य प्रत्याशायाः कारणादहं शृङ्ख-
२१ लेनानेन वेष्टितः। तदा ते तमूचुः, त्वामधि यिहूदियादेशाद् वयं
पत्रिकां न लब्धवन्तः, न वा भ्रातॄणां कोऽप्यागत्य तव कस्यापि
२२ दोषस्य संवादमानीतवान् कथां वा कथितवान्। तव तु मतं
किं तत् तवैव मुखाच्छ्रोतुमस्माभ्यं युक्तं मन्यते, यतस्तं सम्प्रदाय-
२३ मधि जानीमो यत् सर्व्वत्र तत्प्रतिकूलं कथ्यते। अतस्तैस्तस्य कृते
दिवसे निश्चितेऽधिकतराः पान्थशालां तस्यान्तिकमाजग्मुः, स च
प्रातरारभ्य सन्ध्यां यावत् साक्ष्यं दत्त्वा तान् ईश्वरराज्यस्य
व्याख्यामबोधयत्, मोशे र्व्यवस्थातो भाववादिनां ग्रन्थेभ्यश्चोद्धृता
२४ यीशोः कथा ग्रहीतुं प्रावर्त्तयच्च। तदा केऽपि तस्य वाक्यानि
२५ जगृहुः केऽपि च तत्र न विश्वसुः। शेषे ते परस्परमनैक्य-
मत्यः व्यसृज्यन्त। पौलस्तु तानिमामेकां वाणीमुक्तवान्, पवित्र
आत्मा भाववादिना यिशायाहेन युष्माकं पूर्व्वपुरुषानधि सम्यगिदं
कथितवान्,

२६　जातेरस्याः समीपं त्वं गत्वा ब्रूहि कथामिमां।
श्रोष्यथ श्रवणैर्नव किन्तु नानुभविष्यथ।
तथा द्रक्ष्यथ दृष्ट्या हि नैव लालत्यिष्यथ॥
२७　स्थूलीभूतं मनुष्याणाम् एतेषां हृदयं यतः।
मन्दं शृण्वन्ति ते कर्णैः स्वनेत्रे मीलयन्ति च॥
न चेत् ते लोचनै र्दृष्ट्वा स्वकर्णै र्विनिशम्य च।
बोधं लब्ध्वा स्वचित्तैश्चावर्त्तयन्ति मनो यदि।
तर्हि तैर्मत्त आरोग्यं ग्रहीतव्यं भविष्यति॥

अतो युष्माभिरिदं ज्ञायतां यदीश्वरस्य परित्राणोपायः परजाती- २८
यानां समीपं प्रहितं ते च श्रोष्यन्तीति। तस्मिन्नेतत् कथितवति २९
यिहूदिनो मिथो भृशं विवदमानाः प्रतस्थिरे।

अनन्तरं पौलः सम्पूर्णं वर्षद्वयं भाटकीये गृहेऽवसत्, यावन्तश्च ३०
मनुष्यास्तत्र तमभ्यगच्छंस्तान् परिगृह्य बाधां विना सम्पूर्ण- ३१
साहसेनेश्वरस्य राज्यमघोषयत् प्रभौ यीशोः ख्रीष्टस्य कथाश्चा-
शिक्षयत्।

इति॥

रोमिणः प्रति प्रेरितस्य पौलस्य पत्रं।

१ प्रथमोऽध्यायः।

१ प्रेरितत्वपदे पौलस्य नियोगः ८ रोमानगरे सुसंवादं प्रचारयितुं तस्य गमनेच्छा १४ सुसंवादेन परित्राणलाभः २४ सुसंवादेऽज्ञाते सर्व्वपापोत्पत्तेः कथा च।

१ ईश्वरो निजपुत्रमधि यं सुसंवादं भाववादिभि र्धर्म्मग्रन्थे
प्रतिश्रुतवान् तं सुसंवादं प्रचारयितुं पृथक्कृत आहूतः प्रेरि-
२ तश्च प्रभो र्यीशुख्रीष्टस्य दासो यः पौलः स रोमानगरस्थान्
ईश्वरप्रियान् आहूतांश्च पवित्रलोकान् प्रति पत्रं लिखति।
३ अस्माकं स प्रभु र्यीशुः ख्रीष्टः शारीरिकसम्बन्धेन दायूदो
४ वंशोद्भवः पवित्रस्यात्मनः सम्बन्धेन चेश्वरस्य प्रभाववान् पुत्र
५ इति श्मशानात् तस्योत्थानेन प्रतिपन्नं। अपरं येषां मध्ये
यीशुना ख्रीष्टेन यूयमप्याहूतास्ते ऽन्यदेशीयलोकास्तस्य नाम्नि
६ विश्वस्य निदेशग्राहिणो यथा भवन्ति तदभिप्रायेण वयं तस्माद्
७ अनुग्रहं प्रेरितत्वपदञ्च प्राप्ताः। तातेनास्माकम् ईश्वरेण प्रभुणा
यीशुख्रीष्टेन च युष्मभ्यम् अनुग्रहः शान्तिश्च प्रदीयेतां।
८ प्रथमतः सर्व्वस्मिन् जगति युष्माकं विश्वासस्य प्रकाशितत्वाद्
अहं युष्माकं सर्व्वेषां निमित्तं यीशुख्रीष्टस्य नाम गृह्लन् ईश्व-
९ रस्य धन्यवादं करोमि। अपरम् ईश्वरस्य प्रसादाद् बहु-
कालात् परं साम्प्रतं युष्माकं समीपं यातुं कथमपि यत्
सुयोगं प्राप्नोमि, एतदर्थं निरन्तरं युष्माकं नामान्युच्चारयन्
१० निजासु सर्व्वप्रार्थनासु सर्व्वदा निवेदयामि, एतस्मिन् यमहं

तत्पुत्त्रीयसुसंवादप्रचारणेन मनसा परिचरामि स ईश्वरो मम
साक्षी विद्यते। यतो युष्माकं मम च विश्वासेन वयम् उभये ११
यथा शान्तियुक्ता भवाम इति कारणाद् युष्माकं स्थैर्य्यकरणार्थं १२
युष्मभ्यं किञ्चित्परमार्थदानदानाय युष्मान् साक्षात् कर्त्तुं मदीया
वाञ्छा। हे भ्रातृगण भिन्नदेशीयलोकानां मध्ये यद्वत् तद्वद् १३
युष्माकं मध्येऽपि यथा फलं भुञ्जे तदभिप्रायेण मुहुर्मुहु र्युष्माकं
समीपं गन्तुम् उद्यतोऽहं किन्तु यावद् अद्य तस्मिन् गमने
मम विघ्नो जात इति यूयं यद् अज्ञातास्तिष्ठथ तदहम् उचितं
न बुध्ये।

अहं सभ्यासभ्यानां विद्वदविद्वताञ्च सर्व्वेषाम् ऋणी विद्ये। १४
अतएव रोमानिवासिनां युष्माकं समीपेऽपि यथाशक्ति सुसंवादं १५
प्रचारयितुम् अहम् उद्यतोऽस्मि। यतः ख्रीष्टस्य सुसंवादो मम १६
लज्जास्पदं नहि स ईश्वरस्य शक्तिस्वरूपः सन् आयिहूदीयेभ्यो
ऽन्यजातीयान् यावत् सर्व्वजातीयानां मध्ये यः कश्चिद् तत्र
विश्वसिति तस्यैव त्राणं जनयति। यतः विश्वासस्य समपरिमाणम् १७
ईश्वरस्य धार्म्मिकता तत्सुसंवादे प्रकाशते। तदधि धर्म्मपुस्तकेऽपि
लिखितमिदं धार्म्मिको जनो विश्वासेन जीविष्यति।

फलतो ये मानवाः पापकर्म्मणा सत्यतां रुन्धन्ति तेषां १८
सर्व्वस्य दुराचरणस्याधर्म्मस्य च विरुद्धं स्वर्गाद् ईश्वरस्य कोपः
प्रकाशते। यत ईश्वरमधि यद्यद् ज्ञेयं तद् ईश्वरः स्वयं तान् १९
प्रति प्रकाशितवान् तस्मात् तेषाम् अगोचरं नहि। फलतस्तस्या- २०
नन्तशक्तीश्वरत्वादीन्यदृश्यान्यपि सृष्टिकालम् आरभ्य कर्म्मसु प्रकाश-
मानानि दृश्यन्ते तस्मात् तेषां दोषप्रक्षालनस्य पन्था नास्ति।
अपरम् ईश्वरं ज्ञात्वापि ते तम् ईश्वरज्ञानेन नाद्रियन्त कृतज्ञा २१

वा न जाताः; तस्मात् तेषां सर्व्वे तर्का विफलीभूताः, अपरञ्च
२२ तेषां संवेदशून्यानि मनांसि तिमिरे मग्नानि। ते स्वान् ज्ञानिनो
२३ ज्ञात्वा ज्ञानहीना अभवन् अनश्वरस्येश्वरस्य गौरवं विहाय नश्वर-
मनुष्यपशुपक्ष्युरोगामिप्रभृतेराकृतिविशिष्टप्रतिमास्तैराश्रिताः।
२४ इत्थं त ईश्वरस्य सत्यतां विहाय मृषामतम् आश्रितवन्तः
सच्चिदानन्दं सृष्टिकर्त्तारं त्यक्त्वा सृष्टवस्तुनः पूजां सेवाञ्च कृत-
२५ वन्तः; इति हेतोरीश्वरस्तान् कुक्रियायां समर्प्य निजनिजकु-
चिन्ताभिलाषाभ्यां स्वं स्वं शरीरं परस्परम् अपमानितं कर्त्तुम्
२६ अददात्। ईश्वरेण तेषु क्वभिलाषे समर्पितेषु तेषां योषितः
२७ स्वाभाविकाचरणम् अपहाय विपरीतकृत्ये प्रावर्त्तन्त; तथा
पुरुषा अपि स्वाभाविकयोषित्सङ्गमं विहाय परस्परं काम-
कृशानुना दग्धाः सन्तः पुमांसः पुंभिः साकं कुकृत्ये समासज्य
२८ निजनिजभ्रान्तेः समुचितं फलम् अलभन्त। ते स्वेषां मनःस्वी-
श्वराय स्थानं दातुम् अनिच्छुकास्ततो हेतोरीश्वरस्तान् प्रति
२९ दुष्टमनस्कत्वम् अविहितक्रियत्वञ्च दत्तवान्। अतएव ते सर्व्वे
ऽन्यायो व्यभिचारो दुष्टत्वं लोभो जिघांसा ईर्ष्या वधो विवाद-
श्चातुरी कुमतिरित्यादिभि र्दुष्कर्म्मभिः परिपूर्णाः सन्तः कर्णेजपा
३० अपवादिन ईश्वरद्वेषका हिंसका अहङ्कारिण आत्मश्लाघिनः
३१ कुकर्म्मोत्पादकाः पित्रोराज्ञालङ्घका अविचारका नियमलङ्घिनः
३२ स्नेहरहिता अतिद्वेषिणो निर्दयाश्च जाताः। ये जना एतादृशं
कर्म्म कुर्व्वन्ति त एव मृतियोग्या ईश्वरस्य विचारमीदृशं ज्ञात्वापि
त एतादृशं कर्म्म स्वयं कुर्व्वन्ति केवलमिति नहि किन्तु तादृश-
कर्म्मकारिषु लोकेष्वपि प्रीयन्ते।

२ द्वितीयोऽध्यायः।

१ पापेन सर्व्वेषां दण्डनीयत्वस्य कथनं ११ तत्र यिहूदिनाम् अन्यदेशिनाञ्च न विशेषः १७ दोषी सन् यद्यन्यं शिक्षयति तस्मान्न काचित् फलोत्पत्तिः २५ व्यवस्थाचरणं विना त्वक्छेदान्न परित्राणञ्च।

हे परदूषक मनुष्य, यः कश्चन त्वं भवसि तवोत्तरदानाय १
पन्था नास्ति यतो यस्मात् कर्म्मणः परस्त्वया दूष्यते तस्मात्
त्वमपि दूष्यसे, यतस्त्वं दूषयन्नपि त्वं तद्वद् आचरसि। किन्त्वे- २
तादृगाचारिभ्यो यं दण्डम् ईश्वरो निश्चिनोति स यथार्थ इति
वयं जानीमः। अतएव हे मानुष, त्वं यादृगाचारिणो दूषयसि ३
स्वयं यदि तादृगाचरसि तर्हि त्वम् ईश्वरदण्डात् पलायितुं शक्ष्य-
सीति किं बुध्यसे? अपरं तव मनसः परिवर्त्तनं कर्त्तुम् ईश्वर- ४
स्यानुग्रहो भवति तन्न बुद्ध्वा त्वं किं तदीयानुग्रहक्षमाचिरसहि-
ष्णुत्वनिधिं तुच्छीकरोषि? तथा स्वान्तःकरणस्य कठोरत्वात् ५
खेदराहित्याच्चेश्वरस्य न्याय्यविचारप्रकाशनस्य क्रोधस्य च दिनं यावत्
किं स्वार्थं कोपं सञ्चिनोषि? किन्तु स एकैकमनुजाय तत्कर्म्मानु- ६
सारेण प्रतिफलं दास्यति; वस्तुतस्तु ये जना धैर्य्यं धृत्वा सत्कर्म्म ७
कुर्व्वन्तो महिमा सत्कारोऽमरत्वञ्चैतानि मृगयन्ते तेभ्योऽनन्तजीवनं
दास्यति। अपरं ये जनाः सत्यधर्म्मम् अगृहीत्वा विपरीतधर्म्मम् ८
गृह्णन्ति तादृशा विरोधिजनाः कोपं क्रोधञ्च भोक्ष्यन्ते। आ ९
यिहूदिनो यूनानीयान् पर्य्यन्तं यावन्तः कुकर्म्मकारिणः प्राणिनः
सन्ति ते सर्व्वे दुःखं यातनाञ्च गमिष्यन्ति; किन्तु आ यिहूदिनो १०
यूनानीयपर्य्यन्ता यावन्तः सत्कर्म्मकारिणो लोकाः सन्ति तान् प्रति
महिमा सत्कारः शान्तिश्च भविष्यन्ति।

ईश्वरस्य विचारे पक्षपातो नास्ति। अलब्धव्यवस्थाशास्त्रै र्यैः ११

१२ पापानि कृतानि व्यवस्थाशास्त्रालब्धत्वानुरूपस्तेषां विनाशो भवि-
ष्यति; किन्तु लब्धव्यवस्थाशास्त्रा ये पापान्यकुर्व्वन् व्यवस्थानुसारादेव
१३ तेषां विचारो भविष्यति। व्यवस्थाश्रोतार ईश्वरस्य समीपे धार्म्मिका
भविष्यन्तीति नहि किन्तु व्यवस्थाचारिण एव धार्म्मिकीकरिष्यन्ते।
१४ यतो ऽलब्धव्यवस्थाशास्त्रा परजातीयलोका यदि स्वभावतो व्यव-
स्थानुरूपान् आचारान् कुर्व्वन्ति तर्ह्यलब्धशास्त्राः सन्तोऽपि ते
१५ स्वेषां व्यवस्थाशास्त्रमिव स्वयमेव भवन्ति। तेषां मनसि साक्षि-
स्वरूपे सति तेषां वितर्केषु च कदा तान् दोषिणः कदा वा
निर्दोषान् कृतवत्सु ते स्वान्तर्लिखितस्य व्यवस्थाशास्त्रस्य प्रमाणं
१६ स्वयमेव ददति। यस्मिन् दिने मया प्रकाशितस्य सुसंवादस्या-
नुसाराद् ईश्वरो यीशुख्रीष्टेन मानुषाणाम् अन्तःकरणानां गूढाभि-
प्रायान् धृत्वा विचारयिष्यति तस्मिन् विचारदिने तत् प्रका-
शिष्यते।

१७ पश्य त्वं स्वयं यिहूदीति विख्यातो व्यवस्थोपरि विश्वासं
१८ करोषि, ईश्वरमुद्दिश्य स्वं श्लाघसे, तथा व्यवस्थया शिक्षितो
भूत्वा तस्याभिमतं जानासि, सर्व्वासां कथानां सारं विविंक्षे,
१९ अपरं ज्ञानस्य सत्यतायाश्चाकारस्वरूपं शास्त्रं मम समीपे विद्यत
अतो ऽन्धलोकानां मार्गदर्शयिता तिमिरस्थितलोकानां मध्ये
२० दीप्तिस्वरूपोऽज्ञानलोकेभ्यो ज्ञानदाता शिशूनां शिक्षयिता-
२१ हमेवेति मन्यसे। परान् शिक्षयन् स्वयं स्वं किं न शिक्ष-
यसि? वस्तुतश्चौर्य्यनिषेधव्यवस्थां प्रचारयन् त्वं किं स्वयमेव
२२ चोरयसि? तथा परदारगमनं प्रतिषेधन् स्वयं किं परदारान्
गच्छसि? तथा त्वं स्वयं प्रतिमाद्वेषी सन् किं मन्दिरस्य द्रव्याणि
२३ हरसि? यस्त्वं व्यवस्थां श्लाघसे स त्वं किं व्यवस्थाम् अवमत्य

नेश्वरं सम्मन्यसे? शास्त्रे यथा लिखति परजातीयानां समीपे २४
युष्माकं दोषाद् ईश्वरस्य नाम्नो निन्दा भवति।

यदि व्यवस्थां पालयसि तर्हि तव त्वक्छेदक्रिया सफला २५
भवति; यदि व्यवस्थां लङ्घसे तर्हि तव त्वक्छेदोऽत्वक्छेदो
भविष्यति। यतो व्यवस्थाशास्त्रादिष्टधर्म्मकर्म्माचारी पुमान् अत्वक्- २६
छेदी सन्नपि किं त्वक्छेदिनां मध्ये न गणयिष्यते? किन्तु लब्ध- २७
शास्त्रश्छिन्नत्वक् च त्वं यदि व्यवस्थालङ्घनं करोषि तर्हि व्यवस्था-
पालकाः स्वाभाविकाच्छिन्नत्वचो लोकास्त्वां किं न दूषयिष्यन्ति?
तस्माद् यो वाह्ये यिहूदी स यिहूदी नहि तथाङ्गस्य यस्त्वक्छेदः २८
स त्वक्छेदो नहि; किन्तु यो जन आन्तरिको यिहूदी स एव २९
यिहूदी अपरञ्च केवललिखितया व्यवस्थया न किन्तु मानसिको
यस्त्वक्छेदो यस्य च प्रशंसा मनुष्येभ्यो न भूत्वा ईश्वराद् भवति
स एव त्वक्छेदः।

---

३ तृतीयोऽध्यायः।

१ यिहूदिनां नानाधर्म्मानुष्ठानं ९ अन्येषामिव व्यवस्थालङ्घने कृते तेन न परित्राणं २१ एककृत्वो व्यवस्थालङ्घने कृते सति न त्राणं किन्तु केवलविश्वासात् त्राणञ्च।

अपरञ्च यिहूदिनः किं श्रेष्ठत्वं? तथा त्वक्छेदस्य वा किं १
फलं? सर्व्वथा बहूनि फलानि सन्ति, विशेषत ईश्वरस्य शास्त्रं २
तेभ्योऽदीयत। कैश्चिद् अविश्वसने कृते तेषाम् अविश्वसनात् किम् ३
ईश्वरस्य विश्वास्यताया हानिरुत्पत्स्यते? केनापि प्रकारेण नहि। ४
यद्यपि सर्व्वे मनुष्या मिथ्यावादिनस्तथापीश्वरः सत्यवादी। शास्त्रे
यथा लिखितमास्ते,

अतस्त्वन्तु स्ववाक्येन निर्द्दोषो हि भविष्यसि।
विचारे चैव निष्पापो भविष्यसि न संशयः।

५ अस्माकम् अन्यायेन यदीश्वरस्य न्यायः प्रकाशते तर्हि किं वदि-
ष्यामः? अहं मानुषाणां कथामिव कथां कथयामि, ईश्वरः
६ समुचितं दण्डं दत्त्वा किम् अन्यायी भविष्यति? इत्थं न भवतु,
७ तथा सतीश्वरः कथं जगतो विचारयिता भविष्यति? मम मिथ्या-
वाक्यवदनाद् यदीश्वरस्य सत्यत्वेन तस्य महिमा वर्द्धते तर्हि
८ कस्मादहं विचारेऽपराधित्वेन गण्यो भवामि? मङ्गलार्थं पापमपि
करणीयमिति वाक्यं त्वया कुतो नोच्यते? किन्तु यैरुच्यते ते
नितान्तं दण्डस्य पात्राणि भवन्ति; तथापि तद्वाक्यम् अस्माभि-
रप्युच्यत इत्यस्माकं ग्लानिं कुर्व्वन्तः कियन्तो लोका वदन्ति।
९ अन्यलोकेभ्यो वयं किं श्रेष्ठाः? कदाचन नहि यतो यिहू-
दिनो यूनानीयाश्च सर्व्वएव पापस्यायत्ता इत्यस्य प्रमाणं वयं
१० पूर्व्वम् अददाम। लिपि र्यथास्ते,

‘नैकोऽपि धार्म्मिको जनः।
११ तथा ज्ञानीश्वरज्ञानी मानवः कोपि नास्ति हि।
१२ विमार्गगामिनः सर्व्वे सर्व्वे दुष्कर्म्मकारिणः।
एको जनोऽपि नो तेषां साधुकर्म्म करोति च।
१३ तथा तेषान्तु वै कण्ठा अनावृतश्मशानवत्।
स्तुतिवादं प्रकुर्व्वन्ति जिह्वाभिस्ते तु केवलं।
१४ तेषामोष्ठस्य निम्ने तु विषं तिष्ठति सर्प्पवत्।
मुखं तेषां हि शापेन कपटेन च पूर्य्यते।
१५ रक्तपाताय तेषां तु पदानि क्षिप्रगानि च।
१६ पथि तेषां मनुष्याणां नाशः क्लेशश्च केवलः।

ते जना नहि जानन्ति पन्थानं सुखदायिनं। १७
परमेशाद् भयं यत्तत् तच्चक्षुषोरगोचरं।' १८

व्यवस्थायां यद्यल्लिखति तद् व्यवस्थाधीनान् लोकान् उद्दिश्य १९
लिखतीति वयं जानीमः। ततो मनुष्यमात्रो निरुत्तरः सन्
ईश्वरस्य साक्षाद् अपराधी भवति। अतएव व्यवस्थानुरूपैः २०
कर्म्मभिः कश्चिदपि प्राणीश्वरस्य साक्षात् धार्म्मिकीकृतो भवितुं
न शक्ष्यति यतो व्यवस्थया पापज्ञानमात्रं जायते।

किन्तु व्यवस्थायाः पृथग् ईश्वरेण देया धार्म्मिकता व्यवस्थाया २१
भाववादिगणस्य च वचनैः प्रमाणीकृता सती इदानीं प्रकाशते।
यीशुख्रीष्टे विश्वासकरणाद् ईश्वरेण दत्ता धार्म्मिकता सकलेषु २२
प्रकाशिता सती सर्व्वान् विश्वासिनः प्रति वर्त्तते। तेषां कोपि २३
प्रभेदो नास्ति, यतः सर्व्वएव पापिन ईश्वरीयतेजोहीनाश्च जाताः।
त ईश्वरस्यानुग्रहात् मूल्यं विना ख्रीष्टकृतेन परित्राणेन धार्म्मिकी- २४
कृता भवन्ति। यस्मात् स्वशोणितेन विश्वासात् पापनाशको बली २५
भवितुं स एव पूर्व्वम् ईश्वरेण निश्चितः, इत्थम् ईश्वरीयसहिष्णु-
त्वात् पुराकृतपापानां मार्ज्जनकरणे स्वीयधार्म्मिकता तेन प्रकाश्यते,
वर्त्तमानकालीयाऽपि स्वधार्म्मिकता तेन प्रकाश्यते, अपरं यीशौ विश्वा- २६
सिनं धार्म्मिकीकुर्व्वन्नपि स धार्म्मिकस्तिष्ठति। तर्हि कुत्रात्मश्लाघा? २७
सा दूरीकृता; कया व्यवस्थया? किं क्रियारूपव्यवस्थया? इत्थं
नहि किन्तु तत् केवलविश्वासरूपया व्यवस्थयैव भवति। अतएव २८
व्यवस्थानुरूपाः क्रिया विना केवलेन विश्वासेन मानवः धार्म्मिकीकृतो
भवितुं शक्नोतीत्यस्य राद्धान्तं दर्शयामः। स किं केवलयिहूदि- २९
नाम् ईश्वरो भवति? परजातीयानाम् ईश्वरो न भवति? परजा-
तीयानामपि भवति; यस्माद् एक ईश्वरो विश्वासात् त्वक्छेदिनो ३०

विश्वासेनात्वक्छेदिनश्च धार्म्मिकीकरिष्यति। तर्हि विश्वासेन वयं ३१
किं व्यवस्थां लुम्पाम? इत्थं न भवतु वयं व्यवस्थां संस्थापयाम
एव।

---

४ चतुर्थोऽध्यायः।

१ विश्वासाद् अब्राहामस्य धार्म्मिकतालाभः ९ तस्याब्राहामस्य धार्म्मिकता त्वक्छेदान्न किन्तु विश्वासात् प्राप्ता १८ धार्म्मिकता विश्वासेनास्माभिः प्राप्ता।

१ अस्माकं पूर्व्वपुरुष अब्राहामः कायिकक्रियया किं लब्धवान्
२ एतदधि किं वदिष्यामः? स यदि निजक्रियाभ्यः धार्म्मिको भवेत्
तर्हि तस्यात्मश्लाघां कर्त्तुं पन्था भवेदिति सत्यं, किन्त्वीश्वरस्य
३ समीपे नहि। शास्त्रे किं लिखति? अब्राहाम ईश्वरे विश्व-
४ सनात् स विश्वासस्तस्मै धार्म्मिकतार्थं गणितो बभूव। कर्म्मकारिणो
यद् वेतनं तद् अनुग्रहस्य फलं नहि किन्तु तेनोपार्जितं मन्त-
५ व्यम्। किन्तु यः पापिनं धार्म्मिकीकरोति तस्मिन् विश्वासिनः
कर्म्महीनस्य जनस्य यो विश्वासः स धार्म्मिकतार्थं गण्यो भवति।
६ अपरं यं क्रियाहीनम् ईश्वरः धार्म्मिकीकरोति तस्य धन्यवादं
दायूद् वर्णयामास, यथा,
७ 'स धन्योऽघानि मृष्टानि यस्यागांस्यावृतानि च।
८ स च धन्यः परेशेन पापं यस्य न गण्यते।'
९ एष धन्यवादस्त्वक्छेदिनम् अत्वक्छेदिनं वा कं प्रति भवति?
१० अब्राहामस्य विश्वासः धार्म्मिकतार्थं गणित इति वयं वदामः। स
विश्वासस्तस्य त्वक्छेदित्वावस्थायां किम् अत्वक्छेदित्वावस्थायां
कस्मिन् समये धार्म्मिकतेव गणितः? त्वक्छेदित्वावस्थायां नहि
११ किन्त्वत्वक्छेदित्वावस्थायां। अपरञ्च स यत् सर्व्वेषाम् अत्वक्-
छेदिनां विश्वासिनाम् आदिपुरुषो भवेत्, ते च धार्म्मिका

गण्येरन्; ये च लोकाः केवलं छिन्नत्वचो न सन्तो ऽस्मत्पूर्व्व- १२
पुरुष अब्राहामोऽछिन्नत्वक् सन् येन विश्वासमार्गेण गतवान्
तेनैव तस्य पादचिह्नेन गच्छन्ति तेषां त्वक्छेदिनामप्यादिपुरुषो
भवेत् तदर्थम् अत्वक्छेदिनो मानवस्य विश्वासात् धार्म्मिकता उत्पद्यत
इति प्रमाणस्वरूपं त्वक्छेदचिह्नं स प्राप्नोत्। अब्राहामो जगतो १३
ऽधिकारी भविष्यति यैषा प्रतिज्ञा तं तस्य वंशञ्च प्रति पूर्व्वम्
अक्रियत सा व्यवस्थामूलिका नहि किन्तु विश्वासजन्यधार्म्मिकता-
मूलिका। यतो व्यवस्थावलम्बिनो यद्यधिकारिणो भवन्ति तर्हि १४
विश्वासो विफलो जायते सा प्रतिज्ञापि लुप्तैव। अधिकन्तु व्यवस्था १५
कोपं जनयति यतो ऽविद्यमानायां व्यवस्थायाम् आज्ञालङ्घनं न
सम्भवति। अतएव सा प्रतिज्ञा यद् अनुग्रहस्य फलं भवेत् तदर्थं १६
विश्वासमूलिका यतस्तथात्वे तद्वंशसमुदायं प्रति अर्थतो ये व्यव-
स्थया तद्वंशसम्भवाः केवलं तान् प्रति नहि किन्तु य अब्राहामीय-
विश्वासेन तत्सम्भवास्तानपि प्रति सा प्रतिज्ञा स्थास्नुर्भवति। यो १७
निर्जीवान् सजीवान् अविद्यमानानि वस्तूनि च विद्यमानानि
करोति अब्राहामस्य विश्वासभूमेस्तस्येश्वरस्य साक्षात् सोऽस्माकं सर्व्वे-
षाम् आदिपुरुष आस्ते, यथा लिखितं विद्यते, 'अहं त्वां बहुजा-
तीनाम् आदिपुरुषं कृत्वा नियुक्तवान्।'

त्वदीयस्तादृशो वंशो जनिष्यते यदिदं वाक्यं प्रतिश्रुतं तदनु- १८
साराद् अब्राहामो बहुदेशीयलोकानाम् आदिपुरुषो यद् भवति
तदर्थं सोऽनपेक्षितव्यमप्यपेक्षमाणो विश्वासं कृतवान्। अपरञ्च १९
क्षीणविश्वासो न भूत्वा शतवत्सरवयस्कत्वात् स्वशरीरस्य जरां
सारानाम्नः स्वभार्य्याया रजोनिवृत्तिञ्च तृणाय न मेने। अपरम् २०
अविश्वासाद् ईश्वरस्य प्रतिज्ञावचने कमपि संशयं न चकार;

२१ किन्त्वीश्वरेण यत् प्रतिश्रुतं तत् साधयितुं शक्यत इति निश्चितं
विज्ञाय दृढविश्वासः सन् ईश्वरस्य महिमानं प्रकाशयाञ्चकार।
२२ इति हेतोस्तस्य स विश्वासस्तदीयधार्म्मिकतेव गणयाञ्चक्रे। धार्म्मि-
२३ कतेवागण्यत तत् केवलस्य तस्य निमित्तं लिखितं नहि, अस्माकं
२४ निमित्तमपि, यतोऽस्माकं पापनाशार्थं समर्पितोऽस्माकं धार्म्मिकता-
२५ प्राप्त्यर्थञ्चोत्थापितोऽभवत् योऽस्माकं प्रभु र्यीशुस्तस्योत्थापयितरीश्वरे
यदि वयं विश्वसामस्तर्ह्यस्माकमपि सएव विश्वासः धार्म्मिकतेव
गणयिष्यते।

---

५ पञ्चमोऽध्यायः।

१ विश्वासेन धार्म्मिकतायां सत्यां बहुलाभः १२ आदमा यथा पापं मृतिश्च तथा ख्रीष्टेन धार्म्मिकता अनन्तजीवनञ्च।

१ विश्वासेन धार्म्मिकीकृता वयम् ईश्वरेण सार्द्धं प्रभुणास्माकं
२ यीशुख्रीष्टेन मेलनं प्राप्ताः। अपरं वयं यस्मिन् अनुग्रहाश्रये
तिष्ठामस्तन्मध्यं विश्वासमार्गेण तेनैवानीता वयम् ईश्वरीयविभव-
३ प्राप्तिप्रत्याशया समानन्दामः। तत् केवलं नहि किन्तु क्लेशभोगे-
ऽप्यानन्दामो यतः क्लेशाद् धैर्य्यं जायत इति वयं जानीमः, धैर्य्याच्च
४ परीक्षितत्वं जायते, परीक्षितत्वात् प्रत्याशा जायते, प्रत्याशातो-
५ व्रीडितत्वं न जायते, यस्माद् अस्मभ्यं दत्तेन पवित्रेणात्मनास्माकम्
६ अन्तःकरणानीश्वरस्य प्रेमवारिणा सिक्तानि। अस्मासु निरुपायेषु
सत्सु ख्रीष्ट उपयुक्ते समये पापिनां निमित्तं स्वीयान् प्राणान्
७ अत्यजत्। हितकारिणो जनस्य कृते कोऽपि प्राणान् त्यक्तुं साहसं
कर्त्तुं शक्नोति, किन्तु धार्म्मिकस्य कृते प्रायेण कोऽपि प्राणान् न
८ त्यजति। किन्त्वस्मासु पापिषु सत्स्वपि निमित्तमस्माकं ख्रीष्टः

स्वप्राणान् त्यक्तवान्, तत ईश्वरोऽस्मान् प्रति निजं परमप्रेमाणं
दर्शितवान्। अतएव तस्य रक्तपातेन धार्म्मिकीकृता वयं नितान्तं ९
तेन कोपाद् उद्धारिष्यामहे। फलतो वयं यदा रिपव आस्म १०
तदेश्वरस्य पुत्रस्य मरणेन तेन सार्द्धं यद्यस्माकं मेलनं जातं तर्हि
मेलनप्राप्ताः सन्तोऽवश्यं तस्य जीवनेन रक्षां लप्स्यामहे। तत् ११
केवलं नहि किन्तु येन मेलनम् अलभामहि तेनास्माकं प्रभुना
यीशुख्रीष्टेन साम्प्रतम् ईश्वरे समानन्दामश्च।

तथा सति, एकेन मानुषेण पापं पापेन च मरणं जगतीं १२
प्राविशत् अपरं सर्व्वेषां पापित्वात् सर्व्वे मानुषा मृते र्निघ्ना
अभवन्। यतो व्यवस्थादानसमयं यावत् जगति पापम् आसीत् १३
किन्तु यत्र व्यवस्था न विद्यते तत्र पापस्यापि गणना न विद्यते।
तथाप्यादमेन यादृशं पापं कृतं तादृशं पापं यै र्नाकारि आदमम् १४
आरभ्य मोशिं यावत् तेषामप्युपरि मृत्यू राजत्वम् अकरोत् स आदमो
भाव्यादमस्य निदर्शनमेवास्ते। किन्तु पापकर्म्मणो यादृशो भावस्तादृग् १५
दानकर्म्मणो भावो न भवति यत एकस्य जनस्यापराधेन यदि
बहूनां मरणम् अघटत तथापीश्वरानुग्रहस्तदनुग्रहमूलकं दानञ्चैकेन
जनेनार्थाद् यीशुना ख्रीष्टेन बहुषु बाहुल्यातिबाहुल्येन फलति।
अपरम् एकस्य जनस्य पापकर्म्म यादृक् फलयुक्तं दानकर्म्म तादृक् १६
न भवति यतो विचारकर्म्मैकं पापम् आरभ्य दण्डजनकं बभूव, किन्तु
दानकर्म्म बहुपापान्यारभ्य धार्म्मिकताजनकं बभूव। यत एकस्य १७
जनस्य पापकर्म्मतस्तेनैकेन यदि मरणस्य राजत्वं जातं तर्हि ये जना
अनुग्रहस्य बाहुल्यं धार्म्मिकतादानञ्च प्राप्नुवन्ति त एकेन जनेन,
अर्थात् यीशुख्रीष्टेन, जीवने राजत्वम् अवश्यं करिष्यन्ति। एको- १८
ऽपराधो यद्वत् सर्व्वमानवानां दण्डगामी मार्गो ऽभवत् तद्वद् एकं

धार्म्मिकताद्दानं सर्व्वमानवानां जीवनयुक्तधार्म्मिकतागामी मार्ग एव।
१९ अपरम् एकस्य जनस्याज्ञालङ्घनाद् यथा बहवो ऽपराधिनो जाता-
२० स्तद्वद् एकस्याज्ञाचरणाद् बहवो धार्म्मिकीकृता भवन्ति। अधिकन्तु
व्यवस्थागमनाद् अपराधस्य बाहुल्यं जातं किन्तु यत्र पापस्य
२१ बाहुल्यं तत्रैव तस्माद् अनुग्रहस्य बाहुल्यम् अभवत्। तेन मृत्युना
यद्वत् पापस्य राजत्वम् अभवत् तद्वद् अस्माकं प्रभुयीशुख्रीष्ट-
द्वारानन्तजीवनदायिधार्म्मिकतयानुग्रहस्य राजत्वं भवति।

---

६ षष्ठोऽध्यायः।

१ ख्रीष्टात् धार्म्मिकतायां प्राप्तायां पापकरणम् अनुचितं १२ तेन धार्म्मिके सति पापस्य दमनं धर्म्मपालनञ्चोचितं तेनानन्तजीवनप्राप्तिश्च।

१ प्रभूतरूपेण यद् अनुग्रहः प्रकाशते तदर्थं पापे तिष्ठाम इति
२ वाक्यं किं वयं वदिष्यामः? तन्न भवतु। पापं प्रति मृता वयं
३ पुनस्तस्मिन् कथम् जीविष्यामः? वयं यावन्तो लोका यीशुख्रीष्टे
स्नापिता अभवाम तावन्त एव तस्य मरणे स्नापिता इति किं यूयं
४ न जानीथ? ततो यथा पितुः पराक्रमेण मृतानां मध्यात् ख्रीष्ट उत्था-
पितस्तथा वयमपि यत् नूतनजीविन इवाचरामस्तदर्थं स्नापनेन
५ तेन सार्द्धं मृत्युरूपे श्मशानागारे संस्थापिताः। अपरं वयं यदि तेन
संयुक्ताः सन्तः स इव मरणभागिनो जातास्तर्हि स इवोत्थानभागिनो-
६ ऽपि भविष्यामः। वयं यत् पापस्य दासाः पुन र्न भवामस्तदर्थम्
अस्माकं पापरूपशरीरस्य विनाशार्थम् अस्माकं पुरातनपुरुषस्तेन
७ साकं क्रुशेऽहन्यतेति वयं जानीमः। यो हतः स पापात् मुक्त एव।
८ अतएव यदि वयं ख्रीष्टेन सार्द्धम् अहन्यामहि तर्हि पुनरपि तेन
९ सहिता जीविष्याम इत्यत्रास्माकं विश्वासो विद्यते। यतः मृतानां

मध्याद् उत्थापितः ख्रीष्टः पुन र्न म्रियत इति वयं जानीमः। तस्मिन्
कोप्यधिकारो मृत्यो र्नास्ति। अपरञ्च स यद् अम्रियत तेनैकदा १०
पापम् उद्दिश्याम्रियत, यच्च जीवति तेनेश्वरम् उद्दिश्य जीवति;
तद्वद् यूयमपि स्वान् पापम् उद्दिश्य मृतान् अस्माकं प्रभुणा ११
यीशुख्रीष्टेनेश्वरम् उद्दिश्य जीवन्तो जानीत।

अपरञ्च कुत्सिताभिलाषान् पूरयितुं युष्माकं मर्त्यदेहेषु पापम् १२
आधिपत्यं न करोतु। अपरं स्वं स्वम् अङ्गम् अधार्म्मिकताया अस्त्रं १३
कृत्वा पापसेवायां न समर्पयत, किन्तु मृतानां मध्याद् उत्थितानिव
स्वान् ईश्वरे समर्पयत स्वान्यङ्गानि च धर्म्मास्त्रस्वरूपाणीश्वरम् उद्दिश्य
समर्पयत। युष्माकम् उपरि पापस्याधिपत्यं पुन र्न भविष्यति, १४
यस्माद् यूयं व्यवस्थाया अनायत्ता अनुग्रहस्य चायत्ता अभवत।
किन्तु वयं व्यवस्थाया अनायत्ता अनुग्रहस्य चायत्ता अभवाम, इति १५
कारणात् किं पापं करिष्यामः? तन्न भवतु। यतो मृतिजनकं पापं १६
धार्म्मिकताजनकं निदेशाचरणञ्चैतयोर्द्वयो र्यस्मिन् आज्ञापालनार्थं
भृत्यानिव स्वान् समर्पयथ, तस्यैव भृत्या भवथ, एतत् किं यूयं न
जानीथ? अपरञ्च पूर्व्वं यूयं पापस्य भृत्या आस्तेति सत्यं किन्तु १७
यस्यां शिक्षारूपायां मूषायां निक्षिप्ता अभवत तस्या आकृतिं मनोभि
र्लब्धवन्त इति कारणाद् ईश्वरस्य धन्यवादो भवतु। इत्थं यूयं १८
पापसेवातो मुक्ताः सन्तो धर्म्मस्य भृत्या जाताः। युष्माकं शारीरिक्या १९
दुर्व्वलताया हेतो र्मानववद् अहम् एतद् ब्रवीमि; पुनः पुनरधर्म्म-
करणार्थं यद्वत् पूर्व्वं पापामेध्ययो र्भृत्यत्वे निजाङ्गानि समार्पयत
तद्वद् इदानीं पवित्रत्वार्थं धार्म्मिकताया भृत्यत्वे निजाङ्गानि सम-
र्पयत। यदा यूयं पापस्य भृत्या आस्त तदा धार्म्मिकताया नायत्ता २०
आस्त। तर्हि यानि कर्म्माणि यूयम् इदानीं लज्जाजनकानि बुध्यध्वे २१

पूर्व्वं तै र्युष्माकं को लाभ आसीत्? तेषां कर्म्मणां फलं मरणमेव ।
२२ किन्तु साम्प्रतं यूयं पापसेवातो मुक्ताः सन्त ईश्वरस्य भृत्याऽभवत
तस्माद् युष्माकं पवित्रत्वरूपं लभ्यम् अनन्तजीवनरूपञ्च फलम् आस्ते।
२३ यतः पापस्य वेतनं मरणं किन्त्वस्माकं प्रभुणा यीशुख्रीष्टेनानन्त-
जीवनम् ईश्वरदत्तं दानम् आस्ते।

---

७ सप्तमोऽध्यायः ।

१ विश्वासिलोकानां व्यवस्थातो मुक्तिः ख्रीष्टेन सहोढत्वं ७ व्यवस्थायाः पवित्रत्वं न्याय्यत्वं हितदायकत्वं १२ व्यवस्थालङ्घनेन पापे जाते सति कोऽपि यदि तत् पापम् ऋतीयते तर्हि व्यवस्थाया उत्तमत्वस्वीकरणकथनञ्च ।

१ हे भ्रातृगण व्यवस्थाविदः प्रति ममेदं निवेदनं। विधिः केवलं
यावज्जीवं मानवोपर्य्यधिपतित्वं करोतीति यूयं किं न जानीथ?
२ यावत्कालं पति र्जीवति तावत्कालम् ऊढा भार्य्या व्यवस्थया
तस्मिन् बद्धा तिष्ठति किन्तु यदि पति र्म्रियते तर्हि सा नारी
३ पत्यु र्व्यवस्थातो मुच्यते। एतत्कारणात् पत्युर्जीवनकाले नारी
यद्यन्यं पुरुषं विवहति तर्हि सा व्यभिचारिणी भवति किन्तु यदि
स पति र्म्रियते तर्हि सा तस्या व्यवस्थाया मुक्ता सती पुरुषान्तरेण
४ व्यूढापि व्यभिचारिणी न भवति। हे मम भ्रातृगण, ईश्वरनिमित्तं
यदस्माकं फलं जायते तदर्थं मृतानां मध्याद् उत्थापितेन
पुरुषेण सह युष्माकं विवाहो यद् भवेत् तदर्थं ख्रीष्टस्य शरीरेण
५ यूयं व्यवस्थां प्रति मृतवन्तः। यतोऽस्माकं शारीरिकाचरणसमये
मरणनिमित्तं फलम् उत्पादयितुं व्यवस्थया दूषितः पापाभिलाषो-
६ ऽस्माकम् अङ्गेषु जीवन् आसीत्। किन्तु तदा यस्या व्यवस्थाया
वशे आस्महि साम्प्रतं तां प्रति मृतत्वाद् वयं तस्या अधीनत्वात्

मुक्ता इति हेतोरीश्वरोऽस्माभिः पुरातनलिखितानुसारात् न सेवितव्यः किन्तु नवीनस्वभावेनैव सेवितव्यः।

तर्हि वयं किं ब्रूमः? व्यवस्था किं पापजनिका भवति? नेत्थं ७
भवतु। व्यवस्थायाम् अविद्यमानायां पापं किम् इत्यहं नावेदं; किञ्च
लोभं मा कार्षीरिति चेद् व्यवस्थाग्रन्थे लिखितं नाभविष्यत् तर्हि
लोभः किम्भूतस्तदहं नाज्ञास्यं। किन्तु व्यवस्थया पापं छिद्रं प्राप्य ८
ममान्तः सर्व्वविधं कुत्सिताभिलाषम् अजनयत्; यतो व्यवस्थायाम्
अविद्यमानायां पापं मृतं। अपरं पूर्व्वं व्यवस्थायाम् अविद्यमा- ९
नायाम् अहम् अजीवं ततः परम् आज्ञायाम् उपस्थितायाम्
पापम् अजीवत् तदाहम् अम्रिये। इत्थं सति जीवननिमित्ता १०
याज्ञा सा मम मृत्युजनिकाभवत्। यतः पापं छिद्रं प्राप्य व्यवस्थि- ११
तादेशेन मां वञ्चयित्वा तेन माम् अहन्। अतएव व्यवस्था पवित्रा, १२
आदेशश्च पवित्रो न्याय्यो हितकारी च भवति।

तर्हि यत् स्वयं हितकृत् तत् किं मम मृत्युजनकम् अभवत्? १३
नेत्थं भवतु; किन्तु पापं यत् पातकमिव प्रकाशते तथा निदेशेन
पापं यदतीव पातकमिव प्रकाशते तदर्थं हितोपायेन मम मरणम्
अजनयत्। व्यवस्थात्मबोधिकेति वयं जानीमः किन्त्वहं शारीरता- १४
चारी पापस्य क्रीतकिङ्करो विद्ये। यतो यत् कर्म्म करोमि तत् १५
मम मनोऽभिमतं नहि; अपरं यन् मम मनोऽभिमतं तन्न करोमि
किन्तु यद् ऋतीये तत् करोमि। तथात्वे यन् ममानभिमतं तद् १६
यदि करोमि तर्हि व्यवस्था सूत्तमेति स्वीकरोमि। अतएव १७
सम्प्रति तत् कर्म्म मया क्रियत इति नहि किन्तु मम शरीरस्थेन
पापेनैव क्रियते। यतो मयि, अर्थतो मम शरीरे, किमप्युत्तमं न १८
वसति, एतद् अहं जानामि; ममेच्छुकतायां तिष्ठन्त्यामप्यहम्

१९ उत्तमकर्म्मसाधने समर्थो न भवामि । यतो यामुत्तमां क्रियां
कर्त्तुमहं वाञ्छामि तां न करोमि किन्तु यत् कुत्सितं कर्म्म कर्त्तुम्
२० अनिच्छुकोऽस्मि तदेव करोमि । अतएव यद्यत् कर्म्म कर्त्तुं
ममेच्छा न भवति तद् यदि करोमि तर्हि तन् मया न क्रियते,
२१ ममान्तर्वर्त्तिना पापेनैव क्रियते । भद्रं कर्त्तुम् इच्छुकं मां यो
२२ ऽभद्रं कर्त्तुं प्रवर्त्तयति तादृशं स्वभावमेकं मयि पश्यामि । अहम्
२३ आन्तरिकपुरुषेणेश्वरव्यवस्थायां सन्तुष्ट आसे ; किन्तु तद्विपरीतं
युध्यन्तं तदन्यमेकं स्वभावं मदीयाङ्गस्थितं प्रपश्यामि, स मदीयाङ्ग-
२४ स्थितपापस्वभावस्यायत्तं मां कर्त्तुं चेष्टते । हा हा योऽहं दुर्भाग्यो
मनुजस्तं माम् एतस्मान् मृताच्छरीरात् को निस्तारयिष्यति ?
२५ अस्माकं प्रभुणा यीशुख्रीष्टेन निस्तारयितारम् ईश्वरं धन्यं वदामि ।
अतएव शरीरेण पापव्यवस्थाया मनसा तु ईश्वरव्यवस्थायाः सेवनं
करोमि ।

---

८ अष्टमोऽध्यायः ।

१ ख्रीष्टे विश्वासिनां व्यवस्थादण्डान्मुक्तिः धर्म्माचरणञ्च १२ ईश्वरस्य पुत्त्वं विभवा-
पेक्षणं तत्र नियुक्तत्वञ्च ३१ ख्रीष्टेन तेषां लाभो जयश्च ।

१ ये जनाः ख्रीष्टं यीशुम् आश्रित्य शारीरिकं नाचरन्त आत्मि-
२ कमाचरन्ति तेऽधुना दण्डार्हा न भवन्ति । जीवनदायकस्यात्मनो
व्यवस्था ख्रीष्टयीशुना पापमरणयो र्व्यवस्थातो माममोचयत् ।
३ यस्माच्छरीरस्य दुर्ब्बलत्वाद् व्यवस्थया यत् कर्म्मासाध्यम् ईश्वरो
निजपुत्रं पापिशरीररूपं पापनाशकबलिरूपञ्च प्रेष्य तस्य शरीरे
४ पापस्य दण्डं कुर्व्वन् तत्कर्म्म साधितवान् । ततः शारीरिकं नाचरि-
त्वास्माभिरात्मिकम् आचरद्भि र्व्यवस्थाग्रन्थे निर्द्दिष्टानि धार्म्मिकता-

कर्म्माणि सर्व्वानि साध्यन्ते। ये शारीरिकाचारिणस्ते शारीरिकान् ५
विषयान् भावयन्ति ये चात्मिकाचारिणस्ते आत्मनो विषयान्
भावयन्ति। शारीरिकभावस्य फलं मृत्युः किञ्चात्मिकभावस्य फलं ६
जीवनं शान्तिश्च। यतः शारीरिकभाव ईश्वरस्य विरुद्धः शत्रुताभाव ७
एव स ईश्वरस्य व्यवस्थाया अधीनो न भवति भवितुञ्च न शक्नोति।
एतस्मात् शारीरिकाचारिषु तोष्टुम् ईश्वरेण न शक्यं। किन्त्वी- ८
श्वरस्यात्मा यदि युष्माकं मध्ये वसति तर्हि यूयं शारीरिकाचारिणो ९
न सन्त आत्मिकाचारिणो भवथः। यस्मिन् तु ख्रीष्टस्यात्मा न
विद्यते स तत्सम्भवो नहि। यदि ख्रीष्टो युष्मान् अधितिष्ठति तर्हि १०
पापम् उद्दिश्य शरीरं मृतं किन्तु धार्म्मिकतामुद्दिश्यात्मा जीवति।
मृतगणाद् यीशु र्येनोत्थापितस्तस्यात्मा यदि युष्मन्मध्ये वसति ११
तर्हि मृतगणात् ख्रीष्टस्य स उत्थापयिता युष्मन्मध्यवासिना स्वकीया-
त्मना युष्माकं मृतदेहानपि पुन र्जीवयिष्यति।

हे भ्रातृगण शरीरस्य वयमधमर्णा न भवामोऽतः शारीरिका- १२
चारोऽस्माभि र्न कर्त्तव्यः। यदि यूयं शारीरिकाचारिणो भवेत १३
तर्हि युष्माभि र्मर्त्तव्यमेव किन्त्वात्मना यदि शारीरिककर्म्माणि
घातयेत तर्हि जीविष्यथ। यतो यावन्तो लोका ईश्वरस्यात्मना- १४
कृष्यन्ते ते सर्व्व ईश्वरस्य सन्ताना भवन्ति। यूयं पुनरपि भयजनकं १५
दास्यभावं न प्राप्ताः किन्तु येन भावेनेश्वरं पितः पितरिति प्रोच्य
सम्बोधयथ तादृशं दत्तकपुत्त्रत्वभावम् प्राप्नुत। अपरञ्च वयम् १६
ईश्वरस्य सन्ताना एतस्मिन् पवित्र आत्मा स्वयम् अस्माकम् आत्मभिः
सार्द्धं प्रमाणं ददाति। अतएव वयं यदि सन्तानास्तर्ह्यधिकारिणः, १७
अर्थाद् ईश्वरस्य स्वत्वाधिकारिणः ख्रीष्टेन सहाधिकारिणश्च भवामः;
अपरं तेन सार्द्धं यदि दुःखभागिनो भवामस्तर्हि तस्य विभवस्यापि

१८ भागिनो भविष्यामः। किन्त्वस्मासु यो भावी विभवः प्रकाशिष्यते
१९ तस्य समीपे वर्त्तमानकालीनं दुःखमहं तृणाय मन्ये। यतः प्राणि-
गण ईश्वरस्य सन्तानानां विभवप्राप्तिम् आकाङ्क्षन् नितान्तम् अपेक्षते।
२० अपरञ्च प्राणिगणः स्वैरम् अलीकताया वशीकृतो नाभवत् किन्तु
२१ प्राणिगणोऽपि नश्वरताधीनत्वात् मुक्तः सन् ईश्वरस्य सन्तानानां परम-
२२ मुक्तिं प्राप्स्यतीत्यभिप्रायेण वशीकर्त्रा वशीचक्रे। अपरञ्च प्रसूयमानावद्
व्यथितः सन् इदानीं यावत् कृत्स्नः प्राणिगण आर्त्तस्वरं करोतीति
२३ वयं जानीमः। केवलः स इति नहि किन्तु प्रथमजातफलस्वरूपम्
आत्मानं प्राप्ता वयमपि दत्तकपुत्त्रत्वपदप्राप्तिम् अर्थात् शरीरस्य
२४ मुक्तिं प्रतीक्षमाणास्तद्वद् अन्तरार्त्तरावं कुर्म्मः। वयं प्रत्याशया
त्राणम् अलभामहि किन्तु प्रत्यक्षवस्तुनो या प्रत्याशा सा प्रत्याशा
नहि, यतो मनुष्यो यत् समीक्षते तस्य प्रत्याशां कुतः करिष्यति?
२५ यद् अप्रत्यक्षं तस्य प्रत्याशां यदि वयं कुर्व्वीमहि तर्हि धैर्य्यम्
२६ अवलम्ब्य प्रतीक्षामहे। तत आत्मापि स्वयम् अस्माकं दुर्ब्बलतायाः
सहायत्वं करोति; यतः किं प्रार्थितव्यं तद् बोद्धुं वयं न शक्नुमः,
२७ किन्त्वस्पष्टैरार्त्तरावैरात्मा स्वयम् अस्मन्निमित्तं निवेदयति। अपरम्
ईश्वराभिमतरूपेण पवित्रलोकानां कृते निवेदयति य आत्मा
२८ तस्याभिप्रायोऽन्तर्य्यामिना ज्ञायते। अपरम् ईश्वरीयनिरूपणानु-
सारेणाहूताः सन्तो ये तस्मिन् प्रीयन्ते सर्व्वाणि मिलित्वा तेषां
२९ मङ्गलं साधयन्ति, एतद् वयं जानीमः। यत ईश्वरो बहुभ्रातृणां
मध्ये स्वपुत्त्रं ज्येष्ठं कर्त्तुम् इच्छन् यान् पूर्व्वं लक्ष्यीकृतवान् तान्
३० तस्य प्रतिमूर्त्याः सादृश्यप्राप्त्यर्थं न्ययुङ्क्त। अपरञ्च तेन ये नियुक्तास्त
आहूता अपि ये च तेनाहूतास्ते धार्म्मिकीकृताः, ये च तेन धार्म्मि-
कीकृतास्ते विभवयुक्ताः।

इत्यत्र वयं किं ब्रूमः? ईश्वरो यद्यस्माकं सपक्षो भवति तर्हि ३१
को विपक्षोऽस्माकं? आत्मपुत्रं न रक्षित्वा योऽस्माकं सर्व्वेषां कृते ३२
तं प्रदत्तवान् स किं तेन सहास्मभ्यम् अन्यानि सर्व्वाणि न
दास्यति? ईश्वरस्याभिरुचितेषु केन दोष आरोपयिष्यते? य ३३
ईश्वरस्तान् धार्म्मिकीकरोति किं तेन? अपरं तेभ्यो दण्डदानाज्ञा ३४
वा केन करिष्यते? योऽस्मन्निमित्तं प्राणान् त्यक्तवान् केवलं तन्न
किन्तु मृतगणमध्याद् उत्थितवान्, अपि चेश्वरस्य दक्षिणे पार्श्वे
तिष्ठन् अद्याप्यस्माकं निमत्तं प्रार्थत एवम्भूतो यः ख्रीष्टः किं तेन?
अस्माभिः सह ख्रीष्टस्य प्रेमविच्छेदं जनयितुं कः शक्नोति? क्लेशो ३५
व्यसनं वा ताडना वा दुर्भिक्षं वा वस्त्रहीनत्वं वा प्राणसंशयो वा
खड्गो वा किमेतानि शक्नुवन्ति? किन्तु लिखितम् आस्ते, यथा, ३६

'वयं तव निमित्तं स्मो मृत्युवक्त्रेऽखिलं दिनं।
बलिदेयो यथा मेषो वयं गण्यामहे तथा।'

अपरं योऽस्मासु प्रीयते तेनैतासु विपत्सु वयं सम्यग् विजयामहे। ३७
यतोऽस्माकं प्रभुना यीशुख्रीष्टेनेश्वरस्य यत् प्रेम तस्माद् अस्माकं ३८
विच्छेदं जनयितुं मृत्यु र्जीवनं वा दिव्यदूता वा बलवन्तो मुख्य-
दूता वा वर्त्तमानो वा भविष्यन् कालो वा उच्चपदं वा नीचपदं ३९
वापरं किमपि सृष्टवस्तु वैतेषां केनापि न शक्यमित्यस्मिन् दृढ-
विश्वासो ममास्ते।

---

९ नवमोऽध्यायः।

१ यिहूदिनामर्थं पौलस्य मनस्तापः ६ इब्राहीमस्य सर्व्वेषु सन्तानेषु नानुग्रहत्वं १४ कर्म्मणा नानुग्रहः किन्त्वीश्वरीयेच्छानुसारादेव भवतीति कथनं १९ कुलालस्य दृष्टान्तेन विवादिन उत्तरम् ईश्वरस्य न्याय्यत्वञ्च।

अहं काञ्चिद् कल्पितां कथां न कथयामि, ख्रीष्टस्य साक्षात् १

सत्यमेव ब्रवीमि पवित्रस्यात्मनः साचान् मदीयं मन एतत् साच्यं
२ ददाति। ममान्तरतिशयदुःखं निरन्तरं खेदश्च तस्माद् अहं स्वजा-
३ तीयभ्रातृणां निमित्तात् स्वयं ख्रीष्टाच्छापाक्रान्तो भवितुम्
४ ऐच्छम्। यतस्त इस्रायेलस्य वंशा अपि च दत्तकपुत्रत्वं तेजो
नियमो व्यवस्थादानं मन्दिरे भजनं प्रतिज्ञाः पितृपुरुषगणश्चैतेषु
५ सर्व्वेषु तेषाम् अधिकारोऽस्ति। तत् केवलं नहि किन्तु सर्व्वाध्यचः
सर्व्वदा सच्चिदानन्द ईश्वरो यः ख्रीष्टः सोऽपि शारीरिकसम्बन्धेन
तेषां वंशसम्भवः।

६ ईश्वरस्य वाक्यं विफलं जातम् इति नहि यत्कारणाद् इस्राये-
७ लस्य वंशे ये जातास्ते सर्व्वे वस्तुत इस्रायेलीया न भवन्ति। अपरम्
अब्राहामस्य वंशे जाता अपि सर्व्वे तस्यैव सन्ताना न भवन्ति
८ किन्तु इस्हाकस्य नाम्ना तव वंशो विख्यातो भविष्यति। अर्थात्
शारीरिकसंसर्गात् जाताः सन्ताना यावन्तस्तावन्त एवेश्वरस्य सन्ताना
न भवन्ति किन्तु प्रतिश्रवणाद् ये जायन्ते त एवेश्वरवंशा गण्यन्ते।
९ यतस्तत्प्रतिश्रुते वाक्यमेतत्, 'एतादृशे समये ऽहं पुनरागमिष्यामि
१० तत्पूर्वं सारायाः पुत्र एको जनिष्यते।' अपरमपि वदामि स्वमनो-
ऽभिलाषत ईश्वरेण यन्निरूपितं तत् कर्म्मतो नहि किन्त्वाह्वयितु
११ र्जातमेतद् यथा सिद्ध्यति तदर्थं रिबकानामिकया योषिता जनै-
कस्माद् अर्थाद् अस्माकम् इस्हाकात् पूर्व्वपुरुषाद् गर्भे धृते तस्याः
१२ सन्तानयोः प्रसवात् पूर्व्वं किञ्च तयोः शुभाशुभकर्म्मणः करणात
१३ पूर्व्वं तां प्रतीदं वाक्यम् उक्तं, ज्येष्ठः कनिष्ठं सेविष्यते, यथा लिखि-
तम् आस्ते, 'तथाप्येषावि न प्रीला याकोवे प्रीतवान् अहं।'

१४ तर्हि वयं किं ब्रूमः? ईश्वरः किम् अन्यायकारी? तथा न
१५ भवतु। यतः स स्वयं मोशिम् अवदत्; 'अहं यस्मिन् अनुग्रहं

चिकीर्षामि तमेवानुगृह्णामि, यञ्च दयितुम् इच्छामि तमेव दये।'
अतएवेच्छता यतमानेन वा मानवेन तन्न साध्यते दयाकारिणेश्वरे- १६
णैव साध्यते। फिरौणि शास्त्रे लिखति, 'अहं त्वद्द्वारा मत्पराक्रमं १७
दर्शयितुं सर्व्वपृथिव्यां निजनाम प्रकाशयितुञ्च त्वां स्थापितवान्।'
अतः स यम् अनुग्रहीतुम् इच्छति तमेवानुगृह्णाति, यञ्च निग्रही- १८
तुम् इच्छति तं निगृह्णाति।

यदि वदसि तर्हि स दोषं कुतो गृह्णाति? तदीयेच्छायाः १९
प्रतिबन्धकत्वं कर्त्तुं कस्य सामर्थ्यं विद्यते? हे ईश्वरस्य प्रतिपक्ष २०
मर्त्य त्वं कः? एतादृशं मां कुतः सृष्टवान्? इति कथां सृष्टवस्तु
स्रष्ट्रे किं कथयिष्यति? एकस्मान् मृत्पिण्डाद् उत्कृष्टापकृष्टौ २१
द्विविधौ कलशौ कर्त्तुं किं कुलालस्य सामर्थ्यं नास्ति? ईश्वरः २२
कोपं प्रकाशयितुं निजशक्तिं ज्ञापयितुञ्चेच्छन् यदि विनाशस्य
योग्यानि क्रोधभाजनानि प्रति बहुकालं दीर्घसहिष्णुताम् आश्रयति;
अपरञ्च विभवप्राप्त्यर्थं पूर्व्वं नियुक्तान्यनुग्रहपात्राणि प्रति निज २३
विभवस्य बाहुल्यं प्रकाशयितुं केवलयिहूदिनां नहि परजातीया- २४
नामपि मध्याद् अस्मानिव तान्याह्वयति तत्र तव किं? होशेय- २५
ग्रन्थे यथा लिखितम् आस्ते,

'यो लोको मम नासीत् तं वदिष्यामि मदीयकं।
या जाति र्मेऽप्रिया चासीत् तां वदिष्याम्यहं प्रियां।
यूयं मदीयलोका न यत्रेति वाक्यमौच्यत। २६
अमरेशस्य सन्ताना इति ख्यास्यन्ति तत्र ते।'

इस्रायेलीयलोकेषु यिशायाहोऽपि वाचमेतां प्राचारयत्, २७

'इस्रायेलीयवंशानां या संख्या सा तु निश्चितं।
सामुद्रसिकतासंख्यासमाना यदि जायते।

तथापि केवलं लोकैरल्पैस्त्राणं व्रजिष्यते।
२८ यतो न्यायेन स्वं कर्म्म परेशः साधयिष्यति।
देशे सएव संक्षेपान्निजं कर्म्म करिष्यति।'
२९ यिशायाह्योऽपरमपि कथयामास,
'सैन्याध्यक्षपरेशेन चेत् किञ्चिन्नोदशिष्यत।
तदा वयं सिदोमेवाभविष्याम विनिश्चितं।
यद्वा वयम् अमोराया अगमिष्याम तुल्यतां।'
३० तर्हि वयं किं वक्ष्यामः? परजातीया लोका अपि धार्म्मिकतार्थम्
३१ अयतमाना विश्वासेन धार्म्मिकताम् अलभन्त; किन्त्विस्रायेल्लोका
३२ व्यवस्थापालनेन धार्म्मिकतार्थं यतमानास्तन् नालभन्त। तस्य किं
कारणं? ते विश्वासेन नहि किन्तु व्यवस्थायाः क्रियया चेष्टित्वा
३३ तस्मिन् स्खलनजनके पाषाणे पादस्खलनं प्राप्ताः। लिखितं यादृ-
शम् आस्ते,
'पश्य पादस्खलार्थं हि सीयोनि प्रस्तरन्तथा।
बाधाकारञ्च पाषाणं परिस्थापितवानहम्।
विश्वसिष्यति यस्तत्र स जनो न त्रपिष्यते।'

१० दशमोऽध्यायः।

१ यिहूदीयलोकानां व्यवस्थया त्राणाप्राप्तिः केवलविश्वासेन त्राणप्राप्तिः १४ विश्वासेनान्यलोकानां त्राणप्राप्तिः, अविश्वासेन यिहूदिनां त्राणाप्राप्तिश्च।

१ हे भ्रातर इस्रायेलीयलोका यत् परित्राणं प्राप्नुवन्ति तदहं
२ मनसाभिलषन् ईश्वरस्य समीपे प्रार्थये। यत ईश्वरे तेषां चेष्टा
विद्यत इत्यत्राहं साक्ष्यस्मि; किन्तु तेषां सा चेष्टा सज्ञाना नहि,
३ यतस्त ईश्वरदत्तां धार्म्मिकताम् अविज्ञाय स्वकृतधार्म्मिकतां स्थाप-
यितुम् चेष्टमाना ईश्वरदत्ताया धार्म्मिकताया निघ्नत्वं न स्वीकुर्व्वन्ति।

ख्रीष्ट एकैकविश्वासिजनाय धार्म्मिकताम् दातुं व्यवस्थायाः फल- ४
स्वरूपो भवति। व्यवस्थापालनेन या धार्म्मिकता तां मोशिर्वर्ण- ५
यामास, यथा, 'यो जनस्तां पालयिष्यति स तद्द्वारा जीविष्यति।'
किन्तु विश्वासेन या धार्म्मिकता ता एतादृशं वाक्यं वदति, 'कः ६
स्वर्गम् आरुह्य ख्रीष्टम् अवरोहयिष्यति? को वा प्रेतलोकम् ७
अवरुह्य ख्रीष्टं मृतगणमध्याद् आनेष्यतीति वाक् मनसि त्वया न
गदितव्या।' तर्हि किं ब्रवीति? 'तद् वाक्यं तव समीपस्थम् ८
अर्थात् तव वदने मनसि चास्ते,' तच्च वाक्यम् अस्माभिः प्रचार्य्य-
माणं विश्वासस्य वाक्यमेव। वस्तुतः प्रभुं यीशुं यदि वदनेन स्वीक- ९
रोषि, तथेश्वरस्तं मृतगणमध्याद् उदस्थापयद् इति यद्यन्तःकरणेन
विश्वसिषि तर्हि परित्राणं लप्स्यसे। यस्मात् धार्म्मिकता प्राप्त्यर्थम् १०
अन्तःकरणेन विश्वसितव्यं परित्राणार्थञ्च वदनेन स्वीकर्त्तव्यं। शास्त्रे ११
यादृशं लिखति 'विश्वसिष्यति यस्तत्र स जनो न त्रपिष्यते।' इत्यत्र १२
यिहूदिनि परजातीयलोके च कोपि विशेषो नास्ति यस्माद् यः
सर्व्वेषाम् अद्वितीयः प्रभुः स निजयाचकान् सर्व्वान् प्रति वदान्यो
भवति। यतः,

'यः कश्चित् परमेशस्य नाम्ना हि प्रार्थयिष्यते। १३
स एव मनुजो नूनं परित्रातो भविष्यति।'

यस्मिन् ये जना न व्यश्वसिषुस्ते तमुद्दिश्य कथं प्रार्थयिष्यन्ते? ये वा १४
यस्याख्यानं कदापि न श्रुतवन्तस्ते तस्मिन् कथं विश्वसिष्यन्ति? अपरं
यदि प्रचारयितारो न तिष्ठन्ति तदा कथं ते श्रोष्यन्ति? यदि वा १५
प्रेरिता न भवन्ति तदा कथं प्रचारयिष्यन्ति? यादृशं लिखितम्
आस्ते, यथा,

'माङ्गलिकं सुसंवादं ददत्यानीय ये नराः।

प्रचारयन्ति शान्तेश्च सुसंवादं जनास्तु ये ।
तेषां चरणपद्मानि कीदृक् शोभान्वितानि हि ।'

१६ किन्तु ते सर्व्वे तं सुसंवादं न गृहीतवन्तः । यिशायाहो यथा लिखितवान्,

अस्मत्प्रचारिते वाक्ये विश्वासमकरोद्धि कः ।'

१७ अतएव श्रवणाद् विश्वास ऐश्वरवाक्यप्रचारात् श्रवणञ्च भवति ।

१८ तर्ह्यहं ब्रवीमि तैः किं नाश्रावि? अवश्यम् अश्रावि, यस्मात्

तेषां शब्दो महीं व्याप्नोद् वाक्यञ्च निखिलं जगत् ।

१९ अपरमपि वदामि, इस्रायेलीयलोकाः किम् एतां कथां न बुध्यन्ते? प्रथमतो मोशिरिदं वाक्यं प्रोवाच,

अहमुत्तापयिष्ये तान् अगण्यमानवैरपि ।
क्लेक्ष्यामि जातिम् एताञ्च प्रोन्मत्तभिन्नजातिभिः ।

२० अपरञ्च यिशायाहोऽतिशयाक्षोभेण कथयामास, यथा,

अधि मां यैस्तु नाचेष्टि सम्प्राप्तस्तै र्जनैरहं ।
अधि मां यै र्न सम्पृष्टं विज्ञातस्तै र्जनैरहं ॥

२१ किन्त्विस्रायेलीयलोकान् अधि कथयाञ्चकार,

यैराज्ञालङ्घिभि र्लोकै र्विरुद्धं वाक्यमुच्यते ।
तान् प्रत्येव दिनं कृत्स्नं हस्तौ विस्तारयाम्यहं ॥

---

११ एकादशोऽध्यायः ।

१ सर्व्वेषाम् इस्रायेलीयलोकानां नाग्राह्यत्वं ७ अमनोनीतलोकानाम् अग्राह्यत्वं ११ तेषां पतनाद् परजातीयानां परित्राणत्वं २७ परजातीयानां अभिमानकरणानुचितत्वं तथा न्यायतो दयात ईश्वरस्य धन्यवादकरणोचितत्वञ्च ।

१ ईश्वरेण स्वकीयलोका अपसारिता अहं किम् ईदृशं वाक्यं ब्रवीमि? तन्न भवतु यतोऽहमपि बिन्यामीनगोत्रीय इब्राहाम-

वंशीय इस्रायेलीयलोकोऽस्मि। ईश्वरेण पूर्व्वं ये प्रदृष्टास्ते स्वकीय- २
लोका अपसारिता इति नहि। अपरम् एलियोपाख्याने शास्त्रे
यल्लिखितम् आस्ते तद् यूयं किं न जानीथ? 'हे परमेश्वर ३
लोकास्त्वदीयाः सर्व्वा यज्ञवेदीरभञ्जन् तथा तव भाववादिनः
सर्व्वान् अघ्नन् केवल एकोऽहम् अवशिष्ट आसे ते ममापि प्राणान्
नाशयितुं चेष्टन्ते,' एतां कथाम् इस्रायेलीयलोकानां विरुद्धम्
एलिय ईश्वराय निवेदयामास। ततस्तं प्रतीश्वरस्योत्तरं किं जातं? ४
बाल्नाम्नो देवस्य साक्षात् यै र्जानूनि न पातितानि तादृशाः सप्त
सहस्राणि लोका अवशेषिता मया। तद्वद् एतस्मिन् वर्त्तमान- ५
कालेऽपि अनुग्रहेणाभिरुचितास्तेषाम् अवशिष्टाः कतिपया लोकाः
सन्ति। अतएव तद् यद्यनुग्रहेण भवति तर्हि क्रियया न भवति ६
नो चेद् अनुग्रहोऽननुग्रह एव, यदि वा क्रियया भवति तर्ह्यनुग्रहेण
न भवति नो चेत् क्रिया क्रियैव न भवति।

तर्हि किं? इस्रायेलीयलोका यद् अमृगयन्त तन्न प्रापुः। ७
किन्त्वभिरुचितलोकास्तत् प्रापुस्तदन्ये सर्व्वे अन्धीभूताः। यथा ८
लिखितम् आस्ते,

घोरनिद्रालुताभावं दृष्टिहीने च लोचने।
कर्णौ श्रुतिविहीनौ च प्रददौ तेभ्य ईश्वरः॥

एतस्मिन् दायूदोऽपि लिखितवान् यथा, ९

अतो भुक्त्यासनं तेषाम् उन्माथवद् भविष्यति।
वा वंशयन्त्रवद् बाधा दण्डवद् वा भविष्यति॥
भविष्यन्ति तथान्धास्ते नेत्रैः पश्यन्ति नो यथा। १०
वेपथुः कटिदेशस्य तेषां नित्यं भविष्यति॥

पतनार्थं ते स्खलितवन्त इति वाचं किमहं वदामि? तन्न ११

भवतु किन्तु तान् उद्योगिनः कर्त्तुं तेषां पतनात् परजातीय-
१२ लोकैः परित्राणं प्राप्तं। तेषां पतनं यदि जगतो लोकानां लाभ-
जनकम् अभवत् तेषां ह्रासोऽपि यदि परजातीयानां लाभजनकोऽ-
१३ भवत् तर्हि तेषां वृद्धिः कति लाभजनिका भविष्यति? अतो
हे परजातीया युष्मान् सम्बोध्य कथयामि निजानां ज्ञातिबन्धूनां
मनःसूद्योगं जनयन् तेषां मध्ये कियतां लोकानां यथा परित्राणं
१४ साधयामि तन्निमित्तं परजातीयानां निकटे प्रेरितः सन् अहं
१५ स्वपदस्य महिमानं प्रकाशयामि। तेषां निग्रहेण यदीश्वरेण सह
जगतो जनानां मेलनं जातं तर्हि तेषाम् अनुगृहीतत्वं मृतदेहे
१६ यथा जीवनलाभस्तद्वत् किं न भविष्यति? अपरं प्रथमजातं फलं
यदि पवित्रं भवति तर्हि सर्व्वमेव फलं पवित्रं भविष्यति; तथा
मूलं यदि पवित्रं भवति तर्हि शाखा अपि तथैव भविष्यन्ति।
१७ कियतीनां शाखानां छेदने कृते त्वं वन्यजितवृक्षस्य शाखा भूत्वा
यदि तच्छाखानां स्थाने रोपिता सती जितवृक्षीयमूलस्य रसं
१८ भुंक्षे, तर्हि तासां भिन्नशाखानां विरुद्धं मा गर्व्वीः; यदि गर्व्वसि
तर्हि त्वं मूलं यन्न धारयसि किन्तु मूलं त्वां धारयतीति संस्मर।
१९ अपरञ्च यदि वदसि मां रोपयितुं ताः शाखा विभिन्ना अभवन्;
२० भद्रम्, अविश्वासकारणात् ते विभिन्ना जातास्तथा विश्वासकारणात्
त्वं रोपितो जातस्तस्माद् अहङ्कारम् अकृत्वा ससाध्वसो भव।
२१ यत ईश्वरो यदि स्वाभाविकीः शाखा न रक्षति तर्हि सावधानो
२२ भव चेत् त्वामपि न स्थापयति। इत्यत्रेश्वरस्य यादृशी कृपा तादृशं
भयानकत्वमपि त्वया दृश्यतां; ये पतितास्तान् प्रति तस्य भयानकत्वं
दृश्यतां, त्वञ्च यदि तत्कृपाश्रितस्तिष्ठसि तर्हि त्वां प्रति कृपा
द्रक्ष्यते; नो चेत् त्वमपि तद्वत् छिन्नो भविष्यसि।

अपरञ्च ते यद्यविश्वासे न तिष्ठन्ति तर्हि पुनरपि रोपयिष्यन्ते २३
यस्मात् तान् पुनरपि रोपयितुम् ईश्वरस्य शक्तिरास्ते। वन्यजित- २४
वृक्षस्य शाखा सन् त्वं यदि ततश्छिन्नो रीतिव्यत्ययेनोत्तमजितवृक्षे
रोपितोऽभवस्तर्हि तस्य वृक्षस्य स्वीया याः शाखास्ताः किं पुनः
स्ववृक्षे संलगितुं न शक्नुवन्ति? हे भ्रातरो युष्माकम् आत्माभि- २५
मानो यन्न जायते तदर्थं ममेदृशी वाञ्छा भवति यूयं एतन्नि-
गूढतत्त्वम् अजानन्तो यन्न तिष्ठथ; वस्तुतो यावत्कालं सम्पूर्णरूपेण
परजातीयानां संग्रहो न भविष्यति तावत्कालम् अंशत्वेन इस्राये-
लीयलोकानाम् अन्धता स्थास्यति; पश्चात् ते सर्व्वे परित्रास्यन्ते; २६
एतादृशं लिखितमप्यास्ते,

आगमिष्यति सीयोनाद् एको यस्त्राणदायकः।
अधर्म्मं याकोबो वंशात् स तु दूरीकरिष्यति।
तथा दूरीकरिष्यामि तेषां पापान्यहं यदा। २७
तदा तैरेव सार्द्धं मे नियमोऽयं भविष्यति।

सुसंवादात् ते युष्माकं विपक्षा अभवन् किन्त्वभिरुचितत्वात् ते २८
पितृलोकानां कृते प्रियपात्राणि भवन्ति। यत ईश्वरस्य दानाद् २९
आह्वानाच्च पश्चात्तापो न भवति। अतएव पूर्व्वम् ईश्वरेऽविश्वा- ३०
सिनः सन्तोऽपि यूयं यद्वत् सम्प्रति तेषाम् अविश्वासकारणाद्
ईश्वरस्य कृपापात्राणि जातास्तद्वद् इदानीं तेऽविश्वासिनः सन्ति ३१
किन्तु युष्माभि र्लब्धकृपाकारणात् तैरपि कृपा लप्स्यते। ईश्वरः ३२
सर्व्वान् प्रति कृपां प्रकाशयितुं सर्व्वान् अविश्वासित्वेन गणयति।
अहो ईश्वरस्य ज्ञानबुद्धिरूपयो र्धनयोः कीदृक् प्राचुर्य्यं। तस्य ३३
राजशासनस्य तत्त्वं कीदृग् अप्राप्यं। तस्य मार्गाश्च कीदृग्
अनुपलक्ष्याः। परमेश्वरस्य सङ्कल्पं को ज्ञातवान्? तस्य मन्त्री वा ३४

३५ कोऽभवत्? को वा तस्योपकारी भूत्वा तत्कृते तेन प्रत्युपकर्त्तव्यः?
३६ यतो वस्तुमात्रमेव तस्मात् तेन तस्मै चाभवत् तदीयो महिमा
सर्व्वदा प्रकाशितो भवतु। इति।

१२ द्वादशोऽध्यायः।

१ ईश्वरस्य कृपातो यथाशक्ति तस्य सेवनमुचितं ९ प्रेमादि कर्त्तुं हिंसामकर्त्तुमुपदेशश्च।

१ हे भ्रातर ईश्वरस्य कृपयाहं युष्मान् विनये यूयं स्वं स्वं शरीरं
सजीवं पवित्रं ग्राह्यं बलिम् ईश्वरमुद्दिश्य समुत्सृजत, एषा सेवा
२ युष्माकं योग्या। अपरं यूयं सांसारिका इव माचरत, किन्तु
स्वं स्वं स्वभावं परावर्त्त्य नूतनाचारिणो भवत, तत ईश्वरस्य निदेशः
कीदृग् उत्तमो ग्रहणीयः सम्पूर्णश्चेति युष्माभिरनुभाविष्यते।
३ कश्चिदपि जनो योग्यत्वादधिकं स्वं न मन्यतां किन्तु ईश्वरो
यस्मै विश्वासस्य यत्परिमाणम् अददात् स तदनुसारतो योग्यरूपं
स्वं मनुताम्, ईश्वराद् अनुग्रहं प्राप्तः सन् युष्माकम् एकैकं जनम्
४ इत्याज्ञापयामि। यतो यद्वदस्माकम् एकस्मिन् शरीरे बहून्यङ्गानि
५ सन्ति किन्तु सर्व्वेषामङ्गानां कार्य्यं समानं नहि; तद्वदस्माकं बहुत्वेऽपि सर्व्वे वयं ख्रीष्टे एकशरीराः परस्परम् अङ्गप्रत्यङ्गत्वेन भवामः।
६ अस्माद् ईश्वरानुग्रहेण विशेषं विशेषं दानम् अस्मासु प्राप्तेषु सत्सु
कोपि यदि भाववाक्यं वदति तर्हि विश्वासस्य परिमाणानुसारतः
७ स तद् वदतु; यद्वा यदि कश्चित् सेवनकारी भवति तर्हि स
तत्सेवनं करोतु; अथवा यदि कश्चिद् अध्यापयिता भवति तर्हि
८ सोऽध्यापयतु; तथा य उपदेष्टा भवति स उपदिशतु; यश्च दाता
स सरलतया ददातु, यस्त्वधिपतिः स यत्नेनाधिपतित्वं करोतु,
यश्च दयालुः स हृष्टमनसा दयताम्।

अपरञ्च युष्माकं प्रेम कापट्यवर्जितं भवतु; यद् अभद्रं तद् ९
ऋतीयध्वं यच्च भद्रं तस्मिन् अनुरज्यध्वम्। अपरं भ्रातृत्वप्रेम्ना १०
परस्परं प्रीयध्वं समादराद् एकोऽपरजनं श्रेष्ठं जानीध्वम्। तथा ११
कार्य्ये निरालस्या मनसि च सोद्योगाः सन्तः प्रभुं सेवध्वम् अपरं १२
प्रत्याशायाम् आनन्दिता दुःखसमये च धैर्य्ययुक्ता भवत; प्रार्थनायां
सततं प्रवर्त्तध्वं। पवित्राणां दीनतां दूरीकुरुध्वम् अतिथिसेवायाम् १३
अनुरज्यध्वम्। ये जना युष्मान् ताडयन्ति तान् आशिषं वदत, १४
शापम् अदत्त्वा दद्ध्वमाशिषम्। ये जना आनन्दन्ति तैः सार्द्धम् १५
आनन्दत ये च रुदन्ति तैः सह रुदित। अपरञ्च युष्माकं मनसां १६
परस्परम् एको भावो भवतु; अपरम् उच्चपदम् अनाकाङ्क्ष्य
नीचलोकैः सहापि मार्दवम् आचरत; स्वान् ज्ञानिनो न मन्यध्वं।
परस्माद् अपकारं प्राप्यापि परं नापकुरुत। सर्व्वेषां दृष्टितो १७
यत् कर्म्मोत्तमं तदेव कुरुत। यदि भवितुं शक्यते तर्हि यथाशक्ति १८
सर्व्वलोकैः सह निर्व्विरोधेन कालं यापयत। हे प्रियबन्धवः, १९
कस्मैचिद् अपकारस्य समुचितं दण्डं स्वयं न दद्ध्वं, किन्त्वीश्वरीय-
क्रोधाय स्थानं दत्त यतो लिखितमास्ते परमेश्वरः कथयति,

दानं फलस्य मत्कर्म्म सुचितं प्रददाम्यहं।

इतिकारणाद् २०

रिपु र्यदि क्षुधार्त्तस्ते तर्हि तं त्वं प्रभोजय।
तथा यदि तृषार्त्तः स्यात् तर्हि तं परिपायय।
तेन त्वं मस्तके तस्य ज्वलदग्निं निधास्यसि।

कुक्रियया पराजिता न सन्त उत्तमक्रियया कुक्रियां पराजयत। २१

१३ त्रयोदशोऽध्यायः ।

१ राजप्रभृतिलोकानां वशीभूतत्वम् उचितं ८ व्यवस्थायाः सारं प्रेम ११ अन्धकाररूपं कर्म्म परित्यज्य दीप्तिरूपकर्म्मणोऽवश्यकर्त्तव्यत्वञ्च ।

१ युष्माकम् एकैकजनः शासनपदस्य निघ्नो भवतु यतो यानि
शासनपदानि सन्ति तानि सर्व्वाणीश्वरेण स्थापितानि; ईश्वरं
२ विना पदस्थापनं न भवति। इति हेतोः शासनपदस्य यत्
प्रातिकूल्यं तद् ईश्वरीयनिरूपणस्य प्रातिकूल्यमेव; अपरं ये
प्रातिकूल्यम् आचरन्ति ते स्वेषां समुचितं दण्डं स्वयमेव घट-
३ यन्ते। शास्ता सदाचारिणां भयप्रदो नहि दुराचारिणामेव
भयप्रदो भवति; त्वं किं तस्मान् निर्भयो भवितुम् इच्छसि?
४ तर्हि सत्कर्म्माचर, तस्माद् यशो लप्स्यसे, यतस्तव सदाचरणाय
स ईश्वरस्य भृत्योऽस्ति। किन्तु यदि कुकर्म्माचरसि तर्हि त्वं
शङ्कस्व यतः स निरर्थकं खड्गं न धारयति; कुकर्म्माचारिणं
५ समुचितं दण्डयितुम् स ईश्वरस्य दण्डदभृत्य एव। अतएव केव-
लदण्डभयान्नहि किन्तु सदसद्बोधादपि तस्य वश्येन भवितव्यं।
६ एतस्माद् युष्माकं राजकरदानमप्युचितं यस्माद् ये करं गृह्लन्ति
त ईश्वरस्य किङ्करा भूत्वा सततम् एतस्मिन् कर्म्मणि निविष्टा-
७ स्तिष्ठन्ति। अस्मात् करग्राहिणे करं दत्त, तथा शुल्कग्राहिणे
शुल्कं दत्त, अपरं यस्माद् भेतव्यं तस्माद् बिभीत, यश्च समाद-
रणीयस्तं समाद्रियध्वम्; इत्थं यस्य यत् प्राप्यं तत् तस्मै दत्त।

८ युष्माकं परस्परं प्रेम विनान्यत् किमपि देयम् ऋणं न
भवतु, यतो यः परस्मिन् प्रेम करोति तेन व्यवस्था सिध्यति।
९ वस्तुतः परदारान् मा गच्छ, नरहत्यां मा कार्षीः, चौर्य्यं मा
कार्षीः, मिथ्यासाक्ष्यं मा देहि, लोभं मा कार्षीः, एताः सर्व्वा

आज्ञा एताभ्यो भिन्ना या काचिद् आज्ञास्ति सापि स्वसमी-
पवासिनि स्ववत् प्रेम कुर्व्वित्यनेन वचनेन वेदिता। यतः प्रेम १०
समीपवासिनोऽशुभं न जनयति तस्मात् प्रेम्ना सर्व्वा व्यवस्था
पाल्यते।

विश्वासीभवनकालेऽस्माकं परित्राणस्य सामीप्याद् इदानीं तस्य ११
सामीप्यम् अव्यवहितं; अतः समयं विविच्यास्माभिः साम्प्रतम्
अवश्यमेव निद्रातो जागर्त्तव्यं। बहुतरा यामिनी गता प्रभातं १२
सन्निधिं प्राप्तं तस्मात् तामसीयाः क्रियाः परित्यज्यास्माभि र्वासरीया
सज्जा परिधातव्या। अतो हेतो र्वयं दिवा विहितं सदाचरणम् १३
आचरिष्यामः। रङ्गरसो मत्तत्वं लम्पटत्वं कामुकत्वं विवाद ईर्ष्या
चैतानि परित्यक्ष्यामः। यूयं प्रभुयीशुख्रीष्टरूपं परिच्छदं परिधद्धं १४
सुखाभिलाषपूरणाय शारीरिकाचरणं माचरत।

---

१४ चतुर्दशोऽध्यायः।

१ खाद्यार्थं भ्रातृगणस्य तुच्छीकरणमनुचितं १३ भक्ष्येण नहि किन्त्वविश्वासेन मनुजानाम् अशुचित्वञ्च।

योऽ जनोऽदृढविश्वासस्तं युष्माकं सङ्गिनं कुरुत किन्तु सन्देह- १
विचारार्थं नहि। यतो निषिद्धं किमपि खाद्यद्रव्यं नास्ति, कस्य- २
चिज्जनस्य प्रत्यय एतादृशो विद्यते किन्त्वदृढविश्वासः कश्चिदपरो
जनः केवलं शाकं भुङ्क्ते। तर्हि यो जनः साधारणं द्रव्यं भुङ्क्ते स ३
विशेषद्रव्यभोक्तारं नावजानीयात् तथा विशेषद्रव्यभोक्तापि साधा-
रणद्रव्यभोक्तारं दोषिणं न कुर्य्यात्, यस्माद् ईश्वरस्तम् अगृह्लात्।
हे परदासस्य दूषयितस्त्वं कः? निजप्रभोः समीपे तेन पदस्थेन ४
पदच्युतेन वा भवितव्यं स च पदस्थ एव भविष्यति यत ईश्वरस्तं

५ पदस्थं कर्त्तुं शक्नोति। अपरञ्च कश्चिज्जनो दिनाद् दिनं विशेषं
मन्यते कश्चित्तु सर्व्वाणि दिनानि समानानि मन्यते, एकैको जनः
६ स्वीयमनसि विविच्य निश्चिनोतु। यो जनः किञ्चन दिनं विशेषं
मन्यते स प्रभुभक्त्या तन् मन्यते, यश्च जनः किमपि दिनं विशेषं
न मन्यते सोऽपि प्रभुभक्त्या तन्न मन्यते ; अपरञ्च यः सर्व्वाणि
भक्ष्यद्रव्याणि भुङ्क्ते स प्रभुभक्त्या तानि भुङ्क्ते यतः स ईश्वरं धन्यं
वक्ति, यश्च न भुङ्क्ते सोऽपि प्रभुभक्त्यैव न भुञ्जान ईश्वरं धन्यं ब्रूते।
७ अपरम् अस्माकं कश्चित् निजनिमित्तं प्राणान् धारयति निज-
८ निमित्तं म्रियते वा तन्न ; किन्तु यदि वयं प्राणान् धारयामस्तर्हि
प्रभुनिमित्तं धारयामः, यदि च प्राणान् त्यजामस्तर्ह्यपि प्रभुनिमित्तं
९ त्यजामः, अतएव जीवने मरणे वा वयं प्रभोरेवास्महे। यतो
जीवन्तो मृताश्चेत्युभयेषां लोकानां प्रभुत्वप्राप्त्यर्थं ख्रीष्टो मृत
१० उत्थितः पुनर्जीवितश्च। किन्तु त्वं निजं भ्रातरं कुतो दूषयसि?
तथा त्वं निजं भ्रातरं कुतस्तुच्छं जानासि? ख्रीष्टस्य विचारसिंहासनस्य
११ सम्मुखे सर्व्वैरस्माभिरुपस्थातव्यं; यादृशं लिखितम् आस्ते,

परेशः शपथं कुर्व्वन् वाक्यमेतत् पुरावदत्।
सर्व्वो जनः समीपे मे जानुपातं करिष्यति।
जिह्वैकैका तथेशस्य निघ्नत्वं स्वीकरिष्यति।

१२ अतएव ईश्वरसमीपेऽस्माकम् एकैकजनेन निजा कथा कथयितव्या।
१३ इत्थं सति वयम् अद्यारभ्य परस्परं न दूषयन्तः स्वभ्रातु र्विघ्नो
१४ व्याघातो वा यन्न जायेत तादृशीमीहां कुर्म्महे। किमपि वस्तु
स्वभावतो नाशुचि भवतीत्यहं जाने तथा प्रभुना यीशुख्रीष्टेनापि
निश्चितं जाने, किन्तु यो जनो यद् द्रव्यम् अपवित्रं जानीते तस्य
१५ कृते तद् अपवित्रम् आस्ते। अतएव तव भक्ष्यद्रव्येण तव भ्राता

यदि शोकान्वितो भवति तर्हि त्वं भ्रातरं प्रति प्रेम्ना नाचरसि।
ख्रीष्टो यस्य कृते स्वप्राणान् व्ययितवान् त्वं निजेन भक्ष्यद्रव्येण तं
न नाशय। अपरं युष्माकम् उत्तमं कर्म्म निन्दितं न भवतु। १६
भक्ष्यं पेयञ्चेश्वरराज्यस्य सारो नहि, किन्तु धार्म्मिकता शान्तिश्च १७
पवित्रेणात्मना जात आनन्दश्च। एतै र्यो जनः ख्रीष्टं सेवते, स १८
एवेश्वरस्य तुष्टिकरो मनुष्यैश्च सुख्यात। अतएव येनास्माकं सर्व्वेषां १९
परस्परम् ऐक्यं निष्ठा च जायते तदेवास्माभि र्यतितव्यं। भक्ष्यार्थम् २०
ईश्वरस्य कर्म्मणो हानिं मा जनयत; सर्व्वं वस्तु पवित्रमिति सत्यं
तथापि यो जनो यद् भुक्त्वा विघ्नं लभते तदर्थं तद् भद्रं नहि।
तव मांसभक्षणसुरापानादिभिः क्रियाभि र्यदि तव भ्रातुः पाद- २१
स्खलनं विघ्नो वा चाञ्चल्यं वा जायते तर्हि तद्भोजनपानयोस्त्यागो
भद्रः। यदि तव प्रत्ययस्तिष्ठति तर्हीश्वरस्य गोचरे स्वान्तरे तं २२
गोपय; यो जनः स्वमतेन स्वं दोषिणं न करोति स एव धन्यः।
किन्तु यः कश्चित् संशय्य भुङ्क्तेऽर्थात् न प्रतीत्य भुङ्क्ते, स एवावश्यं २३
दण्डार्हो भविष्यति, यतो यत् प्रत्ययजं नहि तदेव पापमयं
भवति।

---

१५ पञ्चदशोऽध्यायः।

१ दुर्ब्बललोकानाम् उपकारकरणावश्यकता ८ सर्व्वविश्वासिनो भ्रातर इत्यादेशः १४ रोमिणां समीपं गन्तुं पौलस्य प्रतिज्ञा ३० निजार्थं प्रार्थयनमधि तेभ्यो निवेदनञ्च।

बलवद्भिरस्माभि र्दुर्ब्बलानां दौर्ब्बल्यं सोढव्यं न च स्वेषाम् १
इष्टाचार आचरितव्यः। अस्माकम् एकैको जनः स्वसमीपवासिनो २
हितार्थं निष्ठार्थञ्च तस्यैवेष्टाचारम् आचरतु। यतः ख्रीष्टोऽपि ३
निजेष्टाचारं नाचरितवान्, यथा लिखितम् आस्ते,

त्वन्निन्दकगणस्यैव निन्दाभि र्निन्दितोऽस्म्यहं ।
४ अपरञ्च वयं यत् सहिष्णुतासान्त्वनयो र्जनकेन शास्त्रेण प्रत्याशां
लभेमहि तन्निमित्तं पूर्व्वकाले लिखितानि सर्व्ववचनान्यस्माकम्
५ उपदेशार्थमेव लिलिखिरे। सहिष्णुतासान्त्वनयोराकरो य ईश्वरः
स एवं करोतु यत् प्रभु र्यीशुख्रीष्ट इव युष्माकम् एकजनोऽन्य-
६ जनेन सार्द्धं मनस ऐक्यम् आचरेत्; यूयञ्च सर्व्वे एकचित्ता भूत्वा
मुखैकेनेवास्मत्प्रभुयीशुख्रीष्टस्य पितुरीश्वरस्य गुणान् कीर्त्तयेत ।
७ अपरम् ईश्वरस्य महिम्नः प्रकाशार्थं ख्रीष्टो यथा युष्मान् प्रत्यगृह्लात्
तथा युष्माकमप्येको जनोऽन्यजनं प्रतिगृह्लातु ।
८ ईश्वरस्य सत्यता पितृपुरुषान् प्रति तस्य प्रतिज्ञा च यत्
९ प्रामाण्यं गच्छेत् तस्य दयालुत्वाच्च परजातीया यद् ईश्वरस्य गुणान्
कीर्त्तयेयुस्तदर्थं यीशुः ख्रीष्टस्त्वक्छेदनियमस्य निघ्नोऽभवद् इत्यहं
वदामि। यथा लिखितम् आस्ते,

अतोऽहं सम्मुखे तिष्ठन् भिन्नदेशनिवासिनां।
स्तुवंस्त्वां परिगास्यामि तव नाम्नि परेश्वर॥

१० अपरमपि लिखितम् आस्ते,

हे परजातयो यूयं समं नन्दत तज्जनैः।

११ पुनश्च लिखितम् आस्ते,

हे सर्व्वदेशिनो यूयं धन्यं ब्रूत परेश्वरं ।
हे तदीयनरा यूयं कुरुध्वं तत्प्रशंसनं॥

१२ अपर यीशायाहोऽपि लिलेख,

यीशयस्य तु यत् मूलं तत् प्रकाशिष्यते तदा।
सर्व्वजातीयनृणाञ्च शासकः समुदेष्यति ।
तत्रान्यदेशिलोकैश्च प्रत्याशा प्रकरिष्यते॥

अतएव यूयं पवित्रस्यात्मनः प्रभावाद् यत् सम्पूर्णां प्रत्याशां १३
लप्स्यध्वे तदर्थं तत्प्रत्याशाजनक ईश्वरो विश्वासेन युष्मान् शान्त्या-
नन्दाभ्यां सम्पूर्णान् करोतु।

हे भ्रातरो यूयं सद्भावयुक्ताः सर्व्वप्रकारेण ज्ञानेन च सम्पूर्णाः १४
परस्परोपदेशे च तत्परा इत्यहं निश्चितं जानामि, तथाप्यहं यत् १५
प्रगल्भतरो भवन् युष्मान् प्रबोधयामि तस्यैकं कारणमिदं। पर- १६
जातीयाः पवित्रेणात्मना पावितनैवेद्यरूपा भूत्वा यद् ग्राह्या
भवेयुस्तन्निमित्तमहम् ईश्वरस्य सुसंवादं प्रचारयितुं परजातीयानां
मध्ये यीशुख्रीष्टस्य सेवकत्वं दानं ईश्वरात् लब्धवानस्मि। ईश्वरं १७
प्रति यीशुख्रीष्टेन मम श्लाघाकरणस्य कारणम् आस्ते। परजाती- १८
यान् आज्ञाग्राहिणः कर्त्तुं ख्रीष्टो वाक्येन क्रियया च, आश्चर्य्य-
लक्षणैश्चित्रक्रियाभिः पवित्रस्यात्मनः प्रभावेन च यानि कर्म्माणि
मया साधितवान्, केवलं तान्येव विनान्यस्य कस्यचित् कर्म्मणो १९
वर्णनां कर्त्तुं प्रगल्भो न भवामि। तस्मात् आ यिरूशालेम
इल्लूरिकं यावत् सर्व्वत्र ख्रीष्टस्य सुसंवादं प्राचारयं। अन्येन निचि- २०
तायां भित्तावहं यन्न निचिनोमि तन्निमित्तं यत्र यत्र स्थाने
ख्रीष्टस्य नाम कदापि केनापि न ज्ञापितं तत्र तत्र सुसंवादं प्रचार-
यितुम् अहं यते। यादृशं लिखितम् आस्ते, २१

ये र्वार्त्ता तस्य न प्राप्ता दर्शनं तैस्तु लप्स्यते।
यैश्च नैव श्रुतं किञ्चित् बोद्धुं शक्ष्यन्ति ते जनाः॥

तस्माद् युष्मत्समीपगमनाद् अहं मुहुर्मुहु र्निवारितोऽभवं। किन्त्वि- २२
दानीम् अत्र प्रदेशेषु मया न गतं स्थानं किमपि नावशिष्यते २३
युष्मत्समीपं गन्तुं बहुवत्सरानारभ्य मामकीनाकाङ्क्षा च विद्यत
इति हेतोः स्पानियादेशगमनकालेऽहं युष्मन्मध्येन गच्छन् युष्मान् २४

आलोकिष्ये, ततः परं युष्मत्सम्भाषणेन तृप्तिं परिलभ्य तद्देशगमनार्थं
२५ युष्माभि र्विसर्जयिष्ये, ईदृशी मदीया प्रत्याशा विद्यते। किन्तु
२६ साम्प्रतं पवित्रलोकानां सेवनाय यिरूशालेमनगरं व्रजामि। यतो
यिरूशालेमस्थपवित्रलोकानां मध्ये ये दरिद्रा अर्थविश्राणनेन तानु-
पकर्त्तुं माकिदनियादेशीया आखायादेशीयाश्च लोका ऐच्छन्।
२७ एषा तेषां सदिच्छा यतस्ते तेषाम् ऋणिनः सन्ति यतो हेतोः
परजातीया येषां परमार्थस्यांशिनो जाता ऐहिकविषये तेषामुप-
२८ कारस्तैः कर्त्तव्यः। अतो मया तत् कर्म्म साधयित्वा तस्मिन् फले
२९ तेभ्यः समर्पिते युष्मन्मध्येन स्पानियादेशो गमिष्यते। युष्मत्समीपे
ममागमनसमये ख्रीष्टस्य सुसंवादस्य पूर्णवरेण सम्बलितः सन् अहम्
आगमिष्यामि इति मया ज्ञायते।

३० हे भ्रातृगण प्रभो र्यीशुख्रीष्टस्य नाम्ना पवित्रस्यात्मनः प्रेम्ना
३१ च विनयेऽहं यिहूदादेशस्थानाम् अविश्वासिलोकानां करेभ्यो यदहं
रक्षां लभेय मदीयैतेन सेवनकर्म्मणा च यद् यिरूशालेमस्थाः पवित्र-
३२ लोकास्तुष्येयुः, तदर्थं यूयं मत्कृत ईश्वराय प्रार्थयमाणा यतध्वं
तेनाहम् ईश्वरेच्छया सानन्दं युष्मत्समीपं गत्वा युष्माभिः सहितः
३३ प्राणान् आप्यायितुं पारयिष्यामि। शान्तिदायक ईश्वरो युष्माकं
सर्व्वेषां सङ्गी भूयात् इति।

१६ षोडशोऽध्यायः।

१ पौलस्य फैवीप्रशंसापत्रं बहुरोमिलोकानां नमस्कारश्च १७ तान् प्रति पौलस्योपदेशः २१ पौलस्य सङ्गिलोकानां नमस्कारप्रेषणं २५ मङ्गलनिमित्तम् ईश्वरस्य धन्यवदनञ्च।

१ किंक्रीयानगरीयमण्डल्याः परिचारिका या फैवीनामिकास्माकं
२ धर्म्मभगिनी तस्याः कृतेऽहं युष्मान् निवेदयामि, यूयं तां प्रभु-
माश्रितां विज्ञाय तस्या आतिथ्यं पवित्रलोकार्हं कुरुध्वं, युष्मत्तस्या

य उपकारो भवितुं शक्नोति तं कुरुध्वं, यस्मात् तया बहूनां मम
चोपकारः कृतः। अपरञ्च ख्रीष्टस्य यीशोः कर्म्मणि मम सहकारिणौ ३
मम प्राणरक्षार्थञ्च स्वप्राणान् पणीकृतवन्तौ यौ प्रिष्किल्लाक्किलौ तौ
मम नमस्कारं ज्ञापयध्वं। ताभ्याम् उपकाराप्तिः केवलं मया ४
स्वीकर्त्तव्येति नहि परजातीयाभिः सर्व्वमण्डलीभिरपि। अपरञ्च ५
तयो र्गृहे स्थितान् मण्डलीलोकान् मम नमस्कारं ज्ञापयध्वं।
तद्वद् आशियादेशे ख्रीष्टस्य पक्षे प्रथमजातफलस्वरूपो य इपेनित-
नामा मम प्रियबन्धुस्तमपि मम नमस्कारं ज्ञापयध्वं। अपरं बहु- ६
श्रमेणास्मान् असेवत या मरियम् तामपि नमस्कारं ज्ञापयध्वं।
अपरञ्च प्रेरितेषु ख्यातकीर्त्ती मदग्रे ख्रीष्टाश्रितौ मम स्वजातीयौ ७
सहबन्दिनौ च यावान्द्रनीकयूनियौ तौ मम नमस्कारं ज्ञापयध्वं।
तथा प्रभौ मत्प्रियतमम् आम्प्लियमपि मम नमस्कारं ज्ञापयध्वं। ८
अपरं ख्रीष्टसेवायां मम सहकारिणम् ऊर्व्वाणं मम प्रियतमं ९
स्ताखुञ्च मम नमस्कारं ज्ञापयध्वं। अपरं ख्रीष्टेन परीक्षितम् १०
आपिल्लिं मम नमस्कारं वदत, आरिष्टबूलस्य परिजनांश्च मम
नमस्कारं ज्ञापयध्वं। अपरं मम ज्ञातिं हेरोदियोनं मम नमस्कारं ११
वदत, तथा नार्किसस्य परिवाराणां मध्ये ये प्रभुमाश्रितास्तान् मम
नमस्कारं वदत। अपरं प्रभोः सेवायां परिश्रमकारिण्यौ त्रुफेनात्रु- १२
फोषे मम नमस्कारं वदत, तथा प्रभोः सेवायाम् अत्यन्तं परिश्रम-
कारिणी या प्रिया पर्षिस्तां नमस्कारं ज्ञापयध्वं। अपरं प्रभोर- १३
भिरुचितं रूफं मम धर्म्ममाता या तस्य माता तामपि नम-
स्कारं वदत। अपरम् असुंक्रितं फ्लिगोनं हर्म्मं पात्रवं हर्म्मिम् एतेषां १४
सङ्गिभ्रातृगणञ्च नमस्कारं ज्ञापयध्वं। अपरं फिललगो यूलिया १५
नीरियस्तस्य भगिन्यलुम्पा चैतान् एतैः सार्द्धं यावन्तः पवित्रलोका

१६ आसते तानपि नमस्कारं ज्ञापयध्वं। यूयं परस्परं पवित्रचुम्बनेन
नमस्कुरुध्वं। ख्रीष्टस्य मण्डलीगणो युष्मान् नमस्कुरुते।
१७ हे भ्रातरो युष्मान् विनयेऽहं युष्माभि र्या शिक्षा लब्धा ताम् अति-
क्रम्य ये विच्छेदान् विघ्नांश्च कुर्व्वन्ति तान् निश्चिनुत तेषां सङ्गं वर्ज-
१८ यत च। यतस्तादृशा लोका अस्माकं प्रभो र्यीशुख्रीष्टस्य दासा इति
नहि किन्तु स्वोदरस्यैव दासाः; अपरं प्रणयवचनै र्मधुरवाक्यैश्च
१९ सरललोकानां मनांसि मोहयन्ति। युष्माकम् आज्ञाग्राहित्वं सर्व्वत्र
सर्व्वै र्ज्ञातं ततोऽहं युष्मासु सानन्दोऽभवं तथापि यूयं यत् सद्ज्ञानेन
२० ज्ञानिनः कुज्ञाने चातत्परा भवेतेति ममाभिलाषः। अधिकन्तु
शान्तिदायक ईश्वरः शैतानम् अविलम्बं युष्माकं पदानाम् अधो
मर्द्दिष्यति। अस्माकं प्रभु र्यीशुख्रीष्टो युष्मासु प्रसादं क्रियात्। इति।
२१ मम सहकारी तीमथियो मम ज्ञातयो लूकियो यासोन्
२२ सोसिपात्रश्चेमे युष्मान् नमस्कुर्व्वन्ति। अपरम् एतत्पत्रलेखकस्तर्त्ति-
२३ यनामाहमपि प्रभो र्नाम्ना युष्मान् नमस्करोमि। तथा कृत्स्न-
मण्डल्या मम चातिथ्यकारी गायो युष्मान् नमस्करोति। अपरम्
एतन्नगरस्य धनरक्षक इरास्तः क्वार्त्तनामकश्चैको भ्राता तावपि
२४ युष्मान् नमस्कुरुतः। अस्माकं प्रभु र्यीशुख्रीष्टो युष्मासु सर्व्वेषु
प्रसादं क्रियात्। इति।
२५ पूर्व्वकालिकयुगेषु प्रच्छन्ना या मन्त्रणाधुना प्रकाशिता भूत्वा
भाववादिलिखितग्रन्थगणस्य प्रमाणाद् विश्वासेन ग्रहणार्थं सदातन-
२६ स्येश्वरस्याज्ञया सर्व्वदेशीयलोकान् ज्ञाप्यते, तस्या मन्त्रणाया ज्ञानं
लब्ध्वा मया यः सुसंवादो यीशुख्रीष्टमधि प्रचार्य्यते, तदनुसाराद्
२७ युष्मान् धर्म्मे सुस्थिरान् कर्त्तुं समर्थो योऽद्वितीयः सर्व्वज्ञ ईश्वरस्तस्य
धन्यवादो यीशुख्रीष्टेन सन्ततं भूयात्। इति।

करिन्थिनः प्रति पौलस्य प्रथमं पत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचरणं ४ करिन्थीयलोकानाम् अनुगृहीतत्वेन पौलस्य धन्यवादः १० अनैक्यत्वात् तान् प्रति भर्त्सनं १७ सुसंवादीयगुणानां प्रशंसा २६ तेनाज्ञानलुप्तलोकानां परित्राणम् ईश्वरस्य महिम्नः प्रकाशितत्वञ्च।

यावन्तः पवित्रा लोकाः स्वेषाम् अस्माकञ्च वसतिस्थानेष्वस्माकं १
प्रभो र्यीशोः ख्रीष्टस्य नाम्ना प्रार्थयन्ते तैः सहाहूतानां ख्रीष्टेन
यीशुना पवित्रीकृतानां लोकानां या ईश्वरीयमण्डली करिन्थनगरे २
विद्यते तं प्रतीश्वरस्येच्छयाहूतो यीशुख्रीष्टस्य प्रेरितः पौलः सोस्थि-
निनामा भ्राता च पत्रं लिखति। अस्माकं पित्रेश्वरेण प्रभुना यीशु- ३
ख्रीष्टेन च प्रसादः शान्तिश्च युष्मभ्यं दीयतां।

ईश्वरो यीशुख्रीष्टेन युष्मान् प्रति प्रसादं प्रकाशितवान्, ४
तस्मादहं युष्मन्निमित्तं सर्व्वदा मदीयेश्वरं धन्यं वदामि। ख्रीष्ट- ५
सम्बन्धीयं साक्ष्यं युष्माकं मध्ये येन प्रकारेण सप्रमाणम् अभवत् तेन ६
यूयं ख्रीष्टात् सर्व्वविधवक्तृताज्ञानादीनि सर्व्वधनानि लब्धवन्तः। ततो- ७
ऽस्मत्प्रभो र्यीशुख्रीष्टस्य पुनरागमनं प्रतीक्षमाणानां युष्माकं कस्यापि
वरस्याभावो न भवति। अपरम् अस्माकं प्रभो र्यीशुख्रीष्टस्य दिवसे ८
यूयं यन्निर्द्दोषा भवेत तदर्थं स एव यावदन्तं युष्मान् सुस्थिरान्
करिष्यति। य ईश्वरः स्वपुत्रस्यास्मत्प्रभो र्यीशुख्रीष्टस्यांशिनः कर्त्तुं ९
युष्मान् आहूतवान् स विश्वसनीयः।

हे भ्रातरः, अस्माकं प्रभुयीशुख्रीष्टस्य नाम्ना युष्मान् विनयेऽहं १०
सर्व्वै र्युष्माभिरेकरूपाणि वाक्यानि कथ्यन्तां युष्मन्मध्ये भिन्नसङ्घाता

११ न भवन्तु मनोविचारयोरैक्येन युष्माकं सिद्धत्वं भवतु। हे मम
भ्रातरो युष्मन्मध्ये विवादा जाता इति वार्त्तामहं क्लोय्याः परिजनै
१२ र्ज्ञापितः। ममाभिप्रेतमिदं युष्माकं कश्चित् कश्चिद् वदति पौलस्य
शिष्योऽहम् आपल्लोः शिष्योऽहं कैफाः शिष्योऽहं ख्रीष्टस्य शिष्योऽह-
१३ मिति च। ख्रीष्टस्य किं विभेदः कृतः? पौलः किं युष्मत्कृते क्रुशे
१४ हतः? पौलस्य नाम्ना वा यूयं किं स्नापिताः? क्रिष्पगायौ विना
युष्माकं मध्येऽन्यः कोऽपि मया न स्नापित इति हेतोरहम् ईश्वरं
१५ धन्यं वदामि। एतेन मम नाम्ना मानवा मया स्नापिता इति वक्तुं
१६ केनापि न शक्यते। अपरं स्तिफानस्य परिजना मया स्नापितास्त-
दन्यः कश्चिद् यन्मया स्नापितस्तदहं न वेद्मि।
१७   ख्रीष्टेनाहं स्नापनार्थं न प्रेरितः किन्तु सुसंवादस्य प्रचारार्थमेव;
सोऽपि वाक्पटुतया मया न प्रचारितव्यः, यतस्तथा प्रचारिते ख्रीष्टस्य
१८ क्रुशे मृत्युः फलहीनो भविष्यति। यतो हेतो र्ये विनश्यन्ति ते तां
क्रुशस्य वार्त्तां प्रलापमिव मन्यन्ते किञ्च परित्राणं लभमानेष्वस्मासु
१९ सा ईश्वरीयशक्तिस्वरूपा। तस्मादित्थं लिखितमास्ते,

ज्ञानवतान्तु यत् ज्ञानं तन्मया नाशयिष्यते।
विलोपयिष्यते तद्वद् बुद्धि र्बुद्धिमतां मया॥

२० ज्ञानी कुत्र? शास्त्राध्यापको वा कुत्र? इहलोकस्य विचारतत्परो वा
२१ कुत्र? इहलोकस्य ज्ञानं किमीश्वरेण मोहीकृतं नहि? ईश्वरस्य ज्ञानाद्
इहलोकस्य मानवाः स्वज्ञानेनेश्वरस्य तत्त्वबोधं न प्राप्तवन्तस्तस्माद्
ईश्वरः प्रचाररूपिणा प्रलापेन विश्वासिनः परित्रातुं रोचितवान्।
२२ यिहूदीयलोका लक्षणानि दिदृक्षन्ति परजातीयलोकास्तु विद्यां
२३ मृगयन्ते, वयञ्च क्रुशे हतं ख्रीष्टं प्रचारयामः। तस्य प्रचारो यिहू-
२४ दीयै र्विघ्न इव परजातीयैश्च प्रलाप इव मन्यते, किन्तु यिहूदीयानां

परजातीयानाञ्च मध्ये ये आहूतास्तेषु स ख्रीष्ट ईश्वरीयशक्तिरि-
वेश्वरीयज्ञानमिव च प्रकाशते। यत ईश्वरे यः प्रलाप आरोप्यते २५
स मानवातिरिक्तं ज्ञानमेव यच्च दौर्ब्बल्यम् ईश्वर आरोप्यते तत्
मानवातिरिक्तं बलमेव।

हे भ्रातरः, आहूतयुष्मद्गणो युष्माभिरालोक्यतां तन्मध्ये सांसा- २६
रिकज्ञानेन ज्ञानवन्तः पराक्रमिणो वा कुलीना वा बहवो न
विद्यन्ते। यत ईश्वरो ज्ञानवतस्त्रपयितुं मूर्खलोकान् रोचितवान् २७
बलानि च त्रपयितुम् ईश्वरो दुर्ब्बलान् रोचितवान्। तथा वर्त्तमान- २८
लोकान् संस्थितिभ्रष्टान् कर्त्तुम् ईश्वरो जगतोऽपकृष्टान् हेयान्
अवर्त्तमानांश्चाभिरोचितवान्। तत ईश्वरस्य साक्षात् केनाप्यात्मश्लाघा २९
न कर्त्तव्या। यूयञ्च तस्मात् ख्रीष्टे यीशौ संस्थितिं प्राप्तवन्तः स ३०
ईश्वराद् युष्माकं ज्ञानं धार्म्मिकत्वं पवित्रत्वं मुक्तिश्च जाता। अतएव ३१
यद्वद् लिखितमास्ते तद्वत्,

यः कश्चित् श्लाघमानः स्यात् श्लाघतां प्रभुना स हि।

---

२ द्वितीयोऽध्यायः।

१ पौलस्य सुसंवादप्रकाशनं वाक्पटुताया विद्यायाश्च निपुणत्वात् न जातं
६ किन्तु सांसारिकज्ञानात् श्रेष्ठं यद् ईश्वरीयज्ञानं तेन सुसंवादप्रचारणञ्च।

हे भ्रातरो युष्मत्समीपे ममागमनकालेऽहं वक्तृताया विद्याया १
वा नैपुण्येनेश्वरस्य साक्ष्यं प्रचारितवान् तन्नहि; यतो यीशुख्रीष्टं २
तस्य क्रुशे हतत्वञ्च विना नान्यत् किमपि युष्मन्मध्ये ज्ञापयितुं
विहितं बुद्धवान्। अपरञ्चातीव दौर्ब्बल्यभीतिकम्पयुक्तो युष्माभिः ३
सार्द्धमासं। अपरं युष्माकं विश्वासो यत् मानुषिकज्ञानस्य फलं न ४
भवेत् किन्त्वीश्वरीयशक्तेः फलं भवेत्, तदर्थं मम वक्तृता मदीय- ५

प्रचारश्च मानुषिकज्ञानस्य मधुरवाक्यसम्बलितौ नास्तां किन्त्वात्मनः
शक्तेश्च प्रमाणयुक्तावास्तां।
६ वयं ज्ञानं भाषामहे तच्च सिद्धलोकै र्ज्ञानमिव मन्यते,
तदिहलोकस्य ज्ञानं नहि, इहलोकस्य नश्वराणाम् अधिपतीनां वा
७ ज्ञानं नहि; किन्तु कालावस्थायाः पूर्व्वस्माद् यत् ज्ञानम् अस्माकं
विभवार्थम् ईश्वरेण निश्चित्य प्रच्छन्नं तन्निगूढम् ईश्वरीयं ज्ञानं
८ प्रभाषामहे। इहलोकस्याधिपतीनां केनापि तत् ज्ञानं न लब्धं,
९ लब्धे सति ते प्रभावविशिष्टं प्रभुं क्रुशे नाहनिष्यन्। तद्वल्लिखितमास्ते,

नेत्रेण क्वापि नो दृष्टं कर्णेनापि च न श्रुतं।
मनोमध्ये तु कस्यापि न प्रविष्टं कदापि यत्।
ईश्वरे प्रीयमाणानां कृते तत् तेन सञ्चितं।

१० अपरमीश्वरः स्वात्मना तदस्माकं साक्षात् प्राकाशयत्; यत
आत्मा सर्व्वमेवानुसन्धत्ते तेन चेश्वरस्य मर्म्मतत्त्वमपि बुध्यते।
११ मनुजस्यान्तःस्थमात्मानं विना केन मनुजेन तस्य मनुजस्य
तत्त्वं बुध्यते? तद्वदीश्वरस्यात्मानं विना केनापीश्वरस्य तत्त्वं
१२ न बुध्यते। वयञ्चेहलोकस्यात्मानं लब्धवन्तस्तन्नहि किन्त्वीश्वर-
स्यैवात्मानं लब्धवन्तः, ततो हेतोरीश्वरेण स्वप्रसादाद् अस्मभ्यं
१३ यद् यद् दत्तं तत्सर्व्वम् अस्माभि र्ज्ञातुं शक्यते। तच्चास्माभि
र्मानुषिकज्ञानस्य वाक्यानि शिक्षित्वा कथ्यत इति नहि किन्त्वा-
त्मतो वाक्यानि शिक्षित्वात्मिकै र्वाक्यैरात्मिकं भावं प्रकाशयद्भिः
१४ कथ्यते। प्राणी मनुष्य ईश्वरीयात्मनः शिक्षां न गृह्णाति यत
आत्मिकविचारेण सा विचार्य्येति हेतोः स तां प्रलापमिव
१५ मन्यते बोद्धुञ्च न शक्नोति। आत्मिको मानवः सर्व्वाणि
१६ विचारयति किन्तु स्वयं केनापि न विचार्य्यते। यत ईश्वरस्य

मनो ज्ञात्वा तमुपदेष्टुं कः शक्नोति? किन्तु ख्रीष्टस्य मनोऽस्माभि र्लब्धं।

---

३ तृतीयोऽध्यायः।

१ सांसारिकत्वे भर्त्सनं ५ प्रभुं विना सेवकस्य कर्म्मणो मृषात्वं १६ प्रभो र्लोका ईश्वरस्य मन्दिरस्वरूपास्तेषां शुचित्वज्ञानत्वयोरावश्यकता च।

हे भ्रातरः, अहमात्मिकैरिव युष्माभिः समं सम्भाषितुं नाशक्नवं १
किन्तु शारीरिकाचारिभिः ख्रीष्टधर्म्मे शिशुतुल्यैश्च जनैरिव युष्माभिः
सह समभाषे। युष्मान् कठिनभक्ष्यं न भोजयन् दुग्धम् अपाययं २
यतो यूयं भक्ष्यं ग्रहीतुं तदा नाशक्नुत इदानीमपि न शक्नुथ,
यतो हेतोरधुनापि शारीरिकाचारिण आध्वे। युष्मन्मध्ये मात्सर्य- ३
विवादभेदा भवन्ति ततः किं शारीरिकाचारिणो नाध्वे मानु-
षिकमार्गेण च न चरथ? पौलस्याहमित्यापल्लोरहमिति वा ४
यद्वाक्यं युष्माकं कैश्चित् कैश्चित् कथ्यते तस्माद् यूयं शारीरिका-
चारिण न भवथ?

पौलः कः? आपल्लु र्वा कः? तौ परिचारकमात्रौ तयो- ५
रेकैकस्मै च प्रभु र्यादृक् फलमददात् तद्वत् तयोर्द्वारा यूयं
विश्वासिनो जाताः। अहं रोपितवान् आपल्लुश्च निषिक्तवान् ६
ईश्वरश्चावर्द्धयत्। अतो रोपयितृसेक्तारावसारौ वर्द्धयितेश्वर एव ७
सारः। रोपयितृसेक्तारौ च समौ तयोरेकैकश्च स्वश्रमयोग्यं ८
स्ववेतनं लप्स्यते। आवामीश्वरेण सह कर्म्मकारिणौ, यूयमीश्वरस्य ९
क्षेत्रमीश्वरस्य निर्म्मितिश्च। ईश्वरस्य प्रसादात् मया यत् पदं १०
लब्धं तस्मात् ज्ञानिना गृहकारिणेव मया भित्तिमूलं स्थापितं
तदुपरि चान्येन निचीयते। किन्तु येन यन्निचीयते तत्

११ तेन विविच्यतां। यतो यीशुख्रीष्टरूपं यद् भित्तिमूलं स्थापितं
१२ तदन्यत् किमपि भित्तिमूलं स्थापयितुं केनापि न शक्यते। एत-
द्भित्तिमूलस्योपरि यदि केचित् स्वर्णरूप्यमणिकाष्ठतृणनलान् निचि-
१३ न्वन्ति, तर्ह्येकैकस्य कर्म्म प्रकाशिष्यते यतः स दिवसस्तत् प्रकाश-
यिष्यति। यतो हेतोस्तेन दिवसेन वह्निमयेनोदेतव्यं तत एकैकस्य
१४ कर्म्म कीदृशमेतस्य परीक्षा वह्निना भविष्यति। यस्य निचयनरूपं
१५ कर्म्म स्थास्नु भविष्यति स वेतनं लप्स्यते। यस्य च कर्म्म धक्ष्यते
तस्य क्षति र्भविष्यति किन्तु वह्ने र्निर्गतजन इव स स्वयं परित्राणं
प्राप्स्यति।

१६ यूयम् ईश्वरस्य मन्दिरं युष्मन्मध्ये चेश्वरस्यात्मा निवसतीति
१७ किं न जानीथ? ईश्वरस्य मन्दिरं येन विनाश्यते सोऽपीश्वरेण
विनाशयिष्यते यत ईश्वरस्य मन्दिरं पवित्रमेव यूयं तु तन्मन्दिरम्
१८ आध्वे। कोऽपि स्वं न वञ्चयतां। युष्माकं कश्चन चेदिहलोकस्य
ज्ञानेन ज्ञानवानहमिति बुध्यते तर्हि स यत् ज्ञानी भवेत् तदर्थं
१९ मूढो भवतु। यस्मादिहलोकस्य ज्ञानम् ईश्वरस्य साक्षात् मूढत्वमेव।
एतस्मिन् लिखितमप्यास्ते,

तीक्ष्णा या ज्ञानिनां बुद्धिस्तया तान् धरतीश्वरः।

२० पुनश्च। ज्ञानिनां कल्पना वेत्ति परमेशो निरर्थकाः।
२१ अतएव कोऽपि मनुजैरात्मानं न श्लाघतां यतः सर्व्वाणि युष्माक-
२२ मेव, पौल वा आपल्लो र्वा कैफा वा जगद् वा जीवनं वा मरणं
२३ वा वर्त्तमानं वा भविष्यद्वा सर्व्वाण्येव युष्माकं, यूयञ्च ख्रीष्टस्य,
ख्रीष्टश्चेश्वरस्य।

४ चतुर्थोऽध्यायः।

१ ख्रीष्टस्य सेवकानां भाण्डागाराध्यक्षत्वं ६ तेषां दुःखं ताडना च १४ तेषामनुगामित्वस्यावश्यकत्वं १८ करिन्थिनः प्रति पौलस्य शासनवाक्यानि च।

लोका अस्मान् ख्रीष्टस्य परिचारकान् ईश्वरस्य निगूढवाक्य- १
धनस्याध्यक्षांश्च मन्यन्तां। किञ्च धनाध्यक्षेण विश्वसनीयेन भवि- २
तव्यमेतदेव लोकै र्याच्यते। अतो विचारयद्भि र्युष्माभिरन्यैः कैश्चित् ३
मनुजै र्वा मम परीक्षणं मयातीव लघु मन्यते ऽहमप्यात्मानं न
विचारयामि। मया किमप्यपराद्धमित्यहं न वेद्मि किन्त्वेतेन ४
मम निरपराधत्वं न निश्चीयते प्रभुरेव मम विचारयितास्ति। अत ५
उपयुक्तसमयात् पूर्व्वम् अर्थतः प्रभोरागमनात् पूर्व्वं युष्माभि
र्विचारो न क्रियतां। प्रभुरागत्य तिमिरेण प्रच्छन्नानि सर्व्वाणि
दीपयिष्यति मनसां मन्त्रणाश्च प्रकाशयिष्यति तस्मिन् समय
ईश्वराद् एकैकस्य प्रशंसा भविष्यति।

हे भ्रातरः सर्व्वाण्येतानि मयात्मानम् आपल्लुञ्चोद्दिश्य कथि- ६
तानि तस्यैतत् कारणं यूयं यथा शास्त्रीयविधिमतिक्रम्य मानवम्
अतीव नादरिष्यध्व ईत्थञ्चैकेन वैपरीत्याद् अपरेण न श्लाघिष्यध्व
एतादृशीं शिक्षामावयोर्दृष्टान्तात् लप्स्यध्वे। अपरात् कस्त्वां विशेष- ७
यति? तुभ्यं यन्न दत्तं तादृशं किं धारयसि? अदत्तेनेव दत्तेन
वस्तुना कुतः श्लाघसे? इदानीमेव यूयं किं तृप्ता लब्धधना वा? ८
अस्मास्वविद्यमानेषु यूयं किं राजत्वपदं प्राप्ताः? युष्माकं राजत्वं
मयाभिलषितं यतस्तेन युष्माभिः सह वयमपि राज्यांशिनो भवि-
ष्यामः। प्रेरिता वयं शेषा हन्तव्याश्चेवेश्वरेण निदर्शिताः। यतो ९
वयं सर्व्वलोकानाम् अर्थतः स्वर्गीयदूतानां मानवानाञ्च कौतुका-
स्पदानि जाताः। ख्रीष्टस्य कृते वयं मूढाः किन्तु यूयं ख्रीष्टेन १०

ज्ञानिनः, वयं दुर्ब्बला यूयञ्च सबलाः, यूयं सम्मानिता वयञ्चा-
११ पमानिताः। वयमद्यापि क्षुधार्त्तास्तृष्णार्त्ता वस्त्रहीनास्ताडिता
१२ आश्रमरहिताश्च सन्तः कर्म्मणि स्वकरान् व्यापारयन्तश्च दुःखैः
कालं यापयामः। गर्हितैरस्माभिराशीः कथ्यते दूरीकृतैः सह्यते
१३ निन्दितैः प्रसाद्यते। वयमद्यापि जगतः सम्मार्जनीयोग्या अवस्करा
इव सर्व्वैं र्मन्यामहे।

१४ युष्मान् त्रपयितुमहमेतानि लिखामीति नहि किन्तु प्रिया-
१५ त्मजानिव युष्मान् प्रबोधयामि। यतः ख्रीष्टधर्म्मे यद्यपि युष्माकं
दशसहस्राणि विनेतारो भवन्ति तथापि बहवो जनका न भवन्ति
१६ यतोऽहमेव सुसंवादेन यीशुख्रीष्टे युष्मान् अजनयं। अतो युष्मान्
१७ विनयेऽहं यूयं मदनुगामिनो भवत। इत्यर्थं सर्व्वासु मण्डलीषु
सर्व्वत्र ख्रीष्टधर्म्मयोग्या ये विधयो मयोपदिश्यन्ते तान् यो युष्मान्
स्मारयिष्यत्येवम्भूतं प्रभोः कृते प्रियं विश्वासिनञ्च मदीयतनयं
तीमथियं युष्माकं समीपं प्रेषितवानहं।

१८ अपरमहं युष्माकं समीपं न गमिष्यामीति बुद्ध्वा युष्माकं
१९ कियन्तो लोका गर्व्वन्ति। किन्तु यदि प्रभोरिच्छा भवति तर्ह्य-
हमविलम्बं युष्मत्समीपमुपस्थाय तेषां दर्पध्मातानां लोकानां वाचं
२० ज्ञास्यामीति नहि सामर्थ्यमेव ज्ञास्यामि। यस्मादीश्वरस्य राजत्वं
२१ वाग्युक्तं नहि किन्तु सामर्थ्ययुक्तं। युष्माकं का वाञ्छा? युष्मत्समीपे
मया किं दण्डपाणिना गन्तव्यमुत प्रेमनम्रतात्मयुक्तेन वा?

---

५ पञ्चमोऽध्यायः।

१ एकजनस्य महापातकं ६ पुरातनकिण्वरूपदुष्टत्वं त्यक्तुम् उपदेशः ९ महापात-
किनो भ्रातुः पृथक्करणस्य कथा च।

१ अपरं युष्माकं मध्ये व्यभिचारो विद्यते स च व्यभिचारस्तादृशो

यद् देवपूजकानां मध्येऽपि तत्तुल्यो न विद्यते फलतो युष्माकमेको
जनो विमातृगमनं कुरुत इति वार्त्ता सर्व्वत्र व्याप्ता। तथाच यूयं २
दर्पध्माता आध्वे, तत् कर्म्म येन कृतं स यथा युष्मन्मध्याद् दूरी-
क्रियते तथा शोको युष्माभि र्न क्रियते किम् एतत्? अविद्यमाने ३
मदीयशरीरे ममात्मा युष्मन्मध्ये विद्यते ऽतोऽहं विद्यमान इव
तत्कर्म्मकारिणो विचारं निश्चितवान्, अस्मत्प्रभो र्यीशुख्रीष्टस्य ४
नाम्ना युष्माकं मदीयात्मनश्च मिलने जाते ऽस्मत्प्रभो र्यीशुख्रीष्टस्य ५
शक्तेः माहात्म्येन स नरः शरीरनाशार्थमस्माभिः शैतानस्य हस्ते
समर्पयितव्यस्ततोऽस्माकं प्रभो र्यीशो र्दिवसे तस्यात्मा रक्षां गन्तुं
शक्ष्यति।

युष्माकं दर्पो न भद्राय यूयं किमेतन्न जानीथ, यथा, ६

विकारः कृत्स्नशक्तूनां स्वल्पकिण्वेन जायते।

यूयं यत् नवीनशक्तुस्वरूपा भवेत तदर्थं पुरातनं किण्वम् अव- ७
मार्ज्जत यतो युष्माभिः किण्वशून्यै र्भवितव्यं। अपरम् अस्माकं
निस्तारोत्सवीयमेषशावको यः ख्रीष्टः सोऽस्मदर्थं बलीकृतो ऽभवत्।
अतः पुरातनकिण्वेनार्थतो दुष्टताजिघांसारूपेण किण्वेन नन्नहि ८
किन्तु सारल्यसत्यत्वरूपया किण्वशून्यतयास्माभिरुत्सवः कर्त्तव्यः।

व्यभिचारिणां संसर्गो युष्माभि र्विहातव्य इति मया पत्रे ९
लिखितं। किन्त्वैहिकलोकानां मध्ये ये व्यभिचारिणो लोभिन १०
उपद्राविणो देवपूजका वा तेषां संसर्गः सर्व्वथा विहातव्य इति
नहि, विहातव्ये सति युष्माभि र्जगतो निर्गन्तव्यमेव। किन्तु भ्रातृ- ११
त्वेन विख्यातः कश्चिज्जनो यदि व्यभिचारी लोभी देवपूजको
निन्दको मद्यप उपद्रावी वा भवेत् तर्हि तादृशेन मानवेन सह
भोजनपानेऽपि युष्माभि र्न कर्त्तव्ये इत्यधुना मया लिखितं। समाज- १२

वहिःस्थितानां लोकानां विचारकरणे मम कोऽधिकारः? किन्तु
१३ तदन्तर्गतानां विचारणं युष्माभिः किं न कर्त्तव्यं भवेत्? वहिः-
स्थानां तु विचार ईश्वरेण कारिष्यते। अतो युष्माभिः स पातकी
स्वमध्याद् वहिष्क्रियतां।

---

६ षष्ठोऽध्यायः।

१ आवेदननिमित्तं करिन्थिनः प्रति पौलस्य भर्त्सनं ९ ईश्वरस्य राज्ये पापिलोकानाम् अनधिकारः १२ पवित्रताया आवश्यकता च।

१ युष्माकमेकस्य जनस्यापरेण सह विवादे जाते स पवित्रलोकै
विचारमकारयन् किम् अधार्म्मिकलोकै र्विचारयितुं प्रोत्सहते?
२ जगतोऽपि विचारणं पवित्रलोकैः कारिष्यत एतद् यूयं किं न
जानीथ? अतो जगद् यदि युष्माभि र्विचारयितव्यं तर्हि क्षुद्र-
३ तमविचारेषु यूयं किमसमर्थाः? दूता अप्यस्माभि र्विचारयिष्यन्त
इति किं न जानीथ? अत ऐहिकविषयाः किम् अस्माभि र्न
४ विचारयितव्या भवेयुः? ऐहिकविषयस्य विचारे युष्माभिः कर्त्तव्ये
५ ये लोकाः मण्डल्यां क्षुद्रतमास्त एव नियुज्यन्तां। अहं युष्मान्
त्रपयितुमिच्छन् वदामि युष्मन्मध्ये किमेकोऽपि मनुष्यस्तादृग्
६ बुद्धिमान्नहि यो भ्रातृविवादविचारणे समर्थः स्यात्? किञ्चैको
भ्राता भ्रात्रान्येन किमविश्वासिनां विचारकाणां साक्षाद् विवदते?
७ युष्मन्मध्ये विवादा विद्यन्त एतदपि युष्माकं दोषः। यूयं कुतो-
८ ऽन्यायसहनं क्षतिसहनं वा श्रेयो न मन्यध्वे? किन्तु यूयमपि
भ्रातॄनेव प्रत्यन्यायं क्षतिञ्च कुरुथ किमेतत्?
९ ईश्वरस्य राज्येऽन्यायकारिणां लोकानामधिकारो नास्त्येतद्
यूयं किं न जानीथ? मा वञ्चध्वं, ये व्यभिचारिणो देवार्च्चिनः

पारदारिकाः स्त्रीवदाचारिणः पुंमैथुनकारिणस्तस्करा लोभिनो १०
मद्यपा निन्दका उपद्राविणो वा न ईश्वरस्य राज्यभागिनो न
भविष्यन्ति। यूयञ्चैवंविधा लोका आस्त किन्तु प्रभो र्यीशो ११
र्नाम्नास्मदीश्वरस्यात्मना च यूयं प्रक्षालिताः पाविता धार्म्मिकी-
कृताश्च।

मदर्थं सर्व्वं द्रव्यम् अप्रतिषिद्धं किन्तु न सर्व्वं हितजनकं। १२
मदर्थं सर्व्वमप्रतिषिद्धं तथाप्यहं कस्यापि द्रव्यस्य वशीकृतो न
भविष्यामि। उदराय भक्ष्याणि भक्ष्येभ्यश्चोदरं, किन्तु भक्ष्योदरे १३
ईश्वरेण नाशयिष्येते; अपरं देहो न व्यभिचाराय किन्तु प्रभवे
प्रभुश्च देहाय। यश्चेश्वरः प्रभुमुत्थापितवान् स स्वशक्त्यास्मान- १४
प्युत्थापयिष्यति। युष्माकं यानि शरीराणि तानि ख्रीष्टस्याङ्गा- १५
नीति किं यूयं न जानीथ? अतः ख्रीष्टस्य यान्यङ्गानि तानि
मयापहृत्य वेश्याया अङ्गानि किं कारिष्यन्ते? तन्न भवतु। यः १६
कश्चिद् वेश्यायाम् आसज्यते स तया सहैकदेहो भवति किं
यूयमेतन्न जानीथ? यतो लिखितमास्ते, यथा, तौ द्वौ जना-
वेकाङ्गौ भविष्यतः। यश्च प्रभावासज्यते स तेन सहैकात्मा १७
भवति। अतो यूयं व्यभिचारात् पराङ्मुखा भवत। मानवा १८
यान्यन्यानि कलुषाणि कुर्व्वते तानि वपु र्न समाविशन्ति किन्तु
व्यभिचारिणा स्वविग्रहस्य विरुद्धं कल्मषं क्रियते। युष्माकं यानि १९
वपूंषि तानि युष्मदन्तःस्थितस्येश्वराल्लब्धस्य पवित्रस्यात्मनो मन्दि-
राणि यूयञ्च स्वेषां स्वामिनो नाध्वे किमेतद् युष्माभि र्न ज्ञायते?
यूयं मूल्येन क्रीता अतो वपुर्मनोभ्याम् ईश्वरो युष्माभिः पूज्यतां २०
यत ईश्वर एव तयोः स्वामी।

७ सप्तमोऽध्यायः ।

१ उद्वाहीया कथा ८ स्त्रीपुंसयोरपृथक्ताया: कथा १२ सहवासस्य कथा १७ निजनिजपदे स्थितिकथा २४ अनूढस्थितिकथा २९ कन्याया विवाहकथनं ३९ स्त्रिया द्विर्विवहनकथनं ।

१ अपरञ्च युष्माभि र्मां प्रति यत् पत्रमलेखि तस्योत्तरमेतत्,
२ योषितोऽस्पर्शनं मनुजस्य वरं; किन्तु व्यभिचारभयाद् एकैकस्य
पुंसः स्वकीयभार्य्या भवतु तद्वद् एकैकस्या योषितोऽपि स्वकीय-
३ भर्त्ता भवतु । भार्य्यायै भर्त्रा यद्यद् वितरणीयं तद् वितीर्य्यतां
४ तद्वद् भर्त्रेऽपि भार्य्यया वितरणीयं वितीर्य्यतां । भार्य्यायाः
स्वदेहे स्वत्वं नास्ति भर्त्तुरेव, तद्वद् भर्त्तुरपि स्वदेहे स्वत्वं नास्ति
५ भार्य्याया एव । उपोषणप्रार्थनयोः सेवनार्थम् एकमन्त्रणानां युष्माकं
कियत्कालं यावद् या पृथक्स्थिति र्भवति तदन्यो विच्छेदो
युष्मन्मध्ये न भवतु, ततः परम् इन्द्रियाणाम् अधैर्य्यात् शैतानो
६ यद् युष्मान् परीक्षां न नयेत् तदर्थं पुनरेकत्र मिलत। एतद् आदेशतो
७ नहि किन्त्वनुज्ञात एव मया कथ्यते, यतो ममावस्थेव सर्व्व-
मानवानामवस्था भवत्विति मम वाञ्छा किन्त्वीश्वराद् एकेनैको
वरोऽन्येन चान्यो वर इत्थमेकैकेन स्वकीयवरो लब्धः ।
८ अपरम् अकृतविवाहान् विधवांश्च प्रति ममैतन्निवेदनं ममेव
९ तेषामवस्थिति र्भद्रा; किञ्च यदि तैरिन्द्रियाणि नियन्तुं न
शक्यन्ते तर्हि विवाहः क्रियतां यतः कामदहनाद् व्यूढत्वं भद्रं ।
१० ये च कृतविवाहास्ते मया नहि प्रभुनैवैतद् आज्ञाप्यन्ते भार्य्या
११ भर्त्तृतः पृथक् न भवतु । यदि वा पृथग्भूता स्यात् तर्हि
निर्विवाहा तिष्ठतु स्वीयपतिना वा सन्दधातु भर्त्तापि भार्य्यां न
त्यजतु ।

इतरान् जनान् प्रति प्रभु र्न ब्रवीति किन्त्वहं ब्रवीमि; १२
कस्यचिद् भ्रातुर्योषिद् अविश्वासिनी सत्यपि यदि तेन सहवासे
तुष्यति तर्हि सा तेन न त्यज्यतां। तद्वत् कस्याश्चिद् योषितः १३
पतिरविश्वासी सन्नपि यदि तया सहवासे तुष्यति तर्हि स तया
न त्यज्यतां। यतोऽविश्वासी भर्त्ता भार्य्यया पवित्रीभूतः, तद्व- १४
दविश्वासिनी भार्य्या भर्त्रा पवित्रीभूता; नोचेद् युष्माकमप-
त्यान्यशुचीन्यभविष्यन् किन्त्वधुना तानि पवित्राणि सन्ति।
अविश्वासी जनो यदि वा पृथग् भवति तर्हि पृथग् भवतु; १५
एतेन भ्राता भगिनी वा न निबध्यते तथापि वयमीश्वरेण शान्तये
समाहूताः। हे नारि तव भर्त्तुः परित्राणं त्वत्तो भविष्यति न १६
वेति त्वया किं ज्ञायते? हे नर तव जायायाः परित्राणं त्वत्तो
भविष्यति न वेति त्वया किं ज्ञायते?

एकैको जनः परमेश्वराल्लब्धं यद् भजते यस्याञ्चावस्थायाम् १७
ईश्वरेणाह्वायि तदनुसारेणैवाचरतु तदहं सर्व्वमण्डलीस्थान् आदि-
शामि। छिन्नत्वग् भूत्वा य आहूतः स प्रकृष्टत्वग् न भवतु, १८
तद्वद् अच्छिन्नत्वग् भूत्वा य आहूतः स छिन्नत्वग् न भवतु।
त्वक्छेदः सारो नहि तद्वदत्वक्छेदोऽपि सारो नहि किन्त्वीश्वर- १९
स्याज्ञानां पालनमेव। यो जनो यस्यामवस्थायामाह्वायि स २०
तस्यामेवावतिष्ठतां। दासः सन् त्वं किमाहूतोऽसि? तन्मा चिन्तय, २१
तथाच यदि स्वतन्त्रो भवितुं शक्नुयास्तर्हि तदेव वृणु। यतः प्रभु- २२
नाहूतो यो दासः स प्रभो र्मोचितजनः। तद्वत् तेनाहूतः स्वतन्त्रो
जनोऽपि ख्रीष्टस्य दास एव। यूयं मूल्येन क्रीता अतो हेतो २३
र्मानवानां दासा मा भवत। हे भ्रातरो यस्यामवस्थायां २४
यस्याह्वानमभवत् तया स ईश्वरस्य साक्षात् तिष्ठतु।

२५ अपरम् अकृतविवाहान् जनान् प्रति प्रभोः कोऽप्यादेशो मया
न लब्धः किन्तु प्रभोरनुकम्पया विश्वास्यो भूतोऽहं यद् भद्रं मन्ये
२६ तद् वदामि । वर्त्तमानात् क्लेशसमयात् मनुष्यस्यानूढत्वं भद्रमिति
२७ मया बुध्यते । त्वं किं योषिति निबद्धोऽसि? तर्हि मोचनं प्राप्तुं मा
यतस्व । किं वा योषितो मुक्तोऽसि? तर्हि जायां मा गवेषय ।
२८ विवाहं कुर्व्वता त्वया किमपि नापराध्यते तद्वद् व्यूह्यमानया युवत्यापि
किमपि नापराध्यते तथाच तादृशौ द्वौ जनौ शारीरिकं क्लेशं लप्स्येते
२९ किन्तु युष्मान् प्रति मम करुणा विद्यते । हे भ्रातरोऽहमिदं ब्रवीमि,
३० इतः परं समयोऽतीव संक्षिप्तः, अतः कृतदारैरकृतदारैरिव रुदद्भि-
श्चारुदद्भिरिव सानन्दैश्च निरानन्दैरिव क्रेतृभिश्चाभागिभिरिवाच-
३१ रितव्यं ये च संसारे चरन्ति तै र्नातिचरितव्यं यत इहलोकस्य
३२ कौतुको विचलति । किन्तु यूयं यन्निश्चिन्ता भवेतेति मम
वाञ्छा । अकृतविवाहो जनो यथा प्रभुं परितोषयेत् तथा प्रभुं
३३ चिन्तयति, किन्तु कृतविवाहो जनो यथा भार्य्यां परितोषयेत् तथा
३४ संसारं चिन्तयति । तद्वद् ऊढयोषितो ऽनूढा विशिष्यते । यानूढा
सा यथा कायमनसोः पवित्रा भवेत् तथा प्रभुं चिन्तयति या चोढा
३५ सा यथा भर्त्तारं परितोषयेत् तथा संसारं चिन्तयति । अहं यद्
युष्मान् मृगबन्धिन्या परिक्षिपेयं तदर्थं नहि किन्तु यूयं यद-
निन्दिता भूत्वा प्रभोः सेवनेऽबाधम् आसक्ता भवेत तदर्थमेतानि
सर्व्वाणि युष्माकं हिताय मया कथ्यन्ते ।

३६ कस्यचित् कन्यायां यौवनप्राप्तायां यदि स तस्या अनूढत्वं निन्द-
नीयं विवाहश्च साधयितव्य इति मन्यते तर्हि यथाभिलाषं करोतु,
३७ एतेन किमपि नापरात्स्यति विवाहः क्रियतां । किन्तु दुःखेनाक्लिष्टः
कश्चित् पिता यदि स्थिरमनोगतः स्वमनोऽभिलाषसाधने समर्थश्च

स्यात् मम कन्या मया रक्षितव्येति मनसि निश्चिनोति च तर्हि
स भद्रं कर्म्म करोति। अतो यो विवाहं करोति स भद्रं कर्म्म ३८
करोति यश्च विवाहं न करोति स भद्रतरं कर्म्म करोति।

यावत्कालं पति जीवति तावद् भार्य्या व्यवस्थया निबद्धा ३९
तिष्ठति किन्तु पत्यौ महानिद्रां गते सा मुक्तीभूय यमभिलषति
तेन सह तस्या विवाहो भवितुं शक्नोति, किन्त्वेतत् केवलं प्रभु-
भक्तानां मध्ये। तथाच सा यदि निष्पतिका तिष्ठति तर्हि तस्याः ४०
क्षेमं भविष्यतीति मम भावः। अपरम् ईश्वरस्यात्मा ममाप्यन्त
र्विद्यत इति मया बुध्यते।

---

८ अष्टमोऽध्यायः।

१ देवनिवेदितद्रव्यभक्षणकथा ७ दुर्ब्बललोकेषु कृपाकरणकथनञ्च।

देवप्रसादे सर्व्वेषाम् अस्माकं ज्ञानमास्ते तद्वयं विद्मः। तथापि १
ज्ञानं गर्व्वं जनयति किन्तु प्रेमतो निष्ठा जायते। अतः कश्चन २
यदि मन्यते मम ज्ञानमास्त इति तर्हि तेन यादृशं ज्ञानं चेष्टि-
तव्यं तादृशं किमपि ज्ञानमद्यापि न लब्धं। किन्तु य ईश्वरे ३
प्रीयते स ईश्वरेणापि ज्ञायते। देवताबलिप्रसादभक्षणे वयमिदं ४
विद्मो यत् जगन्मध्ये कोऽपि देवो न विद्यते, एकश्चेश्वरो द्वितीयो
नास्तीति। स्वर्गे पृथिव्यां वा यद्यपि केषुचिद् ईश्वर इति नामा- ५
रोप्यते तादृशाश्च बहव ईश्वरा बहवश्च प्रभवो विद्यन्ते तथाप्य- ६
स्माकमद्वितीय ईश्वरः स पिता यस्मात् सर्व्वेषां यदर्थञ्चास्माकं
सृष्टि र्जाता, अस्माकञ्चाद्वितीयः प्रभुः स यीशुः ख्रीष्टो येन सर्व्व-
वस्तूनां येनास्माकमपि सृष्टिः कृता।

अधिकन्तु ज्ञानं सर्व्वेषां नास्ति यतः केचिदद्यापि देवतां ७

सम्मन्य देवप्रसादमिव तद् भक्ष्यं भुञ्जते तेन दुर्ब्बलतया तेषां
८ संवेदो मलीमसो भवति। किन्तु भक्ष्यद्रव्याद् वयम् ईश्वरेण ग्राह्या
भवामस्तन्नहि यतो भुङ्क्त्वा वयमुत्कृष्टा न भवामस्तद्वदभुङ्क्त्वाप्यपकृष्टा
९ न भवामः। अतो युष्माकं या क्षमता सा दुर्ब्बलानाम् उन्माथ-
१० स्वरूपा यन्न भवेत् तदर्थं सावधाना भवत। यतो ज्ञानविशिष्टस्त्वं
यदि देवालये उपविष्टः केनापि दृश्यसे तर्हि तस्य दुर्ब्बलस्य मनसि
११ किं प्रसादभक्षण उत्साहो न जनिष्यते? तथा सति यस्य कृते
ख्रीष्टो ममार तव स दुर्ब्बलो भ्राता तव ज्ञानात् किं न विनं-
१२ क्ष्यति? इत्यनेन प्रकारेण भ्रातृणां विरुद्धम् अपराध्यद्भिस्तेषां
दुर्ब्बलानि मनांसि व्याघातयद्भिश्च युष्माभिः ख्रीष्टस्य वैपरीत्येना-
१३ पराध्यते। अतो हेतोः पिशिताशनं यदि मम भ्रातु र्विघ्नस्वरूपं
भवेत् तर्ह्यहं यत् स्वभ्रातु र्विघ्नजनको न भवेयं तदर्थं यावज्जीवनं
पिशितं न भोक्ष्ये।

---

९ नवमोऽध्यायः।

१ सुसंवादप्रचारणेन सुसंवादप्रचारयितॄणामुपजीवनकथनं १५ विना मूल्यं पौलस्य सुसंवादप्रचारणं १९ सर्व्वप्रकारलोकान् तोषयितुं यतनं २४ ख्रीष्टीयलोकानां यात्रामल्लयुद्धकथनञ्च।

१ अहं किम् एकः प्रेरितो नास्मि? किमहं स्वतन्त्रो नास्मि?
अस्माकं प्रभु र्यीशुः ख्रीष्टः किं मया नादर्शि? यूयमपि किं
२ प्रभुना मदीयश्रमफलस्वरूपा न भवथ? अन्यलोकानां कृते
यद्यप्यहं प्रेरितो न भवेयं तथाच युष्मत्कृते प्रेरितोऽस्मि यतः प्रभुना
३ मम प्रेरितत्वपदस्य मुद्रास्वरूपा यूयमेवाध्वे। ये लोका मयि
४ दोषमारोपयन्ति तान् प्रति मम प्रत्युत्तरमेतत्। भोजनपानयोः

किमस्माकं क्षमता नास्ति? अन्ये प्रेरिताः प्रभो र्भ्रातरौ कैफाश्च ५
यत् कुर्व्वन्ति तद्वत् काञ्चित् धर्म्मभगिनीं व्यूह्य तया सार्द्धं पर्य्यटितुं
वयं किं न शक्नुमः? सांसारिकश्रमस्य परित्यागात् किं केवलमहं ६
बार्णबाश्च निवारितौ? निजधनव्ययेन कः संग्रामं करोति? को ७
वा द्राक्षाक्षेत्रं कृत्वा तत्फलानि न भुङ्क्ते? को वा पशुव्रजं
पालयन् तत्पयो न पिवति? किमहं केवलां मानुषिकां वाचं ८
वदामि? व्यवस्थायां किमेतादृशं वचनं न विद्यते? मोशिर्व्यवस्था- ९
ग्रन्थे लिखितमास्ते, त्वं शस्यमर्द्दकवृषस्यास्यं न भंत्स्यसीति। ईश्वरेण
बलीवर्द्दानामेव चिन्ता किं क्रियते? किं वा सर्व्वथास्माकं कृते १०
तद्वचनं तेनोक्तं? अस्माकमेव कृते तल्लिखितं। यः क्षेत्रं कर्षति तेन
प्रत्याशायुक्तेन कर्ष्टव्यं, यश्च शस्यानि मर्द्दयति तेन लाभप्रत्याशा-
युक्तेन मर्द्दितव्यं। युष्मत्कृतेऽस्माभिः पारत्रिकाणि वीजानि रोपि- ११
तानि, अतो युष्माकमैहिकफलानां वयम् अंशिनो भविष्यामः
किमेतत् महत् कर्म्म? युष्मासु योऽधिकारस्तस्य भागिनो यद्यन्ये १२
भवेयुस्तर्ह्यस्माभिस्ततोऽधिकं किं तस्य भागिभि र्न भवितव्यं?
अधिकन्तु वयं तेनाधिकारेण न व्यवहृतवन्तः किन्तु ख्रीष्टीयसुसं-
वादस्य कोऽपि व्याघातोऽस्माभिर्यन्न जायेत तदर्थं सर्व्वं सहामहे।
अपरं ये पवित्रवस्तूनां परिचर्य्यां कुर्व्वन्ति ते पवित्रवस्तुतो भक्ष्याणि १३
लभन्ते, ये च वेद्याः परिचर्य्यां कुर्व्वन्ति ते वेदिस्थवस्तूनाम्
अंशिनो भवन्त्येतद् यूयं किं न विद? तद्वद् ये सुसंवादं घोष- १४
यन्ति तैः सुसंवादेन जीवितव्यमिति प्रभुनादिष्टं।

अहमेतेषां सर्व्वेषां किमपि नाश्रितवान् मां प्रति तदनुसारात् १५
आचरितव्यमित्याशयेनापि पत्रमिदं मया न लिख्यते यतः केनापि
जनेन मम यशसो मुधाकरणात् मम मरणं वरं। सुसंवादघोषणात् १६

मम यशो न जायते यतस्तद्घोषणं ममावश्यकं यद्यहं सुसंवादं न
१७ घोषयेयं तर्हि मां धिक्। इच्छुकेन तत् कुर्व्वता मया फलं लप्स्यते
१८ किन्त्वनिच्छुकेऽपि मयि तत्कर्म्मणो भारोऽर्पितोऽस्ति। एतेन मया
लभ्यं फलं किं? सुसंवादेन मम योऽधिकार आस्ते तं यदभद्र-
भावेन नाचरेयं तदर्थं सुसंवादघोषणसमये तस्य ख्रीष्टीयसुसंवादस्य
निर्व्ययीकरणमेव मम फलं।

१९ सर्व्वेषाम् अनायत्तोऽहं यद् भूरिशो लोकान् प्रतिपद्ये तदर्थं
२० सर्व्वेषां दासत्वमङ्गीकृतवान्। यिहूदीयान् यत् प्रतिपद्ये तदर्थं
यिहूदीयानां कृते यिहूदीयइवाभवं। ये च व्यवस्थायत्तास्तान् यत्
प्रतिपद्ये तदर्थं व्यवस्थानायत्तो योऽहं सोऽहं व्यवस्थायत्तानां कृते
२१ व्यवस्थायत्तइवाभवं। ये चालब्धव्यवस्थास्तान् यत् प्रतिपद्ये तदर्थम्
ईश्वरस्य साक्षाद् अलब्धव्यवस्थो न भूत्वा ख्रीष्टेन लब्धव्यवस्थो
२२ योऽहं सोऽहम् अलब्धव्यवस्थानां कृतेऽलब्धव्यवस्थ इवाभवं। दुर्ब्ब-
लान् यत् प्रतिपद्ये तदर्थमहं दुर्ब्बलानां कृते दुर्ब्बलइवाभवं।
इत्थं केनापि प्रकारेण कतिपया लोका यन्मया परित्राणं प्राप्नु-
युस्तदर्थं यो यादृश आसीत् तस्य कृते ऽहं तादृशइवाभवं।
२३ ईदृश आचारः सुसंवादार्थं मया क्रियते यतोऽहं तस्य फलानां
सहभागी भवितुमिच्छामि।

२४ पणलाभार्थं ये धावन्ति धावतां तेषां सर्व्वेषां केवल एकः
पणं लभते युष्माभिः किमेतन्न ज्ञायते? अतो यूयं यथा पणं
२५ लप्स्यध्वे तथैव धावत। मल्ला अपि सर्व्वभोगे परिमितभोगिनो
भवन्ति ते तु म्लानां स्रजं लिप्सन्ते किन्तु वयम् अम्लानां
२६ लिप्सामहे। तस्माद् अहमपि धावामि किन्तु लक्ष्यमनुद्दिश्य
धावामि तन्नहि। अहं मल्लइव युध्यामि च किन्तु छायामाघात-

यन्निव युध्यामि तन्नहि। इतरान् प्रति सुसंवादं घोषयित्वाहं यत् २७
स्वयमग्राह्यो न भवामि तदर्थं देहम् आहन्मि वशीकुर्व्वे च।

१० दशमोऽध्यायः।

१ यिहूदीयलोकानाम् अनुग्रहभ्रष्टत्वस्य कथनं ६ अस्मच्छिक्षार्थं तेषां दोषकथनं १४ प्रभो र्भोज्ये कथनं २२ देवतानिवेदितसामग्र्यशनवारणञ्च।

हे भ्रातरः, अस्मत्पितृपुरुषानधि यूयं यदज्ञाता न तिष्ठतेति १
मम वाञ्छा, ते सर्व्वे मेघाधःस्थिता बभूवुः सर्व्वे समुद्रमध्येन २
वव्रजुः, सर्व्वे मोशिमुद्दिश्य मेघसमुद्रयोः स्नापिता बभूवुः सर्व्व एकम् ३
आत्मिकं भक्ष्यं बुभुजिर एकम् आत्मिकं पेयं पपुश्च यतस्तेऽनुचरत ४
आत्मिकाद् अचलात् लब्धं तोयं पपुः सोऽचलः ख्रीष्टएव। तथा ५
सत्यपि तेषां मध्येऽधिकेषु लोकेष्वीश्वरो न सन्तुतोषेति हेतोस्ते
प्रान्तरे निपातिताः।

एतस्मिन् ते ऽस्माकं निदर्शनस्वरूपा बभूवुः; अतस्ते यथा ६
कुत्सिताभिलाषिणो बभूवुरस्माभिस्तथा कुत्सिताभिलाषिभि र्न
भवितव्यं। लिखितमास्ते, लोका भोक्तुं पातुञ्चोपविविशुस्ततः ७
क्रीडितुमुत्थिता इत्यनेन प्रकारेण तेषां कैश्चिद् यद्वद् देवपूजा
कृता युष्माभिस्तद्वत् न क्रियतां। अपरं तेषां कैश्चिद् यद्वद् ८
व्यभिचारः कृतस्तेन चैकस्मिन् दिने त्रयोविंशतिसहस्राणि लोका
निपातितास्तद्वद् अस्माभि र्व्यभिचारो न कर्त्तव्यः। तेषां केचिद् ९
यद्वत् ख्रीष्टं परीक्षितवन्तस्तस्माद् भुजङ्गै र्नष्टाश्च तद्वद् अस्माभिः
ख्रीष्टो न परीक्षितव्यः। तेषां केचिद् यथा वाक्कलहं कृतवन्तस्तत्- १०
कारणात् हन्त्रा विनाशिताश्च युष्माभिस्तद्वद् वाक्कलहो न क्रियतां।
तान् प्रति यान्येतानि जघटिरे तान्यस्माकं निदर्शनानि जगतः ११
शेषयुगे वर्त्तमानानाम् अस्माकं शिक्षार्थं लिखितानि च बभूवुः।

१२ अतएव यः कश्चिद् सुस्थिरंमन्यः स यन्न पतेत् तत्र सावधानो
१३ भवतु। मानुषिकपरीक्षातिरिक्ता कापि परीक्षा युष्मान् नाक्रामत्,
ईश्वरश्च विश्वास्यः सोऽतिशक्त्यां परीक्षायां पतनाद् युष्मान् रक्षिष्यति,
परीक्षा च यद् युष्माभिः सोढुं शक्यते तदर्थं तया सह निस्तारस्य
पन्थानं निरूपयिष्यति।

१४ हे प्रियभ्रातरः, देवपूजातो दूरम् अपसरत। अहं युष्मान्
१५ विज्ञान् मत्वा प्रभाषे मया यत् कथ्यते तद् युष्माभि र्विविच्यतां।
१६ यद् धन्यवादपात्रम् अस्माभि र्धन्यं गद्यते तत् किं ख्रीष्टस्य शोणि-
तस्य सहभागित्वं नहि? यश्च पूपोऽस्माभि र्भज्यते स किं ख्रीष्टस्य
१७ वपुषः सहभागित्वं नहि? वयं बहवः सन्तोऽप्येकपूपस्वरूपा एकवपुः-
१८ स्वरूपाश्च भवामः, यतो वयं सर्व्व एकपूपस्य सहभागिनः। यूयं
शारीरिकम् इस्रायेलीयवंशं निरीक्षध्वं। ये बलीनां मांसानि भुञ्जते
१९ ते किं यज्ञवेद्याः सहभागिनो न भवन्ति? इत्यनेन मया किं कथ्यते?
देवता वास्तविकी देवतायै बलिदानं वा वास्तविकं किं भवेत्?
२० तन्नहि किन्तु परजातीयै र्ये बलयो दीयन्ते त ईश्वराय तन्नहि
भूतेभ्यएव दीयन्ते तस्माद् यूयं यद् भूतानां सहभागिनो भवथे-
२१ त्यहं नाभिलषामि। प्रभोः कंसेन भूतानामपि कंसेन पानं युष्मा-
भिरसाध्यं; यूयं प्रभो र्भोज्यस्य भूतानामपि भोज्यस्य सहभागिनो
२२ भवितुं न शक्नुथ। वयं किं प्रभुं स्पर्द्धिष्यामहे? वयं किं तस्माद्
बलवन्तः?

२३ मां प्रति सर्व्वं कर्म्माप्रतिषिद्धं किन्तु न सर्व्वं हितजनकं सर्व्वम्
२४ अप्रतिषिद्धं किन्तु न सर्व्वं निष्ठाजनकं। आत्महितः केनापि न
२५ चेष्टितव्यः किन्तु सर्व्वैः परहितश्चेष्टितव्यः। आपणे यत् क्रय्यं तद्
२६ युष्माभिः संवेदस्यार्थं किमपि न पृष्ट्वा भुज्यतां यतः 'पृथिवी

तन्मध्यस्थञ्च सर्व्वं परमेश्वरस्य।' अपरम् अविश्वासिलोकानां केनचित् २७
निमन्त्रिता यूयं यदि तत्र जिगमिषथ तर्हि तेन यद् यद् उपस्था-
प्यते तद् युष्माभिः संवेदस्यार्थं किमपि न पृष्ट्वा भुज्यतां। किन्तु २८
तत्र यदि कश्चिद् युष्मान् वदेत् भक्ष्यमेतद् देवतायाः प्रसाद इति
तर्हि तस्य ज्ञापयितुरनुरोधात् संवेदस्यार्थञ्च तद् युष्माभि र्न
भोक्तव्यं। 'पृथिवी तन्मध्यस्थञ्च सर्व्वं परमेश्वरस्य,' सत्यमेतत्, २९
किन्तु मया यः संवेदो निर्द्दिश्यते स तव नहि परस्यैव। मम या
स्वतन्त्रता सा परस्य संवेदेन कुतो दूषयिष्यते? अनुग्रहपात्रेण ३०
मया धन्यवादं कृत्वा यद् भुज्यते तत्कारणाद् अहं कुतो निन्दिष्ये?
तस्माद् भोजनं पानम् अन्यद्वा कर्म्म कुर्व्वद्भि र्युष्माभिः सर्व्वमेवेश्वरस्य ३१
महिम्नः प्रकाशार्थं क्रियतां। यिहूदीयानां परजातीयानाम् ईश्वरस्य ३२
मण्डल्या वा विघ्नजनकै र्युष्माभि र्न भवितव्यं। अहमप्यात्महितम् ३३
अचेष्टमानो बहूनां परित्राणार्थं तेषां हितं चेष्टमानः सर्व्वविषये
सर्व्वेषां तुष्टिकरो भवामीत्यनेनाहं यद्वत् ख्रीष्टस्यानुगामी तद्वद् ३४
यूयं ममानुगामिनो भवत।

११ एकादशोऽध्यायः।

१ पुरुषीयोत्तमाङ्गं नाच्छादनीयं योषीयोत्तमाङ्गमवश्यमाच्छादनीयं १७ प्रभो र्भोज्ये करिन्थिनः प्रति भर्त्सनं २२ कथं भोक्तव्यमिति निर्णयनं २३ तस्मिन् पौलस्योपदेशस्य।

हे भ्रातरः, यूयं सर्व्वस्मिन् कार्य्ये मां स्मरथ मया च यादृ- १
गुपदिष्टास्तादृगाचरथैतत्कारणात् मया प्रशंसनीया आध्वे। तथापि २
ममैषा वाञ्छा यद् यूयमिदम् अवगता भवथ, एकैकस्य पुरुष- ३
स्योत्तमाङ्गस्वरूपः ख्रीष्टः, योषितश्चोत्तमाङ्गस्वरूपः पुमान्, ख्रीष्टस्य
चोत्तमाङ्गस्वरूप ईश्वरः। अपरम् आच्छादितोत्तमाङ्गेन येन पुंसा ४

प्रार्थना क्रियते भाववाणी कथ्यते वा तेन स्वीयोत्तमाङ्गम् अव-
५ ज्ञायते। अनाच्छादितोत्तमाङ्गया यया योषिता च प्रार्थना क्रियते
भाववाणी कथ्यते वा तयापि स्वीयोत्तमाङ्गम् अवज्ञायते यतः सा
६ मुण्डितशिरःसदृशा। अनाच्छादितमस्तका या योषित् तस्याः
शिरः मुण्डनीयमेव किन्तु योषितः केशच्छेदनं शिरोमुण्डनं वा
७ यदि लज्जाजनकं भवेत् तर्हि तया स्वशिर आच्छाद्यतां। पुमान्
ईश्वरस्य प्रतिमूर्त्तिः प्रतितेजःस्वरूपश्च तस्मात् तेन शिरो नाच्छा-
८ दनीयं किन्तु सीमन्तिनी पुंसः प्रतिबिम्बस्वरूपा। यतो योषातः
९ पुमान् नोदपादि किन्तु पुंसो योषिद् उदपादि। अधिकन्तु
योषितः कृते पुंसः सृष्टि र्न बभूव किन्तु पुंसः कृते योषितः सृष्टि
१० र्बभूव। इति हेतो र्दूतानाम् आदराद् योषिता शिरस्यधीनता-
११ सूचकम् आवरणं धर्त्तव्यं। तथापि प्रभो र्विधिना पुमांसं विना
१२ योषिन्न जायते योषितञ्च विना पुमान् न जायते। यतो यथा
पुंसो योषिद् उदपादि तथा योषितः पुमान् जायते, सर्व्ववस्तूनि
१३ चेश्वराद् उत्पद्यन्ते। युष्माभिरेवैतद् विविच्यतां, अनावृतया
१४ योषिता प्रार्थनं किं सुदृश्यं भवेत्? पुरुषस्य दीर्घकेशत्वं तस्य
१५ लज्जाजनकं, किन्तु योषितो दीर्घकेशत्वं तस्या गौरवजनकं यत
आच्छादनाय तस्यै केशा दत्ता इति किं युष्माभिः स्वभावतो न
१६ शिक्ष्यते? अत्र यदि कश्चिद् विवदितुम् इच्छेत् तर्ह्यस्माकम् ईश्वरी-
यमण्डलीनाञ्च तादृशी रीति र्न विद्यते।

१७ युष्माभि र्न भद्राय किन्तु कुत्सिताय समागम्यते तस्माद्
१८ एतानि भाषमाणेन मया यूयं न प्रशंसनीयाः। प्रथमतः मण्डल्यां
समागतानां युष्माकं मध्ये भेदाः सन्तीति वार्त्ता मया श्रूयते
१९ तन्मध्ये किञ्चित् सत्यं मन्यते च। यतो हेतो र्युष्मन्मध्ये ये परी-

चितास्ते यत् प्रकाश्यन्ते तदर्थं भेदै र्भवितव्यमेव। एकत्र समागतै २०
युष्माभिः प्राभवं भोज्यं भुज्यत इति नहि; यतो भोजनकाले २१
युष्माकमेकैकेन स्वकीयं भक्ष्यं तूर्णं ग्रस्यते तस्माद् एको जनो
बुभुक्षितस्तिष्ठति, अन्यश्च परितृप्तो भवति। भोजनपानार्थं युष्माकं २२
किं वेश्मानि न सन्ति? युष्माभि र्वा किम् ईश्वरस्य मण्डलीं
तुच्छीकृत्य दीना लोका अवज्ञायन्ते? इत्यनेन मया किं वक्तव्यं?
यूयं किं मया प्रशंसनीयाः? एतस्मिन् यूयं न प्रशंसनीयाः।

प्रभुतो य उपदेशो मया लब्धो युष्मासु समर्पितश्च स एषः। २३
परकरसमर्पणक्षपायां प्रभु र्यीशुः पूपमादायेश्वरं धन्यं व्याहृत्य तं २४
भङ्क्त्वा भाषितवान् युष्माभिरेतद् गृह्यतां भुज्यताञ्च तद् युष्मत्कृते
भग्नं मम शरीरं; मम स्मरणार्थं युष्माभिरेतत् क्रियतां। पुनश्च २५
भोजनात् परं तथैव कंसम् आदाय तेनोक्तं कंसोऽयं मम शोणि-
तेन स्थापितो नूतननियमः; यतिवारं युष्माभिरेतत् पीयते ततिवारं
मम स्मरणार्थं पीयतां। यतिवारं युष्माभिरेष पूपो भुज्यते २६
भाजनेनानेन पीयते च ततिवारं प्रभोरागमनं यावत् तस्य मृत्युः
प्रकाश्यते। अपरञ्च यः कश्चिद् अयोग्यत्वेन प्रभोरिमं पूपम् अश्नाति २७
तस्यानेन भाजनेन पिवति च स प्रभोः कायरुधिरयो र्दण्डदायी
भविष्यति। तस्मात् मानवेनाग्र आत्मानं परीक्ष्य पश्चाद् एष पूपो २८
भुज्यतां कंसेनानेन च पीयतां। येन चानर्हत्वेन भुज्यते पीयते च २९
प्रभोः कायम् अविमृश्यता तेन दण्डप्राप्तये भुज्यते पीयते च।
एतत्कारणाद् युष्माकं भूरिशो लोका दुर्बला रोगिणश्च सन्ति ३०
बहवश्च महानिद्रां गताः। अस्माभि र्यद्यात्मविचारोऽकारिष्यत तर्हि ३१
दण्डो नालप्स्यत; किन्तु यदास्माकं विचारो भवति तदा वयं जगतो ३२
जनैः समं यद् दण्डं न लभामहे तदर्थं प्रभुना शास्तिं भुंज्महे।

३३ हे मम भ्रातरः, भोजनार्थं मिलितानां युष्माकम् एकेनेतरो-
३४ ऽनुगृह्यतां। यश्च बुभुक्षितः स स्वगृहे भुङ्क्तां। दण्डप्राप्तये युष्माभि
र्न समागम्यतां। एतद्भिन्नं यद् आदेष्टव्यं तद् युष्मत्समीपागमनकाले
मयादेक्ष्यते।

१२ द्वादशोऽध्यायः।

१ आत्मनो बहुविधदानकथनं १२ वपुःपूरणाय यथा नानाङ्गानां प्रयोजनं तथा समाजपूर्त्त्यर्थं नानादानानां प्रयोजनञ्च।

१ हे भ्रातरः, यूयं यद् आत्मिकान् दायान् अनवगतास्तिष्ठथ
२ तदहं नाभिलषामि। पूर्व्वं परजातीया यूयं यद्वद् विनीतास्तद्वद्
३ अवाक्प्रतिमानाम् अनुगामिन आध्वम् इति जानीथ। इति
हेतोरहं युष्मभ्यं निवेदयामि, ईश्वरस्यात्मना भाषमाणः कोऽपि
यीशुं शप्त इति न व्याहरति, पुनश्च पवित्रेणात्मना विनीतं विनान्यः
४ कोऽपि यीशुं प्रभुरिति व्याहर्त्तुं न शक्नोति। दाया बहुविधाः
६ किन्त्वेक आत्मा परिचर्य्याश्च बहुविधाः किन्त्वेकः प्रभुः। साधनानि
७ बहुविधानि किन्तु सर्व्वेषु सर्व्वसाधक ईश्वर एकः। एकैकस्मै तस्या-
८ त्मनो दर्शनं परहितार्थं दीयते। एकस्मै तेनात्मना ज्ञानवाक्यं
९ दीयते, अन्यस्मै तेनैवात्मनादिष्टं विद्यावाक्यम्, अन्यस्मै तेनैवात्मना
१० विश्वासः, अन्यस्मै तेनैवात्मना स्वास्थ्यदानशक्तिरन्यस्मै दुःसाध्यसाधन-
शक्तिरन्यस्मै च भाववाणी, अन्यस्मै चात्मनां विचारसामर्थ्यम्, अन्यस्मै
११ परभाषाभाषणशक्तिरन्यस्मै च भाषार्थभाषणसामर्थ्यं दीयते। एके-
नाद्वितीयेनात्मना यथाभिलाषम् एकैकस्मै जनायैकैकं दानं वितरता
तानि सर्व्वाणि साध्यन्ते।

१२ देह एकः सन्नपि यद्वद् बह्वङ्गयुक्तो भवति, तस्यैकस्य वपुषो
१३ ऽङ्गानां बहुत्वेन यद्वद् एकं वपु र्भवति, तद्वत् ख्रीष्टः। यतो

হেতো র্যিহূদিপরজাতীযদাসস্বতন্ত্রা বযং সর্ব্বে স্নাপনেনৈকেনাত্মনৈ-
কদেহীকৃতাঃ সর্ব্বে চৈকাত্মভুক্তা অভবাম। একেনাঙ্গেন বপু র্ন ১৪
ভবতি কিন্তু বহুভিঃ। তত্র চরণং যদি বদেত্ নাহং হস্তস্তস্মাত্ ১৫
শরীরস্য ভাগো নাস্মীতি তর্হ্যনেন শরীরাত্ তস্য বিযোগো ন ভবতি।
শ্রোত্রং বা যদি বদেত্ নাহং নযনং তস্মাত্ শরীরস্যাংশো নাস্মীতি ১৬
তর্হ্যনেন শরীরাত্ তস্য বিযোগো ন ভবতি। কৃত্স্নং শরীরং যদি ১৭
দর্শনেন্দ্রিযং ভবেত্ তর্হি শ্রবণেন্দ্রিযং কুত্র স্থাস্যতি? তত্ কৃত্স্নং
যদি বা শ্রবণেন্দ্রিযং ভবেত্ তর্হি ঘ্রাণেন্দ্রিযং কুত্র স্থাস্যতি ?
কিন্ত্বিদানীম্ ঈশ্বরেণ যথাভিলষিতং তথৈবাঙ্গপ্রত্যঙ্গানাম্ একৈকং ১৮
শরীরে স্থাপিতং। তত্ কৃত্স্নং যদ্যেকাঙ্গরূপি ভবেত্ তর্হি শরীরং কুত্র ১৯
স্থাস্যতি ? তস্মাদ্ অঙ্গানি বহূনি সন্তি শরীরং ত্বেকমেব। ২০
অতএব ত্বযা মম প্রযোজনং নাস্তীতি বাচং পাণিং বদিতুং নযনং ২১
ন শক্নোতি, তথা যুবাভ্যাং মম প্রযোজনং নাস্তীতি মূর্দ্ধা চরণৌ
বদিতুং ন শক্নোতি ; বস্তুতস্তু বিগ্রহস্য যান্যঙ্গান্যস্মাভি র্দুর্ব্বলানি ২২
বুধ্যন্তে তান্যেব সপ্রযোজনানি সন্তি। যানি চ শরীরমধ্যেঽবম- ২৩
ন্যানি বুধ্যন্তে তান্যস্মাভিরধিকং শোভ্যন্তে। যানি চ কুদৃশ্যানি ২৪
তানি সুদৃশ্যতরাণি ক্রিযন্তে কিন্তু যানি স্বযং সুদৃশ্যানি তেষাং
শোভনম্ নিষ্প্রযোজনং। শরীরমধ্যে যদ্ ভেদো ন ভবেত্ কিন্তু ২৫
সর্ব্বাণ্যঙ্গানি যদ্ ঐক্যভাবেন সর্ব্বেষাং হিতং চিন্তযন্তি তদর্থম্
ঈশ্বরেণাপ্রধানম্ আদরণীযং কৃত্বা শরীরং বিরচিতং। তস্মাদ্ ২৬
একস্যাঙ্গস্য পীডাযাং জাতাযাং সর্ব্বাণ্যঙ্গানি তেন সহ পীড্যন্তে,
একস্য সমাদরে জাতে চ সর্ব্বাণি তেন সহ সংহৃষ্যন্তি। যূযঞ্চ ২৭
খ্রীষ্টস্য শরীরং, যুষ্মাকম্ একৈকশ্চ তস্যৈকৈকম্ অঙ্গং। কেচিত্ কেচিত্ ২৮
মণ্ডল্যামীশ্বরেণ প্রথমতঃ প্রেরিতা দ্বিতীযতো ভাববাদিনস্তৃতীযত

उपदेष्टारो नियुक्ताः, ततः परं केभ्योऽपि चित्रकार्य्यसाधनसामर्थ्यम्
अनामयकरणशक्तिरुपकृतौ लोकशासने वा नैपुण्यं नानाभाषा-
२९ भाषणसामर्थ्यं वा तेन व्यतारि। सर्व्वे किं प्रेरिताः? सर्व्वे किम्
भाववादिनः सर्व्वे किम् उपदेष्टारः? सर्व्वे किं चित्रकार्य्यसाधकाः?
३० सर्व्वे किम् अनामयकरणशक्तियुक्ताः? सर्व्वे किं परभाषावादिनः?
३१ सर्व्वे वा किं परभाषार्थप्रकाशकाः? यूयं श्रेष्ठदायान् लब्धुं यतध्वं।
अनेन यूयं मया सर्व्वोत्तममार्गं दर्शयितव्याः।

१३ त्रयोदशोऽध्यायः।

१ अखिलपारमार्थिकदानात् प्रेमदानस्योत्तमत्वं ४ तस्य फलकथनं विश्वासप्रत्याशाभ्यां तस्य श्रेष्ठत्वञ्च।

१ मर्त्यस्वर्गीयाणां भाषा भाषमाणोऽहं यदि प्रेमहीनो भवेयं
२ तर्हि वादकतालस्वरूपो निनादकारिभेरीस्वरूपश्च भवामि। अपरञ्च
यद्यहम् भाववाणीविशिष्टः स्यां सर्व्वाणि गुप्तवाक्यानि सर्व्वविद्याञ्च
जानीयां पूर्णविश्वासः सन् शैलान् स्थानान्तरीकर्त्तुं शक्नुयाञ्च किन्तु
३ यदि प्रेमहीनो भवेयं तर्ह्यगणनीय एव भवामि। अपरं यद्यहम्
अन्नदानेन सर्व्वस्वं त्यजेयं दाहनाय स्वशरीरं समर्पयेयञ्च किन्तु
यदि प्रेमहीनो भवेयं तर्हि तत्सर्व्वं मदर्थं निष्फलं भवति।
४ प्रेम चिरसहिष्णु हितैषि च, प्रेम निर्द्वेषम् अशठं निर्गर्व्वञ्च।
५ अपरं तत् कुत्सितं नाचरति, आत्मचेष्टां न कुरुते सहसा न
६ क्रुध्यति परानिष्टं न चिन्तयति, अधर्म्मे न तुष्यति सत्य एव
७ सन्तुष्यति। तत् सर्व्वं तितिक्षते सर्व्वत्र विश्वसिति सर्व्वत्र भद्रं
८ प्रतीक्षते सर्व्वं सहते च। प्रेम्नो लोपः कदापि न भविष्यति,
भाववाण्यो लोप्स्यन्ते परभाषाभाषणं निवर्त्तिष्यते ज्ञानमपि लोपं
९ यास्यति। यतोऽस्माकं ज्ञानं खण्डमात्रम् भाववाणीकथनमपि

खण्डमात्रं। किन्त्वस्मासु सिद्धतां गतेषु तानि खण्डमात्राणि लोपं १०
यास्यन्ते। बाल्यकालेऽहं बाल इवाभाषे बाल इवाचिन्तयञ्च किन्तु ११
यौवने जाते तत्सर्व्वं बाल्याचरणं परित्यक्तवान्। इदानीम् अभ्र- १२
मध्येनास्पष्टं दर्शनम् अस्माभि र्लभ्यते किन्तु तदा साक्षात् दर्शनं
लप्स्यते। अधुना मम ज्ञानम् अल्पिष्ठं किन्तु तदाहं यथावगम्य-
स्तथैवावगतो भविष्यामि। इदानीं प्रत्ययः प्रत्याशा प्रेम च त्रीण्ये- १३
तानि तिष्ठन्ति तेषां मध्ये च प्रेम श्रेष्ठं।

१४ चतुर्दशोऽध्यायः।

१ नानाभाषाभाषणात उपदेशनस्य श्रेष्ठत्वं ६ उपदिश्य लोकानामवश्यबोधयितव्यत्वं २० बोधयितुः फलं २६ उपदेशे भाषाभाषणे च पौलस्य कथनं ३४ समाजे ऽबलानामप्रचारणकथनं ३६ पौलस्य शासनवाक्यञ्च।

यूयं प्रेमाचरणे प्रयतध्वम् आत्मिकान् दायानपि विशेषत १
भावोक्तिकथनसामर्थ्यं प्राप्तुं चेष्टध्वं। यो जनः परभाषां भाषते २
स मानुषान् न सम्भाषते किन्त्वीश्वरमेव यतः केनापि किमपि न
बुध्यते स चात्मना निगूढवाक्यानि कथयति; किन्तु यो जनो ३
भावोक्तिं कथयति स परेषां निष्ठायै हितोपदेशाय सान्त्वनायै च
भाषते। परभाषावाद्यात्मन एव निष्ठां जनयति किन्तु भाववादी ४
मण्डल्या निष्ठां जनयति। युष्माकं सर्व्वेषां परभाषाभाषणम् ५
इच्छाम्यहं किन्तु भावोक्तिकथनम् अधिकमपीच्छामि। यतः
मण्डल्या निष्ठायै येन स्ववाक्यानाम् अर्थो न क्रियते तस्मात् पर-
भाषावादितो भाववादी श्रेयान्।

हे भ्रातरः, इदानीं मया यदि युष्मत्समीपं गम्यते तर्हीश्वरीय- ६
दर्शनस्य ज्ञानस्य वा भाववाण्या वा शिक्षाया वा वाक्यानि न
भाषित्वा परभाषां भाषमाणेन मया यूयं किमुपकारिष्यध्वे? अपरं ७

वंशीवल्लक्यादिषु निष्प्राणिषु वाद्ययन्त्रेषु वादितेषु यदि क्वणा न
विशिष्यन्ते तर्हि किं वाद्यं किं वा गानं भवति तत् केन बोद्धुं
८ शक्यते? अपरं रणतूर्य्या निस्वणो यद्यव्यक्तो भवेत् तर्हि युद्धाय
९ कः सज्जिष्यते? तद्वत् जिह्वाभि र्यदि सुगम्या वाक् युष्माभि र्न
गद्येत तर्हि यद् गद्यते तत् केन भोत्स्यते? वस्तुतो यूयं दिगा-
१० लापिन इव भविष्यथ। जगति कतिप्रकारा उक्तयो विद्यन्ते?
११ तासामेकापि निरर्थिका नहि; किन्तूक्तेरर्थो यदि मया न बुध्यते
तर्ह्यहं वक्त्रा म्लेच्छ इव मंस्ये वक्तापि मया म्लेच्छ इव मंस्यते।
१२ तस्माद् आत्मिकदायलिप्सवो यूयं मण्डल्या निष्ठार्थं प्राप्तबहुवरा
१३ भवितुं यतध्वं, अतएव परभाषावादी यद् अर्थकरोऽपि भवेत् तत्
१४ प्रार्थयतां। यद्यहं परभाषया प्रार्थनां कुर्य्यां तर्हि मदीय आत्मा
१५ प्रार्थयते, किन्तु मम बुद्धि र्निष्फला तिष्ठति। इत्यनेन किं
करणीयं? अहम् आत्मना प्रार्थयिष्ये बुद्ध्यापि प्रार्थयिष्ये; अपरं
१६ आत्मना गास्यामि बुद्ध्यापि गास्यामि। त्वं यदात्मना धन्यवादं
करोषि तदा यद् वदसि तद् यदि शिष्येनेवोपस्थितेन जनेन
न बुध्यते तर्हि तव धन्यवादस्यान्ते तथास्त्विति तेन वक्तुं कथं
१७ शक्यते? त्वं सम्यग् ईश्वरं धन्यं वदसीति सत्यं तथापि तत्र परस्य
१८ निष्ठा न भवति। युष्माकं सर्व्वेभ्योऽहं परभाषाभाषणे समर्थोऽस्मीति
१९ कारणाद् ईश्वरं धन्यं वदामि; तथापि मण्डल्यां परोपदेशार्थं
मया कथितानि पञ्च वाक्यानि वरं न च लक्षं परभाषीयानि
वाक्यानि।
२० हे भ्रातरः, यूयं बुद्ध्या बालकाइव मा भूत परन्तु दुष्टतया
२१ शिशवइव भूत्वा बुद्ध्या सिद्धा भवत। शास्त्र इदं लिखितमास्ते,
यथा,

इत्यवोचत् परेशोऽहम् आभाषिष्य इमान् जनान्।
भाषाभिः परकीयाभि र्वक्त्रैश्च परदेशिभिः।
तथा मया कृतेऽपीमे न ग्रहीष्यन्ति मद्वचः॥

अतएव तत् परभाषाभाषणं अविश्वासिनः प्रति अभिज्ञानरूपं २२
भवति न च विश्वासिनः प्रति; किन्तु भाववाणी नाविश्वासिनः
प्रति तद् विश्वासिनः प्रत्येव। मण्डलीभुक्तेषु सर्व्वेषु एकस्मिन् स्थाने २३
मिलित्वा परभाषां भाषमाणेषु यदि ज्ञानाकाङ्क्षिणोऽविश्वासिनो वा
तत्रागच्छेयुस्तर्हि युष्मान् उन्मत्तान् किं न वदिष्यन्ति? किन्तु २४
सर्व्वेषु भावोक्तिं प्रकाशयत्सु यद्यविश्वासी ज्ञानाकाङ्क्षी वा कश्चित्
तत्रागच्छति तर्हि सर्व्वैरेव तस्य पापज्ञानं परीक्षा च जायते, २५
ततस्तस्यान्तःकरणस्य गुप्तकल्पनासु व्यक्तीभूतासु सोऽधोमुखः पतन्
ईश्वरमाराध्य युष्मन्मध्य ईश्वरो विद्यत इति सत्यं कथामेतां कथ-
यिष्यति।

हे भ्रातरः, सम्मिलितानां युष्माकम् एकेन गीतम् अन्येनोप- २६
देशोऽन्येन परभाषान्येन ऐश्वरिकदर्शनम् अन्येनार्थबोधकं वाक्यं
लभ्यते किमेतत्? सर्व्वमेव परनिष्ठार्थं युष्माभिः क्रियतां। यदि २७
कश्चिद् भाषान्तरं विवक्षति तर्ह्येकस्मिन् दिने द्विजनेन त्रिजनेन
वा परभाषा कथ्यतां, तदधिकैर्न कथ्यतां तैरपि पर्य्यायानुसारात्
कथ्यतां, एकेन च तदर्थो बोध्यतां। किन्त्वर्थाभिधायकः कोऽपि २८
यदि न विद्यते तर्हि स मण्डल्यां वाचंयमः स्थित्वेश्वरायात्मने च
कथां कथयतु। अपरं द्वौ त्रयो वा भाववादिनः स्वं स्वमादेशं २९
कथयन्तु तदन्ये च तं विचारयन्तु। किन्तु तत्रापरेण केनचिद् ३०
जनेनेश्वरीयादेशे लब्धे प्रथमेन कथनात् निवर्त्तितव्यं। सर्व्वे
यत् शिक्षां सान्त्वनाञ्च लभन्ते तदर्थं यूयं सर्व्वे पर्य्यायेण ३१

३२ भावोक्तिं कथयितुं शक्नुथ । भाववादिनां मनांसि तेषाम् अधीनानि
३३ भवन्ति । यत ईश्वरः कुशासनजनको नहि सुशासनजनक एवेति
पवित्रलोकानां सर्व्वमण्डलीषु प्रकाशते ।
३४ अपरञ्च युष्माकं वनिताः मण्डलीषु तूष्णीम्भूतास्तिष्ठन्तु यतः
शास्त्रलिखितेन विधिना ताः कथाप्रचारणात् निवारितास्ताभि
३५ र्निघ्नाभि र्भवितव्यं । अतस्ता यदि किमपि जिज्ञासन्ते तर्हि गेहेषु
पतीन् पृच्छन्तु यतः मण्डलीमध्ये योषितां कथाकथनं निन्दनीयं ।
३६ ऐश्वरं वचः किं युष्मत्तो निरगमत्? केवलं युष्मान् वा तत्
३७ किम् उपागतं? यः कश्चिद् आत्मानम् भाववादिनम् आत्मना-
विष्टं वा मन्यते स युष्मान् प्रति मया यद् यत् लिख्यते तत्प्रभुना-
३८ ज्ञापितम् इत्युररी करोतु । किन्तु यः कश्चित् अज्ञो भवति सोऽज्ञ
३९ एव तिष्ठतु । अतएव हे भ्रातरः, यूयम् भावोक्तिकथनसामर्थ्यं
४० लब्धुं यतध्वं परभाषाभाषणमपि युष्माभि र्न निवार्य्यतां । सर्व्व-
कर्म्माणि च विध्यनुसारतः सुपरिपाट्या क्रियन्तां ।

---

१५ पञ्चदशोऽध्यायः ।

१ ख्रीष्टोत्थानकथनं १२ उत्थानानङ्गीकारिणो भर्त्सनं २० ख्रीष्टोत्थानेन तल्लोका-
नाम उत्थानावधारणं २९ उत्थाने न सति धर्म्मस्य निष्फलत्वं ३५ उत्थाने शरीरस्य
विशेषत्वं ४२ कथम् उत्थानं भविष्यति तस्य निर्णयः ५० शेषदिनाख्यानञ्च ।

१ हे भ्रातरः, यः सुसंवादो मया युष्मत्समीपे निवेदितो यूयञ्च
२ यं गृहीतवन्त आश्रितवन्तश्च तं पुन र्युष्मान् विज्ञापयामि । युष्माकं
विश्वासो यदि वितथो न भवेत् तर्हि सुसंवादयुक्तानि मम वाक्यानि
३ स्मरतां युस्माकं तेन सुसंवादेन परित्राणं जायते । यतोऽहं यद्
यत् ज्ञापितस्तदनुसारात् युष्मासु मुख्यां यां शिक्षां समार्पयं सेयं,
४ शास्त्रानुसारात् ख्रीष्टोऽस्माकं पापमोचनार्थं प्राणान् त्यक्तवान्,

श्मशाने स्थापितश्च तृतीयदिने शास्त्रानुसारात् पुनरुत्थापितः। स ५
चाग्रे कैफै ततः परं द्वादशशिष्येभ्यो दर्शनं दत्तवान्। ततः परं ६
पञ्चशताधिकसंख्यकेभ्यो भ्रातृभ्यो युगपद् दर्शनं दत्तवान् तेषां
केचित् महानिद्रां गता बहुतरास्त्वद्यापि वर्त्तन्ते। तदनन्तरं ७
याकोबाय तत्पश्चात् सर्व्वेभ्यः प्रेरितेभ्यो दर्शनं दत्तवान्। सर्व्व- ८
शेषेऽकालजाततुल्यो योऽहं, सोऽहमपि तस्य दर्शनं प्राप्तवान्।
ईश्वरस्य मण्डलीं प्रति दौरात्म्याचरणाद् अहं प्रेरितनाम धर्त्तुम् ९
अयोग्यस्तस्मात् प्रेरितानां मध्ये क्षुद्रतमश्चास्मि। यादृशोऽस्मि १०
तादृश ईश्वरस्यानुग्रहेणैवास्मि; अपरं मां प्रति तस्यानुग्रहो
निष्फलो नाभवत्, अन्येभ्यः सर्व्वेभ्यो मयाधिकः श्रमः कृतः, किन्तु
स मया कृतस्तन्नहि मत्सहकारिणेश्वरस्यानुग्रहेणैव। अतएव मया ११
भवेत् तै र्वा भवेत् अस्माभिस्तादृशी वार्त्ता घोष्यते सैव च युष्माभि
र्विश्वासेन गृहीता।

मृत्युदशातः ख्रीष्ट उत्थापित इति वार्त्ता यदि तमधि १२
घोष्यते तर्हि मृतलोकानाम् उत्थिति र्नास्तीति वाग् युष्माकं
मध्ये कैश्चित् कुतः कथ्यते? मृतानाम् उत्थिति र्यदि न भवेत् १३
तर्हि ख्रीष्टोऽपि नोत्थापितः ख्रीष्टश्च यद्यनुत्थापितः स्यात् तर्ह्यस्माकं १४
घोषणं वितथं युष्माकं विश्वासोऽपि वितथः। वयञ्चेश्वरस्य मृषा- १५
साक्षिणो भवामः, यतः ख्रीष्टस्तेनोत्थापितः इति साक्ष्यम् अस्मा-
भिरीश्वरमधि दत्तं किन्तु मृतानामुत्थिति र्यदि न भवेत् तर्हि १६
स तेन नोत्थापितः यतो मृतानामुत्थिति र्यदि न भवेत् तर्हि
ख्रीष्टोऽप्युत्थापितत्वं न गतः। ख्रीष्टश्च यद्यनुत्थापितः स्यात् तर्हि १७
युष्माकं विश्वासो वितथः, यूयम् अद्यापि स्वपापेषु मग्नास्तिष्ठथ। १८
अपरं ख्रीष्टाश्रिता ये मानवा महानिद्रां गतास्तेऽपि नाशं गताः। १९

ख्रीष्टो यदि केवलमिहलोके ऽस्माकं प्रत्याशाभूमिः स्यात् तर्हि
सर्व्वमर्त्त्येभ्यो वयमेव दुर्भाग्याः।
२० इदानीं ख्रीष्टो मृत्युदशात उत्थापितो महानिद्रागतानां मध्ये
२१ प्रथमफलस्वरूपो जातश्च। यतो यद्वत् मानुषद्वारा मृत्युः प्राद्-
२२ र्भूतस्तद्वत् मानुषद्वारा मृतानां पुनरुत्थितिरपि प्रादुर्भूता। आदमेन
यथा सर्व्वे मरणाधीना जातास्तथा ख्रीष्टेन सर्व्वे जीवयिष्यन्ते।
२३ किन्त्वेकैकेन जनेन निजे निजे पर्य्याय उत्थातव्यं प्रथमत प्रथम-
जातफलस्वरूपेन ख्रीष्टेन, द्वितीयतस्तस्यागमनसमये ख्रीष्टस्य
२४ लोकैः। ततः परम् अन्तो भविष्यति तदानीं स सर्व्वं शासनम्
अधिपतित्वं पराक्रमञ्च लुप्त्वा स्वपितरीश्वरे राजत्वं समर्पयिष्यति।
२५ यतः ख्रीष्टस्य रिपवः सर्व्वे यावत् तेन स्वपादयोरधो न निपात-
२६ यिष्यन्ते तावत् तेनैव राजत्वं कर्त्तव्यं। तेन विजेतव्यो यः शेषरिपुः
स मृत्युरेव। लिखितमास्ते 'सर्व्वाणि तस्य पादयो र्वशीकृतानि।'
२७ किन्तु सर्व्वाण्येव तस्य वशीकृतानीत्युक्ते सति सर्व्वाणि येन तस्य
वशीकृतानि स स्वयं तस्य वशीभूतो न जात इति व्यक्तं।
२८ सर्व्वेषु तस्य वशीभूतेषु सर्व्वाणि येन पुत्रस्य वशीकृतानि स्वयं
पुत्रोऽपि तस्य वशीभूतो भविष्यति तत ईश्वरः सर्व्वेषु सर्व्व एव
भविष्यति।
२९ अपरं मृतानां विनिमयेन ये स्नाप्यन्ते तैः किं लप्स्यते? येषां
मृतानाम् उत्थितिः केनापि प्रकारेण न भविष्यति तेषां विनि-
३० मयेन कुतो स्नापनमपि तैरङ्गीक्रियते? वयमपि कुतः प्रतिदण्डं
३१ प्राणभीतिम् अङ्गीकुर्म्महे? अस्मत्प्रभुना यीशुख्रीष्टेन युष्मत्तो मम
या श्लाघास्ते तस्याः शपथं कृत्वा कथयामि दिने दिनेऽहं मृत्युं
३२ गच्छामि। इफिषनगरे वन्यपशुभिः सार्द्धं यदि लौकिकभावात्

मया युद्धं कृतं तर्हि तेन मम को लाभः? मृतानाम् उत्थिति र्यदि न भवेत् तर्हि,

कुर्म्मो भोजनपानेऽद्य श्वस्तु मृत्यु र्भविष्यति।

इत्यनेन धर्म्मात् मा भ्रंशध्वं। ३३

कुसंसर्गेण लोकानां सदाचारो विनश्यति।

यूयं यथोचितं सचैतन्यास्तिष्ठत, पापं मा कुरुध्वं, यतो युष्माकं ३४
मध्य ईश्वरीयज्ञानहीनाः केऽपि विद्यन्ते युष्माकं त्रपायै मयेदं गद्यते।

अपरं मृतलोकाः कथम् उत्थास्यन्ति? कीदृशं वा शरीरं ३५
लब्ध्वा पुनरेष्यन्तीति वाक्यं कश्चित् प्रक्ष्यति। हे अज्ञ त्वया यद् ३६
वीजम् उप्यते तद् यदि न म्रियेत तर्हि न जीवयिष्यते। यया ३७
मूर्त्त्या निर्गन्तव्यं सा त्वया नोप्यते किन्तु शुष्कं वीजमेव; तच्च
गोधूमादीनां किमपि वीजं भवितुं शक्नोति। ईश्वरेणेव यथाभिलाषं ३८
तस्मै मूर्त्ति र्दीयते, एकैकस्मै वीजाय स्वा स्वा मूर्त्तिरेव दीयते।
सर्व्वाणि पललानि नैकविधानि सन्ति, मनुष्यपशुपक्षिमत्स्यादीनां ३९
भिन्नरूपाणि पललानि सन्ति। अपरं स्वर्गीया मूर्त्तयः पार्थिवा ४०
मूर्त्तयश्च विद्यन्ते किन्तु स्वर्गीयानाम् एकरूपं तेजः पार्थिवानाञ्च
तदन्यरूपं तेजोऽस्ति। सूर्य्यस्य तेज एकविधं चन्द्रस्य तेजस्तदन्यविधं ४१
ताराणाञ्च तेजोऽन्यविधं, ताराणां मध्येऽपि तेजसस्तारतम्यं विद्यते।
इत्थं मृतलोकानाम् उत्थितिरपि भविष्यति।

यद् उप्यते तत् क्षय्यं यच्चोत्थास्यति तद् अक्षयं। यद् उप्यते ४२
तत् तुच्छं यच्चोत्थास्यति तद् गौरवान्वितं; यद् उप्यते तन्निर्ब्बलं ४३
यच्चोत्थास्यति तत् शक्तियुक्तं। यत् शरीरम् उप्यते तत् प्राणानां ४४
सद्म, यच्च शरीरम् उत्थास्यति तद् आत्मनः सद्म। प्राणसद्मस्वरूपं
शरीरं विद्यते, आत्मसद्मस्वरूपमपि शरीरं विद्यते। तच्च लिखित- ५४

मास्ते यथा, 'आदिपुरुष आदमो जीवत्प्राणी बभूव,' किन्त्वन्तिम
४६ आदमः (ख्रीष्टो) जीवनदायक आत्मा बभूव। आत्मसद्म न प्रथमं
४७ किन्तु प्राणसद्मैव तत्पश्चाद् आत्मसद्म। आद्यः पुरुषो मृद उत्पन्न-
४८ त्वात् मृण्मयो द्वितीयश्च पुरुषः स्वर्गाद् आगतः प्रभुः। मृण्मयो
यादृश आसीत् मृण्मयाः सर्व्वे तादृशा भवन्ति स्वर्गीयश्च
४९ यादृशोऽस्ति स्वर्गीयाः सर्व्वे तादृशा भवन्ति। मृण्मयस्य रूपं
यद्वद् अस्माभि र्धारितं तद्वत् स्वर्गीयस्य रूपमपि धारयिष्यते।

५० हे भ्रातरः, युष्मान् प्रति व्याहरामि, ईश्वरस्य राज्ये रक्तमांसयो-
रधिकारो भवितुं न शक्नोति, अक्षयत्वे च क्षयस्याधिकारो न
५१ भविष्यति। पश्यताहं युष्मभ्यं निगुढां कथां निवेदयामि। सर्व्वै-
५२ रस्माभि र्महानिद्रा न गमिष्यते किन्त्वन्तिमदिने तूर्य्यां वादिता-
याम् एकस्मिन् विपले निमिषैकमध्ये सर्व्वै रूपान्तरं गमिष्यते,
यतस्तूरी वादिष्यते, मृतलोकाश्चाक्षयीभूता उत्थास्यन्ति वयञ्च
५३ रूपान्तरं गमिष्यामः। यतः क्षयणीयेनैतेन शरीरेणाक्षयत्वं परि-
५४ हितव्यं, मरणाधीनेनैतेन देहेन चामरत्वं परिहितव्यं। एतस्मिन्
क्षयणीये शरीरे ऽक्षयत्वं गते, एतस्मिन् मरणाधीने देहे चामरत्वं
गते शास्त्रे लिखितं वचनमिदं सेत्स्यति, यथा,

———जयेन ग्रस्यते मृत्युः।

५५ मृत्यो ते कण्टकं कुत्र परलोक जयः क्व ते॥

५६ मृत्यो कण्टकं पापमेव पापस्य च बलं व्यवस्था। ईश्वरश्च धन्यो
५७ भवतु यतः सोऽस्माकं प्रभुना यीशुख्रीष्टेनास्मान् जययुक्तान्
५८ विधापयति। अतो हे मम प्रियभ्रातरः यूयं सुस्थिरा निश्चलाश्च
भवत प्रभोः सेवायां युष्माकं परिश्रमो निष्फलो न भविष्यतीति
ज्ञात्वा प्रभोः कार्य्ये सदा तत्परा भवत।

१६ षोड़शोऽध्यायः।

१ दानं कर्त्तुं पौलस्योपदेशः १० आपल्लुतिमथ्योः पौलस्य कथनं १५ स्तिफान-प्रभृतिषु भ्रातृषु पौलस्य कथनं २१ नमस्कारप्रेषणं समाप्तेः कथनञ्च।

पवित्रलोकानां कृते योऽर्थसंग्रहस्तमधि गालातीयदेशस्थमण्डल्यो १
मया यद् आदिष्टास्तद् युष्माभिरपि क्रियतां। ममागमनकाले २
यद् अर्थसंग्रहो न भवेत् तन्निमित्तं युष्माकमेकैकेन स्वसम्पदानु-
सारात् सञ्चयं कृत्वा सप्ताहस्य प्रथमदिवसे स्वसमीपे किञ्चित्
निक्षिप्यतां। ततो ममागमनसमये यूयं यानेव विश्वास्या इति ३
वेदिष्यथ तेभ्योऽहं पत्राणि दत्त्वा युष्माकं तद्दानस्य यिरूशालेमं
नयनार्थं तान् प्रेषयिष्यामि। किन्तु यदि तत्र ममापि गमनम् ४
उचितं भवेद् तर्हि ते मया सह यास्यन्ति। साम्प्रतं माकिदनिया ५
देशमहं पर्य्यटामि तं पर्य्यट्य युष्मत्समीपम् आगमिष्यामि। अनन्तरं ६
किं जानामि युष्मत्सन्निधिम् अवस्थास्ये शीतकालमपि यापयिष्यामि
च पश्चात् मम यत् स्थानं गन्तव्यं तत्रैव युष्माभिरहं प्रेरयितव्यः।
यतोऽहं यात्राकाले क्षणमात्रं युष्मान् द्रष्टुं नेच्छामि किन्तु प्रभु ७
र्यद्यनुजानीयात् तर्हि किञ्चिद् दीर्घकालं युत्समीपे प्रवस्तुम्
इच्छामि। तथापि निस्तारोत्सवात् परं पञ्चाशत्तमदिनं यावद् ८
इफिषपुर्य्यां स्थास्यामि। यस्माद् अत्र कार्य्यसाधनार्थं ममान्तिके ९
बृहद् द्वारं मुक्तं बहवो विपक्षा अपि विद्यन्ते।

तिमथि र्यदि युष्माकं समीपम् आगच्छेत् तर्हि येन निर्भयं १०
युष्मन्मध्ये वर्त्तेत तत्र युष्माभि र्मनो निधीयतां यस्माद् अहं यादृक्
सोऽपि तादृक् प्रभोः कर्म्मणे यतते। कोऽपि तं प्रत्यनादरं नकरोतु ११
किन्तु स ममान्तिकं यद् आगन्तुं शक्नुयात् तदर्थं युष्माभिः सकु-
शलं प्रेष्यतां। भ्रातृभिः सार्द्धमहं तं प्रतीक्षे। आपल्लुं भ्रातरमप्यहं १२

निवेदयामि भ्रातृभिः सार्कं सोऽपि यद् युष्माकं समीपं व्रजेत्
तदर्थं मया स पुनः पुनर्याचितः किन्त्विदानीं गमनं सर्व्वथा
१३ तस्मै नारोचत, इतःपरं सुसमयं प्राप्य स गमिष्यति। यूयं जागृत
१४ विश्वासे सुस्थिरा भवत पैारुषं प्रकाशयत बलवन्तो भवत। युष्माभिः
सर्व्वाणि कर्म्माणि प्रेम्ना निष्पाद्यन्तां।
१५ हे भ्रातरः, अहं युष्मान् इदम् अभियाचे स्तिफानस्य परिजना
आखायादेशस्य प्रथमजातफलस्वरूपाः, पवित्रलोकानां परिचर्य्यायै
१६ च त आत्मनो न्यवेदयन् इति युष्माभि र्ज्ञायते। अतो यूयमपि
तादृशलोकानाम् अस्मत्सहायानां श्रमकारिणाञ्च सर्व्वेषां वश्या
१७ भवत। स्तिफानः फर्तूनात आखायिकश्च यद् अत्रागमन् तेनाहम्
१८ आनन्दामि यतो युष्माभिर्यत् न्यूनितं तत् तैः सम्पूरितं। तै र्युष्माकं
१९ मम च मनांस्याप्यायितानि। तस्मात् तादृशा लोका युष्माभिः
सम्मन्तव्याः। युष्मभ्यम् आशियादेशस्थमण्डलीनां नमस्कृतिम् आक्किल-
२० प्रिस्किल्लयोस्तन्मण्डपस्थमण्डल्याश्च बहुनमस्कृतिं प्रजानीत। सर्व्वे
भ्रातरो युष्मान् नमस्कुर्व्वन्ते। यूयं पवित्रचुम्बनेन मिथो नमत।
२१ पैालोऽहं स्वकरलिखितं नमस्कृतिं युष्मान् वेदये। यदि कश्चिद्
२२ यीशुख्रीष्टे न प्रीयते तर्हि स शापग्रस्तो भवेत् प्रभुरायाति। अस्माकं
२३ प्रभो र्यीशुख्रीष्टस्यानुग्रहो युष्मान् प्रति भूयात्। ख्रीष्टं यीशुम्
२४ आश्रितान् युष्मान् प्रति मम प्रेम तिष्ठतु। इति॥

करिन्थिनः प्रति पौलस्य द्वितीयं पत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचरणं ३ ख्रीष्टस्य शिष्याणां दुःखसुखबोधः १२ करिन्थीयमण्डलीं प्रति प्रेरितानामाचरणं १५ तेषां समीपं पौलस्य गमननिश्चयः २३ तस्य गमनस्य कारणनिर्णयश्च।

ईश्वरस्येच्छया यीशुख्रीष्टस्य प्रेरितः पौलस्तिमथिर्भ्राता च १
द्वावेतौ करिन्थनगरस्थायै ईश्वरीयमण्डल्याय आखायादेशस्थेभ्यः
सर्व्वेभ्यः पवित्रलोकेभ्यश्च पत्रं लिखतः। अस्माकं तातस्येश्वरस्य २
प्रभोर्यीशुख्रीष्टस्य चानुग्रहः शान्तिश्च युष्मासु वर्त्ततां।
कृपालुः पिता सर्व्वसान्त्वनाकरेश्वरश्च योऽस्मत्प्रभोर्यीशुख्रीष्टस्य ३
तात ईश्वरः स धन्यो भवतु। यतो वयम् ईश्वरात् सान्त्वनां ४
प्राप्य तया सान्त्वनया यत् सर्व्वविधक्लिष्टान् लोकान् सान्त्वयितुं
शक्नुयाम तदर्थं सोऽस्माकं सर्व्वक्लेशसमयेऽस्मान् सान्त्वयति। यतः ५
ख्रीष्टस्य क्लेशा यद्वद् बाहुल्येनास्मासु वर्त्तन्ते तद्वद् वयं ख्रीष्टेन
बहुसान्त्वनाढ्या अपि भवामः। वयं यदि क्लिश्यामहे तर्हि ६
युष्माकं सान्त्वनापरित्राणयोः कृते क्लिश्यामहे यतोऽस्माभि र्यादृ-
शानि दुःखानि सह्यन्ते युष्माकं तादृशदुःखानां सहनेन तौ
साधयिष्येते इत्यस्मिन् युष्मानधि मम दृढा प्रत्याशा भवति।
यदि वा वयं सान्त्वनां लभामहे तर्हि युष्माकं सान्त्वनापरित्राणयोः ७
कृते तामपि लभामहे। यतो यूयं यादृग् दुःखानां भागिनो-
ऽभवत तादृक् सान्त्वनाया अपि भागिनो भविष्यथेति वयं
जानीमः। हे भ्रातरः, आशियादेशे यः क्लेशोऽस्मान् आक्राम्यत् ८
तं यूयं यद् अनवगतास्तिष्ठत तन्मया भद्रं न मन्यते। तेनाति- ९

शक्तिक्लेशेन वयमतीव पीडितास्तस्मात् जीवनरक्षणे निरुपाया
जाताश्च, अतो वयं स्वेषु न विश्वस्य मृतलोकानाम् उत्थापयित-
रीश्वरे यद् विश्वासं कुर्म्मस्तदर्थम् अस्माभिः प्राणदण्डो भोक्तव्य
१० इति स्वमनसि निश्चितं। एतादृशभयङ्करात् मृत्यो र्यो ऽस्मान्
अत्रायतेदानीमपि त्रायते स इतः परमप्यस्मान् त्रास्यते ऽस्माकम्
११ एतादृशी प्रत्याशा विद्यते। एतदर्थमस्मत्कृते प्रार्थनया वयं
युष्माभिरुपकर्त्तव्यास्तथा कृते बहुभि र्याचितो यो ऽनुग्रहो ऽस्मासु
वर्त्तिष्यते तत्कृते बहुभिरीश्वरस्य धन्यवादो ऽपि कारिष्यते।
१२ अपरञ्च संसारमध्ये विशेषतो युष्मन्मध्ये वयं सांसारिक्या धिया
नहि किन्त्वीश्वरस्यानुग्रहेणाकुटिलताम् ईश्वरीयसारल्यञ्चाचरित-
वन्तोऽत्रास्माकं मनो यत् प्रमाणं ददाति तेन वयं श्लाघामहे।
१३ युष्माभि र्यद् यत् पठ्यते गृह्यते च तदन्यत् किमपि युष्मभ्यम्
अस्माभि र्न लिख्यते तच्चान्तं यावद् युष्माभि र्ग्रहीष्यत इत्यस्माकम्
१४ आशा। यूयमितः पूर्व्वमप्यस्मान् अंशतो गृहीतवन्तः, यतः प्रभो
र्यीशुख्रीष्टस्य दिने यद्वद् युष्मास्वस्माकं श्लाघा तद्वद् अस्मासु
युष्माकमपि श्लाघा भविष्यति।
१५ अपरं यूयं यद् द्वितीयं वरं लभध्वे तदर्थमितः पूर्व्वं तया
१६ प्रत्याशया युष्मत्समीपं गमिष्यामि युष्मद्देशेन माकिदनियादेशं
व्रजीत्वा पुनस्तस्मात् माकिदनियादेशात् युष्मत्समीपम् एत्य युष्माभि
१७ र्यिहूदादेशं प्रेषयिष्ये चेति मम वाञ्छासीत्। एतादृशी मन्त्रणा
मया किं चाञ्चल्येन कृता? यद् यद् अहं मन्त्रये तत् किं
विषयिलोकइव मन्त्रयाण आदौ स्वीकृत्य पश्चाद् अस्वीकुर्व्वे?
१८ युष्मान् प्रति मया कथितानि वाक्यान्यग्रे स्वीकृतानि शेषेऽस्वीकृ-
१९ तानि नाभवन् एतेनेश्वरस्य विश्वस्तता प्रकाशते। मया सिल्वानेन

तिमथिना चेश्वरस्य पुत्रो यो यीशुख्रीष्टो युष्मन्मध्ये घोषितः स
तेन स्वीकृतः पुनरस्वीकृतश्च तन्नहि किन्तु स तस्य स्वीकारस्वरूप-
एव। ईश्वरस्य महिमा यद् अस्माभिः प्रकाशेत तदर्थम् ईश्वरेण २०
यद् यत् प्रतिज्ञातं तत्सर्व्वं ख्रीष्टेन स्वीकृतं सत्यीभूतञ्च। युष्मान् २१
अस्मांश्चाभिषिच्य यः ख्रीष्टे स्थास्नून् करोति स ईश्वर एव। स २२
चास्मान् मुद्राङ्कितान् अकार्षीत् सत्यङ्कारस्य पणस्वरूपम् आत्मानं
अस्माकम् अन्तःकरणेषु निरक्षिपच्च।

अपरं युष्मासु करुणां कुर्व्वन् अहम् एतावत्कालं यावत् करिन्थ- २३
नगरं न गतवान् इति सत्यमेतस्मिन् ईश्वरं साक्षिणं कृत्वा मया
स्वप्राणानां शपथः क्रियते। वयं युष्माकं विश्वासस्य नियन्तारो न २४
भवामः किन्तु युष्माकम् आनन्दस्य सहाया भवामः, यस्माद्
विश्वासे युष्माकं स्थिति र्भवति।

२ द्वितीयोऽध्यायः।

१ पौलस्योपस्थितौ यथा दुःखं न जायते तदर्थं वहिष्कृतलोको ग्रहणीय इति मन्त्रणा १२ सुसंवादप्रचारणेन पौलस्य कर्म्मणः सफलत्वञ्च।

अपरञ्चाहं पुनः शोकाय युष्मत्सन्निधिं न गमिष्यामीति १
मनसि निरचैषं। यस्माद् अहं यदि युष्मान् शोकयुक्तान् करोमि २
तर्हि मया यः शोकयुक्तीकृतस्तं विना केनापरेणाहं हर्षयिष्ये? मम ३
यो हर्षः स युष्माकं सर्व्वेषां हर्ष एवेति निश्चितं मयाबोधि; अत-
एव यैरहं हर्षयितव्यस्तै र्मदुपस्थितिसमये यन्मम शोको न जाये-
त तदर्थमेव युष्मभ्यम् एतादृशं पत्रं मया लिखितं। वस्तुतस्तु बहु- ४
क्लेशस्य मनःपीडायाश्च समयेऽहं बह्वश्रुपातेन पत्रमेकं लिखित-
वान् युष्माकं शोकार्थं तन्नहि किन्तु युष्मासु मदीयप्रेमबाहुल्यस्य
ज्ञापनार्थं। येनाहं शोकयुक्तीकृतस्तेन केवलमहं शोकयुक्तीकृतस्त- ५

न्नहि किन्त्वंशतो यूयं सर्व्वेऽपि यतोऽहमत्र कस्मिंश्चिद् दोषमारो-
६ पयितुं नेच्छामि। बहूनां यत् तर्ज्जनं तेन जनेनालम्भि तत् तदर्थं
७ प्रचुरं। अतः स दुःखसागरे यन्न निमज्जति तदर्थं युष्माभिः स
८ क्षन्तव्यः सान्त्वयितव्यश्च। इति हेतोः प्रार्थयेऽहं युष्माभिस्तस्मिन्
९ दया क्रियतां। यूयं सर्व्वकर्म्मणि ममादेशं गृह्लीथ न वेति परीक्षि-
१० तुम् अहं युष्मान् प्रति लिखितवान्। यस्य यो दोषो युष्माभिः
क्षम्यते तस्य स दोषो मयापि क्षम्यते यश्च दोषो मया क्षम्यते स
११ युष्माकं कृते ख्रीष्टस्य साक्षात् क्षम्यते। शैतानः कल्पनास्माभिर-
ज्ञाता नहि, अतो वयं यत् तेन न वञ्च्यामहे तदर्थम् अस्माभिः
सावधानै र्भवितव्यं।

१२ अपरञ्च ख्रीष्टस्य सुसंवादघोषणार्थं मयि त्रोयानगरमागते
१३ प्रभोः कर्म्मणे च मदर्थं द्वारे मुक्ते सत्यपि स्वभ्रातुस्तीतस्याविद्य-
मानत्वात् मदीयात्मनः कापि शान्ति र्न बभूव, तस्माद् अहं
तान् विसर्ज्जनं याचित्वा माकिदनियादेशं गन्तुं प्रस्थानम् अकरवं।
१४ य ईश्वरः सर्व्वदा ख्रीष्टेनास्मान् जयिनः करोति सर्व्वत्र चास्माभि-
१५ स्तदीयज्ञानस्य गन्धं प्रकाशयति स धन्यः। यस्माद् ये त्राणं
लप्स्यन्ते ये च विनाशं गमिष्यन्ति तान् प्रति वयम् ईश्वरेण
१६ ख्रीष्टस्य सौगन्ध्यं भवामः। वयम् एकेषां मृत्यवे मृत्युगन्धा
अपरेषाञ्च जीवनाय जीवनगन्धा भवामः, किन्त्वेतादृशकर्म्मसाधने
१७ कः समर्थोऽस्ति? अन्ये बहवो लोका यद्वद् ईश्वरस्य वाक्यं
मृषाशिक्षया मिश्रयन्ति वयं तद्वत् तन्न मिश्रयन्तः सरलभावे-
नेश्वरस्य साक्षाद् ईश्वरस्यादेशात् ख्रीष्टेन कथां भाषामहे।

३ तृतीयोऽध्यायः।

१ करिन्थिनः पौलस्य प्रशंसापत्राणि ४ मोशेर्व्यवस्थाप्रचारणात् ख्रीष्टस्य सुसंवाद-प्रचारणं वरं १२ दृष्टान्तेन तत्कथायाः प्रमाणञ्च ।

वयं किम् आत्मप्रशंसनं पुनरारभामहे? युष्मान् प्रति युष्मत्तो १
वा परेषां केषाञ्चिद् इवास्माकमपि किं प्रशंसापत्रेषु प्रयोजनम्
आस्ते? यूयमेवास्माकं प्रशंसापत्रं तच्चास्माकम् अन्तःकरणेषु लिखितं २
सर्व्वमानवैश्च ज्ञेयं पठनीयञ्च। यतोऽस्माभिः सेवितं ख्रीष्टस्य ३
पत्रं यूयमेव, तच्च न मस्या किन्त्वमरस्येश्वरस्यात्मना लिखितं
पाषाणपत्रेषु तन्नहि किन्तु क्रव्यमयेषु हृत्पत्रेषु लिखितमिति
सुस्पष्टं।

ख्रीष्टेनेश्वरं प्रत्यस्माकम् ईदृशो दृढविश्वासो विद्यते; वयं ४
निजगुणेन किमपि कल्पयितुं समर्था इति नहि किन्त्वीश्वराद- ५
स्माकं सामर्थ्यं जायते। तेन वयं नूतननियमस्यार्थतो ऽक्षरसंस्थानस्य ६
तन्नहि किन्त्वात्मन एव सेवनसामर्थ्यं प्राप्ताः। अक्षरसंस्थानं मृत्युज- ७
नकं किन्त्वात्मा जीवनदायकः। अक्षरै र्विलिखितपाषाणरूपिणी
या मृत्योः सेवा सा यदीदृक् तेजस्विनी जाता यत्तस्याचिरस्थायि-
नस्तेजसः कारणात् मोशेः मुखम् इस्रायेलीयलोकैः संद्रष्टुं नाशक्यत, ८
तर्ह्यात्मनः सेवा किं ततोऽपि बहुतेजस्विनी न भवेत्? दण्डजनिका ९
सेवा यदि तेजोयुक्ता भवेत् तर्हि धार्म्मिकताजनिका सेवा ततो-
ऽधिकं बहुतेजोयुक्ता भविष्यति। उभयोस्तुलनायां कृतायाम् एक- १०
स्यास्तेजो द्वितीयायाः प्रखरतरेण तेजसा हीनतेजो भवति। यस्माद् ११
यत् लोपनीयं तद् यदि तेजोयुक्तं भवेत् तर्हि यत् चिरस्थायि
तद् बहुतरतेजोयुक्तमेव भविष्यति।

ईदृशीं प्रत्याशां लब्ध्वा वयं महतीं प्रगल्भतां प्रकाशयामः। १२

१३ ईस्रायेलीयलोका यत् तस्य लोपनीयस्य तेजसः शेषं न वि-
लोकयेयुस्तदर्थं मोशि यादृग् आवरणेन स्वमुखम् आच्छादयत्
१४ वयं तादृक् न कुर्म्मः। तेषां मनांसि कठिनीभूतानि यतस्तेषां
पठनसमये स पुरातनो नियमस्तेनावरणेनाद्यापि प्रच्छन्नस्तिष्ठति।
१५ तच्च न दूरीभवति यतः ख्रीष्टेनैव तत् लुप्यते मोशेः शास्त्रस्य
१६ पाठसमयेऽद्यापि तेषां मनांसि तेनावरणेन प्रच्छाद्यन्ते किन्तु प्रभुं
१७ प्रति मनसि परावृत्ते तद् आवरणं दूरीकारिष्यते। यः प्रभुः स एव
१८ स आत्मा यत्र च प्रभोरात्मा तत्रैव मुक्तिः। वयञ्च सर्व्वेऽनाच्छा-
दितेनास्येन प्रभोस्तेजसः प्रतिबिम्बं गृह्लन्त आत्मास्वरूपेण प्रभुना
रूपान्तरीकृता वर्द्धमानतेजोयुक्तां तामेव प्रतिमूर्त्तिं प्राप्नुमः।

---

४ चतुर्थोऽध्यायः।

१ सुसंवादप्रचारणाय पौलस्य सारल्यम् उद्योगश्च ७ प्रचारणे तस्य बहुदुःखं
१२ किन्तु तद् दुःखं तस्य माङ्गल्याय हिताय च।

१ अपरञ्च वयं करुणाभाजो भूत्वा यद् एतत् परिचारकपदम्
२ अलभामहि नात्र क्लाम्यामः, किन्तु त्रपायुक्तानि प्रच्छन्नकर्म्माणि
विहाय कुटिलताचरणमकुर्व्वन्त ईश्वरीयवाक्यं मिथ्यावाक्यैरमिश्र-
यन्तः सत्यधर्म्मस्य प्रकाशनेनेश्वरस्य साक्षात् सर्व्वमानवानां संवेदगो-
३ चरे स्वान् प्रशंसनीयान् दर्शयामः। अस्माभि र्घोषितः सुसंवादो
यदि प्रच्छन्नः स्यात् तर्हि ये विनंक्ष्यन्ति तेषामेव दृष्टितः स प्रच्छन्नः;
४ यत ईश्वरस्य प्रतिमूर्त्ति र्यः ख्रीष्टस्तस्य तेजसः सुसंवादस्य प्रभा यत्
तान् न दीपयेत् तदर्थम् इह लोकस्य देवोऽविश्वासिनां ज्ञाननय-
५ नम् अन्धीकृतवान् एतस्योदाहरणं ते भवन्ति। वयं स्वान् घोषयाम
इति नहि किन्तु ख्रीष्टं यीशुं प्रभुमेवास्मांश्च यीशोः कृते युष्माकं
६ परिचारकान् घोषयामः। य ईश्वरो मध्येतिमिरं प्रभां दीपनाया-

दिशत् स यीशुख्रीष्टस्यास्य ईश्वरीयतेजसो ज्ञानप्रभाया उदयार्थम्
अस्माकम् अन्तःकरणेषु दीपितवान्।

अपरं तद् धनम् अस्माभि र्मृण्मयेषु भाजनेषु धार्य्यते यतः ७
साद्भुता शक्ति र्नास्माकं किन्त्वीश्वरस्यैवेति ज्ञातव्यं। वयं पदे पदे ८
पीड्यामहे किन्तु नावसीदामः, वयं व्याकुलाः सन्तोऽपि निरुपाया
न भवामः; वयं प्रद्राव्यमाना अपि न क्लाम्यामः, निपातिता अपि ९
न विनश्यामः। अस्माकं शरीरे ख्रीष्टस्य जीवनं यत् प्रकाशेत तदर्थं १०
तस्मिन् शरीरे यीशो र्मरणमपि धारयामः। यीशो र्जीवनं यद् ११
अस्माकं मर्त्त्यदेहे प्रकाशेत तदर्थं जीवन्तो वयं यीशोः कृते नित्यं
मृत्यौ समर्प्यामहे। इत्थं वयं मृत्याक्रान्ता यूयञ्च जीवनाक्रान्ताः। १२

विश्वासकारणादेव समभाषि मया वचः। १३

इति यथा शास्त्रे लिखितं तथैवास्माभिरपि विश्वासजनकम्
आत्मानं प्राप्य विश्वासः क्रियते तस्माच्च वचांसि भाष्यन्ते। प्रभु १४
यीशु र्येनोत्थापितः स यीशुनास्मानप्युत्थापयिष्यति युष्माभिः सार्द्धं
स्वसमीप उपस्थापयिष्यति च, वयम् एतत् जानीमः। अतएव युष्माकं १५
हिताय सर्व्वमेव भवति तस्माद् बहूनां प्रचुरानुग्रहप्राप्ते र्बहुलो-
कानां धन्यवादेनेश्वरस्य महिमा सम्यक् प्रकाशिष्यते। ततो हेतो १६
र्वयं न क्लाम्यामः किन्तु वाह्यपुरुषो यद्यपि क्षीयते तथाप्यान्तरिकः
पुरुषो दिने दिने नूतनायते। क्षणमात्रस्थायि यदेतत् लघिष्ठं दुःखं १७
तद् अतिबाहुल्येनास्माकम् अनन्तकालस्थायि गरिष्ठसुखं साधयति,
यतो वयं प्रत्यक्षान् विषयान् अनुद्दिश्याप्रत्यक्षान् उद्दिशामः। यतो १८
हेतोः प्रत्यक्षविषयाः क्षणमात्रस्थायिनः किन्त्वप्रत्यक्षा अनन्तकाल-
स्थायिनः।

५ पञ्चमोऽध्यायः।

१ विचारदिवसेऽनन्तजीवनप्राप्तिमपेक्ष्य सुसंवादप्रचारणे पौलस्य परिश्रमः ११ तस्याचारप्रचारनिर्णयश्च।

१ अपरम् अस्माकम् एतस्मिन् पार्थिवे दूष्यरूपे वेश्मनि जीर्णे
सतीश्वरेण निर्म्मितम् अकरकृतम् अस्माकम् अनन्तकालस्थायि
२ वेश्मैकं स्वर्गे विद्यत इति वयं जानीमः। यतो हेतोरेतस्मिन् वेश्मनि
तिष्ठन्तो वयं तं स्वर्गीयं वासं परिधातुम् आकाङ्क्षमाणा निःश्व-
३ सामः। तथापीदानीमपि वयं तेन न नग्नाः किन्तु परिहितवसना
४ मन्यामहे। एतस्मिन् दूष्ये तिष्ठन्तो वयं क्लिश्यमाना निःश्वसामः,
यतो वयं वासं त्यक्तुम् इच्छामस्तन्नहि किन्तु तं द्वितीयं वासं
५ परिधातुम् इच्छामः, यतस्तथा कृते जीवनेन मर्त्त्यं ग्रसिष्यते। एत-
दर्थं वयं येन सृष्टाः स ईश्वर एव स चास्मभ्यं सत्यङ्कारस्य पण-
६ स्वरूपम् आत्मानं दत्तवान्। अतएव वयं सर्व्वदोत्सुका भवामः
किञ्च शरीरे यावद् अस्माभि र्न्युष्यते तावत् प्रभुतो दूरे प्रोष्यत
७ इति जानीमः, यतो वयं दृष्टिमार्गे न चरामः किन्तु विश्वास-
८ मार्गे। अपरञ्च शरीराद् दूरे प्रवस्तुं प्रभोः सन्निधौ निवस्तुञ्चा-
९ काङ्क्षमाणा उत्सुका भवामः। तस्मादेव कारणाद् वयं तस्य सन्नि-
धौ निवसन्तस्तस्माद् दूरे प्रवसन्तो वा तस्मै रोचितुं यतामहे।
१० यस्मात् शरीरावस्थायाम् एकैकेन कृतानां कर्म्मणां शुभाशुभफल-
प्राप्तये सर्व्वैरस्माभिः ख्रीष्टस्य विचारासनसम्मुख उपस्थातव्यं।
११ अतएव प्रभो र्भयानकत्वं विज्ञाय वयं मनुजान् अनुनयामः
किञ्चेश्वरस्य गोचरे सप्रकाशा भवामः, युष्माकं संवेदगोचरेऽपि
१२ सप्रकाशा भवाम इत्याशंसामहे। अनेन वयं युष्माकं सन्निधौ पुनः

स्वान् प्रशंसाम इति नहि किन्तु ये मनो विना मुखैः श्लाघन्ते
तेभ्यः प्रत्युत्तरदानाय यूयं यथास्माभिः श्लाघितुं शक्नुथ तादृशम्
उपायं युष्मभ्यं वितरामः। यदि वयं हतज्ञाना भवामस्तर्हि तद् १३
ईश्वरार्थकं यदि च सज्ञाना भवामस्तर्हि तद् युष्मदर्थकं। वयं १४
ख्रीष्टस्य प्रेम्ना समाकृष्यामहे यतः सर्व्वेषां विनिमयेन यद्येको जनो-
ऽम्रियत तर्हि ते सर्व्वे मृता इत्यस्माभि र्बुध्यते। अपरञ्च ये जीवन्ति १५
ते यत् स्वार्थं न जीवन्ति किन्तु तेषां कृते यो जनो मृतः पुनरुत्था-
पितश्च तमुद्दिश्य यत् जीवन्ति तदर्थमेव स सर्व्वेषां कृते मृतवान्।
अतो हेतोरितः परं कोऽप्यस्माभि र्जातितो न प्रतिज्ञातव्यः। यद्यपि १६
पूर्व्वं ख्रीष्टो जातितोऽस्माभिः प्रतिज्ञातस्तथापीदानीं जातितः पुन
र्न प्रतिज्ञायते। केनचित् ख्रीष्ट आश्रिते नूतना सृष्टि र्भवति १७
पुरातनानि लुप्यन्ते पश्य निखिलानि नवीनानि भवन्ति। सर्व्व- १८
ञ्चैतद् ईश्वरस्य कर्म्म यतो यीशुख्रीष्टेन स एवास्मान् स्वेन सार्द्धं
संहितवान् सन्धानसम्बन्धीयां परिचर्य्याम् अस्मासु समर्पितवांश्च। यत १९
ईश्वरः ख्रीष्टम् अधिष्ठाय जगतो जनानाम् आगांसि तेषाम् ऋण-
मिव न गणयन् स्वेन सार्द्धं तान् संहितवान् सन्धिवार्त्ताम् अस्मासु
समर्पितवांश्च। अतो वयं ख्रीष्टस्य विनिमयेन दौत्यं कर्म्म सम्पाद- २०
यामहे, ईश्वरश्चास्माभि र्युष्मान् याचयते ततः ख्रीष्टस्य विनिमयेन
वयं युष्मान् प्रार्थयामहे यूयमीश्वरेण सन्धत्त। यतो वयं तेन यद् २१
ईश्वरीयधार्म्मिकता भवामस्तदर्थं पापेन सह यस्य ज्ञातेयं नासीत् स
एव तेनास्माकं विनिमयेन पापः कृतः।

६ षष्ठोऽध्यायः।

१ सुसंवादप्रचारणे पौलस्य विश्वास्यता १४ देवपूजकैः साकं मित्रताप्रतिषेधश्च।

१ तस्य सहाया वयं युष्मान् प्रार्थयामहे, ईश्वरस्यानुग्रहो युष्माभि
२ र्वृथा न गृह्यतां। तेनोक्तमेतत्,

संश्रोष्यामि शुभे काले त्वदीयां प्रार्थनाम् अहं।
उपकारं करिष्यामि परित्राणदिने तव।

३ पश्यतायं शुभकालः पश्यतेदं त्राणदिनं। अस्माकं परिचर्य्या यन्नि-
ष्कलङ्का भवेत् तदर्थं वयं कुत्रापि विघ्नं न जनयामः, किन्तु
४ प्रचुरसहिष्णुता क्लेशो दैन्यं विपत् ताड़ना काराबन्धनं निवासहीनत्वं
५ परिश्रमो जागरणम् उपवसनं निर्म्मलत्वं ज्ञानं मृदुशीलता हिते-
६ षिता पवित्र आत्मा निष्कपटं प्रेम सत्यालाप ईश्वरीयशक्ति
७ र्दक्षिणवामाभ्यां कराभ्यां धर्म्मास्त्रधारणं मानापमानयोरख्याति-
८ सुख्यात्यो र्भागित्वम् एतैः सर्व्वैरीश्वरस्य प्रशंस्यान् परिचारकान्
९ स्वान् प्रकाशयामः। भ्रामकसमा वयं सत्यवादिनो भवामः, अपरि-
चितसमा वयं सुपरिचिता भवामः, मृतकल्पा वयं जीवामः,
दण्ड्यमाना वयं न हन्यामहे, शोकयुक्ताश्च वयं सदानन्दामः,
१० दरिद्रा वयं बहून् धनिनः कुर्म्मः, अकिञ्चनाश्च वयं सर्व्वं धारयामः।
११ हे करिन्थिनः, युष्माकं प्रति ममास्यं मुक्तं ममान्तःकरणञ्च वि-
१२ कसितं। यूयं ममान्तरे न सङ्कोचिताः किञ्च यूयमेव सङ्कोचित-
१३ चित्ताः। किन्तु मह्यं न्याय्यफलदानार्थं युष्माभिरपि विकसितै
र्भवितव्यम् इत्यहं निजबालकानिव युष्मान् वदामि।

१४ अपरम् अप्रत्ययिभिः सार्द्धं यूयम् एकयुगे बद्धा मा भूत,
यस्माद् धर्म्माधर्म्मयोः कः सम्बन्धोऽस्ति? तिमिरेण सार्द्धं प्रभाया

वा का तुलनास्ति? बिलीयालदेवेन साकं ख्रीष्टस्य वा का सन्धिः? १५
अविश्वासिना सार्द्धं वा विश्वासिलोकस्यांशः कः? ईश्वरस्य मन्दिरेण १६
सह वा देवप्रतिमानां का तुलना? अमरस्येश्वरस्य मन्दिरं यूय-
मेव। ईश्वरेण तदुक्तं यथा, 'तेषां मध्येऽहं स्वावासं निधास्यामि
तेषां मध्ये च यातायातं कुर्व्वन् तेषाम् ईश्वरो भविष्यामि ते च
मल्लोका भविष्यन्ति। अतो हेतोः परमेश्वरः कथयति यूयं तेषां १७
मध्याद् वहिर्भूय पृथग् भवत, किमप्यमेध्यं न स्पृशत; तेनाहं
युष्मान् ग्रहीष्यामि, युष्माकं पिता भविष्यामि च, यूयञ्च मम कन्या- १८
पुत्रा भविष्यथेति सर्व्वशक्तिमता परमेश्वरेणोक्तं।' अतएव हे प्रिय- १९
तमाः, एतादृशीः प्रतिज्ञाः प्राप्तैरस्माभिः शरीरात्मनोः सर्व्वमा-
लिन्यम् अपमृज्येश्वरस्य भक्त्या पवित्राचारः साध्यतां।

---

७ सप्तमोऽध्यायः।

१ करिन्थिनः प्रति पौलस्य विनयः ५ तीतेन तेषां वार्त्तायां प्राप्तायां पौलस्य यत् सुखं तस्य निर्णयश्च।

यूयम् अस्मान् गृह्लीत। अस्माभिः कस्याप्यन्यायो न कृतः १
कोऽपि न भ्रंशितः कोऽपि न वञ्चितः। युष्मान् दोषिणः कर्त्तुमहं २
वाक्यमेतद् वदामीति नहि युष्माभिः सह जीवनाय मरणाय वा ३
वयं युष्मान् स्वान्तःकरणै धारयाम इति पूर्व्वं मयोक्तं। युष्मान् प्रति ४
मम महोत्साहो जायते युष्मान् अध्यहं बहु श्लाघे च तेन सर्व्वक्लेश-
समयेऽहं सान्त्वनया पूर्णो हर्षेण प्रफुल्लितश्च भवामि।

अस्मासु माकिदनियादेशम् आगतेष्वस्माकं शरीरस्य काचिदपि ५
शान्ति र्नाभवत् किन्तु सर्व्वतो वहि र्विरोधेनान्तश्च भीत्या वयम्
अपीड्यामहि। किन्तु नम्राणां सान्त्वयिता य ईश्वरः स तीतस्याग- ६

७ मनेनास्मान् असान्त्वयत्। केवलं तस्यागमनेन तन्नहि किन्तु युष्मत्तो
जातया तस्य सान्त्वनयापि, यतोऽस्मासु युष्माकं हार्द्दविलापासक्त-
८ लेष्वस्माकं समीपे वर्णितेषु मम महानन्दो जातः। अहं पत्रेण
युष्मान् शोकयुक्तान् कृतवान् इत्यस्माद् अन्वतप्ये किन्त्वधुना नानु-
तप्ये। तेन पत्रेण यूयं क्षणमात्रं शोकयुक्तीभूता इति मया
९ दृश्यते। इत्यस्मिन् युष्माकं शोकेनाहं हृष्यामि तन्नहि किन्तु मनः-
परिवर्त्तनाय युष्माकं शोकोऽभवद् इत्यनेन हृष्यामि यतोऽस्मत्तो
युष्माकं कापि हानि र्यन्न भवेत् तदर्थं युष्माकम् ईश्वरीयः शोको
१० जातः। स ईश्वरीयः शोकः परित्राणजनकं निरनुतापं मनःपरि-
११ वर्त्तनं साधयति किन्तु सांसारिकः शोको मृत्युं साधयति। पश्यत
तेनेश्वरीयेण शोकेन युष्माकं किं न साधितं? यत्नो दोषप्रक्षालनम्
असन्तुष्टत्वं हार्द्दम् आसक्तत्वं फलदानञ्चैतानि सर्व्वाणि। तस्मिन्
कर्म्मणि यूयं निर्म्मला इति प्रमाणं सर्व्वेण प्रकारेण युष्माभि र्दत्तं।
१२ येनापराद्धं तस्य कृते किंवा यस्यापराद्धं तस्य कृते मया पत्रम्
अलेखि तन्नहि किन्तु युष्मानध्यस्माकं यत्नो यद् ईश्वरस्य साक्षाद्
१३ युष्मत्समीपे प्रकाशेत तदर्थमेव। उक्तकारणाद् वयं सान्त्वनां
प्राप्ताः; ताञ्च सान्त्वनां विनापरो महाह्लादस्तीतस्याह्लादादस्माभि
१४ र्लब्धः, यतस्तस्यात्मा सर्व्वै र्युष्माभिस्तृप्तः। पूर्व्वं तस्य समीपेऽहं
युष्माभिर्यद् अश्लाघे तेन नालज्जे किन्तु वयं यद्वद् युष्मान् प्रति
सत्यभावेन सकलम् अभाषामहि तद्वत् तीतस्य समीपेऽस्माकं श्लाघ-
१५ नमपि सत्यं जातं। यूयं कीदृक् तस्याज्ञा अपालयत भयकम्पाभ्यां
तं गृहीतवन्तश्चैतस्य स्मरणाद् युष्मासु तस्य स्नेहो बाहुल्येन वर्त्तते।
१६ युष्मास्वहं सर्व्वमाशंसे, इत्यस्मिन् ममाह्लादो जायते।

८ अष्टमोऽध्यायः।

१ अन्यजनानां दृष्टान्तः ख्रीष्टस्य प्रेम्ना यिरूशालेमस्थदरिद्रलोकेभ्यो दातुं करिन्थिनः प्रति पौलस्य निवेदनं १९ तान् प्रति तीतस्य तदन्यभ्रात्रोश्च प्रशंसावाक्यं।

हे भ्रातरः, माकिदनियादेशस्थासु मण्डलीषु प्रकाशितो य १
ईश्वरस्यानुग्रहस्तमहं युष्मान् ज्ञापयामि। वस्तुतो बहुक्लेशपरीक्षासमये २
तेषां महानन्दोऽतीवदीनता च वदान्यतायाः प्रचुरफलम् अफल-
यतां। ते स्वेच्छया यथाशक्ति किञ्चातिशक्ति दान उद्युक्ता अभवन् ३
इति मया प्रमाणीक्रियते। वयञ्च यत् पवित्रलोकेभ्यस्तेषां दानम् ४
उपकारार्थकम् अंशनञ्च गृह्णामस्तद् बहुनुनयेनास्मान् प्रार्थितवन्तः।
वयं यादृक् प्रत्यैक्षामहि तादृग् अकृत्वा तेऽग्रे प्रभवे ततः परम् ५
ईश्वरस्येच्छयास्मभ्यमपि स्वान् न्यवेदयन्। अतो हेतोस्त्वं यथारब्धवान् ६
तथैव करिन्थिनां मध्येऽपि तद् दानग्रहणं साधयेति युष्मान् अधि
वयं तीतं प्रार्थयामहि। अतो विश्वासो वाक्पटुता ज्ञानं सर्व्वोत्सा- ७
होऽस्मासु प्रेम चैतै र्गुणै र्यूयं यथापरान् अतिशेध्वे तथैवैतेन गुणे-
नाप्यतिशेध्वं। एतद् अहम् आज्ञया कथयामीति नहि किन्त्वन्ये- ८
षाम् उत्साहकारणाद् युष्माकमपि प्रेम्नः सारल्यं परीक्षितुमिच्छता
मयैतत् कथ्यते। यूयञ्चास्मत्प्रभो र्यीशुख्रीष्टस्यानुग्रहं जानीथ यत- ९
स्तस्य निर्धनत्वेन यूयं यद् धनिनो भवथ तदर्थं स धनी सन्नपि
युष्मत्कृते निर्धनोऽभवत्। एतस्मिन् अहं युष्मान् स्वविचारं ज्ञाप- १०
यामि। गतं संवत्सरम् आरभ्य यूयं केवलं कर्म्म कर्त्तुं तन्नहि किन्त्वि-
च्छुकतां प्रकाशयितुमप्युपाक्राम्यध्वं ततो हेतो र्युष्मत्कृते मम
मन्त्रणा भद्रा। अतोऽधुना तत्कर्म्मसाधनं युष्माभिः क्रियतां तेन ११
यद्वद् इच्छुकतायाम् उत्साहस्तद्वद् एकैकस्य सम्पदनुसारेण कर्म्म-

१२ साधनम् अपि जनिष्यते। यस्मिन् इच्छुकता विद्यते तेन यन्न
धार्य्यते तस्मात् सोऽनुगृह्यत इति नहि किन्तु यद् धार्य्यते तस्मा-
१३ देव। यत इतरेषां विरामेण युष्माकञ्च क्लेशेन भवितव्यं तन्नहि किन्तु
१४ समतयैव। वर्त्तमानसमये युष्माकं धनाधिक्येन तेषां धनन्यूनता पूर-
यितव्या तस्मात् तेषामप्याधिक्येन युष्माकं न्यूनता पूरयिष्यते तेन
१५ समता जनिष्यते। तदेव शास्त्रेऽपि लिखितम् आस्ते यथा, येनाधिकं
संगृहीतं तस्याधिकं नाभवत् येन चाल्पं संगृहीतं तस्याल्पं नाभवत्।

१६ युष्माकं हिताय तीतस्य मनसि य ईश्वर इमम् उद्योगं जनि-
१७ तवान् स धन्यो भवतु। तीतोऽस्माकं प्रार्थनां गृहीतवान् किञ्च
१८ स्वयम् उद्युक्तः सन् स्वेच्छया युष्मत्समीपं गतवान्। तेन सह योऽ-
पर एको भ्रातास्माभिः प्रेषितः सुसंवादात् तस्य सुख्यात्या सर्व्वाः
१९ मण्डल्यो व्याप्ताः। प्रभो र्गौरवाय युष्माकम् इच्छुकतायै च स
२० मण्डलीभिरेतस्यै दानसेवायै अस्माकं सङ्गित्वे न्ययोज्यत। यतो या
महोपायनसेवास्माभि र्विधीयते तामधि वयं यत् केनापि न निन्द्या-
२१ महे तदर्थं यतामहे। यतः केवलं प्रभोः साक्षात् तन्नहि किन्तु
२२ मानवानामपि साक्षात् सदाचारं कर्त्तुम् आलोचामहे। ताभ्यां
सहापर एको यो भ्रातास्माभिः प्रेषितः सोऽस्माभि र्बहुविषयेषु
बहुवारान् परीक्षित उद्योगीव प्रकाशितश्च किन्त्वधुना युष्मासु
२३ दृढविश्वासात् तस्योत्साहो बहु ववृधे। यदि कश्चित् तीतस्य तत्त्वं
जिज्ञासते तर्हि स मम सहभागी युष्मन्मध्ये सहकारी च, अपरयो
र्भ्रात्रोस्तत्त्वं वा यदि जिज्ञासते तर्हि तौ मण्डलीनां दूतौ ख्रीष्टस्य
२४ प्रतिबिम्बौ चेति तेन ज्ञायतां। अतो हेतोः मण्डलीनां समक्षं
युष्मत्प्रेम्नोऽस्माकं श्लाघायाश्च प्रामाण्यं तान् प्रति युष्माभिः प्रका-
शयितव्यं।

९ नवमोऽध्यायः।

१ दान उद्यतान् करिन्थिनः प्रति प्रशंसा ६ दानफलस्य निर्णयश्च।

पवित्रलोकानाम् उपकारार्थकसेवामधि युष्मान् प्रति मम लिखनं १
निष्प्रयोजनं। यत आखायादेशस्था लोका गतवर्षम् आरभ्य तत्कार्य्ये २
उद्यताः सन्तीति वाक्येनाहं माकिदनीयलोकानां समीपे युष्माकं
याम् इच्छुकतामधि श्लाघे ताम् अवगतोऽस्मि युष्माकं तस्माद् उत्सा-
हाच्चापरेषां बहूनाम् उद्योगो जातः। किञ्चैतस्मिन् युष्मान् अध्य- ३
स्माकं श्लाघा यद् अतथ्या न भवेत् यूयञ्च मम वाक्यानुसाराद्
यद् उद्यतास्तिष्ठेत तदर्थमेव ते भ्रातरो मया प्रेषिताः। यस्मात् ४
मया सार्द्धं केचित् माकिदनीयभ्रातृभिरागत्य यूयमनुद्यता इति
यदि दृश्यते तर्हि तस्माद् दृढविश्वासाद् युष्माकं लज्जा जनिष्यत
इत्यस्माभि र्न वक्तव्यं किन्त्वस्माकमेव लज्जा जनिष्यते। अतः प्राक् ५
प्रतिज्ञातं युष्माकं दानं यत् सञ्चितं भवेत् तच्च यद् ग्राहकतायाः
फलम् अभूत्वा दानशीलताया एव फलं भवेत् तदर्थं ममाग्रे गमनाय
तत्सञ्चयनाय च तान् भ्रातॄन् आदेष्टुमहं प्रयोजनम् अमन्ये।

अपरमपि व्याहरामि केनचित् क्षुद्रभावेन वीजेषूप्तेषु स्वल्पानि ६
शस्यानि कर्त्तिष्यन्ते, किञ्च केनचिद् बहुदभावेन वीजेषूप्तेषु बहूनि
शस्यानि कर्त्तिष्यन्ते। एकैकेन स्वमनसि यथा निश्चीयते तथैव ७
दीयतां केनापि कातरेण भीतेन वा न दीयतां यत ईश्वरो
हृष्टमानसे दातरि प्रीयते। अपरम् ईश्वरो युष्मान् प्रति सर्व्वविधं ८
बहुप्रदं प्रसादं प्रकाशयितुम् अर्हति तेन यूयं सर्व्वविषये यथेष्टं
प्राप्य सर्व्वेण सत्कर्म्मणा बहुफलवन्तो भविष्यथ। एतस्मिन् लिखित- ९
मास्ते, यथा,

व्ययते स जनोराथं दुर्गतेभ्यो ददाति च ।
नित्यस्थायी च तद्धर्म्मः————

१० वीजं भोजनीयम् अन्नञ्च वप्त्रे येन विश्राण्यते स युष्मभ्यम् अपि
११ वीजं विश्राण्य बहुलीकरिष्यति युष्माकं धर्म्मफलानि वर्द्धयिष्यति
च। तेन सर्व्वविषये सधनीभूतै र्युष्माभिः सर्व्वविषये दानशीलतायां
१२ प्रकाशितायाम् अस्माभिरीश्वरस्य धन्यवादः साधयिष्यते। एतयोप-
कारसेवया पवित्रलोकानाम् अर्थाभावस्य प्रतीकारो जायत
इति केवलं नहि किन्त्वीश्वरस्य धन्यवादोऽपि बाहुल्येनोत्पाद्यते ।
१३ यत एतस्माद् उपकारकरणाद् युष्माकं परीक्षितत्वं बुद्ध्वा बहुभिः
ख्रीष्टसुसंवादाङ्गीकरणे युष्माकम् आज्ञाग्राहित्वात् तद्भागित्वे च
तान् अपरांश्च प्रति युष्माकं दातृत्वाद् ईश्वरस्य धन्यवादः कारि-
१४ ष्यते, युष्मदर्थं प्रार्थनां कृत्वा च युष्मास्वीश्वरस्य गरिष्ठानुग्रहाद्
१५ युष्मासु तैः प्रेम कारिष्यते। अपरम् ईश्वरस्यानिर्व्वचनीयदानात्
स धन्यो भूयात् ।

१० दशमोऽध्यायः ।

१ विपक्षलोकानां सन्निधौ स्वस्य निर्दोषत्वकरणं ७ इतरलोकानां कर्म्म स्वीयं प्रोच्य श्लाघनाद् विपक्षाणां दोषित्वकरणञ्च ।

१ युष्मत्प्रत्यक्षे नम्रः किन्तु परोक्षे प्रगल्भः पौलोऽहं ख्रीष्टस्य
२ क्षान्त्या विनीत्या च युष्मान् प्रार्थये। मम प्रार्थनीयमिदं वयं यैः
शारीरिकाचारीणो मन्यामहे तान् प्रति यां प्रगल्भतां प्रकाशयितुं
निश्चिनोमि सा प्रगल्भता समागतेन मयाचरितव्या न भवतु।
३ यतः शरीरे चरन्तोऽपि वयं शारीरिकं युद्धं न कुर्म्मः। अस्माकं
४ युद्धास्त्राणि च न शारीरिकानि किन्त्वीश्वरेण दुर्गभञ्जनाय प्रब-
५ लानि भवन्ति, तैश्च वयं वितर्कान् ईश्वरीयतत्त्वज्ञानस्य प्रतिबन्धिकां

सर्व्वां चित्तसमुन्नतिञ्च निपातयामः सर्व्वसङ्कल्पञ्च वन्दिनं कृत्वा
ख्रीष्टस्याज्ञाग्राहिणं कुर्म्मः युष्माकम् आज्ञाग्राहित्वे सिद्धे सति
सर्व्वस्याज्ञालङ्घनस्य प्रतीकारं कर्त्तुम् उद्यता आस्महे च। ६
यद् दृष्टिगोचरं तद् युष्माभि र्दृश्यतां। अहं ख्रीष्टस्य लोक ७
इति स्वमनसि येन विज्ञायते स यथा ख्रीष्टस्य भवति वयम्
अपि तथा ख्रीष्टस्य भवाम इति पुनर्विविच्य तेन बुध्यतां।
युष्माकं निपाताय तन्नहि किन्तु निष्ठायै प्रभुना दत्तं यदस्माकं ८
सामर्थ्यं तेन यद्यपि किञ्चिद् अधिकं श्लाघे तथापि तस्मान्न
त्रपिष्ये। अहं पत्रै र्युष्मान् त्रासयामि युष्माभिरेतन्न मन्यतां। ९
तस्य पत्राणि गुरुतराणि प्रबलानि च भवन्ति किन्तु तस्य शरीर- १०
साक्षात्कारो दुर्ब्बल आलापश्च तुच्छनीय इति कैश्चिद् उच्यते। किन्तु ११
परोक्षे पत्रै र्भाषमाणा वयं यादृशाः प्रकाशामहे प्रत्यक्षे कर्म्म
कुर्व्वन्तोऽपि तादृशा एव प्रकाशिष्यामहे तत् तादृशेन वाचालेन
ज्ञायतां। स्वप्रशंसकानां केषाञ्चिन्मध्ये स्वान् गणयितुं तैः स्वान् उ- १२
पमातुं वा वयं प्रगल्भा न भवामः, यतस्ते स्वपरिमाणेन स्वान्
परिमिमते स्वैश्च स्वान् उपमिमते तस्मात् निर्ब्बोधा भवन्ति च।
वयम् अपरिमितेन न श्लाघिष्यामहे किन्त्वीश्वरेण स्वरज्ज्वा युष्म- १३
द्देशगामि यत् परिमाणम् अस्मदर्थं निरूपितं तेनैव श्लाघिष्यामहे।
युष्माकं देशोऽस्माभिरगन्तव्यस्तस्माद् वयं स्वसीमाम् उल्लङ्घामहे तन्न- १४
हि यतः ख्रीष्टस्य सुसंवादेनापरेषां प्राग् वयमेव युष्मान् प्राप्तवन्तः।
वयं स्वसीमाम् उल्लङ्घ्य परक्षेत्रेण श्लाघामहे तन्नहि, किञ्च युष्माकं १५
विश्वासे वृद्धिं गते युष्मद्देशेऽस्माकं सीमा युष्माभिर्दीर्घं विस्तारयिष्यते,
तेन वयं युष्माकं पश्चिमदिक्स्थेषु स्थानेषु सुसंवादं घोषयिष्यामः, १६
इत्थं परसीमायां परेण यत् परिष्कृतं तेन न श्लाघिष्यामहे।

१७ यः कश्चित् श्लाघमानः स्यात् श्लाघतां प्रभुना स हि। स्वेन यः प्रशं-
१८ स्यते स परीक्षितो नहि किन्तु प्रभुना यः प्रशंस्यते स एव परीक्षितः।

११ एकादशोऽध्यायः।

१ अवश्यश्लाघ्यत्वात् पौलस्यात्मश्लाघा १९ विपक्षेभ्यः स्वस्याचुद्रत्वकरणं किन्त खीष्टार्थं श्रमे दुःखे च स्वस्य महत्त्वज्ञापनञ्च।

१ यूयं ममाज्ञानतां क्षणं यावत् सोढुम् अर्हथ, अतः सा
२ युष्माभिः सह्यतां। ईश्वरे ममासक्तत्वाद् अहं युष्मानधि तपे यस्मात्
सतीं कन्यामिव युष्मान् एकस्मिन् वरेऽर्थतः खीष्टे समर्पयितुम्
३ अहं वाग्दानम् अकार्षं। किन्तु सर्पेण स्वखलतया यद्वद् हवा
वञ्चयाञ्चक्रे तद्वत् खीष्टं प्रति सतीत्वाद् युष्माकं भ्रंशः सम्भविष्यतीति
४ बिभेमि। अस्माभिरनाख्यापितोऽपरः कश्चिद् यीशु र्यदि केन-
चिद् आगन्तुकेनाख्याप्यते युष्माभिः प्रागलब्ध आत्मा वा यदि
लभ्यते प्रागगृहीतः सुसंवादो वा यदि गृह्यते तर्हि मन्ये यूयं
५ सम्यक् सहिष्यध्वे। किन्तु मुख्येभ्यः प्रेरितेभ्योऽहं केनचित् प्रकारेण
६ न्यूनो नास्मीति बुध्ये। मम वाक्पटुताया न्यूनत्वे सत्यपि ज्ञानस्य
७ न्यूनत्वं नास्ति किन्तु सर्व्वविषये वयं युष्मद्गोचरे प्रकाशामहे। युष्माकम्
उन्नत्यै मया नम्रतां स्वीकृत्येश्वरस्य सुसंवादो विना वेतनं युष्माकं
८ मध्ये यद् अघोष्यत तेन मया किं पापम् अकारि? युष्माकं सेवनायाहम्
९ अन्यमण्डलीभ्यो भृतिं गृह्णन् धनमपहृतवान्, यदा च युष्मन्मध्येऽवर्त्ते
तदा ममार्थाभावे जाते युष्माकं कोऽपि मया न पीडितः; यतो मम
सोऽर्थाभावो माकिदनियादेशाद् आगतै र्भ्रातृभि र्न्यवार्य्यत, इत्थमहं
क्वापि विषये यथा युष्मासु भारो न भवामि तथा मयात्मरक्षा कृता
१० कर्त्तव्या च। खीष्टस्य सत्यता यदि मयि तिष्ठति तर्हि ममैषा श्लाघा
११ निखिलाखायादेशे केनापि न रोत्स्यते। एतस्य कारणं किं? युष्मासु

मम प्रेम नास्त्येतत् किं तत्कारणं? तद् ईश्वरो वेत्ति। ये छिद्र- १२
मन्विष्यन्ति ते यत् किमपि छिद्रं न लभन्ते तदर्थमेव तत् कर्म्म
मया क्रियते कारिष्यते च तस्मात् ते येन श्लाघन्ते तेनास्माकं समाना
भविष्यन्ति। तादृशा भाक्तप्रेरिताः प्रवञ्चकाः कारवो भूत्वा ख्रीष्टस्य १३
प्रेरितानां वेशं धारयन्ति। तच्चाश्चर्य्यं नहि; यतः स्वयं शैतानो ऽपि १४
तेजस्विदूतस्य वेशं धारयति, ततस्तस्य परिचारका अपि धर्म्मपरि- १५
चारकाणां वेशं धारयन्तीत्यद्भुतं नहि; किन्तु तेषां कर्म्माणि
यादृशानि फलान्यपि तादृशानि भविष्यन्ति।

अहं पुन र्वदामि कोऽपि मां निर्ब्बोधं न मन्यतां किञ्च यद्यपि १६
निर्ब्बोधो भवेयं तथापि यूयं निर्ब्बोधमिव मामनुगृह्य चणैकं
यावत् ममात्मश्लाघाम् अनुजानीत। एतस्याः श्लाघाया निमित्तं १७
मया यत् कथितव्यं तत् प्रभुनादिष्टेनेव कथ्यते तन्नहि किन्तु
निर्ब्बोधेनेव। अपरे बहवः शारीरिकश्लाघां कुर्व्वते तस्माद् अहमपि १८
श्लाघिष्ये। बुद्धिमन्तो यूयं सुखेन निर्ब्बोधानाम् आचारं सहध्वे। १९
कोऽपि यदि युष्मान् दासान् करोति यदि वा युष्माकं सर्व्वस्वं २०
ग्रसति यदि वा युष्मान् हरति यदि वात्माभिमानी भवति यदि
वा युष्माकं कपोलम् आहन्ति तर्हि तदपि यूयं सहध्वे। दौर्ब्बल्याद् २१
युष्माभिरवमानिता इव वयं भाषामहे, किन्त्वपरस्य कस्यचिद्
येन प्रगल्भता जायते तेन ममापि प्रगल्भता जायत इति
निर्ब्बोधेनेव मया वक्तव्यं। ते किम् इब्रिलोकाः? अहमपीब्री। ते २२
किम् इस्रायेलियाः? अहमपीस्रायेलीयः। ते किम् इब्राहीमस्य
वंशाः? अहमप्यिब्राहीमस्य वंशः। ते किं ख्रीष्टस्य परिचारकाः? २३
अहं तेभ्योऽपि तस्य महापरिचारकः; किन्तु निर्ब्बोध इव भाषे,
तेभ्योऽप्यहं बहुपरिश्रमे बहुप्रहारे बहुवारं कारायां बहुवारं

२४ प्राणनाशसंशये च पतितवान्। यिहूदीयैरहं पञ्चकृत्व ऊनचत्वारिं-
शत्प्रहारैराहतस्त्रीर्वेत्राघातम् एककृत्वः प्रस्तराघातञ्च प्राप्तवान्।
२५ वारत्रयं पोतभञ्जनेन क्लिष्टोऽहम् अगाधसलिले दिनमेकं रात्रि-
२६ मेकाञ्च यापितवान्। बहुवारं यात्राभि र्नदीनां सङ्कटै र्दस्यूनां
सङ्कटैः स्वजातीयानां सङ्कटै र्परजातीयानां सङ्कटै र्नगरस्य सङ्कटै
र्मरुभूमेः सङ्कटैः सागरस्य सङ्कटै र्भाक्तभ्रातृणां सङ्कटैश्च परिश्रम-
२७ क्लेशाभ्यां वारं वारं जागरणेन क्षुधातृष्णाभ्यां बहुवारं निराहारेण
२८ शीतनग्नताभ्याञ्चाहं कालं यापितवान्। तादृशं नैमित्तिकं दुःखं
विनाहं प्रतिदिनम् आकुलो भवामि सर्व्वासां मण्डलीनां चिन्ता
२९ च मयि वर्त्तते। येनाहं न दुर्व्वलीभवामि तादृशं दौर्व्बल्यं कः
३० प्राप्नोति? येनाहं न तपे तादृशं विघ्नं वा कः प्राप्नोति? यदि
३१ मया श्लाघितव्यं तर्हि स्वदुर्व्बलतामधि श्लाघिष्ये। मया मृषावाक्यं
न कथ्यत इति नित्यं प्रशंसनीयोऽस्माकं प्रभो र्यीशुख्रीष्टस्य तात
३२ ईश्वरो जानाति। दम्मेषकनगरेऽरिताराजस्य कार्य्याध्यक्षो मां
धर्त्तुम् इच्छन् यदा सैन्यैस्तद् दम्मेषकनगरम् अरक्षयत् तदाहं लोकैः
३३ पिटकमध्ये प्राचीरगवाक्षेणावरोहितस्तस्य करात् त्राणं प्रापं।

१२ द्वादशोऽध्यायः।

१ स्वर्गीयदर्शनेन तस्य दुःखभोगेन च स्वसत्यप्रेरितत्वस्य प्रमाणदानं १.२ लाभार्थं पौलस्य तस्य सपत्नलोकानाञ्च श्रमाभावः किन्तु करिन्थिनां मङ्गलार्थं श्रमः।

१ आत्मश्लाघा ममानुपयुक्ता किन्त्वहं प्रभो र्दर्शनादेशानाम्
२ आख्यानं कथयितुं प्रवर्त्ते। इतश्चतुर्दशवत्सरेभ्यः पूर्व्वं मया परि-
चित एको जनस्तृतीयं स्वर्गमनीयत, स सशरीरेण निःशरीरेण
वा तत् स्थानमनीयत तदहं न जानामि किन्त्वीश्वरो जानाति।
३ स मानवः स्वर्गं नीतः सन् अकथ्यानि मर्त्यवागतीतानि च

বাক্যানি শ্রুতবান্। কিন্তু তদানীং স সশরীরো নিঃশরীরো ৪
বাসীৎ তন্ময়া ন জ্ঞায়তে তদ্ ঈশ্বরেণৈব জ্ঞায়তে। তমধ্যহং ৫
শ্লাঘিষ্যে মামধি নান্যেন কেনচিদ্ বিষয়েণ শ্লাঘিষ্যে কেবলং স্ব- ৬
দৌর্ব্বল্যেন শ্লাঘিষ্যে। যদ্যহম্ আত্মশ্লাঘাং কর্ত্তুম্ ইচ্ছেয়ং তথাপি
নির্ব্বোধ ইব ন ভবিষ্যামি যতঃ সত্যমেব কথয়িষ্যামি, কিন্তু
লোকা মাং যাদৃশং পশ্যন্তি মম বাক্যং শ্রুত্বা বা যাদৃশং মাং মন্যন্তে
তস্মাৎ শ্রেষ্ঠং মাং যন্ন গণয়ন্তি তদর্থমহং ততো বিরংস্যামি।
অপরম্ উৎকৃষ্টদর্শনপ্রাপ্তিতো যদহম্ আত্মাভিমানী ন ভবামি ৭
তদর্থং শরীরবেধকম্ একং শূলং মহ্যম্ অদায়ি তৎ মদীয়াত্মাভি-
মাননিবারণার্থং মম তাডয়িতা শৈতানস্য দূতঃ। মত্তস্তস্য ৮
প্রস্থানং যাচিতুমহং ত্রিস্তমধি প্রভুমুদ্দিশ্য প্রার্থনাং কৃতবান্। ততঃ ৯
স মামুক্তবান্ মমানুগ্রহস্তব সর্ব্বসাধকঃ, যতো দৌর্ব্বল্যাৎ মম
শক্তিঃ পূর্ণতাং গচ্ছতীতি। অতঃ খ্রীষ্টস্য শক্তি র্যন্মাম্ আশ্রয়তি
তদর্থং স্বদৌর্ব্বল্যেন মম শ্লাঘনং সুখদং। তস্মাদ্ খ্রীষ্টহেতো ১০
র্দৌর্ব্বল্যনিন্দাদরিদ্রতাবিপক্ষতাকষ্টাদিষু সন্তুষ্যাম্যহং। যদাহং দুর্ব্ব-
লোঽস্মি তদৈব সবলো ভবামি। এতেনাত্মশ্লাঘনেনাহং নির্ব্বোধ ১১
ইবাভবং কিন্তু যূযং তস্য কারণং যতো মম প্রশংসা যুষ্মাভিরেব
কর্ত্তব্যাসীৎ। যদ্যপ্যহম্ অগণ্যো ভবেয়ং তথাপি মুখ্যতমেভ্যঃ প্রেরি-
তেভ্যঃ কেনাপি প্রকারেণ নাহং ন্যূনোঽস্মি। সর্ব্বথাদ্ভুতক্রিয়াশক্তিলক্ষণৈঃ ১২
প্রেরিতস্য চিহ্নানি যুষ্মাকং মধ্যে সধৈর্য্যং ময়া প্রকাশিতানি।

মম পালনার্থং যূযং ময়া ভারাক্রান্তা নাভবতৈতদ্ একং ন্যূন- ১৩
ত্বং বিনাপরাভ্যঃ মণ্ডলীভ্যো যুষ্মাকং কিং ন্যূনত্বং জাতং? অনেন মম
দোষং ক্ষমধ্বং। পশ্যত তৃতীয়বারং যুষ্মৎসমীপং গন্তুমুদ্যতোঽস্মি ১৪
তত্রাপ্যহং যুষ্মান্ ভারাক্রান্তান্ ন করিষ্যামি। যুষ্মাকং সম্পত্তিমহং

न मृगये किन्तु युष्मानेव, यतः पित्रोः कृते सन्तानानां धनसञ्चयो-
ऽनुपयुक्तः किन्तु सन्तानानां कृते पित्रो र्धनसञ्चय उपयुक्तः।
१५ अपरञ्च युष्मासु बहु प्रीयमाणोऽप्यहं यदि युष्मत्तोऽल्पं प्रेम लभे
तथापि युष्माकं प्राणरक्षार्थं सानन्दं बहुव्ययं सर्व्वव्ययञ्च करिष्यामि।
१६ यूयं मया किञ्चिदपि न भाराक्रान्ता इति सत्यं, किन्त्वहं धूर्त्तः सन्
१७ छलेन युष्मान् वञ्चितवान् एतत् किं केनचिद् वक्तव्यं? युष्मत्समीपं
मया ये लोकाः प्रहितास्तेषामेकेन किं मम कोऽप्यर्थलाभो जातः?
१८ अहं तीतं विनीय तेन सार्द्धं भ्रातरमेकं प्रेषितवान् युष्मत्तस्तीतेन
किम् अर्थो लब्धः? एकस्मिन् भाव एकस्य पदचिह्नेषु चावां किं
१९ न चरितवन्तौ? युष्माकं समीपे वयं पुन र्दोषक्षालनकथां कथयाम
इति किं बुध्यध्वे? हे प्रियतमाः, युष्माकं निष्ठार्थं वयमीश्वरस्य
२० समक्षं ख्रीष्टेन सर्व्वाण्येतानि कथयामः। अहं यदागमिष्यामि तदा
युष्मान् यादृशान् द्रष्टुं नेच्छामि तादृशान् द्रक्ष्यामि, यूयमपि मां
यादृशं द्रष्टुं नेच्छथ तादृशं द्रक्ष्यथ, युष्मन्मध्ये विवाद ईर्ष्या क्रोधो
२१ विपक्षता परापवादः कर्णेजपनं दर्पः कलहश्चैते भविष्यन्ति; तेनाहं
युष्मत्समीपं पुनरागत्य मदीयेश्वरेण नमयिष्ये, पूर्व्वं कृतपापान्
लोकान् स्वीयाशुचितावेश्यागमनलम्पटताचरणाद् अनुतापम् अकृत-
वन्तो दृष्ट्वा च तानधि मम शोको जनिष्यत इति बिभेमि।

१३ त्रयोदशोऽध्यायः।

पापिनः प्रति पौलस्य शासनवाक्यं मण्डलीस्थलोकानामात्मपरीक्षामधि विनयश्च।

१ एतत्तृतीयवारम् अहं युष्मत्समीपं गच्छामि तेन सर्व्वा कथा
२ द्वयोस्त्रयाणां वा साक्षिणां मुखेन निश्चेष्यते। पूर्व्वं ये कृत-
पापास्तेभ्योऽन्येभ्यश्च सर्व्वेभ्यो मया पूर्व्वं कथितं, पुनरपि विद्यमाने-
नेवेदानीम् अविद्यमानेन मया कथ्यते, यदा पुनरागमिष्यामि

तदाहं न क्षमिष्ये। ख्रीष्टो मया कथां कथयत्येतस्य प्रमाणं यूयं ३
मृगयध्वे, स तु युष्मान् प्रति दुर्ब्बलो नहि किन्तु सबल एव।
यद्यपि स दुर्ब्बलतया क्रुश आरोप्यत तथापीश्वरीयशक्त्या जीवति; ४
वयमपि तस्मिन् दुर्ब्बला भवामः, तथापि युष्मान् प्रति प्रकाशि-
तयेश्वरीयशक्त्या तेन सह जीविष्यामः। अतो यूयं विश्वासयुक्ता ५
आध्वे न वेति ज्ञातुमात्मपरीक्षां कुरुध्वं स्वानेवानुसन्धत्त। यीशुः
ख्रीष्टो युष्मन्मध्ये विद्यते स्वान्‌धि तत् किं न प्रतिजानीथ?
तस्मिन् अविद्यमाने यूयं निष्प्रमाणा भवथ। किन्तु वयं निष्प्र- ६
माणा न भवाम इति युष्माभि र्भोत्स्यते तत्र मम प्रत्याशा
जायते। यूयं किमपि कुत्सितं कर्म्म यन्न कुरुथ तदहम् ईश्वर- ७
मुद्दिश्य प्रार्थये। वयं यत् प्रामाणिका इव प्रकाशामहे तदर्थं
तत् प्रार्थयामह इति नहि, किन्तु यूयं यत् सदाचारं कुरुथ
वयञ्च निष्प्रमाणा इव भवामस्तदर्थं। यतः सत्यताया विपक्षतां ८
कर्त्तुं वयं न समर्थाः किन्तु सत्यतायाः साहाय्यं कर्त्तुमेव। वयं ९
यदा दुर्ब्बला भवामस्तदा युष्मान् सबलान् दृष्ट्वानन्दामो युष्माकं
सिद्धत्वं प्रार्थयामहे च। अतो हेतोः प्रभु र्युष्माकं विनाशाय नहि १०
किन्तु निष्ठायै यत् सामर्थ्यम् अस्मभ्यं दत्तवान् तेन यद् उपस्थिति-
काले काठिन्यं मयाचरितव्यं न भवेत् तदर्थम् अनुपस्थितेन
मया सर्व्वाण्येतानि लिख्यन्ते। हे भ्रातरः, शेषे वदामि यूयम् ११
आनन्दत सिद्धा भवत परस्परं प्रबोधयत, एकमनसो भवत
प्रणयभावम् आचरत। प्रेमशान्त्योराकर ईश्वरो युष्माकं सहायो
भूयात्। यूयं पवित्रचुम्बनेन परस्परं नमस्कुरुध्वं। पवित्रलोकाः १२
सर्व्वे युष्मान् नमन्ति। प्रभो र्यीशुख्रीष्टस्यानुग्रह ईश्वरस्य प्रेम १३
पवित्रस्यात्मनो भागित्वञ्च सर्व्वान् युष्मान् प्रति भूयात्। तथास्तु।

गालातिनः प्रति पौलस्य प्रेरितस्य पत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचरणं ६ गालातिलोकानां ख्रीष्टधर्म्मत्यागात् पौलस्याश्चर्य्यज्ञानं तद्-न्यधर्म्मे दोषारोपणं ११ एतस्मिन् धर्म्मे प्रेरितत्वपदे च पौलस्य नियुक्तत्व-स्याख्यानञ्च।

१ मनुष्येभ्यो नहि मनुष्यैरपि नहि किन्तु यीशुख्रीष्टेन मृतगणमध्यात्
तस्योत्थापयित्रा पित्रेश्वरेण च प्रेरितो योऽहं पौलः सोऽहं मत्सह-
२ वर्त्तिनो भ्रातरश्च वयं गालातीयदेशस्थाः मण्डलीः प्रति पत्रं
३ लिखामः। पित्रेश्वरेणास्माकं प्रभुना यीशुना ख्रीष्टेन च युष्मभ्यम्
४ अनुग्रहः शान्तिश्च दीयतां। अस्माकं तातेश्वरस्येच्छानुसारेण वर्त्त-
मानात् कुत्सितसंसाराद् अस्मान् निस्तारयितुं यो यीशुरस्माकं
५ पापहेतोरात्मोत्सर्गं कृतवान् स सर्व्वदा धन्यो भूयात्। तथास्तु।
६ ख्रीष्टस्यानुग्रहेण यो युष्मान् आहूतवान् तस्मान्निवृत्य यूयम्
अतितूर्णम् अन्यं सुसंवादम् अन्ववर्त्तत तत्राहं विस्मयं मन्ये।
७ सोऽन्यसुसंवादः सुसंवादो नहि किन्तु केचित् मानवा युष्मान्
चञ्चलीकुर्व्वन्ति ख्रीष्टीयसुसंवादस्य विपर्य्ययं कर्त्तुं चेष्टन्ते च।
८ युष्माकं सन्निधौ यः सुसंवादोऽस्माभि र्घोषितस्तस्माद् अन्यः सुसं-
वादोऽस्माकं स्वर्गीयदूतानां वा मध्ये केनचिद् यदि घोष्यते तर्हि
९ स शप्तो भवतु। पूर्व्वं यद्वद् अकथयाम, इदानीमहं पुनस्तद्वत्
कथयामि यूयं यं सुसंवादं गृहीतवन्तस्तस्माद् अन्यो येन केनचिद्
१० युष्मत्सन्निधौ घोष्यते स शप्तो भवतु। साम्प्रतं कमहम् अनु-
नयामि? ईश्वरं किंवा मानवान्? अहं किं मानुषेभ्यो रोचितुं

यते? यद्यहम् इदानीमपि मानुषेभ्यो रुरुचिषेय तर्हि ख्रीष्टस्य
परिचारको न भवामि।

हे भ्रातरः, मया यः सुसंवादो घोषितः स मानुषान्न लब्ध- ११
स्तदहं युष्मान् ज्ञापयामि। अहं कस्माच्चित् मनुष्यात् तं न १२
गृहीतवान् न वा शिक्षितवान् केवलं यीशोः ख्रीष्टस्य प्रकाशना-
देव। पुरा यिहूदिमताचारी यदाहम् आसं तदा यादृशम् १३
आचरणम् अकरवम् ईश्वरस्य मण्डलीं प्रत्यतीवोपद्रवं कुर्व्वन्
यादृक् तां व्यनाशयं तदवश्यं श्रुतं युष्माभिः। अपरञ्च पूर्व्वपु- १४
रुषपरम्परागतेषु वाक्येष्वन्यापेक्षातीवासक्तः सन् अहं यिहूदि-
धर्म्ममते मम समवयस्कान् बहून् स्वजातीयान् अत्यशयि। किञ्च १५
य ईश्वरो मातृगर्भस्थं मां पृथक् कृत्वा स्वीयानुग्रहेणाहूतवान्
स यदा मयि स्वपुत्रं प्रकाशयितुं परदेशीयानां समीपे मया १६
तं घोषयितुञ्चाभ्यलषत् तदाहं क्रव्यशोणिताभ्यां सह न मन्त्रयित्वा
पूर्व्वनियुक्तानां प्रेरितानां समीपं यिरूशालेमं न गत्वारवदेशं १७
गतवान् पश्चात् तत्स्थानाद् दम्मेषकनगरं परावृत्यागतवान्।
ततः परं वर्षत्रये व्यतीतेऽहं पितरं सम्भाषितुं यिरूशालेमं गत्वा १८
पञ्चदशदिनानि तेन सार्द्धम् अतिष्ठं। किन्तु तं प्रभो र्भ्रातरं १९
याकोबञ्च विना प्रेरितानां नान्यं कमप्यपश्यं। यान्येतानि वाक्यानि २०
मया लिख्यन्ते तान्यनृतानि न सन्ति तद् ईश्वरो जानाति।
ततः परम् अहं सुरियां किलिकियाञ्च देशौ गतवान्। तदानीं २१
यिहूदादेशस्थानां ख्रीष्टस्य मण्डलीनां लोकाः साक्षात् मम परि- २२
चयमप्राप्य केवलं जनश्रुतिमिमां लब्धवन्तः, यो जनः पूर्व्वम्
अस्मान् प्रत्युपद्रवमकरोत् स तदा यं धर्म्ममनाशयत् तमेवेदानीं २३
प्रचारयतीति। तस्मात् ते मामधीश्वरं धन्यमवदन्। २४

२ द्वितीयोऽध्यायः।

१ पौलस्य यिरूशालेमगमनं तस्य कारणनिर्णयः ११ ख्रीष्टधर्म्मस्य विरुद्धाचरणात् पितरस्य दोषित्वकरणञ्च।

१ अनन्तरं चतुर्दशसु वत्सरेषु गतेष्वहं बार्णबा सह यिरूशालेम-
२ नगरं पुनरगच्छं, तदानीं तीतमपि स्वसङ्गिनम् अकरवं। तत्काले-
ऽहम् ईश्वरदर्शनाद् यात्राम् अकरवं मया यः परिश्रमोऽकारि
कारिष्यते वा स यन्निष्फलो न भवेत् तदर्थं परजातीयानां मध्ये
मया घोष्यमाणः सुसंवादस्तत्रत्येभ्यो लोकेभ्यो विशेषतो मान्येभ्यो
३ नरेभ्यो मया न्यवेद्यत। ततो मम यूनानीयः सहचरस्तीतस्य
४ त्वक्छेदोऽप्यावश्यको न बभूव। यतश्छलेनागता अस्मान् दासान्
कर्त्तुम् इच्छवः कतिपया भाक्तभ्रातरः ख्रीष्टेन यीशुनास्मभ्यं दत्तं
५ स्वातन्त्र्यम् अनुसन्धातुं चारा इव समाजं प्राविशन्। अतः
प्रकृते सुसंवादे युष्माकम् अधिकारो यत् तिष्ठेत् तदर्थं वयं
६ दण्डैकमपि यावद् आज्ञाग्रहणेन तेषां वश्या नाभवाम। परन्तु
ये लोका मान्यास्ते ये केचिद् भवेयुस्तानहं न गणयामि यत
ईश्वरः कस्यापि मानवस्य पक्षपातं न करोति, ये च मान्यास्ते
७ मां किमपि नवीनं नाज्ञापयन्। किन्तु छिन्नत्वचां मध्ये सुसंवाद-
प्रचारणस्य भारः पितरे यथा समर्पितस्तथैवाच्छिन्नत्वचां मध्ये
८ सुसंवादप्रचारणस्य भारो मयि समर्पित इति ते बुबुधे। यत-
श्छिन्नत्वचां मध्ये प्रेरितत्वकर्म्मणे यस्य या शक्तिः पितरमाश्रित-
वती तस्यैव सा शक्ति परजातीयानां मध्ये तस्मै कर्म्मणे माम-
९ प्याश्रितवती। अतो मह्यं दत्तम् अनुग्रहं प्रतिज्ञाय स्तम्भा इव
गणिता ये याकोबः कैफा योहनो चैते सहायतासूचकं दक्षिण-
हस्तग्रहणं विधाय मां बार्णबाञ्च जगदुः, युवां परजातीयानां

सन्निधिं गच्छतं वयं छिन्नत्वचां सन्निधिं गच्छामः, केवलं दरिद्रा १०
युवाभ्यां स्मरणीया इति। अतस्तदेव कर्त्तुम् अहं यते स्म।

अपरम् आन्तियखियानगरं पित्र आगतेऽहं तस्य दोषि- ११
त्वात् समक्षं तम् अभर्त्सयं। यतः स पूर्व्वम् परजातीयैः सा- १२
र्द्धम् आहारमकरोत् ततः परं याकोवस्यः समीपात् कतिपयजने-
ष्वागतेषु स छिन्नत्वङ्मनुष्येभ्यो भयेन निवृत्य पृथग् अभवत्।
ततोऽपरे सर्व्वे यिहूदिनोऽपि तेन सार्द्धं कपटाचारम् अकुर्व्वन् १३
बार्णबा अपि तेषां कापट्येन विपथगाम्यभवत्। ततस्ते प्रकृत- १४
सुसंवादरूपे सरलपथे न चरन्तीति दृष्ट्वाहं सर्व्वेषां साक्षात्
पितरम् उक्तवान् त्वं यिहूदी सन् यदि यिहूदिमतं विहाय पर-
जातीय इवाचरसि तर्हि यिहूदिमताचरणाय परजातीयान् कुतः
प्रवर्त्तयसि? आवां जन्मना यिहूदिनौ भवावो परजातीयौ पापिनौ १५
न भवावः किन्तु व्यवस्थापालनेन मनुष्यः धार्म्मिको न भवति १६
केवलं यीशौ ख्रीष्टे यो विश्वासस्तेनैव धार्म्मिको भवतीति बुद्ध्वा-
वामपि व्यवस्थापालनं विना केवलं ख्रीष्टे विश्वासेन धार्म्मिकता-
प्राप्तये ख्रीष्टे यीशौ व्यश्वसिव यतो व्यवस्थापालनेन कोऽपि मानवः
धार्म्मिकतां प्राप्तुं न शक्नोति। परन्तु यीशुना धार्म्मिकताप्राप्तये १७
यतमानावप्यावां यदि पापिनौ भवावस्तर्हि किं वक्तव्यं? ख्रीष्टः
पापस्य परिचारक इति? तन्न भवतु। मया यद् भग्नं तद् १८
यदि मया पुनर्निर्म्मीयते तर्हि मयैवात्मदोषः प्रकाश्यते। अहं १९
यद् ईश्वराय जीवामि तदर्थं व्यवस्थया व्यवस्थायै अम्रिये। ख्रीष्टेन २०
सार्द्धं क्रुशे हतोऽस्मि तथापि जीवामि किन्त्वहं जीवामीति नहि
ख्रीष्ट एव मदन्तर्जीवति। साम्प्रतं सशरीरेण मया यज्जीवितं
धार्य्यते तत् मम दयाकारिणि मदर्थं स्वीयप्राणत्यागिनि चेश्वर-

२१ पुत्रे विश्वसता मया धार्य्यते। अहमीश्वरस्यानुग्रहं नावजानामि
यस्माद् व्यवस्थया यदि धार्म्मिकता भवति तर्हि ख्रीष्टो निर-
र्थकममियत।

---

३ तृतीयोऽध्यायः।

१ ख्रीष्टं परित्यज्य व्यवस्थया परित्राणचेष्टनाद् गालातिलोकान् प्रति पौलस्य भर्त्सनं व्यवस्थया नहि किन्तु ख्रीष्टस्य धार्म्मिकतया वयं धार्म्मिका भवितुं शक्नुम इत्यस्य दृढ़प्रमाणदानञ्च।

१ हे निर्ब्बोधा गालातिलोकाः, युष्माकं मध्ये क्रुशे हत इव
यीशुः ख्रीष्टो युष्माकं समक्षं प्रकाशित आसीत् अतो यूयं यथा
२ सत्यं वाक्यं न गृह्लीथ तथा केनामुह्यत? अहं युष्मत्तः कथा-
मेकां जिज्ञासे यूयम् आत्मानं केनालभध्वं? व्यवस्थापालनेन
३ किं वा विश्वासवाक्यस्य श्रवणेन? यूयं किम् ईदृग् अबोधा यद्
४ आत्मना कर्म्मारभ्य शरीरेण तत् साधयितुं यतध्वे? तर्हि युष्माकं
गुरुतरो दुःखभोगः किं निष्फलो भविष्यति? कुफलयुक्तो वा
५ किं भविष्यति? यो युष्मभ्यम् आत्मानं दत्तवान् युष्मन्मध्य
आश्चर्य्याणि कर्म्माणि च साधितवान् स किं व्यवस्थापालनेन
६ विश्वासवाक्यस्य श्रवणेन वा तत् कृतवान्? लिखितमास्ते, "अब्रा-
हाम ईश्वरे व्यश्वसीत् स च विश्वासस्तस्मै धार्म्मिकतार्थं गणितो
७ बभूव," अतो ये विश्वासाश्रितास्त एवाब्राहामस्य सन्ताना इति
८ युष्माभि र्ज्ञायतां। ईश्वरो परजातीयान् विश्वासेन धार्म्मिकी-
करिष्यतीति पूर्व्वं ज्ञात्वा शास्त्रदाता पूर्व्वम् अब्राहामं सुसंवादं
श्रावयन् जगाद, "त्वत्तो परजातीयाः सर्व्वे आशिषं प्राप्स्य-
९ न्तीति।" अतो ये विश्वासाश्रितास्ते विश्वासिनाब्राहामेन सार्द्धम्
१० आशिषं लभन्ते। यावन्तो लोका व्यवस्थायाः कर्म्माण्याश्रयन्ति

ते सर्व्वे शापाधीना भवन्ति यतो लिखितमास्ते, यथा, "यः
कश्चिद् एतस्य व्यवस्थाग्रन्थस्य सर्व्ववाक्यानि निश्छिद्रं न पालयति
स शप्त इति।" ईश्वरस्य साक्षात् कोऽपि व्यवस्थया धार्म्मिको न ११
भवति तद् व्यक्तं, यतः "धार्म्मिको मानवो विश्वासेन जीवि-
ष्यतीति" शास्त्रीयं वचः। व्यवस्था तु विश्वाससम्बन्धिनी न भवति १२
किन्त्वेतानि यः पालयिष्यति स एव तै र्जीविष्यतीतिनियमसम्ब-
न्धिनी। ख्रीष्टोऽस्मान् परिक्रीय व्यवस्थायाः शापात् मोचितवान् १३
यतोऽस्माकं विनिमयेन स स्वयं शापास्पदमभवत् तदधि लिखित-
मास्ते, यथा, "यः कश्चित् तरावुल्लम्ब्यते सोऽभिशप्त इति।"
तस्माद् ख्रीष्टेन यीशुनाब्राहामस्याशीः परजातीयलोकेषु वर्त्तते १४
तेन वयं प्रतिज्ञातम् आत्मानं विश्वासेन लब्धुं शक्नुमः। हे १५
भ्रातृगण मानुषाणां रीत्यनुसारेणाहं कथयामि केनचित् मा-
नवेन यो नियमो निरचायि तस्य विकृति र्वृद्धि र्वा केनापि न
क्रियते। परन्त्वब्राहामाय तस्य वंशाय च प्रतिज्ञाः प्रतिशुश्रु- १६
विरे तत्र वंशशब्दं बहुवचनान्तम् अभूत्वा तव वंशायेत्येकवचनान्तं
बभूव स च वंशः ख्रीष्ट एव। अतएवाहं वदामि, ईश्वरेण यो १७
नियमः पुरा ख्रीष्टमधि निरचायि ततः परं त्रिंशदधिकचतुः-
शतवत्सरेषु गतेषु स्थापिता व्यवस्था तं नियमं निरर्थकीकृत्य
तदीयप्रतिज्ञां लोप्तुं न शक्नोति। यस्मात् दायांशलाभो यदि १८
व्यवस्थया भवति तर्हि प्रतिज्ञया न भवति किन्त्वीश्वरः प्रतिज्ञया
दायांशम् अब्राहामायाददात्। तर्हि व्यवस्था किम्भूता? प्रतिज्ञा १९
यस्मै प्रतिश्रुता तस्य वंशस्यागमनं यावद् व्यभिचारनिवारणार्थं
व्यवस्थापि दत्ता, सा च दूतैराज्ञापिता मध्यस्थस्य करे समर्पिता
च। नैकस्य मध्यस्थो विद्यते किन्त्वीश्वर एक एव। तर्हि व्यवस्था २०

२१ किम् ईश्वरस्य प्रतिज्ञानां विरुद्धा? तन्न भवतु यस्माद् यदि
सा व्यवस्था जीवनदाने समर्थाभविष्यत् तर्हि व्यवस्थयैव धार्म्मिकता-
२२ लाभोऽभविष्यत्। किन्तु यीशुख्रीष्टे यो विश्वासस्तत्सम्बन्धिन्याः
प्रतिज्ञायाः फलं यद् विश्वासिलोकेभ्यो दीयते तदर्थं शास्त्रदाता
२३ सर्व्वान् पापाधीनान् गणयति। अतएव विश्वासस्यानागतसमये
वयं व्यवस्थाधीनाः सन्तो विश्वासस्योदयं यावद् रुद्धा इवारक्ष्या-
२४ महे। इत्थं वयं यद् विश्वासेन धार्म्मिकीभवामस्तदर्थं ख्रीष्टस्य
२५ समीपम् अस्मान् नेतुं व्यवस्थाग्रन्थोऽस्माकं विनेता बभूव। किन्त्व-
२६ धुनागते विश्वासे वयं तस्य विनेतुरनधीना अभवाम। ख्रीष्टे
२७ यीशौ विश्वसनात् सर्व्वे यूयम् ईश्वरस्य सन्ताना जाताः। यूयं
यावन्तो लोकाः ख्रीष्टे स्नापिता अभवत सर्व्वे ख्रीष्टं परिहित-
२८ वन्तः। अतो युष्मन्मध्ये यिहूदियूनानिनो र्दासस्वतन्त्रयो र्योषा-
पुरुषयोश्च कोऽपि विशेषो नास्ति; सर्व्वे यूयं ख्रीष्टे यीशावेक
२९ एव। किञ्च यूयं यदि ख्रीष्टस्य भवथ तर्हि सुतराम् इब्राहीमस्य
सन्तानाः प्रतिज्ञया दायहराश्चाध्वे।

---

४ चतुर्थोऽध्यायः।

१ उत्तराधिकारिण इव व्यवस्थाया अधीनीभूतत्वं ६ पुत्त्रत्वाद् दासस्य कर्म्माकरणं १२ गालातिलोकानां पूर्व्वीयप्रेम्नः प्रशंसनं मङ्गलचेष्टाकरणं २१ व्यवस्था-सुसंवादयो र्भेदनिर्णयश्च।

१ अहं वदामि दायहरो यावद् बालस्तिष्ठति तावत् सर्व्वस्वस्या-
धिपतिः सन्नपि स दासात् केनापि विषयेण न विशिष्यते किन्तु पित्रा
२ निरूपितं समयं यावत् पालकानां धनाध्यक्षाणाञ्च निघ्नस्तिष्ठति।
३ तद्वद् वयमपि बाल्यकाले दासा इव संसारस्याक्षरमालाया अधीना

आस्महे। अनन्तरं समये सम्पूर्णतां गतवति व्यवस्थाधीनानां मोच- ४
नार्थम् अस्माकं पुत्त्वप्राप्त्यर्थञ्चेश्वरः स्त्रिया जातं व्यवस्थाया ५
अधिनीभूतञ्च स्वपुत्त्रं प्रेषितवान्।

यूयं सन्ताना अभवत तत्कारणाद् ईश्वरः स्वपुत्त्रस्यात्मानं ६
युष्माकम् अन्तःकरणानि प्रहितवान् स चात्मा पितः पितरित्या-
ह्वानं कारयति। अत इदानीं त्वं न दासः किन्तु सन्तान एव ७
तस्मात् सन्तानत्वाच्च खीष्टेनेश्वरीय दायहरोऽप्याध्वे। अपरञ्च ८
पूर्व्वं यूयम् ईश्वरं न ज्ञात्वा ये स्वभावतोऽनीश्वरास्तेषां दासत्वे-
ऽतिष्ठत। इदानीम् ईश्वरं ज्ञात्वा यदि वेश्वरेण ज्ञाता यूयं कथं ९
पुनस्तानि विफलानि तुच्छानि चाक्षराणि प्रति परावर्त्तितुं शक्नुथ?
यूयं किं पुनस्तेषां दासा भवितुमिच्छथ? यूयं दिवसान् मासान् तिथीन् १०
संवत्सरांश्च सम्मन्यध्वे। युष्मदर्थं मया यः परिश्रमोऽकारि स विफलो ११
जात इति युष्मानध्यहं बिभेमि।

हे भ्रातरः, अहं यादृशोऽस्मि यूयमपि तादृशा भवतेति प्रा- १२
र्थये यतोऽहमपि युष्मत्तुल्योऽभवं युष्माभि र्मम किमपि नाप-
राद्धं। पूर्व्वमहं कलेवरस्य दौर्ब्बल्येन युष्मान् सुसंवादम् अज्ञापय- १३
मिति यूयं जानीथ। तदानीं मम परीक्षकं शारीरक्लेशं दृष्ट्वा यूयं १४
माम् अवज्ञाय ऋतीयितवन्तस्तन्नहि किन्त्वीश्वरस्य दूतमिव सा-
क्षात् खीष्टं यीशुमिव वा मां गृहीतवन्तः। अतस्तदानीं युष्माकं १५
या धन्यताभवत् सा क्व गता? तदानीं यूयं यदि स्वेषां नयना-
न्युत्पाट्य मह्यं दातुम् अशक्ष्यत तर्हि तदप्यकरिष्यतेति प्रमाणम्
अहं ददामि। साम्प्रतमहं सत्यवादित्वात् किं युष्माकं रिपु र्जा- १६
तोऽस्मि? ते युष्मत्कृते स्पर्द्धन्ते किन्तु सा स्पर्द्धा कुत्सिता यतो यूयं १७
तानधि यत् स्पर्द्धध्वं तदर्थं ते युष्मान् पृथक् कर्त्तुम इच्छन्ति।

१८ केवलं युष्मत्समीपे ममोपस्थितिसमये तन्नहि, किन्तु सर्व्वदैव भद्र-
१९ मधि स्पर्द्धनं भद्रं। हे मम बालकाः, युष्मदन्त र्यावत् ख्रीष्टो
मूर्त्तिमान् न भवति तावद् युष्मत्कारणात् पुनः प्रसववेदनेव
२० मम वेदना जायते। अहमिदानीं युष्माकं सन्निधिं गत्वा स्वरा-
न्तरेण युष्मान् सम्भाषितुं कामये यतो युष्मानधि व्याकुलोऽस्मि।
२१ हे व्यावस्थाधीनताकाङ्क्षिणः, यूयं किं व्यवस्थाया वचनं न
२२ गृह्णीथ? तन्मां वदत। लिखितमास्ते, अब्राहामस्य द्वौ पुत्त्रावा-
२३ साते तयोरेको दास्यां द्वितीयश्च पत्न्यां जातः। तयो र्यो
दास्यां जातः स शारीरिकनियमेन जज्ञे यश्च पत्न्यां जातः स
२४ प्रतिज्ञया जज्ञे। इदमाख्यानं दृष्टान्तस्वरूपं। ते द्वे योषिता-
वीश्वरीयसन्धी तयोरेका सीनयपर्व्वताद् उत्पन्ना दासजन-
२५ यित्री च सा तु हाजिरा। यस्माद् हाजिराशब्देनारवदेश-
स्थसीनयपर्व्वतो बोध्यते, सा च वर्त्तमानाया यिरूशालेम-
पुर्य्याः सदृशी। यतः स्वबालैः सहिता सा दासत्व आस्ते।
२६ किन्तु स्वर्गीया यिरूशालेमपुरी पत्नी सर्व्वेषाम् अस्माकं माता
२७ चास्ते। यादृशं लिखितम् आस्ते,

बन्ध्ये सन्तानहीने त्वं स्वरं जयजयं कुरु।
अप्रसूते लयोल्लासो जयशब्दश्च गीयतां।
यत एव सनाथाया योषितः सन्तते र्गणात्।
अनाथा या भवेन्नारी तदपत्यानि भूरिशः॥

२८ हे भ्रातृगण, इस्हाक इव वयं प्रतिज्ञया जाताः सन्तानाः।
२९ किन्तु तदानीं शारीरिकनियमेन जातः पुत्त्रो यद्वद् आत्मि-
३० कनियमेन जातं पुत्त्रम् उपाद्रवत् तथाधुनापि। किन्तु शास्त्रे
किं लिखितं? 'त्वम् इमां दासीं तस्याः पुत्त्रञ्चापसारय यत

एष दासीपुत्रः पत्नीपुत्रेण समं न दायहरो भविष्यतीति।'
अतएव हे भ्रातरः, वयं दास्याः सन्ताना न भूत्वा पत्न्याः ३१
सन्ताना भवामः।

---

५ पञ्चमोऽध्यायः।

१ त्वक्छेदेन त्राणचेष्टानिषेधः परस्परं प्रेम कर्त्तुं विनयः १९ शारीरिककर्म्मात्मिककर्म्मणोः कथनञ्च।

ख्रीष्टोऽस्मभ्यं यत् स्वातन्त्र्यं दत्तवान् यूयं तत्र स्थिरास्ति- १
ष्ठत दासत्वयुगेन पुन र्न निबध्यध्वं। पश्यताहं पौलो युष्मान् २
वदामि यदि छिन्नत्वचो भवथ तर्हि ख्रीष्टेन किमपि नोपका-
रिष्यध्वे। अपरं यः कश्चित् छिन्नत्वग् भवति स कृत्स्नव्यव- ३
स्थायाः पालनम् ईश्वराय धारयतीति प्रमाणं ददामि। युष्माकं ४
यावन्तो लोका व्यवस्थया धार्म्मिकीभवितुं चेष्टन्ते ते सर्व्वे ख्रीष्टाद्
भ्रष्टा अनुग्रहात् पतिताश्च। यतो वयम् आत्मना विश्वा- ५
सात् धार्म्मिकतालाभाशासिद्धिं प्रतीक्षामहे। ख्रीष्टे यीशौ त्वक्- ६
छेदात्वक्छेदयोः किमपि गुणं नास्ति किन्तु प्रेम्ना सफलो विश्वास
एव गुणयुक्तः। पूर्व्वं यूयं सुन्दरम् अधावत किन्त्विदानीं केन ७
बाधां प्राप्य सत्यतां न गृह्णीथ? युष्माकं सा मति र्युष्मदाह्वान- ८
कारिण ईश्वरान्न जाता।

विकारः कृत्स्नशक्तूनां स्वल्पकिण्वेन जायते। ९

युष्माकं मति र्विकारं न गमिष्यतीत्यहं युष्मानधि प्रभुनाशंसे; १०
किन्तु यो युष्मान् विचालयति स यः कश्चिद् भवेत् समुचितं
दण्डं प्राप्स्यति। परन्तु हे भ्रातरः, यद्यहम् इदानीम् अपि ११
त्वक्छेदं प्रचारयेयं तर्हि कुत उपद्रवं भुञ्जीय? तत्कृते क्रुशं

१२ निर्ब्बाधम् अभविष्यत् । ये जना युष्माकं चाञ्चल्यं जनयन्ति तेषां
छेदनमेव मयाभिलष्यते ।
१३ हे भ्रातरः, यूयं स्वातन्त्र्यार्थम् आहूता आध्वे किन्तु तत्स्वा-
तन्त्र्यद्वारेण शारीरिकभावो युष्मान् न प्रविशतु । यूयं प्रेम्ना पर-
१४ स्परं परिचर्य्यां कुरुध्वं । यस्मात् त्वं समीपवासिनि स्ववत् प्रेम
१५ कुर्य्या इत्येकाज्ञा कृत्स्नाया व्यवस्थायाः सारसंग्रहः । किन्तु यूयं
यदि परस्परं दंदश्यध्वे ऽशाश्यध्वे च तर्हि युष्माकम् एकोऽन्येन
यन्न ग्रस्यते तत्र युष्माभिः सावधानै र्भवितव्यं ।
१६ अहं ब्रवीमि यूयम् आत्मिकाचारं कुरुत शारीरिकाभि-
१७ लाषं मा पूरयत । यतः शारीरिकाभिलाष आत्मनो विपरीतः,
आत्मिकाभिलाषश्च शरीरस्य विपरीतः, अनयोरुभयोः परस्परं
विरोधो विद्यते तेन युष्माभि र्यद् अभिलष्यते तन्न कर्त्तव्यं ।
१८ यूयं यद्यात्मना विनीयध्वे तर्हि व्यवस्थाया अधीना न भवथ ।
१९ अपरं परदारगमनं वेश्यागमनम् अशुचिता कामुकता प्रतिमापूजनम्
२० इन्द्रजालं शत्रुत्वं विवादोऽन्तर्ज्वलनं क्रोधः कलहोऽनैक्यं पार्थक्यम्
२१ ईर्ष्या बधो मत्तत्वं लम्पटत्वमित्यादीनि स्पष्टत्वेन शारीरिकभावस्य
कर्म्माणि सन्ति । पूर्व्वं यद्वत् मया कथितं तद्वत् पुनरपि कथ्यते
ये जना एतादृशानि कर्म्माण्याचरन्ति तरीश्वरस्य राज्येऽधिकारः
२२ कदाच न लप्स्यते । किञ्च प्रेमानन्दः शान्तिश्चिरसहिष्णुता हितै-
षिता भद्रत्वं विश्वास्यता तितिक्षा परिमितभोजित्वमित्यादीन्यात्मनः
२३ फलानि सन्ति तेषां विरुद्धा कापि व्यवस्था नहि । ये तु ख्रीष्टस्य
२४ लोकास्ते रिपुभिरभिलाषैश्च सहितं शारीरिकभावं क्रुशे निहतवन्तः ।
२५ यदि वयम् आत्मना जीवामस्तर्ह्यात्मिकाचारोऽस्माभिः कर्त्तव्यः, दर्पः
२६ परस्परं निर्भर्त्सनं द्वेषश्चास्माभि र्न कर्त्तव्यानि ।

६ षष्ठोऽध्यायः।

१ दोषिभ्रातु र्दोषस्यावश्यच्छन्नत्वं ६ उपदेष्ट्रे दानं सत्कर्म्मणि प्रवृत्तिकथनं ११ त्वक्छेदं न मानित्वा ख्रीष्टे पौलस्य विश्वासः श्लाघनञ्च।

हे भ्रातरः, युष्माकं कश्चिद् यदि कस्मिंश्चित् पापे पतति १
तर्ह्यात्मिकभावयुक्तै र्युष्माभिस्तितिक्षाभावं विधाय स पुनरुत्थाप्यतां
यूयमपि यथा तादृक्परीक्षायां न पतथ तथा सावधाना भवत।
युष्माकम् एकैको जनः परस्य भारं वहत्वनेन प्रकारेण ख्रीष्टस्य २
विधिं पालयत। यदि कश्चन क्षुद्रः सन् स्वं महान्तं मन्यते तर्हि ३
तस्यात्मवञ्चना जायते। अत एकैकेन जनेन स्वकीयकर्म्मणः परीक्षा ४
क्रियतां तेन परं नालोक्य केवलम् आत्मालोकनात् तस्य श्लाघा ५
सम्भविष्यति। यत एकैको जनः स्वकीयं भारं वक्ष्यति।

यो जनो धर्म्मोपदेशं लभते स उपदेष्टारं स्वीयसर्व्वसम्पत्ते ६
र्भागिनं करोतु। युष्माकं भ्रान्ति र्न भवतु, ईश्वरो नोपहसि- ७
तव्यः, येन यद् वीजम् उप्यते तेन तज्जातं शस्यं कर्त्तिष्यते। स्वशरी- ८
रार्थं येन वीजम् उप्यते तेन शरीराद् विनाशरूपं शस्यं लप्स्यते
किन्त्वात्मनः कृते येन वीजम् उप्यते तेनात्मतोऽनन्तजीवितरूपं
शस्यं लप्स्यते। सत्कर्म्मकरणेऽस्माभिरश्रान्तै र्भवितव्यं यतोऽक्लान्ती- ९
भूतैस्तिष्ठद्भिरस्माभिरुपयुक्तसमये तत् फलानि लप्स्यन्ते। अतो यावत् १०
समयस्तिष्ठति तावत् सर्व्वान् प्रति विशेषतो विश्वासवेश्मवासिनः
प्रत्यस्माभि र्हिताचारः कर्त्तव्यः।

हे भ्रातरः, अहं स्वहस्तेन युष्मान् प्रति कियद्वृहत् पत्रं ११
लिखितवान् तद् युष्माभि र्दृश्यतां। ये शारीरिकविषये सुदृश्या १२
भवितुमिच्छन्ति ते यत् ख्रीष्टस्य क्रुशस्य कारणादुपद्रवस्य भागिनो
न भवन्ति केवलं तदर्थं त्वक्छेदे युष्मान् प्रवर्त्तयन्ति। ते त्वक्- १३

छेदग्राहिणोऽपि व्यवस्थां न पालयन्ति किन्तु युष्मच्छरीरात् श्लाघा-
१४ लाभार्थं युष्माकं त्वक्छेदम् इच्छन्ति। किन्तु येनाहं संसाराय
हतः संसारोऽपि मह्यं हतस्तदस्मत्प्रभो यीशुख्रीष्टस्य क्रुशं विना-
१५ न्यत्र कुत्रापि मम श्लाघनं कदापि न भवतु। ख्रीष्टे यीशौ
त्वक्छेदात्वक्छेदयोः किमपि गुणं नास्ति किन्तु नवीना सृष्टिरेव
१६ गुणयुक्ता। अपरं यावन्तो लोका एतस्मिन् मार्गे चरन्ति तेषाम्
१७ ईश्वरीयस्य कृत्स्नस्येस्रायेलस्यच शान्ति र्दयालाभश्च भूयात्। इतः
परं कोऽपि मां न क्लिश्नातु यस्माद् अहं स्वगात्रे प्रभो
१८ यीशुख्रीष्टस्य चिह्नानि धारये। हे भ्रातरः, अस्माकं प्रभो
यीशुख्रीष्टस्य प्रसादो युष्माकम् आत्मनि स्थेयात्। तथास्तु।

इफिषिणः प्रति पौलस्य प्रेरितस्य पत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचरणं ३ विश्वासिलोकानाम् ईश्वरमनोनीतत्वकथनं १५ एतां निगूढां कथां बोद्धुम् ईश्वरज्ञानार्थं प्रार्थनञ्च।

ईश्वरस्येच्छया यीशुख्रीष्टस्य प्रेरितः पौल इफिषनगरस्थान् १
पवित्रान् ख्रीष्टयीशौ विश्वासिनो लोकान् प्रति पत्रं लिखति।
अस्माकं तातस्येश्वरस्य प्रभो र्यीशुख्रीष्टस्य चानुग्रहः शान्तिश्च २
युष्मासु वर्त्ततां।
अस्माकं प्रभो र्यीशोः ख्रीष्टस्य तात ईश्वरो धन्यो भवतु; ३
यतः स ख्रीष्टेनास्मभ्यं सर्व्वम् आध्यात्मिकं स्वर्गीयवरं दत्तवान्।
वयं यत् तस्य समक्षं प्रेम्ना पवित्रा निष्कलङ्काश्च भवामस्तदर्थं ४
स जगतः सृष्टेः पूर्व्वं तेनास्मान् अभिरोचितवान्, निजाभिलषिता-
नुरोधाच्च यीशुना ख्रीष्टेन स्वस्य निमित्तं पुत्रत्वपदेऽस्मान् ५
स्वकीयानुग्रहस्य महत्त्वस्य प्रशंसार्थं पूर्व्वं नियुक्तवान्। तस्माद् ६
अनुग्रहात् स येन प्रियतमेन पुत्रेणास्मान् अनुगृहीतवान्, वयं
तस्य शोणितेन मुक्तिम् अर्थतः पापक्षमां लब्धवन्तः। तस्य य ७
ईदृशोऽनुग्रहनिधिस्तस्मात् सोऽस्मभ्यं सर्व्वविधं ज्ञानं बुद्धिञ्च बाहुल्य- ८
रूपेण वितरितवान्। स्वर्गपृथिव्यो र्यद्यद् विद्यते तत्सर्व्वं स ख्रीष्टे ९
संग्रहीष्यतीति हितैषिणा तेन कृतो यो मनोरथः सम्पूर्णतां गत- १०
वत्सु समयेषु साधयितव्यस्तमधि स स्वकीयाभिलाषस्य निगूढं
भावम् अस्मान् ज्ञापितवान्। पूर्व्वं ख्रीष्टे विश्वासिनो ये वयम् ११
अस्मत्तो यत् तस्य महिम्नः प्रशंसा जायते, तदर्थं यः स्वकीये-

१२ च्छायाः मन्त्रणातः सर्व्वाणि साधयति तस्य मनोरथाद् वयं
१३ ख्रीष्टेन पूर्व्वं निरूपिताः सन्तोऽधिकारिणो जाताः। यूयमपि
सत्यं वाक्यम् अर्थतो युष्मत्परित्राणस्य सुसंवादं निशम्य तस्मिन्नेव
ख्रीष्टे विश्वसितवन्तः प्रतिज्ञातेन पवित्रेणात्मना मुद्रयेवाङ्किताश्च।
१४ यतस्तस्य महिम्नः प्रकाशाय तेन क्रीतानां लोकानां मुक्ति र्यावन्न
भविष्यति तावत् स आत्मास्माकम् अधिकारित्वस्य सत्यङ्कारस्य
पणस्वरूपो भवति।
१५ प्रभौ यीशौ युष्माकं विश्वासः सर्व्वेषु पवित्रलोकेषु प्रेम चास्त
१६ इति वार्त्तां श्रुत्वाहमपि युष्मानधि निरन्तरम् ईश्वरं धन्यं
वदन् प्रार्थनासमये च युष्मान् स्मरन् वरमिमं याचामि। अस्माकं
१७ प्रभो र्यीशुख्रीष्टस्य तातो यः प्रभावाकर ईश्वरः स स्वकीय-
तत्त्वज्ञानाय युष्मभ्यं ज्ञानजनकम् प्रकाशितवाक्यबोधकञ्चात्मानं
१८ देयात्। युष्माकं ज्ञानचक्षूंषि च दीप्तियुक्तानि कृत्वा तस्याह्वानं
कीदृश्या प्रत्याशया सम्बलितं पवित्रलोकानां मध्ये तेन दत्तो-
ऽधिकारः कीदृशः प्रभावनिधि र्विश्वासिषु चास्मासु प्रकाशमानस्य
१९ तदीयमहापराक्रमस्य महत्त्वं कीदृग् अनुपमं तत् सर्व्वं युष्मान्
२० ज्ञापयतु। यतः स यस्याः शक्तेः प्रबलतां ख्रीष्टे प्रकाशयन्
मृतगणमध्यात् तम् उत्थापितवान्, अधिपतित्वपदं शासनपदं
२१ पराक्रमो राजत्वञ्चेतिनामानि यावन्ति पदानीह लोके परलोके
च विद्यन्ते तेषां सर्व्वेषाम् ऊर्द्ध्वे स्वर्गे निजदक्षिणपार्श्वे तम्
२२ उपवेशितवान्, सर्व्वाणि तस्य चरणयोरधो निहितवान् या मण्ड-
ली तस्य शरीरं सर्व्वत्र सर्व्वेषां पूरयितुः पूरकञ्च भवति तं तस्या
२३ मूर्द्धानं कृत्वा सर्व्वेषाम् उपर्य्युपरि नियुक्तवांश्च सैव शक्तिरस्मास्वपि
तेन प्रकाश्यते।

२ द्वितीयोऽध्यायः।

१ विश्वासिलोकः स्वभावतः कीदृग् अनुग्रहेण च कीदृक् तदाख्यानं ११ ख्रीष्टेन तेषां परित्राणं १९ तेषां पवित्रमन्दिरस्वरूपत्वञ्च।

पुरा यूयम् अपराधैः पापैश्च मृताः सन्तस्तान्याचरन्त इह- १
लोकस्य संसारानुसारेणाकाशराज्यस्याधिपतिम् अर्थतः साम्प्र- २
तम् आज्ञालङ्घिवंशेषु कर्म्मकारिणम् आत्मानम् अन्वव्रजत। तेषां ३
मध्ये सर्व्वे वयमपि पूर्व्वं शरीरस्य मनस्कामनायाञ्चेहां साधयन्तः
स्वशरीरस्याभिलाषान् आचराम सर्व्वेऽन्य इव च स्वभावतः क्रोध-
भाजनान्यभवाम। किन्तु करुणानिधिरीश्वरो येन महाप्रेम्नास्मान् ४
दयितवान् तस्य स्वप्रेम्नो बाहुल्याद् अपराधै र्मृतानप्यस्मान् ख्रीष्टेन ५
सह जीवितवान् यतोऽनुग्रहाद् यूयं परित्राणं प्राप्ताः। स च ख्रीष्टेन ६
यीशुनास्मान् तेन सार्द्धम् उत्थापितवान् स्वर्ग उपवेशितवांश्च।
इत्थं स ख्रीष्टेन यीशुनास्मान् प्रति स्वहितैषितया भावियुगेषु ७
स्वकीयानुग्रहस्यानुपमं निधिं प्रकाशयितुम् इच्छति। यूयम् अनु- ८
ग्रहाद् विश्वासेन परित्राणं प्राप्ताः, तच्च युष्मन्मूलकं नहि किन्त्वी-
श्वरस्यैव दानं, तत् कर्म्मणां फलम् अपि नहि, अतः केनापि ९
न श्लाघितव्यं। यतो वयं तस्य कार्य्यं प्राग् ईश्वरेण निरूपिताभिः १०
सत्क्रियाभिः कालयापनाय ख्रीष्टे यीशौ तेन सृष्टाश्च।

पुरा जन्मना परजातीया हस्तकृतं त्वक्छेदं प्राप्तै र्लोकै- ११
श्चाच्छिन्नत्वच इतिनाम्ना ख्याता ये यूयं तै र्युष्माभिरिदं स्मर्त्तव्यं
यत् तस्मिन् समये यूयं ख्रीष्टाद् भिन्ना इस्रायेल्लोकानां १२
सहवासाद् दूरस्थाः प्रतिज्ञासम्बलितनियमानां वहिः स्थिताः सन्तो
निराशा निरीश्वराश्च जगत्याध्वम् इति। किन्त्वधुना ख्रीष्टे यीशा- १३
वाश्रयं प्राप्य पुरा दूरवर्त्तिनो यूयं ख्रीष्टस्य शोणितेन निकट-

१४ वर्त्तिनोऽभवत। यतः स एवास्माकं सन्धिः स द्वयम् एकीकृतवान्
शत्रुतारूपिणीं मध्यवर्त्तिनीं प्रभेदकभित्तिं भग्नवान् दण्डाज्ञायुक्तं
१५ विधिशास्त्रं स्वशरीरेण लुप्तवांश्च। यतः स सन्धिं विधाय तौ
द्वौ स्वस्मिन् एकं नूतनं मानवं कर्त्तुं स्वकीयक्रुशे शत्रुतां निहत्य
१६ तेनैवैकस्मिन् शरीरे तयो र्द्वयोरीश्वरेण सन्धिं कारयितुं निश्चित-
१७ वान्। स चागत्य दूरवर्त्तिनो युष्मान् निकटवर्त्तिनो ऽन्यांश्च
१८ सन्धे र्मङ्गलवार्त्तां ज्ञापितवान्। यतस्तस्माद् उभयपक्षीया वयम्
एकेनात्मना पितुः समीपं गमनाय सामर्थ्यं प्राप्तवन्तः।

१९ अत इदानीं यूयम् असम्पर्कीया विदेशिनश्च न तिष्ठन्तः
२० पवित्रलोकैः सहवासिन ईश्वरस्य वेश्मवासिनश्चाध्वे। अपरं प्रेरिता
भाववादिनश्च यत्र भित्तिमूलस्वरूपास्तत्र यूयं तस्मिन् मूले निची-
२१ यध्वे तत्र च स्वयं यीशुः ख्रीष्टः प्रधानः कोणस्थप्रस्तरः। तेन कृत्स्ना
२२ निर्म्मितिः संग्रथ्यमाना प्रभोः पवित्रं मन्दिरं भवितुं वर्द्धते। यूयमपि
तत्र संग्रथ्यमाना आत्मनेश्वरस्य वासस्थानं भवथ।

---

३ तृतीयोऽध्यायः।

१ परजातीयान् प्रति सुसंवादं प्रचारयितुं पौलस्य नियोजनं तेषां कृते तस्य प्रार्थना २० ईश्वरस्य धन्यवदनञ्च।

१ अतो हेतोः परजातीयानां युष्माकं निमित्तं यीशुख्रीष्टस्य
२ बन्दी यः सोऽहं पौलो ब्रवीमि। युष्मदर्थम् ईश्वरेण मह्यं
३ दत्तस्य वरस्य नियमः कीदृशस्तद् युष्माभिरश्रावीति मन्ये। अर्थतः
पूर्व्वं मया संक्षेपेण यथा लिखितं तयाहं प्रकाशितवाक्येनेश्वरस्य
४ निगूढं भावं ज्ञापितोऽभवं। अतो युष्माभिस्तत् पठित्वा ख्रीष्टमधि
५ तस्मिन्निगूढे भावे मम ज्ञानं कीदृशं तद् भोत्स्यते। पूर्व्वयुगेषु

मानवसन्तानास्तं ज्ञापिता नासन् किन्त्वधुना स भावस्तस्य पवि-
त्रान् प्रेरितान् भाववादिनश्च प्रत्यात्मना प्रकाशितोऽभवत्; अर्थत ६
ईश्वरस्य शक्तेः प्रकाशात् तस्यानुग्रहेण यो वरो मह्यम् अदायि
तेनाहं यस्य सुसंवादस्य परिचारकोऽभवं, तद्द्वारा ख्रीष्टेन परजातीया ७
अन्यैः सार्द्धम् एकाधिकारा एकशरीरा एकस्याः प्रतिज्ञाया अंशि-
नश्च भविष्यन्तीति। सर्व्वेषां पवित्रलोकानां क्षुद्रतमाय मह्यं ८
वरोऽयम् अदायि यद् परजातीयानां मध्ये बोधागम्यस्य गुण-
निधेः ख्रीष्टस्य मङ्गलवार्त्तां प्रचारयामि, कालावस्थातः पूर्व्वस्माच्च ९
यो निगूढभाव ईश्वरे गुप्त आसीत् तदीयनियमं सर्व्वान् ज्ञाप-
यामि। यत ईश्वरस्य नानारूपं ज्ञानं यत् साम्प्रतं मण्डल्या १०
स्वर्गे प्राधान्यपराक्रमयुक्तानां दूतानां निकटे प्रकाश्यते तदर्थं स
यीशुना ख्रीष्टेन सर्व्वाणि सृष्टवान्। यतो वयं यस्मिन् विश्वस्य ११
दृढभक्त्या निर्भयताम् ईश्वरस्य समागमे सामर्थ्यञ्च प्राप्तवन्त- १२
स्तमस्माकं प्रभुं यीशुं ख्रीष्टमधि स कालावस्थायाः पूर्व्वं तं मनो-
रथं कृतवान्। अतोऽहं युष्मन्निमित्तं दुःखभोगेन क्लान्तिं यन्न १३
गच्छामीति प्रार्थये यतस्तदेव युष्माकं गौरवं। अतो हेतोः स्वर्ग- १४
पृथिव्योः स्थितः कृत्स्नो वंशो यस्य नाम्ना विख्यातस्तम् अस्मत्प्रभो
र्यीशुख्रीष्टस्य पितरमुद्दिश्याहं जानुनी पातयित्वा तस्य प्रभाव- १५
निधितो वरमिमं प्रार्थये। तस्यात्मना युष्माकम् आन्तरिक- १६
पुरुषस्य शक्ते र्वृद्धिः क्रियतां। ख्रीष्टस्तु विश्वासेन युष्माकं हृदयेषु १७
निवसतु। प्रेमणि युष्माकं बद्धमूलत्वं सुस्थिरत्वञ्च भवतु। इत्थं १८
प्रस्थताया दीर्घताया गभीरताया उच्चतायाश्च बोधाय सर्व्वैः
पवित्रलोकैः प्राप्यं सामर्थ्यं युष्माभि र्लभ्यतां, ज्ञानातिरिक्तं ख्रीष्टस्य प्रेम १९
ज्ञायताम् ईश्वरस्य सम्पूर्णवृद्धिपर्य्यन्तं युष्माकं वृद्धि र्भवतु च।

२०   अस्माकम् अन्तरे या शक्तिः प्रकाशते तया सर्व्वातिरिक्तं कर्म्म
कुर्व्वन् अस्माकं प्रार्थनां कल्पनाञ्चातिक्रमितुं यः शक्नोति ख्रीष्ट-
२१ यीशुना मण्डल्या मध्ये सर्व्वेषु युगेषु तस्य धन्यवादो भवतु। इति।

---

४ चतुर्थोऽध्यायः।

१ ऐक्यभवनाय मन्त्रणा सर्व्वेषां पारमार्थिकवराणाम् अभिप्रायनिर्णयः १७ दुष्टस्वभावत्यागार्थम् इफिषीयलोकेषु पौलस्य विनयः २५ धर्म्मकर्म्मकरणाय ताम् प्रति विनयश्च।

१   अतो बन्दिरहं प्रभो र्नाम्ना युष्मान् विनये यूयं येनाह्वाने-
२ नाहूतास्तदुपयुक्तरूपेण सर्व्वथा नम्रतां मृदुतां तितिक्षां पर-
३ स्परं प्रेम्ना सहिष्णुताञ्चाचरत। प्रणयबन्धनेन चात्मन ऐक्यं
४ रक्षितुं यतध्वं। यूयम् एकशरीरा एकात्मानश्च तद्वद् आह्वा-
५ नेन यूयम् एकप्रत्याशाप्राप्तये समाहूताः। युष्माकम् एकः प्रभु-
६ रेको विश्वास एकं स्नापनं, सर्व्वेषां तातः सर्व्वोपरिस्थः सर्व्व-
७ व्यापी सर्व्वेषां युष्माकं मध्यवर्त्ती चैक ईश्वर आस्ते। किन्तु
ख्रीष्टस्य दानपरिमाणानुसाराद् अस्माकम् एकैकस्मै विशेषो वरो-
८ ऽदायि। यथा लिखितम् आस्ते,

ऊर्द्धम् आरुह्य जेतॄन् स विजित्य बन्दिनोऽकरोत्।
ततः स मनुजेभ्योऽपि स्वीयान् व्यश्राणयद् वरान्॥

९ ऊर्द्धम् आरुह्येतिवाक्यस्यायमर्थः स पूर्व्वं पृथिवीरूपं सर्व्वाधः-
१० स्थितं स्थानम् अवतीर्णवान्; यश्चावतीर्णवान् स एव स्वर्गा-
११ णाम् उपर्य्युपर्य्यारूढवान् यतः सर्व्वाणि तेन पूरयितव्यानि। स
एव च कांश्चन प्रेरितान् अपरान् भाववादिनोऽपरान् सुसं-
वादप्रचारकान् अपरान् पालकान् उपदेशकांश्च नियुक्तवान्।
१२ यावद् वयं सर्व्वे विश्वासस्येश्वरपुत्रविषयकस्य तत्त्वज्ञानस्य चैक्यं

सम्पूर्णं पुरुषार्थञ्चार्थतः ख्रीष्टस्य सम्पूर्णपरिमाणस्य समं परिमाणं
न प्राप्नुमस्तावत् स परिचर्य्याकर्म्मसाधनाय ख्रीष्टस्य शरीरस्य निष्ठायै १२
च पवित्रलोकानां सिद्धतायास्तादृशम् उपायं निश्चितवान्। अत- १४
एव मानुषाणां चातुरीतो भ्रमकधूर्त्ततायाश्छलाच्च जातेन सर्व्वेण
शिक्षावायुना वयं यद् बालका इव दोलायमाना न भ्राम्याम
इत्यस्माभि र्यतितव्यं, प्रेम्ना सत्यताम् आचरद्भिः सर्व्वविषये ख्रीष्टम् १५
उद्दिश्य वर्द्धितव्यञ्च, यतः स मूर्द्धा, तस्माच्चैकैकस्याङ्गस्य स्वस्वपरि- १६
माणानुसारेण साहाय्यकरणाद् उपकारकैः सर्व्वैः सन्धिभिः कृत्स्नस्य
शरीरस्य संयोगे सम्मिलने च जाते प्रेम्ना निष्ठां लभमानं कृत्स्नं
शरीरं वृद्धिं प्राप्नोति ।

युष्मान् अहं प्रभुनेदं ब्रवीम्यादिशामि च, अन्ये परजातीया १७
इव यूयं पुन र्माचरत। यतस्ते स्वमनोमायाम् आचरन्त्यान्त- १८
रिकाज्ञानात् मानसिककाठिन्याच्च तिमिरावृतबुद्धय ईश्वरीय-
जीवनस्य बहिर्भूताश्च भवन्ति, स्वान् चैतन्यशून्यान् कृत्वा च लोभेन १९
सर्व्वविधाशौचाचरणाय लम्पटतायां स्वान् समर्पितवन्तः। किन्तु २०
यूयं ख्रीष्टं न तादृशं परिचितवन्तः, यतो यूयं तं श्रुतवन्तो या
सत्या शिक्षा यीशुतो लभ्या तदनुसारात् तदीयोपदेशं प्राप्तवन्त- २१
श्चेति मन्ये। तस्मात् पूर्व्वकालिकाचारकारी यः पुरातनपुरुषो २२
मायाभिलाषै र्नश्यति तं त्यक्त्वा युष्माभि र्मानसिकभावो नूतनी- २३
कर्त्तव्यः, यो नवपुरुष ईश्वरानुरूपेण धार्म्मिकत्वेन सत्यतासहितेन २४
साधुत्वेन च सृष्टः स एव परिधातव्यश्च ।

अतो यूयं सर्व्वे मिथ्याकथनं परित्यज्य समीपवासिभिः सह २५
सत्यालापं कुरुत यतो वयं परस्परम् अङ्गप्रत्यङ्गा भवामः। अपरं २६
क्रोधे जाते पापं मा कुरुध्वम्, अशान्ते युष्माकं रोषे सूर्य्योऽस्तं

२७ न गच्छतु । अपरं शैतानाय स्थानं मा दत्त । चोरः पुनश्चौर्य्यं
२८ न करोतु किन्तु दीनाय दाने सामर्थ्यं यज्जायते तदर्थं स्वकराभ्यां
२९ सद्वृत्त्या परिश्रमं करोतु । अपरं युष्माकं वदनेभ्यः कोऽपि कदा-
लापो न निर्गच्छतु, किन्तु येन श्रोतुरुपकारो जायते तादृशः
३० प्रयोजनीयनिष्ठायै फलदायक आलापो युष्माकं भवतु । अपरञ्च
यूयं मुक्तिदिनपर्य्यन्तम् ईश्वरस्य येन पवित्रेणात्मना मुद्रयाङ्किता
३१ अभवत तं शोकान्वितं मा कुरुत । अपरं कटुवाक्यं रोषः कोपः
कलहो निन्दा सर्व्वविधद्वेषश्चैतानि युष्माकं मध्याद् दूरीभवन्तु ।
३२ यूयं परस्परं हितैषिणः कोमलान्तःकरणाश्च भवत । अपरम्
ईश्वरः ख्रीष्टेन यद्वद् युष्माकं दोषान् क्षमितवान् तद्वद् यूयमपि
परस्परं क्षमध्वं ।

---

५ पञ्चमोऽध्यायः ।

१ अशुचिक्रियाः परित्यक्तुं तान् प्रति पौलस्य विनयः १५ सावधानतयाचरितुं तान् प्रति विनयस्त्रीपुरुषयोः कर्त्तव्यकर्म्मकथनञ्च ।

१ अतो यूयं प्रियबालका इवेश्वरस्यानुकारिणो भवत, ख्रीष्ट
२ इव प्रेमाचारं कुरुत च, यतः सोऽस्मासु प्रेम कृतवान् अस्माकं
विनिमयेन चात्मनिवेदनं कृत्वा ग्राह्यसुगन्धार्थकम् उपहारं बलि-
३ ञ्चेश्वराय दत्तवान् । किन्तु वेश्यागमनं सर्व्वविधाशौचक्रिया लोभ-
श्चैतेषाम् उच्चारणमपि युष्माकं मध्ये न भवतु, एतदेव पवित्र-
४ लोकानाम् उचितं । अपरं कुत्सितालापः प्रलापः श्लेषोक्तिश्च
न भवतु यत एतान्यनुचितानि किन्त्वीश्वरस्य धन्यवादो भवतु ।
५ वेश्यागाम्यशौचाचारी देवपूजक इव गण्यो लोभी चैतेषां कोपि
ख्रीष्टस्य राज्येऽर्थत ईश्वरस्य राज्ये कमप्यधिकारं न प्राप्स्यतीति
६ युष्माभिः सम्यक् ज्ञायतां । अनर्थकवाक्येन कोऽपि युष्मान् न

वञ्चयतु यतस्तादृगाचारहेतोरनाज्ञाग्राहिषु लोकेष्वीश्वरस्य कोपो
वर्त्तते। तस्माद् यूयं तैः सहभागिनो न भवत। पूर्व्वं यूयम् ७
अन्धकारस्वरूपा आध्वं किन्त्विदानीं प्रभुना दीप्तिस्वरूपा भवथ ८
तस्माद् दीप्तेः सन्ताना इव समाचरत। दीप्ते र्यत् फलं तत् ९
सर्व्वविधहितैषितायां धार्म्मिकत्वे सत्यालापे च प्रकाशते। प्रभवे १०
यद् रोचते तत् परीक्षध्वं। यूयं तिमिरस्य विफलकर्म्मणाम् अंशिनो ११
न भूत्वा तेषां दोषित्वं प्रकाशयत। यतस्ते लोका रहसि यद् १२
यद् आचरन्ति तदुच्चारणम् अपि लज्जाजनकं। यतो दीप्त्या १३
यद् यत् प्रकाश्यते तत् तया चकास्यते यच्च चकास्ति तद्
दीप्तिस्वरूपं भवति। एतत्कारणाद् उक्तम् आस्ते, १४

हे निद्रित प्रबुध्यस्व मृतेभ्यश्चोत्थितिं कुरु।
तत्कृते सूर्य्यवत् ख्रीष्टः स्वयं त्वां द्योतयिष्यति।

अतः सावधाना भवत, अज्ञाना इव माचरत किन्तु ज्ञा- १५
निन इव सतर्कम् आचरत। समयं बहुमूल्यं गणयध्वं यतः काला १६
अभद्राः। तस्माद् यूयम् अज्ञाना न भवत किन्तु प्रभोरभिमतं १७
किं तदवगता भवत। सर्व्वनाशजनकेन सुरापानेन मत्ता मा भवत १८
किन्त्वात्मना पूर्य्यध्वं। अपरं गीतै र्गानैः पारमार्थिककीर्त्तनैश्च १९
परस्परम् आलपन्तो मनसा सार्द्धं प्रभुम् उद्दिश्य गायत वादयत
च। सर्व्वदा सर्व्वविषयेऽस्मत्प्रभो र्यीशोः ख्रीष्टस्य नाम्ना तातम् २०
ईश्वरं धन्यं वदत।

यूयम् ईश्वराद् भीताः सन्त अन्येऽपरेषां वशीभूता भवत। २१
हे योषितः, यूयं यथा प्रभोस्तथा स्वस्वस्वामिनो वशङ्गता २२
भवत। यतः ख्रीष्टो यद्वत् मण्डल्या मूर्द्धा शरीरस्य त्राता च २३
भवति तद्वत् स्वामी योषितो मूर्द्धा। अतः मण्डली यद्वत् २४

खीष्टस्य वशीभूता तद्वद् योषिद्भिरपि स्वस्वस्वामिनो वशता स्वीक-
२५ र्त्तव्या। अपरञ्च हे पुरुषाः, यूयं खीष्ट इव स्वस्वयोषित्सु प्रीयध्वं।
२६ स खीष्टोऽपि मण्डल्यां प्रीतवान् तस्याः कृते च स्वप्राणान् त्यक्त-
वान् यतः स वाक्ये जलमज्जनेन तां परिष्कृत्य पावयितुम् अपरं
२७ तिलकवल्यादिविहीनां पवित्रां निष्कलङ्काञ्च तां मण्डलीं तेज-
२८ स्विनीं कृत्वा स्वहस्ते समर्पयितुञ्चाभिलषितवान्। तस्मात् स्वतनुवत्
स्वयोषिति प्रेमकरणं पुरुषस्योचितं, येन स्वयोषिति प्रेम क्रियते
२९ तेनात्मप्रेम क्रियते। कोऽपि कदापि न स्वकीयां तनुम् ऋती-
यितवान् किन्तु सर्व्वे तां बिभ्रति पुष्णन्ति च। खीष्टोऽपि
मण्डलीं प्रति तदेव करोति, यतो वयं तस्य शरीरस्याङ्गानि
३० मांसास्थीनि च भवामः। एतदर्थं मानवः स्वमातापितरौ परि-
३१ त्यज्य स्वभार्य्यायाम् आसंक्ष्यति तौ द्वौ जनावेकाङ्गौ भवि-
३२ ष्यतः। एतन्निगूढवाक्यं गुरुतरं मया च खीष्ट मण्डल्यावधि तद्
३३ उच्यते। अतएव युष्माकम् एकैको जन आत्मवत् स्वयोषिति
प्रीयतां भार्य्यापि स्वामिनं समादर्त्तुं यततां।

---

६ षष्ठोऽध्यायः।

१ बालकानां मातापित्रोश्च कर्त्तव्यकर्म्मकथनं ५ दासानां प्रभूनाञ्च कर्त्तव्यकर्म्मणः कथनं १० ईश्वरीयसज्जायां सज्जीभूतत्वे तान् प्रति पौलस्य विनयः २१ तुखि-कस्य प्रेषणं भ्रातॄन् प्रति नमस्कारज्ञापनञ्च।

१ हे बालकाः, यूयं प्रभुम् उद्दिश्य पित्रोराज्ञाग्राहिणो भवत
२ यतस्तत् न्याय्यं। त्वं निजपितरं मातरञ्च सम्मन्यस्वेति यो विधिः
३ स प्रतिज्ञायुक्तः प्रथमो विधिः फलतस्तस्मात् तव कल्याणं देशे
४ च दीर्घकालम् आयु र्भविष्यतीति। अपरं हे पितरः, यूयं स्वबा-
लकान् मा रोषयत किन्तु प्रभो र्विनीत्यादेशाभ्यां तान् विन-

यत। हे दासाः, यूयं खीष्टम् उद्दिश्य सभयाः कम्पान्विताश्च ५
भूत्वा सरलान्तःकरणैरैहिकप्रभूनाम् आज्ञाग्राहिणो भवत। दृष्टि- ६
गोचरीयपरिचर्य्यया मानुषेभ्यो रोचितुं मा यतध्वं किन्तु खीष्टस्य
दासा इव निविष्टमनोभिरीश्वरस्येच्छां साधयत। मानवान् अनु- ७
द्दिश्य प्रभुमेवोद्दिश्य सद्भावेन दास्यकर्म्म कुरुध्वं। दासस्वाधीनयो ८
र्येन यत् सत्कर्म्म क्रियते तेन तस्य फलं प्रभुतो लप्स्यत इति
जानीत च। अपरं हे प्रभवः, युष्माभि र्भर्त्सनं विहाय तान् ९
प्रति न्याय्याचरणं क्रियतां यश्च कस्यापि पक्षपातं न करोति
युष्माकमपि तादृश एकः प्रभुः स्वर्गे विद्यत इति ज्ञायतां।

अधिकन्तु हे भ्रातरः, यूयं प्रभुना तस्य विक्रमयुक्तशक्त्या १०
च बलवन्तो भवत। यूयं यत् शैतानस्य छलानि निवारयितुं ११
शक्नुथ तदर्थम् ईश्वरीयसुसज्जां परिधद्धं। यतः केवलं रक्तमांसा- १२
भ्याम् इति नहि किन्तु कर्तृत्वपराक्रमयुक्तैस्तिमिरराज्यस्येहलोक-
स्याधिपतिभिः स्वर्गोद्भवै र्दुष्टात्मभिरेव सार्द्धम् अस्माभि र्युद्धं
क्रियते। अतो हेतो र्यूयं यया संकुले दिनेऽवस्थातुं सर्व्वाणि १३
पराजित्य दृढाः स्थातुञ्च शक्ष्यथ ताम् ईश्वरीयसुसज्जां गृह्णीत।
वस्तुतस्तु सत्यत्वेन शृङ्खलेन कटिं बद्ध्वा धार्म्मिकत्वे वर्म्मणा वक्ष १४
आच्छाद्य शान्तेः सुवार्त्तया जातम् उत्साहं पादुकायुगलं पदे १५
समर्प्य तिष्ठत। येन च दुष्टात्मनोऽग्निवाणान् सर्व्वान् निर्व्वाप- १६
यितुं शक्ष्यथ तादृशं सर्व्वाच्छादकं फलकं विश्वासं धारयत।
शिरस्त्रं परित्राणम् आत्मनः खड्गञ्चेश्वरस्य वाक्यं धारयत। १७
सर्व्वसमये सर्व्वयाचनेन सर्व्वप्रार्थनेन चात्मना प्रार्थनां कुरुध्वं १८
तदर्थं दृढाकाङ्क्षया जाग्रतः सर्व्वेषां पवित्रलोकानां कृते सदा
प्रार्थनां कुरुध्वं। अहञ्च यस्य सुसंवादस्य शृङ्खलबद्धः प्रचा- १९

एकदूतोऽस्मि तम् उपयुक्तेनोत्साहेन प्रचारयितुं यथा शक्नुयां
२० तथा निर्भयेन स्वरेणोत्साहेन च सुसंवादस्य निगूढवाक्यप्रचा-
राय वक्तृता यत् मह्यं दीयते तदर्थं ममापि कृते प्रार्थनां
कुरुध्वं।
२१ अपरं मम यावस्थास्ति यच्च मया क्रियते तत् सर्व्वं यद्
युष्माभि र्ज्ञायते तदर्थं प्रभुना प्रियभ्राता विश्वास्यः परिचार-
२२ कश्च तुखिको युष्मान् तत् ज्ञापयिष्यति। यूयं यद् अस्माकम्
अवस्थां जानीथ युष्माकं मनांसि च यत् सान्त्वनां लभन्ते
२३ तदर्थमेवाहं युष्माकं सन्निधिं तं प्रेषितवान्। अपरम् ईश्वरः
प्रभु र्यीशुख्रीष्टश्च सर्व्वेभ्यो भ्रातृभ्यः शान्तिं विश्वाससहितं प्रेम
२४ च देयात्। ये केचित् प्रभौ यीशुख्रीष्टेऽक्षयं प्रेम कुर्व्वन्ति तान्
प्रति प्रसादो भूयात्। तथास्तु।

फिलिपिनः प्रति पौलस्य प्रेरितस्य पत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचरणं ३ फिलिपिनां प्रत्ययफलहेतोः पौलस्य धन्यवदनं तेषां कृते तस्य प्रार्थना च १२ ख्रीष्टस्य सुसंवादप्रचारणे तस्य दुःखकथनं २६ सुसंवादस्य विध्यनुसारेणाचरितुं विनयः शत्रुभ्यो भयं न कर्त्तुं तान् प्रति विनयश्च।

पौलतीमथिनामानौ यीशुख्रीष्टस्य दासौ फिलिपिनगरस्थान् १
ख्रीष्टयीशोः सर्व्वान् पवित्रलोकान् मण्डल्याध्यक्षान् परिचारकांश्च
प्रति पत्रं लिखतः। अस्माकं तात ईश्वरः प्रभु र्यीशुख्रीष्टश्च २
युष्मभ्यं प्रसादस्य शान्तेश्च भोगं देयास्तां।

अहं निरन्तरं निजसर्व्वप्रार्थनासु युष्माकं सर्व्वेषां कृते सानन्दं ३
प्रार्थनां कुर्व्वन् यति वारान् युष्मान् स्मरामि तति वारान् आ ४
प्रथमाद् अद्य यावद् युष्माकं सुसंवादभागित्वकारणाद् ईश्वरं धन्यं ५
वदामि। युष्मन्मध्ये येनोत्तमं कर्म्म कर्त्तुम् आरम्भि तेनैव यीशु- ६
ख्रीष्टस्य दिनं यावत् तत् साधयिष्यत इत्यस्मिन् दृढविश्वासो
ममास्ते। युष्मान् सर्व्वान् अधि मम तादृशो भावो यथार्थो ७
यतोऽहं कारावस्थायां प्रत्युत्तरकरणे सुसंवादस्य प्रामाण्यकरणे
च युष्मान् सर्व्वान् मया सार्द्धम् एकानुग्रहस्य भागिनो मत्वा
स्वहृदये धारयामि। अपरम् अहं ख्रीष्टयीशोः स्नेहवत् स्नेहेन ८
युष्मान् कीदृशं काङ्क्षामि तदधीश्वरो मम साक्षी विद्यते। मया ९
यत् प्रार्थ्यते तद् इदं युष्माकं प्रेम नित्यं वृद्धिं गत्वा ज्ञानस्य १०
विशिष्टानां परीक्षिकायाश्च सर्व्वविधबुद्धे र्बाहुल्यं फलतु, ख्रीष्टस्य ११
दिनं यावद् युष्माकं सारल्यं निर्विघ्नत्वञ्च भवतु, ईश्वरस्य गौरवाय

प्रशंसायै च यीशुना ख्रीष्टेन धार्म्मिकत्वफलानां पूर्णता युष्मभ्यं
दीयताम् इति।
१२ हे भ्रातरः, मां प्रति यद् यद् घटितं तेन सुसंवादप्रचा-
रस्य बाधा नहि किन्तु वृद्धिरेव जाता तद् युष्मान् ज्ञापयितुं
१३ कामयेऽहं। अपरम् अहं ख्रीष्टस्य कृते बद्धोऽस्मीति राजपुर्य्याम्
१४ अन्यस्थानेषु च सर्व्वेषां निकटे सुस्पष्टम् अभवत्, प्रभुसम्बन्धीया
अनेके भ्रातरश्च मम बन्धनाद् आश्वासं प्राप्य वर्द्धमानेनोत्साहेन
१५ निःक्षोभं कथां प्रचारयन्ति। केचिद् द्वेषाद् विरोधाच्चापरे
१६ केचिच्च सद्भावात् ख्रीष्टं घोषयन्ति; ये विरोधात् ख्रीष्टं घोष-
यन्ति ते पवित्रभावात् तन्न कुर्व्वन्तो मम बन्धनानि बहुतर-
१७ क्लेशदायीनि कर्त्तुम् इच्छन्ति। ये च प्रेम्ना घोषयन्ति ते सुसं-
वादस्य प्रामाण्यकरणेऽहं नियुक्तोऽस्मीति ज्ञात्वा तत् कुर्व्वन्ति।
१८ किं बहुना? कापट्यात् सरलभावाद् वा भवेत्, येन केनचित्
प्रकारेण ख्रीष्टस्य घोषणा भवतीत्यस्मिन् अहम् आनन्दाम्यानन्दि-
१९ ष्यामि च। युष्माकं प्रार्थनया यीशुख्रीष्टस्यात्मनश्चोपकारेण तत्
२० मन्निस्तारजनकं भविष्यतीति जानामि। तत्र च ममाकाङ्क्षा
प्रत्याशा च सिद्धिं गमिष्यति फलतोऽहं केनापि प्रकारेण न
लज्जिष्ये किन्तु गते सर्व्वस्मिन् काले यद्वत् तद्वद् इदानीमपि
सम्पूर्णोत्साहद्वारा मम शरीरेण ख्रीष्टस्य महिमा जीवने मरणे
२१ वा प्रकाशिष्यते। यतो मम जीवनं ख्रीष्टाय मरणञ्च लाभाय।
२२ किन्तु यदि शरीरे मया जीवितव्यं तर्हि तत् कर्म्मफलं फलिष्यति
२३ तस्मात् किं वरितव्यं तन्मया न ज्ञायते। द्वाभ्याम् अहं सम्पीड्ये,
देहवासत्यजनाय ख्रीष्टेन सहवासाय च ममाभिलाषो भवति यत-
२४ स्तत् सर्व्वोत्तमं। किन्तु देहे ममावस्थित्या युष्माकम् अधिक-

प्रयोजनं। अहम् अवस्थास्ये युष्माभिः सर्व्वैः सार्द्धम् अवस्थितिं २५
करिष्ये च तया च विश्वासे युष्माकं वृद्ध्यानन्दौ जनिष्येते तदहं
निश्चितं जानामि। तेन च मत्तोऽर्थतो युष्मत्समीपे मम पुनरुप- २६
स्थितत्वात् यूयं ख्रीष्टेन यीशुना बहुतरम् आह्लादं लप्स्यध्वे।

यूयं सावधाना भूत्वा ख्रीष्टस्य सुसंवादस्योपयुक्तम् आचारं २७
कुरुध्वं यतोऽहं युष्मान् उपागत्य साक्षात् कुर्व्वन् किं वा दूरे
तिष्ठन् युष्माकं यां वार्त्तां श्रोतुम् इच्छामि सेयं यूयम् एकात्मान-
स्तिष्ठथ, एकमनसा सुसंवादसम्बन्धीयविश्वासस्य पक्षे यतध्वे, विप-
क्षैश्च केनापि प्रकारेण न व्याकुलीक्रियध्व इति। तत् तेषां २८
विनाशस्य लक्षणं युष्माकञ्चेश्वरदत्तं परित्राणस्य लक्षणं भविष्यति।
यतो येन युष्माभिः ख्रीष्टे केवलविश्वासः क्रियते तन्नहि किन्तु २९
तस्य कृते क्लेशोऽपि सह्यते तादृशो वरः ख्रीष्टस्यानुरोधाद्
युष्माभिः प्रापि, तस्मात् मम यादृशं युद्धं युष्माभिरदर्शि साम्प्रतं ३०
श्रूयते च तादृशं युद्धं युष्माकम् अपि भवति।

२ द्वितीयोऽध्यायः।

१ परस्परं प्रेम कर्त्तुं विनयः ५ ख्रीष्टस्य दृष्टान्तेन नम्रीभवितुं विनयः १२ अन्य-लोकानां तेषाञ्च फलार्थं धर्म्ममाचरितुं विनयः १७ तेषां सेवां कर्त्तुं पौलस्य वाञ्छा तेषां निकटं तीमथियम् इपाफ्रदीतञ्च प्रेरयितुम् ईहा च।

ख्रीष्टाद् यदि किमपि सान्त्वनं कश्चित् प्रेमजातो हर्षः किञ्चिद् १
आत्मनः समभागित्वं काचिद् अनुकम्पा कृपा वा जायते तर्हि यूयं
ममाह्लादं पूरयन्त एकभावा एकप्रेमाण एकमनस एकचेष्टाश्च भवत। २
विरोधाद् दर्पाद् वा किमपि मा कुरुत किन्तु नम्रतया स्वेभ्यो ३
ऽपरान् विशिष्टान् मन्यध्वं। केवलम् आत्महिताय न चेष्टमानाः ४
परहितायापि चेष्टध्वं।

५ खीष्टस्य यीशो र्यादृशः स्वभावो युष्माकम् अपि तादृशो
६ भवतु। स ईश्वररूपी सन् स्वकीयाम् ईश्वरतुल्यतां श्लाघास्पदं
७ नामन्यत, किन्तु स्वं शून्यं कृत्वा दासरूपी बभूव नराकृतिं लेभे
८ च। इत्थं नरमूर्त्तिम् आश्रित्य नम्रतां स्वीकृत्य मृत्योरर्थतः
९ क्रुशीयमृत्योरेव भोगायाज्ञाग्राही बभूव। तत्कारणाद् ईश्वरोऽपि
तं सर्व्वोन्नतं चकार यच्च नाम सर्व्वेषां नाम्नां श्रेष्ठं तदेव तस्मै
१० ददौ, ततस्तस्मै यीशुनाम्ने स्वर्गमर्त्यपातालस्थितैः सर्व्वै र्जानुपातः
११ कर्त्तव्यः, तातस्येश्वरस्य महिम्ने च यीशुखीष्टः प्रभुरिति जिह्वाभिः
स्वीकर्त्तव्यं।

१२ अतो हे प्रियतमाः, युष्माभि र्यद्वत् सर्व्वदा क्रियते तद्वत्
केवले ममोपस्थितिकाले तन्नहि किन्त्विदानीम् अनुपस्थितेऽपि
मयि बहुतरयत्नेनाज्ञां गृहीत्वा भयकम्पाभ्यां स्वस्वपरित्राणं
१३ साध्यतां। यत ईश्वर एव स्वकीयानुरोधाद् युष्मन्मध्ये मनस्कामनां
१४ कर्म्मसिद्धिञ्च विदधाति। यूयं कलहविवादवर्जितम् आचारं कुर्व्वन्तो
१५ ऽनिन्दनीया अकुटिला ईश्वरस्य निष्कलङ्काश्च सन्तानाइव वक्र-
भावानां कुटिलाचारिणाञ्च लोकानां मध्ये तिष्ठत, यतस्तेषां मध्ये
१६ यूयं जीवनवाक्यं धारयन्तो जगतो दीपका इव दीप्यध्वे। युष्मा-
भिस्तथा कृते मम यत्नः परिश्रमो वा न निष्फलो जात
इत्यहं खीष्टस्य दिने श्लाघां कर्त्तुं शक्ष्यामि।

१७ युष्माकं विश्वासार्थकाय बलिदानाय सेवनाय च यद्यप्यहं
निवेदितव्यो भवेयं तथापि तेनानन्दामि सर्व्वेषां युष्माकम् आन-
१८ न्दस्यांशी भवामि च। तद्वद् यूयमप्यानन्दत मदीयानन्दस्यांशिनो
१९ भवत च। युष्माकम् अवस्थाम् अवगत्याहमपि यत् सान्त्वनां
प्राप्नुयां तदर्थं तीमथियं त्वरया युष्मत्समीपं प्रेषयिष्यामीति प्रभौ

प्रत्याशां कुर्व्वे। यः सत्यरूपेण युष्माकं हितं चिन्तयति तादृश २०
एकभावस्तस्मादन्यः कोऽपि मम सन्निधौ नास्ति। यतोऽपरे सर्व्वे २१
यीशोः ख्रीष्टस्य विषयान् न चिन्तयन्त आत्मविषयान् चिन्त-
यन्ति। किन्तु तस्य परीक्षितत्वं युष्माभि र्ज्ञायते यतः पुत्रो २२
यादृक् पितुः सहकारी भवति तथैव सुसंवादस्य परिचर्य्यायां स
मम सहकारी जातः। अतएव मम भाविदशां ज्ञात्वा तत्क्षणात् २३
तमेव प्रेषयितुं प्रत्याशां कुर्व्वे स्वयम् अहमपि तूर्णं युष्मत्समीपं २४
गमिष्यामीत्याशां प्रभुना कुर्व्वे। अपरं य इपाफ्रदीतो मम २५
भ्राता कर्म्मयुद्धाभ्यां मम सहायश्च युष्माकं दूतो मदीयोपकाराय
प्रतिनिधिश्चास्ति युष्मत्समीपे तस्य प्रेषणम् आवश्यकम् अमन्ये।
यतः स युष्मान् सर्व्वान् अकाङ्क्षत युष्माभिस्तस्य रोगस्य वार्त्ता- २६
श्रावीति बुद्ध्वा पर्य्यशोचच्च। स पीडया मृतकल्पोऽभवदिति सत्यं २७
किन्त्वीश्वरस्तं दयितवान् मम च दुःखात् परं पुनर्दुःखं यन्न भवेत्
तदर्थं केवलं तं न दयित्वा मामपि दयितवान्। अतएव यूयं २८
तं विलोक्य यत् पुनरानन्देत ममापि दुःखस्य ह्रासो यद् भवेत्
तदर्थम् अहं त्वरया तम् अप्रेषयं। अतो यूयं प्रभोः कृते २९
सम्पूर्णेनानन्देन तं गृह्लीत तादृशान् लोकांश्चादरणीयान् मन्यध्वं।
यतो मम सेवने युष्माकं त्रुटिं पूरयितुं स प्राणान् पणीकृत्य ३०
ख्रीष्टस्य कार्य्यार्थं मृतप्रायोऽभवत्।

---

३ तृतीयोऽध्यायः।

१ त्वक्छेदादिभिः परित्राणाभावः केवलख्रीष्टविश्वासेन परित्राणं, ख्रीष्टं प्राप्तुं पौलस्योद्योगः १७ दुष्टलोकानाम् अनुगामिनो न भवितुं स्वस्यानुगामिनो भवितुं विनयश्च।

हे भ्रातरः, शेषे वदामि यूयं प्रभावानन्दत। पुनः पुन- १

रेकस्य वचो लेखनं मम क्लेशदं नहि युष्मदर्थञ्च भ्रमनाशकं
२ भवति। यूयं कुक्कुरेभ्यः सावधाना भवत दुष्कर्म्मकारिभ्यः साव-
३ धाना भवत छिन्नमूलेभ्यो लोकेभ्यश्च सावधाना भवत। वयमेव
छिन्नत्वचो लोका यतो वयम् आत्मनेश्वरं सेवामहे ख्रीष्टेन यीशुना
४ श्लाघामहे शरीरेण च प्रगल्भतां न कुर्व्वामहे। किन्तु शरीरे
मम प्रगल्भतायाः कारणं विद्यते, अपरः कश्चिद् यदि शरीरेण
प्रगल्भतां चिकीर्षति तर्हि तस्माद् अपि मम प्रगल्भताया गुरु-
५ तरं कारणं विद्यते। यतोऽहम् अष्टमदिवसे त्वक्छेदप्राप्त इस्रा-
येलवंशीयो बिन्यामीनगोष्ठीय इब्रिकुलजात इब्रीयो व्यवस्थाचरणे
६ फरीशी धर्म्मोत्साहकारणात् मण्डल्या उपद्रवकारी व्यवस्थातो लभ्ये
७ धार्म्मिकत्वे चानिन्दनीयः। किन्तु मम यद्यत् लभ्यम् आसीत्
८ तत् सर्व्वम् अहं ख्रीष्टस्यानुरोधात् क्षतिम् अमन्ये। किञ्चा-
धुनाप्यहं मत्प्रभोः ख्रीष्टस्य यीशो र्ज्ञानस्योत्कृष्टतां बुद्ध्वा तत् सर्व्वं
९ क्षतिं मन्ये। यतो हेतोरहं यत् ख्रीष्टं लभेय व्यवस्थातो जातं
स्वकीयधार्म्मिकत्वञ्च न धारयन् किन्तु ख्रीष्टे विश्वसनात् लभ्यं यत्
धार्म्मिकत्वम् ईश्वरेण विश्वासं दृष्ट्वा दीयते तदेव धारयन् यत्
ख्रीष्टे विद्येय तदर्थं तस्यानुरोधात् सर्व्वेषां क्षतिं स्वीकृत्य तानि
१० सर्व्वाण्यवकरानिव मन्ये। यतो हेतोरहं ख्रीष्टं तस्य पुनरुत्थिते र्गुणं
तस्य दुःखानां भागित्वञ्च ज्ञात्वा तस्य मृत्योराकृतिञ्च गृहीत्वा येन
११ केनचित् प्रकारेण मृतानां मध्यात् पुनरुत्थितिं प्राप्तुं यते। मया तत्
१२ सर्व्वम् अधुना प्रापि सिद्धता वालम्भि तन्नहि किन्तु यदर्थम्
१३ अहं ख्रीष्टेन धारितस्तद् धारयितुं धावामि। हे भ्रातरः, मया तद्
धारितम् इति न मन्यते किन्त्वेतदेकमात्रं वदामि यानि पश्चात्
१४ स्थितानि तानि विस्मृत्याहम् अग्रस्थितान्युद्दिश्य पूर्णयत्नेन लक्ष्यं प्रति

धावन् ख्रीष्टयीशुनोर्द्धात् माम् आह्वयत ईश्वरात् जेतृपणं प्राप्तुं
चेष्टे। अस्माकं मध्ये ये सिद्धास्तैः सर्व्वैस्तदेव भाव्यतां, यदि च १५
कञ्चन विषयम् अधि युष्माकम् अपरो भावो भवति तर्हीश्वर-
स्तमपि युष्माकं प्रति प्रकाशयिष्यति। किन्तु वयं यद्यद् अवगता १६
आस्मस्तत्रास्माभिरेको विधिराचरितव्य एकभावै र्भवितव्यञ्च।

हे भ्रातरः, यूयं ममानुगामिनो भवत वयञ्च यादृगाच- १७
रणस्य निदर्शनस्वरूपा भवामस्तादृगाचारिणो लोकान् आलोक-
यध्वं। यतोऽनेके विपथे चरन्ति ते च ख्रीष्टस्य क्रुशस्य शत्रव १८
इति पुरा मया पुनः पुनः कथितम् अधुनापि रुदता मया
कथ्यते। तेषां शेषदशा सर्व्वनाश उदरश्चेश्वरो लज्जा च श्लाघा १९
पृथिव्याञ्च लग्नं मनः। किन्त्वस्माकं जनपदः स्वर्गे विद्यते तस्माच्चा- २०
गमिष्यन्तं त्रातारं प्रभुं यीशुख्रीष्टं वयं प्रतीक्षामहे। स च यया २१
शक्त्या सर्व्वाण्येव स्वस्य वशीकर्त्तुं पारयति तयास्माकम् अधमं
शरीरं रूपान्तरीकृत्य स्वकीयतेजोमयशरीरस्य समाकारं करिष्यति।

---

४ चतुर्थोऽध्यायः।

१ विशेषं निवेदनं ४ नाना धर्म्मकर्म्मार्थम् उपदेशः १० पौलस्य कृतज्ञत्वं नम-
स्कारप्रेरणञ्च।

हे मदीयानन्दमुकुटस्वरूपाः प्रियतमा अभीष्टतमा भ्रातरः, हे १
मम स्नेहपात्राः, यूयम् इत्थं प्रभौ स्थिरास्तिष्ठत। हे इवदिये हे २
सुन्तुखि युवां प्रभौ एकभावे भवतम् एतद् अहं प्रार्थये। हे मम ३
सत्य सहकारिन् त्वामपि विनीय वदामि एतयोरुपकारस्त्वया
क्रियतां यतस्ते क्लीमिनादिभिः सहकारिभिः सार्द्धं सुसंवादप्रचार-
णाय मम साहाय्यार्थं परिश्रमम् अकुर्व्वतां तेषां सर्व्वेषां नामानि
च जीवनपुस्तके लिखितानि विद्यन्ते।

४ यूयं प्रभौ सर्व्वदानन्दत। पुन र्वदामि यूयम् आनन्दत।
५ युष्माकं विनीतत्वं सर्व्वमानवै र्ज्ञायतां, प्रभुः सन्निधौ विद्यते। यूयं
६ किमपि न चिन्तयत किन्तु धन्यवादयुक्ताभ्यां प्रार्थनायाञ्चाभ्यां
७ सर्व्वविषये स्वप्रार्थनीयम् ईश्वराय निवेदयत। तथा कृत ईश्वरीया
या शान्तिः सर्व्वां बुद्धिम् अतिशेते सा युष्माकं चित्तानि मनांसि
८ च ख्रीष्टे यीशौ रक्षिष्यति। हे भ्रातरः, शेषे वदामि यद्यत् सत्यम्
आदरणीयं न्याय्यं साधु प्रियं सुख्यातम् अन्येन येन केनचित्
प्रकारेण वा गुणयुक्तं प्रशंसनीयं वा भवति तत्रैव मनांसि निधध्वं।
९ यूयं मां दृष्ट्वा श्रुत्वा च यद्यत् शिक्षितवन्तो गृहीतवन्तश्च तदेवा-
चरत तस्मात् शान्तिदायक ईश्वरो युष्माभिः सार्द्धं स्थास्यति।
१० ममोपकाराय युष्माकं या चिन्ता पूर्व्वम् आसीत् किन्तु
कर्म्मद्वारं न प्राप्नोत् इदानीं सा पुनरफलत् इत्यस्मिन् प्रभौ मम
११ परमाह्लादोऽजायत। अहं यद् दैन्यकारणाद् इदं वदामि तन्नहि
यतो मम या काचिद् अवस्था भवेत् तस्यां सन्तोष्टुम् अशिक्षयं।
१२ दरिद्रतां भोक्तुं शक्नोमि धनाढ्यताम् अपि भोक्तुं शक्नोमि सर्व्वथा
सर्व्वविषयेषु विनीतोऽहं प्रचुरतां क्षुधाञ्च धनं दैन्यञ्चावगतोऽस्मि।
१३ मम शक्तिदायकेन ख्रीष्टेन सर्व्वमेव मया शक्यं भवति। किन्तु
१४ युष्माभि र्दैन्यनिवारणाय माम् उपकृत्य सत्कर्म्माकारि। हे
१५ फिलिपीयलोकाः, सुसंवादस्योदयकाले यदाहं माकिदनियादेशात्
प्रतिष्ठे तदा केवलान् युष्मान् विनापरया कयापि मण्डल्या सह
दानादानयो र्मम कोऽपि सम्बन्धो नासीद् इति यूयमपि जानीथ।
१६ यतो युष्माभि र्मम प्रयोजनाय थिषलनीकीनगरमपि मां प्रति
१७ पुनः पुनर्दानं प्रेषितं। अहं यद् दानं मृगये तन्नहि किन्तु
१८ युष्माकं लाभवर्द्धकं फलं मृगये। किन्तु मम कस्याप्यभावो नास्ति

सर्व्वं प्रचुरम् आस्ते यत ईश्वरस्य ग्राह्यं तुष्टिजनकं सुगन्धिनैवेद्य-
स्वरूपं युष्माकं दानं इपाफ्रदितात् गृहीत्वाहं परितृप्तोऽस्मि।
ममेश्वरोऽपि ख्रीष्टेन यीशुना स्वकीयविभवनिधितः प्रयोजनीयं १९
सर्व्वविषयं पूर्णरूपं युष्मभ्यं देयात्। अस्माकं पितुरीश्वरस्य धन्य- २०
वादोऽनन्तकालं यावद् भवतु। आमेन्। यूयं यीशुख्रीष्टस्यैकैकं पवि- २१
त्रजनं नमस्कुरुत। मम सङ्गिभ्रातरो युष्मान् नमस्कुर्व्वते। सर्व्वे
पवित्रलोका विशेषतः कैसरस्य परिजना युष्मान् नमस्कुर्व्वते। अस्माकं २२
प्रभो र्यीशुख्रीष्टस्य प्रसादः सर्व्वान् युष्मान् प्रति भूयात्। आमेन्। २३

कलसिनः प्रति पौलस्य प्रेरितस्य पत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचरणं ३ कलसीयलोकानां विश्वासनिमित्तं पौलस्य धन्यवदनं ९ तेषां पारमार्थिकमङ्गलार्थं तस्य प्रार्थना ख्रीष्टस्येश्वरत्वस्य प्रमाणं तान् प्रति ख्रीष्टस्यानुग्रहः २४ सुसंवादं प्रचारयितुं पौलस्य तदनुग्रहप्राप्तिश्च।

ईश्वरस्येच्छया यीशुख्रीष्टस्य प्रेरितः पौलस्तीमथियो भ्राता १
च कलसीनगरस्थान् पवित्रान् विश्वस्तान् ख्रीष्टाश्रितभ्रातृन् प्रति
पत्रं लिखतः। अस्माकं तात ईश्वरः प्रभु र्यीशुख्रीष्टश्च युष्मान् २
प्रति प्रसादं शान्तिञ्च क्रियास्तां।

ख्रीष्टे यीशौ युष्माकं विश्वासस्य सर्व्वान् पवित्रलोकान् प्रति ३

४ प्रेम्नश्च वार्त्तां श्रुत्वा वयं सदा युष्मदर्थं प्रार्थनां कुर्व्वन्तः स्वर्गे
निहिताया युष्माकं भाविसम्पदः कारणात् स्वकीयप्रभो र्यीशुख्रीष्टस्य
५ तातम् ईश्वरं धन्यं वदामः। यूयं तस्या भाविसम्पदो वार्त्तां यया
६ सुसंवादरूपिण्या सत्यवाण्या ज्ञापिताः सा यद्वत् कृत्स्नं जगद्
अभिगच्छति तद्वद् युष्मान् अप्यभ्यगमत्, यूयञ्च यद् दिनम्
आरभ्येश्वरस्यानुग्रहस्य वार्त्तां श्रुत्वा सत्यरूपेण ज्ञातवन्तस्तदारभ्य
७ युष्माकं मध्येऽपि फलति वर्द्धते च। अस्माकं प्रियः सहदासो
युष्माकं कृते च ख्रीष्टस्य विश्वस्तपरिचारको य इपफ्रास्तद् वाक्यं
८ युष्मान् आदिष्टवान् स एवास्मान् आत्मना जनितं युष्माकं प्रेम
ज्ञापितवान्।

९ वयं यद् दिनम् आरभ्य तां वार्त्तां श्रुतवन्तस्तदारभ्य निरन्तरं
युष्माकं कृते प्रार्थनां कुर्म्मः फलतो यूयं यत् पूर्णाभ्याम् आत्मिक-
१० ज्ञानवुद्धिभ्याम् ईश्वरस्याभिमतं सम्पूर्णरूपेणावगच्छेत, प्रभो र्योग्यं
सर्व्वथा सन्तोषजनकञ्चाचारं कुर्य्यातार्थत ईश्वरज्ञाने वर्द्धमानाः
११ सर्व्वसत्कर्म्मरूपं फलं फलेत, यथा चेश्वरस्य महिमयुक्तया शक्त्या
सानन्देन पूर्णां सहिष्णुतां तितिक्षाञ्चाचरितुं शक्ष्यथ तादृशेन
१२ पूर्णबलेन यद् बलवन्तो भवेत, यश्च पिता तेजोवासिनां पवित्र-
लोकानाम् अधिकारस्यांशित्वायास्मान् योग्यान् कृतवान् तं यद्
१३ धन्यं वदेत वरम् एनं याचामहे। यतः सोऽस्मान् तिमिरस्य
१४ कर्त्तृत्वाद् उद्धृत्य स्वकीयस्य प्रियपुत्रस्य राज्ये स्थापितवान्। तस्मात्
१५ पुत्राद् वयं परित्राणम् अर्थतः पापमोचनं प्राप्तवन्तः। स चादृ-
१६ श्यस्येश्वरस्य प्रतिमूर्त्तिः कृत्स्नायाः सृष्टेरादिकर्त्ता च। यतः सर्व्वमेव
तेन ससृजे सिंहासनराजत्वपराक्रमादीनि स्वर्गमर्त्त्यस्थितानि दृश्या-
१७ दृश्यानि वस्तूनि सर्व्वाणि तेनैव तस्मै च ससृजिरे। स सर्व्वेषाम्

आदिः सर्व्वेषां स्थितिकारकश्च। सएव मण्डलीरूपायास्तनो र्मूर्द्धा १८
किञ्च सर्व्वविषये स यद् अग्रियो भवेत् तदर्थं स एव मृतानां
मध्यात् प्रथमत उत्थितोऽग्रश्च। यत ईश्वरस्य कृत्स्नं पूर्णत्वं १९
तमेवावासयितुं क्रुशे पातितेन तस्य रक्तेन सन्धिं विधाय तेनैव २०
स्वर्गमर्त्त्यस्थितानि सर्व्वाणि स्वेन सह सन्धापयितुञ्चेश्वरेणाभिलेषे।
पूर्व्वं दूरस्था दुष्क्रियारतमनस्कत्वात् तस्य रिपवश्चास्त ये यूयं तान् २१
युष्मान् अपि स इदानीं तस्य मांसलशरीरे मरणेन स्वेन सह
सन्धापितवान्। यतः स स्वसम्मुखे पवित्रान् निष्कलङ्कान् अनिन्द- २२
नीयांश्च युष्मान् स्थापयितुम् इच्छति। किन्त्वेतदर्थं युष्माभि २३
र्बद्धमूलैः सुस्थिरैश्च भवितव्यम्, आकाशमण्डलस्याधःस्थितानां सर्व्व-
लोकानां मध्ये च घुष्यमाणो यः सुसंवादो युष्माभिरश्रावि तज्जा-
तायां प्रत्याशायां युष्माभिरचलै र्भवितव्यं।

तस्य सुसंवादस्यैकः परिचारको योऽहं पौलः सोऽहम् इदानीम् २४
आनन्देन युष्मदर्थं दुःखानि सहे ख्रीष्टस्य क्लेशभोगस्य योंशो-
ऽपूर्णस्तमेव तस्य तनोः मण्डल्याः कृते स्वशरीरे पूरयामि च।
यत ईश्वरस्य मन्त्रणया युष्मदर्थम् ईश्वरीयवाक्यस्य प्रचारस्य भारो २५
मयि समर्पितस्तस्माद् अहं तस्याः मण्डल्याः परिचारकोऽभवं।
तत् निगूढं वाक्यं पूर्व्वयुगेषु पूर्व्वपुरुषेभ्यः प्रच्छन्नम् आसीत् २६
किन्त्विदानीं तस्य पवित्रलोकानां सन्निधौ तेन प्राकाश्यत। यतो २७
परजातीयानां मध्ये तत् निगूढवाक्यं कीदृग्गौरवनिधिसम्बलितं
तत् पवित्रलोकान् ज्ञापयितुम् ईश्वरोऽभ्यलषत्। युष्मन्मध्यवर्त्ती
ख्रीष्ट एव स निधि र्गौरवाशाभूमिश्च। तस्माद् वयं तमेव २८
घोषयन्तो यद् एकैकं मानवं सिद्धीभूतं ख्रीष्टे स्थापयेम तदर्थ-
मेकैकं मानवं प्रबोधयामः पूर्णज्ञानेन चैकैकं मानवं उपदिशामः।

२९ एतदर्थं तस्य या शक्तिः प्रबलरूपेण मम मध्ये प्रकाशते तयाहं
यतमानः श्राम्यामि ।

२ द्वितीयोऽध्यायः ।

१ खीष्टधर्म्मे स्थातुं तान् प्रति पौलस्य विनयः ८ निरर्थककापथ्यविद्याया निषेध १६ स्वर्गदूतानां पूजाया निषेधः १० सांसारिककर्म्मसूचं मानुषाणां विधिञ्च त्यक्तुं निवेदनञ्च ।

१ युष्माकं लायदिकेयास्थभ्रातृणाञ्च कृते यावन्तो भ्रातरश्च
मम शारीरिकमुखं न दृष्टवन्तस्तेषां कृते मम कियान् यत्नो
२ भवति तद् युष्मान् ज्ञापयितुम् इच्छामि । फलतः पूर्णबुद्धिरूप-
धनभोगाय प्रेम्ना संयुक्तानां तेषां मनांसि यत् पितुरीश्वरस्य
खीष्टस्य च निगूढवाक्यस्य ज्ञानार्थं सान्त्वनां प्राप्नुयुरित्यर्थमहं
३ यते । यतो विद्याज्ञानयोः सर्व्वे निधयः खीष्टे गुप्ताः सन्ति ।
४ कोऽपि युष्मान् विनयवाक्येन यन्न वञ्चयेत् तदर्थम् एतानि मया
५ कथ्यन्ते । युष्मत्सन्निधौ मम शरीरेऽवर्त्तमानेऽपि ममात्मा वर्त्तते
तेन युष्माकं सुरीतिं खीष्टविश्वासे स्थिरत्वञ्च दृष्ट्वाहम् आनन्दामि ।
६ अतो यूयं प्रभुं यीशुखीष्टं यादृग् गृहीतवन्तस्तादृक् तम् अनुच-
७ रत । तस्मिन् बद्धमूलाः स्थापिताश्च भवत या च शिक्षा युष्माभि र्लब्धा
तदनुसाराद् विश्वासे सुस्थिराः सन्तस्तेनैव नित्यं धन्यवादं कुरुत ।
८ सावधाना भवत मानुषिकशिक्षात इहलोकस्य वर्णमाला-
तश्चोत्पन्ना खीष्टस्य विपक्षा या दर्शनविद्या मिथ्याप्रतारणा च
९ तया कोऽपि युष्माकं क्षतिं न जनयतु । यत ईश्वरस्य कृत्स्ना
१० पूर्णता मूर्त्तिमती खीष्टे वसति । यूयञ्च तेन पूर्णा भवथ यतः स
११ सर्व्वेषां राजत्वकर्त्तृत्वपदानां मूर्द्धास्ति, तेन च यूयम् अहस्तकृत-
त्वक्छेदेनार्थतो येन शारीरपापानां विग्रहस्त्यज्यते तेन खीष्टस्य

त्वक्छेदेन छिन्नत्वचो जाता स्नापने च तेन सार्द्धं श्मशानागारे १२
संस्थापिताः पुन र्मृतानां मध्यात् तस्योत्थापयितुरीश्वरस्य शक्तेः
फलं यो विश्वासस्तद्द्वारा तस्मिन्नेव स्नापने तेन सार्द्धम् उत्थापिता
अभवत। स च युष्मान् अपराधैः शारीरिकात्वक्छेदेन च मृतान् १३
दृष्ट्वा तेन सार्द्धं जीवितवान् युष्माकं सर्व्वान् अपराधान् क्षमितवान्,
यच्च दण्डाज्ञारूपं ऋणपत्रम् अस्माकं विरुद्धम् आसीत् तत् १४
प्रमार्जितवान् शलाकाभिः क्रुशे बद्ध्वा दूरीकृतवांश्च। किञ्च तेन १५
राजत्वकर्त्तृत्वपदानि निस्तेजांसि कृत्वा पराजितान् रिपूनिव प्रगल्भ-
तया सर्व्वेषां दृष्टिगोचरे ह्रेपितवान्।

अतो हेतोः खाद्याखाद्ये पेयापेये उत्सवः प्रतिपद् विश्राम- १६
वारश्चैतेषु सर्व्वेषु युष्माकं न्यायाधिपतिरूपं कमपि मा गृह्णीत।
यत एतानि छायास्वरूपाणि किन्तु सत्या मूर्त्तिः ख्रीष्टः। अपरञ्च १७
नम्रता स्वर्गदूतानां सेवा चैतादृशम् इष्टकर्म्माचरन् यः कश्चित् १८
परोक्षविषयान् प्रविशति स्वकीयशारीरिकभावेन च मुधा गर्व्वितः
सन् सन्धिभिः शिराभिश्चोपकृतं संयुक्तञ्च कृत्स्नं शरीरं यस्मात् मूर्द्धत १९
ईश्वरीयवृद्धिं प्राप्नोति तं मूर्द्धानं न धारयति तेन मानवेन युष्मत्तः
फलापहरणं नानुजानीत।

यदि यूयं ख्रीष्टेन सार्द्धं संसारस्य वर्णमालायै मृता अभवत २०
तर्हि ये द्रव्ये भोगेन क्षयं गन्तव्यं तानि मा स्पृश मा भुंक्ष्व मा २१
गृहाणेति मानवैरादिष्टान् शिक्षितांश्च विधीन् आचरन्तो यूयं कुतः २२
संसारे जीवन्त इव भवथ? ते विधयः स्वेच्छाभक्त्या नम्रतया २३
शरीरक्लेशनेन च ज्ञानविधिवत् प्रकाशन्ते तथापि तेऽगण्याः शारी-
रिकभाववर्द्धकाश्च सन्ति।

३ तृतीयोऽध्यायः।

१ स्वर्गस्थख्रीष्टस्योपरि मनो निधातुं पौलस्य विनयः ५ पापदमनार्थं नानाधर्म्मकर्म्मकरणार्थञ्च निवेदनं १८ स्त्रीपुरुषयो र्बालकानां मातापित्रो र्दासानां प्रभूनाञ्च कर्त्तव्यकर्म्मनिर्णयः।

१ यदि यूयं ख्रीष्टेन सार्द्धम् उत्थापिता अभवत तर्हि यस्मिन्
स्थाने ख्रीष्ट ईश्वरस्य दक्षिणपार्श्वे उपविष्ट आस्ते तस्योर्द्ध्वस्थानस्य
२ विषयान् चेष्टध्वं; पार्थिवविषयेषु न यतमाना ऊर्द्ध्वस्थविषयेषु
३ यतध्वं। यतो यूयं मृतवन्तो युष्माकं जीवितञ्च ख्रीष्टेन सार्द्धम्
४ ईश्वरे गुप्तम् अस्ति। अस्माकं जीवनस्वरूपः ख्रीष्टो यदा प्रकाशिष्यते
तदा तेन सार्द्धं यूयमपि विभवेन प्रकाशिष्यध्वे।
५ अतो वेश्यागमनम् अशुचिक्रिया रागः कुत्सिताभिलाषो देवपूजातुल्यो लोभश्चैतानि पार्थिवपुरुषस्याङ्गानि युष्माभि र्निहन्यन्तां।
६ यत एतेभ्यः कर्म्मभ्य आज्ञालङ्घिनो लोकान् प्रतीश्वरस्य क्रोधो
७ वर्त्तते। पूर्व्वं यदा यूयं तान्युपाजीवत तदा यूयमपि तान्येवाचरत;
८ किन्त्विदानीं क्रोधो रोषो जिहिंसिषा दुर्मुखता वदननिर्गतकदा-
९ लापश्चैतानि सर्व्वाणि दूरीकुरुध्वं। यूयं परस्परं मृषाकथां न वदत
१० यतो यूयं स्वकर्म्मसहितं पुरातनपुरुषं त्यक्तवन्तः स्वस्रष्टुः प्रतिमूर्त्या
११ तत्त्वज्ञानाय नूतनीकृतं नवीनपुरुषं परिहितवन्तश्च। तेन च यिहूदिपरजातीययोश्छिन्नत्वगच्छिन्नत्वचो र्म्लेच्छस्कुथीययो र्दासस्वाधीनयोश्च कोऽपि विशेषो नास्ति किन्तु सर्व्वेषु सर्व्वः ख्रीष्ट एवास्ते।
१२ अतएव यूयम् ईश्वरस्य मनोभिलषिताः पवित्राः प्रियाश्च लोका
इव स्नेहयुक्ताम् अनुकम्पां हितैषितां नम्रतां तितिक्षां सहिष्णुताञ्च
१३ परिधद्ध्वं। यूयम् एकैकस्याचरणं सहध्वं येन च यस्य किमप्यपरा-
ध्यते तस्य तं दोषं स क्षमतां, ख्रीष्टो युष्माकं दोषान् यद्वत्

चमितवान् यूयमपि तद्वत् कुरुध्वं। विशेषतः सिद्धिजनकेन प्रेम- १४
बन्धनेन बद्धा भवत। यस्याः प्राप्तये यूयम् एकस्मिन् शरीरे १५
समाहूता अभवत सेश्वरीया शान्ति र्युष्माकं मनांस्यधितिष्ठतु
यूयञ्च कृतज्ञा भवत। ख्रीष्टस्य वाक्यं सर्व्वविधज्ञानाय सम्पूर्णरूपेण १६
युष्मदन्तरे निवसतु, यूयञ्च गीतै र्गानैः पारमार्थिकसङ्कीर्त्तनैश्च पर-
स्परम् आदिशत प्रबोधयत च, अनुगृहीतत्वात् प्रभुम् उद्दिश्य
स्वमनोभि र्गायत च। वाचा कर्म्मणा वा यद् यत् कुरुत तत् १७
सर्व्वं प्रभो र्यीशो र्नाम्ना कुरुत तेन पितरम् ईश्वरं धन्यं वदत च।

हे योषितः, यूयं स्वामिनां वश्या भवत यतस्तदेव प्रभवे १८
रोचते। हे स्वामिनः, यूयं भार्य्यासु प्रीयध्वं ताः प्रति परुषालापं १९
मा कुरुध्वं। हे बालाः, यूयं सर्व्वविषये पित्रोराज्ञाग्राहिणो भवत २०
यतस्तदेव प्रभोः सन्तोषजनकं। हे पितरः, युष्माकं सन्ताना यत् २१
कातरा न भवेयुस्तदर्थं तान् प्रति मा रोषयत। हे दासाः, २२
यूयं सर्व्वविषय ऐहिकप्रभूनाम् आज्ञाग्राहिणो भवत दृष्टिगो-
चरीयसेवया मानवेभ्यो रोचितुं मा यतध्वं किन्तु सरलान्तः-
करणैः प्रभो र्भीत्या कार्य्यं कुरुध्वं। यच्च कुरुध्वे तत् मानुष- २३
मनुद्दिश्य प्रभुम् उद्दिश्य प्रफुल्लमनसा कुरुध्वं, यतो वयं प्रभुतः २४
स्वर्गाधिकाररूपं फलं लप्स्यामह इति यूयं जानीथ यस्माद् यूयं
प्रभोः ख्रीष्टस्य दासा भवथ। किन्तु यः कश्चिद् अनुचितं कर्म्म २५
करोति स तस्यानुचितकर्म्मणः फलं लप्स्यते तत्र कोऽपि पक्षपातो
न भविष्यति। अपरञ्च हे अधिपतयः, यूयं दासान् प्रति न्याय्यं २६
यथार्थञ्चाचरणं कुरुध्वं युष्माकमप्येकोऽधिपतिः स्वर्गे विद्यत इति
जानीत।

४ चतुर्थोऽध्यायः।

१ प्रार्थनायां नित्यं प्रवर्त्तितुं सांसारिकलोकानां समीपे सावधानतयाचरितुञ्च निवेदनं ७ भ्रातृगणेषु नानाकथा नमस्कारप्रेषणञ्च।

१ यूयं प्रार्थनायां नित्यं प्रवर्त्तध्वं धन्यवादं कुर्व्वन्तस्तत्र प्रबुद्धा-
२ स्तिष्ठत च। प्रार्थनाकाले ममापि कृते प्रार्थनां कुरुध्वं, फलतः
३ ख्रीष्टस्य यन्निगूढवाक्यकारणाद् अहं बद्धोऽभवं तत्प्रकाशायेश्वरो
४ यत् मदर्थं वाग्द्वारं कुर्य्यात्, अहञ्च यथोचितं तत् प्रकाशयितुं
५ शक्नुयाम् एतत् प्रार्थयध्वं। यूयं समयं बहुमूल्यं ज्ञात्वा वहिःस्थान्
६ लोकान् प्रति ज्ञानाचारं कुरुध्वं। युष्माकम् आलापः सर्व्वदानु-
ग्रहसूचको लवणेन सुस्वादुश्च भवतु यस्मै यदुत्तरं दातव्यं तद्
युष्माभिरवगम्यतां।
७ मम या दशास्ति तां तुखिकनामा प्रभौ प्रियो मम भ्राता
८ विश्वसनीयः परिचारकः सहदासश्च युष्मान् ज्ञापयिष्यति। स यद्
युष्माकं दशां जानीयात् युष्माकं मनांसि सान्त्वयेच्च तदर्थमेवाहं
९ तम् ओनीषिमनामानञ्च युष्मद्देशीयं विश्वस्तं प्रियञ्च भ्रातरं
१० प्रेषितवान् तौ युष्मान् अत्रत्यां सर्व्ववार्त्तां ज्ञापयिष्यतः। आरिष्टा-
र्खनामा मम सहवन्दी बर्णबा भागिनेयो मार्को युष्टनाम्ना विख्यातो
यीशुश्चैते छिन्नत्वचो भ्रातरो युष्मान् नमस्कारं ज्ञापयन्ति, तेषां
मध्ये मार्कमधि यूयं पूर्व्वम् आज्ञापिताः स यदि युष्मत्समीपम्
११ उपतिष्ठेत् तर्हि युष्माभि र्गृह्यतां। केवलमेत ईश्वरराज्ये मम
१२ सान्त्वनाजनकाः सहकारिणोऽभवन्। ख्रीष्टस्य दासो यो युष्मद्देशीय
इपफ्राः स युष्मान् नमस्कारं ज्ञापयति यूयञ्चेश्वरस्य सर्व्वस्मिन्
मनोऽभिलाषे यत् सिद्धाः पूर्णाश्च भवेत तदर्थं स नित्यं प्रार्थनया
१३ युष्माकं कृते यतते। युष्माकं लायदिकेयास्थितानां हियरापलि-

स्थितानाञ्च भ्रातृणां हिताय सोऽतीव चेष्टत इत्यस्मिन् अहं तस्य
साक्षी भवामि। लूकनामा प्रियश्चिकित्सको दीमाश्च युष्मभ्यं १४
नमस्कुर्व्वाते। यूयं लायदिकेयास्थान् भ्रातॄन् नुम्फां तद्गृहस्थितां १५
मण्डलीञ्च मम नमस्कारं ज्ञापयत। अपरं युष्मत्सन्निधौ पत्रस्यास्य १६
पाठे कृते लायदिकेयास्थमण्डल्यामपि तस्य पाठो यथा भवेत्
लायदिकेयाञ्च यत् पत्रं मया प्रहितं तद् यथा युष्माभिरपि
पठ्येत तथा चेष्टध्वं। अपरम् आर्खिप्पं वदत प्रभो र्यत् परिचर्य्या- १७
पदं त्वयाप्रापि तत्साधनाय सावधानो भव। अहं पौलः स्वहस्ता- १८
क्षरेण युष्मान् नमस्कारं ज्ञापयामि यूयं मम बन्धनं स्मरत।
युष्मान् प्रत्यनुग्रहो भूयात्। आमेन।

थिषलनीकिनः प्रति पौलस्य प्रेरितस्य प्रथमं पत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचरणं २ थिषलनीकिनां प्रत्ययप्रत्याशाप्रेमाचरणस्य प्रशंसनम्।

पौलः सिल्वानस्तीमथियश्च पितुरीश्वरस्य प्रभो र्यीशुख्रीष्टस्य १
चाश्रयं प्राप्तां थिषलनीकीयमण्डलीं प्रति पत्रं लिखन्ति। अस्माकं
तात ईश्वरः प्रभु र्यीशुख्रीष्टश्च युष्मान् प्रत्यनुग्रहं शान्तिञ्च
क्रियास्तां।

वयं सर्व्वेषां युष्माकं कृते नित्यम् ईश्वरं धन्यं वदामः प्रार्थना- २
समये युष्माकं नामोच्चारयामः, अस्माकं तातस्येश्वरस्य साक्षात् ३

प्रभौ यीशुख्रीष्टे युष्माकं विश्वासेन यत् कार्य्यं प्रेम्ना यः परिश्रमः
४ प्रत्याशया च या तितिक्षा जायते तत् सर्व्वं निरन्तरं स्मरामश्च ।
हे प्रियभ्रातरः, यूयम् ईश्वरेणाभिरुचिता लोका इति वयं
५ जानीमः । यतोऽस्माकं सुसंवादः केवलशब्देन युष्मान् न प्रविश्य
शक्त्या पवित्रेणात्मना महोत्साहेन च युष्मान् प्राविशत् । वयन्तु
युष्माकं कृते युष्मन्मध्ये कीदृशा अभवाम तद् युष्माभि र्ज्ञायते ।
६ यूयमपि बहुक्लेशभोगेन पवित्रेणात्मना दत्तेनानन्देन च वाक्यं
७ गृहीत्वास्माकं प्रभोश्चानुगामिनोऽभवत । तेन माकिदनियाखाया-
देशयो र्यावन्तो विश्वासिनो लोकाः सन्ति यूयं तेषां सर्व्वेषां
८ निदर्शनस्वरूपा जाताः । यतो युष्मत्तः प्रतिनादितया प्रभो र्वाण्या
माकिदनियाखायादेशौ व्याप्तौ केवलमेतन्नहि किन्त्वीश्वरे युष्माकं
यो विश्वासस्तस्य वार्त्ता सर्व्वत्राश्रावि, तस्मात् तत्र वाक्यकथनम्
९ अस्माकं निष्प्रयोजनं । यतो युष्मन्मध्ये वयं कीदृशं प्रवेशं प्राप्ता
यूयञ्च कथं प्रतिमा विहायेश्वरं प्रत्यावर्त्तध्वम् अमरं सत्यमीश्वरं
१० सेवितुं मृतगणमध्याच्च तेनोत्थापितस्य पुत्रस्यार्थत आगामिक्रोधाद्
अस्माकं निस्तारयितु र्यीशोः स्वर्गाद् आगमनं प्रतीक्षितुम् आर-
भध्वम् एतत् सर्व्वं ते लोकाः स्वयम् अस्मान् ज्ञापयन्ति ।

---

२ द्वितीयोऽध्यायः ।

१ पौलः केन प्रकारेण थिषलनीकिनां सन्निधौ सुसंवादं प्राचारयत् तदाख्यानं १३ ते कथं सुसंवादं गृहीतवन्त इत्यस्य कथनं १७ तान् साक्षात् कर्त्तुं पौलस्येच्छा च ।

१ हे भ्रातरः, युष्मन्मध्ये ऽस्माकं प्रवेशो निष्फलो न जात इति
२ यूयं स्वयं जानीथ । अपरं युष्माभि र्यथाश्रावि तथा पूर्व्वं

फिलिपीनगरे क्लिष्टा निन्दिताश्च सन्तोऽपि वयम् ईश्वराद् उत्साहं
लब्ध्वा बहुयत्नेन युष्मान् ईश्वरस्य सुसंवादम् अबोधयाम। यतो- ३
ऽस्माकम् आदेशो भ्रान्तेरशुचिभावाद् वोत्पन्नः प्रवञ्चनायुक्तो वा
न भवति। किन्त्वीश्वरेणास्मान् परीक्ष्य विश्वसनीयान् मत्वा च ४
यद्वत् सुसंवादोऽस्मासु समार्प्यत तद्वद् वयं मानवेभ्यो न रुरोचिष-
माणाः किन्त्वस्मदन्तःकरणानां परीक्षकायेश्वराय रुरोचिषमाणा
भाषामहे। वयं कदापि स्तुतिवादिनो नाभवामेति यूयं जानीथ ५
कदापि छलवस्त्रेण लोभं नाच्छादयामेत्यस्मिन् ईश्वरः साक्षी
विद्यते। वयं ख्रीष्टस्य प्रेरिता इव गौरवान्विता भवितुम् अशक्ष्याम ६
किन्तु युष्मत्तः परस्माद् वा कस्मादपि मानवाद् गौरवं न लिप्स-
माना युष्मन्मध्ये मृदुभावा भूत्वावर्त्तामहि। यथा काचिन्माता ७
स्वकीयशिशून् पालयति तथा वयमपि युष्मान् काङ्क्षमाणा युष्मभ्यं ८
केवलम् ईश्वरस्य सुसंवादं तन्नहि किन्तु स्वकीयप्राणान् अपि दातुं
मनोभिरभ्यलषाम, यतो यूयम् अस्माकं स्नेहपात्राण्यभवत। हे ९
भ्रातरः, अस्माकं श्रमः क्लेशश्च युष्माभिः स्मर्य्यते युष्माकं कोऽपि
यद् भारग्रस्तो न भवेत् तदर्थं वयं दिवानिशं परिश्राम्यन्तो
युष्मन्मध्य ईश्वरस्य सुसंवादमघोषयाम। अपरञ्च विश्वासिनो युष्मान् १०
प्रति वयं कीदृक् पवित्रत्वयथार्थत्वनिर्दोषत्वाचारिणोऽभवामेत्यस्मिन्
ईश्वरो यूयञ्च साक्षिण आध्वे। अपरञ्च यद्वत् पिता स्वबालकान् ११
तद्वद् वयं युष्माकम् एकैकं जनम् उपदिष्टवन्तः सान्त्वितवन्तश्च, य १२
ईश्वरः स्वीयराज्याय विभवाय च युष्मान् आहूतवान् तदुपयुक्ता-
चरणाय युष्मान् प्रवर्त्तितवन्तश्चेति यूयं जानीथ।

यस्मिन् समये यूयम् अस्माकं मुखाद् ईश्वरेण प्रतिश्रुतं वाक्यम् १३
अलभध्वं तस्मिन् समये तत् मानुषाणां वाक्यं न मत्वेश्वरस्य

वाक्यं मत्वा गृहीतवन्त इति कारणाद् वयं निरन्तरम् ईश्वरं
धन्यं वदामः, यतस्तद् ईश्वरस्य वाक्यम् इति सत्यं विश्वासिनां
१४ युष्माकं मध्ये तस्य गुणः प्रकाशते च। हे भ्रातरः, ख्रीष्टाश्रितवत्य
ईश्वरस्य या मण्डल्यो यिहूदादेशे सन्ति यूयं तासाम् अनुका-
रिणोऽभवत, तद्भुक्ता लोकाश्च यद्वद् यिहूदिलोकेभ्यस्तद्वद् यूयमपि
१५ स्वजातीयलोकेभ्यो दुःखम् अलभध्वं। ते यिहूदीयाः प्रभुं यीशुं
भाववादिनश्च हतवन्तो ऽस्मान् दूरीकृतवन्तश्च, त ईश्वराय न
१६ रोचन्ते सर्व्वेषां मानवानां विपक्षा भवन्ति च; अपरं परजातीय-
लोकानां परित्राणार्थं तेषां मध्ये सुसंवादघोषणाद् अस्मान्
प्रतिषेधन्ति चेत्थं स्वीयपापानां परिमाणम् उत्तरोत्तरं पूरयन्ति,
किन्तु तेषाम् अन्तकारी क्रोधस्तान् उपक्रमते।
१७ हे भ्रातरः, मनसा नहि किन्तु वदनेन कियत्कालं युष्मत्तो-
ऽस्माकं विच्छेदे जाते वयं युष्माकं मुखानि द्रष्टुम् अत्याकाङ्क्षया
१८ बहु यतितवन्तः। द्विरेककृत्वो वा युष्मत्समीपगमनायास्माकं
विशेषतः पौलस्य ममाभिलाषोऽभवत् किन्तु शैतानोऽस्मान् निवा-
१९ रितवान्। यतोऽस्माकं का प्रत्याशा को वानन्दः किं वा श्लाघ्य-
किरीटं? अस्माकं प्रभो यीशुख्रीष्टस्यागमनकाले तत्सम्मुखस्था यूयं
२० किं तन्न भविष्यथ? यूयम् एवास्माकं गौरवानन्दस्वरूपा भवथ।

---

३ तृतीयोऽध्यायः।

१ तेषां सान्त्वनार्थं तीमथियस्य प्रेषणं, तीमथिये प्रत्यागते तेषां वार्त्ताश्रुत्या पौलस्य धन्यवादः प्रार्थना च।

१ अतोऽहं यदा सन्देहं पुनः सोढुं नाशक्नुवं तदानीम् आ-
२ थीनीनगर एकाकी स्थातुं निश्चित्य स्वभ्रातरं ख्रीष्टस्य सुसंवादे

सहकारिणश्चेश्वरस्य परिचारकं तीमथियं युष्मत्समीपम् अप्रेषयं।
वर्त्तमानैः क्लेशैः कस्यापि चाञ्चल्यं यथा न जायते तथा ते त्वया ३
स्थिरीक्रियन्तां स्वकीयधर्म्ममधि समाश्वास्यन्ताञ्चेति तम् आदिशं।
वयमेतादृशे क्लेशे नियुक्ता आस्मह इति यूयं स्वयं जानीथ, ४
यतोऽस्माकं दुर्गति र्भविष्यतीति वयं युष्माकं समीपे स्थितिकाले-
ऽपि युष्मान् अबोधयाम, तादृशमेव चाभवत् तदपि जानीथ।
तस्मात् परीक्षकेण युष्मासु परीक्षितेष्वस्माकं परिश्रमो विफलो ५
भविष्यतीति भयं सोढुं यदाहं नाशक्नुवं तदा युष्माकं विश्वासस्य
तत्त्वावधारणाय तम् अप्रेषयं। किन्त्वधुना तीमथियो युष्मत्समीपाद् ६
अस्मत्सन्निधिम् आगत्य युष्माकं विश्वासप्रेमणी अध्यस्मान् सुवार्त्तां
ज्ञापितवान् वयञ्च यथा युष्मान् स्मरामस्तथा यूयमप्यस्मान् सर्व्वदा
प्रणयेन स्मरथ द्रष्टुम् आकाङ्क्षध्वे चेति कथितवान्। हे भ्रातरः, ७
वार्त्तामिमां प्राप्य युष्मानधि विशेषतो युष्माकं क्लेशदुःखान्यधि
युष्माकं विश्वासाद् अस्माकं सान्त्वनाजायत; यतो यूयं यदि ८
प्रभाववतिष्ठथ तर्ह्येनेन वयम् अधुना जीवामः। वयञ्चास्मदीये- ९
श्वरस्य साक्षाद् युष्मत्तो जातेन येनानन्देन प्रफुल्ला भवामस्तस्य
कृत्स्नस्यानन्दस्य योग्यरूपेणेश्वरं धन्यं वदितुं कथं शक्ष्यामः?
वयं येन युष्माकं वदनानि द्रष्टुं युष्माकं विश्वासे यद् असिद्धं १०
विद्यते तत् सिद्धीकर्त्तुञ्च शक्ष्यामस्तादृशं वरं दिवानिशं प्रार्थ-
यामहे। अस्माकं तातेनेश्वरेण प्रभुना यीशुख्रीष्टेन च युष्म- ११
त्समीपगमनायास्माकं पन्था सुगमः क्रियतां। परस्परं सर्व्वांश्च १२
प्रति युष्माकं प्रेम युष्मान् प्रति चास्माकं प्रेम प्रभुना वर्द्ध्यतां
बहुफलं क्रियताञ्च। अपरमस्माकं प्रभु र्यीशुख्रीष्टः स्वकीयैः १३
सर्व्वैः पवित्रलोकैः सार्द्धं यदागमिष्यति तदा यूयं यथास्माकं

तातस्येश्वरस्य सम्मुखे पवित्रतया निर्दोषा भविष्यथ तथा युष्माकं मनांसि स्थिरीक्रियन्तां ।

---

४ चतुर्थोऽध्यायः ।

१ आज्ञापालनकारणात् तेषां प्रशंसा ३ अशुचित्वस्य निषेधः ९ परस्परं प्रेम कर्त्तुं कर्म्म कर्त्तुञ्चाज्ञा १३ मृतलोकार्थम् अतिशयशोकनिषेधः शेषदिवसीयघटनाया निर्णयश्च ।

१ हे भ्रातरः, युष्माभिः कीदृग् आचरितव्यं ईश्वराय रोचितव्यञ्च तदध्यस्मत्तो या शिक्षा लब्धा तदनुसारात् पुनरतिशयं यत्नः क्रियतामिति वयं प्रभुयीशुना युष्मान् विनीयादिशामः ।
२ यतो वयं प्रभुयीशुना कीदृशीराज्ञा युष्मासु समर्पितवन्तस्तद् यूयं जानीथ ।
३ ईश्वरस्यायम् अभिलाषो यद् युष्माकं पवित्रता भवेत्, यूयं
४ व्यभिचाराद् दूरे तिष्ठत । युष्माकम् एकैको जनः स्वकीयं प्राणा-
५ धारं पवित्रं मान्यञ्च रक्षतु, ये च परजातीया लोका ईश्वरं न
६ जानन्ति त इव तत् कामाभिलाषस्याधीनं न करोतु । एतस्मिन् विषये कोऽप्यत्याचारी भूत्वा स्वभ्रातरं न वञ्चयतु यतोऽस्माभिः पूर्व्वं यथोक्तं प्रमाणीकृतञ्च तथैव प्रभुरेतादृशानां कर्म्मणां समुचितं
७ फलं दास्यति । यस्माद् ईश्वरोऽस्मान् अशुचितायै नाहूतवान्
८ किन्तु पवित्रतायैवाहूतवान् । अतो हेतो र्यः कश्चिद् वाक्यमेतन्न गृह्लाति स मनुष्यम् अवजानातीति नहि येन स्वकीयात्मा युष्मदन्तरे समर्पितस्तम् ईश्वरम् एवावजानाति ।
९ भ्रातृषु प्रेमकरणमधि युष्मान् प्रति मम लिखनं निष्प्रयोजनं
१० यतो यूयं परस्परं प्रेमकरणायेश्वरशिक्षिता लोका आध्वे । कृत्स्ने

माकिदनियादेशे च यावन्तो भ्रातरः सन्ति तान् सर्व्वान् प्रति
युष्माभिस्तत् प्रेम प्रकाश्यते तथापि हे भ्रातरः, वयं युष्मान्
विनयामहे यूयं पुन र्बहुतरं प्रेम प्रकाशयत। अपरं ये वहिः- ११
स्थितास्तेषां दृष्टिगोचरे युष्माकम् आचरणं यत् मनोरम्यं भवेत्
कस्यापि वस्तुनश्चाभावो युष्माकं यन्न भवेत्, एतदर्थं यूयम् अस्मत्तो १२
यादृशम् आदेशं प्राप्तवन्तस्तादृशं निर्व्विरोधाचारं कर्त्तुं स्वस्व-
कर्म्मणि मनांसि निधातुं निजकरैश्च कार्य्यं साधयितुं यतध्वं।

हे भ्रातरः, निराशा अन्ये लोका इव यूयं यन्न शोचेध्वं तदर्थं १३
महानिद्रागतान् लोकानधि युष्माकम् अज्ञानता मया नाभि-
लष्यते। यीशु र्मृतवान् पुनरुत्थितवांश्चेति यदि वयं विश्वसाम- १४
स्तर्हि यीशुम् आश्रितान् महानिद्राप्राप्तान् लोकानपीश्वरोऽवश्यं
तेन सार्द्धम् आनेष्यति। यतोऽहं प्रभो र्वाक्येन युष्मान् इदं १५
ज्ञापयामि; अस्माकं मध्ये ये जनाः प्रभोरागमनं यावत् जीवन्तो-
ऽवशेक्ष्यन्ते ते महानिद्रितानाम् अग्रगामिनो न भविष्यन्ति;
यतः प्रभुः सिंहनादेन प्रधानस्वर्गदूतस्योच्चैः शब्देनेश्वरीयतूरीवाद्येन १६
च स्वयं स्वर्गाद् अवरोक्ष्यति तेन ख्रीष्टाश्रिता मृतलोकाः प्रथमम्
उत्थास्यन्ति। अपरम् अस्माकं मध्ये ये जीवन्तोऽवशेक्ष्यन्ते त १७
आकाशे प्रभोः साक्षात्करणार्थं तैः सार्द्धं मेघवाहनेन हरिष्यन्ते;
इत्थञ्च वयं सर्व्वदा प्रभुना सार्द्धं स्थास्यामः। अतो यूयम् १८
एताभिः कथाभिः परस्परं सान्त्वयत।

---

५ पञ्चमोऽध्यायः।

१ शेषदिनार्थं सज्जीभवितुं विनयः १२ नानाप्रकारकर्म्मणां करणाज्ञा पत्र-
समाप्तेः कथा च।

हे भ्रातरः, कालान् समयांश्चाधि युष्मान् प्रति मम लिखनं १

२ निष्प्रयोजनं, यतो रात्रौ यादृक् तस्करस्तादृक् प्रभो र्दिनम्
३ उपस्थास्यतीति यूयं स्वयमेव सम्यग् जानीथ। शान्ति र्निर्व्विघ्नत्वञ्च
विद्यत इति यदा मानवा वदिष्यन्ति तदा प्रसववेदना यद्वद्
गर्ब्भिनीम् उपतिष्ठति तद्वद् अकस्माद् विनाशस्तान् उपस्थास्यति
४ तैरुद्धारो न लप्स्यते। किन्तु हे भ्रातरः, यूयम् अन्धकारेणावृता
५ न भवथ तस्मात् तद्दिनं तस्कर इव युष्मान् न प्राप्स्यति। सर्व्वे
यूयं दीप्तेः सन्ताना दिवायाश्च सन्ताना भवथ वयं निशावंशास्ति-
६ मिरवंशा वा न भवामः। अतोऽपरे यथा निद्रागताः सन्ति
तद्वद् अस्माभि र्न भवितव्यं किन्तु जागरितव्यं सचेतनैश्च भवितव्यं।
७ ये निद्रान्ति ते निशायामेव निद्रान्ति ये च मत्ता भवन्ति ते
८ रजन्यामेव मत्ता भवन्ति। किन्तु वयं दिवसस्य वंशा भवामः;
अतोऽस्माभि र्वक्षसि प्रत्ययप्रेमरूपं कवचं शिरसि च परित्राणा-
९ शारूपं शिरस्त्रं परिधाय सचेतनै र्भवितव्यं। यत ईश्वरोऽस्मान्
क्रोधे न नियुज्यास्माकं प्रभुना यीशुख्रीष्टेन परित्राणस्याधिकारे
१० नियुक्तवान्, जाग्रतो निद्रागता वा वयं यत् तेन प्रभुना सह
११ जीवामस्तदर्थं सोऽस्माकं कृते प्राणान् त्यक्तवान्। अतएव यूयं
यद्वत् कुरुथ तद्वत् परस्परं सान्त्वयत सुस्थिरीकुरुध्वञ्च।
१२ हे भ्रातरः, युष्माकं मध्ये ये जनाः परिश्रमं कुर्व्वन्ति प्रभो
र्नाम्ना युष्मान् अधितिष्ठन्त्युपदिशन्ति च तान् यूयं सम्मन्यध्वं।
१३ स्वकर्म्महेतुना च प्रेम्ना तान् अतीवादृयध्वमिति मम प्रार्थना,
१४ यूयं परस्परं निर्व्विरोधा भवत। हे भ्रातरः, युष्मान् विनयामहे
यूयम् अविहिताचारिणो लोकान् भर्त्सयध्वं, क्षुद्रमनसः सान्त्वयत,
१५ दुर्ब्बलान् उपकुरुत, सर्व्वान् प्रति सहिष्णवो भवत च। अपरं
कमपि प्रत्यनिष्टस्य फलम् अनिष्टं केनापि यन्न क्रियेत तदर्थं

सावधाना भवत, किन्तु परस्परं सर्व्वान् मानवांश्च प्रति नित्यं
हिताचारिणो भवत। सर्व्वदानन्दत। निरन्तरं प्रार्थनां कुरुध्वं। १६
सर्व्वविषये कृतज्ञतां स्वीकुरुध्वं यत एतदेव ख्रीष्टयीशुना युष्मान् १८
प्रति प्रकाशितम् ईश्वराभिमतं। पवित्रम् आत्मानं न निर्व्वापयत। २०
भाववाणीं नावजानीत। सर्व्वाणि परीक्ष्य यद् भद्रं तदेव धारयत। २२
यत् किमपि पापरूपं भवति तस्माद् दूरं तिष्ठत। शान्तिदायक २३
ईश्वरः स्वयं युष्मान् सम्पूर्णत्वेन पवित्रान् करोतु, अपरम् अस्मत्प्रभो
यीशुख्रीष्टस्यागमनं यावद् युष्माकम् आत्मानः प्राणाः शरीराणि
च निखिलानि निर्द्दोषत्वेन रक्ष्यन्तां। यो युष्मान् आह्वयति स २४
विश्वसनीयोऽतः स तत् साधयिष्यति।

हे भ्रातरः, अस्माकं कृते प्रार्थनां कुरुध्वं। पवित्रचुम्बनेन २५
सर्व्वान् भ्रातॄन् प्रति सत्कुरुध्वं। पत्रमिदं सर्व्वेषां पवित्राणां भ्रातॄणां २७
श्रुतिगोचरे युष्माभिः पठ्यतामिति प्रभो र्नाम्ना युष्मान् शपयामि।
अस्माकं प्रभो यीशुख्रीष्टस्यानुग्रहो युष्मासु भूयात्। आमेन्।　२८

थिषलनीकिनः प्रति पौलस्य प्रेरितस्य द्वितीयं पत्रं ।

१ प्रथमोऽध्यायः ।

१ मङ्गलाचरणं २ धर्म्माचरणार्थं दुःखसहनार्थञ्च तेषां प्रशंसा सान्त्वनञ्च तेषां कृते प्रार्थना च ।

१ पौलः सिल्वानस्तीमथियश्चेतिनामानो वयम् अस्मदीयतातम्
ईश्वरं प्रभुं यीशुख्रीष्टञ्चाश्रितां थिषलनीकिनां मण्डलीं प्रति पत्रं
२ लिखामः । अस्माकं तात ईश्वरः प्रभु र्यीशुख्रीष्टश्च युष्मास्वनुग्रहं
शान्तिञ्च क्रियास्तां ।
३ हे भ्रातरः, युष्माकं कृते सर्व्वदा यथायोग्यम् ईश्वरस्य धन्य-
वादोऽस्माभिः कर्त्तव्यः, यतो हेतो र्युष्माकं विश्वास उत्तरोत्तरं
४ वर्द्धते परस्परम् एकैकस्य प्रेम च बहुफलं भवति । तस्माद् युष्माभि
र्यावन्त उपद्रवक्लेशाः सह्यन्ते तेषु यद् धैर्य्यं यश्च विश्वासः प्रकाश्यते
५ तत्कारणाद् वयम् ईश्वरीयमण्डलीषु युष्माभिः श्लाघामहे । तच्चे-
श्वरस्य न्यायविचारस्य प्रमाणं भवति यतो यूयं यस्य कृते दुःखं
६ सहध्वं तस्येश्वरीयराज्यस्य योग्या भवथ । यतः स्वकीयस्वर्गदूतानां
बलैः सहितस्य प्रभो र्यीशोः स्वर्गाद् आगमनकाले युष्माकं क्लेशकेभ्यः
७ क्लेशेन फलदानं सार्द्धमस्माभिश्च क्लिश्यमानेभ्यो युष्मभ्यं शान्तिदानम्
८ ईश्वरेण न्याय्यं भोत्स्यते ; तदानीम् ईश्वरानभिज्ञेभ्योऽस्मत्प्रभो
र्यीशुख्रीष्टस्य सुसंवादाग्राहकेभ्यश्च लोकेभ्यो जाज्वल्यमानेन वह्निना
९ समुचितं फलं यीशुना दास्यते ; ते च प्रभो र्वदनात् पराक्रम-
१० युक्तविभवाच्च सदातनविनाशरूपं दण्डं लप्स्यन्ते, किन्तु तस्मिन्
दिने स्वकीयपवित्रलोकेषु विराजितुं युष्मान् अपरांश्च सर्व्वान्

विश्वासिलोकान् विस्मापयितुञ्च स आगमिष्यति यतोऽस्माकं प्रमाणे
युष्माभि र्विश्वासोऽकारि। अतोऽस्माकम् ईश्वरो युष्मान् तस्या- ११
ह्वानस्य योग्यान् करोतु सौजन्यस्य शुभफलं विश्वासस्य गुणञ्च
पराक्रमेण साधयत्विति प्रार्थनास्माभिः सर्व्वदा युष्मन्निमित्तं क्रियते,
यतस्तथा सत्यस्माकम् ईश्वरस्य प्रभो र्यीशुख्रीष्टस्य चानुग्रहाद् १२
अस्मत्प्रभो र्यीशुख्रीष्टस्य नाम्नो गौरवं युष्मासु युष्माकमपि गौरवं
तस्मिन् प्रकाशिष्यते।

---

२ द्वितीयोऽध्यायः।

१ स्थिरत्वे पौलस्य विनयः पापपुरुषस्य निर्णयः १३ तेषां मनोनीतत्वार्थम् ईश्वरस्य धन्यवादः १५ तेषां कृते प्रार्थना च।

हे भ्रातरः, अस्माकं प्रभो र्यीशुख्रीष्टस्यागमनं तस्य समीपे- १
ऽस्माकं संस्थितिञ्चाधि वयं युष्मान् इदं प्रार्थयामहे, प्रभोस्तद् २
दिनं प्रायेणोपस्थितम् इति यदि कश्चिद् आत्मना वाचा वा
पत्रेण वास्माकम् आदेशं कल्पयन् युष्मान् गदति तर्हि यूयं तेन
चञ्चलमनस उद्विग्नाश्च न भवत। केनापि प्रकारेण कोऽपि ३
युष्मान् न वञ्चयतु यतस्तस्माद् दिनात् पूर्व्वं धर्म्मलोपेनोपस्थातव्यं,
यश्च जनो विपक्षतां कुर्व्वन् सर्व्वस्माद् देवात् पूजनीयवस्तुतश्चोन्नंस्यते ४
स्वम् ईश्वरमिव दर्शयन् ईश्वरवद् ईश्वरस्य मन्दिर उपवेक्ष्यति च
तेन विनाशपात्रेण पापपुरुषेणोदेतव्यं। यदाहं युष्माकं सन्निधावासं ५
तदानीम् एतद् अकथयमिति यूयं किं न स्मरथ? साम्प्रतं स ६
येन निवार्य्यते तद् यूयं जानीथ, किन्तु स्वसमये तेनोदेतव्यं।
विधर्म्मस्य निगूढो गुण इदानीमपि फलति किन्तु यस्तं निवारयति ७
सोऽद्यापि दूरीकृतो नाभवत्। तस्मिन् दूरीकृते स विधर्म्म्युदेष्यति ८

किन्तु प्रभु र्यीशुः स्वमुखपवनेन तं विध्वंसयिष्यति निजोपस्थिते-
९ स्तेजसा विनाशयिष्यति च। शैतानस्य शक्तिप्रकाशनाद् विनाश्यमा-
नानां मध्ये सर्व्वविधाः प्रभावसिद्धाः क्रिया भ्रमिका न्यभिज्ञानानि
लक्षणान्यधर्म्मजाता सर्व्वविधप्रतारणा च तस्योपस्थितेः फलं भवि-
१० ष्यति; यतो हेतोस्ते परित्राणप्राप्तये सत्यधर्म्मस्यानुरागं न गृहीत-
११ वन्तस्तस्मात् कारणाद् ईश्वरेण तान् प्रति भ्रान्तिकरमायायां
१२ प्रेषितायां ते मृषावाक्ये विश्वसिष्यन्ति। यतो यावन्तो मानवाः
सत्यधर्म्मे न विश्वस्याधर्म्मेण तुष्यन्ति तैः सर्व्वै र्दण्डभाजनै र्भवितव्यं।
१३ हे प्रभोः प्रिया भ्रातरः, युष्माकं कृत ईश्वरस्य धन्यवादो-
ऽस्माभिः सर्व्वदा कर्त्तव्यो यत ईश्वर आ प्रथमाद् आत्मनः
पावनेन सत्यधर्म्मे विश्वासेन च परित्राणार्थं युष्मान् वरीतवान्
१४ तदर्थञ्चास्माभि र्घोषितेन सुसंवादेन युष्मान् आहूयास्माकं प्रभो
र्यीशुख्रीष्टस्य तेजसोऽधिकारिणः करिष्यति।
१५ अतो हे भ्रातरः, यूयम् अस्माकं वाक्यैः पत्रैश्च यां शिक्षां
१६ लब्धवन्तस्तां कृत्स्नां शिक्षां धारयन्तः सुस्थिरा भवत। अस्माकं
प्रभु र्यीशुख्रीष्टस्तात ईश्वरश्चार्थतो यो युष्मासु प्रेम कृतवान्
नित्याञ्च सान्त्वनाम् अनुग्रहेणोत्तमप्रत्याशाञ्च युष्मभ्यं दत्तवान्
१७ स स्वयं युष्माकम् अन्तःकरणानि सान्त्वयतु सर्व्वस्मिन् सद्वाक्ये
सत्कर्म्मणि च सुस्थिरीकरोतु च।

---

३ तृतीयोऽध्यायः।

१ सत्य कृते प्रार्थनार्थं तान् प्रति पौलस्य विनयः ६ अनाज्ञाग्राहिणोऽलसांश्च प्रति तस्योपदेशः पत्रसमाप्तिः कथा च।

१ हे भ्रातरः, शेषे वदामि, यूयम् अस्मभ्यमिदं प्रार्थयध्वं यत्

प्रभो र्वाक्यं युष्माकं मध्ये यथा तथैवान्यत्रापि प्रचरेत् मान्यञ्च
भवेत्; यच्च वयम् अविवेचकेभ्यो दुष्टेभ्यश्च लोकेभ्यो रक्षां २
प्राप्नुयाम यतः सर्व्वेषां विश्वासो न भवति। किन्तु प्रभु र्विश्वास्यः ३
स एव युष्मान् स्थिरीकरिष्यति दुष्टस्य कराद् उद्धरिष्यति च।
यूयम् अस्माभि र्यद् आदिश्यध्वे तत् कुरुथ करिष्यथ चेति ४
विश्वासो युष्मानधि प्रभुनास्माकं जायते। ईश्वरस्य प्रेम्नि ख्रीष्टस्य ५
सहिष्णुतायाञ्च प्रभुः स्वयं युष्माकम् अन्तःकरणानि विनयतु।

हे भ्रातरः, अस्मत्प्रभो र्यीशुख्रीष्टस्य नाम्ना वयं युष्मान् इदम् ६
आदिशामः, अस्मत्तो युष्माभि र्या शिक्षालम्भि तां विहाय कश्चिद्
भ्राता यद्यविहिताचारं करोति तर्हि यूयं तस्मात् पृथग् भवत।
यतो वयं युष्माभिः कथम् अनुकर्त्तव्यास्तद् यूयं स्वयं जानीथ। ७
युष्माकं मध्ये वयम् अविहिताचारिणो नाभवाम, विनामूल्यं ८
कस्याप्यन्नं नाभुंज्महि किन्तु कोऽपि यद् अस्माभि र्भारग्रस्तो न
भवेत् तदर्थं श्रमेण क्लेशेन च दिवानिशं कार्य्यम् अकुर्म्म। अत्रा- ९
स्माकम् अधिकारो नास्तीत्थं नहि किन्त्वस्माकम् अनुकरणाय
युस्मान् दृष्टान्तं दर्शयितुम् इच्छन्तस्तद् अकुर्म्म। यतो येन कार्य्यं १०
न क्रियते तेनाहारोऽपि न क्रियतामिति वयं युष्मत्समीप उप-
स्थितिकालेऽपि युष्मान् आदिशाम। युष्मन्मध्येऽविहिताचारिणः ११
केऽपि जना विद्यन्ते ते च कार्य्यम् अकुर्व्वन्त आलस्यम् आचर-
न्तीत्यस्माभिः श्रूयते। तादृशान् लोकान् अस्मत्प्रभो र्यीशुख्रीष्टस्य १२
नाम्ना वयम् इदम् आदिशाम आज्ञापयामश्च, ते शान्तभावेन
कार्य्यं कुर्व्वन्तः स्वकीयमन्नं भुञ्जतां। अपरं हे भ्रातरः, यूयं १३
सदाचरणे न क्लाम्यत। यदि च कश्चिदेतत्पत्रे लिखिताम् अस्माकम् १३
आज्ञां न गृह्लाति तर्हि यूयं तं मानुषं लक्षयत तस्य संसर्गं त्यजत

१५ च तेन स त्रपिष्यते। किन्तु तं न शत्रुं मन्यमाना भ्रातरमिव
१६ चेतयत। शान्तिदाता प्रभुः सर्व्वत्र सर्व्वथा युष्मभ्यं शान्तिं देयात्।
प्रभु र्युष्माकं सर्व्वेषां सङ्गी भूयात्।
१७ नमस्कार एष पौलस्य मम करेण लिखितोऽभूत् सर्व्वस्मिन्
१८ पत्र एतन्मम चिह्नम् एतादृशैरक्षरै र्मया लिख्यते। अस्माकं प्रभो
र्यीशुख्रीष्टस्यानुग्रहः सर्व्वेषु युष्मासु भूयात्। आमेन्।

तीमथियं प्रति पौलस्य प्रेरितस्य प्रथमं पत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचारणं ३ वंशावलिव्यवस्थासुसंवादप्रेरितत्वपदेषु तीमथियं प्रति पौलस्योपदेशः १८ स्थिरं स्थातुं विनयः कतिपयलोकानां धर्म्मत्यागप्रकाशनञ्च।

१ अस्माकं त्राणकर्त्तुरीश्वरस्यास्माकं प्रत्याशाभूमेः प्रभो र्यीशु-
ख्रीष्टस्य चाज्ञानुसारतो यीशुख्रीष्टस्य प्रेरितः पौलः स्वकीयं सत्यं
२ धर्म्मपुत्त्रं तीमथियं प्रति पत्रं लिखति। अस्माकं तात ईश्वरो-
ऽस्माकं प्रभु र्यीशुख्रीष्टश्च त्वयि अनुग्रहं दयां शान्तिञ्च कुर्य्यास्तां।
३ माकिदनियादेशे मम गमनकाले त्वम् इफिषनगरे तिष्ठन्
इतरशिक्षा न ग्रहीतव्या, अनन्तेषूपाख्यानेषु वंशावलिषु च युष्माभि
४ र्मनो न निवेशितव्यम् इति कांश्चित् लोकान् यद् उपदिशेरेतत्
मयादिष्टोऽभवः, यतः सर्व्वैरेतै र्विश्वासयुक्तेश्वरीयनिष्ठा न जायते
५ किन्तु विवादो जायते। उपदेशस्य त्वभिप्रेतं फलं निर्म्मलान्तःकरणेन

सत्संवेदेन निष्कपटविश्वासेन च युक्तं प्रेम। केचित् जनाश्च सर्व्वा- ६
ण्येतानि विहाय निरर्थककथानाम् अनुगमनेन विपथगामिनो-
ऽभवन्, यद् भाषन्ते यच्च निश्चिन्वन्ति तन्न बुध्यमाना व्यवस्थोप- ७
देष्टारो भवितुम् इच्छन्ति। सा व्यवस्था यदि योग्यरूपेण गृह्यते ८
तर्ह्युत्तमा भवतीति वयं जानीमः। अपरं सा व्यवस्था धार्म्मिकस्य ९
विरुद्धा न भवति किन्त्वधार्म्मिको ऽवाध्यो दुष्टः पापिष्ठो ऽपवित्रो
ऽशुचिः पितृहन्ता मातृहन्ता नरहन्ता वेश्यागामी पुंमैथुनी मनुष्य- १०
विक्रेता मिथ्यावादी मिथ्याशपथकारी च सर्व्वेषामेतेषां विरुद्धा,
तथा सच्चिदानन्देश्वरस्य यो विभवयुक्तः सुसंवादो मयि समर्पित- ११
स्तदनुयायिहितोपदेशस्य विपरीतं यत् किञ्चिद् भवति तद्विरुद्धा
सा व्यवस्थेति तद्ग्राहिणा ज्ञातव्यं। मह्यं शक्तिदाता योऽस्माकं १२
प्रभुः ख्रीष्टयीशुस्तमहं धन्यं वदामि। यतः पुरा निन्दक उपद्रावी १३
हिंसकश्च भूत्वाप्यहं तेन विश्वास्यो ऽमन्ये परिचारकत्वे न्ययुज्ये च।
तद् अविश्वासाचरणम् अज्ञानेन मया कृतमिति हेतोरहं तेनानु-
कम्पितोऽभवं। अपरं ख्रीष्टे यीशौ विश्वासप्रेमभ्यां सहितोऽस्म- १४
त्प्रभोरनुग्रहो ऽतीव प्रचुरोऽभवत्। पापिनः परित्रातुं ख्रीष्टो यीशु १५
र्जगति समवतीर्णोऽभवत्, एषा कथा विश्वसनीया सर्व्वै र्ग्रहणीया
च। तेषां पापिनां मध्येऽहं प्रथम आसं किन्तु ये मानवा अनन्त- १६
जीवनप्राप्त्यर्थं तस्मिन् विश्वसिष्यन्ति तेषां दृष्टान्ते मयि प्रथमे
यीशुना ख्रीष्टेन स्वकीया कृत्स्ना चिरसहिष्णुता यत् प्रकाश्यते
तदर्थमेवाहम् अनुकम्पां प्राप्तवान्। अनादिरक्षयोऽदृश्यो राजा १७
योऽद्वितीयः सर्व्वज्ञ ईश्वरस्तस्य गौरवं महिमा चानन्तकालं यावद्
भूयात्। आमेन।

हे पुत्र तीमथिय त्वयि यानि भाववाक्यानि पुरा कथितानि १८

१९ तदनुसाराद् अहम् एनमादेशं त्वयि समर्पयामि, तस्याभिप्रायोऽयं
यत्त्वं तै र्वाक्यैरुत्तमयुद्धं करोषि विश्वासं सत्संवेदञ्च धारयसि
२० च। अनयोः परित्यागात् केषाञ्चिद् विश्वासतरी भग्नाभवत्।
हुमिनायसिकन्दरौ तेषां यौ द्वौ जनौ, तौ यद् धर्म्मनिन्दां पुन
र्न कर्त्तुं शिक्षेते तदर्थं मया शैतानस्य करे समर्पितौ।

---

२ द्वितीयोऽध्यायः।

१ सर्व्वसाधारणलोकानां कृते प्रार्थयितुं पौलस्य निदेशः ८ योषिताम् अलङ्कारस्यानुपदेशस्य च कथनम्।

१ मम प्रथम आदेशोऽयं, प्रार्थनाविनयनिवेदनधन्यवादाः कर्त्त-
२ व्याः, सर्व्वेषां मानवानां कृते विशेषतो वयं यत् शान्तत्वेन
निर्व्विरोधत्वेन चेश्वरभक्तिं विनीतत्वञ्चाचरन्तः कालं यापयामस्तदर्थं
३ नृपतीनाम् उच्चपदस्थानाञ्च कृते ते कर्त्तव्याः। यतोऽस्माकं
४ तारकस्येश्वरस्य साक्षात् तदेवोत्तमं ग्राह्यञ्च भवति, स सर्व्वेषां
५ मानवानां परित्राणं सत्यज्ञानप्राप्तिञ्चेच्छति। यत एकोऽद्वितीय
ईश्वरो विद्यते किञ्चेश्वरे मानवेषु चैकोऽद्वितीयो मध्यस्थः स
६ नरावतारः ख्रीष्टो यीशु र्विद्यते यः सर्व्वेषां मुक्ते र्मूल्यम् आत्मदानं
७ कृतवान्। एतेन येन प्रमाणेनोपयुक्ते समये प्रकाशितव्यं, तद्घोष-
यिता दूतो विश्वासे सत्यधर्म्मे च भिन्नजातीयानाम् उपदेशक-
श्चाहं न्ययुज्ये, एतदहं ख्रीष्टस्य नाम्ना यथातथ्यं वदामि नानृतं
कथयामि।

८ अतो ममाभिमतमिदं पुरुषैः क्रोधसन्देहौ विना पवित्रकरान्
९ उत्तोल्य सर्व्वस्मिन् स्थाने प्रार्थना क्रियतां। तद्वत् नार्य्योऽपि-
सलज्जाः संयतमनसश्च सत्यो योग्यमाच्छादनं परिदधतु किञ्च

केशसंस्कारैः कणकमुक्ताभि र्महार्घ्यपरिच्छदैश्चात्मभूषणं न कुर्व्वत्यः
स्वीकृतेश्वरभक्तीनां योषितां योग्यैः सत्कर्म्मभिः स्वभूषणं कुर्व्वतां। १०
नारी सम्पूर्णविनीतत्वेन निर्व्विरोधं शिक्षतां। नार्य्याः शिक्षादानं ११
पुरुषायाज्ञादानं वाहं नानुजानामि तया निर्व्विरोधत्वम् आचरि- १२
तव्यं। यतः प्रथमम् आदमस्ततः परं हवायाः सृष्टि र्बभूव। १३
किञ्चादम् भ्रान्तियुक्तो नाभवत् योषिदेव भ्रान्तियुक्ता भूत्वात्या- १४
चारिणी बभूव। तथापि नारीगणो यदि विश्वासे प्रेम्नि पवित्र- १५
तायां संयतमनसि च तिष्ठति तर्ह्यपत्यप्रसववर्त्मना परित्राणं
प्राप्स्यति।

---

३ तृतीयोऽध्यायः।

१ अध्यक्षाणां व्यवहारनिर्णयः ८ परिचारकाणां व्यवहारनिर्णयः १४ तीमथियं प्रति लिखितुं पौलस्याभिप्रायः।

यदि कश्चिद् अध्यक्षपदम् आकाङ्क्षते तर्हि स उत्तमं कर्म्म १
लिप्सत इति सत्यं। अतोऽध्यक्षेणानिन्दितेनैकस्या योषितो भर्त्रा २
परिमितभोगेन संयतमनसा सभ्येनातिथिसेवकेन शिक्षणे निपुणेन
न मद्यपेन न प्रहारकेण किन्तु मृदुभावेन निर्व्विवादेन निर्लोभेन ३
स्वपरिवाराणाम् उत्तमशासकेन पूर्णविनीतत्वाद् वश्यानां सन्ता- ४
नानां नियन्त्रा च भवितव्यं। यत आत्मपरिवारान् शासितुं यो ५
न शक्नोति तेनेश्वरस्य मण्डल्यास्तत्त्वावधारणं कथं कारिष्यते?
अपरं स गर्व्वितो भूत्वा यत् शैतान इव दण्डयोग्यो न भवेत् ६
तदर्थं तेन नवशिष्येण न भवितव्यं। यच्च निन्दायां शैतानस्य ७
जाले च न पतेत् तदर्थं तेन बहिःस्थलोकानामपि मध्ये सुख्याति-
युक्तेन भवितव्यं।

८ तद्वत् परिचारकैरपि विनीतै र्द्विविधवाक्यरहितै र्बहुमद्यपाने-
९ ऽनासक्तै र्निर्लोभैश्च भवितव्यं, निर्म्मलसंवेदेन च विश्वासस्य निगूढ-
१० वाक्यं धारितव्यञ्च। अग्रे तेषां परीक्षा क्रियतां ततः परम्
११ अनिन्दिता भूत्वा ते परिचर्य्यां कुर्व्वन्तु। अपरं योषिद्भिरपि
विनीताभिरनपवादिकाभिः सतर्काभिः सर्व्वत्र विश्वास्याभिश्च भवि-
१२ तव्यं। परिचारका एकैकयोषितो भर्त्तारो भवेयुः, निजसन्तानानां
१३ परिजनानाञ्च सुशासनं कुर्य्युश्च। यतः सा परिचर्य्या यै र्भद्ररूपेण
साध्यते ते श्रेष्ठपदं प्राप्नुवन्ति ख्रीष्टे यीशौ विश्वासेन महोत्सुका
भवन्ति च।

१४ त्वां प्रत्येतत्पत्रलेखनसमये शीघ्रं त्वत्समीपगमनस्य प्रत्याशा
१५ मम विद्यते। यदि वा विलम्बेय तर्हीश्वरस्य गृहेऽर्थतः सत्यधर्म्मस्य
स्तम्भभित्तिमूलस्वरूपायाम् अमरेश्वरस्य मण्डल्यां त्वया कीदृश
१६ आचारः कर्त्तव्यस्तत् ज्ञातुं शक्ष्यते। अपरं यस्य महत्त्वं सर्व्वस्वीकृतम्
ईश्वरभक्तेस्तत् निगूढवाक्यमिदम् ईश्वरो मानवदेहे प्रकाशित
आत्मना धार्म्मिकीकृतो दूतैः सन्दृष्टः सर्व्वजातीयानां निकटे
घोषितो जगतो विश्वासपात्रीभूतस्तेजःप्राप्तये स्वर्गं नीतश्चेति।

---

४ चतुर्थोऽध्यायः।

१ धर्म्मत्यागस्य भविष्यद्वाक्यं ७ धर्म्मे तीमथियं प्रति पौलस्य नानाविधोपदेशश्च।

१ पवित्र आत्मा स्पष्टम् इदं वाक्यं वदति चरमकाले कतिपय-
२ लोका वह्निनाङ्कितत्वात् कठोरमनसां कापट्याद् अनृतवादिनां
३ विवाहनिषेधकानां भक्ष्यविशेषनिषेधकानाञ्च भूतस्वरूपाणां शिक्षायां
भ्रमकात्मनां वाक्येषु च मनांसि निवेश्य धर्म्माद् भ्रंशिष्यन्ते।
४ तानि तु भक्ष्याणि विश्वासिनां स्वीकृतसत्यधर्म्माणाञ्च धन्यवाद-

सहिताय भोगायेश्वरेण ससृजिरे। यत ईश्वरेण यद्यत् सृष्टं तत्
सर्व्वम् उत्तमं यदि च धन्यवादेन भुज्यते तर्हि तस्य किमपि
नाग्राह्यं भवति, यत ईश्वरस्य वाक्येन प्रार्थनया च तत् पवित्री- ५
भवति। एतानि वाक्यानि यदि त्वं भ्रातॄन् ज्ञापयेस्तर्हि यीशु- ६
ख्रीष्टस्योत्तमः परिचारको भविष्यसि यो विश्वासो हितोपदेशश्च
त्वया गृहीतस्तदीयवाक्यैराप्यायिष्यसे च।

यान्युपाख्यानानि दुर्भावानि वृद्धयोषितामेव योग्यानि च ७
तानि त्वया विसृज्यन्ताम् ईश्वरभक्तये यत्नः क्रियताञ्च। यतः ८
शारीरिको यत्नः स्वल्पफलदो भवति किन्त्वीश्वरभक्तिरैहिकपार-
त्रिकजीवनयोः प्रतिज्ञायुक्ता सती सर्व्वत्र फलदा भवति। वाक्य- ९
मेतद् विश्वसनीयं सर्व्वै र्ग्रहणीयञ्च वयञ्च तदर्थमेव श्राम्यामो
निन्दां भुंज्महे च। यतो हेतोः सर्व्वमानवानां विशेषतो विश्वा- १०
सिनां त्राता योऽमर ईश्वरस्तस्मिन् वयं विश्वसामः। त्वम् एतानि ११
वाक्यानि प्रचारय समुपदिश च। अल्पवयस्कत्वात् केनाप्यवज्ञेयो १२
न भव किन्त्वालापेनाचरणेन प्रेम्ना सदात्मत्वेन विश्वासेन शुचित्वेन
च विश्वासिनाम् आदर्शो भव। यावन्नाहम् आगमिष्यामि तावत् १३
त्वं पाठे चेतयने उपदेशे च मनो निधत्स्व। प्राचीनगणहस्तार्पण- १४
सहितेन भाववाण्या यद्दानं तुभ्यं विश्राणितं तवान्तःस्थे तस्मिन्
दाने शिथिलमना मा भव। एतेषु मनो निवेशय, एतेषु वर्त्तस्व, १५
इत्यञ्च सर्व्वविषये तव गुणवृद्धिः प्रकाशतां। स्वस्मिन् उपदेशे १६
च सावधानो भूत्वावतिष्ठस्व तत् कृत्वा त्वयात्मपरित्राणं श्रोतॄणाञ्च
परित्राणं साधयिष्यते।

५ पञ्चमोऽध्यायः।

१ भर्त्सनं विधवापालनञ्च १७ प्राचीनलोकानां निरूपणं २२ तीमथियं प्रति पौलस्य विशेषोपदेशश्च।

१ त्वं प्राचीनं न भर्त्सय किन्तु तं पितरमिव यूनश्च भ्रातॄनिव
२ वृद्धाः स्त्रियश्च मातॄनिव युवतीश्च पूर्णशुचित्वेन भगिनीरिव विन-
३ यस्व। अपरं सत्यविधवाः सम्मन्यस्व। कस्याश्चिद् विधवाया यदि
४ पुत्राः पौत्रा वा विद्यन्ते तर्हि ते प्रथमतः स्वीयपरिजनान् सेवितुं
पित्रोः प्रत्युपकर्त्तुञ्च शिक्षन्तां यतस्तदेवेश्वरस्य साक्षाद् उत्तमं
५ ग्राह्यञ्च कर्म्म। अपरं या नारी सत्यविधवा नाथहीना चास्ति
सा ईश्वरस्याश्रये तिष्ठन्ती दिवानिशं निवेदनप्रार्थनाभ्यां कालं
६ यापयति। किन्तु या विधवा सुखभोगासक्ता सा जीवत्यपि मृता
७ भवति। अतएव ता यद् अनिन्दिता भवेयुस्तदर्थम् एतानि त्वया
८ निदिश्यन्तां। यदि कश्चित् स्वजातीयान् लोकान् विशेषतः स्वीय-
परिजनान् न पालयति तर्हि स विश्वासाद् भ्रष्टोऽविश्वासिनो-
९ ऽप्यधमश्च भवति। विधवावर्गे यस्या गणना भवति तया षष्टि-
वत्सरेभ्यो न्यूनवयस्कया न भवितव्यं; अपरं पूर्व्वम् एकस्वामिका
१० भूत्वा सा यत् शिशुपोषणेनातिथिसेवनेन पवित्रलोकानां चरण-
प्रक्षालनेन क्लिष्टानाम् उपकारेण सर्व्वविधसत्कर्म्माचरणेन च सत्कर्म्म-
११ करणात् सुख्यातिप्राप्ता भवेत् तदप्यावश्यकं। किन्तु युवती
र्विधवा न गृहाण यतः ख्रीष्टस्य वैपरीत्येन तासां दर्पे जाते
१२ ता विवाहम् इच्छन्ति। तस्माच्च पूर्व्वधर्म्मं परित्यज्य दण्डनीया
१३ भवन्ति। अनन्तरं ता गृहाद् गृहं पर्य्यटन्त्य आलस्यं शिक्षन्ते
केवलमालस्यं नहि किन्त्वनर्थकालापं पराधिकारचर्च्चाञ्चापि शिक्ष-
१४ माणा अनुचितानि वाक्यानि भाषन्ते। अतो ममेच्छेयं युवत्यो

विधवा विवाहं कुर्व्वताम् अपत्यवत्यो भवन्तु गृहकर्म्म कुर्व्वताञ्चेत्थं
विपक्षाय किमपि निन्दाद्वारं न ददतु। यत इतः पूर्व्वम् अपि १५
काश्चित् शैतानस्य पश्चाद्गामिन्यो जाताः। अपरं विश्वासिन्या १६
विश्वासिनो वा कस्यापि परिवाराणां मध्ये यदि विधवा विद्यन्ते
तर्हि स ताः प्रतिपालयतु तस्मात् मण्डल्यां भारेऽनारोपिते
सत्यविधवानां प्रतिपालनं कर्त्तुं तया शक्यते।

ये प्राञ्चः मण्डलीं सम्यग् अधितिष्ठन्ति विशेषत ईश्वरवाक्ये- १७
नोपदेशेन च ये यत्नं विदधते ते द्विगुणस्यादरस्य योग्या
मान्यन्तां। यस्मात् शास्त्रे लिखितमिदमास्ते, त्वं शस्यमर्द्दकवृषस्यास्यं १८
मा बधानेति, अपरमपि कार्य्यकृद् वेतनस्य योग्यो भवतीति।
द्वौ त्रीन् वा साक्षिणो विना कस्यचित् प्राचीनस्य विरुद्धम् १९
अभियोगस्त्वया न गृह्यतां। अपरं ये पापमाचरन्ति तान् सर्व्वेषां २०
समक्षं भर्त्सयस्व तेनापरेषामपि भीति र्जनिष्यते। अहम् ईश्वरस्य २१
प्रभो र्यीशुख्रीष्टस्य मनोनीतदिव्यदूतानाञ्च गोचरे त्वाम् इदम्
आज्ञापयामि त्वं कस्याप्यनुरोधेन किमपि न कुर्व्वन् विनापक्ष-
पातम् एतान् विधीन् पालय।

कस्यापि मूर्द्ध्नि हस्तार्पणं त्वरया माकार्षीः। परपापानाञ्चांशी २२
मा भव। स्वं शुचिं रक्ष। अपरं तवोदरपीडायाः पुनः पुन २३
र्दुर्ब्बलतायाश्च निमित्तं केवलं तोयं न पिवन् किञ्चिन् द्राक्षारसं
पिव। केषाञ्चित् मानवानां पापानि विचारात् पूर्व्वं केषाञ्चित् २४
पश्चात् प्रकाशन्ते। तथैव सत्कर्म्माण्यपि प्रकाशन्ते तदन्यथा सति २५
प्रच्छन्नानि स्थातुं न शक्नुवन्ति।

६ षष्ठोऽध्यायः ।

१ दासानां कर्त्तव्यं कर्म्म दुष्टोपदेशकस्य त्यागो धर्म्मफलञ्च ११ धर्म्मे तीमथियं प्रति पौलस्य निवेदनं १७ धनिलोकाः किमुपदेष्टव्यास्तत्कथनं २० पत्रस्य समाप्तिश्च ।

१ यावन्तो लोका युगधारिणो दासाः सन्ति ते स्वस्वस्वामिनं
पूर्णसमादरयोग्यं मन्यन्तां नो चेद् ईश्वरस्य नाम्न उपदेशस्य च
२ निन्दा सम्भविष्यति । येषाञ्च स्वामिनो विश्वासिनः भवन्ति तैस्ते
भ्रातृत्वात् नावज्ञेयाः किन्तु ते कर्म्मफलभोगिनो विश्वासिनः
प्रियाश्च भवन्तीति हेतोः सेवनीया एव, त्वम् एतानि शिक्षय
३ समुपदिश च । यः कश्चिद् इतरशिक्षां करोति, अस्माकं प्रभो
र्यीशुख्रीष्टस्य हितवाक्यानीश्वरभक्ते र्योग्यां शिक्षाञ्च न स्वीकरोति स
४ दर्पध्मातः सर्व्वथा ज्ञानहीनश्च विवादै र्वाग्युद्धैश्च रोगयुक्तश्च भवति ।
५ तादृशाद् भावाद् ईर्ष्याविरोधापवाददुष्टासूया भ्रष्टमनसां सत्य-
ज्ञानहीनानाम् ईश्वरभक्तिं लाभोपायम् इव मन्यमानानां लोकानां
६ विवादाश्च जायन्ते तादृशेभ्यो लोकेभ्यस्त्वं पृथक् तिष्ठ । संयतेच्छया
७ युक्ता येश्वरभक्तिः सा महालाभोपायो भवतीति सत्यं । एतज्जगत्-
प्रवेशनकालेऽस्माभिः किमपि नानायि तत्त्यजनकालेऽपि किमपि
८ नेतुं न शक्यत इति निश्चितं । अतएव खाद्यान्याच्छादनानि च
९ प्राप्यास्माभिः सन्तुष्टै र्भवितव्यं । ये तु धनिनो भवितुं चेष्टन्ते ते
परीक्षायाम् उन्माथे पतन्ति ये चाभिलाषा मानवान् विनाशे
नरके च मज्जयन्ति तादृशेष्वज्ञानाहिताभिलाषेष्वपि पतन्ति ।
१० यतोऽर्थस्पृहा सर्व्वेषां दुरितानां मूलं भवति तामवलम्ब्य केचिद्
विश्वासाद् अभ्रंशन्त नानाक्लेशैश्च स्वान् अविध्यन् ।

११ हे ईश्वरस्य लोक त्वम् एतेभ्यः पलाय्य धर्म्म ईश्वरभक्ति
१२ र्विश्वासः प्रेम सहिष्णुता क्षान्तिश्चैतान्याचर । विश्वासरूपम् उत्तम-

युद्धं कुरु, अनन्तजीवनम् आलम्बस्व यतस्तदर्थं त्वम् आहूतोऽभवः,
बहुसाक्षिणां समक्षञ्चोत्तमां प्रतिज्ञां स्वीकृतवान्। अपरं सर्व्वेषां १३
जीवयितुरीश्वरस्य साक्षाद् यश्च ख्रीष्टो यीशुः पन्तीयपीलातस्य
समक्षम् उत्तमां प्रतिज्ञां स्वीकृतवान् तस्य साक्षाद् अहं त्वाम्
इदम् आज्ञापयामि। ईश्वरेण स्वसमये प्रकाशितव्यम् अस्माकं १४
प्रभो र्यीशुख्रीष्टस्यागमनं यावत् त्वया निष्कलङ्कत्वेन निर्दोषत्वेन
च विधी रक्ष्यतां। स ईश्वरः सच्चिदानन्दः, अद्वितीयसम्राट्, राज्ञां १५
राजा, प्रभूनां प्रभुः, अमरताया अद्वितीय आकरः, अगम्यतेजो- १६
निवासी, मर्त्यानां केनापि न दृष्टः केनापि न दृश्यश्च। तस्य
गौरवपराक्रमौ सदातनौ भूयास्तां। आमेन्।

इहलोके ये धनिनस्ते चित्तसमुन्नतिं चपले धने विश्वासञ्च १७
न कुर्व्वतां किन्तु भोगार्थम् अस्मभ्यं प्रचुरत्वेन सर्व्वदाता योऽमर
ईश्वरस्तस्मिन् विश्वसन्तु सदाचारं कुर्व्वन्तु सत्कर्म्मधनेन धनिनो १८
सुकला दातारश्च भवन्तु, यथा च सत्यं जीवनं पाप्नुयुस्तथा १९
पारत्रिकाम् उत्तमसम्पदं सञ्चिन्वन्त्वेति त्वयादिश्यन्तां।

हे तीमथिय, त्वम् उपनिधिं गोपय काल्पनिकविद्याया २०
अपवित्रं प्रलापं विरोधोक्तिञ्च त्यज च, यतः कतिपया लोकास्तां २१
विद्यामवलभ्य विश्वासाद् भ्रष्टा अभवन्। प्रसादस्तव सहायो
भूयात्। आमेन्।

तीमथियं प्रति पौलस्य प्रेरितस्य द्वितीयं पत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचरणं ३ सत्यविश्वासकारणात् तीमथियं प्रति पौलस्य प्रेम ६ तथा धर्म्मकर्म्मणि दुःखभोगे च तीमथियं प्रति पौलस्योपदेशः १३ धर्म्मे स्थातुम् उपदेशः १५ कियतां लोकानां धर्म्मत्यागः, अनीषिफरस्य धर्म्मशीलत्वप्रकाशश्च।

१ ख्रीष्टेन यीशुना या जीवनस्य प्रतिज्ञा तामधीश्वरस्येच्छया
यीशोः ख्रीष्टस्यैकः प्रेरितः पौलोऽहं स्वकीयं प्रियं धर्म्मपुत्रं तीम-
२ थियं प्रति पत्रं लिखामि। तात ईश्वरोऽस्माकं प्रभु र्यीशु-
ख्रीष्टश्च त्वयि प्रसादं दयां शान्तिञ्च क्रियास्तां।
३ अहम् आ पूर्व्वपुरुषात् यम् ईश्वरं पवित्रमनसा सेवे तं धन्यं
वदन् कथयामि, अहम् अहोरात्रं प्रार्थनासमये त्वां निरन्तरं
४ स्मरामि। यश्च विश्वासः प्रथमे लोयीनामिकायां तव माता-
मह्याम् ऊनीकीनामिकायां मातरि चातिष्ठत् तवान्तरेऽपि तिष्ठ-
५ तीति मन्ये तव तं निष्कपटं विश्वासं मनसि कुर्व्वन् तवाश्रुपातं
स्मरन् यथानन्देन प्रफुल्लो भवेयं तदर्थं तव दर्शनम् आकाङ्क्षे।
६ अतो हेतो र्मम हस्तार्पणेन लब्धो य ईश्वरस्य वरस्त्वयि
७ विद्यते तम् उज्ज्वालयितुं त्वां स्मारयामि। यत ईश्वरोऽस्मभ्यं
भयजनकम् आत्मानम् अदत्त्वा शक्तिप्रेमसतर्कतानाम् आकरम्
८ आत्मानं दत्तवान्। अतएवास्माकं प्रभुमधि तस्य वन्दिदासं मामधि
च प्रमाणं दातुं न त्रपस्व किन्त्वीश्वरीयशक्त्या सुसंवादस्य कृते
९ दुःखस्य सहभागी भव। सोऽस्मान् परित्राणपात्राणि कृतवान्

पवित्रेणाह्वानेनाहूतवांश्च; अस्मत्कर्म्महेतुनेति नहि स्वीयनिरू-
पणस्य प्रसादस्य च कृते तत् कृतवान्। स प्रसादः सृष्टेः पूर्व्वकाले
ख्रीष्टेन यीशुनास्मभ्यम् अदायि, किन्त्वधुनास्माकं परित्रातु र्यीशोः
ख्रीष्टस्यागमनेन प्राकाशत। ख्रीष्टो मृत्युं पराजितवान् सुसंवादेन १०
च जीवनम् अमरताञ्च प्रकाशितवान्। तस्य घोषयिता दूतश्च- ११
परजातीयानां शिक्षकश्चाहं नियुक्तोऽस्मि। तस्मात् कारणात् ममायं १२
क्लेशो भवति तेन मम लज्जा न जायते यतोऽहं यस्मिन् विश्व-
सितवान् तमवगतोऽस्मि महादिनं यावत् ममोपनिधे र्गोपनस्य
शक्तिस्तस्य विद्यत इति निश्चितं जानामि।

हितदायकानां वाक्यानाम् आदर्शरूपेण मत्तः श्रुताः ख्रीष्टे १३
यीशौ विश्वासप्रेम्नोः कथा धारय। अपरम् अस्मदन्तर्वासिना १४
पवित्रेणात्मना तामुत्तमाम् उपनिधिं गोपय।

आशियादेशीयाः सर्व्वे मां त्यक्तवन्त इति त्वं जानासि तेषां १५
मध्ये फुगिल्लो हर्म्मगिनिश्च विद्येते। प्रभुरनीषिफरस्य परिवारान् १६
प्रति कृपां विदधातु यतः स पुनः पुन र्माम् आप्यायितवान्
मम शृङ्खलेन न त्रपित्वा रोमानगरे उपस्थितिसमये यत्नेन १७
मां मृगयित्वा ममोद्देशं प्राप्तवान्। अतो विचारदिने स यथा १८
प्रभोः कृपाभाजनं भवेत् तादृशं वरं प्रभुस्तस्मै देयात्। इफिष-
नगरेऽपि स कति प्रकारै र्माम् उपकृतवान् तत् त्वं सम्यग् वेत्सि।

---

२ द्वितीयोऽध्यायः।

१ धर्म्मकर्म्मणि नित्यप्रवृत्ति र्दुःखसहिष्णुत्वं १४ तीमथियं प्रति कर्त्तव्याकर्त्तव्ययो र्नानोपदेशश्च।

हे मम पुत्र, ख्रीष्टयीशुतो योऽनुग्रहस्तस्य बलेन त्वं बलवान् १

२ भव। अपरं बहुभिः साक्षिभिः प्रमाणीकृतां यां शिक्षां श्रुतवानसि
३ तां विश्वास्येषु परस्मै शिक्षादाने निपुणेषु च लोकेषु समर्पय। त्वं
४ यीशुख्रीष्टस्योत्तमो योद्धेव क्लेशं सहस्व। यो युद्धं करोति स
सांसारिके व्यापारे मग्नो न भवति किन्तु स्वनियोजयित्रे रोचितुं
५ चेष्टते। अपरं यो मल्लै र्युध्यति स यदि नियमानुसारेण न
६ युध्यति तर्हि किरीटं न लप्स्यते। अपरं यः कृषीवलः कर्म्म
७ करोति तेन प्रथमेन फलभागिना भवितव्यं। मया यदुच्यते
८ तत् त्वया बुध्यतां यतः प्रभुस्तुभ्यं सर्व्वत्र बुद्धिं दास्यति। मम
सुसंवादस्य वचनानुसाराद् दायूद्वंशीयं मृतगणमध्याद् उत्था-
९ पितञ्च यीशुं ख्रीष्टं स्मर। तत्सुसंवादकारणाद् अहं दुष्कर्म्मेव
बन्धनदशापर्य्यन्तं क्लेशं भुञ्जे किन्त्वीश्वरस्य वाक्यम् अबद्धं तिष्ठति।
१० ख्रीष्टेन यीशुना यद् अनन्तगौरवसहितं परित्राणं जायते तदभि-
रुचितै र्लोकैरपि यत् लभ्येत तदर्थमहं तेषां निमित्तं सर्व्वाण्ये-
११ तानि सहे। अपरम् एषा भारती सत्या यदि वयं तेन सार्द्धं
म्रियामहे तर्हि तेन सार्द्धं जीविष्यामः, यदि च क्लेशं सहामहे
१२ तर्हि तेन सार्द्धं राजत्वमपि करिष्यामहे। यदि वयं तम् अनङ्गी-
१३ कुर्म्मस्तर्हि सोऽस्मानप्यनङ्गीकरिष्यति। यदि वयं न विश्वसामस्तर्हि
स विश्वास्यस्तिष्ठति यतः स्वम् अपह्नोतुं न शक्नोति।

१४ त्वमेतानि स्मारयन् ते यथा निष्फलं श्रोतॄणां भ्रंशजनकं
१५ वाग्युद्धं न कुर्य्युस्तथा प्रभोः समक्षं दृढं विनीयादिश। अपरं
त्वम् ईश्वरस्य साक्षात् स्वं परीक्षितम् अनिन्दनीयकर्म्मकारिणञ्च
१६ सत्यमतस्य वाक्यानां सद्विभजने निपुणञ्च दर्शयितुं यतस्व। किन्त्व-
पवित्रा अनर्थककथा दूरीकुरु यतस्तदालम्बिन उत्तरोत्तरम्
१७ अधर्म्मे वर्द्धिष्यन्ते, तेषाञ्च वाक्यं गलितक्षतवत् क्षयवर्द्धको

भविष्यति तेषां मध्ये हुमिनायः फिलीतश्चेतिनामानौ द्वौ जनौ
सत्यमताद् भ्रष्टौ जातौ, मृतानां पुनरुत्थितिर्व्यतीतेति वदन्तौ १८
केषाञ्चिद् विश्वासम् उत्पाटयतश्च। तथापीश्वरस्य भित्तिमूलम् १९
अचलं तिष्ठति तस्मिंश्चेयं लिपि मुद्राङ्किता विद्यते। यथा,

जानाति परमेशस्तु स्वकीयान् सर्व्वमानवान्।
अपगच्छेद् अधर्म्माच्च यः कश्चित् ख्रीष्टनामकृत्॥

किन्तु बृहन्निकेतने केवलं सुवर्णमयानि रौप्यमयाणि च भाजनानि २०
विद्यन्त इति नहि काष्ठमयानि मृण्मयान्यपि विद्यन्ते तेषाञ्च
कियन्ति सम्मानाय कियन्त्यपमानाय च भवन्ति। अतो यदि २१
कश्चिद् एतादृशेभ्यः स्वं परिष्करोति तर्हि स पावितं प्रभोः
कार्य्ययोग्यं सर्व्वसत्कार्य्यायोपयुक्तं सम्मानार्थकञ्च भाजनं भवि-
ष्यति। यौवनावस्थाया अभिलाषास्त्वया परित्यज्यन्तां धर्म्मो २२
विश्वासः प्रेम ये च शुचिमनोभिः प्रभुम् उद्दिश्य प्रार्थनां कुर्व्वते
तैः सार्द्धम् ऐक्यभावश्चैतेषु त्वया यत्नो विधीयतां। अपरं त्वम् २३
अनर्थकान् अज्ञानांश्च प्रश्नान् वाग्युद्धोत्पादकान् ज्ञात्वा दूरी-
कुरु। यतः प्रभो र्दासेन युद्धम् अकर्त्तव्यं किन्तु सर्व्वान् प्रति २४
शान्तेन शिक्षादानेच्छुकेन सहिष्णुना च भवितव्यं, विपक्षाश्च तेन
नम्रत्वेन चेतितव्याः। तथा कृते यदीश्वरः सत्यमतस्य ज्ञानार्थं २५
तेभ्यो मनःपरिवर्त्तनरूपं वरं दद्यात्, तर्हि ते येन शैतानेन २६
निजाभिलाषसाधनाय धृतास्तस्य जालात् चेतनां प्राप्योद्धारं
लब्धुं शक्ष्यन्ति।

---

३ तृतीयोऽध्यायः।

१ भ्रष्टलोकेषु भविष्यद्वाक्यं १० पौलस्य स्वीयाचारस्य प्रकाशनं धर्म्मपुस्तकस्य प्रशंसा च।

१ चरमदिनेषु क्लेशजनकाः समया उपस्थास्यन्तीति जानीहि ।
२ यतस्तात्कालिका लोका आत्मप्रेमिणोऽर्थप्रेमिण आत्मश्लाघिनो-
ऽभिमानिनो निन्दकाः पित्रोरनाज्ञाग्राहिणः कृतघ्ना अपवित्राः
३ प्रीतिवर्जिता असन्धेया मृषापवादिनोऽजितेन्द्रियाः प्रचण्डा भद्र-
४ द्वेषिणो विश्वासघातका दुःसाहसिनो दर्पध्माता ईश्वराप्रेमिणः
५ किन्तु सुखप्रेमिणो भक्तवेशाः किन्त्वस्वीकृतभक्तिगुणा भविष्यन्ति;
६ एतादृशानां लोकानां संसर्गं परित्यज । यतो ये जनाः प्रच्छन्नं
गेहान् प्रविशन्ति पापै र्भारग्रस्ता नानाविधाभिलाषैश्चालिता
७ याः कामिन्यो नित्यं शिक्षन्ते किन्तु सत्यमतस्य तत्त्वज्ञानं प्राप्तुं
कदाचित् न शक्नुवन्ति ता दासीवद् वशीकुर्व्वते च ते तादृशा
८ लोकाः । यान्नि र्याम्ब्रिश्च यथा मोशिं प्रति विपक्षत्वम् अकुरुतां
तथैव भ्रष्टमनसो विश्वासविषयेऽग्राह्याश्चैते लोका अपि सत्यमतं
९ प्रति विपक्षतां कुर्व्वन्ति । किन्तु ते बहुदूरम् अग्रसरा न भविष्यन्ति
यतस्तयो र्मूढता यद्वत् तद्वद् एतेषामपि मूढता सर्व्वदृश्या
भविष्यति ।

१० ममोपदेशः शिष्टताभिप्रायो विश्वासो धैर्य्यं प्रेम सहिष्णुतो-
११ पद्रवः क्लेशा आन्तियखियायाम् इकनिये लूस्त्रायाञ्च मां प्रति
यद्यद् अघटत यांश्चोपद्रवान् अहम् असहे सर्व्वमेतत् त्वम् अव-
१२ गतोऽसि किन्तु तत्सर्व्वतः प्रभु र्माम् उद्धृतवान् । परन्तु यावन्तो
लोकाः ख्रीष्टेन यीशुनेश्वरभक्तिम् आचरितुम् इच्छन्ति तेषां
१३ सर्व्वेषाम् उपद्रवो भविष्यति । अपरं पापिष्ठाः खलाश्च लोका
१४ भ्राम्यन्तो भ्रमयन्तश्चोत्तरोत्तरं दुष्टत्वेन वर्द्धिष्यन्ते । किन्तु त्वं
यद् यद् अशिक्षथाः, यच्च त्वयि समर्पितम् अभूत् तस्मिन
१५ अवतिष्ठ, यतः कस्मात् शिक्षां प्राप्तोऽसि तद् वेत्सि; यानि च

धर्म्मशास्त्राणि ख्रीष्टे यीशौ विश्वासेन परित्राणप्राप्तये त्वां ज्ञानिनं
कर्त्तुं शक्नुवन्ति तानि त्वं शैशवकालाद् अवगतोऽसि। तत् सर्व्वं १६
शास्त्रम् ईश्वरस्यात्मना दत्तं शिक्षायै दोषबोधाय शोधनाय
धर्म्मविनयाय च फलयुक्तं भवति तेन चेश्वरस्य लोको निपुणः १७
सर्व्वस्मै सत्कर्म्मणे सुसज्जश्च भवति।

४ चतुर्थोऽध्यायः।

१ सुसंवादप्रचारणे नित्यं प्रवर्त्तितुं विनयः ६ निजमृतिभाविसुखयोः पौलस्य कथनं ९ नानासंवादकथा १९ नमस्कारज्ञापनञ्च।

ईश्वरस्य गोचरे यश्च यीशुः ख्रीष्टः स्वीयागमनकाले स्वराज- १
त्वेन जीवतां मृतानाञ्च लोकानां विचारं करिष्यति तस्य गोचरे-
ऽहं त्वाम् इदं दृढम् आज्ञापयामि। त्वं वाक्यं घोषय कालेऽकाले २
चोत्सुको भव पूर्णया सहिष्णुतया शिक्षया च लोकान् प्रबोधय
भर्त्सय विनयस्व च। यत एतादृशः समय आयाति यस्मिन् ३
लोका यथार्थम् उपदेशम् असह्यमानाः कर्णकण्डूयनविशिष्टा भूत्वा
निजाभिलाषात् शिक्षकान् संग्रहीष्यन्ति सत्यमताच्च श्रोत्राणि ४
निवर्त्त्य विपथगामिनो भूत्वोपाख्यानेषु प्रवर्त्तिष्यन्ते; किन्तु त्वं ५
सर्व्वविषये प्रबुद्धो भव दुःखभोगं स्वीकुरु सुसंवादप्रचारकस्य कर्म्म
साधय निजपरिचर्य्यां पूर्णत्वेन कुरु च।

मम प्राणानाम् उत्सर्गो भवति मम प्रस्थानकालश्चोपातिष्ठत्। ६
अहम् उत्तमयुद्धं कृतवान् गन्तव्यमार्गस्यान्तं यावद् धावितवान् ७
विश्वासञ्च रक्षितवान्। शेषं धार्म्मिकत्वमुकुटं मदर्थं रक्षितं विद्यते ८
तच्च तस्मिन् महादिने यथार्थविचारकेण प्रभुना मह्यं दायिष्यते
केवलं मह्यम् इति नहि किन्तु यावन्तो लोकास्तस्यागमनम्
आकाङ्क्षन्ते तेभ्यः सर्व्वेभ्योऽपि दायिष्यते।

९ त्वं त्वरया मत्समीपम् आगन्तुं यतस्व, यतो दीमा ऐहिक-
१० संसारम् ईहमानो मां परित्यज्य थिषलनीकीं गतवान् तथा
क्रीष्कि गालातियां गतवान् तीतश्च दाल्मातियां गतवान्।
११ केवलो लूको मया सार्द्धं विद्यते। त्वं मार्कं सङ्गिनं कृत्वागच्छ
१२ यतः स परिचर्य्यया ममोपकारी भविष्यति, तुखिकञ्चाहम्
१३ इफिषनगरं प्रेषितवान्। यद् आच्छादनवस्त्रं त्रोयानगरे कार्पस्य
सन्निधौ मया निक्षिप्तं त्वमागमनसमये तत् पुस्तकानि च विशे-
१४ षतश्चर्म्मग्रन्थान् आनय। कांस्यकारः सिकन्दरो मम बह्वनिष्टं
१५ कृतवान् प्रभुस्तस्य कर्म्मणां समुचितफलं ददातु। त्वमपि तस्मात्
सावधानस्तिष्ठ यतः सोऽस्माकं वाक्यानाम् अतीव विपक्षो जातः।
१६ मम प्रथमप्रत्युत्तरसमये कोऽपि मम सहायो नाभवत् सर्व्वे मां
१७ पर्य्यत्यजन् तान् प्रति तस्य दोषस्य गणना न भूयात्; किन्तु
प्रभु र्मम सहायोऽभवत् यथा च मया घोषणा साध्येत परजाती-
याश्च सर्व्वे सुसंवादं शृणुयुस्तथा मह्यं शक्तिम् अददात् ततोऽहं
१८ सिंहस्य मुखाद् उद्धृतः। अपरं सर्व्वस्माद् दुष्कर्म्मतः प्रभु र्माम्
उद्धरिष्यति निजस्वर्गीयराज्यं नेतुं मां तारयिष्यति च। तस्य
धन्यवादः सदाकालं भूयात्। आमेन्।
१९ त्वं प्रिष्काम् आक्किलम् अनीषिफरस्य परिजनांश्च नमस्कुरु।
२० इरास्तः करिन्थनगरेऽतिष्ठत् त्रफिमश्च पीडितत्वात् मिलीतनगरे
२१ मया व्यहीयत। त्वं हेमन्तकालात् पूर्व्वम् आगन्तुं यतस्व।
उबूलः पूदि र्लीनः क्लौदिया सर्व्वे भ्रातरश्च त्वां नमस्कुर्व्वते।
२२ प्रभु र्यीशुः ख्रीष्टस्तवात्मना सह भूयात्। युष्मास्वनुग्रहो भूयात्।
आमेन्।

तीतं प्रति पौलस्य प्रेरितस्य पत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचरणं ५ क्रीत्युपद्वीपे तीतस्य स्थितेरभिप्रायः, उत्तमोपदेशकानां गुणनिर्णयः, दुष्टोपदेशकानां गुणनिर्णयश्च।

अनन्तजीवनस्याशातो जाताया ईश्वरभक्ते र्योग्यस्य सत्यमतस्य १
यत् तत्त्वज्ञानं यश्च विश्वास ईश्वरस्याभिरुचितलोकै र्लभ्यते तदर्थं
यीशुख्रीष्टस्य प्रेरित ईश्वरस्य दासः पौलोऽहं साधारणविश्वासात् २
मम प्रकृतं धर्म्मपुत्रं तीतं प्रति लिखामि। निष्कपट ईश्वर ३
आदिकालात् पूर्व्वं तत् जीवनं प्रतिज्ञातवान् स्वनिरूपितसमये
च घोषणया तत् प्रकाशितवान्। मम त्रातुरीश्वरस्याज्ञया च ४
तस्य घोषणं मयि समर्पितम् अभूत्। अस्माकं तात ईश्वरः
परित्राता प्रभु र्यीशुख्रीष्टश्च तुभ्यम् अनुग्रहं दयां शान्तिञ्च
वितरतु।

त्वं यद् असम्पूर्णकार्य्याणि सम्पूरये मदीयादेशाच्च प्रतिनगरं ५
प्राचीनगणान् नियोजयेस्तदर्थमहं त्वां क्रीत्युपद्वीपे स्थापयित्वा
गतवान्। तस्माद् यो नरोऽनिन्दित एकस्या योषितः स्वामी ६
विश्वासिनाम् अपचयस्यावाध्यत्वस्य वा दोषेणालिप्तानाञ्च सन्ता-
नानां जनको भवति स एव योग्यः। यतो हेतोरध्यक्षेणेश्वरस्य ७
गृहाध्यक्षेणेवानिन्दनीयेन भवितव्यं। तेन स्वेच्छाचारिणा क्रोधिना
पानासक्तेन प्रहारकेण लोभिना वा न भवितव्यं किन्त्वतिथिसेवकेन
सल्लोकानुरागिणा विनीतेन न्याय्येन धार्म्मिकेण जितेन्द्रियेण च ८

९ भवितव्यं, उपदेशे च विश्वस्तं वाक्यं तेन धारितव्यं यतः स यद्
यथार्थेनोपदेशेन लोकान् विनेतुं विघ्नकारिणश्च निरुत्तरान् कर्त्तुं
१० शक्नुयात् तद् आवश्यकं। यतस्ते बहवोऽवाध्या अनर्थकवाक्यवादिनः
प्रवञ्चकाश्च सन्ति विशेषतश्छिन्नत्वचां मध्ये केचित् तादृशा लोकाः
११ सन्ति। तेषाञ्च वाग्रोध आवश्यको यतस्ते कुत्सितलाभस्याशयानु-
चितानि वाक्यानि शिक्षयन्तो निखिलपरिवाराणां सुमतिं नाश-
१२ यन्ति। तेषां स्वदेशीय एको भाववादी वचनमिदमुक्तवान्, यथा,

क्रीतीयमानवाः सर्व्वे सदा कापट्यवादिनः।
हिंस्रजन्तुसमानास्तेऽलसाश्चोदरभारतः॥

१३ साक्ष्यमेतत् तथ्यं, अतो हेतोस्त्वं तान् गाढं भर्त्सय ते च यथा
१४ विश्वासे स्वस्था भवेयु र्यिहूदीयोपाख्यानेषु सत्यमतभ्रष्टानां मान-
१५ वानाम् आज्ञासु च मनांसि न निवेशयेयुस्तथादिश। शुचीनां
कृते सर्व्वाण्येव शुचीनि भवन्ति किन्तु कलङ्कितानाम् अविश्वासि-
नाञ्च कृते शुचि किमपि न भवति यतस्तेषां बुद्धयः संवेदाश्च
१६ कलङ्किताः सन्ति। ईश्वरस्य ज्ञानं ते प्रतिजानन्ति किन्तु कर्म्म-
भिस्तद् अनङ्गीकुर्व्वते यतस्ते गर्हिता अनाज्ञाग्राहिणः सर्व्वसत्कर्म्म-
णश्चायोग्याः सन्ति।

---

२ द्वितीयोऽध्यायः।

१ स्थविरस्थविरायुवजनदासाः कथमुपदेष्टव्या इति निर्णयः ११ सुसंवादाभि-
प्रायश्च।

१ यथार्थस्योपदेशस्य वाक्यानि त्वया कथ्यन्तां विशेषतः प्राचीन-
२ लोका यथा प्रबुद्धा धीरा विनीता विश्वासे प्रेम्नि सहिष्णुतायाञ्च
३ स्वस्था भवेयुस्तद्वत् प्राचीनयोषितोऽपि यथा धर्म्मयोग्यम् आचारं

तीतं प्रति पौलस्य प्रेरितस्य पत्रं ।

१ प्रथमोऽध्यायः ।

१ मङ्गलाचरणं ५ क्रीत्युपद्वीपे तीतस्य स्थितेरभिप्रायः, उत्तमोपदेशकानां गुण-निर्णयः, दुष्टोपदेशकानां गुणनिर्णयश्च ।

अनन्तजीवनस्याशातो जाताया ईश्वरभक्ते र्योग्यस्य सत्यमतस्य १
यत् तत्त्वज्ञानं यश्च विश्वास ईश्वरस्याभिरुचितलोकै र्लभ्यते तदर्थं
यीशुख्रीष्टस्य प्रेरित ईश्वरस्य दासः पौलोऽहं साधारणविश्वासात् २
मम प्रकृतं धर्म्मपुत्रं तीतं प्रति लिखामि। निष्कपट ईश्वर ३
आदिकालात् पूर्व्वं तत् जीवनं प्रतिज्ञातवान् स्वनिरूपितसमये
च घोषणया तत् प्रकाशितवान्। मम चातुरीश्वरस्याज्ञया च ४
तस्य घोषणं मयि समर्पितम् अभूत्। अस्माकं तात ईश्वरः
परित्राता प्रभु र्यीशुख्रीष्टश्च तुभ्यम् अनुग्रहं दयां शान्तिञ्च
वितरतु ।

त्वं यद् असम्पूर्णकार्य्याणि सम्पूरये र्मदीयादेशाच्च प्रतिनगरं ५
प्राचीनगणान् नियोजयेस्तदर्थमहं त्वां क्रीत्युपद्वीपे स्थापयित्वा
गतवान्। तस्माद् यो नरोऽनिन्दित एकस्या योषितः स्वामी ६
विश्वासिनाम् अपचयस्यावाध्यत्वस्य वा दोषेणालिप्तानाञ्च सन्ता-
नानां जनको भवति स एव योग्यः। यतो हेतोरध्यक्षेणेश्वरस्य ७
गृहाध्यक्षेणेवानिन्दनीयेन भवितव्यं। तेन स्वेच्छाचारिणा क्रोधिना
पानासक्तेन प्रहारकेण लोभिना वा न भवितव्यं किन्त्वतिथिसेवकेन
सल्लोकानुरागिणा विनीतेन न्याय्येन धार्म्मिकेण जितेन्द्रियेण च ८

९ भवितव्यं, उपदेशे च विश्वस्तं वाक्यं तेन धारितव्यं यतः स यद्
यथार्थेनोपदेशेन लोकान् विनेतुं विघ्नकारिणश्च निरुत्तरान् कर्त्तुं
१० शक्नुयात् तद् आवश्यकं। यतस्ते बहवोऽवाध्या अनर्थकवाक्यवादिनः
प्रवञ्चकाश्च सन्ति विशेषतश्छिन्नत्वचां मध्ये केचित् तादृशा लोकाः
११ सन्ति। तेषाञ्च वाग्रोध आवश्यको यतस्ते कुत्सितलाभस्याशयानु-
चितानि वाक्यानि शिक्षयन्तो निखिलपरिवाराणां सुमतिं नाश-
१२ यन्ति। तेषां स्वदेशीय एको भाववादी वचनमिदमुक्तवान्, यथा,

क्रीतीयमानवाः सर्व्वे सदा कापट्यवादिनः।
हिंस्रजन्तुसमानास्तेऽलसाश्चोदरभारतः॥

१३ साक्ष्यमेतत् तथ्यं, अतो हेतोस्त्वं तान् गाढं भर्त्सय ते च यथा
१४ विश्वासे स्वस्था भवेयु र्यिहूदीयोपाख्यानेषु सत्यमतभ्रष्टानां मान-
१५ वानाम् आज्ञासु च मनांसि न निवेशयेयुस्तथादिश। शुचीनां
कृते सर्व्वाण्येव शुचीनि भवन्ति किन्तु कलङ्कितानाम् अविश्वासि-
नाञ्च कृते शुचि किमपि न भवति यतस्तेषां बुद्धयः संवेदाश्च
१६ कलङ्किताः सन्ति। ईश्वरस्य ज्ञानं ते प्रतिजानन्ति किन्तु कर्म्म-
भिस्तद् अनङ्गीकुर्व्वते यतस्ते गर्हिता अनाज्ञाग्राहिणः सर्व्वसत्कर्म्म-
णश्चायोग्याः सन्ति।

२ द्वितीयोऽध्यायः।

१ स्थविरस्थविरायुवजनदासाः कथमुपदेष्टव्या इति निर्णयः ११ सुसंवादाभि-
प्रायश्च।

१ यथार्थस्योपदेशस्य वाक्यानि त्वया कथ्यन्तां विशेषतः प्राचीन-
२ लोका यथा प्रबुद्धा धीरा विनीता विश्वासे प्रेम्नि सहिष्णुतायाञ्च
३ स्वस्था भवेयुस्तद्वत् प्राचीनयोषितोऽपि यथा धर्म्मयोग्यम् आचारं

कुर्य्युः परनिन्दका बहुमद्यपानस्य निघ्नाश्च न भवेयुः किन्तु
सुशिक्षाकारिण्यः सत्य ईश्वरस्य वाक्यं यत् न निन्द्येत तदर्थं युवतीः ४
सुशीलताम् अर्थतः पतिस्नेहम् अपत्यस्नेहं विनीतिं शुचित्वं
गृहिणीत्वं सौजन्यं स्वामिनिघ्नत्वञ्चादिशेयुस्तथा त्वया कथ्यतां। ५
तद्वद् यूनोऽपि विनीतये प्रबोधय। त्वञ्च सर्व्वविषये स्वं सत्कर्म्मणां ६
दृष्टान्तं दर्शय शिक्षायाञ्चाविकृतत्वं धीरतां यथार्थं निर्द्दोषञ्च ७
वाक्यं प्रकाशय तेन विपक्षो युष्माकम् अपवादस्य किमपि छिद्रं ८
न प्राप्य त्रपिष्यते। दासाश्च यत् स्वप्रभूनां निघ्नाः सर्व्वविषये ९
तुष्टिजनकाश्च भवेयुः प्रत्युत्तरं न कुर्य्युः किमपि नापहरेयुः किन्तु
पूर्णां सुविश्वस्ततां प्रकाशयेयुरिति तान् आदिश। यत एवम्प्र- १०
कारेणास्माकं त्रातुरीश्वरस्य शिक्षा सर्व्वविषये तै र्भूषितव्या।

यतो हेतोस्त्राणजनक ईश्वरस्यानुग्रहः सर्व्वान् मानवान् ११
प्रत्युदितवान् स चास्मान् इदं शिक्षयति यद् वयम् अधर्म्मं १२
सांसारिकाभिलाषांश्चानङ्गीकृत्य विनीतत्वेन न्यायेनेश्वरभक्त्या चेह-
लोके आयु र्यापयामः, परमसुखस्याशाम् अर्थतोऽस्माकं महत १३
ईश्वरस्य त्राणकर्त्तु र्यीशुख्रीष्टस्य प्रभावस्योदयं प्रतीक्षामहे। यतः १४
स यथास्मान् सर्व्वस्माद् अधर्म्मात् मोचयित्वा निजाधिकारस्वरूपं
सत्कर्म्मसूत्सुकम् एकं प्रजावर्गं पावयेत् तदर्थम् अस्माकं कृते आत्म-
दानं कृतवान्। एतानि भाषस्व पूर्णसामर्थ्येन चादिश प्रबोधय १५
च, कोऽपि त्वां नावमन्यतां।

३ तृतीयोऽध्यायः।

१ कथम् उपदेष्टव्यम् इत्यस्य निर्णयः १२ तीतं प्रति पौलस्य विनयः पत्रसमाप्तिश्च।

ते यथा देशाधिपानां शासकानाञ्च निघ्ना आज्ञाग्राहिणश्च १
सर्व्वस्मै सत्कर्म्मणे सुसज्जाश्च भवेयुः कमपि न निन्देयु र्निर्व्विरो- २

धिनः क्षान्ताश्च भवेयुः सर्व्वान् प्रति च पूर्णं मृदुत्वं प्रकाशयेयुश्चेति
२ तान् आदिश । यतः पूर्व्वं वयमपि निर्ब्बोधा अनाज्ञाग्राहिणो भ्रान्ता
नानाभिलाषाणां सुखानाञ्च दासेया दुष्टत्वेर्ष्याचारिणो घृणिताः
४ परस्परं द्वेषिणश्चाभवामः । किन्त्वस्माकं त्रातुरीश्वरस्य या दया
मर्त्त्यानां प्रति च या प्रीतिस्तस्याः प्रादुर्भावे जाते वयम् आत्मकृतेभ्यो
५ धर्म्मकर्म्मभ्यस्तन्नहि किन्तु तस्य कृपातः पुनर्जन्मरूपेण प्रक्षालनेन
६ पवित्रस्यात्मनो नूतनीकरणेन च तस्मात् परित्राणं प्राप्ताः स चास्माकं
७ त्रात्रा यीशुख्रीष्टेनास्मदुपरि तम् आत्मानं प्रचुरत्वेन वृष्टवान् । इत्थं
वयं तस्यानुग्रहेण धार्म्मिकीभूय प्रत्याशयानन्तजीवनस्याधिकारिणो
८ जाताः । वाक्यमेतद् विश्वसनीयम् अतो हेतोरीश्वरे ये विश्वसि-
तवन्तस्ते यथा सत्कर्म्माण्यनुतिष्ठेयुस्तथा तान् दृढम् आज्ञापयेति
ममाभिमतं । तान्येवोत्तमानि मानवेभ्यः फलदानि च भवन्ति ।
९ मूढेभ्यः प्रश्नवंशावलिविवादेभ्यो व्यवस्थाया वितण्डाभ्यश्च नि-
१० वर्त्तस्व यतस्ता निष्फला अनर्थकाश्च भवन्ति । यो जनो बि-
११ भित्सुस्तम् एकवारं द्विर्व्वा प्रबोध्य दूरीकुरु, यतस्तादृशो जनो
विपथगामी पापिष्ठ आत्मदोषकश्च भवतीति त्वया ज्ञायतां ।
१२ यदाहम् आर्त्तिमां तुखिकं वा तव समीपं प्रेषयिष्यामि तदा
त्वं नीकपलौ मम समीपम् आगन्तुं यतस्व यतस्तत्रैवाहं शीतकालं
१३ यापयितुं मतिम् अकार्षं । व्यवस्थापकः सीना आपल्लुश्चैतयोः
कस्याप्यभावो यन्न भवेत् तदर्थं तौ यत्नेन त्वया विसृज्येतां ।
१४ अपरम् अस्मदीयलोका यन्निष्फला न भवेयुस्तदर्थं प्रयोजनीयोप-
१५ काराय सत्कर्म्माण्यनुष्ठातुं शिक्षन्तां । मम सङ्गिनः सर्व्वे त्वां
नमस्कुर्व्वते । ये विश्वासाद् अस्मासु प्रीयन्ते तान् नमस्कुरु; सर्व्वेषु
युष्मास्वनुग्रहो भूयात् । आमेन् ।

इब्रिणः प्रति पौलस्य प्रेरितस्य पत्रं।

१ प्रथमोऽध्यायः।

ईश्वरस्य समीपाद् अस्मान् प्रति ख्रीष्टस्यागमनं गुणेन कर्म्मणा च दिव्यदूतेभ्यस्तस्य श्रेष्ठत्वञ्च।

पुरा य ईश्वरो भाववादिभिः पितृलोकेभ्यो नानासमये १
नानाप्रकारं कथितवान् स एतस्मिन् शेषकाले निजपुत्रेणास्मभ्यं २
कथितवान्। स तं पुत्रं सर्व्वाधिकारिणं कृतवान् तेनैव च सर्व्व-
जगन्ति सृष्टवान्। स पुत्रस्तस्य प्रभावस्य प्रतिबिम्बस्तस्य तत्त्वस्य ३
मूर्त्तिश्चास्ति स्वीयशक्तिवाक्येन सर्व्वं धत्ते च स्वप्राणैरस्माकं पाप-
मार्ज्जनं कृत्वा ऊर्द्ध्वस्थाने महामहिम्नो दक्षिणपार्श्वे समुपविष्टवान्।
दिव्यदूतगणाद् यथा स विशिष्टनाम्नोऽधिकारी जातस्तथा तेभ्यो- ४
ऽपि श्रेष्ठो जातः। यतो दूतानां मध्ये कदाचिदीश्वरेणेदं क ५
उक्तः? यथा,

मदीयतनयोऽसि त्वम् अद्यैव जनितो मया।

पुनश्च 'अहं तस्य पिता भविष्यामि स च मम पुत्रो भविष्यति'।
अपरं जगति स्वकीयाद्वितीयपुत्रस्य पुनरानयनकाले तेनोक्तं, यथा, ६

ईशस्य सकलै दूतैरेष एव प्रणम्यतां।

दूतान् अधि तेनेदम् उक्तं, यथा, ७

स करोति निजान् दूतान् गन्धवाहस्वरूपकान्।
वह्निशिखास्वरूपांश्च करोति निजसेवकान्॥

किन्तु पुत्रमुद्दिश्य तेनोक्तं, यथा, ८

हे ईश्वर सदा स्थायि तव सिंहासनं भवेत् ।
याथार्थ्यस्य भवेद्दण्डो राजदण्डस्त्वदीयकः ।
९ पुण्ये प्रेम करोषि त्वं किञ्चाधर्म्मम् ऋतीयसे ।
तस्माद् य ईश ईशस्ते स ते मित्रगणादपि ।
अधिकाह्लादतैलेन सेचनं कृतवान् तव ॥

१० पुनश्च, यथा,

हे प्रभो पृथिवीमूलम् आदौ संस्थापितं त्वया ।
तथा त्वदीयहस्तेन कृतं गगनमण्डलं ।
११ इमे विनंक्ष्यतस्त्वन्तु नित्यमेवावतिष्ठसे ।
इदन्तु सकलं विश्वं संजरिष्यति वस्त्रवत् ।
१२ सङ्कोचितं त्वया तत्तु वस्त्रवत् परिवर्त्स्यते ।
त्वन्तु नित्यं स एवासी र्निरन्तास्तव वत्सराः ॥

१३ अपरं दूतानां मध्ये कः कदाचिदीश्वरेणेदमुक्तः? यथा,

तवारीन् पादपीठं ते यावन्नहि करोम्यहं ।
मम दक्षिणदिग्भागे तावत् त्वं समुपाविश ॥

१४ ये परित्राणस्याधिकारिणो भविष्यन्ति तेषां परिचर्य्यार्थं प्रेष्यमाणाः सेवनकारिण आत्मानः किं ते सर्व्वे दूता नहि?

---

२ द्वितीयोऽध्यायः ।

मर्त्त्यानां त्राणार्थं ख्रीष्टोऽवतीर्ण इति होतोस्तस्य दुःखभोगस्यावश्यकता ।

१ अतो वयं यद् भ्रमस्रोतसा नापनीयामहे तदर्थमस्माभि
२ र्यद्यद् अश्रावि तस्मिन् मनांसि निधातव्यानि। यतो हेतो
र्दूतैः कथितं वाक्यं यद्यमोघम् अभवद् यदि च तल्लङ्घनकारिणे
३ तस्याग्राहकाय च सर्व्वस्मै समुचितं दण्डम् अदीयत, तर्ह्यस्मा-

भिस्तादृशं महापरित्राणम् अवज्ञाय कथं रक्षा प्राप्स्यते, यत्
प्रथमतः प्रभुना प्रोक्तं ततोऽस्मान् यावत् तस्य श्रोतृभिः स्थिरी-
कृतं, अपरं लक्षणैरद्भुतकर्म्मभि र्विविधशक्तिप्रकाशेन निजेच्छातः ४
पवित्रस्यात्मनो विभागेन च यद् ईश्वरेण प्रमाणीकृतम् अभूत्।
वयं तु यस्य भाविराज्यस्य कथां कथयामः, तत् तेन दिव्य- ५
दूतानाम् अधीनीकृतमिति नहि। किन्तु कुत्रापि कश्चित् प्रमाणम् ६
ईदृशं दत्तवान्, यथा,

किं वस्तु मानवो यत् स नित्यं संस्मर्य्यते त्वया।
किं वा मानवसन्तानो यत् स आलोच्यते त्वया।
दिव्यदूतगणेभ्यः स किञ्चिन् न्यूनः कृतस्त्वया। ७
तेजोगौरवरूपेण किरीटेन विभूषितः।
सृष्टं यत् ते कराभ्यां स तत्प्रभुत्वे नियोजितः।
चरणाधश्च तस्यैव त्वया सर्व्वं वशीकृतं॥ ८

तेन सर्व्वं यस्य वशीकृतं तस्यावशीभूतं किमपि नावशेषितं किन्त्व-
धुनापि वयं सर्व्वाणि तस्य वशीभूतानि न पश्यामः। तथापि ९
दिव्यदूतगणेभ्यो यः किञ्चिन् न्यूनीकृतोऽभवत् तं यीशुं मृत्यु-
भोगहेतोस्तेजोगौरवरूपेण किरीटेन विभूषितं पश्यामः, यत
ईश्वरस्यानुग्रहात् स सर्व्वेषां कृते मृत्युम् अस्वदत। अपरञ्च १०
यस्मै येन च कृत्स्नं वस्तु सृष्टं विद्यते बहुसन्तानानां विभवा-
यानयनकाले तेषां परित्राणाग्रसरस्य दुःखभोगेन सिद्धीकरणमपि
तस्योपयुक्तम् अभवत्। यतः पावकः पूयमानाश्च सर्व्वे एकस्मा- ११
देवोत्पन्ना भवन्ति, इति हेतोः स तान् भ्रातॄन् वदितुं न
लज्जते। तेन स उक्तवान्, यथा, १२

द्योतयिष्यामि ते नाम भ्रातॄणां मध्यतो मम।

परन्तु समिते मध्ये करिष्ये ते प्रशंसनं ॥
१३ पुनरपि, यथा, तस्मिन् विश्वस्य स्थाताहं——————
पुनरपि, यथा,
पश्याहम् अपत्यानि च दत्तानि मह्यम् ईश्वरात् ।
१४ तेषाम् अपत्यानां रुधिरपललविशिष्टत्वात् सोऽपि तद्वत् तद्वि-
शिष्टोऽभूत् तस्याभिप्रायोऽयं यत् स मृत्युबलाधिकारिणं शैतानं
१५ मृत्युना बलहीनं कुर्य्यात् ये च मृत्युभयाद् यावज्जीवनं दास-
१६ त्वस्य निघ्ना आसन् तान् उद्धारयेत् । स दूतानाम् उपकारी न
१७ भवति किन्त्विब्राहीमस्य वंशस्यैवोपकारी भवति । अतो हेतोः
स यथा कृपावान् प्रजानां पापशोधनार्थम् ईश्वरोद्देश्यविषये
विश्वास्यो महायाजको भवेत् तदर्थं सर्व्वविषये स्वभ्रातृणां सदृशी-
१८ भवनं तस्योचितम् आसीत् । यतः स स्वयं परीक्षां गत्वा यं
दुःखभोगम् अवगतस्तेन परीक्षाक्रान्तान् उपकर्त्तुं शक्नोति ।

---

३ तृतीयोऽध्यायः ।

१ मोशेस् ख्रीष्टस्य श्रेष्ठत्वं ७ इस्रायेलीयलोकदण्डात् तस्मिन्नविश्वासिलोकानाम् अधिकदण्डनीयत्वञ्च ।

१ हे स्वर्गीयस्याह्वानस्य सहभागिनः पवित्रभ्रातरः, अस्माकं
२ धर्म्मप्रतिज्ञाया दूतो महायाजकश्च यो यीशुस्तम् आलोचध्वं । मोशि
र्यद्वत् तस्य सर्व्वपरिवारमध्ये विश्वास्य आसीत्, तद्वद् अयमपि
३ स्वनियोजकस्य समीपे विश्वास्यो भवति । परिवाराच्च यद्वत् तत्-
स्थापयितुरधिकं गौरवं भवति तद्वत् मोशेरयं बहुतरगौरवस्य
४ योग्यो भवति । एकैकस्य निवेशनस्य परिजनानां स्थापयिता कश्चिद्
५ विद्यते यश्च सर्व्वस्थापयिता स ईश्वर एव । मोशिश्च वक्ष्यमाणानां

साक्षी भृत्य इव तस्य सर्व्वपरिजनमध्ये विश्वास्योऽभवत् किन्तु
ख्रीष्टस्तस्य परिजनानामध्यक्ष इव। वयं तु यदि विश्वासस्योत्साहं ६
श्लाघनञ्च शेषं यावद् धारयामस्तर्हि तस्य परिजना भवामः।

अतो हेतोः पवित्रेणात्मना यद्वत् कथितं, तद्वत्, ७

अद्य यूयं कथां तस्य यदि संश्रोतुमिच्छथ।
तर्हि पुरा परीक्षाया दिने प्रान्तरमध्यतः। ८
मदाज्ञानिग्रहस्थाने युष्माभिस्तु कृतं यथा।
तथा मा कुरुतेदानीं कठिनानि मनांसि वः। ९
युष्माकं पितरस्तत्र मत्परीक्षाम् अकुर्व्वत।
कुर्व्वद्भि र्मेऽनुसन्धानं तैरदृश्यन्त मत्क्रियाः।
चत्वारिंशत्समा यावत् क्रुद्धाहन्तु तदन्वये। १०
अवादिषम् इमे लोका भ्रान्तान्तःकरणाः सदा।
मामकीनानि वर्त्मानि परिजानन्ति नो इमे।
इति हेतोरहं कोपात् शपथं कृतवान् इमं। ११
प्रवेक्ष्यते जनैरेतै र्न विश्रामस्थलं मम॥

हे भ्रातरः सावधाना भवत, अमरेश्वरात् निवर्त्तको योऽवि- १२
श्वासस्तद्युक्तं दुष्टान्तःकरणं युष्माकं कस्यापि न भवतु। किन्तु १३
यावद् अद्यनामा समयो विद्यते तावद् युष्मन्मध्ये कोऽपि पापस्य
वञ्चनया यत् कठोरीकृतो न भवेत् तदर्थं प्रतिदिनं परस्परम्
उपदिशत। यतो वयं ख्रीष्टस्यांशिनो जाताः किन्तु प्रथमविश्वा- १४
सस्य दृढत्वम् अस्माभिः शेषं यावद् अमोघं धारयितव्यं। अद्य १५
यूयं कथां तस्य यदि संश्रोतुमिच्छथ, तर्ह्याज्ञालङ्घनस्थाने युष्मा-
भिस्तु कृतं यथा, तथा मा कुरुतेदानीं कठिनानि मनांसि व इति १६
तेन यदुक्तं, तदनुसाराद् ये श्रुत्वा तस्य कथां न गृहीतवन्तस्ते

१७ के? किं मोशिना मिसरदेशाद् आगताः सर्व्वे लोका नहि?
केभ्यो वा स चत्वारिंशद्वर्षाणि यावद् अक्रुध्यत्? पापं कुर्व्वतां
१८ येषां कुणपाः प्रान्तरे ऽपतन् किं तेभ्यो नहि? प्रवेक्ष्यते जनैरेतै
र्न विश्रामस्थलं ममेति शपथः केषां विरुद्धं तेनाकारि? किम्
१९ अविश्वासिनां विरुद्धं नहि? अतस्ते तत् स्थानं प्रवेष्टुम् अवि-
श्वासात् नाशक्नुवन् इति वयं वीक्षामहे ।

---

४ चतुर्थोऽध्यायः ।

१ विश्वासेन विश्रामप्राप्तिः १२ ईश्वरस्य वादस्य शक्तिः १४ ख्रीष्टेनेश्वरसमीप-
गमनञ्च ।

१ अपरं तद्विश्रामप्राप्तेः प्रतिज्ञा यदि तिष्ठति तर्ह्यस्माकं कश्चित्
चेत् तस्याः फलेन वञ्चितो भवेत् वयम् एतस्माद् बिभीमः ।
२ यतो ऽस्माकं समीपे यद्वत् तद्वत् तेषां समीपेऽपि सुसंवादः
प्रचारितो ऽभवत् किन्तु तैः श्रुतं वाक्यं तान् प्रति निष्फलम्
३ अभवत्, यतस्ते श्रोतारो विश्वासेन सार्द्धं तन्नामिश्रयन् । तद्
विश्रामस्थानं विश्वासिभिरस्माभिः प्रविश्यते यतस्तेनोक्तं, अहं
कोपात् शपथं कृतवान् इमं, प्रवेक्ष्यते जनैरेतै र्न विश्रामस्थलं
मम । किन्तु तस्य कर्म्माणि जगतः सृष्टिकालात् समाप्तानि
४ सन्ति । यतः कस्मिंश्चित् स्थाने सप्तमं दिनमधि तेनेदम् उक्तं,
यथा, ईश्वरः सप्तमे दिने स्वकृतेभ्यः सर्व्वकर्म्मभ्यो विशश्राम ।
५ किन्त्वेतस्मिन् स्थाने पुनस्तेनोच्यते, यथा, प्रवेक्ष्यते जनैरेतै र्न
६ विश्रामस्थलं मम । फलतस्तत् स्थानं कैश्चित् प्रवेष्टव्यं किन्तु ये
७ पुरा सुसंवादं श्रुतवन्तस्तैरविश्वासात् तन्न प्रविष्टम्, इति हेतोः
स पुनरद्यनामकं दिनं निरूप्य दीर्घकाले गतेऽपि पूर्व्वोक्तां वाचं

दायूदा कथयति, यथा, अद्य यूयं कथां तस्य यदि संश्रोतु-
मिच्छथ, तर्हि मा कुरुतेदानीं कठिनानि मनांसि वः। अपरं ८
यिहोशूयो यदि तान् व्यश्रामयिष्यत् तर्हि ततः परम् अपरस्य
दिनस्य वाग् ईश्वरेण नाकथयिष्यत। अत ईश्वरस्य प्रजाभिः ९
कर्त्तव्य एको विश्रामस्तिष्ठति। अपरम् ईश्वरो यद्वत् स्वकृत- १०
कर्म्मभ्यो विशश्राम तद्वत् तस्य विश्रामस्थानं प्रविष्टो जनोऽपि
स्वकृतकर्म्मभ्यो विश्राम्यति। अतो वयं तद् विश्रामस्थानं प्रवेष्टुं ११
यतामहै, तदविश्वासोदाहरणेन कोऽपि न पततु।

ईश्वरस्य वादोऽमरः प्रभावविशिष्टश्च सर्व्वस्माद् द्विधारखड्गादपि १२
तीक्ष्णः, अपरं प्राणात्मनो र्ग्रन्थिमज्जयोश्च परिभेदाय विच्छेदकारी
मनसश्च सङ्कल्पानाम् अभिप्रेतानाञ्च विचारकः। अपरं यस्य १३
समीपे स्वीया स्वीया कथास्माभिः कथयितव्या तस्यागोचरः कोऽपि
प्राणी नास्ति तस्य दृष्टौ सर्व्वमेवानावृतं प्रकाशितञ्चास्ते।

अपरं य उच्चतमं स्वर्गं प्रविष्ट एतादृश एको व्यक्तिरर्थत १४
ईश्वरस्य पुत्रो यीशुरस्माकं महायाजकोऽस्ति, अतो हेतो र्वयं
धर्म्मप्रतिज्ञां दृढम् आलम्बामहै। अस्माकं यो महायाजकोऽस्ति १५
सोऽस्माकं दुःखै र्दुःखितो भवितुम् अशक्तो नहि किन्तु पापं
विना सर्व्वविषये वयमिव परीक्षितः। अतएव कृपां ग्रहीतुं प्रयो- १६
जनीयोपकारार्थम् अनुग्रहं प्राप्तुञ्च वयम् उत्साहेनानुग्रहसिंहा-
सनस्य समीपं यामः।

---

५ पञ्चमोऽध्यायः।

१ ख्रीष्टस्य महायाजकत्वं ४ परमेश्वरेण तस्य महायाजकत्वपदे नियुक्तत्वं ११ इब्रि-
लोकानाम् अज्ञानत्वकारणाद् भर्त्सनञ्च।

यः कश्चित् महायाजको भवति स मानवानां मध्यात् १

नीतः सन् मानवानां कृत ईश्वरोद्देश्यविषयेऽर्थत उपहाराणां
२ पापार्थकबलीनाञ्च दान नियुज्यते। स चाज्ञानां भ्रान्तानाञ्च
लोकानां दुःखेन दुःखी भवितुं शक्नोति, यतो हेतोः स
३ स्वयमपि दौर्ब्बल्यवेष्टितो भवति। एतस्मात् कारणाच्च यद्वत्
लोकानां कृते तद्वद् आत्मकृतेऽपि पापार्थकबलिदानं तेन
कर्त्तव्यं ।
४ स चोच्चपदः स्वेच्छातः केनापि न गृह्यते किन्तु हारोण
५ इव य ईश्वरेणाहूयते तेनैव गृह्यते। एवम्प्रकारेण ख्रीष्टोऽपि
महायाजकत्वं ग्रहीतुं स्वीयगौरवं स्वयं न कृतवान्, किन्तु मदी-
यतनयोऽसि त्वम् अद्यैव जनितो मयेति वाचं यस्तं भाषितवान्
६ स एव तस्य गौरवं कृतवान्। तद्वद् अन्यगीतेऽपीदमुक्तं, त्वं मल्की-
७ षेदकः श्रेण्यां याजकोऽसि सदातनः। स च देहवासकाले बहु-
क्रन्दनेनाश्रुपातेन च मृत्युत उद्धरणे समर्थस्य पितुः समीपे पुनः
पुनर्विनतिं प्रार्थनाञ्च कृत्वा तत्फलरूपिणीं शङ्कातो रक्षां प्राप्य
८ च यद्यपि पुत्रोऽभवत् तथापि यैरक्लिश्यत तैराज्ञाग्रहणम् अशि-
९ क्षत। इत्थं सिद्धीभूय निजाज्ञाग्राहिणां सर्व्वेषाम् अनन्तपरि-
१० त्राणस्य कारणस्वरूपो ऽभवत्। तस्मात् स मल्कीषेदकः श्रेणी-
भुक्तो महायाजक ईश्वरेणाख्यातः।
११ तमध्यस्माकं बहुकथाः कथयितव्याः किन्तु ताः स्तब्धकर्णै र्युष्माभि
१२ र्दुर्गम्याः। यतो यूयं यद्यपि समयस्य दीर्घत्वात् शिक्षका भवि-
तुम् अशक्ष्यत तथापीश्वरस्य वाक्यानां या प्रथमा वर्णमाला तामधि
शिक्षाप्राप्तिः युष्माकं पुनरावश्यका भवति, तथा कठिनद्रव्ये नहि किन्तु
१३ दुग्धे युष्माकं प्रयोजनम् आस्ते। यो दुग्धपायी स शिशुरेवेतिकार-
१४ णात् धर्म्मवाक्ये तत्परो नास्ति। किन्तु सदसद्विचारे येषां

चेतांसि व्यवहारेण शिक्षितानि तादृशानां सिद्धलोकानां कठोर-
द्रव्येषु प्रयोजनमस्ति।

---

६ षष्ठोऽध्यायः।

१ धर्म्माधिकाभ्यासकरणार्थं विनयः ४ धर्म्मत्यागनिषेधः ९ धर्म्मे स्थिरीभवितुं विनयः, धर्म्मफलं दातुम् ईश्वरस्याङ्गीकारः शपथश्च।

वयं मृतिजनककर्म्मभ्यो मनःपरावर्त्तनम् ईश्वरे विश्वासो १
स्नापनशिक्षणं हस्तार्पणं मृतलोकानाम् उत्थानम् अनन्तकाल- २
स्थायिविचाराज्ञा चैतैः पुनर्भित्तिमूलं न स्थापयन्तः ख्रीष्टविषयकं
प्रथमोपदेशं पश्चात्कृत्य सिद्धिं यावद् अग्रसरा भवाम। ईश्वर- ३
स्यानुमत्या च तद् अस्माभिः कारिष्यते।

य एककृत्वो दीप्तिमया भूत्वा स्वर्गीयवररसम् आस्वदितवन्तः ४
पवित्रस्यात्मनोऽंशिनो जाता ईश्वरस्य सुवाक्यं भाविकालस्य शक्ति- ५
ञ्चास्वदितवन्तश्च ते भ्रष्ट्वा यदि स्वमनोभिरीश्वरस्य पुत्रं पुनः ६
क्रुशे घ्नन्ति लज्जास्पदं कुर्व्वते च तर्हि मनःपरावर्त्तनाय पुनस्तान्
नवीनीकर्त्तुं कोऽपि न शक्नोति। यतो या भूमिः स्वोपरि भूयः ७
पतितं वृष्टिं पिवती तत्फलाधिकारिणां निमित्तम् इष्टानि शाका-
दीन्युत्पादयति सा ईश्वराद् आशिषं प्राप्ता। किन्तु या भूमि ८
र्गोक्षुरकण्टकवृक्षान् उत्पादयति सा न ग्राह्या शापार्हा च शेषे
तस्या दाहो भविष्यति।

हे प्रियतमाः, यद्यपि वयम् एतादृशं वाक्यं भाषामहे ९
तथापि यूयं तत उत्कृष्टाः परित्राणपथस्य पथिकाश्चाध्व इति
विश्वसामः। यतो युष्माभिः पवित्रलोकानां य उपकारोऽकारि १०
क्रियते च तेनेश्वरस्य नाम्ने प्रकाशितं प्रेम श्रमञ्च विस्मर्त्तुम्

११ ईश्वरोऽन्यायकारी न भवति। अपरं युष्माकम् एकैको जनो
यत् प्रत्याशापूरणार्थं शेषं यावत् तमेव यत्नं प्रकाशयेदित्यहम्
१२ इच्छामि। अतः शिथिला न भवत किन्तु ये विश्वासेन
सहिष्णुतया च प्रतिज्ञानां फलाधिकारिणो जातास्तेषाम् अनु-
१३ गामिनो भवत। ईश्वरो यदा अब्राहामाय प्रत्यजानात् तदा
श्रेष्ठस्य कस्याप्यपरस्य नाम्ना शपथं कर्त्तुं नाशक्नोत्, अतो
१४ हेतोः स्वनाम्ना शपथं कृत्वा तेनोक्तं यथा, सत्यम् अहं त्वाम्
१५ आशिषं गदिष्यामि तवान्वयं वर्द्धयिष्यामि च। अनेन प्रकारेण
१६ स सहिष्णुतां विधाय तस्याः प्रत्याशायाः फलं लब्धवान्। अथ
मानवाः श्रेष्ठस्य कस्यचित् नाम्ना शपन्ते, शपथश्च प्रमाणार्थं तेषां
१७ सर्व्वविवादान्तको भवति। इत्यस्मिन् ईश्वरः प्रतिज्ञायाः फलाधि-
कारिणः स्वीयमन्त्रणाया अमोघतां बाहुल्यतो दर्शयितुमिच्छन्
१८ शपथेन स्वप्रतिज्ञां स्थिरीकृतवान्। अतएव यस्मिन् अनृतकथनम्
ईश्वरस्य न साध्यं तादृशेनाचलेन विषयद्वयेन सम्मुखस्थरक्षास्थलस्य
१९ प्राप्तये पलायितानाम् अस्माकं सुदृढा सान्त्वना जायते। सा
प्रत्याशास्माकं मनोनौकाया अचलो लङ्गरो भूत्वा विच्छेदक-
२० वस्त्रस्याभ्यन्तरं प्रविष्टा। तत्रैवास्माकम् अग्रसरो यीशुः प्रविश्य
मल्कीषेदकः श्रेण्यां नित्यस्थायी याजकोऽभवत्।

---

७ सप्तमोऽध्यायः।

१ मल्कीषेदक इव ख्रीष्टस्य महायाजकत्वं ११ हारोणादिसर्व्वयाजकेभ्यस्तस्य श्रेष्ठत्वञ्च।

१ शालमस्य राजा सर्व्वोपरिस्थस्येश्वरस्य याजकश्च सन् यो नृप-
तीनां मारणात् प्रत्यागतम् अब्राहामं साक्षात्कृत्याशिषं गदित-

वान्, यस्मै चाब्राहामः सर्व्वद्रव्याणां दशमांशं दत्तवान् स मल्की- २
षेदक् स्वनाम्नोऽर्थेन प्रथमतो धर्म्मराजः पश्चात् शालमस्य राजा-
र्थतः शान्तिराजो भवति। अपरं तस्य पिता माता वंशस्य ३
निर्णय आयुष आरम्भो जीवनस्य शेषश्चैतेषाम् अभावो भवति,
इत्थं स ईश्वरपुत्रस्य सदृशीकृतः, स त्वनन्तकालं यावद् याजक-
स्तिष्ठति। अतएवास्माकं पूर्व्वपुरुष अब्राहामो यस्मै लुठितद्रव्याणां ४
दशमांशं दत्तवान् स कीदृक् महान् तद् आलोचयत। याज- ५
कत्वप्राप्ता लेवेः सन्ताना व्यवस्थानुसारेण लोकेभ्योऽर्थत अब्राहा-
मात् जातेभ्यः स्वीयभ्रातृभ्यो दशमांशग्रहणस्यादेशं लब्धवन्तः।
किन्त्वसौ यद्यपि तेषां वंशात् नोत्पन्नस्तथाप्यब्राहामाद् दशमांशं ६
गृहीतवान् प्रतिज्ञानाम् अधिकारिणम् आशिषं गदितवांश्च। अपरं ७
यः श्रेयान् स क्षुद्रतरायाशिषं ददातीत्यत्र कोऽपि सन्देहो
नास्ति। अपरम् इदानीं ये दशमांशं गृह्लन्ति ते मृत्योरधीना ८
मानवाः किन्तु तदानीं यो गृहीतवान् स जीवतीतिप्रमाणप्राप्तः।
अपरं दशमांशग्राही लेविरप्यब्राहामद्वारा दशमांशं दत्तवान् एत- ९
दपि कथयितुं शक्यते। यतो यदा मल्कीषेदक् तस्य पितरं १०
साक्षात् कृतवान् तदानीं स लेविः पितुरुरस्यासीत्।

अपरं यस्य सम्बन्धे लोका व्यवस्थां लब्धवन्तस्तेन लेवीययाजक- ११
वर्गेण यदि सिद्धिः समभविष्यत् तर्हि हारोणस्य श्रेण्या मध्याद्
याजकं न निरूप्येश्वरेण मल्कीषेदकः श्रेण्या मध्याद् अपरस्यैकस्य
याजकस्योत्थापनं कुत आवश्यकम् अभविष्यत्? यतो याजक- १२
वर्गस्य विनिमयेन सुतरां व्यवस्थाया अपि विनिमयो जायते।
अपरञ्च तद् वाक्यं यस्योद्देश्यं सोऽपरेण वंशेन संयुक्तोऽस्ति तस्य १३
वंशस्य च कोऽपि कदापि वेद्याः कर्म्म न कृतवान्। वस्तुतस्तु यं १४

वंशमधि मोशि याजकत्वस्यैकां कथामपि न कथितवान् तस्मिन्
१५ यिहूदावंशेऽस्माकं प्रभु र्जन्म गृहीतवान् इति सुस्पष्टं। तस्य स्पष्ट-
तरम् अपरं प्रमाणमिदं यत् मल्कीषेदकः सादृश्यवतापरेण तादृ-
१६ शेन याजकेनोदेतव्यं, यस्य निरूपणं शरीरसम्बन्धीयविधियुक्तया
१७ व्यवस्थया न भवति किन्त्वक्षयजीवनयुक्तया शक्त्या भवति। यत
ईश्वर इदं साक्ष्यं दत्तवान्, यथा, त्वं मल्कीषेदकः श्रेण्यां याजको
१८ ऽसि सदातनः। अनेनाग्रवर्त्तिनो विधे र्दुर्ब्बलताया निष्फल-
तायाश्च हेतोरर्थतो व्यवस्थया किमपि सिद्धं न जातमितिहेतो-
१९ स्तस्य लोपो भवति। यया च वयम् ईश्वरस्य निकटवर्त्तिनो
भवाम एतादृशी श्रेष्ठप्रत्याशा संस्थाप्यते।
२० अपरं यीशुः शपथं विना न नियुक्तस्तस्मादपि स श्रेष्ठनि-
२१ यमस्य मध्यस्थो जातः। यतस्ते शपथं विना याजका जाताः
२२ किन्त्वसौ शपथेन जातः यतः स इदमुक्तः, यथा,

परमेश इदं शेपे न च तस्मान्निवर्त्स्यते।

त्वं मल्कीषेदकः श्रेण्यां याजकोऽसि सदातनः।

२३ ते च बहवो याजका अभवन् यतस्ते मृत्युना नित्यस्थायित्वात्
२४ निवारिताः, किन्त्वसावनन्तकालं यावत् तिष्ठति तस्मात् तस्य
२५ याजकत्वं न परिवर्त्तनीयं। ततो हेतो र्ये मानवास्तेनेश्वरस्य
सन्निधिं गच्छन्ति तान् स शेषं यावत् परित्रातुं शक्नोति यत-
२६ स्तेषां कृते प्रार्थनां कर्त्तुं स सततं जीवति। अपरम् अस्माकं
तादृशमहायाजकस्य प्रयोजनमासीद् यः पवित्रो ऽहिंसको नि-
२७ ष्कलङ्कः पापिभ्यो भिन्नः स्वर्गादप्युच्चीकृतश्च स्यात्। अपरं महा-
याजकानां यथा तथा तस्य प्रतिदिनं प्रथमं स्वपापानां कृते ततः
परं लोकानां पापानां कृते बलिदानस्य प्रयोजनं नास्ति यत

आत्मबलिदानं कृत्वा तद् एककृत्वस्तेन सम्पादितं । यतो व्यव- २८
स्थया ये महायाजका निरूप्यन्ते ते दौर्ब्बल्ययुक्ता मानवाः किन्तु
व्यवस्थातः परं शपथयुक्तेन वाक्येन यो महायाजको निरूपितः
सोऽनन्तकालार्थं सिद्धः पुत्र एव ।

---

८ अष्टमोऽध्यायः ।

ख्रीष्टस्य महायाजकत्वपदेन हारोणस्य महायाजकत्वपदस्य लोपः सुसंवादस्य नवीननियमेन पुरातननियमस्य लोपश्च ।

कथ्यमानानां वाक्यानां सारोऽयम् अस्माकम् एतादृश एको १
महायाजकोऽस्ति यः स्वर्गे महामहिम्नः सिंहासनस्य दक्षिणपार्श्वे
समुपविष्टवान् यच्च दूष्यं न मनुजैः किन्त्वीश्वरेण स्थापितं तस्य २
सत्यदूष्यस्य पवित्रवस्तूनाञ्च सेवकः स भवति। यत एकैको महा- ३
याजको नैवेद्यानां बलीनाञ्च दाने नियुज्यते, अतो हेतोरेत-
स्यापि किञ्चिद् उत्सर्जनीयं विद्यत इत्यावश्यकं । किञ्च स यदि ४
पृथिव्याम् अस्थास्यत् तर्हि याजको नाभविष्यत्, यतो ये व्यव-
स्थानुसारात् नैवेद्यानि ददत्येतादृशा याजका विद्यन्ते । ते तु ५
स्वर्गीयवस्तूनां दृष्टान्तेन छायया च सेवामनुतिष्ठन्ति यतो मोशो
दूष्यं साधयितुम् उद्यते सतीश्वरस्तदेव तमादिष्टवान् फलतः स
तमुक्तवान्, यथा, अवधेहि गिरौ त्वां यद्यन्निदर्शनं दर्शितं तद्वत्
सर्व्वाणि त्वया क्रियन्तां। किन्त्विदानीम् असौ तस्मात् श्रेष्ठं सेवक- ६
पदं प्राप्तवान् यतः स श्रेष्ठप्रतिज्ञाभिः स्थापितस्य श्रेष्ठनियमस्य
मध्यस्थोऽभवत्। स प्रथमो नियमो यदि निर्द्दोषोऽभविष्यत ७
तर्हि द्वितीयस्य नियमस्य किमपि प्रयोजनं नाभविष्यत् । किन्तु ८
स दोषमारोपयन् तेभ्यः कथयति, यथा, 'परमेश्वर इदं भाषते

पश्य यस्मिन् समयेऽहम् इस्रायेलवंशेन यिहूदावंशेन च सार्द्धम
एकं नवीनं नियमं स्थिरीकरिष्याम्येतादृशः समय आयाति।
९ परमेश्वरोऽपरमपि कथयति तेषां पूर्व्वपुरुषाणां मिसरदेशाद्
आनयनार्थं यस्मिन् दिनेऽहं तेषां करं धृत्वा तैः सह नियमं
स्थिरीकृतवान् तद्दिनस्य नियमानुसारेण नहि यतस्तै र्मम नियमे
१० लङ्घितेऽहं तान् प्रति चिन्तां नाकरवं। किन्तु परमेश्वरः कथ-
यति तद्दिनात् परमहं इस्रायेलवंशीयैः सार्द्धम् इमं नियमं
स्थिरीकरिष्यामि, तेषां चित्ते मम विधीन् स्थापयिष्यामि तेषां
हृत्पत्रे च तान् लेखिष्यामि, अपरमहं तेषाम् ईश्वरो भविष्यामि
११ ते च मम लोका भविष्यन्ति। अपरं त्वं परमेश्वरं जानीहीति-
वाक्येन तेषामेकैको जनः स्वं स्वं समीपवासिनं भ्रातरञ्च पुन
र्न शिक्षयिष्यति यत आक्षुद्रात् महान्तं यावत् सर्व्वे मां ज्ञास्यन्ति।
१२ यतो हेतोरहं तेषाम् अधर्म्मान् क्षमिष्ये तेषां पापान्यपराधांश्च
१३ पुनः कदापि न स्मरिष्यामि।' अनेन तं नियमं नूतनं गदित्वा
स प्रथमं नियमं पुरातनीकृतवान्; यच्च पुरातनं जीर्णञ्च जातं
तस्य लोपो निकटो ऽभवत्।

---

९ नवमोऽध्यायः।

१ व्यवस्थाया बलिदानादिकथनं ११ एतेभ्यः सर्व्वेभ्यः ख्रीष्टीयबलिदानस्य श्रेष्ठत्वञ्च।

१ स प्रथमो नियम आराधनाया विविधरीतिभिरैहिकपवि-
२ त्रस्थानेन च विशिष्ट आसीत्। यतो दूष्यमेकं निरमीयत तस्य
प्रथमकोष्ठस्य नाम पवित्रस्थानमित्यासीत् तत्र दीपवृक्षो भोज-
३ नासनं दर्शनीयपूपानां श्रेणी चासीत्। तत्पश्चाद् द्वितीयाया-
स्तिरष्करिण्या अभ्यन्तरे ऽतिपवित्रस्थानमितिनामकं कोष्ठमासीत्,

तत्र च सुवर्णमयो धूपाधारः परितः सुवर्णमण्डिता नियममञ्जूषा ४
चासीत् तन्मध्ये मान्नायाः सुवर्णघटो हारोणस्य मञ्जरितदण्ड-
स्तक्षितौ नियमप्रस्तरौ, तदुपरि च करुणासने छायाकारिणौ ५
तेजोमयौ किरूबावास्ताम्, एतेषां विशेषवृत्तान्तकथनाय नायं
समयः। एतेष्वीदृक् निर्म्मितेषु याजका ईश्वरसेवाम् अनुतिष्ठन्तो ६
दूष्यस्य प्रथमकोष्ठं नित्यं प्रविशन्ति। किन्तु द्वितीयं कोष्ठं प्रात- ७
वर्षम् एककृत्व एकाकिना महायाजकेन प्रविश्यते किन्त्वात्म-
निमित्तं लोकानाम् अज्ञानकृतपापानाञ्च निमित्तम् उत्सर्ज्जनीयं
रुधिरम् अनादाय तेन न प्रविश्यते। इत्यनेन पवित्र आत्मा ८
यत् ज्ञापयति तदिदं तत् प्रथमं दूष्यं यावत् तिष्ठति तावत्
महापवित्रस्थानगामी पन्था अप्रकाशितस्तिष्ठति। तच्च दूष्यं वर्त्त- ९
मानसमयस्य दृष्टान्तः, यतो हेतोः साम्प्रतं संशोधनकालं यावद्
यन्निरूपितं तदनुसारात् सेवाकारिणो मानसिकसिद्धिकरणेऽसम-
र्थाभिः केवलं खाद्यपेयेषु विविधस्नापनेषु च शारीरिकरीतिभि १०
र्युक्तानि नैवेद्यानि बलिदानानि च भवन्ति।

अपरं भाविमङ्गलानां महायाजकः ख्रीष्ट उपस्थायाहस्त- ११
निर्म्मितेनार्थत एतत्सृष्टे र्बहिर्भूतेन श्रेष्ठेन सिद्धेन च दूष्येण गत्वा
छागानां गोवत्सानां वा रुधिरम् अनादाय स्वीयरुधिरम् आदा- १२
यैककृत्व एव महापवित्रस्थानं प्रविश्यानन्तकालिकां मुक्तिं प्राप्त-
वान्। वृषच्छागानां रुधिरेण गवीभस्मनः प्रक्षेपेण च यद्यशुचि- १३
लोकाः शारीरिकशुचित्वाय पूयन्ते, तर्हि किं मन्यध्वे यः सदा- १४
तनेनात्मना निष्कलङ्कबलिमिव स्वमेवेश्वराय दत्तवान् तस्य ख्रीष्टस्य
रुधिरेण युष्माकं मनांस्यमरेश्वरस्य सेवायै किं मृत्युजनकेभ्यः
कर्म्मभ्यो न पवित्रीकारिष्यन्ते? स नूतननियमस्य मध्यस्थोऽभवत् १५

तस्याभिप्रायोऽयं यत् प्रथमनियमलङ्घनरूपपापेभ्यो मृत्युना मुक्तौ
जातायाम् आहूतलोका अनन्तकालीयदायांशस्य प्रतिज्ञाफलं लभे-
१६ रन्। यत्र नियमो भवति तत्र नियमसाधकस्य बले र्मृत्युना
१७ भवितव्यं। यतो हतेन बलिना नियमः स्थिरीभवति किन्तु
नियमसाधको बलि र्यावत् जीवति तावत् नियमो निरर्थक-
१८ स्तिष्ठति। तस्मात् स पूर्व्वनियमोऽपि रुधिरपातं विना न
१९ साधितः। फलतः सर्व्वलोकान् प्रति व्यवस्थानुसारेण सर्व्वा आज्ञा
कथयित्वा मोशि र्जलेन सिन्दूरवर्णलोम्ना एषोवतृणेन च सार्द्धं
गोवत्सानां छागानाञ्च रुधिरं गृहीत्वा ग्रन्थे सर्व्वलोकेषु च प्रक्षिप्य
२० बभाषे, युष्मान् अधीश्वरो यं नियमं निरूपितवान् तस्य रुधिर-
२१ मेतत्। तद्वत् स दूष्येऽपि सेवार्थकेषु सर्व्वपात्रेषु च रुधिरं
२२ प्रक्षिप्तवान्। अपरं व्यवस्थानुसारेण प्रायशः सर्व्वाणि रुधिरेण
२३ परिष्क्रियन्ते रुधिरपातं विना पापमोचनं न भवति च। अपरं
यानि स्वर्गीयवस्तूनां दृष्टान्तास्तेषाम् एतैः पावनम् आवश्यकम्
आसीत् किन्तु साक्षात् स्वर्गीयवस्तूनाम् एतेभ्यः श्रेष्ठै र्बलिदानैः
२४ पावनमावश्यकं। यतः ख्रीष्टः सत्यपवित्रस्थानस्य दृष्टान्तरूपं हस्त-
कृतं पवित्रस्थानं न प्रविष्टवान् किन्त्वस्मन्निमित्तम् इदानीम् ईश्व-
२५ रस्य साक्षाद् उपस्थातुं स्वर्गमेव प्रविष्टः। यथा च महायाजकः
प्रतिवर्षं परशोणितमादाय महापवित्रस्थानं प्रविशति तथा ख्रीष्टेन
२६ पुनः पुनरात्मोत्सर्गो न कर्त्तव्यः, कर्त्तव्ये सति जगतः सृष्टिकाल-
मारभ्य बहुवारं तस्य मृत्युभोग आवश्यकोऽभवत्; किन्त्विदानीं
स आत्मोत्सर्गेण पापनाशार्थम् एककृत्वो जगतः शेषकाले प्रच-
२७ काशे। अपरं यथा मानुषस्यैककृत्वो मरणं तत्पश्चाद् विचारो
२८ निरूपितोऽस्ति, तद्वत् ख्रीष्टोऽपि बहूनां पापवहनार्थं बलिरूपे-

ऐककृत्व उत्ससृजे, अपरं द्वितीयवारं पापाद् भिन्नः सन् ये तं
प्रतीक्षन्ते तेषां परित्राणार्थं दर्शनं दास्यति।

---

१० दशमोऽध्यायः।

१ व्यवस्थानुयायिबलिदानेन सर्व्वथा पापमोचनाभावः ५ ख्रीष्टस्य बलिदानेन सर्व्वथा पापमोचनं ११ तस्य बलिदानस्यैकत्वं सम्पूर्णत्वञ्च १९ तेन तदीयलोकानामक्षोभः २६ धर्म्मत्यागनिषेधः ३२ धर्म्मार्थं दुःखभोगसहनप्रशंसा च।

व्यवस्था भविष्यन्मङ्गलानां छायास्वरूपा न च वस्तूनां मूर्त्ति- १
स्वरूपा ततो हेतो र्नित्यं दीयमानैरेकविधै र्वार्षिकबलिभिः शरणा-
गतलोकान् सिद्धान् कर्त्तुं कदापि न शक्नोति। यद्यशक्ष्यत् तर्हि २
तेषां बलीनां दानं किं न न्यवर्त्तिष्यत? यतः सेवाकारिष्वेककृत्वः
पवित्रीभूतेषु तेषां कोऽपि पापबोधः पुन र्नाभविष्यत्। किन्तु तै ३
र्बलिदानैः प्रतिवत्सरं पापानां स्मारणं जायते। यतो वृषाणां ४
छागानां वा रुधिरेण पापमोचनं न सम्भवति।

एतत्कारणात् ख्रीष्टेन जगत् प्रविश्येदम् उच्यते, यथा, ५

नेष्ट्वा बलिं न नैवेद्यं देहो मे निर्म्मितस्त्वया।
न च त्वं बलिभि र्हव्यैः पापघ्नै र्वा प्रतुष्यसि। ६
अवादिषं तदैवाहं पश्य कुर्व्वे समागमं। ७
धर्म्मग्रन्थस्य सर्गे मे विद्यते लिखिता कथा।
ईश मनोऽभिलाषस्ते मया सम्पूरयिष्यते।

इत्यस्मिन् प्रथमतो येषां दानं व्यवस्थानुसाराद् भवति तान्यधि ८
तेनेदमुक्तं यथा, बलिनैवेद्यहव्यानि पापघ्नञ्चोपचारकं, नेमानि
वाञ्छसि त्वं हि न चैतेषु प्रतुष्यसीति। ततः परं तेनोक्तं ९
यथा, पश्य मनोऽभिलाषं ते कर्त्तुं कुर्व्वे समागमं; द्वितीयम्

१० एतद् वाक्यं स्थिरीकर्त्तुं स प्रथमं लुम्पति। तेन मनोऽभि-
लाषेण च वयं यीशुख्रीष्टस्यैकक्कत्वः स्वशरीरोत्सर्गात् पवित्रीक्कता
अभवाम।
११ अपरम् एकैको याजकः प्रतिदिनम् उपासनां कुर्व्वन् यैश्च
पापानि नाशयितुं कदापि न शक्यन्ते तादृशान् एकरूपान् बलीन्
१२ पुनः पुनरुत्सृजन् तिष्ठति। किन्त्वसौ पापनाशकम् एकं बलिं
१३ दत्त्वानन्तकालार्थम् ईश्वरस्य दक्षिण उपविश्य यावत् तस्य शत्रु-
१४ वस्तस्य पादपीठं न भवन्ति तावत् प्रतीक्षमाणस्तिष्ठति। यत एकेन
बलिदानेन सोऽनन्तकालार्थं पूयमानान् लोकान् साधितवान्।
१५ एतस्मिन् पवित्र आत्माप्यस्माकं पक्षे प्रमाणयति यतो हेतो-
१६ स्तद्दिनात् परम् अहं तैः सार्द्धम् इमं नियमं स्थिरीकरिष्यामीति
प्रथमत उक्त्वा परमेश्वरेणेदं कथितं, तेषां चित्ते मम विधीन्
स्थापयिष्यामि तेषां मनःसु च तान् लेखिष्यामि च, अपरञ्च
१७ तेषां पापान्यपराधांश्च पुनः कदापि न स्मारिष्यामि। किन्तु यत्र
१८ पापमोचनं भवति तत्र पापार्थकबलिदानं पुन र्न भवति।
१९ अतो हे भ्रातरः, यीशो रुधिरेण पवित्रस्थानप्रवेशाया-
२० स्माकम् उत्साहो भवति, यतः सोऽस्मदर्थं तिरस्करिण्यार्थतः
२१ स्वशरीरेण नवीनं जीवनयुक्तञ्चैकं पन्थानं निर्म्मितवान्, अपरञ्चे-
२२ श्वरीयपरिवारस्याध्यक्ष एको महायाजकोऽस्माकमस्ति। अतो हेतो-
रस्माभिः सरलान्तःकरणै र्दृढविश्वासैः पापबोधात् प्रक्षालितमनोभि
र्निर्म्मलजले स्नातशरीरैश्चेश्वरम् उपागत्य प्रत्याशायाः प्रतिज्ञा
२३ निश्चला धारयितव्या। यतो यस्ताम् अङ्गीक्कतवान् स विश्वसनीयः।
२४ अपरं प्रेम्नि सत्क्रियासु चैकैकस्योत्साहवृद्ध्यर्थम् अस्माभिः परस्परं
२५ मन्त्रयितव्यं। अपरं कतिपयलोका यथा कुर्व्वन्ति तथास्माभिः

सभाकरणं न परित्यक्तव्यं परस्परम् उपदेष्टव्यञ्च यतस्तत् महादिनम् उत्तरोत्तरं निकटवर्त्ति भवतीति युष्माभि र्दृश्यते।

सत्यमतस्य ज्ञानप्राप्तेः परं यदि वयं स्वेच्छया पापाचारं २६
कुर्म्मस्तर्हि पापानां कृते ऽन्यत् किमपि बलिदानं नावशिष्यते
किन्तु विचारस्य भयानका प्रतीक्षा रिपुनाशकानलस्य तापश्चा- २७
वशिष्यते। यः कश्चित् मोशो व्यवस्थाम् अवमन्यते स दयां विना २८
द्वयोस्त्रयाणां वा साक्षिणां प्रमाणेन हन्यते, तस्मात् किं बुध्यध्वे २९
यो जन ईश्वरस्य पुत्रम् अवजानाति येन च पवित्रीकृतो ऽभवत्
तत् नियमस्य रुधिरम् अपवित्रं जानाति, अनुग्रहकरम् आत्मा-
नम् अपमन्यते च, स कियन्महाघोरतरदण्डस्य योग्यो भवि-
ष्यति? यतः परमेश्वरः कथयति, ३०

दानं फलस्य मत्कर्म्म सूचितं प्रददाम्यहं।

पुनरपि, तदा विचारयिष्यन्ते परेशेन निजाः प्रजाः।

इदं यः कथितवान् तं वयं जानीमः। अमरेश्वरस्य करयोः पतनं ३१
महाभयानकं।

हे भ्रातरः, पूर्व्वदिनानि स्मरत यतस्तदानीं यूयं दीप्तिं प्राप्य ३२
बहुदुर्गतिरूपं संग्रामं सहमाना एकतो निन्दाक्लेशैः कौतुकीकृता ३३
अभवत, अन्यतस्च तद्भोगिनां समांशिनो ऽभवत। यूयं मम ३४
बन्धनस्य दुःखेन दुःखिनो ऽभवत, युष्माकम् उत्तमा नित्या च
सम्पत्तिः स्वर्गे विद्यत इति ज्ञात्वा सानन्दं सर्व्वस्वस्यापहरणम्
असहध्वञ्च। अतएव महापुरस्कारयुक्तं युष्माकम् उत्साहं न परि- ३५
त्यजत। यतो यूयं येनेश्वरस्येच्छां पालयित्वा प्रतिज्ञायाः फलं ३६
लभध्वं तदर्थं युष्माभि र्धैर्य्यावलम्बनं कर्त्तव्यं। येनागन्तव्यं स ३७
स्वल्पकालात् परम् आगमिष्यति न च विलम्बिष्यते। धार्म्मिको ३८

जनो विश्वासेन जीविष्यति किन्तु यदि निवर्त्तते तर्हि मम
३९ मनस्तस्मिन् न तोषं यास्यति। किन्तु वयं विनाशजनिकां धर्म्मात्
निवृत्तिं न कुर्व्वाणा आत्मनः परित्राणाय विश्वासं कुर्व्वामहे।

---

११ एकादशोऽध्यायः।

१ विश्वासस्य निर्णयः बहुदृष्टान्तैस्तत्फलस्य निर्णयः ३२ विश्वासेन यद् आश्चर्य्यकर्म्म दुःखभोगश्चाभवत् तस्य निर्णयश्च।

१ विश्वास आशंसितानां निश्चयः, अदृश्यानां विषयाणां दर्शनं
२ भवति। तेन विश्वासेन प्राञ्चो लोकाः प्रामाण्यं प्राप्तवन्तः।
३ अपरम् ईश्वरस्य वाक्येन जगन्त्यसृज्यन्त, दृष्टवस्तूनि च प्रत्यक्ष-
४ वस्तुभ्यो नोदपद्यन्तैतद् वयं विश्वासेन बुध्यामहे। विश्वासेन
हेवल ईश्वरमुद्दिश्य काबिलः श्रेष्ठं बलिदानं कृतवान् तस्माच्चेश्वरेण
तस्य दानान्यधि प्रमाणे दत्ते स धार्म्मिक इत्यस्य प्रमाणं लब्ध-
५ वान् तेन विश्वासेन च स मृतः सन् अद्यापि भाषते। विश्वासेन
हनोको यथा मृत्युं न पश्येत् तथा लोकान्तरं नीतः, तस्यो-
द्देशश्च केनापि न प्रापि यत ईश्वरस्तं लोकान्तरं नीतवान्,
तत्प्रमाणमिदं तस्य लोकान्तरीकरणात् पूर्व्वं स ईश्वराय रोचित-
६ वान् इति प्रमाणं प्राप्तवान्। किन्तु विश्वासं विना कोऽपीश्वराय
रोचितुं न शक्नोति यत ईश्वरोऽस्ति स्वान्वेषिलोकेभ्यः पुरस्कारं
७ ददाति चेतिकथायाम् ईश्वरशरणागतै र्विश्वसितव्यं। अपरं तदानीं
यान्यदृश्यान्यासन् तानीश्वरेणादिष्टः सन् नोहो विश्वासेन भीत्वा
स्वपरिजनानां रक्षार्थं पोतं निर्म्मितवान् तेन च जगज्जनानां
दोषान् दर्शितवान् विश्वासात् लभ्यस्य धार्म्मिकत्वस्याधिकारी बभूव
८ च। विश्वासेनाब्राहाम आहूतः सन् आज्ञां गृहीत्वा यस्य स्थान-

स्याधिकारस्तेन प्राप्तव्यस्तत् स्थानं प्रस्थितवान् किन्तु प्रस्थानसमये
क यामीति नाजानात्। विश्वासेन स प्रतिज्ञाते देशे परदेशवत् ९
प्रवसन् तस्याः प्रतिज्ञायाः समानांशिभ्याम् इस्हाका याकूबा च
सह दूष्यवास्यभवत्। यस्मात् स ईश्वरेण निर्म्मितं स्थापितञ्च १०
भित्तिमूलयुक्तं नगरं प्रत्यैक्षत। अपरञ्च विश्वासेन सारा वयोति- ११
क्रान्ता सन्त्यपि गर्भधारणाय शक्तिं प्राप्य पुत्रवत्यभवत्, यतः सा
प्रतिज्ञाकारिणं विश्वास्यम् अमन्यत। ततो हेतो र्मृतकल्पाद् १२
एकस्माद् जनाद् आकाशीयनक्षत्राणीव गणनातीताः समुद्रतीरस्थ-
सिकता इव चासंख्या लोका उत्पेदिरे। एते सर्व्वे प्रतिज्ञायाः १३
फलान्यप्राप्य केवलं दूरात् तानि निरीक्ष्य वन्दित्वा च, पृथिव्यां
वयं विदेशिनः प्रवासिनश्चास्मह इति स्वीकृत्य विश्वासेन प्राणान्
तत्यजुः। ये तु जना इत्थं कथयन्ति तैः पैतृकदेशो ऽस्माभि- १४
रन्विष्यत इति प्रकाश्यते। ते यस्माद् देशाद् निर्गतास्तं यद्यस्मरि- १५
ष्यन् तर्हि परावर्त्तनाय समयम् अलप्स्यन्त। किन्तु ते सर्व्वोत्- १६
कृष्टम् अर्थतः स्वर्गीयं देशम् आकाङ्क्षन्ति तस्माद् ईश्वरस्तानधि
न लज्जमानस्तेषाम् ईश्वर इति नाम गृहीतवान् यतः स तेषां
कृते नगरमेकं संस्थापितवान्। अपरम् अब्राहामस्य परीक्षायां १७
जातायां स विश्वासेनेस्हाकम् उत्ससर्ज, वस्तुत इस्हाकि तव
वंशो विख्यास्यत इति वाग् यमधि कथिता तम् अद्वितीयं पुत्रं १८
प्रतिज्ञाप्राप्तः स उत्ससर्ज। यत ईश्वरो मृतानप्युत्थापयितुं शक्नो- १९
तीति स मेने तस्मात् स उपमारूपं तं लेभे। अपरम् इस्हाक् २०
विश्वासेन याकूबे एषावे च भाविविषयानध्याशिषं ददौ। अपरं २१
याकूब् मरणकाले विश्वासेन यूषफः पुत्रयोरेकैकस्मै जनायाशिषं
ददौ यष्ट्या अग्रभागे समालम्ब्य प्रणनाम च। अपरं यूषफ् चरम- २२

काले विश्वासेनेस्रायेल्वंशीयानां मिसरदेशाद् वहिर्गमनस्य वार्त्तां
२३ जगाद निजास्थीनि चाधि समादिदेश। नवजातो मोशिश्च विश्वा-
सात् त्रीन् मासान् स्वपितृभ्याम् अगोप्यत यतस्तौ स्वशिशुं परम-
२४ सुन्दरं दृष्टवन्तौ राजाज्ञाञ्च न शङ्कितवन्तौ। अपरं वयःप्राप्तो
मोशि विश्वासात् फिरौणो दौहित्र इति नाम नाङ्गीचकार।
२५ यतः स क्षणिकात् पापजसुखभोगाद् ईश्वरस्य प्रजाभिः सार्द्धं
२६ दुःखभोगं वव्रे। तथा मिसरदेशीयनिधिभ्यः ख्रीष्टनिमित्तां निन्दां
महतीं सम्पत्तिं मेने यतो हेतोः स पुरस्कारदानम् अपैक्षत।
२७ अपरं स विश्वासेन राज्ञः क्रोधात् न भीत्वा मिसरदेशं परितत्याज,
२८ यतस्तेनादृश्यं वीक्षमाणेनेव धैर्य्यम् आलम्बि। अपरं प्रथमजातानां
हन्ता यत् स्वीयलोकान् न स्पृशेत् तदर्थं स विश्वासेन निस्तार-
२९ पर्व्वीयबलिच्छेदनं रुधिरसेचनञ्चानुष्ठितवान्। अपरं ते विश्वासात्
स्थलेनेव सूफ्सागरेण जग्मुः किन्तु मिस्रीयलोकास्तत् कर्त्तुम्
३० उपक्रम्य तोयेषु ममज्जुः। अपरञ्च विश्वासात् तैः सप्ताहं यावद्
३१ यिरीहोः प्राचीरस्य प्रदक्षिणे कृते तत् निपपात। विश्वासाद्
राहब्नामिका वेश्यापि प्रीत्या चारान् अनुगृह्याविश्वासिभिः सार्द्धं
न विननाश।

३२ अधिकं किं कथयिष्यामि? गिदियोनो बारकः शिम्शोनो
यिप्तहो दायूदः शिमूयेलो भाववादिनश्चैतेषां वृत्तान्तकथनाय
३३ मम समयाभावो भविष्यति। विश्वासात् ते राज्यानि वशीकृतवन्तो
धर्म्मकर्माणि साधितवन्तः प्रतिज्ञानां फलं लब्धवन्तः सिंहानां
३४ मुखानि रुद्धवन्तो वह्नेर्दाहं निर्व्वापितवन्तः खड्गधाराद् रक्षां
प्राप्तवन्तो दौर्ब्बल्ये सबलीकृता युद्धे पराक्रमिणो जाताः परेषां
३५ सैन्यानि दवयितवन्तश्च। योषितः पुनरुत्थानेन मृतान् आत्म-

जान् लेभिरे, अपरे च श्रेष्ठोत्थानस्य प्राप्तेराशया रक्षाम् अगृहीत्वा
ताडनेन मृतवन्तः। अपरे तिरस्कारैः कशाभि र्बन्धनैः कारया ३६
च परीक्षिताः। बहवश्च प्रस्तराघातै र्हताः करपत्रै र्वा विदीर्णा ३७
यन्त्रै र्वा क्लिष्टाः खड्गधारै र्वा व्यापादिताः। ते मेषाणां छागानां
वा चर्म्माणि परिधाय दीनाः पीडिता दुःखार्त्ताश्चाभ्राम्यन्।
संसारो येषाम् अयोग्यस्ते निर्जनस्थानेषु पर्व्वतेषु गह्वरेषु पृथिव्या- ३८
श्छिद्रेषु च पर्य्यटन्। एतैः सर्व्वै र्विश्वासात् प्रमाणं प्रापि किन्तु ३९
प्रतिज्ञायाः फलं न प्रापि। यतस्ते यथास्मान् विना सिद्धा न ४०
भवेयुस्तथैवेश्वरेणास्माकं कृते श्रेष्ठतरं किमपि निर्दिदिशे।

---

१२ द्वादशोऽध्यायः।

१ विश्वासे दुःखभोगे धर्म्मे च स्थिरत्वं १९ धर्म्मत्यागे सावधानत्वं १८ व्यवस्थाया मङ्गलात् सुसंवादस्य मङ्गलं महत् २५ सुसंवादे ऽवश्यस्थिरत्वञ्च।

अतो हेतोरेतावत्साक्षिमेघै र्वेष्टिताः सन्तो वयमपि सर्व्व- १
भारम् आशुबाधकं पापञ्च निक्षिप्यास्माकं गमनाय निरूपिते
मार्गे धैर्य्येण धावाम। यश्चास्माकं विश्वासस्याग्रेसरः सिद्धिकर्त्ता २
चास्ति तं यीशुं वीक्षामहै यतः स स्वसम्मुखस्थितानन्दस्य प्राप्त्य-
र्थम् अपमानं तुच्छीकृत्य क्रुशस्य यातनां सोढवान् ईश्वरीय-
सिंहासनस्य दक्षिणपार्श्वे समुपविष्टवांश्च। यः पापिभिः स्वविरुद्धम् ३
एतादृशं वैपरीत्यं सोढवान् तम् आलोचयत तेन यूयं स्वमनः
सु श्रान्ताः क्लान्ताश्च न भविष्यथ। यूयं पापेन सह युध्यन्तो ४
ऽद्यापि शोणितव्ययपर्य्यन्तं प्रतिरोधं नाकुरुत। तथा च पुत्रान् ५
प्रतीव युष्मान् प्रति य उपदेश उक्तस्तं किं विस्मृतवन्तः?

परेशेन कृतां शास्तिं हे मत्पुत्र न तुच्छय।

तेन संभर्त्सितश्चापि नैव क्लाम्य कदाचन ।
६ परेशः प्रीयते यस्मिन् तस्मै शास्तिं ददाति यत् ।
यन्तु पुत्रं स गृह्णाति तमेव प्रहरत्यपि ।
७ यदि यूयं शास्तिं सहध्वं तर्हीश्वरः पुत्रैरिव युष्माभिः सार्द्धं व्यव-
हरति यतः पिता यस्मै शास्तिं न ददाति तादृशः पुत्रः कः ?
८ सर्व्वे यस्याः शास्तेरंशिनो भवन्ति सा यदि युष्माकं न भवति
९ तर्हि यूयम् आत्मजा न किन्तु जारजा आध्वे । अपरम् अस्माकं
शारीरिकजन्मदातारोऽस्माकं शास्तिकारिणोऽभवन् ते चास्माभिः
सम्मानितास्तस्माद् य आत्मनां जनयिता वयं किं ततोऽधिकं
१० तस्य वशीभूय न जीविष्यामः ? ते त्वल्पदिनानि यावत् स्वमनो
ऽभिमतानुसारेण शास्तिं कृतवन्तः किन्त्वेषोऽस्माकं हिताय तस्य
११ पवित्रताया अंशित्वाय चास्मान् शास्ति । शास्तिश्च वर्त्तमानसमये
केनापि नानन्दजनिका किन्तु शोकजनिकैव मन्यते तथापि ये
तया विनीयन्ते तेभ्यः सा पश्चात् शान्तियुक्तं धर्म्मफलं ददाति ।
१२ अतएव यूयं शिथिलान् हस्तान् दुर्ब्बलानि जानूनि च सब-
१३ लानि कुरुध्वं । यथा च दुर्ब्बलस्य सन्धिस्थानं न भज्येत स्वस्थं
१४ तिष्ठेत् तथा स्वचरणार्थं सरलं मार्गं निर्म्मात । अपरञ्च सर्व्वैः
सार्द्धम् ऐक्यभावं यच्च विना परमेश्वरस्य दर्शनं केनापि न
१५ लप्स्यते तत् पवित्रत्वं चेष्टध्वं । यथा कश्चिद् ईश्वरस्यानुग्रहात् न
पतेत् यथा च तिक्तताया मूलं प्ररुह्य बाधाजनकं न भवेत्
१६ तेन च बहवोऽपवित्रा न भवेयुः, यथा च कश्चित् लम्पटो वा
एककृत्व आहारार्थं स्वीयज्येष्ठाधिकारविक्रेता य एषौस्तद्वद् अधर्म्मा-
१७ चारी न भवेत् तथा सावधाना भवत । यतः स एषौः
पश्चाद् आशीर्व्वादाधिकारी भवितुम् इच्छन्नपि नानुगृहीत इति

यूयं जानीथ, स चाश्रुपातेन मत्यन्तरं प्रार्थयमानोऽपि तदुपायं
न लेभे ।

अपरञ्च स्पृश्यः पर्व्वतः प्रज्वलितो वह्निः कृष्णवर्णो मेघो १८
ऽन्धकारो झञ्झा तूरीवाद्यं वाक्यानां शब्दश्च नैतेषां सन्निधौ १९
यूयम् आगताः । तं शब्दं श्रुत्वा श्रोतारस्तादृशं सम्भाषणं यत्
पुन र्न जायते तत् प्रार्थितवन्तः । यतः पशुरपि यदि धराधरं २०
स्पृशति तर्हि स पाषाणाघातै र्हन्तव्य इत्यादेशं सोढुं ते नाश-
क्नुवन् । तच्च दर्शनम् एवं भयानकं यत् मोशिनोक्तं भीतस्त्रास- २१
युक्तश्चास्मीति । किन्तु सीयोन्पर्व्वतो ऽमरेश्वरस्य नगरं स्वर्गस्थ- २२
यिरूशालेमम् अयुतानि दिव्यदूताः स्वर्गे लिखितानां प्रथमजाता- २३
नाम् उत्सवः मण्डलीश्च सर्व्वेषां विचाराधिपतिरीश्वरः सिद्धीकृत-
धार्म्मिकानाम् आत्मानो नूतननियमस्य मध्यस्थो यीशुः, अपरं २४
हेवलो रक्तात् श्रेयः प्रचारकं प्रोक्षणस्य रक्तञ्चैतेषां सन्निधौ यूयम्
आगताः ।

सावधाना भवत तं वक्तारं नावजानीत यतो हेतोः पृथिवी- २५
स्थितः स वक्ता यैरवज्ञातस्ते यदि रक्षां नाप्रापि तर्हि स्वर्गी-
यवक्तुः पराङ्मुखीभूयास्माभिः कथं रक्षा प्राप्स्यते? तदा तस्य २६
रवात् पृथिवी कम्पिता किन्त्विदानीं तेनेदं प्रतिज्ञातं यथा, अहं
पुनरेककृत्वः पृथिवीं कम्पयिष्यामि केवलं तन्नहि गगनमपि
कम्पयिष्यामि । स एककृत्वः शब्दो निश्चलविषयाणां स्थितये २७
निर्म्मितानामिव चञ्चलवस्तूनां स्थानान्तरीकरणं प्रकाशयति । अत- २८
एव निश्चलराज्यप्राप्तैरस्माभिः सोऽनुग्रह आलम्बितव्यो येन वयं
सादरं सभयञ्च तुष्टिजनकरूपेणेश्वरं सेवितुं शक्नुयाम । यतोऽस्मा- २९
कम् ईश्वरः संहारको वह्निः ।

१३ त्रयोदशोऽध्यायः ।

१ भ्रातृषु प्रेमादेः कथनं ९ नानाशिक्षाभिश्चालितत्वनिषेधः १७ शिक्षकाणां माननकथनं १०   ३ प्रार्थना २२ वार्त्तानमस्कारप्रेषणञ्च ।

१ भ्रातृषु प्रेम तिष्ठतु । अतिथिसेवा युष्माभि र्न विस्मर्य्यतां
२ यतस्तया प्रच्छन्नरूपेण दिव्यदूताः केषाञ्चिद् अतिथयोऽभवन् ।
३ बन्दिनः सहबन्दिभिरिव दुःखिनश्च देहवासिभिरिव युष्माभिः
४ स्मर्य्यन्तां । विवाहः सर्व्वेषां समीपे सम्मानितव्यस्तदीयशय्या च
शुचिः किन्तु वेश्यागामिनः पारदारिकाश्चेश्वरेण दण्डयिष्यन्ते ।
५ यूयम् आचारे निर्लोभा भवत विद्यमानविषये सन्तुष्यत च
यस्माद् ईश्वर एवेदं कथितवान्, यथा, त्वां न त्यक्ष्यामि न त्वां
६ हास्यामि । अतएव वयम् उत्साहेनेदं कथयितुं शक्नुमः,
मत्पक्षे परमेशोऽस्ति न भेष्यामि कदाचन ।
यस्मात् मां प्रति किं कर्त्तुं मानवः पारयिष्यति ॥
७ युष्माकं ये नायका युष्मभ्यम् ईश्वरस्य वाक्यं कथितवन्तस्ते युष्माभिः
स्मर्य्यन्तां तेषाम् आचारस्य परिणामम् आलोच्य युष्माभिस्तेषां
८ विश्वासोऽनुक्रियतां । यीशुः ख्रीष्टः श्वोऽद्य सदा च स एवास्ते ।
९ यूयं नानाविधनूतनशिक्षाभि र्न परिवर्त्तध्वं यतोऽनुग्रहे-
णान्तःकरणस्य सुस्थिरीभवनं क्षेमं न च खाद्यद्रव्यैः । यतस्त-
१० द्राचारिणस्तै र्नोपकृताः । ये दूष्यस्य सेवां कुर्व्वन्ति ते यस्या
११ द्रव्यभोजनस्यानधिकारिणस्तादृशी यज्ञवेदिरस्माकम् आस्ते । यतो
येषां पशूनां शोणितं पापनाशाय महायाजकेन महापवित्रस्थान-
१२ स्याभ्यन्तरं नीयते तेषां शरीराणि शिविराद् वहि र्दह्यन्ते । तस्माद्
यीशुरपि यत् स्वरुधिरेण प्रजाः पवित्रीकुर्य्यात् तदर्थं नगरद्वारस्य
१३ वहि र्मृतिं भुक्तवान् । अतो हेतोरस्माभिरपि तस्यापमानं सहमानैः

शिविराद् वहिस्तस्य समीपं गन्तव्यं। यतो ऽत्रास्माकं स्थायि नगरं १४
न विद्यते किन्तु भावि नगरम् अस्माभिरन्विष्यते। अतएव १५
यीशुनास्माभि र्नित्यं प्रशंसारूपो बलिरर्थतस्तस्य नामाङ्गीकुर्व्वताम्
ओष्ठाधराणां फलम् ईश्वराय दातव्यं। अपरञ्च परोपकारो दानञ्च १६
युष्माभि र्न विस्मर्य्यतां यतस्तादृशं बलिदानम् ईश्वराय रोचते।

यूयं स्वनायकानाम् आज्ञाग्राहिणो वश्याश्च भवत यतो १७
यैरुपनिधिः प्रतिदातव्यस्तादृशा लोका इव ते युष्मदीयात्मनां
रक्षणार्थं जाग्रति, अतस्ते यथा सानन्दास्तत् कुर्य्यु र्न च सार्त्तस्वरा
अत्र यतध्वं यतस्तेषाम् आर्त्तस्वरो युष्माकम् इष्टजनको न भवेत्।
अपरञ्च यूयम् अस्मन्निमित्तं प्रार्थनां कुरुत यतो वयम् उत्तम- १८
मनोविशिष्टाः सर्व्वत्र सदाचारं कर्त्तुम् इच्छुकाश्च भवाम इति
निश्चितं जानीमः। विशेषतो ऽहं यथा त्वरया युष्मभ्यं पुन र्दीये १९
तदर्थं प्रार्थनायै युष्मान् अधिकं विनये।

अनन्तनियमस्य रुधिरेण विशिष्टो महान् मेषपालको येन २०
मृतगणमध्यात् पुनरानायि स शान्तिदायक ईश्वरो निजाभिमत-
साधनाय सर्व्वस्मिन् सत्कर्म्मणि युष्मान् सिद्धान् करोतु, तस्य २१
दृष्टौ च यद्यत् तुष्टिजनकं तदेव युष्माकं मध्ये यीशुना ख्रीष्टेन
साधयतु। तस्मै महिमा सर्व्वदा भूयात्। आमेन्।

हे भ्रातरः, विनये ऽहं यूयम् इदम् उपदेशवाक्यं सहध्वं यतो ऽहं २२
संक्षेपेण युष्मान् प्रति लिखितवान्। अस्माकं भ्राता तीमथियो मुक्तो २३
ऽभवद् इति जानीत, स च यदि त्वरया समागच्छति तर्हि तेन
सार्द्धम् अहं युष्मान् साक्षात् करिष्यामि। युष्माकं सर्व्वान् नायकान् २४
पवित्रलोकांश्च नमस्कुरुत। अपरम् इतालियादेशीयानां नमस्कारं
ज्ञास्यथ। अनुग्रहो युष्माकं सर्व्वेषां सहायो भूयात्। आमेन्। २५

याकोबस्य सर्व्वसाधारणपत्रं ।

१ प्रथमोऽध्यायः ।

१ मङ्गलाचरणं २ दुःखेऽप्याह्लादनं ५ ईश्वराद् धैर्य्ययाचनं ९ धनेऽभिमाननिषेधः १२ ईश्वरस्य पापमूलत्वं नहि किन्तु सर्व्वस्य मङ्गलस्य मूलत्वं २१ काल्पनिकताया विरुद्धा कथा च ।

१ ईश्वरस्य प्रभो र्यीशुख्रीष्टस्य च दासो याकोबो विकीर्णीभूतान्
द्वादश वंशान् प्रति नमस्कृत्य पत्रं लिखति ।
२ हे मम भ्रातरः, यूयं यदा बहुविधपरीक्षाषु निपतत तदा
३ तत् पूर्णानन्दस्य कारणं मन्यध्वं। यतो युष्माकं विश्वासस्य परी-
४ क्षितत्वेन धैर्य्यं सम्पाद्यत इति जानीथ। तच्च धैर्य्यं सिद्धफलं भवतु
तेन यूयं सिद्धाः सम्पूर्णाश्च भविष्यथ कस्यापि गुणस्याभावश्च
युष्माकं न भविष्यति ।
५ युष्माकं कस्यापि ज्ञानाभावो यदि भवेत् तर्हि य ईश्वरः
सरलभावेन तिरस्कारञ्च विना सर्व्वेभ्यो ददाति ततः स याचतां
६ ततस्तस्मै दायिष्यते। किन्तु स निःसन्देहः सन् विश्वासेन याचतां
यतः सन्दिग्धो मानवो वायुना चालितस्योत्प्लवमानस्य च समुद्र-
७ तरङ्गस्य सदृशो भवति। तादृशो मानवः प्रभोः किञ्चित् प्राप्स्य-
८ तीति न मन्यतां। द्विमना लोकः सर्व्वगतिषु चञ्चलो भवति।
९ यो भ्राता नम्रः स निजोन्नत्या श्लाघतां। यश्च धनवान् स
१० निजनम्रतया श्लाघतां यतः स तृणपुष्पवत् क्षयं गमिष्यति।
११ यतः सतापेन सूर्य्येणोदित्य तृणं शोष्यते तत्पुष्पञ्च भ्रश्यति तेन
तस्य रूपस्य सौन्दर्य्यं नश्यति तद्वद् धनिलोकोऽपि स्वीयमूढतया
म्लास्यति ।

यो जनः परीक्षां सहते स एव धन्यः, यतः परीक्षितत्वं प्राप्य १२
स प्रभुना स्वप्रेमकारिभ्यः प्रतिज्ञातं जीवनमुकुटं लप्स्यते। ईश्वरो १३
मां परीक्षत इति परीक्षासमये कोऽपि न वदतु यतः पापाये-
श्वरस्य परीक्षा न भवति स च कमपि न परीक्षते। किन्तु यः १४
कश्चित् स्वीयमनोवाञ्छयाकृष्यते लोभ्यते च तस्यैव परीक्षा
भवति। तस्मात् सा मनोवाञ्छा सगर्भा भूत्वा दुष्कृतिं प्रसूते १५
दुष्कृतिश्च परिणामं गत्वा मृत्युं जनयति। हे मम प्रियभ्रातरः, १६
यूयं न भ्राम्यत। यत् किञ्चिद् उत्तमं दानं पूर्णो वरश्च तत् १७
सर्व्वम् ऊर्द्धाद् अर्थतो यस्मिन् दशान्तरं परिवर्त्तनजातच्छाया
वा नास्ति तस्माद् दीप्त्याकरात् पितुरवरोहति। तस्य सृष्टवस्तूनां १८
मध्ये वयं यत् प्रथमफलस्वरूपा भवामस्तदर्थं स स्वेच्छातः सत्य-
मतस्य वाक्येनास्मान् जनयामास। अतएव हे मम प्रियभ्रातरः, १९
युष्माकम् एकैको जनः श्रवणे त्वरितः कथने धीरः क्रोधेऽपि
धीरो भवतु। यतो मानवस्य क्रोध ईश्वरीयधर्म्मं न साधयति। २०
अतो हेतो र्यूयं सर्व्वाम् अशुचिक्रियां दुष्टताबाहुल्यञ्च २१
निक्षिप्य युष्मन्मनसां परित्राणे समर्थं रोपितं वाक्यं नम्रभावेन
गृह्णीत। अपरञ्च यूयं केवलम् आत्मवञ्चयितारो वाक्यस्य श्रोतारो २२
न भवत किन्तु वाक्यस्य कर्म्मकारिणो भवत। यतो यः कश्चिद् २३
वाक्यस्य कर्म्मकारी न भूत्वा केवलं तस्य श्रोता भवति स दर्पणे
स्वीयशारीरिकवदनं निरीक्षमाणस्य मनुजस्य सदृशः। आत्माकारे २४
दृष्टे स प्रस्थाय कीदृश आसीत् तत् तत्क्षणाद् विस्मरति। किन्तु २५
यः कश्चित् नत्वा मुक्तेः सिद्धां व्यवस्थाम् आलोक्य तिष्ठति स
विस्मृतियुक्तः श्रोता न भूत्वा कर्म्मकर्त्तैव सन् स्वकार्य्ये धन्यो
भविष्यति। अनायत्तरसनः सन् यः कश्चित् स्वमनो वञ्चयित्वा २६

२७ स्वं भक्तं मन्यते तस्य भक्ति मुधा भवति। क्लेशकाले पितृहीनानां विधवानाञ्च यद् अवेक्षणं संसाराच्च निष्कलङ्केन यद् आत्मरक्षणं तदेव पितुरीश्वरस्य साक्षात् शुचि निर्म्मला च भक्तिः।

---

२ द्वितीयोऽध्यायः।

१ धनिलोकानां समादरार्थं दरिद्रलोकानां तुच्छीकरणस्य निषेधः १४ धर्म्मरहितो विश्वासो मुधा, निष्फलसफलप्रत्यययोः कथनञ्च।

१ हे मम भ्रातरः, यूयम् अस्माकं तेजस्विनः प्रभो यीशु-
२ ख्रीष्टस्य धर्म्मं मुखापेक्षया न धारयत। यतो युष्माकं सभायां
स्वर्णाङ्गुरीयकयुक्ते भ्राजिष्णुपरिच्छदे पुरुषे प्रविष्टे मलिनवस्त्रे
३ कस्मिंश्चिद् दरिद्रेऽपि प्रविष्टे यूयं यदि तं भ्राजिष्णुपरिच्छद-
वसानं जनं निरीक्ष्य वदेत भवान् अत्रोत्तमस्थान उपविशत्विति
किञ्च तं दरिद्रं यदि वदेत त्वम् अमुष्मिन् स्थाने तिष्ठ यद्वात्र
४ मम पादपीठ उपविशेति, तर्हि मनःसु विशेष्य यूयं किं कुतर्कैः
५ कुविचारका न भवथ? हे मम प्रियभ्रातरः, शृणुत, संसारे
ये दरिद्रास्तान् ईश्वरो विश्वासेन धनिनः स्वप्रेमकारिभ्यश्च प्रति-
६ श्रुतस्य राज्यस्याधिकारिणः कर्त्तुं किं न वरीतवान्? किन्तु
दरिद्रो युष्माभिरवज्ञायते। धनवन्त एव किं युष्मान् नोपद्रवन्ति
७ बलाच्च विचारासनानां समीपं न नयन्ति? युष्मदुपरि परिकीर्त्तितं
८ परमं नाम किं तैरेव न निन्द्यते? किञ्च त्वं स्वसमीपवासिनि
स्वात्मवत् प्रीयस्व, एतच्छास्त्रीयवचनानुसारतो यदि यूयं राज-
९ कीयव्यवस्थां पालयथ तर्हि भद्रं कुरुथ। यदि च मुखापेक्षां
कुरुथ तर्हि पापम् आचरथ व्यवस्थया चाज्ञालङ्घिन इव दूष्यध्वे।
१० यतो यः कश्चित् कृत्स्नां व्यवस्थां पालयति स यद्येकस्मिन् विधौ

स्खलति तर्हि सर्व्वेषाम् अपराधी भवति। यतो हेतोस्त्वं पर- ११
दारान् मा गच्छेति यः कथितवान् स एव नरहत्यां मा कुर्य्या
इत्यपि कथितवान् तस्मात् त्वं परदारान् न गत्वा यदि नरहत्यां
करोषि तर्हि व्यवस्थालङ्घी भवसि। मुक्ते र्व्यवस्थातो येषां विचा- १२
रेण भवितव्यं तादृशा लोका इव यूयं कथां कथयत कर्म्म
कुरुत च। यो दयां नाचरति तस्य विचारो निर्द्दयेन कारिष्यते, १३
किन्तु दया विचारम् अभिभविष्यति।

हे मम भ्रातरः, मम विश्वासोऽस्तीति यः कथयति तस्य १४
कर्म्माणि यदि न विद्यन्त तर्हि तेन किं फलं? तेन विश्वासेन किं
तस्य परित्राणं भवितुं शक्नोति? केषुचिद् भ्रातृषु भगिनीषु वा १५
वसनहीनेषु प्रात्यहिकाहारहीनेषु च सत्सु युष्माकं कोऽपि तेभ्यः १६
शरीरार्थं प्रयोजनीयानि द्रव्याणि न दत्त्वा यदि तान् वदेत्,
यूयं सकुशलं गत्वोष्णगात्रा भवत तृप्यत चेति तर्ह्येतेन किं फलं?
तद्वत् विश्वासो यदि कर्म्मभि र्युक्तो न भवेत् तर्ह्येकाकित्वात् मृत १७
एवास्ते। किञ्च कश्चिद् इदं वदिष्यति तव विश्वासो विद्यते मम १८
च कर्म्माणि विद्यन्ते, त्वं कर्म्महीनं स्वविश्वासं मां दर्शय तर्ह्यहमपि
मत्कर्म्मभ्यः स्वविश्वासं त्वां दर्शयिष्यामि। एक ईश्वरोऽस्तीति त्वं १९
विश्वासिषि। भद्रं करोषि। भूता अपि तत् विश्वसन्ति कम्पन्ते
च। किन्तु हे निर्ब्बोधमानव, कर्म्महीनः विश्वासो मृत एवास्त्ये- २०
तद् अवगन्तुं किम् इच्छसि? अस्माकं पूर्व्वपुरुषो य इब्राहीमः स्वपु- २१
त्रम् इस्हाकं यज्ञवेद्याम् उत्सृष्टवान् स किं कर्म्मभ्यो न धार्म्मिकी-
कृतः? विश्वासे तस्य कर्म्मणां सहकारिणि जाते कर्म्मभिः विश्वासः २२
सिद्धोऽभवत् तत् किं पश्यसि? इत्यस्येदं शास्त्रीयवचनं सफलम् २३
अभवत्, इब्राहीमः परमेश्वरे विश्वसितवान् तच्च तस्य धार्म्मिकत्वा-

२४ यागण्त स चेश्वरस्य मित्र इति नाम लब्धवान्। पश्यत मानवः
२५ कर्म्मभ्यः धार्म्मिकीक्रियते न चैकाकिना विश्वासेन। तद्वद् या राहब्-
नामिका वाराङ्गना चारान् अनुगृह्यापरेण मार्गेण विससर्ज सापि
२६ किं कर्म्मभ्यो न धार्म्मिकीकृता? अतएवात्महीनो देहो यथा मृतो-
ऽस्ति तथैव कर्म्महीनः विश्वासोऽपि मृतोऽस्ति ।

---

३ तृतीयोऽध्यायः ।

१ अन्यजनं दोषिणम् अकला रसनाया अवश्यदमनीयत्वं १३ ज्ञानिलोकस्य पूर्व्वोक्तदोषपरिहारस्य।

१ हे मम भ्रातरः, शिक्षकैरस्माभि र्गुरुतरदण्डो लप्स्यत इति
२ ज्ञात्वा यूयम् अनेके शिक्षका मा भवत। यतः सर्व्वे वयं बहु-
विषयेषु स्खलामः, यः कश्चिद् वाक्ये न स्खलति स सिद्धपुरुषः
३ कृत्स्नं देहं वशीकर्त्तुं समर्थश्चास्ति। पश्यत वयम् अश्वान् वशीकर्त्तुं तेषां
४ वक्त्रेषु खलीनान् निधाय तेषां कृत्स्नं शरीरम् अनुवर्त्तयामः। पश्यत
ये पोता अतीव वृहदाकाराः प्रचण्डवातैश्च चालितास्तेऽपि कर्णधा-
रस्य मनोऽभिमताद् अतिक्षुद्रेण कर्णेन वाञ्छितं स्थानं प्रत्यनु-
५ वर्त्तन्ते। तद्वद् रसनापि क्षुद्रतराङ्गं सन्ती दर्पवाक्यानि भाषते।
६ पश्य कीदृङ्महारण्यं दह्यतेऽल्पेन वह्निना। रसनापि भवेद् वह्निर-
धर्म्मरूपपिष्टपे। अस्मदङ्गेषु रसना तादृशं सन्तिष्ठति सा कृत्स्नं
देहं कलङ्कयति सृष्टिरथस्य चक्रं प्रज्वलयति नरकानलेन ज्वलति
७ च। पशुपक्ष्युरोगजलचराणां सर्व्वेषां स्वभावो दमयितुं शक्यते
८ मानुषिकस्वभावेन दमयाञ्चक्रे च। किन्तु मानवानां केनापि
जिह्वा दमयितुं न शक्यते सा न निवार्य्यम् अनिष्टं हलाहलविषेण
९ पूर्णा च। तया वयं पितरम् ईश्वरं धन्यं वदामः, तया चेश्वरस्य

सादृश्ये सृष्टान् मानवान् शपामः। एकस्माद् वदनाद् धन्यवाद- १०
शापौ निर्गच्छतः। हे मम भ्रातरः, एतादृशं न कर्त्तव्यं। प्रस्र- ११
वणः किम् एकस्मात् छिद्रात् मिष्टं तिक्तञ्च तोयं निर्गमयति? हे १२
मम भ्रातरः, उडुम्बरतरुः किं जितफलानि द्राक्षालता वा किम्
उडुम्बरफलानि फलितुं शक्नोति? तद्वद् एकः प्रस्रवणो लवणमिष्टे
तोये निर्गमयितुं न शक्नोति।

युष्माकं मध्ये ज्ञानी सुबोधश्च क आस्ते? तस्य कर्म्माणि ज्ञान- १३
मूलकमृदुतायुक्तानीति सदाचारात् स प्रमाणयतु। किन्तु युष्म- १४
दन्तःकरणमध्ये यदि तिक्तेर्ष्या विवादेच्छा च विद्यते तर्हि सत्य-
मतस्य विरुद्धं न श्लाघध्वं नचानृतं कथयत। तादृशं ज्ञानम् १५
ऊर्द्ध्वाद् आगतं नहि किन्तु पार्थिवं शरीरि भौतिकञ्च। यतो १६
हेतोरीर्ष्या विवादेच्छा च यत्र विद्येते तत्रैव कलहः सर्व्वं दुष्कृ-
तञ्च विद्यते। किन्तूर्द्ध्वाद् आगतं यत् ज्ञानं तत् प्रथमं शुचि ततः १७
परं शान्तं क्षान्तम् आशुसन्धेयं दयादिसत्फलैः परिपूर्णम् अस-
न्दिग्धं निष्कपटञ्च भवति। शान्त्याचारिभिः शान्त्या धर्म्मफलं रोप्यते। १८

---

४ चतुर्थोऽध्यायः।

१ युद्धलोभेर्ष्याहङ्कारादीनां विरुद्धा कथा ११ अज्ञानिकथनं १२ वाणिज्यदीर्घायुषी उद्दिश्य श्लाघाया अकर्त्तव्यत्वञ्च।

युष्माकं मध्ये समरा रणाश्च कुत उत्पद्यन्ते? युष्मदङ्गशिबिरा- १
श्रिताभ्यः सुखेच्छाभ्यः किं नोत्पद्यन्ते? यूयं वाञ्छथ किन्तु नाप्नुथ, २
यूयं नरहत्याम् ईर्ष्याञ्च कुरुथ किन्तु कृतार्था भवितुं न शक्नुथ,
यूयं युध्यथ रणं कुरुथ च किन्त्वप्राप्तास्तिष्ठथ, यतो हेतोः प्रार्थनां
न कुरुथ। यूयं प्रार्थयध्वे किन्तु न लभध्वे यतो हेतोः स्वसुख- ३

४ भोगेषु व्ययार्थं कु प्रार्थयध्वे। हे व्यभिचारिणो व्यभिचारिण्यश्च,
संसारस्य यत् मैत्र्यं तद् ईश्वरस्य शात्रवमिति यूयं किं न जानीथ?
अत एव यः कश्चित् संसारस्य मित्रं भवितुम् अभिलषति स
५ एवेश्वरस्य शत्रु र्भवति। यूयं किं मन्यध्वे? शास्त्रस्य वाक्यं किं
फलहीनं भवेत्? अस्मदन्तर्वासी य आत्मा स वा किम् ईर्ष्यार्थं
६ प्रेम करोति? तन्नहि किन्तु स प्रतुलं वरं वितरति तस्माद्
उक्तमास्ते यथा,

आत्माभिमानलोकानां विपक्षो भवतीश्वरः।
किन्तु तेनैव नम्रेभ्यः प्रसादाद् दीयते वरः॥

७ अतएव यूयम् ईश्वरस्य वश्या भवत शैतानं संरुन्ध तेन स युष्मत्तः
८ पलायिष्यते। ईश्वरस्य समीपवर्त्तिनो भवत तेन स युष्माकं
समीपवर्त्ती भविष्यति। हे पापिनः, यूयं स्वकरान् परिष्कुरुध्वं।
९ हे द्विमनोलोकाः, यूयं स्वान्तःकरणानि शुचीनि कुरुध्वं। यूयम्
उद्विजध्वं शोचत विलपत च, युष्माकं हासः शोकाय, आनन्दश्च
१० कातरतायै परिवर्त्तेतां। प्रभोः समक्षं नम्रा भवत तस्मात् स
युष्मान् उच्चीकरिष्यति।

११ हे भ्रातरः, यूयं परस्परं मा दूषयत। यः कश्चिद् भ्रातरं
दूषयति भ्रातु र्विचारञ्च करोति स व्यवस्थां दूषयति व्यव-
स्थायाश्च विचारं करोति। त्वं यदि व्यवस्थाया विचारं करोषि
तर्हि व्यवस्थापालयिता न भवसि किन्तु विचारयिता भवसि।
१२ अद्वितीयो व्यवस्थापको विचारयिता च स एवास्ते यो रक्षितुं
नाशयितुञ्च पारयति। किन्तु कस्त्वं यत् परस्य विचारं करोषि?

१३ अद्य श्वो वा वयम् अमुकनगरं गत्वा तत्र वर्षमेकं यापयन्तो
वाणिज्यं करिष्यामः लाभं प्राप्स्यामश्चेति कथां भाषमाणा यूयम्

इदानीं शृणुत। श्वः किं घटिष्यते तद् यूयं न जानीथ यतो १४
जीवनं वो भवेत् कीदृक् तत्तु वाष्पस्वरूपकं, क्षणमात्रं भवेद्
दृश्यं लुप्यते च ततः परं। तदनुक्ता युष्माकम् इदं कथनीयं १५
प्रभोरिच्छातो वयं यदि जीवामस्तर्ह्येतत् कर्म्म तत् कर्म्म वा
करिष्याम इति। किन्त्विदानीं यूयं गर्व्ववाक्यैः श्लाघनं कुरुध्वे १६
तादृशं सर्व्वं श्लाघनं कुत्सितमेव। अतो यः कश्चित् सत्कर्म्म कर्त्तुं १७
विदित्वा तन्न करोति तस्य पापं जायते।

---

५ पञ्चमोऽध्यायः।

१ दण्डाद् दुष्टधनिलोकानां भीतत्वमुचितं ७ धार्म्मिकलोकानाम् अवश्यदुःखमोचकत्वं १२ निरर्थकदिव्यनिषेधः १३ पीडासमये प्रार्थयितव्यं १९ भ्रान्तभ्रातुः परावर्त्तनीयत्वकथनं।

हे धनवन्तः, यूयम् इदानीं शृणुत युष्माभिरागमिष्यत्क्लेश- १
हेतोः क्रन्द्यतां विलप्यताञ्च। युष्माकं द्रविणं जीर्णं कीटभुक्ताः २
सुचेलकाः। कनकं रजतञ्चापि विकृतिं प्रगमिष्यति, तत्कलङ्कश्च ३
युष्माकं पापं प्रमाणयिष्यति, हुताशवच्च युष्माकं पिशितं खाद्-
यिष्यति। इत्थम् अन्तिमघस्रेषु युष्माभिः सञ्चितं धनं। पश्यत यैः ४
कृषीवलै र्युष्माकं शस्यानि छिन्नानि तेभ्यो युष्माभि र्यद् वेतनं
छिन्नं तद् उच्चै र्ध्वनिं करोति तेषां शस्यच्छेदकानाम् आर्त्तरावः
सेनापतेः परमेश्वरस्य कर्णकुहरं प्रविष्टः। यूयं पृथिव्यां सुखभोगं ५
कामुकताञ्चाचरितवन्तः, महाभोजस्य दिन इव निजान्तःकरणानि
परितर्पितवन्तश्च। अपरञ्च युष्माभि र्धार्म्मिकस्य दण्डाज्ञा हत्या ६
चाकारि तथापि स युष्मान् न प्रतिरुद्धवान्।

हे भ्रातरः, यूयं प्रभोरागमनं यावद् धैर्य्यमालम्बध्वं। पश्यत ७

कृषिबलो भूमे र्बहुमूल्यं फलं प्रतीक्षमाणो यावत् प्रथमम् अन्तिमञ्च
८ वृष्टिजलं न प्राप्नोति तावद् धैर्य्यम् आलम्बते। यूयमपि धैर्य्यमा-
लम्ब्य स्वान्तःकरणानि स्थिरीकुरुत, यतः प्रभोरुपस्थितिः समीप-
९ वर्त्तिन्यभवत्। हे भ्रातरः, यूयं यद् दण्ड्या न भवेत तदर्थं परस्परं
१० न ग्लायत, पश्यत विचारयिता द्वारसमीपे तिष्ठति। हे मम
भ्रातरः, ये भाववादिनः प्रभो र्नाम्ना भाषितवन्तस्तान् यूयं दुःख-
सहनस्य धैर्य्यस्य च दृष्टान्तान् जानीत। पश्यत धैर्य्यशीला अस्माभि
११ र्धन्या उच्यन्ते। आयूबो धैर्य्यं युष्माभिरश्रावि प्रभोः परिणाम-
श्चादर्शि यतः प्रभु र्बहुकृपः सकरुणश्चास्ति।

१२ हे भ्रातरः, विशेषत इदं वदामि स्वर्गस्य वा पृथिव्या वान्यवस्तुनो
नाम गृहीत्वा युष्माभिः कोऽपि शपथो न क्रियतां, किन्तु यथा दण्ड्या
न भवेत तदर्थं युष्माकं तथैव तन्नहि चेतिवाक्यं यथेष्टं भवतु।

१३ युष्माकं कश्चिद् दुःखी भवति? स प्रार्थनां करोतु। कश्चिद्
१४ वानन्दितो भवति? स गीतं गायतु। युष्माकं कश्चित् पीडितो
ऽस्ति? स मण्डल्याः प्राचीनान् आह्वातु ते च प्रभो र्नाम्ना तं तैले-
१५ नाभिषिच्य तस्य कृते प्रार्थनां कुर्व्वन्तु। तस्माद् विश्वासजातप्रार्थ-
नया स रोगी रक्षां यास्यति प्रभुश्च तम् उत्थापयिष्यति यदि च
१६ कृतपापो भवेत् तर्हि स तं क्षमिष्यते। यूयं परस्परम् अपराधान्
अङ्गीकुरुध्वम् आरोग्यप्राप्त्यर्थञ्चैकजनो ऽन्यस्य कृते प्रार्थनां करोतु
१७ धार्म्मिकस्य सयत्ना प्रार्थना बहुशक्तिविशिष्टा भवति। य एलियो
वयमिव सुखदुःखभोगी मर्त्त्य आसीत् स प्रार्थनयानावृष्टिं याचित-
१८ वान् तेन देशे सार्द्धवत्सरत्रयं यावद् वृष्टि र्न बभूव। पश्चात् तेन
पुनः प्रार्थनायां कृतायाम् आकाशस्तोयान्यवर्षीत् पृथिवी च स्वफ-
लानि प्रारोहयत्।

हे भ्रातरः, युष्माकं कस्मिंश्चित् सत्यमताद् भ्रष्टे यदि कश्चित् तं १९
परावर्त्तयति तर्हि यो जनः पापिनं विपथभ्रमणात् परावर्त्तयति स २०
तस्यात्मानं मृत्युत उद्धरिष्यति बहुपापान्यावरिष्यति चेति जानातु।

पितरस्य प्रथमं सर्व्वसाधारणपत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचरणं ३ अनुग्रहकारणाद् ईश्वरस्य धन्यवदनं भाववादिभ्यः ख्रीष्टेन परित्राणकथनं १३ ईश्वरीयामोघवाक्यानुसारतो धर्म्मम् आचरितुं पितरस्य विनयश्च।

पन्त-गालातिया-कप्पदकिया-आशिया-बिथुनियादेशेषु प्रवा- १
सिनो ये विकीर्णलोकाः पितुरीश्वरस्य पूर्व्वनिर्णयाद् आत्मनः पाव- २
नेन यीशुख्रीष्टस्याज्ञाग्रहणाय शोणितप्रोक्षणाय चाभिरुचितास्तान्
प्रति यीशुख्रीष्टस्य प्रेरितः पितरः पत्रं लिखति। युष्मान् प्रति
बाहुल्येन शान्तिरनुग्रहश्च भूयास्तां।

अस्माकं प्रभो र्यीशुख्रीष्टस्य तात ईश्वरो धन्यः, यतः स ३
स्वकीयबहुकृपातो मृतगणमध्याद् यीशुख्रीष्टस्योत्थानेन जीवन-
प्रत्याशार्थम् अर्थतो ऽक्षयनिष्कलङ्काम्लानसम्पत्तिप्राप्त्यर्थम् अस्मान् ४
पुन र्जनयामास। सा सम्पत्तिः स्वर्गे ऽस्माकं कृते सञ्चिता तिष्ठति,
यूयञ्चेश्वरस्य शक्तितः शेषकाले प्रकाश्यपरित्राणार्थं विश्वासेन रक्ष्यध्वे। ५
तस्माद् यूयं यद्यप्यानन्देन प्रफुल्ला भवथ तथापि साम्प्रतं प्रयो- ६
जनहेतोः कियत्कालपर्य्यन्तं नानाविधपरीक्षाभिः क्लिश्यध्वे। यतो ७
वह्निना यस्य परीक्षा भवति तस्मात् नश्वरसुवर्णादपि बहुमूल्यं
युष्माकं विश्वासरूपं यत् परीक्षितं स्वर्णं तेन यीशुख्रीष्टस्यागमन-

८ समये प्रशंसायाः, समादरस्य गौरवस्य च योग्यता प्राप्तव्या। यूयं तं
ख्रीष्टम् अदृष्ट्वापि तस्मिन् प्रीयध्वे साम्प्रतं तं न पश्यन्तोऽपि तस्मिन्
विश्वसन्तो ऽनिर्व्वचनीयेन प्रभावयुक्तेन चानन्देन प्रफुल्ला भवथ,
९ स्वविश्वासस्य परिणामरूपम् आत्मनां परित्राणं लभध्वे च। युष्मासु
१० यो ऽनुग्रहो वर्त्तते तद्विषये य ईश्वरीयवाक्यं कथितवन्तस्ते भाव-
११ वादिनस्तस्य परित्राणस्यान्वेषणम् अनुसन्धानञ्च कृतवन्तः। विशेष-
तस्तेषामन्तर्व्वासी यः ख्रीष्टस्यात्मा ख्रीष्टे वर्त्तिष्यमाणानि दुःखानि
तदनुगामिप्रभावञ्च पूर्व्वं प्राकाशयत् तेन कः कीदृशो वा समयो
१२ निरदिश्यतैतस्यानुसन्धानं कृतवन्तः। ततस्तै र्विषयैस्ते यन्न स्वान्
किन्त्वस्मान् उपकुर्व्वन्त्येतत् तेषां निकटे प्राकाश्यत। यांश्च तान्
विषयान् दिव्यदूता अप्यवनतशिरसो निरीक्षितुम् अभिलषन्ति
ते विषयाः साम्प्रतं स्वर्गात् प्रेषितस्य पवित्रस्यात्मनः साहाय्याद्
युष्मत्समीपे सुसंवादप्रचारयितृभिः प्राकाश्यन्त।
१३ अतएव यूयं मनःकटिबन्धनं कृत्वा प्रबुद्धाः सन्तो यीशुख्रीष्टस्य
प्रकाशसमये युष्मासु वर्त्तिष्यमानस्यानुग्रहस्य सम्पूर्णां प्रत्याशां कुरुत।
१४ अपरं पूर्व्वीयाज्ञानतावस्थायाः कुत्सिताभिलाषाणां योग्यम् आचारं
१५ न कुर्व्वन्तो युष्मदाह्वानकारी यथा पवित्रो ऽस्ति यूयमप्याज्ञाग्राहि-
१६ सन्ताना इव सर्व्वस्मिन् आचारे तादृक् पवित्रा भवत। यतो
१७ लिखितम् आस्ते, यूयं पवित्रास्तिष्ठत यस्मादहं पवित्रः। अपरञ्च
यो विनापक्षपातम् एकैकमानुषस्य कर्म्मानुसाराद् विचारं करोति
स यदि युष्माभिस्तात आख्यायते तर्हि स्वप्रवासस्य कालो युष्माभि
१८ र्भीत्या यापयतां। यूयं निरर्थकात् पैतृकाचारात् क्षयणीयै रूप्य-
१९ सुवर्णादिभि र्मुक्तिं न प्राप्य निष्कलङ्कनिर्म्मलमेषशावकस्येव ख्रीष्टस्य
२० बहुमूल्येन रुधिरेण मुक्तिं प्राप्तवन्त इति जानीथ। स जगतो

भित्तिमूलस्थापनात् पूर्व्वं नियुक्तः किन्तु चरमदिनेषु युष्मदर्थं प्रका-
शितो ऽभवत्। यतस्तेनैव मृतगणात् तस्योत्थापयितरि तस्मै गौरव- २१
दातरि चेश्वरे विश्वसिथ तस्माद् ईश्वरे युष्माकं विश्वासः प्रत्याशा
चास्ते। यूयम् आत्मना सत्यमतस्याज्ञाग्रहणद्वारा निष्कपटाय भ्रातृ- २२
प्रेम्ने पावितमनसो भूत्वा निर्म्मलान्तःकरणैः परस्परं गाढ़ं प्रेम कुरुत।
यस्माद् यूयं क्षयणीयवीर्य्यात् नहि किन्त्वक्षयणीयवीर्य्याद् ईश्वरस्य २३
जीवनदायकेन नित्यस्थायिना वाक्येन पुनर्जन्म गृहीतवन्तः।

सर्व्वप्राणी तृणैस्तुल्यस्तत्तेजस्तृणपुष्पवत्। २४
तृणानि परिशुष्यन्ति पुष्पाणि निपतन्ति च।
किन्तु वाक्यं परेशस्यानन्तकालं वितिष्ठते। २५

तदेव च वाक्यं सुसंवादेन युष्माकम् अन्तिके प्रकाशितं।

---

२ द्वितीयोऽध्यायः।

१ ख्रीष्टस्य भित्तिमूलत्वं विश्वासिलोकानां मन्दिरतुल्यत्वं ११ सुखाभिलाषत्यागस्य शासकानां वशित्वस्य चाज्ञा १८ प्रभोः समीपे दासानां वशित्वस्यादेशश्च।

सर्व्वान् द्वेषान् सर्व्वांश्च छलान् कापट्यानीर्ष्याः समस्तग्लानि- १
कथाश्च दूरीकृत्य युष्माभिः परित्राणाय वृद्धिप्राप्त्यर्थं नवजातशिशु- २
भिरिव प्रकृतं वाग्दुग्धं पिपास्यतां। यतः प्रभु र्मधुर एतस्यास्वादं ३
यूयं प्राप्तवन्तः। अपरं मानुषैरवज्ञातस्य किन्त्वीश्वरेणाभिरुचितस्य ४
बहुमूल्यस्य जीवत्प्रस्तरस्येव तस्य प्रभोः सन्निधिम् आगता यूयमपि
जीवत्प्रस्तरा इव निचीयमाना आत्मिकमन्दिरं ख्रीष्टेन यीशुना ५
चेश्वरतोषकाणाम् आत्मिकबलीनां दानार्थं पवित्रो याजकवर्गो
भवथ। यतः शास्त्रे लिखितमास्ते, यथा, ६

पश्य पाषाण एक ऽस्ति सीयोनि स्थापितो मया।

मुख्यकोणस्य योग्यः स हतश्चातीव मूल्यवान्।
यो जनो विश्वसेत् तस्मिन् स लज्जां न गमिष्यति।

७ विश्वासिनां युष्माकमेव समीपे स मूल्यवान् भवति किन्त्वविश्वासिनां
८ कृते निचेतृभिरवज्ञातः स पाषाणः कोणस्य भित्तिमूलं भूत्वा बाधा-
जनकः पाषाणः स्खलनकारकश्च शैलो जातः। ते चाविश्वासाद्
९ वाक्येन स्खलन्ति स्खलने च नियुक्ताः सन्ति। किन्तु यूयं येनान्ध-
कारमध्यात् स्वकीयाश्चर्य्यदीप्तिमध्यम् आहूतास्तस्य गुणान् प्रकाश-
यितुम् अभिरुचितो वंशो राजकीयो याजकवर्गः पवित्रा जाति-
१० रधिकर्त्तव्याः प्रजाश्च जाताः। पूर्व्वं यूयं तस्य प्रजा नाभवत किन्त्वी-
दानीम् ईश्वरस्य प्रजा आध्वे। पूर्व्वम् अननुकम्पिता अभवत
किन्त्विदानीम् अनुकम्पिता आध्वे।

११ हे प्रियतमाः, यूयं प्रवासिनो विदेशिनश्च लोका इव मनसः
प्रातिकूल्येन योधिभ्यः शारीरिकसुखाभिलाषेभ्यो निवर्त्तध्वम् इत्यहं
१२ विनये। देवपूजकानां मध्ये युष्माकम् आचार एवम् उत्तमो भवतु
यथा ते युष्मान् दुष्कर्म्मकारिलोकानिव पुन र्न निन्दन्तः कृपादृष्टि-
१३ दिने स्वचक्षुर्गोचरीयसत्क्रियाभ्य ईश्वरस्य प्रशंसां कुर्य्युः। ततो हेतो
र्यूयं प्रभोरनुरोधात् मानवसृष्टानां कर्तृत्वपदानां वशीभवत विशे-
१४ षतो भूपालस्य यतः स श्रेष्ठः, देशाध्यक्षाणाञ्च यतस्ते दुष्कर्म्मकारिणां
१५ दण्डदानार्थं सत्कर्म्मकारिणां प्रशंसार्थञ्च तेन प्रेरिताः। इत्थं निर्ब्बोध-
मानुषाणाम् अज्ञानत्वं यत् सदाचारिभि र्युष्माभि र्निरुत्तरीक्रियते
१६ तद् ईश्वरस्याभिमतं। यूयं स्वाधीना इवाचरत तथापि दुष्टताया
वेशस्वरूपां स्वाधीनतां धारयन्त इव नहि किन्त्वीश्वरस्य दासा
१७ इव। सर्व्वान् समाद्रियध्वं भ्रातृवर्गे प्रीयध्वम् ईश्वराद् बिभीत
भूपालं सम्मन्यध्वं।

हे दासाः, यूयं सम्पूर्णादरेण प्रभूनां वश्या भवत केवलं भद्राणां १८
दयालूनाञ्च नहि किन्त्वनृजूनामपि। यतो ऽन्यायेन दुःखभोगकाल १९
ईश्वरचिन्तया यत् क्लेशसहनं तदेव प्रियं। पापं कृत्वा युष्माकं २०
चपेटाघातसहनेन का प्रशंसा? किन्तु सदाचारं कृत्वा युष्माकं यद्
दुःखसहनं तदेवेश्वरस्य प्रियं। तदर्थमेव यूयम् आहूता यतः ख्रीष्टो- २१
ऽपि युष्मन्निमित्तं दुःखं भुक्त्वा यूयं यत् तस्य पदचिह्नै र्व्रजेत तदर्थं
दृष्टान्तमेकं दर्शितवान्। स किमपि पापं न कृतवान् तस्य वदने २२
कापि छलस्य कथा नासीत्। निन्दितो ऽपि सन् स प्रतिनिन्दां न २३
कृतवान् दुःखं सहमानो ऽपि न भर्त्सितवान् किन्तु यथार्थविचार-
यितुः समीपे स्वं समर्पितवान्। वयं यत् पापेभ्यो निवृत्य धर्म्मार्थं २४
जीवामस्तदर्थं स स्वशरीरेणास्माकं पापानि क्रुश ऊढवान् तस्य प्रहारै
र्यूयं स्वस्था अभवत। यतः पूर्व्वं यूयं भ्रमणकारिमेषा इवाध्वं किन्त्व- २५
धुना युष्माकम् आत्मनां पालकस्याध्यक्षस्य च समीपं प्रत्यावर्त्तिताः।

---

३ तृतीयोऽध्यायः।

१ स्त्रीपुरुषयोः कर्त्तव्यकर्म्मनिर्णयः ८ परस्परं प्रेमकथनं धर्म्मार्थं दुःखभोगकथनम् आत्मना पूर्व्वकालीनलोकान् प्रतीश्वरस्य कथाप्रचारणञ्च।

हे योषितः, यूयमपि निजस्वामिनां वश्या भवत तथा सति १
यदि केचिद् वाक्ये विश्वासिनो न सन्ति तर्हि ते विनावाक्यं योषि-
ताम् आचारेणार्थतस्तेषां प्रत्यक्षेण युष्माकं सभयसतीत्वाचारेणाक्रष्टुं २
शक्ष्यन्ते। अपरं केशरचनया स्वर्णालङ्कारधारणेन परिच्छदपरिधानेन ३
वा युष्माकं वाह्यभूषा न भवतु, किन्त्वीश्वरस्य साक्षाद् बहुमूल्य- ४
क्षमाशान्तिभावाक्षयरत्नेन युक्तो गुप्त आन्तरिकमानव एव। यतः ५
पूर्व्वकाले याः पवित्रस्त्रिय ईश्वरे प्रत्याशामकुर्व्वन् ता अपि तादृ-

६ शीमेव भूषां धारयन्त्यो निजस्वामिनां वश्या अभवन्। तथैव सारा
इब्राहीमस्य वश्या सती तं पतिमाख्यातवती यूयञ्च यदि सदा-
चारिण्यो भवथ व्याकुलतया च भीता न भवथ तर्हि तस्याः कन्या
७ आध्वे। हे पुरुषाः, यूयं ज्ञानतो दुर्ब्बलतरभाजनैरिव योषिद्भिः
सहवासं कुरुत, एकस्य जीवनवरस्य सहभागिनीभ्यस्ताभ्यः समा-
दरं वितरत च न चेद् युष्माकं प्रार्थनानां बाधा जनिष्यते।
८ विशेषतो यूयं सर्व्वे एकमनसः परदुःखे दुःखिता भ्रातृप्रेमिणः
९ कृपावन्तः प्रीतिभावाश्च भवत। अनिष्टस्य परिशोधेनानिष्टं निन्दाया
वा परिशोधेन निन्दां न कुर्व्वन्त आशिषं दत्त यतो यूयम् आशि-
१० रधिकारिणो भवितुमाहूता इति जानीथ। अपरञ्च,

जीवने प्रीयमाणो यः सुदिनानि दिदृक्षते।
पापात् जिह्वां मृषावाक्यात् स्वाधरौ स निवर्त्तयेत्।
११ स त्यजेद् दुष्टतामार्गं सत्क्रियाञ्च समाचरेत्।
मृगयाणश्च शान्तिं स नित्यमेवानुधावतु।
१२ लोचने परमेशस्योन्मीलिते धार्म्मिकान् प्रति।
प्रार्थनायाः कृते तेषां तच्छ्रोत्रे सुगमे सदा।
क्रोधास्यञ्च परेशस्य कदाचारिषु वर्त्तते।

१३ अपरं यदि यूयम् उत्तमस्यानुगामिनो भवथ तर्हि को युष्मान्
१४ हिंसिष्यते? यदि च धर्म्मार्थं क्लिश्यध्वं तर्हि धन्या भविष्यथ।

तेषाम् आशङ्कया यूयं न बिभीत न विङ्क्त वा।
१५ मनोभिः किन्तु मन्यध्वं पवित्रं प्रभुमीश्वरं।

अपरञ्च युष्माकम् आन्तरिकप्रत्याशायास्तत्त्वं यः कश्चित् पृच्छति
१६ तस्मै शान्तिभीतिभ्याम् उत्तरं दातुं सदा सुसज्जा भवत। ये च
खीष्टधर्म्मे युष्माकं सदाचारं दूषयन्ति ते दुष्कर्म्मकारिणामिव युष्मा-

कम् अपवादेन यत् लज्जिता भवेयुस्तदर्थं युष्माकम् उत्तमः संवेदो
भवतु। ईश्वरस्याभिमताद् यदि युष्माभिः क्लेशः सोढव्यस्तर्हि सदा- १७
चारिभिः क्लेशसहनं वरं न च कदाचारिभिः। यस्माद् ईश्वरस्य १८
सन्निधिम् अस्मान् आनेतुम् अधार्म्मिकाणां विनिमयेन धार्म्मिकः
ख्रीष्टो ऽप्येककृत्वः पापानां दण्डं भुक्तवान्, स च शरीरसम्बन्धे मारितः
किन्त्वात्मनः सम्बन्धे पुन र्जीवितो ऽभवत्। तत्सम्बन्धे च स यात्रां १९
विधाय काराबद्धानाम् आत्मनां समीपे वाक्यं घोषितवान्। पुरा २०
नोहस्य समये यावत् पोतो निरमीयत तावद् ईश्वरस्य दीर्घसहि-
ष्णुता यदा व्यलम्बत तदा तेऽनाज्ञाग्राहिणोऽभवन्। तेन पोते-
नाल्पेऽर्थाद् अष्टावेव प्राणिनस्तोयम् उत्तीर्णाः। तन्निदर्शनञ्चस्नापनं २१
(अर्थतः शारीरिकमलिनतायास्त्यागः स नहि किन्त्वीश्वरायोत्तम-
संवेदस्य या प्रतिज्ञा सैव) यीशुख्रीष्टस्य पुनरुत्थानेनेदानीम् अस्मान् २२
उत्तारयति, यतः स स्वर्गं गत्वेश्वरस्य दक्षिणे विद्यते स्वर्गीयदूताः
शासका बलानि च तस्य वशीभूता अभवन्।

---

४ चतुर्थोऽध्यायः।

१ ख्रीष्ट इव दुःखं भोक्तुं सज्जीभवतेति विनयः ७ धर्म्मम् आचरितुं विनयः १२ धर्म्मार्थं दुःखभोगिनां सान्त्वनायाः कथनञ्च।

अस्माकं विनिमयेन ख्रीष्टः शरीरसम्बन्धे दण्ड भुक्तवान् अतो १
हेतोः शरीरसम्बन्धे यो दण्डं भुक्तवान् स पापात् मुक्त इतिभावेन
यूयमपि सुसज्जीभूय देहवासस्यावशिष्टं समयं पुनर्मानवानाम् इच्छा- २
साधनार्थं नहि किन्त्वीश्वरस्येच्छासाधनार्थं यापयत। आयुषो यः ३
समयो व्यतीतस्तस्मिन् युष्माभि र्यद् देवपूजकानाम् इच्छासाधनं
कामकुत्सिताभिलाषमद्यपानरङ्गरसमत्तताघृणार्हदेवपूजाचरणञ्चा-

४ कारि तेन बाहुल्यं। यूयं तैः सह तस्मिन् सर्व्वनाशपङ्के मज्जितुं
५ न धावथ, इत्यनेनाश्चर्य्यं विज्ञाय ते युष्मान् निन्दन्ति। किन्तु यो
जीवतां मृतानाञ्च। विचारं कर्त्तुम् उद्यतोऽस्ति तस्मै तैरुत्तर
६ दायिष्यते। यतो हेतो र्ये मृतास्तेषां यत् मानवोद्देश्यः शारीरिक-
विचारः किन्त्वीश्वरोद्देश्यम् आत्मिकजीवनं भवेत् तदर्थं तेषामपि
सन्निधौ सुसमाचारः प्रकाशितोऽभवत्।

७ सर्व्वेषाम् अन्तिमकाल उपस्थितस्तस्माद् यूयं सुबुद्धयः प्रार्थनार्थं
८ जाग्रतश्च भवत। विशेषतः परस्परं गाढं प्रेम कुरुत, यतः,

पापानामपि बाहुल्यं प्रेम्नैवाच्छादयिष्यते।

९ कातरोक्तिं विना परस्परम् आतिथ्यं कुरुत। येन यो वरो लब्ध-
१० स्तेनैव स परम् उपकरोतु, इत्थं यूयम् ईश्वरस्य बहुविधप्रसा-
११ दस्योत्तमा भाण्डागाराधिपा भवत। यो वाक्यं कथयति स ईश्वरस्य
वाक्यमिव कथयतु यश्च परम् उपकरोति स ईश्वरदत्तसामर्थ्यादि-
वोपकरोतु। सर्व्वविषये यीशुख्रीष्टेनेश्वरस्य गौरवं प्रकाश्यतां तस्यैव
गौरवं पराक्रमश्च सर्व्वदा भूयात्। आमेन्।

१२ हे प्रियतमाः, युष्माकं परीक्षार्थं यस्तापो युष्मासु वर्त्तते तम्
१३ असम्भवघटितं मत्वा नाश्चर्य्यं जानीत, किन्तु ख्रीष्टेन क्लेशानां
सहभागित्वाद् आनन्दत तेन तस्य प्रतापप्रकाशेऽप्यानन्देन प्रफुल्ला
१४ भविष्यथ। यदि ख्रीष्टस्य नामहेतुना युष्माकं निन्दा भवति तर्हि
यूयं धन्या यतो गौरवदायक ईश्वरस्यात्मा युष्मास्वधितिष्ठति तेषां
१५ मध्ये स निन्द्यते किन्तु युष्मन्मध्ये प्रशंस्यते। किन्तु युष्माकं कोऽपि
हन्ता वा चौरो वा दुष्कर्म्मकृद् वा पराधिकारचर्चक इव दण्डं
१६ न भुङ्क्तां। यदि च ख्रीष्टीयान इव दण्डं भुङ्क्ते तर्हि स न लज्जमान-
१७ स्तत्कारणाद् ईश्वरं प्रशंसतु। यतो विचारस्यारम्भसमय ईश्वरस्य

मन्दिरे युज्यते यदि चास्मत्स्वारभते तर्हीश्वरीयसुसंवादाग्राहिणां शेषदशा का भविष्यति?

धार्म्मिकेनापि चेत् त्राणम् अतिकृच्छ्रेण गम्यते। १८
तर्ह्यधार्म्मिकपापिभ्याम् आश्रयः कुत्र लप्स्यते।

अत ईश्वरेच्छातो ये दुःखं भुञ्जते ते सदाचारेण स्वात्मानो १९
विश्वास्यस्रष्टुरीश्वरस्य कराभ्यां निदधतां।

---

५ पञ्चमोऽध्यायः।

१ प्राचीनलोकानां कर्त्तव्यं कर्म्म ५ यूनामन्येषाञ्च कर्त्तव्यं कर्म्म १० मङ्गलप्रार्थना १२ समाप्तिकथा नमस्कारप्रेषणञ्च।

ख्रीष्टस्य क्लेशानां साक्षी प्रकाशिष्यमाणस्य प्रतापस्यांशी प्राचीन- १
श्चाहं युष्माकं प्राचीनान् विनीयेदं वदामि। युष्माकं मध्यवर्त्ती य २
ईश्वरस्य मेषवृन्दो यूयं तं पालयत तस्य वीक्षणं कुरुत च, आवश्यक-
त्वेन नहि किन्तु स्वेच्छातो न वा कुलोभेन किन्त्विच्छुकमनसा।
अपरम् अंशानाम् अधिकारिण इव न प्रभवत किन्तु वृन्दस्य दृष्टान्त- ३
स्वरूपा भवत। तेन प्रधानपालक उपस्थिते यूयम् अम्लानं गौरव- ४
किरीटं लप्स्यध्वे।

हे युवानः, यूयमपि प्राचीनलोकानां वश्या भवत सर्व्वे च ५
सर्व्वेषां वशीभूय नम्रताभरणेन भूषिता भवत, यतः,

आत्माभिमानिलोकानां विपक्षो भवतीश्वरः।
किन्तु तेनैव नम्रेभ्यः प्रसादाद् दीयते वरः।

अतो यूयम् ईश्वरस्य बलवत्करस्याधो नम्रीभूय तिष्ठत तेन स ६
उचितसमये युष्मान् उच्चीकरिष्यति। यूयं सर्व्वचिन्तां तस्मिन् निक्षिपत ७
यतः स युष्मान् प्रति चिन्तयति। यूयं प्रबुद्धा जाग्रतश्च तिष्ठत यतो ८

यूष्माकं प्रतिवादी यः शैतानः स गर्ज्जनकारी सिंह इव पर्य्यटन् कं ग्रसि-
९ ष्यामीति मृगयते, अतो विश्वासे सुस्थिरास्तिष्ठन्तस्तेन सार्द्धं युध्यत,
युष्माकं जगन्निवासिभ्रातृष्वपि तादृशाः क्लेशा वर्त्तन्त इति जानीत।
१० क्षणिकदुःखभोगात् परम् अस्मभ्यं ख्रीष्टेन यीशुना स्वकीया-
नन्तगौरवदानार्थं योऽस्मान् आहूतवान् स सर्व्वानुग्राहीश्वरः स्वयं
११ युष्मान् सिद्धान् स्थिरान् सबलान् निश्चलांश्च करोतु। तस्य गौरवं
पराक्रमश्चानन्तकालं यावद् भूयात्। आमेन्।
१२ यः सिल्वानो (मन्ये) युष्माकं विश्वास्यो भ्राता भवति तद्द्वा-
राहं संक्षेपेण लिखित्वा युष्मान् विनीतवान् यूयञ्च यस्मिन् अधि-
१३ तिष्ठथ स एवेश्वरस्य सत्यो ऽनुग्रह इति प्रमाणं दत्तवान्। युष्माभिः
सहाभिरुचिता या मण्डली बाबिलि विद्यते सा मम पुत्रो मार्कश्च
१४ युष्मान् नमस्कारं वेदयति। यूयं प्रेमचुम्बनेन परस्परं नमस्कुरुत।
यीशुख्रीष्टाश्रितानां युष्माकं सर्व्वेषां शान्ति र्भूयात्। आमेन्।

पितरस्य द्वितीयं सर्व्वसाधारणपत्रं।

१ प्रथमोऽध्यायः।

१ मङ्गलाचरणम् ३ अनुग्रहार्थं कृतज्ञत्वं, नानाधर्म्मकर्म्म कर्त्तुं पितरस्य विनयः
१२ निजमरणस्य कथनं ख्रीष्टस्य सत्यचाक्षुषत्वकथनञ्च।

१ ये जना अस्माभिः सार्द्धम् अस्मदीश्वरे त्रातरि यीशुख्रीष्टे च
धार्म्मिकत्वसम्बलितविश्वासधनस्य समानांशित्वं प्राप्तास्तान् प्रति यीशु-
२ ख्रीष्टस्य दासः प्रेरितश्च शिमोनो पितरः पत्रं लिखति। ईश्वरस्यास्माकं
प्रभो र्यीशोश्च तत्त्वज्ञानेन युष्मास्वनुग्रहशान्त्यो र्बाहुल्यं वर्त्ततां।
३ जीवनार्थम् ईश्वरभक्त्यर्थञ्च यद्यद् आवश्यकं तत् सर्व्वं गौरव-

सद्गुणाभ्याम् अस्मदाह्वानकारिणस्तत्त्वज्ञानद्वारा तस्येश्वरीयशक्तिर-
स्मभ्यं दत्तवती। तत्सर्व्वेण चास्मभ्यं तादृशा बहुमूल्या महाप्रतिज्ञा ४
दत्ता याभि र्यूयं संसारव्यापात् कुत्सिताभिलाषमूलात् सर्व्वनाशाद्
रक्षां प्राप्येश्वरीयस्वभावस्यांशिनो भवितुं शक्नुथ। ततो हेतो र्यूयं ५
सम्पूर्णं यत्नं विधाय विश्वासे सौजन्यं सौजन्ये ज्ञानं ज्ञान आयते- ६
न्द्रियताम् आयतेन्द्रियतायां धैर्य्यं धैर्य्य ईश्वरभक्तिम् ईश्वरभक्तौ
भ्रातृस्नेहं भ्रातृस्नेहे च प्रेम युङ्क्त। एतानि यदि युष्मासु विद्यन्ते ७
वर्द्धन्ते च तर्ह्यस्मत्प्रभो र्यीशुख्रीष्टस्य तत्त्वज्ञाने युष्मान् अलसान् ८
निष्फलांश्च न स्थापयिष्यन्ति। किन्त्वेतानि यस्य न विद्यन्ते सो ऽन्धो ९
मुद्रितलोचनः स्वकीयपूर्व्वपापानां मार्ज्जनस्य विस्मृतिं गतश्च। तस्माद् १०
हे भ्रातरः, यूयं स्वकीयाह्वानवरणयो र्दृढकरणे बहु यतध्वं, तत्
कृत्वा कदाच न स्खलिष्यथ। यतो ऽनेन प्रकारेणास्माकं प्रभोस्त्रातु ११
र्यीशुख्रीष्टस्यानन्तराज्यस्य प्रवेशेन यूयं सुकलेन योजयिष्यध्वे।

यद्यपि यूयम् एतत् सर्व्वं जानीथ वर्त्तमाने सत्यमते सुस्थिरा १२
भवथ च तथापि युष्मान् सर्व्वदा तत् स्मारयितुम् अहम् अयत्नवान्
न भविष्यामि। यावद् एतस्मिन् दूष्ये तिष्ठामि तावद् युष्मान् १३
स्मारयन् प्रबोधयितुं विहितं मन्ये। यतो ऽस्माकं प्रभु र्यीशुख्रीष्टो १४
मां यत् ज्ञापितवान् तदनुसाराद् दूष्यमेतत् मया शीघ्रं त्यक्तव्यम्
इति जानामि। मम परलोकगमनात् परमपि यूयं यदेतानि स्मर्त्तुं १५
शक्ष्यथ तस्मिन् सर्व्वथा यतिष्ये। यतो ऽस्माकं प्रभो र्यीशुख्रीष्टस्य १६
पराक्रमं पुनरागमनञ्च युष्मान् ज्ञापयन्तो वयं कल्पितान्युपाख्या-
नान्यन्वगच्छामेति नहि किन्तु तस्य महिम्नः प्रत्यक्षसाक्षिणो भूत्वा
भाषितवन्तः। यतः स पितुरीश्वराद् गौरवं प्रशंसाञ्च प्राप्तवान् विशेषतो १७
महिमयुक्ततेजोमध्याद् एतादृशी वाणी तं प्रति निर्गतवती, यथा, एष

१८ मम प्रियपुत्र एतस्मिन् मम परमसन्तोषः। स्वर्गात् निर्गतेयं वाणी
१९ पवित्रपर्व्वते तेन सार्द्धं विद्यमानैरस्माभिरश्रावि। अपरम् अस्मत्समीपे
दृढतरं भाववाणी विद्यते यूयञ्च यदि दिनारम्भं युष्मन्मनःसु प्रभा-
तीयनक्षत्रस्योदयञ्च यावत् तिमिरमये स्थाने ज्वलन्तं प्रदीपमिव तद्
२० वाक्यं सम्मन्यध्वे तर्हि भद्रं करिष्यथ। शास्त्रीया कापि भाववाणी मनु-
२१ ष्यस्य स्वकीयभावबोधका नहि, एतद् युष्माभिः सम्यक् ज्ञायतां। यतो
भाववाणी पुरा मानुषाणाम् इच्छातो नोत्पन्ना किन्त्वीश्वरस्य पवित्र-
लोकाः पवित्रेणात्मना प्रवर्त्तिताः सन्तो वाक्यम् अभाषन्त।

---

२ द्वितीयोऽध्यायः।

१ मिथ्याभाववादिन उद्दिश्य कथनं ४ तेषां दोषो दण्डो धार्म्मिकाणां रक्षाया कथनञ्च।

१ अपरं पूर्व्वकाले यथा लोकानां मध्ये मिथ्याभाववादिन उपा-
तिष्ठन् तथा युष्माकं मध्येऽपि मिथ्याशिक्षका उपस्थास्यन्ति, ते
स्वेषां क्रेतारं प्रभुम् अनङ्गीकृत्य सत्वरं विनाशं स्वेषु वर्त्तयन्ति
२ विनाशकवैधर्म्म्यं गुप्तं युष्मन्मध्यम् आनेष्यन्ति। ततो ऽनेकेषु तेषां
३ विनाशकमार्गं गतेषु तेभ्यः सत्यमार्गस्य निन्दा सम्भविष्यति। अपरञ्च
ते लोभात् कापट्यवाक्यै र्युष्मत्तो लाभं करिष्यन्ते किन्तु तेषां
पुरातनदण्डाज्ञा न विलम्बते तेषां विनाशश्च न निद्राति।
४ ईश्वरः कृतपापान् दूतान् न क्षमित्वा तिमिरशृङ्खलैः पाताले
५ रुद्ध्वा विचारार्थं समर्पितवान्। पुरातनं संसारमपि न क्षमित्वा तं
दुष्टानां संसारं जलाप्लावनेन मज्जयित्वा सप्तजनैः सहितं धर्म्मप्रचारकं
६ नोहं रक्षितवान्। सदोमो घोमरा चेतिनामके नगरे भविष्यतां
७ दुष्टानां दृष्टान्तं विधाय भस्मीकृत्य विनाशेन दण्डितवान्; किन्तु
तैः कुत्सितव्यभिचारिभि र्दुष्टात्मभिः क्लिष्टं धार्म्मिकं लोटं रक्षित-

वान्। स धार्म्मिको जनस्तेषां मध्ये निवसन् स्वीयदृष्टिश्रोत्रगोचरेभ्य- ८
स्तेषाम् अधर्म्माचारेभ्यः स्वकीयधार्म्मिकमनसि दिने दिने तप्तवान्।
प्रभु र्भक्तान् परीक्षाद् उद्धर्त्तुं विचारदिनञ्च यावद् दण्ड्यमानान् ९
अधार्म्मिकान् रोद्धुं पारयति, विशेषतो ये ऽमेध्याभिलाषात् १०
शारीरिकसुखम् अनुगच्छन्ति कर्तृत्वपदानि चावजानन्ति तानेव
(रोद्धुं पारयति।) ते दुःसाहसिनः प्रगल्भाश्च। अपरं बलगौरवाभ्यां ११
श्रेष्ठा दिव्यदूताः प्रभोः सन्निधौ येषां वैपरीत्येन निन्दासूचकं विचारं
न कुर्व्वन्ति तेषाम् उच्चपदस्थानां निन्दनाद् इमे न भीताः। किन्तु १२
ये बुद्धिहीनाः प्रकृता जन्तवो धर्त्तव्यतायै विनाश्यतायै च जायन्ते
तत्सदृशा इमे यन्न बुध्यन्ते तत् निन्दन्तः स्वकीयविनाश्यतया विनं-
क्ष्यन्ति स्वीयाधर्म्मस्य फलं प्राप्स्यन्ति च। ते दिवा प्रकृष्टभोजनं १३
सुखं मन्यन्ते निजछलैः सुखभोगिनः सन्तो युष्माभिः सार्द्धं भोजनं
कुर्व्वन्तः कलङ्किनो दोषिणश्च भवन्ति। तेषां लोचनानि परदाराका- १४
ङ्क्षीणि पापे चाश्रान्तानि ते चञ्चलानि मनांसि मोहयन्ति लोभे
तत्परमनसः सन्ति च। ते शापग्रस्ता वंशाः सरलमार्गं विहाय १५
वियोरपुत्रस्य विलियमस्य विपथेन व्रजन्तो भ्रान्ता अभवन्। स
विलियमो ऽप्यधर्म्मात् प्राप्ये पारितोषिकेऽप्रीयत, किन्तु निजा- १६
पराधाद् भर्त्सनाम् अलभत यतो वचनशक्तिहीनं वाहनं मानुषिक-
गिरम् उच्चार्य्य भाववादिन उन्मत्तताम् अबाधत। इमे निर्जलानि १७
प्रस्रवणानि प्रचण्डवायुना चालिता मेघाश्च तेषां कृते नित्यस्थायी
घोरतरान्धकारः सञ्चितो ऽस्ति। ये च जना भ्रान्त्याचारिगणात् १८
कृच्छ्रेणोद्धृतास्तान् इमे ऽपरिमितदर्पकथा भाषमाणाः शारीरिक-
सुखाभिलाषैः कामक्रीडाभिश्च मोहयन्ति। तेभ्यः स्वाधीनतां प्रति- १९
ज्ञाय स्वयं विनाश्यताया दासा भवन्ति, यतः,

यो येनैव पराजिग्ये स जातस्तस्य किङ्करः।

२० त्रातुः प्रभो र्यीशुख्रीष्टस्य ज्ञानेन संसारस्य मलेभ्य उद्धृता ये
पुनस्तेषु निमज्ज्य पराजीयन्ते तेषां प्रथमदशातः शेषदशा कुत्सिता
२१ भवति। तेषां पक्षे धर्म्मपथस्य ज्ञानाप्राप्ति र्वरं न च निर्द्दिष्टात्
२२ पवित्रविधिमार्गात् ज्ञानप्राप्तानां परावर्त्तनं। किन्तु येयं सत्या
दृष्टान्तकथा सैव तेषु फलितवती, यथा,

कुक्कुरः स्वीयवान्ताय व्यावर्त्तते पुनः पुनः।
लुठितुं कर्द्दमे तद्वत् क्षालितश्चैव शूकरः॥

---

३ तृतीयोऽध्यायः।

१ ख्रीष्टस्यागमनस्य जगतो दग्धत्वस्य च कथनं १४ धर्म्मम् आचरितुं पितरस्य विनयश्च।

१ हे प्रियतमाः, यूयं यथा पवित्रभाववादिभिः पूर्व्वोक्तानि
वाक्यानि त्रात्रा प्रभुना प्रेरितानाम् अस्माकम् आदेशञ्च स्मरथ
२ तथा युष्मान् स्मारयित्वा युष्माकं सरलभावं प्रबोधयितुम् अहं
३ द्वितीयम् इदं पत्रं लिखामि। प्रथमं युष्माभिरिदं ज्ञायतां यत्
४ शेषे काले स्वेच्छाचारिणो निन्दका उपस्थाय वदिष्यन्ति प्रभोरा-
गमनस्य प्रतिज्ञा कुत्र? यतः पितृलोकानां महानिद्रागमनात्
५ परं सर्व्वाणि सृष्टेरारम्भकाले यथा तथैवावतिष्ठन्ते। पूर्व्वम् ईश्वरस्य
वाक्येनाकाशमण्डलं जलाद् उत्पन्ना जले सन्तिष्ठमाना च पृथिव्य-
विद्यतैतद् अनिच्छुकतातस्ते न जानन्ति, ततस्तात्कालिकसंसारो
६ जलेनाप्लावितो विनाशं गतः। किन्त्वधुना वर्त्तमाने आकाशभूमण्डले
७ तेनैव वाक्येन वह्न्यर्थं गुप्ते विचारदिनं दुष्टमानवानां विनाशञ्च
८ यावद् रक्ष्येते। हे प्रियतमाः, यूयम् एतदेकं वाक्यम् अनवगता
मा भवत यत् प्रभोः साक्षाद् दिनमेकं वर्षसहस्रवद् वर्षसहस्रञ्च

दिनैकवत्। केचिद् यथा विलम्बं मन्यन्ते तथा प्रभुः स्वप्रतिज्ञायां ९
विलम्बते तन्नहि किन्तु को ऽपि यन्न विनश्येत् सर्व्वे एव मनः-
परावर्त्तनं गच्छेयुरित्यभिलषन् सो ऽस्मान् प्रति दीर्घसहिष्णुतां
विदधाति। किन्तु क्षपायां चौर इव प्रभो र्दिनम् आगमिष्यति १०
तस्मिन् महाशब्देन गगनमण्डलं लोप्स्यते मूलवस्तूनि च तापेन
गलिष्यन्ते पृथिवी तन्मध्यस्थितानि कर्म्माणि च धक्ष्यन्ते। अतः ११
सर्व्वैरेतै र्विकारे गन्तव्ये सति यस्मिन् आकाशमण्डलं दाहेन विकारि-
ष्यते मूलवस्तूनि च तापेन गलिष्यन्ते तस्येश्वरदिनस्यागमनं प्रतीक्षमाणै- १२
राकाङ्क्षमाणैश्च यूष्माभि र्धर्म्माचारेश्वरभक्तिभ्यां कीदृशै र्लोकै र्भवि-
तव्यं? तथापि वयं तस्य प्रतिज्ञानुसारेण धर्म्मस्य वासस्थानं नूतनम् १३
आकाशमण्डलं नूतनं भूमण्डलञ्च प्रतीक्षामहे।

अतएव हे प्रियतमाः, तानि प्रतीक्षमाणा यूयं निष्कलङ्का १४
अनिन्दिताश्च भूत्वा यत् शान्त्याश्रितास्तिष्ठथैतस्मिन् यतध्वं। अस्माकं १५
प्रभो र्दीर्घसहिष्णुताञ्च परित्राणजनिकां मन्यध्वं। अस्माकं प्रिय-
भ्रात्रे पौलाय यत् ज्ञानम् अदायि तदनुसारेण सोऽपि पत्रे युष्मान्
प्रति तदेवालिखत्। स्वकीयसर्व्वपत्रेषु चैतान्यधि प्रस्तुत्य तदेव १६
गदति। तेषु पत्रेषु कतिपयानि दुरूह्याणि वाक्यानि विद्यन्ते ये
च लोका अज्ञानाश्चञ्चलाश्च ते निजविनाशार्थम् अन्यशास्त्रीय-
वचनानीव तान्यपि विकारयन्ति। तस्माद् हे प्रियतमाः, यूयं पूर्व्वं १७
बुद्ध्वा सावधानास्तिष्ठत, अधार्म्मिकाणां भ्रान्तिस्रोतसापहृताः स्वकीय-
सुस्थिरत्वात् मा भ्रश्यत। किन्त्वस्माकं प्रभोस्त्रातु र्यीशुख्रीष्टस्या- १८
नुग्रहे ज्ञाने च वर्द्धध्वं। तस्य गौरवम् इदानीं सदाकालञ्च भूयात्।
आमेन्।

योहनस्य प्रथमं सर्व्वसाधारणपत्रं।

१ प्रथमोऽध्यायः।

१ ख्रीष्टस्य कथनं ५ तेन सार्द्धम् अस्माकं मैत्री तेनास्माकं पापमोचनञ्च।

१ आदितो य आसीद् यस्य वाग् अस्माभिरश्रावि यञ्च वयं
स्वनेत्रै र्दृष्टवन्तो यञ्च वीक्षितवन्तः स्वकरैः स्पृष्टवन्तश्च तं जीव-
२ नवादं वयं ज्ञापयामः। स जीवनस्वरूपः प्राकाशत वयञ्च तं
दृष्टवन्तस्तमधि साक्ष्यं दद्मश्च, यश्च पितुः सन्निधाववर्त्ततास्माकं
समीपे प्राकाशत च तम् अनन्तजीवनस्वरूपं वयं युष्मान् ज्ञाप-
३ यामः। अस्माभि र्यद् दृष्टं श्रुतञ्च तदेव युष्मान् ज्ञाप्यते तेना-
स्माभिः सहांशित्वं युष्माकं भविष्यति। अस्माकञ्च सहांशित्वं पित्रा
४ तत्पुत्रेण यीशुख्रीष्टेन च सार्द्धं भवति। अपरञ्च युष्माकम्
आनन्दो यत् सम्पूर्णो भवेद् तदर्थं वयम् एतानि लिखामः।
५ वयं यां वार्त्तां तस्मात् श्रुत्वा युष्मान् ज्ञापयामः सेयम्।
६ ईश्वरो ज्योतिस्तस्मिन् अन्धकारस्य लेशोऽपि नास्ति। वयं तेन
सहांशिन इति गदित्वा यद्यन्धकारे चरामस्तर्हि सत्याचारिणो न
७ सन्तोऽनृतवादिनो भवामः। किन्तु स यथा ज्योतिषि वर्त्तते तथा
वयमपि यदि ज्योतिषि चरामस्तर्हि परस्परं सहभागिनो भवाम-
स्तस्य पुत्रस्य यीशुख्रीष्टस्य रुधिरञ्चास्मान् सर्व्वस्मात् पापात् शुद्ध-
८ यति। वयं निष्पापा इति यदि वदामस्तर्हि स्वयमेव स्वान् वञ्च-
९ यामः सत्यमतञ्चास्माकम् अन्तरे न विद्यते। यदि स्वपापानि
स्वीकुर्म्महे तर्हि स विश्वास्यो याथार्थिकश्चास्ति तस्माद् अस्माकं

पापानि क्षमिष्यते सर्व्वस्माद् अधर्म्माच्चास्मान् शुद्धयिष्यति । वयम् १०
अकृतपापा इति यदि वदामस्तर्हि तम् अनृतवादिनं कुर्म्मस्तस्य
वाक्यञ्चास्माकम् अन्तरे न विद्यते ।

---

२ द्वितीयोऽध्यायः ।

१ अस्माकं पापानां ख्रीष्टस्य प्रायश्चित्तस्वरूपत्वं ३ ईश्वरस्याज्ञापालनात् तदीयतत्त्वज्ञानस्य चिह्नत्वं ७ परस्परप्रेमकथनं १२ संसारे प्रेमनिषेधः १८ ख्रीष्टारितः सावधानत्वं कर्त्तुं ख्रीष्टे विश्वसितुं निवेदनञ्च ।

हे प्रियबालकाः, युष्माभि र्यत् पापं न क्रियेत तदर्थं युष्मान् १
प्रत्येतानि मया लिख्यन्ते । यदि तु केनापि पापं क्रियते तर्हि
पितुः समीपे ऽस्माकं एकः सहायो ऽर्थतो धार्म्मिको यीशुः
ख्रीष्टो विद्यते । स चास्माकं पापानां प्रायश्चित्तं केवलमस्माकं २
नहि किन्तु निखिलसंसारस्य पापानां प्रायश्चित्तं ।

वयं तं जानीम इति तदीयाज्ञापालनेनावगच्छामः । अहं तं ३
जानामीति वदित्वा यस्तस्याज्ञा न पालयति सो ऽनृतवादी सत्य- ४
मतञ्च तस्यान्तरे न विद्यते । यः कश्चित् तस्य वाक्यं पालयति ५
तस्मिन् ईश्वरस्य प्रेम सत्यरूपेण सिध्यति वयं तस्मिन् वर्त्तामहे
तद् एतेनावगच्छामः । अहं तस्मिन् तिष्ठामीति यो गदति तस्ये- ६
दम् उचितं यत् ख्रीष्टो यादृग् आचरितवान् सो ऽपि तादृग्
आचरेत् ।

हे प्रियतमाः, युष्मान् प्रत्यहं नूतनामाज्ञां लिखामीति नहि ७
किन्त्वादितो युष्माभि र्लब्धां पुरातनामाज्ञां लिखामि । आदितो ८
युष्माभि र्यद् वाक्यं श्रुतं सा पुरातनाज्ञा । पुनरपि युष्मान् प्रति
नूतनाज्ञा मया लिख्यत एतदपि तस्मिन् युष्मासु च सत्यं, यतो

९ ऽन्धकारो व्यत्येति सत्या ज्योतिश्चेदानीं प्रकाशते; अहं ज्योतिषि
वर्त्ते इति गदित्वा यः स्वभ्रातरं द्वेष्टि सो ऽद्यापि तमिस्रे वर्त्तते ।
१० स्वभ्रातरि यः प्रीयते स एव ज्योतिषि वर्त्तते विघ्नजनकं किमपि
११ तस्मिन् न विद्यते । किन्तु स्वभ्रातरं यो द्वेष्टि स तिमिरे वर्त्तते
तिमिरे चरति च तिमिरेण च तस्य नयने ऽन्धीक्रियेते तस्मात्
क्क यामीति स ज्ञातुं न शक्नोति ।
१२ हे शिशवः, यूयं तस्य नाम्ना पापक्षमां प्राप्तवन्तस्तस्माद् अहं
१३ युष्मान् प्रति लिखामि । हे पितरः, य आदितो वर्त्तमानस्तं यूयं
जानीथ तस्माद् युष्मान् प्रति लिखामि । हे युवानः, यूयं पापा-
त्मानं जितवन्तस्तस्माद् युष्मान् प्रति लिखामि । हे बालकाः,
१४ यूयं पितरं जानीथ तस्मादहं युष्मान् प्रति लिखितवान् । हे
पितरः, आदितो यो वर्त्तमानस्तं यूयं जानीथ तस्माद् युष्मान्
प्रति लिखितवान् । हे युवानः, युयं बलवन्त आध्वे, ईश्वरस्य
वाक्यञ्च युष्मदन्तरे वर्त्तते पापात्मा च युष्माभिः पराजिग्ये तस्माद्
१५ युष्मान् प्रति लिखितवान् । यूयं संसारे संसारस्थविषयेषु च मा
प्रीयध्वं यः संसारे प्रीयते तस्यान्तरे पितुः प्रेम न तिष्ठति ।
१६ यतः संसारे यद्यत् स्थितम् अर्थतः शारीरिकभावस्याभिलाषो
दर्शनेन्द्रियस्याभिलाषो जीवनस्य गर्व्वश्च सर्व्वमेतत् पितृतो न
१७ जायते किन्तु संसारादेव । संसारस्तदीयाभिलाषश्च व्यत्येति किन्तु
य ईश्वरस्येष्टं करोति सो ऽनन्तकालं यावत् तिष्ठति ।
१८ हे बालकाः, शेषकालोऽयं, अपरं ख्रीष्टारिणोपस्थातव्यमिति
युष्माभि र्यथा श्रुतं तथा बहवः ख्रीष्टारय उपस्थितास्तस्माद्यं
१९ शेषकालोऽस्तीति वयं जानीमः । ते ऽस्मन्मध्यान् निर्गतवन्तः
किन्त्वस्मदीया नासन् यद्यस्मदीया अभविष्यन् तर्ह्यस्मत्सङ्गे ऽस्थास्यन्,

किन्तु सर्व्वे ऽस्मदीया न सन्त्येतस्य प्रकाश आवश्यक आसीत्। यः २०
पवित्रस्तस्माद् यूयम् अभिषेकं प्राप्तवन्तस्तेन सर्व्वाणि जानीथ।
यूयं सत्यमतं न जानीथ तत्कारणाद् अहं युष्मान् प्रति लिखित- २१
वान् तन्नहि किन्तु यूयं तत् जानीथ सत्यमताच्च किमप्यनृतवाक्यं
नोत्पद्यते तत्कारणादेव। यीशुरभिषिक्तस्त्रातेति यो नाङ्गीकरोति २२
तं विना को ऽपरोऽनृतवादी भवेत्? स एव स ख्रीष्टारि र्यः
पितरं पुत्त्रञ्च नाङ्गीकरोति। यः कश्चित् पुत्त्रं नाङ्गीकरोति स २३
पितरमपि न धारयति यश्च पुत्त्रमङ्गीकरोति स पितरमपि धार-
यति। आदितो युष्माभि र्यत् श्रुतं तद् युष्मासु तिष्ठतु, आदितः २४
श्रुतं वाक्यं यदि युष्मासु तिष्ठति, तर्हि यूयमपि पुत्त्रे पितरि च
स्थास्यथ। स च प्रतिज्ञयास्मभ्यं यत् प्रतिज्ञातवान् तद् अनन्त- २५
जीवनं। ये जना युष्मान् भ्रामयन्ति तानध्यहम् इदं लिखित- २६
वान्। अपरं यूयं तस्माद् यम् अभिषेकं प्राप्तवन्तः स युष्मासु २७
तिष्ठति ततः कोऽपि यद् युष्मान् शिक्षयेत् तद् अनावश्यकं, स
चाभिषेको युष्मान् सर्व्वाणि शिक्षयति सत्यश्च भवति न चातथ्यः,
अतः स युष्मान् यद्वद् अशिक्षयत् तद्वत् तत्र स्थास्यथ। अतएव २८
हे प्रियबालका यूयं तत्र तिष्ठत, तथा सति स यदा प्रकाशिष्यते
तदा वयं प्रतिभान्विता भविष्यामः, तस्यागमनसमये च तस्य
साक्षान्न त्रपिष्यामहे। स धार्म्मिको ऽस्तीति यदि यूयं जानीथ तर्हि २९
यः कश्चिद् धर्म्माचारं करोति स तस्मात् जात इत्यपि जानीत।

---

३ तृतीयोऽध्यायः।

अस्मान् प्रतीश्वरस्यानुग्रहः, तत्कारणात् पापत्यागपरस्परप्रेमधर्म्मकर्म्मणाम् अव-
श्यकर्त्तव्यत्वञ्च।

१ पश्यत वयम् ईश्वरस्य सन्ताना इति नाम्नाख्यामहे, एतेन
पितास्मभ्यं कीदृक् महाप्रेम प्रदत्तवान्, किन्तु संसारस्तं नाजानात्
२ तत्कारणादस्मान् अपि न जानाति। हे प्रियतमाः, इदानीं वयम्
ईश्वरस्य सन्ताना आस्महे पश्चात् किं भविष्यामस्तद् अद्याप्य-
प्रकाशितं किन्तु प्रकाशं गते वयं तस्य सदृशा भविष्याम इति
जानीमः, यतः स यादृशो ऽस्ति तादृशोऽस्माभि र्दर्श्निष्यते।
३ तस्मिन् एषा प्रत्याशा यस्य कस्यचिद् भवति स स्वं तथा पवित्रं
४ करोति यथा स पवित्रोऽस्ति। यः कश्चित् पापम् आचरति स
५ व्यवस्थालङ्घनं करोति यतः पापमेव व्यवस्थालङ्घनं। अपरं सो-
ऽस्माकं पापान्यपहर्त्तुं प्राकाशतैतद् यूयं जानीथ, पापञ्च तस्मिन्
६ न विद्यते। यः कश्चित् तस्मिन् तिष्ठति स पापाचारं न करोति
यः कश्चित् पापचारं करोति स तं न दृष्टवान् न वावगतवान्।
७ हे प्रियबालकाः, कश्चिद् युष्माकं भ्रमं न जनयेत्, यः कश्चिद्
धर्म्माचारं करोति स तादृग् धार्म्मिको भवति यादृक् स
८ धार्म्मिकोऽस्ति। यः पापाचारं करोति स शैतानात् जातो यतः
शैतान आदितः पापाचारी शैतानस्य कर्म्मणां लोपार्थमेवेश्वरस्य
९ पुत्त्रः प्राकाशत। यः कश्चिद् ईश्वरात् जातः स पापाचारं न
करोति यतस्तस्य वीर्य्यं तस्मिन् तिष्ठति पापाचारं कर्त्तुञ्च न
१० शक्नोति यतः स ईश्वरात् जातः। इत्यनेनेश्वरस्य सन्तानाः
शैतानस्य च सन्ताना व्यक्ता भवन्ति। य कश्चिद् धर्म्माचारं न
करोति स ईश्वरात् जातो नहि यश्च स्वभ्रातरि न प्रीयते
११ सोऽपीश्वरात् जातो नहि। यतस्तस्य य आदेश आदितो युष्माभिः
१२ श्रुतः स एष एव यद् अस्माभिः परस्परं प्रेम कर्त्तव्यं। पापात्मतो
जातो यः काबिल् स्वभ्रातरं हतवान् तत्सदृशैरस्माभि र्न भवितव्यं।

स कस्मात् कारणात् तं हतवान्? तस्य कर्म्माणि दुष्टानि तद्भ्रातुश्च
कर्म्माणि धर्म्माण्यासन् इति कारणात्। हे मम भ्रातरः, संसारो १३
यदि युष्मान् द्वेष्टि तर्हि तद् आश्चर्य्यं न मन्यध्वं। वयं मृत्युम् १४
उत्तीर्य्य जीवनं प्राप्तवन्तस्तद् भ्रातृषु प्रेमकरणात् जानीमः।
भ्रातरि यो न प्रीयते स मृत्यौ तिष्ठति। यः कश्चित् स्वभ्रातरं १५
द्वेष्टि स नरघाती किञ्चानन्तजीवनं नरघातिनः कस्याप्यन्तरे
नावतिष्ठते तद् यूयं जानीथ। अस्माकं कृते स स्वप्राणांस्त्यक्तवान् १६
इत्यनेन वयं प्रेम्नस्तत्त्वम् अवगताः, अपरं भ्रातॄणां कृतेऽस्माभिरपि
प्राणास्त्यक्तव्याः। सांसारिकजीविकाप्राप्तो यो जनः स्वभ्रातरं दीनं १७
दृष्ट्वा तस्मात् स्वीयदयां रुणद्धि तस्यान्तर ईश्वरस्य प्रेम कथं
तिष्ठेत्? हे मम प्रियबालकाः, वाक्येन जिह्वया वास्माभिः प्रेम १८
न कर्त्तव्यं किन्तु कार्य्येण सत्यतया चैव। एतेन वयं यत् सत्य- १९
मतसम्बन्धीयास्तत् जानीमस्तस्य साक्षात् स्वान्तःकरणानि सान्त्वयितुं
शक्ष्यामश्च। यतोऽस्मदन्तःकरणं यद्यस्मान् दूषयति तर्ह्यस्मदन्तः- २०
करणाद् ईश्वरो महान् सर्व्वज्ञश्च। हे प्रियतमाः, अस्मदन्तःकरणं २१
यद्यस्मान् न दूषयति तर्हि वयम् ईश्वरस्य साक्षात् प्रतिभान्विता
भवामः। यच्च प्रार्थयामहे तत् तस्मात् प्राप्नुमः, यतो वयं २२
तस्याज्ञाः पालयामस्तस्य साक्षात् तुष्टिजनकम् आचारं कुर्म्मश्च।
अपरं तस्येयमाज्ञा यद् वयं तस्य पुत्त्रस्य यीशुख्रीष्टस्य नाम्नि २३
विश्वसिमस्तस्याज्ञानुसारेण च परस्परं प्रेम कुर्म्मः। यश्च तस्याज्ञाः २४
पालयति स तस्मिन् तिष्ठति तस्मिन् सोऽपि तिष्ठति; स चास्मान्
यम् आत्मानं दत्तवान् तस्मात् सोऽस्मासु तिष्ठतीति जानीमः।

४ चतुर्थोऽध्यायः ।

१ परीक्षां विना सर्व्वेषाम् उपदेशकानाम् अग्राह्यत्व ७ परस्परं प्रेमकरणस्य फलनिर्णयश्च ।

१ हे प्रियतमाः, यूयं सर्व्वेष्वात्मसु न विश्वसित किन्तु ते
ईश्वरात् जाता न वेत्यात्मनः परीक्षध्वं यतो बहवो मृषाभाव-
२ वादिनो जगन्मध्यम् आगतवन्तः । ईश्वरीयो य आत्मा स युष्मा-
भिरनेन परिचीयतां, यीशुः ख्रीष्टो नरावतारो भूलागत एतद्
३ येन केनचिद् आत्मना स्वीक्रियते स ईश्वरीयः । किन्तु यीशुः
ख्रीष्टो नरावतारो भूलागत एतद् येन केनचिद् आत्मना
नाङ्गीक्रियते स ईश्वरीयो नहि किन्तु ख्रीष्टारेरात्मा, तेन
चागन्तव्यमिति युष्माभिः श्रुतं, स चेदानीमपि जगति वर्त्तते ।
४ हे बालकाः, यूयम् ईश्वरात् जातास्तान् जितवन्तश्च यतः संसा-
५ राधिष्ठानकारिणोऽपि युष्मदधिष्ठानकारी महान् । ते संसारात्
जातास्ततो हेतोः संसाराद् भाषन्ते संसारश्च तेषां वाक्यानि
६ गृह्णाति । वयम् ईश्वरात् जाताः, ईश्वरं यो जानाति सोऽस्मद्-
वाक्यानि गृह्णाति यश्चेश्वरात् जातो नहि सोऽस्मद्वाक्यानि न
गृह्णाति ; अनेन वयं सत्यात्मानं भ्रामकात्मानञ्च परिचिनुमः ।
७ हे प्रियतमाः, वयं परस्परं प्रेम करवाम, यतः प्रेम ईश्वरात्
जायते, अपरं यः कश्चित् प्रेम करोति स ईश्वरात् जात ईश्वरं
८ वेत्ति च । यः प्रेम न करोति स ईश्वरं न जानाति यत ईश्वरः
९ प्रेमस्वरूपः । अस्मास्वीश्वरस्य प्रेमैतेन प्राकाशत यत् स्वपुत्रेणास्मभ्यं
जीवनदानार्थम् ईश्वरः स्वीयम् अद्वितीयं पुत्रं जगन्मध्यं प्रेषित-
१० वान् । वयं यद् ईश्वरे प्रीतवन्त इत्यत्र नहि किन्तु स यदस्मासु
प्रीतवान् अस्मत्पापानां प्रायश्चित्तार्थं स्वपुत्रं प्रेषितवांश्चेत्यत्र प्रेम

सन्तिष्ठते। हे प्रियतमाः, अस्मासु यदीश्वरेणैतादृशं प्रेम कृतं तर्हि ११
परस्परं प्रेम कर्त्तुम् अस्माकमप्युचितं। ईश्वरः कदाच केनापि न १२
दृष्टः यद्यस्माभिः परस्परं प्रेम क्रियते तर्हीश्वरो ऽस्मन्मध्ये तिष्ठति
तस्य प्रेम चास्मासु सेत्स्यते। अस्मभ्यं तेन स्वकीयात्मनो ऽंशो दत्त १३
इत्यनेन वयं यत् तस्मिन् तिष्ठामः स च यद् अस्मासु तिष्ठतीति
जानीमः। पिता जगत्त्रातारं पुत्रं प्रेषितवान् एतद् वयं दृष्ट्वा १४
प्रमाणयामः। यीशुरीश्वरस्य पुत्त्र एतद् येनाङ्गीक्रियते तस्मिन् १५
ईश्वरस्तिष्ठति स चेश्वरे तिष्ठति। अस्मास्वीश्वरस्य यत् प्रेम वर्त्तते १६
तद् वयं ज्ञातवन्तस्तस्मिन् विश्वसितवन्तश्च। ईश्वरः प्रेमस्वरूपः प्रेम्नि
यस्तिष्ठति स ईश्वरे तिष्ठति तस्मिंश्चेश्वरस्तिष्ठति। स यादृशो ऽस्ति १७
वयमप्येतस्मिन् जगति तादृशा भवाम एतस्माद् विचारदिने ऽस्माभि
र्या प्रतिभा लभ्यते सास्मत्सम्बन्धीयस्य प्रेम्नः सिद्धिः। प्रेम्नि भीति १८
र्न वर्त्तते किन्तु सिद्धं प्रेम भीतिं निराकरोति यतो भीतिः
सयातनास्ति भीतो मानवः प्रेम्नि सिद्धो न जातः। अस्मासु स १९
प्रथमं प्रीतवान् इति कारणाद् वयं तस्मिन् प्रीयामहे। ईश्वरे ऽहं २०
प्रीय इत्युक्त्वा यः कश्चित् स्वभ्रातरं द्वेष्टि सो ऽनृतवादी। स यं
दृष्टवान् तस्मिन् स्वभ्रातरि यदि न प्रीयते तर्हि यम् ईश्वरं न
दृष्टवान् कथं तस्मिन् प्रेम कर्त्तुं शक्नुयात्? अत ईश्वरे यः प्रीयते २१
स स्वीयभ्रातर्य्यपि प्रीयताम् इयम् आज्ञा तस्माद् अस्माभि र्लब्धा।

---

५ पञ्चमोऽध्यायः।

१ भ्रातृभिः सार्द्धं प्रेमकरणम् ईश्वराज्ञायाः पालनम् ईश्वरस्य प्रेम्नश्चिह्नं १४ ईश्वरस्य स्वकीयलोकानां प्रार्थनाश्रवणं सफलकरणञ्च।

यीशुरभिषिक्तस्त्रातेति यः कश्चिद् विश्वसिति स ईश्वरात् १

जातः; अपरं यः कश्चित् जनयितरि प्रीयते स तस्मात् जाते जने
२ ऽपि प्रीयते। वयम् ईश्वरस्य सन्तानेषु प्रीयामहे तद् अनेन
३ जानीमो यद् ईश्वरे प्रीयामहे तस्याज्ञाः पालयामश्च। यत ईश्वरे
यत् प्रेम तत् तदीयाज्ञापालनेनास्माभिः प्रकाशयितव्यं, तस्याज्ञाश्च
४ कठोरा न भवन्ति। यतो यः कश्चिद् ईश्वरात् जातः स संसारं
जयति किञ्चास्माकं यो विश्वासः स एवास्माकं संसारजयिजयः।
५ यीशुरीश्वरस्य पुत्त्र इति यो विश्वसिति तं विना कोऽपरः संसारं
६ जयति? सोऽभिषिक्तस्त्राता यीशुस्तोयरुधिराभ्याम् आगतः केवलं
तोयेन नहि किन्तु तोयरुधिराभ्याम्, आत्मा च साक्षी भवति यत
७ आत्मा सत्यतास्वरूपः। यतो हेतोः आत्मा तोयं रुधिरञ्च त्रीण्ये-
८ तानि साक्ष्यं ददति तेषां त्रयाणाम् एकत्वं भवति च। मानवानां
९ साक्ष्यं यद्यस्माभि र्गृह्यते तर्हीश्वरस्य साक्ष्यं तस्मादपि श्रेष्ठं यतः
१० स्वपुत्त्रमधीश्वरेण दत्तं साक्ष्यमिदं। ईश्वरस्य पुत्त्रे यो विश्वसिति
स निजान्तरे तत् साक्ष्यं धारयति; ईश्वरे यो न विश्वसिति स तम्
अनृतवादिनं करोति यत ईश्वरः स्वपुत्त्रमधि यत् साक्ष्यं दत्तवान्
११ तस्मिन् स न विश्वसिति। तच्च साक्ष्यमिदं यद् ईश्वरो ऽस्मभ्यम्
१२ अनन्तजीवनं दत्तवान् तच्च जीवनं तस्य पुत्त्रे विद्यते। यः पुत्त्रं
धारयति स जीवनं धारयति, ईश्वरस्य पुत्त्रं यो न धारयति स
१३ जीवनं न धारयति। ईश्वरपुत्त्रस्य नाम्नि विश्वासकारिन युष्मान्
प्रत्येतानि मया लिखितानि तस्याभिप्रायो ऽयं यद् यूयम् अनन्त-
जीवनप्राप्ता इति जानीयात तथेश्वरपुत्त्रस्य नाम्नि विश्वसेत च।
१४ 　तस्यान्तिके ऽस्माकं या प्रतिभा भवति तस्याः कारणमिदं
यद् वयं यदि तस्याभिमतं किमपि तं याचामहे तर्हि सो ऽस्माकं
१५ वाक्यं शृणोति। स चास्माकं यत् किञ्चन याचनं शृणोतीति यदि

जानीमस्तर्हि तस्माद् याचिता वरा अस्माभिः प्राप्यन्ते तदपि
जानीमः। कश्चिद् यदि स्वभ्रातरम् अमृत्युजनकं पापं कुर्व्वन्तं १६
पश्यति तर्हि स प्रार्थनां करोतु तेनेश्वरस्तस्मै जीवनं दास्यति,
अर्थतो मृत्युजनकं पापं येन नाकारि तस्मै। किन्तु मृत्युजनकम्
एकं पापम् आस्ते तदधि तेन प्रार्थना क्रियतामित्यहं न वदामि।
सर्व्वं एवाधर्म्मः पापं किन्तु सर्व्वपापं मृत्युजनकं नहि। य ईश्वरात् १७
जातः स पापाचारं न करोति किन्त्वीश्वरात् जातो जनः स्वं रक्षति १८
तस्मात् स पापात्मा तं न स्पृशतीति वयं जानीमः। वयम् ईश्वरात् १९
जाताः किन्तु कृत्स्नः संसारः पापात्मनो वशं गतोऽस्तीति जानीमः।
अपरम् ईश्वरस्य पुत्त्र आगतवान् वयञ्च यया तस्य सत्यमयस्य २०
ज्ञानं प्राप्नुयामस्तादृशीं धियम् अस्मभ्यं दत्तवान् इति जानीमस्त-
स्मिन् सत्यमये ऽर्थतस्तस्य पुत्त्रे यीशुख्रीष्टे तिष्ठामश्च; स एव
सत्यमय ईश्वरो ऽनन्तजीवनस्वरूपश्चास्ति। हे प्रियबालकाः, यूयं २१
देवमूर्त्तिभ्यः स्वान् रक्षत। आमेन्।

योहनस्य द्वितीयं पत्रं।

१ मङ्गलाचरणं ४ प्रेम्नि धर्म्माचरणे च नित्यप्रवर्त्तनं मिथ्योपदेशात् सावधानत्वं १२ समाप्तिश्च।

हे अभिरुचिते कुरिये, त्वां तव पुत्त्रांश्च प्रति प्राचीनोऽहं पत्रं १
लिखामि। सत्यमताद् युष्मासु मम प्रेमास्ति केवलं मम नहि किन्तु
सत्यमतज्ञानां सर्व्वेषामेव। यतः सत्यमतम् अस्मासु तिष्ठत्यनन्त- २
कालं यावच्चास्मासु स्थास्यति। पितुरीश्वरात् तत्पितुः पुत्त्रात् प्रभो ३

यीशुख्रीष्टाच्च प्राप्यो ऽनुग्रहः कृपा शान्तिश्च सत्यताप्रेमभ्यां सार्द्धं
युष्मान् अधितिष्ठतु ।
४ वयं पितृतो याम् आज्ञां प्राप्तवन्तस्तदनुसारेण तव केचिद्
आत्मजाः सत्यमतम् आचरन्त्येतस्य प्रमाणं प्राप्याहं भृशम् आनन्दित-
५ वान् । साम्प्रतञ्च हे कुरिये, नवीनां काञ्चिद् आज्ञां न लिखन्नहम्
आदितो लब्धाम् आज्ञां लिखन् त्वाम् इदं विनये यद् अस्माभिः
६ परस्परं प्रेम कर्त्तव्यं । अपरं प्रेमैतेन प्रकाशते यद् वयं तस्याज्ञा
आचरेम । आदितो युष्माभि र्या श्रुता सेयम् आज्ञा सा च
७ युष्माभिराचरितव्या । यतो बहवः प्रवञ्चका जगत् प्रविश्य यीशु-
ख्रीष्टो नरावतारो भूत्वागत एतत् नाङ्गीकुर्व्वन्ति स एव प्रवञ्चकः
८ ख्रीष्टारिश्चास्ति । अस्माकं श्रमो यत् पण्डश्रमो न भवेत् किन्तु
सम्पूर्णं वेतनमस्माभि र्लभ्येत तदर्थं स्वानधि सावधाना भवत ।
९ यः कश्चिद् विपथगामी भूत्वा ख्रीष्टस्य शिक्षायां न तिष्ठति स
ईश्वरं न धारयति ख्रीष्टस्य शिक्षायां यस्तिष्ठति स पितरं पुत्रञ्च
१० धारयति । यः कश्चिद् युष्मत्सन्निधिमागच्छन् शिक्षामेनां नानयति
स युष्माभिः स्ववेश्मनि न गृह्यतां तव मङ्गलं भूयादिति वागपि
११ तस्मै न कथ्यतां । यतस्तव मङ्गलं भूयादिति वाचं यः कश्चित्
तस्मै कथयति स तस्य दुष्कर्म्मणाम् अंशी भवति ।
१२ युष्मान् प्रति मया बहूनि लेखितव्यानि किन्तु पत्रमसीभ्यां
तत् कर्त्तुं नेच्छामि, यतो ऽस्माकम् आनन्दो यथा सम्पूर्णो भवि-
ष्यति तथा युष्मत्समीपमुपस्थायाहं सम्मुखीभूय युष्माभिः सम्भाषिष्य
१३ इति प्रत्याशा ममास्ते । तवाभिरुचिताया भगिन्या बालकास्त्वां
नमस्कारं ज्ञापयन्ति । आमेन् ।

योहनस्य तृतीयं पत्रं।

१ मङ्गलाचरणं, अतिथिसेवानिमित्तं योहना गायस्य प्रशंसा ९ दियत्रिफिं प्रति भर्त्सनं दीमीत्रियस्य प्रशंसा १३ समाप्तिश्च।

प्राचीनो ऽहं सत्यमताद् यस्मिन् प्रीये तं प्रियतमं गायं प्रति १
पत्रं लिखामि। हे प्रिय, तवात्मा यादृक् शुभान्वितस्तादृक् २
सर्व्वविषये तव शुभं स्वास्थ्यञ्च भूयात्। भ्रातृभिरागत्य तव सत्य- ३
मतस्यार्थतस्त्वं कीदृक् सत्यमतमाचरस्येतस्य साक्ष्ये दत्ते मम महा-
नन्दो जातः। मम सन्तानाः सत्यमतमाचरन्तीतिवार्त्तातो मम य ४
आनन्दो जायते ततो महत्तरो नास्ति। हे प्रिय, भ्रातृन् प्रति ५
विशेषतस्तान् विदेशिनो भ्रातृन् प्रति त्वया यद्यत् कृतं तत् सर्व्वं
विश्वासिनो योग्यं। ते च मण्डल्याः साक्षात् तव प्रेम्नः प्रमाणं ६
दत्तवन्तः, अपरम् ईश्वरयोग्यरूपेण तान् प्रस्थापयता त्वया सत्कर्म्म
कारिष्यते। यतस्ते तस्य नाम्ना यात्रां विधाय परजातीयेभ्यः ७
किमपि न गृहीतवन्तः। तस्माद् वयं यत् सत्यमतस्य सहाया ८
भवेम तदर्थमेतादृशा लोका अस्माभिरनुग्रहीतव्याः।

मण्डलीं प्रत्यहं पत्रं लिखितवान् किन्तु तेषां मध्ये यो दिय- ९
त्रिफिः प्रधानायते सो ऽस्मान् न गृह्लाति। अतो ऽहं यदो- १०
पस्थास्यामि तदा तेन यद्यत् क्रियते तत् सर्व्वं तं स्मारयिष्यामि,
यतः स दुर्व्वाक्यैरस्मान् अपवदति, तेनापि तृप्तिं न गत्वा स्वयमपि
भ्रातृन् नानुगृह्लाति ये चानुग्रहीतुमिच्छन्ति तान् मण्डलितो
ऽपि वहिष्करोति। हे प्रिय, त्वया दुष्कर्म्म नानुक्रियतां किन्तु ११
सत्कर्म्मैव। यः सत्कर्म्माचारी स ईश्वरात् जातः, यो दुष्कर्म्माचारी

१२ स ईश्वरं न दृष्टवान्। दीमीत्रियस्य पक्षे सर्व्वैः साक्ष्यम् अदायि
विशेषतः सत्यमतेनापि, वयमपि तत्पक्षे साक्ष्यं दद्मः, अस्माकञ्च
साक्ष्यं सत्यमेवेति यूयं जानीथ।
३ त्वां प्रति मया बहूनि लेखितव्यानि किन्तु मसीलेखनीभ्यां
.४ लेखितुं नेच्छामि। अचिरेण त्वां द्रक्ष्यामीति मम प्रत्याशास्ते
तदावां सम्मुखीभूय परस्परं सम्भाषिष्यावहे। तव शान्ति र्भूयात्।
अस्माकं मित्राणि त्वां नमस्कारं ज्ञापयन्ति त्वमप्येकैकस्य नाम
प्रोच्य मित्रेभ्यो नमस्कुरु। इति।

यिहूदाः सर्व्वसाधारणपत्रं।

१ मङ्गलाचरणं २ धर्म्मे स्थिरत्वं दुष्टशिक्षकाणां पापं दण्डश्च १९ यिहूदा विनय-
कथनं २४ मङ्गलप्रार्थना च।

१ यीशुख्रीष्टस्य दासो याकोबस्य भ्राता यिहूदास्तातेनेश्वरेण
पवित्रीकृतान् यीशुख्रीष्टेन रक्षितांश्चाहूतान् लोकान् प्रति पत्रं
२ लिखति। कृपा शान्तिः प्रेम च बाहुल्यरूपेण युष्मास्वधितिष्ठतु।
३ हे प्रियाः, साधारणपरित्राणमधि युष्मान् प्रति लेखितुं मम
बहुयत्ने जाते पूर्व्वकाले पवित्रलोकेषु समर्पितो यो धर्म्मस्तदर्थं
यूयं प्राणव्ययेनापि सचेष्टा भवतेति विनयार्थं युष्मान् प्रति पत्र-
४ लेखनमावश्यकम् अमन्ये। यस्माद् एतद्रूपदण्डप्राप्तये पूर्व्वं लि-
खिताः केचिज्जना अस्मान् उपसृप्तवन्तः, ते ऽधार्म्मिकलोका
अस्माकम् ईश्वरस्यानुग्रहं ध्वजीकृत्य लम्पटताम् आचरन्ति, अद्वि-
५ तीयो ऽधिपति र्यो ऽस्माकं प्रभु र्यीशुख्रीष्टस्तं नाङ्गीकुर्व्वन्ति। तस्माद्
यूयं पुरा यद् अवगतास्तत् पुन र्युष्मान् स्मारयितुम् इच्छामि,
फलतः प्रभुरेककृत्वः स्वप्रजा मिसरदेशाद् उदधार यत् ततः परम्

अविश्वासिनो व्यनाशयत्। ये च स्वर्गदूताः स्वीयकर्त्तृत्वपदे न ६
स्थित्वा स्ववासस्थानं परित्यक्तवन्तस्तान् स महादिनस्य विचारार्थम्
अन्धकारमये ऽधःस्थाने सदास्थायिभि र्बन्धनैरबध्नात्। अपरं सदोमो ७
घोमरा तन्निकटस्थनगराणि चैतेषां निवासिनस्तत्समरूपं व्यभिचारं
कृतवन्तो विषममैथुनस्य चेष्टया विपथं गतवन्तश्च तस्मात् तान्यपि
दृष्टान्तस्वरूपाणि भूत्वा सदातनवह्निना दण्डं भुञ्जते। तथैवेमे ८
स्वप्नाचारिणोऽपि स्वशरीराणि कलङ्कयन्ति राजाधीनतां न
स्वीकुर्व्वन्त्युच्चपदस्थान् निन्दन्ति च। किन्तु प्रधानदिव्यदूतो मीखायेलो ९
यदा मोशे र्देहे शैतानेन विवदमानः समभाषत तदा तस्मिन्
निन्दारूपं दण्डं समर्पयितुं साहसं न कृत्वाकथयत् प्रभुस्त्वां भर्त्स-
यतां। किन्त्विमे यन्न बुध्यन्ते तन्निन्दन्ति यच्च निर्व्वोधपशव १०
इवेन्द्रियैरवगच्छन्ति तेन नश्यन्ति। तान् धिक्, ते काबिलो मार्गे ११
चरन्ति पारितोषिकस्याशातो बिलियमो भ्रान्तिमनुधावन्ति कोरहस्य
दुर्म्मुखत्वेन विनश्यन्ति च। युष्माकं प्रेमभोज्येषु ते विघ्नजनका १२
भवन्ति, आत्मम्भरयश्च भूत्वा निर्लज्जया युष्माभिः सार्द्धं भुञ्जते।
ते वायुभिश्चालिता निस्तोयमेघा हेमन्तकालिका निष्फला द्वि १३
र्मृता उन्मूलिता वृक्षाः, स्वकीयलज्जाफेणोद्वमकाः प्रचण्डाः सामुद्र-
तरङ्गाः सदाकालं यावत् घोरतिमिरभागीनि भ्रमणकारीणि नक्षत्राणि
च भवन्ति। आदमतः सप्तमः पुरुषो यो हनोकः स तानुद्दिश्य १४
भाववाक्यमिदं कथितवान्, यथा,

पश्य स्वकीयपुण्यानाम् अयुतै र्वेष्टितः प्रभुः।
सर्व्वान् प्रति विचाराज्ञासाधनायागमिष्यति। १५
तदा चाधार्म्मिकाः सर्व्वे जाता यैरपराधिनः।
विधर्म्मकर्म्मणां तेषां सर्व्वेषामेव कारणात्।

तथा तद्वैपरीत्येनाप्यधर्म्माचारिपापिनां।
उक्तकठोरवाक्यानां सर्व्वेषामपि कारणात्।
परमेशेन दोषित्वं तेषां प्रकाशयिष्यते॥

१६ ते वाक्कलहकारिणः स्वभाग्यनिन्दकाः स्वेच्छाचारिणो दर्पवादि-
१७ मुखविशिष्टा लाभार्थं मनुष्यस्तावकाश्च सन्ति। किन्तु हे प्रिय-
तमाः, अस्माकं प्रभो र्यीशुख्रीष्टस्य प्रेरितै र्यद् वाक्यं पूर्व्वं युष्मभ्यं
१८ कथितं तत् स्मरत, फलतः शेषसमये स्वेच्छातो ऽधर्म्माचारिणो
निन्दका उपस्थास्यन्तीति।

१९ एते लोकाः स्वान् पृथक् कुर्व्वन्तः सांसारिका आत्महीनाश्च
२० सन्ति। किन्तु हे प्रियतमाः, यूयं स्वेषाम् अतिपवित्रविश्वासे
२१ निचीयमानाः पवित्रेणात्मना प्रार्थनां कुर्व्वन्त ईश्वरस्य प्रेम्ना स्वान्
रक्षत, अनन्तजीवनाय चास्माकं प्रभो र्यीशुख्रीष्टस्य कृपां प्रतीक्षध्वं
२२ अपरं यूयं विविच्य कांश्चिद् अनुकम्पध्वं कांश्चिद् अग्नित उद्धृत्य
२३ भयं प्रदर्श्य रक्षत, शारीरिकभावेन कलङ्कितं वस्त्रमपि ऋतीयध्वं।

२४ अपरञ्च युष्मान् स्खलनाद् रक्षितुम् उल्लासेन स्वीयतेजसः
२५ साक्षात् निर्द्दोषान् स्थापयितुञ्च समर्थो यो ऽस्माकम् अद्वितीय-
स्त्राणकर्त्ता सर्व्वज्ञ ईश्वरस्तस्य गौरवं महिमा पराक्रमः कर्त्तृत्वञ्चेदा-
नीम् अनन्तकालं यावद् भूयात्। आमेन्।

योहनं प्रति प्रकाशितं वाक्यं।

१ प्रथमोऽध्यायः।

१ आभासः ४ मङ्गलाचरणं ७ ख्रीष्टस्यागमनकथनं ९ योहनस्य बन्धनकथनं ख्रीष्टस्य दर्शनं सप्तदीपवृक्षस्वरूपसप्तमण्डलीनां दर्शनञ्च।

यत् प्रकाशितं वाक्यम् ईश्वरः स्वदासानां निकटं शीघ्रमुप- १
स्थास्यन्तीनां घटनानां दर्शनार्थं यीशुख्रीष्टे समर्पितवान् तत् स
स्वीयदूतं प्रेष्य निजसेवकं योहनं ज्ञापितवान्। स चेश्वरस्य वाक्ये २
ख्रीष्टस्य साक्ष्ये च यद्यद् दृष्टवान् तस्य प्रमाणं दत्तवान्। एतस्य ३
भाववादिग्रन्थस्य वाक्यानां पाठकः श्रोतारश्च तन्मध्ये लिखिताज्ञा-
ग्राहिणश्च धन्या यतः स कालः सन्निकटः।

योहन आशियादेशस्थाः सप्त मण्डलीः प्रति पत्रं लिखति। ४
यो वर्त्तमानो भूतो भविष्यंश्च ये च सप्तात्मानस्तस्य सिंहासनस्य
सम्मुखे तिष्ठन्ति यश्च यीशुख्रीष्टो विश्वस्तः साक्षी मृतानां मध्ये ५
प्रथमजातो भूमण्डलस्थराजानाम् अधिपतिश्च भवति, एतेभ्यो
ऽनुग्रहः शान्तिश्च युष्मासु वर्त्ततां। यो ऽस्मासु प्रीतवान् स्व-
रुधिरेणास्मान् स्वपापेभ्यः प्रक्षालितवान् तस्य पितुरीश्वरस्य याज- ६
कान् कृत्वास्मान् राजवर्गे नियुक्तवांश्च तस्मिन् महिमा पराक्रमश्चा-
नन्तकालं यावद् वर्त्ततां। आमेन्।

पश्यत स मेघैरागच्छति तेनैकैकस्य चक्षुस्तं द्रक्ष्यति ये च तं ७
विद्धवन्तस्ते ऽपि तं विलोकिष्यन्ते तस्य कृते पृथिवीस्थाः सर्व्वे
वंशा विलपिष्यन्ति। सत्यम् आमेन्। वर्त्तमानो भूतो भविष्यंश्च ८

यः सर्व्वशक्तिमान् प्रभुः परमेश्वरः स गदति, अहमेव कः चश्चा-
र्थत आदिरन्तश्च।
९ युष्माकं भ्राता यीशुख्रीष्टस्य क्लेशराज्यतितिक्षाणां सहभागी
चाहं योहन् ईश्वरस्य वाक्यहेतो र्यीशुख्रीष्टस्य साक्ष्यहेतोश्च पात्म-
१० नामक उपद्वीप आसं। तत्र प्रभो र्दिने आत्मनाविष्टो ऽहं स्वपश्चात्
११ तूरीध्वनिवत् महारवम् अश्रौषं, तेनोक्तम्, अहं कः चश्चार्थत
आदिरन्तश्च। त्वं यद् द्रक्ष्यसि तद् ग्रन्थे लिखिलाशियादेशस्थानां
सप्त मण्डलीनां समीपम् इफिषं स्मुर्णां पर्गामं थुयातीरां सार्द्दिं
१२ फिलादिल्फियां लायदीकेयाञ्च प्रेषय। ततो मया सम्भाषमाणस्य
कस्य रवः श्रूयते तद्दर्शनार्थं मुखं परावर्त्तितं तत् परावर्त्त्य स्वर्ण-
१३ मयाः सप्त दीपवृक्षा दृष्टाः। तेषां सप्त दीपवृक्षाणां मध्ये दीर्घ-
परिच्छदपरिहितः सुवर्णशृङ्खलेन वेष्टितवक्षश्च मनुष्यपुत्राकृतिरेको
१४ जनस्तिष्ठति, तस्य शिरः केशश्च श्वेतमेषलोमानीव हिमवत् श्वेतौ
१५ लोचने वह्निशिखासमे चरणौ वह्निकुण्डे तापितसुपित्तलसदृशौ
१६ रवश्च बहुतोयानां रवतुल्यः। तस्य दक्षिणहस्ते सप्त तारा विद्यन्ते
वक्त्राच्च तीक्ष्णो द्विधारः खड्गो निर्गच्छति मुखमण्डलञ्च स्वतेजसा
१७ देदीप्यमानस्य सूर्य्यस्य सदृशं। तं दृष्ट्वाहं मृतकल्पस्तच्चरणे पतित-
स्ततः स्वदक्षिणकरं मयि निधाय तेनोक्तम् अहम् आदिरन्तश्च।
१८ अहम् अमरस्तथापि मृतवान् किन्तु पश्याहम् अनन्तकालं यावत्
जीवामि। आमेन्। मृत्योः परलोकस्य च कुञ्जिका मम हस्तगताः।
१९ अतो यद् भवति यच्चेतः परं भविष्यति त्वया दृष्टं तत् सर्व्वं
२० लिख्यतां। मम दक्षिणहस्ते स्थिता याः सप्त तारा ये च स्वर्ण-
मयाः सप्त दीपवृक्षास्त्वया दृष्टास्तत्तात्पर्य्यमिदं ताः सप्त ताराः सप्त
मण्डलीनां दूताः सुवर्णमयाः सप्त दीपवृक्षाश्च सप्त मण्डल्यः सन्ति।

२ द्वितीयोऽध्यायः।

१ इफिषीयसमाजं प्रति ख्रीष्टस्य कथनं ८ स्मुर्णासमाजं प्रति कथनं १२ पर्गाम-समाजं प्रति कथनं १८ थुयातीरासमाजं प्रति कथनञ्च।

इफिषस्थमण्डल्या दूतं प्रति त्वम् इदं लिख; यो दक्षिण- १
करेण सप्त तारा धारयति सप्तानां सुवर्णदीपवृक्षाणां मध्ये
गमनागमने करोति च तेनेदम् उच्यते। तव क्रियाः श्रमः २
सहिष्णुता च मम गोचराः, त्वं दुष्टान् सोढुं न शक्नोषि ये च
प्रेरिता न सन्तः स्वान् प्रेरितान् वदन्ति त्वं तान् परीक्ष्य मृषा-
भाषिणो विज्ञातवान्, अपरं त्वं तितिक्षां विदधासि मम नामार्थं ३
बहु सोढवानसि तथापि न पर्य्यक्लाम्यस्तदपि जानामि। किन्तु तव ४
विरुद्धं मयैतत् वक्तव्यं यत् तव प्रथमं प्रेम त्वया व्यहीयत। अतः ५
कुतः पतितो ऽसि तत् स्मृत्वा मनः परावर्त्त्य पूर्व्वीयक्रियाः कुरु न
चेत् त्वया मनसि न परिवर्त्तिते ऽहं तूर्णम् आगत्य तव दीपवृक्षं
स्वस्थानाद् अपसारयिष्यामि। तथापि तवैष गुणो विद्यते यत् ६
नीकलायतीयलोकानां याः क्रिया अहम् ऋतीये तास्त्वमपि
ऋतीयसे। यस्य श्रोत्रं विद्यते स मण्डलीः प्रत्युच्यमानाम् आत्मनः ७
कथां शृणोतु। यो जनो जयति तस्मा अहम् ईश्वरस्यारामस्थ-
जीवनतरोः फलं भोक्तुं दास्यामि।

अपरं स्मुर्णास्थमण्डल्या दूतं प्रतीदं लिख; य आदिरन्तश्च ८
यो मृतवान् पुनर्जीवितवांश्च तेनेदम् उच्यते, तव क्रियाः क्लेशो ९
दैन्यञ्च मम गोचराः किन्तु त्वं धनवानसि ये च यिहूदीया न सन्तः
शैतानस्य समाजाः सन्ति तथापि स्वान् यिहूदीयान् वदन्ति तेषां
निन्दामप्यहं जानामि। त्वया यो यः क्लेशः सोढव्यस्तस्मात् मा १०
भैषीः पश्य शैतानो युष्माकं परीक्षार्थं कांश्चित् कारायां निक्षेप्स्यति

दश दिनानि यावत् क्लेशो युष्मासु वर्त्तिष्यते च। त्वं मृत्युपर्य्यन्तं
११ विश्वास्यो भव तेनाहं जीवनकिरीटं तुभ्यं दास्यामि। यस्य श्रोत्रं
विद्यते स मण्डलीः प्रत्युच्यमानाम् आत्मनः कथां शृणोतु। यो
जयति स द्वितीयमृत्युना न हिंसिष्यते।
१२ अपरं पर्गामस्थमण्डल्या दूतं प्रतीदं लिख, यस्तीक्ष्णं द्विधारं
१३ खड्गं धारयति स एव भाषते। तव क्रिया मम गोचराः, यत्र
शैतानस्य सिंहासनं तत्रैव त्वं वससि तदपि जानामि। त्वं मम
नाम धारयसि मद्भक्तेरस्वीकारस्त्वया न कृतो मम विश्वास्यसाक्षिण
आन्तिपाः समये ऽपि न कृतः। स तु युष्मन्मध्ये ऽघानि यतः
१४ शैतानस्तत्रैव निवसति। तथापि तव विरुद्धं मम किञ्चिद् वक्तव्यं
यतो देवप्रसादादनाय परदारगमनाय चेस्रायेलः सन्तानानां
सम्मुख उन्माथं स्थापयितुं बालाक् येनाशिक्ष्यत तस्य बिलियमः
१५ शिक्षावलम्बिनस्तव केचित् जनास्तत्र सन्ति। तथा नीकलायतीयानां
शिक्षावलम्बिनस्तव केचित् जना अपि सन्ति तदेवाहम् ऋतीये।
१६ अतो हेतोस्त्वं मनः परिवर्त्तय न चेदहं त्वरया तव समीपमुपस्थाय
१७ मद्वक्त्रस्थखड्गेन तैः सह योत्स्यामि। यस्य श्रोत्रं विद्यते स मण्डलीः
प्रत्युच्यमानाम् आत्मनः कथां शृणोतु। यो जनो जयति तस्मा
अहं गुप्तमान्नां भोक्तुं दास्यामि शुभ्रप्रस्तरमपि तस्मै दास्यामि तत्र
प्रस्तरे नूतनं नाम लिखितं तच्च ग्रहीतारं विना नान्येन
केनाप्यवगम्यते।
१८ अपरं थुयातीरास्थमण्डल्या दूतं प्रतीदं लिख। यस्य लोचने
वह्निशिखासदृशे चरणौ च सुपित्तलसङ्काशौ स ईश्वरपुत्रो भाषते,
१९ तव क्रियाः प्रेम विश्वासः परिचर्य्या सहिष्णुता च मम गोचराः,
२० तव प्रथमक्रियाभ्यः शेषक्रियाः श्रेष्ठास्तदपि जानामि। तथापि

तव विरुद्धं मया किञ्चिद् वक्तव्यं यतो या ईषेबल्नामिका
योषित् स्वां भाववादिनीं मन्यते वेश्यागमनाय देवप्रसादाशनाय
च मम दासान् शिक्षयति भ्रामयति च सा त्वया न निवार्य्यते।
अहं मनःपरिवर्त्तनाय तस्यै समयं दत्तवान् किन्तु सा स्वीयवेश्या- २१
क्रियातो मनः परिवर्त्तयितुं नाभिलषति। पश्याहं तां शय्यायां २२
निक्षेप्स्यामि, ये तया सार्द्धं व्यभिचारं कुर्व्वन्ति ते यदि स्वक्रियाभ्यो
मनांसि न परावर्त्तयन्ति तर्हि तानपि महाक्लेशे निक्षेप्स्यामि तस्याः २३
सन्तानांश्च मृत्युना हनिष्यामि। तेनाहम् अन्तःकरणानां मन-
साञ्चानुसन्धानकारी युष्माकमेकैकस्मै च स्वक्रियाणां फलं मया
दातव्यमिति सर्व्वाः मण्डल्यो ज्ञास्यन्ति। अपरम् अवशिष्टान् थुया- २४
तीरस्थलोकान् अर्थतो यावन्तस्तां शिक्षां न धारयन्ति ये च
कैश्चित् शैतानस्य गम्भीरार्था उच्यन्ते तान् ये नावगतवन्तस्तानहं
वदामि युष्मासु कमप्यपरं भारं नारोपयिष्यामि, किन्तु यद् युष्माकं २५
विद्यते तत् ममागमनं यावद् धारयत। यो जनो जयति शेष- २६
पर्य्यन्तं मम क्रियाः पालयति च तस्मा अहम् परजातीयानाम्
आधिपत्यं दास्यामि; पितृतो मया यद्वत् कर्तृत्वं लब्धं तद्वत् २७
सो ऽपि लौहदण्डेन तान् चारयिष्यति तेन मृद्भाजनानीव ते
चूर्णा भविष्यन्ति। अपरम् अहं तस्मै प्रभातीयताराम् अपि दास्यामि। २८
यस्य श्रोत्रं विद्यते स मण्डलीः प्रत्युच्यमानाम् आत्मनः कथां २९
शृणोतु।

३ तृतीयोऽध्यायः ।

१ सार्द्दिस्थसमाजं प्रति कथनं ७ फिलादिल्फियास्थसमाजं प्रति कथनं १४ लायदिकेयास्थसमाजं प्रति कथनञ्च ।

१ अपरं सार्द्दिस्थमण्डल्या दूतं प्रतीदं लिख, यो जन ईश्वरस्य
सप्तात्मनः सप्त ताराश्च धारयति स एव भाषते, तव क्रिया मम
गोचराः, त्वं जीवदाख्यो ऽसि तथापि मृतो ऽसि तदपि जानामि ।
२ प्रबुद्धो भव, अवशिष्टं यद्यत् मृतकल्पं तदपि सबलीकुरु यत
ईश्वरस्य साक्षात् तव कर्म्माणि न सिद्धानीति प्रमाणं मया प्राप्तं ।
३ अतः कीदृशीं शिक्षां लब्धवान् श्रुतवांश्चासि तत् स्मरन् तां पालय
स्वमनः परिवर्त्तय च । चेत् प्रबुद्धो न भवेस्तर्ह्यहं स्तेन इव तव
समीपम् उपस्थास्यामि किञ्च कस्मिन् दण्डे उपस्थास्यामि तन्न
४ ज्ञास्यसि । तथापि यैः स्ववासांसि न कलङ्कितानि तादृशाः कति-
पयलोकाः सार्द्दिनगरे ऽपि तव विद्यन्ते ते शुभ्रपरिच्छदै र्मम
५ सङ्गे गमनागमने करिष्यन्ति यतस्ते योग्याः । यो जनो जयति स
शुभ्रपरिच्छदं परिधापयिष्यते, अहञ्च जीवनग्रन्थात् तस्य नाम
नान्तर्धापयिष्यामि किन्तु मत्पितुः साक्षात् तस्य दूतानां साक्षाच्च
६ तस्य नाम स्वीकरिष्यामि । यस्य श्रोत्रं विद्यते स मण्डलीः प्रत्युच्य-
मानाम् आत्मनः कथां शृणोतु ।

७ अपरञ्च फिलादिल्फियास्थमण्डल्या दूतं प्रतीदं लिख, यः
पवित्रः सत्यमयश्चास्ति दायूदस्य कुञ्जिकां धारयति च येन
मोचिते ऽपरः कोऽपि न रुणद्धि रुद्धे चापरः कोऽपि न मोच-
८ यति स एव भाषते । तव क्रिया मम गोचराः पश्य तव समीपे
ऽहं मुक्तं द्वारं स्थापितवान् तत् केनापि रोद्धुं न शक्यते यतस्तवाल्पं
बलमास्ते तथापि त्वं मम वाक्यं पालितवान् मम नाम्नो ऽस्वीकारं

न कृतवांश्च। पश्य यिहूदीया न सन्तो ये मृषावादिनः स्वान् ९
यिहूदीयान् वदन्ति तेषां शैतानसमाजीयानां कांश्चिद् अहम्
आनेष्यामि पश्य ते मदाज्ञात आगत्य तव चरणयोः प्रणंस्यन्ति
त्वञ्च मम प्रियो ऽसीति ज्ञास्यन्ति। त्वं मम सहिष्णुतासूचकं वाक्यं १०
रक्षितवानसि तत्कारणात् पृथिवीनिवासिनां परीक्षार्थं कृत्स्नं जगद्
येनागामिपरीक्षादिनेनाक्रमिष्यते तस्माद् अहमपि त्वां रक्षिष्यामि।
पश्य मया शीघ्रम् आगन्तव्यं तव यदस्ति तत् धारय को ऽपि ११
तव किरीटं नापहरतु। यो जनो जयति तमहं मदीयेश्वरस्य १२
मन्दिरे स्तम्भं कृत्वा स्थापयिस्यामि स पुन र्न निर्गमिष्यति। अपरञ्च
तस्मिन् मदीयेश्वरस्य नाम मदीयेश्वरस्य पुर्य्या अपि नाम अर्थतो
या नवीना यिरूशालेमः पुरी स्वर्गात् मदीयेश्वरस्य समीपाद्
अवरोक्ष्यति तस्या नाम ममापि नूतनं नाम लेखिष्यामि। यस्य १३
श्रोत्रं विद्यते स मण्डलीः प्रत्युच्यमानाम् आत्मनः कथां शृणोतु।

अपरञ्च लायदिकेयास्थमण्डल्या दूतं प्रतीदं लिख, य आमेन् १४
अर्थतो विश्वास्यः सत्यमयश्च साक्षी, ईश्वरस्य सृष्टेरादिश्चास्ति स एव
भाषते। तव क्रिया मम गोचराः त्वं शीतो नासि तप्तो ऽपि १५
नासीति जानामि। तव शीतत्वं तप्तत्वं वा वरं भवेत्, शीतो न १६
भूत्वा तप्तो ऽपि न भूत्वा त्वमेवम्भूतः कदुष्णो ऽसि तत्कारणाद्
अहं स्वमुखात् त्वाम् उद्वमिष्यामि। अहं धनी समृद्धश्चास्मि मम १७
कस्याप्यभावो न भवतीति त्वं वदसि किन्तु त्वमेव दुःखार्त्तो दुर्गतो
दरिद्रो ऽन्धो नग्नश्चासि तत् त्वया नावगम्यते। त्वं यद् धनी १८
भवेस्तदर्थं मत्तो वह्नौ तापितं सुवर्णं क्रीणीहि नग्नत्वात् तव लज्जा
यन्न प्रकाशेत तदर्थं परिधानाय मत्तः शुभ्रवासांसि क्रीणीहि
यच्च तव दृष्टिः प्रसन्ना भवेत् तदर्थं चक्षुर्लेपनायाञ्जनं मत्तः

१९ क्रीणीहीति मम मन्त्रणा। येष्वहं प्रीये तान् सर्व्वान् भर्त्सयामि
२० शास्मि च, अतस्त्वम् उद्यमं विधाय मनः परिवर्त्तय। पश्याहं
द्वारि तिष्ठन् तद् आहन्मि यदि कश्चित् मम रवं श्रुत्वा द्वारं
मोचयति तर्ह्यहं तस्य सन्निधिं प्रविश्य तेन सार्द्धं भोक्ष्ये सो ऽपि
२१ मया सार्द्धं भोक्ष्यते। अपरमहं यथा जितवान् मम पित्रा च
सह तस्य सिंहासन उपविष्टश्चास्मि, तथा यो जनो जयति तमहं
२२ मया सार्द्धं मत्सिंहासन उपवेशयिष्यामि। यस्य श्रोत्रं विद्यते स
मण्डलीः प्रत्युच्यमानाम् आत्मनः कथां शृणोतु।

---

४ चतुर्थोऽध्यायः।

स्वर्गे ईश्वरस्य सिंहासनस्य प्राचीनलोकानां चक्षुर्भिः परिपूर्णचतुःप्राणिनाञ्च दर्शनम्।

१ ततः परं मया दृष्टिपातं कृत्वा स्वर्गे मुक्तं द्वारम् एकं दृष्टं
मया सहभाषमाणस्य च यस्य तूरीवाद्यतुल्यो रवः पूर्व्वं श्रुतः
स माम् अवोचत् स्थानमेतद् आरोहय, इतः परं येन येन भवि-
२ तव्यं तदहं त्वां दर्शयिष्ये। तेनाहं तत्क्षणाद् आत्माविष्टो भूत्वा
ऽपश्यं स्वर्गे सिंहासनमेकं स्थापितं तत्र सिंहासने एको जन उप-
३ विष्टो ऽस्ति। सिंहासने उपविष्टस्य तस्य जनस्य रूपं सूर्य्यकान्तमणेः
प्रवालस्य च तुल्यं तत् सिंहासनञ्च मरकतमणिवद्रूपविशिष्टेन
४ मेघधनुषा वेष्टितं। तस्य सिंहासनस्य चतुर्दिक्षु चतुर्विंशतिसिंहा-
सनानि तिष्ठन्ति तेषु सिंहासनेषु चतुर्विंशतिप्राचीनलोका उप-
विष्टास्ते शुभ्रवासःपरिहितास्तेषां शिरांसि च सुवर्णकिरीटै र्भूषि-
५ तानि। तस्य सिंहासनस्य मध्यात् तडितो रवाः स्तनितानि च
निर्गच्छन्ति सिंहासनस्यान्तिके च सप्त दीपा ज्वलन्ति त ईश्वरस्य
६ सप्तात्मानः। अपरं सिंहासनस्यान्तिके स्फटिकतुल्यः काचमयो जला-

शयो विद्यते, अपरम् अग्रतः पश्चाच्च बहुचक्षुष्मन्तश्चत्वारः प्राणिनः
सिंहासनस्य मध्ये चतुर्दिक्षु च विद्यन्ते। तेषां प्रथमः प्राणी सिंहाकारो ७
द्वितीयः प्राणी गोवत्साकारस्तृतीयः प्राणी मनुष्यवद्वदनविशिष्टश्च-
तुर्थश्च प्राणी उड्डीयमानकुररोपमः। तेषां चतुर्णाम् एकैकस्य प्राणिनः ८
षट् पक्षाः सन्ति ते च सर्व्वाङ्गेष्वभ्यन्तरे च बहुचक्षुर्विशिष्टाः, ते
दिवानिशं न विश्राम्य गदन्ति पवित्रः पवित्रः पवित्रः सर्व्वशक्तिमान्
वर्त्तमानो भूतो भविष्यंश्च प्रभुः परमेश्वरः। इत्थं तैः प्राणिभिस्तस्यानन्त- ९
जीविनः सिंहासनोपविष्टस्य जनस्य प्रभावे गौरवे धन्यवादे च १०
प्रकीर्त्तिते ते चतुर्विंशतिप्राचीना अपि तस्य सिंहासनोपविष्टस्यान्तिके
प्रणिपत्य तम् अनन्तजीविनं प्रणमन्ति स्वीयकिरीटांश्च सिंहासनस्या-
न्तिके निक्षिप्य वदन्ति,

हे प्रभो ईश्वरास्माकं प्रभावं गौरवं बलं। ११
त्वमेवार्हसि सम्प्राप्तुं यत् सर्व्वं ससृजे त्वया।
तवाभिलाषतश्चैव सर्व्वं सम्भूय निर्म्ममे॥

---

५ पञ्चमोऽध्यायः।

सप्तमुद्राभि र्मुद्राङ्कितस्य पुस्तकस्य दर्शनं ख्रीष्टेन तस्य मोचनं दिव्यदूतप्राचीनलोकै-
श्चतुर्भिः प्राणिभिश्च तस्य प्रशंसनञ्च।

अनन्तरं तस्य सिंहासनोपविष्टजनस्य दक्षिणहस्ते ऽन्त र्बहिश्च १
लिखितं पत्रमेकं मया दृष्टं तत् सप्तमुद्राभिरङ्कितं। तत्पश्चाद् एको २
बलवान् दूतो दृष्टः स उच्चैः स्वरेण वाचमिमां घोषयति कः पत्र-
मेतद् विवरीतुं तन्मुद्रा मोचयितुञ्चार्हति? किन्तु स्वर्गमर्त्यपातालेषु ३
तत् पत्रं विवरीतुं निरीक्षितुञ्च कस्यापि सामर्थ्यं नाभवत्। अतो ४
यस्तत् पत्रं विवरीतुं निरीक्षितुञ्चार्हति तादृशजनस्याभावाद् अहं

५ बहु रोदितवान्। किन्तु तेषां प्राचीनानाम् एको जनो माम-
वदत् मा रोदीः पश्य यो यिहूदावंशीयः सिंहो दायूदस्य मूलस्व-
रूपश्चास्ति स पत्रस्य तस्य सप्तमुद्राणाञ्च मोचनाय प्रभूतवान्।
६ अपरं सिंहासनस्य चतुर्णां प्राणिनां प्राचीनवर्गस्य च मध्य एको
मेषशावको मया दृष्टः स छेदित इव तस्य सप्तशृङ्गाणि सप्त-
लोचनानि च सन्ति तानि कृत्स्नां पृथिवीं प्रेषिता ईश्वरस्य सप्ता-
७ त्मानः। स उपागत्य तस्य सिंहासनोपविष्टजनस्य दक्षिणकरात् तत्
८ पत्रं गृहीतवान्। पत्रे गृहीते चत्वारः प्राणिनश्चतुर्विंशतिप्राचीनाश्च
तस्य मेषशावकस्यान्तिके प्रणिपतन्ति तेषाम् एकैकस्य करयो र्वीणां
सुगन्धिद्रव्यैः परिपूर्णं स्वर्णमयपात्रञ्च तिष्ठति तानि पवित्रलोकानां
९ प्रार्थनास्वरूपाणि। अपरं ते नूतनमेकं गीतमगायन्, यथा,

ग्रहीतुं पत्रिकां तस्या मुद्रा मोचयितुं तथा।
त्वमेवार्हसि यस्मात् त्वं बलिवत् छेदनं गतः।
सर्व्वाभ्यो जातिभाषाभ्यः सर्व्वस्माद् वंशदेशतः।
ईश्वरस्य कृते ऽस्मान् त्वं स्वीयरक्तेन क्रीतवान्।
१० अस्मदीश्वरपक्षे ऽस्मान् नृपतीन् याजकानपि।
कृतवांस्तेन राजत्वं करिष्यामो महीतले॥

११ अपरं निरीक्षमाणेन मया सिंहासनस्य प्राणिचतुष्टयस्य प्राचीनवर्गस्य
च परितो बहूनां दूतानां रवः श्रुतः, तेषां संख्या अयुतायुतानि
सहस्रसहस्राणि च। तैरुच्चैरिदम् उक्तं,

१२ पराक्रमं धनं ज्ञानं शक्तिं गौरवमादरं।
प्रशंसाञ्चार्हति प्राप्तुं छेदितो मेषशावकः॥

१३ अपरं स्वर्गमर्त्त्यपातालसागरेषु यानि यानि विद्यन्ते तेषां सर्व्वेषां
सृष्टवस्तूनां वागियं मया श्रुता,

प्रशंसा गौरवं शौर्य्यम् आधिपत्यं सनातनं।
सिंहासनोपविष्टस्य मेषवत्सस्य गच्छतां।

अपरं ते चत्वारः प्राणिनः कथितवन्तस्तथास्तु, ततश्चतुर्विंशतिप्राचीना १४
अपि प्रणिपत्य तम् अनन्तकालजीविनं प्रणमन्।

---

६ षष्ठोऽध्यायः।

१ ख्रीष्टेन प्रथममुद्रामोचनं ३ द्वितीयमुद्रामोचनं ५ तृतीयमुद्रामोचनं ७ चतुर्थमुद्रामोचनं ९ पञ्चममुद्रामोचनं १२ षष्ठमुद्रामोचनञ्च।

अनन्तरं मयि निरीक्षमाणे मेषशावकेन तासां सप्तमुद्राणाम् १
एका मुद्रा मुक्ता ततस्तेषां चतुर्णाम् एकस्य प्राणिन आगत्य
पश्येतिवाचको मेघगर्जनतुल्यो रवो मया श्रुतः। ततः परम् एकः २
शुक्लाश्वो दृष्टः, तदारूढो जनो धनु र्धारयति तस्मै च किरीटमेकम्
अदायि ततः स प्रभवन् प्रभविष्यंश्च निर्गतवान्।

अपरं द्वितीयमुद्रायां तेन मोचितायां द्वितीयस्य प्राणिन आगत्य ३
पश्येति वाक् मया श्रुता। ततो ऽरुणवर्णो ऽपर एको ऽश्वो निर्गत- ४
वान् तदारोहिणि पृथिवीतः शान्त्यपहरणस्य लोकानां मध्ये परस्परं प्रतिघातोत्पादनस्य च सामर्थ्यं समर्पितम्, एको बृहत्खङ्गो ऽपि तस्मा अदायि।

अपरं तृतीयमुद्रायां तेन मोचितायां तृतीयस्य प्राणिन आगत्य ५
पश्येति वाक् मया श्रुता, ततः कालवर्ण एको ऽश्वो मया दृष्टः, तदा- ६
रोहिणो हस्ते तुला तिष्ठति अनन्तरं प्राणिचतुष्टयस्य मध्याद् वागियं मया श्रुता गोधूमानामेकः सेटको मुद्रापादैकमूल्यः, यवानाञ्च सेटकत्रयं मुद्रापादैकमूल्यं, तैलद्राक्षारसाश्च त्वया मा हिंसितव्याः।

७ अनन्तरं चतुर्थमुद्रायां तेन मोचितायां चतुर्थस्य प्राणिन
८ आगत्य पश्येति वाक् मया श्रुता। ततः पाण्डुरवर्ण एको ऽश्वो
मया दृष्टः, तदारोहिणो नाम मृत्युरिति परलोकश्च तम् अनु-
चरति खड्गेन दुर्भिक्षेण महामार्य्या वन्यपशुभिश्च लोकानां बधाय
पृथिव्याश्चतुर्थांशस्याधिपत्यं तस्मा अदायि।

९ अनन्तरं पञ्चममुद्रायां तेन मोचितायाम् ईश्वरवाक्यहेतोस्तत्र
साक्ष्यदानाच्च छेदितानां लोकानां देहिनो वेद्या अधो मया-
१० दृश्यन्त। त उच्चैरिदं गदन्ति, हे पवित्र सत्यमय प्रभो अस्माकं
रक्तपाते पृथिवीनिवासिभि र्विवदितुं तस्य फलं दातुञ्च कति कालं
११ विलम्बसे? ततस्तेषाम् एकैकस्मै शुभ्रः परिच्छदो ऽदायि वागियं
श्चाकथ्यत यूयमल्पकालम् अर्थतो युष्माकं ये सहदासा भ्रातरो
यूयमिव घानिष्यन्ते तेषां संख्या यावत् सम्पूर्णतां न गच्छति
तावद् विरमत।

१२ अनन्तरं यदा स षष्ठमुद्रामसोचयत् तदा मयि निरीक्षमाणे
महान् भूकम्पो ऽभवत् सूर्य्यश्च उष्ट्रलोमजवस्त्रवत् कृष्णवर्णश्चन्द्रमाश्च
१३ रक्तसङ्काशो ऽभवत् गगनस्थताराश्च प्रबलवायुना चालिताद् उडुम्बर-
१४ वृक्षाद् निपातितान्यपक्कफलानीव भूतले न्यपतन्। आकाशमण्डलञ्च
१५ सङ्कुच्यमानग्रन्थइवान्तर्धानम् अगमत् गिरय उपद्वीपाश्च सर्व्वे स्थाना-
न्तरं चालिताः पृथिवीस्था भूपाला महाँल्लोकाः सहस्रपतयो
धनिनः पराक्रमिणश्च लोका दासा मुक्ताश्च सर्व्वे ऽपि गुहासु
१६ गिरिस्थशैलेषु च स्वान् प्राच्छादयन्। ते च गिरीन् शैलांश्च वदन्ति
यूयम् अस्मदुपरि पतित्वा सिंहासनोपविष्टजनस्य दृष्टितो मेष-
१७ शावकस्य कोपाच्चास्मान् गोपायत; यतस्तस्य क्रोधस्य महादिनम्
उपस्थितं कः स्थातुं शक्नोति?

७ सप्तमोऽध्यायः।

१ ईश्वरस्य लोकानां मुद्राङ्कनं यिहूदिनां संख्या ९ अन्यदेशिनां संख्या १३ ख्रीष्टस्य रक्तेन तेषां त्राणं सुखञ्च।

अनन्तरं चत्वारो दिव्यदूता मया दृष्टाः, ते पृथिव्याश्चतुर्षु १
कोणेषु तिष्ठन्तः पृथिव्यां समुद्रे वृक्षेषु च वायु र्यथा न वहेत् तथा
पृथिव्याश्चतुरो वायून् धारयन्ति। अनन्तरं सूर्य्योदयस्थानाद् उद्यन् २
अपर एको दूतो मया दृष्टः सोऽमरेश्वरस्य मुद्रां धारयति, येषु
चतुर्षु दूतेषु पृथिवीसमुद्रयो र्हिंसनस्य भारो दत्तस्तान् स उच्चै-
रिदं अवदत्। ईश्वरस्य दासा यावद् अस्माभि र्भालेषु मुद्रयाङ्किता ३
न भविष्यन्ति तावत् पृथिवी समुद्रो तरवश्च युष्माभि र्न हिंस्यन्तां।
ततः परं मुद्राङ्कितलोकानां संख्या मयाश्रावि। इस्रायेलः सर्व्व- ४
वंशीयाश्चतुश्चत्वारिंशत्सहस्राधिकलक्षलोका मुद्रयाङ्किता अभवन्,
अर्थतो यिहूदावंशे द्वादश सहस्राणि रूबेणवंशे द्वादशसहस्राणि ५
गादवंशे द्वादशसहस्राणि, आशेरवंशे द्वादशसहस्राणि नप्तालिवंशे ६
द्वादशसहस्राणि मिनशिवंशे द्वादशसहस्राणि, शिमियोनवंशे द्वादश- ७
सहस्राणि लेविवंशे द्वादशसहस्राणि इषाखरवंशे द्वादशसहस्राणि,
सिवूलूनवंशे द्वादशसहस्राणि यूषफवंशे द्वादशसहस्राणि विन्यामीन- ८
वंशे च द्वादशसहस्राणि लोका मुद्राङ्किताः।

ततः परं सर्व्वजातीयानां सर्व्ववंशीयानां सर्व्वदेशीयानां सर्व्व- ९
भाषावादिनाञ्च महालोकारण्यं मया दृष्टं, तान् गणयितुं केनापि
न शक्यं, ते च शुभ्रपरिच्छदपरिहिताः सन्तः करैश्च तालवृन्तानि
वहन्तः सिंहासनस्य मेषशावकस्य चान्तिके तिष्ठन्ति, उच्चैःस्वरैरिदं
कथयन्ति च, १०

सिंहासनोपविष्टस्य परमेशस्य नः स्तवः।
स्तवश्च मेषवत्सस्य सम्भूयात् त्राणकारणात्।

११ ततः सर्व्वे दूताः सिंहासनस्य प्राचीनवर्गस्य प्राणिचतुष्टयस्य च
परितस्तिष्ठन्तः सिंहासनस्यान्तिके न्यूब्जीभूयेश्वरं प्रणम्य वदन्ति,

१२ तथास्तु धन्यवादश्च तेजो ज्ञानं प्रशंसनं।
शौर्य्यं पराक्रमश्चापि शक्तिश्च सर्व्वमेव तत्।
वर्त्ततामीश्वरेऽस्माकं नित्यं नित्यं तथास्त्विति।

१३ ततः परं तेषां प्राचीनानाम् एको जनो मां सम्भाष्य जगाद
१४ शुभ्रपरिच्छदपरिहिता इमे के? कुतो वागताः? ततो मयोक्तं
हे महेच्छ भवानेव तत् जानाति। तेन कथितं, इमे महाक्लेश-
मध्याद् आगत्य मेषशावकस्य रुधिरेण स्वीयपरिच्छदान् प्रक्षा-
१५ लितवन्तः शुक्लीकृतवन्तश्च। तत्कारणात् त ईश्वरस्य सिंहासनस्या-
न्तिके तिष्ठन्तो दिवारात्रं तस्य मन्दिरे तं सेवन्ते सिंहासनोपविष्टो
१६ जनश्च तान् अधिस्थास्यति। तेषां क्षुधा पिपासा वा पुन र्न भवि-
१७ ष्यति रौद्रं कोष्णुत्तापो वा तेषु न निपतिष्यति, यतः सिंहासना-
धिष्ठानकारी मेषशावकस्तान् चारयिष्यति, अमृततोयानां प्रस्रव-
णानां सन्निधिं तान् गमयिष्यति च, ईश्वरोऽपि तेषां नयनेभ्यः
सर्व्वमश्रु प्रमार्क्ष्यति।

---

८ अष्टमोऽध्यायः।

१ सप्तममुद्राया मोचनं ६ प्रथमतूर्य्या ध्वनिः ८ द्वितीयतूर्य्या ध्वनिः १० तृतीयतूर्य्या ध्वनिः १२ चतुर्थतूर्य्या ध्वनिश्च।

१ अनन्तरं सप्तममुद्रायां तेन मोचितायां सार्द्धदण्डकालं स्वर्गो
२ निःशब्दोऽभवत्। अपरम् अहम् ईश्वरस्यान्तिके तिष्ठतः सप्तदूतान्

अपश्यं तेभ्यः सप्ततूर्य्योऽदीयन्त। ततः परम् अन्य एको दूत ३
आगतः स स्वर्णधूपाधारं गृहीत्वा वेदिमुपातिष्ठत् स च यत् सिंहा-
सनस्यान्तिके स्थितायाः सुवर्णवेद्या उपरि सर्व्वेषां पवित्रलोकानां
प्रार्थनासु धूपान् योजयेत् तदर्थं प्रचुरधूपास्तस्मै दत्ताः। ततस्तस्य ४
दूतस्य करात् पवित्रलोकानां प्रार्थनाभिः संयुक्तधूपानां धूम ईश्वरस्य
समक्षं उदतिष्ठत्। पश्चात् स दूतो धूपाधारं गृहीत्वा वेद्या वह्निना ५
पूरयित्वा पृथिव्यां निक्षिप्तवान् तेन रवा मेघगर्ज्जनानि विद्युतो
भूमिकम्पश्चाभवन्।

ततः परं सप्ततूरी धारयन्तः सप्तदूतास्तूरी वादयितुम् उद्यता ६
अभवन्। प्रथमेन तूर्य्यां वादितायां रक्तमिश्रितौ शिलावह्नी सम्भूय ७
पृथिव्यां निक्षिप्तौ तेन पृथिव्यास्तृतीयांशो दग्धः, तरूणामपि
तृतीयांशो दग्धः, हरिद्वर्णतृणानि च सर्व्वाणि दग्धानि।

अनन्तरं द्वितीयदूतेन तूर्य्यां वादितायां वह्निना प्रज्वलितो ८
महापर्व्वतः सागरे निक्षिप्तस्तेन सागरस्य तृतीयांशो रक्तीभूतः
सागरे स्थितानां सप्राणानां सृष्टवस्तूनां तृतीयांशो मृतः, अर्णव- ९
यानानाम् अपि तृतीयांशो नष्टः।

अपरं तृतीयदूतेन तूर्य्यां वादितायां दीप इव ज्वलन्ती एका १०
महती तारा गगनात् निपत्य नदीनां जलप्रस्रवणानाञ्चोपर्य्या-
वतीर्णा। तस्यास्ताराया नाम नागदमनकमिति, तेन तोयानां ११
तृतीयांशे नागदमनकीभूते तोयानां तिक्तत्वात् बहवो मानवा मृताः।

अपरं चतुर्थदूतेन तूर्य्यां वादितायां सूर्य्यस्य तृतीयांशश्चन्द्रस्य १२
तृतीयांशो नक्षत्राणाञ्च तृतीयांशः प्रहृतः, तेन तेषां तृतीयांशे
ऽन्धकारीभूते दिवसस्तृतीयांशकालं यावत् तेजोहीनो भवति निशापि
तामेवावस्थां गच्छति। तदा निरीक्षमाणेन मयाकाशमध्येनाभिपतत १३

एकस्य दूतस्य रवः श्रुतः स उच्चै र्गदति, अपरै र्यैस्त्रिभि र्दूतैस्तूर्य्यो वादितव्यास्तेषाम् अवशिष्टतूरीध्वनितः पृथिवीनिवासिनां सन्तापः सन्तापः सन्तापश्च सम्भविष्यति।

---

९ नवमोऽध्यायः।

१ पञ्चमतूरीध्वनिः, तेन तारकायाः पतनं, रसातलकूपस्य मोचनं घोरतरपतङ्गानामुत्थानं १३ षष्ठतूर्य्या ध्वनिः, तेन चतुर्दूतानां मुक्तिश्च।

१ ततः परं सप्तमदूतेन तूर्य्यां वादितायां गगनात् पृथिव्यां
निपतित एकस्तारको मया दृष्टः, तस्मै रसातलकूपस्य कुञ्जि-
२ कादायि। तेन रसातलकूपे मुक्ते महाग्निकुण्डस्य धूम इव धूमस्त-
स्मात् कूपाद् उद्गतः। तस्मात् कूपधूमात् सूर्य्याकाशौ तिमिरावृतौ।
३ तस्माद् धूमात् पतङ्गेषु पृथिव्यां निर्गतेषु नरलोकस्थवृश्चिकवत्
४ बलं तेभ्योऽदायि। अपरं पृथिव्यास्तृणानि हरिद्वर्णशाकादयो वृक्षाश्च
तै र्न हिंसितव्याः किन्तु येषां भालेष्वीश्वरस्य मुद्राया अङ्को नास्ति
५ केवलं ते मानवास्तै र्हिंसितव्या इदं त आदिष्टाः। परन्तु तेषां
बधाय नहि केवलं पञ्च मासान् यावत् यातनादानाय तेभ्यः साम-
र्थ्यमदायि। वृश्चिकेन दष्टस्य मानवस्य यादृशी यातना जायते
६ तैरपि तादृशी यातना प्रदीयते। तस्मिन् समये मानवा मृत्युं
मृगयिष्यन्ते किन्तु प्राप्तुं न शक्ष्यन्ति, ते प्राणान् त्यक्तुम् अभि-
७ लषिष्यन्ति किन्तु मृत्युस्तेभ्यो दूरं पलायिष्यते। तेषां पतङ्गानाम्
आकारो युद्धार्थं सुसज्जितानाम् अश्वानाम् आकारस्य तुल्यः,
तेषां शिरःसु सुवर्णकिरीटानीव किरीटानि विद्यन्ते, मुखमण्डलानि
८ च मानुषिकमुखतुल्यानि, केशाश्च योषितां केशानां सदृशाः, दन्ताश्च
९ सिंहदन्ततुल्याः, लौहकवचवत् तेषां कवचानि सन्ति, तेषां पक्षाणां

शब्दो रणाय धावतामश्वरथानां समूहस्य शब्दतुल्यः। वृश्चिकानामिव १०
तेषां लाङ्गूलानि सन्ति, तेषु लाङ्गूलेषु कण्टकानि विद्यन्ते, अपरं
पञ्च मासान् यावत् मानवानां हिंसनाय ते सामर्थ्यप्राप्ताः। तेषां ११
राजा च रसातलस्य दूतस्तस्य नाम इब्रीयभाषया अबद्दोन् यूना-
नीयभाषया च अपल्लुयोन् अर्थतो विनाशक इति। प्रथमः सन्तापो १२
गतवान् पश्य इतः परमपि द्वाभ्यां सन्तापाभ्याम् उपस्थातव्यं।

ततः परं षष्ठदूतेन तूर्य्यां वादितायाम् ईश्वरस्यान्तिके स्थितायाः १३
सुवर्णवेद्याश्चतुश्चूडातः कस्यचिद् रवो मयाश्रावि। स तूरीधारिणं १४
षष्ठदूतम् अवदत्, फराताख्ये महानदे ये चत्वारो दूता बद्धाः सन्ति
तान् मोचय। ततस्तद्दण्डस्य तद्दिनस्य तन्मासस्य तद्वत्सरस्य च कृते १५
निरूपितास्ते चत्वारो दूता मानवानां तृतीयांशस्य बधार्थं मोचिताः।
अपरम् अश्वारोहिसैन्यानां संख्या मयाश्रावि, ते विंशतिकोटय १६
आसन्। मया ये ऽश्वा अश्वारोहिणश्च दृष्टास्त एतादृशाः तेषां १७
वह्निस्वरूपाणि नीलप्रस्तरस्वरूपाणि गन्धकस्वरूपाणि च वर्म्माण्या-
सन्, वाजिनाञ्च सिंहमूर्द्धसदृशा मूर्द्धानः, तेषां मुखेभ्यो वह्निधूम-
गन्धका निर्गच्छन्ति। एतैस्त्रिभि र्दण्डैरर्थतस्तेषां मुखेभ्यो निर्गच्छद्भि १८
र्वह्निधूमगन्धकै र्मानुषाणां तृतीयांशो ऽघानि। तेषां वाजिनां १९
बलं मुखेषु लाङ्गूलेषु च स्थितं, यतस्तेषां लाङ्गूलानि सर्पाकाराणि
मस्तकविशिष्टानि च तैरेव ते हिंसन्ति। अपरम् अवशिष्टा ये मानवा २०
ते र्दण्डै र्न हतास्ते यथा दृष्टिश्रवणगमनशक्तिहीनान् स्वर्णरौप्य-
पित्तलप्रस्तरकाष्ठमयान् विग्रहान् भूतांश्च न पूजयिष्यन्ति तथा
स्वहस्तानां क्रियाभ्यः स्वमनांसि न परावर्त्तितवन्तः स्वबधकुहक- २१
व्यभिचारचौर्य्येभ्यो ऽपि मनांसि न परावर्त्तितवन्तः।

१० दशमोऽध्यायः ।

पुस्तकहस्तशक्तिमद्दिव्यदूतस्य दर्शनं, ईश्वरस्य नाम्ना तस्य शपथः, भोजनार्थं योहने पुस्तकदानञ्च ।

१ अनन्तरं स्वर्गादवरोहन् अपर एको महाबलो दूतो मया
दृष्टः, स परिहितमेघस्तस्य शिरश्च मेघधनुषा भूषितं मुखमण्डलञ्च
२ सूर्य्यतुल्यं चरणौ च वह्निस्तम्भसमौ। स स्वकरेण विस्तीर्णमेकं क्षुद्र-
ग्रन्थं धारयति, दक्षिणचरणेन समुद्रे वामचरणेन च स्थले तिष्ठति।
३ स सिंहगर्जनवद् उच्चैःस्वरेण न्यनदत् निनादे कृते सप्त स्तनितानि
४ स्वकीयान् स्वनान् प्राकाशयन्। तैः सप्तस्तनितै र्वाक्ये कथिते
ऽहं तत् लेखितुम् उद्यत आसं किन्तु स्वर्गाद् वागियं मया श्रुता
५ सप्तस्तनितै र्यद्यद् उक्तं तत् मुद्रयाङ्कय मा लिख। अपरं समुद्र-
६ मेदिन्योस्तिष्ठन् यो दूतो मया दृष्टः स गगनं प्रति स्वदक्षिणक-
रमुत्थाप्य स्वर्गस्य तन्मध्यस्थानाञ्च मेदिन्यास्तन्मध्यस्थानाञ्च समुद्रस्य
तन्मध्यस्थानाञ्च स्रष्टुरनन्तजीविनो नाम्ना शपथमिदम् अकरोत्,
७ पुन र्विलम्बो न भविष्यति, किन्तु तूरीं वादिष्यतः सप्तमदूतस्य
तूरीवादनसमय ईश्वरस्य गुप्ता मन्त्रणा तस्य दासान् भविष्यद्वादिनः
प्रति तेन सुसंवादे यथा प्रकाशिता तथैव सिद्धा भविष्यति।
८ अपरं स्वर्गाद् यस्य रवो मयाश्रावि स पुन र्मां सम्भाष्यावदत् त्वं
गत्वा समुद्रमेदिन्योस्तिष्ठतो दूतस्य करात् तं विस्तीर्णं क्षुद्रग्रन्थं
९ गृहाण, तेन मया दूतसमीपं गत्वा कथितं ग्रन्थो ऽसौ दीयतां।
स माम् अवदत् तं गृहीत्वा गिल, तवोदरे स तिक्तरसो भवि-
१० ष्यति किन्तु मुखे मधुवत् स्वादु र्भविष्यति। तेन मया दूतस्य
कराद् ग्रन्थो गृहीतो गिलितश्च। स तु मम मुखे मधुवत्
११ स्वादुरासीत् किन्त्वदनात् परं ममोदरस्तिक्ततां गतः। ततः स

माम् अवदत् बहून् जातिवंशभाषावादिराजान् अधि त्वया पुन र्भाववाक्यं वक्तव्यं।

११ एकादशोऽध्यायः।

१ मन्दिरमापनं, द्वयोः साक्षिणोः कथनं हननं सार्द्धदिनत्रयात् परम् उत्थानं स्वर्गगमनञ्च १५ सप्तमतूर्य्या ध्वनिः १९ स्वर्गीयमन्दिरमोचनञ्च।

अनन्तरं परिमाणदण्डवद् एको नलो मह्यमदायि, स च १
दूत उपतिष्ठन् माम् अवदत्, उत्थायेश्वरस्य मन्दिरं वेदीं तत्र-
त्यसेवकांश्च मिमीष्व। किन्तु मन्दिरस्य बहिःप्राङ्गणं त्यज न मिमीष्व २
यतस्तद् अन्यजातीयेभ्यो दत्तं, पवित्रं नगरञ्च द्विचत्वारिंशन्मासान्
यावत् तेषां चरणै र्मर्द्दिष्यते। पश्चात् मम द्वाभ्यां साक्षिभ्यां मया ३
सामर्थ्यं दायिष्यते तावुष्ट्रलोमजवस्त्रपरिहितौ षष्ठ्यधिकद्विशताधिक-
सहस्रदिनानि यावद् भाववाक्यानि वदिष्यतः। तावेव जगदीश्वरस्या- ४
न्तिके तिष्ठन्तौ जितवृक्षौ दीपवृक्षौ च। यदि केचित् तौ हिंसितुं ५
चेष्टन्ते तर्हि तयो र्वदनाभ्याम् अग्नि र्निर्गत्य तयोः शत्रून् भस्मी-
करिष्यति। यः कश्चित् तौ हिंसितुं चेष्टते तेनैवमेव विनष्टव्यं।
तयो र्भाववाक्यकथनदिनेषु यथा वृष्टि र्न जायते तथा गगनं ६
रोद्धुं तयोः सामर्थ्यम् अस्ति, अपरं तोयानि शोणितरूपाणि कर्त्तुं
निजाभिलाषात् मुहुर्मुहुः सर्व्वविधदण्डैः पृथिवीम् आहन्तुञ्च तयोः
सामर्थ्यमस्ति। अपरं तयोः साक्ष्ये समाप्ते सति रसातलाद् येनो- ७
त्थितव्यं स पशुस्ताभ्यां सह युद्ध्वा तौ जेष्यति हनिष्यति च।
ततस्तयोः प्रभुरपि यस्यां महापुर्य्यां क्रुशे हतो ऽर्थतो यस्याः पार- ८
मार्थिकनाम्नी सदोमं मिसरश्चेति तस्या महापुर्य्याः सन्निवेशे तयोः
कुणपे स्थास्यतः। ततो नानाजातीया नानावंशीया नानाभाषा- ९

वादिनो नानादेशीयाश्च बहवो मानवाः सार्द्धदिनत्रयं तयोः कुणपे
निरीक्षिष्यन्ते, तयोः कुणपयोः श्मशाने स्थापनं नानुज्ञास्यन्ति।
१० पृथिवीनिवासिनश्च तयो र्हेतोरानन्दिष्यन्ति सुखभोगं कुर्व्वन्तः पर-
स्परं दानानि प्रेषयिष्यन्ति च यतस्ताभ्यां भाववादिभ्यां पृथिवी-
११ निवासिनो यातनां प्राप्ताः। तस्मात् सार्द्धदिनत्रयात् परम् ईश्व-
रात् जीवनदायक आत्मनि तौ प्रविष्टे तौ चरणैरुदतिष्ठतां, तेन
१२ यावन्तस्तावपश्यन् ते ऽतीव त्रासयुक्ता अभवन्। ततः परं तौ
स्वर्गाद् उच्चैरिदं कथयन्तं रवम् अशृणुतां युवां स्थानम् एतद्
आरोहतां ततस्तयोः शत्रुषु निरीक्षमाणेषु तौ मेघेन स्वर्गम्
१३ आरूढवन्तौ। तद्दण्डे महाभूमिकम्पे जाते पुर्य्या दशमांशः पतितः
सप्तसहस्राणि मानुषाश्च तेन भूमिकम्पेन हताः, अवशिष्टाश्च भयं
१४ गत्वा स्वर्गीयेश्वरस्य प्रशंसाम् अकीर्त्तयन्। द्वितीयः सन्तापो गतः
पश्य तृतीयः सन्तापस्तूर्णम् आगच्छति।

१५ अनन्तरं सप्तमदूतेन तूर्य्यां वादितायां स्वर्ग उच्चैः स्वरैर्वागियं
कीर्त्तिता,

राजत्वं जगतो यद्यद् राज्यं तदधुनाभवत्।
अस्मत्प्रभोस्तदीयाभिषिक्तस्य तारकस्य च।
तेन चानन्तकालीयं राजत्वं प्रकरिष्यते॥

१६ अपरम् ईश्वरस्यान्तिके स्वकीयसिंहासनेषूपविष्टाश्चतुर्विंशतिप्राचीना
भुवि न्यञ्चुखा भूत्वेश्वरं प्रणम्यावदन्,

१७ हे भूत वर्त्तमानापि भविष्यंश्च परेश्वर।
हे सर्व्वशक्तिमन् स्वामिन् वयं ते कुर्म्महे स्तवं।
यत् त्वया क्रियते राज्यं गृहीत्वा ते महाबलं।
१८ विजातीयेषु कुप्यत्सु प्रादुर्भूता तव क्रुधा।

मृतानामपि कालो ऽसौ विचारो भविता यदा।
भृत्याश्च तव यावन्तो भविष्यद्वादिसाधवः।
ये च क्षुद्रा महान्तो वा नामतस्ते हि बिभ्यति।
सदा सर्व्वेभ्य एतेभ्यो वेतनं वितरिष्यते।
गन्तव्यश्च यदा नाशो वसुधाया विनाशकैः॥

अनन्तरम् ईश्वरस्य स्वर्गस्थमन्दिरस्य द्वारं मुक्तं तन्मन्दिरमध्ये च १९
नियममञ्जूषा दृश्याभवत्, तेन तडितो रवाः स्तनितानि भूमिकम्पो
गुरुतरशिलावृष्टिश्चैतानि समभवन्।

---

१२ द्वादशोऽध्यायः।

१ आश्चर्य्ययोषिदेकाया दर्शनं तस्याः प्रसवः, पुत्त्रेण सार्द्धं नागात् प्रान्तरं प्रति पलायनं ७ मीखायेलनागयो र्युद्धं नागस्य पराभवस्तद्योषितस्ताडनञ्च।

ततः परं स्वर्गे महाचित्रं दृष्टं योषिदेकासीत् सा परिहित- १
सूर्य्या चन्द्रश्च तस्याश्चरणयोरधो द्वादशताराणां किरीटञ्च शिरस्या-
सीत्। सा गर्भवती सती प्रसववेदनया व्यथितार्त्तरावम् अकरोत्। २
ततः स्वर्गे ऽपरम् एकं चित्रं दृष्टं महानाग एक उपातिष्ठत् स ३
लोहितवर्णस्तस्य सप्त शिरांसि सप्त शृङ्गाणि शिरःसु च सप्त किरीटा-
न्यासन्। स स्वलाङ्गूलेन गगनस्थनक्षत्राणां तृतीयांशम् अवमृज्य ४
पृथिव्यां न्यपातयत्। स एव नागो नवजातं सन्तानं ग्रसितुम्
उद्यतस्तस्याः प्रसविष्यमाणाया योषितो ऽन्तिके ऽतिष्ठत्। सा तु ५
पुंसन्तानं प्रसूता स एव लौहमयराजदण्डेन सर्व्वजातीश्चारयिष्यति,
किञ्च तस्याः सन्तान ईश्वरस्य समीपं तदीयसिंहासनस्य च सन्नि-
धिम् उद्धृतः। सा च योषित् प्रान्तरं पलायिता यतस्तत्रेश्वरेण ६

निर्म्मित आश्रमे षष्ट्यधिकशतद्वयाधिकसहस्रदिनानि तस्याः पाल-
नेन भवितव्यं।
७ ततः परं स्वर्गे संग्राम उपास्थित् मीखायेलस्तस्य दूताश्च तेन
नागेन सहायुध्यन् तथा स नागस्तस्य दूताश्च संग्रामम् अकुर्व्वन्,
८ किन्तु प्रभवितुं नाशक्नुवन् यतः स्वर्गे तेषां स्थानं पुन र्नाविद्यत।
९ अपरं स महानागो ऽर्थतो दियावलः (अपवादकः) शैतानश्च
(विपक्षः) इति नाम्ना विख्यातो यः पुरातनः सर्पः कृत्स्नं नरलोकं
भ्रामयति स पृथिव्यां निपातितस्तेन सार्द्धं तस्य दूता अपि तत्र
१० निपातिताः। ततः परं स्वर्गे उच्चै र्भाषमाणो रवो ऽयं मयाश्रावि,

त्राणं शक्तिश्च राजत्वमधुनैवेश्वरस्य नः।
तथा तेनाभिषिक्तस्य त्रातुः पराक्रमो ऽभवत्॥
यतो निपातितो ऽस्माकं भ्रातॄणां सो ऽभियोजकः।
येनेश्वरस्य नः साक्षात् ते ऽदूष्यन्त दिवानिशं॥
११ मेषवत्सस्य रक्तेन स्वसाक्ष्यवचनेन च।
ते तु निर्जितवन्तस्तं न च स्नेहम् अकुर्व्वत।
प्राणेष्वपि स्वकीयेषु मरणस्यैव सङ्कटे।
१२ तस्माद् आनन्दतु स्वर्गो हृष्यन्तां तन्निवासिनः।
हा भूमिसागरौ तापो युवामेवाक्रमिष्यति।
युवयोरवतीर्णो यत् शैतानो ऽतीव कोपनः।
अल्पो मे समयो ऽस्त्येतच्चापि तेनावगम्यते॥

१३ अनन्तरं स नागः पृथिव्यां स्वं निक्षिप्तं विलोक्य तां पुत्रप्रसूतां
१४ योषितम् उपाद्रवत्। ततः सा योषित् यत् स्वकीयं प्रान्तर-
स्थाश्रमं प्रत्युत्पतितुं शक्नुयात् तदर्थं महाकुररस्य पक्षद्वयं तस्यै
दत्तं, सा तु तत्र नागतो दूरे कालैकं कालद्वयं कालार्द्धञ्च यावत्

पाल्यते। किञ्च स नागस्तां योषितं स्रोतसा स्रावयितुं स्वमुखात् १५
नदीवत् तोयानि तस्याः पश्चात् प्राक्षिपत्। किन्तु मेदिनी योषि- १६
तम् उपकुर्व्वती निजवदनं व्यादाय नागमुखाद् उद्गीर्णां नदीम्
अपिवत्। ततो नागो योषिते क्रुद्धा तद्वंशस्यावशिष्टलोकैर्यतो य १७
ईश्वरस्याज्ञाः पालयन्ति यीशोः साक्ष्यं धारयन्ति च तैः सह योद्धुं
निर्गतवान्।

---

१३ त्रयोदशोऽध्यायः।

१ सप्तशीर्षदशशृङ्गदशकिरीटविशिष्टपशोः सागरादुत्थानं तस्मै नागपराक्रमदानं ११ धरणीतो द्वितीयपशोरुत्थानं पूर्व्वीयपशोः प्रतिमानिर्म्माणं सर्व्वैर्लोकैस्तत्पूजनञ्च।

ततः परमहं सागरीयसिकतायां तिष्ठन् सागराद् उद्गच्छन्तम् १
एकं पशुं दृष्टवान् तस्य दश शृङ्गाणि सप्त शिरांसि च दश शृङ्गेषु
दश किरीटानि शिरःसु चेश्वरनिन्दासूचकानि नामानि विद्यन्ते।
मया दृष्टः स पशुश्चित्रव्याघ्रसदृशः किन्तु तस्य चरणौ भल्लूकस्येव २
वदनञ्च सिंहवदनमिव। नागेन तस्मै स्वीयपराक्रमः स्वीयं सिंहासनं
महाधिपत्यञ्चादायि। मयि निरीक्षमाणे तस्य शिरसाम् एकम् ३
अन्तकाघातेन छेदितमिवादृश्यत, किन्तु तस्यान्तकक्षतस्य प्रतीकारो
ऽक्रियत ततः कृत्स्नो नरलोकस्तं पशुमधि चमत्कारं गतः, यश्च ४
नागस्तस्मै पशवे सामर्थ्यं दत्तवान् सर्व्वे तं प्राणमन् पशुमपि प्रण-
मन्तो ऽकथयन्,

को विद्यते पशोस्तुल्यस्तेन को योद्धुमर्हति।

अनन्तरं तस्मै दर्पवाक्येश्वरनिन्दावादि वदनं द्विचत्वारिंशन्मासान् ५
यावद् अवस्थितेः सामर्थ्यञ्चादायि। ततः स ईश्वरनिन्दनार्थं मुखं ६

व्यादाय तस्य नाम तस्यावासं स्वर्गनिवासिनश्च निन्दितुम् आर-
७ भत । अपरं धार्म्मिकैः सह योधनस्य तेषां पराजयस्य चानुमतिः
सर्व्वजातीयानां सर्व्ववंशीयानां सर्व्वभाषावादिनां सर्व्वदेशीयानाञ्चा-
८ धिपत्यमपि तस्मा अदायि । ततो जगतः सृष्टिकालाच्छेदितस्य
मेषवत्सस्य जीवनपुस्तके यावतां नामानि लिखितानि न विद्यन्ते
९ ते पृथिवीनिवासिनः सर्व्वे तं पशुं प्रणंस्यन्ति । यस्य श्रोत्रं विद्यते
१० स शृणोतु । यो जनो ऽपरान् वन्दीकृत्य नयति स स्वयं वन्दीभूय
स्थानान्तरं गमिष्यति, यश्च खड्गेन हन्ति स स्वयं खड्गेन घानिष्यते ।
अत्र पवित्रलोकानां सहिष्णुतया विश्वासेन च प्रकाशितव्यं ।
११ अनन्तरं पृथिवीत उद्गच्छन् अपर एकः पशु र्मया दृष्टः स
१२ मेषशावकवत् शृङ्गद्वयविशिष्ट आसीत् नागवच्चाभाषत । स प्रथम-
पशोरन्तिके तस्य सर्व्वं पराक्रमं व्यवहरति विशेषतो यस्य प्रथम-
पशोरन्तिकक्षतं प्रतीकारं गतं तस्य पूजां पृथिवीं तन्निवासिनश्च
१३ कारयति । अपरं मानवानां साक्षाद् आकाशतो भुवि वह्निवर्षणा-
१४ दीनि महाचित्राणि करोति । तस्य पशोः साक्षाद् येषां चित्रकर्म्मणां
साधनाय सामर्थ्यं तस्मै दत्तं तैः स पृथिवीनिवासिनो भ्रामयति,
विशेषतो यः पशुः खड्गेन क्षतयुक्तो भूत्वाप्यजीवत् तस्य प्रतिमा-
१५ निर्म्माणं पृथिवीनिवासिन आदिशति । अपरं तस्य पशोः प्रतिमा
यथा भाषते यावन्तश्च मानवास्तां पशुप्रतिमां न पूजयन्ति ते
यथा हन्यन्ते तथा पशुप्रतिमायाः प्राणप्रतिष्ठार्थं सामर्थ्यं तस्मा
१६ अदायि । अपरं क्षुद्रमहद्धनिदरिद्रमुक्तदासान् सर्व्वान् दक्षिणकरे
१७ भाले वा कलङ्कं ग्राहयति । तस्माद् ये तं कलङ्कमर्थतः पशो र्नाम
तस्य नाम्नः संख्याङ्कं वा धारयन्ति तान् विना परेण केनापि क्रय-
१८ विक्रये कर्त्तुं न शक्येते । अत्र ज्ञानेन प्रकाशितव्यं । यो बुद्धिविशिष्टः

स पशोः संख्यां गणयतु यतः सा मानवस्य संख्या भवति। सा च संख्या षट्षष्ट्यधिकषट्शतानि।

---

१४ चतुर्दशोऽध्यायः।

१ सियोनपर्व्वते स्वीयलोकैः सार्द्धं ख्रीष्टस्य दर्शनं ६ सुसंवादप्रचारिणो बाबिल्-विनाशप्रकाशिनो दूतस्य दर्शनं १४ ईश्वरस्य कोपस्वरूपं शस्यच्छेदनं द्राक्षाफल-मर्द्दनञ्च।

ततः परं निरीक्षमाणेन मया मेषशावको दृष्टः स सियोन- १
पर्व्वतस्योपर्य्यतिष्ठत्, अपरं येषां भालेषु तस्य नाम तत्पितुश्च नाम
लिखितमास्ते तादृशाश्चतुश्चत्वारिंशत्सहस्राधिका लक्षलोकास्तेन
सार्द्धम् आसन्। अनन्तरं बहुतोयानां रव इव गुरुतरस्तनितस्य २
च रव इव एको रवः स्वर्गात् मयाश्रावि। मया श्रुतः स रवो वीणा-
वादकानां वीणावादनस्य सदृशः। सिंहासनस्यान्तिके प्राणिचतुष्टयस्य ३
प्राचीनवर्गस्य चान्तिके ऽपि ते नवीनमेकं गीतम् अगायन् किन्तु
धरणीतः परिक्रीतान् तान् चतुश्चत्वारिंशत्सहस्राधिकलक्षलोकान्
विना नापरेण केनापि तद् गीतं शिक्षितुं शक्यते। इमे योषितां ४
सङ्गेन न कलङ्किता यतस्ते ऽमैथुना मेषशावको यत् किमपि स्थानं
गच्छेत् तत्सर्व्वस्मिन् स्थाने तम् अनुगच्छन्ति यतस्ते मनुष्याणां
मध्यतः प्रथमफलानीवेश्वरस्य मेषशावकस्य च कृते परिक्रीताः। तेषां ५
वदनेषु चानृतं किमपि न विद्यते यतस्ते निर्द्दोषा ईश्वरसिंहासनस्या-
न्तिके तिष्ठन्ति।

अनन्तरम् आकाशमध्येनोड्डीयमानो ऽपर एको दूतो मया ६
दृष्टः सो ऽनन्तकालीयं सुसंवादं धारयति स च सुसंवादः सर्व्व-
जातीयान् सर्व्ववंशीयान् सर्व्वभाषावादिनः सर्व्वदेशीयांश्च पृथिवी- ७

निवासिनः प्रति तेन घोषितव्यः। स उच्चैःस्वरेणेदं गदति यूयमीश्वराद्
बिभीत तस्य स्तवं कुरुत च यतस्तदीयविचारस्य दण्ड उपातिष्ठत्
तस्माद् आकाशमण्डलस्य पृथिव्याः समुद्रस्य तोयप्रस्रवणानाञ्च स्रष्टा
८ युष्माभिः प्रणम्यतां। तत्पश्चाद् द्वितीय एको दूत उपस्थायावदत्
पतिता पतिता सा महाबाबिल् या सर्व्वजातीयान् स्वकीयं व्यभि-
९ चाररूपं क्रोधमदम् अपाययत्। तत्पश्चात् तृतीयो दूत उप-
स्थायोच्चैरवदत्, यः कश्चित तं पशुं तस्य प्रतिमाञ्च प्रणमति
स्वभाले स्वकरे वा कलङ्कं गृह्लाति च सो ऽपीश्वरस्य क्रोधपात्रे
१० स्थितम् अमिश्रितं मदम् अर्थत ईश्वरस्य क्रोधमदं पास्यति पवित्र-
दूतानां मेषशावकस्य च साक्षाद् वह्निगन्धकयो र्यातनां लप्स्यते
११ च। तेषां यातनाया धूमो ऽनन्तकालं यावद् उद्गमिष्यति ये च
पशुं तस्य प्रतिमाञ्च पूजयन्ति तस्य नाम्नो ऽङ्कं वा गृह्लन्ति ते
१२ दिवानिशं कञ्चन विरामं न प्राप्स्यन्ति। ये मानवा ईश्वरस्याज्ञा
यीशौ विश्वासञ्च पालयन्ति तेषां पवित्रलोकानां सहिष्णुतयात्र
१३ प्रकाशितव्यं। अपरं स्वर्गात् मया सह सम्भाषमाण एको रवो
मयाश्रावि तेनोक्तं त्वं लिख, इदानीमारभ्य ये प्रभौ म्रियन्ते ते
मृता धन्या इति; आत्मा भाषते सत्यं स्वश्रमेभ्यस्तै र्विरामः प्राप्तव्यः,
तेषां कर्म्माणि च तान् अनुगच्छन्ति।

१४ तदनन्तरं निरीक्षमाणेन मया श्वेतवर्ण एको मेघो दृष्टस्तन्मेघा-
रूढो जनो मानवपुत्राकृतिरस्ति तस्य शिरसि सुवर्णकिरीटं करे
१५ च तीक्ष्णं दात्रं तिष्ठति। ततः परम् अन्य एको दूतो मन्दिरात्
निर्गत्योच्चैःस्वरेण तं मेघारूढं सम्भाष्यावदत् त्वया दात्रं प्रसार्य्य
शस्यच्छेदनं क्रियतां शस्यच्छेदनस्य समय उपस्थितो यतो मेदिन्याः
१६ शस्यानि परिपक्वानि। ततस्तेन मेघारूढेन पृथिव्यां दात्रं प्रसार्य्य

पृथिव्याः शस्यच्छेदनं कृतं। अनन्तरम् अपर एको दूतः स्वर्गस्थ- १७
मन्दिरात् निर्गतः सो ऽपि तीक्ष्णं दात्रं धारयति। अपरम् अन्य १८
एको दूतो वेदितो निर्गतः स वह्नेरधिपतिः स उच्चैःस्वरेण तं
तीक्ष्णदात्रधारिणं सम्भाष्यावदत् त्वया स्वं तीक्ष्णं दात्रं प्रसार्य्य
मेदिन्या द्राक्षागुच्छच्छेदनं क्रियतां यतस्तत्फलानि परिणतानि।
ततः स दूतः पृथिव्यां स्वदात्रं प्रसार्य्य पृथिव्या द्राक्षाफलच्छेदनम् १९
अकरोत् तत्फलानि चेश्वरस्य क्रोधस्वरूपस्य महाकुण्डस्य मध्यं
निरक्षिपत्। तत्कुण्डस्थफलानि च वहि र्मर्द्दितानि ततः कुण्ड- २०
मध्यात् निर्गतं रक्तं क्रोशशतपर्य्यन्तम् अश्वानां खलीनान् यावद्
व्याप्नोत्।

---

१५ पञ्चदशोऽध्यायः।

१ सप्तोत्पातकारिणां सप्तदूतानां दर्शनं, पशुजयिनां गीतं ५ ईश्वरकोपसप्तपात्राणां प्रकाशश्च।

ततः परम् अहं स्वर्गे ऽपरम् एकम् अद्भुतं महाचिह्नं दृष्टवान् १
अर्थतो ये दण्डैरीश्वरस्य कोपः समाप्तिं गमिष्यति तान् दण्डान्
धारयन्तः सप्त दूता मया दृष्टाः। वह्निमिश्रितस्य काचमयस्य जला- २
शयस्याकृतिरपि दृष्टा ये च पशोस्तत्प्रतिमायास्तन्नाम्नो ऽङ्कस्य च
प्रभूतवन्तस्ते तस्य काचमयजलाशयस्य तीरे तिष्ठन्त ईश्वरीयवीणा
धारयन्ति, ईश्वरदासस्य मोशे र्गीतं मेषशावकस्य च गीतं गायन्तो ३
वदन्ति, यथा,

सर्व्वशक्तिविशिष्टस्त्वं हे प्रभो परमेश्वर।
त्वदीयसर्व्वकर्म्माणि महान्ति चाद्भुतानि च।
सर्व्वपुण्यवतां राजन् मार्गा न्याय्या ऋताश्च ते।

४ हे प्रभो नामधेयात्ते को न भीतिं गमिष्यति।
को वा त्वदीयनाम्नश्च प्रशंसां न करिष्यति।
केवलस्त्वं पवित्रो ऽसि सर्व्वजातीयमानवाः।
त्वामेवाभिप्रणंस्यन्ति समागत्य त्वदन्तिकं।
यस्मात्तव विचाराज्ञाः प्रादुर्भावं गताः किल॥

५ तदनन्तरं मयि निरीक्षमाणे सति स्वर्गे साक्ष्यावासस्य मन्दि-
६ रस्य द्वारं मुक्तं। ये च सप्त दूताः सप्त दण्डान् धारयन्ति ते
तस्मात् मन्दिरात् निरगच्छन्। तेषां परिच्छदा निर्म्मलशुभ्रवर्ण-
७ वस्त्रनिर्म्मिता वक्षांसि च सुवर्णशृङ्खलै र्वेष्टितान्यासन्। अपरं चतुर्णां
८ प्राणिनाम् एकस्तेभ्यः सप्तदूतेभ्यः सप्तसुवर्णकंसान् अददात्। अन-
न्तरम् ईश्वरस्य तेजःप्रभावकारणात् मन्दिरं धूमेन परिपूर्णं तस्मात्
तैः सप्तदूतः सप्तदण्डानां समाप्तिं यावत् मन्दिरं केनापि प्रवेष्टुं
नाशक्यत।

---

१६ षोडशोऽध्यायः।

१ पात्रावतारणं २ प्रथमपात्रावतारणं ३ द्वितीयपात्रावतारणं ४ तृतीयपात्राव-तारणं ८ चतुर्थपात्रावतारणं १० पञ्चमपात्रावतारणं १२ षष्ठपात्रावतारणं १७ सप्तमपात्रावतारणञ्च।

१ ततः परं मन्दिरात् तान् सप्तदूतान् सम्भाषमाण एष महा-
रवो मयाश्रावि, यूयं गत्वा तेभ्यः सप्तकंसेभ्य ईश्वरस्य क्रोधं
पृथिव्यां स्रावयत।

२ ततः प्रथमो दूतो गत्वा स्वकंसे यद्यद् अविद्यत तत् पृथिव्याम्
अस्रावयत् तस्मात् पशोः कलङ्कधारिणां तत्प्रतिमापूजकानां
मानवानां शरीरेषु व्यथाजनका दुष्टव्रणा अभवन्।

ततः परं द्वितीयो दूतः स्वकंसे यद्यद् अविद्यत तत् समुद्रे ३
ऽस्त्रावयत् तेन स कुणपस्थशोणितरूप्यभवत् समुद्रे स्थिताश्च सर्व्वे
प्राणिनो मृत्युं गताः।

अपरं तृतीयो दूतः स्वकंसे यद्यद् अविद्यत तत् सर्व्वं नदीषु ४
जलप्रस्रवणेषु चास्त्रावयत् ततस्तानि रक्तमयान्यभवन्। अपरं
तोयानाम् अधिपस्य दूतस्य वागियं मया श्रुता।

वर्त्तमानश्च भूतश्च भविष्यंश्च परेश्वरः। ५
त्वमेव न्याय्यकारी यद् एतादृक् त्वं व्यचारयः।
भविष्यद्वादिसाधूनां रक्तं तैरेव पातितं। ६
शोणितं त्वन्तु तेभ्यो ऽदास्तत्पानं तेषु युज्यते॥

अनन्तरं वेदीतो भाषमाणस्य कस्यचिद् अयं रवो मया श्रुतः, ७
हे परेश्वर सत्यं तत् हे सर्व्वशक्तिमन् प्रभो।
सत्या न्याय्याश्च सर्व्वा हि विचाराज्ञास्त्वदीयकाः॥

अनन्तरं चतुर्थो दूतः स्वकंसे यद्यद् अविद्यत तत् सर्व्वं सूर्य्ये ८
ऽस्त्रावयत् तस्मै च वह्निना मानवान् दग्धुं सामर्थ्यम् अदायि। तेन ९
मनुष्या महातापेन तापितास्तेषां दण्डानाम् आधिपत्यविशिष्ट-
स्येश्वरस्य नामानिन्दन् तत्प्रशंसार्थञ्च मनःपरिवर्त्तनं नाकुर्व्वन्।

ततः परं पञ्चमो दूतः स्वकंसे यद्यद् अविद्यत तत् सर्व्वं पशोः १०
सिंहासने ऽस्त्रावयत् तेन तस्य राष्ट्रं तिमिराच्छन्नम् अभवत् लोकाश्च
वेदनाकारणात् स्वरसना अदंदश्यत। स्वकीयव्यथाव्रणकारणाच्च ११
स्वर्गस्थम् ईश्वरम् अनिन्दन् स्वक्रियाभ्यश्च मनांसि न परावर्त्तयन्।

ततः परं षष्ठो दूतः स्वकंसे यद्यद् अविद्यत तत् सर्व्वं फराताख्ये १२
महानदे ऽस्त्रावयत् तेन सूर्य्योदयदिश आगमिष्यतां राज्ञां मार्ग-
सुगमार्थं तस्य तोयानि पर्य्यशुष्यन्। अनन्तरं नागस्य वदनात् १३

पश्चो वदनात् मिथ्याभाववादिनश्च वदनात् निर्गच्छन्तस्त्रयो ऽशुचय
१४ आत्मानो मया दृष्टास्ते मण्डूकाकाराः। त आश्चर्य्यकर्म्मकारिणो
भूतानाम् आत्मानः सन्ति सर्व्वशक्तिमत ईश्वरस्य महादिने येन
युद्धेन भवितव्यं तत्कृते कृत्स्नजगतो राज्ञः संग्रहीतुं तेषां सन्निधिं
१५ निर्गच्छन्ति। अपरम् इब्रिभाषया हर्म्मगिद्दोनामकस्थाने ते सङ्गृ-
१६ हीताः। पश्चाहं चौरवद् आगच्छामि यो जनः प्रबुद्धस्तिष्ठति यथा
च नग्नः सन् न पर्य्यटति तस्य लज्जा च यथा दृश्या न भवति तथा
स्ववासांसि रक्षति स धन्यः।

१७ ततः परं सप्तमो दूतः स्वकंसे यद्यद् अविद्यत तत् सर्व्वम्
आकाशे ऽस्रावयत् तेन स्वर्गीयमन्दिरमध्यस्थसिंहासनात् महारवो
१८ ऽयं निर्गतः समाप्तिरभवदिति। तदनन्तरं तडितो रवाः स्तनितानि
चाभवन्, यस्मिन् काले च पृथिव्यां मनुष्याः सृष्टास्तम् आरभ्य
यादृङ्महाभूमिकम्पः कदापि नाभवत् तादृग् भूकम्पो ऽभवत्।
१९ तदानीं महानगरी त्रिखण्डा जाता भिन्नजातीयानां नगराणि च
न्यपतन् महाबाबिल् चेश्वरेण स्वकीयप्रचण्डकोपमदिरापात्रदानार्थं
२० संस्मृता। द्वीपाश्च पलायिता गिरयश्चान्तर्हिताः। गगनमण्डलाच्च
२१ मनुष्याणाम् उपर्य्येकैकद्रोणपरिमितशिलानां महावृष्टिरभवत्
तच्छिलावृष्टेः क्लेशात् मनुष्या ईश्वरम् अनिन्दन् यतस्तज्जातः क्लेशो
ऽतीव महान्।

---

१७ सप्तदशोऽध्यायः।

सप्तशीर्षदशशृङ्गविशिष्टस्य पशोरुपरि बाबिल्नामिकाया वेश्याया आरोहणं सप्तशीर्षदशशृङ्गाणां तात्पर्य्यं तेषां दण्डनं ख्रीष्टस्य जयनञ्च।

१ तदनन्तरं तेषां सप्तकंसधारिणां सप्तदूतानाम् एक आगत्य

मां सम्भाष्यावदत्, अत्रागच्छ, मेदिन्या नरपतयो यया वेश्यया २
सार्द्धं व्यभिचारकर्म्म कृतवन्तः, यस्या व्यभिचारमदेन च पृथिवी-
निवासिनो मत्ता अभवन् तस्या बहुतोयेषूपविष्टाया महावेश्याया
दण्डम् अहं त्वां दर्शयामि। ततो ऽहम् आत्मनाविष्टस्तेन दूतेन ३
प्रान्तरं नीतस्तत्र निन्दानामभिः परिपूर्णं सप्तशिरोभि र्दशशृङ्गैश्च
विशिष्टं सिन्दूरवर्णं पशुमुपविष्टा योषिदेका मया दृष्टा। सा नारी ४
कृष्णलोहितवर्णं सिन्दूरवर्णञ्च परिच्छदं धारयति स्वर्णमणिमुक्ताभिश्च
विभूषितास्ति तस्याः करे घृणार्हद्रव्यैः स्वव्यभिचारजातमलैश्च परि-
पूर्ण एकः सुवर्णमयः कंसो विद्यते। तस्या भाले निगूढवाक्यमिदं ५
पृथिवीस्थवेश्यानां घृण्यक्रियाणाञ्च माता महाबाबिलिति नाम
लिखितम् आस्ते। मम दृष्टिगोचरस्था सा नारी पवित्रलोकानां ६
रुधिरेण यीशोः साक्षिणां रुधिरेण च मत्तासीत् तस्या दर्शनात्
ममातिशयम् आश्चर्य्यज्ञानं जातं। ततः स दूतो माम् अवदत् कुत- ७
स्तवाश्चर्य्यज्ञानं जायते? अस्या योषितस्तद्वाहनस्य सप्तशिरोभि र्दश-
शृङ्गैश्च युक्तस्य पशोश्च निगूढभावम् अहं त्वां ज्ञापयामि। त्वया ८
दृष्टो ऽसौ पशुरासीत् नेदानीं वर्त्तते किन्तु रसातलात् तेनोदेतव्यं
विनाशश्च गन्तव्यः। ततो येषां नामानि जगतः सृष्टिकालम् आरभ्य
जीवनपुस्तके लिखितानि न विद्यन्ते ते पृथिवीनिवासिनो भूतम्
अवर्त्तमानमुपस्थास्यन्तञ्च तं पशुं दृष्ट्वाश्चर्य्यं मंस्यन्ते। अत्र ज्ञान- ९
युक्तया बुद्ध्या प्रकाशितव्यं। तानि सप्तशिरांसि तस्या योषित
उपवेशनस्थानस्वरूपाः सप्तगिरयः सप्त राजानश्च सन्ति। तेषां पञ्च १०
पतिता एकश्च वर्त्तमानः शेषश्चाद्याप्यनुपस्थितः स यदोपस्थास्यति
तदापि तेनाल्पकालं स्थातव्यं। यः पशुरासीत् किन्त्विदानीं न वर्त्तते ११
स एवाष्टमः, स सप्तानाम् एको ऽस्ति विनाशं गमिष्यति च। त्वया १२

दृष्टानि दशशृङ्गाण्यपि दश राजानः सन्तिः, अद्यापि तै राज्यं न
प्राप्तं किन्तु मुहूर्त्तमेकं यावत् पशुना सार्द्धं ते राजान इव प्रभुत्वं
१३ प्राप्स्यन्ति। त एकमन्त्रणा भविष्यन्ति स्वकीयशक्तिप्रभावौ पशवे
१४ दास्यन्ति च। ते मेषशावकेन सार्द्धं योत्स्यन्ति, किन्तु मेषशावक-
स्तान् जेष्यति यतः स प्रभूनां प्रभू राज्ञां राजा चास्ति तस्य
१५ सङ्गिनो ऽप्याहूता अभिरुचिता विश्वास्याश्च। अपरं स माम् अवदत्
सा वेश्या यत्रोपविशति तानि तोयानि लोका जनता जातयो
१६ नानाभाषावादिनश्च सन्ति। त्वया दृष्टानि दश शृङ्गाणि पशुश्चेमे
तां वेश्याम् ऋतीयिष्यन्ते दीनां नग्नाञ्च करिष्यन्ति तस्या मांसानि
१७ भोक्ष्यन्ते वह्निना तां दाहयिष्यन्ति च। यत ईश्वरस्य वाक्यानि
यावत् सिद्धिं न गमिष्यन्ति तावद् ईश्वरस्य मनोगतं साधयितुम्
एकां मन्त्रणां कृत्वा तस्मै पशवे स्वेषां राज्यं दातुञ्च तेषां मनांसी-
१८ श्वरेण प्रवर्त्तितानि। अपरं त्वया दृष्टा योषित् सा महानगरी
या पृथिव्या राज्ञाम् उपरि राजत्वं कुरुते।

---

१८ अष्टादशोऽध्यायः।

१ बाबिलो ऽधःपतनं तस्माद् ईश्वरस्य लोकानां निर्गमनं, तदर्थं राज्ञां बाणिज्य-
कारिणां पोतीयलोकानाञ्च विलपनं, ईश्वरस्य लोकानाम् आनन्दः २१ बाबिलः
पतनस्य दृष्टान्तश्च।

१ तदनन्तरं स्वर्गाद् अवरोहन् अपर एको दूतो मया दृष्टः स
२ महापराक्रमविशिष्टस्तस्य तेजसा च पृथिवी दीप्ता। स बलवता
स्वरेण वाचमिमाम् अघोषयत् पतिता पतिता महाबाबिल्, सा
भूतानां वसतिः सर्व्वेषाम् अशुच्यात्मनां कारा सर्व्वेषाम् अशुचीनां
३ घृण्यानाञ्च पक्षिणां पिञ्जरश्चाभवत्। यतः सर्व्वजातीयास्तस्या व्यभि-

चारजातां कोपमदिरां पीतवन्तः पृथिव्या राजानश्च तया सह व्यभि-
चारं कृतवन्तः पृथिव्या वणिजश्च तस्याः सुखभोगबाहुल्याद् धना-
ढ्यतां गतवन्तः। ततः परं स्वर्गात् मयापर एष रवः श्रुतः, हे मम ४
प्रजाः, यूयं यत् तस्याः पापानाम् अंशिनो न भवत तस्या दण्डैश्च
दण्डयुक्ता न भवत तदर्थं ततो निर्गच्छत। यतस्तस्याः पापानि ५
गगनस्पर्शान्यभवन् तस्या अधर्म्मक्रियाश्चेश्वरेण संस्मृताः। परान् प्रति ६
तया यद्वद् व्यवहृतं तद्वत् तां प्रति व्यवहरत, तस्याः कर्म्मणां द्विगुण-
फलानि तस्यै दत्त, यस्मिन् कंसे सा परान् मद्यम् अपाययत् तमेव
तस्याः पानार्थं द्विगुणमद्येन पूरयत। तया यात्मश्लाघा यश्च सुख- ७
भोगः कृतस्तयो र्द्विगुणौ यातनाशोकौ तस्यै दत्त, यतः सा
स्वकीयान्तःकरणे वदति, राज्ञीवद् उपविष्टाहं नानाथा न च
शोकवित्। तस्माद् दिवस एकस्मिन् मारीदुर्भिक्षशोचनैः सा समा- ८
प्लोष्यते नारी ध्यक्ष्यते वह्निना च सा; यद् विचाराधिपस्तस्या ९
बलवान् प्रभुरीश्वरः, व्यभिचारस्तया सार्द्धं सुखभोगश्च यैः कृतः, ते
सर्व्व एव राजानस्तद्दाहधूमदर्शनात् प्ररोदिष्यन्ति वक्षांसि चाहनिष्यन्ति
बाहुभिः। तस्यास्ते यातनाभीते दूरे स्थित्वेदमुच्यते, हा हा बाबिल् १०
महास्थान हा प्रभावान्विते पुरि, एकस्मिन् आगता दण्डे विचाराज्ञा
त्वदीयका। मेदिन्या वणिजश्च तस्याः कृते रुदन्ति शोचन्ति च ११
यतस्तेषां पण्यद्रव्याणि केनापि न क्रीयन्ते। फलतः सुवर्णरौप्यमणि- १२
मुक्ताः सूक्ष्मवस्त्राणि कृष्णलोहितवासांसि पट्टवस्त्राणि सिन्दूरवर्ण-
वासांसि चन्दनादिकाष्ठानि गजदन्तेन महार्घकाष्ठेन पित्तललोहाभ्यां
मर्म्मरप्रस्तरेण वा निर्म्मितानि सर्व्वविधपात्राणि लवङ्गेला धूपः सुगन्धि- १३
द्रव्यं गन्धरसो द्राक्षारसस्तैलं शस्यचूर्णं गोधूमो गावो मेषा अश्वा
रथा दासेया मनुष्यप्राणाश्चैतानि पण्यद्रव्याणि केनापि न क्रीयन्ते।

१४ तव मनोऽभिलाषस्य फलानां समयो गतः, त्वत्तो दूरीकृतं यद्यत्
शोभनं भूषणं तव, कदाचन तदुद्देशो न पुन र्लप्स्यते त्वया।
१५ तद्विक्रेतारो ये वणिजस्तया धनिनो जातास्ते तस्या यातनाया
भयाद् दूरे तिष्ठन्तो रोदिष्यन्ति शोचन्तश्चेदं गदिष्यन्ति हा हा
१६ महापुरि, त्वं सूक्ष्मवस्त्रैः कृष्णलोहितवस्त्रैः सिन्दूरवर्णवासोभिश्चा-
१७ च्छादिता स्वर्णमणिमुक्ताभिरलङ्कृता चासीः, किन्त्वेकस्मिन् दण्डे
सा महासम्पद् लुप्ता। अपरं पोतानां कर्णधाराः समूहलोका
१८ नाविकाः समुद्रव्यवसायिनश्च सर्व्वे दूरे तिष्ठन्तस्तस्या दाहस्य धूमं
निरीक्षमाणा उच्चैः स्वरेण वदन्ति तस्या महानगर्य्याः किं तुल्यं?
१९ अपरं स्वशिरःसु मृत्तिकां निक्षिप्य ते रुदन्तः शोचन्तश्चोच्चैः-
स्वरेणेदं वदन्ति हा हा यस्या महापुर्य्या बाहुल्यधनकारणात्
सम्पत्तिः सञ्चिता सर्व्वैः सामुद्रपोतनायकैः, एकस्मिन्नेव दण्डे सा
सम्पूर्णोच्छिन्नतां गता।

२०　　हे स्वर्गवासिनः सर्व्वे पवित्राः प्रेरिताश्च हे।
　　हे भाविवादिनो यूयं कृते तस्याः प्रहर्षत।
　　युष्माकं यत् तया सार्द्धं यो विवादः पुराभवत्।
　　दण्डं समुचितं तस्य तस्यै व्यतरदीश्वरः॥

२१　अनन्तरम् एको बलवान् दूतो वृहत्पेषणीप्रस्तरतुल्यं पाषाण-
मेकं गृहीत्वा समुद्रे निक्षिप्य कथितवान्, ईदृग्बलप्रकाशेन
बाबिल् महानगरी निपातयिष्यते ततस्तस्या उद्देशः पुन र्न लप्स्यते।

२२　　वल्लकीवादिनां शब्दः पुन र्न श्रोष्यते त्वयि।
　　गायकानाञ्च शब्दो वा वंशीतूर्य्यादिवादिनां।
　　शिल्पकर्म्मकरः को ऽपि पुन र्न द्रक्ष्यते त्वयि।
　　पेषणीप्रस्तरध्वानः पुन र्न श्रोष्यते त्वयि।

दीपस्यापि प्रभा तद्वत् पुन र्न द्रक्ष्यते त्वयि। २३
न कन्यावरयोः शब्दः पुनः संश्रोष्यते त्वयि।
यस्मान्मुख्याः पृथिव्या ये बणिजस्तेऽभवन् तव।
यस्माच्च जातयः सर्व्वा मोहितास्तव मायया।
भाविवादिपवित्राणां यावन्तश्च हता भुवि। २४
सर्व्वेषां शोणितं तेषां प्राप्तं सर्व्वं तवान्तरे॥

---

१९ ऊनविंशोऽध्यायः।

१ बाबिल्वेश्याया दण्डार्थं स्वर्गीयलोकानां गानं, ख्रीष्टस्य धर्म्मविवाहः; दूत-भजननिषेधः ११ जयिख्रीष्टस्य दर्शनं १७ मांसमत्तं खगाह्वानञ्च।

ततः परं स्वर्गस्थानां महाजनताया महाशब्दो ऽयं मया श्रुतः, १
ब्रूत परेश्वरं धन्यम् अस्मदीयो य ईश्वरः।
तस्याभवत् परित्राणं प्रभावश्च पराक्रमः।
विचाराज्ञाश्च तस्यैव सत्या न्याय्या भवन्ति च। २
या स्ववेश्याक्रियाभिश्च व्यकरोत् कृत्स्नमेदिनीं।
तां स दण्डितवान् वेश्यां तस्याश्च करतस्तथा।
शोणितस्य स्वदासानां संशोधं स गृहीतवान्॥

पुनरपि तैरिदमुक्तं यथा, ३
ब्रूत परेश्वरं धन्यं यन्नित्यं नित्यमेव च।
तस्या दाहस्य धूमो ऽसौ दिशमूर्द्ध्वमुदेष्यति॥

ततः परं चतुर्व्विंशतिप्राचीनाश्चत्वारः प्राणिनश्च प्रणिपत्य सिंहा- ४
सनोपविष्टम् ईश्वरं प्रणम्यावदन्,
तथास्तु परमेशश्च सर्व्वैरेव प्रशस्यतां॥

अनन्तरं सिंहासनमध्याद् एष रवो निर्गतो, यथा, ५

हे ईश्वरस्य दासेयास्तद्भक्ताः सकला नराः।
यूयं क्षुद्रा महान्तश्च प्रशंसत व ईश्वरं॥

६ ततः परं महाजनतायाः शब्द इव बहुतोयानाञ्च शब्द इव गुरु-
तरस्तनितानाञ्च शब्द इव शब्दो ऽयं मया श्रुतः,

ब्रूत परेश्वरं धन्यं राजत्वं प्राप्तवान् यतः।
स परमेश्वरो ऽस्माकं यः सर्व्वशक्तिमान् प्रभुः।
७ कीर्त्तयामः स्तवं तस्य हृष्टाश्चोल्लासिता वयं।
यन्मेषशावकस्यैव विवाहसमयो ऽभवत्।
वाग्दत्ता चाभवत् तस्मै या कन्या सा सुसज्जिता।
८ परिधानाय तस्यै च दत्तः शुभ्रः सुचेलकः॥

९ स सुचेलकः पवित्रलोकानां धार्म्मिकत्वानि। ततः स माम् उक्त-
वान् त्वमिदं लिख मेषशावकस्य विवाहभोज्याय ये निमन्त्रितास्ते
धन्या इति। पुनरपि माम् अवदत्, इमानीश्वरस्य सत्यानि
१० वाक्यानि। अनन्तरम् अहं तस्य चरणयोरन्तिके निपत्य तं प्रणन्तु-
मुद्यतः। ततः स माम् उक्तवान् सावधानस्तिष्ठ मैवं कुरु यीशोः
साक्ष्यविशिष्टैस्तव भ्रातृभिस्त्वया च सहदासो ऽहं। ईश्वरमेव
प्रणम यस्माद् यीशोः साक्ष्यं भाववाक्यस्य सारं।

११ अनन्तरं मया मुक्तः स्वर्गो दृष्टः, एकः श्वेतवर्णो ऽश्वो ऽपि
दृष्टस्तदारूढो जनो विश्वास्यः सत्यमयश्चेति नाम्ना ख्यातः स
१२ याथार्थ्येन विचारं युद्धञ्च करोति। तस्य नेत्रे ऽग्निशिखातुल्ये
शिरसि च बहुकिरीटानि विद्यन्ते तत्र तस्य नाम लिखितमस्ति
१३ तमेव विना नापरः को ऽपि तन्नाम जानाति। स रुधिरमग्नेन
१४ परिच्छदेनाच्छादित ईश्वरवाद इति नाम्नाभिधीयते च। अपरं
स्वर्गस्थसैन्यानि श्वेताश्वारूढानि परिहितनिर्म्मलश्वेतसूक्ष्मवस्त्राणि च

भूत्वा तमनुगच्छन्ति। तस्य वक्त्राद् एकस्तीक्ष्णः खड्गो निर्गच्छति १५
तेन खड्गेन सर्व्वजातीयास्तेनाघातितव्याः स च लौहदण्डेन तान्
चारयिष्यति सर्व्वशक्तिमत ईश्वरस्य प्रचण्डकोपरसोत्पादकद्राक्षा-
कुण्डे यद्यत् तिष्ठति तत् सर्व्वं स एव पदाभ्यां पिनष्टि। अपरं तस्य १६
परिच्छद उरसि च राज्ञां राजा प्रभूनां प्रभुश्चेति नाम लिखितमस्ति।

अनन्तरं सूर्य्ये तिष्ठन् एको दूतो मया दृष्टः, आकाशमध्य १७
उड्डीयमानान् सर्व्वान् पक्षिणः प्रति स उच्चैःस्वरेणेदं घोषयति,
अत्रागच्छत। ईश्वरस्य महाभोज्ये मिलत, राज्ञां क्रव्याणि सेना- १८
पतीनां क्रव्याणि वीराणां क्रव्याण्यश्वानां तदारूढानाञ्च क्रव्याणि
दासमुक्तानां क्षुद्रमहतां सर्व्वेषामेव क्रव्याणि च युष्माभि र्भक्षित-
व्यानि। ततः परं तेनाश्वारूढजनेन तदीयसैन्यैश्च सार्द्धं युद्धं कर्त्तुं १९
स पशुः पृथिव्या राजानस्तेषां सैन्यानि च समागच्छन्तीति मया
दृष्टं। ततः स पशु र्धृतो यश्च मिथ्याभाववादि तस्यान्तिके चित्र- २०
कर्म्माणि कुर्व्वन् तैरेव पश्वङ्कधारिणस्तत्प्रतिमापूजकांश्च भ्रमित-
वान् सो ऽपि तेन सार्द्धं धृतः। तौ च वह्निगन्धकज्वलितह्रदे
जीवन्तौ निक्षिप्तौ। अवशिष्टाश्च तस्याश्वारूढस्य वक्त्रनिर्गतखड्गेन २१
हताः, तेषां क्रव्यैश्च पक्षिणः सर्व्वे तृप्तिं गताः।

---

२० विंशोऽध्यायः।

१ वर्षसहस्रं यावत् शैतानस्य बन्धनं तत्कालीयसुखस्य वर्णना, ८ ततः परं जुज-
माजुजयोः पराजयः शैतानस्य च दण्डः ११ विचारदिनकथनञ्च।

ततः परं स्वर्गाद् अवरोहन् एको दूतो मया दृष्टस्तस्य करे १
रसातलस्य कुञ्जिका महाशृङ्खलञ्चैकं तिष्ठतः। अपरं नागो २
ऽर्थतः यो वृद्धः सर्पो ऽपवादकः शैतानश्चास्ति तमेव धृत्वा वर्ष-

३ सहस्रं यावद् बद्धवान्। अपरं रसातले तं निक्षिप्य तदुपरि
द्वारं रुद्धा मुद्राङ्कितवान् यस्मात् तद् वर्षसहस्रं यावत् सम्पूर्णं न
भवेत् तावत् परजातीयास्तेन पुन र्न भ्रमितव्याः। ततः परम्
४ अल्पकालार्थं तस्य मोचनेन भवितव्यं। अनन्तरं मया सिंहासनानि
दृष्टानि तत्र ये जना उपाविशन् तेभ्यो विचारभारो ऽदीयत;
अनन्तरं यीशोः साक्ष्यस्य कारणाद् ईश्वरवाक्यस्य कारणाच्च येषां
शिरश्छेदनं कृतं पशोस्तदीयप्रतिमाया वा पूजा यै र्न कृता भाले
करे वा कलङ्को ऽपि न धृतस्तेषाम् आत्मानो ऽपि मया दृष्टाः,
ते प्राप्तजीवनास्तद्वर्षसहस्रं यावत् ख्रीष्टेन सार्द्धं राजत्वमकुर्व्वन्।
५ किन्त्ववशिष्टा मृतजनास्तस्य वर्षसहस्रस्य समाप्तेः पूर्व्वं जीवनं न
६ प्रापन्। एषा प्रथमोत्थितिः। यः कश्चित् प्रथमाया उत्थितेरंशी
स धन्यः पवित्रश्च। तेषु द्वितीयमृत्योः को ऽप्यधिकारो नास्ति
त ईश्वरस्य ख्रीष्टस्य च याजका भविष्यन्ति वर्षसहस्रं यावत् तेन
सह राजत्वं करिष्यन्ति च।

७ वर्षसहस्रे समाप्ते शैतानः स्वकारातो मोक्ष्यते। ततः स
८ पृथिव्याश्चतुर्दिक्षु स्थितान् सर्व्वजातीयान् विशेषतो जूजाख्यान्
माजूजाख्यांश्च सामुद्रसिकतावद् बहुसंख्यकान् जनान् भ्रमयित्वा
९ युद्धार्थं संग्रहीतुं निर्गमिष्यति। ततस्ते मेदिन्याः प्रस्थेनागत्य
पवित्रलोकानां दुर्गं प्रियतमां नगरीञ्च वेष्टितवन्तः किन्त्वीश्वरेण
१० निक्षिप्तो ऽग्निराकाशात् पतित्वा तान् खादितवान्। तेषां भ्रम-
यिता च शैतानो वह्निगन्धकयो र्ह्रदे ऽर्थतः पशु र्मिथ्याभाववादी
च यत्र तिष्ठतस्तत्रैव निक्षिप्तः, तत्रानन्तकालं यावत् ते दिवानिशं
यातनां भोक्ष्यन्ते।

११ ततः शुक्लम् एकं महासिंहासनं मया दृष्टं तदुपविष्टो ऽपि

दृष्टस्तस्य वदनान्तिकाद् भूनभोमण्डले पलायेतां पुनस्ताभ्यां स्थानं
न लब्धं। अपरं क्षुद्रा महान्तश्च सर्व्वे मृता मया दृष्टाः, ते १२
सिंहासनस्यान्तिके ऽतिष्ठन् ग्रन्थाश्च व्यस्तीर्य्यन्त जीवनपुस्तकाख्यम्
अपरम् एकं पुस्तकमपि विस्तीर्णं। तत्र ग्रन्थेषु यद्यत् लिखितं
तस्मात् मृतानाम् एकैकस्य स्वक्रियानुयायी विचारः कृतः। तदानीं १३
समुद्रेण स्वान्तरस्था मृतजनाः समर्पिताः, मृत्युपरलोकाभ्यामपि
स्वान्तरस्था मृतजनाः समर्पिताः, तेषाञ्चैकैकस्य स्वक्रियानुयायी
विचारः कृतः। अपरं मृत्युपरलोकौ वह्निह्रदे निक्षिप्तौ, एष एव १४
द्वितीयो मृत्युः। यस्य कस्यचित् नाम जीवनपुस्तके लिखितं १५
नाविद्यत स एव तस्मिन् वह्निह्रदे न्यक्षिप्यत।

---

२१ एकविंशोऽध्यायः।

१ नव्यनभःपृथिव्यो र्दर्शनं २ नव्यधर्म्मपुरयिरूशालेमस्य दर्शनं ९ तत्तेजआकृति-धनसुखानां वर्णनञ्च।

अनन्तरं नवीनम् आकाशमण्डलं नवीना पृथिवी च मया १
दृष्टे यतः प्रथमम् आकाशमण्डलं प्रथमा पृथिवी च लोपं गते
समुद्रो ऽपि ततः परं न विद्यते।

अपरं स्वर्गाद् अवरोहन्ती पवित्रा नगरी, अर्थतो नवीना २
यिरूशालेमपुरी मया दृष्टा, सा वराय विभूषिता कन्येव सुस-
ज्जितासीत्। अनन्तरं स्वर्गाद् एष महारवो मया श्रुतः पश्यायं ३
मानवैः सार्द्धम् ईश्वरस्यावासः, स तैः सार्द्धं वत्स्यति ते च तस्य
प्रजा भविष्यन्ति, ईश्वरश्च स्वयं तेषाम् ईश्वरो भूत्वा तैः सार्द्धं
स्थास्यति। तेषां नेत्रेभ्यश्चाश्रूणि सर्व्वाणीश्वरेण प्रमार्क्ष्यन्ते मृत्युरपि ४
पुन र्न भविष्यति शोकविलापक्लेशा अपि पुन र्न भविष्यन्ति, यतः

५ प्रथमानि सर्व्वाणि व्यतीतानि। अपरं सिंहासनोपविष्टो जनो ऽवदत्
पश्याहं सर्व्वाणि नूतनीकरोमि। पुनरवदत् लिख यत इमानि
६ वाक्यानि सत्यानि विश्वास्यानि च सन्ति। पुन र्माम् अवदत् समाप्तं,
अहं कः क्षश्च, अहम् आदिरन्तश्च, यः पिपासति तस्मा अहं जीवन-
७ दायिप्रस्रवणस्य तोयं विनामूल्यं दास्यामि। यो जयति स सर्व्वे-
षाम् अधिकारी भविष्यति, अहञ्च तस्येश्वरो भविष्यामि स च मम
८ पुत्रो भविष्यति। किन्तु भीतानाम् अविश्वासिनां घृण्यानां नरह-
न्तॄणां वेश्यागामिनां मोहकानां देवपूजकानां सर्व्वेषाम् अनृतवादि-
नाञ्चांशो वह्निगन्धकज्वलितह्रदे भविष्यति, एष एव द्वितीयो मृत्युः।
९ अनन्तरं शेषसप्तदण्डैः परिपूर्णाः सप्त कंसा येषां सप्तदूतानां
करेष्वासन् तेषामेक आगत्य मां सम्भाष्यावदत्, आगच्छाहं तां
१० कन्याम् अर्थतो मेषशावकस्य भाविभार्य्यां त्वां दर्शयामि। ततः
स आत्माविष्टं माम् अत्युच्चं महापर्व्वतमेकं नीत्वेश्वरस्य सन्निधितः
स्वर्गाद् अवरोहन्तीं यिरूशालेमाख्यां पवित्रां नगरीं दर्शितवान्।
११ सा ईश्वरीयप्रतापविशिष्टा तस्यास्तेजो महार्घरत्नवद् अर्थतः सूर्य्य-
१२ कान्तमणितेजस्तुल्यं। तस्याः प्राचीरं बृहद् उच्चञ्च तत्र द्वादश
गोपुराणि सन्ति तद्गोपुरोपरि द्वादश स्वर्गदूता विद्यन्ते तत्र च
द्वादश नामान्यर्थत इस्रायेलीयानां द्वादशवंशानां नामानि लिखि-
१३ तानि। पूर्व्वदिशि त्रीणि गोपुराणि उत्तरदिशि त्रीणि गोपुराणि
दक्षिणदिशि त्रीणि गोपुराणि पश्चिमदिशि च त्रीणि गोपुराणि
१४ सन्ति। नगर्य्याः प्राचीरस्य द्वादश मूलानि सन्ति तत्र मेषशावकस्य
१५ द्वादशप्रेरितानां द्वादश नामानि लिखितानि। अपरं नगर्य्या-
स्तदीयगोपुराणां तत्प्राचीरस्य च मापनार्थं मया सम्भाषमाणस्य
१६ दूतस्य करे स्वर्णमय एकः परिमाणदण्ड आसीत्। नगर्य्या

आकृतिश्चतुरस्रा तस्या दैर्घ्यप्रस्थे समे। ततः परं स तेन परि-
माणदण्डेन तां नगरीं परिमितवान् तस्याः परिमाणं द्वादशसहस्र-
नल्वाः। तस्या दैर्घ्यं प्रस्थम् उच्चत्वञ्च समानानि। अपरं स तस्याः १७
प्राचीरं परिमितवान् तस्य मानवस्यार्थतो दूतस्य परिमाणानु·
सारतस्तत् चतुश्चत्वारिंशदधिकशतहस्तपरिमितं। तस्य प्राचीरस्य १८
निर्म्मितः सूर्य्यकान्तमणिभि र्नगरी च निर्म्मलकाचतुल्येन शुद्ध-
सुवर्णेन निर्म्मिता। नगर्य्याः प्राचीरस्य मूलानि च सर्व्वविधमहा- १९
र्घमणिभि र्भूषितानि। तेषां प्रथमं भित्तिमूलं सूर्य्यकान्तस्य,
द्वितीयं नीलस्य, तृतीयं ताम्रमणेः, चतुर्थं मरकतस्य, पञ्चमं
वैदूर्य्यस्य, षष्ठं शोणरत्नस्य, सप्तमं चन्द्रकान्तस्य, अष्टमं गोमेदस्य, २०
नवमं पद्मरागस्य, दशमं लशूनीयस्य, एकादशं पेरोजस्य, द्वादशं
मर्टीष्मणेश्चास्ति। द्वादशगोपुराणि द्वादशमुक्ताभि र्निर्म्मितानि, २१
एकैकं गोपुरम् एकैकया मुक्तया कृतं नगर्य्या महामार्गश्चाच्छ-
काचवत् निर्म्मलसुवर्णेन निर्म्मितं। तस्या अन्तर एकमपि मन्दिरं २२
मया न दृष्टं यतः सर्व्वशक्तिमान् प्रभुः परमेश्वरो मेषशावकश्च स्वयं
तस्य मन्दिरं। तस्यै नगर्य्यै दीप्तिदानार्थं सूर्य्याचन्द्रमसोः प्रयोजनं २३
नास्ति यत ईश्वरस्य प्रतापस्तां दीपयति मेषशावकश्च तस्या
ज्योतिरस्ति। परित्राणप्राप्तलोकनिवहाश्च तस्या आलोके गमना- २४
गमने कुर्व्वन्ति पृथिव्या राजानश्च स्वकीयं प्रतापं गौरवञ्च तन्म-
ध्यम् आनयन्ति। तस्या द्वाराणि दिवा कदापि न रोत्स्यन्ते २५
निशापि तत्र न भविष्यति। सर्व्वजातीनां गौरवप्रतापौ तन्मध्यम्
आनेष्येते। परन्त्वपवित्रं घृण्यकृद् अनृतकृद् वा किमपि तन्मध्यं न २६
प्रवेक्ष्यति मेषशावकस्य जीवनपुस्तके येषां नामानि लिखितानि केवलं २७
त एव प्रवेक्ष्यन्ति।

२२ द्वाविंशोऽध्यायः ।

१ अमृतनदीनगर्य्या दर्शनं, ईश्वरस्य लोकानां सुखं ६ दूतख्रीष्टयोः कथनं ८ दूतस्य स्वपूजानिषेधः ११ ख्रीष्टस्य कथनं १८ एतत्पुस्तकस्य न्यूनाधिककरणनिषेधः शुभप्रार्थना च ।

१ अनन्तरं स स्फटिकवत् निर्म्मलम् अमृततोयस्य स्रोतो माम्
अदर्शयत् तद् ईश्वरस्य मेषशावकस्य च सिंहासनात् निर्गच्छति ।
२ नगर्य्या मार्गमध्ये तस्या नद्याः पार्श्वयोरमृतवृक्षा विद्यन्ते तेषां
द्वादशफलानि भवन्ति, एकैको वृक्षः प्रतिमासं स्वफलं फलति
३ तद्वृक्षपत्राणि चान्यजातीयानाम् आरोग्यजनकानि । अपरं किमपि
शापग्रस्तं पुन र्न भविष्यति तस्या मध्य ईश्वरस्य मेषशावकस्य च
४ सिंहासनं स्थास्यति तस्य दासाश्च तं सेविष्यन्ते । तस्य वदनदर्शनं
प्राप्स्यन्ति तेषां भालेषु च तस्य नाम लिखितं भविष्यति । तदानीं
५ रात्रिः पुन र्न भविष्यति तेषां दीपस्य तेजसा सूर्य्यस्य वा तेजसा
प्रयोजनं न भविष्यति यतः प्रभुः परमेश्वरस्तान् दीपयिष्यति ते
चानन्तकालं यावद् राजत्वं करिष्यन्ते ।

६ अनन्तरं स माम् अवदत्, वाक्यानीमानि विश्वास्यानि सत्यानि
च, अचिराद् यै र्भवितव्यं तानि स्वदासान् ज्ञापयितुं पवित्रभाव-
७ वादिनां प्रभुः परमेश्वरः स्वदूतं प्रेषितवान् । पश्याहं तूर्णम् आग-
च्छामि, एतद्ग्रन्थस्य भाववाक्यानि यः पालयति स एव धन्यः ।

८ योहनहम् एतानि श्रुतवान् दृष्टवांश्चास्मि श्रुत्वा दृष्ट्वा च
९ तद्दर्शकदूतस्य प्रणामार्थं तच्चरणयोरन्तिके ऽपतं । ततः स माम्
अवदत् सावधानो भव मैवं कुरु, त्वया तव भ्रातृभि र्भवि-
ष्यद्वादिभिरेतद्ग्रन्थस्थवाक्यपालनकारिभिश्च सहदासो ऽहं । त्वम्
१० ईश्वरं प्रणम । स पुन र्माम् अवदत्, एतद्ग्रन्थस्थभविष्यद्वाक्यानि

त्वया न मुद्राङ्कयितव्यानि यतः समयो निकटवर्त्ती। अधर्म्माचार ११
इतः परमप्यधर्म्मम् आचरतु, अमेध्याचार इतः परमप्यमेध्यम्
आचरतु धर्म्माचार इतः परमपि धर्म्मम् आचरतु पवित्राचारश्चेतः
परमपि पवित्रम् आचरतु।

पश्याहं तूर्णम् आगच्छामि, एकैकस्मै स्वक्रियानुयायिफल- १२
दानार्थं मद्दातव्यफलं मम समवर्त्ति। अहं कः क्षश्च प्रथमः शेष- १३
श्चादिरन्तश्च। अमृतवृक्षस्याधिकारप्राप्त्यर्थं द्वारै र्नगरप्रवेशार्थञ्च १४
ये तस्याज्ञाः पालयन्ति त एव धन्याः। कुक्कुरै र्मायाविभिः पुङ्गा- १५
मिभि र्नरहन्तृभि र्देवार्च्चकैः सर्व्वैरनृते प्रीयमाणैरनृताचारिभिश्च
वहिः स्थातव्यं। मण्डलीषु युष्मभ्यमेतेषां साक्ष्यदानार्थं यीशुरहं १६
स्वदूतं प्रेषितवान्, अहमेव दायूदस्य मूलं वंशश्च, अहं तेजोमय-
प्रभातीयतारास्वरूपः। आत्मा कन्या च कथयतः, त्वयागम्यतां। १७
श्रोतापि वदतु, आगम्यतामिति। यश्च तृषार्त्तः स आगच्छतु
यश्चेच्छति स विना मूल्यं जीवनदायि जलं गृह्लातु।

यः कश्चिद् एतद्ग्रन्थस्थभाववाक्यानि शृणोति तस्मा अहं साक्ष्य- १८
मिदं ददामि, कश्चिद् यद्यपरं किमप्येतेषु योजयति तर्हीश्वरो-
ग्रन्थेऽस्मिन् लिखितान् दण्डान् तस्मिन्नेव योजयिष्यति। यदि १९
च कश्चिद् एतद्ग्रन्थस्थभविष्यद्वाक्येभ्यः किमप्यपहरति तर्हीश्वरो ग्रन्थे
ऽस्मिन् लिखितात् जीवनवृक्षात् पवित्रनगराच्च तस्यांशमपहरि-
ष्यति। एतत् साक्ष्यं यो ददाति स एव वक्ति सत्यम् अहं तूर्णम् २०
आगच्छामि। तथास्तु। प्रभो यीशो, आगम्यतां भवता।

अस्माकं प्रभो र्यीशुख्रीष्टस्यानुग्रहः सर्व्वेषु युष्मासु वर्त्ततां। २१
आमेन्।

धर्म्मपुस्तकस्य शेषांशः समाप्तः।